Śrīdakṣiṇāmūrtisanskritgranthamālā – 71 Ratna

## Śrī Śaṅkarabhagavatpāda's
# Śrīmad Bhagavadgītā–Bhāṣyam

With Commentaries of
Śrīmad Anubhūtisvarūpācārya,
Śrīmad Ānandagiri and Śri
Bellankonda-Rāmarāya-kavi

Volume I
Chapters 1-9

Critically edited with notes etc. by
Mīmāṁsā-Vedāntācārya
**Dr. Mani Dravid**

Under the directions of
Śrī Svāmī Maheśānanda Giri Mahārāja
Mahāmaṇḍaleśvara
Śrī Dakṣiṇāmūrti Matha

Śrī Dakṣiṇāmūrti Matha Prakāśana,
Varanasi

श्रीदक्षिणामूर्तिसंस्कृतग्रन्थमाला—७१ रत्नम्

श्रीशङ्करभगवत्पादाचार्यविरचितम्

# श्रीमद्भगवद्गीताभाष्यम्

## प्रथम खण्ड

टीकाः

श्रीमदनुभूतिस्वरूपाचार्यविरचिता,

श्रीमदानन्दगिरिस्वामिविरचिता,

श्रीबेल्लङ्कोण्ड-रामरायकवि-विरचिता च

प्रथम खण्ड

अध्याय १-९

श्रीदक्षिणामूर्तिपीठाधीश्वर-महामण्डलेश्वर-

श्रीमन्महेशानन्दगिरिमहाराजानां

निदेशेन

मीमांसा-वेदान्ताचार्य-श्रीमणिद्राविडेन

संशोध्य पाठभेदटिप्पणादिभिः

सम्पादितम्

श्रीदक्षिणामूर्तिमठप्रकाशनम्

वाराणसी

प्रकाशक
श्रीदक्षिणामूर्ति मठ प्रकाशन
डी ४९/९, मिश्रपोखरा
वाराणसी
२२१०१०

प्रथम संस्करण
© सर्वाधिकार प्रकाशकाधीन

भगवत्पादाब्द : १२२७
विक्रमाब्द : २०७२
ख्रीष्टाब्द : २०१५

मूल्य : एक सौ रुपये मात्र (दोनों खण्डों के लिए)

मुद्रक
महिम पत्रन (प्रा. लि.) आगरा

# श्रीदक्षिणामूर्तिर्विजयतेतमाम्

श्रीमत्परमहंसपरिव्राजकाचार्य–पदवाक्यप्रमाणपारावारपारीण–शमदमोपरतितितिक्षासमाधानश्रद्धाचरणनिष्ठ–
ब्रह्मविद्वरिष्ठ–यतिचक्रवर्तित्वाद्यनवच्छिन्नगुरुपरम्पराप्राप्तब्रह्मात्मैक्यज्ञानवैभवानुभवप्रद्योतितान्तः–
करण–वेदान्तमार्गप्रवर्त्तक–श्रीकाशीक्षेत्रस्थितकेवलाद्वैतव्याख्यासिंहासन–श्रीदक्षिणामूर्तिपीठाधीश्वर–
शङ्करधर्मस्थापनाचार्य–श्रीशङ्करभगवत्पादारविन्दोपासक–तोटकाचार्यानन्दगिरिपरम्पराप्राप्त–
महामण्डलेश्वरस्थानवैभव–सर्वतन्त्रस्वतन्त्र–अनन्तश्रीविभूषित–**महेशानन्दगिरिस्वामि**–
करकमलसञ्जात–श्रीदक्षिणामूर्तिनिरञ्जनपीठाचार्य–
**पुण्यानन्दगिरि**–महामण्डलेश्वरस्वामिभिः
क्रियन्ते नारायणस्मृतयः।

वेदान्तमञ्जूषायाः एकसप्ततितमं रत्नं प्रकाश्यत इति सन्तोषावसरः। घोरेऽस्मिन् कलौ श्रीशङ्करभगवत्पूज्यपादप्रदर्शितं मार्गं विहाय नान्यमुपायं शान्तिकरं पश्यद्भिरस्मदाराध्यपादै-राचार्यवचसां ग्रन्थाकारेण प्रकाशनमारब्धम्। पूर्वकाले शास्त्रीयेण कर्मादिनाऽऽपेक्षिकी शान्तिः सम्भाविताऽऽसीदपि, परमधुना शुद्धद्रव्यादेरनुपलभ्यता, वर्णाश्रमादिसाङ्कर्याद् अधिकारिणाम् अनुपलभ्यता च वर्ततेतराम्। तस्माद्भाष्यकारप्रदर्शितं विधुराधिकरणम् अनुसृत्य पुरुषमात्रसम्बन्धिभिर्जपोपवासदेवताराधनादिभिरेवान्तः-करणसंशुद्धिः सम्भवति। तदनुकूलस्तोत्रदेवमन्दिरादीनां सौलभ्यं कृतम् आचार्यैस्तत्र तत्र तदा तदा। एवं बहिरङ्गं संसाध्य निर्गतनिखिलकल्मषान्तःकरणैस्तु बाह्याभ्यन्तरिकालिङ्गसलिङ्गपारिव्राज्यं गृहीत्वा सभाष्यं प्रस्थानत्रयं श्रोतव्यं, संशयविप्रतिपत्तिनिवारणाय प्रकरणग्रन्थानां वादग्रन्थानां च विचारो विधेयः। चित्तैकाग्र्येण कृते श्रवणमनने ब्रह्मवेदने पर्याप्ते। प्रारब्धदोषतो जीवन्मुक्तिर्नानुभूयते चेत् तादृशदोषनिवृत्त्यै संयमाभ्यासः साधनम्। तच्चिन्तनतत्कथनादिरूपब्रह्माभ्यासोऽपीश्वराराधनधियाऽनुष्ठितः सम्प्रदायसेवात्मा जीवन्मुक्तयेऽलं स्याद् इति न सन्देहः।

ग्रन्थदौर्लभ्येन खिन्ना गुरवो भूतभावनं भगवन्तं श्रीशङ्करं प्रार्थितवन्तः। श्रीदक्षिणामूर्तिना विष्णुदासमेहताख्यः कश्चिच्छ्रेष्ठिप्रवरः प्रेरितः स्वकीयद्रव्येणाऽद्वैतग्रन्थप्रकाशनाय। एकविंशतितमविक्रमशताब्दे चतुस्त्रिंशत्तमे वर्षे शास्त्रिप्रवराः श्रीसुब्रह्मण्यशास्त्रिणो पण्डितराजादिपदालङ्कृताः ग्रन्थसम्पादनशोधनादौ संयोजिताः। अल्पीयसेनैव कालेन महता श्रमेण सत्यपि वार्धक्ये श्रीशङ्करानुरागमात्रेण कृतसङ्कल्पाः शास्त्रिणः उपदेशसहस्रिकादिद्वादशप्रकरणानि दशोपनिषद्भाष्याणि तैत्तिरीयकबृहदारण्यकसुरेश्वरवार्तिके पञ्चपादिकाविवरणम् इत्येतान् ग्रन्थतल्लजान् टीकाटिप्पणादिभिरलङ्कृतान् सम्पादितवन्तः। नैकव्याख्यानानि प्रथमवारमेवैतन्मञ्जूषा-न्तर्गततया मुद्रितानि। द्विसहस्राधिकाष्टचत्वारिंशे वैक्रमवत्सरे सुब्रह्मण्यशास्त्रिमहेच्छा दिवङ्गताः। ततस्तेषामेवान्तेवासी न्यायमीमांसादिसर्वसच्छास्त्रेषु कृतभूरिपरिश्रमः समधीतसर्ववेदान्तप्रबन्धः श्रीमणिद्राविडमहाशयः श्रीमद्गुरुपादैरेव सम्पादने नियुक्तः। श्रीमद्भगवत्पादश्रद्धालुरयं विद्वान् अल्पवयसि राष्ट्रपतिसम्मानादिभिरलङ्कृतः सततं पूर्वोत्तरमीमांसाध्ययनाध्यापनसंलग्नोऽपि पूर्णश्रमेण प्रकटार्थविवरण-भाष्यभावप्रकाशिका-न्यायनिर्णय-शारीरकन्यायसङ्ग्रहयुतं शारीरकभाष्यं सम्पाद्य श्रीमत्पूज्यपादनिदेशेन टीकात्रयोपेतगीताभाष्यसम्पादनमारब्धवान्। अत्रान्तरे द्विसहस्रोत्तरपञ्चषष्टितमे विक्रमसंवत्सरे श्रीचरणा ब्रह्मलीना विदेहकैवल्यमाप्ताः। तदाज्ञावशवर्तिना श्रीमणिना श्रीमद्भगवद्गीताभाष्यं सटीकं सम्पादितम् इति सन्तुष्टा वयम्।

विशेषोऽयमस्मिन् सम्पुटे यदनुभूतिस्वरूपाचार्याणां भाष्यव्याख्यानं प्रथमवारमेव प्रकाश्यते। संक्षिप्ततरमपि महत्त्वातिशयवदिदं साम्प्रदायिकं विवरणमिति नेह सन्देहः। भगवदानन्दगिरिटीका तु भाष्याशयावगमायाऽनिवार्यतयाऽ-ध्येतव्येति प्रथितगौरवा। श्रीरामकविव्याख्यानमप्रत्नमपि न सुलभतरम् इति बहुषु स्थलेषु विचारप्रचुरं दृष्ट्वा प्रकाशितम्। सम्पादकीयटिप्पणं छात्रोपकारीति साधुवादार्हम्। पदोद्धरणादिसूचीजातमनुसन्धानकर्मणि तत्पराणामुपयोगाय भविष्यति।

ग्रन्थस्यास्याऽध्येतार आचार्यप्रसादानुगृहीताः क्रममुक्तिभाजनाः स्युः। उमारमणं रमारमणं प्रार्थये यद् ब्रह्मात्मैक्यं स्फुरतु समेषाम्। येषां गृहे शङ्करवचोरूपग्रन्थाः सादरं स्थिता मन्ये तेषां गृहाद् भूतग्रहपिशाचगदाकालमृत्युशान्त्यभावादीनि निर्गच्छेयुरिति।

—नारायणस्मृतयः॥

नेत्राब्धिखबाहुमिते वैक्रमे वत्सरे श्रीशंकरजयन्तीतिथौ।

Śrīdakṣiṇāmūrtisanskritgranthamālā – 71 Ratna

## Śrī Śaṅkarabhagavatpāda's
# Śrīmad Bhagavadgītā–Bhāṣyam

With Commentaries of
Śrīmad Anubhūtisvarūpācārya,
Śrīmad Ānandagiri and Śri
Bellankonda-Rāmarāya-kavi

Volume II
Chapters 10-18

Critically edited with notes etc. by
Mīmāṁsā-Vedāntācārya
**Dr. Mani Dravid**

Under the directions of
Śrī Svāmī Maheśānanda Giri Mahārāja
Mahāmaṇḍaleśvara
Śrī Dakṣiṇāmūrti Matha

Śrī Dakṣiṇāmūrti Matha Prakāśana,
Varanasi

श्रीदक्षिणामूर्तिसंस्कृतग्रन्थमाला—७१ रत्नम्

श्रीशङ्करभगवत्पादाचार्यविरचितम्

# श्रीमद्भगवद्गीताभाष्यम्

## द्वितीय खण्ड

टीका:

श्रीमदनुभूतिस्वरूपाचार्यविरचिता,

श्रीमदानन्दगिरिस्वामिविरचिता,

श्रीबेल्लङ्कोण्ड-रामरायकवि-विरचिता च

द्वितीय खण्ड

अध्याय १०-१८

श्रीदक्षिणामूर्तिपीठाधीश्वर-महामण्डलेश्वर-

श्रीमन्महेशानन्दगिरिमहाराजानां

निदेशेन

मीमांसा-वेदान्ताचार्य-श्रीमणिद्राविडेन

संशोध्य पाठभेदटिप्पणादिभिः

सम्पादितम्

श्रीदक्षिणामूर्तिमठप्रकाशनम्

वाराणसी

प्रकाशक
श्रीदक्षिणामूर्ति मठ प्रकाशन
डी ४९/९, मिश्रपोखरा
वाराणसी
२२१०१०

प्रथम संस्करण
© सर्वाधिकार प्रकाशकाधीन

भगवत्पादाब्द : १२२७
विक्रमाब्द : २०७२
ख्रीष्टाब्द : २०१५

मूल्य : एक सौ रुपये मात्र (दोनों खण्डों के लिए)

मुद्रक
महिम पत्रन (प्रा. लि.) आगरा

# निदर्शिका

**प्रथमः खण्डः**

1. शुभाशीः
2. भूमिका क – ठ
3. विषयसूचिका ड - ऩ
4. ध्यानम् , माहात्म्यं च १- २
5. व्याख्यात्रयोपेतं श्रीमद्भगवद्गीताशांकरभाष्यम् १ - ४९०

*****

# निदर्शिका

द्वितीयः खण्डः


1. व्याख्यात्रयोपेतं श्रीमद्भगवद्गीताशांकरभाष्यम् ४९१ - १०१८

2. श्लोकार्धानुक्रमणिका १०१९ - १०३४

3. पदानुक्रमः १०३५ - १०६८

4. उद्धृतवाक्यसूचिका १०६९ - १०९४

5. साङ्केतिकाक्षरविवरणम् १०९५


*****

# भूमिका

**प्रपन्नपारिजाताय तोत्त्रवेत्रैकपाणये । ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥**

**अभिवन्द्य गुरूनादौ शिष्यधीपद्मिनीरवीन्। तत्प्रसादात् करिष्येऽहं गीताशास्त्रार्थचिन्तनम्॥**

वेदान्तदर्शनस्य प्रस्थानत्रयमभियुक्ताः वर्णयन्ति— श्रुतिप्रस्थानम् , स्मृतिप्रस्थानम् , सूत्रप्रस्थानमिति। श्रुतिप्रस्थानं नाम उपनिषदः। स्मृतिप्रस्थानं च श्रीमद्भगवद्गीता। सूत्रप्रस्थानं तु ब्रह्मसूत्राणि। त्रयाणामप्येतेषां प्रस्थानानां प्रमेयं प्रयोजनं चाभिन्नम्। तेषां यथावत् तात्पर्यस्फोरणाय **श्रीमच्छङ्करभगवत्पादाचार्यैः** भाष्याणि विरचितानि विराजन्ते।

तत्र श्रीमद्भगवद्गीता अर्जुनं निमित्तीकृत्य सर्वजनसमुद्धरणाय भगवतोपदिष्टा समस्तवेदार्थसारसंग्रहभूताऽपि विशिष्य वेदान्तार्थप्रतिपादनप्रधाना इति "सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः। पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥" इति वचनात् , "तदिदं गीताशास्त्रं समस्तवेदार्थसारसंग्रहभूतं दुर्विज्ञेयार्थं तदर्थाविष्करणायानेकैर्विवृतपदपदार्थवाक्यार्थन्यायमपि अत्यन्तविरुद्धानेकार्थत्वेन लौकिकैर्गृह्यमाणमुपलभ्याहं विवेकतोऽर्थनिर्धारणार्थं संक्षेपतो विवरणं करिष्यामि।" (पृ.११) इति भाष्यकारोक्तेश्चावगम्यते। अत एव वेदमूलकत्वेन प्रामाण्यात् अस्याः स्मृतिप्रस्थानत्वम्।

गीताशास्त्रस्य प्रतिपाद्यो विषयः— प्रत्यगभिन्नं ब्रह्म, तत्प्रतिपत्त्युपायतया प्रवृत्तिनिवृत्तिधर्मौ, प्रयोजनं चात्मतत्त्वज्ञानस्य निःश्रेयसं संसारबीजभूताविद्यानिवृत्तिलक्षणं सकलवेदान्तप्रसिद्धम्। तदुक्तं भाष्ये— "इमं द्विप्रकारं धर्मं निःश्रेयसप्रयोजनम् , परमार्थतत्त्वं च वासुदेवाख्यं परं ब्रह्म अभिधेयभूतं विशेषतोऽभिव्यञ्जयद् विशिष्टप्रयोजनसम्बन्धाभिधेयवद् गीताशास्त्रम्। यतः तदर्थविज्ञानेन समस्तपुरुषार्थसिद्धिः, अतः तद्विवरणे यत्नः क्रियते मया॥" (पृ. १४) इति।

गीताशास्त्रस्य च भाष्यादतिरिक्तानि औपनिषदाद्वैतसिद्धान्तानुसारीणि बहूनि व्याख्यानानि नाना विद्वद्भिः प्रणीतानि विलसन्ति— श्रीमधुसूदनसरस्वतीस्वामिविरचिता गूढार्थदीपिका, श्रीधरस्वामिविरचिता सुबोधिनी, नीलकण्ठविरचितो भावदीपः, शंकरानन्दविरचिता तात्पर्यबोधिनी, वेङ्कटनाथविरचितं ब्रह्मानन्दगिर्याख्यं व्याख्यानम् , धनपतिसूरिविरचिता भाष्योत्कर्षदीपिका इत्यादीनि ।

गीताशाङ्करभाष्यमपि अनेकैः व्याख्यानैः अलंकृतं विराजते। प्रस्तुतसंस्करणे **अनुभूतिस्वरूपाचार्यविरचितं** गीताभाष्यस्य टिप्पणम् , **आनन्दगिर्याचार्यकृता** भाष्यव्याख्या, **श्रीबेल्लंकोण्डरामरायकविविरचितो** भाष्यार्कप्रकाशः इत्येताभिः व्याख्याभिः सह श्रीमद्भगवद्गीताशाङ्करभाष्यं विलसति।

श्रीमच्छङ्करभगवत्पादाचार्येभ्यः प्राक्तनैरपि अनेकैः गीता व्याख्यातेति— 'अत्र केचिदाहुः' 'अन्ये तु वर्णयन्ति' 'अयं श्लोकोऽन्यथा व्याख्यातः कैश्चित्' इत्यादिभाष्यगततदुल्लेखादवगम्यते। भगवदाशयानुसरणाभिधानं भास्करकृतं भाष्यमपि शाङ्करभाष्यात् प्रचीनमिति केचिन्मन्वते। तत्तु भास्करेण कृतस्य शाङ्करभाष्यदूषणस्य भामत्यादावनूद्य खण्ड्यमानत्वात् , भास्करः

शाङ्करव्याख्याचोरः इति नरेन्द्रपुरीयटिप्पण्यादावुपलम्भाच्चायुक्तम्। श्रीमद्भगवद्गीतायाः यथावत्तात्पर्यस्फोरणं शाङ्करभाष्येणैव भवतीत्यत्र तु न संशीतिलेशोऽपि। श्रीमच्छङ्करभगवत्पादाचार्यैः - ज्ञानकर्मसमुच्चयान्मोक्ष इति वादः न भगवतः संमतः, किन्तु सर्वकर्मसंन्यासपूर्वकात्मज्ञानादेव मोक्ष इत्येव गीतातात्पर्यविषयः, औपनिषदाद्वैतसिद्धान्त एव च गीताशास्त्रस्य सिद्धान्त इति न्यायैः गीतातात्पर्यविचारमुखेन सम्यक् प्रतिष्ठापितम्। न केवलं गीतायाः, अपि तु श्रुतिस्मृतिपुराणेतिहासानामपि अयमेव तात्पर्यविषयः।

भाष्यकारैः आदौ "नारायणः परोऽव्यक्तादण्डमव्यक्तसम्भवम्। अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी॥" इति पौराणिकः श्लोकः पठितः पुराणानां सर्वेषां गीताशास्त्रेण समानार्थकत्वप्रकटनाय। तदुक्तमनुभूतिस्वरूपाचार्यैः— "गीताशास्त्रं व्याचिख्यासुर्भगवान् भाष्यकारः विघ्नोपशमनादिप्रयोजनसिद्ध्यर्थं 'स्मृते सकलकल्याणभाजनं यत्र जायते' इत्यादिस्मृतिविहित-नारायणानुस्मरणं मङ्गलं चिकीर्षुः पुराणान्तर्गतमेव श्लोकं पठति स्म, पुराणानामपि गीतार्थपरत्वप्रकटनाय, पुराणव्याख्यातृ-सम्प्रदायप्रकटनाय च— **नारायणः परोऽव्यक्ता[द्] इत्यादि**" इति। श्लोकोऽयं व्यासवचनत्वेन बृहदारण्यकभाष्यवार्तिके सुरेश्वराचार्यैः उद्धृतः— "कृष्णद्वैपायनो व्यासो वेदात्मा ध्वान्तहानिकृत्। प्राहेममेव बहुशः प्राणिनां हितकाम्यया॥ नारायणः परो ऽव्यक्तादण्डमव्यक्तसम्भवम्। अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी॥ तस्मै नमोऽस्तु देवाय निर्गुणाय गुणात्मने। नारायणाय विश्वाय देवानां परमात्मने॥ एतमेव समुद्दिश्य मन्त्रो नारायणस्तथा। वेदविद्भिर्महाप्राज्ञैः पुरुषैर्विनियुज्यते॥"(बृ.वा. ३-७-३९,४०,४१,४२) इति। तेन व्यासप्रणीतस्य महाभारतस्य पुराणानां चास्मिन्नर्थे गतिसामान्यं सूचितम्।

गीताशास्त्रस्य प्रतिपाद्यं प्रवृत्तिधर्मं निवृत्तिधर्मं चाधिकृत्य किञ्चिद् निरूपयामः। प्रवृत्तिधर्मः 'चोदनालक्षणोऽर्थो धर्मः' इति जैमिनिना सूत्रेण लक्षितो वेदविहितं कर्म। तच्च काम्यं नित्यं नैमित्तिकं च प्रवृत्तिधर्म एव। तच्च कर्तव्यतया यद्यपि सामान्यतो निर्दिष्टं गीताशास्त्रे, तथापि तत्स्वरूपं तु तत्र न विहितम् , किन्तु कर्मशास्त्रादेवावगन्तव्यम् । यथा 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा' इत्यत्र शास्त्रान्तरविहितमेव यज्ञादि फलान्तरे विनियुज्यते, न तु नूतनं यज्ञादि उत्पाद्यते, तथा शास्त्रान्तरविहितमेव कर्म, उपासनं वा गीताशास्त्रेऽपि परामृश्यते। परन्तु तस्यैव कर्मणः सङ्गं फलाभिसन्धिं च विनाऽनुष्ठानं कर्मयोगापरनामधेयं गीताशास्त्रे विधेयं चित्तशुद्धि-ज्ञाननिष्ठायोग्यताप्राप्तिद्वारेण ज्ञानोत्पत्तिहेतुभूतं परम्परया निःश्रेयसहेतुः प्रवृत्तिधर्मपदेन विवक्ष्यते। अत एव भाष्यम्— 'अभ्युदयार्थोऽपि यः प्रवृत्तिलक्षणो धर्मो वर्णान् आश्रमांश्चोद्दिश्य विहितः, स च देवादिस्थानप्राप्तिहेतुरपि सन् ईश्वरार्पणबुद्ध्याऽनुष्ठीयमानः सत्त्वशुद्धये भवति फलाभिसन्धिवर्जितः। शुद्धसत्त्वस्य च ज्ञाननिष्ठायोग्यताप्राप्तिद्वारेण ज्ञानोत्पत्तिहेतुत्वेन च निःश्रेयसहेतुत्वमपि प्रतिपद्यते।'(पृ.१३) इति। अत एव 'तस्माद् युध्यस्व भारत' इत्यादौ युद्धस्य क्षत्रियं प्रति स्मृत्या विहितत्वात् गीताशास्त्रेणाविधेयत्वात् यथाश्रुतमर्थं विहाय युद्धादुपरमे कारणं नास्तीत्येवं व्याख्यातं भाष्यकारैः। तथोपासनमपि उपनिषद्विहितमेव गीताशास्त्रे परामृश्यते। यथा अष्टमाध्याये प्रश्नोपनिषद्विहितमोङ्कारोपासनमेव परामृष्टम्। विभूति-विश्वरूपाद्यध्यायोक्तं तूपासनमिहैव विहितमित्यपि वक्तुं शक्यम्। परन्तु तदपि चित्तशुद्धि-चित्तैकाग्र्यद्वारा तत्त्वप्रतिपत्तिहेतुरिति तदुपायत्वेनैवात्र संगृह्यते।

एवं निवृत्तिधर्मः संन्यासोऽपि उपनिषद्विहित एव गीताशास्त्रे परामृश्यते। तत्रापि केवलः संन्यासो, ज्ञानसहितश्चेति द्वैविध्यम्। ज्ञानसहितः संन्यासः सांख्ययोगशब्दितो ज्ञाननिष्ठोपयोगीति तत्त्वप्रतिपत्तिहेतुत्वेनैवात्र संगृह्यते। इत्थं च प्रवृत्तिनिवृत्ति-धर्मौ तत्त्वप्रतिपत्त्युपायतयाऽवान्तरतात्पर्यविषयौ, औपनिषदात्मतत्त्वज्ञानमेकमेव गीताशास्त्रस्य प्रधानप्रतिपाद्यमिति भाष्यकाराणा-माशयः। अत एव भाष्यम्— 'शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रं न प्रवर्तकमित्येतस्यार्थस्य साक्षिभूते ऋचावानिनाय भगवान्' ( पृ.७१) इति।

भक्तियोगोऽपि तत्त्वप्रतिपत्त्युपायतया संगृहीतः। स च— **'मां च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते॥'** (१४.२६) इत्युच्यमानो भगवति निष्कामभक्तिकरणमेव। इयमेव च ईश्वरशरणागतिः कर्मयोगनिष्ठायाः परमरहस्यमित्युक्तं भाष्यकारैः। अष्टादशाध्यायेऽपि सर्वशास्त्रार्थोपसंहाररूपे—"स्वकर्मणा भगवतोऽभ्यर्चनभक्ति-योगस्य सिद्धिप्राप्तिः फलं ज्ञाननिष्ठायोग्यता, यन्निमित्ता ज्ञाननिष्ठा मोक्षफलावसाना, स भगवद्भक्तियोगोऽधुना स्तूयते शास्त्रार्थोपसंहारप्रकरणे शास्त्रार्थनिश्चयदार्ढ्याय" इत्यवतार्य, **'सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः। मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्॥**५६॥ इत्यारभ्य, **ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥**६१॥ **तमेव शरणं गच्छ सर्वभावेन भारत! । तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्॥**६२॥' इति पर्यन्तं भक्तियोगप्रपञ्चनोत्तरम् , भाष्यकाराः— "भूयोऽपि मयोच्यमानं सर्वगुह्यतमं अत्यन्तरहस्यम् मे परमं प्रकृष्टं वचो वाक्यं शृणु। न भयात् , नाप्यर्थकारणाद् वक्ष्यामि। किं तर्हि? इष्टः प्रियोऽसि मे इति कृत्वा तव हितं परमं ज्ञानप्राप्तिसाधनं वक्ष्यामि। तद्धि सर्वहितानां हिततमम्। किं तदित्याह—मन्मना इति। मन्मना भव, मच्चित्तो भव, मद्भक्तो भव, मद्याजी मद्यजनशीलो भव, मां नमस्कुरु नमस्कारमपि ममैव कुरु। तत्रैवं वर्तमानो वासुदेवे एव समर्पितसाध्यसाधनप्रयोजनो मामेव एष्यसि। सत्यं ते प्रतिजाने, सत्यां प्रतिज्ञां करोम्येतस्मिन् वस्तुनीत्यर्थः। यतः प्रियोऽसि मे। एवं भगवतः सत्यप्रतिज्ञत्वं बुद्ध्वा भगवद्भक्तेः अवश्यम्भावि मोक्षफलमवधार्य भगवच्छरणैक-परायणो भवेदिति वाक्यार्थः॥" इति 'मन्मनाः' इति श्लोकं व्याचक्षाणाः भक्तियोगस्यापेक्षां स्फुटयांबभूवुः। 'भक्तेः पुनर्ग्रहणाद् भक्तिमात्रेण केवलेन शास्त्रसम्प्रदाने पात्रं भवतीति गम्यते।' इति च वदन्तः भक्तियोगे स्वीयं समादरं प्रकटीचक्रुः। एतेन भक्तिरुपेक्षिता भगवत्पादैरिति केषांचिदाक्षेपो निरवकाशः।

एवं चाष्टादशाध्याये— 'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः। स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु॥४५॥ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः'॥४६॥ इत्यत्र कर्मनिष्ठायाः, 'सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः'इत्यत्र भक्तिनिष्ठायाश्च उपायभूतायाः उपसंहृतत्वात् 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज' इत्यत्र उपेयत्वेन प्रधानभूता सर्वकर्मसंन्यासपूर्वकात्मज्ञाननिष्ठोपसंहृतेति भाष्यकाराणामाशयः। वृत्तिकाराणां ज्ञानकर्मसमुच्चयवादः, औपनिषद-सिद्धान्तविरोधित्वादेव अभागवत इति भाष्यकारैः खण्डितः। एवं काणादादिमतान्यपि । एवं च यद्यपि प्राचीनं वृत्तिकारव्याख्यानं तथापि न्यायविरोधात् तत्र तत्र परिष्कारमपेक्षते स्म। स एव च भाष्यकारैः संप्रदायानुसारेण न्यायपुरस्सरं व्याचक्षाणैः कृत इति।

सर्वथा औपनिषदसिद्धान्तानुसारि श्रीमच्छङ्करभगवत्पादाचार्याणां भाष्यम्। औपनिषदसिद्धान्त एव च भगवतोऽभिमत इत्यविप्रतिपन्नं सर्वेषां विदुषाम्। अतः स एव विद्वद्भिराद्रियते।

## माध्वकृतदूषणपरीक्षणम्

द्वैत-विशिष्टाद्वैतादिवादिनस्तु पूर्वोक्तश्रुत्यनुसारिव्याख्याने द्वेषवशादेव दोषाभासानुद्भावयन्तो हठादेव कोशव्याकरणादिकमाश्रित्य तत्तपदानामन्यार्थं कल्पयन्तो दृश्यादृश्यपुराणवचनानि च स्वोक्तार्थे प्रमाणयन्तः स्वाभिप्रेतेऽर्थे गीतां योजयन्ति। तत्र विशिष्टाद्वैतिकृतव्याख्यानं भाष्यार्कप्रकाशेन पराकृतमेव। द्वैतिव्याख्यानं स्थालीपुलाकन्यायेन विमृशामः।

(२-११)श्लोके आचार्याणां भाष्यमित्थं दूषयन्ति माध्वाः। प्रज्ञावादान् इत्यस्य 'प्रज्ञावतां बुद्धिमतां वादान् वचनानि' इति व्याख्यानमसत्। न हि अर्जुनवाक्येषु कश्चिद् बुद्धिमद्वादो विद्यते। न हि बुद्धिमन्तो नारायणद्विट्तदनुबन्धिनिग्रहम् अधर्मं वदन्ति। न च धर्माधर्मविषयत्वमात्रेण बुद्धिमद्वादो भवति, बौद्धोपदेशादेरपि बुद्धिमद्वादत्वप्रसङ्गात्। स्वपक्षे तु—प्रज्ञायाः वादाः इति षष्ठीसमासः। सर्वस्यापि वादस्य प्रज्ञापूर्वकत्वात् अव्यावर्तकत्वापत्त्या स्वेति, अवधारणं च विवक्ष्यते। स्वमनीषामात्रोत्थवचनानीत्यर्थः। तानि त्वं भाषसे, तानि न भाषणीयानि इति माध्वाः।

तत्रेदमालोचनीयम्— अस्य विशेषणस्य व्यावर्त्यं शास्त्राचार्योपदेशप्राप्तं वचनम्। तथा च तद्भिन्नं वचनं न भाषणीयमिति तेषां व्याख्यानम्। एवं च सति लोके व्यवहारोऽस्तमियात्। शास्त्रे च पूर्वपक्षोपस्थापनमेव न स्यात्। शोकाकुलतया किङ्कर्तव्यविमूढेनार्जुनेन शास्त्रीयमेव वचनं वक्तव्यमिति तस्यां दशायां कथं भगवता नियन्तुं शक्यम्? किञ्च अर्जुनवचनं प्रज्ञामात्रवादो न भवत्येव। न हि अर्जुनेनोपन्यस्तः कुलक्षयकृतो दोषः शास्त्रमनाश्रित्य ज्ञातुं शक्यः। परन्तु शास्त्रतात्पर्यभ्रमजन्यत्वात् आभासत्वं वाच्यम्। अत एव सिद्धान्तिना भगवता निरसनीयम्। तच्च स्वमनीषामात्रोत्थवचनं नेति स्पष्टम्। वस्तुतस्तु भाष्यकारैः बुद्धिमद्वादान् भाषसे इति नार्जुनवचनप्रशंसाभिप्रायेणोक्तम् , येन खण्डनीयम्। अशोच्यान् अनुशोचितवानसि, प्रज्ञावतां वादांश्च भाषसे। तदेतद् मौढ्यं पाण्डित्यं च विरुद्धमात्मनि दर्शयसि उन्मत्त इवेत्यभिप्रायः इति भाष्यात्। अतो विरोधस्फोरणार्थं भाष्यकारोक्त एवार्थो ग्रहीतुं युक्तः।

(२-१२, १३) श्लोकयोः माध्वानामिदं व्याख्यानम्— भीष्मादयः कुतोऽशोच्याः? यतो नित्याः। कथं नित्यत्वम्? अनुमानेन। तत्र ईश्वरनित्यत्वं दृष्टान्ततयोक्तं जीवनित्यत्वसाधनार्थम्। 'न त्वेवाहं जातु नासम्' इत्यादिः अनादित्वं हेतुं समर्पयति। 'न चैव न भविष्यामः' इति अविनाशित्वरूपं साध्यं समर्पयति। भीष्मादयः नित्याः, अनादित्वात् , ईश्वरवत्। अस्मिंश्चानुमाने देहातिरिक्तात्मनः पक्षत्वसिद्धये उत्तरश्लोकेन स साध्यते। कौमारादिशरीरभेदेऽपि तदीक्षिता एकः प्रत्यभिज्ञायते इति देहातिरिक्तात्मनः सिद्धिः।

प्रकारान्तरेण श्लोकद्वयव्याख्यानम्—जीवनाशात् शोकः, देहनाशाद् वा? नाद्यः, तस्य नाशाभावात् इत्याह—न त्वेवेति श्लोकः। न द्वितीयः, देहनाशेऽपि देहान्तरप्राप्तेः इत्याह—देहिन इति श्लोकः।

एवं च— भीष्मादीनुद्दिश्य शोकः कुतः? किं जीवनाशात् शोकः? देहनाशाद् वा? तद्दर्शनादिनिमित्तसुखवियोगाद्वा? नाद्यः, तस्य नाशाभावात् । न द्वितीयः, देहनाशेऽपि देहान्तरप्राप्तेः हानिप्रतिविधानात्। न तृतीयः, अभिमानसहितस्यैव विषयसंबन्धस्य सुखदुःखहेतुत्वात् अभिमानाभावे सामग्र्यभावेन तदसंभवात् इति माध्वव्याख्यानसारः।

तत्रेदमालोचनीयम्— 'न त्वेवाहं जातु नासम्' 'न चैव न भविष्यामः' इत्यनयोः निर्देशयोः न कमपि विशेषमुपलभामहे येन पूर्वं हेतुसमर्पकम् , उत्तरं तु साध्यसमर्पकं निश्चीयेत। यथैव शब्दप्रमाणविधया भवन्मते हेतुः सिध्यति, तथैव साध्यमपि सिध्यत्येवेति अनुमानोपन्यासस्यानवसरः। अतोऽस्मद्भाष्यानुसारेण शब्दप्रमाणविधयैव प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वरूपनित्यत्व-बोधनं युक्तम् ।

(२-१३) श्लोके देहातिरिक्तात्मनः साधनमपि अस्वरसम्। कौमारादिपदैः तज्ज्ञानलक्षणात् , अन्यथा तदीक्षितृत्वालाभात्। न च तदीक्षितृत्वमात्रेण देहव्यतिरेकसिद्धिरात्मनः, लोकायतमतेऽपि तद्भावात्। अतः प्रत्यभिज्ञानपर्यन्तं लम्भनीयम्। न च श्लोकस्थपदैः स्वरसतः तल्लभ्यम्।

प्रकारान्तरेण श्लोकद्वयव्याख्याने— देहान्तरप्राप्तिः भवतु भीष्मादीनाम् , तथापि अर्जुनस्य शोकः कथं परिहृतो भवति? न हि जन्मान्तरं प्राप्य भीष्मादयः अर्जुनस्य पितामहादिरूपाः भवेयुः। भीष्मादिषु 'ममैते पितामहादयः' इति अभिमानेन हि अर्जुनस्य शोकः। किञ्च - कुमारादिदेहहानिनिमित्तः शोकः जीर्णादिदेहप्राप्त्या निवर्तते यथा- इति तेषां व्याख्यानं बालानामपि हास्यास्पदम्।

अभिमानसहितस्यैव विषयसंबन्धस्य सुखदुःखहेतुत्वात् अभिमानाभावे सामग्र्यभावेन तदसंभवात् इति तु अस्मन्मतेऽप्यविरुद्धम्। अभिमानस्याध्यासरूपत्वात्।

## मध्वाचार्यैः कृतं शब्दपीडनम्

इदानीं मध्वाचार्यकृतस्य शब्दपीडनस्य कानिचिदुदाहरणानि पश्यामः।

१. 'यो मामजमनादिं च' (१०-३) इति श्लोके— अनश्चासौ आदिश्चेति अनादिः, अनस्यादिः अनादिः इति वा व्याख्यातम्। 'अन' इत्यस्य चेष्टयिता इत्यर्थः आर्थिकपुनरुक्तिपरिहाराय स्वीकृतः। परन्तु आदिशब्दः एवमपि पुनरुक्त एव।

२. तथा (१०-१८) इति श्लोके— न जायते इति जनः, संसारमर्दयतीति अर्दनः, जनश्चासौ अर्दनश्च जनार्दनः इति व्याख्यानमप्येवमेवाप्रामाणिकम् ।

३. (२-२४ ) इति श्लोके— सनातन इत्यत्र नादेन शब्देन सह वर्तत इति सनादः, दशब्दस्य तनादेशः इत्यर्थकरणम्।

४. नान्यं गुणेभ्यः कर्तारम्(१४-१९) इति श्लोके गुणेभ्योऽन्यस्य कर्तृत्वाभावे 'कर्तारमीशम्' इति श्रुतिविरोधात् कर्तृपदं परिणामिकर्तृपरतया, 'नान्यम्' इत्यत्र ना (=पुरुषः) अन्यम् इति पदं छित्त्वा - यदा गुणेभ्योऽन्यं कर्तारं पश्यति, तदा द्रष्टा पुरुषः, अन्यथा पशुः- इति च व्याख्यातं माध्वैः। तदयुक्तम्। सोपाधिकत्वनिरुपाधिकत्वाभ्यां कर्तृत्वाकर्तृत्वयोरविरोधात् कर्तृपदार्थसंकोचे कारणाभावात्।

क्वचिच्च परोक्तमित्येव खण्डनीयमित्याग्रहमात्रेण प्रवृत्तिरेषां दृश्यते। यथा—(१०-४) इत्यत्र 'अन्तःकरणस्योपशमः' इति भाष्योक्तार्थे 'शमो मन्निष्ठता बुद्धेः दम इन्द्रियसंयमः'(११-१९-३६) इति भागवतविरोधोद्भावनम्।

एतच्च मया तत्र तत्र टिप्पण्यां संक्षेपतो दर्शितमिति उपरम्यते विस्तरात्।

## अनुभूतिस्वरूपाचार्यविरचितगीताभाष्यटिप्पणम्

अत्र संगृहीतेषु भाष्यव्याख्यानेषु प्राचीनम् अनुभूतिस्वरूपाचार्यविरचितं गीताभाष्यटिप्पणम्। इदं चाप्रकाशितपूर्वमिदानीमेव प्रकाशपथमारोहति। इदमत्यन्तसंक्षिप्तमपि भाष्यस्य स्फुटतरार्थावबोधे महदुपकरोति। अधीतभाष्याणां भाष्यव्याख्यानाक्षमाणा-मेतद्ग्रन्थालोचनेन व्याख्यानक्षमतासंपादनं एतट्टिप्पणकाराणां लक्ष्यम्। एतच्च ग्रन्थकृता स्वयमेवाविष्कृतम्—

**"अनुभूतिस्वरूपाख्यो यतिश्चकार टिप्पणम्। व्याख्याऽसामर्थ्यसन्तापिपुंसां चित्तानुरञ्जनम्॥"**( पृ.१०००) इति।

प्रकटार्थविवरणेऽपि एतैरित्थमेवोक्तम्—

**"ज्ञात्वाऽपि यस्य बहुकालमचिन्तनेन व्याख्यातुमक्षमतया परितापि चेतः।**

**तस्योपतापहरणाय मयेह भाष्ये प्रारभ्यते विवरणं प्रकटार्थमेतत्॥"** इति।

इष्टसिद्धिविवरणे, माण्डूक्यभाष्यटिप्पणादौ चैतेषामेतदभिप्रायकः श्लोको दृश्यते। अनुभूतिस्वरूपाचार्याः मायाऽविद्यादिविषये ऽसाधारणप्रक्रियानिरूपकाः स्वीयग्रन्थान्तरेषु परमतनिराकरणेऽपि - विशिष्य भास्करोक्तदूषणनिराकरणे - पराक्रमन्ते। विस्तरेण निरूपितमिदमस्माभिः शारीरकमीमांसाभाष्यभूमिकायाम्। गीताभाष्यटिप्पणे तु संग्रहं रोचयमानास्ते परमतनिराकरणं प्रयत्नेन वर्जयन्ति। तथा चोक्तं तैरेव— "अत एव भास्कररोदनम् — 'यत्तु निवृत्तस्य निवृत्त्युपदेशकं शास्त्रम्' इत्यादि, तद् उक्ताभिप्रायापरिज्ञानप्रसूतमिति उपेक्ष्यते। यच्च [यश्च] तस्य समुच्चयाभिप्रायः, सोऽनन्तरमेव निरूप्यमाणन्यायबलादेवाप्तो[दपास्तो] भविष्यति। पराचक्रमिरे प्रत्येकं तदीयग्रन्थानुभाषणदूषणयोः गयाबलाभार्या[?] इत्युपरम्यतेऽस्माभिः मन्दमतिव्युत्पादनाय ग्रन्थमात्रविवेचनपरैः।"(पृ. ३३) इति।

एते पूर्वपक्षसिद्धान्तपक्षयोः अनुमानप्रयोगेण आशयनिरूपणं तत्र तत्र कुर्वन्ति, तच्च आनन्दगिर्याचार्याः तथैवानुसरन्ति। यथा वृत्तिकारमतविवरणे— "ब्रह्मज्ञानं सेतिकर्तव्यमेव स्वफलसाधकम् , करणत्वाद् , दर्शादिवदित्यनुमानात् श्रौतस्मार्तकर्मोपकृतमेव ब्रह्मज्ञानं कैवल्यसाधकम्"(पृ.३३)इति, सिद्धान्त्याशयविवरणे च— "शुद्धब्रह्मज्ञानं स्वफलसिद्धौ न सेति[इति]कर्तव्यतापेक्षम् , अबोधनिवृत्तिफलत्वात् , शुक्तिज्ञानवत्। बन्धो वा केवलज्ञानहेयः, अज्ञानात्मकत्वात् , शुक्तिरूप्यवदिति"(पृ.४०) इति अनुभूतिस्वरूपाचार्याः निरूपयन्ति। आनन्दगिर्याचार्याः अपि तत्र— "विमतं सेतिकर्तव्यताकमेव स्वफलसाधकं, करणत्वाद्, दर्शपौ-[पू ]र्णमासादिवत्"(पृ.३४) इति, "विशुद्धब्रह्मात्मज्ञानं स्वफलसिद्धौ न सहकारिसापेक्षम् , अज्ञाननिवृत्तिफलत्वाद् , रज्ज्वादितत्त्व-ज्ञानवत्। अथवा बन्धः सहायानपेक्षेण ज्ञानेन निवर्त्यते , अज्ञानात्मकत्वाद् , रज्जुसर्पादिवदिति भावः"(पृ.३९) इत्येव निरूपयन्ति।

तथा "न त्वेवाहं जातु नास"मिति श्लोकार्थविवरणे— "आत्मा न जायते, प्रागभावशून्यत्वात् , नरविषाणवदिति पूर्वार्धस्यार्थः। आत्मा नित्यः, अजभावत्वात् , यो नित्यो न भवति नासावजभावः, यथा घट इत्युत्तरार्धस्यार्थः"(४५पृ.) इति अनुभूतिस्वरूपाचार्याः निरूपयन्ति। तत्र— "आत्मा न जायते, प्रागभावशून्यत्वात् , नरविषाणवदिति परिहरति— **न त्वेवेति**। किञ्चात्मा नित्यः, भावत्वे सत्यजातत्वात् , व्यतिरेके घटवदित्यनुमानान्तरमाह— **न चैवेति**।"(४५पृ.) इति आनन्दगिर्याचार्याः। अत्रानन्दगिर्याचार्यैः द्वितीयानुमाने 'अजभावत्वात्' इति पदं 'भावत्वे सत्यजातत्वात्' इति विवृतमिति स्पष्टं प्रतीयते।

'देहभेदानुवृत्त्या बहुवचनम्' इति भाष्यं व्याचक्षाणाः एते मायाप्रदेशरूपाविद्यायाः जीवोपाधित्वात् तद्भेद एव जीवभेदे प्रयोजको वक्तव्य इति स्वप्रक्रियामनुसृत्य तत्परतयैव व्याचख्युः— 'रूपं रूपं प्रतिरूपो बभूव' इति च श्रुतेः देहोपादानाविद्याभेदे प्रतिबिम्बिततया तद्भेदानुवर्तनाद् बहुवचनमित्यर्थः॥' इति । आनन्दगिर्याचार्यास्तु यथाश्रुतं भाष्यं योजयन्ति।

भाष्यकाराः यत्र कमपि विचारमवतारयन्ति, तत्रावश्यमेतेषां व्याख्यानं भवति। यत्र तु न तथा, न तत्र एतेषां व्याख्यानं भवति। अत एव चतुर्दशाद्यध्यायत्रये एतेषां व्याख्यानं नास्ति।

## आनन्दगिरिकृतव्याख्या

आनन्दगिर्याचार्यास्तु भाष्य-वार्तिकादिग्रन्थव्याख्यानप्रणयनेन सुप्रसिद्धाः। एतैः कृतं व्याख्यानं पूर्वमपि बहुशो मुद्रितम्। भाष्यस्य प्रतिपङ्क्ति तात्पर्यज्ञानार्थमिदमेव व्याख्यानमाद्रियते शिष्टैः। प्राचीनव्याख्यानमनुसृत्यैव एतैरिदं व्याख्यानं प्रणीतमिति तद्वाक्यादेवावगम्यते—**प्राचामाचार्यपादानां पदवीमनुगच्छता। गीताभाष्ये कृता टीका टीकतां पुरुषोत्तमम्॥**(पृ.१०१८) इति। अत्र प्राचीनाचार्यटीकासु अनुभूतिस्वरूपाचार्यविरचितगीताभाष्यटिप्पणमपि अन्यतममिति तद्दर्शनेनैव स्फुटम्। अवतारिकायामेव भाष्यभावस्फुटीकरणमस्य व्याख्यानस्य वैशिष्ट्यम्। पदानां शास्त्रमर्यादयाऽर्थविवरणं बहुत्र एतैः कृतं बहूपयुज्यते। एतैः गीताशास्त्रस्य काण्डत्रयरूपेण विभज्य तात्पर्यमित्थं कथितम्—**अत्र हि शास्त्रे त्रीणि काण्डानि, अष्टादशसंख्याकानामध्यायानां षट्कत्रितयमुपादाय त्रैविध्यात्। तत्र पूर्वषट्कात्मकं पूर्वकाण्डं त्वम्पदार्थं विषयीकरोति, मध्यमषट्करूपं मध्यमकाण्डं तत्पदार्थं गोचरयति, अन्तिमषट्कलक्षणमन्तिमं काण्डं पदार्थयोरैक्यं वाक्यार्थमधिकरोति। तज्ज्ञानसाधनानि च तत्र तत्र प्रसङ्गादुपन्यस्यन्ते, तज्ज्ञानस्य तदधीनत्वात्। तत्त्वज्ञानमेव केवलं कैवल्यसाधनमिति च सर्वत्राविगीतम्।**(पृ.४३) इति। प्रत्यध्यायमन्ते अध्यायतात्पर्यवर्णनमपि सुन्दरं विदुषां मनो रञ्जयति।

अत्र च भाष्यव्याख्याने क्वचित् व्याख्यान्तरविमर्शः कृत उपलभ्यते। यथा— "यत्तु कैश्चित् 'आत्मा वा अरे द्रष्टव्यः' इत्याद्यात्मयाथात्म्यदर्शनविधिवाक्यार्थमनेन श्लोकेन व्याचष्टे स्वयं हरिरित्युक्तम्, तदयुक्तम् , कृतियोग्यतैकार्थसमवेतश्रेयःसाधनताया वा पराभिमतनियोगस्य वा विध्यर्थस्यात्राप्रतीयमानस्य कल्पनाहेत्वभावात्। न च दर्शने पुरुषतन्त्रत्वरहिते विधेययागादिविलक्षणे विधिरुपपद्यते। कृत्यान्तर्भूतश्चार्हार्थत्वात् तव्यो न विधिमधिकरोतीत्यभिप्रेत्य व्याचष्टे–" (पृ.४३) इति।

"यत्तु कैश्चिदात्मयाथात्म्यं जिज्ञासितं भगवानुपदिशति– न त्वित्यादिना श्लोकचतुष्टयेनेत्यादिष्टम् ; तदसत् , विशेषवचने हेत्वभावात् , सर्वत्रैवात्मयाथात्म्यप्रतिपादनाविशेषादिति" (४५) इति।

"ननु नेदं व्याख्यानं भाष्यकाराभिप्रेतम् , सर्वद्वैतशून्यत्वविवक्षायां शास्त्रतद्भाष्यविरोधात्। केनापि पुनर्दुर्विदग्धेन स्वमनीषिकया उत्प्रेक्षितमेतदिति चेत्? मैवम् ; किमिदं द्वैतप्रपञ्चस्य शून्यत्वम्? किं तुच्छत्वं, किं वा सद्विलक्षणत्वम्? नाद्यः, अनभ्युपगमात्। द्वितीयानभ्युपगमे तु तवैव शास्त्रविरोधो, भाष्यविरोधश्च। सर्वं हि शास्त्रं तद्भाष्यं च द्वैतस्य सत्यत्वानधिकरणत्व-साधनेन अद्वैतसत्यत्वे पर्यवसितमिति त्रैविद्यवृद्धैस्तत्र तत्र प्रतिष्ठापितम्। तथा च प्रक्षेपाशङ्का सम्प्रदायपरिचयाभावादिति द्रष्टव्यम्।" (पृ.५९) इति।

"एतेन भूरादिलोकचतुष्टयं प्रविष्टानां पुनरावृत्तावपि जनआदिलोकत्रयं प्राप्तानामपुनरावृत्तिरिति विभागोक्तिरप्रामाणिकत्वा-दवहेयेत्यवधेयम्।" (पृ.४३३) इति।

क्वचित् तद्व्याख्यानमनुज्ञायते च। यथा—'अविनाशि तु तद्विद्धि' इत्यत्र पूर्वार्धेन तत्पदार्थसमर्थनम् , उत्तरार्धेन निरीश्वरवादस्य परिणामवादस्य वा निराकरणम् , आत्मनि जन्मादिप्रतिभानस्यौपचारिकत्वप्रदर्शनार्थम् 'अन्तवन्तः' इत्यादि वचनमिति केचित्। अस्तु नामायमपि पन्थाः। ( पृ. ७१) इति।

एतच्च निराक्रियमाणं व्याख्यानं कस्येति अन्वेषणीयम्।

## बेल्लङ्कोण्डरामरायकविः

बेल्लङ्कोण्डोपाह्वः रामरायकविः आन्ध्रप्रदेशान्तर्गत-गुण्टूरुमण्डले नरसरावुपेटशाखामण्डले पमिडिपाडुनामकाग्रहारे १७९७ शालिवाहनाब्दे युवनामसंवत्सरे मार्गशीर्षकृष्णपक्षामावास्यायां सोमवासरे(27-12-1875) हनुमाम्बिका-मोहनराययोः दम्पत्योः पुत्ररूपेणाजनिष्ट। स च ऋक्छाखाध्यायी भारद्वाजसगोत्रः आश्वलायनसूत्रः। काव्य-व्याकरण-तर्कशास्त्रादिकमनेन श्रीरामशास्त्रि-प्रमुखेभ्यो विद्वत्तल्लजेभ्यः अधीतम्। कुलपरम्परया विशिष्टाद्वैतानुयायी वैष्णवोऽपि सः अद्वैतमेव श्रुतिसंमतं ज्ञात्वा बह्वमन्यत। अद्वैतवेदान्तशास्त्रं तु कस्य गुरोः सकाशादधीतमिति नोल्लिखितम्। श्रीहयग्रीवदेवोपासनया तस्य मेधाशक्तिः अतिशयिताऽऽसीत्। सिद्धान्तकौमुदीव्याख्या शरद्रात्रिः, श्रीकृष्णलीलातरङ्गिणी, वेदान्तसंग्रहः, सिद्धान्तबिन्दुव्याख्या सिद्धान्तसिन्धुः, शंकराशंकर-भाष्यविमर्शः, भाष्यार्कप्रकाशः , हयवदनशतकम् इत्यादयः परश्शतं ग्रन्थाः एतद्विरचिता विराजन्ते। स्वीयाध्यापनचातुर्या बहून् लब्धप्रतिष्ठान् पण्डितान् , कवीश्वरांश्च निर्माय स्वीयेऽष्टात्रिंशे वयसि भूतलं विहाय दिवं जगाम। एतदीयवंशपरम्परायामेतत्पौत्रः अधीतवेदः आहिताग्निः वाजपेयान्तक्रत्वनुष्ठाता इदानीं वसति।

भगवद्गीतायाः रामानुजभाष्ये वेदान्तदेशिककृततात्पर्यचन्द्रिकासहिते स्थितं शाङ्करभाष्यदूषणमसहमानः रामरायकविः तदुद्धारपूर्वकं रामानुजभाष्यखण्डनार्थं भगवद्गीताशाङ्करभाष्यस्य भाष्यार्कप्रकाशाख्यं व्याख्यानं विरचितवान्। तदुक्तं तेनैव—

"विष्ण्ववतारव्यासहृदयपरिज्ञानं शिवावतारशङ्करैकविषयमेवेति कृत्वा गीताभिप्रायः शाङ्करभाष्यादेव ज्ञेयः; न तु रामानुजभाष्यादिभिः; तेषां श्रीशङ्करभाष्यनिन्दैकप्रधानोद्देशत्वात्। मूलाननुगतार्थत्वाद् वेदान्तविरुद्धत्वेनाप्रमाणत्वाच्च तद्भाष्याणाम्। तत्र च शङ्करभाष्य-प्रतिपक्षभूतभाष्यमध्ये रामानुजभाष्यमेव प्रधानमिति प्रधानमल्लनिबर्हणन्यायेन रामानुजभाष्ये वेदान्तदेशिककृततात्पर्यचन्द्रिकासहिते श्रुतियुक्त्यादिभिर्विमृष्टे सति शङ्करभाष्यं निरवद्यमप्रतिभटं स्थितं स्यादित्येतदर्थमहमधुना मन्दमतिरपि श्रीहयग्रीवदेवकृपया श्रीशाङ्करभगवद्गीताभाष्यव्याख्याने प्रयुक्तः। किं नाम दुष्करमचिन्त्यविचित्रशक्तेर्भगवतः कृपायाः? तृणमपि श्रीरामेण निहितशक्तिकं ब्रह्मास्त्रमभवत् किल काकासुरे"। (पृ.२)इति।

रामरायकविकृतं रामानुजभाष्यदूषणमसहमानाः विशिष्टाद्वैतसिद्धान्तबद्धदीक्षाः अभिनवदेशिकाः उत्तमूर् **वीरराघवाचार्याः** स्वकीयरसास्वादाख्यटिप्पणसहिततात्पर्यचन्द्रिकोपेतगीताभाष्यभूमिकायां '**दूषकोक्तिपरीक्षणम्**' इति शीर्षकाङ्कितेऽवान्तरविभागे— 'रामकविः विशिष्टाद्वैतसिद्धान्तमजानन् परोक्तमित्येव खण्डनीयमित्याग्रहमात्रेण प्रवृत्तः यत्किंचिदाह, स्थालीपुलाकन्यायेन कानिचित् स्थलान्युदाहृत्य तत्र दोषः प्रदर्श्यते'—इति प्रतिज्ञाय रामकविकृतदूषणानि कानिचित् परिजह्रुः।

अथ तेषां दूषणपरिहाररीतिं किंचिदिव विमृशामः।

'यावानर्थ उदपाने सर्वतः सम्प्लुतोदके। तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः' ॥२.४६॥ इति श्लोके शांकरभाष्यम्— 'ब्राह्मणस्य संन्यासिनः परमार्थतत्त्वं विजानतः' इति। अत्र 'संन्यासिनः' इति ब्राह्मणस्येति पदस्य विवरणम् , 'परमार्थतत्त्वं विजानतः' इति 'विजानतः' इति पदस्येति स्पष्टम्। श्लोकस्थब्राह्मणपदस्य संन्यासिनः इति कथमर्थलाभः? इत्याकाङ्क्षायामाह रामकविः— 'नायं जातिमात्रवाची ब्राह्मणशब्दोऽमुख्यः, किन्तु मुख्य एवेत्याह— संन्यासिन इति। 'जन्मना जायते शूद्रः कर्मणा जायते द्विजः। वेदपाठेन विप्रः स्याद् ब्रह्मज्ञानेन ब्राह्मणः॥' इति वचनात् , ब्रह्मज्ञानस्य च वेदान्तश्रवणाद्यधीनत्वात् , तत्र च 'शान्तो दान्त उपरतः' इति संन्यासिन एवाधिकाराद्, 'ब्राह्मणो निर्वेदमाया'दिति ब्राह्मणजातीयस्यैव संन्यासेऽधिकाराच्च ब्रह्मज्ञानिब्राह्मण-संन्यासिपर एव मुख्यो ब्राह्मणशब्द इति भावः। ब्रह्मणोऽयं ब्राह्मणः। वेद्यवेदितृभावरूपसम्बन्धे शेषे 'तस्येदम्' इत्यण्। ब्रह्मविदित्यर्थः।' इति। अत्र च ब्राह्मणपदस्य ब्रह्मज्ञानिपरत्वेन यौगिकत्वेऽपि 'विजानतः' इति विशेषणात् संन्यासिनः इति विवरणम् , 'ब्राह्मणो निर्वेदमाया'दिति ब्राह्मणजातीयस्यैव संन्यासेऽधिकाराच्चेत्यनेन ब्राह्मणजातिरूढत्वेऽपि वा संन्यासिनः इति विवरणं 'विजानतः' इति विशेषणात् ब्राह्मणपदस्य सामान्यार्थकस्य संन्यासिरूपार्थविशेषे पर्यवसानमभिप्रेत्येति व्याख्यातं भवति।

अत्र रामानुजभाष्ये— 'ब्राह्मणस्य विजानतः वैदिकस्य मुमुक्षोः' इति व्याख्यातम्। तत्त्वज्ञानफले सर्वं कर्मफलमन्तर्भूतमिति श्लोकतात्पर्यमद्वैतमते। रामानुजमते तु 'मुमुक्षुणा वेदोदितं सर्वं नोपादेयम् , किन्तु यद् मोक्षसाधनं तदेवोपादेय'मिति श्लोकतात्पर्यमिति विवेकः। वेदान्तदेशिकाः— ब्राह्मणजातिरूपरूढ्यर्थग्रहणे क्षत्रियायार्जुनायोपदेशानुपपत्तेः, ब्रह्म वेदः, ब्रह्म अणतीति निरुक्त्या ब्राह्मणपदं वैदिकमात्रपरम् , 'विजानतः' इति च हेयोपादेयविवेकविज्ञानवत्त्वात् मुमुक्षुपरमित्यभिप्रेत्य रामानुजभाष्यं प्रवृत्तमिति, ब्राह्मणशब्दस्यात्र संन्यासिपरत्वेन शंकरव्याख्या तु अतिमन्दा इति चाहुः।

रामकविस्तु पूर्वोक्तरीत्या ब्राह्मणपदस्य संन्यासिपरत्वमुपपाद्य रामानुजव्याख्यां दूषयामास— 'एतेन ब्राह्मणस्य वैदिकस्येति रामानुजोक्तार्थः परास्तः; तस्य तत्त्वविज्ञानाभावेन 'विजानतः' इति विशेषणासाङ्गत्यप्रसङ्गात्' इति। तथा वेदान्तदेशिककृतां ब्राह्मणपदव्युत्पत्तिं ब्राह्मण इति रूपासिद्ध्या खण्डयामास— **यत्त्वत्र** वेदान्तदेशिकः - ब्रह्मानितीति निरुक्त्या ब्रह्मणः, 'शकन्ध्वादिषु पररूपं वक्तव्यम्' इति पररूपे कृते प्रज्ञादित्वाद् अण्प्रत्यये च ब्राह्मण इति रूपं भवति। ब्रह्म चात्र वेदः इति; **तत्तुच्छम्** ; प्रज्ञादिषु ब्रह्मणशब्दाभावात् ; ब्रह्मण इति क्वापि प्रथमान्तपदप्रयोगाभावेन प्रज्ञादिषु शकन्ध्वादिषु वा आकृतिगणत्वेन तद्ग्रहणायोगात्। प्रसिद्धपदप्रयोगनिर्वहणाय हि स्वीकृत आकृतिगणः। किञ्च ब्रह्मानितीति व्युत्पत्तौ 'कर्मण्यण्' स्यात्। ततश्च वृद्धौ ब्रह्माण इत्येव स्यादिति (पृ.११०)।

उत्तमूर् **वीरराघवाचार्यास्तु** रामकव्युक्तवाक्यार्थे दोषमप्रदर्श्य, ब्रह्म अणतीति निरुक्त्या ब्राह्मणशब्दस्य प्रत्ययान्तरकरणेन निष्पत्तिं च विस्तरेण प्रदर्श्य एतन्मतं खण्डितममन्यन्त। अस्मिंश्च श्लोके अर्जुने ब्राह्मणपदप्रयोगं समर्थयितुं प्रायतन्त। परन्तु रामकविरीत्या अस्मिन् श्लोके अर्जुने ब्राह्मणपदप्रयोगः न समर्थनीयः। तथा सति अर्जुनं प्रति किमर्थमुपदेशः इति प्रश्ने तादृशज्ञानसंपादने प्रवर्तयितुमित्येवोत्तरम्। अतश्च रामकविकृतदूषणोद्धारप्रयत्नो विफलः।

**रामकवेः भाष्यकारेषु भक्तिः**

रामकवेः भाष्यकारेषु भक्तिरनितरसाधारणी। पञ्चदशाध्यायान्ते भाष्यव्याख्यानकरणेनात्मनो धन्यतां प्रकटयति— **"अयं चाध्यायः सर्वगीतार्थवेदार्थपरिसमाप्तिमत्त्वेनोत्कृष्ट इति कृत्वा सर्वगीताशास्त्रपारायणासमर्थाः शिष्टाः इममध्यायमन्वहं पठन्ति। एतत्पाठवशाच्च सर्वपापविनिर्मुक्ताः इह जन्मनि, जन्मान्तरे वा शमदमादिपूर्वकं संन्यासमुपलभ्य, वेदान्तश्रवणादिना तत्त्वं ज्ञात्वा मुक्तिं यास्यन्तीति कृत्वा एतत्पाठोऽपि क्रमेण कृतकृत्यताहेतुरेव। तस्मात् सर्वैरपि मुमुक्षुभिः पठनीयोऽयमध्यायः सर्वथा श्रोतव्यश्चास्यार्थश्चिन्तनीयश्च। धन्योऽस्म्यहं यदेतदध्यायभाष्यार्थविवरणं लब्धं मम। ये चैतत् पश्यन्ति, वदन्ति, शृण्वन्ति ते च धन्या एव। 'एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्चे'त्युक्तत्वेन ज्ञानमात्रमेव कृतकृत्यत्वकारणम् , न तु कर्मज्ञानसमुच्चय इति सूचितम्। ततश्च – 'तरति शोकमात्मवि'दिति श्रुत्यनुसारो गीतायाः सिध्यति। अत एवोपनिषत्तौल्यं गीताया उपनिषदभेदश्च, उपनिषदर्थप्रतिपादकत्वाद् गीताया इति"** इति।

**सम्प्रदायवित्** इति पदस्य एतस्य व्याख्यानं रमणीयम्। यथा— व्यासशुकादिगुरुशिष्यपरम्परा **सम्प्रदाय** इत्युच्यते। तं **विन्दति** भजत इति **सम्प्रदायवित्**। तत्परम्पराप्रविष्ट इति यावत्। स चासौ गुरुर्गोविन्दयोगीन्द्रः, तदुपदेशः शङ्कराचार्यस्यास्तीति शङ्करोक्त एवार्थो ग्राह्यः। (पृ.६२१)

गीताशास्त्रान्तेऽनेन संगृहीतः शास्त्रार्थसारः अत्यन्तं समीचीनः अवश्यं द्रष्टव्यः। (पृ.१००७)

यद्यपि रामकवेः अद्वैतशास्त्रीयप्रक्रियाऽन्यैवेति भाति। अव्यक्तमज्ञानं माया, तद् बुद्धिरेव, सर्वबुद्धिसमष्टेरेव मायात्वादित्यादि वदतो मायाऽविद्यादिस्वरूपविषयेऽस्य प्रक्रिया न तथा स्पष्टा। अयं नीरूपत्वात् मायायां चैतन्यस्य प्रतिबिम्बं निराकरोति। क्वचित्

आनन्दगिर्यादिव्याख्यानं खण्डयति। तादृशस्थलेऽस्माभिः टिप्पण्यां खण्डनस्य चिन्त्यत्वं निरूपितम्। श्रीमदचलमतगुरुशिवरामदीक्षित इति, आधुनिकाचलमतरीत्येति (पृ.७२६) च कस्यचिन्मतमनेनोपन्यस्तम्। कोऽसौ पण्डित इति न ज्ञायते। किं बहुना? एतद्व्याख्यातगीताभाष्यपाठोऽपि प्रसिद्धपाठादत्यन्तविलक्षणः। तथापि विशिष्टाद्वैतवादिभिरुद्भावितदोषनिराकरणेनैव तदीयव्याख्यायाः साफल्यं सर्वैः स्वीकार्यमेव।

## प्रस्तुतसंस्करणस्य वैशिष्ट्यम्

प्रस्तुतसंस्करणे अनुभूतिस्वरूपाचार्यविरचितं गीताभाष्यस्य टिप्पणम् , आनन्दगिर्याचार्यकृता भाष्यव्याख्या, श्रीबेल्लंकोण्डरामरायकविविरचितो भाष्यार्कप्रकाशः इत्येताभिः व्याख्याभिः सह श्रीमद्भगवद्गीताशाङ्करभाष्यं विलसति। एतेषु ग्रन्थेषु यत्रापेक्षा तत्राध्येतॄणां सौकर्याय काचित् टिप्पणी समायोजिता। व्याख्यान्तरेषु दृष्टा विशेषा अपि क्वचित् संगृहीताः। माध्वकृतानि च शाङ्करभाष्यदूषणानि टिप्पण्यां संक्षेपतो विमृष्टानि। उचितानि पाठान्तराणि च निर्दिष्टानि। बहुषु स्थलेषु शुद्धपाठाः संसूचिताः। भाष्येऽपि शुद्धपाठसंरक्षणार्थं यथाशक्ति प्रयत्नः कृतः। व्याख्याभेदेन भाष्ये पाठभेदप्राप्तौ आनन्दगिर्यादृतः पाठो मूले निवेशितः, इतरश्च पादटिप्पण्याम् ।

आनन्दाश्रममुद्रणालयमुद्रिते पादटिप्पण्यां निवेशितानि पाठान्तराणि बहुषु स्थलेषु औचित्यं पुरस्कृत्य मूलपाठे निवेशितानि। मुद्रितग्रन्थेषु स्थिताः अधिकाः अनपेक्षिताश्च वर्णाः ( ) वर्तुलकोष्ठकेषु निवेशताः। अपेक्षिताः वर्णाः [ ] चतुरस्रकोष्ठकेषु निवेशताः। क्व परिवर्तनीयो वर्णः, क्व वा संयोजनीय इति पाठकैः स्वकीयव्युत्पत्तिबलात् निर्णेयम्।

## प्रस्तुतसंस्करणे शोधनार्थमुपयुक्तानि पुस्तकानि

संस्करणेऽस्मिन् शोधनार्थमुपयुक्तानि पुस्तकानि—

**गीताभाष्यस्य—**

(१) निर्णयसागरमुद्रणालयमुद्रितम् अष्टव्याख्योपेतं भगवद्गीतापुस्तकम्

(२) आनन्दाश्रममुद्रणालयमुद्रितमानन्दगिरिव्याख्योपेतं भाष्यम्

(३) गुजरातीमुद्रणालयमुद्रितम् एकादशव्याख्योपेतं भगवद्गीतापुस्तकम्

(४) वाणीविलासमुद्रणालयमुद्रितं भाष्यम्

(५) रामकविव्याख्यानसहितं भाष्यम्

(७) कैलासाश्रमसंस्करणम् सटिप्पणव्याख्योपेतं भगवद्गीताभाष्यपुस्तकम्

(८) कलिकातामुद्रितमानन्दगिरिव्याख्योपेतं भाष्यम्

श्रीधरीयसुबोधिनीयुतम्

(९) मद्रपुरीस्थ- संस्कृत एजुकेशन् सोसाइटि द्वारा प्रकाशितम्

**अनुभूतिस्वरूपाचार्यकृतगीताभाष्यटिप्पणस्य—** (१)अडयार् हस्तलिखितग्रन्थकोशालयात् प्राप्तं देवनागर्यां लिप्यन्तरीकृतम्

(२) तन्मूलभूतं तालपत्रेषु ग्रन्थलिपिलिखितम्

(३)तिरुवनन्तपुरीयहस्तलिखितग्रन्थकोशालयात् प्राप्तं देवनागर्यां लिप्यन्तरीकृतम्।

**आनन्दगिरिव्याख्यायाः —** पूर्वोक्तानि व्याख्यासहितभाष्यपुस्तकानि।

**भाष्यार्कप्रकाशस्य** — कविता वेङ्कटसुब्रह्मण्यशास्त्रिभिः देवनागरीलिप्या मुद्रितमेकं पुस्तकम्।

काशीस्थ-श्रीदक्षिणामूर्ति-निरञ्जनपीठाधीश्वराणां महामण्डलेश्वराणां ब्रह्मलीनानां **श्रीमन्महेशानन्दगिरिस्वामिमहाराजानाम्** आज्ञया व्याख्यात्रयोपेतं भगवद्गीताशाङ्करभाष्यमिदं मया संशोधयितुमारब्धम्। दैवदुर्विपाकात् विघ्नैः प्रतिहतमपि अस्य संपादनकार्यं यदद्य पूर्णं तत्र श्रीमहाराजानां शुभाशिष एव परमं निदानम्। तन्निमित्तं श्रीमहाराजानां चरणकमलयोः स्मरन् प्रणामाञ्जलिं समर्पये।

महता परिश्रमेण शोधने कृतेऽपि मद्दृष्टिपथादपेताः अशुद्धयोऽत्र भवेयुरेव। विद्वांसः कृपया स्वयमेव ताः संशोधयन्त्विति सविनयमभ्यर्थये।

श्रद्धया समीचीनरीत्या उट्टङ्कनकार्यं संपादितवतः श्री **P.N. सुन्दरेशन्** महोदयस्य साधुवादैरभिनन्दनं विदधामि।

विदुषां वशंवदः

**मणिद्राविडः**

# श्रीमद्भगवद्गीताध्यायानां नामानुक्रमणिका


| | |
|---|---|
| १. अर्जुनविषादयोगः | १५ - २७ |
| २. सांख्ययोगः | २८ - १४२ |
| ३. कर्मयोगः | १४३ - १९५ |
| ४. ज्ञान-कर्म-संन्यासयोगः | १९६ - २५८ |
| ५. कर्मसंन्यासयोगः | २५९ - ३०३ |
| ६. ध्यानयोगः(आत्मसंयमयोगः) | ३०४ - ३५८ |
| ७. ज्ञानविज्ञानयोगः | ३५९ - ४०९ |
| ८. अक्षरब्रह्मयोगः | ४१० - ४५३ |
| ९. राजविद्याराजगुह्ययोगः | ४५४ - ४९० |
| १०. विभूतियोगः | ४९१ - ५२१ |
| ११. विश्वरूपदर्शनयोगः | ५२२ - ५५१ |
| १२. भक्तियोगः | ५५२ - ५८६ |
| १३. क्षेत्रक्षेत्रज्ञविभागयोगः | ५८७ - ७३३ |
| १४. गुणत्रयविभागयोगः | ७३४ - ७६८ |
| १५. पुरुषोत्तमयोगः | ७६९ - ८०५ |
| १६. दैवासुरसंपद्विभागयोगः | ८०६ - ८२२ |
| १७. श्रद्धात्रयविभागयोगः | ८२३ - ८४० |
| १८. मोक्षसंन्यासयोगः | ८४१ - १०१८ |

# श्रीमद्भगवद्गीताविषयानुक्रमणिका


| विषयाः | श्लोकः |
|---|---|
| **१. कर्म-तत्संन्यासात्मकसाधनप्रधानं त्वम्पदार्थनिष्ठं च आद्यं षट्कम्** | |
| **प्रथमोऽध्यायः-अर्जुनविषादयोगः** | |
| सञ्जयं प्रति धृतराष्ट्रस्य प्रश्नः | १ श्लो० |
| सञ्जयस्य प्रतिवचनम् | २ |
| द्रोणाचार्यं प्रति दुर्योधनस्य वचनम् | ३-११ |
| दुर्योधनहर्षार्थं भीष्मादिभिः शङ्खनादकरणम् | १२-१३ |
| स्वसैन्यप्रोत्साहनार्थं कृष्णार्जुनादिभिः शङ्खवादनम् | १४-१८ |
| पाण्डवकृतशङ्खनादेन धार्तराष्ट्राणां भयजननम् | १९ |
| श्रीकृष्णं प्रत्यर्जुनस्योभयोः सेनयोर्मध्ये रथस्थापनप्रार्थना | २०-२३ |
| भगवता सेनाद्वयमध्ये रथस्थापनपूर्वकमर्जुनं प्रति योद्धॄणां प्रदर्शनम् | २४-२५ |
| युद्धभूमावुभयोरपि सेनयोः स्थितान् बन्धूनवलोक्यार्जुनस्य विषादः | २६-२७ |
| श्रीकृष्णं प्रत्यर्जुनस्य विषादपूर्वकोक्तिसरणिः | २८-४६ |
| शोकाकुलस्यार्जुनस्य शरचापौ परित्यज्य रथोपस्थोपवेशः | ४७ |
| **द्वितीयोऽध्यायः- सांख्ययोगः** | |
| सञ्जयवचनम् | १ |
| विषीदन्तं पार्थमुद्दिश्य भगवतस्तद्विषादनिबर्हणायोक्तिः | २-३ |
| गुर्वादिभिः सार्धं योद्धुमयुक्तमित्युक्तिपूर्वकमर्जुनस्य युद्धकरणाकरणयोः कतरच्छ्रेय इति जिज्ञासया श्रीकृष्णं प्रति शिष्यत्वेनोपसत्तिः | ४-८ |
| सञ्जयवचनम् | ९-१० |
| अर्जुनस्य शोकमोहावपनेतुं भगवत्कृतः आत्मतत्त्वविनिर्णयः | ११-३० |
| आत्मनो नित्यत्वनिरूपणम् | १२ |
| आत्मनो नित्यत्वे दृष्टान्तः | १३ |
| मुमुक्षोः तितिक्षोपदेशः | १४ |
| तितिक्षायाः ज्ञानद्वारा मोक्षसाधनत्वम् | १५ |
| तितिक्षासिद्ध्यर्थं सत्यमिथ्याविभागोपन्यासः | १६ |
| आत्मनः सत्यत्वनिरूपणम् | १७ |
| देहादेरनात्मनो मिथ्यात्वनिरूपणम् | १८ |
| उक्तार्थे कठोपनिषन्मन्त्रयोरुपन्यासः | १९-२० |
| आत्मज्ञानिनः सर्वकर्माभावः | २१ |
| दृष्टान्तेनात्मनोऽविनाशित्वनिरूपणम् | २२-२५ |
| आत्मनो लोकदृष्ट्याऽनित्यत्वेऽपि भीष्मादेरशोच्यता | २६ |
| तत्र हेतुत्वेन जन्ममरणयोरपरिहार्यत्वोक्तिः | २७ |
| देहादेः मिथ्यात्वादशोच्यत्वम् | २८ |
| आत्मज्ञानस्य दुर्लभत्वम् | २९ |
| प्रकृतार्थोपसंहारः | ३० |
| क्षत्रियस्य स्वधर्मत्वाद् युद्धस्यावश्यकर्तव्यतोक्तिः | ३१ |
| युद्धस्य स्वर्गसाधनत्वकथनम् | ३२ |
| स्वधर्मभूतयुद्धाकरणे स्वधर्मकीर्तिहान्या दोषकथनम् | ३३ |
| संभावितस्य मृतिर्वरम् , अकीर्तिस्तु दुःसहेति प्रदर्शनम् | ३४-३६ |
| समरे हतस्य स्वर्गप्राप्तिः, विजये वा महीप्राप्तिरिति युद्धकरणमेव श्रेयः | ३७ |
| जयाजययोः समत्वदृष्ट्या युद्धं कुर्वतो दोषाभावकथनम् | ३८ |
| मोक्षसाधनात्मतत्त्वसाक्षात्कारोपायत्वेन कर्मयोगावतारणम् | ३९-४५ |
| कर्मयोगप्राप्यज्ञाननिष्ठाफले सर्वकर्मफलान्तर्भावः | ४६ |
| कर्मयोगोपदेशः, तत्फलत्वेन मोक्षस्योक्तिश्च | ४७-५१ |
| कदा कर्मयोगजचित्तशुद्धिरूपफलप्राप्तिरिति निरूपणम् | ५२-५३ |
| अर्जुनेन स्थितप्रज्ञलक्षणप्रश्नः | ५४ |
| भगवता स्थितप्रज्ञलक्षणकथनम् | ५५-५८ |
| इन्द्रियाणां विषयवैमुख्येऽपि विषयरागनिवृत्तिः आत्मतत्त्वज्ञानादेव | ५९ |
| इन्द्रियनिग्रहस्यावश्यकत्वम् | ६० |
| संयतेन्द्रियस्य युक्तस्यैव स्थितप्रज्ञता भवतीति कथनम् | ६१ |
| विषयाभिध्यानस्य सङ्गादिद्वारा पुरुषप्रणाशहेतुत्वकथनम् | ६२-६३ |
| मुमुक्षोः साधनत्वेन रागद्वेषवर्जनोपदेशः | ६४-६६ |
| अजितेन्द्रियस्येन्द्रियानुसारिमनसा प्रज्ञाया अपहारः | ६७ |
| विजितेन्द्रियस्य प्रज्ञा स्थिरा भवतीति कथनम् | ६८ |
| परमार्थतत्त्वज्ञानेनाविद्या-तत्कार्यनिवृत्तिनिरूपणम् | ६९ |
| स्थितप्रज्ञस्य विदुषो मोक्षावाप्तिः | ७० |
| निवृत्तसर्वकामस्यैव पुंसः शान्तिप्राप्तिरिति कथनम् | ७१ |
| ज्ञाननिष्ठायाः स्तुतिः | ७२ |

| विषयाः | श्लोकः |
|---|---|
| **तृतीयोऽध्यायः-कर्मयोगः** | |
| ज्ञानयोगस्य ज्यायस्त्वे कुतः कर्मणि प्रवर्तनमिति अर्जुनस्य प्रश्नः | १-२ |
| भगवता कर्मयोगज्ञानयोगयोर्भिन्नाधिकारिकत्वकथनम् | ३ |
| कर्मयोगस्य ज्ञानयोगोपायत्वनिरूपणम् | ४-५ |
| अनात्मज्ञस्य कर्मयोगावश्यकत्वप्रतिपादनम् | ६-७ |
| अधिकृतस्य कर्मानुष्ठानावश्यकत्वनिरूपणम् | ८-१६ |
| आत्मज्ञस्य कर्मयोगानावश्यकत्वप्रतिपादनम् | १७-१८ |
| नानायुक्तिभिः फलासङ्गनिवर्तनपूर्वकं स्वधर्मानुष्ठाने प्रवर्तनम् | १९-३२ |
| प्राणिनां प्रवृत्तेः स्वप्रकृत्यधीनत्वम् | ३३ |
| पुरुषकारस्य विषयप्रदर्शनम् | ३४ |
| स्वधर्मस्यैव कर्तव्यत्वम् | ३५ |
| अर्जुनकृतः पापाचरणप्रवृत्तिहेतुप्रश्नः | ३६ |
| भगवता कामस्य सर्वानर्थहेतुत्वं प्रतिपाद्य, इन्द्रियजयादिना तन्नाशनिरूपणम् | ३७-४३ |
| **चतुर्थोऽध्यायः-ज्ञान-कर्म-संन्यासयोगः** | |
| ज्ञानयोगस्य कृत्रिमत्वशङ्कापनुत्तये वंशकथनेन स्तुतिः | १-३ |
| लोकस्य भगवद्वचने विप्रतिषेधशङ्कां निवर्तयितुमर्जुनस्य प्रश्नः | ४ |
| अतीतानेकजन्मवत्त्वस्य सर्वप्राणिसाधारण्येऽपि भगवतः सर्वज्ञत्व-रूपविशेषप्रदर्शनेन समाधानम् | ५ |
| भगवतः कर्मानधीनजन्मप्रकारप्रयोजनादिकथनम् | ६-८ |
| भगवतो दिव्यजन्मकर्मवेदनस्य पुनर्जन्माभावप्रयोजनकथनेन तस्मिन् अश्रद्दधानस्य प्रत्यवायसूचनम् | ९ |
| पूर्वेषामपि ब्रह्मविदामेतेनैव मोक्षमार्गेण कैवल्यप्राप्तिरिति कथनम् | १० |
| तत्तत्कामनानुरोधेनेश्वरस्य तत्तत्फलदातृत्वकथनम् | ११ |
| कर्मजायाः फलसिद्धेः शीघ्रभावितया जनानां कर्मप्रवृत्तिकथनम् | १२ |
| चातुर्वर्ण्यसृष्टिकर्तुरपि भगवतो वस्तुतः तदकर्तृत्वबोधनम् | १३ |
| स्वस्याकर्तृत्वज्ञानेन पुंसः कर्मबन्धाभाव इति भगवत उक्तिः | १४ |
| कर्तृत्वाभिमानं कर्मफलस्पृहां च विना कर्म कुर्विति पार्थं प्रति नियोगः | १५ |
| कर्माकर्मतत्त्वकथनप्रतिज्ञा | १६ |
| कर्मादेः दुर्विज्ञेयत्वोक्तिः | १७ |
| कर्मादीनां तत्त्वप्रदर्शनम् | १८ |
| कर्मादावकर्मादिदर्शनस्य स्तुतिपूर्वकं तत्त्वज्ञानिनः कर्म परमार्थतोऽकर्मैवेति निरूपणम् | १९-२३ |
| तत्त्वज्ञानस्य यज्ञत्वसम्पादनम् | २४ |
| दैवयज्ञादिकथनपूर्वक ज्ञानयज्ञस्य सर्वयज्ञेभ्यः श्रेष्ठत्वप्रतिपादनम् | २५-३३ |
| गुरुप्रणिपातादेः यथोक्तज्ञानप्राप्तावुपायत्वकथनम् | ३४ |
| ज्ञानमाहात्म्यकथनम् | ३५-३८ |
| श्रद्धाया ज्ञानप्राप्तिं प्रत्येकान्तोपायता, विपर्ययेऽनर्थकथनं च | ३९-४० |
| ज्ञानिनो बन्धाभावः | ४१ |
| संशयमकृत्वा ज्ञानोपायं कर्मयोगमनुतिष्ठेत्यर्जुनस्य प्रवर्तनम् | ४२ |
| **पञ्चमोऽध्यायः-संन्यासयोगः** | |
| ज्ञानरहितसंन्यास-कर्मयोगयोः कः प्रशस्यतरः इत्यर्जुनस्य प्रश्नः | १ |
| यथोक्तसंन्यासात् कर्मयोगस्य सहेतुकं प्रशस्यतरत्वकथनम् | २-३ |
| ज्ञानसहितसंन्यास-कर्मयोगलक्षणयोः साङ्ख्ययोगयोः फलैकत्वोक्तिः | ४-५ |
| पारमार्थिकसंन्यासः कर्मयोगमन्तरा दुष्प्राप इति कथनम् | ६ |
| लोकसङ्ग्रहाय केवलं कर्म कुर्वतः सम्यग्दर्शननिष्ठस्य न तत्फललेपः | ७ |
| परमार्थतः तस्याकर्तृत्वनिरूपणम् | ८-१० |
| कर्मयोगिनः चित्तशुद्धिज्ञानप्राप्तिद्वारा मोक्षकथनम् | ११-१२ |
| विदुषः सर्वकर्मसंन्यासेन देहेऽवस्थितिकथनम् | १३ |
| आत्मनः कारयितृत्वाद्यभावप्रपञ्चनम् | १४-१५ |
| ज्ञानिनां ज्ञानेनाज्ञाननाशाद् ब्रह्मप्राप्तिकथनम् | १६-१७ |
| ज्ञानिनां ब्राह्मणादौ सर्वत्र समब्रह्मदर्शित्ववर्णनम् | १८-१९ |
| ब्रह्मनिष्ठस्य प्रियाप्रियसंनिधावपि हर्षोद्वेगराहित्यकथनम् | २० |
| ब्रह्मनिष्ठस्य विषयेष्वसक्तस्याक्षयसुखावाप्तिकथनम् | २१ |
| इन्द्रियाणां विषयसकाशान्निवर्तने हेतूपन्यासः | २२ |
| देहत्यागावधि कामक्रोधोद्भवं वेगं निगृह्णत एव युक्तत्वसुखित्वयोः कथनम् | २३ |
| अन्तःसुखादिलक्षणलक्षितस्य ब्रह्मप्राप्तिकथनम् | २४-२६ |
| ध्यानयोगस्य सङ्क्षेपत उपक्षेपः | २७-२९ |

| विषयाः | श्लोकः |
|---|---|
| **षष्ठोऽध्यायः-ध्यानयोगः** | |
| निष्कामकर्मानुष्ठानस्तुतिः | १-२ |
| ध्यानयोगेऽवस्थानशक्तिप्राप्तिपर्यन्तं कर्मयोगः, ततः कर्मसंन्यासः | ३ |
| योगारूढस्य लक्षणकथनम् | ४ |
| योगारूढत्वसंपादनेनात्मोद्धारस्य कर्तव्यता | ५-९ |
| ध्यानयोगिन आसनाहारविहारादिनियमकथनम् | १०-२६ |
| ध्यानयोगफलनिरूपणम् | २७-३२ |
| यथोक्तध्यानयोगस्य मनश्चाञ्चल्येन दुष्करत्वमिति शङ्का | ३३-३४ |
| अभ्यासवैराग्याभ्यां मनोनिग्रहे सति ध्यानयोगसिद्धिरिति समाधानम् | ३५ |
| असंयतात्मना ध्यानयोगस्य दुष्प्रापत्वकथनम् | ३६ |
| ध्यानयोगप्रवृत्तस्य त्यक्तसर्वकर्मणः प्रागेव सम्यग्दर्शनलक्षण-फलप्राप्तेर्देहवियोगे का गतिरिति प्रश्नः | ३७-३९ |
| योगभ्रष्टस्य विनाशाभावप्रतिपादनपुरःसरमुत्तमगतिप्राप्तिकथनम् | ४०-४५ |
| ध्यानयोगिनः सर्वश्रेष्ठत्वकथनपूर्वकं ध्यानयोगेऽर्जुनस्य प्रवर्तनम् | ४६ |
| तत्तद्देवताध्यानपराणां मध्ये वासुदेवध्याननिष्ठस्य युक्ततमत्वबोधनम् | ४७ |


——— * ———

## २. उपासनाप्रधानं तत्पदार्थनिष्ठं च मध्यमं षट्कम्


| विषयाः | श्लोकः |
|---|---|
| **सप्तमोऽध्यायः-ज्ञानविज्ञानयोगः** | |
| भगवद्ध्याननिष्ठस्य विभूत्यादिगुणसम्पन्नभगवज्ज्ञानोपदेशप्रतिज्ञा, ज्ञानस्य दुर्लभत्वोक्त्या श्रोतृप्ररोचनं च | १-३ |
| अपरप्रकृतेर्भूम्याद्यष्टभेदभिन्नत्वोक्तिः | ४ |
| जीवभूतपरप्रकृतिकथनम् | ५ |
| यथोक्तप्रकृतिद्वयद्वारेणेश्वरस्य जगत्कारणत्वनिरूपणम् | ६ |
| सर्वभूतानां परमेश्वरे प्रोतत्वकथनम् | ७-१२ |
| सात्त्विकादित्रिविधभावमोहितत्वाल्लोकानां भगवत्तत्त्वानभिज्ञत्ववर्णनम् | १३ |
| भगवदेकशरणस्य तत्त्वज्ञानेन मायातिक्रमकथनम् | १४ |
| दुष्कृतिनां भगवद्भक्तिपराङ्मुखत्वनिरूपणम् | १५ |
| भगवद्भजनप्रवृत्तानां सुकृतिनां भक्तानां चातुर्विध्यनिर्देशः | १६ |
| तथाविधेषु भक्तेषु ज्ञानिनः श्रेष्ठत्वप्रतिपादनम् | १७-१९ |
| कामापहृतविवेकविज्ञानतायाः देवतान्तरभजने निमित्तत्वोक्तिः | २० |
| देवतान्तरोपासकानां तत्तदुपासनश्रद्धादार्ढ्योपादनेन भगवत एव तत्तत्स्वरूपेणेष्टप्रदातृत्वकथनम् | २१-२२ |
| अन्यदेवतोपासकानामवाप्तफलस्यान्तवत्त्वप्रदर्शनम् | २३ |
| भगवद्भजने प्रवृत्त्यभावे अज्ञानस्य हेतुत्वनिरूपणम् | २४ |
| परमार्थतत्त्वस्याज्ञाने हेतुनिरूपणम् | २५-२७ |
| भगवद्भजनद्वारा सुकृतिनामुत्तमगतिप्राप्तिकथनम् , अर्जुनस्य प्रश्नबीजोपवापश्च | २८-३० |
| **अष्टमोऽध्यायः-अक्षरब्रह्मयोगः** | |
| किं तद्ब्रह्मेत्यादिप्रश्नसप्तकम् | १-२ |
| यथोक्तस्य प्रश्नसप्तकस्योत्तरम् | ३-५ |
| अन्त्यभावनानुरोधेन देहान्तरावाप्तिकथनम् | ६ |
| सर्वदा भगवद्ध्यानपुरःसरमर्जुनस्य युद्धादिकरणे प्रवर्तनम् | ७ |
| अभ्यासयोगयुक्तस्य पुरुषोत्तमप्राप्तिकथनम् | ८-१० |
| प्रणवोपासनप्रकारः | ११-१३ |
| अनन्यचित्ततया भगवत्स्मरणस्य तत्प्राप्तिहेतुत्वम् | १४ |
| ईश्वरं प्राप्तवतामपुनरावृत्तिकथनम् | १५ |
| स्वर्गलोकादिसत्यलोकपर्यन्तं गतानां पुनरावृत्तिकथनम् | १६-१९ |
| परतत्त्वस्वरूपप्रदर्शनम् | २०-२१ |
| परमपुरुषस्य भक्तिप्राप्यत्वकथनम् | २२ |
| ध्यानयोगिनां कर्मिणां च यथानुरूपं देवयानपितृयाणरूपमार्गद्वयमुक्त्वा यथोक्तमार्गद्वयगतानामनावृत्त्यावृत्तिप्रदर्शनम् | २३-२६ |
| मार्गद्वयचिन्तनप्रयोजनम् | २७ |
| अक्षरोपासनरूपध्यानयोगमाहात्म्यकथनम् | २८ |
| **नवमोऽध्यायः-राजविद्याराजगुह्ययोगः** | |
| स्तुतिपूर्वकं परब्रह्मतत्त्वज्ञानोपदेशः | १-१० |
| मूढकर्तृकस्वावज्ञायाः स्वतत्त्वाज्ञानमूलकत्ववर्णनम् | ११-१२ |
| भक्तिलक्षणे मोक्षमार्गे महात्मनां प्रवृत्तिकथनम् | १३-१५ |
| सङ्क्षेपतो भगवद्विभूतिवर्णनम् | १६-१९ |
| सकामानां संसारप्राप्तिकथनम् | २०-२१ |
| निष्कामभक्तिनिष्ठानां सम्यग्दर्शिनां योगक्षेमस्य भगवता निर्वहणोक्तिः | २२ |

| | श्लोकः |
|---|---|
| देवतान्तरेषु भक्तिमतामपि भगवद्भक्तत्वप्रतिपादनपुरःसरं तत्तद्भजनानुसारेण तेषां फलप्राप्तिकथनम् | २३-२५ |
| भगवदाराधनस्य सुकरत्वप्रतिपादनम् | २६ |
| क्रियमाणस्य कर्मणो भगवत्समर्पणोपदेशः | २७ |
| तत्फलनिर्देशः | २८ |
| भगवतः सर्वभूतेषु रागद्वेषराहित्येन समत्वम् | २९ |
| भक्तिमहिमकथनपूर्वकमर्जुनस्य तन्मार्गप्रवर्तनम् | ३०-३३ |
| ईश्वरभक्तिकर्तव्यताप्रकारप्रदर्शनम् | ३४ |
| **दशमोऽध्यायः-विभूतियोगः** | |
| भगवत्कृतः सङ्क्षेपतो विभूतियोगज्ञानोपदेशः | १-११ |
| विस्तरेण तत्कथनार्थोऽर्जुनस्य प्रश्नः | १२-१८ |
| भगवता विस्तरतः कृतो विभूतियोगोपदेशः | १९-४२ |
| **एकादशोऽध्यायः-विश्वरूपदर्शनयोगः** | |
| विश्वरूपदिदृक्षोरर्जुनस्य भगवन्तं प्रति प्रार्थना | १-४ |
| पार्थं प्रति भगवतो विश्वरूपप्रदर्शनप्रतिज्ञा, दिव्यचक्षुःप्रदानं च | ५-८ |
| भगवान् विश्वरूपं पार्थाय दर्शयामासेति धृतराष्ट्रं प्रति सञ्जयस्योक्तिः | ९-१४ |
| भगवतो विश्वरूपं दृष्ट्वाऽर्जुनस्य स्वानुभवप्रकटनम्, को भवानिति प्रश्नश्च | १५-३१ |
| भगवत उत्तरम्, भूभारपरिजिहीर्षया प्रवृत्तोऽहमेवैषां हन्ता, त्वं तु निमित्तमात्रं भवेति पार्थं प्रति भगवदुक्तिः | ३२-३४ |
| कदाचित्पराजयभयाद् धृतराष्ट्रः सन्धिं कुर्यादिति काङ्क्षया सञ्जयस्य तं प्रति वृत्तान्तकथनम् | ३५ |
| अर्जुनकृता भगवत्स्तुतिः | ३६-४० |
| पार्थस्य भगवन्तं प्रति स्वापराधक्षमापणपूर्वकं पूर्वरूपप्रदर्शनाभ्यर्थना | ४१-४६ |
| भगवतो विश्वरूपदर्शनस्य दुर्लभत्वकथनम्, भीतपार्थाश्वासनं च | ४७-४९ |
| सञ्जयस्योक्तिः | ५० |
| भगवतः पूर्वरूपदर्शनेनार्जुनस्यान्तःस्थैर्यप्रदर्शनम् | ५१ |
| विश्वरूपदर्शनमनन्यभक्तिसाध्यमिति भगवदुक्तिः | ५२-५४ |
| ईश्वरार्थकर्मादियुक्तस्य तत्प्राप्तिरिति गीताशास्त्रसारभूतार्थः | ५५ |

| | श्लोकः |
|---|---|
| **द्वादशोऽध्यायः-भक्तियोगः** | |
| विश्वरूपस्याक्षरस्य चोपासकानां मध्ये योगवित्तमाः के इत्यर्जुनप्रश्नः | १ |
| भगवता विश्वरूपोपासकानां युक्ततमत्वकथनम् | २ |
| अक्षरोपासकानां तेभ्यः अधिकतरक्लेशप्रतिपादनम् | ३-५ |
| विश्वरूपोपासकानां भगवतैवोद्धरणीयत्वकथनम् | ६-७ |
| विश्वरूपध्यानलक्षणे भक्तियोगे भगवताऽर्जुनस्य प्रवर्तनम् | ८ |
| भक्तियोगेऽशक्तस्याभ्यासयोगादिसाधनकथनम् | ९-११ |
| सर्वकर्मफलत्यागस्य स्तुतिः | १२ |
| अक्षरोपासकानां ज्ञानिनां लक्षणनिरूपणम् | १३-१९ |
| यथोक्तधर्मपराणां स्वप्रीतिविषयत्वकथनम् | २० |


———*———

## ३. तत्त्वम्पदार्थैक्यरूपवाक्यार्थनिष्ठं सम्यग्धीप्रधानं च अन्तिमं षट्कम्


| | |
|---|---|
| **त्रयोदशोऽध्यायः- क्षेत्रक्षेत्रज्ञविभागयोगः** | |
| क्षेत्रक्षेत्रज्ञयोः सङ्क्षेपतः स्वरूपनिरूपणम् | १ |
| सर्वक्षेत्रस्थस्य क्षेत्रज्ञस्येश्वराभेदकथनपूर्वकं क्षेत्रक्षेत्रज्ञयोर्ज्ञानस्य सम्यग्ज्ञानत्वकथनम् | २ |
| क्षेत्रक्षेत्रज्ञयोर्विशेषतो याथात्म्यकथनप्रतिज्ञा | ३ |
| क्षेत्रक्षेत्रज्ञयोर्याथात्म्यस्तुतिः | ४ |
| विशेषतः क्षेत्रयाथात्म्यकथनम् | ५-६ |
| अमानित्वादितत्त्वज्ञानसाधनकथनम् | ७-११ |
| क्षेत्रज्ञयाथात्म्यकथनम् | १२-१७ |
| क्षेत्रक्षेत्रज्ञयाथात्म्यज्ञानफलकथनम् | १८ |
| प्रकृतिपुरुषयोरनादित्वोक्तिः | १९ |
| प्रकृतेः कार्यकरणकर्तृत्वे, पुरुषस्य सुखदुःखभोक्तृत्वे च हेतुत्वकथनम् | २० |
| पुरुषस्य भोक्तृत्वे प्रकृतिसङ्गस्य निमित्तत्वकथनम् | २१ |
| पुरुषस्योपद्रष्टृत्वादिप्रदर्शनम् | २२ |
| प्रकृतिपुरुषविवेकफलप्रतिपादनम् | २३ |
| आत्मदर्शने यथाधिकारं ध्यानाद्युपायकथनम् | २४-२५ |
| सम्यग्दर्शन-तत्फलयोरुपवर्णनम् | २६-३४ |

| विषयाः | श्लोकः |
|---|---|
| **चतुर्दशोऽध्यायः-गुणत्रयविभागयोगः** | |
| उत्तमज्ञानोपदेशस्य प्रतिज्ञानम् | १-२ |
| क्षेत्रक्षेत्रज्ञसंयोगेन हिरण्यगर्भोपजननद्वारा सर्वभूतोत्पत्तिवर्णनम् | ३-४ |
| सत्त्वादिगुणानां जीवबन्धकत्वोक्तिः | ५ |
| सत्त्वादिगुणानां स्वरूपकार्यादिप्रतिपादनम् | ६-१८ |
| सम्यग्ज्ञानाद् मोक्षकथनम् | १९-२० |
| गुणातीतलक्षणप्रश्नः | २१ |
| गुणातीतलक्षणकथनम् | २२-२५ |
| अव्यभिचारेण भक्तियोगेन गुणातीतत्वसिद्धिवर्णनम् | २६ |
| आत्मनः सर्वप्रतिष्ठात्वकथनम् | २७ |
| **पञ्चदशोऽध्यायः-पुरुषोत्तमयोगः** | |
| संसारस्य वृक्षरूपककल्पना | १-२ |
| असङ्गशस्त्रेण संसारवृक्षच्छेदने ब्रह्मपदावाप्तिकथनम् | ३-५ |
| उक्तस्य ब्रह्मपदस्य स्वरूपोक्तिः | ६ |
| जीवस्य भगवदंशत्वकथनपूर्वकं सेन्द्रियस्योत्क्रान्त्यादेः प्रतिपादनम् | ७-९ |
| मूढानामात्मज्ञानस्यासम्भवोक्तिः | १०-११ |
| सङ्क्षेपेण विभूतिवर्णनम् | १२-१५ |
| क्षराक्षरोत्तमपुरुषाणां निरूपणम् | १६-१८ |
| भगवतः पुरुषोत्तमत्वज्ञाने फलस्य निरूपणम् | १९ |
| भगवत्तत्त्वज्ञानप्रशंसा | २० |
| **षोडशोऽध्यायः-दैवासुरसंपद्विभागयोगः** | |
| दैवासुरसंपदोः स्वरूपफलनिर्णयः | १-५ |
| सविस्तरमासुरसम्पद्वर्णनम् | ६-२० |
| आसुरसंपत्संक्षेपः, तद्विमोकेन श्रेयःप्राप्तिकथनञ्च | २१-२२ |
| शास्त्रविधिमुल्लङ्घ्य प्रवृत्तस्य सिद्ध्याद्यभावकथनम् | २३ |
| अर्जुनस्य शास्त्रीये कर्मणि भगवता प्रवर्तनम् | २४ |
| **सप्तदशोऽध्यायः-श्रद्धात्रयविभागयोगः** | |
| उत्सृष्टशास्त्रविधीनां श्रद्धया कर्म कुर्वतां का निष्ठेति प्रश्नः | १ |
| त्रिविधश्रद्धाविवरणम् | २-६ |
| आहारत्रैविध्यनिरूपणम् | ७-१० |
| यज्ञत्रैविध्यकथनम् | ११-१३ |
| कायिकादिभेदैस्तपस्त्रैविध्यवर्णनम् | १४-१६ |
| सात्त्विकादिभेदैः पूर्वोक्ततपसस्त्रैविध्यवर्णनम् | १७-१९ |
| सात्त्विकादिभेदैर्दानत्रैविध्यप्रदर्शनम् | २०-२२ |
| यज्ञादिसाद्गुण्यार्थम् ओं तत् सदिति शब्दत्रयविनियोगप्रदर्शनम् | २३-२७ |
| अश्रद्धया कृतस्य होमादिसर्वकर्मणोऽसत्त्वप्रतिपादनम् | २८ |
| **अष्टादशोऽध्यायः-मोक्षसंन्यासयोगः** | |
| संन्यासत्यागयोस्तत्त्वनिर्णयाय प्रश्नः | १ |
| संन्यासत्यागपदयोरर्थनिरुक्तिः | २ |
| कर्मणस्त्यागविषये साङ्ख्यमीमांसकपक्षद्वयप्रदर्शनम् | ३ |
| नित्यनैमित्तिककर्माणि तत्फलासङ्गं विहाय कार्याणीति स्वमतप्रदर्शनम् | ४-६ |
| नित्यकर्मत्यागानुपपत्तिकथनपूर्वकं तामसादिभेदैस्त्यागत्रैविध्यकथनम् | ७-९ |
| फलासङ्गं त्यक्त्वा नित्यकर्मानुतिष्ठतो ज्ञाननिष्ठाप्राप्तिप्रदर्शनम् | १० |
| कर्मफलत्यागिनस्त्यागीत्यभिधानकथनम् | ११ |
| संन्यासिनामनिष्टादिकर्मफलाद्यभावकथनम् | १२ |
| सर्वकर्मणामधिष्ठानादिकारणपञ्चकप्रपञ्चनम् | १३-१५ |
| शुद्धात्मनि कर्तृत्वाद्यभिमानिनां दुर्मतित्वकथनम् | १६ |
| कर्तृत्वाद्यभिमानरहितस्य सुमतित्वकथनम् | १७ |
| कर्मप्रवर्तकप्रदर्शनम् | १८ |
| ज्ञानकर्मकर्तॄणां सत्त्वादिगुणभेदतस्त्रैविध्यकथनप्रतिज्ञानम् | १९ |
| ज्ञानकर्मकर्तॄणां सात्त्विकत्वादिभेदैस्त्रैविध्यप्रदर्शनम् | २०-२८ |
| बुद्धिधृत्योर्गुणभेदेन त्रैविध्यकथनप्रतिज्ञानम् | २९ |
| सात्त्विकादिभेदेन बुद्ध्यादेः त्रैविध्यकथनम् | ३०-३५ |
| सुखस्य गुणभेदेन त्रैविध्यकथनप्रतिज्ञानम् | ३६ |
| सुखस्य गुणभेदेन त्रैविध्यकथनम् | ३७-३९ |
| संसारान्तर्गतस्याशेषस्य त्रिगुणात्मकत्वकथनम् | ४० |
| ब्राह्मणादिवर्णधर्माणां प्रविभागप्रदर्शनम् | ४१-४४ |
| ब्राह्मणादीनां यथास्वकर्म भगवदाराधनेन ज्ञाननिष्ठायोग्यतारूपसिद्धि-प्रतिपादनम् | ४५-४६ |

| विषयाः | श्लोकः |
|---|---|
| स्वधर्मस्यात्याज्यताप्रतिपादनम् | ४७-४८ |
| असक्तबुद्धेः संन्यासेन ज्ञाननिष्ठारूपनैष्कर्म्यसिद्धिप्रतिपादनम् | ४९ |
| नैष्कर्म्यलक्षणसिद्धिप्राप्तिक्रमकथनप्रतिज्ञानम् | ५० |
| विस्तरेण ज्ञाननिष्ठाप्राप्तिक्रमकथनम् | ५१-५३ |
| यथोक्तक्रमेण ज्ञानलक्षणभक्तिप्राप्तिनिरूपणम् | ५४ |
| यथोक्तज्ञानलक्षणभक्तियोगतो भगवत्तत्त्वज्ञानसिद्धिकथनम् | ५५ |
| भगवद्भक्तियोगस्य स्तुतिः | ५६ |
| अर्जुनं प्रति भगवत्कृतः स्वाभिन्नेश्वरे सदा चित्तस्थापनोपदेशः | ५७ |
| ईश्वरैकचित्तत्वे तत्प्रसादात् सर्वदुःखतरणस्य, अन्यथा विनाशस्य च कथनम् | ५८ |
| युद्धाकरणनिश्चयस्याहङ्काराश्रयत्वान्मिथ्यात्वकथनम् | ५९-६० |
| अन्तर्यामित्वादीश्वरस्य सर्वभूतप्रेरकत्वप्रतिपादनम् | ६१ |
| सर्वभावेनेश्वरमाश्रयतः शाश्वतपदप्राप्तिकथनम् | ६२ |
| उक्तगुह्यतरज्ञानविमर्शेन यथेच्छकरणानुज्ञानम् | ६३ |
| अर्जुनस्यातीव प्रियतया सर्वगुह्यतमवचनश्रवणे प्रवर्तनम् | ६४ |
| गुह्यतमस्येश्वरशरणत्वस्य कर्मयोगनिष्ठातत्त्वस्योपदेशः | ६५ |
| सर्वकर्मसंन्यासपूर्वकसम्यग्दर्शननिष्ठायास्तत्फलस्योपदेशः | ६६ |
| अपात्रे शास्त्रोपदेशं निषिध्य पात्रे तदुपदेशस्य फलकथनम् | ६७-६९ |
| प्रकृतशास्त्राध्ययनश्रवणफलप्रदर्शनम् | ७०-७१ |
| मदुक्तशास्त्रश्रवणेनाज्ञानसम्मोहः कच्चित्प्रनष्ट इत्यर्जुनं प्रति भगवत्प्रश्नः | ७२ |
| नष्टो मोहः स्मृतिर्लब्धा इत्याद्यर्जुनस्योत्तरवचनम् | ७३ |
| धृतराष्ट्रं प्रति सञ्जयस्य वचनम् | ७४-७८ |


---*---

## सव्याख्यशाङ्करभाष्यगतानां विशिष्टविषयाणामनुक्रमणिका


| विषयाः | पृष्ठम् |
|---|---|
| मङ्गलाचरणम् , अवतरणिका च[१] (अ)(आ)(रा) | १ |
| पौराणिकश्लोकस्योदाहरणेनेष्टदेवतातत्त्वानुसन्धानलक्षणमङ्गलाचरणम् | २ |
| रामानुजभाष्यविमर्शार्थं स्वस्य प्रवृत्तिकथनम्(रा) | २ |
| गीताशास्त्रस्य षड्भेदेन महावाक्यघटकपदत्रयार्थविवरणरूपत्वम्(रा) | २ |
| अव्यक्तस्य कारणत्वे साङ्ख्यवत् अचेतनकारणवादापत्तिशङ्कानिरसनम् (रा) | ३ |
| गीताशास्त्रस्य अनुबन्धनिरूपणम्(आ) | ५ |
| मायांशस्यैव जगत्प्रकृतित्वमिति निरूपणम्(रा) | ५ |
| मायाया मृषात्वात् एकस्य ब्रह्मणः सत्यत्वात् अद्वैतसिद्धिः(रा) | ५ |
| गीतायाः प्रमाणत्वात् प्रयोजनादिमत्त्वाच्च व्याख्येयत्वोपपादनम् (अ) | ६ |
| भगवत्कृतस्य वेदोक्तप्रवृत्तिनिवृत्तिलक्षणधर्मप्रवर्तनस्य प्रतिपादनम् | ६ |
| द्विविधवेदोक्तधर्मप्रयोजनकथनम् | ७ |
| वैदिकधर्मरक्षणार्थं कृष्णावतारकथनम् | ८ |
| सर्वभूतानुजिघृक्षया भगवतोऽर्जुनाय वैदिकधर्मद्वयोपदेशः | १० |
| भगवदुपदिष्टस्य धर्मस्य सप्तभिः श्लोकशतैर्व्यासेन निबन्धनम् | १० |
| समस्तश्रुत्यर्थसारसङ्ग्रहरूपस्य गीताशास्त्रस्य विवरणकरणप्रतिज्ञा | ११ |
| गीतार्थे व्याख्यातॄणां विप्रतिपत्तिप्रदर्शनम् (अ) | ११ |
| गीताशास्त्रस्य निःश्रेयसप्रयोजनकत्वकथनम् | १२ |
| शास्त्रस्यास्यानुबन्धत्रयवैशिष्ट्याद् व्याख्येयत्वोपपादनम् | १४ |
| आरम्भप्रभृति 'इदं वचः' इत्येतदन्ते ग्रन्थे त्रेधा वाक्यविभागः(आ) | ३१ |
| 'दृष्ट्वा तु पाण्डवानीकम्' इत्यादेः 'उक्त्वा तूष्णीं बभूव ह' इत्येतदन्तस्य ग्रन्थस्य शोकमोहादिसंसारकारणाविद्याप्रदर्शनपरत्ववर्णनम् | ३१ |
| अशोच्यानित्यादिसन्दर्भस्य समूलसंसारोच्छेदकसम्यग्ज्ञानोपदेशे तात्पर्यप्रदर्शनम् | ३३ |
| भास्करकृतखण्डनस्य उपेक्ष्यत्वे हेतुकथनम् (अ) | ३३ |
| ज्ञानकर्मसमुच्चयमतोत्थापनम् | ३३ |
| ज्ञानकर्मसमुच्चयवादनिरासः — १. तत्र निष्ठाद्वयविभागानुपपत्तिः | ३५ |


---

[१] (अ) = अनुभूतिस्वरूपाचार्यविरचितगीताभाष्यटिप्पणम् , (आ) = आनन्दगिरिव्याख्या, (रा) = रामकविव्याख्या।

# विषयानुक्रमणिका


| विषयाः | पृष्ठम् |
|---|---|
| २. ज्ञानकर्मसमुच्चयमते अर्जुनप्रश्नानुपपत्तिः | ३८ |
| लोकसंग्रहार्थं ज्ञानिना क्रियमाणं कर्म कर्माभासः | ४० |
| अशोच्यान् इति श्लोकस्य कैश्चित् कृतव्याख्याखण्डनम् (आ) | ४३ |
| केवलात्तत्त्वज्ञानादेव मुक्तिरिति सिद्धान्तोपसंहृतिः | ४२ |
| विकारजातस्यासत्यत्वप्रदर्शनम् | ५२ |
| आत्मनोऽप्रमेयत्वसमर्थनम् | ६७ |
| विदुषः कर्मासम्भवहेतूपन्यासः | ७७ |
| विदुषो मुमुक्षोश्चाविक्रियात्मदर्शिनः सर्वकर्मसंन्यासेऽधिकारप्रदर्शनम् | ७९ |
| अविक्रियात्मदर्शने आक्षेपः, समाधानं च | ८२ |
| मनसेति वचनान्न वाचिकानां कायिकानां च संन्यास इत्याक्षेपनिरासः | ८५ |
| पौनःपुन्येनात्मनित्यत्वादिवचनस्य पौनरुक्त्याभावकथनम् | ८९ |
| अविद्यावस्थायामेव कर्मविधिः | १३५ |
| द्वितीयाध्यायगतस्यार्थस्य सङ्क्षेपतोऽनुवादः | १४३ |
| वृत्तिकारकृतव्याख्यानिरासः | १४४ |
| ज्ञानकर्मसमुच्चयवादनिरासे युक्त्यन्तरम् | १५९ |
| कर्मारम्भस्य नैष्कर्म्योपायत्वनिरूपणम् | १६१ |
| भूतजातस्य सर्वस्य प्रकृत्यधीनत्वे विधिनिषेधानर्थक्यशङ्कानिरसनम् | १८६ |
| भगवच्छब्दार्थवर्णनम् | १८९ |
| विरोधशङ्कापरिहारेण कर्मण्यकर्मेति श्लोकतात्पर्याख्यानम् | २१२ |
| कर्मण्यकर्मेति श्लोके वृत्तिकारव्याख्यानस्य दूषणम् | २१८ |
| शारीरं केवलं कर्मेत्यत्र शारीरपदार्थनिर्णयः | २२९ |
| ब्रह्मार्पणमित्यत्रार्पणादौ ब्रह्मदृष्टिविधिरिति पक्षमनूद्य दोषापादनम् | २३७ |
| अविद्वत्कर्तृकयोःकर्मसंन्यास-कर्मयोगयोः प्रशस्यतरविषयकतया अर्जुनप्रश्नस्य सङ्गतिः | २५९ |
| प्रकरणात् आत्मविदः संन्यासो विवक्षितश्चेत् , तर्हि कर्मयोगोऽपि तस्यैव कस्मान्नेत्याक्षेपनिरासः | २६५ |
| संन्यासकर्मयोगशब्दाभ्यामुपक्रम्य साङ्ख्ययोगशब्दयोः प्रयोगे अप्रकृतार्थताशङ्काया निराकरणम् | २७३ |
| सर्वकर्माणीत्यत्र श्लोके नवद्वारे पुर इति विशेषणस्य प्रयोजनकथनम् | २८१ |
| सात्त्विकादिषु त्रिविधेषु सत्त्वेषु समत्वदृष्टौ दोषशङ्काया निरसनम् | २९० |
| पञ्चमान्तोपक्षिप्तस्य ध्यानयोगस्य विवरणरूपः षष्ठोऽध्याय इति प्रतिपादनम् | ३०४ |
| कर्मयोगस्य ध्यानयोगारोहणसीमाकरणे आक्षेपः समाधानं च | ३०४ |
| कर्मफलासङ्गत्यागस्तुत्यर्थं गौणं संन्यासित्वं योगित्वं चेति कथनम् | ३१० |
| कृष्णावतारस्य साक्षान्मायाविकारत्वम्(रा) | ३९७ |
| श्रुत्युक्तस्य ओङ्कारे ब्रह्मोपासनस्येहानुक्रमणमिति निरूपणम् | ४२७ |
| भगवतो सर्वभक्तयोगक्षेमनिर्वोढृत्वान्निष्कामभक्तज्ञानिविषये विशिष्य योगक्षेमनिर्वाहाभिधानस्याभिप्रायवर्णनम् | ४८२ |
| निर्विकारस्यात्मनः कथं भक्तश्रेयोऽभिलाषित्वमिति(रा) | ४९९ |
| एतच्छ्रुत्वा इत्यादिसंजयवचनस्याभिप्रायविशेषप्रतिपादनम् | ५३८ |
| द्वितीयाध्यायाद्युक्तस्यार्थस्य सङ्क्षेपेणानुवादः | ५५२ |
| अज्ञकृतकर्मफलत्यागस्याविलम्बतः श्रेयःसाधनतोक्तेस्तात्पर्यवर्णनम् | ५७२ |
| प्रकृतिं पुरुषं चेति श्लोकव्याख्यानम्(रा) | ५८७ |
| जीवब्रह्माभेदे पूर्वपक्षः | ५९४ |
| जीवब्रह्माभेदे सिद्धान्तः | ५९५ |
| ईश्वरस्य क्षेत्रज्ञस्य चैकत्वे बहुविधानां युक्तीनां निरूपणम् | ५९६ |
| अविषयेऽप्यात्मनि अनात्माध्याससाधनम् | ६०० |
| अविद्यायाः आत्मधर्मत्वनिरासः | ६०३ |
| जीवब्रह्माभेदे शास्त्रानर्थक्यादिदोषपरिहारः | ६०७ |
| यौक्तिकविवेकस्यापरोक्षभ्रमानिवर्तकता | ६१९ |
| क्षेत्रज्ञजीवभेदपरपरव्याख्यानखण्डनम् | ६२० |
| सर्वशास्त्रविदोऽप्यसम्प्रदायवित्त्वे मूर्खवदुपेक्ष्यत्वोक्तिः | ६३१ |
| आत्मनोऽविद्यासम्बन्धस्याप्रामाणिकत्वबोधनाय अविद्याश्रयप्रश्नोत्तरप्रणाली | ६२५ |
| शास्त्रस्याविद्वद्विषयत्वेन विचारोपसंहारः | ६३२ |
| मानित्वादीनामज्ञानत्वोक्तेस्तात्पर्यविवरणम् | ६५९ |
| अनादि मत्परमिति पदच्छेदेन परकीयव्याख्यानिरसनम् | ६६१ |
| ज्ञेयस्य वागगोचरत्वोपपादनम् | ६६३ |
| अवस्तुत्वशङ्कानिरासार्थं मिथ्यारूपमपि ब्रह्मणोऽस्तित्वाधिगमाय ज्ञेयधर्मवत् परिकल्प्योच्यमानं ज्ञानोपयोगीति निरूपणम् | ६७० |

| विषयाः | पृष्ठम् |
|---|---|
| विद्ध्यनादी उभावपि इत्यत्रानादिपदे तत्पुरुषपक्षनिराकरणम् | ६८७ |
| प्रकृतिस्थत्वाख्याविद्यायाः पुरुषसंसृतिहेतुत्ववर्णनम् | ६९३ |
| ज्ञानोदयानन्तरं जन्माभावसमर्थनम् | ७०४ |
| क्षेत्रक्षेत्रज्ञसंयोगस्याध्यासरूपत्वनिरूपणम् | ७११ |
| न हिनस्त्यात्मनात्मानमित्यस्याप्रसक्तप्रतिषेधत्वशङ्कानिरसनम् | ७२१ |
| आत्मनः आविद्यककर्तृत्वभोक्तृत्वयोर्निरूपणम् | ७२७ |
| साङ्ख्याद्वैतमतयोः भेदनिरूपणम्(रा) | ७३४ |
| न करोति न लिप्यत इत्यस्य, निबध्नन्ति महाबाहो इत्यस्य च परस्परविरोधपरिहारप्रकारः | ७४२ |
| संसारवृक्षविषये प्रमाणभूतानां पुराणश्लोकानां प्रदर्शनम् | ७७० |
| जीवस्य भगवदंशत्वोक्तितात्पर्यवर्णनम् | ७८२ |
| तत्त्वज्ञाने सति कृतकृत्यताप्रतिपादकस्य मनुवचनस्य प्रदर्शनम् | ८०४ |
| नित्यनैमित्तिककर्मणामपि फलवत्त्वस्य भगवदिष्टत्वप्रदर्शनम् | ८४४ |
| कर्मत्यागात्यागविकल्पानां ज्ञाननिष्ठसंन्यासिपरत्वव्युदसनम् | ८४६ |
| एतान्यपि तु कर्माणि इत्यस्य व्याख्यानान्तरमनूद्य दोषप्रदर्शनम् | ८५३ |
| कर्मत्यागस्य त्रैविध्यं प्रस्तुत्य सङ्गफलत्यागस्य तृतीयत्वोक्तेः संगमनम् | ८५६ |
| अधिष्ठानादीनां पञ्चानां सर्वकर्मकारणत्वे शरीरवाङ्मनोभिर्यत्कर्म प्रारभते इत्युक्तिविरोधस्य परिहारः | ८६४ |
| हत्वाऽपि न हन्ति इत्यत्र विप्रतिषिद्धोक्तिशङ्कानिरसनम् | ८६९ |
| आत्मनोऽविक्रियत्वस्य श्रुतिस्मृतिन्यायप्रसिद्धत्वप्रतिपादनम् | ८७२ |
| शास्त्रप्रविभक्तानां कर्मणां गुणप्रविभक्तत्वोक्तिविरोधपरिहारः | ८९६ |
| सदोषमपि न त्यजेत् इत्यत्र कर्मणोऽत्यागवचनस्य तात्पर्यविचारः | ९०१ |
| काणादाभिमतासत्कार्यवादस्य निरसनम् | ९०३ |

| विषयाः | पृष्ठम् |
|---|---|
| साङ्ख्याभिमतस्य परिणामवादस्य निरासः | ९०९ |
| विदुषोऽशेषतः कर्मत्यागोपपत्तिसमर्थनम् | ९११ |
| आत्मनो निराकारत्वात् तदाकारज्ञानं कथमिति शङ्कानिरसनम् | ९१५ |
| आत्मनो निराकारत्वात् तज्ज्ञाननिष्ठाया दुःसाधत्ववादनिरसनम् | ९२२ |
| ज्ञानाप्रत्यक्षवादनिरासः | ९२७ |
| ज्ञाननिष्ठापदाभिलप्याया ज्ञानावृत्तेः नापेक्षेत्याक्षेपः | ९३५ |
| स्वाभिमतज्ञाननिष्ठास्वरूपनिरूपणम् | ९३६ |
| गीताशास्त्रे निश्चितं निःश्रेयससाधनं किमिति विचारपूर्वकं निष्कर्षणम् | ९५५ |
| तत्र मीमांसकानां पूर्वपक्षः | ९६२ |
| तन्निरासपूर्वकं सिद्धान्तः | ९६५ |
| नित्यानुष्ठानायासदुःखभोगस्य पूर्वकृदुरितफलत्वनिरासः | ९६६ |
| विद्याया एवाशेषकर्मक्षयकारणत्वोपसंहारः | ९७७ |
| देहादिसंघातेऽहम्प्रत्ययस्य गौणत्ववादनिरासः | ९८२ |
| आत्मीयैः ज्ञानेच्छाप्रयत्नैरात्मनः कर्तृत्वं वास्तवमिति मतनिरासः | ९८५ |
| देहाद्यभिमानस्याविद्यात्मकत्वात् तस्यात्यन्तोच्छेदः सम्यग्ज्ञानादेवेति राद्धान्तप्रदर्शनम् | ९८७ |
| शास्त्रप्रामाण्यादात्मकर्तव्यं गौणैर्देहाद्यात्मभिः क्रियत इति मतनिरासः | ९८९ |
| कर्तृत्वस्याविद्यकत्वे, परमार्थतः कर्तुरभावादप्रामाण्यं कर्मविधिश्रुतेरिति शङ्कानिरासः | ९९२ |
| अव्याप्रियमाणस्याप्यात्मनः सन्निधिमात्रेण कर्तृत्वमिति मतनिरासः | ९९८ |
| सम्यग्दर्शनादात्यन्तिकसंसारोपरमोपसंहारः | १००१ |
| गीताशास्त्रार्थसारः(रा) | १००७ |
| ग्रन्थसमाप्तिः | १०१८ |


*

## ॥ गीताध्यानश्लोकाः ॥

पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं व्यासेन ग्रथितां पुराणमुनिना मध्येमहाभारतम्।
अद्वैतामृतवर्षिणीं भगवतीम् अष्टादशाध्यायिनीम् अम्ब ! त्वामनुसन्दधामि भगवद्गीते ! भवद्वेषिणीम्॥ १ ॥

नमोऽस्तु ते व्यास ! विशालबुद्धे ! फुल्लारविन्दायतपत्रनेत्र !।
येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः॥ २ ॥

प्रपन्नपारिजाताय तोत्त्रवेत्रैकपाणये। ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः॥ ३ ॥

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः। पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥ ४॥

वसुदेवसुतं देवं कंसचाणूरमर्दनम्। देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम्॥ ५॥

भीष्मद्रोणतटा जयद्रथजला गान्धारनीलोपला[१] शल्यग्राहवती कृपेण वहनी कर्णेन वेलाकुला।
अश्वत्थामविकर्णघोरमकरा दुर्योधनावर्तिनी सोत्तीर्णा खलु पाण्डवै रणनदी कैवर्तकः केशवः॥ ६ ॥

पाराशर्यवचःसरोजममलं गीतार्थगन्धोत्कटं नानाख्यानककेसरं हरिकथासम्बोधनाबोधितम्।
लोके सज्जनषट्पदैरहरहः [२]पेपीयमानं मुदा भूयाद् भारतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे॥ ७॥

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम्। यत्कृपा तमहं वन्दे परमानन्दमाधवम्॥ ८॥

यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः [३]स्तुन्वन्ति दिव्यैः स्तवैः वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो यस्यान्तं न विदुः सुरासुरगणाः देवाय तस्मै नमः॥ ९॥

*****

## ॥ गीतामाहात्म्यम् ॥

**धरोवाच—**

भगवन् परमेशान ! भक्तिरव्यभिचारिणी। प्रारब्धं भुज्यमानस्य कथं भवति हे प्रभो !॥ १ ॥

**विष्णुरुवाच—**

प्रारब्धं भुज्यमानो हि गीताभ्यासरतः सदा। स मुक्तः स सुखी लोके कर्मणा नोपलिप्यते॥ २ ॥

महापापादिपापानि गीताध्यानं करोति चेत्। क्वचित् स्पर्शं न कुर्वन्ति नलिनीदलमम्बुवत्॥ ३ ॥

गीतायाः पुस्तकं यत्र यत्र पाठः प्रवर्तते। तत्र सर्वाणि तीर्थानि प्रयागादीनि तत्र वै॥ ४॥

---

१. 'गान्धारनीलोत्पला' इति पा.। २. पीङ् पाने इति धातोः यङ्लुगन्तात् कर्मणि शानचि रूपम्। 'पेपीय्यमानं' इति क्वचित् पा.। ३. स्तुन्वन्ति इति आर्षः प्रयोगः। स्तुवन्ति इत्यर्थः। (भाग. १२.१३.१ )

सर्वे देवाश्च ऋषयो योगिनः पन्नगाश्च ये। गोपाला गोपिका वाऽपि नारदोद्धवपार्षदैः॥५॥

सहायो जायते शीघ्रं यत्र गीता प्रवर्तते। यत्र गीताविचारश्च पठनं पाठनं श्रुतम्।

तत्राहं निश्चितं पृथ्वि ! निवसामि सदैव हि ॥६॥

गीताश्रयेऽहं तिष्ठामि गीता मे चोत्तमं गृहम्। गीताज्ञानमुपाश्रित्य त्रीन् लोकान् पालयाम्यहम्॥७॥

गीता मे परमा विद्या ब्रह्मरूपा न संशयः। अर्धमात्राक्षरा नित्या स्वानिर्वाच्यपदात्मिका॥८॥

चिदानन्देन कृष्णेन प्रोक्ता स्वमुखतोऽर्जुनम्। वेदत्रयी परानन्दा तत्त्वार्थज्ञानसंयुता॥९॥

योऽष्टादशजपो नित्यं नरो निश्चलमानसः। ज्ञानसिद्धिं स लभते ततो याति परं पदम्॥ १०॥

पाठेऽसमर्थः सम्पूर्णे ततोऽर्धं पाठमाचरेत्। तदा गोदानजं पुण्यं लभते नात्र संशयः॥११॥

त्रिभागं पठमानस्तु गङ्गास्नानफलं लभेत्। षडंशं जपमानस्तु सोमयागफलं लभेत्॥१२॥

एकाध्यायं तु यो नित्यं पठते भक्तिसंयुतः। रुद्रलोकमवाप्नोति गणो भूत्वा वसेच्चिरम्॥१३॥

अध्यायं श्लोकपादं वा नित्यं यः पठते नरः। स याति नरतां यावन्मन्वन्तरं वसुन्धरे॥१४॥

गीतायाः श्लोकदशकं सप्त पञ्च चतुष्टयम्। द्वौ त्रीनेकं तदर्धं वा श्लोकानां यः पठेन्नरः॥१५॥

चन्द्रलोकमवाप्नोति वर्षाणामयुतं ध्रुवम्। गीतापाठसमायुक्तो मृतो मानुषतां व्रजेत्॥१६॥

गीताभ्यासं पुनः कृत्वा लभते मुक्तिमुत्तमाम्। गीतेत्युच्चारसंयुक्तो म्रियमाणो गतिं लभेत्॥१७॥

गीतार्थश्रवणाऽऽसक्तो महापापयुतोऽपि वा। वैकुण्ठं समवाप्नोति विष्णुना सह मोदते॥१८॥

गीतार्थं ध्यायते नित्यं कृत्वा कर्माणि भूरिशः। जीवन्मुक्तः स विज्ञेयो देहान्ते परमं पदम्॥१९॥

गीतामाश्रित्य बहवो भूभुजो जनकादयः। निर्धूतकल्मषा लोके गीता याताः परं पदम्॥२०॥

गीतायाः पठनं कृत्वा माहात्म्यं नैव यः पठेत्। वृथा पाठो भवेत् तस्य श्रम एव ह्युदाहृतः॥२१॥

एतन्माहात्म्यसंयुक्तं गीताभ्यासं करोति यः। स तत्फलमवाप्नोति दुर्लभां गतिमाप्नुयात्॥२२॥

सूत उवाच—

माहात्म्यमेतद् गीताया मया प्रोक्तं सनातनम्। गीतान्ते च पठेद् यस्तु यदुक्तं तत्फलं लभेत्॥२३॥

॥इति श्रीवराहपुराणे श्रीगीतामाहात्म्यं सम्पूर्णम्॥

*****

ॐ श्रीपरमात्मने नमः

**अनुभूतिस्वरूपाचार्य - श्रीमदानन्दगिरि - श्रीबेल्लंकोण्डरामरायकविविरचित-व्याख्योपबृंहित-श्रीमच्छाङ्करभाष्योपेता**

# श्रीमद्भगवद्गीता

## ॥ अथ प्रथमोऽध्यायः ॥

**धृतराष्ट्र उवाच—**

**धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः। मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय !॥ १ ॥**

**अत्र च[1] - ( धृतराष्ट्र उवाच —** धर्मक्षेत्र इत्यादि।**)**[3]

### आनन्दगिरिकृतव्याख्या

**एवं गीताशास्त्रस्य साध्यसाधनभूतनिष्ठाद्वयविषयस्य परापराभिधेयप्रयोजनवतो व्याख्येयत्वं प्रतिपाद्य, व्याख्यातुकामः शास्त्रम् , तदेकदेशस्य प्रथमाध्यायस्य द्वितीयाध्यायैकदेशसहितस्य तात्पर्यमाह—** अत्र चेति। **गीताशास्त्रे प्रथमाध्याये प्रथमश्लोके कथासम्बन्ध-प्रदर्शनपरे स्थिते सतीति यावत्।**

[2]**तत्रैषाऽक्षरयोजना—** [3](धृतराष्ट्र उवाचेति।) **धृतराष्ट्रो हि प्रज्ञाचक्षुर्बाह्यचक्षुरभावाद् बाह्यमर्थं प्रत्यक्षयितुमनीशः सन् अभ्याश-वर्तिनं सञ्जयमात्मनो हितोपदेष्टारं पृच्छति—** धर्मक्षेत्र इति। **धर्मस्य** [4]**तद्वृद्धेश्च** क्षेत्रम् **अभिवृद्धिकारणं यदुच्यते कुरुक्षेत्रमिति, तत्र** समवेताः **संगता** युयुत्सवो **योद्धुकामाः, ते च केचिन्मदीया दुर्योधनप्रभृतयः, पाण्डवाश्चापरे युधिष्ठिरादयः, ते च सर्वे युद्धभूमौ संगता भूत्वा किम्** [5]अकुर्वत **कृतवन्तः?** ॥ १ ॥

**किमस्मदीयं प्रबलं बलं प्रतिलभ्य धीरपुरुषैर्भीष्मादिभिरधिष्ठितं, परेषां भयमाविरभूत्? यद्वा पक्षद्वयहिंसानिमित्ताधर्मभय-**

### भाष्यार्कप्रकाशः

अन्धो धृतराष्ट्रः स्वस्य (स्व)भारतयुद्धवृत्तान्तकथनार्थं व्यासेन नियुक्तेन तद्दत्तशक्तिना च सञ्जयेन साकं प्रश्नोत्तरिकया व्यव-हृतवानिति कृत्वा आह भगवान् व्यासः— **धृतराष्ट्र उवाचेति।** धृतं राष्ट्रं जगद्रूपं येन स धृतराष्ट्र ईश्वर इति भगवत्स्मरणात्मकमङ्गलं व्यञ्जनावृत्त्या भगवता बादरायणेन ग्रन्थादौ ग्रथितम्। यद्वा भारतग्रन्थान्तर्गतत्वात् तदादौ यन्मङ्गलं कृतं तदेव गीताशास्त्रस्यापि निर्विघ्नपरिसमाप्तयेऽलमिति न पृथङ् मङ्गलं कृतम्। वस्तुतस्तु गीताशास्त्रस्य 'अशोच्यानि'त्यादित्वात् तदादौ 'भगवानुवाच' इति मङ्गलं ग्रथितमेवेति बोध्यम्। **उवाचेति** । पप्रच्छेत्यर्थः। सञ्जयमिति शेषः।

तदेवाह—**धर्मक्षेत्र इति।** हे सञ्जय! धर्मक्षेत्रे कुरुक्षेत्रे युयुत्सवः समवेता मामकाः पाण्डवाश्चैव किमकुर्वतेत्यन्वयः। धर्मो यज्ञ-युद्धादिः श्रुत्यादिविहितः स्वर्गादिहेतुः, तस्य क्षेत्रं विहितस्थलं **धर्मक्षेत्रम्** । पुण्यभूमित्वादत्र कृतः स्वल्पोऽपि धर्मो बहुफलदो भवतीति द्योतनार्थमिदं विशेषणम्। **कुरुक्षेत्रे** कुरुराजपाल्यभूमौ। योद्धुमिच्छवो **युयुत्सवः**। युध्यतेः सन्नन्तादुः[6]। सन्तः इति शेषः। **समवेताः** सङ्गताः। ममेमे **मामकाः** 'तवकममकावेकवचने' इति ममकादेशः, मत्पुत्राः दुर्योधनादयः। पाण्डोरपत्यानि **पाण्डवाः,** 'तस्यापत्यम्' इत्यण् , धर्मराजादयः। चकारादन्ये सहाया राजानः । एवकाराच्चतुरङ्गसैन्यानि। **किमकुर्वत** किमनुष्ठितवन्तः? किं युद्धं चक्रुः, यद्वा सन्धिमिति प्रश्नार्थः। कर्मफलस्य विजयादिरूपस्यात्मगामित्वादात्मनेपदनिर्देशः॥ १॥

---

१. 'अत्र च'– इत्यस्य 'दृष्ट्वा तु पाण्डवानीकम् इत्यारभ्य.......व्याख्येयो ग्रन्थः'(पृ. ३१) इति द्वितीयाध्यायगतभाष्येण संबन्धः। २. प्रथमाध्यायस्य द्वितीया-ध्यायैकदेशसहितस्य भाष्यकारैस्तात्पर्यतो व्याख्यातत्वेऽपि अक्षरशः अव्याख्यातत्वात् स्वयमक्षरयोजनया तं व्याचष्टे— **तत्रैषेति**। ३. कुण्डलान्तर्गतः पाठः बहुषु पुस्तकेषु न दृश्यते। ४. 'तद्वृद्धेश्च' इति पाठान्तरम्। ५. 'अकुर्वत' इति क्वचिन्नास्ति। ६. 'सनाशंसभिक्ष उः' ( पा.सू.३.२.१६८) इति सूत्रेणेति शेषः।

**सञ्जय उवाच —**

**दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा। आचार्यमुपसङ्गम्य राजा वचनमब्रवीत्॥ २॥**
**पश्यैतां पाण्डुपुत्राणामाचार्य ! महतीं चमूम्। व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता॥ ३॥**
**अत्र शूरा महेष्वासा भीमार्जुनसमा युधि। युयुधानो विराटश्च द्रुपदश्च महारथः॥ ४॥**

आनन्दगिरि व्याख्या

**मासीद् , येनैते युद्धादुपरमेरन् इत्येवं पुत्रपरवशस्य पुत्रस्नेहाभिनिविष्टस्य धृतराष्ट्रस्य प्रश्ने सञ्जयस्य प्रतिवचनम्—**दृष्ट्वेत्यादि। **पाण्डवानां भयप्रसङ्गो नास्तीत्येतत् तुशब्देन द्योत्यते । प्रत्युत दुर्योधनस्यैव राज्ञो भयं प्रभूतं प्रादुर्बभूव।** पाण्डवानां **पाण्डुसुतानां युधिष्ठिरादीनाम्** अनीकं **सैन्यं धृष्टद्युम्नादिभिरतिधृष्टैर्व्यूहाधिष्ठितं**[१] दृष्ट्वा **प्रत्यक्षेण प्रतीत्य, त्रस्तहृदयो दुर्योधनो राजा** तदा **तस्यां संग्रामोद्योगावस्थायाम् ,** आचार्यं **द्रोणनामानम् आत्मनः शिक्षितारं रक्षितारं च श्लाघयन्** उपसंगम्य **तदीयं समीपं विनयेन प्राप्य, भयोद्विग्नहृदयत्वेऽपि तेजस्वित्वादेव**[२] वचनम् **अर्थसहितं वाक्यमुक्तवानित्यर्थः॥ २॥**

**तदेव वचनमुदाहरति—** पश्येति। एताम् **अस्मदभ्याशे महापुरुषानपि भवत्प्रमुखान् अपरिगणय्य भयलेशशून्यामवस्थितां** चमूम् **इमां सेनां पाण्डुपुत्रैर्युधिष्ठिरादिभिरानीतां** महतीम् **अनेकाक्षौहिणीसहितामक्षोभ्यां पश्य - इत्याचार्यं दुर्योधनो नियुङ्क्ते। नियोगद्वारा च तस्मिन् परेषामवज्ञां विज्ञापयन् क्रोधातिरेकमुत्पादयितुमुत्सहते। परकीयसेनाया वैशिष्ट्याभिधानद्वारा परपक्षेऽपि त्वदीयमेव बलमिति सूचयन्नाचार्यस्य तन्निरसनं सुकरमिति मन्वानः सन्नाह—** व्यूढामिति। **राज्ञो द्रुपदस्य पुत्रस्तव च शिष्यो धृष्टद्युम्नो लोके ख्यातिमुपगतः, स्वयं च शस्त्रास्त्रविद्यासम्पन्नो महामहिमा, तेन व्यूहमापाद्याधिष्ठितामिमां चमूं किमिति न प्रतिपद्यसे? किमिति वा मृष्यसीत्यर्थः॥ ३॥**

**अन्येऽपि प्रतिपक्षे पराक्रमभाजो बहवः सन्तीत्यनुपेक्षणीयत्वं परपक्षस्य विवक्ष(य)न्नाह—** अत्रेति। **अस्यां हि प्रतिपक्षभूतायां सेनायां** शूराः **स्वयमभीरवः शस्त्रास्त्रकुशलाः भीमार्जुनाभ्यां सर्वसम्प्रतिपन्नवीर्याभ्यां तुल्या युद्धभूमावुपलभ्यन्ते। तेषां युद्धशौण्डीर्यं**[३] **विशदीकर्तुं विशिनष्टि—** महेष्वासा इति। **इषुरस्यतेऽस्मिन्निति व्युत्पत्त्या धनुस्तदुच्यते**[४]**। तच्च महद् अन्यैरप्रधृष्यम् , तद् येषां ते राजानस्तथा विवक्ष्यन्ते। तानेव परसेनामध्यमध्यासीनान् परपक्षानुरागिणो राज्ञो विज्ञापयति—**युयुधान **इत्यादिना** सौभद्रो द्रौपदेयाश्चेत्यन्तेन ॥ ४॥

भाष्यार्कप्रकाशः

**सञ्जय उवाच** । धृतराष्ट्रं प्रतीति शेषः। तदेवाह— **दृष्ट्वेत्यादिना।** [५]**दृष्ट्वेति।** राजा दुर्योधनस्तु तदा **व्यूढं** व्यूहाकारेण स्थितं **पाण्डवानीकं** पाण्डवसेनां दृष्ट्वा, **आचार्यं** द्रोणम् **उपसङ्गम्य** उपसृत्य, **वचनं** वक्ष्यमाणप्रकारं वाक्यम् , जात्येकवचनम् , वचनानीत्यर्थः। **अब्रवीत्** उवाच। पाकं पचतीतिवन्निर्देशः सर्वकविसम्मतत्वान्न पुनरुक्तिदोषावहः॥ २॥

**पश्येति।** हे आचार्य! **धीमता** बुद्धिशालिना तव शिष्येण द्रुपदपुत्रेण धृष्टद्युम्नेन सेनापतिना **व्यूढां** व्यूहाकारेण स्थापितां **महतीम्** अधिकां प्रबलां वा पाण्डुपुत्राणां सम्बन्धिनीमेतां पुरोवर्तिनीं **चमूं** सेनां पश्य॥ ३॥

**अत्रेति।** **अत्र** पाण्डवसेनायां **युधि** युद्धे विषये भीमार्जुनसमाः **महेष्वासा** महाशरासनाः शूराः सन्तीति शेषः। तेषां नामान्याह— **युयुधान इत्यादिना। युयुधानः** सात्यकिः । **महारथ इति** । 'आत्मानं सारथिं चाश्वान् रक्षन् युध्येत यो नरः। स महारथसंज्ञः स्याद्' इत्युक्तलक्षणः॥ ४॥

---

१. 'व्यूह्याधिष्ठितं' इति पा.। २. 'राजा' इति पदसामर्थ्यलभ्यमिदम्। राजृ दीप्तौ इति धात्वर्थानुसारात्। ३. शौण्डीर्यं प्रागल्भ्यम्। ४. **तदुच्यत इति।** इष्वासः उच्यत इत्यर्थः। ५. **दृष्ट्वेत्यादिना** इति समग्रं संजयवचनं गृहीतम्। **दृष्ट्वेति** इति तु अस्यैव श्लोकस्य विवरणार्थं प्रतीकग्रहणम्।

**धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् । पुरुजित् कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ॥ ५ ॥**
**युधामन्युश्च विक्रान्तः उत्तमौजाश्च वीर्यवान्। सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥**
**अस्माकं तु विशिष्टा ये तान् निबोध द्विजोत्तम !।**
**नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते ॥ ७ ॥**
**भवान् भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः। अश्वत्थामा विकर्णश्च [1]सौमदत्तिस्तथैव च ॥ ८ ॥**
**अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः। नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ ९ ॥**

आनन्दगिरिकृतव्याख्या

[2]( **किञ्च—** धृष्टकेतुरिति। **स्पष्टम्** )॥५॥

**तेषां सर्वेषामपि महाबलपराक्रमभाक्त्वाद् अनुपेक्ष्यत्वं पुनर्विवक्षति —** सर्व एवेति॥६॥

**यद्येवं परकीयं बलमतिप्रभूतं प्रतीत्यातिभीतवदभिदधासि, हन्त सन्धिरेव परैरिष्यताम्, अलं विग्रहाग्रहेणेत्याचार्याभिप्रायमाशङ्क्य ब्रवीति—** अस्माकमिति। तुशब्देना**न्तरुत्पन्नमपि स्वकीयं भयं तिरोदधानो धृष्टतामात्मनो द्योतयति। ये खल्वस्मत्पक्षे व्यवस्थिताः सर्वेभ्यः समुत्कर्षजुषः, तान् मयोच्यमानान्** निबोध **निश्चयेन मद्वचनादवधारयेत्यर्थः। यद्यपि त्वमेव त्रैवर्णिकेषु त्रैविद्यवृद्धेषु प्रधानत्वात् तान् प्रतिपत्तुं प्रभवसि, तथापि मदीयसैन्यस्य ये मुख्यास्तान्** अहं ते **तुभ्यं** संज्ञार्थम् **असंख्येषु तेषु मध्ये कतिचित् नामभिर्गृहीत्वा परिशिष्टानुपलक्षयितुं [**ब्रवीमि**] विज्ञापनं करोमि, न त्वज्ञातं किञ्चित् तव ज्ञापयामीति मत्वाऽऽह—** द्विजोत्तमेति॥७॥

**तानेव स्वसेनानिविष्टान् पुरुषधौरेयान् आत्मीयभयपरिहारार्थं परिगणयति—** भवानित्यादिना ॥८॥

**द्रोणादिपरिगणनस्य परिशिष्टपरिसंख्यार्थत्वं व्यावर्तयति—** अन्ये चेति। **सर्वेऽपि भवन्तमारभ्य मदीयपृतनायां प्रविष्टाः स्वजीवितादपि मह्यं स्पृहयन्तीत्याह—** मदर्थ इति। **यत्तु तेषां शूरत्वमुक्तम्, तदिदानीं विशदयति—** नानेति। **नानाविधानि अनेकप्रकाराणि** शस्त्राणि **आयुधानि** प्रहरणानि **प्रहरणसाधनानि येषां ते तथा। बहुविधायुधसम्पत्तावपि तत्प्रयोगे नैपुण्याभावे तद्वैफल्यमिति चेत्, नेत्याह—** सर्व इति॥९॥

भाष्यार्कप्रकाशः

**धृष्टकेतुरिति।** अत्र वीर्यवानिति, नरपुङ्गवः इति च विशेषणे । अवशिष्टानि विशेष्याणीति विवेकः॥५॥

**युधामन्युरिति।** युधामन्युरुत्तमौजाश्चेति विशेष्ये। तद्विशेषणे—विक्रान्तो वीर्यवानिति। **सौभद्रः** अभिमन्युः। 'तस्येदम्' इत्यण्[3]। द्रौपद्याः अपत्यानि द्रौपदेयाः[4]। 'स्त्रीभ्यो ढगि'ति ढक् । एते सर्वे महारथा एव॥६॥

**अस्माकमिति।** सेनायामिति शेषः। ये **विशिष्टाः** उत्कृष्टाः, महारथत्वेन गणनीया इत्यर्थः। मम सैन्यस्य नायकाः, तान् संज्ञार्थं ते तुभ्यं ब्रवीमि । हे द्विजोत्तम ! तान् **निबोध** जानीहि॥७॥

**भवानिति।** द्रोणाचार्य इत्यर्थः। **समितिं** सङ्ग्रामं जयतीति समितिञ्जय इति कृपविशेषणम्[5]। **सौमदत्तिर्भूरिश्रवाः**॥८॥

**अन्य इति। मदर्थे** मत्कृते **त्यक्तजीविताः** विसृष्टप्राणाः- प्राणानपि त्यक्तुं व्यवसितवन्तः- प्राणैरप्यस्मदुपकारकरणे बद्धबुद्धय इत्यर्थः। न तु मरणकातरा इति भावः। अनेन च दैवादपजयो दुर्योधनस्य सूचितः। न तु तत्र दुर्योधनस्य तात्पर्यमस्तीति कल्पयितुं शक्यम्। अन्येऽपि शूरा बहवः सन्ति। सर्वेऽपि **नानाशस्त्रप्रहरणाः** नानाविधशस्त्रादिसाधनवन्तः युद्धविशारदाश्च भवन्तीति शेषः॥९॥

---

१. 'सौमदत्तिर्जयद्रथः'इति पा.। २. कुण्डलान्तर्गतः पाठः क्वचिन्नास्ति। ३. सुभद्रायाः अयं सौभद्रः।अपत्यार्थे तु ढकि सौभद्रेय इति स्यादिति भावः। ४. द्रौपद्याः पञ्च पुत्राः - 'प्रथमः प्रतिविन्ध्यस्तु सुतसोमस्तथा परः। श्रुतकीर्तिः शतानीकः श्रुतकर्मा च पञ्चमः॥' इति श्लोकोक्ताः। ५. 'सर्वविशेषणं वा' इत्यपि पाठः।

**अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्। पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम्॥ १०॥**
**अयनेषु च सर्वेषु यथाभागमवस्थिताः। भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि॥ ११॥**
**तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः। सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान्॥ १२॥**

आनन्दगिरिकृतव्याख्या

**राजा पुनरपि स्वकीयभयाभावे हेत्वन्तरमाचार्यं प्रत्यावेदयति—** अपर्याप्तमिति। **अस्माकं खलु** इदम् **एकादशसंख्याकाक्षौहिणीपरिगणितम् अपरिमितं बलं, भीष्मेण च प्रथितमहामहिम्ना सूक्ष्मबुद्धिना सर्वतो रक्षितं,** पर्याप्तम् **परेषां परिभवे समर्थम्। एतेषां पुनस्तदल्पं सप्तसंख्याकाक्षौहिणीपरिमितं बलं, भीमेन चपलबुद्धिना कुशलताविकलेन परिपालितम्,** अपर्याप्तम् **अस्मानभिभवितुमसमर्थमित्यर्थः**[1]। **अथवा तदिदमस्माकं बलं भीष्माधिष्ठितम्** अपर्याप्तम् **अपरिमितम् अधृष्यमक्षोभ्यम्, एतेषां तु पाण्डवानां बलं भीमेनाभिरक्षितं** पर्याप्तं **परिमितम्, सोढुं शक्यमित्यर्थः। अथवा** तत् **पाण्डवानां बलम्** अपर्याप्तं **नालम्** अस्माकम् **अस्मभ्यम्। भीष्माभिरक्षितं भीष्मोऽभिरक्षितोऽस्मै परबलनिवृत्त्यर्थमिति तदेव तथोच्यते।** इदं **पुनरस्मदीयं बलम्** एतेषां **पाण्डवानां** पर्याप्तं **परिभवे समर्थम्, भीमाभिरक्षितं भीमो दुर्बलहृदयो यस्मादस्मै परबलनिवृत्त्यर्थमभिरक्षितः। तस्मादस्माकं न किञ्चिदपि भयकारणमस्तीत्यर्थः॥ १०॥**

**स्वकीयबलस्य भीष्माधिष्ठितत्वेन बलिष्ठत्वमुक्त्वा भीष्मशेषत्वेन तदनुगुणत्वं द्रोणादीनां प्रार्थयते—** अयनेष्विति। **कर्तव्यविशेषद्योती चशब्दः। समरसमारम्भसमये योधानां यथाप्रधानं युद्धभूमौ पूर्वापरादिदिग्विभागेनावस्थितिस्थानानि नियम्यन्ते। तान्यत्र** अयनानि **उच्यन्ते। सेनापतिश्च सर्वसैन्यमधिष्ठाय मध्ये तिष्ठति। तेषु सर्वेषु प्रक्लृप्तं प्रविभागमप्रत्याख्याय, भवान् अश्वत्थामा कर्णश्चेत्येवमादयो भवन्तः सर्वेऽवस्थिताः सन्तो भीष्ममेव सेनापतिं सर्वतो रक्षन्तु। तस्य हि रक्षणे सर्वमस्मदीयं बलं रक्षितं स्यात्, परबलनिवृत्त्यर्थत्वेन तस्यास्माभी रक्षितत्वादित्यर्थः॥ ११॥**

**तमेवमाचार्यं प्रति संवादं कुर्वन्तं भयाविष्टं राजानं दृष्ट्वा तदभ्याशवर्ती पितामहः तद्बुद्ध्यनुरोधार्थमित्थं कृतवानित्याह—** तस्येति। **राज्ञो दुर्योधनस्य** हर्षं **बुद्धिगतमुल्लासविशेषं परपरिभवद्वारा स्वकीयविजयद्वारकं सम्यगुत्पादयन्, भयं तदीयमपनिनीषुः उच्चैः सिंहनादं कृत्वा शङ्खमापूरितवान्। किमिति दुर्योधनस्य हर्षमुत्पादयितुं पितामहो यतते? कुरुवृद्धत्वात्, तस्य कुरुराजत्वात्, पितामहत्वाच्चास्य दुर्योधनभयापनयनार्था प्रवृत्तिरुचिता, तदुपजीवितया तद्वशत्वाच्च। तस्य च सिंहनादे शङ्खशब्दे च परेषां हृदयव्यथा सम्भाव्यते,**

भाष्यार्कप्रकाशः

**अपर्याप्तमिति। तत्** तस्मात् पूर्वोक्तविधत्वादित्यर्थः। भीष्माभिरक्षितमस्माकं बलम् **अपर्याप्तम्** असमग्रं परबलविजयाक्षममित्यर्थः। भीष्मस्य वृद्धत्वादिति भावः। इदं च भीष्मसामर्थ्यापरिज्ञानमूलकं वाक्यम्। भीष्मस्य धर्मिष्ठत्वेन पाण्डवपक्षपातित्वादिति वा भावः। **इदं** दृश्यमानं भीमाभिरक्षितम् **एतेषां** पाण्डवानां बलं तु पर्याप्तम्। भीमस्य तरुणत्वात्, सर्वधार्तराष्ट्रवधदीक्षितत्वाद्, आबाल्यात् ससोदरस्य दुर्योधनस्य भीमेन बहुशो निर्जितत्वाच्च भयहेतुर्भीमो दुर्योधनस्येति भावः॥ १०॥

**अयनेष्विति। हि** तस्मात् **सर्व एव** सर्वे च भवन्तः सर्वेषु **अयनेषु** स्थानेषु यथाभागमवस्थिताः सन्तः भीष्ममेवाभिरक्षन्तु। भीष्मस्य सेनापतित्वात् तस्मिन् रक्षिते सर्वसेना रक्षिता स्यादिति भावः॥ ११॥

**तस्येति।** प्रतापवान् **कुरुवृद्धः** कुरुषु वृद्धः **पितामहो** भीष्मः, **तस्य** दुर्योधनस्य हर्षं **सञ्जनयन्** सम्यगुत्पादयन् सन् उच्चैः सिंहनादं **विनद्य** कृत्वेत्यर्थः। शङ्खं **दध्मौ** पूरयामास। सर्वोत्कृष्टतमस्वसामर्थ्यप्रदर्शनार्थमिति भावः॥ १२॥

---

१. अस्माकमिदं बलं भीष्माभिरक्षितं पर्याप्तम्, एतेषां तु तद् बलं भीमाभिरक्षितम् अपर्याप्तम् इति प्रथमयोजना। द्वितीययोजना तु— तदिदम् अस्माकं बलं भीष्माभिरक्षितम् अपर्याप्तम्, एतेषां तु बलं भीमाभिरक्षितं पर्याप्तम् इति। तृतीययोजना तु— तद् बलम् = पाण्डवानां बलम् अस्माकम् अपर्याप्तम्, यतो भीष्माभिरक्षितं तत्। इदं बलम्— अस्मदीयं बलं तु एतेषां पर्याप्तम्, यतो भीमाभिरक्षितम् इदम् इति। अन्या अपि योजनाः व्याख्यान्तरेषु द्रष्टव्याः।

**ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः। सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्॥ १३॥**

**ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ। माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः॥ १४॥**

**पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः। पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः॥ १५॥**

**अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः। नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६॥**

**काश्यश्च परमेष्वासः शिखण्डी च महारथः। धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः॥ १७॥**

**द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते !। सौभद्रश्च महाबाहुः शङ्खान् दध्मुः पृथक् पृथक्॥ १८॥**

आनन्दगिरिकृतव्याख्या

**दूरादेवारिनिवहं प्रति भयजननलक्षणप्रतापत्वादित्यर्थः॥ १२॥**

**राजाभिप्रायं प्रतीत्य भीष्मप्रवृत्त्यनन्तरं तत्पक्षैस्तैस्तै राजभिः शङ्खादयो वाद्यविशेषा झटिति शब्दवन्तः सम्पादिताः। स च शङ्खादिप्रयुक्तशब्दः** तुमुलो **बहुलं भयं परेषां परिद्योतयन्नासीदित्याह—** तत इति॥ १३॥

**एवं दुर्योधनपक्षे प्रवृत्तिमालक्ष्य परिसरवर्तिनौ केशवार्जुनौ श्वेतैर्हयैरतिबलपराक्रमैर्युक्ते** महति **अप्रधृष्ये रथे व्यवस्थितौ अप्राकृतौ शङ्खौ पूरितवन्तावित्याह—** ततः श्वेतैर्हयैरिति॥ १४॥

**तयोः शङ्खयोर्दिव्यत्वमेवावेदयति—** पाञ्चजन्यमिति। **केशवार्जुनयोर्युद्धाभिमुख्यं दृष्ट्वा संहृष्टः स्वारस्येन समररसिको भीमसेनोऽपि युद्धाभिमुखोऽभूदित्याह—** पौण्ड्रमिति॥ १५॥

**एतेषामीदृशीं प्रवृत्तिं प्रतीत्य परिपालनावकाशमासाद्य राज्ञो युधिष्ठिरस्यापि प्रवृत्तिं दर्शयति—** अनन्तेति। **ज्यायसां भ्रातॄणामनुसरणमावश्यकमिति मत्वा तयोर्यवीयसोर्भ्रात्रोरपि प्रवृत्तिमाह—** नकुल इति॥ १६॥

**अन्येषामपि तत्पक्षीयाणां राज्ञामैकमत्यं विज्ञापयन् धृतराष्ट्रस्य दुराशां सञ्जयो व्युदस्यति—** काश्यश्चेत्यादिना[१]। **परमेष्वासादिविशेषणचतुष्टयं** [२] **प्रत्येकं संबध्यते ॥ १७, १८॥**

भाष्यार्कप्रकाशः

**तत इति।** शङ्खादयो वाद्यविशेषाः सहसैव **अभ्यहन्यन्त** वादिताः सेनाचारिपुरुषैरिति भावः। स **शब्दः** ध्वनिः **तुमुलः** सङ्कुलः अभवत्॥ १३॥

**तत इति।** श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ **माधवः** कृष्णः, **पाण्डवो**ऽर्जुनश्च दिव्यौ शङ्खौ प्रदध्मतुरेव॥ १४॥

**पाञ्चजन्यमिति। हृषीकेशः** कृष्णः पाञ्चजन्यं शङ्खं दध्मौ । धनञ्जयो देवदत्तं दध्मौ । **भीमकर्मा** शत्रुभयंकरव्यापारो [३]वृकस्योदरमिवोदरं यस्य स **वृकोदरो** भीमः **पौण्ड्रं** तन्नामकं महाशङ्खं दध्मौ॥ १५॥

**अनन्तेति। राजा** जनरञ्जकः **कुन्तीपुत्रः** श्लाघ्यमातृवंशो युधिष्ठिरः अनन्तविजयं दध्मौ। नकुलः सहदेवश्च द्वौ क्रमेण सुघोषं मणिपुष्पकं च दध्मतुः॥ १६॥

**काश्य इति। परमेष्वासः** महाशरासनः॥

**द्रुपद इति।** हे पृथिवीपते ! काश्यादयः सर्वशः पृथक्पृथक् शङ्खान् दध्मुः॥ १७, १८॥

---

१. अतःपरम् - **द्रुपद इति।** इति प्रतीकः क्वचित् पठ्यते। श्लोकद्वयस्य सह व्याख्यानादनावश्यकं प्रतीकग्रहणम्। २. विशेषणचतुष्टयम् - परमेष्वासः, महारथः, अपराजितः, महाबाहुः इति। ३. 'यस्य तीक्ष्णो वृको नाम जठरे हव्यवाहनः। मया दत्तः स धर्मात्मा तेन चासौ वृकोदरः॥' इति मात्स्यवचनात् वृको नामाग्निरुदरे यस्य स वृकोदरो भीमः। तेन बह्वन्नपचनसामर्थ्यादतिबलिष्ठत्वं सूचितमिति परे। वृकस्येव कृशमुदरं यस्येत्यन्ये।

**स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत्। नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन्॥ १९॥**
**अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः। प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः॥ २०॥**
**हृषीकेशं तदा वाक्यमिदमाह महीपते !।**

**अर्जुन उवाच—**

**सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत !॥ २१॥**
**यावदेतान् निरीक्षेऽहं योद्धुकामानवस्थितान्। कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे॥ २२॥**

आनन्दगिरिकृतव्याख्या

**तैस्तैः राजभिः शङ्खानापूरयद्भिरापादितो महान् घोषः** तुमुलोऽतिभैरवो नभश्चान्तरिक्षं **पृथिवीं च भुवनं लोकत्रयं सर्वमेव विशेषेणानुक्रमेण** नादयन् **नादयुक्तं कुर्वन्** धार्तराष्ट्राणां **दुर्योधनादीनां** हृदयानि **अन्तःकरणानि** व्यदारयद् **विदारितवान्। युज्यते हि तत्प्रेरितशङ्खघोषश्रवणात् त्रैलोक्याक्रोशे तमुपशृण्वतां तेषां हृदयेषु दोधूयमानत्वम्। तदाह—** स घोष इति॥ १९॥

**दुर्योधनादीनां धार्तराष्ट्राणामेवं भयप्राप्तिं प्रदर्श्य पार्थादीनां पाण्डवानां तद्वैपरीत्यमिदानीमुदाहरति—**अथेत्यादिना। **भीतिप्रत्युपस्थितेरनन्तरं पलायने प्राप्तेऽपि** [1]**धैर्यमुत्पाद्य** व्यवस्थितान् **अप्रचलितानेव परान् प्रत्यक्षेणोपलभ्य, हनूमन्तं वानरवरं ध्वजलक्षणत्वेनादायावस्थितोऽर्जुनो भगवन्तमाहेति सम्बन्धः। किमाहेत्यपेक्षायामिदं वक्ष्यमाणं हेतुमद् वचनमित्याह—**वाक्यमिदमिति। **कस्यामवस्थायामिदमुक्तवानिति? तत्राह—** प्रवृत्त इति। शस्त्राणाम् **इषुप्रासप्रभृतीनां** सम्पातः **समुदायस्तस्मिन् प्रवृत्ते, प्रयोगाभिमुखे सतीति यावत्। किं कृत्वा भगवन्तं प्रत्युक्तवानिति, तदाह—** धनुरिति। **महीपतिशब्देन राजा प्रज्ञाचक्षुः सञ्जयेन सम्बोध्यते। तदेव गाण्डीवधन्वनो वाक्यमनुक्रामति—** सेनयोरिति। **'उभयोरपि सेनयोः सन्निहितयोः मध्ये मदीयं रथं स्थापये'त्यर्जुनेन सारथ्ये सर्वेश्वरो नियुज्यते। किं हि भक्तानामशक्यम् , यद् भगवानपि तन्नियोगमनुतिष्ठति। युक्तं हि भगवतो भक्तपारवश्यम्। अच्युतेति सम्बोधनतया [ सम्बोधयता ] भगवतः स्वरूपं न कदाचिदपि प्रच्युतिं प्राप्नोतीत्युच्यते ॥ २०,२१॥**

**'मध्ये रथं स्थापये'त्युक्तम्। तदेव रथस्थापनस्थानं निर्धारयति—** यावदिति। एतान् **प्रतिपक्षे प्रतिष्ठितान् भीष्मद्रोणादीन् अस्माभिः सार्धं योद्धुमपेक्षावतो यावद् गत्वा निरीक्षितुमहं क्षमः स्याम् , तावति प्रदेशे रथस्य स्थापनं कर्तव्यमित्यर्थः। किञ्च प्रवृत्ते युद्धप्रारम्भे, बहवो राजानोऽमुष्यां युद्धभूमावुपलभ्यन्ते , तेषां मध्ये कैः सह मया योद्धव्यम्? न हि क्वचिदपि मम गतिप्रतिहतिरस्तीत्याह—** कैर्मयेति॥ २२॥

भाष्यार्कप्रकाशः

**स इति**। तुमुलः स घोषो नभश्च पृथिवीं च [2]**अनुनादयन्** प्रतिध्वनयन् सन् धार्तराष्ट्राणां हृदयानि **व्यदारयत्** बिभेदैव[3]॥ १९॥

**अथेति**। अथ **कपिध्वजः** हनुमत्केतुः **पाण्डवः** अर्जुनः **व्यवस्थितान्** युद्धाय समवस्थितान् धार्तराष्ट्रान् दृष्ट्वा **शस्त्रसम्पाते** शस्त्रप्रयोगे प्रवृत्ते सति **धनुः** गाण्डीवम् **उद्यम्य** उद्धृत्य॥ २०॥

**हृषीकेशमिति**। हे **महीपते** धृतराष्ट्र ! हृषीकेशं प्रति तदा **इदं** वक्ष्यमाणं **वाक्यं** वचनमाह— हे अच्युत! मे रथमुभयोः सेनयोर्मध्ये स्थापय॥ २१॥

**यावदिति**। यावदहं **योद्धुकामान्** योद्धुं कामो येषां तान् , 'तुम् काममनसोरपि' इति मकारलोपः, अवस्थितानेतान् निरीक्षे, तावत् स्थापयेत्यर्थः। अस्मिन् **रणसमुद्यमे** युद्धव्यापारे कैः सह मया योद्धव्यम् ?॥ २२॥

१. 'वैपरीत्याद् व्यवस्थितान्' इति पा.। २. 'व्यनुनादयन्' इति पाठः संभाव्यते। ३. 'बिभेदैव' इति एवकारस्य भिन्नक्रमेण योजना प्रदर्शिता।

**योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः। धार्तराष्ट्रस्य दुर्बुद्धेः युद्धे प्रियचिकीर्षवः॥२३॥**

**सञ्जय उवाच—**

**एवमुक्तो हृषीकेशो गुडाकेशेन भारत !। सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम्॥२४॥**

**भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्।**
**उवाच पार्थ ! पश्यैतान् समवेतान् कुरूनिति॥२५॥**

**तत्रापश्यत् स्थितान् पार्थः पितॄनथ पितामहान्।**
**आचार्यान् मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखींस्तथा॥२६॥**

आनन्दगिरिकृतव्याख्या

[1]**प्रतियोगिनामभावे कथं तव युद्धौत्सुक्यं फलवद् भवेदिति? तत्राह—** योत्स्यमानानिति। **ये केचिदेते राजानो नानादेशेभ्योऽत्र कुरुक्षेत्रे समवेतास्तानहं** योत्स्यमानान् **परिगृहीतप्रहरणोपायान् अतितरां संग्रामसमुत्सुकानुपलभे। तेन प्रतियोगिनां बाहुल्यमित्यर्थः। तेषामस्माभिः सह पूर्ववैराभावे कथं प्रतियोगित्वं प्रकल्प्यते? तत्राह—** धार्तराष्ट्रस्येति। **धृतराष्ट्रपुत्रस्य दुर्योधनस्य दुर्बुद्धेः स्वरक्षणोपायमप्रतिपद्यमानस्य युद्धाय संरम्भं कुर्वतो** युद्धे **युद्धभूमौ स्थित्वा प्रियं कर्तुमिच्छवो राजानः समागता दृश्यन्ते। तेन तेषामौपाधिकमस्मत्प्रतियोगित्वमुपपन्नमित्यर्थः॥२३॥**

**'एवमर्जुनेन प्रेरितो भगवानहिंसारूपं धर्ममाश्रित्य प्रायशो युद्धात् तं निवर्तयिष्यति' इति धृतराष्ट्रस्य मनीषां दुदूषयिषुः सञ्जयो राजानं प्रत्युक्तवानित्याह—** सञ्जय इति। **भगवतोऽपि भूभारापहारार्थं प्रवृत्तस्यार्जुनाभिप्रायप्रतिपत्तिद्वारेण स्वाभिसन्धिं प्रतिलभमानस्य परोक्तिमनुसृत्य स्वाभिप्रायानुकूलमनुष्ठानमादर्शयति—** एवमिति। **भीष्मद्रोणादीनामन्येषां च राज्ञाम् अन्तिके रथं स्थापयित्वा भगवान् किं कृतवानिति? तदाह—** उवाचेति। एतान् **अभ्याशे वर्तमानान्** कुरून् **कुरुवंशप्रसूतान्** [2]**भवद्भिः सार्धं युद्धार्थं संगतान् पश्य। दृष्ट्वा च यैः सहात्र युयुत्सा तवोपावर्तते, तैः साकं युद्धं कुरु। नो खल्वेतेषां शस्त्रास्त्रशिक्षावतां महीक्षितामुपेक्षोपपद्यते। सारथ्ये तु न मनः खेदनीयमित्यर्थः॥२४,२५॥**

**एवं स्थिते, 'महान् अधर्मो हिंसा' इति विपरीतबुद्ध्या युद्धादुपरिरंसा पार्थस्य संप्रवृत्तेति कथयति—** तत्रेत्यादिना। **सप्तम्या**[3] **भगवदभ्यनुज्ञाने समरसमारम्भाय संवृत्ते सतीत्येतदुच्यते। सेनयोरुभयोरपि स्थितान् पार्थोऽपश्यदिति सम्बन्धः।** [4]अथ**शब्दः तथाशब्दपर्यायः।** श्वशुरा **भार्याणां जनयितारः।** सुहृदो **मित्राणि कृतवर्मप्रभृतयः॥२६॥**

भाष्यार्कप्रकाशः

**योत्स्यमानानिति।** युद्धे दुर्बुद्धेः **धार्तराष्ट्रस्य** दुर्योधनस्य **प्रियचिकीर्षवः** प्रियं कर्तुमिच्छवः सन्तः ये एते अत्र समागताः, **योत्स्यमानान्** युद्धं करिष्यतः तान् अहम् **अवेक्षे** पश्यामि॥२३॥

**एवमिति, भीष्मेति च।** एवं **गुडाकेशेन** अर्जुनेनोक्तो हृषीकेशः, हे **भारत** धृतराष्ट्र ! उभयोः सेनयोर्मध्ये **भीष्मद्रोणप्रमुखतः** भीष्मद्रोणयोरग्रे । सार्वविभक्तिकस्तसिः। सर्वेषां **महीक्षितां** राज्ञां च प्रमुखतः रथोत्तमं स्थापयित्वा 'हे पार्थ! एतान् समवेतान् **कुरून्** कुरुवंशजान् दुर्योधनादीन् पश्य' इत्युवाच॥२४,२५॥

**तत्रेति।** अथ पार्थः **तत्र** युद्धभुवि उभयोः सेनयोरपि स्थितान् - पितॄन् , पितामहान् , आचार्यान् , मातुलान् , भ्रातॄन् , पुत्रान्

१. प्रतियोगिनः प्रतिपक्षिणः। २. भवद्भिः पाण्डवैरित्यर्थः। ३. तत्रेति सप्तम्यन्तपदेनेत्यर्थः। ४. पितॄनथेत्यत्रेति शेषः। अव्ययानामनेकार्थत्वादिति भावः।

**श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि।**
**तान् समीक्ष्य स कौन्तेयः सर्वान् बन्धूनवस्थितान्॥ २७॥**
**कृपया परयाऽऽविष्टो विषीदन्निदमब्रवीत्।**

**अर्जुन उवाच—**

**दृष्ट्वेमं स्वजनं कृष्ण ! युयुत्सुं समुपस्थितम्॥ २८॥**
**सीदन्ति मम गात्राणि मुखं च परिशुष्यति।**
**वेपथुश्च शरीरे मे रोमहर्षश्च जायते॥ २९॥**
**गाण्डीवं स्रंसते हस्तात् त्वक् चैव परिदह्यते।**
**न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः॥ ३०॥**
**निमित्तानि च पश्यामि विपरीतानि केशव !। न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे॥ ३१॥**

आनन्दगिरिकृतव्याख्या

**सेनाद्वये व्यवस्थितान् यथोक्तान् पितृपितामहादीनालोच्य[१] परमकृपापरवशः सन्नर्जुनो भगवन्तमुक्तवानित्याह—** तानिति। विषीदन् **यथोक्तानां पित्रादीनां हिंसासंरम्भनिबन्धनं विषादमुपतापं कुर्वन्नित्यर्थः॥ २७॥**

**तदेवेदंशब्दवाच्यं वचनमुदाहरति—** दृष्ट्वेति। **आत्मीयं बन्धुवर्गं युद्धेच्छया युद्धभूमावुपस्थितमुपलभ्य शोकप्रवृत्तिं दर्शयति—** सीदन्तीति। **देवांशस्यैवार्जुनस्यानात्मविदः स्वपरदेहेष्वात्मात्मीयाभिमानवतः [२]तत्प्रियस्य युद्धारम्भे तन्मृत्युप्रसङ्गदर्शिनः[३] शोको महानासीदित्यर्थः ॥ २८॥**

**अङ्गेषु व्यथा, मुखे परिशोषश्चेत्युभयं शोकलिङ्गमुक्तम् । सम्प्रति वेपथुप्रभृतीनि भीतिलिङ्गान्युपन्यस्यति—** वेपथुश्चेति। रोमहर्षो **रोम्णां गात्रेषु पुलकितत्वम्॥ २९॥**

**किं चाधैर्यमपि संवृत्तमित्याह—** न चेति। **मोहोऽपि महान् भवतीत्याह—** भ्रमतीवेति॥ ३०॥

**विपरीतनिमित्तप्रतीतेरपि मोहो भवतीत्याह—** निमित्तानीति। **तानि विपरीतानि निमित्तानि, यानि वामनेत्रस्फुरणादीनि। युद्धे**

भाष्यार्कप्रकाशः

पौत्रान्, सखीन्, **तथा** तद्वत् श्वशुरान्, सुहृदश्चापि अपश्यत्॥ २६ $^{1}/_{2}$॥

**तानिति।** स **कौन्तेयः** कुन्तीपुत्रः अवस्थितान् तान् सर्वान् बन्धून् **समीक्ष्य** दृष्ट्वा **परया** अधिकया कृपया आविष्टः **विषीदन्** विषादं गच्छन् **इदं** वक्ष्यमाणं वचनमब्रवीत्॥ २७ $^{1}/_{2}$॥

**दृष्ट्वेति, सीदन्तीति च।** हे कृष्ण ! **युयुत्सुं** योद्धुमिच्छुं **समुपस्थितम्** युयुत्सया समागतमित्यर्थः। इमं स्वजनं दृष्ट्वा मम गात्राणि **सीदन्ति** अवसादं प्राप्नुवन्ति, मुखं च परिशुष्यति । मे शरीरे **वेपथुः** कम्पः, **रोमहर्षो** रोमाञ्चश्च जायते॥ २८, २९॥

**गाण्डीवमिति।** मे हस्ताद् गाण्डीवं **स्रंसते** भ्रश्यति। मे त्वक् च परिदह्यत एव। अहमवस्थातुं न शक्नोमि। मे मनः भ्रमतीव॥ ३०॥

**निमित्तानीति।** हे केशव! विपरीतानि निमित्तानि च पश्यामि। **आहवे** युद्धे स्वजनं हत्वा श्रेयो नैवानुपश्यामि॥ ३१॥

१. 'आलोक्य' इति पा.। २. ते उक्ताभिमानविषयाः स्वपरदेहाः प्रिया यस्येति अर्जुनविशेषणम्। ३.'दर्शनशोको' इति पा.।

**न काङ्क्षे विजयं कृष्ण ! न च राज्यं सुखानि च।**
**किं नो राज्येन गोविन्द ! किं भोगैर्जीवितेन वा॥ ३२॥**
**येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च। त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च॥ ३३॥**
**आचार्याः पितरः पुत्रास्तथैव च पितामहाः। मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा॥ ३४॥**
**एतान् न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन !। अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते॥ ३५॥**
**निहत्य धार्तराष्ट्रान् नः का प्रीतिः स्याज्जनार्दन !।**
**पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः॥ ३६॥**

आनन्दगिरिकृतव्याख्या

**स्वजनहिंसया फलानुपलम्भादपि तस्मादुपरिरंसा जायत इत्याह—** न चेति॥ ३१॥

**प्राप्तानां युयुत्सूनां हिंसया विजयो राज्यं सुखानि च लब्धुं शक्यानीति कुतो युद्धादुपरतिरित्याशङ्क्याह—** न काङ्क्ष इति। **किमिति राज्यादिकं सर्वाकाङ्क्षितत्वान्न काङ्क्ष्यते, तेन हि पुत्रभ्रात्रादीनां स्वास्थ्यमाधातुं शक्यमित्याशङ्क्याह—** किमिति॥ ३२॥

**राज्यादीनामाक्षेपे हेतुमाह—** येषामिति॥ ३३॥

**तानेव विशिनष्टि—** आचार्या इति। श्यालाः **भार्याणां भ्रातरो धृष्टद्युम्नप्रभृतयः॥ ३४॥**

**वध्येष्वपि स्वराज्यपरिपन्थिष्वाततायिषु कृपाबुद्ध्या स्वधर्माद् युद्धात् पूर्वोक्तमोहादिवशात् प्रच्युतिं प्रदर्शयति—** एतानिति। **'जिघांसन्तं जिघांसीयात्' इति न्यायादेतेषां हिंसा न दोषायेत्याशङ्क्याह—** घ्नतोऽपीति। **पृथिवीप्राप्त्यर्थं हि हननमेतेषामिष्यते। न च तत्प्राप्तिः समीहितेति कैमुतिकन्यायेन दर्शयति—** अपीति। **न हि महदपि त्रैलोक्यलक्षणं राज्यं लब्धुं स्वजनहिंसायै मनो मदीयं स्पृहयति। पृथिवीप्राप्त्यर्थं पुनर्बन्धुवधं न श्रद्दधामीति किं वक्तव्यमित्यर्थः॥ ३५॥**

**दुर्योधनादीनां शत्रूणां निग्रहे प्रीतिप्राप्तिसम्भवाद् युद्धं कर्तव्यमित्याशङ्क्याह—** निहत्येति। **यदि पुनरमी दुर्योधनादयो न निगृह्येरन्, भवन्तस्तर्हि तैर्निगृहीता दुःखिताः स्युरित्याशङ्क्याह—** पापमेवेति। **यदीमे दुर्योधनादयो निर्दोषानेवास्मान् अकस्माद् युद्धभूमौ**

भाष्यार्कप्रकाशः

**नेति।** हे कृष्ण ! विजयं **न काङ्क्षे** नेच्छामि। राज्यं च न काङ्क्षे। सुखानि च न काङ्क्षे। हे गोविन्द ! नः राज्येन किम्? भोगैः किम्? जीवितेनापि किम्?॥ ३२॥

**येषामिति। नः** अस्माभिः येषामर्थे राज्यं काङ्क्षितं, भोगाः काङ्क्षिताः, सुखानि च काङ्क्षितानि, त इमे प्राणान् धनानि च त्यक्त्वा युद्धेऽवस्थिताः॥ ३३॥

**आचार्या इति।** आचार्यादिशब्दानां ते इति पूर्वश्लोकस्थतच्छब्देनान्वयः॥ ३४॥

**एतानिति।** हे मधुसूदन ! **घ्नतोऽपि** मां मारयतोऽपि **एतान्** आचार्यादीन् त्रैलोक्यराज्यस्य हेतोरपि हन्तुं नेच्छामि, किं पुनर्महीकृते भूम्यर्थम्?॥ ३५॥

**निहत्येति।** हे जनार्दन ! धार्तराष्ट्रान् **निहत्य,** तद्धननादित्यर्थः, नः का प्रीतिः स्यात्? न काऽपीत्यर्थः।[1] मधुसूदन जनार्दनेति सम्बुद्धिद्वयेन दुष्टराक्षसजनहननमेव तवापि सम्मतम्, न त्वाचार्यादिस्वजनहननमिति सूच्यते। एतान् **आततायिनः** - 'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारहरौ चैव षडेते आततायिनः॥' इत्युक्तलक्षणान् **हत्वा,** एतद्धननादित्यर्थः, अस्मान् पापमेवाश्रयेत्

१. मधुनामकराक्षसघातक, असुराणां नरकादिप्रापक (द्र.भ.गी. १०-१८) इत्यर्थकसंबुद्धिद्वयसूचितमर्थमाह— मध्विति।

**तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान् स्वबान्धवान्।**
**स्वजनं हि कथं हत्वा सुखिनः स्याम माधव !॥ ३७॥**
**यद्यप्येते न पश्यन्ति लोभोपहतचेतसः।**
**कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्॥ ३८॥**
**कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम्।**
**कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन !॥ ३९॥**
**कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः। धर्मे नष्टे कुलं कृत्स्नम् अधर्मोऽभिभवत्युत॥ ४०॥**

आनन्दगिरिकृतव्याख्या

**हन्युः, तदैतान् 'अग्निदो गरदश्च' इत्यादिलक्षणोपेतानाततायिनो निर्दोषस्वजनहिंसाप्रयुक्तं पापं पूर्वमेव पापिनः समाश्रयेदित्यर्थः[१]। अथवा यद्यप्येते भवन्त्याततायिनः, तथाप्येतानतिशोच्यान् दुर्योधनादीन् हिंसित्वा हिंसाकृतं पापमस्मानेवाश्रयेत्[२]। अतो नास्माभिरेते हन्तव्याः इत्यर्थः। [३]अथवा गुरुभ्रातृसुहृत्प्रभृतीनेतान् हत्वा वयमाततायिनः स्याम। ततश्चैतान् हत्वा तत्कृतं पापमाततायिनोऽस्मानेव समाश्रयेदिति युद्धादुपरमणमस्माकं श्रेयस्करमित्यर्थः॥ ३६॥**

**फलाभावादनर्थसम्भवाच्च परहिंसा न कर्तव्येत्युपसंहरति—** तस्मादिति। **किञ्च राज्यसुखमुद्दिश्य [४]युद्धमुपक्रम्यते। न च स्वजनपरिक्षये सुखमुपपद्यते। तेन न कर्तव्यं युद्धमित्याह—** स्वजनं हीति॥ ३७॥

**कथं तर्हि परेषां कुलक्षये स्वजनहिंसायां च प्रवृत्तिः? तत्राह—** यद्यपीति। **लोभोपहतबुद्धित्वात् तेषां कुलक्षयादिप्रयुक्तदोष-प्रतीत्यभावात् प्रवृत्तिविस्रम्भः सम्भवतीत्यर्थः॥ ३८॥**

**परेषामिवास्माकमपि प्रवृत्तिविस्रम्भः संभवेदिति चेत्, नेत्याह—** कथमिति। **कुलक्षये मित्रद्रोहे च दोषं प्रपश्यद्भिरस्माभिः तद् दोषशब्दितं पापं कथं न ज्ञातव्यम्? तदज्ञाने तत्परिहारासम्भवात्। अतोऽस्मात्पापान्निवृत्त्यर्थं तज्ज्ञानमपेक्षितमिति पापपरिहारार्थिनाम् अस्माकं न युक्ता युद्धे प्रवृत्तिरित्यर्थः॥ ३९॥**

**कोऽसौ कुलक्षये दोषो यद्दर्शनाद् युष्माकं युद्धादुपरतिरपेक्ष्यते? तत्राह—** कुलेति। **कुलस्य हि क्षये कुलसम्बन्धिनश्चिरन्तना**

भाष्यार्कप्रकाशः

भजेत्। यद्यपि 'आततायिनमायान्तं हन्यादेवाविचारयन्' इति शास्त्रादाततायिहननं धर्म एव, तथापि धर्मेऽप्यधर्मभ्रमादेवमुक्त-मर्जुनेनेति बोध्यम्॥ ३६॥

**तस्मादिति।** तस्मात् सबान्धवान् धार्तराष्ट्रान् हन्तुं वयं नार्हाः, हे माधव! स्वजनं हत्वा कथं वा सुखिनः **स्याम** भवेम?॥ ३७॥

**यद्यपीति।** यद्यपि विचार्यमाणे लोभोपहतचेतसः एते कुलक्षयकृतं दोषं, मित्रद्रोहे पातकं च न पश्यन्ति॥ ३८॥

**कथमिति।** तथापीति शेषः। हे जनार्दन ! कुलक्षयकृतं दोषं प्रपश्यद्भिः अस्माभिरस्मात् पापान्निवर्तितुं कथं न ज्ञेयम्?॥ ३९॥

**कुलक्षय इति।** कुलक्षये सति सनातनाः कुलधर्माः प्रणश्यन्ति। धर्मे नष्टे सति कृत्स्नं कुलम् अधर्मो**ऽभिभवत्युत** तिरस्करोत्येव ॥ ४०॥

---

१. अस्मान् हत्वा आततायिनः एतान् पापमेवाश्रयेत् इति। २. आततायिनः एतान् हत्वा अस्मान् एव पापमाश्रयेत् इति। ३. एतान् हत्वा आततायिनोऽस्मान् एव पापमाश्रयेत् इति च क्रमेण योजना। हत्वा इत्यनन्तरं 'स्थितान्' इति पदमध्याहृत्य समानकर्तृकत्वेन क्त्वाप्रयोगो निर्वाह्यः। ४. 'युद्धमुपक्रम्य तेन च स्वजन-परिक्षये न सुखमुपपद्यते।' इति पा.।

**अधर्माभिभवात् कृष्ण ! प्रदुष्यन्ति कुलस्त्रियः।**
**स्त्रीषु दुष्टासु वार्ष्णेय ! जायते वर्णसङ्करः॥४१॥**
**सङ्करो नरकायैव कुलघ्नानां कुलस्य च। पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः॥४२॥**
**दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः। उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः॥४३॥**
**उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन !। नरके नियतं वासो भवतीत्यनुशुश्रुम॥४४॥**
**अहो बत महत् पापं कर्तुं व्यवसिता वयम्। यद् राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः॥४५॥**

आनन्दगिरिकृतव्याख्या

**धर्मास्तत्तदग्निहोत्रादिक्रियासाध्या नाशमुपयान्ति, कर्तुरभावादित्यर्थः। धर्मनाशेऽपि किं स्यादिति चेत्? तत्राह—** धर्म इति। **कुलप्रयुक्ते धर्मे कुलनाशादेव नष्टे कुलक्षयकरस्य कुलं परिशिष्टमखिलमपि तदीयोऽधर्मोऽभिभवति। अधर्मभूयिष्ठं तस्य कुलं भवतीत्यर्थः॥४०॥**

**कुलक्षयकृतोऽवशिष्टकुलस्याधर्मप्रवणत्वे को दोषः स्यादिति? तत्राह—** अधर्मेति। **पापप्रचुरे कुले प्रसूतानां स्त्रीणां प्रदुष्टत्वे किं दुष्यति? तत्राह—** स्त्रीष्विति॥४१॥

**वर्णसङ्करस्य दोषपर्यवसायितामादर्शयति—** संकर इति। **कुलक्षयकराणां दोषान्तरं समुच्चिनोति—** पतन्तीति। **कुलक्षयकृतां पितरो निरयगामिनः (सं)भवन्तीत्यत्र हेतुमाह—** लुप्तेति। **पुत्रादीनां कर्तॄणामभावाल्लुप्ता पिण्डस्योदकस्य च क्रिया येषां ते तथा। ततश्च प्रेतत्वपरावृत्तिकारणाभावान्नरकपतनमेवावश्यकमापतेदित्यर्थः॥४२॥**

**कुलक्षयकृतामेतैरुदाहृतैर्दोषैर्वर्णसंकरहेतुभिर्जातिप्रयुक्ता वंशप्रयुक्ताश्च धर्माः सर्वे समुत्साद्यन्ते। तेन कुलक्षयकारणाद् युद्धादुपरतिरेव श्रेयसीत्याह—** दोषैरिति॥४३॥

**किञ्च जातिधर्मेषु कुलधर्मेषु चोत्सन्नेषु तत्तद्धर्मवर्जितानां मनुष्याणामनधिकृतानां नरकपतनध्रौव्यादनर्थकरमिदमेव[1] हेयमित्याह—** उत्सन्नेति। **यथोक्तानां मनुष्याणां नरकपातस्यावश्यकत्वे प्रमाणमाह—** इत्यनुशुश्रुमेति॥४४॥

**राज्यप्राप्तिप्रयुक्तसुखोपभोगलुब्धतया स्वजनहिंसायां प्रवृत्तिरस्माकं गुणदोषविभागविज्ञानवतामतिकष्टेति परिभ्रष्टहृदयः सन्नाह —** अहो बतेति॥४५॥

भाष्यार्कप्रकाशः

**अधर्मेति।** हे कृष्ण ! अधर्माभिभवाद्धेतोः कुलस्त्रियः **प्रदुष्यन्ति** प्रकर्षेण दुष्टा भवन्ति। हे **वार्ष्णेय** वृष्णिवंशप्रसूत! स्त्रीषु दुष्टासु सतीषु वर्णसङ्करो जायते॥४१॥

**सङ्कर इति।** सङ्करः **कुलघ्नानां** वंशनाशकानां, कुलस्य च नरकायैव भवति। **हि** यतः एषां पितरः लुप्तपिण्डोदकक्रियाः सन्तः पतन्ति॥४२॥

**दोषैरिति।** कुलघ्नानां वर्णसङ्करकारकैरेतैर्दोषैः शाश्वता जातिधर्माः, कुलधर्माश्च **उत्साद्यन्ते** नाश्यन्ते॥४३॥

**उत्सन्नेति।** हे जनार्दन ! उत्सन्नकुलधर्माणां मनुष्याणां नरके वासो नियतं निश्चयेन भवतीत्य**नुशुश्रुम** वृद्धेभ्यः श्रुतवन्तः॥४४॥

**अहो इति।** अहो बतेति खेदातिशये। वयं महत् पापं कर्तुं **व्यवसिता** निश्चितवन्तः**- यद्** यस्मात् राज्यसुखलोभेन स्वजनं हन्तुम् **उद्यता** उद्युक्ताः॥४५॥

१. 'अवहेयम्' इति पा.।

**यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः। धार्तराष्ट्रा रणे हन्युः तन्मे क्षेमतरं भवेत्॥४६॥**

**सञ्जय उवाच —**

**एवमुक्त्वाऽर्जुनः संख्ये रथोपस्थ उपाविशत्। विसृज्य सशरं चापं शोकसंविग्नमानसः॥४७॥**

**[1]इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोगो नाम प्रथमोऽध्यायः॥१॥**

आनन्दगिरिकृतव्याख्या

**यद्येवं युद्धे विमुखः सन् परिभवप्रतीकाररहितो वर्तेथाः, तर्हि त्वां शस्त्रपरिग्रहरहितं शत्रुं शस्त्रपाणयो धार्तराष्ट्रा निगृह्णीयुरित्याशङ्क्याह—** यदीति। **प्राणत्राणादपि प्रकृष्टो धर्मः प्राणभृतामहिंसेति भावः॥४६॥**

**यथोक्तमर्जुनस्य वृत्तान्तं सञ्जयो धृतराष्ट्रं राजानं प्रति प्रवेदितवान्। तमेव प्रवेदनप्रकारं दर्शयति—** एवमिति। **प्रदर्शितेन प्रकारेण भगवन्तं प्रति विज्ञापनं कृत्वा शोकमोहाभ्यां परिभूतमानसः सन्नर्जुनः** संख्ये **युद्धमध्ये शरेण सहितं गाण्डीवं त्यक्त्वा 'न योत्स्येऽहम्' इति ब्रुवन् मध्ये रथस्य संन्यासमेव श्रेयस्करं मत्वोपविष्टवानित्यर्थः॥४७॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते श्रीमद्भगवद्गीताशाङ्करभाष्यव्याख्याने प्रथमोऽध्यायः॥१॥**

भाष्यार्कप्रकाशः

**यदीति।** अशस्त्रम् **अप्रतीकारं** प्रतिक्रियाशून्यं मां शस्त्रपाणयो धार्तराष्ट्राः रणे हन्युर्यदि, **तद्** हननं मे क्षेमतरं भवेत्॥४६॥

**एवमिति।** अर्जुनः **संख्ये** युद्धे एवमुक्त्वा सशरं चापं विसृज्य **शोकसंविग्नमानसः** शोकव्याकुलचित्तः सन् **रथोपस्थे** रथमध्ये **उपाविशत्** तस्थौ॥४७॥

**[इतीति।] इति**शब्दः समाप्तौ। श्रीयुक्तो भगवान् श्रीभगवान्। यद्यपि भगान्तःपातिनी श्रीः, तथापि तस्याः पुनरुक्तिः श्रियः प्राधान्यद्योतनाय। [2]श्रीभगवता गीता उक्ताः श्रीभगवद्गीताः। [3]श्रीयुक्ता भगवद्गीता इति वा । तासूपनिषत्सु इति 'सिंहो माणवकः' इतिवद् गौणप्रयोगः। [4]संसारशिथिलीकरणादिगुणसादृश्याद् गीतानामुपनिषत्त्वमौपचारिकम्। [5]यद्वा उपनिषच्छब्दो ब्रह्मात्मैक्यविद्यापरः। तद्योगाद् यथोपनिषदामुपनिषत्त्वव्यवहारः, एवं गीतानामपीति। अत्र च पक्षे उपनिषच्छब्दो योगरूढ्या वेदान्तपरः[6] , योगेन तु गीतापर इति बोध्यम्। एतावता अत्र 'उपनिषत्सु' इत्यस्य उपनिषद्विद्याप्रतिपादिकासु इति निष्कृष्टार्थः सिद्धः। [7]अथवा 'उपनिषत्सु' इत्यस्य लक्षणया उपनिषदपरपर्यायवेदान्तार्थप्रतिपादिकासु इत्यर्थो वाच्यः। उपनिषत्त्वमेव स्फुटयितुमाह— **ब्रह्मविद्यायामिति** । ब्रह्मज्ञानप्रदास्वित्यर्थः। **योगशास्त्र इति** । कर्मज्ञानयोगद्वयं यस्मादिदं शास्ति तस्मादुच्यते योगशास्त्रमिति। श्रीकृष्णार्जुनयोः संवाद उक्तिप्रत्युक्तिरूपो यस्मिन् तस्मिन् । षष्ठीतत्पुरुषो वा। **अर्जुनविषादयोगः** अर्जुनविषादसङ्गतिः, 'योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु' इति कोशात्। अस्मिन्नध्यायेऽर्जुनविषादस्य सङ्गतत्वादस्येदं नाम। यद्यप्यशोच्यानित्यारब्धस्यैव

---

१. अत्र च अध्यायान्ते — 'इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि' इत्यादि, 'ॐ तत्सदिति श्री' इत्यादि च पाठान्तरं दृश्यते। २.श्रीभगवद्गीतासु इति पाठमवलम्ब्य व्याचष्टे— श्रीभगवता इत्यादि। श्रीमद्भगवद्गीतासु इति पाठोऽपि अनयैव रीत्या व्याख्येयः। ३. प्रथमव्याख्याने श्रीमत्त्वं भगवतो विशेषणम् , द्वितीये तु गीतायाः। ४. उपनिषदो वेदान्ताः। 'षद्लृ विशरणगत्यवसादनेषु' इत्यस्माद् धातोर्निष्पन्नः उपनिषच्छब्दः संसारशिथिलीकरणाद्यर्थयोगाद् वेदान्तेषु मुख्यः। गीतासु तु गौण इति भावः। ५. गीतासु उपनिषच्छब्दस्य मुख्यत्वायाह— **यद्वेति**। ६. प्रयोगप्राचुर्यादिति भावः। ७. रूढिपूर्वकलक्षणाया योगापेक्षया प्राबल्यमभिप्रेत्याह— **अथवेति**।

भाष्यार्कप्रकाशः

ग्रन्थस्य योगशास्त्रमिति व्यवहारस्तथापि योगशास्त्रोपोद्घातत्वादस्याध्यायस्य योगशास्त्रान्तःपातित्वमिति बोध्यम्। अनेन च विषादयोगाध्यायेन संसारे दृष्टदोषस्य जातविषादस्य योगशास्त्रे प्रवृत्तिः स्यादिति विषयेषु दोषदृष्टिस्तावत् कार्या मुमुक्षुणेति शास्यते। अत एवास्याप्यध्यायस्य योगशास्त्रत्वम्।

॥ इति श्रीबेल्लङ्कोण्डोपनामकरामकविकृते श्रीभगवद्गीताभाष्यार्कप्रकाशे प्रथमोऽध्यायः ॥ १ ॥

DO NOT
PRINT
THIS PAGE

ॐ श्रीपरमात्मने नमः

# ॥ अथ द्वितीयोऽध्यायः ॥

**सञ्जय उवाच—**

**तं तथा कृपयाऽऽविष्टमश्रुपूर्णाकुलेक्षणम्।**
**विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥**

**श्रीभगवानुवाच—**

**कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्। अनार्यजुष्टमस्वर्ग्यम् अकीर्तिकरमर्जुन ! ॥ २ ॥**
**क्लैब्यं मा स्म गमः पार्थ ! नैतत् त्वय्युपपद्यते। क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ! ॥ ३ ॥**

आनन्दगिरिकृतव्याख्या

**'अहिंसा परमो धर्मो, भिक्षाशनं च ' इत्येवंलक्षणया बुद्ध्या युद्धवैमुख्यमर्जुनस्य श्रुत्वा स्वपुत्राणां राज्यैश्वर्यमप्रचलितमवधार्य स्वस्थहृदयं धृतराष्ट्रं दृष्ट्वा, तस्य दुराशामपनेष्यामीति मनीषया सञ्जयः तं प्रत्युक्तवानित्याह—** सञ्जय इति। **परमेश्वरेण स्मार्यमाणोऽपि कृत्याकृत्ये सहसा नार्जुनः सस्मार, विपर्ययप्रयुक्तस्य शोकस्य दृढतरमोहहेतुत्वात् , तथापि तं भगवान् नोपेक्षितवानित्याह—** तं तथेति। तम् **प्रकृतं पार्थं** तथा **स्वजनमरणप्रसङ्गदर्शनेन** कृपया **करुणया** आविष्टम् **अधिष्ठितम् अश्रुभिः पूर्णे समाकुले चेक्षणे यस्य तम् अश्रुव्याप्त-तरलाक्षं** विषीदन्तं **शोचन्तम्** इदं **वक्ष्यमाणं** वाक्यं **सोपपत्तिकं वचनं, मधुनामानमसुरं सूदितवानिति** मधुसूदनो **भगवानुक्तवान् , न तु यथोक्तमर्जुनमुपेक्षितवानित्यर्थः ॥ १ ॥**

**किं तद् वाक्यमित्यपेक्षायामाह—** श्रीभगवानिति। कुतो **हेतोः** त्वा **त्वां सर्वक्षत्रियप्रवरं** कश्मलं **मलिनं शिष्टगर्हितं युद्धात् पराङ्मुखत्वं** विषमे **सभयस्थाने** समुपस्थितं **प्राप्तम्** अनार्यैः **शास्त्रार्थमविद्वद्भिः** जुष्टं **सेवितम्** अस्वर्ग्यं **स्वर्गानर्हं प्रत्यवायकारणम् , [1]इह च** अकीर्तिकरम् **अयशस्करम्। [2]अर्जुननाम्ना प्रख्यातस्य तव नैतद् युक्तमित्यर्थः ॥ २ ॥**

**पुनरपि भगवानर्जुनं प्रत्याह—** क्लैब्यमिति। क्लैब्यं **क्लीबभावम् अधैर्यं** मा स्म गमः **मा गाः।** हे पार्थ **पृथातनय ! न हि** त्वयि **महेश्वरेणापि कृताहवे प्रख्यातपौरुषे महामहिमनि, एतदुपपद्यते।** क्षुद्रं **क्षुद्रत्वकारणं** हृदयदौर्बल्यं **मनसो दुर्बलत्वमधैर्यं त्यक्त्वा** उत्तिष्ठ **युद्धायोपक्रमं कुरु।** हे परन्तप **! परं शत्रुं तापयतीति तथा सम्बोध्यते ॥ ३ ॥**

श्रीबेल्लंकोण्डरामरायकविविरचितः
भाष्यार्कप्रकाशः

**तमिति। तथा** पूर्वोक्तरीत्या, कृपया **आविष्टं** व्याप्तम् **अश्रुपूर्णाकुलेक्षणम्** अश्रुभिः पूर्णे आकुले च ईक्षणे यस्य तम् , **विषीदन्तम्** विषादं प्राप्नुवन्तम् **तम्** अर्जुनं प्रति मधुसूदनः **इदं** वक्ष्यमाणं [**वाक्यं**] वचनम् **उवाच** ॥ १ ॥

**कुत इति।** हे अर्जुन ! **विषमे** अयोग्यसमये, **अनार्यजुष्टम्** आर्यैरसेवितम् **अस्वर्ग्यम्** स्वर्गप्राप्तिविरोधि, अकीर्तिकरमिदं **कश्मलं** व्याकुलत्वं, **कुतः** कस्माद्धेतोः **त्वा** त्वां **समुपस्थितं** प्राप्तम्? ॥ २ ॥

**क्लैब्यमिति।** हे **पार्थ !** तत्तादृग्वीरमातृत्वेन प्रसिद्धायाः पृथायाः पुत्र! **क्लैब्यं** पौरुषराहित्यं मा गमः स्म [**मा स्म गमः**] मा गच्छ। [3]माङ्योगाल्लुङि अडागमप्रतिषेधः। **त्वयि** खाण्डवदहनादिना प्रख्यातपौरुषे त्वयि **एतत्** क्लैब्यं **नैवोपपद्यते** न युज्यत एव। हे

---

१. धर्माद् वैमुख्यम् इह लोके परलोके चानिष्टहेतुरिति भावः। २. (भ.गी.१८.६१) भाष्ये अर्जुनशब्दस्य शुद्धान्तःकरणपरत्वेन व्याख्यानमिहानुसंधेयम्। तथा च तादृशस्य तवाकीर्तिकरमेतद् न युक्तमिति भावः। ३. 'स्मोत्तरे लङ् च' इति सूत्रेण लुङ्, अडागमप्रतिषेधस्तु 'न माङ्योगे'(पा.सू.६.४.७४) इति सूत्रेणेति भावः।

**अर्जुन उवाच—**

**कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन !।**
**इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन !॥४॥**
**गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं [१]भैक्षमपीह लोके।**
**हत्वाऽर्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान्॥५॥**
**न चैतद् विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः।**
**यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः॥६॥**

आनन्दगिरिकृतव्याख्या

**एवं भगवता प्रतिबोध्यमानोऽपि शोकाभिभूतचेतस्त्वादप्रतिबुध्यमानः सन् अर्जुनः स्वाभिप्रायमेव प्रकृतं भगवन्तं प्रत्युक्तवान्—** कथमित्यादिना। भीष्मं **पितामहं ,** द्रोणं **चाचार्यं** संख्ये **रणे, हे मधुसूदन !** इषुभिः [२]**(यत्र वाचाऽपि योत्स्यामीति वक्तुमनुचितम्, तत्र कथं बाणैर्योत्स्ये इति भावः।) सायकैः तौ कथं** प्रतियोत्स्यामि **प्रतियोत्स्ये? तौ हि** पूजार्हौ **कुसुमादिभिरर्चनयोग्यौ।** हे अरिसूदन ! **सर्वानेवारीन् अयत्नेन सूदितवानिति भगवानेवं सम्बोध्यते॥४॥**

**राज्ञां धर्मेऽपि युद्धे गुर्वादिवधे वृत्तिमात्रफलत्वं गृहीत्वा पापमारोप्य ब्रूते—** गुरूनिति। गुरून् **भीष्मद्रोणादीन् , भ्रात्रादींश्चात्र प्राप्तान् अहिंसित्वा** महानुभावान् **महामाहात्म्यान् श्रुताध्ययनसम्पन्नान् ,** श्रेयः **प्रशस्यतरं युक्तं** भोक्तुम् **अभ्यवहर्तुं** भैक्षम् **भिक्षाणां समूहम् , भिक्षाशनं नृपादीनां निषिद्धमपि,** इह लोके **व्यवहारभूमौ। न हि गुर्वादिहिंसया राज्यभोगोऽपेक्ष्यते। किञ्च हत्वा गुर्वादीन् ,** [३]**अर्थकामानेव भुञ्जीय, न मोक्षमनुभवेयम्। इहैव भोगो, न स्वर्गे। अर्थकामानेव विशिनष्टि—** भोगानिति। **भुज्यन्त इति भोगास्तान्** रुधिरप्रदिग्धान् **लोहितलिप्तानिवात्यन्तगर्हितान्। अतो भोगान् गुरुवधादिसाध्यान् परित्यज्य भिक्षाशनमेव युक्तमित्यर्थः॥५॥**

**क्षत्रियाणां स्वधर्मत्वाद् युद्धमेव श्रेयस्करमित्याशङ्क्याह—** न चैतदिति। **एतदपि न जानीमो भैक्षयुद्धयोः कतरत्** नः **अस्माकं** गरीयः **श्रेष्ठम् - किं भैक्षं हिंसाशून्यत्वाद् , उत युद्धं स्ववृत्तित्वादिति। सन्दिग्धा च जयस्थितिः। किं साम्यमेवोभयेषाम् , यद्वा वयं** जयेम **अतिशयीमहि , यदि वा नः अस्मान् धार्तराष्ट्रा दुर्योधनादयो जयेयुः। जातोऽपि जयो न फलवान्। यतो यान् बन्धून् हत्वा न**

भाष्यार्कप्रकाशः

**परन्तप !** शत्रुसंतापक! **क्षुद्रं** नीचं हृदयदौर्बल्यं त्यक्त्वा **उत्तिष्ठ** युद्धाय संनद्धो भवेत्यर्थः॥३॥

**कथमिति।** हे **मधुसूदन !** मधुनामकराक्षसहन्तः! न तु देववत्पूज्याचार्यादिहन्ता त्वमपीति सूचयितुमिदं संबोधनम्। हे **अरिसूदन** शत्रुमारक ! न तु स्वजनमारक इति भावः। अहम् , पूजार्हौ भीष्मं द्रोणं चेति द्वाविति शेषः, **संख्ये** युद्धे **इषुभिर्बाणैः कथं प्रतियोत्स्यामि** केन वा प्रकारेण प्रहरिष्यामि ॥४॥

**गुरूनिति।** महानुभावान् गुरून् अहत्वा इह लोके **भैक्षं** भिक्षाणां समूहो भैक्षम् , 'भिक्षादिभ्योऽण्' इत्यण् , भिक्षान्नमपि भोक्तुं **श्रेयः** युक्तम्। हिः प्रश्नार्थेऽव्ययम् , अव्ययानामनेकार्थत्वात्। श्रेयः किम्? इत्यर्थः। **तुशब्दः** पक्षान्तरद्योतनाय। यद्वेत्यर्थः। **अर्थकामान्** धनाभिलाषिणः, विषयाभिलाषिण इति वा। गुरून् हत्वा **इह** लोके **रुधिरप्रदिग्धान्** शोणितव्याप्तान् भोगान् **भुञ्जीय** अनुभवेयम् , किम् इति शेषः। मम गुर्वहननाद् भिक्षाटनं युक्तं वा , गुरुहननाद् रुधिरसंपृक्तान्नं युक्तं वा? इत्यर्थः॥५॥

**न चेति। नः** अस्माकम् , **कतरत्** उक्तमतद्वये किं वा मतं **गरीयः** श्रेष्ठतरम् , एतद् वयं नैव **विद्मः** जानीमः। जयोऽप्यस्माकं न नियतः इत्याह— **यद्वेति। यद्वा** पक्षे जयेम, वयं शत्रूनिति शेषः। **यदि वा** यद्वा पक्षान्तरे **नः** अस्मान् शत्रवो जयेयुः। जयो भवतु वा मा

---

१. 'भैक्ष्यम्' इति पा.। २. कुण्डलितः पाठः क्वचिदेव दृश्यते। ३. अर्थाश्च कामाश्च इति द्वन्द्वः। अर्थान् कामयन्त इति व्युत्पत्त्या गुरुविशेषणमिति व्याख्यान्तरे।

**कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां[१] धर्मसम्मूढचेताः।**
**यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्॥७॥**
**न हि प्रपश्यामि ममापनुद्याद् यच्छोकमुच्छोषणमिन्द्रियाणाम्।**
**अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥८॥**

आनन्दगिरिकृतव्याख्या

जिजीविषामो **जीवितुं नेच्छामः, ते एवावस्थिताः** प्रमुखे **सम्मुखे** धार्तराष्ट्राः **धृतराष्ट्रस्यापत्यानि। तस्माद् भैक्षाद् युद्धस्य श्रेष्ठत्वं न सिद्धमित्यर्थः॥६॥**

**समधिगतसंसारदोषजातस्यातितरां निर्विण्णस्य मुमुक्षोरुपसन्नस्यात्मोपदेशसंग्रहणेऽधिकारं सूचयति—** कार्पण्येति। **योऽ(ल्पां स्व)ल्पामपि** [२]**स्वक्षतिं न क्षमते स कृपणः। तद्विधत्वाद् अखिलोऽनात्मविद् अप्राप्तपरमपुरुषार्थतया कृपणो भवति, 'यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणः' इति श्रुतेः।** तस्य भावः कार्पण्यं **दैन्यम्, तेन दोषेण** उपहतो दूषितः स्वभाव**श्चित्तमस्येति विग्रहः। सोऽहं** पृच्छामि **अनुयुञ्जे** त्वा **त्वां** धर्मसम्मूढचेताः [३]**धर्मो धारयतीति परं ब्रह्म, तस्मिन्** सम्मूढ**मविवेकतां गतं चेतो यस्य ममेति तथाऽहमुक्तः। किं पृच्छसि? यत्** निश्चितम् [४]**ऐकान्तिकमनापेक्षिकं श्रेयः स्यात्, न रोगनिवृत्तिवद् अनैकान्तिकमनात्यन्तिकं स्वर्गवदापेक्षिकं वा,** तत् **निश्रेयसं** मे **मह्यं** ब्रूहि। **'नापुत्रायाशिष्याय' इति निषेधान्न प्रवक्तव्यमिति मा मंस्थाः। यतः शिष्यस्तेऽहं भवामि।** शाधि **अनुशाधि मां निःश्रेयसम्। त्वामहं प्रपन्नोऽस्मि॥७॥**

**कुतो निःश्रेयसमेवेच्छसि? तत्राह—** न हीति। **यस्मात् न प्रपश्यामि। किं न पश्यसि? मम** अपनुद्याद् **अपनयेद् यत्, शोकम्** उच्छोषणं **प्रतपनम् इन्द्रियाणाम्, तन्न पश्यामि। ननु शत्रून् निहत्य राज्ये प्राप्ते शोकनिवृत्तिस्ते भविष्यति? नेत्याह—** अवाप्येति। **अविद्यमानः** सपत्नः **शत्रुर्यस्य तद् दृढं [ऋद्धं]** राज्यं **राज्ञः कर्म प्रजारक्षणप्रशासनादि। तदिदमस्यां भूमाववाप्यापि शोकापनयकारणं न पश्यामीत्यर्थः। तर्हि देवेन्द्रत्वादिप्राप्त्या शोकापनयस्ते भविष्यति? नेत्याह—** सुराणामपीति। **तेषाम्** आधिपत्यम् **अधिपतित्वं स्वाम्यम्**

भाष्यार्कप्रकाशः

वा, युद्धमेव तावद् दुष्करमित्याह— **यानिति।** वयं यान् हत्वा **न जिजीविषामः** जीवितुं नेच्छामः, त एव धार्तराष्ट्राः **प्रमुखे** अग्रे अवस्थिताः॥६॥

**कार्पण्येति।** अहं **कार्पण्यदोषोपहतस्वभावः** कार्पण्यं कृपणत्वं दैन्यमिति यावत्, तदेव दोषः, तेनोपहतः स्वभावो यस्य स तथोक्तः। अत एव **धर्मसंमूढचेताः** धर्माधर्मनिर्णयासमर्थः सन् त्वां पृच्छामि। किं पृच्छसीत्यत आह— **यदिति।** मे यत् **श्रेयः स्यात्** श्रेयस्करं स्यात्, युक्तं स्यादिति वा, निश्चितं तन्मे ब्रूहि। 'गुरूनहत्वा' इति श्लोकोक्तपक्षद्वये यः पक्षोऽस्माकं युक्तः श्रेयस्करश्च तं निश्चित्य वदेत्यर्थः। न हि मम त्वत्तोऽन्यः कोऽपि धर्मनिर्णायकोऽस्तीति भावः। अहं ते शिष्यः। त्वां **प्रपन्नं** शरणं गतं मां **शाधि** शिक्षय। अनेन गुरूपसत्तिप्रकारः शिक्षितः॥७॥

यदि तव[५] युद्धकरणमेव श्रेय इति मतम्, तर्हि शोकसंविग्नमानसस्य मम युद्धकरणं न संभवति। तस्मात् तावत् त्वं मम शोकनाशोपायं ब्रूहीति प्रार्थयते— **न हीति।** ममेन्द्रियाणामुच्छोषणं शोकं यदपनुद्यात् तन्नैव प्रपश्यामि। ननु जये लब्धे सति राज्येन शोको नश्येदित्यत आह— **भूमाविति।** भूमौ **असपत्नं** निष्कण्टकम् **ऋद्धं** समृद्धिमद् राज्यमवाप्य, **सुराणामाधिपत्यं** देवेन्द्रपदमप्यवाप्य, नाहमिमं शोकं तरेयमिति वाक्यशेषः। तस्मान्न राज्यप्राप्त्याशा मम शोकनाशकारिणी भवेदेवेति भावः[६]॥८॥

---

१. 'त्वा' इति पा.। २. वित्तक्षतिमित्यर्थः। ३. गीताशास्त्रीयपरमतात्पर्यविषयात्मदर्शने अधिकारसूचनोपयोगितया कार्पण्यपदम् अनात्मवित्त्वलक्षणदैन्यपरत्वेन व्याख्याय धर्मसंमूढचेतःपदमपि तथैव व्याचष्टे—**धर्म** इत्यादिना। ४. मोक्ष इत्यर्थः। साधनानन्तरमवश्यम्भावित्वमैकान्तिकत्वम्। उपलक्षणमिदमात्यन्तिकत्वस्यापि। अविनाशित्वमात्यन्तिकत्वम्। अनेन मुमुक्षुत्वं दर्शितम्। ५. तव = श्रीकृष्णस्य। ६. एतेनेहामुत्रार्थभोगविरागोऽधिकारिविशेषणत्वेन दर्शितः।

**संजय उवाच—**

**एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः। न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह॥९॥**

**तमुवाच हृषीकेशः प्रहसन्निव भारत !। सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः॥१०॥**

**श्रीभगवानुवाच—**

**[1](अत्र च) 'दृष्ट्वा तु पाण्डवानीकम्'(भ.गी.१.२) इत्यारभ्य यावत् 'न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव**

**अनुभूतिस्वरूपाचार्यविरचितगीताभाष्यटिप्पणम्**

एवं व्याख्येयत्वमुपपाद्यावान्तरविभागकरणेन तात्पर्यमाह— **अत्र चेत्यादिना**। 'इत्यारभ्य' 'इत्येतदन्तः' ग्रन्थः

आनन्दगिरिकृतव्याख्या

**इन्द्रत्वं ब्रह्मत्वं वा, तदवाप्यापि मम शोको नापगच्छेदित्यर्थः॥८॥**

**एवमर्जुनेन स्वाभिप्रायं भगवन्तं प्रति प्रकाशितं सञ्जयो राजानमावेदितवानित्याह—** सञ्जय इति। एवं **प्रागुक्तप्रकारेण भगवन्तं प्रति उक्त्वा, परन्तपोऽर्जुनो** न योत्स्ये **न संप्रहरिष्ये अत्यन्तासह्यशोकप्रसङ्गाद् इति गोविन्दमुक्त्वा** तूष्णीम् **अब्रुवन् बभूव** ह **किलेत्यर्थः** ॥९॥

तम् **अर्जुनं** सेनयोः **वाहिन्योरुभयोर्मध्ये** विषीदन्तं **विषादं कुर्वन्तमतिदुःखितं शोकमोहाभ्यामभिभूतं स्वधर्मात् प्रच्युतप्रायं प्रतीत्य** प्रहसन्निव **उपहासं कुर्वन्निव तदाश्वासार्थं,** हे भारत **भरतान्वय! इत्येवं सम्बोध्य भगवान्** इदं **प्रश्नोत्तरं निःश्रेयसाधिगमसाधनं वचन[2]मूचिवानित्याह—** तमुवाचेति॥१०॥

**तदेव वचनमुदाहरति—** श्रीभगवानिति।

**अतीतसन्दर्भस्येत्थमक्षरोत्थमर्थं विवक्षित्वा तस्मिन्नेव वाक्यविभागमवगमयति—** दृष्ट्वा त्विति। **'धर्मक्षेत्रे कुरुक्षेत्रे' इत्यादिः आद्यश्लोकस्तावदेकं वाक्यम्, शास्त्रस्य कथासम्बन्धपरत्वेन पर्यवसानात्। 'दृष्ट्वे'त्यारभ्य यावत् 'तूष्णीं बभूव ह'ेति, तावच्चैकं वाक्यम्। इत आरभ्य 'इदं वचः' इत्येतदन्तो ग्रन्थो भवत्यपरं वाक्यमिति विभागः। नन्वाद्यश्लोकस्य युक्तमेकवाक्यत्वम्, प्रकृतशास्त्रस्य**

भाष्यार्कप्रकाशः

**एवमिति**। परन्तपो गुडाकेशः एवं हृषीकेशं प्रति उक्त्वा, ततः अहं **न योत्स्ये** युद्धं नैव करिष्ये इति च गोविन्दं प्रति उक्त्वा **तूष्णीं बभूव** जोषमाप। **हेति** विस्मये। **एतेन -** 'अहिंसा परमो धर्मः' इति शास्त्राद्, आचार्यादिद्विजोत्तममारणस्य ब्रह्महत्याहेतुत्वाच्च, क्षणिकराज्यसुखापेक्षया युद्धकरणं मम सुतराम् अधर्म एवेति, परिव्राजकब्राह्मणवद् भिक्षाटनमेव धर्म इति च पार्थस्याशयः स्फुटं **गम्यते**॥९॥

**तमिति**। हे **भारत** धृतराष्ट्र ! उभयोः सेनयोः मध्ये विषीदन्तं **तम्** अर्जुनं प्रति हृषीकेशः **प्रहसन्निव**, अर्जुनस्योन्मादप्रलाप-तुल्यवचनश्रवणात् कृष्णस्य हास इति भावः; **इदम् 'अशोच्यान्'** इत्यारभ्य 'मा शुचः' इत्यन्तं गीताशास्त्ररूपं वचः उवाच॥१०॥
॥इत्युपोद्घातः॥[3]

**अत्र च** गीतास्वित्यर्थः। 'एतदन्तो ग्रन्थो व्याख्येयः' इत्यन्वयः। शोकमोहादयो ये संसारबीजभूता दोषाः, तेषामुद्भवस्य यत् कारणं, तस्य प्रदर्शनमेवार्थो यस्य, तत्त्वेन। प्राणिनां संसारबीजभूतशोकमोहादिदोषोद्भवं प्रतीदं कारणमिति दर्शयति **दृष्ट्वेत्यादिः तूष्णीं**

१. कुण्डलितो ग्रन्थभागः आनन्दगिरीये प्रथमाध्यायारम्भे व्याख्यातः(पृ.१५)। २. उक्तवानित्यर्थः। ३. एतदुत्तरम् 'नत्वा लक्ष्मीहयग्रीवौ'(पृ.३) इति मङ्गलपद्यपूर्वकं 'नारायणः परोऽव्यक्तादि'त्यादि 'अतस्तद्विवरणे यत्नः क्रियते मया'(पृ.१४) इत्यन्तम् उपोद्घातभाष्यं व्याख्यातं भाष्यार्कप्रकाशकारेण। स च भाष्यार्कप्रकाशग्रन्थभागः अस्माभिः आनन्दगिरिकृतव्याख्यानुरोधेन पूर्वं निवेशितः।

**ह'(भ.गी.२.९) इत्येतदन्तः प्राणिनां शोकमोहादिसंसारबीजभूतदोषोद्भवकारणप्रदर्शनार्थत्वेन व्याख्येयो ग्रन्थः। तथाहि— अर्जुनेन राज्यगुरुपुत्रमित्रसुहृत्स्वजनसम्बन्धिबान्धवेषु 'अहमेतेषाम् , ममैते' इत्येवम्प्रत्ययनिमित्तस्नेह-विच्छेदादिनिमित्तौ आत्मनः शोकमोहौ प्रदर्शितौ— 'कथं भीष्ममहं संख्ये' (भ.गी.२.४) इत्यादिना। शोकमोहाभ्यां ह्यभिभूतविवेकविज्ञानः[१] स्वत एव [२]क्षत्रधर्मे युद्धे प्रवृत्तोऽपि तस्माद् युद्धादुपरराम; परधर्मं च भिक्षाजीवनादिकं कर्तुं प्रववृते। तथा च सर्वप्राणिनां शोकमोहादिदोषाविष्टचेतसां स्वभावत एव स्वधर्मपरित्यागः, प्रतिषिद्धसेवा च स्यात्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

शोकमोहादिरेव संसारबीजभूतो दोषः, तस्योद्भवे कारणं स्नेहादि, तत्प्रदर्शनार्थत्वेन व्याख्येयः इति योजना। [३]संग्रहवाक्यं विवृणोति— **तथाहीत्यादिना**। एवंप्रत्ययनिमित्तो यः स्नेहः, तथा तैः सह विच्छेदः, तेषां घाते पातकम् , लोकगर्हा चेत्येवमादि निमित्तं ययोस्तौ शोकमोहौ अर्जुनेन दर्शितौ। [कथं] तावेव संसारबीजमित्याकाङ्क्षायां विहिताकरणप्रतिषिद्धसेवा-हेतुत्वादित्याह— **शोकमोहाभ्यां हीति**। न केवलमर्जुनस्यैव शोकमोहौ संसारबीजम् , किन्तु अन्येषामपीत्याह— **तथा चेत्यादिना**। यद्यपि चैते स्वधर्मे प्रवर्तन्ते, तथापि 'अहमस्य कर्ता, मयाऽस्य फलं भोक्तव्यम्' इत्यभिमानपूर्विकैव तेषां

आनन्दगिरिकृतव्याख्या

**महाभारतेऽवतारावद्योतित्वात्। अन्तिमस्यापि सम्भवत्येकवाक्यत्वम् , अर्जुनाश्वासार्थतया प्रवृत्तत्वात्। तन्मध्यमस्य तु कथमेकवाक्य-त्वमित्याशङ्क्यार्थैकत्वादित्याह[४]—** प्राणिनामिति। शोको **मानससन्तापः,** मोहो **विवेकाभावः**। आदि**शब्दस्तदवान्तरभेदार्थः। स एव संसारस्य दुःखात्मनो बीजभूतो दोषः, तस्योद्भवे कारणम् - अहङ्कारो ममकारः तद्धेतुरविद्या च, तत्प्रदर्शनार्थत्वेनेति योजना।**

**संगृहीतमर्थं विवृणोति—** तथाहीति। राज्यं **राज्ञः कर्म परिपालनादि। पूजार्हा** गुरवो **भीष्मद्रोणादयः**। पुत्राः **स्वयमुत्पादिताः सौभद्रादयः। सम्बन्धान्तरमन्तरेण स्नेहगोचरा गुरुपुत्रप्रभृतयो** मित्रशब्दे**नोच्यन्ते। उपकारनिरपेक्षतया स्वयमुपकारिणो हृदयानुराग-भाजो भगवत्प्रमुखाः** सुहृदः। स्वजनाः **ज्ञातयो दुर्योधनादयः**। सम्बन्धिनः **श्वशुरश्यालप्रभृतयो द्रुपदधृष्टद्युम्नादयः। परम्परया पितृपितामहादिष्वनुरागभाजो राजानो** बान्धवाः। **तेषु यथोक्तं प्रत्ययं निमित्तीकृत्य यः स्नेहः, यश्च तैः सह विच्छेदः, [५] यच्च तेषामुपघाते पातकं, या च लोकगर्हा, सर्वं तत् निमित्तं ययोरात्मनः शोकमोहयोः, तावेतौ संसारबीजभूतौ 'कथम्' इत्यादिना दर्शितावित्यर्थः। कथं पुनरनयोः संसारबीजयोरर्जुने संभावनोपपद्यते? न हि प्रथितमहामहिम्नो विवेकविज्ञानवतः स्वधर्मे प्रवृत्तस्य तस्य शोकमोहावनर्थहेतू संभावितावित्याशङ्क्य , विवेकतिरस्कारेण तयोर्विहिताकरणप्रतिषिद्धाचरणकारणत्वाद् अनर्थाधायकयोरस्ति तस्मिन् सम्भावनेत्याह—** शोकमोहाभ्यामिति। **भिक्षया** जीवनं **प्राणधारणम्।** आदि**शब्दाद् अशेषकर्मसंन्यासलक्षणं पारिव्राज्यम् , आत्माभिध्यानमित्यादि गृह्यते। किञ्च, अर्जुने दृश्यमानौ शोकमोहौ संसारबीजं, शोकमोहत्वाद् , अस्मदादिनिष्ठशोकमोहवदिति उपलब्धौ शोकमोहौ प्रत्येकं पक्षीकृत्या-नुमातव्यमित्याह—** तथा चेति। शोकमोहादी**त्यादिशब्देन मिथ्याभिमानस्नेहगर्हादयो गृह्यन्ते।** स्वभावतः **चित्तदोषसामर्थ्यादित्यर्थः।**

भाष्यार्कप्रकाशः

**बभूवे**त्येतदन्तो ग्रन्थ इत्यर्थः। **तथाहीति**। तत्प्रदर्शनप्रकारमेव दर्शयामीति प्रतिज्ञायामव्ययमिदम्। अर्जुनेनात्मनः शोकमोहौ 'कथं भीष्ममहं संख्ये' इत्यादिना दर्शितौ इत्यन्वयः। **अहमेतेषां ममैत इति**। 'अहमेतदीयः' 'एते मदीयाः' इति **प्रत्ययौ** ज्ञाने **निमित्ते** हेतू यस्य, तस्य स्नेहस्य **विच्छेदः** नाशः आदिर्येषां तानि स्नेहविच्छेदादीनि निमित्तानि ययोस्तौ तथोक्तौ। अनात्मीयेष्वात्मीयत्वभ्रमः, अनन्यदीये आत्मनि अन्यदीयत्वभ्रमश्च आत्मनः अनात्मीयेषु पुत्रादिषु स्नेहं जनयित्वा तद्विच्छेदादिना शोकमोहौ जनयतीति तावेव भ्रमौ शोकमोहयोः कारणभूतावित्यर्थः।

---

१. अर्जुनः इति शेषः। २. 'क्षात्रधर्मे' इति पा.। ३. 'वस्तुसंग्रहवाक्यं' इति पा.। ४. अर्थैकत्वं नानावाक्यानाम् एकप्रधानप्रतिपाद्यपरत्वम्। आत्मतत्त्वज्ञानमव-तारयितुं तन्निवर्त्यप्रदर्शनपरोऽयं ग्रन्थः। तेन वाक्यैकवाक्यत्वमिह विवक्षितमिति भावः। ५. स्नेहविच्छेदादीति भाष्यस्थादिपदग्राह्यमाह— **यच्चेति, या चेति** च।

**स्वधर्मे प्रवृत्तानामपि तेषां वाङ्मनःकायादीनां प्रवृत्तिः फलाभिसन्धिपूर्विकैव साहङ्कारा च भवति। तत्रैवं सति धर्माधर्मोपचयाद् इष्टानिष्टजन्म[१]सुखदुःखसम्प्राप्तिलक्षणः संसारोऽनुपरतो भवतीत्यतः संसारबीजभूतौ शोकमोहौ। तयोश्च सर्वकर्मसंन्यासपूर्वकादात्मज्ञानाद् नान्यतो निवृत्तिरिति तदुपदिदिक्षुः सर्वलोकानुग्रहार्थमर्जुनं निमित्तीकृत्याह भगवान् वासुदेवः—** अशोच्यानित्यादि।

[ ज्ञानकर्मसमुच्चयमतोत्थापनम् ]

**[२]तत्र केचिदाहुः— सर्वकर्मसंन्यासपूर्वकादात्मज्ञाननिष्ठामात्रादेव केवलात् कैवल्यं न प्राप्यत एव। किं तर्हि?**

अनुभूतिस्वरूपाचार्यटिप्पणम्

प्रवृत्तिरित्याह—**स्वधर्मे प्रवृत्तानामपीति**। ततः किं सिध्यतीत्यत आह—**तत्रैवं सतीति**। एवं तावत् प्रथमाध्यायस्य द्वितीयाध्यायैकदेशसहितस्य निवर्त्यसमर्पणेन तात्पर्यमुक्त्वा, निवर्तकसमर्पणेन तात्पर्यम् उत्तरग्रन्थसन्दर्भस्य दर्शयति— **तयोश्चेत्यादिना**। तस्यामवस्थायां नार्जुनस्य संन्यासो भगवतोऽभिप्रेतः, किन्तु युद्धलक्षणस्वधर्मानुष्ठानेन सत्त्वशुद्ध्युत्तरकालम् [इति] अभिप्रेत्य प्रयोगः— **निमित्तीकृत्येति**।

अत एव **भास्कर**रोदनम् - 'यत्तु निवृत्तस्य निवृत्त्युपदेशकं शास्त्रम्' इत्यादि, **तद्** उक्ताभिप्रायापरिज्ञानप्रसूतमिति **उपेक्ष्यते**। यच्च [यश्च] तस्य समुच्चयाभिप्रायः, सोऽनन्तरमेव निरूप्यमाणन्यायबलादेवाप्तो[दपास्तो] भविष्यति। पराचक्रमिरे प्रत्येकं तदीयग्रन्थानुभाषणदूषणयोः **गयाबलाभार्या**[?] इत्युपरम्यतेऽस्माभिः मन्दमतिव्युत्पादनाय ग्रन्थमात्रविवेचनपरैः।

एवं तावत् स्वाभिप्रेतसम्बन्धमभिधाय, प्रवृत्तीकृता[**वृत्तिकृता**]मभिप्रायमनुभाषते— **तत्र केचिदित्यादिना।** ब्रह्मज्ञानं सेतिकर्तव्यमेव स्वफलसाधकम् , करणत्वाद् , दर्शादिवदित्यनुमानात् श्रौतस्मार्तकर्मोपकृतमेव ब्रह्मज्ञानं कैवल्यसाधकम् ,

आनन्दगिरिकृतव्याख्या

**अस्मदादीनामपि स्वधर्मे प्रवृत्तानां विहिताकरणत्वा[रणा]द्यभावान्न शोकादेः संसारबीजतेति दृष्टान्तस्य साध्यविकलतेति चेत्? तत्राह—** स्वधर्म इति। कायादीनामित्यादिशब्दाद् **अवशिष्टानीन्द्रियाण्यादीयन्ते।** फलाभिसन्धिः **तद्विषयोऽभिलाषः। कर्तृत्वभोक्तृत्वाभिमानः** अहङ्कारः। **प्रागुक्तप्रकारेण वागादिव्यापारे सति किं सिध्यति? तत्राह—** तत्रेति। **शुभकर्मानुष्ठानेन धर्मोपचयादिष्टं देवादिजन्म, ततः सुखप्राप्तिः। अशुभकर्मानुष्ठानेनाधर्मोपचयादनिष्टं तिर्यगादिजन्म, ततो दुःखप्राप्तिः। व्यामिश्रकर्मानुष्ठानादुभाभ्यां धर्माधर्माभ्यां मनुष्यजन्म, ततः सुखदुःखे भवतः। एवमात्मकः संसारः सन्ततो वर्तत इत्यर्थः। अर्जुनस्यान्येषां च शोकमोहयोः संसारबीजत्वमुपपादितमुपसंहरति—** इत्यत इति। **तदेवं प्रथमाध्यायस्य द्वितीयाध्यायैकदेशसहितस्य आत्माज्ञानोत्थनिवर्तनीयशोकमोहाख्यसंसारबीजप्रदर्शनपरत्वं दर्शयित्वा वक्ष्यमाणसन्दर्भस्य सहेतुकसंसारनिवर्तकसम्यग्ज्ञानोपदेशे तात्पर्यं दर्शयति—** तयोश्चेति। तद् **यथोक्तं ज्ञानम्** उपदिदिक्षुः **उपदेष्टुमिच्छन् भगवानाहेति सम्बन्धः। सर्वलोकानुग्रहार्थं यथोक्तं ज्ञानं भगवानुपदिदिक्षतीत्ययुक्तम् , अर्जुनं प्रत्येव उपदेशादित्याशङ्क्याह—** अर्जुनमिति। **न हि तस्यामवस्थायामर्जुनस्य भगवता यथोक्तं ज्ञानमुपदेष्टुमिष्टम् , किन्तु स्वधर्मानुष्ठानाद् बुद्धिशुद्ध्युत्तरकालमित्यभिप्रेत्योक्तम्—** निमित्तीकृत्येति।

**सर्वकर्मसंन्यासपूर्वकादात्मज्ञानादेव केवलात् कैवल्यप्राप्तिरिति गीताशास्त्रार्थः स्वाभिप्रेतो व्याख्यातः। सम्प्रति** वृत्तिकृताम् **अभिप्रेतं निरसितुमनुवदति—** तत्रेति। **निर्धारितः शास्त्रार्थः सतिसप्तम्या[३] परामृश्यते। तेषामुक्तिमेव विवृण्वन्नादौ [४]सैद्धान्तिकमभ्युपगमं**

भाष्यार्कप्रकाशः

**अत्र केचिदिति।** कर्मज्ञानसमुच्चयवादिन इत्यर्थः। 'यथाऽन्नं मधुसंयुक्तं मधु चान्नेन संयुतम्। एवं तपश्च विद्या च संयुक्तं भेषजं

१. 'सुखदुःखादिप्राप्ति' इति पा.। २.'अत्र' इति रा.पा.। ३. भाष्ये सतिसप्तम्यन्तेन पदेन 'तत्र' इत्यनेनेत्यर्थः। तथा च **तत्र** शास्त्रार्थे निर्धारिते सति इत्यर्थः। एवमग्रेऽपि व्याख्याशैली द्रष्टव्या। ४. भाष्यकारपक्षः सिद्धान्तः इहाभिप्रेतः।

**अग्निहोत्रादिश्रौतस्मार्तकर्मसहिताज्ज्ञानात् कैवल्यप्राप्तिरिति सर्वासु गीतासु निश्चितोऽर्थः - इति। ज्ञापकं चाहुरस्यार्थस्य 'अथ चेत् त्वमिमं धर्म्यं संग्रामं न करिष्यसि'(भ.गी.२.३३) 'कर्मण्येवाधिकारस्ते'(भ.गी.२.४७) 'कुरु कर्मैव तस्मात्त्वम्'(भ.गी.४.१५) इत्यादि। 'हिंसादियुक्तत्वाद् वैदिकं कर्माधर्माय' इतीयमप्याशङ्का न कार्या। कथम्? क्षात्रं कर्म युद्धलक्षणं गुरुभ्रातृपुत्रादिहिंसालक्षणमत्यन्तक्रूरमपि स्वधर्म इति कृत्वा नाधर्माय, तदकरणे च 'ततः स्वधर्मं कीर्तिञ्च हित्वा पापमवाप्स्यसि' (भ.गी.२.३३) इति ब्रुवता यावज्जीवादिश्रुतिचोदितानां पश्वादिहिंसालक्षणानां च कर्मणां प्रागेव नाधर्मत्वमिति सुनिश्चितमुक्तं भवतीति।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

यथा प्रयाजाद्युपकृतमेव दर्शादि स्वर्गादिसाधकमित्यर्थः। स्वधर्माननुष्ठाने पापप्राप्त्यभिधानं च सामर्थ्यं (च) केवलज्ञानात् कैवल्यं नास्तीत्यस्यार्थस्य गमकमाह— **ज्ञापकं चाहुरित्यादिना।** ननु 'न हिंस्यात् सर्वा भूतानी'त्यादिशास्त्रप्रतिषिद्धहिंसादियुक्तत्वात् वैदिकं कर्माधर्माय, न तु मोक्षोपयोगीति **सांख्यः,** तत्राह— **हिंसादियुक्तत्वादिति। कथमिति** कस्मादित्यस्मिन्नर्थे। अत्यन्तक्रूरमपि कर्म विहितत्वाद् नाधर्म इति ब्रुवता वासुदेवेन यावज्जीवादिश्रुतिविहितानां दूरत एव नाधर्मत्वमित्युक्तं भवति। रागप्राप्त[हिंसा]प्रतिषेधार्थत्वाद् 'न हिंस्यादि'त्यादिवाक्यस्य, न क्रत्वर्थहिंसायामधर्मत्वमिति भावः।

आनन्दगिरिकृतव्याख्या

**प्रत्यादिशति—** सर्वकर्मेति। [1]**वैदिकेन कर्मणा समुच्चयं व्युदसितुं** मात्रपदम्। **स्मार्तेन कर्मणा समुच्चयं निरसितुमवधारणम्।** [2]**अभ्याससम्बन्धं धुनीते—** केवलादिति। **नैवेत्येवकारः सम्बध्यते। केन तर्हि प्रकारेण ज्ञानं कैवल्यप्राप्तिकारणमित्याशङ्क्याह—** किं तर्हीति। **किं तत्र प्रमापकमित्याशङ्क्येदमेव शास्त्रमित्याह—** इति सर्वास्विति। **यथा प्रयाजानुयाजाद्युपकृतमेव दर्शपूर्णमासादि स्वर्गसाधनम् , तथा श्रौतस्मार्तकर्मोपकृतमेव ब्रह्मज्ञानं कैवल्यं साधयति। विमतं सेतिकर्तव्यताकमेव स्वफलसाधकं, करणत्वाद्, दर्शपौ[पू]र्णमासादिवत्। तदेवं ज्ञानकर्मसमुच्चयपरं शास्त्रमित्यर्थः।** इतिपदम् **आहुरित्यनेन पूर्वेण सम्बध्यते। पौर्यापर्यपर्यालोचनायां शास्त्रस्य समुच्चयपरत्वं न निर्धारितमित्याशङ्क्याह—** ज्ञापकं चेति। **'न केवलं ज्ञानं मुक्तिहेतुः, अपि तु समुच्चितम्' इत्यस्यार्थस्य स्वधर्माननुष्ठाने पापप्राप्तिवचनसामर्थ्यलक्षणं लिङ्गं गमकमित्यर्थः। शास्त्रस्य समुच्चयपरत्वे लिङ्गवद् वाक्यमपि प्रमाणमित्याह—** कर्मण्येवेति। **तत्रैव वाक्यान्तरमुदाहरति—** कुरु कर्मेति। **ननु 'न हिंस्यात् सर्वा भूतानि' इत्यादिना प्रतिषिद्धत्वेन हिंसादेरनर्थहेतुत्वावगमात् तदुपेतं वैदिकं कर्माधर्मायेति नानुष्ठातुं शक्यते। तथा च तस्य मोक्षे ज्ञानेन समुच्चयो न सिध्यतीति** सांख्यमत**माशङ्क्य परिहरति—** हिंसादीति। आदि**शब्दाद् उच्छिष्टभक्षणं**[3] **गृह्यते। यथोक्ताशङ्का न कर्तव्येत्यत्राकाङ्क्षापूर्वकं हेतुमाह—** कथमित्यादिना। **स्वशब्देन क्षत्रियो विवक्ष्यते। युद्धाकरणे क्षत्रियस्य प्रत्यवायश्रवणात् , तस्य तं प्रति नित्यत्वेनावश्यकर्तव्यत्वप्रतीतेर्गुर्वादिहिंसायुक्तमतिक्रूरमपि कर्म नाधर्मायेति हेत्वन्तरमाह—** तदकरणे चेति। **आचार्यादिहिंसायुक्तमतिक्रूरमपि युद्धं नाधर्मायेति ब्रुवता भगवता श्रौतानां हिंसादियुक्तानामपि कर्मणां दूरतो नाधर्मत्वमिति स्पष्टमुपदिष्टं भवति।** [4]**सामान्यशास्त्रस्य व्यर्थहिंसानिषेधार्थत्वात् , क्रतुविषये चोदितहिंसायास्तदविषयत्वात् , कुतो वैदिककर्मानुष्ठानानुपपत्तिरित्यर्थः। ज्ञानकर्मसमुच्चयात् कैवल्यसिद्धिरित्युपसंहर्तुम्** इतिशब्दः।

भाष्यार्कप्रकाशः

महद्' इति **हारीतस्मृत्याद्यनुसारिण** इति भावः। **कैवल्यं** मोक्षः। **कथमिति**। कुतो न कार्येति प्रश्नः। तत्रोत्तरमाह— **क्षात्रमित्यादिना। ब्रुवता** श्रीकृष्णेनेति शेषः।

---

१. भाष्ये मात्रपदस्य एवकारस्य केवलपदस्य चासंकीर्णं प्रयोजनं दर्शयति— **वैदिकेनेत्यादिना**। २. प्रत्ययावृत्तिरूपः अभ्यासः। ३. तच्च ज्योतिष्टोमे सोमरसभक्षणावसरे विहितम्। ४. 'न हिंस्यात् सर्वा भूतानी'ति निषेधशास्त्रस्य विधिशास्त्रानुरोधेन विहितातिरिक्तहिंसाविषयत्वादिति भावः।

[ज्ञानकर्मसमुच्चयवादनिरासः – १. तत्र निष्ठाद्वयविभागानुपपत्तिः]

**तदसत्। ज्ञानकर्मनिष्ठयोर्विभागवचनाद् बुद्धिद्वयाश्रययोः। 'अशोच्यान्' इत्यादिना भगवता यावत् 'स्वधर्ममपि चावेक्ष्य'(भ.गी.२.३१) इत्येतदन्तेन ग्रन्थेन यत् परमार्थात्मतत्त्वनिरूपणं कृतम् , तत् सांख्यम्। तद्विषया बुद्धिः 'आत्मनो जन्मादिषड्विक्रियाऽभावादकर्ताऽऽत्मा' इति प्रकरणार्थनिरूपणाद् या जायते, सा [1]सांख्यबुद्धिः। सा येषां [2]ज्ञानिनामुचिता भवति ते सांख्याः। एतस्या बुद्धेर्जन्मनः प्रागात्मनो देहादिव्यतिरिक्तत्व[3]-कर्तृत्व-भोक्तृत्वाद्यपेक्षो**

अनुभूतिस्वरूपाचार्यटिप्पणम्

तत्रानुमानं तावत् शुक्तिज्ञानेऽनैकान्तिकम्। न ह्यबोधनिवृत्तौ स्वफले [ज्ञानेन] सहकारि किञ्चिदपेक्ष्यत इत्याह— **तदसदिति**। यच्च सर्वासु गीतासु समुच्चय एव प्रतिपाद्यत इति प्रतिज्ञावचनम् , तद् विभागवचनबाधितमित्याह— [**ज्ञानकर्मनिष्ठयोरिति**।] सांख्ययोगबुद्धिद्वयाश्रययोरित्युक्तम्। तत्र सांख्यबुद्धिं व्याख्यातुं प्रथमं सांख्यशब्दार्थमाह— [**अशोच्यानित्यादिनेति**।] सम्यक् ख्यायते प्रकाश्यते तत्त्वं यया सा **संख्या** वैदिकी सम्यग्बुद्धिः। तत्संबन्धि सांख्य-

आनन्दगिरिकृतव्याख्या

**यत्तावद् - ब्रह्मज्ञानं , सेतिकर्तव्यताकं स्वफलसाधकं, करणत्वादित्यनुमानम् , तद् दूषयति—** तदसदिति। **न हि शुक्तिकादिज्ञानमज्ञाननिवृत्तौ स्वफले सहकारि किञ्चिदपेक्षते। तथा च व्यभिचारादसाधकं करणत्वमित्यर्थः। यत्तु गीताशास्त्रे समुच्चयस्यैव प्रतिपाद्यतेति प्रतिज्ञातम् , तदपि विभागवचनविरुद्धमित्याह—** ज्ञानेति। **सांख्यबुद्धिर्योगबुद्धिश्चेति** बुद्धिद्वयम्। **तत्र सांख्यबुद्ध्याश्रयां ज्ञाननिष्ठां व्याख्यातुं सांख्यशब्दार्थमाह—** अशोच्यानित्यादिनेति। **'अशोच्यानि'त्यादि 'स्वधर्ममपि चावेक्ष्य' इत्येतदन्तं वाक्यं यावद् भविष्यति तावता ग्रन्थेन यत् परमार्थभूतमात्मतत्त्वं भगवता निरूपितम्[4], तद् यया सम्यक् ख्यायते प्रकाश्यते सा वैदिकी सम्यग्बुद्धिः संख्या। तया प्रकाश्यत्वेन सम्बन्धि प्रकृतं तत्त्वं सांख्यमित्यर्थः। सांख्यशब्दार्थमुक्त्वा तत्प्रकाशिकां बुद्धिं तद्वतश्च सांख्यान् व्याकरोति—** तद्विषयेति। **तद्विषया बुद्धिः सांख्यबुद्धिरिति सम्बन्धः। तामेव प्रकटयति—** आत्मन इति। **'न जायते म्रियते वा' इत्यादिप्रकरणार्थनिरूपणद्वारेण 'आत्मनः षड्भावविक्रियाऽसम्भवात् कूटस्थोऽसौ' इति या बुद्धिरुत्पद्यते, सा सांख्यबुद्धिः, तत्पराः संन्यासिनः सांख्या इत्यर्थः। सम्प्रति**

भाष्यार्कप्रकाशः

समुच्चयवादं खण्डयति— **तदसदित्यादिना। तत्** कर्मसहिताद् ज्ञानान्मुक्तिरिति मतम् **असद्** दुष्टम्। तत्र हेतुमाह— **ज्ञानेति**। बुद्धिद्वयाश्रययोः ज्ञानकर्मनिष्ठयोः विभागवचनादिति। तदेव विवृणोति— **अशोच्यानित्यादिना**। अशोच्यानिति श्लोक आदिर्यस्य तेन। 'स्वधर्ममपि चावेक्ष्ये'ति श्लोकोऽन्तो यस्य तेन। 'स्वधर्मम्' इति श्लोकस्य नात्रान्तर्भावः, किन्तु 'देही नित्यम्' इति श्लोकस्यैव। 'स्वधर्मम्' इति श्लोकस्तु ग्रन्थस्यास्यावधिरिति बोध्यम्। '**अशोच्यानि**'त्यादिना '**न त्वं शोचितुमर्हसी**'त्येतदन्तेन ग्रन्थेनेति परमार्थः। भगवता यत् परमार्थतत्त्वनिरूपणं कृतं तत् सांख्यमित्यन्वयः। सम्यक् ख्यायते प्रकाश्यते तत्त्वमनयेति **संख्या** वैदिकी सम्यग्बुद्धिः। तया संख्यया प्रकाश्यमात्मतत्त्वं सांख्यमिति व्युत्पत्तेरिति भावः। **यावदिति** साकल्येऽवधारणे वाऽव्ययम्। प्रकरणार्थनिरूपणाद् 'आत्मनो जन्मादिविक्रियाऽभावादात्मा अकर्ता' इति या **तद्विषया** सांख्यविषया बुद्धिर्जायते सा बुद्धिः सांख्येत्युच्यते, उपचारादिति भावः। न च संख्याया एव बुद्धित्वात् कथं सांख्याया अपि बुद्धित्वमिति वाच्यम् ; संख्या बुद्धिरन्तःकरणम् , सांख्या बुद्धिस्तु तद्वृत्तिरिति भेदात्। न च कुत एतद्भेदावगम इति वाच्यम् , 'या जायते' इति भाष्यात्। बुद्धिवृत्तिर्हि प्रकरणार्थनिरूपणाज्जायते। बुद्धिस्तु पञ्चभूतसत्त्वांशसमष्ट्या प्रागेव जातेति नाधुना जायते इति। सा सांख्या बुद्धिर्येषाम् **उपचिता** प्रवृद्धा - दृढेति यावत् - भवति, ते ज्ञानिनः सांख्याः स्युः। सांख्या एषामस्तीति सांख्याः इत्यर्शआद्यजन्तोऽयं शब्द इति भावः। **एतस्या**

१. 'सांख्या बुद्धिः' इति रा.पा.। २. 'ज्ञानिनामुपचिता भवति ते सांख्याः स्युः' इति रा.पा.। ३. 'देहादिव्यतिरिक्तस्य कर्तृत्व' इति पा.। ४. अनेन 'यत् परमार्थात्मतत्त्वनिरूपणं कृतम्' इति भाष्यं 'यत् निरूपितं परमार्थात्मतत्त्वम्' इति व्याख्यातं भवति।

**धर्माधर्मविवेकपूर्वको मोक्षसाधनानुष्ठान[1]लक्षणो योगः। तद्विषया बुद्धिर्योगबुद्धिः। सा येषां [2]कर्मिणामुचिता भवति, ते योगिनः। तथा च भगवता विभक्ते द्वे बुद्धी निर्दिष्टे — 'एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु'(भ.गी.२.३९) इति। तयोश्च सांख्यबुद्ध्याश्रयां ज्ञानयोगेन निष्ठां सांख्यानां विभक्तां वक्ष्यति— 'पुरा वेदात्मना मया प्रोक्ता' (द्र. भ.गी.३.३) इति। तथा च योगबुद्ध्याश्रयां कर्मयोगेन निष्ठां [3]विभक्तां वक्ष्यति— 'कर्मयोगेन योगिनाम्' (भ. गी.३.३) इति। एवं सांख्यबुद्धिं योगबुद्धिं चाश्रित्य द्वे निष्ठे विभक्ते भगवतैवोक्ते ज्ञानकर्मणोः कर्तृत्वाकर्तृत्वैकत्वानेकत्व-बुद्ध्याश्रययोः युगपदेकपुरुषाश्रयत्वासम्भवं पश्यता।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

मित्यभिप्रायः। 'न जायते म्रियते वा' इति प्रकरणपर्यालोचनया निरवयवस्यात्मनो जन्मादिषड्भावविकारशून्यत्वात् अविक्रिय आत्मेति बुद्धिः सांख्यबुद्धिः। तत्पराः संन्यासिनः सांख्या इत्यर्थः। इदानीं योगबुद्धिं व्याख्याति— **एतस्या बुद्धेरि-त्यादिना। युज्यते** योग्यः क्रियते पुरुषो मोक्षाय अनेनेश्वराराधनरूपेण कर्मणेति योग इत्यर्थः। उक्तार्थे भगवद्वाक्यं पठति— **तथा चेति**। 'पुरा प्रोक्ता मयाऽनघ। ज्ञानयोगेन सांख्यानाम्' इत्येतदर्थतो दर्शयति— **पुरा वेदात्मनेति**। ननु भगवता वा कया युक्त्या द्वे निष्ठे(ति) विभक्ते इत्याशङ्क्याह— **ज्ञानकर्मणोरिति**। कर्तृत्वानेकत्वबुद्ध्याश्रयं कर्म, अकर्तृत्वैकत्वबुद्ध्याश्रयं

आनन्दगिरिकृतव्याख्या

**योगबुद्ध्याश्रयां कर्मनिष्ठां व्याख्यातुकामो योगशब्दार्थमाह—** एतस्या इति। **यथोक्तबुद्ध्युत्पत्तौ विरोधादेवानुष्ठानायोगात् तस्या-स्तन्निवर्तकत्वात् , पूर्वमेव तदुत्पत्तेरात्मनो देहादिव्यतिरिक्तत्वाद्यपेक्षया धर्माधर्मौ[4] निष्कृष्य, तेनेश्वराराधनरूपेण कर्मणा पुरुषो मोक्षाय** युज्यते **योग्यः सम्पद्यते। तेन मोक्षसिद्धये परम्परया साधनीभूतप्रागुक्तधर्मानुष्ठानात्मको योग इत्यर्थः। अथ योगबुद्धिं विभजन् योगिनो विभजते—** तद्विषयेति। **उक्ते बुद्धिद्वये भगवतोऽभिमतिं दर्शयति—** तथा चेति। **सांख्यबुद्ध्याश्रया ज्ञाननिष्ठेत्येतदपि भगवतो ऽभिमतमित्याह—** तयोश्चेति। **ज्ञानमेव योगो ज्ञानयोगः। तेन हि ब्रह्मणा** युज्यते **तादात्म्यमापद्यते। तेन संन्यासिनां** निष्ठा **निश्चयेन स्थितिस्तात्पर्येण परिसमाप्तिः, तां कर्मनिष्ठातो व्यतिरिक्तां, निष्ठयोर्मध्ये निष्कृष्य भगवान् वक्ष्यतीति योजना। 'लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ। ज्ञानयोगेन सांख्यानाम्' इत्येतद् वाक्यमुक्तार्थविषयमर्थतोऽनुवदति—** पुरेति। **योगबुद्ध्याश्रया कर्मनिष्ठे-त्यत्रापि भगवदनुमतिमादर्शयति—** तथा चेति। **कर्मैव योगः कर्मयोगः। तेन हि बुद्धिशुद्धिद्वारा मोक्षहेतुज्ञानाय पुमान् युज्यते। तेन निष्ठां कर्मिणाम् , ज्ञाननिष्ठातो विलक्षणां 'कर्मयोगेने'त्यादिना वक्ष्यति भगवानिति योजना। निष्ठाद्वयं बुद्धिद्वयाश्रयं भगवता विभज्योक्तमुपसंहरति—** एवमिति। **कया पुनरनुपपत्त्या भगवता निष्ठाद्वयं विभज्योक्तमित्याशङ्क्याह—** ज्ञानकर्मणोरिति। **कर्म हि कर्तृत्वानेकत्वबुद्ध्याश्रयम् , ज्ञानं पुनरकर्तृत्वैकत्वबुद्ध्याश्रयम्। तदुभयमित्थं विरुद्धसाधनसाध्यत्वात् नैकावस्थस्यैव पुरुषस्य सम्भवति। अतो युक्तमेव तयोर्विभागवचनमित्यर्थः।**

भाष्यार्कप्रकाशः

**इति**। सांख्याया इत्यर्थः। **देहादिव्यतिरिक्तस्येति**। नास्तिकानां देहादिव्यतिरिक्तात्माभावेऽप्यास्तिकानां देहादिव्यतिरिक्तात्माऽस्त्येव, देहपातानन्तरं स्वर्गादिफलसिद्ध्यर्थमास्तिकैर्यज्ञादिकर्मणां क्रियमाणत्वादिति भावः। **मोक्षसाधनानुष्ठानलक्षण इति**। मोक्षशब्दोऽत्र मोक्षहेतुज्ञानपरः, उपचारात्। तत्साधनानि तु फलाभिसन्धिरहितानि कर्माणि। तदनुष्ठानमेव लक्षणं स्वरूपं यस्य स तथोक्तो योगः। मोक्षस्य परम्परया साधनानि मोक्षसाधनानि कर्माणीति वा। 'कर्तृत्वानेकत्वबुद्ध्याश्रयस्य कर्मणः, एकत्वाकर्तृत्वबुद्ध्याश्रयस्य ज्ञानस्य च युगपदेकपुरुषाश्रयत्वासम्भवं पश्यता भगवता कृष्णेन एवं सांख्यबुद्धिं योगबुद्धिं चाश्रित्य विभक्ते द्वे निष्ठे उक्ते' इत्यन्वयः।

१. 'ष्ठाननिरूपणलक्षणो' इति मु.पा.। २. 'कर्मिणामुपचिता' इति रा.पा.। ३. 'योगिनां विभक्तां' इति पा.। ४. 'धर्माधर्मम्' इति पा.।

**यथैतद् विभागवचनं तथैव दर्शितं शातपथीये ब्राह्मणे— 'एतमेव प्रव्राजिनो लोकमिच्छन्तो ब्राह्मणाः प्रव्रजन्ति' इति सर्वकर्मसंन्यासं विधाय, तच्छेषेण 'किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः'(बृ.उ.४.४.२२) इति। तत्रैव[1] च प्राग् दारपरिग्रहात् [2]पुरुष आत्मा प्राकृतो धर्मजिज्ञासोत्तरकालं लोकत्रयसाधनम् — पुत्रं[3], द्विप्रकारं च वित्तम् - मानुषं दैवं च; तत्र मानुषं वित्तं [4]कर्मरूपं पितृलोकप्राप्तिसाधनं, विद्यां च दैवं वित्तं देवलोकप्राप्तिसाधनम् -**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ज्ञानम् । तयोरेवं विरुद्धसाधनसाध्यत्वात् नैकावस्थस्यैव पुरुषस्य ते संभवत इत्यर्थः।

उक्तेऽर्थे **यथैतदि**त्यादिना भगवद्वचनस्य मूलत्वेनोदाहृतश्रुतेस्तात्पर्यं कथयति—**तत्र चेत्यादिना। प्राकृत** इत्यतत्त्ववित्। गुरुकुले यथाविधानं वेदानधीत्य धर्मजिज्ञासोत्तरकालम् एतल्लोकपितृलोक(देवलोक)ब्रह्मलोकप्राप्तिसाधनं पुत्रं

आनन्दगिरिकृतव्याख्या

**भगवदुक्तविभागवचनस्य मूलत्वेन श्रुतिमुदाहरति—** यथेति। **तत्र ज्ञाननिष्ठाविषयं वाक्यं पठति—** एतमेवेति। **प्रकृतमात्मानं नित्यविज्ञप्तिस्वभावं वेदितुमिच्छन्तस्त्रिविधेऽपि [5] कर्मफले वैतृष्ण्यभाजः सर्वाणि कर्माणि परित्यज्य ज्ञाननिष्ठाः भवन्तीति [6]पञ्चमलकारस्वीकारेण संन्यासविधिं विवक्षित्वा तस्यैव विधेः** शेषेण **अर्थवादेन 'किं प्रजया' इत्यादिना मोक्षफलं ज्ञानमुक्तमित्यर्थः। ननु फलभावात् प्रजाक्षेपो नोपपद्यते, पुत्रेणैतल्लोकजयस्य वाक्यान्तरसिद्धत्वादित्याशङ्क्य , विदुषां प्रजासाध्यमनुष्यलोकस्यात्मव्यतिरेकेणाभावादात्मनश्चासाध्यत्वादाक्षेपो युक्तिमानिति विवक्षित्वाऽऽह—** येषामिति। इति **ज्ञानं दर्शितमिति शेषः। तस्मिन्नेव ब्राह्मणे कर्मनिष्ठाविषयं वाक्यं दर्शयति—** तत्रैवेति। प्राकृतत्व**मतत्त्वदर्शित्वेनाज्ञत्वम्। स च ब्रह्मचारी सन् गुरुसमीपे यथाविधि वेदमधीत्यार्थज्ञानार्थं धर्मजिज्ञासां[7] कृत्वा तदुत्तरकालं लोकत्रयप्राप्तिसाधनं पुत्रादित्रयं 'सोऽकामयत जाया मे स्यात्' इत्यादिना कामितवानिति श्रुतमित्यर्थः। वित्तं विभजते—**द्विप्रकारमिति। **तदेव प्रकारद्वैरूप्यमाह—**मानुषमिति। **मानुषं वित्तं व्याचष्टे—** कर्मरूपमिति। **तस्य फलपर्यवसायित्वमाह—** पितृलोकेति। **दैवं वित्तं विभजते—** विद्यां चेति। **तस्यापि फलनिष्ठत्वमाह—** देवेति। **कर्मनिष्ठाविषयत्वेनोदाहृतश्रुतेस्तात्पर्यमाह—**

भाष्यार्कप्रकाशः

'तच्छेषेण यथैतद् विभागवचनं तथैव दर्शितं ब्राह्मणे' इत्यन्वयः। **एतमेव लोकम्** आत्मलोकम्। **प्रव्राजिनः** संन्यासिनः। **प्रव्रजन्ति** संन्यसन्ति। **येषाम्** अस्माकमात्मैव लोकः, न त्वात्मनोऽन्यः कश्चिल्लोकोऽस्ति , ते वयं **प्रजया** सन्तानेन किं करिष्यामः? न किमपि। अतः प्रजार्थं गृहस्थाश्रमस्वीकारोऽस्माकमनुचित इति भावः। आत्मकामानां संन्यासः, प्रजाकामानां तु गृहस्थाश्रमस्वीकारद्वारा कर्माणि चेति सुविभक्तमिति तात्पर्यम्। श्रुत्यर्थमेव विवृणोति— **तत्र चेति।** श्रुतावित्यर्थः। दारपरिग्रहात्प्राक् **पुरुषस्य** कार्यकरणसंघातलक्षणस्य **आत्मा** स्वरूपभूतः। आत्मनैव संघातस्य कल्पितत्वात् , कल्पितस्य चाधिष्ठानात्मकत्वादिति भावः। **पुरुष आत्मेति** पाठे पुरि शरीरे शेत इति **पुरुषः** शारीर आत्मा। **प्राकृतः** अज्ञः। **धर्मजिज्ञासेति।** अधीत्य वेदवेदाङ्गानि 'अथातो धर्मजिज्ञासा' इति धर्मविचारं कृत्वेत्यर्थः। **सोऽकामयत** । प्राकृतः आत्मा तच्छब्दार्थः। किमकामयत? इत्यत आह— **पुत्रं वित्तं चेति।** कीदृशं तद्? अत आह— **लोकत्रयसाधनमिति**। यद्वा किमर्थम्? अत आह— **लोकत्रयसाधनमिति**। लोकत्रयसिद्ध्यर्थं लोकत्रयसाधनं पुत्रं वित्तं चाकामयतेत्यर्थः। तत्र किंलोकसाधनः पुत्रः? अत आह— **मनुष्येति।** वित्तं कतिविधम्? अत आह— **द्विप्रकारमिति।** तावेव प्रकारौ दर्शयति— **मानुषं दैवं चेति**। किं तन्मानुषं वित्तम्? अत आह— **कर्मेति।** किं तत् कर्म? इत्यत आह— **अनुरूपमिति।** विहितमित्यर्थः। किंलोकसाधनमिदम्? अत आह— **पितृलोकेति।** किं पुनर्दैवं वित्तम्? अत आह— **विद्यामिति।** किंलोकसाधनमिदम्? अत आह—**देवलोकेति।** अत्र 'सोऽकामयत, जाया मे स्यादि'त्यादि , 'अथ त्रयो वाव लोका मनुष्यलोकः पितृलोको

१. 'तत्र च' इति पा.। २. 'पुरुषस्यात्मा' इति रा.पा.। ३. 'पुत्रं मनुष्यलोकप्राप्तिसाधनम्' इति रा.पा.। ४. 'कर्मानुरूपम्' इति रा.पा.। ५. पुत्रद्विविधवित्तसाध्यम् एतल्लोकपितृलोकदेवलोकभेदेन त्रिविधं फलम्। ६. 'प्रव्रजन्ति' इति श्रुतिगतपदे विध्यर्थकलेट्लकारस्वीकारेणेत्यर्थः। ७. धर्मविचारमित्यर्थः।

**सोऽकामयत - इत्यविद्याकामवत एव सर्वाणि कर्माणि श्रौतादीनि दर्शितानि। तेभ्यो 'व्युत्थाय प्रव्रजन्ति' इति व्युत्थानम् आत्मानमेव लोकमिच्छतोऽकामस्य [१]विहितम्। तदेतद् विभागवचनमनुपपन्नं स्यात् , यदि श्रौतकर्मज्ञानयोः समुच्चयोऽभिप्रेतः स्याद् भगवतः।**

[२. ज्ञानकर्मसमुच्चयमते अर्जुनप्रश्नानुपपत्तिः]

**न चार्जुनस्य प्रश्नः उपपन्नो भवति— 'ज्यायसी चेत् कर्मणस्ते' (भ.गी.३.१) इत्यादिः। एकपुरुषानुष्ठेयत्वासम्भवं बुद्धिकर्मणोः भगवता पूर्वमनुक्तं कथमर्जुनः अश्रुतं बुद्धेश्च कर्मणो ज्यायस्त्वं भगवत्यध्यारोपयेन्मृषैव—**

अनुभूतिस्वरूपाचार्यटिप्पणम्

द्विप्रकारं च वित्तं कामितवानिति श्रूयते— 'सोऽकामयत जाया मे स्यादि'त्यादिना। मानुषं वित्तं व्याचष्टे— **कर्मानु[कर्म] रूपमिति**। दैवं व्याचष्टे— **विद्यां चेति**। इत्थं कामनाविशिष्टस्यैव कर्माणि, कर्मसु विविक्तस्यैव[विरक्तस्यैव] संन्यासपूर्विका ज्ञाननिष्ठेति अवस्थाभेदेन ज्ञानकर्मणोर्भिन्नाधिकारित्वं तत्र श्रुतौ दर्शितमित्यर्थः। भवत्वेवम् , ततः किमित्याशङ्क्याह— **तदेतदिति।**

एवं तावत् समुच्चयप्रतिज्ञाया विभागवचनविरोधमुपपाद्य, इदानीं [२]प्रश्नानुपपत्तिविरोधमाह— **न चार्जुनस्येत्यादिना।**

आनन्दगिरिकृतव्याख्या

अविद्येति। **अज्ञस्य कामनाविशिष्टस्यैव कर्माणि 'सोऽकामयत' इत्यादिना दर्शितानीत्यर्थः। ज्ञाननिष्ठाविषयत्वेन दर्शितश्रुतेरपि तात्पर्यं दर्शयति—** तेभ्य इति। **कर्मसु विरक्तस्यैव संन्यासपूर्विका ज्ञाननिष्ठा प्रागुदाहृतश्रुत्या दर्शितेत्यर्थः। अवस्थाभेदेन ज्ञानकर्मणोर्भिन्नाधिकारत्वस्य श्रुतत्वात् तन्मूलेन भगवतो विभागवचनेन शास्त्रस्य समुच्चयपरत्वं प्रतिज्ञातमपबाधितमिति साधितम्। किञ्च समुच्चयो ज्ञानस्य श्रौतेन, स्मार्तेन वा कर्मणा विवक्ष्यते? यदि [३]प्रथमस्तत्राह—** तदेतदिति।

**समुच्चयेऽभिप्रेते प्रश्नानुपपत्तिं दोषान्तरमाह—** न चेति। **तामेवानुपपत्तिं प्रकटयति—** एकपुरुषेति। **यदि समुच्चयः शास्त्रार्थो भगवता विवक्षितस्तदा ज्ञानकर्मणोरेकेन पुरुषेणानुष्ठेयत्वमेव तेनोक्तम् , अर्जुनेन च श्रुतम्। तत् कथं तदसम्भवमनुक्तमश्रुतं च मिथ्यैव श्रोता भगवत्यारोपयेत्? न च तदारोपादृते 'किमिति मां कर्मण्येवातिक्रूरे युद्धलक्षणे नियोजयसी'ति प्रश्नोऽवकल्पते। तथा च प्रश्नालोचनया प्रष्टृप्रतिवक्त्रोः शास्त्रार्थतया समुच्चयोऽभिप्रेतो न भवतीति प्रतिभातीत्यर्थः। किञ्च समुच्चयपक्षे कर्मापेक्षया बुद्धेर्ज्यायस्त्वं भगवता पूर्वमनुक्तमर्जुनेन चाश्रुतं कथमसौ तस्मिन्नारोपयितुमर्हति? ततश्चानुवादवचनं श्रोतुरनुचितमित्याह—** बुद्धेश्चेति।

भाष्यार्कप्रकाशः

देवलोकः' इत्यादि च **बृहदारण्यक**मनुसन्धेयम्। **व्युत्थानं** व्युत्थितिः, कर्मसंन्यास इत्यर्थः। 'श्रौतकर्मणो ज्ञानस्य च समुच्चयोऽभिप्रेतः स्याद् यदि , तदैतद् विभागवचनमनुपपन्नं स्यादि'त्यन्वयः।

**न चेति**। यदि कर्मज्ञानयोः समुच्चयोऽभिप्रेतस्तर्हि कर्मापेक्षया ज्ञानस्य ज्यायस्त्ववचनमयुक्तम् , समुच्चितयोरेव द्वयोर्मोक्षहेतुत्वात्। ते च समुच्चिते कर्मज्ञाने एकपुरुषेण युगपदनुष्ठेये च भवत एवेति कथं कृष्णोऽर्जुनं कर्मण्येव केवले चोदयामास निष्फले? न हि केवलाज्ज्ञानादिव केवलात् कर्मणोऽपि स्यान्मोक्षस्तव मते। अथ यदि कृष्णोऽर्जुनं समुच्चय एव प्रेरितवानित्युच्यते, तर्हि 'तत् किं कर्मणि घोरे मां नियोजयसि केशवे'त्यर्जुनोपालम्भः कथमुपपद्येत? 'भगवता पूर्वमनुक्तं बुद्धिकर्मणोरेकपुरुषानुष्ठेयत्वासम्भवं, बुद्धेः कर्मणो ज्यायस्त्वं च कथमर्जुनो भगवति मृषैवाध्यारोपयेदि'त्यन्वयः।

ननु श्रौतेन कर्मणा ज्ञानस्य समुच्चयो माऽस्तु नाम, स्मार्तेन तु स्यात् , 'तथा तपश्च विद्या च संयुक्तं भेषजं महद्' इति स्मृतेः,

---

१. 'अभिहितम्' इति पा.। २. प्रश्नानुपपत्तिरूपविरोधमित्यर्थः। ३. द्वितीयपक्षप्रतिक्षेपः 'नापि स्मार्तेन— ' इत्यादिग्रन्थेन भविष्यति।

**'ज्यायसी चेत् कर्मणस्ते मता बुद्धिः'(भ.गी.३.१) इति।**

**किञ्च - यदि बुद्धिकर्मणोः सर्वेषां समुच्चय उक्तः स्यात् , अर्जुनस्यापि स उक्त एवेति 'यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम्'(भ.गी.५.१) इति कथमुभयोरुपदेशे सत्यन्यतरविषय एव प्रश्नः स्यात्? न हि पित्तप्रशमनार्थिनो वैद्येन 'मधुरं शीतलं च भोक्तव्यम्' इत्युपदिष्टे, 'तयोरन्यतरत् पित्तप्रशमनकारणं ब्रूहि' इति प्रश्नो भवति। अथार्जुनस्य भगवदुक्तवचनार्थविवेकानवधारणनिमित्तः प्रश्नः कल्प्येत, तथापि भगवता प्रश्नानुरूपं प्रतिवचनं देयम् - 'मया बुद्धिकर्मणोः समुच्चय उक्तः, किमर्थमित्थं त्वं भ्रान्तोऽसि' इति; न तु पुनः प्रतिवचनमननुरूपं पृष्टादन्यदेव— 'द्वे निष्ठे मया पुरा प्रोक्ते' इति वक्तुं युक्तम्।**

**नापि स्मार्तेनैव कर्मणा बुद्धेः समुच्चयेऽभिप्रेते विभागवचनादि सर्वमुपपन्नम्। किञ्च क्षत्रियस्य युद्धं स्मार्तं कर्म स्वधर्म इति जानतः 'तत् किं कर्मणि घोरे मां नियोजयसि'(भ.गी.३.१) इत्युपालम्भोऽनुपपन्नः। तस्माद् गीताशास्त्रे**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ननु ज्ञानस्य प्राधान्यात् श्रेष्ठत्ववचनं भविष्यतीत्याशङ्क्याह— **न हि पित्तेति।** यथा प्रयाजादिरहितं दर्शादि न स्वर्गसाधनम् , तथा ज्ञानकर्मणोः अङ्गाङ्गिभावपक्षे न केवलं ज्ञानं पुरुषार्थसाधनमिति अन्यतरविषयप्रश्नो न स्यादित्यर्थः। अर्थापत्तेरन्यथाऽप्युपपत्तिमाशङ्क्य परिहरति— **तथापीत्यादिना।**

ननु श्रौतस्य कर्मणो नास्ति ज्ञानेन समुच्चय इत्यनेनाभिप्रायेण द्वे निष्ठे इति उक्तम्। स्मार्तेन तु युद्धादिना भगवतोऽपि समुच्चय एवाभिप्रेत इत्याशङ्क्याह— **नापि स्मार्तेनैवेति।** विभागवचनम् , आदिशब्दाद् बुद्धेर्ज्यायस्त्वम् , एतत् सर्वं न मुख्यं स्यात्। श्रौतस्मार्तकर्मवाचकस्य कर्मशब्दस्य श्रौतमात्रविषयत्वे सङ्कोचप्रसङ्गाद् विकाराश्रयत्वासंभव-साम्याच्चेत्यर्थः। यस्मात् समुच्चयपक्षे प्रश्नवाक्यस्य प्रतिवचनवाक्यस्य च नार्थः सङ्गच्छते, **तस्मादि**त्युपसंहारः।

आनन्दगिरिकृतव्याख्या

**इतश्च समुच्चयः शास्त्रार्थो न सम्भवति, अन्यथा पञ्चमादावर्जुनस्य प्रश्नानुपपत्तेरित्याह—** किञ्चेति। **ननु सर्वान् प्रत्युक्तेऽपि समुच्चये, नार्जुनं प्रत्युक्तोऽसाविति तदीयप्रश्नोपपत्तिरित्याशङ्क्याह—** यदीति। एतयोः **कर्मतत्त्यागयोरिति यावत्। ननु कर्मापेक्षया कर्मत्यागपूर्वकस्य ज्ञानस्य प्राधान्यात् तस्य श्रेयस्त्वात् तद्विषयप्रश्नोपपत्तिरिति चेत्? नेत्याह—** न हीति। **तथैव समुच्चये पुरुषार्थसाधने भगवता दर्शिते सत्यन्यतरगोचरो न प्रश्नो भवतीति शेषः। समुच्चये भगवतोक्तेऽपि तदज्ञानादर्जुनस्य प्रश्नोपपत्तिरिति शङ्कते—** अथेति। **अज्ञाननिमित्तं प्रश्नमङ्गीकृत्यापि प्रत्याचष्टे—** तथापीति। **भगवतो भ्रान्त्यभावेन पूर्वापरानुसन्धानसम्भवादित्यर्थः। प्रश्नानुरूपत्वमेव प्रतिवचनस्य प्रकटयति—** मयेति। **व्यावर्त्यमंशमादर्शयति—** न त्विति। **प्रतिवचनस्य प्रश्नाननुरूपत्वमेव स्पष्टयति—** पृष्टादिति।

**श्रौतेन कर्मणा समुच्चयो ज्ञानस्येति पक्षं प्रतिक्षिप्य, पक्षान्तरं प्रतिक्षिपति—** नापीति। **श्रुतिस्मृत्योर्ज्ञानकर्मणोर्विभागवचनम् ,** आदि**शब्दगृहीतं बुद्धेर्ज्यायस्त्वं, पञ्चमादौ प्रश्नः, भगवत्प्रतिवचनम् - सर्वमिदं श्रौतेनेव स्मार्तेनापि कर्मणा बुद्धेः समुच्चये विरुद्धं स्यादित्यर्थः। द्वितीयपक्षासम्भवे हेत्वन्तरमाह—** किञ्चेति। **समुच्चयपक्षे प्रश्नप्रतिवचनयोरसम्भवान्नेदं गीताशास्त्रं तत्परमित्युपसंहरति—** तस्मादिति। **विशुद्धब्रह्मात्मज्ञानं स्वफलसिद्धौ न सहकारिसापेक्षम् , अज्ञाननिवृत्तिफलत्वाद् , रज्ज्वादितत्त्वज्ञानवत्। अथवा - बन्धः सहायानपेक्षेण ज्ञानेन निवर्त्यते , अज्ञानात्मकत्वाद् , रज्जुसर्पादिवदिति भावः।**

भाष्यार्कप्रकाशः

अत आह— **नापीति।** स्मार्तेन कर्मणाऽपि बुद्धिसमुच्चयो नाभिप्रेतः। अभिप्रेतेऽपि तस्मिन् सर्वमपि विभागवचनाद्युपपन्नं नैव स्यात्। 'एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु' इत्यादि **विभागवचनम्। आदिशब्दाद्** बुद्धेर्ज्यायस्त्ववचनादिग्रहणम्।

**ईषन्मात्रेणापि श्रौतेन स्मार्तेन वा कर्मणाऽऽत्मज्ञानस्य समुच्चयो न केनचिद् दर्शयितुं शक्यः।**

[३. लोकसंग्रहार्थं ज्ञानिना क्रियमाणं कर्म कर्माभासः]

**यस्य त्वज्ञानाद् रागादिदोषतो वा कर्मणि प्रवृत्तस्य, यज्ञेन दानेन तपसा वा विशुद्धसत्त्वस्य ज्ञानमुत्पन्नं परमार्थतत्त्वविषयम् - 'एकमेवेदं सर्वं ब्रह्माकर्तृ च' इति, तस्य कर्मणि कर्मप्रयोजने च निवृत्तेऽपि लोकसंग्रहार्थं [१]पूर्वं यथा प्रवृत्तस्तथैव कर्मणि प्रवृत्तस्य यत् प्रवृत्तिरूपं दृश्यते, न तत् कर्म, येन बुद्धेः समुच्चयः स्यात्। यथा भगवतो**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**ईषन्मात्रेणापी**त्यस्यायं भावः— शुद्धब्रह्मज्ञानं स्वफलसिद्धौ न सेति[इति]कर्तव्यतापेक्षम् , अबोधनिवृत्तिफलत्वात् , शुक्तिज्ञानवत्। बन्धो वा केवलज्ञानहेयः, अज्ञानात्मकत्वात् , शुक्तिरूप्यवदिति।

ननु 'कुर्याद् विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम्' इति वक्ष्यति। अतो गीताशास्त्रे कथं समुच्चयो न दर्शयितुं शक्यः इत्याशङ्क्याह— **यस्य त्वित्यादिना।** 'चोदनालक्षणोऽर्थो धर्मः' इत्युक्तत्वाद् विधितोऽनुष्ठेयं कर्म धर्म उच्यते, न व्यापारमात्रम्। (अ)तत्त्वदर्शिनस्तु वर्णाश्रमाभिमानरहितस्याधिकारप्रतिपत्त्यभावाद् वाङ्मनःकायानां प्रवृत्तिः पूर्वप्रवृत्तकर्मसंस्कारवशाज्जायमाना कर्माभासा एवापाततो[एव। ततो] न तद्दर्शनं समुच्चयप्रापकमित्यर्थः। ज्ञानिनो वाङ्मनःकायप्रवृत्तिः न फलाय ज्ञानेन समुच्चयार्हा, फलाभिसन्धिरहितप्रवृत्तित्वात् , [२]अहङ्कारविधुरप्रवृत्तित्वाद्वा, श्रीकृष्णप्रवृत्तिवदित्याह— **यथा भगवत इति।** नन्वसिद्धो हेतुः, तत्त्वविदोऽपि व्याख्यानभिक्षाटनादावहङ्कारदर्शनात् , तृप्त्यादिफलाभिसन्धिदर्शनाच्चे-

आनन्दगिरिकृतव्याख्या

**ननु 'कुर्याद् विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम्' इति [३]वक्ष्यमाणत्वात् कथं गीताशास्त्रे समुच्चयो नास्ति? तत्राह—** यस्य त्विति। [४]**चोदनासूत्रानुसारेण विधितोऽनुष्ठेयस्य कर्मणो धर्मत्वाद् , व्यापारमात्रस्य तथात्वाभावात् , तत्त्वविदश्च वर्णाश्रमाभिमानशून्यस्याधिकारप्रतिपत्त्यभावाद्, यागादिप्रवृत्तीनामविद्यालेशतो जायमानानां कर्माभासत्वात् 'कुर्याद् विद्वान्' इत्यादिवाक्यं न समुच्चयप्रापकमिति भावः।** वाशब्दः चार्थे। [५] **द्वितीयस्तु विविदिषावाक्यस्थसाधनान्तरसंग्रहार्थः। सांसारिकं ज्ञानं व्यावर्तयति—** परमार्थेति। **तदेवाभिनयति—** एकमिति। प्रवृत्तिरूप**मिति रूपग्रहणमाभासत्वप्रदर्शनार्थम्। कर्माभाससमुच्चयस्तु यादृच्छिकत्वान्न मोक्षं फलयतीति शेषः। किञ्च ज्ञानिनो यागादिप्रवृत्तिर्न ज्ञानेन [६]फले समुच्चीयते, फलाभिसन्धिविकलप्रवृत्तित्वाद् , अहङ्कारविधुरप्रवृत्तित्वाद्वा, भगव-**

भाष्यार्कप्रकाशः

ननु यदि कर्मज्ञानयोरेकपुरुषानुष्ठेयत्वासम्भवात् समुच्चयो नास्ति, तर्हि 'आत्मा कर्ता भोक्ता च' इति विपरीतज्ञानवत एव कर्मसु प्रवृत्तिः स्यात् , 'आत्मा अकर्ता अभोक्ता च' इति सम्यग्ज्ञानवतस्तु न स्यात् । न त्वयं नियमो दृश्यते, श्रूयते वा। जनकादीनां ज्ञानिनामपि कर्मसु प्रवृत्तिदर्शनात्। तस्मादेकस्मिन्नेव पुरुषे जनकादौ कर्मज्ञानसमुच्चयदर्शनात् कर्मज्ञानयोरेकपुरुषानुष्ठेयत्वं सम्भवत्येवेति समुच्चयादेव मोक्ष इति शङ्कायामाह— **यस्य त्विति।** आदौ अज्ञत्वात् कामाद्यभिभूतत्वाच्च पुरुषः कर्मसु प्रवर्तते। ततः फलाभिसन्धिरहितयज्ञादिकर्मकरणद्वारा चित्तशुद्धिस्तस्य भवति। चित्ते शुद्धे सति ज्ञानमुत्पद्यते 'एकमिदं ब्रह्माकर्तृ च' इति। स च ज्ञानोत्पत्त्यनन्तरमपि प्रारब्धवशाद् यथापूर्वं यज्ञादिषु प्रवर्तते, यथा जनकादिः। तस्य सा प्रवृत्तिः न कर्मेत्यर्थः। तत्र दृष्टान्तमाह— **यथा भगवत इति।** भगवान् कृष्णः ज्ञानी भवन् केवलाज्ज्ञानात् पुरुषार्थसिद्ध्यभावं पश्यन् तत्सिद्धये न क्षत्रधर्मचेष्टितं करोति, किन्तु

---

१. 'यत्र पूर्वं', 'तत्र पूर्वं', 'यत्नपूर्वं यथा प्रवृत्तिस्तथैव कर्मणि प्रवृत्तस्य' इति च पा.। २. 'अहं करोमि' इति आत्मनि कर्तृत्वाभिमानः अत्र अहंकारः। तत्त्वविदः प्रवृत्तौ स नास्ति, 'नैव किंचित् करोमीति युक्तो मन्येत तत्त्ववित्' इति भगवदुक्तेः। ३. तत्र— विद्वान् कुर्यादिति तत्त्वज्ञानस्य कर्मणश्चोक्तत्वादिति भावः। ४. 'चोदनालक्षणोऽर्थो धर्मः' इति धर्मलक्षणपरं जैमिनिसूत्रमिहानुसंधेयम्। ५. 'यज्ञेन दानेन तपसा वा' इत्यत्र वाशब्दः चार्थः सन् 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इति वाक्योक्तवेदानुवचनसमुच्चयार्थ इत्यर्थः। ६. 'तत्फलेन' इति पा.।

**वासुदेवस्य [1]क्षत्रधर्मचेष्टितं न ज्ञानेन समुच्चीयते पुरुषार्थसिद्धये, तद्वत् तत्फलाभिसन्ध्यहङ्काराभावस्य तुल्यत्वाद् विदुषः। [2]तत्त्ववित्तु नाहं करोमीति मन्यते, न च तत्फलमभिसन्धत्ते। यथा च स्वर्गादिकामार्थिनः [3]अग्निहोत्रादिकाम-साधनानुष्ठानाय आहिताग्नेः काम्य एवाग्निहोत्रादौ प्रवृत्तस्य सामिकृते, विनष्टेऽपि कामे, [4]तदेवाग्निहोत्रादि अनुतिष्ठतोऽपि न तत् काम्यमग्निहोत्रादि भवति। तथा च दर्शयति भगवान् 'कुर्वन्नपि न लिप्यते'(भ.गी.५.७) 'न करोति न लिप्यते'(भ.गी.१३.३१) इति तत्र तत्र।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

त्याशङ्क्याह— **तत्त्वविदिति।** अविक्रियब्रह्मात्मतां मन्वानो विद्वान् न कांचिदपि प्रवृत्तिं फलं वा स्वगतत्वेन पश्यति, रूपादिवद् दृश्यस्य द्रष्टृधर्मत्वानुपपत्तेः। किन्तु कार्यकरणसंघातगतत्वेनैव पश्यति। ततो नासिद्धो हेतुरित्यर्थः।

ननु साधकावस्थायां यादृशी प्रवृत्तिः प्रतिनियता स्नानाशनादौ, तादृश्येव सिद्धावस्थायामप्युपलभ्यते। ततः कथं कर्माभासत्वमित्याशङ्क्याह— **यथा चेति।** स्वर्गादिरेव काम्यत इति कामः, तदर्थिनः **सामिकृते** अर्धं कृते अग्निहोत्रादौ, कामे नष्टे तदेवाग्निहोत्रादि काम्यं न भवति। कामोपबन्धानुपबन्धकृतो [हि] काम्यनित्यविभागः, न स्वरूपभेदनिबन्धनः। तथा विदुषोऽपि विध्यधिकाराभावात् प्रवृत्तेः कर्माभासत्वमित्यर्थः। नैतत् स्वमनीषिकामात्रमित्याह— **दर्शयति चेति।**

आनन्दगिरिकृतव्याख्या

**त्प्रवृत्तिवदित्याह—** यथेति। **हेतुद्वयस्यासिद्धिमाशङ्क्य परिहरति—** तत्त्वविदिति। **'कूटस्थं ब्रह्मैवाहम्' इति मन्वानो विद्वान् प्रवृत्तिं तत्फलं वा नैव स्वगतत्वेन पश्यति, रूपादिवद् दृश्यस्य द्रष्टृधर्मत्वायोगात्। किन्तु कार्यकरणसंघातगतत्वेनैव प्रवृत्त्यादि प्रतिपद्यते। ततः तत्त्वविदो व्याख्यानभिक्षाटनादावहङ्कारस्य, तृप्त्यादिफलाभिसन्धेश्चाभासत्वाद् नासिद्धं हेतुद्वयमित्यर्थः। ननु ज्ञानोदयात्प्रागवस्थाया-मिवोत्तरकालेऽपि प्रतिनियतप्रवृत्त्यादिदर्शनान्न तत्त्वदर्शिनिष्ठप्रवृत्त्यादेराभासत्वमिति? तत्राह—** यथा चेति। **स्वर्गादिरेव काम्यमानत्वात् कामः, तदर्थिनः स्वर्गादिकामस्य, अग्निहोत्रादेरपेक्षितस्वर्गादिसाधनस्यानुष्ठानार्थम् अग्निमाधाय व्यवस्थितस्य, तस्मिन्नेव काम्ये कर्मणि प्रवृत्तस्यार्धकृते केनापि हेतुना कामे विनष्टे तदेवाग्निहोत्रादि निर्वर्तयतो न तत् काम्यं भवति, नित्यकाम्यविभागस्य स्वाभाविकत्वाभावात्, कामोपबन्धानुपबन्धकृतत्वात्। तथा विदुषोऽपि विध्यधिकाराभावाद् [5]यागादिप्रवृत्तीनां कर्माभासतेत्यर्थः। विद्वत्प्रवृत्तीनां कर्माभासत्व-मित्यत्र भगवदमनुमतिमुपन्यस्यति—** तथा चेति।

भाष्यार्कप्रकाशः

लोकानुग्रहार्थमेव, तद्वज्जनकादयोऽपीत्यर्थः। तत्र हेतुमाह— **फलेति।** फलाभिसन्ध्यहङ्काराभावस्य तुल्यत्वात्। फलाभिसन्ध्यहङ्कार-पूर्वकं कर्मैव कर्म, न त्वन्यदित्यर्थः। ननु फलाभिसन्ध्यहङ्काराभावमात्रेण कर्मणः कर्मत्वं कथं व्यपैतीत्यत्राह— **यथा चेति।** [6]स्वर्गादिकामेन काम्याग्निहोत्राद्यनुष्ठायी पुरुषः मध्ये अकस्माज्ज्ञानकामेन स्वर्गादिकामं त्यक्त्वा तदेव कर्म समापयति। तत्र च यावत्पर्यन्तं स्वर्गादिकामः तावदेव तत्कर्मणः काम्यत्वम्, न तूर्ध्वमिति कृत्वा अनुष्ठीयमानस्यापि काम्यकर्मणः कामनाशाद् यथा काम्यत्वनाशः, तथा ज्ञानिना क्रियमाणस्यापि कर्मणः फलाभिसन्ध्यहङ्काराभावात् कर्मत्वनाशः इति भावः।

'कुर्वन्नपि न करोती'ति कथं कुर्वतः पुरुषस्याकर्तृत्वं स्यात्? विरुद्धं हीदं द्वयम्। [7]अतः अहङ्कारपूर्वकत्वात् कर्तृत्वस्य तद्रहितः पुरुषः कुर्वन्नप्यकर्तैव।

---

१.'क्षात्रधर्म' इति पा.। २.'तत्त्वविद्धि' इति पा.। ३.'अग्निहोत्रादिकाम्य', 'अग्निहोत्रादिकर्मलक्षणधर्मानुष्ठानाय' इति च पा.। ४.आरम्भोत्तरं वीतायामपि कामना-यामारब्धमग्निहोत्रादि कर्म समापनीयमेव, परं न तस्य काम्यत्वम्, किन्तु नैमित्तिकत्वमिति पूर्वमीमांसायां (६.२.३) निरूपितम्। नित्यत्वं काम्यत्वं चैकस्यैव कर्मणः संयोगपृथक्त्वन्यायेन स्वीक्रियते। अतश्च काम्यत्वेन रूपेणारब्धस्य वीतायां कामनायां नित्यत्वं न विरुध्यते। ५. 'वागादि' इति पा.। ६. स्वर्गादि-कामनयेत्यर्थः। एवं ज्ञानकामेनेत्यत्रापि । ७. कुर्वतः अकर्तृत्ववचनं विरुद्धमिति शङ्कां समाधत्ते— अत इति। लोकदृष्ट्या कुर्वन्नपि स्वदृष्ट्या अकर्तैवेत्यर्थः।

**यच्च 'पूर्वैः पूर्वतरं कृतम्'(भ.गी.४.१५) , 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः'(भ.गी.३.२०) इति, तत्तु प्रविभज्य विज्ञेयम्। तत् कथम्? यदि तावत् पूर्वे जनकादयस्तत्त्वविदोऽपि प्रवृत्तकर्माणः स्युः, ते लोकसंग्रहार्थं 'गुणा गुणेषु वर्तन्ते'(भ.गी.३.२८) इति, ज्ञानेनैव संसिद्धिमास्थिताः। कर्मसंन्यासे प्राप्तेऽपि कर्मणा सहैव[1] संसिद्धिमास्थिताः, न कर्मसंन्यासं कृतवन्त इत्येषोऽर्थः। अथ न ते तत्त्वविदः - ईश्वरसमर्पितेन कर्मणा साधनभूतेन** संसिद्धिं **सत्त्वशुद्धिं ज्ञानोत्पत्तिलक्षणां वा** संसिद्धिमास्थिताः **जनकादयः इति व्याख्येयम्। एतमेवार्थं वक्ष्यति भगवान् — 'सत्त्वशुद्धये कर्म कुर्वन्ति' (द्र.भ.गी.५.११) इति। 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः'(भ.गी.१८.४६) इत्युक्त्वा सिद्धिं प्राप्तस्य च पुनर्ज्ञाननिष्ठां वक्ष्यति— 'सिद्धिं प्राप्तो यथा ब्रह्म'(भ.गी.१८.५०) इत्यादिना। तस्माद् गीताशास्त्रे केवलादेव तत्त्वज्ञानान्मोक्षप्राप्तिः, न कर्मसमुच्चितादिति निश्चितोऽर्थः। यथा चायमर्थः तथा प्रकरणशो विभज्य तत्र तत्र दर्शयिष्यामः॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ननु विद्वत्सम्बन्धिव्यापारे कर्मशब्दप्रयोगदर्शनात् कथं कर्माभासत्वमुच्यते? इत्याशङ्क्य तस्याभिप्रायमाह— **यच्च पूर्वैरित्यादिना**। यस्मात् न तत्त्वदर्शनोत्तरकालं कर्म सम्भवति, **तस्मादि**त्युपसंहारः। ननु ज्ञानप्रधानं गीताशास्त्रमेकं महावाक्यम्। तन्मध्ये श्रूयमाणं कर्म तदङ्गमेव, प्रकरणप्रमाणादित्याशङ्क्याह— **यथा चायमर्थ इति।**

आनन्दगिरिकृतव्याख्या

**ननु विद्वद्व्यापारेऽपि कर्मशब्दप्रयोगदर्शनात् तद्व्यापारस्य कर्माभासत्वानुपपत्तेः समुच्चयसिद्धिरिति, तत्राह—** यच्चेति। **ज्ञान-कर्मणोः समुच्चित्यैव संसिद्धिहेतुत्वे प्रतिपन्ने कुतो विभज्यार्थज्ञानमिति पृच्छति—** तत् कथमिति। **तत्र किं जनकादयोऽपि तत्त्वविदः प्रवृत्तकर्माणः स्युः, आहोस्विद् अतत्त्वविदः? इति विकल्प्य प्रथमं प्रत्याह—** यदीति। **तत्त्ववित्त्वे कथं प्रवृत्तकर्मत्वम् , कर्मणाम-किञ्चित्करत्वाद्? इत्याशङ्क्याह—**ते लोकेति। **तेषामुक्तप्रयोजनार्थमपि न प्रवृत्तिर्युक्ता, [2]सर्वत्रोदासीनत्वाद् , इत्याशङ्क्याह—**गुणा इति। **इन्द्रियाणां विषयेषु प्रवृत्तिद्वारा तत्त्वविदां प्रवृत्तकर्मत्वेऽपि ज्ञानेनैव तेषां मुक्तिरित्याह—** ज्ञानेनेति। **उक्तमेवार्थं सङ्क्षिप्य दर्शयति—** कर्मेति। **'कर्मणा' इत्यादौ बाधितानुवृत्त्या प्रवृत्त्याभासो गृह्यते। द्वितीयमनुवदति—** अथेति। **तत्र वाक्यार्थं कथयति—** ईश्वरेति। **विभज्य विज्ञेयत्वं वाक्यार्थस्योक्तमुपसंहरति—** इति व्याख्येयमिति। **कर्मणां चित्तशुद्धिद्वारा ज्ञानहेतुत्वमित्युक्तेऽर्थे वाक्यशेषं प्रमाणयति—** एतमेवेति। **'योगिनः कर्म कुर्वन्ति' इत्यादिवाक्यमर्थतोऽनुवदति—** सत्त्वेति। **'स्वकर्मणा' इत्यादौ साक्षादेव मोक्षहेतुत्वं कर्मणां वक्ष्यतीत्याशङ्क्याह—** स्वकर्मणेति। **स्वकर्मानुष्ठानाद् ईश्वरप्रसादद्वारा ज्ञाननिष्ठायोग्यता लभ्यते। ततो ज्ञाननिष्ठया मुक्तिः। तेन न साक्षात् कर्मणां मुक्तिहेतुतेत्यग्रे स्फुटीभविष्यतीत्यर्थः। तत्त्वज्ञानोत्तरकालं कर्मासम्भवे फलितमुपसंहरति—** तस्मादिति। **ननु यद्यपि गीताशास्त्रं तत्त्वज्ञानप्रधानमेकं वाक्यम् , तथापि तन्मध्ये श्रूयमाणं कर्म तदङ्गमङ्गीकर्तव्यम् , प्रकरणप्रामाण्यादिति समुच्चयसिद्धिः, तत्राह—** यथा चेति। अर्थ**शब्देनात्मज्ञानमेव केवलं कैवल्यहेतुरिति गृह्यते।**

भाष्यार्कप्रकाशः

**त इति।** ते जनकादयः लोकसंग्रहार्थं 'गुणा गुणेषु वर्तन्ते' इति ज्ञानेन कर्मसु प्रवृत्ता इति शेषः। 'कर्मणैव ही'ति श्लोकगतस्य 'संसिद्धिमास्थिताः' इति वाक्यस्यार्थमाह— **कर्मेति।** अकर्त्रभोक्त्रात्मज्ञानात् कर्मसंन्यासे प्राप्तेऽपीत्यर्थः।

अत्रेदं बोध्यम्— प्रवृत्तिमार्गे वर्तमाना अपि जनकादयः वेदान्तश्रवणादिना परमार्थात्मतत्त्वज्ञानं सम्पाद्य निवृत्तिमार्गभूत-संन्यासाश्रमस्वीकारं विनैव, निरहङ्कारं कर्म कुर्वन्त एव ज्ञानान्मुक्तिं भेजिरे। निवृत्तिमार्गे वर्तमानास्तु सनकादयः संन्यासाश्रम-

१. अनेनास्मिन् पक्षे 'कर्मणैव हि संसिद्धि'मिति श्लोके कर्मणेति सहार्थयोगे तृतीया, न तु कारकतृतीयेति सूचितम्। २. 'सर्वत्राप्युदासीनत्वाद्' इति पा.।

## अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
## गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ ११ ॥

**तत्रैवं धर्मसम्मूढचेतसो मिथ्याज्ञानवतो महति शोकसागरे निमग्नस्यार्जुनस्यान्यत्रात्मज्ञानादुद्धरणमपश्यन् भगवान् वासुदेवः ततः कृपयाऽर्जुनमुद्दिधीर्षुः[1] आत्मज्ञानायावतारयन्नाह—**अशोच्यानित्यादि। **न शोच्या अशोच्याः**

अनुभूतिस्वरूपाचार्यटिप्पणम्

इदानीम् 'अशोच्यान्' इत्यारभ्य 'स्वधर्ममपि चावेक्ष्य' इत्येतदन्तस्य प्रकरणस्य तात्पर्यमाह— **तत्रेत्यादिना। न**

आनन्दगिरिकृतव्याख्या

वृत्तिकृता**मभिप्रायं प्रत्याख्याय स्वाभिप्रेतः शास्त्रार्थः समर्थितः। सम्प्रति 'अशोच्यानि'त्यस्मात् प्राक्तनग्रन्थसन्दर्भस्य प्रागुक्तं तात्पर्यार्थमनूद्य 'अशोच्यानि'त्यादेः 'स्वधर्ममपि चावेक्ष्ये'त्येतदन्तस्य समुदायस्य तात्पर्यमाह—** तत्रेति। **अत्र हि शास्त्रे त्रीणि काण्डानि, अष्टादशसंख्याकानामध्यायानां षट्कत्रितयमुपादाय त्रैविध्यात्। तत्र पूर्वषट्कात्मकं पूर्वकाण्डं त्वम्पदार्थं विषयीकरोति, मध्यमषट्करूपं मध्यमकाण्डं तत्पदार्थं गोचरयति, अन्तिमषट्कलक्षणमन्तिमं काण्डं पदार्थयोरैक्यं वाक्यार्थमधिकरोति। तज्ज्ञानसाधनानि च तत्र तत्र प्रसङ्गादुपन्यस्यन्ते, तज्ज्ञानस्य तदधीनत्वात्। तत्त्वज्ञानमेव केवलं कैवल्यसाधनमिति च सर्वत्राविगीतम्।** एवं **पूर्वोक्तरीत्या गीताशास्त्रार्थे परिनिश्चिते सतीति यावत्।** धर्मे सम्मूढं **कर्तव्याकर्तव्यविवेकविकलं चेतो यस्य तस्य** मिथ्याज्ञानवतो**ऽहङ्कारममकारवतः शोकाख्यसागरे [2]दुरुत्तारे प्रविश्य क्लिश्यतः, ब्रह्मात्मैक्यलक्षणवाक्यार्थज्ञान**मात्मज्ञानम्**, तदतिरेकेणोद्धरणासिद्धेः, तमतिभक्तमतिस्निग्धं शोकादुद्धर्तुमिच्छन् भगवान् यथोक्तज्ञानार्थं तमर्जुनम्** अवतारयन् **पदार्थपरिशोधने प्रवर्तयन् आदौ त्वम्पदार्थं शोधयितुम् 'अशोच्यान्' इत्यादि वाक्यमाह इति योजना। यस्याज्ञानं तस्य भ्रमः, यस्य भ्रमस्तस्य पदार्थपरिशोधनपूर्वकं सम्यग्ज्ञानं वाक्यादुदेतीति ज्ञानाधिकारिणमभिप्रेत्याह—** अशोच्यानित्यादीति।

**यत्तु कैश्चित् 'आत्मा वा अरे द्रष्टव्यः' इत्याद्यात्मयाथात्म्यदर्शनविधिवाक्यार्थमनेन श्लोकेन व्याचष्टे स्वयं हरिरित्युक्तम्, तदयुक्तम्, [3]कृतियोग्यतैकार्थसमवेतश्रेयःसाधनताया वा, [4]पराभिमतनियोगस्य वा विध्यर्थस्यात्राप्रतीयमानस्य कल्पनाहेत्वभावात्। न च दर्शने पुरुषतन्त्रत्वरहिते विधेययागादिविलक्षणे विधिरुपपद्यते। [5]कृत्यान्तर्भूतश्चार्हार्थत्वात् तव्यो न विधिमधिकरोतीत्यभिप्रेत्य व्याचष्टे—** न शोच्या इति। **कथं तेषामशोच्यत्वमित्युक्ते [6]भीष्मादिशब्दवाच्यानां वा शोच्यत्वम्, तत्पदलक्ष्याणां वा? इति विकल्प्याऽऽद्यं**

भाष्यार्कप्रकाशः

स्वीकाराद् वेदान्तश्रवणादिना आत्मतत्त्वज्ञानं सम्पाद्य कर्माण्यकुर्वन्त एव ज्ञानान्मुक्तिं भेजिरे इति॥

**तत इति।** शोकसागरादित्यर्थः। **अशोच्यानित्यादिनेति।**

अत्र **रामानुजः—** 'न त्वेवाहमित्यादिने'त्युक्त्वा 'अशोच्या'निति श्लोकं गीताशास्त्रात् पृथक् चकार। **तन्मन्दम्**; न ते भीष्मादयः शोच्याः, परमार्थस्वरूपेण तेषां नित्यत्वात्; न हि पण्डिता मृतान् जीवतश्च प्रति शोचन्ति; त्वं च पण्डितोऽसि; अतो मा शुचः इति हितशासनपरस्यास्य श्लोकस्य शास्त्रान्तःपातित्वौचित्यात्।

यच्च **वेदान्तदेशिकेनो**क्तम्**—**'अशोच्या'निति श्लोकस्योपदेशार्थावधानापादनार्थपरिहासभावतया[7] शास्त्रावतरणमात्रत्वेन साक्षाच्छास्त्रत्वाभाव इति, **तत् तुच्छम्**; महति शोकसागरे निमग्ने स्वचरणं शरणं प्रपन्ने पार्थे भगवतः कृष्णस्य परिहासभावोदयासाङ्गत्यात्।

---

१. 'उद्दिधारयिषुः' इति पा.। २. 'दुरुत्तरे' इति पा.। ३. कृतिसाध्यत्वसमानाधिकरणेष्टसाधनत्वस्येत्यर्थः। ४. प्राभाकराभिमतकार्यस्येत्यर्थः। ५. दर्शनविधेरनुपपन्नत्वे 'द्रष्टव्यः' इति तव्यप्रयोगानुपपत्तिमाशङ्क्याह— **कृत्येति**। कृत्यसंज्ञकप्रत्ययान्तर्गत इति यावत्। 'अर्हे कृत्यतृचश्च' इति सूत्रेण तस्यार्हार्थत्वबोधनात्। 'कृत्यान्तर्भूतस्य' इति पा.। ६.भीष्मादिशब्दवाच्याः तत्तच्छरीरविशिष्टाः, भीष्मादिशब्दलक्ष्यास्तु तत्तच्छरीरोपलक्षिताः आत्मानः। ७.'च्छायतया' इति परग्रन्थे।

**भीष्मद्रोणादयः, सद्वृत्तत्वात्, परमार्थस्वरूपेण च नित्यत्वात्। तान्** अशोच्यान् अन्वशोचः **अनुशोचितवानसि - 'ते म्रियन्ते मन्निमित्तम्, अहं तैर्विनाभूतः किं करिष्यामि राज्यसुखादिना?' इति। त्वं** प्रज्ञावादान्[१] **प्रज्ञावतां बुद्धिमतां वादांश्च वचनानि च भाषसे। तदेतद् मौढ्यं पाण्डित्यं च विरुद्धमात्मनि दर्शयसि उन्मत्त इवेत्यभिप्रायः। यस्माद्** गतासून् **गतप्राणान् मृतान्,** अगतासून् **अगतप्राणाञ्जीवतश्च नानुशोचन्ति** पण्डिताः **आत्मज्ञाः। पण्डाऽऽत्मविषया बुद्धिर्येषां ते हि पण्डिताः। 'पाण्डित्यं निर्विद्य'(बृ.उ.३.५.१) इति श्रुतेः। परमार्थतस्तु तान् नित्यान् अशोच्यान् शोच्या इति।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**शोच्या इति।** अरूप्ये (यदा) रूप्यदर्शी यथा भ्रान्तः, तथा अशोच्यांस्त्वं शोचितवानसि, ततो भ्रान्तोऽसि। ततो यथास्वरूपावधारणेन भ्रमं परित्यजेत्यर्थः। किञ्च विरुद्धार्थाभिधायित्वादपि भ्रान्तोऽसीत्याह— **त्वं प्रज्ञावतामिति।** शोचित्वादपि [शोकित्वादपि] त्वं भ्रान्तोऽसीत्याह— **यस्माद् गतासूनित्यादिना**॥ ११॥

आनन्दगिरिकृतव्याख्या

**दूषयति—** सद्वृत्तत्वादिति। **ये भीष्मादिशब्दैरुच्यन्ते ते श्रुतिस्मृत्युदीरिताविगीताचारवत्त्वान्न शोच्यतामश्नुवीरन्नित्यर्थः। द्वितीयं प्रत्याह—** परमार्थेति। **अरजते रजतबुद्धिवद् अशोच्येषु शोच्यबुद्ध्या भ्रान्तोऽसीत्याह—** तानिति। **अनुशोचनप्रकारमभिनयन् भ्रान्तिमेव प्रकटयति—** ते म्रियन्त इति। [२]**पुत्रभार्यादिप्रयुक्तं सुखमादिशब्देन गृह्यते। इति अनुशोचितवानसीति सम्बन्धः। विरुद्धार्थाभिधायित्वेनापि भ्रान्तत्वमर्जुनस्य साधयति—** त्वं प्रज्ञावतामिति। वचनानि **'उत्सन्नकुलधर्माणाम्' इत्यादीनि। किमेतावता फलितमिति? तदाह—** तदेतदिति। तत् **मौढ्यम् अशोच्येषु शोच्यदृष्टित्वम्,** एतत् **पाण्डित्यं बुद्धिमतां वचनभाषित्वमिति यावत्। अर्जुनस्य पूर्वोक्तभ्रान्तिभाक्त्वे निमित्तम् आत्माज्ञानमित्याह—** यस्मादिति। **ननु सूक्ष्मबुद्धिभाक्त्वमेव पाण्डित्यम्, न त्वात्मज्ञत्वम्, हेत्वभावादित्याशङ्क्याह—** ते हीति। पाण्डित्यं **पण्डितभावमात्मज्ञानं** निर्विद्य **निश्चयेन लब्ध्वा बाल्येन तिष्ठासेद् इति बृहदारण्यकश्रुतिमुक्तार्थामुदाहरति—** पाण्डित्यमिति। **यथोक्तपाण्डित्यराहित्यं कथं ममावगतम्? इत्याशङ्क्य कार्यदर्शनादित्याह—** परमार्थतस्त्विति। **यस्मादित्यस्यापेक्षितं**

भाष्यार्कप्रकाशः

**यदप्युक्तमनेन—** यद्वाऽत्र 'अशोच्या'निति श्लोकः 'प्रहसन्निव' इत्यस्य विषयः। 'न त्वेवाहम्' इत्यादिकं तु इदंशब्दार्थः[३] इति, **तदपि तुच्छम्**; इदंशब्दस्यात्रानुपदवक्ष्यमाणे शक्ततया तदनुपदोक्तस्य 'अशोच्या'निति श्लोकस्य इदंपदार्थत्वाभावकल्पनाया अप्रमाणत्वात्, 'अशोच्या'निति श्लोकस्य प्रहसन्नित्यनेनान्वयासम्भवात्, इतिशब्दमध्याहृत्य 'अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे इति प्रहसन्निव' इत्यन्वये समाप्तपुनरादानदोषात्, **इति**शब्दाध्याहारगौरवाच्च, 'गतासू'निति पदार्थस्य [उत्तरार्धस्य] परिहास-वाक्यत्वासम्भवेन शास्त्रप्रवेशासम्भवेन च व्यर्थत्वप्रसङ्गात्, 'परिहासवाक्यं वदन्निव' इति **इव**शब्देन - 'न तु वस्तुतः परिहासवाक्यं जगाद' इति सिद्धत्वेन, 'अशोच्या'निति श्लोकस्य भगवदुक्तत्वा[त्व]सम्भवाच्च। तस्माद् गीताशास्त्रस्य 'अशोच्या'निति श्लोक एवादिः।

अशोच्यत्वे हेतुद्वयमाह— **सद्वृत्तत्वात् परमार्थस्वरूपेण च नित्यत्वादिति।** असच्चरितान् पुत्रादीनुद्दिश्य पित्रादयः शोचन्ति —भ्रष्टा एत इति। भीष्मद्रोणादयस्तु सद्वृत्तत्वान्न ते शोच्याः। अनित्यास्तु गृहसम्पदादयः शोच्याः, न तु नित्या आत्मानो भीष्मादय इत्यर्थः। शोकप्रकारमाह— **मन्निमित्तमित्यादिना। मन्निमित्तं** मदर्थम्। प्रज्ञावादानित्यत्र प्रज्ञाशब्दो लक्षणया प्रज्ञावतः प्राज्ञानभिधत्त इत्याह— **प्रज्ञावतामिति।** 'श्रेयो भोक्तुं भैक्ष्यमपीह लोके' इत्यादीनि वचनानीत्यर्थः। येषां देहतदिन्द्रियादिसंघाताभिमानिनां देवदत्तादीनां प्राणाः देहादुत्क्रान्तास्ते गतासवः इत्युच्यन्ते। फलितार्थमाह— **मृतानिति।** गतासवो न भवन्तीत्यगतासवः, नञ्तत्पुरुषः। गतासुभिन्ना इत्यर्थः, तान्। फलितमाह— **जीवत इति।** न च - मृतानां शोच्यत्वमस्तु नाम, कथं जीवतामिति - वाच्यम्, जीवन्तोऽपि पुत्रादयः दुर्वृत्ताः सामयाश्च शोच्या एवेति। ननु पण्डिता अपि तार्किकादयः शोचन्त्येव मृतं स्वजनं प्रतीत्यत

१. 'प्रज्ञावादान्' इति क्वचिन्नास्ति। २. भाष्ये राज्यसुखं - तत्प्रयुक्तं सुखम्। आदिशब्दार्थमाह— **पुत्रेति।** ३. 'तमुवाच...इदं वचः' इति श्लोके इदंशब्दार्थः इत्यर्थः।

**न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।**
**न चैव न भविष्यामः सर्वे वयमतः परम्॥१२॥**

**अनुशोचसि, अतो मूढोऽसीत्यभिप्रायः**[१]**॥११॥**

**कुतस्तेऽशोच्याः? यतो नित्याः। कथम्?—** न त्विति। **न त्वेव** जातु **कदाचिद् अहं नासम्, किं त्वासमेव।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

भीष्मादयोऽपि शोच्या एव, सेवकत्वात्, भृत्यान्तरवदित्याह— **कुतस्तेऽशोच्या इति।** तेषां देहस्य सेवकत्वेऽपि नात्मा सेवक इत्याह— **यतो नित्या इति।** नित्यत्वे किं नु प्रमाणमित्याह— **कथमिति।** आत्मा न जायते, प्रागभाव-शून्यत्वात्, नरविषाणवदिति पूर्वार्धस्यार्थः। आत्मा नित्यः, [२]अजभावत्वात्, यो नित्यो न भवति नासावजभावः, यथा घट

आनन्दगिरिकृतव्याख्या

**दर्शयति—** अत इति॥११॥

**नित्यत्वमशोच्यत्वे कारणमिति सूचितं विवेचयितुं प्रश्नपूर्वकं प्रतिजानीते—** कुत इत्यादिना। **नित्यत्वमसिद्धम्, प्रमाणा-भावादिति चोदयति—** कथमिति। **आत्मा न जायते, प्रागभावशून्यत्वात्, नरविषाणवदिति परिहरति—** न त्वेवेति। **किञ्चात्मा नित्यः, भावत्वे सत्यजातत्वात्, व्यतिरेके घटवदित्यनुमानान्तरमाह—** न चैवेति। **यत्तु कैश्चिद् आत्मयाथात्म्यं जिज्ञासितं भगवानुपदिशति न** त्वित्यादिना **श्लोकचतुष्टयेनेत्यादिष्टम्; तदसत्, विशेषवचने हेत्वभावात्, सर्वत्रैवात्मयाथात्म्यप्रतिपादनाविशेषादित्याशयेन - पदच्छेदः, पदार्थोक्तिः, वाक्ययोजना - इति त्रितयमपि व्याख्यानाङ्गं प्रतिपादयति—** न त्वित्यादिना। **नन्वात्मनो देहोत्पत्तिविनाशयोः**

भाष्यार्कप्रकाशः

आह— **पण्डा आत्मज्ञानमिति।** आत्मज्ञानिन एव पण्डिताः, न तु तार्किकादय इत्यर्थः। तत्र श्रुतिं प्रमाणयति— **पाण्डित्यं निर्विद्येति।** आत्मज्ञानं सम्पाद्येत्यर्थः। त्वं त्वपण्डित एव, शोकित्वादित्याह— **परमार्थतस्त्विति। परमार्थतः** आत्मस्वरूपेणेत्यर्थः। **इत्येतदिति।** इति यावदित्यर्थः। 'इत्यभिप्रायः' इति पाठान्तरम्।

अत्र 'गतासून् देहान् अगतासूनात्मनश्च' इति **रामानुज** आह। **तत्तुच्छम्**; मृतदेहानां गतासुत्वेऽप्यमृतदेहानामगतासुत्वेन अगतासुशब्दाज्जीवद्देहार्था[३]लाभात्, गतास्वगतासुशब्दयोर्लोके मृतजीवतोरेव शक्तिग्रहदर्शनात्। 'भोः सखे ! त्वद्ग्रामे अस्मत्सम्ब-न्धिनौ देवदत्तयज्ञदत्तौ किं सुखमासाते?' इति विष्णुमित्रेण पृष्टः कृष्णशर्मा, तं प्रति 'देवदत्तो गतासुर्यज्ञदत्तस्त्वगतासु'रिति प्रत्युवाच। किं तत्र देवदत्तो देहो गतासुः, यज्ञदत्तो जीवस्त्वगतासुरिति स श्रोता प्रत्येति स्म? अपि तु 'देवदत्तो मृतः, यज्ञदत्तो जीवति' इति जानाति स्म। **अपि च** देहवद् असवोऽपि कोशत्वेनात्मनः उपाधिभूता एवेति कृत्वा परमार्थत आत्मानो निष्कोशत्वेन गतासव एवेति कथम् आत्मनामगतासुत्वम्? **किञ्च** सच्चिदानन्दरूपमप्यात्मानं ये अन्नमयकोशावच्छिन्नत्वेन मनुष्यं वृद्धं जीर्णं कृशं, प्राणमयकोशाव-च्छिन्नत्वेन क्षुधितं पिपासितं च मन्वते, ते अज्ञा अतीव शोच्या एवेति कृत्वा कथमगतासूनामात्मनामशोच्यत्वम्? **अपि च** पण्डिताः गतासून् देहान्प्रति न शोचन्तीत्युक्ते, अपण्डितानां तान् प्रति शोको भवतीति सिद्धम्, न तु तद् दृश्यते। न ह्यपण्डिता अपि गतासुदेहान् प्रति शोचन्ति। 'देहो दग्धः, देहः श्वभिर्भक्षितः' इति न हि कोऽपि शोचति। किन्तु 'देही पुत्रो मृतः' इत्येव शोचति सर्वोऽपि। तस्माद् दुष्टो **रामानुजोक्तार्थः**॥११॥

'न त्वेवाहम्' इति श्लोकमवतारयति— **कुत इति।** कुतस्ते अशोच्याः? इति प्रश्नः। यतस्ते नित्याः, ततस्ते अशोच्याः इत्युत्तरम्। कथं ते नित्याः? इति पुनः प्रश्नः। तत्रोत्तरमाह— **नेति** श्लोकेन। यदि भीष्मादयः नित्यास्तर्हि अशोच्या एव, न तु नित्याः,

१. 'मूढोऽसीत्येतत्' इति रा.पा.। २. अजन्यत्वे सति भावत्वादित्यर्थः। प्रागभावे व्यभिचारवारणाय भावत्वम्। ३. 'जीवद्देहार्थलाभात्' इति पाठः स्यात्।

**अतीतेषु देहोत्पत्तिविनाशेषु , घटादिषु वियदिव, नित्य एवाहमासमित्यभिप्रायः। तथा न त्वं नासीः, किं त्वासीरेव। तथा नेमे जनाधिपाः नासन् , किन्तु आसन्नेव। तथा न चैव न भविष्यामः, किन्तु भविष्याम एव सर्वे वयम्** अतः **अस्माद्** **देहविनाशात्** परम् **उत्तरकालेऽपि। त्रिष्वपि कालेषु नित्याः आत्मस्वरूपेणेत्यर्थः। देहभेदानुवृत्त्या बहुवचनम् , नात्मभेदाभिप्रायेण ॥ १२॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

इत्युत्तरार्धस्यार्थः। 'रूपं रूपं प्रतिरूपो बभूव' इति च श्रुतेः [१]देहोपादानाविद्याभेदे प्रतिबिम्बिततया तद्भेदानुवर्तनाद् बहुवचनमित्यर्थः॥ १२॥

आनन्दगिरिकृतव्याख्या

**उत्पत्तिविनाशप्रसिद्धेः उक्तमनुमानद्वयं प्रसिद्धिविरुद्धतया कालात्ययापदिष्टमिति? नेत्याह—** अतीतेष्विति। **'चराचरव्यपाश्रयस्तु स्यात्' इति न्यायेनात्मनो जन्मविनाशप्रसिद्धेरौपाधिकजन्मविनाशविषयत्वात् निरुपाधिकस्य तस्य जन्मादिराहित्यमिति भावः। यद्यपि तवेश्वरस्य जन्मराहित्यं, तथापि कथं ममेत्याशङ्क्याह—** तथेति। **तथापि भीष्मादीनां कथं जन्माभावः? तत्राह—** तथा नेम इति। **द्वितीयमनुमानं प्रपञ्चयन्नुत्तरार्धं व्याचष्टे—** तथेत्यादिना। **ननु देहोत्पत्तिविनाशयोरात्मनो जन्मनाशाभावेऽपि महासर्गमहाप्रलययोः तस्याग्निविस्फुलिङ्गदृष्टान्तश्रुत्या जन्मविनाशावेष्टव्यावित्याशङ्क्य 'नात्माऽश्रुतेः' इति न्यायेन परिहरति[२]—** त्रिष्वपीति। **'यावद्विकारं तु विभागो लोकवत्' इति न्यायेन भिन्नत्वाद् विकारित्वमात्मनामनुमीयते, भिन्नत्वं च बहुवचनप्रयोगप्रमितमित्याशङ्क्याह[३]—** देहेति॥ १२॥

भाष्यार्कप्रकाशः

म्रियमाणत्वात् , ततश्चानित्यान् तान् प्रत्यहं शोचामीत्याशङ्कायामाह भगवान् -'न त्वेवाहम्' इति श्लोकम् - इत्यवतारिकायाः आशयः। अहं जातु तु कदाचिदपि नैव नासमित्यन्वयः। सम्भाव्यनिषेधनिवर्तनार्थौ द्वौ नञौ। अहमिदानीमेव वर्ते, प्राक्तु कदाचिदपि नासमिति सम्भाव्यस्य निषेधस्य हि निवृत्तिरत्र कृता— **नैव नासमिति**। अस्यार्थमाह— **किं त्वासमेवेति**। देहानामुत्पत्तयो विनाशाश्च **देहोत्पत्ति-विनाशाः**, तेषु। अतीतकाले अनन्तेषु देहेषु जातेषु नष्टेषु च नाऽऽत्मा जातो नष्टः[४], किन्तु नित्य एवेत्यर्थः। नन्वात्मनः एकत्वाद् 'वयम्' इत्युक्तिर्न सङ्गच्छत इत्यत्राह— **देहभेदेति**। उपाधीनां देहानां बहुत्वाद् वयमिति बहुवचननिर्देशः, न त्वात्मबहुत्वादित्यर्थः।

युक्तं चेदम् ; वासुदेवत्वार्जुनत्वजनाधिपत्वानां देहधर्मत्वेनात्मधर्मत्वाभावात्। अवच्छेदकानां घटमठकरकादीनां भेदेन 'घटाकाशो मठाकाशः करकाकाशः' इत्यादिभेदव्यवहारे सत्यपि यद्वदाकाशस्यैकत्वम् , तद्वदवच्छेदकानां देहाद्युपाधीनां भेदेन 'वासुदेवोऽर्जुनो नराधिपाश्चे'ति भेदव्यवहारे सत्यप्यात्मन एकत्वमेवेति भावः।

अत्राह **रामानुजः**— 'अहं सर्वेश्वरस्तावन्नित्य इति सिद्ध'मिति; **तत्तुच्छम् ;** न ह्यर्जुनः कृष्णं सर्वेश्वरं नित्यमात्मानं मन्यते। 'अपरं भवतो जन्म परं जन्म विवस्वतः। कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति॥' [इति] वक्ष्यति ह्यर्जुनः। **किञ्च** यथा कुन्त्या जाते आत्मनि अर्जुनस्यानित्यत्वबुद्धिः, तथा देवक्या जातेऽपि कृष्णे अनित्यत्वबुद्धिरेव भवति, स्वस्मिन्निव कृष्णेऽपि जन्मबाल्यकौमारा-दिधर्मदर्शनात्। नापि कृष्णस्यास्मिन् श्लोके आत्मानं सर्वेश्वरं प्रथयितुमस्ति तात्पर्यम् , प्रकृतासाङ्गत्यात् ; परन्तु आत्मानं नित्यं प्रथयितुमेव। नित्यत्वप्रथनाय च नेश्वरत्वमावश्यकम् , भवन्मते प्रकृतिपुरुषेश्वराणां त्रयाणां नित्यत्वेन नित्यत्वेश्वरत्वयोरसम-नियतत्वात्। **किञ्च** अहंशब्दस्य वक्तरि केवले शक्तिः, न त्वीश्वरत्वादिविशेषणविशिष्टे इति सर्वेश्वरत्ववचनमत्रासङ्गतम् , कवितात्पर्या-विषयं च।

तथा— 'यथाऽहं सर्वेश्वरः परमात्मा नित्य इति नात्र संशयः, तथा भवन्तः क्षेत्रज्ञा आत्मानोऽपि नित्या एवेति मन्तव्याः'

---

१. एतद्ग्रन्थकारमते मायाप्रदेशरूपाविद्याभेदात् तदुपाधिकजीवभेदः इति प्रकारान्तरेण भाष्यं योजयति— **देहेति**। तथा च भाष्ये देहपदं लक्षणया देहोपादाना-विद्यापरमिति भावः। द्र. प्रकटार्थः पृ. ५। २. उक्तश्रुतौ श्रुतं जन्मौपाधिकमिति भावः। द्र.ब्र.सू. २-३-१७। ३. तथा चौपाधिकत्वात् तद्भेदस्य धर्मिसमसत्ताक-भेदवत्त्वस्य विवक्षितहेतोरसिद्धा नात्मनो विकारित्वानुमानमिति भावः। ४. देहेषु जातेषु आत्मा न जातो, देहेषु नष्टेषु च आत्मा न नष्टः इत्यन्वयः।

भाष्यार्कप्रकाशः

इत्यप्युक्तं **रामानुजेन।** तच्चासत् , श्लोके 'न त्वेवाहं जातु नासम्' इत्ययमंशो दृष्टान्तः, अतिरिक्तस्तु दार्ष्टान्तिक इति विभागकल्पनस्या-प्रमाणत्वात् , दृष्टान्तवाचियथाशब्दाभावात् , अर्जुनस्य कृष्णे नित्यत्वनिश्चयाभावेन 'न त्वेवाहं जातु नासम्' इत्यस्य दृष्टान्तत्वा-सम्भवाच्च।

**किञ्च** - आस्तिकोऽयमर्जुनः ईश्वरः कश्चन नित्योऽस्तीति मन्यतां नाम; कृष्णं त्वीश्वरं नित्यं नैव मन्यते। अन्यथा सारथ्यादिषु कृष्णनियमनासम्भवात्। **अपिच** यदि **रामानुजोक्तार्थे** कृष्णस्य तात्पर्यं स्यात् , तर्हि 'ईश्वरोऽहं यथा नित्यो जीवा यूयं तथैव हि' इत्येव ब्रूयात् , न तु 'न त्वेवाहम्' इत्यादि। **किञ्च** - ईश्वरः परमात्मा, जीवास्त्वात्मान इत्यपि वक्तुं न शक्यते; 'य आत्मा अपहतपाप्मा' 'सर्वव्यापी सर्वभूतान्तरात्मा' 'ऐतदात्म्यमिदं सर्वं....स आत्मा तत्त्वमसि' 'अयमात्मा ब्रह्म' इत्यादिषु श्रुतिषु आत्मशब्देनैवेश्वरग्रहणात्। जीवेश्वरयोरभेदोपदेशाच्च।

अथ यच्चात्र **रामानुजेनो**क्तम्— 'एवं भगवतः सर्वेश्वरादात्मनां [भेदः, आत्मनां] च परस्परं भेदः पारमार्थिक इति भगवतैवोक्तमिति प्रतीयते, अज्ञानमोहितं प्रति तन्निवृत्तये पारमार्थिकनित्यत्वोपदेशसमये 'अहम् , त्वम् , इमे, सर्वे वयम्' इति व्यपदेशात्। औपाधिकभेदवादे ह्यात्मभेदस्याતात्त्विकत्वेन तत्त्वोपदेशसमये भेदनिर्देशो न सङ्गच्छते' इति; **तच्चासत् ;** भीष्मादीन् अनित्यत्वेन शोच्यान् मन्यमानायार्जुनाय तावत् 'न ते भीष्मादयः शोच्याः, नित्यत्वादि'त्येतावदेव तावदुपदेष्टुमुचितं कृष्णस्य, न त्वात्मैकत्वम्। तद्धि कृष्णः स्वयं पश्चादुपदेक्ष्यति— 'अविनाशि तु तद् विद्धि येन सर्वमिदं ततम्' इत्यादिना। वक्ष्यति च तत्र **रामानुजो** गत्यभावाज्जात्येकत्वमपि। यदि कृष्णस्यात्मभेद एव वास्तवः इत्यभिप्रायस्तर्हि - 'अनाशिनस्तु तान् विद्धि यैः सर्वमिदमावृतम्' इत्येवावक्ष्यत्। **किंच** आत्मनामनेकत्वे तत्तद्देहावच्छिन्नत्वेन सर्वव्यापकत्वमेव मा भूत् ; न हि चैत्रेणात्मना मैत्रदेहो व्याप्तो दृश्यते, चैत्रात्मनो मैत्रदेहसुखदुःखाद्यनुभवाभावात्। तत्तद्देहाद्यनवच्छिन्नस्त्वात्मा सर्वव्यापक एक एव, तद्भेदकाभावात्। यदि तु 'अविनाशि' इति श्लोकः परमात्मानं ब्रूत इत्युच्येत, तर्हि - सर्वव्यापकः परमात्मैवाविनाशी, न त्वात्मानः; ते हि परिच्छिन्नत्वाद् घटादिवदनित्या एवेति महदिदमनिष्टमापतितम्।

तस्माद् 'न त्वेवाहम्' इति श्लोके आत्मभेदम् , 'अविनाशी'ति श्लोके आत्माभेदं च प्रतिपादयतः कृष्णस्याशयः 'आत्मन औपाधिक एव भेदः, न तु तात्त्विकः' इत्येवंरूप एवेति सुखेन निश्चीयते विद्वद्भिः।

तत्त्वोपदेशसमयेऽप्यौपाधिकं भेदमनूद्यैव पारमार्थिकाभेदो बोधनीयः इति नानुवादमात्रेण भेदस्य पारमार्थिकत्वम्। 'कृष्ण इति अर्जुन इति नराधिपा इति च व्यवह्रियमाणाः सर्वे वयम् अविनाशि तद् ब्रह्मैव, येन सर्वमिदं तत'मिति हि श्लोकद्वयस्यैकवाक्यार्थः। तस्मात् सर्वव्यापकस्य नित्यस्यात्मनो भेदकाभावान्नास्ति पारमार्थिकः आत्मभेदः, भेदकानां सर्वेषामप्यात्मनैव व्याप्तत्वात्। व्यवहारतस्तु कल्पितोऽस्त्यात्मभेद आकाशभेदवदिति।

अथ यदप्युक्तं **रामानुजेन—** शङ्करमते ग्रन्थारम्भ एव न सम्भवति; परमपुरुषस्य परमार्थदृष्टेर्निर्विशेषकूटस्थनित्यचैतन्यात्म-याथात्म्यसाक्षात्कारान्निवृत्ताज्ञानतत्कार्यतया अज्ञानकृतभेददर्शनं तन्मूलोपदेशादिव्यवहाराश्च न सङ्गच्छन्त इति; **तदपि मन्दम्** ; तव मतेऽप्यवाप्तसमस्तकामस्य परिपूर्णस्यात्मारामस्यानन्दमयस्य परमपुरुषस्य कथमर्जुनदुःखनिरीक्षणतदुपदेशादिव्यवहाराः सङ्गच्छेरन्? लीलयेति चेत्? तर्हि माययेति विद्धि। यथा मायावशादजोऽव्ययो भूतानामीश्वरो भगवान् जात इव, व्ययित इव, उग्रसेनस्य पाल्य इव प्रतीयते, तथा पार्थाय किमप्युपदिशन्निव न प्रतीयतां किम्? परमार्थतस्तु न कृष्णो न पार्थः नाप्युपदेशः; एकमेवाद्वितीयं ब्रह्मास्ति। व्यवहारतस्तु सर्वमपि द्वैतमिति न काचिदस्माकं क्षतिः।

अथ ब्रूहि त्वम् - परिपूर्णे निष्कामे हरौ कथं लीलोदयः? - इत्यत्रोत्तरम्। न च बालवदिति वाच्यम् , बालस्याज्ञत्वात् सकामत्वाच्च दृष्टान्तत्वाभावात्। न च राज्ञः कन्दुकविहारवदिति वाच्यम् , तस्य तत्र सुखकामप्रवृत्तिदर्शनात्। न च लोकानुग्रहार्थमिति वाच्यम् , लोकानुग्रहरूपे प्रयोजने अवशिष्टे सति भगवतः पूर्णकामत्वव्याघातात्। तस्मात् तवापि मायैवात्र शरणम्। न च माययाऽपि कथमसङ्गतार्थसिद्धिरिति वाच्यम् , 'मायायां सर्वसम्भवाद्' इति न्यायात्।

भाष्यार्कप्रकाशः

**ननु** परमपुरुषस्यार्जुनं प्रत्युपदेशो मायया भवतु नाम , इदानीन्तनाचार्यपरम्परायाः शिष्यपरम्परां प्रत्युपदेशः कथम्? द्वैतदर्शने विद्वत्ताऽभावाद् , द्वैतादर्शने वाग्व्यवहाराभावाच्चेति चेत्? **मैवम् ;** अपरोक्षीकृतात्मतत्त्वस्यापि गुरोर्यावद्देहपातं बाधिताध्या-सानुवृत्त्या व्यवहारलोपाभावात्। देहातिरिक्तमात्मानं विदन्नपि त्वं यथा 'मनुष्योऽहं , वैष्णवोऽहं , रामानुजोऽहम्' इति ब्रवीषि, तद्वद् अस्माकं किं न स्यात्? न च बाधितानुवृत्तस्य भेदज्ञानस्य उपदेशादिप्रवृत्तिहेतुत्वं नेति वाच्यम् , आत्मज्ञानेन बाधितस्यानुवर्तमानस्य देहात्मभ्रमस्य भोजनादिप्रवृत्तिहेतुत्वदर्शनात्। न हि देहातिरिक्तात्मज्ञानी त्वं निर्भोजनादिव्यापारो वर्तसे। भोजनादिव्यापारो हि देहात्मभ्रममूलकः। 'नाहं देहः' इति मन्वानो न हि मुखेन भुङ्क्ते , भोक्तुमिच्छति वा।

यदप्युक्तं **रामानुजेन—** बिम्बभूत ईश्वरः स्वप्रतिबिम्बभूतायार्जुनाय तत्त्वं कथमुपदिशेत्? न हि कोऽप्यनुन्मत्तः पुरुषः स्वदर्पणप्रतिबिम्बाय किमप्युपदिशेदिति; तदपि **तुच्छम्** ; कोऽपि पुरुषः प्रतिबिम्बाय किमपि न वक्तीत्यत्र किं बिम्बप्रतिबिम्बयोः अत्यन्ताभेदः कारणम्? किं वा प्रतिबिम्बमिथ्यात्वम्? यद्वा प्रतिबिम्बचैतन्याभावः? **नाद्यः**, अत्यन्ताभेदे बिम्बप्रतिबिम्बव्यवहारस्यैव लोपप्रसङ्गात्। 'अयं बिम्बोऽयं प्रतिबिम्बः' इति व्यवहारो हि बिम्बप्रतिबिम्बभेदमूलकः; 'अयं घटोऽयं पटः' इति व्यवहार इव घटपटभेदमूलकः। किञ्च दर्पणगतपरप्रतिबिम्बाय सुतरां भिन्नाय किमिति नोपदिशेत् पुरुषः? **नापि द्वितीयः**, रज्जुसर्पस्य रज्जुज्ञानेनेव प्रतिबिम्बस्य केनापि ज्ञानेन बाधादर्शनात् , अबाधितस्य चामिथ्यात्वात्। न हि कोऽपि दर्पणगतं स्वप्रतिबिम्बं स्वयं मिथ्या मन्यते। अतः परिशिष्ट**स्तृतीयः**, अविद्याचित्प्रतिबिम्बास्तु चैतन्यवन्त एवेति न दर्पणप्रतिबिम्बतुल्या इति सङ्गच्छत एव स्वप्रतिबिम्बानां स्वभिन्नत्वेन स्वस्योपदेशः कृष्णस्येति। न चैवं बिम्बप्रतिबिम्बयोर्जीवेश्वरयोर्भेदे कथमद्वैतसिद्धिरिति वाच्यम् , यावदविद्यं बिम्बप्रति-बिम्बादिभेदसद्भावेऽपि परमार्थदशायामविद्याया एवाभावेन बिम्बप्रतिबिम्बभेदाभावान्नाद्वैतहानिरिति।

एतेन - 'नित्यो नित्यानां चेतनश्चेतनानाम्' इति मन्त्राज्जीवेश्वरद्वैतसिद्धिरिति **रामानुज**वचनं दत्तोत्तरम्। 'एको बहूनां यो विदधाति कामान्' इति तन्मन्त्रस्य व्यावहारिकजीवेश्वरभेदरक्ष्यरक्षकभावाद्यनुग्राहकत्वात्।

**किञ्च** नात्र चिन्मात्रस्योपदेष्टृत्वादिकं, तस्य निर्धर्मकत्वात् ; किं तर्हि? कृष्णदेहेन्द्रियाद्याकारपरिणतमायावच्छिन्नचितेरेव। सा हि अर्जुनदेहेन्द्रियाद्याकारपरिणताविद्यावच्छिन्नचितेर्भिन्नैव। अत एव खलु 'तत्त्वमसी'त्यत्र विशेषणांशं विहाय विशेष्यांशे लक्षणा स्वीकृता। तस्माद् विशिष्टयोः कृष्णार्जुनयोर्भेदादस्त्युपदेशोपपत्तिः इति।

यच्च **रामानुजेनो**क्तम्— 'गुरोरद्वितीयात्मविज्ञानादेव ब्रह्माज्ञानस्य सकार्यस्य नष्टत्वाच्छिष्यं प्रत्युपदेशो निष्प्रयोजनः' इति, तदपि **तुच्छम्** ; यावद्देहपातमात्मज्ञस्यापि गुरोर्देहेन्द्रियादिप्रपञ्चप्रतीतिसद्भावः प्रागेव प्रत्यपादि। ऐन्द्रजालिकेन गगने गन्धर्वनगरं निर्मितं 'नेदं गन्धर्वनगरं, किन्तु गगनमेव' इति जानतामपि यावदिन्द्रजालं प्रतिभात्येव। अयं च प्रपञ्चः यस्याद्वितीयात्मज्ञानेन बाधितस्तस्यैव दग्धपटवदबन्धकः, न त्वन्यस्येति कृत्वा न गुरुज्ञानेन शिष्याज्ञाननिवृत्तिः, प्रतिपुरुषमविद्याभेदात् प्रपञ्चभेदाच्च। यथा नयनसन्निहितहस्ता बहवः पुरुषा एकमेव सूर्यं न पश्यन्ति, नयनासन्निहितहस्तस्तु विदग्धस्तं पश्यति, नैतद् विदग्धकर्तृकाद्वितीय-सूर्यावलोकनम् अविदग्धपुरुषाश्रयसूर्याज्ञाननिवर्तकम् , तद्वत् प्रकृतेऽपीति। विपरीतं चेदं यदेकस्य ज्ञानादन्यस्य भ्रमनिवृत्तिरिति। न हि एकस्य रज्जुयाथात्म्यज्ञानाद् , अन्यस्य रज्जुसर्पभ्रमो निवर्तमानो दृष्टः, श्रुतो वा।

वस्तुतस्तु **रामानुज**मत एव सुतरामुपदेशानुपपत्तिः, उपदेशानर्थक्यं च। तथाहि— चिदचिच्छरीरकत्वेन चिदचिदन्तःस्थः परमात्मा कृष्णः चितोऽर्जुनस्य बहिराभिमुख्येन गुरुः सन् कथं वर्तेत? न ह्यान्तरं वस्तु बहिः स्यात्। यदि चिदचितोर्बहिरपि कृष्णः स्यात् , तर्हि कृष्ण एव चिदचितोः शरीरं स्यात् , चिदचिद्व्याप्तश्च स्यात्। [1]व्यापकेन शस्त्रादिना व्याप्यस्य देहस्येव चिदचिद्भ्यां कृष्णस्य नाशोऽपि स्यात्। चिदचितोरीश्वरापृथक्सिद्धविशेषणत्वेन, स्वापृथक्सिद्धविशेषणाद् गन्धात् स्वयं पृथिव्या इव, चिदचिद्भ्यां पृथगीश्वर-स्यावस्थानमपि न सम्भवतीति कृत्वा पृथगवस्थितवस्तुद्वयधर्मस्य गुरुशिष्यभावस्योपपत्तिः कथं कृष्णार्जुनयोरपृथगवस्थितयोः चिदीश्वरयोः? अपृथक्सिद्धविशेषणवाचिशब्दानां विशेष्यपर्यन्तत्वनियमात् अर्जुनपदार्थोऽपि चिदचिद्विशिष्ट ईश्वर एवेति कृत्वा 'कृष्णो

१. आन्तरस्य व्यापकत्वं, बाह्यस्य व्याप्यत्वं चात्रेष्टम्।

**देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।**
**तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥१३॥**

**तत्र कथमिव नित्य आत्मेति दृष्टान्तमाह—** देहिन इति। **देहोऽस्यास्तीति देही, तस्य** देहिनो [1]**देहवतः**

आनन्दगिरिकृतव्याख्या

**ननु पूर्वं देहं विहायापूर्वं देहमुपाददानस्य विक्रियावत्त्वेनोत्पत्तिविनाशवत्त्वविभ्रमः समुद्भवेदिति शङ्कते—** तत्रेति। **अशोच्यत्व-**

भाष्यार्कप्रकाशः

ऽर्जुनायोपदिदेश' इत्येतद्वाक्यमपि न युज्यते। सर्वव्यापिनः सर्वशरीरस्य सर्वान्तरस्येश्वरस्य कृष्णदेहेन्द्रियादिष्विव अर्जुनदेहेन्द्रियादिष्वपि अहंममग्रहस्यैवौचित्येन 'कृष्णोऽहम् , अर्जुनस्त्वं, नराधिपाः इमे' इति त्वमिदङ्ग्रहनिर्देशः कथमुपपद्यताम्? 'कृष्णोऽहम् , अर्जुनोऽहम् , नराधिपा अहम्' इति हि वक्तव्यम्। यद्वा 'कृष्णो मे, अर्जुनो मे, नराधिपा मे' इति वक्तव्यम्।

**किञ्च** चेतनाचेतनात्मकनिखिलजगत्परमकारणभूत ईश्वरः कृष्णः स्वजातत्वेन स्वाभिन्नेष्वर्जुनादिषु कथं भेदबुद्धिमीयात्? न हि मृदो भिद्यते घटः। कथं वा स्वाभिन्नायार्जुनाय स्वयमुपदिशेत् किमपि? उपदेशो हि भेदमूलकः। एवमर्वाचीनाचार्यपरम्पराऽपि स्वमिवान्यानपि चेतनान् परमकारणेश्वराभिन्नान् विदुषी सती परमकारणेश्वराभिन्नस्वाभिन्नचेतनेभ्यः शिष्येभ्यः कथमुपदिशेत् किमपि? ननु परमेश्वराज्जीवा जायन्त इत्यत्र जीवानामौपाधिकमेव जन्मास्माभिरिष्यते, न तु स्वरूपतः, जीवानां ज्ञानैकाकारत्वेन नित्यत्वादिति चेत्? तर्हि ज्ञानैकाकारे आत्मनि भेदकाभावात् सिद्धमद्वैतमिति स्वमतप्रच्युतिः, परमतप्रवेशश्चेत्यपि दोषद्वयं प्रसक्तं तव। न च स्वरूपतो भेदाभावेऽपि धर्मतोऽस्ति भेद इति वाच्यम् , तस्य धर्मस्याप्यौपाधिकत्वेन स्वरूपगतत्वाभावात्।

एवं ज्ञानैकाकारे आत्मनि उपदेशसम्पाद्यगुणाभावाद् उपदेशनिवार्यदोषाभावाच्चोपदेशोऽप्यपार्थः। न च निकृष्टोपाधित्यागः उत्कृष्टोपाधिस्वीकारश्च फलमुपदेशस्येति वाच्यम् , मार्तिकघटोपाधिपरित्यागात् सौवर्णघटोपाधिस्वीकाराच्च गगनस्येवाविक्रियस्य आत्मनोऽपि मनुष्योपाधित्यागाद् देवोपाधिस्वीकाराच्च न कोऽपि लाभः। सति हि देहात्मभ्रमे 'देवोऽहं, यक्षोऽहम्' इति सन्तुष्येत् पुरुषः। प्रकृते तूपदेशेन देहात्मभ्रमनाशाद् देहातिरिक्तात्मज्ञानस्य जातत्वाच्च किं देवदेहेन? न च देवदेहे आत्मीयत्वज्ञानात् सन्तुष्यति पुरुष इति वाच्यम् , 'असङ्गो ह्ययं पुरुषः' इति श्रुत्या आत्मानमसङ्गं विद्वान् पुरुषः कथं देवदेहमात्मीयं [2]मनुयात्?

**ननु** 'असङ्गः' इति श्रुतिरर्थान्तरपरा। पुरुषस्तु सदाऽपि सूक्ष्मदेहविशिष्टत्वात् ससङ्ग एव। ज्ञानैकाकारोऽपि पुरुषः सूक्ष्मदेहोपाधिबहुत्वाद् बहुविध एव। असावुपाधिः प्रलये मुक्तौ च न नश्यति। अतो जीवाः परस्परं भिन्ना एव सर्वदा; उपदेशादीश्वरोपासनाच्चामीषामीश्वरवद् ज्ञानैश्वर्यादिसिद्धिरप्राकृतदिव्यमङ्गलविग्रहसिद्धिश्चेति चेत्? **नैतदप्युपपद्यते**। सदाऽपि लिङ्गदेहविशिष्टस्य पुरुषस्य लिङ्गाकारवत्त्वेन ज्ञानैकाकारवत्त्वाभावात् , अपञ्चीकृतपञ्चभूतकार्यस्य लिङ्गस्य सदाऽप्यनादिपुरुषोपाधित्वासम्भवात् , प्रकृतिपुरुषेश्वराणां तव मते अनादित्वात् , लिङ्गस्य प्रकृतिकार्यत्वेन सादित्वात् , मुक्तौ मनःसत्त्वे तदनुभूतसंसारस्मरणप्रसङ्गेन मनाग्दुःखसम्भवात् , लिङ्गभङ्गस्यैव मोक्षत्वाच्च, उपासनयैव सगुणमुक्तिक्षेत्रलाभे तत्त्वज्ञानोपदेशस्य वैयर्थ्याच्च, उपासनां विना तदुपदेशमात्रेण तन्मुक्त्यलाभाच्च व्यर्थस्तव मते तत्त्वोपदेशः।

**किञ्च** सर्वेऽप्यास्तिका लौकिकास्तार्किकाश्च वेदानुमानादिना स्वभिन्नमीश्वरं प्रतिपद्यमानाः तस्माद् बिभ्यत्येव। 'भीषाऽस्माद् वातः पवते' इति श्रुतेर्वायुसूर्यादयोऽपीश्वराद् बिभ्यत्येव। एवं स्थिते अभयार्थमात्मानं शरणं गताय शिष्याय यदि गुरुस्तमेव जीवेश्वरभेदं भयजनकमुपदिशेत् , तर्हि तेन शिष्यः किं फलं प्राप्नुयात्? न किमपि। प्रत्युत भयाधिक्यमेव। यः 'उदरमन्तरं कुरुते अथ तस्य भयं भवती'ति हि श्रूयते। तस्माद् व्यर्थमेव भेदवादिगुरूपसदनं शिष्यस्य॥१२॥

**देहिन इति। किं तर्हीति।** एकस्याविक्रियस्यैवात्मनः द्वितीयतृतीयावस्थाप्राप्तिर्यथा दृष्टेत्यन्वयः। **तत्र**शब्दार्थमाह— **एवं सतीति।** एवं देहाद् देहान्तरप्राप्तौ सत्यामित्यर्थः। कौमाराद् यौवनावस्थाप्राप्तिरिवेति **एवं**शब्दार्थः॥१३॥

१. 'देहवदात्मनः' इति पा.। २. 'मनु अवबोधने' इति धातोः आत्मनेपदित्वाद् अयं प्रयोगश्चिन्त्यः। 'मनुताम्' इति वा पाठः कल्प्यः।

**मात्रास्पर्शास्तु कौन्तेय! शीतोष्णसुखदुःखदाः।**
**आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत !॥ १४॥**

आत्मनोऽस्मिन् **वर्तमाने देहे** यथा **येन प्रकारेण** कौमारं **कुमारभावो बाल्यावस्था,** यौवनं **यूनो भावो मध्यमावस्था,** जरा **वयोहानिः जीर्णावस्था - इत्येतास्तिस्त्रोऽवस्थाः अन्योन्यविलक्षणाः। तासां प्रथमावस्थानाशे** [1]**न नाशो, द्वितीया**[2]**वस्थोपजनने नोपजननमात्मनः। किं तर्हि?** [3]**अविक्रियस्यैव द्वितीयतृतीयावस्थाप्राप्तिरात्मनो दृष्टा।** तथा **तद्वदेव, देहादन्यो देहो देहान्तरम्, तस्य प्राप्तिः** देहान्तरप्राप्तिः **अविक्रियस्यैवात्मनः इत्यर्थः।** धीरो **धीमान्** तत्र **एवं सति** न मुह्यति **न मोहमापद्यते॥ १३॥**

**यद्यप्यात्मविनाशनिमित्तो मोहो न सम्भवति 'नित्यः आत्मा' इति विजानतः, तथापि शीतोष्णसुखदुःखप्राप्तिनिमित्तो मोहो लौकिको दृश्यते,** [4]**सुखवियोगनिमित्तो दुःखसंयोगादिनिमित्तश्च शोकः इत्येतदर्जुनस्य वचनमाशङ्क्य भगवानाह—** मात्रास्पर्शा इति। मात्राः **आभिर्मीयन्ते शब्दादयः इति श्रोत्रादीनीन्द्रियाणि**[5]**। मात्राणां** स्पर्शाः **शब्दादिभिः संयोगाः, ते** शीतोष्णसुखदुःखदाः **शीतमुष्णं सुखं दुःखं च प्रयच्छन्तीति। अथवा स्पृश्यन्ते इति**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ननु पूर्वदेहत्यागोत्तरदेहप्राप्त्योरात्मनो विकारो वक्तव्यः, क्षीरादिवत्, ततोऽनित्यत्वमिति प्रत्यनुमानविरोधमाशङ्क्याह— **तत्र कथमिवेत्यादिना॥** १३-१५॥

आनन्दगिरिकृतव्याख्या

**प्रतिज्ञायां नित्यत्वे हेतौ कृते**[6] **सतीति यावत्। अवस्थाभेदे सत्यपि वस्तुतो विक्रियाऽभावादात्मनो नित्यत्वमुपपन्नमित्युत्तरश्लोकेन दृष्टान्तावष्टम्भेन प्रतिपादयतीत्याह—** दृष्टान्तमिति। **न केवलमागमादेवात्मनो नित्यत्वम्, किन्त्ववस्थान्तरवद् जन्मान्तरे पूर्वसंस्कारानुवृत्तेश्चेत्याह—** देहिन इति। देहवत्त्वं **तस्मिन् अहममाभिमानभाक्त्वम्।** तासामिति **निर्धारणे षष्ठी। आत्मनः श्रुतिस्मृत्युपपत्तिभिः नित्यत्वज्ञानं** धीमानित्यत्र **धीः विवक्ष्यते।** एवं सतीति। **तत्त्वतो विक्रियाऽभावान्नित्यत्वे समधिगते सतीत्यर्थः॥ १३॥**

**आत्मनः श्रुत्यादिप्रमिते नित्यत्वे तदुत्पत्तिविनाशप्रयुक्तशोकमोहाभावेऽपि प्रकारान्तरेण शोकमोहौ स्यातामित्याशङ्कामनूद्योत्तरत्वेन श्लोकमवतारयति—** यद्यपीत्यादिना। **शीतोष्णयोस्ताभ्यां सुखदुःखयोश्च प्राप्तिं निमित्तीकृत्य यो मोहादिर्दृश्यते तस्यान्वयव्यतिरेकाभ्यां दृश्यमानत्वमाश्रित्य** लौकिक **इति विशेषणम्। 'अशोच्यानि'त्यत्र यो विद्याधिकारी सूचितः, तस्य 'तितिक्षुः समाहितो भूत्वा' इति श्रुतेस्तितिक्षुत्वं विशेषणमिहोपदिश्यते। व्याख्येयं** [7]**पदमुपादाय करणव्युत्पत्त्या तस्येन्द्रियविषयत्वं दर्शयति—** मात्रास्पर्शा इत्यादिना। **षष्ठीसमासं दर्शयन् भावव्युत्पत्त्या स्पर्शशब्दार्थमाह—** मात्राणामिति। **तेषामर्थक्रियामादर्शयति—** ते शीतेति। **सम्प्रति** [8]**शब्दद्वयस्य कर्मव्युत्पत्त्या शब्दादिविषयपरत्वमुपेत्य समासान्तरं दर्शयन् विषयाणां कार्यं कथयति—** अथवेति। **ननु शीतोष्णप्रदत्वे**

भाष्यार्कप्रकाशः

**मात्रेति। मीयन्त इति।** गृह्यन्त इत्यर्थः। 'हुयामाश्रुभसिभ्यस्त्रन्' इति माङस्त्रन् औणादिकः। अदन्तात् स्त्रियां टाप्। मात्राः।

१. 'आत्मनो न नाशः' इति पा.। २. 'वस्थोपजने नोपजन आत्मनः' इति पा.। ३. 'एकस्याविक्रियस्यैव' इति पा.। ४. 'सुखवियोगनिमित्तो मोहो दुःख' इति पा.। ५. मात्रापदस्य इन्द्रियपरतया व्याख्यानमसत्, तस्य विषये रूढत्वादिति **माध्वाः**। तन्न, रूढौ प्रमाणाभावात्, करणव्युत्पत्त्या इन्द्रियपरत्वे दोषाभावात्, 'भूतमात्राः प्रज्ञामात्रास्वर्पिताः' इति इन्द्रियपरतया प्रयोगदर्शनाच्च। ६. 'हेतूकृते' इति पा.। ७. मात्रापदम्। ८. मात्राशब्दस्य स्पर्शशब्दस्य च। शब्दद्वयस्यापि शब्दादिविषयपरत्वे कर्मधारयः समासः। वस्तुतस्तु स्पर्शशब्दस्यैव कर्मव्युत्पत्त्या विषयपरत्वम्, मात्राशब्दस्य तु इन्द्रियपरत्वमेव। द्वन्द्वश्च समासः।

स्पर्शाः **विषयाः शब्दादयः, मात्राश्च स्पर्शाश्च शीतोष्णसुखदुःखदाः। शीतं कदाचित् [१]सुखं कदाचिद् दुःखम्। तथोष्णमप्यनियतस्वरूपम्। सुखदुःखे [२]पुनर्नियतरूपे, यतो न व्यभिचरतः। अतस्ताभ्यां पृथक् शीतोष्णयोर्ग्रहणम्। [३](यद्येते सुखदुःखदाः, तर्हि एषामनपायादनुपरत एव संसारः स्यादिति चेन्मैवम् ;) यस्मात् ते मात्रास्पर्शादयः** आगमापायिनः **आगमापायशीलाः तस्माद् अनित्याः [४](उत्पत्तिविलयरूपत्वात्)। अतस्ताञ्शीतोष्णादीन्** तितिक्षस्व **प्रसहस्व। तेषु हर्षं विषादं च मा कार्षीरित्यर्थः॥ १४॥**

आनन्दगिरिकृतव्याख्या

**सुखदुःखप्रदत्वस्य सिद्धत्वात् किमिति शीतोष्णयोः सुखदुःखाभ्यां पृथग्ग्रहणमिति? तत्राह—** शीतमिति। **विषयेभ्यस्तु पृथक्कथनं तदन्तर्भूतयोरेव तयोः सुखदुःखहेत्वोरानुकूल्यप्रातिकूल्ययोरुपलक्षणार्थम्। अध्यात्मं हि शीतमुष्णं वा [५]अनुकूलं प्रतिकूलं वा सम्पाद्य बाह्या विषयाः सुखादि जनयन्ति। ननु विषयेन्द्रियसंयोगस्यात्मनि सदा सत्त्वात् तत्प्रयुक्तशीतादेरपि तथात्वात् तन्निमित्तौ हर्षविषादौ तथैव तस्मिन्नापन्नावित्याशङ्क्योत्तरार्धं व्याचष्टे—** यस्मादित्यादिना। **अत्र च** कौन्तेय, भारत **इति सम्बोधनाभ्याम् [६]उभयकुलशुद्धस्यैव विद्याधिकारित्वमित्येतदेव द्योत्यते॥ १४॥**

भाष्यार्कप्रकाशः

श्रोत्रत्वगक्षिरसनघ्राणाख्येन्द्रियपञ्चकविषयाः शब्दस्पर्शरूपरसगन्धाः इष्टानिष्टभेदेन द्विविधाः प्रत्येकं भवन्ति। तत्र आत्मनः सुखदाः इष्टाः, दुःखदास्त्वनिष्टाः। यथा ग्रीष्मकाले शीतस्पर्श इष्टः सुखदः, शिशिरकाले स एवानिष्टो दुःखदः। शिशिरकाले उष्णस्पर्श इष्टः सुखदः, ग्रीष्मकाले स एवानिष्टो दुःखदः। एवं सुरभिगन्धः संयोगकाले इष्टः सुखदः, स एव विरहदशायामनिष्टो दुःखदः। मधुररसश्च ज्वरितस्यानिष्टो दुःखदः, स एव स्वस्थस्येष्टः सुखदः। एवं श्राव्यशब्दादयोऽपीष्टाः सुखदाः, अनिष्टा दुःखदा इति विवेकः। एवं स्थिते मात्रास्पर्शाः सुखदुःखदा भवन्तीत्येतावानेवेह विवक्षितांशः। शीतोष्णग्रहणं तु दृष्टान्तार्थम्। यथा शीतोष्णभेदभिन्नस्त्वक्स्पर्शः सुखदुःखदो भवति, तद्वदिति। अन्यथा तु शीतोष्णप्रदत्वं श्रोत्रशब्दादीनामपि सम्बध्येत। तद्ध्यनिष्टम् , तेषां तथात्वाभावात्। शीतोष्णे इव सुखदुःखदाः शीतोष्णसुखदुःखदा इति समासः। यद्वा मात्रास्पर्शाः सुखदुःखदा भवन्ति। स्पर्शवद्द्रव्यसम्बद्धं त्वगिन्द्रियं तु शीतोष्णस्पर्शप्रदं च भवतीत्यर्थो बोध्यः। 'मात्रास्पर्शाः' इत्यस्य इन्द्रियसंयोग इति व्याख्याने शब्दादिभिरिति पदानयनक्लेश इत्यरुच्या पक्षान्तरमाह— **अथवेति।** ननु शीतोष्णयोरेव सुखदुःखत्वात् पृथक् शीतोष्णग्रहणं व्यर्थम्? अत आह— **शीतं चेति।** विषयेन्द्रिय-संयोगजन्यं शीतोष्णरूपद्वन्द्वं सुखदुःखरूपद्वन्द्वं चावर्जनीयत्वादागमापायित्वादनित्यत्वाच्च सोढव्यमिति श्लोकस्य फलितार्थः। अनेन तितिक्षुत्वरूपाधिकारिधर्मः शिक्षितः।

अत्राह **रामानुजः**— 'शब्दस्पर्शादयः साश्रयाः तन्मात्राकार्यत्वान्मात्रा इत्युच्यन्ते' इति। **तत्तुच्छम्** ; शब्दादीनामेव तन्मात्रात्वात्। न च सूक्ष्मभूतानि तन्मात्रा इति वाच्यम् ; तथापि साश्रयशब्दादीनामेव सूक्ष्मभूतानां तन्मात्रात्वात्। न च शब्दादयः साश्रया नाम मृदङ्गकुसुमादय इति वाच्यम् ; तेषां महाभूतकार्यत्वेन तन्मात्राऽकार्यत्वात्। न च महाभूतान्येव शब्दादयः साश्रया इति वाच्यम् ; महाभूतानीत्येव वक्तव्यत्वेन शब्दादयः साश्रया इति वक्रोक्तेर्व्यर्थत्वाद् दुष्टत्वाच्च। इन्द्रियाणामपि तन्मात्राकार्यत्वेन भूतानामेव ग्रहणमित्यत्र नियामकाभावाच्च। अथ यदि शब्दादीनामाश्रयास्तद्ग्राहकाणीन्द्रियाणि इत्युच्यते, तर्हि मीयन्ते [आभिः] इति मात्राः इत्येव वक्तव्यमभिधया, न तु लक्षणया, लक्षणाश्रयणस्यागतिकस्थलविषयत्वादिति।

**तथा** शीतोष्णसुखदुःखदाः इत्यत्र 'शीतोष्णरूपसुखदुःखदा' इत्याह। **तच्चासत्** ; शीतोष्णकार्ययोः सुखदुःखयोः कथं शीतोष्णरूपत्वम्? यथासंख्यं शीतोष्णयोः सुखदुःखहेतुत्वं च नैव सम्भवति, शीतस्यापि हेमन्तकाले दुःखहेतुत्वाद् उष्णस्यापि सुखहेतुत्वात्॥ १४॥

१. 'सुखदं कदाचिद्दुःखदम्' इति पा.। २. 'पुनर्नियतरूपतां न' इति पा.। ३-४. कुण्डलान्तर्गतौ पाठौ रा. पुस्तके दृश्येते। ५. 'आनुकूल्यं प्रातिकूल्यं वा' इति पा.। ६. कुन्तीपुत्र भरतान्वयज इत्यर्थकपदद्वयेन मातृकुलं पितृकुलं चार्जुनस्योक्तम्। तदभिप्रायमाह— **उभयेति।**

**यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ !।**
**समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते॥ १५॥**
**नासतो विद्यते भावो नाभावो विद्यते सतः।**

**शीतोष्णादीन् [१]सहतः किं स्यादिति श्रृणु —** यं हीति। **यं हि पुरुषं** समदुःखसुखम् **समे दुःखसुखे यस्य तं समदुःखसुखम्। सुखदुःखप्राप्तौ हर्षविषादरहितम्।** धीरं **धीमन्तं** न व्यथयन्ति **न चालयन्ति नित्यात्मदर्शनात्** एते **यथोक्ताः शीतोष्णादयः,** स **नित्यात्मस्वरूपदर्शननिष्ठो द्वन्द्वसहिष्णुः** अमृतत्वाय **अमृतभावाय, मोक्षायेत्यर्थः;** कल्पते **समर्थो भवति॥ १५॥**

**इतश्च शोकमोहावकृत्वा शीतोष्णादिसहनं युक्तम् , यस्मात् —** नासत इति। **न** असतः **अविद्यमानस्य**

आनन्दगिरिकृतव्याख्या

**अधिकारिविशेषणं तितिक्षुत्वं नोपयुक्तम् , केवलस्य तस्य पुमर्थहेतुत्वादिति शङ्कते—** शीतेति। **विवेकवैराग्यादिसहितं तद् मोक्षहेतुज्ञानद्वारा तदर्थमिति परिहरति—** श्रृण्विति। **तितिक्षमाणस्य विवक्षितं लाभमुपलम्भयति—** यं हीति। हर्षविषादरहित**मित्यत्र शमादिसाधनसम्पन्नत्वमुच्यते;** धीमन्तमिति **नित्यानित्यविवेकभागित्वम्। एतच्चोभयं वैराग्यादेरुपलक्षणम्।** नित्यात्मदर्शनं **त्वमर्थ-ज्ञानम्। साधनचतुष्टयवन्तमधिकारिणमनूद्य त्वम्पदार्थज्ञानवतस्तस्य मोक्षौपयिकवाक्यार्थज्ञानयोग्यतामाह—** स नित्येति॥ १५॥

**अधिकारिविशेषणे तितिक्षुत्वे हेत्वन्तरपरत्वेनोत्तरश्लोकमवतारयति—** इतश्चेति। इतः**शब्दार्थमेव स्फुटयति—** यस्मादिति।

भाष्यार्कप्रकाशः

**यमिति। न व्यथयन्तीति**। 'व्यथ भयचलनयो'रिति धातुः। चलनस्यापादानमाह— **नित्यात्मदर्शनादिति। एतेन** - शीतोष्णा-दिद्वन्द्वसहनमात्रान्नामृतत्वम् , किन्तु नित्यात्मदर्शनभ्रंशाभावादेव, अन्यथा शीतोष्णादिसहनशालिनो मूर्खाः [२]शूद्रादयोऽपि प्राप्नुयुः अमृतत्वम् - इति **सिद्धम्**। स्थिरधीरेव नित्यात्मदर्शननिष्ठो भवति। द्वन्द्वासहनेन तु सुखदुःखाभ्यां बुद्धौ चरितायां [चलितायां ] सत्याम् आत्मदर्शननिष्ठा दुर्लभा पुरुषस्येति भवति। हे पुरुषर्षभेति सम्बोधनेन च पुरुषश्रेष्ठस्य तव पुरुषाधमस्येव नित्यात्म-दर्शननिष्ठातो भ्रंशः, द्वन्द्वसहनाभावश्चानुचित इति द्योत्यते।

अत्राह **रामानुजः**— 'धैर्ययुक्तमवर्जनीयदुःखं सुखवन्मन्यमानं स्ववर्णोचितं युद्धादिकर्माफलाभिसन्धि कुर्वाणं यं पुरुषं तदन्त-र्गतशस्त्रपातादिस्पर्शाः परितापेन न चालयन्ति, स एवामृतत्वं साधयति, न त्वादृशो दुःखासहिष्णु'रिति, तत् **तुच्छम्** ; तादृशो हि पुरुषो युद्धे मृतश्चेद् वीरस्वर्गं साधयति, जयी चेत् परराज्यम् , अथवा चित्तशुद्धिमेव; न त्वमृतत्वम् ; मोक्षस्य ज्ञानैकसाध्यत्वात्। सांख्यप्रकरणे चात्र कर्मकीर्तनमनुचितम्। पुरुषर्षभशब्दे काक्वाश्रयणं चायुक्तम् ; भगवतः परमार्थोपदेष्टुरत्र काकुसम्बोधनप्रयोगा-नौचित्यात्। अर्जुनस्य परमार्थतः पुरुषाधमत्वे तं प्रति शास्त्रोपदेशस्यैवायुक्तत्वादिति॥ १५॥

**नासत इति**। 'अस भुवि, भू सत्ताया'मित्येकार्थकं धातुद्वयम्। तत्र अस्तेः शतरि सन्निति , भवतेर्घञि भाव इति च रूपद्वयम्। सन् न भवतीत्यसन् , क्लीबत्वे तु असत्। सतो भावः सत्ता। न भावः अभावः। तथा च भावः सत्ता, अभावस्त्वसत्तेति विवेकः। एवं सति, सति सत्ता वर्तते, तद्भावस्य तन्निष्ठत्वात् , सत्तावत एव सत्त्वाच्च। असति तु सत्ता न वर्तते, किन्तु असत्तैव वर्तते, सत्तारहितस्यैवासत्त्वात् इति सर्वस्यापि सुग्रहमेव। ततश्च - असतो नास्ति सत्ता इति, सतो नास्त्यसत्ता इति च व्यर्थोऽयं कृष्णस्योपदेशः। न हि कोऽपि सतः पदार्थस्यासत्ताशालित्वम् , असतः सत्ताशालित्वं च मनुते; येनायमुपदेशः सफलः स्यात्। न हि कश्चिदप्यसन्तं [३]शशश्रृङ्गं सन्तं मन्यते; सन्तं वा गोश्रृङ्गमसन्तम् ; इति प्राप्ते, आह भगवान् भाष्यकारः— **असतः अविद्यमानस्य**

१. 'प्रसहतःतव' इति पा.। २. शूद्रादयः इत्यविवक्षितम् , नित्यात्मदर्शनराहित्ये तात्पर्यम्। ३. अर्धर्चादिगणे पाठात् श्रृङ्गशब्दस्य पुंस्त्वं नानुपपन्नम्।

**शीतोष्णादेः सकारणस्य** न विद्यते **नास्ति** भावो **भवनमस्तिता। न हि शीतोष्णादि सकारणं प्रमाणैर्निरूप्यमाणं** [1]**वस्तुसद् भवति। विकारो हि सः। विकारश्च व्यभिचरति। यथा घटादिसंस्थानं चक्षुषा निरूप्यमाणं मृद्व्यतिरेकेणानुप-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

विमत एव स तु [विमतमसत् ,] अप्रामाणिकत्वात् , सम्मतवदित्याह—**न हि शीतोष्णादीति।** तथाहि— न प्रतीतिमात्रेण प्रामाणिकत्वं शक्यते वक्तुम् , चन्द्रप्रादेशिकत्वदेहात्मभावादेरपि प्रामाणिकत्वप्रसङ्गात्। निरूपणं न सहते, अपि च प्रामाणिकमिति व्याहतत्वाच्च। निरूप्यमाणे च - न द्वैतं स्वतः सिध्यति, जाड्यहानिप्रसङ्गात्। प्रमाणतोऽपि सम्बन्धात् सिध्यति, अन्यथाऽतिप्रसङ्गात्। सम्बन्धस्य च सम्बन्ध[द्ध]त्वासम्बन्ध[द्ध]त्वविकल्पासहत्वात्। अतो यद्यप्यापाततः करणदोषो बाधो वा नोपलभ्यते, तथापि यौक्तिकबाधाद् देहात्मप्रत्ययवद् द्वैतविषयस्य प्रत्यक्षादेरप्रामाण्यात् न हेतोरसिद्धिरिति भावः। **किञ्च** विमतो मिथ्या, विकारत्वात् , स्वप्नवदित्याह— **विकारो हि स इति।** किञ्च विमतो मिथ्या, व्यवहारित्वात्

आनन्दगिरिकृतव्याख्या

**यतः शीतादेः शोकादिहेतोरनात्मनो नास्ति वस्तुत्वम् , वस्तुनश्चात्मनो निर्विकारत्वेनैकरूपत्वम् , अतो मुमुक्षोर्विशेषणं तितिक्षुत्वं युक्तमित्याह—** नेत्यादिना। **कार्यस्यासत्त्वेऽपि कारणस्य सत्त्वेनात्यन्तासत्त्वासिद्धिरित्याशङ्क्य विशिनष्टि—** सकारणस्येति। **नासतः इत्युपादाय पुनर्नकारानुकर्षणमन्वयार्थम्।** असतः **शून्यस्यास्तित्वप्रसङ्गाभावादप्रसक्तप्रतिषेधप्रसक्तिरित्याशङ्क्याह—** न हीति। **विमतम् अतात्त्विकम् , अप्रामाणिकत्वाद् , रज्जुसर्पवत्। न हि धर्मिग्राहकस्य प्रत्यक्षादेस्तत्त्वावेदकं प्रामाण्यं कल्प्यते, विषयस्य दुर्निरूपत्वात्। अतोऽनिर्वाच्यं द्वैतमित्यर्थः। कथं पुनरध्यक्षादिविषयस्य शीतोष्णादिद्वैतस्य दुर्निरूपत्वेनानिर्वाच्यत्वम्? तत्राह—** विकारो हीति। **ततश्च विमतं मिथ्या, आगमापायित्वात् , सम्प्रतिपन्नवदिति फलितमाह—** विकारश्चेति। [2]**वाचारम्भणश्रुतेर्द्वैतमिथ्यात्वेऽनुग्राहकत्वं दर्शयितुं**

भाष्यार्कप्रकाशः

**शीतोष्णादेरित्यादि।** यस्य कालत्रयेऽप्यभावो नास्ति, तदेव सत् ; यस्य तु प्रतीतिसमये एव भावः, न तु कालत्रये, तदसत्। सति वस्तुनि कदाचिदप्यसत्तायाः स्थित्यनौचित्यात् , अन्यथा प्रतीतिसमयवर्ती रज्जुसर्पोऽपि सन् स्यादेव। लोकस्तु नैवं जानाति, किन्तु प्रतीतं वस्तु सत्त्वेन, अप्रतीतं वस्त्वसत्त्वेन च जानाति; अतोऽयमुपदेशः सफल एवेति भावः।

भाष्यार्थं ब्रूमः— **असतः** अविद्यमानस्य शीतोष्णादेः सकारणस्य **भावो** भवनमस्तिता **न विद्यते** नास्तीत्यन्वयः। ननु कारणस्य सत्त्वे कथं कार्यस्य शीतोष्णादेरसत्त्वम्? अत आह— **सकारणस्येति। सकारणस्य** जलाग्न्यादिकारणसहितस्य। साज्ञानस्येति वा, अज्ञानप्रभवत्वाच्छीतोष्णादिसर्वप्रपञ्चस्य। आदिशब्दात् सुखदुःखादिग्रहणम्। ननु यदि शीतोष्णादिकमविद्यमानं स्यात् तर्हि तस्य भावो न स्यादेव, प्रत्युत शीतोष्णादिकं विद्यत एव, प्रतीयमानत्वात्। न ह्यविद्यमानं शशशृङ्गादिकं प्रतीयेत; अत आह— **न हीति।** सकारणं शीतोष्णादि जगत् प्रमाणैर्निरूप्यमाणं **वस्तु** सत्यं न सम्भवति हीत्यन्वयः। श्रुतिभिस्तदनुगृहीततर्कैश्च विचार्यमाणे सति शीतोष्णादेर्वस्तुत्वं न सिध्यतीत्यर्थः।

यद्वा - 'प्रमाणैस्त्वगादीन्द्रियैः **निरूप्यमाणं** गृह्यमाणं सकारणं शीतोष्णादि वस्तु न सम्भवति हि' इत्यन्वयः। तत्र हेतुमाह— **विकारो हि स इति**। सः शीतोष्णादिपदार्थः, विक्रियत इति विकारः भवति। हिः प्रसिद्धौ। भवतु विकारः, किं तेनेत्यत आह— **विकारश्चेति। विकारः** कार्यं व्यभिचरति च। ह्यर्थोऽत्र चः। **व्यभिचारो** नाम कार्यस्य कारणव्यतिरेकेणासत्त्वम्। तदेवोपपादयति— **यथेत्यादिना। घटादिसंस्थानं** घटाद्याकारसन्निवेशः। यद्वा **व्यभिचारो** नाम कार्यस्य कालत्रयेऽप्यसत्त्वम्। ननु कार्यस्य स्वोत्पत्तेः प्राक्, स्वध्वंसात् पश्चाच्च भवत्यसत्त्वमिति कृत्वा कालद्वये कार्यमसद् भवतु नाम; वर्तमानकाले कार्यस्य सत्त्वात् कथं कालत्रयेऽपि कार्यस्यासत्त्वम्? अत आह— **यथेत्यादि**। कारणव्यतिरेकेण कार्यस्यानुपलभ्यमानत्वाद् वर्तमानकालेऽपि न कार्यस्य सत्त्वमिति कृत्वा

१. 'वस्तु संभवति' इति रा. पाठः। २. 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां.उ. ६.१.४) इति श्रुतेरित्यर्थः।

**लब्धेरसत् , तथा सर्वो विकारः कारणव्यतिरेकेणानुपलब्धेरसन् , जन्मप्रध्वंसाभ्यां [1]प्रागूर्ध्वं चानुपलब्धेः कार्यस्य घटादेः। मृदादिकारणस्य च तत्कारणव्यतिरेकेणानुलब्धेरसत्त्वम्।**

**तदसत्त्वे सर्वाभावप्रसङ्ग इति चेत्? न ; सर्वत्र बुद्धिद्वयोपलब्धेः - सद्बुद्धिरसद्बुद्धिरिति। [2]यद्विषया बुद्धिर्न व्यभि-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

[व्यभिचारित्वात्] स्वप्नवदित्याह— **विकारश्चेति।** किञ्च भेदाभेदयोरेकोपाधौ विरोधात् कार्यमुपादानाद् भिन्नमेव वा वक्तव्यम् , [अ]भिन्नमेव वा? तत्राऽऽद्यं प्रत्याह— **यथा घटादीत्यादिना।** घटस्यान्तर्बहिश्च निरीक्षणे न मृदोऽतिरिक्तं किमपि रूपमुपलभ्यते। अतः पृथक् सत्त्वाभावो गम्यत इत्यर्थः। अभेदपक्षं दूषयति— **जन्मप्रध्वंसाभ्यामिति।** कार्यस्यापि [स्य प्राक्] जन्मनः, प्रध्वंसाच्चोर्ध्वमुपलभ्यमानेऽपि उपादानादेर[उपादानेऽ]नुपलम्भान्नाभेदो घटत इत्यर्थः। ननु भेदादिविकल्पा-सहत्वाच्चेत् कार्यं न वस्तु , कारणं मृदादि वस्तु भविष्यतीत्याशङ्क्याह— **मृदादिकार्यस्ये[कारणस्ये]ति।**

कारणस्याप्यसत्त्वे सर्वशून्यवाद एव प्रसज्यत इत्याह— **तदसत्त्व इति।** सर्वत्रानुवृत्तव्यावृत्तबुद्धिद्वयोपलब्धेः, अनुवृत्ते च व्यावृत्तानामध्यस्तत्वात् सर्वभेदाध्यासाधिष्ठानं सद्वस्तु भविष्यतीत्याह— **न, सर्वत्रेति।** अनुमानं वक्तुं व्याप्तिं दर्शयति— **यद्विषयेति।** सर्वत्रानुगतं सत्यम् , अव्यभिचारित्वाद् , रज्विदमंशवत्। व्यावृत्तं च न सत्यं, व्यावृत्तत्वात् ,

आनन्दगिरिकृतव्याख्या

**चकारः। किञ्च कार्यं कारणाद् भिन्नमभिन्नं वेति विकल्प्याऽऽद्यं दूषयति—** यथेति। निरूप्यमाणम् **अन्तर्बहिश्चेति शेषः। विमतं कारणान्न तत्त्वतो भिद्यते, कार्यत्वाद् , घटवदित्यर्थः। इतोऽपि कारणाद्भेदेन नास्ति कार्यम् ,'आदावन्ते च यन्नास्ति वर्तमानेऽपि तत् तथा' इति न्यायादित्याह—** जन्मेति। **यदि कार्यं कारणादभिन्नं, तदा तस्य भेदेनासत्त्वे पूर्वस्मादविशेषः। तादात्म्येनावस्थानं तु न युक्तम् , तस्यापि कारणव्यतिरेकेणाभावात्। कार्यकारणविभागविधुरे वस्तुनि कार्यकारणपरम्पराया [3]विभ्रमादित्यभिप्रेत्याह—** मृदादीति।

**कार्यकारणविभागविहीनं वस्त्वेव नास्तीति मन्वानश्चोदयति—** तदसत्त्व इति। **अनुवृत्तव्यावृत्तबुद्धिद्वयदर्शनाद् , अनुवृत्ते च व्यावृत्तानां कल्पितत्वाद्, अकल्पितं सर्वभेदकल्पनाधिष्ठानमकार्यकारणं वस्तु सिध्यतीति परिहरति—** न; सर्वत्रेति। **सम्प्रति सतो वस्तुत्वे प्रमाणमनुमानमुपन्यस्यति—** यद्विषयेति। **यद् व्यावृत्तेष्वनुवृत्तं तत् परमार्थसत् , यथा सर्पधारादिष्वनुगतो रज्वादेरिदमंशः। विमतं**

भाष्यार्कप्रकाशः

कालत्रयेऽपि कार्यमसदेवेति युक्तं विकारस्य व्यभिचारित्वमित्यर्थः। जन्मप्रध्वंसाभ्यां प्रागूर्ध्वं च कार्यस्यानुपलब्धेश्चासत्त्वमित्यन्वयः। ननु घटादिकार्यस्यासत्त्वमस्तु नाम, न तु तत्कारणस्य मृदादेरिति शङ्कायामाह— **मृदादीति।** घटादिकारणं मृदादिकमपि स्वकारण-भूतजलादिव्यतिरेकेण वर्तमानकाले नास्ति, जन्मनः प्राक्, प्रध्वंसात् पश्चाच्च सुतरां नास्तीत्यसदेव तदिति।

नन्वेवं पृथिव्याद्याकाशान्तानां भूतानामपि जन्यत्वेन व्यभिचारित्वे सति सद्रूपवस्त्वन्तरस्यैवाभावाच्छून्यवादप्रसङ्ग इत्या-क्षिपति स्वयमेव— **तदसत्त्व इति।** सकार्यस्य मृदादिकारणस्यासत्त्वे इत्यर्थः। परिहरति**— नेति।** 'सर्वत्र सद्बुद्धिरसद्बुद्धिश्चेति बुद्धि-द्वयोपलब्धेर्न सर्वाभावप्रसङ्गः' इत्यन्वयः। **सर्वत्रेति।** घटपटादिसर्वव्यवहारेष्वित्यर्थः। सद्विषया बुद्धिः सद्बुद्धिः, असद्विषया बुद्धिर-सद्बुद्धिः। **बुद्धिः** वृत्तिज्ञानम्। विषयस्याभावे विषयिण एवाभावात् , विषयिभूतया सर्वत्र प्रसिद्धया सद्बुद्ध्या विषयस्य सतः पदार्थस्यानु-मीयमानत्वात् सद्वस्तुलाभेन न शून्यवादप्रसङ्ग इत्यर्थः। ननु किं तत् सत् , यद्विषया बुद्धिः सद्बुद्धिः? किं वा तदसत् , यद्विषया बुद्धिरसद्बुद्धिः? इत्यत आह— **यद्विषयेति। न व्यभिचरति** न नश्यतीत्यर्थः। विपर्ययं न प्राप्नोतीति यावत्। [4]यथा घटबुद्धिर्घटे भिन्ने सति कपालबुद्धिर्भवति, तद्वदित्यर्थः। **बुद्धितन्त्रे** बुद्ध्यधीने। बुद्धेरव्यभिचारत्वसव्यभिचारत्वाभ्यां सदसद्विभागस्य जातत्वादिति भावः। **स्थिते**

१. जन्मप्रध्वंसाभ्यां यथाक्रममन्वयः— जन्मनःप्राक् , प्रध्वंसाच्चोर्ध्वमिति । २. विषयव्यभिचारोऽत्र बुद्धेः व्यभिचारोऽभिप्रेतः। विषयस्य व्यभिचारश्च प्रतिपन्नो-पाधौ परमार्थतोऽसत्त्वम्। ३. 'विभ्रमत्वाद्' इति पा.। ४. नात्र यथाश्रुतार्थो ग्राह्यः। घट एव कपालरूपो जात इति तद्बुद्धेस्तद्बुद्धित्वमुपचर्यते।

**चरति तत् सत् , यद्विषया व्यभिचरति तदसत् इति सदसद्विभागे बुद्धितन्त्रे स्थिते, सर्वत्र द्वे बुद्धी सर्वैरुपलभ्येते [१]समानाधिकरणे, न नीलोत्पलवत् , 'सन् घटः' 'सन् पटः' 'सन् हस्ती' इति। एवं सर्वत्र। तयोर्बुद्ध्योः घटादिबुद्धिः**

अनुभूतिस्वरूपाचार्यटिप्पणम्

रज्जुसर्पवदित्यर्थः। नन्वेतदनुमानं सकलद्वैतजातातत्त्ववादिनो दृष्टान्ताभावादनुपपन्नमित्याशङ्क्याह— **[सदसद्विभागे बुद्धितन्त्रे इति।]** सदसद्विभागे बुद्धितन्त्रे लोके व्यवस्थिते सति तदनुमानादिव्यवहारो नानुपपन्नः। एषा हि **मायावादिनां** मर्यादा यत् - स्वमतं लोकसिद्धेन परसिद्धेन वा दृष्टान्तेन परः प्रतिबोधनीयः- इति। नो खलु स्वयं सत्यतया (च) परिगृहीत एव दीपः अन्धकारध्वंसप्रयोजक इति। तथापि हेतोः पक्षधर्मताप्रमितिरस्ति वा न वा? प्रथमे न द्वैतस्याप्रामाणिकत्वसिद्धिः, चरमे हेत्वसिद्धिरित्याशङ्क्याह— **सर्वत्र द्वे बुद्धी इति।** लौकिकबुद्धिसिद्धहेतौ सम्भवति प्रमितत्वविशेषणमकिञ्चित्करम् , केवलव्यतिरेकाभावात् , स्वप्नवच्च जडादिसिद्धिरिति भावः। ननु द्वे बुद्धी स्वीकृते चेत् , तर्हि सत्ता सामान्यं, घटादयस्तु तद्विशेषा इत्येवं वस्तुभेद एव किं नाङ्गीक्रियते इत्याशङ्क्याह— **समानाधिकरणे इति।** सोऽयं देवदत्तः इत्यादौ कल्पितभेदपरामर्शेनैकवस्तुपर्यवसितस्य सामानाधिकरण्यस्योपलम्भात् , भिन्नयोश्च घटपटयोः [२]अनुपलम्भात् , न भेद-सिद्धिरिति भावः। तर्हि नीलोत्पलवद् धर्मिधर्मभावरूपसामानाधिकरण्यं गौणं भविष्यतीत्याशङ्क्याह— **न नीलोत्पलवदिति।**

आनन्दगिरिकृतव्याख्या

**सत्यम् , अव्यभिचारित्वात् , सम्प्रतिपन्नवदित्यर्थः। व्यावृत्तस्य कल्पितत्वे प्रमाणमाह—** यद्विषयेत्यादिना। **यद् व्यावृत्तं तन्मिथ्या, यथा सर्पधारादि। विमतं मिथ्या, व्यभिचारित्वात् , सम्प्रतिपन्नवदित्यर्थः। इत्यनुमानद्वयमनुसृत्य सतोऽकल्पितत्वम् , असतश्च कल्पितत्वं स्थितमिति शेषः। ननु नेदमनुमानद्वयमुपपद्यते, समस्तद्वैतवैतथ्यवादिनो विभागाभावादनुमानादिव्यवहारानुपपत्तेः? तत्राह—** सदसदिति। **उक्ते विभागे बुद्धिद्वयाधीने स्थिते सत्यनुमानादिव्यवहारो निर्वहति, प्रातिभासिकविभागेन तद्योगात् , परमार्थस्यैव तद्धेतुत्वे [३]केवलव्यतिरेकाभावादित्यर्थः। कुतः सदसद्विभागस्य बुद्धिद्वयाधीनत्वम् , बुद्धिविभागस्यापि [४]तवाभावात्? तत्राह—** सर्वत्रेति। **व्यवहारभूमिः सप्तम्यर्थः। बुद्धिविभागस्यापि कल्पितस्यैव बोध्यविभागप्रतिभासहेतुतेति भावः। बुद्धिद्वयमनुरुध्य सदसद्विभागे, सतः सामान्यरूपतया विशेषाकाङ्क्षायां सामान्यविशेषौ द्वे वस्तुनी वस्तुभूते स्यातामिति चेत्? तत्राह—** समानाधिकरणे इति। **पदयोः सामानाधिकरण्यं बुद्ध्योरुपचर्यते। 'सोऽयम्' इति सामानाधिकरण्यवद् 'घटः सन्' इत्यादि सामानाधिकरण्यम् एकवस्तुनिष्ठम् , वस्तुभेदे घटपटयोरिव तदयोगादित्यर्थः। नीलमुत्पलमितिवद् धर्मधर्मिविषयतया सामानाधिकरण्यस्य सुवचत्वान्न वस्त्वैक्यविषयत्वमिति चेत्? नेत्याह—** न नीलेति। **न हि सामान्यविशेषयोर्भेदेऽभेदे च [५]तद्भावः। भेदाभेदौ च [६]विरुद्धौ। अतो जातिव्यक्त्योः सामानाधिकरण्यं**

भाष्यार्कप्रकाशः

इत्यनन्तरं सतीति पूरणीयम्। 'नीलोत्पलवत् सामानाधिकरण्येन 'सन् घटः' 'सन् पटः' 'सन् हस्ती'त्येवं सर्वत्र द्वे बुद्धी सर्वैरुपलभ्येते' इत्यन्वयः। **सामानाधिकरण्येन** समानाश्रयवृत्तित्वेन, अभेदसंबन्धेनेति यावत्। यथा नीलत्वोत्पलत्वयोः सामानाधि-करण्याद् नीलाभिन्नमुत्पलमिति शाब्दबोधः, एवं 'सन् घटः' इत्यादौ सत्त्वघटत्वयोः सामानाधिकरण्यात् सदभिन्नो घट इति बोधः। एवं नीलोत्पलयोरिव सद्घटयोः सामानाधिकरण्ये सति तद्बुद्ध्योरपि सामानाधिकरण्यं सम्भवति, एकस्मिन्नेव नीलोत्पलपदार्थे नीलबुद्धेरुत्पलबुद्धेश्च जातत्वात्। एकस्मिन्नेव विद्यमानघटे सद्बुद्धेर्घटबुद्धेश्च जातत्वात्।

ननु भवतु बुद्धिद्वयम् , किं तेनेत्यत आह— **तयोरिति।** सद्बुद्धिघटबुद्ध्योरित्यर्थः। **घटादीति।** आदिपदात् पटहस्तिग्रहणम्। सद्बुद्धिघटबुद्ध्योः घटबुद्धिर्व्यभिचरति, सद्बुद्धिपटबुद्ध्योः पटबुद्धिर्व्यभिचरति, सद्बुद्धिहस्तिबुद्ध्योस्तु हस्तिबुद्धिर्व्यभिचरतीत्यर्थः। कथं

---

१. 'सामानाधिकरण्येन' इति रा.पा.। २. सामानाधिकरण्यस्येति अनुषङ्गः। ३. इतरसामग्र्यां सत्यां परमार्थविभागाभावमात्रेण कार्यानुदयस्यादर्शनादित्यर्थः। ४. 'तत्राभावात्' इति पा.। ५. सामानाधिकरण्यमित्यर्थः। अभेदे स्वं प्रति स्वस्य, भिन्नयोश्च घटपटयोः तददर्शनात्। ६. समानसत्ताकौ इति शेषः।

**व्यभिचरति; तथा च दर्शितम् ; न तु सद्बुद्धिः। तस्माद् घटादिबुद्धिविषयोऽसन् , व्यभिचारात् , न तु सद्बुद्धिविषयो ऽव्यभिचारात्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

'सन् घटः' 'सन् पटः' 'सन् हस्ती'त्येवं सर्वं यत् सामानाधिकरण्यं दृश्यते, तन्न नीलोत्पलवद् भवितुमर्हति। घटादेः पृथक् सत्त्वे प्रमाणाभावात्। तथा हि— न तावत् 'सन् घट'(त) इति प्रत्ययः [1]प्रमाणम् , तस्यानुवृत्तगोचरत्वात्। नाप्यनुगत्यनुपपत्तिः, आपरोक्ष्यानुपपत्तिर्वा[2]। शुक्तीदमंशसंसृष्टरूप[रूप्य]स्य सत्त्वाभावेऽपि सत्त्वानुगत्यपरोक्षत्वयोर्दर्शनात्। अर्थक्रियायाश्च स्वप्नकामिन्यादेरिव तुच्छव्यावृत्तिमात्रेण संभवात् न स्वरूपसत्त्वसाधकत्वम्। तस्माद् धर्मधर्मिभाव[वा]योगात् परिशेषत्वा[षा]द् - [3]घटादयः स्वानुगते कल्पिताः, व्यावृत्तत्वाद् , रज्जुसर्पवदिति सिद्धम्। ननु द्वयोरपि बुद्ध्योः प्रत्यक्षत्वाविशेषे केन विशेषेण व्यावृत्तिबुद्धिविषयस्य मिथ्यात्वमित्याशङ्क्याह— **तयोर्बुद्ध्योरिति।**

आनन्दगिरिकृतव्याख्या

**नीलोत्पलयोरिव न गौणम् , किन्तु व्यावृत्तमनुवृत्ते कल्पितमित्येकनिष्ठमित्यर्थः। सामान्यविशेषयोरुक्तन्यायं गुणगुण्यादावतिदिशति—** एवमिति। **तुल्यौ हि तत्रापि विकल्पदोषाविति भावः। सामानाधिकरण्यानुपपत्त्या द्वे वस्तुनी सामान्यविशेषाविति पक्षं प्रतिक्षिप्य, विशेषा एव वस्तूनीति पक्षं प्रतिक्षिपति—** तयोरिति। **बुद्धिव्यभिचाराद् बोध्यव्यभिचारेऽपि कथं व्यावृत्तानां विशेषाणामवस्तुत्वमित्याशङ्क्याह—** तथा चेति। **'विकारो हि सः' इत्यादाविति शेषः। न चैकं वस्तु सामान्यविशेषात्मकम् , एकस्य द्वैरूप्यविरोधादित्यभिप्रेत्य सामान्यमेकमेव वस्तु , तद्बुद्धेरव्यभिचारात् , बोध्यस्यापि सतस्तथात्वादित्याह—** न त्विति। **व्यभिचरतीति पूर्वेण सम्बन्धः। विशेषाणां व्यभिचारित्वे सतश्चाव्यभिचारित्वे फलितमुपसंहरति—**तस्मादिति। असत्त्वं **कल्पितत्वम्। तच्छब्दार्थमेव स्फोरयति—**व्यभिचारादिति। **सद्बुद्धिविषयस्य सतोऽकल्पितत्वे तच्छब्दोपात्तमेव हेतुमाह—** अव्यभिचारादिति।

भाष्यार्कप्रकाशः

व्यभिचरतीत्यत्राह— **तथा च दर्शितमिति।** यथा व्यभिचरति तथा दर्शितमेवेत्यर्थः। घटादिविकारजातस्य व्यभिचारप्रदर्शनद्वारेति भावः। स्वविषये घटादिविकारे व्यभिचरति सति, स्वयं बुद्धिरपि व्यभिचरतीति तत्त्वम्। घटस्य कालत्रयेऽसत्त्वे तद्विषयबुद्धेरपि कालत्रयेऽप्यसत्त्वादस्ति व्यभिचार इत्याशयः।

**यद्वा** - घटः स्वोत्पत्तेः प्राक् मृद्रूपत्वान्मृद्बुद्धिविषयः, ध्वंसानन्तरं चूर्णबुद्धिविषयः, स्वकाले घटबुद्धिविषयः। अतः कालत्रयेऽप्यनियतरूपत्वेन अनियतबुद्धिविषयत्वाद् व्यभिचारित्वं घटस्य। तद्बुद्धेश्चानियतविषयत्वेनानियतरूपत्वाद् व्यभिचारित्वमिति। यत् सदाऽप्येकरूपं तदव्यभिचारि, यत्त्वनियतरूपं तद् व्यभिचारीति सिद्धान्तात्। **न त्विति।** सद्बुद्धिस्तु न व्यभिचरतीत्यर्थः। फलितमाह— **तस्मादिति।** सद्बुद्धेरव्यभिचारित्वाद् घटादिबुद्धेश्च व्यभिचारित्वादित्यर्थः। **घटादिबुद्धिविषय इति।** घटादिवस्त्वित्यर्थः। असद् भवतीति शेषः। हेतुमाह— **व्यभिचारादिति।** व्यभिचारश्च दर्शितः— 'विकारश्च व्यभिचरती'त्यादिनेति बोध्यम्। **न त्विति।** सद्बुद्धेः **विषयः** गोचरः वस्तु तु नासत् , अव्यभिचारात् कालत्रयेऽप्येकरूपेण वर्तमानत्वादित्यर्थः। किन्तु सदेवेत्यर्थः। **एतेन** असद्बुद्धिविषयस्य घटादिकार्यजातस्य मृदादिकारणजातस्य चासत्त्वेऽपि, सद्बुद्धिविषयस्य परमकारणस्य ब्रह्मणः सत्त्वान्न शून्यवादप्रसङ्ग इति **सिद्धम्।**

**अत्रेदमवधेयम्—** कारणधर्मः कार्येऽन्वेति, यथा मृद्धर्मः काठिन्यनैल्यादिकं घटे। एवम् 'आत्मन आकाशः सम्भूतः' इति सर्वजगत्कारणस्यात्मनः सच्चिदानन्दरूपस्य धर्माः सत्ताचैतन्यानन्दाः कार्ये जगत्यनुगताः। अत एव - घटोऽस्ति , घटो भाति , घटः प्रिय इत्यादिर्व्यवहारः। एतद्व्यवहारबलाद् घटादिकार्यजाते [4]श्रूयमाणाः सत्ताभानानन्दाः खल्वात्मधर्माः कार्यत्वादात्माभिन्ने कार्यजाते

१. घटादेः सत्त्वे इति शेषः। २. घटादेः सत्त्वे प्रमाणमिति शेषः। ३. अस्यानुमानस्य विवेचनमद्वैतसिद्धौ (पृ. ३१७) द्र.। ४. ज्ञायमाना इत्यर्थः।

**[१]घटे विनष्टे घटबुद्धौ व्यभिचरन्त्यां सद्बुद्धिरपि व्यभिचरतीति चेत्? न ; पटादावपि सद्बुद्धिदर्शनात्। विशेषणविषयैव सा सद्बुद्धिः। [२]सद्बुद्धिवद् घटबुद्धिरपि घटान्तरे दृश्यत इति चेत् ? न; पटादावदर्शनात्। [३]सद्बुद्धिरपि नष्टे घटे**

अनुभूतिस्वरूपाचार्यटिप्पणम्

व्यभिचारित्वाव्यभिचारित्वलक्षणस्य विशेषहेतोरसिद्धिं शङ्कते— **घटे विनष्ट इति।** यद्[यदि] घटविषया सद्बुद्धिः स्यात् , तदा घटनाशे व्यभिचरेत् , किन्तु सा अनुगतविशेषणविषयैवेति परिहारार्थः। अतिप्रसङ्गं शङ्कते— **सद्बुद्धिवदिति।** निरङ्कुशमव्यभिचारित्वं मया हेतुत्वेनोपात्तं न घटादेरस्तीत्याह— **न ; पटादावदर्शनादिति।** तर्हि निरङ्कुशमव्यभिचारित्वं सतोऽपि नास्ति, अभावदेशे व्यभिचारादित्याह— **सद्बुद्धिरपीति।** यथा खण्डादिगवादिव्यक्तिनाशे गोत्वं व्यञ्जकाभावाद् न

आनन्दगिरिकृतव्याख्या

**सद्बुद्धिव्यभिचारद्वारा [४]बोध्यस्यापि व्यभिचारात् तदव्यभिचारित्वहेतोरसिद्धिरिति शङ्कते—** घटे विनष्ट इति। **सद्बुद्धेर्घटबुद्धिवद् [५]घटविषयत्वाभावाद् न घटनाशे व्यभिचारोऽस्तीति परिहरति—** न ; पटादाविति। **सद्बुद्धेरघटविषयत्वे निरालम्बनत्वायोगाद् विषयान्तरं वक्तव्यमित्याशङ्क्याह—** विशेषणेति। **सतोऽकल्पितत्वहेतोरव्यभिचारित्वस्यासिद्धिमुद्धृत्य, विशेषाणां कल्पितत्वहेतोर्व्यभिचारित्वस्यासिद्धिं शङ्कते—** सदिति। **यथा सद्बुद्धिः घटे नष्टे पटादौ दृष्टत्वादव्यभिचारिणीत्यव्यभिचारः सतो दर्शितः, तथा घटबुद्धिरपि घटे नष्टे घटान्तरे दृष्टेत्यव्यभिचाराद् घटे व्यभिचारासिद्धौ विशेषान्तरेष्वपि कल्पितत्वहेतोर्व्यभिचारो न सिध्यतीत्यर्थः। घटबुद्धेर्घटान्तरे दृष्टत्वेऽपि पटादावदृष्टत्वेन व्यभिचारात् [६]घटादिविशेषेष्वपि व्यभिचारित्वसिद्धिरित्युत्तरमाह—**न; पटादाविति। **विशेषाणामेवं व्यभिचारित्वे सतोऽपि**

भाष्यार्कप्रकाशः

वर्तमाना इव प्रतिभान्ति। न तु वस्तुतस्तत्र सन्ति। मृद्धर्माः काठिन्यादयोऽपि हि घटाकारपरिणतमृद्येव वर्तन्ते, न तु कम्बुग्रीवत्वाद्याकारे। तद्वद् घटादौ प्रतीयमानाः सत्ताचैतन्यानन्दाः घटाद्यवच्छिन्नचैतन्यात्मनिष्ठा एव। ततश्च घटःसन्निति घटे श्रूयमाणा सत्ता आत्मसत्तैव, न तु घटसत्ता। तस्याश्च सत्ताया घटस्य पृथक्करणे असन्नेव घटोऽवशिष्यते। एवं सर्वमपि जगत् कारणचैतन्यसत्तयैव सदित्युच्यते, अन्यथा तु जगदसदेवेति। किञ्च 'मृद्घटः' इतिवत् 'सन् घटः' इत्यपि प्रयोगः कार्यकारणाभेदनिबन्धन एवेति कृत्वा तत्र सच्छब्दः घटभिन्नमात्मानमेव बोधयति; यथा मृद्घट इत्यत्र मृच्छब्दो घटभिन्नां मृदम्। अतत्त्वदर्शिनस्त्वत्र भ्रान्ता घटमेव सन्तं मन्यन्त इति।

अथासद्बुद्धेरिव सद्बुद्धेरपि व्यभिचारमाशङ्कते— **नन्वित्यादिना।** घटे विद्यमाने 'सन् , घटः' इति बुद्धिद्वयमासीत् , घटे नष्टे तु घटबुद्धिरिव सद्बुद्धिरपि नष्टैव। न हि घटनाशानन्तरं सन्निति बुद्धिर्भवेदित्यर्थः। परिहरति— **नेति।** पटादावपि सद्बुद्धिदर्शनान्न सद्बुद्धिः व्यभिचरतीत्यन्वयः। यदि घटनाशादेव घटबुद्धिनाशवत् तत्समानाधिकरणसद्बुद्धिनाशः स्यात् , तर्हि 'पटःसन्' इति पटबुद्धिसामानाधिकरण्येन सद्बुद्धिर्न स्यादिति भावः। पटादावित्यस्य पटादिबुद्धिसामानाधिकरण्येनेत्यर्थो वाच्यः। यथाश्रुतार्थे तु सद्बुद्धिविषयत्वं पटादेरापतति, तच्चानिष्टम्। सद्बुद्धेर्घटनाशादनाशे हेत्वन्तरमाह— **विशेषणविषयैव सा सद्बुद्धिरिति।** विशेषणं विषयो यस्याः सा विशेषणविषया। 'सन् घटः' इत्यादौ हि सन्निति विशेषणम् , घटादयस्तु विशेष्याणीति कृत्वा सद्बुद्धेर्विशेषणविषयत्वम्। नीलोत्पलं, नीलाम्बरं, नीलागः इत्यादौ विशेष्यभूतोत्पलादिबुद्धेर्व्यभिचारेऽपि यथा विशेषणभूतनीलबुद्धेरव्यभिचारः, तद्वदिति भावः। ननु 'सन् घटः' इति सद्बुद्धिर्घटनाशानन्तरं 'सन्पटः' इत्यत्र यथा दृश्यते, तथा घटबुद्धिरपि घटान्तरे दृश्यत इति कथं घटबुद्धेर्व्यभिचार इति शङ्कते— **सद्बुद्धिवदिति।** परिहरति— **नेति**। पटादौ घटबुद्धेरदर्शनान्न घटबुद्धेरव्यभिचार इत्यर्थः। पटादिबुद्धिसामानाधिकरण्येन घटबुद्धिर्न दृश्यते, सद्बुद्धिस्तु दृश्यत इति न सद्बुद्धिसाम्यं घटबुद्धेरिति भावः। ननु 'सन् नष्टघटः' इति सद्बुद्धिनष्टघटबुद्धिसामानाधिकरण्याभावाद् नष्टघटादिसमानाधिकरणसद्बुद्ध्यभावेन सद्बुद्धेरपि व्यभिचार इति शङ्कते— **नन्विति**। परिहरति— **नेति**।

---

१. 'ननु घटे' इति रा.पा.। २. 'अतोऽपि न विनश्यति। अथ सद्बुद्धिवद्' इति पाठः क्वचिद् दृश्यते। ३. 'ननु सद्बुद्धिरपि' इति रा.पा.। ४. सद्बुद्धिविषयस्य सतः इत्यर्थः। ५. 'घटमात्र' इति पा.। ६. 'पटादिविशेषेष्वपि' इति पा.।

**न दृश्यत इति चेत् ? न ; विशेष्याभावात्। सद्बुद्धिर्विशेषणविषया सती विशेष्याभावे विशेषणानुपपत्तौ किंविषया स्यात् ? न तु पुनः सद्बुद्धेर्विषयाभावात्।**

**एकाधिकरणत्वं घटादिविशेष्याभावे न युक्तमिति चेत्? न ; [१]'सदिदमुदकम्' इति मरीच्यादावन्यतराभावेऽपि**

अनुभूतिस्वरूपाचार्यटिप्पणम्

भाति, न तु गोत्वस्यैव विनाशात् , तथा घटादिनाशेऽपि सत्त्वं तदुपरक्तरूपेण न भातीत्येतावन्मात्रम् , न तु नास्त्येव, अभावाधिष्ठानतया भानादित्यभिप्रेत्याह— **न ; विशेष्याभावादिति।** विशेषणत्वं नाम [२]सप्रतियोगिकं रूपम् , तद् यद्यपि व्यभिचरति, तथापि स्वरूपव्यभिचाराभावात् सिद्धं सतः स्वतःसिद्धत्वम्।

ननु नीलोत्पलादौ सतोरेव विशेषणविशेष्यभावदर्शनात् 'सन् घट' इत्यादावपि विशेषणविशेष्यभावे द्वयोरपि सत्त्वं वक्तव्यम्। ततः पूर्वोक्तमनुमानं बाधितविषयमित्याह— **एकाधिकरणत्वमिति।** व्यभिचाराभिधानेन परिहरति— **न ; इदमुद-**

आनन्दगिरिकृतव्याख्या

**तदुपपत्तेरव्यभिचारित्वहेत्वसिद्धितादवस्थ्यमिति शङ्कते—** सद्बुद्धिरिति। **घटादिनाशदेशे तदुपरक्ताकारेण सत्त्वाभानेऽपि नासत्त्वम् , घटाद्यभावाधिष्ठानतया भानादित्याह—** न ; विशेष्येति। [३]**यथा सर्वगता जातिरित्यत्र खण्डमुण्डादिव्यक्त्यभावदेशे गोत्वं व्यञ्जकाभावान्न व्यज्यते, न गोत्वाभावात् , तथा सत्त्वमपि घटादिनाशे व्यञ्जकाभावान्न भाति, न स्वरूपाभावादित्युक्तमेव प्रपञ्चयति—** सदित्यादिना। **सप्रतियोगिकविशेषणव्यभिचारेऽपि स्वरूपाव्यभिचाराद् युक्तं सतः सत्यत्वमिति भावः।**

**द्वयोः सतोरेव विशेषणविशेष्यत्वदर्शनाद् घटसतोरपि विशेषणविशेष्यत्वे द्वयोः सत्त्वध्रौव्याद् घटादिकल्पितत्वानुमानं सामानाधिकरण्यधीबाधितमिति चोदयति—** एकेति। **अनुभवमनुसृत्य बाधितविषयत्वमुक्तानुमानस्य निरस्यति—** नेत्यादिना। **घटादेः**

भाष्यार्कप्रकाशः

हेतुमाह— **विशेष्येति**। विशेष्यस्याभावे विशेषणस्यानुपपत्तौ सत्यां सद्बुद्धिः किंविषया स्यात्? **विशेष्यस्य** घटस्य **अभावात्** नाशात् , **विशेषणस्य** सतः अनुपपत्तौ, नष्टघटे सत्त्वस्यासम्भवादित्यर्थः। विशेषणविषयायाः सद्बुद्धेर्विशेषणानुपपत्तौ सत्यां निर्विषयत्वं जातमिति यावत्। सद्बुद्धेर्विशेषणमात्रविषयत्वाद् विशेषणानुपपत्त्या निर्विषयत्वमिति फलितार्थः। सतो नष्टघटविशेषणत्वानुपपत्त्यैव नष्टघटबुद्धिसमानाधिकरणसद्बुद्ध्यभाव इति निष्कर्षः। एवकारार्थमाह— **न त्विति।** सद्बुद्धेर्विषयस्तु सद्वस्तु ब्रह्मैव। कथं तस्याभावः शक्यते कल्पयितुम्? न कथमपीत्यर्थः। न च सद्वस्तुनः स्वतन्त्रस्य कथं घटादिविशेषणत्वमिति वाच्यम् ; अज्ञानकृताल्लोक-व्यवहारादेव, न तु वस्तुत इति।

ननु 'नासतो विद्यते भावः' इत्यसतो घटादेर्भावाभावाद् असता घटादिना सतो ब्रह्मणः सामानाधिकरण्यं नोपपद्यते 'सन् घटः' 'सन् पटः' इत्यादीत्याक्षिपति— **एकाधिकरणत्वमिति।** घटादेर्विशेष्यस्याभावे विशेषणविशेष्ययोः सद्घटयोः सामानाधिकरण्यं न युक्तमित्यर्थः। **मरीच्यादा**वित्यादिपदाच्छुक्तिरज्ज्वादिग्रहणम्। **अन्यतराभावेऽपीति। अन्यतरस्यो**दकरजतसर्पादेरभावेऽपीत्यर्थः। मरी-च्यादावन्यतराभावेऽपि 'इदमुदकम्' इति सामानाधिकरण्यदर्शनादित्यन्वयः। अयमाशयः—'मरीचिका उदकं' 'शुक्ती रजतं' 'रज्जुः सर्पः' इत्येवं प्रतीतिः क्वापि नास्ति, अधिष्ठानविशेषज्ञानेनारोप्यविशेषज्ञानस्य बाधात्। किन्तु 'इदमुदकम्' 'इदं रजतम्' 'अयं सर्पः' इति प्रतीतिरस्ति, अधिष्ठानसामान्यज्ञानस्यारोप्यविशेषज्ञानबाधकत्वाभावात्। तत्र च यदधिष्ठानमिदमंशः तदेवास्ति, यत्त्वारोप्य-मुदकादि तन्नास्त्येव। सर्पादिप्रतीतेः प्राक्, सर्पादिबाधानन्तरं च रज्ज्वादेरेव सत्त्वात् , सर्पादिप्रतीतिकालेऽपि वस्तुतो रज्ज्वादेरेव सत्त्वात् , कालत्रयेऽपि सर्पादेरसत्त्वाद् व्यभिचारः, रज्ज्वादेः सत्त्वादव्यभिचारः। एवं व्यभिचारिणाऽपि सर्पादिना अव्यभिचारिणि इदमंशस्याधिष्ठानसामान्यस्य सामानाधिकरण्यमस्त्येव 'अयं सर्पः' इत्यादिप्रतीतेः। तद्वत् 'ब्रह्म घटः, ब्रह्म पटः, ब्रह्म हस्ती' इत्येवं

१. 'इदमुदकमिति' इति पा.। २. निरूपकत्वेन विशेष्यसापेक्षमित्यर्थः। ३. सर्वसर्वगता जातिः, व्यक्तिसर्वगता जातिः इति पक्षद्वयम्। आद्यपक्षेऽयं दृष्टान्तः। तत्र हि गोत्वं सर्वत्र विद्यमानमपि गोव्यक्तावेव व्यज्यते।

**सामानाधिकरण्यदर्शनात्। तस्माद् देहादेर्द्वन्द्वस्य च सकारणस्यासतो न विद्यते भावः इति।**

**तथा** सतश्चात्मनः अभावः **अविद्यमानता न विद्यते, सर्वत्राव्यभिचारादित्यवोचाम। एवम् आत्मानात्मनोः सदसतोः** उभयोरपि दृष्टः **उपलब्धः**[1] अन्तो **निर्णयः 'सत् सदेव, असदसदेव' इति** त्वनयोः **यथोक्तयोः** तत्त्व-

अनुभूतिस्वरूपाचार्यटिप्पणम्

**कमिति।** यस्माद् घटस्य सति (वि)कल्पितत्वानुमानं निर्दुष्टं **तस्मादि**त्युपसंहारः॥१६-१७॥

आनन्दगिरिकृतव्याख्या

**सति कल्पितत्वानुमानस्य दोषराहित्ये फलितमुपसंहरति—** तस्मादिति। **प्रथमपादव्याख्यानपरिसमाप्तौ** इति**शब्दः।**

**ननु नेदं व्याख्यानं भाष्यकाराभिप्रेतम्, सर्वद्वैतशून्यत्वविवक्षायां शास्त्रतद्भाष्यविरोधात्। केनापि पुनर्दुर्विदग्धेन स्वमनीषिकया उत्प्रेक्षितमेतदिति चेत्? मैवम्; किमिदं द्वैतप्रपञ्चस्य शून्यत्वम्? किं तुच्छत्वं, किं वा सद्विलक्षणत्वम्? नाद्यः, अनभ्युपगमात्। द्वितीयानभ्युपगमे तु तवैव शास्त्रविरोधो, भाष्यविरोधश्च। सर्वं हि शास्त्रं तद्भाष्यं च द्वैतस्य सत्यत्वानधिकरणत्वसाधनेन अद्वैतसत्यत्वे पर्यवसितमिति त्रैविद्यवृद्धैस्तत्र तत्र प्रतिष्ठापितम्। तथा च प्रक्षेपाशङ्का सम्प्रदायपरिचयाभावादिति द्रष्टव्यम्।**

**अनात्मजातस्य कल्पितत्वेनावस्तुत्वप्रतिपादनपरतया प्रथमपादं व्याख्याय, द्वितीयपादमात्मनः सर्वकल्पनाधिष्ठानस्याकल्पितत्वेन वस्तुत्वप्रसाधनपरतया व्याकरोति—** तथेति। **नन्वात्मनः सदात्मनो विशेषेषु विनाशिषु तदुपरक्तस्य विनाशः स्यादित्याशङ्क्य विशिष्टनाशेऽपि स्वरूपानाशस्योक्तत्वान्नैवमित्याह—** सर्वत्रेति। **ननु कदाचिदसदेव पुनः सत्त्वमापद्यते, प्रागसतो घटस्य जन्मना सत्त्वाभ्युपगमात्। सच्च कदाचिदसत्त्वं प्रतिपद्यते, स्थितिकाले सतो घटस्य पुनर्नाशेनासत्त्वाङ्गीकारात्। एवं सदसतोरव्यवस्थितत्वाविशेषादुभयोरपि हेयत्वमुपादेयत्वं वा तुल्यं स्यादिति, तत्राह—** एवमिति। तु**शब्दो दृष्टशब्देन सम्बध्यमानो दृष्टिमवधारयति। न हि प्रागसतो घटस्य सत्त्वम्, असत्त्वे स्थिते सत्त्वप्राप्तिविरोधात्। असत्त्वनिवृत्तिश्च सत्त्वप्राप्त्या चेत्, प्राप्तमितरेतराश्रयत्वम्। अन्तरेणैव सत्त्वापत्तिमसत्त्वनिवृत्तावसत्त्वमनवकाशि भवेत्। एतेन सतोऽसत्त्वापत्तिरपि प्रतिनीतेति भावः। कथं तर्हि सतोऽसत्त्वम्, असतश्च सत्त्वं प्रतिभाति? इत्याशङ्क्य तत्त्वदर्शनाभावादित्याह—** तत्त्वेति। **तस्य भावस्तत्त्वम्। न च तच्छब्देन परामर्शयोग्यं किञ्चिदस्ति प्रकृतं**

भाष्यार्कप्रकाशः

क्वापि प्रतीतिर्नास्ति। किन्तु 'सन् घटः, सन् पटः, सन् हस्ती' इत्येवमेव प्रतीतिः सर्वत्र। तत्र यद्विशेषणं सदंशस्तदेवास्ति, यत्तु विशेष्यं घटाद्यंशस्तन्नास्त्येव। विशेषणभूते [2]सति अधिष्ठाने विशेष्यस्य घटादेः कल्पितत्वात्। अयं च सद्रूपो विशेषणांशो न घटादिविशेष्यांशबाधक इत्यस्त्युभयोः सामानाधिकरण्यमिति। श्लोकस्य प्रथमपादार्थमुपसंहरति— **तस्मादिति।** शीतोष्णादेः सकारणस्य विकारस्य असद्बुद्धिविषयत्वेन व्यभिचारादित्यर्थः। 'असतः सकारणस्य देहादेर्द्वन्द्वस्य च भावो न विद्यते' इत्यन्वयः। देहादेरित्यत्रादिपदादिन्द्रियमनआदिग्रहणम्। **द्वन्द्वस्य** शीतोष्णसुखदुःखादिरूपस्येत्यर्थः। यथा घटादिरुत्पत्तेः प्राग् ध्वंसात् पश्चाच्चासन्, मध्येऽपि कारणभूतमृदादिव्यतिरेकेणासन्, तथा देहादिरपि जन्मनः प्राग् मरणादूर्ध्वं चासन्, मध्येऽपि कारणभूतपृथिव्यादिभूतव्यतिरेकेणासन् इति देहादेर्व्यभिचारो बोध्यः।

श्लोकस्य द्वितीयपादस्यार्थमाह— **तथेत्यादिना। तथा**शब्दः पूर्ववाक्यार्थसमाप्तिद्योतकः। यथा असतो भावो नास्ति, तथेति दृष्टान्तार्थो वा। सत्पदार्थमाह— **आत्मन इति।** सच्चिदानन्दरूपत्वादात्मन इति भावः। **सर्वत्राव्यभिचारादिति।** सर्वेषु कालेषु सर्वेषु देशेषु सर्वेषु वस्तुषु च सत्त्वादित्यर्थः। **अवोचामेति।** पूर्वमेवोक्तमस्माभिरित्यर्थः। 'यद्विषया बुद्धिर्न व्यभिचरति तत् सद्' इति वाक्येनेति भावः। श्लोकस्य तृतीयचतुर्थपादयोरर्थमाह— **एवमित्यादिना।** 'एवमनयोरुभयोः सदसतोरात्मानात्मनोरपि **अन्तो** निर्णयः तत्त्वदर्शिभिः **दृष्टः** उपलब्धः, ज्ञात इति यावत्' इत्यन्वयः। निर्णयस्याकारमाह— **सत् सदेव, असदसदेवेति।** सदसतोः सामानाधिकरण्यमज्ञानविलसितमिति भावः। **अनयोः**शब्दार्थमाह— **यथोक्तयोरिति।** अभावराहित्येन भावराहित्येन च श्लोकद्वितीयप्रथम-

१. 'दृष्टः उपलब्धः, ज्ञात इति यावत्, अन्तो निर्णयः' इति भाष्यपाठः रामकविसंमत इति भाति। २. सति = सत्पदार्थे ब्रह्मणि।

## उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥ १६ ॥

दर्शिभिः। **तदिति सर्वनाम, सर्वं च ब्रह्म, तस्य नाम तदिति, तद्भावस्तत्त्वं, ब्रह्मणो याथात्म्यम् , तद् द्रष्टुं शीलं येषां ते तत्त्वदर्शिनः, तैस्तत्त्वदर्शिभिः। त्वमपि तत्त्वदर्शिनां दृष्टिमाश्रित्य शोकं मोहं च हित्वा शीतोष्णादीनि नियतानियतरूपाणि द्वन्द्वानि 'विकारोऽयमसन्नेव मरीचिजलवन्मिथ्याऽवभासते' इति मनसि निश्चित्य तितिक्षस्वेत्यभिप्रायः ॥ १६ ॥**

आनन्दगिरिकृतव्याख्या

**प्रतिनियतमित्याशङ्क्य व्याचष्टे—** तदित्यादिना। **ननु सदसतोरन्यथात्वं केचित् प्रतिपद्यन्ते, केचित्तु तयोरुक्तनिर्णयमनुसृत्य तथात्वमेवाधिगच्छन्ति; तत्र केषां मतमेषितव्यमिति? तत्राह—** त्वमपीति॥ १६ ॥

भाष्यार्कप्रकाशः

पादाभ्यां प्रतिपादितयोरित्यर्थः। **तत्त्वदर्शि**शब्दार्थमाह— **तदित्यादिना।** तच्छब्देन परामर्शयोग्यस्य प्रकृतस्य कस्यचित् प्रतिनियतस्य वस्तुनोऽभावात् तदिति सर्वनामेत्युक्तम्। सर्वनामशब्दार्थमाह— **सर्वं चेत्यादिना।** सर्वस्य नाम सर्वनामेति षष्ठीसमासः। 'सर्वं खल्विदं ब्रह्म' इति श्रुतेः सर्वस्य ब्रह्मकार्यत्वेन कारणभूतब्रह्माभिन्नत्वात् सर्वं ब्रह्मैव। यद्वा सर्वस्य ब्रह्मणि कल्पितत्वेन कल्पितस्याधिष्ठानानतिरिक्तत्वात् सर्वं ब्रह्मैव।

**ननु** यदि तच्छब्दस्य सर्वनामत्वेन ब्रह्मनामत्वं स्यात् , तर्हि उभ-उभय-कतर-कतमादीनामपि सर्वनामत्वेन ब्रह्मनामत्वं स्यात् , न चेष्टापत्तिः, उभादीनां क्वापि ब्रह्मणि प्रयोगाभावात् इति चेत् , **उच्यते** - शृणु; 'सर्वादीनि सर्वनामानि' इति व्याकरणपरिभाषितसर्वनामत्वेन तच्छब्दस्य ब्रह्मवाचित्वमिह नोच्यते , किं त्वविशेषेण सर्ववस्त्वभिधायित्वप्रयुक्तसर्वनामत्वेनेति।[1]

ननु ब्रह्मणो निर्धर्मकत्वात् तद्वाचिनस्तच्छब्दात् कथं भावप्रत्ययोपपत्तिः? अत आह— **याथात्म्यमिति।** ब्रह्मणो याथात्म्यम् इह भावार्थक**त्व**प्रत्ययेनाभिधीयते, न तु ब्रह्मातिरिक्तो धर्म इत्यर्थः। **याथात्म्यं** च याथार्थ्यम्। तच्च ब्रह्मणः सच्चिदानन्दरूपत्वम्। न च निर्धर्मके ब्रह्मणि सच्चिदानन्दरूपत्वरूपधर्मः कथं वर्तेतेति वाच्यम् ; 'आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति तद्धर्माः, अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्ते' इति वचनात् , सत्ता चितिरानन्दश्चेति धर्मत्रयं ब्रह्मणोऽपृथग्भूतमेव पृथगिवावभासते माययेति कृत्वा न दोष इति।

**ननु** सच्चिदानन्दरूपं ब्रह्म, तत्र सत्ताचित्यानन्दाः ब्रह्मणोऽपृथग्भूता भवन्तु नाम, सच्चिदानन्दरूपे सच्चिदानन्दरूपत्वस्य सत्त्वात् कथं निर्धर्मकत्वमिति मया पृच्छ्यत इति चेत् , **मैवम्** ; यथा सत्तादयोऽपृथग्भूताः, तथा सच्चिदानन्दरूपत्वमप्यपृथग्भूतमेव ब्रह्मणः, सत्ताचित्यानन्देभ्यो न हि भिन्नं यत् किमपि सच्चिदानन्दरूपत्वमिति। अस्मिंश्च श्लोके ब्रह्मणः सद्रूपत्वमेव प्रपञ्चितम् , न तु चिद्रूपत्वम् , नाप्यानन्दरूपत्वम्। तद्द्वयमुत्तरत्र प्रपञ्चयिष्यत इति बोध्यम्।

**दृष्टिमिति।** मतमित्यर्थः। ज्ञानमिति यावत्। 'ब्रह्मातिरिक्तं सर्वं जगदसत् , प्रत्यगभिन्नं ब्रह्मैकमेव सदि'त्येवंरूपां दृष्टिमिति भावः।

अत्र श्रीशाङ्करभाष्ये 'सामानाधिकरण्येने'ति स्थले 'समानाधिकरणे न' इति पाठमाश्रित्य 'सन् घटः, सन् पटः, सन् हस्ती'त्येवं सर्वत्र समानाधिकरणे द्वे बुद्धी सर्वैरुपलभ्येते, न नीलोत्पलवदित्यन्वयं प्रकल्प्य, "पदयोः सामानाधिकरण्यं बुद्ध्योरुपचर्यते, सोऽयमिति सामानाधिकरण्यवत्। घटःसन्नित्यादि सामानाधिकरण्यमेकवस्तुनिष्ठम् , वस्तुभेदे घटपटयोरिव तदयोगादित्यर्थः। नीलमुत्पलमितिवद् धर्मधर्मिभावस्य सुवचत्वान्न वस्त्वैक्यविषयत्वमिति चेत्? नेत्याह— न ; नीलोत्पलवदिति। न हि सामान्यविशेषयोर्भेदेऽभेदे च तद्भावः, भेदाभेदौ च विरुद्धौ। अतो जातिव्यक्त्योः सामानाधिकरण्यं नीलोत्पल इव न गौणम् , किन्तु व्यावृत्तमनुवृत्ते

१. तच्छब्दस्य ब्रह्मपरत्वे 'ॐ तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति गीतावचनमप्यनुसंधेयम्।

भाष्यार्कप्रकाशः

कल्पितमित्येकनिष्ठमित्यर्थः। सामान्यविशेषयोरुक्तन्यायं गुणगुण्यादावतिदिशति— एवमिति।"— इति व्याख्यातम् **आनन्दगिरिणा।**

**अत्र विचार्यते**— समानमधिकरणं ययोस्तयोर्भावः सामानाधिकरण्यमिति वस्तुद्वयनिष्ठमेव सर्वत्रापि सामानाधिकरण्यम्। तद्धि पदद्वयस्य विशेषणविशेष्यभावेनाभेदान्वये प्रयोजकम्। यथा- नीलमुत्पलमित्यत्र नीलाभिन्नमुत्पलमिति शाब्दबोधान्नीलत्वोत्पलत्वयोरेकाधिकरणवृत्तित्वेन तत्सामानाधिकरण्यस्य नीलोत्पलपदार्थद्वयनिष्ठत्वम्। पदयोः सामानाधिकरण्यं च पदार्थयोः सामानाधिकरण्याधीनम्। तच्च पदार्थयोः सुतरां भेदे अभेदे वा न सम्भवति। अत एव - 'घटः पटः' इति, 'घटो घटः' इति च प्रयोगाभावः। न चैवं गुणगुणिनोर्नीलोत्पलयोः सुतरां भेदात् कथं नीलोत्पल[मिति] प्रयोग इति वाच्यम् ; तत्र नीलपदस्य नीलगुणवद्द्रव्ये शक्तत्वात् , 'अथ त्रिषु द्रव्ये' [१]इत्यमरशासनात् , लक्षणया वा तद्बोधात्। ततश्च नीलगुणवद्द्रव्याभिन्नमुत्पलमिति शाब्दबोधसिद्धिः। एवं सति पदार्थयोः सामानाधिकरण्यं सर्वत्रापि सामान्यविशेषभावाधीनमेव। तथाहि— नीलमुत्पलमित्यत्र नीलपदं नीलगुणवद्द्रव्यसामान्यवाचि, उत्पलपदं तु द्रव्यविशेषवाचीत्युभयोः सामानाधिकरण्यम्। गौर्मुण्डः इत्यत्र गोपदं गोत्वसामान्यवद्व्यक्तिमात्रवाचि, मुण्डपदं व्यक्तिविशेषवाचि। मृद्घटः इत्यत्र मृत्पदं मृत्सामान्यवाचि, घटपदं कम्बुग्रीवाद्याकारवन्मृद्विशेषवाचि। 'अयं सर्पः' इत्यत्र इदंशब्दः पुरःस्थितवस्तुसामान्यवाची , सर्पशब्दस्तद्विशेषवाची। 'सन् घटः' इत्यत्र सच्छब्दः सत्तावद्वस्तुमात्रवाची , घटशब्दस्तद्विशेषवाची। **यद्वा** मृद्घट इत्यादिषु कार्यकारणभावाधीनं सामानाधिकरण्यम् , अन्यत्र तु सामान्यविशेषभावाधीनमित्यस्तु।

धर्मधर्मिभाव-गुणगुणिभावाद्यधीनं तु नास्ति सामानाधिकरण्यम् , धर्मधर्मिणोर्गुणगुणिनोश्च सुतरां भेदात्। न चैवं कार्यकारणयोः सामान्यविशेषयोर्वा सुतरां भेद एवेति वाच्यम् ; मृदादेः सकाशाद् घटादीनां सुतरां भेदादर्शनात्। नापि सुतरामभेदः, कार्यं कारणमित्यादिभेदव्यवहारलोपप्रसङ्गात्। तस्माद् भेदेनाभेदेन वा दुर्निरूपयोरेव पदार्थयोः सामानाधिकरण्यम्। इदं च 'सन् घट' इत्यत्रेव 'नीलमुत्पलम्' इत्यत्रापि तुल्यमेवेति कथमुच्यते - 'न नीलोत्पलवद्' इति ?

न च 'सोऽयम्' इति सामानाधिकरण्यवत् 'सन् घटः' इति सामानाधिकरण्यं सामान्यविशेषभावाद्यनाक्रान्तमेवेति वाच्यम् ; सोऽयमित्यत्र तदिदमर्थयोः सामानाधिकरण्यासम्भवेनैव भागत्यागलक्षणास्वीकारात्। न हि 'सोऽयं देवदत्तः' इत्यत्र तदभिन्नोऽयं देवदत्त इति वाक्यार्थः , किन्तु देवदत्त इत्येव। 'सन् घट' इत्यत्र नैवं सन्मात्रमित्यर्थः, किन्तु सदभिन्नो घट इत्येव, सत्त्वघटत्वयोः तदिदमर्थयोरिवाविरोधात्। विरोधे सति हि लक्षणाश्रयणम्। 'ब्रह्म घटः' इत्युक्तौ हि विरोधस्फूर्तिः। तस्माद् 'नीलमुत्पलम्' इतिवत् 'सन् घटः' इत्यत्रापि सामानाधिकरण्यम् , न तु 'सोऽयम्' इतिवत् ; 'सोऽयम्' इत्यत्र सामानाधिकरण्यस्यैव बाधितत्वात्[२]।

**ननु** सति अनुवृत्ते घटस्य व्यावृत्तस्य कल्पितत्वेन 'सन् घटः' इत्यत्र अनुवृत्तव्यावृत्तभावाश्रयं सामानाधिकरण्यम्। नीलोत्पलमित्यत्र तु नैवमिति चेत् , **मैवम्** ; न हि कोऽपि सति घटस्य कल्पितत्वमभिप्रेत्य 'सन् घटः' इति प्रयुङ्क्ते, तथात्वे 'चिद्घटः' इत्यपि प्रयुञ्जीत। तात्पर्याधीना हि शब्दप्रवृत्तिः। परं तु विद्यमानतया घटस्य 'घटःसन्' इति सर्वोऽपि प्रत्येति। तच्च विद्यमानत्वं पटादिष्वप्यस्तीत्यनुगतमेव। तथा नीलत्वमपि रत्नादिष्वस्तीत्यनुगतमेव। एवमनुवृत्तव्यावृत्तभावो नीलोत्पलस्थलेऽप्यस्त्येवेति कथमुच्यते 'न नीलोत्पलवद्' इति?

न च - 'गौर्मुण्डः' 'सन् घटः' 'मृद्घटः' इत्यादिषु गोसन्मृदादिरूपमेकमेव वस्त्वस्तीति तत्र सामानाधिकरण्यमेकनिष्ठम् , नैवं नीलोत्पलस्थल इति - वाच्यम् ; नीलोत्पलस्थलेऽपि एकमेव नीलगुणवद्द्रव्यं वर्तत इति सिद्धान्तात्। नापि 'सन् घटः' इत्यत्र सत्यमिथ्यारूपवस्तुद्वयनिष्ठं सामानाधिकरण्यम् , नीलोत्पलमित्यत्र तु मिथ्याभूतवस्तुद्वयनिष्ठमेवेति वाच्यम् ; 'ब्रह्म घटः' इत्यत्र तथात्वेऽपि 'सन् घटः' इत्यत्रातथात्वात्। **किञ्च** यदि - 'सन् घटः' इत्यत्र सच्छब्दः सत्यं ब्रह्म वक्ति, घटशब्दस्तु मिथ्याघटम् - इति

---

१. अत्र 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति' इति अमरशासनमनुसंधेयम्। कोशस्य गुणिनि शक्तिग्राहकत्वे विप्रतिपत्तेराह—लक्षणया वेति। २. वस्तुतस्तु अखण्डार्थसामानाधिकरण्यस्य वेदान्ते सुप्रसिद्धत्वात् चिन्त्यमिदम्। किंच गुणगुणिनोः तादात्म्यस्य सिद्धान्ते स्वीकारात् , तस्यैव च समानाधिकरणप्रतीतिगोचरत्वात् नीलमुत्पलमित्यादिप्रयोगे न लक्षणाऽपि। कल्पितस्य अधिष्ठाने कल्पिततादात्म्यस्वीकारात् सामानाधिकरण्यप्रतीतिः सुलभा।

## अविनाशि तु तद् विद्धि येन सर्वमिदं ततम्।
## विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति॥ १७॥

[१]**किं पुनः तद्** [२]**यत् सदेव सर्वदेति? उच्यते—** अविनाशीति। अविनाशि **न विनंष्टुं शीलमस्येति ; तुशब्दः**

आनन्दगिरिकृतव्याख्या

**ननु सदिति सामान्यं, स्वरूपं वा? प्रथमे तस्य विशेषसापेक्षतया**[३] **प्रलयदशायामशेषविशेषविनाशे विनाशः स्यात्। न चात्मादयो विशेषास्तदाऽपि सन्तीति वाच्यम् ; आत्मातिरिक्तानां विशेषाणां कार्यत्वाङ्गीकारात् प्रलयावस्थायामनवस्थानात् , आत्मनस्तु सामान्यात्मनो धर्मित्वादुक्तदोषात्**[४]**। द्वितीये तु स्वरूपस्य व्यावृत्तत्वे**[५] **कल्पितत्वाद् विनाशित्वम् ; अनुवृत्तत्वे तस्यैव सामान्यतया प्रागुक्तदोषानुषक्तिरिति मन्वानश्चोदयति—** किं पुनरिति। **सामान्यविशेषभावशून्यमखण्डैकरसं 'सदेवे'त्यादिश्रुतिप्रमितं सर्वविक्रियारहितं वस्तु प्रकृतं सद् विवक्षितमित्युत्तरमाह—** उच्यत इति। **आत्मनः सदात्मनो विनाशराहित्यविज्ञाने सर्वजगद्व्यापकत्वं हेतुमाह—** येनेति। **आत्मनो विनाशाभावे युक्तिमाह—** विनाशमिति। **आत्मनो विनाशमिच्छता स्वतो वा परतो वा नाशस्तस्येष्यते? नाद्यः इत्याह—** अविनाशीति। **देहादिद्वैतम्** असदुच्यते, **ततः सतो** विशेषणं **स्वतो नाशराहित्यम् , तस्य द्योतको निपात इत्याह—** तुशब्द

भाष्यार्कप्रकाशः

वेत्ति पुरुषस्तर्हि सत्यमिथ्यावस्तुनोः सामानाधिकरण्यायोगात् 'सन् घटः' इति नैव प्रयुङ्क्ते। न च - 'नीलं नभः' इतिवत् 'सन् घटः' इति प्रयोगोपपत्तिरिति - वाच्यम् ; तस्य भ्रमत्वात्। 'सन् घटः' इत्यस्य यावद्व्यवहारं प्रमात्वाच्च। न हि सर्पे सर्पबुद्धिः, रज्जौ सर्पबुद्धिश्च तुल्येति वक्तुं शक्यते। तस्मात् सामानाधिकरण्येनेति पाठ एव समीचीनः अन्वयक्लेशरहितश्च।

अत्राह **रामानुजः—** 'असतो देहस्य सद्भावो न विद्यते, सतश्चात्मनो नासद्भावः, उभयोर्देहात्मनोरुपलभ्यमानयोर्यथोपलब्धि तत्त्वदर्शिभिरन्तो दृष्टः। निर्णयान्तत्वान्निरूपणस्य निर्णय इह अन्तशब्देनोच्यते। 'देहस्याचिद्वस्तुनोऽसत्त्वमेव स्वरूपम् , आत्मनश्चेतनस्य सत्त्वमेव स्वरूपम्' इति निर्णयो दृष्ट इत्यर्थः। विनाशस्वभावो ह्यसत्त्वम् , अविनाशस्वभावश्च सत्त्वम्' इति।

**अत्र विचार्यते—** सत ईश्वरादुत्पन्नमिदं कार्यं जगत् सदेवेति सत्कार्यवादिनः स्वस्य 'असतो देहस्ये'त्यर्थवर्णनं स्वमतप्रच्युतिरूपदोषावहं, परमतप्रवेशरूपदोषावहं च। असतो देहस्येति देहमात्रग्रहणं चायुक्तम् , शीतोष्णादेरपि तादृशस्य सत्त्वात्। मूले भाव इति श्रूयमाणस्य पदस्य सद्भाव इत्यर्थवर्णनं चायुक्तम् ; तथा अभाव इत्यस्यासद्भाव इति च; योग्यत्वमयोग्यत्वमिति चार्थान्तरप्रतीतेः सद्भावः सत्ता, असद्भावोऽसत्तेत्यर्थग्रहणस्य क्लिष्टत्वात्। सत आत्मनः इत्यप्ययुक्तम् ; स्वमते प्रकृतिपुरुषेश्वराणां त्रयाणां सत्यत्वात् नित्यत्वाच्च। आत्मनां च बहुत्वादेक(त्व)वचनं चायुक्तम्। देहात्मनोरुपलभ्यमानत्वोक्तिश्चायुक्ता; देहस्योपलभ्यमानत्वेऽप्यात्मनः प्रमातुरुपलब्धृत्वेनोपलभ्यमानत्वाभावात्। अन्यथा उपलभ्यमानत्वे देहादिवदात्मनोऽपि जडत्वं स्यादेव। 'तत्त्वदर्शिभि'रित्यस्य यथोपलब्धीति शेषपूरणं चायुक्तम् ; शेषपूरणं विनैवार्थलाभात्। शेषपूरणस्य मूलकारासम्मतत्वात्। देहस्याचिद्वस्तुनः असत्त्वमेव स्वरूपमित्यप्ययुक्तम् , असत्त्वस्य गुणत्वेन स्वरूपत्वाभावात्। असत्त्वमेवेत्येवकारेण स्वरूपान्तरनिषेधश्च सम्भवति, तच्चानिष्टम् ; अचिद्वस्तूनामचित्स्वरूपत्वात्। तथा आत्मनः सत्त्वमेव स्वरूपमित्यप्ययुक्तम् ; ज्ञानैकाकारत्वादात्मनः। विनाशस्वभावो ह्यसत्त्वमित्यप्ययुक्तम् , स्वमते सत्यत्वनित्यत्वयोर्भेदात् , जगदिदं सत्यमनित्यमिति स्वसिद्धान्तात्। अत एवाविनाशस्वभावश्च सत्त्वमित्यप्ययुक्तम्॥ १६॥

अविनाशीति श्लोकमवतारयति— **किं पुनरिति। सर्वदैवेति।** [६]'यद्विषया बुद्धिर्न व्यभिचरति तत् सदि'त्यनेनेति भावः।

---

१. 'किं पुनः तत् सत् , यत् सदेव सर्वदैवास्तीति' इति पा.। २. 'यत् सर्वदैव सत्' इति रा.पा.। ३. निर्विशेषं न सामान्यमिति न्यायात्। ४. **उक्तदोषः** विशेषाभावे सामान्यस्य स्थित्ययोगः। ५. व्यावृत्तत्वेनैव कल्पितत्वानुमानात्। ६. 'किं पुनः तत् सत् , यत् सर्वदैव सदित्युच्यते' इत्यन्तं प्रश्नवाक्यमादाय, कुत्रोच्यत इत्यपेक्षायामुक्तम्—**यद्विषयेति।**

[1]**सतो विशेषणार्थः; तद्** विद्धि **विजानीहि। किम्?** [2]**येन सर्वमिदं जगत्** ततं **व्याप्तं सदाख्येन ब्रह्मणा साकाशम् , आकाशेनेव घटादयः।** विनाशम् **अदर्शनमभावम् ,** अव्ययस्य **न व्येति उपचयापचयौ न यातीत्यव्ययम् , तस्य अव्ययस्य ; नैतत् सदाख्यं ब्रह्म स्वेन रूपेण** व्येति **व्यभिचरति, निरवयवत्वाद् , देहादिवत्। नाप्यात्मीयेन, आत्मीयाभावात्। यथा देवदत्तो धनहान्या व्येति, न त्वेवं ब्रह्म व्येति। अतोऽव्ययस्य** अस्य **ब्रह्मणो विनाशं न कश्चित्**

आनन्दगिरिकृतव्याख्या

इति। **आकाङ्क्षापूर्वकं विशेष्यं दर्शयति—** किमित्यादिना। **विमतमविनाशि, व्यापकत्वादाकाशवत्।** [3]**न हि प्रमितमेवोदाहरणम् , किन्तु प्रसिद्धमपीति भावः। न द्वितीय इत्याह—** विनाशमिति। **न खल्वस्य विनाशं कर्तुं कश्चिदर्हतीति सम्बन्धः। विनाशस्य सावशेषत्व-निरवशेषत्वाभ्यां द्वैराश्यमाश्रित्य व्याकरोति—** अदर्शनमभावमिति। **न कश्चिद् अस्याभावं कर्तुं शक्नोतीत्यत्र हेतुमाह—** अव्ययस्येति। **ब्रह्म हि स्वरूपेण व्येति, स्वसम्बन्धिना वा? इति विकल्प्याद्यं दूषयति—** नैतदिति। **न हि निरवयवस्य स्वावयवापचयरूपव्ययः सम्भवतीत्यत्र वैधर्म्यदृष्टान्तमाह—** देहादिवदिति। **द्वितीयं निरस्यति—** नापीति। **तदेव व्यतिरेकदृष्टान्तेन स्पष्टयति—** यथेति। **द्विविधेऽपि व्ययायोगे फलितमाह—** अत इति। **किञ्च - ब्रह्म परतो न नश्यति, आत्मत्वाद् , घटवदित्याह—** न कश्चिदिति। **आत्मत्व-**

भाष्यार्कप्रकाशः

**शीलमिति**। ताच्छीलिको णिनिरिति भावः। **विशेषणार्थ इति**। भेदार्थ इत्यर्थः। असतो घटादेर्भिन्नः खल्वयं सत्पदार्थः। 'तत् तु अविनाशीति विद्धी'त्यन्वयः। असतो व्यावृत्तं तद् वस्तु अविनाशीत्यर्थः। **विष्ण्वाख्येनेति।** विश्वं वेवेष्टि व्याप्नोतीति विष्णुशब्द-निर्वचनादिति भावः। साकाशमिति जगतो विशेषणम्। ब्रह्मणो जगद्व्याप्तौ दृष्टान्तमाह— **आकाशेनेव घटादय इति।** 'अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः' इति श्रुतेः सर्वव्यापकं नारायणमात्मानं विष्णुं ब्रह्म, अविनाशित्वात् सत्पदार्थं विद्धीति फलितार्थः। यद्वा अविनाशीति सतः पर्यायः। तथा च सर्वव्यापकत्वाद् ब्रह्म **अविनाशि** सदिति विद्धीति। अथवा नात्र हेतुर्निर्दिष्टः, किन्तु यत् सर्वव्यापकं तद् ब्रह्म त्वम् अविनाशीति विद्धि। कुतोऽस्याविनाशित्वम्? अत आह— **विनाशमिति**। तदर्थमाह— **अदर्शनमभावमिति।** [4]यावदिति शेषः। विनाशशब्दस्य निश्चयार्थोऽभावः(?) इत्यर्थः। अव्ययस्यास्येति शब्दद्वयार्थमाह— **नैतदित्यादिना।** न व्येतीत्यव्ययमित्यव्यय-शब्दनिरुक्तिः प्रसिद्धा। 'सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥' इति वचनात्। व्येति विकारं प्राप्नोतीत्यर्थः। एतत् **सदाख्यं** सच्छब्दवाच्यं ब्रह्म स्वेन रूपेण **न व्येति** न विक्रियते। कुतः? निरवयवत्वात्। व्यतिरेकदृष्टान्तमाह— **देहादिवदिति।** यथा देहादिः स्वावयवोपचयापचयाभ्यां स्वरूपविकारं भजते, तथा ब्रह्म न भजते, निरवयवत्वेन स्वरूपविकारा-पादकसामग्र्यभावात्। स्वरूपविकारो नाम रूपभेदः; यथा देहस्य स्थौल्यकार्श्यादिः। नाप्यात्मीयत्वेन ब्रह्म व्येति। कुतः? आत्मीयाभावात्। असङ्गस्यात्मनः कथमन्येन सम्बन्धः? येनान्यदात्मीयं स्यादात्मनः। व्यतिरेकदृष्टान्तमाह— **यथा देवदत्तो धन-हान्येति।** देवदत्तस्य धने ममतासत्त्वात् तद्धनं देवदत्तस्यात्मीयम्। एवमात्मीयस्य धनस्य दैवान्नाशे सति स धनस्वामी देवदत्तः दुःखरूपं विकारमापद्यते इत्यर्थः। दार्ष्टान्तिकं पुनरप्याह दार्ढ्याय— **न त्वेवं ब्रह्म व्येतीति।** ब्रह्मापेक्षया पृथग्वस्तुन एवाभावात् , सत्यपि मायामये वस्तुनि, निष्कामस्य ब्रह्मणस्तत्र ममताऽभावाच्च। न ब्रह्मणः स्वीयं वस्तु किञ्चिदस्ति, यन्नाशेन ब्रह्मणो विकारः स्यात्। अतो निर्विकारं ब्रह्मेत्यर्थः। **अव्ययस्येति।** निर्विकारस्येत्यर्थः। तदेवं ब्रह्मणः अविनाशित्वे निर्विकारत्वं हेतुरित्युक्तं भवति। हेत्वन्तरमाह— **न कश्चिदिति।** ब्रह्मणो विनाशकस्यान्यस्याभावाच्चाविनाशित्वं ब्रह्मण इत्यर्थः। नन्‌ ब्रह्मणोऽन्यदचेतनं ब्रह्म नाशयितुं

१. 'असतः' इति पा.। २. 'येन विष्ण्वाख्येन ब्रह्मणा सर्वमिदं जगत् ततं व्याप्तं साकाशम्' इति रा.पा.। ३. ननु आकाशदृष्टान्तः साध्यविकलः, तस्य श्रुति-सिद्धोत्पत्तिकत्वेन विनाशित्वादित्याशङ्कां लोकप्रसिद्धिमात्रेण दृष्टान्तत्वोपपत्त्या परिहरति— न हीति। ४. विनाशशब्दस्य णश अदर्शने इति धात्वर्थानुसारात् अदर्शनमित्यर्थमुक्त्वा विवक्षितोऽर्थ उक्तः भाष्यकारैः— अभावमिति। तत्र - अभावमिति यावत् इति वक्तव्ये यावच्छब्दो न पठित इत्यतः तत्पूरणमिदम्। एवमग्रेऽपि बोध्यम्।

**कर्तुमर्हति। [1]न कश्चिदात्मानं विनाशयितुं शक्नोतीश्वरोऽपि। आत्मा हि ब्रह्म। स्वात्मनि च क्रियाविरोधात्[2]॥ १७॥**

आनन्दगिरिकृतव्याख्या

**हेतोरसिद्धिमुद्धरति—**आत्मा हीति। **तादात्म्यश्रुतिरत्र** हीति **हेतूक्रियते**[3]। **अस्तु तर्हि स्वयमेव ब्रह्म आत्मनो नाशकम् , उद्बन्धनादि-दर्शनात् , नेत्याह—** स्वात्मनीति॥ १७॥

भाष्यार्कप्रकाशः

नार्हतु नाम , चेतनस्त्वात्मा शक्नोत्येवेत्यत आह— **न हीति।** आत्मन एव ब्रह्मत्वात् , कथं स्वनाशं स्वयं कर्तुं शक्नुयादात्मेत्यर्थः।

**ननु** अग्निजलपतनादिना आत्मनाशोऽपि सुकर एवेति चेत्? **मैवं मंस्थाः**। अग्निजलपतनादिना ह्यात्मा देहमेव नाशयति, न त्वात्मानमिति नास्ति नाश्यनाशकभावयोः सामानाधिकरण्यमिति।

ननु आत्मा ब्रह्म नाशयितुं न शक्नुयन्नाम , ईश्वरः पुनः शक्नुयात् , तस्य सर्वेश्वरत्वादिति शङ्कायामाह— **ईश्वरोऽपीति।** तत्र हेतुमाह— **आत्मेति। हि** यस्माद् ब्रह्म, ईश्वरस्येति शेषः, आत्मा भवति। यद्वा ईश्वरोऽप्यात्मैव, **हि** यस्मादीश्वरो ब्रह्म भवतीत्यन्वयः। तदेवमीश्वर आत्माभिन्नं ब्रह्मैव, आत्मा चेश्वराभिन्नं ब्रह्मैव, ब्रह्म चेश्वराभिन्न आत्मैवेति कृत्वा ईश्वरब्रह्मात्मनां त्रयाणां शब्दानामेव भेदः, अर्थस्तु चैतन्यमेकमेवेति नास्ति ब्रह्मनाशकं वस्त्वन्तरमिति भावः।

यद्वा - असमर्थो ब्रह्म नाशयितुं न शक्नोतु नाम, समर्थस्तु शक्नुयादेवेत्यत्राह— **न हीति। ईश्वरः** समर्थोऽपि कश्चिन्न शक्नोतीत्यन्वयः। तत्र हेतुमाह— **आत्मा हीति। हि** यस्मादात्मा स्वयमेव ब्रह्म भवतीति शेषः। स्वस्यैव ब्रह्मत्वादित्यर्थः। ननु स्वं स्वयमेव हन्यात् , को दोषः? तत्राह—**स्वात्मनीति। स्वात्मनि** स्वस्वरूपे **क्रिया** स्वव्यापारो नास्ति, कुतः? विरोधात्। [4]**यद्वा** स्वात्मनि क्रियायाः **विरोधाद्** असम्भवादित्यर्थः। तत्र दृष्टान्तमाह— **यथेति।** चक्षुष ईक्षणरूपक्रिया चक्षुर्भिन्ने घटादावेव, न तु चक्षुषि, न हि स्वगतनीलारुणश्वेतरेखादींश्चक्षुः पश्यति।

**ननु** स्वात्मनि क्रियाविरोधे 'आत्मा वा अरे द्रष्टव्यः' इति श्रुत्या कथमात्मनि दर्शनं विधीयत इति चेत्? **नैष दोषः**, दर्शनस्य ज्ञानत्वेनाक्रियात्वात्। क्रियात्वेऽपि मानसिकक्रियात्वेन स्वात्मक्रियात्वाभावात्। **ननु** मनः स्वगतान् कामादीन् विकारान् पश्यत्येवेति चेत् , **मैवम्** ; विज्ञानात्मन एव तद्द्रष्टृत्वात्।

निर्विकारत्वान्नाशकान्तराभावाच्च सर्वव्यापकं ब्रह्म चैतन्यमेकमेव अविनाशि सत्पदवाच्यं वस्त्विति विद्धीति श्लोकस्य निष्कृष्टार्थः।

अत्राह **रामानुजः**— 'तद् आत्मतत्त्वमविनाशीति विद्धि येनात्मतत्त्वेन चेतनेन तद्व्यतिरिक्तमिदमचेतनतत्त्वं सर्वं ततं व्याप्तम् , व्यापकत्वेन निरतिशयसूक्ष्मत्वादात्मनो विकारा[विनाशा]नर्हस्य तद्व्यतिरिक्तो न कश्चित् पदार्थो विनाशं कर्तुमर्हति, तद्व्याप्यतया तस्मात् स्थूलत्वात्। अत आत्मतत्त्वमविनाशि' इति। 'आत्मनोऽपि सूक्ष्मतरस्य तन्नाशकस्यान्यस्यादर्शनाद्, ईश्वरस्यापि तन्नाशसङ्कल्पा-भावादिति भावः' इति **वेदान्तदेशिकश्च।**

**तदिह विचार्यते**— तदिति मूले दृश्यमानस्य क्लीबस्य सद्ब्रह्मरूपेऽर्थे स्फुटमवगम्यमाने सति, तं विहाय आत्मतत्त्वरूपार्थ-कल्पनस्याप्रमाणत्वात् , आत्मानमित्यनेनैवाभीष्टे सिद्धे तत्त्वपदवैयर्थ्याच्च। 'इदमचेतनतत्त्वं सर्व'मित्यस्य जीवेश्वरव्यतिरिक्तं सर्वमिति हि तवाभिमतोऽर्थः। कथं तद्व्यापकत्वं सूक्ष्मत्वेन परिच्छिन्नस्य जीवस्य? न हि क्वापि परिच्छिन्नस्य व्याप्तिर्दृष्टा। न हि परिच्छिन्नो घटो व्यापकःसन् दृश्यते। सर्वव्याप्तिर्नाम सर्वत्र सत्त्वं खलु? कथं परिच्छिन्नो जीवः सर्वत्र स्यात्? दृश्यते किं जीवो दारुपाषाणमृदादिष्व-चेतनेषु? यदि दृश्यते, तर्हि दार्वादीन्यपि सचेतनान्येव स्युः, न त्वचेतनानि। बुद्धिपरिच्छिन्नस्य मनोमयकोशादान्तरस्य विज्ञान-मयस्यात्मनो जीवस्य सूक्ष्मतरस्य मनोमयकोशव्याप्तिरस्तु नाम , कथं नाम स्वसर्वदेहव्याप्तिः? यः स्वमेव देहं सर्वं व्याप्तुं नेष्टे, कथ-

---

१. 'न हि कश्चित्' इति रा.पा.। २. एतदनन्तरम् 'यथा चक्षुर्गतरेखादींश्चक्षुर्न पश्यति' इति अधिकः रा. पा.। ३. ततश्च ब्रह्मणः आत्मत्वं ब्रह्मात्माभेदबोधकश्रुति-सिद्धमिति नात्मत्वहेतोरसिद्धिरिति भावः। ४. पूर्वं क्रियामुपेत्य कर्तृकर्मभावविरोधः अभिप्रेतः, इदानीं तु अकर्त्रात्मस्वरूपे क्रियाया असंभवः इति भावः।

भाष्यार्कप्रकाशः

मन्यदेहान् व्याप्नुयात्? सर्वदेहव्यापकत्वे चैकजीववादप्रसङ्गः। आत्मानेकत्वे तु आत्मनः सर्वव्यापकत्वभङ्गप्रसङ्गः। अथ यद्येतद्दोष-परिहारायात्मनां जात्येकत्वमङ्गीकृत्य येनात्मसमुदायेन इदं सर्वमचेतनजातं ततमित्युच्यते, तर्हि सर्वपदविरोधः। न हि सर्वोऽप्यय-मात्मसमुदायः पाषाणादिकमचेतनं व्याप्नुमीष्टे। यदि सर्वपदस्यापि मनुष्यादिदेहजाते सङ्कोचस्तर्हि मूलकाराशयविरोधः स्फुट एव। जात्येकत्वादेकैक आत्मा एकैकं देहं व्याप्य वर्तत इति व्यापकत्वमात्मनो यद्युच्येत, तर्हि तच्च न सम्भवति। एकैकदेहान्तर्वर्तिन आत्मनः पेटिकान्तरस्य वस्त्रस्येव व्यापकत्वायोगात्। यदन्तर्बहिर्वर्तते तद्धि व्यापकम्, यथा आकाशः। धूमाभाववत्ययोगोलके वह्नि-रस्तीति हि वह्नेर्धूमव्यापकत्वमुक्तम्[1]। तथा देहाभाववति गगनादौ चेतनस्याभावात् कथं देहव्यापकत्वं चैतन्यस्य? प्रत्युत देह एव जीवव्यापकः, जीवाभाववति शय्यादौ देहस्य सत्त्वात्। न च यदान्तरं तद् व्यापकमिति वक्तुं शक्यम्, [2]गृहान्तरस्य घटस्यापि व्यापकत्वप्रसङ्गात्। न चाणोरपि जीवस्य धर्मभूतज्ञानेन व्यापकत्वमिति वाच्यम्; धर्मभूतज्ञानस्याप्यचेतने वृत्त्ययोगात्।

सिद्धान्ते तु ज्ञानस्वरूपे जीवे धर्मभूतं ज्ञानं नास्त्येव, ज्ञाने ज्ञानायोगात्। धर्मभूतज्ञानवत्त्वेन जीवस्य ज्ञानित्वमेव स्यान्न तु ज्ञानस्वरूपत्वम्। न्यायमते जीवस्य द्रव्यत्वाद् द्रव्यस्य गुणवत्त्वाद् धर्मभूतज्ञानवत्त्वं जीवस्योपपद्यते। तव मते तु ज्ञानैकाकारस्य जीवस्य कथं धर्मभूतज्ञानवत्त्वम्? न ह्येकमेव ज्ञानमेकस्मिन्नाश्रये स्वरूपभूतं धर्मभूतं च भवितुमर्हति। यदि तु धर्मभूतज्ञानं वृत्तिज्ञान-मित्यभ्युपगम्येत, तर्हि तद् वृत्तिज्ञानमन्तःकरणस्यैव धर्मभूतम्, नात्मन इति विद्धि। तस्मान्न व्यापकत्वं सूक्ष्मस्यात्मन इति कृत्वा 'आत्मतत्त्वेन सर्वमचेतनतत्त्वं ततम्' इत्ययुक्तम्।

**किञ्च** आत्मव्यतिरिक्तत्वमप्यचेतनस्य दुर्वचम्, 'आत्मन आकाशः सम्भूतः' [3]इत्यात्मकार्यस्याचेतनस्यात्माव्यतिरिक्तत्वात्। आत्मनो निरतिशयसूक्ष्मत्वं चायुक्तम्, निरतिशये सूक्ष्मत्वे व्यापकत्वायोगात्। शरीरान्तरपि सर्वव्याप्त्यभावे कृत्स्नदेहव्यापिशैत्यादि-प्रयुक्तसुखाद्युपलब्ध्ययोगात्। त्वगादीन्द्रियैस्तदुपलब्धिरित्यपि न शङ्क्यम्, सूक्ष्मतमस्य तस्य त्वगादिसम्बन्धासम्भवात्। 'अणोरणी-यान् महतो महीयानात्मा गुहायां निहितोऽस्य जन्तो'रिति श्रुत्या आत्मनो महतो महीयस्त्वस्य प्रतिपादितत्वात्। अणोरणीयानित्यस्य तु सूक्ष्मात्सूक्ष्मतरो दुर्विज्ञेय इत्यर्थात्। तथा 'आत्मव्याप्यतया आत्मनः स्थूलाः पदार्था आत्मानं न नाशयन्ती'त्यप्ययुक्तम्, अणो-रात्मनः व्यापकत्वे सिद्धे, तद्व्याप्यत्वमचेतनस्य सिध्येत्, तदेव न सिद्धम्। तथा च दर्शितं प्राक्। 'तुष्यतु दुर्जनः' इति न्यायेन व्यापक-त्वमान्तरत्वमित्यभ्युपगम्य आत्मनो व्यापकत्वे, देहस्य व्याप्यत्वे चाभ्युपगतेऽपि, स्थूलं व्याप्यं वस्तु सूक्ष्मस्यान्तरस्य नाशं कर्तुं नेष्टे इतीष्टं नैव सिध्यति, स्थूलादजगरात् सूक्ष्मस्य छागस्य नाशदर्शनात्, स्थूलदृढमुष्टेस्तदन्तर्गतसूक्ष्मकीटनाशदर्शनात्, स्थूलाद् दह्यमानाद् गृहात् तदन्तर्गतजन्तुनाशदर्शनात्। तथा सूक्ष्मात् मत्कुणात् स्थूलस्य मनुष्यस्य नाशादर्शनात्, सूक्ष्मादुदकात् स्थूलस्याग्नेर्नाशादर्शनाच्च।

अथ ईश्वर आत्मनोऽपि सूक्ष्मतरः इत्युक्तिरयुक्ता, आत्मनोऽपि सूक्ष्मतरत्वे एकस्मिन्नात्मनि स्थितस्येश्वरस्य नान्यस्मिन्ना-त्मनि स्थितिः सम्भवेत्। इष्यते तु त्वया ईश्वरस्य सर्वभूतान्तर्यामित्वं सर्वान्तर्यामित्वरूपम्। यावन्तो देहास्तावन्त आत्मान इतिवद् यावन्त आत्मानस्तावन्त ईश्वरा इति वक्तुं न शक्यते, त्वयाऽपीश्वरैकत्वस्याभ्युपगतत्वात्। तस्माच्चेतनाचेतनसर्वजगदन्तर्बहिर्व्यापके ईश्वरे सूक्ष्मतमत्वं स्वप्नेऽपि सम्भावयितुं न शक्यम्। 'महान्तं विभुमात्मानं मत्वा धीरो न शोचती'त्यादिश्रुतिशतात्। दुर्विज्ञेयत्वलक्षणं सूक्ष्मतमत्वं तु तत्र तत्रोच्यत इति प्रागेवोक्तम्।

यदीश्वराज्जीवो भिन्नः स्यात्, तर्हीश्वराज्जीवस्य सृष्टिस्थितिलयाः स्युरेव, 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुतेः। अभिन्नत्वे तु कथम्? न कथमपि। एवमीश्वराभिन्नत्वादेव जीवस्य जन्मनाशाभावः, न त्वीश्वरस्य सङ्कल्पाभावात्। जीवस्येश्वरभिन्नत्वे तु 'सदेव सोम्येदमग्र आसीत्' 'एकमेवाद्वितीयं ब्रह्म' इत्यद्वितीयं ब्रह्म प्रक्रम्य— 'तदैक्षत, बहु स्यां प्रजायेय' इति तस्य बहुभवन-सङ्कल्पमुक्त्वा 'तत्सृष्ट्वा तदेवानुप्राविशद्' इति 'तदनुप्रविश्य, सच्च त्यच्चाभवद्' इति जगत्सृष्टिं तदनुप्रवेशं च ब्रूते खलु श्रुतिः। तत्र किमीश्वरसङ्कल्पाज्जीवो जातो न वा? आद्ये, 'जातस्य हि ध्रुवो मृत्यु'रिति गीतावचनादेव तस्य नाशः सिद्धः। द्वितीये, कथं

१. अधिकदेशवृत्तित्वं व्यापकत्वमिति स्वीकृत्येदमुक्तम्। २. गृहान्तरवस्थितस्येत्यर्थः। ३. आत्मोपादानकस्येत्यर्थः।

**अन्तवन्त इमे देहाः नित्यस्योक्ताः शरीरिणः।**
**अनाशिनोऽप्रमेयस्य तस्माद् युध्यस्व भारत !॥ १८॥**

**किं पुनस्तदसत् , यत् स्वात्मसत्तां व्यभिचरतीति ? उच्यते—** अन्तवन्त इति। अन्तो **विनाशो विद्यते येषां ते** अन्तवन्तः। **यथा मृगतृष्णिकोदकादौ सद्बुद्धिरनुवृत्ता प्रमाणनिरूपणान्ते विच्छिद्यते ; स तस्या अन्तः। तथेमे देहाः। स्वप्नमायादेहादिवच्चान्तवन्तः। नित्यस्य** शरीरिणः **शरीरवतोऽनाशिनोऽप्रमेयस्यात्मनः अन्तवन्त इत्युक्ता**

आनन्दगिरिकृतव्याख्या

**सदसतोरनन्तरप्रकृतयोः स्वरूपाव्यभिचारित्वेन परमार्थतया सत् निर्धारितम्। इदानीम् असन्निर्दिधारयिषया पृच्छति—** किं पुनरिति। **असदसदेवेति निर्धारितत्वात् प्रश्नस्य निरवकाशत्वमाशङ्क्य , शून्यं व्यावर्त्य विवक्षितमसन्निर्धारयितुं तस्य सावकाशत्वमाह—** यत् स्वात्मेति। **देहादेरनात्मवर्गस्य प्रकृतासच्छब्दविषयतेत्याह—** उच्यत इति। **तेषां स्वातन्त्र्यं व्युदस्यति—** नित्यस्येति। **आकाशादि-व्यावृत्त्यर्थं विशिनष्टि—**शरीरिण इति। **परिणामिनित्यत्वं व्यवच्छिनत्ति—**अनाशिन इति। **तस्य प्रत्यक्षाद्यविषयत्वमाह—**अप्रमेयस्येति। **देहादेरवस्तुत्वाद् आत्मनश्चैकरूपत्वाद् युद्धे स्वधर्मे प्रवृत्तस्यापि तव न हिंसादिदोषसम्भावनेत्याह—** तस्मादिति। **ननु देहादिषु सद्बुद्धेरनुवृत्तेः तस्या विच्छेदाभावात् कथमन्तवत्त्वं तेषामिष्यते? तत्राह—** यथेति। तथेमे देहाः **सद्बुद्धिभाजोऽपि प्रमाणतो निरूपणाया-मवसाने विच्छेदाद् अन्तवन्तो भवन्तीति शेषः। देहत्वादिना च जाग्रद्देहादेरन्तवत्त्वं सम्प्रतिपन्नवदनुमातुं शक्यमित्याह—** स्वप्नेति।

भाष्यार्कप्रकाशः

जीवस्येश्वराद् भिन्नस्य सिद्धिः? न हि सृष्टेः प्राग् जीवोऽस्ति, 'एकमेवाद्वितीयं ब्रह्म' इति श्रुतेः। तस्मादीश्वरादभिन्न एव जीव इति कथं स्वनाशे ईश्वरस्य सङ्कल्पः स्यात्? न कथमपीति बोध्यम्। ननु सृष्टेः प्रागपि चिदचिद्विशिष्टं ब्रह्मैवास्ति, न तु शुद्धमिति चेत् , तर्हि ईश्वरवच्चिदपि स्वत एव नित्येति कृत्वा किमितीश्वरसङ्कल्पाभावाज्जीवस्य नित्यत्वमित्युक्तं त्वया?

**वस्तुतस्तु** ब्रह्मणश्चिदचिद्वैशिष्ट्ये सति सविकारत्वमेव स्यात् , विशेषणभूतचिदचिद्गतस्थूलसूक्ष्मादिविकाराणां विशिष्टे समन्वयात्। अपृथक्सिद्धविशेषणे खलु ब्रह्मणश्चिदचितौ। एवं सविकारत्वे च ब्रह्मैवानित्यं स्यादिति महदनिष्टम्॥ १७॥

अन्तवन्त इति श्लोकमवतारयति— **किं पुनरिति।** यत् स्वात्मसत्तां व्यभिचरति, तद् असद्वस्तु पुनः किमिति शङ्का। **उच्यते** इति प्रतिज्ञा। **स्वात्मसत्ताव्यभिचारः** स्वसत्तानाश इत्यर्थः। यस्य सर्वदा नास्ति सत्ता, किन्तु प्रतीतिकाले एव, तद्धि असद्वस्तु। प्रतीतिकालेऽपि कारणव्यतिरेकेणासत्त्वात् सत्ताव्यभिचारोऽस्त्येवेति प्रागेव प्रतिपादितम्। 'अनाशिनो नित्यस्याप्रमेयस्य शरीरिणः सम्बन्धिनः इमे देहा अन्तवन्त इति विवेकिभिरुक्ताः' इत्यन्वयः। असङ्गस्याप्यात्मनः शरीरेण सह सम्बन्ध आधाराधेयभावादिरूपः कल्पितोऽस्तीति शेषषष्ठ्युपपत्तिः। देहानां नाशो नाम तदनुवृत्तसद्बुद्धिविच्छेदः। स च प्रमाणनिरूपणाज्जायत इत्याह— **यथेति।**

**एतेन** - देहानां प्राणापायप्रयुक्तं नश्वरत्वं सर्वजनविदितमेवेति कृत्वा किमिति भगवता 'अन्तवन्तः इमे देहाः' इत्युपदिष्टम् , व्यर्थत्वादिति - प्रश्नो दत्तोत्तरः।

नन्वीदृशो नाशः क्व दृष्टः? इत्यत्राह— **मृगतृष्णिकायामिति। मृगतृष्णिका** मरीच्युदकम्। इदमुदकमस्तीति मरीच्युदक-समानाधिकरणा या सद्बुद्धिर्मरीच्युदकेऽनुवर्तते, सा हि 'नेदमुदकं, किन्तु मरीचिरेव' इति प्रमाणनिरूपणान्ते व्यावर्तते। सः सद्बुद्धिविच्छेदः तस्य मृगतृष्णिकादेरन्त इत्यक्षरार्थः। तथा इमे दृश्यमाना देहा अन्तवन्तः - देहाः सन्तीति देहेष्वनुवर्तमानायाः सद्बुद्धेः, नेमे देहाः, किन्तु पृथिव्यादिभूतान्येव, भूतव्यतिरिक्तांशस्यात्रानुपलम्भादिति [1][नेमे देहाः, किन्तु ब्रह्मैवेति वा] प्रमाण-निरूपणान्ते विच्छेदात्। ननु जलपानाद्यर्थक्रियाशून्यस्य मरीचिकोदकस्य भवत्वसत्त्वम् , कथं पुनर्देहानां गमनाद्यर्थक्रियाशालिना-मसत्त्वमित्यत्राह— **स्वप्नमायादेहादिवच्चेति।** स्वप्ने यथा निद्राख्यमायया कल्पिता देहरथादयः पदार्था अर्थक्रियाशालिनोऽप्यसन्त इति

१. अयं पाठः मुद्रितपुस्तके कुण्डलित एव दृष्टः।

**विवेकिभिरित्यर्थः। नित्यस्य अनाशिनः इति न पुनरुक्तम्। नित्यत्वस्य द्विविधत्वाल्लोके, नाशस्य च। यथा देहो भस्मीभूतोऽदर्शनं गतो नष्ट उच्यते। [1]विद्यमानोऽप्यन्यथा परिणतो व्याध्यादियुक्तो जातो नष्ट उच्यते। तत्रानाशिनो नित्यस्येति द्विविधेनापि नाशेनासम्बन्धोऽस्येत्यर्थः। अन्यथा पृथिव्यादिवदपि नित्यत्वं स्यादात्मनः। तन्मा भूदिति 'नित्यस्यानाशिनः' इत्याह।** अप्रमेयस्य **न प्रमेयस्य, प्रत्यक्षादिप्रमाणैरपरिच्छेद्यस्येत्यर्थः।**

**नन्वागमेनात्मा परिच्छिद्यते, प्रत्यक्षादिना च [2]पूर्वम्। न ; आत्मनः स्वतःसिद्धत्वात्। सिद्धे ह्यात्मनि प्रमातरि**

अनुभूतिस्वरूपाचार्यटिप्पणम्

आत्मा न विनाशी, अप्रमेयत्वात् , शशविषाणवदित्युक्तम्। तत्र हेतोरसिद्धिमाशङ्कते— **नन्वागमेनेति**। 'तं त्वौपनिषदं पुरुषं पृच्छामी'ति श्रुतेः आत्मा वेदान्तप्रमेयो वक्तव्यः। आगमार्थपरिचयाच्च पूर्वं प्रत्यक्षादिप्रमेयो वक्तव्यः।

आनन्दगिरिकृतव्याख्या

**शरीरादेरन्तवत्त्वेऽपि प्रवाहरूपेण आत्मनस्तत्सम्बन्धस्यानन्तवत्त्वमाशङ्क्याह—** नित्यस्येति। **प्रवाहस्य प्रवाहिव्यतिरेकेणानिरूपणान्न तदात्मना देहाद्यभावे सम्बन्धसिद्धिरित्यभिसन्धायोक्तम्—** विवेकिभिरिति। **पदद्वयस्यैकार्थत्वमाशङ्क्य निरस्यति—** नित्यस्येत्यादिना। **नित्यत्वस्य द्वैविध्यसिद्ध्यर्थं नाशद्वैविध्यं प्रतिज्ञातं प्रकटयति—** यथेत्यादिना। **नाशस्य निरवशेषत्वेन सावशेषत्वेन च सिद्धे द्वैविध्ये फलितमाह—** तत्रेति। **विशेषणाभ्यां कूटस्थनित्यत्वमात्मनो विवक्षितमित्यर्थः। अन्यतरविशेषणमात्रोपादाने परिणामिनित्यत्वमात्मनः शङ्क्येतेत्यनिष्टापत्तिमाशङ्क्याह—** अन्यथेति।

[3]**औपनिषदत्वविशेषणमाश्रित्याप्रमेयत्वमाक्षिपति—** नन्विति। **इतश्चात्मनो नाप्रमेयत्वमित्याह—** प्रत्यक्षादिनेति। **तेन चागमप्रवृत्त्यपेक्षया पूर्वावस्थायामात्मैव परिच्छिद्यते, [4]तस्मिन्नेवाज्ञातत्वसम्भवात् , 'अज्ञातज्ञापकं प्रमाण'मिति च प्रमाणलक्षणादित्यर्थः।**

भाष्यार्कप्रकाशः

सर्वैरभ्युपगम्यते, तद्वदित्यर्थः। न च स्वप्नदेहादीनामर्थक्रियाकारित्वे विवदितव्यम् , स्वप्नरथारोहणदेशान्तरगमनसम्भाषणाद्यर्थक्रियादर्शनात्। देहात्मनोः कः सम्बन्ध इति शङ्कायां धार्यधारकभावरूप इति दर्शयितुमाह—**शरीरिण इति। शरीरिणः** शरीरमस्यास्तीति शरीरी, मत्वर्थे 'अत इनिठनौ' इतीनिः। तस्य शरीरिणः। मतुप्प्रत्यये कृते शरीरवान् । तस्य शरीरवतः। अन्तः प्रविश्य शरीरं धरतः इत्यर्थः।

**नित्यत्वस्येति**। लोके नित्यत्वस्य नाशस्य च द्विविधत्वादित्यन्वयः। नाशस्य द्विविधत्वात् तदभावरूपं नित्यत्वमपि द्विविधमित्यर्थः। नाशस्य द्वैविध्यमेव दर्शयति— **यथेत्यादिना**। भस्मीभूतः अदर्शनं गतो देहो नष्ट इत्युच्यते, 'णश अदर्शने' इति धातुस्मरणात्। विद्यमानोऽपि वयसा **परिणतः** परिणामं गतः **व्याध्यादियुक्तश्च** देहः नष्टो जातः, नष्ट आसीदित्युच्यते। रक्तक्षयादिकृतं कार्श्यमत्र नाशशब्दार्थ इति भावः। **तत्रेति**। एवं स्थिते इत्यर्थः। **द्विविधेनापीति**। अदर्शनरूपेण कार्श्यरूपेण चेत्यर्थः। **अन्यथेति**। अथ वेत्यर्थः। नित्यस्येत्युक्ते, किं पृथिव्यादिवदात्मा यावत्प्रलयं नित्यः इति शङ्का स्यात् , तद्वारणाय अनाशिनः इत्युक्तमित्यर्थः। घटादिवदनित्यत्ववारणाय [नित्यस्येति, पृथिव्यादिवन्नित्यत्ववारणाय] अनाशिन इति चोक्तमिति यावत्। **आहेति**। भगवानिति शेषः।

अप्रमेयस्येति नञ्तत्पुरुषो, न तु बहुव्रीहिरित्याह— **न प्रमेयस्येति**। प्रमातुं शक्यं योग्यं वा प्रमेयम् , तद्भिन्नोऽप्रमेयः, तस्य **अपरिच्छेद्यस्य** परिच्छेत्तुम् इदन्ता-ईदृक्ता-इयत्तादिना परिमातुमशक्यस्येत्यर्थः।

ननु 'शास्त्रयोनित्वा'दिति सूत्रेण, 'सर्वे वेदा यत्पदमामनन्ती'ति श्रुत्या, 'वेदैश्च सर्वैरहमेव वेद्यः' इति गीतया च शास्त्रवेद्यत्वमात्मन उच्यत इति कथमागमापरिच्छेद्यत्वम्? तथा सुखादिवदात्मा मनोवेद्य एव। 'मनसैवानुद्रष्टव्यम्' इति श्रुतेः

१. 'विद्यमानोऽपि वयसा परिणतः' इति रा.पा.। २. 'न, पूर्वं स्वतःसिद्धत्वात्' इति रा. पा.। ३. 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति श्रुतौ औपनिषदत्वं पुरुषस्य विशेषणं श्रूयते। तच्च उपनिषत्प्रमाणपरिच्छेद्यत्वम्। तच्चाप्रमेयत्वविरोधीति भावः। ४. जडे आवरणकृत्यस्य वैयर्थ्येन आत्मन्येव अज्ञानविषयत्वाङ्गीकारात्। अत एवोक्तम्— 'अतोऽनुभव एवैको विषयोऽज्ञातलक्षणः। अक्षादीनां स्वतः सिद्धो यत्र तेषां प्रमाणता॥' इति। द्र. अद्वैतसिद्धिः पृ. ३१८.

**प्रमित्सोः प्रमाणान्वेषणा भवति। [1]न हि पूर्वम् 'इत्थमहम्' [2]इत्यात्मानं प्रमाय पश्चात् प्रमेयपरिच्छेदाय प्रवर्तते। न ह्यात्मा नाम कस्यचिदप्रसिद्धो भवति।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

प्रयोगोऽपि— आत्मा (अ)प्रमेयः, वस्तुत्वात् , घटादिवदिति भावः। 'अत्रायं पुरुषः स्वयञ्ज्योतिर्भवती'ति श्रुतिविरोधात् अनुमानं प्रमाणं न भवतीत्याह— **न ; स्वतःसिद्धत्वादिति।** न च श्रुतेर(वि)मुख्यार्थत्वम्। मुख्यार्थत्वे बाधकादर्शनात्। न ह्यनुमानं बाधकम् , अन्योन्याश्रयात्। **किञ्च** [अहं]प्रत्ययप्रवृत्तेः प्रागेव सुषुप्तावस्थायामात्मनि सिद्धे सति, पश्चात् प्रमातुमिच्छा जायते। ततः प्रमाणान्वेषणा भवति। अतो ह्यात्मा स्वप्रकाश इत्याह— **सिद्धे ह्यात्मनीति। किञ्च** अहंप्रत्ययाद् आत्मा विषयसंवेदनात् पूर्वं सिध्यति, किं वोत्तरकालं, किं वा समकालं, किं वा विषयसंवेदनाश्रयतया? तत्राद्यं दूषयति— [**न हि पूर्वमिति।**] 'घटमहं जानामी'ति विषयसंवेदनसमये प्रमातुरनवभासप्रसङ्गादित्यर्थः। द्वितीयं दूषयति— **न ह्यात्मा नामेति**। विषयसंवित्समये कस्यचित् न ह्यात्माऽप्रसिद्धो भवति, 'मयेदं विदित'मिति ग्राह्यग्राहकभावास्फुरणप्रसङ्गात्। अतः उत्तरकाले सिद्धिरनुपपन्नेत्यर्थः। नापि समसमयम् , निरंश(स्यैवा)स्यात्मनः युगपद्विरुद्धपरिणामायोगात्। नापि संविदा-श्रयतया वेद्यः, संवित्कर्मतामन्तरेणापरोक्षत्वात् , संवेदनवत्। तस्मात् परिशेषात् [3]स्वयम्प्रकाश आत्मा सिद्ध इति भावः।

आनन्दगिरिकृतव्याख्या

**'एतदप्रमयम्' इत्यादिश्रुतिमनुसृत्य परिहरति—** नेत्यादिना। **कथं मानमनपेक्ष्यात्मनः सिद्धत्वमित्याशङ्क्योक्तं विवृणोति—** सिद्धे हीति। प्रमित्सोः **प्रमेयमिति शेषः। तदेव व्यतिरेकमुखेन विशदयति—** न हीति। **आत्मनः सर्वलोकप्रसिद्धत्वाच्च तस्मिन् न प्रमाणमन्वेष-णीयमित्याह—** न ह्यात्मेति। **प्रत्यक्षादेरनात्मविषयत्वात् , [4]तत्र चाज्ञातताया व्यवहारे सम्भवात् , तत्प्रामाण्यस्य च व्यावहारिकत्वाद् ,**

भाष्यार्कप्रकाशः

मानसिकप्रत्यक्षविषयत्वमात्मनोऽस्तीति कथं प्रत्यक्षापरिच्छेद्यत्वम्? तथा जगज्जन्मादिलिङ्गकानुमानेनात्मनः सुग्रहत्वात् कथमनुमा-नापरिच्छेद्यत्वमित्याक्षिपति— **नन्वित्यादिना।** परिहरति— **नेति।** प्रत्यक्षागमादिप्रमाणव्यवहारात् पूर्वमेवात्मनः स्वतःसिद्धत्वाद् न प्रत्यक्षादिपरिच्छेद्यत्वमिति। घटादयो हि पदार्थाश्चक्षुरादिप्रमाणव्यापारानन्तरं सिध्यन्ति - घटोऽस्ति पटोऽस्तीति। प्रमाता तु आगमादिप्रमाणव्यापारात् पूर्वमेव सिध्यति , प्रमात्रधीनत्वात् प्रमाणव्यापारस्य। कर्ता हि प्रमाता , करणानि तु प्रमाणानि। यथा वास्यादिकरणव्यापारश्छेदनादिस्तक्षादिकर्त्रधीनः, तद्वत्। आत्मा हि प्रमाता। अतो न प्रमातर्यात्मनि प्रमाणपरिच्छेद्यत्वमिति भावः। संग्रहवाक्यं विवृणोति— **सिद्धे हीत्यादिना।** प्रमातर्यात्मनि सिद्धे सत्येव प्रमित्सोः प्रमाणान्वेषणा भवतीत्यन्वयः। प्रमातुमिच्छुः प्रमित्सुः, तस्य; प्रमातुरित्यर्थः। प्रमाता हि प्रमित्सति प्रमेयम्। प्रमाणानां चक्षुरादीनां करणानाम् **अन्वेषणा** गवेषणा। रूपं प्रमित्सुः प्रमाता चक्षुरन्विष्यति, चक्षुषैव रूपस्य प्रमेयत्वात् , शब्दं प्रमित्सुः श्रोत्रमन्विष्यतीत्येवम्। ननु प्रमित्सुः पूर्वं प्रमातारमात्मानं प्रमाय पश्चाद् रूपादिकं प्रमातीति कृत्वा सिध्यति प्रमातुरपि प्रमेयत्वमित्यत आह— **न हीति।** घटादिकं प्रमेयं प्रमातुमिच्छन् पुरुषः पूर्वमादौ नित्योऽविक्रिय आत्माऽहमित्येवमात्मानं प्रमाय पश्चात् प्रमेयस्य घटादेः परिच्छेदाय न हि प्रवर्तते। हिशब्दः सर्वानुभवप्रसिद्धिं द्योत-यति। तत्र हेतुमाह— **न हीति।** आत्मनः स्वत्वात् स्वस्य स्वयं कथमप्रसिद्धः स्यात् ? असिद्धार्थपरिच्छेदाय हि प्रमात्रा प्रमाणव्यापार आकाङ्क्षितः। चक्षुर्व्यापारात्प्रागेव यदि प्रमाता गृहे घटं जानीयात् तर्हि किमिति घटोऽत्रास्ति वा न वेति संशयीत? किमिति तत्संशयापनोदार्थं चक्षुषा घटदर्शने व्याप्रियेत? आत्मनि तु न कोऽपि 'अहमस्मि वा न वा' इति सन्देग्धि येन तत्सन्देहापनोदनाय

१. 'न हि प्रमातुमिच्छन् पूर्वमित्थं नित्यः अविक्रियश्चात्माऽहमित्यात्मानं प्रमाय' इति रा. पुस्तके पा.। २. 'इत्यात्मानमप्रमाय' इति पा.। ३. स्वयम्प्रकाशत्वं च स्वान्यसंविन्नैरपेक्ष्येण स्फुरणम्। ४. अज्ञानविषयत्वरूपाज्ञातत्वस्य सिद्धान्ते आत्ममात्रवृत्तित्वादज्ञातज्ञापकत्वलक्षणप्रामाण्यस्य अनात्मविषयकप्रत्यक्षादौ असंभवेऽपि व्यवहारसिद्धाज्ञातताघटितप्रामाण्यस्य तत्र संभवः इति भावः।

**शास्त्रं त्वन्त्यं[1] प्रमाणम् अतद्धर्माध्यारोपणमात्रनिवर्तकत्वेन प्रमाणत्वमात्मनि प्रतिपद्यते, न त्वज्ञातार्थज्ञापकत्वेन। तथा च श्रुतिः 'यत्साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः'(बृ.उ.३.४.१) इति। यस्मादेवं नित्योऽविक्रियश्चात्मा,**

अनुभूतिस्वरूपाचार्यटिप्पणम्

कथं तस्य तर्हि औपनिषदत्वप्रतिपादनेन शास्त्रप्रमाण[प्रामाण्य]मित्याशङ्क्याह— **शास्त्रं त्वन्त्यं प्रमाणमिति**। शास्त्रेणात्मनि प्रतिपादिते पुनः प्रमाणप्रमेयव्यवहारानुपपत्तेः तदन्त्यम्। ततो बाधकप्रमाणान्तराभावाद् , अपौरुषेयतया निर्दुष्टत्वाच्च शास्त्रं प्रमाणमित्यर्थः। कथं तर्हि आत्मन्यप्रमेये प्रामाण्यं लभत इत्याशङ्क्याह— **अतद्धर्मेति**। प्रकाशमानोऽप्यात्मा 'मनुष्योऽहम् , कर्ताऽह'मिति अतद्धर्मविशिष्टो भाति। तत्र शास्त्रेण 'अस्थूल'मित्यादिना स्वाभाविकनिष्प्रपञ्चत्वोपदेशेनातद्धर्मनिवृत्तिः क्रियते अर्थात् , न त्वज्ञातस्वरूपं ज्ञाप्यते, प्रागेव स्वस्वरूपस्फुरणस्य सिद्धत्वात्। अतः स्वरूपेणाप्रमेयत्वं, निरुपाधिक-रूपेण सोपाधिकरूपेण वा शास्त्रप्रमेयत्वमिति भावः। स्वतोऽपरोक्षत्वे प्रमाणमाह— **तथा च श्रुतिरिति। यः साक्षादिति** प्रमाणवृत्तिमन्तरेण। **अपरोक्षादिति** अपरोक्षमित्यर्थः। एवम् अप्रमेयत्वहेतुं प्रसाध्य पूर्वोक्तं निगमयति— **यस्मादिति।** ननु

आनन्दगिरिकृतव्याख्या

**विशिष्टे तत्प्रवृत्तावपि केवले[2] तदप्रवृत्तेः यद्यपि नात्मनि तत्प्रामाण्यम् , तथापि [3]तद्धितश्रुत्या शास्त्रस्य तत्र प्रवृत्तिरवश्यम्भाविनी-त्याशङ्क्याह—** शास्त्रं त्विति। **शास्त्रेण प्रत्यग्भूते ब्रह्मणि प्रतिपादिते प्रमात्रादिविभागस्य [4]व्यावृत्तत्वाद् युक्तमस्यान्त्यत्वम्। अपौरुषेयतया निर्दोषत्वाच्चास्य प्रामाण्यमित्यर्थः। तथापि कथमस्य प्रत्यगात्मनि प्रामाण्यम्? तस्य स्वतःसिद्धत्वेनाविषयत्वाद् अज्ञातज्ञापना-योगादित्याशङ्क्य स्वतो भानेऽपि प्रतीचो 'मनुष्योऽहं' 'कर्ताऽहम्' इत्यादिना मनुष्यत्वकर्तृत्वादीनामतद्धर्माणामध्यारोपणेनात्मनि प्रतीयमानत्वात् तन्मात्रनिवर्तकत्वेनात्मनो विषयत्वमनापद्यैव[पाद्यैव] शास्त्रं प्रामाण्यं प्रतिपद्यते, 'सिद्धं तु निवर्तकत्वा'दिति न्यायादित्याह—** अतद्धर्मेति। **घटादाविव स्फुरणातिशयजनकत्वेन किमिति आत्मनि शास्त्रप्रामाण्यं नेष्टमित्याशङ्क्य जडत्वाजडत्वाभ्यां विशेषादिति मत्वाऽऽह—** न त्विति। **ब्रह्मात्मनो मानापेक्षामन्तरेण स्वतः स्फुरणे प्रमाणमाह—** तथा चेति। साक्षाद् **अन्यापेक्षामन्तरेण,** अपरोक्षाद् **अपरोक्षस्फुरणात्मकं यद् ब्रह्म, न च तस्यात्मनोऽर्थान्तरत्वम् , सर्वाभ्यन्तरत्वेन सर्ववस्तुसारत्वात् , तमात्मानं व्याचक्ष्वेति**

भाष्यार्कप्रकाशः

आत्मानं प्रमातुमिच्छेदिति भावः।

नन्वेवं वेदान्तशास्त्रम् अप्रमाणम् अनर्थत्वात् , आत्मज्ञानं हि वेदान्तशास्त्रस्य फलम्। तत्तु पूर्वमेव सिद्धम् , आत्मनः स्वतः सिद्धत्वादिति शङ्कायामाह— **शास्त्रं त्विति**। शास्त्रमत्यन्तं प्रमाणमेव। तत्र हेतुमाह— **अतदिति।** आत्मनि यदनात्मतद्धर्माध्यारोपणम् अविद्याकृतमस्ति 'मनुष्योऽहं स्थूलोऽहं काणोऽह'मिति प्रतीत्याश्रयम् , तन्मात्रस्य निवर्तकत्वेन हेतुना शास्त्रं प्रमाणत्वं प्रतिपद्यते। अविद्याकृतात्माश्रयानात्मधर्माध्यारोपणनिवर्तकत्वरूपफलस्य सत्त्वाच्छास्त्रं प्रमाणमेवेत्यर्थः। फलान्तरं निषेधति— **न त्विति।** अज्ञातार्थज्ञापकत्वरूपं फलं नास्ति शास्त्रस्यास्येत्यर्थः। आत्मनः स्वत्वेन ज्ञातार्थत्वादिति भावः। उक्तार्थे श्रुतिं प्रमाणयति— **तथा च श्रुतिरिति।** अपरोक्षादिति पञ्चमी प्रथमार्थे छान्दसी। अपरोक्षमित्यर्थः। यः सर्वान्तर आत्मा, यच्च साक्षादपरोक्षं तद् ब्रह्मेति श्रुत्यर्थः। आत्मा स्वयमेवापरोक्षं ब्रह्मेति यावत्। अनया श्रुत्या प्रत्यगभिन्नस्य ब्रह्मणः प्रमाणव्यापारं विनैव प्रत्यक्षत्वमुक्तम् , साक्षादि-त्युक्तत्वात्। ततश्च आत्मा ज्ञातार्थः स्वतःसिद्ध एवेति भावः।

मूलस्थतस्माच्छब्दार्थमाह— **यस्मादिति।** अनाशिनो नित्यस्येति शब्दद्वयार्थमाह— **नित्य इति।** [5]अप्रमेयशब्दार्थमाह—

१. 'अत्यन्तम्' इति रा.पा.। २. **केवले** आत्मनीति शेषः। ३. उपनिषत्स्वेव विज्ञायते इत्यौपनिषदः। शैषिकोऽण्। औपनिषदपदेऽयं तद्धितप्रत्ययः श्रुतिः। शक्त्या बोधकः शब्दः श्रुतिः। तथा चोपनिषद्रूपशास्त्रस्य तत्र प्रवृत्तिः= आत्मबोधकत्वमावश्यकमिति अप्रमेयत्वं कथमिति शङ्कार्थः। ४. बाधितत्वादित्यर्थः। तदुक्तम्— 'अन्वेष्टव्यात्मविज्ञानात् प्राक् प्रमातृत्वमात्मनः' इत्यादि। ५. अप्रमेयत्वेनार्थलभ्यमर्थमाहेत्याशयः। अविक्रियत्वस्यार्थलभ्यत्वं दर्शयति—**प्रमेयस्येत्यादिना**।

**तस्माद्** युध्यस्व, **युद्धादुपरमं मा कार्षीरित्यर्थः। न ह्यत्र [1]युद्धकर्तव्यता विधीयते। युद्धे प्रवृत्त एव ह्यसौ शोकमोहप्रतिबद्धस्तूष्णीमास्ते। अतस्तस्य [2]प्रतिबन्धापनयनमात्रं भगवता क्रियते। तस्माद् 'युध्यस्व' इत्यनुवाद-मात्रम् , न विधिः[3] ॥ १८॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

आत्मस्वरूपमुपदिश्य[4] युद्धकर्तव्यताविधानात् समुच्चयोऽत्र भातीत्याशङ्क्याह— **न ह्यत्रेति** ॥ १८॥

आनन्दगिरिकृतव्याख्या

**योजना। अप्रमेयत्वेनाविनाशित्वं प्रतिपाद्य फलितं निगमयति—** यस्मादिति। **स्वधर्मनिवृत्तिहेतुनिषेधे तात्पर्यं दर्शयति—** युद्धादिति। **आत्मनो नित्यत्वादिस्वरूपमुपपाद्य युद्धकर्तव्यत्वविधानाद् ज्ञानकर्मसमुच्चयोऽत्र भातीत्याशङ्क्याह—** न हीति। **युध्यस्वेति वचनात् तत्कर्तव्यत्वविधिरस्तीत्याशङ्क्याह—** युद्ध इति। **कथं तर्हि 'कथं भीष्ममहम्' इत्याद्यर्जुनस्य युद्धोपरमपरं वचनमिति? तत्राह—** शोकेति। **यदि स्वतो युद्धे प्रवृत्तिस्तर्हि भगवद्वचनस्य का गतिः? इत्याशङ्क्याह—** तस्येति। **भगवद्वचनस्य प्रतिबन्धनिवर्तकत्वे सत्यर्जुनप्रवृत्तेः स्वाभाविकत्वे फलितमाह—** तस्मादिति॥ १८॥

भाष्यार्कप्रकाशः

**अविक्रिय इति।** प्रमेयस्य घटादेः सविक्रियत्वादप्रमेय आत्मा अविक्रिय इत्यर्थः। युध्यस्वेति लोटा युद्धं कुर्विति विधिरभिधीयत इत्या-शङ्क्याह— **युद्धादुपरमं मा कार्षीरित्यर्थ इति। अनुवादमात्रमिति।** चिकीर्षितयुद्धानुवादमात्रमेवेत्यर्थः। मात्रपदार्थमाह— **न विधिरिति।** तत्र हेतुमाह— **शोकमोहादीति।** शोकमोहादीनां संसारकारणानां निवृत्तिरेवार्थः फलं यस्य तत् तथोक्तम्। तन्निवृत्तये इदं [5]निवृत्त्यर्थमिति वा समासः। उभयथाऽप्येक एवार्थः। न तु कस्मिंश्चित् कर्मणि प्रवर्तकमित्याह— **न प्रवर्तकमिति।** इति हेतोर्युध्यस्वेति न विधिरित्यन्वयः।

अत्राह **रामानुजः**—'दिह उपचये इत्युपचयरूपा इमे देहा अन्तवन्तः विनाशस्वभावाः। उपचयात्मका हि घटादयोऽन्तवन्तो दृष्टाः। नित्यस्य शरीरिणः कर्मफलभोगार्थतया भूतसंघातरूपा देहाः 'पुण्यः पुण्येने'त्यादिशास्त्रैरुक्ताः कर्मावसानविनाशिनः' इति। **तत्तुच्छम्** ; दिह उपचये इत्युपचयरूपत्वं देहानां वृद्धिहेतुरेव, न क्षयहेतुः। उपचयो हि वृद्धिः। न च घटादीनामुपचयात्मकत्वं दृश्यते। कुलालेन यावत्परिमाणो घटः कृतस्तावत्परिमाणान्न हि घटोऽस्मद्गृहेषु वर्धते।

न च - एतद्दोषपरिहारायैव **वेदान्तदेशिकेन** उपचयरूपा इत्यस्य सावयवा इत्यर्थः वर्णित इति - वाच्यम् ; देहशब्दात् तादृशार्थालाभात्। न च सावयवस्यैवोपचयः, न तु निरवयवस्येति सिद्धान्तात् तादृशार्थलाभः, निरवयवत्वे देहस्योपचयासम्भवादिति वाच्यम् ; सावयवस्यापि घटस्योपचयादर्शनेन सावयवत्वोपचययोः समनियतत्वाभावान्न तादृशार्थलाभ इति। **किञ्च** तव मते निरवयवस्यापि मठाकाशस्य मठवैपुल्येनोपचयदर्शनान्निरवयवस्य नोपचय इत्यपि न नियन्तुं शक्यते।

अथ देहस्योपचयोऽपि दुर्निरूपः, यावद्भिरवयवैर्देहः आरब्धो घटवत् , तावद्भ्योऽवयवेभ्योऽन्यावयवानां कथं देहे लाभः, येनोपचयः स्यात्। न च देहस्य बाल्यावस्थातस्तारुण्ये वृद्धिदर्शनात् तद्बलेनावयवान्तरसङ्क्रमणं कल्प्यत इति वाच्यम्; अप्रमाणत्वात् तत्कल्पनायाः। अतो मायामय्येव सा वृद्धिः। यथा घटादयः अन्तवन्तो दृष्टास्तथा देहा अप्यन्तवन्तो दृष्टा एवेति किमिति देहेषु सिद्धस्यान्तवत्त्वस्य सावयवत्वादिभिर्हेतुभिर्भगवता साधनं क्रियते? सिद्धसाधनं ह्यपार्थत्वाद् दोषः। शरीरिणः कर्मफलभोगार्थतया देहाः शास्त्रैरुक्ता इत्यर्थवर्णनमप्ययुक्तम् , मूलाद्बहिः कल्पितत्वात् कर्मफलभोगार्थतयेति पदस्य। सर्वप्रमाणेषु प्रत्यक्षस्य बलवत्त्वाद्

---

१. 'युद्धं कर्तव्यतया' इति रा.पा.। २. 'कर्तव्यप्रतिबन्धा' इति पा.। ३. क्षत्रियस्य युद्धकर्तव्यताविधायकं शास्त्रं तु स्मृतिरूपमन्यदेवेति भावः। एतदनन्तरम् 'शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रं न प्रवर्तकमित्यर्थः॥१८॥' इति रा.पा.। आनन्दगिर्याचार्यैस्तु अयं ग्रन्थः उत्तरश्लोकावतारिकात्वेन व्याख्यातः। ४. 'उद्दिश्य' इति पा.। ५. लाघवाय शोकमोहादिसंसारकारणनिवृत्त्यर्थमिति समासैकदेशनिर्देशोऽयम्।

**य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।**
**उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥ १९॥**

[१]**शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रं न प्रवर्तकमित्येतस्यार्थस्य साक्षिभूते ऋचावानिनाय भगवान्। यत्तु मन्यसे - 'युद्धे भीष्मादयो मया हन्यन्ते, [२]अहमेव तेषां हन्ता' इति, एषा बुद्धिर्मृषैव ते। कथम्? —** य एनमिति। **य** एनं **प्रकृतं देहिनं** वेत्ति **विजानाति** हन्तारं **हननक्रियायाः कर्तारम् , यश्च एनम् अन्यो मन्यते** हतं [३]**देहहननेन हतोऽहमिति हननक्रियायाः कर्मभूतम् , तावुभौ न** विजानीतो **न ज्ञातवन्तौ अविवेकेनात्मानम् । हन्ताऽहम् , हतोऽस्म्यहमिति देहहननेन आत्मानम् अहम्प्रत्ययविषयं यौ विजानीतः, तौ आत्मस्वरूपानभिज्ञावित्यर्थः। यस्माद्**

अनुभूतिस्वरूपाचार्यटिप्पणम्

प्रतिबन्धापनयमात्रं क्रियत इत्येतत् प्रागप्युक्तमिति स्मारयति— **शोकमोहादीति**। उत्तरश्लोकद्वयस्य सम्बन्धमाह —**एतस्यार्थस्येति**। नित्यः सन् अविक्रियश्चात्मेत्येतस्यार्थस्य संवादकौ मन्त्रौ भगवानानीतवान्। तत्राद्यस्य सम्बन्ध उच्यते — **यत्तु मन्यस इति**॥ १९ - २०॥

आनन्दगिरिकृतव्याख्या

**'अविनाशि तु तद्विद्धि' इत्यत्र पूर्वार्धेन तत्पदार्थसमर्थनम् , उत्तरार्धेन निरीश्वरवादस्य परिणामवादस्य वा निराकरणम् , आत्मनि जन्मादिप्रतिभानस्यौपचारिकत्वप्रदर्शनार्थम् 'अन्तवन्तः' इत्यादि वचनमिति केचित्। अस्तु नामायमपि पन्थाः। पूर्वोक्तस्य गीताशास्त्रार्थस्योत्प्रेक्षामात्रमूलत्वं निराकर्तुं मन्त्रद्वयं भगवानानीतवानिति श्लोकद्वयस्य सङ्गतिं दर्शयति—** शोकमोहादीति। **तत्र प्रथम-मन्त्रस्य सङ्गतिमाह—** यत्त्विति। **प्रत्यक्षनिबन्धनत्वादमुष्या बुद्धेर्मृषात्वमयुक्तमित्याक्षिपति—** कथमिति। **प्रत्यक्षस्याज्ञानप्रसूतत्वेनाभास-त्वात् तत्कृता बुद्धिर्न प्रमेति परिहरति—** य एनमिति। **'हन्ता चेन्मन्यते हन्तुम्' इत्याद्यामृचमर्थतो दर्शयित्वा व्याचष्टे—** य एनमिति। **हन्तारं हतं वाऽऽत्मानं मन्यमानस्य कथमज्ञानमित्याशङ्क्याह—** हन्ताऽहमिति। **हन्तृत्वादिज्ञानमज्ञानमित्यत्र हेतुमाह—** यस्मादिति।

भाष्यार्कप्रकाशः

देहानां तद्गतविनाशस्वभावस्य च प्रत्यक्षसिद्धत्वेन शास्त्रैरुक्ता इत्यप्ययुक्तम् , व्यर्थत्वात्॥ १८॥

य एनमिति श्लोकमवतारयति— **एतस्येति। एतस्य** उक्तस्य 'नित्य आत्मा अविक्रियः' इत्यस्यार्थस्य **साक्षिभूते** प्रमाणभूते 'हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्' 'न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चिद्' इति **ऋचौ** मन्त्रौ भगवान् **आनिनाय** इहोपनिबबन्धेत्यर्थः। तत्र प्रथममन्त्रस्य सङ्गतिमाह— **यत्त्विति**। 'य एनं हन्तारं वेत्ति, यश्चैनं हतं मन्यते, तावुभौ न विजानीतः, अयं न हन्ति न हन्यते' इति श्लोकस्यान्वयः। यौ **देहहनने** इदम्प्रत्ययविषयस्य देहस्य हनने सति, **अविवेकेन** देहात्मनोरविवेकेन हेतुना अहम्प्रत्ययविषयमात्मानं हन्ताऽहमिति हतोऽहमिति जानीतः, तावुभौ न विजानीतः इत्यस्यार्थमाह— **आत्मस्वरूपानभिज्ञाविति**। तत्र हेतुभूतं श्लोकस्य चरमपादं व्याचष्टे— **यस्मादिति**। कुत आत्मा हननक्रियायाः कर्ता कर्म च न भवतीत्यत आह— [४]**अविक्रियत्वादिति**। हन्तृत्वहतत्वादयो विकारा आत्मनि निर्विकारे कथं स्युरित्यर्थः। शस्त्रपाणिः प्रबलो देह एव दुर्बलमन्यं देहं हन्ति; स दुर्बलदेह एव प्रबलेनान्येन देहेन हन्यत इति देहधर्मावेव हन्तृत्वहतत्वे। अविवेकिभिस्तु ते आत्मन्यारोप्येते, यथा देहधर्मः कार्श्यमात्मन्यारोप्यते व्याधिग्रस्तेन मूढेन पुंसा, तद्वदिति भावः।

अत्राह **रामानुजः**—'एनमुक्तस्वभावमात्मानं प्रति हन्तारं हननहेतुं कमपि यो मन्यते, यश्चैनं केनापि हेतुना हतं मन्यते' इति,

१. 'एतस्यार्थस्य' इत्यादि रा.पा.। २. 'अहमेतेषाम्' इति रा.पा.। ३. 'देहहनने' इति पा.। ४. इदं प्रतीकं ७२ पृष्ठस्थं द्र.।

न अयम् **आत्मा** हन्ति **न हननक्रियायाः कर्ता भवति,** न च हन्यते **न च कर्म भवतीत्यर्थः, अविक्रियत्वात्**[1] ॥ १९॥

आनन्दगिरिकृतव्याख्या

**आत्मनो हननं प्रति कर्तृत्वकर्मत्वयोरभावे हेतुं दर्शयति—** अविक्रियत्वादिति॥ १९॥

भाष्यार्कप्रकाशः

**तत्तुच्छम्** ; 'प्रति, कम् ,अपि' इति पदत्रयाध्याहारदोषात् , स्वरसतः प्रतीयमानसामानाधिकरण्यभङ्गदोषाच्च। हन्तारमिति हन्तेः कर्तरि विहितेन तृच्प्रत्ययेन हेत्वर्थस्यानभिधीयमानत्वात्। हननहेतुमित्यस्य हननकर्तारमित्यर्थवर्णनस्य वक्रत्वात्। तथा केनापि हेतुना हतमित्यप्यसङ्गतम् , हतमिति कर्मणि क्तप्रत्ययेन तावत् कर्तुरेवाकाङ्क्षाया उत्पद्यमानत्वात् तत्परिपूर्तये केनापि कर्त्रेत्येव वक्तव्यात्। कारणफलरूपार्थद्वयवाचिनो हेतुशब्दस्य कर्त्रर्थाश्रयणस्याप्रमाणत्वाच्च।

तथा - अयमात्मा हननहेतुर्न भवतीत्यप्युक्तमनेन, **तदप्यसत्** ; हन्तीति हननकर्तारमभिधत्ते तिबन्तो धातुः, न तु हननहेतुम्। हननकर्ता हि हननाश्रयः, आख्यातस्य चाश्रयत्वमर्थ इति सिद्धान्तः। रामो रावणं जघान बाणेन, भार्यापहारित्वादिति वाक्ये - हननं क्रिया, तत्र कर्ता रामः, करणं बाणः, हेतुस्तु भार्यापहरणं, कर्म रावणः इति कर्तृहेत्वोर्भेदात्। ततश्च नायं हन्तीति वाक्येनात्मनो हननकर्तृत्वमेव निषिध्यते, न तु हननहेतुत्वं, कर्तरि तिब्विधानादिति कृत्वा कथं **रामानुजेना**त्मनो हननहेतुत्वं निषिद्धं 'नायं हन्ती'ति वाक्येन।

**यदप्युक्तम्—** अत्र प्रत्ययस्य हेतुमात्रविवक्षेति **वेदान्तदेशिकेन ; तदप्ययुक्तम्** ; व्यासस्य तादृशविवक्षाऽस्तीति कल्पने प्रमाणाभावात् , प्रसिद्धकर्त्रर्थपरित्यागे कारणाभावाच्च। न हि यः कोऽपि मूढ आत्मानं हननहेतुं मन्यते। किन्तु हननकर्तारमेव— 'रिपुं हतवानह'मिति। तत्र हेतुं तु धनराज्यादिकमेव मन्यते। ततश्च नात्मा हननहेतुरित्युपदेशोऽपि व्यर्थः। न च 'आत्मार्थं रिपून् हन्ती'ति प्रयोगादात्मनोऽस्ति हेतुत्वमिति वाच्यम् ; तत्र आत्मार्थमित्यस्यात्मसुखादिलाभार्थमित्यर्थात्। अन्यथा हन्तीति हननक्रियाश्रये आत्मनि हननहेतुत्वस्यासम्भवात्। 'आत्मार्थे पृथिवीं त्यजेदि'त्यादौ यथाकथञ्चित्फलत्वरूपहेतुत्वमात्मनो भवतु नाम, कारणत्वरूप-हेतुत्वं तु क्वापि न सम्भवेत्। त्वया तु हननहेतुर्नेति हननकारणत्वमेव प्रतिषिध्यते। स चायुक्तः, निषेधस्य प्रसक्तिपूर्वकत्वादात्मनि च कर्तरि हेतुत्वाप्रसक्तेः। न चात्मना पुत्रमुत्पादयतीत्यस्ति हेतुत्वमात्मन इति वाच्यम् , तत्रात्मशब्दस्य देहार्थकत्वात् , तृतीयायाश्च करणे विहितत्वात्।

**किञ्च** 'हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हत'मिति कठवल्लीवाक्यमिहान्वितमिति त्वयाऽप्युक्तम्। तत्र 'हन्ता चेदि'त्यस्य किं हननकर्ता चेदित्यर्थः, उत हननहेतुश्चेदिति। न द्वितीयः, हननहेतोर्हननाकर्तृत्वेन हननबुद्ध्युदयप्रसङ्गासम्भवात्। हन्तुं मन्यत इति हननबुद्धिरुच्यते हि। सा च हननबुद्धिर्हननकर्तुरेवोचिता 'हन्याम् अहमिम'मिति। अतः प्रथमः परिशिष्यते। योऽर्थो मूलभूतश्रुतिगत-हन्तृशब्दस्य स एव गीताश्लोकगतहन्तृशब्दस्यापि वक्तव्यः, न त्वन्यः, तस्यैवेहोपनिबद्धत्वात्। तस्माद् हन्तेत्यस्य हननहेतुरित्यर्थः श्रुतिविरुद्धश्च।

'लः कर्मणि च भावे चाकर्मकेभ्यः' इति पाणिन्यनुशासनविरुद्धश्च। लादेशानां तिबादीनां कर्तरि कर्मणि भावे च शक्तिरिति तदर्थात्। हेत्वर्थे तिबविधानात्। कर्तरि तृन्तृचोर्विहितत्वेन हेतौ तदविधानाच्च। 'आख्यातस्याश्रयत्वमर्थः' इति **व्युत्पत्तिवाद**विरुद्धश्च। न हि हेतुत्वमाख्यातस्यार्थ इति तत्रोक्तम्। उपदेशवैयर्थ्यादिना दुष्टश्चेति तुच्छं **रामानुजभाष्यम्** , तदनुसारि**वेदान्तदेशिकतात्पर्यचन्द्रिका**

१. 'वेदाविनाशिनं नित्यम्' (२-२१) इति श्लोके वक्ष्यमाणरीत्या अविक्रियत्वस्य हेतोः साधारण्यात् हन्तिरत्र कियासामान्यस्योपलक्षणार्थः। तथा च कर्तृत्वाद्येव न संभवतीति 'युद्धे भीष्मादयो मया हन्यन्ते, अहमेव तेषां हन्ता' इति तव बुद्धिः मृषेत्यर्थः। अर्जुनस्य बुद्धेः मृषात्वेन बोधनीयायाः विषयतयोपस्थितत्वेन हन्तेरुपलक्षणतया ग्रहणमुचितमेव। 'हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हत'मिति कठवल्लीवाक्यानुगमाय च तथैव वक्तुमुचितत्वात्। न चैवं 'कर्ता शास्त्रार्थवत्त्वात्'(ब्र.सू. २.३.३२) इत्यधिकरणे आत्मनः कर्तृत्वसाधनविरोध इति वाच्यम्। 'यथा च तक्षोभयथा' इत्युत्तराधिकरणे तत्कर्तृत्वस्य औपाधिकतायाः तत्रैव व्यवस्थापितत्वात्। अत एव 'शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रं न प्रवर्तकमित्येतस्यार्थस्य साक्षिभूते ऋचावानिनाय भगवान्' इति भाष्यकारैरुक्तम्। कठवल्ल्यामुक्तमन्त्रस्य 'अन्यत्र धर्मादन्यत्राधर्माद्...यत्तत् पश्यसि तद् वद' इति प्रश्नोत्तरत्वेन पठिततया मोक्षसाधनज्ञानविषयात्मपरत्वात्।

**न जायते म्रियते वा कदाचिन्नायं भूत्वाऽभविता वा न भूयः।**
**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥२०॥**

[1]**कथमविक्रिय आत्मेति द्वितीयो मन्त्रः—** न जायत इति। न जायते **नोत्पद्यते, जनिलक्षणा वस्तुविक्रिया नात्मनो विद्यत इत्यर्थः। तथा न म्रियते वा। वाशब्दः चार्थे। न म्रियते चेति अन्त्या विनाशलक्षणा विक्रिया प्रतिषिध्यते। कदाचिच्छब्दः सर्वविक्रियाप्रतिषेधैः सम्बध्यते - न कदाचिज्जायते, न कदाचिन्म्रियते - इत्येवम्। यस्माद्** अयम् **आत्मा** भूत्वा **भवनक्रियामनुभूय पश्चाद्** अभविता **अभावं गन्ता न** भूयः **पुनः, तस्मान्न म्रियते। यो हि भूत्वा न भविता, स म्रियत इत्युच्यते लोके। वाशब्दान्नशब्दाच्च अयमात्माऽभूत्वा भविता वा देहवन्न** भूयः **पुनः।**

आनन्दगिरिकृतव्याख्या

**तदेव साधयितुं 'न जायते म्रियते वा विपश्चिदि'त्यादिमन्त्रान्तरमवतारयति—** कथमिति। **सर्वविक्रियाराहित्यप्रदर्शनेन हेतुं विशदयन् मन्त्रमेव पठति—** न जायत इति। **जन्ममरणविक्रियाद्वयप्रतिषेधं साधयति—** नायमिति। **अयमात्मा भूत्वा नाभविता, न वाऽभूत्वा भूयो भवितेति योजना। न केवलं विक्रियाद्वयमेवात्र निषिध्यते, किन्तु सर्वमेव विक्रियाजातमित्याह—** अज इति। **वाच्यमर्थमुक्त्वा विवक्षितमर्थमाह—** जनिलक्षणेति। **विकल्पार्थत्वं व्यावर्तयति—** वेति। **निष्पन्नमर्थं निर्दिशति—** नेत्यादिना। **सम्बन्धमेवाभिनयति—** न कदाचिदिति। **अन्त्यविक्रियाऽभावे हेतुत्वेन 'नाय'मित्यादि व्याचष्टे—** यस्मादिति। **उक्तमेव व्यनक्ति—** यो हीति। **आत्मनि तु भूत्वा पुनर्भवनाभावान्नास्ति मृत्युरित्यर्थः। आत्मनो जन्माभावेऽपि हेतुरिहैव विवक्षित इत्याह—** वाशब्दादिति। **अभूत्वेति छेदः। देहवदिति**

भाष्यार्कप्रकाशः

च॥१९॥

**कथमिव** - कथं वा, केन प्रकारेणेत्यर्थः; आत्मा अविक्रियः इति शङ्कायाम्— 'न जायते' इति द्वितीयमन्त्रः उपन्यस्तो भगवता। अयमात्मा कदाचिदपि न जायते, कदाचिदपि न म्रियते, कदाचिदपि भूत्वा भूयो नाभविता, कदाचिदपि नभूत्वा भविता च न, शरीरे हन्यमानेऽपि कदाचिदपि न हन्यते। तस्मादयमजो नित्यः शाश्वतः पुराणश्च भवतीत्यन्वयः। भूत्वा अभविता, भूत्वा भवितेति च द्वेधा पदविभागः। जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यतीति च षड् भावविकाराः। यथा देहो जायते, जन्मानन्तरं देहोऽस्तीति सत्तां प्रतिपद्यते, ततः प्रवृद्धो भवति, ततो विपरिणामं वलितपलितत्वादिकं भजते, ततोऽपक्षीयते कार्श्यं प्रपद्यते, ततो नश्यति अदर्शनं प्रपद्यते। इतीमे विकाराः आत्मनि न सन्तीति अविक्रियः आत्मेति फलितार्थः।

तत्र 'न जायते' इत्यनेन जन्मलक्षणः प्रथमो विकारः आत्मनि निषिध्यत इत्याह— **न जायत इति।** न म्रियते - न नश्यतीति हृदि कृत्वाऽऽह— **अन्त्येति।** विनाशो ह्यन्त्यः षष्ठो विकारः। ननु कस्मादात्मा न म्रियते, अत आह— **यस्मादिति।** 'यस्मादयमात्मा **भूत्वा** भवनक्रियामनुभूय पश्चाद् **भूयः** पुनः **अभविता** अभावं गन्ता न, तस्मान्न म्रियते' इत्यन्वयः। **भवनक्रियामनुभूय** जनिक्रियाश्रयत्वं प्रपद्येत्यर्थः। जातःसन्निति यावत्। **अभावं** नाशं **न गन्ता** न प्राप्स्यति। उक्तमर्थं व्यतिरेकमुखेन द्रढयति— **यो हि [इति]**। यो देहादिः पदार्थः भूत्वा न भवति नाशं प्रपद्यते, स म्रियत इत्युच्यते लोके। जनैरिति शेषः। शशश्रृङ्गादिवारणार्थं **भूत्वेति**। शशश्रृङ्ग-गगनकुसुमादीनि अभूत्वैवादर्शनं प्रपद्यन्त इति, न तेषां मृतत्वव्यवहार इति भावः।

ननु 'न जायते म्रियते वा कदाचिद्' इति प्रथमपादे श्रूयमाणस्यैकस्यैव नञः 'जायते, म्रियते' इति क्रियाद्वयेऽन्वयात्, 'नायं भूत्वाऽभविता भूयः' इत्यनेन द्वितीयपादस्य विवक्षितार्थसिद्धेश्च द्वितीयपादगतौ 'वा न भूयः' इत्यत्र '**वा न**'शब्दौ व्यर्थाविति शङ्कायामाह— **वाशब्दान्नशब्दाच्चेति।** अयमात्मा अभूत्वा **भूयः** पुनर्भविता च नेत्यन्वयः। तत्र व्यतिरेकदृष्टान्तमाह— **देहवदिति।** यथा

१. 'कथमिवाविक्रियः' इति रा. पा.।

**तस्मान्न जायते। यो ह्यभूत्वा भविता स जायत इत्युच्यते। नैवमात्मा। अतो न जायते। यस्मादेवं तस्मादजः, यस्मान्न म्रियते तस्मान्नित्यश्च। यद्यप्याद्यन्तयोर्विक्रिययोः प्रतिषेधे सर्वा विक्रियाः प्रतिषिद्धा भवन्ति, तथापि मध्यभाविनीनां विक्रियाणां [1]स्वशब्दैरेव प्रतिषेधः कर्तव्यः इति अनुक्तानामपि यौवनादिसमस्तविक्रियाणां प्रतिषेधो यथा स्यादित्याह—** शाश्वत इत्यादिना। **शाश्वत इत्यपक्षयलक्षणा विक्रिया प्रतिषिध्यते। शश्वद्भवः** शाश्वतः। **नापक्षीयते स्वरूपेण, निरवयवत्वात्। [2]निर्गुणत्वाच्च नापि गुणक्षयेणापक्षयः। अपक्षयविपरीताऽपि वृद्धिलक्षणा विक्रिया प्रतिषिध्यते—** पुराण इति। **यो ह्यवयवागमेनोपचीयते, स वर्धतेऽभिनव इति चोच्यते।** अयं **त्वात्मा निरवयवत्वात्**

आनन्दगिरिकृतव्याख्या

**व्यतिरेकोदाहरणम्। उक्तमेवार्थं साधयति—** यो हीति। [3]**जन्माभावे तत्पूर्विकाऽस्तित्वविक्रियाऽपि नात्मनोऽस्तीत्याह—** यस्मादिति। **प्राणवियोगादात्मनो [प्राणवियोगात्मनो] मृतेरभावे सावशेषनाशाभाववद् निरवशेषनाशाभावोऽपि सिध्यतीत्याह—**यस्मादिति। **ननु जन्मनाशयोर्निषेधे तदन्तर्गतानां विक्रियान्तराणामपि निषेधसिद्धेस्तन्निषेधार्थं न पृथक् प्रयतितव्यमिति? तत्राह—** यद्यपीति। स्वशब्दैः **मध्यवर्तिविक्रियानिषेधवाचकैरिति यावत्। आर्थिकेऽपि निषेधे निषेधस्य सिद्धतया शाब्दो निषेधो न पृथगर्थवानित्याशङ्क्याह—** अनुक्तानामिति। **नित्यशब्देन शाश्वतशब्दस्य पौनरुक्त्यं परिहरन् व्याकरोति—**शाश्वत इत्यादिना। **अपक्षयो हि स्वरूपेण वा स्याद् , गुणापचयतो वेति विकल्प्य क्रमेण दूषयति—** नेत्यादिना। **पुराणपदस्यागतार्थत्वं कथयति—** अपक्षयेति। **तदेव स्फुटयति—** यो हीति।

भाष्यार्कप्रकाशः

देहः उत्पत्तेः प्रागभूत्वा, अविद्यमानः सन्नित्यर्थः; पश्चाद् भविता **भावं** सत्तां प्रपत्स्यते, तद्वदित्यर्थः। फलितमाह— **तस्मादिति**। यस्मादभूत्वा न भविता तस्मादित्यर्थः। प्रागभावाभावादिति यावत्। उक्तमर्थं व्यतिरेकेण द्रढयति— **यो हीति**। यो घटादिः पदार्थः **अभूत्वा** प्रागभावं प्रपद्य **भविता** उत्पत्स्यते, स जायते इत्युच्यते। लोकैरिति शेषः। प्रकृतमाह— **नैवमिति**। **एवं** घटादिवदात्मा प्रागभावं प्रपद्य न भविता। अत आत्मा न जायते। ततः किमत आह—**यस्मादिति**। यस्मादेवं न जायते, तस्मादजः आत्मा, न जायते इत्यजः इति व्युत्पत्तेरिति भावः। एवं मूलस्थम् **अज**पदं व्याख्याय **नित्य**पदं व्याचष्टे— **यस्मादिति**। लोके मृतिशालिन एव वस्तुनः अनित्यत्वव्यवहारादिति भावः।

**यद्यपीति**। विचार्यमाणे सतीत्यर्थः। **आद्यन्तयोरिति**। जन्मनाशयोरित्यर्थः। **सर्वा इति**। सर्वासामस्तित्वादिविक्रियाणां जनिपूर्वकत्वान्नाशफलकत्वाच्चेति भावः। **शब्दैरेवेति**। न तु व्यङ्ग्यमर्यादयेत्येवकारार्थः। आर्थिकादपि निषेधान्निषेधसिद्धेः शाब्दो निषेधो व्यर्थ इत्याशङ्क्य, अर्थान्तरमाह— **अनुक्तानामपीति**। ननु मध्यभाविविक्रियामध्ये का विक्रिया **शाश्वत**पदेन प्रतिषिध्यत इत्यत्राह— **अपक्षयलक्षणेति**। कथमित्यतः तं शब्दं निर्वक्ति— **शश्वद्भव इति**। **शश्वत्** सर्वदैकरूपेण **भवति** विद्यत इति शाश्वतः इति। फलितार्थमाह— **नापक्षीयत इति**। लोके द्विविधोऽपक्षयः - स्वरूपकृतो गुणकृतश्च। यथा देहस्य वार्धक्ये स्वरूपकृतः, यथा चित्रपटस्य नीलपीतादिगुणक्षयकृतः। स द्विविधोऽप्यात्मनि नास्तीति सहेतुकमाह— **स्वरूपेणेति**। निरवयवत्वात् स्वरूपेण नापक्षीयते। निर्गुणत्वाच्च गुणक्षयेण [4]नाप्यपक्षीयते। आत्मेति कर्तुः शेषः। अयमिति वा। **पुराण**पदमवतारयति— **अपक्षयेति**। 'अपक्षयविपरीता वृद्धिलक्षणा विक्रिया पुराण इति पदेन प्रतिषिध्यते' इत्यन्वयः। कथम्? तत्राह— **यो हीति। अवयवागमेन** विद्यमानेभ्योऽवयवेभ्यो ऽन्येषामवयवानां मायिकानामागमेन हेतुना यः उपचीयते, सः वर्धते अभिनव इति चोच्यते, लोकैरिति शेषः। न च - वर्धत इत्येवोच्यते, न त्वभिनव इति - वाच्यम् ; देवदत्तः बाल्ये दृष्टं यज्ञदत्तं तारुण्ये दृष्ट्वा 'कोऽयमभिनव इव भाती'ति प्रत्येतीति लोकप्रसिद्धेः। पुराणपदं व्याचष्टे—**पुराऽपि नव एवेति**। यथेदानीं तथा पूर्वमप्यभिनव एवात्मा। ततश्च पूर्वापेक्षयेदानीं नवत्वाभावान्नास्य

१. 'शब्दैरेव' 'स्वशब्दैरेव तदर्थैः प्रतिषेधो वक्तव्यः' इति रा.पा.। २. 'नापि गुणक्षयेणापक्षयः, निर्गुणत्वात्' इति पा.। ३. न जायते, न म्रियते इति जन्ममरणाभावोक्तेः 'अजः' इत्यस्यास्तिताख्यभावविकारवारकतया, 'नित्यः' इत्यस्य निरवशेषनाशवारकतया च सार्थक्यमाह— जन्मेति। प्राणवियोगात्मकमरणे हि सावशेषनाशः प्रसिद्धः, तदभावे अर्थात् स एव निषिद्धो भवति। ४. अपिकारो भिन्नक्रमः- गुणक्षयेणापीति।

**वेदाविनाशिनं नित्यं य एनमजमव्ययम्।**
**कथं स पुरुषः पार्थ ! कं घातयति हन्ति कम्?॥२१॥**

[1]**पुराऽपि नव एवेति** पुराणो **न वर्धत इत्यर्थः। तथा** न हन्यते **न विपरिणम्यते** हन्यमाने **विपरिणम्यमानेऽपि शरीरे। हन्तिरत्र विपरिणामार्थो द्रष्टव्योऽपुनरुक्ततायै।** [2]**न विपरिणमते इत्यर्थः। अस्मिन् मन्त्रे षड् भावविकाराः लौकिकवस्तुविक्रियाः आत्मनि प्रतिषिध्यन्ते। सर्वप्रकारविक्रियारहितः आत्मेति वाक्यार्थः। यस्मादेवं तस्माद् उभौ तौ न विजानीतः इति पूर्वेण मन्त्रेणास्य सम्बन्धः**[3]**॥२०॥**

**'य एनं वेत्ति हन्तारम्' इत्यनेन मन्त्रेण हननक्रियायाः कर्ता कर्म च न भवतीति प्रतिज्ञाय, 'न जायते' इत्यनेनाविक्रियत्वं हेतुमुक्त्वा, प्रतिज्ञातार्थमुपसंहरति—** वेदाविनाशिनमिति। वेद **विजानाति** अविनाशिनम् **अन्त्य-**

आनन्दगिरिकृतव्याख्या

**'न म्रियते वा' इत्यनेन चतुर्थपादस्य पौनरुक्त्यमाशङ्क्य व्याचष्टे—** तथेत्यादिना। **ननु हिंसार्थो हन्तिः श्रूयते, तत् कथं विपरिणामो निषिध्यते? तत्राह—** हन्तिरिति। **हिंसार्थत्वसम्भवे किमित्यर्थान्तरं हन्तेरिष्यते? तत्राह—** अपुनरुक्तताया इति। **हिंसार्थत्वे मृतिनिषेधेन पौनरुक्त्यं स्यात्,** [4]**तन्निषेधार्थं विपरिणामार्थत्वमेष्टव्यमित्यर्थः। पूर्वावस्थात्यागेनावस्थान्तरापत्तिः** विपरिणामः, **तदर्थश्चेदत्र हन्तिरिष्यते, तदा निष्पन्नमर्थमाह—** नेति। **'न जायते' इत्यादिमन्त्रार्थमुपसंहरति—** अस्मिन्निति। **षण्णां विकाराणामात्मनि प्रतिषेधे फलितमाह—** सर्वेति। **आत्मनः सर्वविक्रियाराहित्येऽपि किमायातमित्याशङ्क्याह—** यस्मादिति॥२०॥

**पूर्वश्लोकार्थस्यैवोत्तरत्रापि प्रतिभानात् पौनरुक्त्यमाशङ्क्य वृत्तानुवादपूर्वकमुत्तरश्लोकमवतारयति—** य एनमित्यादिना। **कर्तृत्वाद्यभिमानविरोधाद्**[5] **अद्वैतकूटस्थात्मनिश्चयसामर्थ्यात् प्राप्तं विदुषः संन्यासं विद्यापरिपाकार्थमभ्यनुजानाति—** वेदेति। **पदद्वयस्य पूर्वमेव**

भाष्यार्कप्रकाशः

वृद्धिरिति भावः। तत्र हेतुमाह— **निरवयवत्वादिति।** निरवयवस्यात्मनः अवयवान्तरागमनप्रयुक्तवृद्धिर्न कथमपि स्यादिति भावः। एवं श्लोकस्य पादत्रयं व्याख्याय तुरीयं पादं व्याचष्टे— **न हन्यत इति।** हन्यत इत्यस्य म्रियत इत्यर्थवचनेन म्रियत इत्यनेन पुनरुक्तिः स्यादिति तद्दोषवारणार्थमाह— **न हन्यते न विपरिणम्यत इति।** धातूनामनेकार्थत्वादिति भावः। हन्तिरिति [6]'इक्श्तिपौ धातुनिर्देशा'विति कात्यायनस्मरणात् श्तिपा निर्देशः। **हन्तिरिति** हनधातुरित्यर्थः। **अपुनरुक्ततायै** पुनरुक्तिदोषाभावायेत्यर्थः। नात्र यकः कर्मविवक्षा, फलाभावात् प्रकृतासाङ्गत्याच्चेत्याह—**विपरिणमत इत्यर्थ इति।** [7]कर्तर्येवायं यक्, आर्षत्वादिति भावः। सर्वं सङ्कलय्याह— **अस्मिन् मन्त्र इति।**

**ननु** न जायते, न म्रियते, शाश्वतः, पुराणः, न हन्यते इति जन्मनाशापक्षयवृद्धिविपरिणामाः पञ्चैव विकाराः प्रतिषिद्धाः, न त्वस्तित्वमिति कथं षड्भावविकारप्रतिषेध इति चेत्, **मैवम्**, अयं भूत्वा नाभवितेत्यनेन तस्य प्रतिषिद्धत्वात्। भूत्वेत्यस्य भवनेनात्मनः सत्तां संपाद्येत्यर्थात्। अथवा - अभूत्वा न भवितेत्यनेन तत्प्रतिषेधः। पूर्वमभूत्वा पश्चाद् भवनेनात्मनः सत्तां न गन्तेत्यर्थात्। 'षड्भावविकारा वस्तुविक्रियाः' इत्यस्य षड्भावविकारा इति लोके प्रसिद्धा वस्तुविक्रिया इत्यर्थः। **यस्मादेवमिति।** यस्मादेवमविक्रिय आत्मेत्यर्थः॥२०॥

**य एन**मित्यादिना वेदाविनाशिनमिति श्लोकमवतारयति। न भवतीत्यस्य आत्मेति कर्तुःशेषः। यः एनमजमव्ययमविनाशिनं

---

१. 'पुराणं कस्मात्? पुरा नवं भवति'(३-१९-२४) इति निरुक्तम्। २. 'न विपरिणम्यते' इति पा.। ३. इमौ मन्त्रौ कठोपनिषदि व्युत्क्रमेण पठितौ। उभयोः हेतुहेतुमद्भावेनैकवाक्यता तु समाना। ४. पौनरुक्त्यवारणार्थमित्यर्थः। ५. अद्वैतात्मज्ञानस्येति शेषः। ६. 'इक्श्तिपौ धातुनिर्देशे' इति पठ्यते। ७. 'हन्यते' 'हन्यमाने' इति कर्तरि प्रयोगः। तत्रार्षत्वाद् व्यत्ययेन यक्। एतत्सूचनाय भाष्ये 'विपरिणमते' इति यकं विना प्रयोगः। पूर्वं 'विपरिणम्यते' इत्यादिप्रयोगस्तु यथाश्रुतानुरूप्याय।

**भावविकाररहितं** नित्यं **विपरिणामरहितं,** यो **वेदेति सम्बन्धः;** एनं **पूर्वेण मन्त्रेणोक्तलक्षणम्** [१]अजं **जन्मरहितम्** अव्ययम् **अपक्षयरहितम्;** कथं **केन प्रकारेण** स **विद्वान्** पुरुषोऽ**धिकृतः** [२]हन्ति **हननक्रियां करोति?** [३]**कथं वा** घातयति **हन्तारं प्रयोजयति? न कथञ्चित् कञ्चिद् हन्ति, न कथञ्चित् कञ्चिद् घातयतीति उभयत्राक्षेप**[४] **एवार्थः, प्रश्नासम्भवात्।** [५]**हेत्वर्थस्य च तुल्यत्वाद् विदुषः सर्वकर्मप्रतिषेध एव प्रकरणार्थोऽभिप्रेतो भगवतः। हन्तेस्त्वाक्षेप उदाहरणार्थत्वेन कथितः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

उत्तरत्र प्रतिवचनादर्शनात् नात्र प्रश्नो घटत इत्याह—**प्रश्नासम्भवादिति।** हेत्वर्थस्याविक्रियत्वस्य सर्वकर्मप्रतिषेधे समानत्वाद् यदि सर्वकर्मप्रतिषेधोऽभिप्रेतः, तर्ह्यङ्गन्त्यर्थः[तर्हि हन्त्यर्थः] एव किमित्याक्षिप्त इत्याशङ्क्याह— **हन्तेस्त्वाक्षेप-स्येति [क्षेप इति]।**

आनन्दगिरिकृतव्याख्या

**पौनरुक्त्यपरिहारेऽपि** [६]**प्रकारान्तरेणापौनरुक्त्यमाह—** अविनाशिनमित्यादिना। **प्रश्नेऽपि संभवति किमिति नञुल्लेखेन व्याख्यायते? तत्राह—** उभयत्रेति। **उत्तरत्र प्रतिवचनादर्शनान्नात्र प्रश्नः सम्भवतीत्यर्थः। विवक्षितं प्रकरणार्थं निगमयति—** हेत्वर्थस्येति। **अविक्रियत्वं** हेत्वर्थः; **तस्य, विदुषः सर्वकर्मनिषेधे समानत्वादिति यावत्। यदि विदुषः सर्वकर्मनिषेधोऽभिमतस्तर्हि किमिति हन्त्यर्थ एवाक्षिप्यते? तत्राह—** हन्तेरिति।

भाष्यार्कप्रकाशः

नित्यं वेद , हे पार्थ! स पुरुषः कथं कं घातयति, कं हन्तीत्यन्वयः। अविनाशिनित्यपदयोः पौनरुक्त्यं वारयति— **अन्त्यभावविकारेति।** अन्त्यो यो भावविकारः वस्तुविक्रिया, नाश इत्यर्थः; तेन रहितम्। नाशविपरिणामरूपविकारद्वयवारणार्थं पदद्वयमित्यर्थः। **उपजनो** जन्म। अत्र **अविनाशिनित्याजाव्यय**शब्दैः नाशविपरिणामजन्मापक्षयरूपाश्चत्वारो विकाराः प्रतिषिद्धाः। द्योतयन्ति चामी अस्तित्व-वृद्धिविकारद्वयप्रतिषेधमपि, जन्मपूर्वकत्वादस्तित्वस्य, क्षयफलकत्वाद् वृद्धेः, वृद्धिं विना क्षयायोगात्। **अधिकृत इति।** ज्ञाने इति शेषः। हन्तीत्यत्र प्रकृतिप्रत्ययार्थावाह— **हननेति।** हनधातोर्हननक्रियाऽर्थः। तदुत्तरवर्तितिप्रत्ययस्य कर्तृत्वमर्थः। 'कं हन्ती'त्यस्य किंकर्मक-हननक्रियाश्रय इत्यर्थः। घातयतीति हन्तेर्हेतुमति णिच्। घ्नन्तं प्रेरयति घातयति। इदमेवाह— **हन्तारं प्रयोजयतीति।** 'कं घातयति हन्ति क'मित्यस्य फलितार्थमाह— **न कंचिदिति।** कथमेतदर्थलाभ इत्यत्राह— **उभयत्रापीति।** ननु किंशब्दस्य प्रश्नार्थत्वं हेत्वर्थत्वं वा अस्तु, किमित्याक्षेपार्थत्वम्? अत आह— **प्रश्नेति।** आत्मविदः यत्किञ्चित्प्राणिकर्मकहननाश्रयत्वाभावात् प्रश्नासम्भवः। [७]हेत्वर्थस्य प्रश्नार्थेन तुल्यत्वादसम्भवः, केन हेतुना हन्तीत्यस्य हेतुविषयकप्रश्नवाचित्वाद् वाक्यस्येति भावः। नन्वात्मविदो हननक्रियाश्रयत्वं

१. 'अजमव्ययम् उपजनापक्षयरहितम्' इति रा.पा.। २. 'कं हन्ति' इति पा.। ३. 'कं वा कथं घातयति' इति पा.। ४. 'उभयत्रापि आक्षेपार्थ एव किंशब्दः, प्रश्ना-र्थासम्भवात्' इति पा.। ५. 'हेत्वर्थस्य चाविक्रियत्वस्य तुल्यत्वाद्' इति पा.। ६. 'नित्यस्य अनाशिनः'(भ.गी.२.१८) इति पदद्वयव्याख्यानावसरे द्विविधनाश-संबन्धवारकतया पौनरुक्त्यपरिहारः कृतः, इदानीं तु प्रकारान्तरेण क्रियते। ७. अनेन 'हेत्वर्थस्य च तुल्यत्वादि'ति भाष्यं किंशब्दस्य हेत्वर्थत्वेऽपि प्रश्नार्थत्वेन तुल्यत्वादिति व्याख्यातं भवति। अत्र च 'हेत्वर्थस्य च तुल्यत्वादि'त्यत्र वाक्यसमाप्तिः। 'विदुषः सर्वकर्मप्रतिषेधः' इत्यत्र न तस्यान्वयः।

**वस्तुतस्तु** 'हेत्वर्थस्य च तुल्यत्वादि'ति विदुषः सर्वकर्मप्रतिषेधः अभिप्रेतः इत्यत्रान्वेति। तथा चायमर्थः— आत्मनः हननक्रियाकर्तृत्वाभावे यो हेतुः- अविक्रियत्वम् , तस्य क्रियासामान्यकर्तृत्वाभावव्याप्यत्वात् , तत्सामर्थ्यादेव क्रियासामान्यकर्तृत्वाभावः सिध्यति। हेतुसाधारण्ये हेतुमतो विधेयस्यापि साधारण्येन सिद्धिः मीमांसकसंमता। अत एव आतिथ्याप्रकरणगते 'चतुर्गृहीतान्याज्यानि भवन्ति, न ह्यत्रानूयाजान् यक्ष्यन् भवति' इत्यत्र हिशब्दोक्तहेतुबलात् , यत्र यत्रानूयाजाभावः- आतिथ्यातोऽन्यत्रापि, तत्रापि चतुर्थचतुर्गृहीताभाव इति उक्तवचनादेवेष्यते। द्र.भाट्टदी.४.१.१७। अयमेवानन्दगिर्यादिसंमतो भाष्यार्थः। इममेवार्थं स्वयं भगवान् भाष्यकारः स्पष्टीकरिष्यति—'अत्र चात्मनो हननक्रियायाः कर्तृत्वं, कर्मत्वं, हेतुकर्तृत्वं चाज्ञानकृतं दर्शितम्। तच्च सर्वक्रियास्वपि समानं कर्तृत्वादेरविद्याकृतत्वम् , अविक्रियत्वादात्मनः। ....तदेतदविशेषेण विदुषः सर्वक्रियासु कर्तृत्वं हेतुकर्तृत्वं च प्रतिषेधति भगवान् वासुदेवो विदुषः कर्माधिकारा-भावप्रदर्शनार्थम् — 'वेदाविनाशिनं...कथं स पुरुषः' इत्यादिना।'(भ.गी.२.२१) इति।

**विदुषः कं कर्मासम्भवे हेतुविशेषं पश्यन् कर्माण्याक्षिपति भगवान् - 'कथं स पुरुषः' इति? [१]ननूक्त एवात्मनः अविक्रियत्वं सर्वकर्मासम्भवहेतुः[२] कारणविशेषः। [३]सत्यमुक्तः, न तु स कारणविशेषः, अन्यत्वाद् विदुषोऽविक्रियादात्मनः इति। न ह्यविक्रियं स्थाणुं विदितवतः कर्म न सम्भवतीति चेत्? न ; विदुषः आत्मत्वात्। न देहादिसंघातस्य विद्वत्ता। अतः पारिशेष्याद् असंहतः आत्मा विद्वानविक्रियः इति तस्य विदुषः कर्मासम्भवादाक्षेपो युक्तः— 'कथं स**

अनुभूतिस्वरूपाचार्यटिप्पणम्

हेतुमाक्षेप्तुं पृच्छति— **विदुषः कमिति।** जीवब्रह्मणोर्विरुद्धधर्माक्रान्तत्वाद् दहनतुहिनवद् भेदं मत्वाऽऽक्षिपति— **सत्यमुक्तमित्यादिना।** 'अयमात्मा ब्रह्म' इति श्रुतेरभेदमुपादाय परिहरति— **न ; विदुष इति।** किञ्च देहादिसंघातधर्मविशिष्टस्यैव विरुद्धधर्माक्रान्तत्वम् , तस्य च ब्रह्मवित्त्वं न सम्भवति, कल्पितत्वात्। अतो व्यधिकरणासिद्धो हेतुरित्यभिप्रेत्याह— **न देहादिसंघातस्येति।** ननु यद्यविक्रियब्रह्मस्वरूपतया विदुषः कर्मासम्भवः, तर्हि तस्य विद्वत्ता वा कथं घटते?

आनन्दगिरिकृतव्याख्या

**उक्तं हेतुमाक्षेप्तुं पृच्छति—** विदुष इति। **अभिप्रायमप्रतिपद्यमानो हेतुविशेषं पूर्वोक्तं स्मारयति—** नन्विति। **उक्तमङ्गीकृत्याक्षिपति—** सत्यमिति। **विदुषो विज्ञानात्मनो ब्रह्मणश्च वेद्यस्य विरुद्धधर्मत्वेन दहनतुहिनवद् भिन्नत्वाद् , विदुषः सर्वकर्मत्यागे नासौ कारणविशेषः स्यादित्याह—** अन्यत्वादिति। **अविक्रियादिति च्छेदः। तथापि कूटस्थमविक्रियं ब्रह्म प्रतिपद्यमानस्य कुतो विक्रिया सम्भवेत्? ब्रह्मप्रतिपत्तिविरोधादित्याशङ्क्याह—** न हीति। **'अयमात्मा ब्रह्म' इत्यादिश्रुत्या समाधत्ते—** न ; विदुष इति। **किञ्च विद्वत्ता [४]विशिष्टस्य वा केवलस्य वा? नाद्यः, विशिष्टस्य विद्वत्तायां विशेषणस्यापि तत्प्रसङ्गात्। न च विशेषणीभूतसंघातस्याचेतनत्वाद् विद्वत्ता युक्तेत्याह—** न देहादीति। **द्वितीये तु जीवब्रह्मविभागासिद्धिरित्याह—** असंहत इति। [५]**किञ्च प्रामाणिकविरुद्धधर्मवत्त्वस्यासिद्धत्वात् , प्रातिभासिकस्य च बिम्बप्रतिबिम्बयोरनैकान्त्याद् भेदानुमानायोगाज्जीवब्रह्मणोरभेदसिद्धिरित्यभिप्रेत्य फलितमाह—** इति तस्येति।

भाष्यार्कप्रकाशः

माऽस्तु नाम, तदतिरिक्तस्तुतिनिन्दादिक्रियाश्रयत्वमस्ति किमित्यत आह— **विदुषः सर्वकर्मप्रतिषेध इति।**

विदुषः सर्वकर्मासम्भवे को हेतुर्भगवताऽभिप्रेत इति पृच्छति— **विदुष इति। पश्यन्** जानन्नित्यर्थः। उत्तरयति— **ननूक्तमिति।** आत्मनः कर्मासम्भवकारणविशेषः अविक्रियत्वम् **उक्तं ननु** उक्तं खलु 'य एनम्' इति श्लोकेनेति भावः। तत्र शङ्कते— **सत्यमित्यादिना।** सत्यमविक्रियत्वमुक्तम् , **तु** किं तु , **सः** - विधेयप्राधान्यात्पुंस्त्वम् - अविक्रियत्वरूपः कारणविशेषः **न** विदुषो नास्ति। तत्र हेतुमाह— **अन्यत्वादिति।** अविक्रियादात्मनः इति निर्धारणे[६] पञ्चमी। विदुषः **अन्यत्वाद्** भिन्नत्वात्। अविक्रियत्वमात्मन उक्तम् , न तु विदुषः; विद्वांस्तु भिन्न एवात्मन इति कृत्वा कथं विदुषः सर्वकर्मासम्भवे आत्मगतमविक्रियत्वं हेतुः स्यात्? न कथमपीत्यर्थः। तदेव प्रपञ्चयति— **न हीति।** अविक्रियात्मतत्त्वविदः पुरुषस्य यदि कर्मासम्भवस्तर्हि अविक्रियस्थाणुविदोऽपि कर्मासम्भव एवेत्यर्थः। परिहरति— **नेति।** हेतुमाह— **विदुष आत्मत्वादिति।** य आत्मानं वेत्ति स विद्वानात्मैव, यः स्थाणुं वेत्ति न स स्थाणुः। अतो न दृष्टान्तदार्ष्टान्तिकयोः साम्यमिति भावः। ननु देहादिसंघातस्यास्तु विद्वत्तेत्यत आह— **नेति।** देहादिसमूहस्य जडत्वान्न विद्वत्तेति भावः। फलितमाह— **अत इति।** देहादिसंघातस्य विद्वत्ताऽसम्भवादित्यर्थः। **पारिशेष्यादिति।** उक्तातिरिक्तः शेषः; स एव परिशेषः; तस्य भावः पारिशेष्यं; तस्मात्। आत्मानात्मानौ द्वावेव लोके पदार्थौ। तत्रानात्मनोऽविद्वत्तायां सिद्धायामात्मैव परिशिष्ट इति पारिशेष्यादात्मैव विद्वानित्यर्थः। **असंहत इति** एकत्वादसङ्गत्वाच्चान्यैरमिलित इत्यर्थः। **तस्य विदुष इति।** आत्मनो विदुष इत्यर्थः।

१. 'ननूक्तमात्मनः' इति रा.पा.। २. 'सर्वकर्मासंभवकारणविशेषः' इति पा.। ३. 'सत्यमुक्तम्' इति पा.। ४. देहादिसंघातविशिष्टस्येत्यर्थः। ५. विद्वान् ब्रह्मणो भिन्नः, तद्विरुद्धधर्मवत्त्वात् , दहनात् तुहिनवदित्यत्र प्रामाणिकं विरुद्धधर्मवत्त्वं हेतुः, प्रातिभासिकं वा? इति विकल्प्याद्ये स्वरूपासिद्धिः, द्वितीये बिम्बप्रतिबिम्बयोः वस्तुतो भेदाभावेऽपि आभिमुख्यादिरूपविरुद्धधर्मवत्त्वाद् व्यभिचार इत्याह— किञ्चेति। ६. 'पञ्चमी विभक्ते' (पा.सू.२.३.४२) इति सूत्रेणेति शेषः।

**पुरुषः' इति। यथा बुद्ध्याद्याहृतस्य शब्दाद्यर्थस्य[1] अविक्रिय एव सन् बुद्धिवृत्त्यविवेकविज्ञानेन अविद्यया उपलब्धा आत्मा कल्प्यते, एवमेव आत्मानात्मविवेकविज्ञानेन बुद्धिवृत्त्या विद्ययाऽसत्यरूपयैव परमार्थतोऽविक्रिय एवात्मा विद्वानुच्यते।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

इत्याशङ्क्याह— **यथा बुद्ध्याद्याहृतस्येति।** अदृष्टेन्द्रियादिसहकृतमन्तःकरणं गवाक्षनिःसृतप्रदीपप्रभावद् दीर्घप्रभाकारेण विषयपर्यन्तं परिणमते। सा **बुद्धिवृत्ति**रित्युच्यते। तस्यां प्रतिबिम्बितं चैतन्यं तया व्यञ्जकबुद्धिवृत्त्याऽविवेकाद् विषयज्ञानमुच्यते। तेनात्मा उपलब्धा कल्प्यते अविद्या[अविद्यया] मिथ्यासम्बन्धेन यथा, तथाऽऽध्यासिकसम्बन्धेनैव ब्रह्मैक्यव्यञ्जकबुद्धिवृत्त्या विद्वान् उच्यते। न हि मिथ्यासम्बन्धेनाविक्रियत्वं व्याहन्यते इति भावः। 'अहं ब्रह्मास्मि' इति बुद्धिवृत्तेरपि यावदुपाधित्व[धिसत्त्व]मेव, न मोक्षानुविधायित्वमिति कथयति— **असत्यरूपयेति।**

ननु अस्तु अविक्रियस्यैव मिथ्यैव विद्यावत्त्वम् , तथापि तस्य कर्माधिकारनिवृत्तेः कस्य कर्माणि विधीयन्ते

आनन्दगिरिकृतव्याख्या

**[2]नन्वविक्रियब्रह्मस्वरूपतया सर्वकर्मासम्भवे विदुषो विद्वत्ताऽपि कथं सम्भवति? न हि ब्रह्मणोऽविक्रियस्य विद्यालक्षणा विक्रिया [3]स्वीक्रियामर्हति, तत्राह—** यथेति। **अदृष्टेन्द्रियादिसहकृतमन्तःकरणं प्रदीपप्रभावद् विषयपर्यन्तं परिणतं बुद्धिवृत्तिरुच्यते। तत्र प्रतिबिम्बितं चैतन्यम् अभिव्यञ्जकबुद्धिवृत्त्यविवेकाद् विषयज्ञानमिति व्यवह्रियते। तेन आत्मोपलब्धा कल्प्यते। तच्चाविद्याप्रयुक्तमिथ्यासम्बन्धनिबन्धनम्। तथैवाध्यासिकसम्बन्धेन [4]ब्रह्मात्मैक्याभिव्यञ्जकवाक्योत्थबुद्धिवृत्तिद्वारा विद्वानात्मा व्यपदिश्यते। न च मिथ्यासम्बन्धेन पारमार्थिकाविक्रियत्वविहतिरस्तीत्यर्थः। 'अहं ब्रह्म' इति बुद्धिवृत्तेर्मोक्षावस्थायामपि भावाद् आत्मनः सविशेषत्वमाशङ्क्य , तस्याः यावदुपाधिसत्त्वमेवेत्याह—** असत्येति।

**ननु कूटस्थस्यात्मनो मिथ्याविद्यावत्त्वेऽपि तस्य कर्माधिकारनिवृत्तौ कस्य कर्माणि विधीयन्ते? न हि निरधिकाराणां तेषां**

भाष्यार्कप्रकाशः

आक्षेपस्वरूपमाह— **कथं स पुरुष इति।** कथं स पुरुषः पार्थ! कं घातयति, हन्ति कमितीत्यर्थः। ननु अविक्रिये आत्मनि विद्वत्तारूपस्य विकारस्य कथं सङ्गतिः? अत आह— **यथेति। शब्दाद्यर्थस्य** शब्दस्पर्शरूपरसगन्धात्मकविषयपञ्चकस्य, तदाश्रयघटादिद्रव्यस्य च **बुद्ध्याद्याहृतस्य** इन्द्रियसहकृतान्तःकरणेन गृहीतस्य सतः - चक्षुरादीन्द्रियद्वारा निर्गतान्तःकरणवृत्तौ घटादिविषयाकारेण परिणम्य 'घटोऽयम्' इत्यादिविषयज्ञानं जनयन्त्यां सत्यामित्यर्थः, - अविक्रिय एव सन् आत्मा **बुद्धिवृत्त्यविवेकविज्ञानेन** बुद्धिवृत्तेरात्मनश्च तादात्म्याध्यासप्रयुक्तेन विवेकज्ञानाभावेन हेतुना, अविद्यया **उपलब्धा** प्रमाता कल्प्यते। अविद्यया यद् बुद्धिवृत्त्यविवेकविज्ञानं तेनेति वाऽन्वयः। अस्मिन् मते कल्प्यत इत्यस्य लोकैरिति कर्तुःशेषः। काकाक्षिन्यायेनाविद्यया कल्प्यत इत्येव वा। अविक्रियस्याप्यात्मनः अविद्याकृताद् विषयाकारपरिणतबुद्धिवृत्तितादात्म्याध्यासाद् यथा प्रमातृत्वव्यवहारः कल्पित इति पर्यवसन्नार्थः। एवमेव **असत्यरूपया**, अविद्यामयत्वादिति भावः, **आत्मानात्मविवेकविज्ञानेन** 'अहं ब्रह्मास्मी'त्यादिरूपेणेत्यर्थः[5], **बुद्धिवृत्त्या विद्यया** तत्तादात्म्याध्यासादित्यर्थः; परमार्थतोऽविक्रिय एवात्मा विद्वानित्युच्यते। महावाक्यार्थ[महावाक्य]जन्याहम्ब्रह्मास्मीत्याद्याकारकबुद्धिवृत्तितादात्म्याध्यासाद् अविक्रियस्याप्यात्मनस्तथा विद्वत्त्वव्यवहारः कल्पित इति परमार्थः। 'अहं ब्रह्म' इत्याद्याकारकबुद्धिवृत्तेः विद्यारूपत्वात् तत्तादात्म्याध्यासेनात्मनः प्राप्तं विद्वत्त्वम् , यथा विषयग्राहिबुद्धिवृत्तितादात्म्याध्यासाद् विषयग्राहित्वलक्षणं प्रमातृत्वम् , तद्वत्। अनेन

१. शब्दाद्यर्थस्य उपलब्धा इत्यन्वयः। २ 'नन्वविक्रियस्य' इति पा.। ३. 'स्वक्रिया भवितुमर्हति', 'विक्रिया भवितुमर्हति' इति च पा.। ४. ब्रह्मात्मैक्याभिव्यञ्जकत्वं तद्विषयकाज्ञाननिवर्तकत्वम्। वाक्योत्थत्वं महावाक्यजन्यत्वम्। ५. आत्मानात्मनोः विवेकः भेदः, तदुपलक्षितस्यात्मनो विज्ञानेनेत्यर्थः। तथा च 'अहं ब्रह्मास्मी'त्याकारेणेति फलितम्। तस्य बुद्धिवृत्त्या सामानाधिकरण्येनान्वयः।

**विदुषः कर्मासम्भववचनाद् यानि कर्माणि शास्त्रेण विधीयन्ते तान्यविदुषो विहितानीति भगवतो निश्चयो ऽवगम्यते। ननु विद्याऽप्यविदुष एव विधीयते, विदितविद्यस्य पिष्टपेषणवद् विद्याविधानानर्थक्यात् ; तत्राविदुषः कर्माणि विधीयन्ते, न विदुष इति विशेषो नोपपद्यते चेत्? न ; अनुष्ठेयस्य भावाभावविशेषोपपत्तेः। अग्निहोत्रादि-विध्यर्थज्ञानोत्तरकालम् अग्निहोत्रादिकर्म अनेकसाधनोपसंहारपूर्वकम्[1], 'कर्ताऽहम्' 'मम कर्तव्यम्' इत्येवम्प्रकारक-विज्ञानवतोऽविदुषो यथाऽनुष्ठेयं भवति, न तु तथा 'न जायते' इत्याद्यात्मस्वरूप[2]विध्यर्थज्ञानोत्तरकालभावि**

अनुभूतिस्वरूपाचार्यटिप्पणम्

इत्याशङ्क्याह— **विदुष इति।** अविदुषः कर्माणीति विशेषमाक्षिपति— **ननु विद्याऽपीति।** अनुष्ठानकालेऽपि तत्त्वापरिज्ञानस्य विद्यमानत्वाद् युक्तं विशेषणमित्याह— **न ; अनुष्ठेयस्येति।** देहमात्रात्मदर्शिनो न पारलौकिककर्मण्यधिकारः, किन्तु देहव्यतिरिक्तात्मदर्शिनः। ततः आत्मविदश्चेत् किञ्चिदनुष्ठेयं न सम्भवति, [3]ज्ञानान्तरं च नोपपद्यते चेत् , कथं तर्हि तं प्रति

आनन्दगिरिकृतव्याख्या

**विधिरित्याशङ्क्याह—** विदुष इति। **कर्माणि अविदुषो विहितानीति विशेषमाक्षिपति—** नन्विति। **कर्मविधानमविदुषः, विदुषश्च विद्याविधानमिति विभागे का हानिरित्याशङ्क्याह—** विदितेति। **विद्याया** विदितत्वं **लब्धत्वम्। कर्मविधिरविदुषः,** विदुषो **विद्याविधिरिति विभागासम्भवे फलितमाह—** तत्रेति। **धर्मज्ञानानन्तरमनुष्ठेयस्य भावात् , ब्रह्मज्ञानोत्तरकालं च तदभावात् , ब्रह्मज्ञानहीनस्यैव कर्मविधिरिति समाधत्ते—** न ; अनुष्ठेयस्येति। **विशेषोपपत्तिमेव प्रपञ्चयति—** अग्निहोत्रादीति। **ननु देहादिव्यतिरिक्तात्मज्ञानं विना पारलौकिकेषु कर्मसु प्रवृत्तेरनुपपत्तेः, तथाविधज्ञानवता कर्मानुष्ठेयमिति चेत्? तत्राह—** कर्ताऽहमिति। **आत्मनि 'कर्ता भोक्ते'त्येवं विज्ञानवत्त्वेऽपि [4]ब्रह्मज्ञानविहीनत्वेनाविदुषोऽनुष्ठेयं कर्मेत्यर्थः। देहादिव्यतिरेकज्ञानवद् ब्रह्मज्ञानमपि ज्ञानत्वाविशेषात् कर्मप्रवृत्तौ उपकरिष्यतीत्याशङ्क्याह—**न त्विति। **अनुष्ठेयविरोधित्वादविक्रियात्मज्ञानस्येति शेषः। ननु ब्रह्मात्मैकत्वज्ञानादुत्तरकालमपि 'कर्ताऽहम्'**

भाष्यार्कप्रकाशः

चाध्यासिकेन बुद्धिवृत्तिसम्बन्धेन न कोऽप्यात्मनोऽस्ति विकार इति भावः।

ननु विदुषः सर्वकर्मासम्भवे 'ज्योतिष्टोमेन यजेत' इत्यादिविधीनां का गतिः? इत्यत आह— **विदुष इत्यादि।** ननु कर्माण्येवाविदुषो विहितानीति कोऽयं नियमः? 'आत्मा वा अरे द्रष्टव्यः' इत्यादिना विद्याऽप्यविदुष एव विधीयत इति पृच्छति कश्चित्— **नन्वित्यादिना। तत्रेति।** एवं सतीत्यर्थः। 'यानि कर्माणि शास्त्रेण विधीयन्ते तान्यविदुष एव, न तु विदुष इति **विशेषो** नियमो नोपपद्यते' इत्यन्वयः। या तु विद्या शास्त्रेण विहिता सा विदुष एवेति नियमासिद्धेरिति भावः। यदि विद्या विदुष एव विहितेति नियमः सिध्येत् , तर्हि कर्माण्यविदुष एवेति नियमः सिध्यतु , न तु तदस्तीति तत्त्वम्। न च - विद्याकर्मद्वयमपि अविदुष एव विहितं, न तु विदुषः कोऽपि विधिरिति - वाच्यम् ; 'ज्ञानयोगेन सांख्यानाम्' इति विदुषो विद्याविधेर्वक्ष्यमाणत्वात्। परिहरति— **नेति।** अनुष्ठेयस्य भावाभावाभ्यामविदुषः कर्माणि, न तु विदुषः इति विशेषस्योपपत्तेरित्यर्थः। तदेव प्रपञ्चयति— **अग्निहोत्रेति।** अग्निहोत्रादिविधि-वाक्यार्थज्ञानानन्तरम् अनेकसाधनोपसंहारपूर्वकमग्निहोत्रादि कर्मानुष्ठेयम्। **साधनानि** उपकरणानि। **उपसंहारः** सम्पादनम्। कस्या-नुष्ठेयम्? अत आह— **कर्तेति।** 'अहं कर्ता, ममेदं कर्तव्यम्' इत्येवम्प्रकारकं विज्ञानं यस्यास्ति तस्याविदुषः। यथा अविदुषः कर्मानुष्ठेयं भवति, **तथा,** विदुषः इति शेषः; 'न जायते' इत्याद्यात्मस्वरूपविध्यर्थज्ञानोत्तरकालभावि किञ्चिदनुष्ठेयं कर्म न भवतीत्यन्वयः। आत्मस्वरूपप्रतिपादकवाक्यार्थः इह **आत्मस्वरूपविध्यर्थः** इत्युक्तः। न ह्यात्मस्वरूपे कश्चिद् विधिरस्ति। यद्वा 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादयः **आत्मस्वरूपविधयः** 'न जायते' इत्यादिनोक्तं यदात्मस्वरूपं तस्य विधयः 'श्रोतव्यः' इत्यादयः,

---

१. 'पूर्वकमनुष्ठेयम्' इति पा.। २. अज्ञातज्ञापकत्वेन आत्मस्वरूपबोधकवाक्ये विधित्वव्यवहारः। ३. 'ज्ञानान्तरं च' इति पा.। ४. ब्रह्मज्ञानवत्त्वमेवेह विद्वत्त्व-मभिप्रेतम् , अतस्तद्विहीनः कर्माधिकृतः कर्मानुष्ठानौपयिकज्ञानवानपि अविद्वानिति भावः।

**किंचिदनुष्ठेयं भवति। किन्तु 'नाहं कर्ता, नाहं भोक्ता' इत्याद्यात्मैकत्वाकर्तृत्वादिविषयज्ञानादन्यन्नोत्पद्यत इत्येष विशेष उपपद्यते। यः पुनः 'कर्ताऽहम्' इति वेत्त्यात्मानम् , तस्य 'ममेदं कर्तव्यम्' इत्यवश्यम्भाविनी[1] बुद्धिः स्यात् , तदपेक्षया [2]सोऽधिक्रियत इति तं प्रति कर्माणि [3]सम्भवन्ति। स चाविद्वान् , 'उभौ तौ न विजानीतः' इति वचनात्। विशेषितस्य च विदुषः कर्माक्षेपवचनाच्च - 'कथं स पुरुषः' इति। तस्माद् विशेषितस्याविक्रियात्मदर्शिनो विदुषः, मुमुक्षोश्च सर्वकर्मसंन्यास एवाधिकारः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

कर्माणि विधीयन्त इत्याशङ्क्याह— **यः पुनः कर्ताऽहमिति।** तर्ह्यात्मवित्त्वाविशेषात् कर्माधिकारिविलक्षणस्यापि ब्रह्मविदः कर्माधिकारो भवत्वित्याशङ्क्याह— **विशेषितस्य चेति।**

आनन्दगिरिकृतव्याख्या

**इत्यादिज्ञानोत्पत्तौ कर्मविधिः सावकाशः स्यादिति? नेत्याह—** नाहमिति। **कारणाभावादिति शेषः। कर्तृत्वादिज्ञानम्** अन्यदित्युक्तम्। **अनुष्ठानाननुष्ठानयोः उक्तविशेषादविदुषोऽनुष्ठानं, विदुषो नेत्युपसंहरति—** इत्येष इति। **नन्वात्मविदो न चेदनुष्ठेयं किञ्चिदस्ति, कथं तर्हि 'विद्वान् यजेत' इत्यादिशास्त्रात् तं प्रति कर्माणि विधीयन्ते? तत्राह—** यः पुनरिति। **आत्मनि कर्तृत्वादिज्ञानापेक्षया कर्मसु अधिकृतत्वज्ञाने, तथाविधं पुरुषं प्रति कर्माणि विधीयन्ते। स च प्राचीनवचनाद् अविद्वानेवेति निश्चीयते। न खल्वकर्तृत्वादिज्ञानवतः तद्विपरीतकर्तृत्वादिज्ञानद्वारा कर्मसु प्रवृत्तिरित्यर्थः। कर्मासम्भवे ब्रह्मविदो हेत्वन्तरमाह—**विशेषितस्येति। **'वेदाविनाशिनम्' इत्यादिनेति शेषः। यद्यपि विदुषो नास्ति कर्म, तथापि विविदिषोः स्यादित्याशङ्क्याह—** तस्मादिति। **विद्यया विरुद्धत्वाद् , इष्यमाणमोक्षप्रतिपक्षत्वाच्च कर्मणामित्यर्थः।**

भाष्यार्कप्रकाशः

तदर्थज्ञानोत्तरकालभावीत्यर्थः। 'नाहं कर्ता, नाहं भोक्ते'त्यादिना शास्त्रेण आत्मैकत्वाकर्तृत्वज्ञानादन्यन्नोत्पद्यते। 'नाहं कर्ता, नाहं भोक्ते'त्यादिशास्त्रमात्मन एकत्वमकर्तृत्वं च बोधयति, न त्वन्यदित्यर्थः। **एष विशेष इति।** 'कर्ताऽहं, ममेदं कर्तव्यम्' इति विज्ञानवतो विदुषः शास्त्रेण 'वसन्ते वसन्ते ज्योतिषा यजेते'त्यादिना कर्माणि विहितानि। विदुषस्तु 'कामः कर्ता नाहं कर्ते'त्यादिना शास्त्रेण आत्मैकत्वाकर्तृत्वज्ञानमात्रमुत्पन्नमित्ययं विशेष उपपद्यत इत्यर्थः। **एतेन** विदितविद्यस्य पिष्टपेषणवद् विद्याविधानानर्थक्यमिति प्रश्नो **दत्तोत्तरः**; विद्याविधानाभावात्।

**ननु** विदुषः 'नाहं कर्ता' इत्यादिना आत्मैकत्वाकर्तृत्वज्ञानमात्रमुत्पन्नम् इतीदमयुक्तम् ; तज्ज्ञानोत्पत्तेः प्राक् तस्य विद्वत्ताया एवाभावादिति चेत् , **सत्यम्** ; अत एवात्माकर्तृत्वज्ञानान्नान्यदुत्पद्यते इत्युक्तम् ; तज्ज्ञानं तु प्रागेव सिद्धमिति। न च तर्हि विद्या व्यर्थेति वाच्यम् ; आत्मविदः कर्मसु नाधिकारः; किन्तु स्वस्वरूपदर्शन एवेत्येतदर्थं विद्याया आवश्यकत्वात्। **वस्तुतस्तु** विद्या नाम आत्मानात्मविवेकज्ञानम् ।'अहमात्मा, देहादिरयमनात्मा' इत्येवंप्रकारकं विवेकविज्ञानमेव विद्या। अस्यां हि 'कर्ताऽहम्' इत्यविद्वान् नाधिक्रियते, विरोधात्। किन्तु 'न जायते' इत्याद्यात्मस्वरूपं विद्वानेवाधिक्रियते, आत्मानात्मस्वरूपज्ञानपूर्वकत्वाद् आत्मानात्मविवेकविज्ञानस्य। तस्मादात्मानात्मस्वरूपज्ञानिन एव विदुषः आत्मानात्मविवेकविज्ञानरूपविद्यायामधिकार इति न पिष्टपेषणात्मकदोष इति।

अविदुष एव कर्मस्वधिकार इतीममंशं प्रपञ्चयति— **यः पुनरिति। यः पुनः** यस्तु आत्मानं 'कर्ताऽहम्' इति **वेत्ति** जानाति। अवश्यं भवतीत्य**वश्यम्भावि**, तस्मिन् यज्ञादिकर्मणीत्यर्थः। अनुष्ठेयमिति बुद्धिः **अनुष्ठेयबुद्धिः। तदपेक्षया** तद्बुद्ध्यपेक्षया। **अधिकृत इति।** कर्मस्विति शेषः। **कर्माणीति।** विहितानीति शेषः। **विशेषितस्येति।** अविक्रियात्मज्ञानवतः इत्यर्थः। 'वेदाविनाशिनं नित्यम्' इति

१. 'अवश्यंभाविनि अनुष्ठेयबुद्धिः' इति रा.पा.। २. 'सोऽधिकृतः' इति रा.पा.। ३. 'संभवन्ति' इति रा. पाठे नास्ति।

**अत एव भगवान् नारायणः सांख्यान् विदुषः, अविदुषश्च कर्मिणः प्रविभज्य द्वे निष्ठे ग्राहयति— 'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्'(भ.गी.३.३) इति। तथा च पुत्रायाह भगवान् व्यासो 'द्वाविमावथ पन्थानौ'(म.भा.शां. २४०.६) इत्यादि। तथा च— 'क्रियापथश्चैव पुरस्तात् पश्चात् संन्यासश्च' इति। एतमेव विभागं [1]पुनः पुनर्दर्शयिष्यति भगवान्— अतत्त्वविद् अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते, तत्त्ववित्तु 'नाहं करोमि' (द्र.भ.गी. ३.२७) इति। तथा च 'सर्वकर्माणि मनसा संन्यस्याऽऽस्ते' (भ.गी. ५.१३) इत्यादि।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

उक्तेऽर्थे भगवद्वाक्यमाह— **अत एव भगवानिति। पुरस्तादिति।** अशुद्धसत्त्वस्य कर्मसु वैराग्योत्पत्तेः पूर्वं कर्ममार्गो विहितः, पश्चात् संन्यासश्चेत्यर्थः।

ज्ञानक्रियाशक्तिद्वयाधारः आत्मा। अतो नाविक्रियात्मज्ञानं सम्भवतीति मीमांसकंमन्यमानः[मीमांसकम्मन्याः]

आनन्दगिरिकृतव्याख्या

**यद्यपि मुमुक्षोराश्रमकर्माण्यपेक्षितानि, तथापि विद्यातत्फलाभ्यामविरुद्धान्येव तान्यभ्युपगतानि, अन्यथा विविदिषासंन्यास-विधिविरोधादित्यभिप्रेत्य, उक्तेऽर्थे भगवतोऽनुमतिमाह—** अत एवेति। **विदुषो विविदिषोश्च संन्यासेऽधिकारः, अविदुषस्तु कर्मणीति विभागस्येष्टत्वादित्यर्थः। अधिकारिभेदेन निष्ठाद्वयं भगवता** वेदव्यासेनापि **दर्शितमित्याह—** तथा चेति। **अध्ययनविधिना स्वाध्यायपाठे त्रैवर्णिकस्य प्रवृत्त्यनन्तरं तत्र क्रियामार्गो ज्ञानमार्गश्चेति द्वौ मार्गावधिकारिभेदेनावेदितावित्यर्थः। आदिशब्दात् 'यत्र वेदाः प्रतिष्ठिताः' [2]इत्यादि गृह्यते। उक्तयोः मार्गयोस्तुल्यतां परिहर्तुमुदाहरणान्तरमाह—** तथेति। **बुद्धिशुद्धिद्वारा कर्मतत्फलयोर्वैराग्योदयात्पूर्वं कर्ममार्गो विहितः, विरक्तस्य पुनः संन्यासपूर्वको ज्ञानमार्गो दर्शितः, [3]स चेतरस्मादतिशयशालीति श्रुतमित्यर्थः। उक्ते विभागे पुनरपि वाक्य-शेषानुकूल्यमादर्शयति—** एतमेवेति। **अहङ्कारविमूढात्मेत्यस्य व्याख्यानम्—** अतत्त्वविदिति। **'तत्त्ववित्तु' इति श्लोकमवतार्य तात्पर्यार्थं संगृह्णाति—** नाहमिति। **पूर्वेण क्रियापदेन**[4] इति**शब्दः सम्बध्यते। विरक्तमधिकृत्य वाक्यान्तरं पठति—** तथा चेति। आदि**शब्दस्तस्यैव श्लोकस्य शेषसंग्रहार्थः।**

भाष्यार्कप्रकाशः

विविच्य दर्शितस्येति यावत्। 'कथं स पुरुषः' इति कर्माक्षेपवचनाच्चेत्यन्वयः। उपसंहरति— **तस्मादिति**। अविक्रियात्मस्वरूपं विदुषः सर्वकर्मासम्भवादित्यर्थः। विदुषोऽपि प्रारब्धवशाल्लोकानुग्रहार्थं वा कर्मसु प्रवृत्तिः स्याज्जनकवद् वासुदेववच्चेत्याशङ्क्याह— **मुमुक्षोश्चे-ति।** मुक्तत्वाज्जनकादीनां न कुत्राप्यधिकारः इति भावः। अथवा अविदुषोऽपि मुमुक्षोः संन्यास एवाधिकारः, विद्यासंन्यासो विविदिषा-संन्यासश्चेति संन्यासद्वयदर्शनात्। गृहस्थस्य कर्मसु प्रवृत्तस्य दारापत्यादिकुटुम्बपोषणालसस्य वेदान्तश्रवणमननाद्यसम्भवात् , तं विना आत्मज्ञानालाभाच्चात्मानं जिज्ञासुः पुरुषः संसाराद्भीतः तीव्रमुमुक्षुः सद्य एव प्रव्रजेत् ,'यदहरेव विरजेत् तदहरेव प्रव्रजेदि'ति श्रुतेः; इतीममर्थं दर्शयितुं **मुमुक्षोश्चे**त्युक्तम्। **एतेना**विदुषोऽप्यमुमुक्षोरेव कर्मस्वधिकार इति **सिद्धम्।**

स्वोक्तार्थे भगवन्तं वासुदेवमेव प्रमाणयति— **अत एव भगवानिति। अत एव** विदुषां ज्ञाने, अविदुषां कर्मणि चाधिकार-सत्त्वादेवेत्यर्थः। विदुषः कर्मण्यधिकाराभावादेवेति वा। **प्रदर्शयिष्यतीति**। तृतीयाध्याये—'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते॥ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः। गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते॥' इति श्लोकद्वयेनेति भावः। तत्र हि 'तत्त्ववित्तु' इति तुशब्दात् 'प्रकृते'रिति श्लोकोऽतत्त्वविद्विषयः। 'अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते' इत्यनेन तत्त्वविद् नाहं करोमीति मन्यते इति सिद्धम्। तदेतदाह— **अतत्त्वविदित्यादिना।** तथा पञ्चमाध्याये— 'सर्वकर्माणि मनसा

१. 'पुनः प्रदर्शयिष्यति' इति रा. पा.। २. अत्रादिपदेन 'प्रवृत्तिलक्षणो धर्मो निवृत्तिश्च विभावितः' इति गृह्यते। ३. 'तयोः संन्यास एवातिरेचयति' इति श्रुति-शेषस्यार्थः अत्र विवृतः। ४. 'मन्यते' इत्यनेनेत्यर्थः।

**तत्र केचित् पण्डितम्मन्याः वदन्ति— 'जन्मादिषड्भावविक्रियारहितोऽविक्रियोऽकर्तैकोऽहमात्मा' इति न कस्यचिज्ज्ञानमुत्पद्यते, यस्मिन् सति सर्वकर्मसंन्यासः उपदिश्यते इति। तन्न। 'न जायते'(भ.गी.२.२०) इत्यादि-शास्त्रोपदेशानर्थक्यप्रसङ्गात्। यथा च शास्त्रोपदेशसामर्थ्याद् धर्माधर्मास्तित्वविज्ञानं, कर्तुश्च देहान्तरसम्बन्धविज्ञानम्**

अनुभूतिस्वरूपाचार्यटिप्पणम्

चोदयन्तीत्याह— **तत्र केचिदित्यादिना।** किं विषयाभावादविक्रियात्मज्ञानाभावः, किं वा प्रमाणकारणाभावात्? प्रथमं प्रत्याह— **तन्न, [न] जायत इत्यादि।** शास्त्रस्य प्रमाणभूतस्य प्रधानार्थक्यव्यवहार[आनर्थक्य]प्रसङ्गाद् नाविक्रियात्माभावः शक्यते वक्तुमित्यर्थः। नापि द्वितीयः पक्ष इत्याह—**यथा चेत्यादिना।** यज्ज्ञानं तन्मनःसंयोगजन्यम्। 'यतो वाचो निवर्तन्ते,

आनन्दगिरिकृतव्याख्या

**अविक्रियात्मज्ञानात् कर्मसंन्यासे दर्शिते मीमांसकमतमुत्थापयति—** तत्रेति। **आत्मनो ज्ञानक्रियाशक्त्याधारत्वेनाविक्रियत्वा-भावाद् अविक्रियात्मज्ञानं संन्यासकारणीभूतं न सम्भवतीत्यर्थः। यथोक्तज्ञानाभावो विषयाभावाद् वा मानाभावाद् वेति विकल्प्याद्यं दूषयति—** नेत्यादिना। **न तावदविक्रियात्माभावः, 'न जायते म्रियते वे'त्यादिशास्त्रस्याप्तवाक्यतया प्रमाणस्य अन्तरेण कारणमानर्थ-क्यायोगादित्यर्थः। द्वितीयं प्रत्याह—** यथा चेति। **पारलौकिककर्मविधिसामर्थ्यसिद्धं विज्ञानमुदाहरति—** कर्तुश्चेति। **कर्मकाण्डादज्ञाते**

भाष्यार्कप्रकाशः

संन्यस्यास्ते सुखं वशी। नवद्वारे पुरे देहे नैव कुर्वन्न कारयन्॥' इति वक्ष्यतीत्याह— **तथा चेति।**

**तत्रेति।** विदुषो नास्ति कर्माधिकार इत्यत्रेत्यर्थः। पण्डितमात्मानं मन्यन्ते **पण्डितम्मन्याः**; लोकाः एतान् पण्डितान् न मन्यन्ते; किन्तु स्वयमेव स्वानित्यर्थः। अपण्डिताः इति यावत्।

**न जायत इति।** यदि 'न जायते' इत्यादिना शास्त्रेण अविक्रिय आत्मैक इति ज्ञानं श्रोतुर्नोत्पद्यते, तर्हि किमर्थं तच्छास्त्रम्?

**ननु** संन्यासात्प्राग् वेदान्तशास्त्रश्रवणे नास्त्यधिकारः, 'शान्तो दान्त उपरतः' इति श्रुतिगतोपरतशब्दस्य संन्यासार्थ-वचनात्[१]। गीताशास्त्रं च वेदान्तशास्त्रमेव, 'भगवद्गीतासूपनिषत्सु' इत्युक्तत्वात् ; 'न जायते' इत्यादिना विदितात्मतत्त्वस्यैव सर्वकर्म-संन्यासाधिकारं ब्रूते भगवान् ; अतः परस्पराश्रयदोषः; संन्यासे सति 'न जायते' इति शास्त्रोपदेशः; 'न जायते' इति शास्त्रोपदेशे सति संन्यासः - इति चेत्? **मैवम्** ; गृहस्थानामपि जनकादीनां वेदान्तश्रवणदर्शनात्। श्रुतिस्तु वेदान्तश्रवणे संन्यासिनां मुख्याधिकारं ब्रूते। तेनाश्रमान्तराणामस्ति गौणोऽधिकारः। **यद्वा** संन्यासिनां वेदान्तश्रवणादिष्वेवाधिकारो, न त्वन्यत्रेति नियमार्थमुपरतपदम्। **अथवा** उपरतिर्न संन्यासः, किन्तु चित्तविक्षेपाभावः; स हि गृहस्थस्याप्युपपद्यते, जनकवत्। **वस्तुतस्तु** अधीतसाङ्गस्वाध्यायस्य शमदमादिसंस्कृतस्य वेदान्तशास्त्रेऽधिकारः इति 'अथातो ब्रह्मजिज्ञासा' इति सूत्रेण प्रतिपादितम्। स्वाध्यायो वेदः, तस्मिन्नेव सन्त्युपनिषदः इति कृत्वा ब्रह्मचर्याश्रमे एव वेदान्तश्रवणं सम्पद्यते द्विजस्य। व्याकरणादिना च वेदान्तानामर्थमापाततो जानाति। ततश्च 'अविक्रियः आत्मा' इति विज्ञानं तस्योपपद्यते; तदेवापातब्रह्मात्मज्ञानं द्रढयितुं यावद्ब्रह्मात्मसाक्षात्कारं वेदान्तश्रवणमननादि-कस्य कर्तव्यत्वाद् आश्रमान्तरेषु कर्मबाहुल्येन तदसम्भवान्मुमुक्षुरयं विद्वान् संन्यस्य ब्रह्मनिष्ठगुरूपसत्तिं कृत्वा वेदान्तश्रवणमननादिकं करोतीत्येष घण्टापथः। अतो न संन्यासवेदान्तश्रवणयोरन्योन्याश्रयदोषः; आपाततो वेदान्तश्रवणानन्तरं प्राधान्येन वेदान्तश्रवण-मित्युक्तत्वात्। अत एव वेदान्तश्रवणे गृहस्थानामप्यधिकारः इति, संन्यासिनामेवाधिकारः इति च पक्षद्वयं प्रवृत्तम् - वेदान्त-श्रवणस्यापातत्वप्राधान्याभ्याम्। **ये तु** महानुभावाः प्रारब्धसुकृतातिशयवशात् सकृद्वेदान्तश्रवणादेव ब्रह्मात्मापरोक्ष्यं लभन्ते शुकजनकवामदेवादिवत् , तेषां तु न क्वाप्यधिकारः, आत्मन्यधिकारासम्भवादिति **बोध्यम्।**

ननु शास्त्रादपि कथमप्रसिद्धार्थाभ्युपगमः? अत आह— **यथा चेति।** धर्माधर्मौ तत्प्रयुक्तदेवनारकशरीरविशेषपरिग्रहौ च

१. संन्यासरूपार्थबोधकत्वादित्यर्थः।

**उत्पद्यते, तथा शास्त्रात् तस्यैवात्मनोऽविक्रियत्वाकर्तृत्वैकत्वादिविज्ञानं कस्मान्नोत्पद्यत इति प्रष्टव्यास्ते। करणागोचरत्वादिति चेत्? न ; 'मनसैवानुद्रष्टव्यम्' (बृ.उ.४.४.१९) इति श्रुतेः। [1]शास्त्राचार्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने करणम्। तथा च तदधिगमायानुमाने आगमे च सति ज्ञानं नोत्पद्यत इति साहसमात्रमेतत्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

अप्राप्य मनसा सहे'त्यादिश्रुतेः नात्मा मनोगोचरः। तस्मान्नास्त्येवात्मज्ञाने साधनमित्याह— **करणागोचरत्वादिति।** श्रुत्यन्तरावष्टम्भेन परिहरति— [**न, मनसैवेति।**] तत्त्वमस्यादिवाक्योत्थमनोवृत्तौ अभिव्यक्तं ब्रह्मात्मैकत्वं सविकल्पकव्यवहारगोचरं सम्भवतीति मनोगोचरत्वमुपचर्यत इत्यर्थः। या मनसोऽविषयत्वप्रतिपादिका श्रुतिः सा पुनरसंस्कृतमत्यनवगाह्यत्वं दर्शयतीत्यभिप्रेत्याह— **शास्त्राचार्येत्यादिना।** ननु लौकिकव्युत्पत्त्यनुसारेण वेदार्थप्रतिपत्तिर्वक्तव्या। लोके च कार्यान्वितेऽर्थे सकलपदा(र्था)नां शक्तिसंवेदनान्न सिद्धार्थपरः आगमोऽस्ति। नापि तदनुग्राहकः कश्चित् तर्कोऽस्ति। ततः 'सोऽरोदीदि'त्यादिवाक्यवद् वेदान्ताः न स्वार्थपरा इति अविक्रियात्मज्ञानाभावः इत्याशङ्क्याह— **तथा तदधिगमायेति।** वृद्धव्यवहारे अन्वितमात्रधीजनने पदानां शक्तिरवगम्यते, न कार्यान्विते, गौरवात् , [2]प्रयोजकद्वैविध्यापाताच्च। अतो वेदेऽ

आनन्दगिरिकृतव्याख्या

**धर्मादौ विज्ञानोत्पत्तिवद् ज्ञानकाण्डादज्ञाते ब्रह्मात्मनि विज्ञानोत्पत्तिरविरुद्धा, प्रमाणत्वाविशेषादित्यर्थः। ज्ञानस्य मनःसंयोगजन्यत्वाद्, आत्मनश्च श्रुत्या मनोगोचरत्वनिरासाद् नात्मज्ञाने साधनमस्तीति शङ्कते—** करणेति। **श्रुतिमाश्रित्य परिहरति—** न ; मनसेति। **तत्त्वमस्यादिवाक्योत्थमनोवृत्त्यैव शास्त्राचार्योपदेशमनुसृत्य द्रष्टव्यं तत्त्वमिति श्रूयते। स्वरूपेण स्वप्रकाशमपि ब्रह्मात्मवस्तु वाक्योत्थबुद्धिवृत्त्यभिव्यक्तं सविकल्पकव्यवहारालम्बनं भवतीति मनोगोचरत्वोपचारादसिद्धं करणागोचरत्वमित्यर्थः। कथं तर्हि ब्रह्मात्मनो मनोविषयत्वनिषेधश्रुतिः? इत्याशङ्क्य असंस्कृतमनोवृत्त्यविषयत्वविषया सेति मन्वानः सन्नाह—** शास्त्रेति। **सत्यपि श्रुत्यादौ [3]तदनुग्राहकाभावाद् नास्माकम् अविक्रियात्मज्ञानमुत्पत्तुमर्हतीत्याशङ्क्याह—** तथेति। **तस्य अविक्रियस्यात्मनः अधिगत्यर्थम्— विमतो**

भाष्यार्कप्रकाशः

प्रत्यक्षादिप्रमाणाविषयत्वेनाप्रसिद्धावपि यथा आगमप्रामाण्यादास्तिकैरभ्युपगम्येते, तद्वदात्माविक्रियत्वादिकमपीत्यर्थः। ननु धर्माधर्मस्वर्गनरकादीनां प्रत्यक्षाविषयत्वेऽपि मनोवाग्विषयत्वमस्ति, मनसा इदमीदृशमिति सङ्कल्पयितुं , वाचा वक्तुं च सुशकत्वात्। अतः तत्र शास्त्रं प्रमाणं भवतु नाम, 'यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह' इति श्रुत्या वाङ्मनसागोचरे ब्रह्मणि कथं शास्त्रस्य प्रामाण्यमिति पृच्छति— **करणागोचरत्वादिति।** करणानां विषयग्रहणसाधनानां मनआदीनामगोचरत्वाद्धेतोः शास्त्रोपदेशादात्माकर्तृत्वादिविज्ञानं नोत्पद्यत इति पूर्वपक्षार्थः। परिहरति सिद्धान्ती— **नेति।** हेतुमाह— **मनसैवेति।** 'अप्राप्य मनसा सह' इति श्रुतिविरोधं परिहरति— **शास्त्रेति।** असंस्कृतेन मनसा सहेति तच्छ्रुत्यर्थान्न दोष इति भावः।

**ननु** आत्मनः संस्कृतमनोवेद्यत्वाभ्युपगमे स्वतःसिद्धत्वं नित्यापरोक्षत्वं च हीयेतेति चेत्? **मैवम्** ; नित्यापरोक्षः स्वतःसिद्धोऽप्यात्मा अविद्यया परोक्ष इव, साध्य इव च प्रतिभाति; तदविद्यानिरसने तु संस्कृतं मनः करणम् , तादृशमनोवृत्त्या 'अहं ब्रह्म' इत्याकारिकया विद्यया नष्टायामविद्यायामविक्रिय आत्मा स्वयंप्रभः स्वयं स्फुरतीति। **ननु** आत्मनः अकर्तृत्वान्मनसः करणत्वेन कर्तृत्वाभावाच्च कथमत्र मनोव्यापारसिद्धिः, कर्त्रधीनो हि करणव्यापार इति चेत्? **उच्यते**— अस्ति बुद्ध्यवच्छिन्नचैतन्यलक्षणः अविद्याकल्पितः प्रमाताऽत्र कर्ता; स चात्मानं मनसा वेत्ति – 'नाहमवच्छिन्नः, किन्तु परिपूर्णोऽविक्रियः आत्मैव, ज्ञानघनेऽसङ्गे मय्यात्मनि कालत्रयेऽप्यविद्यायास्तत्कार्यबुद्ध्यादीनां वा वृत्त्ययोगाद्' इति।

**तदधिगमायेति।** आत्मनोऽविक्रियत्वैकत्वादिज्ञानाय **अनुमाने** 'आत्मा अविक्रियः, निरवयवत्वाद् , व्यतिरेकेण घटादिवद्'

१. 'शास्त्राचार्योपदेशजनितशम' इति पा.। २. इतरपदानां कार्यान्वितस्वार्थे शक्तिः, कार्यपदस्य तु अन्वितमात्रे इति द्वैविध्यादित्यर्थः। ३. तदनुग्राहकम् अनुमानम्।

**ज्ञानं चोत्पद्यमानं तद्विपरीतमज्ञानम् अवश्यं बाधत इत्यभ्युपगन्तव्यम्। तच्चाज्ञानं दर्शितम् - 'हन्ताऽहम्, हतोऽस्मीत्युभौ तौ न विजानीतः' इति। अत्र चात्मनो हननक्रियायाः कर्तृत्वं, कर्मत्वं, हेतुकर्तृत्वं चाज्ञानकृतं दर्शितम्। तच्च सर्वक्रियास्वपि समानं कर्तृत्वादेरविद्याकृतत्वम्, अविक्रियत्वादात्मनः। विक्रियावान् हि कर्ताऽऽत्मनः**

अनुभूतिस्वरूपाचार्यटिप्पणम्

प्युपक्रमोपसंहारैकरूप्यादिषड्विधतात्पर्यलिङ्गगम्याविकार्यद्वितीयब्रह्मप्रमितिरिति तात्पर्यविशिष्टागमोऽस्ति। तदनुग्राहकं चानुमानं विद्यते— विमतं विकारजातं नात्मधर्मः, विकारत्वात्, दृश्यत्वाद्वा, सम्प्रतिपन्नवत्। तस्मिंश्च पुष्कलकारणे विद्यमाने सम्यग्ज्ञानं न जायत इति साहसमात्रमेव हि।

ननु अध्ययनविध्युपात्तवेदवाक्यप्रसूतज्ञानं सप्रयोजनार्थे प्रमाणं वक्तव्यम्। प्रयोजनञ्च प्रवृत्तिनिवृत्तिसाध्यं, न सिद्ध-वस्तुज्ञानमात्रात् सम्भवतीत्याशङ्क्याह— **ज्ञानं चोत्पद्यमानमिति।** यथा रज्जुतत्त्वज्ञानात् तदज्ञाननिवृत्त्या तज्जभ्रमनिवृत्तिः, तथा आत्माज्ञाननिवृत्त्या तज्जप्रमातृत्वादिभ्रमसंसारभयनिवृत्तिः दृष्टमेव ज्ञानफलम्। प्रवृत्तिनिवृत्तिसाध्यफलमेव फलमिति नियमो नास्ति। ज्ञानाच्चाज्ञाननिवृत्तिरवश्यमभ्युपगन्तव्या। अन्यथा जीवनस्याप्यसम्भवादित्यर्थः। ननु अज्ञानं नाम न भावरूपमस्ति, प्रमाणाभावात्। किन्तु ज्ञानप्रागभाव एव। तन्निवृत्तिरेव ज्ञानं, न निवर्तकम्। ततः कथमनर्थकारणाज्ञान-प्रहाणं ज्ञानस्य दृष्टं फलमुच्यत इत्याशङ्क्याह— **तच्चाज्ञानमिति।** ननु भगवता वा कथमभावातिरिक्तमज्ञानं दर्शितमित्या-शङ्क्याह— **अत्र चात्मन इति।** विमतमज्ञानं नाभावः, उपादानत्वात्, मृद्वदिति भावः। ननु हननक्रियायाः प्रतिषिद्धत्वात् तत्कर्तृत्वं भवतु अज्ञानमूलम्; न विहितक्रियायाः कर्तृत्वमित्याशङ्क्याह— **तच्च सर्वक्रियास्वपीति।** न तावदात्मगतं कर्तृत्वमात्मोपादानकम्, तस्याविक्रियत्वात्। नापि निरुपादानकम्, भावकार्यस्य सोपादानत्वनियमात्। नापि कार्यकरण-

आनन्दगिरिकृतव्याख्या

**विकारो नात्मधर्मः, विकारत्वाद्, उभयाभिमतविकारवदित्यनुमाने, पूर्वोक्तश्रुतिस्मृतिरूपागमे च सत्येव, तस्मिन्[1] नोत्पद्यते ज्ञानमिति वचः साहसमात्रम्, सत्येव माने मेयं न भातीतिवदित्यर्थः।**

**ननु यथोक्तं ज्ञानमुत्पन्नमपि हानायोपादानाय वा न भवतीति कुतोऽस्य फलवत्त्वम्? तत्राह—** ज्ञानं चेति। अवश्यमिति। **प्रकाशप्रवृत्तेस्तमोनिवृत्तिव्यतिरेकेणानुपपत्तिवद् आत्माज्ञाननिवृत्तिमन्तरेणात्मज्ञानोत्पत्तेरनुपपत्तेरित्यर्थः। नन्वज्ञानस्य ज्ञानप्रागभाव-त्वात् तन्निवृत्तिरेव ज्ञानं[2], न तु तन्निवर्तकमिति? तत्राह—** तच्चेति। **कथं पुनर्भगवताऽपि ज्ञानाभावातिरिक्तमज्ञानं दर्शितमित्याशङ्क्याह—** अत्र चेति। **विमतं ज्ञानाभावो न भवति, उपादानत्वान्मृदादिवदिति भावः। ननु हननक्रियायाः 'न हिंस्यादि'ति निषिद्धत्वात् तत्कर्तृ-त्वादेरज्ञानकृतत्वेऽपि विहितक्रियाकर्तृत्वादेर्न तथात्वमिति? नेत्याह—** तच्चेति। **न तावदात्मनि कर्तृत्वादि नित्यम्, अमुक्तिप्रसङ्गात्। न चानित्यमपि निरुपादानम्, भावकार्यस्योपादाननियमात्। न चानात्मा तदुपादानम्, आत्मनि तत्प्रतिभानात्। न चात्मैव तदुपादानम्, कूटस्थस्य तस्याविद्यां विना तदयोगादित्याह—** अविक्रियत्वादिति। **कर्तृत्वाभावेऽपि कारयितृत्वं स्यादित्याशङ्क्याह—** विक्रियावानिति। **आत्मनि कर्तृत्वादिप्रतिभानस्यानाद्यनिर्वाच्यमज्ञानमुपादानम्; तन्निवृत्तिश्च तत्त्वज्ञानादित्युक्तम्। इदानीं कर्तृत्वकारयितृत्वयोरविद्या-**

भाष्यार्कप्रकाशः

इत्याद्यनुमाने सति, **आगमे** 'न जायते' इत्यादिशास्त्रे च सति ज्ञानं नोत्पद्यते इत्येतत् साहसमेव। सति कारणे कुतः कार्यानुदय इति भावः।

**ज्ञानं चेति।** [ज्ञानम्] 'अविक्रिय एकोऽकर्ता आत्मा' इत्येवंरूपम्। अज्ञानं 'कर्ताऽहं भिन्नोऽहं भोक्ताऽहम्' इत्येवंरूपम्। **सर्वक्रियासु** गमनादिसमस्तक्रियासु। सर्वक्रियास्वपि आत्मनः कर्तृत्वादेरविद्याकृतत्वरूपं **तत्** पूर्वोक्तं समानमित्यन्वयः। यद्वा **तत्**

१. तस्मिन् = अविक्रिये आत्मनि विषये। २. प्रागभावनिवृत्तेः प्रतियोगिरूपत्वाङ्गीकारादिति भावः।

**कर्मभूतमन्यं प्रयोजयति - 'कुरु' इति। तदेतदविशेषेण विदुषः सर्वक्रियासु कर्तृत्वं हेतुकर्तृत्वं च प्रतिषेधति भगवान् वासुदेवो विदुषः कर्माधिकाराभावप्रदर्शनार्थम् — 'वेदाविनाशिनं...कथं स पुरुषः' इत्यादिना। क्व पुनर्विदुषोऽधिकार इत्येतदुक्तं पूर्वमेव 'ज्ञानयोगेन सांख्यानाम्' (भ.गी.३.३) इति। तथा च सर्वकर्मसंन्यासं वक्ष्यति— 'सर्वकर्माणि मनसा'(भ.गी.५.१३) इत्यादिना।**

**ननु मनसेति वचनान्न वाचिकानां कायिकानां च संन्यास इति चेत् ? न ; सर्वकर्माणीति विशेषितत्वात्। मानसानामेव सर्वकर्मणामिति चेत् ? न ; मनोव्यापारपूर्वकत्वाद् वाक्कायव्यापाराणां मनोव्यापाराभावे तदनुपपत्तेः। शास्त्रीयाणां वाक्कायकर्मणां कारणानि मानसानि कर्माणि वर्जयित्वाऽन्यानि सर्वकर्माणि मनसा [1]संन्यस्येदिति चेत्? न; 'नैव कुर्वन् न कारयन्' इति विशेषणात्। सर्वकर्मसंन्यासोऽयं भगवतोक्तो मरिष्यतः, न जीवत इति चेत् ? न ;**

अनुभूतिस्वरूपाचार्यटिप्पणम्

संघातोपादानकम् , तथा सति आत्मगतत्वेन प्रतिभासासम्भवात् , [2]सतः उपादानत्वेनाभ्रमत्वप्रसङ्गाच्च। अतः परिशेषाद् आत्मगतकर्तृत्वादिभ्रमस्य उपादानमनाद्यनिर्वाच्यमज्ञानं सिद्धम्। तन्निवृत्तिश्च सम्यग्ज्ञानफलमिति। प्रासङ्गिकं विहाय प्रकृतमिदानीमनुसंदधाति— **तदेतदित्यादिना।** यस्मादविदुष एव कर्तृत्वं तस्मादेतद् विदुषः प्रतिषेधति भगवानिति संबन्धः।

आनन्दगिरिकृतव्याख्या

**कृतत्वे भगवतोऽनुमतिं दर्शयति—** तदेतदिति। **विदुषो यदि कर्माधिकाराभावो भगवतोऽभिमतः, तर्हि कुत्र तस्य जीवतोऽधिकारः स्यादिति पृच्छति—** क्व पुनरिति। **ज्ञाननिष्ठायामित्युक्तं स्मारयति—** उक्तमिति। **तदङ्गभूते सर्वकर्मसंन्यासे च तस्याधिकारोऽस्तीत्याह—** तथेति।

**वक्ष्यमाणे वाक्ये सर्वकर्मसंन्यासो न प्रतिभाति, मानसानामेव कर्मणां विशेषणवशात् त्यागावगमादिति शङ्कते—** नन्विति। **विशेषणान्तरमाश्रित्य दूषयति—** न ; सर्वेति। **'मनसा' इति विशेषणाद् मानसेष्वेव कर्मसु सर्वशब्दः सङ्कुचितः स्यादिति शङ्कते—** मानसानामिति। **सर्वात्मना मनोव्यापारत्यागे व्यापारान्तराणामनुपपत्तेः सर्वकर्मसंन्यासः सिध्यतीति परिहरति—** नेत्यादिना। **मानसेष्वपि कर्मसु संन्यासे [3]सङ्कोचान्न वागादिव्यापारानुपपत्तिरिति शङ्कते—** शास्त्रीयाणामिति। अन्यानीति। **अशास्त्रीयवाक्कायकर्म-कारणानि अशास्त्रीयाणि मानसानि, तानि च सर्वाणि कर्माणीत्यर्थः। वाक्यशेषमादाय दूषयति—** न ; नैवेति। **न हि विवेकबुद्ध्या सर्वाणि कर्माण्यशास्त्रीयाणि संन्यस्य तिष्ठतीति युक्तम् , 'नैव कुर्वन्' इत्यादिविशेषणस्य, विवेकबुद्धेश्च त्यागहेतोस्तुल्यत्वादित्यर्थः।**

भाष्यार्कप्रकाशः

आत्मनः कर्तृत्वादेरविद्याकृतत्वं च सर्वक्रियास्वपि समानमित्यन्वयः। तत्र हेतुमाह— **अविक्रियत्वादात्मन इति।** अविक्रियत्वादात्मनः सर्वक्रियानिरूपितकर्तृत्वादिविकारो नोपपद्यत इत्यर्थः। **अविशेषेणेति।** हननादिविशेषाभावेनेत्यर्थः।

**विशेषितत्वादिति।** कर्मणां [4]सर्वविशेषणस्य दत्तत्वादित्यर्थः। **सर्वेति।** मनोव्यापाराभावे सर्वव्यापाराणां भावानुपपत्तेरि-त्यन्वयः। तत्र हेतुमाह— **तत्पूर्वकत्वादिति।** मानसिककर्माणि नाम सङ्कल्परूपमनोव्यापारा एव। गच्छेयं वदेयं हन्यामित्येवम् आदौ मनसा सङ्कल्प्यैव सर्वोऽपि गमनभाषणहननादिक्रियाः वाचिकीः कायिकीश्च करोति, न त्वसङ्कल्प्येत्यर्थः। 'तदैक्षत' इतीश्वर-जगत्सृष्ट्यादिव्यापारस्यापि सङ्कल्पपूर्वकत्वश्रवणादिति भावः। पुनः शङ्कते पूर्ववादी— **शास्त्रीयाणामिति।** वेदपाठज्योतिष्टोमादीना-मित्यर्थः। **नैवेति।** अशास्त्रीयाणि सर्वाणि कर्माणि मनसा संन्यस्येत्युक्तौ 'नैव कुर्वन्' इत्यादि व्यर्थम् , मनसा संन्यस्येत्यनेनैव वाचा कायेन चाकरणस्य सिद्धत्वादित्यर्थः। सिद्धान्ते तु मनसा विवेकबुद्ध्या कर्मादावकर्मदर्शनेन संत्यज्येत्यर्थ इति। [5]आत्मसमवायिकर्तृत्व-

---

१. 'संन्यस्यास्ते' इति पा.। २. सत्योपादानकत्वे कर्तृत्वस्य सत्यत्वप्रसङ्गेनात्मनि तद्भ्रमाभावप्रसङ्गादित्यर्थः। ३. अशास्त्रीयवाक्कायकर्मकारणमानसकर्मणां संन्यासे सर्वशब्दस्य संकोचादित्यर्थः। ४. सर्वेति विशेषणस्येत्यर्थः। ५. आत्मसमवेतेत्यर्थः।

**'नवद्वारे पुरे देह्यास्ते' इति विशेषणानुपपत्तेः। न हि सर्वकर्मसंन्यासेन मृतस्य तद्देहे आसनं सम्भवति। अकुर्वतोऽकारयतश्च देहे संन्यस्येति सम्बन्धः, न 'देहे आस्ते' इति चेत्? न ; सर्वत्रात्मनोऽविक्रियत्वावधारणात्। आसनक्रियायाश्चाधिकरणापेक्षत्वात् , तदनपेक्षत्वाच्च संन्यासस्य। सम्पूर्वस्तु न्यासशब्दस्त्यागार्थः, न निक्षेपार्थः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

आत्मनः सर्वत्राविक्रियत्वावधारणात् न देहसंबन्धं विना कर्तृत्वकारयितृत्वप्राप्तिः।अतोऽप्राप्तप्रतिषेधप्रसङ्गपरिहाराय 'देहे आस्ते' इत्येव संबन्धो वक्तव्य इत्याह— **न ; सर्वत्रात्मनोऽविक्रियत्वावधारणादिति।** किञ्च आकाङ्क्षायोग्यतासंनिधिवशेनापि 'देहे आस्ते' इत्ययमेव सम्बन्ध इत्याह— **आसनक्रियायाश्चेति**। ननु संन्यासो नाम निक्षेपः। तस्याधिकरणापेक्षा विद्यत इत्याशङ्क्याह— **सम्पूर्वस्त्विति**। 'न्यासहर्ता' इत्यादौ केवलन्यासशब्दः निक्षेपवाची। सम्पूर्वस्तु त्यागे प्रसिद्ध

आनन्दगिरिकृतव्याख्या

**भगवदभिमतसर्वकर्मसंन्यासस्यावस्थाविशेषे सङ्कोचं दर्शयन्नाशङ्कते—** मरिष्यत इति। **संन्यासो जीवदवस्थायामेवात्र विवक्षित इत्यत्र लिङ्गं दर्शयन्नुत्तरमाह—** न ; नवेति। **अनुपपत्तिमेव स्फोरयति—** न हीति। [1]**अन्वयविशेषान्वाख्यानेन लिङ्गासिद्धिं चोदयति—** अकुर्वत इति। **विवेकवशादशेषाण्यपि कर्माणि देहे यथोक्ते निक्षिप्य अकुर्वन्नकारयंश्च विद्वानवतिष्ठते। तथा च देहे कर्माणि संन्यस्य अकुर्वतोऽकारयतश्च सुखमासनमिति सम्बन्धसम्भवात् विशेषणस्य सति देहे कर्मत्यागविषयत्वाभावाज्जीवतः सर्वकर्मत्यागो नास्तीत्यर्थः।** [2]**अथवा अकुर्वतः इत्यादि पूर्वत्रैव सम्बन्धनीयम्। लिङ्गासिद्धिचोद्यं तु 'देहे संन्यस्ये'त्यारभ्योन्नेयम्। आत्मनः सर्वत्राविक्रियत्वनिर्धारणाद् देहसम्बन्धमन्तरेण कर्तृत्वकारयितृत्वाप्राप्तेः अप्राप्तप्रतिषेधप्रसङ्गपरिहारार्थम् अस्मदुक्त एव सम्बन्धः साधीयानिति समाधत्ते—** न ; सर्वत्रेति। **श्रुतिषु स्मृतिषु चेत्यर्थः। किञ्च सम्बन्धस्याकाङ्क्षासन्निधियोग्यताधीनत्वादाकाङ्क्षावशादस्मदभिमतसम्बन्धसिद्धिरित्याह—** आसनेति। **भवदिष्टस्तु सम्बन्धो न सिध्यति, आकाङ्क्षाऽभावादित्याह—** तदनपेक्षत्वाच्चेति। **संन्यासशब्दस्य निक्षेपार्थत्वात् तस्य चाधिकरणसापेक्षत्वाद् अस्मदिष्टसम्बन्धसिद्धिरित्याशङ्क्याह—** सम्पूर्वस्त्विति। [3]**अन्यथोपसर्गवैयर्थ्यादित्यर्थः।**

भाष्यार्कप्रकाशः

कारयितृत्वयोर्वारणार्थं 'नैव कुर्वन् न कारयन्' इति च वक्ष्यति। **मरिष्यत इति।** आसन्नमरणस्येत्यर्थः। गमनभोजनादिसर्वकर्मोपरमः तस्यैव सङ्घटीतीति भावः। **न जीवत इति।** जीवतस्तु भोजनादिकर्माण्यवर्जनीयानीति भावः। **आस्त इति।** 'आस उपवेशने' इति धातोर्वर्तमाने लड्विधानात् जीवत एव सिद्धिरिति भावः। तदेव प्रपञ्चयति— **न हीति**। मृतः कथं सर्वाणि कर्माणि संन्यस्य देहे तिष्ठेदित्यर्थः। ननु 'सर्वकर्माणि मनसा नवद्वारे पुरे देहे **संन्यस्य** निक्षिप्य नैव कुर्वन् न कारयन् वशी आस्ते' इति श्लोकस्यान्वयमाशङ्कते— **अकुर्वत इति।** अकुर्वतोऽकारयतश्च आत्मनः सर्वकर्माणि मनसा देहे संन्यस्य वशी सुखमास्त इति सम्बन्धः, न तु 'देह आस्ते' (इति) इत्यन्वयः। संन्यासक्रियाधिकरणत्वमेव देहस्य, न तूपवेशक्रियाधिकरणत्वमिति परमार्थः। 'देहेन कर्माणि क्रियन्ते, कार्यन्ते च, न तु मया' इत्यनुसन्धानपूर्वकं सर्वकर्माणि कर्तव्यानि विदुषोऽपीति पूर्वपक्ष्याशयः। परिहरति— **नेति।** हेतुमाह— **सर्वत्रेति**। अविक्रिये आत्मनि देहाधिकरणककर्मसंन्यासक्रियाकर्तृत्वमपि नोपपद्यत इत्यर्थः। न च सर्वकर्मत्यागकर्तृत्वमपि कथमिति वाच्यम् ; सर्वकर्मत्यागस्य निवृत्तिरूपस्याक्रियात्वात् ; निक्षेपस्य च क्रियात्वादिति। किञ्च देहे आस्ते इति पदयोः साकाङ्क्षत्वमस्ति, न तु देहे संन्यस्येति पदयोरित्याह— **आसनेति।** आधेयनिष्ठा ह्यासनक्रिया स्वाधिकरणमाधारमाकाङ्क्षते, आस्ते इत्युक्तौ, क्वास्ते? इत्याकाङ्क्षाया उत्थितत्वादित्यर्थः। न च घटं भुवि निक्षिप्येति निक्षेपक्रियाया अप्यधिकरणापेक्षत्वमस्तीति वाच्यम् ; सरूपस्य घटादेर्निक्षेपस्याधिकरणापेक्षत्वेऽपि नीरूपकर्मनिक्षेपो नाधिकरणापेक्षः; न हि 'गमनं निक्षिप्ये'त्युक्तौ कुत्र निक्षिप्येत्याकाङ्क्षा जायते। दोषान्तरमाह— **सम्पूर्व इति।** न्यासशब्दस्य निक्षेपार्थकत्वेऽपि संन्यासशब्दो न निक्षेपार्थः, उपसर्गवशादर्थान्तरप्रतीतेः।

---

१. अस्मिन् पक्षे—सर्वकर्माणि देहे संन्यस्येति अन्वयः। संन्यस्येत्यस्य निक्षिप्येत्यर्थः। २. अकुर्वतोऽकारयतश्चेत्यत्र पूर्ववाक्यसमाप्तिः। अकुर्वतोऽकारयतश्च आसनेऽन्वयः। ३. न्यस्येत्यनेनैव निक्षिप्येत्यर्थलाभात् समित्युपसर्गवैयर्थ्यम्।

**तस्माद् गीताशास्त्रे आत्मज्ञानवतः संन्यास एवाधिकारः, न कर्मणि इति तत्र तत्रोपरिष्टाद् आत्मज्ञानप्रकरणे दर्शयिष्यामः॥२१॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

इत्यर्थः। यस्माद् मनसा विवेकज्ञानेन सर्वकर्माणि संन्यस्यास्ते इत्ययमेव सम्बन्धः, **तस्मादि**त्युपसंहारः। संन्यासस्य सर्व-(कर्म)व्यापारोपरमस्य [१]क्रियात्मज्ञानविरोधित्वात्, प्रयोजकज्ञानवतस्तावद् विधित एव संन्यासेऽधिकारः, सम्यग्ज्ञानवतः [अ]वैधसंन्यासे एवाधिकारः उत्सर्गसिद्ध इत्यर्थः॥२१॥

आनन्दगिरिकृतव्याख्या

**मनसा विवेकविज्ञानेन सर्वकर्माणि परित्यज्य आस्ते देहे विद्वानित्यस्यैव सम्बन्धस्य साधुत्वं मत्वोपसंहरति—** तस्मादिति। **सर्वव्यापारोपरमात्मनः संन्यासस्य अविक्रियात्मज्ञानाविरोधित्वात् [२]प्रयोजकज्ञानवतो [३]वैधे संन्यासेऽधिकारः, सम्यग्ज्ञानवतस्त्ववैधे स्वाभाविके फलात्मनीति विभागमभ्युपेत्योक्तेऽर्थे वाक्यशेषानुगुण्यं दर्शयति—** इति तत्र तत्रेति॥२१॥

भाष्यार्कप्रकाशः

'अतः संन्यस्य सर्वाणि कर्माण्यात्मावबोधतः' इत्यादिप्रयोगादिति भावः। उपसंहरति— **तस्मादिति**। 'सर्वकर्माणि मनसे'त्यादिना विदुषां सर्वकर्मसंन्यास एवाधिकार इति भगवता वक्ष्यमाणत्वादित्यर्थः।

**न कर्मणीति। ननु** विदुषो जीवतः सर्वकर्मसंन्यासो दुर्लभः, भोजनादिकर्मणामवर्जनीयत्वादिति चेत्? **मैवम्**। यानि शास्त्रेण विहितानि, यानि च निषिद्धानि तेषु अविद्वानेवाधिकारी, न तु विद्वानित्येतावत एवेह विवक्षितत्वात्। भोजनादीनि तु अविहितत्वाद् अनिषिद्धत्वाच्च न कर्माणीति। यद्यविद्वान् भोजनादावधिक्रियते शास्त्रात् तर्हि तत्र विदुषोऽधिकारो न भवेदेव, न तु तथाऽस्ति। तस्मान्न भोजनादेः कर्मत्वम्, नापि तत्र प्रवर्तमानस्याधिकृतत्वमिति संक्षेपः।

अत्राह **रामानुजः**— 'स पुरुषो देवमनुष्यतिर्यक्स्थावरशरीरेष्ववस्थितेष्वात्मसु कमप्यात्मानं कथं घातयति, कं वा कथं हन्ती'ति। **तदयुक्तम्**, 'अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्' 'य एनं वेत्ति हन्तारम्' 'अजो नित्यः शाश्वतोऽयं पुराणः' 'वेदाविनाशिनं नित्यं य एनमजमव्ययम्' 'अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः' 'नवानि देही' 'नैनं छिन्दन्ति शस्त्राणि' 'अच्छेद्योऽयम्' 'अव्यक्तोऽयम्' 'आश्चर्यवत्पश्यति कश्चिदेनम्' इत्यादिषु सर्वत्राप्यात्मन एकत्वेनैव निर्देशात्; अनेकत्वे परिच्छिन्न-त्वेनानित्यत्वप्रसङ्गात्। निरवयवत्वात् परमाणुपुञ्जवदात्मसमूहस्य नानित्यत्वमिति न वाच्यम्; निरवयवपरमाणुपुञ्जस्यैवानभ्युगमात्। न हि निरवयवानां परमाणूनां पुञ्जत्वं स्यात्; सावयववस्तुसंयोगात् खलु पुञ्जलाभः? सावयवस्य वस्तुनः उपचयो, न तु निरवयवस्येति त्वयाऽप्युक्तं प्राक्। न च - पुञ्जो माऽस्तु नाम; निरवयवाः परमाणवः सन्ति नित्याः यथा, तथा आत्मान इति - वाच्यम्, निरवयवपरमाणूनामेवाप्रमाणत्वात्; मार्तिकाद्यणुपुञ्जस्यैव घटादिकार्योपादानत्वात्; परमाणुकारणवादस्य च **शारीरकमीमांसायां** प्रत्याख्यातत्वात्[४]। निरवयवपरमाणुतुल्यस्यात्मनः सर्ववस्तुसंयोगाभावेन सर्वावभासकत्वासम्भवात्, 'तस्य भासा सर्वमिदं विभाति' इति श्रुत्या आत्मनः सर्वावभासकत्वस्योक्तत्वात्; तत्रात्मा नाम ईश्वरः इत्यभ्युपगमेऽपीश्वरस्यापि जीवादपि सूक्ष्मत्वेन सुतरां सर्वावभासकत्वासम्भवाच्च।

तथा देवमनुष्यतिर्यक्स्थावरशरीरावस्थितात्मस्विति मूलाद् बहिः पदपरम्पराकल्पनमप्यप्रमाणम्, 'य आत्मानं नित्यं वेद स कथमात्मानं हन्ती'त्युक्तौ 'यस्त्वनित्यं वेद स हन्त्येवात्मान'मित्यापतति, तच्चानिष्टम्, विदितस्याविदितस्य वा आत्मनः नित्यत्वात्। न हि ज्ञानमात्रेणात्मनः स्यान्नित्यत्वं ज्ञानात्पूर्वमविद्यमानम्। तस्माद् यो वेद सः इत्यपार्थम्। यदि मूलकर्तुरियं विवक्षा स्यात् तर्हि - 'कः कथं नित्यमात्मानं हन्ति कं घातयत्यपी'त्येव ब्रूयात्। किञ्च 'कम्' इत्यपि व्यर्थमेव, सर्वत्र ज्ञानैकाकारत्वादिभिरात्मनः

१. 'अविक्रियात्मज्ञानविरोधित्वात्' इति पा.। २. विचारप्रयोजकवेदान्तजन्यापातज्ञानवतः मुमुक्षोरित्यर्थः। ३. विविदिषासंन्यासः वैधः। विद्वत्संन्यासस्तु स्वतःसिद्धत्वादवैधः इति भावः। ४. द्र.ब्र.सू. २.२.१२-१७।

**वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।**
**तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही॥ २२॥**
**नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।**

**प्रकृतं तु वक्ष्यामः। तत्रात्मनोऽविनाशित्वं प्रतिज्ञातम्। तत् किमिवेत्युच्यते—** वासांसीति। वासांसि **वस्त्राणि** जीर्णानि **दुर्बलतां गतानि यथा लोके** विहाय **परित्यज्य** नवानि **अभिनवानि** गृह्णाति **उपादत्ते** नरः **पुरुषः** अपराणि **अन्यानि,** तथा **तद्वदेव शरीराणि विहाय जीर्णान्यन्यानि** संयाति [१]**संगच्छति नवानि** देही **आत्मा, पुरुषवद् अविक्रिय एवेत्यर्थः॥ २२॥**

**कस्मादविक्रिय एवेति? आह—** नैनं छिन्दन्तीति। [२]एनं **प्रकृतं देहिनं** न छिन्दन्ति **शस्त्राणि, निरवयवत्वाद् नावयवविभागं कुर्वन्ति** शस्त्राणि **अस्यादीनि। तथा** नैनं दहति पावकः **अग्निरपि न भस्मीकरोति। तथा न चैनं**

आनन्दगिरिकृतव्याख्या

**आत्मनोऽविक्रियत्वेन कर्मासम्भवं प्रतिपाद्य, अविक्रियत्वहेतुसमर्थनार्थमेवोत्तरग्रन्थमवतारयति—** प्रकृतं त्विति। **किं तत् प्रकृतम्? इति शङ्कमानं प्रत्याह—** तत्रेति। **अविनाशित्वमित्युपलक्षणम्। अविक्रियत्वमित्यर्थः। तदेव दृष्टान्तेन स्पष्टयितुम् उत्तरश्लोक-मुत्थापयति—** तदित्यादिना। **आत्मनः स्वतो विक्रियाऽभावेऽपि पुरातनदेहत्यागे नूतनदेहोपादाने च विक्रियावत्त्वध्रौव्याद् अविक्रियत्व-मसिद्धमिति चेत्? तत्राह—** वासांसीति। **शरीराणि** जीर्णानि **वयोहानिं गतानि, वलीपलितादिसङ्गतानीत्यर्थः। वाससां पुरातनानां परित्यागे, नवानां चोपादाने त्यागोपादानकर्तृभूतलौकिकपुरुषस्यापि अविकारित्वेन एकरूपत्ववद् , आत्मनो देहत्यागोपादानयोः अविरुद्धम् अविक्रियत्वमिति वाक्यार्थमाह—** पुरुषवदिति॥ २२॥

**पृथिव्यादिभूतचतुष्टयप्रयुक्तविक्रियाभाक्त्वाद् आत्मनोऽसिद्धमविक्रियत्वमिति शङ्कते—** कस्मादिति। **यतो न भूतानि आत्मानं**

भाष्यार्कप्रकाशः

एकरूपत्वस्य त्वयाऽपीष्यमाणत्वात्। 'कः कथं नित्यमात्मानं हन्ति वा घातयत्यपि' इत्येव ब्रूयात्। **अपि च** नित्यात्मविदः नित्यात्महननाक्षेपेण अनित्यानात्महननं निराक्षेपं प्राप्तम्। नित्यात्मकर्मकहननेतरक्रियाश्रयत्वं च प्राप्तम्। उभयमपीदमनिष्टम् , 'मा हिंस्यात् सर्वा भूतानि' इति विद्वदविद्वत्साधारण्येन निषिद्धाया हिंसाया आत्मज्ञे विदुषि प्रसक्तत्वात् , पश्वादिप्राणिहिंसायामपि नात्मनो हिंसा, किं त्वनात्मनो देहस्यैव हिंसेत्यनात्महननस्य विदुषो निराक्षेपत्वात्। तथा नित्यात्मानं विद्वान् न हन्ति न घातयति, किन्तु स्तौति निन्दति तिरस्करोतीत्येवं विदुषः आत्मदूषणादिकं हि नरकावहम्। तस्मादात्मविदः सर्वकर्माधिकारासम्भव एवानेन श्लोकेनोच्यत इत्यनवद्यम्॥ २१॥

'वासांसी'ति श्लोकमवतारयति— **तत्रेत्यादिना। तत्र** 'न जायते' इति श्लोके इत्यर्थः। 'अविनाशि तु तद्विद्धि' इति श्लोके इति वा। तदविनाशित्वं किमिवेति शङ्कायामुच्यते— **वासांसीति**। यथा नरः जीर्णानि वासांसि विहाय अपराणि नवानि वासांसि गृह्णाति, तथा देही जीर्णानि शरीराणि विहाय अन्यानि नवानि शरीराणि संयातीत्यन्वयः। श्लोकस्थक्रमेण पदानामर्थमाह— **वासांसि वस्त्राणीत्यादिना। पुरुषः** मनुष्य इत्यर्थः। यथा जीर्णवस्त्रत्यागात् , नूतनवस्त्रधारणाच्च देहस्य न काऽपि वृद्धिक्षयादिलक्षणा जन्मनाश-लक्षणा च विक्रिया, तद्वज्जीर्णदेहत्यागात् , नूतनदेहस्वीकाराच्च न काऽपि विक्रिया देहिनः इत्यर्थः॥ २२॥

**नैनमिति**। एनं शस्त्राणि न छिन्दन्ति, एनं पावको न दहति, एनमापो न च क्लेदयन्ति, एनं मारुतो न शोषयतीत्यन्वयः।

१. 'समो गम्यृच्छिभ्याम्' (पा.सू.१.३.२९) इति आत्मनेपदविधायकसूत्रे अकर्मकाच्चेत्यनुवृत्तेः प्रकृते सकर्मकत्वान्नात्मनेपदम्। २. 'नैनं प्रकृतं देहिनं छिन्दन्ति निरवयवत्वाद्' इति पा.।

**न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥२३॥**
**अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।**
**नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥२४॥**

**क्लेदयन्ति आपः। अपां हि सावयवस्य वस्तुनः आर्द्रीभावकरणेनावयवविश्लेषापादने [1]सामर्थ्यम्। तन्न निरवयव आत्मनि सम्भवति। तथा स्नेहवद् द्रव्यं स्नेहशोषणेन नाशयति वायुः, एनं त्वात्मानं न शोषयति मारुतोऽपि॥२३॥**

**यत एवं तस्मात् —** अच्छेद्योऽयमिति। **यस्मादन्योन्यनाशहेतुभूतानि[2] एनमात्मानं नाशयितुं नोत्सहन्ते [3]अस्यादीनि, तस्मान्नित्यः, नित्यत्वात् सर्वगतः, सर्वगतत्वात्** स्थाणुः, **स्थाणुरिव स्थिरः इत्येतत्। स्थिरत्वाद् अचलोऽयमात्मा। अतः** सनातनश्चिरन्तनः। **न कारणात् कुतश्चिन्निष्पन्नः, अभिनव इत्यर्थः। नैतेषां श्लोकानां पौनरुक्त्यं चोदनीयम्। यत एकेनैव श्लोकेनात्मनो नित्यत्वमविक्रियत्वं चोक्तम् - 'न जायते म्रियते वा' इत्यादिना। तत्र यदेवात्मविषयं किञ्चिदुच्यते, तद् एतस्माच्छ्लोकार्थाद् नातिरिच्यते। किञ्चिच्छब्दतः पुनरुक्तम् , किञ्चिदर्थतः इति। दुर्बोधत्वाद् आत्मवस्तुनः पुनः पुनः प्रसङ्गमापाद्य शब्दान्तरेण तदेव वस्तु निरूपयति भगवान् वासुदेवः, कथं नु नाम**

आनन्दगिरिकृतव्याख्या

**गोचरयितुमर्हन्ति , अतो युक्तमाकाशवत् तस्याविक्रियत्वमित्याह—** आहेत्यादिना॥२३॥

**पृथिव्यादिभूतप्रयुक्तच्छेदनाद्यर्थक्रियाऽभावे योग्यताऽभावं कारणमाह—** यत इति। **पूर्वार्धमुत्तरार्धे हेतुत्वेन योजयति—** यस्मादिति। **नित्यत्वादीनामन्योन्यं हेतुहेतुमद्भावं सूचयति—** नित्यत्वादित्यादिना। **न च नित्यत्वं परमाणुषु व्यभिचारादसाधकं सर्वगतत्वस्येति वाच्यम् ; तेषामेवाप्रामाणिकत्वेन व्यभिचारानवतारात्। न च सर्वगतत्वेऽपि विक्रियाशक्तिमत्त्वमात्मनोऽस्तीति युक्तम् , विभुत्वेनाभिमते नभसि तदनुपलम्भात्। न च विक्रियाशक्तिमत्त्वे स्थैर्यमास्थातुं शक्यम् , तथाविधस्य मृदादेरस्थिरत्वदर्शनादि- त्याशयेनाह—** स्थिरत्वादिति। **स्वतो नित्यत्वेऽपि कारणान्नाशसम्भवाद् उत्पत्तिरपि सम्भावितेति कुतश्चिरन्तनत्वमित्याशङ्क्याह—** न कारणादिति। **आत्मनोऽविक्रियत्वस्य 'न जायते म्रियते वा' इत्यादिना साधितत्वात् तस्यैव पुनःपुनरभिधाने पुनरुक्तिरित्याशङ्क्याह—** नैतेषामिति। **अनाशङ्कनीयस्य चोद्यस्य प्रसङ्गं दर्शयति—** यत इति। **अतो 'वेदाविनाशिनम्' इत्यादौ शङ्क्यते पौनरुक्त्यमिति शेषः। कथं तत्र पौनरुक्त्याशङ्का समुन्मिषति? तत्राह—** तत्रेति। **'वेदाविनाशिनम्' इत्यादिश्लोकः सप्तम्या परामृश्यते। श्लोकशब्देन 'न जायते म्रियते वा' इत्यादिरुच्यते। नन्विह श्लोके जन्ममरणाद्यभावोऽभिलक्ष्यते, 'वेदे'त्यादौ पुनरपक्षयाद्यभावो विवक्ष्यते, तत्र कथमर्थातिरेकाभाव-**

भाष्यार्कप्रकाशः

**विश्लेषो** वियोगः॥२३॥

**अच्छेद्य इति।** अयमच्छेद्यः, अयमदाह्यः, अयमक्लेद्यः, अयमशोष्य एव च। अयं नित्यः, सर्वगतः, स्थाणुः, अचलः, सनातनश्च भवतीति शेषः। **नित्यत्वादिति।** अनित्यस्य घटादेः सर्वगतत्वादर्शनादिति भावः। सर्वदेशसर्वकालसर्ववस्तुगतत्वं हि सर्वगतत्वम् , तत् कथं परिच्छिन्नस्यानित्यस्य स्यादिति बोध्यम्। **इत्येतत्** इति यावदित्यर्थः। **अचलश्च**लनरहितः। परिपूर्ण इति यावत्। **सने**ति सदार्थेऽव्ययम्। चिरार्थे इति केचित्। 'सायञ्चिरम्' इति सूत्रेऽव्ययग्रहणात् सनाशब्दाद् भवार्थे ट्युट्युलोरन्यतरप्रत्ययः तुडागमश्च। **निष्पन्नः** सिद्धः, जात इति यावत्। **अभिनव इति।** सदाऽपि नव इत्यर्थः। अनादिरिति यावत्। पौनरुक्त्यमेव प्रपञ्चयति— **यत इत्यादिना। शब्दत इति।** [4]नित्यो नित्य इति। **अर्थत इति।**[5]सनातनः पुराणः इति। पौनरुक्त्यस्याचोदनीयत्वे हेतुमाह— **दुर्बोधत्वा-**

---

१. 'यत् सामर्थ्यम् , तन्निरवयव आत्मनि न सम्भवति' इति रा.पा.। २. 'नाशहेतूनि भूतानि' पा.। ३. 'अस्यादीनि' इति नास्ति क्वचित्। 'अग्न्यादीनि' इति पा.।
४. 'अजो नित्यः' 'अविनाशिनं नित्यं' 'नित्यः सर्वगतः' इति शब्दतः पुनरुक्तम्। ५. 'अचलोऽयं सनातनः' 'शाश्वतोऽयं पुराणः' इति अर्थतः पुनरुक्तम्।

# अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।
# तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि॥२५॥

**संसारिणाम् [१]अव्यक्तं तत्त्वं बुद्धिगोचरतामापन्नं सत् संसारनिवृत्तये स्यादिति॥२४॥**

**किञ्च —** अव्यक्तोऽयमिति। अव्यक्तः **सर्वकरणाविषयत्वान्न व्यज्यते इत्यव्यक्तः** अयम् **आत्मा। अत एव** अचिन्त्योऽयम्। **यद्धीन्द्रियगोचरं वस्तु तच्चिन्ताविषयत्वमापद्यते। अयं त्वात्माऽनिन्द्रियगोचरत्वादचिन्त्यः। अत एव अविकार्यः। यथा क्षीरं [२]दध्यातञ्चनादिना विकारि , न तथाऽयमात्मा। निरवयवत्वाच्चाविक्रियः। न हि निरवयवं**

आनन्दगिरिकृतव्याख्या

**मादाय पौनरुक्त्यं चोद्यते? तत्राह—**किञ्चिदिति। **कथं तर्हि पौनरुक्त्यं न चोदनीयमिति [३]मन्यसे? तत्राह—** दुर्बोधत्वादिति। **[४]पुनःपुनर्विधानभेदेन वस्तु निरूपयतो भगवतोऽभिप्रायमाह—** कथं न्विति॥२४॥

**त्वम्पदार्थपरिशोधनस्य प्रकृतत्वात् तत्रैव हेत्वन्तरमाह—** किञ्चेति। **आत्मनो नित्यत्वादिलक्षणस्य तथैव प्रथा किमिति न भवति? तत्राह—** अव्यक्त इति। **मा तर्हि प्रत्यक्षत्वं भूत् , अनुमेयत्वं तु तस्य किं न स्यादित्याशङ्क्याह—** अत एवेति। **तदेव प्रपञ्चयति—** यद्धीति। **अतीन्द्रियत्वेऽपि [५]सामान्यतोदृष्टविषयत्वं भविष्यतीत्याशङ्क्य कूटस्थेनात्मना व्याप्तलिङ्गाभावान्मैवमित्याह—** अविकार्य इति। **अविकार्यत्वे व्यतिरेकदृष्टान्तमाह—** यथेति। **किंच - आत्मा न विक्रियते, निरवयवद्रव्यत्वाद् , घटादिवदिति व्यतिरेक्यनुमानमाह—** निरवयवत्वाच्चेति। **निरवयवत्वेऽपि विक्रियावत्त्वे का क्षतिरित्याशङ्क्याह—** न हीति। **सावयवस्यैव विक्रियावत्त्वदर्शनाद् विक्रियावत्त्वे निरवयवत्वानुपपत्तिरित्यर्थः। यद्धि सावयवं सक्रियं क्षीरादि , तद् दध्यादिना विकारमापद्यते। न चात्मनः श्रुतिप्रमितनिरवयवत्वस्य**

भाष्यार्कप्रकाशः

**दित्यादिना**। बोद्धुमशक्यं दुर्बोधम्। **आपन्न**मित्यस्य आत्मवस्तु इति कर्तृ। **स्यादिति**। अभिप्रायेणेति शेषः॥२४॥

**अव्यक्त इति**। अव्यक्तः अयम् , अचिन्त्यः अयम् , अविकार्यः अयम् इत्युच्यते। शास्त्रेणेति शेषः। तस्मादेनमेवं विदित्वा त्वमनुशोचितुं नार्हसीत्यन्वयः। **न व्यज्यते** न प्रतीयत इत्यव्यक्तः।

**ननु** सर्वकरणाविषयत्वमसिद्धम् , 'मनसैवानुद्रष्टव्यम्' इति श्रुतेः, 'शास्त्रोपदेशशमदमादिसंस्कृतं मन आत्मदर्शने करणम्' इति स्वेनैव पूर्वमुक्तत्वाच्चेति चेत्? **सत्यम्** ; संस्कृतमनोव्यतिरिक्तसर्वकरणाविषयत्वस्येह विवक्षितत्वात्। न च सर्वपदसङ्कोचः, मन-आदिसर्वकरणाविषयत्वस्य सत्त्वात्। **यद्वा** स्वयम्प्रभत्वादयमात्मा न करणविषयः, 'यन्मनसा न मनुते येनाहुर्मनो मतम्' इति श्रुत्या मनस एवात्मवेद्यत्ववचनात्। 'साक्षी चेता निर्गुणः' इति श्रुत्या सर्वसाक्षित्वमात्मनश्चोक्तम्। साक्षित्वं हि साक्षाद्द्रष्टृत्वम्। करण-नैरपेक्ष्येण स्वत एव सर्वद्रष्टृत्वमित्यर्थः। अत एव 'अपाणिपादो जवनो ग्रहीता' इति श्रुतिः सङ्गच्छते। इदमेव ह्यात्मनः स्वयम्प्रभत्वं नाम यत् स्वयमेवात्मानं सर्वांश्चायं प्रभासयतीति। संस्कृतमनसः करणत्वं तु आत्मस्वरूपावरकाविद्यानिरसन एवेति बोध्यम्। न च कथं सूर्यं तम इवात्मानमविद्याऽऽवृणुयादिति वाच्यम् ; तेजस्तिमिरयोरिवात्माविद्ययोर्नास्ति बाध्यबाधकभावः। प्रत्युतात्मैवाविद्यां भासयति। अविद्या हि जडा न स्वतो भातुं क्षमते। अविद्याविरोधि तु 'अहं ब्रह्म' इत्याकारकं संस्कृतमनोवृत्तिरूपं ज्ञानमेवेति युक्तमात्मनः सर्वकरणाविषयत्वम्।

**चिन्ता** अयमीदृश इति विचारः। **अविकार्य इति**। विकर्तुं योग्यः विकार्यः, विकारं प्राप्तुमर्ह इत्यर्थः। न विकार्यः अविकार्यः। विकारो नाम परिणामः। अविकारित्वे हेतुं वदन् शब्दस्य फलितार्थमाह— **निरवयवत्वाच्चाविक्रिय इति**। विक्रिया आत्मनि यस्य तद् विक्रियात्मकं, विकारवदित्यर्थः। अथवा विक्रिया विकारः कार्यमित्यर्थः। तदात्मकं तद्रूपमित्यर्थः। सावयवस्यैव कार्यत्वं, कार्यस्यैव

१. 'असंसारित्वबुद्धिगोचरतामापन्नं सत् अव्यक्तं तत्त्वं' इति पा.। २. 'दध्यात्मत्वेन विकार्यं भवति, न तथाऽयम्' इति पा.। ३. 'मन्यते' इति पा.।
४.'पुनःपुनर्विधाभेदेन' इति पाठः स्यात्। ५. सामान्यतोदृष्टम् कार्यकारणान्यलिङ्गकमनुमानम्।

**अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम्।**
**तथापि त्वं महाबाहो ! नैवं शोचितुमर्हसि॥२६॥**

**किञ्चिद् विक्रियात्मकं दृष्टम्। अविक्रियत्वाद् अविकार्योऽयमात्मोच्यते। तस्माद्** एवं **यथोक्तप्रकारेण** एनम् **आत्मानं विदित्वा त्वं नानुशोचितुमर्हसि - 'हन्ताऽहमेषाम्, मयैते हन्यन्ते' इति॥२५॥**

**आत्मनोऽनित्यत्वमभ्युपगम्येदमुच्यते—** अथ चैनमिति। **अथ चेत्यभ्युपगमार्थः।** एनं **प्रकृतमात्मानं** नित्यजातं [1]**लोकप्रसिद्ध्या** [2]**प्रत्यनेकशरीरोत्पत्तिं जातो जात इति मन्यसे, तथा प्रतितद्विनाशं नित्यं वा मन्यसे** मृतं **मृतो मृत**

आनन्दगिरिकृतव्याख्या

**सावयवत्वम्। अतोऽविक्रियत्वान्नायं विकार्यो भवितुमलमिति फलितमाह—** अविक्रियत्वादिति। **आत्मयाथात्म्योपदेशम् 'अशोच्यानन्वशोचस्त्वम्' इत्युपक्रम्य व्याख्यातमुपसंहरति—** तस्मादिति। **अव्यक्तत्वाचिन्त्यत्वाविकार्यत्वनित्यत्वसर्वगतत्वादिरूपो यस्मादात्मा निर्धारितः, तस्मात् तथैव ज्ञातुमुचितः, तज्ज्ञानस्य फलवत्त्वादित्यर्थः। प्रतिषेध्यमनुशोकमेवाभिनयति—** हन्ताऽहमिति॥२५॥

**आत्मनो नित्यत्वस्य प्रागेव सिद्धत्वादुत्तरश्लोकानुपपत्तिरित्याशङ्क्याह—** आत्मन इति। **अनित्यत्वमिति च्छेदः। शाक्यानां लोकायतानां वा मतम् इदमा परामृश्यते। श्रोतुरर्जुनस्य पूर्वोक्तमात्मयाथात्म्यं श्रुत्वाऽपि तस्मिन् निर्धारणासिद्धेः द्वयोर्मतयोरन्यतरमताभ्युपगमः शङ्कितः, तदर्थो निपातद्वयप्रयोग इत्याह—** अथ चेति। **प्रकृतस्यात्मनो नित्यत्वादिलक्षणस्य पुनःपुनर्जातत्वाभिमानो मानाभावादसम्भवीत्याशङ्क्याह—** लोकेति। **नित्यजातत्वाभिनिवेशे पौनःपुन्येन मृतत्वाभिनिवेशो व्याहतः स्यादित्याशङ्क्याह—** तथेति।

भाष्यार्कप्रकाशः

विकारवत्त्वं चेति भावः। शोकाकारं दर्शयति— **हन्ताऽहमिति।** आत्मनि हननक्रियाकर्तृत्वकर्मत्वादिविकारायोगादिति भावः॥२५॥

**अथ चेति।** अथ च एनं नित्यजातं नित्यं मृतं वा मन्यसे, हे महाबाहो! तथापि त्वमेवं शोचितुं नार्हसीत्यन्वयः। अव्ययानामनेकार्थत्वादाह— **अथ चेत्यभ्युपगमार्थ इति। अथ च** आत्मनः अनित्यत्वेऽभ्युपगतेऽपीत्यर्थः। यथा लोकप्रसिद्ध्या आत्मानं 'क्रुद्धो जातः तृप्तो जातः हृष्टो जात इत्यन्तःकरणविक्रियाभेदमनु विक्रियते आत्मा' इति मन्यसे इत्यन्वयः। यद्वा 'क्रुद्धो जातस्तृप्तो जातो हृष्टो जात इति लोकप्रसिद्ध्या' इत्यन्वयः। अन्यत् तुल्यम्। यथा च 'तत्प्रत्ययविनाशमनु विनश्यत्यात्मा' इति लोकप्रसिद्ध्या मन्यसे। तथा प्रत्यनेकशरीरोत्पत्तिं जातो जात आत्मेति मन्यसे, तथा नित्यं वा सदाऽपि प्रत्यनेकशरीरमृतिं मृतो मृत आत्मेति मन्यसे इत्यन्वयः। नित्यमपि जायत इति नित्यजातः, नित्यमपि म्रियत इति नित्यं वा मृत इति चार्थः।

अयमाशयः— क्रोधतृप्तिहर्षाः अन्तःकरणधर्मत्वाद् अन्तःकरणविक्रियाः। लोकस्तु आत्मान्तःकरणयोस्तादात्म्याध्यासेन अन्तःकरणे क्रुद्धे सति आत्मा क्रुद्धो जात इति, तस्मिन् तृप्ते आत्मा तृप्त आसीदिति, तस्मिन् हृष्टे आत्मा हृष्ट इति चात्मानमेव विक्रियमाणं मन्यते। क्रोधादिप्रत्ययनाशे तु क्रुद्धात्मा नष्टः, हृष्टात्मा नष्टः, तृप्तात्मा नष्ट इत्यात्मानमेव नष्टं मन्यते। **एतेना**न्तःकरणविकाराणां क्रोधतृप्तिहर्षाणामुदयनाशाभ्याम् आत्मन उदयनाशौ लौकिकैरभ्युपगम्येते इति **सिद्धम्।** तद्वच्छरीरधर्मौ जन्मनाशौ लौकिकैरात्मन्यध्यस्तौ दृश्येते, शरीरेषु जातेषु आत्मा जात इति, तेषु मृतेषु आत्मा मृत इति च लोकप्रसिद्धेरिति।

**ननु** अन्तःकरणधर्मक्रोधाद्युदयनाशाभ्यामन्तःकरणस्यैव नास्त्युदयनाशव्यवहारः; न ह्यन्तःकरणे क्रुद्धे सति कोऽप्यन्तःकरणं जातमिति, तस्मिन् शान्ते सति अन्तःकरणं नष्टमिति च प्रत्येति; किं पुनरात्मनस्तद्व्यवहारः; तस्मान्न दृष्टान्तोपपत्तिरिति चेत्? **उच्यते**— उपरतक्रोधो देवदत्तः 'सखे, इतः प्राक् क्रुद्ध इदानीं क्व?' इति यज्ञदत्तेन पृष्टः, तं प्रति वदति— 'क्रुद्धो नष्टः, शान्तो जातः' इति। तथा यतिश्च वदति— 'गृही नष्टो यतिर्जातः' इति। ततश्च धर्मनाशोदयाभ्यां धर्मिनाशोदयोपचार इति। ततो न लोक-

१. 'लोकप्रसिद्ध्या क्रुद्धो जातः, तृप्तो जातः, हृष्टो जात इत्यन्तःकरणविक्रियाभेदमनु विक्रियते इति मन्यसे, तथा तत्प्रत्ययविनाशमनु विनश्यतीति लोकप्रसिद्ध्या' इति रा.पा.। २. प्रतीति पृथक्पदम्। लक्षणाद्यर्थे यथासंभवं प्रतिशब्दो योज्यः। 'प्रत्यनेकशरीरोत्पत्ति' इति पा.।

## जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
## तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि॥ २७॥

**इति।** तथापि **तथाभावेऽपि आत्मनि त्वं महाबाहो ! नैवं शोचितुमर्हसि।** [1]**जन्मवतो जन्म नाशवतो नाशश्चेत्येतौ अवश्यम्भाविनाविति॥ २६॥**

**तथा च सति —** जातस्येति। जातस्य **हि लब्धजन्मनो** ध्रुवः **अव्यभिचारी** मृत्युः **मरणम्। ध्रुवं जन्म मृतस्य च। तस्माद् अपरिहार्योऽयं जन्ममरणलक्षणोऽर्थः। तस्मिन्नपरिहार्येऽर्थे न त्वं शोचितुमर्हसि**[2] **॥ २७॥**

आनन्दगिरिकृतव्याख्या

**परकीयमतमनुभाषितमभ्युपेत्य 'अहो बत महत्पापं कर्तुं व्यवसिता वयम्' इत्यादेस्तदीयशोकस्य निरवकाशत्वमित्याह—** तथापीति। एवम् [3]**इति अर्जुनस्य दृश्यमानमनुशोकप्रकारं दर्शयित्वा तस्य कर्तुमयोग्यत्वे हेतुमाह—** जन्मवत इति। **जन्मवतो नाशो, नाशवतश्च जन्मेत्येतौ** अवश्यम्भाविनौ **मिथो व्याप्ताविति योजना॥ २६॥**

**तयोरवश्यम्भावित्वे सति अनुशोकस्याकर्तव्यत्वे हेत्वन्तरमाह—** तथा चेति॥ २७॥

भाष्यार्कप्रकाशः

प्रसिद्ध्यनुपपत्तिः। **वस्तुतस्तु** भाष्यकारैः प्रौढ्या प्रोक्तोऽयमर्थः। न त्वत्राभिनिवेशस्तेषाम्। किं तर्हि? अन्तःकरणधर्माणां क्रोधादीनामिव देहधर्मयोर्जन्मनाशयोरात्मन्यध्यासाल्लोके आत्मा क्रुद्धो हृष्ट इत्यादिवद् आत्मा जातो मृत इति व्यवहारः, तद्बलाच्च अर्जुनस्यापि 'नित्यजातो नित्यमृत आत्मा' इति मतिरित्येतावत्येवार्थे भाष्यकाराणामभिनिवेश इति।

**आत्मनीति** विषयसप्तमी। महाबाहो! इति सम्बुद्धिर्धीरत्वद्योतनार्था। ततश्च नायं शोको धीरस्य तवोचित इति भावः।

अत्राह **रामानुजः**— अथ नित्यजातं नित्यमृतं देहमेवैनमात्मानं मनुषे - इति; **तदसत्** ; मूले देहपदाभावात् ; आस्तिकस्यार्जुनस्य नास्तिकबौद्धादिवद् देहे आत्मबुद्ध्यभावात्। किन्तु 'देहातिरिक्त आत्मा अस्त्येव; स तु न जन्मादिविकारहीनः, देहोदयमनूत्पन्नत्वाद् देहनाशमनु विनष्टत्वादि'त्येवार्जुनस्य मतिः; पुत्रो जातः पुत्रो नष्ट इति लोकव्यवहारात्। मृते पुत्रदेहे दृश्यमानेऽपि पुत्रो नष्ट इति शोचति हि पित्रादिलोकः। तस्मादर्जुनोऽपि न देहमात्मानं मन्यते; किन्तु देहवदात्मानं जन्मनाशयुक्तं मन्यत इति **रामानुजभाष्यमसत्**॥ २६॥

**जातस्येति।** जनिक्रियाश्रयस्येत्यर्थः। **लब्धजन्मन इति।** जन्मना लब्धसत्ताकस्येति यावत्। **अव्यभिचारीति।** यो यो जातः स स मृत इति व्याप्तेः क्वापि नास्ति व्यभिचार इत्यर्थः। न च विभीषणहनूमन्मार्कण्डेयादिषु व्यभिचार इति वाच्यम् , प्रलये तेषामपि नाशश्रवणात्। **स्वाभाविकः** स्वभावसिद्धो धर्मः, यथा अग्नेरौष्ण्यं, जलस्य शैत्यं च, तद्वदिति भावः।

**ननु** जन्मवतो नाशः सर्वजनप्रत्यक्षः, जन्मवतां पितृपुत्रादीनां नाशदर्शनात्। नाशवतः पुनर्जन्म त्वप्रत्यक्षं कथमभ्युपगन्तुं शक्यमिति चेत्? **मैवम्** ; बीजस्य भुवि निक्षेपान्नष्टस्य अङ्कुरात्मना जन्मदर्शनात् ; न हि बीजस्वरूपनाशं विनाऽङ्कुरोदयः। शास्त्रप्रामाण्याच्च पुनर्जन्माभ्युपगमः।

अत्र 'कथमिदमुपपद्यते विनष्टस्योत्पत्ति'रित्याक्षिप्य सत्कार्यवादमवतारयामास **रामानुजः**।

**तत्र विचार्यते**— मृद्द्रव्यं सद् घटाद्यात्मना विक्रियत इति सतो मृद्द्रव्यस्यैवावस्थाविशेषा घटाद्युत्पत्तिविनाशादय इत्यमीषां प्रघोषः अविचारितरमणीयः। तथाहि— यद् विक्रियते तन्न सत् , यथा घटादयः; यदविक्रियं तत् सत् , व्यतिरेकेण घटादिवदिति कथं विक्रियमाणस्य मृद्द्रव्यस्य सत्त्वम्? 'नासतो विद्यते भावो नाभावो विद्यते सतः' इति कालत्रयेऽप्यभाववत्त्वस्यासल्लक्षणत्वात्।

१.'यस्मात् जन्मवतो नाशः, नाशवतो जन्म' इति पा.। आनन्दगिरीये जन्मवतो नाशः, नाशवतश्च जन्मेति योजनाप्रदर्शनात् यथास्थित एव भाष्यपाठः तत्संमत इति भाति। २. एतदनन्तरम्—जन्मवतो नाशः, नाशवतो जन्मेति च स्वाभाविकश्चेत् , अपरिहार्यः अर्थः। इत्यधिकः रा. पुस्तके पाठः। ३. 'इति' क्वचिन्न।

**अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।**
**अव्यक्तनिधनान्येव तत्र का परिदेवना[१] ॥२८॥**

**कार्यकरणसंघातात्मकान्यपि भूतान्युद्दिश्य शोको न युक्तः कर्तुम् , यतः—** अव्यक्तादीनीति। अव्यक्तादीनि अव्यक्तम् **अदर्शनम् अनुपलब्धिः आदिर्येषां** भूतानां **पुत्रमित्रादिकार्यकरणसंघातात्मकानाम् , तानि अव्यक्तादीनि**

आनन्दगिरिकृतव्याख्या

**आत्मानमुद्दिश्यानुशोकस्य कर्तुमयोग्यत्वेऽपि, भूतसंघातात्मकानि भूतान्युद्दिश्य तस्य कर्तव्यत्वमाशङ्क्याह—** कार्येति। **समनन्तरश्लोकस्तत्र हेतुरित्याह—** यत इति। [२]**चाक्षुषदर्शनमात्रव्यावृत्तिं व्यावर्तयति—** अनुपलब्धिरिति। **न हि यथोक्तसंघातरूपाणि भूतानि**

भाष्यार्कप्रकाशः

मृद्द्रव्यस्य च भूतोत्पत्तेः प्राक्, भूतप्रलयानन्तरं चाभाववत्त्वेनासत्त्वात्। 'मृत्तिकेत्येव सत्यम्' इति तु श्रुत्या यावत्प्रपञ्चं सत्यत्वस्य विवक्षितत्वात्। न च - अनित्यमपि मृद्द्रव्यं रज्जुसर्पादिवन्नासत् , किन्तु सदेवेति - वाच्यम् ; 'विनाशस्वभावो ह्यसत्त्वम् , अविनाशस्वभावश्च सत्त्व'मिति त्वयैव सत्त्वस्य नित्यत्वेनोपवर्णितत्वात्। नित्ये वस्तुन्यसत्त्वस्य, असति वस्तुनि नित्यत्वस्य च क्वाप्यदर्शनात्। 'अविनाशि तु तद्विद्धि' इति तुशब्देनात्मान्यस्य सर्वस्यापि विनाशित्वप्रतिपादनात् , मृदादीनामप्यविनाशित्वे तद्वैलक्षण्यप्रतिपादकतुशब्दप्रयोगानुपपत्तेः 'आत्मन आकाशः सम्भूतः' इति श्रुत्या आत्मनः सकाशादाकाशादीनां जन्मश्रवणात् , 'पृथिव्यप्सु प्रविलीयते' इत्यादिना तेषां लयश्रवणाच्च कथं पृथिव्यादिभूतानां सद्द्रव्यत्वं येन तद्विकाराणां घटादीनां सत्कार्यत्वं स्यात्? न च - प्रकृतिः सती, पृथिव्यादयस्तु तद्विकारत्वात् सत्कार्याण्येव, पृथिव्यादिविकारत्वाच्च घटादीनां परम्परया सत्कार्यत्वमिति - वाच्यम् ; प्रकृतेः ईश्वरात्पृथगसिद्धत्वेन स्वतन्त्रसत्ताऽभावान्न सत्त्वं, नाप्यसत्त्वमिति सिद्धान्तात्। प्रकृतिर्न सांख्याभिमतं प्रधानम् , तस्याशब्दत्वात् ; किन्तु मायैव। माया नामेश्वरशक्तिः। सा ह्यग्निशक्तिवदग्नेः पृथग् ईश्वरात् पृथगसिद्धा। इयं च कार्यगम्यैव। कार्यं चास्याः प्रपञ्चः। स च प्रलये नश्यतीति कथं महाभूतप्रलये प्रकृत्याः सत्त्वमनुमेयम्? लिङ्गाभावात्। 'पादोऽस्य विश्वा भूतानि, त्रिपादस्यामृतं दिवि' इति मुक्तप्राप्ये ब्रह्मणि मायातत्कार्याभावश्रवणाद् नास्ति मुक्तौ प्रकृतिः। तस्मान्न प्रकृतिरपि सद्द्रव्यम्।

**एतेन** - जीवः ईश्वरस्यापृथक्सिद्धविशेषणमिति वादोऽपि **प्रत्युक्तः**; तथात्वे जीवस्यापीश्वरसत्ताधीनसत्ताकतया स्वतन्त्रसत्ताऽभावादसत्त्वमेव स्यात् ; तच्चानिष्टम् , त्वयाऽपि जीवसत्यत्वस्याभ्युपगतत्वात्। तस्मादात्मान्यस्यासत्त्वात् , सत आत्मनश्च अविक्रियत्वान्न सत्कार्यवादसिद्धिः। **किञ्च** सतो द्रव्यस्यावस्थान्तरप्राप्तिरुत्पत्तिरित्यभ्युपगमेऽपि अवस्थान्तरस्य पूर्वमसत एवोत्पत्तिः, न तु सतः, सत उत्पत्त्ययोगादिति कृत्वा असत्कार्यवाद एव सिद्धस्तवापि; मृदि पूर्वमसत एव घटाद्याकारस्य कारकव्यापारेण जातत्वात्। अत एव कारकव्यापारनैरपेक्ष्यरूपदोषासम्भवश्च, कारकव्यापारात्प्राग् घटाद्याकाराभावात्।

तस्मान्न सत्कार्यवादो, नाप्यसत्कार्यवादः; किन्तु मिथ्याकार्यवाद एवानवद्यः। सत उत्पत्त्यादिविकारायोगात् , असतश्च शशश्रृङ्गवदुपलब्ध्ययोगात् , उपलभ्यमानं विक्रियमाणं चेदं कार्यमात्रं [३]मिथ्यैव; शुक्तिकायामुपलभ्यमानं नाशरूपं विकारं भजमानं च रजतमिवेति॥२७॥

अव्यक्तादीनीति श्लोकमवतारयति— **कार्यकरणेति। कार्यं** देहः, **करणानि** मनआदीन्द्रियाणि, तेषां संघातः कार्यकरणसंघातः, स आत्मा स्वरूपं येषां तानि कार्यकरणसंघातात्मकानि, आत्मातिरिक्तचतुर्विंशतितत्त्वात्मकानीत्यर्थः। भूतानि अव्यक्तादीनि व्यक्तमध्यानि अव्यक्तनिधनान्येव भवन्तीति शेषः। हे भारत! तत्र का परिवेदना। अव्यक्तशब्दार्थमाह— **अदर्शनमिति।** अभाव इति यावत्। पुत्रमित्रादीनि भूतानि उत्पत्तेः प्रागनुपलभ्यमानत्वादव्यक्तादीनि। इदमेवाव्यक्तं **नैयायिकाः** प्रागभावं वदन्ति। **व्यक्तम्**उपलब्धिः

१. 'परिवेदना' इति रा.पा.। २. 'अदर्शनम् अनुपलब्धिः' इति भाष्येण अदर्शनप्रतियोगिभूतं दर्शनम् उपलब्धिः, न तु चाक्षुषमात्रमिति व्याख्यातं भवति। तेन अदर्शनशब्दस्य उपलब्धिव्यावृत्तिपरत्वम् , न तु चाक्षुषमात्रव्यावृत्तिपरत्वमिति भावः। 'चाक्षुषदर्शनमात्रवृत्तिं' इति पा.। ३. मिथ्यात्वं तु सदसद्विलक्षणत्वम्।

**भूतानि प्रागुत्पत्तेः; उत्पन्नानि च प्राङ्मरणाद् व्यक्तमध्यानि ;** अव्यक्तनिधनान्येव **पुनः** अव्यक्तम् **अदर्शनं** निधनं **मरणं येषां तानि अव्यक्तनिधनानि, मरणादूर्ध्वमव्यक्ततामेव प्रतिपद्यन्त इत्यर्थः। तथा चोक्तम्— [१]'अदर्शनादापतितः पुनश्चादर्शनं गतः। नासौ तव न तस्य त्वं वृथा का परिदेवना॥'(म.भा.स्त्री.२.१३) इति। तत्र** का परिदेवना **को वा प्रलापः अदृष्टदृष्टप्रनष्टभ्रान्तिभूतेषु भूतेष्वित्यर्थः॥२८॥**

आनन्दगिरिकृतव्याख्या

**पूर्वमुत्पत्तेरुपलभ्यन्ते, तेन तानि तथा व्यपदेशभाञ्जि भवन्तीत्यर्थः। किं तन्मध्यं यदेषां व्यक्तमिष्यते? तदाह—** उत्पन्नानीति। **उत्पत्तेरूर्ध्वं मरणाच्च पूर्वं व्यावहारिकं सत्त्वं मध्यमेषां व्यक्तमिति तथोच्यते। जन्मानुसारित्वं विलयस्य युक्तमिति मत्वा तात्पर्यार्थमाह—** मरणादिति। **उक्तेऽर्थे पौराणिकसम्मतिमाह—** तथा चेति। **तत्रेत्यस्यार्थमाह—** अदृष्टेति। **पूर्वमदृष्टानि सन्ति पुनर्दृष्टानि तान्येव पुनर्नष्टानि। तदेवं भ्रान्तिविषयतया घटीयन्त्रवच्चक्रीभूतेषु भूतेषु शोकनिमित्तस्य प्रलापस्य नावकाशोऽस्तीत्यर्थः॥२८॥**

भाष्यार्कप्रकाशः

मध्ये येषां तानि व्यक्तमध्यानि; जन्मनाशयोर्मध्ये प्रतीयमानानीत्यर्थः। **अव्यक्तनिधनानीति। निधनम्** अन्त इति यावत्। इदमेवाव्यक्तं **नैयायिकाः** प्रध्वंसाभावमाहुः। अव्यक्तमरणयोरेकार्थतामाशङ्क्याह— **मरणादूर्ध्वमिति**। प्राणत्यागादनन्तरमित्यर्थः।

**ननु** सर्वकरणागोचरत्वरूपाव्यक्तत्वस्य आत्मधर्मत्वाद्, 'अव्यक्तोऽयमचिन्त्योऽयम्' इतीहाप्युक्तत्वात् , यो यस्माज्जातः स तस्यादिरिति सिद्धान्तात् 'यतो वा इमानि भूतानि जायन्ते' इति श्रुत्या ब्रह्मणः सर्वभूतकारणत्वावगमाच्च अव्यक्त आत्मा आदिर्येषां तान्यव्यक्तादीनि। तथा कार्यस्य कारणे लयदर्शनाद् ,'यत् प्रयन्त्यभिसंविशन्ति' इति ब्रह्मणि भूतानां लयश्रवणाच्च अव्यक्तं ब्रह्म निधनं येषां तान्यव्यक्तनिधनानीत्यर्थो वाच्यः। यद्वा मायाकार्यत्वात् प्रपञ्चस्य मायादीनि मायान्तानि चेत्यर्थो वाच्यः। तथैव व्याख्यातं च **यादवप्रकाशादिभि**रिति चेत्? **सत्यम्** ; यद्यत्रादिशब्दस्य कारणमित्यर्थः, निधनशब्दस्य च नाशावधिरिति, तदा अव्यक्तशब्दस्य ब्रह्मैवार्थः स्यात् , परं तु आदिशब्दस्य जन्मेत्यर्थः; निधन[शब्द]स्य च मरणमिति; न हि भूतानां ब्रह्म जन्म मरणं वा भवितुमर्हति, माया च। न च - अदर्शनार्थेऽपि समानोऽयं दोषः; न ह्यदर्शनं जन्म भवतीति - वाच्यम् , जन्मनः प्राक् मरणादूर्ध्वं च भूताना-मदृश्यमानत्वाद् अदर्शनस्य आदित्वमन्तत्वं चोक्तमिति।

**नन्वेवम्** 'अदर्शनादापतिताः पुनश्चादर्शनं गताः' इति श्लोकानुगुण्यादादिनिधनशब्दयोरत्र कारणनाशावधिरूपावर्थावेवाप-तितौ; जन्मनः प्राक्, मरणात्पश्चाच्चादर्शनमस्तीत्यनेनापि तदेव सिद्धम् ; ततश्चासत्कार्यवादप्रसङ्गः, प्रपञ्चनाशानन्तरं शून्यवादप्रसङ्गश्च इति चेत्? **मैवम्** ; भूतानि स्वोत्पत्तेः प्राग् भूतस्वरूपेण न दृश्यन्ते, स्वनाशात् पश्चाच्चेति कृत्वा भूतानामव्यक्तादित्वमव्यक्तनिधनत्वं चोक्तं लोकदृष्टिमभिप्रेत्य। शास्त्रदृष्ट्या तु भूतानि स्वोत्पत्तेः प्राक्, स्वकाले, स्वनाशानन्तरं च ब्रह्मरूपेणैव दृश्यन्त इति ब्रह्मादित्वं ब्रह्मनिधनत्वं च युक्तं भूतानामिति।

**नन्वस्मिन्** गीताशास्त्रे शास्त्रदृष्टेरेवाश्रयणीयत्वात् किं लोकदृष्ट्या अव्यक्तशब्दस्यादर्शनार्थवर्णनमिति चेत्? **उच्यते**— व्यक्तमध्यानीति लिङ्गात् न शास्त्रदृष्टिरिह परिग्राह्येति। न हि शास्त्रदृष्ट्या भूतानां मध्यकालेऽपि अब्रह्मात्मकत्वमस्ति येन व्यक्तमध्यत्वं स्यात् ; अव्यक्तं हि ब्रह्म, व्यक्तं त्विन्द्रियविषयमन्यदेव। घटतत्त्ववेत्ता हि पुरुषः घटप्रतीतिकालेऽपि घटं मृद्रूपमेव जानाति। **एतेन** अव्यक्तादीनि व्यक्तमध्यानि अव्यक्तनिधनानीति पदानां - भूतानि जन्मनः प्राक् नोपलभ्यन्ते, मध्ये उपलभ्यन्ते, मरणादनन्तरं च नोपलभ्यन्ते इत्यर्थः **सिद्धः**। नैतावता असत्कार्यवादशून्यवादयोः प्रसङ्गः, भूतान्यभावादुत्पद्यन्ते, अभावं प्रत्यस्तं यन्तीत्यनुक्तत्वात्।

**ननु** 'अदर्शनादापतिताः पुनश्चादर्शनं गताः' इति प्रमाणश्लोके तथैवोक्तमिति कथं तद्वादयोरप्रसङ्ग इति चेत्? **उच्यते**— भूतानामुत्पत्तेः प्रागदृश्यमानत्वाद् 'अदर्शनादापतिताः' इत्युक्तं, न त्वदर्शनप्रभूतत्वादिति। एवं मरणानन्तरमदृश्यमानत्वाद् 'अदर्शनं गताः' इत्युक्तं, न त्वदर्शनं प्रत्यस्तङ्गतत्वादिति। अदर्शनादित्यवधित्वरूपापादाने पञ्चमी, ग्रामादायातीतिवत् ; न तु जनिरुक्तः

१. 'अदर्शनादापतिताः पुनश्चादर्शनं गताः' इति रा.पा.।

**आश्चर्यवत् पश्यति कश्चिदेनमाश्चर्यवद् वदति तथैव चान्यः।**
**आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाऽप्येनं वेद न चैव कश्चित्॥ २९॥**

**दुर्विज्ञेयोऽयं प्रकृत आत्मा, किं त्वामेवैकमुपालभे साधारणे भ्रान्तिनिमित्ते। कथं दुर्विज्ञेयोऽयमात्मेति?** [1]**आह—** आश्चर्यवदिति। **आश्चर्यवद् ,** आश्चर्यम् **अदृष्टपूर्वम् अद्भुतम् अकस्माद् दृश्यमानं, तेन तुल्यम्** आश्चर्यवत् **, आश्चर्यमिवैनमात्मानं पश्यति कश्चित्। आश्चर्यवद् एनं वदति तथैव चान्यः। आश्चर्यवच्च एनमन्यः शृणोति।** [2]**श्रुत्वा दृष्ट्वोक्त्वाऽप्येनं वेद न चैव कश्चित्। अथवा योऽयमात्मानं पश्यति स आश्चर्यतुल्यो, यो वदति, यश्च शृणोति सोऽनेकसहस्रेषु कश्चिदेव भवति। अतो दुर्बोध आत्मेत्यभिप्रायः॥ २९॥**

आनन्दगिरिकृतव्याख्या

**अर्जुनं प्रत्युपालम्भं दर्शयित्वा प्रकृतस्यात्मनो दुर्विज्ञेयत्वात् तं प्रत्युपालम्भो न सम्भवतीति मन्वानः सन्नाह—** दुर्विज्ञेय इति। **तथा चात्माज्ञाननिमित्त**[3]**विभ्रमस्य साधारणत्वादसाधारणोपालम्भस्य निरवकाशतेत्याह—** किं त्वामेवेति। **अहम्प्रत्ययवेद्यत्वादात्मनो दुर्विज्ञेयत्वमसिद्धमिति शङ्कते—** कथमिति। **विशिष्टस्यात्मनोऽहम्प्रत्ययदृष्टत्वेऽपि केवलस्य तदभावादस्ति दुर्विज्ञेयतेति श्लोकमवतारयति—** आहेति। **आश्चर्यवदित्याद्येन पादेनात्मविषयदर्शनस्य दुर्लभत्वं दर्शयता द्रष्टुर्दौर्लभ्यमुच्यते। द्वितीयेन च तद्विषयवदनस्य दुर्लभत्वोक्त्या तदुपदेष्टुस्तथात्वं कथ्यते। तृतीयेन तदीयश्रवणस्य दुर्लभत्वद्वारा श्रोतुर्विरलता विवक्षिता। श्रवणदर्शनोक्तीनां भावेऽपि तद्विषयसाक्षात्कारस्यात्यन्तायासलभ्यत्वं चतुर्थेनाभिप्रेतमिति विभागः। आत्मगोचरदर्शनादिदुर्लभत्वद्वारा दुर्बोधत्वमात्मनः साधयति—** आश्चर्यवदिति। **सम्प्रत्यात्मनि द्रष्टुः वक्तुः श्रोतुः साक्षात्कर्तुश्च दुर्लभत्वाभिधानेन तदीयं दुर्बोधत्वं कथयति—** अथवेति। **व्याख्यानद्वयेऽपि फलितमाह—** अत इति॥ २९॥

भाष्यार्कप्रकाशः

[जनिकर्तुः] प्रकृतित्वरूपापादाने पञ्चमीति बोध्यम्। **अदृष्टेति।** अदृष्टानि दृष्टानि नष्टानि चेत्येवंरूपभ्रान्तिरूपेष्वित्यर्थः।

अत्राह **रामानुजः**— 'मनुष्यादिभूतानि सन्त्येव द्रव्याणि अनुपलब्धपूर्वावस्थानि उपलब्धमनुष्यत्वादिमध्यमावस्थानि अनुपलब्धोत्तरावस्थानी'ति, **तत्तुच्छम्** ; जन्मनाशादिविक्रियावतां मनुष्यादिभूतानां सत्त्वासम्भवात्। अविक्रियं वस्तु हि सत् ; तच्च ब्रह्मैवेति दर्शितमेव 'अविनाशी'ति श्लोकेन। अनुपलब्धपूर्वावस्थानीत्यप्ययुक्तम् ; वीर्यरक्तान्नादिपूर्वावस्थोपलम्भात्। अनुपलब्धोत्तरावस्थानीत्यप्ययुक्तम् ; भस्ममृत्तिकाद्युत्तरावस्थोपलम्भात्॥ २८॥

आश्चर्यवदिति श्लोकमवतारयति— **दुर्विज्ञेय इति। साधारणे** सर्वलोकसाधारणे भ्रान्तिनिमित्ते त्वामेकमेवोपालभे किम्? भूतेष्वदृष्टदृष्टनष्टभ्रान्तिं प्रति यन्निमित्तम् अज्ञानं तत् सर्वसाधारणमेव। तद्वैभवाच्चायं पुरुष आत्मा सर्वस्यापि दुर्विज्ञेय इत्यत्र न त्वमेक एवोपालभ्यः; किं तर्हि? सर्वेऽपि जनाः। 'अहो! अमीषामात्मज्ञानं नासीदि'ति सर्वेऽपि शोच्या एवेत्यर्थः। आश्चर्येण तुल्यमाश्चर्यवदिति 'तेन तुल्यं क्रिया चेद्वति'रिति वतिः। **कश्चिद्** अनेकजन्मस्वनुष्ठितनिष्कामकर्मतपआदिना शुद्धचित्तः कोऽपि धन्यः पुरुषः **पश्यति** जानाति, साक्षात्कुरुत इति यावत्। आत्मनि चक्षुर्व्यापारासम्भवान्न निरीक्षणार्थस्येहोपयोगः, [4]'दृशोऽनालोचने' इति लिङ्गाच्च पश्यतेर्ज्ञानार्थकत्वम्। **वदतीति।** 'न जायते' इत्याद्यात्मस्वरूपं वक्तीत्यर्थः। एनं श्रुत्वाऽपि कश्चिच्च नैव वेदेत्यन्वयः। **अथवा** इति व्याख्यान्तरे। आश्चर्यतुल्यः कश्चिदेनं पश्यति, तथैवाश्चर्यतुल्यः कश्चिदेनं वदति, आश्चर्यतुल्यः अन्यः कश्चिदेनं शृणोतीत्यन्वयः। कश्चिच्छब्दार्थमाह— **अनेकसहस्रेष्विति।** 'मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥'

---

१. 'अत आह' इति पा.। २. 'श्रुत्वाऽप्येनं वेद न चैव कश्चित्' इति पा.। ३. 'विप्रलम्भस्य' इति पा.। ४. आलोचनं हि चाक्षुषज्ञानम्। तद्भिन्नोऽप्यर्थः दृशेरस्तीति अनालोचने इति पर्युदासेन ज्ञापितम्। 'पश्यार्थैश्चानालोचने' (पा. सू. ८।१।२५) इत्यप्युदाहर्तुं युक्तम्।

**देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।।**
**तस्मात् सर्वाणि भूतानि न त्वं शोचितुमर्हसि॥ ३०॥**
**स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि।**

**अथेदानीं प्रकरणार्थमुपसंहरति**[१]**—** देहीति। [२]**(यस्माद्** देही **शरीरी** नित्यं **सर्वदा सर्वावस्थास्ववध्यो निरवयवत्वाद् , नित्यत्वाच्च। तत्रावध्योऽयं** देहे **शरीरे सर्वस्य सर्वगतत्वात् स्थावरादिषु स्थितोऽपि) सर्वस्य प्राणिजातस्य देहे वध्यमानेऽप्ययं देही न वध्यो यस्मात् , तस्माद् भीष्मादीनि सर्वाणि भूतान्युद्दिश्य न त्वं शोचितुमर्हसि॥ ३०॥**

**इह परमार्थतत्त्वापेक्षायां शोको मोहो वा न सम्भवतीत्युक्तम्। न केवलं परमार्थतत्त्वापेक्षायामेव, किन्तु—** स्वधर्ममिति। स्वधर्ममपि **स्वो धर्मः** [३]**स्वधर्मः, क्षत्रियस्य धर्मो युद्धम्। तमप्यवेक्ष्य त्वं न** विकम्पितुं [४]**प्रचलितुं नार्हसि** धर्म्यात् **क्षत्रियस्य स्वाभाविकाद् धर्मात् , आत्मस्वाभाव्यादित्यभिप्रायः। तच्च युद्धं पृथिवीजयद्वारेण धर्मार्थं प्रजा-**

आनन्दगिरिकृतव्याख्या

**श्लोकान्तरमुत्थापयति—** अथेति। **आत्मनो दुर्ज्ञानत्वप्रदर्शनानन्तरमिति यावत्। वस्तुवृत्तापेक्षया शोकमोहयोरकर्तव्यत्वं** प्रकरणार्थः। **देहे वध्यमानेऽपि देहिनो वध्यत्वाभावे फलितमाह—** [५]तस्मादिति। **हेतुभागं विभजते—** सर्वस्येति। **फलितप्रदर्शनपरं श्लोकार्धं व्याचष्टे—** तस्माद्भीष्मादीनीति॥ ३०॥

**श्लोकान्तरमवतारयन् वृत्तं कीर्तयति—** इहेति। **पूर्वश्लोकः सप्तम्यर्थः। यत् पारमार्थिकं तत्त्वं तदपेक्षायामेव केवलं शोकमोहयोरसम्भवो न भवति, किन्तु स्वधर्ममपि चावेक्ष्येति सम्बन्धः। स्वकीयं क्षात्रं धर्ममनुसन्धाय ततश्चलनं परिहर्तव्यमित्यर्थः। यद्धि क्षत्रियस्य धर्मादनपेतं श्रेयःसाधनं तदेव मयाऽनुवर्तितव्यमित्याशङ्क्याह—** धर्म्यादिति। **जातिप्रयुक्तं स्वाभाविकं धर्ममेव विशिनष्टि—** क्षत्रियस्येति। [६]**पुनर्नकारोपादानमन्वयार्थम्। प्रचलितुमयोग्यत्वे प्रतियोगिनं दर्शयति—** स्वाभाविकादिति। **स्वाभाविकत्वमशास्त्रीयत्वमिति शङ्कां वारयितुं तात्पर्यमाह—** आत्मेति। आत्मनः **स्वस्यार्जुनस्य** स्वाभाव्यं **क्षत्रियस्वभावप्रयुक्तं वर्णाश्रमोचितं कर्म, तस्मादित्यर्थः। धर्मार्थं**

भाष्यार्कप्रकाशः

इति स्मरणादिति भावः। **अत इति**। आत्मद्रष्टृवक्तृश्रोतॄणां दुर्लभत्वादित्यर्थः। अत्र 'श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः। आश्चर्यो वक्ता कुशलोऽस्य लब्धाऽऽश्चर्यो ज्ञाता कुशलानुशिष्टः॥' इति मन्त्रोऽनुसन्धेयः॥ २९॥

**देहीति। नित्यं** ध्रुवम्। देहिनि अवध्यत्वं न व्यभिचरतीत्यर्थः। यस्मात् कार्यकरणसंघातस्यानित्यत्वेऽपि तदन्तर्गत आत्मा नित्यः, तस्मात् त्वं सर्वाणि भूतान्युद्दिश्य न शोचितुमर्हसि। भीष्मादिसंघातगतानित्यत्वस्यावर्जनीयत्वाद् भीष्माद्यात्मगतनित्यत्वस्य शोकविरोधित्वाच्चेति भावः॥ ३०॥

**स्वधर्ममिति।** हि क्षत्रियस्य धर्म्याद् युद्धादन्यच्छ्रेयो न विद्यते, तस्मादिति शेषः। स्वधर्ममवेक्ष्यापि, त्वमिति शेषः, विकम्पितुं न चार्हसि, 'धर्मपथ्यर्थन्यायादनपेते' इति यत्। धर्म्यं श्रेय इति श्रेयोहेतावौपचारिकः प्रयोगः, श्रेयस्करमित्यर्थः। **स्वः** स्वीयः क्षत्रियजातेर्विहित इत्यर्थः। इदमेवाह— **क्षत्रियस्य युद्धमिति।** युद्धदर्शनादपि तव कम्पो नोचित इति श्लोकपूर्वार्धस्यार्थः। तत्र हेतुमाह—

१. 'प्रकरणार्थ उपसंह्रियते' इति, 'प्रकरणार्थमुपसंहरन् ब्रूते' इति च पा.। २. कुण्डलितो भागः नास्ति सर्वत्र। ३. 'स्वधर्मः' इति क्वचिन्न। 'स्वधर्मः क्षत्रियस्य युद्ध'मिति रा.पा.। ४. 'न प्रचलितुमर्हसि स्वधर्मत्वादित्यभिप्रायः' रा.पा.। ५. श्लोकगतपदस्य प्रतीकधारणमिदम्। पुस्तकान्तरे तु 'यस्मादिति' इति प्रतीकधारणं दृश्यते। ६. 'न विकम्पितुम्' इत्यत्र नञमुपादाय पुनः 'नार्हसि' इत्यत्र नञुपादानं तस्य अर्हसीत्यनेनान्वयबोधनार्थमित्यर्थः।

**धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते॥ ३१॥**
**यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम्।**
**सुखिनः क्षत्रियाः पार्थ ! लभन्ते युद्धमीदृशम्॥ ३२॥**
**अथ चेत् त्वमिमं धर्म्यं संग्रामं न करिष्यसि।**
**ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि॥ ३३॥**

**रक्षणार्थं चेति धर्मादनपेतं** [१]**परं धर्म्यम्। तस्माद् धर्म्याद् युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते।** हि **यस्मात्॥ ३१॥**

**कुतश्च तद् युद्धं कर्तव्यमिति? उच्यते—** यदृच्छयेति। यदृच्छया **चाप्रार्थिततया** उपपन्नम् **आगतं स्वर्गद्वारम्** अपावृतम् **उद्घाटितम्**[२]**। य एतदीदृशं युद्धं लभन्ते क्षत्रियाः, हे पार्थ ! किं न सुखिनस्ते?॥ ३२॥**

**एवं** [३]**कर्तव्यताप्राप्तमपि —** अथेति। **अथ चेत् त्वमिमं** धर्म्यम् **धर्मादनपेतं** [४]**विहितं** सङ्ग्रामं **युद्धं न करिष्यसि चेत् ,** ततः **तदकरणात् स्वधर्मं, कीर्तिञ्च महादेवादिसमागमनिमित्तां** हित्वा **त्यक्त्वा केवलं पापमवाप्स्यसि॥ ३३॥**

आनन्दगिरिकृतव्याख्या

**प्रजापरिपालनार्थं च प्रयतमानस्य युद्धादुपरिरंसा श्रद्धातव्येत्याशङ्क्याह—** तच्चेति। **ततोऽपि श्रेयस्करं किञ्चिदनुष्ठातुं युद्धादुपरतिः उचितेत्याशङ्क्याह—** तस्मादिति। **तस्माद् युद्धात् प्रचलनमनुचितमिति शेषः॥ ३१॥**

**युद्धस्य गुर्वाद्यनेकप्राणिहिंसात्मकस्य अहिंसाशास्त्रविरोधान्नास्ति कर्तव्यतेति शङ्कते—** कुतश्चेति। **अग्नीषोमीयहिंसादिवद्**[५] **युद्धमपि क्षत्रियस्य विहितत्वादनुष्ठेयम् , सामान्यशास्त्रतो विशेषशास्त्रस्य बलीयस्त्वादित्याह—** उच्यत इति। **तथापि युद्धे प्रवृत्तानाम् ऐहिकामुष्मिकस्थायिसुखाभावाद् उपरतिरेव ततो युक्ता प्रतिभातीत्याशङ्क्याह—** यदृच्छयेति। **चिरेण चिरतरेण च कालेन यागाद्यनुष्ठायिनः स्वर्गादिभाजो भवन्ति, युध्यमानास्तु क्षत्रिया बहिर्मुखताविहीनाः सहसैव स्वर्गादिसुखभोक्तारः, तेन तव कर्तव्यमेव युद्धमिति व्याख्यानेन स्फुटयति—** यदृच्छयेत्यादिना। **इहामुत्र च भाविसुखवतामेव क्षत्रियाणां स्वधर्मभूतयुद्धसिद्धेस्तादर्थ्येनोत्थानं शोकमोहौ हित्वा कर्तव्यमित्यर्थः॥ ३२॥**

**स्वधर्मस्य युद्धस्य श्रद्धया करणे स्वर्गादिमहाफलप्राप्तिं प्रदर्श्य, तदकरणे प्रत्यवायप्राप्तिं प्रदर्शयन्नुत्तरश्लोकगताथशब्दार्थं कथयति—** एवमिति। विहितत्वं **फलवत्त्वम्।** इति **अनेन प्रकारेणेत्यर्थः। अन्वयार्थं पुनः** चेदित्यनूद्यते। महादेवादीत्यादिशब्देन **महेन्द्रादयो गृह्यन्ते॥ ३३॥**

भाष्यार्कप्रकाशः

**स्वधर्मत्वादिति**। क्षत्रियस्य तव युद्धस्य स्वधर्मत्वादित्यर्थः। 'क्षत्रियस्य विजित(व्य)म्' इति शास्त्रादिति भावः।

अत्र **रामानुजः—** इदं युद्धमिति मूलाद् बहिः प्रकल्प्य इदं युद्धं स्वधर्ममवेक्ष्येति व्याचख्यौ। **तन्मन्दम्** ; मूलाद् बहिः कल्पनस्याप्रमाणत्वात्॥ ३१॥

**यदृच्छयेति**। 'हे पार्थ ! सुखिनः क्षत्रियाः यदृच्छया चोपपन्नमपावृतं स्वर्गद्वारमीदृशं युद्धं लभन्ते' इत्यन्वयः। ये लभन्ते ते सुखिनो न किमिति भाष्यं त्वर्थात् सिद्धार्थकथनम्॥ ३२॥

**अथेति। महादेवः** शिवः। आदिशब्देनेन्द्रादिग्रहणम्। तत्समागमजन्यामित्यर्थः। वन्यवराहवधखाण्डवदहनादिष्विति भावः ॥ ३३॥

१. 'परमम्' इति पा.। २. 'उद्घाटितकवाटम्' पा.। ३. 'कर्तव्यतया' इति पा.। ४. 'विहितमिति' इति आनन्दगिरिसंमतः पाठः भाति। ५. 'हिंसावत्' इति पा.।

**अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्।**
**सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते॥ ३४॥**
**भयाद् रणादुपरतं [१]मंस्यन्ते त्वां महारथाः।**
**येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम्॥ ३५॥**
**अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः।**
**निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम्?॥ ३६॥**

**न केवलं स्वधर्मकीर्तिपरित्यागः—** अकीर्तिमिति। **अकीर्तिं चापि भूतानि कथयिष्यन्ति** ते **तव** अव्ययां **दीर्घकालाम्। धर्मात्मा शूरः इत्येवमादिभिर्गुणैः सम्भावितस्य चाकीर्तिः** मरणादतिरिच्यते। **सम्भावितस्य चाकीर्तेर्वरं मरणमित्यर्थः॥ ३४॥**

**किञ्च —** भयादिति। **भयात् कर्णादिभ्यो** रणाद् **युद्धाद्** उपरतं **निवृत्तं** [१]मंस्यन्ते **चिन्तयिष्यन्ति, न कृपयेति, त्वां** महारथाः **दुर्योधनप्रभृतयः।** येषां च **त्वं दुर्योधनादीनां** बहुमतो **बहुभिर्गुणैर्युक्तः इत्येवं मतो बहुमतो भूत्वा पुनः यास्यसि** लाघवं **लघुभावम्॥ ३५॥**

**किञ्च—** अवाच्यवादानिति। अवाच्यवादान् **अवक्तव्यवादांश्च** बहून् **अनेकप्रकारान् वदिष्यन्ति तव** अहिताः **शत्रवो** निन्दन्तः **कुत्सयन्तः** तव **त्वदीयं** सामर्थ्यं **निवातकवचादियुद्धनिमित्तम्।** ततः **तस्माद् निन्दाप्राप्तेर्दुःखाद्**

आनन्दगिरिकृतव्याख्या

**युद्धाकरणे क्षत्रियस्य प्रत्यवायमामुष्मिकमापाद्य, शिष्टगर्हालक्षणं दीर्घकालभाविनमैहिकमपि प्रत्यवायं प्रतिलम्भयति—** न केवलमिति। **युद्धे स्वमरणसंदेहात् तत्परिहारार्थम् अकीर्तिरपि सोढव्या, आत्मसंरक्षणस्य श्रेयस्करत्वादित्याशङ्क्याह—** धर्मात्मेति। **मान्यानाम् अकीर्तिर्भवति मरणादपि दुःसहेति तात्पर्यार्थमाह—** सम्भावितस्येति॥ ३४॥

**इतश्च त्वया युद्धं कर्तव्यमित्याह—** किञ्चेति। **प्राणिषु कृपया नाहं युद्धं करिष्यामीत्याशङ्क्याह—** भयादिति। **महारथानेव विशिनष्टि—** येषां चेति। **दुर्योधनादिभिः तव उपहास्यतानिरसनार्थं [२] संग्रामे प्रवृत्तिरवश्यम्भाविनीत्यर्थः॥ ३५॥**

**इतश्च मा त्वं युद्धादुपरमं कार्षीरित्याह—** किञ्चेति। **ननु भीष्मद्रोणादिवधप्रयुक्तं कष्टतरं दुःखमसहमानो युद्धान्निवृत्तः स्वसामर्थ्यनिन्दनादि शत्रुकृतं सोढुं शक्ष्यामीत्याशङ्क्याह—** तत इति॥ ३६॥

भाष्यार्कप्रकाशः

**अकीर्तिमिति। अकीर्तिम्** अपकीर्तिम् 'अर्जुनो युद्धाद्भीतः' इत्याकारिकाम्। **भूतानि** प्राणिनः, जनाः इति यावत्। कथयन्तु नाम, किं तेन मे? इत्यत आह— **सम्भावितस्येति।** धर्मात्मत्वशौर्यधैर्यादिगुणैरुत्कृष्टस्येत्यर्थः॥ ३४॥

ननु स्वजने स्नेहकारुण्यादिना युद्धान्निवृत्तस्य मम कथमपकीर्तिः? अत आह— **भयादिति।** भयहे(तु)त्वाकाङ्क्षां पूरयति— **कर्णादिभ्य इति।** काकोलूकयोरिव कर्णार्जुनयोर्निसर्गवैरित्वात् कर्णशब्दश्रवणेनार्जुनस्य कोपोद्दीपनं स्यादिति कर्णग्रहणम्। 'महारथास्ते कर्णादिभ्यो भयाद्धेतोः त्वां रणादुपरतं मन्यन्ते' इत्यन्वयः॥ ३५॥

**अवाच्येति।** वक्तुमयोग्या अवाच्याः॥ ३६॥

१. 'मन्यन्ते' इति मूले भाष्ये च रा.पा.। २. निरसनाय इति पा.।

**हतो वा प्राप्स्यसि[1] स्वर्गं जित्वा वा भोक्ष्यसे महीम्।**
**तस्मादुत्तिष्ठ कौन्तेय ! युद्धाय कृतनिश्चयः ॥ ३७॥**
**सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।**
**ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८॥**

**दुःखतरं नु किम्? ततः कष्टतरं दुःखं नास्तीत्यर्थः ॥ ३६ ॥**

**युद्धे पुनः क्रियमाणे कर्णादिभिः—** हतो वेति। **हतो वा [2]प्राप्स्यसि स्वर्गं, हतः सन् स्वर्गं प्राप्स्यसि। जित्वा वा कर्णादीन् शूरान् भोक्ष्यसे महीम्। उभयथाऽपि तव लाभ एवेत्यभिप्रायः। यत एवं तस्मादुत्तिष्ठ, कौन्तेय ! युद्धाय** कृतनिश्चयः**- जेष्यामि शत्रून् , मरिष्यामि वेति निश्चयं कृत्वेत्यर्थः ॥ ३७॥**

**तत्र युद्धं स्वधर्म इत्येवं युध्यमानस्योपदेशमिमं शृणु—** सुखदुःखे इति। **सुखदुःखे** समे **तुल्ये कृत्वा, रागद्वेषावकृत्वेत्येतत् । तथा लाभालाभौ जयाजयौ च समौ कृत्वा, ततो युद्धाय** युज्यस्व **घटस्व। नैवं युद्धं कुर्वन् पापमवाप्स्यसीत्येष उपदेशः प्रासङ्गिकः ॥ ३८॥**

आनन्दगिरिकृतव्याख्या

**तर्हि युद्धे गुर्वादिवधवशान्मध्यस्थनिन्दा, ततो निवृत्तौ शत्रुनिन्देत्युभयतःपाशा रज्जुरित्याशङ्क्याह—** युद्धे पुनरिति। **जये पराजये च लाभध्रौव्याद् युद्धार्थमुत्थानमावश्यकमित्याह—** तस्मादिति। **न हि परिशुद्धकुलस्य क्षत्रियस्य युद्धायोद्युक्तस्य तस्मादुपरमः साधीयानित्याह—** कौन्तेयेति। **जये पराजये चेत्येतद्** उभयथेत्युच्यते। **जयादिनियमाभावेऽपि लाभनियमे फलितमाह—** यत इति। **कृतनिश्चयत्वमेव विशदयति—** जेष्यामीति ॥ ३७॥

**पापभीरुतया युद्धाय निश्चयं कृत्वा नोत्थातुं शक्नोमीत्याशङ्क्याह—** तत्रेति। **युद्धस्य स्वधर्मतया कर्तव्यत्वे सतीति यावत्। सुहृज्जीवनमरणादिनिमित्तयोः सुखदुःखयोः समताकरणं कथमिति? तत्राह—** रागद्वेषाविति। लाभः **शत्रुकोषादिप्राप्तिः,** अलाभः **तद्विपर्ययः। न्याय्येन युद्धेनापरिभूतेन परस्य परिभवो** जयः**, तद्विपर्ययस्तु** अजयः। **तयोः लाभालाभयोर्जयाजययोश्च समताकरणं [3]समानमेव रागद्वेषावकृत्वेत्येतद् दर्शयितुं** तथेत्युक्तम्। **यथोक्तोपदेशवशात् परमार्थदर्शनप्रकरणे युद्धकर्तव्यतोक्तेः समुच्चयपरत्वं [4]शास्त्रस्य प्राप्तमित्याशङ्क्याह—** एष इति। **क्षत्रियस्य तव धर्मभूतयुद्धकर्तव्यतानुवादप्रसङ्गागतत्वाद् अस्योपदेशस्य नानेन मिषेण समुच्चयः सिध्यतीत्यर्थः ॥ ३८॥**

भाष्यार्कप्रकाशः

**हत इति**। हतः इति हन्तेः कर्मणि क्तः। कर्त्राकाङ्क्षां पूरयति— **कर्णादिभिरिति। भोक्ष्यसे** अनुभविष्यसि। **उत्तिष्ठेति**। 'उदोऽनूर्ध्वकर्मणि' इति[5] न तङ्। यस्माद् हतो वा स्वर्गं प्राप्स्यसे, जित्वा वा [महीं] भोक्ष्यसे, तस्माद् हे कौन्तेय! युद्धाय कृतनिश्चयः सन् उत्तिष्ठेत्यन्वयः ॥ ३७॥

**सुखेति**। सुखदुःखसमीकरणफलितार्थमाह— **रागद्वेषावकृत्वेति**। सुखे रागमकृत्वा, दुःखे द्वेषमकृत्वा चेत्यर्थः। एवं लाभजययोः अलाभाजययोश्च ऊह्यम्। एवं युद्धं कुर्वन् त्वं पापं नावाप्स्यसीत्यन्वयः ॥ ३८॥

१-२. 'प्राप्स्यसे' इति मूले, 'हतो वेति। युद्धे पुनः क्रियमाणे कर्णादिभिः हतो वा प्राप्स्यसे' इति भाष्ये च रा.पाठः। ३. सुखदुःखयोः समताकरणेन समानमित्यर्थः। ४. गीताशास्त्रस्येत्यर्थः। ५. ऊर्ध्वदेशसंयोगानुकूलक्रियाभिन्नकर्मवृत्तेः स्थाधातोः उत्पूर्वादात्मनेपदमित्यर्थकमिदं सूत्रम्। प्रकृते तु उपविष्टमर्जुनं प्रति उत्तिष्ठेत्युक्तेः ऊर्ध्वकर्मपरत्वान्नात्मनेपदमित्यर्थः।

**एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु।**
**बुद्ध्या युक्तो यया पार्थ ! कर्मबन्धं प्रहास्यसि॥३९॥**

**[१]शोकमोहापनयनाय लौकिको न्यायः 'स्वधर्ममपि चावेक्ष्य' (भ.गी.२.३१) इत्याद्यैः श्लोकैरुक्तः, न तु तात्पर्येण। परमार्थदर्शनं त्विह प्रकृतम्। तच्चोक्तमुपसंहरति— 'एषा तेऽभिहिता' इति, शास्त्रविषयविभागप्रदर्शनाय। इह हि प्रदर्शिते पुनः शास्त्रविषयविभागे, उपरिष्टात् 'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्'(भ.गी.३.३) इति निष्ठाद्वयविषयं शास्त्रं सुखं प्रवर्तिष्यते, श्रोतारश्च विषयविभागेन सुखं ग्रहीष्यन्तीत्यत आह—** एषा त इति। **एषा** ते **तुभ्यम्** अभिहिता **उक्ता** सांख्ये **परमार्थवस्तुविवेकविषये** बुद्धिः **ज्ञानं साक्षाच्छोकमोहादिसंसारहेतुदोषनिवृत्तिकारणम् ।** योगे **तु तत्प्राप्त्युपाये निःसङ्गतया द्वन्द्वप्रहाणपूर्वकमीश्वराराधनार्थे कर्मयोगे कर्मानुष्ठाने, समाधियोगे च**

आनन्दगिरिकृतव्याख्या

**ननु 'स्वधर्ममपि चावेक्ष्य' इत्यादिश्लोकैर्न्यायावष्टम्भेन शोकमोहापनयनस्य तात्पर्येणोक्तत्वात् तस्मिन्नुपसंहर्तव्ये, किमिति परमार्थदर्शनमुपसंह्रियते? तत्राह—** शोकेति। **'स्वधर्ममपी'त्यादिभिरतीतैः श्लोकैः शोकमोहयोः स्वजनमरणगुर्वादिवधशङ्कानिमित्तयोः सम्यग्ज्ञानप्रतिबन्धकयोरपनयार्थं 'वर्णाश्रमकृतं धर्ममनुतिष्ठितः स्वर्गादि सिध्यति, नान्यथे'त्यन्वयव्यतिरेकात्मको लोकप्रसिद्धो न्यायो यद्यपि दर्शितः, तथापि नासौ तात्पर्येणोक्त इत्यर्थः। किं तर्हि तात्पर्येणोक्तम्? तदाह—** परमार्थेति। **'न त्वेवाहं जातु नासम्' इत्यादि सप्तम्या परामृश्यते।** उक्तं **'न जायते म्रियते वा' इत्यादिनोपपादितमित्यर्थः। उपसंहारप्रयोजनमाह—** शास्त्रेति। **तस्य वस्तुद्वारा विषयो निष्ठाद्वयं, तस्य विभक्तस्य तेनैव विभागेन प्रदर्शनार्थं परमार्थदर्शनोपसंहार इत्यर्थः। ननु किमिति अत्र शास्त्रस्य विषयविभागः प्रदर्श्यते, उत्तरत्रैव तद्विभागप्रवृत्तिप्रतिपत्त्योः सम्भवादिति? तत्राह—** इह हीति। **शास्त्रप्रवृत्तेः श्रोतृप्रतिपत्तेश्च सौकर्यार्थमादौ विषयविभागसूचनमित्यर्थः। उपसंहारस्य फलवत्त्वमेवमुक्त्वा तमेवोपसंहारमवतारयति—** अत आहेति। **परमार्थतत्त्वविषयां ज्ञाननिष्ठामुक्तामुपसंहृत्य वक्ष्यमाणां संगृह्णाति—** योगे त्विति। **तामेव बुद्धिं विशिष्टफलवत्त्वेनाभिष्टौति—** बुद्ध्येति। **तत्रोपसंहारभागं विभजते—** एषेत्यादिना। **बुद्धिशब्दस्यान्तःकरणविषयत्वं व्यावर्तयति—** ज्ञानमिति। **तस्य सहकारिनिरपेक्षस्य विशिष्टं फलवत्त्वमाचष्टे—** साक्षादिति। **शोकमोहौ रागद्वेषौ कर्तृत्वं भोक्तृत्वमित्यादिरनर्थः संसारः, तस्य हेतुर्दोषः स्वाज्ञानं, तस्य निवृत्तौ निरपेक्षं कारणं ज्ञानम्। अज्ञाननिवृत्तौ ज्ञानस्यान्वयव्यतिरेकसमधिगतसाधनत्वादित्यर्थः। 'योगे त्विमाम्' इत्यादि व्याकुर्वन् योगशब्दस्य प्रकृते चित्तवृत्तिनिरोधविषयत्वं व्यवच्छिनत्ति—** तत्प्राप्तीति। **प्रकृतं मुक्त्युपयुक्तं ज्ञानं तत्पदेन परामृश्यते। ज्ञानोदयोपायमेव प्रकटयति—** निःसङ्गतयेति। **फलाभि-**

भाष्यार्कप्रकाशः

**एष इति।** 'स्वधर्ममपि चावेक्ष्य' इत्येवमादिभिः श्लोकैरुक्तः शोकमोहापनये लौकिको न्याय एष उपदेशः **प्रासङ्गिकः** प्रसङ्गादागतः; प्रसङ्गादुक्त इति यावत्। न त्वस्मिन्नुपदेशे वक्तुस्तात्पर्यमस्तीत्याह— **न तु तात्पर्येणेति।** तत्र हेतुमाह— **परमार्थेति।** इह परमार्थदर्शनमेव प्रकृतं, न तु लौकिकदर्शनमिति **तुशब्दार्थः।** **तच्चोक्तमिति।** 'अशोच्यानि'त्यारभ्य 'न त्वं शोचितुमर्हसी'त्येतदन्तेन ग्रन्थेनेति भावः। तेऽभिहिता एषा बुद्धिः **सांख्ये** सांख्यविषयेत्यर्थः। एषा सांख्ये बुद्धिस्तेऽभिहितेति वाऽन्वयः। एतावता ग्रन्थसन्दर्भेण ते सांख्यबुद्धिरुपदिष्टेति परमार्थः। सांख्यशब्दार्थमाह— [२]**परमार्थवस्तुविवेक इति।** सप्तम्यर्थमाह— **विषय इति।** बुद्धिं विशिनष्टि— **साक्षादिति।** शोकमोहादिरूपो यः संसारहेतुभूतो दोषः तस्य साक्षान्निवृत्तिकारणमित्यर्थः। ज्ञानेनाज्ञाननाशे सति तत्कार्यशोकमोहादिनाश इति भावः। योगशब्दार्थमाह— **तत्प्राप्तीत्यादिना।** तस्य सांख्यस्य प्राप्तौ **उपायः** साधनं, तस्मिन्। **निःसङ्गतया** फलाभिसन्धिराहित्येन। **द्वन्द्वप्रहाणं** शीतोष्णादिद्वन्द्वसहनम्। ईश्वरस्याराधनमेवार्थो यस्मिन् तस्मिन् , परमेश्वरप्रीत्यर्थमिति सङ्कल्प-

१. 'एष उपदेशः प्रासङ्गिकः शोकमोहापनये' इत्यादिः रा.पा.। २. भाष्ये— 'परमार्थवस्तुविवेके विषये' इति रा.पा. भाति।

## नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।

इमाम् **अनन्तरमेवोच्यमानां बुद्धिं शृणु। तां च बुद्धिं स्तौति प्ररोचनार्थम्। बुद्ध्या** यया **योगविषयया युक्तः, हे पार्थ !** कर्मबन्धं **कर्मैव धर्माधर्माख्यं**[1] **बन्धः कर्मबन्धः, तं प्रहास्यसि, ईश्वरप्रसादनिमित्त**[2]**ज्ञानप्राप्तेरित्यभिप्रायः॥ ३९॥**

**किञ्चान्यत् —** नेहाभीति। **न** इह **मोक्षमार्गे कर्मयोगे** अभिक्रमनाशः**अभिक्रमणमभिक्रमः प्रारम्भः, तस्य**

आनन्दगिरिकृतव्याख्या

**सन्धिवैधुर्यं** निःसङ्गत्वम्। **बुद्धिस्तुतिप्रयोजनमाह—** प्ररोचनार्थमिति। **अभिष्टुता हि बुद्धिः श्रद्धातव्या सती अनुष्ठातारमधिकरोति, तेन स्तुतिरर्थवतीत्यर्थः। कर्मानुष्ठानविषयबुद्ध्या कर्मबन्धस्य कुतो निवृत्तिः? न हि तत्त्वज्ञानमन्तरेण समूलं कर्म हातुं शक्यमित्याशङ्क्याह—** ईश्वरेति॥ ३९॥

**ननु कर्मानुष्ठानस्यानैकान्तिकफलत्वेनाकिञ्चित्करत्वाद् , अनेकानर्थकलुषितत्वेन दोषवत्त्वाच्च योगबुद्धिरपि न श्रद्धेयेति, तत्राह —**किञ्चेति। **अन्यच्च किञ्चिदुच्यते कर्मानुष्ठानस्यावश्यकत्वे कारणमिति यावत्। कर्मणा सह समाधेरनुष्ठातुमशक्यत्वाद् ,** [3]**अनेकान्तराय-सम्भवात् , तत्फलस्य च साक्षात्कारस्य** [4]**दीर्घकालाभ्याससाध्यस्य एकस्मिञ्जन्मन्यसम्भवाद् , अर्थाद् योगी भ्रश्येत, अनर्थे च निपतेदित्याशङ्क्याह—** नेहेति। **प्रतीकत्वेनोपात्तस्य नकारस्य पुनरन्वयानुगुणत्वेन नास्तीत्यनुवादः। यत्तु कर्मानुष्ठानस्यानैकान्तिक-**

भाष्यार्कप्रकाशः

पूर्वकमनुष्ठिते इत्यर्थः। कोऽसौ योगः? अत आह— **कर्मयोग इति।** तत्स्वरूपमाह— **कर्मानुष्ठान इति।** समाधिरपि कर्मयोग एवेत्याह—**समाधियोग इति।** यमनियमाद्यष्टाङ्गयोग इत्यर्थः। एतावता योगे इत्यस्य कर्मानुष्ठानयोगानुष्ठानात्मककर्मयोगविषया-मित्यर्थः सिद्धः। **तत्प्राप्त्युपायेत्य**नेन च सांख्ययोगादुत्तमाधिकारिविषयात् कर्मयोगस्यापकर्षः सूचितः। न हि संसारकारणाज्ञाननिवृत्तौ साक्षात् साधनेन सांख्ययोगेन परम्परासाधनं कर्मयोगस्तुल्यः स्यात्। न च वैयर्थ्यं शङ्क्यम् , योगस्य सांख्योपजीव्यत्वात्। **प्ररोचनार्थं** रुच्युत्पादनार्थम्। 'यवागूं पिब शिखा ते वर्धिष्यते' इति वाक्यवदिति भावः। **ज्ञानप्राप्त्यैवेति।** न तु साक्षादित्येवकारार्थः। कर्मयोगादीश्वरप्रसादः; आदिपदाच्चित्तशुद्धिः, तेन निमित्तेन ज्ञानप्राप्तिरिति परम्परया योगात् कर्मबन्धप्रहाणमिति भावः।

अत्राह **रामानुजः—** संख्या बुद्धिः; बुद्ध्या निर्धारणीयमात्मतत्त्वं सांख्यम् ; ज्ञातव्ये आत्मतत्त्वे तज्ज्ञानाय या बुद्धिरभिधेया, 'न त्वेवाहम्' इत्यारभ्य 'तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसी'त्यन्तेन सैषा तेऽभिहिता। आत्मज्ञानपूर्वकमोक्षसाधनकर्मानुष्ठाने यो बुद्धियोगो वक्तव्यः, स इह योगशब्देनोच्यते इति; **तदसत्** ; 'या, अभिधेया, सा' इति पदत्रयस्य मूलाद् बहिः प्रकल्पनस्या-प्रमाणत्वात्। मूलकर्तुरेतद्विवक्षासत्त्वे 'सैषा तेऽभिहिता' इत्येव वक्तव्यत्वात्। तज्ज्ञानाय या बुद्धिरित्यसङ्गतार्थकं वाक्यम्; ज्ञानस्यैव बुद्धित्वेन बुद्धेर्ज्ञानार्थत्वस्यासम्भवात् ; न हि स्वयमेव स्वार्थं भवति यत्किमपि। तथा कर्मणां मोक्षसाधनत्वं श्रुतिविरुद्धम् , 'नास्त्यकृतः कृतेन' 'नान्यः पन्था विद्यतेऽयनाय' इत्यादिश्रुतेः। आत्मज्ञानस्यैव मोक्षसाधनत्वं च श्रुतिसिद्धम् , 'तरति शोकमात्मवित्' 'ब्रह्मविद् ब्रह्मैव भवति' इत्यादिश्रुतेः। आत्मज्ञस्य कर्मसु प्रवृत्तिरेव न सम्भवति। 'निष्कलं निष्क्रियं शान्तम्' 'साक्षी चेता केवलो निर्गुणश्च' इत्यादिना अकर्त्रभोक्त्रविक्रियसाक्षिचैतन्यात्मकमात्मानं विदुषः कथं कर्मसु प्रवृत्तिः? कर्माणि हि कर्त्रादिकारकव्यापारसाध्यानि। तथा 'कर्मानुष्ठाने या बुद्धिर्वक्तव्या तामिमां शृणु' इत्यनेनैव विवक्षितार्थसिद्धेः, 'कर्मानुष्ठाने यो बुद्धियोगो वक्तव्यः, तत्र या बुद्धिर्वक्तव्या, तामिमां शृणु' इति कोऽयं वक्रः पन्थाः? कर्मानुष्ठानविषयबुद्धेः कर्मानुष्ठानविषयबुद्धियोगविषयबुद्धेर्वैलक्षण्यस्य दुर्वचत्वात्॥ ३९॥

**नेहेति।** इहाभिक्रमनाशो नास्ति, प्रत्यवायो न विद्यते, अस्य धर्मस्य **स्वल्पं** लेशोऽपि महतो भयात् त्रायते अनुष्ठातारमिति शेषः। **मोक्षमार्ग इति।** परम्परया कर्मयोगस्यापि मोक्षहेतुत्वादिति भावः। **कृष्यादेरिति।** कृष्यादेः प्रारम्भस्य यथा नाशोऽस्ति

१. 'धर्माधर्माख्यः' इति पा. प्रायेण सर्वत्र दृश्यते। २. 'ईश्वरप्रसादादिनिमित्तज्ञानप्राप्त्यैवेत्यर्थः' इति रा. पा.। ३. 'व्याधिस्त्यानसंशयप्रमाद —' (यो.सू. १-२९) इत्यादिसूत्रे अन्तरायाः परिगणिताः, तद्याख्यासु विवृताश्च द्रष्टव्याः। ४. स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः (यो.सू. १-१४) इति सूत्रादिति भावः।

## स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्॥४०॥

**नाशो नास्ति, यथा कृष्यादेः। योगविषये प्रारम्भस्य नानैकान्तिकफलत्व[1]मित्यर्थः। किञ्च नापि चिकित्सावत् प्रत्यवायो [2]विद्यते। किन्तु भवति? स्वल्पमप्यस्य** धर्मस्य **[3]योगधर्मस्यानुष्ठितं** त्रायते **रक्षति महतः** भयात् **संसारभयात् जन्ममरणादिलक्षणात् ॥४०॥**

आनन्दगिरिकृतव्याख्या

**फलत्वेनाकिञ्चित्करत्वमुक्तम्, तद् दूषयति—** यथेति। **कृषिवाणिज्यादेरारम्भस्यानियतं फलं, सम्भावनामात्रोपनीतत्वात्। न तथा कर्मणि वैदिके प्रारम्भस्य फलमनियतं युज्यते, शास्त्रविरोधादित्यर्थः। यत्तूक्तमनेकानर्थकलुषितत्वेन दोषवदनुष्ठानमिति, तत्राह—** किञ्चेति। **इतोऽपि कर्मानुष्ठानमावश्यकमिति प्रतिज्ञाय हेत्वन्तरमेव स्फुटयति—** नापीति। **चिकित्सायां हि क्रियमाणायां व्याध्यतिरेको वा मरणं वा प्रत्यवायोऽपि सम्भाव्यते, कर्मपरिपाकस्य दुर्विवेकत्वात्। न तथा कर्मानुष्ठाने दोषोऽस्ति विहितत्वादित्यर्थः। सम्प्रति कर्मानुष्ठानस्य फलं पृच्छति—** किन्त्विति। **उत्तरार्धं व्याकुर्वन् विवक्षितं फलं कथयति—** स्वल्पमपीति। **सम्यग्ज्ञानोत्पादनद्वारेण रक्षणं विवक्षितम्। [4]'सर्वपापप्रसक्तोऽपि ध्यायन् निमिषमच्युतम्। यतिस्तपस्वी भवति पङ्क्तिपावनपावनः॥' इति स्मृतेरित्यर्थः॥४०॥**

भाष्यार्कप्रकाशः

तद्वदित्यर्थः। ननु प्रारम्भस्य कथं नाशः, प्रारब्धस्य तु भवेन्नाश इत्यत आह— **नानैकान्तिकमिति**। प्रारम्भस्य फलव्यभिचारित्वमेव नाश इत्यर्थः। कृष्यादिप्रारम्भस्य तु न नियतं फलं, वर्षाभावतदाधिक्यादिना निष्फलत्वसम्भवात्। योगविषयप्रारम्भस्य तु नियतं फलमित्यर्थः। ननु प्रारब्धे योगे अपरिसमाप्ते सति कथं योगप्रारम्भस्यानैकान्तिकं फलं नेति? अत आह— **स्वल्पमपीति।** योगस्यारम्भमात्रादपि संसारभयनिवृत्तिर्भवेत् , किं पुनर्योगस्य परिसमाप्तेरिति द्योतयितुं स्वल्पमपी**त्यपि**पदम्। ननु रोगनिवृत्त्यर्थं क्रियमाणे चिकित्सात्मके योगे असमाप्ते सति प्रत्यवायोऽस्ति, पूर्वापेक्षया समधिकतरव्याधिविजृम्भदर्शनात्। तथा संसारनिवृत्त्यर्थं क्रियमाणे कर्मयोगे असमाप्ते सति संसारविजृम्भरूपप्रत्यवायः स्यादिति, अत आह— **प्रत्यवायो न विद्यत इति**। कर्मयोगस्यासमाप्तौ दोषो न विद्यते, परं तु संसारो यथापूर्वं वर्तते इत्यर्थः। **यद्वा** चिकित्साया अकरणे रोगस्य वृद्धिरूपः प्रत्यवायो विद्यते यथा, तद्वत् कर्मयोगस्याकरणे दोषोऽस्ति किमिति? अत आह— **प्रत्यवाय इति।** अकरणे दोषः प्रत्यवायः इति शास्त्रवित्समयः; सन्ध्या-वन्दनादिवत् कर्मयोगस्याकरणे नास्ति प्रत्यवाय इत्यर्थः। न च - सन्ध्यावन्दनादिनित्यकर्मविधानमेव कर्मयोग इति कृत्वा कथमुच्यते सन्ध्यावन्दनादिवदिति - वाच्यम् , ईश्वराराधनबुद्ध्या कर्मानुष्ठानस्यैव कर्मयोगत्वात् , नित्यकर्मविधानस्य फलाभिसन्धिपूर्वकत्वाच्च। नित्यकर्मानुष्ठानमेव फलाभिसन्ध्या[5] विरहितं सत् कर्मयोग इत्युच्यत इति भावः। **अथवा** रोगनिवृत्त्यर्थं चिकित्सायां क्रियमाणायां यथा रसौषध्यादिमारणरूपजीवहिंसावत्त्वेन नरकपातलक्षणः प्रत्यवायोऽस्ति कर्तुस्तथा कर्मयोगानुष्ठातुर्नास्ति प्रत्यवायः, कर्मयोगे हिंसाऽभावात्। न चात्रापि पशुहिंसादिकमस्तीति वाच्यम् , 'अग्नीषोमीयं पशुमालभेते'त्यादिशास्त्राद् विहितस्य पश्वालम्भनादे-रहिंसात्वात्। न च 'मा हिंस्यात् सर्वा भूतानि' इति निषिद्धैव हिंसेति वाच्यम् , [6]सामान्यविधित्वात् तस्य। विशेषविधिना हि सामान्यविधिर्बाध्यते। न च पश्वालम्भनस्य पशुदुःखहेतुत्वात् कुतो न हिंसात्वमिति वाच्यम् , यज्ञादावालम्भितस्य[7] पशोः स्वर्गलाभात्। **यद्वा** चिकित्सायां क्रियमाणायां व्याधिनिवृत्तिरवश्यं भवतीति वक्तुं न शक्यते, प्राणिकर्मविपाकस्य विचित्रत्वात् ; प्रत्युत व्याध्यतिशयो मरणं वा भविष्यतीत्यस्ति दोषश्चिकित्साकरणे। एवं कर्मयोगस्य करणे नास्ति यः कश्चिद् दोषः, नियतफलत्वात् कर्मयोगस्य। यद्यपि चिकित्साया अकरणेऽपि तदुभयं भविष्यति, तथापि तत्करणेऽपि तदुभयसत्त्वात् तत्करणस्य दुष्टत्वमिति बोध्यम्।

**वस्तुतस्तु** रोगिणश्चिकित्साकरणात् प्रत्यवायो भिषज एव; स्वकृतचिकित्सया यदि रोगिणो रोगवृद्धिः स्यात् , यदि वा मरणं

१. 'नानैकान्तिकं फलम्' इति रा.पा.। २. 'विद्यते भवति। किन्तु स्वल्प' इति रा.पा.। ३. 'योगस्यानुष्ठितम्' इति रा.पा.। ४. 'सर्वपापेषु सक्तोऽपि' इति पा.।
५. 'फलाभिसंधिना' इति पाठो युक्तः। ६. सामान्यशास्त्रत्वादित्यर्थः। ७. 'आलब्धस्य' इति पाठो युक्तः।

**व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।।**
**बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥४१॥**

**येयं सांख्ये बुद्धिरुक्ता, योगे च वक्ष्यमाणलक्षणा, सा—** व्यवसायेति। व्यवसायात्मिका **निश्चयस्वभावा एकैव बुद्धिः इतरविपरीतबुद्धिशाखाभेदस्य बाधिका, सम्यक्प्रमाणजनितत्वात् ,** इह **श्रेयोमार्गे, हे कुरुनन्दन** ! । **याः पुनः**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ननु अन्या अपि काम्यविषयाः वैदिक्यः आगमिक्यश्च त्रिपुरादिविषयाः **काणादा**दिशास्त्रसिद्धाश्च बुद्धयः सन्ति। ताः परित्यज्य किमिति द्वे एव बुद्धी भगवतोपदिष्टे इत्याशङ्क्याह—[**येयमिति**।] येयं सांख्ये बुद्धिरुक्ता योगे च वक्ष्यमाणा, सैव

आनन्दगिरिकृतव्याख्या

**ननु बुद्धिद्वयातिरिक्तानि बुद्ध्यन्तराण्यपि** काणादा**दिशास्त्रप्रसिद्धानि विद्यन्ते। तथा च कथं बुद्धिद्वयमेव भगवतोपदिष्टमिति? तत्राह—** येयमिति। **सेवैका प्रमाणभूता बुद्धिरित्याह—** व्यवसायात्मिकेति। **बुद्ध्यन्तराणि अविवेकमूलानि अप्रमाणानीत्याह—** बहुशाखा हीति। **व्यवसायात्मिकाया बुद्धेः श्रेयोमार्गे प्रवृत्तायाः विवक्षितं फलमाह—** इतरेति। **प्रकृतबुद्धिद्वयापेक्षयेतराः विपरीताश्चाप्रमाणजनिताः स्वकपोलकल्पिताः या बुद्धयस्तासां शाखाभेदो यः संसारहेतुस्तस्य बाधिकेति यावत्। तत्र हेतुः—** सम्यगिति। **निर्दोषवेदवाक्य-समुत्थत्वाद् उक्तमुपायोपेयभूतं बुद्धिद्वयं साक्षात्पारम्पर्याभ्याम् संसारहेतुबाधकमित्यर्थः। उत्तरार्धं व्याचष्टे—** याः पुनरिति। **प्रकृत-**

भाष्यार्कप्रकाशः

स्याद्, उभयथाऽपि भिषजो नरकपातलक्षणः प्रत्यवाय एव। एवं प्रत्यवायित्वादेव चिकित्सकानामपाङ्क्तेयत्वं स्मर्यते। न च रोगनिवारणात् सुकृतमपि भवेद् भिषज इति वाच्यम् ; सुकृतप्राप्तेः पाक्षिकत्वात्। **किञ्च** पाक्षिक्यपि सुकृतप्राप्तिर्नैव ; धनाशया चिकित्सायाः कृतत्वाद् भिषजा; भेषजसिद्ध्यर्थं रसौषधीनां भिषजा मारितत्वाच्च नरकपातः। न चैवं भिषजामेवाभावे चिकित्साया अप्यभावात् कथं रोगिणां रोगनिवृत्तिरिति वाच्यम् ; प्रारब्धपापफलस्य व्याधेः प्रारब्धावसानेऽवश्यं नाशसम्भवात्। अपि च भेषजेन यदि व्याधिप्रतिबन्धः स्यात् , तर्हि जन्मान्तरे तद्व्याधिं पुनरनुभवेदेव, अनुभवं विना कृतस्य क्षयाभावात्। एवं च चिकित्सायाः अन्वयव्यतिरेकाभ्यां रोगनिवृत्त्यहेतुत्वात् , प्रत्युत प्रतिकूलचिकित्साया रोगवृद्धिमरणहेतुत्वाद् , रसौषधिमारणरूपहिंसागर्भत्वाच्च भिषजः प्रत्यवायजनकत्वमिति सिद्धम्। नैवं चिकित्साकर्तुरिव कर्मयोगकर्तुः कोऽपि प्रत्यवायो विद्यते, हिंसाद्यभावात् कर्मयोगे इति भावः। चिकित्सावदिति 'तत्र तस्येव' इति [१]वतिः। चिकित्सायामिवेत्यर्थः। यथा चिकित्सायां प्रत्यवायो विद्यते, तथा कर्मयोगे प्रत्यवायो न विद्यते इति व्यतिरेकदृष्टान्तः॥४०॥

**व्यवसायेति**। हे कुरुनन्दन! इह व्यवसायात्मिका एकैव बुद्धिरस्ति। अव्यवसायिनां बुद्धयः बहुशाखाः अनन्ताश्च भवन्ति हि। का सा व्यवसायात्मिका बुद्धिः? अत आह— **येयमिति**। सांख्यविषया योगविषया चेत्यर्थः।

**ननु** सांख्यबुद्धेर्योगबुद्धेश्च परस्परं भिन्नत्वात् कथमेकत्वमिति चेत्? **उच्यते**— नात्र बुद्धिद्वयस्यैकत्वमुक्तम् ; किन्तु सांख्ये न बह्व्यो बुद्धयः सन्ति, तथा योगे च न बह्व्यो बुद्धयः सन्ति; परं तु एकैव व्यवसायात्मिका बुद्धिः सांख्ये; तथा योगे च व्यवसायात्मिका बुद्धिरेकैवेति सांख्ययोगयोः प्रत्येकमेकबुद्धिमत्त्वमुक्तमिति। तदेवाह— **इतरेति**। इतरा विपरीताश्च या बुद्धिशाखास्तासां भेदस्य। अनेकशाखाभिन्नेतरविपरीतबुद्धीनामित्यर्थः। कुतोऽस्या इतरबुद्धिभेदबाधकत्वम्? अत आह— **सम्यगिति**। निर्दुष्टशास्त्रप्रमाणजनित-त्वादित्यर्थः। **इहे**त्यस्य सांख्ययोगकर्मयोगसाधारण्यायाह— **श्रेयोमार्ग इति**। 'अविक्रियः सर्वगतः नित्य एकः स्वयम्प्रभोऽप्रमेयः आत्मा' इत्येवंरूपनिश्चयस्वभावा सांख्यबुद्धिः; 'फलसङ्गं त्यक्त्वा ईश्वराराधनार्थतया सिद्ध्यसिद्ध्योः समः सन् शास्त्रविहितानि कर्माणि

१. सप्तम्यन्ताद् वतिरित्यर्थः।

**इतराः विपरीतबुद्धयः, यासां शाखाभेदप्रचारवशाद् अनन्तोऽपारोऽनुपरतः संसारो नित्यप्रततो विस्तीर्णो भवति, प्रमाणजनितविवेकबुद्धिनिमित्तवशाच्चोपरतासु अनन्तभेदबुद्धिषु संसारोऽप्युपरमते[१], ताः बुद्धयो** बहुशाखाः **बह्व्यः शाखा यासां ता बहुशाखाः, बहुभेदा इत्येतत्। प्रतिशाखाभेदेन ह्यनन्ताश्च बुद्धयः, केषाम्?** अव्यवसायिनाम् **प्रमाणजनितविवेकबुद्धिरहितानामित्यर्थः॥४१॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

प्रमाणभूता। अन्याश्चाविवेकमूला एवेत्यभिप्रायः॥४१॥

आनन्दगिरिकृतव्याख्या

**बुद्धिद्वयापेक्षयाऽर्थान्तरत्वम्** इतरत्वम्। **तासामनर्थहेतुत्वं दर्शयति—** यासामिति। **अप्रामाणिकबुद्धीनां प्रसक्तानुप्रसक्त्या जायमानानामतीव [जायमाना अवान्तर]बुद्धिपरिणामविशेषाः** शाखाभेदाः, **तेषां** प्रचारः **प्रवृत्तिः, तद्वशादित्येतत्।** [२]अनन्तत्वं **सम्यग्ज्ञानमन्तरेण निवृत्तिविरहितत्वम्।** अपारत्वं **कार्यस्यैव सतो वस्तुभूतकारणविरहितत्वम्। अनुपरतत्वं स्फोरयति—** नित्येति। **कथं तर्हि तन्निवृत्त्या पुरुषार्थपरिसमाप्तिः? तत्राह—** प्रमाणेति। **अन्वयव्यतिरेकाख्येनानुमानेन आगमेन च पदार्थपरिशोधनपरिनिष्पन्ना विवेकात्मिका या बुद्धिस्तां निमित्तीकृत्य समुत्पन्नसम्यग्बोधानुरोधात् प्रकृता विपरीतबुद्धयो व्यावर्तन्ते। तास्वसंख्यातासु व्यावृत्तासु सतीषु निरालम्बनतया संसारोऽपि स्थातुमशक्नुवन्नुपरतो भवतीत्यर्थः। 'याःपुनः' इत्युपक्रान्तास्तत्त्वज्ञानापनोद्याः संसारास्पदभूताः विपरीतबुद्धीरनुक्रामति—** ता बुद्धय इति। **बुद्धीनां वृक्षस्येव कुतो बहुशाखत्वम्? तत्राह—** बहुभेदा इत्येतदिति। **एकैकां बुद्धिं प्रति शाखाभेदोऽवान्तरविशेषः, तेन बुद्धीनामसंख्यत्वं प्रख्यातमित्याह—** प्रतिशाखेति। **बुद्धीनामानन्त्यप्रसिद्धिप्रद्योतनार्थो** हिशब्दः। **सम्यग्ज्ञानवतां यथोक्तबुद्धिभेदभाक्त्वमप्रसिद्धमित्याशङ्क्य प्रत्याह—** केषामित्यादिना॥४१॥

**यदि सांख्ययोगरूपैकैव प्रमाणभूता बुद्धिस्तर्हि सैव सर्वेषां चित्ते किमिति स्थिरा न भवति? तत्राह—** येषामिति। **ते यामिमां**

भाष्यार्कप्रकाशः

कुर्याद्' इत्येवंनिश्चयस्वभावा योगबुद्धिः; विपरीतबुद्धयस्तु 'आत्मा कर्ता भोक्ता च, धर्मादिपुरुषार्थास्तेन सम्पादितव्याः[सम्पादयितव्याः]' 'ज्योतिष्टोमेन स्वर्गकामो यजेत' 'पशुकामः[वृष्टिकामः] कारीर्येष्ट्या' इत्येवमादयः इति विवेकः।

अत्र यदाह **रामानुजः** - आत्मयाथात्म्यनिश्चयपूर्विका व्यवसायात्मिका बुद्धिरेकफलसाधनविषयतयैका, एकस्मै मोक्षाख्यफलाय हि कर्माणि विधीयन्त इति; **तत्तुच्छम्** ; नित्यत्वस्वयम्प्रकाशत्वानन्दत्वापहतपाप्मत्वादिरूपमात्मयाथात्म्यं पक्षद्वयसम्मतम्। यस्यास्ति एतन्निश्चयः, तस्य कथं कर्मसु प्रवृत्तिः स्यात्? न कथमपि; कर्मसम्पाद्योत्कर्षाभावात् कर्मनिवार्यापकर्षाभावाच्च। अनेककारकोपसंहारपूर्वककर्मानुष्ठानदुःखस्य आनन्दे आत्मन्ययोगाच्च, मोक्षस्य कर्मसाध्यत्वे घटादिवदनित्यत्वाच्च, सकामानां स्वर्गाद्यर्थं, निष्कामानां चित्तशुद्ध्यर्थं च कर्मणां विहितत्वेन [३]मोक्ष[फलाय ]विहितत्वासम्भवाच्च; 'ज्योतिष्टोमेन स्वर्गकामो यजेत' [४]'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने'त्यादिश्रुतेः। मोक्षकाम इदं कुर्यादिति श्रुत्यभावाच्च। नित्ये आत्मनि क्रियावत्त्वादिरूपविकारायोगाच्च। किञ्च व्यवसायात्मिकेति पदान्निश्चयपूर्विकेत्यर्थोऽपि दुर्लभः, आत्मशब्दस्य पूर्वार्थाभावात्॥४१॥

**यामिति, कामात्मान** इति च श्लोकद्वयस्यैकान्वयः। हे पार्थ! वेदवादरताः अन्यन्नास्तीति वादिनः कामात्मानः स्वर्गपराः अविपश्चितः भोगैश्वर्यगतिं प्रति क्रियाविशेषबहुलां जन्मकर्मफलप्रदां पुष्पितां यामिमां वाचं प्रवदन्तीति। यच्छब्दस्य तु तयेति तृतीयश्लोकस्थतच्छब्देनान्वयः।

१. 'विभाषाऽकर्मकात्' (पा.सू.१.३.८५) इति उपाद् रमतेः परस्मैपदस्य वैकल्पिकत्वादात्मनेपदम्। एवं 'यत्रोपरमते'(भ.गी.६.२०) इत्यत्रापि। २. अनन्तत्वे 'सम्यग्ज्ञानेनोपरतासु अनन्तभेदबुद्धिषु संसारोऽप्युपरमते' इति भाष्यासंगतिमाशङ्क्यानन्तत्वं व्याचष्टे—**अनन्तत्वमिति**। ३. साक्षान्मोक्षफलाय विहितत्वाभावादित्यर्थः। परम्परया मोक्षफलकत्वं तु कर्मणां न निवार्यते। ४. अत्र विविदिषोद्देशेन वेदनोद्देशेन वा कर्मविधानेऽपि चित्तशुद्धिद्वारैव तत्संभवात् चित्तशुद्ध्यर्थत्वं कर्मणामभिप्रेतम्। 'इदं मेऽनेनाङ्गं संस्क्रियते' इत्यादिश्रुतिस्मृतिभ्यश्च।

**यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।**
**वेदवादरताः पार्थ ! नान्यदस्तीति वादिनः॥४२॥**
**कामात्मानः स्वर्गपराः जन्मकर्मफलप्रदाम्।**

**येषां व्यवसायात्मिका बुद्धिर्नास्ति, ते—** यामिति। यामिमां **वक्ष्यमाणां** पुष्पितां [१]**पुष्पितवृक्ष इव शोभमानां श्रूयमाणरमणीयां** वाचं **वाक्यलक्षणां प्रवदन्ति। के?** अविपश्चितः **अमेधसः। अविवेकिन इत्यर्थः।** वेदवादरताः **बह्वर्थवादफलसाधनप्रकाशकेषु वेदवाक्येषु रताः, हे पार्थ, 'नान्यत् स्वर्गपश्वादिफलसाधनेभ्यः कर्मभ्योऽस्ति' इत्येवं** वादिनो **वदनशीलाः॥४२॥**

**ते च—** कामात्मान इति। कामात्मानः **कामस्वभावाः। कामपरा इत्यर्थः।** स्वर्गपराः **स्वर्गः परः पुरुषार्थो**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ननु यदि सांख्ययोगरूपैव बुद्धिः प्रमाणभूता, तर्हि किमिति सैव सर्वेषां चित्ते न स्थिरा भवतीत्याशङ्क्याह— **येषां व्यवसायात्मिका बुद्धिर्नास्ति [इति]**। यामिमां वाचं [प्र]वदन्ति तयाऽपहृतचेतसामिति व्यवहितेन सम्बन्धः। कामिनामुपच्छन्दनवशाद् निश्चयात्मिका बुद्धिः प्रायेणास्थिरा भवतीत्यर्थः॥४२-४४॥

आनन्दगिरिकृतव्याख्या

**पुष्पितां वाचं प्रवदन्ति तयाऽपहृतचेतसां कामिनां कामवशान्निश्चयात्मिका बुद्धिर्न प्रायः स्थिरा भवतीत्याह—** ते - यामिति। **इमामित्यध्ययनविध्युपातत्त्वेन प्रसिद्धत्वं कर्मकाण्डरूपाया वाचो विवक्ष्यते।** वक्ष्यमाणत्वं **'क्रियाविशेषबहुला'मित्यादौ द्रष्टव्यम्। किंशुको हि पुष्पशाली शोभमानोऽनुभूयते, न पुरुषभोग्यफलभागी लक्ष्यते, तथेयमपि कर्मकाण्डात्मिका श्रूयमाणदशायां रमणीया वागुपलभ्यते साध्यसाधनसम्बन्धप्रतिभानात्, न त्वेषा निरतिशयफलभागिनी भवति, कर्मानुष्ठानफलस्यानित्यत्वादिति मत्वाऽऽह—** पुष्पितामिति। **वाक्यत्वेन लक्ष्यतेऽर्थवत्त्वप्रतिभानात्, वस्तुतस्तु न वाक्यम्, अर्थाभासत्वादित्याह—** वाक्यलक्षणामिति। **प्रवक्तॄणां वेदवाक्यतात्पर्यपरिज्ञानाभावं सूचयति—** अविपश्चित इति। वेदवादाः **वेदवाक्यानि, तानि च बहूनामर्थवादानां फलानां साधनानां च विधिशेषाणां प्रकाशकानि, तेषु** रतिरासक्तिस्तन्निष्ठत्वं, **तद्वत्त्वमपि तेषां विशेषणमित्याह—** वेदवादेति। **कर्मकाण्डनिष्ठत्वफलं कथयति—** नान्यदिति। **ईश्वरो वा मोक्षो वा नास्तीत्येवं वदन्तो नास्तिकाः सन्तः सम्यग्ज्ञानवन्तो न भवन्तीत्यर्थः॥४२॥**

**प्रकृतान् प्रवक्तॄनविवेकिनो व्यवसायात्मकबुद्धिभाक्त्वासम्भवसिद्ध्यर्थं विधान्तरेण विशिनष्टि—** ते चेति। **तेषां संसारपरिवर्तन-**

भाष्यार्कप्रकाशः

पुष्पाण्यस्याः सञ्जातानि पुष्पिता, 'तदस्य सञ्जातम्' इति तारकादित्वादितच्। कथं वृक्षधर्मस्य पुष्पवत्त्वस्य वाचो लाभ इत्यत आह— **पुष्पितवृक्षवदिति**। औपचारिकप्रयोग इति भावः। फलितार्थमाह— **श्रूयमाणेति**। यथा पुष्पितवृक्षो दृश्यमानरमणीयस्तद्वदियं वाक् श्रूयमाणरमणीया। श्रूयमाणं रमणीयं यस्याः सा **श्रूयमाणरमणीया** श्रवणमात्रमनोहरेत्यर्थः। संसाररूपदुःखावसानत्वादिति भावः। वाक्यं लक्षणं यस्याः सा **वाक्यलक्षणा** वाक्यरूपेत्यर्थः। वाक्यमिति यावत्। आकाङ्क्षादिमत्पदकदम्बकं वाक्यमिति बोध्यम्। विशेषेण पश्यन्ति जानन्तीति **विपश्चितः**; पृषोदरादित्वात् साधुः। न विपश्चितोऽ**विपश्चितः। जन्मैव कर्मफलमिति**। यज्ञादिविहितकर्मणः फलं स्वर्गानुभवः, स च देवत्वेन जातेनानुभाव्यः; हिंसादिनिषिद्धकर्मणः फलं नरकं, तद्धि नारकत्वेन जातेनानुभाव्यम्; मिश्रकर्मणः फलं मनुष्यलोकः, स हि मनुष्यत्वेन जातेनानुभाव्यः इत्येवं कर्मफलानुभवस्य देवादिजन्मपरिग्रहपूर्वकत्वात् कर्मणः फलं जन्मैवेत्युक्तम्। **परिवर्तन्ते** भ्रमन्ति - जन्मनो मरणं मरणाज्जन्म चेत्यविच्छेदेन संसरन्तीत्यर्थः॥४२, ४३॥

१. 'पुष्पितवृक्षवत् शोभनां' इति पा.।

**क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति॥ ४३॥**
**भोगैश्वर्यप्रसक्तानां तयाऽपहृतचेतसाम्।**
**व्यवसायात्मिका बुद्धिः समाधौ न विधीयते॥ ४४॥**

**येषां ते स्वर्गपराः, स्वर्गप्रधानाः।** जन्मकर्मफलप्रदाम् **कर्मणः फलं कर्मफलं, जन्मैव कर्मफलं जन्मकर्मफलं, तत् प्रददातीति जन्मकर्मफलप्रदा, तां वाचं प्रवदन्तीत्यनुषज्यते।** क्रियाविशेषबहुलां **क्रियाणां विशेषाः क्रियाविशेषास्ते बहुलाः यस्यां वाचि ताम् , स्वर्गपशुपुत्राद्यर्थाः यया वाचा बाहुल्येन प्रकाश्यन्ते।** भोगैश्वर्यगतिं प्रति **भोगश्चैश्वर्यं च भोगैश्वर्ये, तयोर्गतिः प्राप्तिः भोगैश्वर्यगतिः, तां प्रति साधनभूताः ये क्रियाविशेषाः, तद्बहुलां तां वाचं प्रवदन्तो मूढाः संसारे परिवर्तन्त इत्यभिप्रायः॥ ४३॥**

**तेषां च—** भोगेति। भोगैश्वर्यप्रसक्तानां [1]**भोगः ऐश्वर्यं चेति** [2]**भोगैश्वर्ये, तयोरेव प्रणयवतां तदात्मभूतानां** तया **क्रियाविशेषबहुलया वाचा** अपहृतचेतसाम् **आच्छादितविवेकप्रज्ञानां** व्यवसायात्मिका **सांख्ये योगे वा बुद्धिः** समाधौ **समाधीयतेऽस्मिन् पुरुषोपभोगाय सर्वमिति समाधिः अन्तःकरणं बुद्धिः, तस्मिन् समाधौ** न विधीयते **न भवतीत्यर्थः॥ ४४॥**

आनन्दगिरिकृतव्याख्या

**परिदर्शनार्थं प्रस्तुतां वाचमेव विशिनष्टि—** जन्मेति। **ननु पुंसां कामस्वभावत्वमयुक्तम् , चेतनस्येच्छावतः तदात्मत्वानुपपत्तेरिति, तत्राह—** कामपरा इति। तत्परत्वं **तत्तत्फलार्थित्वेन तत्तदुपायेषु कर्मस्वेव प्रवृत्ततया कर्मसंन्यासपूर्वकाज्ज्ञानाद् बहिर्मुखत्वम्। ननु कर्मनिष्ठानामपि परमपुरुषार्थापेक्षया मोक्षोपाये ज्ञाने भवत्याभिमुख्यमिति? नेत्याह—** स्वर्गेति। तत्परत्वं **तस्मिन्नेवासक्ततया तदतिरिक्तपुरुषार्थराहित्यनिश्चयवत्त्वम्। उच्चावचमध्यमदेहप्रभेदग्रहणं** जन्म। **वाचो यथोक्तफलप्रदत्वमप्रामाणिकमित्याशङ्क्यानुष्ठानद्वारा तदुपपत्तिरित्याह—** क्रियेति। **क्रियाणामनुष्ठानानां यागदानादीनां विशेषाः देशकालाधिकारिप्रयुक्ताः** [3]**सत्राहीनैकाहलक्षणास्ते खल्वस्यां वाचि प्राचुर्येण प्रतिभान्तीत्यर्थः। कथं यथोक्तायां वाचि क्रियाविशेषाणां बाहुल्येनावस्थानमित्याशङ्क्य , प्रकाश्यत्वेनेत्येतद् विशदयति—** स्वर्गेति। **तथापि तेषां मोक्षोपायत्वोपपत्तेस्तन्निष्ठानां मोक्षाभिमुख्यं भविष्यति, नेत्याह—** भोगेति। **यथोक्तां वाचमभिवदतां पर्यवसानं दर्शयति—** तद्बहुलामिति॥ ४३॥

**ननु कर्मकाण्डनिष्ठानां कर्मानुष्ठायिनामपि बुद्धिशुद्धिद्वारेणान्तःकरणे साध्यसाधनभूतबुद्धिद्वयसमुदयसम्भवाद्** [4]**अक्षतो मोक्षो भविष्यति? नेत्याह—** तेषां चेति। तदात्मभूतानां **तयोरेव भोगैश्वर्ययोरात्मकर्तव्यत्वेनारोपितयोः अभिनिविष्टे चेतसि तादात्म्याध्यासवतां बहिर्मुखानामित्यर्थः। तथापि शास्त्रानुसारिण्या विवेकप्रज्ञया व्यवसायात्मिका बुद्धिस्तेषामुदेष्यतीत्याशङ्क्याह—** तयेति। **ननु समाधिः**

भाष्यार्कप्रकाशः

**भोगेति**। तयाऽपहृतचेतसां भोगैश्वर्यप्रसक्तानां समाधौ व्यवसायात्मिका बुद्धिर्न विधीयते। **तदात्मभूतानामिति**। भोगैश्वर्याभिनिविष्टान्तःकरणतादात्म्याध्यासवतां बहिर्मुखानामित्यर्थः। **समाधीयते** निक्षिप्यते, ईश्वरेणेति शेषः। पुरुषस्य नास्ति स्वतो भोगः अभोक्तृत्वात् , किन्तु अन्तःकरणस्य विज्ञानबुद्ध्यपरपर्यायस्य भोक्तुस्तादात्म्याध्यासेनैव। यथाऽऽह **माघः—**'समीक्ष्योक्ते बुद्धेर्भोग

१. 'भोगः कर्तव्यः, ऐश्वर्यं चेति' 'भोगः कर्तव्यम् ऐश्वर्यं चेति' इति पा.। २. 'भोगैश्वर्ययोरेव प्रणयवताम्' इति पा.। ३. यस्य यागस्य विधिवाक्ये 'आसीरन्' इति 'उपेयुः' इति वा श्रूयते स सोमयागः सत्रम् , तच्च नियतबहुयजमानकम्। अनियतसंख्याकयजमानकः यजधातुघटितविधिवाक्यगम्यः अहीनः। एकदिनसाध्यसुत्याकः एकाहः। 'सप्ताहानेकाहलक्षणाः' इति पा.। ४. 'अतः' इति पा.।

**त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।।**
**निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्॥ ४५॥**

**य एवं विवेकबुद्धिरहितास्तेषां कामात्मनां यत्फलम् , तदाह—** त्रैगुण्येति। त्रैगुण्यविषया**स्त्रैगुण्यं संसारो विषयः प्रकाशयितव्यो येषां ते वेदास्त्रैगुण्यविषयाः। त्वं तु** निस्त्रैगुण्यो **भवार्जुन ! निष्कामो भवेत्यर्थः।** निर्द्वन्द्वः **सुखदुःखहेतू सप्रतिपक्षौ पदार्थौ द्वन्द्वशब्दवाच्यौ। ततो निर्गतो निर्द्वन्द्वो भव** [१]**त्वम्।** नित्यसत्त्वस्थः **सदा सत्त्वगुणाश्रितो भव। तथा** निर्योगक्षेमः **अनुपात्तस्योपादानं योगः, उपात्तस्य रक्षणं क्षेमः। योगक्षेमप्रधानस्य श्रेयसि प्रवृत्तिर्दुष्करेत्यतो निर्योगक्षेमो भव।** आत्मवान् **अप्रमत्तश्च भव। एष तवोपदेशः स्वधर्ममनुतिष्ठतः॥ ४५॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

'नित्यसत्त्वस्थ' इति वचनात् न गुणत्रयप्रतिषेधो विवक्षितः, किन्तु तदेकदेशप्रतिषेधो निस्त्रैगुण्यशब्देन लक्ष्यत इत्याह— **निष्कामो भवेति॥ ४५॥**

आनन्दगिरिकृतव्याख्या

**सम्प्रज्ञातासम्प्रज्ञातभेदेन द्विधोच्यते, तत्र बुद्धिद्वयविधिरप्रसक्तः सन् कथं निषिध्यते? तत्राह—** समाधीयत इति॥ ४४॥

**अविवेकिनामपि वेदाभ्यासवतां विवेकबुद्धिरुदेष्यतीत्याशङ्क्याह—** य एवमिति। **तर्हि वेदार्थतया कामात्मता प्रशस्तेत्याशङ्क्याह—** निस्त्रैगुण्य इति। **भवेति पदं निर्द्वन्द्वादिविशेषणेष्वपि प्रत्येकं सम्बध्यते। त्रयाणां सत्त्वादीनां गुणानां पुण्यपापव्यामिश्रकर्मतत्फलसम्बन्धलक्षणः समाहारस्त्रैगुण्यमित्यङ्गीकृत्य व्याचष्टे—** संसार इति। **वेदशब्देनात्र कर्मकाण्डमेव गृह्यते। तदभ्यासवतां तदर्थानुष्ठानद्वारा संसारध्रौव्यान्न विवेकावसरोऽस्तीत्यर्थः। तर्हि संसारपरिवर्जनार्थं विवेकसिद्धये किं कर्तव्यमित्याशङ्क्याह—** त्वं त्विति। **कथं निस्त्रैगुण्यो भवेति गुणत्रयराहित्यं विधीयते, नित्यसत्त्वस्थो भवेति वाक्यशेषविरोधादित्याशङ्क्याह—** निष्काम इति। सप्रतिपक्षत्वं **परस्परविरोधित्वम्।** पदार्थौ **शीतोष्णादिलक्षणौ। निष्कामत्वे** द्वन्द्वान्निर्गतत्वं **शीतोष्णादिसहिष्णुत्वं हेतुमुक्त्वा, तत्रापि हेत्वपेक्षायां सदा सत्त्वगुणाश्रितत्वं हेतुमाह—** नित्येति। **योगक्षेमव्यापृतचेतसो रजस्तमोभ्यामसंस्पृष्टे सत्त्वमात्रे समाश्रितत्वमशक्यमित्याशङ्क्याह—** तथेति। **योगक्षेमयोः जीवनहेतुतया पुरुषार्थसाधनत्वान्निर्योगक्षेमो भवेति कुतो विधिरित्याशङ्क्याह—** योगेति। **योगक्षेमप्रधानत्वं सर्वस्य स्वारसिकमिति ततो निर्गमनमशक्यमित्याशङ्क्याह—** आत्मवानिति। अप्रमादो **मनसो विषयपारवश्यशून्यत्वम्। अथ यथोक्तोपदेशस्य मुमुक्षुविषयत्वाद् अर्जुनस्य मुमुक्षुत्वमिह** [२]**विवक्षितमिति? नेत्याह—** एष इति॥ ४५॥

भाष्यार्कप्रकाशः

इवात्मनि' इति। सांख्योक्ते आत्मनि बुद्धेर्भोग इवेत्यर्थः। तस्मात् पुरुषोपभोगाय कामादिकं सर्वमन्तःकरणे सृष्टमीश्वरेणेति कृत्वा समाधिरन्तःकरणं भवति। न च बुद्धेर्बुद्धौ कथं विधानमिति वाच्यम् , ज्ञानस्यान्तःकरणे विधानमित्यदोषात्। 'न विधीयते' इति कर्मकर्तरि लकार इत्याह— **न भवतीति।** न जायत इति यावत्। वस्तुतस्तु न विधीयते ईश्वरेणात्मनेति शेषः। तस्यैव सर्वबुद्धिप्रेरकत्वात् , 'मत्तः स्मृतिर्ज्ञानमपोहनं च' इति वक्ष्यमाणत्वादिति॥ ४४॥

**त्रैगुण्येति।** त्रैगुण्यविषयाः संसारप्रकाशकाः। सत्त्वादित्रिगुणजन्यत्वात्सुखदुःखादिलक्षणसंसारस्य त्रैगुण्यव्यपदेशः। केषाम्? इत्यत आह— **कामात्मनामिति।** निर्गतं त्रैगुण्यं यस्मात् स **निस्त्रैगुण्यः** निःसंसार इत्यर्थः। कामस्यैव संसारहेतुत्वात् फलितमाह— **निष्काम इति। सप्रतिपक्षौ** परस्परं प्रतिपक्षावित्यर्थः। **पदार्थौ** शीतोष्णादिरूपौ। ततो निर्गत इति 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति समासः। **निर्द्वन्द्व इति।** द्वन्द्वसह इत्यर्थः। **दुष्करेति।** अनुपात्तस्य धनधान्यादेरुपादाने, उपात्तस्य च तस्य रक्षणे व्यग्रस्य संसारिणः कथं मोक्षमार्गे प्रवृत्तिः? न कथमपीत्यर्थः। आत्मवानित्यत्र आत्मशब्दस्य देहमनोबुद्धिपुरुषादिरूपस्य यस्य कस्याप्यर्थस्य बोधकत्वं न

१. 'त्वम्' इति क्वचिन्न। २. 'अविवक्षितम्' इति पा.।

**यावानर्थ उदपाने सर्वतः सम्प्लुतोदके।**
**तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः॥ ४६॥**

**सर्वेषु वेदोक्तेषु कर्मसु यान्युक्तान्यनन्तानि फलानि, तानि नापेक्ष्यन्ते चेत् किमर्थं तानीश्वरायेत्यनुष्ठीयन्त इति।** [1]**उच्यते, शृणु—** यावानिति। **यथा लोके** [2]**कूपतडागादावनेकस्मिन्** उदपाने **परिच्छिन्नोदके** यावान् **यावत्परिमाणः स्नानपानादिः** अर्थः **फलं प्रयोजनम् , स सर्वोऽर्थः सर्वतःसम्प्लुतोदके(ऽपि) योऽर्थः, तावानेव**

अनुभूतिस्वरूपाचार्यटिप्पणम्

यथा परिच्छिन्नोदकेषु यत् स्नानादिकं तदपरिच्छिन्नोदकेषु अन्तर्भवति, तदंशत्वात् परिच्छिन्नोदकानाम् , तथा शुभ-कर्मोपस्थापितविषयविशेषोपरक्तबुद्धिषु प्रतिबिम्बितमात्मसुखमेव विषयानन्दाः। अतस्तेषां परिच्छिन्नानन्दानामपरिच्छिन्ना-नन्दान्तर्भूतत्वात् तथाभूतात्मानन्दप्राप्तिपर्यवसायिनो योगमार्गस्य न निष्फलत्वमित्याह— **यावानर्थ इत्यादिना।**

आनन्दगिरिकृतव्याख्या

**ईश्वरार्पणधिया स्वधर्मानुष्ठानेऽपि फलकामनाभावाद् वैफल्यं योगमार्गस्येति मन्वानः शङ्कते—** सर्वेष्विति। **कर्ममार्गस्य फलवत्त्वं प्रतिजानीते—** उच्यत इति। **किं तत्फलमित्युक्ते तद्विषयं श्लोकमवतारयति—** शृण्विति। **यथोदपाने कूपादौ परिच्छिन्नोदके स्नानाचमनादिर्योऽर्थो यावानुत्पद्यते, स तावानपरिच्छिन्ने सर्वतःसम्प्लुतोदके समुद्रेऽन्तर्भवति, परिच्छिन्नोदकानाम् अपरिच्छिन्नो-दकांशत्वात्। तथा सर्वेषु वेदोक्तेषु कर्मसु यावान्** अर्थो **विषयविशेषोपरक्तः सुखविशेषो जायते, स तावान् आत्मविदः स्वरूपभूते सुखेऽन्तर्भवति, परिच्छिन्नानन्दानाम् अपरिच्छिन्नानन्दान्तर्भावाभ्युपगमात् 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः। तथा चापरिच्छिन्नात्मानन्दप्राप्तिपर्यवसायिनो योगमार्गस्य नास्ति वैफल्यमित्याह—** यावानिति। **उक्तमर्थमक्षरयोजनया प्रकटयति—** यथेति। **उदकं पीयतेऽस्मिन्निति व्युत्पत्त्या कूपादिपरिच्छिन्नोदकविषयत्वमुदपानशब्दस्य दर्शयति—** कूपेति। **कूपादि-गतस्याभिधेयस्य समुद्रेऽन्तर्भावासम्भवात् कथमिदमित्याशङ्क्यार्थशब्दस्य प्रयोजनविषयत्वं व्युत्पादयति—** फलमिति। **यत् फल्गुत्वेन लीयते तत् फलमित्युच्यते। तत् कथं तडागादिकृतं स्नानपानादि तथेत्याशङ्क्य तस्याल्पीयसो नाशोपपत्तेरित्याह—** प्रयोजनमिति। **तडागादिप्रयुक्तप्रयोजनस्य समुद्रनिमित्तप्रयोजनमात्रत्वमयुक्तम् , अन्यस्यान्यात्मत्वानुपपत्तेरित्याशङ्क्याह—** तत्रेति। **घटाकाशादेरिव महाकाशे परिच्छिन्नोदककार्यस्यापरिच्छिन्नोदककार्यान्तर्भावः सम्भवति, तत्प्राप्तावितरापेक्षाऽभावादित्यर्थः। पूर्वार्धं दृष्टान्तभूतमेवं**

भाष्यार्कप्रकाशः

सम्भवति, आत्मराहित्ये प्रसक्ते सति हि आत्मवत्त्वं विधेयम् ; तदेव न सम्भवति देहादिरूपाणामात्मनां विधानात्प्रागेव सत्त्वादित्यभिप्रेत्य **अप्रमत्त** इत्युक्तम्। मनोवाचिनो बुद्धिवाचिनो वा आत्मशब्दस्य तद्धर्मे अवधाने लक्षणेति भावः। **एष इति।** 'निस्त्रैगुण्यः' इत्यादिना प्रोक्त इत्यर्थः। स्वधर्ममनुतिष्ठतस्तवेत्यन्वयः॥ ४५॥

'यावान्' इति श्लोकमवतारयति— **सर्वेष्विति।** फलाभावाद् योगमार्गो व्यर्थ इति प्रष्टुराशयः। आक्षेपसमाधानं प्रतिजानीते— **उच्यते तदिति।** तच्छब्दस्य योगानुष्ठानस्य फलमित्यर्थः। [3]किमर्थमिति फलस्यैवाक्षिप्तत्वादिति भावः। श्रोतुः सावधानत्वापादनायाह — **शृण्विति।** वाक्यार्थः कर्म। **यावानिति।** यावत्तावदर्थशब्दानामावृत्तिः। 'उदपाने यावानर्थः, सर्वतःसम्प्लुतोदके तावानर्थः, सर्वेषु वेदेषु यावानर्थः, विजानतो ब्राह्मणस्य तावानर्थः' इत्यन्वयः।

पूर्वार्थ[र्ध]स्य दृष्टान्तत्वादाह— **यथेति।** दृष्टान्तार्थस्य लोकसिद्धत्वादाह— **लोके इति।** उदकं पीयतेऽस्मिन्निति, उदकस्य पानं यस्मिंस्तदिति वा व्युत्पत्त्या 'उदकस्योदः संज्ञायामि'त्युदादेशे सिध्यत्युदपानमिति रूपम्। किं तदुदपानम्? अत आह— **कूपेति।**

---

१. 'उच्यते तत् , शृणु' इति रा.पा.। २. 'कूपतडागाद्यनेकस्मिन्' इति पा.। ३. किमर्थम् = कस्मै फलायेत्यर्थः।

**सम्पद्यते। तत्रान्तर्भवतीत्यर्थः। एवं** तावान् **तावत्परिमाण एव सम्पद्यते सर्वेषु** वेदेषु **वेदोक्तेषु कर्मसु योऽर्थः** - [१]**यत् कर्मफलं सोऽर्थः,** ब्राह्मणस्य **संन्यासिनः परमार्थतत्त्वं विजानतो योऽर्थः - यद् विज्ञानफलं सर्वतःसम्प्लुतोदकस्थानीयं**

आनन्दगिरिकृतव्याख्या

**व्याख्याय दार्ष्टान्तिकमुत्तरार्धं व्याकरोति—** एवमित्यादिना। **कर्मसु योऽर्थ इत्युक्तं व्यनक्ति—** यत् कर्मफलमिति। **सोऽर्थो विजानतो ब्राह्मणस्य योऽर्थस्तावानेव सम्पद्यत इति सम्बन्धः। तदेव स्पष्टयति—** विज्ञानेति। [२]**तस्मिन्नन्तर्भवन्निति शेषः। सर्वं कर्मफलं ज्ञानफले ऽन्तर्भवतीत्यत्र प्रमाणमाह—** सर्वमिति। **यत्किमपि प्रजाः साधु कर्म कुर्वन्ति तत् सर्वं स पुरुषोऽभिसमेति प्राप्नोति यः पुरुषस्तद्वेद विजानाति, यद्वस्तु स रैक्वो वेद , तद्वेद्यमिति श्रुतेरर्थः। कर्मफलस्य सगुणज्ञानफलेऽन्तर्भावः संवर्गविद्यायां श्रूयते, कथमेतावता**

भाष्यार्कप्रकाशः

आदिपदाद् वाप्यादिग्रहणम्। उदपानानां नानात्वादाह— **अनेकस्मिन्निति**। कस्मादनेकत्वम्? अत आह— **परिच्छिन्नेति**। परिच्छिन्नत्वस्य नानात्वप्रयोजकत्वादिति भावः। यावानिति यच्छब्दात्परिमाणे (ड)वतुप्[३] विहितः इत्यभिप्रायादाह— **यावत्परिमाण इति।** अर्थविशेषं दर्शयति—**स्नानेति।** अर्थशब्दार्थमाह—**फलमिति**। फल्गुत्वेन लीयत इति फलम्। [४]यावदर्थमाह—**प्रयोजनमिति। स इति**। एतदानुगुण्येन स्नानपानादिरर्थ इत्यत्र स्नानपानादिः योऽर्थ इति यच्छब्दाध्याहारो बोध्यः। न तु यः कश्चनार्थ इत्याह— **सर्व इति।** सर्वतः **सम्प्लुतं** व्याप्तमुदकं यस्य तस्मिन् **सर्वतःसम्प्लुतोदके** अपरिच्छिन्नोदके समुद्रे इत्यर्थः। मूले क्रियापदाभावात् तदध्याहृत्याह— **सम्पद्यत इति**। जायत इत्यर्थः। ननु परिच्छिन्नोदके यावानर्थोऽपरिच्छिन्नोदकेऽपि तावानर्थ इति कथमुच्यते? अत आह— **तत्रान्तर्भवतीति**। परिच्छिन्नोदकानां कूपादीनामपरिच्छिन्नोदकसमुद्रांशत्वाद्, घटाकाशानां महाकाशांशत्ववदिति भावः। न च कथं कूपादीनां समुद्रांशत्वम् , समुद्रव्यवहितत्वादिति वाच्यम् ; समुद्रमध्ये भुवः ईश्वरेण स्थापितत्वात् समुद्रजलस्यैव भूगतवापीकूपेषु अनुगतत्वाद्, नदीतटाकादिषु च मेघवृष्टिद्वारा तज्जलस्यैव वर्तमानत्वाच्च। तस्माल्लोके ये 'अस्माभिः कूपे तटाकादौ वा स्नातं, जलं पीतम्' इति मन्यन्ते, तैः सर्वैः समुद्र एव स्नातं, समुद्रजलमेव पीतं भवति वस्तुत इति भावः।

उत्तरार्थ[र्ध]स्य दार्ष्टान्तिकत्वादाह— **एवमिति**। तावच्छब्दस्य पूर्वमनुक्तार्थत्वादाह— **तावत्परिमाण इति**। वेदेषु फलाभावादाह—**वेदोक्तेषु कर्मस्विति।** यज्ञादिष्वित्यर्थः। यावानित्यस्यात्राप्यन्वय इत्यभिप्रेत्याह—**यत्परिमाणमिति। कर्मफलं** स्वर्गादिकम्। **योऽर्थ इति** यच्छब्दस्योक्तत्वादाह— **सोऽर्थ इति।** इदं च यत्तच्छब्दद्वयमन्वयसौष्ठवाय भाष्यकारैरध्याहृतम्। नायं जातिमात्रवाची ब्राह्मणशब्दोऽमुख्यः, किन्तु मुख्य एवेत्याह— **संन्यासिन इति।** 'जन्मना जायते शूद्रः कर्मणा जायते द्विजः। वेदपाठेन विप्रः स्याद् ब्रह्मज्ञानेन ब्राह्मणः॥' इति वचनात् , ब्रह्मज्ञानस्य च वेदान्तश्रवणाद्यधीनत्वात् , तत्र च 'शान्तो दान्त उपरतः' इति संन्यासिन एवाधिकाराद्, 'ब्राह्मणो निर्वेदमाया'दिति ब्राह्मणजातीयस्यैव संन्यासेऽधिकाराच्च ब्रह्मज्ञानिब्राह्मणसंन्यासिपर एव मुख्यो ब्राह्मणशब्द इति भावः।

ब्रह्मणोऽयं ब्राह्मणः। वेद्यवेदितृभावरूपसम्बन्धे शेषे 'तस्येदम्' इत्यण्। ब्रह्मविदित्यर्थः। न च [५]'ब्राह्मोऽजाता'विति पाणिनिसूत्रादजातौ ब्राह्म इति स्यादिति वाच्यम् ; तत्र ब्रह्मशब्दस्य पुंलिङ्गस्य हिरण्यगर्भार्थकस्य ग्रहणात्। अत्र ब्रह्मशब्दस्य परब्रह्मवाचित्वाच्च। अत एव '(अ)जातौ किम्? ब्राह्मो नारदः' इति प्रत्युदाहृतम् , 'उत्सङ्गान्नारदो जज्ञे' इति हिरण्यगर्भाङ्गभवत्वाद् नारदस्य। **किञ्च** 'ब्राह्मणोऽस्य मुखमासीदि'ति श्रुतिश्च ब्राह्मणादिजात्युत्पत्तिहेतुं साकारमेव पुरुषं निर्दिशति, न तु निराकारं ब्रह्म, तस्य मुखाद्यवयवाभावात्। न च ब्राह्मणशब्दो ब्रह्मज्ञानिनमेव वक्ति, न तु संन्यासिनमिति वाच्यम् ; असंन्यासिनो ब्रह्मज्ञानित्वाभावात्। न च गृहस्थो जनकादिर्ब्रह्मज्ञान्येवेति वाच्यम् ; जनकादेर्यदि ब्रह्मवित्त्वेन ब्राह्मणत्वं स्यात् , तर्हि कर्मगतफलाभिसन्धिकर्तृत्वपरित्यागेन

---

१. 'यत्परिमाणं कर्मफलं' इति रा.पा.। २. 'तस्मिन्नन्तर्भवती'ति पा.। ३. वतुप् प्रत्ययः। ४. 'प्रयोजनमिति यावदि'ति वक्तव्ये यावत्पदं विना तदर्थमाहेति भावः।
५. अनेन सूत्रेण अणि ब्रह्मन्शब्दे अनः लोपो निपात्यते अजातौ। तेन ब्राह्मशब्दः सिध्यति। जातौ तु ब्राह्मणशब्दः। प्रकृते जातित्वाभावात् कथं ब्राह्मणशब्दः इति शङ्का। समाधानं तु पुंलिङ्गब्रह्मशब्दस्यैव सूत्रे ग्रहणम् , अत एव 'ब्राह्मो नारदः' इति प्रत्युदाहृतम्। प्रकृते नपुंसकलिङ्गशब्दात् ब्राह्मण इति रूपं सिध्यतीति।

**तस्मिन् , तावानेव सम्पद्यते। तत्रैवान्तर्भवतीत्यर्थः। 'यथा कृतायविजितायाधरेयाः संयन्त्येवमेनं [1]सर्वं तदभिसमेति यत्किञ्च प्रजाः साधु कुर्वन्ति यस्तद् वेद यत् स वेद'(छा.उ.४.१.४) इति श्रुतेः। 'सर्वं कर्माखिलम्' (भ.गी.४.३३) इति च वक्ष्यति। तस्मात् प्राग् ज्ञाननिष्ठाधिकारप्राप्तेः कर्मण्यधिकृतेन कूपतडागाद्यर्थस्थानीयमपि कर्म कर्तव्यम्॥४६॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

यत् किञ्चित् प्रजाः साधु कुर्वन्ति तत् सर्वमभिसमेति प्राप्नोति, यः पुरुषः यद्[तद्] वेद जानाति, यद् वस्तु स रैक्को वेदेत्यर्थः॥४६॥

आनन्दगिरिकृतव्याख्या

**निर्गुणज्ञानफले कर्मफलान्तर्भावः सम्भवतीत्याशङ्क्याह—** सर्वमिति। **तर्हि ज्ञाननिष्ठैव कर्तव्या, तावतैव कर्मफलस्य लब्धतया कर्मानुष्ठानानपेक्षणादित्याशङ्क्याह—** तस्मादिति। **योगमार्गस्य निष्फलत्वाभावस्तच्छब्दार्थः॥४६॥**

भाष्यार्कप्रकाशः

संन्यासित्वमपि स्यात्; जनकादेः कर्माकर्मैवेत्युक्तत्वात्। 'कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः' इति मूल एव वक्ष्यमाणत्वाच्च। कर्मणामकर्तृत्वं हि संन्यासः। तस्माद् ब्राह्मणः संन्यास्येव। [2]**अस्तु** वा सूत्रगतब्रह्मशब्दस्य परब्रह्मवाचित्वम् , तथापि न काचिदत्रानुपपत्तिः; ब्राह्मणजातीयस्यैव संन्यास इत्युक्तत्वात्। न चैवं ब्राह्मणस्येत्यस्य ब्राह्मणजातीयो गृहस्थादिरप्यर्थः स्यादिति वाच्यम्; विजानत इति विशेषणात्; विजानत्त्वं हि ब्रह्मवित्त्वम्, तच्चासंन्यासिनो न भवत्येवेति।

एतेन ब्राह्मणस्य वैदिकस्येति **रामानुजोक्तार्थः** परास्तः; तस्य तत्त्वविज्ञानाभावेन 'विजानतः' इति विशेषणासाङ्गत्यप्रसङ्गात्। न च वेदविदो वैदिका एव ब्रह्मविद इति वाच्यम् ; 'वेदवादरताः पार्थ नान्यदस्तीति वादिनः' 'त्रैगुण्यविषया वेदाः' इति वेदविदामब्रह्मवित्त्वस्य, वेदानां त्रैगुण्यपरत्वस्य च भगवतैवोक्तत्वात्।

यत्त्वत्र **वेदान्तदेशिकः** - ब्रह्मानितीति निरुक्त्या ब्रह्मणः, 'शकन्ध्वादिषु पररूपं वक्तव्यम्' इति पररूपे कृते प्रज्ञादित्वाद् अण्प्रत्यये च ब्राह्मण इति रूपं भवति। ब्रह्म चात्र वेदः इति; **तत्तुच्छम्** ; प्रज्ञादिषु ब्रह्मणशब्दाभावात् ; ब्रह्मण इति क्वापि प्रथमान्तपदप्रयोगाभावेन प्रज्ञादिषु शकन्ध्वादिषु वा आकृतिगणत्वेन तद्ग्रहणायोगात्। प्रसिद्धपदप्रयोगनिर्वहणाय हि स्वीकृत आकृतिगणः। किञ्च ब्रह्मानितीति व्युत्पत्तौ 'कर्मण्यण्' स्यात्। ततश्च वृद्धौ ब्राह्माण इत्येव स्यादिति।

किं विजानतः? अत आह— **परमार्थतत्त्वमिति**। ब्रह्मेत्यर्थः। विजानदर्थस्य (न) ज्ञानफलत्वादाह— **विज्ञानफलमिति**। पूर्वोक्तदृष्टान्तवाक्यस्थेन केन पदार्थेन सहास्य बिम्बप्रतिबिम्बभावः? अत आह— **यत्सर्वत इति**। सर्वतःसम्प्लुतोदकफलस्थानीयमित्यर्थः। विज्ञानस्यैव सर्वतःसम्प्लुतोदकस्थानीयत्वादिति भावः। **स्थानीयं** तुल्यमित्यर्थः। **तस्मिन्निति**। विज्ञानफले अपरिच्छिन्ने ब्रह्मानन्दे इत्यर्थः। ब्रह्मानन्दलक्षणमोक्षस्यैव विज्ञानफलत्वादिति भावः। **तावानेव सम्पद्यत इति**। तत्रैवान्तर्भवति, 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः। अपरिच्छिन्नब्रह्मानन्दांशत्वात् परिच्छिन्नस्वर्गादिविषयानुभवजन्यानन्दानामिति भावः।

ननु कर्मफलं ज्ञानफलेऽन्तर्भवतीत्यत्र किं प्रमाणम्? अत आह— **सर्वमिति**। प्रजाः यत्किञ्च **साधु** सत्कर्म कुर्वन्ति तत् सर्वं , स इति शेषः। **अभिसमेति** प्राप्नोति। कः सः? इत्यत आह— **यस्तद्वेदेति**। किं तद्? इत्यत आह – **यत् स वेदेति**। स रैक्को यद्वेद तद् ब्रह्म यो वेद स तत्त्ववित् प्रजाकर्तृकसर्वसाधुकर्मफलं प्राप्नोति, तत्त्ववित्प्राप्तब्रह्मानन्दांशत्वात् प्रजासाधुकर्मफलभूतानन्दस्येति भावः। स्मृतिमपि प्रमाणयति— **सर्वमिति। '**सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' इति गीताश्लोकः। ज्ञानफले कर्मफलस्यान्तर्भावाज्ज्ञाने कर्मणः परिसमाप्तिरित्यर्थः।

अयमत्र भाष्यपदान्वयः - 'यथा उदपाने यावान् योऽर्थः स सर्वोऽर्थः सर्वतःसम्प्लुतोदके योऽर्थस्तावानेव सम्पद्यते - एवं सर्वेषु वेदेषु यावान् योऽर्थः सोऽर्थः विजानतो ब्राह्मणस्य योऽर्थः तावानेव सम्पद्यते' - इति। श्लोकव्याख्यामुपसंहरन् फलितमाह—

१. 'यथा.....एवमेनं' इति क्वचिन्न। २. लिङ्गविशेषं विना ब्रह्मशब्दमात्रस्य सूत्रे ग्रहणेऽपि जातिवाचित्वं स्वीकृत्य ब्राह्मणशब्दं समर्थयते— अस्तु वेति।

भाष्यार्कप्रकाशः

**तस्मादिति**। समुद्रफले कूपफलस्येव विज्ञानफले कर्मफलस्यान्तर्भावादित्यर्थः। अधिकृतेन कर्म कर्तव्यमित्यन्वयः। क्वाधिकृतेन? इत्यत आह— **कर्मणीति**। कियत्पर्यन्तम्? अत आह— **प्रागिति**। ज्ञाननिष्ठायां यावता कालेनास्याधिकारो भवति, तावत्पर्यन्तमित्यर्थः। ज्ञाननिष्ठाधिकारप्राप्त्यनन्तरं तु कर्म नैव कर्तव्यमिति भावः। कीदृशं कर्म? इत्यत आह— **कूपेति**। अर्थशब्दोऽत्र वस्तुवाच्येव, न तु फलवाची। कूपतटाकादिस्थानीयमित्यर्थः। अपिशब्दाद् विज्ञानादल्पत्वेन कर्तुमयुक्तमपीति गम्यते। विज्ञानेऽधिकाराभावादिति भावः।

**ननु** किमर्थं कर्मयोगानुष्ठानमिति यदादावाक्षिप्तं तस्य किं समाधानमायातमिति चेद्? **उच्यते**— मोक्षप्रदायां ज्ञाननिष्ठायामधिकाराभावात् तदधिकारसिद्ध्यर्थं कर्मयोगानुष्ठानमिति। न च नायं समाधानार्थो मूलादायातीति वाच्यम् ; अर्थादेतत्सिद्धेः। तथाहि— विज्ञानमेव सर्वैः सम्पाद्यं, समुद्रफले कूपफलस्येव विज्ञानफले ब्रह्मानन्दे एव सर्वकर्मफलविषयानन्दानामन्तर्भावात्। तच्च विज्ञानं कर्मयोगानुष्ठानं विना दुःसम्पादमिति कृत्वा मुमुक्षुणा विज्ञानसिद्ध्यर्थं कर्मयोगोऽनुष्ठेय इति। एवं ज्ञानप्राप्तिद्वारा अपरिच्छिन्नब्रह्मानन्दप्राप्तिहेतुत्वात् तत्तत्क्षुद्रफलान्यनभिसन्धाय विहितानि कर्माण्यधिकृतेन कर्तव्यानीति परमार्थः।

अत्र भाष्ये [१]**कर्मफल**मित्यस्य अनभिसंहितकर्मफलं चित्तशुद्धिरूपार्थ इत्यर्थः। **कूपतटाकाद्यर्थस्थानीय**मित्यस्य कूपतटाकादौ योऽर्थः स्नानपानादिक्रिया तत्तुल्यमित्यर्थः। ततश्च समुद्रे सिष्णासुः पुरुषः यथा समुद्रस्नानाधिकारसिद्ध्यर्थं समुद्रस्नानात्प्राक् कूपतटाकादौ स्नानाचमनादिक्रियां करोति, तथा मुमुक्षुः पुरुषः मोक्षसाधनज्ञाननिष्ठाधिकारसिद्ध्यर्थं ततः प्रागफलाभिसन्धि विहितं कर्म कुर्यात्। स यथा कूपादिस्नानानन्तरं समुद्रे स्नाति, देहस्य शुद्धत्वात् , तथाऽयं कर्मयोगानुष्ठानानन्तरं ज्ञाननिष्ठां प्राप्नुयाच्चित्तस्य शुद्धत्वात्। यथा तस्य कूपादिस्नानजं फलं समुद्रस्नानफले एवान्तर्भवति समुद्रस्नानातिरिक्तकूपादिस्नानजन्यफलाभावात् , तथाऽस्यापि कर्मफलं विज्ञानफले एवान्तर्भवति। एवं च कूपस्नानसमुद्रस्नानयोरिव कर्मज्ञानयोगयोरस्त्युपजीव्योपजीवकभावः; कूपस्नानसाध्यत्वात् समुद्रस्नानस्य कर्मयोगसाध्यत्वाच्च ज्ञानयोगस्य। उभयोः फलविषये तु हस्तिमशकान्तरमस्त्येव; कूपस्नानस्य देहमलापाकरणमात्रफलकत्वात् , समुद्रस्नानस्य च सर्वनदीस्नानजन्यमहाफलकत्वात्। तथा - कर्मयोगस्य चित्तशुद्धिमात्रफलकत्वाद् , विज्ञानस्य च निरतिशयानन्दमोक्षरूपपरमपुरुषार्थफलकत्वादिति **केचिद्** वर्णयन्ति।

अस्मिन् पक्षे - किमर्थं कर्मयोगानुष्ठानमित्याक्षेपस्य समुद्रस्नानाधिकारसिद्ध्यर्थं कूपादिस्नानमिव ज्ञाननिष्ठाधिकारसिद्ध्यर्थं कर्मयोगानुष्ठानमिति कण्ठोक्तमेवोत्तरं सिध्यति।

**ननु** 'कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम्' इति न्यायेन पिपासुरुदकपाने यावत्परिमाणं जलं पिबति सर्वतःसम्प्लुतोदकेऽपि तावत्परिमाणमेव जलं पिबति। न च समुद्रजलमपेयमिति वाच्यम् ; बाष्पभूतस्य समुद्रजलस्य पेयत्वात् इत्यनेनोच्यत इति चेत्? **मैवम्** - दार्ष्टान्तिकाननुरोधात् प्रकृतस्यार्थस्य। न च दार्ष्टान्तिकेऽपि सर्वेषु वेदोक्तेषु कर्मसु यावत्फलं लभते कर्मी तावदेव संन्यासी विज्ञाने फलं लभत इत्यर्थो वाच्य इति वाच्यम् ; कर्मफलेभ्यः स्वर्गादिभ्योऽनित्येभ्यः विज्ञानफलस्य मोक्षस्य नित्यस्य परमोत्कृष्टत्वात्।

अत एव हि 'यदहरेव विरजेत्तदहरेव प्रव्रजेदि'ति श्रुत्या कर्मफलेषु स्वर्गपशुपुत्रादिषु क्षयिष्णुत्वसातिशयत्वादिदोषदर्शनेन यस्य पुरुषस्य यस्मिन्नहनि विरागो जायते स तस्मिन्नेवाहनि संन्यासं स्वीकुर्यादित्युक्तम्। अन्यथा विज्ञानफलस्यापि कर्मफलतुल्यत्वे 'अथातो ब्रह्मजिज्ञासा' इत्यारब्धं वेदान्तशास्त्रं व्यर्थमेव स्यात् ,'अथातो धर्मजिज्ञासा' इति पूर्वमीमांसाशास्त्रेणैव स्वर्गादिलाभात्। न च - व्यर्थं भवतु , को दोष इति - वाच्यम् ; 'तरति शोकमात्मवित्' 'ब्रह्मविद् ब्रह्मैव भवति' 'आत्मा वा अरे द्रष्टव्यः' इत्यादिज्ञानतत्फलविधायकश्रुतिशतविरोधात्। तस्याप्यङ्गीकारेऽनुभवविरोधो बलवान् जागर्ति। कर्मिणां दुःखात्मकसंसारस्यानुपरमदर्शनात् , संन्यासिनां तदुपरमेण निरतिशयात्मानन्दानुभवदर्शनाच्च। तस्माद् विज्ञानफलकर्मफलयोः हस्तिमशकयोरिव महदन्तरम्। न चानभिसंहितफलानां कर्मणां मोक्षः फलमिति वाच्यम् ; चित्तशुद्धेरेव फलत्वादिति।

१. भाष्ये कर्मेत्यस्य स्थाने 'कर्मफलम्' इति रा.पा. भाति।

## कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

**तव च —** कर्मणीति। **कर्मण्येवाधिकारो, न ज्ञाननिष्ठायां,** ते तव। **तत्र च कर्म कुर्वतो** मा फलेष्वधिकारो

अनुभूतिस्वरूपाचार्यटिप्पणम्

ननु तर्हि यत् साक्षादपरिमितात्मसुखप्राप्तिसाधनमात्मज्ञानं, तदेव मह्यमुपदिश। किमनेन योगेन परम्परया पुरुषार्थसाधनेनेत्याशङ्क्याह— [**तव चेति**।] तव च कर्मण्येवाधिकारः, पुत्रवित्ताद्यभिस्नेहस्य विद्यमानत्वादित्यर्थः॥४७॥

आनन्दगिरिकृतव्याख्या

**तर्हि परम्परया पुरुषार्थसाधनं योगमार्गं परित्यज्य साक्षादेव पुरुषार्थकारणमात्मज्ञानं तदर्थमुपदेष्टव्यम् । तस्मै हि स्पृहयति मनो मदीयमित्याशङ्क्याह—** तव चेति। **तर्हि [1]तत्फलाभिलाष्यपि स्यामिति? नेत्याह—** मा फलेष्विति। **पूर्वोक्तमेवार्थं प्रपञ्चयति—** मा

भाष्यार्कप्रकाशः

**अत्र** यथा गङ्गायमुनादितत्तन्नदीस्नानादिजन्यानि तानि तानि फलानि समुद्रस्नानादेकस्मादेव पुरुषस्य भवन्ति, तथा तत्तत्कर्मजन्या हैरण्यगर्भाद्यानन्दा एकस्मादेव ब्रह्मज्ञानाद् विदुषो भवन्तीति **कतिचिद्** वर्णयन्ति।

यत्त्वाह **रामानुजः–** न च वेदोदितं सर्वं सर्वस्योपादेयम् ; यथा सर्वार्थपरिकल्पिते सर्वतःसम्प्लुतोदके उदपाने पिपासोर्यावानर्थः यावदेव प्रयोजनं पानीयं, तावदेव तेनोपादीयते, न सर्वम्। एवं सर्वेषु च वेदेषु ब्राह्मणस्य विजानतो वैदिकस्य मुमुक्षोर्यदेव मोक्षसाधनं तदेवोपादेयं नान्यदिति। **तन्मन्दम्** ; सर्वतःसम्प्लुतोदकशब्दात् सर्वार्थपरिकल्पितत्वरूपार्थालाभात् , कूपादेः स्नानादियत्किञ्चिदर्थपरि-कल्पितत्वेन सर्वार्थपरिकल्पितत्वाभावाच्च। न हि स्त्रीपश्वादिकामस्य कूपादिना यःकश्चिदर्थः। सर्वशब्दस्य सङ्कोचश्च न न्याय्यः। तथा यावत्प्रयोजनं तावत् तेनोपादीयत इत्यप्ययुक्तम् ; जलस्यैवोपादेयत्वेन प्रयोजनस्यानुपादेयत्वात्। प्रयोजनवाचिनो(र)[ऽ]र्थशब्दस्य जलवाचित्वाभावात्। यावताऽर्थेन जलेन प्रयोजनं तावदेव जलं तेनोपादीयत इति वक्तव्यत्वात्। न च तथैव वदामीति वाच्यम् ; यावानिति प्रथमान्तपदसत्त्वात्। तेनेति उपादीयत इति च कर्म[कर्तृ]क्रिययोर्द्वयोर्मूलाद् बहिः कल्पितत्वात्। पिपासोरिति च नियन्तु-मशक्यम् , सिष्णास्वादिसत्त्वात्। यदि पिपासोरित्युदाहरणार्थम् , तर्हि आरामसेचनेच्छोरपि ग्रहणं स्यात्। न चेष्टापत्तिः; तस्य सर्वेणापि कूपजलेन प्रयोजनसत्त्वात् तावदेव तेनोपादीयते, न सर्वमिति वक्तुमशक्यत्वात्।

**तथा** ब्राह्मणशब्दाद् वैदिकार्थलाभः प्रागेव प्रत्युक्तः। विजानतः इति शब्दाच्च न मुमुक्षुलाभः, वेदवादरतानां वैदिकानां बहूनां कामात्मनामेव दर्शनात् , वैदिकस्य 'अथातो धर्मजिज्ञासा' इति कर्मस्वेव प्रवृत्तत्वेन मुमुक्षुत्वासम्भवात् , 'त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुने'ति भगवतैव वैदिकत्वस्य कामहेतुत्वेन दूषितत्वात् , निष्कामस्यैव मुमुक्षुत्वाच्च। निष्कामस्तु न [2]वैदिकः, किन्तु वेदान्त्येवेति सिद्धान्तात्।

यो विशेषेणात्मतत्त्वं विजानाति, स हि विजानन्नित्युच्यते। स च मुक्त एवेति किमिति मुमुक्षुत्वं तस्य? त्वयाऽपि नित्यमुक्तानामनन्तगरुडादीनाम् , ईश्वरस्य च विजानत्त्वमभ्युपगतम्। **किञ्च** मुमुक्षोरेव ज्ञानेऽधिकारः। मुमुक्षुर्हि वेदान्तश्रवणादिकं कृत्वा तमात्मानं विशेषेण जानातीति कथं विजानत्त्वस्यैव मुमुक्षु[त्वरूप]त्वम्? मुमुक्षुत्वानन्तरभाव्यत्वाद् विज्ञानस्य। यदेव मोक्षसाधनं तदेवोपादेयमिति सर्वमपि वाक्यं मूलाद् बहिः कल्पितत्वात् सुतरामप्रमाणम्।

वेदान्तेष्वेव मोक्षसाधनज्ञानश्रवणाद् वेदेषु मोक्षसाधनमित्यप्ययुक्तम् ; वेदेष्वेव मोक्षसाधनस्यापि धर्मादिसाधनयज्ञादेरिव श्रवणे सति वेदान्तश्रवणाद्यानर्थक्यात् ; पूर्वोत्तरमीमांसाभेदेन शास्त्रभेदकल्पनस्याप्ययुक्तत्वापत्तेः। न च - सर्वशब्दस्वारस्याद् उपनिषदोऽपि वेदा एवेति - वाच्यम् ; 'त्रैगुण्यविषया वेदाः' इति भगवतैवोक्तत्वाद् , उपनिषदाञ्च सत्त्वादिगुणातीतब्रह्मात्मतत्त्व-प्रतिपादकत्वात्॥४६॥

**कर्मणीति।** एवकारार्थमाह— **न ज्ञाननिष्ठायामिति। ते तवेति।** क्षत्रियस्येत्यर्थः। ब्राह्मणस्यैव संन्यासाधिकारात् , 'ब्राह्मणो

१. 'तत्फलाभिलाषोऽपि स्यादिति' इति पा.। २. वेदोक्तकर्माधिकृतः इत्यर्थः।

# मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥४७॥

**ऽस्तु कर्मफलतृष्णा मा भूत्** कदाचन **कस्यांचिदप्यवस्थायामित्यर्थः। यदा कर्मफले तृष्णा ते स्यात् , तदा कर्मफलप्राप्तेः हेतुः स्याः। एवं मा कर्मफलहेतुः भूः। यदा हि कर्मफलतृष्णाप्रयुक्तः कर्मणि प्रवर्तते, तदा कर्मफलस्यैव जन्मनो हेतुर्भवेत्। यदि कर्मफलं नेष्यते, किं कर्मणा दुःखरूपेणेति मा** ते **तव सङ्गोऽस्तु** अकर्मणि **अकरणे प्रीतिर्मा भूत्** ॥४७॥

आनन्दगिरिकृतव्याख्या

कर्मेति। **फलाभिसन्ध्यसम्भवे कर्माकरणमेव** [१]**श्रद्दध्यामित्याशङ्क्याह—** मा त इति। **ज्ञानानधिकारिणोऽपि कर्मत्यागप्रसक्तिं निवारयति—** कर्मण्येवेति। **कर्मण्येवेत्येवकारार्थमाह—** न ज्ञानेति। **न हि तत्राब्राह्मणस्यापरिपक्वकषायस्य मुख्योऽधिकारः सिध्यतीत्यर्थः। फलैस्तर्हि सम्बन्धो दुर्वारः स्यादित्याशङ्क्याह—** तत्रेति। **कर्मण्येवाधिकारे सतीति सप्तम्यर्थः। फलेष्वधिकाराभावं स्फोरयति—** कर्मेति। **कर्मानुष्ठानात् प्राग् ऊर्ध्वं तत्काले चेत्येतत्** कदाचनेति **विवक्षितमित्याह—** कस्याञ्चिदिति। **फलाभिसन्धाने दोषमाह—** यदेति। एवं **कर्मफलतृष्णाद्वारेणेत्यर्थः। कर्मफलहेतुत्वं विवृणोति—** यदा हीति। **तर्हि विफलं क्लेशात्मकं कर्म न कर्तव्यमिति शङ्कामनुभाष्य दूषयति—** यदीत्यादिना। **अकर्मणि ते सङ्गो मा भूदित्युक्तमेव स्पष्टयति—** अकरण इति॥४७॥

भाष्यार्कप्रकाशः

निर्वेदमायाद्' 'ब्राह्मणः प्रव्रजेदि'त्यादिश्रुतिभ्यः। **यद्वा** विवेकवैराग्यादिरहितस्येत्यर्थः। विवेकादिशालिन एव संन्यासेऽधिकारात्। ज्ञाननिष्ठा हि सर्वकर्मसंन्यासः, [२]तत्पूर्विकेति वा। **तृष्णा** स्पृहा। **कस्यांचिदपीति** ।स्वप्नाद्यवस्थास्वपीत्यर्थः।

न च 'मा फलेषु कदाचने'त्यनेन 'फलहेतुर्मा भू'रित्यस्य पौनरुक्त्यमिति वाच्यम् ; 'फलेषु स्वर्गादिषु' इति, 'कर्मफलस्य जन्मनः' इति च व्याख्यातत्वात्। यदि तव स्वर्गादिषु तृष्णा स्यात् तर्हि तदनुभवाय तव जन्मापि स्यात् ; तस्मात् फलहेतुर्जन्महेतुश्च मा भूस्त्वमिति वक्तुं वाक्यद्वयस्यावश्यकत्वात्। **कर्मफलहेतुत्वं** नाम कर्मफलरूपजन्मानुभवितृत्वम्। **फलेष्वधिकारो** नाम फलविषयस्पृहेति विवेकः। यदि कर्मफलं नेष्यते, तर्हि दुःखरूपेण कर्मणा किमिति शङ्कायामाह— **मा ते सङ्गोऽस्त्वकर्मणीति।** कर्मशब्दस्य क्रियायां यज्ञादिकर्मणि च प्रसिद्धत्वादाह— **अकर्मणि अकरणे इति**। कर्मणामकरणे इत्यर्थः। फलमनभिसन्धाय त्वया कर्माण्येव कर्तव्यानि, न तु संन्यासः, तत्र तवानधिकारादिति श्लोकस्य फलितार्थः।

यत्तु **रामानुजः**– 'फलस्य च क्षुन्निवृत्त्यादेर्न त्वं हेतुरित्यनुसन्धेय'मिति, **तत्तुच्छम्** ; भोजनादिकर्मणामकर्मत्वात् क्षुन्निवृत्त्या-देश्चाफलत्वात्। न हि केनचिच्छास्त्रेण कश्चिद् भोजनादिकर्मण्यधिक्रियते, येन भोजनादिकर्मण्येव तवाधिकार इत्युच्येत। नक्तभोजनोपवासपारणादिकं तु नित्यनैमित्तिकादिकर्माङ्गमेवेति न तत्र पृथग्विधिः। **किञ्च** यदि क्षुन्निवृत्त्यादिः फलं स्यात् , कथं तत्सङ्गो भोक्तुर्न भवेत्? यज्ञादिकर्मणः स्वर्गादिफलं तु कालान्तरभावीति तत्सङ्गस्त्यक्तुं शक्यः पुंसा। अपि च फलमनभिसन्धाय यज्ञादीनि क्रियन्तां नाम, क्षुन्निवृत्तिमनभिसन्धाय कथं क्षुधितो भोजने प्रवर्तेत? अन्यथा अक्षुधितस्यापि भोजने प्रवृत्तिः स्यात्। यत्तु क्षुत्पिपासादेः प्राणधर्मत्वानुसन्धानं, भोजनादेश्च शरीरधर्मत्वानुसन्धानं सा ज्ञाननिष्ठैव, अविक्रियात्मदर्शनहेतुत्वात्। **तथा** कर्मफलयोर्हेतुर्मा भूरिति च **रामानुजोक्तमसत्** ; कर्मण्येवाधिकारः इति कर्महेतुत्वस्योक्तत्वात्।

यच्चोक्तम् - **वेदान्तदेशिकेन** कर्तृत्वानभिसन्धानमेव कर्माहेतुत्वमिति; **तच्चायुक्तम्** ; कर्तृत्वानभिसन्धानस्य फलाहेतुत्वात्। यः 'कर्ताऽहम्' इति मन्यते, स एव हि फलमभिसन्धत्ते; कर्माहेतुत्वे तु कर्मैव न स्यात् ; यथा फलाहेतुत्वे फलस्य स्वरूपानिष्पत्तिः, तथा कर्माहेतुत्वे किमिति कर्मणः स्वरूपानिष्पत्तिर्न भवेत्?॥४७॥

---

१. 'श्रद्दधामि' इति पा.। २. सर्वकर्मसंन्यासपूर्विका ज्ञाननिष्ठा इत्यर्थः।

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय !।**
**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥४८॥**
**दूरेण ह्यवरं कर्म बुद्धियोगाद् धनञ्जय !।**

**यदि [१]कर्मफलप्रयुक्तेन न कर्तव्यं कर्म , कथं तर्हि कर्तव्यमित्युच्यते—** योगस्थ इति। **योगस्थः सन् कुरु कर्माणि केवलमीश्वरार्थं,[२] तत्रापीश्वरो मे तुष्यत्विति सङ्गं त्यक्त्वा, धनञ्जय ! फलतृष्णाशून्येन क्रियमाणे कर्मणि सत्त्वशुद्धिजा ज्ञानप्राप्तिलक्षणा सिद्धिः, तद्विपर्ययजाऽसिद्धिः, तयोः** सिद्ध्यसिद्ध्योरपि समः **तुल्यो भूत्वा कुरु कर्माणि। कोऽसौ योगो यत्रस्थः कुर्वित्युक्तम्? इदमेव तत् - सिद्ध्यसिद्ध्योः समत्वं योग उच्यते॥४८॥**

**यत्पुनः समत्वबुद्धियुक्तमीश्वराराधनार्थं कर्मोक्तम् , एतस्मात् कर्मणः—** दूरेणेति। दूरेण **अतिविप्रकर्षेण हि**

आनन्दगिरिकृतव्याख्या

**आसक्तिरकरणे न युक्ता चेत् , तर्हि क्लेशात्मकं कर्म किमुद्दिश्य कर्तव्यमित्याशङ्कामनूद्य श्लोकान्तरमवतारयति—**यदीत्यादिना। **वक्ष्यमाणयोगमुद्दिश्य तन्निष्ठो भूत्वा कर्माणि क्लेशात्मकान्यपि विहितत्वाद् [३]अनुतिष्ठेत्याह—** योगस्थः सन्निति। **कर्मानुष्ठानस्योद्देश्यं दर्शयति—** केवलमिति। **फलान्तरापेक्षामन्तरेण** ईश्वरार्थं **तत्प्रसादनार्थमनुष्ठानमित्यर्थः। तर्हीश्वरसंतोषोऽभिलाषगोचरीभूतो भविष्यति? नेत्याह—** तत्रापीति। **ईश्वरप्रसादनार्थे कर्मानुष्ठाने स्थितेऽपीत्यर्थः।** सङ्गं त्यक्त्वा **कुर्विति पूर्वेण सम्बन्धः। आकाङ्क्षितं पूरयित्वा सिद्धि-शब्दार्थमाह—** फलेति। तद्विपर्ययजा **सत्त्वाशुद्धिजन्या [४]ज्ञानाप्राप्तिलक्षणेति यावत्। कर्माण्यनुतिष्ठतो योगमुद्दिश्य शेषतया प्रकृत-माकाङ्क्षापूर्वकं प्रकटयति—** कोऽसावित्यादिना॥४८॥

**किमिति योगस्थेन तत्त्वज्ञानमुद्दिश्य कर्म कर्तव्यम् , फलाभिलाषेणापि तदनुष्ठानस्य सुलभत्वादित्याशङ्क्य, यथोक्तयोगयुक्तं कर्म**

भाष्यार्कप्रकाशः

**योगस्थ इति**। 'हे धनञ्जय! सङ्गं त्यक्त्वा सिद्ध्यसिद्ध्योः समो भूत्वा योगस्थःसन् कर्माणि कुरु' इत्यन्वयः। **फलप्रयुक्तेनेति**। फलाभिसन्धिमतेत्यर्थः। अथवा प्रयुक्तं प्रयोग इति भावे क्तः, प्रसङ्ग इति यावत्। पुंसेति शेषः। फलप्रसङ्गेन कर्म न कर्तव्यम्। फलमभिसन्धाय कर्म न कुर्याद् विवेकीत्यर्थः। **इति** शङ्कायामिति शेषः। **उच्यते** भगवतेति शेषः। कर्माणि कुर्वित्यत्र किमर्थमित्याशङ्कां पूरयति— **केवलमीश्वराराधनार्थमिति। तत्रापि** ईश्वराराधनत्वेऽपीत्यर्थः। ईश्वरप्रीतावपि स्पृहा न कार्येत्यर्थः। ईश्वरप्रीत्याशाया अपि सिद्ध्यसिद्धिशङ्कादिना चित्तचाञ्चल्यहेतुत्वादिति भावः। **तद्विपर्ययजेति**। तच्छब्देन चित्तशुद्धिः परामृश्यते। चित्तशुद्धेर्विपर्ययश्च चित्ताशुद्धिः, तस्माज्जायत इति तज्जा। ज्ञानप्राप्तौ रागः, तदप्राप्तौ द्वेषश्च न कर्तव्य इति भावः। योगस्थशब्दगतयोगशब्दार्थं भगवानेव तुरीयपादेन वक्तीत्याह— **कोऽसौ योग इत्यादि। उच्यत इति**। शास्त्रज्ञैरिति शेषः।

यत्तु **रामानुजः** - राज्यबन्धुप्रभृतिषु सङ्गं त्यक्त्वा, तदन्तर्भूतविजयादिसिद्ध्यसिद्ध्योः समो भूत्वेति, **तत्तुच्छम्** ; 'मा फलेषु कदाचने'त्यनेनैव राज्यादिफलसङ्गस्याकर्तव्यत्वस्योक्तत्वात्। बन्धुप्रभृतिषु सङ्गाकर्तव्यत्वस्य 'अशोच्यानि'त्यारभ्य 'न त्वं शोचितुम-र्हसी'त्येतदन्तेन ग्रन्थेन प्रतिपादितत्वात्। प्रधानफलसिद्ध्यसिद्ध्योः समत्वमुपेक्ष्य तदन्तर्भूतविजयादिसिद्ध्यसिद्धिसमत्ववचनस्यायुक्त-त्वात्। प्रधानफलसिद्ध्यसिद्धिसमत्वस्य इतः प्रागनुक्तत्वाच्च। 'सुखदुःखे समे कृत्वा' इति श्लोके जयापजयसमत्वस्योक्तत्वाच्च॥४८॥

**दूरेणेति**। हे धनञ्जय! बुद्धियोगात् कर्म दूरेणावरं हि। बुद्धौ शरणमन्विच्छ। फलहेतवः कृपणा भवन्तीति शेषः। [५]बुद्धिना(?)

---

१. 'कर्म' इति नास्ति क्वचित् । २. 'ईश्वराराधानार्थम्' इति रा.पा.। ३. 'अनुष्ठेयानीत्याह' इति पा.। ४. 'अज्ञानप्राप्तिलक्षणेति' इति पा.। ५. 'बुद्ध्या व्यवसायात्मकबुद्ध्या' इति पाठो युक्तः।

## बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः॥४९॥

अवरम् **अधमं निकृष्टं कर्म फलार्थिना क्रियमाणं,** बुद्धियोगात् **समत्वबुद्धियुक्तात् कर्मणः, जन्ममरणादिहेतुत्वात् , हे धनञ्जय ! यत एवं ततः योगविषयायां बुद्धौ, तत्परिपाकजायां वा सांख्यबुद्धौ** शरणम् आश्रयम् **अभयप्राप्तिकारणम्** अन्विच्छ **प्रार्थयस्व। परमार्थज्ञानशरणो भवेत्यर्थः। यतोऽवरं कर्म कुर्वाणाः** कृपणाः **दीनाः** फलहेतवः **फलतृष्णा-प्रयुक्ताः सन्तः, 'यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणः' (बृ.उ.३.८.१०) इति श्रुतेः॥४९॥**

आनन्दगिरिकृतव्याख्या

**स्तुवन्ननन्तरश्लोकमुत्थापयति—** यत्पुनरिति। अवरं कर्म **बुद्धिसम्बन्धविधुरमिति**[१] **शेषः। बुद्धियुक्तस्य बुद्धियोगाधीनं प्रकर्षं सूचयति—** बुद्धीति। **बुद्धिसम्बन्धासम्बन्धाभ्यां कर्मणि प्रकर्षनिकर्षयोर्भावे करणीयं नियच्छति—** बुद्धाविति। **यत्तु फलेच्छयाऽपि कर्मानुष्ठानं सुकरमिति, तत्राह—** कृपणेति[णा इति]। **निकृष्टं कर्मैव विशिनष्टि—**फलार्थिनेति। **कस्मात् प्रतियोगिनः सकाशादिदं निकृष्टमित्याशङ्क्य प्रतीकमुपादाय व्याचष्टे—** बुद्धीत्यादिना। **फलाभिलाषेण क्रियमाणस्य कर्मणो निकृष्टत्वे हेतुमाह—** जन्मेति। **समत्वबुद्धियुक्तात् कर्मणः तद्धीनस्य कर्मणो जन्मादिहेतुत्वेन निकृष्टत्वे फलितमाह—** यत इति। योगविषया बुद्धिः **समत्वबुद्धिः। बुद्धिशब्दस्यार्थान्तरमाह—** तत्परिपाकेति। **तच्छब्देन समत्वबुद्धिसमन्वितं कर्म गृह्यते। तस्य परिपाकस्तत्फलभूता बुद्धिशुद्धिः। शरणशब्दस्य पर्यायं गृहीत्वा विवक्षितमर्थमाह—** अभयेति। [२]**सप्तमीमविवक्षित्वा द्वितीयं पक्षं गृहीत्वा वाक्यार्थमाह—** परमार्थेति। **तथाविधज्ञानशरणत्वे हेतुमाह—** यत इति। **फलहेतुत्वं विवृणोति—** फलेति। **तेन परमार्थज्ञानशरणतैव युक्तेति शेषः। परमार्थज्ञानबहिर्मुखानां कृपणत्वे श्रुतिं प्रमाणयति—** यो वा इति। [३]**अस्थूलादिविशेषणमेतदित्युच्यते॥४९॥**

भाष्यार्कप्रकाशः

व्यवसायात्मकबुद्धिना योगो यस्य तद् बुद्धियोगम्[४], तस्माद् बुद्धियोगात्। फलितमाह—**समत्वबुद्धियुक्तात् कर्मण इति। जन्ममरणादि-हेतुत्वादिति।** फलार्थिना क्रियमाणस्य कर्मण इति भावः। स्वर्गादिफलानुभवार्थं जन्म, तत्सुकृतक्षयानन्तरं मरणं चेति बोध्यम्। आदिशब्दात् सुखदुःखादिग्रहणम्। **परिपाकजा** परिणामजाता, फलभूतेति यावत्। **सांख्ये बुद्धौ** सांख्यविषयायां बुद्धावित्यर्थः। परमार्थज्ञानमेव शरणमभयप्राप्तिकारणं यस्य स **परमार्थज्ञानशरणः**। 'फलहेतवः सन्तः अवरं कर्म कुर्वाणाः कृपणाः' इत्यन्वयः। फलहेतव इत्यनेनार्थसिद्धस्यैव वचनमवरं कर्म कुर्वाणा इति। कर्मफलतृष्णाशालित्वरूपफलहेतुत्ववन्तो ह्यवरं कर्म कुर्वन्ति। कर्मण एकस्यैवोत्कर्षापकर्षौ तत्कर्तृबुद्धिगतफलासङ्गतत्सङ्गप्रयुक्तावेव, न तु स्वाभाविकाविति बोध्यम्। **एतेन** - अविवेकिकामिजनसमाश्रयात् कर्मणामेवापकर्षो जात इति तन्निन्दा **सूच्यते**। फलहेतूनां कृपणत्वे श्रुतिं प्रमाणयति— **यो वेति**। हे गार्गि! यो वा पुरुषः **एतदक्षरम्** अविनाशि ब्रह्मेति यावत्। अविदित्वा अस्माल्लोकान्मनुष्यलोकात् प्रैति, मनुष्यलोकं विहाय स्वर्गादिलोकं प्राप्नोति, स्वकृतफलसङ्ग-पूर्वककर्मफलानुभवार्थं भूरादिलोकान् प्राप्नोतीत्यर्थः। सोऽ(पि)विद्वान् पुरुषः कृपणः शोच्यः। अस्माल्लोकादिति ल्यब्लोपे पञ्चमी। **यद्वा** अस्माल्लोकाद् देहात् **प्रैति** उत्क्रामति, म्रियत इति यावत्। तत्त्वविदः उत्क्रान्त्यभावादिति भावः।

यत्तु **रामानुजः** - बुद्धियोगादित्यस्य बुद्धियोगयुक्तात् कर्मणः इत्यर्थमाह, अत्रोपपत्तिमाह अजहल्लक्षणयेति **वेदान्तदेशिकश्च** यत् ; तदुभयं **तुच्छम्** ; [५]लक्षणाश्रयणस्य दुष्टत्वात् , बुद्धियुक्तादित्यनेनैवेष्टसिद्धौ बुद्धियोगयुक्तादित्यस्यानर्थक्याच्च॥४९॥

---

१. 'विरुद्धमिति' इति पा.। २. 'बुद्धौ' इत्यत्र सप्तम्याः वाच्यार्थो न विवक्षितः, लक्षणया तु कर्मत्वं विवक्षितम्। तथा च 'बुद्धिं शरणमन्विच्छ' इत्यत्र सांख्यबुद्धिं गृहीत्वा वाक्यतात्पर्यार्थमाहेत्यर्थः। ३. 'अस्थूलमनणु' इत्यादिपूर्ववाक्ये प्रकृतं ब्रह्मेत्यर्थः। ब्रह्मज्ञानहीनाः कृपणाः इति श्रुतावुक्तम्। अतः कृपणताव्यावृत्तये परमार्थज्ञानशरणता कर्तव्या। सा च तत्प्राप्तिसाधनकर्मयोगानुष्ठानलक्षणा। बुद्धिशब्देन योगबुद्धिग्रहणे सांख्यबुद्धिग्रहणे च परमार्थज्ञानशरणता समाना। ४. व्यधिकरणबहुव्रीहिः। अन्यपदार्थः कर्म। ५. अस्माभिस्तु बहुव्रीहिसमासाश्रयणेनोक्तार्थो लब्धः। यद्यपि बहुव्रीहावपि लक्षणाऽस्त्येव, तथापि सा निरूढेति न दोषः इति भावः।

**बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।**
**तस्माद् योगाय युज्यस्व योगः कर्मसु कौशलम्॥५०॥**
**कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।**

**समत्वबुद्धियुक्तः सन् स्वधर्ममनुतिष्ठन् यत्फलं प्राप्नोति तच्छृणु—** बुद्धीति। बुद्धियुक्तः **कर्मणि समत्वविषयया बुद्ध्या युक्तो बुद्धियुक्तः। स** जहाति **परित्यजति,** इह **अस्मिन् लोके उभे** सुकृतदुष्कृते **पुण्यपापे, सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण यतः, तस्मात् समत्वबुद्धियोगाय** युज्यस्व **घटस्व। योगो हि कर्मसु कौशलम्। स्वधर्माख्येषु कर्मसु वर्तमानस्य या सिद्ध्यसिद्ध्योः समत्वबुद्धिरीश्वरार्पितचेतस्तया तत्** कौशलं **कुशलभावः। तद्धि कौशलं यद् बन्धनस्वभावान्यपि कर्माणि समत्वबुद्ध्या स्वभावान्निवर्तन्ते[१]। तस्मात् समत्वबुद्धियुक्तो भव त्वम्॥५०॥**

**यस्मात्—** कर्मजमिति। **कर्मजं फलं त्यक्त्वेति व्यवहितेन सम्बन्धः। इष्टानिष्टदेहप्राप्तिः** कर्मजं **फलं कर्मभ्यो**

आनन्दगिरिकृतव्याख्या

**पूर्वोक्तसमत्वबुद्धियुक्तस्य स्वधर्मानुष्ठाने प्रवृत्तस्य किं स्यादित्याशङ्क्याह—** समत्वेति। बुद्धियुक्तः **स्वधर्माख्यं कर्मानुतिष्ठन्निति शेषः[२]। बुद्धियोगस्य फलवत्त्वे फलितमाह—** तस्मादिति। **पूर्वार्धं व्याचष्टे—** बुद्धीत्यादिना। **ननु समत्वबुद्धिमात्रान्न पुण्यपापनिवृत्तिर्युक्ता, परमार्थदर्शनवतस्तन्निवृत्तिप्रसिद्धेरिति? तत्राह—** सत्त्वेति। **उत्तरार्धं व्याचष्टे—** तस्मादिति। **स्वधर्ममनुतिष्ठतो यथोक्तयोगार्थं किमर्थं मनो योजनीयमित्याशङ्क्याह—** योगो हीति। **तर्हि यथोक्तयोगसामर्थ्यादेव दर्शितफलसिद्धेरनास्था स्वधर्मानुष्ठाने प्राप्तेत्याशङ्क्याह—** स्वधर्माख्येष्विति। **ईश्वरार्पितचेतस्तया कर्मसु वर्तमानस्यानुष्ठाननिष्ठस्य या यथोक्ता बुद्धिः, तत् तेषु कौशलमिति योजना। कर्मणां बन्धस्वभावत्वात् तदनुष्ठाने बन्धानुबन्धः स्यादित्याशङ्क्य , कौशलमेव विशदयति—** तद्धीति। **समत्वबुद्धेरेवंफलत्वे स्थिते फलितमुपसंहरति—** तस्मादिति ॥५०॥

**समत्वबुद्धियुक्तस्य सुकृतदुष्कृततत्फलपरित्यागेऽपि कथं मोक्षः स्यादित्याशङ्क्याह—** यस्मादिति। **समत्वबुद्ध्या यस्मात्**

भाष्यार्कप्रकाशः

**बुद्धीति**। बुद्धियुक्तः पुरुष इह उभे सुकृतदुष्कृते जहातीत्यन्वयः। कर्मणि समत्वं नाम कर्मजन्यसिद्ध्यसिद्ध्योः समत्वम् , तस्यैव प्रकृतत्वात्। अथवा फलपरित्यागान्नित्येषु नैमित्तिकेषु काम्येषु च कर्मसु समत्वबुद्धिः, सर्वेषामपि सत्त्वशुद्धिरूपैकफलकत्वेन समत्वात्। ननु 'तद्विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैती'ति श्रुत्या आत्मविद एव पुण्यपापपरित्यागश्रवणात् कथं कर्मयोगिनः पुण्यपापविधूननम्? अत आह— **सत्त्वशुद्धिज्ञानप्राप्तिद्वारेणेति**। सत्त्वशुद्ध्या यज्ज्ञानं तत्प्राप्तिद्वारेण, सत्त्वशुद्धिपूर्वकज्ञानप्राप्तिद्वारेणेत्यर्थः। कर्मयोगात् सत्त्वशुद्धिस्ततो ज्ञानप्राप्तिस्तया सुकृतदुष्कृतपरित्याग इति भावः। **स्वभावादिति** बन्धकत्वरूपात् स्वभावादित्यर्थः।

यत्तु **रामानुजः—** बुद्धियुक्तो बुद्धियोगयुक्त इति। योगो बुद्धियोगः, कौशलम् अतिसामर्थ्यम् , अतिसामर्थ्यसाध्य इत्यर्थ इति, **तत्तुच्छम्** ; बुद्धिशब्दाद् बुद्धियोगरूपार्थालाभात् प्रकृतयोगस्य कर्मयोगत्वेन बुद्धियोगशब्दवाच्यत्वाभावात्। बुद्धियोगो हि ज्ञानयोगः, बुद्धेर्ज्ञानपर्यायत्वात्। न च बुद्धियोगादिति पूर्वश्लोकादत्र बुद्धेर्बुद्धियोगार्थबोधकत्वमिति वाच्यम् ; तत्रापि बुद्धियुक्तादित्येवार्थस्य सिद्धान्तितत्वात्। योगः कौशलमिति पदद्वयस्य स्वारसिकं सामानाधिकरण्यं भञ्जयित्वा कौशलसाध्य इति लाक्षणिकार्थस्वीकारस्याप्रमाणत्वाच्च॥५०॥

१. 'निवर्त्यन्ते' इति पा.। २. इत्थं शेषपूरणेन श्लोकव्याख्यानं भाष्ये 'समत्वबुद्धियुक्तः सन् स्वधर्ममनुतिष्ठन् यत् फलं प्राप्नोति' इति अवतारिकया सूचितम्।

**जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्॥५१॥**

**जातम्।** बुद्धियुक्ताः **समत्वबुद्धियुक्ताः सन्तः** हि **यस्मात् फलं** त्यक्त्वा **परित्यज्य** मनीषिणो **ज्ञानिनो भूत्वा** जन्मबन्धविनिर्मुक्ताः **जन्मैव बन्धो जन्मबन्धस्तेन विनिर्मुक्ताः, जीवन्त एव जन्मबन्धविनिर्मुक्ताः सन्तः,** पदं **परमं विष्णोः मोक्षाख्यं गच्छन्ति** अनामयं **सर्वोपद्रवरहितमित्यर्थः।**

**अथवा 'बुद्धियोगाद् धनञ्जय'(भ.गी.२.४९) इत्यारभ्य परमार्थदर्शनलक्षणैव सर्वतःसम्प्लुतोदकस्थानीया कर्मयोगजसत्त्वशुद्धिजनिता बुद्धिर्दर्शिता, साक्षात् सुकृतदुष्कृतप्रहाणादिहेतुत्वश्रवणात्॥५१॥**

आनन्दगिरिकृतव्याख्या

**कर्मानुष्ठीयमानं दुरितादि त्याजयति, तस्मात् परम्परयाऽसौ मुक्तिहेतुरित्यर्थः।** मनीषिणो हि **ज्ञानातिशयवन्तो बुद्धियुक्ताः सन्तः स्वधर्माख्यं कर्मानुतिष्ठन्तस्ततो जातं फलं** [१]**देहप्रदं हित्वा जन्मलक्षणाद् बन्धाद् विनिर्मुक्ता वैष्णवं पदं सर्वसंसारसंस्पर्शशून्यं प्राप्नुवन्तीति श्लोकोक्तमर्थं श्लोकयोजनया दर्शयति—** कर्मजमित्यादिना। **इष्टो देहो देवादिलक्षणः, अनिष्टो देहस्तिर्यगादिलक्षणः, तत्प्राप्तिरेव कर्मणो जातं फलम्। तद् यथोक्तबुद्धियुक्ता ज्ञानिनो भूत्वा तद्बलादेव परित्यज्य बन्धविनिर्मोकपूर्वकं जीवन्मुक्ताः सन्तो विदेहकैवल्यभाजो भवन्तीत्यर्थः। बुद्धियोगादित्यादौ बुद्धिशब्दस्य समत्वबुद्धिरर्थो व्याख्यातः।**

**सम्प्रति परम्परां परिहृत्य सुकृतदुष्कृतप्रहाणहेतुत्वस्य समत्वबुद्धावसिद्धेर्बुद्धिशब्दस्य योग्यमर्थान्तरं कथयति—** अथवेति। **अनवच्छिन्नवस्तुगोचरत्वेनानवच्छिन्नत्वं तस्याः सूचयन् बुद्ध्यन्तराद् विशेषं दर्शयति—** सर्वत इति। **असाधारणं निमित्तं तस्या निर्दिशति—** कर्मेति। **यथोक्तबुद्धेर्बुद्धिशब्दार्थत्वे हेतुमाह—** साक्षादिति। **जन्मबन्धविनिर्मोकादिरादिशब्दार्थः।**

भाष्यार्कप्रकाशः

बुद्धियुक्ताः पुरुषाः कर्मजं फलं त्यक्त्वा मनीषिणः सन्तः जन्मबन्धविनिर्मुक्ताः अनामयं पदं गच्छन्तीत्यन्वयः। **ज्ञानिनो भूत्वेति।** चित्तशुद्धिद्वारा आत्मज्ञाननिष्ठां प्रपद्येत्यर्थः। गच्छन्तीति वर्तमाननिर्देशादाह— **जीवन्त एवेति।** अन्यथा हि गमिष्यन्तीति वक्तव्यं स्यात्। 'तद्विष्णोः परमं पद'मिति श्रुतेराह— **विष्णोरिति।** किं तत् पदम्? अत आह— **मोक्षाख्यमिति।** सच्चिदानन्दलक्षणं स्वरूपमित्यर्थः। आत्मन्यनात्माध्यासहेतोरविद्यायाः 'अहं ब्रह्म' इति विद्यया, तेजसा तिमिरस्येव, नाशे सति सच्चिदानन्दब्रह्मात्मसाक्षात्कारो जायते। स एव मोक्ष इत्युच्यते। स च जीवद्दशायामेव सुलभः, शमदमादिसंस्कृतमनःसाध्यत्वाद् विद्यायाः 'ब्रह्मविद् ब्रह्मैव भवती'ति विद्याया अव्यवहितफलत्वाच्च मोक्षस्य। न च विदेहकैवल्यस्य मोक्षस्य कथं जीवद्दशायां लाभ इति वाच्यम्; आत्मनः सर्वदाऽपि विदेहत्वात्, 'निष्कलं निष्क्रियं शान्तम्' 'अशब्दमस्पर्शमरूपमव्ययम्' इत्यादिश्रुतेः, सदेहत्वस्य चाविद्यासिद्धत्वात्। विद्यया आत्मनि सदेहत्वभ्रान्तिमात्रस्यैव निवर्त्यत्वात्, रज्जुसर्पभ्रान्तेराप्तोपदेशनिवर्त्यत्ववत्। तस्मादविक्रिये आत्मनि स्वयम्प्रभे कालत्रयेऽपि बन्धतद्धेतुसङ्गाभावात् सिद्धा जीवन्मुक्तिरात्मज्ञस्य।

ननु 'सुकृतदुष्कृते जहाति' 'अनामयं पदं गच्छन्ती'ति साक्षाज्ज्ञानफलस्य सुकृतदुष्कृतप्रहाणस्य परमपदप्राप्तेश्च प्रोक्तत्वान्नात्र कर्मयोगप्रसञ्जनमतीवोचितमित्यत आह— **अथवेति।** अयं च श्लोकानामर्थः। हे धनञ्जय! **बुद्धियोगा**ज्ज्ञानयोगात् सांख्ययोगादित्यर्थः। **कर्म** कर्मयोगः दूरेणावरं हि। तस्माद् **बुद्धौ** सांख्ये शरणमन्विच्छ। कर्मफलहेतवस्त्वतीव कृपणाः। कर्मयोगनिष्ठास्तु नातीव कृपणाः, अफलहेतुत्वादित्यर्थः। **बुद्धियुक्तः** सांख्यबुद्धियुक्तः इह उभे सुकृतदुष्कृते जहाति, 'तद्विद्वान् पुण्यपापे विधूय' इति श्रुतेः। तस्मात् त्वं **योगाय** सांख्यबुद्धिजनककर्मयोगाय तावद् युज्यस्व। 'योगः कर्मसु कौशलम्' इत्यनतिरिक्तार्थम्। **बुद्धियुक्ताः** सांख्यज्ञानयुक्ता **मनीषिणो** विद्वांसः **कर्मजं फलं त्यक्त्वा** कर्मत्यागद्वारा तत्फलत्यागं कृत्वेत्यर्थः। जन्मबन्धविनिर्मुक्ताः सन्तः अनामयं पदं गच्छन्ती-

---

१. 'देहप्रभेदं' इति पा.।

**यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।**
**तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च॥५२॥**

**योगानुष्ठानजनितसत्त्वशुद्धिजा बुद्धिः कदा [१]प्राप्स्यत इत्युच्यते—** यदेति। यदा **यस्मिन् काले** ते **तव** मोहकलिलं **मोहात्मकमविवेकरूपं कालुष्यं, येनात्मानात्मविवेकबोधं कलुषीकृत्य विषयं प्रत्यन्तःकरणं प्रवर्त्यते तत्, तव बुद्धिः** व्यतितरिष्यति **व्यतिक्रमिष्यति। शुद्धभावमापत्स्यत इत्यर्थः।** तदा **तस्मिन् काले** गन्तासि **प्राप्स्यसि** निर्वेदं **वैराग्यं श्रोतव्यस्य श्रुतस्य च। तदा श्रोतव्यं श्रुतं च ते निष्फलं प्रतिभातीत्यभिप्रायः॥५२॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**श्रोतव्यस्ये(स्य)[ति]।** अध्यात्मशास्त्रातिरिक्तशास्त्रस्येत्यर्थः॥५२॥

आनन्दगिरिकृतव्याख्या

**[२]यस्मिन् कर्मणि क्रियमाणे परमार्थदर्शनलक्षणा बुद्धिरुद्देश्यतया युज्यते, तस्मात् कर्मणः सकाशादितरत् कर्म तथाविधोद्देश्यभूतबुद्धिसम्बन्धविधुरमतिशयेन [३]निष्कृष्यते, ततश्च परमार्थबुद्धिमुद्देश्यत्वेनाश्रित्य कर्मानुष्ठातव्यम्, परिच्छिन्नं फलान्तरमुद्दिश्य तदनुष्ठाने कार्पण्यप्रसङ्गात्। किञ्च परमार्थबुद्धिमुद्देश्यामाश्रित्य कर्मानुतिष्ठन् अन्तःकरणशुद्धिद्वारा परमार्थदर्शनसिद्धौ जीवत्येव देहे सुकृतादि हित्वा मोक्षमधिगच्छति। तथा च परमार्थदर्शनलक्षणयोगार्थं मनो धारयितव्यम्। योगशब्दितं हि परमार्थदर्शनमुद्देश्यतया[४] कर्मसु अनुतिष्ठतो नैपुण्यमिष्यते। यदि च परमार्थदर्शनमुद्दिश्य तद्युक्ताः सन्तः समारभेरन् कर्माणि, तदा तदनुष्ठानजनितबुद्धिशुद्ध्या ज्ञानिनो भूत्वा कर्मजं फलं परित्यज्य निर्मुक्तबन्धना मुक्तिभाजो भवन्तीत्येवमस्मिन् पक्षे श्लोकत्रयाक्षराणि व्याख्यातव्यानि॥५१॥**

**यथोक्तबुद्धिप्राप्तिकालं प्रश्नपूर्वकं प्रकटयति—** योगेति। **श्रुतं श्रोतव्यं दृष्टं द्रष्टव्यमित्यादौ फलाभिलाषप्रतिबन्धान्नोक्ता बुद्धिरुदेष्यतीत्याशङ्क्याह—** यदेति। **विवेकपरिपाकावस्था** कालशब्देनोच्यते। **कालुष्यस्य दोषपर्यवसायित्वं दर्शयन् विशिनष्टि—** येनेति। तद् **अनर्थरूपं कालुष्यम्। तवेत्यन्वयार्थं पुनर्वचनम्। बुद्धिशुद्धिफलस्य विवेकस्य प्राप्त्या वैराग्यप्राप्तिं दर्शयति—** तदेति। **अध्यात्मशास्त्रातिरिक्तं शास्त्रं** श्रोतव्यादिशब्देन **गृह्यते। उक्तं वैराग्यमेव स्फोरयति—** श्रोतव्यमिति। **यथोक्तविवेकसिद्धौ सर्वस्मिन्ननात्मविषये नैष्फल्यं प्रतिभातीत्यर्थः॥५२॥**

भाष्यार्कप्रकाशः

त्यनतिरिक्तार्थम्। परमार्थदर्शनं परतत्त्वज्ञानं लक्षणं स्वरूपं यस्याः सा **परमार्थदर्शनलक्षणा** कर्मयोगजा सत्त्वशुद्धिः, तज्जा **कर्मयोगजसत्त्वशुद्धिजा** बुद्धिः, सांख्यबुद्धिरित्यर्थः। **दर्शिता** भगवतेति शेषः। तत्र हेतुमाह— **साक्षादिति।** कर्मयोगस्य परम्परया सुकृतदुष्कृतप्रहाणादिहेतुत्वमस्ति, न तु साक्षात्। ज्ञानयोगस्य तु साक्षात् तदस्तीति कृत्वा प्रकृतश्लोकेषु साक्षात् तद्धेतुत्वश्रवणात् साक्षात् तद्धेतुत्ववान् सांख्ययोग एवेहाप्युक्त इति ज्ञेयमिति भावः॥५१॥

**यदेति।** यदा ते बुद्धिः मोहकलिलं व्यतितरिष्यति, तदा श्रोतव्यस्य श्रुतस्य च निर्वेदं गन्तासि। कालुष्यमेव कार्यद्वारा दर्शयति— **येनेति।** आत्मानात्मविवेकरूपो बोधो ज्ञानं, तं कलुषीकृत्य अपहृत्य, विषयं शब्दादिकं प्रति अन्तःकरणं येन प्रवर्त्यते तत् कालुष्यमित्यन्वयः। विवेकजलकलुषीकरणादविवेकस्य रजस इव कलिलशब्दव्यवहार इति भावः। श्रुतेन किम्? श्रोतव्येन किम्? इति श्रुतश्रोतव्यविषयं निर्वेदं प्राप्स्यसीत्यर्थः। **श्रुतं श्रोतव्यञ्चेति।** आत्मनोऽन्यत् सर्वं धर्मशास्त्रादिकमित्यर्थः। आत्मनस्तु यावत्साक्षात्कारं सर्वदाऽपि श्रोतव्यत्वान्न तत्र निर्वेद उचितः - 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इति श्रुतेः 'आसुप्तेरामृतेः कालं नयेद् वेदान्तचिन्तया' इति स्मृतेश्च॥५२॥

---

१. 'प्राप्यते' इति पा.। २. अथवेत्युक्तपक्षे 'दूरेण ह्यवर'मित्यादिश्लोकत्रयं व्याचष्टे— यस्मिन्नित्यादिना। ३. 'निकृष्यते' इति पाठो युक्तः। ४. आश्रितमिति शेषः।

**श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला।**
**समाधावचला बुद्धिस्तदा योगमवाप्स्यसि॥५३॥**

**मोहकलिलात्ययद्वारेण [१]लब्धात्मविवेकजप्रज्ञः कदा कर्मयोगजं फलं परमार्थयोगमवाप्स्यसीति[२] चेत्? तच्छृणु—** श्रुतिविप्रतिपन्नेति। श्रुतिविप्रतिपन्ना **अनेकसाध्यसाधनसम्बन्धप्रकाशनश्रुतिभिः** श्रवणैः **प्रवृत्तिनिवृत्ति-लक्षणैः** विप्रतिपन्ना **नानाप्रतिपन्ना श्रुतिविप्रतिपन्ना, विक्षिप्ता सती,** ते **तव बुद्धिः** यदा **यस्मिन् काले** स्थास्यति **स्थिरीभूता भविष्यति** निश्चला [३]**विक्षेपरूपचलनवर्जिता सती** समाधौ **समाधीयते चित्तमस्मिन्निति समाधिः आत्मा, तस्मिन् आत्मनीत्येतत्।** अचला **तत्रापि विकल्पवर्जितेत्येतत्।** बुद्धिः **अन्तःकरणम् ,** तदा **तस्मिन् काले** योगमवाप्स्यसि **विवेकप्रज्ञां समाधिं प्राप्स्यसि॥५३॥**

आनन्दगिरिकृतव्याख्या

**बुद्धिशुद्धिविवेकवैराग्यसिद्धावपि पूर्वोक्तबुद्धिप्राप्तिकालो दर्शितो न भवतीति शङ्कते—** मोहेति। **प्रागुक्तविवेकादियुक्तबुद्धेरात्मनि स्थैर्यावस्थायां प्रकृतबुद्धिसिद्धिरित्याह—** तच्छृण्विति। **पृष्टं कालविशेषाख्यं वस्तु तच्छब्देन गृह्यते। बुद्धेः श्रुतिविप्रतिपन्नत्वं विशदयति—** अनेकेति। [४]**नानाप्रतिपन्नत्वमेव संक्षिपति—** विक्षिप्तेति। **उक्तं हेतुद्वयमनुरुध्य वैराग्यपरिपाकावस्था** काल**शब्दार्थः।** नैश्चल्यं **विक्षेपराहित्यम् ,** अचलत्वं **विकल्पशून्यत्वम्।** विक्षेपो **विपर्ययः,** विकल्पः **संशय इति विवेकः। विवेकद्वारा जाता** प्रज्ञा **प्रागुक्ता बुद्धिः।** समाधिः **तत्रैव निष्ठा॥५३॥**

भाष्यार्कप्रकाशः

'श्रुती'ति श्लोकमवतारयति— **मोहेति**। आत्मानात्मविवेकाच्छादकस्य मोहकलिलस्यात्यये नाशे सति आत्मानात्मविवेक-रूपा प्रज्ञा लभ्यते पुंसा। तादृशश्च पुरुषः कर्मयोगजं परमार्थयोगं सांख्ययोगरूपं फलं कदा प्राप्स्यसि? इत्येतदहं वच्मि, तत् त्वं शृणु; श्रुतिविप्रतिपन्ना ते बुद्धिः यदा निश्चला सती समाधावचला सती स्थास्यति, तदा योगमवाप्स्यसीत्यन्वयः। अनेकेषां साध्यानां साधनानां सम्बन्धानां च प्रकाशनं याभिस्ताभिः **श्रुतिभिः** प्रवृत्तिनिवृत्तिलक्षणैः श्रवणैः, प्रवृत्तिनिवृत्ती लक्षणं स्वरूपं येषां तैः तथोक्तैर्वेदैः हेतुभिः **विप्रतिपन्ना** विप्रतिपत्तिं प्राप्ता **नानाप्रतिपन्ना** बहुभेदं प्राप्तेत्यर्थः। प्रवृत्तिनिवृत्तिधर्मप्रतिपादकवेदश्रवणात् 'किं कर्म कुर्याम् , किंवा प्रव्रजेयम् , किंवा वनं विशेयम्? कर्मस्वपि किं काम्यानि कुर्याम् , अथवा नित्यानि?' इत्येवं बहुविधविकल्पान् प्राप्तेति भावः। निश्चलाचलपदयोः पौनरुक्त्यं वारयति—**विक्षेपेति**। **विक्षेपो** बुद्धेरात्मस्वरूपात् प्रच्युतिः, विषयचिन्तेति यावत्। **तत्रापीति**। आत्मन्यपीत्यर्थः। **विकल्पो** बुद्धिवृत्तिः। **विवेकप्रज्ञाम्** 'अयमात्मा, इदमनात्मा' इति विवेकरूपं ज्ञानम्। यावदर्थमाह— **समाधिमिति**। चित्तसमाधानमित्यर्थः। निर्विकल्पसमाधिमिति यावत्। सुषुप्ताविव लयरहितं, जाग्रत्स्वप्नयोरिव विक्षेपरहितम् 'अहं ब्रह्म' इत्याकारकवृत्तिशून्यं च सदन्तःकरणं यत् केवलमात्मस्वरूपानुसन्धानपरं वर्तते, तदेव निर्विकल्पसमाधिरिति फलितार्थः। यदा स्वस्यान्तःकरणं निर्विकल्पं निर्विक्षेपं च सदात्मनि स्थिरं वर्तते, तदा निर्विकल्पसमाधिशाल्यहमिति ज्ञातव्यं त्वयेति श्लोकनिष्कृष्टार्थः। निर्विकल्पसमाधावात्मस्वरूपसाक्षात्कारे सति 'अयमात्मा, इदमनात्मा' इति विवेकः सुखेन भवति पुंस इति भावः। **एतेन** ज्ञानयोगस्य समाधिरेव परा काष्ठेति **सूचितम्।** न च यमनियमाद्यष्टाङ्गलक्षणयोगस्यैव समाधिः परा काष्ठेति वाच्यम् ; मनःसंयमसाध्यस्य समाधेः सांख्ययोगयोरुभयोरपि परमावधित्वात्। मनःसंयमस्तु केषाञ्चित् प्राणायामादियोगसाध्यः, केषाञ्चिदात्मानात्मविवेचनरूपसांख्य-साध्य इति विवेकः। अत एव 'एकं सांख्यं च योगं च यः पश्यति स पश्यति' इति वक्ष्यति भगवान्।

१. 'लब्धात्मविवेकप्रज्ञः' इति पा.। २. 'अवाप्स्यामि' इति पा.। ३. निश्चला अचला इत्यनयोः पुनरुक्तिं वारयति—विक्षेपेति। 'विक्षेपचलनवर्जिता' इति पा.।
४. 'नानाश्रुतिप्रतिपन्नत्वमेव' इति पा.।

**अर्जुन उवाच—**

**स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।।**
**स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम्?॥५४॥**

**प्रश्नबीजं प्रतिलभ्यार्जुन उवाच लब्धसमाधिप्रज्ञस्य लक्षणबुभुत्सया—** स्थितप्रज्ञस्येति। स्थिता **प्रतिष्ठिता 'अहमस्मि परं ब्रह्म' इति प्रज्ञा यस्य स स्थितप्रज्ञः, तस्य स्थितप्रज्ञस्य** का भाषा? **किं भाषणं वचनम्। कथमसौ**

आनन्दगिरिकृतव्याख्या

**संन्यासिनो** [१]**ज्ञाननिष्ठाप्राप्तिवचनं** प्रश्नबीजम्। **पृच्छतोऽर्जुनस्याभिप्रायमाह—**लब्धेति। **लब्धा** [२]समाधौ **आत्मनि, समाधानेन वा** प्रज्ञा **परमार्थदर्शनलक्षणा येन, तस्येति यावत्। ननु तस्य भाषा तत्तत्कार्यानुरोधिनी भविष्यति, किमित्यसौ जिज्ञास्यते? तत्राह—**

भाष्यार्कप्रकाशः

**ननु** 'समाधावचला बुद्धिः स्थास्यती'त्यनेनैव निर्विकल्पसमाधिरुक्तः; पुनः समाधिं प्राप्स्यसीति वचनं त्वयुक्तम् ; समाधिमतः समाधिप्राप्तिरिति पौनरुक्त्यादिदोषादिति **चेत्**? अत एव श्लोकनिष्कृष्टार्थस्तथोक्तो मया। **यद्वा** - कर्मयोगजा सत्त्वशुद्धिः, सत्त्वशुद्धौ निर्विकल्पसमाधिलाभः, ततश्चात्मानात्मविवेकलक्षणज्ञानयोगात्मकसमाधिलाभ इति विवेकः। सत्त्वशुद्धिं प्रति कर्मानुष्ठानवद् यमनियमादयोऽपि हेतव एवेति कृत्वा निर्विकल्पसमाधेर्योगपरमावधित्वं चोच्यत इति बोध्यम्।

**एतेन** सर्वेऽपि योगा ज्ञानयोगसाधका एव, न तु तत्साध्यः कश्चन योगोऽस्तीति ज्ञानयोगस्य सर्वयोगाधिकत्वं **सूचितम्।**

**यद्यपि** ज्ञानयोगस्य परा काष्ठा ब्रह्मात्मसाक्षात्कारः, निर्विकल्पसमाधिश्च स एवेति नोभयोर्भेदः[३], **तथापि** निर्विकल्पसमाधावात्मानुभवं कुर्वन्तोऽपि योगिनः न तमात्मानं ब्रह्माभिन्नं विदुरिति हेतोर्निर्विकल्पसमाधेर्योगसाध्यात् ज्ञानयोगस्योत्कर्ष उक्तः। येन केनापि योगाद्युपायेन यदा तवान्तःकरणस्य निर्विकल्पसमाधिलाभः, तदैव तव 'अयमात्मा, इदमनात्मा' इति विवेको जायते, निर्विकल्पसमाधावात्मस्वरूपसाक्षात्कारस्य जातत्वादिति श्लोकस्य तात्पर्यम्। न चैवं निर्विकल्पसमाधिनैवालम् , तत एवात्मस्वरूपसाक्षात्कारलाभात् , स च समाधिः प्राणायामादिसाध्य इति कोऽर्थो ज्ञानयोगेनेति वाच्यम् ; 'सच्चिदानन्दलक्षणः सर्वान्तरः स्वयम्प्रभ आत्मा' इति ज्ञाने सत्येव निर्विकल्पसमाध्यनुभूतवस्तुनि ब्रह्मात्मज्ञानं स्यात् पुंसः, न त्वन्यथेति ज्ञानयोगस्यावश्यकत्वात्। न हि सौषुप्तिक आत्मानन्दानुभवो मोक्षाय भवति पुंसाम् ,'अयमात्मा' इति ज्ञानाभावस्य तुल्यत्वात् इति। **अथवा** विक्षेपो विपर्ययः विकल्पः संशय इत्यर्थान्नात्र श्लोके पूर्ववाक्येन निर्विकल्पसमाधिरभिधीयत इति न कोऽपि दोष इति बोध्यम्। 'नायमात्मा' इति, 'अयमात्मा वा न वा' इति च विक्षेपविकल्परहिता सती यदा ते बुद्धिरात्मनि स्थिरा स्थास्यति 'अयमेवात्मा' इति तदा त्वं योगमवाप्स्यसीति भावः। **योगम्** आत्मसाक्षात्कारमिति **मधुसूदनः**।

यत्तु 'समाधौ मनसि बुद्धिः स्थास्यती'ति **रामानुजः; तदसत्** ; मनोबुद्ध्योरुभयोरेकतत्त्वत्वेनाधाराधेयभावायोगात् , एकमेव ह्यन्तःकरणं सङ्कल्पविकल्परूपं मन इति, निश्चयरूपं बुद्धिरिति चोच्यते। विप्रतिपन्नेत्यस्य विशेषतः प्रतिपन्नेत्यर्थोऽपि तदुक्तोऽयुक्तः; विप्रतिपत्तिशब्दस्य विरुद्धप्रतिपत्त्यर्थकत्वेन विप्रतिपन्नशब्दस्यापि तादृशार्थबोध[कत्व]स्यैवौचित्यात् , अप्रसिद्धार्थकल्पनस्यान्याय्यत्वात् ॥५३॥

'स्थितप्रज्ञस्ये'ति श्लोकमवतारयति— **प्रश्नबीजमिति**। 'समाधौ बुद्धिरचला स्थास्यति', 'योगमवाप्स्यसी'ति वाक्यश्रवणात् प्रष्टुमवकाशो जात इत्यर्थः। तदेवाह— **लब्धसमाधिप्रज्ञस्येति**। लब्धे **समाधिप्रज्ञे** निर्विकल्पसमाधिविवेकौ येन तस्य। **बोद्धुं** ज्ञातुमिच्छा बुभुत्सा। **प्रतिष्ठितेति**। दृढेत्यर्थः। प्रज्ञाया आकारमाह— **अहमिति**। 'अहं परं ब्रह्मास्मी'त्यन्वयः। **प्रज्ञा** बुद्धिवृत्तिरूपं ज्ञानम्। **समाधौ**

१. 'ज्ञाननिष्ठातत्प्राप्ति' इति पा.। २. लब्धा समाधिप्रज्ञा येनेति विग्रहः। समाधौ आत्मनि प्रज्ञा, समाधानेन प्रज्ञा वा समाधिप्रज्ञा। उभयथा परमार्थदर्शनं तदर्थः।
३. निर्विकल्पसमाधेः ब्रह्मात्मसाक्षात्कारस्य च एकविषयकत्वेऽपि प्रमाणजन्यत्वेन ब्रह्मात्मसाक्षात्कारस्याविद्यानिवर्तकत्वं विशेषः ब्रह्मानन्दीयादौ निरूपितः।

**श्रीभगवानुवाच—**

**परैर्भाष्यते?** समाधिस्थस्य **समाधौ स्थितस्य, हे केशव !** स्थितधीः **स्थितप्रज्ञः स्वयं वा किं प्रभाषेत? किमासीत? व्रजेत किम्?** [१]**भाषणम् आसनं व्रजनं वा तस्य कथमित्यर्थः। स्थितप्रज्ञस्य लक्षणमनेन श्लोकेन पृच्छ्यते॥५४॥**

**यो ह्यादित एव संन्यस्य कर्माणि ज्ञानयोगनिष्ठायां प्रवृत्तः, यश्च कर्मयोगेन, तयोः** [२]**प्रजहातीत्यारभ्य** [३]**आ अध्यायपरिसमाप्तेः** [४]**स्थितप्रज्ञलक्षणं साधनं चोपदिश्यते। सर्वत्रैव ह्यध्यात्मशास्त्रे कृतार्थलक्षणानि यानि तान्येव साधनान्युपदिश्यन्ते यत्नसाध्यत्वात्। यानि यत्नसाध्यानि साधनानि, लक्षणानि च भवन्ति, तानि श्रीभगवानुवाच—**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ननु कथमेकेनैव वाक्येनार्थद्वयमुपदेष्टुं शक्यत इत्याशङ्क्याह— **सर्वत्रैवाध्यात्मिकशास्त्र इति।** प्रारब्धकर्मशेषनिबन्धनभोग्यस्य विद्ययाऽपि वारयितुमशक्यत्वात् , विदुषश्च विधिप्रतिषेधचोदनाकिङ्करत्वाभावात् , यद्यपि तल्लक्षणं वक्तुं न

आनन्दगिरिकृतव्याख्या

कथमिति। **ज्ञाननिष्ठस्य लक्षणविवक्षया प्रश्नमवतार्य, तन्निष्ठासाधनबुभुत्सया विशिनष्टि—** समाधिस्थस्येति। **तस्यैवार्थक्रियां पृच्छति—** स्थितधीरिति। [५]**(प्रश्नाक्षराणि व्याख्याय वाक्यार्थमाह—**स्थितप्रज्ञस्येति)॥५४॥

**प्रतिवचनमवतारयितुं पातनिकां करोति—** यो हीति। हिशब्देन **कर्मसंन्यासकारणीभूतविरागतासम्पत्तिः सूच्यते।** आदितो **ब्रह्मचर्यावस्थायामिति यावत्। ज्ञानमेव योगो** [६]**ब्रह्मभावप्रापकत्वात् , तस्मिन् निष्ठा परिसमाप्तिः, तस्यामित्यर्थः। कर्मैव योगस्तेन, कर्माण्यसंन्यस्य** [७]**तन्निष्ठायामेव प्रवृत्त इति शेषः। ननु तत् कथमेकेन वाक्येनार्थद्वयमुपदिश्यते, द्वैयर्थ्ये वाक्यभेदात् । न च लक्षणमेव साधनम् , कृतार्थलक्षणस्य तत्स्वरूपत्वेन फलत्वे साधनत्वानुपपत्तेरिति, तत्राह—** सर्वत्रैवेति। **यद्यपि कृतार्थस्य ज्ञानिनो** [८]**लक्षणं तद्रूपेण फलत्वान्न साधनत्वमधिगच्छति , तथापि जिज्ञासोस्तदेव प्रयत्नसाध्यतया साधनं सम्पद्यते। लक्षणं चात्र ज्ञानसामर्थ्यलब्धमनूद्यते, न विधीयते, विदुषो विधिनिषेधागोचरत्वात्। तेन जिज्ञासोः साधनानुष्ठानाय लक्षणानुवादाद्** [९]**एकस्मिन्नेव साधनानुष्ठाने तात्पर्यमित्यर्थः। उक्तेऽर्थे भगवद्वाक्यमुत्थापयति—** यानीति। लक्षणानि च **ज्ञानसामर्थ्यलभ्यान्ययत्नसाध्यानीति शेषः। स्थितप्रज्ञस्य का भाषेति**

भाष्यार्कप्रकाशः

आत्मनि निर्विकल्पसमाधाविति वा। किं प्रभाषेतेत्यनेन पौनरुक्त्यादाह— **परैर्भाष्यत इति।** 'स्थितप्रज्ञोऽयम्' इत्यन्यैः कथमुच्यत इत्यर्थः। किं प्रभाषेतेत्यादौ किंशब्दानां कथमित्यर्थो ज्ञेयः - कथं प्रभाषेत? कथमासीत? कथं व्रजेत? इति। ननु स्थितप्रज्ञस्य भाषणादिकमसम्भवि, ब्रह्मात्मनिष्ठत्वादिति किमर्जुनप्रश्नाशयः? इत्यत आह— **स्थितप्रज्ञस्येति।** भाषणादिकं किंरूपमिति तल्लक्षणं पृच्छ्यत इत्यर्थः। अर्जुनेनेति शेषः। कोऽसौ स्थितप्रज्ञः? अत आह—**यो हीति।** हिः प्रसिद्धौ, त्वर्थे वा। **आदितो** ब्रह्मचर्यादेव कर्माणि संन्यस्य **[ज्ञानयोग]निष्ठायाम्** आत्मदर्शननिष्ठायां [प्रवृत्तः], यश्च कर्मयोगेन क्रमाज्ज्ञाननिष्ठायां प्रवृत्तः' इत्यन्वयः। **तयोः** स्थितप्रज्ञशब्दवाच्ययोर्द्वयोरपि लक्षणं पृच्छ्यत इत्यर्थः।

स्थितप्रज्ञस्येत्येकवचननिर्देशेन ज्ञाननिष्ठाप्राप्त्यनन्तरमुभयोर्भेदाभावः सूचितः। संन्यासद्वारा कर्मयोगद्वारा वा निर्विकल्पकसमाधिं लब्ध्वा यः 'अहं ब्रह्मास्मि' इति दृढां प्रज्ञां प्राप, स स्थितप्रज्ञ इति परमार्थः। कीदृशं पुरुषं लोकाः स्थितप्रज्ञं मन्यन्ते? कीदृशश्च स्वयं स्थितप्रज्ञमात्मानं मन्यते? स्थितप्रज्ञस्य मनोव्यापारः कीदृशः? कायव्यापारश्च कीदृशः? वाग्व्यापारश्च कीदृशः? इति

---

१. 'आसनम् , व्रजनं वा' इति पा.। २. 'तयोः' इत्यन्तं भाष्यं भाष्यार्कप्रकाशव्याख्यानुसारेण पूर्वश्लोकशेषः, 'प्रजहातीत्यारभ्य' इत्यत उत्तरश्लोकस्यावतारिका । ३. 'अध्यायपरिसमाप्तिपर्यन्तम्' इति पा.। ४. 'स्थितप्रज्ञस्य लक्षणं' इति रा.पा.। ५. कुण्डलितः पाठो बहुत्र नोपलभ्यते। ६. ब्रह्मभावेन युज्यतेऽनेनेति व्युत्पत्त्या ज्ञानं योग इत्यर्थः। 'ब्रह्मात्मभावप्रापकत्वात्' इति पा.। ७. ज्ञानयोगनिष्ठायामित्यर्थः। ८. 'ज्ञानलक्षणं तद्रूपेण' इति पा.। ९. साधनानुष्ठाने एकस्मिन्नेव तात्पर्यम् , अतो न वाक्यभेदः इत्यर्थः।

**प्रजहाति यदा कामान् सर्वान् पार्थ ! मनोगतान्।**
**आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते॥५५॥**

प्रजहातीति। प्रजहाति **प्रकर्षेण जहाति परित्यजति** यदा **यस्मिन् काले** सर्वान् **समस्तान्** कामान् **इच्छाभेदान्, हे पार्थ** मनोगतान् **मनसि प्रविष्टान् हृदि प्रविष्टान्। सर्वकामपरित्यागे तुष्टिकारणाभावात् शरीरधारणनिमित्तशेषे**[१] **च सति उन्मत्तप्रमत्तस्येव प्रवृत्तिः प्राप्तेत्यत उच्यते—** आत्मन्येव **प्रत्यगात्मस्वरूप एव** आत्मना **स्वेनैव** [२]**बाह्यलाभनिरपेक्षः**

आनन्दगिरिकृतव्याख्या

**प्रथमप्रश्नस्योत्तरमाह—** प्रजहातीति। **कामत्यागस्य प्रकर्षो वासनाराहित्यम्। कामानामात्मनिष्ठत्वं** कैश्चिदिष्यते। **तदयुक्तम् , तेषां मनोनिष्ठत्वश्रुतेरित्याशयवानाह—** मनोगतानिति। **आत्मन्येवात्मनेत्याद्युत्तरभागनिरस्यं चोद्यमनुवदति—** सर्वकामेति। **तर्हि प्रवर्तका-भावाद् विदुषः सर्वप्रवृत्तेरुपशान्तिरिति? नेत्याह—** शरीरेति। **उन्मादवान्** उन्मत्तो **विवेकविरहितबुद्धिभ्रमभागी। प्रकर्षेण मदमनुभवन् विद्यमानमपि विवेकं निरस्यन् भ्रान्तवद् व्यवहरन्** प्रमत्त **इति विभागः। उत्तरार्धमवतार्य व्याकरोति—** उच्यत इति। **आत्मन्येवे-त्येवकारस्य आत्मनेत्यत्रापि सम्बन्धं द्योतयति—** स्वेनैवेति। **बाह्यलाभनिरपेक्षत्वेन तुष्टिमेव स्पष्टयति—** परमार्थेति। **स्थितप्रज्ञपदं**

भाष्यार्कप्रकाशः

स्थितप्रज्ञलक्षणं पप्रच्छार्जुन इति पर्यवसन्नार्थः।

अत्र स्थितप्रज्ञस्य को वाचकः शब्दः? इति 'का भाषे'त्यस्यार्थमाह **रामानुजः, तन्मन्दम्** ; स्थितप्रज्ञशब्दस्यैव तद्वाचकत्वेन वाचकान्तरप्रश्नानर्थक्यात्॥५४॥

'प्रजहाती'ति श्लोकमवतारयति— **प्रजहातीति**। आ अध्यायपरिसमाप्तेरिति छेदः। समासे त्वाध्यायपरिसमाप्तीति स्यात्। यावदध्यायपरिसमाप्तीत्यर्थः। **साधनं चेति**। ननु लक्षणस्यैव पृष्टत्वात् किमिति साधनोपदेशः? इत्यत आह— **सर्वत्रेति**। **अध्यात्मशास्त्रे** वेदान्तशास्त्रे। **कृतार्थः** स्थितप्रज्ञः, तस्यैव कृतकृत्यत्वात्। कृतकृत्यस्य यानि लक्षणानि, तान्येव कृतकृत्यत्वस्य साधनानीति **उपदिश्यन्ते** उच्यन्ते। तत्र हेतुमाह— **यत्नसाध्यत्वादिति**। कृतार्थे पुरुषे वर्तमानानि यानि कृतार्थत्वसूचकानि चिह्नानि कामपरित्यागात्मतुष्टिसुखस्वभावादीनि, तान्येव कृतार्थत्वसाधकानि, मनःसंयमरूपयत्नसाध्यत्वात् तेषामित्यर्थः।

ननु साधनलक्षणयोरेकत्वमयुक्तम् , साधनसाध्यत्वाल्लक्षणानामिति चेत्? सत्यमन्यत्र तथैव। इह तु साधनलक्षणयोरैक्यमेव, कामप्रहाणादिभिः साधनैः कृतार्थत्वसिद्धेः। कृतार्थे पुंसि कामप्रहाणादीनां लक्षणत्वाच्च। लक्षयन्तीति लक्षणानि, साधयन्तीति साधनानीति निरुक्तेः। यान्येव कृतार्थत्वं लक्षयन्ति तान्येव तत् साधयन्ति। कथमन्यथा कृतार्थत्वासाधकानां कृतार्थत्वलक्षकत्वं स्यात्? साधनेन हि साध्यं लक्ष्यते, धूमेन वह्निवत्। साध्यं चात्र कृतार्थत्वम्। तल्लक्षकत्वं चास्ति तत्साधनस्य। तस्मात् साधनत्वलक्षकत्वयोरैक्यात् साधनलक्षणयोरैक्यमिति भावः।

यानि लक्षणानि तानि साधनानीत्येतदेव द्रढयितुमाह— **यानि साधनानि तान्येव लक्षणानीति**[३]।

हे पार्थ! यदा पुरुष इति शेषः। मनोगतान् सर्वान् कामान् प्रजहाति, आत्मन्येवात्मना तुष्टश्च भवति, तदा स्थितप्रज्ञ इत्युच्यते। **सर्वकामेति**। सति पुत्रादिविषयकामे तत्सिद्ध्या पुंसस्तुष्टिः स्यात् , सुतरां कामाभावे तु तुष्टिरेव न स्यात् , तुष्टिकारणस्य कामितार्थलाभरूपस्याभावादित्यर्थः। किञ्च सर्वकामपरित्यागाद् भोजनकामस्यापि परित्यागः प्राप्तः, सति च तस्मिन् भोजनकामत्यागे भोजनाभावाद् विदुष आकस्मिकं बलात्कारमरणं स्यात् ; तच्चायुक्तम् , दोषावहत्वात्। अथैतद्भयाच्छरीरधारणनिमित्तभोजनादि-कामविशेषोऽस्त्वित्यत आह—**शरीरेति**। उन्मादं प्राप्त **उन्मत्तः**, मदिरापानादिना मत्तः **प्रमत्तः**। उन्मत्तवत् प्रमत्तवच्चेत्यर्थः। **प्रवृत्तिरिति** भोजनादिमात्रे इति भावः। यथा उन्मत्तः कमपि पुरुषार्थं न वाञ्छति, न तस्मै यतते; परन्तु क्षुत्तृड्भ्यामर्दितः तदपनोदाय

१. 'शरीरधारणनिमित्तविशेषे' इति रा.पा.। २. 'अन्यलाभनिरपेक्षः' इति रा.पा.। ३. 'यानि साधनानि तान्येव लक्षणानि' श्रीभगवानुवाच इति भाष्ये रा.पा.भाति।

तुष्टः **परमार्थदर्शनामृतरसलाभेन अन्यस्मादलम्प्रत्ययवान्** स्थितप्रज्ञः **स्थिता प्रतिष्ठिता आत्मानात्मविवेकजा प्रज्ञा यस्य स स्थितप्रज्ञो विद्वांस्तदोच्यते। त्यक्तपुत्रवित्तलोकैषणः संन्यासी आत्माराम आत्मक्रीडः स्थितप्रज्ञ इत्यर्थः**[1] **॥५५॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

शक्यते, तथापि साधकस्यानुष्ठानायैतल्लक्षणमुच्यते। ततः साधनानुष्ठान एवैकस्मिन्नर्थे तात्पर्यमित्यर्थः। अर्थात् तल्लक्षणं भवतीत्यर्थः॥५५॥

आनन्दगिरिकृतव्याख्या

**विभजते—** स्थितेति। **प्रज्ञाप्रतिबन्धकसर्वकामविगमावस्था** तदेति **निर्दिश्यते। उक्तमेव प्रपञ्चयति—** त्यक्तेति। **आत्मानं जिज्ञासमानो वैराग्यद्वारा सर्वैषणात्यागात्मकं संन्यासमासाद्य, श्रवणाद्यावृत्त्या तज्ज्ञानं प्राप्य, तस्मिन्नेवासक्त्या विषयवैमुख्येन तत्फलभूतां परितुष्टिं तत्रैव प्रतिलभमानः स्थितप्रज्ञव्यपदेशभागित्यर्थः॥५५॥**

भाष्यार्कप्रकाशः

यत्किमपि निन्दितमन्नं जलं च भुङ्क्ते, तद्वद् विद्वानपि प्रवर्तेतेति भावः। इति शङ्कायामाह— **आत्मन्येवेति।** स्वेनैवेत्यस्यार्थमाह— **अन्यलाभनिरपेक्ष इति।** 'आत्मन्येवात्मना तुष्टः' इत्यस्य फलितार्थमाह— **परमार्थेति।** यथा लब्धामृतस्यान्नादावलम्बुद्धिः, तद्वद् आत्मस्वरूपानन्दानुभवशालिनस्तदितरत्र सर्वत्राप्यलम्बुद्धिरेवेत्यर्थः। एतेन - नामुष्य विदुषः शरीरधारणस्पृहा, यदर्थमुन्मत्तवद् भोजनादिकर्मणि प्रवर्तेत। नापि क्षुत्तृड्बाधा, आत्मानन्दानुभवव्यग्रत्वात् , नापि शरीरपातः, यावत्प्रारब्धं तस्यापातात् - इति सिद्धम्। श्लोकस्य निष्कृष्टार्थमाह— **त्यक्तेति। एषणा** अभिलाषः। त्यक्ताः पुत्रे वित्ते लोकेषु स्वर्गादिषु च एषणा येन सः **त्यक्तपुत्रवित्तलोकैषणः।** पुत्रशब्दः दारपश्वाद्युपलक्षणः। **संन्यासी** कृतसर्वकर्मसंन्यासः। **आत्मारामः** आत्मैवारामो विहारस्थानं यस्य सः। आत्मन्येव रतिः प्रीतिर्यस्य स **आत्मरतिः**। एवंविधः पुरुषः स्थितप्रज्ञ इत्युच्यते।

**ननु** 'प्रजहाति यदा कामानि'त्यादिना त्यक्तपुत्रवित्तलोकैषणः इति, 'आत्मन्येवात्मना तुष्टः' इत्यनेनात्माराम आत्मरतिरिति च सिध्यति ; संन्यासीति तु न कुतोऽपीति कथं निर्मूलस्य तस्य वचनं भाष्ये इति **चेन्मैवम्** ; सर्वकर्मसंन्यासपूर्वकत्वादात्मनिष्ठायाः। न हि कर्मसु व्यग्रस्यात्मरतिः स्यात्। तस्मादर्थसिद्धार्थकथनं संन्यासिनः इति, न निर्मूलत्वं तस्य। न च वासुदेवजनकवसिष्ठादीनाम् असंन्यासिनामेतावन्मात्रेणास्थितप्रज्ञत्वं चोदनीयम् ; लोकातिगत्वात् तच्चरितस्य। न हि वासुदेवादिभिरनुष्ठितानि कर्माणि कर्माणि, येन तत्संन्यासः संन्यासः स्यात्। उक्तं हीदं **शङ्कराचार्यैरेव** ग्रन्थारम्भे[2]। यद्यधुनातना अपि वासुदेवादिदृष्टान्तेन संन्यासं न स्वीकुर्युः, तर्हि किमिति ते शङ्कराचार्यादिदृष्टान्तेन गृहस्थाश्रमं न परित्यजेयुः? न च कोऽयं तव संन्यासे पक्षपात इति वाच्यम्। कोऽयं तव संन्यासे प्रद्वेषहेतुः गृहस्थाश्रमविषयकरागादृते? सति चास्मिन् रागे तव नात्मरतिः स्यात्। अतस्तद्रागभ्रंशनाय संन्यासः स्वीकार्यो गृहस्थाश्रमस्थैर्मुमुक्षुभिः स्थितप्रज्ञत्वलाभार्थम्। न च संन्यासोऽपि भिक्षावन्दनादिरागपूर्वक एवेति वाच्यम् ; 'यदहरेव विरजेत्तदहरेव प्रव्रजेद्' इति श्रुत्यैव संन्यासस्य वैराग्यपूर्वकत्वस्योक्तत्वात्। यदि मोक्षकामः सकामः स्यात् , तर्हि संन्यासरागी रागी स्यात्।

**ननु** जन्मान्तरानुष्ठितसंन्यासादिसुकृतवशाद् यः कश्चिद् ब्रह्मचर्यात्प्राग् , ब्रह्मचर्ये वा, गार्हस्थ्ये वा स्थितप्रज्ञो भवति जडभरतादिवत् , तत्र संन्यासस्य व्यभिचार इति **चेन्मैवम्** ; तस्य जनकादिवल्लोकातिगचरितेष्वेव गणनीयत्वात्। **अथवा** इह जन्मनि संन्यासवज्जन्मान्तरीयसंन्यासस्यापि स्थितप्रज्ञत्वहेतुत्वाज्जनकभरतादीनां जन्मान्तरीयसंन्यासित्वात् स्थितप्रज्ञत्वमिति बोध्यम्॥५५॥

---

१. अनेन स्थितप्रज्ञो जीवन्मुक्त इति स्पष्टम्। 'अनारब्धकार्ये एव तु पूर्वे तदवधेः'(ब्र.सू. ४.१.१५) इत्यधिकरणे भाष्यकारैः जीवन्मुक्तिसाधकत्वेनायं स्थितप्रज्ञलक्षणनिर्देशः आदृतः। इयं जीवन्मुक्तिः आत्मतत्त्वसाक्षात्कारफलभूतेहोपन्यस्यत इति बोध्यम्। २. 'तस्य कर्मणि कर्मप्रयोजने च निवृत्तेऽपि लोकसंग्रहार्थं पूर्वं यथा प्रवृत्तस्तथैव कर्मणि प्रवृत्तस्य यत् प्रवृत्तिरूपं दृश्यते, न तत् कर्म, येन बुद्धेः समुच्चयः स्यात्। यथा भगवतो वासुदेवस्य क्षत्रधर्मचेष्टितं न ज्ञानेन समुच्चीयते पुरुषार्थसिद्धये, तद्वत् तत्फलाभिसन्ध्यहङ्काराभावस्य तुल्यत्वाद् विदुषः।' (द्र. पृ. ४०) इति भाष्यमिहानुसंधेयम्।

**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।**
**वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥५६॥**

**किञ्च—** दुःखेष्विति। दुःखेषु **आध्यात्मिकादिषु प्राप्तेषु** [१]नोद्विग्नं **न प्रक्षुभितं दुःखप्राप्तौ मनो यस्य सोऽयम्** अनुद्विग्नमनाः। **तथा** सुखेषु **प्राप्तेषु विगता स्पृहा तृष्णा यस्य, नाग्निरिवेन्धनाद्याधाने** [२]**सुखान्यनु विवर्धते, स** विगतस्पृहः। वीतरागभयक्रोधः **रागश्च भयं च क्रोधश्च** वीता **विगता यस्मात् स वीतरागभयक्रोधः,** स्थितधीः **स्थितप्रज्ञो** मुनिः **संन्यासी तदोच्यते॥५६॥**

आनन्दगिरिकृतव्याख्या

**लक्षणभेदानुवादद्वारा विविदिषोरेव कर्तव्यान्तरमुपदिशति—** किञ्चेति। **ज्वरशिरोरोगादिकृतानि दुःखान्याध्यात्मिकानि। आदिशब्देनाधिभौतिकानि व्याघ्रसर्पादिप्रयुक्तानि, आधिदैविकानि चातिवातवर्षादिनिमित्तानि दुःखानि गृह्यन्ते। तेषूपलब्धेष्वपि नोद्विग्नं मनो यस्य स तथेति सम्बन्धः। नोद्विग्नमित्येतद् व्याचष्टे—** न प्रक्षुभितमिति। **दुःखानामुक्तानां प्राप्तौ परिहाराक्षमस्य तदनुभवपरिभावितं दुःखम्** उद्वेगः, **तेन सहितं मनो यस्य न भवति स तथेत्याह—** दुःखप्राप्ताविति। **मनो यस्य नोद्विग्नमिति पूर्वेण सम्बन्धः। सुखान्यपि दुःखवत् त्रिविधानीति मत्वा** तथेत्युक्तम्। **तेषु प्राप्तेषु सत्सु तेभ्यो विगता स्पृहा तृष्णा यस्य स विगतस्पृह इति योजना। अज्ञस्य हि प्राप्तानि सुखान्यनु विवर्धते तृष्णा, विदुषस्तु नैवमित्यत्र वैधर्म्यदृष्टान्तमाह—** नाग्निरिवेति। **यथा हि दाह्यस्येन्धनादेरभ्याधाने वह्निर्विवर्धते, तथा अज्ञस्य सुखानि उपनतानि अनु विवर्धमानाऽपि तृष्णा विदुषो न तान्यनु विवर्धते। न हि वह्निरदाह्यम्** [३]**उपनतमपि दग्धुं विवृद्धिमधिगच्छति। तेन जिज्ञासुना सुखदुःखयोस्तृष्णोद्वेगौ न कर्तव्यावित्यर्थः। रागादयश्च तेन कर्तव्या न भवन्तीत्याह—** वीतेति। [४]**अनुभूताभिनिवेशो विषयेषु रञ्जनात्मकस्तृष्णाभेदो** रागः। **परेणापकृतस्य गात्रनेत्रादिविकारकारणं** भयम्। क्रोधस्तु **परवशीकृत्यात्मानं स्वपरापकारप्रवृत्तिहेतुर्बुद्धिवृत्तिविशेषः। मनुते इति** मुनिः **आत्मविद्**[५] **इत्यङ्गीकृत्याह—** संन्यासीति। **सुखादिविषयतृष्णादेः रागादेश्चाभावावस्था** तदेत्युच्यते॥५६॥

भाष्यार्कप्रकाशः

**दुःखेष्विति।** 'एवंविधो मुनिः स्थितधीरित्युच्यते' इत्यन्वयः। **आध्यात्मिकादिष्वि**त्यादिपदादाधिदैविकाधिभौतिकयोर्ग्रहणम्। तापानां दुःखहेतुत्वाद् **दुःखेष्वि**त्यौपचारिकप्रयोगः। तत्राध्यात्मिका ज्वरादिजन्याः, आधिभौतिका व्याघ्रसर्पादिजन्याः, आधिदैविकाः शीतवातातपादिजन्यास्तापा इति विवेकः। **दुःखप्राप्ताविति।** आध्यात्मिकादितापप्रयुक्तदुःखप्राप्तावित्यर्थः। न च दुःखेष्वित्यस्य तापार्थमुक्त्वा दुःखप्राप्ताविति पुनःपदान्तरकल्पना दुष्टेति वाच्यम् ; दुःखेष्विति बहुवचनान्न तस्य साक्षाद्दुःखार्थवचनं युक्तम्। अतो दुःखहेतुषु तापेष्वित्युक्तिर्युक्तेति। **प्राप्तेष्विति।** ननु प्राप्येषु सुखेषु भवतीच्छा पुंसः, न तु प्राप्तेषु, इच्छायाः फलावसानत्वादित्यत आह— **नाग्निरिवेति। इन्धनाद्याधाने** काष्ठाज्यादिनिधाने यथाऽग्निर्वर्धते, तथा सुखप्राप्तौ यस्य सुखानि नानुविवर्धन्ते, स सुखेषु विगतस्पृहः। अयमाशयः— अन्नप्राप्तौ यथा अन्नेच्छा निवर्तते पुंसस्तथा धनप्राप्तौ धनेच्छा निवर्तमाना न दृष्टा। एवं सुखप्राप्तावपि सुखेच्छा न निवर्तते, पुनरपि 'इतोऽधिकं मे सुखं स्या'दिति सुखेच्छा वर्धत एव। यथा काष्ठाज्यादिप्राप्तावपि नाग्नेः काष्ठाद्याशा निवर्तते, 'नाग्निस्तृप्यति काष्ठानाम्' इति न्यायात् किन्तु सा वर्धत एव। यदग्नेः[यद्यग्नेः] काष्ठादिभ्यस्तृप्तिस्तर्हि तत्र निक्षिप्तं काष्ठादिकं सोऽग्निः पुनर्न दहेदेव। नैवं लोके दृश्यते, परं त्वतीव प्रवृद्धजिह्वःसन् काष्ठादिकं प्रार्थयत्येव। तस्मान्न सुखप्राप्त्या सुखेच्छाया निवृत्तिरिति युक्तमुक्तं सुखेषु प्राप्तेष्विति। **तदेति।** पूर्वश्लोकाद् यदातदाशब्दयोरिहानुवृत्तिः। 'यदा मुनिरेवंविधो भवति, तदा स्थितप्रज्ञ इत्युच्यते' इत्यन्वयः। **यद्वा** पुरुष इति शेषः। यदा पुरुष एवंविधो मुनिर्भवति, तदा स्थितप्रज्ञ इत्युच्यत इति। न चात्र मुनिशब्दस्य संन्यासस्य

१. 'अनुद्विग्नम्' इति पा.। २. 'सुखान्यनुविवर्धन्ते' इति रा.पा.। ३. 'उपगतमपि' इति पा.। ४. अनेनार्थविवरणेन विगतस्पृहः वीतराग इत्यनयोरपौनरुक्त्यमुक्तम्।
५. आत्मविदः अर्थसिद्धः संन्यास इति संन्यासीति फलितार्थवर्णनमिति भावः।

**यः सर्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम्।**
**नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता॥५७॥**
**यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।**
**इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥५८॥**

**किञ्च —** यः सर्वत्रेति। यो **मुनिः** सर्वत्र **देहजीवितादिष्वपि** अनभिस्नेहः **अभिस्नेहवर्जितः,** तत्तत्प्राप्य शुभाशुभं **तत्तच्छुभमशुभं वा लब्ध्वा** नाभिनन्दति न द्वेष्टि **शुभं प्राप्य न तुष्यति - न हृष्यति, अशुभं च प्राप्य न द्वेष्टीत्यर्थः।** तस्य **एवं हर्षविषादवर्जितस्य विवेकजा प्रज्ञा प्रतिष्ठिता भवति॥५७॥**

**किञ्च —** यदा संहरत इति। **यदा** संहरते **सम्यगुपसंहरते च** अयं **ज्ञाननिष्ठायां प्रवृत्तो यतिः,** कूर्मोऽङ्गानीव **यथा कूर्मो भयात् स्वान्यङ्गानि उपसंहरति** सर्वशः **सर्वतः, एवं ज्ञाननिष्ठः इन्द्रियाणि** इन्द्रियार्थेभ्यः **सर्वविषयेभ्य उपसंहरते। तस्य प्रज्ञा प्रतिष्ठितेत्युक्तार्थं वाक्यम्॥५८॥**

आनन्दगिरिकृतव्याख्या

**लक्षणभेदानुवादद्वारा विविदिषोरेव कर्तव्यान्तरमुपदिशति—** किञ्चेति। **विवेकवतो [1]विविदिषोः विवेकजन्या प्रज्ञा कथं प्रतिष्ठां प्रतिपद्यतामित्याशङ्क्याह—** यः सर्वत्रेति। **ननु [2]देहजीवितादौ स्पृहा, शुभाशुभप्राप्तौ हर्षविषादौ विदुषो विविदिषोश्चावर्जनीयाविति प्रज्ञास्थैर्यासिद्धिः, तत्राह—** यो मुनिरिति। तत्तदिति **शोभनवत्त्वेनाशोभनवत्त्वेन वा प्रसिद्धत्वं प्रतिनिर्दिश्यते। तदेव विभजते—** शुभमिति। **विषयेष्वभिषङ्गाभावः, शुभादिप्राप्तौ हर्षाद्यभावश्च प्रज्ञास्थैर्ये कारणमित्याह—** तस्येति॥५७॥

**जिज्ञासोरेव कर्तव्यान्तरं सूचयति—** किञ्चेति। **इन्द्रियाणां विषयेभ्यो वैमुख्यस्य प्रज्ञास्थैर्ये कारणत्वादादौ जिज्ञासुना तदनुष्ठेयमित्याह—** यदेति। **मुमुक्षुणा मोक्षहेतुं प्रज्ञां प्रार्थयमानेन सर्वेभ्यो विषयेभ्यः सर्वाणीन्द्रियाणि विमुखानि कर्तव्यानीति श्लोकव्याख्यानेन कथयति—** यदेत्यादिना। उपसंहारः **स्ववशत्वापादनम् , तस्य च** सम्यक्त्व**मतिदृढत्वम्।** अयमिति **प्रकृतस्थितप्रज्ञ-ग्रहणं व्यावर्तयति—** ज्ञाननिष्ठायामिति। **इन्द्रियोपसंहारस्य प्रलयरूपत्वं व्यावर्त्य सङ्कोचात्मकत्वं दृष्टान्तेन[3] दर्शयति—** कूर्म इति। **दृष्टान्तं व्याकरोति—** यथेति। **दार्ष्टान्तिके योजयन् [4]ज्ञाननिष्ठपदं तत्र प्रवर्तयति—** एवमिति। **इन्द्रियाणां विषयेभ्यो वैमुख्यकरणं प्रज्ञास्थैर्यहेतुरित्युक्तमुपसंहरति—** तस्येति॥५८॥

भाष्यार्कप्रकाशः

[संन्यास्य]र्थबोधकत्वे विवदितव्यम् ; मुनिर्मननशीलः; सर्वकर्मसंन्यासिनस्तु इतरव्यापाराभावादात्ममननशीलतोपपद्यते, न गृहिण इति। न च कथमसंन्यासिनां वसिष्ठादीनां मुनित्वमिति वाच्यम् ; गृहिणोऽपि ते त्यक्तसर्वकर्माणो वनमाश्रित्य निरन्तरमात्ममननं कुर्वन्त्येवेति मुनयस्ते संन्यासिन एवेति॥५६॥

**य इति।** 'यः सर्वत्रानभिस्नेहःसन् तत्तच्छुभाशुभं प्राप्य नाभिनन्दति, न द्वेष्टि, तस्य प्रज्ञा प्रतिष्ठिता' इत्यन्वयः। **तस्य प्रज्ञा प्रतिष्ठितेत्यस्य स स्थितप्रज्ञः इत्यर्थः॥५७॥**

**यदेति।** यदाऽयं कूर्मोऽङ्गानीव सर्वश इन्द्रियार्थेभ्यः इन्द्रियाणि संहरते च तदा तस्य प्रज्ञा प्रतिष्ठिता - इत्यन्वयः। इन्द्रियार्थेभ्य इति पञ्चमी। **उपसंहरते** प्रतिनिवर्तयति , इन्द्रियाणां विषयप्रावीण्यं [विषयप्रावण्यं ]वारयतीत्यर्थः॥५८॥

---

१. 'विदुषो' इति पा.। २. 'देहजीवनादौ' इति पा.। ३. यथा कूर्मो भयात् स्वाङ्गानि उपसंहरति, तथा इति दृष्टान्ते संकोचयतीत्यर्थप्रतीतेः दार्ष्टान्तिकेऽपि संकोचस्यैव विवक्षेति भावः। ४. 'ज्ञाननिष्ठापदं' इति पा.।

**विषया विनिवर्तन्ते निराहारस्य देहिनः।**
**रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते॥५९॥**

**तत्र विषयान् अनाहरत आतुरस्यापीन्द्रियाणि निवर्तन्ते, कूर्माङ्गाणीव संह्रियन्ते, न तु तद्विषयो रागः, स कथं संह्रियत इति, उच्यते—** विषया इति। **यद्यपि** विषयाः **विषयोपलक्षितानि विषयशब्दवाच्यानीन्द्रियाणि** [1]**(अथवा विषया एव)** निराहारस्य **अनाह्रियमाणविषयस्य** [2]**कष्टे तपसि स्थितस्य मूर्खस्यापि विनिवर्तन्ते** देहिनो **देहवतः,** रसवर्जम् रसो **रागो विषयेषु यस्तं वर्जयित्वा। रसशब्दो रागे प्रसिद्धः। स्वरसेन प्रवृत्तः, रसिकः, रसज्ञः इत्यादिदर्शनात्। सोऽपि रसो रञ्जनारूपः सूक्ष्मो**ऽस्य **यतेः,** परं **परमार्थतत्त्वं ब्रह्म** दृष्ट्वा **उपलभ्य 'अहमेव तदि'ति**

आनन्दगिरिकृतव्याख्या

**इन्द्रियाणां विषयेभ्यो वैमुख्येऽपि तद्विषयरागानुवृत्तौ कथं प्रज्ञालाभः स्याद्? इति शङ्कते—** तत्रेति। **व्यवहारभूमिः सप्तम्यर्थः।** विषयाननाहरतः **तदुपभोगविमुखस्येत्यर्थः। रागश्चेत् नोपसंह्रियते, न तर्हि प्रज्ञालाभः सम्भवति, रागस्य तत्परिपन्थित्वादिति मत्वाऽऽह —** स कथमिति। **रागनिवृत्त्युपायमुपदिशन्नुत्तरमाह—** उच्यत इति। **विषयोपभोगपराङ्मुखस्य कुतो विषयपरावृत्तिः? तत्परावृत्तिश्चाप्रस्तुता इत्याशङ्क्याह—**यद्यपीति। **निराहारस्येत्यस्य व्याख्यानम्—** अनाह्रियमाणविषयस्येति। **यो हि विषयप्रवणो न भवति तस्य आत्यन्तिके तपसि क्लेशात्मके व्यवस्थितस्य विद्याहीनस्यापीन्द्रियाणि विषयेभ्यः सकाशाद् यद्यपि संह्रियन्ते , तथापि रागोऽवशिष्यते। स च तत्त्वज्ञानादुच्छिद्यत इत्यर्थः। रसशब्दस्य माधुर्यादिषड्विधरसविषयत्वं निषेधति—** रसशब्द इति। **वृद्धप्रयोगमन्तरेण कथं प्रसिद्धिरित्याशङ्क्याह—** स्वरसेनेति। **स्वेच्छयेति यावत्।** रसिकः **स्वेच्छावशवर्ती।** रसज्ञो **विवक्षितापेक्षितज्ञातेत्यर्थः। कथं तर्हि तस्य निवृत्तिः? तत्राह—** सोऽपीति। **दृष्टिमेवोपलब्धिपर्यायां स्पष्टयति—** अहमेवेति। **रागापगमे सिद्धमर्थमाह—** निर्बीजमिति। **ननु सम्यग्ज्ञानमन्तरेण**

भाष्यार्कप्रकाशः

**विषया इति। अनाहरतः** अगृह्णतः, इन्द्रियव्यापाराभावादिति भावः। **आतुरः** तपसा पीडितः। **संह्रियन्ते** उपसंहृतानि भवन्ति, निर्व्यापाराणि भवन्तीत्यर्थः। **इत्युच्यते** इति शङ्कायामुच्यत इत्यर्थः। निराहारस्य देहिनो विषयाः रसवर्जं विनिवर्तन्ते। विषयेभ्य इति शेषः। ननु इन्द्रियाणां विषयेभ्यो विनिवृत्तिर्भवतु नाम, कथं पुनर्विषयाणाम्? अत आह— **विषयोपलक्षितानीति।** ग्राह्यग्राहकभावरूपसम्बन्धेन हेतुना विषयशब्दो लक्षणया विषयग्राहकाणीन्द्रियाणि प्रतिपादयतीत्यर्थः। अर्थानुपपत्तेर्लक्षणाबीजस्य सत्त्वात्। **निराहारस्येति।** आहरणमाहारः, तच्चाहरणं प्रकरणाद् विषयाणामेव, निर्गत आहारो विषयाहरणं यस्मात् स निराहारः, तस्य शब्दस्पर्शादीन् विषयानगृह्णत इत्यर्थः। कथं तदग्रहणम्? अत आह— **काष्ठतपसि स्थितस्येति।** यस्मिन् तपसि पुरुषः काष्ठवद् वर्तते तत् तपः **काष्ठतपः**, तस्मिन् स्थितस्य। नेत्रश्रोत्रादिनिमीलनविधा[पिधा]नादिपूर्वकं काष्ठवन्निश्चलाङ्गस्य कथं विषयग्रहणसम्भव इति भावः। न चात्र निराहारस्य त्यक्तभोजनस्य, कृतलङ्घनस्येति यावत् इत्यर्थ इति शङ्क्यम्। आहाराभावेऽपि चक्षुस्त्वगादिभी रूपस्पर्शादिविषयग्रहणसम्भवात् न सर्वेन्द्रियप्रतिनिवृत्तिरिति। **मूर्खस्येति।** ज्ञानहीनस्य। **देहिन इति।** देहादिसंघाते अहमभिमानिनः, न त्वात्मनः, तस्य सर्वज्ञस्य मूर्खत्वासम्भवात्। **विषयेष्विति** विषयसप्तमी। **विषयाः** शब्दादयः, तेषु। तद्विषय इत्यर्थः। ननु रसशब्दस्य कट्वादिरसेषु, शृङ्गारादिरसेषु वा प्रसिद्धप्रयोगस्य कथमत्र रागवाचित्वम्? अत आह— **स्वरसेनेत्यादि। स्वरसेन** स्वेच्छया। 'अनुभवरसिको विजानाती'त्यादौ रसिकशब्दश्च रागवति प्रसिद्धः, रसज्ञशब्दश्च रक्ते प्रसिद्धः 'शृङ्गारमुख्यमधुरादिसुवर्णरेतोनिर्यासरागगरलद्रवपारदेषु। आस्वादनध्वनिसुधाम्बुरसाख्यधातुष्विष्टो रसोऽथ धरणी रसना रसा स्यादि'त्यभिधानं चास्ति। अस्य यतेः रसोऽपि परं दृष्ट्वा निवर्तते इति वाक्यं व्याख्यातुमारभते— **सोऽपीति।** रञ्जनारूपो रागात्मकः। दृष्ट्वेत्यस्यार्थमाह— **उपलभ्येति।**

१. कुण्डलितः पाठः क्वाचित्कः। २. 'काष्ठतपसि' इति रा.पा.।

**यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः।**
**इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः॥६०॥**

**वर्तमानस्य, निवर्तते। निर्बीजं विषयविज्ञानं सम्पद्यत इत्यर्थः। नासति सम्यग्दर्शने रसस्योच्छेदः। तस्मात् सम्यग्दर्शनात्मिकायाः प्रज्ञायाः स्थैर्यं कर्तव्यमित्यभिप्रायः॥५९॥**

**सम्यग्दर्शनलक्षणप्रज्ञास्थैर्यं चिकीर्षता आदाविन्द्रियाणि स्ववशे स्थापयितव्यानि, यस्मात् तदनवस्थापने दोषमाह—** यतत इति। यततः **प्रयत्नं कुर्वतोऽपि** हि **यस्मात् , कौन्तेय ! पुरुषस्य** विपश्चितो **मेधाविनोऽपीति**[1] **व्यवहितेन सम्बन्धः। इन्द्रियाणि** प्रमाथीनि **प्रमथनशीलानि विषयाभिमुखं हि पुरुषं विक्षोभयन्ति आकुलीकुर्वन्ति, आकुलीकृत्य च हरन्ति** प्रसभं **प्रसह्य, प्रकाशमेव, पश्यतो विवेकविज्ञानयुक्तं मनः** [2]**यतस्तस्मात्॥६०॥**

आनन्दगिरिकृतव्याख्या

**रागो नापगच्छति चेत् , तदपगमादृते रागवतः सम्यग्ज्ञानोदयायोगादितरेतराश्रयतेति? नेत्याह—** नासतीति। **इन्द्रियाणां विषयपारवश्ये विवेकद्वारा परिहृते स्थूलो रागो व्यावर्तते। ततश्च सम्यग्ज्ञानोत्पत्त्या सूक्ष्मस्यापि रागस्य सर्वात्मना निवृत्त्युपपत्तेः नेतरेतराश्रयतेत्यर्थः। प्रज्ञास्थैर्यस्य सफलत्वे स्थिते फलितमाह—** तस्मादिति॥५९॥

**श्लोकान्तरमवतारयति—** सम्यग्दर्शनेति। **मनसः स्ववशत्वादेव प्रज्ञास्थैर्यसम्भवे किमर्थमिन्द्रियाणां स्ववशत्वापादनमित्याशङ्क्याह—** यस्मादिति। **ननु विवेकवतो विषयदोषदर्शिनो विषयेभ्यः स्वयमेवेन्द्रियाणि व्यावर्तन्ते, किं तत्र प्रज्ञास्थैर्यं चिकीर्षता कर्तव्यमिति? तत्राह—** यततो हीति। **विषयेषु भूयो भूयो दोषदर्शनमेव** प्रयत्नः। हि**शब्दस्य यस्मादर्थस्य समाप्तौ सम्बन्धं वक्ष्यति।** अपि**शब्दस्य प्रयत्नं कुर्वतोऽपीति सम्बन्धं गृहीत्वा सम्बन्धान्तरमाह—** पुरुषस्येति। **प्रमथनशीलत्वं प्रकटयति—** विषयेति। **विक्षोभस्याकुलीकरणस्य फलमाह—** आकुलीकृत्येति। **प्रकाशमेवेत्युक्तं विशदयति—** पश्यत इति। **विपश्चितो विदुषोऽपि** प्रकाशमेव **प्रकाशशब्दितविवेकाख्यविज्ञानेन युक्तमेव मनो हरन्तीन्द्रियाणीति सम्बन्धः। हिशब्दार्थमनूद्य तस्मादिन्द्रियाणि स्ववशे स्थापयितव्यानीति पूर्वेण सम्बन्ध-**

भाष्यार्कप्रकाशः

ज्ञात्वेत्यर्थः। साक्षात्कृत्येति यावत्। ज्ञानस्याकारमाह— **अहमेव तदिति।** अहमेव ब्रह्मेत्यात्मानं साक्षात्कृत्वेत्यर्थः। फलितमाह— **निर्बीजमिति।** विषयविज्ञानस्य राग एव बीजम् , नीरागस्य विषयप्रवृत्त्यदर्शनात्। रागस्यापि निवृत्तत्वाद् विषयज्ञानं निर्बीजं जायत इत्यर्थः। मूर्खस्य तु न रसनिवृत्तिरात्मदर्शनाभावादिति कृत्वा न तस्य विषयज्ञानबीजध्वंस इति तपोनिवृत्त्यनन्तरं पुनरपि विषयविज्ञानप्रसङ्गः, बीजसत्त्वात्। अतो न काष्ठतपसा स्थितप्रज्ञत्वलाभ इति भावः। इदमेवाह— **नेति। सम्यग्दर्शने** परमार्थतत्त्वज्ञाने असति रसस्य **उच्छेदो** नाशो न च भवति। तस्मात् तपसा रसोच्छेदाभावात् सम्यग्दर्शनमेवात्मा स्वरूपं यस्यास्तस्याः **सम्यग्दर्शनात्मिकायाः** प्रज्ञायाः ज्ञानस्य **स्थैर्यं** प्रतिष्ठा कर्तव्यं यतिनेति शेषः॥५९॥

**यतत इति।** हे कौन्तेय! हि यततो विपश्चितः पुरुषस्य मनोऽपि प्रमाथीनीन्द्रियाणि प्रसभं हरन्ति। **प्रयत्नमिति।** प्रज्ञास्थैर्यलाभार्थमिति भावः। **मेधाविनो** बुद्धिमतः मनोऽपीति, किं पुनर्मूर्खस्य मनः इत्यपेरर्थः। मनःपुरुषयोस्तादात्म्याध्यासादाह— **विषयाभिमुखं पुरुषमिति।** विषयाभिमुखमनस्कं पुरुषमित्यर्थः। विषयाभिमुखं पुरुषाध्यस्तमन इति वाऽर्थः। विषयाभिमुखं पुरुषं हि यस्मादिन्द्रियाणि प्रमथ्नन्ति तत इन्द्रियाणि प्रमाथीनीत्युच्यन्त इति भावः। प्रमथ्नन्तीत्यस्यार्थमाह— **विक्षोभयन्तीति।** तस्याप्यर्थमाह— **आकुलीकुर्वन्तीति।** एवं प्रमथनशीलत्वादिन्द्रियाणि तावदाकुलीकृत्य मनो हरन्तीत्याह— **आकुलीकृत्येति।** प्रसभमित्यस्य यावदर्थमाह— **प्रकाशमेवेति। पश्यत इति।** पुरुषस्येति शेषः। कीदृशं मनो हरन्तीत्यत आह— **विवेकविज्ञानयुक्तं मन इति।** विपश्चितो

१. 'मेधाविनो मनोऽपि' इति रा. पा.। २. रा.पाठे 'यतस्तस्मात्' इति उत्तरश्लोकेऽन्वितम् ।

**तानि सर्वाणि संयम्य युक्त आसीत मत्परः।**
**वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता॥ ६१॥**
**ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते।**

तानीति। **तानि सर्वाणि संयम्य,** संयमनं **वशीकरणं कृत्वा** युक्तः **समाहितः सन्नासीत।** मत्परः **अहं वासुदेवः सर्वप्रत्यगात्मा परो यस्य स मत्परो, नान्योऽहं तस्मादित्यासीतेत्यर्थः। एवमासीनस्य यतेर्वशे हि यस्येन्द्रियाणि वर्तन्ते अभ्यासबलात्, तस्य प्रज्ञा प्रतिष्ठिता॥ ६१॥**

**अथेदानीं पराभविष्यतः सर्वानर्थमूलमिदमुच्यते—** ध्यायत इति। ध्यायतः **चिन्तयतो** विषयान् **शब्दादीन्**

आनन्दगिरिकृतव्याख्या

**मभिसन्धायाह—** यतस्तस्मादिति॥ ६०॥

**इन्द्रियाणां स्ववशत्वसम्पादनानन्तरं कर्तव्यमर्थमाह—**तानीति। **एवमासीनस्य किं स्यादिति? तदाह—**वशे हीति। **समाहितस्य विक्षेपविकलस्य कथमासनमित्यपेक्षायामाह—** मत्पर इति। **परापरभेदशङ्कामपाकृत्यासनमेव स्फोरयति—** नान्योऽहमिति। **उत्तरार्धं व्याकरोति—**एवमिति। हि**शब्दार्थं स्फुटयति—**अभ्यासेति। **परस्मादात्मनो नाहमन्योऽस्मीति प्रागुक्तानुसन्धानस्यादरेण नैरन्तर्य-दीर्घकालानुष्ठानसामर्थ्यादित्यर्थः। अथवा विषयेषु दोषदर्शनाभ्याससामर्थ्यादिन्द्रियाणि संयतानीत्यर्थः॥ ६१॥**

**समनन्तरश्लोकद्वयतात्पर्यमाह—** अथेति। **पुरुषार्थोपायोपदेशानन्तर्यम्** अथ**शब्दार्थः। तन्निष्ठत्वराहित्यावस्थां दर्शयति—** इदानीमिति। पराभविष्यतो **महान्तमनर्थं गमिष्यतो विवेकविज्ञानविहीनस्येति यावत्।** सर्वानर्थमूलं **विषयाभिध्यानम्। तस्य**

भाष्यार्कप्रकाशः

मन इत्यस्यार्थतः सिद्धं विवेकविज्ञानयुक्तमिति। 'आत्मैक एवानवद्यः, विषयास्तु दुष्टा एव' इति जानत एव पुरुषस्य मनः प्रकाशमेवेन्द्रियाणि विषयाभिमुखं कृत्वा व्याकुलीकृत्य निष्प्रज्ञं कुर्वन्तीत्यर्थः॥ ६०॥

तर्हि किं कर्तव्यम्? अत आह— **तानीति। यतस्तस्मादिति।** यस्मादेवमिन्द्रियाणि विपश्चितोऽपि मनः प्रक्षोभ्य प्रसभं हरन्ति, तस्मादित्यर्थः। सर्वाणीन्द्रियाणीति शेषः। **समाहित इति।** चित्तसमाधानशालीत्यर्थः। अहंशब्दार्थमाह— **वासुदेव इति।** किमयं वसुदेवपुत्रः? नेत्याह— **सर्वप्रत्यगात्मेति।** सर्वेषां भूतानां हृदि प्रत्यग्रूपेण स्थित आत्मा वासुदेव इत्यर्थः। **परः** प्राप्य इत्यर्थः। प्रत्यगभिन्नब्रह्मात्मानुसन्धानपर इति यावत्। तदेवाह— **नान्योऽहं तस्मादिति।** 'अहं वासुदेवाद्भिन्नो न, किन्तु वासुदेव एवाहम्' इति ज्ञानवानिति शेषः। **आसीत** वर्तेत, किञ्चिदप्यकुर्वन् तूष्णीं वर्तेतेत्यर्थः। एवमासीनस्य सतो यस्य यतेर्वशे इन्द्रियाणि वर्तन्ते, तस्य प्रज्ञा प्रतिष्ठिता। कुतो वर्तन्ते वशे इन्द्रियाणि? इत्यत आह— **अभ्यासबलादिति।** इन्द्रियाणां विषयप्रावण्यं वारयित्वा मन आत्मनि समाधाय 'ब्रह्माहमस्मि' इति यो नित्यमनुसन्धत्ते, तस्य क्रमेण भवतीन्द्रियजयः। तथा सतीन्द्रियजये स स्थितप्रज्ञ इत्युच्यत इत्यर्थः। अत्राधिकारिविशेषणानि शमदमोपरतिसमाधानान्युक्तानीति बोध्यम्।

**यत्तु** - मत्परः चेतसः शुभाश्रयभूते मयि मनोऽवस्थाप्येति **रामानुजः; तन्मन्दम्** ; स्थितप्रज्ञस्य सांख्यस्य योगिवद् ध्यानधारणासम्भवात् ; न हि सच्चिदानन्दब्रह्मात्मतत्त्ववित् स्थितप्रज्ञः कञ्चिदाकारमात्मनि प्रकल्प्य ध्यायति, कल्पितस्य मिथ्यात्वात् कल्पनस्य क्लेशावहत्वात् , चिरकालावस्थानाभावेन कल्पितस्य क्षणिकत्वात् ततो दुःखहेतुत्वाच्च; नाप्यात्मनोऽन्यं परमात्मानं मनुते, तन्मननस्य भयहेतुत्वात्। 'द्वितीयाद्वै भयं भवति' इति श्रुतेः, तत्त्वमस्यादिश्रुतिभिर्ब्रह्मात्मैक्यप्रतिपादनात् , समाहिते मनसि सच्चिदानन्दलक्षणात्मस्वरूपाद्भिन्नस्य परमात्मस्वरूपस्य स्फुरणाभावाच्च, परमात्मनोऽपि सच्चिदानन्दरूपत्वेन आत्मस्वरूपात् पृथक्त्वायोगाच्च॥ ६१॥

**सङ्गात् संजायते कामः कामात् क्रोधोऽभिजायते॥६२॥**
**क्रोधाद् भवति संमोहः सम्मोहात् स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति॥६३॥**

[1]**विषयविशेषानालोचयतः** पुंसः **पुरुषस्य** सङ्गः **आसक्तिः प्रीतिः** तेषु **विषयेषु** उपजायते **उत्पद्यते**। सङ्गात् **प्रीतेः** सञ्जायते **समुत्पद्यते** कामः **तृष्णा।(तस्मात्)** कामात् **कुतश्चित् प्रतिहतात् क्रोधोऽभिजायते॥६२॥**

क्रोधादिति। **क्रोधाद् भवति** सम्मोहः **अविवेकः कार्याकार्यविषयः। क्रुद्धो हि सम्मूढः सन् गुरुमप्याक्रोशति। सम्मोहात्** स्मृतिविभ्रमः **शास्त्राचार्योपदेशाहितसंस्कारजनितायाः स्मृतेः स्याद् विभ्रमो भ्रंशः, स्मृत्युत्पत्ति-निमित्तप्राप्तावनुत्पत्तिः। ततः स्मृतिभ्रंशाद्** बुद्धिनाशः **बुद्धेर्नाशः, कार्याकार्यविषयविवेकायोग्यता अन्तःकरणस्य बुद्धेर्नाश उच्यते। बुद्धिनाशात् प्रणश्यति। तावदेव हि पुरुषो यावदन्तःकरणं तदीयं कार्याकार्यविषयविवेकयोग्यम्।**

आनन्दगिरिकृतव्याख्या

**तथात्वमनुभवसिद्धमिति वक्तुमिदमित्युक्तम्। विषयेषु विशेषत्वमारोपितरमणीयत्वम्।** [2]**प्रीतिरिति साधारणासक्तिमात्रं गृह्यते।** तृष्णेति **उद्रिक्तासक्तिरुक्ता। प्रतिबन्धेन प्रणाशेन वा प्रतिहतिः॥६२॥**

**क्रोधस्य सम्मोहहेतुत्वमनुभवेन द्रढयति—** क्रुद्धो हीति। आक्रोशति **अधिक्षिपति। तदयोग्यत्वम् अपेरर्थः। सम्मोहकार्यं कथयति—** सम्मोहादिति। **स्मृतेर्निमित्तनिवेदनद्वारा स्वरूपं निरूपयति—** शास्त्रेति। **क्षणिकत्वादेव तस्याः स्वतो नाशसम्भवान्न सम्मोहाधीनत्वं तस्येत्याशङ्क्याह—** स्मृतीति। **स्मृतिभ्रंशेऽपि कथं बुद्धिनाशः स्वरूपतः सिध्यति? तत्राह—** कार्येति। **ननु पुरुषस्य नित्यसिद्धस्य बुद्धिनाशेऽपि प्रणाशो न कल्पते? तत्राह—** तावदेवेति। **कार्याकार्यविवेचनयोग्यान्तःकरणाभावे सतोऽपि पुरुषस्य**

भाष्यार्कप्रकाशः

**ध्यायत इति। पराभविष्यत इति।** तिरस्करिष्यत इत्यर्थः[3]। यतमानस्य विपश्चितः पराभवं जनयिष्यत इति यावत्। [4]पुरेति पाठस्तु सुगमः। तावदित्यर्थः। भविष्यतः उत्पत्स्यमानस्य सर्वविधस्याप्यनर्थस्य मूलं कारणमिदं विषयध्यानरूपमुच्यते। **सर्वानर्थमूलमिति** पाठे पराभविष्यतः पराभवं गमिष्यतो विवेकविज्ञानहीनस्य पुरुषस्येत्यर्थः। कुतश्चिद्धेतोः कामे प्रतिहते सति क्रोधो जायत इत्यर्थः। यथा स्त्रीकामस्य स्त्रियामपहृतायामपहर्तरि क्रोधः। 'विषयान् ध्यायतः पुंसस्तेषु सङ्ग उपजायते, सङ्गात् कामः सञ्जायते, कामात् क्रोधोऽभिजायते' इत्यन्वयः॥६२॥

**क्रोधादिति। अविवेक इति।** नायमात्मानात्मविषय इत्याह— **कार्येति**। 'इदं कर्म कार्यम्, इदं कर्माकार्यम्' इति विवेको न भवति क्रुद्धस्य पुंस इत्यर्थः। तदेव निदर्शयति— **क्रुद्धो हीति।** हिः प्रसिद्धौ। **[आ]क्रोशति** उपालभते, निन्दतीति यावत्। **स्मृतीति।** अनुभवजन्यः संस्कारः, संस्कारजन्या तु स्मृतिः। **शास्त्रं** श्रुतिस्मृत्यादिकम्, **आचार्योपदेशः** गुरूपदेशः, ताभ्यामाहितः सम्पादितो यः **संस्कारः** आत्मज्ञानवासना, तस्माज्जनितायाः **स्मृतेः** 'सच्चिदानन्द आत्मा' इत्याकारकस्मरणस्य। भ्रंशशब्दार्थमाह— **स्मृतीति।** स्मृत्युत्पत्तौ यन्निमित्तं सदृशवस्तुदर्शनादिकं तस्य प्राप्तावपि स्मृतेरनुत्पत्तिः **भ्रंश** इत्युच्यत इत्यर्थः। बुद्धिनाशः **बुद्धेः** अन्तःकरणस्य **नाशः** कार्याकार्यविषयविवेकाभावः **बुद्धिनाशः**। न हि यावन्मुक्तिदशमन्तःकरणस्य स्वरूपनाशः[5]। 'अन्तःकरणस्य कार्याकार्यविषय-विवेकायोग्यता बुद्धेर्नाश इत्युच्यते' इत्यन्वयः। प्रणश्यतीत्यस्यार्थमाह— **तावदित्यादिना**। यावदन्तःकरणं यस्य कार्याकार्यविषय-

१. 'शब्दादिविषयविशेषानालोचयतः' इति पा.। २. 'प्रीतिरासक्ति'रिति पा.। ३. 'पराभविष्यतः सर्वानर्थस्य मूल'मिति पा.। तत्र - पराभविष्यतः इति अनर्थ-विशेषणम्, अतो व्याचष्टे— **तिरस्करिष्यत** इति। ४. 'पुरा भविष्यतः' इति पाठे इत्यर्थः। तत्र पुरा इत्यस्यार्थमाह— **तावदिति**। ५. 'यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्' (ब्र.सू.२.३.३०) इत्यत्र तथोक्तत्वादिति भावः।

**रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्।**
**आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति॥ ६४॥**

**तदयोग्यत्वे नष्ट एव पुरुषो भवति। अतः तस्यान्तःकरणस्य बुद्धेर्नाशात् प्रणश्यति। पुरुषार्थायोग्यो भवतीत्यर्थः॥ ६३॥**

**सर्वानर्थस्य मूलमुक्तं विषयाभिध्यानम्। अथेदानीं मोक्षकारणमिदमुच्यते—** रागद्वेषेति। रागद्वेषवियुक्तैः **रागश्च द्वेषश्च रागद्वेषौ। तत्पुरःसरा हीन्द्रियाणां प्रवृत्तिः स्वाभाविकी। तत्र यो मुमुक्षुर्भवति स ताभ्यां वियुक्तैः श्रोत्रादिभिरिन्द्रियैः विषयानवर्जनीयान्** चरन् **उपलभमानः** आत्मवश्यैः **आत्मनो वश्यानि वशीभूतानि तैरात्मवश्यैः** विधेयात्मा **इच्छातो विधेय** आत्माऽ**न्तःकरणं यस्य सोऽयं प्रसादमधिगच्छति।** [१]प्रसादः **प्रसन्नता स्वास्थ्यम्॥ ६४॥**

आनन्दगिरिकृतव्याख्या

[२]**करणाभावादपगततत्त्वविवेकविवक्षया नष्टत्वव्यपदेशः; तदेतदाह—** पुरुषार्थेति॥ ६३॥

**विषयाणां स्मरणमपि चेदनर्थकारणम्, सुतरां तर्हि भोगः, तेन जीवनार्थं भुञ्जानो विषयान् अनर्थं कथं न प्रतिपद्यत इत्याशङ्क्य वृत्तानुवादपूर्वकमुत्तरश्लोकतात्पर्यमाह—**सर्वानर्थस्येति। **अनर्थमूलकथनानन्तर्यमथशब्दार्थः। परिहर्तव्ये निर्णीते तत्परिहारोपायजिज्ञासां दर्शयति—**इदानीमिति। **रागद्वेषपूर्विका प्रवृत्तिरित्यत्रानुभवदर्शनार्थो** हिशब्दः। **शास्त्रीयप्रवृत्तिव्यासेधार्थं स्वाभाविकीत्युक्तम्।** तत्रे-**त्यधिकृतानधिकृत्य प्रयोगः।** अवर्जनीयान् **अशनपानादीन् देहस्थितिहेतूनिति यावत्। इन्द्रियाणां विषयेषु प्रवृत्तिश्चेत् नियमानुपपत्त्या वर्जनीयेष्वपि सा स्यादित्याशङ्क्याह—** आत्मेति। **अन्तःकरणाधीनत्वेऽपीन्द्रियाणां तदनियमात् तेषामपि नियमानुपपत्तिरित्याशङ्क्याह—** विधेयात्मेति॥ ६४॥

भाष्यार्कप्रकाशः

विवेकयोग्यं तावदेव स पुरुष इत्युच्यते। तद्योग्यत्वे नष्टे स पुरुषो नैव भवति , किन्तून्मत्तः, स्थाणुः, पशुर्वा भवति। अयमेव हि पुरुषस्य प्रणाशः यदन्तःकरणस्य कार्याकार्यविषयविवेकाभावः। अतस्तादृशविवेकशून्यान्तःकरणः पुरुषः प्रणष्ट इव भवति। पुरुषात् तस्मात् पुरुषत्वस्यैवापगतत्वादिति कृत्वा प्रणश्यतीत्युक्तम्। पुरुषनिष्ठं पुरुषत्वं पौरुषं च पुरुषार्थयोग्यत्वमेवेत्यभिप्रेत्याह— **पुरुषार्थायोग्य इति।** न ह्यपुरुषाः पश्वादयः किमपि पुरुषार्थं साधयेयुरिति भावः॥ ६३॥

**रागेति।** रागद्वेषवियुक्तैरिन्द्रियैर्विषयांश्चरन् विधेयात्मा तु प्रसादमधिगच्छति। **तत्पुरःसरेति।** तौ रागद्वेषौ पुरःसरौ यस्याः सा तत्पुरःसरा, रागद्वेषप्रयुक्तेत्यर्थः। **प्रवृत्तिरिति।** विषयेष्विति शेषः। **स्वाभाविकी** स्वभावादागता - स्वभावसिद्धेति यावत्। **चरन्निति।** 'चर गतिभक्षणयो'रिति धातुः। तत्र 'ये गत्यर्थास्ते ज्ञानार्थाः' इति न्यायात् चरतेर्ज्ञानार्थत्वमित्यभिप्रेत्याह— **उपलभमान इति।** अनुभवन्नित्यर्थः।**इच्छातो विधेय इति।** स्वेच्छाधीन इत्यर्थः। स्वाधीन इति यावत्। **स्वास्थ्यमिति।** मनःक्षोभाभावमित्यर्थः।

अत्र चरन्नित्यस्य तिरस्कृत्य वर्तमान इति **रामानुजेनोक्तम्** ; **तत्तुच्छम्** ; चरतेस्तादृशार्थालाभात्। चरतिरत्र आक्रमणरूप-गतिपरः, भक्षणार्थः संहारपरो वा, तेन तिरस्कारार्थलाभ इति **वेदान्तदेशिकः; तत्तुच्छम्** ; गमनाक्रमणयोर्भेदात्। प्राप्त्याक्रमणयोस्तु भवति कथञ्चिदभेदः, तथापि नाक्रमणात् तिरस्कारलाभः। तथा भक्षणसंहारयोरपि भेद एव, भक्षणस्याहिंसात्मकत्वात् , संहारस्य च हिंसात्मकत्वात्। व्याघ्रः पुरुषं भक्षयतीत्यादौ कथञ्चिद्भक्षणस्य हिंसात्मकत्वेऽपि न तिरस्काररूपत्वं भक्षणस्य। भक्षणं ह्यनुभवः, तिरस्कारस्तु तत्रानादरः। स ह्यननुभवे पर्यवस्यति, अन्नं तिरस्कृत्य भक्ष्यान् भक्षयतीत्यादिप्रसिद्धेः। तस्माच्चरतेः तिरस्कारार्थकत्व-मप्रमाणम् ॥ ६४॥

१. 'प्रसादं प्रसन्नतां' इति पा.। २. 'करभवत्' इति पा.।

**प्रसादे सर्वदुःखानां हानिरस्योपजायते।**
**प्रसन्नचेतसो ह्याशु बुद्धिः [१]पर्यवतिष्ठते॥६५॥**
**नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।**

**प्रसादे सति किं स्यादित्युच्यते —** प्रसाद इति। **प्रसादे** सर्वदुःखानाम् **आध्यात्मिकादीनां** हानिः **विनाशः,** अस्य **यतेः उपजायते। किञ्च** प्रसन्नचेतसः **[२]स्वस्थान्तःकरणस्य** हि **यस्माद्** आशु **शीघ्रं बुद्धिः** पर्यवतिष्ठते **आकाशमिव परि समन्तादवतिष्ठते। आत्मस्वरूपेणैव [३]निश्चलीभवतीत्यर्थः। एवं प्रसन्नचेतसोऽवस्थितबुद्धेः कृतकृत्यता यतः तस्माद् रागद्वेषवियुक्तैरिन्द्रियैः शास्त्राविरुद्धेष्ववर्जनीयेषु युक्तः समाचरेदिति वाक्यार्थः॥६५॥**

**सेयं प्रसन्नता स्तूयते—** नास्तीति। नास्ति **न विद्यते। न भवतीत्यर्थः। बुद्धिरात्मस्वरूपविषया,** अयुक्तस्य **असमाहितान्तःकरणस्य। न चास्त्ययुक्तस्य** भावना **आत्मज्ञानाभिनिवेशः। तथा न चास्ति** अभावयतः **आत्मज्ञानाभिनिवेशमकुर्वतः** शान्तिः **उपशमः। अशान्तस्य कुतः सुखम्? इन्द्रियाणां हि विषयसेवातृष्णातो निवृत्तिर्या तत्**

आनन्दगिरिकृतव्याख्या

**तथापि नानाविधदुःखाभिभूतत्वान्न स्वास्थ्यमास्थातुं शक्यमित्याशयेन पृच्छति—** प्रसाद इति। **श्लोकार्धेनोत्तरमाह—** उच्यत इति। **सर्वदुःखहान्या बुद्धिस्वास्थ्येऽपि प्रकृतं प्रज्ञास्थैर्यं कथं सिद्धमित्याशङ्क्याह—** प्रसन्नेति। **बुद्धिप्रसादस्यैव फलान्तरमाह—** किञ्चेति। **तस्माद् बुद्धिप्रसादार्थं प्रयतितव्यमिति शेषः। श्लोकद्वयस्याक्षरोत्थमर्थमुक्त्वा तात्पर्यार्थमुपसंहरति—** एवमिति। युक्तः **समाहितो विषयपारवश्यशून्यः सन्निति यावत्॥६५॥**

**किं पुनः सत्त्वशुद्ध्यैव यथोक्तबुद्धिः सिध्यति? नेत्याह—** सेयमिति। **असमाहितस्यापि बुद्धिमात्रमुत्पद्यमानं प्रतिभातीत्याशङ्क्य विशिनष्टि—** आत्मस्वरूपेति। **न हि विक्षिप्तचित्तस्यात्मस्वरूपविषया बुद्धिरुदेतुमर्हतीत्यत्र हेतुमाह—** न चेति। **आत्मज्ञाने शब्दादापाततो जाते स्मृतिसन्तानकरणं साक्षात्कारार्थम् अभिनिवेशो भावनेति चोच्यते। न चासौ विक्षिप्तबुद्धेः सिध्यतीति हेत्वर्थं विवक्षित्वाऽऽह—** आत्मज्ञानेति। **भावनाद्वारा साक्षात्काराभावेऽपि का क्षतिरित्याशङ्क्याह—** तथेति। **असमाहितस्य भावनाऽभाववदिति यावत्। आत्मन्यापाततो ज्ञाते श्रवणाद्यावृत्तिरूपां स्मृतिमनातन्वानस्यापरोक्षबुद्ध्यभावे नानर्थनिवृत्तिः सिध्यतीत्याह—** उपशम इति। **अनिवृत्तानर्थस्य परमानन्दसागराद् विभक्तस्य संसारवारिधौ निमग्नस्य सुखाविर्भावो न सम्भवतीत्याह—** अशान्तस्येति। **तस्यापि विषयसेवातो वैषयिकं सुखं सम्भवतीत्याशङ्क्याह—** इन्द्रियाणां हीति। **तृष्णाक्षयस्य [४]शास्त्रप्रसिद्धमानुभविकं च सुखत्वमिति वक्तुं**

भाष्यार्कप्रकाशः

**प्रसाद इति।** बुद्धिरन्तःकरणं निश्चयात्मकम् , चेतस्तु संशयात्मकमिति विवेकः। **समाचरेत्** आसीत, वर्तेतेति यावत्। ज्ञाननिष्ठामभ्यसेदिति वा। 'बुद्धिः पर्यवतिष्ठती'त्यत्र बुद्धिशब्दस्य ज्ञानार्थाश्रयणे 'तस्य प्रज्ञा प्रतिष्ठिते'त्यनेनैकार्थश्च प्रतिभाति।

**ननु** आत्मस्वरूपेणैव निश्चला भवतीत्यस्य अर्थानुपपत्तिः, अन्तःकरणात्मिकाया बुद्धेः, 'अहं ब्रह्म' इति बुद्धिवृत्तेर्वा सच्चिदानन्दलक्षणात्मस्वरूपा[पत्वा]योगादिति चेत्? **उच्यते—** सच्चिदानन्दलक्षणात्मतादात्म्याध्यासादन्तःकरणस्यात्मस्वरूप[त्व]-लाभ इति। यथा निरन्तरविष्णुमूर्तिध्यानवशान्मनसस्तद्रूपत्वलाभः। बुद्धिवृत्तेस्तु आत्मस्वरूपविषयत्वेन नैश्चल्यं विवक्षितमित्यदोषः ॥६५॥

**नास्तीति। बुद्धिः** ज्ञानम्। सुखस्य स्वरूपमाह— **इन्द्रियाणामिति।** इन्द्रियाणां विषयसेवायां या **तृष्णा** स्पृहा, तस्या इति

१. 'पर्यवतिष्ठति' इति मूले भाष्ये च रा.पा.। २. 'स्वच्छान्तःकरणस्य' इति पा.। ३. 'निश्चला भवतीत्यर्थः' इति पा.। ४. 'यच्च कामसुखं लोके यच्च दिव्यं महत् सुखम्। तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्॥' इत्यादि शास्त्रम्।

**न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्?॥ ६६॥**
**इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते।**
**तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि॥ ६७॥**
**तस्माद् यस्य महाबाहो निगृहीतानि सर्वशः।**

**सुखम्, न विषयविषया तृष्णा, दुःखमेव हि सा। न तृष्णायां सत्यां सुखस्य गन्धमात्रमप्युपपद्यत[१] इत्यर्थः॥ ६६॥**

**अयुक्तस्य कस्माद् बुद्धिर्नास्तीत्युच्यते —** इन्द्रियाणामिति। **इन्द्रियाणां** हि **यस्मात्** चरतां **स्वस्वविषयेषु प्रवर्तमानानां यन्मनः** अनुविधीयते **अनुप्रवर्तते** तद् **इन्द्रियविषयविकल्पनेन प्रवृत्तं मनः** अस्य **यतेः** हरति प्रज्ञाम् **आत्मानात्मविवेकजां नाशयति। कथम्? वायुर्नावमिव** अम्भसि **उदके [२]जिगमिषतां मार्गादुद्धृत्योन्मार्गे यथा वायुर्नावं प्रवर्तयति, एवमात्मविषयां प्रज्ञां हृत्वा मनो विषयविषयां करोति॥ ६७॥**

**'यततो ह्यपि' इत्युपन्यस्तस्यार्थस्यानेकधोपपत्तिमुक्त्वा तं चार्थमुपपाद्योपसंहरति—** तस्मादिति। **इन्द्रियाणां प्रवृत्तौ दोष उपपादितो यस्मात्, तस्माद्** यस्य **यतेः हे महाबाहो! निगृहीतानि** सर्वशः **सर्वप्रकारैः मानसादि-**

आनन्दगिरिकृतव्याख्या

हिशब्दः। **विषयसेवातृष्णयाऽपि विषयोपभोगद्वारा सुखमुपलब्धमित्याशङ्क्याह—** दुःखमेवेति। **तत्रापि** हि**शब्दोऽनुभवावद्योती। तदेव स्पष्टयति—** नेत्यादिना॥ ६६॥

**आकाङ्क्षाद्वारा श्लोकान्तरमुत्थापयति—** अयुक्तस्येति। **विक्षिप्तचेतसो भावनाऽभावे साक्षात्कारलक्षणा बुद्धिर्न भवतीति हेत्वन्तरेण साधयति—** इन्द्रियाणामिति। **यत्पदोपात्तं मनस्तत्पदेनापि गृह्यते।** इन्द्रियाणां **श्रोत्रादीनां विषयाः शब्दादयस्तेषां** विकल्पनं **मिथो विभज्य ग्रहणं, तेनेति यावत्। दृष्टान्तं व्याकरोति—** उदक इति। **करोति यस्मात् तस्मादयुक्तस्य नोत्पद्यते बुद्धिरिति योजना ॥ ६७॥**

**'यततो ही'त्यादिश्लोकाभ्यामुक्तस्यैवार्थस्य प्रकृतश्लोकाभ्यामपि कथ्यमानत्वादस्ति पुनरुक्तिरित्याशङ्क्य परिहरति—** यततो हीत्यादिना। **'ध्यायतो विषयानि'त्यादिनोपपत्तिवचनमुन्नेयम्। तच्छब्दापेक्षितार्थोक्तिद्वारा श्लोकमवतारयति—** इन्द्रियाणामिति।

भाष्यार्कप्रकाशः

पञ्चम्यास्तसिः। **विषयविषया** शब्दादिविषया तृष्णा तु न सुखम्। **सा** विषयतृष्णा। **गन्धमात्रं** लेशमात्रमपि **नोपपद्यते** न जायते।

**ननु** विषयसिद्धौ विषयतृष्णातः सुखमेवेति चेत्? **मैवम्**, यदि विषयसिद्धिमात्रेण विषयतृष्णा निवर्तेत, तर्हि सुखमेव, न तु निवर्तते, प्रत्युत वर्धते। न हि लब्धधनस्य धनतृष्णा निवर्तमाना दृष्टा, श्रुता वा। नापि स्त्रिया सह मिथुनीभूय वर्तमानस्य स्त्रीतृष्णा निवर्तमाना दृष्टा श्रुता वा। तृष्णायां निवृत्तायामेव मनस्यन्तर्मुखे सति तत्रात्मसुखप्रतिबिम्बात् सुखलाभः। ततश्च सुखविरोधिनी तृष्णा दुःखहेतुत्वाद् दुःखमेवेति॥ ६६॥

**इन्द्रियाणामिति।** इन्द्रियाणां स्वविषयेषु चरतां सतां, यद्वा चरतामिन्द्रियाणामिति कर्मणि षष्ठी। चरन्ति इन्द्रियाणीत्यर्थः। यदिति मनसो विशेषणम्। **सांयात्रिकाः** पोतवणिजः। **विषयविषयां** शब्दादिविषयां प्रज्ञाम्॥ ६७॥

**तस्मादिति।** तस्मात् इन्द्रियाणां विषयेषु प्रवृत्तेर्बहुदोषवत्त्वादित्यर्थः। हे महाबाहो! यस्य इन्द्रियाणि **सर्वशः** सर्वेभ्य इन्द्रियार्थेभ्यो निगृहीतानि तस्य प्रज्ञा प्रतिष्ठितेत्यन्वयः। अगृहीतविषयेन्द्रियो जितेन्द्रियः स्थितप्रज्ञ इत्युच्यत इत्यर्थः॥ ६८॥

---

१. 'उत्पद्यते' इति पा.। २. 'जिगमिषतां सांयात्रिकाणाम्' इति पा.।

**इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥६८॥**
**या निशा सर्वभूतानां तस्यां जागर्ति संयमी।**
**यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥६९॥**

**भेदैरिन्द्रियाणि** इन्द्रियार्थेभ्यः **शब्दादिभ्यः, तस्य प्रज्ञा प्रतिष्ठिता॥६८॥**

**योऽयं लौकिको वैदिकश्च व्यवहारः, स उत्पन्नविवेकज्ञानस्य स्थितप्रज्ञस्य अविद्याकार्यत्वादविद्यानिवृत्तौ निवर्तते; अविद्यायाश्च विद्याविरोधान्निवृत्तिरित्येतमर्थं स्फुटीकुर्वन्नाह—** या निशेति। **या** निशा **रात्रिः सर्वपदार्थानामविवेककरी तमःस्वभावत्वात्**[१] सर्वभूतानां **सर्वेषां भूतानाम्। किं तत्? परमार्थतत्त्वम्, स्थितप्रज्ञस्य विषयः। यथा नक्तञ्चराणामहरेव सद् अन्येषां निशा भवति, तद्वत् नक्तञ्चरस्थानीयानामज्ञानिनां सर्वभूतानां निशेव निशा परमार्थतत्त्वम्, अगोचरत्वाद् अतद्बुद्धीनाम्।** तस्यां **परमार्थतत्त्वलक्षणायाम्** [२]**अज्ञाननिद्रायाः प्रबुद्धो जागर्ति** संयमी

आनन्दगिरिकृतव्याख्या

**असमाहितेन मनसा यस्मादनुविधीयमानानीन्द्रियाणि प्रसह्य प्रज्ञामपहरन्ति, तस्मादिति योजना॥६८॥**

**आत्मविदः स्थितप्रज्ञस्य सर्वकर्मपरित्यागेऽधिकारस्तद्विपरीतस्याज्ञस्य कर्मणीत्येतस्मिन्नर्थे समनन्तरश्लोकमवतारयति—** योऽयमिति। **अविद्यानिवृत्तौ सर्वकर्मनिवृत्तिश्चेत् तन्निवृत्तिरेव कथमित्याशङ्क्याह—** अविद्यायाश्चेति। स्फुटीकुर्वन् **बाह्याभ्यन्तरकरणानां पराक्प्रत्यक्प्रवृत्तिवत् तथाविधे दर्शने च मिथो विरुध्येते, पराग्दर्शनस्यानाद्यात्मावरणाविद्याकार्यत्वाद् आत्मदर्शनस्य च तन्निवर्तकत्वात्। ततश्चात्मदर्शनार्थमिन्द्रियाण्यर्थेभ्यो निगृह्णीयादित्याहेति योजना। सर्वप्राणिनां निशा पदार्थाविवेककरीत्यत्र हेतुमाह—** तमःस्वभावत्वादिति। **सर्वप्राणिसाधारणीं प्रसिद्धां निशां दर्शयित्वा तामेव प्रकृतानुगुणत्वेन प्रश्नपूर्वकं विशदयति—** किं तदित्यादिना। **स्थितप्रज्ञविषयस्य परमार्थतत्त्वस्य प्रकाशैकस्वभावस्य कथमज्ञान् प्रति निशात्वमित्याशङ्क्याह—** यथेति। **तत्र हेतुमाह—** अगोचरत्वादिति। अतद्बुद्धीनां **परमार्थतत्त्वातिरिक्तद्वैतप्रपञ्चे प्रवृत्तबुद्धीनामप्रतिपन्नत्वात् परमार्थतत्त्वं निशेवाविदुषामित्यर्थः। तस्यामित्यादि व्याचष्टे—** तस्यामिति।

भाष्यार्कप्रकाशः

**येति।** सर्वभूतानां या निशा तस्यां संयमी जागर्ति, यस्यां भूतानि जाग्रति, पश्यतो मुनेः सा निशा। **लौकिक** इति भोजनादिः, **वैदिकः** यज्ञादिः, **व्यवहारः** कर्म मनोवाक्कायनिष्पाद्यः। **अविद्या** 'अहमज्ञः' इत्यनुभवसिद्धा अनादिभावत्वे सति ज्ञाननिवर्त्यत्वलक्षणलक्षिता अज्ञानशक्त्यादिपर्याया माया। **विद्या** 'अहं ब्रह्म' इति ज्ञानम्। स्थितप्रज्ञस्य ज्ञानेनाज्ञाननिवृत्तौ तत्कार्यव्यवहारनिवृत्तिरित्यर्थः। **सर्वपदार्थानां** घटादीनाम् **अविवेककरी** विवेकाभावकारिणी। न हि निशायां दीपादिज्योतिरभावे 'घटोऽयं पटोऽयम्' इति विवेकः कस्यापि सम्भवति। तत्र हेतुमाह— **तमःस्वभावत्वादिति।** अन्धकारमयत्वादित्यर्थः। अत्र निशावर्णनस्याप्रकृतत्वात् पृच्छति— **किं तदिति।** का सा निशेत्यर्थः। निशापदाभिधेयं तद् वस्तु किमित्यक्षरार्थः। उत्तरयति— **परमार्थतत्त्वमिति।** आत्मेति यावत्। तस्यैव परमार्थसत्यत्वात्। प्रपञ्चो हि व्यवहारसत्यः। कस्तद्वेदेत्यत आह— **स्थितप्रज्ञस्य विषय इति।** गोचर इत्यर्थः। तद्बुद्धिविषय इति यावत्। ननु या सर्वभूतानामविवेककरी निशा सा स्थितप्रज्ञस्याविवेककरी निशैव भवितुमर्हतीति कथं तस्याः स्थितप्रज्ञविषयत्वम्? अत आह—**यथेत्यादि**। अन्येषामस्मदादीनामहरेव सद् नक्तञ्चराणां निशा भवति,अहनि नक्तञ्चराणामप्रवृत्तेश्चेति भावः। **नक्तं** निशायां चरन्तीति **नक्तञ्चराः** भूतपिशाचोलूकादयः। तद्वदज्ञानिनां सर्वभूतानां निशा सत्यपि स्थितप्रज्ञस्य विषय एव परमार्थतत्त्वमिति। ननु परमार्थतत्त्वस्य कथं निशात्वम्? अत आह— **निशेव निशेति।** औपचारिकः प्रयोग इति भावः। ननु गौणप्रयोगेऽपि साम्यं वक्तव्यम्? अत आह— **अगोचरत्वादिति। अतद्बुद्धयः** आत्मज्ञानशून्याः, तेषामगोचरत्वाद् अविषयत्वात्। यथा

१. 'तमःस्वभावत्वात् निशा' इति पा.। २. 'अज्ञाननिद्रायाम्' इति रा.पा.।

**संयमवान् जितेन्द्रियो योगीत्यर्थः।** यस्यां **ग्राह्यग्राहकभेदलक्षणायामविद्यानिशायां**[1] **प्रसुप्तान्येव भूतानि** [2]**जाग्रतीत्युच्यन्ते (यस्यां निशायां)**[3]**, प्रसुप्ता इव स्वप्नदृशः,** सा निशा **अविद्यारूपत्वात्, परमार्थतत्त्वं पश्यतो मुनेः।**

आनन्दगिरिकृतव्याख्या

**निशावदुक्तायामवस्थायामिति यावत्।** योगीति **ज्ञानी कथ्यते। द्वितीयार्धं विभजते—** यस्यामिति। **प्रसुप्तानां जागरणं विरुद्धमित्याशङ्क्याह—** प्रसुप्ता इवेति। **परमार्थतत्त्वमनुभवतो निवृत्ताविद्यस्य संन्यासिनो द्वैतावस्था निशेत्यत्र हेतुमाह—** अविद्यारूपत्वादिति।

भाष्यार्कप्रकाशः

निशा अस्मदादिचक्षुर्वृत्त्यविषयः, तथा आत्मतत्त्वमप्यविदुषां बुद्धिवृत्त्यविषय इत्यर्थः।

न च निशायाः कथं चक्षुर्वृत्त्यविषयत्त्वम्, तत्तमसः चक्षुषैव गृह्यमाणत्वादिति वाच्यम्; चक्षुर्वृत्तिनिरोधकत्वस्यैव तमसो लक्षणत्वात्, नेत्रगोलकसम्बद्धे तमसि चक्षुर्वृत्त्यनपेक्षणात्, चक्षुर्वृत्तेर्बहिर्निर्गमनायोगाच्च, नेत्रे निमीलितेऽप्यान्तरतमोग्रहणसम्भवाच्च। तस्माच्चक्षुर्वृत्तिनिरोधकं तमो मनसैव वेद्यत इति बोध्यम्।

परमार्थतत्त्वमेव लक्षणं यस्यास्तस्याम्। **तस्यां** निशायाम्। नास्या निशाया जाग्रदाद्यवस्थास्वन्तर्भाव इत्याह— **अज्ञाननिद्रायामिति।** जाग्रत्स्वप्नयोरिव न ज्ञानानि, सुषुप्ताविव न निद्राख्यं तमः, न विद्येते ज्ञाननिद्रे यस्यां तस्यामिति बहुव्रीहिः। अज्ञानानिद्रायामिति पाठे [4]बहुव्रीहिद्वयस्य कर्मधारयः। सच्चिदानन्दरूपे आत्मनि अज्ञानाभावान्न निद्रा, बुद्ध्यभावान्न तद्वृत्तिज्ञानानि सन्तीत्यर्थः। न चाज्ञानोपाधिके आत्मनि कथमज्ञानाभाव इति वाच्यम्, निरुपाधिके आत्मनि अज्ञानोपाधिकल्पनस्यातात्त्विकत्वात्, परमार्थदशायामात्मनि अविद्याऽभावाच्च। यावद्व्यवहारं हि व्यवहारान्यथानुपपत्त्या आत्मन्यज्ञानं कल्पितम्। **किञ्च** 'नाहं घटं जानामि' इति यावद् घटाज्ञानानुभवः, तावद् घटाज्ञानमस्ति, चक्षुर्वृत्त्या घटाज्ञाने नाशिते तु घटप्रत्यक्षं भवति। सति च घटप्रत्यक्षे कथं पुनर्घटाज्ञानसद्भावः? एवं 'नाहं ब्रह्म जानामि' इति यावदात्माज्ञानानुभवः, तावदात्माज्ञानमस्ति, 'अहं ब्रह्म' इति धीवृत्त्या आत्माज्ञाने नाशिते तु आत्मसाक्षात्कारो जायते। सति चात्मसाक्षात्कारे कथं पुनरात्माज्ञानानुभवः यद्बलेनात्मन्यज्ञानं कल्प्येत? न च कार्यलिङ्गकानुमानेन कल्प्यतामिति वाच्यम्; परमार्थतः प्रपञ्चाभावात्। तस्मान्नास्ति परमार्थतत्त्वे ज्ञानाज्ञानद्वन्द्वमित्यनवद्यम्। **प्रबुद्धः** विद्वान् स्थितप्रज्ञ इति यावत्। कोऽसौ प्रबुद्धः? अत आह— **संयमीति।** संयम इन्द्रियजयः। एतेन सर्वभूतानामविषयम् आत्मतत्त्वं स्थितप्रज्ञ एक एव नित्यमनुसन्दधानो वर्तत इति सिद्धम्। इदमेव हि विदुष आत्मनि जागरणं नाम यदात्मस्वरूपानुभवः। इदमेव ह्यविदुषामात्मनि स्वापो नाम यदात्मस्वरूपाज्ञानम्।

अथ श्लोकस्योत्तरार्धं व्याचष्टे— **यस्यामिति।** ग्राह्याणि विषयाः, ग्राहकाणि समनस्कानीन्द्रियाणि, तद्भेद एव लक्षणं स्वरूपं यस्यास्तस्यां निशायामविद्यानिद्रायाम् अज्ञानात्मकनिद्रायाम्। निशाकार्ये निद्रायां निशात्वोपचार इति भावः। **प्रसुप्तान्येवेति।** अज्ञाननिद्राभिभूतत्वादिति भावः। **उच्यत इति।** अविवेकिभिरिति शेषः। तत्र दृष्टान्तमाह— **प्रसुप्ता इव स्वप्नदृश इति।** यथा निद्रायां प्रसुप्ताः स्वप्नद्रष्टृत्वाज्जाग्रतीत्युच्यन्ते, तद्वदिति। यद्वा व्यतिरेकदृष्टान्तोऽयम्। यथा स्वप्नदृशः पुरुषाः निद्रायां प्रबुद्धा अपि प्रसुप्ता इत्युच्यन्ते, तद्वदिति। यत्राविदुषां सर्वेषां भूतानां लौकिके च वैदिके च सर्वस्मिन्नविद्याकार्ये व्यवहारे प्रवृत्तिः, न स स्थितप्रज्ञस्य विषयः, तस्यात्मानुभवव्यग्रत्वात्, तद्विद्यया अविद्यायाः सकार्याया नष्टत्वाच्चेत्यभिप्रायः।

अत्रायं निष्कर्षः— यो भूतानामविषयत्वान्निशारूपः आत्मा स स्थितप्रज्ञस्य गोचरत्वादहोरूपः। यस्तु भूतानां विषयत्वादहोरूपः आविद्यको व्यवहारः स स्थितप्रज्ञस्याविषयत्वान्निशारूपः इति। यथा नक्तञ्चराणां निशा अस्मदादीनामहः, अस्मदादीनां निशा नक्तञ्चराणामहः, तद्वदिति।

---

१. 'अविद्यानिद्रायां' इति पा.। २. 'जाग्रतीत्युच्यते' इति पा.। ३. कुण्डलितं क्वचिन्न। ४. ज्ञानं च निद्रा च ज्ञाननिद्रे इति द्वन्द्वोत्तरबहुव्रीहिरुक्तः। अज्ञानानिद्रायामिति पाठे तु— न विद्यते ज्ञानं यस्यामिति, न विद्यते निद्रा यस्यामिति च बहुव्रीहिद्वयं कृत्वा, अज्ञाना चासौ अनिद्रा चाज्ञानानिद्रा इति कर्मधारयः।

[अविद्यावस्थायामेव कर्मविधिः]

**अतः कर्माण्यविद्यावस्थायामेव चोद्यन्ते, न विद्यावस्थायाम्। विद्यायां हि सत्याम् उदिते सवितरि शार्वरमिव तमः, प्रणाशमुपगच्छत्यविद्या। प्राग्विद्योत्पत्तेः अविद्या प्रमाणबुद्ध्या गृह्यमाणा क्रियाकारकफलभेदरूपा सती सर्व-कर्महेतुत्वं प्रतिपद्यते। नाप्रमाणबुद्ध्या गृह्यमाणायाः कर्महेतुत्वोपपत्तिः। प्रमाणभूतेन वेदेन मम चोदितं कर्तव्यं कर्मेति**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ननु विद्योदयेऽपि देहादिप्रतिभासानिवृत्तेः, यथा पूर्वं कर्माणि विधीयन्ते, तथा विद्योदयादूर्ध्वमपि कस्मान्न विधीयन्त इत्याशङ्क्य विशेषमाह— **प्राग्विद्योत्पत्तेरविद्या प्रमाणबुद्ध्या गृह्यमाणा सतीति।** [1]'अत्र वेदा अवेदा भवन्ती'ति श्रुतेः वैदिक-

आनन्दगिरिकृतव्याख्या

**परमार्थावस्था निशेवाविदुषाम् , विदुषां तु द्वैतावस्था तथेति स्थिते फलितमाह—** अत इति। **अविद्यावस्थायामेव क्रियाकारकफलभेदप्रतिभानादित्यर्थः। विद्योदयेऽपि तत्प्रतिभानाविशेषात् पूर्वमिव कर्माणि विधीयेरन्नित्याशङ्क्याह—** विद्यायामिति। **अविद्यानिवृत्तौ बाधितानुवृत्त्या विभागभानेऽपि नास्ति कर्मविधिर्विभागाभिनिवेशाभावादित्यर्थः। अविद्यावस्थायामेव कर्माणीत्युक्तं व्यक्तीकरोति—** प्रागिति। **विद्योदयात्पूर्वं बाधकाभावादबाधिताऽविद्या क्रियादिभेदमापद्य, प्रमाणरूपया बुद्ध्या ग्राह्यतां प्राप्य कर्महेतु-र्भवति, क्रियादिभेदाभिमानस्य तद्धेतुत्वादित्यर्थः। न विद्यावस्थायामित्युक्तं प्रपञ्चयति—**नाप्रमाणेति। **उत्पन्नायां च विद्यायामविद्याया निवृत्तत्वात् क्रियादिभेदभानमप्रमाणमिति बुद्धिरुत्पद्यते। तया गृह्यमाणा यथोक्तविभागभागिन्यप्यविद्या न कर्महेतुत्वं प्रतिपद्यते, बाधितत्वेनाभासतया तद्धेतुत्वायोगादित्यर्थः। विद्याऽविद्याविभागेनोक्तमेव विशेषं विवृणोति—** प्रमाणभूतेनेति। **यथोक्तेन वेदेन**

भाष्यार्कप्रकाशः

**यद्वा** यस्मिन् ब्रह्मणि भूतानि निलीयन्ते सुषुप्तौ निशायां, तद् ब्रह्म भूतानां निशेत्युच्यते। तत्र च स्थितप्रज्ञो जागर्ति, तदनुभवितृत्वात् तस्य। यस्यामविद्यानिशायां भूतान्यहनि व्यवहरन्ति, सा अविद्यानिशा भूतानामहरित्युच्यते। तत्र च न स्थितप्रज्ञो जागर्ति, स्थितप्रज्ञाविषयत्वाद् व्यवहारस्य। यथा अस्मदहोरूपायां निशायां नक्तञ्चरा न जाग्रति, वयं तु जागृमः, अस्मन्निशारूपे अहनि तु नक्तञ्चरा जाग्रति, वयं तु न जागृमः, तद्वदिति। भूतानां ब्रह्मैव निशा, अविद्यैवाहः। स्थितप्रज्ञस्य तु ब्रह्मैवाहः, अविद्यैव निशेति सङ्क्षिप्तोऽर्थः। निर्व्यवहारः आत्मानुभवपरः स्थितप्रज्ञः, व्यवहारिण आत्मज्ञानहीनास्तु सर्वे प्राणिन इति भावार्थः।

एवं श्लोकं व्याख्याय फलितमाह— **अत इत्यादिना।** अतः अविदुषां ब्रह्मज्ञानाभावाद् , विदुषश्च व्यवहाराभावादित्यर्थः। **चोद्यन्ते** विधीयन्ते शास्त्रेणेति शेषः। शर्वर्या इदं शार्वरम् , 'तस्येदम्' इत्यण्। सवितर्युदिते शार्वरं तम इव विद्यायां सत्यामविद्या प्रणाशमुपगच्छतीत्यन्वयः। **विद्या** 'अहं ब्रह्मास्मि' 'तत्सत्यं स आत्मा तत्त्वमसि' 'स भूमा' 'अतोऽन्यदार्तम्' इत्यादिज्ञानम्। 'अहमज्ञः, कर्ता, भोक्ता, ब्राह्मणो, यष्टव्यं मम दातव्यम्' इत्याद्यज्ञानमविद्या। अविद्यापरिणामरूपत्वात् सर्वोऽपि प्रपञ्चोऽविद्येत्युच्यते। इयं ह्यविद्या दर्शितविद्योत्पत्तेः प्राक् प्रमाणमिव प्रतिभाति। सर्वे ह्यास्तिका अतत्त्वविदः पुरुषाः - वेदशास्त्रादीनि, यज्ञयागादिक्रियाः, तत्तदुपकरणानि, स्वर्गादिफलानि च ब्राह्मणादिवर्णान् , ब्रह्मचर्याद्याश्रमान् , इन्द्रादिदेवताः - किं बहुना? सर्वमपि जगत् सत्यमेव मन्वते, 'ब्रह्म सत्यं जगन्मिथ्या' इति विद्योत्पत्त्यनन्तरं तु सर्वमप्यसत्यत्वादप्रमाणमित्येव मन्वते इत्याह— **प्राग्विद्येत्यादिना।** विद्योत्पत्तेः प्राक् क्रियाकारकफलभेदरूपा अविद्या प्रमाणबुद्ध्या गृह्यमाणा सती कर्महेतुत्वं प्रतिपद्यते हि। अप्रमाणबुद्ध्या गृह्यमाणाया अविद्यायाः कर्महेतुत्वोपपत्तिर्न, हि यतः कर्ता पुरुषः प्रमाणभूतेन वेदेन चोदितं कर्म मम कर्तव्यमिति मत्वा कर्मणि प्रवर्तते, 'इदं सर्वं निशेवाविद्यामात्रम्' इति जानंस्तु नैव प्रवर्तते इति भाष्यवाक्यान्वयः। विद्यादशायां तु वेदस्यैवाप्रमाणत्वात् कथं तच्चोदितकर्मणः

---

१. 'अत्र पिताऽपिता भवती'त्यारभ्य पठितयाऽनया श्रुत्या अत्रेति प्रकृतपरामर्शात् सुषुप्तौ पित्राद्यभावः प्रतिपाद्यते। तच्च 'तद्वा अस्यैतदतिच्छन्दा अपहत-पाप्माभयं रूपम्' इति श्रुत्या तदा पित्रादिसंबन्धनिमित्तकर्मासंबन्धित्वादात्मनः उपपद्यते। आत्मतत्त्वप्रबोधेऽपि कर्मासंबन्धित्वं तुल्यमिति पित्राद्यभावः सिद्धः। अत एव 'आत्मेति'(ब्र.सू. ४-१-३) इत्यत्र 'वेदा अवेदाः(बृ.उ ४.३.२२) इति वचनादिष्यत एवास्माभिः श्रुतेरप्यभावः प्रबोधे' इत्युक्तं भाष्यकारैः।

**हि कर्मणि कर्ता प्रवर्तते, न अविद्यामात्रमिदं सर्वं निशेवेति[1]। यस्य पुनर्निशेवाविद्यामात्रमिदं सर्वं भेदजातमिति ज्ञानं तस्यात्मज्ञस्य सर्वकर्मसंन्यास एवाधिकारो, न प्रवृत्तौ। तथा च दर्शयिष्यति— 'तद्बुद्धयस्तदात्मानः' (भ.गी.५.१७) इत्यादिना ज्ञाननिष्ठायामेव तस्याधिकारम्।**

**तत्रापि प्रवर्तकप्रमाणाभावे प्रवृत्तेरनुपपत्तिरिति चेत्? न ; स्वात्मविषयत्वादात्मविज्ञानस्य। न ह्यात्मनः**

अनुभूतिस्वरूपाचार्यटिप्पणम्

विधिविधेयादिव्यवहारस्यावस्तुत्वं, स्वात्मना चासंस्पर्शं मन्यमानस्य कर्मणि नाधिकारश्चेत् , कथं तर्हि विदुषो वर्तमान [वर्तन]मित्याशङ्क्याह— **यस्य पुनर्निशेवेति।**

प्रवर्तकप्रमाणस्य विधेरभावे यथा न कर्मसु प्रवृत्तिः, तथाऽस्य ज्ञाननिष्ठायामपि प्रवृत्तिर्न स्यात्। अतोऽवश्यं ज्ञाने [ऽपि प्रवर्तकप्रमाणं][2] विधिराश्रयणीय इत्याह— **तत्रापि प्रवर्तकप्रमाणाभाव इति**। तर्हि किं ज्ञानोत्पत्त्यर्थं विधिराश्रीयते, किं वा निष्प्रपञ्चस्वरूपेण स्थित्यर्थं, किं वा ज्ञानिव्यवहारस्य प्रामाणिकत्वसिद्ध्यर्थमिति वाच्यम्। प्रथमं प्रत्याह— **नेति**। 'अहं ब्रह्मास्मी'ति वाक्याज्जायमानस्य ज्ञानस्य स्वात्मविषयत्वात् , स्वात्मनश्च नित्यापरोक्षत्वात् , [3]विषयापरोक्षनिबन्धनत्वाच्च ज्ञानापरोक्षत्वस्य प्रथमत एव शब्दादपरोक्षज्ञानं जायते, न तत्र विध्यपेक्षेत्यर्थः। कथञ्चित् पुरुषदोषवशात् कस्यचित् पारोक्ष्यभ्रमेऽपि परमानन्दसाक्षात्कारस्य पुरुषार्थरूपत्वेन तत्प्रतिबन्धकपारोक्ष्यभ्रमनिरासे स्वयमेव प्रवृत्तिसम्भवात् न तत्रापि विध्यपेक्षेति द्रष्टव्यम्। द्वितीयं पक्षं दूषयति— **न ह्यात्मन इति**। अविद्याध्यारोपितमात्मनः सप्रपञ्चत्वम्। विद्यया चाविद्यानिवृत्तौ निष्प्रपञ्चस्वरूपावस्थानस्य स्वतःसिद्धत्वात् न तत्र विध्यपेक्षा। साध्ये(ति) [4]नियोगो, न सिद्धे। कस्यचित्

आनन्दगिरिकृतव्याख्या

**कामनाजीवनादिमतो मम कर्म विहितं, तेन मया तत्कर्तव्यमिति मन्वानः सन् कर्मण्यज्ञोऽधिक्रियते, तं प्रति साधनविशेषवादिनो वेदस्य प्रवर्तकत्वादित्यर्थः। सर्वमेवेदमविद्यामात्रं द्वैतं निशेवेति मन्वानस्तु न प्रवर्तते कर्मणीति व्यावर्त्यमाह—** नाविद्येति। **विदुषो न कर्मण्यधिकारश्चेत् तस्याधिकारस्तर्हि कुत्रेत्याशङ्क्याह—**यस्येति। **तस्यात्मज्ञस्य फलभूतसंन्यासाधिकारे वाक्यशेषं प्रमाणयति—**तथा चेति।

प्रवर्तकं प्रमाणं **विधिः। तदभावे कर्मस्विव विदुषो ज्ञाननिष्ठायामपि प्रवृत्तेरनुपपत्तेराश्रयणीयो ज्ञानवतोऽपि विधिरिति शङ्कते—** तत्रापीति। **किमात्मज्ञानं विधिमपेक्षते, किं वाऽऽत्मा? नाद्यः, तस्य स्वरूपविषयस्य यथाप्रमाणप्रमेयमुत्पत्तेर्विध्यनपेक्षत्वादित्याह—**न, स्वात्मेति। **न द्वितीय इत्याह—** न हीति। **प्रवर्तकप्रमाणशब्दितस्य विधेः साध्यविषयत्वादात्मनश्चासाध्यत्वादिति हेतुमाह—** आत्म-

भाष्यार्कप्रकाशः

प्रामाण्यमिति भावः। **निशेवेत्यस्य** निद्रेवेत्यर्थः। निद्राया अविद्यामात्रत्वात्। **दर्शयिष्यतीति।** भगवानिति शेषः। पञ्चमाध्याये इति भावः। 'तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः। गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः।' इति ज्ञाननिष्ठायामेव विदुषोऽधिकारं दर्शयिष्यतीत्यन्वयः।

ननु विद्यावस्थायां वेदस्यैवाप्रमाणत्वेन तच्चोदितः प्रवृत्तिधर्म इव निवृत्तिधर्मोऽप्यप्रमाणमेवेति कथं विदुषो निवृत्तिधर्मे ज्ञाननिष्ठायां संन्यासेऽधिकार इति वक्तुं शक्यमिति शङ्कते— **तत्रापीति।** ज्ञाननिष्ठायामपीत्यर्थः। परिहरति— **नेति। आत्मज्ञानस्य** ज्ञाननिष्ठाया इत्यर्थः। विवृणोति— **न हीति। आत्मनः** स्वस्य स्वात्मनि प्रवर्तकप्रमाणापेक्षा न हि। तत्र हेतुमाह— **आत्मत्वादेवेति।**

---

१. 'निशेवेति जानन्' इति रा.पा.। २. इदं क्वचिन्न। ३. आत्मनो 'यत्साक्षादपरोक्षाद् ब्रह्म' इति श्रुतेः स्वप्रकाशचिद्रूपत्वमेवापरोक्षत्वम्। जडार्थस्य चापरोक्षत्वम् अनावृतप्रमातृचैतन्यतादात्म्यमेव। वृत्तिज्ञानस्य त्वपरोक्षार्थगोचरत्वमेवापरोक्षत्वमित्यर्थाधीनमेव ज्ञानापरोक्षत्वं वक्तव्यम्। अत एव शाब्दापरोक्षं सिद्धान्त-संमतम्। अतश्चोक्तरीत्या आत्मनो नित्यापरोक्षत्वादेव शब्दादपि तद्विषयकमपरोक्षमेव ज्ञानं जायते इति भावः। ४. नियोगो विधिः।

**स्वात्मनि प्रवर्तकप्रमाणापेक्षता, आत्मत्वादेव। तदन्तत्वाच्च सर्वप्रमाणानां प्रमाणत्वस्य। न ह्यात्मस्वरूपाधिगमे सति पुनः प्रमाणप्रमेयव्यवहारः सम्भवति। [1]प्रमातृत्वं ह्यात्मनो निवर्तयति अन्त्यं प्रमाणम्। निवर्तयदेव चाप्रमाणीभवति,**

अनुभूतिस्वरूपाचार्यटिप्पणम्

संस्कारप्रचयापेक्षकमिथ्याज्ञानप्राबल्यप्राप्तौ [2]परिसंख्याविधिर्भविष्यति— आत्मा द्रष्टव्यः, अनात्मदर्शनं न कर्तव्यमिति। न त्वपूर्वविधिरप्रवृत्तप्रवर्तनात्मकः संभवतीति भावः। द्वितीय[तृतीय]विकल्पं दूषयति—**तदन्तत्वाच्चेति**। प्रमाणानां प्रमाणत्वस्य ब्रह्मज्ञानोदयान्तत्वाद् उत्तरकाले ज्ञानाभासादिलक्षणो व्यवहारो न विधिप्रतिषेधप्रमाणाधीनः, किन्त्वाभासरूप एवेति भावः। ननु सर्वस्य भेदस्य मिथ्यात्वावगमात् ज्ञानिनः सर्वो व्यवहारः अप्रामाणिक इति कथमुच्यते, यतः आत्मज्ञानमेव प्रमाणं विद्यत इत्याशङ्क्याह—**प्रमातृत्वं हीति।** यथा विनश्यदाश्रया विनाशक्रिया स्वाश्रयं [3]निहन्ति, तथा प्रमात्राश्रयम् अद्वैतप्रमाणं

आनन्दगिरिकृतव्याख्या

त्वादेवेति। **आत्मतज्ज्ञानयोर्विध्यनपेक्षत्वेऽपि ज्ञानिनो मानमेयव्यवहारप्रतिनियमार्थं विध्यपेक्षा स्यादित्याशङ्क्याह—** तदन्तत्वाच्चेति। **सर्वेषां प्रमाणानां प्रामाण्यस्यात्मज्ञानोदयावसानत्वात् तस्मिन्नुत्पन्ने व्यवहारस्य निरवकाशत्वान्न तत्प्रतिनियमाय ज्ञानिनो विधिरित्यर्थः। उक्तमेव व्यक्तीकरोति—** न हीति। **धर्माधिगमवदात्माधिगमेऽपि किमिति यथोक्तो व्यवहारो न भवतीत्याशङ्क्याह—** प्रमातृत्वं हीति। **तन्निवृत्तौ कथमद्वैतज्ञानस्य प्रामाण्यमित्याशङ्क्याह—** निवर्तयदेवेति। **प्रमातृत्वं निवर्तयदद्वैतज्ञानं [4]स्वयं निवृत्तेर्न प्रमाणमित्यत्र**

भाष्यार्कप्रकाशः

यथा देहात्माभिमानिनः पुरुषस्य स्वदेहदर्शने प्रवर्तकं किञ्चित् प्रमाणं नास्ति, तदभावेऽपि स तत्र प्रवर्तत एव, तद्वदिति भावः। **तदन्तत्वादिति**। आत्मावसानत्वादित्यर्थः। तदन्तत्वमेव विवृणोति— **न हीति**। यावदात्मसाक्षात्कारं सर्वाणि शास्त्रादीनि प्रमाणानि भवन्ति, सति चात्मसाक्षात्कारे निष्प्रपञ्चे स्वयम्प्रभे आत्मन्यविक्रियेऽद्वितीये सच्चिदानन्दे ब्रह्मणि परमार्थतत्त्वे द्वैतादर्शनात् 'आविद्यकं प्रतीतिमात्रसत्ताकमिदं द्वैतं मिथ्यात्वादप्रमाणमेव' इति विदुषो निश्चयो जायते। एवं निश्चयशालिनो विदुषः कथं प्रमाणप्रमेयादि-व्यवहारसम्भवः? न कथमपीत्यर्थः।

ननु प्रमातर्यात्मनि सति कथं प्रमाणाद्यसम्भवः? अत आह— **प्रमातृत्वमपी[त्वं ही]ति। अन्त्यं** शास्त्ररूपं प्रमाणमात्मनः प्रमातृत्वं निवर्तयति हि, 'अहं ब्रह्म' इत्याकारकवृत्तिजननद्वारेत्यर्थः। आत्मस्वरूपसाक्षात्कारजननद्वारेति वा। प्रमातृत्वस्य प्रमेयाधी-नत्वादप्रमेये आत्मनि प्रमेयस्य द्वैतस्यासम्भवाच्च नात्मनः प्रमातृत्वं पारमार्थिकमिति भावः। 'एकमेवाद्वितीयं ब्रह्म' इत्यादिशास्त्रं, विद्वदनुभवश्चात्र प्रमाणमिति बोध्यम्। नन्वाविद्यकत्वेनाप्रमाणस्य शास्त्रस्य कथं प्रामाण्यमत्र? इत्यत आह— **निवर्तयदेवेति।** यावदात्मनः प्रमातृत्वं तावच्छास्त्रस्य प्रामाण्यम् , यदा तु शास्त्रमात्मनः प्रमातृत्वं निवर्तयति तदैव शास्त्रमप्रमाणं भवति। यथा कतकरजः अम्भसि क्षिप्तं सत् तद्गतमालिन्यं हरदेव स्वयमपि नश्यति, तद्वदिति भावः। तस्मादात्मनः प्रमातृत्वं निवर्तयत् सदेव शास्त्रमप्रमाणं भवतीत्यनवद्यम्। उक्तार्थे दृष्टान्तमाह— [5]**स्वप्नेति।** यथा **स्वप्नकालप्रमाणं** स्वप्नदशायामनुभवसिद्धं चक्षुरादिप्रमाणं **प्रबोधे** जाग्रत्यप्रमाणं भवति, तद्वदिति। स्वप्ने काशीनगरं दृष्टवान् पुरुषः तदा स्वस्य काशीनगरदर्शनकरणं निद्रया कल्पितं मृषाभूतमेव चक्षुः प्रमाणं मन्यते। प्रबोधे तु 'मृषैव मया स्वप्ने काशी दृष्टा' इति तादात्विकं चक्षुरप्रमाणमेव निश्चिनोति। एवमविद्यावस्थायां प्रमाणभूतं

१. प्रमातृत्वाभावे प्रमाणप्रमेयव्यवहारो न संभवति। तदुक्तमध्यासभाष्ये सर्वेषां प्रमाणानामविद्यावद्विषयत्वोपपादनावसरे—'देहेन्द्रियादिष्वहम्ममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः।' इत्यादि। २. सिद्धत्वेनात्मस्वरूपे विध्यसंभवेऽपि तज्ज्ञाने विधिरस्तु 'आत्मा द्रष्टव्यः' इति श्रुतेरित्याशङ्क्याभ्युपेत्यवादेन परिसंख्याविधिमाह—परीति। 'अविशेषप्राप्तौ परप्रतिषेधफलोऽन्यतरानुवादः परिसंख्या' (प्रकटार्थे पृ १११२) इति ग्रन्थकृतोऽभिमतं तल्लक्षणम्। परिसंख्यायाश्च विधित्वं गौणमेव। तत्र हि परप्रतिषेधो वाक्यार्थः। प्रतिषेधवाक्यस्य च कार्यपरत्वाभावः समन्वयाधिकरणद्वितीयवर्णके विस्तरेण निरूपितः। अतो नेह ज्ञाने विधिस्वीकारप्रयुक्तः सिद्धान्तविरोधः। ३. विनाशो हि अर्थस्य चरमसमयमात्रसंसर्गी भावविकारः। अत एव 'घटो विनश्यति' इति घटस्य चरमसमय एव व्यवहारः। तदुत्तरं तु 'घटो विनष्टः' इत्यतीतताप्रतीतिरेव। तत्र च धात्वर्थभूतविनाशक्रिया कर्तरि घटे उत्पद्यमाना उत्तरक्षणे घटाभावं संपादयतीति दृष्टान्तार्थः। ४. 'स्वनिवृत्तेर्न' इति पा.। ५. इदमुत्तरपृष्ठे द्र.।

**स्वप्नकालप्रमाणमिव प्रबोधे[1]। लोके च वस्त्वधिगमे प्रवृत्तिहेतुत्वादर्शनात् प्रमाणस्य। तस्मान्नात्मविदः कर्मण्यधिकार इति सिद्धम्॥ ६९॥**

**विदुषस्त्यक्तैषणस्य स्थितप्रज्ञस्य यतेरेव मोक्षप्राप्तिः, न त्वसंन्यासिनः कामकामिनः इत्येतमर्थं दृष्टान्तेन**

अनुभूतिस्वरूपाचार्यटिप्पणम्

स्वाश्रयस्य प्रमातृत्वं हत्वा स्वयमपि शाम्यतीत्यर्थः। इतश्च न ज्ञानोत्तरकालं प्रामाणिको व्यवहार इत्याह— **लोके चेति।** रज्ज्वां सर्पाध्यारोपात् तु यत् पलायनं कर्म, तद् रज्जुसाक्षात्कारे यथा न भवति, तथा स्वात्मनि संन्यासित्वाद्यध्यारोपात् यत् त्रिषवणस्नानादिलक्षणं कर्म विधितः आसीत् , तत् कथं संन्यासित्वादिविधुरस्वरूपावगमे विधित एव भवेत्? किन्त्वाभास-मात्रं स्यादिति भावः॥ ६९-७२॥

**॥ इति श्रीमद्भगवद्गीताभाष्यटिप्पणे द्वितीयोऽध्यायः॥**

आनन्दगिरिकृतव्याख्या

**दृष्टान्तमाह—** स्वप्नेति। **आत्मज्ञानस्य विध्यनपेक्षत्वे हेत्वन्तरमाह—**लोके चेति। **व्यवहारभूमौ हि प्रमाणस्य वस्तुनिश्चयफलपर्यन्तत्वे सति प्रवर्तकविधिसापेक्षत्वानुपलम्भाद् अद्वैतज्ञानमपि प्रमाणत्वान्न विधिमपेक्षते, रज्ज्वादिज्ञानवदित्यर्थः। आत्मज्ञानवतस्तन्निष्ठाया विधिमन्तरेण ज्ञानमाहात्म्येनैव सिद्धत्वात् तस्य कर्मसंन्यासेऽधिकारो, न कर्मणीत्युपसंहरति—**तस्मादिति॥ ६९॥

**नन्वसंन्यासिनाऽपि विद्यावता विद्याफलस्य मोक्षस्य लब्धुं शक्यत्वात् किमिति विदुषः संन्यासो नियम्यते? तत्राह—** विदुष

भाष्यार्कप्रकाशः

शास्त्रादिकं विद्यावस्थायामप्रमाणमेव भवति।

एतावता **तत्रापीति** प्रश्नस्य किमुत्तरमायातमिति चेद्? **इदमायातम्**— यावदात्मसाक्षात्कारं शास्त्रस्य प्रमाणत्वात् पारोक्ष्येणा-त्मतत्त्वविदं विद्वांसं ज्ञाननिष्ठायां प्रवर्तयत्येव शास्त्रमिति। प्रवर्तकाभावेऽपि स्वात्मनि स्वत एव प्रवृत्तिरिति तु प्रौढ्योक्तमुत्तरम् - इति।

न केवलमात्मन्येव प्रवर्तकाभावेऽपि प्रवृत्त्युपपत्तिः, किन्तु लोकेऽपीत्याह— **लोके चेति।** घटादिवस्त्वनुभवे विषये पुरुषं न प्रवर्तयति चक्षुरादिप्रमाणम् , किन्तु तत्तद्वस्तुविषयेच्छैव। इच्छया घटाद्यधिगमे प्रवृत्तस्तु पुरुषः तत्करणं चक्षुरादिप्रमाणमपेक्षते। तस्मात् प्रमाणं प्रमातुः प्रमेयाधिगमे साधनमेव, न प्रवर्तकमित्यर्थः। **एतेना**त्मजिज्ञासुः पुरुषः तज्जिज्ञासया आत्मज्ञाने प्रमाणं वेदान्तशास्त्रमपेक्षते यावदात्मसाक्षात्कारम् , यथा घटं दिदृक्षुः पुरुषः तद्दिदृक्षया घटदर्शने प्रमाणं चक्षुरपेक्षते यावद्घटसाक्षात्कारम्। साक्षात्कारानन्तरं तु किं तस्य प्रमाणेन? न किञ्चिदपीत्यप्रमाणमेव प्रमाणम् , व्यर्थत्वादिति **सिद्धम्**। यथा कूपखानकः पुरुषस्तोयप्राप्त्यनन्तरं खनित्रादिकं खननसाधनं परित्यजति, तथा मुमुक्षुरात्मसाक्षात्कारानन्तरं वेदान्तशास्त्रं परित्यजेदेवेति नात्मस्वरूपाधिगमनानन्तरं प्रमाणव्यवहारः पण्डितस्य, नापि प्रामाण्यं शास्त्रस्य इति बोध्यम्।

उपसंहरति— **तस्मादिति**। अविद्यावस्थायामेव कर्माणि चोद्यन्ते, न विद्यावस्थायामिति हेतोरित्यर्थः। आत्मविदः कर्मण्यधिकारो न, किन्तु ज्ञाननिष्ठायामेव। अयं च ज्ञाननिष्ठाधिकारोऽपि यावदात्मसाक्षात्कारमेव, पश्चात्तु अधिकार्याधिकारकयो-रेवाभावादधिकारस्यैवाभावः। न ह्यात्मा केनचित् कुत्रचिदधिक्रियते, सर्वशेषित्वादात्मनोऽविक्रियत्वाच्च। अधिकारकं शास्त्रं तु अद्वितीये आत्मनि नास्त्येव। अतः कथमधिकारसिद्धिः? न कथमपीति बोध्यम्॥ ६९॥

**आपूर्यमाणमिति।** यद्वत् आपः आपूर्यमाणमचलप्रतिष्ठं समुद्रं प्रविशन्ति, तद्वत् सर्वे कामा यं प्रविशन्ति सः शान्तिमाप्नोति,

---

१. अत्रेदं बोध्यम्—यस्मादात्मज्ञानवान् आत्मनो वर्णाश्रमवयोऽवस्थादिमत्त्वेऽश्रद्दधानो 'विधिषु श्राद्धोऽधिकारी' इति न्यायेन कर्मविधिभिर्नाधिक्रियते, तस्मात् तं प्रति कर्मविधीनामप्रामाण्यमननुष्ठापकत्वलक्षणमेव, न तु भ्रमजनकत्वलक्षणम्। यदि तु बाधितविषयकत्वादप्रामाण्यमुच्येत, तदापि ब्रह्मज्ञानेतराबाध्य-विषयकत्वलक्षणस्य व्यावहारिकप्रामाण्यस्य न क्षतिः। अतः प्रवृत्तिविशेषकरत्वाभाव एवाप्रमाणत्ववाचोयुक्तिः द्रष्टव्या।

**आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्।**
**तद्वत् कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी॥७०॥**

**प्रतिपादयिष्यन्नाह—** आपूर्येति। **आपूर्यमाणमद्भिः** अचलप्रतिष्ठम् **अचलतया प्रतिष्ठा अवस्थितिर्यस्य तमचलप्रतिष्ठं समुद्रम् आपः सर्वतो गताः प्रविशन्ति स्वात्मस्थमविक्रियमेव सन्तं यद्वत् , तद्वत्** कामाः **विषयसन्निधावपि सर्वत इच्छाविशेषाः** यं [1]**पुरुषं समुद्रमिवापोऽविकुर्वन्तः** प्रविशन्ति, **सर्वे आत्मन्येव प्रलीयन्ते, न स्वात्मवशं कुर्वन्ति, स** शान्तिं **मोक्षम् आप्नोति। नेतरः** कामकामी। **काम्यन्त इति कामा विषयाः, तान् कामयितुं शीलं यस्य स कामकामी नैव प्राप्नोतीत्यर्थः ॥७०॥**

आनन्दगिरिकृतव्याख्या

इति। **आपातज्ञानवतो विवेकवैराग्यादिविशिष्टस्य एषणाभ्यः सर्वाभ्यो व्युत्थितस्य श्रवणादिद्वारा समुत्पन्नसाक्षात्कारवतो मुख्यस्य संन्यासिनो मोक्षो, नान्यस्य विषयतृष्णापरिभूतस्येत्येतद् दृष्टान्तेन** [2]**प्रतिपादयितुमिच्छन् 'रागद्वेषवियुक्तैस्तु' इति श्लोकोक्तमेवार्थं पुनराहेति योजना। अद्भिः समुद्रस्य समन्तात्पूर्यमाणत्वे वृद्धिह्रासवती तदीया स्थितिरापतेदित्याशङ्क्याह—** अचलेति। **न हि समुद्रस्योदकात्मकं प्रतिनियतं रूपं कदाचिदपि वर्धते ह्रसते वा। तेन तदीया स्थितिरेकरूपैवेत्यर्थः।** [3]**तत्तन्नादेयाश्चेदापः समुद्रान्तर्गच्छन्ति, तर्हि तस्य विक्रियावत्त्वादप्रतिष्ठा स्यादित्याशङ्क्याह—** स्वात्मस्थमिति। **इच्छाविशेषाः विषयाणामसन्निधौ विदुषि निर्विकारेऽप्रविशन्तोऽपि सन्निधाने तस्मिन् प्रविशन्तो विकारमापादयेयुरित्याशङ्क्याह—** विषयेति। **प्रवेशं विशदयति—** सर्व इति। **'योऽकामः' इत्यादिश्रुतेर्विषयविमुखस्य निष्कामस्य मोक्षः, न कामकामुकस्येत्याह—** स शान्तिमिति॥७०॥

भाष्यार्कप्रकाशः

कामकामी शान्तिं नाप्नोति। आ समन्तात्पूर्यमाणम् **आपूर्यमाणम्**। कर्त्राकाङ्क्षां वारयति— **अद्भिरिति**। यद्वा भगवतेति कर्तुःशेषः। आपस्तु करणम्। **अचलप्रतिष्ठं** न चलतीत्यचलः, पाराभावाच्चलनरहितः। प्रतिष्ठा शाश्वती स्थितिः अस्यास्तीति प्रतिष्ठः, अर्शआद्यजन्तः। प्रतिष्ठति प्रकर्षेण शाश्वतं तिष्ठतीति प्रतिष्ठ इति पचाद्यजन्तो वा[4]। अचलश्चासौ प्रतिष्ठश्चाचलप्रतिष्ठः। अचल इति हेतुगर्भं विशेषणम्— यस्मादचलस्तस्मात् प्रतिष्ठ इति। इदं सर्वमभिप्रेत्याह— **अचलतया प्रतिष्ठा यस्य तमिति**। 'अचला प्रतिष्ठा यस्य तम्' इति व्याख्याने तु मूलाद्बहिरेव अपारत्वादिति हेतुः कल्पनीयः स्यात्। इदानीं तु अचलशब्दादर्थतः सिद्धं तदपारत्वमिति बोध्यम्। **सर्वतो गताः** सर्वतः प्राप्ताः **आपः** गङ्गादिनदीजलानि। **स्वात्मस्थं** स्वरूपस्थम्। तदेव विवृणोति— **अविक्रियमेव सन्तमिति।** समुद्रमित्यस्य विशेषणमिदम्। नदीजलप्रवेशाप्रवेशाभ्यां समुद्रस्य वृद्धिह्रासरूपो न कोऽपि स्वरूपगतो विकार इत्यर्थः। **विषयसन्निधावपीति**। अपिना विषयाणामसन्निधौ सुतरामेवास्य नास्ति कोऽपि कामकृतो विकार इति सूच्यते। केचिद् धीराः स्त्र्याद्यसन्निधौ निष्कामविकारा वर्तन्ते, तत्सन्निधौ तु कामविकारं भजन्ते इति दर्शनादाह— **विषयसन्निधावपीति**। **अविकुर्वन्तः** कमपि विकारमजनयन्तः। यतिं कामाः प्रविशन्तीत्यस्यार्थमाह— **सर्व इति। आत्मनि** [5]मनसि, कूटस्थे वा। फलितमाह— **नेति।** कामा यतिं **स्वात्मवशं** कामपरतन्त्रं न कुर्वन्ति। **शान्तिं** मोक्षं ब्रह्मेति यावत्। सर्वप्रपञ्चोपशमसम्भवाद् ब्रह्मणः शान्तिपदाभिधेयत्वम्। **यद्वा** शान्तिं सकार्यस्याज्ञानस्य निवृत्तिमित्यर्थः। सर्वदुःखनिवृत्तेर्मोक्षत्वादाह— **मोक्षमिति**॥७०॥

---

१. 'यं यतिम्' इति रा.पा.। २. अनेन 'प्रतिपिपादयिषन्नाह— ' इति भाष्यपाठः आनन्दगिरिसंमत इत्यूह्यते। ३. 'तत्तन्नादेय्यः' इति पाठः स्यात्। 'नद्यादिभ्यो ढक्' (पासू ४-२-९७) इति सूत्रविहितढगन्तस्य स्त्रियां ङ्यन्तत्वौचित्यात्। ४. पचाद्यचि तु तिष्ठादेशो दुर्लभ इति प्रतिरुपसर्गो ग्राह्यः। शप्रत्ययो वा वाच्यः, पाघ्रादिसूत्रेण तिष्ठादेशसंभवात्। ५. कामानां मनःपरिणामतया मनोधर्मत्वेन तत्र विलयौचित्यादाह—**मनसीति**।

**विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः।**
**निर्ममो निरहंकारः स शान्तिमधिगच्छति॥ ७१ ॥**

**यस्मादेवं तस्मात् —** विहायेति। विहाय **परित्यज्य कामान् यः संन्यासी पुमान्** सर्वान् **अशेषतः - कात्स्न्र्येन,** चरति, **जीवनमात्रचेष्टाशेषः पर्यटतीत्यर्थः।** निःस्पृहः **शरीरजीवनमात्रेऽपि निर्गता स्पृहा यस्य स निःस्पृहः सन् ,** [१]निर्ममः **शरीरजीवनमात्राक्षिप्तपरिग्रहेऽपि 'ममेदम्' इत्यभिनिवेशवर्जितः,** निरहङ्कारो **विद्यावत्त्वादिनिमित्तात्मसम्भावनारहित इत्यर्थः।** स **एवम्भूतः स्थितप्रज्ञो ब्रह्मवित्** शान्तिं **सर्वसंसारदुःखोपरमलक्षणां निर्वाणाख्याम्** अधिगच्छति **प्राप्नोति। ब्रह्मभूतो भवतीत्यर्थः॥ ७१ ॥**

आनन्दगिरिकृतव्याख्या

**यदि गृहस्थेनापि मनसा समस्ताभिमानं हित्वा कूटस्थं ब्रह्मात्मानं परिभावयता ब्रह्मनिर्वाणमाप्यते, प्राप्तं तर्हि मौढ्यादि [मौण्ड्यादि] विडम्बनमेवेत्याशङ्क्याह—** यस्मादिति। **शब्दादिविषयप्रवणस्य तत्तदिच्छाभेदभागिनो न मुक्तिरिति व्यतिरेकस्य सिद्धत्वात् पूर्वोक्तमन्वयं निगमयितुमनन्तरं वाक्यमित्यर्थः। अशेषविषयत्यागे जीवनमपि कथमित्याशङ्क्याह—** जीवनेति। **सम्भवद्रागद्वेषादिके देशे निवासव्यावृत्त्यर्थं चरतीति; एतद् व्याचष्टे—** पर्यटतीति। **'विहाय कामानि'त्यनेन पुनरुक्तिं[२] परिहरति—** शरीरेति। **निःस्पृहत्वमुक्त्वा निर्ममत्वं पुनर्वदन् कथं पुनरुक्तिमार्थिकीं न [३]पश्यतीत्याशङ्क्याह—** शरीरजीवनेति। **सत्यहङ्कारे ममकारस्यावश्यकत्वाद् निरहङ्कारत्वं व्याकरोति—** विद्यावत्त्वादीति। **स शान्तिमाप्नोतीत्युक्तमुपसंहरति—** स एवम्भूत इति। **संन्यासिनो मोक्षमपेक्षमाणस्य सर्वकाम-**

भाष्यार्कप्रकाशः

विहायेति श्लोकमवतारयति— **यस्मादेवं तस्मादिति।** यस्मादेवं निष्काम एव शान्तिमाप्नोति, न कामकामी, तस्मात् - कामकामिनो मोक्षाभावादित्यर्थः। यः पुमान् सर्वान् कामान् विहाय निःस्पृहो निर्ममो निरहङ्कारश्च सन् चरति स शान्तिमधिगच्छति। **यः संन्यासीति।** तस्यैव प्रकृतत्वादिति भावः। **जीवनमात्रचेष्टाशेषः** जीवनमेव जीवनमात्रम् , तत्सम्बन्धिनी चेष्टा शरीरचेष्टा जीवनमात्रचेष्टा, सैव शेषो यस्य स तथोक्तः। प्राणधारणमात्रफलकभिक्षाटनव्यापारमात्रवानित्यर्थः। चरतेर्गत्यर्थत्वादाह—**पर्यटतीति।** परितः सर्वेषु ग्रामादिषु **अटति** सञ्चरति, ग्रामैकरात्रवासित्वात् संन्यासिन इत्यर्थः।

ननु 'सर्वान् कामान् परित्यज्ये'त्यनेनैव निःस्पृहत्वं सिद्धमिति निःस्पृह इति पुनरुक्तमित्याह— **शरीरेति।** येन केनाप्युपायेन शरीरजीवनमवश्यं कर्तव्यमिति नास्ति यतेः कामः। तथा सति कृष्यादिस्तेयादिप्रसङ्गात्। किन्तु माधुकरान्नेन सरिदम्बुपानेन च क्षुत्तृडपनयनमात्रं कर्तव्यमित्येव यतिर्मन्येत। एतेन न यतेर्मरणभीतिः कार्येत्युपदिष्टम्। **निर्ममः** ममतारहितः। ननु संन्यस्तसर्वस्य क्व ममता, स्वीयस्यैवाभावाद्? अत आह— **शरीरेति।** शरीरजीवनमात्रार्थमाक्षेपतः प्राप्ते भिक्षाकपालशाट्यादिरूपेऽपि **परिग्रहे** परिगृह्यत इति परिग्रहः, तस्मिन्। **अभिनिवेशो**ऽभिमानः। **आत्मसम्भावना** स्वश्लाघा। **निर्वाणं** मोक्षः। **ब्रह्मभूतो भवति** 'ब्रह्मविद् ब्रह्मैव भवति' इति श्रुतेः ब्रह्मभावं प्राप्नोति इति।

**ननु** 'स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव। स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम्॥' इत्यर्जुनप्रश्नस्यैतावता किमुत्तरमायातमिति चेत्? **उच्यते—** सर्वकामपरित्यागः, आत्मरतिः, दुःखेष्वनुद्वेगः, सुखेषु स्पृहाऽभावः, रागभयक्रोधाभावः, सर्वत्र स्नेहाभावः, शुभप्राप्तावानन्दाभावः, अशुभप्राप्तौ द्वेषाभावः, इन्द्रियजयः, प्रत्यग्ब्रह्मपरता, समाहितचित्तत्वं, व्यवहारराहित्यं, निःस्पृहत्वं, निर्ममत्वं, निरहङ्कारत्वमित्येतानि पञ्चदश स्थितप्रज्ञस्य लक्षणानि। स्थितप्रज्ञत्वस्य साधनानि चेमानि। यस्मिन्नेतानि दृश्यन्ते स स्थितप्रज्ञ इति परैरुच्यते। स्वयं चात्मानं स्थितप्रज्ञं स विद्यात्। भिक्षायाञ्चामृते नास्य कोऽपि वाग्व्यापारः। सति तु सौम्ये

१. 'निर्मम इति ममत्ववर्जितः शरीर'इति पा.। २. निःस्पृहः इत्यस्येति शेषः। ३. 'पश्यसीत्याशङ्क्याह' इति पा.।

**एषा ब्राह्मी स्थितिः पार्थ ! नैनां प्राप्य विमुह्यति।**
**स्थित्वाऽस्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति॥७२॥**

**इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे**
**सांख्ययोगो नाम द्वितीयोऽध्यायः॥२॥**

**सैषा ज्ञाननिष्ठा स्तूयते—** एषा ब्राह्मीति। एषा **यथोक्ता** ब्राह्मी **ब्रह्मणि भवेयं स्थितिः, सर्वं कर्म संन्यस्य ब्रह्मरूपेणैवावस्थानमित्येतत्। हे पार्थ, न** एनां **स्थितिं** प्राप्य **लब्ध्वा,** न विमुह्यति **न मोहं प्राप्नोति।** स्थित्वाऽ**स्यां स्थितौ ब्राह्म्यां यथोक्तायाम्** अन्तकालेऽपि **अन्त्ये वयस्यपि** ब्रह्मनिर्वाणं **ब्रह्मनिर्वृतिं मोक्षम्** ऋच्छति **गच्छति। किमु वक्तव्यं ब्रह्मचर्यादेव संन्यस्य यावज्जीवं यो ब्रह्मण्येवावतिष्ठते स ब्रह्मनिर्वाणमृच्छतीति॥७२॥**

आनन्दगिरिकृतव्याख्या

**परित्यागादीनि श्लोकोक्तानि विशेषणानि यत्नसाध्यानि। तत्सम्पत्तिफलं तु कैवल्यमित्यर्थः॥७१॥**

**तत्र तत्र संक्षेपविस्तराभ्यां प्रदर्शितां ज्ञाननिष्ठाम्** [1]**अधिकारिप्रवृत्त्यर्थत्वेन स्तोतुमुत्तरश्लोकमवतारयति—** सैषेति। **गृहस्थः संन्यासीत्युभावपि चेन्मुक्तिभागिनौ, किं तर्हि कष्टेन सर्वथैव संन्यासेन? इत्याशङ्क्य संन्यासिव्यतिरिक्तानामन्तरायसम्भवादपेक्षितः संन्यासो मुमुक्षोरित्याह—** एषेति। **स्थितिमेव व्याचष्टे—** सर्वमिति। न विमुह्यतीति **पुनर्नञोऽनुकर्षणमन्वयार्थम्। संन्यासिनो विमोहाभावेऽपि गृहस्थो धनहान्यादिनिमित्तं प्रायेण विमुह्यति।** [2]**विचित्तः सन् परमार्थविवेकरहितो भवतीत्यर्थः।** यथोक्ता ब्राह्मी स्थितिः **सर्वकर्मसंन्यासपूर्विका ब्रह्मनिष्ठा, तस्यां** स्थित्वा **तामिमामायुषश्चतुर्थेऽपि भागे कृत्वेत्यर्थः।** अपि**शब्दसूचितं कैमुतिकन्यायमाह—** किमु वक्तव्यमिति।

भाष्यार्कप्रकाशः

शिष्ये तस्मै तत्त्वमुपदिश्यादिति[3] त्वत्रानुक्तमपि ग्राह्यमन्यतः [4]शास्त्रात्। अन्यथा सम्प्रदायविच्छेदप्रसङ्गात्। मानसिकव्यापारस्तु इन्द्रियाणां विषयेभ्यः प्रत्यावर्त्य स्ववशे स्थापनम्। आत्मस्वरूपानुसन्धानञ्च स्वस्वरूपेणावस्थानम्। कायव्यापारस्तु भिक्षार्थं पर्यटनमेव। तच्च 'चरती'त्यनेन प्रतिपादितमिति। **किञ्च** प्रश्नश्लोके 'व्रजेत किम्' इत्यस्य किं प्राप्नुयादित्यप्यर्थ आयाति, तस्य च समाधानमुक्तम्— स शान्तिमधिगच्छतीति। एतेन स्थितप्रज्ञस्य मोक्ष एव फलमिति सिद्धम्। युक्तञ्चेदम् , विद्ययैवाविद्याया नाशाद् आविद्यकसर्वसंसारोपरमात्मको मोक्षः स्थितप्रज्ञस्येति। ततश्च न कर्मिणां मोक्ष इति फलितम्। अत एव 'नास्त्यकृतः कृतेन' इति श्रुतिरुपपद्यते। 'तमेवं विदित्वाऽति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति च। कामत्यागेन्द्रियजयनिर्व्यवहारत्वादीनां गृहस्थेऽसम्भवात् तादृशसंन्यास्येव स्थितप्रज्ञ इति संक्षेपः॥७१॥

**एषेति।** ब्राह्मीति 'तत्र भवः' इति भवार्थेऽण् इत्याह— **ब्रह्मणि भवेति।** टिलोप आर्षः। न च 'ब्राह्मः' इति निपातनात् सिध्यतीति वाच्यम् ; तत्र [5]चतुर्मुखवाचिब्रह्मशब्दग्रहणात्। न च [6]तत्त्वविध्योरुभयोर्ग्रहणमिति वाच्यम् ; अनेकार्थत्वस्यान्याय्यत्वात्। न च तत्त्वस्यैव ग्रहणमिति वाच्यम् ; ब्राह्मं हविरित्यसिद्धेः, ब्रह्मदेवताकं हि ब्राह्ममित्युच्यते। ब्राह्मं हि हविः स्वयम्भुवमुद्दिश्याग्नौ निक्षिप्यते। **यद्वा** चतुर्मुखवाच्येवात्रापि ब्रह्मशब्दः। लक्षणया तु शुद्धब्रह्माभिधीयत इति ब्राह्म इति निपानाट्टिलोपः। ब्रह्मस्वरूपेणावस्थानं नाम 'ब्रह्माहम्' इति निश्चयेनावस्थानमित्यर्थः। **ब्रह्मनिर्वृतिं** ब्रह्मानन्दमित्यर्थः। अन्तकालेऽपीत्**यपि**शब्दसूचितमर्थमाह— **किमु वक्तव्यमित्यादिना। ब्रह्मण्येवेति।** ज्ञाननिष्ठायामित्यर्थः। **ब्रह्मण्यवस्थानं** ब्रह्मात्मस्वरूपानुसन्धानमिति वा।

एतेन ब्रह्मचर्यादारभ्य देहपातादर्वाग् यदा कदा वा ब्राह्मणेन संन्यसितव्यम् , संन्यस्य च सर्वकामप्रहाणादिपूर्वकं स्थितप्रज्ञा

१. अनेन ज्ञाननिष्ठास्तुतेः प्रयोजनं दर्शितम्। २. 'विक्षिप्तः' इति पा.। ३.आशिषि लिङ् । ४. 'तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय। येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्॥' (मु.उ.१.१३) इति शास्त्रात्। प्रोवाच= प्रब्रूयात्। ५. द्र. पृ. १०९। ६. तत्त्वं ब्रह्म, विधिः ब्रह्मा।

[१]इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
श्रीमद्भगवद्गीताभाष्ये द्वितीयोऽध्यायः॥२॥

आनन्दगिरिकृतव्याख्या

**तदेवं तत्त्वम्पदार्थौ, तदैक्यं वाक्यार्थः, तज्ज्ञानादेकाकिनो[२] मुक्तिः, [३]तदुपायश्च इत्येतेषामेकैकत्र श्लोके प्राधान्येन प्रदर्शितमिति [४]निष्ठाद्वयम् उपायोपेयभूतमध्यायेन सिद्धम्[५]॥७२॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते
श्रीमद्भगवद्गीताशाङ्करभाष्यव्याख्याने द्वितीयोऽध्यायः॥२॥**

भाष्यार्कप्रकाशः

सम्पादनीयेति हितोपदेशः सूचितः। न चानधिकारिणोऽर्जुनस्य कुतः संन्यासोपदेश इति वाच्यम् , तेन स्थितप्रज्ञलक्षणस्य पृष्टत्वात्। अर्जुनेन स्वस्य ज्ञाननिष्ठायामधिकाराभावस्याविदितत्वाच्च प्रश्नस्योपपत्तिः। न च 'कर्मण्येवाधिकारस्ते' इति भगवतोक्तं खल्विति वाच्यम् ; उक्तत्वेऽपि आपातत एव स्वस्य कर्माधिकारं जानाति, न तु सहेतुकं निःसंशयम्। कथमन्यथा 'ज्यायसी चेत् कर्मणः' इत्यनुपदमर्जुनः प्रष्टा इति॥७२॥

[६]**सांख्ययोगः** सांख्येन योगः सम्बन्धो यस्य स सांख्ययोगः, सांख्ययोगो ज्ञानयोगः सोऽस्मिन्नस्तीत्यर्शआद्यजन्तो वा। प्रतिपाद्यप्रतिपादकयोरभेदसम्बन्धेन सांख्ययोगप्रतिपादकस्याध्यायस्य सांख्ययोगशब्दवाच्यत्वम् , उपचारादिति वा। यद्यप्यत्र कर्मयोगोऽपि क्वचित् प्रतिपादितः, तथापि प्रायशः सांख्यस्य प्रतिपादनात् तद्व्यपदेशः।

**परमहंसपरिव्राजकेति**। कुटीचक-बहूदक-हंस-परमहंसात्मकाश्चत्वारो यतिनः। तत्र पूर्वपूर्वापेक्षया उत्तरोत्तर उत्कृष्टः ज्ञानवैराग्यादिगुणैः। परित्यज्य व्रजतीति परिव्राजकः संन्यासी। परमहंसश्चासौ परिव्राजकश्च **परमहंसपरिव्राजकः**। आचारमाचारयतीत्याचार्यः। शास्त्रोक्तं निवृत्तिधर्मं स्वयमाचरन् अन्येभ्यः **पद्मपादादिभ्यः** शिष्येभ्य उपदिशतीत्याचार्यः। पूज्यौ पादौ यस्य स पूज्यपादो गुरुः। भगवान् षड्गुणैश्वर्यसम्पन्नश्चासौ पूज्यपादश्च भगवत्पूज्यपादः। गोविन्द इति भगवत्पूज्यपादः **गोविन्दभगवत्पूज्यपादः**। तस्य शिष्यः। **श्रीमान्** ज्ञानवैराग्यादिसम्पच्छाली। भगवन्तौ पादौ यस्य स भगवत्पादः। आत्मगुणस्य भगस्य पादे आरोपः। पद्यते गम्यते सेव्यत इति पादः, भगवतामपि पद्मपादादीनां पाद भगवत्पादः इति वा। भगवतः शङ्करस्य पादोंऽशः भगवत्पाद इति वा, शिवावतारत्वादस्य। भगवन्तं परमात्मानं पद्यते जानाति, पादयति बोधयतीति वा भगवत्पादः। शङ्कर इति भगवत्पादः **शङ्करभगवत्पादः**। विशेष्यमिदम् , प्राचीनानि तु विशेषणानि प्रथमान्तानि, अनेन साकं तेषामभेदेन सम्बन्धः, विशेषणानामपि परस्परमभेदसम्बन्धात् समासः 'विशेषणं विशेष्येण' इति सूत्रे बहुलग्रहणात् सिध्यति, केषुचिद् विशेषणेषु विशेष्यत्वारोपादिति वा। क्रियत इति कृतिः, भगवत्पादस्य कृतिः भगवत्पादकृतिः, तस्याम् ; तेन कृते इत्यर्थः। श्रीयुक्तो भगवान् श्रीभगवान् भगान्तःपातिन्या अपि श्रियः पृथग्ग्रहणं प्राशस्त्यार्थं प्राधान्यार्थं वा। इन्दिरावानिति वा। तस्य गीताः श्रीभगवद्गीताः कर्तरि षष्ठीसमासः। तत्कर्तृकगीता इत्यर्थः। गीयन्त इति गीताः श्लोकाः, तासां भाष्ये ग्रन्थे द्वितीयोऽध्यायः, **इति** समाप्तः।

**॥इति बेल्लङ्कोण्डोपनामकरामकविकृतौ श्रीभगवद्गीताभाष्यार्कप्रकाशे
द्वितीयोऽध्यायः॥**

[७][कीलकसंवत्सरकार्तिकबहुलसप्तम्यामस्य समाप्तिः]

---

१. **इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छङ्करभगवत्पादकृतौ श्रीभगवद्गीताभाष्ये द्वितीयोऽध्यायः॥** इति रीत्या पाठः रामकविसंमतः। एवमग्रेऽपि। २. एकाकिनः= कर्मणा असमुच्चितादित्यर्थः। ३. ज्ञानोपाय इत्यर्थः। ४. ज्ञाननिष्ठा मुक्त्युपायभूतोपेया, तदुपायः कर्मयोगनिष्ठा। ५. अत्र पङ्क्तितात्पर्यं तु 'तदनेन द्वितीयाध्यायेन तत्पदलक्ष्यं परमात्मानमेव त्वंपदलक्ष्यत्वेन प्रतिपादयता साक्षाच्छोकमोहनिवृत्तिहेतुभूतां ज्ञाननिष्ठां लक्षणसहितां प्राधान्येन, तदुपायभूतां योगनिष्ठां च गुणभावेन प्रदर्शयता उपायोपेयभूतं निष्ठाद्वयं प्रकाशितम्।' इति भाष्योत्कर्षदीपिकया विशदीकृतम्। ६. 'सांख्ययोगो नाम द्वितीयोऽध्यायः' इत्येतद् व्याचष्टे—**सांख्ययोग** इत्यादिना। ७. इदं ग्रन्थकृतैव लिखितं स्यादिति संभाव्य ग्रन्थानन्तर्गतत्वेऽपि स्थापितम्।

ॐ श्रीपरमात्मने नमः

# ॥ अथ तृतीयोऽध्यायः ॥

**अर्जुन उवाच—**

**ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन !।**
**तत् किं कर्मणि घोरे मां नियोजयसि केशव !॥ १॥**

**शास्त्रस्य [१]प्रवृत्तिनिवृत्तिविषयभूते द्वे बुद्धी भगवता निर्दिष्टे - साङ्ख्ये बुद्धिर्योगे बुद्धिरिति च। तत्र 'प्रजहाति यदा कामान्'(भ.गी.२.५५) इत्यारभ्य आ अध्यायपरिसमाप्तेः साङ्ख्यबुद्ध्याश्रितानां संन्यासं कर्तव्यमुक्त्वा, तेषां तन्निष्ठतयैव च कृतार्थतोक्ता—'एषा ब्राह्मी स्थितिः' (भ.गी.२.७२) इति। अर्जुनाय च 'कर्मण्येवाधिकारस्ते....मा ते सङ्गो ऽस्त्वकर्मणि'(भ.गी.२.४७) इति कर्मैव कर्तव्यमुक्तवान् योगबुद्धिमाश्रित्य। न तत एव श्रेयःप्राप्तिमुक्तवान्। तदेतद् आलक्ष्य पर्याकुलीभूतबुद्धिः अर्जुन उवाच। कथं[२] भक्ताय श्रेयोऽर्थिने यत् साक्षाच्छ्रेयःप्राप्तिसाधनं साङ्ख्यबुद्धिनिष्ठां**

## अनुभूतिस्वरूपाचार्यविरचितगीताभाष्यटिप्पणम्

वृत्तानुवादपूर्वकं प्रष्टुरर्जुनस्याभिप्रायमाह—**शास्त्रस्येत्यादिना**। **पारम्पर्येणापि** अन्तःकरणशुद्धिद्वारेणापि अस्मिन्नेव

## आनन्दगिरिकृतव्याख्या

**पूर्वोत्तराध्याययोः सम्बन्धं वक्तुं पूर्वस्मिन्नध्याये वृत्तमर्थं संक्षिप्यानुवदति—** शास्त्रस्येति। **गीताशास्त्रप्रारम्भापेक्षितं हेतुफलभूतं बुद्धिद्वयं भगवतोपदिष्टमित्यर्थः। प्रष्टुरर्जुनस्याभिप्रायं निर्देष्टुं [३]प्रवृत्तमर्थान्तरमनुवदति—** तत्रेति। **अध्यायः, बुद्धिद्वयनिर्धारणं वा सप्तम्यर्थः। पारमार्थिके तत्त्वे यज्ज्ञानं तन्निष्ठानाम् अशेषकामत्यागिनाम् , कामयुक्तानां कर्मिणामपि प्रतिपत्तिकर्मवत् त्यागं कर्तव्यत्वेन भगवानुक्तवानित्यर्थः। तथापि मोक्षसाधने विकल्पसमुच्चययोरन्यतरस्य विवक्षितत्वबुद्ध्या समनन्तरप्रश्नप्रवृत्तिरित्याशङ्क्याह—** [४]उक्तेति। **अर्जुनस्य मनसि व्याकुलत्वं प्रश्नबीजं दर्शयितुम् उक्तमर्थान्तरमनुभाषते—** अर्जुनाय चेति। **साङ्ख्यबुद्धिमाश्रित्य कर्मत्यागमुक्त्वा पुनः [५]तस्यैव कर्तव्यत्वं कथं मिथो विरुद्धं ब्रवीतीत्याशङ्क्याह—** योगेति। **यथा साङ्ख्यबुद्धिमाश्रितानां संन्यासद्वारा तन्निष्ठानां कृतार्थतोक्ता, तथा योगबुद्धिमाश्रित्य कर्म कुर्वतोऽपि कृतार्थत्वमुक्तमित्याशङ्क्याह—** न तत एवेति। **'दूरेण ह्यवरं कर्म बुद्धियोगाद्' इति दर्शनादिति शेषः। बुद्धिव्याकुलत्वं प्रश्नबीजं प्रतिलभ्य प्रश्नं करोतीत्याह—** तदेतदिति। **साक्षादेव श्रेयःसाधनं ज्ञानमन्येभ्यो दर्शितं** तदित्युच्यते। **तद्विपरीतं कर्म स्वस्यानुष्ठेयत्वेनोक्तम्** एतदिति **निर्दिश्यते। भगवदुक्तेऽर्थे [६]सन्दिह्यमानस्य निर्णयाकाङ्क्षया प्रश्नप्रवृत्तेः अस्ति पूर्वोत्तराध्याययोः उत्थाप्योत्थापकलक्षणा सङ्गतिरित्यर्थः। अर्जुनस्य प्रश्ननिमित्तं पर्याकुलत्वं प्रपञ्चयति—** कथमित्यादिना। **यद्धि साक्षादेव श्रेयःसाधनं**

## श्रीबेल्लंकोण्डरामरायकविविरचितः
## भाष्यार्कप्रकाशः

'ज्यायसी चेद्' इति श्लोकमवतारयति—**शास्त्रस्येत्यादिना**। शास्त्रस्येति प्रतिपाद्यप्रतिपादकभावरूपे सम्बन्धे शेषे षष्ठी। शास्त्र-प्रतिपाद्यप्रवृत्तिनिवृत्तिविषयभूते इत्यर्थः। शास्त्रस्य प्रवृत्तौ निवृत्ताविति वाऽर्थः। प्रवृत्तिमार्गे शास्त्रापेक्षाऽस्ति, न तु निवृत्तिमार्गे इति कृत्वा ज्ञानयोगे शास्त्रमेव निवर्तत इत्यर्थः। 'साङ्ख्ये' 'योगे' इति च विषयसप्तम्यौ। **तन्निष्ठतया** संन्यासनिष्ठतया, ज्ञानयोगनिष्ठतयेति वा। **ततः** कर्मयोगात् श्रेयःप्राप्तिं नैवोक्तवान्। **भक्ताय श्रेयोऽर्थिन इति**। **श्रेयो** मोक्षः, **तदर्थित्वं** तत्कामित्वम्। तस्मिन् सत्यप्यभक्ताय नोपदिशेद् गुह्यमिति **भक्तायेत्युक्तम्**। **भक्तत्वं** पूज्येऽनुरागित्वम्। तस्मिन् सत्यपि कामकामाय नोपदिशेदित्येतदर्थं **श्रेयोऽर्थिने** इत्युक्तम्। **अनैकान्तिकं** व्यभिचारि श्रेयःप्राप्तिरूपं फलं यस्मिन् तस्मिन् तथोक्ते। **पर्याकुलभूतो** व्याकुलः, भूतशब्दस्यात्र

---

१. 'प्रवृत्तिविषयभूते' इति पा.। तदेवानन्दगिरीयानुगुणं भाति। २. कथमित्यस्य नियुङ्क्ष्यादित्यनेन संबन्धः। ३. वृत्तम् इत्येव विवक्षितम्। ४. 'तन्निष्ठतयैव च कृतार्थतोक्ता' इत्यत्र एवकारेण शङ्कितविकल्पसमुच्चययोर्व्यावृत्तिरिति भावः। ५. कर्मण एवेत्यर्थः। कथं ब्रवीतीत्यन्वयः। ६. 'सन्दिहानस्य' इति स्यात्।

**श्रावयित्वा, मां कर्मणि दृष्टानेकानर्थयुक्ते पारम्पर्येणाप्यनैकान्तिकश्रेयःप्राप्तिफले नियुञ्ज्यादिति युक्तः [1]पर्याकुलीभावो ऽर्जुनस्य। तदनुरूपश्च प्रश्नो 'ज्यायसी चेत्' इत्यादिः। [2]प्रश्नापाकरणवाक्यं च [3]भगवतो युक्तं [4]यथोक्तविभागविषये शास्त्रे।**

[वृत्तिकारकृतव्याख्यानिरासः]

**केचित्तु— अर्जुनस्य प्रश्नार्थमन्यथा कल्पयित्वा तत्प्रतिकूलं भगवतः प्रतिवचनं वर्णयन्ति। यथा चात्मना सम्बन्धग्रन्थे गीतार्थो निरूपितः, तत्प्रतिकूलं चेह पुनः प्रश्नप्रतिवचनयोरर्थं निरूपयन्ति। कथम्? तत्र सम्बन्धग्रन्थे**

अनुभूतिस्वरूपाचार्यटिप्पणम्

जन्मनि कर्मफलनियमो [न] भवतीति **अनैकान्तिकफलत्वमुक्तम्**।

यत् साक्षात् श्रेयःसाधनं तदन्येभ्यः प्रोक्तम् , न मह्यमिति मत्वा व्याकुलीभूतः पृच्छतीति स्वाभिप्रायेण सम्बन्धमभिधाय पराभिप्रायं दूषयति— **केचित्तु अर्जुनस्येत्यादिना**। समुच्चयानवधारणनिमित्ते हि प्रश्ने समुच्चयावधारणेन प्रतिवचनमनुकूलं स्यात्। तच्च न भगवता कृतमित्यसामञ्जस्यमित्यर्थः। न केवलं प्रश्नप्रतिवचनयोरसामञ्जस्यम् , किन्तु तेषां स्वग्रन्थेऽपि पूर्वापरसामञ्जस्यं नास्तीत्याह— **यथा चात्मनेति**। तदेव विवृणोति— **कथमित्यादिना**। आद्ये सम्बन्धग्रन्थे समुच्चय

आनन्दगिरि व्याख्या

**साङ्ख्यशब्दितपरमार्थतत्त्वविषयबुद्धौ निष्ठारूपं, तद् अन्यस्मै श्रेयोऽर्थिने भक्ताय श्रावयित्वा, मां पुनरभक्तमश्रेयोऽर्थिनमिव कर्मणि पूर्वोक्तविपरीते कथं भगवान् नियोक्तुमर्हतीत्यर्जुनस्य पर्याकुलीभावो युक्त इति सम्बन्धः। ज्ञाननिष्ठातो वैपरीत्यं स्फोरयितुं कर्म विशिनष्टि—** दृष्टेति। **युद्धे हि क्षत्रकर्मणि दृष्टोऽनेकोऽनर्थो गुरुभ्रातृहिंसादिः, तेन सम्बद्धे , बुद्धिशुद्धिद्वाराऽपि वर्तमाने जन्मन्येव फलमित्यनियते मम भक्तस्य श्रेयोऽर्थिनो नियोगो** [5]भगवता युक्तो **न भवतीति शेषः। यथोक्तं निमित्तं प्रश्नस्य युक्तम् , तदनुगुणत्वात् तस्येति द्योतकमाह—** तदनुरूपश्चेति। **ज्ञाननिष्ठानां कृतार्थता, कर्मनिष्ठानां तु न तथेत्युक्तविभागभागि शास्त्रमित्यत्र 'लोकेऽस्मिन्' इत्यादिवाक्यस्यापि द्योतकत्वं दर्शयति—** प्रश्नेति।

**साक्षादेव श्रेयःसाधनमन्येभ्यो भगवतोक्तम् , न तु मह्यमिति मत्वा [6]व्याकुलीभूतः सन् पृच्छतीति स्वाभिप्रायेण सम्बन्धमुक्त्वा,** वृत्तिकारा**भिप्रायं दूषयति—** केचित्त्विति। **ज्ञानकर्मणोः समुच्चयमवधारयितुं प्रश्नाङ्गीकारे समुच्चयावधारणेनैव प्रतिवचनमुचितम्। न च तथा भगवता प्रतिवचनमुक्तम्। तथा च प्रश्नस्य समुच्चयविषयत्वोपगमात् , प्रत्युक्तेश्चासमुच्चयविषयत्वात् तयोर्मिथो विरोधो** वृत्तिकारमते **स्यादित्यर्थः। किञ्च केवलं प्रश्नप्रतिवचनयोरेव परमते परस्परविरोधो न भवति, अपितु परेषां स्वग्रन्थेऽपि पूर्वापरविरोधोऽस्तीत्याह—** यथा चेति। आत्मना **वृत्तिकारैरिति यावत्।** सम्बन्धग्रन्थो **गीताशास्त्रारम्भोपोद्घातः।** इहेति **तृतीयाध्यायारम्भं परामृशति। तदेव विवृण्वन्नाकाङ्क्षामाह—** कथमिति। **पूर्वापरविरोधं स्फोरयितुं सम्बन्धग्रन्थोक्तमनुवदति—** तत्रेति। **परकीया वृत्तिः सप्तम्या समुल्लिख्यते।**

भाष्यार्कप्रकाशः

स्वरूपवाचित्वेनानतिरिक्तार्थत्वात्। **भावो**ऽभिप्रायः, बुद्धिरिति यावत्। **प्रश्नोपकरणं** प्रश्नस्योत्तरम्। **भागवतं** कृष्णसम्बन्धि। यथोक्तः विषयविभागो यस्मिन् तस्मिन् शास्त्रे। 'लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ। ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्॥' इति ज्ञानिकर्मिणोः साङ्ख्ययोगात्मको विषयविभागः।

**केचित्तु** वृत्तिकारा इत्यर्थः। **अन्यथेति**। 'यदि बुद्धिकर्मणोः समुच्चयान्मोक्ष इति तव मतम् , तत्रापि कर्मापेक्षया बुद्धिरेव ज्यायसीति, तर्हि हे कृष्ण! किमिति मां कर्मण्येव केवले नियोजयसी'त्यर्जुनस्य प्रश्नार्थं कल्पयित्वा तत्प्रश्नप्रतिकूलं भगवतः प्रतिवचनं वर्णयन्ति— 'ज्ञानयोगेन साङ्ख्यानाम् , कर्मयोगेन योगिनां च सिद्धि'रिति। **सम्बन्धग्रन्थः** अवतारिकाग्रन्थः, उपोद्घात इति यावत्।

१. 'पर्याकुलभूतो भावः' इति रा.पा.। २. 'प्रश्नोपकरणं च वाक्यं भागवतं युक्तम्' इति रा.पा.। ३. 'भगवतोक्तं' इति पा.। ४. 'यथोक्तविषयविभागे' इति रा.पा.।
५. 'भगवतो युक्तः' इति पा.। ६. 'आकुलीभूतः' इति पा.।

**तावत् सर्वेषामाश्रमिणां ज्ञानकर्मणोः समुच्चयो गीताशास्त्रे [१]निरूपितोऽर्थ इत्युक्तम्। पुनर्विशेषितं च—यावज्जीवश्रुति-चोदितानि कर्माणि परित्यज्य केवलादेव ज्ञानान्मोक्षः प्राप्यत इत्येतदेकान्तेनैव प्रतिषिद्धमिति। इह त्वाश्रमविकल्पं दर्शयता यावज्जीवश्रुतिचोदितानामेव कर्मणां परित्यागः उक्तः। तत् कथमीदृशं विरुद्धमर्थमर्जुनाय ब्रूयाद् भगवान् ? श्रोता वा कथं विरुद्धमर्थमवधारयेत् ?**

**तत्रैतत् स्यात्— गृहस्थानामेव श्रौतकर्मपरित्यागेन केवलादेव ज्ञानान्मोक्षः प्रतिषिध्यते, न त्वाश्रमान्तराणा-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

एव गीताप्रतिपाद्यः प्रतिज्ञातः। विशेषितश्च[विशेषतश्च] श्रौतकर्मत्यागो निषिद्धः त्वया। तृतीयाध्याये पुनः— संन्यासिनां ज्ञाननिष्ठा, कर्मिणां कर्मनिष्ठेत्याश्रमविभागं दर्शयता स एव पूर्वप्रतिषिद्धः कर्मत्यागः अभ्युपगतः इत्यसामञ्जस्यमित्यर्थः। ननु नायं **वृत्तिकारस्या**पराधः, यथा भगवता प्रतिपादितं तथैव व्याख्यातमित्याशङ्क्याह— **तत् कथमीदृशमिति।** भगवान् विरुद्धाभिधायी न भवति, किन्तु तस्याभिप्रायापरिज्ञानादेव विरोधप्रतिभानमित्यर्थः।

इदानीं विरोधं परिहरति— **तत्रैतत् स्यादिति। तत्र** सम्बन्धग्रन्थे **एतद**भिप्रेतं स्यात्— गार्हस्थ्ये स्थित एवापरिपक्व-

आनन्दगिरिकृतव्याख्या

**सम्बन्धग्रन्थे तावदयमर्थ उक्तः इति सम्बन्धः। तमेवार्थं विशदयति—** सर्वेषामिति। **सर्वकर्मसंन्यासपूर्वकज्ञानादेव केवलात् कैवल्यमित्यस्मिन्नर्थे शास्त्रस्य पर्यवसानान्न समुच्चयो विवक्षितस्तत्रेत्याशङ्क्याह—** पुनरिति। **उक्तगीतार्थो** वृत्तिकारैरेव **कर्मत्यागायोगेन विशेषितत्वान्नाविवक्षितोऽलं भवितुमुत्सहते। तथा च श्रौतानि कर्माणि त्यक्त्वा ज्ञानादेव केवलान्मुक्तिर्भवतीत्येतन्मतं नियमेनैव यावज्जीवश्रुतिभिर्विप्रतिषिद्धत्वान्नाभ्युपगन्तुमुचितमित्यर्थः। तथापि कथं मिथो विरोधधीरित्याशङ्क्याह—** इह त्विति। **प्रथमतो हि सम्बन्धग्रन्थे समुच्चयो गीताप्रतिपाद्यत्वेन** वृत्तिकृता **प्रतिज्ञातः। श्रौतकर्मपरित्यागश्च श्रुतिविरोधादेव न सम्भवतीत्युक्तम्। तृतीया-ध्यायारम्भे पुनः संन्यासिनां ज्ञाननिष्ठा, कर्मिणां कर्मनिष्ठेत्याश्रमविभागमभिदधता[२] पूर्वप्रतिषिद्धकर्मत्यागाभ्युपगमान्मिथो विरोधो दर्शितः स्यादित्यर्थः। ननु यथा भगवता प्रतिपादितम् , तथैव** वृत्तिकृता **व्याख्यातमिति न तस्यापराधोऽस्तीत्याशङ्क्याह—** तत्कथमिति। **न हीह भगवान् विरुद्धमर्थमभिधत्ते, सर्वज्ञस्य परमाप्तस्य विरुद्धार्थवादित्वायोगात् , किन्तु तदभिप्रायापरिज्ञानादेव व्याख्यातुः विरुद्धार्थवादिते-त्यर्थः। भगवतो विरुद्धार्थवादित्वाभावेऽपि श्रोतुर्विरुद्धार्थप्रतिपत्तिं प्रतीत्य व्याचक्षाणो** वृत्तिकारो **नापराध्यतीशङ्क्याह—** श्रोता वेति। **अर्जुनो हि श्रोता। सोऽपि बुद्धिपूर्वकारी भगवदुक्तमेवावधारयन् न विरुद्धमर्थमवधारयितुमर्हति। तथा च [३]परस्यैव विरुद्धार्थवादितेत्यर्थः।**

**विरोधं परिहरन्नाशङ्कते—** तत्रेति। **सम्बन्धग्रन्थे हि** वृत्तिकारस्यै**तदभिप्रेतम्— गृहस्थानामेव सतां परिपक्वज्ञानमन्तरेण यावज्जीवश्रुतिचोदिताग्निहोत्रादित्यागेन केवलादेवापातिकादात्मज्ञानान्मोक्षमपेक्षमाणानां यावज्जीवादिशास्त्रैरसौ निषिध्यते, न तु**

भाष्यार्कप्रकाशः

**आत्मना** स्वेन, वृत्तिकारैरित्यर्थः। तदेव विवरीतुमाकाङ्क्षामाह— **कथमिति।** उत्तरयति— **तत्रेति। विशेषितः** विशेषेणोक्तः। **आश्रमविकल्पमिति** गृहस्थसंन्यासाश्रमद्वयविकल्पम्। 'यावज्जीवमग्निहोत्रं जुहुयादि'ति श्रुतिः **यावज्जीवश्रुतिः। उक्त इति** संन्यासे[४] इति भावः। गीताशास्त्रे यावज्जीवश्रुतिचोदितकर्मरहिताज्ज्ञानान्नास्त्येव मोक्षः इति पूर्वं विशेषतः प्रतिपाद्य, ज्ञानयोगेन साङ्ख्यानां श्रेयःप्राप्तिरिति संन्यासिनां कथं यावज्जीवश्रुतिचोदितकर्मरहिताज्ज्ञानान्मोक्षः इत्युच्येत? न कथमपीत्यर्थः।

शङ्कते—**तत्रैतत् स्यादिति।** तत्र एतदुत्तरं स्यादित्यर्थः। किं तद्? अत आह— **गृहस्थानामिति। आश्रमान्तराणां** संन्यासादीनाम्। ननु 'ज्ञानयोगेन साङ्ख्याना'मिति संन्यासिनां केवलाज्ज्ञानान्मोक्षः, न त्वाश्रमान्तराणामित्यस्य 'सर्वाश्रमाणां

---

१. 'निश्चितोऽर्थः' इति पा.। २. अनेन भाष्ये **आश्रमविकल्प**शब्दस्य संन्यासिगृहस्थभेदेन निष्ठाद्वयविभागः इत्यर्थो विवृतः। पूर्वोत्तरविरोधं स्फुटयति—पूर्वेति। पूर्वं प्रतिषिद्धः यः कर्मत्यागः, तदभ्युपगमादित्यर्थः। ३. **परस्य** वृत्तिकारस्येत्यर्थः। ४. संन्यासे सर्वकर्मणां परित्यागः उक्तः इति संबन्धः।

**मिति। एतदपि पूर्वोत्तरविरुद्धमेव। कथम्? सर्वाश्रमिणां ज्ञानकर्मणोः समुच्चयो गीताशास्त्रे निश्चितोऽर्थ इति प्रतिज्ञाय इह कथं तद्विरुद्धं केवलादेव ज्ञानान्मोक्षं ब्रूयादाश्रमान्तराणाम् ?**

**अथ मतम् - श्रौतकर्मापेक्षयैतद्वचनम् 'केवलादेव ज्ञानाच्छ्रौतकर्मरहिताद् गृहस्थानां मोक्षः प्रतिषिध्यते' इति। तत्र गृहस्थानां विद्यमानमपि स्मार्तं कर्माविद्यमानवदुपेक्ष्य[१] ज्ञानादेव केवलादित्युच्यत इति। एतदपि विरुद्धम्। कथम्? गृहस्थस्यैव स्मार्तकर्मणा समुच्चिताज्ज्ञानान्मोक्षः प्रतिषिध्यते, न त्वाश्रमान्तराणामिति कथं विवेकिभिः शक्यमवधारयितुम्?**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ज्ञानावष्टम्भेनालस्याद्वा यः कर्मत्यागः स एव प्रतिषिद्धो, न तु स्वरूपेणैव कर्मत्यागः प्रतिषिद्धः। इह त्वन्येषां संन्यासिनां केवलज्ञानान्मोक्ष इत्युच्यत इति भिन्नविषयत्वादविरोध इत्यर्थः। प्रकारान्तरेण विरोधमुपपादयन् दूषयति— **एतदपि पूर्वोत्तरेत्यादिना।**

श्रौतं कर्म गृहस्थानामवश्यमनुष्ठेयमित्यनेनाभिप्रायेण केवलज्ञानान्मोक्षप्रतिषेधवचनम् , न तु गृहस्थानां केवलज्ञानान्मोक्षप्राप्तिप्रतिषेधाद् अन्येषां केवलज्ञानान्मोक्षोऽभिप्रेतः। विद्यत एव तु स्मार्तेन कर्मणाऽन्येषामपि समुच्चय इत्यभिप्रेत्याह— **अथ मतमित्यादिना।** ननु अग्निहोत्रादिश्रौतकर्मराहित्येऽपि कथं ज्ञानस्य केवलत्वं गृहस्थानां स्मार्ते कर्मणि सतीत्याशङ्क्याह— **तत्र गृहस्थानामिति।** श्रौतस्य प्राधान्यात् स्मार्तस्याविद्यमानवद्भावः। पक्षपाते कारणाभावं मन्वानः परिहरति— **एतदपि विरुद्धमित्यादिना।**

आनन्दगिरिकृतव्याख्या

**स्वरूपेणैव कर्मत्यागो ज्ञानान्मोक्षो वा निषेद्धुमिष्यते। तृतीये पुनरध्याये कर्मत्यागिनां गृहस्थेभ्यो व्यतिरिक्तानामेव केवलादात्मज्ञानाद् मोक्षो विवक्ष्यते। अतो भिन्नविषयत्वान्निषेधाभ्यनुज्ञानयोर्न विरोधाशङ्केत्यर्थः। विधान्तरेण विरोधं दर्शयन्नुत्तरमाह—** एतदपीति। **विरोधमेवाकाङ्क्षाद्वारा साधयति—** कथमित्यादिना।

**श्रौतं कर्म गृहस्थानामवश्यमनुष्ठेयमित्यनेनाभिप्रायेण तेषां केवलादात्मज्ञानान्मोक्षो निषिध्यते, न तु - गृहस्थानां ज्ञानमात्रायत्तं मोक्षं प्रतिषिध्य, अन्येषां केवलज्ञानाधीनो मोक्षो - विवक्ष्यते, आश्रमान्तराणामपि स्मार्तेन कर्मणा समुच्चयाभ्युपगमादिति चोदयति—** अथेति। **एतत्पदपरामृष्टं वचनमेवाभिनयति—** केवलादिति। **ननु गृहस्थानां श्रौतकर्मराहित्येऽपि, सति स्मार्ते कर्मणि कुतो ज्ञानस्य केवलत्वं लभ्यते येन निषेधोक्तिरर्थवती? तत्राह—** तत्रेति। **प्रकृतवचनमेव सप्तम्यर्थः। प्रधानं हि श्रौतं कर्म, तद्राहित्ये सति स्मार्तस्य कर्मणः सतोऽप्यसद्भावमभिप्रेत्य ज्ञानस्य केवलत्वमुक्तमिति युक्ता निषेधोक्तिरित्यर्थः। गृहस्थानामेव श्रौतकर्मसमुच्चयो, नान्येषाम् ; [२]अन्येषां तु स्मार्तेनेति पक्षपाते हेत्वभावं मन्वानः सन् परिहरति—** एतदपीति। **तमेव हेत्वभावं प्रश्नद्वारा विवृणोति—** कथमित्यादिना। **गृहस्थानां श्रौतस्मार्तकर्मसमुच्चितं ज्ञानं मुक्तिहेतुरित्यभ्युपगमात् , केवलस्मार्तकर्मसमुच्चितात् ततो न मुक्तिरिति निषेधो युज्यते; ऊर्ध्वरेतसां तु स्मार्तकर्ममात्रसमुच्चिताज्ज्ञानान्मुक्तिरिति विभागे नास्ति हेतुरित्यर्थः।**

भाष्यार्कप्रकाशः

ज्ञानकर्मसमुच्चयः' इति वचनव्याघातेन दुष्टत्वे, तर्हि 'केवलाद्' इत्यस्य श्रौतकर्मरहितादित्यर्थो वाच्यः। तथा च श्रौतकर्मरहिताज्ज्ञानात् संन्यासिनां मुक्तिः, गृहस्थानां तु नेति वाच्यम् ; अस्मिन् मते च सर्वाश्रमाणां ज्ञानकर्मसमुच्चयादेव मुक्तिरिति वचनस्य न व्याघातः। स्मार्तसमुच्चिताज्ज्ञानात् संन्यासिनां, श्रौतस्मार्तोभयकर्मसमुच्चिताद् गृहस्थानां च मुक्तिरिति सिद्धत्वादिति शङ्कते— **अथ मतमित्यादिना।** परिहरति— **एतदपीति।** गृहस्थानामेवम् , संन्यासिनां तु नैवमिति विवेको दुर्लभ इत्यर्थः।

---

१. 'अनपेक्ष्य' इति पा.। २. गृहस्थभिन्नानामाश्रमिणामित्यर्थः। **स्मार्तेनेति।** कर्मणा समुच्चय इति शेषः।

**किञ्च यदि मोक्षसाधनत्वेन स्मार्तानि कर्माण्यूर्ध्वरेतसां समुच्चीयन्ते, तथा गृहस्थस्यापीष्यतां स्मार्तैः एव समुच्चयो, न श्रौतैः। अथ श्रौतैः स्मार्तैश्च गृहस्थस्यैव समुच्चयो मोक्षाय, ऊर्ध्वरेतसां तु स्मार्तकर्ममात्रसमुच्चिता-ज्ज्ञानान्मोक्ष इति। तत्रैवं सति [१]गृहस्थस्यायासबाहुल्याच्छ्रौतं स्मार्तं च बहु दुःखरूपं कर्म शिरस्यारोपितं स्यात्।**

**अथ [२]गृहस्थस्यैवायासबाहुल्यकरणाद् मोक्षः स्यात् , नाश्रमान्तराणाम् , श्रौतनित्यकर्मरहितत्वादिति। तदप्यसत्। सर्वोपनिषत्सु इतिहासपुराणयोगशास्त्रेषु च ज्ञानाङ्गत्वेन मुमुक्षोः सर्वकर्मसंन्यासविधानाद् , आश्रम-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

पूर्वं पक्षपाते कारणं नास्तीत्युक्तम् , इदानीम्— गृहस्थानामपि ब्रह्मज्ञानं स्मार्तेनैव समुच्चितं मोक्षसाधनम् , ब्रह्मज्ञानत्वात् , संन्यासिब्रह्मज्ञानवत् इति वैपरीत्याकरणं[वैपरीत्यकारणं] विद्यत इत्याह— **किञ्च यदीत्यादिना**। इदानी-माश्रमकर्मग्रहणमात्रेण पराभिप्रायं दूषयति— **अथ श्रौतैः स्मार्तैश्चेत्यादिना।**

कर्मभूयस्त्वात् फलभूयस्त्वमिति न्यायमभिसन्धायाह— **अथ गृहस्थस्येत्यादिना**। 'त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदम्' 'नान्यत्र कर्मसंत्यागान्मोक्षं विन्दति मानवः' इत्यादिशास्त्रविरोधाद् न्यायस्यावकाशो नास्तीत्याह—

आनन्दगिरिकृतव्याख्या

**पक्षपाते कारणं नास्तीत्युक्त्वा, पक्षपातपरित्यागे कारणमस्तीत्याह—** किञ्चेति। **गृहस्थानामपि ब्रह्मज्ञानं स्मार्तैः एव कर्मभिः समुच्चितं मोक्षसाधनम् , ब्रह्मज्ञानत्वाद् , ऊर्ध्वरेतस्सु व्यवस्थितब्रह्मज्ञानवदिति पक्षपातत्यागे हेतुं स्फुटयति—** यदीत्यादिना। **यदि गृहस्थानां ब्रह्मज्ञानं स्मार्तैः एव कर्मभिः समुच्चितं मोक्षहेतुरिति विवक्षितम् , तदा तान् प्रति यावज्जीवश्रुतिर्विरुध्येत। यदि स्मार्तैरपि कर्मभिः समुच्चितं तदीयं ज्ञानं मोक्षसाधनं विवक्ष्यते, तदा सिद्धसाध्यतेति प्रागुक्तमभिप्रेत्य चोदयति—**अथेति। **आश्रमान्तराणां तर्हि केवलादेव ज्ञानान्मुक्तिरिति प्रागुक्तविरोधतादवस्थ्यमित्याशङ्क्याह—** ऊर्ध्वरेतसां त्विति। **यथोक्ते विभागे गार्हस्थ्यं क्लेशात्मकं कर्म-बाहुल्यादनुपादेयमापद्येतेति दूषयति—** तत्रेति।

**साधनभूयस्त्वे फलभूयस्त्वमिति न्यायमाश्रित्य शङ्कते—**अथेति। **क्लेशबाहुल्योपेतं श्रौतं स्मार्तं च बहु कर्म, तस्यानुष्ठानाद् गृहस्थस्य मोक्षः स्यादेवेत्यर्थः। एवकारनिरस्यं दर्शयति—**नाश्रमान्तराणामिति। **तेषां नास्ति मुक्तिरित्यत्र यावज्जीवादिश्रुतिविहिता-वश्यानुष्ठेयकर्मराहित्यं हेतुं सूचयति—** श्रौतेति। **शास्त्रविरोधिन्यायस्य [३]निरवकाशत्वमभिप्रेत्य दूषयति—** तदपीति। **ऐकाश्रम्यस्मृत्या गार्हस्थ्यस्यैव प्राधान्यादनधिकृतान्धादिविषयं कर्मसंन्यासविधानमित्याशङ्क्याह—** ज्ञानाङ्गत्वेनेति। **न खल्वनधिकृतानामन्धादीनां**

भाष्यार्कप्रकाशः

दोषान्तरमाह— **किञ्चेति**। यदेव ज्ञानं स्मार्तकर्मसमुच्चितं सत् संन्यासिनां मुक्तिप्रदम् , तदेव तथाविधं गृहस्थानामपि मुक्तिप्रदं भवतु , किं पुनः श्रौतकर्मणामपि समुच्चयेनेत्यर्थः। ननु संन्यासगृहस्थयोरयमेव भेदः, अग्निहोत्रादिश्रौतकर्मसंन्यासस्यैव संन्यास-लक्षणत्वात्। ततश्च संन्यासिनः श्रौतकर्मसंन्यासविधानात् स्मार्तकर्मसमुच्चिताज्ज्ञानादेव केवलान्मुक्तिः, गृहस्थस्य तूभय-समुच्चिताज्ज्ञानादिति शङ्कते— **अथेति। आरोपितमिति।** शास्त्रेण भगवतेति वा कर्तुःशेषः।

इतः प्राक् स्मार्तकर्मसमुच्चितात् केवलाज्ज्ञानात् संन्यासिनां मोक्ष इत्यभ्युपेत्य पूर्वपक्षैर्व्यवहृतम्। अथ ते तदप्यनभ्युपेत्य स्वाभिमतं समुच्चयवादं स्थापयितुं केवलाज्ज्ञानात् संन्यासिनामपि न मुक्तिरित्याहुः— **अथ गृहस्थस्यैवेति**। तत्र हेतुमाह—[**श्रौतेति**।] श्रौतानि यानि नित्यकर्माण्यग्निहोत्रादीनि, तद्रहितत्वादिति। यद्येवं संन्यासिनां न मुक्तिस्तर्हि संन्यासाश्रमविधानमेव व्यर्थमिति परि-हरति— **तदप्यसदित्यादिना**। ज्ञानस्य मोक्षसाधनत्वाभावे ज्ञानाङ्गत्वेन संन्यासविधानं व्यर्थं, मुमुक्षोर्हि सर्वकर्मसंन्यासो विहितः शास्त्रेण। तस्मात् संन्यासिनामेव ज्ञाननिष्ठायामधिकारः। ज्ञानादेव कैवल्यम्। अत एव गृहस्थस्य ज्ञानाधिकारार्थं संन्यासाश्रम-

१. 'गृहस्थस्यैवायासबाहुल्यम् , श्रौतम्' इति रा.पा.। २. 'गृहस्थस्यैवायासबाहुल्यकारणात्' इति पा.। ३. निरवकाशत्वमिह प्रामाण्यावकाशाभावाद् बाध्यत्वम्।

**विकल्पसमुच्चयविधानाच्च[१] श्रुतिस्मृत्योः।**

**सिद्धस्तर्हि [२]सर्वाश्रमिणां ज्ञानकर्मणोः समुच्चयः। न ; मुमुक्षोः सर्वकर्मसंन्यासविधानात्। [३]'व्युत्थायाथ भिक्षाचर्यं चरन्ति'(बृ.उ.४.४.२२) 'तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः'(म.ना.उ.७९) 'न्यास एवात्यरेचयत्'(म.ना.**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**तदप्यसदिति**। ननु 'ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद् गार्हस्थ्यस्य' इति **गौतम**स्मरणाद् गृहस्थाश्रम एवैकः श्रेष्ठः, संन्यासस्तु कर्मानधिकृतान्धपङ्ग्वादिविषयः इत्याशङ्क्याह— **आश्रमविकल्पेति**। 'ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद् वनी भूत्वा प्रव्रजेत्। यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा' इति, 'तस्याश्रमविकल्प इत्येके' 'यमिच्छेत् तमावसेदि'त्यादिश्रुतिस्मृत्योराश्रमाणां समुच्चयेन विकल्पेन च तत्तदाश्रमैषिणां विधानाद् न गार्हस्थ्यस्यैव श्रैष्ठ्यम् , येन तस्यैव मोक्षसाधनत्वं स्यादित्यर्थः[४]।

यदि सर्वेऽप्याश्रमाः श्रुतिस्मृतिमूलाः, तदा तत्तदाश्रमविहितकर्मणां ज्ञानेन समुच्चयः सिद्ध इत्याह— **सिद्धस्तर्हीति**। आश्रमकर्मणां यद्यपि ज्ञानोत्पत्तिसाधनत्वम् , तथापि नोत्पन्नज्ञानस्य कर्मसहकार्यपेक्षा। अन्यथा मुमुक्षोः संन्यासविधानं न

आनन्दगिरिकृतव्याख्या

**संन्यासः श्रवणाद्यावृत्तिद्वारा ज्ञानाङ्गं भवितुमलम् , तेषां श्रवणाद्यभ्यासासामर्थ्यात्। अतः [५]श्रुत्यादिना विरोधे नास्ति गार्हस्थ्यस्य प्राधान्यमित्यर्थः। तस्य प्राधान्याभावे हेत्वन्तरमाह—** आश्रमेति। **'ब्रह्मचर्यं समाप्य गृही भवेद् गृहाद् वनी भूत्वा प्रव्रजेद् यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वा वनाद्वा' इति श्रुतौ, 'तस्याश्रमविकल्पमेके ब्रुवते' इति 'यमिच्छेत् तमावसेत्' इत्यादिस्मृतौ चाश्रमाणां समुच्चयेन विकल्पेन चाश्रमान्तरमिच्छन्तं प्रति विधानान्न गार्हस्थ्यस्य प्रधानत्वमित्यर्थः।**

**यदि सर्वेषामाश्रमाणां श्रुतिस्मृतिमूलत्वम् , तर्हि तत्तदाश्रमविहितकर्मणां ज्ञानेन समुच्चयः सिध्यतीति शङ्कते—** सिद्धस्तर्हीति। **यद्यपि ज्ञानोत्पत्तावाश्रमकर्मणां साधनत्वम् , तथापि ज्ञानमुत्पन्नं नैव फले सहकारित्वेन तान्यपेक्षते, अन्यथा संन्यासविध्यनुपपत्तेरिति दूषयति—** न, मुमुक्षोरिति। **संन्यासविधानमेवानुक्रामति—** व्युत्थायेत्यादिना। **एषणाभ्यो वैमुख्येनोत्थानं तत्परित्यागः। आश्रम-सम्पत्त्यनन्तरं तत्र विहितधर्मकलापानुष्ठानमपि[६] कर्तव्यमित्याह—** अथेति। **[७]प्रागुक्तानां सत्यादीनामल्पफलत्वाद् न्यासस्य च ज्ञानद्वारा मोक्षफलत्वादित्याह—** तस्मादिति। अतिरिक्तम् **अतिशयवन्तम् , महाफलमिति यावत्। प्रकृतकर्मभ्यः सकाशाद् न्यास एवातिशय-वानासीदित्युक्तेऽर्थे वाक्यान्तरं पठति—** न्यास एवेति। **लोकत्रयहेतुं साधनत्रयं परित्यज्य संसाराद् विरक्ताः संन्यासपूर्वकादात्मज्ञानादेव**

भाष्यार्कप्रकाशः

विधानमित्याह— **आश्रमविकल्पविधानाच्चेति**। 'यदि प्रजाकामः स्त्रियमुद्वहेत्' 'यदि विरक्तस्तर्हि ब्रह्मचर्यादेव प्रव्रजेदि'त्यादिशास्त्रेण सकामनिष्कामाधिकारिभेदेन गृहस्थसंन्यासाश्रमविकल्पस्य विधानादित्यर्थः। क्व विधानम्? अत आह— **श्रुतिस्मृत्योरिति।**

शङ्कते— **तर्हि सर्वाश्रमाणां ज्ञानकर्मणोः समुच्चयः सिद्ध इति**। केवलाज्ज्ञानान्मोक्षाभावात् , संन्यासस्य च विधिदर्शनादस्ति संन्यासिनोऽपि समुच्चयः श्रौतस्मार्तकर्मभिः ज्ञानस्य मुक्त्यर्थमिति पूर्वपक्षाशयः। परिहरति— **नेति**। हेतुमाह— **मुमुक्षोरिति। सर्वेति।** श्रौतस्मार्तात्मकसर्वकर्मसंन्यासस्य विधानात्। क्व विधानम्? इत्यतस्तावच्छ्रुतिं प्रमाणयति— **व्युत्थायेति**। गृहस्थाश्रमाद् **व्युत्थाय** सर्वाणि कर्माणि त्यक्त्वेत्यर्थः। तदेव हि गृहस्थाश्रमादुत्थानं नाम, गृहस्थाश्रमस्य कर्ममयत्वात्। संन्यस्येति यावत्। एषां सर्वेषां सत्यादीनां तपसां मध्ये **न्यासं** संन्यासमेव **अतिरिक्त**मुत्कृष्टं तप आहुः विद्वांस इति शेषः। **अत्यरेचयत्** अतिचक्राम, सर्वाधिकम-भूदित्यर्थः। लोकाः कर्मणा अमृतत्वं मोक्षं **नानशुः** न प्रापुः, प्रजया नानशुः। **एके** कुशलिनः त्यागेन सर्वकर्मपरित्यागेन अमृतत्वमा-

१. 'आश्रमविकल्पविधानाच्च' इति रा.पा. भाति। २. 'सर्वाश्रमाणाम्' इति पा.। ३. 'पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय' इति पा.। ४. एवं च ऐकाश्रम्यवचनमेव गार्हस्थ्यस्तुतिपरमिति भावः। ५. 'श्रुत्यादीनाम्' इति पा.। ६. भिक्षाचर्योक्तिः विहितधर्मकलापोपलक्षणमिति भावः। ७. अस्मिन् अनुवाके 'सत्येन वायुरावाति...तस्मात् सत्यं परमं वदन्ति' इत्यादिनोक्तानां सत्यतपोदानादीनामित्यर्थः।

**उ.७८) इति, 'न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः'(कै.उ.१.३,म.ना.उ.१२.३) इति च। 'ब्रह्मचर्यादेव प्रव्रजेत्'(जा.उ.४) इत्याद्याः श्रुतयः, 'त्यज धर्ममधर्मं च उभे सत्यानृते त्यज। उभे सत्यानृते त्यक्त्वा येन त्यजसि तत् त्यज'(म.भा.१२.३२९.४०, ३३१.४४), 'संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया। प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिताः'(ना.प.उ.३.१५) इति ([1]बृहस्पतिः)। 'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते। तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः'(म.भा.१२.२४१.७) इति शुकानुशासनम्। इहापि च 'सर्वकर्माणि मनसा संन्यस्य'(भ.गी.५.१३) इत्यादि।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

स्यात् 'पिण्डमुत्सृज्य करं लेढी'ति न्यायापातादित्याह— **[न,] मुमुक्षोरिति। त्यागेनेति।** त्यागपुरस्सरज्ञानेन **एके** विरक्ताः अमृतत्वं प्राप्ता इत्यर्थः। येन कृतकृत्यत्वाभिमानेन त्यजसि तमपि त्यज, तस्यापि तत्त्वस्वरूपसम्बन्धाभावादित्यर्थः।

यदि ज्ञानस्य कर्मापेक्षा स्यात् , तर्हि श्रौतस्योत्तमस्याग्निहोत्रादेः संन्यासो न स्यादेव कस्यापि। अतः संन्यास-

आनन्दगिरिकृतव्याख्या

**प्राप्तवन्तो मोक्षमित्याह—** न कर्मणेति। **सति वैराग्ये नास्ति [2]क्रमापेक्षा, सत्यां सामग्र्यां [3]कार्याक्षेपानुपपत्तेरित्याह—** ब्रह्मचर्यादेवेति। **इत्याद्याः सर्वकर्मसंन्यासविधायिन्यः श्रुतयो भवन्तीति शेषः। 'आत्मानमेव लोकमिच्छन्तः प्रव्रजन्ती'त्यादिवाक्यसंग्रहार्थम्** आदि-पदम्। **तत्रैव [4]स्मृतिमुदाहरति—** त्यजेति। **धर्माधर्मयोः सत्यानृतयोश्च संसारारम्भकत्वान्मुमुक्षुणा तत्त्यागे प्रयतितव्यमित्यर्थः। त्यक्तृत्वाभिमानस्यापि [5]तत्त्वतः स्वरूपसम्बन्धाभावात् त्याज्यत्वमविशिष्टमित्याह—**येनेति। **अनुभवानुसारेण प्रमातृताप्रमुखस्य संसारस्य दुःखफलत्वमालक्ष्य मोक्षहेतुसम्यग्ज्ञानसिद्धये ब्रह्मचर्यादेव पारिव्राज्यमनुष्ठेयमिति [6]उत्पत्तिविधिमुपन्यस्यति—**संसारमिति। **तत्त्वज्ञानमुद्दिश्य ब्रह्मचर्यादेव कर्मसंन्यास[7]सामग्रीमभिदधानो विनियोगविधिं सूचयति—** परमिति। **ज्ञानकर्मणोरसमुच्चयार्थं फलविभागं कथयति—** कर्मणेति। **उक्तं फलविभागमनूद्य ज्ञाननिष्ठानां कर्मसंन्यासस्य कर्तव्यत्वमाह—** तस्मादिति। **वाक्यशेषेऽपि सर्वकर्मसंन्यासो विवक्षितोऽस्तीत्याह—** इहापीति।

भाष्यार्कप्रकाशः

नशुः। ब्रह्मचर्यादेव **प्रव्रजेत्** संन्यसेत्। **इत्याद्या** इत्याद्यशब्दाद् 'आत्मानमेव लोकमिच्छन्तः प्रव्रजन्ती'त्यादिग्रहणम्। स्मृतीश्च प्रमाणयति— **त्यजेति।** धर्ममधर्मं च त्यज। यज्ञयागादिर्धर्मः, हिंसादिरधर्मः। धर्मं त्यजेत्युक्तावधर्मप्रवृत्तिः स्यादित्यत आह— **अधर्मं त्यजेति। उभे** द्वे सत्यानृते त्यज। एवं सत्यानृते उभे त्यक्त्वा, येन मनसेदमुभयं त्यजसि, तन्मनश्च त्यज। 'नाहं मनः, न मदीयं मनः' इति मनस्यहन्ताममतयोस्त्याग एव मनस्त्यागः। धर्माधर्मत्यागश्च गृहस्थस्य न सम्भवति, तस्य धर्मेष्वधिकारात् , नित्यकर्माकरणे प्रत्यवायाच्च। अतो धर्माधर्मत्यागः संन्यासिन एवेति संन्यासोऽनेन विहित इति भावः। **संसारमिति।** एवं संसारं निःसारं **दृष्ट्वा** निश्चित्य **अकृतोद्वाहाः** अकृतदारपरिग्रहाः सन्तः **पर**मुत्कृष्टं वैराग्यमाश्रिताः विवेकिन इति शेषः। **सारस्य** आत्मनो दिदृक्षया **प्रव्रजन्ति** संन्यस्यन्ति। **बृहस्पतिरिति।** आहेति शेषः। शुकस्मृतिमाह— **कर्मणेति।** जन्तुः कर्मणा पुण्यपापादिलक्षणेन **बध्यते** देवमनुष्य-तिर्यगादिजन्मप्राप्तिरूपं संसारं प्राप्नोतीत्यर्थः। विद्यया ज्ञानेन **विमुच्यते** मुक्तो भवति, यस्मादेवं तस्मात् **पारदर्शिनः** तत्त्वविदः यतयः कर्म न कुर्वन्ति। प्रकृतगीताशास्त्रं चोक्तार्थे प्रमाणयति— **इहापि चेति।** 'सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी। नवद्वारे पुरे देहे नैव कुर्वन् न कारयन्॥' इति।

---

१. 'बृहस्पतिः' इति क्वचिन्न। 'बृहस्पतिरपि कचं प्रति' इति पा.। २. ब्रह्मचर्यं समाप्य गृही भवेद् , गृही भूत्वा वनी भवेदित्यादिः क्रमः। 'कर्मापेक्षा' इति पा.। ३. कार्यविलम्बानुपपत्तेरित्यर्थः। 'कार्यापेक्षा' इति पा.। ४. 'स्मृतीरुदाहरति' इति पा.। ५. परमार्थत आत्मसंबन्धाभावादित्यर्थः। ६. 'प्रव्रजन्त्यकृतोद्वाहाः' इति अनुष्ठेयपारिव्राज्यस्वरूपबोधकः उत्पत्तविधिः। 'परं वैराग्यमाश्रिताः' इति वैराग्यस्य संन्यासाङ्गत्वबोधको विनियोगविधिरिति भावः। ७. कर्मसंन्यासे सामग्री परं वैराग्यम्।

**मोक्षस्य चाकार्यत्वान्मुमुक्षोः कर्मानर्थक्यम्। नित्यानि प्रत्यवाय[1]परिहारार्थमनुष्ठेयानीति चेत् , न ; असंन्यासिविषयत्वात् प्रत्यवायप्राप्तेः। [2]न ह्यग्निकार्याद्यकरणात् संन्यासिनः प्रत्यवायः कल्पयितुं शक्यः, यथा**

अनुभूतिस्वरूपाचार्यटिप्पणम्

विध्यनुपपत्तिबाधितं समुच्चयाभिधानमित्यभिधाय, मोक्षस्वभावपर्यालोचनयाऽपि इदानीं कर्मापेक्षा नास्तीत्याह— **मोक्षस्य चाकार्यत्वादिति।** उत्पाद्यम् आप्यं संस्कार्यं विकार्यं च क्रियाफलम्। स्वरूपावस्थानलक्षणं तु कैवल्यं नैवंविधमिति न कर्मणा[मु]पयोग इत्यर्थः। **नित्यानीति।** 'अकुर्वन् विहितं कर्म निन्दितं च समाचरन्। प्रसजंश्चेन्द्रियार्थेषु नरः पतनमृच्छति॥' इति स्मृतेः मुमुक्षुणाऽपि प्रत्यवायपरिहाराय कर्म कर्तव्यम्। ततो[ऽ]वैयर्थ्यमित्यर्थः। यो यस्मिन् कर्मण्यधिकृतः तस्य तदकरणात् भवेन्नाम प्रत्यवायः, न तु संन्यासिनः 'अत ऊर्ध्वममन्त्रवदाचरेदि'त्यादिविध्यधिकारिणः सन्ध्यावन्दनादेरकरणात् [3]सूतकिनामिव प्रत्यवायः सम्भवतीत्याह— **न, असंन्यासिविषयत्वादिति**। पूर्वमकरणात् प्रत्यवायोत्पत्तिमङ्गीकृत्योक्तम्। इदानीं तु प्रतिषिद्धकरणादेव प्रत्यवायो भवति, [4]न त्वकरणाद् , अभावाद्भावोत्पत्तेः

आनन्दगिरिकृतव्याख्या

**ज्ञानार्थिनो मुमुक्षोः संन्यासविध्यनुपपत्तिबाधितं समुच्चय[5]वचनमित्युक्तम् । इदानीं मोक्षस्वभावालोचनयाऽपि समुच्चयवचनमनुचितमित्याह—** मोक्षस्य चेति। **'अकुर्वन् विहितं कर्म निन्दितं च समाचरन्। प्रसज्जंश्चेन्द्रियार्थेषु नरः पतनमृच्छति॥' इति स्मृतेः मुमुक्षुणाऽपि प्रत्यवायनिवृत्तये कर्तव्यं नित्यं कर्मेति शङ्कते—** नित्यानीति। **यो यस्मिन् कर्मण्यधिकृतस्तस्य तदकरणात् प्रत्यवायो भवति, न तु कर्मानधिकारिणः संन्यासिनस्तदकरणात् प्रत्यवायः सम्भवतीति दूषयति—** न, असंन्यासीति। **तदेव स्पष्टयति—** न हीति। [6]**समिद्धोमाध्ययनाद्यकरणात् प्रत्यवायः संन्यासिनो नास्तीत्यर्थः। तत्र व्यतिरेकोदाहरणमाह—**यथेति। **अकरणात् प्रत्यवायोत्पत्तिमभ्यु-**

भाष्यार्कप्रकाशः

मुमुक्षोः सर्वकर्मसंन्यास एव विहित इत्यत्र हेत्वन्तरमाह—**कर्मानर्थक्यमिति**। ननु न कर्माण्यनर्थकानि, किन्तु मोक्षार्थानीत्यत आह—**मोक्षस्य चाकार्यत्वादिति।** यत् कर्मजन्यं तत् कार्यम् , यथा घटः। स हि दण्डचक्रभ्रमणादिजन्यः। एवं यज्ञादिकर्मजन्यत्वात् स्वर्गादिफलानि कार्याणीत्युच्यन्ते। मोक्षस्तु न कार्यमिति कथं कर्मजन्यत्वं तस्य? अकार्यत्वे च 'नास्त्यकृतः कृतेन' इति श्रुतिः प्रमाणम्। किञ्च यदि मोक्षः कार्यः स्यात् , तर्हि स्वर्गादिवद् घटादिवच्चानित्य एव स्यात्। नित्यो हि मोक्षः सम्प्रतिपन्नः। तस्मात् कर्मफलेषु स्वर्गादिषु पापपरिहारादिषु वा मुमुक्षोः कामाभावाद् मोक्षस्याकर्मजन्यत्वाच्च न मुमुक्षोः कर्मभिः कोऽप्यर्थ इति युक्तमेव मुमुक्षोः सर्वकर्मसंन्यासविधानम्। ननु मुमुक्षोरपि नित्यकर्माण्यावश्यकानि प्रत्यवायपरिहारार्थकत्वान्नित्यानां कर्मणाम् ; इदमेव हि तन्नित्यत्वं यदकरणे प्रत्यवाय इत्याक्षिपति— **नित्यानीति।** [7]**असंन्यासविषयत्वादिति**। यैः सर्वकर्मसंन्यासो न कृतः शास्त्रोक्तः, तेषामेव नित्यानामकरणे प्रत्यवायः शास्त्रोक्तः। विहितस्याकरणं निषिद्धस्य करणं हि दोषहेतुः। कर्माणि तु विहितानि पुंसः संन्यासात् प्राक्, पश्चात्तु संन्यासस्यैव विहितत्वात् कथं कर्मविधानम्? न ह्येकस्मिन् पुरुषे एकदा सर्वकर्मसंन्यासविधिं सर्वकर्मविधिं च ब्रूयात् शास्त्रमीश्वरो वा। एवं सर्वकर्मसंन्यासिनां नित्यकर्मकरणमेव दोषहेतुः, अविहितत्वादिति भावः। कुतो न शक्य इत्यत्र दृष्टान्तमाह— **यथेति।** अग्निहोत्रस्य दारपरिग्रहसमकालप्राप्तत्वान्नास्ति असंन्यासिनामपि ब्रह्मचारिणामग्निहोत्रविधिः। विध्यभावादेवाग्निहोत्राकरणाद् नास्ति तेषां प्रत्यवायः। तद्वद् विध्यभावस्य तुल्यत्वान्न संन्यासिनां नित्याकरणात् प्रत्यवायः। यद्वा ब्रह्मचारिणामिति व्यतिरेकदृष्टान्तः। यथा सन्ध्यावन्दनादिनित्याकरणाद् ब्रह्मचारिणां प्रत्यवायः, तथेति। नित्यानामकरणात् प्रत्यवायमभ्युपेत्य तस्यासंन्यासविषयत्वमुक्तमितः प्राक्। इदानीं तु नित्यानामकरणात् प्रत्यवाय एव भवितुं नार्हतीत्याह— **न तावदित्यादिना।** अत्र हेतुमाह—

१. 'परिहारार्थानीति चेत्' इति पा.। २. 'न ह्यग्निहोत्राद्यकरणात्' इति रा.पा.। ३. सूतकिनां मन्त्रवत्संध्यावन्दनाद्यकरणप्रयुक्तः प्रत्यवायो यथा न भवति, तथेति दृष्टान्तस्यार्थः। ४. 'अकुर्वन् विहितं कर्मे'ति स्मृतेस्तु नित्याकरणं प्रत्यवायस्य ज्ञापकमित्याशयः। द्र. तै.उ.भाष्यम् पृ.३६७। ५. 'विधिवचन' इति पा.। ६. **समिद्धोमः** ब्रह्मचारिणां विहितं समिदाधानम्। ७. 'असंन्यासविषयत्वाद्' इति रा.पुस्तके भाष्ये पाठो दृश्यते।

**ब्रह्मचारिणामसंन्यासिनामपि कर्मिणाम्। न तावन्नित्यानां कर्मणामकरणाद् अभावादेव भावरूपस्य प्रत्यवायस्य उत्पत्तिः कल्पयितुं शक्या, [१]युक्ता च। 'कथमसतः सज्जायेत'(छा.उ.६.२.२) इत्यसतः सज्जन्मासम्भवश्रुतेः। यदि विहिताकरणादसम्भाव्यमपि प्रत्यवायं ब्रूयाद् वेदस्तदाऽनर्थकरो वेदोऽप्रमाणमित्युक्तं स्यात् , विहितस्य करणा-करणयोर्दुःखमात्रफलत्वात्। तथा च कारकं शास्त्रम् , न ज्ञापकमित्यनुपपन्नार्थं कल्पितं स्यात्। न चैतदिष्टम्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

लोकवेदविरुद्धत्वादित्याह— **असंन्यासिनामपीति**। इतश्च नाकरणात् प्रत्यवाय इत्याह— **यदि विहितेति**। विहितस्य करणे तावत् पितृलोकप्राप्तिलक्षणं फलं **कर्ममीमांसकैः** नाभ्युपगम्यते। धूमादीनां तु चक्षुषः पीडादिकं दृष्टमेव, अकरणेऽपि प्रत्यवाय इति उभयथाऽपि पुरुषस्यानर्थकरो वेदोऽप्रमाणमेव स्यादित्यर्थः। नन्वभावस्यापि भावोत्पादनसामर्थ्यं वेदबलादेव भविष्यति, ततोऽकरणनिमित्तप्रत्यवायपरिहार एव फलं विद्यत इत्याशङ्क्याह— **तथा च कारकमिति**। लोकसिद्धपद-

आनन्दगिरिकृतव्याख्या

**पेत्योक्तम्। सम्प्रति प्रतिषिद्धकरणादेव प्रत्यवायः, न त्वकरणाद् , अभावाद् भावोत्पत्तेर्लोकवेदविरुद्धत्वादित्याह—** न तावदिति। **ननु नित्यकर्मविधायी वेदस्तदकरणात् प्रत्यवायो भवतीति ब्रवीति; तत् कथमकरणात् प्रत्यवायो न भवतीति श्रुतिमाश्रित्योच्यते, श्रुत्यन्तरविरोधादिति, तत्राह—** यदीति। **विहितस्याकरणे सत्यनर्थप्राप्तेः न नित्यकर्मविधायी वेदोऽनर्थकरत्वेनाप्रमाणमित्याशङ्क्याह—** विहितस्येति। **न विहितस्य करणे पितृलोकप्राप्तिलक्षणं फलं [२]भवतेष्यते; धूमादिना नयनपीडादिदुःखं तु प्रत्यक्षमेव; अकरणे च प्रत्यवायोत्पत्तिः; उभयथाऽपि पुरुषस्यानर्थकरो वेदोऽप्रमाणमेव स्यादित्यर्थः। नन्वभावस्यापि भावोत्पादनसामर्थ्यं वेदः सम्पादयिष्यति। तथा च विहिताकरण[निमित्त]प्रत्यवायपरिहारो विहितकरणे फलिष्यतीति, नेत्याह—** तथा चेति। **लोकप्रसिद्धपदार्थशक्त्याश्रयणेन शास्त्रप्रवृत्त्यङ्गीकाराद् अपूर्वशक्त्याधानायोगाज्ज्ञापकमेव शास्त्रमित्यर्थः। कारकत्वे च तस्याप्रामाण्यमप्रत्यूहं स्यादित्याह—** कारकमिति।

भाष्यार्कप्रकाशः

**अभावादेवेति**। नित्यानामकरणं नाम नित्यकर्मकरणाभावः, नञोऽभावार्थकत्वात्। प्रत्यवायो दोषः। स हि भावरूपः। अभावाद् भावस्योत्पत्तिः कल्पयितुं न शक्या, नापि युक्ता। तत्र श्रुतिं प्रमाणयति— **कथमिति**। असतः सकाशात् सत् कथं जायेत? न कथमपीत्यर्थः। एतेन घटप्रागभावाद् घटोत्पत्तिं ब्रुवाणास्तार्किकाः प्रत्युक्ताः, अभावस्याभावत्वादेव भावं प्रति कारणत्वायोगात्। न ह्यभावाच्छशशृङ्गाद् यत्किञ्चिद् वस्तूत्पद्यमानं दृष्टं श्रुतं वा।

**ननु** 'असदेवेदमग्र आसीत् , ततो वै सदजायते'ति श्रुतिसिद्धा भावस्याभावादुत्पत्तिरिति चेत् ? **मैवम्** ; 'सदेवेदमग्र आसीत्', 'यतो वा इमानि भूतानि जायन्ते...तद् ब्रह्म', 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते', 'सन्मूलाः सोम्येमाः' इत्यादिश्रुतिशत-संवादाद् इहाप्यसच्छब्देन ब्रह्मण एव ग्राह्यत्वात्।[३]जन्माधीनसत्ताऽभावस्तु ब्रह्मण्यसच्छब्दप्रवृत्तिनिमित्तम्। यद्वा प्रमाणप्रमेयाद्यभावाद् असत्कल्पत्वात् सदपि ब्रह्मासदित्युच्यते, 'मेनेऽसन्तमिवात्मानं सुप्तशक्तिरसुप्तदृग्' इति भागवतात्। किञ्च 'तदैक्षत बहु स्याम्' इति सङ्कल्पश्रवणं च कथमुपपद्येताभावस्य जगत्कारणताश्रयणे? न ह्यभावश्चेतनः, भावधर्मत्वाच्चैतन्यस्येति।

ननु अभावाद् भावस्योत्पत्तिरशक्या अयुक्ता वा भवतु, तथापि अतीन्द्रियार्थे वेदस्यैव प्रमाणत्वान्नित्याकरणे प्रत्यवायस्य वेदोक्तत्वादभ्युपेय एव प्रत्यवाय इत्यत आह— **यदीत्यादि। अप्रमाणमिति**। असम्भाव्यार्थवर्णनादनर्थहेतुत्वाच्चेति भावः। अर्थवत्त्वस्यैव प्रमाणत्वात्मकत्वादिति गूढाशयः। तदेव विवृणोति— **विहितस्येति**। क्रियाकारकाद्यनेकोपकरणोपसंहारपूर्वकत्वाद् विहितकरणस्य श्रमहेतुत्वेन दुःखहेतुत्वं सर्वजनानुभवसिद्धम्। विहिताकरणस्य प्रत्यवायहेतुत्वेन दुःखहेतुत्वं तु शास्त्रसिद्धम्। अत उभयथाऽपि दुःखमेव फलमित्यर्थः। **तथा चेति**। नित्यकर्मणां दुःखमात्रफलकत्वादित्यर्थः। **कारकं** तद्विधायकं, प्रवर्तकमिति यावत्। **शास्त्रं न**

१. 'युक्ता च' इति क्वचिन्न। २. 'भवतीति दृश्यते' इति पा.। ३. ब्रह्मणि असच्छब्दप्रयोगमुपपादयति— **जन्मेति**। तत्र सत्तायां जन्माधीनत्वरूपविशेषणाभावाद् उक्तविधमसत्त्वम्। नामरूपव्याकरणाभावमपेक्ष्य ब्रह्मणि असच्छब्दप्रयोग इति च बोध्यम्। द्र. ब्र.सू. १-४-१५।

**तस्मान्न संन्यासिनां कर्माणि। अतो ज्ञानकर्मणोः समुच्चयानुपपत्तिः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

पदार्थशक्त्याश्रयणेन हि शास्त्रं प्रवर्तते, नापूर्वशक्तिकारकम् , अन्यथा 'अग्निना सिञ्च' इत्यस्यापि [१]प्रामाण्यापातादित्यर्थः। लोकेऽप्यभावज्ञानमनुपलम्भात् , कण्टकाभावाच्चरणन्यास इत्यादि नोदाहरणीयम्। यतोऽनिर्वाच्यानुपलम्भस्य संवेदनम् अभावज्ञाने कारणम् , समीहितसाधनज्ञानं तु प्रवृत्तिकारणमिति द्रष्टव्यम्। यस्माद् नित्याकरणान्न प्रत्यवायः, **तस्मादि-**त्युपसंहारः।

आनन्दगिरिकृतव्याख्या

**भवतु शास्त्रस्याप्रामाण्यमित्याशङ्क्य , अपौरुषेयतयाऽशेषदोषानागन्धितत्वाद् मैवमित्याह—** न चेति। **अनिर्वाच्यानुपलम्भस्य संवेदनम् अभावज्ञाने कारणम्[२] , समीहितसाधनज्ञानं तु[३] चरणन्यासादिप्रवृत्तिकारणमित्यङ्गीकृत्योपसंहरति—** तस्मादिति। **अकरणात् प्रत्यवायो-त्पत्त्यसम्भवः तच्छब्दार्थः। संन्यासिनां ज्ञाननिष्ठानां कर्मसंन्यासित्वादेव कर्मासम्भवे फलितमाह—** अत इति।

भाष्यार्कप्रकाशः

**ज्ञापकं** न प्रमाणम् इति **अनुपपन्नार्थ**मयुक्तार्थमसम्भावितार्थं वा शास्त्रं कल्पितं, भगवतेति शेषः, स्यात्। भवतु, किं ततः? आह– **न चैतदिष्टमिति।** शास्त्रस्य भगवदाज्ञारूपस्य प्रवृत्त्यात्मकस्य वेदस्य असम्भावितार्थत्वप्रयुक्तं दुःखार्थत्वप्रयुक्तं चाप्रामाण्यम् इत्येतदनिष्टमेव, स्वतः प्रमाणत्वाद् वेदस्य। सर्वपुरुषार्थज्ञानस्य वेदाधीनत्वेन वेदस्याज्ञापकत्वासम्भवाच्च।

**अयमाशयः**— नित्यकर्मणां न प्रत्यवायपरिहारार्थत्वं कल्पयितुं शक्यम् ; उपात्तदुरितक्षयप्राजापत्यलोकचित्तशुद्ध्यादिमहा-फलवत्त्वात् तेषाम्। 'सन्ध्या येन न विज्ञाता, सन्ध्या येनानुपासिता। जीवमानो भवेच्छूद्रो मृतः श्वानोऽभिजायते॥' इत्यादिप्रत्यवाय-श्रवणं तु - नित्यकर्माचरणेन दुरितक्षयं विधाय चित्तशुद्धिं सम्पाद्य ज्ञानद्वारा मुक्तिं प्राप्तुमर्हं द्विजदेहमासाद्य, यः पुमान् नित्यकर्माकरणेनात्मानं नाशयति, स आत्मघाती अन्धं तमः प्रपद्यते, 'अन्धं तमः प्रपद्यन्ते ये के चात्महनो जनाः' इति श्रुतेः - इत्यभिप्रायकृतम्। **यद्वा** यो नित्यकर्मभिर्दुरितक्षयं न करोति, पुण्यं च न सम्पादयति, स पुमानितोऽपि हीनतरं श्वादिजन्म प्राप्नोति। पुण्यपापोभयलब्धं मनुष्यजन्म, नित्यकर्मानाचरणे तु पुण्याभावात् पापानिवृत्तेश्च पापबलाच्छ्वादिजन्मप्राप्तिरिति बोध्यम्। सर्वथाऽपि नित्यकर्माकरणान्न प्रत्यवायोत्पत्तिः, किन्तु नित्यकर्माकरणे दुरितक्षयाद्यभावः, पुण्याभावविशिष्टदुरिताच्च श्वादिजन्मरूपप्रत्यवायो-त्पत्तिरिति सर्वमनवद्यम्।

'तथा चे'ति वाक्यमन्यथा व्याख्यातम् **आनन्दगिरिणा।** तथाहि—'नन्वभावस्यापि भावोत्पादनसामर्थ्यं वेदः सम्पादयिष्यति, तथा च विहिताकरणप्रत्यवायपरिहारो विहितकरणे फलिष्यतीति, नेत्याह— **तथा चेति।** लोकप्रसिद्धपदार्थशक्त्याश्रयणेन शास्त्रप्रवृत्त्यङ्गीकारादपूर्वशक्त्याधानायोगाज्ज्ञापकमेव शास्त्रमित्यर्थः। कारकत्वे च तस्याप्रामाण्यमप्रत्यूहं स्यादित्याह— **कारकमिति।** भवतु शास्त्रस्याप्रामाण्यमित्याशङ्क्यापौरुषेयतया अशेषदोषानागन्धितत्वान्मैवमित्याह— **न चेति।'** अस्यायमर्थः— यद्यभावस्यापि भावोत्पादनसामर्थ्यं वेदः सम्पादयिष्यतीत्युच्यते, तर्हि वेदः कारक एव स्यान्न तु ज्ञापकः। अपूर्वशक्त्याधायकत्वं कारकत्वम् , लोकप्रसिद्धपदार्थशक्त्याश्रयणेन प्रवर्तकत्वं ज्ञापकत्वमिति विवेकः। यस्य यस्याग्न्यादिपदार्थस्य लोके या या दाहकत्वादिशक्तिरस्ति तामनुसृत्यैव शास्त्रं होमादिविधिं विधत्ते, न तु पदार्थेष्वपूर्वां शक्तिं कल्पयितुमीष्टे, प्रत्यक्षविरोधात्। मानान्तराबाधित-तात्पर्यविषयसंसर्गबोधकं हि वाक्यं प्रमाणम्। अत एव 'अग्निना सिञ्चे'ति वाक्यस्याप्रामाण्यम् , प्रत्यक्षेण बाधितत्वादग्निकरणक-सेचनस्य। ततश्च नित्याकरणात् प्रत्यवाय इति वाक्यस्य मानान्तरबाधितत्वादप्रामाण्यमेव। अभावाद् भावस्योत्पत्तिर्हि प्रत्यक्षादि-प्रमाणविरुद्धा। न चैवं वाक्यतात्पर्यविषयसंसर्गस्य मानान्तरेणैव सिद्धत्वात् संसर्गबोधकं वाक्यं व्यर्थमिति वाच्यम् ; वृद्धप्रयुक्तस्य गामानयेति वाक्यस्य बालस्य गवानयनकर्मणि प्रवृत्तिजनकत्वेनाव्यर्थत्वात्। 'ज्योतिष्टोमेन यजेते'त्यादिवेदवाक्यानि तु सुतरां

१. 'पत्तिरित्यर्थः' इति पा.। २. नन्वनुपलब्धेः अभावज्ञानहेतुत्वाङ्गीकारात् कथं नाभावस्य कारणत्वमित्याशङ्क्याह—अनिर्वाच्येति। वृत्तिरूपोपलब्धितदभावयोः साक्षिवेद्यत्वमङ्गीक्रियते। द्र.चित्सुखी पृ. ४३६। तथा च तत्रापि नाभावस्य कारणत्वमिति भावः। ३. तुशब्देन अनिष्टसाधनकण्टकाद्यभावस्य कारणत्वव्यवच्छेदः।

**'ज्यायसी चेत् कर्मणस्ते मता बुद्धिः'(भ.गी.३.१) इत्यर्जुनस्य प्रश्नानुपपत्तेश्च। यदि हि भगवता द्वितीयेऽध्याये ज्ञानं कर्म च [१]समुच्चित्य त्वयाऽनुष्ठेयमित्युक्तं स्यात् , ततोऽर्जुनस्य प्रश्नोऽनुपपन्नः 'ज्यायसी चेत् कर्मणस्ते मता बुद्धिः' इति। अर्जुनाय चेद् बुद्धिकर्मणी त्वयाऽनुष्ठेये इत्युक्ते, या कर्मणो ज्यायसी बुद्धिः साऽप्युक्तैवेति 'तत् किं कर्मणि घोरे मां नियोजयसि केशव'(भ.गी.३.१) इति [२]उपालम्भः प्रश्नो वा न कथञ्चनोपपद्यते। न चार्जुनस्यैव ज्यायसी बुद्धिर्नानुष्ठेयेति भगवतोक्तं पूर्वमिति कल्पयितुं युक्तम् , 'येन ज्यायसी चेद्' इति प्रश्नः स्यात्। यदि पुनरेकस्य पुरुषस्य**

अनुभूतिस्वरूपाचार्यटिप्पणम्

इतश्च समुच्चयानुपपत्तिरित्याह— **ज्यायसी चेदित्यादिना**। ननु 'कर्मण्येवाधिकारएवे[रस्ते' इ]त्यर्जुनं प्रत्युक्तम् , न ज्यायसी बुद्धिरुक्तेति युक्त उपालम्भ इत्याशङ्क्याह—**न चार्जुनस्यैवेति**। 'एषा तेऽभिहिता साङ्ख्ये' इति वचनविरोधादित्यर्थः। कस्मिन् पक्षे तर्हि अयं प्रश्न उपपन्नो भवतीत्याशङ्क्याह— **यदि पुनरेकस्येत्यादिना**। पूर्वोक्तमप्यधिकविवक्षया स्मारयति—

आनन्दगिरिकृतव्याख्या

**समुच्चयानुपपत्तौ हेत्वन्तरमाह—** ज्यायसीति। **प्रश्नानुपपत्तिमेव प्रपञ्चयति—** यदि हीति। **समुच्चयोपदेशे [३]प्रश्नैकदेशानुपपत्तेश्च न तदुपदेशोपपत्तिरित्याह—** अर्जुनायेति। **'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन' इत्यर्जुनं प्रत्युपदेशात् तं प्रति ज्यायसी बुद्धिर्नोक्तेति युक्तं 'तत् किम्' इत्याद्युपालम्भवचनमित्याशङ्क्याह—** न चेति। **येन कल्पनेन 'ज्यायसी चेदि'त्यारभ्य 'तत् किं कर्मणी'त्युपालम्भात्मा प्रश्नः स्यात् , तथा न युक्तं कल्पयितुम् , 'एषा तेऽभिहिता साङ्ख्ये बुद्धिः' इति वचनविरोधादिति योजना। कस्मिन् पक्षे तर्हि प्रश्नस्योपपत्तिरित्याशङ्क्याह—** यदीति। **भगवदुक्तेऽर्थे प्रष्टुर्विवेकाभावात् प्रश्नः स्यादित्याशङ्क्य पूर्वोक्तमेवाधिकविवक्षया स्मारयति—**

भाष्यार्कप्रकाशः

मानान्तरासिद्धसंसर्गबोधकान्येवेति न तेषु वैयर्थ्यशङ्कावकाशः। तस्माद् वाक्यतात्पर्यविषयसंसर्गः मानान्तरसिद्धो भवतु वा, मा वा, मानान्तराबाधितस्तु भवितव्योऽवश्यमिति कृत्वा शास्त्रं ज्ञापकमेव, न तु कारकम्। पदार्थेषु विद्यमानां शक्तिमनुस्मृत्यैव[मनुसृत्यैव] अस्मिन् वह्नौ एतदिन्द्रमुद्दिश्य एतदाज्यहविःप्रदानेन यजमानस्य स्वर्गो भविष्यतीत्यज्ञातार्थं ज्ञापयतीति ज्ञापकम्। एवमज्ञातार्थज्ञापकत्वादेव शास्त्रं प्रमाणम्। यद्ययोग्यमर्थं विदध्यात् तर्हि कारकत्वाच्छास्त्रमप्रमाणमेव स्यादिति भावः। शास्त्रं कारकं, भवतीति शेषः। न तु ज्ञापकं भवति **इत्यनुपपन्नार्थम्** अयुक्तार्थं, वाक्यमिति शेषः। **कल्पितं स्यात्** नित्याकरणात् प्रत्यवायवादिना इति शेषः। अनुपपन्नो वाक्यार्थः कल्पितः स्यादित्यर्थः। इति भाष्यान्वयः। अन्यत् तुल्यम्।

पूर्वव्याख्यानेऽपि 'इत्यनुपपन्नार्थं कल्पितं स्यादि'त्यस्य समनन्तरोक्तार्थोऽप्युपपद्यते, परं तु— कारकं शास्त्रं ज्ञापकं न भवतीति पूर्वोक्तान्वयः; शास्त्रं कारकं भवति, न तु ज्ञापकमिति समनन्तरोक्तान्वय इति विशेषः। कारकज्ञापकपदार्थभेदस्तु दर्शित एवेति सङ्क्षेपः। **तस्मादिति**। नित्यकर्माकरणजन्मप्रत्यवायाभावादित्यर्थः। **अत इति**। मुमुक्षोः संन्यासविधानादित्यर्थः।

प्रश्नानुपपत्तिमेव विवृणोति— **यदि हीत्यादिना**। यदि ज्ञानकर्मणोः समुच्चय एव श्रेयःप्राप्तिहेतुः, न त्वन्यतरत् , तर्हि श्रेयस्कामायार्जुनाय भगवान् समुच्चयं कुर्वित्युपदिशेत् , न तु 'कर्मण्येवाधिकार' इति। अर्जुनश्च—यदि कर्मापेक्षया ज्ञानमेव ज्यायः, तर्हि किमिति कर्मणि मां नियोजयसीति नैव पृच्छेत् , समुच्चयस्यैवोपदिष्टत्वादित्यर्थः। ननु अन्येषां समुच्चय उपदिष्टः, अर्जुनस्य तु कर्मैवेति कृत्वा प्रश्न उपपद्यत इति शङ्कते— **न चेति**। न चैवं कल्पयितुं युक्तम् , अर्जुनस्य भक्तत्वाच्छ्रेयोऽर्थित्वाच्च हिततमोपदेशार्हत्वात् , कर्ममात्रोपदेशानुष्ठानो[मात्रानुष्ठानो]पदेशस्य मोक्ष[क्षा]हेतुत्वेनाहिततमत्वाच्चेति भावः। **येनेति**। अर्जुनस्य कर्ममात्रोपदेशेनेत्यर्थः। ज्ञानानुष्ठानानुपदेशेनेति वा। येन कल्पनेनेति वा। अस्मिन् पक्षे तथा कल्पयितुमिति तथाशब्दस्य शेषः।

प्रश्नस्यानुपपत्तिमुक्त्वा उपपत्तिं दर्शयति— **यदि पुनरिति**। **विरोधादिति**। 'कर्ताऽहं, भोक्ताऽहम्' इत्यहङ्कारपूर्वकत्वात् कर्मणः,

१. 'समुच्चयेन त्वया' इति पा.। २. 'उपालम्भो वा प्रश्नो वा' 'उपालम्भो न' 'प्रश्नो न' इति पा.। ३. एकदेशप्रश्नेति संभाव्यते। एकदेशविषयः प्रश्नः इति यावत्।

**ज्ञानकर्मणोर्विरोधाद् युगपदनुष्ठानं न सम्भवतीति भिन्नपुरुषानुष्ठेयत्वं भगवता पूर्वमुक्तं स्यात् , ततोऽयं प्रश्न उपपन्नः—'ज्यायसी चेद्' इत्यादिः। अविवेकतः प्रश्नकल्पनायामपि भिन्नपुरुषानुष्ठेयत्वेन ज्ञानकर्मनिष्ठयोः भगवतः प्रतिवचनं नोपपद्यते। न चाज्ञाननिमित्तं भगवत्प्रतिवचनं कल्प्यम्। [१]अस्माच्च भिन्नपुरुषानुष्ठेयत्वेन ज्ञानकर्मनिष्ठयोः भगवतः प्रतिवचनदर्शनाद् ज्ञानकर्मणोः समुच्चयानुपपत्तिः। तस्मात् केवलादेव ज्ञानान्मोक्ष इत्येषोऽर्थो निश्चितो गीतासु , सर्वोपनिषत्सु च।**

**'ज्ञानकर्मणोरेकं वद निश्चित्य' इति चैकविषयैव प्रार्थनाऽनुपपन्ना उभयोः समुच्चयसम्भवे। 'कुरु कर्मैव तस्मात् त्वम्' (भ.गी.४.१५) इति च ज्ञाननिष्ठाऽसम्भवमर्जुनस्यावधारणेन दर्शयिष्यति।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**अविवेकत इति।** तदधिकमाह— **न चेति।** सर्वज्ञत्वप्रसिद्धिविरोधादित्यर्थः। यद्युक्तरीत्या प्रश्नप्रतिवचनयोर्न समुच्चयपक्षे सामञ्जस्यम् , कस्तर्हि पक्षः शास्त्रार्थाविरुद्धः सुनिश्चित इत्याशङ्क्याह— **तस्माच्चेत्यादिना।** न चात्र सम्बन्धग्रन्थेन पौनरुक्त्य-मेषां ग्रन्थानां शङ्कनीयम् , सकलशास्त्रार्थसङ्ग्रहत्वात् तस्य, विवरणरूप(क)त्वाच्च [ए]तेषाम्।

॥ इति श्रीभगवद्गीताभाष्यटिप्पणे तृतीयोऽध्यायः॥

आनन्दगिरिकृतव्याख्या

अविवेकत इति। **भगवतोऽपि प्रतिवचनमज्ञाननिमित्तं [२]प्रश्नाननुरूपत्वादित्याशङ्क्याधिकं दर्शयति—** न चेति। **भगवतः सर्वज्ञत्वप्रसिद्धि-विरोधादज्ञानाधीनप्रतिवचनायोगादित्यर्थः। इतश्च समुच्चयः शास्त्रार्थो न भवतीत्याह—** अस्माच्चेति। **कस्तर्हि शास्त्रार्थो विवक्षितः? तत्राह—** केवलादिति।

**ज्ञानकर्मणोः समुच्चयानुपपत्तौ कारणान्तरमाह—** ज्ञानेति। **वाक्यशेषवशादपि समुच्चयस्याशास्त्रार्थतेत्याह—** कुरु कर्मैवेति।

**प्राथमिकेन सम्बन्धग्रन्थेन समस्तशास्त्रार्थसङ्ग्राहकेण तद्विवरणात्मनोऽस्य सन्दर्भस्य नास्ति पौनरुक्त्यमिति मत्वा प्रतिपदं**

भाष्यार्कप्रकाशः

'नाहं कर्ता, नाहं भोक्ते'ति ज्ञानविरोधः। ननु भगवता समुच्चय एव द्वितीयाध्याये प्रोक्तः। अर्जुनस्तु तदर्थमज्ञात्वा - ज्ञाने केषाञ्चिदधिकारः, कर्मणि तु स्वस्याधिकारः प्रोक्तो भगवतेति - मत्वा 'ज्यायसी चेद्' इति पप्रच्छेत्यत आह— **अविवेकत इति। भिन्नपुरुषानुष्ठेयत्वेनेति।** 'लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ। ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्॥' इति साङ्ख्ययोगिरूपपुरुषद्वयानुष्ठेयत्वेनेत्यर्थः। ननु भगवानप्यविवेकादेव तादृशमुत्तरमवोचदित्यत आह— **न चेति।** भगवति सर्वज्ञे भ्रमप्रमादादिदोषगन्धरहिते अज्ञानायोगादिति भावः। **तस्माच्चे**ति तस्माच्छब्दार्थं स्वयमेव विवृणोति—**भिन्नपुरुषेति।** एकपुरुषा-नुष्ठेयत्वे सति ज्ञानकर्मणोः समुच्चयः स्यादिति भावः।

किञ्च यदि समुच्चय एव भगवदभिमतः, अर्जुनाय प्रोक्तश्च तर्हि , 'तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्' इति कथमर्जुनः ज्ञानकर्मणोरन्यतरदेव श्रेयःप्रापकं पप्रच्छ? इत्याह— **ज्ञानकर्मणोरिति।** भगवांश्च 'मया समुच्चय एवोक्तः, किमित्थं त्वं भ्रान्तोऽसि, न ह्यन्यतराच्छ्रेयः प्राप्तुं शक्यम् , तस्मात् त्वमुभयं कुरु' इत्येवात्र चतुर्थाध्याये ब्रूयात् , न तु 'कुरु कर्मैव तस्मात्त्वम्' इति ब्रूयादित्याह— **उभयोरित्यादिना।** ज्ञाननिष्ठाया असम्भवमिति समासः। **अवधारणेनेति।** कर्मैवेत्येवकारेणेत्यर्थः।

एतेन आत्मयाथात्म्यदर्शनपूर्वकं कर्म कर्तव्यमिति **रामानुजमतं** च प्रत्युक्तम् , आत्मयाथात्म्यदर्शनस्य साङ्ख्यविषयत्वात् , कर्मणश्च योगिविषयत्वाद् , अकर्त्रभोक्त्रात्मदर्शनस्य कर्तृत्वाद्यभिमानपूर्वककर्मविरोधित्वाच्चेति।

हे जनार्दन ! यदि कर्मणो बुद्धिर्ज्यायसीति ते मता, तर्हि , हे केशव ! मां घोरे कर्मणि किमिति नियोजयसीत्यन्वयः। **श्रेयसी**

१. 'तस्माच्च' इति पा.। २. 'प्रश्नानुरूपत्वाद्' इति पा.।

ज्यायसी चेदिति। ज्यायसी **श्रेयसी** चेद् **यदि कर्मणः सकाशात्** ते **तव** मताऽभिप्रेता बुद्धिः **ज्ञानं, हे जनार्दन ! यदि बुद्धिकर्मणी समुच्चिते इष्टे , तदा एकं श्रेयःसाधनमिति कर्मणो ज्यायसी बुद्धिरिति कर्मणोऽतिरिक्तकरणं बुद्धेः अनुपपन्नमर्जुनेन कृतं स्यात्। न हि तदेव तस्मात् फलतोऽतिरिक्तं स्यात्। तथा ([१]च) कर्मणः श्रेयस्करी भगवतोक्ता**

आनन्दगिरिकृतव्याख्या

**व्याख्यातुं प्रश्नैकदेशं समुत्थापयति—** ज्यायसी चेदिति। **'वेदाश्चेत् प्रमाण'मितिवत् चेदित्यस्य निश्चयार्थत्वं व्यावर्तयति—** यदीति। **बुद्धिशब्दस्यान्तःकरणविषयत्वं व्यवच्छिनति—**ज्ञानमिति। **पूर्वार्धस्याक्षरयोजनां कृत्वा समुच्चयाभावे तात्पर्यमाह—** यदीति। इष्टे **भगवतेति शेषः।** एकं **ज्ञानं कर्म च समुच्चितमिति यावत्। ज्ञानकर्मणोरभीष्टे समुच्चये समुच्चितस्य श्रेयःसाधनस्यैकत्वात् कर्मणः सकाशाज्ज्ञानस्य पृथक्करणमयुक्तमित्यर्थः। एकमपि साधनं फलतोऽतिरिक्तं किं न स्यादित्याशङ्क्याह—** न हीति। **न च केवलात् कर्मणो ज्ञानस्य केवलस्य फलतोऽतिरिक्तत्वं विवक्षित्वा पृथक्करणम् , समुच्चयपक्षे प्रत्येकं श्रेयःसाधनत्वानभ्युपगमादिति भावः। पूर्वार्धस्येव उत्तरार्धस्यापि समुच्चयपक्षे तुल्याऽनुपपत्तिरित्याह—** तथेति। **'दूरेण ह्यवरं कर्मे'त्यत्र कर्मणः सकाशाद् बुद्धिः श्रेयस्करी भगवतोक्ता, कर्म च बुद्धेः सकाशादश्रेयस्करमुक्तम् , तथापि [२]तदेव कर्म 'कर्मण्येवाधिकारस्ते मा फलेषु' इति स्निग्धं भक्तं च मां प्रति कुर्विति भगवान् प्रतिपादयति, तत्र कारणानुपलम्भाद् अयुक्तमतिक्रूरे कर्मणि भगवतो मन्नियोजनमिति यदर्जुनो ब्रवीति, तच्च समुच्चयपक्षेऽनुपपन्नं स्यादित्यर्थः।**

भाष्यार्कप्रकाशः

श्रेयस्करीत्यर्थः। हे **जनार्दन**, [३]जनमर्दति गच्छतीति जनार्दनः, सर्वान्तर इत्यर्थः। गत्यर्थानां ज्ञानार्थत्वात् सर्वज्ञ इति वा। जनैरर्द्यते याच्यते इति वा जनार्दनः। तत्तत्पुरुषार्थसिद्धये जना एनं याचन्त इत्यर्थः; तत्सम्बुद्धिः। **एतेन** सर्वज्ञस्य सर्वान्तरस्य च तव यन्मतं तदेव सर्वसम्मतमिति, सर्वपुरुषार्थप्रदेन त्वया यच्चोद्यते तत्करणमेव फलदमिति च **सूच्यते। यदीति।** यदि बुद्धिकर्मणी समुच्चिते इष्टे तर्हि अर्जुनेन कृतं बुद्धेः कर्मणो**ऽतिरिक्तत्वं** पृथक्त्वमधिकत्वं वाऽनुपपन्नं स्यात्। कुत्र कृतमर्जुनेनेत्यत आह— **तदेकमिति**। 'तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुया'मिति, 'ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दने'ति चात्रैवोक्तमित्यर्थः। ननु समुच्चयेऽपि कर्मातिरिक्ता बुद्धिः स्यात् , को दोषः? तत्राह— **न हीति**। तदेव तस्मात् फलतोऽतिरिक्तं न हि स्यादित्यन्वयः। समुच्चयस्य कर्मज्ञानोभयरूपत्वेन कर्म बुद्धिश्चेत्युभयमप्येकमेव। एकसमुच्चयात्मकत्वादिति कृत्वा कथमेकात्मकयोः कर्मबुद्ध्योः पृथक्त्वम् उत्कर्षापकर्षौ वा स्याताम्? न कथमपीत्यर्थः।

**ननु** शिरःपाण्याद्यवयवसमूहात्मकेऽपि गात्रे यथा पादादिभ्यः शिरः प्रधानमित्युच्यते, तद्वत् कर्मबुद्ध्युभयात्मकेऽपि समुच्चये कर्मणो बुद्धिः श्रेयस्करीत्युच्यत इति चेत् , **मैवम्** ; दृष्टान्तदार्ष्टान्तिकयोरुभयोरपि अवयवातिरिक्तस्यावयविनोऽभावात्। न हि शिरः-पाण्याद्यतिरिक्तं गात्रमिति कश्चिदवयव्यस्ति, येन तदवयवान्यतमयोः शिरःपादयोरुत्कर्षापकर्षावुच्येयाताम्। तथा कर्मबुद्ध्यतिरिक्तः समुच्चय इति कश्चिदवयवी नास्ति, येन समुदायावयवान्यतरयोः ज्ञानकर्मणोरुत्कर्षापकर्षावुच्येयाताम्। तस्माच्छिरआद्यवयवानामेव गात्रमिति, कर्मबुद्ध्योरेव समुच्चय इति च संज्ञा। तथा च यथा शिरो गात्रम् , तथा पादोऽपि गात्रमेव; यथा कर्म समुच्चयस्तथा बुद्धिरपि समुच्चय एवेति सिद्धम्। ततश्च कर्मणो बुद्धिः श्रेयसीत्युक्तौ समुच्चयात् समुच्चयः श्रेयानित्यापतितम्। तच्चायुक्तम् ; न हि तदेव तस्मात् फलतोऽतिरिक्तं स्यादिति। **ननु** तथा सति 'सर्वस्य गात्रस्य शिरः प्रधान'मित्युक्तिः कथमुपपद्येतेति चेत्? **उच्यते**— अविवेकादिति। न ह्यवयवातिरिक्तावयविकल्पने अविवेकं विना हेतुरस्ति। न च 'पादाच्छिरः उत्कृष्ट'मित्यस्य कथमुपपत्तिरिति वाच्यम् ; अवयव्यनभ्युपगमे सिद्धान्ते अवयवानामेकात्मकत्वाभावाच्छिरःपादयोः पृथगवयवयोरुत्कर्षापकर्षौ सुष्टूपपद्येते। अतः प्रकृते च समुच्चयानभ्युपगमे कर्मज्ञानयोः पृथग्भूतयोरुत्कर्षापकर्षौ स्यातामेवेति। **एतेन** कर्मज्ञानसमुच्चय इति कश्चन पदार्थो दुर्निरूप इति **व्यक्तम्।**

**तथा चेति**। कर्मणो बुद्धेरतिरिक्तीकरणेन कर्मज्ञानयोः समुच्चयस्यासिद्धत्वादित्यर्थः। हे कृष्ण! भगवता त्वयोक्ता बुद्धिः कर्मणः

---

१. क्वचिन्न। २. तदेव कर्म कुरु इति संबन्धः। ३. जनार्दनशब्दस्य व्युत्पादनं भाष्यकारैः (भ.गी.१०-१८) इत्यत्र कृतं द्रष्टव्यम्।

**व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे।**
**तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्॥ २॥**

**बुद्धिः, अश्रेयस्करं च कर्म कुर्विति मां प्रतिपादयति, तत् किं नु कारणमिति भगवतः उपालम्भमिव कुर्वन् , तत्** किं **कस्मात् कर्मणि** घोरे **क्रूरे हिंसालक्षणे मां नियोजयसि, केशव ! इति च यदाह , तच्च नोपपद्यते।**

**अथ स्मार्तेनैव कर्मणा समुच्चयः सर्वेषां भगवतोक्तोऽर्जुनेन चावधारितश्चेत् , 'तत् किं कर्मणि घोरे मां नियोजयसी'त्यादि कथं युक्तं वचनम्?॥ १॥**

**किञ्च—** व्यामिश्रेणेति। व्यामिश्रेणेव, **यद्यपि विविक्ताभिधायी भगवान् , तथापि मम मन्दबुद्धेर्व्यामिश्रमिव भगवद्वाक्यं प्रतिभाति। तेन मम बुद्धिं मोहयसीव। मम [1]बुद्धिव्यामोहापनयाय हि प्रवृत्तस्त्वं तु कथं मोहयसि? अतो**

आनन्दगिरिकृतव्याख्या

**यत्तु** वृत्तिकारै**रुक्तम् — 'श्रौतेन स्मार्तेन च कर्मणा समुच्चयो गृहस्थानां श्रेयःसाधनम् , इतरेषां स्मार्तेनैवेति भगवतोक्तम् , अर्जुनेन च निर्धारित'मिति, तदेतदनुवदति—**अथेति। **तत्रापि 'तत्किम्' इत्याद्युपालम्भवचनमनुपपन्नम् , कर्ममात्रे समुच्चयवादिनो भगवतो नियोजनाभावादिति[2] दूषयति—** तत्किमिति॥ १॥

**इतश्च प्रश्नः समुच्चयानुसारी न भवतीत्याह—**किञ्चेति। **भगवतो विविक्तार्थवादित्वाद् अयुक्तं 'व्यामिश्रे'त्यादिवचनम् इत्याशङ्क्याह—**यद्यपीति। **यदि भगवद्वचनं सङ्कीर्णमिव ते भाति, तर्हि तेन त्वदीयबुद्धिव्यामोहनमेव तस्य विवक्षितमिति किमिति मोहयसीवे-**

भाष्यार्कप्रकाशः

श्रेयस्करी मास्तु , अश्रेयस्करं कर्म कुर्विति प्रतिपादयसि; **तत्** तत्र **किन्नु** किं वा कारणमिति भगवत उपालम्भं कुर्वन्निव अर्जुनो यदाह , तच्च नोपपद्यते इत्यन्वयः। किमाहेति शङ्कायां श्लोकस्योत्तरार्धं व्याचष्टे— **तत्किमित्यादिना। तत्** तर्हि हे केशव! 'क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम्। आवां तवाङ्गे सम्भूतौ तस्मात् केशवनाम ते॥' इति स्मरणाद् ब्रह्मरुद्रकारणम्। एतेन सर्वजगत्कर्तुः सर्वाधिपस्य तव मम कर्मसु प्रेरणं नोचितमिति प्रतीयते। अथवा ब्रह्मरुद्राधिपस्त्वं येन केनापि हेतुना मां कर्मणि नियोजयसि, न तु वृथा, नाप्यमर्षेण, किन्तु स हेतुः मम दुरधिगमः; न केवलं मम, किन्तु ब्रह्मरुद्रयोरपि; अतः पृच्छामि कस्तत्र हेतुरिति। इदमेव सूचयितुं श्रीभाष्यकारैः प्रयुक्तम् — उपालम्भमिव कुर्वन्निति **इव**पदम्। न तु वस्तुत उपालम्भं करोतीत्यर्थः।

एतावता ग्रन्थसन्दर्भेण गृहस्थस्य श्रौतस्मार्तकर्मसमुच्चिताद् ज्ञानान्मुक्तिः, ऊर्ध्वरेतसां तु स्मार्तकर्मसमुच्चिताज्ज्ञानान्मोक्ष इति च पूर्वपक्षः, तत्प्रसङ्गागतमन्यच्च खण्डितम्। पुनः पूर्वपक्षयति स्मार्तकर्मसमुच्चितादेव सर्वाश्रमिणां मोक्षः, न केवलज्ञानादिति— **अथेत्यादिना**। दूषयति—**तत्किमित्यादिना।** घोरे कर्मणीत्यनेन युद्धकर्म सिद्धम्। तद्धि स्मार्तम्। स्मार्तकर्मसमुच्चितं ज्ञानं त्वया ऽनुष्ठेयमिति भगवता प्रोक्ते सति कथमर्जुनः 'तत् किं कर्मणि घोरे मां नियोजयसि केशव' इति भगवन्तं पृच्छेत् ? कथं वा 'ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन' इति कर्मापेक्षया ज्ञानस्य श्रेयस्त्वं वदेत्? कथं वा 'तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्' इति पृच्छेत्? अथ यदि भगवतोक्तोऽर्थोऽर्जुनेनानवधारित इत्युच्येत, तर्हि भगवानपि 'मया स्मार्तकर्मज्ञानसमुच्चय एवोक्तः, त्वया तु नाधिगतम्' इति किमिति नावोचत्? 'लोकेऽस्मिन् द्विविधा निष्ठा' इति कर्मज्ञानयोर्भिन्नपुरुषानुष्ठेयत्वं किमिति ब्रूयात्? तस्मात् केवलादेव ज्ञानान्मोक्ष इति गीतासूपनिषत्सु च निश्चितोऽर्थ इति पूर्वेण सम्बन्धः॥ १॥

**व्यामिश्रेणेति**। इवशब्दान्न वस्तुतो व्यामिश्रमिति प्रतीयत इत्यभिप्रेत्याह— **यद्यपीत्यादि**। **विविक्तं** विस्पष्टमभिधत्ते इति विविक्ताभिधायी। **व्यामिश्रम्** अविविक्तम् , सङ्कीर्णमिति यावत्। कर्मज्ञानविषयविवेकरहितमिति परमार्थः। मोहयसीवेत्यत्रापीवशब्दात्

---

१. 'मन्दबुद्धेर्व्यामोहापनयाय' इति पा.। २. समुच्चयवादिनो भगवतः कर्ममात्रे नियोजनाभावादिति संबन्धः। त्वन्मते समुच्चये एवार्जुनस्य भगवता नियोजनादिति भावः।

**ब्रवीमि— बुद्धिं मोहयसीव मे ममेति।** [1]**त्वं तु भिन्नकर्तृकयोर्ज्ञानकर्मणोरेकपुरुषानुष्ठानासम्भवं यदि मन्यसे, तत्रैवं सति** तत् **तयोः** एकं **बुद्धिं कर्म वा, इदमेवार्जुनस्य योग्यं बुद्धिशक्त्यवस्थानुरूपमिति निश्चित्य** वद **ब्रूहि।** येन **ज्ञानेन कर्मणा वाऽन्यतरेण श्रेयोऽहमाप्नुयां प्राप्नुयाम्।** [2]**(इति यदुक्तं तदपि नोपपद्यते।)** [3]**यदि हि कर्मनिष्ठायां गुणभूतमपि ज्ञानं भगवतोक्तं स्यात् , तत् कथं 'तयोरेकं वद' इत्येकविषयैवार्जुनस्य शुश्रूषा स्यात्? न हि भगवतोक्तम्**[4]**— अन्यतरदेव ज्ञानकर्मणोर्वक्ष्यामि, नैव द्वयमिति, येनोभयप्राप्त्यसम्भवमात्मनो मन्यमान एकमेव** [5]**प्रार्थयते॥ २॥**

आनन्दगिरिकृतव्याख्या

**त्युच्यते? तत्राह—** ममेति। **ज्ञानकर्मणी मिथो विरोधाद् युगपदेकपुरुषाननुष्ठेयतया भिन्नकर्तृके कथ्येते। तथा च तयोरन्यतरस्मिन्नेव त्वं नियुक्तः, न तु ते बुद्धिव्यामोहनमभिमतमिति भगवतो मतमनुवदति—** त्वं त्विति। **'तदेक'मित्यादिश्लोकार्धेनोत्तरमाह—** तत्रेति। **उक्तं भागवतं मतं सप्तम्या परामृश्यते।** एवमित्युक्तप्रकारोक्तिः। एक**मित्युक्तमेव स्फुटयति—** बुद्धिमिति। **निश्चयप्रकारं प्रकटयति—** इदमिति। **योग्यत्वं स्पष्टयति—** बुद्धीति। **अस्य क्षत्रियस्य सतोऽन्तःकरणस्य, देहशक्तेः, समरसमारम्भावस्थायाश्चेदमेव ज्ञानं कर्म वाऽनुगुणमिति निर्धार्य ब्रूहीत्यर्थः। निश्चित्यान्यतरोक्तौ तेन श्रोतुः श्रेयोऽवाप्तिं फलमाह—**येनेति। **'तदेक'मित्यादिवाक्यस्याक्षरोत्थमर्थ-मुक्त्वा समुच्चयस्य शास्त्रार्थत्वाभावे तात्पर्यमाह—**यदि हीति। [6]**गुणभूतमपीत्यादिना[त्यपिना] प्रधानभूतमपि वेति विवक्षितम्। ननूभयप्राप्त्यसम्भवमात्मनो मन्यमानस्यार्जुनस्यान्यतरविषया शुश्रूषा भविष्यति, नेत्याह—** न हीति। **यथोक्तभगवद्वचनाभावे द्वय-प्राप्त्यसम्भवबुद्ध्या नान्यतरप्रार्थना सम्भवतीत्याह—**येनेति। **न हि तथाविधं भगवद्वचनं भवतेष्टम् , भगवतः समुच्चयवादित्वाङ्गीकारात्। अतस्तदभावादुक्तबुद्ध्या न युक्ताऽन्यतरप्रार्थनेत्यर्थः॥ २॥**

भाष्यार्कप्रकाशः

न वस्तुतो मोहयसीति प्रतीतमित्याह— **ममेत्यादिना। तत्रेति।** व्यवहारभूमावित्यर्थः। **तत्रैवं सति** भागवते मते एवंरीत्या निश्चिते सतीत्यर्थः। **गुणः** अप्रधानम् , 'गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु' इति कोशः। गुणेन तुल्यं गुणभूतं नित्यसमासः। **शुश्रूषा** श्रोतुमिच्छा।

पुनरपि समुच्चयवादं निराकरोति— **यदीहेति।** ज्ञानयुक्तं कर्म त्वयाऽनुष्ठेयमिति भगवतोक्ते कथमर्जुनस्तयोरेकं मे ब्रूहीति प्रार्थयेत? न कथमपीत्यर्थः। ननु समुच्चय एव भगवतो मतः; किन्तु समुच्चयः सः विवेकवत्पुरुषधौरेयविषयः; तत्र नास्त्यर्जुनस्य प्रवेष्टुं शक्तिरित्यभिप्रेत्य भगवता अन्यतरदेव कर्तव्यत्वेनार्जुनायोपदिष्टमित्यत आह—**न हीति।** किञ्च 'ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्' इति निष्ठाद्वयमेवोवाच भगवान् , न तु विवेकवत्पुरुषधौरेयानुष्ठेयां समुच्चयात्मिकामन्यां निष्ठाम्। तस्मान्नास्ति समुच्चयो-पपत्तिः।

**ननु** 'कर्मण्येवाधिकारस्ते' इति भगवता अर्जुनाय कर्मैव श्रेयस्करत्वेन निश्चित्योक्तमेवेति पुनः कथमर्जुनस्य प्रश्नावकाश इति चेत्? **सत्यम्** ; अत एव 'तत्किं कर्मणि घोरे मां नियोजयसी'त्युपालब्धवान् पार्थः। परं तु भगवता द्वितीयाध्याये सामान्यतः कर्मयोगः, विस्तरतो ज्ञानयोगश्च प्रतिपादितः। अर्जुनस्तु स्नेहकारुण्यादिभीतो युद्धकर्मणो निवृत्तः ज्ञानयोगमवलम्ब्य भिक्षाटनमेव मे श्रेय इति कृतनिश्चय इति 'गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके' इति श्लोकेन सूच्यते। ततश्च संन्यास एव कृतप्रीतेः संन्यास एव साक्षान्निःश्रेयससाधनमिति भगवदुक्त्या निश्चितवतश्चार्जुनस्य 'कर्मण्येवाधिकारस्ते' इत्येतावन्मात्रोपदेशेन न कर्मणि प्रवर्तितु-मिच्छा जाता; नापि संन्यासान्निवर्तितुम्। अत एव पृच्छति— 'तदेकं निश्चित्य वद' इति।

यद्यपि यथापूर्वमेव कर्मैव तव श्रेय इति वक्ष्यति भगवानिति वेदैवार्जुनः; तथापि कस्माज्ज्ञानयोगेऽहं न नियोजितः, कुतो वा कर्मयोगे नियोजितः, सति साक्षाच्छ्रेयःप्रदे ज्ञानयोगे किमिति कर्मयोगः शास्त्रेणोच्यते? इत्यादिहेतूपशमपूर्वकं कर्मयोगस्य माहात्म्यं

---

१. 'तत्र भिन्न' इति रा.पा.। २. कुण्डलितः पाठः न सर्वत्र। ३. 'यदीह' इति रा.पा.। ४. 'भगवता पूर्वमुक्तम्' इति पा.। ५. 'प्रार्थयेत' 'प्रार्थयेत्' इति पा.।
६.ज्ञानकर्मसमुच्चयो ह्यनेकविधः। उभयोः समत्वेन, परस्परगुणप्रधानभावाभ्युपगमेन चेति भावः।

**श्रीभगवानुवाच—**

**लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ !।**
**ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥३॥**

**प्रश्नानुरूपमेव प्रतिवचनं श्रीभगवानुवाच—** लोकेऽस्मिन्निति। **लोकेऽस्मिन् शास्त्रार्थानुष्ठानाधिकृतानां**

आनन्दगिरिकृतव्याख्या

**समुच्चयविरोधितया प्रश्नं व्याख्याय तद्विरोधित्वेनैव प्रतिवचनमुत्थापयति—** प्रश्नेति। **येयं व्यवहारभूमिरुपलभ्यते, तत्र ये त्रैवर्णिकाः ज्ञानं कर्म वा शास्त्रीयमनुष्ठातुमधिक्रियन्ते, तेषां** [1]**द्विधा स्थितिर्मया प्रोक्तेति पूर्वार्धं योजयति—** लोकेऽस्मिन्निति। **स्थितिमेव**

भाष्यार्कप्रकाशः

श्रोतुकामः पप्रच्छ तथाऽर्जुन इति। **अथवा** 'कर्मण्येवाधिकारस्ते' इति कर्मोपदिष्टमर्जुनाय, 'बुद्धौ शरणमन्विच्छ' इति साङ्ख्यं चोपदिष्टं द्वितीयाध्याये; अतः पृच्छत्यर्जुनः—तदेकं वद निश्चित्येति।

**वस्तुतस्तु** न कृष्णेन तथा व्यामिश्रमभिहितम् , किन्तु विविक्तमेव। कथम्? तावत् कर्मयोगं कुरु, पश्चाच्चित्तशुद्धौ परमार्थ-ज्ञानशरणो भवेति, 'श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला। समाधावचला बुद्धिस्तदा योगमवाप्स्यसी'त्युक्तत्वात्। अर्जुनस्तु एतद् अविदित्वा तथा पप्रच्छेति बोध्यम्।

यत्तु **रामानुजः—** आत्मावलोकनसाधनभूतायाः सर्वेन्द्रियव्यापारोपरतिरूपायाः ज्ञाननिष्ठायास्तद्विपर्ययरूपं कर्म[2] साधनम् , तदेव कुरु इति वाक्यं व्यामिश्रं [3]विरुद्धमेव। तस्माद् एकम् अमिश्ररूपं वाक्यं वद , येन वाक्येन अहमनुष्ठेयरूपं निश्चित्य श्रेयः प्राप्नुयामिति बभाषे। **तत्तुच्छम्** ; कर्मयोगनिष्पाद्यो ज्ञानयोग इत्युक्तस्य वाक्यस्य कथं विरुद्धत्वम्? यदि तु कर्मयोग एव ज्ञानयोग इत्युच्येत, तर्हि भवतु विरोधः, इन्द्रियव्यापारतदुपरमरूपत्वादुभयोः। न चेन्द्रियव्यापारसाध्यत्वमिन्द्रियव्यापारोपरमस्य विरुद्धमिति वाच्यम् ; 'तदुदितः स हि यो यदनन्तरः' इति यदनन्तरन्यायेन इन्द्रियव्यापारानन्तरजन्याया निद्राया इन्द्रियव्यापारोपरतिरूपाया दर्शनात्। मनोव्यापारोपरमस्येन्द्रियनिग्रहादिरूपमनोव्यापारसाध्यत्वदर्शनाच्च।

तथा - **व्यामिश्रं** विरुद्धम् , **एकम्** अविरुद्धमित्यर्थवर्णनमप्ययुक्तम् , ताभ्यां तादृशार्थालाभात्।

तथा - कर्मयोगनिष्पाद्या बुद्धिर्यदि ज्यायसीति ते मता, तर्हि किमिति मां कर्मणि नियोजयसीत्युपालम्भोऽप्यनुपपन्नः, कर्मणि नियुक्तेन कर्मयोगे साधिते सति तन्निष्पाद्यज्ञानयोगलाभात्। बुद्धिकर्मणी प्रकृत्य एकं वद इत्यनेन तयोरेकमित्येवार्थस्य स्वरसतः सिद्धत्वात् , वदेत्यनेनैवेष्टसिद्धौ वाक्यं वदेति व्याख्यानस्य पौनरुक्त्यावहत्वाच्च।

निश्चित्येत्यस्योत्तरवाक्यान्वयोऽप्यसाधुः, भगवतोक्तेऽर्थे स्वनिश्चयस्यानपेक्षत्वात्। यद् यथा भगवतोक्तं तत् तथैव कर्तव्यं खलु? कः पुनरर्थस्तत्र पुरुषस्य निश्चयेन? न च निश्चित्य वदेत्यन्वये भगवतः सर्वज्ञत्वभङ्गप्रसङ्ग इति वाच्यम् ; यथा मम वाक्यार्थो निर्णीतः स्यात् तथा वदेति विवक्षितत्वेनादोषात्। येनेत्यस्य वाक्येनेत्यर्थोऽप्ययुक्तः, श्रेयःप्राप्तौ यत् करणं तस्यैवेहाकाङ्क्षितत्वात् ; वाक्येन केवलेन श्रेयोऽलाभान्न तस्य करणत्वम् ; वाक्यस्यैव 'त्वं कर्मैव (न) कुरु' इति [4]निश्चयात्मकत्वेन वाक्येन निश्चित्य इत्यप्ययुक्तमिति॥२॥

**लोके इति। प्रश्नानुरूपमिति।** न तु वृत्तिकारादिमतवत्प्रश्नाननुरूपमित्यर्थः। श्रीभगवान् प्रश्नानुरूपमेव प्रतिवचनमुवाच इत्यन्वयः। **त्रैवर्णिकाः** ब्रह्मक्षत्रियवैश्याः। शूद्राणां तु नास्त्यधिकार इति भावः। युज्यत इति योगः। यद्वा युज्यतेऽनेनेति योग उपायः, पुरुषार्थप्राप्तिसाधनत्वादिति भावः। आत्मानात्मविषयो विवेकः- 'अयमात्मा, इदमनात्मा' इति, स एव ज्ञानम् , तद् येषामस्ति तेषां

---

१. 'द्वयी' इति पा.। २. अत्र 'ज्ञाननिष्ठायास्तद्विपर्ययं कर्म कुरु, तदेव साधनम्' इति मुद्रितः पाठो विद्यते। स च रामानुजभाष्यानुसारेण शोधितः। ३. तद्विपर्यय-रूपं कर्म कथं तत्साधनम्? तद्विरुद्धं च तदर्थिना कथं कर्तव्यम्? इति व्याहतिरत्राभिप्रेता। ४. वाक्यजन्यबोधस्य निश्चयात्मकत्वाव्यभिचारादिति भावः।

**त्रैवर्णिकानां** द्विविधा **द्विप्रकारा** निष्ठा **स्थितिः अनुष्ठेयतात्पर्यम्** पुरा **पूर्वं सर्गादौ प्रजाः सृष्ट्वा तासामभ्युदयनिःश्रेयस-प्राप्तिसाधनं वेदार्थसम्प्रदायमाविष्कुर्वता प्रोक्ता मया सर्वज्ञेनेश्वरेण,** हेऽनघ **अपाप ! तत्र का सा द्विविधा निष्ठेत्याह— [**ज्ञानेति।**]**[१] **तत्र** ज्ञानयोगेन **ज्ञानमेव योगस्तेन** साङ्ख्यानाम् **आत्मानात्मविषयविवेकज्ञानवतां ब्रह्मचर्याश्रमादेव कृतसंन्यासानां वेदान्तविज्ञानसुनिश्चितार्थानां परमहंसपरिव्राजकानां ब्रह्मण्येवावस्थितानां निष्ठा प्रोक्ता।** कर्मयोगेन **कर्मैव योगः कर्मयोगस्तेन कर्मयोगेन** योगिनां **कर्मिणां निष्ठा प्रोक्तेत्यर्थः।**

**यदि चैकेन पुरुषेणैकस्मै पुरुषार्थाय ज्ञानं कर्म च समुच्चित्यानुष्ठेयं भगवतेष्टमुक्तं वक्ष्यमाणं वा गीतासु , वेदेषु चोक्तम् , कथमिहार्जुनायोपसन्नाय प्रियाय विशिष्टभिन्नपुरुषकर्तृके एव ज्ञानकर्मनिष्ठे ब्रूयात्? यदि पुनरर्जुनः ज्ञानं कर्म च द्वयं श्रुत्वा स्वयमेवानुष्ठास्यति, अन्येषां तु भिन्नपुरुषानुष्ठेयतां वक्ष्यामीति मतं भगवतः कल्प्येत, तदा रागद्वेषवान्**

आनन्दगिरिकृतव्याख्या

**व्याकरोति—** अनुष्ठेयेति। **पूर्वं प्रवचनप्रसङ्गं प्रदर्शयन् प्रवक्तारं विशिनष्टि—** सर्गादाविति। **प्रवचनस्यायथार्थत्वशङ्कां वारयति—** सर्वज्ञेनेति। **अर्जुनस्य भगवदुपदेशयोग्यत्वं सूचयति—** अनघेति। **निर्धारणार्थे** तत्रेति **सप्तमी।** ज्ञानं **परमार्थवस्तुविषयं, तदेव योगशब्दितं, युज्यतेऽनेन ब्रह्मणेति व्युत्पत्तेः, तेन । निष्ठेत्यनुवर्तते। उक्तज्ञानोपायमुपदिदिक्षुः साङ्ख्यशब्दार्थमाह—** आत्मेति। **तेषामेव कर्मनिष्ठत्वं व्यावर्तयति—** ब्रह्मचर्येति। **तेषां जपादिपारवश्येन श्रवणादिपराङ्मुखत्वं पराकरोति—** वेदान्तेति। **उक्तविशेषणवतां मुख्यसंन्यासित्वेन फलावस्थत्वं दर्शयति—** परमहंसेति। कर्म **वर्णाश्रमविहितं धर्माख्यम् , तदेव युज्यतेऽनेनाभ्युदयेनेति योगः, तेन निष्ठा कर्मिणां प्रोक्तेत्यनुषङ्गं दर्शयन्नाह—** कर्मैवेत्यादिना।

**एवं प्रतिवचनवाक्यस्थान्यक्षराणि व्याख्याय तस्यैव तात्पर्यार्थं कथयति—** यदि चेति। **इष्टस्यापि दुर्बोधत्वमाशङ्क्याह—** उक्तमिति। **ज्ञानस्यापि मूलविकलतया विभ्रमत्वमाशङ्क्याह—**वेदेष्विति। **तस्याशिष्यत्वबुद्ध्याऽन्यथाकथनमित्याशङ्क्याह—**उपसन्नायेति। **तथापि तस्मिन्नौदासीन्यादन्यथोक्तिरित्याशङ्क्याह—** प्रियायेति। **ब्रवीति च भिन्नपुरुषकर्तृकं निष्ठाद्वयम्। तेन समुच्चयो भगवदभीष्टः शास्त्रार्थो न भवतीति शेषः। नन्वर्जुनस्य प्रेक्षापूर्वकारित्वाज्ज्ञानकर्मश्रवणानन्तरमुभयनिर्देशानुपपत्त्या समुच्चयानुष्ठानं सम्पत्स्यते, तद्व्यतिरिक्तानां तु ज्ञानकर्मणोर्भिन्नपुरुषानुष्ठेयत्वं श्रुत्वा प्रत्येकं तदनुष्ठानं भविष्यतीति भगवतो मतं कल्प्यते, तस्यार्जुनेऽनुरागातिरेकाद् इतरेषु च तदभावादिति, तत्राह—** यदि पुनरिति। अप्रमाणभूतत्वम् **अनाप्तत्वम्। न च भगवतो रागादिमत्त्वेनानाप्तत्वं युक्तं, 'समं सर्वेषु**

भाष्यार्कप्रकाशः

तथोक्तानाम्। साङ्ख्यं ज्ञानं, तदेषामस्तीति साङ्ख्या इति व्युत्पादितत्वादिति भावः। के ते साङ्ख्याः? अत आह— **ब्रह्मचर्यादिति।** 'वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद् यतयः शुद्धसत्त्वाः' इति श्रुतिमिहानुक्रामयति—**वेदान्तेति। वेदान्तविज्ञानं** वेदान्तशास्त्र-श्रवणम् , तेन सुष्ठु निश्चितः अर्थः परमार्थतत्त्वमात्मा यैस्ते वेदान्तविज्ञानसुनिश्चितार्थाः[२]। यद्वा वेदान्तैर्जातं यद्विशिष्टं ज्ञानं 'ब्रह्माहमस्मी'त्याकारकं तेन सुनिश्चितोऽर्थः परमपुरुषार्थो मोक्षः येषां ते तथोक्ताः। 'ब्रह्मण्येव' इत्येवकारान्नाविद्याकृतकर्मव्यवहारे इत्यर्थः। हे अनघ ! अस्मिन् लोके पुरा मया साङ्ख्यानां ज्ञानयोगेन, योगिनां कर्मयोगेन च द्विविधा निष्ठा प्रोक्तेत्यन्वयः।

पुनः समुच्चयवादं निराकरोति— **यदि चेत्यादिना।** उपपन्नः[उपसन्नः] प्रपन्नः। **विशिष्टेति।** साङ्ख्यत्वयोगित्वविशेषणविशिष्टे-त्यर्थः। विशिष्टौ भिन्नौ पुरुषौ कर्तारौ ययोस्ते विशिष्टभिन्नपुरुषकर्तृके। **अनुष्ठास्यतीति।** द्वयमिति कर्म। **रागद्वेषेति।** यथा मत्प्रिय-शिष्योऽर्जुनः कर्मज्ञानसमुच्चयमनुष्ठाय मुच्येत, यथा चेतरे अन्यतरदनुष्ठाय न मुच्येरन् , तथा मया वक्तव्यमिति कपटबुद्ध्या यदि भगवान् प्रवर्तेत, तर्हि जीववत् सोऽपि रागद्वेषवत्त्वेनाग्राह्यवाक्य एव स्यात्। **तच्चायुक्तमिति।** अपहतपाप्मनि सर्वसमे सर्वसुहृदि भगवति रागद्वेषादिदोषाप्रसङ्गादिति भावः।

---

१. क्वचिन्न। २. वेदान्तजनितं विज्ञानं वेदान्तविज्ञानम् , तस्य अर्थो विषयः आत्मा, स सुनिश्चितो येषां ते तथा, आत्मतत्त्वविदः इत्यर्थः। द्र.मु.उ.भाष्यम् ३-२-६।

**न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।**
**न च संन्यसनादेव सिद्धिं समधिगच्छति॥४॥**

**अप्रमाणभूतो भगवान् कल्पितः स्यात्। तच्चायुक्तम्। तस्मात् कयाऽपि युक्त्या न समुच्चयो ज्ञानकर्मणोः॥३॥**

**यदर्जुनेनोक्तं कर्मणो[1] ज्यायस्त्वं बुद्धेः, तच्च स्थितम्, अनिराकरणात्। तस्याश्च [2]ज्ञाननिष्ठायाः संन्यासिनामेवानुष्ठेयत्वम्। भिन्नपुरुषानुष्ठेयत्ववचनाद् भगवत एवमेवानुमतमिति गम्यते।[3]**

**'मां च बन्धकारणे कर्मण्येव नियोजयसी'ति विषण्णमनसम् अर्जुनं 'कर्म नारभे' इत्येवं मन्वानमालक्ष्याह भगवान्—** न कर्मणामनारम्भादिति। **अथवा - ज्ञानकर्मनिष्ठयोः परस्परविरोधादेकेन पुरुषेण युगपदनुष्ठातुमशक्यत्वे सति इतरेतरानपेक्षयोरेव पुरुषार्थहेतुत्वे प्राप्ते, कर्मनिष्ठाया ज्ञाननिष्ठाप्राप्तिहेतुत्वेन पुरुषार्थहेतुत्वम्, न स्वातन्त्र्येण। ज्ञाननिष्ठा तु कर्मनिष्ठोपायलब्धात्मिका सती स्वातन्त्र्येण पुरुषार्थहेतुरन्यानपेक्षा[4] - इत्येतमर्थं दर्शयिष्यन्नाह भगवान् —** न कर्मणामिति। **न** [5]कर्मणां **क्रियाणां यज्ञादीनामिह जन्मनि जन्मान्तरे वाऽनुष्ठितानामुपात्तदुरितक्षयहेतुत्वेन**

आनन्दगिरिकृतव्याख्या

**भूतेषु तिष्ठन्तम्' इत्यादिविरोधादित्याह—** तच्चेति। **निष्ठाद्वयस्य भिन्नपुरुषानुष्ठेयत्वनिर्देशफलमुपसंहरति—** तस्मादिति॥३॥

**किमिति भगवता बुद्धेर्ज्यायस्त्वं 'ज्यायसी चेद्' इत्यत्रोक्तमुपेक्षितमिति, तत्राह—** यदर्जुनेनेति। **किञ्च ज्ञाननिष्ठायां संन्यासिनामेवाधिकारो भगवतोऽभिप्रेतः, अन्यथा तदीयविभागवचनविरोधादिति विभागवचनसामर्थ्यसिद्धमर्थमाह—** तस्याश्चेति। **तर्हि विभागवचनानुरोधादर्जुनस्यापि संन्यासपूर्विकायां ज्ञाननिष्ठायामेवाधिकारो भविष्यति, नेत्याह—** मां चेति। **बुद्धेर्ज्यायस्त्वमुपेत्यापीति चकारार्थः। अर्जुनमालक्ष्य भगवानाहेति सम्बन्धः। अन्तरेणापि कर्माणि श्रवणादिभिर्ज्ञानावाप्तिर्भविष्यतीति परबुद्धिमनुरुध्य विशिनष्टि—** कर्मेति। **विभागवचनवशादसमुच्चयश्चेदुभयोरपि ज्ञानकर्मणोः स्वातन्त्र्येण पुरुषार्थहेतुत्वम्; अन्यथा कर्मवज्ज्ञानमपि न स्वातन्त्र्येण पुरुषार्थं साधयेदित्याशङ्क्य सम्बन्धान्तरमाह—** अथवेति। **तर्हि ज्ञाननिष्ठाऽपि कर्मनिष्ठावन्निष्ठात्वाविशेषान्न स्वातन्त्र्येण पुरुषार्थहेतुरिति समुच्चयसिद्धिरित्याशङ्क्याह—** ज्ञाननिष्ठा त्विति। **न हि रज्जुतत्त्वज्ञानमुत्पन्नं फलसिद्धौ सहकारिसापेक्षमालक्ष्यते। तथेदमपि चोत्पन्नं मोक्षाय नान्यदपेक्षते। तदाह—**अन्येति। **'यस्य वैतत् कर्म' इति श्रुताविव[6] कर्मशब्दस्य क्रियमाणवस्तुविषयत्वमाशङ्क्य व्याचष्टे—** क्रियाणामिति। **ताश्च नित्यनैमित्तिकत्वेन विभजते—** यज्ञादीनामिति। **अस्मिन्नेव जन्मन्यनुष्ठितानां कर्मणां बुद्धिशुद्धिद्वारा ज्ञानकारणत्वे ब्रह्मचारिणां कुतो ज्ञानोत्पत्तिः? जन्मान्तरकृतानां वा कर्मणां तथात्वे गृहस्थादीनामैहिकानि कर्माणि न ज्ञानहेतवः स्युरित्याशङ्क्यानियमं दर्शयति—**इहेति। **नेमानि सत्त्वशुद्धिकारणानि, उपात्तदुरितप्रतिबन्धादित्याशङ्क्याह—**उपात्तेति। **तर्हि तावतैव कृतार्थानां कुतो ज्ञान-**

भाष्यार्कप्रकाशः

**स्थितमिति।** सिद्धान्तितमित्यर्थः। तत्र हेतुमाह— **अनिराकरणादिति।** न कर्मणो बुद्धिर्ज्यायसीति भगवताऽनिराकृतत्वादर्जुनोक्तार्थस्येत्यर्थः। **तस्याश्च** बुद्धेरित्यर्थः। **संन्यासिनैवेति।** 'ज्ञानयोगेन साङ्ख्याना'मित्युक्तत्वादिति भावः। सर्वकर्मसंन्यासरूपज्ञाननिष्ठायाः कर्मिगृहस्थाविषयत्वादिति तत्त्वम्। **अनुमतम्** अङ्गीकृतं सम्मतमिति यावत्॥३॥

नेति श्लोकमवतारयति— **मां चेति। चस्त्वर्थः।** प्रियं भक्तमपि मामिति वा। **नारभे** नोपक्रमे, न कुर्वे इति यावत्। **मन्वानं** मन्यमानं, निश्चितवन्तमिति यावत्। **कर्मनिष्ठोपायलब्धात्मिका**, कर्मनिष्ठा कर्मयोगः, सैवोपायः साधनं, तेन लब्धः आत्मा स्वरूपं यस्याः सा तथोक्ता। स्वातन्त्र्येणेति पदं स्वयमेव व्याकरोति— **अन्यानपेक्षयेति। तत्कारणत्वेन** सत्त्वशुद्धिकारणत्वेन। **ज्ञानमिति।** पुंसां

१. कर्मणः इति पञ्चमी। २. 'ज्ञाननिष्ठायाः' इति रा.पाठे नास्ति। ३. क्वचिदत्रैव तृतीयश्लोकसमाप्तिर्दृश्यते, न पूर्वम्। भाष्यार्कप्रकाशानुसारेणापि तथैव। ४. 'अन्यानपेक्षया' इति रा.पा.। ५. 'कर्मणाम् अनारम्भाद् अप्रारम्भात्; कर्मणाम्' इति रा.पा.। ६. उक्तश्रुतौ क्रियत इति व्युत्पत्त्या कर्मशब्दार्थः कार्यसामान्यम्। 'जगद्वाचित्वात्' (ब्र.सू. १-४-१६) इति सूत्रे एतन्निरूपितम्।

**सत्त्वशुद्धिकारणानां, तत्कारणत्वेन च ज्ञानोत्पत्तिद्वारेण ज्ञाननिष्ठाहेतूनाम् - 'ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः। यथाऽऽदर्शतलप्रख्ये पश्यत्यात्मानमात्मनि'(म.भा.शा.२०४.८)इत्यादिस्मरणाद् -** अनारम्भाद् **अननुष्ठानाद्** नैष्कर्म्यं **निष्कर्मभावं कर्मशून्यतां ज्ञानयोगेन निष्ठाम् , निष्क्रियात्मस्वरूपेणैवावस्थानमिति यावत् ; पुरुषो** नाश्नुते **न प्राप्नोतीत्यर्थः।**

**कर्मणामनारम्भाद् नैष्कर्म्यं नाश्नुते इति वचनात् , तद्विपर्ययात् तेषामारम्भाद् नैष्कर्म्यमश्नुते इति गम्यते। कस्मात्पुनः कारणात् कर्मणामनारम्भान्नैष्कर्म्यं नाश्नुत इति? उच्यते— कर्मारम्भस्यैव नैष्कर्म्योपायत्वात्। न ह्युपायमन्तरेणोपेयप्राप्तिरस्ति। [१]कर्मयोगोपायत्वं च नैष्कर्म्यलक्षणस्य ज्ञानयोगस्य श्रुताविह च प्रतिपादनात्। श्रुतौ तावत् प्रकृतस्यात्मलोकस्य वेद्यस्य वेदनोपायत्वेन 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन'(बृ.उ.४.४.२२) इत्यादिना कर्मयोगस्य ज्ञानयोगोपायत्वं प्रतिपादितम्। इहापि च 'संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः' (भ.गी. ५.६) 'योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये' (भ.गी.५.११) 'यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्' (भ. गी. ८.५) इत्यादि प्रतिपादयिष्यति।**

आनन्दगिरिकृतव्याख्या

**निष्ठाहेतुत्वम्? तत्राह—** तत्कारणत्वेनेति। **कर्मणां चित्तशुद्धिद्वारा ज्ञानहेतुत्वे मानमाह—** ज्ञानमिति। अनारम्भ**शब्दस्योपक्रमविपरीत-विषयत्वं व्यावर्तयति—** अननुष्ठानादिति। **निष्कर्मणः संन्यासिनः कर्म ज्ञानं नैष्कर्म्यमिति व्याचष्टे—** निष्कर्मेति। **कर्माभावावस्थां व्यवच्छिनत्ति—** ज्ञानयोगेनेति। **तस्याः साधनपक्षपातित्वं व्यावर्तयति—** निष्क्रियेति।

**कर्मानुष्ठानोपायलब्धा ज्ञाननिष्ठा स्वतन्त्रा पुमर्थहेतुरिति प्रकृतार्थसमर्थनार्थं व्यतिरेकवचनस्यान्वये पर्यवसानं मत्वा व्याचष्टे—** कर्मणामिति। **तद्विपर्ययमेव व्याचष्टे—**तेषामिति। **उक्तेऽर्थे हेतुं पृच्छति—**कस्मादिति। **जिज्ञासितं हेतुमाह—**उच्यत इति। **उपायत्वेऽपि तदभावे कुतो नैष्कर्म्यासिद्धिरित्याशङ्क्याह—** न हीति। **ज्ञानयोगं प्रति कर्मयोगस्योपायत्वे श्रुतिस्मृती प्रमाणयति—** कर्मयोगेति। **श्रौतमुपायोपेयत्वप्रतिपादनं प्रकटयति—** श्रुताविति। **यत्तु गीताशास्त्रे कर्मयोगस्य ज्ञानयोगं प्रत्युपायत्वोपपादनम् , तदिदानीमुदा-हरति—** इहापि चेति।

भाष्यार्कप्रकाशः

पापस्य कर्मणः क्षयाज्ज्ञानमुत्पद्यते। कथमुत्पद्यते? अत आह—**यथेति। आदर्शतलप्रख्ये** दर्पणवदतिस्वच्छे इत्यर्थः। **आत्मनि** मनसि। **आत्मानं** सच्चिदानन्दं ब्रह्म यथा पश्यति, तथा ज्ञानमुत्पद्यत इत्यर्थः। यथा निर्मले आदर्शतले पुरुषः स्वप्रतिबिम्बं पश्यति तथा निष्पापे मनसि पुरुष आत्मानं पश्यतीति परमार्थः। इह जन्मनि जन्मान्तरे वाऽनुष्ठितैर्निष्कामकर्मभिर्दुरितक्षयः, दुरितक्षयात् सत्त्वशुद्धिः, सत्त्वशुद्धेर्ज्ञानोत्पत्तिः, ज्ञानोत्पत्तेर्ज्ञाननिष्ठाप्राप्तिरिति क्रमः। अत्र केषाञ्चिच्छुकवामदेवादीनां विनैव कर्मयोगं ज्ञाननिष्ठादर्शनाद् **जन्मान्तरे** इत्युक्तम्। यथा ऐहिकसम्पदा जन्मान्तरीयशिवपूजा अनुमीयते, यथा वा क्षयरोगादिना ब्रह्महत्यादीनि जन्मान्तरीयपापानि अनुमीयन्ते, तद्वदिति भावः। कारणं विना कार्यासिद्धेरिति। **ज्ञानम्** आत्मानात्मविवेकः। **ज्ञाननिष्ठा** त्वात्मसाक्षात्कारः।

**उपेयं** साध्यम्। **कर्मयोगोपायत्वस्य** कर्मयोग उपायो यस्य तस्य भावस्तत्त्वं, तस्य। नैष्कर्म्यं लक्षणं स्वरूपं यस्य तस्य **नैष्कर्म्यलक्षणस्येति** ज्ञानयोगविशेषणम्। **वेद्यस्य** ज्ञेयस्य **आत्मलोकस्य** आत्मैव लोक आत्मलोकस्तस्य **वेदनं** ज्ञानं, तदुपायत्वेन। **विविदिषन्ति** वेदितुमिच्छन्ति। आदिपदात् 'दानेन तपसाऽनाशकेने'ति सङ्ग्रहः। 'तमेत'मिति वेदः ज्ञानयोगमुपेयं प्रति कर्मयोग उपाय इत्युवाच, वेदवादयज्ञदानतपोभिः कर्मभिर्विविदिषा जायत इत्युक्तत्वादिति भावः। **संन्यासस्त्विति।** हे महाबाहो! संन्यासस्तु **अयोगतः**

१. 'कर्मयोगोपायत्वस्य' इति रा.पा.।

**न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।**
**कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥५॥**

**ननु च 'अभयं सर्वभूतेभ्यो दत्त्वा नैष्कर्म्यमाचरेत्' (म.भा.आश्व.४६.१८) इत्यादौ कर्तव्यकर्मसंन्यासादपि नैष्कर्म्यप्राप्तिं दर्शयति। लोके च कर्मणामनारम्भान्नैष्कर्म्यमिति प्रसिद्धतरम्। अतश्च नैष्कर्म्यार्थिनः किं कर्मारम्भेण ? इति प्राप्तम् , अत आह —** न च संन्यसनादेवेति। **नापि** संन्यसनादेव **केवलात् कर्मपरित्यागमात्रादेव ज्ञानरहितात् ,** सिद्धिं **नैष्कर्म्यलक्षणां ज्ञानयोगेन निष्ठां** समधिगच्छति **न प्राप्नोतीति॥४॥**

**कस्मात् पुनः कारणात् कर्मसंन्यासमात्रादेव केवलाद् ज्ञानरहितात् सिद्धिं नैष्कर्म्यलक्षणां पुरुषो नाधिगच्छतीति हेत्वाकाङ्क्षायामाह—** न हीति। **न** हि **यस्मात् क्षणमपि कालं** जातु **कदाचित् कश्चित् तिष्ठत्यकर्मकृत् सन्। कस्मात् ?** कार्यते **प्रवर्त्यते** हि **यस्माद्** अवश **एव अस्वतन्त्र एव कर्म सर्वः प्राणी** प्रकृतिजैः **प्रकृतितो जातैः सत्त्वरजस्तमोभिर्गुणैः। अज्ञ इति वाक्यशेषः। यतो वक्ष्यति 'गुणैर्यो न विचाल्यते'(भ.गी.१४.२३) इति। साङ्ख्यानां**

आनन्दगिरिकृतव्याख्या

**'न कर्मणा'मित्यादिना पूर्वार्धं व्याख्यायोत्तरार्धं व्याख्यातुमाशङ्कयति—**नन्विति। आदिशब्देन **'शान्तो दान्त उपरतस्तितिक्षुः' 'संन्यासयोगाद्यतयः शुद्धसत्त्वाः' इत्यादि गृह्यते। तत्रैव लोकप्रसिद्धिमनुकूलयति—**लोके चेति। प्रसिद्धतरं **'यतो यतो निवर्तते ततस्ततो विमुच्यते। निवर्तनाद्धि सर्वतो न वेत्ति दुःखमण्वपि' इत्यादिदर्शनादिति शेषः। लौकिकवैदिकप्रसिद्धिभ्यां सिद्धमर्थमाह—** अतश्चेति। **तत्रोत्तरत्वेनोत्तरार्धमवतार्य व्याकरोति—** अत आहेत्यादिना। **एवकारार्थमाह—** केवलादिति। **तदेव स्पष्टयति—** कर्मेति। **उक्तमेव नञमनुकृष्य क्रियापदेन सङ्गतिं दर्शयति—** न प्राप्नोतीति॥४॥

**उक्तेऽर्थे बुभुत्सितं हेतुं वक्तुमुत्तरश्लोकमुत्थापयति—** कस्मादिति। **कस्मान्न कर्मसंन्यासादेव सिद्धिमधिगच्छतीति पूर्वेण सम्बन्धः।** कदाचित् **क्षणमात्रमपि न कश्चिदकर्मकृत् तिष्ठतीत्यत्र हेतुत्वेनोत्तरार्धं व्याचष्टे—** कस्मादिति। **सर्वशब्दाज्ज्ञानवानपि गुणैः अवशः सन् कर्म कार्यते, ततश्च ज्ञानवतः संन्यासवचनमनवकाशं स्यादित्याशङ्क्याह—** अज्ञ इतीति। **तमेव** वाक्यशेषं **वाक्यशेषावष्टम्भेन**

भाष्यार्कप्रकाशः

कर्मयोगं विना आप्तुं **दुःखम्** अशक्यः इत्यर्थः।

**अभयमिति।** 'भूताभयप्रदानस्य कलां नार्हन्ति षोडशी'मिति शास्त्रात् सर्वभूतेभ्योऽभयं दत्त्वेत्युक्तम्। **लोके चेति।** कर्मराहित्यस्य कर्मानाचरणप्रयुक्तत्वादिति भावः। **अतश्चेति।** कर्मराहित्यस्य कर्मसंन्यासपूर्वकत्वादित्यर्थः। **नैष्कर्म्यार्थिन इति।** दारिद्र्यार्थिनः कृष्याद्यारम्भ इव, नैष्कर्म्यार्थिनः कर्मारम्भः उपहासास्पद इति भावः। **प्राप्तमिति।** पूर्वपक्षः प्राप्त इत्यर्थः। **अत आहेति।** उत्तरपक्षमिति शेषः। एवकारार्थमाह— **केवलाज्ज्ञानरहितादिति।** अयं भावः—ज्ञानसहितात् कर्मसंन्यासाद् नैष्कर्म्यं प्राप्यते पुंसा। तत्तु ज्ञानं सत्त्वशुद्धिद्वारा कर्मयोगसाध्यम्। तस्मात् कर्मणामारम्भादेव सत्त्वशुद्धिद्वारा ज्ञानसहितं कर्मसंन्यासं कृतवतो नैष्कर्म्यप्राप्तिरिति।

यत्तु **रामानुजः— अनारम्भाद्** अनुपक्रमात् , **संन्यसनाद्** आरब्धस्य मध्ये त्यागादित्यभाषत, **तत्तुच्छम्** ; यदा तु कर्मणामनारम्भान्न सिद्धिरित्युक्तम् , तदैव प्रारब्धकर्मसंन्यासान्न सिद्धिरिति सिद्धमेवेति पुनस्तत्कथनस्य व्यर्थत्वात्। न ह्यसमाप्तस्य कर्मणः फलहेतुत्वं कोऽपि शङ्कते, असमाप्तकृष्यादेः फलहेतुत्वादर्शनात्। किञ्च संन्यसनादेवेत्येवकारश्चास्मिन् मते व्यर्थः॥४॥

**न हीति।** हि कश्चित् क्षणमपि जातु अकर्मकृत् सन् न तिष्ठतीत्यन्वयः। सर्व इत्यनेन ज्ञान्यज्ञानिरूपसकलजनग्रहणशङ्कायामाह— **अज्ञ इति।** एवं सर्वशब्दसङ्कोचे हेतुमाह— **यत इति।**

**ननु** एतेन 'न च संन्यसनादेव सिद्धिं समधिगच्छती'त्यत्र को हेतुरिति प्रश्नस्य किमुत्तरमायातमिति चेत्? **उच्यते**— अज्ञस्य

## कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
## इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते॥ ६॥

**पृथक्करणादज्ञानामेव हि कर्मयोगः, न ज्ञानिनाम्। ज्ञानिनां तु गुणैरचाल्यमानानां स्वतश्चलनाभावात् कर्मयोगो नोपपद्यते। तथा च व्याख्यातम्— 'वेदाविनाशिनम्'(भ.गी.२.२१) इत्यत्र॥५॥**

[1]**यस्त्वनात्मज्ञश्चोदितं कर्म नारभत इति, तदसदेवेत्याह—** कर्मेन्द्रियाणीति। कर्मेन्द्रियाणि **हस्तादीनि** संयम्य

आनन्दगिरिकृतव्याख्या

**स्पष्टयति—** यत इति। **आत्मज्ञानवतो गुणैरविचाल्यतया गुणातीतत्ववचनाद् अज्ञस्यैव सत्त्वादिगुणैरिच्छाभेदेन कार्यकरणसङ्घातं प्रवर्तयितुमशक्तस्याजितकार्यकरणसङ्घातस्य क्रियासु प्रवर्तमानत्वमित्यर्थः। 'ज्ञानयोगेने'त्यादिनोक्तन्यायाच्च वाक्यशेषोपपत्तिरित्याह—** साङ्ख्यानामिति। **ज्ञानिनां गुणप्रयुक्तचलनाभावेऽपि स्वाभाविकचलनबलात् कर्मयोगो भविष्यतीत्याशङ्क्याह—** ज्ञानिनां त्विति। **प्रत्यगात्मनि स्वारसिकचलनासम्भवे प्रागुक्तं न्यायं स्मारयति—** तथा चेति॥५॥

**आत्मज्ञवदनात्मज्ञस्यापि तर्हि कर्माकुर्वतो न प्रत्यवायः, शरीरेन्द्रियसङ्घातं नियन्तुमसमर्थस्य मूर्खस्यापि संन्याससम्भवा-दित्याशङ्क्याह—** यस्त्विति। **तस्य चोदिताकरणं तच्छब्देन परामृश्यते**[2] **—** तदसदिति। **मिथ्याचारत्वादिति भावः। मिथ्याचारतामेव**

भाष्यार्कप्रकाशः

कर्मसंन्यास एवासिद्धः। यतः सत्त्वादिगुणचोदितः सर्वोऽप्यज्ञजनस्तद्गुणानुरूपं शुभमशुभं मिश्रं वा कर्म अवश एव करोति। क्षणकालमप्यकर्मकृन्न वर्तत इति।

**नन्वेवं** यदि अज्ञस्य संन्यास एव न सिध्यति, तर्हि ज्ञानरहितात् संन्यासात् सिद्धिर्नास्तीति कथमुक्तं ज्ञानरहितसंन्यासस्या-स्तित्वम्? दृश्यन्ते च बहवः संन्यासिनः परम् अज्ञा इदानीमपीति कथमज्ञस्य संन्यासाभावो वेति चेत्? **मैवम्** , यतः सशिखायज्ञोपवीतमग्निहोत्रादि कर्म त्यक्त्वा काषायाम्बरं धृत्वा अज्ञाः संन्यासिनो लोके चरन्तो दृश्यन्ते। तत एवोक्तम्— **न च संन्यसनादेवेति।** य एवमज्ञ आत्मानं संन्यासिनं मन्यते, न तु स वस्तुतःसंन्यासी, क्षणकालमपि तस्याकर्मकर्तृत्वेन स्थित्यभावात्। अत उक्तम्— अज्ञस्य नास्ति संन्यास इति। शिखायज्ञोपवीतत्यागादिमात्रलक्षणात् संन्यासाल्लोकप्रसिद्धान्नास्ति सिद्धिः यतस्तादृश-संन्यासवान् पुरुषो न शास्त्रसिद्धसंन्यासवान् , ज्ञानपूर्वकसंन्यासस्यैव शास्त्रसिद्धसंन्यासत्वादिति पर्यवसन्नार्थः।

**ननु** योऽज्ञः संन्यासी सोऽपि नाग्निहोत्रादिकं कर्म करोति , यश्च ज्ञः संन्यासी सोऽपि न तथा; यच्च ज्ञःसंन्यासी भिक्षाटनादिकं कर्म करोति, तदेवाज्ञः संन्यास्यपि करोति। एवं स्थिते अज्ञ एव क्षणमप्यकर्मकृन्न वर्तत इति कुत उच्यते इति चेत्? **सत्यम्** ; यदेव ज्योतिष्टोमादिकं कर्म सकामानां स्वर्गादिफलदं तदेव निष्कामानां स्वर्गादिफलाप्रदं यथा, तथा यदेव भिक्षाटनादिकर्म अज्ञसंन्यासिनां कर्मायते तदेव विदुषां न कर्मायते, कर्तृत्वाभिमानाद्यभावात्। न हि विद्वानात्मानमविक्रियं सच्चिदानन्दं ब्रह्म, भिक्षाटकं शाटीधरं कपालिनं मुण्डिनं वा मन्यते। अतो नास्ति नित्याविक्रियात्मदर्शिनः कर्मकर्तृत्वम्। अविद्वांस्तु आत्मानं भिक्षाटकं शाटीधरं कपालिनं मुण्डिनं मन्यते, तस्य देहात्मभ्रान्त्यनपगमात्। अतस्तस्यास्ति कर्मकर्तृत्वम्। तस्माद् युक्तमुक्तम्— अज्ञ इति वाक्यशेष इति।

उत्तरार्धेऽन्वयो बहुधा सम्भवति। तथाहि— हि सर्वः अवशःसन्नेव प्रकृतिजैर्गुणैः कर्म प्रति **कार्यते** प्रवर्त्यते, अवशः सर्वं इति च, सर्वो गुणैः कर्म कार्यत इति द्विकर्मककर्मणि प्रयोग इति च ण्यन्तात् करोतेः कर्मणि तङ्। गुणाः सर्वं कर्म कारयन्तीत्यर्थः। कुर्वाणं प्रेरयति कारयतीति हेतुमण्णिच्। सर्वथाऽपि प्रकृतिजैर्गुणैः प्रेरितः सर्वोऽवश एव कर्म करोतीति फलितार्थः॥५॥

**कर्मेन्द्रियाणीति।** यो विमूढात्मा कर्मेन्द्रियाणि संयम्य इन्द्रियार्थान् मनसा स्मरन्नास्ते स मिथ्याचार इत्युच्यते। यस्त्विति **तु**शब्दादात्मज्ञस्य नास्ति कर्मचोदनेति वैलक्षण्यं द्योत्यते। **कर्मेन्द्रियाणीति।** भाषणग्रहणगमनविसर्जनमैथुनाख्यानि पञ्च कर्माणि,

---

१. 'यत्तु' इति पा.। २. भाष्ये यच्छब्देनानात्मज्ञस्योक्तत्वेऽपि तदिति नपुंसकेन तत्परामर्शायोगात् तदर्थमाह—चोदिताकरणमिति।

**यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन !।**
**कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते॥७॥**

**संहृत्य य** आस्ते **तिष्ठति मनसा** स्मरन् **चिन्तयन्** इन्द्रियार्थान् **विषयान्** विमूढात्मा **विमूढान्तःकरणो** मिथ्याचारो **मृषाचारः** [1]**पापाचारः स उच्यते॥६॥**

यस्त्विति। यस्तु **पुनः कर्मण्यधिकृतोऽज्ञो बुद्धीन्द्रियाणि मनसा नियम्य आरभतेऽर्जुन !** कर्मेन्द्रियैः **वाक्पाण्यादिभिः। किमारभत इत्याह—** कर्मयोगम्। असक्तः **सन्** [2]**फलाभिसन्धिवर्जितः स विशिष्यते इतरस्माद् मिथ्याचारात्॥७॥**

आनन्दगिरिकृतव्याख्या

**वर्णयति—** कर्मेन्द्रियाणीति॥६॥

**अनात्मज्ञस्य चोदितमकुर्वतो जाग्रतो विषयान्तरदर्शनध्रौव्याद् मिथ्याचारत्वेन प्रत्यवायित्वमुक्त्वा, विहितमनुतिष्ठतस्तस्यैव फलाभिलाषविकलस्य सदाचारत्वेन वैशिष्ट्यमाचष्टे—** यस्त्विन्द्रियाणीति। **विहितमनुतिष्ठतो**[3] **मूर्खात् कर्म त्यजतो वैशिष्ट्यमक्षरयोजनया स्पष्टयति—** यस्तु पुनरिति॥७॥

भाष्यार्कप्रकाशः

तत्साधनानीन्द्रियाणि वाक्पाणिपादपायूपस्थानि पञ्च कर्मेन्द्रियाणि। **इन्द्रियार्थान्** इन्द्रियविषयान् शब्दादीन्। मनसा स्मरन्नित्यनेन चक्षुर्निमीलनं श्रोत्रपिधानं च कृतमिति व्यज्यते। अन्यथा चक्षुःश्रोत्राभ्यां रूपशब्दविषयग्रहणे सति मनसा तत्स्मरणानुपपत्तेः। अनुभवजन्यसंस्कारजन्या हि स्मृतिः। **यद्वा** क्वापि विजने स्थित्वा देवालयादौ पत्तनस्थितवेश्यारूपगानात्मकौ चक्षुःश्रोत्राविषयौ विषयौ मनसा स्मरतीति न चक्षुःश्रोत्रपिधानावसरः।

**विमूढात्मेति**। अज्ञ इत्यर्थः। ननु यथा प्राज्ञः कर्मेन्द्रियाणि संयम्य विषयानस्मरन् वर्तते, तथा विषयान् स्मरन्नज्ञः कर्मेन्द्रियाणि संयम्य वर्तत इति प्राज्ञाचारवदज्ञाचारोऽपि यावद्व्यवहारं सत्य एवेति कथं मिथ्यात्वमज्ञव्यवहारस्य? इति शङ्कायामाह— **हेयाचार इति।** हेयस्त्याज्य आचारो यस्य स तथोक्तः। विदुषामाचारवन्नैषामविदुषामाचारो ग्राह्य इत्यर्थः।

यत्तु **रामानुजः**— अन्यथा सङ्कल्प्यान्यथा आचरतीति मिथ्याचार इति , **तत्तुच्छम् ;** 'नाहं कर्म कुर्वे' इति सङ्कल्प्य नैव कर्म कृतवानयमज्ञ इति कथमस्य तादृशमिथ्याचारत्वप्रसङ्गः? न हि मनसा विषयस्मरणं कर्म, येनास्य सङ्कल्पविपरीतः स्यादाचारः। न च ज्ञानयोगं कुर्वे इति सङ्कल्प्य मनसा विषयस्मरणादस्ति मिथ्याचारत्वमस्येति वाच्यम् ; अज्ञस्य ज्ञानयोगसङ्कल्पस्यैवासम्भवात्। ज्ञानपूर्वको हि ज्ञानयोगः। किञ्च 'न हि कश्चिदि'त्यारभ्य कर्मयोगस्यैव प्रकृतत्वेन ज्ञानयोगसङ्कल्पस्यात्रासङ्गतत्वात् , 'यस्त्विन्द्रियाणी'ति वक्ष्यमाणश्लोके कर्मयोगस्यैवेन्द्रियनियमनपूर्वकं प्रपञ्चितत्वात्॥६॥

**यस्त्विति**। हे अर्जुन! यस्तु मनसा इन्द्रियाणि नियम्य असक्तःसन् कर्मेन्द्रियैः कर्मयोगमारभते स विशिष्यते। तुशब्दार्थमाह— **पुनरिति।** यच्छब्दार्थमाह— **कर्मण्यधिकृतोऽज्ञ इति।** प्राज्ञस्य कर्माधिकाराभावादुक्तम् अज्ञ इति।

शब्दस्पर्शादिविषयेभ्यः सकाशान्निवर्तनीयानीन्द्रियाणि ज्ञानेन्द्रियाण्येवेत्यभिप्रेत्याह— **बुद्धीन्द्रियाणीति**। त्वक्चक्षुःश्रोत्रजिह्वाघ्राणाख्यानि पञ्च। करपिधानादिना चक्षुरादिव्यापारनिरोधः कर्तव्य इति शङ्कानिरासायाह— **मनसा नियम्येति।** मनसि निष्कामे सति ज्ञानेन्द्रियाणि स्वत एव विषयेभ्यो निवर्तन्त इति भावः। एतेनेन्द्रियजयस्य मनोजयपूर्वकत्ववचनेन मनोजयोऽवश्यं कर्तव्य इति सूचितम्। मनोजयरहितस्य तु मिथ्याचारत्वं पूर्वश्लोक एवोक्तम्। अयं तु ग्राह्याचार इत्याह— **स विशिष्यत इति।** ज्ञानयोगिनोऽपि कर्मयोगी उत्कृष्ट इति शङ्कां वारयितुमाह— **मिथ्याचारादिति**। पूर्वश्लोकोक्तान्मिथ्याचारादयमुत्कृष्ट इत्यर्थः।

१. 'हेयाचारः' इति रा.पा.। २. इदं पदं क्वचिन्न। 'अफलाकाङ्क्षः सन्' इति पा.। ३. कर्म त्यजतो मूर्खात् विहितमनुतिष्ठतो वैशिष्ट्यमित्यन्वयः।

**नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।**
**शरीरयात्राऽपि च ते न प्रसिध्येदकर्मणः॥८॥**

**यत एवम् अतः—** नियतमिति। [1]नियतं **नित्यम् ; यो यस्मिन् कर्मण्यधिकृतः, फलाय चाश्रुतं तन्नियतं कर्म; तत् कुरु त्वं हे अर्जुन ! यतः कर्म** ज्यायोऽ**धिकतरं फलतः,** हि **यस्मात्** अकर्मणोऽ**करणादनारम्भात्। कथम्?**

आनन्दगिरिकृतव्याख्या

**कर्मानुष्ठायिनो वैशिष्ट्यमुपदिष्टमनूद्य तदनुष्ठानमधिकृतेन कर्तव्यमिति निगमयति—** यत इति। **उक्तमेव हेतुं भगवदनुमति-कथनेन स्फुटयति—** कर्मेति। **इतश्च त्वया कर्तव्यं कर्मेत्याह—** शरीरेति। तन्नियतं **तस्याधिकृतस्येति सम्बन्धः। स्वर्गादिफले दर्शपूर्णमासादावधिकृतस्य तदपि नित्यं स्यादित्याशङ्क्य विशिनष्टि—** फलायेति। **नित्यं कर्म नियमेन कर्तव्यमित्यत्र हेतुमाह—** यत इति। हि**शब्दोपात्तमुक्तमेव हेतुमनुवदति—** यस्मादिति। **करणस्याकरणाज्ज्यायस्त्वं प्रश्नपूर्वकं प्रकटयति—** कथमित्यादिना। **सत्येव**

भाष्यार्कप्रकाशः

एतेन 'ज्ञाननिष्ठाद् विशिष्यते' इति **रामानुजोक्तं** प्रत्युक्तम्। कर्मयोगसाध्यज्ञाननिष्ठात् कर्मयोगनिष्ठस्याल्पत्वस्य सर्वविदित-त्वात् , यज्ञसाध्यस्वर्गफलभोक्तुः पुरुषात् कथं यज्ञकृद् विशिष्येत? कथं वा ज्ञानसाध्यमुक्तिशालिनः पुरुषाज्ज्ञाननिष्ठो विशिष्येत?

**यदपि** अनेनोक्तम् असम्भाव्यमानप्रमादत्वेनेति कारणम् , **तदप्ययुक्तम्** ; यदि कर्मज्ञानयोगौ द्वावपि परस्परनैरपेक्ष्येण निःश्रेयसकरौ तर्हि सम्भाव्यमानप्रमादाज्ज्ञानयोगादसम्भाव्यमानप्रमादः कर्मयोगो विशिष्येत, न त्वेतदस्ति, ज्ञानयोगस्य स्वोत्पत्तिं प्रति कर्मयोगसापेक्षत्वात् , कर्मयोगस्य च ज्ञानयोगद्वारा निःश्रेयसकरत्वाच्च। कर्मयोगनिष्पाद्यत्वं ज्ञानयोगस्य तवाप्यभिमतम् , आत्मावलोकनसाधनत्वं च।

न च - कर्मयोगिना आत्मावलोकनं चेत् सिषाधयिषितं, तर्हि ज्ञानयोगे प्रवेष्टव्यम् , मुक्तिश्चेत् सिषाधयिषिता तर्हि कर्मयोग एव यावज्जीवमवस्थातव्यम् , तत एव मुक्तिलाभादिति - वाच्यम् ; तथात्वे सप्रमाददुष्करनिरर्थकज्ञानयोगविधायकस्य शास्त्रस्य भगवतो वा अप्रमाणत्वापत्तेः। आत्मावलोकनं हि तव मते न पुरुषार्थः, स्वतःसिद्धत्वादात्मनः। आत्मभिन्नपरमात्मावलोकनात् तत्सारूप्यादिप्राप्तिर्हि तव मते मुक्तिः। तस्माद् व्यर्थमेव ज्ञानयोगविधानम्।

**ननु** न व्यर्थमात्मावलोकनरूपफलसत्त्वादिति चेत् , **मैवम्** ; स्वकुचमर्दनतुल्यत्वात् स्वावलोकनस्य। ज्ञानयोगं विनाऽपि कर्मयोगिनो मुक्तिदशायामात्मावलोकनसम्भवाच्च। न च मुक्तौ नास्त्यात्मावलोकनमिति वाच्यम् ; अपहतपाप्मत्वसर्वज्ञत्वादि-गुणाविर्भावान्मुक्तौ जीवानां कथमनात्मज्ञत्वम् ? मुक्तोऽनात्मज्ञ इति हि विरुद्धम्।

सिद्धान्ते तु आत्मावलोकनस्यैव मोक्षत्वान्मुमुक्षुणा कर्मयोगिना सम्पाद्य एवावश्यं ज्ञानयोगः, ज्ञानयोगनिष्पाद्यत्वादात्माव-लोकनस्य। अतो न [2]योगान्यतरस्य वैयर्थ्यम् , नापि योगयोः समप्राधान्यम् , नापि ज्ञानयोगे प्रमादसम्भावना, कर्मयोगेनैव मनइन्द्रियजयलाभात्। तथा च मिथ्याचारादेव कर्मयोगी विशिष्यते। ज्ञाननिष्ठस्तु कर्मयोगिनो विशिष्यते, यथा पश्वादेर्मनुष्यो, मनुष्याद् देवः इति॥७॥

**नियतमिति।** त्वं नियतं कर्म कुरु, हि अकर्मणः कर्म ज्यायः। अकर्मणः ते शरीरयात्राऽपि न च प्रसिध्येत्। किं तन्नित्यम्? अत आह— **य इति।** यो यस्मिन् कर्मण्यधिकृतस्तस्य तन्नित्यमित्यन्वयः। स्वर्गादिफले दर्शपूर्णमासादावधिकृतस्य तदपि नित्यं स्यादित्याशङ्क्य विशिनष्टि— **फलायेति। फलायाश्रुतं** फलार्थमश्रुतं, स्वर्गादिफलप्रदत्वेन यन्न श्रुतं तदित्यर्थः। काम्यकर्मभिन्नमिति यावत्। यदकरणे प्रत्यवायः श्रूयते तत् कर्म नित्यमिति भावः। तत् कुरु त्वमिति। क्षत्रियस्त्वं तु युद्धे कर्मण्यधिकृतः; अतस्तव युद्धकर्म नियतं, तदेव त्वं कुर्वित्यर्थः। ज्ञानादल्पमपि कर्म, अकरणादधिकमेवेत्याह— **कर्म ज्यायो ह्यकर्मण इति।** हिः प्रसिद्धिमपि गमयति।

---

१. 'नित्यं शास्त्रोपदिष्टम्' इति पा.। २. योगयोरन्यतरस्येत्यर्थः।

**यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।**
**तदर्थं कर्म कौन्तेय ! मुक्तसङ्गः समाचर ॥९॥**

शरीरयात्रा **शरीरस्थितिरपि च** ते **तव** न प्रसिध्येत् **प्रसिद्धिं न गच्छेद्** अकर्मणो**ऽकरणात्। अतो दृष्टः कर्माकर्मणोर्विशेषो लोके॥८॥**

**यच्च मन्यसे बन्धार्थत्वात् कर्म न कर्तव्यमिति, तदप्यसत्। कथम्?—** यज्ञार्थादिति। **'यज्ञो वै विष्णुः'(तै.सं.**

आनन्दगिरिकृतव्याख्या

**कर्मणि देहादिचेष्टाद्वारा शरीरं स्थातुं पारयति, तदभावे जीवनमेव दुर्लभं भवेदिति फलितमाह—** अत इति॥८॥

**'कर्मणा बध्यते जन्तुः' इति स्मृतेर्बन्धार्थं कर्म, तन्न श्रेयोऽर्थिना कर्तव्यमित्याशङ्कामनूद्य दूषयति—** यच्चेत्यादिना। **कर्माधिकृतस्य तदकरणमयुक्तमिति प्रतिज्ञातं प्रश्नपूर्वकं विवृणोति—**कथमित्यादिना। **फलाभिसन्धिमन्तरेण यज्ञार्थं कर्म कुर्वाणस्य**

भाष्यार्कप्रकाशः

लोके खलु अकृतसन्ध्यात् कृतसन्ध्यः, अकृतवैश्वदेवात् कृतवैश्वदेवः, अकृतयज्ञात् कृतयज्ञश्चोत्कृष्ट इति प्रतीतिः। इदमेवाह— **अतो दृष्टः कर्माकर्मणोर्विशेषो लोके इति।** इदं चाज्ञविषयमेव, प्राज्ञस्य कर्मासम्भवात्। तथाच अकृतविहितकर्मणो जनादज्ञात् कृतविहितकर्मा भवत्यज्ञ उत्कृष्टः, ज्ञानी तु अज्ञात् कर्मिण उत्कृष्ट इति सिद्धम्। **शरीरयात्रा** शरीरस्थितिः, जीवनमित्यर्थः। प्राणधारणमिति यावत्। अन्नमूलत्वाच्छरीरस्थितेरन्नस्य च कर्ममूलत्वादिति भावः। वक्ष्यत्येतमर्थम् 'अन्नाद्भवन्ति भूतानी'ति श्लोकेन।

**यद्वा** यथा लोके क्षुद्राणां पुरुषाणां पश्वादीनां च शरीरस्थितिर्न प्रसिद्धा, तथा तवापीत्यर्थः। यज्ञादेर्युद्धादेर्वा विहितस्योत्कृष्टतमस्य कर्मणः करणाद्धि लोके पुरुषस्य बहुला प्रतिष्ठा। यस्तु शिश्नोदरपरायणः कर्म विहितं न कुरुते, तस्य पश्वादिवन्न काऽपि प्रतिष्ठेति वृथैव तस्य जीवनमिति भावः। अर्जुन इति कश्चिदस्तीति लोके न कोऽपि प्रतीयादिति तत्त्वम्।

यत्तु **रामानुजः**— अकर्मणो ज्ञानयोगात् कर्मैव ज्यायः। ज्ञाननिष्ठस्यापि कर्माकुर्वतो देहयात्राऽपि न सेत्स्यति। ज्ञाननिष्ठस्यापि यज्ञादिकर्म कर्तव्यम्। कर्मयोगेऽप्यात्मयाथात्म्यानुसन्धानमन्तर्भूतमिति। **तत्तुच्छम्** , 'स्थित्वाऽस्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छती'ति साक्षान्मोक्षहेतुत्वं ज्ञाननिष्ठाया इहैवोक्तम्। 'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते। तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥' इति वक्ष्यति चतुर्थाध्याये। किमयं व्याहतार्थाभिधायी भगवानप्रमाणभूतः येन ज्ञानात् कर्मोत्कृष्टमिति 'ज्ञानेन सदृशं किमपि नास्ती'ति च स्वत एवोक्तवान्? अहो तव पाण्डित्यमहिमा ! येन भगवन्तमेवाप्रमाणयसि तद्गीतानामपव्याख्यानकरणद्वारा।

तथा 'निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः। शारीरं केवलं कर्म कुर्वन् नाप्नोति किल्बिषम्॥' इति 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन' इति, 'सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि' इति च भगवता वक्ष्यते चतुर्थाध्याये। ततः कथमयज्ञशिष्टान्नाशनाद् यतेः किल्बिषप्राप्तिः येन ज्ञाननिष्ठस्य यज्ञादिकर्म कर्तव्यं स्यात्? सति भिक्षाटने कर्मणि कथं वा तस्य देहयात्राया असिद्धिः? निवृत्तिलक्षणज्ञानयोगनिष्ठस्य कथं यज्ञादिषु प्रवृत्तिः? न हि प्रवृत्तिनिवृत्त्योरैक्यं केनापि सम्पादयितुं शक्यम्।

फलाभिसन्धिपरित्यागपूर्वककर्माचरणात्मके कर्मयोगे कथमात्मयाथात्म्यानुसन्धानस्यान्तर्भावः? आत्मयाथात्म्यं हि सच्चिदानन्दत्वाविक्रियत्वाकर्तृत्वाभोक्तृत्वादिरूपम्। सति तदनुसन्धाने कथं कर्मसु प्रवर्तेत पुरुषः? कथं वा कर्तारमात्मानं [1]मनुयात् [मन्वीत]? अकर्त्रात्मज्ञानं हि कर्मभ्यः पुंसो निवर्तकम्। तस्मात् सूर्यस्य तमसीवात्मज्ञानस्य न कर्मण्यन्तर्भावः।

**किञ्च** शास्त्राचार्योपदेशशमदमादिसंस्कृतान्तःकरणसाध्यस्यात्मयाथात्म्यानुसन्धानस्य कथं कर्मविक्षिप्तचित्तसाध्यत्वम्? ज्ञाननिष्ठोऽपि निर्व्यवहारसमय एव ह्यात्मयाथात्म्यानुसन्धानं कर्तुं क्षमते। तस्मात् तुच्छं **रामानुज**भाष्यम्॥८॥

१. परस्मैपदप्रयोगश्चिन्त्यः।

**सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।**
**अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥ १०॥**

**१.७.४) इति श्रुतेः** यज्ञ **ईश्वरः, तदर्थं यत् क्रियते तद् यज्ञार्थं कर्म, तस्मात् कर्मणः** अन्यत्र **अन्येन कर्मणा** लोकोऽयम् **अधिकृतः कर्मकृत्** कर्मबन्धनः **कर्म बन्धनं यस्य सोऽयं कर्मबन्धनो लोकः, न तु यज्ञार्थात्**[1]**। अतस्तदर्थं यज्ञार्थं कर्म कौन्तेय !** मुक्तसङ्गः **कर्मफलसङ्गवर्जितः सन्** समाचर **निर्वर्तय॥ ९॥**

**इतश्चाधिकृतेन कर्म कर्तव्यम्—** सहेति। सहयज्ञा **यज्ञसहिताः** प्रजा**स्त्रयो वर्णाः, ताः** सृष्ट्वोत्पाद्य पुरा **पूर्वं सर्गादौ** उवाच **उक्तवान्** प्रजापतिः **प्रजानां स्रष्टा— '**अनेन **यज्ञेन** [2]प्रसविष्यध्वं **प्रसवो वृद्धिरुत्पत्तिस्तां कुरुध्वम्।** एष **यज्ञो** वो **युष्माकम्** अस्तु **भवतु** इष्टकामधुग् **इष्टानभिप्रेतान् कामान् फलविशेषान् दोग्धीतीष्टकामधुक्॥ १०॥**

आनन्दगिरिकृतव्याख्या

**बन्धाभावात् तादर्थ्येन कर्म कर्तव्यमित्याह—** तदर्थमिति। **यज्ञार्थं कर्मेत्ययुक्तम् , न हि कर्मार्थमेव कर्मेत्याशङ्क्य व्याचष्टे—** यज्ञो वै विष्णुरिति। **कथं तर्हि 'कर्मणा बध्यते जन्तु'रिति स्मृतिः? तत्राह—** तस्मादिति। **ईश्वरार्पणबुद्ध्या कृतस्य कर्मणो बन्धार्थत्वाभावे फलितमाह—** अत इति॥ ९॥

**नित्यस्य कर्मणो नैमित्तिकसहितस्याधिकृतेन कर्तव्यत्वे हेत्वन्तरपरत्वेनानन्तरश्लोकमवतारयति—** इतश्चेति। **कथं पुनरनेन यज्ञेन वृद्धिरस्माभिः शक्या कर्तुमित्याशङ्क्याह—** एष इति॥ १०॥

भाष्यार्कप्रकाशः

**यज्ञेति।** अयं लोकः यज्ञार्थात् कर्मणोऽन्यत्र, अधिकृतः कर्मकृदिति शब्दद्वयशेषः; कर्मबन्धनः, भवतीति शेषः। हे कौन्तेय! त्वं मुक्तसङ्गः सन् तदर्थं कर्म समाचर। स्वस्ववर्णाश्रमविहितकर्मानुष्ठानेनेश्वराज्ञायाः परिपालनीयत्वादीश्वराज्ञापरिपालनार्थानि कर्माणि विहितानीश्वरार्थानीत्युच्यन्ते, न त्वेभ्यः कर्मभ्य ईश्वरस्य कोऽप्यर्थः; तस्य परिपूर्णत्वेनावाप्तसमस्तकामत्वात् इत्यभिप्रेत्याह— **तदर्थमिति। अन्यत्रेति।** सकामे कर्मणीत्यर्थः। ईश्वरार्थे यज्ञादिकर्मणि क्रियमाणे स्वर्गादिफलाभावाद् देवादिजन्मरूपो बन्धो नास्ति पुरुषस्य। अन्यत्र तु फलानुभवार्थं जन्म स्वीकर्तव्यमित्यस्ति बन्ध इति भावः। तदर्थमित्यत्र तच्छब्दः प्रकृतयज्ञपरामर्शीत्याह— **यज्ञार्थमिति।** तस्मा इदं तदर्थमिति नित्यसमासः।

यत्तु **रामानुजः**— यज्ञार्थाद् यज्ञादिशास्त्रीयकर्मशेषभूतद्रव्यार्जनादेः कर्मणोऽन्यत्रात्मीयप्रयोजनशेषभूते कर्मणि क्रियमाण इति। **तत्तुच्छम्** , यज्ञाद्यर्थादित्यादिशब्दाभावाद् , यज्ञशब्दस्योपलक्षणत्वाभ्युपगमस्य चान्याय्यत्वात्। प्रधानकर्मणोऽबन्धकत्वेनैव तच्छेषकर्मणोऽबन्धकत्वस्य सिद्धौ तदर्थं पुनर्वचनस्यायुक्तत्वात् , यज्ञार्थात् कर्मणोऽन्यत् कर्म यज्ञोऽपि भवत्येवेति यज्ञस्यापि बन्धकत्वापत्तेः। युद्धाय सन्नह्य ततो निवृत्तायार्जुनाय युद्धं कुर्वित्येवोपदेष्टुमुचितत्वेन युद्धार्थं द्रव्यार्जनं कर्म कुरु इत्युपदेशस्यानुचितत्वात्। पिष्टपेषणं हि तत्। इतः प्रागेवानेन युद्धसम्भारसम्पादनस्य कृतत्वात्॥ ९॥

**सहेति।** पुरा प्रजापतिः सहयज्ञाः प्रजाः सृष्ट्वा 'अनेन प्रसविष्यध्वम् , एष व इष्टकामधुगस्तु' इत्युवाच। **इतश्चेति।** यज्ञद्वारा देवमनुष्ययोरुपकार्योपकारकभावसत्त्वाददेवयाजिनश्चोरत्वादयज्ञशिष्टान्नाशनस्य किल्बिषहेतुत्वाद् यज्ञशिष्टान्नाशनस्य किल्बिषमोचकत्वाच्चेत्यर्थः। **प्रजापतिः** ब्रह्मा। **अनेन प्रसविष्यध्वमिति।** अनेनेति करणे हेतौ वा तृतीया। सुकृतमिति शेषः। प्रसवशब्दार्थमाह— **वृद्धिरिति।** अन्यार्थमाह— **उत्पत्तिरिति।** सुकृतं वर्धयध्वम् उत्पादयध्वमिति वाऽर्थः।

यत्तु **रामानुजः—** आत्मनो वृद्धिं कुरुध्वमिति, **तदसत्** , आत्मनः वृद्धिक्षयादिविक्रियारहितत्वात्॥ १०॥

---

१. न तु **यज्ञार्थात्** ईश्वरार्थात् कर्मणः कर्तुः बन्ध इत्यर्थः। 'न तु यज्ञार्थेने'ति पाठश्चेत् समीचीनः स्यात्। २. इदमार्षं रूपमिति भाति।

**देवान् भावयतानेन ते देवा भावयन्तु वः।**
**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥ ११॥**
**इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।**
**तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः॥ १२॥**

**कथम्?—** देवानिति। देवान् **इन्द्रादीन्** भावयत **वर्धयत** अनेन **यज्ञेन। ते देवाः** भावयन्तु **आप्याययन्तु वृष्ट्यादिना** वः **युष्मान्। एवं** परस्परम् **अन्योन्यं भावयन्तः** श्रेयः परं **मोक्षलक्षणं** [१]**ज्ञानप्राप्तिक्रमेणावाप्स्यथ। स्वर्गं वा परं श्रेयोऽवाप्स्यथ॥ ११॥**

**किञ्च—** इष्टान् भोगानिति। इष्टान् **अभिप्रेतान् भोगान् हि** वो **युष्मभ्यं देवाः** दास्यन्ते **वितरिष्यन्ति स्त्रीपशुपुत्रादीन्** यज्ञभाविताः **यज्ञैर्वर्धिताः तोषिता इत्यर्थः।** तैः **देवैर्दत्तान् भोगान्** अप्रदाय **अदत्त्वा, आनृण्य-**

आनन्दगिरिकृतव्याख्या

**कथं पुनरभीष्टफलविशेषहेतुत्वं यज्ञस्य विज्ञायते? न हि देवताप्रसादादृते स्वर्गादिरभ्युदयो लभ्यते। नापि सम्यग्दर्शनमन्तरेण निःश्रेयसं सेद्धुं पारयतीति शङ्कते—** कथमिति। **तत्र श्लोकेनोत्तरमाह—** देवानिति। **मुमुक्षुत्वबुभुक्षुत्वविभागेन श्रेयसि विकल्पः**[२]**॥ ११॥**

**इतश्चाधिकृतेन कर्म कर्तव्यमित्याह—** किञ्चेति। **कथमस्माभिर्भाविताः सन्तो देवा भावयिष्यन्त्यस्मानिति? तदाह—** इष्टानिति। **यज्ञानुष्ठानेन पूर्वोक्तरीत्या स्वर्गापवर्गयोर्भावेऽपि कथं स्त्रीपशुपुत्रादिसिद्धिरित्याशङ्क्य पूर्वार्धं व्याकरोति—** इष्टानभिप्रेतानिति। **पश्वादिभिश्च यज्ञानुष्ठानद्वारा भोगो निर्वर्तनीयः, अन्यथा प्रत्यवायप्रसङ्गादित्युत्तरार्धं व्याचष्टे—**तैरिति। आनृण्यमकृत्वेति। **अयमर्थः— देवानामृषीणां पितॄणां च यज्ञेन ब्रह्मचर्येण प्रजया च सन्तोषमनापाद्य स्वकीयं कार्यकरणसङ्घातमेव पोष्टुं भुञ्जानः तस्करो भवतीति॥ १२॥**

भाष्यार्कप्रकाशः

**देवानिति। कथमिति।** यज्ञस्य कथमिष्टकामधुक्त्वमित्यत आहेत्यर्थः। न च देवानां कथं यज्ञेन वृद्धिरिति वाच्यम्; देवानाममृताशित्वाद् 'अमृतं वै घृत'मिति घृतस्यामृतत्वाद् यज्ञे च देवेभ्योऽग्नौ घृतस्य दीयमानत्वाच्चेति। वृष्ट्यादीत्यादिपदात् पशुपुत्रादिग्रहणम्। **आप्याययन्तु** वर्धयन्तु आनन्दयन्त्विति वा। परं हि श्रेयो मोक्षम्। ननु कथं कर्मणा मोक्षः? अत आह— **विज्ञानप्राप्तिक्रमेणेति**। चित्तशुद्धिद्वारेति भावः। यज्ञादिकर्मणां देवभावनमवान्तरफलम्। प्रधानफलं तु चित्तशुद्धिज्ञानप्राप्तिद्वारा निःश्रेयसमिति तत्त्वम्। एवं निष्कामानां गतिं प्रदर्श्य सकामानां गतिं प्रदर्शयति— **स्वर्गं वेति**। परं श्रेय इत्यस्य स्वर्गमिति वाऽर्थ इत्यर्थः। **अवाप्स्यथ** प्राप्स्यथ ॥ ११॥

**इष्टानिति**। देवाः यज्ञभाविताःसन्तः वः इष्टान् भोगान् दास्यन्ति। यः तैर्दत्तान् भोगानेभ्यः अप्रदाय भुङ्क्ते, सः स्तेन एव। ननु देवदत्तभोगान् स्त्रीपशुपुत्रादीन् कथं देवेभ्यो दातुं शक्यम्? अत आह—**आनृण्यमकृत्वेति**। स्त्रिया सहाग्नौ घृताहुतिप्रक्षेपणेन, स्वस्याशक्तौ पुत्रेण तत्प्रक्षेपणेन च स्त्रीपशुपुत्रभोगप्रत्यर्पणरूपमानृण्यं जायते पुंसः। पुरोडाशप्रदानेन च व्रीहिभोगप्रत्यर्पणरूपमित्येवं ज्ञेयम्। अस्त्रीकस्यापुत्रस्य च यज्ञेऽधिकाराभावादुक्तम्— **स्त्रीपुत्रेति**। क्षीराज्याभावे होमाद्यसम्भवादाह— **पश्विति**। पशुश्चात्र गौरेव, न महिष्यादिः, अपवित्रत्वादिति बोध्यम्। 'इमां स्त्रियम् इमं पुत्रम् इमां गाम् इदं व्रीह्यादिकं च गृहीत्वा, भो द्विजाः! देवानस्मान् यज्ञादिभिर्भावयते'ति देवाः द्विजेभ्यः स्त्रीपशुपुत्रधान्यादिकान् भोगान् ददुः। यस्तु तथा देवांस्तैस्तर्पयति स यथोक्तकारी बुद्धिमानेव; यस्तु तान् स्वयं केवलं भुङ्क्ते स स्तेन एव। ननु कथं स्त्रीपश्वादीनां भोजनं घटेत? इत्यत आह— **स्वदेहेन्द्रियाण्येव तर्पयतीति।**

१. 'विज्ञानप्राप्ति' इति रा.पा.। २. भाष्ये मुमुक्षुं प्रति - कर्मणा **परं श्रेयः** मोक्षः ज्ञानप्राप्तिक्रमेणेति व्याख्याय, बुभुक्षुं प्रति 'स्वर्गं वा परं श्रेयः' इति अधिकारिभेदेन श्रेयःपदमर्थद्वये द्वेधा व्याख्यातमिति भावः।

**यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः।**
**भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥१३॥**

**मकृत्वेत्यर्थः**; एभ्यो **देवेभ्यो, यो** भुङ्क्ते **स्वदेहेन्द्रियाण्येव तर्पयति,** स्तेन एव **तस्कर एव सः देवादिस्वापहारी॥१२॥**

**ये पुनः—**यज्ञेति। **देवयज्ञादीन् निर्वर्त्य तच्छिष्टम् अशनममृताख्यमशितुं शीलं येषां ते** यज्ञशिष्टाशिनः **सन्तो मुच्यन्ते** सर्वकिल्बिषैः **सर्वपापैः** [१]**'चुल्ल्यादिपञ्चसूनाकृतैः, प्रमादकृतहिंसादिजनितैश्चान्यैः। ये त्वात्मम्भरयः, भुञ्जते ते**

आनन्दगिरिकृतव्याख्या

**देवादिभ्यः संविभागमकृत्वा भुञ्जानानां प्रत्यवायित्वमुक्त्वा, तदन्येषां सर्वदोषराहित्यं दर्शयति—** ये पुनरिति। **यज्ञशिष्टाशिनो ये पुनस्ते तादृशाः सन्तः सर्वकिल्बिषैर्मुच्यन्त इति योजना। 'तैर्दत्तान्' इत्यादिनोक्तं निगमयति—** भुञ्जत इति। देवयज्ञादीनित्या**दिशब्देन पितृयज्ञो मनुष्ययज्ञो भूतयज्ञो ब्रह्मयज्ञश्चेति चत्वारो यज्ञा गृह्यन्ते। चुल्लीशब्देन पिठरधारणाद्यर्थक्रियां कुर्वन्तो विन्यासविशेषवन्तस्त्रयो ग्रावाणो विवक्ष्यन्ते। आदिशब्देन कण्डनी पेषणी मार्जनी उदकुम्भश्चेत्येते हिंसाहेतवो गृहीताः। तान्येतानि पञ्च प्राणिनां सूनास्थानानि हिंसाकारणानि। तत्प्रयुक्तैः सर्वैरपि बुद्ध्यबुद्धिपूर्वकैर्दुरितैर्मुच्यन्त इति सम्बन्धः।** प्रमादो **विचारव्यतिरेकेणाबुद्धिपूर्वकमुपनतं पादपातादि-कर्म। तेन प्राणिनां हिंसा सम्भाव्यते। आदिशब्देनाशुचिसंस्पर्शादि गृहीतम्। तदुत्थैश्च पापैर्महायज्ञकारिणो मुच्यन्ते। उक्तं हि— 'कण्डनं पेषणं चुल्ली उदकुम्भश्च मार्जनी। पञ्च सूना गृहस्थस्य पञ्चयज्ञात् प्रणश्यति॥' इति। 'पञ्च सूना गृहस्थस्य चुल्ली पेषण्यवस्करः। कण्डनी चैव कुम्भश्च वध्यन्ते यास्तु वाहयन्॥' इति च। अस्यायमर्थः— या यथोक्ताः पञ्चसङ्ख्याका गृहस्थस्य सूनास्ताः यो वाहयन् आपादयन् वर्तते, तेन प्राणिनो बुद्धिपूर्वकमबुद्धिपूर्वकं च वध्यन्ते, तत्प्रयुक्तं सर्वमपि पापं महायज्ञानुष्ठानात् प्रणश्यतीति। महायज्ञानुष्ठानस्तुत्यर्थं**

भाष्यार्कप्रकाशः

मैथुनक्षीराज्यपानादिभिरिति भावः। कथमस्य स्तेनत्वम्? अत आह—**देवादिस्वापहारीति**। देवादिधनापहारित्वाद् युक्तमस्य चोरत्वमित्यर्थः। देवैः स्त्र्यादीनां स्वयज्ञार्थं दत्तत्वेन द्विजसम्बन्धितया प्रतीयमानाः स्त्र्यादयो भोगाः देवसम्बन्धिन एवेति कृत्वा देवसम्बन्धिभोगानां स्वसम्बन्धीकरणाद् द्विजस्य चोरत्वम्। यथा देवदत्तसम्बन्धिवस्त्रस्य स्वसम्बन्धीकरणाद् यज्ञदत्तस्य चोरत्वं तद्वदिति भावः।

**ननु** यदा देवैर्भोगा दत्तास्तदैव देवानां तेषु भोगेषु स्वामित्वं नष्टम् , स्वत्वनिवृत्तिपूर्वकपरकीयत्वानुकूलव्यापारो हि दानम्। तस्मात् कथं स्त्र्यादीनां देवसम्बन्धित्वमिति चेत्? **मैवम् ,** यथा अपुत्रः कन्यादानसमये 'अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यती'ति सङ्कल्पपूर्वकं कन्यां कस्मैचिद् दत्त्वाऽपि तत्पुत्रे स्वाम्यं प्रतिपद्यते, तद्वद् देवा अपि यज्ञार्थं स्त्र्यादीन् तुभ्यं ददाम[२] इति सङ्कल्पपूर्वकं द्विजाय स्त्र्यादीन् दत्तवन्तः कथं तत्र स्वाम्यं न प्राप्नुयुः? अपितु प्राप्नुयुरेव, सङ्कल्पा(न)धीनत्वाद् दानवैचित्र्यस्येति॥१२॥

**यज्ञेति**। यज्ञशब्दोऽत्र ब्रह्मयज्ञदेवयज्ञपितृयज्ञमनुष्ययज्ञभूतयज्ञाख्यपञ्चयज्ञपरः। सर्वशब्दस्वारस्यादाह— **प्रमादेति**। **कुट्टनीति**। गृहस्थस्य कुट्टन्यादयः **पञ्च सूनाः** पञ्च हिंसाः सन्ति। ताभिर्हेतुभिः गृहस्थः स्वर्गं न गच्छति। **कुट्टनी—** उलूखले धान्यं निक्षिप्य मुसलेनावहननसमये कीटादिनाशसम्भवात् तज्जन्या सूना कुट्टनीत्युच्यते। घरट्टोपलाभ्यां धान्यस्य पेषणसमये जाता सूना **पेषणी**त्युच्यते। **चुल्ली—** चुल्ल्यां काष्ठानि निक्षिप्य तत्राग्निं संयोज्य ओदनादिपचनसमये कीटादिनाशजन्या सूना चुल्ली। **उदकुम्भी**— कुम्भेन जलाहरणसमये जाता सूना जले पादप्रवेशादिना कुम्भनिक्षेपेण च क्षुद्रजन्तुनाशसम्भवात्। **मार्जनी**— मार्जन्या गृहभूमेर्मार्जनसमये जाता कीटादिनाशात् सूना मार्जनीत्युच्यते।

यद्यप्येताः सूनाः न गृहस्थेन क्रियन्ते, किन्तु तत्पत्न्यैव, तथापि पत्नीकृतपाकसङ्क्रान्तास्ताः तदन्नभोजनाद् गृहस्थेऽपि

---

१. 'चुल्ल्यादिपञ्चसूनाख्यैः प्रमादकृतहिंसादिजनितैश्च। तद्यथा— कुट्टनी पेषणी चुल्ली उदकुम्भी च मार्जनी। पञ्च सूना गृहस्थस्य ताभिः स्वर्गं न गच्छति। अन्ये त्वात्मम्भराः' इति रा.पा.। २. ददामेति दाधातोः लोडुत्तमपुरुषबहुवचनम्। अथवा दद्मः इति पाठः स्यात्।

**अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः।**
**यज्ञाद् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥ १४॥**

त्वघं **पापं स्वयमपि पापाः, ये** पचन्ति **पाकं निर्वर्तयन्ति** आत्मकारणाद् **आत्महेतोः॥ १३॥**

**इतश्चाधिकृतेन कर्म कर्तव्यम्। जगच्चक्रप्रवृत्तिहेतुर्हि कर्म। कथमिति? उच्यते—** अन्नाद्भवन्तीति। अन्नाद् भुक्ताल्लोहितरेतःपरिणतात् **प्रत्यक्षं** भवन्ति **जायन्ते भूतानि।** पर्जन्याद् **वृष्टेः अन्नस्य सम्भवः** अन्नसम्भवः। **यज्ञाद् भवति पर्जन्यः। 'अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥'(म.स्मृ.**

आनन्दगिरिकृतव्याख्या

**तदनुष्ठानविमुखान् निन्दति—**ये त्विति। **आत्मम्भरित्वमेव स्फोरयति—**ये पचन्तीति। **स्वदेहेन्द्रियपोषणार्थमेव पाकं कुर्वतां देवयज्ञादि-पराङ्मुखानां पापभूयस्त्वं दर्शयति—** भुञ्जत इति। **पाठक्रमस्त्वर्थक्रमादपबाधनीयः**[१]॥ १३॥

**देवयज्ञादिकं कर्माधिकृतेन कर्तव्यमित्यत्र हेत्वन्तरम्** इतःशब्दोपात्तमेव **दर्शयति—** जगदिति। **ननु भुक्तमन्नं रेतोलोहित-परिणतिक्रमेण प्रजारूपेण जायते; तच्चान्नं वृष्टिसम्भवं प्रत्यक्षदृष्टम् ; तत् कथं कर्मणो जगच्चक्रप्रवर्तकत्वमिति शङ्कते—** कथमिति। **पारम्पर्येण कर्मणस्तद्धेतुत्वं साधयति—** उच्यत इति। **उक्तेऽर्थे स्मृत्यन्तरं संवादयति—**अग्नाविति। **तत्र हि देवताभिध्यानपूर्वकं तदुद्देशेन प्रहिता आहुतिरपूर्वतां गता रश्मिद्वारेणादित्यमारुह्य वृष्ट्यात्मना पृथिवीं प्राप्य व्रीहियवाद्यन्नभावमापद्य संस्कृतोपभुक्ता शुक्रशोणितरूपेण परिणता प्रजाभावं प्राप्नोतीत्यर्थः। 'यज्ञः कर्मसमुद्भवः' इत्ययुक्तम् , स्वस्यैव स्वोद्भवे कारणत्वायोगादित्याशङ्क्याह—** ऋत्विगिति।

भाष्यार्कप्रकाशः

सङ्क्रामन्ति। **यद्वा** भर्त्रा चोदितैव भार्या ताः करोतीति भर्तारं प्रेरकं सङ्क्रामन्ति। **अथवा** भर्तृभार्ययोरेकात्मकत्वात्। वस्तुतस्तु भर्त्रर्थमेव भार्या पाकं करोतीति सूना भर्तुरेव। भार्यायास्तु भर्तृभुक्तावशिष्टपाकाशनान्न दोष इति। एतास्तु पञ्च सूना वैश्वदेवाख्यान्नित्यकर्मणो निवर्तन्त इति धर्मशास्त्रम्।

**ननु** कथं पञ्चसूनानिर्वर्त्यपक्वान्नस्य यज्ञशेषीकरणमात्रेण किल्बिषनाशकत्वमिति चेत्? **उच्यते**— प्रत्यहं देवार्थमेव पाकः कार्यः, न तु स्वार्थमिति विधौ स्थिते देवार्थं पाकाकरणस्य दुष्टत्वाद् हिंसाप्रायोऽपि पाको देवार्थं कर्तव्य एव, यथा हिंसात्मको ऽप्यग्निष्टोमः विहितत्वात् कर्तव्यः। स्वार्थं पाकस्तु स्वार्थं पशुविशसनवद् दुष्ट एव। पञ्चसूनानिर्वर्त्यमपि देवार्थं पक्वान्नं पुण्यमेव, विहितत्वाद् हिंसानिर्वर्त्ययज्ञपशुमांसवदिति सिद्धम्। एवं सति देवयज्ञावशिष्टस्यान्नस्य शास्त्रादायातं पुण्यत्वम् , लोकतश्च देवार्थं कृतत्वात् पाकस्य तत्सम्बन्धिदोषाणां न यजमानगामित्वमिति सिद्धम्।

ये तु देवार्थं न पचन्ति, किन्तु स्वार्थमेव ते पापिन एवेत्याह— **अन्ये त्विति।** अन्ये तु अयज्ञशिष्टाशिनस्त्वित्यर्थः। अस्यैव फलितमाह— **आत्मम्भरा इति।** स्वकुक्षिम्भरा इत्यर्थः। **स्वयमपीति** स्वत एवेत्यर्थः। अन्नभोजनात्प्रागपीति यावत्। पापवशादेवैतेषां यज्ञाकरणे बुद्ध्युदयादिति भावः। **आत्महेतोः** स्वकुक्षिपूरणार्थमित्यर्थः।

कुक्षिपूरणं येन केनाप्यन्नेन जायत एव, यज्ञशिष्टान्नेन तु पापनिवृत्तिः; अयज्ञशिष्टेन स्वार्थं पक्वेनान्नेन तु पापसञ्चयनमित्येता-वानेव भेदः। ततश्चैहिकं कुक्षिपूरणं आमुष्मिकं पुण्यं च यस्माद् भवति तदेव यज्ञशिष्टान्नं द्विजैः पापभीरुभिर्भोक्तव्यमित्यवश्यं कर्तव्यं यज्ञाख्यं कर्म॥ १३॥

**अन्नादिति। इतश्चेति।** जगच्चक्रप्रवृत्तिहेतुत्वात् कर्मण इत्यर्थः। 'अन्नाद्भूतानि जायन्ते' इति श्रुतेराह भगवान्— **अन्नाद्भवन्ति भूतानीति।** ननु पात्रादिस्थादन्नाद् भूतान्युत्पद्यमानानि न दृश्यन्ते, नापि श्रूयन्त इति मूलकर्तुः प्रसक्तमाक्षेपं वारयति भाष्यकर्ता— **भुक्तादिति।** ननु भुक्तादप्यन्नात् पुरीषादिरूपान्न भूतोदय इति शङ्कायामाह— **लोहितरेतःपरिणतादिति।** स्त्रीभिर्भुक्तं सल्लोहितरूपेण,

१. पाठक्रमापेक्षयाऽर्थक्रमो बलवान्। द्र.पू.मी. ५-४-१ अधि.। प्रकृते 'तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः' 'भुञ्जते ते त्वघं पापाः' इत्यनयोः निन्दयोः मध्ये 'यज्ञशिष्टाशिनः सन्तो मुच्यन्ते' इति महायज्ञानुष्ठानस्तुतिः पठिता। अतोऽर्थक्रमेण योजना करणीयेति भावः।

**कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।**
**तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्॥ १५॥**

**३.७६) इति स्मृतेः। यज्ञोऽपूर्वम्। स च यज्ञः** कर्मसमुद्भवः। **ऋत्विग्यजमानयोश्च व्यापारः कर्म,** [१]**ततः समुद्भवो यस्य यज्ञस्य अपूर्वस्य, स यज्ञः कर्मसमुद्भवः॥ १४॥**

[२]**तच्च —** कर्मेति। **कर्म** ब्रह्मोद्भवम् **ब्रह्म वेदः स उद्भवः कारणं** [३]**प्रकाशकः यस्य तत् कर्म ब्रह्मोद्भवं** विद्धि **जानीहि।** ब्रह्म **पुनर्वेदाख्यम्** अक्षरसमुद्भवम्। अक्षरं **ब्रह्म परमात्मा समुद्भवो यस्य तदक्षरसमुद्भवं** ब्रह्म **वेद इत्यर्थः। यस्मात् साक्षात् परमात्माख्यादक्षरात् पुरुषनिःश्वासवत्**[४] **समुद्भूतं ब्रह्म, तस्मात् सर्वार्थप्रकाशकत्वात्** सर्वगतम्। **सर्वगतमपि सत्** नित्यं **सदा यज्ञविधिप्रधानत्वात् यज्ञे प्रतिष्ठितम्॥ १५॥**

आनन्दगिरिकृतव्याख्या

**द्रव्यदेवतयोः संग्राहकश्चकारः॥ १४॥**

**यदपूर्वहेतुत्वेन कर्मोक्तम् , तत् किं चैत्यवन्दनादि , किं वाऽग्निहोत्रादीति संदिहानं प्रत्याह—** कर्मेति। **किमिति कर्मणो ब्रह्मोद्भवत्वमुच्यते, सर्वस्य तदुद्भवत्वाविशेषादित्याशङ्क्याह—** ब्रह्म वेद इति। **ब्रह्म तर्हि वेदाख्यमनादिनिधनमिति, तत्राह—** ब्रह्म पुनरिति। **अक्षरात्मनो वेदस्य पुनरक्षरेभ्यः सकाशादेव समुद्भवो न सम्भवतीत्याशङ्क्याह—** अक्षरमिति। **ब्रह्मेत्यक्षरमेवोक्तम् , तत् कथं तस्मादेवोद्भवतीत्याशङ्क्य ब्रह्मशब्दार्थमुक्तमेव स्मारयति—**(ब्रह्म) वेद इति। **ननु ब्रह्मशब्दितस्य वेदस्यापि पौरुषेयत्वात् प्रामाण्यसंदेहात् कथं त्वदुक्तमग्निहोत्रादिकं कर्म निर्धारयितुं शक्यते? तत्राह—** यस्मादिति। **कथं तर्हि तस्य यज्ञे प्रतिष्ठितत्वम् , सर्वगतत्वेन विशेषायोगादित्याशङ्क्याह—** सर्वगतमपीति॥ १५॥

भाष्यार्कप्रकाशः

पुम्भिर्भुक्तं सद् रेतोरूपेण च यत् परिणतमन्नं तस्मादन्नादित्यर्थः। **प्रत्यक्षमिति।** स्त्रीपुरुषसंयोगाज्जरायुजाण्डजात्मकभूतोत्पत्तेः प्रत्यक्षत्वादित्यर्थः। प्रत्यक्षं यथा तथेति क्रियाविशेषणम्। भवन्तीति प्रत्यक्षमिति वा अन्वयः। मनुष्येषु पश्वादिषु चेति भावः। **भूतानि** प्राणिनः, न त्वात्मा तस्याजत्वात् ; देहा इति यावत्। पर्जन्यशब्दो मेघवाची तत्कार्यं वर्षं लक्षयति 'वृष्टेरन्न'मिति स्मृत्यनुसारादित्याह— **वृष्टेरिति।** व्रीह्यादिमयस्यान्नस्य वृष्टिं विना अनुत्पत्तेरिति भावः। न च नदीजलादन्नसम्भव इति वाच्यम् ; तस्यापि वर्षाधीनत्वात्। न हि ग्रीष्मे नद्यां जलं विद्यते, विद्यमानमप्यल्पमेव हि। **प्रास्तेति।** निक्षिप्तेत्यर्थः। प्रपूर्वकाद् 'असु गतिक्षेपणयो'रिति धातोः कर्मणि क्तः। प्रकर्षेणास्ता प्रास्ता। **अपूर्वमिति।** कर्तृनिष्ठो धर्मः सुकृतपर्यायः, येनैव स्वर्गादिफलप्राप्तिर्यजमानस्य। कथमन्यथा इहैव समाप्तिसमकाल एव नष्टस्य कर्मणो यज्ञस्य जन्मान्तरीयस्वर्गादिफलजनकत्वं स्यात्?। **व्यापार इति।** होमादिरूपः (लौकिकैः कैश्चिद्) वैदिकैश्च यज्ञत्वेन व्यवह्रियमाण इति भावः॥ १४॥

**कर्मेति।** 'ब्रह्म वेदस्तपस्तत्त्व'मिति कोशादाह— **ब्रह्म वेद इति।** मृद्घटयोरिव ब्रह्मजगतोरिव वा वेदकर्मणोः कार्यकारणभावाभावादाह— **प्रकाशक इति।** प्रतिपादक इत्यर्थः। इदमित्थं कर्तव्यमिति बोधयतीत्यर्थः। **समुद्भव इति।** सम्यगुद्भवत्यस्मादिति समुद्भवः प्रकृतिः, उपादानमिति यावत्। **निश्वासवदिति। '**तस्य महतो भूतस्य निश्वसितमेतद् यदृग्वेदः' इति श्रुतेः ब्रह्मणः सकाशात् वेदा अप्रयत्नेन जाता इत्यर्थः। श्वासवेदयोरप्रयत्नजन्यत्वरूपं साधर्म्यमस्तीति भावः। **तस्माच्छब्दार्थमाह— सर्वार्थप्रकाशकत्वादिति।** सर्वार्थप्रकाशकत्वं च वेदस्य सर्वावभासकचैतन्यजन्यत्वप्रयुक्तमिति बोध्यम्। **यद्वा** तस्मादित्यस्य परमात्मनः समुद्भूतत्वादित्येवार्थः। कथं वेदस्य सर्वगतत्वम्? इत्यत आह— **सर्वार्थप्रकाशकत्वादिति।** सर्वार्थप्रकाशकत्वरूपं सर्वगतत्वं वेदस्यास्तीत्यर्थः। ननु ब्रह्मान्यस्य सर्वस्यानित्यत्वात् कथं नित्यत्वं वेदस्य? इत्यत आह— **नित्यं सदेति।** यावद्व्यवहारमित्यर्थः। यज्ञे कथं वेदस्य प्रतिष्ठितत्वम्? अत

१. 'तत् समुद्भवो' 'तस्मात् समुद्भवो' इति पा.। २. 'तच्च एवंविधं कर्म कुतो जातमित्याह—' इति पा.। ३. 'प्रकाशक' इति क्वचिन्न। ४. अनेनापौरुषेयत्वमिष्टम्।

## एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः।
## अघायुरिन्द्रियारामो मोघं पार्थ ! स जीवति॥ १६॥

एवमिति। एवम् **इत्थमीश्वरेण वेदयज्ञपूर्वकं जगच्चक्रं प्रवर्तितं नानुवर्तयति** इह **लोके** यः **कर्मण्यधिकृतः सन्** अघायुः[1]**अघं पापमायुर्जीवनं यस्य सोऽघायुः, पापजीवन इति यावत्।** इन्द्रियारामः **इन्द्रियैरारामः आरमणमाक्रीडा विषयेषु यस्य स इन्द्रियारामो** मोघं **वृथा हे पार्थ ! स जीवति। तस्माद् अज्ञेनाधिकृतेन कर्तव्यमेव कर्मेति प्रकरणार्थः।**

आनन्दगिरिकृतव्याख्या

**अधिकृतेनाध्ययनादिद्वारा जगच्चक्रमनुवर्तनीयम् , अन्यथेश्वराज्ञातिलङ्घिनस्तस्य प्रत्यवायः स्यादित्याह—** एवमिति। **'न कर्मणामनारम्भात्' इत्यादिनोक्तमुपसंहरति—** तस्मादिति। **जगच्चक्रस्य प्रागुक्तप्रकारेणाननुवर्तने वृथा जीवनमघसाधनं यस्मात् तस्माज्जीवता नियतं कर्म कर्तव्यमित्यर्थः।**

भाष्यार्कप्रकाशः

आह— **यज्ञविधिप्रधानत्वादिति**। यज्ञविधिरेव प्रधानं प्रतिपाद्यं यस्य स यज्ञविधिप्रधानः, तत्त्वात् इति।

यत्तु **रामानुजः**— यज्ञः कर्मसमुद्भवः द्रव्यार्जनादिक्रियासाध्यः, कर्म ब्रह्मोद्भवं [2]शरीरजातम् , ब्रह्म अक्षरसमुद्भवं [3]जीवजातम् ; अन्नपानादिना तृप्ताक्षराधिष्ठितं शरीरं कर्मणे प्रभवतीति, सर्वगतं सर्वाधिकारिगतं शरीरं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं यज्ञमूलमित्यर्थः इति। **तन्मन्दम् ,** यज्ञस्यैव क्रियारूपत्वेन क्रियासाध्यत्वायोगात्। न हि क्रियया क्रिया साध्यते, किन्तु फलादिकमेव। यद्यपूर्वात्मको यज्ञ इह विवक्षितः, तर्हि स न द्रव्यार्जनादिक्रियासाध्यः, किन्तु ऋत्विग्यजमानव्यापाररूपक्रियासाध्य एव। ब्रह्मशब्दस्य च शरीरे प्रयोगोऽप्रसिद्धः, 'मम योनिर्महद्ब्रह्म' इति प्रकृतौ प्रयोगसत्त्वेऽपि न शरीरे प्रयोगसिद्धिः। प्रकृतेर्ब्रह्मत्वात् तत्कार्यमपि ब्रह्मैवोपचारादिति वचनं तु लक्षणामूलत्वादुपेक्ष्यम्। प्रकृतेर्ब्रह्मशब्दवाच्यत्वमेव तावल्लक्षणया निर्वाह्यम् , किं पुनर्वक्तव्यं शरीरस्य ब्रह्मशब्दवाच्यत्वम्? 'शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः' इति वक्ष्यमाणत्वात् कथं शरीरमात्रप्रभवत्वं कर्मणः? अन्नपानादिना तृप्तजीवेत्युक्तिरयुक्ता, जीवस्याभोक्तुरन्नादिना तृप्त्ययोगात्। प्राणादीनामेव हि तृप्तिः। यदि जीवस्यान्नादिना तृप्तिस्तर्हि तदभावेन शोकादिरपि स्यात् ; न चैतद् युक्तमविक्रिये सच्चिदानन्दमये जीवे।

यद्ययं जीवः कर्ता भोक्ता विज्ञानात्मा, न तु सच्चिदानन्दरूप इत्युच्येत; तर्हि नासावक्षरः किन्तु क्षर एव, कर्तृत्वादिविकारवतोऽनित्यत्वात्। न हि लोके विक्रियमाणं वस्तु नित्यं दृष्टं; घटादिरूपेण विक्रियमाणस्य मृदादिद्रव्यस्यापि प्रलये नाशदर्शनात्। सर्वगतमित्यस्य सर्वाधिकारिगतमित्यर्थोऽप्ययुक्तः, अधिकारिविषयसङ्कोचासहत्वात् सर्वशब्दस्य अनधिकारिपश्वादिशूद्रादिशरीरस्यापि यज्ञमूलत्वेन तस्य तदसिद्धेश्च। यद्येतद्दोषपरिहाराय सर्वजीवगतमित्युच्येत, तदप्ययुक्तम् , मत्स्यादिशरीराणामयज्ञमूलत्वात्। न हि समुद्रगतमत्स्यादयो वर्षफलितव्रीह्यादिना जीवन्ति इति॥ १५॥

**एवमिति**। इह एवम् , ईश्वरेणेति शेषः, प्रवर्तितं चक्रं यः नानुवर्तयति, हे पार्थ! अघायुरिन्द्रियारामः स मोघं जीवति। एवंशब्दार्थमाह— **वेदयज्ञपूर्वकमिति**। वेदयज्ञौ पूर्वौ यस्मिन् तद् वेदयज्ञपूर्वकं यथा तथा, वेदयज्ञाभ्यां सहेत्यर्थः। प्रवर्तितं सृष्टमिति यावत्। किं तच्चक्रम्? अत आह— **जगच्चक्रमिति।** चक्रवद्भ्रमणशालित्वाज्जगतश्चक्रत्वव्यपदेशः। **नानुवर्तयतीति** जगच्चक्रस्यानुवर्तनं नाम वेदाध्ययनपूर्वकं तदर्थानुष्ठानद्वारा जगति यथा कर्मिणो वर्तन्ते तथा वर्तनमित्यर्थः। यच्छब्देन संन्यासिग्रहणं मा भूदित्याह— **कर्मण्यधिकृत इति। आयुरिति**। शरीरे प्राणवायुसञ्चारः **आयुः**। यस्य शरीरे प्राणवायुसञ्चारः पापायैव भवति स उच्यतेऽघायुरिति।

---

१. अघं परस्येच्छतीत्यघायुः इति छन्दसि परेच्छायां क्यच उपसंख्यानात् क्यचि 'अश्वाघस्यात्' इत्यात्वे 'क्याच्छन्दसि' इत्युप्रत्ययेन यद्यपि सिध्यति, तथापि छान्दसत्वाश्रयणक्लेशात् , पराघेच्छायाः अविवक्षणात् , प्रकृतजगच्चक्राननुवर्तनस्यैव विवक्षितत्वाच्चेत्थं व्याख्यातम्। २. तन्मते प्रकृत्यर्थकब्रह्मशब्देन शरीरस्य विवक्षितत्वात् शरीराज्जातमित्यर्थः। ३. ब्रह्म शरीरम् जीवाज्जातमित्यर्थः, अक्षरशब्देन जीवस्य विवक्षितत्वात् ।

**प्रागात्मज्ञाननिष्ठायोग्यताप्राप्तेः तादर्थ्येन कर्मयोगानुष्ठानमधिकृतेनानात्मज्ञेन कर्तव्यमेवेत्येतत् 'न कर्मणा-मनारम्भाद्' इत्यत आरभ्य 'शरीरयात्राऽपि च ते न प्रसिध्येदकर्मणः'(भ.गी.३.४—८) इत्येवमन्तेन प्रतिपाद्य, 'यज्ञार्थात् कर्मणोऽन्यत्र' इत्यादिना 'मोघं पार्थ स जीवति' (भ.गी.३.९—१६) इत्येवमन्तेनापि ग्रन्थेन प्रासङ्गिकम् अधिकृतस्यानात्मविदः कर्मानुष्ठाने बहु कारणमुक्तम्, तदकरणे च दोषसङ्कीर्तनं कृतम्॥ १६॥**

आनन्दगिरिकृतव्याख्या

**यद्यधिकृतेन कर्तव्यमेव कर्म, तर्हि किमित्यज्ञेनेति विशिष्यते, ज्ञाननिष्ठेनापि तत् कर्तव्यमेवाधिकृतत्वाविशेषादित्याशङ्क्य पूर्वोक्तमनुवदति—** प्रागिति। **न हि ज्ञानकर्मणोर्विरोधाज्ज्ञाननिष्ठेन कर्म कर्तुं शक्यते। तथा चानात्मज्ञेनैव चित्तशुद्ध्यादिपरम्परया ज्ञानार्थं कर्मानुष्ठेयमिति प्रतिपादितमित्यर्थः। तर्हि 'यज्ञार्थादि'त्यादि किमर्थम्, न हि तत्र ज्ञाननिष्ठा प्रतिपाद्यते। कर्मनिष्ठा तु पूर्वमेवोक्तत्वान्नात्र वक्तव्येत्याशङ्क्य वृत्तमर्थान्तरमनुवदति[1]—** प्रतिपाद्येति। प्रासङ्गिकम् **अज्ञस्य कर्मकर्तव्यतोक्तिप्रसङ्गागतमिति यावत्।** बहु कारणम् **ईश्वरप्रसादो देवताप्रीतिश्चेत्यादि।** दोषसङ्कीर्तनं **'तैर्दत्तानप्रदाय' इत्यादि॥ १६॥**

भाष्यार्कप्रकाशः

इदमेवाह— **पापजीवन इति।** पापसञ्चयनजीवित इत्यर्थः। **आराम इति।** आङ्पूर्वकाद् रमतेर्भावे घञ् इत्यभिप्रेत्याह— **आक्रीडेति।** अश्वेनोद्यान इव इन्द्रियैर्विषयेषु यः क्रीडति स इन्द्रियाराम इत्यर्थः।

यदि कर्म कर्तव्यं, तर्ह्यज्ञेनेति किं विशेष्यते, ज्ञानिनाऽपि कर्तव्यमेवेत्यत्रोक्तमनुवदति— **प्रागिति। तादर्थ्येनेति।** तदर्थमेव तादर्थ्यं तेन, ज्ञाननिष्ठायोग्यताप्राप्त्यर्थमित्यर्थः। अनात्मज्ञेन कर्मयोगानुष्ठानं कर्तव्यमित्येतत् प्रतिपाद्येत्यन्वयः।

अत्राह **रामानुजः—** अन्नाद् भूतशब्दनिर्दिष्टानि सजीवानि शरीराणि, पर्जन्यादन्नं, यज्ञात् पर्जन्यः, यज्ञश्च कर्तृव्यापाररूपात् कर्मणः, कर्म च सजीवाच्छरीरात्, सजीवं शरीरं पुनरन्नाद् इत्यन्योन्यकार्यकारणभावेन चक्रवत् परिवर्तमानमिति, इन्द्रियारामः इन्द्रियाण्येवास्योद्यानानि भवन्तीति, ज्ञानयोगादौ यतमानोऽपि निष्फलप्रयत्नतया मोघं पार्थ स जीवतीति च। **तदेतत् सर्वमविचारितरमणीयम्।** तथाहि—'कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भव'मित्यत्र शरीरात् कर्म, शरीरं जीवाच्चोद्भूतमित्युक्तं प्रागनेनैव। इदानीं तु कर्म सजीवाच्छरीरात्, सजीवं शरीरं पुनरन्नादित्युच्यते। कथमिदं न व्याहतम्? कथं वा त्वन्मतरीत्याऽपि मूलादिदमर्थलाभः? 'अन्नाद्भवन्ति भूतानी'त्यत्र यथा भूतशब्दः सजीवशरीरवाची तथा 'कर्म ब्रह्मोद्भव'मित्यत्र किं ब्रह्मशब्दः सजीवशरीरवाची उताजीवशरीरवाची? नाद्यः, 'ब्रह्माक्षरसमुद्भव'मित्यक्षरशब्दवाच्यसजीवशरीरात् सजीवशरीरस्योत्पत्तिरिति व्याघातात्। न ह्येकमेव कार्यं कारणं च भवितुमर्हति। न चाक्षरशब्दः केवलजीववाचीति वाच्यम्; केवलजीवात् सजीवशरीरसमुद्भव इत्यपि व्याघातात्। कारणजीवात् कार्यजीवस्य भेदाभावात्। न द्वितीयः, अजीवशरीरात् कर्मोदयासम्भवात्। सजीवं हि शरीरं कर्मणि प्रभवत इति [कर्मणे प्रभवतीति] सम्प्रतिपन्नम्। किञ्च सजीवशरीरो जात इत्यनेन जीवस्यापि जन्म सिद्धम्। तच्चायुक्तम्, 'अजो नित्यः' इत्यादिविरोधात्।

अत एवेह न चक्रत्वमप्युपपद्यते, अक्षरस्य जीवस्य देहकारणस्य कुतश्चिदुत्पत्त्यश्रवणादुत्पत्त्यसम्भवाच्च। उत्पत्तौ सत्यां नाशसम्भवेनाक्षरत्वायोगाच्च। अक्षरत्वं ह्यविनाशित्वम्। 'जातस्य हि ध्रुवो मृत्यु'रिति जातस्य मृत्युव्यभिचाराभावाच्च। 'ब्रह्माक्षर-समुद्भव'मित्येतस्याभावे तु चक्रत्वमुपपद्येत, भूतब्रह्मशब्दयोरेकार्थवाचित्वाद्— अन्नाद्भूतानि भवन्ति; तद् ब्रह्म पुनरन्नाद् भवतीति। न च तथैवास्त्विति वाच्यम्; मूलच्छेदपाण्डित्यप्रकर्षापत्तेस्तव।

**ननु** भूतब्रह्माक्षरशब्दास्त्रयोऽपि सजीवशरीरवाचिन एव, तत्र ब्रह्मशब्दवाच्यस्य सजीवशरीरस्य पुत्रस्य अक्षरशब्दवाच्यात् सजीवशरीरात् पितुः समुद्भव इत्यदोष इति चेत्, **नैतदपि युक्तम्**, यथा पितृदेहात् पुत्रदेहः समुद्भवति तथा पितृदेहोऽपि पितामहदेहात् समुद्भवतीति कृत्वा अक्षरशब्दवाच्यस्य पितृदेहस्य पुनरन्नात् समुद्भवाभावात्। न च - अन्नाद्भवन्ति भूतानीत्यत्रापि अन्नादन्नमयात्

१. 'अनुद्रवति' इति पा.।

**एवं स्थिते, किमेवं प्रवर्तितं चक्रं सर्वेणानुवर्तनीयम् , आहोस्वित् पूर्वोक्तकर्मयोगानुष्ठानोपायप्राप्याम्[1]अनात्मविदा ज्ञानयोगेनैव निष्ठाम् आत्मविद्भिः साङ्ख्यैरनुष्ठेयामप्राप्तेनैव[2]? इत्येवमर्थमर्जुनस्य प्रश्नमाशङ्क्य, स्वयमेव वा शास्त्रार्थस्य विवेकप्रतिपत्त्यर्थम् 'एतं वै तमात्मानं विदित्वा निवृत्तमिथ्याज्ञानाः सन्तो ब्राह्मणा मिथ्याज्ञानवद्भिरवश्यं कर्तव्येभ्यः पुत्रैषणादिभ्यो व्युत्थायाथ भिक्षाचर्यं शरीरस्थितिमात्रप्रयुक्तं चरन्ति, न तेषामात्मज्ञाननिष्ठाव्यति-**

आनन्दगिरिकृतव्याख्या

**वृत्तमर्थमेवं विभज्यानूद्यानन्तरश्लोकमाशङ्कोत्तरत्वेनावतारयति—** एवमिति। **अर्जुनस्य प्रश्नम् इत्येवमर्थमाशङ्क्याह भगवानिति सम्बन्धः। नन्वेषाऽऽशङ्का नावकाशमासादयति, अनात्मज्ञेन कर्तव्यं कर्मेति बहुशो विशेषितत्वादित्याशङ्क्याह—** स्वयमेवेति। **किमर्थं श्रुत्यर्थं स्वयमेव भगवानत्र प्रतिपादयतीत्याशङ्क्याह—**शास्त्रार्थस्येति। **गीताशास्त्रस्य ससंन्यासं ज्ञानमेव मुक्तिसाधनमर्थः, नार्थान्तरमिति विवेकार्थमिह श्रुत्यर्थं कीर्तयतीत्यर्थः। तमेव श्रुत्यर्थं सङ्क्षिपति—** एतमिति। **सिद्धं चेदात्मवेदनम् , अनर्थकं तर्हि व्युत्थानादीत्याशङ्क्य आपातिकविज्ञानफलमाह—**निवृत्तेति। **ब्राह्मणग्रहणं तेषामेव व्युत्थाने मुख्यमधिकारित्वमिति ज्ञापनार्थम्। क्लेशात्मकत्वादेषणानां ताभ्यो व्युत्थानं सर्वेषां स्वाभाविकत्वादविधित्सितमित्याशङ्क्याह—**मिथ्येति। **'भिक्षाचर्यं चरन्ती'ति वचनं व्युत्थानविरुद्धमित्याशङ्क्याह—** शरीरेति। **तर्हि तद्वदेव तेषामग्निहोत्राद्यपि कर्तव्यमापद्येतेत्याशङ्क्य , व्युत्थायिनामाश्रमधर्मवदग्निहोत्रादेरनुष्ठापकाभावान्नैवमित्याह—** न तेषामिति। **यथोक्तं श्रुत्यर्थमस्मिन् गीताशास्त्रे पौर्वापर्येण पर्यालोच्यमाने प्रतिपादयितुमिष्टं प्रकटीकुर्वन् 'कर्तव्यमेव कर्म जीवतेति नियमे**

भाष्यार्कप्रकाशः

पितृदेहाद् भूतानि पुत्रदेहाः सम्भवन्तीत्यर्थ इति - वाच्यम् ; 'ब्रह्माक्षरसमुद्भव'मित्यनेन पौनरुक्त्यात्। न च - 'ब्रह्माक्षरसमुद्भवम्' इत्येतत्पुनरुक्तमपि चक्रत्वोपपादकमित्यदोष इति - वाच्यम् ; चक्रत्वोपपादनाय 'कर्म भूतोद्भवं विद्धि भूतमन्नसमुद्भव'मिति स्वपदेनैव वक्तव्यत्वात् , स्वपदेन पर्यायपदेन वा वचनं विनापि अन्नाद्भूतानि भवन्ति, कर्म भूतोद्भवमित्येतावन्मात्रेणैव चक्रत्वस्य स्फुटं प्रतीयमानत्वाच्च। तस्माद्भूतब्रह्माक्षरशब्दानां नैकार्थत्वमुचितम्। भिन्नार्थत्वे तु न त्वदभीष्टचक्रत्वसिद्धिः।

तथा इन्द्रियाराम इत्यत्र इन्द्रियाणां करणानामारामत्वरूपणं च विरुद्धम्। विहारस्थानं ह्यारामः, न तु विहारकरणम्। प्रकृते विहारस्थानं विहारविषयाः शब्दादय एव। तस्माच्छब्दादिष्वेवारामत्वरूपणमुचितम्। न च विषयभोगैकरतिर्भवतीति फलितार्थ उक्तोऽस्माभिरिति वाच्यम् ; ऋजुमार्गं विहाय वक्रपथाश्रयणस्यान्याय्यत्वात्।

तथा ज्ञानयोगादौ यतमानोऽपि निष्फलप्रयत्नतया मोघं जीवतीत्यप्ययुक्तम् , ज्ञानयोगे यतमानस्य संन्यासिनः यज्ञानुष्ठानाधिकाराभावात्। यद् यस्य विहितं स हि तदननुष्ठानेन व्यर्थजीवनः, ज्ञानयोगिनस्तु ज्ञानमेव विहितं, न तु कर्मेति कथं तस्य कर्मानाचरणाद् व्यर्थजीवनत्वप्रसङ्गः?

न च - इन्द्रियारामत्वं संन्यासिनो व्यर्थजीवनत्वापादकमिति - वाच्यम् ; असंन्यास्यज्ञविषयत्वादेतत्प्रकरणस्य , 'यस्तु' इत्यादिश्लोकद्वयेन संन्यासिप्राज्ञस्य कर्माभावस्य वक्ष्यमाणत्वाच्च॥ १६॥

**एवमिति**। यद्यपि कर्मिण उद्दिश्यैवोक्तम् 'एवं प्रवर्तितं चक्र'मिति प्रकरणादिना सुज्ञेयम् , तथापि मन्दमतीनां नायं विवेकः सुलभ इत्यभिप्रेत्य भगवान् स्वयमेव तद्विभागं दर्शयतीत्याह— **किमित्यादिना**। एवमीश्वरेण प्रवर्तितं जगच्चक्रं किं सर्वेणानुवर्तनीयम्? यद्वा पूर्वोक्तकर्मयोगानुष्ठानोपायप्राप्यामात्मविद्भिः साङ्ख्यैरनुष्ठेयां ज्ञानयोगेनात्मविदो निष्ठामप्राप्तैरनात्मविद्भिरेवानुवर्तनीयमिति विकल्पः। **श्रुत्यर्थमिति**। 'एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ती'ति श्रुतिः। **पुत्रैषणादिभ्यो व्युत्थायेति** पुत्रैषणादिकं त्यक्त्वेत्यर्थः। प्रतिपिपादयिषितमिति श्रुत्यर्थविशेषणम्। प्रतिपादयितुमिष्टं **प्रतिपिपादयिषितम्।**

१. 'आत्मविदः' इति रा. पा.। यथास्थिते 'सर्वेणानुवर्तनीयम् , आहोस्वित् पूर्वोक्तकर्मयोगानुष्ठानोपायप्राप्याम् आत्मविद्भिः साङ्ख्यैरनुष्ठेयां ज्ञानयोगेनैव निष्ठामप्राप्तेनानात्मविदैव अनुवर्तनीयम्' इति अन्वयः। २. 'अप्राप्तैरेव' इति रा.पा.।

**यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।**
**आत्मन्येव च सन्तुष्टः तस्य कार्यं न विद्यते॥ १७॥**

**रेकेणान्यत् कार्यमस्ति' इत्येवं श्रुत्यर्थमिह गीताशास्त्रे प्रतिपिपादयिषितमाविष्कुर्वन्नाह भगवान्—** यस्त्विवति। यस्तु **साङ्ख्य आत्मज्ञाननिष्ठ** आत्मरतिः **आत्मन्येव रतिः, न विषयेषु यस्य स आत्मरतिरेव** स्याद् **भवेद्** आत्मतृप्तश्च**आत्मनैव तृप्तः, नान्नरसादिना स** मानवो **मनुष्यः संन्यासी आत्मन्येव च सन्तुष्टः, सन्तोषो हि बाह्यार्थलाभेन सर्वस्य भवति, तमनपेक्ष्यात्मन्येव च सन्तुष्टः, सर्वतो वीततृष्ण इत्येतत्। य ईदृश आत्मवित्** तस्य कार्यं **करणीयं** न विद्यते **नास्तीत्यर्थः॥ १७॥**

आनन्दगिरिकृतव्याख्या

**'ज्ञानयोगेन साङ्ख्यानाम्' इति कथमुक्तम्?' इति परिचोद्य परिहारमुपदर्शयतीत्याह—** इत्येवमिति। **आत्मनिष्ठस्य विषयसङ्गराहित्यं दृष्टम्, तद् अनात्मज्ञेन जिज्ञासुना कर्तव्यमिति मत्वाऽऽह—** यस्तु साङ्ख्य इति। **किञ्चात्मज्ञस्य ज्ञानेनात्मनैव परितृप्तत्वाद् नान्नपानादिना साध्या तृप्तिरिष्टा। तेन विद्यार्थिना संन्यासिनाऽपि नान्नरसादावासक्तिर्युक्ता कर्तुमित्याह—** आत्मतृप्त इति। **किञ्चात्मविदः सर्वतो वैतृष्ण्यं दृष्टम्, तद् अनात्मविदा विद्यार्थिना कर्तव्यमित्याह—** आत्मन्येवेति। **रतितृप्तिसन्तोषाणां [1]मोदप्रमोदानन्दवद् अवान्तरभेदः। अथवा** रतिः **विषयासक्तिः,** तृप्तिः **विषयविशेषसम्पर्कजं सुखम्,** सन्तोषः **अभीष्टविषयमात्रलाभाधीनं सुखसामान्यमिति भेदः। नन्वात्मरतेरात्मतृप्तस्यात्मन्येव सन्तुष्टस्यापि किञ्चित् कर्तव्यं मुक्तये भविष्यतीति, नेत्याह—** य ईदृश इति॥ १७॥

भाष्यार्कप्रकाशः

**यस्त्विवति**। यो मानवस्तु आत्मरतिरात्मतृप्त आत्मन्येव सन्तुष्टश्च स्यात् तस्य कार्यं नैव विद्यते। **साङ्ख्य इति**। तुशब्दस्य पूर्वोक्तवैलक्षण्यद्योतकत्वात् पूर्वं कर्मिण उक्तत्वादिह साङ्ख्यलाभ इति भावः। साङ्ख्यशब्दार्थमाह— **आत्मज्ञाननिष्ठ इति**। आत्मरतिरेवेत्येवकारादाह— **विषयेष्विति**। आत्मन्येवास्य रतिरित्यर्थः। आत्मतृप्तश्चेत्यत्र चकार एवार्थक इत्याह— **आत्मनैव तृप्त इति**। एवकारार्थमाह— **नान्नरसादिनेति**। मनःप्राणादितादात्म्याध्यासाभावादिति भावः। **मानव इति**। मनुष्याणामेवात्राधिकारादिति भावः। यद्यपि 'तदुपर्यपि बादरायणः सम्भवा'दिति ज्ञानमार्गे देवानामप्यधिकारस्तथापि न संन्यासे इति बोध्यम्। **सर्वत इति**। सर्वेषु विषयेष्वित्यर्थः। क एवंविधः? अत आह— **आत्मविदिति**। सच्चिदानन्दब्रह्मात्मज्ञानशून्यस्य कथमात्मरत्यादयः स्युरिति भावः।

**यत्तु** मुक्तपरोऽयं श्लोको वक्ष्यमाणश्चेति **रामानुजः,** न संन्यासाश्रमिपरः, तस्यापि स्वाश्रमधर्मनिवृत्त्यभावात्। वर्णाश्रमविशिष्टस्यैव हि वर्णाश्रमधर्मारम्भः, न पुनर्वर्णाश्रमाधीननामरूपविनिर्मुक्तस्येति मुक्तशब्दस्य भाव इति **वेदान्तदेशिकश्च। तदुभयं** मन्दम्। मुक्तस्येह प्रसक्त्यभावात्, मुमुक्षुं प्रत्येव गीताशास्त्रस्य प्रवृत्तत्वात्। वेदान्तशास्त्रे मुमुक्षोरेवाधिकारित्वात् 'आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यत' इत्यात्मतुष्टेः स्थितप्रज्ञलक्षणत्वात् स्थितप्रज्ञो ज्ञानयोग्येव, न मुक्त इति सम्प्रतिपन्नत्वात्, 'दुःखेष्वनुद्विग्नमनाः' इत्यादिश्लोकोक्तधर्माणां मुक्ते प्रसक्त्यभावात्। न हि मुक्तौ दुःखानि सन्ति, येन तत्रानुद्वेग उपदिश्येत मुक्तस्य। किञ्च मानव इति पदमपि अस्य श्लोकस्य साधकपरत्वे लिङ्गम्। सिद्धस्य [मुक्तस्य] हि न मानवत्वादिकमस्ति। मानवत्वादेर्देहधर्मत्वान्मुक्तस्यात्मत्वाच्च। न हि मुक्तेषु मानवासुरदैवतादिविभागोऽस्ति। अपि चात्मरतिरेवेत्येवकारोऽपि व्यर्थस्त्वन्मते। न हि मुक्तौ विषयाः सन्ति येन विषयरतिव्युदासाय प्रयुज्येतैवकारः। अथ यदि मुक्तिर्विष्णुपदं वैकुण्ठलोकस्तत्र अप्राकृता विषयाः सन्तीत्युच्येत, तर्हि मुक्तस्य विषयरतिरेव स्यान्न त्वात्मरतिः, अप्राकृतविषयैस्तैरिन्द्रियाणामाकृष्टत्वान्मुक्तस्य। असति तु मुक्तानां विषयभोगे अभोग्यानामप्राकृतानां तद्विषयाणां सृष्टिः पारमेश्वरी व्यर्थैव स्यात्। एवं निरर्थविषयस्रष्टा विष्णुरप्रमाण एव स्यात् निरर्थप्रलापोन्मत्तवत्। **अपि च** नैवेति वक्ष्यमाणश्लोके इहेति पदमस्ति। तद्धि एतल्लोकवाचि। कथं मुक्तस्येहलोकसम्बन्धित्वम्? न कथमपि। तस्मान्नेमौ श्लोकौ मुक्तपरौ किन्तु [2]साङ्ख्यपरावेव।

---

१. प्रियलाभनिमित्तो हर्षः मोदः, स एव प्रकृष्टः प्रमोदः, आनन्दः सुखसामान्यमिति। द्र. तै. उ. २-५। २. तत्त्वज्ञानिपरावित्यर्थः।

**नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।**
**न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः॥ १८॥**

**किञ्च—** नैवेति। **नैव** तस्य **परमात्मरतेः** कृतेन **कर्मणा** अर्थः **प्रयोजनमस्ति। अस्तु तर्हि** अकृतेन **अकरणेन प्रत्यवायाख्योऽनर्थः? नाकृतेन** इह **लोके** कश्चन **कश्चिदपि प्रत्यवायप्राप्तिरूप आत्महानिलक्षणो वा नैवास्ति। न चास्य** सर्वभूतेषु **ब्रह्मादिस्थावरान्तेषु भूतेषु कश्चिद्** अर्थव्यपाश्रयः **प्रयोजननिमित्तक्रियासाध्यो** व्यपाश्रयो **व्यपाश्रयणम् आलम्बनम्। कञ्चिद् भूतविशेषमाश्रित्य न साध्यः कश्चिदर्थोऽस्ति, येन तदर्था क्रियाऽनुष्ठेया स्यात्। न त्वम् एतस्मिन् सर्वतःसम्प्लुतोदकस्थानीये सम्यग्दर्शने वर्तसे॥ १८॥**

आनन्दगिरिकृतव्याख्या

**इतश्चात्मविदो न किञ्चित् कर्तव्यमित्याह—** किञ्चेति। **अभ्युदयनिःश्रेयसयोरन्यतरत् प्रयोजनं** कृतेन **सुकृतेनात्मविदो भविष्यतीत्याशङ्क्याह—** नैवेति। **प्रत्यवायनिवृत्तये स्वरूपप्रच्युतिप्रत्याख्यानाय वा कर्म स्यादित्याशङ्क्याह—** नेत्यादिना। **ब्रह्मादिषु स्थावरान्तेषु भूतेषु कञ्चिद् भूतविशेषमाश्रित्य कश्चिदर्थो विदुषः साध्यो भविष्यति, तदर्थं तेन कर्तव्यं कर्मेत्याशङ्क्याह—** न चेति। **तत्राद्यं पादमादत्ते—** नैवेति। **तं व्याचष्टे—** तस्येति। **आत्मविदः स्वर्गाद्यभ्युदयानर्थित्वात् , निःश्रेयसस्य च प्राप्तत्वान्न कृतं कर्मार्थवदित्यर्थः। आत्मविदा चेत् कर्म न क्रियते, तर्हि तेनाकृतेन तस्यानर्थो भविष्यतीति तत्प्रत्याख्यानार्थं तस्य कर्तव्यं कर्मेति शङ्कते—** तर्हीति। **द्वितीयपादेनोत्तरमाह—** नेत्यादिना। **अतो न तन्निवृत्त्यर्थं कृतमर्थवदिति शेषः। द्वितीयं भागं विभजते—** न चास्येति। **व्यपाश्रयणमालम्बनं नेति सम्बन्धः। पदार्थमुक्त्वा वाक्यार्थमाह—** कञ्चिदिति। **भूतविशेषस्याश्रितस्यापि क्रियाद्वारा प्रयोजनप्रसव-हेतुत्वमिति मत्वाऽऽह—** येनेति। **तर्हि मयाऽपि यथोक्तं तत्त्वज्ञानमाश्रित्य त्याज्यमेव कर्मेत्यर्जुनस्य मतमाशङ्क्याह—** न त्वमिति॥ १८॥

भाष्यार्कप्रकाशः

**यदुक्तं** संन्यासिनोऽप्यस्ति वर्णाश्रमधर्म इति, **तदयुक्तम्।** कुटीचकादीनां दण्डतर्पणादिधर्मसत्त्वेऽपि परमहंसस्य नास्ति यः कोऽप्यल्पोऽपि धर्मः, 'ये ब्राह्मणा गामवधूतलिङ्गाश्चरन्ति तेभ्यः शिवमस्तु राज्ञा'मिति भागवतात्। 'दिगम्बरा निर्दण्डकपालाः' 'करतलभिक्षस्तरुतलवासः' इत्यादिवचनोक्तकरतलभिक्षादिशालिनो हि ते। उक्तं हि—'निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः' इति। न चास्ति तेषामपि निवृत्तिधर्म इति वाच्यम् ; आत्मरत्यादीनामेव निवृत्तिधर्मत्वात्[१] , त्वदुक्तरीत्या मुक्तेष्वपि तत्सम्भवाच्च॥ १७॥

**नैवेति।** तस्य इह कृतेन कश्चनार्थो नैव, अकृतेन कश्चनार्थो नैव। अस्य सर्वभूतेषु अर्थव्यपाश्रयः कश्चिन्न च। ननु कर्मणा साङ्ख्यस्य माऽस्तु प्रयोजनम् ; कर्माकरणेन तु प्रत्यवायरूपोऽनर्थः स्यादित्यत आह— **तर्हीति। अर्थव्यपाश्रय इति।** अर्थाय व्यपाश्रयो ऽर्थव्यपाश्रय इति [२]''चतुर्थी' इति योगविभागात् समासः। अर्थशब्दार्थमाह— **प्रयोजनेति।** चतुर्थ्यर्थमाह— **निमित्त इति।** व्यपाश्रयशब्दार्थमाह— **व्यपाश्रयणमिति।** स कीदृशः? अत आह— **क्रियासाध्य इति।** कीर्तनवन्दनादिक्रियानिर्वर्त्य इत्यर्थः। क्रियापूर्वक इति यावत्। सर्वभूतविषयकं प्रयोजननिमित्तं क्रियासाध्यमाश्रयणं किञ्चिदप्यस्य नास्तीत्यर्थः। इदमेव विशदयति— **कञ्चिदिति।** कञ्चिद्भूतविशेषं ब्रह्मरुद्रादिरूपं राजधनिकादिरूपं वा सागराश्वत्थादिरूपं वा आश्रित्य कीर्तनवन्दनादिना संश्रित्य साध्यः। तस्माल्लभ्यः कश्चिदर्थः सत्यलोककैलासादिरूपः भूमिधनादिरूपो वा पुण्यपुत्रादिरूपो वा, अर्थः फलमिति यावत् , नास्यास्ति। **येनेति।** अर्थसत्त्वेनेत्यर्थः। **तदर्थेति।** ब्रह्मलोकादिफलार्थेत्यर्थः। **क्रियेति।** सगुणब्रह्मोपासनयज्ञानुष्ठानादिरूपेत्यर्थः॥ १८॥

---

१. आत्मरत्यादि स्वतःसिद्धमेव तत्त्वज्ञानिनः, न यत्नसाध्यम्। तेन तस्य कर्तव्याभावः सिद्धः। "परिव्राजकस्य तु सर्वकर्मसंन्यासात् प्रत्यवायो न संभवत्यननुष्ठाननिमित्तः। शमदमादिस्तु तदीयो धर्मो ब्रह्मसंस्थताया उपोद्बलको न विरोधी। ब्रह्मनिष्ठत्वमेव हि तस्य शमदमाद्युपबृंहितं स्वाश्रमविहितं कर्म।" (ब्र.सू. ३.४.२०) इति भाष्यमिहानुसंधेयम्। २. 'चतुर्थी तदर्थार्थ—' (पा.सू. २-१-३६) इति समासविधायकसूत्रे इति शेषः।

**तस्मादसक्तः सततं कार्यं कर्म समाचर।**
**असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः॥ १९॥**
**कर्मणैव हि संसिद्धिमास्थिता जनकादयः।**
**लोकसंग्रहमेवापि सम्पश्यन् कर्तुमर्हसि॥ २०॥**

**यत एवम्—** तस्मादिति। **तस्माद्** असक्तः **सङ्गवर्जितः** सततं **सर्वदा** कार्यं **कर्तव्यं नित्यं कर्म** समाचर **निर्वर्तय। असक्तो** हि **यस्मात्** समाचरन् **ईश्वरार्थं कर्म कुर्वन्** परं **मोक्षमाप्नोति पूरुषः सत्त्वशुद्धिद्वारेणेत्यर्थः॥ १९॥**

**यस्माच्च—** कर्मणैवेति। **कर्मणैव** हि **यस्मात् पूर्वे क्षत्रिया विद्वांसः** संसिद्धिं **मोक्षं गन्तु**मास्थिताः **प्रवृत्ताः। के?** जनकादयो **जनकाश्वपतिप्रभृतयः। यदि ते प्राप्तसम्यग्दर्शनाः, ततो लोकसंग्रहार्थं** [1]**प्रारब्धकर्मत्वात्** कर्मणा सहैव **असंन्यस्यैव कर्म संसिद्धिमास्थिता इत्यर्थः। अथाप्राप्तसम्यग्दर्शना जनकादयः,** तदा कर्मणा **सत्त्वशुद्धिसाधनभूतेन क्रमेण संसिद्धिमास्थिता इति व्याख्येयः श्लोकः।**

आनन्दगिरिकृतव्याख्या

**सम्यग्ज्ञाननिष्ठत्वाभावे कर्मानुष्ठानमावश्यकमित्याह—** यत इति। तस्मात् **ज्ञाननिष्ठाराहित्यादिति यावत्। मोक्षमेवापेक्षमाणस्य कथं कर्मणि फलान्तरवति नियोगः स्यादित्याशङ्क्याह—** असक्तो हीति॥ १९॥

**यद्यपि जितेन्द्रियोऽपि विवेकी श्रवणादिभिरजस्रं ब्रह्मणि निष्ठातुं शक्नोति, तथापि क्षत्रियेण त्वया विहितं कर्म न त्याज्यमित्याह—** यस्माच्चेति। **तस्मात् त्वमपि कर्म कर्तुमर्हसीति सम्बन्धः। इतोऽपि त्वया विहितं कर्म कर्तव्यमित्याह—** लोकेति। **पूर्वार्धं विभजते—** कर्मणैवेति। **कथं जनकादीनां कर्मणा संसिद्धिप्राप्तिरुच्यते, कर्मत्यजां हि सम्यग्दर्शनवतां प्रसिद्धा संसिद्धिरिति? तत्र किं जनकादयोऽपि प्राप्तसम्यग्दर्शनाः स्युः, उताप्राप्तसम्यग्दर्शना भवेयुरिति विकल्प्य प्रथमं प्रत्याह—** यदीति। **लोकसंग्रहार्थं कर्मणा सहैव संसिद्धिमास्थिता इति सम्बन्धः। कर्मणा सहैवेत्येतद् व्याकरोति—** असंन्यस्यैव कर्मेति। **तत्र हेतुमाह—** प्रारब्धेति। **जनकादीनां सत्यपि ज्ञानित्वे प्रारब्धकर्मवशात् कर्मापरित्यज्यैव लोकसंग्रहार्थं प्रवर्तमानानां ज्ञानमाहात्म्यादुपपन्ना संसिद्धिरित्यर्थः। द्वितीयमनूद्य पूर्वार्धेनैवोत्तरमाह—** अथेत्यादिना।

भाष्यार्कप्रकाशः

**यत एवं तस्मादिति।** यस्मात् त्वमेवं सर्वतःसम्प्लुतोदकस्थानीये सम्यग्दर्शने न वर्तसे, तस्मादित्यर्थः। ज्ञानयोगाधिकाराभावादिति यावत्। न हि त्वमात्मरतिरात्मतृप्त आत्मतुष्टश्च भवसि, येन तव कार्याभावः स्यादिति भावः। कार्यशब्दस्वारस्यादाह— **नित्यमिति।** एतेन कर्मिणाऽपि काम्यादिकर्माणि त्याज्यान्येवेति सूचितम्। न हि तानि कर्तुं योग्यानि बन्धकरत्वात्। नित्यानि तु चित्तशुद्धिहेतुत्वात् कर्तुं योग्यानि। **परं मोक्षमिति।** मोक्षस्यैव सर्वोत्कृष्टब्रह्मरूपत्वादिति भावः। ननु ज्ञानादेव मोक्षस्य सिद्धान्तितत्वेन कथं कर्मणा मोक्षप्राप्तिः? अत आह— **सत्त्वशुद्धिद्वारेणेति।**

यत्तु **रामानुजः**— परं जीवमाप्नोतीति, **तदसत्।** तन्मते जीवस्याब्रह्मत्वाज्जीवस्य जीवप्राप्तेरफलत्वाच्च॥ १९॥

**कर्मणेति।** 'असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः' इत्युक्तम्। तत्र किं प्रमाणमिति शङ्कायां जनकादय एवेह प्रमाणमित्याह भगवान्— **कर्मणैवेति।** जनकादयः कर्मणैव संसिद्धिमास्थिता हि। कर्मणैव जनकादयो मोक्षं प्राप्ता इत्यर्थः। सत्त्वशुद्धिद्वारेणेति भावः। एवकारान्न त्वकरणेनेत्यर्थः। इत्येकोऽर्थः। जनकादयः कर्मणा सहैव संसिद्धिं गन्तुमास्थिता हि। 'कर्मणा सहैवे'त्यस्यार्थमाह— **असंन्यस्यैवेति।** ननु कर्मयोगाज्ज्ञानयोगः, ततो मुक्तिरिति क्रमे सति कथं कर्मणा सहैव जनकादीनां मुक्तिप्राप्तिप्रवृत्तिः? इत्यत

१. 'प्रारब्धकर्मबलात्' इति रा. पा.।

## यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः।

**अथ मन्यसे— पूर्वैरपि जनकादिभिरपि अजानद्भिरेव कर्तव्यं कर्म कृतम् ; तावता नावश्यमन्येन कर्तव्यं सम्यग्दर्शनवता कृतार्थेनेति; तथापि प्रारब्धकर्मायत्तस्त्वं** लोकसंग्रहमेवापि **लोकस्योन्मार्गप्रवृत्तिनिवारणं लोकसंग्रहः; तमेवापि प्रयोजनं सम्पश्यन् कर्तुमर्हसि॥ २०॥**

[१]**लोकसंग्रहं कः कर्तुमर्हति, कथं चेत्युच्यते—** यद्यदिति। यद्यत् **कर्माचरति करोति** [२]श्रेष्ठः **प्रधानः,** तत्तदेव

आनन्दगिरिकृतव्याख्या

**द्वितीयार्धव्यावर्त्यामाशङ्कामुत्थापयति—** अथेति। **अज्ञेनाकृतार्थेन** [३]**कृतं कर्मेत्येतावता ज्ञानवता कृतकृत्येन न तत् कर्तव्यमित्युक्तमङ्गीकरोति—** तथापीति। **तर्हि मयाऽपि ज्ञानवता कृतार्थेन कर्म न कर्तव्यमित्याशङ्क्य , अर्जुनस्य कर्तव्यमेव कर्मेत्युत्तरार्धव्याख्यानेन कथयति—** प्रारब्धेति॥ २०॥

**ज्ञानवता कृतार्थेन लोकसंग्रहार्थमपि न प्रवर्तितव्यमित्याशङ्कामुत्थाप्य परिहरति—** लोकेत्यादिना। **श्रुताध्ययनसम्पन्नत्वेनाभि-**

भाष्यार्कप्रकाशः

आह— **प्राप्तसम्यग्दर्शना इति।** जन्मान्तरानुष्ठितज्ञानयोगमाहात्म्येनेति भावः।

**अत्रेदं तत्त्वम्—** वेदान्तश्रवणादिना पारोक्ष्येण ब्रह्मात्मानं विदित्वा विद्वांसो ज्ञानयोगे प्रवर्तन्ते, सिद्धे तु तस्मिन्नपरोक्षीकृतब्रह्मात्मानो मुच्यन्ते। अकालमरणादिना ज्ञानासिद्धौ तु अपक्वज्ञानयोगास्ते न मुच्यन्ते, किन्तु जन्मान्तरं प्रतिपद्यन्ते। तत्र तु विनैव ज्ञानयोगं केचिद् विनैव कर्मयोगं च वेदान्तश्रवणमात्रेणैव ब्रह्मात्मानं साक्षात्कुर्वन्ति। तस्मादेतेषां कर्मसंन्यासं विनैव मुक्तिरिति।

नन्वेवं ज्ञानिनां कुतः कर्मणि प्रवृत्तिः, अत आह— **लोकसंग्रहार्थमिति।** लोकेन स्वाचारं संग्राहयितुमित्यर्थः। ननु किमिति शुकादयो लोकसंग्रहार्थं कर्म नाकुर्वन्नत आह— **प्रारब्धकर्मबलादिति।** ज्ञानिभिरपि यावत्प्रारब्धावसानं तदनुवर्तनस्यावर्जनीयत्वादिति भावः। एतेन ज्ञानिषु केषाञ्चित् कर्मयोगे, केषाञ्चित् तपोयोगे, केषाञ्चिद् ग्रन्थकरणे, केषाञ्चिद् व्यवहारे, केषाञ्चिद् वाणिज्यादौ च प्रारब्धवशात् प्रवृत्तेर्दर्शनेऽपि न कोऽपि बन्ध इति सूचितम्। कर्मणा सहैव मुक्तिं गता इत्युक्तौ कर्मणोऽपि मुक्तिप्रवेशः स्यात्। तच्चानिष्टम् , निष्क्रियब्रह्मरूपत्वान्मुक्तेरित्यभिप्रेत्याह— **गन्तुं प्रवृत्ता इति।** इति द्वितीयोऽर्थः। कर्मणा सहैवेत्यस्य असंन्यस्यैवेत्यर्थात् जनकादयोऽसंन्यस्यैव मुक्तिं गताः। संन्यासं विना कर्मयोगे स्थित्वैव ते जन्मान्तरप्रारब्धसुकृतवशादपरोक्षीकृतब्रह्मात्मनो मुक्तिं गता इति तृतीयोऽर्थः। संसिद्धिमास्थिताश्चित्तशुद्धिं प्राप्ताः इति चतुर्थोऽर्थः। दर्शितश्चायं ग्रन्थारम्भे भाष्यकृद्भिरेवेति।

परहृदयस्याप्रत्यक्षत्वाज्जनकादयः प्राप्तसम्यग्दर्शना एवेति निश्चेतुमशक्यत्वात् पक्षान्तरमाह— **अथेत्यादिना।** जनकादयः कर्मणैव क्रमेण संसिद्धिमास्थिता इति श्लोको व्याख्येय इत्यन्वयः। अयमेवार्थः आदौ मया लिखितः।

ननु जनकादयः प्राप्तसम्यग्दर्शनाः इत्यत्र नास्ति बलवत् प्रमाणम् ; जनकयाज्ञवल्क्ययोरुक्तिप्रत्युक्त्यादिकं तु परोक्षज्ञानसाधनतयोपक्षीणम्। अप्राप्तसम्यग्ज्ञानाः इत्यत्र तु बलवल्लिङ्गमस्ति कर्मानुष्ठानरूपम् , अविद्वद्विषयत्वात् कर्मानुष्ठानस्य। अहं तु इतः प्रागप्राप्तज्ञानोऽपीदानीं त्वदुपदेशमाहात्म्यात् प्राप्तसम्यग्दर्शन एव भवामि। ततो नाहं युद्धाख्यमन्यद्वा कर्म कुर्यामिति मतमर्जुनस्याशङ्क्याह भगवान् लोकसङ्ग्रहमित्युत्तरार्धम् इत्याह भाष्यकारः— **अथ मन्यस इति।** पूर्वैरप्यजानद्भिरप्राप्तसम्यग्दर्शनैरेव जनकादिभिः कर्तव्यं कर्म कृतम्। सम्यग्दर्शनवता, अत एव कृतार्थेनान्येन मादृशेन तु तदवश्यं न कर्तव्यमित्यथ मन्यसे, मन्यसे यदीत्यर्थः। पूर्वैरपीत्यपिशब्दस्तु पूर्वेषां ज्ञानादिसामग्र्यतिशयं द्योतयति। कृतार्थपदं तु कृतकृत्यत्वबोधकम्। तच्च अकृतकृत्यः कृत्यं करोतु नाम, कृतकृत्यः कथं कृत्यं कुर्यात् , तदानीमेव कृतभोजनो भोजनमिवेति सूचयति— **प्रारब्धेति।** प्रारब्धकर्मणोऽनतिक्रमणीयत्वादिति भावः। एतेन तवास्ति युद्धहेतुप्रारब्धकर्मेति भगवता सूचितमर्जुनाय सर्वज्ञेन। **उन्मार्गः** अधर्ममार्गः। **सम्पश्यन्** सम्यग्जानन्॥ २०॥

**यद्यदिति।** श्रेष्ठो यद्यदाचरति इतरो जनस्तत्तदेवाचरति। **प्रधान इति।** विद्यादिभिरुत्कृष्टः। यत् प्रमाणमिति व्यस्ते पदे। यत्

१. 'लोकसङ्ग्रहः किमर्थं कर्तव्य इत्युच्यते' इति पा.। २. 'येषु येषु श्रेष्ठः प्रधानः' इति पा.। ३. 'कर्तव्यं कर्म' इति पा.।

**स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते॥ २१॥**
**न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन।**
**नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि॥ २२॥**
**यदि ह्यहं न वर्तेय[१] जातु कर्मण्यतन्द्रितः।**
**मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ ! सर्वशः॥ २३॥**

**कर्माचरति** इतरः **अन्यो जनस्तदनुगतः। किञ्च स श्रेष्ठो यत् प्रमाणं कुरुते लौकिकं वैदिकं वा, लोकः** तद् अनुवर्तते **तदेव प्रमाणीकरोतीत्यर्थः॥ २१॥**

**यद्यत्र ते लोकसंग्रहकर्तव्यतायां विप्रतिपत्तिः, तर्हि मां किं न पश्यसि?—** न म इति। **न** मे **मम पार्थ !** नास्ति **न विद्यते कर्तव्यं त्रिष्वपि लोकेषु** किञ्चन **किञ्चिदपि। कस्मात्? न** अनवाप्तम् **अप्राप्तम्** अवाप्तव्यं **प्रापणीयम्। तथापि वर्त एव च कर्मण्यहम्॥ २२॥**

**यदि हि पुनरहं न वर्तेय** जातु **कदाचित् कर्मणि** अतन्द्रितो**ऽनलसः सन् , मम श्रेष्ठस्य सतो** वर्त्म **मार्गम्**

आनन्दगिरिकृतव्याख्या

**मतो यद्यद् विहितं प्रतिषिद्धं वा कर्मानुतिष्ठति, तत्तदेव प्राकृतो जनोऽनुवर्तते। तेन विद्यावताऽपि लोकमर्यादास्थापनार्थं विहितं कर्तव्यमित्यर्थः। श्रेष्ठानुसारित्वमितरेषामाचारे दर्शयित्वा प्रतिपत्तावपि दर्शयति—** किञ्चेति॥ २१॥

**कृतार्थस्यापि लोकसंग्रहार्थं विहितं कर्म कर्तव्यमित्युक्त्वा तत्रैव भगवन्तमुदाहरणत्वेनोपन्यस्यति—** यदीत्यादिना। **अप्राप्तस्य प्राप्तये तवापि [२]कर्तव्यसम्भवाद् 'न किञ्चिदपि विद्यते कर्तव्य'मिति कथमुक्तमित्याशङ्क्याह—**नानवाप्तमिति। **प्रतीकमुपादाय व्याख्यानद्वारा विद्यावतोऽपि कर्मप्रवृत्तिं सम्भावयति—** नेत्यादिना। **अन्वयार्थं पुनर्नञोऽनुवादः।** भगवतो **नास्ति कर्तव्यमित्येतदाकाङ्क्षाद्वारा स्फोरयति** —कस्मादित्यादिना। **प्रयोजनाभावे त्वयाऽपि नानुष्ठेयं कर्मेत्याशङ्क्य , लोकसंग्रहार्थं ममापि कर्मानुष्ठानमिति मत्वाऽऽह—** तथापीति ॥ २२॥

**लोकसंग्रहोऽपि न ते कर्तव्यो विफलत्वादित्याशङ्क्याह—** यदि हीति॥ २३॥

भाष्यार्कप्रकाशः

शास्त्रादिकं स श्रेष्ठः **प्रमाणं कुरुते** प्रमाणत्वेन स्वीकरोति, इतरो लोकः तदेव शास्त्रादिकं प्रमाणमनुवर्तते अनुसृत्य प्रवर्तते। फलितार्थमाह— **तदेव प्रमाणीकरोतीति**॥ २१॥

**नेति**। हे पार्थ, मे त्रिषु लोकेषु किञ्चन कर्तव्यं नास्ति; अनवाप्तमवाप्तव्यं च किञ्चन मे नास्ति। कर्मण्येव वर्ते च। **मां किमिति**। मद्दृष्टान्तेन लोकसङ्ग्रहकर्तव्यतायां विषये तव वर्तमाना विप्रतिपत्तिः स्वयमेव निराकरणीयेत्यर्थः। अप्राप्तस्य प्राप्त्यर्थं लोकाः कर्म कुर्वन्तीति प्रसिद्धम् , स्वर्गाद्यर्थं ज्योतिष्टोमादौ लोकानां प्रवृत्तिदर्शनात्। अवाप्तसमस्तकामः परिपूर्णो भगवान् वासुदेवस्तु कमर्थमुद्दिश्य कर्मणि प्रवर्तेत? न कमपि। तथापि कर्मणि वर्तत एव वासुदेवो लोकसङ्ग्रहार्थमित्यर्थः॥ २२॥

**यदीति**। ननु तव किं लोकसङ्ग्रहेण फलम्? अतो मा कुरुष्व त्वमपि कर्मेत्यत आह भगवान्— **यदीति**। यदि ह्यहमतन्द्रितः सन् जातु कर्मणि न वर्तेय इत्यन्वयः। अतन्द्रितः इत्यनेन कर्मत्यागे हेतुरलसत्वं सूचितम्। यद्यप्यात्मनिष्ठः पुरुष आत्मानन्दानुभवपारवश्यादेव कर्म जहाति, न त्वालस्यात् , तथापि आलस्यप्रयुक्तः कर्मत्यागोऽनुचित इति बोधनायातन्द्रित इत्युक्तम्। **ममेति**। ज्ञानबलादिभिरुत्कृष्टस्येत्यर्थः॥ २३॥

---

१. 'वर्तेयं' इति मूले भाष्ये च पा.। २. 'कर्तृत्वसंभवात्' इति पा.।

**उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्।**
**सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः॥२४॥**
**सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत !।**
**कुर्याद् विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम्॥२५॥**

**अनुवर्तन्ते मनुष्याः, हे पार्थ !** सर्वशः **सर्वप्रकारैः॥२३॥**

**तथा च को दोष इत्याह—** उदिति। उत्सीदेयुः **विनश्येयुः** इमे **सर्वे लोकाः, लोकस्थितिनिमित्तस्य कर्मणोऽभावात् , न कुर्यां कर्म चेदहम्। किञ्च सङ्करस्य च कर्ता स्याम्। तेन कारणेन उपहन्याम् इमाः प्रजाः। प्रजानामनुग्रहाय प्रवृत्तः उपहतिम् उपहननं कुर्यामिति ममेश्वरस्याननुरूपमापद्येत॥२४॥**

**यदि पुनरहमिव** [१]**त्वं कृतार्थबुद्धिरात्मविद् अन्यो वा, तस्यापि आत्मनः कर्तव्याभावेऽपि परानुग्रह एव कर्तव्य इत्याह—** सक्ता इति। **सक्ताः कर्मणि 'अस्य कर्मणः फलं मम भविष्यति' इति** [२]**केचिदविद्वांसो यथा कुर्वन्ति, भारत !**

आनन्दगिरिकृतव्याख्या

**श्रेष्ठस्य तव मार्गानुवर्तित्वं मनुष्याणामुचितमेवेत्याशङ्क्य दूषयति—** तथा चेत्यादिना। **ईश्वरस्य कर्मण्यप्रवृत्तौ तदनुवर्तिनामपि कर्मानुपपत्तेरिति हेतुमाह—** लोकस्थितीति। **इतश्चेश्वरेण कर्म कर्तव्यमित्याह—** किञ्चेति। **यदि कर्म न कुर्यामिति शेषः। सङ्करकरणस्य कार्यं कथयति—** तेनेति। **प्रजोपहतिः परिप्राप्यते चेत् , किं तया तव स्यादिति? तत्राह—** प्रजानामिति॥२४॥

**त्वामनाचरन्तमनुवर्तितां सर्वेषां को दोषः स्यादित्यपेक्षायाम् , ईश्वरस्य कृतार्थतया कर्मानुष्ठानाभावे तदनुवर्तिनामपि तदभावादेव स्थितिहेत्वभावात् पृथिव्यादिभूतानां विनाशप्रसङ्गाद्, वर्णाश्रमधर्मव्यवस्थानुपपत्तेश्चाधिकृतानां प्राणभृतां पापोपहतत्वप्रसङ्गात् परानुग्रहार्थं प्रवृत्तिरीश्वरस्येत्युक्तम्। संप्रति लोकसंग्रहाय कर्म कुर्वाणस्य कर्तृत्वाभिमानेन ज्ञानाभिभवे प्राप्ते प्रत्याह—** यदि पुनरिति। **कृतार्थबुद्धित्वे हेतुमाह—** आत्मविदिति। **यथावदात्मानमवगच्छन् कर्तृत्वाद्यभिमानाभावात् कृतार्थो भवत्येवेत्यर्थः। अर्जुनादन्यत्रापि ज्ञानवति कृतार्थबुद्धित्वं कर्तव्यत्वाद्यभिमानहीने तुल्यमित्याह—** अन्यो वेति। **तस्य तर्हि कर्मानुष्ठानमफलत्वादनवकाशमित्याशङ्क्याह—** तस्यापीति। कर्तव्य इति। **आत्मविदाऽपि परानुग्रहाय कर्तव्यमेव कर्मेत्याहेति शेषः। दृष्टान्तदार्ष्टान्तिकरूपं श्लोकं व्याकरोति—**सक्ता

भाष्यार्कप्रकाशः

**उत्सीदेयुरिति।** अहं कर्म न कुर्यां चेद् इमे लोका **उत्सीदेयुः** विनश्येयुरिति, नरकप्राप्त्यादिलक्षणं नाशं प्राप्नुयुरित्यर्थः। **सङ्करस्येति।** याजनयुद्धगोरक्षणसेवादिवर्णधर्माः गुरुकुलवासवैश्वदेववनवासभिक्षाटनाद्याश्रमधर्माश्च पृथगसङ्कीर्णा वर्णाश्रमविभागबोधकाः यदि लुप्येरन् , तर्हि वर्णाश्रमसङ्करः स्यादित्यर्थः। **तेनेति।** साङ्कर्यकरणेनेत्यर्थः। **उपहन्यां** नाशयेयम् , नरकदुःखप्राप्त्या[प्त्या]दिनाशं जनयेयमित्यर्थः। 'सङ्करो नरकायैव' इत्यर्जुनेनैवोक्तत्वादिति भावः। तस्माद् यथाहं परमात्मा सर्वज्ञ आत्मविदपि क्षत्रियजातिगृहस्था-श्रमोचितानि कर्माणि लोकसङ्ग्रहार्थं करोमि, तद्वत् त्वमपि कुर्ववश्यमित्यर्थः॥२४॥

**सक्ता इति।** कृतार्थबुद्धिः कृतार्थोऽहमिति बुद्धिशाली। कृतः साक्षात्कृतोऽर्थः परमार्थ आत्मा यया सा कृतार्था बुद्धिर्यस्य स कृतार्थबुद्धिरिति वा। कृतार्था कृतकृत्या बुद्धिर्यस्येति वा। आत्मनि कृतकृत्यत्वाकृतकृत्यत्वादिविशेषासम्भवाद् बुद्धिरेव सच्चिदानन्दात्म-तादात्म्यमापद्य कृतकृत्यतामात्मनि सम्भावयतीत्यर्थः। **अन्यो वेति।** त्वत्त इतरो वा अहमिव कृतार्थबुद्धिरात्मविदित्यर्थः। तस्यान्यस्य आत्मनस्तवापि कर्तव्याभावेऽपीतरानुग्रहः कर्तव्य एव। यथा मया इतरानुग्रहः क्रियते तथा मादृशेन त्वयाऽन्येन वाऽऽत्मविदा कर्तव्य एवेतरानुग्रहः [३]कर्मकरणद्वारेत्यर्थः। **तस्यापि** तादृशस्यापि **आत्मनः** स्वस्य कर्तव्याभावेऽपीत्यन्वयः। तस्यापीत्यतः प्राक् तर्हीति

१. 'त्वमपि कृतार्थबुद्धिः' इति रा.पा.। २. 'के? अविद्वांसः' इति रा.पा.। ३. कर्मानुष्ठानद्वारेत्यर्थः।

**न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्।**
**जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन्॥ २६॥**
**प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।**
**अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते॥ २७॥**

**कुर्याद्** विद्वान् **आत्मवित्** तथा **असक्तः सन्।** [1]**तद्वत् किमर्थं करोति? तच्छृणु।** चिकीर्षुः **कर्तुमिच्छुः लोकसंग्रहम्** ॥ २५॥

**एवं लोकसंग्रहं चिकीर्षोः न ममात्मविदः कर्तव्यमस्ति, अन्यस्य वा, लोकसंग्रहं मुक्त्वा।** [2]**ततस्तस्यात्मविद इदमुपदिश्यते—** नेति। **बुद्धेर्भेदो** बुद्धिभेदो **'मयेदं कर्तव्यं, भोक्तव्यं चास्य कर्मणः फलम्' इति निश्चितरूपाया बुद्धेर्भेदनं चालनं बुद्धिभेदः। तं न** जनयेद् **नोत्पादयेत्** अज्ञानाम् **अविवेकिनां** कर्मसङ्गिनां **कर्मणि आसक्तानाम् आसङ्गवताम्। किं नु कुर्यात्?** जोषयेत् **कारयेत् सर्वकर्माणि विद्वान् स्वयं तदेवाविदुषां कर्म** युक्तोऽ**भियुक्तः समाचरन्॥ २६॥**

**अविद्वान् अज्ञः कथं कर्मसु सज्जत इत्याह—** प्रकृतेरिति। प्रकृतेः**, प्रकृतिः प्रधानं सत्त्वरजस्तमसां गुणानां**

आनन्दगिरिकृतव्याख्या

इत्यादिना। असक्तःसन् **कर्तृत्वाभिमानं फलाभिसन्धिं वाऽकुर्वन्निति यावत् ॥ २५॥**

**वृत्तमनूद्योत्तरश्लोकमवतारयति—** एवमिति। **कर्तव्यं कर्मेति** शेषः। **पूर्वार्धमेवं व्याख्यायोत्तरार्धं प्रश्नपूर्वकमवतार्य व्याचष्टे—** किन्तु कुर्यादिति। **सर्वकर्माणि कारयेत् तेषु प्रीतिं कुर्वन्निति शेषः। कथं कारयेदित्याकाङ्क्षायामाह—** तदेवेति॥ २६॥

**अज्ञानां कर्मसङ्गिनामित्युक्तम्। तेनोत्तरश्लोकस्य सङ्गतिमाह—**अविद्वानिति। **कर्तृत्वमात्मनो वास्तवमित्यभ्युपगमाद् विद्वान् कथं कुर्वन्नेव तस्याभावं पश्यतीत्याशङ्क्याह—** प्रकृतेरिति। **कर्मस्वविदुषः सक्तिप्रकारं प्रकटयन् व्याकरोति—** प्रकृतेरित्यादिना।

भाष्यार्कप्रकाशः

पूरणीयम्।

हे भारत! अविद्वांसः कर्मणि सक्ताःसन्तः यथा कर्म कुर्वन्ति, तथा विद्वानसक्तःसन् लोकसंग्रहं चिकीर्षुः कर्म कुर्यात्। कथं कर्मणि सङ्गः? अत आह— **अस्येति**। फलद्वारा कर्मसङ्ग इत्यर्थः॥ २५॥

**नेति**। विद्वान् कर्मसङ्गिनामज्ञानां बुद्धिभेदं न जनयेत् ; विद्वान् युक्तःसमाचरन् सन् सर्वकर्माणि जोषयेत्। **एवमिति**। एवं लोकसङ्ग्रहचिकीर्षोर्मम आत्मविदोऽन्यस्य वा लोकसङ्ग्रहं मुक्त्वा कर्तव्यं नास्ति। तस्माल्लोकसङ्ग्रहेतरप्रयोजनाभावात् ते तुभ्यमिदम् उपदिश्यते मयेति शेषः। अज्ञस्य बुद्धिं दर्शयति – **कर्तव्यमित्यादिना। जोषयेदिति।** जुषी प्रीतिसेवनयोरिति धातोः सेवनार्थकाज्जुषतेः हेतुमति णिच्। **युक्तः** चित्तसमाधानरूपयोगशाली। आदावेव पुंसां ज्ञानयोगेऽधिकाराभावात् कर्मसु प्रवृत्तिरुपपद्यते। विदुषा कर्मसु निन्दितेषु तु अज्ञाः कर्मभ्यो निवर्तन्ते स्वयम्। न तु ज्ञानयोगे प्रवर्तितुं क्षमन्ते। अत उभयभ्रष्टा भवन्ति। तस्मात् कर्मनिन्दादिना नाज्ञानां बुद्धिं भ्रंशयेद् विद्वानित्यर्थः॥ २६॥

**प्रकृतेरिति**। सर्वशः प्रकृतेर्गुणैः क्रियमाणानि कर्माणि अहङ्कारविमूढात्मा अहं कर्तेति मन्यते। साक्षात् सत्त्वादिगुणानां कर्तृत्वाभावादाह— **कार्यकरणाकारपरिणता इति**। कार्यं देहः करणानि समनस्कानीन्द्रियाणि। **विकारैरिति**। कार्यैरित्यर्थः। गुण-साम्यावस्थारूपप्रकृतिजन्यत्वात् प्रकृतिविकारत्वं गुणानामित्यर्थः।

---

१. 'तत् किमर्थं' इति पा.। २. 'तस्मात् त इदमुपदिश्यते' इति रा.पा.।

**तत्त्ववित् तु महाबाहो! गुणकर्मविभागयोः।**
**गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते॥ २८॥**

**साम्यावस्था। तस्याः** [1]**प्रकृतेः** गुणैः **विकारैः कार्यकरणरूपैः क्रियमाणानि** कर्माणि **लौकिकानि शास्त्रीयाणि च** सर्वशः **सर्वप्रकारैः** अहङ्कारविमूढात्मा**, कार्यकरणसङ्घाते आत्मप्रत्ययोऽहङ्कारः, तेन विविधं नानाविधं मूढः आत्मा अन्तःकरणं यस्य सोऽयं कार्यकरणधर्मा कार्यकरणाभिमानी, अविद्यया कर्माण्यात्मनि मन्यमानः, तत्तत्कर्मणामहं कर्ता इति मन्यते ॥ २७॥**

**यः पुनर्विद्वान्—** तत्त्वविदिति। **तत्त्ववित्तु , महाबाहो ! कस्य तत्त्ववित् ?** गुणकर्मविभागयोः। **गुणविभागस्य कर्मविभागस्य च तत्त्वविदित्यर्थः; 'गुणाः करणात्मकाः गुणेषु विषयात्मकेषु वर्तन्ते, नात्मा' इति मत्वा** न सज्जते **सक्तिं न करोति॥ २८॥**

आनन्दगिरिकृतव्याख्या

**प्रधानशब्देन मायाशक्तिरुच्यते। अविद्ययेत्युभयतः सम्बध्यते॥ २७॥**

**अज्ञस्य कर्मसु सक्तिमुक्त्वा, विदुषस्तदभावमभिदधाति—** यः पुनरिति। तत्त्वं **याथार्थ्यं वेत्तीति व्युत्पत्त्या तत्त्वविदिति।** तुश**ब्देनाज्ञाद्** [2]**विशिष्टो निर्दिष्टः। प्रश्नपूर्वकं द्वितीयपादमवतार्य व्याचष्टे—** कस्येत्यादिना। **गुणानामेव गुणेषु वर्तमानत्वमयुक्तम् ,** [3]**निर्गुणत्वात् तेषामित्याशङ्क्य विभजते—** गुणा इति। **'कार्यकरणानामेव विषयेषु प्रवृत्तिः, आत्मनस्तु कूटस्थत्वान्नैवम्' इति ज्ञात्वा**

भाष्यार्कप्रकाशः

**ननु** 'ईक्षतेर्नाशब्द'मिति प्रधानाख्यस्य साङ्ख्यपरिकल्पितस्य तत्त्वस्याशब्दत्वं **व्यासेनैव** सिद्धान्तितमिति कथमिह तद्ग्रहणमिति चेत्? **उच्यते—** नेयं प्रकृतिस्तत्त्वान्तरं, किन्तु मायैव। इयं हि सत्त्वादिगुणत्रयवती। प्रलये गुणास्ते त्रयोऽस्यां निलीय साम्येन वर्तन्त इति तदा अस्याः प्रकृतिरिति नाम। सृष्ट्युपक्रमे त्वस्याः गुणाः क्षुभ्यन्ते। स एव गुणक्षोभः सत्त्वादिगुणोत्पत्तिरित्युच्यते इति। **अहङ्कारेति**। कार्यकरणसङ्घाते अनात्मनि अहमिति यः प्रत्ययः सोऽहङ्कार इत्युच्यते। एतेन ब्रह्मण्यात्मबुद्धिर्नाहङ्कार इति सूचितम् , तस्यात्मत्वात्। **नानाविधमिति**। स्थूलोऽहं काणोऽहं रुग्णोऽहं खिन्नोऽहमित्यादिबहुप्रकारं मूढः मोहं प्राप्तः, कोऽयम्? अत आह— **कार्यकरणधर्मेति**। कार्यकरणगतधर्मानात्मन्यध्यस्तवानित्यर्थः। अत एव **कार्यकरणाभिमानी** कार्यकरणेषु ममेति अहमिति चाभिमानवान्। अत एव **अविद्यया** भ्रान्त्या **आत्मनि** स्वस्मिन् **कर्माणि सन्तीति मन्यमानः** कार्यकरणगतकर्माण्यात्मगतानि मन्वान इत्यर्थः। **तत्कर्मणां** कार्यकरणकर्मणां कर्ताऽहमिति मन्यते। कार्यकरणाकारपरिणतसत्त्वादिप्रकृतिगुणत्रयक्रियमाणकर्माणि मूढोऽहमेव करोमीति मन्यत इति समुदायार्थः। देहे गच्छत्यहं गच्छामीति, चक्षुषि पश्यत्यहं पश्यामीति, मनसि शोचत्यहं शोचामीति च देहादितादात्म्याध्यासाद् भ्रान्त्या पुरुषो मन्यत इति यावत् ॥ २७॥

**तत्त्वविदिति**। तुशब्दस्य पूर्वोक्तवैलक्षण्यद्योतकत्वादाह— **यः पुनर्विद्वानिति**। हे महाबाहो! गुणकर्मविभागयोस्तत्त्ववित्तु गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते। तत्त्वं याथार्थ्यं वेत्ति जानातीति तत्त्ववित्। 'द्वन्द्वान्ते श्रूयमाणं प्रत्येकं सम्बध्यते' इति न्यायादाह— **गुणविभागस्य कर्मविभागस्य चेति**। गुणकर्मणोर्विभागौ गुणकर्मविभागौ तयोरिति समासः। वक्ष्यति भगवांश्चतुर्थाध्याये स्वयमेव गुणकर्मविभागद्वयम्— 'सत्त्वात् संजायते ज्ञानं रजसो लोभ एव च। प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥' इत्यादि। सति तु गुणकर्मविभागज्ञाने— 'नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति। गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति॥' इति तत्रैव वक्ष्यमाणरीत्या गुणा एव कर्मकर्तारो नाहमिति मन्यते। ततश्च मुक्तो भवति। इदमेवात्राप्युच्यते— 'गुणा गुणेषु वर्तन्त इति मत्वा न

---

१.'प्रकृतेः प्रकृतितो जाताः सत्त्वरजस्तमांसि कार्यकरणाकारपरिणताः, तैःगुणैः' इति रा. पा.। २.'विशिष्टे निर्दिष्टे' इति पा.। ३. गुणे गुणानङ्गीकारादिति भावः।

**प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु।**
**तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत्॥ २९॥**
**मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा।**

**ये पुनः—** प्रकृतेरिति। **प्रकृतेर्गुणैः** [1]संमूढाः **सम्यङ्‌ मूढाः सम्मोहिताः सन्तः सज्जन्ते गुणानां कर्मसु गुण-कर्मसु - 'वयं कर्म कुर्मः फलाय' इति। तान् कर्मसङ्गिनः** अकृत्स्नविदः **कर्मफलमात्रदर्शिनो** मन्दान् **मन्दप्रज्ञान्** [2]कृत्स्नविद् **आत्मवित् स्वयं न विचालयेत्। बुद्धिभेदकरणमेव चालनम्; तन्न कुर्यादित्यर्थः॥ २९॥**

**कथं पुनः कर्मण्यधिकृतेनाज्ञेन मुमुक्षुणा कर्म कर्तव्यमिति? उच्यते—** मयीति। **मयि वासुदेवे परमेश्वरे सर्वज्ञे**

आनन्दगिरिकृतव्याख्या

**तत्त्ववित् कर्मसु दृढतरं कर्तृत्वाभिमानं न करोतीत्यर्थः॥ २८॥**

**विद्वानविद्वानित्युभावपि प्रकृत्य विद्वानविदुषो बुद्धिभेदं न कुर्यादित्युपसंहरति—** ये पुनरिति। **प्रकृतेरुक्तगुणैर्देहादिभिर्विकारैः** सम्मूढाः **तानेवात्मत्वेन मन्यमानाः ये ते गुणानां तेषामेव देहादीनां कर्मसु व्यापारेषु** सज्जन्ते **सक्तिं दृढतरामात्मीयबुद्धिं कुर्वन्तीत्याह—** प्रकृतेरित्यादिना। **तेषामनात्मविदां स्वयमात्मविद् बुद्धिभेदं नापादयेदित्याह—** तानित्यादिना॥ २९॥

**यद्यपि कर्मण्यज्ञोऽधिक्रियते, तथापि मोक्षमाणेन तेन कर्म त्यक्तव्यम्, मोक्षस्य कर्मासाध्यत्वात्, न तु तेन कर्म कर्तुं शक्यम्, कर्मणः स्वापेक्षितविरोधित्वादिति शङ्कते—** कथमिति। **श्लोकेनोत्तरमाह—** उच्यत इति। **यथोक्ते परस्मिन्नात्मनि सर्वकर्मणां समर्पणे करणमाह—** अध्यात्मेति। **विवेकबुद्धिमेव व्याकरोति—** अहमिति। **दर्शितरीत्या कर्मसु प्रवृत्तस्य कर्तव्यान्तरमाह—** किञ्चेति।

भाष्यार्कप्रकाशः

सज्जते' इति। **करणात्मका इति।** इन्द्रियरूपेण परिणताः सत्त्वादिगुणा इत्यर्थः। विषयात्मकेषु शब्दादिविषयरूपेण परिणतेषु सत्त्वादिगुणेष्वित्यर्थः। सर्वस्यापि जगतः सत्त्वादिगुणकार्यत्वादिति भावः। गुणानां गुणेषु वृत्त्युक्त्या फलितमाह— **नात्मेति।** आत्मा न गुणेषु वर्तत इत्यर्थः। **न सजत इति।** गुणकर्मस्विति भावः। **यद्वा** 'गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु' इति कोशाद् गुणाः इन्द्रियाणि, कर्माणि तद्व्यापाराः, तद्विभागवित् अस्येन्द्रियस्येदं कर्मेति वेत्तेत्यर्थः। अन्यत्तुल्यम्। गुणेभ्यः [सकाशात्, कर्मभ्यः] सकाशाच्चात्मनो विभागौ गुणकर्मविभागाविति **श्रीधरः॥** २८॥

**प्रकृतेरिति। गुणैः** सत्त्वादिभिः। 'तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्। सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥ रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्। तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥ तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्। प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत॥' इति वक्ष्यमाणविधया गुणानां मोहकत्वं बोध्यम्।

गुणानां सत्त्वादीनां कर्मसु यज्ञादिषु सज्जन्ते। सङ्गप्रकारं दर्शयति— **वयमिति।** फलार्थं वयं कर्माणि कुर्मः इति सज्जन्त इत्यर्थः। फलाभिसन्धिपूर्वककर्तृत्वाभिमान एव सङ्ग इति भावः।

कृत्स्नं सर्वं ब्रह्मेति यावत्, 'सर्वं खल्विदं ब्रह्मे'ति श्रुतेः। **यद्वा** कृत्स्नमशेषं, ब्रह्मेति यावत्, 'निषेधशेषो जयतादशेषः' इति भागवतात्। तदभिन्नत्वादात्मन आह— **आत्मविदिति॥** २९॥

**मयीति।** अध्यात्मचेतसा मयि सर्वाणि कर्माणि संन्यस्य निराशीर्निर्ममश्च भूत्वा विगतज्वरः सन् युध्यस्व। मयीति कस्त्वम्? अत आह— **देव इति।** दीव्यति भूतपालनादिना क्रीडतीति, स्वयं प्रकाशत इति वा देवः, तस्मिन्। नन्वीदृश ईश्वर एवेत्यत आह— **परमेश्वर इति।** अहमेवेश्वरः, न मत्तोऽन्योऽस्तीत्यर्थः। ननु 'स [यः] सर्वज्ञः सर्वविद्' इतीश्वरः सर्वज्ञः, न त्वम्? अत आह— **सर्वज्ञ**

१. 'संमूढाः' इति क्वचिन्न। प्रकृतेर्गुणसम्मूढाः इत्यत्र देवदत्तस्य गुरुकुलमित्यत्रेव समासः। २. 'आत्मेत्येवोपासीत, अत्र ह्येते सर्व एकं भवन्ति'(बृ.उ. १.४.७) इत्यत्रात्मनः सोपाधिकस्याकृत्स्नत्वं, निरुपाधिकस्यात्मनः कृत्स्नत्वं चोपपादितम्। अतः कृत्स्नवित् आत्मवित् इति विवृतम्।

**निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥**
**ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः।**
**श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ ३१ ॥**

**सर्वात्मनि सर्वाणि कर्माणि** संन्यस्य **निक्षिप्य** अध्यात्मचेतसा **विवेकबुद्ध्या [1]'अहं कर्ता ईश्वराय भृत्यवत् करोमि' इत्यनया बुद्ध्या। किञ्च** निराशीः **त्यक्ताशीः,** निर्ममो **ममभावश्च निर्गतो यस्य तव, स त्वं निर्ममो भूत्वा युध्यस्व** विगतज्वरो **विगतसन्तापो, विगतशोकः सन्नित्यर्थः ॥ ३० ॥**

**यदेतन्मम मतम् - कर्म कर्तव्यमिति सप्रमाणमुक्तम् , तत् तथा—** ये म इति। **ये मे मदीयमिदं मतं नित्यम्** अनुतिष्ठन्ति **अनुवर्तन्ते** मानवाः **मनुष्याः** श्रद्धावन्तः **श्रद्दधानाः** अनसूयन्तः **असूयां च मयि परमगुरौ वासुदेवे ऽकुर्वन्तो मुच्यन्ते तेऽपि एवम्भूताः** कर्मभिः **धर्माधर्माख्यैः ॥ ३१ ॥**

आनन्दगिरिकृतव्याख्या

त्यक्ताशीः **फलप्रार्थनाहीनः सन्नित्यर्थः।** निर्ममो भूत्वा **पुत्रभ्रात्रादिष्विति शेषः। ननु युद्धे नियोगो नोपपद्यते, पुत्रभ्रात्रादिहिंसात्मनस्तस्य संतापहेतोर्नियोगविषयत्वायोगादिति, तत्राह[2]—** विगतेति ॥ ३० ॥

**प्रकृतं भगवतो मतमुक्तप्रकारमनुसृत्यैवानुतिष्ठतां क्रममुक्तिफलं कथयति—** यदेतदिति। **शास्त्राचार्योपदिष्टेऽदृष्टार्थे विश्वासवत्त्वं** श्रद्धधानत्वम्। [3]**गुणेषु दोषाविष्करणम्** असूया। अपिः **यथोक्तायाः मुक्तेरमुख्यत्वद्योतनार्थः[4]** ॥ ३१ ॥

भाष्यार्कप्रकाशः

**इति।** ननु प्रत्यक्षे कर्मसंन्यासः कर्तुं शक्यः, ईश्वरस्तु परोक्षः कथं तस्मिन् स कर्तव्यः? इत्यत आह— **सर्वात्मनीति।** सर्वेषामात्मनि प्रत्यग्रूपे। न हि स्वात्मा स्वस्य परोक्ष इति भावः। अत एव मम वासुदेवाभिधा, न तु वसुदेवपुत्रत्वप्रयुक्तेत्याह— **वासुदेव इति।** वसन्ति जगन्त्यस्मिन्निति, वसति जगत्ययमिति वा वासुः, दीव्यतीति देवः, वासुश्चासौ देवो वासुदेव इति निरुक्तेरिति भावः। ईश्वरे कर्मनिक्षेपो नाम ईश्वरार्थं कर्मकरणमेवेत्याह— **अहं सर्वेश्वरायेति।** भृत्यवदिति दृष्टान्तः। यथा भृत्यो राजार्थं युद्धादिकर्म करोति, तद्वदिति।

**नन्वीश्वरार्थं** कर्म करोमीति बुद्धिः कथं विवेकबुद्धिर्भवितुमर्हति? न कथमपि किं त्वविवेकबुद्धिरेव, निष्कलनिष्क्रियशान्त-परिपूर्णानन्दरूपत्वादीश्वरस्य इति चेत् ? **मैवम्** ; अज्ञपरो ह्ययं श्लोकः, कर्मप्रतिपादकत्वात्। अज्ञस्य च 'सच्चिदानन्दरूप ईश्वरः' इति न ज्ञानमस्ति, किन्तु परोक्षः सर्वजगन्नियामकः प्रभुतुल्यः ईश्वरः कश्चित् क्वाप्यस्तीति। वेदरूपया तदाज्ञया मयावश्यं कर्म कर्तव्यम् , न तु फलमभिसन्धेयम् , अन्यथा मां पातयेदीश्वरः इति ज्ञानमस्ति। यः पुनः स्वर्गाद्यर्थं कर्म करोमीति मन्यते, तद्दृष्ट्या विवेक्येवायमज्ञोऽपीति कृत्वा एतदज्ञबुद्धेर्विवेकबुद्धित्वमुक्तमिति।

**ननु** अध्यात्मचेतसेत्यस्य विवेकबुद्ध्येत्यर्थलाभः कथमिति चेत्? **उच्यते—** आत्मा परमात्मा, तस्मिन्नध्यात्मम्। आत्म-विषयमित्यर्थः। चेतो ज्ञानम्। अध्यात्मचेतः परमात्मविषयबुद्धिः, 'परमात्मार्थमहं कर्म करोमी'त्याकारिका बुद्धिरित्यर्थः। अस्याः बुद्धेः विवेकबुद्धित्वं सिद्धमेव, 'यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः' इतीश्वरार्थकर्मणोऽबन्धकत्ववचनात् ॥ ३० ॥

**य इति।** ये मानवाः श्रद्धावन्तोऽनसूयन्तश्च सन्तः मे इदं मतं नित्यमनुतिष्ठन्ति, तेऽपि कर्मभिर्मुच्यन्ते। **परमगुराविति।** सर्व-कारणत्वाद् गुरूणामपि गुरावित्यर्थः। तेऽपीत्यपिना ज्ञानयोगिनां मुक्तिरविवादेति सूच्यते ॥ ३१ ॥

---

१. ईदृग्बुद्धिकरणमेव कर्मणामीश्वरे निक्षेपः। 'अहं सर्वेश्वराय भृत्यवत्' इति रा.पा.। २. विवेकबुद्धिरेव विगतज्वरत्वेऽपि हेतुरिति भावः। ३. दुःखात्मके कर्मणि मां प्रवर्तयन्नयं न कारुणिकः इत्येवं दोषदृष्टिरिति भावः। ४. कर्मानुष्ठानेन चित्तशुद्धिज्ञानप्राप्तिद्वारा क्रमेण मुक्तिः। अस्याः क्रममुक्तेरमुख्यत्वं तु साधनस्या-मुख्यत्वात्। तत्त्वसाक्षात्कारात् सद्योमुक्तेरेव शास्त्रतात्पर्यविषयत्वाद् ज्ञानस्येव कर्मणः साक्षान्मुक्तिसाधनत्वाभावादिति भावः। न तु अनेन क्रमेण मुक्तेः स्वरूपतोऽमुख्यत्वं वक्तुं शक्यम्।

**ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्।**
**सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः॥ ३२॥**
**सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।**
**प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति?॥ ३३॥**

ये त्विति। **ये तु तद्विपरीताः एतन्मम मतम्** अभ्यसूयन्तो **निन्दन्तो** नानुतिष्ठन्ति **नानुवर्तन्ते मे मतम्, सर्वेषु ज्ञानेषु विविधं मूढास्ते** सर्वज्ञानविमूढांस्तान् विद्धि **जानीहि** नष्टान् **नाशं गतान्** अचेतसो**ऽविवेकिनः॥ ३२॥**

**कस्मात् पुनः कारणात् त्वदीयं मतं नानुतिष्ठन्ति, [१]परधर्माननुतिष्ठन्ति, स्वधर्मं च नानुवर्तन्ते, त्वत्प्रतिकूलाः कथं न बिभ्यति त्वच्छासनातिक्रमदोषात्? तत्राह—** सदृशमिति। सदृशम् **अनुरूपं** चेष्टते **चेष्टां करोति। कस्याः?** स्वस्याः **स्वकीयायाः प्रकृतेः। प्रकृतिर्नाम? पूर्वकृतधर्माधर्मादिसंस्कारो वर्तमानजन्मादावभिव्यक्तः, सा** प्रकृतिः। **तस्याः सदृशमेव सर्वो जन्तुः—ज्ञानवानपि चेष्टते, किं पुनर्मूर्खः? तस्मात् प्रकृतिं** यान्ति **अनुगच्छन्ति** भूतानि **प्राणिनः।** निग्रहः **निषेधरूपः किं करिष्यति मम वाऽन्यस्य वा**[२]**॥ ३३॥**

आनन्दगिरिकृतव्याख्या

**भगवन्मताननुवर्तिनां प्रत्यवायित्वं प्रत्याययति—** ये त्विति। तद्विपरीतत्वं **भगवन्मतानुवर्तिभ्यो वैपरीत्यम्। तदेव दर्शयति—** एतदित्यादिना। अभ्यसूयन्तः **तत्रासन्तमपि दोषमुद्भावयन्त इत्यर्थः।** सर्वज्ञानानि **सगुणनिर्गुणविषयाणि। प्रमाणप्रमेयप्रयोजनविभागतो** विविधत्वम्॥ ३२॥

**भगवन्मतानुवर्तनमन्तरेण परधर्मानुष्ठाने स्वधर्माननुष्ठाने च कारणं पृच्छति—** कस्मादिति। **भगवत्प्रतिकूलत्वमेव तत्र कारणमित्याशङ्क्याह—** त्वत्प्रतिकूला इति। **राजानुशासनातिक्रमे दोषदर्शनाद् भगवदनुशासनातिक्रमेऽपि दोषसम्भवात् प्रतिकूलत्वं भयकारणमित्यर्थः। उत्तरत्वेन श्लोकमवतारयति—** तत्राहेति (**सदृशमिति**)। **सर्वस्य प्राणिवर्गस्य प्रकृतिवशवर्तित्वे कैमुतिकन्यायं सूचयति—** ज्ञानवानपीति। **सर्वाण्यपि भूतान्यनिच्छन्त्यपि प्रकृतिसदृशीं चेष्टां गच्छन्तीति निगमयति—** प्रकृतिमिति। **भूतानां प्रकृत्यधीनत्वेऽपि प्रकृतिर्भगवता निग्राह्येत्याशङ्क्याह—** निग्रह इति। **का पुनरियं प्रकृतिर्यदनुसारिणी भूतानां चेष्टेति पृच्छति—** प्रकृतिर्नामेति। **भगवदभिप्रेतां प्रकृतिं प्रकटयति—** पूर्वेति। **आदिशब्देन ज्ञानेच्छादि संगृह्यते। यथोक्तः संस्कारः स्वसत्तया प्रवर्तकश्चेत् प्रलयेऽपि प्रवृत्तिः स्यादित्याशङ्क्य विशिनष्टि—** वर्तमानेति। **सर्वो जन्तुरित्ययुक्तम्, विवेकिप्रवृत्तेरतथात्वादित्याशङ्क्य 'पश्वादिभिश्चाविशेषात्' इति न्यायमनुसरन्नाह—** ज्ञानवानिति। **ज्ञानवतामज्ञानवतां च प्रकृत्यधीनत्वाविशेषे फलितमाह—** तस्मादिति। प्रकृतिं यान्ति

भाष्यार्कप्रकाशः

**ये त्विति। तद्विपरीताः** पूर्वोक्तकर्मयोगिपरीताः, न तु ज्ञानयोगिन इति भ्रमितव्यम्, व्याघातात्। किन्तु ज्ञानयोगिभ्यः कर्मयोगिभ्योऽपि भिन्ना इति बोध्यम्। सर्वज्ञानविमूढान् तानचेतसो नष्टान् विद्धीत्यन्वयः। सर्वज्ञानेषु विमूढाः सर्वज्ञानविषयकमोहाक्रान्ताः, सर्वविधज्ञानशून्या इत्यर्थः। **नाशं** नरकप्राप्तिस्थावरादिजन्मप्राप्तिरूपमिति भावः॥ ३२॥

**सदृशमिति। परमतमिति।** नास्तिकादिमतं शैवादिमतं वेत्यर्थः। ज्ञानवानपि स्वस्याः प्रकृतेः सदृशं चेष्टते। सदृशमनुरूपं कर्म चेष्टते करोति। सदृशं यथा तथा चेष्टते व्याप्रियते इति वा। भूतानि प्रकृतिं यान्ति, प्रकृतिपरतन्त्राणीत्यर्थः। ननु धीरो निगृह्णीयात् प्रकृतिम्? अत आह— **निग्रहः किं करिष्यतीति।** प्रकृतिविषयो निग्रहो व्यर्थ इत्यर्थः। **मम वेति।** ईश्वरस्यापीत्यर्थः।

१. 'परमतमनुतिष्ठन्ति' इति पा.। २. 'मम वाऽन्यस्य वा दुर्निग्रहा प्रकृतिरिति वाक्यशेषः' इति क्वचित् पाठः। 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च'(बृ.उ. ४-४-२) इति श्रुतौ पूर्वप्रज्ञाशब्दोक्ता वासनाऽत्र प्रकृतिरभिप्रेता। तत्प्राबल्यात् मम वाऽन्यस्य वा निग्रहः रागौत्कट्येन प्रवर्तमानं निवर्तयितुं न शक्नोतीति भावः।

**इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।**
**तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ॥३४॥**

**यदि सर्वो जन्तुरात्मनः प्रकृतिसदृशमेव चेष्टते, न च प्रकृतिशून्यः कश्चिदस्ति, ततः पुरुषकारस्य विषयानुपपत्तेः शास्त्रानर्थक्यप्राप्ताविदमुच्यते—** इन्द्रियस्येति। इन्द्रियस्येन्द्रियस्यार्थे **सर्वेन्द्रियाणामर्थे शब्दादिविषये इष्टे रागः,**

आनन्दगिरिकृतव्याख्या

**प्रकृतिसदृशीं चेष्टां गच्छन्ति अनिच्छन्त्यपि सर्वाणि भूतानीत्यर्थः। प्रकृतेर्भगवता तत्तुल्येन वा केनचिन्निग्रहमाशङ्क्य , अवतारितचतुर्थपादस्यार्थापेक्षितं पूरयति—** [१]मम वेति ॥३३॥

**सर्वस्य भूतवर्गस्य प्रकृतिवशवर्तित्वे लौकिकवैदिकपुरुषकारविषयाभावाद् विधिनिषेधानर्थक्यमिति शङ्कते—** यदीति। **ननु यस्य न प्रकृतिरस्ति तस्य पुरुषकारसम्भवादर्थवत्त्वं तद्विषये विधिनिषेधयोर्भविष्यति, नेत्याह—** न चेति। **शङ्कितं दोषं श्लोकेन परिहरति—** इदमित्यादिना। **वीप्सायाः सर्वकरणगोचरत्वं दर्शयति—** सर्वेति। **प्रत्यर्थं रागद्वेषयोरव्यवस्थया प्राप्तौ प्रत्यादिशति—** इष्ट इति।

भाष्यार्कप्रकाशः

**अयमाशयः—** प्राग्जन्मनि येन पुरुषेण यो धर्मोऽधर्मो वा सम्पादितः, स हि संस्काररूपेण तदात्मनि वर्तते। जन्मान्तरपरिग्रहे तु स उद्बुद्धःसन् तं पुरुषं स्वानुगुणं सत्कर्मणि दुष्कर्मणि वा प्रवर्तयति; न तु तन्निरोधे सामर्थ्यमस्तीश्वरस्य जीवस्य वा, ईश्वरेणैव तस्य तादृशसामर्थ्यस्य दत्तत्वात् , जीवस्य च स्वत एवाशक्तत्वादिति॥३३॥

**इन्द्रियस्येति। प्रकृतिशून्य इति।** मुक्तावेव धर्माधर्मसंस्कारस्य समूलोच्छेदो, न तु व्यवहारे इति भावः। **पुरुषकारस्य** पुरुषप्रयत्नस्य। प्रकृतेर्दुर्निग्रहत्वात् पुरुषस्य तत्परतन्त्रत्वात् स्वप्रकृत्यनुसारेण स्वयं पुरुषश्चेष्टते, न तु शास्त्रमधीत्य तत्प्रतिपादितविधया चेष्टितुं शक्नोतीति कृत्वा शास्त्रं व्यर्थमित्यर्थः। पुरुषकारस्य विषयं प्रतिपादयति— **इन्द्रियस्येति।**

**अयमर्थः—** पुरुषः स्वधर्माधर्मसंस्कारानुगुणं सत्कर्मणि दुष्कर्मणि वा प्रवर्तते। सा च प्रवृत्तिर्विषयगतरागद्वेषपूर्विकैव तस्य। न हि रागं विना कश्चिदधर्मसंस्कारमात्रेण परस्त्रीगमने प्रवर्तते; नापि द्वेषं विना स्वस्त्रीगमनं जहाति। तथा न रागं विना कश्चिद् धर्मसंस्कारमात्रेण स्वस्त्रीगमने प्रवर्तते; नापि द्वेषं विना परस्त्रीगमनं जहाति। तयोश्च रागद्वेषयोर्वशीकरणं पुरुषकारस्य विषयोऽस्तीति न शास्त्रवैयर्थ्यम्।

**ननु** प्रकृतिपरतन्त्रस्य रागद्वेषनियमनं नोपपद्यते; पुरुषस्य हि धर्माधर्मसंस्कारवशादेव सद्विषये रागः, असद्विषये द्वेषश्च भवति। रागद्वेषभावानन्तरमेव स तत्रतत्र प्रवर्तते। सति च रागद्वेषोत्पत्तिकारणे धर्माधर्मसंस्कारे रागद्वेषयोरनुत्पत्तिः पुरुषकारमात्रेणेति साहसमेतत् इति चेत्? **मैवम्** ; न वयं रागद्वेषयोरुत्पत्तिं निवारयामः; किन्तु उत्पन्नयोरेव रागद्वेषयोः पुरुषकारेण प्रतिबन्धं ब्रूमः; यथा काष्ठादुत्पन्नस्यैवाग्नेर्मणिमन्त्रादिना दाहकत्वप्रतिबन्धः, तद्वदुत्पन्नयोरेव रागद्वेषयोः कार्यप्रवर्तकत्वप्रतिबन्ध इति।

**ननु** य एव संस्कारो रागद्वेषौ जनयति, स एव तत्तत्कार्यमपि जनयति। उक्तं हि त्वयैव— रागद्वेषपुरःसरैव प्रकृतिः पुरुषं कार्ये प्रवर्तयतीति। सा हि प्रकृतिर्दुर्निग्रहा। ततो नास्ति पुरुषकारस्य विषय इति चेत्? **मा**; एवमपि धर्माधर्मसंस्काररूपप्रकृतेः विषयेषु रागद्वेषजननमात्र एव सामर्थ्यम्। कार्ये प्रवर्तकत्वं तु रागद्वेषयोरेव। एतदभिप्रायेणैव 'रागद्वेषपुरःसरैवे'त्युक्तं भाष्यकारैः। यदि तु प्रकृतेरेव रागद्वेषजनकत्वं कार्यप्रवर्तकत्वं च, तर्हि क्षुद्रस्यापि राजकन्यायां रागसत्त्वेन तत्कार्ये प्रवृत्तिः स्यात्। न त्वेतदस्ति; क्षुद्रो हि राजकन्यां दृष्ट्वा एषा मम स्यादिति तत्र रागं प्रपद्यापि—क्व राजकन्या क्व चाहं क्षुद्रः इति विमृश्य तद्रागमेव जहाति, न तु तत्प्राप्त्यर्थं यतते। ततश्च प्रकृतिसम्भवस्यापि रागस्य पुरुषकारेण विमर्शरूपेण निवृत्तिर्दृश्यते; विमर्शहीनस्तु तत्र यतते, ताड्यते च भटैः।

१. अत्र— मम वाऽन्यस्य वेति निग्रहकर्त्रध्याहारोऽयुक्तः, किन्तु शास्त्रकृतो निग्रहः किं करिष्यति इत्येवार्थः उचित इति वेदान्तदेशिकाः। तन्न, वासनाधीनप्रवृत्तेः शास्त्रीयलौकिकोभयविषयत्वेन, मम निग्रह इति शास्त्रकृतनिग्रहस्य, अन्यस्येति राजादिकृतनिग्रहस्य लौकिकविषयस्य च संग्रहौचित्यात्।

## श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।

**अनिष्टे द्वेष इत्येवं प्रतीन्द्रियार्थं रागद्वेषौ अवश्यम्भाविनौ। तत्रायं पुरुषकारस्य शास्त्रार्थस्य च विषय उच्यते। शास्त्रार्थे प्रवृत्तः पूर्वमेव रागद्वेषयोर्वशं नागच्छेत्। या हि पुरुषस्य प्रकृतिः सा [1]रागद्वेषपुरःसरैव स्वकार्ये पुरुषं प्रवर्तयति। तदा स्वधर्मपरित्यागः परधर्मानुष्ठानं च भवति। यदा पुनः रागद्वेषौ तत्प्रतिपक्षेण नियमयति, तदा शास्त्रदृष्टिरेव पुरुषो भवति, न प्रकृतिवशः। तस्मात्** तयोः **रागद्वेषयोर्वशं नागच्छेत्। यतः तौ** ह्यस्य **पुरुषस्य** परिपन्थिनौ **श्रेयोमार्गस्य विघ्नकर्तारौ , तस्कराविव पथीत्यर्थः॥३४॥**

**तत्र रागद्वेषप्रयुक्तो मन्यते शास्त्रार्थमप्यन्यथा - 'परधर्मोऽपि धर्मत्वादनुष्ठेय एव' इति। तदसत्—** श्रेयानिति।

आनन्दगिरिकृतव्याख्या

**प्रतिविषयं विभागेन तयोरन्यतरस्यावश्यकत्वेऽपि पुरुषकारविषयाभावप्रयुक्त्या प्रागुक्तं दूषणं कथं समाधेयमित्याशङ्क्याह—** तत्रेति। **तयोरित्याद्यवतारितं भागं विभजते—** शास्त्रार्थ इति। **प्रकृतिवशत्वाज्जन्तोर्नैव नियोज्यत्वमित्याशङ्क्याह—** या हीति। **रागद्वेषद्वारा प्रकृतिवशवर्तित्वे स्वधर्मत्यागादि दुर्वारमित्युक्तम्। इदानीं विवेकविज्ञानेन रागादिनिवारणे शास्त्रीयदृष्ट्या प्रकृतिपारवश्यं परिहर्तुं शक्यमित्याह—** यदेति। **मिथ्याज्ञाननिबन्धनौ हि रागद्वेषौ। तत्प्रतिपक्षत्वं विवेकविज्ञानस्य मिथ्याज्ञानविरोधित्वादवधेयम्। रागद्वेषयोर्मूलनिवृत्त्या निवृत्तौ प्रतिबन्धध्वंसे कार्यसिद्धिमभिसन्धायोक्तम्—** तदेति। **एवकारस्यान्ययोगव्यवच्छेदकत्वं दर्शयति—** नेति। **पूर्वोक्तं नियोगमुपसंहरति—** तस्मादिति। **तत्र हेतुमाह—** यत इति। **हिशब्दोपात्तो हेतुर्यत इति प्रकटितः। स च पूर्वेण तच्छब्देन सम्बन्धनीयः। पुरुषपरिपन्थित्वमेव तयोः सोदाहरणं स्फोरयति—** श्रेयोमार्गस्येति॥३४॥

**रागद्वेषयोः श्रेयोमार्गप्रतिपक्षत्वं प्रकटयितुं परमतोपन्यासद्वारा समनन्तरश्लोकमवतारयति—** तत्रेत्यादिना। **व्यवहारभूमिः सप्तम्यर्थः। शास्त्रार्थस्यान्यथा प्रतिपत्तिमेव प्रत्याययति—** परधर्मोऽपीति। **स्वधर्मवदित्यपेरर्थः। अनुमानं दूषयन्नुत्तरत्वेन श्लोक-**

भाष्यार्कप्रकाशः

रागस्योत्पत्तिं प्रति तु न पुरुषकारस्य प्रतिबन्धः, स्वाभाविकत्वात् तस्य। तस्माद् धर्माधर्मसंस्कारवशात् पुरुषस्येन्द्रियार्थेषु रागद्वेषोदयः; अप्रतिबन्धाभ्यां रागद्वेषाभ्यां तु कार्याकार्यप्रवृत्तिरिति कृत्वा पुरुषकारस्यास्ति विषयो रागद्वेषवशीकरणम् , पुरुषकारस्यैव तत्प्रतिबन्धकत्वात् इति। **तदा स्वधर्मेति।** अधर्मसंस्कारवशात् पुरुषस्य परधर्मे रागः, स्वधर्मे द्वेषश्च यदा जायते, तदा स्वधर्मत्यागः परधर्मानुष्ठानं च भवति, यदा तु धर्मसंस्कारवशात् स्वधर्मे रागः, परधर्मे द्वेषश्च जायते, तदा स्वधर्मानुष्ठानं परधर्माननुष्ठानं च भवतीति बोध्यम्।

**नन्वेवं** धर्मसंस्कारजन्यरागद्वेषयोरपि नियमने स्वधर्मप्रवृत्तिः परधर्मनिवृत्तिश्च न स्यादिति चेत्? **मैवम् ,** धर्मसंस्कारवशात् स्वधर्मे रागे, परधर्मे द्वेषे च जाते सति विद्वान् पुरुषः पुरुषकारेण रागद्वेषौ नियम्यैव तत्र प्रवर्तेत। रागद्वेषपुरःसरं प्रवृत्तेन तु पुंसा तत्कर्मफलमवश्यं भोक्तव्यं स्यात् ; तत्रापि तस्य रागसत्त्वादिति।

**यद्वा** इष्टविषयरागेणानिष्टविषयद्वेषेण च धर्माधर्मसंस्कारजन्येन पुरुषस्य स्वधर्मपरित्यागः परधर्मानुष्ठानं च भवति। तद्यथा ब्राह्मणस्य यजनयाजनादिः स्वधर्मः, राज्यं त्विष्टो विषयः, तद्रागेण च स परस्य क्षत्रियस्य धर्मे युद्धे प्रवर्तते; उपवासादयस्त्वनिष्टा विषयास्तद्द्वेषेण स्वधर्मं जहाति। क्षत्रियस्य युद्धं स्वधर्मः; भिक्षान्नभोजनादिकमिष्टो विषयः; प्राचीनाधर्मसंस्कारबलात् तद्रागेण च स परस्य ब्राह्मणस्य धर्मे भिक्षाटने प्रवर्तते; राज्यभोगस्त्वनिष्टो विषयः, तद्द्वेषेण स्वधर्मं जहाति इत्येवमूह्यमिति। **तत्प्रतिपक्षेणेति।** रागद्वेषयोः प्रतिपक्षेणेत्यर्थः। वैराग्येण शान्त्येति च भावः॥३४॥

**श्रेयानिति।** 'प्रशस्यस्य श्रः' इति श्रादेश ईयसुनि प्रत्यय इत्यभिप्रायादाह— **प्रशस्यतर इति। स्वः** स्वीयः स्ववर्णाश्रमविहित

१. रागद्वेषौ पुरःसरौ यस्याः सेति विग्रहः। प्रकृतिः रागद्वेषौ जनयित्वैव प्रवर्तिकेति भावः।

**स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥ ३५॥**

**अर्जुन उवाच—**

**अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।**
**अनिच्छन्नपि वार्ष्णेय ! बलादिव नियोजितः॥ ३६॥**

श्रेयान् **प्रशस्यतरः स्वो धर्मः** स्वधर्मो विगुणोऽपि **विगतगुणोऽप्यनुष्ठीयमानः परधर्मात्** स्वनुष्ठितात् **साद्गुण्येन सम्पादितादपि। स्वधर्मे स्थितस्य** निधनं **मरणमपि श्रेयः परधर्मे स्थितस्य जीवितात्। कस्मात्? परधर्मो** भयावहः **नरकादिलक्षणं भयमावहति यतः॥ ३५॥**

**यद्यप्यनर्थमूलं 'ध्यायतो विषयान् पुंसः' इति, 'रागद्वेषौ ह्यस्य परिपन्थिनौ' इति चोक्तम्, विक्षिप्तमनवधारितं च तदुक्तम्, तत् संक्षिप्तं निश्चितं च इदमेवेति ज्ञातुमिच्छन् अर्जुन उवाच। ज्ञाते हि तस्मिन् तदुच्छेदाय यत्नं कुर्यामिति—** अथेति। **अथ** केन **हेतुभूतेन प्रयुक्तः सन्, राज्ञेव भृत्यः, अयं पापं कर्म** चरति **आचरति** पूरुषः **पुरुषः।**

आनन्दगिरिकृतव्याख्या

**मुत्थापयति—**तदसदिति। **क्षत्रधर्माद् युद्धाद् दुरनुष्ठानात् परिव्राड्धर्मस्य भिक्षाशनादिलक्षणस्य स्वनुष्ठेयतयाऽपि कर्तव्यत्वं प्राप्तमित्याशङ्क्य व्याचष्टे—** श्रेयानिति। **उक्तेऽर्थे प्रश्नपूर्वकं हेतुमाह—**कस्मादित्यादिना। **स्वधर्ममवधूय परधर्ममनुतिष्ठतः स्वधर्मातिक्रमकृतदोषस्य दुष्परिहरत्वान्न तत्त्यागः साधीयानित्यर्थः॥ ३५॥**

**प्रागेवानर्थमूलस्योक्तत्वात् पुनस्तज्जिज्ञासया प्रश्नानुपपत्तिरित्याशङ्क्याह—**यद्यपीति। विक्षिप्तं **विविधेषु प्रदेशेषु क्षिप्तं, दर्शितमिति यावत्।** अनवधारितम् **अनेकत्रोक्तत्वाद्** [१]**अनेकधाऽविवेककामादिभिर्विकल्पितत्वादित्यर्थः। नन्वनर्थमूलं परिहर्तव्यम्, तत्** [२]**किमिति ज्ञातुमिष्यते? तत्राह—** ज्ञाते हीति। कुर्यामिति **तज्ज्ञानमर्थवदिति शेषः। वाक्यारम्भार्थत्वमथशब्दस्य गृहीत्वा प्रश्नवाक्यं व्याकरोति—** अथेत्यादिना। **अनिच्छतोऽपि बलादेव दुश्चरितप्रेरितत्वे दृष्टान्तमाचष्टे—** राज्ञेवेति। **विनियोज्यत्वस्येच्छासापेक्षत्वात् तदभावे तदसिद्धिमाशङ्क्य, प्रागुक्तं स्मारयति—** राज्ञेवेत्युक्त इति॥ ३६॥

भाष्यार्कप्रकाशः

इत्यर्थः। न साक्षात्[३] स्वधर्मस्य परधर्माच्छ्रेयस्त्वं वक्तुं शक्यम्, ब्राह्मणधर्मस्य संन्यासस्य शूद्रधर्मात् सेवादिरूपादश्रेयस्करत्वसिद्धेः; किं त्वनुष्ठानद्वारैवेत्यभिप्रायादाह— **अनुष्ठीयमान इति।** अनुष्ठीयमानः स्वधर्मः स्वनुष्ठितात् परधर्माच्छ्रेयानित्यर्थः। सद्गुणस्यापि परधर्मस्यानुष्ठानाद् विगुणस्यापि स्वधर्मस्यानुष्ठानं श्रेय इति परमार्थः। सुष्ठु अनुष्ठितः स्वनुष्ठितः। सुशब्दार्थमेवाह— **साद्गुण्येनेति।** सद्गुणत्वात् परधर्मः सुष्ठु स्वेन सम्पादित इत्यर्थः। स्वधर्मस्य निधनाधिकरणत्वाभावादाह— **स्थितस्येति।** किमपेक्षयाऽस्य श्रेयस्त्वम्? अत आह— **परधर्मे स्थितस्य जीवितादिति।** यः परधर्ममवलम्ब्य जीवति, तस्मात् स्वधर्माचरणेन मृत एव गरीयानित्यर्थः। तत्र हेतुं स्वयमेवाक्षिपति— **कस्मादिति।** एतेन क्षत्रियस्य तव सगुणस्यापि परधर्मस्य भिक्षान्नभोजनस्य स्वीकारेण जीवनादपि स्वधर्मे युद्धे प्रवृत्त्या पाक्षिकं मरणमपि श्रेय एव। किं पुनर्विजय इत्यर्जुनं प्रति कृष्णोपदेशः सूचितः॥ ३५॥

**अथेति।** ननु अर्जुनः 'अथ केन प्रयुक्तः' इत्यनर्थस्य मूलं पृच्छति। नेदं प्रष्टुमुचितम्, प्रागेव 'ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते' इति विषयध्यानं सर्वानर्थमूलमित्युक्तत्वात्। इहापि 'तौ ह्यस्य परिपन्थिना'विति विषयध्यानकृतसङ्गजन्यकामक्रोधयोरनर्थमूलत्वमभिहितमित्याक्षिपति— **यद्यपीत्यादिना उक्तमित्यन्तेन।** तथापीति शेषः। **विक्षिप्तं** विस्तृतम् **अनवधारितम्** अनिश्चितं च यदुक्तं

१. 'अनेकधा वाऽविवेक ' इति पा.। २. किमिति - कस्मादित्यर्थः। ३. साक्षादिति। अनुष्ठानमद्वारीकृत्येत्यर्थः। संन्यासस्येत्यनन्तरम् अननुष्ठीयमानस्येति शेषः। तथा च तस्य शूद्रधर्मात् श्रेयस्करत्वासिद्धिः इति भावः। 'श्रेयस्त्वासिद्धेः' इति पाठः संभाव्यते, प्रक्रमानुसारात्।

**श्रीभगवानुवाच—**

**काम एष क्रोध एष रजोगुणसमुद्भवः।**
**महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥ ३७॥**

**स्वयमनिच्छन्नपि हे** वार्ष्णेय **वृष्णिकुलप्रसूत ! बलादिव नियोजितो राज्ञेवेत्युक्तो दृष्टान्तः॥ ३६॥**

**शृणु त्वं तं वैरिणं सर्वानर्थकरं यं त्वं पृच्छसि इति श्रीभगवानुवाच। "ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः। वैराग्यस्याथ मोक्षस्य षण्णां भग इतीङ्गना॥" ऐश्वर्यादिषट्कं यस्मिन् वासुदेवे नित्यमप्रतिबद्धत्वेन सामस्त्येन च वर्तते, "उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति।" उत्पत्त्यादिविषयं च विज्ञानं यस्य, स वासुदेवो वाच्यो भगवानिति।**

काम इति। **काम एष सर्वलोकशत्रुः यन्निमित्ता सर्वानर्थप्राप्तिः प्राणिनाम्। स एष कामः प्रतिहतः केनचित् क्रोधत्वेन परिणमते। अतः क्रोधोऽप्येष एव। रजोगुणसमुद्भवो रजश्च तद् गुणश्च रजोगुणः, स समुद्भवो यस्य स**

आनन्दगिरिकृतव्याख्या

**सम्प्रति प्रतिवचनं प्रस्तौति—** शृण्विति। **तस्य वैरित्वं स्फोरयति—**सर्वेति। **अप्रस्तुतं किमिति प्रस्तूयते? तत्राह—** यं त्वमिति। **भगवच्छब्दार्थं निर्धारयितुं पौराणिकं वचनमुदाहरति—** ऐश्वर्यस्येति। **समग्रस्येत्येतत् प्रत्येकं विशेषणैः सम्बध्यते। अथशब्दस्तथाशब्द-पर्यायः समुच्चयार्थः। मोक्षशब्देन तदुपायो ज्ञानं विवक्ष्यते। उदाहृतवचसस्तात्पर्यमाह—** ऐश्वर्यादीति। **स वाच्यो भगवानिति सम्बन्धः। तत्रैव पौराणिकं वाक्यान्तरं पठति—** उत्पत्तिमिति। **भूतानामिति प्रत्येकमुत्पत्त्यादिभिः सम्बध्यते। [1]कारणार्थौ चोत्पत्तिप्रलयशब्दौ, क्रियामात्रस्य पुरुषान्तरगोचरत्वसम्भवात्। आगतिर्गतिश्चेति आगामिन्यौ सम्पदापदौ सूच्येते। वाक्यान्तरस्यापि तात्पर्यमाह—** उत्पत्त्यादीति। **वेत्तीत्युक्तः साक्षात्कारो विज्ञानमित्युच्यते। समग्रैश्वर्यादिसम्पत्तिसमुच्चयार्थश्चकारः।**

**उक्तलक्षणो भगवान् किमुक्तवानिति, तदाह—** काम इति। **कामस्य सर्वलोकशत्रुत्वं विशदयति—** यन्निमित्तेति। **तथापि कथं तस्यैव क्रोधत्वम्? तदाह—** स एष इति। **[2]कामक्रोधयोरेव हेयत्वद्योतनार्थं कारणं कथयति—** रजोगुणेति। **कारणद्वारा [3]कामादेरेव हेयत्वमुक्त्वा कार्यद्वाराऽपि तस्य हेयत्वं सूचयति—** रजोगुणस्येति। **कामस्य पुरुषप्रवर्तकत्वमेव, न रजोगुणजनकत्वमित्याशङ्क्याह—**

भाष्यार्कप्रकाशः

कृष्णेनानर्थमूलं तदिदमेव सङ्क्षिप्तं निश्चितं चेति ज्ञातुमिच्छन्नर्जुन उवाच। किं तज्जिज्ञासया फलम्? अत आह— **ज्ञाते हीति। तस्मिन्** सर्वानर्थमूले वस्तुनि ज्ञाते सति। अथेति प्रश्नार्थे। हे वार्ष्णेय! अनिच्छन्नप्ययं पूरुषः केन प्रयुक्तःसन् राज्ञा बलान्नियोजितो भृत्य इव पापं चरति? **पूरुष इति**। पूः शरीरम्। पुरि शेत इति पुरिशयः। स एव पुरुषः पूरुषश्च पृषोदरादित्वादित्यभिप्रेत्याह—**पुरुष इति**॥ ३६॥

'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायिने। ससर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः॥' इति वचनादाह— **नित्यमिति। काम इति।** रजोगुणसमुद्भव एष काम एष क्रोधश्च महाशनो महापाप्मा भवति। एनमिह वैरिणं विद्धि। ननु कामक्रोधयोर्द्वयोर्भिन्नत्वात् कथं 'काम एष क्रोध एषः' इत्यभेदनिर्देशः? अत आह— **कामः प्रतिहत इति।** केनचिद् हेतुना। कामपरिणामत्वात् क्रोधस्य कामत्वेन व्यपदेश इति भावः। क्रोधात्मना स्वस्वरूपेण च काम एव सर्वलोकशत्रुः, सर्वानर्थकरत्वादित्यर्थः। रज इति गुणो रजोगुणः, चूतवृक्षवत् समासः। व्याकरणशास्त्रे अवधारणपूर्वपदकर्मधारयसमास इति कश्चन नास्ति, किन्तु विशेषणसमास एवेत्यभिप्रेत्याह— **रजश्च तद् गुणश्चेति।** समुद्भवत्यस्मादिति समुद्भव उपादानम्। रजोगुणजन्योऽयं काम इत्यर्थः। कामादेव रजोगुणो जात इति पक्षान्तरमाह— **रजोगुणस्य वेति।** तत्र हेतुमाह— **कामो हीति।** उद्भूतः कामो रजः प्रति पुरुषं प्रवर्तयति हि। कामादेव पुरुषो रजः-

१. उत्पत्तिप्रलयशब्दाभ्याम् उत्पत्तिकारणं, प्रलयकारणं च विवक्षितमिति भावः। २. 'कामक्रोधयोरवहेयत्वद्योतनार्थं' इति पा.। ३. 'कामादेरवहेयत्व'इति पा.।

**धूमेनाव्रियते वह्निर्यथाऽऽदर्शो मलेन च।**
**यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्॥ ३८॥**

**कामः** रजोगुणसमुद्भवः। **रजोगुणस्य वा समुद्भवः। कामो हि उद्भूतः रजः प्रवर्तयन् पुरुषं प्रवर्तयति। तृष्णया ह्यहं कारित इति** [१]**दुःखितानां रजःकार्ये सेवादौ प्रवृत्तानां प्रलापः श्रूयते।** महाशनो **महदशनमस्येति महाशनः, अत एव** महापाप्मा, **कामेन हि प्रेरितो जन्तुः पापं करोति। अतो विद्धि** एनं **कामम्** इह **संसारे वैरिणम्॥ ३७॥**

**कथं वैरीति दृष्टान्तैः प्रत्याययति—** धूमेनेति। **धूमेन सहजेनाव्रियते वह्निः प्रकाशात्मकोऽप्रकाशात्मकेन, यथा वा आदर्शो मलेन च, यथा उल्बेन च गर्भवेष्टनेन जरायुणा आवृत आच्छादितो गर्भस्तथा तेनेदमावृतम्**[२]**॥ ३८॥**

आनन्दगिरिकृतव्याख्या

कामो हीति। **तत्रैवानुभवानुसारिणीं लोकप्रसिद्धिं प्रमाणयति—** तृष्णया हीति। **तस्य योग्यायोग्यविभागमन्तरेण बहुविषयत्वं दर्शयति—** महाशन इति। **बहुविषयत्वप्रयुक्तं कार्यं निर्दिशति—** अत इति। **सर्वविषयत्वेऽपि कुतोऽस्य पापत्वमित्याशङ्क्याह—** कामेनेति। **कामस्योक्तविशेषणवत्त्वे फलितमाह—** अत इति॥ ३७॥

**उत्तरश्लोकमवतारयति—**कथमिति। **अनेकदृष्टान्तोपादानं प्रतिपत्तिसौकर्यार्थम्। सहजस्य धूमस्य प्रकाशात्मकवह्निं प्रत्यावरकत्वसिद्ध्यर्थं विशिनष्टि—** अप्रकाशात्मकेनेति॥ ३८॥

**सामान्यतो निर्दिष्टं विशेषतो निर्देष्टुमाकाङ्क्षापूर्वकमनन्तरश्लोकमवतारयति—** किं पुनरिति। **कामस्य ज्ञानं प्रत्यावरणत्वसिद्ध्यर्थं**

भाष्यार्कप्रकाशः

कार्ये प्रवर्तत इति हेतोः कामस्य रजोगुणं प्रति हेतुत्वमिति भावः।

हिशब्दो लोकप्रसिद्धिं द्योतयति। तामेव दर्शयति— **तृष्णयेति**। रजःकार्ये राजसेवादौ प्रवृत्तानां दुःखिनां सम्बन्धी 'तृष्णया ह्यहमेवं कारितः' इत्याकारकः प्रलापः श्रूयतेऽस्माभिरिति शेषः। तृष्णा आशा काम इत्यनर्थान्तरम्। **महाशन इति**। कामस्याशनम् आहारो विषयभोगः। अनन्तान् विषयान् भुञ्जानोऽपि कामः न विषयभोगेऽलम्बुद्धिं भजते, किन्तु भूयोऽपि बहून् विषयान् भोक्तुमेव यतते यत एवं ततोऽयं महाशन इत्युच्यते। 'न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥' इति स्मरणात् । 'निःस्वो ह्येकशतं शती दशशतं लक्षं सहस्राधिपो लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेशवत् सम्पदम्। चक्रेशः पुनरिन्द्रतां सुरपतिर्ब्रह्मास्पदं वाञ्छति ब्रह्मा विष्णुपदं हरिर्हरपदं तृष्णावधिं को गतः॥' इति च वचनात्।

**केचित्तु** नायं कामविकारः, किन्तु लोभविकार एव, 'कामस्यान्तं तु क्षुत्तृड्भ्यां क्रोधस्यान्तं फलोदयात्। नरो याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः॥' इति भागवतादित्याहुः। तन्मते तु कामस्य क्रोधवल्लोभोऽपि विकार एवेति कृत्वा लोभद्वारा महाशनः काम इति बोध्यम्।

**वस्तुतस्तु** लोभो नाम प्राप्तस्यापरित्यागः, अदातरि लुब्धशब्दप्रयोगदर्शनात्। तृष्णा तु काम एवेति महाशनत्वं कामस्य स्वाभाविकमेवेति ज्ञेयम्। महापाप्महेतुत्वात् कामस्य महापाप्मेति व्यपदेश इत्याह— **कामेनेति**। महापाप्मेति बहुव्रीहिः। महान् पाप्मा पापं यस्मात् स इति॥ ३७॥

**धूमेनेति। प्रत्याययति** प्रत्ययं विश्वासं जनयति, निश्चाययतीत्यर्थः। अप्रकाशात्मकेन सहजेन धूमेन यथा प्रकाशात्मको वह्निराव्रियते इत्यन्वयः॥ ३८॥

---

१. 'दुःखिनाम्' इति पा.। २. सूक्ष्मस्थूलस्थूलतरावस्थेन कामेन ज्ञानस्यावरणे क्रमेण दृष्टान्ताः। अत्र धूमेनावृतोऽपि वह्निर्दाहादिलक्षणं स्वकार्यं करोति। मलेन आवृतस्त्वादर्शः प्रतिबिम्बग्रहणलक्षणं स्वकार्यं न करोति, स्वच्छताधर्ममात्रतिरोधानात् , स्वरूपतस्तूपलभ्यत एव। उल्बेनावृतस्तु गर्भो न हस्तपादादिप्रसारणरूपं स्वकार्यं करोति, न वा स्वरूपत उपलभ्यत इति विशेषः इति मधुसूदनी।

**आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।**
**कामरूपेण कौन्तेय ! दुष्पूरेणानलेन च[१]॥ ३९॥**
**इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते।**
**एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम्॥ ४०॥**

**किं पुनस्तद् इदंशब्दवाच्यं यत् कामेनावृतमित्युच्यते—** आवृतमिति। [२]**आवृतमेतेन ज्ञानम्, ज्ञानिनो नित्यवैरिणा। ज्ञानी हि जानाति अनेनाहमनर्थे प्रयुक्तः इति पूर्वमेव, दुःखी च भवति नित्यमेव। अतोऽसौ ज्ञानिनो नित्यवैरी, न तु मूर्खस्य। स हि कामं तृष्णाकाले मित्रमिव पश्यंस्तत्कार्ये दुःखे प्राप्ते जानाति तृष्णयाऽहं दुःखित्वमापादितः इति, न पूर्वमेव। अतो ज्ञानिन एव नित्यवैरी। किंरूपेण?** कामरूपेण। **काम इच्छैव रूपमस्येति कामरूपस्तेन।** दुष्पूरेण **दुःखेन पूरणमस्येति दुष्पूरस्तेन।** अनलेन **नास्यालं पर्याप्तिर्विद्यत इत्यनलः, तेन च॥ ३९॥**

**किमधिष्ठानः पुनः कामो ज्ञानस्यावरणत्वेन वैरी सर्वस्य लोकस्येत्यपेक्षायामाह, ज्ञाते हि शत्रोरधिष्ठाने सुखेन शत्रुनिबर्हणं कर्तुं शक्यत इति—** इन्द्रियाणीति। **इन्द्रियाणि मनो बुद्धिश्चास्य कामस्य** अधिष्ठानम् **आश्रयः उच्यते।** एतैः **इन्द्रियादिभिराश्रयैः** विमोहयति **विविधं मोहयति** एष **कामो ज्ञानम्** आवृत्य **आच्छाद्य** देहिनं **शरीरिणम्॥ ४०॥**

आनन्दगिरिकृतव्याख्या

ज्ञानिनो नित्यवैरिणेत्यादिविशेषणम्। **प्रतीकमादाय व्याकरोति—** आवृतमित्यादिना। **ज्ञानिनं प्रति वैरित्वेऽपि नित्यवैरित्वं कामस्य कथमित्याशङ्क्याह—** ज्ञानी हीति। **अनर्थप्राप्तिमन्तरेण कामस्य प्रसङ्गावस्था** पूर्वमेवेत्युच्यते। अतःशब्देन **कामप्रसक्तिरेव परामृश्यते। नित्यमेवेत्युत्पत्त्यवस्था कार्यावस्था च कामस्य कथ्यते[३]। ननु सर्वस्यापि 'कामात्मता न प्रशस्ता' इति कामो नित्यवैरी भवति। ततः कुतो ज्ञानिविशेषणमित्याशङ्क्याह—** न त्विति। **अज्ञस्य नासौ नित्यवैरीत्येतदुपपादयति—** स हीति। **कार्यप्राप्तिप्रागवस्था पूर्वमित्युक्ता। अज्ञं प्रति वैरित्वे सत्यपि कामस्य नित्यवैरित्वाभावे फलितमाह—** अत इति। **स्वरूपतो नित्यवैरित्वाविशेषेऽपि ज्ञानाज्ञानाभ्यामवान्तरभेदसिद्धिरित्यर्थः। आकाङ्क्षाद्वारा प्रकृतं वैरिणमेव स्फोरयति—** किंरूपेणेत्यादिना॥ ३९॥

**कामस्य निराश्रयस्य कार्यकरत्वाभावं मत्वा प्रश्नपूर्वकमाश्रयं दर्शयति—** किमधिष्ठान इति। **कामस्य नित्यवैरित्वेन परिजिहीर्षितस्य किमित्यधिष्ठानं ज्ञाप्यते? तत्राह—** ज्ञाते हीति। **इन्द्रियादीनां कामाधिष्ठानत्वं प्रकटयति—**एतैरिति। **नन्वेताभिरिति वक्तव्ये कथमेतैरित्युच्यते? तत्राह—** इन्द्रियादिभिरिति॥ ४०॥

भाष्यार्कप्रकाशः

**आवृतमिति।** हे कौन्तेय! ज्ञानिनो नित्यवैरिणा दुष्पूरेणानलेन कामरूपेणैतेन ज्ञानमावृतम्। नित्यं सदाऽपि वैरी **नित्यवैरी। पूर्वमेवेति।** दुःखात्पूर्वमेवेत्यर्थः। तृष्णाकाल एवेति यावत्। यथा अजीर्णरोगी कदलीफलं भोक्तुकामः कामकालेऽपि 'भवेदनेन ममानर्थः' इति जानाति, तद्वदिति भावः। न च जानतः कुतस्तत्र प्रवृत्तिरिति वाच्यम्; कामस्य सत्त्वात्॥ ३९॥

**इन्द्रियाणीति।** एष एतैर्ज्ञानमावृत्य देहिनं विमोहयति। इन्द्रियमनोबुद्धीराश्रित्य वर्तमानः कामः पुरुषस्यात्मानात्मकृत्याकृत्यादिज्ञानमाच्छाद्य तं पुरुषं शब्दादिषु सुखादिषु च प्रवर्त्य तेषु बहुलं मोहं जनयति तस्येत्यर्थः॥ ४०॥

---

१. चशब्द इवार्थः। अनलो यथा हविषा पूरयितुमशक्यस्तथा भोगेन कामः इति मधुसूदनी। २. **एतेन** कामेन **ज्ञानं** विवेकज्ञानम् **आवृतम्** अभिभूतम्, तद्विरोधित्वादित्यर्थः। आत्मस्वरूपं ज्ञानमपि कामेनावृतमेव। 'सुखमाव्रियते नित्यं दुःखं विव्रियते सदा। यस्य कस्य च धर्मस्य ग्रहेण भगवानसौ॥' (मा.का. ४.८२) इत्युक्तेः। ३. तथा च कामः सर्वावस्थासु वैरित्वान्नित्यवैरी कथ्यत इति भावः।

**तस्मात् त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ !।**
**पाप्मानं प्रजहिह्येनं ज्ञानविज्ञाननाशनम्॥ ४१॥**
**इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।**
**मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥ ४२॥**

**यत एवम् —** तस्मादिति। **तस्मात् त्वमिन्द्रियाणि** आदौ **पूर्वमेव** नियम्य **वशीकृत्य, भरतर्षभ !** पाप्मानं **पापाचारं कामं** प्रजहिहि **परित्यज** एनं **प्रकृतं वैरिणं** ज्ञानविज्ञाननाशनम् , ज्ञानं **शास्त्रतः आचार्यतश्चात्मादीनामवबोधः,** विज्ञानं **विशेषतस्तदनुभवः, तयोर्ज्ञानविज्ञानयोः श्रेयःप्राप्तिहेत्वोः** नाशनं **नाशकरं** प्रजहिहि **आत्मनः परित्यजेत्यर्थः॥ ४१॥**

**इन्द्रियाण्यादौ नियम्य कामं शत्रुं जहिहीत्युक्तम् , तत्र किमाश्रयः कामं जह्यादित्युच्यते—** इन्द्रियाणीति। इन्द्रियाणि **श्रोत्रादीनि पञ्च देहं स्थूलं बाह्यं परिच्छिन्नं चापेक्ष्य** [1]**सौक्ष्म्यान्तरत्वव्यापित्वाद्यपेक्ष्य** पराणि **प्रकृष्टान्याहुः**

आनन्दगिरिकृतव्याख्या

**तेषां कामाश्रयत्वे सिद्धे साश्रयस्य तस्य परिहर्तव्यत्वमाह—** यत इति। तस्माद् **इन्द्रियादीनामाश्रयत्वादिति यावत्।** पूर्वं **कामनिरोधात् प्रागवस्थायामित्यर्थः। तेषु नियमितेषु मनोबुद्ध्योर्नियमः सिध्यति, तत्प्रवृत्तेरितरप्रवृत्तिव्यतिरेकेणाफलत्वादिति भावः। पापमूलतया कामस्य तच्छब्दवाच्यत्वमुन्नेयम्। कामस्य परित्याज्यत्वे वैरित्वं हेतुं साधयति—** ज्ञानेति। **ज्ञानविज्ञानशब्दयोरर्थभेदमावेदयति—** ज्ञानमित्यादिना॥ ४१॥

**पूर्वोक्तमनूद्य कामत्यागस्य दुष्करत्वं मन्वानो 'रसोऽप्यस्ये'त्यत्रोक्तमेव स्पष्टीकर्तुं प्रश्नपूर्वकं श्लोकान्तरमवतारयति—** इन्द्रियाणीत्यादिना। पञ्चेति **ज्ञानेन्द्रियवत् कर्मेन्द्रियाण्यपि वागादीनि गृह्यन्ते। किमपेक्षया तेषां परत्वम्? तत्राह—** देहमिति। **तथापि केन प्रकारेण परत्वम्? तदाह—** सौक्ष्म्येति। **आदिशब्देन कारणत्वादि गृह्यते। इन्द्रियापेक्षया सूक्ष्मत्वादिना मनसः स्वरूपोक्तिपूर्वकं परत्वं**

भाष्यार्कप्रकाशः

**तस्मादिति। यत एवमिति।** यस्मादेवमिन्द्रियादीनधिष्ठाय कामः पुरुषस्य ज्ञानमाच्छादयति, तस्मादिति **तस्मा**च्छब्दार्थः। हे भरतर्षभ, त्वमादौ इन्द्रियाणि नियम्य ज्ञानविज्ञाननाशनं पाप्मानमेनं प्रजहिहि। **इन्द्रियाणीति।** समनस्कानीत्यर्थः। अन्यथा मनसोऽनिग्रहे मिथ्याचारप्राप्तिः स्यादिति भावः। **आत्मनः** स्वस्य ज्ञानविज्ञानयोर्नाशनमित्यन्वयः॥ ४१॥

**इन्द्रियाणीति।** साश्रयः शत्रुः साश्रयेणैव जिगीषुणा जय्य इत्यभिप्रायादाह— **किमाश्रय इति।** कः आश्रयो यस्य सः किमाश्रयः। इन्द्रियाणि पराण्याहुः किमपेक्षया? के आहुः? इत्याकाङ्क्षां पूरयन्नाह— **देहमिति, पण्डिता इति च।** पण्डिताः स्थूलदेहादिन्द्रियाणि पराण्याहुः। कोऽसौ स्थूलदेहः? अत आह— **बाह्यमिति।** बहिर्भवं बाह्यम् , करचरणादिमत्त्वेन बहिरुपलभ्यमानमित्यर्थः। घटादिवदेकदेशस्थत्वादाह— **परिच्छिन्नमिति।** कथमिन्द्रियाणां परत्वं देहादस्माद्? अत आह— **सौक्ष्म्येत्यादि।** सौक्ष्म्यमन्तःस्थत्त्वं व्यापित्वं चेति हेतुत्रयं क्रमेण स्थूलबाह्यपरिच्छिन्नत्वप्रातिभट्यायोपात्तम्। स्थूलाद् बाह्यात् परिच्छिन्नाच्च देहात् सूक्ष्माणि अन्तर्भवानि व्यापकानि चेन्द्रियाणि पराणीत्यर्थः। इन्द्रियाणां देहापेक्षया व्यापकत्वं चानेकशरीरावस्थिततत्वरूपम् , अनेककालावस्थिततत्वरूपं वा। चक्षुःश्रोत्रयोस्तु गत्वा ग्राहकत्वेन सूर्यमण्डलभेरीदेशादिगमनोपयोगित्वरूपं च व्यापकत्वं बोध्यम्। आदिपदात् ज्ञानविषयाद् देहाज्ज्ञानकरणानीन्द्रियाणि पराणीत्याद्यूह्यम्। तथा पण्डिताः मनः इन्द्रियेभ्यः परमाहुः; इन्द्रियाणां मनोवश्यत्वाज्जाग्रत्कालमात्रव्यापृतत्वात् क्षणादेव देशान्तरलोकान्तरगमनाशक्तत्वान्मनोपेक्षयाऽपकृष्टत्वमिति बोध्यम्। मनसस्तु

१. 'सौक्ष्म्यान्तस्स्थत्वव्यापित्वाद्यपेक्षया' 'सौक्ष्म्यान्तरस्थत्वव्यापित्वाद्यपेक्षया' इति पा.।

**पण्डिताः। तथेन्द्रियेभ्यः परं** मनः **सङ्कल्पविकल्पात्मकम्। तथा मनसस्तु परा** बुद्धिः **निश्चयात्मिका। तथा यः सर्व-दृश्येभ्यो बुद्ध्यन्तेभ्योऽभ्यन्तरो, यं देहिनमिन्द्रियादिभिराश्रयैर्युक्तः कामो ज्ञानावरणद्वारेण मोहयतीत्युक्तम्, बुद्धेः पर-तस्तु सः। स बुद्धेर्द्रष्टा पर आत्मा॥४२॥**

आनन्दगिरिकृतव्याख्या

**कथयति—** तथेति। **मनसि दर्शितं न्यायं बुद्धावतिदिशति—** तथा मनसस्त्विति। **'यो बुद्धे'रित्यादि व्याचष्टे—** तथेत्यादिना। **आत्मनो यथोक्तविशेषणस्याप्रकृतत्वमाशङ्क्याह—** यं देहिनमिति॥४२॥

भाष्यार्कप्रकाशः

बुद्धिः परा; मनसः सङ्कल्पविकल्पात्मकत्वाद् बुद्धेर्निश्चयात्मकत्वाच्च मनसो बुद्धिवश्यत्वाच्च मनोपेक्षया बुद्धेरुत्कर्षः। **यो बुद्धेरिति।** यः सर्वान्तर इति शेषः। स तु बुद्धेः परत इत्यन्वयः। सर्वान्तरत्वमेवाह— **सर्वदृश्येभ्य इति।** देहादिभ्यो बुद्ध्यन्तेभ्यः सर्वेभ्यः दृश्येभ्यः अभ्यन्तरो मध्ये वर्तत इति नासावपूर्वोऽप्रकृतश्चेत्याह— **यमिति।** 'एतैर्विमोहयत्येष ज्ञानमावृत्य देहिन'मिति श्लोकोक्तो देह्येवायमित्यर्थः। स आत्मा बुद्धेः परतः। प्रथमार्थे तसिः। परः इत्यर्थः। परत्वे हेत्वन्तरमाह— **द्रष्टेति।** द्रष्टा हि दृश्यादधिकः, घटादिभ्यो देवदत्त इव। बुद्धिस्तु दृश्या, अतस्तस्याः अधिक आत्मेति। एतेन श्लोकेनात्मनः सर्वान्तरत्वं सर्वद्रष्टृत्वं सर्वाधिकत्वं सर्वव्यापकत्वं सर्वसूक्ष्मत्वं चोक्तं भवति।

यत्तु **रामानुजः—** बुद्धेः परः कामः इति; **तत्तुच्छम्,** 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः। महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः।' इति कठवल्ल्यर्थस्येह विवक्षितत्वात्। न चार्थमहदव्यक्तानां किमित्यग्रहणमिति वाच्यम्; उपलक्षणतया तद्ग्रहणसम्भवात्।

**वस्तुतस्तु** ग्राह्येभ्योऽर्थेभ्यो ग्राहकाणीन्द्रियाण्येव पराणि । महत्तत्त्वं तु सूत्रभाष्ये प्रत्याख्यातम्[१]। बुद्धेरेव महत्तत्त्व[शब्द]-वाच्यत्वं चोक्तम्। अव्यक्तमज्ञानं माया, तद् बुद्धिरेव, सर्वबुद्धिसमष्टेरेव मायात्वादित्यभिप्रेत्य नेहार्थादिग्रहणं कृतम्। किञ्च कामसङ्कल्पादीनां मनोधर्मत्वं 'कामः सङ्कल्पो विचिकित्से'त्यादिश्रुतिसिद्धम्, सम्प्रतिपन्नं च; कथं तस्य मनोधर्मस्य कामस्य मनःपरबुद्धिपरत्वम्? धर्मिणो ह्यत्र पूर्वपूर्वापेक्षया उत्तरोत्तरस्योत्कर्षोऽभिहितः। स ह्युत्कर्षो धर्मपूर्वकः। सूक्ष्मत्वव्यापित्वादिधर्मैर्हि देहादिन्द्रियाणामुत्कर्ष उक्तः। एवं यदि कामः सर्वोत्कृष्टस्तर्हि बुद्धेरपि मन एवोत्कृष्टं सकामत्वादित्युच्येत। तथा नैवोक्तम्। किञ्च धर्म्यधीनस्य कामरूपस्य धर्मस्य स्वतन्त्रपदार्थत्वाभावात् कथमस्मिन् धर्मिपदार्थतारतम्यविवेचनप्रकरणे तस्योपन्यासो युज्येत?

**यच्चा**नेनोक्तम् कामस्य बुद्धिपरत्वे कारणम् - सर्वेषु बुद्धिपर्यन्तेषूपरतेष्वपीच्छापर्यायकामो वर्तते चेत्, स एव एतानीन्द्रियादीन्यपि स्वविषये वर्तयित्वा आत्मज्ञानं निरुणद्धीति, **तदतीव हासास्पदम्**; बुद्धेरप्युपरमे क्व कामस्याविर्भावः, यदि तदानीमपि कामसत्त्वं तर्हि निर्विकल्पसमाधिर्भज्येत। 'यदोपरामो मनसो नामरूपरूपस्य दृष्टस्मृतसंप्रमोषात्। य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिषद्मने नमः॥' इति भागवते मनउपरमे हंसस्फूर्तिर्दर्शिता व्यासेन। तच्च नोपपद्येत, कामस्यैवाविर्भावात्। किंच धर्मिणो मनस एवोपरमे कथं धर्मस्य स्थितिः? किमग्नौ शान्ते दाहस्तिष्ठेत्? किं वा तव मनोबुद्ध्युपरमावस्थारूपायां सुषुप्तौ कामोऽस्ति? येनैवं ब्रूषे।

यच्च **वेदान्तदेशिकः—** [२]इन्द्रियाणीति श्लोके आत्मनश्चतुर्भिर्मोहनीयत्वस्योक्तत्वादिहापि तेषां चतुर्णामेव ग्रहणमुचितमिति; **तदप्यसत्**; तत्र कामेनैकेनैव देहिनो मोहस्य प्रतिपादितत्वात्। इन्द्रियादीनि तु कामस्याधिष्ठानानीति हि तत्रोक्तम्। कथं वा कामस्येन्द्रियाद्यनाश्रयेण स्वयमेव देहिनो मोहकत्वम्? कथं वा इन्द्रियादीनां कामानाश्रितानां देहिमोहकत्वम्, येन चत्वारोऽपीन्द्रियमनोबुद्धिकामा देहिनां मोहकाः इत्युच्येत? तस्मादिन्द्रियाद्याश्रयः काम एव देहिमोहकः, तथैव मूले दर्शनात्

१. द्र. 'महद्वच्च' (ब्र.सू. १-४-७) 'इतरेषां चानुपलब्धेः' (ब्र.सू.२-१-२)। २. 'इन्द्रियाणि मनो बुद्धिः' (४०) इति श्लोके।

**एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना।**
**जहि शत्रुं महाबाहो ! कामरूपं दुरासदम्॥ ४३॥**

**इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोऽध्यायः॥ ३॥**

**ततः किम्?—** एवमिति। **एवं बुद्धेः** परम् **आत्मानं** बुद्ध्वा **ज्ञात्वा,** संस्तभ्य **सम्यक् स्तम्भनं कृत्वा** आत्मानं **स्वेनैव** आत्मना **संस्कृतेन मनसा सम्यक् समाधायेत्यर्थः। जह्येनं शत्रुं हे महाबाहो ! कामरूपं** दुरासदं **दुःखेनासदः आसादनं प्राप्तिर्यस्य तं दुरासदं दुर्विज्ञेयानेकविशेषमिति॥ ४३॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये कर्मयोगो नाम तृतीयोऽध्यायः॥ ३॥**

आनन्दगिरिकृतव्याख्या

**इन्द्रियादिसमाधानपूर्वकमात्मज्ञानात् कामजयो भवतीत्युपसंहरति—** एवमित्यादिना। **संस्कृतं मनो मनःसमाधाने हेतुरिति सूचयति—** संस्तभ्येति। **प्रकृतं शत्रुमेव विशिनष्टि—** कामरूपमिति। **तस्य दुरासदत्वे हेतुमाह—** दुर्विज्ञेयेति। [1]**अनेको विशेषस्तादृशो महाशनत्वादिः।**

**तदनेनोपायभूता कर्मनिष्ठा प्राधान्येनोक्ता, उपेया तु ज्ञाननिष्ठा गुणत्वेनेति विवेक्तव्यम्॥ ४३॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते श्रीमद्भगवद्गीताशाङ्करभाष्यव्याख्याने तृतीयोऽध्यायः॥ ३॥**

भाष्यार्कप्रकाशः

'एतैर्विमोहयत्येषः' इति। इन्द्रियादीनि तु तत्र करणानीति विवेकः। न च कथं मनोधर्मस्य कामस्य मनःकरणकत्वमिति वाच्यम् ; धर्मेऽपि कामे कर्तृत्वस्यारोपादिति। **वस्तुतस्तु** इन्द्रियादीनि कामस्य न करणानि, किं त्वाश्रया एव, तथैव भाषितत्वादाचार्यैः— इन्द्रियादिभिराश्रयैरिति। धर्मस्य हि धर्मी भवत्याश्रयः। न च मनोधर्मस्य कामस्य कथमिन्द्रियाश्रयत्वमिति वाच्यम् ; मनसीन्द्रियप्रवणे सति तद्द्वारा कामस्यापीन्द्रियाश्रयत्वलाभात्। मनोबुद्ध्योरेकान्तःकरणात्मकत्वात् कामस्य बुद्ध्याश्रयत्वमुचितमेव॥ ४२॥

**एवमिति।** एवं पूर्वोक्तविधया बुद्धेः परम् आत्मानं बुद्ध्वा; अनेन किमाश्रय इति प्रश्नस्योत्तरमायातम् - आत्मज्ञानाश्रय इति, आत्माश्रय इति वा। आत्मानं मनः, न तु सच्चिदानन्दम् , तस्याचलत्वेन स्तम्भनानवकाशात्। सति हि चलने स्तम्भनमवकाशं लभते। मनस्तु चञ्चलत्वादपेक्षते स्तम्भनम्। आत्मनेत्यस्यार्थमाह— **स्वेनैवेति।** स्वयमेवेति यावत्। स्वबुद्ध्यैवेति फलितार्थः। **समाधायेति।** समाहितं कृत्वा निश्चलमनाःसन्नित्यर्थः। **दुरासदमिति।** सीदतेर्विशरणगत्यवसादनार्थकत्वाद् गत्यर्थानां ज्ञानार्थत्वाद् **दुरासदं** दुष्प्रापं दुर्ज्ञेयमिति यावत्। दुःखेनासत्तुं शक्यो दुरासद इति समासः। दुःखेनासदो यस्येति तु फलितार्थकथनम्। 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' इति खल्। न च दुष्प्रजा इत्यादिवद् बहुव्रीहिरेवेति वाच्यम् ; 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' इति वार्तिकाद् , अत्र धातुजाभावात्। दुष्प्रजा इत्यत्र तु दुष्ठा[दुःस्था] प्रजा यस्येति धातुजः स्थाशब्दोऽस्ति। ष्ठा गतिनिवृत्ताविति धातुजातो हि स शब्दः। अत्र तु दुःखेनेत्युक्तत्वाद् दुरित्युपसर्गात् परस्य खशब्दस्य धातुजत्वाभावात्। यदि तु बहुव्रीहिसमास एव वक्तव्य इत्याग्रहः, तर्हि दुस्थः दुष्कर इति वा आसदो यस्य तमिति विग्रहो वाच्यः।

कथं कामस्य दुर्ज्ञेयत्वम्? अत आह— **दुर्विज्ञेयानेकविशेषमिति।** दुर्विज्ञेया अनेके विशेषाः प्रकाराः, भेदा इति यावत् , यस्य

---

१. 'अनेकविशेषोऽतादृशो' इति पा.।

भाष्यार्कप्रकाशः

तम्। कामो हि बहुविधः, विषयाणामानन्त्यात्। न च प्राप्तिरिति भाष्यपदस्य लाभ इत्यर्थ इति भ्रमितव्यम् ; कामस्य सर्वसुलभस्य दुर्लभत्वायोगात्। किन्तु ज्ञानमित्येवार्थः। सीदतेरवसादनार्थत्वाद् दुरासदं नाशयितुमशक्यमित्यप्यर्थः सूच्यते। कामो हि दुर्जयः।

अत्र— बुद्धेः परं काममिति **रामानुजव्याख्या तु** पूर्वश्लोक एव निराकृता। न हि कामजयं प्रति कामस्य बुद्धेः परत्वज्ञानमावश्यकम्। अतस्तदुपदेशोऽपि व्यर्थ एवेत्यापतति भगवत्यप्रमाणार्थोपदेष्टृत्वमस्य मते।

**॥ इति श्रीशाङ्करभगवद्गीताभाष्यतृतीयाध्यायव्याख्याभूते भाष्यार्कप्रकाशे**
**बेल्लङ्कोण्डोपनामकरामकविकृते तृतीयोऽध्यायः ॥**

श्री हयग्रीवार्पणमस्तु।

(कीलकसंवत्सरकार्तिकबहुलचतुर्दश्यामस्य समाप्तिः)

DO NOT PRINT THIS PAGE

ॐ श्रीपरमात्मने नमः

# ॥ अथ चतुर्थोऽध्यायः ॥

श्रीभगवानुवाच—

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥

**योऽयं योगोऽध्यायद्वयेनोक्तो ज्ञाननिष्ठालक्षणः [१]ससंन्यासः कर्मयोगोपायः, यस्मिन् वेदार्थः परिसमाप्तः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च ; गीतासु च सर्वास्वयमेव योगो विवक्षितो भगवता। अतः परिसमाप्तं वेदार्थं मन्वानः तं [२]वंशकथनेन स्तौति श्रीभगवान्—**इममिति। **इमम् अध्यायद्वयेनोक्तं योगं** विवस्वते आदित्याय **सर्गादौ प्रोक्तवान् अहं जगत्परिपालयितॄणां क्षत्रियाणां बलाधानाय। तेन हि योगबलेन युक्ताः समर्था भवन्ति [३]ब्रह्म परिरक्षितुम्। ब्रह्मक्षत्रे**

### आनन्दगिरिकृतव्याख्या

**पूर्वाभ्यामध्यायाभ्यां निष्ठाद्वयात्मनो योगस्य गीतत्वाद् , वेदार्थस्य च समाप्तत्वाद् , वक्तव्यशेषाभावाद् उक्तयोगस्य कृत्रिमत्व-शङ्कानिवृत्तये वंशकथनपूर्विकां स्तुतिं भगवानुक्तवानित्याह—** श्रीभगवानिति। **तदेतद् भगवद्वचनं वृत्तानुवादद्वारेण प्रस्तौति—** योऽय-मिति। **उक्तमेव योगं विभज्यानुवदति—** ज्ञानेति। **संन्यासेनेतिकर्तव्यतया सहितस्य ज्ञानात्मनो योगस्य कर्माख्यो योगो हेतुः। अतश्चो-पायोपेयभूतं निष्ठाद्वयं प्रतिष्ठापितमित्यर्थः। उक्ते योगद्वये प्रमाणमुपन्यस्यति—** यस्मिन्निति। **अथवा ज्ञानयोगस्य कर्मयोगोपायत्वमेव स्फुटयति—** यस्मिन्निति। **प्रवृत्त्या लक्ष्यते ज्ञायते कर्मयोगः, निवृत्त्या च लक्ष्यते ज्ञानयोग इति विभागः। यद्यपि पूर्वस्मिन् अध्यायद्वये यथोक्तनिष्ठाद्वयं व्याख्यातम् , तथापि वक्ष्यमाणाध्यायेषु वक्तव्यान्तरमस्तीत्याशङ्क्याह—** गीतासु चेति। **कथं तर्हि समनन्तराध्यायस्य प्रवृत्तिः? अत आह—**अत इति। वंशकथनं **सम्प्रदायोपन्यासः। सम्प्रदायोपदेशश्च कृत्रिमत्वशङ्कानिवृत्त्या योगस्तुतौ पर्यवस्यति। गुरु-शिष्यपरम्परोपन्यासमेवानुक्रामति—** इममिति। **'इमम्' इत्यस्य सन्निहितं विषयं दर्शयति—** अध्यायेति। योगं **ज्ञाननिष्ठालक्षणं कर्मयोगोपायलभ्यमित्यर्थः। स्वयमकृतार्थानां प्रयोजनव्यग्राणां परार्थप्रवृत्त्यसम्भवाद् , भगवतस्तथाविधप्रवृत्तिदर्शनात् कृतार्थता कल्पनीयेत्याह—**विवस्वत इति। **अव्ययवेदमूलत्वादव्ययत्वं योगस्य गमयितव्यम्। किमिति भगवता कृतार्थेनापि योगप्रवचनं कृतमिति? तदाह—**जगदिति। **कथं यथोक्तेन योगेन क्षत्रियाणां बलाधानम्? तदाह—**तेनेति। **युक्ताः क्षत्रियाः इति शेषः।** ब्रह्म**शब्देन ब्राह्मणत्व-जातिरुच्यते। यद्यपि योगप्रवचनेन क्षत्रं रक्षितम् ; तेन च ब्राह्मणत्वम् ; तथापि कथं रक्षणीयं जगदशेषं रक्षितमित्याशङ्क्याह—** ब्रह्मेति।

### श्रीबेल्लंकोण्डरामरायकविविरचितः
### भाष्यार्कप्रकाशः

**योऽयमिति।** अध्यायद्वयेनोक्तो ज्ञाननिष्ठालक्षणः संन्यासः, कर्मयोगरूपश्चोपाय इति **योऽयं योगः,** कर्मयोगरूपो ज्ञानयोग-रूपश्चाध्यायद्वयोक्तो यो योग इत्यर्थः। **यस्मिन्** उभयात्मके योगे प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च वेदार्थः परिसमाप्तः, सर्वास्वपि गीतासु भगवता विवक्षितः सोऽयमेव योगः। **अतः** योगस्योक्तत्वादित्यर्थः। वेदार्थं परिसमाप्तं मन्वानः तं वंशकथनेन सम्प्रदायकथनद्वारा स्तौति श्रीभगवान्— **इममिति। योगमिति।** कर्मज्ञानोभयात्मकं श्रेयःप्राप्त्युपायभूतं योगमित्यर्थः। **अव्ययं** न विद्यते व्ययः क्षयः बलस्य यस्मात् सोऽव्ययः, तमित्यभिप्रेत्याह— **बलाधानायेति।** मनोवाक्कायानां बलं वर्धयितुमित्यर्थः। **ब्रह्मक्षत्रे** ब्राह्मणक्षत्रियजाती। तयोरेव याजनादिना दण्डादिना च धर्मप्रतिष्ठापकत्वादिति भावः।

---

१. 'संन्यासः' इति रा.पा.। २. वंशकथनेन विद्यायाः स्तुतिः बृहदारण्यके मधुकाण्डादौ दृष्टा।(बृ.उ.२.६, ४.६, ६.५)। ३. 'ब्रह्मक्षत्रे' इति पा.।

**एवं परम्पराप्राप्तमिमं राजर्षयो विदुः।**
**स कालेनेह महता योगो नष्टः परन्तप ! ॥२॥**
**स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः।**
**भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥३॥**

**परिपालिते जगत् परिपालयितुमलम्।** अव्ययम् **अव्ययफलत्वात्। न ह्यस्य योगस्य सम्यग्दर्शननिष्ठालक्षणस्य मोक्षाख्यं फलं व्येति। स च विवस्वान् मनवे प्राह। मनुः** इक्ष्वाकवे **स्वपुत्रायादिराजाय अब्रवीत्॥ १॥**

एवमिति। एवं **क्षत्रियपरम्पराप्राप्तम् इमं** राजर्षयो **राजानश्च त ऋषयश्च राजर्षयो विदुः** इमं **योगम्।** स **योगः** [1]**कालेन** इह महता **दीर्घेण** नष्टो **विच्छिन्नसम्प्रदायः संवृत्तः।** हे परन्तप ! **आत्मनो विपक्षभूताः परा इत्युच्यन्ते। तान्** [2]**शौर्यतेजोगभस्तिभिर्भानुरिव तापयतीति परन्तपः, शत्रुतापनः इत्यर्थः॥ २॥**

**दुर्बलानजितेन्द्रियान् प्राप्य नष्टं योगमिममुपलभ्य, लोकं चापुरुषार्थसम्बन्धिनम् —** स एवायमिति। **स एवायं**

आनन्दगिरिकृतव्याख्या

**ताभ्यां हि कर्मफलभूतं जगद् अनुष्ठानद्वारा रक्षितुं शक्यमित्यर्थः। योगस्याव्ययत्वे हेत्वन्तरमाह—** अव्ययफलत्वादिति। **ननु कर्मफलवद् उक्तयोगफलस्यापि साध्यत्वेन क्षयिष्णुत्वमनुमीयते, नेत्याह—** न हीति। [3]**अपुनरावृत्तिश्रुतिप्रतिहतमनुमानं न प्रमाणीभवतीति भावः। भगवता विवस्वते प्रोक्तो योगस्तत्रैव पर्यवस्यतीत्याशङ्क्याह—** स चेति। **स्वपुत्रायेत्युभयत्र**[4] **सम्बध्यते।** आदिराजायेतीक्ष्वाकोः **सूर्यवंशप्रवर्तकत्वेन वैशिष्ट्यमुच्यते॥ १॥**

**यथोक्ते योगे परम्परागते विशिष्टजनसम्मतिमुदाहरति—** एवमिति। **तस्य कथं सम्प्रति वक्तव्यत्वम्? तदाह—** स कालेनेति। **पूर्वार्धं व्याकरोति—** एवमित्यादिना। [5]**ऐश्वर्यसम्पत्ती** राजत्वं **येषां, तेषामेव सूक्ष्मार्थनिरीक्षणक्षमत्वम्** ऋषित्वम्। इहेति **भगवतोऽर्जुनेन सह संव्यवहारकालो गृह्यते।** परन्तपेति **सम्बोधनं विभजते—** आत्मन इति॥ २॥

**किमिति वर्तमाने काले प्रकृतो योगः सम्प्रदायरहितोऽभूदित्याशङ्क्याधिकार्यभावादित्याह—** दुर्बलानिति। **तदेव दौर्बल्यं प्रकृतोपयोगित्वेन व्याकरोति—** अजितेन्द्रियानिति। **यद्यपि कामक्रोधादिप्रधानान् पुरुषान् प्रतिलभ्य कामक्रोधादिभिरभिभूयमानो योगो** नष्टो **विच्छिन्नसम्प्रदायः सञ्जातः, तथापि योगादृते पुरुषार्थो लोकस्य लभ्यते चेत् किमनेन योगोपदेशेनेत्याशङ्क्य, यथोक्तयोगाभावे परमपुरुषार्थाप्राप्तेर्मैवमित्याह—** लोकं चेति। **पूर्वो योगो विच्छिन्नसम्प्रदायः, अधुना त्वन्यो योगो मदर्थमुच्यते भगवतेत्याशङ्क्याह—** स एवेति।

भाष्यार्कप्रकाशः

अव्यय[पद]स्यार्थान्तरमाह— **अव्ययफलत्वादिति।** अव्ययमस्यास्तीत्यव्ययः, तम् इत्यर्शआद्यजन्त इति भावः। अव्ययफलत्वपद[6]घटिताव्ययशब्दार्थमाह— **न हीति। न व्येति** न विपर्ययं प्राप्नोतीत्यव्ययं मोक्षाख्यं फलम्। मोक्षस्य अविक्रियब्रह्मरूपत्वादिति भावः। **यद्वा** अव्ययशब्दस्यायमेक एवार्थः। किमर्थं त्वं प्रोक्तवान् विवस्वते योगम्? इत्याकाङ्क्षापूरणाय **बलाधानायेत्युक्तमिति** व्याख्येयं भाष्यम्॥ १॥

**एवमिति। परम्परा** गुरुशिष्यसम्प्रदायः। **नष्ट इति।** सम्प्रदायविच्छेदाददर्शनं गत इत्यर्थः। **तेजोभिः** प्रतापैः॥ २॥

**स इति।** दुर्बलान् अजितेन्द्रियान् प्राप्य नष्टं योग**मुपलभ्य** ज्ञात्वा **अपुरुषार्थसम्बन्धिनं** पुरुषार्थविधुरं लोकं च उपलभ्य, स

---

१. 'इह लोके कालेन महता' इति पा.। २. 'शौर्यतेजोभिर्गभस्तिभिः' इति पा.। ३. 'न स पुनरावर्तते' इति श्रुत्या मोक्षनित्यत्वबोधिकया बाधितमित्यर्थः।
४. 'विवस्वान् स्वपुत्राय मनवे, मनुः स्वपुत्रायेक्ष्वाकवे' इति संबन्धः इत्यर्थः। ५. राजर्षय इति पदे राजत्वम् ऋषित्वं च व्याचष्टे—**ऐश्वर्येति**। ६. 'घटके'ति युक्तम्।

**अर्जुन उवाच—**

**अपरं भवतो जन्म परं जन्म विवस्वतः।**
**कथमेतद् विजानीयां त्वमादौ प्रोक्तवानिति ॥४॥**

**श्रीभगवानुवाच—**

**बहूनि मे व्यतीतानि जन्मानि तव चार्जुन !।**

**मया** ते **तुभ्यम्** अद्य **इदानीं योगः प्रोक्तः पुरातनः। भक्तोऽसि मे सखा चासीति। रहस्यं** हि **यस्माद् एतदुत्तमम्।** योगो **ज्ञानमित्यर्थः॥३॥**

**भगवता विप्रतिषिद्धमुक्तमिति मा भूत् कस्यचिद् बुद्धिरिति, परिहारार्थं चोद्यमिव कुर्वन्नर्जुन उवाच—** अपरमिति। अपरम् **अर्वाग् वसुदेवगृहे भवतो जन्म।** परं **पूर्वं सर्गादौ** जन्म **उत्पत्तिः** विवस्वतः **आदित्यस्य। तत्** कथमेतद् **विजानीयाम् अविरुद्धार्थतया, यस्त्वमेवादौ प्रोक्तवान् इमं योगम्, स एव** [1]**त्वम् इदानीं मह्यं प्रोक्तवानसीति ॥४॥**

**या वासुदेवेऽनीश्वरासर्वज्ञाशङ्का मूर्खाणाम्, तां परिहरन् श्रीभगवानुवाच, यदर्थो ह्यर्जुनस्य प्रश्नः—**

आनन्दगिरिकृतव्याख्या

**कस्माद् अन्यस्मै यस्मै कस्मैचित् पुरातनो योगो नोक्तो भगवता? इत्याशङ्क्याह—** भक्तोऽसीति। **उक्तमधिकारिणं प्रति योगस्य वक्तव्यत्वे हेतुमाह—** रहस्यं हीति। **अनादिवेदमूलत्वाद् योगस्य** पुरातनत्वम्। भक्तिः **शरणबुद्ध्या प्रीतिः, तया युक्तो निजरूपमपेक्ष्य**[2] भक्तो **विवक्षितः। समानवयाः स्निग्धः सहायः** सखेत्युच्यते। **एतदिति कथं योगो विशेष्यते? तत्राह—** ज्ञानमिति॥३॥

**भगवति लोकस्यानीश्वरत्वशङ्कां निवर्तयितुं चोद्यमुद्भावयति—** भगवतेति। परिहारार्थम् **भगवतो मनुष्यवदवस्थितस्यानीश्वरत्वमुपेत्य तद्वचने शङ्कितविप्रतिषेधस्येति शेषः। भगवतो निजरूपमुपेत्य नेदं चोद्यम्, किन्तु लीलाविग्रहं गृहीत्वेति वक्तुं** चोद्यमिवेत्युक्तम्। **एतच्छब्दार्थमेव स्फुटयति—** यस्त्वमिति॥४॥

**भगवत्यज्ञानाद्[अज्ञानां] मनुष्यत्वशङ्कां वारयितुं प्रतिवचनमवतारयति—** या वासुदेव इति। **अन्यथाप्रश्ने कथमाशङ्कान्तरं परिहर्तुं भगवद्वचनमित्याशङ्क्य प्रश्नप्रतिवचनयोरेकार्थत्वमाह—** यदर्थो हीति। **यस्य शङ्कितस्य विरोधस्य** [3]**परिहारार्थो यस्य प्रश्नः, तमेव**

भाष्यार्कप्रकाशः

एवायं पुरातनो योगोऽद्य मया ते प्रोक्तः। ननु किमिति मह्यमेवोक्तवानसीत्यत आह— **भक्तोऽसि म इति।** ननु भक्ता अपि बहवः सन्त्येवेत्यत आह— **सखा चेति।** ननु कुतो भक्ताय सख्य एवैतद् वक्तव्यम्? अत आह— **रहस्यमिति।** एतदिति क्लीबत्वादाह— **योगो ज्ञानमिति।** अतीव रहस्यत्वादमुं योगं नाभक्ताय ब्रूयात्, नाप्यसखायेत्यर्थः॥३॥

**अपरमिति। चोद्यमिवेति। इवशब्दादर्जुनः** कृष्णं परमेश्वरं वेदैवेति सूच्यते। **अथवा** 'अजो नित्यः शाश्वतोऽयं पुराणः' इति भगवदुपदेशादनादिमात्मानं वेदैवार्जुन इति सूच्यते। **अर्वागिति।** नूतनमित्यर्थः। जन्मनोऽधिकरणाकाङ्क्षां पूरयति— **वसुदेवस्य गृह इति।** अथवा अर्वाक्छब्दार्थमाह—**वसुदेवस्य गृह इति। विजानीयामिति।** ननु मयोक्तं त्वया श्रुतमेवेत्यत आह— **अविरुद्धार्थतयेति।** अविरुद्धार्थं त्वदुक्तमिति कथं प्रत्ययं भजेयमित्यर्थः। अर्वाक्तनस्य तव सर्गादावभावादिति भावः॥४॥

**बहूनीति। यदर्थ इति।** मूर्खप्रत्यायनार्थ इत्यर्थः। श्रीकृष्णं भगवन्तं सर्वे मूर्खा अपि जानीयुरिति बुद्ध्या अर्जुनेन पृष्टत्वा-

१. 'त्वम्' इति क्वचिन्न। २. ऐश्वररूपमपेक्ष्यार्जुनस्य भक्तत्वम्, लीलाविग्रहमपेक्ष्य तु सखित्वमिति भावः। 'अवेक्ष्य' इति पा.। ३.'परिहारार्थस्तस्य प्रश्नः' इति पा.।

**तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ! ॥५॥**
**अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।**
**प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥६॥**

बह्नीति। **बहूनि** मे **मम** व्यतीतानि **अतिक्रान्तानि जन्मानि, तव च** हे**ऽर्जुन ! तान्यहं** वेद **जाने सर्वाणि।** न त्वं वेत्थ **न जानीषे, धर्माधर्मादिप्रतिबद्धज्ञानशक्तित्वात् । अहं पुनर्नित्यशुद्धबुद्धमुक्तस्वभावत्वाद् अनावरणज्ञानशक्तिरिति वेदाहम्**[१] **, हे परन्तप !॥ ५॥**

**कथं तर्हि तव नित्येश्वरस्य धर्माधर्माभावेऽपि जन्मेति? उच्यते—** अजोऽपीति। अजोऽपि **जन्मरहितोऽपि सन् तथा** अव्ययात्मा **अक्षीणज्ञानशक्तिस्वभावोऽपि सन् , तथा भूतानां ब्रह्मादिस्तम्बपर्यन्तानाम्** ईश्वरः **ईशनशीलोऽपि सन् ,** प्रकृतिं स्वां **मम वैष्णवीं मायां त्रिगुणात्मिकाम् , यस्या वशे सर्वं जगद् वर्तते, यया मोहितं सत् स्वमात्मानं**

आनन्दगिरिकृतव्याख्या

**परिहारं वक्तुं भगवद्वचनमित्यर्थः। अतीतानेकजन्मवत्त्वं ममैव नासाधारणम् , किन्तु सर्वप्राणिसाधारणमित्याह—** तव चेति। **तानि प्रमाणाभावान्न प्रतिभान्तीत्याशङ्क्याह—** तानीति। **ईश्वरस्यानावृतज्ञानत्वादित्यर्थः। किमिति तर्हि तानि मम न प्रतीयन्ते? तवावृतज्ञानत्वादित्याह—** न त्वमिति। **परान् परिकल्प्य तत्परिभवार्थं प्रवृत्तत्वात् तव ज्ञानावरणं विज्ञेयमित्याह—** परन्तपेति। **अर्जुनस्य भगवता सहातीतानेकजन्मवत्त्वे तुल्येऽपि, ज्ञानवैषम्ये हेतुमाह—** धर्मेति। **आदिशब्देन रागलोभादयो गृह्यन्ते। ईश्वरस्यातीतानागतवर्तमानसर्वार्थविषयज्ञानवत्त्वे हेतुमाह—** अहमिति॥५॥

**ईश्वरस्य कारणाभावाज्जन्मैवायुक्तम् , अतीतानेकजन्मवत्त्वं तु दूरोत्सारितमिति शङ्कते—** कथमिति। **वस्तुतो जन्माभावेऽपि मायावशाज्जन्म सम्भवतीत्युत्तरमाह—** उच्यत इति। **पारमार्थिकजन्मायोगे कारणं पूर्वार्धेनानूद्य प्रातिभासिकजन्मसम्भवे कारणमाह—** प्रकृतिमिति। **प्रकृतिशब्दस्य स्वरूपविषयत्वं** [२]**प्रत्यादेष्टुम्** आत्ममाययेत्युक्तम्। **वस्तुतो जन्माभावे कारणानुवादभागं विवृणोति—** अजोऽपीत्यादिना। **प्रातिभासिकजन्मसम्भवे कारणकथनपरमुत्तरार्धं विभजते—**प्रकृतिमित्यादिना। **प्रकृतिशब्दस्य स्वरूपशब्दपर्यायत्वं**

भाष्यार्कप्रकाशः

दस्यार्थस्येति भावः। ननु त्वमिवाहमपि जन्ममरणादिमानेव, तत् कुतस्त्वं वेत्थ, नाहं वेद्मि? इत्यत आह— **धर्माधर्मेति।** जीवाः प्रकृतिपरतन्त्रत्वात् प्रतिबद्धबुद्धयः किञ्चिज्ज्ञाः, ईश्वरस्तु प्रकृत्यवश्यत्वादप्रतिबद्धबुद्धिः सर्वज्ञ इति। **नित्यः** शाश्वतः, **शुद्धो** निर्मलः, **बुद्धः** प्राज्ञः, मुक्तश्च स्वभावो यस्य सः। न विद्यते आवरणं यस्याः सा अनावरणा, [अनावरणा] ज्ञानशक्तिर्यस्य सः। एकस्याप्यात्मनः प्रकृतिकृतोऽस्ति जीवेश्वरभेदो मठाद्युपाधिकृत इवाकाशभेदः। अजस्याप्यात्मनः शरीरसम्बन्धकृतानि सन्ति जन्मानि चेति न काचिदिहानुपपत्तिः॥ ५॥

**अजोऽपीति।** ननु अजस्यापि जीवस्य धर्माधर्मसंस्कारवशाज्जन्मनाशौ भवतां नाम, धर्माधर्मकृतत्वाच्छरीरसंयोगवियोगयोः। ईश्वरस्य तु नित्यमुक्तस्य कथं धर्माधर्मसद्भावो येन जन्मादिकं स्यादिति शङ्कायामयं श्लोकः प्रवृत्त इत्याह— **कथमिति। अजोऽपीति।** पुण्यापुण्यकर्माधीनशरीरसंयोगरहितोऽपीत्यर्थः।'आत्मा यत्ने धृतौ बुद्धौ स्वभावे परमात्मनी'ति कोशादाह—**स्वभाव इति।** भूतानामीशनं च 'भीषाऽस्माद्वातः पवते' इत्यादिश्रुतिसिद्धम्। **ईशनं** नियमनम्। विष्णोः परमात्मन इमां **वैष्णवीम्** । त्रयो गुणाः सत्त्वादयः आत्मा स्वरूपं यस्यास्तां **त्रिगुणात्मिकाम्। स्वमात्मानं** प्रत्यग्रूपम्। ननु प्रकृतिमधिष्ठायापि कथमजस्य जन्म? इत्यत आह—

१. अत्र पुनरयम् अहंशब्दोऽन्वयप्रदर्शनार्थः। एवमग्रेऽपि भाष्यशैली वेदितव्या। २. निराकर्तुमित्यर्थः। तथा च प्रकृतिशब्देन आत्ममायाशब्देन चैक एवार्थ उच्यते। प्रकृतिशब्देन कारणत्वं, मायाशब्देनापारमार्थिकत्वं चोक्तमिति ध्येयम्। द्र. उपोद्घातः पृ. ९.

**वासुदेवं न जानाति, तां प्रकृतिं स्वाम्** अधिष्ठाय **वशीकृत्य** सम्भवामि **देहवानिव भवामि, जात इव,** आत्ममायया **आत्मनो मायया, न परमार्थतो लोकवत्॥ ६॥**

आनन्दगिरिकृतव्याख्या

**वारयति—** मायामिति। **तस्याः स्वातन्त्र्यं निराकृत्य भगवदधीनत्वमाह—** ममेति। [१]**तस्याश्चाधिकरणद्वारेणानवच्छिन्नत्वं सूचयति—** वैष्णवीमिति। **मायाशब्दस्यापि** [२]**प्रज्ञानामसु पाठाद् विज्ञानशक्तिविषयत्वमाशङ्क्याह—** त्रिगुणात्मिकामिति। **तस्यां कार्यलिङ्गकमनुमानं सूचयति—** यस्या इति। **जगतो मायावशवर्तित्वमेव स्फुटयति—** ययेति। **यथा लोके कश्चिज्जातो देहवानालक्ष्यते, एवमहमपि मायामाश्रित्य तया स्ववशया** सम्भवामि **जन्मव्यवहारमनुभवामि, तेन मायामयमीश्वरस्य जन्मेत्याह—** तां प्रकृतिमित्यादिना। **सम्भवामीत्युक्तमेव विभजते—** देहवानिति। **अस्मदादेरिव तवापि परमार्थत्वाभिमानो जन्मादिविषये स्यादित्याशङ्क्य , प्रागुक्तस्वरूप-परिज्ञानवत्त्वाद् ईश्वरस्य, मैवमित्याह—** न परमार्थत इति। **आवृतज्ञानवतो लोकस्य जन्मादिविषये परमार्थत्वाभिमानः सम्भवतीत्याह —** लोकवदिति॥ ६॥

भाष्यार्कप्रकाशः

**आत्ममाययेति। आत्मनो** मम **मायया** इन्द्रजालतुल्यया विचित्रशक्त्येत्यर्थः। व्यतिरेकमाह— **न परमार्थतो लोकवदिति।** यथा लोकः परमार्थतः सम्भवति न तथेत्यर्थः।

**ननु** प्रकृतिमाययोरेकार्थत्वात् 'प्रकृतिमधिष्ठाय मायया सम्भवामी'त्ययुक्तमुक्तं मूलकर्त्रा। 'न परमार्थतो लोकवद्' इति भाष्यकर्त्राऽप्ययुक्तमुक्तम् , परमार्थतो लोकस्यैवाभावादिति चेत्? **मैवम्** ; अविद्यामात्रं प्रकृतिः, दोषसहकृताऽविद्या तु माया। अविद्योपादानकं कार्यं व्यावहारिकत्वात् परमार्थतो जातमित्युक्तम् , मायोपादानकं तु प्रातिभासिकत्वात् न परमार्थत इति। यथा अविद्याजन्यः सर्पः सत्यसर्पो, मायामयस्तु रज्जुसर्पो मिथ्यासर्पः; यथा वा जाग्रत्प्रपञ्चोऽविद्याजन्यः सत्यप्रपञ्चः, स्वप्नप्रपञ्चो मायामयो मिथ्याप्रपञ्चः; तद्वज्जीवानां शरीरसंयोगोऽविद्याजन्यः, ईश्वरस्य तु मायामय इत्यदोषात्। प्रकृतिमधिष्ठायेति वचनं तु जीवानामिव नास्याविद्यामयः शरीरसंयोगः, अविद्याया एतत्परतन्त्रत्वादेतस्य शरीरसंयोगं कर्तुं न क्षमत इति बोधनार्थम्। अविद्या हि जीवान् स्ववशीकृत्य तेषां स्वजन्यशरीरसंयोगं विधत्ते। नात्र कूटस्थ आत्मा जीवशब्देन विवक्षितः; किन्तु साभासबुद्धिरेव विज्ञानात्मा जीव इति। कूटस्थ आत्मा हीश्वरादभिन्नः, तत्त्वमस्यादिश्रुतेः। जीवस्य वास्तवं रूपं कूटस्थ आत्मैव; व्यावहारिकं तु साभासबुद्धिरिति विवेकः।

**यद्वा** त्रिगुणात्मिका माया प्रकृतिः, इन्द्रजालशक्तितुल्या तु मायेति विवेकः। तथा च प्रकृतिकार्यं जीवानां देहेन्द्रियादिकं व्यावहारिकम् , मायाकार्यमीश्वरस्य देहेन्द्रियादिकं तु ऐन्द्रजालिकगन्धर्वनगरवत् प्रातिभासिकम्। अत एव 'न परमार्थतो लोकवद्' इति भाषितमाचार्यैः। अत्र परमार्थतः इत्यस्य व्यवहारतः इत्यर्थः, न तु वस्तुतः इति, वस्तुतो लोकस्यैवाभावात्।

**अत्रेदं बोध्यम्—** व्यावहारिकसत् , पारमार्थिकसत् , प्रातिभासिकसत् , अत्यन्तासच्चेति चतुर्विधं पदार्थजातम्। तत्र व्यावहारिकसत् जाग्रद्दशायामदुष्टप्रमाणैरनुभूयमानं जगत् मनुष्यपशुपक्ष्यादिकं भूम्यादिभूतात्मकं च। पारमार्थिकसत् एकमेवाद्वितीयं ब्रह्म। प्रातिभासिकसत् स्वप्नेन्द्रजालरज्जुसर्पादिकं यद्दुष्टप्रमाणैर्गृह्यते प्रतिभानसमयमात्रवर्ति। अत्यन्तासत्तु वन्ध्यापुत्रशशशृङ्गादिकं, प्रतीतितोऽपि तस्याभावात्। तदुक्तम्— 'वन्ध्यापुत्रो न तत्त्वेन मायया वाऽपि जायते' इति।

एवं स्थिते ईश्वरावतारा रामकृष्णादयः नात्यन्तासन्तः, प्रतीतितः सत्त्वात् ; न पारमार्थिकसन्तः, परमार्थदशायामभावात् ; नापि व्यावहारिकसन्तः, अतर्कितजन्मादीनां तेषां व्यावहारिकत्वासम्भवात्। अतः [३]प्रातिभासिकसत्त्वमवशिष्टं तेषाम्। युक्तं च तद्, अविचारितरमणीयत्वाद्, गन्धर्वनगरादिवत्। न हि—चतुर्भुजः शङ्खचक्रादिमान् किरीटादिभूषितः सर्वज्ञः शिशुः कस्याश्चिदासीदिति

१. परमात्मा व्यापकत्वाद् विष्णुः। तदाश्रिता माया वैष्णवी। मायायाः व्यापकत्वं सूचयतीदं पदमिति भावः। २. माया प्रज्ञा वयुनमिति पठन्ति। ३. अन्ये तु ईश्वरीयलीलाविग्रहस्य व्यवहारदशाऽबाध्यत्वेन व्यावहारिकसत्तामभिप्रयन्ति। द्र.न्यायरक्षामणिः१.१.२०।

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत !।**
**अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥७॥**

**तच्च जन्म कदा, किमर्थं चेत्युच्यते—** यदेति। **यदा यदा हि धर्मस्य** ग्लानिः हानिः **वर्णाश्रमादिलक्षणस्य**

आनन्दगिरिकृतव्याख्या

**यद् ईश्वरस्य मायानिबन्धनं जन्मेत्युक्तम् , तस्य प्रश्नपूर्वकं कालं कथयति—** तच्चेत्यादिना। **चातुर्वर्ण्ये चातुराश्रम्ये च यथावदनुष्ठीयमाने नास्ति धर्महानिरिति मन्वानो विशिनष्टि—** वर्णेति। **वर्णैराश्रमैस्तदाचारैश्च** लक्ष्यते **ज्ञायते धर्मस्तस्येति यावत्।**

भाष्यार्कप्रकाशः

केनचिदुक्ते कोऽपि सम्प्रतीयात् - सत्योऽयं वृत्तान्त इति। तथा स्तम्भान्नरसिंहोभयाकृतिः पुरुष आविरासीदित्युक्तेऽपि। यद्धि विचाराक्षमं, तत् खल्विन्द्रजालवन्मिथ्या।

**यद्यपि** सिद्धान्ते व्यावहारिकं जगदपि विचाराक्षममेव, 'एतस्मात् किमिवेन्द्रजालमपरं यद् गर्भवासस्थितं रेतश्चेतति हस्तमस्तकपदप्रोद्भूतनानाङ्कुरम्' इति, **तथापि** रेतोबीजमृदादेः सकाशाद् देहवृक्षघटादिजन्मनः सर्वानुभवसिद्धत्वान्न तत्र कस्यचिदपि आश्चर्यलेशः, अप्रमाणबुद्धिर्वा। ततः तद् विचारक्षममित्युच्यते यल्लौकिकानामाश्चर्याविषयभूतम्। यत्तु तदाश्चर्यविषयभूतं तद् विचाराक्षमं मिथ्येत्युच्यते, यथा गन्धर्वनगरादिकमिति। तस्मादिन्द्रजालवद् विचित्रहेतुरीश्वरशक्तिर्माया, सर्वसाधारणा तु प्रकृतिरिति।

**अथवा** प्रकृतिर्माया चेत्येकमेव वस्तु, वशीकृतप्रकृतिरहं प्रकृत्यैव सम्भवामि, न तु धर्माधर्मादिनेत्येतदर्थ**मात्ममाययेत्**युक्तम्। यो हि धर्माधर्मादिसंस्कारसचिवप्रकृतिजन्यो मनुष्यादिः, स परमार्थतो जात इत्युच्यते। यस्तु केवलमायाजन्यो रामकृष्णादिः, स परमार्थतो न जात इति, जात इवेत्युच्यते। यथा अज्ञस्य सकामं कर्म वस्तुतः कर्मैव। प्राज्ञस्य तु निष्कामं तत् कर्म न वस्तुतः कर्म; किन्तु कर्मेवाभाति, अबन्धकत्वात्। तथा प्राज्ञस्येश्वरस्याबन्धकत्वाद् रामकृष्णादिदेहधारणलक्षणं जन्म न वस्तुतो जन्म; किन्तु जन्मेव प्रतिभाति, अबन्धकत्वात्। अज्ञस्य जीवस्य तु मनुष्यादिदेहधारणलक्षणं जन्म वस्तुतो जन्मैव, बन्धकत्वादित्यभिप्रायः।

**द्वैतिनश्च** ईश्वरस्य न कर्माधीनं जन्म, किन्तु लीलयैवेत्याहुः। सा च लीला मायातोऽनतिरिक्तैव, मायामयत्वाल्लीलायाः। न हि वस्तुतो निर्विशेषे ईश्वरे लीला सम्भवेदित्यलम्।

**एतेन** जीवपदवाच्यायाः प्रकृतिपरतन्त्रायाः साभासबुद्धेर्यथा प्रकृतिजन्यशरीरसंयोगात्मकं जन्मास्ति, तथा ईश्वरपदवाच्यस्य प्रकृत्यपरतन्त्रस्य कूटस्थस्यात्मनो नास्ति प्रकृतिजन्यशरीरसंयोगात्मकं जन्म, किन्तु मायामयमेव तदिति पर्यवसन्नः श्लोकार्थः।

**ननु** ईश्वरशरीरस्य प्रातिभासिकत्वेन मायामयत्वम् , जीवशरीराणां व्यावहारिकत्वेन प्रकृतिमयत्वमिति विवेको दुष्करः, यावद्व्यवहारमर्जुनशरीरवत् कृष्णशरीरस्यापि वर्तमानत्वादिति चेत्? **मैवम्** ; कृष्णशरीरस्यानेकविधत्वेन दृश्यमानत्वात् कदाचिद-दृश्यमानत्वाच्च मायामयत्वम् , यथा रज्जुसर्पस्य कदाचिद् दण्डादिरूपेण दृश्यमानत्वात् कदाचिददर्शनाच्च मायामयत्वम् , तद्वत्। तस्मादर्जुनादिवन्नास्ति परमार्थतो जन्म कृष्णस्येति कृष्णस्य नित्याजेश्वरत्वं युक्तम्।

यत्तु **रामानुजः**— नेदं कृष्णस्य जन्म इन्द्रजालादिवन्मिथ्या, किन्तु सत्यमेव, प्रकृतिं स्वभावमधिष्ठायाजहदेव आत्ममायया सङ्कल्पज्ञानेन सम्भवामि। ईश्वरस्य स्वस्वरूपं च 'आदित्यवर्णं' 'हिरण्यवर्णं' 'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषाद्' इत्यादिश्रुति-सिद्धमिति; **तत्तुच्छम्** ; 'सच्चिदानन्दं ब्रह्म' 'निष्कलं निष्क्रियं शान्तम्' 'अशब्दमस्पर्शमरूपमव्यय'मित्यादिश्रुत्या ईश्वरस्य नीरूपत्व-स्वभावसिद्धेः, हिरण्यवर्णत्वादिरूपस्य उपासनार्थं कल्पितत्वेन इन्द्रजालवन्मायामयत्वसिद्धेश्च, ईश्वरस्य सविग्रहत्वे सर्वान्तरत्व-साक्षित्वाद्यसिद्धेश्च, दृश्यत्वेन घटादिवदनित्यत्वप्रसङ्गाच्च, सङ्कल्पेनाप्यजस्य जन्मायोगाच्च, असङ्गपुरुषस्येश्वरस्य वस्तुतः शरीरसङ्गा-योगाच्च मिथ्यैवायं कृष्णावतारः॥६॥

**यदा यदेति।** हे भारत! यदा यदा धर्मस्य ग्लानिर्भवति, अधर्मस्याभ्युत्थानं भवति, तदा तदा आत्मानं सृजामि। **आत्मानं** मां

**परित्राणाय साधूनां विनाशाय च दुष्कृताम्।**
**धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥८॥**

**प्राणिनामभ्युदयनिःश्रेयससाधनस्य भवति, भारत !** अभ्युत्थानम् **उद्भवोऽधर्मस्य, तदा तदाऽऽत्मानं सृजाम्यहं मायया ॥७॥**

**किमर्थम्? —** परित्राणायेति। परित्राणाय **परिरक्षणाय** साधूनां **सन्मार्गस्थानाम् , विनाशाय च** दुष्कृतां **पाप-कारिणाम् , किञ्च** धर्मसंस्थापनार्थाय **धर्मस्य सम्यक् स्थापनं धर्मसंस्थापनम् , तदर्थं सम्भवामि** युगे युगे **प्रतियुगम् ॥८॥**

आनन्दगिरिकृतव्याख्या

**धर्महानौ समस्तपुरुषार्थभङ्गो भवतीत्यभिप्रेत्याह—** प्राणिनामिति। **न च यथोक्तस्य धर्मस्य हानिं सोढुं शक्तो भवानित्याह—** भारतेति। **न केवलं प्राणिनां धर्महानिरेव भगवतो मायाविग्रहस्य परिग्रहे हेतुः, अपि तु तेषामधर्मप्रवृत्तिरपीत्याह—** अभ्युत्थानमिति। **यदा यदेति पूर्वेण सम्बन्धः ॥७॥**

**यथोक्ते काले कृतकृत्यस्य भगवतो मायाकृते जन्मनि प्रश्नपूर्वकं प्रयोजनमाह—** किमर्थमित्यादिना। **यथा साधूनां रक्षणम् , असाधूनां निग्रहश्च भगवदवतारफलम् , तथा फलान्तरमपि तस्यास्तीत्याह—** किञ्चेति। **धर्मे हि स्थापिते जगदेव स्थापितं भवति। अन्यथा भिन्नमर्यादं जगदसङ्गतमापद्येतेत्यर्थः ॥८॥**

**मायामयमीश्वरस्य जन्म न वास्तवम् , तस्यैव च जगत्परिपालनं कर्म नान्यस्येति जानतः श्रेयोवाप्तिं दर्शयन् विपक्षे प्रत्यवायं**

भाष्यार्कप्रकाशः

**सृजामि** आविर्भावयामि। कथमात्मनोऽजस्य जन्म? इत्यत आह— **माययेति ॥७॥**

**परित्राणायेति**। साधूनां परित्राणाय, दुष्कृतां विनाशाय, धर्मसंस्थापनार्थाय च युगे युगे अहं सम्भवामि। **साधूनां** सन्मार्गस्थानां देवर्ष्यादीनाम्।

**यत्तु रामानुजः—** विष्णुविरहासहानां वैष्णवाग्रेसराणामिति, तदतीव **तुच्छम्** ; किं ज्ञानिनो वैष्णवाग्रेसराः? उताज्ञानिनः? आद्ये 'वासुदेवः सर्वमिति स महात्मा सुदुर्लभः' इत्युक्तरीत्या सर्वं ब्रह्मेति, 'सर्वगत्वादनन्तस्य स एवाहमवस्थितः। मत्तः सर्वमहं सर्वं मयि सर्वं सनातने'[1] इति प्रह्लादोक्तरीत्या 'ब्रह्माहमस्मी'ति च येषां ज्ञानमस्ति त एवाद्वैतिनो वैष्णवाग्रेसराः। तेषां कथं विष्णुविरहप्रसङ्गः। विष्णोरेव स्वात्मत्वात् सदाऽपि विष्ण्वभिन्नात्मानन्दानुभवव्यग्रत्वाच्च। न द्वितीयः, विष्णुमजानतां वैष्णवत्वासम्भ-वात् । ये विष्णुं जानन्तस्तत्र भक्तिं तन्वन्ति ते हि वैष्णवाः, 'विष्ण्वर्पिताखिलाचारः स हि वैष्णव उच्यते' इति शास्त्रात्। न च 'न चलति निजवर्णधर्मतो यः स्थिरमनसं तमवेहि विष्णुभक्त'मिति वचनात् स्ववर्णाश्रमधर्मस्थो वैष्णव इति वाच्यम् , तस्य योगित्वाद् योगिन एव वैष्णवत्वे ज्ञानिनोऽवैष्णवत्वापत्तेः। 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' इति वक्ष्यमाणगीताविरोधाच्च। न हि विष्णुप्रियो ज्ञानी वैष्णवो न भवतीति वक्तुं शक्यम्। भवतु वा योगिनोऽपि ज्ञानशून्यस्य वैष्णवत्वम्; कथं पुनस्तस्य भगवद्विरहासहत्वम्? भगवत्स्वरूपस्वभावादिज्ञानस्यैवाभावात्। न च तप्तशङ्खचक्रचिह्नधारिणश्छिद्रोर्ध्वपुण्ड्रधरा अर्चापूजका द्विजा वैष्णवा इति वाच्यम् ; तापादीनां वेदविरुद्धाचारत्वेन, एवंविधदुराचारवतां दुष्कृतां विनाशायैव भगवदवताराविर्भावाच्च नामी वैष्णवाः। तापादीनां द्विजेतरविषयत्वं तु मामके **शूद्रधर्मदर्पणाख्ये** ग्रन्थे विस्तरतो द्रष्टव्यम्। तस्मात् साधुपददर्शनमात्रेण नेह वैष्णवजनाडम्बरः प्रसक्तुमर्हति ॥८॥

---

१. वि.पु. १.१९.८५।

**जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः।**
**त्यक्त्वा देहं पुनर्जन्म नैति, मामेति सोऽर्जुन ! ॥९॥**
**वीतरागभयक्रोधा मन्मया मामुपाश्रिताः।**
**बहवो ज्ञानतपसा पूता मद्भावमागताः ॥१०॥**

**तत् —** जन्मेति। **जन्म मायारूपं, कर्म च साधुपरित्राणादि** मे **मम** दिव्यम् **अप्राकृतमैश्वरम्** एवं **यथोक्तं यो वेत्ति** तत्त्वतः **तत्त्वेन यथावत् , त्यक्त्वा देहमिमं** पुनर्जन्म **पुनरुत्पत्तिं** नैति **न प्राप्नोति, माम्** एति **आगच्छति, स मुच्यते, हे अर्जुन !॥९॥**

**नैष मोक्षमार्ग इदानीं प्रवृत्तः, किं तर्हि? पूर्वमपि —** वीतरागेति। वीतरागभयक्रोधाः **रागश्च भयं च क्रोधश्च वीता विगता येभ्यस्ते वीतरागभयक्रोधाः,** मन्मयाः **ब्रह्मविदः ईश्वराभेददर्शिनो** मामेव **च परमेश्वरम्** उपाश्रिताः, **केवलज्ञाननिष्ठा इत्यर्थः।** बहवः **अनेके** ज्ञानतपसा **ज्ञानमेव च परमात्मविषयं तपः, तेन ज्ञानतपसा** पूताः **परां शुद्धिं गताः सन्तो** मद्भावम् **ईश्वरभावं मोक्षम्** आगताः **समनुप्राप्ताः।** [1]**इतरतपोनिरपेक्षज्ञाननिष्ठाः इत्यस्य लिङ्गम्— 'ज्ञानतपसा' इति विशेषणम्॥१०॥**

आनन्दगिरिकृतव्याख्या

**सूचयति—** तज्जन्मेत्यादिना। **यथोक्तं** मायामयं **कल्पितमिति यावत्। वेदनस्य यथावत्त्वम् - वेद्यस्य जन्मादेरुक्तरूपानतिवर्तित्वम्। यदि पुनर्भगवतो वास्तवं जन्म, साधुजनपरिपालनादि चान्यस्यैव कर्म क्षत्रियस्येति विवक्ष्येत, तदा तत्त्वापरिज्ञानप्रयुक्तो जन्मादिः संसारो दुर्वारः स्यादिति** भावः॥९॥

**सम्प्रति प्रस्तुतमोक्षमार्गस्य नूतनत्वेनाव्यवस्थितत्वमाशङ्क्य परिहरति—** नैष इति। **मन्मयत्वस्य मद्भावगमनेनापौनरुक्त्यं दर्शयति—** ब्रह्मविद इति। **आत्मनो भिन्नत्वेन भिन्नाभिन्नत्वेन वा** [2]**ब्रह्मणो वेदनं व्यावर्तयति—** ईश्वरेति। **अभेददर्शनेन समुच्चित्य कर्मानुष्ठानं प्रत्याचष्टे—** मामेवेति। **तदुपाश्रयत्वमेव विशदयति—** केवलेति। **मामुपाश्रिताः इति केवलज्ञाननिष्ठत्वमुक्त्वा 'ज्ञानतपसा पूताः' इति किमर्थं पुनरुच्यते? तत्राह—** इतरेति॥१०॥

भाष्यार्कप्रकाशः

**जन्मेति।** एवं यः मे जन्म दिव्यं कर्म च तत्त्वतो वेत्ति, हे अर्जुन! सः देहं त्यक्त्वा पुनः जन्म नैति; मामेति। **मायारूपं** मिथ्याभूतमित्यर्थः। ईश्वरस्येदं **ऐश्वरम्।** पुनर्जन्म नैति, मामेतीत्यस्य फलितमाह— **स मुच्यत इति।** अजो नित्यः शुद्धो बुद्धो मुक्त आत्मा स्वतो न जायते, किन्तु माययैव, तस्य चेष्टितं च न प्राकृतम् , किं त्वप्राकृतं लोकातीतमेवेति यो वेद स मुच्यत इत्यर्थः।

**ननु** ईश्वरजन्मकर्मज्ञानात् कथं जीवस्य मुक्तिरिति चेद्? **उच्यते**— ईश्वरो हि जीवस्य स्वस्वरूपम्। तस्मादीश्वरतत्त्वज्ञाने सति जीवतत्त्वं ज्ञातमेवेति भवति मुक्तिरिति।

यत्तु **रामानुजः**— मज्जन्मकर्मणी ज्ञात्वा निष्पापो भूत्वा मामाश्रित्य मदेकप्रियो मच्चित्तो मामेव प्राप्नोतीत्याह; तदप्रमाणम् , मूलाद् बहिर्बहूनां पदार्थानां कल्पितत्वान्मदाश्रयणादीनाम्॥९॥

**वीतेति।** वीतरागभयक्रोधाः मामुपाश्रिताः ज्ञानतपसा पूताः बहवो मन्मयाः मद्भावमागताः, रागभयादित्यागपूर्वकं केवल-ज्ञानयोगमाश्रित्य तत एव परिशुद्धा अनेके ब्रह्मविदो मोक्षं प्राप्ता इत्यर्थः। **केवलज्ञाननिष्ठा इति।** इतरतपोनैरपेक्ष्येण ज्ञानयोगनिष्ठा इत्यर्थः। ननु किमत्र ज्ञापकम्? अत आह— **लिङ्गमिति।** 'ज्ञानतपसा पूताः' इति विशेषणमेव **लिङ्गं** ज्ञापकम्। ज्ञानमेव तपो ज्ञानतप

१. 'इतरतपोनिरपेक्षा ज्ञाननिष्ठेत्यस्य' इति पा.। २. 'ब्रह्मणि' इति पा.।

**ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।**
**मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ ! सर्वशः ॥ ११ ॥**

**तव तर्हि रागद्वेषौ स्तः, येन केभ्यश्चिदेवात्मभावं प्रयच्छसि, न सर्वेभ्य इति। उच्यते—** ये यथेति। **ये यथा येन प्रकारेण येन प्रयोजनेन यत्फलार्थितया मां प्रपद्यन्ते, तान्** तथैव **तत्फलदानेन** भजामि **अनुगृह्णाम्यहमित्येतत्। तेषां मोक्षं प्रत्यनर्थित्वात्। न ह्येकस्य मुमुक्षुत्वं फलार्थित्वं च युगपत् सम्भवति। अतो ये फलार्थिनस्तान् फलप्रदानेन, ये यथोक्तकारिणस्त्वफलार्थिनो मुमुक्षवश्च तान् ज्ञानप्रदानेन, ये ज्ञानिनः संन्यासिनो मुमुक्षवश्च तान् मोक्षप्रदानेन, तथा आर्तान् आर्तिहरणेन - इत्येवं यथा प्रपद्यन्ते ये, तांस्तथैव भजामीत्यर्थः[1]। न पुना रागद्वेषनिमित्तं मोहनिमित्तं वा कञ्चिद् भजामि। सर्वथाऽपि सर्वावस्थस्य** मम **ईश्वरस्य** वर्त्म **मार्गमनुवर्तन्ते मनुष्याः। यत्फलार्थितया यस्मिन् कर्मण्यधिकृता ये प्रयतन्ते, ते मनुष्या अत्र उच्यन्ते । हे पार्थ !** सर्वशः **सर्वप्रकारैः ॥ ११ ॥**

आनन्दगिरिकृतव्याख्या

**ईश्वरः सर्वेभ्यो भूतेभ्यो मोक्षं प्रयच्छति चेत् ,[2]प्रागुक्तविशेषणवैयर्थ्यम् ; यदि तु केभ्यश्चिदेव मोक्षं प्रयच्छेत् , तर्हि तस्य रागादिमत्त्वादनीश्वरत्वापत्तिरिति शङ्कते—** तव तर्हीति। **ये मुमुक्षवस्तेभ्यो मोक्षमीश्वरो ज्ञानसम्पादनद्वारा प्रयच्छति, फलान्तरार्थिभ्यस्तु तत्तदुपायानुष्ठानेन तत्तदेव ददातीति नास्य रागद्वेषाविति परिहरति—** उच्यत इति। **मुमुक्षूणामीश्वरानुसारित्वेऽपि फलान्तरार्थिनां कुतः तदनुसारित्वमित्याशङ्क्य , 'फलमत उपपत्ते'रिति न्यायेन तत्फलस्येश्वरायत्तत्वात् तदनुवर्तित्वमावश्यकमित्याह—**ममेति। **[3]भगवद्भजन-भागिनां सर्वेषामेव कैवल्यमेकरूपं किमिति नानुगृह्यते? तत्राह—** तेषामिति। **अभ्युदयनिःश्रेयसार्थित्वं प्रार्थनावैचित्र्यादेकस्यैव किं न स्यादित्याशङ्क्यापर्यायेण तदनुपपत्तिं साधयति—** न हीति। **मुमुक्षूणां फलार्थिनां च विभागे स्थिते सति अनुग्रहविभागं फलितमाह—** अत इति। **फलप्रदानेनानुगृह्णामीति सम्बन्धः। नित्यनैमित्तिककर्मानुष्ठायिनामेव फलार्थित्वाभावे, सति च मुमुक्षुत्वे, कथं तेष्वनुग्रहः स्यादिति? तत्राह—** ये यथोक्तेति। **ज्ञानप्रदानेन भजामीत्युत्तरत्र सम्बन्धः। सन्ति केचित् त्यक्तसर्वकर्माणो ज्ञानिनो मोक्षमेवापेक्षमाणाः, तेष्वनुग्रहप्रकारं प्रकटयति—** ये ज्ञानिन इति। **केचिदार्ताः सन्तो ज्ञानादिसाधनान्तररहिता भगवन्तमेवार्तिमपहर्तुमनुवर्तन्ते, तेषु भगवतोऽनुग्रहविशेषं दर्शयति—** तथेति। **पूर्वार्धव्याख्यानमुपसंहरति—** इत्येवमिति। **भगवतोऽनुग्रहे निमित्तान्तरं निवारयति—** न पुनरिति। **फलार्थित्वे मुमुक्षुत्वे च जन्तूनां भगवदनुसरणमावश्यकमित्युत्तरार्धं विभजते—** सर्वथाऽपीति। सर्वावस्थत्वं **तेन तेनात्मना परस्यैवेश्वरस्यावस्थानम्।** मार्गो **ज्ञानकर्मलक्षणः। मनुष्यग्रहणादितरेषामीश्वरमार्गानुवर्तित्वपर्युदासः स्यादित्याशङ्क्याह—** यत्फलेति। सर्वप्रकारैः **मम मार्गमनुवर्तन्त इति पूर्वेण सम्बन्धः ॥ ११ ॥**

भाष्यार्कप्रकाशः

इति हि समासः। तत्रैवकारेण तपोऽन्तरव्यवच्छेद इति भावः। यद्वा ज्ञाने तपस्त्वारोपणात् तपोऽन्तरव्यवच्छेदः। सति त्वितरतपसि किमिति ज्ञाने तपस्त्वारोपणपूर्वकं कृत्रिमतपसो ज्ञानस्योपादानम्? न हि ज्ञानं वस्तुतस्तपः इति ॥ १० ॥

**य इति।** तमिति श्रुतेरयमर्थः— **तम्** ईश्वरं **यथा यथा** येन येन प्रकारेण, यं यमर्थमभिसन्धायेति यावत्। उपासते पुरुषाः, तं तमेव **फलम्** अर्थं **लभते** प्राप्नुवन्तीति। [4]वचनव्यत्ययश्छान्दसः। **सर्वावस्थस्येति।** सर्वप्रकारमवस्थितस्येत्यर्थः। ब्रह्मादिस्थावरान्त-रूपेण, सच्चिदानन्दरूपेण च स्थितस्येति यावत्। मायया वस्तुतश्चेति भावः। **मम वर्त्मानुवर्तन्ते** मदुक्तमार्गानुष्ठानद्वारा मामेव भजन्ते इत्यर्थः।

---

१. एतदनन्तरम् — 'तं यथा यथोपासते तं तमेव फलं लभते' इति श्रुतेः' इति अधिकः पाठः रा.पा.। २. 'ज्ञानतपसा पूताः' इति विशेषणम्। ३. 'भगवद्वचन-भागिनाम्' इति पा.। ४. उदाहृतश्रुतौ 'उपासते' इति बहुवचनानुरोधेन 'लभते' इति एकवचनं बहुवचनार्थे इति भावः।

**काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः।**
**क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥१२॥**

**यदि तवेश्वरस्य रागादिदोषाभावात्**[१] **सर्वप्राणिष्वनुजिघृक्षायां तुल्यायां, सर्वफलप्रदानसमर्थे च त्वयि सति, 'वासुदेवः सर्व'मिति ज्ञानेनैव मुमुक्षवः सन्तः कस्मात् त्वामेव सर्वे न** [२]**प्रतिपद्यन्त इति? शृणु तत्र कारणम् —** काङ्क्षन्त इति। काङ्क्षन्तः **अभीप्सन्तः कर्मणां** सिद्धिं **फलनिष्पत्तिं प्रार्थयन्तो यजन्त** इह **अस्मिन् लोके** देवताः **इन्द्राग्न्याद्याः; 'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानाम्' (बृ.उ. १.४.१०) इति श्रुतेः। तेषां हि भिन्नदेवतायाजिनां फलाकाङ्क्षिणां** क्षिप्रं **शीघ्रं** हि **यस्माद् मानुषे लोके ; मनुष्यलोके हि शास्त्राधिकारः**[३]**। 'क्षिप्रं हि मानुषे लोके' इति विशेषणाद् अन्येष्वपि कर्मफलसिद्धिं दर्शयति भगवान्। मानुषे लोके**

आनन्दगिरिकृतव्याख्या

**अनुग्राह्याणां ज्ञानकर्मानुरोधेन भगवता तेष्वनुग्रहविधानात् तस्य रागद्वेषौ यदि न भवतस्तर्हि तस्य रागाद्यभावादेव सर्वेषु प्राणिष्वनुग्रहेच्छा तुल्या प्राप्ता। न च - तस्यां सत्यामेव फलस्याल्पीयसः सम्पादने सामर्थ्यम्, न तु भगवतो महतो मोक्षाख्यस्य फलस्य प्रदाने शक्तिरिति - युक्तम्, अप्रतिहतज्ञानेच्छाक्रियाशक्तिमतस्तव सर्वफलप्रदानसामर्थ्यात्। तथा च यथोक्तानुजिघृक्षायां सत्यां त्वयि च यथोक्तसामर्थ्यवति सति सर्वे फल्गुफलादभ्युदयाद् विमुखा मोक्षमेवापेक्षमाणाः ज्ञानेन त्वामेव किमिति न प्रतिपद्येरन्निति चोदयति—** यदीति। **मोक्षापेक्षाऽभावात् तदुपायभूतज्ञानादपि वैमुख्याद् भगवत्प्राप्त्यभावे हेतुमभिदधानः समाधत्ते—**शृण्विति। **कर्मफलसिद्धिमिच्छता किमिति मानुषे लोके देवतापूजनमिष्यते? तत्राह—**क्षिप्रं हीति। **कर्मफलसम्पत्त्यर्थिनां यष्टृयष्टव्यविभागदर्शिनां तद्दर्शने कारणम् आत्माज्ञानमित्यत्र बृहदारण्यकश्रुतिमुदाहरति—**अथेति। **अविद्याप्रकरणोपक्रमार्थम्** अथेत्युक्तम्। उपासनं **भेददर्शनम्। इत्यनूद्य,** [४]**कारणम् आत्माज्ञानं तत्रेति दर्शयति—** नेति। **यथाऽस्मदादीनां हलवहनादिना पशुरुपकरोति, एवमज्ञो देवादीनां यागादिभिरुपकरोतीत्याह—** यथेति। **किमिति ते फलाकाङ्क्षिणो भिन्नदेवतायाजिनो ज्ञानमार्गं नापेक्षन्ते? तत्रोत्तरार्धमुत्तरत्वेन योजयति—** तेषामित्यादिना। **यस्माद् यथोक्तानामधिकारिणां कर्मप्रयुक्तं फलं लोकविशेषे झटिति सिध्यति, तस्मात् तेषां मोक्षमार्गादस्ति वैमुख्यमित्यर्थः। मानुषलोकविशेषणं किमर्थमित्याशङ्क्याह—** मनुष्यलोके हीति। **लोकान्तरेषु तर्हि कर्मफलसिद्धिर्नास्तीत्याशङ्क्य क्षिप्रविशेषणस्य तात्पर्यमाह—** क्षिप्रमिति। **क्वचित् कर्मफलसिद्धिरविलम्बेन भवति, अन्यत्र तु विलम्बेनेति विभागे को हेतुरित्याशङ्क्य ,**

भाष्यार्कप्रकाशः

यत्तु **रामानुजः**— मम वर्त्म मत्स्वभावमनुवर्तन्ते अनुभूयानुवर्तन्त इति; **तत्तुच्छम्**, वर्त्मनः स्वभावार्थाभावात्। अनुभूयेति पदाभावाच्च। मनुष्याणां सर्वप्रकारैर्भगवत्स्वभावानुभवस्य दुष्करत्वाच्च॥११॥

**काङ्क्षन्त इति**। अथेति श्रुतेरयमर्थः। यः अन्याम् इन्द्रादिदेवताम् 'असावन्यः, अहमन्योऽस्मी'त्युपास्ते - 'कर्मफलदाता इन्द्रः, तद्भोक्ता त्वह'मिति भेदबुद्ध्योपास्ते इत्यर्थः। सः न वेद - अज्ञ इत्यर्थः। तत्र दृष्टान्तमाह— **यथा पशुरिति**। यथा पशुर्मनुष्याणां भोग्यः, एवं स कर्मी देवानां भोग्य इति देवपशुरेवेत्यर्थः। **भिन्नदेवतेति**। वासुदेवस्य सर्वात्मत्वात् स्वात्माभिन्नदेवतात्वम् , न त्विन्द्रादीनाम् , तेषामसर्वात्मत्वात्। दर्शितं चैतद् भागवते व्यासेनैव – 'एवं गजेन्द्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिङ्गभिदाभिमानाः। नैते यदोपससृपुर्निखिलात्मकत्वात् तत्राखिलामरमयो हरिराविरासी'दिति। तथा च इन्द्रादयः भिन्नदेवताः, वासुदेव एक एवाभिन्नदेवतेति बोध्यम्। वस्तुतस्तु वासुदेवो नाम न कश्चित् कार्यकरणसङ्घातविशेषे अहमित्यभिमानवान् पुरुषः इन्द्रादिवत् , किन्तु नित्यशुद्धबुद्ध आत्मैवेति कथमात्मनो भिन्नदेवतात्वमिति ज्ञेयम्। **हिशब्दः** प्रसिद्धिद्योतकः। तामेव प्रसिद्धिमाह— **शास्त्राधिकारादिति**।

---

१.'रागद्वेषाभावात्'इति, 'यदि...दोषाभावस्तदा' इति च पा.। २.'प्रपद्यन्ते' इति पा.। ३.'शास्त्राधिकारात्' इति रा.पा.। ४. तत्र कारणम् आत्माज्ञानमित्यन्वयः।

**चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।**
**तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥१३॥**

[१]**वर्णाश्रमादिकर्माधिकार इति विशेषः। तेषां च** [२]**वर्णाश्रमाद्यधिकारिकर्मणां फलसिद्धिः क्षिप्रं भवति;** कर्मजा **कर्मणो जाता॥१२॥**

**मानुषे एव लोके वर्णाश्रमादिकर्माधिकारो, नान्येषु लोकेष्विति नियमः किन्निमित्त इति? अथवा 'वर्णाश्रमादिप्रविभागोपेता मनुष्या मम वर्त्मानुवर्तन्ते सर्वशः' इत्युक्तम् ; कस्मात्पुनः कारणान्नियमेन तवैव वर्त्मानुवर्तन्ते, नान्यस्येति? उच्यते—** चातुर्वर्ण्यमिति। चातुर्वर्ण्यं **चत्वार एव वर्णाश्चातुर्वर्ण्यम् ,** मया **ईश्वरेण** सृष्टम् **उत्पादितम् , 'ब्राह्मणोऽस्य मुखमासीत्'(तै.आ.३.१२) इत्यादिश्रुतेः।** गुणकर्मविभागशो **गुणविभागशः कर्मविभागशश्च। गुणाः सत्त्वरजस्तमांसि। तत्र - सात्त्विकस्य सत्त्वप्रधानस्य ब्राह्मणस्य शमो दमस्तप इत्यादीनि कर्माणि,** [३]**सत्त्वोपसर्जनरजःप्रधानस्य क्षत्रियस्य शौर्यतेजःप्रभृतीनि कर्माणि, तमउपसर्जनरजःप्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि, रजउपसर्जनतमःप्रधानस्य शूद्रस्य शुश्रूषैव कर्म - इत्येवं गुणकर्मविभागशः चातुर्वर्ण्यं मया सृष्टमित्यर्थः। तच्चेदं**

आनन्दगिरिकृतव्याख्या

**सामग्रीभावाभावाभ्यामित्याह—** मानुष इति। **मनुष्यलोके कर्मफलसिद्धेः शैघ्र्यात् तदभिमुखानां ज्ञानमार्गवैमुख्यं प्रायिकमित्युपसंहरति—** तेषामिति॥१२॥

**मनुष्यलोके चातुर्वर्ण्यं चातुराश्रम्यमित्यनेन द्वारेण कर्माधिकारनियमे कारणं पृच्छति—** मानुष एवेति। **आदिशब्देनावस्थाविशेषा विवक्ष्यन्ते। प्रकारान्तरेण वृत्तानुवादपूर्वकं चोद्यमुत्थापयति—**अथवेत्यादिना। **प्रश्नद्वयं परिहरति—**उच्यत इति। **तर्हि तव कर्तृत्वभोक्तृत्वसम्भवाद् अस्मदादितुल्यत्वेनानीश्वरत्वमित्याशङ्क्याह—** तस्येति। **ईश्वरस्य विषमसृष्टिं विदधानस्य सृष्टिवैषम्यनिर्वाहकं कथयति—** गुणेति। **गुणविभागेन कर्मविभागः, तेन चातुर्वर्ण्यस्य सृष्टिमेवोपदिष्टां स्पष्टयति—** तत्रेत्यादिना। **प्रश्नद्वयप्रतिविधानं प्रकृतमुपसंहरति—** तच्चेदमिति। **मनुष्यलोके परं वर्णाश्रमादिपूर्वके कर्मण्यधिकारस्तत्रैव वर्णादेरीश्वरेण सृष्टत्वात् , न लोकान्तरेषु , तत्र वर्णाद्यभावात्। ईश्वरमेव चातुर्वर्ण्याश्रमादिविभागभागिनोऽधिकारिणोऽनुवर्तन्ते, तेनैव वर्णादेस्तद्व्यापारस्य च सृष्टत्वात् तदनुवर्तनस्य**

भाष्यार्कप्रकाशः

**मानुषे लोके** भूलोके, तत्रापि मनुष्याणाम्, तेष्वपि त्रैवर्णिकानामेव शास्त्राधिकारः। शास्त्रस्य च फलवत्त्वाच्छास्त्राधिकारिणामेव फलसिद्धिरिति भावः। ननु मानुषे लोके कर्मजा सिद्धिः क्षिप्रं भवतीति कोऽर्थः क्षिप्रपदनिर्देशेनेत्यत आह— **अन्येष्वपीति**। अन्येषु लोकेषु कर्मजा सिद्धिश्चिराय भवतीत्यर्थः।

**ननु** अन्येषु लोकेषु कर्माधिकारस्यैवाभावात् कथं कर्मसिद्धिरिति चेद्? **उच्यते**— इहानुष्ठितानामेव विविधानां कर्मणां फलान्यपि विविधानि पुत्रपशुस्वर्गादिरूपाणि भवन्ति, तत्र पशुपुत्रादिरूपा ऐहिककर्मसिद्धिः क्षिप्रं भवति, स्वर्गादिरूपा आमुष्मिककर्मसिद्धिस्तु चिराय भवतीति कर्माधिकाराभावेऽपि स्वर्गलोकादिषु कर्मसिद्धयः सन्त्येवेति। **कर्मसिद्धयः** कर्मफलानि॥१२॥

**चातुर्वर्ण्यमिति**। मया चातुर्वर्ण्यं गुणकर्मविभागशः सृष्टम्। तस्य कर्तारमपि माम् अकर्तारमव्ययं विद्धि। चतुर्वर्णशब्दात् स्वार्थे ष्यञ् , चातुर्वर्ण्यम्। सत्त्वम् उपसर्जनमप्रधानं यस्य स सत्त्वोपसर्जनः, तस्य। **शुश्रूषा** त्रैवर्णिकसेवा। यतः सर्वज्ञोऽहं गुणकर्मविभागपूर्वकं चातुर्वर्ण्यं सृष्टवांस्ततो मनुष्या ममैव वर्त्मानुवर्तन्ते, स्वस्वविहितवर्णाश्रमधर्मानुष्ठानद्वारा तद्विधायकं मामेव सेवन्त

---

१. 'वर्णाश्रमादिकर्माणीति विशेषः' इति पा.। २. 'वर्णाश्रमाद्यधिकारिणां कर्मिणां''वर्णाश्रमाद्यधिकारिणां कर्मणा' इति च पा.। ३. 'सत्त्वोपसर्जनस्य' इति रा.पा.।

**न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।**
**इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥१४॥**

**चातुर्वर्ण्यं नान्येषु लोकेषु। अतो मानुषे लोके इति विशेषणम्। हन्त तर्हि चातुर्वर्ण्यसर्गादेः कर्मणः कर्तृत्वात् तत्फलेन युज्यसे; अतो न त्वं नित्यमुक्तो नित्येश्वरश्चेति। उच्यते। यद्यपि मायासंव्यवहारेण** तस्य **कर्मणः कर्तारमपि सन्तं मां परमार्थतो विद्धि अकर्तारम्। अत एव** अव्ययम् **असंसारिणं च मां विद्धि॥१३॥**

**येषां तु कर्मणां कर्तारं मां मन्यसे, परमार्थतः तेषामकर्तैवाहम्, यतः—** नेति। **न मां तानि कर्माणि लिम्पन्ति देहाद्यारम्भकत्वेन, अहङ्काराभावात्। न च तेषां कर्मणां फलेषु मे मम** स्पृहा **तृष्णा। येषां तु संसारिणाम् अहं**

आनन्दगिरिकृतव्याख्या

**युक्तत्वादित्यर्थः।** तस्येत्यादिद्वितीयभागापोह्यं **चोद्यमनुद्रवति—**हन्तेति। **यदि चातुर्वर्ण्यादिकर्तृत्वादीश्वरस्य प्रागुक्तो नियमोऽभिमतः, तर्हि तद्विषयसृष्ट्यादेः, तन्निष्ठव्यापारस्य च धर्मादेर्निर्वर्तकत्वात्,** [1]**तत्फलस्य कर्तृगामित्वात् कर्तृत्वभोक्तृत्वयोस्त्वयि प्रसङ्गात् नित्यमुक्तत्वादि ते न स्यादित्यर्थः। मायया कर्तृत्वं, परमार्थतश्चाकर्तृत्वमित्यभ्युपगमान्नित्यमुक्तत्वादि सिध्यतीत्युत्तरमाह—**उच्यत इति। **मायावृत्त्यादिसंव्यवहारेण चातुर्वर्ण्यादेः तत्कर्मणश्च यद्यपि कर्ताऽहम्, तथापि तथाविधं मां परमार्थतोऽकर्तारं विद्धीति योजना। अकर्तृत्वादेवाभोक्तृत्वसिद्धिरित्याह—** अत एवेति॥१३॥

**ईश्वरस्य कर्तृत्वभोक्तृत्वयोर्वस्तुतोऽभावे कर्मतत्फलसम्बन्धवैधुर्यं फलतीत्याह—** येषां त्विति। **कर्मतत्फलसंस्पर्शशून्यमीश्वरं पश्यतो दर्शनानुरूपं फलं दर्शयति—** न मामिति। तानि कर्माणीति। **येषां कर्मणामहं कर्ता तवाभिमतस्तानीति यावत्। देहेन्द्रियाद्यारम्भकत्वेन तेषां कर्मणामीश्वरे संस्पर्शाभावे तस्य तत्करणावस्थायामहङ्काराभावं हेतुं करोति—** अहङ्काराभावादिति। **कर्मफलतृष्णाभावाच्चेश्वरं कर्माणि न लिम्पन्तीत्याह—** न चेति। **उक्तमेव प्रपञ्चयति—** येषां त्विति। तदभावात् **कर्मसु अहं कर्ता इत्यभिमानस्य,**

भाष्यार्कप्रकाशः

इत्यर्थः। मनुष्यलोके चातुर्वर्ण्यस्य गुणकर्मविभागवतः सत्त्वादिहैव कर्माधिकारः। अन्येषु लोकेषु तु चातुर्वर्ण्याभावान्न कर्माधिकार इत्यन्योऽर्थः, द्वेधा अवतारिकायाः कृतत्वाद् भाष्यकारैरस्य श्लोकस्य। **सर्गादे**रित्यादिपदात् स्थितिलययोर्ग्रहणम्। **कर्मणः** क्रियायाः। यः यत्कर्मकर्ता स तत्फलेन युक्तो भवति, यथा कृषीवलः सस्येनेति व्याप्तिसत्त्वाच्चातुर्वर्ण्यसृष्ट्यादिकर्मकर्ता त्वमपि तत्फलेन युज्यस एव। भवतु, को दोषः? तत्राह— **न त्वं नित्यमुक्त इति।** कर्मफलबद्धस्य कथं मुक्तत्वमिति भावः। नन्वीश्वरस्य मम किं मुक्त्येत्यत आह— **नित्येश्वर इति।** बद्धस्यानीश्वरत्वं लोकन्यायेनापि सिद्धमिति भावः। अस्मिन् प्रश्ने प्रतिजानाति— **उच्यत इति।** किमुच्यते? तदाह— **यद्यपीत्यादिना। संव्यवहारः** एकीकृत्य व्यवहारः, तादात्म्याध्यास इति यावत्। माययैव सृष्ट्यादीनि कर्माणि क्रियन्ते, न त्वीश्वरेण, तस्याक्रियत्वात्। मायातादात्म्याध्यासात्तु कर्तृत्वमारोप्यतेऽज्ञैरीश्वरे इति भावः। इदमेवोक्तं विश्वामित्रेण **अध्यात्मरामायणे—** 'रामो न गच्छति न तिष्ठति नानुशोचत्याकाङ्क्षते त्यजति नो न करोति किञ्चित्। आनन्दमूर्तिरचलः परिणामहीनो मायागुणाननुगतो हि तथा विभाति॥' इति। कथं कर्तुरकर्तृत्वम्? अत आह— **परमार्थत इति।** वस्तुतोऽकर्ताऽप्यहं मायया कर्तेव प्रतीये इत्यर्थः। **अत एवेति।** वस्तुतोऽकर्तृत्वादेवेत्यर्थः। यः संसरति स व्येतीत्युच्यते, संसारस्यैव विकारत्वादित्यभिप्रायादाह— **अव्ययमसंसारिणमिति।** निर्विकारमित्यर्थः॥१३॥

**नेति। लिम्पन्ति** बध्नन्तीत्यर्थः। केन प्रकारेणेत्यत आह—**देहाद्यारम्भकत्वेनेति।** आदिपदादिन्द्रियादिग्रहणम्, विषयादिग्रहणं वा। न कर्मभिर्मम जन्मवृद्ध्यादिरूपसंसारात्मको लेपोऽस्तीत्यर्थः। तत्र हेतुमाह— **अहङ्काराभावादिति।** कर्ताऽहमिति विपरीत-

१. 'शास्त्रफलं प्रयोक्तरि'(जै.सू. ३.७.१८) इति न्यायादिति भावः।

# एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः।
# कुरु कर्मैव तस्मात् त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५॥

**कर्तेत्यभिमानः कर्मसु , स्पृहा तत्फलेषु च तान् कर्माणि लिम्पन्तीति युक्तम्। तदभावान्न मां कर्माणि लिम्पन्ति।** इति **एवं योऽन्योऽपि मामात्मत्वेन अभिजानाति - 'नाहं कर्ता, न मे कर्मफले स्पृहा' इति, स कर्मभिः न बध्यते। तस्यापि न देहाद्यारम्भकाणि कर्माणि भवन्तीत्यर्थः॥ १४॥**

**'नाहं कर्ता, न मे कर्मफले स्पृहा' इति—** एवमिति। **एवं ज्ञात्वा कृतं कर्म** पूर्वैरपि **अतिक्रान्तैः मुमुक्षुभिः। कुरु तेन कर्मैव त्वम् , न तूष्णीमासनम्। नापि संन्यासः कर्तव्यः।** तस्मात् त्वं **पूर्वैरप्यनुष्ठितत्वाद्** [१]**'यद्यनात्मज्ञः त्वं तदा आत्मशुद्ध्यर्थम् , तत्त्वविच्चेल्लोकसंग्रहार्थम्।** पूर्वैर्जनकादिभिः **पूर्वतरं कृतम् , नाधुनातनं** कृतं **निर्वर्तितम्॥ १५॥**

आनन्दगिरिकृतव्याख्या

**तत्फलेषु स्पृहायाश्चाभावादित्यर्थः। ईश्वरस्य कर्मनिर्लेपेऽपि क्षेत्रज्ञस्य किमायातमित्याशङ्क्योत्तरार्धं व्याचष्टे—** इत्येवमिति। **अभिज्ञानप्रकारमभिनयति—** नाहमिति। **ज्ञानफलं कथयति—** स कर्मभिरिति। **कर्मासम्बन्धं विदुषि विशदयति—** तस्यापीति ॥ १४॥

**तव कर्मतत्फलसम्बन्धाभावे, तथा ज्ञानवतश्च तदसम्बन्धे, ममापि किं कर्मणेत्याशङ्क्य कर्मणि कर्तृत्वाभिमानं तत्फले स्पृहां चाकृत्वा मुमुक्षुवत् त्वया कर्म कर्तव्यमेवेत्याह—** नाहमित्यादिना। **नाहं कर्तेत्येवमादि** [२]**एवमा परामृश्यते।** तेन **पूर्वैर्मुमुक्षुभिरनुष्ठितत्वेन हेतुनेत्यर्थः। कर्मैवेत्येवकारार्थमाह—** नेत्यादिना। [३]**त्वंशब्दस्य क्रियापदेन सम्बन्धः। तस्मादित्युक्तमेव स्फुटयति—** पूर्वैरिति। **यदुक्तं किं मम कर्मणेति, तत्र त्वमज्ञो वा, तत्त्वविद्वा? यद्यज्ञस्तदा चित्तशुद्ध्यर्थं कुरु कर्मेत्याह—**यदीति। **द्वितीयं प्रत्याह—**तत्त्वविदिति। **कुरु कर्मेति सम्बन्धः। पूर्वैर्मूढैराचरितमित्येतावता किमिति विवेकवता मया तत् कर्तव्यमित्याशङ्क्याह—**जनकादिभिरिति[४]। **ते** [५]**तावदेवं सम्पाद्य कर्म कृतवन्तः, न तदिदानीमप्रामाणिकत्वादनुष्ठेयमित्याशङ्क्याह—** पूर्वतरमिति॥ १५॥

भाष्यार्कप्रकाशः

ज्ञानाभावादित्यर्थः। ननु भगवतः कृष्णस्य नास्ति कर्मलेपः, नास्ति कर्मफलस्पृहेति ज्ञानमात्रात् कथमन्येषामस्मदादीनां मुक्तिः? अत आह— **मामात्मत्वेनेति**। 'यः कर्मलेपरहितः कर्मफलतृष्णारहितश्चेश्वरः स एवाहम् , अहमेव स ईश्वरः' इति मदभिन्नमात्मानम् आत्माभिन्नं च मां यो वेत्ति - एवमीश्वरात्मदर्शिनः कीदृशी बुद्धिर्भवतीत्यत आह— **नाहं कर्ता न मे कर्मफले स्पृहेति**। ममैवेश्वरत्वादीश्वरस्यैवात्मत्वाच्च 'नाहं कर्ता न मे कर्मफले स्पृहा' इति यो जानातीत्यर्थः। स पुरुषः कर्मभिर्न बध्यते। तस्यापि कर्माणि नित्यानि नैमित्तिकानि काम्यानि निषिद्धानि वा तदाचरितकर्माणि देहाद्यारम्भकाणि न भवन्ति। फलाभिसन्ध्यहङ्काराभावस्य तुल्यत्वादिति भावः। एतेन फलाभिसन्ध्यहङ्कारयोः सत्त्व एव कर्मणां बन्धकत्वम् , न तु तदभावे इति सिद्धान्तितम्॥ १४॥

**एवमिति**। एवंशब्दार्थमाह— **नाहं कर्ता न मे कर्मफले स्पृहेतीति**। पूर्वैरित्यस्यार्थमाह— **अतिक्रान्तैरिति**। प्राचीनैः अतीतैरित्यर्थः। कर्मैवेत्येवकारव्यावर्त्यार्थमाह— **न तूष्णीमासनम् , नापि संन्यास इति**। **तूष्णीमासनं** तूष्णीं स्थितिः, अकरणमिति यावत्। **संन्यासः** आश्रमविशेषः। तस्माच्छब्दार्थमाह— **पूर्वैरप्यनुष्ठितत्वादिति**। के ते पूर्वे? अत आह— **जनकादिभिरिति**। **पूर्वतरं** पूर्वमेवेत्यर्थः। तरप्प्रत्ययार्थमाह— **नाधुना कृतमिति**। कृतशब्दार्थमाह— **निर्वर्तितमिति**। पूर्वैरपि मुमुक्षुभिरेवं ज्ञात्वा कर्म कृतम्। तस्मात् पूर्वैः पूर्वतरं कृतं कर्मैव त्वं कुरु इत्यन्वयः। किमर्थं कर्म कर्तव्यम्? अत आह—**[यद्यज्ञ इति।]** यदि अज्ञः, तर्ह्यात्मशुद्ध्यर्थं चित्तशुद्धये कर्म कुरु, यदि तत्त्ववित् , तर्हि लोकसंग्रहार्थं कर्म कुर्विति॥ १५॥

---

१. 'यद्यज्ञः' इति रा. पा.। २. एवंशब्देनेत्यर्थः। ३. 'तस्मात् त्वं पूर्वैरप्यनुष्ठितत्वाद्' इति भाष्ये त्वंशब्दस्यान्वयार्थमग्रे क्रियापदाभावात् असंगतिमाशङ्क्य, 'कुरु कर्मैव' इत्यत्रत्येन क्रियापदेन संबन्धमाह—त्वमिति। ४. जनकादीनां विवेकित्वं प्रसिद्धमिति उक्ताशङ्कानिरासः। ५. 'तदैव' इति पा.।

**किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।**
**तत् ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६॥**
**कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः।**

**तत्र कर्म चेत् कर्तव्यं त्वद्वचनादेव करोम्यहम् , किं विशेषितेन - पूर्वैः पूर्वतरं कृतमिति? उच्यते— यस्मान्महद् वैषम्यं कर्मणि। कथम्? —** किं कर्मेति। **किं कर्म, किं चाकर्मेति** कवयो **मेधाविनोऽपि** अत्र **अस्मिन् कर्मादिविषये** मोहिताः **मोहं गताः**। तत् **अतः** ते **तुभ्यम् अहं कर्म अकर्म च प्रवक्ष्यामि, यद्** ज्ञात्वा **विदित्वा कर्मादि, मोक्ष्यसे** अशुभात् **संसारात्**॥ १६॥

**न चैतत् त्वया मन्तव्यम् - कर्म नाम देहादिचेष्टा लोकप्रसिद्धम् , अकर्म नाम तदक्रिया तूष्णीमासनम् , किं तत्र बोद्धव्यम्? इति। कस्मात्? उच्यते —** कर्मण इति। कर्मणः **शास्त्रविहितस्य** हि **यस्माद् अपि अस्ति बोद्धव्यम् ,**

आनन्दगिरिकृतव्याख्या

**कर्मविशेषणमाक्षिपति—** तत्रेति। **मनुष्यलोकः सप्तम्यर्थः। कर्मणि महतो वैषम्यस्य विद्यमानत्वात् तस्य पूर्वैरनुष्ठितत्वेन पूर्वतरत्वेन च विशेषितत्वे तस्मिन् प्रवृत्तिस्तव सुकरेति युक्तं विशेषणमिति परिहरति—** उच्यत इति। **कर्मणि देहादिचेष्टारूपे लोकप्रसिद्धे नास्ति वैषम्यमिति शङ्कते—** कथमिति। **विज्ञानवतामपि कर्मादिविषये व्यामोहोपपत्तेः सुतरामेव तव तद्विषये व्यामोहसम्भवात् तदपोहार्थमाप्तवाक्यापेक्षणादस्ति कर्मणि वैषम्यमित्युत्तरमाह—**किं कर्मेति। तत्ते कर्मेत्यत्राकारानुबन्धेनापि[1] **पदं छेत्तव्यम्। कर्मादिप्रवचनस्य प्रयोजनमाह—** यज्ज्ञात्वेति। **तत् कर्माकर्म चेति सम्बन्धः।** अतो **मेधाविनामपि यथोक्ते विषये व्यामोहस्य सत्त्वादित्यर्थः** ॥ १६॥

**कर्मणोऽकर्मणश्च प्रसिद्धत्वात् तद्विषये न किञ्चिद् बोद्धव्यमिति चोद्यमनूद्य निरस्यति—** न चेति। **तत्र हेत्वाकाङ्क्षापूर्वकमनन्तरं श्लोकमवतारयति—** कस्मादिति। **त्रिष्वपि कर्माकर्मविकर्मसु बोद्धव्यमस्तीति यस्मादध्याहारः, तस्मान्मदीयं प्रवचनमर्थवदिति योजना। बोद्धव्यसद्भावे हेतुमाह—**यस्मादिति। **त्रितयं प्रकृत्य अन्यतमस्य गहनत्ववचनमयुक्तमित्याशङ्क्य , अन्यतमग्रहणस्योपलक्षणार्थत्वमुपेत्य**

भाष्यार्कप्रकाशः

**किमिति। त्वद्वचनादेवेति।** ईश्वरस्य तवादेशेनेत्यर्थः। न हि पूर्वाचार ईश्वरादेशादधिक इति भावः। पूर्वैः पूर्वतरं कृतमिति **विशेषितेन** विशेषणेन, कर्मण इति भावः, किं कर्मणः पूर्वैः पूर्वतरं कृतमिति विशेषणेन? न किमपि फलमित्यर्थः। यस्मात् कर्मणि महद्वैषम्यमस्ति तस्मात् पूर्वैः पूर्वतरं कृतमिति विशेषितं कर्म। कथं वैषम्यमित्यतः श्लोकोऽयं प्रवृत्त इत्याह– **कथं किमिति।** यदेव पूर्वैः पूर्वतरं कृतं तत् कर्मेति मेधाविनोऽपि जानीयुः, न तु स्वबुद्ध्या - इदं कर्म इदमकर्मेति ज्ञातुं क्षमन्त इत्यर्थः। सर्वज्ञोऽहं तु तत् पूर्वैः पूर्वतरं कृतं कर्माकर्म च तुभ्यं वक्ष्यामि, तज्ज्ञानफलमाह— **यदिति**॥ १६॥

**कर्मण इति।** किं तत्र बोद्धव्यमित्येतत् त्वया न मन्तव्यमित्यन्वयः। कस्मान्न मन्तव्यमित्यत उच्यते— **कर्मण इति** श्लोकः। कर्मणः कर्मसम्बन्धि बोद्धव्यं ज्ञातव्यं तत्त्वमस्ति। एवमुत्तरत्रापि। नैतावता त्वया कर्मणोऽकर्मणो विकर्मणो वा तत्त्वं ज्ञातम् , किन्तु ज्ञातव्यमवशिष्टमेवेत्यर्थः।

अत्र - कर्म मोक्षसाधनभूतं, विकर्म विविधं नित्यनैमित्तिककाम्यादिरूपं कर्म, अकर्म ज्ञानमिति **रामानुज**भाष्यं तुच्छम् , नित्यादिविविधकर्मणामेव फलाभिसन्धिरहितानां परम्परया मोक्षसाधनकर्मत्वात् कर्मविकर्मणोर्भेदस्य दुर्वचत्वात्। नञः [2]स्वप्रतियोग्यभावबोधनस्वाभाव्याद् [3]अहननादाविवात्रापि कर्माभावरूपार्थ एव भवितुमर्हति। नञो विरोधाद्यर्थास्तु लाक्षणिका एव। न हि

१. 'तत्ते कर्मे'त्यत्र अकर्मेत्यपि पदच्छेदः, किं कर्म किमकर्मेति प्रक्रमानुरोधादित्यर्थः। २. स्वप्रतियोगीति। स्वसंबन्धीत्यर्थः। ३. 'अहननम्' इत्यादाविवेत्यर्थः। हननाभावः इति हि तदर्थः।

**अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ १७॥**
**कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।**
**स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८॥**

**बोद्धव्यं चास्त्येव** विकर्मणः **प्रतिषिद्धस्य। तथा** अकर्मणश्च **तूष्णीम्भावस्य बोद्धव्यम् । अस्तीति त्रिष्वप्यध्याहारः कर्तव्यः। यस्माद्** गहना **विषमा दुर्ज्ञाना**[१]**; कर्मण इत्युपलक्षणार्थम् ; कर्मादीनां कर्माकर्मविकर्मणां** गतिः **याथात्म्यम् , तत्त्वमित्यर्थः ॥ १७॥**

**किं पुनस्तत्त्वं कर्मादेः यद् बोद्धव्यं वक्ष्यामीति प्रतिज्ञातम्? उच्यते—** कर्मणीति। कर्मणि **क्रियत इति कर्म**

आनन्दगिरिकृतव्याख्या

**विवक्षितमर्थमाह—** कर्मादीनामिति ॥ १७॥

**उत्तरश्लोकमाकाङ्क्षापूर्वकमुपादत्ते—** किं पुनरिति। **प्रथमपादस्याक्षरोत्थमर्थं कथयति—** कर्मणीत्यादिना। **द्वितीयपादस्यापि**

भाष्यार्कप्रकाशः

मुख्यार्थसम्भवे लाक्षणिकार्थस्वीकारो न्याय्यः। **किञ्च** कर्मविरोधित्वाज्ज्ञानमकर्मेति वक्तुमपि तवाशक्यम् , तव मते ज्ञानकर्मणोर्विरोधाभावात्। ज्ञानपूर्वकं कर्मानुष्ठेयमिति त्वयाऽसकृदुक्तत्वात्। नापि नञोऽत्र सादृश्यमर्थः, कर्मज्ञानयोः सादृश्याभावात्। न च तदन्यत्वमत्रार्थः, कर्मणोऽन्यस्य द्रव्यादेः सत्त्वेन ज्ञानस्यैवाश्रयणे मानाभावात्। नापि तदल्पत्वमर्थः, कर्मणः उत्कृष्टत्वाज्ज्ञानस्य। नापि प्रकरणाज्ज्ञानलाभः, कर्मप्रकरणत्वादस्य। 'काङ्क्षन्तः कर्मणां सिद्धि'मित्यादिना हि कर्म प्रकृतमिति ॥ १७॥

**कर्मणीति।** यः कर्मण्यकर्म पश्येत् , यः अकर्मणि च कर्म पश्येत् , मनुष्येषु स बुद्धिमान् युक्तः कृत्स्नकर्मकृच्च भवतीत्यन्वयः।

**अत्र तावदिदं वेद्यम्—** 'सप्तम्यधिकरणे च' इति सूत्रेणाधिकरणे सप्तमी विहिता। 'आधारोऽधिकरण'मिति सूत्रेणाधारस्याधिकरणसंज्ञा विहिता। स चाधारस्त्रिविधः— औपश्लेषिको वैषयिकोऽभिव्यापकश्चेति। क्रमेण कट्यामास्ते[कटे आस्ते], मोक्षे इच्छाऽस्ति, सर्वस्मिन्नात्माऽस्तीत्युदाहरणानि। एवं स्थिते 'कर्मणि' 'अकर्मणी'ति कर्माकर्मणोर्विहितायाः सप्तमीविभक्तेर्वैषयिक आधारोऽर्थ इति **केचित्**। अभिव्यापकाधारोऽर्थ **इत्यन्ये**। तत्राद्यपक्षे श्लोकस्यायमर्थः— यः **कर्मणि** क्रियत इति कर्म देहादिचेष्टा, तस्मिन् विषये **अकर्म** कर्माभावम् आत्मानमिति यावत् , **पश्येद्** जानीयात् , **अकर्मणि** देहादिव्यापारोपरमे कर्माभावे कर्म च यः पश्येत् , मनुष्येषु मध्ये स मनुष्यः बुद्धिमान् , युक्तः, **कृत्स्नकर्मकृत्** कृतकृत्य इत्यर्थः, भवतीति।

अयं भावः— लोक आत्मानं कर्मत्वेन, देहादिव्यापारोपरममकर्मत्वेन च गृह्णाति भ्रान्त्या। यथा मन्दान्धकारगतं [२]गुणं सर्पत्वेन, सर्पं च गुणत्वेन गृह्णाति तिमिराद्युपहतदृष्टिः पुरुषः, तद्वत्। एवं स्थिते यः आत्मानमात्मत्वेन देहादिव्यापारोपरमं कर्मत्वेन च गृह्णाति स बुद्धिमत्त्वादिगुणशाली। यथा गुणं गुणत्वेन सर्पं सर्पत्वेन च जानन् पुरुषो बुद्धिमान् , तद्वत्। न च कर्माभावस्य कथमात्मत्वमिति वाच्यम् , कल्पिताभावस्याधिष्ठानात्मकत्वात् कर्मण आत्मनि कल्पितत्वेन कर्माभाव आत्मैवेति। यथा गुणकल्पितसर्पाभावो गुण एव, तद्वदिति। तस्मादज्ञजनाभिमतं कर्माकर्मेति, अकर्म कर्मेति च विद्वान् जानीयात् इति।

अस्मिन्नेव पक्षेऽर्थान्तरमवगम्यते। तथाहि— **कर्मणि** कर्माश्रयत्वात् कर्तृत्वेनाज्ञजनाभिमते जीवे विषये, **अकर्म** न विद्यन्ते कर्माणि क्रिया यस्मिंस्तदकर्म निष्क्रियं ब्रह्म यः पश्येत्। यमज्ञजनः कर्तारं संसारिणं जीवं मन्यते, तमात्मानमकर्त्रसंसारि ब्रह्म यः पश्यतीत्यर्थः। 'अयमात्मा ब्रह्मे'ति श्रुतेरिति भावः। तथा अकर्मणि ब्रह्मणि विषये च कर्म यः जीवं पश्येत्। अन्यत्वेन परोक्षत्वेनेश्वरत्वेन चाज्ञजनाभिमतं ब्रह्म, स्वत्वेन प्रत्यक्षत्वेन प्रत्यक्त्वेन चात्मानं यः पश्यतीत्यर्थः। 'तत्त्वमसी'ति श्रुतेरिति भावः। एवं जीवब्रह्मणो-

---

१. 'दुर्विज्ञेया' 'दुर्ज्ञेया' इति पा.। २. गुणः = रज्जुः।

**व्यापारमात्रम् , तस्मिन् कर्मणि,** अकर्म **कर्माभावं यः पश्येत् ,** अकर्मणि च **कर्माभावे, कर्तृतन्त्रत्वात् प्रवृत्तिनिवृत्त्योः, - वस्त्वप्राप्यैव हि सर्वं एव क्रियाकारकादिव्यवहारोऽविद्याभूमावेव - कर्म यः** पश्येत् **पश्यति, स बुद्धिमान् मनुष्येषु ,**

आनन्दगिरिकृतव्याख्या

**शब्दप्रकाशितमर्थं निर्दिशति—**अकर्मणि चेति। **कर्माभावे यः कर्म पश्यतीति सम्बन्धः। प्रवृत्तेरेव कर्मत्वात् , निवृत्तेस्तदभावत्वात् तत्र कथं कर्मदर्शनमित्याशङ्क्य , द्वयोरपि कारकाधीनत्वेनाविशेषमभिप्रेत्याह—** कर्तृतन्त्रत्वादिति। **प्रवृत्ताविव निवृत्तावपि कर्मदर्शनमविरुद्ध-मिति शेषः। ननु निवृत्तेर्वस्त्वधीनत्वात् कारकनिबन्धनाभावान्न तत्र कर्मदर्शनं युज्यते? तत्राह—** वस्त्विति। **क्रियाकारकफलव्यवहारस्य**

भाष्यार्कप्रकाशः

ब्रह्मजीवयोः चात्यन्ताभेददर्शी बुद्धिमत्त्वादिगुणशालीति।

कर्माश्रयत्वानाश्रयत्वाभ्यां, तत्प्रयुक्तसुखदुःखभोगलक्षणसंसारवत्त्वतदभावाभ्यां च यो व्यावहारिकोऽस्ति जीवेश्वरभेदः, न स पारमार्थिकः, परमार्थतः कर्मतत्फलयोरभावात् , 'एकमेवाद्वितीयं ब्रह्मे'ति श्रुतेः। व्यवहारतोऽपि कर्मतत्फले जीवस्यौपाधिकत्वेनो-पाधिगते एव, न तु स्वरूपगते, चिदेकरसत्वाज्जीवस्येति निष्क्रियमविक्रियं च ब्रह्मैव जीव इति भावः। न च - कर्माकर्मादि-तत्त्वकथनप्रकरणे जीवब्रह्मैक्यकथनमसङ्गतमिति - वाच्यम् , कर्ममात्रमनात्मगतमेव, न त्वात्मगतम् , आत्मनो निष्क्रियब्रह्मरूप-त्वादिति वचनस्य प्रकृतसङ्गतत्वात्।

अर्थानुपपत्तेर्लक्षणाबीजस्य सत्त्वादत्र कर्मशब्देन तदाश्रयो जीवो लक्ष्यत इति न लक्षणाश्रयणस्य दुष्टत्वमिति मन्तव्यम्।

तृतीयोऽप्यर्थोऽत्रावगम्यते। तथाहि— **कर्मणि** कर्माश्रये देहादिसङ्घाते विषये **अकर्म** ब्रह्म यः पश्येत् , सङ्घातस्य ब्रह्मणि कल्पितत्वेन सङ्घातं ब्रह्माभिन्नं यः पश्यतीत्यर्थः। कल्पितस्याधिष्ठानानतिरेकादिति भावः। अत एव 'सर्वं खल्विदं ब्रह्मे'ति श्रूयते। तथा **अकर्मणि** उपरतव्यापारे च सङ्घाते विषये **कर्म** तूष्णीमासनरूपकर्माश्रयं यः पश्येत् , उपरतव्यापारमपि सङ्घातं तूष्णीमासनरूप-कर्माश्रयं यः पश्यतीत्यर्थः। सङ्घातस्य निष्क्रियत्वायोगादिति भावः। स बुद्धिमत्त्वादिगुणशालीति।

[१]द्वितीयपक्षे तु श्लोकस्यायमर्थः— यः **कर्मणि** कर्माश्रये कर्तरि **अकर्म** कर्मराहित्यं पश्येत् , **अकर्मणि** कर्माभावे देहादिचेष्टोपरमे **कर्म** कर्मत्वं च पश्येत् , स बुद्धिमत्त्वादिगुणशालीति। **अयं भावः**— आत्मनि कर्म समवेततया वर्तत इति लोक आत्मानं कर्माश्रयत्वेन कर्तारं मन्यते। तस्मिंश्च कर्तृत्वेनाभिमते आत्मनि प्राज्ञः पुनः कर्मराहित्यं पश्येत्। 'निष्कलं निष्क्रियं शान्त'मिति श्रुतेरविक्रियत्वादियुक्तितश्चाकर्तारमेवात्मानं मन्यते विद्वान्। कर्म च देहादिसङ्घातगतमेव मन्यते, न त्वात्मगतम्। तथा व्यापारवद् व्यापारोपरमोऽपि कर्मैवेति कृत्वा मूढैरकर्मत्वेनाभिमतं व्यापारोपरमं कर्मत्वेनैव प्रतिपद्यते प्राज्ञ इति।

न चैवं 'कर्तर्यकर्म यः पश्येदि'त्येव किमिति नोक्तवान् व्यास इति वाच्यम् , यत्र लोकाः कर्म पश्यन्ति तत्र बुद्धिमानकर्म पश्येदिति बोधयितुं कर्मणीत्युक्तत्वात्। कर्तृशब्दात् कर्माश्रयत्वप्रतीतिर्झटिति भवेदिति भावः इति। यथा प्रवृत्तिस्तथा निवृत्तिरपि कर्मैव, उभयमपीदमनात्मदेहादिसङ्घातगतमेव, अविद्यया चात्मन्यध्यस्तमिति तत्पुनरात्मैव, कल्पितस्याधिष्ठानात्मत्वादिति कृत्वा निष्क्रियोऽविक्रियश्चात्मेति पक्षद्वयसङ्गृहीतार्थः।

अथ भाष्यं व्याख्यायते— विहितप्रतिषिद्धतदुभयभिन्नसर्वकर्मसङ्ग्रहार्थमाह— **व्यापारमात्रमिति।** नञोऽभावार्थकत्वादाह— **कर्माभाव इति।** कर्माभावे कर्म यः पश्येदित्यन्वयः। ननु कर्माभावे कथं कर्मदर्शनम्? अत आह— **कर्त्रीति।** प्रवृत्तिनिवृत्त्योः कर्तृतन्त्रत्वात् , यत् कर्तृतन्त्रं तत् कर्मेति व्याप्त्या प्रवृत्तिवन्निवृत्तिरपि कर्मैवेति कृत्वा निवृत्तिरूपे कर्माभावेऽपि कर्मदर्शनं युक्तमिति भावः। ननु प्रवृत्तेः कारकाधीनत्वादस्तु कर्मत्वं, वस्त्वधीनाया निवृत्तेः कथं पुनः कर्मत्वम्? अत आह— **वस्त्विति। हि** यस्मात् वस्तु परमार्थतत्त्वमप्राप्यैव अविद्याभूमावेव सर्वः क्रियाकारकादिव्यवहारः, अस्तीति शेषः। हिः प्रसिद्धाविति वा। सर्वोऽपि क्रियाकारक-फलव्यवहारोऽविद्यादशायामेव प्रवृत्त इति कृत्वा प्रवृत्तिवन्निवृत्तेरपि वस्तुसंस्पर्शशून्यत्वेन वस्त्वनधीनत्वाद् युक्तं प्रवृत्तिलक्षणायां

१. अधिकरणसप्तमीपक्षे इत्यर्थः।

**स** युक्तो **योगी च,** कृत्स्नकर्मकृत् **समस्तकर्मकृच्च सः इति स्तूयते कर्माकर्मणोरितरेतरदर्शी।**

**ननु किमिदं विरुद्धमुच्यते— कर्मण्यकर्म यः पश्येदिति, अकर्मणि च कर्मेति। न हि कर्माकर्म स्याद् , अकर्म वा कर्म। तत्र विरुद्धं कथं पश्येद् द्रष्टा? न ; अकर्मैव परमार्थतः सत् कर्मवदवभासते मूढदृष्टेर्लोकस्य। तथा कर्मैव अकर्मवत्। तत्र यथाभूतदर्शनार्थमाह भगवान्—**कर्मण्यकर्म यः पश्येदित्यादि। **अतो न विरुद्धम्। बुद्धिमत्त्वा-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

श्लोकस्य तात्पर्यापरिज्ञानात् कश्चिद् विरोधं शङ्कते— **ननु किमिदं विरुद्धमिति**। कर्मणीति किं विषयसप्तमी, किं वाऽधिकरणसप्तमी? प्रथमे अन्याकारं ज्ञानमन्यविषयमिति विरोधः स्फुट एव। द्वितीयेऽपि कर्माकर्मणोः परस्परविरोधादधि-करणाधिकर्तव्यभावो विरुद्ध एवेत्यर्थः। विषयसप्तम्यङ्गीकारेण सिद्धान्ती परिहरति— **न, अकर्मैव परमार्थत इत्यादिना**। यथा 'यदिदं रजतम् इत्यभात् , तत् शुक्तिकाशकलं पश्ये'दिति भ्रमसिद्धरजतलक्षणविषयानुवादेन तदधिष्ठानमुपदिश्यते, तथा भ्रमसिद्धकर्मलक्षणविषयानुवादेन तदधिष्ठानभूतं कर्मरहितमविक्रियं ब्रह्मोपदिश्यते। ततो न विरोध इत्यर्थः। इतश्चात्र

आनन्दगिरिकृतव्याख्या

**सर्वस्याविद्यावस्थायामेव प्रवृत्तत्वाद् वस्तुसंस्पर्शशून्यत्वात् प्रवृत्तिवद् निवृत्तावपि यः कर्म पश्यति स मनुष्येषु बुद्धिमानिति सम्बन्धः। कर्मण्यकर्म, अकर्मणि च कर्म पश्यतो बुद्धिमत्त्वं युक्तत्वं समस्तकर्मकृत्त्वं च कथमित्याशङ्क्याह—** इति स्तूयत इति।

**श्लोकस्य शब्दोत्थेऽर्थे दर्शिते तात्पर्यार्थापरिज्ञानान्मिथो विरोधं शङ्कते—** नन्विति। **कथमिदं विरुद्धमित्याशङ्क्य कर्मणीति विषयसप्तमी वा स्यादधिकरणसप्तमी वेति विकल्प्य, आद्येऽन्याकारं ज्ञानमन्यालम्बनमिति स्पष्टो विरोधः स्यादित्याह—** न हीति। **अन्यस्यान्यात्मताऽयोगात् कर्माकर्मणोरभेदासम्भवादकर्माकारं कर्मालम्बनं ज्ञानमयुक्तमित्यर्थः। द्वितीयं दूषयति—** तत्रेति। **कर्मण्यधिकरणे ततो विरुद्धमकर्म कथमाधेयं द्रष्टा द्रष्टुमीष्टे ? न हि कर्माकर्मणोः मिथो विरुद्धयोराधाराधेयभावः सम्भवतीत्यर्थः। विषयसप्तमीमभ्युपेत्य सिद्धान्ती परिहरति—** [1]न, अकर्मैवेति। **लोकस्य** मूढदृष्टेः **विवेकवर्जितस्य परमार्थतो ब्रह्म** अकर्म **अक्रियमेव सद् भ्रान्त्या कर्मसहितं क्रियावदिव प्रतिभातीत्यक्षरार्थः। परस्पराध्यासमभ्युपेत्योक्तम्—** तथेति। **यथा खल्वकर्म ब्रह्म कर्मवदुपलभ्यते, तथा** कर्म **सक्रियमेव द्वैतम् अक्रिये ब्रह्मण्यधिष्ठाने संसृष्टं तद्वद् भातीत्यक्षरयोजना। कर्माकर्मणोरितरेतराध्यासे सिद्धे सम्यग्दर्शनसिद्ध्यर्थं भगवतो वचनमुचितमित्याह—** तत्रेति। **यथा - 'यदिदं रजतमिति प्रतिपन्नं तदिदानीं शुक्तिशकलं पश्य' इति भ्रमसिद्धरजतरूपविषया-नुवादेन तदधिष्ठानं शुक्तिमात्रमुपदिश्यते, तथा भ्रमसिद्धकर्माद्यात्मकविषयानुवादेन तदधिष्ठानं कर्मादिरहितं कूटस्थं ब्रह्म भगवता**

भाष्यार्कप्रकाशः

देहादिचेष्टायामिव निवृत्तिलक्षणे तदुपरमेऽपि कर्मत्वदर्शनं बुद्धिशालिन इति भावः। परमार्थतत्त्वं ब्रह्मैकमेव वस्तु, तच्चाद्वयमसङ्गं चेति न तदधीनत्वं निवृत्तेः। न च देहादिरपि वस्त्वेवेति वाच्यम् , 'तत् सत्यमतोऽन्यदार्त'मिति श्रुत्या ब्रह्मण एकस्यैव सत्यत्वेन वस्तुत्वात्। वस्तु हि सत्यम् , असत्यत्वादवस्तुन इति तत्त्वम्। **कृत्स्नकर्मकृदिति**। आत्मज्ञस्य कृतकृत्यत्वेन कर्तव्याभावादिति भावः। **इतरेतरदर्शीति**। इतरस्मिन्नितरत् पश्यतीति तथोक्तः। कर्मण्यकर्मदर्शी, अकर्मणि कर्मदर्शी चेत्यर्थः।

अत्राक्षिपति— **नन्वित्यादिना**। विरुद्धाभिधानमेवाभिनीय दर्शयति— **कर्मणीत्यादिना**। विरोधमेव दर्शयति— **न हीत्यादिना**। अत्रापरोऽप्यस्ति विरोधः— यः कर्म कर्म जानाति अकर्म चाकर्म स न बुद्धिमान् , किन्तु यः कर्माकर्म जानाति, अकर्म च कर्म जानाति, स एव बुद्धिमानिति। न हि विरुद्धद्रष्टा क्वापि बुद्धिमान् भवेत् , बुद्धिमान् वा विरुद्धं पश्येत्। आक्षेपं परिहरति— **नेत्यादिना**। परमार्थतोऽकर्मैव सन्मूढदृष्टेर्लोकस्य कर्मवदवभासते, तथा परमार्थतः कर्मैव मूढदृष्टेर्लोकस्याकर्मवदवभासते, **तत्र** विपर्यये **यथाभूतदर्शनार्थं** सत्यज्ञानाय भगवान् 'कर्मण्यकर्म यः पश्येदि'त्याद्याहेत्यन्वयः। **अतो** हेतोः कर्मण्यकर्मदर्शनमकर्मणि च कर्मदर्शनं

१. 'ननु अकर्मैव' इति भाष्ये टीकायां च पा.।

**द्युपपत्तेश्च। बोद्धव्यमिति च यथाभूतदर्शनमुच्यते। न च विपरीतज्ञानाद् अशुभान्मोक्षणं स्यात्। 'यज्ज्ञात्वा मोक्ष्यसे ऽशुभा'दिति चोक्तम्। तस्मात् कर्माकर्मणी विपर्ययेण गृहीते प्राणिभिः। तद्विपर्ययग्रहणनिवृत्त्यर्थं भगवतो वचनम्—** कर्मण्यकर्म यः **इत्यादि।**

**न चात्र कर्माधिकरणम् अकर्मास्ति, कुण्डे बदराणीव। नाप्यकर्माधिकरणं कर्मास्ति, [1]कर्माभावत्वादकर्मणः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

भ्रमानुवादेनाध्यस्तस्य कर्मादेः स्वरूपमधिष्ठानमुच्यत इत्याह— **बुद्धिमत्त्वाद्युपपत्तेश्चेति**। अविक्रियाद्धि ब्रह्मणोऽन्यत् सर्वं मायामात्रम्। ततो नान्यज्ञानिनां बुद्धिमत्त्वाद्युपपत्तिः। अतो बुद्धिमत्त्वाद्युपपत्तेरविक्रियब्रह्मज्ञानमेव विवक्षितमित्यर्थः। बोधशब्दस्य सम्यग्ज्ञाने प्रसिद्धत्वात् कर्मादेः स्वरूपं बोद्धव्यमस्तीत्यपि सम्यग्ज्ञानोपदेशं गमयतीत्याह— **बोद्धव्यमिति चेति**। फलवचनमपि सम्यग्ज्ञानोपदेशं गमयतीत्याह— **न च विपरीतज्ञानादिति**।

अधिकरणसप्तमीपक्षे यद् दूषणमुक्तम्, तदनङ्गीकारपराहतमित्याह— **न चात्र कर्माधिकरणमिति**। अनुपलम्भादित्यर्थः। अकर्मणश्च तुच्छत्वादप्यधिकरणत्वं न सम्भवतीत्याह— **नाप्यकर्मेति**। यस्मान्निरूप्यमाणेऽधिकरणाधिकर्तव्यभावो

आनन्दगिरिकृतव्याख्या

**व्यपदिश्यते। तथा च भगवद्वचनमविरुद्धमित्याह—** अत इति। **इतश्चाध्यारोपितकर्माद्यनुवादपूर्वकं तदधिष्ठानस्य कर्मादिरहितस्य निर्विशेषस्य ब्रह्मणो भगवता बोध्यमानत्वान्न तत्र विरोधाशङ्कावकाशो भवतीत्याह—** बुद्धिमत्त्वादीति। **कूटस्थाद् ब्रह्मणोऽन्यस्य सर्वस्य मायामात्रत्वादन्यज्ञानाद् बुद्धिमत्त्वयुक्तत्वसर्वकर्मकृत्त्वानामनुपपत्तेः, अत्र च 'स बुद्धिमानि'त्यादिना बुद्धिमत्त्वादिनिर्देशाद् ब्रह्मज्ञानादेव तदुपपत्तेः सर्वविक्रियारहितब्रह्मज्ञानमेव विवक्षितमित्यर्थः। बोधशब्दस्य सम्यग्ज्ञाने प्रसिद्धत्वात्, कर्माकर्मविकर्मणां स्वरूपं बोद्धव्यमस्तीति वदता सम्यग्ज्ञानोपदेशस्य विवक्षितत्वादपि कूटस्थं ब्रह्मात्राभिप्रेतमित्याह—** बोद्धव्यमिति चेति। **फलवचनपर्यालोचनायामपि कूटस्थं ब्रह्मात्राभिप्रेतं प्रतिभातीत्याह—** न चेति। **सम्यग्ज्ञानाधीनफलमत्र न श्रुतमित्याशङ्क्याह—** यज्ज्ञात्वेति। **अध्यारोपापवादार्थं भगवद्वचनम् अविरुद्धमित्युपपादितमुपसंहरति—** तस्मादिति। **तद्विपर्ययेत्यत्र तच्छब्देन प्राणिनो गृह्यन्ते।**

**विषयसप्तमीपरिग्रहेण परिहारमभिधाय, अधिकरणसप्तमीपक्षे दर्शितं दूषणमनङ्गीकारेण परिहरति—** न चेति। **व्यवहारभूमिः** अत्रे**त्युच्यते । योग्यत्वे सति अनुपलब्धेरित्यर्थः। अकर्माधिकरणं कर्म न सम्भवतीत्यत्र हेत्वन्तरमाह—**कर्माभावत्वादिति। **न हि**

भाष्यार्कप्रकाशः

न विरुद्धमित्याह— **अत इति।** ननु भगवता यथाभूतदर्शनार्थमिदमुक्तमिति कथमवगम्यते? तत्राह— **बुद्धिमत्त्वादीति।** [2]बुद्धिमत्त्वाद्युपपत्तेश्च यथाभूतं च बोद्धव्यमित्युच्यते। भगवतेति शेषः। [3]द्वितीयश्चः एवार्थकः। यो हि यथाभूतं पश्यति स एव बुद्धिमान् युक्तश्च भवति। यथा यथाभूतरज्जुद्रष्टा, प्रकृते च कर्माकर्मणोरितरेतरदर्शी बुद्धिमत्त्वादिगुणवत्त्वेनोक्त इति कर्माकर्मणोरितरेतरदर्शनमिदं यथाभूतदर्शनमेव। अन्यथा हि कर्माकर्मैतरेतरदर्शिनोऽस्योक्तं बुद्धिमत्त्वादिकमनुपपन्नं स्यादित्यभिप्रायः। फलबलादपीदं यथाभूतदर्शनमेवेत्यवगम्यत इत्याह— **न चेति।** विपरीतज्ञानाद्धेतोः पुरुषस्याशुभान्मोक्षणं नैव स्यात्, इह च 'यज्ज्ञात्वा मोक्ष्यसेऽशुभाद्' इत्युक्तम्। तस्मात् कर्माकर्मणोरितरेतरदर्शनस्याशुभमोक्षहेतुत्वात् तद्दर्शिनश्च बुद्धिमत्त्वाद्युपपत्तेरित्यर्थः।

ननु 'कर्माकर्मणी विपर्ययेण गृहीते प्राणिभि'रित्युक्तमयुक्तम्, यतस्ते देहेन्द्रियादिचेष्टारूपं कर्म कर्मेति, तदभावमकर्मेति च अविपर्ययेणैव गृहीतवन्त इत्यत आह— **न चेति। अत्र** लोके बदरीफलानां **कुण्डमिव** घट इव, कर्मणामधिकरणमकर्म नास्ति, तथा अकर्माधिकरणं कर्मापि नास्ति। तत्र हेतुमाह— **अभावत्वादिति**। अकर्मणः कर्माभावस्याभावरूपत्वेनासत्त्वात् कथं तस्य

१. 'अभावत्वादकर्मणः' इति रा.पा.। २. एतन्मते 'बुद्धिमत्त्वाद्युपपत्तेश्च बोद्धव्यमिति च यथाभूतदर्शनमुच्यते' इति एकं वाक्यम्। तत्रान्वयं प्रदर्शयति— **बुद्धिमत्त्वेति**। ३. तथा च **यथाभूतं च** यथाभूतमेवेत्यर्थः।

**अतो विपरीतगृहीते एव कर्माकर्मणी लौकिकैः। यथा मृगतृष्णिकायामुदकम् , शुक्तिकायां वा रजतम्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

न सम्भवति, तस्मात् कर्मादेरध्यास एवेत्याह— **अतो विपरीतेति**।

आनन्दगिरिकृतव्याख्या

**तुच्छस्याधिकरणं[1] क्वचिद् [2]दृष्टमिष्टं चेत्यर्थः। निरूप्यमाणे कर्माकर्मणोरधिकरणाधिकर्तव्यभावासम्भवे फलितमाह—** अत इति। **शास्त्र-परिचयविरहिणामध्यारोपमुदाहरति—** यथेति।

भाष्यार्कप्रकाशः

कर्माधिकरणत्वम्? कथं वा कर्मणस्तदधिकरणम्? अतो हेतो लौकिकैर्विपरीतगृहीते एव कर्माकर्मणी इति। तत्र दृष्टान्तमाह— **यथा मृगतृष्णिकायामुदकमिति**। नैको दृष्टान्तोऽर्थसिद्धयेऽलमिति मन्वानं प्रत्याह दृष्टान्तान्तरम्— **शुक्तिकायां रजतमिति**।

**ननु** बुद्धिमानेव निवृत्तिलक्षणे कर्माभावे कर्म पश्यति, प्रवृत्तिलक्षणे च कर्मणि कर्माभावं पश्यतीति कर्माकर्मविपर्ययदर्शी, न तु लौकिका इति चेत् , **मैवम्**। प्रवृत्तिलक्षणं निवृत्तिलक्षणं चेत्युभयात्मकं कर्म लौकिकैरात्मनि मृगतृष्णिकायामुदकमिवाध्यस्तम्। ततश्चात्मा कर्तेति, आत्मा तूष्णीमास्ते इति च प्रत्येति लोकः। तदेवमकर्मण्यात्मनि कर्मप्रत्यय एको विपर्ययः, तूष्णीमासनरूपे कर्मण्यकर्मप्रत्ययोऽन्य इति।

**ननु** अभावत्वादकर्मणो नास्ति कर्माधिकरणत्वम् , कर्माधिकरणकत्वं चेति यदुक्तं भाष्यकारैः, तदसत्। आत्मत्वेनाकर्मणः भावरूपत्वादिति चेत् , **सत्यम्**। कर्माभावो यद्यात्मत्वेन मतो लौकिकैस्तर्हि भावरूप एव स्यात् , न तु तथा मत इति।

**ननु** लौकिकैः भावरूपे देहे अथवा भावरूपे आत्मनि कर्म तदभावश्च गृह्यते, न तु कर्माभावे कर्मेति कथं विपर्ययदर्शित्वं तेषामिति चेत् , **उच्यते**— यत्र कर्माभावस्तत्रैव कर्म गृहीतवन्त इति कृत्वा कर्माभावे कर्म गृहीतवन्त इत्युक्तमिति।

**अथवा— ननु** लौकिका अकर्मणि कर्म, कर्मण्यकर्म च विपर्ययेण पश्यन्तीत्युक्तम् , **तदसत्।** अकर्मणि कर्मणः कर्मण्यकर्मणश्च सत्त्वादित्यत आह— **न चेति**। बदराणामधिकरणं कुण्डमिव कर्मणोऽधिकरणमकर्म नैवास्ति। कर्म चाकर्मणो ऽधिकरणं न भवत्येव। कुतः? अकर्मणोऽभावत्वादिति। नन्वकर्मणोऽभावत्वे सुतरां कथं लौकिकानामपि तद्ग्रहणम्? अत आह— **मृगतृष्णिकायामिति**। मृगतृष्णिकायामुदकं, शुक्तिकायां रजतं चात्यन्तासदपि यथा भ्रान्तैर्गृह्यते, तद्वदिति।

न च[**ननु** ] अकर्मण्यकर्म कर्मणि कर्म च पश्यति बुद्धिमानित्यत्रापि तुल्यः स दोषः, अकर्मणोऽभावत्वात् कथमभावे ऽभावदर्शनमिति चेत् , **मैवम्।** बुद्धिमदभिमतस्याकर्मणः आत्मत्वेनाभावत्वाभावात्। न च - आत्मन्यात्मानं पश्यतीति कथमेकस्यैवात्मन आधाराधेयभाव इति - वाच्यम् , विषयसप्तमीत्वाद् आत्मविषये आत्मानं पश्यतीत्यर्थाद् आत्मानमात्मानं पश्यतीति फलितार्थाच्च।

**ननु** त्वयाऽऽदौ सप्तम्यन्तरमाश्रित्याधाराधेयभाव एवोक्त इति चेत्? **सत्यम्।** आत्मनि यदसत्त्वं कर्मणां तदेव कर्माभावोऽस्तीत्यनेन विवक्षितत्वात् तत्रेति। न च भाष्यविरोधस्तवेति वाच्यम् , तात्पर्यैक्यात्। **किञ्च** अनुपलब्धिप्रामाण्याद् अभाव इति कश्चित् पदार्थोऽस्तीति कतिचि**दद्वैतिनः।** अभावस्य सत्ताऽयोगान्नास्तीति **परे**। तत्र प्रथमपक्षाश्रयणे भूतले घटाभाववदात्मनि कर्माभावोऽस्त्येवेति नाधाराधेयभावानुपपत्तिरात्मकर्मणोः। द्वितीयपक्षे तु तदनुपपत्तिरस्त्येव। **भाष्यकारास्तु** द्वितीयपक्षमेवावलम्ब्य विषयसप्तमीं स्वीचक्रुरिति दिक्।

**अयमत्र निष्कर्षः**— यद् वस्तुतोऽकर्म तल्लौकिकैः कर्मेति गृहीतम्। तत्र च कर्मणि विषये पुनर्बुद्धिमतोऽकर्मज्ञानमस्ति। यद् वस्तुतः कर्म तल्लौकिकैरकर्मेति गृहीतम्। तत्र चाकर्मणि विषये पुनर्बुद्धिमतोऽस्ति कर्मज्ञानमिति। तथा च वस्तुतोऽकर्मण्यकर्मज्ञानं बुद्धिमतः प्रमा, वस्तुतः कर्मणि कर्मज्ञानं च, तस्मिंस्तद्बुद्धेः प्रमात्वात्। एवं वस्तुतोऽकर्मणि लौकिकानां कर्मज्ञानं भ्रमः, वस्तुतः कर्मण्यकर्मज्ञानं च, अतस्मिंस्तद्बुद्धेर्भ्रमत्वात्। वस्तुतोऽकर्म आत्मा, वस्तुतः कर्म तु देहादिचेष्टा तदुपरमश्चेति।

---

१. अधिकरणत्वमिति पा.। २. 'द्रष्टुमिष्टम्' इति पा.। 'दृष्टम् , इष्टं वेत्यर्थः' इति पाठः संभाव्यते।

**ननु कर्म कर्मैव सर्वेषाम् , न क्वचिद् व्यभिचरति। तन्न। नौस्थस्य नावि गच्छन्त्यां तटस्थेष्वगतिषु नगेषु प्रतिकूलगतिदर्शनात् , दूरेषु चक्षुषाऽसन्निकृष्टेषु गच्छत्सु गत्यभावदर्शनात्। एवमिहाप्यकर्मणि [१]कर्मदर्शनं, कर्मणि चाकर्मदर्शनं विपरीतदर्शनम् , येन तन्निराकरणार्थमुच्यते—** कर्मण्यकर्म यः पश्येदित्यादि। **तदेतदुक्तप्रतिवचन-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

कर्मादेः सत्यत्वं मन्यमानः शङ्कते— **ननु कर्मेति**। कर्म सत्यम् , अव्यभिचारित्वात् , ब्रह्मवदित्यर्थः। हेतोरसिद्ध्या परिहरति— **नौस्थस्येति**। विदितं [विमतं] कर्म न तत्त्वतोऽव्यभिचारि , कर्मत्वात् , नौस्थस्य तटस्थवृक्षगमनवदित्यर्थः। ननु कर्मादेर्मिथ्यात्वादविक्रियज्ञानं चेद् विवक्षितं तर्हि पौनरुक्त्यमापद्यत इत्याशङ्क्याह— **तदेतदुक्तप्रतिवचनमित्यादिना**। मिथ्याज्ञानसंस्कारप्रचयात् , वस्तुनश्च दुर्लक्ष्यत्वात् पुनः पुनः प्रतिपादनं तत्तद्भ्रमनिराकरणार्थमुपयुज्यते। अतो न पौनरुक्त्यं

आनन्दगिरिकृतव्याख्या

**कर्माकर्मणोरारोपितत्वमुक्तममृष्यमाणः[२] सन्नाशङ्कते—** नन्विति। कर्म कर्मैवेत्यत्र **अकर्म चाकर्मैवेति द्रष्टव्यम्। विमतं सत्यम् , अव्यभिचारित्वाद् , ब्रह्मवदित्यर्थः। तत्र कर्म तत्त्वतो नाव्यभिचारि , कर्मत्वात् , नौस्थस्य तटस्थवृक्षगमनवदित्यव्यभिचारित्वं कर्मण्यसिद्धमिति परिहरति—** तन्नेति। **अकर्म च तत्त्वतो नाव्यभिचारि कर्माभावत्वात् , दूरप्रदेशे चैत्रमैत्रादिषु गच्छत्स्वेव चक्षुषा सन्निधानविधुरेषु दृश्यमानगत्यभाववदित्याह—** दूरेष्विति। **दूरत्वादेव विशेषतः सन्निकर्षविरहितेषु तेषु स्वरूपेण चक्षुःसन्निकृष्टेषु चक्षुषा गत्यभावदर्शनादिति योजना। गतिरहितेषु तरुषु गतिदर्शनवत् प्रकृते ब्रह्मण्यविक्रिये कर्मदर्शनं, सक्रिये च द्वैतप्रपञ्चे गतिमत्सु चैत्रादिषु गत्यभावदर्शनवत् कर्माभावस्य विपरीतस्य दर्शनं येन हेतुना सम्भवति, तेन तस्य विपरीतदर्शनस्य निरसनार्थं भगवद्वचनमिति दार्ष्टान्तिकं निगमयति—** एवमित्यादिना। **ननु कर्मतदभावयोरारोपितत्वाद् अविक्रियस्य ब्रह्मणो ज्ञानमत्राभिप्रेतं चेद् , 'अव्यक्तोऽयमचिन्त्योऽयम्' 'न जायते म्रियते वा' इत्यादिना पौनरुक्त्यं प्राप्तम् , तत्रैव ब्रह्मात्मनो [३]निर्विकारस्योक्तत्वादिति? तत्राह—** तदेतदिति। तदेतद् **आत्मनि शङ्कितं सक्रियत्वम् असकृदुक्तप्रतिवचनमपि, निर्विकारात्मवस्त्वपेक्षया**ऽत्यन्तविपरीतदर्शनं **मिथ्याज्ञानं,**

भाष्यार्कप्रकाशः

तत्र शङ्कते— **नन्विति**। सर्वेषामपि कर्म कर्मैव, अकर्माकर्मैव। कर्माकर्म वा क्वचिदपि न व्यभिचरति। यथा घटः सर्वान्प्रति घट एव, अघटश्च सर्वान्प्रति अघट एव, तद्वदिति भावः। परिहरति— **तन्नेति**। **नगेषु** वृक्षेषु। न गच्छन्तीति नगाः। वृक्षा हि तटस्था वस्तुतः स्थावराः तटस्थान्प्रति च स्थावरा एव नौस्थानां तु जङ्गमा इव प्रतिभान्ति। नौस्था हि पुरुषा नावि गच्छन्त्यां तटस्थान् वृक्षान् गच्छत इव पश्यन्ति। इदं लौकिकानामकर्मणि कर्मदर्शनस्य निदर्शनम्। अथ कर्मण्यकर्मदर्शनस्याह— **दूरेष्विति।** दूरेषु अत एव **असन्निकृष्टेषु** विशेषतःसन्निकर्षरहितेषु , सामान्यतोऽपि सन्निकर्षाभावे दर्शनानुपपत्तेरिति भावः। यद्वा **सन्निकृष्टेषु** अपरोक्षेष्वित्यर्थः। दूरस्थत्वेन प्राप्तां परोक्षत्वशङ्कां वारयितुं सन्निकृष्टेष्वित्युक्तमिति भावः। **गच्छत्सु** गतिमत्सु चैत्रमैत्रादिजनसङ्घेषु चक्षुषा गत्यभावदर्शनात्। दूरस्था हि जनसङ्घाः गच्छन्तोऽपि वस्तुतः अगच्छन्त इव भान्तीति भावः। इदं कर्मण्यकर्मदर्शनस्य निदर्शनम्। दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह— **एवमिति।** यथा गतिक्रियारहितत्वेनाकर्मणि वृक्षे नौस्थानां कर्मदर्शनं, यथा वा गतिक्रियासहितत्वेन कर्माश्रये दूरस्थजनसङ्घे पुरुषस्याकर्मदर्शनं तद्वदिति **एवं**शब्दार्थः। लौकिकानामिति शेषः। अकर्मणि कर्मरहिते आत्मनि कर्मदर्शनम् , कर्मणि देहादिव्यापारोपरमरूपे अकर्मदर्शनं कर्माभावदर्शनं चेति विपरीतदर्शनमस्तीति। तन्निराकरणार्थं भागवतमिदं वचनमित्याह— **येनेति। येन** विपरीतदर्शनस्तत्त्वेन[दर्शनसत्त्वेन] लौकिकानां **तन्निराकरणार्थं** विपरीतदर्शननिराकरणाय 'कर्मण्यकर्म यः पश्येद्' इत्याद्युच्यते भगवता । आदिपदाद् 'अकर्मणि च कर्म यः' इत्यादिग्रहणम्। प्रवृत्तिनिवृत्त्योरभावेन निष्क्रियत्वादविक्रिय आत्मेति विवक्षया भगवतैष श्लोक उक्त इति भावः। नन्विदमविक्रियत्वमात्मनः पूर्वमेवोक्तमिति पुनरुक्तमिदानीम् , अत आह— **तदेतदिति।**

---

१. 'अहं करोमीति कर्मदर्शनम्' इति पा.। २. 'अमृष्यन्नाशङ्कते' इति पा.। ३. 'निर्विकारत्वस्य' इति पा.।

**मप्यसकृद् अत्यन्तविपरीतदर्शनभाविततया मोमुह्यमानो लोकः श्रुतमप्यसकृत् तत्त्वं विस्मृत्य विस्मृत्य मिथ्याप्रसङ्गमवतार्यावतार्य चोदयतीति पुनः पुनरुत्तरमाह भगवान् , दुर्विज्ञेयत्वं चालक्ष्य वस्तुनः। 'अव्यक्तोऽयमचिन्त्योऽयम्'(भ.गी.२.२५) 'न जायते म्रियते' (भ.गी.२.२०) इत्यादिनाऽऽत्मनि कर्माभावः श्रुतिस्मृतिन्यायप्रसिद्धः उक्तो वक्ष्यमाणश्च। तस्मिन्नात्मनि कर्माभावेऽकर्मणि कर्मविपरीतदर्शनमत्यन्तनिरूढम्। यतः - किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः(भ.गी.४.१६)। देहाद्याश्रयं कर्म आत्मन्यध्यारोप्य 'अहं कर्ता, ममैतत् कर्म, मयाऽस्य कर्मणः**

अनुभूतिस्वरूपाचार्यटिप्पणम्

शङ्कनीयमित्यर्थः। किञ्चित् कर्म कायिकं, किञ्चिद् वाचिकं, किञ्चिन्मानसं प्रसिद्धम् । नात्मव्यापाररूपं किञ्चित् कर्म प्रसिद्धम्। कूटस्थचित्स्वभावस्यात्मनोऽसङ्गत्वाद् न कर्मभ्रमोऽप्यस्तीत्याशङ्क्याह— **तस्मिन्नात्मनीति**। अहं कर्तेति चित्त्वसमानाधिकरणव्यापारस्यानुभवात् कर्मभ्रमोऽप्यात्मनि नास्तीति वचनमनुभवविरुद्धमित्यर्थः। इदानीमकर्मभ्रमं दर्शयति— **तथाऽहं**

आनन्दगिरिकृतव्याख्या

**तेन** भावितत्वं **तत्संस्कारप्रचयवत्त्वम् , ततोऽतिशयेन मोहमापद्यमानो लोकः श्रुतमपि तत्त्वं विस्मृत्य पुनर्यत्किञ्चित्प्रसङ्गमापाद्य सक्रियत्वमेवात्मनश्चोदयतीति पुनःपुनः तत्त्वभूतमुत्तरं भगवानभिधत्ते। वस्तुनश्च दुर्विज्ञेयत्वात् पुनःपुनः प्रतिपादनं तत्तद्भ्रमनिराकरणार्थमुपयुज्यते। तथा च नास्ति पुनरुक्तिरित्यर्थः। असकृदुक्तप्रतिवचनमेवानुवदति—** अव्यक्तोऽयमिति। **कर्माभाव उक्त इति सम्बन्धः। उक्तस्य 'न जायते म्रियते वा विपश्चिदि'त्यादिश्रुतौ, प्रकृतस्मृतौ, असङ्गत्वादिन्यायेन च प्रसिद्धत्वमस्तीत्याह—** श्रुतीति। **न केवलमुक्तः कर्माभावः, किन्तु 'सर्वकर्माणि मनसा संन्यस्ये'त्यादौ वक्ष्यमाणश्चेत्याह—** वक्ष्यमाणश्चेति। **ननु कर्मणो देहादिनिर्वर्त्यत्वेन त्रैविध्यात् कूटस्थस्वभावस्यात्मनोऽसङ्गत्वात् तद्व्यापाररूपस्य कर्मणोऽप्रसिद्धत्वाद् न तस्मिन्नकर्मणि विपरीतस्य कर्मणो दर्शनं सिध्यतीत्याशङ्क्याह—** तस्मिन्निति। **कर्मैव विपरीतं, तस्य दर्शनमिति यावत्। 'अहं कर्ते'त्यात्मसमानाधिकरणस्य व्यापारस्यानुभवात् कर्मभ्रमस्तावदात्मनि अत्यन्तरूढोऽस्तीत्यर्थः। आत्मनि कर्मविभ्रमोऽस्तीत्यत्र हेतुमाह—** यत इति। **आत्मनो निष्क्रियत्वे कुतस्तस्मिन् यथोक्तो विभ्रमः सम्भवेदित्याशङ्क्याह—**देहेति। **इदानीमात्मन्यकर्मभ्रममुदाहरति—**तथेत्यादिना। **यथा शुक्तौ स्वाभाविकमरूप्यत्वम् ,**

भाष्यार्कप्रकाशः

'अव्यक्तोऽयमचिन्त्योऽयम्' 'न जायते म्रियते' इत्यादिना असकृद् **उक्तप्रतिवचनमपि** दत्तोत्तरमपि **तदेतत्** कथमविक्रिय आत्मेति चोद्यं लोकश्चोदयतीति हेतोर्भगवान् पुनरुत्तरमाहेत्यन्वयः। असकृच्चोदयतीति वा। किं कृत्वा चोदयति? तत्राह— **मिथ्याप्रसङ्गमवतार्यावतार्येति**। वीप्सायां द्विर्भावः। तत्र हेतुमाह— **असकृच्छ्रुतमप्यात्मतत्त्वं विस्मृत्य विस्मृत्येति**। तत्त्वविस्मरणे हेतुमाह विशेषणविधया — **मोमुह्यमान इति**। अतिशयेन मोहं प्राप्नुवन्नित्यर्थः। मोहाधिक्यप्राप्तौ हेतुमाह— **अत्यन्तविपरीतदर्शनभाविततयेति**। अत्यन्तमिथ्याज्ञानसंस्कारवत्त्वेनेत्यर्थः। भगवतः पुनर्वचने हेत्वन्तरमाह— **दुर्विज्ञेयत्वं चेति। वस्तुनः** आत्मतत्त्वस्य दुर्विज्ञेयत्वमालक्ष्य चेत्यन्वयः।

उक्तमनुवदन्नुपसंहरति— **आत्मनीति**। आत्मनि श्रुतिस्मृतिन्यायप्रसिद्धः कर्माभाव उक्तः— 'अव्यक्तोऽय'मित्यादिनेति भावः। **वक्ष्यमाणश्च** वक्ष्यते चेत्यर्थः। 'सर्वकर्माणि मनसा संन्यस्ये'त्यादिनेति भावः। श्रुतयः 'न जायते म्रियते वा विपश्चित्', 'अविनाशी वा अरेऽयमात्मा' इत्येवमादयः। स्मृतयः– 'रामो न गच्छति न तिष्ठति नानुशोचती'त्याद्याः। आत्मा अकर्ता, असङ्ग(त)त्वाद्, विभुत्वाच्चाकाशवद् इत्यादिन्याया इति विवेकः । **अकर्मणी**त्यस्य प्रतिपदं **कर्माभाव** इति। निष्क्रिये इत्यर्थः। **यद्वा** कल्पितसर्पाभावस्य [१]गुणरूपत्वेन कल्पितकर्माभाव आत्मरूप एवेति बोध्यम्। **कर्मविपरीतदर्शनमिति।** कर्म च तद् विपरीतं च कर्मविपरीतं, विपरीतं कर्मेत्यर्थः। **यद्वा** विपरीतमिति भावे क्तः; कर्मविपर्यय इत्यर्थः। तस्य **दर्शनं** ज्ञानमत्यन्तरूढं लौकिकानामिति

१. अधिष्ठानरज्जुरूपत्वेनेत्यर्थः। रज्जौ कल्पितसर्पाभावस्य रज्जुरूपत्वे आत्मनि कल्पितकर्माभावस्यात्मरूपत्वौचित्यादिति भावः।

**फलं भोक्तव्य'मिति च, तथा 'अहं तूष्णीं भवामि, येनाहं निरायासोऽकर्मा सुखी स्या'मिति कार्यकरणाश्रयं व्यापारोपरमं तत्कृतं च सुखित्वमात्मन्यध्यारोप्य 'न करोमि किञ्चित्, तूष्णीं सुखमासे' इत्यभिमन्यते लोकः। तत्रेदं लोकस्य विपरीतदर्शनापनयनायाह भगवान्—** कर्मण्यकर्म यः पश्येदित्यादि।

**अत्र च कर्म कर्मैव सत् कार्यकरणाश्रयं कर्मरहितेऽविक्रिय आत्मनि सर्वैरध्यस्तम्, यतः पण्डितोऽप्यहं करोमीति मन्यते।** [१]**अत आत्मसमवेततया सर्वलोकप्रसिद्धे** कर्मणि, **नदीकूलस्थेष्विव वृक्षेषु, गतिप्रातिलोम्येन** अकर्म **कर्माभावं यथाभूतं गत्यभावमिव वृक्षेषु यः पश्येत्, अकर्मणि च कार्यकरणव्यापारोपरमे कर्मवद् आत्मन्यध्यारोपिते,**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**तूष्णीमित्यादिना।** यथा [२]शुक्तेः....स्वाभाविकमविक्रियत्वम्, अपरस्त्वध्यस्तकर्माभावः, सोऽप्यध्यस्तस्याभाव इत्यध्यस्त एवेत्यर्थः।

एवं तावदात्मनि कर्मादिभ्रमं प्रसाध्य तन्निराकरणाय श्लोकमवतार्य विस्पष्टं व्याचष्टे— **अत्र चेत्यादिना।**

आनन्दगिरिकृतव्याख्या

**रूप्यत्वमारोपितम्, तदभावोऽप्यारोप्याभावत्वाद् आरोपपक्षपाती। तथाऽऽत्मनोऽपि स्वाभाविकमविक्रियत्वम्, सक्रियत्वं पुनरध्यस्तम्, तदभावत्वात् कर्माभावोऽप्यध्यस्त एवेति मन्वानः सन्नुपसंहरति—** तत्रेदमिति। [तत्र] **आत्मनि कर्मादिविभ्रमे लौकिके सिद्धे सति,** इदं **'कर्मणी'त्यादिवचनं तत्परिहारार्थं भगवानुक्तवानित्यर्थः।**

**सम्प्रत्युक्तेऽर्थे श्लोकाक्षरसमन्वयं दर्शयितुं 'कर्मणी'त्यादि व्याचिख्यासुर्भूमिकां करोति—**अत्र चेति। [अत्र] **व्यवहारभूमौ कार्यकरणाधिकरणं कर्म स्वेनैव रूपेण व्यवस्थितं सद् आत्मन्यविक्रिये कार्यकरणारोपणद्वारेण सर्वैरारोपितमित्यत्र हेतुमाह—** यत इति। **अविवेकिनां तु कर्तृत्वाभिमानः सुतरामिति वक्तुम्** अपिशब्दः। **एवमात्मनि कर्मारोपमुपपाद्य प्रथमपादं व्याचष्टे—** अत इति। **आत्मनि कर्मरहिते कर्मारोपे दृष्टान्तमाह—** नदीति। **आरोपवशादात्मनिष्ठत्वेन कर्मणि सर्वलोकप्रसिद्धे कर्माभावं यः पश्येत् स बुद्धिमानिति सम्बन्धः। अकर्मदर्शनस्य यथाभूतत्वं सम्यक्त्वम्। तत्र दृष्टान्तमाह—** गत्यभावमिवेति। **द्वितीयपादं व्याकरोति—** अकर्मणि चेति।

भाष्यार्कप्रकाशः

शेषः। **कवयोऽपीति। अपिना** किं पुनरविद्वांसो लौकिकाः इति गम्यते। तदेव विपरीतदर्शनमभिनीय दर्शयति— **देहेति।** ननु लोको देहाश्रयं गमनादिकर्मात्मन्यारोप्य 'गन्ताऽह'मिति मन्यत इति यत् तद् भवतु भ्रमः; देहादिव्यापारोपरमे 'अकर्माऽह'मिति यन्मन्यते कथं तस्य भ्रमत्वम्, अकर्मत्वाद् वस्तुत आत्मनः इत्यत आह—**तथाऽहमिति।** कार्यकरणाश्रयव्यापारोपरमस्य वस्तुत आत्मन्यसम्भवात् कथं तत्प्रयुक्तमकर्तृत्वं स्यादात्मनः? अतो लौकिकाभिमतम् अकर्मण्यात्मनि अकर्मज्ञानमपि भ्रम एवेति। **तत्रेति** व्यवहारभूमावित्यर्थः।

अथ श्लोकं व्याख्याति— **अत्र चेति। अत्र** व्यवहारभूमौ कार्यकरणाश्रयं कर्म **कर्मैव सत्,** स्वेनैव रूपेणावस्थितं सदित्यर्थः, कर्मरहिते अविक्रिये आत्मनि सर्वैरध्यस्तमित्यन्वयः। उक्तार्थे लोकव्यवहारं प्रमाणयति— **यत इति।** पण्डितस्तार्किकादिः। अपिशब्दात् किमुत पामर इति गम्यते। **तत इति।** आत्मनि सर्वलोकस्य कर्तृत्वाभिमानसत्त्वादित्यर्थः। **आत्मसमवेततयेति।** आत्मनि समवायेन वर्तमानतयेत्यर्थः। ननु कथं कार्यकरणव्यापारोपरमे पण्डितस्य कर्मबुद्धिः स्याद्, अत आह—**अहङ्काराभिसन्धिहेतुत्वादिति।** यथा 'अहं कर्म करोमि फलाये'ति कर्मण्यहङ्काराभिसन्धी स्तः, तथा 'अहं तूष्णीमासे सुखाये'ति कर्माभावेऽप्यहङ्काराभिसन्धी स्तः इति कर्माभावोऽपि कर्मैव। यद्यदहङ्काराभिसन्धिहेतुकं तत्तत् कर्मेति सिद्धान्तादिति भावः।

यत्र व्यापारोऽस्ति तत्रैव तदुपरमोऽपि। यथा वृक्षे चलनं चलनाभावश्च। तथा चात्मनि [३]व्यापाराभावाद् व्यापाराभावोऽपि

१. 'ततः' इति रा.पा.। २. 'शुक्तेः स्वाभाविकमरूप्यत्वम्, रूप्यत्वमध्यस्तम्, तदभावोऽप्यध्यस्ताभावत्वादध्यस्त एव, तथा आत्मनोऽपि स्वाभाविकमविक्रियत्वम्, सक्रियत्वं पुनरध्यस्तम्, यस्त्वध्यस्त' इति पाठः स्यात्। ३. व्यापारसंबन्धाभावादित्यर्थः।

**'तूष्णीमकुर्वन् सुखमासे' इत्यहङ्काराभिसन्धिहेतुत्वात्, तस्मिन्नकर्मणि च कर्म यः पश्येत्। य एवं कर्माकर्मविभागज्ञः स** बुद्धिमान् **पण्डितो मनुष्येषु, स** युक्तो **योगी** कृत्स्नकर्मकृच्च **सोऽशुभान्मोक्षितः कृतकृत्यो भवतीत्यर्थः।**

[ वृत्तिकारीयव्याख्यानोपन्यासः, तद्दूषणं च ]

**अयं श्लोकोऽन्यथा व्याख्यातः कैश्चित्। कथम्? नित्यानां किल कर्मणामीश्वरार्थे[1]ऽनुष्ठीयमानानां [2]तत्फलाभावाद् अकर्माणि तान्युच्यन्ते गौण्या वृत्त्या। तेषां चाकरणमकर्म। तच्च प्रत्यवायफलत्वात् कर्मोच्यते गौण्यैव**

अनुभूतिस्वरूपाचार्यटिप्पणम्

एवं स्वाभिप्रायेण श्लोकं व्याख्याय **वृत्तिकार**व्याख्यानमनुवदति— **अयं श्लोक इत्यादिना**। फलराहित्यगुणयोगात् नित्यान्यकर्माण्युच्यन्ते। तेषां तु नित्यानां करणममुख्यवृत्त्यैवाकर्मोच्यत इत्यर्थः। तत्र [अ]कर्मणि कर्मशब्दप्रयोगस्य

आनन्दगिरिकृतव्याख्या

**अध्यारोपमभिनयति—**तूष्णीमिति। **अकर्मणि कर्मदर्शने युक्तिमाह—**अहङ्कारेति। **पूर्वार्धेनोक्तमनूद्योत्तरार्धं विभजते—**य एवमिति।

**आत्मनि कार्यकरणसङ्घातसमारोपद्वारेण तद्व्यापारमात्रे कर्मणि, शुक्तिकायामिव रजतम्, [3]आरोपितविषये, तदभावम् अकर्म वस्तुतो यो रजताभाववदनुभवति, अकर्मणि च सङ्घातव्यापारोपरमे तद्द्वारा स्वात्मनि 'अहं तूष्णीमासे सुख'मित्यारोपिते गोचरे कर्म अहङ्कारहेतुकं यस्तत्त्वतो मन्यते, स रूप्यतदभावविभागहीनशुक्तिमात्रवद् आत्ममात्रं कर्मतदभावविभागशून्यं कूटस्थं परमार्थतो ऽवगच्छन् 'बुद्धिमानि'त्यादिस्तुतियोग्यतां गच्छतीत्येवं स्वाभिप्रायेण श्लोकं व्याख्यायात्र** वृत्तिकार**व्याख्यानमुत्थापयति—** अयमिति। **अन्यथाव्याख्यानमेव प्रश्नद्वारा प्रकटयति—** कथमित्यादिना। **ईश्वरार्थेनानुष्ठाने फलाभाववचनं व्याहतमिति मत्वाऽऽह—** किलेति। **नित्यानामकर्मत्वमप्रसिद्धमित्याशङ्क्य [4]फलराहित्यगुणयोगात् तेष्वकर्मत्वव्यवहारः सिद्ध्यतीत्याह—** गौण्येति। **नित्यानामकरणं मुख्यवृत्त्यैवाकर्म वाच्यमित्याह—** तेषां चेति। **तत्र कर्मशब्दस्य प्रत्यवायाख्यफलहेतुत्वगुणयोगाद् गौण्यैव वृत्त्या प्रवृत्तिरित्याह—** तच्चेति।

भाष्यार्कप्रकाशः

नास्त्येव, प्रसक्तिपूर्वकत्वान्निषेधस्य। व्यापारतदभावावुभावपि देहाद्याश्रयावेव नात्माश्रयौ। **किञ्च** यत्र व्यापारोपरमोऽस्ति स उपरतव्यापार इत्युच्यते। यथा तिष्ठन् पुरुषः गमनोपरमादुपरतगमनः, यथा वा अभाषमाणः पुरुषः भाषणोपरमादुपरतभाषणो मौनीति। एवमुपरतक्रियोऽकर्मात्मेति वक्तुं न शक्यते, उपरमात् प्रागात्मनि क्रियाऽप्रसक्तेः। न ह्यक्रिये आत्मनि कालत्रयेऽपि क्रिया सम्भावयितुं शक्या। एतदभिप्रायेणैवात्मनि कर्माभावः श्रुत्यादिभिरुक्तः। एतेन प्रसक्तिपूर्वकत्वान्निषेधस्य कथमात्मनि कर्मनिषेध इति चोद्यं परिहृतम्; भ्रान्तिप्रसक्तकर्मनिषेधपरत्वात् तद्वचनस्येति।

**य एवमिति।** कालत्रयेऽपि आत्मनि कर्माभावादात्मैवाकर्म। अज्ञस्त्वात्मनि कर्म मन्यते, देहाद्याश्रयं देहादिव्यापारोपरमरूपं कर्म च कर्माभावं मन्यते, देहाद्याश्रयं तच्चात्मनि मन्यते। इमे चाज्ञजनाभिमते कर्माकर्मणी द्वे अप्यात्मनि न स्तः कालत्रयेऽपि। अत एवात्मा अकर्म इति यः कर्माकर्मविभागौ जानातीति। 'यज्ज्ञात्वा मोक्ष्यसेऽशुभा'दित्युक्तत्वादाह—**अशुभान्मोक्षितः कृतकृत्यो भवतीति**। य आत्मानमेवाकर्म जानाति देहादिव्यापारं तदुपरमं च कर्म जानाति तस्य देहादिव्यापाररूपस्य तूष्णीमासनरूपस्य वा कर्तव्यस्याभावात् कृतकृत्यत्वमिति भावः। एतेन— यस्तूष्णीमास्ते, यो वा व्याप्रियते नासावात्मा, किन्तु देहादिसङ्घात एव। ततश्च व्यापारात्मिके जाग्रत्स्वप्नावस्थे निर्व्यापारात्मिका निद्रावस्था चेत्यवस्थात्रयमात्मनो नास्त्येवेत्यवस्थात्रयसाक्षित्वरूपं तुरीयत्वं कूटस्थत्वं चात्मनः सिद्धम्। य एवमात्मतत्त्ववित्पुमान् स हि मुक्त एव, 'तरति शोकमात्मवित्' 'ब्रह्मविद् ब्रह्मैव भवती'त्यादिश्रुतिभ्यः। अत एवाशुभान्मोक्षित इत्युक्तमिति।

**गौण्या** लक्षणयेत्यर्थः। यथा कर्माभावस्य फलाभावस्तथा नित्यकर्मणोऽपि फलाभाव इति सादृश्यमत्र निमित्तमिति बोध्यम्।

---

१. 'ईश्वरार्थत्वेन' इति पा.। २. 'फलाभावात्' इति पा.। ३. 'आरोपिते विषये' इति पाठः स्यात्। तत्र आरोपिते इति कर्मविशेषणम्। विषये इति सप्तम्यर्थकथनम्।
४ . स्वशक्यार्थवृत्तिगुणवत्ता गौणी वृत्तिः। अतो नित्यकर्मणि अकर्मपदप्रयोगे गुणं दर्शयति— **फलराहित्येति**। फलाजनकत्वेत्यर्थः। स च कर्माकरणस्य धर्मः।

**वृत्त्या। तत्र नित्ये कर्मण्यकर्म यः पश्येत् फलाभावात्। यथा धेनुरपि गौः अगौरुच्यते क्षीराख्यं फलं न प्रयच्छतीति, तद्वत्। तथा नित्याकरणे त्वकर्मणि कर्म यः पश्येन्नरकादिप्रत्यवायफलं प्रयच्छतीति।**

**नैतद् युक्तं व्याख्यानम्। एवं ज्ञानादशुभान्मोक्षानुपपत्तेः 'यज्ज्ञात्वा मोक्ष्यसेऽशुभा'दिति भगवतोक्तं वचनं बाध्येत। कथम्? नित्यानामनुष्ठानादशुभात् स्यान्नाम मोक्षणम् , न तु तेषां फलाभावज्ञानात्। न हि नित्यानां**

अनुभूतिस्वरूपाचार्यटिप्पणम्

गुणयोगमाह— **तच्च प्रत्यवायफलत्वादिति।**

इदानीं **वृत्तिकार**व्याख्यानं दूषयति— **नैतद् युक्तमित्यादिना**। ननु 'धर्मेण पापमपनुदती'ति श्रुतेः नित्यानुष्ठानादशुभक्षयः प्रसिद्धः। ततो नित्यानुष्ठानस्य तदभावात् तदकर्मेति ज्ञात्वा नित्यानुष्ठाने क्रियमाणे कथं नाशुभक्षय इत्याह— **कथमिति**। 'क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मते'ति स्मृतेः न कर्मणाऽऽत्यन्तिकाशुभक्षयः। तथाप्यङ्गीकृत्य परिहरति— **नित्यानामनुष्ठानादिति**। यद्यपि नित्यानुष्ठानादशुभमोक्षणं सम्भवति, तथाप्यस्मिन् प्रकरणे तन्न विवक्षितम्। 'यज्ज्ञात्वा मोक्ष्यसेऽशुभादि'ति ज्ञानादशुभक्षयस्य प्रतिज्ञातत्वात्। तत्त्वज्ञानं फलाभावविषयं भवत्विति न वाच्यमित्याह— **ननु [न तु] तेषामिति**। अशुभस्य फलाभाव[वा]ज्ञानकार्यत्वाभावान्न फलाभावज्ञानादशुभक्षय इत्यर्थः। किञ्चातीन्द्रियार्थे शास्त्रमेव प्रमाणम्। न च नित्यकर्मणां फलाभावज्ञानादशुभक्षय इति शास्त्रे विद्यत इत्याह— **न हि नित्यानामिति**। ननु भगवद्वाक्यमेव

आनन्दगिरिकृतव्याख्या

**पातनिकामेवं कृत्वा श्लोकाक्षराणि व्याचष्टे—** तत्रेत्यादिना। **अकर्मणि चेत्यादि व्याकरोति—** तथेति। **स बुद्धिमानित्यादि पूर्ववत्।**

**परकीयं व्याख्यानं व्युदस्यति—** नैतदिति। **नित्यं कर्म अकर्म, नित्याकरणं कर्मेति ज्ञानाद् दुरितनिवृत्त्यनुपपत्तेर्भगवद्वचनं** वृत्तिकार**मते बाधितं स्यादित्यर्थः। 'धर्मेण पापमपनुदति' इति श्रुतेर्नित्यानुष्ठानाद् दुरितनिबर्हणप्रसिद्धेस्तदनुष्ठानस्य फलान्तराभावात् तदकर्मेति ज्ञात्वा नित्यानुष्ठाने क्रियमाणे कथमशुभक्षयो नेति शङ्कते—** कथमिति। **'क्षेत्रज्ञस्येश्वरज्ञानाद् विशुद्धिः परमा मता' इति स्मरणात् कर्मणाऽऽत्यन्तिकाशुभक्षयाभावेऽप्यङ्गीकृत्य परिहरति—** नित्यानामिति। **नित्यानुष्ठानादशुभक्षयेऽपि नास्मिन् प्रकरणे तद् विवक्षितम् , 'यज्ज्ञात्वा मोक्ष्यसेऽशुभादि'ति ज्ञानादशुभक्षयस्य प्रतिज्ञातत्वात्। न च तज्ज्ञानं फलाभावविषयमेषितव्यमित्याह—** न त्विति। **अशुभस्य फलाभावाज्ञानकार्यत्वाभावान्न फलाभावज्ञानात् क्षयः सिध्यतीत्यर्थः। किञ्चातीन्द्रियोऽर्थः शास्त्रान्निश्चीयते। न च नित्यकर्मणां फलाभावज्ञानादशुभनिवृत्तिरित्यत्र शास्त्रमस्तीत्याह—** न हीति। **नित्याकरणं कर्मेति ज्ञानमपि नाशुभनिवृत्तिफलत्वेन**

भाष्यार्कप्रकाशः

अकर्मकर्मणोस्तु यथा निषिद्धकर्मणः पापफलवत्त्वं तथा नित्यकर्माकरणस्यापीति। **यद्वा** यथा विहितस्य कर्मणः पुण्यं फलं तथा नित्याकरणस्य पापं फलमिति। **अथवा** यथा कर्मणः फलवत्त्वं तथा अकरणस्यापीति सादृश्यं बोध्यम्।

**अयमर्थः**— नित्यकर्म कर्मेति, तदकरणमकर्मेति मूढा जानन्ति, न त्वेतद्युक्तम्। यत् फलवत् तदेव कर्म, फलाभावात्तु न नित्यकर्म कर्म। प्रत्यवायरूपफलवत्त्वात्तु न नित्याकरणमकर्म, किन्तु नित्यकर्म अकर्म, नित्यकर्माकरणं तु कर्म इति योऽभिजानाति स बुद्धिमानिति।

एवं परमतमुपपाद्य दूषयति— **नैतद् व्याख्यानं युक्तमिति। एवं ज्ञानादिति**। नित्यकर्मणां फलाभावज्ञानात् , तदकरणात् प्रत्यवायोऽस्तीति ज्ञानाच्चेत्यर्थः। **नित्यानामिति**। अयं भावः– 'यज्ज्ञात्वा मोक्ष्यसेऽशुभा'दिति भगवता ज्ञानमात्रादेव मुक्तिरभिहिता, न तु यज्ज्ञात्वा नित्यकर्म कृत्वा मोक्ष्यस इत्युक्तम्। नित्यकर्म तु कृतं सदेव पापनिवृत्तिलक्षणाशुभमोक्षहेतुर्भवति, न तु ज्ञानमात्रम् [ज्ञातमात्रम्]। तथा सति नित्यकर्माकरणे प्रत्यवायानुपपत्तेः। वेदाध्ययनमात्रेण नित्यकर्माणि ज्ञातान्येवेति यज्ञयागाद्यननुष्ठानापत्तेश्च। अतो नित्यकर्मणामनुष्ठानमेवाशुभान्मोचकं पुंसां, न तु तज्ज्ञानमात्रम्। यथा काम्यकर्मज्ञानं न स्वर्गादिफलदम् , यथा वा कृष्यादिकर्मज्ञानं न

**फलाभावज्ञानमशुभमुक्तिफलत्वेन चोदितम् , नित्यकर्मज्ञानं वा। न च भगवतैवेहोक्तम्। [1]एतेनाकर्मणि कर्मदर्शनं प्रत्युक्तम्। न ह्यकर्मणि कर्मेति दर्शनं कर्तव्यतयेह चोद्यते; नित्यस्य तु कर्तव्यतामात्रम्। न चाकरणान्नित्यस्य**

अनुभूतिस्वरूपाचार्यटिप्पणम्

विद्यत इत्याशङ्क्याह— **न चेति**। 'यज्ज्ञात्वा मोक्ष्यसेऽशुभादि'ति साधारणमेव भगवद्वाक्यम्। न तु 'नित्यानां फलाभावं ज्ञात्वे'ति विशेषनिष्ठमित्यर्थः। एवं तावदशुभमोक्षासम्भवप्रदर्शनेन कर्मण्यकर्मदर्शनं निराकृतम्। इदानीमकर्म(कर्म)णि कर्म-(कर्मणि)दर्शननिराकरणेऽप्यतिदिशति—[**एतेनेति।**] ननु यथा 'नाम ब्रह्मेत्युपासीते'त्यादौ नामादिषु ब्रह्मादिदृष्टिर्विधीयते फलाय, तथा अत्रा(पि)कर्मणि कर्मदृष्टिर्विधीयते फलाय। अतो नाशुभमोक्षणासंभव इत्याशङ्क्याह— **न ह्यकर्मणीति**। **वृत्तिकार**मते नित्यस्य कर्तव्यतामात्रमस्मिन् श्लोके विवक्षितम्। अतः [अ]कर्मणि कर्मदर्शनं फलाय विधीयत इति कल्पनं सिद्धान्तविरुद्धमित्यर्थः। ननु वृत्तिकारस्यापि नित्यस्य कर्तव्यतामात्रमस्मिन् श्लोके विवक्षितं न भवति, किन्तु नित्यानुष्ठाने प्रवृत्तिसिद्धये नित्याकरणात् प्रत्यवायो भवतीति ज्ञानं कर्तव्यत्वेन विवक्षितमित्याशङ्क्याह— **न चेति**। यथा राजनियोगादेव भृत्यः प्रवर्तते, न त्वकरणे दोषोऽपि कीर्त्यते, तथा नियोगादेव नित्यानुष्ठाने प्रवृत्तिसिद्धौ नाकरणात् प्रत्यवायज्ञानमपि तदर्थं संपादनीयम्। न चापरं किमपि फलमस्ति। अतो निष्फलत्वादकरणात् प्रत्यवायो भवतीति ज्ञानं कर्तव्यत्वेन [न] विवक्षितमित्यर्थः। किञ्चाकरणे कर्मदृष्टि(प्र)करणे प्राधान्यादकरणस्याश्रय[त्वेन] ज्ञेयत्वं वक्तव्यम्। तन्न सम्भाव्यते,

आनन्दगिरिकृतव्याख्या

**चोदितमस्तीत्याह—** नित्यकर्मेति। **भगवद्वचनमेवात्र प्रमाणमित्याशङ्क्याह—** न चेति। **साधारणमेव यज्ज्ञात्वेत्यादि भगवतो वचनं न तु नित्यानां फलाभावं ज्ञात्वेति विशेषविषयमित्यर्थः। अशुभमोक्षणासम्भवप्रदर्शनेन कर्मण्यकर्मदर्शननिराकरणन्यायेनाकर्मणि कर्मदर्शनं निराकरोति—** एतेनेति। **नामादिषु फलाय ब्रह्मदृष्टिवदकर्मण्यपि फलार्थं कर्मदृष्टिविधानान्नाशुभमोक्षणानुपपत्तिरित्याशङ्क्याह—** न हीति। **अत्र हि श्लोके नित्यस्य कर्तव्यतामात्रं परमते विवक्षितम्। अतश्चाकर्मणि कर्मदर्शनं विधीयते तत्फलायेति कल्पना परस्य सिद्धान्तविरुद्धेत्याह—** नित्यस्य त्विति। **परमतेऽपि नित्यस्य कर्तव्यतामात्रमत्र श्लोके न विवक्षितं, किन्तु नित्यानुष्ठाने प्रवृत्तिसिद्ध्यर्थं नित्याकरणात् प्रत्यवायो भवतीति ज्ञानमपि कर्तव्यत्वेनात्र विवक्षितमेवेत्याशङ्क्याह—** न चेति। **न तावत् प्रवृत्तिरस्य विज्ञानस्य फलम् , नियोगादेव तदुपपत्तेः, नापि फलान्तरमनुपलम्भाद् , अतोऽफलत्वादकरणात् प्रत्यवायो भवतीति ज्ञानं नात्र कर्तव्यत्वेन विवक्षितमि-**

भाष्यार्कप्रकाशः

सस्यादिफलदम् , तद्वदिति। नित्यानां फलाभावज्ञानं नित्यकर्मज्ञानं वा अशुभमुक्तिफलत्वेन न चोदितं वेदेनेति शेषः। यथा – 'तरति शोकमात्मविद्' इत्यात्मज्ञानं शोकतारकत्वेन चोदितम् , तद्वदिति भावः।

ननु वेदेन चोदितं मास्तु नाम, भगवतैवोक्तं गीतास्वित्यत आह— **न चेति**। भगवता चेह गीतासु नैवोक्तम्। **एतेनेति**। नित्यकर्मणां फलाभावज्ञानस्याशुभमोचकत्वाभाववचनेनेत्यर्थः। 'कर्मण्यकर्म यः पश्येदि'त्यस्य परोक्तं व्याख्यानं निराकृतमित्यर्थः। 'एतेनाकर्मणि कर्मदर्शनं प्रत्युक्त'मिति पाठान्तरे एतेनाशुभमोक्षणासम्भवप्रदर्शनेन कर्मण्यकर्मदर्शननिराकरणोक्तन्यायेनेत्यर्थः।

अथाकर्मणि च कर्म य इत्यस्य परोक्तमर्थं दूषयति— **न हीत्यादिना**। नित्याकरणं कर्मेति पश्येदिति नेह चोद्यते भगवता। किम्पुनश्चोद्यते? तदाह— **नित्यस्येति।** नित्यं कर्म कर्तव्यमित्येव चोद्यते— 'कुरु कर्मैवे'त्यादिनेति भावः। ननु नित्याकरणं कर्मेति मा चोद्यतां नाम, नित्याकरणात् प्रत्यवाय इति यो जानाति स बुद्धिमानितीहोच्यत इत्यत्राह— **न चेति। ननु** नित्याकरणात् प्रत्यवाय इति यो वेत्ति स नित्यं कर्म कुरुते, ततश्चाशुभान्मुच्यत इत्यस्ति नित्याकरणात् प्रत्यवायज्ञानात् फलमशुभमुक्तिरूपमिति **चेन्नैवम् ;** तद्ध्यशुभमुक्तिरूपं फलं नित्यकर्माचरणजन्यमेव, न तु प्रत्यवायज्ञानजन्यम् , अन्यथा नित्याकरणात् प्रत्यवाय इति ज्ञानमात्राद् विनैव

---

१. 'एतेन कर्मणि अकर्मदर्शनं प्रत्युक्तम्' इति रा.पा.।

**प्रत्यवायो भवतीति विज्ञानात् किञ्चित् फलं स्यात्। नापि नित्याकरणं ज्ञेयत्वेन चोदितम्। नापि कर्माकर्मेति मिथ्यादर्शनादशुभान्मोक्षणं बुद्धिमत्त्वं युक्तता कृत्स्नकर्मकृत्त्वादि च फलमुपपद्यते, स्तुतिर्वा। मिथ्याज्ञानमेव हि साक्षादशुभरूपम्। कुतोऽन्यस्मादशुभान्मोक्षणम्? न हि तमस्तमसो निवर्तकं भवति।**

**ननु कर्मणि यदकर्मदर्शनम् , अकर्मणि वा कर्मदर्शनं न तन्मिथ्याज्ञानम् ; किं तर्हि? गौणं [१]फलभावाभाव-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

तुच्छत्वादित्याह— **नापि नित्याकरणमिति**। नन्वकरणस्य तुच्छत्वान्नामादिवदाश्रयत्वेन दर्शनं यद्यपि न सम्भवति, तथापि सामानाधिकरण्येन भविष्यति। 'इदं रूप्य'मित्यादौ सदसतोरपि सामानाधिकरण्यदर्शनादित्याशङ्क्याह— **नापि कर्मेति**। सम्यग्ज्ञानस्य हि फलवत्त्वं स्तुतिर्वा घटते, न मिथ्याज्ञानस्य, दुष्टत्वादित्यर्थः। ननु स्वप्ने मिथ्याज्ञानमपि फलवद् दृष्टमित्याशङ्क्याह— **मिथ्याज्ञानमेव हीति**। मिथ्याज्ञानस्याशुभाविरोधित्वान्न मिथ्याज्ञानादशुभनिवृत्तिः फलं सम्भाव्यते इत्यर्थः।

मिथ्याज्ञानत्वमसिद्धमित्याह— **ननु कर्मणीति**। अविवेकपूर्वं हि सदसतोः सामानाधिकरण्यं मिथ्याज्ञानं भवति। कर्माकर्मणोस्तु विवेकेन भानात् सामानाधिकरण्यं न मिथ्याज्ञानं, किन्तु गौणमेवेत्यर्थः। तथापि फलवत्त्वासम्भवः समान

आनन्दगिरिकृतव्याख्या

**त्यर्थः। किञ्चाकरणे कर्मदृष्टिविधावकरणस्यालम्बनत्वेन प्रधानत्वाज्ज्ञेयत्वं वक्तव्यम् , तच्च तुच्छत्वादनुपपन्नमित्याह—**नापीति। **अकरणस्यासतो नामादिवदाश्रयत्वेन दर्शनासम्भवेऽपि सामानाधिकरण्येन इदं रजतमितिवद् दर्शनं भविष्यतीत्याशङ्क्याह—** नापि कर्मेति। **आदिशब्देन सर्वोत्कर्षादि गृह्यते। फलवत्त्वं स्तुतिर्वा सम्यग्ज्ञानस्य युक्तम् , न मिथ्याज्ञानस्य [२]अनुपपत्तेरित्यर्थः। स्वप्ने मिथ्याज्ञानमपि फलवदुपलब्धमित्याशङ्क्य मिथ्याज्ञानस्याशुभाविरोधित्वान्न तस्मात् तन्निवृत्तिरित्याह—** मिथ्याज्ञानमेवेति। **अशुभादेवाशुभानिवृत्तौ दृष्टान्तमाह—** न हीति।

**अविवेकपूर्वकम् 'इदं रजत'मिति सदसतोः सामानाधिकरण्यान्मिथ्याज्ञानं युक्तं, कर्माकर्मणोस्तु विवेकेन भासमानयोः सामानाधिकरण्याधीनं ज्ञानं सिंहदेवदत्तयोरिव गौणम् , न मिथ्याज्ञानमिति शङ्कते—** नन्विति। **कर्माकर्मेति दर्शने फलाभावो गुणः, अकर्म कर्मेति दर्शने तु फलभावो गुणः, तन्निमित्तमिदं ज्ञानं गौणमित्याह—** फलेति। **यथोक्तज्ञानस्य गौणत्वेऽपि प्रामाणिकफलाभावान्न**

भाष्यार्कप्रकाशः

कर्माचरणम् अशुभमुक्तिप्रसङ्गात्। न च प्रत्यवायज्ञानस्य नित्यकर्मप्रवर्तकत्वरूपं फलमस्तीति वाच्यम् , अशुभमोक्षणफलस्यैव भगवता प्रतिज्ञातत्वात्। प्रत्यवायं जानद्भिरपि बहुभिः प्रारब्धवशान्नित्यकर्मणामनाचरितत्वात् , मूढैरपि क्रियमाणत्वाच्च।

ननु नित्याकरणं ज्ञेयमेव निषिद्धकर्मवत् परिहारायेति कृत्वा नित्याकरणमिह ज्ञेयत्वेन चोद्यत इत्यत आह— **नापीति**। नित्यान्येव ज्ञेयत्वेन चोदितान्यनुष्ठानाय, न तु नित्याकरणं क्वापि चोद्यते। नित्यचोदनादेव नित्याकरणनिषेधोऽर्थात् सिध्यतीति न पुनर्नित्याकरणचोदनावकाशः। ननु तत्त्वज्ञानादिव कर्माकर्मज्ञानान्मुक्तिःस्यादत आह— **नापीति**। तत्त्वज्ञानादेव मुक्तिर्न तु मिथ्याज्ञानादिति सर्वसम्मतम्। रज्जुयाथात्म्यरूपतत्त्वज्ञानाद्धि कृत्रिमसर्पजन्यभयकम्पादिनिवृत्तिः। कर्माकर्मेति ज्ञानं तु मिथ्याज्ञानमेव, कर्मण्यकर्मेति ज्ञानस्य, अकर्मणि कर्मेति ज्ञानस्य वा अतस्मिंस्तद्बुद्धित्वेन मिथ्याज्ञानत्वात्। मिथ्याज्ञानादशुभमोक्षणादिकं तु विप्रतिषिद्धं, रज्जुसर्पज्ञानाद् भयकम्पाद्यशुभस्यैव प्राप्तेः। तस्मिन्मिथ्याज्ञानादशुभमेव स्यान्न तु तन्मोक्षः। नाप्येवं मिथ्याज्ञानी बुद्धिमान् युक्तः कृत्स्नकर्मकृद्वा भवेत्। **स्तुतिर्वेति**। नोपपद्यत इत्यन्वयः। ननु मिथ्याज्ञानादप्यशुभमोक्षः किं न स्याद्? अत आह— **मिथ्याज्ञानमेवेति**। अशुभस्य मिथ्याज्ञानस्य कथमशुभनिवर्तकत्वम् , न कथमपीत्यर्थः। तत्र दृष्टान्तमाह— **न हीति**।

अथ कर्माकर्मणोरितरेतरज्ञानस्य मिथ्यात्वमसहमानः शङ्कते पूर्ववादी— **नन्विति**। गौणत्वे हेतुमाह— **फलाभावभाव-**

१. 'फलाभावभावनिमित्तम्' इति पा.। २. 'अनुपलब्धेः' इति पा.।

**निमित्तम्। न ; कर्माकर्मविज्ञानादपि गौणात् फलस्याश्रवणात्। नापि श्रुतहान्यश्रुतपरिकल्पनायां कश्चिद् विशेषः उपलभ्यते। स्वशब्देनापि शक्यं वक्तुम् - नित्यकर्मणां फलं नास्ति, अकरणाच्च तेषां नरकपातः स्यादिति। तत्र व्याजेन परव्यामोहरूपेण 'कर्मण्यकर्म यः पश्येदि'त्यादिना किम्? तत्रैवं व्याचक्षाणेन भगवतोक्तं वाक्यं लोकव्यामोहार्थमिति व्यक्तं कल्पितं स्यात्। न चैतच्छद्मरूपेण वाक्येन रक्षणीयं वस्तु ; नापि शब्दान्तरेण पुनः पुनरुच्यमानं सुबोधं स्यादित्येवं वक्तुं युक्तम् । 'कर्मण्येवाधिकारस्ते' इत्यत्र हि स्फुटतरः उक्तोऽर्थो न पुनर्वक्तव्यो**

अनुभूतिस्वरूपाचार्यटिप्पणम्

इत्याह— **न, कर्माकर्मेति**। ननु गौणविज्ञानस्य फलवत्त्वासम्भवो न दूषणाय। अतोऽनेन व्याजेन नित्यानुष्ठानकर्तव्यतायामेव तात्पर्यमित्याशङ्क्याह— **नापि श्रुतहानीति**। श्रुतं यद् ज्ञानादशुभमोक्षणं तस्य हानिः, अश्रुतस्य नित्यानुष्ठानस्य कल्पनेत्यनेन व्यापारगौरवेण न कश्चिद् विशेषो दृश्यत इत्यर्थः। एतदेव विवृणोति— **स्वशब्देनेत्यादिना**। ननु नित्यानुष्ठानस्य गौणत्वसिद्ध्यर्थं व्याजरूपमेव वाक्यमुचितं भवतीत्याशङ्क्याह— **न चैतच्छद्मरूपेणेति**। पुरुषमात्रसम्बन्धित्वेन नित्यानुष्ठानस्य प्रकटत्वादित्यर्थः। ननु यथा आत्मप्रतिपादनं पुनः पुनः क्रियते सुबोधत्वसिद्ध्यर्थम् , तथा तेषां नित्यानुष्ठानमपि शब्दान्तरेणोच्यमानं सुबोधं स्यादित्यपि न युक्तम् , 'कर्मण्यकर्म यः' इत्यादिशब्दानां नित्यानुष्ठानावाचकत्वादित्याह— **नापि शब्दान्तरेणेति**। यत् प्रथमं[अ]स्फुटमुच्यते, तत् स्फुटीकर्तुं युक्तं भवति, न तथा नित्यानुष्ठानमित्याह— **कर्मण्येवाधिकारस्त इति**। तस्मात् कर्माकर्मज्ञानव्याजेन नित्यानुष्ठानकर्तव्यतायां तात्पर्यमित्यसम्बन्धमुपपाद्य पुनर्गौण-

आनन्दगिरिकृतव्याख्या

**तद्गौणतोचितेति दूषयति—** नेत्यादिना। **कर्माकर्मेत्यादिगौणविज्ञानोपन्यासव्याजेन नित्यकर्मणः कर्तव्यतया विवक्षितत्वाद् गौणज्ञानस्याफलत्वमदूषणमित्याशङ्क्याह—** नापीति। **ज्ञानादशुभमोक्षणस्य श्रुतस्य हानिः, अश्रुतस्य नित्यानुष्ठानस्य कल्पनेत्यनेन व्यापारगौरवेण न कश्चिद् विशेषः सिध्यतीत्यर्थः। उक्तमेव प्रपञ्चयति—** स्वशब्देनेति। **नरकपातः स्याद् अतो विधेरेवानुष्ठेयानि तानीति शेषः। यथोक्तवाचककर्मशब्दप्रयोगादेवापेक्षितार्थसिद्धिसम्भवे भगवतो व्याजवचनकल्पनमनुचितमित्याह—** तत्रेति। **प्रकृते श्लोके** वृत्तिकृतां **व्याख्यानेन परमाप्तस्यैव भगवतो विप्रलम्भकत्वमापादितमिति तदीयं व्याख्यानमुपेक्षितव्यमिति फलितमाह—** तत्रैवमिति। **नित्यकर्मानुष्ठानसिद्ध्यर्थं व्याजरूपमपि भगवद्वचनमुचितमित्याशङ्क्य 'स्वशब्देनापी'त्यादिप्रागुक्तपरिपाट्या तदनुष्ठानबोधनसम्भवाद् मैवमित्याह—** न चैतदिति। वस्तु**शब्देन नित्यकर्मानुष्ठानमुच्यते। यथाऽऽत्मप्रतिपादनं सुबोधत्वसिद्ध्यर्थं पौनःपुन्येन क्रियते, तथा नित्यानामपि कर्मणामनुष्ठानं 'कर्मण्यकर्मे'त्यादिशब्दान्तरेणोच्यमानं सुबोधं स्यादिति भगवतः शब्दान्तरं युक्तमित्याशङ्क्य तस्य नित्यानुष्ठानवाचकत्वाभावान्मैवमित्याह—** नापीति। **किञ्च पूर्वमेव नित्यानुष्ठानस्य स्पष्टमुपदिष्टत्वान्न तस्य सुबोधत्वार्थं शब्दान्तर-**

भाष्यार्कप्रकाशः

**निमित्तमिति।** कर्मण्यकर्मज्ञानं फलाभावनिमित्तम् , अकर्मणि कर्मज्ञानं तु फलभावनिमित्तमिति विवेकः। यथा सिंहो माणवक इति ज्ञानं गौणं क्रौर्यशौर्यादिनिमित्तम् , तद्वदिति भावः। गौणत्वमभ्युपेत्यैव परिहरति— **नेति।** मिथ्याज्ञानवद् गौणज्ञानेऽप्यशुभमोक्षणरूपफलाभावस्तुल्य एवेत्यर्थः। दोषान्तरमाह— **नापीति**। यथाश्रुतार्थं विहायाश्रुतार्थकल्पनमन्याय्यं निष्फलं चेति भावः। **स्वशब्देनेति।** वाचकशब्देनेत्यर्थः। न तु लाक्षणिकेनेति भावः। स्वशब्देन वादप्रकारमेव दर्शयति— **नित्यानामित्यादिना**। 'न नित्यकर्मणोऽर्थोऽस्ति प्रत्यवायोऽविधानतः' इति श्लोकस्य सुकरत्वादिति भावः। ननु परकान्तासु रतोद्यतं धूर्तं तत्कालागतपतिसकाशाद् रक्षयितुं यथा दूती वक्ति 'वृषापेहि परक्षेत्रा'दिति गूढं वाक्यम् , तद्वद् अयं भगवान् गूढमाह— कर्मण्यकर्म यः पश्येदितीत्यत आह— **न चेति**। भगवान् हि गुह्यं वस्तु शिष्यायार्जुनाय प्रकटयितुमेव प्रवृत्तः, न तु गोप्यं कचिदर्थं गोपयितुम्। तस्मादिह नास्ति भगवतो गोप्यार्थः, यद्गोपनाय छद्मवाक्यं प्रयुञ्जीत। ननु यथा आत्मतत्त्वं दुर्बोधत्वात् पुनः पुनः शब्दान्तरेणोक्तम् 'अव्यक्तो

**भवति। सर्वत्र च प्रशस्तं बोद्धव्यं च कर्तव्यमेव, न निष्प्रयोजनं बोद्धव्यमित्युच्यते। न च मिथ्याज्ञानं बोद्धव्यं भवति, तत्प्रत्युपस्थापितं वा वस्त्वाभासम्।**

**नापि नित्यानामकरणादभावात् प्रत्यवायभावोत्पत्तिः, 'नासतो विद्यते भावः'(भ.गी.२.१६) इति वचनात्, 'कथमसतः सज्जायेत' (छा.उ.६.२.२) [1]इति च असतः सज्जन्मप्रतिषेधात्। असतः सदुत्पत्तिं ब्रुवता 'असदेव सद् भवेत्, सच्चाप्यसद् भवेद्' इत्युक्तं स्यात्। तच्चायुक्तम्, सर्वप्रमाणविरोधात्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

व्याख्याने दूषणान्तरमाह— **सर्वत्र चेति**। लोके [वे]दे वा यत् प्रशस्तं देवतादितत्त्वं, कर्तव्यं च यदनुष्ठानार्हं तदेव बोद्धव्यमित्युच्यते, न निष्प्रयोजनं 'काकस्य कति वा दन्ताः' इतिवत्। कर्मण्यकर्मज्ञानस्य च गौणत्वादेव [न] प्रशस्तादिरूपत्वमित्यर्थः। किञ्च कर्मादेर्मायामात्रत्वाद् गौणमपि तद्विषयं विज्ञानं मिथ्याज्ञानमेव। तत्र च बोद्धव्यशब्दो ऽनुपपन्नमि[न्न इ]त्याह— **न च मिथ्याज्ञानमिति**।

यच्चाकरणस्य प्रत्यवायफलत्वमित्युक्तम्, तद् दूषयति— **नापीति**॥ १८॥

आनन्दगिरिकृतव्याख्या

**मपेक्षितमित्याह—** कर्मण्येवेति। **कर्माकर्मादिविज्ञानव्याजेन नित्यकर्मानुष्ठानकर्तव्यतायां तात्पर्यमित्येतन्निराकृत्य कर्माकर्मादिदर्शनं गौणमिति पक्षे दूषणान्तरमाह—** सर्वत्र चेति। **लोके वेदे च यथा[यत्] प्रशस्तं देवतादितत्त्वं, यच्च कर्तव्यमनुष्ठानार्हमग्निहोत्रादि, तदेव बोद्धव्यमित्युच्यते, न निष्फलं काकदन्तादि ; कर्मण्यकर्मदर्शनमकर्मणि च कर्मदर्शनं गौणत्वादेवाप्रशस्तमकर्तव्यं च ; नातस्तद् बोद्धव्यमिति वचनमर्हतीत्यर्थः। किञ्च कर्मादेर्मायामात्रत्वाद् गौणमपि तद्विषयं ज्ञानं मिथ्याज्ञानमिति न तस्य बोद्धव्यत्वसिद्धिरित्याह—** न चेति। **मिथ्याज्ञानस्य बोद्धव्यत्वाभावेऽपि तद्विषयस्य बोद्धव्यता सिध्येदित्याशङ्क्य वस्त्वाभासत्वान्नैवमित्याह—** तत्प्रत्युपस्थापितं चेति।

**यत्पुनरकरणस्य प्रत्यवायहेतुत्वमकरणे गौण्या वृत्त्या कर्मशब्दप्रयोगे निमित्तमिति, तद् दूषयति—** नापीति। **अकरणात् प्रत्यवायो भवतीत्यत्र श्रुतिस्मृतिविरोधमभिधाय युक्तिविरोधमभिदधाति—** असत इति। **असतः सद्रूपेण भवनमभवनं च निःस्वरूपत्वादनुपपन्नम्, निरस्तसमस्ततत्त्वस्य किञ्चित्तत्त्वाभ्युपगमे सर्वप्रमाणानामप्रामाण्यप्रसङ्गादित्याह—** तच्चेति।

भाष्यार्कप्रकाशः

ऽयमचिन्त्योऽय'मित्यादिना, तद्वदिदमपीत्यत आह— **नापीति**। न हि नित्यकर्मादेः फलाभावादिज्ञानं दुर्बोधम्, येन सुबोधाय पुनः पुनरुच्येतेत्यर्थः। कथमेष सुबोधः? अत आह— **कर्मण्येवेति**। किञ्च निष्फलमिदं नित्यकर्म नैव बोद्धव्यमित्याह— **सर्वत्रेति**। यत् सफलं तदेव बोद्धव्यं, कर्तव्यं चेति सर्वत्रापि प्रशस्तम्। निष्प्रयोजनं तु नित्यकर्म नैव बोद्धव्यम्। नापि कर्तव्यमिति कृत्वा कथं तद् बोद्धव्यमित्युच्यते। ननु न वयं नित्यकर्म बोद्धव्यमिति ब्रूमः, किन्तु नित्यकर्माकर्मेति बोद्धव्यमिति ब्रूम इत्यत आह— **न चेति**। कर्मण्यकर्मज्ञानं हि मिथ्याज्ञानं रज्जुसर्पज्ञानवदिति कथं तस्य बोद्धव्यत्वम्? ननु मिथ्याज्ञानस्याबोद्धव्यत्वेऽपि तद्विषयस्य वस्तुनो बोद्धव्यत्वमस्तीत्यत आह— **तदिति**। मिथ्याज्ञानविषयो हि मिथ्यावस्त्वेवेति कथं तस्य वस्त्वाभासस्य बोद्धव्यत्वम्। लोकेऽपि सत्यमेव वस्तु हि बोद्धव्यम्।

एतावता ग्रन्थसन्दर्भेण नित्याकरणात् प्रत्यवायसत्त्वमभ्युपेत्य 'अकर्मणि च कर्म यः' इत्यस्य परोक्तार्थः प्रत्याख्यातः। अथ नित्याकरणात् प्रत्यवायमेव प्रत्याख्याति—**नापीत्यादिना**। **ननु** असतः सदुत्पद्यत इति ब्रुवता असदेव सद्भवेदित्युक्तं भवतु नाम, कारणस्य कार्यात्मना परिणामात्। कथं पुनः सच्चासद्भवेदित्युक्तं भवेदिति चेत्, **उच्यते**— कार्यस्य कारणात्मकत्वं दृष्टम्, घटस्य मृदात्मकत्वदर्शनात्। तथा च कार्यस्य सतः कारणभूतासदात्मकत्वं स्यादेवेति सच्चासद्भवेदित्युक्तं भवेदेव। भवतु को दोषस्तत्राह— **तच्चायुक्तमिति**। तत्र हेतुमाह—**सर्वेति**। प्रत्यक्षादिसर्वप्रमाणविरोधात्। न ह्यसतः शशशृङ्गादेः सत्त्वं प्रत्यक्षादिप्रमाणानि सहेरन्निति

१. 'इति च दर्शितम्। असतः' इति पा.।

**न च निष्फलं विदध्यात् कर्म शास्त्रम् , दुःखस्वरूपत्वाद् , दुःखस्य च बुद्धिपूर्वकतया कार्यत्वानुपपत्तेः। तदकरणे च नरकपाताभ्युपगमादनर्थायैव उभयथाऽपि करणे चाकरणे च शास्त्रं निष्फलं कल्पितं स्यात्। स्वाभ्युपगमविरोधश्च नित्यं निष्फलं कर्मेत्यभ्युपगम्य मोक्षफलायेति ब्रुवतः। तस्माद् यथाश्रुत एवार्थः 'कर्मण्यकर्म' इत्यादेः। तथा च व्याख्यातोऽस्माभिः श्लोकः॥ १८॥**

आनन्दगिरिकृतव्याख्या

**यत्तु नित्यानां फलराहित्यं तत्राकर्मशब्दप्रयोगे निमित्तमिति, तन्निरस्यति—** न चेति। **न केवलं विध्युद्देशे स्वफलाभावान्नित्यानां विध्यनुपपत्तिः, अपि तु धात्वर्थस्य क्लेशात्मकत्वात् तत्र श्रुतफलाभावे नैव विधिरवकाशमासादयेदित्याह—** दुःखेति। **दुःखरूपस्यापि धात्वर्थस्य साध्यत्वेन कार्यत्वात् तद्विषयो विधिः स्यादिति चेत् , नेत्याह—** दुःखस्य चेति। **स्वर्गादिफलाभावेऽपि नित्यानामकरण-निमित्तनिरयनिरासार्थं दुःखरूपाणामपि स्यादनुष्ठेयत्वमित्याशङ्क्याह—** तदकरणे चेति। **फलान्तराभावेऽपि मोक्षसाधनत्वान्मुमुक्षुणा नित्यानि कर्माण्यनुष्ठेयानीत्याशङ्क्याह—** स्वाभ्युपगमेति। वृत्तिकार**व्याख्यानासंभवे फलितमुपसंहरति—** तस्मादिति। **कोऽसौ यथाश्रुतोऽर्थः श्लोकस्येत्याशङ्क्याह—** तथा चेति॥ १८॥

भाष्यार्कप्रकाशः

भावः।

ननु नित्यानामकरणे प्रत्यवायोऽस्तु वा, मा वा; करणे तु नास्ति फलम् , अत आह— **न चेति।** शास्त्रं निष्फलं कर्म न विदध्यात् , लोकानुग्रहाय प्रवृत्तत्त्वादिति भावः। कुतो न विदध्यात्? अत आह— **दुःखरूपत्वादिति।** निष्फलस्य कर्मणो दुःखरूपत्वादित्यर्थः। ननु दुःखमपि कर्म कार्यमेव, विहितत्वात् , अत आह— **दुःखस्येति।** कोऽपि दुःखकरं कर्म बुद्धिपूर्वकतया न करोति, परस्त्रीसङ्गादिकमपि तात्कालिकसुखकरत्वादेव बुद्धिपूर्वकतया करोति लोकः। तस्माद् नित्ये कर्मण्यपि दुःखरूपे न पुंसां बुद्धिपूर्वकतया प्रवृत्तिरस्ति। न च ततो निवर्ततामिति वाच्यम् , तदकरणे प्रत्यवायश्रवणात्। अतो नित्यकर्मणां करणे वा, अकरणे वा न कोऽपि बुद्धिपूर्वकं प्रवर्तेत, किन्तु शास्त्रबलादेव। तच्च शास्त्रं भगवता लोकस्यानर्थायैव कल्पितम् , नित्यकर्मणां करणस्य दुःखत्वाद् अकरणस्य च दुःखत्वात्। इत्थं लोकानर्थकरं निष्फलं शास्त्रं तु कथं वा प्रमाणं स्यात्? न कथमपि। अहो तव पाण्डित्यम् ! येन वेदमूलं गीताशास्त्रं व्याख्यातुं प्रवृत्तःसन् समूलं गीताशास्त्रमेवाप्रमाणं कृतवानिति। दोषान्तरमप्याह— **स्वाभ्युपगमविरोधश्चेति।** नित्यकर्मणो निष्फलत्वं मोक्षफलत्वं चेत्युभयमव्याहतं कथमित्यर्थः। 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इत्यादौ नित्यकर्मणो मोक्ष इति तैर्व्याख्यातत्वात् , कर्मसमुचिताज्ज्ञानान्मोक्ष इति ग्रन्थारम्भे चोक्तत्वादिति भावः। उपसंहरति— **तस्मादिति।** परोक्तार्थ-स्याप्रमाणत्वादयुक्तत्वाच्चेत्यर्थः। **यथाश्रुत इति।** यस्माच्छब्दाद् योऽर्थः व्याकरणादिना शब्दशक्त्या सिध्यति तदविरुद्ध इत्यर्थः। कथं स यथाश्रुतार्थोऽत आह— **तथा च व्याख्यात इति।** एतेन परोक्तार्थस्य अयथाश्रुतार्थत्वं सिद्धम्। तच्च दर्शितं प्रागेव। गौणवृत्त्याश्रयणं ह्ययथाश्रुतार्थत्वे तस्य लिङ्गम्। योऽर्थोऽभिधाशक्त्याऽऽयाति स यथाश्रुतः। अभिधेय इति यावत्। यस्तु लक्षणादिना स त्वयथाश्रुत इति विवेकः। यस्य शब्दस्य यथा योऽर्थः श्रुतः प्रसिद्धः तस्य स यथाश्रुतार्थ इति निष्कर्षः। कर्मशब्दस्य विहितप्रतिषिद्धोभयवाचित्वादत्र कर्मणस्तत्त्वकथनेन विकर्मणोऽपि तत्त्वमुक्तमिति वेद्यम्।

यत्तु **रामानुजः**— क्रियमाणमेव कर्म आत्मयाथात्म्यानुसन्धानेन ज्ञानाकारं यः पश्येत् , तच्च ज्ञानं कर्मण्यन्तर्गततया कर्माकारं यः पश्येत् , स बुद्धिमत्त्वादिगुणयुक्त इति, **तत्तुच्छम्** ; कर्मज्ञानयोः परस्परं भिन्नयोरितरत्रेतराकारस्य दुर्दर्शत्वात् , तादृशस्येतरत्रेतराकारज्ञानस्य मिथ्याज्ञानत्वाच्च। न चात्मयाथात्म्यानुसन्धानेन कर्मणो ज्ञानाकारता, ज्ञानस्य च कर्माकारतोपपद्यत इति वाच्यम् , आत्मयाथात्म्यानुसन्धानेन वा अन्येन वा न ह्यन्यस्यान्याकारता कथमप्युपपद्यते, भ्रान्तिं विना आत्मतत्त्वानुसन्धानेना-क्रियत्वमात्मनोऽस्तु नाम ; कथं पुनर्देहाश्रयस्य कर्मणः ज्ञानाकारता? कथं वा 'अयं घट' इत्यादिज्ञानस्य मानसस्य कर्माकारता? किं वा ज्ञानशक्तिक्रियाशक्त्योर्बुद्धिप्राणनिष्ठयोः तदाश्रययोर्बुद्धिप्राणयोर्वा अभेदो वक्तुं शक्यः केनचिद् विदुषा अध्यासं विना? न च

**यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः।**
**ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः॥ १९॥**

**तदेतत्** [1]**कर्मण्यकर्मदर्शनं स्तूयते—** यस्येति। यस्य **यथोक्तदर्शिनः** सर्वे **यावन्तः** समारम्भाः **सर्वाणि कर्माणि समारभ्यन्ते इति समारम्भाः** कामसङ्कल्पवर्जिताः **कामैः तत्कारणैश्च सङ्कल्पैर्वर्जिताः मुधैव चेष्टामात्राः अनुष्ठीयन्ते, प्रवृत्तेन चेल्लोकसंग्रहार्थम् , निवृत्तेन चेज्जीवनमात्रार्थम् ,** तं ज्ञानाग्निदग्धकर्माणम् , **कर्मादावकर्मादिदर्शनं**

आनन्दगिरिकृतव्याख्या

**कर्मण्यकर्मदर्शनं पूर्वोक्तं स्तोतुमुत्तरश्लोकं प्रस्तौति—** तदेतदिति। यथोक्तदर्शित्वं **पूर्वोक्तदर्शनसम्पन्नत्वम्। समारम्भशब्दस्य कर्मविषयत्वं न रूढ्या, किन्तु व्युत्पत्त्येत्याह—** समारभ्यन्त इतीति। **कामसङ्कल्पवर्जितत्वे कथं कर्मणामनुष्ठानमित्याशङ्क्याह—** मुधैवेति। **उद्देशफलाभावे तेषामनुष्ठानं यादृच्छिकं स्यादित्याशङ्क्य, प्रवृत्तेन निवृत्तेन वा तेषामनुष्ठानमिति**[2] **विकल्प्य क्रमेण निरस्यति—**

भाष्यार्कप्रकाशः

फलाद्यनभिसन्धानात् कर्मणो भवति ज्ञानाकारतेति वाच्यम् , फलाभिसन्ध्यादौ सति बन्धकत्वं कर्मणः, तदभावे त्वबन्धकत्वमित्येव सिद्धान्तात्। न च - बन्धकत्वाभावनिमित्तं कर्मणो ज्ञानाकारज्ञानं गौणमेव, न मिथ्येति - वाच्यम् , अनेन गौणज्ञानेनापि भगवत्प्रतिज्ञाताशुभमोक्षणरूपफलाभावात्। न हि फलाभिसन्ध्यादिरहितं कर्माबन्धकत्वाज्ज्ञानतुल्यमिति ज्ञानमात्रेण पुमान् अशुभाद् मुच्येत, किन्तु तादृशकर्मानुष्ठानादेव।

अथ कर्मण्यन्तर्गततया ज्ञानस्य कर्माकारतेत्येतदतीव परिहासास्पदं विदुषाम्। कथम्? किं देहाद्यन्तर्गतस्यात्मनो भवति देहाद्याकारता? यत्तु कर्मान्तर्गते ज्ञाने कर्माकारज्ञानं तद्धि मिथ्याज्ञानम् , देहाद्यन्तर्गते आत्मनि देहाद्याकारज्ञानवत्। नापि कर्मणि ज्ञानस्यान्तर्गतिरस्ति कुण्डे बदराणामिव, ज्ञानस्य मनोनिष्ठत्वात् कर्मणो देहाश्रयत्वाच्च। नापि ज्ञानयुक्तं कर्म कर्तव्यमिति वाच्यम् , कर्मज्ञानयोर्योगस्यैवाभावात् ; न ह्ययं घट इति ज्ञानं गमनादिक्रियया युज्येत। न च कर्मज्ञाने युगपदेवानुष्ठेये इति वाच्यम् , दुष्करत्वात्।

**ननु** स्थितिगत्योरिव ज्ञानकर्मणोर्विरोधाभावात् कथं युगपदनुष्ठानासम्भव इति **चेन्नैवम्** ; अहं कर्तेति ज्ञानस्य कर्मणश्च विरोधाभावेऽपि अहमक्रिय इति ज्ञानस्य कर्मणश्चास्ति विरोध इति। य आत्मानमकर्तारं मन्यते, स कथं पुनरात्मानं कर्तारं विद्याद् येन तस्य कर्मानुष्ठानं स्यात्। एतेन ज्ञानिना कर्मानुष्ठेयमित्येतदपि प्रत्युक्तम् , आत्मविदः कृतकृत्यत्ववचनेन कर्तव्याभावसिद्धेः। न च परोक्षज्ञानकर्मणोरविरोध इति वाच्यम् , आत्मनो नित्यापरोक्षत्वेन तद्विषयज्ञानस्य परोक्षत्वस्यैवासम्भवात्। यस्तु न ममात्मसाक्षात्कार इति मन्यते, स ह्यनात्मविदेव; अनात्मविदस्तु कर्माण्यस्माभिरप्यभ्युपेतानि। अयं ह्यनात्मविदात्मानमकर्तारं न निश्चयेन प्रत्येति, किन्तु संशयेनैव, आत्मसाक्षात्कारं विना तन्निश्चयानुदयात्। न चापातज्ञानविशिष्टं कर्म कर्तव्यमिति वाच्यम् , त्वया आत्मयाथात्म्यानुसन्धानपूर्वकं कर्म कर्तव्यमित्यसकृदुक्तत्वाद् आत्मयाथाम्यानुसन्धानस्य चापरोक्षज्ञानत्वात्। किञ्च एकाग्रचित्त-साध्यस्यात्मतत्त्वानुसन्धानस्य कथं कर्मकरणव्यग्रचित्तसाध्यत्वं येनात्मतत्त्वानुसन्धानपूर्वकं कर्म कर्तव्यं स्यात्? न हि मनस्यात्मनिष्ठे सति देहेन्द्रियाणि कर्मसु व्याप्रियेरन्। अन्यथा समाधौ वर्तमानस्यापि पुरुषस्य कर्मकरणप्रसङ्गः, मनोव्यापारपूर्वको हि देहेन्द्रियव्यापारः, मनस्यन्याक्रान्ते सति चक्षुरादीनां घटादिदर्शनाभावः सर्वविदितः। तस्माद् युगपदेकस्यैव मनसः आत्मयाथात्म्या-नुसन्धानं देहादिसंयोगपूर्वककर्मकरणं चानुपपन्नमेव। देहेन्द्रियादिव्यापारात्मकस्य कर्मणः, 'सच्चिदानन्द आत्माऽहमि'त्याकारक-ज्ञानस्य च न परस्पराकारत्वं स्वप्नेऽपि सम्भावयितुं शक्यम्। तस्मादवद्यं **रामानुजभाष्यम्**॥ १८॥

**यस्येति। कामाः** स्वर्गादितृष्णाः, **सङ्कल्पाः** मम स्वर्गो भूयादित्यादयः। सङ्कल्पप्रभवत्वात् कामस्योक्तम्— **तत्कारणैरिति।**

१. 'कर्मण्यकर्मादिदर्शनं', 'कर्मादावकर्मादिदर्शनं','यथोक्तदर्शित्वं स्तूयते' इति च पा.। २. 'तेषामनुष्ठानं यादृच्छिकं स्यादिति विकल्प्य' इति अधिकः पाठः।

**ज्ञानम् , तदेवाग्निः, तेन ज्ञानाग्निना दग्धानि शुभाशुभलक्षणानि कर्माणि यस्य तमाहुः परमार्थतः पण्डितं** बुधा **ब्रह्मविदः॥ १९॥**

**[1]यस्तु कर्मादौ अकर्मादिदर्शी सोऽकर्मादिदर्शनादेव निष्कर्मा संन्यासी जीवनमात्रार्थचेष्टः सन् कर्मणि न**

आनन्दगिरिकृतव्याख्या

प्रवृत्तेनेत्यादिना। **ज्ञानाग्नीत्यादि विभजते—** कर्मादाविति। **यथोक्तज्ञानं योग्यमेव दहति, नायोग्यमिति [2]विवक्षित्वा तस्मिन्नग्निपदम्। यथोक्तविज्ञानविरहिणामपि वैशेषिकादीनां पण्डितत्वप्रसिद्धिमाशङ्क्य तेषां पण्डिताभासत्वं विवक्षित्वा विशिनष्टि—** परमार्थत इति॥ १९॥

**विवेकात्पूर्वं कर्मणि प्रवृत्तावपि सति विवेके तत्र न प्रवृत्तिरित्याशङ्क्याङ्गीकरोति—** यस्त्विति। **विवेकात्पूर्वमभिनिवेशेन प्रवृत्तस्य**

भाष्यार्कप्रकाशः

मम स्वर्गो भूयादित्यादौ सङ्कल्प्य पश्चात् स्वर्गे सकामः सज्जत इति सङ्कल्पप्रभवत्वं कामस्य बोध्यम्। **मुधैव** व्यर्थमेव। ननु कुतो मुधाऽनुष्ठानं कर्मणाम्? अत आह—**प्रवृत्तेनेति।** गृहस्थेनेति यावत्। **निवृत्तेनेति**। संन्यासिनेति यावत्। प्रवृत्तिमार्गस्थो विद्वान् लोकसङ्ग्रहार्थं, निवृत्तिमार्गस्थस्तु जीवनार्थं व्यर्थमेव कर्माणि करोतीत्यर्थः। न च कथं निवृत्तस्य सर्वकर्मानुष्ठानमिति वाच्यम् , यानि भिक्षाटनादीनि निवृत्तेनानुष्ठीयन्ते तान्येव सर्वकर्माणीति विवक्षितत्वात्। प्रवृत्तस्तु यज्ञादिनित्यनैमित्तिकसर्वकर्माणि करोत्येवेति बोध्यम्। आदिपदाद् अकर्मणि कर्मदर्शनसङ्ग्रहः। देहाद्याश्रयं कर्म आत्मा त्वकर्मैवेत्याकारकं ज्ञानमित्यर्थः। **दग्धानीति** नाशितानीत्यर्थः। एतेन कर्मणां तूलत्वरूपणं व्यज्यते । **कर्माणीति**। सञ्चितानीति भावः, प्रारब्धकर्मणो भोगैकावसानत्वात्।

**ननु** भगवता अशुभान्मोक्ष्यसे इत्येवोक्तम् , कथमत्र शुभाशुभानीति चेत् , **नैष दोषः**। तत्राशुभपदेन संसारस्य विवक्षितत्वाद् , अत्राशुभपदेन पापस्य, शुभपदेन पुण्यस्य च विवक्षितत्वाच्छुभाशुभयोर्द्वयोरपि बन्धकत्वेन संसारत्वादिति। अत एव हि 'तद्विद्वान् पुण्यपापे विधूये'ति श्रूयते। **परमार्थत इति।** व्यवहारतः पाण्डित्यं तर्कादिशास्त्राध्येतृष्वप्यस्ति। वस्तुतस्तु न ते पण्डिताः, अनात्मज्ञत्वादिति भावः। **बुधा इति।** ननु तर्कादिशास्त्रज्ञास्तर्कादिशास्त्रज्ञं पण्डितं ब्रुवन्तीत्यत आह— **ब्रह्मविद इति।**

यत्तु **रामानुजः—** कर्मणो ज्ञानाकारता कथमुपपद्यत इति शङ्कासमाधानपरोऽयं श्लोक इति, सङ्कल्पः प्रकृत्या तद्गुणैश्चात्मानमेकीकृत्य व्यवहार इति, **तत्तुच्छम् ;** अनेन श्लोकेन कर्मणो ज्ञानाकारत्वस्याप्रतिपादितत्वात्। कामसङ्कल्पाभाववर्णनमात्रेण कर्मणो ज्ञानाकारालाभात्। 'ज्ञानाग्निदग्धकर्माण'मिति ज्ञानकर्मणोर्विरोधस्यैव प्रतिपादितत्वात्। कर्मणः स्वदाहकज्ञानाकारस्य स्वप्नेऽपि सम्पादयितुमशक्यत्वात् तूलस्याग्न्याकारवत्। कर्म दग्धं सज्ज्ञानाकारं प्रपद्यत इत्यप्ययुक्तं वाक्यं, यद्विद्यमानमेव ज्ञानाकारं प्राप्तुं न क्षमते, कथं पुनस्तन्नष्टं सत् प्राप्नुयात्? **किञ्च** नष्टं कर्म नाम कर्माभाव एव, न तु कर्म। कर्माभावस्य ज्ञानाकारत्वमस्तु नाम, न तावता कर्मणः तत्सिद्धिः।

**ननु** नास्माभिः क्रियमाणमेव कर्म ज्ञानाग्निना दह्यत इत्युक्तम्। किन्तु प्राचीनं पुण्यापुण्यलक्षणमेवेति चेत्? **तर्हि** कथं क्रियमाणस्य कर्मणो ज्ञानाकारतोक्ता श्लोकेनानेन? **ननु** यः कामसङ्कल्पवर्जितसर्वसमारम्भः स ज्ञानाग्निदग्धकर्मेति वचनात् कर्मणो ज्ञानाकारसिद्धिः, कामसङ्कल्पवर्जितसर्वसमारम्भत्वस्यैव ज्ञानत्वादिति चेत्, **मैवम् ;** कामसङ्कल्पवर्जितसर्वसमारम्भत्वं हि ज्ञानस्य लिङ्गं, न तु ज्ञानम् , आत्मयाथात्म्यानुसन्धानस्यैवेह ज्ञानत्वेन तवापि सम्मतत्वात्। कर्मान्तर्गतात्मयाथात्म्यानुसन्धानेन ज्ञानेनेति त्वया ऽप्युक्तत्वात्। तस्माद् यः आत्मयाथात्म्यं वेद , स कामसङ्कल्परहितानि कर्माणि करोति, यस्तु न वेद स कामसङ्कल्पसहितानि कर्माणि करोति। एवं कर्मकरणादपि ज्ञानिनो बन्धमाशङ्क्याह—**ज्ञानाग्निदग्धकर्माणमिति**। आत्मज्ञानिनं कर्माणि न लिम्पन्ति, कर्मगतलेपनसामर्थ्यस्य ज्ञानेन नाशितत्वात्। कर्मणां लेपनसामर्थ्यं हि कामसङ्कल्पप्रयुक्तम्। यस्तु विद्वान् कामसङ्कल्पावेव विससर्ज कथं तं कर्माणि लिम्पेयुः? न कथमपि। ततश्च येषां कर्मणां ज्ञानवशान्निर्लेपकत्वं जातं, तेषां कथं ज्ञानाकारत्वं स्यात्। न हि स्वगुणाधायकं वस्तु स्वमेव भवति। अथ च सङ्कल्पशब्दस्य दर्शितोऽर्थस्तु अभिधानादिविरुद्ध इति सर्वविदितम् ॥ १९॥

१. 'यस्तु अकर्मादिदर्शी' इति पा.। २. 'विवक्षितत्वात्' इति पा.।

**त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।**
**कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः॥२०॥**

**प्रवर्तते, यद्यपि प्राग्विवेकतः प्रवृत्तः। यस्तु प्रारब्धकर्मा सन्नुत्तरकालमुत्पन्नात्मसम्यग्दर्शनः स्यात् स कर्मणि प्रयोजनमपश्यन् ससाधनं कर्म परित्यजत्येव। स कुतश्चिन्निमित्तात् कर्मपरित्यागासम्भवे सति, कर्मणि तत्फले च सङ्गरहिततया स्वप्रयोजनाभावाल्लोकसंग्रहार्थं पूर्ववत् कर्मणि प्रवृत्तोऽपि नैव किञ्चित् करोति। ज्ञानाग्निदग्धकर्मत्वात् तदीयं कर्माकर्मैव सम्पद्यत इत्येतमर्थं दर्शयिष्यन्नाह—** त्यक्त्वेति। **त्यक्त्वा कर्मस्वभिमानं फलासङ्गं च यथोक्तेन ज्ञानेन** नित्यतृप्तो **निराकाङ्क्षो विषयेष्वित्यर्थः।** निराश्रयः **आश्रयरहितः।** आश्रयो **नाम यदाश्रित्य पुरुषार्थं सिषाधयिषति। दृष्टादृष्टेष्टफलसाधनाश्रयरहित इत्यर्थः। विदुषा क्रियमाणं कर्म परमार्थतोऽकर्मैव, तस्य निष्क्रियात्म-**

आनन्दगिरिकृतव्याख्या

**विवेकानन्तरमभिनिवेशाभावात् प्रवृत्त्यसम्भवेऽपि जीवनमात्रमुद्दिश्य प्रवृत्त्याभासः सम्भवतीत्यर्थः। सत्यपि विवेके तत्त्वसाक्षात्कारानुदयात्कर्मणि प्रवृत्तस्य कथं तत्त्यागः स्यादित्याशङ्क्याह—** यस्तु प्रारब्धेति। **त्यक्त्वेत्यादि समनन्तरश्लोकमवतारयितुं भूमिकां कृत्वा तदवतारणप्रकारं दर्शयति—** स कुतश्चिदिति। **लोकसंग्रहादि निमित्तं विवक्षितम्। कर्मपरित्यागासम्भवे सति तस्मिन्प्रवृत्तोऽपि नैव करोति किञ्चिदिति सम्बन्धः। कर्मणि प्रवृत्तो न करोति कर्मेति कथमुच्यते? तत्राह—** स्वप्रयोजनाभावादिति। **कथं तर्हि कर्मणि प्रवर्तते? तत्राह—**लोकेति। [1]**प्रवृत्तेरर्थक्रियाकारित्वाभावं** [2]**'पश्वादिभिश्चाविशेषात्' इति न्यायेन व्यावर्तयति—**पूर्ववदिति। **कथं तर्हि विवेकिनामविवेकिनां च विशेषः स्यादित्याशङ्क्य , कर्मादौ सङ्गासङ्गाभ्यामित्याह—** कर्मणीति। **उक्तेऽर्थे समनन्तरश्लोकमवतारयति—** ज्ञानाग्नीति। **एतमर्थं दर्शयिष्यन्निमं श्लोकमाहेति योजना। यथोक्तं ज्ञानं कूटस्थात्मदर्शनं, तेन स्वरूपभूतं सुखं साक्षादनुभूय कर्मणि तत्फले च सङ्गमपास्य विषयेषु निरपेक्षश्चेष्टते विद्वानित्याह—** त्यक्त्वेत्यादिना। **इष्टसाधनसापेक्षस्य कुतो निरपेक्षत्वमित्याशङ्क्य विशिनष्टि—**निराश्रय इति। यदाश्रित्येति **यच्छब्देन फलसाधनमुच्यते।** आश्रयरहित **इत्यस्यार्थं स्पष्टयति—** दृष्टेति। **तेन ज्ञानवता पुरुषेणैवम्भूतेन त्यक्त्वा**

भाष्यार्कप्रकाशः

त्यक्त्वेति श्लोकमवतारयति— **यस्त्विति।** यः कर्मारम्भात् प्रागेवात्मानात्मविवेकतः संन्यासे प्रवृत्तः स आत्मवित् संन्यासी न पुनः कर्मणि प्रवर्तते, निवृत्तिमार्गत्वात् संन्यासस्य। अथ यस्तु यज्ञादिकर्म प्रारभ्य, तस्मिन् कर्मण्यसमाप्ते एव प्रारम्भोत्तरकालमात्मज्ञानी भवेत् स पुमान् प्रारब्धमपि तत् कर्म ससाधनं परित्यज्य संन्यासी भवेदेव, न पुनः कर्मणि प्रवर्तते। अतो नेमौ द्वावुद्दिश्य त्यक्त्वेति श्लोकः प्रवृत्तः, 'कर्मण्यभिप्रवृत्तोऽपी'ति कर्मण्यभिप्रवृत्तमुद्दिश्य श्लोकस्योक्तत्वात्। किन्तु यः कर्मप्रारम्भानन्तरमुत्पन्नात्मज्ञानोऽपि कुतश्चित् प्रतिबन्धान्निमित्तात् कर्म परित्यक्तुं न क्षमते, तमसंन्यासिनमात्मविदमारब्धकर्माणमुद्दिश्य श्लोकोऽयं प्रवृत्तः। अयं हि प्रारब्धे कर्मणि तत्फले च स्वप्रयोजनाभावान्निःसङ्गोऽपि लोकसङ्ग्रहार्थं ज्ञानात्प्रागिव कर्मणि प्रवर्तते ज्ञानात्पश्चादपि। एवं कर्मणि प्रवृत्तमात्मविदं तदारब्धं कर्म नैव लिम्पति, कुतः? ज्ञानाग्निना कर्मगतबन्धकत्वांशस्य दग्धत्वात्। एवमबन्धकमेतदीयं कर्म **अकर्मैव** कर्माभाव एव **सम्पद्यते** जायत इति।

कर्मफलासङ्गं त्यक्त्वा नित्यतृप्तः निराश्रयश्च सन् सः कर्मण्यभिप्रवृत्तोऽपि किञ्चिन्नैव करोति। **अभिमानम्** अहमस्य कर्ता ममेदं कर्मेति चेत्येवंरूपं **यथोक्तेन** कर्मण्यकर्म यः इति श्लोकोक्तेन निष्क्रियात्मस्वरूपदर्शनेनेत्यर्थः। विषयस्पृहाभावादेव तृप्तिरित्याह— **निराकाङ्क्ष इति। आश्रय इति।** आश्रीयते पुरुषार्थायेत्याश्रयः यज्ञादिः। **यदिति।** तदिति, स इति वा शेषः। दृष्टानीष्टफलानि पशुपुत्रान्नादीनि, अदृष्टानीष्टफलानि स्वर्गादीनि, तेषां यत् साधनं कर्मादि, तदेवाश्रयः। तेन रहितः तथोक्तः। साधनाश्रयणरहित इति

१. विद्वत्प्रवृत्तेः विदुषि देहान्तरभोग्यफलजनकत्वाभावः तदधिगमाधिकरणे (ब्र.सू.४-१-१३) निरूपितः। अर्थक्रियाकारित्वं तु न निवार्यते। २. विवेकिनां व्यवहारस्यापि अध्यासपूर्वकत्वं सूत्रभाष्ये एतद्दृष्टान्तेन निरूपितम्।

**निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः।**
**शारीरं केवलं कर्म कुर्वन् नाप्नोति किल्बिषम् ॥२१॥**

**दर्शनसम्पन्नत्वात्। तेनैवम्भूतेन स्वप्रयोजनाभावात् ससाधनं कर्म परित्यक्तव्यमेवेति प्राप्ते, ततो निर्गमासम्भवात् लोकसंग्रहचिकीर्षया शिष्टविगर्हणापरिजिहीर्षया वा पूर्ववत् कर्मण्यभिप्रवृत्तोऽपि निष्क्रियात्मदर्शनसम्पन्नत्वाद् नैव किञ्चित् करोति सः॥२०॥**

**यः पुनः पूर्वोक्तविपरीतः प्रागेव कर्मारम्भाद् ब्रह्मणि सर्वान्तरे प्रत्यगात्मनि निष्क्रिये सञ्जातात्मदर्शनः सः दृष्टादृष्टेष्टविषयाशीर्विवर्जिततया दृष्टादृष्टार्थे कर्मणि प्रयोजनमपश्यन् ससाधनं कर्म संन्यस्य शरीरयात्रामात्रचेष्टो**

आनन्दगिरिकृतव्याख्या

**कर्मफलासङ्गमित्यादिना विशेषितेनेत्यर्थः**। ततः **ससाधनात् कर्मणः सकाशादिति यावत्। निर्गमासम्भवे हेतुमाह—**लोकेत्यादिना। पूर्ववत् **ज्ञानोदयात् प्रागवस्थायामिवेत्यर्थः**। अभिप्रवृत्तोऽपि **लोकदृष्ट्येति शेषः। नैव करोति किञ्चिदिति स्वदृष्ट्येति द्रष्टव्यम् ॥२०॥**

**सत्यपि विक्षेपके कर्मणि कूटस्थात्मानुसन्धानस्य सिद्धे कैवल्यहेतुत्वे, विक्षेपाभावे सुतरां तस्य तद्धेतुत्वसिद्धिरित्यभिप्रेत्याह—** यः पुनरिति। पूर्वोक्तविपरीतत्वं **लोकसङ्ग्रहादिनिरपेक्षत्वम्। तदेव वैपरीत्यं स्फोरयति—** प्रागेवेति। **ससाधनसर्वकर्मसंन्यासे शरीरस्थितिरपि कथमित्याशङ्क्याह—** शरीरेति। **तर्हि तथाविधचेष्टानिविष्टचेतस्तया सम्यग्ज्ञानबहिर्मुखस्य कुतो मुक्तिरित्याशङ्क्य**

भाष्यार्कप्रकाशः

वा। अनाश्रितफलसाधन इत्यर्थः। निर्व्यापार इति यावत्। **ततः** कर्मणःसकाशात् **निर्गमनं** बहिर्गमनम् , संन्यास इति यावत्। **तदसम्भवात्** पुत्रादिप्रतिबन्धादिति भावः। हेत्वन्तरमाह— **लोकेति**। अन्यं हेतुमाह— **विगर्हणेति। विगर्हणं** निन्दा - 'अनारम्भो मनुष्याणां प्रथमं बुद्धिलक्षणम्। आरब्धस्य समाप्तिस्तु द्वितीयं बुद्धिलक्षण'मिति स्थिते(ऽधिगमं विद्वांसं) यज्ञादिकर्म प्रारभ्यासमाप्यैव संन्यस्तवानित्येवंरूपा लौकिकाज्ञजनकृतेति भावः। परिहर्तुमिच्छा **परिजिहीर्षा**। यद्यप्यात्मविदः स्तुतिनिन्दे समे एव, आत्मन उभयदूरत्वात् , तथापि देववत्पूज्यत्वमेव विद्वद्भिः सम्पाद्यम् , न तु विड्वराहादिसाम्यमित्यभिप्रेत्येदमुक्तम्।

ननु कर्मणि प्रवृत्तोऽपि न करोतीत्युक्तिर्व्याहतेत्यत आह— **निष्क्रियेति**। देहाद्याश्रयमेवेदं कर्म, न त्वात्माश्रयमिति यः प्रत्येति स आत्मविदात्मानमकर्तारमेव मन्यत इति कृत्वा न करोतीत्युक्तमिति भावः। देहादिसङ्घाते अनात्मनि कर्मणि प्रवृत्तेऽपि निष्क्रिय आत्मा अप्रवृत्त एवेति नास्ति काऽपि व्याहतिरिति तत्त्वम्। तस्मादात्मविदा कृतं कर्म अकर्मैव सम्पद्यत इति।

अत्र— नैव किञ्चित् करोति कर्मापदेशेन ज्ञानाभ्यासमेव करोतीति **रामानुजः,** विपरीतविषयसञ्चरणेन ज्ञानाभ्यासविरोधिनामिन्द्रियाणामनुकूलविषयसञ्चरणमात्रं हि कर्मयोग इति भाव इति **वेदान्तदेशिक**श्चाहतुः, **तत्तुच्छम्** । सत्यां **रामानुजो**क्तार्थविवक्षायां व्यासेन 'ज्ञानमेव करोति सः' इत्येवोच्येत श्लोकः। इन्द्रियव्यापारोपरमस्य ज्ञानाभ्यासस्य इन्द्रियाणां विपरीतविषयसञ्चरणमिवानुकूलविषयसञ्चरणमपि विरोध्येव, इन्द्रियाणां विषयप्रावण्यमात्रस्यैव इन्द्रियव्यापारोपरमप्रतिबन्धकत्वात्। अन्तर्मुखमनःसाध्यो हि ज्ञानाभ्यासः, बहिर्मुखमनोवेद्यास्तु अनुकूलाः प्रतिकूलाश्च सर्वे विषयाः। अतः कथमनुकूलविषयाणां ज्ञानाभ्यासाविरोधित्वम्। तस्माद् यो निःसङ्गं कर्म करोति स कर्मयोगमेव करोति, न तु ज्ञानयोगं, कर्मयोगसाध्ये ज्ञानयोगे कर्मयोगाकाराभावात्॥२०॥

निराशीरिति श्लोकमवतारयति— **य इति। प्रागेव कर्मारम्भादिति।** गृहस्थाश्रम एव यज्ञादिकर्मणां प्रारम्भाद् गृहस्थाश्रमस्वीकारात् प्रागेवेत्यर्थः। ब्रह्मचर्यादेवेति यावत् , 'ब्रह्मचर्यादेव प्रव्रजेदि'ति श्रुतेरिति भावः। **यद्वा** ब्रह्मचर्याश्रमस्वीकारात् प्रागेवेत्यर्थः। तत्रैव वेदाध्ययनादिकर्मप्रारम्भादिति भावः। ब्रह्मणि सञ्जातमात्मेति दर्शनं बुद्धिर्यस्य सः 'अहं ब्रह्मास्मी'ति ज्ञानवानित्यर्थः। शुकसनकवामदेवादिवदिति भावः।

**यतिर्ज्ञाननिष्ठो मुच्यत इत्येतमर्थं दर्शयितुमाह—** निराशीरिति। **निराशीः, निर्गताः आशिषो यस्मात् स** निराशीः, यतचित्तात्मा **चित्तम् अन्तःकरणम् , आत्मा बाह्यः कार्यकरणसङ्घातः, तावुभावपि यतौ संयतौ येन स यतचित्तात्मा,** त्यक्तसर्वपरिग्रहः **त्यक्तः सर्वः परिग्रहो येन स त्यक्तसर्वपरिग्रहः,** शारीरं **शरीरस्थितिमात्रप्रयोजनम् ,** केवलं **तत्राप्यभिमानवर्जितं, कर्म कुर्वन्** नाप्नोति **न प्राप्नोति** किल्बिषम् **अनिष्टरूपं पापं धर्मं च। [१]धर्मोऽपि मुमुक्षोः किल्बिषमेव, बन्धापादकत्वात्। तस्मात् ताभ्यां मुक्तो भवति, संसारात् मुक्तो भवति इत्यर्थः।**

**[२]शारीरं केवलं कर्मेत्यत्र किं शरीरनिर्वर्त्यं शारीरं कर्माभिप्रेतम् , आहोस्विच्छरीरस्थितिमात्रप्रयोजनं शारीरं कर्मेति? किञ्चातः यदि शरीरनिर्वर्त्यं शारीरं कर्म, यदि वा शरीरस्थितिमात्रप्रयोजनं शारीरमिति? उच्यते— यदा शरीरनिर्वर्त्यं कर्म शारीरमभिप्रेतं स्यात् तदा दृष्टादृष्टप्रयोजनं कर्म प्रतिषिद्धमपि शरीरेण कुर्वन् नाप्नोति किल्बिषमिति**

आनन्दगिरिकृतव्याख्या

**यथोपदिष्टचेष्टायामनादरान्नैवमित्याह—** ज्ञाननिष्ठ इति। **इति दर्शयितुमिमं श्लोकमाहेति पूर्ववत्।** आशिषः **प्रार्थनाभेदास्तृष्णाविशेषाः। आशिषां विदुषो निर्गतत्वे हेतुमाह—** यतेति। **चित्तवदात्मनः संयमनं कथमित्याशङ्क्याह—** आत्मा बाह्य इति। **द्वयोः संयमने [३]सति अर्थसिद्धमर्थमाह—**त्यक्तेति। **सर्वपरिग्रहपरित्यागे देहस्थितिरपि दुःस्था स्यादित्याशङ्क्याह—**शारीरमिति। **मात्रशब्देन पौनरुक्त्यादनर्थकं केवलपदमित्याशङ्क्याह—** तत्रापीति।

**शारीरं केवलमित्यादौ शारीरपदार्थं स्फुटीकर्तुमुभयथा सम्भावनया विकल्पयति—**शारीरमिति। **शरीरनिर्वर्त्यं शारीरमित्यस्मिन् पक्षे किं दूषणम् , शरीरस्थितिमात्रं शारीरमित्यस्मिन् वा पक्षे किं फलमिति पूर्ववादी पृच्छति—** किञ्चात इति। **शरीरनिर्वर्त्यं शारीरमित्यस्मिन् पक्षे सिद्धान्ती दूषणमाह—**उच्यत इति। **शरीरेण यन्निर्वर्त्यं तत् किं प्रतिषिद्धं विहितं वा? प्रथमे विरोधः स्यादित्याह—** यदेति। **प्रतिषिद्धाचरणेऽपि नानिष्टप्राप्तिरित्युक्ते प्रतिषेधशास्त्रविरोधः स्यादित्यर्थः। द्वितीये विहितकरणे सत्यनिष्टप्राप्त्यभावादप्राप्तप्रतिषेधः**

भाष्यार्कप्रकाशः

**आशिषः** कामाः, बाह्यं कार्यं देहः, बाह्यानि करणानीन्द्रियाणि, बाह्यघटादिविषयग्रहणसाधनत्वाद् बाह्यकरणत्वमिन्द्रियाणाम् , अन्तःसुखादिविषयग्रहणसाधनत्वादन्तःकरणत्वं मनस इति विवेकः। **संयतौ** नियमितौ। **परिग्रहो** गृहादिः, परिगृह्यत इति परिग्रहः। शरीरस्येदं **शारीरम्।** फलितमाह—**शरीरेति।** शरीररक्षणमात्रफलकं भिक्षाटनादिरूपमिति भावः। **धर्मं** पुण्यम्। ननु पुण्यस्य कथं किल्बिषत्वम्? अत आह— **मुमुक्षोरनिष्टरूपत्वादिति।** यदनिष्टं तत् किल्बिषमिति सिद्धान्तात् पुण्यमपि मुमुक्षोरनिष्टमेवेति किल्बिषमेव। मुमुक्षुर्नाम बन्धान्मोक्तुमिच्छुर्हि। बन्धश्च जन्मादिसंसाररूपः। पुण्यात् पुण्यजन्म देवादिरूपं भवेदेवेति पुण्यस्य बन्धकत्वादनिष्टत्वमिति भावः।

शारीरमित्यस्य शरीरस्थितिमात्रप्रयोजनमित्यर्थो भाष्यकारैर्वर्णितः। तत्र यदि यः कोऽपि शारीरमित्यस्य शरीरनिर्वर्त्यं कर्मेत्यर्थः किं न स्यादिति पृच्छेत्। तं प्रति किमुत्तरमिति शङ्कायां शरीरनिर्वर्त्यमित्यर्थस्यायुक्तत्वं प्रतिपादयितुं भूमिकामारचयति— **शारीरं केवलं कर्मेत्यत्रेति।** पक्षद्वयेऽपि किं दूषणमिति पृच्छति पूर्ववादी— **किञ्चात इति।** प्रतिजानाति सिद्धान्ती— **उच्यत इति।** प्रथमपक्षे दोषमाह— **यदेत्यादिना।** यज्ञयागादिविहितकर्मवत् परदारगमनादिनिषिद्धकर्माण्यपि शरीरेणैव निर्वर्त्यन्त इति कृत्वा निषिद्धानामपि शारीरत्वं दुर्वारम्। ततश्च शारीरं कर्म कुर्वन्नित्यस्य विहितं प्रतिषिद्धं वा कर्म शरीरेण कुर्वन्नित्यर्थः सिद्धः, शरीरनिर्वर्त्यं कर्म कुर्वन्नित्यस्य शरीरेण कर्म कुर्वन्नित्येव सिद्धत्वात्। तत्र च प्रथमे विकल्पे किं शरीरनिर्वर्त्यं निषिद्धं कर्म कुर्वन् किल्बिषं नाप्नोतीत्यभिप्रेतम् , यद्वा शरीरनिर्वर्त्यं विहितं कर्म कुर्वन् किल्बिषं नाप्नोतीति विकल्प्य, प्रथमपक्षे दोषमाह— **प्रतिषिद्धमिति।** प्रतिषिद्धकर्मणां न किल्बिषप्राप्तिरित्येतद्वचनं व्याहतम् , 'न परदारान् गच्छेदि'त्यादिनिषेधशास्त्रानर्थक्यप्रसङ्गात्। द्वितीयपक्षे

---

१. 'मुमुक्षोरनिष्टरूपत्वाद् धर्मोऽपि किल्बिषमेव। तस्मात्' इति रा.पा.। २. 'किञ्च शारीरं' इति पा.। ३. 'सति सिद्ध' इति पा.।

**ब्रुवतो विरुद्धाभिधानं प्रसज्येत। शास्त्रीयं च कर्म दृष्टादृष्टप्रयोजनं शरीरेण कुर्वन् नाप्नोति किल्बिषमित्यपि ब्रुवतोऽप्राप्तप्रतिषेधप्रसङ्गः। शारीरं कर्म कुर्वन्निति विशेषणात् केवलशब्दप्रयोगाच्च वाङ्मनसनिर्वर्त्यं कर्म विधिप्रतिषेधविषयं धर्माधर्मशब्दवाच्यं [1]कुर्वन् प्राप्नोति किल्बिषमित्युक्तं स्यात्। तत्रापि वाङ्मनसाभ्यां विहितानुष्ठानपक्षे किल्बिषप्राप्तिवचनं विरुद्धमापद्येत। प्रतिषिद्धसेवापक्षेऽपि भूतार्थानुवादमात्रमनर्थकं स्यात्। यदा तु शरीरस्थितिमात्रप्रयोजनं शारीरं कर्माभिप्रेतं भवेत् , तदा दृष्टादृष्टप्रयोजनं कर्म [2]विधिप्रतिषेधगम्यं शरीरवाङ्मनसनिर्वर्त्यम् अन्यदकुर्वंस्तैरेव शरीरादिभिः शरीरस्थितिमात्रप्रयोजनम् - केवलशब्दप्रयोगाद् 'अहं करोमी'त्यभिमान-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

[3]......तद्विरुद्धं वचनम् , द्वितीये सिद्धानुवादमात्रमित्यर्थः। एवमाद्यविकल्पे दूषणमभिधाय द्वितीयविकल्पे लाभं दर्शयति— **यदा त्वित्यादिना।**

आनन्दगिरिकृतव्याख्या

**स्यादित्याह—** शास्त्रीयं चेति। **दृष्टप्रयोजनं कारीर्यादिकं कर्म, अदृष्टप्रयोजनं स्वर्गसाधनं ज्योतिष्टोमादिकं कर्मेति विभागः। शरीरनिर्वर्त्यं कर्म शारीरमभिमतमिति पक्षे दूषणान्तरमाह—** शारीरमिति। **वाचा मनसा वा कर्मणोऽनुष्ठाने संन्यासिनो भवत्येव किल्बिषप्राप्तिरित्याशङ्क्याह—** तत्रापीति। **वाङ्मनसाभ्यां विहितानुष्ठाने वा प्रतिषिद्धकरणे वा किल्बिषप्राप्तिः संन्यासिनः स्यादिति विकल्प्याऽऽद्ये जपध्यानविधिविरोधः स्यादित्युक्त्वा, द्वितीयं दूषयति—** प्रतिषिद्धेति। **शरीरनिर्वर्त्यं कर्म शारीरमिति पक्षमेवं प्रतिक्षिप्य, द्वितीयपक्षे लाभं दर्शयति—** यदा त्विति। अन्यद् **देहस्थितिप्रयोजनात् कर्मणः सकाशादिति शेषः। तत्रापि विदुषः स्वदृष्ट्या न प्रवृत्तिरिति सूचयति—**

भाष्यार्कप्रकाशः

दोषमाह— **शास्त्रीयमिति**। निषेधस्य प्रसक्तिपूर्वकत्वात् यदि शास्त्रविहितकर्मानुष्ठानात् किल्बिषस्य प्रसक्तिः, तदा तन्निषेधार्थं किल्बिषं न प्राप्नोतीति वक्तुं युक्तम् , न त्वेतदस्ति, न हि विहितानुष्ठानात् किल्बिषं प्रसज्यते, अन्यथा विधिशास्त्रवैयर्थ्यप्रसङ्गात्। तस्मादप्राप्तस्य किल्बिषस्य प्रतिषेधप्रसङ्गोऽयं दुष्ट इत्यर्थः। **किञ्च** कर्म कुर्वन्नित्यनुक्त्वा शारीरं कर्मेत्युक्तम्। अनेन च शारीरत्वविशेषणेन वाचिकस्य मानसिकस्य च कर्मणो व्यवच्छेदः(दकः) सिध्यति। न च शारीरमुपलक्षणं वाचिकमानसिकयोरिति वाच्यमित्याह— **केवलशब्दप्रयोगादिति।** शारीरं केवलं कर्म कुर्वन्नित्यनेन शरीरमात्रनिर्वर्त्यमेव कर्म कुर्वन्नित्यर्थस्य जातत्वात् केवलपदेन वाचिकमानसिककर्मणोर्निवृत्तिरिति भावः। ननु भवतु, को दोषः? तत्राह— **वागिति**। शरीरमात्रनिर्वर्त्यकर्मकरणात् किल्बिषं नेति वचनेन वाचा मनसा च निर्वर्त्यस्य कर्मणः करणात् किल्बिषं प्राप्यत एवेति सिद्धमित्यर्थः। कुर्वन्नाप्नोतीत्यस्य कुर्वन् आप्नोतीति छेदः। 'ङमो ह्रस्वादि'ति ङमुडागमः। मूले तु 'कुर्वन् न आप्नोति' इति छेदः इति विवेकः। ननु वाचिकमानसिककर्मकरणात् किल्बिषप्राप्तिरभिप्रेतैवेत्यत आह— **तत्रापीति**। किं वाचिकस्य मानसिकस्य वा विहितस्य कर्मणः करणं किल्बिषावहम्? यद्वा निषिद्धस्य? इति विकल्प्य, आद्यं दूषयति— **विहितेति**। द्वितीयं दूषयति— **प्रतिषिद्धेति।** प्रतिषिद्धाचरणेन किल्बिषप्राप्तेः सिद्धत्वात् पुनरिह वचनमनर्थकमित्यर्थः। **भूतार्थः** सिद्धार्थः। अनुसृत्य वादो वचन**मनुवादः**। सिद्धस्य पुनः कथनमित्यर्थः।

एवं शरीरनिर्वर्त्यं शारीरं कर्माभिप्रेतं वेति प्रथमपक्षं दूषयित्वा द्वितीयं पक्षं सिद्धान्तयति— **यदा त्विति**। दृष्टान्यदृष्टानि च प्रयोजनानि यस्य तद् **दृष्टादृष्टप्रयोजनम्**। निषिद्धाचरणस्य दृष्टं प्रयोजनं रोगराजशिक्षादिः, अदृष्टं तु नरकम्। विहिताचरणस्य तु दृष्टं प्रयोजनं पशुपुत्रान्नादिः, अदृष्टं तु स्वर्गादिरिति विवेकः। **विधिप्रतिषेधाभ्यां** विधिनिषेधशास्त्राभ्यां गम्यम्। **अन्यत्** शरीरस्थितिमात्र-

---

१. 'कुर्वन्नाप्नोति' इति रा.पा.। २. 'विधिप्रतिषेधशास्त्रगम्यम्' इति पा.। ३. अत्र कश्चिद् ग्रन्थभागो नष्टः। स च त्रुटितो भाग आनन्दगिरिटीकादर्शनेनेत्थमूहितुं शक्यते— [शारीरपदार्थं स्फुटीकर्तुं विकल्पयति—**शारीरमिति**। शरीरनिर्वर्त्यं शारीरमित्यस्मिन् पक्षे, तत् किं प्रतिषिद्धं विहितं वा? प्रथमे प्रतिषेधशास्त्रेणानिष्टप्राप्तिबोधनात् ] इति।

**वर्जितः शरीरादिचेष्टामात्रं लोकदृष्ट्या कुर्वन् नाप्नोति किल्बिषम्। एवम्भूतस्य पापशब्दवाच्यकिल्बिषप्राप्त्यसम्भवात्** किल्बिषं **संसारं नाप्नोति। ज्ञानाग्निदग्धसर्वकर्मत्वादप्रतिबन्धेन मुच्यत एवेति पूर्वोक्तसम्यग्दर्शनफलानुवाद एवैषः। एवं शारीरं केवलं कर्मेत्यस्यार्थस्य परिग्रहे निरवद्यं भवति॥२१॥**

**त्यक्तसर्वपरिग्रहस्य यतेः अन्नादेः शरीरस्थितिहेतोः परिग्रहस्याभावाद् याचनादिना [1]शरीरस्थितौ कर्तव्यतायां प्राप्तायाम् 'अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया' (म.भा.१४.४६.१९, बौ.ध.सू.२.१८.१२) इत्यादिना वचनेनानु-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**एवम्भूतस्येति**। विधिप्रतिषेधगम्यं कर्म शरीरस्थितिहेतुव्यतिरिक्तमकुर्वत इत्यर्थः॥२१॥

आनन्दगिरिकृतव्याख्या

लोकेति। **विद्वानुक्तया रीत्या वर्तमानो नाप्नोति किल्बिषमित्यत्र विवक्षितमर्थमाह—** एवम्भूतस्येति। **विधिनिषेधगम्यं कर्म देहस्थितिहेतुव्यतिरिक्तमकुर्वत इत्यर्थः। 'शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिष'मित्यस्योक्तेन प्रकारेण परिग्रहे 'शारीरं केवल'मिति विशेषणद्वयं निर्दोषं सिद्ध्यतीति फलितमाह—** एवमिति॥२१॥

**पूर्वश्लोकेन सङ्गतिं दर्शयन्नुत्तरश्लोकमुत्थापयति—** त्यक्तेति। **अन्नादेरित्यादिशब्देन [2]पादुकाच्छादनादि गृह्यते। याचनादिनेत्यादिपदेन सेवाकृष्याद्युपादीयते। भिक्षाटनार्थमुद्योगात् प्राक्काले केनापि योग्येन निवेदितं भैक्ष्यम्** अयाचितम्। **[3]अभिशस्तं पतितं च वर्जयित्वा सङ्कल्पमन्तरेण पञ्चभ्यः सप्तभ्यो वा गृहेभ्यः समानीतं भैक्ष्यम्** असंक्लृप्तम्। **सिद्धमन्नं भक्तजनैः स्वसमीपमुपनीतम्** उपपन्नम्।

भाष्यार्कप्रकाशः

प्रयोजनात् कर्मणोऽन्यदित्यर्थः। कर्म यज्ञादि परदारगमनादि चाकुर्वन्। शरीरादिभिरित्यादिपदाद् वाङ्मनसयोर्ग्रहणम्। **लोकदृष्ट्येति।** एतदपि कर्म विवेकदृष्ट्या स्वयं न करोति, स्वस्याविक्रियात्मत्वात् , किन्तु लोकदृष्ट्या कुर्वन्निव प्रतिभातीत्यर्थः। लोको हि देहादौ यतेर्भिक्षाटनादिकं कर्म कुर्वति सति 'यतिः कर्म करोती'ति मन्यते, विद्वांस्तु 'अविक्रियः आत्मा कर्म कथं कुर्यात् , किन्तु देहादिसङ्घात एवे'ति जानातीति भावः।

ननु शरीरस्थितिमात्रप्रयोजनं भिक्षाटनादिकं कर्म कुर्वन् किल्बिषं नाप्नोतीत्येतदपि वचनमयुक्तमेव, एवंविधकर्मकरणात् किल्बिषप्राप्त्यसम्भवात् , अप्राप्तस्य च किल्बिषस्य निषेधायोगादित्यत आह— **संसारमिति।** एवंविधकर्मकरणादप्यस्य संसारस्य प्राप्तिरस्तीति मन्यमानमज्ञजनम्प्रति वदति भगवान्— **संसारं न प्राप्नोतीति।** अतः भ्रान्त्या प्राप्तस्य संसारस्य निषेधो युज्यत एवेति भावः। कुतोऽस्य संसाराभावः? अत आह— **ज्ञानाग्नीति। अप्रतिबन्धेनेति।** अस्य मुक्तौ न कोऽपि कर्मादिप्रतिबन्धोऽस्तीत्यर्थः। **पूर्वोक्तस्य** कर्मण्यकर्मेति श्लोकोक्तस्य **सम्यग्दर्शनस्य** आत्मज्ञानस्य **यत्फल**मशुभान्मोक्षणं तस्यैवानुवादोऽयम् , न त्वपूर्ववचनमित्येवकारार्थः। निगमयति— **एवमिति।** एवं मदुक्तरीत्या शारीरं केवलं कर्मेत्यस्य शरीरस्थितिमात्रप्रयोजनमभिमानवर्जितं कर्मेत्यर्थस्य परिग्रहे **निरवद्यं** दोषाभावो भवति। एतेनान्यार्थस्य परिग्रहः सावद्य इति सिद्धम्।

यत्तु **रामानुजः**—शारीरं केवलं कर्म कुर्वन् ज्ञाननिष्ठाव्यवधानरहितं कर्मयोगमनुतिष्ठन् किल्बिषं संसारं नाप्नोतीति, **तत्तुच्छम्** ; वाचिकमानसिकजपध्यानादिकर्मानुष्ठानेन संसारप्राप्तिप्रसङ्गात् , केवलपदस्याव्यवधानार्थाश्रयणस्याप्रमाणत्वाच्च॥२१॥

यदृच्छेति श्लोकमवतारयति— **त्यक्तेति। अयाचितमिति।** भिक्षाटनार्थमुद्योगात् प्राक्काले केनापि योग्येन निवेदितं भैक्षमित्यर्थः। **असंक्लृप्तमिति।** अनिर्णीतं अभिशस्तं पतितं च वर्जयित्वा सङ्कल्पमन्तरेण पञ्चभ्यः सप्तभ्यो वा गृहेभ्यः समानीतं भैक्षमित्यर्थः। **यदृच्छयोपपन्नमिति** सिद्धमन्नं भक्तजनैः स्वयमुपनीतमित्यर्थः।

---

१. 'शरीरस्थितिकर्तव्यतायाम्' इति पा.। यथाश्रुतपाठे व्यधिकरणे सप्तम्यौ। २. पानाच्छादनादि इति पा.। ३.'अभिशस्तं च पतितं पाषण्डं देवपूजकम्। वर्जयित्वा चरेद् भैक्षम्' (सं.उ. ७४) इति श्रुतिं मत्वाऽऽह—**अभिशस्तमिति**। मिथ्यापवादग्रस्तः अभिशस्तः। दुष्टत्वेन संदिग्ध इति यावत्। उपपातकदुष्ट इति केचित्।

**यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः।**
**समः सिद्धावसिद्धौ च कृत्वाऽपि न निबध्यते ॥२२॥**

**ज्ञातं यतेः शरीरस्थितिहेतोरन्नादेः प्राप्तिद्वारमाविष्कुर्वन्नाह—** यदृच्छेति। यदृच्छालाभसन्तुष्टः **अप्रार्थितोपनतो लाभो** यदृच्छालाभः**, तेन** सन्तुष्टः **सञ्जातालम्प्रत्ययः।** द्वन्द्वातीतः **द्वन्द्वैः शीतोष्णादिभिः हन्यमानोऽपि अविषण्णचित्तो द्वन्द्वातीत उच्यते।** विमत्सरो **विगतमत्सरो निर्वैरबुद्धिः,** समः **तुल्यो यदृच्छालाभस्य** सिद्धावसिद्धौ च। **य एवम्भूतो यतिरन्नादेः शरीरस्थितिहेतोर्लाभालाभयोः समो हर्षविषादवर्जितः कर्मादावकर्मादिदर्शी यथाभूतात्मदर्शननिष्ठः सन् शरीरस्थितिमात्रप्रयोजने भिक्षाटनादिकर्मणि शरीरादिनिर्वर्त्ये - 'नैव किञ्चित् करोम्यहम् , गुणा गुणेषु वर्तन्ते' इत्येवं सदा [१]सम्परिचक्षाणः - आत्मनः कर्तृत्वाभावं पश्यन् , नैव किञ्चिद् भिक्षाटनादिकं कर्म करोति। लोकव्यवहार-सामान्यदर्शनेन तु लौकिकैरारोपितकर्तृत्वे भिक्षाटनादौ कर्मणि कर्ता भवति। स्वानुभवेन तु शास्त्रप्रमाणादि-जनितेनाकर्तैव। स एवं पराध्यारोपितकर्तृत्वः[२] शरीरस्थितिमात्रप्रयोजनं भिक्षाटनादिकं कर्म कृत्वाऽपि न निबध्यते, बन्धहेतोः कर्मणः सहेतुकस्य ज्ञानाग्निना दग्धत्वादित्युक्तानुवाद एवैषः॥२२॥**

**'त्यक्त्वा कर्मफलासङ्गम्' (भ.गी.४.२०) इत्यनेन श्लोकेन यः प्रारब्धकर्मा सन् यदा निष्क्रियब्रह्मात्मदर्शन-**

आनन्दगिरिकृतव्याख्या

यदृच्छया **स्वकीयप्रयत्नव्यतिरेकेणेति यावत्। आदिशब्देन [३]'माधूकरमसंक्लृप्तं प्राक्प्रणीतमयाचितम्। तत्तत्कालोपपन्नं च भैक्ष्यं पञ्चविधं स्मृतम्' इत्यादि गृह्यते। आविष्कुर्वन्निदं वाक्यमाहेति योजनीयम्। [४]परोत्कर्षामर्षपूर्विका स्वस्योत्कर्षाभिवाञ्छा विगता यस्मादिति व्युत्पत्तिमाश्रित्य विवक्षितमर्थमाह—** निर्वैरेति। **सङ्क्षेपतो दर्शितमर्थं विशदयति—** य एवम्भूत इति। **तथापि प्रकृतस्य यतेर्भिक्षाटनादौ कर्तृत्वं प्रतिभाति, तदभावे भिक्षाटनाद्यभावेन जीवनाभावप्रसङ्गादित्याशङ्क्याह—** लोकेति। **लौकिकैरविवेकिभिः सह व्यवहारस्य स्नानाचमनभोजनादिलक्षणस्य [५]विदुष्यपि सामान्येन दर्शनात् , तदनुसारेण लौकिकैरध्यारोपितकर्तृत्व[६]भाक्त्वाद् विद्वानपि लोकदृष्ट्या भिक्षाटनादौ कर्तृत्वमनुभवतीत्यर्थः। कथं तर्हि तस्याकर्तृत्वम्? तत्राह—**स्वानुभवेनेति। **यदृच्छेत्यादिपादत्रयं व्याख्याय, कृत्वाऽपीत्यादि-चतुर्थपादं व्याचष्टे—** स एवमिति। **भिक्षाटनादिना प्रातिभासिकेन कर्मणा विदुषो बद्धत्वाभावेऽपि कर्मान्तरेण निबद्धत्वं भविष्यती-त्याशङ्क्याह—** बन्धेति। **ज्ञानाग्निदग्धत्वादित्येवं 'शारीरं केवल'मित्यादावुक्तस्यायमनुवाद इति योजना। यथोक्तस्य कर्मणो [७]मुक्त्या सहाविरोधाभ्युपगमसूचनार्थोऽपिशब्दः॥२२॥**

**'गतसङ्गस्ये'त्यादिश्लोकस्य व्यवहितेन सम्बन्धं वक्तुं वृत्तं कीर्तयति—** त्यक्त्वेति। **अनेन श्लोकेन 'नैव किञ्चित् करोति सः' इत्यत्र कर्माभावः प्रदर्शित इति सम्बन्धः। कस्य कर्माभावप्रदर्शनमित्याशङ्क्याह—** यः प्रारब्धेति। **प्रारब्धकर्मा सन् योऽवतिष्ठते तस्य कर्माभावः प्रदर्शितश्चेद् विरोधः स्यादित्याशङ्क्यावस्थाविशेषे तत्प्रदर्शनान्नैवमित्याह—** यदेति। **ननु ज्ञानवतः क्रियाकारकफलाभावदर्शिनः**

भाष्यार्कप्रकाशः

लभ्यत इति लाभः, लब्ध इत्यर्थः। यदृच्छया लाभो **यदृच्छालाभः** अप्रार्थनया प्राप्त इत्यर्थः। **तेन** अन्नादिना। **हर्षेति।** शरीरे आत्माभिमानाभावाच्छरीरधारकान्नादिलाभेन नास्य हर्षः, तदलाभेन न विषाद इत्यर्थः। **परिसञ्चक्षाणः** परिपश्यन्। **सहेतुकस्य** साज्ञानस्येत्यर्थः। सवासनस्येति वा॥२२॥

१. 'परिसंचक्षाणः' इति पा.। २. 'कर्तृत्वं' इति पा.। ३. मनःसंकल्परहितान् त्रीन् गृहान् पञ्च सप्त वा। मधुमक्षिकवत् कृत्वा माधूकरमिति स्मृतम्॥ (सं.उ.६६) 'तात्कालिकोपपन्नं च' इति पा.। ४. परोत्कर्षासहनपूर्विकेत्यर्थः। विमत्सर इत्यत्र मत्सरशब्दार्थविवरणमिदम्। ५. 'विदुषामपि' इति पा.। ६. 'कर्तृत्वभोक्तृत्वाद्' इति पा.। ७. 'युक्त्या' इति पा.।

**गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः।**
**यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥२३॥**
**ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।**

**सम्पन्नः स्यात् , तदा तस्यात्मनः कर्तृकर्मप्रयोजनाभावदर्शिनः कर्मपरित्यागे प्राप्ते, कुतश्चिन्निमित्तात् तदसम्भवे सति पूर्ववत् तस्मिन् कर्मण्यभिप्रवृत्तस्यापि**[१] **'नैव किञ्चित् करोति सः' इति कर्माभावः प्रदर्शितः। यस्यैवं कर्माभावो दर्शितस्तस्यैव—** गतसङ्गस्येति। गतसङ्गस्य **सर्वतो निवृत्तासक्तेः**[२] मुक्तस्य **निवृत्तधर्माधर्मादिबन्धनस्य** ज्ञानावस्थितचेतसो **ज्ञाने एवावस्थितं चेतो यस्य सोऽयं ज्ञानावस्थितचेतास्तस्य,** यज्ञाय **यज्ञनिर्वृत्त्यर्थम्** आचरतो **निर्वर्तयतः कर्म** समग्रं **सहाग्रेण फलेन वर्तत इति समग्रं कर्म, तत् समग्रं** प्रविलीयते **विनश्यतीत्यर्थः॥२३॥**

**कस्मात्पुनः कारणात् क्रियमाणं कर्म स्वकार्यारम्भमकुर्वत् समग्रं प्रविलीयत इति? उच्यते, यतः—** ब्रह्मेति।

अनुभूतिस्वरूपाचार्यटिप्पणम्

गतसङ्गस्येति श्लोकस्य व्यवहितेन सम्बन्धं दर्शयितुं वृत्तमनुवदति— **त्यक्त्वा कर्मफलासङ्गमित्यादिना**। अनेन श्लोकेन कर्माभावो दर्शित इति सम्बन्धः। कस्य प्रदर्शित इत्याकाङ्क्षायामाह— **यः प्रारब्धकर्मेत्यादिना**॥२३॥

आनन्दगिरिकृतव्याख्या

**कर्मपरित्यागध्रौव्यात् कर्माभाववचनमप्राप्तप्रतिषेधः स्यादित्याशङ्क्याह—** आत्मन इति। **लोकसङ्ग्रहादिनिमित्तं प्रागेवोक्तम्। अविद्यावस्थायामेवेति पूर्ववदित्युक्तम्। एवं वृत्तमनूद्योत्तरश्लोकमवतारयति—** यस्येति। **यथोक्तस्यापि विद्यावतो मुक्तस्य भगवत्प्रीत्यर्थं कर्मानुष्ठानोपलम्भात् ततो बन्धारम्भः सम्भाव्येतेत्याशङ्क्याह—** यज्ञायेति। **धर्माधर्मादीत्यादिशब्देन रागद्वेषादिसङ्ग्रहः। तस्य बन्धनत्वं करणव्युत्पत्त्या प्रतिपत्तव्यम्।** यज्ञनिर्वृत्त्यर्थं **यज्ञशब्दितस्य भगवतो विष्णोर्नारायणस्य प्रीतिसम्पत्त्यर्थमिति यावत्। ज्ञानमेव वाञ्छतो ज्ञानस्य प्रतिबन्धकं कर्म परिशङ्कितं परिहरति—** कर्मेति। **समग्रेणेत्यङ्गीकृत्य व्याचष्टे—** सहेत्यादिना॥२३॥

**'नाभुक्तं क्षीयते कर्म' इति स्मृतिमाश्रित्य शङ्कते—** कस्मादिति। **समस्तस्य क्रियाकारकफलात्मकस्य द्वैतस्य ब्रह्ममात्रत्वेन बाधितत्वाद् ब्रह्मविदो ब्रह्ममात्रस्य कर्म प्रविलीयते सर्वमिति युक्तमित्याह—** उच्यत इति। **ब्रह्मविदो ब्रह्मैव सर्वं क्रियाकारकफलजातं द्वैतमित्यत्र हेतुत्वेनानन्तरश्लोकमवतारयति—** यत इति। **अर्पणशब्दस्य करणविषयत्वं दर्शयन्नर्पणं ब्रह्मेति पदद्वयपक्षे सामानाधिकरण्यं**

भाष्यार्कप्रकाशः

**गतेति**। एवं श्लोकद्वयेन निवृत्तिमार्गरतस्य संन्यासिनः स्थितिं प्रदर्श्याथ पुनः प्रवृत्तिमार्गस्थात्मविदः स्थितिं वक्तीत्याह— त्यक्त्वा कर्मेत्यादिनाऽवतारिकाग्रन्थेन। **यतेरिति**। यतते मोक्षाय प्रयत्नं करोतीति **यतिः,** तस्य यतमानस्येत्यर्थः, न तु संन्यासिन इति। **ज्ञान एव** आत्मदर्शने एव। **यज्ञनिर्वृत्त्यर्थमिति**। प्रारब्धयज्ञसमाप्त्यर्थमाचरतः व्याप्रियमाणस्य, यज्ञं निर्वर्तयत इत्यर्थः। न च यज्ञाये-श्वरप्रीत्यर्थमिति वाच्यम् , आत्मविदोऽस्य ईश्वरप्रीत्यर्थकसङ्कल्पासम्भवात्। अयं ह्यात्मानमेवेश्वरं जानाति। ततश्चात्मप्रीत्यर्थमेवेत्युक्तं स्यात्। तच्चानिष्टम्। स्वप्रीतिरूपेऽपि फले सङ्गस्याकर्तव्यत्वात्। न च यज्ञनिर्वृत्तिरप्यस्य व्यर्थैवेति वाच्यम् , लोकसङ्ग्रहार्थत्वात्। समग्रमित्यत्र समित्युपसर्गस्य सहेत्यर्थः। **अग्रेण** फलेन **सम्** सह वर्तत इति **समग्रम्**। आत्मविदनुष्ठितं कर्म फलेन सह विनश्यतीत्यर्थः। आत्मविदा कृतो यज्ञः स्वर्गादिफलं न जनयतीति यावत्। फलाभिसन्ध्यहङ्काराद्यभावादिति भावः॥२३॥

**ब्रह्मार्पणमितीति**। अर्पणं ब्रह्म हविर्ब्रह्म ब्रह्माग्नौ ब्रह्मणा हुतं (ब्रह्म) ब्रह्मकर्मसमाधिना तेन गन्तव्यं ब्रह्मैव इत्यन्वयः। अर्पणं ब्रह्म, हविर्ब्रह्म, अग्निर्ब्रह्म, कर्ता ब्रह्म, हुतं ब्रह्म, फलं ब्रह्म, ब्रह्मकर्मसमाधेरेवं भातीत्यर्थः। अर्प्यतेऽनेनेति **अर्पणं** स्रुगादि, अग्नौ

१. 'कर्मण्यभिप्रवृत्तोऽपि' इति पा.। २. 'निवृत्तासङ्गस्य यतेः' इति रा.पा.।

## ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥२४॥

ब्रह्मार्पणं **येन करणेन ब्रह्मविद् हविरग्नावर्पयति तद् ब्रह्मैवेति पश्यति, तस्यात्मव्यतिरेकेणाभावं पश्यति, यथा शुक्तिकायां रजताभावं पश्यति,** [१]**तद्वदुच्यते— ब्रह्मैवार्पणमिति। यथा यद् रजतं तच्छुक्तिकैवेति। ब्रह्म अर्पणमिति असमस्ते पदे। यदर्पणबुद्ध्या गृह्यते लोके तदस्य ब्रह्मविदो ब्रह्मैवेत्यर्थः।** ब्रह्म हविः **तथा यद् हविर्बुद्ध्या गृह्यमाणं तद् ब्रह्मैवास्य। तथा** ब्रह्माग्नाविति **समस्तं पदम्। अग्निरपि ब्रह्मैव यत्र हूयते,** ब्रह्मणा कर्त्रा, **ब्रह्मैव कर्तेत्यर्थः। यत् तेन** हुतं **हवनक्रिया तद् ब्रह्मैव। यत् तेन गन्तव्यं फलं तदपि ब्रह्मैव।** ब्रह्मकर्मसमाधिना **ब्रह्मैव कर्म ब्रह्मकर्म, तस्मिन्**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ब्रह्मार्पणमिति बाधायां सामानाधिकरण्यमित्यत्र दृष्टान्तमाह— **यथा यद् रजतमिति।**

आनन्दगिरिकृतव्याख्या

**साधयति—**येनेति। **यद् रजतं सा शुक्तिरितिवद् बाधायामिदं** [२]**सामानाधिकरण्यमित्याह—**तस्येति। **तत्र दृष्टान्तमाह—**यथेति। **उक्तेऽर्थे पदद्वयमवतारयति—** तद्वदुच्यत इति। **उक्तमेवार्थं स्पष्टयति—** यथा यदिति। **समासशङ्कां व्यावर्तयति—** ब्रह्मेति। **पदद्वयपक्षे विवक्षितमर्थं कथयति—** यदर्पणेति। **ब्रह्म हविरिति पदद्वयमवतार्य व्याचष्टे—** ब्रह्मेत्यादिना। **यदर्पणबुद्ध्या गृह्यते तद् ब्रह्मविदो ब्रह्मैवेति यथोक्तं तथेहापीत्याह—** तथेति। **अस्येति षष्ठी ब्रह्मविदमधिकरोति। पूर्ववदसमासमाशङ्क्य व्यावर्तयन् पदान्तरमवतार्य व्याकरोति—** तथेति। **प्रागुक्तासमासवदिति व्यतिरेकः। तत्र विवक्षितमर्थमाह—** अग्निरपीति। **ब्रह्मणेति पदस्याभिमतमर्थमाह—** ब्रह्मणेति। **कर्त्रा हूयत इति सम्बन्धः। कर्ता ब्रह्मणः सकाशाद् व्यतिरिक्तो नास्तीत्येतदभिप्रेतमित्याह—** ब्रह्मैवेति। **हुतमित्यस्य विवक्षितमर्थमाह—** यत्तेनेति। **ब्रह्मैव तेनेत्यादि भागं विभजते—** ब्रह्मैवेत्यादिना। **ब्रह्म कर्मेत्याद्यवतार्य व्याकरोति— ब्रह्मे**ति। **कर्मत्वं ब्रह्मणो ज्ञेयत्वात्**

भाष्यार्कप्रकाशः

हविःप्रक्षेपणसाधनम्। **हविरा**ज्यम्। **कर्ता** यजमानः, अध्वर्युरिति वा। **हुत**मग्नौ हविःप्रक्षेपणक्रिया। **फलं** स्वर्गादि इति।

ननु अर्पणादीनां ज्ञेयानां कथं साक्षिब्रह्मरूपत्वम्? अत आह— **तस्येति**। कारणव्यतिरेकेण कार्याभावस्य लोकसिद्धत्वात् , मृद्व्यतिरेकेण घटाभावदर्शनात् , 'आत्मन आकाशः सम्भूतः, यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुत्या आत्मनो जगत्कारणत्वावधारणाद् अर्पणादीनां च जगदन्तःपातित्वात् कारणभूतात्मव्यतिरेकेण नास्त्यर्पणादिरूपः कश्चित् पदार्थ इति भावः।

तत्र दृष्टान्तमाह— **शुक्तिकायामिति**। शुक्तिकायां रजतमिवात्मनि जगत् कल्पितमिति सिद्धान्तः। तथा च शुक्तिका-व्यतिरेकेण यथा रजतं नास्ति, तथा आत्मव्यतिरेकेणार्पणं नास्तीति। ननु चक्षुषा गृह्यमाणस्यार्पणस्य कथमभावो वक्तुं शक्यत इत्यत आह— **शुक्तिकायामिति।** शुक्तिकायां रजताभावं यथा शुक्तितत्त्ववित् पश्यति, तद्वदात्मतत्त्वविदात्मनि अर्पणाभावं पश्यतीति।

**ननु** आन्तरे आत्मनि अर्पणाभावोऽस्तु नाम, बहिः कथमर्पणाभाव इति **चेन्मैवम्** , आत्मनोऽन्तर्बहिश्च व्याप्य स्थितत्वात् , 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इति हि श्रूयते। तस्माच्छुक्तिकायां रजतमिव ब्रह्मणि जगदज्ञः पश्यति। प्राज्ञस्तु शुक्तिकायां रजताभावमिव ब्रह्मणि जगदभावं पश्यतीति। यथा चक्षुर्दोषादिवशाच्छुक्तिकैव रजताकारेण प्रतिभाति, तद्वदविद्यावशा-दात्मैवार्पणादिजगदाकारेण प्रतिभात्यविदुषाम्। विदुषां तु शुक्तिः शुक्तिरिव, ब्रह्म ब्रह्मैव प्रतिभातीति।

नन्वेवं ब्रह्म ब्रह्मैव, न त्वर्पणमिति वक्तव्ये कथमुक्तमर्पणं ब्रह्मैवेति? अत आह—**यथा यद् रजतमिति**। यद्रजतं तच्छुक्तिकैवेति यथोच्यते, तथा यदर्पणं तद् ब्रह्मैवेत्युच्यत इत्यन्वयः। कार्यस्य कारणाभिन्नत्वादिति भावः। यद्भ्रान्त्या रजताकारेण प्रतीतं, तन्न रजतम् , किन्तु वस्तुतः शुक्तिकैवेति यथा रजतभ्रमापगमानन्तरं पुरुषः प्रत्येति, तथा यद्भ्रान्त्या अर्पणरूपेण प्रतीतं तन्नार्पणम् , किन्तु वस्तुतो ब्रह्मैवेति अर्पणभ्रमापगमानन्तरं विद्वान् प्रत्येति। अविद्वांसस्तु शुक्तिकायामुद्भूतं रजतं रजतमिवात्मन्युद्भूतमर्पणमर्पणमेव

१. 'तदुच्यते' इति पा.। २. पदयोः सामानाधिकरण्यं चतुर्धा—अध्यासे , बाधायाम् , अभेदे , विशेषणविशेष्यभावे च। द्र. ब्र.सू.भा. ३-३-९।

**समाधिर्यस्य स ब्रह्मकर्मसमाधिः, तेन ब्रह्मकर्मसमाधिना ब्रह्मैव गन्तव्यम्।**

**एवं लोकसंग्रहं चिकीर्षुणाऽपि क्रियमाणं कर्म परमार्थतोऽकर्म, ब्रह्मबुद्ध्युपमृदितत्वात्। [1]निवृत्तकर्मणोऽपि सर्वकर्मसंन्यासिनः सम्यग्दर्शनस्तुत्यर्थं यज्ञत्वसम्पादनं ज्ञानस्य सुतरामुपपद्यते। यदर्पणाद्यधियज्ञे प्रसिद्धं तदस्याध्यात्मं ब्रह्मैव परमार्थदर्शिन इति। अन्यथा सर्वस्य ब्रह्मत्वेऽर्पणादीनामेव विशेषतो ब्रह्मत्वाभिधानमनर्थकं स्यात्। तस्माद् 'ब्रह्मैवेदं सर्व'मित्यभिजानतो विदुषः सर्वकर्माभावः। कारकबुद्ध्यभावाच्च। न हि कारकबुद्धिरहितं**

आनन्दगिरिकृतव्याख्या

**प्राप्यत्वाच्च प्रतिपत्तव्यम्।**

**एवं ब्रह्मार्पणमन्त्रस्याक्षरार्थमुक्त्वा तात्पर्यार्थमाह—** एवमिति। **निवृत्तकर्माणं संन्यासिनं प्रति कथमस्य मन्त्रस्य प्रवृत्तिरित्याशङ्क्याह—** निवृत्तेति। **यथा बाह्ययज्ञानुष्ठानासमर्थस्याज्ञस्य सङ्कल्पात्मकयज्ञो दृष्टः, तथा ज्ञानस्य यज्ञत्वसम्पादनं स्तुत्यर्थं सुतरामुपपद्यते। तेन स्तुतिलाभात् कल्पनायाः [2]स्वाधीनत्वाद्वेत्यर्थः। ज्ञानस्य यज्ञत्वसम्पादनमभिनयति—** यदर्पणादीति। **केन प्रमाणेनात्र यज्ञत्वसम्पादनमवगतमित्याशङ्क्य , अर्पणादीनां विशेषतो ब्रह्मत्वाभिधानानुपपत्त्येत्याह—** अन्यथेति। **ज्ञानस्य यज्ञत्वे सम्पादिते फलितमाह—** तस्मादिति। **'आत्मैवेदं सर्व'मित्यात्मव्यतिरेकेण सर्वस्यावस्तुत्वं प्रतिपद्यमानस्य कर्माभावे हेत्वन्तरमाह—** कारकेति। कारकबुद्धेः **तेष्वभिमानस्याभावेऽपि किमिति कर्म न स्यादित्याशङ्क्याह—** न हीति। **उक्तमेवान्वयव्यतिरेकाभ्यां द्रढयति—**

भाष्यार्कप्रकाशः

पश्यन्तीति।

**अनेन** च शुक्तिरजतदृष्टान्तेन सच्चिदानन्दाद् ब्रह्मणः कथमनृतजडदुःखार्पणाद्याविर्भाव इति शङ्का **प्रत्युक्ता**, विवर्तवादाश्रयणात्। न हि मृदो घटात्मनेव ब्रह्मणो जगदात्मना परिणामं वयं ब्रूमः, किन्तु शुक्तिकाया रजतात्मनेव ब्रह्मणो जगदात्मना विवर्तं ब्रूमः। उपादानसमसत्ताककार्यापत्तिः **परिणामः**, तद्विषमसत्ताककार्यापत्तिः **विवर्त** इति विवेकः। स्वस्वरूपापरित्यागपूर्वकासत्यरूपान्तराभासो **विवर्त** इति वा। तस्माद् रजतस्य शुक्त्यात्मत्वमिवार्पणस्य ब्रह्मात्मकत्वं युक्तम्। एवं हविरादिष्वपि बोध्यम्।

ब्रह्मार्पणं यथा तथेति क्रियाविशेषणत्वभ्रमव्युदासायाह— **ब्रह्मार्पणमित्यसमस्ते पदे इति।** अविदुषो लोकस्य यस्मिन् स्रुगादिद्रव्ये अर्पणबुद्धिः, विदुषस्तस्मिन् ब्रह्मबुद्धिरित्यर्थः। 'सर्वं खल्विदं ब्रह्मे'ति श्रुतेः, 'वासुदेवः सर्व'मिति स्मृतेश्चेति भावः। ब्रह्मैव कर्मेत्यवधारणान्नास्य विदुषः ब्रह्मातिरिक्तं कर्मास्तीति गम्यते। **समाधिश्चित्तसमाधानम्। ब्रह्मैव गन्तव्यमिति।** न तु स्वर्गादि तुच्छफलमित्येवकारार्थः।

**ननु** स्वर्गादिफलं ब्रह्मैवेत्युक्तम्। इदानीं ब्रह्मैव फलं गन्तव्यमिच्युच्यते, कथमविरोध इति चेद्? **उच्यते**— यदविद्वद्भिः कर्मिभिर्यज्ञाद्यनुष्ठानात् प्राप्यते फलं स्वर्गादि , तद् विद्वान् ब्रह्मेत्येव पश्यति। य एवमर्पणादिकं ब्रह्मेति पश्यति स तु ब्रह्मैव प्राप्नोतीति।

कथं कर्मणः परमार्थतोऽकर्मत्वम्? अत आह— **ब्रह्मबुद्धीति।** यद्धवनादिरूपं कर्म तद् ब्रह्मैवेति या विदुषः कर्मणि ब्रह्मबुद्धिः तया कर्मण **उपमृदितत्वाद्** बाधितत्वात्। ब्रह्मज्ञानेन कर्मज्ञानस्य नाशितत्वाद् ब्रह्मणि मायया प्रतीतं कर्म वस्तुतोऽकर्म, ब्रह्मैवेत्यर्थः।

ननु ब्रह्मैव कर्मेति ब्रह्मणि यज्ञत्वारोपो व्यर्थः, अत आह— **निवृत्तेत्यादि।** नात्र साक्षाद् ब्रह्मण्येव कर्मत्वारोपः,असम्भवात् , किन्तु ब्रह्मज्ञाने। तत्र च कर्मत्वारोपो युज्यते, कर्मवद् ब्रह्मज्ञानस्याप्यभ्यसनीयत्वेन कर्तव्यत्वात्। अयं च ब्रह्मज्ञाने कर्मत्वारोपः ब्रह्मज्ञानस्तुत्यर्थ इति। तदेव दर्शयति— **यदिति। यज्ञे अधियज्ञे,** अव्ययीभावः। 'सप्तम्या बहुलमम्भावः' इति बहुलग्रहणाद् अधियज्ञमित्यम्भावो नासीत्। आत्मनि **अध्यात्मम्।** अस्य परमार्थदर्शिन इत्यन्वयः। यथा यज्ञे प्रसिद्धानि प्रायणीयोदयनीयादीनि यज्ञवराहे दंष्ट्रादिरूपत्वेन[3] कल्पितानि, तद्वद् यज्ञे प्रसिद्धान्यर्पणादीनि आत्मनि ब्रह्मत्वेन कल्पितानीत्यर्थः। अध्यात्मं ब्रह्मैवार्पणादीत्येतदर्थं ब्रह्मार्पणमिति श्लोकः प्रवृत्त इत्येतस्यानभ्युपगमे दोषमाह—**अन्यथेति।** फलितमाह— **तस्मादिति।** अर्पणादेर्ब्रह्मत्वादित्यर्थः।

१. 'तदेवं सति निवृत्तकर्मणोऽपि' इति पा.। २. 'स्वाधीनत्वाच्च' इति पा.। ३. 'त्वं प्रायणीयोदयनीयदंष्ट्रः'। द्र. भाग. ३.१३. श्लो ३४—४४.

**यज्ञाख्यं कर्म दृष्टम्। सर्वमेवाग्निहोत्रादिकं कर्म शब्दसमर्पितदेवताविशेषसम्प्रदानादिकारकबुद्धिमत् कर्त्रभिमान-फलाभिसन्धिमच्च दृष्टम् , नोपमृदितक्रियाकारक(कर्म)फलभेदबुद्धिमत् कर्तृत्वाभिमानफलाभिसन्धिरहितं वा। इदं तु ब्रह्मबुद्ध्युपमृदितार्पणादिकारकक्रियाफलभेदबुद्धि[१]मत् कर्म। अतोऽकर्मैव तत्।**

**तथा च दर्शितम्—'कर्मण्यकर्म यः पश्येत्'(भ.गी.४.१८) 'कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः' (भ.गी.४.२०) 'गुणा गुणेषु वर्तन्ते' (भ.गी.३.२८) 'नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्' (भ.गी.५.८)**

अनुभूतिस्वरूपाचार्यटिप्पणम्

[२]**अन्यथा सर्वस्येति**। अर्पणादीनां विशेषतो ब्रह्मत्वाभिधानान्यथानुपपत्त्या यज्ञत्वसम्पादनमेवेह विवक्षितमित्यर्थः। ततः किं फलमित्याशङ्क्याह— **तस्मादिति**। आत्मैवेदं सर्वमित्यात्मातिरेकेण सर्वस्यावस्तुत्वं पश्यतः कर्माभावः सिद्धो भवतीत्यर्थः। इतश्च आत्मविदः कर्माभाव इत्याह— **कारकबुद्ध्यभावाच्चेति**। उक्तमेवान्वयव्यतिरेकाभ्यां द्रढयति— **सर्वमेवेत्यादिना**। शब्देन समर्पितो देवताविशेषः सम्प्रदानकारण[रक]म् आदिशब्दाद् व्रीह्यादि। कारकबुद्धिमत् कर्म दृष्टमिति योजना। यत् कर्म तत् सकारकं दृष्टम् । तत्त्वज्ञाने च सति सकारकत्वं व्यापकं व्यावर्तमानं कर्मत्वमपि व्यावर्तयतीत्यर्थः। अत्र प्रयोगः - तत्त्वविदः कायादिचेष्टा कर्माभासो भवितुमर्हति, कर्मव्यापकविधुरत्वात् , सुप्तचेष्टावदिति ।

आनन्दगिरिकृतव्याख्या

सर्वमेवेति। **इन्द्रायेत्यादिना शब्देन समर्पितो देवताविशेषः सम्प्रदानकारकम्।** आदि**शब्दाद् व्रीह्यादिकरणकारकम् , तद्विषयबुद्धिमत् , 'कर्ताऽस्मी'त्यभिमानपूर्वकं 'भोक्ष्ये फलमस्ये'ति फलाभिसन्धिमच्च कर्म दृष्टमिति योजना। अन्वयमुक्त्वा व्यतिरेकमाह—** नेत्यादिना। **उपमृदिता क्रियादिभेदविषया बुद्धिर्यस्य तत् कर्म तथा, कर्तृत्वाभिमानपूर्वको 'भोक्ष्ये फलमस्ये'ति योऽभिसन्धिस्तेन रहितं च न कर्म दृष्टमित्यन्वयः। तथापि ब्रह्मविदो भासमानकर्माभावे किमायातमित्याशङ्क्याह—** इदमिति। **यदिदं ब्रह्मविदो दृश्यमानं कर्म तद् 'अहमस्मि ब्रह्मे'ति बुध्या निराकृतकारकादिभेदविषयबुद्धिमत्। अतश्च कर्मैव न भवति। तत्त्वज्ञाने सति व्यापकं कारकादि व्यावर्तमानं व्याप्यं कर्मापि व्यावर्तयति। तत्त्वविदः शरीरादिचेष्टा कर्माभासः, कर्मव्यापकरहितत्वात् , [३]सुषुप्तचेष्टावदित्यर्थः।**

**ज्ञानवतो दृश्यमानं कर्माकर्मैवेत्यत्र भगवदनुमतिमाह—** तथा चेति। **ब्रह्मविदो दृष्टं कर्म नास्तीत्युक्तेऽपि तत्कारणानुपमर्दात्**

भाष्यार्कप्रकाशः

ब्रह्मैवेदं सर्वमिति यो जानाति तस्य कर्माभावः, अर्पणादिषु कारकबुद्ध्यभावश्च, सर्वत्र ब्रह्मबुद्धिसत्त्वादिति भावः। **शब्देति।** शब्द इन्द्राय स्वाहेत्यादिः, तेन **समर्पितः** प्रतिपादितः **देवताविशेष** इन्द्रादिः, स एव **सम्प्रदानं** सम्प्रदीयते अस्मा इति सम्प्रदानम् , 'कर्मणा यमभिप्रैति स सम्प्रदान'मिति पाणिनिना सूत्रितम्। हविःकर्मणा इन्द्रस्याभिप्रेतत्वादिन्द्रः सम्प्रदानम्। अत एव 'सम्प्रदाने चतुर्थी'ति इन्द्रायेति चतुर्थी। सम्प्रदानमादिर्येषां तानि सम्प्रदानादीनि कारकाणि। कर्म, करणं, कर्ता, सम्प्रदानम् , अपादानम् , अधिकरणं चेत्येतानि द्वितीयातृतीयाचतुर्थीपञ्चमीसप्तमीविभक्त्यर्थाः। तेषां बुद्धयो यस्मिन् तत् तथोक्तम्। कर्मणो विशेषणमिदम्। उपमृदित-क्रियाकारकफलभेदबुद्धीति कर्मविशेषणम्। **उपमृदिताः** बाधिताः क्रियेति कारकमिति फलमिति च भेदबुद्धयो यस्मिन् तत्। न दृष्टमित्यन्वयः। **इदं** ब्रह्मार्पणमिति श्लोकोक्तं कर्म तु ब्रह्मबुद्ध्या उपमृदिताः अर्पणादिक्रियाकारकफलभेदबुद्धयो यस्मिन् तत् तथोक्तम्। **अतः** क्रियाकारकफलभेदबुद्ध्यभावादित्यर्थः। **अकर्मैव** कर्माभाव एव, ब्रह्मैवेति यावत्।

कथं कर्मणोऽकर्मत्वमित्यतः प्रमाणान्याह— **कर्मण्यकर्मेत्यादीनि**। ननु क्रियाकारकफलभेदबुद्ध्युपमर्दनमात्रेण कथं

१.'मत्' इति क्वचिन्न। २.प्रतीकमिदं २३५ पृष्ठे द्र.। ३.सुप्तचेष्टावदित्येवापेक्षितम्। सुषुप्ते चेष्टाया अभावात्। न च स्वप्ने स्वाप्नकारकादिभेदबुद्धिः फलाभिसंधिश्चा-स्त्येवेति स्वाप्नचेष्टायां साधनवैकल्यम् , अप्रामाण्यज्ञानानास्कन्दिततादृशबुद्धेः व्यापकतया विवक्षितत्वात् । अत एव व्यतिरेककथनावसरे भाष्ये उपमृदितेति बुद्धिविशेषणं दत्तम्। बाधितेति तदर्थः। मिथ्यात्वेन निश्चितेति यावत्। अतश्च प्रबुद्धस्य व्याप्तिग्रहणावसरे स्वाप्निकतादृशबुद्धेरप्रमात्वेन ज्ञातत्वात् न दोषः।

**इत्यादिभिः। तथा च दर्शयंस्तत्र तत्र क्रियाकारकफलभेदबुद्ध्युपमर्दं करोति। दृष्टा च काम्याग्निहोत्रादौ कामोपमर्देन काम्याग्निहोत्रादिहानिः। तथा मतिपूर्वकामतिपूर्वकादीनां कर्मणां कार्यविशेषस्यारम्भकत्वं दृष्टम्। तथेहापि ब्रह्मबुद्ध्युपमृदितार्पणादिकारकक्रियाफलभेदबुद्धेः बाह्यचेष्टामात्रेण कर्मापि विदुषोऽकर्म सम्पद्यते। अत उक्तम्— 'समग्रं प्रविलीयते' इति।**

**अत्र केचिदाहुः—यद् ब्रह्म तदर्पणादीनि, ब्रह्मैव किलार्पणादिना पञ्चविधेन कारकात्मना [1]व्यवस्थितं सत् तदेव कर्म करोति। तत्र नार्पणादिबुद्धिर्निवर्त्यते, किन्त्वर्पणादिषु ब्रह्मबुद्धिराधीयते। यथा प्रतिमादौ विष्ण्वादिबुद्धिः,**

अनुभूतिस्वरूपाचार्यटिप्पणम्

पूर्ववत् प्रवृत्तिदर्शनेऽप्यतथात्वमित्यत्र दृष्टान्तमाह— **दृष्टा चेति**। विद्वत्कर्मापि फलारम्भकं भवितुमर्हति, कर्मत्वाविशेषाद् अविद्वत्कर्मवदिति (अ)विद्वत्कर्मापि फलारम्भकमिति नाशङ्कनीयमित्याह— **तथा मतिपूर्वकेति**। ब्रह्मबुद्ध्या **उपमृदिता** नाशिता अर्पणादिकारकक्रियाफलभेदविषया बुद्धिर्येन स तथोक्तः, तस्येति विग्रहः।

इदानीमेकदेशिव्याख्यानमनुवदति— **अत्र केचिदाहुरिति**। ननु यद् ब्रह्म तदर्पणादि [इति] अप्रसिद्धोद्देशेन कथं प्रसिद्धविधानमित्याशङ्क्याह— **ब्रह्मैव किलेति**। **पञ्चविधेनेति**। कर्तृकर्मकरणसम्प्रदानाधिकरणरूपेण ब्रह्मैव व्यवस्थितम्।

आनन्दगिरिकृतव्याख्या

**पुनर्भविष्यतीत्याशङ्क्याह—** तथा च दर्शयन्निति। **अविद्वानिव विद्वानपि कर्मणि प्रवर्तमानो दृश्यते, तथापि तस्य कर्माकर्मैवेत्यत्र दृष्टान्तमाह—** दृष्टा चेति। **विद्वत्कर्मापि कर्मत्वाविशेषादितरकर्मवत् फलारम्भकमित्यपि शङ्का न युक्तेत्याह—** तथेति। **इदं कर्मैवं कर्तव्यम्, अस्य च फलं भोक्तव्यमिति मतिस्तत्पूर्वकाण्यतत्पूर्वकाणि च कर्माणि। तेषामवान्तरभेदसङ्ग्रहार्थमादिपदम्। दार्ष्टान्तिकमाह—** तथेति। **सप्तम्या[2] विद्वत्प्रकरणं परामृष्टम्। [3]षष्ठ्यौ समानाधिकरणे। उक्तेऽर्थे पूर्ववाक्यमनुकूलयति—** अत इति।

**ब्रह्मार्पणमन्त्रस्य स्वव्याख्यानमुक्त्वा स्वयूथ्यव्याख्यानमनुवदति—** अत्रेति। **प्रसिद्धोद्देशेनाप्रसिद्धविधानस्य न्याय्यत्वाद् अप्रसिद्धोद्देशेन प्रसिद्धविधानं कथमित्याशङ्क्याह—** ब्रह्मैवेति। **किलेत्यस्मिन् व्याख्याने सिद्धान्तिनोऽसम्प्रतिपत्तिं सूचयति। कर्तृकर्मकरणसम्प्रदानाधिकरणरूपेण पञ्चविधेन ब्रह्मैव व्यवस्थितं कर्म करोतीत्यङ्गीकारात् तदप्रसिद्ध्यभावात् तदनुवादेनार्पणादिषु अविरुद्धः तद्दृष्टिविधिरित्यर्थः। दृष्टिविधिपक्षे सिद्धान्ताद् विशेषं दर्शयति—**तत्रेति। **अर्पणादिषु कर्तव्यां ब्रह्मबुद्धिं दृष्टान्ताभ्यां स्पष्टयति—**

भाष्यार्कप्रकाशः

कर्मणोऽकर्मत्वमित्यतो दृष्टान्तमाह— **दृष्टेति।** यथा काम्यस्याग्निहोत्रादिकर्मणः कामोपमर्दनेनाकाम्यत्वम्, तद्वदित्यर्थः। दृष्टान्तान्तरमाह— **तथेति।** मतिपूर्वकाणि कर्माणि यत् कार्यमारभन्ते ततो भिन्नं कार्यमेवामतिपूर्वकाणि कर्माण्यारभन्ते। यथा बुद्धिपूर्वं कृता प्राणिहिंसा रौरवादिनरकरूपकार्यमारभते, तथा प्रमादात् कृता नैवारभेत, किन्तु स्वल्पमेव रोगादिकम्, तद्वदिति भावः। दार्ष्टान्तिकमाह—**तथेहापीति। बुद्धेरिति।** बुद्धित्वादित्यर्थः। हेतुरयं कर्मणोऽकर्मत्वसम्पत्तौ। **अत इति।** ब्रह्मबुद्ध्या कर्मणोऽकर्मत्वसम्पत्तेरित्यर्थः। विद्वद्भिराचरितस्य भिक्षाटनादेर्बाह्यचेष्टामात्ररूपस्य कर्मणः यज्ञादिकर्मणो वा ब्रह्मबुद्ध्या क्रियाकारकादिभेदबुद्ध्युपमर्दनेनाकर्मत्वान्नास्ति कार्यारम्भकत्वमिति भावः।

अथ पूर्वपक्षयति— **केचिदिति।** यदर्पणं तद् ब्रह्मेति नार्थः, किन्तु यद् ब्रह्म तदर्पणम्। एवं यद् ब्रह्म तद्धविः, यद् ब्रह्म तदग्निः, यद् ब्रह्म तत् कर्ता, यद् ब्रह्म तद्धुतं, यद् ब्रह्म तत् फलमित्यर्थः। कोऽत्र विशेषः? अत आह— **ब्रह्मैवेति। पञ्चविधेनेति।** अर्पणं करणकारकं, हविः कर्मकारकम्, अग्निरधिकरणकारकं, यजमानः कर्तृकारकम्, उद्देश्यदेवता सम्प्रदानकारकमिति पञ्चविधत्वम्। अपादानकारकस्य नात्रोपयोग इति पञ्चविधेनेत्युक्तम्। **कारकात्मनाऽवस्थितं** कारकरूपेण परिणतं सदित्यर्थः।

---

१. 'अवस्थितं' इति पा.। २. इहेत्यनेन। ३. 'ब्रह्म....बुद्धेः' 'विदुषः' इति षष्ठ्यन्ते पदे।

**[1]यथा वा नामादौ ब्रह्मबुद्धिः, एवम् इति। सत्यमेवमपि स्याद् , यदि ज्ञानयज्ञस्तुत्यर्थं प्रकरणं न स्यात्। अत्र तु सम्यग्दर्शनं ज्ञानयज्ञशब्दितम् अनेकान् यज्ञशब्दितान् क्रियाविशेषानुपन्यस्य 'श्रेयान् द्रव्यमयाद् यज्ञाज्ज्ञान-यज्ञः' (भ.गी.४.३३) इति ज्ञानं स्तौति। अत्र च समर्थमिदं वचनं 'ब्रह्मार्पण'मित्यादि ज्ञानस्य यज्ञत्वसम्पादने। ([2]अन्यथा सर्वस्य ब्रह्मत्वेऽर्पणादीनामेव विशेषतो ब्रह्मत्वाभिधानमनर्थकं स्यात्।)**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ततो नाप्रसिद्धमित्यर्थः। ब्रह्मदृष्टिविधानपक्षे मानसी क्रिया स्यात्। न सम्यग्ज्ञानमिति प्रकरणबाध इत्यभिप्रेत्य परिहरति— **सत्यमेवमपीति**। न केवलं प्रकरणपर्यालोचनया ज्ञानस्तुतिः प्रमीयते, अस्यापि श्लोकस्यास्मिन्नर्थे सामर्थ्यं विद्यत इत्याह— **अत्र चेति**।

आनन्दगिरिकृतव्याख्या

यथेत्यादिना। **दृष्टिविधाने विधेयदृष्टेर्मानसक्रियात्वेन सम्यग्ज्ञानत्वाभावात् प्रकरणभङ्गः स्यादित्यभिप्रेत्य परिहरति—** सत्यमेवमिति। **विधित्सितदृष्टिस्तुतिपरमेव प्रकरणं न ज्ञानस्तुतिपरमित्याशङ्क्य प्रकरणपर्यालोचनया ज्ञानस्तुतिरेवात्र प्रतिभातीति प्रतिपादयति—** अत्र त्विति। **किञ्च ब्रह्मार्पणमन्त्रस्यापि सम्यग्ज्ञानस्तुतौ सामर्थ्यं प्रतिभातीत्यत्राह—** अत्र चेति।

भाष्यार्कप्रकाशः

नन्वद्वैतिनाऽपीदमेवोक्तम् , अत आह— **तत्रेति। तत्र** एवं सतीत्यर्थः। अर्पणादिबुद्धिर्न निवर्त्यते अर्पणादिष्विति भावः। **आधीयत इति।** 'अन्नं ब्रह्मेत्युपासीत, मनो ब्रह्मेत्युपासीते'त्यादौ यथा अन्नादिषु ब्रह्मबुद्धिरुपासनार्थमाहिता, तद्वदिति भावः। **एतेन** अद्वैतिमते अर्पणादिषु अर्पणादिबुद्ध्युपमर्दनमस्ति, अत्र तु नेति विशेषः **सिद्धः**।

**ननु** प्रतिमादिषु प्रतिमादिबुद्धौ सत्यां कथं विष्ण्वादिबुद्धिर्भवेदिति चेद्? **उच्यते**— नेयं विष्ण्वादिबुद्धिस्तात्त्विकी, किन्तु कल्पितैव। ततश्च तात्त्विक्याः प्रतिमादिबुद्ध्याः कल्पिताया विष्ण्वादिबुद्ध्याश्च भवितुमर्हत्येकत्र समावेशः, विभिन्नविषयत्वेन बुद्धिद्वयस्य विरोधाभावात्। यदि बुद्धिद्वयमपि तत्त्वविषयं मिथ्याविषयं वा स्यात् , तर्हि भवत्येव विरोधः।

**ननु** प्रतिमादिविषयकविष्ण्वादिबुद्धेः कल्पितत्वमस्तु नाम, अर्पणादिविषयकब्रह्मबुद्धेः कल्पितत्वं नास्ति, ब्रह्मजन्यत्वेनार्पणादीनां ब्रह्ममयत्वात् तेषु ब्रह्मबुद्धेरकल्पितत्वात्। प्रतिमादयस्तु न विष्ण्वादिदेवतामयाः, तदजन्यत्वात्। न हि मृज्जन्ये घटे मृद्बुद्धेः कल्पितत्वमिति चेत्, **तर्हि** मृज्जन्ये घटे मृद्बुद्धिघटबुद्धिद्वयस्य निर्विरोधेन दर्शनाद् ब्रह्मजन्येष्वर्पणादिष्वपि ब्रह्मबुद्ध्यर्पणादिबुद्धिद्वयमस्तु। **नन्वेवम**र्पणादिषु बुद्धिद्वयसामानाधिकरण्याभ्युपगमे कथं ब्रह्मविदोऽपि अर्पणादिषु अर्पणादिबुद्ध्युपमर्दनमिति **चेन्मैवम्** , ब्रह्मविद् हि ब्रह्मव्यतिरेकेणार्पणाद्यभावं पश्यति, यथा घटतत्त्ववित् मृद्व्यतिरेकेण घटाभावम्। अतो न ब्रह्मविद्दृष्ट्या अर्पणादिषु बुद्धिद्वय-सामानाधिकरण्यम् , किन्त्वापातज्ञानिदृष्ट्यैवेति।

अयं भावः— य आत्मसाक्षात्कारवान् तस्य सर्वमिदं ब्रह्मैव भाति। यस्त्वल्पज्ञः पारोक्ष्येण ब्रह्मवित् तस्य हि सर्वं ब्रह्मैव न भाति, किन्तु सर्वस्मिन् तेन ब्रह्मदृष्टिराधेया, प्रतिमादौ विष्ण्वादिबुद्धिवत्। तस्मादर्पणादेर्वस्तुतो ब्रह्मत्वेऽपि अल्पज्ञेन तत्राहितेयं ब्रह्मबुद्धिः कल्पितैव, आहितत्वात्। **आहितत्वम्** आरोपितत्वम्। आरोपितस्य कल्पितत्वं सर्वसम्मतम्— इति।

पूर्वपक्षमङ्गीकरोति— **सत्यमिति**। किमिदं ज्ञानयज्ञस्तुत्यर्थं प्रकरणम्? यद्वा अर्पणादिकारकविशिष्टयज्ञस्तुत्यर्थम्? द्वितीये, त्वदुक्तं सत्यमेव भवेत् ,न तु द्वितीयस्येह सङ्गतिः, 'कर्मण्यकर्म यः पश्ये'दित्यादिना सम्यग्दर्शनरूपज्ञानस्यैव स्तूयमानत्वात्। आद्ये तु न त्वदुक्तार्थः सङ्गच्छते, प्रकरणविरोधादित्याह—[**यदीति**।] यदीदं ज्ञानयज्ञस्तुत्यर्थं प्रकरणं न स्यात् , तर्हि **एवं** त्वदुक्तरीत्याऽपि स्यात्। इदं तु ज्ञानयज्ञस्तुत्यर्थं प्रकरणमित्याह— **अत्र त्विति**। अत्र तु प्रकरणे **सम्यग्दर्शनं** सम्यग्दृश्यते आत्मादिपदार्थो येन तत् सम्यग्दर्शनमिति ज्ञानमित्यस्य विशेषणम्। **स्तौति** भगवानिति शेषः। स्तुतिप्रकारं दर्शयति— **श्रेयानिति**। ननु कथं ज्ञानस्य यज्ञत्वेन

१. 'यथा च' इति पा.। २. कुण्डलितः अंशः क्वचिन्न। स च २३५ पृष्ठे पूर्वं पठित एव। इह व्याख्यातृभिरस्पृष्टश्च।

**ये त्वर्पणादिषु प्रतिमायां विष्णुदृष्टिवद् ब्रह्मदृष्टिः क्षिप्यते, नामादिष्विव चेति ब्रुवते, न तेषां ब्रह्मविद्योक्तेह विवक्षिता स्याद् , अर्पणादिविषयत्वाज्ज्ञानस्य। न च दृष्टिसम्पादनज्ञानेन मोक्षफलं प्राप्यते। 'ब्रह्मैव तेन गन्तव्यम्' इति चोच्यते। विरुद्धं च 'सम्यग्दर्शनमन्तरेण मोक्षफलं प्राप्यते' इति। प्रकृतविरोधश्च। सम्यग्दर्शनं च प्रकृतम्— 'कर्मण्यकर्म यः पश्येत्' (भ.गी.४.१८) इत्यत्र। अन्ते च सम्यग्दर्शनम् , तस्यैवोपसंहारात्। 'श्रेयान् द्रव्यमयाद्**

अनुभूतिस्वरूपाचार्यटिप्पणम्

नन्वर्पणादिषु ये ब्रह्मदृष्टिं कुर्वन्ति तेषामिति[मपि] ब्रह्मविद्यैवात्र विवक्षिता। अतो न विवाद इत्याशङ्क्याह— **ये त्वर्पणादिष्विति**। यथाऽत्र ब्रह्मदृष्ट्या नामादिकमुपास्यम् , तथा अर्पणादिषु ब्रह्मदृष्टिकरणेऽर्पणादिकमेव प्राधान्येन ज्ञेयमिति ब्रह्मविद्या विवक्षिता न स्यादित्यर्थः। किञ्च ब्रह्मप्राप्तिफलाभिधानादपि दृष्टिविधानपक्षोऽनुपपन्न इत्याह— **न च दृष्टीति**। ननु दृष्टिविधानपक्षे नियोगबलादेव स्वर्गवद् अदृष्टो मोक्षो भविष्यतीत्याशङ्क्याह— **विरुद्धं चेति**। मोक्षो न नैयोगिकः, सातिशयत्वक्षयिष्णुत्वशरीरादिभोग[ग्य]त्वप्रसङ्गात्। **किञ्चा**विद्यानिवृत्तिलक्षणो मोक्षो नाम दृष्टमेव फलम्। सा चाविद्या-निवृत्तिः सम्यग्ज्ञानमन्तरेण न भवतीति प्रसिद्ध[प्रसिद्धि?]विरुद्धमित्यर्थः। दृष्टिनियोगान्मोक्षो भविष्यतीत्येतत् प्रकरणविरुद्धं चेत्याह— **प्रकृतविरोधश्चेति**। तदेव स्फुटयति— **सम्यग्दर्शनं चेत्यादिना**॥ २४॥

आनन्दगिरिकृतव्याख्या

**नन्वर्पणादिषु ब्रह्मदृष्टिं कुर्वतामपि ब्रह्मविद्यैवात्र विवक्षितेति पक्षभेदासिद्धिरिति चेत् , तत्राह—** ये त्विति। **यथा ब्रह्मदृष्ट्या नामादिकमुपास्यं तथार्पणादिषु ब्रह्मदृष्टिकरणे सत्यर्पणादिकमेव प्राधान्येन ज्ञेयमिति ब्रह्मविद्या यथोक्तेन वाक्येन विवक्षिता न स्यादित्यर्थः। किञ्च ब्रह्मैव तेन गन्तव्यमिति ब्रह्मप्राप्तिफलाभिधानादपि दृष्टिविधानमश्लिष्टमित्याह—** न चेति। **न चार्पणाद्यालम्बना दृष्टिर्ब्रह्म प्रापयति, 'अप्रतीकालम्बनान् नयती'ति[१] न्यायविरोधादिति भावः। दृष्टिविधानेऽपि नियोगबलादेव स्वर्गवददृष्टो मोक्षो भविष्यतीत्याशङ्क्याह—** विरुद्धं चेति। **ज्ञानादेव कैवल्यमुक्त्वा मार्गान्तरापवादिन्या श्रुत्या विरुद्धं मोक्षस्याविद्यानिवृत्तिलक्षणस्य दृष्टस्य नैयोगिकत्ववचनमित्यर्थः। दृष्टिनियोगान्मोक्षो भवतीत्येतत् प्रकरणविरुद्धं चेत्याह—** प्रकृतेति। **तदेव प्रपञ्चयति—** सम्यग्दर्शनं चेति। **अन्ते च सम्यग्दर्शनं प्रकृतमिति सम्बन्धः। तत्र हेतुः—** तस्यैवेति। **सम्यग्ज्ञानेनोपक्रम्य तेनैवोपसंहारेऽपि मध्ये किञ्चिदन्यदुक्तमिति**

भाष्यार्कप्रकाशः

स्तुतिसम्भवः? अत आह— **अत्र चेति**। 'ब्रह्मार्पण'मिति श्लोकोक्तस्य ज्ञानस्य यज्ञत्वसम्पादने 'ज्ञानयज्ञः परन्तपे'ति वचनं समर्थम्। ज्ञानयज्ञ इति भगवद्वचनाज्ज्ञानस्य यज्ञत्वसम्पत्तिरित्यर्थः। **यद्वा** इदं 'ब्रह्मार्पण'मित्यादिवचनं ज्ञानस्य यज्ञत्वसम्पादने समर्थमित्यन्वयः।

ननु भवत्विदं ज्ञानयज्ञस्तुत्यर्थं प्रकरणम् , किं तत इत्यत आह— **ये त्विति**। तेषां मत इति शेषः। **उक्ता** पूर्वोक्ता **ब्रह्मविद्या** सम्यग्दर्शनं **नेह विवक्षिता स्यात्** यथोक्तेन वाक्येन विवक्षिता न स्यात् , तत्र हेतुमाह— **अर्पणादीति**। अर्पणादिषु ब्रह्मदृष्टिः कर्तव्येति अर्पणादिविषयं ज्ञानमेवेह विवक्षितं भवेन्न तु ब्रह्मज्ञानमित्यर्थः। ननु भवत्विदमर्पणादिविषयं ज्ञानम्, तथापि अर्पणादिषु ब्रह्मदृष्ट्याधानेन स्यादेव मोक्षः, प्रतिमादिषु विष्ण्वाद्या[दिबुद्ध्या]धानवदित्यत आह—**न चेति**। अतस्तस्मिंस्तद्बुद्धेर्मिथ्याज्ञानत्वादर्पणादिषु ब्रह्मबुद्ध्या, प्रतिमादिषु विष्ण्वादिबुद्ध्या वा न भवेन्मोक्षः इत्यर्थः। मोक्षाभावे इष्टापत्तिं वारयति— **ब्रह्मैवेति**। ननु भगवद्वचनादस्मादेव मिथ्याज्ञानाद् गौणज्ञानाद्वा दर्शिताद् भवेदेव मोक्ष इत्यत आह— **विरुद्धं चेति**। 'तमेवं विदित्वाऽतिमृत्युमेती'त्यादिशास्त्रविरोधादिति भावः।

प्रकरणविरोधोऽपीत्याह— **प्रकृतेति**। सम्यग्दर्शनप्रकरणत्वादस्याध्यायस्येत्यर्थः। कथमिदं ज्ञायते? अत आह— **कर्मणीति**। 'कर्मण्यकर्म यः' इति सम्यग्दर्शनं प्रक्रम्य 'ज्ञानं लब्ध्वा परां शान्ति'मित्युपसंहरति। मध्ये च ज्ञानमेव स्तूयते। अत

१. तथा सति प्रतीकोपास्तिरियं स्यात्। प्रतीकोपासकानां च ब्रह्मप्राप्तिवचनं न युक्तम् , तेषामब्रह्मक्रतुत्वेन ब्रह्मलोकप्राप्त्यभावस्य(ब्र.सू. ४-३-१५)इत्यत्रोक्तत्वात्।

**यज्ञाज्ज्ञानयज्ञः'(भ.गी.४.३३) 'ज्ञानं लब्ध्वा परां शान्तिम्' (भ.गी.४.३९) इत्यादिना सम्यग्दर्शनस्तुतिमेव कुर्वन्नुपक्षीणोऽध्यायः। तत्राकस्मादर्पणादौ ब्रह्मदृष्टिरप्रकरणे[१] प्रतिमायामिव विष्णुदृष्टिरुच्यत इत्यनुपपन्नम्। तस्माद् यथाव्याख्यातार्थ एवायं श्लोकः॥२४॥**

आनन्दगिरिकृतव्याख्या

**प्रकरणस्यातद्विषयत्वमित्याशङ्क्याह—** श्रेयानिति। **प्रकरणे सम्यग्ज्ञानविषये सत्यनुपपन्नो दर्शनविधिरिति फलितमाह—** तत्रेति। **ब्रह्मार्पणमन्त्रे परकीयव्याख्यानासंभवे स्वकीयव्याख्यानं व्यवस्थितमित्युपसंहरति—** तस्मादिति॥२४॥

भाष्यार्कप्रकाशः

उपक्रमाद्यैकरूप्यादिलिङ्गात् सम्यग्दर्शनप्रकरणमिदमिति ज्ञायते। **उपक्षीण** उपसंहृतः, समाप्तो भवतीत्यर्थः। **तत्र** एवं सति **अकस्माद्** हेतुं विना। **अत्र प्रकरणे** ज्ञानयज्ञप्रकरणे 'प्रतिमायां विष्णुदृष्टिरिव अर्पणादिषु ब्रह्मदृष्टिरुच्यते' इति परव्याख्यानमनुपपन्नम्।

उपसंहरति— **तस्मादिति**। परोक्तार्थस्यानुपपन्नत्वादित्यर्थः। **यथा व्याख्यातार्थः** यथेत्यनुरूपार्थेऽव्ययम्। व्याख्यातोऽर्थो यस्य स व्याख्यातार्थः। अनुरूपं श्लोकस्यार्थो मया व्याख्यात इत्यर्थः। व्याख्यानमनतिक्रम्य यथाव्याख्यातमर्थो यस्य स यथाव्याख्यातार्थ इति वा।

यत्तु **रामानुजः**— ब्रह्मार्पणं ब्रह्म अर्पणं स्रुगादि यस्य तत् , ब्रह्म, स्वयं च ब्रह्मभूतं हविः, ब्रह्माग्नौ (येन) ब्रह्मणा कर्त्रा हुतं निक्षिप्तम् , सर्वं कर्म ब्रह्मात्मकतया ब्रह्ममयमिति यः समाधत्ते स **ब्रह्मकर्मसमाधिः**, तेन ब्रह्मैव गन्तव्यम् , ब्रह्मात्मकतया ब्रह्मभूत-मात्मस्वरूपं गन्तव्यम् , मुमुक्षुणा क्रियमाणं कर्म परब्रह्मात्मकमेवेत्यनुसन्धानयुक्ततया ज्ञानाकारं साक्षादात्मावलोकनसाधनम् , न ज्ञाननिष्ठाव्यवधानेनेत्यर्थः - इति, यच्च **वेदान्तदेशिकः**—कर्मयोगसाक्षात्कार्यमात्मस्वरूपमत्र स्रुग्घविरग्न्यादिवद् ब्रह्मशब्देनोच्यत इत्याह—**ब्रह्मात्मकतयेति**।[२], तत् सर्वं **तुच्छात्तुच्छतरम्।** तथाहि— यः सर्वं कर्म ब्रह्ममयं जानाति स आत्मानं साक्षात्कुरुत इति वचनमयुक्तम् , आत्मसाक्षात्कारस्य सर्वकर्मविषयकब्रह्मज्ञानस्य च कार्यकारणभावाभावात्। सर्वं कर्म ब्रह्मात्मकमिति ज्ञानादस्तु नाम कथञ्चिद् ब्रह्मसाक्षात्कारः, न पुनरात्मसाक्षात्कारो भवितुमर्हति, ब्रह्मभिन्नत्वादात्मनस्तव मते। किञ्च इन्द्रियव्यापारोपरमरूपज्ञाननिष्ठां विना कथमन्तःस्थितात्मवस्तुसाक्षात्कारः? आत्मन आन्तरस्य साक्षात्कारे मन एव हि करणम्। तस्यान्तर्मुखत्वं हि ज्ञाननिष्ठा। यः कर्मी स बहिर्मुखमना एव, कारकादीनां बहिःस्थत्वात्। न त्वात्मा बाह्यः, येन कर्मव्यग्रमनसा बहिर्मुखेनात्मसाक्षात्कारो भवेत्। न च कर्म ब्रह्मेति ज्ञानमात्मसाक्षात्कारहेतुरेवेति वाच्यम् , घटो ब्रह्मेति ज्ञानादप्यात्मसाक्षात्कारापत्तेः। न चेष्टापत्तिः, तथाऽनुभवाभावात्।

अपि च सर्वस्यापि ब्रह्मकार्यत्वेन ब्रह्मभूतत्वादर्पणादिकं ब्रह्मभूतमेवेति कृत्वा अर्पणादीनां ब्रह्मभूतत्वविशेषणमप्यनर्थकम्। न ह्यविद्वानपि अब्रह्मभूतमर्पणादिकं सम्पादयितुं शक्नोति, येनाब्रह्माग्नावब्रह्मार्पणमब्रह्महविर्होतुं शक्येतेति तद्वारणाय ब्रह्मार्पणमि-त्याद्युच्येत।

अथ यदुक्तं हविरादिवद् ब्रह्मात्मकत्वमात्मन इति **वेदान्तदेशिकेन,** तद्धि वेदान्तदेशिकपदं विरुद्धलक्षणयाऽस्मिन् प्रवृत्तमिति स्पष्टं बोधयति। तथाहि— आत्मनो हविरग्न्यादिवद् ब्रह्मात्मकत्वं किं ब्रह्मकार्यत्वाद् , उत ब्रह्मज्ञेयत्वात्? नाद्यः, 'अजो नित्यः शाश्वतः' इत्यादिविरोधात्। प्रकृतिपुरुषकालादीनां त्वन्मतेऽप्यनादित्वात् , नित्यत्वाच्च। न द्वितीयः, ब्रह्मण इवात्मनोऽपि द्रष्टृत्वेन ब्रह्मज्ञेयत्वाभावात् , अन्यथा जडत्वापत्तेः, 'चेतनश्चेतनाना'मिति श्रुतौ जीवाश्चेतनाः इति त्वयाऽप्यभ्युपेतत्वात्।

यद्यात्मनो ब्रह्मज्ञेयत्वाद् ब्रह्मात्मकत्वं स्यात् , तर्हि ब्रह्मणोऽप्यात्मज्ञेयत्वादात्मात्मकत्वं स्यात्। 'दृश्यते त्वग्र्यया बुद्ध्या' इत्यादिश्रुत्या प्रतिपाद्यते हि ब्रह्मणोऽप्यात्मज्ञेयत्वम्। न चेदं ज्ञेयत्वं ब्रह्मणः सत्यमिति वाच्यम् , तथा सति जडत्वपरिच्छिन्नत्वा-नित्यत्वादिप्राप्तेः, 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिश्रुतिविरोधाच्च, 'साक्षी चेता' इत्यादिश्रुतिविरोधाच्च। अतः कल्पितमेव[३]। एवमात्मन्यपि, ब्रह्मण एवात्मत्वात्। तस्मादात्मनि ब्रह्मात्मकत्वं ब्रह्माभिन्नत्वमेव, न त्वन्यत्॥२४ ॥

१. 'अत्र प्रकरणे' इति रा.पा.। २. 'इति आहतुः' इति शेषः। ३. ज्ञेयत्वं ब्रह्मणि इति शेषः।

**दैवमेवापरे यज्ञं योगिनः पर्युपासते।**
**ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥२५॥**

**तत्राधुना सम्यग्दर्शनस्य यज्ञत्वं सम्पाद्य तत्स्तुत्यर्थम् अन्येऽपि यज्ञा उपक्षिप्यन्ते—** दैवमेवेत्यादिना। दैवमेव **देवा इज्यन्ते येन यज्ञेनासौ दैवो यज्ञः, तमेवापरे यज्ञं** योगिनः **कर्मिणः** पर्युपासते **कुर्वन्तीत्यर्थः।** ब्रह्माग्नौ **'सत्यं ज्ञानमनन्तं ब्रह्म'(तै.उ.२.१) 'विज्ञानमानन्दं ब्रह्म' (बृ.उ.३.९.२८) 'यत्साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः' (बृ.उ.३.४.१) इत्यादिवचनोक्तम् अशनायादिसर्वसंसारधर्मवर्जितं 'नेति नेति' (बृ.उ.४.४.२२) इति निरस्ताशेषविशेषं [१]ब्रह्मशब्देनोच्यते। ब्रह्म च तदग्निश्च सः होमाधिकरणत्वविवक्षया ब्रह्माग्निः, तस्मिन् ब्रह्माग्नौ** अपरे

आनन्दगिरिकृतव्याख्या

**ज्ञानस्य यज्ञत्वं सम्पाद्य पूर्वश्लोके स्थिते सत्यधुना तस्यैव ज्ञानस्य स्तुत्यर्थं यज्ञान्तरनिर्देशार्थमुत्तरग्रन्थप्रवृत्तिरित्याह—** तत्रेति। **सर्वस्य श्रेयःसाधनस्य मुख्यगौणवृत्तिभ्यां यज्ञत्वं दर्शयन्नादौ यज्ञद्वयमादर्शयति—** दैवमेवेत्यादिना। [२]**प्रतीकमादाय दैवयज्ञं व्याचष्टे—** देवा इति। **सम्यग्ज्ञानाख्यं यज्ञं विभजते—** ब्रह्माग्नाविति। **तत्र ब्रह्मशब्दार्थं श्रुत्यवष्टम्भेन स्पष्टयति—** सत्यमिति। [३]**यदजड-मनृतविपरीतमपरिच्छिन्नं ब्रह्म तस्य परमानन्दत्वेन परमपुरुषार्थत्वमाह—** विज्ञानमिति। **तस्य ज्ञानाधिकरणत्वेन ज्ञानत्वमौपचारिक-मित्याशङ्क्याह—** यत्साक्षादिति। **जीवब्रह्मविभागे[४] कथमपरिच्छिन्नत्वमित्याशङ्क्य विशिनष्टि—** य आत्मेति। **परस्यैवात्मत्वं सर्वस्माद् देहादेरव्याकृतान्तादान्तरत्वेन साधयति—** सर्वान्तर इति। **विधिमुखं सर्वमेवोपनिषद्वाक्यं ब्रह्मविषयम्** आदिशब्दार्थः। **निषेधमुखं ब्रह्मविषयमुपनिषद्वाक्यमशेषमेवार्थतो निबध्नाति—** अशनायेति। **ब्रह्मण्यग्निशब्दप्रयोगे निमित्तमाह—** स होमेति। **बुद्ध्यारूढतया सर्वस्य**

भाष्यार्कप्रकाशः

**दैवमिति।** देवानामयं दैवः 'तस्येद'मित्यण्। देवयजनसाधन इत्यर्थः। यज्ञोऽपूर्वः, तत्साधकं कर्म वा। यज्ञस्योपासना-सम्भवादुपासनमिह करणमेवेत्याह— **कुर्वन्तीति।** [५]कर्मयज्ञोऽयं सर्वत्र प्रसिद्ध एवेति भावः। साक्षादपरोक्षादिति श्रुतावपरोक्षादिति पञ्चमी प्रथमार्थे छान्दसी, अपरोक्षमित्यर्थः। **साक्षात्** करणव्यापारं विनैवेत्यर्थः। आत्मत्वादिति भावः। सर्वान्तरः सर्वेषामन्नमया-द्यानन्दमयान्तानां पञ्चानां कोशाना**मान्तरः** अन्तः स्थितः, जगदन्तःस्थितः इति वा। **अशनाया** क्षुत्। आदिपदात् सुखदुःखादि-ग्रहणम्। नेति नेतीति श्रुत्या निरस्ता अशेषा **विशेषाः** भेदा यस्मिन् तत् , अस्थूलमनण्वह्रस्वमित्येवं स्थूलत्वाणुत्वह्रस्वत्वादयः सर्वे विशेषाः आत्मनि निराकृता इत्यर्थः। ब्रह्मणि अग्नित्वारोपणं किंविवक्षयेत्यत आह— **होमाधिकरणविवक्षयेति।** हविरादिहोमस्य अग्नेरधिकरणत्वादिति भावः। अत एवाग्नावित्यधिकरणे सप्तमी। कोऽसावात्मेत्यत आह— **परमार्थत इत्यादि।** यथा परमार्थतो महाकाश एव घटाद्युपाधिवशाद् घटाकाशादिभेदेन व्यवह्रियते, तथा परमार्थतो ब्रह्मैव बुद्ध्याद्युपाधिवशादात्मेति व्यवह्रियते। अस्मिंश्च बुद्ध्याद्यवच्छिन्ने आत्मनि बुद्ध्याद्युपाधिधर्माः अज्ञानेनाध्यस्ताः। अत एवाहं सुखी दुःखी काणो बधिरः स्थूलः कृश इत्यादिव्यवहारः। बुद्ध्यादीत्यादिपदान्मनःप्राणेन्द्रियदेहग्रहणम्।

न च 'असङ्गो ह्ययं पुरुषः' इति श्रुत्युक्तस्यासङ्गस्यात्मनः कथं बुद्ध्याद्युपाधिसम्बन्ध इति वाच्यम् , मायया सर्वसम्भवात् । उक्तं हि व्यासेन भागवते— 'सेयं भगवतो माया यन्नयेन विरुध्यते' इति। यद्विचारेण विरुध्यते सैव मायेत्यर्थः। अविचारितरमणीय-त्वान्मायाकार्यस्य नास्ति विचारक्षमत्वमिति भावः। वस्तुतो नास्त्युपाधिसङ्गः आत्मनः, किन्तु मायया शुक्तिकारजतादिवत् प्रतीयत इति तत्त्वम्।

---

१. 'ब्रह्म ब्रह्मशब्देन' इति रा.पा.। २. 'दैवमेवेति प्रतीकमादाय' इति पा.। ३. ज्ञानम् सत्यम् अनन्तमिति पदानि क्रमेण व्याचष्टे—**अजडमित्यादिना।** ४. जीव-ब्रह्मभेदे सति ब्रह्मणो वस्तुपरिच्छेदराहित्यं कथमिति प्रश्नः। आत्मत्वात् न भेद इति युक्तं वस्तुपरिच्छेदराहित्यमिति समाधानम्। ५. प्रसिद्धो यज्ञः श्रौतकर्मरूपः। द्रव्ययज्ञाः इति तु तीर्थेषु द्रव्यदानमिति न पौनरुक्त्यशङ्का।

**श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।**
**शब्दादीन् विषयानन्य इन्द्रियाग्निषु जुह्वति ॥२६॥**

**अन्ये ब्रह्मविदो** यज्ञं **यज्ञशब्दवाच्य आत्मा,**[१]**आत्मनामसु यज्ञशब्दस्य पाठात्। तमात्मानं यज्ञं परमार्थतः परमेव ब्रह्म सन्तं बुद्ध्याद्युपाधिसंयुक्तम् अध्यस्तसर्वोपाधिधर्मकमाहुतिरूपं** यज्ञेनैव **आत्मनैवोक्तलक्षणेन** उपजुह्वति **प्रक्षिपन्ति। सोपाधिकस्यात्मनो निरुपाधिकेन परब्रह्मस्वरूपेणैव यद् दर्शनं स तस्मिन् होमः, तं कुर्वन्ति ब्रह्मात्मैकत्वदर्शननिष्ठाः संन्यासिन इत्यर्थः। सोऽयं सम्यग्दर्शनलक्षणो यज्ञो दैवयज्ञादिषु यज्ञेषूपक्षिप्यते 'ब्रह्मार्पण'मित्यादिश्लोकैः प्रस्तुतः 'श्रेयान् द्रव्यमयाद् यज्ञाज्ज्ञानयज्ञः परन्तप' इत्यादिना स्तुत्यर्थम्॥२५॥**

श्रोत्रादीनीति। श्रोत्रादीनि **इन्द्रियाणि** अन्ये **योगिनः** संयमाग्निषु **, प्रतीन्द्रियं संयमो भिद्यत इति बहुवचनम् ; संयमा एवाग्नयस्तेषु जुह्वति। इन्द्रियसंयममेव कुर्वन्तीत्यर्थः। शब्दादीन् विषयान् अन्ये** इन्द्रियाग्निषु **जुह्वति,**

आनन्दगिरिकृतव्याख्या

**दाहकत्वाद् विलयस्य वा हेतुत्वादिति द्रष्टव्यम्। यज्ञशब्दस्यात्मनि त्वम्पदार्थे प्रयोगे हेतुमाह—** आत्मनामस्विति। **आधाराधेयभावेन वास्तवभेदं ब्रह्मात्मनोर्व्यावर्तयति—** परमार्थत इति। **कथं तर्हि होमः? न हि तस्यैव तत्र होमः सम्भवतीत्याशङ्क्याह—** बुद्ध्यादीति। **उपाधिसंयोगफलं कथयति—** अध्यस्तेति। **उपाध्यध्यासद्वारा तद्धर्माध्यासे प्राप्तमर्थं निर्दिशति—** आहुतीति। [२]**इत्थम्भूतलक्षणां तृतीयामेव व्याकरोति—** उक्तेति। **अशनायादिसर्वसंसारधर्मवर्जितेन निर्विशेषेण स्वरूपेणेति यावत्। आत्मनो ब्रह्मणि होममेव प्रकटयति—** सोपाधिकस्येति। **अपर इत्यस्यार्थं स्फोरयति—** ब्रह्मेति। **उक्तस्य ज्ञानयज्ञस्य दैवयज्ञादिषु ब्रह्मार्पणमित्यादि-श्लोकैरुपक्षिप्यमाणत्वं दर्शयति—** सोऽयमिति। **उपक्षेपप्रयोजनमाह—** श्रेयानिति॥२५॥

**सम्प्रति यज्ञद्वयमुपन्यस्यति—** श्रोत्रादीनीति। **बाह्यानां करणानां मनसि संयमस्यैकत्वात् कथं संयमाग्निष्विति बहुवचनमित्याशङ्क्याह—** प्रतीन्द्रियमिति। **संयमानां प्रत्याहाराधिकरणत्वेन व्यवस्थितानां मनोरूपाणां होमाधारत्वादग्नित्वं व्यपदिशति —**संयमा इति। **विषयेभ्योऽन्तर्बाह्यानीन्द्रियाणि प्रत्याहरन्तीति संयमयज्ञं सङ्क्षिप्य दर्शयति—** इन्द्रियेति। **श्रोत्रादीन्द्रियाग्निषु शब्दादि-**

भाष्यार्कप्रकाशः

**आहुतिर्हविः। उक्तलक्षणेनेति।** बुद्ध्याद्युपाधिसंयुक्तत्वादिलक्षणशालिनेत्यर्थः। नन्वात्मन एव ब्रह्मत्वात् कथं स्वस्मिन् स्वस्य प्रक्षेपः, आधाराधेयभावस्य द्विनिष्ठत्वादत आह— **सोपाधिकस्येति।** सोपाधिके आत्मनि या निरुपाधिकब्रह्मबुद्धिः सैवात्मनो ब्रह्मणि प्रक्षेप इत्यर्थः। फलितमाह— **ब्रह्मात्मेति।** अहं ब्रह्मास्मीति ज्ञाननिष्ठेत्यर्थः। केऽमी? अत आह— **संन्यासिन इति।** पूर्वार्धेन कर्मिणामुक्तत्वादिति भावः। ननु ब्रह्मार्पणमिति श्लोकोक्तस्य ज्ञानयज्ञस्य कस्मात् पुनरिह वचनम्? अत आह— **सोऽयमिति।** ब्रह्मार्पणमिति श्लोकेन सम्यग्दर्शनं प्रस्तुतम्। इदानीं तु तस्य यज्ञत्वं स्फुटमुक्तमिति न पौनरुक्त्यमिति भावः। किमर्थोऽयं ज्ञानयज्ञ इहोपक्षिप्तः? अत आह— **श्रेयानित्यादिना स्तुत्यर्थमिति।**

यत्तु **रामानुजः**— दैवं देवतार्चनरूपं यज्ञमिति, [३]यज्ञं हविः, यज्ञेन स्रुगादिनेति च व्याचख्यौ, **तत्तुच्छम्** ; अप्रसिद्धार्थ-कल्पनस्यान्याय्यत्वात्, ब्रह्माग्नावित्यग्नेर्ब्रह्मविशेषणस्य व्यर्थत्वाच्च॥२५॥

**श्रोत्रादीनीति। संयमो** नियमनम्। ननु संयमस्यैकत्वात् कुतः संयमाग्निष्विति बहुत्वम्? अत आह— **प्रतीन्द्रियमिति।** चक्षुःसंयमो वाक्संयमः श्रोत्रसंयम इत्येवमिन्द्रियभेदात् संयमभेद इति भावः। **शब्दादीनिति।** ननु इन्द्रियसंयमरूपयज्ञेनैव

१. द्र. निरुक्तम् १४-११। २. यज्ञं यज्ञेनेति पदद्वयमपि आत्मपरम्। यज्ञेनेति तु न करणे तृतीया, किन्तु इत्थम्भूतलक्षणे। ३. ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति इत्यस्य— अपरे स्रुगादिसाधनेन ब्रह्माग्नौ हविः प्रक्षिपन्ति इति तदभिमतोऽर्थः।

**सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।**
**आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥२७॥**
**द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे।**
**स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः॥२८॥**

**इन्द्रियाण्येवाग्नयः, तेष्विन्द्रियाग्निषु जुह्वति। श्रोत्रादिभिरविरुद्धविषयग्रहणं होमं मन्यन्ते॥२६॥**

**किञ्च—** सर्वाणीति। सर्वाणीन्द्रियकर्माणि **इन्द्रियाणां कर्माणीन्द्रियकर्माणि, तथा** प्राणकर्माणि **प्राणो वायुराध्यात्मिकः, तत्कर्माणि आकुञ्चनप्रसारणादीनि, तानि चापरे** आत्मसंयमयोगाग्नौ **आत्मनि संयम आत्मसंयमः, स एव योगाग्निः, तस्मिन्नात्मसंयमयोगाग्नौ** जुह्वति **प्रक्षिपन्ति** ज्ञानदीपिते, **स्नेहेनेव [1]प्रदीपिते विवेकविज्ञानेनोज्ज्वलभावमापादिते [2]प्रविलापयन्तीत्यर्थः॥२७॥**

द्रव्येति। द्रव्ययज्ञाः **तीर्थेषु द्रव्यविनियोगं यज्ञबुद्ध्या कुर्वन्ति ये ते द्रव्ययज्ञाः।** तपोयज्ञाः **तपो यज्ञो येषां तपस्विनां ते तपोयज्ञाः।** योगयज्ञाः **प्राणायामप्रत्याहारादिलक्षणो योगो यज्ञो येषां ते योगयज्ञाः। तथाऽपरे**

आनन्दगिरिकृतव्याख्या

**विषयहोमस्य तत्तदिन्द्रियैस्तत्तद्विषयोपभोगलक्षणस्य सर्वसाधारणत्वमाशङ्क्य , प्रतिषिद्धान् वर्जयित्वा रागद्वेषरहिताः भूत्वा प्राप्तान् विषयानुपभुञ्जते तैस्तैरिन्द्रियैरिति विवक्षितं होमं विशदयति—** श्रोत्रादिभिरिति॥२६॥

**यज्ञान्तरं कथयति—** किञ्चेति। **इन्द्रियाणां कर्माणि श्रवणवदनादीनि।** आत्मनि संयमो **धारणाध्यानसमाधिलक्षणः[3]। सर्वमपि व्यापारं निरुध्यात्मनि चित्तसमाधानं कुर्वन्तीत्याह—** विवेकेति॥२७॥

**यज्ञषट्कमवतारयति—** द्रव्येति। **तत्र द्रव्ययज्ञान् पुरुषानुपादाय विभजते—** तीर्थेष्विति। तपस्विनो **यज्ञबुद्ध्या तपोऽनुतिष्ठन्तो नियमवन्त इत्यर्थः।** प्रत्याहारादीत्यादि**शब्देन यमनियमासनध्यानधारणासमाधयो गृह्यन्ते।** यथाविधि **प्राङ्मुखत्वपवित्रपाणित्वाद्यङ्ग-**

भाष्यार्कप्रकाशः

शब्दादिविषयग्रहणरूपो यज्ञोऽप्युक्त एवेत्यत आह— **श्रोत्रादिभिरिति।** विरुद्धाविरुद्धसाधारण्येन सर्वविषयाग्रहणं पूर्वस्मिन् यज्ञे, इह तु विरुद्धविषयाग्रहणमेवेति भेद इत्यर्थः॥२६॥

**सर्वाणीति।** अपरे सर्वाणि इन्द्रियकर्माणि प्राणकर्माणि च ज्ञानदीपिते आत्मसंयमयोगाग्नौ जुह्वति। इन्द्रियाणां कर्माणि व्यापाराः शब्दस्पर्शादिग्रहणानि, गमनभाषणादीनि च । आत्मनि अध्यात्मम् , तत्र भवति आध्यात्मिकः, आत्मनि संयमो नियमनं मनस इति भावः। आत्मसंयमः, स एव योग आत्मसंयमयोगः, स एवाग्निरात्मसंयमयोगाग्निः, तस्मिन् औपनिषदाभिमत-निर्बीजसमाधावित्यर्थः। वक्ष्यत्यमुं षष्ठाध्याये। ज्ञानेन विवेकविज्ञानेन दीपिते उज्ज्वलभावमापादिते इत्यन्वयः। तत्र दृष्टान्तमाह— **स्नेहेनेव प्रदीपे इति।** यथा प्रदीपस्तैलेन दीपितो भवति, तद्वदित्यर्थः। जुह्वतीति हविःप्रक्षेपवाचिनो धातोरिह कथं प्रयोगोपपत्तिरत आह— **प्रविलापयन्तीति।** लीनानि कुर्वन्तीत्यर्थः। अग्नौ हविषः प्रक्षेपणं नाम हविर्विलापनमेव हीति भावः॥२७॥

**द्रव्येति।** द्रव्यं यज्ञो येषां ते द्रव्ययज्ञाः। साक्षाद्द्रव्यस्य यज्ञत्वरूपक्रियात्वाभावादाह— **द्रव्यविनियोगमिति।** अतीर्थे द्रव्यविनियोगस्य व्यर्थत्वेन यज्ञतुल्यत्वाभावादाह— **तीर्थेष्विति।** गङ्गादिपुण्यक्षेत्रेष्वित्यर्थः। **पात्रेष्विति वा। तपः** कृच्छ्रचान्द्रायणादिलक्षणं यज्ञो येषां ते तपोयज्ञाः। **योगयज्ञा इति। योगः** पातञ्जलाभिमत ईश्वरप्रणिधानात्मकः। आत्मदर्शनयज्ञव्यावृत्त्यर्थमाह—

१.'प्रदीपे' इति पा.। २. 'जुह्वति प्रविलापयन्तीत्यर्थः'इति पा.। ३.तदुक्तम्— 'त्रयमेकत्र संयमः'(यो.सू. ३-४) इति। धारणादित्रयमेकविषयकं संयमसंज्ञं भवतीति सूत्रार्थः। चित्तस्यैकस्मिन् विषये स्थापनं धारणा। चित्तस्यैकविषयवृत्तिप्रवाहकरणं ध्यानम्। ध्यानमेव ध्येयैकगोचरतया भासमानं वृत्तिप्रतिभासशून्यं समाधिः।

**अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे।**
**प्राणापानगती रुद्ध्वा प्राणायामपरायणाः॥ २९॥**
**अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति।**
**सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः॥ ३०॥**

स्वाध्यायज्ञानयज्ञाश्च **स्वाध्यायो यथाविधि ऋगाद्यभ्यासो यज्ञो येषां ते** स्वाध्याययज्ञाः, **ज्ञानयज्ञा ज्ञानं शास्त्रार्थपरिज्ञानं यज्ञो येषां ते** ज्ञानयज्ञाश्च यतयो **यतनशीलाः** संशितव्रताः **सम्यक् शितानि तनूकृतानि तीक्ष्णीकृतानि व्रतानि येषां ते संशितव्रताः॥ २८॥**

**किञ्च—** अपान इति। अपाने **अपानवृत्तौ** जुह्वति **प्रक्षिपन्ति** प्राणं **प्राणवृत्तिम्। पूरकाख्यं प्राणायामं कुर्वन्तीत्यर्थः। प्राणेऽपानं तथाऽपरे जुह्वति। रेचकाख्यं च प्राणायामं कुर्वन्तीत्येतत्।** प्राणापानगती **मुखनासिकाभ्यां वायोर्निर्गमनं प्राणस्य गतिः, तद्विपर्ययेणाधोगमनमपानस्य गतिः, ते प्राणापानगती, एते** रुद्ध्वा **निरुध्य** प्राणायामपरायणाः **प्राणायामतत्पराः कुम्भकाख्यं प्राणायामं कुर्वन्तीत्यर्थः॥ २९॥**

**किञ्च—** अपर इति। **अपरे** नियताहाराः **नियतः परिमितः आहारो येषां ते नियताहाराः सन्तः** प्राणान् **वायुभेदान् प्राणेष्वेव जुह्वति। यस्य यस्य वायोर्जयः क्रियत इतरान् वायुभेदान् तस्मिंस्तस्मिञ्जुह्वति, ते तत्र प्रविष्टा इव भवन्ति। सर्वेऽप्येते यज्ञविदो** यज्ञक्षपितकल्मषाः **यज्ञैर्यथोक्तैः क्षपितो नाशितः कल्मषो येषां ते यज्ञक्षपितकल्मषाः ॥ ३०॥**

आनन्दगिरिकृतव्याख्या

**विधिमनतिक्रम्येति यावत्। व्रतानां** तीक्ष्णीकरणम् **अतिदृढत्वम्॥ २८॥**

**प्राणायामाख्यं यज्ञमुदाहरति—** किञ्चेति। **प्राणायामपरायणाः सन्तो रेचकं पूरकं च कृत्वा कुम्भकं कुर्वन्तीत्याह—** प्राणेति ॥ २९॥

**प्राणापानयोर्गती श्वासप्रश्वासौ निरुध्य किं कुर्वन्तीत्यपेक्षायामाह—** किञ्चेति। **प्राणापानगतिनिरोधरूपं कुम्भकं कृत्वा पुनःपुनर्वायुजयं कुर्वन्तीत्यर्थः। आहारस्य परिमितत्वं हितत्वमेध्यत्वोपलक्षणार्थम्। प्राणानां प्राणेषु होममेव विभजते—** यस्येति। **जितेषु वायुभेदेष्वजितानां तेषां होमप्रकारं प्रकटयति—** ते तत्रेति। **प्रकृतान् यज्ञानुपसंहरति—** सर्वेऽपीति॥ ३०॥

भाष्यार्कप्रकाशः

**शास्त्रार्थपरिज्ञानमिति। शास्त्रं** वेदवेदाङ्गादिरूपम्। संशितव्रताः अपरे यतयः द्रव्ययज्ञास्तपोयज्ञा योगयज्ञाः स्वाध्यायज्ञानयज्ञाश्च भवन्तीत्यन्वयः। नात्र द्रव्ययज्ञादीनामेकस्मिन् पुरुषे समुच्चयः, किन्तु केचिद् द्रव्ययज्ञाः, केचित् तपोयज्ञाः, केचिद् योगयज्ञाः, केचित् स्वाध्याययज्ञाः, केचिज्ज्ञानयज्ञाश्च भवन्तीति। अपरे इति पदस्य आवृत्त्या लभ्यतेऽयमर्थः॥ २८॥

**अपान इति।** केचिदपाने प्राणं जुह्वति, तथा अपरे प्राणे अपानं जुह्वति। अन्ये इति शेषः। प्राणापानगती रुद्ध्वा प्राणायामपरायणा भवन्ति। न चास्य श्लोकस्य योगयज्ञेन गतार्थता शङ्क्या, प्राणायामप्रत्याहाराद्यष्टाङ्गयुक्तो योगस्तत्रोक्तः। अत्र तु पूरकस्य रेचकस्य कुम्भकस्य च प्रत्येकं यज्ञत्वमिति भेदात्॥ २९॥

**अपरे इति।** कथं प्राणानां प्राणेष्वेव होमः? इत्यत आह— **यस्य यस्येति।** पञ्चानां वायूनां मध्ये यो यो वायुर्जितः स्वाधीनो भवति, तस्मिंस्तस्मिन्नितरेषां वायूनां प्रवेशनमेव होम इत्युच्यत इत्यर्थः। **एते** 'दैवमेवे'त्यारभ्योक्ता इत्यर्थः॥ ३०॥

**यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्।**
**नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ! ॥३१॥**
**एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे।**
**कर्मजान् विद्धि तान् सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥३२॥**

**एवं यथोक्तान् यज्ञान् निर्वर्त्य —** यज्ञेति। यज्ञशिष्टामृतभुजो **यज्ञानां शिष्टं यज्ञशिष्टम्, यज्ञशिष्टं च तदमृतं च यज्ञशिष्टामृतम् , तद् भुञ्जत इति यज्ञशिष्टामृतभुजः। यथोक्तान् यज्ञान् कृत्वा तच्छिष्टेन कालेन यथाविधि चोदितमन्नममृताख्यं भुञ्जत इति यज्ञशिष्टामृतभुजो** यान्ति **गच्छन्ति ब्रह्म** सनातनं **चिरन्तनं मुमुक्षवश्चेत् , कालातिक्रमापेक्षयेति सामर्थ्याद् गम्यते। नायं लोकः सर्वप्राणिसाधारणोऽप्यस्ति यथोक्तानां यज्ञानामेकोऽपि यज्ञो यस्य नास्ति सोऽयज्ञः तस्य, कुतोऽन्यो विशिष्टसाधनसाध्यः, कुरुसत्तम !॥३१॥**

एवमिति। **एवं यथोक्ताः** बहुविधाः **बहुप्रकाराः यज्ञाः** वितताः **विस्तीर्णाः** ब्रह्मणो **वेदस्य** मुखे **द्वारे। वेदद्वारेणावगम्यमाना ब्रह्मणो मुखे विततः उच्यन्ते। तद्यथा 'वाचि हि प्राणं जुहुमः'(ऐ .आ.३.२.६) इत्यादयः।** कर्मजान्

आनन्दगिरिकृतव्याख्या

**यथोक्तयज्ञनिर्वर्तनानन्तरं क्षीणे कल्मषे किं स्यादित्याशङ्क्याह—** एवमिति। **यथोक्तानां यज्ञानां मध्ये केनचिदपि यज्ञेनाविशेषितस्य पुरुषस्य प्रत्यवायं दर्शयति—** नायमिति। **कथं यथोक्तयज्ञानुष्ठायिनामवशिष्टेन कालेन विहितान्नभुजां ब्रह्मप्राप्तिरित्याशङ्क्य , मुमुक्षुत्वे सति चित्तशुद्धिद्वारेत्याह—** मुमुक्षवश्चेदिति। **तत् किमिदानीं साक्षादेव मोक्षो विवक्षितः, तथा च गतिश्रुतिविरोधः स्यादित्याशङ्क्य , गतिनिर्देशसामर्थ्यात् क्रममुक्तिरत्राभिप्रेतेत्याह—** कालातीति। **तृतीयं पादं व्याचष्टे—** नायमिति। **विवक्षितं कैमुतिकन्यायमाह—** कुत इति। **साधारणलोकाभावे पुनरसाधारणलोकप्राप्तिर्दूरनिरस्तेत्यर्थः। यथोक्तेऽर्थे बुद्धिसमाधानं कुरुकुलप्रधानस्यार्जुनस्यानायासलभ्यमिति वक्तुं** कुरुसत्तमेत्युक्तम् ॥३१॥

**उक्तानां यज्ञानां वेदमूलकत्वेनोत्प्रेक्षानिबन्धनत्वं निरस्यति—** एवमिति। **आत्मव्यापारसाध्यत्वमुक्तकर्मणामाशङ्क्य दूषयति—** कर्मजानिति। **आत्मनो निर्व्यापारत्वज्ञाने फलमाह—** एवमिति। **कथं यथोक्तानां यज्ञानां वेदस्य मुखे विस्तीर्णत्वमित्याशङ्क्याह—** वेदद्वारेणेति। **तेनावगम्यमानत्वमेवोदाहरति—** तद्यथेति। **'एतद्ध स्म वै तत्पूर्वे विद्वांस आहुः' इत्युपक्रम्याध्ययनाद्याक्षिप्य**[1]

भाष्यार्कप्रकाशः

**यज्ञेति**। ननु दैवयज्ञस्यान्नमयत्वादाज्यमयत्वान्मांसमयत्वाद्वा तत्र हुतावशिष्टममृतशब्दवाच्यमन्नाज्यमांसान्यतमं लभ्यते भोक्तुं तत्कर्तुः; कथं पुनर्योगयज्ञादिषु भोक्तव्यलाभ इत्यत आह— **तच्छिष्टेन कालेनेति**। यज्ञशिष्टममृतं भुञ्जत इत्येकोऽर्थः। यज्ञशिष्टकालेन अमृतं भुञ्जत इत्यन्योऽर्थः। अतो नानुपपत्तिरित्यर्थः। यथोक्तयज्ञकारिणामपि सकामत्वे न ब्रह्मप्राप्तिरित्याह— **मुमुक्षवश्चेदिति**। ननु किं सहसा यान्ति, उत चिरकालेनेत्यत आह— **कालेति**। ज्ञानयज्ञनिष्ठानामचिरेणैव ब्रह्मप्राप्तिरन्येषां तु चित्तशुद्धिज्ञानप्राप्तिद्वारा चिरकालादेवेति भावः। ननु कथमिदं ज्ञायते? अत आह— **सामर्थ्यादिति**। 'ब्रह्मविद् ब्रह्मैव भवति' 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने'ति च श्रुतिसामर्थ्यादित्यर्थः। यद्वा 'तेऽर्चिषमभिसम्भवन्ती'त्यादिगतिश्रुतिसामर्थ्यादित्यर्थः। अयं लोको मनुष्यलोको मनुष्यलोकाभावो नाम मनुष्यलोकभोग्यपशुकलत्रान्नाद्यभावः। अन्यः स्वर्गादिः। विशिष्टसाधनानि तत्तन्नियतयज्ञादिसाधनानि। कुरुश्रेष्ठस्यार्जुनस्य दर्शितयज्ञसम्पादनं सुलभमेवेति सूचयितुमाह— **कुरुसत्तमेति**॥३१॥

**एवमिति**। वेदे क्वोक्ताः इमे यज्ञाः इत्यत आह— **वाचि हि प्राणं जुहुम इत्यादय इति**। आदिशब्देन 'प्राणे वा वाचं यो ह्येव

१. 'किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे' इति श्रुतिशेषः। तत्राक्षेपार्थककिंशब्देनाध्ययनाद्याक्षेप इत्यर्थः।

**श्रेयान् द्रव्यमयाद् यज्ञाज्ज्ञानयज्ञः परन्तप !।**
**सर्वं कर्माखिलं पार्थ ! ज्ञाने परिसमाप्यते ॥३३॥**

**कायिकवाचिकमानसकर्मोद्भवान् विद्धि तान् सर्वान् अनात्मजान्। निर्व्यापारो ह्यात्मा। अत एवं ज्ञात्वा विमोक्ष्यसे ऽशुभात्। 'न मद्व्यापारा इमे, निर्व्यापारोऽहमुदासीनः' इत्येवं ज्ञात्वाऽस्मात् सम्यग्दर्शनाद् , मोक्ष्यसे संसार-बन्धनादित्यर्थः॥३२॥**

**'ब्रह्मार्पण'मित्यादिश्लोकेन सम्यग्दर्शनस्य यज्ञत्वं सम्पादितम्। यज्ञाश्चानेके उपदिष्टाः। तैः सिद्धपुरुषार्थ-प्रयोजनैः ज्ञानं स्तूयते। कथम्? —** श्रेयानिति। **श्रेयान्** द्रव्यमयाद् **द्रव्यसाधनसाध्याद् यज्ञाद् ज्ञानयज्ञः, हे परन्तप !**

आनन्दगिरिकृतव्याख्या

**हेत्वाकाङ्क्षायामुक्तम्—** वाचि हीति। **ज्ञानशक्तिमद्विषये क्रियाशक्तिमदुपसंहारोऽत्र विवक्षितः, 'प्राणे वा वाचं यो ह्येव प्रभवः स एवाप्ययः' इति वाक्यमादिशब्दार्थः। ज्ञानशक्तिमतां क्रियाशक्तिमतां चान्योन्योत्पत्तिप्रलयत्वात् तदभावे नाध्ययनादिसिद्धिरित्यर्थः। कर्मणा-मात्मजन्यत्वाभावे हेतुमाह—** निर्व्यापारो हीति। **तस्य च निर्व्यापारत्वं फलवत्त्वाज्ज्ञातव्यमित्याह—** अत इति। **एवं ज्ञानमेव ज्ञापयन्नुक्तं व्यनक्ति—** नेत्यादिना॥३२॥

**कर्मयोगेऽनेकधाऽभिहिते सर्वस्य श्रेयःसाधनस्य कर्मात्मकत्वप्रतिपत्त्या केवलं ज्ञानमनाद्रियमाणमर्जुनमालक्ष्य वृत्तानुवाद-पूर्वकमुत्तरश्लोकस्य तात्पर्यमाह—** ब्रह्मेत्यादिना। सिद्धेति। **सिद्धं पुरुषार्थभूतं पुरुषापेक्षितलक्षणं प्रयोजनं येषां यज्ञानां तैः। अनन्तरोपदिष्टैरिति यावत्। प्रश्नपूर्वकं स्तुतिप्रकारं प्रकटयति—**कथमित्यादिना। **ज्ञानयज्ञस्य द्रव्ययज्ञात् प्रशस्यतरत्वे हेतुमाह—** सर्वमिति। **द्रव्यसाधनसाध्यादित्युपलक्षणं स्वाध्यायादेरपि। ततोऽपि ज्ञानयज्ञस्य श्रेयस्त्वाविशेषात्। द्रव्यमयादियज्ञेभ्यो ज्ञानयज्ञस्य**

भाष्यार्कप्रकाशः

प्रभवः स एवाप्ययः' इति वाक्यस्य ग्रहणम्। ननु वेदोक्तानां यज्ञानां कर्मजत्वज्ञानात् कथं मोक्ष आत्मन इत्यत आह— **अनात्मजानित्यादि**। सर्वेषां यज्ञानां वाङ्मनःकायसाध्यानामनात्मजत्वे ज्ञाते सति निर्व्यापारात्मतत्त्वज्ञानं जायते, तस्माच्च तत्त्वज्ञानान्मुच्यत इति। विमोक्ष्यस इत्युक्ते कस्मादित्याकाङ्क्षा जाता, तत्पूरणायाह— **अशुभादिति**॥३२॥

**श्रेयानिति। सिद्धाः** लोकतः सिद्धाः **पुरुषार्था** धर्मार्थकामाः प्रयोजनानि येषां तैः, यद्वा **सिद्धाः** लोकशास्त्राभ्यां सिद्धाः पुरुषार्थश्चत्वारः प्रयोजनानि येषां तैः, अथवा सिद्धः, न तु साध्यः, पुरुषार्थो मोक्षः प्रयोजनं येषां तैः। परम्परयेति भाव इति। यद्वा सिद्धं पुरुषार्थभूतं पुरुषापेक्षितलक्षणं प्रयोजनं येषां तैस्तथोक्तैरिति। यज्ञाः साध्यपुरुषार्थप्रयोजनाः, अथवा परम्परया सिद्धपुरुषार्थप्रयोजनाः। ज्ञानं तु साक्षात्सिद्धपुरुषार्थप्रयोजनम्। तस्माज्ज्ञानस्य स्तुतिरुच्यत इति भावः। [1]यज्ञैर्ज्ञानस्य स्तुतिर्नाम अस्मदपेक्षया ज्ञानमुत्कृष्टमिति यज्ञाः प्रतिपादयन्तीत्यर्थः। यज्ञविदो ज्ञानं सर्वयज्ञोत्कृष्टमिति वदन्तीति यावत्। अचेतनानां यज्ञानां स्तावकत्वासम्भवात्।

द्रव्यमयादित्यत्र द्रव्यशब्दो यज्ञसाधनहविरादिद्रव्यपर इत्याह— **द्रव्यसाधनसाध्यादिति।** द्रव्यात्मकसाधनसाध्यादित्यर्थः। कर्मयज्ञादिति यावत्। अनेन च प्राणायामादिसाधनसाध्याः सर्वेऽपि यज्ञाः सङ्गृहीताः। वाचिकमानसिककायिकान्यतमकर्ममयत्वात् तेषाम्। तत्र दैवयज्ञद्रव्ययज्ञतपोयज्ञाः कायिककर्मयज्ञाः, स्वाध्याययज्ञो वाचिककर्मयज्ञः, आत्मसंयमयोगशास्त्रार्थज्ञानयज्ञाः मानसिककर्मयज्ञाः, प्राणायामादयोऽपि कायिककर्मयज्ञा एवेति विवेकः। एभ्यः सर्वेभ्योऽपि यज्ञेभ्यो ज्ञानयज्ञ उत्कृष्टः। यदि त्वेकवचननिर्देशबलाद् द्रव्ययज्ञादित्यस्य दैवयज्ञादित्यर्थ उच्येत, तर्हि दैवयज्ञादेव ज्ञानयज्ञ उत्कृष्टो, न तु तपोयज्ञादिभ्य इत्यापतेत् तच्चानिष्टम् , ज्ञानस्य सर्वोत्कृष्टत्वात्।

१. भाष्ये 'तैः सिद्धपुरुषार्थप्रयोजनैः ज्ञानं स्तूयते' इत्यत्र तृतीयान्तं कर्तृपदत्वेनात्र व्याख्यातम्। वस्तुतस्तु करणे तृतीयेति युक्तम्।

**द्रव्यमयो हि यज्ञः फलस्यारम्भकः, ज्ञानयज्ञो न फलारम्भकः, अतः** श्रेयान् **प्रशस्यतरः। कथम्? यतः** सर्वं **कर्म समस्तम्** अखिलम् **अप्रतिबद्धं पार्थ !** ज्ञाने **मोक्षसाधने सर्वतःसम्प्लुतोदकस्थानीये** परिसमाप्यते **अन्तर्भवतीत्यर्थः। 'यथा कृतायविजितायाधरेयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत्किञ्चित् [यत्किञ्च] प्रजाः [1]साधु कुर्वन्ति यस्तद्वेद**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**यथा कृतायेति।** चतुरायके हि द्यूतविशेषे चतुरङ्क एक आयः कृतशब्देनोच्यते, तस्मै कृताय विजिताय तादर्थ्येनाधरे [2]आयाः त्र्यङ्क- द्व्यङ्क - एकाङ्काः त्रेताद्वापरकलिनामानः संयन्ति सङ्गच्छन्ते यथा, एवमित्यर्थः॥ ३३॥

आनन्दगिरिकृतव्याख्या

**प्रशस्यतरत्वं प्रपञ्चयति—** द्रव्यमयो हीति। फलस्य **अभ्युदयस्येत्यर्थः।** न फलारम्भको **न कस्यचित् फलस्योत्पादकः, किन्तु नित्यसिद्धस्य मोक्षस्याभिव्यञ्जक इत्यर्थः। तस्य प्रशस्यतरत्वे हेत्वन्तरमाह—** यत इति। समस्तं कर्मे**त्यग्निहोत्रादिकमुच्यते।** अखिलम् **अविद्यमानं खिलं शेषोऽस्येत्यनल्पं महत्तरमिति यावत्।** सर्वमखिलमिति **पदद्वयोपादानमसङ्कोचार्थम्। सर्वं कर्म ज्ञानेऽन्तर्भवतीत्यत्र छान्दोग्यश्रुतिं प्रमाणयति—** यथेति। **चतुरायके हि द्यूते कश्चिदायश्चतुरङ्कः सन् कृतशब्देनोच्यते, [3]तस्मै विजिताय कृताय तादर्थ्येन** अधरेयाः **तस्मादधस्ताद्भाविनः त्रिद्व्येकाङ्काः त्रेताद्वापरकलिनामानः संयन्त्यायाः सङ्गच्छन्ते। चतुरङ्के खल्वाये त्रिद्व्येकाङ्कानामायाना-मन्तर्भावो भवति, महासङ्ख्यायामवान्तरसङ्ख्यान्तर्भावावश्यम्भावाद् , एवम्** एनं **विद्यावन्तं पुरुषं सर्वं तदाभिमुख्येन** समेति **सङ्गच्छति। किं तत् सर्वं यद् विदुषि पुरुषेऽन्तर्भवति? तदाह—** यत्किञ्चिदिति। **प्रजाः सर्वा यत् किमपि साधु कर्म कुर्वन्ति तत् सर्वमित्यर्थः। एनमभिसमेतीत्युक्तं तमेव विद्यावन्तं पुरुषं विशिनष्टि—** यस्तदिति। [4]**किं तदित्युक्तम् ? तदेव विशदयति—** यत् स इति। **स रैक्वो यत्**

भाष्यार्कप्रकाशः

कुतः पुनरस्योत्कर्ष इत्यत आह— **द्रव्यमयो हीति।** फलस्य स्वर्गादिरूपस्य। न च ज्ञानमपि मोक्षफलारम्भकमिति वाच्यम् , मोक्षस्य नित्यसिद्धत्वेनानारभ्यमाणत्वात् , ब्रह्मस्वरूपत्वेन नित्याप्तत्वाच्च। तत्र फलत्वं तु कल्पितमेव। न च ज्ञानस्य वैयर्थ्यम् , अविद्याकृतो यो मया मोक्षो नावाप्त इत्याकारको भ्रमः, तन्निवृत्त्यर्थं ज्ञानस्यावश्यकत्वात्।

सर्वस्य कर्मणो ज्ञाने परिसमाप्तिर्नाम मोक्षसाधनज्ञाने कर्मान्तर्भावः? इत्याह— **अन्तर्भवतीत्यर्थ इति।** ज्ञाने कथं कर्मणो ऽन्तर्भाव इत्यत्र श्रुतिं प्रमाणयति— **यथेति।** कृतायविजिताय, अधरे अयाः इति च्छेदः। अयो द्यूतम्। कृतसंज्ञोऽयः कृतायः, स विजितो येन तस्मै कृतायविजिताय, आहिताग्न्यादित्वात् परनिपातः। विजितकृतायायेत्यर्थः। **अधरे** अपकृष्टाः अयाः त्र्यङ्कादयः **संयन्ति** उपनयन्ति, तेन जिता भवन्तीत्यर्थः। कृतत्रेताद्वापरकलिसंज्ञकानि चत्वारि द्यूतानि। तत्र कृतं चतुरङ्कं, त्रेता त्र्यङ्का, द्वापरो द्व्यङ्कः, कलिरेकाङ्कः। कृतादियुगेषु धर्मवृषभस्य [5]चतुष्पादत्वाद्यभिधानादियं कल्पना। तत्र चतुरङ्के कृताख्ये द्यूते त्र्यङ्कादित्रेतादि-द्यूतानामन्तर्भावः, चतुर्षु त्र्यादिसत्त्वादिति यथा **एवं** तथा **यत्किञ्च** यत्किञ्चित् **साम** साधुकर्म प्रजाः कुर्वन्ति तत् सर्वमेनम् **अभिसमेति** प्राप्नोति, अनेन जितं भवतीत्यर्थः। क एष इत्यत आह— **यस्तद्वेदेति।** यः तद्वेद्यं वेद तमेनमभिसमेतीत्यर्थः। किं तद्? अत आह— **यत् स वेदेति।** यत् स रैक्वो वेद तद्वेद्यं ब्रह्मेत्यर्थः। यथा कृतजयादितरद्यूतजयः, एवं ज्ञानलाभात् सर्वकर्मसिद्धिः। कृते त्रेतादीनामिव ज्ञाने कर्मणामन्तर्भावादिति श्रुत्यर्थः।

**ननु** चतुर्षु त्र्यादीनां सत्त्वादन्तर्भाव उचितः, कथं पुनर्ज्ञाने कर्मणां सत्त्वम् , येन तत्र तेषामन्तर्भाव उच्येतेति चेद्? **उच्यते—** सर्वेषां कर्मणामात्मनि कल्पितत्वादात्मनि ज्ञाते सति सर्वाणि कर्माणि कृतप्रायाण्येवेत्यभिप्रायाद् ज्ञाने कर्मणामन्तर्भाव उक्तः। **यद्वा** एकस्यैवात्मनः सर्वबुद्धिवृत्तिसाक्षित्वात्। विज्ञानात्मबुद्धिशब्दवाच्यजीवसमूहकृतानि सर्वाणि कर्माणि आत्मसाक्षिकाण्येवेति कृत्वा आत्मज्ञानेन सर्वकर्माणि ज्ञातान्येवेत्यभिप्रायात्। **अथवा** एकस्यैव ममात्मनः सन्निधानाद् वाङ्मनःकायाः कर्म कुर्वन्तीति यो जानाति

१.'साम' इति रा.पा.। २.श्रुतौ अयः इति ह्रस्वयुक्तः पाठः। द्र.परिमलः पृ.२१५। ३.एतत्पक्षे कृताय विजितायेति व्यस्तं पदद्वयम्। ४.तदिति किमुक्तमित्यन्वयः। 'किं तदित्युक्ते' इति पा.। ५.वृषभत्वेन रूपितस्य धर्मस्य चतुष्पादत्वं, क्रमेण त्रेतादिषु युगेषु एकैकपादह्रासश्चेति भागवतादौ प्रसिद्धम्। द्र. भाग. १२-३-१८।

**तद् विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥३४॥**

**यत् स वेद'(छा.उ. ४.१.४) इति श्रुतेः ॥३३॥**

**तदेतद् विशिष्टं ज्ञानं तर्हि केन प्राप्यत इत्युच्यते—** तद्विद्धीति। **तद्** विद्धि **विजानीहि येन विधिना प्राप्यत इति। आचार्यानभिगम्य** प्रणिपातेन **प्रकर्षेण नीचैः पतनं प्रणिपातो दीर्घनमस्कारः तेन , 'कथं बन्धः? कथं मोक्षः? का**

आनन्दगिरिकृतव्याख्या

**तत्त्वं वेद तत् तत्त्वं योऽन्योऽपि जानाति तमेनं सर्वं साधु कर्माभिसमेतीति योजना॥३३॥**

**यद्येवं प्रशस्यतरमिदं ज्ञानम् , तर्हि केनोपायेन तत्प्राप्तिरिति पृच्छति—** तदेतदिति। **ज्ञानप्राप्तौ प्रत्यासन्नमुपायमुपदिशति—** उच्यत इति। तद् **विज्ञानं गुरुभ्यो विद्धि। गुरवश्च प्रणिपातादिभिरुपायैरावर्जितचेतसो वदिष्यन्तीत्याह—** तद्विद्धीति। [1]उपदेष्टृत्वम् **उपदेशकर्तृत्वं परोक्षज्ञानमात्रेण न भवतीत्याह—** उपदेक्ष्यन्तीति**[**तत्त्वदर्शिन इति**]। तदिति प्रेप्सितं ज्ञानसाधनं गृह्यते, येन विधिनेति शेषदर्शनात्। यद्वा येनाचार्यावर्जनप्रकारेण तदुपदेशवशादपेक्षितं ज्ञानं लभ्यते तथा तद् ज्ञानमाचार्येभ्यो लभस्वेत्यर्थः। तदेव स्फुटयति**

भाष्यार्कप्रकाशः

स हि सर्वेषां कर्मणामात्माधीनत्वं पश्यतीत्यभिप्रायात्— इति।

**एतावता** आत्मज्ञानमेव दुर्लभम् , कर्माणि तु सुलभान्येव, आत्मज्ञाने लब्धे तु सर्वाणि कर्माणि फलैः सह लब्धान्येव, आत्मनोऽवाप्तसमस्तकामत्वादिति आत्मज्ञानस्य प्राशस्त्यं **सिद्धम्**।

**मूले** सर्वम् अखिलमिति पदद्वयस्य पौनरुक्त्यं न शङ्क्यम् , प्रधानावान्तरसर्वभेदसङ्ग्रहार्थं पदद्वयप्रयोगात्।

अत्र **रामानुजः**— उभयाकारे कर्मणि कर्मांशाज्ज्ञानांशः श्रेयानिति व्याचख्यौ, **तदयुक्तम् ,** कर्मणः उभयाकारत्वस्यैवासिद्धेः। कर्म सर्वथा कर्माकारमेव, ज्ञानं ज्ञानाकारमेव। न हि कर्मज्ञानयोरितरेतराकारत्वं सम्पादयितुं शक्यते। **किञ्च** ज्ञानकर्मोभयांशयुक्तस्य कथं कर्मत्वम्? अपि तु उभयत्वमेव स्यात्॥३३॥

**तदिति। विशिष्टमिति** सर्वकर्मपरिसमाप्तिस्थानत्वादिविशेषणयुक्तमित्यर्थः। प्रशस्ततममिति वा। **केनेति।** केनोपायेनेत्यर्थः। प्रणिपातेन परिप्रश्नेन सेवया च आवर्जिता इति शेषः। तत्त्वदर्शिनो ज्ञानिनः ते ज्ञानमुपदेक्ष्यन्तीति। **तद् विद्धि** तदित्यस्य ज्ञानप्राप्त्युपायमित्यर्थः। 'येन विधिना प्राप्यते तद् विद्धी'ति भाष्यात्। तज्ज्ञानं प्रणिपातादिना विद्धीत्यन्वयस्त्वयुक्तः, प्रणिपातादीनां ज्ञानकरणत्वाभावात्। न हि प्रणिपातादिना ज्ञानं वेद्यते, किन्तु मनसा। नापि प्रणिपातादिना ज्ञानं प्रतिपाद्यते, किन्तु शास्त्रेण। तस्माद् **रामानुजोक्तान्वयो** दुष्टः। यद्यपि विद्धीत्यस्य लभस्वेत्यर्थाश्रयणेऽयमप्यन्वयः साधुस्तथापि वेत्तेर्लाभार्थकथनमयुक्तमिति[2] वेद्यम्।

तदिति क्लीबत्वं तु ज्ञानप्राप्तिसाधनपरतयेति बोध्यम्। येन विधिना ज्ञानं प्राप्यते **तत्** तं विधिमित्यर्थः,वदतो मत्त इति शेषः, विद्धि। तमेव विधिं दर्शयति— प्रणिपातेनेत्याद्यवशिष्टश्लोकभागेन इति वाऽन्वयः।

**अथवा** यदित्युत्तरश्लोकस्थयच्छब्दस्वारस्यात् तदिति पदमत्रत्यज्ञानविशेषणम्। प्रणिपातेन परिप्रश्नेन सेवया चावर्जितास्तत्त्वदर्शिनो ज्ञानिनस्ते तज्ज्ञानमुपदेक्ष्यन्तीति विद्धि। अनयाऽपि योजनया ज्ञानप्राप्त्युपाय एवानेन श्लोकेनोक्त इति न भाष्यविरोधः। **ते** तुभ्यमित्यर्थः।

**ननु** भगवताऽर्जुनायोपदिष्टमेव ज्ञानमिति न ज्ञानप्राप्त्युपायजिज्ञासाऽर्जुनस्य स्यादिति **चेत्**? मा भवत्वर्जुनस्य ज्ञानप्राप्त्याकाङ्क्षा, प्राप्तज्ञानत्वात्। तथापि लोकानुग्रहाय ज्ञानप्राप्त्युपायं जिज्ञासुमर्जुनमालक्ष्य भगवतोक्तमिदमिति। यद्वा त्वयोक्तमिदं ज्ञानं यदि मया केनापि हेतुना विस्मृतं भविष्यति, तदा कः पुनर्मम ज्ञानप्राप्त्युपायः इतीममर्जुनस्य प्रश्नमुत्प्रेक्ष्याह भगवान्—

१. उपदेष्टृत्वम् उपदेशकर्तृत्वमित्यनयोः एकमेवापेक्षितम्। २. विद्धि इति वेत्तेरेव रूपम् , न तु विन्दतेरिति भावः। फलितार्थपरत्वे तु न दोषः।

**यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव !।**
**येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥३५॥**

**विद्या? का चाविद्या?' इति परिप्रश्नेन,** सेवया **गुरुशुश्रूषया एवमादिना। प्रश्रयेणावर्जिता आचार्याः** उपदेक्ष्यन्ति **कथयिष्यन्ति ते ज्ञानं यथोक्तविशेषणं** ज्ञानिनो **ज्ञानवन्तोऽपि केचिद् यथावत् तत्त्वदर्शनशीलाः, अपरे न, अतो विशिनष्टि —** तत्त्वदर्शिन इति। **ये सम्यग्दर्शिनस्तैरुपदिष्टं ज्ञानं कार्यक्षमं भवति, नेतरदिति भगवतो मतम्॥३४॥**

**तथा च सतीदमपि समर्थं वचनम् —** यदिति। यज्ज्ञात्वा **यद् ज्ञानं तैरुपदिष्टमधिगम्य प्राप्य**[१] पुनः **भूयो**

आनन्दगिरिकृतव्याख्या

**—** आचार्यानिति। एवमादिनेत्या**दिशब्देन शमादयो गृह्यन्ते।** एवमादिना **विद्धीति पूर्वेण सम्बन्धः। उत्तरार्धं व्याचष्टे—** प्रश्रयेणेति। प्रश्रयो **भक्तिश्रद्धापूर्वको निरतिशयो नतिविशेषः।** यथोक्तविशेषणं **पूर्वोक्तेन प्रकारेण प्रशस्यतममित्यर्थः। विशेषणस्य पौनरुक्त्यपरिहारार्थमर्थभेदं कथयति—** ज्ञानवन्तोऽपीति। **ज्ञानिनः इत्युक्त्वा पुनस्तत्त्वदर्शिनः इति ब्रुवतो भगवतोऽभिप्रायमाह—** ये सम्यगिति। **बहुवचनं चैतद् आचार्यविषयं बहुभ्यः श्रोतव्यं बहुधा चेति सामान्यन्यायाभ्यनुज्ञानार्थम्, न त्वात्मज्ञानमधिकृत्याचार्यबहुत्वं विवक्षितम्, तस्य तत्त्वसाक्षात्कारवदाचार्यमात्रोपदेशादेवोदयसम्भवात् ॥३४॥**

**विशिष्टैराचार्यैरुपदिष्टे ज्ञाने कार्यक्षमे प्राप्ते सति समनन्तरवचनमपि योग्यविषयमर्थवद्भवतीत्याह—**तथा चेति। **अतस्तस्मिन् विशिष्टे ज्ञाने कार्यक्षमे त्वदीयमोहापोहहेतौ निष्ठावता भवितव्यमिति शेषः। तत्र निष्ठाप्रतिष्ठायै तदेव ज्ञानं पुनर्विशिनष्टि—** येनेति। **यज्ज्ञात्वेत्ययुक्तं ज्ञाने ज्ञानायोगादित्याशङ्क्य प्राप्त्यर्थत्वमधिपूर्वस्य गमेरङ्गीकृत्य व्याकरोति—** अधिगम्येति। **इतश्चाचार्योपदेशलभ्ये ज्ञाने**

भाष्यार्कप्रकाशः

**तद्विद्धीति।**

ननु योऽर्थः स्वेनाज्ञातः तमर्थं जिज्ञासुः पुरुषः तज्ज्ञमन्यं प्रार्थयेतैवेति लोकतः सिद्धत्वाद् व्यर्थमिदं वचनम्,अत आह— **ये इति। नेतरदिति। इतरद्** अतत्त्वविदुपदिष्टम्। गुरूपदेशं विना स्वेन शास्त्रविचाराज्ज्ञातं वा कार्यक्षमं न भवतीत्यर्थः। कार्यं चात्र अविद्यानिवृत्तिः, तस्या एव मोक्षत्वात् , मोक्षस्य तत्पूर्वकत्वादिति वा। न च कार्यं मोक्ष इति वाच्यम् , मोक्षस्य सिद्धत्वेन साध्यत्वलक्षणकार्यत्वाभावात्।

कथं तत्त्वदर्शिनो निष्कामाः उपदेक्ष्यन्तीत्यत आह भगवान्— **प्रणिपातेनेत्यादि। आवर्जिताः** स्वाधीनीकृताः। यथा भगवान् प्रणिपातादिलक्षणया भक्त्या भक्तपरवशो भवति, तद्वद् विद्वांसोऽपीति भावः। अनेन च न धनादयस्तत्त्वविदावर्जने हेतवः, किन्तु प्रणिपातादय एवेति। गुरोश्च न नैर्घृण्येन भवितव्यम् , किन्तु शिष्यवत्सलतयैवेति सूचितम्। ततश्च तत्त्वविदोऽपि शिष्यानुग्रहार्थं शास्त्रपाठभाष्यरचनादिव्यवहारो न दोषाय, किन्तु गुणायैवेति सिद्धम्। अन्यथा शास्त्रार्थसम्प्रदायस्यैव विच्छेदप्रसङ्गात्। तत्त्वविदि भगवति कृष्णे तूष्णीं स्थिते सति गीताशास्त्रस्यैवाप्रवृत्तिप्रसङ्गात्। यथा गुरुः शिष्यवत्सलो भवेत् तथा शिष्येण यतितव्यम् , न तूदासितव्यम्, नापि कुपितव्यम्, किन्तु सविनयं तत्र वर्तितव्यमित्याह— **प्रश्रयेणावर्जिता इति॥३४॥**

**समर्थमिति।** सार्थकमित्यर्थः। आत्मविदुपदिष्टं ज्ञानमेव कार्यक्षमं नेतरदित्यभ्युपगते सति यज्ज्ञात्वेतीदं वचनमर्थवत् स्यादिति भावः। **यदिति।** हे पाण्डव! यज्ज्ञात्वा पुनरेवं मोहं न यास्यसि, येनाशेषेण भूतानि आत्मनि मय्यथो द्रक्ष्यसि। **इदानीमिति।** मदुपदेशात् प्रागित्यर्थः। न तूपदेशकाले इति भ्रमितव्यम् , तदा मोहायोगात्। न हि भगवानतत्त्ववित् , येन तदुपदिष्टं ज्ञानं मोहनिवर्तनाक्षमं स्यादिति शङ्क्येत।

**ननु** व्यर्थमिदं वचनम् , येन वाताङ्कुशादिभेषजेन यस्येदानीं वातादिरोगः शान्तः स हि पुनर्वातादिरोगप्राप्तौ वाताङ्कुशादि-

१. ज्ञात्वा इति पदस्य विवरणम् **अधिगम्येति**। प्राप्येति तु तदर्थाविष्करणम्।

**मोहम्** एवं **यथेदानीं मोहं गतोऽसि, पुनरेवं न यास्यसि, हे पाण्डव !। किञ्च येन ज्ञानेन भूतानि अशेषेण ब्रह्मादीनि स्तम्बपर्यन्तानि द्रक्ष्यसि साक्षाद्** आत्मनि **प्रत्यगात्मनि 'मत्संस्थानीमानि भूतानी'ति,** अथो **अपि** मयि **वासुदेवे परमेश्वरे चेमानीति। क्षेत्रज्ञेश्वरैकत्वं सर्वोपनिषत्प्रसिद्धं द्रक्ष्यसीत्यर्थः॥ ३५॥**

आनन्दगिरिकृतव्याख्या

**फलवति प्रतिष्ठावता भवितव्यमित्याह—** किञ्चेति। **जीवे चेश्वरे चोभयत्र भूतानां प्रतिष्ठितत्वप्रतिनिर्देशे भेदवादानुमतिः स्यादित्याशङ्क्याह —** क्षेत्रज्ञेति। **मूलप्रमाणाभावे कथं तदेकत्वदर्शनं स्यादित्याशङ्क्याह—** सर्वेति॥ ३५॥

भाष्यार्कप्रकाशः

भेषजमेवास्य निवर्तकमिति स्वयमेव जानीयादेव यथा, तद्वदिदानीं यज्ज्ञानं मोहनिवर्तकं तादृशं ज्ञानं पुनरपि मोहे सति तन्निवर्तकं स्यादेवेति स्वत एव जानीयादर्जुन इति चेत् , **मैवम्।** इदानीं महानुभावेन साक्षाद् भगवता कृष्णेनोपदिष्टत्वादस्य ज्ञानस्य मोहनिवर्तकत्वं युक्तम्। श्रीरामप्रयुक्तस्य तृणस्यापि काकासुरोद्वेजकत्ववत्। अस्मिन् ज्ञाने विस्मृते सति पुनर्मोहप्रसङ्गः, तदपनयनाय यदर्वाक्तनैर्गुरुभिरुपदिश्यते ज्ञानम् , तस्य मोहनिवर्तकत्वमस्ति वा न वेति शङ्का जायेतैवार्जुनस्य। तदपगमेन सार्थकमिदं वचनम्। मयेव तत्त्वविद्भिरप्युपदिष्टं ज्ञानं मोहनिवर्तकमेव, न तु व्यर्थम् , ममेव तेषामपि तत्त्ववित्त्वांशे भेदाभावादिति भगवता विवक्षितत्वात्। **यद्वा** मया सङ्ग्रहेणोक्तं ते ज्ञानम् , अवकाशाभावात् , यदि विस्तरेण शुश्रूषा तर्हि तत्त्ववित्सकाशं गत्वा तेभ्यो विस्तरेण शृणु। इदं तु मयोक्तं सङ्क्षिप्तं ज्ञानं तात्कालिकमोहनिवर्तनक्षममपि न भविष्यन्मोहनिवर्तनक्षमम्। तस्मात् त्वं युद्धानन्तरं तत्त्ववित्सकाशं गत्वा पुनर्विस्तरेण ज्ञानं लभस्व। सति विस्तृतज्ञाने न पुनर्मोहोदयप्रसङ्ग इति। **अथवा** भगवदुपदिष्टज्ञानान्मम मोहः शान्तः, तत्त्वविदुपदिष्टज्ञानात् किं फलं भवेल्लोकस्येतीममर्जुनस्य प्रश्नमुत्प्रेक्ष्याह भगवान्— **यज्ज्ञात्वेति।** अर्जुनस्तु लोकस्थानीयतयेहोपनिबद्ध इति यास्यसीत्युक्तम्।

एवं ज्ञानस्य मोहनिवर्तकत्वमेकं फलमुक्तम्। अथ फलान्तरमाह— **येन भूतानीति। यद्वा** ज्ञानान्मोहे निवृत्ते सति पश्चात् किं स्यादत आह— **येनेति।** स्वप्नवदात्मन्येव सर्वप्रपञ्चस्य कल्पितत्वात् सर्वजगदधिष्ठाने मय्येव सर्वभूतानि वर्तन्त इति ज्ञास्यसि, तथा वासुदेवे परमेश्वरे चेमानि सर्वाणि भूतानि वर्तन्त इत्यपि ज्ञास्यसि। त्वयि मयि च द्रक्ष्यसि भूतानीत्यनेन किं लब्धमत आह— **क्षेत्रज्ञेति।** क्षेत्रं शरीरेन्द्रियप्राणबुद्ध्यादिकं जानातीति क्षेत्रज्ञ आत्मा अन्तःकरणोपहितचैतन्यं कूटस्थः बुद्ध्यादिसाक्षी, ईश्वरः मायोपहितं चैतन्यम् , तयोरुभयोरेकत्वमभेदं **द्रक्ष्यसि** ज्ञास्यसि। उपाधिकृत एव भेदो न वास्तविकः, उभयोरपि निर्धर्मकपरमानन्दबोधरूपत्वात् , एकस्यैव चैतन्यस्य मायोपहितत्वेनेश्वर इति, अन्तःकरणोपहितत्वेनात्मेति च भेदव्यहारस्य कल्पितत्वात्। ततश्च वस्तुत ईश्वर एवाहमिति ज्ञास्यतीत्यर्थः।

अयं भावः – 'यतो वा इमानि भूतानि जायन्ते' इत्यादिना सर्वजगदधिष्ठानं ब्रह्मेति निश्चिनोति विद्वान् वेदान्तश्रवणवशात्। पश्चान्मननादिना तु स्वस्यैव सर्वजगदधिष्ठानत्वे ज्ञाते सति स्वस्मिन्नेव सर्वं जगत् पश्यति। तथा सर्वजगदधिष्ठानत्वादात्मानमेव ब्रह्म पश्यतीति अयमेव ब्रह्मसाक्षात्कारो मुक्तिरिति नित्यमुक्तात्मसाक्षात्कारे सति बन्धभ्रमनिवृत्तेरिति।

यत्तु **रामानुजः**— प्रकृतिविनिर्मुक्तं सर्वमात्मवस्तु परस्परं समम् , सर्वेश्वरेण च सममित्यस्य श्लोकस्य फलितार्थमाह, यच्च **वेदान्तदेशिकः**— स्वात्मनि निदर्शनभूते स्थालीपुलाकादिन्यायेन सर्वाणि भूतानि द्रक्ष्यसीति, अथो मयीत्यस्य मन्निदर्शनेन स्वात्मानं परांश्च द्रक्ष्यसीत्यर्थः इति, **तत् सर्वं तुच्छम् ,** आत्मनो निदर्शनत्वे आत्मानमिव सर्वाणि भूतानि द्रक्ष्यसीति वक्तव्यत्वात्। अधिकरणे सप्तम्या विहितत्वेन कर्मणि सप्तम्या अयोगात्। नापि 'यस्य च भावेने'ति भावलक्षणसप्तम्युचिता, आत्मनि निदर्शनभूते सतीति सर्वभूतदर्शनं प्रति आत्मनिदर्शनत्वस्य भावलक्षणत्वायोगात्। निदर्शनभूतपदस्य मूलाद्बहिःकल्पनस्याप्रमाणत्वात्। भवन्तीति भूतानीति भूतशब्दस्य देहेन्द्रियादिकार्यसङ्घातवाचिनः अजे नित्ये आत्मनि प्रयोगायोगात्।

प्रकृतिविनिर्मुक्तत्वे सति आत्मनो भेदकाभावान्नैवानेकात्मसिद्धिरिति सर्वमात्मवस्त्वित्यप्ययुक्तम् , आत्मनामीश्वरतौल्यं

**अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः।**
**सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥३६॥**
**यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन !।**

**किं चैतस्य ज्ञानस्य माहात्म्यम् —** अपीति। **अपि चेदसि** पापेभ्यः **पापकृद्भ्यः** सर्वेभ्योऽ**तिशयेन पापकृत्** पापकृत्तमः, सर्वं ज्ञानप्लवेनैव **ज्ञानमेव प्लवं कृत्वा** वृजिनं **वृजिनार्णवं**[1] **संतरिष्यसि। धर्मोऽपीह मुमुक्षोः पापमुच्यते** ॥३६॥

**ज्ञानं कथं नाशयति पापमिति सदृष्टान्तमुच्यते—** यथेति। **यथा** एधांसि **काष्ठानि** समिद्धः **सम्यगिद्धो दीप्तोऽग्निः** भस्मसाद् [2]**भस्मीभावं कुरुते, हेऽर्जुन ! । ज्ञानमेवाग्निः** ज्ञानाग्निः **सर्वकर्माणि भस्मसात् कुरुते तथा।** [3]**निर्बीजीकरोतीत्यर्थः। न हि साक्षादेव ज्ञानाग्निः कर्माणीन्धनवद् भस्मीकर्तुं शक्नोति। तस्मात् सम्यग्दर्शनं सर्वकर्मणां**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ननु ज्ञानं साक्षादेव कर्मदाहकं किमिति न भवति? निर्बीजीकरोतीति किमिति व्याख्यातम्? इत्याशङ्क्याह— **न हि**

आनन्दगिरिकृतव्याख्या

**ज्ञानस्य प्रकारान्तरेण प्रशंसां प्रस्तौति—** किञ्चेति। **पापकारिभ्यः सर्वेभ्यः सकाशादतिशयेन पापकारित्वमेकस्मिन्नसम्भावितमपि ज्ञानमाहात्म्यप्रसिद्ध्यर्थमङ्गीकृत्य ब्रवीति—** अपि चेदिति। **ब्रह्मात्मैक्यज्ञानस्य सर्वपापनिवर्तकत्वेन माहात्म्यमिदानीं प्रकटयति—** सर्वमिति। **अधर्मे निवृत्तेऽपि धर्मप्रतिबन्धाज्ज्ञानवतोऽपि न मोक्षः सम्भवतीत्याशङ्क्याह—** धर्मोऽपीति। **इहेत्यध्यात्मशास्त्रं गृह्यते॥३६॥**

**ज्ञाने सत्यपि धर्माधर्मयोरुपलम्भात् कुतस्ततो निवृत्तिरित्याशङ्क्य, ज्ञानस्य धर्माधर्मनिवर्तकत्वं दृष्टान्तेन दर्शयितुमनन्तरश्लोकमवतारयति—** ज्ञानमिति। **योग्यायोग्यविभागेन निवर्तकत्वानिवर्तकत्वविभागमुदहरति—** यथेति। **दृष्टान्तानुरूपं दार्ष्टान्तिकमाचष्टे—**ज्ञानाग्निरिति। **योग्यविषयेऽपि दाहकत्वमग्नेरप्रतिबन्धापेक्षयेति विवक्षित्वा विशिनष्टि—**सम्यगिति। **दार्ष्टान्तिकं व्याचष्टे—** ज्ञानमेवेति। **ननु ज्ञानं साक्षादेव कर्मदाहकं किमिति नोच्यते, निर्बीजीकरोति कर्मेति किमिति व्याख्यानमित्याशङ्क्याह—** न हीति। **ज्ञानस्य**

भाष्यार्कप्रकाशः

चायुक्तम्, नियाम्यनियामकादिभेदसद्भावात्। वस्तुतश्चैतन्यात्मना साम्यमिति चेत्, न तत् साम्यम्, किं त्वभेद एव, चैतन्यस्यैकत्वाद् अनेकचैतन्यकल्पनायोगात्। न च घटत्ववच्चैतन्यजात्यभेदेऽपि घटवच्चेतनव्यक्तिभेद इति वाच्यम्, व्यक्तिभेदप्रयोजकाकारभेदस्य निराकारे आत्मन्यसम्भवाद् घटवत्। न च घटाकाशानामिवोपाधितो भेद इति वाच्यम्, प्रकृतिविनिर्मुक्तमात्मवस्त्विति त्वया निरुपाधिकस्यैवात्मनो गृहीतत्वात्॥३५॥

**अपीति।** 'शस्तं चाथ त्रिषु द्रव्ये पापपुण्यसुखानि चे'त्यमरादाह— **पापेभ्यः पापकृद्भ्य इति।** पापवद्भ्य इत्यर्थः। पापाद् गुणभूतात् पापकृतो द्रव्यस्यातिशयस्य वक्तुमशक्यत्वात् पापशब्दोऽत्र द्रव्यवाची गृहीतः, सर्वपापिष्ठपुरुषोत्तमः इत्यर्थः। ज्ञाने प्लवत्वारोपादाह— **वृजिनार्णवमिति।** प्लवेनार्णवमिव ज्ञानेन वृजिनं सन्तरिष्यसीत्यर्थः।

ननु ज्ञानेन पापस्य नाशे पुण्यमवशिष्यते, ततश्च देवादिजन्मरूपसंसार इत्यत आह—**धर्मोऽपीति।** वृजिनशब्देन पुण्यमप्युच्यते, कुतः? मुमुक्षोः पुण्यस्यापि पापत्वादित्यर्थः। एतेन पापपुण्यात्मकं संसारसमुद्रं ज्ञानप्लवेनैव सन्तरिष्यसीत्युक्तं भवति॥३६॥

**यथेति। भस्मसाद्** भस्मसाधीनम्[4][भस्माधीनम्]। फलितमाह—**भस्मीभूतमिति। निर्बीजमिति।** बीजसत्त्वे पुनः कर्माङ्कुरोदयादिति भावः। कर्मणां बीजं चाज्ञानमेव। ननु अग्निरिन्धनानीव ज्ञानाग्निः कर्माणि भस्मीकरोत्येवेति कृत्वा कथमुक्तं निर्बीजं

१. एतदुत्तरं - 'पापम्' इति, 'पापसमुद्रम्' इति चाधिकः पाठः। २. 'भस्मीभूतं कुरुते, हेऽर्जुन ! एवं ज्ञानमेव' इति पा.। ३. 'निर्बीजं करोतीत्यर्थः' इति पा.।
४. 'तदधीनवचने' (पा.सू. ५-४-५५) इति सातिप्रत्ययः इति भावः।

## ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ॥ ३७॥

**निर्बीजत्वे कारणमित्यभिप्रायः। सामर्थ्याद् येन कर्मणा शरीरमारब्धं तत् प्रवृत्तफलत्वादुपभोगेनैव क्षीयते, [१]तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये (छा.उ.६.१४.१) इति श्रुतेः। [२]अतो यान्यप्रवृत्तफलानि ज्ञानोत्पत्तेः प्राक् कृतानि, ज्ञानसहभावीनि च, अतीतानेकजन्मकृतानि च तान्येव सर्वाणि कर्माणि भस्मसात्कुरुते॥ ३७॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**साक्षादेव ज्ञानाग्निरिति**। ज्ञानस्य स्वप्रमेयाज्ञाननिवर्तन एव लोके सामर्थ्यस्य दृष्टत्वादविक्रियब्रह्मात्मज्ञानमपि अकर्तृत्वाज्ञानं कर्तृत्वभ्रमद्वारेण कर्मबीजभूतं निवर्तयति। न तु साक्षात् कर्मदाहकमित्यर्थः। ननु मूलभूताज्ञाननिवर्तनेन कर्मनिवर्तकं चेत् सम्यग्ज्ञानं, तर्हि प्रवृत्तफलस्यापि कर्मणो निवृत्तिप्रसङ्गाद् ज्ञानोदयसमकालमेव शरीरपातः स्यात्। तथा च तत्त्वदर्शिभिरुपदिष्टं ज्ञानं फलवदिति भगवतो मतं बाध्ये[तेत्य]त आह— **सामर्थ्याद् येनेति**। आचार्यलाभान्यथानुपपत्त्यैवं कल्प्यते - यथा तमोनिवर्तनसमर्थोऽपि सविता अपवरकप्रतिबन्धात् तदाश्रयं तमोलेशं न नाशयति, तथा सकलसंसार-

आनन्दगिरिकृतव्याख्या

**स्वप्रमेयावरणाज्ञानापाकरणे सामर्थ्यस्य लोके दृष्टत्वादविक्रियब्रह्मात्मज्ञानमपि तदज्ञानं निवर्तयत् तज्जन्यकर्तृत्वभ्रमं कर्मबीजभूतं निवर्तयति। तन्निवृत्तौ च कर्माणि न स्थातुं पारयन्ति, न तु साक्षात्कर्मणां निवर्तकम् , ज्ञानमज्ञानस्यैव निवर्तकमिति व्याप्तेस्तदनिवृत्तौ पुनरपि कर्मोद्भवसंभवादित्यर्थः। ज्ञानस्य साक्षात्कर्मनिवर्तकत्वाभावे फलितमाह—** तस्मादिति। **सम्यग्ज्ञानं मूलभूताज्ञाननिवर्तनेन कर्मनिवर्तकमिष्टं चेदारब्धफलस्यापि कर्मणो निवृत्तिप्रसङ्गाज्ज्ञानोदयसमकालमेव शरीरपातः स्यादित्याशङ्क्याह—** सामर्थ्यादिति। **ज्ञानोदयसमसमयमेव देहापोहे तत्त्वदर्शिभिरुपदिष्टं ज्ञानं फलवदिति भगवदभिप्रायस्य बाधितत्वप्रसङ्गादाचार्यलाभान्यथानुपपत्त्या प्रवृत्तफलकर्मसम्पादकमज्ञानलेशं न नाशयति ज्ञानमित्यर्थः। कथं तर्हि प्रारब्धफलं कर्म नश्यतीत्याशङ्क्याह—** येनेति। **तर्हि कथं ज्ञानाग्निः सर्वकर्माणि भस्मसात्करोतीत्युक्तम्? तत्राह—** अत इति। **ज्ञानादारब्धफलानां कर्मणां निवृत्त्यनुपपत्तेरनारब्धफलानि यानि कर्माणि पूर्वं ज्ञानोदयादस्मिन्नेव जन्मनि कृतानि, ज्ञानेन च सह वर्तमानानि प्राचीनेषु चानेकेषु जन्मस्वर्जितानि तानि सर्वाणि ज्ञानं कारणनिवर्तनेन निवर्तयतीत्यर्थः॥ ३७॥**

भाष्यार्कप्रकाशः

करोतीत्यर्थ इति? तत्राह— **न हीति**। कर्मणामिन्धनवद् भस्मीभवनार्हस्वरूपाभावादिति भावः। ननु सर्वाणि कर्माणीत्यनेन किं प्रारब्धानि विवक्षितानि? यद्वा सञ्चितानि? अथवोभयात्मकानीत्यत आह— **सामर्थ्यादिति**। शास्त्रसामर्थ्यादित्यर्थः। **तदिति**। प्रारब्धं कर्मेत्यर्थः। प्रकर्षेणारब्धं फलदानायेति प्रारब्धम्। **उपभोगेनैवेति**। 'प्रारब्धं भोगतो नश्ये'दिति स्मरणादिति भावः। तत्र श्रुतिं प्रमाणयति— **तस्येति**। **तस्य** कृतात्मसाक्षात्कारस्य तावदेव **चिरं** विलम्बः, यावन्न **विमोक्ष्ये** शरीरपातो न स्यात्। **अथ** शरीरपातानन्तरं **सम्पत्स्ये** ब्रह्म भवति। अतः शरीरनाशादेव प्रारब्धकर्मनाशः, न त्वन्यथेति सिद्धम्। एवं शास्त्रसामर्थ्यात् प्रारब्धस्य ज्ञानाग्न्यदाह्यत्वे सिद्धे तद्दाह्यानि कर्माण्याह— **अत इति**। **अतः** प्रारब्धकर्मणां भोगं विना नाशायोगादित्यर्थः। अप्रवृत्तफलानि अप्रारब्धानीत्यर्थः। अतीतानेकजन्मकृतानि इह जन्मनि च ज्ञानोत्पत्तेः प्राक्कृतानि ज्ञानेन सह भवन्तीति **ज्ञानसहभावीनि** ज्ञानाभ्यासकाले कृतानि गुरुसेवादिरूपाणि चेत्यर्थः। **तान्येवेति**। सञ्चितान्येवेत्यर्थः। आगामिनामप्यत्रैवान्तर्भावः। एवकारान्न तु प्रारब्धानीत्यर्थः।

---

१. 'तस्य....श्रुतेः।' इति पाठः क्वचिन्न। २. अत्र चेमानि सूत्राण्यनुसंधेयानि— 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्' 'इतरस्याप्येवमसंश्लेषः पाते तु' 'अनारब्धकार्य एव तु पूर्वे तदवधेः' (ब्र.सू. ४.१.१३,१४,१५ ) 'भोगेन त्वितरे क्षपयित्वा संपद्यते' (ब्र.सू. ४.१.१९)।

**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।**
**तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥३८॥**
**श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।**

**यत एवमतः—** न हीति। **न हि ज्ञानेन** सदृशं **तुल्यं** पवित्रं **पावनं शुद्धिकरमिह विद्यते।** तत् **ज्ञानं स्वयमेव** योगसंसिद्धो **योगेन कर्मयोगेन समाधियोगेन च** संसिद्धः **संस्कृतो योग्यतामापन्नः सन् मुमुक्षुः कालेन महता आत्मनि** विन्दति **लभत इत्यर्थः॥३८॥**

**येनैकान्तेन ज्ञानप्राप्तिर्भवति, स उपायः उपदिश्यते—** श्रद्धावानिति। श्रद्धावान् **श्रद्धालुर्लभते ज्ञानम्। श्रद्धालुत्वेऽपि भवति कश्चिन्मन्दप्रस्थानः, अत आह—** तत्परः [१]**गुरूपासनादावभियुक्तो ज्ञानलब्ध्युपाये। श्रद्धावान्**

अनुभूतिस्वरूपाचार्यटिप्पणम्

बीजाज्ञाननिवर्तनसमर्थोऽपि ब्रह्मज्ञानदिवाकरः प्रवृत्तफलकर्मप्रतिबन्धात् तत्सम्पादकम् अज्ञानलेशं न नाशयति। तस्मात् प्रवृत्तफलस्य कर्मणो यो[भो]गादेव क्षय इति॥३७॥

**॥इति श्रीभगवद्गीताभाष्यटिप्पणे चतुर्थोऽध्यायः॥**

आनन्दगिरिकृतव्याख्या

**नन्वन्येनैव परिशुद्धिकरेण केनचिदश्वमेधादिना परमपुरुषार्थसिद्धेरलमात्मज्ञानेनेत्याशङ्क्याह—** यत इति। **पूर्वोक्तेन प्रकारेण ज्ञानमाहात्म्यं यतः सिद्धम्, अतस्तेन ज्ञानेन तुल्यं परिशुद्धिकरं परमपुरुषार्थौपयिकमिह व्यवहारभूमौ नास्तीत्यर्थः। तत्पुनरात्मविषयं ज्ञानं सर्वेषां किमिति झटिति नोत्पद्यते? तत्राह—** तत् स्वयमिति। **महता कालेन यथोक्तेन साधनेन योग्यतामापन्नस्तदधिकृतः स्वयं तदात्मनि ज्ञानं विन्दतीति योजना। सर्वेषां झटिति ज्ञानानुदयो योग्यतावैधुर्यादिति भावः॥३८॥**

**कर्मयोगेन समाधियोगेन च सम्पन्नस्य ज्ञानोत्पत्तावन्तरङ्गं साधनमुपदिशति—** येनेति। **ज्ञानलाभप्रयोजनमाह—** ज्ञानमिति। **न केवलं श्रद्धालुत्वमेवासहायं ज्ञानलाभे हेतुरपि तु तात्पर्यमपीत्याह—** श्रद्धालुत्वेऽपीति। मन्दप्रस्थानत्वं **तात्पर्यविधुरत्वम्। न च तस्योपदिष्टमपि ज्ञानमुत्पत्तुमीष्टे। तेन तात्पर्यमपि तत्र कारणं भवतीत्याह—** अत आहेति। अभियुक्तो **निष्ठावान्।** उपासनादा-

भाष्यार्कप्रकाशः

यथा चापाल्लक्ष्यं प्रति निर्गतः शरः न मध्ये निवर्तते, किन्तु लक्ष्यं प्राप्यैव निर्व्यापारो भवति, तद्वत् प्रारब्धं कर्म यावद्देहपातं न नश्यति। यथा च तूणस्थाः शराः, धनुषि संयोजिता वा, अप्रयुक्ताः लक्ष्यप्राप्तिं विना निवारयितुं शक्यन्ते, तद्वत् सञ्चितानि भोगप्रदानं विना ज्ञानेन नाश्यन्त इति बोध्यम्॥३७॥

**न हीति।** न चेदं ज्ञानमकस्मात् सिद्ध्यति, किन्तु चित्तशुद्धिद्वारैव, सा च चित्तशुद्धिर्योगद्वारैवेत्याह— **योगसंसिद्ध इति। योगः** कर्मानुष्ठानलक्षणः समाधिलक्षणश्च। कर्मयोग इत्याह [**योगः** कर्मानुष्ठानलक्षणः कर्मयोगः, समाधिलक्षणश्च इत्याह]— **कर्मयोगेनेति।** कर्मानुष्ठानेनेत्यर्थः। **समाधियोगः** 'तानि सर्वाणि संयम्य युक्त आसीत मत्परः' इत्यादिना प्रोक्तः इन्द्रियमनोजयात्मको योगः। **संस्कृत इति।** चित्तगतोऽयं संस्कारः पुरुषे आरोपितः, यथा चित्तगतः संस्कारः[असंस्कारः]॥३८॥

**श्रद्धावानिति। एकान्तेन** नियमेनाव्यभिचारेणेत्यर्थः। **मन्दप्रस्थानः** मन्दप्रयाणः, गुर्वभिगमने त्वरारहित इत्यर्थः। **तत्परः** तस्मिन्नासक्तः। आसक्तिसत्त्वे गुरुं प्रति क्षिप्रं प्रयातीत्यभिप्रेत्याह— **गुर्विति। अभियुक्तः** आसमन्तात् सक्तः।

१. 'गुरूपसदनादौ' इति पा.।

## ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥३९॥

**तत्परोऽप्यजितेन्द्रियः स्यादित्यत आह—** संयतेन्द्रियः। **संयतानि विषयेभ्यो निवर्तितानि यस्येन्द्रियाणि स** संयतेन्द्रियः, **य एवम्भूतः श्रद्धावान् तत्परः संयतेन्द्रियश्च सोऽवश्यं ज्ञानं लभते। प्रणिपातादिस्तु बाह्यो ऽनैकान्तिकोऽपि भवति, मायावित्वादिसम्भवात् । न तु तथा तत् श्रद्धावत्त्वादावित्येकान्ततो ज्ञानलब्ध्युपायः। किं पुनर्ज्ञानलाभात् स्यादिति? उच्यते— ज्ञानं लब्ध्वा** परां **मोक्षाख्यां** शान्तिम् **उपरतिम्** अचिरेण **क्षिप्रमेवाधिगच्छति। सम्यग्दर्शनात् क्षिप्रमेव मोक्षो भवतीति सर्वशास्त्रन्यायप्रसिद्धः सुनिश्चितोऽर्थः॥३९॥**

आनन्दगिरिकृतव्याख्या

**वित्यादिशब्देन श्रवणादि गृह्यते। न च श्रद्धा तात्पर्यं चेत्युभयमेव ज्ञानकारणम् , किन्तु संयतेन्द्रियत्वमपि, तदभावे श्रद्धादेरकिञ्चित्करत्वादित्याशयेनाह—**श्रद्धावानिति। **उक्तसाधनानां ज्ञानेन सहैकान्तिकत्वमाह—**य एवम्भूत इति। **'तद्विद्धि प्रणिपातेन' इत्यादौ प्रागेव प्रणिपातादेर्ज्ञानहेतोरुक्तत्वात् किमितीदानीं हेत्वन्तरमुच्यते? तत्राह—** प्रणिपातादिस्त्विति। **तद्धि बहिरङ्गम् , इदं पुनरन्तरङ्गम्। न च तत्र ज्ञाने प्रतिनियमः, मनस्यन्यथा कृत्वा बहिरन्यथाप्रदर्शनात्मनो मायावित्वस्य सम्भवाद् , विप्रलम्भकत्वादेरपि सम्भावनोपनीतत्वादित्यर्थः। मायावित्वादेः श्रद्धावत्त्वतात्पर्यादावपि सम्भवादनैकान्तिकत्वमविशिष्टमित्याशङ्क्याह—** न त्विति। **न हि मायया विप्रलम्भेन वा श्रद्धातात्पर्यसंयमा[१]भियोगतो निष्ठातुमर्हतीत्यर्थः। उत्तरार्धं प्रश्नपूर्वकमवतार्य व्याकरोति—** किं पुनरित्यादिना। **सम्यग्ज्ञानादभ्यासादिसाधनानपेक्षान्मोक्षो भवतीत्यत्र प्रमाणमाह—** सम्यग्दर्शनादिति। **शास्त्रशब्देन 'तमेव विदित्वा' 'ज्ञानादेव तु कैवल्यम्' इत्यादि विवक्षितम्। न्यायस्तु ज्ञानादज्ञाननिवृत्तेः रज्ज्वादौ प्रसिद्धत्वाद् आत्मज्ञानादपि निरपेक्षादज्ञानतत्कार्यप्रक्षयलक्षणो मोक्षः स्यादित्येवंलक्षणः॥३९॥**

भाष्यार्कप्रकाशः

ननु पूर्वं 'तद्विद्धी'ति श्लोके प्रणिपातपरिप्रश्नसेवाः ज्ञानलब्धावुपायत्वेनोक्ताः, इदानीं तु श्रद्धासक्तीन्द्रियजयाः उक्ताः। अतः कथं व्याघातपरिहार इत्यत आह— **प्रणिपातादिस्त्विति।** आदिशब्दात् परिप्रश्नसेवयोर्ग्रहणम्। बहिर्भवो **बाह्यः**, श्रद्धादिस्त्वान्तरः। बाह्यादान्तरस्य बलीयस्त्वं प्रसिद्धमिति भावः। **किञ्च** अनैकान्तिकः व्यभिचारी। तत्र हेतुमाह— **मायावित्वादीति।**

प्रणिपातादौ मायावित्वादेः सम्भवोऽस्ति। कश्चिन्मायावी कृत्रिमः कपटेन कस्यचित् प्रणिपातादिकं कुर्यात्। तादृशो मायावी ज्ञानं नियमेन न लभते। अतः प्रणिपातादिर्हेतुर्व्यभिचार्येवेत्यर्थः। श्रद्धावत्त्वादौ तु मायावित्वादिर्न सम्भवति। अतः श्रद्धावत्त्वादिरव्यभिचारी उपायः। अत एवावतारिकाग्रन्थे येनैकान्तेन ज्ञानप्राप्तिर्भवतीत्युक्तम्। एवं च तद्विद्धीति श्लोकेन ज्ञानलब्धौ बाह्या अनैकान्तिका उपाया उक्ताः, अनेन तु आन्तरा एकान्ता उपाया इति न व्याघातः कश्चिदिति सिद्धम्।

**किञ्च** यत्र श्रद्धादिगुणत्रयमस्ति तत्र प्रणिपातादिगुणत्रयमपि भवत्येव, यत्र तु प्रणिपातादिगुणत्रयं दृश्यते तत्र नियमेन श्रद्धादिगुणत्रयं न विद्यते, अश्रद्धालोरतत्परस्याजितेन्द्रियस्यापि मायाविनः प्रणिपातादिगुणत्रयसम्भवादिति कृत्वा न प्रणिपातादिदर्शनाद् गुरुः शिष्ये विश्वासं कुर्यात् , किन्तु श्रद्धादिकं तस्मिन् परीक्ष्यैवेति गुरुशिक्षा अनेनोपदिष्टा।

**क्षिप्रमिति।** 'तरति शोकमात्मवित्' 'ब्रह्मविद् ब्रह्मैव भवति,' 'तमेवं विदित्वा अतिमृत्युमेति' इत्यादीनि शास्त्राणि, रज्जुयाथात्म्यज्ञानात् सर्पभ्रमनिवृत्तिवदात्मयाथात्म्यज्ञानात् संसारिभ्रमनिवृत्तिरित्यादयो न्यायाः, तत्प्रसिद्धो ज्ञानात् क्षिप्रं कैवल्यलाभः। एवकारान्न तु विलम्ब इत्यर्थः। ततश्च कर्मयोगादीनां चिरेण मोक्षप्रदानां व्यावृत्तिः। किञ्च **क्षिप्रम्** अव्यवधानेनेत्यर्थः। कर्मयोगादयस्तु ज्ञाननिष्ठाव्यवधानेन मोक्षं प्रयच्छन्ति, न तु साक्षादिति भावः॥३९॥

---

१. 'भियोगतोऽनुष्ठातुम्' 'नियोगतोऽनुष्ठातुम्' इति पा.। यथाश्रुते— न हि मायादिना श्रद्धादिनिष्ठो भवितुमर्हतीत्यर्थः।

**अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।**
**नायं लोकोऽस्ति न परो न सुखं संशयात्मनः॥४०॥**
**योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम्।**

**अत्र संशयो न कर्तव्यः। पापिष्ठो हि संशयः। कथमित्युच्यते—** अज्ञश्चेति। अज्ञश्च **अनात्मज्ञश्च,** अश्रद्दधानश्च **गुरुवाक्यशास्त्रेष्वविश्वासवान् च,** संशयात्मा च **संशयचित्तश्च विनश्यति। अज्ञाश्रद्दधानौ यद्यपि विनश्यतः, तथापि न तथा, यथा संशयात्मा। संशयात्मा तु पापिष्ठः सर्वेषाम्। कथम्?** नायं **साधारणोऽपि लोकोऽस्ति, तथा न** परो **लोकः, न सुखम् , तत्रापि** [1]**संशयोत्पत्तेः,** संशयात्मनः **संशयचित्तस्य। तस्मात् संशयो न कर्तव्यः॥४०॥**

**कस्मात्?** [2]**यस्मात्—** योगेति। [3]योगसंन्यस्तकर्माणं **परमार्थदर्शनलक्षणेन योगेन संन्यस्तानि कर्माणि येन**

आनन्दगिरिकृतव्याख्या

**उत्तरश्लोकस्य पातनिकां करोति—** अत्रेति। **यथोक्तसाधनवानुपदेशमपेक्ष्याचिरेण ब्रह्म साक्षात्करोति, साक्षात्कृतब्रह्मत्वे ऽचिरेणैव मोक्षं प्राप्नोतीत्येषोऽर्थः सप्तम्या परामृश्यते। संशयस्याकर्तव्यत्वे हेतुमाह—** पापिष्ठो हीति। **उक्तं हेतुं प्रश्नपूर्वकमुत्तरश्लोकेन साधयति—** कथमित्यादिना। **अज्ञादश्रद्दधानाच्च संशयचित्तस्य विशेषमादर्शयति—** नायमिति। **द्वितीयविभागविभजनार्थं भूमिकां करोति—** अज्ञेति। **अज्ञादीनां मध्ये संशयात्मनो यत् पापिष्ठत्वं तत् प्रश्नद्वारा प्रकटयति—** कथमिति। **लोकद्वयस्य तत्प्रयुक्तसुखस्य चाभावे हेतुमाह—**तत्रापीति। **संशयचित्तस्य सर्वत्र संशयप्रवृत्तेर्दुर्निवारत्वादित्यर्थः। संशयस्यानर्थमूलत्वे स्थिते फलितमाह—** तस्मादिति ॥४०॥

**यद्यपि संशयः सर्वानर्थहेतुत्वात् कर्तव्यो न भवति, तथापि निवर्तकाभावे** [4]**तदकरणमस्वाधीनमिति शङ्कते—** कस्मादिति। **श्रुतियुक्तिप्रयुक्तमैक्यज्ञानं तन्निवर्तकमित्युत्तरमाह—** ज्ञानेति। **संशयरहितस्यापि कर्माण्यनर्थहेतवो भवन्तीत्याशङ्क्याह—** योगेति।

भाष्यार्कप्रकाशः

**अज्ञ इति।** चकारादज्ञत्वादीनां त्रयाणां पृथक्पृथग् विनाशहेतुत्वं सिद्धम्। यः सुतरामात्मानं न वेत्ति सः **अज्ञः**, यस्तु गुरुणा तत्त्वे उक्ते सत्यपि न तत्र विश्वासवान् सः **अश्रद्दधानः।** सच्चिदानन्द आत्मेति गुरुणोच्यते, नैतद् युक्तम् , मम दुःखित्वादेरनुभवसिद्धत्वादिति मन्यतेऽयमश्रद्दधानः। एवं गुरुवाक्यमिव शास्त्रमपि नायं विश्वसिति, किं त्वप्रमाणमेव मन्यते। अथ **संशयात्मा** तु— किमात्मा गुरुवेदान्तोक्तविधया सच्चिदानन्दब्रह्माभिन्नः? किं वा तर्काद्युक्तरीत्या ईश्वराद्भिन्नः? किं वा बौद्धाद्युक्तरीत्या देहादिरेवात्मा? इत्याद्याकारकसंशयवान्। अयं हि अज्ञाश्रद्दधानाभ्यामप्यतीव पापिष्ठ इत्याह— **सर्वेषामिति।** सर्वेषां मध्ये इत्यर्थः। संशयात्मनः यथा आत्मनि संशयः तथा सर्वत्रापि संशय एव, तस्य संशयैकस्वभावत्वात्। तथा च पुत्रेष्ट्यादिना पुत्रादयः सिद्ध्येयुर्वा न वा इति सन्दिहानः पुरुषः पुत्रेष्ट्यादिकं नैव करोतीति न तस्य मनुष्यलोकफलसिद्धिः। एवं ज्योतिष्टोमेन स्वर्गो भवेद्वा न वेति सन्दिहानः ज्योतिष्टोमं नैव करोतीति न तस्य परलोकफलसिद्धिः। एवं स्रक्चन्दनादिधारणेन मम सुखं स्याद्वा न वेति सन्दिहानः स्रक्चन्दनादिधारणं नैव करोतीति न तस्य सुखसिद्धिः।

**यद्वा** इहलोकोऽस्ति वा न वा? परलोकोऽस्ति वा न वा? सुखमस्ति वा न वेत्येवं सन्दिहानस्य नेहलोकादयः सिद्ध्यन्ति, निश्चयपूर्वकत्वात् सिद्धेः। न चेहलोकास्तित्वसंशयः कथमुदेतुमर्हतीति वाच्यम् , शून्यवादिमते प्रपञ्चस्य स्वरूपापलापदर्शनात् , अन्यत्र तत्सत्यत्वदर्शनाच्च तत्रापि संशयोत्पत्तिसम्भवात्॥४०॥

१. 'संशयोपपत्तेः' इति पा.। २.'यस्मात्' इति क्वचिन्न। ३. योगेन भगवदाराधनलक्षणसमत्वबुद्धिरूपेण संन्यस्तानि भगवति समर्पितानि कर्माणि येनेति व्याख्यान्तरमपि मधुसूदन्याम्। ४. **तदकरणं** संशयाकरणम्।

## आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ! ॥ ४१ ॥

**परमार्थदर्शिना धर्माधर्माख्यानि, तं योगसंन्यस्तकर्माणम्। कथं योगसंन्यस्तकर्मेत्याह—** ज्ञानसंछिन्नसंशयम् । ज्ञानेन **आत्मेश्वरैकत्वदर्शनलक्षणेन संछिन्नः संशयो यस्य स ज्ञानसंछिन्नसंशयः। य एवं योगसंन्यस्तकर्मा तम्** आत्मवन्तम् **अप्रमत्तं गुणचेष्टारूपेण दृष्टानि कर्माणि न** निबध्नन्ति **अनिष्टादिरूपं फलं नारभन्ते, हे धनञ्जय ! ॥ ४१ ॥**

**यस्मात् कर्मयोगानुष्ठानादशुद्धिक्षयहेतुकज्ञानसंछिन्नसंशयो[१] न निबध्यते कर्मभिः, ज्ञानाग्निदग्धकर्मत्वादेव,**

आनन्दगिरिकृतव्याख्या

**विषयपरवशस्य पुंसो योगायोगात् कुतो योगसंन्यस्तकर्मत्वमित्याशङ्क्याह—** आत्मवन्तमिति। **परमार्थदर्शनतः संशयोच्छित्तौ तदुच्छेदकज्ञानमाहात्म्यादेव कर्मणां च निवृत्तावप्रमत्तस्य प्रातिभासिकानि कर्माणि बन्धहेतवो न भवन्तीत्याह—** न कर्माणीति। **कर्मयोगादेव कर्मसंन्यासस्यानुपपत्तिमाशङ्क्य , आद्यं पादं विभजते—** परमार्थेति। [२]**तच्च वैधसंन्यासपक्षे परोक्षम् , फलसंन्यासपक्षे त्वपरोक्षमिति विवेकः। यथोक्तज्ञानेन सन्न्यस्तकर्मत्वमेव सति संशये न सिध्यति, संशयवतस्तदयोगादिति शङ्कते—** कथमिति। **द्वितीयं पादं व्याकुर्वन् परिहरति—**आहेत्यादिना। [३]**पाठक्रमादर्थक्रमस्य बलीयस्त्वादादौ द्वितीयं पादं व्याख्याय पश्चादाद्यं पादं व्याचक्षीतेत्याह—** य एवमिति। **सर्वमिदं प्रमादवतो विषयपरवशस्य न सिध्यतीत्यभिसन्धायात्मवन्तं[४] व्याकरोति—**अप्रमत्तमिति। **न कर्माणीत्यादिफलोक्तिं व्याचष्टे—** गुणचेष्टेति। **अनिष्टादीत्यादिशब्देनेष्टं मिश्रं च गृह्यते॥ ४१ ॥**

**तस्मादित्यादिसमनन्तरश्लोकगततत्पदापेक्षितमर्थमाह—** यस्मादिति। **सतां कर्मणामस्मदादिषु फलारम्भकत्वोपलम्भाद् विदुष्यपि तेषां [५]तद्भाव्यमनपबाधमित्याशङ्क्याह—** ज्ञानाग्नीति। **ननु सन्दिहानस्य तत्प्रतिबन्धान्न कर्मयोगानुष्ठानम् , नापि तद्धेतुकं ज्ञानं**

भाष्यार्कप्रकाशः

**योगेति**। ज्ञानसञ्छिन्नसंशयम् अत एव योगसन्न्यस्तकर्माणमात्मवन्तं, हे धनञ्जय! कर्माणि न निबध्नन्ति धर्माधर्माख्यानि कर्माणीत्यन्वयः। आत्मा मनः, तद्वान् **आत्मवान्** , तमात्मवन्तम्। ननु न हि कस्यापि मनोऽभावोऽस्ति, येनात्मवन्तमित्युच्येतेत्यत आह—**अप्रमत्तमिति।** [६]प्रशंसायां मतुब्विधानात् **आत्मवन्तं** प्रशस्तमनसमित्यर्थः। मनसः प्राशस्त्यं च प्रमादाभावप्रयुक्तमेवेत्यभिप्रेत्याह— **अप्रमत्तमिति।** अवहितमनस्कमित्यर्थः। मनोधर्मस्य प्रमादाभावस्य पुरुषे आरोपादुक्तम् अप्रमत्तमिति। न हि वस्तुतः पुरुषस्य प्रमादादिधर्मवत्ता, निर्धर्मकात्मस्वरूपत्वात् पुरुषस्य। **गुणचेष्टाः** सत्त्वादिगुणकृतनिग्रहादिचेष्टाः रज्जवः पशुमिव कर्माणि पुरुषं न निबध्नन्तीति वक्तुमयुक्तत्वादाह— **अनिष्टादीति**। अनिष्टादिरूपफलारम्भद्वारा पुरुषं न निबध्नन्तीत्यर्थः।

**ननु** आत्मवन्तमिति व्यर्थम् , ज्ञानिनः प्रमादजननीयक्षत्यभावादिति चेद्? **मैवम् ,** ज्ञानिनोऽपि सति प्रमादे इन्द्रियपारतन्त्र्यादिप्रयुक्तसंसारप्रसङ्गात्। तस्माज्ज्ञानिनाऽपि जितेन्द्रियमनस्केन भाव्यमिति सूचानायाह— **अप्रमत्तमिति**। प्रपञ्चितं चैतत् पूर्वस्मिन्नध्याये 'ध्यायतो विषयन् पुंसः' इत्यादिना। प्रमत्तस्यानर्थजन्म 'बलवानिन्द्रियग्रामो विद्वांसमपि कर्षती'ति च स्मर्यते। तस्माद् मुमुक्षुर्विद्वान् जितेन्द्रियःसन्नन्तर्मुखेन मनसा आत्मस्वरूपं सदा साक्षात्कुर्वन् वर्तेत, ततो मुच्यत इत्यनेन श्लोकेनोपदिष्टम् ॥ ४१ ॥

**तस्मादिति**। तस्माच्छब्दार्थमाह— **यस्मादित्यादिना**। हेतुरेव हेतुकः, अशुद्धिभयादीनां हेतुकः ज्ञानेन सञ्छिन्नश्च संशयो यस्य सः ज्ञानसञ्छिन्नाशुद्धिभयादिहेतुसंशयः इत्यर्थः। तच्च ज्ञानं कस्माज्जायत इत्यत आह— **कर्मयोगानुष्ठानादिति। अशुद्धिक्षयहेतुके**ति पाठे अशुद्धिक्षयो हेतुर्यस्य तत् तथोक्तमिति ज्ञानविशेषणम्। कुतः कर्मभिर्न निबध्यते? इत्यत आह— **ज्ञानाग्नीति।**

---

१. 'अशुद्धिभयादिहेतुकज्ञानसञ्छिन्नसंशयः' इति रा.पा.। २. तत् परमार्थज्ञानम्। वैधसंन्यासः विविदिषासंन्यासः। फलसंन्यासः विद्वत्संन्यासः। ३. अर्थः प्रयोजनम् , तदनुरोधी क्रमः। प्रकृते च कर्मसंन्यासात् प्राक् तत्प्रतिबन्धकसंशयच्छेदः आवश्यकः। अतो ज्ञानसंछिन्नसंशयमिति पूर्वं व्याख्येयमिति भावः। ४. आत्मवन्तमिति पदं व्याख्यातीत्यर्थः। ५. 'तद्धान'मिति 'तद्भाव'मिति च क्वचित् पा.। 'ताद्भाव्य'मिति, 'तद्भावमनपबाधमाशङ्क्याहे'ति वा युक्तं स्यादिति भाति। फलारम्भकत्वमिति तदर्थः। ६. भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः॥

**तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनाऽऽत्मनः।**
**छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत !॥४२॥**

**इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानकर्मसंन्यासयोगो[1] नाम चतुर्थोऽध्यायः॥४॥**

**यस्माच्च ज्ञानकर्मानुष्ठानविषये संशयवान् विनश्यति—** तस्मादिति। **तस्मात् पापिष्ठम्** अज्ञानसम्भूतम् **अज्ञानाद् अविवेकाज्जातं** हृत्स्थं **हृदि बुद्धौ स्थितं** ज्ञानासिना **शोकमोहादिदोषहरं सम्यग्दर्शनं ज्ञानम् , तदेवासिः खड्गस्तेन ज्ञानासिना** आत्मनः **स्वस्य, आत्मविषयत्वात् संशयस्य। न हि परस्य संशयः परेण छेत्तव्यतां प्राप्तो येन स्वस्येति विशेष्येत। अतः आत्मविषयोऽपि स्वस्यैव भवति। छित्त्वैनं संशयं स्वविनाशहेतुभूतं,** योगं **सम्यग्दर्शनोपायं कर्मानुष्ठानम्** आतिष्ठ **कुर्वित्यर्थः। उत्तिष्ठ चेदानीं युद्धाय, भारतेति॥४२॥**

आनन्दगिरिकृतव्याख्या

**तत्रापि संशयावतारादित्याशङ्क्याह—** यस्माच्चेति। **श्लोकाक्षराणि व्याचष्टे—** तस्मादित्यादिना। **पापिष्ठमिति संशयस्य सर्वानर्थमूलत्वेन त्याज्यत्वं सूच्यते। विवेकाग्रहप्रसूतत्वादपि तस्यावहेयत्वमविवेकस्यानर्थकरत्वप्रसिद्धेरित्याह—**अविवेकादिति। **न च तस्य चैतन्यवदात्मनिष्ठत्वादत्याज्यत्वं शङ्कितव्यमित्याह—** हृदीति। **शोकमोहाभ्यामभिभूतस्य पुंसो मनसि प्रादुर्भवतः संशयस्य प्रबलप्रतिबन्धकाभावे नैव प्रध्वंसः सिध्येदित्याशङ्क्याह—** ज्ञानासिनेति। **स्वाश्रयस्य संशयस्य स्वाश्रयेणैव ज्ञानेन समुच्छेदसम्भवात् किमिति स्वस्येति विशेषणमित्याशङ्क्याह—** आत्मविषयत्वादिति। **स्थाण्वादिविषयः संशयस्तद्विषयेण ज्ञानेन देवदत्तनिष्ठेन [2]तन्निष्ठो व्यावर्त्यते। प्रकृते त्वात्मविषयस्तदाश्रयश्च संशयस्तथाविधेन ज्ञानेनापनीयते, तेन विशेषणमर्थवदित्यर्थः। तदेव प्रपञ्चयति—** न हीति। **आत्माश्रयत्वस्य प्रकृते संशये सिद्धत्वेनाविवक्षितत्वात् तद्विषयस्य तद्विषयेणैव तस्य तेन निवृत्तिर्विवक्षितेत्युपसंहरति—** अत इति। **संशयसमुच्छित्त्यनन्तरं कर्तव्यमुपदिशति—** छित्त्वैनमिति। **अग्निहोत्रादिकं कर्म [3]भगवदाज्ञया क्रमेण करिष्यामि, युद्धात् पुनरुपरिरंसैवेत्याशङ्क्याह—** उत्तिष्ठेति। **भरतान्वये महति क्षत्रियवंशे प्रसूतस्य समुपस्थितसमरविमुखत्वमनुचितमिति मन्वानः**

भाष्यार्कप्रकाशः

तस्मादित्यस्यार्थान्तरमाह— **यस्माच्चेति।** ज्ञानं च कर्म च ज्ञानकर्मणी प्रत्येकानुष्ठानविषये इत्यर्थः। तयोः युगपदनुष्ठानासम्भवस्य प्रागेवोक्तत्वात्। [4]तयोरनुष्ठानविषये। **तस्मादिति।** कर्मज्ञानयोगानुष्ठानजन्यज्ञानाग्नेः सर्वकर्मदाहकत्वान्निःसंशयेन ज्ञानकर्मानुष्ठानस्य कर्तव्यत्वाच्चेत्यर्थः। हे भारत! अज्ञानसम्भूतं हृत्स्थमेनम् आत्मनः संशयं ज्ञानासिना छित्त्वा योगमातिष्ठ, उत्तिष्ठ। **अविवेकाद्** आत्मानात्मविवेकाभावात्। **यद्वा** यस्माद् विवेको न भवति तदविवेकं भावरूपम् , मायेति यावत्। आत्मन इति विषयविषयिभावरूपे सम्बन्धे शेषे षष्ठीत्याह— **आत्मविषयत्वादिति।** आत्मविषयमित्यर्थः। अन्यथा यथाश्रुतार्थे दोषमाह— **न हीति।** संशयं छित्त्वेत्यनेनैव स्वसंशयं छित्त्वेत्यर्थलाभो भवति, परसंशयस्याच्छेत्तव्यत्वेनैव व्यावृत्तेः परसंशयं छित्त्वेत्यर्थाप्रसक्तेः।

नन्वयमात्मसंशयः कस्य भवतीत्यत आह— **स्वस्यैवेति।** किमहं नित्य आत्मा उतानित्य इत्यादिरूपस्य स्वस्मिन्नेव संशयस्य सर्वाविद्वदनुभवसिद्धत्वादिति भावः। एनमिति शब्दार्थमाह— **स्वविनाशहेतुभूतमिति।** संशयात्मा विनश्यतीत्युक्तत्वादिति भावः। [5]योगशब्दोऽत्रोपायपरः इत्याह— **सम्यगिति। कर्मानुष्ठानं कुर्विति।** ज्ञाननिष्ठायां तवानधिकारादिति भावः।

**उत्तिष्ठ** 'उदोऽनूर्ध्वकर्मणि' इति न तङ्। किमर्थमुत्थानम्? अत आह— **युद्धायेति।** भारतेत्यनेन क्षत्रियस्य तव

---

१. 'ज्ञानयोगः' इति रा.पुस्तके पा.। २. **तन्निष्ठो** देवदत्तनिष्ठः। संशयविशेषणमिदम्। दृष्टान्ते विषयाश्रययोः भेदः, दार्ष्टान्तिके तु तदैक्यमिति विशेषः।
३. 'भवदाज्ञया' इति पा.। ४. **तयोः** ज्ञानकर्मणोः। ५. 'योगः संनहनोपायध्यानसंगतियुक्तिषु' इति कोशः। (अमर. नानार्थ. २२)

**इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये ज्ञानकर्मसंन्यासयोगो नाम चतुर्थोऽध्यायः॥४॥**

आनन्दगिरिकृतव्याख्या

**सन्नाह—** भारतेति।

[1]**तदनेन योगस्य कृत्रिमत्वं भगवतोऽनीश्वरत्वं च निराकृत्य, कर्मादावकर्मादिदर्शनादात्मनः सम्यग्ज्ञानात् - प्रणिपातादेः बहिरङ्गाद् , अन्तरङ्गाच्च श्रद्धादेरुद्भूताद् - अशेषानर्थनिवृत्त्या ब्रह्मभावमभिदधता सर्वस्मादुत्कृष्टे तस्मिन्नसंशयानस्याधिकाराद् अशेषदोषवन्तं संशयं हित्वोत्तमस्य ज्ञाननिष्ठा, अपरस्य कर्मनिष्ठेति स्थापितम्॥४२॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते श्रीमद्भगवद्गीताशाङ्करभाष्यव्याख्याने चतुर्थोऽध्यायः॥४॥**

भाष्यार्कप्रकाशः

युद्धाख्यकर्मयोग एवाधिकार इति सूच्यते। सम्यग्दर्शिनोऽपि तव लोकसङ्ग्रहार्थं कर्मैव कर्तुमुचितं जनकादिवदिति च प्रतीयते॥४२॥

**इति बेल्लङ्कोण्डोपनामकरामकविकृतौ श्रीभगवद्गीताभाष्यार्कप्रकाशे चतुर्थोऽध्यायः॥**

---

१. अध्यायतात्पर्यं संगृह्णाति— तदनेनेति। बहिरङ्गात् प्रणिपातादेः , अन्तरङ्गात् श्रद्धादेश्चोद्भूतात् आत्मनः सम्यग्ज्ञानादित्यन्वयः।

ॐ श्रीपरमात्मने नमः

# ॥ अथ पञ्चमोऽध्यायः ॥

**अर्जुन उवाच —**

**संन्यासं कर्मणां कृष्ण ! पुनर्योगं च शंससि।**
**यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम्॥ १ ॥**

**'कर्मण्यकर्म यः पश्येत्' इत्यारभ्य 'स युक्तः कृत्स्नकर्मकृत्' (भ.गी.४.१८) 'ज्ञानाग्निदग्धकर्माणम्' (भ.गी.४.१८) 'शारीरं केवलं कर्म कुर्वन्' (भ.गी.४.२१) 'यदृच्छालाभसन्तुष्टः' (भ.गी.४.२२) 'ब्रह्मार्पणं ब्रह्म हविः' (भ.**

### अनुभूतिस्वरूपाचार्यविरचितगीताभाष्यटिप्पणम्

आद्यस्यार्जुनप्रश्नस्य वृत्तानुवादपूर्वकमभिप्रायं दर्शयितुमुपक्रमते— **कर्मण्यकर्मेत्यादिना**। 'कर्मण्यकर्म' इत्यादिना

### आनन्दगिरिकृतव्याख्या

**पूर्वोत्तराध्याययोः सम्बन्धमभिदधानो वृत्तानुवादपूर्वकमर्जुनप्रश्नस्याभिप्रायं प्रदर्शयितुं प्रक्रमते—** कर्मणीत्यादिना। इत्यारभ्य **कर्मण्यकर्मदर्शनमुक्त्वा तत्प्रशंसा प्रसारितेत्याह—** स युक्त इति। **ज्ञानवन्तं सर्वाणि कर्माणि लोकसंग्रहार्थं कुर्वन्तं ज्ञानलक्षणेनाग्निना दग्धसर्वकर्माणं कर्मप्रयुक्तबन्धविधुरं विवेकवन्तो वदन्तीति ज्ञानवतो ज्ञानफलभूतं संन्यासं विवक्षन् विविदिषोः साधनरूपमपि संन्यासं भगवान् विवक्षितवानित्याह—** ज्ञानाग्नीति। **'निराशी'रित्यारभ्य शरीरस्थितिमात्रकारणं कर्म शरीरस्थितावपि सङ्गरहितः सन्नाचरन् धर्माधर्मफलभागी न भवतीत्यपि [1]पूर्वोत्तराभ्यामध्यायाभ्यां द्विविधं संन्यासं सूचितवानित्याह—** शारीरमिति। **'यदृच्छे'त्यादावपि संन्यासः सूचितः, [2]तद्धर्मकलापोपदेशादित्याह—** यदृच्छेति। **ज्ञानस्य यज्ञत्वसम्पादनपूर्वकं प्रशंसावचनादपि कर्मसंन्यासो दर्शितो ज्ञाननिष्ठस्येत्याह—** ब्रह्मार्पणमिति। **ज्ञानयज्ञस्तुत्यर्थं नानाविधान् यज्ञाननूद्य तेषां देहादिव्यापारजन्यत्ववचनेनात्मनो निर्व्यापारत्व-**

### श्रीबेल्लंकोण्डरामरायकविविरचितः

### भाष्यार्कप्रकाशः

द्वितीयेऽध्याये कर्मयोगं ज्ञानयोगं च प्रतिपाद्य तत्र कर्मणो ज्ञानस्य श्रेयस्त्वमुपपादितं भगवता। अत एव तृतीये— 'ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन' इत्यर्जुनेनोक्तम्। ततस्तृतीये ज्ञानयोगस्य साङ्ख्यविषयत्वात् कर्मयोगस्य च योगिविषयत्वाद् अर्जुनस्य चासाङ्ख्यत्वात् कर्मयोग एव कर्तव्य इति प्रतिपादितम्। चतुर्थे स्वयमेव भगवान् ज्ञानयोगं पुनः प्रशशंस। तदन्ते च 'ज्ञानेन संशयं छित्त्वा योगमातिष्ठे'त्यर्जुनाय योग एवोपदिष्टः। एवं स्थिते अर्जुनः पृच्छति पञ्चमाध्याये— **संन्यासमिति।**

**ननु** कर्मयोगज्ञानयोगयोर्द्वयोरपि निःश्रेयसहेतुत्वं भगवतोक्तम्। तत्र मुक्तिं प्रति साक्षात्साधनत्वं, कर्मयोगसाध्यत्वं च ज्ञानस्य प्रतिपादयन् , कर्मयोगस्य ज्ञानयोगद्वारा मुक्तिहेतुत्वं न तु साक्षादिति च प्रतिपादयन् , कर्मयोगाज्ज्ञानयोगमेव श्रेयांसं स्थापयामास भगवान्। अर्जुनस्य च ज्ञानयोगानधिकारित्वेन 'कुरु कर्मैव तस्मात्त्वम्' इति कर्मयोगमेव श्रेयस्करं प्रतिपादयामास। एवं स्थिते कथमर्जुनस्येह प्रश्नावकाशः, स्वस्य कर्मयोग एव श्रेयानिति, द्वयोर्ज्ञानयोग एव श्रेयानिति च स्फुटमुक्तत्वाद् भगवता, अर्जुनेन च सावधानं ज्ञातत्वात् तदर्थस्येति चेत्? **उच्यते**— नायमर्जुनस्य प्रश्नः कर्मयोगज्ञानयोगयोस्तारतम्यज्ञानार्थः; नापि कर्मज्ञानयोः; किं तर्हि? संन्यासकर्मयोगयोः। प्रश्नसामर्थ्याच्चास्य संन्यासस्य ज्ञानरहितसंन्यासत्वमवगम्यते। यद्यपि 'न च संन्यसनादेव सिद्धिं समधिगच्छती'ति ज्ञानरहितसंन्यासस्य सिद्ध्यहेतुत्वमुक्तम्; 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इति कर्मयोगस्य सिद्धिहेतुत्वं चोक्तं भगवता; तेन च संन्यासाज्ज्ञानहीनात् कर्मयोगः श्रेयानिति ज्ञातुं शक्यम् , तथापि विस्तरेण बुभुत्सया पृष्टमर्जुनेनेति बोध्यम्।

'संन्यासं योगं च शंससी'त्यर्जुनेनोक्तम्। तत्र क्व संन्यास उक्तः? क्व वा योगः? इत्यत आह— **कर्मणीत्यादि।**

---

१. 'पूर्वोत्तराभ्यामर्थाभ्यां' इति पा.। 'पूर्वोत्तराभ्यामधर्भ्यां' इति पा. संभाव्यते। २. 'तद्धर्मफलायोपदेशाद्' इति पा.।

**गी.४.२४) 'कर्मजान् विद्धि तान् सर्वान्' (भ.गी.४.३२) 'सर्वं कर्माखिलं पार्थ' (भ.गी.४.३३) 'ज्ञानाग्निः सर्वकर्माणि' (भ.गी.४.३७) 'योगसंन्यस्तकर्माणम्' (भ.गी.४.४१) [१]इत्यन्तैर्वचनैः सर्वकर्मसंन्यासमवोचद् भगवान्। 'छित्त्वैनं संशयं योगमातिष्ठ' (भ.गी.४.४२) इत्यनेन वचनेन योगं च कर्मानुष्ठानलक्षणम् अनुतिष्ठेत्युक्तवान्। तयोरुभयोश्च कर्मानुष्ठानकर्मसंन्यासयोः स्थितिगतिवत् परस्परविरोधाद् एकेन सह कर्तुमशक्यत्वात् , कालभेदेन चानुष्ठानविधानाभावाद् अर्थादेतयोरन्यतरकर्तव्यताप्राप्तौ सत्यां यत् प्रशस्यतरम् एतयोः कर्मानुष्ठानकर्मसंन्यासयोः, तत् कर्तव्यम् , नेतरदित्येवं मन्यमानः प्रशस्यतरबुभुत्सया अर्जुन उवाच—** संन्यासं कर्मणां कृष्णेत्यादिना।

**ननु चात्मविदो ज्ञानयोगेन निष्ठां [२]प्रतिपादयिष्यन् पूर्वोदाहृतैर्वचनैः भगवान् सर्वकर्मसंन्यासमवोचत् , न त्वनात्मज्ञस्य। अतश्च कर्मानुष्ठानकर्मसंन्यासयोर्भिन्नपुरुषविषयत्वाद् अन्यतरस्य प्रशस्यतरत्वबुभुत्सया [३]प्रश्नोऽनुपपन्नः। सत्यमेव त्वदभिप्रायेण प्रश्नो नोपपद्यते ; प्रष्टुः स्वाभिप्रायेण पुनः प्रश्नो युज्यत एवेति वदामः। कथम्?**

अनुभूतिस्वरूपाचार्यटिप्पणम्

भगवता संन्यासः उक्तः, कर्मयोगश्च; तयोरन्यतरश्रेष्ठत्वबुभुत्सया प्रश्नः' इत्यभिप्रायो नोपपद्यते, कर्मसंन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेयत्वस्य प्रागुक्तत्वाद् एकस्मिन् पुरुषे प्राप्त्यसम्भवादित्याक्षिपति— **ननु चात्मविद इत्यादिना**। चोद्यमभ्युपगम्य

आनन्दगिरि व्याख्या

**विज्ञानफलाभिलाषादपि यथोक्तमात्मानं विविदिषोः सर्वकर्मसंन्यासेऽधिकारो ध्वनित इत्याह—** कर्मजानिति। **समस्तस्यैवावशेषवर्जितस्य कर्मणो ज्ञाने पर्यवसानाभिधानाच्च जिज्ञासोः सर्वकर्मसंन्यासः सूचित इत्याह—** सर्वमिति। **'तद्विद्धी'त्यादिना ज्ञानप्राप्त्युपायं प्रणिपातादिं प्रदर्श्य प्राप्तेन ज्ञानेनातिशयमाहात्म्यवता सर्वकर्मणां निवृत्तिरेवेति वदता च ज्ञानार्थिनः संन्यासेऽधिकारो दर्शितो भगवतेत्याह—** ज्ञानाग्निरिति। **ज्ञानेन समुच्छिन्नसंशयं तस्मादेव ज्ञानात् कर्माणि संन्यस्य व्यवस्थितम् अप्रमत्तं वशीकृतकार्यकरणसङ्घातवन्तं प्रातिभासिकानि कर्माणि न निबध्नन्तीत्यपि द्विविधः संन्यासो भगवतोक्त इत्याह—** योगेति। **'कर्मणी'त्यारभ्य 'योगसंन्यस्तकर्माण'मित्यन्तैरुदाहृतैर्वचनैरुक्तं संन्यासमुपसंहरति—**इत्यन्तैरिति। **तर्हि कर्मसंन्यासस्यैव जिज्ञासुना ज्ञानवता चादरणीयत्वात् कर्मानुष्ठानमनादेयमापन्नमित्याशङ्क्य , उक्तमर्थान्तरमनुवदति—** छित्त्वैनमिति। **कर्मतत्त्यागयोरुक्तयोः एकेनैव पुरुषेणानुष्ठेयत्वसम्भवान्न विरोधोऽस्तीत्याशङ्क्य, युगपद्वा क्रमेण वाऽनुष्ठानमिति विकल्प्य, आद्यं दूषयति—** उभयोश्चेति। **द्वितीयं प्रत्याह—** कालभेदेनेति। **उक्तयोर्द्वयोरेकेन पुरुषेणानुष्ठेयत्वासम्भवे कथं कर्तव्यत्वसिद्धिरित्याशङ्क्याह—** अर्थादिति। **द्वयोरुक्तयोरेकेन युगपत्क्रमाभ्यामनुष्ठानानुपपत्तेरित्यर्थः। अन्यतरस्य कर्तव्यत्वे कतरस्येति कुतो निर्णयः, द्वयोः सन्निधानाविशेषादित्याशङ्क्याह—** यत्प्रशस्यतरमिति। **भगवता कर्मणां संन्यासो योगश्चोक्तः; न च तयोः समुच्चित्यानुष्ठानम् ; तेनान्यतरस्य श्रेष्ठस्यानुष्ठेयत्वे तद्बुभुत्सया प्रश्नोपपत्तिरित्युपसंहरति—** इत्येवमिति।

**नायं प्रष्टुरभिप्रायः, कर्मसंन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेयत्वस्योक्तत्वाद् एकस्मिन् पुरुषे प्राप्त्यभावादिति शङ्कते—** नन्विति। **चोद्यमङ्गीकृत्य परिहरति—** सत्यमेवेति। **कीदृशस्तर्हि प्रष्टुरभिप्रायो येन प्रश्नप्रवृत्तिरिति पृच्छति—** कथमिति। **एकस्मिन् पुरुषे**

भाष्यार्कप्रकाशः

**कालभेदेनेति**। 'योगमादौ कृत्वा पश्चात् संन्यासं कुरु' इत्यनुक्तत्वादित्यर्थः।

शङ्कते— **ननु चेति**। 'लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ !। ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्॥' इति भिन्नपुरुषविषययोः ज्ञानकर्मणोरन्यतरस्य श्रेयस्करत्वज्ञानेन नार्जुनस्य किमपि फलम्; सत्यपि ज्ञानयोगस्य कर्मयोगस्य वा उत्कर्षे कर्मिणा ज्ञानस्य, ज्ञानिना कर्मणश्च कर्तुमशक्यत्वात् ; अतो व्यर्थोऽयं प्रश्न इति शङ्कितुराशयः। अङ्गीकृत्य परिहरति— **सत्यमिति**। न

१. 'इत्येतैः' इति पा.। २. 'प्रतिपिपादयिषन्' इति पा.। ३.'अयं प्रश्नः' इति पा.।

**पूर्वोदाहृतैर्वचनैर्भगवता कर्मसंन्यासस्य कर्तव्यतया विवक्षितत्वात् [1]प्राधान्यम्; अन्तरेण च कर्तारं तस्य कर्तव्यत्वासम्भवाद् अनात्मविदपि कर्ता पक्षे प्राप्तोऽनूद्यत एव, न पुनः आत्मवित्कर्तृकत्वमेव संन्यासस्य विवक्षितमित्येवं मन्वानस्यार्जुनस्य कर्मानुष्ठानकर्मसंन्यासयोरविद्वत्पुरुषकर्तृकत्वमप्यस्तीति पूर्वोक्तेन प्रकारेण तयोः परस्परविरोधाद् अन्यतरस्य कर्तव्यत्वे प्राप्ते, प्रशस्यतरं च कर्तव्यम्, नेतरदिति प्रशस्यतरविविदिषया प्रश्नो नानुपपन्नः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

समाधानमाह— **सत्यमेवमेवेति**। कीदृशस्तर्हि प्रष्टुरभिप्राय इत्याह— **कथमिति**। एकस्मिन् पुरुषे विद्यते उभयप्राप्तिरिति प्रष्टुरभिप्रायं दर्शयितुमुपक्रमते— **पूर्वोदाहृतैरित्यादिना**। यथा 'स्वर्गकामो यजेते'ति स्वर्गकामोद्देशेन यागविधानम्, न तु स्वर्गकामस्यैव नान्यस्येत्यपि प्रतिपाद्यते, वाक्यभेदप्रसङ्गात्; तथाऽत्रापि अनात्मवित्कर्तव्यसंन्यासः पक्षे प्राप्तो नोद्यते [ऽनूद्यते], वैराग्यमात्रेण अनात्मज्ञस्यापि संन्यासविधानात्, न त्वात्मवित्कर्तृकत्वमेव। तस्मात् संन्यासकर्मणोः(अपि) अविद्वत्कर्तृकत्वमप्यस्तीत्यर्जुनस्य मतमित्यर्थः। ततः किमित्याशङ्कायामाह— **पूर्वोक्तेनेति**।

आनन्दगिरिकृतव्याख्या

**कर्मतत्त्यागयोरस्ति प्राप्तिरिति प्रष्टुरभिप्रायं प्रतिनिर्देष्टुं प्रारभते—** पूर्वोदाहृतैरिति। **यथा 'स्वर्गकामो यजेत' इति स्वर्गकामोद्देशेन यागो विधीयते, न तु तस्यैवाधिकारो नान्यस्येत्यपि प्रतिपाद्यते, वाक्यभेदप्रसङ्गात्; तथाऽनात्मवित् कर्ता [2]संन्यासे पक्षे प्राप्तोऽनूद्यते, न त्वात्मवित्कर्तृकत्वमेव संन्यासस्य नियम्यते, वैराग्यमात्रेणाज्ञस्यापि संन्यासविधिदर्शनात्। तस्मात् कर्मतत्त्यागयोरविद्वत्कर्तृकत्वमस्तीति मन्वानस्यार्जुनस्य प्रश्नः सम्भवतीति भावः। भवतु संन्यासस्य कर्तव्यत्वविवक्षा, तथापि कथं प्रशस्यतरबुभुत्सया प्रश्नप्रवृत्तिरित्याशङ्क्याह—** प्राधान्यमिति। **तथापि कथमेकस्मिन् पुरुषे तयोरप्राप्तावुक्ताभिप्रायेण प्रश्नवचनं प्रकल्प्यते? तत्राह—**अनात्मविदपीति। **आत्मविदो विद्यासामर्थ्यात् कर्मत्यागध्रौव्यवद् इतरस्यापि सति वैराग्ये तत्त्यागस्यावश्यकत्वात् तत्र कर्ताऽसौ प्राप्तोऽत्रानूद्यते। तथा च कर्मतत्त्यागयोरेकस्मिन्नविदुषि प्राप्तेर्व्यक्तत्वादुक्ताभिप्रायेण प्रश्नप्रवृत्तिरविरुद्धेत्यर्थः। संन्यासस्यात्मवित्कर्तृकत्वमेवात्र विवक्षितं किं न स्यादित्याशङ्क्य, कर्त्रन्तरपर्युदासः संन्यासविधिश्चेत्यर्थभेदे वाक्यभेदप्रसङ्गान्मैवमित्याह—** न पुनरिति। **इतिशब्दो वाक्यभेदप्रसङ्गहेतुद्योतनार्थः। ततः किमित्याशङ्क्य फलितमाह—** एवमिति। **कर्मानुष्ठानकर्मसंन्यासयोरविद्वत्कर्तृकत्वमप्यस्तीत्येवं मन्वानस्यार्जुनस्य प्रशस्यतरविविदिषया प्रश्नो नानुपपन्न इति सम्बन्धः। तयोः समुच्चित्यानुष्ठानसम्भवे कथं प्रशस्यतरविविदिषेत्याशङ्क्याह—** पूर्वोक्तेनेति। **'उभयोश्चे'त्यादावुक्तप्रकारेण कर्मतत्त्यागयोर्मिथो विरोधान्न समुच्चित्यानुष्ठानं सावकाशमित्यर्थः। भवतु तर्हि यस्य कस्यचिदन्यतरस्यानुष्ठेयत्वमिति कुत उक्ताभिप्रायेण प्रश्नप्रवृत्तिरित्याशङ्क्याह—** अन्यतरस्येति। **उभयप्राप्तौ समुच्चयानुपपत्तावन्यतरपरिग्रहे विशेषस्यान्वेष्यत्वादुक्ताभिप्रायेण प्रश्नोपपत्तिरित्यर्थः।**

भाष्यार्कप्रकाशः

त्वदुक्तविधोऽर्जुनस्याभिप्रायः, किन्तु भिन्नविधः। तमेवार्जुनाभिप्रायं दर्शयति— **पूर्वेति। प्राधान्यमन्तरेण** प्राधान्यज्ञानं विनेत्यर्थः। अनयोरिदं प्रधानमिति ज्ञात्वैव प्रधाने ज्ञानयोगे कर्ता प्रवर्तते। एवं प्रधानत्वादेव संन्यासः कर्तव्यतया भगवता चतुर्थाध्यायेऽभिहितः। नन्वेवं कर्मयोगात् कर्मसंन्यासः प्रधान इत्यभिहितप्राय एवेति पुनः प्रश्नोऽनुपपन्न इत्यत आह— **अनात्मविदपीति**। अज्ञः प्राज्ञो वा सर्वोऽपि जनः प्रधानमेवानुतिष्ठासति, न त्वप्रधानमिति कृत्वा प्रधाने कर्मसंन्यासे अज्ञोऽपि प्रवर्तेतैव। तस्य चाज्ञस्य किं संन्यासः श्रेयान् उत कर्मयोग इति युज्यते प्रश्नोऽर्जुनस्येति भावः। ननु 'ज्ञानयोगेन साङ्ख्याना'मिति प्राज्ञस्यैव संन्यासविधानात् कथमज्ञस्य पाक्षिक्यपि संन्यासे प्रवृत्तिः? अत आह— **न पुनरिति**। 'कर्मसंन्यासस्यात्मवित्कर्तृकत्वमेव विवक्षितमिति तु न' - एवं मन्वानस्यार्जुनस्य प्रश्नो नानुपपन्न इति सम्बन्धः। यदि भगवता कर्मसंन्यास आत्मविद्विषय एव, न त्वज्ञविषय इति विवक्षितम्, तर्हि 'न च

---

१. 'प्राधान्यमन्तरेण च कर्त्रा तस्य' इति रा.पा.। अत्र पाठे आनन्दगिरीयव्याख्याऽपि अविरुद्धैव। २. 'संन्यासपक्षे प्राप्तः' इति मु.पा.।

**प्रतिवचनवाक्यार्थनिरूपणेनापि प्रष्टुरभिप्राय एवमेवेति गम्यते। कथम्? 'संन्यासकर्मयोगौ निःश्रेयसकरौ, तयोस्तु कर्मयोगो विशिष्यते' इति प्रतिवचनम्। एतन्निरूप्यम् — किमनेनात्मवित्कर्तृकयोः संन्यासकर्मयोगयोः निश्रेयसकरत्वं प्रयोजनमुक्त्वा तयोरेव कुतश्चिद् विशेषात् कर्मसंन्यासात् कर्मयोगस्य विशिष्टत्वमुच्यते? आहोस्विद् अनात्मवित्कर्तृकयोः संन्यासकर्मयोगयोः तदुभयमुच्यते? इति। किञ्चातः, यद्यात्मवित्कर्तृकयोः कर्मसंन्यास-कर्मयोगयोर्निःश्रेयसकरत्वम् , तयोस्तु कर्मसंन्यासात् कर्मयोगस्य विशिष्टत्वमुच्यते; यदि वाऽनात्मवित्कर्तृकयोः संन्यासकर्मयोगयोस्तदुभयमुच्यत इति?**

अनुभूतिस्वरूपाचार्यटिप्पणम्

इतश्चाविद्वत्कर्तृकयोः संन्यासकर्मयोगयोः कतरः श्रेयानित्यर्जुनस्याभिप्राय इत्याह— **प्रतिवचनवाक्यार्थेति**। किं तत् प्रतिवचनम् , किं वा तन्निरूपणमित्याह— **कथमिति**। प्रतिवचनं निरूपणं च— **संन्यासेत्यादिना। तदुभयमिति**। श्रेयस्करत्वं, कर्मयोगस्य श्रेष्ठत्वं चेत्यर्थः। पूर्ववादे गुणदोषं [ पूर्ववादी गुणं दोषं] च पृच्छति— **किञ्चात इत्यादिना**।

आनन्दगिरिकृतव्याख्या

**इतश्चाविद्वत्कर्तृकयोः संन्यासकर्मयोगयोः कतरः श्रेयानिति प्रष्टुरभिप्रायो भातीत्याह—** प्रतिवचनेति। **किं तत् प्रतिवचनम् , कथं वा तन्निरूपणमिति पृच्छति—** कथमिति। **तत्र प्रतिवचनं दर्शयति—** संन्यासेति। **तन्निरूपणं कथयति—** एतदिति। तदुभयमिति **निःश्रेयसकरत्वं कर्मयोगस्य श्रेष्ठत्वं चेत्यर्थः। गुणदोषविभागविवेकार्थं पृच्छति—** किञ्चेति। अतोऽ**स्मिन्नाद्ये पक्षे किं दूषणम् , अस्मिन् वा द्वितीये पक्षे किं फलमिति प्रश्नार्थः।**

भाष्यार्कप्रकाशः

संन्यसनादेव सिद्धिं समधिगच्छती'ति ज्ञानहीनसंन्यासास्तित्वं कथं बोध्येत? न हि ज्ञानहीनसंन्यासस्यैवाभावे ततः सिद्धिर्नास्तीति वक्तुं शक्यते। तस्मात् संन्यासस्याप्यनात्मविद्विषयत्वमस्तीत्यर्जुनस्याभिप्रायः। युक्तं चेदम् ; विद्वत्संन्यासस्येव विविदिषासंन्यासस्यापि शास्त्रसिद्धत्वात्। विविदिषुर्विद्यासिद्ध्यर्थं यज्ञादिकर्मयोगमिव पक्षे संन्यासमपि कुर्यादेव। तस्मादनात्मविदपि संन्यासे कर्ता पक्षे प्राप्त एवेति कृत्वा 'किमज्ञस्य संन्यासः श्रेयानुत कर्मयोगः' इति प्रश्न उचित एवार्जुनस्य।

**ननु** संन्यासात् केवलात् सिद्धिर्नास्ति, 'कर्मणैव संसिद्धिमास्थिताः' इति च केवलसंन्यासात् कर्मयोगस्य प्राशस्त्यं प्रतिपादितमेवेति व्यर्थोऽयं प्रश्न इति चेत्? **मैवम्** ; संसिद्धिशब्दस्य चित्तशुद्ध्यर्थकत्वात् , सिद्धिशब्दस्य च मोक्षार्थकत्वात्। यथा केवलसंन्यासान्न मोक्षः, तथा कर्मयोगादपि नैव मोक्षः, यथा कर्मयोगाच्चित्तशुद्धिस्तथा केवलसंन्यासादपि स्यादेव चित्तशुद्धिः, अन्यथा विविदिषासंन्यासविधायकशास्त्रानर्थक्यप्रसङ्गात्। तस्मादज्ञकर्तृकयोः संन्यासकर्मयोगयोः समबलत्वमेव सिद्धमतीतग्रन्थे, न तु विषमबलत्वमिति कृत्वा तयोस्तारतम्यजिज्ञासया प्रश्नोऽयमुचित एवार्जुनस्य। न च - विस्तरेण बुभुत्सया पृष्टमिति स्ववचन-व्याघातस्तवेति - वाच्यम् ; प्रश्ने एकस्मिन्नप्यनेकाभिप्रायकल्पनस्य गुणत्वात्।

**ननु** परहृदयस्याप्रत्यक्षत्वात् कथं त्वया विदितोऽर्जुनस्याभिप्रायः? इत्यत आह— **प्रतिवचनेति**। किं तत् प्रतिवचनम् , कथं वा तन्निरूपणमिति पृच्छति— **कथमिति**। तत्र प्रतिवचनं दर्शयति— **संन्यासेति**। 'संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ। तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते॥' इति श्लोकरूपं प्रतिवचनमित्यर्थः। तन्निरूपणं कथयति— **एतदिति**। प्रतिवचनवाक्यम् **एत**च्छब्दार्थः। एतन्निरूप्यं वस्तु दर्शयिष्यामः, तथाहीति शेषः। **यद्वा** एषः अर्जुनाभिप्रायो निरूप्यो यस्य तद् एतन्निरूप्यमिति प्रतिवचनविशेषणम्। निरूपणप्रकारं दर्शयति— **किमनेनेत्यादिना**। अनेन प्रतिवचनेन कर्मयोगस्य विशिष्टत्वमुच्यते किमित्यन्वयः। **तदुभयमिति**। निःश्रेयसकरत्वं कर्मयोगस्य संन्यासाद् विशिष्टत्वं चेत्यर्थः। **विशिष्टत्वम्** उत्कृष्टत्वम्। गुणदोषविवेकार्थं पृच्छति— **किञ्चात इति**। यदि कर्मयोगस्य विशिष्टत्वमुच्येत, **अतः** अस्मिन् पक्षे, किम् , दूषणमिति शेषः। यदि वा संन्यासकर्मयोगयोः

**अत्रोच्यते— आत्मवित्कर्तृकयोः संन्यासकर्मयोगयोरसम्भवात् तयोर्निःश्रेयसकरत्ववचनम् , तदीयाच्च कर्मसंन्यासात् कर्मयोगस्य विशिष्टत्वाभिधानम् इत्येतदुभयमनुपपन्नम्। [1]यद्यात्मविदः कर्मसंन्यासस्तत्प्रतिकूलश्च कर्मानुष्ठानलक्षणः कर्मयोगः सम्भवेताम् , तदा तयोर्निःश्रेयसकरत्वोक्तिः, कर्मयोगस्य च कर्मसंन्यासाद् विशिष्टत्वाभिधानमित्येतदुभयमुपपद्येत। आत्मविदस्तु संन्यासकर्मयोगयोरसम्भवात् तयोर्निःश्रेयसकरत्वाभिधानम् , कर्मसंन्यासाच्च कर्मयोगो विशिष्यत इति चानुपपन्नम्।**

**अत्राह— किमात्मविदः संन्यासकर्मयोगयोरुभयोरप्यसम्भवः? आहोस्विदन्यतरस्यासम्भवः? यदा चान्यतरस्यासम्भवः, तदा किं कर्मसंन्यासस्य, उत कर्मयोगस्येति? असम्भवे कारणं च वक्तव्यमिति।**

**अत्रोच्यते— आत्मविदो निवृत्तमिथ्याज्ञानत्वाद् विपर्ययज्ञानमूलस्य कर्मयोगस्यासम्भवः स्यात्। जन्मादि -**

अनुभूतिस्वरूपाचार्यटिप्पणम्

आद्यपक्षे सिद्धान्ती दोषमाह— **अत्रोच्यत इत्यादिना**। असम्भवं व्यतिरेकमुखेन प्रपञ्चयति— **यद्यात्मविद इत्यादिना**। एकासम्भवेऽप्युभयासम्भवस्य सम्भवात् पृच्छति— **किमात्मविद इत्यादिना**।

सकारणं कर्मयोगस्यासम्भवमाह— **अत्रोच्यत इत्यादिना**। वस्तुसंग्रहवाक्यं विवृणोति— **जन्मादिसर्वविक्रिये-**

आनन्दगिरिकृतव्याख्या

**तत्र सिद्धान्ती प्रथमपक्षे दोषमादर्शयति—**अत्रेत्यादिना। **तदेवानुपपन्नत्वं व्यतिरेकद्वारा विवृणोति—**यदीत्यादिना। **निःश्रेयसकरत्वोक्तिरित्यत्र पारम्पर्येणेति द्रष्टव्यम्।** विशिष्टत्वाभिधानमिति। **प्रतियोगिनोऽसहायत्वादस्य च शुद्धिद्वारा ज्ञानार्थत्वादित्यर्थः।**

**आत्मज्ञस्य कर्मसंन्यासकर्मयोगयोरसंभवे दर्शिते चोदयति—** अत्राहेति। **चोदयिता निर्धारणार्थं विमृशति—** किमित्यादिना। **अन्यतरासम्भवेऽपि संदेहात् प्रश्नोऽवतरतीत्याह—** यदा चेति। **यस्य कस्यचिदन्यतरस्यासम्भवो भविष्यतीत्याशङ्क्य कारणमन्तरेणासम्भवो भवन् अतिप्रसङ्गी स्यादिति मन्वानः सन्नाह—** असम्भव इति। **आत्मविदः सकारणं कर्मयोगासम्भवं सिद्धान्ती दर्शयति—** अत्रेति। **संग्रहवाक्यं विवृण्वन्नात्मवित्त्वं विवृणोति—** जन्मादीति। **तस्य यदुक्तं निवृत्तमिथ्याज्ञानत्वम् , तदिदानीं व्यनक्ति—** सम्यगिति।

भाष्यार्कप्रकाशः

तदुभयमुच्येत, **अतः** अत्र पक्षे, **किं च** किं वा फलमिति प्रश्नार्थः। **इतिशब्दः** प्रश्नपरिसमाप्तौ।

सिद्धान्ती समाधानं वच्मीति प्रतिजानाति— **अत्रोच्यत इति। अत्र** शङ्कायामित्यर्थः। प्रश्ने इति वा। **तदीयाच्चेति।** आत्मवित्कर्तृकादित्यर्थः। ज्ञानसहितादिति यावत्। कर्मयोगकर्मसंन्यासयोरनात्मवित्कर्तृकत्वं यथा सम्भवति, तथा न सम्भवत्येव आत्मवित्कर्तृकत्वमिति कृत्वा प्रथमपक्षे अनुपपत्तिर्दूषणम् , द्वितीयपक्षे उपपत्तिः फलमिति भावः।

आत्मवित्कर्तृकयोः कर्मयोगकर्मसंन्यासयोरसम्भवं श्रुत्वा तदसहमानः पूर्वपक्षयति— **अत्राहेत्यादिना।** आहेत्यस्य पूर्वपक्षी इति कर्तुःशेषः। किमात्मवित्कर्तृकः संन्यासो नास्ति, यद्वा आत्मवित्कर्तृकः कर्मयोगो नास्तीति पूर्वपक्षस्य फलितार्थः।

उत्तरमाह— **अत्रोच्यत इत्यादिना।** आत्मवित्कर्तृकः संन्यासोऽस्त्येव, किन्तु कर्मयोगो नास्तीत्यर्थः। तत्र हेतुमाह— **आत्मविदो निवृत्तमिथ्याज्ञानत्वादिति। मिथ्याज्ञानम्** कर्ताऽहम् , ममेदं कर्मेत्याद्याकारकं भ्रमज्ञानम् , मिथ्याभूतमज्ञानमिति वा। आत्मविदः कर्मयोगासम्भवं प्रति मिथ्याज्ञाननिवृत्तेः कुतो हेतुत्वम्? अत आह— **विपर्ययेति।** कर्मयोगस्य विपर्ययज्ञानमूलत्वादित्यर्थः। मिथ्याज्ञानमूलः कर्मयोगः कथं पुनर्मिथ्याज्ञानरहितस्यात्मविदः सम्भवेदिति भावः। संग्रहवाक्यमेव विवृणोति— **जन्मादीति।** निष्क्रियमात्मानमात्मत्वेन यो वेत्ति, तस्यात्मविदः कर्मयोगस्याभावः प्रतिपाद्यत इति सम्बन्धः। आत्मनो निष्क्रियत्वे हेतुमाह— **जन्मादीति।** आदिपदात् सत्तावृद्ध्यादिभावविकारपञ्चकग्रहणम्। लोके सविक्रियस्यैव वस्तुनः सक्रियत्वदर्शनात् निर्विकार-

१. 'यद्यनात्मविदः' इति मु. पा.।

**सर्वविक्रियारहितत्वेन निष्क्रियमात्मानम् आत्मत्वेन यो वेत्ति, तस्यात्मविदः सम्यग्दर्शनेनापास्तमिथ्याज्ञानस्य निष्क्रियात्मस्वरूपावस्थानलक्षणं सर्वकर्मसंन्यासमुक्त्वा, तद्विपरीतस्य मिथ्याज्ञानमूलकर्तृत्वाभिमानपुरःसरस्य सक्रियात्मस्वरूपावस्थानरूपस्य कर्मयोगस्य इह [1]शास्त्रे तत्र तत्रात्मस्वरूपनिरूपणप्रदेशेषु सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधाद् अभावः प्रतिपाद्यते यस्मात् तस्मादात्मविदो निवृत्तमिथ्याज्ञानस्य विपर्ययज्ञानमूलः कर्मयोगो**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**त्यादिना**। सर्वकर्मसंन्यासमुक्त्वा तद्विपरीतस्य कर्मयोगस्याभावः प्रतिपाद्यत इत्यन्वयः।

आनन्दगिरिकृतव्याख्या

विपर्ययज्ञानमूलस्ये**त्यादिनोक्तं प्रपञ्चयति—** निष्क्रियेति। **यथोक्तसंन्यासमुक्त्वा ततो विपरीतस्य कर्मयोगस्याभावः प्रतिपाद्यत इति सम्बन्धः। वैपरीत्यं स्फोरयन् कर्मयोगमेव विशिनष्टि—** मिथ्याज्ञानेति। **मिथ्या च तदज्ञानं चेत्यनाद्यनिर्वाच्यमज्ञानम् , तन्मूलः 'अहं कर्ता' इत्यात्मनि कर्तृत्वाभिमानः, तज्जन्यस्येति यावत्। यथोक्तं संन्यासमुक्त्वा यथोक्तकर्मयोगस्यासम्भवप्रतिपादने हेतुमाह—** सम्यग्ज्ञानेति। **कुत्र तदभावप्रतिपादनम्? तदाह—** इहेति। **उक्तं हेतुं कृत्वा आत्मज्ञस्य कर्मयोगासम्भवे फलितमाह—** यस्मादिति।

भाष्यार्कप्रकाशः

स्यात्मनो निष्क्रियत्वमिति भावः। वैदिका योगिनश्च केचिन्निष्क्रियमात्मानमीश्वरत्वेन विदन्तीत्यत आह— **आत्मत्वेनेति**। एतेन आत्मेश्वरभेदवादिनोऽनात्मवित्त्वमेव, मिथ्याज्ञानवत्त्वादिति सिद्धम्। ननु स्वभिन्नस्येश्वरस्य कथमात्मत्वेन ग्रहणम्? अत आह— **आत्मानमिति**। ईश्वरो हि जीवस्यात्मैव, स्वरूपत्वात् , 'स आत्मा तत्त्वमसी'ति श्रुतेश्चेति भावः। आत्मविदोऽपि मिथ्याज्ञानं किं न स्याद्? अत आह— **सम्यगिति**। **सम्यग्दर्शनं** तत्त्वज्ञानम् 'निष्क्रियं सच्चिदानन्दं ब्रह्माहमस्मी'त्याकारकम् , तेन **अपास्तं** निरस्तं **मिथ्याज्ञानं** 'कर्ताऽहं ब्राह्मणः' इत्याद्याकारकमयथार्थज्ञानं, तन्मूलभूतमज्ञानं वा यस्य, तस्य तथोक्तस्य। नन्वेतादृशस्यात्मविदः कर्मसंन्यासोऽप्यनुपपन्न एवेत्यत आह— **सर्वकर्मसंन्यासमुक्त्वेति**। कस्मादस्य संन्यासः सम्भवतीत्यत आह— **निष्क्रियेति**। निष्क्रियो ह्यात्मा निष्क्रियात्मस्वरूपेणैव तिष्ठतीति कृत्वा तत्त्वविदो निष्क्रियात्मनः निष्क्रियात्मस्वरूपावस्थानलक्षणः कर्मसंन्यासः सम्भवत्येवेत्यर्थः। आत्मविदः कर्मसंन्यासस्येव कर्मयोगस्य कुतोऽसम्भवः? अत आह— **तद्विपर्यय[परीत]स्येति**। कर्मसंन्यासविपरीतत्वात् कर्मयोगस्यात्मवित्कर्तृकत्वाभाव इत्यर्थः। कस्माद् विपरीतत्वमस्येत्यत आह— **मिथ्येति**। मिथ्याभूतमज्ञानं तत्प्रयुक्तोऽध्यासो वा **मिथ्याज्ञानम्** , तदेव **मूलं** कारणं यस्य, स चासौ कर्तृत्वाभिमानः **पुरःसरः** पूर्वो यस्य तस्य। सम्यग्ज्ञानमिथ्याज्ञानयोः तन्मूलकनिष्क्रियात्माभिमानकर्तृत्वाभिमानयोश्च संन्यासकर्मयोगकारणयोः परस्परं विपरीतत्वात् संन्यासकर्मयोगयोश्च विपरीतत्वमिति भावः। न केवलं कारणद्वारैव, किन्तु स्वरूपतोऽपि तयोर्वैपरीत्यमित्याह— **सक्रियेति**। निष्क्रियात्मस्वरूपावस्थानात् सक्रियात्मस्वरूपावस्थानं विपरीतमित्यर्थः। आत्मविदः कर्मयोगस्याभावः क्व प्रतिपाद्यते? अत आह— **इहेति**। तदर्थमाह— **गीताशास्त्र इति**। गीताशास्त्रेऽपि कुत्र प्रतिपाद्यतेऽत आह— **तत्र तत्रेति**। तेषु तेष्वित्यर्थः। तच्छब्दार्थमाह— **आत्मेति**। आत्मविदः कर्मयोगस्याभावे किं कारणम्? अत आह— **सम्यगिति**। सम्यग्ज्ञानमिथ्याज्ञानयोः **तत्कार्ययोः** कर्मसंन्यासकर्मयोगयोश्च **विरोधात्** सहानवस्थानलक्षणविरोधात्। न हि विरुद्धधर्मयोः सामानाधिकरण्यं क्वापि सम्भवतीति भावः। **यद्वा** सम्यग्ज्ञानमिथ्याज्ञानयोः **तत्कार्ययो**र्भ्रमनिवृत्तिभ्रमसद्भावयोश्च मिथो विरोधात् कर्तृत्वादिभ्रममूलः कर्मयोगः निवृत्तभ्रमस्यात्मविदो न सम्भवतीति भावः। न चात्मवित्कर्तृकस्य कर्मयोगस्यैवासम्भवे कथं तत्त्वविदो जनकादेः कर्मसु प्रवृत्तिरिति वाच्यम् ; जनकादिकर्तृकयज्ञादिकर्मणः आत्मवित्संन्यासिकर्तृकभिक्षाटनादिवद् वासुदेवकर्तृकसृष्ट्यादिवच्च कर्मत्वाभावस्य प्रागेव प्रतिपादितत्वात्। उपसंहरति— **यस्मात् तस्मादिति**। यस्मादात्मविदः कर्मयोगस्याभावो गीताशास्त्रे प्रतिपाद्यते, तस्मादित्यर्थः। गीताशास्त्रे आत्मविदः कर्मयोगाभावप्रतिपादनं तच्छब्दार्थः।

१. 'गीताशास्त्रे' इति पा.।

**न सम्भवतीति युक्तमुक्तं स्यात्।**

**केषु केषु पुनरात्मस्वरूपनिरूपणप्रदेशेष्वात्मविदः कर्माभावः प्रतिपाद्यत इति? अत्रोच्यते— 'अविनाशि तु तद्विद्धि' (भ.गी.२.१७) इति प्रकृत्य 'य एनं वेत्ति हन्तारम्' (भ.गी.२.१९) 'वेदाविनाशिनं नित्यम्'(भ.गी.२.२१) इत्यादौ तत्र तत्रात्मविदः कर्माभाव उच्यते।**

**ननु च कर्मयोगोऽप्यात्मस्वरूपनिरूपणप्रदेशेषु तत्र तत्र प्रतिपाद्यत एव। तद्यथा— 'तस्माद् युध्यस्व भारत' (भ.गी.२.१८) 'स्वधर्ममपि चावेक्ष्य' (भ.गी.२.३१) 'कर्मण्येवाधिकारस्ते' (भ.गी.२.४७) इत्यादौ। अतश्च कथमात्मविदः कर्मयोगस्यासम्भवः स्यादिति? अत्रोच्यते— सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधात् , 'ज्ञानयोगेन सांख्यानाम्' (भ.गी.३.३) इत्यनेन सांख्यानामात्मतत्त्वविदाम् अनात्मवित्कर्तृककर्मयोगनिष्ठातो निष्क्रियात्मस्वरूपावस्थानलक्षणाया ज्ञानयोगनिष्ठायाः पृथक्करणात् , कृतकृत्यत्वेनात्मविदः प्रयोजनान्तराभावात् , 'तस्य कार्यं न**

अनुभूतिस्वरूपाचार्यटिप्पणम्

आत्मस्वरूपनिरूपणप्रदेशेषु संन्यासप्रतिपादनाच्चेदात्मविदः संन्यासः, तर्हि कर्मयोगोऽपि कस्मान्न सम्भवतीत्याह— **ननु च कर्मेति**। आत्मज्ञानसाधकत्वेनापि प्रकरणपाठोपपत्तौ ज्ञानादूर्ध्वं न्यायविरुद्धः कर्मयोगः कल्पयितुं न शक्यत इत्याह—**अत्रोच्यत इत्यादिना**। सम्यग्ज्ञानमिथ्याज्ञानयोस्तत्कार्ययोश्च भ्रमनिवृत्तिभ्रमसद्भावयोः परस्परविरोधात् कर्तृत्वादिभ्रममूलः कर्मयोगः सम्यग्ज्ञानादूर्ध्वं न सम्भवतीत्यर्थः। कर्मयोगासम्भवे हेत्वन्तराण्याह— **ज्ञानयोगेनेत्यादिना**। तदीयाच्च कर्मसंन्यासात् कर्मयोगस्य विशिष्टत्वाभिधानमित्यन्वयः।

आनन्दगिरिकृतव्याख्या

**'इह शास्त्रे तत्र तत्रे'त्यादावुक्तमेव व्यक्तीकर्तुं पृच्छति—** केषु केष्विति। **तानेव प्रदेशान् दर्शयति—** अत्रेति।

**आत्मस्वरूपनिरूपणप्रदेशेषु संन्यासप्रतिपादनाद् आत्मविदः संन्यासो विवक्षितश्चेत् , तर्हि कर्मयोगोऽपि तस्य कस्मान्न भवति, प्रकरणाविशेषादिति शङ्कते—**ननु चेति। **आत्मविद्याप्रकरणे कर्मयोगप्रतिपादनमुदाहरति—**तद्यथेति। **प्रकरणादात्मविदोऽपि कर्मयोगस्य सम्भवे फलितमाह—** अतश्चेति। **आत्मज्ञानोपायत्वेनापि प्रकरणपाठसिद्धौ ज्ञानादूर्ध्वं न्यायविरुद्धं कर्म कल्पयितुमशक्यमिति परिहरति —** अत्रोच्यत इति। **सम्यग्ज्ञानमिथ्याज्ञानयोः, तत्कार्ययोश्च भ्रमनिवृत्तिभ्रमसद्भावयोर्मिथो विरोधात् कर्तृत्वादिभ्रममूलं कर्म सम्यग्ज्ञानादूर्ध्वं न सम्भवतीत्यर्थः। आत्मज्ञस्य कर्मयोगासम्भवे हेत्वन्तरमाह—** ज्ञानयोगेनेति। **इतश्चात्मविदो ज्ञानादूर्ध्वं कर्मयोगो न युक्तिमानित्याह—** कृतकृत्यत्वेनेति। **ज्ञानवतो नास्ति कर्मेत्यत्र कारणान्तरमाह—** तस्येति। **तर्हि ज्ञानवता कर्मयोगस्य हेयत्ववद्**

भाष्यार्कप्रकाशः

तत्र तत्रेति पूर्वं सामान्येनोक्तत्वात् तद्विशेषबुभुत्सया पृच्छति कश्चित्— **केषु केष्विति। प्रतिपाद्यत इति** भगवतेति शेषः।

गीताशास्त्रे आत्मस्वरूपनिरूपणप्रदेशेषु आत्मविदः कर्माभाव एव प्रतिपादित इति नियन्तुं न शक्यते, कर्मयोगस्यापि प्रतिपादितत्वादिति शङ्कते— **ननु चेति**। कर्मयोगप्रतिपादनप्रकारमेव दर्शयति— **तद्यथेत्यादिना**। आत्मविदः कर्मयोगस्यासम्भवे पूर्वोक्तं हेतुं पुनरनुवदति हेत्वन्तरकथनार्थम्— **सम्यग्ज्ञानेति**। हेत्वन्तरमाह— **ज्ञानेति**। अनात्मवित्कर्तृककर्मयोगनिष्ठातः साङ्ख्यानां ज्ञानयोगनिष्ठायाः पृथक्करणादित्यन्वयः। **साङ्ख्यानां** साङ्ख्यकर्तृकाया इत्यर्थः। केन वाक्येन पृथक्करणम्? अत आह— **ज्ञानयोगेनेति**। ननु अनात्मवित्कर्तृककर्मयोगनिष्ठातः साङ्ख्यकर्तृकज्ञाननिष्ठायाः पृथक्करणेऽपि आत्मवित्कर्तृकसंन्यासस्य न पृथक्करणमित्यत आह— **आत्मतत्त्वविदामिति, निष्क्रियात्मस्वरूपावस्थानलक्षणाया इति च**। आत्मविद एव सांख्याः, सर्वकर्मसंन्यास एव ज्ञानयोगनिष्ठेति भावः। पुनरपि हेत्वन्तरमाह— **कृतकृत्यत्वेनेति**। आत्मविदः कर्मयोगसाध्यप्रयोजनान्तराभावात् कर्माभावः। प्रयोजनान्तराभावे

**विद्यते' (भ.गी.३.१७) इति कर्तव्यान्तराभाववचनाच्च 'न कर्मणामनारम्भात्' (भ.गी.३.४) 'संन्यासस्तु महाबाहो ! दुःखमाप्तुमयोगतः'(भ.गी.५.६) [१]इत्यादिना चात्मज्ञानाङ्गत्वेन कर्मयोगस्य विधानात् , 'योगारूढस्य तस्यैव शमः कारणमुच्यते'(भ.गी.६.३) इत्यनेन चोत्पन्नसम्यग्दर्शनस्य कर्मयोगाभाववचनात् ,'शारीरं केवलं कर्म कुर्वन् नाप्नोति किल्बिषम्'(भ.गी. ४.२१) इति च शरीरस्थितिकारणातिरिक्तस्य कर्मणो निवारणात् ,'नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्' (भ.गी.५.८) इत्यनेन च शरीरस्थितिमात्रप्रयुक्तेष्वपि दर्शनश्रवणादिकर्मसु आत्मयाथात्म्यविदः करोमीति प्रत्ययस्य समाहितचेतस्तया सदा अकर्तव्यत्वोपदेशाद् आत्मतत्त्वविदः सम्यग्दर्शनविरुद्धो मिथ्याज्ञान-**

आनन्दगिरिकृतव्याख्या

**जिज्ञासुनाऽपि तस्य त्याज्यत्वम् , ज्ञानप्राप्त्या तस्यापि पुरुषार्थसिद्धेरित्याशङ्क्य जिज्ञासोरस्ति कर्मयोगापेक्षेत्याह—** न कर्मणामिति। **स्वरूपोपकार्यङ्गमन्तरेणाङ्गिस्वरूपानिष्पत्तेः ज्ञानार्थिना कर्मयोगस्य शुद्ध्यादिद्वारा ज्ञानहेतोरादेयत्वमित्यर्थः। तर्हि ज्ञानवताऽपि ज्ञान-फलोपकारित्वेन कर्मयोगो मृग्यतामित्याशङ्क्याह—** योगारूढस्येति। **उत्पन्नसम्यग्ज्ञानस्य कर्माभावे शरीरस्थितिहेतोरपि कर्मणो ऽसम्भवान्न तस्य शरीरस्थितिः। तदस्थितौ च कुतो जीवन्मुक्तिः? तदभावे च कस्योपदेष्टृत्वम्?, उपदेशाभावे च कुतो ज्ञानोदयः स्याद्? इत्याशङ्क्याह—** शारीरमिति। **विदुषोऽपि शरीरस्थितिरास्थिता चेत् , तन्मात्रप्रयुक्तेषु दर्शनश्रवणादिषु कर्तृत्वाभिमानोऽपि स्यादित्याशङ्क्याह—** नैवेति। **तत्त्वविदित्यनेन च समाहितचेतस्तया करोमीति प्रत्ययस्य सदैवाकर्तव्यत्वोपदेशादिति सम्बन्धः। यत्तु विदुषः शरीरस्थितिनिमित्तकर्माभ्यनुज्ञाने तस्मिन् कर्तृत्वाभिमानोऽपि स्यादिति, तत्राह—** शरीरेति। **आत्मयाथात्म्यविदः तेष्वपि नाहं करोमीति प्रत्ययस्य 'नैव किञ्चित् करोमी'त्यादौ अकर्तृ[अकर्तव्य]त्वोपदेशात् न कर्तृत्वाभिमानसंभावनेत्यर्थः। यथोक्तोपदेशानुसंधाना-भावे विदुषोऽपि करोमीति स्वाभाविकप्रत्ययद्वारा कर्मयोगः स्यादित्याशङ्क्याह—** आत्मतत्त्वेति। **यद्यपि विद्वान् यथोक्तमुपदेशं कदाचिद् नानुसन्धत्ते, तथापि तत्त्वविद्याविरोधान्मिथ्याज्ञानं तन्निमित्तं कर्म वा तस्य सम्भावयितुमशक्यमित्यर्थः। आत्मवित्कर्तृकयोः संन्यास-कर्मयोगयोरयोगात् तयोः निश्रेयसकरत्वम् अन्यतरस्य विशिष्टत्वमित्येतदयुक्तमिति सिद्धत्वाद् द्वितीयं पक्षमङ्गीकरोति—** यस्मादि-

भाष्यार्कप्रकाशः

हेतुमाह— **कृतकृत्यत्वेनेति**। कृतं कृत्यं सर्वं येन स कृतकृत्यः, तद्भावेन, कर्तव्यशेषाभावेनेत्यर्थः। आत्मविदः कर्तव्यशेषाभावे प्रमाण-माह— **तस्येति**। आत्मवित् तच्छब्दार्थः। चकारेण कर्मयोगस्याकृतकृत्याज्ञविषयत्वं बोध्यते। अकृतकृत्याज्ञविषयत्वात् कर्मयोग-स्यात्मविदि असम्भव इति भावः। इतश्च पुनरात्मविदः कर्मासम्भव इत्याह— **नेति**। कर्मयोगस्यात्मज्ञानाङ्गत्वेन विधानात् प्रतिपन्नात्मज्ञानस्य कर्मयोगासम्भवः। केन वाक्येन तद्विधानम्? अत आह— **न कर्मणामित्यादि**। यथा अनात्मविदः कर्मयोगो विहितः, तथा आत्मविदः कर्मसंन्यासो विहितः इति आत्मविदः कर्मसंन्यासविधानाच्च कर्मासम्भव इत्याह— **उत्पन्नेति**। केन वाक्येनात्मविदः कर्माभाव उक्तः? इत्यत आह— **योगारूढस्येति**। कर्मसंन्यासविधानादित्यनुक्त्वा **कर्मयोगाभाववचनादि**ति वचनेन कर्मसंन्यासो न विधिः[विहितः], किन्तु स्वाभाविक एवेति गम्यते, निष्क्रियत्वादात्मन इति भावः। इतश्चात्मविदः कर्मासम्भव इत्याह— **शारीरमिति**। शरीरस्थितिमात्रफलकभिक्षाटनादिकर्मव्यतिरिक्तकर्मनिवारणाद् आत्मविदः कर्मयोगासम्भवः। ननु यद्यात्मविदो भिक्षाटनादिकर्म सम्भवति, तर्हि स कर्म्येव स्याद्? अत आह— **नैवेति**। समाहितचेतास्तत्त्ववित् संन्यासी शरीरस्थितिमात्रफलकेष्वपि दर्शनश्रवणादिकर्मसु 'अहं करोमी'ति कर्तृत्वाभिमानं न कुर्यादिति भगवदुपदेशादित्यर्थः। तत्त्ववित् संन्यासी पश्यन् शृण्वन्नपि 'नाहं करोमी'ति यस्माद् मन्यते, तस्मादयं कर्मी नैव भवति, कर्तृत्वाभिमानपुरःसरं कर्मकर्तुरेव कर्मित्वादिति भावः। आत्मतत्त्वविदः कर्मयोगः स्वप्नेऽपि सम्भावयितुं न शक्यत इत्यन्वयः। तत्र हेतुगर्भं विशेषणद्वयमाह— **सम्यगिति**। सम्यग्दर्शनविरुद्धत्वान्मिथ्याज्ञानहेतुकत्वाच्चेत्यर्थः। सम्यग्दर्शनेन कर्मयोगमूलमिथ्याज्ञानस्य बाधात् कर्मयोगस्य

१. 'इत्यादिवचनाच्च' इति पा.।

**हेतुकः कर्मयोगः स्वप्नेऽपि न सम्भावयितुं शक्यते यस्मात् तस्माद् अनात्मवित्कर्तृकयोरेव संन्यासकर्मयोगयोः निःश्रेयसकरत्ववचनम् ; तदीयाच्च कर्मसंन्यासात् पूर्वोक्तात्मवित्कर्तृकसर्वकर्मसंन्यासविलक्षणात् सत्येव कर्तृत्व-विज्ञाने कर्मैकदेशविषयाद् यमनियमादिसहितत्वेन च [१]दुरनुष्ठेयत्वात् सुकरत्वेन च कर्मयोगस्य विशिष्टत्वाभिधान-मित्येवं प्रतिवचनवाक्यार्थनिरूपणेनापि पूर्वोक्तः प्रष्टुरभिप्रायो निश्चीयत इति स्थितम्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ननु कर्मयोगेन शुद्धसत्त्वस्य पश्चाज्जायमानः संन्यासः कथमुत्कृष्टो न भवतीत्याशङ्क्याह— **पूर्वोक्तात्मविदिति**। वैलक्षण्यमेवाह— **सत्येव चेति**। स्वाश्रमविहितश्रवणादौ कर्तृत्वविज्ञाने सत्येव पूर्वाश्रमोपात्तकर्मैकदेशविषयात् संन्यासात् कर्मयोगस्य श्रेष्ठत्वाभिधानं 'नैतादृशं ब्राह्मणस्यास्ति वित्तम्' इत्यादिवचनविरुद्धमित्याशङ्क्याह— **यमनियमादीति**। प्रकृतं निगमयति— **एवमिति**।

आनन्दगिरिकृतव्याख्या

त्यादिना। **तदीयाच्च कर्मसंन्यासात् कर्मयोगस्य विशिष्टत्वाभिधानमिति सम्बन्धः। ननु कर्मयोगेन शुद्धबुद्धेः संन्यासो जायमानः तस्मादुत्कृष्यते, कथं तस्मात् कर्मयोगस्योत्कृष्टत्ववाचोयुक्तिर्युक्तेति? तत्राह—** पूर्वोक्तेति। **वैलक्षण्यमेव स्पष्टयति—** सत्येवेति। **स्वाश्रमविहितश्रवणादौ कर्तृत्वविज्ञाने सत्येव पूर्वाश्रमोपात्तकर्मैकदेशविषयसंन्यासात् कर्मयोगस्य श्रेयस्त्ववचनं 'नैतादृशं ब्राह्मणस्यास्ति वित्तम्' इत्यादिस्मृतिविरुद्धमित्याशङ्क्याह—** यमनियमादीति। **'आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवम्। प्रीतिः प्रसादो माधुर्यमक्रोधश्च यमा दश॥ दानमिज्या तपो ध्यानं स्वाध्यायोपस्थनिग्रहौ। व्रतोपवासौ मौनं च स्नानं च नियमा दश॥' इत्युक्तैर्यमनियमैः, अन्यैश्चाश्रमधर्मैर्विशिष्टत्वेनानुष्ठातुमशक्यत्वाद् उक्तसंन्यासात् कर्मयोगस्य विशिष्टत्वोक्तिर्युक्तेत्यर्थः। 'न हि कश्चिद्' इति न्यायेन कर्मयोगस्येतरापेक्षया सुकरत्वाच्च तस्य विशिष्टत्ववचनं श्लिष्टमित्याह—**सुकरत्वेन चेति। **प्रतिवचनवाक्यार्थालोचनात् सिद्धमर्थमुपसंहरति—** इत्येवमिति। **संन्यासकर्मयोगयोर्मिथोविरुद्धयोः समुच्चित्यानुष्ठातुमशक्ययोरन्यतरस्य कर्तव्यत्वे प्रशस्यतरस्य तद्भावात् , तद्भावस्य चानिर्धारितत्वात् , तन्निर्दिधारयिषया प्रश्नः स्यादिति प्रश्नवाक्यार्थपर्यालोचनया प्रष्टुरभिप्रायो यथा पूर्वमुपदिष्टः, तथा प्रतिवचनार्थनिरूपणेनापि तस्य निश्चितत्वात् प्रश्नोपपत्तिः सिद्धेत्यर्थः।**

भाष्यार्कप्रकाशः

तद्विरुद्धत्वमिति भावः। **तस्मादिति।** आत्मवित्कर्तृककर्मयोगासम्भवादित्यर्थः। **तदीयादिति।** अनात्मवित्कर्तृकादित्यर्थः। कर्म-संन्यासात् कर्मयोगस्य विशिष्टत्वाभिधानमित्यन्वयः। किमयम् अनात्मवित्कर्तृकः कर्मसंन्यास आत्मवित्कर्तृकसंन्यास[स]लक्षण इत्यत आह— **पूर्वोक्तेति।** ज्ञानसाहित्यराहित्याभ्यामुभयोर्वैलक्षण्यमिति भावः। भेदमेव दर्शयति— **सत्येवेति।** कर्तृत्वविज्ञाने सतीत्यन्वयः। अज्ञकर्तृकसंन्यासे कर्ताऽहमिति विपरीतज्ञानमस्ति, अहं भिक्षामटामि, पश्यामीत्याद्यभिमानसत्त्वादज्ञस्य। तत्त्ववित्कर्तृकसंन्यासे तु नैवं कर्तृत्वविज्ञानमस्ति, नाहं करोमीति तत्त्वविन्निश्चयादिति भावः। भेदान्तरमाह— **कर्मैकदेशविषयादिति।** कर्मण एकदेश एव विषयो यस्य सः कर्मैकदेशविषयः, तस्मात्। अज्ञो हि यज्ञयागादिकं कर्मैकदेशमेव संन्यस्तवान् , न तु सर्वं कर्म। अज्ञसंन्यासिनः दण्डतर्पणस्नानभिक्षाटनादिकर्मसत्त्वात् , तेषु च स्वाचरितेषु कर्मसु कर्तृत्वाभिमानसत्त्वात्। प्राज्ञकर्तृकसंन्यासस्तु सर्वकर्मविषय एवेति द्वयोर्भेद इति भावः। भेदान्तरमाह— **यमेति**। प्राज्ञकर्तृकसंन्यासस्य न यमनियमादिसापेक्षा, प्राज्ञस्याकर्तृत्वेन यमादिकर्तृत्वाभावादिति भावः। **यद्वा** अज्ञकर्तृकात् संन्यासादज्ञकर्तृकः कर्मयोगः कुतो भवति विशिष्टः? अत आह— **यमेति**। दुरनुष्ठेयात् स्वनुष्ठेयो हि विशिष्यते। 'आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवम्। प्रीतिः प्रसादो माधुर्यमक्रोधश्च यमा दश॥ दानमिज्या तपो ध्यानं स्वाध्यायोपस्थनिग्रहौ। व्रतोपवासौ मौनं च स्नानं च नियमा दश॥' आदिपदादासनादिग्रहणम्। **पूर्वोक्त इति।**

---

१. 'दुरनुष्ठेयात्' इति पा.।

आनन्दगिरिकृतव्याख्या

**ननु तृतीये यथोक्तप्रश्नस्य भगवता निर्णीतत्वान्नात्र प्रश्नप्रतिवचनयोः सावकाशत्वमित्याशङ्क्य विस्तरेणोक्तमेव सम्बन्धं पुनः**

भाष्यार्कप्रकाशः

अविद्वत्कर्तृकयोः कर्मानुष्ठानकर्मसंन्यासयोर्मध्ये किं श्रेय इत्येवंरूप इति भावः।

**ननु** आत्मवित्कर्तृकात् संन्यासाद् अनात्मवित्कर्तृकः कर्मयोगः श्रेयानिति भगवत्प्रतिवचनवाक्यार्थनिरूपणं सुकरमिति चेत्? **मैवम्** ; साक्षान्मोक्षहेतोः विद्वत्संन्यासात् परम्परया मोक्षहेतोरविद्वत्कर्मयोगस्य वैशिष्ट्यं स्वप्नेऽपि सम्भावयितुं न शक्यमिति हेतोः। एवंविधज्ञानेन फलाभावाच्च। प्रशस्यतरं हि कर्तव्यत्वार्थं जिज्ञासितम्। न ह्यात्मविदः प्रशस्यतरमपि कर्म सम्भवति। तस्माद् आत्मवित् पुरुषः निवृत्तमिथ्याज्ञानत्वात् कर्मयोगं नैवानुतिष्ठेत् , किन्तु संन्यासमेव विदध्यादिति न तत्र मया ज्ञातव्यः अंशोऽस्ति। किन्तु यस्त्वनात्मविन्मुमुक्षुः स कर्मयोगं कुर्याद्वा, उत कर्मसंन्यासम्? किं तदुभयोः प्रशस्यतरमिति जिज्ञासया पृच्छत्यर्जुन इति भावः।

**ननु** 'कर्मण्यकर्मे'त्यादिना यः कृष्णेन प्रोक्तः कर्मसंन्यासः स आत्मवित्कर्तृक एव, ज्ञानमार्गत्वात् तस्य। अतः कथं तस्यानात्मवित्कर्तृकत्वम्? येन अनात्मवित्कर्तृकसंन्यासकर्मयोगयोः प्रशस्यतरबुभुत्सा स्यादर्जुनस्येति चेत्? **मैवम्** ; यद्यपि कृष्णेन आत्मवित्कर्तृक एव संन्यास उक्तस्तथापि तत्रानात्मविदपि कर्ता पक्षे प्राप्त इति भाष्यकारैरुक्तत्वात् तस्यानात्मवित्कर्तृकत्वमप्यस्तीति।

अयमाशयः— कर्मसंन्यासे सम्यग्दर्शनाद्धेतोः यथा आत्मवित् कर्ता प्राप्तः, तथा कर्मफलानित्यत्वादिदर्शनप्रयुक्त-वैराग्यादिना अनात्मविदपि कर्ता पक्षे प्राप्त एव। न च - 'ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिना'मित्यात्मविदः संन्यासोऽनात्मविदः कर्मयोगश्च नियमितः कृष्णेनेति - वाच्यम् ; 'आत्मवित् संन्यासमेव कुर्यादि'ति आत्मविदः संन्यासस्य नियमितत्वेऽपि 'आत्मविदेव संन्यासं कुर्यादि'ति संन्यासस्यात्मवित्कर्तृकत्वस्यानियमितत्वात्। न च - एवं कर्मयोगस्याप्यनात्मवित्कर्तृकत्वं न नियमितमिति आत्मवित्कर्तृकत्वमपि कर्मयोगस्य सम्भवतीति - वाच्यम् ; सम्यग्दर्शनमिथ्याज्ञानतत्कार्यविरोधान्मिथ्याज्ञानमूलकर्मयोगस्य सम्यग्दर्शनवत्पुरुषकर्तृकत्वासम्भवात्। न चैवं सम्यग्दर्शनमूलस्य कर्मसंन्यासस्यापि कथं मिथ्याज्ञानवत्पुरुषकर्तृकत्वसम्भव इति वाच्यम् ; सर्वकर्मसंन्यासस्य सम्यग्दर्शनमूलकत्वेऽपि कर्मैकदेशविषयसंन्यासस्य अतन्मूलकत्वेनाज्ञकर्तृकत्वसम्भवात्।

न च - सर्वकर्मसंन्यास इति कर्मैकदेशसंन्यास इति च द्विविधसंन्याससद्भावे प्रमाणं न पश्याम इति - वाच्यम् ; भाष्यकारवचनस्यैव प्रमाणत्वात्। कुटीचकादेः कर्मैकदेशसद्भावस्य, परमहंसस्यावधूतस्य सर्वकर्माभावस्य च शास्त्रे दर्शनाच्च। न च प्रमाणसद्भावेऽप्युपपत्तिसद्भावो नेति वाच्यम् ; एकस्मिन्नपि संन्यासे ज्ञानसाहित्यराहित्याभ्यां दर्शितद्वैविध्योपपत्तेः। तस्मात् सर्वकर्मसंन्यासात्मके ज्ञानसहितसंन्यासे विषये आत्मविदेव कर्ता, कर्मैकदेशसंन्यासात्मके ज्ञानरहितसंन्यासे अनात्मविदेव कर्तेति कृत्वा संन्याससामान्ये आत्मविद इवानात्मविदोऽपि कर्तुः प्राप्तिरस्त्येव।

**ननु** 'कर्मयोगेन योगिना'मिति 'अनात्मवित् कर्मयोगमेव कुर्यादि'ति कृष्णेन नियमितत्वात् कथं तस्य संन्यासे पाक्षिक्यपि प्रवृत्तिरिति चेत्? **मैवम् ;** यमनियमादिपूर्वकध्यानयोगात्मककर्मयोगानुष्ठानयोग्यतासम्पादककर्मैकदेशसंन्यासस्यानात्मवित्कर्तृकस्य कर्मयोगोपायत्वेन कर्मयोगानतिरिक्तत्वात्। तस्माद् अनात्मवित् पुरुषः संन्यस्य ध्यानयोगमभ्यसेत् , असंन्यस्य यज्ञादिकं वा कुर्याद् इत्यज्ञस्य संन्यासे पाक्षिकप्रवृत्तिरस्त्येव। न चाविद्वत्कर्तृकसंन्याससद्भावे प्रमाणं नास्तीति वाच्यम् ; 'न च संन्यसनादेवे'ति भगवद्वाक्यस्यैव प्रमाणत्वादिति।

**ननु** -'कर्मण्यकर्मे'त्यादिना दर्शितं ज्ञानं कर्मयोगोपकारकमेव, न तु संन्यासविषयम् , 'तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिना ऽऽत्मनः। छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत॥' इत्यध्यायोपसंहारे कर्मानुष्ठानेऽपि संशयनिरासार्थं ज्ञानमावश्यकमिति प्रतिपादितम्। 'न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा। इति मां योऽभिजानाति कर्मभिर्न स बध्यते॥ एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः। कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम्॥' इति चोपक्रमे ज्ञानपूर्वकं कर्मानुष्ठेयमिति दर्शितम्। एवमुपक्रमोपसंहारैकरूप्यात् 'यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः। ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः॥ त्यक्त्वा

**'ज्यायसी चेत् कर्मणस्ते' (भ.गी.३.१) इत्यत्र ज्ञानकर्मणोः सहासम्भवे 'यच्छ्रेय एतयोस्तन्मे ब्रूहि' इत्येवं**

अनुभूतिस्वरूपाचार्यटिप्पणम्

विस्तरेणोक्तं सम्बन्धं पुनः सङ्क्षेपेणाह— **ज्यायसी चेदित्यादिना**। निर्णीतत्वात् सांख्ययोगयोर्न पुनः प्रश्नयोग्यत्व-

आनन्दगिरिकृतव्याख्या

**संक्षेपतो दर्शयति—** ज्यायसी चेदिति। **सांख्ययोगयोर्भिन्नपुरुषानुष्ठेयत्वेन निर्णीतत्वान्न पुनः प्रश्नयोग्यत्वमित्यर्थः। इतोऽपि न तयोः**

भाष्यार्कप्रकाशः

कर्मफलासङ्गं नित्यतृप्तो निराश्रयः। कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः॥' 'यज्ञायाचरतः कर्म समग्रं प्रविलीयते।' 'ज्ञानाग्निः सर्वकमाणि भस्मसात्कुरुतेऽर्जुन' इति च मध्येऽपि ज्ञानपूर्वकं कर्मानुष्ठानस्य दर्शितत्वाच्च। आत्मवित्कर्तृकः कर्मयोगः सम्भवत्येव। वाक्यान्तरैरात्मविदः संन्यासोऽपि दर्शितः। अत एव 'संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससी'त्युक्तमर्जुनेन। तथा च आत्मवित्कर्तृककर्मयोगसंन्यासयोस्तारतम्यबुभुत्सयैवायं प्रश्नोऽर्जुनस्येति युक्ततरम्। किञ्चाज्ञस्य कर्मसम्भवे सत्यपि विशिष्टकर्मयोगो न सम्भवति, कर्मयोगो हि कर्मसु फलाभिसन्ध्यादिपरित्यागप्रयुक्तः। स च त्याग आत्मज्ञानं विना नैव सम्भवति। अत एव हि 'त्यक्त्वा कर्मफलासङ्ग'मिति श्लोकस्य प्रवृत्तिमार्गस्थात्मविद्विषयत्वं व्याख्यातं भाष्यकारैरपि। 'ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षती'ति भगवत्प्रतिवचनादपि कर्मयोगस्यात्मवित्कर्तृकत्वमेव निश्चीयते। न हि ज्ञानं विना रागद्वेषक्षयः स्यात्। तस्मादात्मवित्कर्तृकयोरेव संन्यासकर्मयोगयोस्तारतम्यबुभुत्सया कृतोऽयं प्रश्नोऽर्जुनेनेति **रामानुजादयः**।

**अत्रोच्यते—** यज्ज्ञानं कर्मयोगस्योपकारकम् , यत्तु ज्ञानं कर्मसंन्यासस्य, तदुभयं विविच्य त्वं न वेत्सि, येनेयमाशङ्काऽऽसीत् तव। 'आत्मा नित्यः, ईश्वरार्थमहं कर्म करोमि, मा भून्मम क्षयिष्णु स्वर्गादिफलम् , इन्द्रियाणां विषयप्रावण्यं मया वारणीयम् , मनश्च स्ववशे स्थापयितव्यम् , शीतोष्णादिर्द्वन्द्वजातं सोढव्यम् , कर्मणः सिद्ध्यसिद्ध्योः समचित्तेन भाव्यम्' इत्यादिज्ञानं कर्मयोगस्योपकारकम्। कर्मसंन्यासस्य तु 'आत्माऽविक्रियोऽकर्ताऽभोक्ता सच्चिदानन्दब्रह्मरूपः, कर्माणि देहाद्याश्रयाण्येव' इत्यादिज्ञानम्। इदमेव सम्यग्दर्शनमित्युच्यते। यस्यैतज्ज्ञानं स एव आत्मविदित्युच्यते। अत आत्मवित्कर्तृकस्य कर्मयोगस्यासम्भव एव। यस्तु आत्मवित्कर्तृकः कर्मयोगो दर्शितः— 'त्यक्त्वा कर्मफलासङ्गम्' इत्यादिना, स न कर्मयोगः, किन्त्वकर्मैव, लोकसंग्रहार्थत्वात् , निरभिमानपूर्वकत्वाच्च तस्येति बहुशः प्रपञ्चितम्।

**यत्तु** ज्ञानासिना संशयं छित्वा योगमातिष्ठेत्युक्तं ज्ञानम् , **तद्धि** नात्मज्ञानम् , किन्तु शोकमोहादिदोषज्ञानमेव। तच्च कर्मयोगस्योपकारकम्। तथैव दर्शितं भाष्यकृद्भिः— शोकमोहादिदोषसम्यग्दर्शनमिति[१]। न त्वात्मदर्शनमित्युक्तम्। **अथवा** तत्त्वविदा मया लोकसंग्रहार्थं कर्म कर्तव्यं वा न वेत्याकारकं संशयं छित्त्वा जनकादिदृष्टान्तेन कर्म कुरु इति तदर्थः। तथा च ज्ञानं नाम तत्र 'लोकसंग्रहार्थं विदुषाऽपि कर्म कर्तव्यं मया क्षत्रियेणे'त्याकारकं बोध्यम्। **यद्वा** ज्ञानमात्मतत्त्वज्ञानमेवास्तु , संशयः— किमहं ब्रह्म उत नेत्याद्याकारक एवास्तु , तथापि न क्षतिः, लोकसंग्रहार्थं कर्मकर्तव्यत्वोपदेशात्।

सर्वथाऽपि कृतकृत्यस्याविक्रियब्रह्मरूपेणावस्थितस्य तत्त्वविदः कर्मासम्भव एव, किन्तु ब्रह्मरूपेणावस्थानलक्षणसर्वकर्मसंन्यासस्यैव सम्भव इति न कश्चिद् दोषः। न च - भगवता 'कर्मण्यकर्मे'त्यादिना ज्ञानिकर्तृक एव संन्यासोऽभिहितः, अर्जुनस्तु तदविदित्वा पप्रच्छेति - वाच्यम् ; तथा सति कृष्णेन मयोक्तः संन्यासो ज्ञानिकर्तृक एव, न त्वज्ञानिकर्तृकः, स तु कर्मयोगाद् विशिष्ट एव, यस्त्वज्ञानिकर्तृकः संन्यासः स तु कर्मयोगादपकृष्ट इत्येव प्रतिवचनं ब्रूयात्[२]। तस्मात् **शङ्करो**क्तमेवापङ्क्तम्।

संक्षेपविस्तराभ्यामुक्तोऽर्थो जिज्ञासोर्बुद्ध्यारूढो भवतीति न्यायाद् विस्तरेणोक्तमर्थं संक्षिप्याह— **ज्यायसी चेदिति। इत्यत्रेति।** गीताशास्त्रे तृतीयाध्याये इत्यर्थः। **सहासम्भव इति।** सहानुष्ठानासम्भव इत्यर्थः। युगपदेकपुरुषानुष्ठेयत्वासम्भव इति यावत्। **यच्छ्रेय इति।** 'तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुया'मिति पृष्टत्वादिति भावः। **निर्णयं चकारेति।** 'लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता

१. 'शोकमोहादिदोषहरं सम्यग्दर्शन'मिति भाष्ये पाठो दृश्यते। २. भगवानिति कर्तृपदमध्याहार्यम्।

**पृष्टेऽर्जुनेन भगवान् सांख्यानां संन्यासिनां ज्ञानयोगेन निष्ठा, पुनः कर्मयोगेन योगिनां निष्ठा प्रोक्तेति निर्णयं चकार। 'न च संन्यसनादेव केवलात् सिद्धिं समधिगच्छती'ति वचनाज्ज्ञानसहितस्य तस्य सिद्धिसाधनत्वमिष्टम् , कर्मयोगस्य च विधानात्। [१]ज्ञानरहितः संन्यासः श्रेयान् , किं वा कर्मयोगः श्रेयान्? इत्येतयोर्विशेषबुभुत्सयाऽर्जुन उवाच—** संन्यासमिति। संन्यासं **परित्यागं** कर्मणां **शास्त्रीयाणाम्** [२]**अनुष्ठानविशेषाणां** शंससि **प्रशंससि, कथयसीत्येतत्। पुनः** योगं **च तेषामेवानुष्ठानम् अवश्यकर्तव्यं शंससि। अतो मे कतरच्छ्रेयः इति संशयः— किं कर्मानुष्ठानं श्रेयः, किं वा**

अनुभूतिस्वरूपाचार्यटिप्पणम्

मित्यर्थः। इतश्च तयोः प्रश्नाविषयत्वमित्याह— **न च संन्यसनादेवेति**। एवकारविशेषणाद् ज्ञानसहितस्य संन्यासस्य सिद्धिसाधनत्वं भगवतोऽभिप्रेतम्। 'छित्त्वैनं संशयं योगमातिष्ठ' इति च कर्मयोगस्य विधानात् तस्यापि सिद्धिसाधनत्वमिष्टम्। ततो निर्णीतत्वात् प्रश्नः तद्विषयो नोपपद्यत इत्यर्थः। केन तर्ह्यभिप्रायेण प्रश्न इत्याकाङ्क्षायामाह—(ज्ञानरहितं च) **[ज्ञानरहित इति।]** ॥१॥

आनन्दगिरिकृतव्याख्या

**प्रश्नविषयत्वमित्याह—** न चेति। **एवकारविशेषणाज्ज्ञानसहितसंन्यासस्य सिद्धिसाधनत्वं भगवतोऽभिमतम् ; 'छित्त्वैनं संशयं योगमातिष्ठ' इति च कर्मयोगस्य विधानात् तस्यापि सिद्धिसाधनत्वमिष्टम् ; ततश्च निर्णीतत्वान्न प्रश्नस्तद्विषयः सिध्यतीत्यर्थः। केनाभिप्रायेण तर्हि प्रश्नः स्यादित्याशङ्क्य ज्ञानरहितसंन्यासात् कर्मयोगस्य प्रशस्यतरत्वबुभुत्सयेत्याह—** ज्ञानरहित इति। **प्रष्टुरभिप्रायमेवं प्रदर्श्य प्रश्नोपपत्तिमुक्त्वा प्रश्नमुत्थापयति—**संन्यासमिति। **तर्हि द्वयं त्वयाऽनुष्ठेयमित्याशङ्क्य , तदशक्तेरुक्तत्वात् प्रशस्यतरस्यानुष्ठानार्थं तदिदमिति निश्चित्य वक्तव्यमित्याह—** यच्छ्रेय इति। **काम्यानां प्रतिषिद्धानां च कर्मणां परित्यागो मयोच्यते, न सर्वेषामित्याशङ्क्य 'कर्मण्यकर्मे'त्यादौ [३]विशेषादर्शनान्मैवमित्याह—** शास्त्रीयाणामिति। **अस्तु तर्हि शास्त्रीयाशास्त्रीययोरशेषयोरपि कर्मणोः त्यागः? नेत्याह—** पुनरिति। **तर्हि कर्मत्यागः, तद्योगश्चेत्युभयमाहर्तव्यमित्याशङ्क्य विरोधान्मैवमित्यभिप्रेत्याह—** अत इति। **द्वयोरेकेनानुष्ठाना-**

भाष्यार्कप्रकाशः

मयाऽनघ। ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्॥' इति श्लोकेनेति भावः। सांख्ययोगयोर्भिन्नपुरुषानुष्ठेयत्वेन निर्णीतत्वान्नाद्य पुनः प्रश्नावकाश इत्यर्थः। हेत्वन्तरादपि नेत्याह— **न चेति। इष्टमिति**। अभिमतम् , भगवत इति शेषः। **कर्मयोगस्य चेति** । कर्मयोगस्य च सिद्धिसाधनत्वमिष्टमित्यन्वयः, सिद्धिसाधनत्वम् इष्टमिति पदद्वयस्यात्राप्यनुकर्षणात्। कस्मात् कर्मयोगस्य सिद्धिसाधनत्वमिष्टम्? अत आह— **विधानादिति**। 'छित्त्वैनं संशयं योगमातिष्ठे'ति कर्मयोगस्य भगवता विहितत्वात् , निरर्थकस्य च विध्ययोगादिति भावः। एवं ज्ञानसहितसंन्यासस्य कर्मयोगस्य च सिद्धिसाधनत्वस्य भगवदिष्टत्वान्नाद्य सांख्ययोगयोर्विशेषबुभुत्सया पुनः प्रश्नावकाश इत्यर्थः। तर्हि केनाभिप्रायेण प्रश्नोपपत्तिः? अत आह— **ज्ञानेति। ज्ञानरहित इति**। अज्ञकर्तृक इत्यर्थः। अज्ञस्य किं संन्यासः श्रेयान्? किं वा कर्मयोगः श्रेयान्? इत्यभिप्रायेणार्जुनप्रश्न उपपद्यत इत्यर्थः।

**संन्यासमिति**। हे कृष्ण! कर्मणां संन्यासम् , पुनः कर्मणां योगं च शंससि। एतयोर्यच्छ्रेयः सुनिश्चितं तदेकं मे ब्रूहीत्यन्वयः। काम्यानां निषिद्धानां च कर्मणां संन्यासं, [४]विहितानां कर्मणां योगं चाहं शंसामीति न व्याघात इत्यभिप्रेत्याह'[५]— **शास्त्रीयाणामिति।** शास्त्रेण विहितानां नित्यानां नैमित्तिकानां चेत्यर्थः। **अनुष्ठानविशेषाः** अग्निहोत्रादिक्रियाविशेषाः। शंसु स्तुताविति स्मरणात् स्तुतेरत्राभावात् कथनमात्रमेवाभिप्रेतमित्याह— **कथयसीत्येतदिति**। 'कर्मण्यकर्म यः पश्येदि'त्यादिनेति भावः। **योगं शंससीति।** 'योगमातिष्ठे'त्युक्तत्वादिति भावः। एवं कर्मसंन्यासकर्मानुष्ठानयोर्द्वयोरपि कर्तव्यत्वोपदेशादेकेन सह कर्तुमशक्यत्वाच्च 'किं मया

---

१. 'ज्ञानरहितस्य' इति पा.। २. 'अनुष्ठेयविशेषाणाम्' इति पा.। ३. 'विशेषदर्शनाद्' इति पा.। ४. शास्त्रेण विहितानां नित्यानां नैमित्तिकानां चेत्यर्थः। सर्वकर्मत्यागस्य कर्मानुष्ठानस्य च विरोधेऽपि काम्यनिषिद्धत्यागस्य नित्याद्यनुष्ठानस्य चाविरोधादिति भावः। ५. 'इत्यत आह' इति पाठः स्यात्।

**श्रीभगवानुवाच —**

**संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।**
**तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते॥ २॥**

**तद्धानमिति। प्रशस्यतरं चानुष्ठेयम्। अतश्च यत्** श्रेयः **प्रशस्यतरम्** एतयोः [१]**कर्मसंन्यासकर्मानुष्ठानयोः, यदनुष्ठानात् श्रेयोऽवाप्तिर्मम स्यादिति मन्यसे, तद्** एकम् **अन्यतरत् सहैकपुरुषानुष्ठेयत्वासम्भवाद् मे ब्रूहि** सुनिश्चितम् **अभिप्रेतं तवेति॥ १॥**

**स्वाभिप्रायमाचक्षाणो निर्णयाय श्रीभगवानुवाच—**संन्यास इति। संन्यासः **कर्मणां परित्यागः**, कर्मयोगश्च **तेषामनुष्ठानम् , तावुभावपि** निःश्रेयसकरौ **निःश्रेयसं मोक्षं कुर्वाते ज्ञानोत्पत्तिहेतुत्वेन। उभौ यद्यपि निःश्रेयसकरौ, तथापि** तयोस्तु **निःश्रेयसहेत्वोः कर्मसंन्यासात् केवलात् कर्मयोगो विशिष्यते - इति कर्मयोगं स्तौति॥ २॥**

आनन्दगिरिकृतव्याख्या

**योगस्योक्तत्वात् कर्तव्यत्वोक्तेश्च संशयो जायते। तमेव संशयं विशदयति—** किं कर्मेति। **प्रशस्यतरबुभुत्सा किमर्थेत्याशङ्क्याह—** प्रशस्यतरं चेति। **तस्यैवानुष्ठेयत्वे प्रश्नस्य सावकाशत्वमाह—** अतश्चेति। **तदेव प्रशस्यतरं विशिनष्टि—** यदनुष्ठानादिति। **तद्** एकम् **अन्यतरद् मे ब्रूहीति सम्बन्धः। उभयोरुक्तत्वे सति किमित्येकं वक्तव्यमिति नियुज्यते? तत्राह—** सहेति। **कर्मतत्त्यागयोर्मिथो विरोधादित्यर्थः॥ १॥**

**प्रश्नमेवमुत्थाप्य प्रतिवचनमुत्थापयति—** स्वाभिप्रायमिति। निर्णयाय **तद्वारेण परस्य संशयनिवृत्त्यर्थमित्यर्थः। एवं प्रश्ने प्रवृत्ते कर्मयोगस्य सौकर्यमभिप्रेत्य प्रशस्यतरत्वमभिधित्सुर्भगवान् प्रतिवचनं किमुक्तवानित्याशङ्क्याह—** संन्यास इति। **उभयोरपि तुल्यत्वशङ्कां वारयति—** तयोस्त्विति। **कथं तर्हि** [२]**ज्ञानस्यैव मोक्षोपायत्वं विवक्ष्यते? तत्राह—** ज्ञानोत्पत्तीति। **तर्हि द्वयोरपि प्रशस्यत्वमप्रशस्यत्वं वा तुल्यमित्याशङ्क्याह—** उभाविति। **ज्ञानसहायस्य कर्मसंन्यासस्य कर्मयोगापेक्षया विशिष्टत्वविवक्षया विशिनष्टि—** केवलादिति॥ २॥

भाष्यार्कप्रकाशः

कर्तव्य'मिति मम संशयो जात इत्याह— **अत इति।** किंशब्दाद् द्वयोर्निर्धारणे डतरच्प्रत्यये कतरदिति रूपं भवति। द्वयोर्मध्ये किं श्रेय इत्यर्थः। संशयमेवाभिनीय दर्शयति— **किमिति। तद्धानमिति।** कर्मत्याग इत्यर्थः। **श्रेय इति।** प्रशस्यस्य श्रादेशः। अतिशयेन प्रशस्यं श्रेयः। इदमेवाभिप्रेत्याह— **प्रशस्यतरमिति।** यद्यपि विहितत्वादुभयमपि प्रशस्यमेव, तथापि प्रशस्यतरबुभुत्सया पृच्छामीत्यर्थः। किं तव प्रशस्यतरज्ञानात् फलम्? तत्राह— **प्रशस्यतरं चानुष्ठेयमिति। अतश्चेति।** प्रशस्यतरस्यैवानुष्ठेयत्वादित्यर्थः। योगस्य प्रशस्यतरत्वं च श्रेयःप्रदत्वादेवेत्याह— **श्रेयोऽवाप्तिरिति।** निःश्रेयसप्राप्तिरित्यर्थः। योगद्वयमपि श्रेयोऽवापकत्वात् कर्तव्यमेवेत्यत्राह— **सहैकेति।** युगपदेकेन योगद्वयस्याप्यनुष्ठातुमशक्यत्वाद् नैकेनोभयं कर्तव्यमित्यर्थः। सर्वज्ञस्य तव यदभिप्रेतं तदेव मादृशेन कर्तव्यमित्याह— **तवेति॥ १॥**

**संन्यास इति।** [३]**केवलादिति।** ज्ञानसहितस्य संन्यासस्य साक्षान्मोक्षहेतुत्वेन कर्मयोगादुत्कृष्टत्वादिति भावः। **विशिष्यते** उत्कृष्टो भवति॥ २॥

**ज्ञेय इति।** यो दुःखं तद्धेतुं वा न द्वेष्टि, सुखं तद्धेतुं वा न काङ्क्षति, स नित्यसंन्यासीति ज्ञेयः। हे महाबाहो! हि निर्द्वन्द्वः पुरुषः

---

१. 'कर्मसंन्यासकर्मयोगयोः'इति पा.। २. 'तयोः' इति पा.। संन्यासकर्मयोगयोरुभयोः निःश्रेयसकरत्वे ज्ञानस्यैव मोक्षोपायत्वं श्रुत्यादिप्रसिद्धं कथमिति शङ्कां तयोः ज्ञानोत्पत्तिद्वारा निःश्रेयसकरत्वविवक्षया परिहरतीत्यर्थः। ३. ज्ञानरहितादित्यर्थः।

**ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति।**
**निर्द्वन्द्वो हि महाबाहो! सुखं बन्धात् प्रमुच्यते॥ ३॥**
**सांख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः।**
**एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्॥ ४॥**

**कस्मादित्याह—** ज्ञेय इति। ज्ञेयो **ज्ञातव्यः** स **कर्मयोगी नित्यसंन्यासीति, यो न द्वेष्टि** [१]**किञ्चित् न काङ्क्षति दुःखं सुखं, तत्साधनं च। एवंविधो यः, कर्मणि वर्तमानोऽपि स नित्यसंन्यासीति ज्ञातव्य इत्यर्थः।** निर्द्वन्द्वो **द्वन्द्ववर्जितो** हि **यस्माद् महाबाहो!** सुखं **बन्धाद् अनायासेन प्रमुच्यते॥ ३॥**

**संन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेययोर्विरुद्धयोः फलेऽपि विरोधो युक्तः, न तूभयोर्निःश्रेयसकरत्वमेवेति प्राप्त इदमुच्यते—** सांख्ययोगाविति। **सांख्ययोगौ** पृथग् **विरुद्धभिन्नफलौ बालाः प्रवदन्ति, न पण्डिताः। पण्डितास्तु ज्ञानिन एकं फलमविरुद्धमिच्छन्ति। कथम्? एकमपि सांख्ययोगयोः** सम्यगास्थितः **सम्यगनुष्ठितवानित्यर्थः। उभयोर्विन्दते फलम्। उभयोस्तदेव हि निःश्रेयसं फलम्। अतो न फले विरोधोऽस्ति।**

आनन्दगिरिकृतव्याख्या

**कर्म हि बन्धकारणं प्रसिद्धम्। तत् कथं निःश्रेयसकरं स्यादिति शङ्कते—** कस्मादिति। **अकर्त्रात्मविज्ञानात् प्रागपि सर्वदाऽसौ संन्यासी ज्ञेयः, यो रागद्वेषौ क्वचिदपि न करोतीत्याह—** इत्याहेति। **यथाऽननुष्ठीयमानानि कर्माणि संन्यासिनं न निबध्नन्ति, कृतानि च वैराग्येन्द्रियसंयमादिना निवर्तन्ते, तथैवानभिसंहितफलानि नित्यनैमित्तिकानि योगिनमपि न निबध्नन्ति, निवर्तयन्ति च सञ्चितं दुरितमित्यभिप्रेत्याह—** निर्द्वन्द्वो हीति। **कर्मयोगिनो नित्यसंन्यासित्वज्ञानम् अन्यथाज्ञानत्वान्मिथ्याज्ञानमित्याशङ्क्याह—** एवंविध इति। **कर्मिणोऽपि रागद्वेषाभावेन संन्यासित्वं ज्ञातुमुचितमित्यर्थः। रागद्वेषरहितस्यानायासेन बन्धप्रध्वंससिद्धेश्च युक्तं तस्य संन्यासित्वमित्याह—** निर्द्वन्द्व इति॥ ३॥

**यदुक्तं संन्यासकर्मयोगयोर्निःश्रेयसकरत्वम् , तदाक्षिपति—** संन्यासेति। **तत्रोत्तरत्वेनोत्तरश्लोकमवतारयति—** इति प्राप्त इति। **विवेकिनस्तर्हि कथं वदन्तीत्याकाङ्क्षायामाह—**एकमिति। संख्याम् **आत्मसमीक्षामर्हतीति** सांख्यः **संन्यासः,** योगस्तु **कर्मयोगः, तावुभावपि पृथगित्यस्यार्थमाह—**विरुद्धेति। **शास्त्रार्थे विवेकशून्यत्वं** बालत्वम्। **उत्तरार्धमवतारयितुं भूमिकां करोति—** पण्डितास्त्विति। **ज्ञानिनो योगिनश्चेति शेषः। द्वयोरविरुद्धफलत्वमेव प्रश्नपूर्वकं प्रकटयति—** कथमित्यादिना। **एकं साधनमनुष्ठितवतो द्वयोरपि फलं भवतीति विरुद्धमित्याशङ्क्याह—** उभयोरिति। **सांख्ययोगयोः संन्यासकर्मानुष्ठानयोस्तत्त्वज्ञानद्वारा निःश्रेयसफलत्वान्न विरुद्धफलत्वशङ्केत्यर्थः।**

भाष्यार्कप्रकाशः

सुखं बन्धात् प्रमुच्यते। **नित्यं** सदा संन्यासोऽस्यास्तीति नित्यसंन्यासी। प्रसिद्धस्तु न सर्वदा संन्यासी, किन्त्वाश्रमस्वीकारानन्तरमेवेति भावः। एवं कर्मयोगिनो नित्यसंन्यासित्वादेव संन्यासाद् योगो विशिष्यते इत्युक्तम्। एतेन कर्मयोगिनाऽपि संन्यासिनेव रागद्वेषादिद्वन्द्ववर्जितेन भाव्यमित्युपदेशः सूचितः। किं च सुखमित्यनेन च कर्मयोगस्य संन्यासाद् वैशिष्ट्यं सूचितम्। संन्यासे यमादीनां दुष्करत्वेन तस्य क्लेशावहत्वात्। **प्रमुच्यत इति।** परम्परयेति शेषः। ज्ञानोत्पत्तिद्वारेति यावत्॥ ३॥

**सांख्येति।** सांख्ययोगयोः शब्दतोऽर्थतश्च पार्थक्यसम्भवात् कथमपृथक्त्वम्? अत आह— **विरुद्धेति।** विरुद्धे अत एव भिन्ने फले ययोस्तौ तथोक्तौ। फलेऽभेदादपृथक्त्वमित्यर्थः।

१. 'किञ्चित् न काङ्क्षति दुःखसुखे, तत्साधने च' इति पा.।

## यत् सांख्यैः प्राप्यते स्थानं तद् योगैरपि गम्यते।
## एकं सांख्यं च योगं च यः पश्यति स पश्यति॥५॥

**ननु संन्यासकर्मयोगशब्देन प्रस्तुत्य सांख्ययोगयोः फलैकत्वं कथमिहाप्रकृतं ब्रवीति? नैष दोषः; यद्यपि अर्जुनेन संन्यासं कर्मयोगं च केवलमभिप्रेत्य प्रश्नः कृतः; भगवांस्तु तदपरित्यागेनैव स्वाभिप्रेतं च विशेषं संयोज्य शब्दान्तरवाच्यतया प्रतिवचनं ददौ— सांख्ययोगाविति। तावेव संन्यासकर्मयोगौ ज्ञानतदुपायसमबुद्धित्वादिसंयुक्तौ सांख्ययोगशब्दवाच्याविति भगवतो मतम्। अतो नाप्रकृतप्रक्रियेति॥४॥**

**एकस्यापि सम्यगनुष्ठानात् कथमुभयोः फलं विन्दत इत्युच्यते—** यदिति। **यत्** सांख्यैः **ज्ञाननिष्ठैः**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**स्वाभिप्रेतं च विशेषं संयोज्ये**त्युक्तम्। तमेव भगवतोऽभिप्रेतं दर्शयति— **तावेव संन्यासकर्मयोगाविति**॥४॥

आनन्दगिरिकृतव्याख्या

**सांख्ययोगयोरेकफलत्ववचनं प्रकरणाननुगुणमिति शङ्कते—** नन्विति। **अप्रकृतत्वमसिद्धमिति परिहरति—** नैष दोष इति। **'संन्यासं कर्मणाम्' इत्यादिना संन्यासं कर्मयोगं चाङ्गीकृत्य प्रश्ने, 'संन्यासः कर्मयोगश्च' इत्यादिना तथैव प्रतिवचने च, कथं सांख्ययोगयोरेकफलत्वमप्रकृतं न भवतीत्युच्यते? तत्राह—** यद्यपीति। **प्रतिवचनमपि तदनुरूपमेव भगवता निरूपितमिति विशेषानुपपत्तिरित्याशङ्क्याह—** भगवांस्त्विति। तदपरित्यागेनेत्यत्र **तत्पदेन प्रष्ट्रा प्रतिनिर्दिष्टौ कर्मसंन्यासकर्मयोगावुच्येते। सांख्ययोगाविति शब्दान्तरवाच्यतया तयोरेव संन्यासकर्मयोगयोरत्यागेन स्वाभिप्रेतं च विशेषं संयोज्य भगवान् प्रतिवचनं ददाविति योजना। यदुक्तं 'स्वाभिप्रेतं च विशेषं संयोज्य' इति, तदेतद् व्यक्तीकरोति—** तावेवेति। समबुद्धित्वादीत्यादिशब्देन **ज्ञानोपायभूतः शमादिरादीयते। प्रकृतयोरेव संन्यासकर्मयोगयोरुपादाने फलितमाह—** अत इति। **'सांख्ययोगा'वित्यादिश्लोकव्याख्यानसमाप्तिः** इति**शब्दार्थः॥४॥**

**प्रश्नपूर्वकं श्लोकान्तरमवतारयति—** एकस्यापीति। **केचिदेव तयोरेकफलत्वं पश्यन्तीत्याशङ्क्य , तेषामेव सम्यग्दर्शित्वम् ,**

भाष्यार्कप्रकाशः

ननु सांख्यशब्दस्य ज्ञानयोगाभिधायित्वात् प्रकृतसंन्यासस्य च ज्ञानहीनत्वात् कोऽयमप्रस्तुतप्रसङ्ग इति शङ्कते— **नन्विति।** अयमाशयः उत्तरपक्षस्य— यथा सांख्ययोगयोः साक्षात् क्रमेण च निःश्रेयससाधनत्वम् , तथा ज्ञानहीनसंन्यासकर्मयोगयोरपि परम्परया निःश्रेयससाधनत्वमेवेति नास्ति फलतो भेदस्तयोः, अनयोर्वा । य एव प्रकृतः संन्यासः स एव ज्ञानयुक्तो भवति सांख्यशब्दवाच्य इति न संन्यासादतिरिच्यते सांख्यम् , नापि योगात् कर्मयोग इति।

**ननु** अर्जुनेन संन्यासस्य ज्ञानहीनसंन्यासत्वेनाभिप्रेतत्वेऽपि कर्मयोगस्य न ज्ञानशून्यत्वेनाभिप्रेतत्वं वक्तुं शक्यम् , ज्ञानशून्यकर्मानुष्ठानस्य कर्मयोगशब्दवाच्यत्वाभावात् , फलाभिसन्ध्यादिपूर्वककर्मानुष्ठानस्य च संसारहेतुत्वेन निःश्रेयसफलाभावात् , तादृशकर्माचरणस्य ज्ञानहीनसंन्यासाद् विशिष्टत्वस्य वक्तुमयुक्तत्वाच्च। एवं सति केवलं कर्मयोगमभिप्रेत्यार्जुनेन प्रश्नः कृतः तदुपायसमत्वबुद्धित्वादियुक्तः स एव योगशब्दवाच्य इति च **भाष्यकारोक्त**मसङ्गतम् , 'ज्ञानोत्पत्तिहेतुत्वेन उभौ यद्यपि निःश्रेयसकरौ' इति स्ववचनव्याघातश्चेति चेत्? **मैवम् ;** कर्मयोगोऽत्र कर्मानुष्ठानम् ; स च फलसङ्गादिवर्जित एवेति चित्तशुद्धिहेतुत्वेन निःश्रेयसफलक एव। अयमेव कर्मयोगः 'सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते' इति समत्वबुद्धिशमादिविशेषयुक्तःसन् योगशब्दवाच्य इति॥४॥

**यदिति।** सांख्यम् आत्मतत्त्वज्ञानम् , तद् येषामस्ति ते **सांख्याः** ज्ञानिनः। ज्ञानस्य च वेदान्तश्रवणाद्यधीनत्वात् , तत्र च संन्यासिनामेवाधिकारादाह—**संन्यासिन[सिभिः] इति।** योगः समत्वादिलक्षणः एषामस्तीति योगिनः। अर्शआद्यजन्तौ द्वावपि शब्दौ।

**संन्यासिभिः प्राप्यते** स्थानं **मोक्षाख्यम् , तद्** योगैरपि, **ज्ञानप्राप्त्युपायत्वेनेश्वरे समर्प्य कर्माणि आत्मनः फलम् अनभिसन्धायानुतिष्ठन्ति ये, ते** योगाः **योगिनः, तैरपि परमार्थज्ञानसंन्यासप्राप्तिद्वारेण गम्यत इत्यभिप्रायः। अत एकं सांख्यं च योगं च यः पश्यति फलैकत्वात् , स** पश्यति **सम्यक् पश्यतीत्यर्थः॥५॥**[१]

**एवं तर्हि योगात् संन्यास एव विशिष्यते। कथं तर्हीदमुक्तम्— 'तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते'**

अनुभूतिस्वरूपाचार्यटिप्पणम्

प्रपञ्चः सर्वोऽप्यवस्तुभूतो मायामात्र एव; आत्मा तु अविक्रियः एकः परमार्थः सन्निति प्रत्ययो ज्ञानं **परमार्थज्ञान**मित्युच्यते॥५॥

तत्पूर्वं संन्यासद्वारेण यदि गृहस्थानां श्रेयःप्राप्तिः, तर्हि संन्यास एव श्रेयानिति पूर्वोक्तं विस्मृत्य चोदयति— **एवं**

आनन्दगिरिकृतव्याख्या

**नेतरेषामित्याह—**एकमिति। [२]**तिष्ठत्यस्मिन् न च्यवते पुनरिति व्युत्पत्तिमाश्रित्याह—** मोक्षाख्यमिति। **योगशब्दार्थमाह—** ज्ञानप्राप्तीति। **ये हि जिज्ञासवः सर्वाणि कर्माणि भगवत्प्रीत्यर्थत्वेन तेषां फलाभिलाषमकृत्वा, ज्ञानप्राप्तौ बुद्धिशुद्धिद्वारेणोपायत्वेनानुतिष्ठन्ति, तेऽत्र योगा विवक्ष्यन्ते। अच्प्रत्ययस्य मत्वर्थत्वं गृहीत्वोक्तम्—** योगिन इति। **'सर्वोऽपि द्वैतप्रपञ्चो न वस्तुभूतः, मायाविलासत्वात्। आत्मा त्वविक्रियोऽद्वितीयो वस्तुसन्' इति** [३]**प्रयोजकज्ञानं** परमार्थज्ञानम्। **तत्पूर्वकसंन्यासद्वारेण कर्मिभिरपि तदेव स्थानं प्राप्यमित्येकफलत्वं संन्यासकर्मयोगयोरविरुद्धमित्याह—** तैरपीति। **फलैकत्वे फलितमाह—** अत इति॥५॥

**यदि यथोक्तज्ञानपूर्वकसंन्यासद्वारा कर्मिणामपि श्रेयोऽवाप्तिरिष्टा, तर्हि संन्यासस्यैव श्रेयस्त्वं प्राप्तमिति चोदयति—** एवं तर्हीति।

भाष्यार्कप्रकाशः

**एवं तर्हीति।** सांख्यस्य साक्षान्मोक्षकारणत्वेन, योगस्य परम्परया मोक्षसाधनत्वेन चेति **एवं**शब्दार्थः। **तर्ही**ति शङ्कार्थः। **कथं तर्हि** कथं वा ज्ञानहीनात् संन्यासात् कर्मयोग एव विशिष्यते? सुकरत्वादप्रमादत्वाच्च। सांख्यशब्दवाच्याज्ज्ञानसहितसंन्यासात्तु कर्मयोगो न विशिष्यते, किन्तु निकृष्यत एवेत्यर्थः। कर्मसंन्यासात् कर्मयोगो विशिष्यत इत्यत्र केवलसंन्यासकर्मयोगौ मया विवक्षितौ त्वत्प्रश्नानुगुण्याय। इह तु सांख्ययोगशब्दाभ्यां ज्ञानसहितसंन्यासकर्मयोगौ विवक्षितौ। यद्यपीदं त्वया न पृष्टं तथापि पृष्टादधिकस्यैव वक्तव्यत्वात् प्रियशिष्याय गुरुणा त इदमप्युक्तम्।

ज्ञानसापेक्षः परमार्थसंन्यासः सांख्यशब्दार्थः। **स एव** परमार्थसंन्यास एव परमार्थयोगश्च भवति। एवं परमार्थतः संन्यास-योगयोः शब्दत एव भेदः, न त्वर्थतोऽपीति सिद्धम्। अथ यस्तु वैदिकः कर्मयोगः, स योग इति संन्यास इति चोपचर्यते, 'ज्ञेयः स नित्यसंन्यासी'त्युक्तत्वात् इति। एतेन 'एकं साङ्ख्यं च योगं च यः पश्यति स पश्यती'त्यस्य सांख्ययोगयोर्वस्तुत एकत्वादेकत्वज्ञानं सम्यग्ज्ञानमित्यर्थान्तरं च मूलस्य सिद्धम्।

**अत्रायं विवेकः**— संन्यासयोगौ पारमार्थिकापारमार्थिकत्वभेदेन प्रत्येकं द्विविधौ। आत्मवित्कर्तृकः पारमार्थिकसंन्यासः, अनात्मवित्कर्तृकस्त्वन्यः। आत्मवित्कर्तृको लोकसंग्रहार्थः पारमार्थिको योगः, अनात्मवित्कर्तृकश्चित्तशुद्ध्यर्थस्त्वन्यः। तत्र यः पारमार्थिकः संन्यासः स पारमार्थिकयोगान्न भिद्यते, संन्यासिन इव योगिनोऽपि कर्तृत्वाद्यभिमानराहित्येन तत्कर्मणोऽकर्म-त्वस्योक्तत्वात्। अनात्मवित्कर्तृकृतौ संन्यासयोगौ च न भिद्येते, उभयोरनुष्ठात्रोः कर्तृत्वाद्यभिमानस्य सत्त्वाद्, यज्ञादीनामिव यमादीनामपि कर्मत्वाच्च। अत एव कर्मयोगेऽस्यान्तर्भावः समाधियोगस्य केवलसंन्यासिविषयस्येति। **यद्वा** पारमार्थिको ज्ञानहीनश्चेति संन्यासो द्विविधः। समत्वादिबुद्धियुक्तः केवलश्चेति कर्मयोगो द्विविधः। तत्र पारमार्थिकसंन्यासः सांख्यम् , समत्वादिबुद्धियुक्तः कर्मयोगः परमार्थयोग इति॥५॥

---

१. रा.पाठे पञ्चमश्लोकसमाप्तिः 'कथं तादर्थ्य'मित्यतःप्राग् भवति। २. स्थानशब्दस्येत्यादिः। ३. परमार्थज्ञानप्रयोजकत्वात् इदं ज्ञानमिह परमार्थज्ञानशब्देनोक्तम्।

**संन्यासस्तु महाबाहो ! दुःखमाप्तुमयोगतः।**
**योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥६॥**

**इति? श्रृणु तत्र कारणम्। त्वया पृष्टं केवलं कर्मसंन्यासं कर्मयोगं चाभिप्रेत्य [१]तयोरन्यतरः कः श्रेयान्? (इति)। तदनुरूपं प्रतिवचनं मयोक्तम्— कर्मसंन्यासात् कर्मयोगो विशिष्यत इति, ज्ञानमनपेक्ष्य। ज्ञानापेक्षस्तु संन्यासः सांख्यमिति मयाऽभिप्रेतः। परमार्थयोगश्च स एव। यस्तु कर्मयोगो वैदिकः, स च तादर्थ्याद् योगः, संन्यास इति चोपचर्यते। कथं तादर्थ्यमित्युच्यते—** संन्यास इति। **संन्यासस्तु पारमार्थिकः, हे महाबाहो ! दुःखम्** आप्तुं **प्राप्तुम्** अयोगतो **योगेन विना।** योगयुक्तो **वैदिकेन कर्मयोगेनेश्वरसमर्पितरूपेण फलनिरपेक्षेण युक्तो** मुनिः **मननादीश्वरस्वरूपस्य मुनिः,** ब्रह्म **परमात्मज्ञाननिष्ठालक्षणत्वात् प्रकृतः संन्यासो ब्रह्मोच्यते— 'न्यास इति ब्रह्म, ब्रह्म[२] हि परः'(द्र.म.ना.उ.७८) इति श्रुतेः।** ब्रह्म **परमार्थसंन्यासं परमात्मज्ञाननिष्ठालक्षणं** नचिरेण **क्षिप्रमेव**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**तर्हीति**। पूर्वोक्तमेवाभिप्रायं स्मारयन् परिहरति— **श्रृणु तत्र कारणमित्यादिना** ॥६॥

आनन्दगिरिकृतव्याख्या

**संन्यासस्य श्रेष्ठत्वे कर्मयोगस्य [३]प्रशस्यत्ववचनमनुचितमित्याह—** कथं तर्हीति। **पूर्वोक्तमेवाभिप्रायं स्मारयन् परिहरति—** श्रृण्विति। **कर्मयोगस्य विशिष्टत्ववचनं** तत्रेति **परामृष्टम्। तदेव कारणं कथयति—** त्वयेत्यादिना। केवलं **विज्ञानरहितमिति यावत्।** तयोरन्यतरः कः श्रेयानिति। इति**शब्दोऽध्याहर्तव्यः। त्वदीयं प्रश्नमनुसृत्य तदनुगुणं प्रतिवचनं 'ज्ञानमनपेक्ष्य तद्रहितात् केवलादेव संन्यासाद् योगस्य विशिष्टत्व'मिति मयोक्तमित्याह—** तदनुरूपमिति। **ज्ञानापेक्षः संन्यासस्तर्हि कीदृगित्याशङ्क्याह—** ज्ञानेति। **तर्हि कर्मयोगे कथं योगशब्दः संन्यासशब्दो वा प्रयुज्यते? तत्राह—** यस्त्विति। तादर्थ्यात् **परमार्थज्ञानशेषत्वादिति यावत्। तदेव तादर्थ्यं प्रश्नपूर्वकं प्रसाधयति—** कथमित्यादिना। **कर्मानुष्ठानाभावे बुद्धिशुद्ध्यभावात् परमार्थसंन्यासस्य सम्यग्ज्ञानात्मनो न प्राप्तिरिति व्यतिरेकमुपन्यस्य, अन्वयमुपन्यस्यति—** योगेति। पारमार्थिकः **सम्यग्ज्ञानात्मकः। सामग्र्यभावे कार्यप्राप्तिरयुक्तेति मत्वाऽऽह—** दुःखमिति। **योगयुक्तत्वं व्याचष्टे—** वैदिकेनेति। ईश्वरस्वरूपस्य **सविशेषस्येति शेषः। ब्रह्मेति व्याख्येयं पदमुपादाय व्याचष्टे—** प्रकृत इति। **तत्र ब्रह्मशब्दप्रयोगे हेतुमाह—** परमात्मेति। **लक्षणशब्दो गमकविषयः। संन्यासे ब्रह्मशब्दप्रयोगे तैत्तिरीयकश्रुतिं प्रमाणयति—** न्यास इति। **कथं संन्यासे हिरण्यगर्भवाची ब्रह्मशब्दः प्रयुज्यते? द्वयोरपि परत्वाविशेषादित्याह—** ब्रह्म हीति। **ब्रह्मशब्दस्य संन्यासविषयत्वे फलितं वाक्यार्थ-**

भाष्यार्कप्रकाशः

**संन्यास इति**। हे महाबाहो! संन्यासस्तु अयोगत आप्तुं दुःखम्। योगयुक्तो मुनिरचिरेण ब्रह्माधिगच्छति। **दुःखमाप्तुमिति।** दुर्लभ इत्यर्थः। **मननाद्** ध्यानात्। ननु कथं योगिनोऽचिराद् ब्रह्मप्राप्तिर्ज्ञाननिष्ठया व्यवधानादित्यत आह— **ब्रह्म संन्यासमिति**। कथं पारमार्थिकस्यापि संन्यासस्य ब्रह्मशब्दवाच्यतेत्यत्र हेतुमाह—**परमात्मज्ञानलक्षणत्वादिति।** परमात्मज्ञानं लक्षणं स्वरूपं यस्य तत्त्वात्। परमात्मज्ञानलक्षणे संन्यासे परमात्मवाचिब्रह्मशब्दप्रयोग औपचारिक इति भावः।

एवं ब्रह्मशब्दस्य संन्यासे प्रयोगः श्रुतिसिद्ध इत्याह—**न्यास इति। ब्रह्म** ब्रह्मशब्दवाच्यः, **न्यासः** संन्यासः, **परः** सत्यादिसर्वसाधनोत्कृष्टः इति **ब्रह्मा** हिरण्यगर्भः **हि** यस्माद् , आहेति शेषः, तस्माद् न्यास एवावराणि तपांसि **अत्यरेचयद्** अतिचक्रामेत्यन्वयः। हिः प्रसिद्धाविति वा। ननु हिरण्यगर्भोक्त[त्व]मात्रेण कथं न्यासस्य सर्वातिशायित्वम्? अत आह— **परो हि ब्रह्मेति। हि** यस्माद् **ब्रह्मा** हिरण्यगर्भः **परः** सर्वोत्कृष्टः, आदिपुरुषत्वादिति भावः। **यद्वा** परः परमात्मरूप एव, न तु जीवः। यद्यप्यसौ हिरण्यगर्भो देहधारी,

१. 'तयोर्यच्छ्रेयस्तन्मे ब्रूहीति' इति पा.। २. भाष्ये 'इति ब्रह्मा ब्रह्मा हि' इति, टीकाप्रतीके च 'ब्रह्मा हीति' इति पा.। ३. 'प्रशस्तत्व' इति पा.।

अधिगच्छति **प्राप्नोति। अतो मयोक्तम्— 'कर्मयोगो विशिष्यते' इति॥ ६॥**

आनन्दगिरिकृतव्याख्या

**माह—** ब्रह्मेत्यादिना। **नद्याः स्रोतांसीव निम्नप्रवणानि, कर्मभिरतितरां परिपक्वकषायस्य करणानि सर्वतो व्यावृत्तानि निरस्ताशेषविशेष-कूटस्थप्रत्यगात्मान्वेषणप्रवणानि भवन्तीति। कर्मयोगस्य परमार्थसंन्यासप्राप्त्युपायत्वे फलितमाह—** अत इति॥ ६॥

भाष्यार्कप्रकाशः

तथापि पर इति वक्तुं शक्यते, तच्छिष्यत्वेन तत्समानज्ञानत्वात्। अत एव श्वेताश्वतरा आमनन्ति— 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति।

इयं श्रुतिस्तैत्तिरीयकविद्यारण्यभाष्ये 'न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मे'त्येव दृश्यते। 'न्यास एवोत्तमो मोक्षहेतुरिति ब्रह्मा हिरण्यगर्भो मन्यते' इत्येवं **विद्यारण्यै**र्व्याख्याता च। तद्रीत्या तु न्यासे ब्रह्मशब्दप्रयोगं प्रति प्रमाणतया नेयं श्रुतिरुदाहर्तव्या। किन्तु , 'मुक्तिहेतुत्वाच्चे'ति भाष्ये[१] पूरणीयम्। संन्यासो मुक्तिहेतुत्वाच्च ब्रह्मेत्युच्यते। मुक्तेर्ब्रह्मस्वरूपत्वात् तद्धेतौ तत्पदप्रयोग औपचारिकः। नेत्रानन्दश्चन्द्र इतिवदिति भावः। ननु कथं न्यासस्यैव मोक्षहेतुत्वम् , सत्यतपःशमदमादीनां सत्त्वादिति शङ्कायाम् , न्यास एक एव मोक्षहेतुर्नान्य इत्यत्र श्रुतिं पठति— **न्यास इति।** इति भाष्यं व्याख्येयम्।

श्रुतौ 'ब्रह्मा हि परः परो हि ब्रह्मे'ति द्विरुक्तिः 'तत्त्वमसि त्वं तदसी'तिवद् दार्ढ्यायेति कैश्चिदुच्यते। ब्रह्मा न्यासो मोक्षहेतुरिति मन्यते, स च परो हि परमात्मरूपो हि, परो हि परमात्मैव ब्रह्मा हिरण्यगर्भ इति वक्तुं शक्यते' इति **विद्यारण्यस्वामिनः।**

'तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयत्' इत्युत्तरवाक्यं श्रुतेः। **अवराणि** न्यासापेक्षया अल्पानि तपांसि सत्य-दमादीनि। सत्यादीनां साक्षान्मोक्षहेतुत्वाभावात् , स्वर्गादिक्षयिष्णुपुरुषार्थहेतुत्वाच्च तेभ्यो न्यासस्य साक्षान्मोक्षहेतोरुत्कर्ष इति भावः।

**अत इति।** योगस्य पारमार्थिकसंन्यासप्राप्त्युपायत्वादित्यर्थः।

**ननु** संन्यासोऽपि केवलस्तादृश एवेति कथं कर्मयोगस्य विशिष्टत्वमिति चेत् , **सत्यम्** , तथापि योगयुक्तस्य पारमार्थिकसंन्यासप्राप्तिरचिरेणैव भवेद् , अन्यस्य तु चिरेणेति केवलसंन्यासापेक्षया कर्मयोगस्य चित्तशुद्धिं प्रत्यन्तरङ्गसाधनत्वमिति भावः। केवलसंन्यासिनः विषयप्रवृत्तिस्वभावस्य मनसः प्राणायामादिना स्ववशीकरणं चिरकालसाध्यम् , योगिनस्तु कामादित्यागात् सुलभमिति गूढाभिसन्धिः।

अस्य श्लोकस्य योगयुक्तः पुमानचिरेणैव मुनिः संन्यासी भूत्वा ब्रह्म परमं पदमधिगच्छतीत्यप्यन्वयः सुवचः। योगादचिरादेव पारमार्थिकसंन्यासलाभस्ततो ब्रह्मप्राप्तिरित्यर्थः। न चिरेणेति नञर्थकनशब्देन सह समासः। न चिरेणेति पदद्वयमिति वा, चिरेण ब्रह्म नाधिगच्छति, किन्त्वचिरेणैवेत्यर्थः। अस्मिन् पक्षे चिरेणापि नाधिगच्छतीत्यपार्थप्रतीतिः स्यादिति समासपक्ष एवोचितः।

**ननु** अयोगतः संन्यासो दुर्लभ इत्यनेनैव योगतः संन्यासः सुलभ इति सिद्धत्वाद् व्यर्थं श्लोकस्योत्तरार्धमिति चेत्? **मैवम्** ; यस्माद् योगिनः संन्यासः सुलभस्तस्मादयोगतः संन्यासो दुर्लभ इति हेतुहेतुमद्भावस्य पूर्वोत्तरार्धयोर्विवक्षितत्वात्। अत एव अयोगत इत्यस्य 'योगेन विने'त्यर्थः उक्त आचार्यैर्न तु योगरहितस्येति। यस्मादयोगतः संन्यासो दुर्लभस्तस्माद् योगयुक्तः संन्यासं लभत इति वा हेतुहेतुमद्भावो बोध्यः। **ननु** योगयुक्त एव संन्यासमाप्नोति, न तु योगरहित इत्यनेन योगसाहित्यं संन्यासस्य सिद्धमिति चेत्? **मैवम्** ; कर्मानुष्ठानलक्षणयोगस्य कर्मसंन्यासलक्षणसंन्यासस्य च साहित्यासम्भवात् , तेजस्तिमिरवत्। न च - नायं कर्मत्यागलक्षणः संन्यासः, किन्तु पारमार्थिकः परमात्मज्ञानलक्षण इति - वाच्यम् ; परमात्मज्ञाननिष्ठालक्षणसंन्यासस्यैव सर्वकर्मत्यागरूपत्वात्। न ह्यज्ञः सर्वं कर्म त्यक्तुं शक्नुयात् , देहादितादात्म्याध्यासेन तस्य कर्ताऽहमिति विपरीतबुद्धिसत्त्वात्। तूष्णीं तिष्ठामीति विपरीत-बुद्धिविषयस्यापि तूष्णीम्भावस्य कर्मत्वस्य सिद्धान्तितत्वात्। तस्माद् येन योगो युक्तः स चित्तशुद्धिद्वारा ज्ञानं प्राप्य, योगं संन्यस्यैव पारमार्थिकसंन्यासमाप्नोतीति सर्वमनवद्यम्।

यत्तु **रामानुजः**— कर्मयोगयुक्तस्यात्मप्राप्तिः सुलभा, ज्ञानयोगयुक्तस्य तु कष्टसाध्येति, **तत्तुच्छम्** , आत्मप्राप्तिः किं मुक्तिरुत

१. भाष्ये परमात्मज्ञाननिष्ठालक्षणत्वात् इत्यस्यानन्तरं 'मुक्तिहेतुत्वाच्च' इति पूरणीयमित्यर्थः।

**योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः।**
**सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७॥**

**यदा पुनरयं सम्यग्दर्शनप्राप्त्युपायत्वेन—** योगेति। **योगेन युक्तो** योगयुक्तः विशुद्धात्मा **विशुद्धसत्त्वो** विजितात्मा **विजितदेहो, जितेन्द्रियश्च** सर्वभूतात्मभूतात्मा **सर्वेषां ब्रह्मादीनां स्तम्बपर्यन्तानां भूतानामात्मभूत आत्मा प्रत्यक्चेतनो यस्य स सर्वभूतात्मभूतात्मा। सम्यग्दर्शीत्यर्थः। स तत्रैवं वर्तमानो लोकसंग्रहाय कर्म कुर्वन्नपि** न लिप्यते **न कर्मभिर्बध्यत इत्यर्थः॥७॥**

आनन्दगिरिकृतव्याख्या

**ननु पारिव्राज्यं परिगृह्य श्रवणादि साधनमसकृदनुतिष्ठतो लब्धसम्यग्बोधस्यापि यथापूर्वं कर्माण्युपलभ्यन्ते; तानि च बन्धहेतवो भविष्यन्तीत्याशङ्क्य श्लोकान्तरमवतारयति—** यदा पुनरिति। **सम्यग्दर्शनप्राप्त्युपायत्वेन यदा पुनरयं पुरुषो योगयुक्तत्वादिविशेषणः सम्यग्दर्शी सम्पद्यते, तदा प्रातिभासिकीं प्रवृत्तिमनुसृत्य कुर्वन्नपि न लिप्यते इति योजना।** योगेन **नित्यनैमित्तिककर्मानुष्ठानेनेति यावत्। आदौ नित्याद्यनुष्ठानवतो रजस्तमोमलाभ्यामकलुषितं सत्त्वं सिध्यतीत्याह—**विशुद्धेति। **बुद्धिशुद्धौ कार्यकरणसङ्घातस्यापि स्वाधीनत्वं भवतीत्याह—** विजितेति। **तस्य यथोक्तविशेषणवतो जायते सम्यग्दर्शित्वमित्याह—** सर्वभूतेति। **सम्यग्दर्शिनस्तर्हि कर्मानुष्ठानं कुतस्त्यम्? तदनुष्ठाने वा कुतो बन्धविश्लेषसिद्धिरित्याशङ्क्याह—** स तत्रेति। **सम्यग्दर्शनं सप्तम्यर्थः॥७॥**

भाष्यार्कप्रकाशः

ज्ञानम्? नाद्यः, कर्मणा मुक्त्ययोगात्। आत्मप्राप्तेर्मुक्तित्वेन त्वयाऽनभ्युपेतत्वाच्च। द्वितीये, यदात्मज्ञानं कर्मयोगसुप्रापं तद्योगस्यैव ज्ञानयोगत्वेन कथं ज्ञानयोगदुष्प्रापत्वं ज्ञानस्य? न च - ज्ञानयोगगतं ज्ञानं परोक्षम्, कर्मयोगप्राप्यं त्वपरोक्षमिति - वाच्यम्; परोक्षज्ञानं विना अपरोक्षज्ञानालाभात्, तथापि ज्ञानयोगसुप्रापमेवापरोक्षज्ञानम्। कर्मयोगस्तु परोक्षज्ञानमुत्पाद्य तत एवापरोक्षं जनयेदिति बहिरङ्गसाधनमेवेत्यलम्॥ ६॥

**योगेति**। योगयुक्तः पुरुषः विशुद्धात्मा विजितात्मा जितेन्द्रियश्च भूत्वा सर्वभूतात्मभूतात्मा च भूत्वा कुर्वन्नपि न लिप्यते। योगिनो योगवशान्मनःशरीरेन्द्रियजयानन्तरमात्मतत्त्वज्ञानं जायते, स ततः कर्म कुर्वन्नपि न लिप्यत इत्यर्थः।

**सर्वभूतेति**। यः स्वस्यात्मा प्रत्यक्चेतनः स एव सर्वभूतानामप्यात्मेति यो मन्यते स सर्वभूतात्मभूतात्मेत्युच्यते। इदं च ज्ञानं ब्रह्मात्माभेदज्ञानाद् भवति, न त्वन्यथा। ततश्च अहं ब्रह्मास्मीति सम्यग्दर्शनवान् सर्वभूतात्मभूतात्मेत्युच्यत इत्यभिप्रेत्याह— **सम्यग्दर्शीत्यर्थ इति। तत्रैवेति**। सम्यग्दर्शन एवेत्यर्थः। कर्मबन्ध एव कर्मलेप इत्याह— **न कर्मभिर्बध्यत इति**। कुतोऽस्य कर्तुरलेप इत्यत आह— **न चेति**। परमार्थत आत्मनोऽकर्तृत्वान्नायमात्मवित् कर्ता भवति, आत्मविद् एवात्मत्वादिति भावः।

यत्तु **रामानुजः**— सर्वभूतेति विशेषणेन ज्ञानैककारतया सर्वात्मनां साम्यमुच्यत इति, **तत्तुच्छम्**, मूलकारानभिप्रेतत्वादस्यार्थस्य। यदि मूलकर्तुः सोऽभिप्रायस्तर्हि 'सर्वभूतात्मतुल्यात्मे'त्येव ब्रूयात्। किञ्च व्यर्थ एवायं सर्वात्मनां स्वरूपतौल्योपदेशः, सर्वदेहानां भौतिकत्वेन तुल्यत्वोपदेशवत्। नाप्यत्यन्तसाम्ये वक्तुं भेदोऽपि युज्यते, भेदकविशेषस्यैवाभावात्। यदि तूपाधितो भेद इति, तर्हि सिद्धमात्मैकत्वम्, घटाद्युपाधिभेदे सत्यप्याकाशैक्यवत्।

**किञ्च** यदिदमात्मनः आकारत्वेनोच्यते ज्ञानम्, किं तच्चैतन्यम् अथवा वृत्तिः? न द्वितीयः, तस्य मनोजन्यत्वात्। आद्ये, चैतन्यस्य सर्वविशेषविलयसाक्षित्वं सुषुप्त्याद्यनुभवसिद्धम्। तस्य च निर्विशेषपरिपूर्णापरिच्छिन्नचैतन्यस्य कथं भेदसिद्धिः, भेदकस्यैवाभावात्। अत एव हि 'एकमेवाद्वितीयं ब्रह्मे'त्युपदिश्यते श्रुत्या। तस्मादलं भेदवादेन भयहेतुना 'द्वितीयाद्वै भयं भवती'ति श्रुतेः॥७॥

**नैवेति**। तत्त्वविद् युक्तःसन् पश्यन्, शृण्वन्, स्पृशन्, जिघ्रन्, अश्नन्, गच्छन्, स्वपन्, श्वसन्, प्रलपन्, विसृजन्,

**नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्।**
**पश्यञ्शृण्वन् स्पृशञ्जिघ्रन्नश्नन् गच्छन् स्वपञ्श्वसन्॥८॥**
**प्रलपन् विसृजन् गृह्णन्नुन्मिषन् निमिषन्नपि।**
**इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥९॥**

**न चासौ परमार्थतः करोतीत्यतः—** नैवेति। **नैव किञ्चित् करोमीति** युक्तः **समाहितः सन्** मन्येत **चिन्तयेत्** तत्त्वविद् **आत्मनो याथात्म्यं तत्त्वं वेत्तीति तत्त्ववित्। परमार्थदर्शीत्यर्थः॥८॥**

**कदा कथं वा तत्त्वमवधारयन् मन्येतेत्युच्यते—** पश्यन्निति। **मन्येतेति पूर्वेण सम्बन्धः।** [1]**यस्यैवं तत्त्वविदः सर्वकार्यकरणचेष्टासु कर्मस्वकर्मैव पश्यतः सम्यग्दर्शिनः तस्य सर्वकर्मसंन्यास एवाधिकारः, कर्मणोऽभावदर्शनात्। न हि मृगतृष्णिकायामुदकबुद्ध्या पानाय प्रवृत्तः उदकाभावज्ञानेऽपि तत्रैव पानप्रयोजनाय प्रवर्तते॥९॥**

आनन्दगिरिकृतव्याख्या

**कर्माण्यङ्गीकृत्य तैरस्य विदुषो बन्धो नास्तीत्युक्तम् । इदानीं वस्तुतस्तस्य कर्माण्येव न सन्तीत्याह—** न चेति। **लोकदृष्ट्या विदुषोऽपि कर्माणि सन्तीत्याशङ्क्य स्वदृष्ट्या तदभावमभिप्रेत्याह—** नैवेति॥८॥

**सार्धं समनन्तरश्लोकमाकाङ्क्षापूर्वकमुत्थापयति—** कदेत्यादिना। **चक्षुरादिज्ञानेन्द्रियैर्वागादिकर्मेन्द्रियैः प्राणादिवायुभेदैरन्तः-करणचतुष्टयेन च तत्तच्चेष्टानिर्वर्तनावस्थायां तत्तदर्थेषु सर्वा प्रवृत्तिरिन्द्रियाणामेवेत्यनुसन्दधानो 'नैव किञ्चित् करोमी'ति विद्वान् प्रतिपद्येत इत्यर्थः। यथोक्तस्य विदुषो विध्यभावेऽपि विद्यासामर्थ्यात् प्रतिपत्तिकर्मभूतं कर्मसंन्यासं फलात्मकमभिलषति**[2]**—** यस्येति। **अज्ञस्येव विदुषोऽपि कर्मसु प्रवृत्तिसम्भवात् कुतः संन्यासेऽधिकारः स्यादित्याशङ्क्याह—** न हीति॥९॥

भाष्यार्कप्रकाशः

गृह्णन् , उन्मिषन् , निमिषन्नपि इन्द्रियाणि इन्द्रियार्थेषु वर्तन्त इति धारयन् सन् 'अहं किञ्चिन्न करोम्येव' इति मन्येत इति श्लोकद्वयान्वयः। दर्शनं चक्षुरिन्द्रियकर्म, न त्वात्मनः। श्रवणं श्रोत्रेन्द्रियकर्म, स्पर्शनं त्वगिन्द्रियस्य कर्म, घ्राणं घ्राणेन्द्रियस्य कर्म, अशनं वक्त्रस्य, गमनं पादस्य, स्वपनमन्तःकरणस्य, अन्तःकरणोपरमस्यैव स्वापत्वात् , श्वसनं प्राणवायोः, प्रलपनं वागिन्द्रियस्य, विसर्जनं पायोः, ग्रहणं हस्तयोः, उन्मेषनिमेषौ पक्ष्मणोः- इति विवेकः॥८॥

इन्द्रियार्था विषया दर्शनादयः रूपादयो वा। **कर्मस्वकर्मैव पश्यत इति।** 'कर्मण्यकर्म यः पश्येदि'त्युक्तरीत्येति भावः। सम्यग् यथावदात्मानं पश्यतीति सम्यग्दर्शी, तस्य। कुतोऽस्य कर्मस्वनधिकार इत्यत आह— **कर्मण इति।** तत्त्वविद्दृष्ट्या कर्मणामभावादेव कर्मस्वनधिकार इत्यर्थः। तत्रैव दृष्टान्तमाह— **यथेति।** मृगतृष्णिकायामुदकमिवात्मनि कर्म अज्ञानवशात् प्रतीतम्। ततस्तत्राज्ञः प्रवर्तते। यस्तु मृगतृष्णिकायामुदकाभावमिव आत्मनि कर्माभावं वेत्ति, स कथं तत्र प्रवर्तेत? न कथमपीत्यर्थः। एतेन यः 'अहङ्करोमी'ति मन्यते, तस्यैव कर्माधिकार इति सिद्धम्।

**ननु** दर्शनादिकर्माणि कुर्वन्नपि न करोमीति यो मन्यते, स हि मिथ्याज्ञानीति चेत्? **मैवम्** ; यथोक्तदर्श्येवायम् , आत्मदृष्ट्या कर्माभावात् , यानि कर्माणि कुर्वन्ति तेषां देहेन्द्रियादीनामनात्मत्वाच्च।

**ननु** तर्हि कथं पश्यन्नित्यादिकमुक्तमिति चेत्? लोकदृष्ट्येति विद्धि। लोकदृष्ट्या कर्माणि कुर्वन्निव प्रतीयमानोऽपि वस्तुतो न करोतीत्यर्थः। उक्तं हि **विश्वामित्रेणाध्यात्मरामायणे—** 'रामो न गच्छति न तिष्ठति नानुशोचत्याकाङ्क्षते त्यजति नो न करोति किञ्चित्।

---

१. 'तस्यैवं तत्त्वविदः सर्वकार्यकरणचेष्टासु कर्मस्वकर्मैव पश्यतः सम्यग्दर्शिनः सर्वकर्मसंन्यास एवाधिकारः' इति पा.। २. 'अभिलपति' इति पा.।

**ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।**
**लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥ १०॥**
**कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।**
**योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये॥ ११॥**

**यस्तु पुनरतत्त्ववित् प्रवृत्तश्च कर्मयोगे—** ब्रह्मणीति। ब्रह्मणि **ईश्वरे** आधाय **निक्षिप्य तदर्थं कर्म करोमीति, भृत्य इव स्वाम्यर्थम् , सर्वाणि कर्माणि मोक्षेऽपि फले सङ्गं त्यक्त्वा करोति यः सर्वकर्माणि,** लिप्यते न **स पापेन न सम्बध्यते, पद्मपत्रमिव** अम्भसा **उदकेन॥ १०॥**

[1]**केवलं सत्त्वशुद्धिमात्रफलमेव तस्य कर्मणः स्यात् । यस्मात्—** कायेनेति। कायेन **देहेन मनसा बुद्ध्या च** केवलैः **ममत्ववर्जितैः 'ईश्वरायैव कर्म करोमि, न मम फलाय' इति ममत्वबुद्धिशून्यैरिन्द्रियैरपि। केवलशब्दः कायादिभिरपि प्रत्येकं सम्बध्यते सर्वव्यापारेषु ममतावर्जनाय।** योगिनः **कर्मिणः कर्म कुर्वन्ति सङ्गं त्यक्त्वा फलविषयम्** आत्मशुद्धये **सत्त्वशुद्धय इत्यर्थः। तस्मात् तत्रैव तवाधिकार इति कुरु कर्मैव॥ ११॥**

आनन्दगिरिकृतव्याख्या

**तर्हि विद्वानिवाविद्वानपि कर्मणि न प्रवर्तेत, पापोपहतिसम्भवादित्याशङ्क्याह—** यस्त्विति। **यथा भृत्यः स्वाम्यर्थं कर्माणि करोति, न स्वफलमपेक्षते, तथैव योऽविद्वान् मोक्षेऽपि सङ्गं त्यक्त्वा भगवदर्थमेव सर्वाणि कर्माणि करोति, न स** [2]**कर्मणा बध्यते। न हि पद्मपत्रमम्भसा सम्बध्यते, तद्वदित्यर्थः॥ १०॥**

**अविदुषस्तर्हि कृतेन कर्मणा किं स्यादित्याशङ्क्याह—** केवलमिति। **अज्ञस्येश्वरार्पणबुद्ध्याऽनुष्ठितं कर्म बुद्धिशुद्धिफलमित्यत्रैव हेतुमाह—** यस्मादिति। **केवलशब्दस्य प्रत्येकं सम्बन्धे प्रयोजनमाह—** सर्वव्यापारेष्विति। **कर्मणश्चित्तशुद्धिफलत्वे तादर्थ्येन कर्मानुष्ठान-**

भाष्यार्कप्रकाशः

आनन्दमूर्तिरचलः परिणामहीनो मायागुणाननुगतो हि तथा विभाति' इति। न च परमात्मविषयं तदिति वाच्यम् ; आत्मत्वात् परमात्मनः। न आत्मनोऽन्यः कश्चित् परमात्मा नामास्ति, 'एकमेवाद्वितीयं ब्रह्मे'त्यादिश्रुतिविरोधात्॥ ९॥

**ब्रह्मणीति।** यः ब्रह्मणि आधाय सङ्गं त्यक्त्वा कर्माणि करोति, सः अम्भसा पद्मपत्रमिव पापेन न लिप्यते। 'नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्वविदि'त्यस्य 'कर्माणि करोती'त्यस्य च एकपुरुषविषयत्वासम्भवादाह— **यस्तु पुनरतत्त्वविदिति। आधाय** न्यस्य, समर्प्यैति यावत्। पापेन न लिप्यत इत्येवोक्तम् , न तु ब्रह्म प्राप्नोतीति। अत आह— **केवलमिति। तस्येति।** ईश्वरार्पणबुद्ध्या निःसङ्गं कृतस्येत्यर्थः।

यत्तु **रामानुजः**— ब्रह्मणि इन्द्रियाकारेणावस्थितायां प्रकृतौ कर्माण्याधायेति, **तत्तुच्छम् ;** इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्नित्यनेन पौनरुक्त्यात्॥ १०॥

**कायेनेति।** 'कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेःस्वभावात्। करोमि यत्तत् सकलं परस्मै नारायणायेति समर्पयामी'ति सर्ववैदिकजनेन सन्ध्यावन्दनाद्यन्तेषु पठ्यमानस्य श्लोकस्य मूलभूतोऽयम्। सङ्कल्पविकल्पात्मकं मनः, अध्यवसाया-त्मिका बुद्धिरिति विवेकः। **ममत्वबुद्धिशून्यैरिति।** कर्तृगता ममत्वबुद्धिः करणेष्वारोपिता। अथवा ममत्वबुद्ध्यप्रयुक्तैरित्यर्थः। अत एवाह— **ममत्ववर्जिता इति। तत्रैवेति।** न तु साङ्ख्ये इत्येवकारार्थः॥ ११॥

**युक्त इति। निष्ठायां** ज्ञाननिष्ठायामित्यर्थः। ननु कथं ज्ञाननिष्ठाभवमोक्षस्य कर्मयोगेन सिद्धिरत आह— **सत्त्वशुद्धीति।**

१. 'केवलं सत्त्वशुद्धिमात्रमेव फलं तस्य कर्मणः स्यात्' इति पा.। २. 'स्वकर्मणा' इति पा.।

**युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।**
**अयुक्तः कामकारेण फले सक्तो निबध्यते॥ १२॥**
**सर्वकर्माणि मनसा संन्यस्याऽऽस्ते सुखं वशी।**
**नवद्वारे पुरे [1]देही नैव कुर्वन्न कारयन् ॥ १३॥**

**यस्माच्च—**युक्त इति। युक्तः **'ईश्वराय कर्माणि करोमि, न मम फलाये'त्येवं समाहितः सन् कर्मफलं** त्यक्त्वा **परित्यज्य** शान्तिं **मोक्षाख्याम् आप्नोति** नैष्ठिकीं **निष्ठायां भवाम् , सत्त्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासज्ञाननिष्ठाक्रमेणेति वाक्यशेषः। यस्तु पुनः** अयुक्तो**ऽसमाहितः** कामकारेण **करणं कारः, कामस्य कारः कामकारस्तेन कामकारेण। कामप्रेरिततयेत्यर्थः। 'मम फलायेदं करोमि कर्म' इत्येवं फले सक्तो निबध्यते। अतः त्वं युक्तो भवेत्यर्थः॥ १२॥**

**यस्तु परमार्थदर्शी सः—** सर्वेति। **सर्वाणि कर्माणि** सर्वकर्माणि संन्यस्य **परित्यज्य, नित्यं, नैमित्तिकं, काम्यं, प्रतिषिद्धं च सर्वकर्माणि, तानि** मनसा **विवेकबुद्ध्या कर्मादावकर्मसंदर्शनेन सन्त्यज्येत्यर्थः।** आस्ते **तिष्ठति सुखं**

आनन्दगिरिकृतव्याख्या

**मेव तव कर्तव्यमिति** यस्मादित्यस्यापेक्षितं **वदन् फलितमाह—** तस्मादिति॥ ११॥

**इतश्च सङ्गं त्यक्त्वा कर्मानुष्ठानं त्वया कर्तव्यमित्याह—** यस्माच्चेति। **युक्तः सन् फलं त्यक्त्वा कर्म कुर्वन् मोक्षाख्यां शान्तिं यस्मादाप्नोति तस्माच्च त्वया सङ्गं त्यक्त्वा कर्म कर्तव्यमिति योजना। विपक्षे दोषमाह—** अयुक्त इति। **युक्तत्वं व्याकरोति—** ईश्वरायेति। **फलं परित्यज्य कर्म कुर्वन्निति शेषः। नैष्ठिकी शान्तिरित्येतदेव विशदयति—** सत्त्वेति। **द्वितीयमर्धं विभजते—** यस्त्विति। **असमाधाने दोषादर्जुनस्य नियोगं दर्शयति—** अतस्त्वमिति॥ १२॥

**तर्हि फले सक्तिं त्यक्त्वा सर्वैरपि कर्म कर्तव्यमिति कर्मसंन्यासस्य निरवकाशत्वमित्याशङ्क्य, अविदुषः सकाशाद् विदुषो विशेषं दर्शयति—** यस्त्विति। **सर्वकर्मपरित्यागे प्राप्तं मरणं व्यावर्तयति—** आस्त इति। **वृत्तिं लभमानोऽपि शरीरतापेनाध्यात्मिकादिना तप्यमानस्तिष्ठतीति चेत्? नेत्याह—** सुखमिति। **कार्यकरणसङ्घातपारवश्यं पर्युदस्यति—** वशीति। **आसनस्यापेक्षितमधिकरणं निर्दिशति —** नवेति। **देहसम्बन्धाभिमानाभासवत्त्वमाह—** देहीति। **मनसा सर्वकर्मसंन्यासेऽपि लोकसंग्रहार्थं बहिः सर्वं कर्म कर्तव्यमिति प्राप्तं प्रत्याह—** नैवेति। **तान्येव सर्वाणि कर्माणि परित्याज्यानि विशिनष्टि—** नित्यमिति। **तेषां परित्यागे हेतुमाह—** तानीति। **यदुक्तं**

भाष्यार्कप्रकाशः

कर्मयोगात् सत्त्वशुद्धिः, ततः परोक्षज्ञानप्राप्तिः, ततः सर्वकर्मसंन्यासः, ततोऽपरोक्षज्ञाननिष्ठा, ततो विदेहकैवल्यात्मको मोक्ष इत्यर्थः। **वाक्यशेष इति।** येनार्थः परिसमाप्यते पदेना[ध्या]हार्येण, स वाक्यशेष इत्युच्यते। **असमाहित इति।** फलाशाविक्षिप्तचित्त इत्यर्थः। **कामकारः,** कामस्य आशायाः कारः करणं कामकारः, **तेन** फलाशायुक्तत्वेनेत्यर्थः। निबध्यते कर्मभिर्जन्मादिरूपं संसारं प्राप्यत इत्यर्थः। किमनेन श्लोकेनोपदिष्टमर्जुनायेत्यत आह— **अत इति।** योगेन मुक्तिसत्त्वादयोगेन बन्धसत्त्वाच्चेत्यर्थः। त्वमिति मुक्तिकाम इत्यर्थः ॥ १२॥

**सर्वेति**। युक्त इत्यनेन पूर्वश्लोकस्य योगिपरत्वनिश्चयात् , संन्यस्येत्यनेनास्य श्लोकस्य साङ्ख्यपरत्वनिश्चयाच्च सांख्ययोगयो- रुभयोरेकपुरुषाननुष्ठेयत्वादाह— **यस्तु परमार्थदर्शी स इति।** सर्वकर्माणि मनसा संन्यस्य वशी सन् , नैव कुर्वन् न कारयंश्च सन् नवद्वारे पुरे देहे सुखमास्ते। मनसेति न करणे तृतीया, कर्मत्यागं प्रति मनसोऽकरणत्वात् , अत आह— **विवेकबुद्ध्येति।** मनःशब्दोऽत्र स्ववृत्तिरूपविवेकज्ञानं लक्षणया बोधयतीति भावः। ततश्च हेतौ तृतीयेति बोध्यम्। मनःपूर्वकत्वाद् वाक्कायचेष्टयोस्ताभ्यामपि मनस

१. 'देहे' इति पा.।

**त्यक्तवाङ्मनःकायचेष्टो यतिः निरायासः प्रसन्नचित्तः, आत्मनोऽन्यत्र [1]निवृत्तबाह्यसर्वप्रयोजनः इति सुखमास्ते इत्युच्यते।** वशी **जितेन्द्रिय इत्यर्थः। क्व कथमास्ते? इत्याह—** नवद्वारे पुरे। **सप्त शीर्षण्यान्यात्मनः उपलब्धिद्वाराणि, [2]अर्वाग् द्वे मूत्रपुरीषविसर्गार्थे, तैः द्वारैर्नवद्वारं पुरमुच्यते शरीरम् , पुरमिव पुरम् आत्मैकस्वामिकं तदर्थप्रयोजनैश्च इन्द्रियमनोबुद्धिविषयैरनेकफलविज्ञानस्योत्पादकैः पौरैरिवाधिष्ठितम्। तस्मिन् नवद्वारे पुरे देही सर्वं कर्म संन्यस्य आस्ते।**

**किं विशेषणेन? सर्वो हि देही संन्यास्यसंन्यासी वा देह एवास्ते, तत्रानर्थकं विशेषणमिति। उच्यते— यस्त्वज्ञो देही देहेन्द्रियसङ्घातमात्रात्मदर्शी स सर्वोऽपि 'गेहे भूमावासने वा आसे' इति मन्यते। न हि**

आनन्दगिरिकृतव्याख्या

**सुखमास्त इति, तदुपपादयति—** त्यक्तेति। **जितेन्द्रियत्वं कायवशीकारस्याप्युपलक्षणम्। द्वे श्रोत्रे, द्वे चक्षुषी, द्वे नासिके, वागेकेति सप्त** शीर्षण्यानि **शिरोगतानि शब्दाद्युपलब्धिद्वाराणि। अथापि कथं नवद्वारत्वम्? अधोगताभ्यां पायूपस्थाभ्यां सहेत्याह—** अर्वागिति। **शरीरस्य पुरसाम्यं स्वामिना पौरैश्चाधिष्ठितत्वेन दर्शयति—** आत्मेत्यादिना। **यद्यपि [3]देहजीवनत्वाद् देहसम्बन्धाभिमानाभासवान् अवतिष्ठते, तथापि प्रवासीव परगेहे तत्पूजापरिभवादिभिरप्रहृष्यन् अविषीदन् व्यामोहादिरहितश्च तिष्ठतीति मत्वाऽऽह—** तस्मिन्निति।

**विशेषणमाक्षिपति—** किमिति। **तदनुपपत्तिमेव [4]दर्शयति—** सर्वो हीति। **सर्वसाधारणे देहावस्थाने संन्यस्य देहे तिष्ठति विद्वानिति विशेषणमकिञ्चित्करमिति फलितमाह—** तत्रेति। **विशेषणफलं दर्शयन्नुत्तरमाह—**उच्यत इति। **किमविवेकिनं प्रति विशेषणानर्थक्यं चोद्यते, किंवा विवेकिनं प्रतीति विकल्प्याऽऽद्यमङ्गीकरोति—** यस्त्विति। **अज्ञत्वं देहित्वे हेतुः। तदेव देहित्वं स्फुटयति—** देहेति। **सङ्घातात्मदर्शिनोऽपि देहे स्थितिप्रतिभासः स्यादिति चेत्? नेत्याह—** न हीति। **द्वितीयं दूषयति—** देहादीति। **गृहादिषु देहस्याव-**

भाष्यार्कप्रकाशः

आयासो भवेदिति कृत्वा आह— **त्यक्तवाङ्मनःकायचेष्ट इति।** वाक्चेष्टा भाषणं, मनश्चेष्टा आलोचनं, कायचेष्टा गमनादिकम्। प्रसन्नं शान्तं चित्तं यस्य स प्रसन्नचित्तः। **आत्मनोऽन्यत्र** आत्मभिन्नेषु सर्वेषु बाह्येषु विषयेषु प्रयोजनं यस्य निवृत्तं स निवृत्तसर्वबाह्यप्रयोजनः। अथवा निवृत्तानि सर्वाणि बाह्यानि प्रयोजनानि यस्य स तथोक्तः। आत्मैकप्रयोजन इति यावत्। नव द्वाराणि यस्य तत् नवद्वारम् , तस्मिन् नवद्वारे। नव द्वाराण्याह— **सप्तेति। आत्मनः** पुरुषस्य **शीर्षण्यानि** शिरोगतानि **उपलब्धिद्वाराणि** शब्दादिज्ञानसाधनानि सप्त — श्रोत्रे, चक्षुषी, नासे, वक्त्रं चेति। **अर्वाग्** अधोभागे मूत्रपुरीषयोर्विसर्गः त्यागः अर्थः प्रयोजनं कार्यं वा ययोस्ते द्वे , द्वारे इति शेषः। मिलित्वा नव द्वाराणीति भावः। कथं शरीरस्य नवद्वारपुरत्वम् , तद्धि पत्तनधर्मः? अत आह— **पुरमिव पुरमिति।** गौणोऽयं प्रयोगः, सिंहो माणवक इतिवत् पुरे देहे इति। यथा पुरस्य नवद्वारत्वं तथा देहस्यापीति साम्यं स्फुटम्। कोऽस्य देहपत्तनस्य स्वामी अत आह— **आत्मेति।** आत्मा एक एव स्वामी यस्य तत् आत्मैकस्वामिकम्। ननु पुरे पौराःसन्ति, अत्र देहे तु के पुनः पौरस्थानीयाः? अत आह— **तदर्थेत्यादि।** तस्मै आत्मने इदं तदर्थं प्रयोजनं येषां तैस्तदर्थप्रयोजनैः अनेकेषां फलानां विज्ञानस्य, अनेकफलस्य विविधज्ञानस्येति वा, उत्पादकैः। इन्द्रियमनोबुद्धयः विषयाश्च तैरेव पौरैरधिष्ठितम्।

ननु देहे सर्वं कर्म संन्यस्यास्ते इति विशेषणेन विशेषवचनेन किम्? इति शङ्कते— **किमिति।** कुतो विशेषणस्य वैयर्थ्यम्? अत आह— **सर्व इति।** यथा संन्यासी देहे आस्ते, तथा असंन्यास्यपि देहे एवास्ते। तत्रैवं सति देहे इति विशेषणमनर्थकमिति प्रश्नः।

उत्तरमाह— **यस्त्विति।** कोऽसावज्ञः? अत आह— **देहेति।** देहेन्द्रियसङ्घातरूपमेवात्मानं पश्यति, न तु तद्भिन्नं यः सोऽयमज्ञः। **आसे** तिष्ठामि। कुतस्तथा मन्यते? अत आह— **न हीति।** यो देहमेवात्मानं मन्यते, स हि यत्र देहः आस्ते तत्रैवाहमास इति मन्यते, देहस्यैवात्मत्वात्। देहश्च भूम्यादिषु वर्तते, न तु देहे, आधाराधेयभावस्य द्विनिष्ठत्वेन एकस्यैव देहस्य आधारत्वमाधेयत्वं

१. 'निवृत्तसर्वबाह्यप्रयोजनः' इति पा.। २. 'अवाग् द्वे' इति पा.। ३. 'देहे जीवनत्वाद्' इति पा.। ४. 'उपपादयति' इति पा.।

**देहमात्रात्मदर्शिनो गेह इव 'देह आसे' इति प्रत्ययः सम्भवति। देहादिसङ्घातव्यतिरिक्तात्मदर्शिनस्तु 'देह आसे' इति प्रत्ययः उपपद्यते। परकर्मणां च परस्मिन्नात्मन्यविद्ययाऽध्यारोपितानां विद्यया विवेकज्ञानेन मनसा संन्यास उपपद्यते। उत्पन्नविवेकज्ञानस्य सर्वकर्मसंन्यासिनोऽपि गेह इव देह एव नवद्वारे पुरे आसनं प्रारब्धफल[१]कर्मसंस्कारशेषानुवृत्त्या देह एव विशेषविज्ञानोत्पत्तेः देह एवास्त इत्यस्त्येव विशेषणफलं विद्वदविद्वत्प्रत्ययभेदापेक्षत्वात्। यद्यपि कार्यकरणकर्माण्यविद्ययाऽऽत्मन्यध्यारोपितानि संन्यस्यास्त इत्युक्तम् , तथाप्यात्मसमवायि तु कर्तृत्वं**

अनुभूतिस्वरूपाचार्यटिप्पणम्

गृहस्थादिव देहस्यावस्थानेनात्मावस्थानभ्रमव्यावृत्त्यर्थं देह आस्ते इति विशेषणमुपपद्यते विवेकिन इत्युक्तम्। संन्यासोऽपि तस्यैव विवेकिन उपपद्यत इत्याह— **उत्पन्नविवेकस्येति**। 'अहं ब्रह्मास्मी'ति विज्ञानमुत्पद्यमानं देह एवोत्पद्यते। अतो देहावस्थानमुपचर्यत इत्यर्थः॥ १३॥

आनन्दगिरिकृतव्याख्या

**स्थानेनात्मावस्थानभ्रमव्यावृत्त्यर्थं 'देहे विद्वानास्ते' इति विशेषणमुपपद्यते, विवेकवतो देहेऽवस्थानप्रतिभाससम्भवादित्यर्थः। ननु विवेकिनो देहावस्थानप्रतिभानेऽपि वाङ्मनोदेहव्यापारात्मनां कर्मणां तस्मिन् प्रसङ्गाभावात् तत्त्यागेन कुतस्तस्य देहेऽवस्थानमुच्यते? तत्राह—** परकर्मणां चेति। **ननु विवेकिनो दिगाद्यनवच्छिन्नबाह्याभ्यन्तराविक्रियब्रह्मात्मतां मन्यमानस्य कुतो देहेऽवस्थानमास्थातुं शक्यते? तत्राह—** उत्पन्नेति। **तत्र हेतुमाह—** प्रारब्धेति। **यद्धि प्रारब्धफलं धर्माधर्मात्मकं कर्म, तस्योपभुक्तस्य शेषादनुपभुक्ताद् देहादिसंस्कारोऽनुवर्तते, तदनुवृत्त्या च तत्रैव देहे विशेषविज्ञानमवस्थानविषयमुपपद्यते। अतो विवेकवतः संन्यासिनो देहेऽवस्थानव्यपदेशः सम्भवतीत्यर्थः। अविद्वत्प्रत्ययापेक्षया विशेषणासम्भवेऽपि विद्वत्प्रत्ययापेक्षया विशेषणमर्थवदित्युपसंहरति—** देह एवेति। **देहे स्वावस्थानविषयो विद्वत्प्रत्ययः, तदविषयश्चाविद्वत्प्रत्ययः, तयोरेवं भेदे [२]विद्वत्प्रत्ययापेक्षया विशेषणमर्थवदित्युपसंहरन्नेव हेतुं विशदयति—** विद्वदिति। **आरोपितकर्तृत्वाद्यभावेऽपि स्वगतकर्तृत्वादि दुर्वारमित्याशङ्कामनूद्य दूषयति—**यद्यपीत्यादिना। **क्रियासु**

भाष्यार्कप्रकाशः

च न सम्भवतीति। तस्मात् प्राज्ञ एव देहे आसे इति मन्यते, न त्वज्ञः। ततश्च न सर्वसाधारण्येन देहिनो देहे आसनमिति कृत्वा अज्ञव्यावृत्त्यर्थम् , अज्ञाभिमतभूम्याद्यासनव्यावृत्त्यर्थं वा विशेषणस्यावश्यकत्वान्न वैयर्थ्यशङ्का। संन्यासश्च ज्ञान्येकाश्रय इति युक्तं संन्यासिनो देहे आसनमिति भावः।

ननु त्यागस्य प्रसक्तिपूर्वकत्वाद् , आत्मनि कर्मणां प्रसक्तेरेवाभावात् कथं संन्यस्येत्युक्तम्? अत आह— **परकर्मणामिति**। देहेन्द्रियकर्माणि परकर्माणि, तान्यविद्यया आत्मन्यारोपितानीत्यज्ञानादात्मनि कर्मप्रसङ्गः। अतो विद्यया तत्संन्यासोपपत्तिः। केयं विद्येत्यत आह— **विवेकज्ञानेनेति**। आत्मानात्मविवेकज्ञानेनेत्यर्थः। ननु मनसा संन्यस्येति मूले उक्तम् , अत आह— **मनसेति**। मनःशब्दस्य विद्येत्येवार्थ इति भावः। ननु यस्तत्त्ववित् तस्य कथमतत्त्वविद इव देहे स्थितिरुपपद्यते, प्रत्युत देहत्यागाद् ब्रह्मणि स्थितिरेवोचितेत्यत आह— **उत्पन्नेति**। यथाऽनुत्पन्नविवेकः पुरुषः यावत्प्रारब्धावसानं देहमत्यजन्नेव गेहे आस्ते तथा विवेक्यपि **प्रारब्धफलशेषसंस्कारानुवृत्त्या** देहे एवास्ते। प्रारब्धं कर्मविशेषः, तत्फलं शरीरभोगादिः, तस्य शेषः तस्य संस्कारः, तस्यानुवृत्तिः तया यावत्प्रारब्धावसानं विवेक्यपि देहे आस्ते इत्यर्थः।

**यद्वा**, ननु य आत्मवित् स हि सर्वत्र वर्तते, सर्वं चात्मनि तस्मिन् वर्तत इति कृत्वा आत्मवित् पुमान् देहे एवास इति नैव मन्येत, किन्तु सर्वत्रास इत्येव मन्येत, इत्यत आह— **उत्पन्नेति**। यावत्प्रारब्धावसानं विवेक्यपि देहे आस इति मन्यत इत्यर्थः। सर्वकर्मसंन्यासिनोऽपि प्रारब्धफलशेषसंस्कारानुवृत्त्या देह एवासनं सम्भवतीति शेष इत्यन्वयः।

---

१. 'कर्म' इति नास्ति रा.पा.। २. 'विद्वत्प्रत्ययापेक्षत्वादुपपन्नं विशेषणमित्युक्तमेव' इति पा.।

**कारयितृत्वं च स्यादित्याशङ्क्याह— नैव कुर्वन् स्वयं, न कार्यकरणानि** कारयन् **क्रियासु प्रवर्तयन्। किं यत् तत् कर्तृत्वं कारयितृत्वं च देहिनः स्वात्मसमवायि सत् संन्यासान्न सम्भवति, यथा गच्छतो गतिर्गमनव्यापारपरित्यागे न स्यात् , तद्वत् , किंवा स्वत एवात्मनो नास्तीति? अत्रोच्यते— नास्त्यात्मनः स्वतः कर्तृत्वं कारयितृत्वं च। उक्तं हि— 'अविकार्योऽयमुच्यते'(भ.गी.२.२५) 'शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते'(भ.गी.१३.३१) इति, 'ध्यायतीव**

आनन्दगिरिकृतव्याख्या

**प्रवर्तयन्नास्त इति पूर्वेण सम्बन्धः। पूर्वस्यापि शतुरेवमेव सम्बन्धः। कर्तृत्वं कारयितृत्वं चात्मनो नेत्यत्र विचारयति—** किमिति। **यत् कर्तृत्वं कारयितृत्वं च तत् किं देहिनः स्वात्मसमवायि सदेव संन्यासान्न भवतीत्युच्यते, यथा गच्छतो देवदत्तस्य स्वगतैव गतिः तत्स्थित्या त्यागान्न भवति, अथ वा स्वारस्येन कर्तृत्वं कारयितृत्वं चात्मनो नास्तीति वक्तव्यम्। आद्ये सक्रियत्वम् , द्वितीये कूटस्थत्वमित्यर्थः। द्वितीयं पक्षमाश्रित्योत्तरमाह—** अत्रेति। **उक्तेऽर्थे वाक्योपक्रममनुकूलयति—** उक्तं हीति। **तत्रैव वाक्यशेषमपि संवादयति—** शरीरस्थोऽपीति। **स्मृत्युक्तेऽर्थे श्रुतिमपि दर्शयति—** ध्यायतीवेति। **उपाधिगतैव सर्वा विक्रिया, नात्मनि स्वतोऽस्तीत्यर्थः ॥१३॥**

भाष्यार्कप्रकाशः

हेत्वन्तरमाह— **देह एवेति।** स्थूलसूक्ष्मकारणात्मना देहस्त्रिविधः। तत्र सूक्ष्मदेहस्य प्रधानाङ्गं मनः। तस्मिन् मनोमये देहे एव विशेषविज्ञानस्योत्पत्तेर्हेतोर्देह एवास्त इत्युक्तम्। विवेकी अन्तर्मुखत्वान्मनस्येवात्मानमनुसन्धत्त इति मनस्येवास्त इति भावः।

**यद्वा** श्वादिदेहेषु विशेषविज्ञानाभावात् , मनुष्यदेहे एव तत्सद्भावात् , विशेषविज्ञानोत्पत्तिहेतावस्मिन् देहे वर्तमानोऽहं तत्त्वविदासमिति कृत्वा देह एवास इति तत्त्वविन्मन्यत इत्यर्थः।

**अथवा** संस्कारानुवृत्त्या हेतुना देह एव विशेषविज्ञानस्य अवस्थानविषयज्ञानस्योत्पत्तेर्हेतोरित्येक एव हेतुर्विदुषो देह आसनस्य। फलसत्त्वे हेतुमाह— **विद्वदिति।** विदुषो 'देह आसे' इति प्रत्ययः, अविदुषस्तु 'भूम्यादावासे' इति प्रत्ययः इति विवेकः।

एतावता श्लोकस्य पादत्रयं व्याख्यातम्। अथ तुरीयपादं व्याख्यातुमाक्षेपसङ्गतिमाह—**यद्यपीति।** अविद्ययाऽऽत्मन्यध्यस्तानां कर्मणां संन्यासो विद्ययोपपद्यत इत्युक्तम्। स संन्यासो न कर्मणां परित्यागरूपः, किन्तु नात्मनि कर्माणि सन्ति, देहेन्द्रियादिसङ्घात एवेत्यनुसन्धानमेव, विद्यया संन्यस्येत्युक्तत्वात्। ततश्च देहाद्याश्रयदर्शनादिकर्मसत्त्वात् तत्कर्तृत्वमात्मनि समवैति,[1]आत्मसमवेतस्यैव देहेन्द्रियसङ्घातस्य कर्मदर्शनात्। तथा अन्तर्यामिण आत्मनः सङ्घातप्रेरकत्वात् कारकत्वमप्यात्मनि समवैति, देहादीनां पारतन्त्र्य-दर्शनात्। तस्मादात्मा स्वयमकर्ताऽपि देहादिभिः कर्म करोति, अथवा कारयतीति कृत्वा कथं संन्यासिनः कर्माभाव इत्यत आह भगवान्— नैव कुर्वन्न कारयन्नितीत्यर्थः।

**स्वयं कुर्वन्तीति।** देहादिभिः करणैरात्मा न कर्म करोति। देहादिभिः प्रयोज्यकर्तृभिर्वा न कर्म कारयतीत्यर्थः। न कर्ता नापि कारक आत्मेति यावत्। विद्यया सर्वकर्मसंन्यासादिति भावः। अत्र शङ्कते— **किमिति।** गच्छतो गतिरिव देहिनः स्वात्मसमवायि सद् यत् कर्तृत्वं कारयितृत्वं चास्ति, तत् संन्यासान्न भवतीति किमित्यन्वयः। आत्मसमवेतयोः कर्तृत्वकारकत्वयोः किं संन्यासान्निवृत्तिः? उत आत्मनि कर्तृत्वकारकत्वयोः समवेतत्वमेव नास्तीति? आद्ये, पृथिव्यां समवायसम्बन्धेन वर्तमानस्य गन्धस्य यथा पृथिवीनाशं विना न नाशः[2], तथा आत्मसमवेतस्य कर्तृत्वादेरात्मनाशं विना न नाशः, तथा च विद्यया संन्यासेन वा नात्मसमवेतयोः कर्तृत्वकारकत्वयोर्निवृत्तिरुपपद्यते।

ततो द्वितीयमाश्रित्योत्तरमाह— **अत्रोच्यत इति। स्वत इति।** समवायेनेत्यर्थः। न तु भ्रान्त्यैवेति भावः। कुतो नास्तीत्यत आह— **अविकार्य इति।** अविकार्ये आत्मनि कर्तृत्वादिविकारायोगादिति भावः। गीतावाक्ये प्रमाणत्वेनोपन्यस्य श्रुतिमुपन्यस्यति— **ध्यायतीवेति।** बुद्धौ ध्यायन्त्यामात्मा ध्यायतीव प्रतिभाति, बुद्धौ चलन्त्यामात्मा लेलायति चलतीव इति। तस्माद् गच्छति पुरुषे

---

१. आत्मसहितस्येत्यर्थः, 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इति श्रुतेः। २. पाकेन नाशेऽपि गन्धान्तरमुत्पद्यत इति भावः।

**न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।**
**न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते॥ १४॥**

**लेलायतीव'(बृ.उ.४.३.७) इति श्रुतेः ॥ १३॥**

**किञ्च—** न कर्तृत्वमिति। **न कर्तृत्वं स्वतः कुर्विति[१], नापि कर्माणि [२]रथघटप्रासादादीनीप्सिततमानि लोकस्य** सृजति **उत्पादयति** प्रभुः **आत्मा; नापि रथादि कृतवतस्तत्फलेन संयोगं** न कर्मफलसंयोगम्। **यदि किञ्चिदपि स्वतो न करोति न कारयति च देही, कस्तर्हि कुर्वन् कारयंश्च प्रवर्तत इत्युच्यते—** स्वभावस्तु **स्वो भावः स्वभावोऽविद्यालक्षणा प्रकृतिर्माया प्रवर्तते 'दैवी हि' (भ.गी.७.१४) इत्यादिना वक्ष्यमाणा॥ १४॥**

आनन्दगिरिकृतव्याख्या

**आत्मनो यदुक्तं कारयितृत्वं नास्तीति, तत् प्रपञ्चयति—** नेत्यादिना। **यद्यपि लोकस्य कर्तृत्वं न सृजतीति नास्ति कारयितृत्वम्, तथापि रथशकटादीनि कुर्वन् भवति कर्तेत्याशङ्क्याह—** न कर्माणीति। **तथापि भोजयितृत्वेन विक्रियावत्त्वं दुष्परिहरमित्याशङ्क्याह—** न कर्मेति। **कस्य तर्हि प्रवर्तकत्वम्? तदाह—** स्वभावस्त्विति। **कुरु इति कर्तृत्वं लोकस्य न सृजत्यात्मेति सम्बन्धः। रथादीनां कर्मत्वं साधयति—** ईप्सितेति। **आत्मनो देहादिस्वामित्वेन** प्रभुत्वम्। **रथादि कृतवतो लोकस्य रथादिफलेन सम्बन्धमपि न सृजत्यात्मेत्यात्मनो भोजयितृत्वं प्रत्याचष्टे—** नापीति। **चतुर्थपादं शङ्कोत्तरत्वेनावतारयति—**यदीत्यादिना। **स्वभाववादस्तर्हीत्याशङ्क्य व्याकरोति—**अविद्या-लक्षणेति। **प्रकृतेर्विद्याऽभावत्वं व्युदसितुं मायेत्युक्तम्। सा च सप्तमे वक्ष्यते। तेन [३]प्रधानविलक्षणेत्याह—** दैवी हीति॥ १४॥

भाष्यार्कप्रकाशः

गतिरिव आत्मनि कर्तृत्वादिर्न समवैतीत्युपपद्यते कर्माभावः संन्यासिनः।

यत्तु **रामानुजः**— कर्माणि देहे संन्यस्येति, तद् वेदाविनाशिनमिति श्लोकभाष्ये भाष्यकारैरेव प्रत्याख्यातम्— सम्पूर्वस्य न्यासस्य त्यागार्थकत्वेन निक्षेपार्थकत्वायोगादित्यादिना ॥ १३ ॥

**नेति।** प्रभुः लोकस्य कर्तृत्वं न सृजति, कर्माणि न सृजति, कर्मफलसंयोगं न सृजति, स्वभावस्तु प्रवर्तते । प्रभुरीश्वर आत्मा, ईश्वरस्यैवात्मत्वात्। **लोको** देहेन्द्रियादिसङ्घातः, लोक्यते दृश्यते ज्ञायत इति लोक इति व्युत्पत्तेः। कर्तृत्वं न सृजति नोत्पादयति, 'त्वमिदं कुर्वि'ति लोकं न प्रवर्तयति कर्मस्वित्यर्थः। लोकेन न कारयतीति यावत्। 'नैव कुर्वन्न कारयन्नि'त्यस्यैवार्थस्य सुबोधत्वाय भङ्ग्यन्तरेणोपपादनमिदमिति न पुनरुक्तिः। **प्रवर्तते** कुर्वन् कारयंश्च सन्निति शेषः। लोकस्य कर्तृत्वादिकं सृजन् सन्निति वा । स्वभावस्यैवं प्रवृत्तत्वे प्रमाणमाह— **दैवीति।** 'दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' इति सप्तमाध्याये वक्ष्यते। अथवा स्वभावस्य मायात्वे प्रमाणमाह— **दैवीति**। देवस्य विष्णोरीश्वरस्यात्मनः स्वभावः, 'दैवी'ति वक्ष्यमाणत्वादित्यर्थः।

अत्र स्वभावः वासनेति **रामानुजः, तत्तुच्छम्** ; असङ्गस्यात्मनः प्रकृतिसंसर्गस्यैवासम्भवेन तत्कृतदेहाद्यात्माभिमानजनित-वासनाया दूरापास्तत्वात्। निर्धर्मकपरमानन्दबोधस्वरूपे आत्मनि देहाद्यात्माभिमानस्य तत्कृतवासनाया वा स्थातुमयुक्तत्वात् इति ॥ १४॥

**नादत्त इति।** 'स्वभावस्तु प्रवर्तते' इति मायिकस्य कार्यस्योक्तत्वादाह— **परमार्थतस्त्विति।** तुशब्दो वैलक्षण्यार्थः। न पुनः

१. आत्मनः कर्तृत्वं कारयितृत्वं च स्वगतमेव सत् संन्यासे सति न भवति, अथवा नभसि तलमलिनतादिवद् वस्तुवृत्त्या तत्र नास्त्येवेति सन्देहापोहायाह—**न कर्तृत्वमिति।** न कर्तृत्वं, न कर्माणि, न कर्मफलसंयोगं सृजति इति क्रमेण आत्मनः कारयितृत्वं, कर्तृत्वं, भोजयितृत्वं च स्वाभाविकं व्यावर्त्यते। एवं भोक्तृत्व-निषेधोऽपि ज्ञेयः। द्र. मधुसूदनी। २. एतेन कर्मपदं 'कर्तुरीप्सिततमं कर्म' (पा.सू. १-४-४९) परिभाषितकर्मकारकपरतया व्याख्यातमिति स्पष्टम् । तेन कर्तृत्व-प्रतिषेधो लभ्यते। रथादीनि सृजन् हि कर्ता भवति। ३. सांख्याभिमतप्रधानेत्यर्थः।

**नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः।**
**अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः॥ १५॥**

**परमार्थतस्तु—** नादत्त इति। नादत्ते [1]**न गृह्णाति भक्तस्यापि कस्यचित् पापम् । न चैवादत्ते सुकृतं भक्तैः प्रयुक्तं विभुः**[2]**। किमर्थं तर्हि भक्तैः पूजादिलक्षणं यागदानहोमादिकं च सुकृतं प्रयुज्यत इत्याह— अज्ञानेनावृतं** ज्ञानं **विवेकविज्ञानम् , तेन** मुह्यन्ति **करोमि कारयामि भोक्ष्ये भोजयामीत्येवं मोहं गच्छन्त्यविवेकिनः संसारिणो जन्तवः॥ १५॥**

आनन्दगिरिकृतव्याख्या

**कर्तृत्वभोक्तृत्वैश्वर्याण्यात्मनोऽविद्याकृतानीत्युक्तम्। इदानीम् ईश्वरे संन्यस्तसमस्तव्यापारस्य तदेकशरणस्य दुरितं सुकृतं वा तदनुग्रहार्थं भगवानादत्ते, 'मदेकशरणो मत्प्रीत्यर्थं कर्म कुर्वाणो दुष्कृताद्यपनोदनेनानुग्राह्यो मया' इति प्रत्ययभाक्त्वादित्याशङ्क्य , सोऽपि परमार्थतो नास्यास्ति, अविक्रियत्वादित्याह—** परमार्थतस्त्विति। **कथं तर्हि भक्तानामनुग्राह्यत्वम् , ईश्वरस्यानुग्रहीतृत्वमिति प्रसिद्धिः? तत्राह—**अज्ञानेनेति। **पूर्वार्धगतान्यक्षराणि व्याख्याय, आकाङ्क्षापूर्वकमुत्तरार्धमवतार्य व्याचष्टे—** किमर्थमित्यादिना॥ १५॥

भाष्यार्कप्रकाशः

स्वभावत इति तदर्थः। विभुः कस्यचित् पापं नादत्ते, कस्यचित् सुकृतं च नैवादत्ते। अज्ञानेन ज्ञानमावृतं तेन जन्तवो मुह्यन्ति।

यो हि ब्रह्महत्यादिमहापातकापनुत्तये जन्मान्तरसंचितपापापनुत्तये वा भगवति भक्तिं तनोति, तस्य भक्तस्य पापं विभुरीश्वरः आत्मा नादत्ते। यश्चेश्वरार्पणबुद्ध्या यज्ञदानजपादिकर्माणि करोति, तस्य यज्ञादिकर्मजन्यं सुकृतमपि नादत्ते न स्वीकरोति, असङ्गस्यात्मनः पुण्यपापसम्बन्धाभावात्। सति तु पुण्यपापसम्बन्धे धर्माधर्मवश्यत्वेनेश्वरत्वस्यैव व्याघातात् इत्याह— **नादत्ते न गृह्णातीत्यादि**। **प्रयुक्तं** दत्तं समर्पितमिति यावत्।[3]

न च - भक्त्या ईश्वराय विष्णवे शिवायान्याय[यान्यस्मै] दैवताय वा सुकृतादिकं समर्पयन्ति, न त्वात्मन इति - वाच्यम् 'आकाशात् पतितं तोयं यथा गच्छति सागरम्। सर्वदेवनमस्कारः केशवं प्रति गच्छती'ति स्मरणाच्छिवादिदेवतान्तरसमर्पितमपि सुकृतादिकमात्मानमेव प्राप्नोति।

न च - केशवमिति विष्णुपर्यायदर्शनात् शिवादिदेवतान्तरसमर्पितस्य विष्णुगामित्वमेव, न त्वात्मगामित्वमिति - वाच्यम् ; विष्णोरेवात्मत्वात्। न च विष्णुरपि शिवादिवदनात्मैवेति वाच्यम् ; शिवादेरनात्मत्वस्यैवासिद्धेः। न च त्र्यक्षत्वादिधर्मविशिष्टानां शिवादीनां कथमात्मत्वमिति वाच्यम् ; चतुर्भुजत्वादिधर्मविशिष्टविष्णावपीदं चोद्यं समानम्। न चैवं शिवविष्ण्वादयः सर्वेऽप्यनात्मान एवेति वाच्यम् ; देहबुद्ध्या अनात्मत्वेऽपि अन्तर्यामिबुद्ध्या आत्मत्वात्। तस्माच्छिवादिबुद्ध्या समर्पितमपि सर्वं शिवादिदेहस्थितात्मसमर्पितमेव भवति। यस्तु शिवादिदेहस्थित आत्मा स एव भक्तदेहस्थितोऽपीति युक्तमुक्तमात्मने समर्पयन्तीति। अत एव आकाशात् पतितमिति स्मृतिश्च सङ्गच्छते, कथमन्यथा देहान्तरसमर्पितं वस्तु देहान्तरगामि भवेत् , येन शिवाद्यर्पितं वस्तु विष्ण्वर्पितं भवतीत्युच्येत।

न च केशवपदं चतुर्भुजत्वादिविशिष्टविग्रहविशेषपरमिति वाच्यम् ; कः आत्मा, 'को ब्रह्मात्मे'ति कोशात् , ईशः प्रभुः, वाति गच्छति जानातीति वः, वातेर्डः, द्रष्टेत्यर्थः। कश्चासावीशः केशः, केशश्चासौ वश्च केशव इति व्युत्पत्त्या आत्मपरत्वात् केशवशब्दस्य। न च 'योगाद् रूढिर्बलीयसी'ति यौगिकाद् योगरूढोऽर्थ एव बलवानिति वाच्यम् ; बलवत्त्वेऽपि तस्यार्थस्येहानन्वयेनोपेक्ष्यत्वात्।

ननु यद्ययमात्मा नादत्ते कस्यचित्पापं, न चैव सुकृतं, तर्हि 'ईश्वरार्पणमस्तु' इति कथं स्वानुष्ठितयागादिसुकृतस्येश्वरे प्रयोगो

१. 'न च गृह्णाति' इति पा.। २. **विभुः** परमेश्वरः। ३. ननु तर्हि कथं वक्ष्यति 'तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः'(भ.गी. ९-२६) इति? उच्यते— व्यवहारदृष्ट्या मुमुक्षोः सत्त्वशुद्ध्यर्थं साधनोपदेशपरत्वात् तस्य। इह तु परमार्थदृष्टिर्विवक्षिता। अत एव भाष्यम्—**परमार्थतस्तु इति**।

भाष्यार्कप्रकाशः

भक्तानाम्? कथं वेश्वरस्य पूजादिकम्? इति शङ्कते— **किमर्थमिति**। **प्रयुज्यते** समर्प्यते। **अज्ञानम्** अविद्या, न तु ज्ञानाभावः, तस्यावरणत्वायोगात्। आवरणं हि भावकार्यम् , यथा घटाद्यावरणं तमः भावरूपम् , तद्वत्। न च तमोऽपि तेजोऽभाव एवेति वाच्यम् ; तमसि तम इत्येव सर्वः प्रत्येति, न तु तेजोऽभाव इति कृत्वा सर्वलोकव्यवहारविरोधात्। **आवृतं** नाशितमित्यर्थः। **अथवा** ज्ञानं बुद्धिरित्यर्थः। **आवृतं** छादितं, मलेन दर्पणमिवेति भावः। तेन ज्ञानस्याज्ञानावृतत्वेन हेतुना करोम्यहं पूजादिकमिति शेषः। कारयाम्यहं पूजादिकं पुत्रादिनेति शेषः। **भोक्ष्ये** अहमन्नादिकमिति शेषः। **भोजयामि** अहमन्नादिकमतिथ्यादिनेति शेषः।

अत्र मत्त ईश्वरोऽन्योऽस्ति, स मत्पापं नाशयति, मया दत्तमल्पमपि सुकृतं गृहीत्वा मम बहुफलं दास्यतीत्याकारकोऽपि मोहो ज्ञेयः। एतन्मोहप्रयुक्तत्वादेव कर्मणां कर्तृत्वस्य कारयितृत्वस्य च, ईश्वरादात्मनि भेदभ्रमे सत्येव कर्ताऽहं, कारकोऽहं, भोक्ताऽहम् , फलदाता त्वीश्वरः इत्यादिभ्रमसम्भवात्। तस्मादात्मानात्मविवेकशून्या एवैते य ईश्वरार्थमपि कर्माण्यनुतिष्ठन्तीत्याह— **अविवेकिन इति**। अत एवैते जन्ममरणादिलक्षणं संसारं प्राप्नुवन्तीत्याह— **संसारिण इति**। जायन्ते पुनः पुनरुत्पद्यन्ते अविवेकवशादिति **जन्तव** इति व्युत्पत्तेरिति भावः।

यत्तु **रामानुजः— नादत्ते** नापनुदति। **अज्ञानेन** प्राचीनकर्मणाऽस्य ज्ञानम् **आवृतं** सङ्कुचितम्। **तेन** अज्ञानेनेति, **तत्तुच्छम् ,** आदानस्य अपनोदनाभेदानौचित्यात् , आदानापनोदनयोर्भिन्नक्रियात्वात्। आदत्त इत्यस्यापनोदनार्थकत्वस्य व्याकरणकोशादि-विरुद्धत्वात् , आत्मज्ञानस्य सर्वपुण्यपापतूलाग्नित्वस्य 'ज्ञानाग्निदग्धकर्माणमि'त्यनेनोक्तत्वादात्मनः सुखदुःखापनोदनासम्भवाच्च। तथा पुत्रादेः पापं दुःखं च नादत्त इत्यप्ययुक्तम् , पुत्रादेरात्मत्वादात्मनि च पापाद्ययोगात्। यदि पुत्रादिः सङ्घात इति मतं, तर्हि तस्य सङ्घातस्य आत्मसम्बन्धित्वमेव नास्तीति कथमुक्तं स्वसम्बन्धितयाऽभिमतस्य पुत्रादेरिति।

**ननु** सङ्घातो न स्वसम्बन्धी, किन्तु तथाऽभिमत इति चेत्? नैतदपि युज्यते, स्वप्रभे निर्विशेषे आत्मन्यभिमानायोगात्। यस्तु ममायं पुत्रोऽहमन्यः पितेत्यभिमन्यते, स हि सङ्घात एव। न च सङ्घातस्याचेतनस्य कथमभिमान इति वाच्यम् ; तत्र चिदाभाससत्त्वात् , कथमन्यथा अन्तःकरणस्य केवलस्य सङ्कल्पादिव्यापार उपपद्येत? य एवं पुत्रादिकं स्वसम्बन्धिनं मन्यते स पुत्रादेर्दुःखं यथाशक्त्यपनुदत्येवेति कथमुक्तम्— नापनुदतीति।

तथा रावणादिर्देहादिसङ्घातो रामादेः प्रतिकूलस्य देहादिसङ्घातस्य भार्यापहारादिना सुखमपनुनोदैवेति कथमुक्तं प्रतिकूल-तयाऽभिमतस्य सुखं नापनुदतीति। तथा अज्ञानशब्दस्य कर्मार्थकत्वमप्यनुपपन्नम् , अज्ञानकर्मणोः कार्यकारणभावेन भेदात्। यदि ज्ञानविरोधि कर्माज्ञानशब्देन विवक्षितं, तर्हि मूलकर्ता 'कर्मणा' [ 'कर्मणा ह्यावृतं ज्ञानम्' ] इत्येव ब्रूयात् , न त्वज्ञानेनेति।

कर्मणो ज्ञानावरणत्वं चानुपपन्नमद्रव्यत्वात् कर्मणः, आवरणस्य च द्रव्यकार्यत्वात्। **ननु** कर्मणा ज्ञानस्यावरणं नाम कर्मणा हेतुना ज्ञानस्य सङ्कोच इत्यर्थः इति चेत्, **मैवमपि ,** ज्ञानावरणरूपेण कर्मणेति त्वयोच्यमानत्वात्। न हि कर्मणो ज्ञानसङ्कोचनं स्वरूपं, किन्तु गुण एव। न च कर्मापि गुण एवेति वाच्यम् ; गुणकर्मणोर्भेदात्। न च पुण्यापुण्यसंस्काररूपमिदं कर्म गुण एवेति वाच्यम् ; तादृशस्य गुणस्य संस्काररूपत्वेन ज्ञानावरणरूपत्वाभावात्।

**किञ्च न** कर्मणो ज्ञानविरोधित्वमपि युक्तम् , कर्मणो ज्ञानोपायत्वात्। न च यज्ज्ञानविरोधि कर्म तदेवेह गृह्यत इति वाच्यम् ; अज्ञानशब्दस्य ज्ञानविरोधिवस्तुमात्रोपस्थापनक्षमत्वेन ज्ञानविरोधिवस्तुविशेषाबोधकत्वात्। सति ज्ञानविरोधितया प्रत्यक्षे अज्ञाने मायाख्ये तद् विहायान्यार्थबोधनस्यासम्भवात्। न ह्यसुरशब्दो राक्षसान् विहायान्यान् बोधयितुमीष्टे। तस्मात् नञो विरोधार्थमभ्युपेत्य न ज्ञानमज्ञानं ज्ञानविरोधीत्यर्थस्य वचनेऽपि तादृशमज्ञानं मायैव भवितुमर्हति, तस्या एव तथात्वात्। न हि कर्म वा अन्यद्वा एकान्तेन ज्ञानविरोधि, यज्ञादिकर्मणां गुरुशास्त्रादिद्वैतस्य च ज्ञानोपायत्वेन ज्ञानाविरोधदर्शनात्। तथा तेनेत्यस्य प्रकृतवाक्यार्थपरामर्शं न्याय्यं विहाय अज्ञानेनेत्यर्थकल्पनं चान्याय्यम् , अज्ञानं ज्ञानावरणद्वारैव मोहयति, न तु साक्षादिति कृत्वा अज्ञानेन मुह्यन्तीति वचनं पुनरयुक्तम् ॥१५॥

**ज्ञानेनेति**। येषां तु तद् आत्मनोऽज्ञानं ज्ञानेन नाशितम् , यद्वा येषां तु तदज्ञानमात्मनो ज्ञानेन नाशितम् , अथवा येषां तु

**ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।**
**तेषामादित्यवज्ज्ञानं प्रकाशयति तत् परम्॥ १६॥**

ज्ञानेनेति। ज्ञानेन तु **येनाज्ञानेनावृता मुह्यन्ति जन्तवः** तद् अज्ञानं येषां **जन्तूनां विवेकज्ञानेनात्मविषयेण नाशितम्** आत्मनो **भवति,** तेषां **जन्तूनाम्** आदित्यवद् **यथा आदित्यः समस्तं रूपजातमवभासयति, तद्वद् , ज्ञानं ज्ञेयं वस्तु सर्वं प्रकाशयति** तत् परं **परमार्थतत्त्वम्**॥ १६॥

आनन्दगिरिकृतव्याख्या

**तर्हि सर्वेषामनाद्यज्ञानावृतज्ञानत्वाद् व्यामोहापोहाभावाच्च कुतः संसारनिवृत्तिरिति? तत्राह—** ज्ञानेनेति। सर्वमिति **पूर्णत्वमुच्यते। ज्ञेयस्यैव वस्तुनः** तत्पर**मिति विशेषणम्। तद् व्याचष्टे—** परमार्थतत्त्वमिति ॥१६ ॥

भाष्यार्कप्रकाशः

तदात्मनोऽज्ञानमात्मनो ज्ञानेन नाशितम् , तेषां ज्ञानमादित्यवत् तत्परं प्रकाशयति। **आत्मनः** स्वस्याज्ञानम् , स्वस्वरूपावरकमज्ञानमित्यर्थः। स्वविवेकज्ञानावरकमिति वा। **ज्ञानेन** विद्यया, आत्मविषयज्ञानेनेत्यर्थः, नाशितम्। द्वितीययोजनायां तु , येषां **तत्** पूर्वोक्तम् अज्ञानम् , येन ज्ञानमावृतं तदित्यर्थः। आत्मनो ज्ञानेन 'अहं ब्रह्मास्मी'त्याकारकस्वस्वरूपज्ञानेन, आत्मविषयज्ञानेनेति यावत् , नाशितम्। तृतीययोजनायां तु आत्मस्वरूपावरकमज्ञानमात्मस्वरूपज्ञानेन नाशितमिति, आत्मविषयज्ञानेनात्मविषयाज्ञानं नाशितमिति चार्थः।

भाष्ये तृतीययोजनानुसारेणैवात्मशब्दस्यावृत्तिमभिप्रेत्योक्तम्— 'विवेकज्ञानेनात्मविषयेण नाशितमात्मनो भवती'ति। तदज्ञानमिति कर्तृपदं पूर्वमेवोक्तम्। आत्मनस्तदज्ञानमित्यन्वयः। ज्ञायतेऽनेनेति ज्ञानम्। ज्ञेयं वस्तु चात्रात्मैव। **सर्वमिति।** साकल्येनेत्यर्थः। **अथवा** ज्ञेयं सर्वं वस्तु ब्रह्मैव, सर्वस्य ब्रह्मत्वात्। न च कथं ब्रह्मणः परमार्थतत्त्वस्य द्रष्टुर्ज्ञेयत्वमिति वाच्यम् ; अध्यस्तत्वाज्ज्ञेयत्वस्य तस्मिन् , परमार्थतस्तु ज्ञातृज्ञानतत्करणानामभावात् कथं ज्ञेयत्वं ब्रह्मणः स्यात्?

**ननु** ज्ञानं तत् प्रकाशयतीत्ययुक्तम् , प्रकाशात्मकस्य ज्ञानस्य प्रकाशकत्वायोगात् , आत्मनैव सर्वस्य भास्यमानत्वाच्च, 'तस्य भासा सर्वमिदं विभाती'ति श्रुतेः, 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यात्मन एव ज्ञानस्वरूपत्वाच्चेति चेत् , **मैवम् ,** सर्वावभासकचैतन्यरूपमप्यात्मानमविद्याऽऽवृत्य वर्तते, अविद्यात्मनोरविरोधाद् , आत्मनैवाविद्यायाः भास्यमानत्वाच्च। तस्याश्चाविद्यायाः विद्यैव विरोधिनी, सैव विद्येह ज्ञानशब्देन विवक्षिता। सा तु बुद्धिवृत्तिरूपा, न तु प्रकाशरूपा। इयं बुद्धिवृत्तिर्विद्या आत्मावरकाविद्यां नाशयति। तत आत्मप्रकाशो जायत इति ब्रह्मवस्तुप्रकाशकत्वमुक्तं विद्यायाः[१]।

तस्माच्चैतन्यभासितयैव बुद्धिवृत्त्या ज्ञानेन करणेन आत्मावरकाज्ञाननाशनद्वारा आत्मा प्रकाश्यते, घटावरकाज्ञाननाशनद्वारा घट इवेति न कश्चिद् दोषः। एतेन बुद्धिवृत्तिरूपं ज्ञानं न प्रकाशात्मकम् , किन्तु प्रकाशकरणात्मकमेव, प्रकाशात्मकं ज्ञानं तु चैतन्यमेवेति सिद्धम्।

यत्तु **रामानुजः**— तेषामिति विनष्टाज्ञानानाम् , बहुत्वाभिधानादात्मस्वरूपबहुत्वम् , आदित्यदृष्टान्तेन च प्रभाप्रभावतोरिव ज्ञातृज्ञानयोरवस्थानम् , आत्मनो ज्ञानधर्मवत्त्वं च प्रतिपादितमिति, **तत्तुच्छम् ,** 'तेन मुह्यन्ति जन्तवः' इति पूर्वश्लोकोक्तजन्तूनामिह तत्पदेन परामर्शात्। जन्तवश्च भूतानि प्राणिन एव, न त्वात्मा, आत्मनो जन्तुत्वासम्भवात्। अजो ह्यात्मा। जायत इति जनिमांस्तु जन्तुः। यदि जन्तव इत्यनेनापि आत्मान एव लक्षणया विवक्षिताः इत्युच्येत, तर्हि महदनिष्टम् , यदात्मनः स्वप्रभस्यापि मोहः। मोहादयो ह्यन्तःकरणधर्माः।

अथ यद्यन्तःकरणतादात्म्याभिमानादात्मनो मोह इत्युच्यते, तर्हीमे जन्तवः न निरुपाधिकात्मभूताः, किन्तु सोपाधिका

१. स्वप्रकाशस्यान्येन प्रकाशासंभवात् आवरणभङ्ग एव प्रकाशपदार्थः।

**तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः।**
**गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥ १७॥**

**यत् परं ज्ञानप्रकाशितम्—**तद्बुद्धय इति। [1]**तस्मिन् गता बुद्धिर्येषां ते** तद्बुद्धयः, तदात्मानः **तदेव परं ब्रह्मात्मा येषां ते तदात्मानः,** तन्निष्ठाः - निष्ठा **अभिनिवेशस्तात्पर्यम्, सर्वाणि कर्माणि संन्यस्य तस्मिन् ब्रह्मण्येवावस्थानं येषां**

आनन्दगिरिकृतव्याख्या

**विदुषां विविदिषूणां चान्तरङ्गाणि विद्यापरिपाकसाधनानि उपदिदिक्षुरुत्तरश्लोकस्यापेक्षितं पूरयति—** यत्परमिति। **तस्मिन् परमार्थतत्त्वे परस्मिन् ब्रह्मणि बाह्यं विषयमपोह्य गता प्रवृत्ता श्रवणमनननिदिध्यासनैरसकृदनुष्ठितैर्बुद्धिः साक्षात्कारलक्षणा येषां ते तथेति प्रथमविशेषणं विभजते—** तस्मिन्निति। **तर्हि बोद्धा जीवो, बोद्धव्यं ब्रह्मेति जीवब्रह्मभेदाभ्युपगमः; नेत्याह—** तदात्मान इति। **कल्पितं बोद्धृबोद्धव्यत्वम्, वस्तुतस्तु न भेदोऽस्तीत्यङ्गीकृत्य व्याचष्टे—** तदेवेति। **ननु देहादावात्माभिमानमपनीय ब्रह्मण्येवाहमस्मीत्यवस्थानं तत्तदनुष्ठीयमानकर्मप्रतिबन्धान्न सिध्यतीत्याशङ्क्य विशेषणान्तरमादत्ते—**तन्निष्ठा इति। **तत्र निष्ठाशब्दार्थं दर्शयन् विवक्षितमर्थमाह—**

भाष्यार्कप्रकाशः

एवेति सिद्धम्। अन्तःकरणाद्युपाधिकृतमात्मबहुत्वमस्माकमिष्टमेव। एवं सोपाधिकानां जन्तूनामात्मनां मोह इत्युक्त्वा तेषामिति तच्छब्दपरामृष्टानां तज्जन्तूनां कथमकस्मादुच्यते निरुपाधिकत्वम्? न च - विनष्टाज्ञानानामुपाधिगन्धाभाव इति - वाच्यम्; अज्ञानविनाशमात्रेण तत्कार्यभूतान्तःकरणाद्युपाधिस्वरूपनाशाभावात्। न च - वस्तुत उपाध्यभावादज्ञानादेवोपाधिसम्भवादज्ञाननाशे कुत उपाध्यनाश इति - वाच्यम्, अस्य वचनस्य परमार्थविषयत्वाभावात्। परमार्थतोऽज्ञानस्यैवाभावात् कथमुच्येताज्ञानं ज्ञानेन नाशितमिति। 'न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः। न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता' इति कैवल्योपनिषच्छ्रुतेः। तस्मादुपाधिभेदादेव तेषामिति बहुत्वसिद्धेः आत्मबहुत्वकल्पनं गौरवादप्रमाणत्वाच्चोपेक्ष्यम्।

तथा निर्धर्मके आत्मनि ज्ञानधर्मकल्पनमप्ययुक्तम्। वृत्तिरूपं हीदं ज्ञानमन्तःकरणधर्मः, न त्वात्मधर्मः। अन्तःकरणक्षये वृत्त्यदर्शनात्। न च 'तस्य भासे'ति श्रुत्या ज्ञानस्यात्मधर्मत्वमिति वाच्यम्; राहोः शिर इतिवदौपचारिकभेदवादात्। आत्मस्वरूप-भूतज्ञानेनेति तदर्थात्। यद्यात्मा ज्ञानवान् स्यात्, तर्हि ज्ञानमान्तरं स्यादात्मनः, पृथिव्या गन्ध इव। तच्चानिष्टम्, आत्मनः सर्वान्तरत्वविरोधात्।

**ननु** [न च -] नात्मा सर्वान्तरः, किन्तु परमात्मैव, 'य आत्मानमन्तरो यमयती'ति श्रुतेरिति - वाच्यम्; आत्मानं प्रमातारं यः कूटस्थ आत्माऽन्तरो यमयतीति तच्छ्रुत्यर्थात्। कूटस्थस्य साक्षिण आत्मनोऽन्यस्यादर्शनात् 'साक्षी चेता' इति श्रुत्या परमात्मन एव साक्षित्ववचनाच्च नात्मनोऽन्यः परमात्मा, किन्त्वात्मैव। न च - 'कूटस्थोऽक्षर उच्यते, उत्तमः पुरुषस्त्वन्यः' इति वक्ष्यत इहैव कूटस्थात् परमात्मभेद इति - वाच्यम्; तत्र कूटस्थशब्देन मायाया विवक्षितत्वात्। उत्तमपुरुषस्य कूटस्थादन्यत्वे अकूटस्थत्वस्य सिद्धत्वात्। तच्चानिष्टम्, अनित्यत्वापत्तेः।

न च - ज्ञाता आत्मा कथं ज्ञानं स्याद्, अपि तु ज्ञानवानेवेति - वाच्यम्; त्वयाऽप्यात्मनो ज्ञानस्वरूपस्याभ्युपगतत्वात्। निर्विशेषज्ञानस्य तार्किकादिभिरप्यभ्युपगतत्वात्(?)। न च - निर्विशेषज्ञाने कथं ज्ञातृत्वविशेष इति - वाच्यम्; ज्ञातृत्वस्यापि कल्पितत्वात्। **अथवा** ज्ञातृत्वस्य ज्ञानानन्यत्वादिति[2]॥ १६॥

**तद्बुद्धय इति।** तच्छब्दार्थमाह— **यदिति।** ज्ञानप्रकाशितं परमार्थतत्त्वं ब्रह्म तच्छब्दार्थः। प्रकृतत्वादिति भावः। तस्मिन् बुद्धिर्येषां ते तद्बुद्धय इति समासः। गतेति तु फलितार्थकथनम्, स्थितेत्यर्थः।

**ननु** तदात्मान इति व्यर्थम्, अज्ञस्यापि तदात्मत्वाव्यभिचारादिति चेत्? **मैवम्**; यद्यप्यज्ञोऽपि तदात्मैव, तथापि स तथा न

१. 'तस्मिन् ब्रह्मणि' इति पा.। २. विशिष्टाद् भावप्रत्ययः विशेषणमभिधत्ते इति न्यायेन ज्ञातृत्वस्य ज्ञानरूपत्वादिति भावः।

**विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।**
**शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥ १८॥**

**ते तन्निष्ठाः,** तत्परायणाश्च **तदेव परमयनं परा गतिर्येषां भवति ते तत्परायणाः, केवलात्मरतय इत्यर्थः।** [1]**येषां ज्ञानेन नाशितमात्मनोऽज्ञानं ते गच्छन्त्येवंविधाः** अपुनरावृत्तिम् **अपुनर्देहसम्बन्धं** ज्ञाननिर्धूतकल्मषाः **यथोक्तेन ज्ञानेन निर्धूतो नाशितः कल्मषः पापादिसंसारकारणदोषो येषां ते ज्ञाननिर्धूतकल्मषाः यतय इत्यर्थः॥ १७॥**

**येषां ज्ञानेन नाशितमात्मनोऽज्ञानम् , ते पण्डिताः कथं तत्त्वं पश्यन्तीत्युच्यते—**विद्येति। विद्याविनयसम्पन्ने **विद्या च विनयश्च विद्याविनयौ,** [2]**(**विद्या आत्मनो बोधः,**)** विनय **उपशमः, ताभ्यां विद्याविनयाभ्यां सम्पन्नो विद्याविनयसम्पन्नो विद्वान् विनीतश्च यो ब्राह्मणस्तस्मिन् ब्राह्मणे, गवि, हस्तिनि, शुनि चैव श्वपाके च पण्डिताः समदर्शिनः। विद्याविनयसम्पन्ने** [3]**उत्तमे संस्कारवति ब्राह्मणे सात्त्विके, मध्यमायां च राजस्यां गवि संस्कारहीनायाम्**

आनन्दगिरिकृतव्याख्या

निष्ठेत्यादिना। **तथापि** [4]**पुरुषार्थान्तरापेक्षाप्रतिबन्धात् कथं यथोक्ते ब्रह्मण्येवावस्थानं सेद्धुं** [5]**पारयति? तत्राह—** तत्परायणाश्चेति। **यथोक्तानामधिकारिणां परमपुरुषार्थस्योक्तब्रह्मानतिरेकान्नान्यत्रासक्तिरिति तात्पर्यार्थमाह—** केवलेति। **ननु यथोक्तविशेषणवतां वर्तमान-देहपातेऽपि देहान्तरपरिग्रहव्यग्रतया कुतो यथोक्ते ब्रह्मण्यवस्थानमास्थातुं शक्यते? तत्राह—** येषामिति। (ते गच्छन्तीति।) **सति संसारकारणे दुरितादौ संसारप्रसरस्य दुर्वारत्वान्नापुनरावृत्तिसिद्धिरित्याशङ्क्याह—** ज्ञानेति। **उक्तविशेषणसम्पत्त्या दर्शितफलशालित्वम् आश्रमान्तरेषु असम्भावितमिति मन्वानो विशिनष्टि—** यतय इति॥ १७ ॥

**यदपुनरावृत्तिसाधनं तत्त्वज्ञानं, तदेव प्रश्नद्वारेण विवृणोति—** येषामित्यादिना। **विद्या वेदार्थविज्ञानमित्यङ्गीकृत्य विनयं व्याचष्टे—** विनय इति। उपशमो **निरहङ्कारत्वम् अनौद्धत्यम्। पदार्थमेवमुक्त्वा वाक्यार्थं दर्शयति—** विद्वानिति। **गवीत्याद्यनूद्य वाक्यार्थं कथयति—** विद्येति। **हस्त्यादौ पण्डिताः समदर्शिन इत्युत्तरत्र सम्बन्धः। तत्र तत्र प्राणिभेदेषु तत्तद्गुणैस्तत्तन्निमित्तसंस्कारैश्च संस्पृष्टत्वसम्भवान्न ब्रह्मणः समत्वमित्याशङ्क्याह—** सत्त्वादीति। **तज्जैश्चेत्यत्र तच्छब्देन सत्त्वमेव गृह्यते। सात्त्विकसंस्कारैरिव राजस-**

भाष्यार्कप्रकाशः

जानाति, प्राज्ञस्तु जानाति, अत उच्यते तदात्मेति प्राज्ञः। 'अहं ब्रह्मे'त्यात्मज्ञानवन्त इत्यर्थः। **ब्रह्मण्येवेति।** न कर्मादावित्येव-कारार्थः। **परा गतिः** परमं प्राप्यं। **अपुनरावृत्तिं** पुनरावृत्त्यभावं, मोक्षमिति यावत्। पुनरावृत्तिशब्दार्थमाह— **पुनर्देहसम्बन्धमिति।** यतीनां संन्यासिनामेव ब्रह्मनिष्ठादिसद्भावादाह— **यतय इति।**

**ननु** तद्बुद्धय इत्यादीनि चत्वारि विशेषणानि एकार्थबोधकत्वात् पुनरुक्तानीति चेत्? **मैवम्** ; सूक्ष्मदृष्ट्या अर्थभेदसत्त्वात्। तथाहि— तद्बुद्धय इत्यनेन पारोक्ष्येण ब्रह्मज्ञानम् , तदात्मान इत्यनेन ब्रह्मात्मापरोक्षज्ञानम् , तन्निष्ठा इत्यनेन नैरन्तर्येण तत्स्वरूपानुसन्धानम् , तत्परायणा इत्यनेन तद्रतिश्चाभिहितमिति॥ १७॥

**विद्येति। कथमिति।** कथं ते पण्डिता इत्याक्षेपः। समाधानमाह— **तत्त्वं पश्यन्तीति।** यतस्ते ज्ञाननाशितात्माज्ञानास्तत्त्वं पश्यन्ति, ततः पण्डिता इत्यर्थः। अयमेवार्थः श्लोकेनानेनोच्यत इत्याह— **उच्यत इति। यद्वा** ते पण्डितास्तत्त्वं कथं पश्यन्तीति प्रश्नः। तेषां पण्डितानां कीदृशं तत्त्वज्ञानमित्यर्थः। तस्योत्तरमनेनोच्यत इत्याह— **उच्यत** इति। पण्डिता ब्राह्मणादिषु समदर्शिनो भवन्तीत्यन्वयः।

नन्वव्युत्पन्नस्य बालस्याप्यस्ति ब्राह्मणादिषु समदर्शित्वम् , ब्राह्मणत्वादिविवेकग्रहणसामर्थ्याभावाद् , अत आह— **समं ब्रह्म**

---

१. 'येषां....अज्ञानम्' इति पाठः क्वचिन्न। २. क्वचिन्न। ३. 'उत्तमसंस्कारवति' इति पा.। ४. 'पुरुषार्थान्तरापेक्षात्प्रतिबन्धात्' इति पा.। ५. 'पारयन्ति' इति पा.।

**इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः।**
**निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः॥ १९॥**

[1]**अधमे च केवलतामसे हस्त्यादौ च, सत्त्वादिगुणैस्तज्जैश्च संस्कारैः, तथा राजसैः, तथा तामसैश्च संस्कारैः अत्यन्तमेवास्पृष्टं** समम् **एकमविक्रियं ब्रह्म तद् द्रष्टुं शीलं येषां ते पण्डिताः समदर्शिनः॥ १८॥**

**नन्वभोज्यान्नास्ते दोषवन्तः, 'समासमाभ्यां विषमसमे पूजातः' (गौ.ध.सू.२.८.२०) इति स्मृतेः। न ते**

आनन्दगिरिकृतव्याख्या

**संस्कारैरपि सर्वथैवासंस्पृष्टं ब्रह्मेत्याह—** तथेति। **राजसैरिव तामसैरपि संस्कारैर्ब्रह्मात्यन्तमेवास्पृष्टमित्याह—** तथा तामसैरिति। **ब्रह्मणोऽद्वितीयत्वं कूटस्थत्वमसङ्गत्वं चोक्तेऽर्थे हेतुरिति मत्वा समशब्दार्थमाह—** सममिति। **समदर्शित्वमेव** पाण्डित्यम्। **तद् व्याचष्टे—** ब्रह्मेति॥ १८॥

**सात्त्विकेषु राजसेषु तामसेषु च सत्त्वेषु समत्वदर्शनमनुचितमिति शङ्कते—** नन्विति। **सर्वत्र समदर्शिनस्तच्छब्देन परामृश्यन्ते। तेषां दोषवत्त्वादभोज्यान्नत्वमित्यत्र प्रमाणमाह—** समासमाभ्यामिति। समानाम् **अध्ययनादिभिः समानधर्मकाणां वस्त्रालङ्कारादिपूजया**

भाष्यार्कप्रकाशः

**द्रष्टुं शीलं येषां ते समदर्शिन** इति। ननु ब्राह्मणादीनां वैषम्ये प्रत्यक्षसिद्धे कथं तत्र ब्रह्मणः समत्वम्? अत आह— **सत्त्वादीति**। सत्त्वादिगुणभेदात्तत्कृतसंस्कारभेदाच्च ब्राह्मणादिभेदो युक्तः। आत्मनस्तु तद्गुणादिस्पर्शाभावाद्भेदो न युक्त इत्यर्थः। कुतः स्पर्शाभावः? अत आह— **अविक्रियमिति।** सति तु गुणादिस्पर्शे आत्मनो विक्रिया स्यात्, तच्चानिष्टम्, 'अविकार्योऽयमुच्यते' इत्यादिप्रमाणविरोधादिति भावः। नन्वविक्रियस्याप्यात्मनः प्रतिशरीरं भिन्नत्वात् कथं समत्वम्? अत आह— **एकमिति**। आत्मनः शरीरभेदप्रयुक्तो भेदो नास्ति, घटादिप्रयुक्तो भेद आकाशस्येवेति भावः। एवमेकत्वादेवास्याविक्रियत्वम्, अन्यथा सति सजातीयादिभेदे विकारित्वमेव स्याद् वृक्षादिवत्। भेदो हि विकारः। तस्माद् यः सर्वत्राप्येकमद्वितीयं ब्रह्मात्मानं पश्यति, स एव पण्डितः, न त्वन्यः। तच्च समदर्शित्वमेव पण्डितस्य तत्त्वज्ञानम्, न त्वन्यदिति॥ १८॥

**इहेति।** ननु यदि ब्राह्मणादिषु सर्वत्राप्यात्मन एकत्वेन समबुद्धिः पण्डितस्य, तर्हि ब्राह्मणादिभिः समं गवादयोऽपि पूज्या एव, एवंविधस्यान्नभोजनं दोषावहं स्मृतिविरोधादित्याक्षिपति— **नन्विति**। अभोज्यं भोक्तुमयोग्यमन्नं येषां ते **अभोज्यान्नाः**। यद्दत्तान्नं शिष्टानामभोज्यं ते इत्यर्थः। अत एव ते पण्डिताः दोषवन्तः भवन्तीति शेषः। **समे**ति स्मृतेरयमर्थः— कुलशीलविद्यादिभिस्तुल्यः समः, तद्विपरीतोऽसमः। विषमसमशब्दौ भावपरौ। समाहारद्वन्द्वः। **पूजातः** पूजायामासनपरिचरणादिकायां **विषमसमे** समेन सह पूजायां विषमे वैषम्ये, असमेन च समे साम्ये क्रियमाणे तदन्नमभोज्यमिति **मिताक्षरा**। 'नित्यमभोज्य'मिति सूत्रादभोज्यपदस्यानुवृत्तिः, तत्प्रकरणस्थत्वादेतत्सूत्रस्य। अन्नलाभस्तु 'पशुपाले'ति[2] सूत्रगत-भोज्यान्नशब्दगतान्नशब्दानुवृत्तेरिति बोध्यम्।

सूत्रस्यायमाशयः— यज्ञादौ विदुषां पूजासमये वेदविदो वेदविद्भिः समं, षडङ्गविदः षडङ्गविद्भिः समं, ब्रह्मविदो ब्रह्मविद्भिः समं, शास्त्रविदः शास्त्रविद्भिश्च समं पूजनीया यजमानेन। तत्र यदि वेदविदः षडङ्गविद्भिः समं, ब्रह्मविदो वेदविद्भिः समं, षडङ्गविदः शास्त्रविद्भिः समं पूज्यन्ते, तर्हि तद्यज्ञाद्यन्नमभोज्यं, समेन वेदविदा समं वेदविदोऽपूजितत्वादसमेन षडङ्गविदा समं वेदविदः पूजितत्वाच्च यजमानस्य सदोषत्वात् तद्द्वारा तदन्नमपि सदोषमेवेत्यभोज्यमिति। तस्मात् पण्डितेन न ब्राह्मणादिषु गवादिषु च समदृष्टिः कर्तव्येति पूर्वपक्षः।

परिहरति— **नेति**। तथेत्यर्थः। ते ब्राह्मणादिषु समदर्शिनः पण्डिताः दोषवन्तो न भवन्ति। तत्र हेतुमाक्षिपति— **कथमिति**।

---

१. 'अत्यन्तमेव' इति पा।  २. गौ.ध.सू.२.८.६।

**दोषवन्तः। कथम्?—** इहैवेति। इहैव **जीवद्भिरेव** तैः **समदर्शिभिः पण्डितैः** जितो **वशीकृतः** सर्गो **जन्म, येषां** साम्ये **सर्वभूतेषु ब्रह्मणि समभावे** स्थितं **निश्चलीभूतं** मनोऽन्तःकरणम्। निर्दोषम् - **यद्यपि दोषवत्सु श्वपाकादिषु मूढैः तद्दोषैर्दोषवदिव विभाव्यते, तथापि तद्दोषैरसंस्पृष्टमिति** निर्दोषं **दोषवर्जितं** हि **यस्मात् , नापि स्वगुणभेदभिन्नं निर्गुणत्वाच्चैतन्यस्य। वक्ष्यति च भगवानिच्छादीनां क्षेत्रधर्मत्वम्— 'अनादित्वान्निर्गुणत्वाद्' (भ.गी.१३.३१) इति च।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

पूजातः समासमाभ्यां विषमसमे क्रियमाणे समानधर्माणां विषमपूजायाम् असमानधर्माणां च समपूजायां क्रियमाणायां धनाद् धर्माच्च हीयत इत्यर्थः। ननु दोषवन्तो जीवास्तदभिन्नं ब्रह्म कथं निर्दोषमित्याशङ्क्याह— **यद्यपि दोषवत्स्विति**। प्रतिबिम्बरूपेण दोषवदिव भाव्यमानमपि चैतन्यं बिम्बरूपेण सकलदोषास्पृष्टम्। 'न लिप्यते लोकदुःखेन बाह्यः' 'शुद्धमपापविद्ध'मित्यादिश्रुतेरित्यर्थः। इदानीं समशब्दसूचितं प्रतिभासमानभोक्तृभेदस्य स्वरूपैक्यं व्याख्यातु-मुपक्रमते— **नापि स्वगुणभेदभिन्नमिति**।

आनन्दगिरिकृतव्याख्या

**विषमे प्रतिपत्तिविशेषे क्रियमाणे सति,** असमानां **चासमानधर्मकाणां कस्यचिदेकवेदत्वम् अपरस्य द्विवेदत्वमित्यादिधर्मवतां प्रागुक्तया पूजया समे प्रतिपत्तिविशेषे, पूजयिता पुरुषविशेषं ज्ञात्वा प्रतिपत्तिमकुर्वन् धनाद् धर्माच्च हीयते। तेन सात्त्विके राजसतामसयोश्च समबुद्धिं कुर्वन् प्रत्यवैतीत्यर्थः। उत्तरत्वेनोत्तरश्लोकमवतारयति—**न ते दोषवन्त इति। **स्मृत्यवष्टम्भेन सर्वसत्त्वेषु समत्वदर्शिनां दोषवत्त्वमुक्तं [1]कथं नास्तीति प्रतिज्ञामात्रेण सिध्यतीति शङ्कते—** कथमिति। **स्मृतेर्गतिमग्रे वदिष्यन् निर्दोषत्वं समत्वदर्शिनां विशदयति—** इहैवेति। **सर्वेषां चेतनानां साम्ये प्रवणमनसां ब्रह्मलोकगमनमन्तरेणास्मिन्नेव देहे परिभूतजन्मनामशेषदोषराहित्ये हेतुमाह—** निर्दोषं हीति। **वर्तमानो देहः सप्तम्या परिगृह्यते। तानेव समदर्शिनो विशिनष्टि—** येषामिति। **ननु ब्रह्मणो निर्दोषत्वमसिद्धम् , दोषवत्सु श्वपाकादिषु तद्दोषै-र्दोषवत्त्वोपलम्भसम्भवात् , तत्राह—** यद्यपीति। **यस्मात् तन्निर्दोषं तस्मात् तस्मिन् ब्रह्मणि स्थितैर्निर्दोषैः सर्गो जित इति सम्बन्धः। ब्रह्मणो गुणभूयस्त्वादल्पीयान् दोषोऽपि स्यादित्याशङ्क्याह—** नापीति। **चेतनस्य स्वगुणविशेषविशिष्टत्वमनिष्टं निर्गुणत्वश्रवणादि-त्ययुक्तम् इच्छादीनां परिशेषादात्मधर्मत्वस्य कैश्चिन्निश्चितत्वादित्याशङ्क्याह—** वक्ष्यति चेति। **आत्मनो निर्गुणत्वे वाक्यशेषं प्रमाणयति**

भाष्यार्कप्रकाशः

प्रकृतश्लोकेन हेतुरुच्यत इत्याह— **इहेति**। येषां मनः साम्ये स्थितं तैरिहैव सर्गो जितः। **इहैव** जीवद्दशायामेवेत्यर्थः। तदेवाह— **जीवद्भिरेवेति**। किं तत्साम्यम्? अत आह— **सर्वभूतेषु ब्रह्मणः समभाव इति**। सर्वभूतेष्वप्येकमेव ब्रह्मास्तीत्येवंरूपे ब्रह्मसाम्ये इत्यर्थः। **स्थितं** दृढमवस्थितमित्यर्थः। ननु कस्माद् ब्रह्मसाम्यविद्भिरिहैव सर्गो जित इत्यत आह— **निर्दोषमिति। हि** यस्माद् ब्रह्म निर्दोषं समं चेति।

ननु कुतो निर्दोषत्वं ब्रह्मणः सदोषश्वादिशरीरावस्थितस्य तत्संसर्गाद् दोषवत्त्वेन भाव्यत्वाच्चण्डालगृहस्थितब्राह्मणवदित्यत आह— **यद्यपीति**। **तद्दोषैः** श्वपाकादिदोषैः **विभाव्यते** ज्ञायते। श्वपाकादिसङ्घातस्य तदन्तर्गतात्मनश्चाविवेकान्मूढाः श्वपाकादीनात्मत्वेन प्रतिपद्य दुष्ट आत्मेति मन्यन्त इत्यर्थः। **तथापीति**। एवं मूढैर्विभावितत्वेऽपीत्यर्थः। **तद्दोषैरस्पृष्टमिति** । घटादिदोषैराकाश इवेति भावः। अध्यस्तसर्पदोषैः रज्जुवदिति वा। असङ्गस्य पुरुषस्य वस्तुतः शरीरसङ्गस्यैवाभावात् कुतः पुनस्तद्दोषप्रसङ्ग इति तत्त्वम्।

ननु निर्दोषमपि ब्रह्म समं न भवति, गुणवत्त्वात् , प्रकृतिवदित्यत आह— **नापीति**। यथा प्रकृतिः स्वकीयसत्त्वादिगुणभेदाद् बहुविधा, न तथा ब्रह्म बहुविधम् , सगुणत्वाभावात्। चैतन्यात्मकस्य ब्रह्मणो निर्गुणत्वे गीतामेव प्रमाणयति— **वक्ष्यति चेति।** ब्रह्मणोऽनादित्वान्निर्गुणत्वाच्च इच्छादीनां न ब्रह्मधर्मत्वम् , किन्तु क्षेत्रधर्मत्वमेवेति त्रयोदशाध्याये— 'अनादिमत्परं ब्रह्म न

१. न ते दोषवन्त इति प्रतिज्ञामात्रेण उक्तं दोषवत्त्वं नास्तीति कथं सिध्यतीत्यन्वयः।

**[१]नाप्यन्त्या विशेषाः आत्मनो भेदकाः सन्ति, प्रतिशरीरं तेषां सत्त्वे प्रमाणानुपपत्तेः। अतः समं ब्रह्मैकं च। तस्माद्**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**अनेन चेदं निरस्तम्**— यदाहुः **वैशेषिकादयः** आत्मा [२]दृष्टव्य[द्रव्य]त्वातिरिक्तापरजात्याधारः, अश्रावणविशेषगुणाधिकरणत्वाद् घटवदिति। हेतोरसिद्धत्वात्, ज्ञेयानां ज्ञातृधर्मत्वानुपपत्तेरित्यर्थः। यच्च ते मन्यन्ते— अस्मदाद्यक्षगम्येषु खण्डमुण्डादिव्यावर्तकाः सामान्यविशेषाः गोत्वादयः, तथा योगिप्रत्यक्षगम्येष्वत्यन्तसलक्षणेषु नित्येष्वात्मादिषु व्यावर्तकाः अन्त्याः विशेषाः सन्तीति, तन्निराचष्टे— **नाप्यन्त्या विशेषा इति**। प्रतिशरीरमात्मव्यक्तिभेदे सिद्धे तदाश्रितान्त्यविशेषसिद्धिः, तत्सिद्धौ च तद्बलाद् भेदसिद्धिरिति [३]परस्पराश्रयादित्यर्थः। नन्वस्ति तावत् पण्डितमूर्खादिभेदेन जीवभेदप्रतीतिः। ततः तत्सिद्ध्यन्यथानुपपत्त्या तन्निर्वाहका अन्त्या विशेषाः कल्प्यन्त इत्याशङ्क्याह— **तेषां सत्त्व इति**। यथा दिगादीनामेकत्वेऽप्यौपाधिकः प्राच्यादिविभागः, तथा चितः स्वरूपैक्येऽपि सकलोऽपि विभागव्यवहारः औपाधिक एवोपपत्स्यते। लाघवं तु न्याय्यम्। 'एको देवः सर्वभूतेषु गूढः' इत्यादिश्रुतिविरोधः स्फुट एव। तस्मादन्त्यविशेषादिकल्पना व्यामोहायैवेति भावः।

आनन्दगिरिकृतव्याख्या

**—**अनादित्वादिति। **चकारो वक्ष्यतीत्यनेन सम्बन्धार्थः। गुणदोषवशादात्मनो भेदाभावेऽपि भेदोऽन्त्यविशेषेभ्यो भविष्यतीत्यति[तीति] प्रसङ्गादाशङ्क्य दूषयति—** नापीति। **प्रतिशरीरमात्मभेदसिद्धौ तद्धेतुत्वेन तेषां सत्त्वम्, तेषां च सत्त्वे प्रतिशरीरमात्मनो भेदसिद्धिरिति परस्पराश्रयत्वमभिप्रेत्य हेतुमाह—** प्रतिशरीरमिति। **आत्मनो भेदकाभावे फलितमाह—** अत इति। **समत्वमेव व्याकरोति—** एकं चेति। **ब्रह्मणो निर्विशेषत्वेनैकत्वाज्जीवानां च भेदकाभावेनैकत्वस्योक्तत्वाद् एकलक्षणत्वादेकत्वं जीवब्रह्मणोरेष्टव्यमित्याह—** तस्मादिति। **जीवब्रह्मणोरेकत्वे जीवानां ब्रह्मवन्निर्दोषत्वं सिध्यतीत्याह—** तस्मान्नेति। **तच्छब्दार्थमेव स्फोरयति—** देहादीति। **यदि सर्वसत्त्वेषु**

भाष्यार्कप्रकाशः

सत्तन्नासदुच्यते।' 'असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च।' 'विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान्।' 'इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः। एतत्क्षेत्रं समासेन सविकारमुदाहृतम्॥' इति वक्ष्यमाणत्वादिति भावः।

ननु माऽस्त्वात्मनो गुणतो भेदः, विशेषतस्तु भेदो भविष्यति। नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः, यैः परमाण्वादीनां मिथो भेदःसिध्यति - इति शङ्कायां, किमिमे विशेषा आत्मनि स्थित्वा आत्मानं भेदयन्ति? उत शरीरे स्थित्वेति विकल्प्य, तत्र निर्विशेषे आत्मनि विशेषस्थित्ययोगाच्छरीरे स्थित्वेति प्राप्ते परिहरति— **नापीति**। आत्मनो भेदका विशेषाः प्रतिशरीरं शरीरे शरीरे न सन्ति, शरीरस्यानित्यत्वाद् विशेषाणां नित्यद्रव्यवृत्तित्वाच्चेति भावः।

ननु पृथिव्यादिपरमाण्वारब्धे शरीरे, तन्त्वारब्धे पटे तन्तव इव परमाणवः सन्ति, ते हि नित्यद्रव्याणि। अतस्तत्र विशेषाः सन्त्येवेत्यत आह— **तेषां सत्त्वे प्रमाणाभावादिति**। वेदान्तमते ब्रह्मभिन्नस्य सर्वस्याप्यनित्यत्वेन नित्यद्रव्यस्यैवाभावात्, गुणवत्त्वस्य द्रव्यलक्षणत्वेन निर्गुणे ब्रह्मणि द्रव्यत्वाभावाच्च, नित्यद्रव्यवृत्तित्वे सति व्यावर्तकत्वरूपलक्षणस्यासम्भवादप्रमाणैव विशेषकल्पना इति। विशेषाणामभ्युपगमेऽपि शरीराश्रयाणां तद्गतपरमाण्वाश्रयाणां वा तेषां शरीरभेदकत्वं परमाणुभेदकत्वं वा स्यात्, न त्वात्मभेदकत्वम्, अन्यगतविशेषस्यान्यभेदकत्वासम्भवात्। न हि घटगताः पृथिवीपरमाणुगता वा विशेषा आकाशं भेदयितुं क्षमन्त इति। तस्मान्नास्ति विशेषकृतोऽप्यात्मभेदः।

**तत इति**। आत्मभेदप्रयोजकाभावादित्यर्थः। **सममिति**। सर्वत्रैकरूपमित्यर्थः। कुतः समत्वम्? आह— **एकं चेति**। सर्वत्राप्येकस्यैव ब्रह्मणः स्थितत्वात् समत्वमित्यर्थः। श्लोकतुरीयपादं व्याख्याति— **तस्मादिति**। यस्मात् तेषां मनः साम्ये स्थितं

१. द्र.ब्र.सू. २-३-५३। नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः - स च वैशेषिकसंमतोऽतिरिक्तः पदार्थः। २. आत्मभेदसाधकमिदमनुमानम्। द्रव्यत्वातिरिक्तापरजातिः आत्मत्वजातिरिष्टा। तदाश्रयत्वोपपत्तये आत्मभेदोऽङ्गीकर्तव्यः। द्र. प्रकटार्थे पृ. ७६४। ३. भेदसिद्ध्यर्थं भेदसिद्ध्यधीनसिद्धिकस्य विशेषस्य ज्ञातव्यत्वादिति भावः।

**ब्रह्मण्येव ते स्थिताः। तस्मान्न दोषगन्धमात्रमपि तान् स्पृशति, देहादिसङ्घातात्मदर्शनाभिमानाभावात् तेषाम्। देहादिसङ्घातात्मदर्शनाभिमानवद्विषयं तु तत् सूत्रम्— 'समासमाभ्यां विषमसमे पूजातः'(गौ.ध.सू.२.८.२०) इति, पूजाविषयत्वविशेषणात्।[१] दृश्यते हि ब्रह्मवित् षडङ्गवित् चतुर्वेदविदिति पूजादानादौ गुणविशेषसम्बन्धः कारणम् । ब्रह्म तु सर्वगुणदोषसम्बन्धवर्जितमित्यतो ब्रह्मणि ते स्थिता इति युक्तम्। [२]कर्मिविषयं च समासमाभ्यामित्यादि। इदं**

अनुभूतिस्वरूपाचार्यटिप्पणम्

येभ्यो ददाति ते गुणवन्तः, द्रष्टव्यं तु ब्रह्म गुणदोषहीनमिति एको विषयविभाग उक्तः। इदानीं यो ददाति स कर्मी, यस्तु ब्रह्म पश्यति स संन्यासीति अपरं विषयविभागमाह— **कर्मिविषयं चेति**॥

**॥ इति गीताभाष्यटिप्पणे पञ्चमोऽध्यायः॥**

आनन्दगिरिकृतव्याख्या

**समत्वदर्शनमदुष्टमिष्टम् , तर्हि कथं गौतमसूत्रमित्याशङ्क्याह—** देहादिसङ्घातेति। **सूत्रस्य यथोक्ताभिमानवद्विषयत्वे गमकमाह—** पूजेति। **यदि चतुर्वेदानामेव सतां पूजया वैषम्यम् , यदि वा चतुर्वेदानां षडङ्गविदां ब्रह्मविदां च पूजया साम्यम् , तदा तेषामुक्तपूजाविषयाणां केषाञ्चिन्मनोविकारसम्भवे कर्ता प्रत्यवैतीत्यविद्वद्विषयत्वं सूत्रस्य प्रतिभातीत्यर्थः। तत्रैव चानुभवमनुकूलत्वेनोदाहरति—** दृश्यते हीति। **देहादिसङ्घाताभिमानवतां गुणदोषसम्बन्धसम्भवात् तद्विषयं सूत्रमित्युक्तम्। इदानीं ब्रह्मात्मदर्शनाभिमानवतां गुणदोषासम्बन्धाद् न तद्विषयं सूत्रमित्यभिप्रेत्याह—** ब्रह्म त्विति। **इतश्च नेदं सूत्रं ब्रह्मविद्विषयमित्याह—** कर्मीति। **तत्रैव पूजापरिभवसम्भवादित्यर्थः। ननु यत्र समत्वदर्शनं तत्रैव त्विदं सूत्रम् , न तु कर्मिण्यकर्मिणि वेति विभागोऽस्ति, तत्राह—** इदं त्विति। **समत्वदर्शनस्य संन्यासिविषयत्वेन प्रस्तुतत्वे हेतुमाह—** सर्वकर्माणीति। **आ अध्यायपरिसमाप्तेः 'सर्वकर्माणी'त्यारभ्य तत्र तत्र सर्वकर्मसंन्यासाभिधानात् तद्विषयमिदं**

भाष्यार्कप्रकाशः

तस्मादित्यर्थः। यद्वा यस्मान्निर्दोषं समं ब्रह्म तस्मादित्यर्थः। ब्रह्मणो निर्दोषत्वादित्यर्थः। **ब्रह्मण्येवेति**। न तु दोषवत्पिण्डे इत्यर्थः। **तस्मादिति**। ब्रह्मण्येव स्थितत्वाद् ब्रह्मणश्च निर्दोषत्वादित्यर्थः। **गन्धो** लेशः। तान् पण्डितान् समदर्शिनः कुतो न स्पृशतीत्यत आह— **देहादीति**। येषां देहादिसङ्घाते दोषवति आत्माभिमानो नास्ति तेषां कथं सङ्घातगतदोषस्पर्श इत्यर्थः।

अथ सूत्रस्य गतिं दर्शयति— **देहादीति**। ये सङ्घातमात्मत्वेनाभिमन्यन्ते तद्विषयं समासमाभ्यामिति सूत्रम् , न त्वात्मविद्विषयम्। ननु कथमिदं ज्ञायते? अत आह— **पूजात** इति। पूजायां विषये इत्युक्तत्वात् पूजायाश्च कर्मत्वात् कर्मविषयमेवेदं, न तु ज्ञानविषयमित्यर्थः।

ननु कर्मणि कथमस्योपयोगः? अत आह— **दृश्यत इति**। पूजादानादौ कर्मणि ब्रह्मवित् षडङ्गविच्चतुर्वेदविदित्येवं गुणविशेषसम्बन्धरूपं तारतम्यकारणं दृश्यते। **हिः** प्रसिद्धौ। पूजायां प्राप्तायां कः प्रथमं पूज्य इति शङ्कायां ब्रह्मविदादौ पूज्य इति ब्रह्मवित्त्वरूपगुणविशेषसम्बन्धाद् ब्रह्मवित् प्रथमं पूज्यते, पश्चात्तु वेदविदित्येवमित्यर्थः। यस्तु ब्रह्मनिष्ठः तस्य पूजाप्रसक्तिरेव नास्ति, तस्य निर्गुणे निर्दोषे च ब्रह्मण्येव स्थितत्वादित्याह— **ब्रह्म त्विति**। गौतमस्मृतिगीताश्लोकयोर्विभिन्नविषयत्वान्न विरोध इत्युपसंहरति— **कर्मविषयं चेति**।

एतेन पण्डितस्य जनकादेरपि ज्ञानविषय एव ब्राह्मणगवादिसमदर्शित्वम् , न तु पूजादिकर्मविषये इति लोकसंग्रहो दर्शितः। पूजादेः सङ्घातविषयत्वात् सङ्घातेषु च गुणदोषतारतम्यसत्त्वात्। ज्ञानस्य त्वात्मविषयत्वादात्मनश्चैकत्वादिति। अतो ज्ञानविषयेण 'विद्याविनये'ति श्लोकेन न कोऽपि स्मृत्यादिसिद्धस्य लोकधर्मस्य भङ्गः, 'ब्राह्मणं श्वपाकादिकं च समदृष्ट्या पूजयेदि'त्यनुक्तत्वात्। किन्तु ब्राह्मणे श्वपाकादौ च वर्तमानमात्मानं समं पश्येदित्युक्तत्वात्।

---

१. 'पूजाविषयत्वेन विशेषणात्' इति पा.। २. 'कर्मविषयं' इति पा.।

**न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम्।**
**स्थिरबुद्धिरसम्मूढो ब्रह्मविद् ब्रह्मणि स्थितः॥ २०॥**

**तु सर्वकर्मसंन्यासिविषयं प्रस्तुतं 'सर्वकर्माणि मनसा' (भ.गी.५.१३) इत्यारभ्य आऽध्यायपरिसमाप्तेः॥ १९॥**

**यस्माद् निर्दोषं समं ब्रह्मात्मा, तस्मात्—** न प्रहृष्येदिति। न प्रहृष्येत् **न प्रहर्षं कुर्यात्** प्रियम् **इष्टं** प्राप्य **लब्ध्वा। नोद्विजेत्** प्राप्य **च** अप्रियम् **अनिष्टं लब्ध्वा। देहमात्रात्मदर्शिनां हि प्रियाप्रियप्राप्ती हर्षविषादस्थाने**[1]**। न केवलात्मदर्शिनः, तस्य प्रियाप्रियप्राप्त्यसम्भवात्। किञ्च सर्वभूतेष्वेकः समो निर्दोष आत्मेति स्थिरा निर्विचिकित्सा बुद्धिर्यस्य स** स्थिरबुद्धिः, असम्मूढः **सम्मोहवर्जितश्च स्याद् यथोक्तब्रह्मविद् ब्रह्मणि स्थितोऽकर्मकृत् सर्वकर्मसंन्यासीत्यर्थः॥ २०॥**

आनन्दगिरिकृतव्याख्या

**समत्वदर्शनं गम्यते। **[2]**तत्र च निरहङ्कारे निरवकाशं सूत्रमित्यर्थः॥ १९॥**

**नन्विष्टानिष्टप्राप्तिभ्यां हर्षविषादौ विद्वानपि कुर्वन् निर्दोषे ब्रह्मणि कथं स्थितिं लभेतेत्याशङ्क्य , आकाङ्क्षितं पूरयन्नुत्तरश्लोकमुत्थापयति—** यस्मादिति। **आत्मज्ञाननिष्ठावतो विदुषो हर्षविषादनिमित्ताभावान्न तावुचितावित्याह—** स्थिरबुद्धिरिति। **ननु हर्षविषादनिमित्तत्वं प्रियाप्रिययोः सिद्धमिति कथं तत्प्राप्त्या हर्षोद्वेगौ न कर्तव्याविति नियुज्यते? तत्राह—** देहेति। **विदुषोऽपि प्रियाप्रियप्राप्तिसामर्थ्यादेव हर्षविषादौ दुर्वारावित्याशङ्क्याह—** न केवलेति। **अद्वितीयात्मदर्शनशीलस्य व्यतिरिक्तप्रियाप्रियप्राप्त्ययोगान्न तन्निमित्तौ हर्षविषादावित्यर्थः। इतोऽपि विदुषो हर्षविषादावसम्भावितावित्याह—** किञ्चेति। **निर्दोषे ब्रह्मणि प्रागुक्ते दृढप्रतिपत्तिः, सम्मोहेन हर्षादिहेतुना रहितः, यथोक्ते सर्वदोषरहिते ब्रह्मण्यहमस्मीति विद्यावान् अशेषदोषशून्ये तस्मिन्नेव ब्रह्मणि स्थितस्तदनुरोधात् कर्माण्यमृष्यमाणो नैव हर्षविषादभागी भवितुमलमित्यर्थः॥ २०॥**

भाष्यार्कप्रकाशः

न चेदं समदर्शनं पूजोपयोगि, प्रत्युत सर्वद्वैतनिरासेन पूजानिर्मूलकमेव। सत्यां पूज्यपूजकपूजासाधनपूजारूपभेदबुद्धौ अद्वितीयब्रह्मबुद्धेरेवानुदयात् तदुदये सूर्योदये तमस इव भेदबुद्धेः सर्वात्मना नाशाच्च। तस्माद् युक्तमुक्तं पण्डिता ब्राह्मणादिषु समदर्शिन इति। न तु समपूजका इत्ययुक्तमुक्तं, येनाशङ्क्येत स्मृत्यादिविरोध इति। **आ अध्यायपरिसमाप्तेरिति** छेदः। यावदध्यायसमाप्तीत्यर्थः।

अत्र 'इहैव तैर्जितः सर्गः' इत्येतज्जीवन्मुक्तिव्यवस्थापकं जीवद्भिरेव जन्मादिलक्षणः संसारो जित इति जीवतां संसारजयरूपमुक्तिप्रतिपादनात्। आत्मसु ज्ञानैकाकारतया साम्यमेवानुसन्दधाना मुक्ता एवेत्यर्थ इति **रामानुजः**, संसारो जित इति मुक्तप्रायास्त इत्यर्थ इति **वेदान्तदेशिक**श्चार्थाज्जीवन्मुक्तिमभ्युपगतवन्तावेव, गत्यभावात् , मूलस्यार्थान्तरपरिकल्पनेऽवकाशाभावाच्च। अतो योऽमीषां द्वैतिनां च जीवन्मुक्तिप्रतिक्षेपणोऽसमीचीनो वादः, सोऽनेन पराहत एव गीताविरोधात् , स्वाभ्युपगमविरोधाच्चेति ज्ञेयम्॥ १९॥

**नेति।** स्थिरबुद्धिरसम्मूढो ब्रह्मणि स्थितो ब्रह्मवित् प्रियं प्राप्य न प्रहृष्येत् , अप्रियं प्राप्य नोद्विजेत्। **यद्वा** ब्रह्मवित् प्रियं प्राप्य न हृष्येत् , अप्रियं प्राप्य नोद्विजेत् , स्थिरबुद्धिरसम्मूढश्च स्यात् , एवंविधो ब्रह्मवित् ब्रह्मणि स्थित इत्युच्यत इत्यन्वयः।

**असम्भवादिति।** 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इति श्रुतेरिति भावः। **निर्विचिकित्सा** निःसंशया। **सम्मोहः** अनात्मस्वात्माभिमानः। ब्रह्मणि स्थितो ब्रह्मनिष्ठः। न तु कर्मनिष्ठ इत्याह— **अकर्मकृदिति।** कर्मकृन्न भवतीत्यकर्मकृत्। फलितार्थमाह— **सर्वकर्मसंन्यासीति**॥ २०॥

---

१. 'प्रियाप्रिये हर्षविषादौ कुर्वाते' इति पा.। २. 'तत्र तन्निरहङ्कारे' इति पा.।

**बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम्।**
**स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥२१॥**

**किञ्च ब्रह्मणि स्थितः—** बाह्येति। बाह्यस्पर्शेषु **बाह्याश्च ते स्पर्शाश्च बाह्यस्पर्शाः, स्पृश्यन्त इति स्पर्शाः शब्दादयो विषयास्तेषु बाह्यस्पर्शेषु असक्तः** आत्माऽन्तः**करणं यस्य सो**ऽयमसक्तात्मा **विषयेषु प्रीतिवर्जितः सन्** विन्दति **लभते आत्मनि यत् सुखं, तद् विन्दतीत्येतत्। स** ब्रह्मयोगयुक्तात्मा **ब्रह्मणि** योगः **समाधिर्ब्रह्मयोगः, तेन ब्रह्मयोगेन युक्तः समाहितस्तस्मिन् व्यापृतः** आत्मा **अन्तःकरणं यस्य स ब्रह्मयोगयुक्तात्मा सुखमक्षयम्** अश्नुते [१]**व्याप्नोति। तस्माद् बाह्यविषयप्रीतेः क्षणिकायाः इन्द्रियाणि निवर्तयेदात्मन्यक्षयसुखार्थीत्यर्थः॥२१॥**

आनन्दगिरिकृतव्याख्या

**शब्दादिविषयप्रीतिप्रतिबन्धान्न कस्यचिदपि ब्रह्मणि स्थितिः सिध्येदित्याशङ्क्याह—** किञ्चेति। **न केवलं पूर्वोक्तरीत्या ब्रह्मणि स्थितो हर्षविषादरहितः, किन्तु विधान्तरेणापीत्यर्थः। यावद्यावद् विषयेषु रागरूपमावरणं निवर्तते,** [२]**तावत्तावद् आत्मस्वरूपसुखमभिव्यक्तं भवतीत्याह—** बाह्येति। **न केवलमसक्तात्मा शमवशादेव सुखं विन्दति, किन्तु ब्रह्मसमाधिना समाहितान्तःकरणः सुखमनन्तं प्राप्नोतीत्याह—** स ब्रह्मेति। **तत्र पूर्वार्धं व्याचष्टे—** बाह्याश्चेति। **समाधानाधीनसम्यग्ज्ञानद्वारा निरतिशयसुखप्राप्तिमुत्तरार्धव्याख्यानेन कथयति—** ब्रह्मणीत्यादिना। **शब्दादिविषयविमुखस्यानन्तसुखाप्तिसम्भवात् तदर्थिना प्रयत्नेन विषयवैमुख्यं कर्तव्यमिति शिष्यशिक्षार्थमाह—** तस्मादिति॥२१॥

भाष्यार्कप्रकाशः

**बाह्येति।** [३]यः बाह्यस्पर्शेष्वसक्तात्मा सन् आत्मनि सुखं विन्दति, ब्रह्मयोगयुक्तात्मा सः अक्षयं सुखमश्नुते। आत्मनि सुखमित्यस्यार्थमाह— **आत्मनि यत्सुखं तदिति।** आत्मानन्दमित्यर्थः।

**ननु** आत्मन एव सुखत्वात् कथमात्मनि सुखमित्युक्तमिति चेत्? **नैष दोषः**। 'आनन्दं ब्रह्मणो विद्वान्' इतिवद् भेदस्य कल्पितत्वात्। 'आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति तद्धर्माः अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्ते' इत्युक्तत्वाच्च।

**ननु** यः आत्मसुखं विन्दति स आत्मैवेति कथमेकस्य आत्मनः प्राप्यप्राप्तृभाव इति चेत् , **नैष दोषः**। एक एवात्मा सुखरूपत्वेन प्राप्यः, अनुभवरूपत्वेन प्राप्ता चेति। **यद्वा** प्रमातृत्वेन प्राप्ता, ब्रह्मत्वेन प्राप्यश्चेति। **अथवा** यदात्मनः सुखस्वरूपेणावस्थानं तदेव सुखानुभव इतीह विवक्षितत्वान्न प्राप्यप्राप्तृभावप्रसक्तिः[४]।

आत्मनि सुखं विन्दतीत्यनेन 'आत्मरतिरात्मक्रीडः' इति श्रुत्यर्थोऽभिप्रेतः। **ब्रह्मयोग इति। ब्रह्म** आत्मा। **योग**श्चित्तसमाधानम्। **अक्षयमिति**। आत्मसुखस्याक्षयत्वादिति भावः। **तस्मादिति**। ब्रह्मानुसन्धानस्याक्षयसुखत्वादित्यर्थः। **बाह्यविषयप्रीतेः** शब्दाद्यनुभवजन्यसुखात्। आत्मनि यदक्षयं सुखं तदर्थी पुरुषः। यः पुमान् ममाक्षयसुखलाभः स्यादिति वाञ्छति, स न बहिर्विषयेषु सज्जेत् , तत्र क्षणिकसुखसत्त्वात् , किन्तु आत्मस्वरूपानुसन्धान एव सज्जेत् , तत्रैवाक्षयसुखसत्त्वात्। विषयाणां क्षणिकत्वात् तत्सुखमपि क्षणिकम्। नित्यत्वादात्मनस्तत्सुखं च नित्यमिति बोध्यम्॥२१॥

---

१. 'प्राप्नोति' इति पा.। २. विषयरागस्य आत्मसुखावरणत्वात् तन्निवृत्त्या आत्मस्वरूपसुखमभिव्यज्यते। अतो विषयानासक्तिरूपान्तःकरणोपशमयुक्तः तद्वशादेवात्मसुखाभिव्यक्तियुक्तो ब्रह्मयोगशब्दितसाक्षात्कारप्राप्त्या मूलाज्ञानलक्षणावरणनिवृत्तौ निरतिशयं सुखं प्राप्नोतीत्यर्थः। यावद्यावदित्यनेन— पूर्वं सुखाभिव्यक्तिः अभिव्यञ्जकस्य रागक्षयस्य तारतम्यात् तारतम्यवतीति सूचितम्। उक्तो हि अकामहतत्वकृतो विशेषः आनन्दस्य शतगुणोत्कर्षहेतुः तैत्तिरीयके बृहदारण्यके चेति। पश्चात्तु निःशेषावरणनिवृत्त्या स्वप्रकाशसुखस्फुरणस्य निरतिशयत्वमिति भावः। 'यत् सुखं विन्दति तदेव सुखं निरतिशयं प्राप्नोती'ति यत्तच्छब्दाभ्यां आत्मस्वरूपसुखस्याभेदः उक्तो भवति। ३. मूले— 'बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यः सुखम्' इति रामकविदृष्टः पाठ इति भाति। ४. 'ब्रह्मविदाप्नोति परम्' इत्यादौ ब्रह्मभावापत्तेरेव तत्प्राप्तित्वेन व्यपदेशादिति भावः।

**ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।**
**आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः॥२२॥**

**इतश्च निवर्तयेत्**—ये हीति। **ये** हि **यस्मात्** संस्पर्शजा **विषयेन्द्रियसंस्पर्शेभ्यो जाता** भोगा **भुक्तयो, दुःखयोनय एव तेऽविद्याकृतत्वात्। दृश्यन्ते ह्याध्यात्मिकादीनि दुःखानि तन्निमित्तान्येव। यथेह लोके तथा परलोकेऽपीति गम्यत एवशब्दात्। न संसारे सुखस्य गन्धमात्रमप्यस्तीति बुद्ध्वा विषयमृगतृष्णिकायाः इन्द्रियाणि निवर्तयेत् । न केवलं दुःखयोनय** [1]**एव,** आद्यन्तवन्तश्च**, आदिर्विषयेन्द्रियसंयोगो भोगानाम् , अन्तश्च तद्वियोग एव, अतः आद्यन्तवन्तो**

आनन्दगिरिकृतव्याख्या

[2]**तत्रैव हेत्वन्तरपरत्वेनोत्तरश्लोकमुदाहरति—** इतश्चेति। **विषयेभ्यः सकाशादिन्द्रियाणीति शेषः। वैराग्यार्थमेव वैषयिकाणि सुखानि दूषयति—**ये हीति। **ननु विषयेन्द्रियसम्प्रयोग**[3]**सम्प्रसूतेषु भोगेषु जन्तूनामभिरुचिदर्शनात् कुतस्तेषां दुःखयोनित्वमित्याशङ्क्य , अविवेकिनां तेष्वासङ्गेऽपि न विवेकिनामित्याह—** आद्यन्तवन्त इति। **यस्मादाधिव्याधिजरामरणादिसहितेभ्यः समागमनादिक्लेशरूप-भागिभ्यश्च विषयेन्द्रियसम्बन्धेभ्यो** भोगाः **सुखलवानुभवा जायन्ते, तस्मात् ते दुःखहेतवो भवन्तीति योजना। अविद्याकार्यत्वाद् दुखानां कुतो भोगजन्यत्वमित्याशङ्क्य भोगानामविद्याप्रयुक्तत्वात् तन्निबन्धनत्वं दुःखानां युक्तमित्यभिप्रेत्याह—** अविद्येति। **भोगानां दुःखयोनित्वे** [4]**मानमनुभवमुपन्यस्यति—** दृश्यन्ते हीति। **ऐहिकानां भोगानां दुःखनिमित्तत्वेऽपि नामुष्मिकाणां तथात्वमनुभवाभावादित्याशङ्क्या-वधारणसामर्थ्यसिद्धमर्थमाह—** यथेति। **पूर्वार्धस्याक्षरार्थमुक्त्वा तात्पर्यार्थमाह—** नेत्यादिना। **इतश्च विषयेभ्यः सकाशादिन्द्रियाणि निवर्तयितव्यानीत्याह—** न केवलमिति। **आद्यन्तवत्त्वे मध्यक्षणवर्तित्वेन क्षणभङ्गुरत्वादुपेक्षणीयत्वं भोगानां सिध्यति। अस्ति हि तेषां क्षणभङ्गुरत्वं क्षणिकविषयाकारमनोवृत्तिव्यङ्ग्यत्वादिति मन्वानः सन्नाह—** अत इति। **बुद्धिपूर्वकारिणां विवेकवतां भोगेषूपेक्षोपलब्धेश्च**

भाष्यार्कप्रकाशः

**ये हीति।** हि ये भोगाः संस्पर्शजाः ते दुःखयोनय एव, आद्यन्तवन्तश्च भवन्ति। तस्मात् , हे कौन्तेय! तेषु बुधो न रमते। **संस्पर्शः** सम्बन्धः। कयोरित्यत आह— **विषयेन्द्रियेति**। विषयस्य शब्दादेरिन्द्रियस्य श्रोत्रादेश्च संस्पर्शाः सम्बन्धाः, भोगा भुक्तयोऽनुभवा इति यावत्। दुःखानां योनयः कारणानि दुःखयोनयः। **अविद्याकृतत्वादिति**। भोगानामिति शेषः। अनात्मन्यात्माभि-मानः, अनात्मीये आत्मीयाभिमानश्चात्र **अविद्येत्**युच्यते। अविद्याकार्यत्वात् [5]तत्र तदुपचारः। अहं शब्दं शृणोमि, ममायं शब्दः, ममेदं श्रोत्रमित्यादिभ्रमप्रयुक्तत्वाद् भोगा अविद्याकृता इत्युच्यन्ते। एतद्भोगवशादेवाध्यात्मिकादिदुःखप्राप्तिः पुरुषाणाम् , प्रतिकूलभोगस्य अनुकूलभोगाभावस्य च तापहेतुत्वात्। **तन्निमित्तानीति** बहुव्रीहिः। भोगनिमित्तानीत्यर्थः। ऐहिकलौकिकभोगस्य दुःखहेतुत्वानुभवेन पारलौकिकभोगस्यापि दुःखहेतुत्वमनुमीयत इत्याह— **यथेति**। पारलौकिको भोगो दुःखप्रदः, विषयेन्द्रियसंस्पर्शजन्यभोगत्वात् , ऐहिकलौकिकभोगवदित्यनुमानम्। न च कथमनुमानमात्रेण रम्भासम्भोगादिस्वर्गसुखस्य दुःखहेतुत्वमिति वाच्यम् ; 'क्षीणे पुण्ये मर्त्यलोकं विशन्ती'ति शास्त्रात् , क्षयिष्णुत्वदोषेण सातिशयत्वादिना च स्वर्गभोगोऽपि भयदुःखादिहेतुरेवेति। दुःखयोनय एवेत्यत्र एवकारस्यार्थमाह— **एवशब्दादिति**। न तु सुखयोनय इत्यर्थः। **यद्वा** गम्यत एव शब्दादित्येकं वाक्यम् , **शब्दाद्** आगमात् प्रमाणादित्यर्थः। किमेतज्ज्ञानस्य भोगाः दुःखयोनय एवेत्याकारकस्य फलम्? अत आह— **इति बुद्ध्वेति**। विषया एव मृगतृष्णिका, तस्याः सकाशात्। यथा मृगतृष्णिकायामुदकं नास्ति, तथा विषयेषु सुखं नास्तीति विषयेषु मृगतृष्णिकात्वरूपणम्। 'न केवलम् दुःखयोनय एवे'त्यनन्तरं 'किन्तु' इति पूरणीयम्। आद्यन्तौ एषां स्त इति आद्यन्तवन्तः। विषयेन्द्रियसंयोगजन्यत्वाद् भोगानां विषयेन्द्रियसंयोग एव **आदिः**। विषयेन्द्रियवियोगनाश्यत्वाद् भोगानां तद्वियोग एव **अन्तः**। यथा चक्षुरिन्द्रियस्य कामिनीरूपसम्बन्धे पुरुषस्य भोगः, तत्सम्बन्धनाशे भोगनाश इति। **अतः** विषयेन्द्रियसंयोगवियोगप्रयुक्तजन्मनाशवत्त्वादित्यर्थः। सिद्धार्थमाह—

१. एवकारः क्वचिन्न। २. विषयवैमुख्य एवेत्यर्थः। ३. 'संभूतेषु' इति पा.। ४. 'मानवमनुभवम्' इति पा.। ५. उक्ताभिमाने ।

**शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।**
**कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः॥२३॥**

ऽनित्याः, [१]मध्यक्षणभावित्वादित्यर्थः। कौन्तेय ! न तेषु भोगेषु रमते बुधो विवेकी अवगतपरमार्थतत्त्वः। अत्यन्त-मूढानामेव हि विषयेषु रतिर्दृश्यते, यथा पशुप्रभृतीनाम्॥२२॥

अयं च श्रेयोमार्गप्रतिपक्षी कष्टतमो दोषः सर्वानर्थप्राप्तिहेतुर्दुर्निवार्यश्चेति तत्परिहारे यत्नाधिक्यं कर्तव्यमित्याह भगवान्— शक्नोतीति। शक्नोति उत्सहत इहैव जीवन्नेव यः [२]सोढुं प्रसहितुं प्राक् पूर्वं शरीरविमोक्षणाद् आ मरणात् — मरणसीमाकरणं जीवतोऽवश्यम्भावी हि कामक्रोधोद्भवो वेगः, अनन्तनिमित्तवान् हि स इति यावन्मरणं तावन्न विश्रम्भणीय इत्यर्थः। कामः इन्द्रियगोचरप्राप्त इष्टे विषये श्रूयमाणे स्मर्यमाणे वाऽनुभूते सुखहेतौ या गर्धिस्तृष्णा स

आनन्दगिरिकृतव्याख्या

तेषामाभासत्वं प्रतिभातीत्याह— न तेष्विति। प्रतीकोपादानमाद्यम्; इदं पुनर्व्याख्यानमिति न पुनरुक्तिः। ननु केषाञ्चिद् भोगेष्वभिरुचि-रुपलभ्यते? तत्राह— अत्यन्तेति॥२२॥

उत्तरश्लोकस्य तात्पर्यमाह— अयं चेति। श्रेयोमार्गप्रतिपक्षत्वं कष्टतमत्वे हेतुः, तत्रैव हेत्वन्तरमाह— सर्वेति। प्रयत्नाधिक्यस्य कर्तव्यत्वे हेतुं सूचयति— दुर्निवार्य इति। प्रसिद्धं हि कामक्रोधोद्भवस्य वेगस्य दुर्निवारत्वं येन मातरमपि चाधिरोहति, पितरमपि हन्ति, तमवश्यं परिहर्तव्यं दर्शयति— शक्नोतीति। यथोक्तं वेगं बहिरनर्थरूपेण परिणामात् प्रागेव देहान्तरुत्पन्नं यः सोढुं क्षमते, तं स्तौति— स युक्त इति। [३]मरणसीमाकरणस्य तात्पर्यमाह— मरणेति। प्रसिद्धौ हिशब्दः। तत्र हेतुमाह— अनन्तेति। व्याध्युपहतानां वृद्धानां च कामादिवेगो न भवतीत्याशङ्क्याह— यावदिति। कामक्रोधोद्भवं वेगं व्याख्यातुम् आदौ कामं मनोविकारविशेषत्वेन व्याचष्टे— काम इति। कथमस्य मनोविकारविशेषत्वम्? तदाह— इन्द्रियेति। कामो गर्धिस्तृष्णेति पर्यायाः सन्तः शब्दा मनोविकारविशेषे पर्यवस्यन्तीत्यर्थः।

भाष्यार्कप्रकाशः

**अनित्या** इति। तत्र हेतुमाह— **मध्यमेति।** विषयेन्द्रियसंयोगात्पूर्वक्षणे विषयेन्द्रियवियोगक्षणे च भोगाः न सन्ति, किन्तु विषयेन्द्रियसंयोगक्षण एवेत्यर्थः। एतेन विषयसुखस्य क्षणिकत्वं विवृतम्। **बुध इति।** न तर्कादिशास्त्रवेत्तेत्याह— **विवेकेति।** आत्मानात्मविवेकवानित्यर्थः। सति विवेके किं भवतीत्यत आह— **अवगतेति।** आत्मैव परमार्थतत्त्वम् अन्यत् सर्वं मृषैवेति जानातीत्यर्थः। य एवं वेत्ति स कथं नित्यसुखमात्मानं विहाय विषये सुखे क्षणिके रज्येत? न कथमपीत्यर्थः। ये तु विषयेषु रतास्ते अतीव मूढा एव, न त्वल्पज्ञा अपीत्याह— **अत्यन्तेति।** आत्मानात्मविवेकशून्यत्वमत्यन्तमूढत्वम् , देहात्मभ्रमवत्त्वं वा। ननु ये विषयरतास्ते मूढा एवेत्यत्र को दृष्टान्त इत्यत आह— **यथा पश्विति।** प्रभृतिशब्दात् पक्षिसर्पादिग्रहणम्।

तस्माद् बुधेनात्मरतिनैव भाव्यम्। योऽनात्मरतः सोऽबुध एव। इमे चात्मरतिविषयारती गृहस्थस्य दुष्करे। तस्य इन्द्रिय-दमनेऽनधिकारात्। अतः सर्वकर्मसंन्यास्येव बुधः, गृहस्थास्तु मूढा एव॥२२॥

**शक्नोतीति।** य इहैव शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवं वेगं सोढुं शक्नोति, स युक्तो नरः सुखी ।**अयं चेति** वक्ष्यमाणः कामक्रोधोद्भववेगरूप इत्यर्थः। ननु जीवन्नेवेत्यनेन मरणात् प्रागिति लब्धत्वात् पुनस्तद्वचनमनर्थकम्? अत आह— **मरणसीमाकरणादिति।** अनन्तानि निमित्तानि उत्पत्तिकारणानि अस्य सन्तीति अनन्तनिमित्तवान्। हिः प्रसिद्धौ, तावत् मरणपर्यन्तमित्यर्थः। **न विस्रम्भणीयः**, न विश्वसनीयः। कामक्रोधयोः स्वरूपे दर्शयति— **काम इत्यादिना।** इन्द्रियगोचरप्राप्ते

---

१. 'मध्यमक्षण' इति पा.। २. 'तीषसहलुभरुषरिषः'(पा.सू. ७-२-४२) इति इडागमविकल्पः। तेन 'सोढुं' 'प्रसहितुम्' इति द्वयमपि साधु। ३. **इहैवेत्यस्य** जीवन्नेवेत्यर्थविवरणादेव सिद्धे मरणसीमाकरणं व्यर्थमिति शङ्कां परिहरन् मरणसीमाकरणस्य तात्पर्यमाहेत्यर्थः।

**योऽन्तःसुखोऽन्तरारामस्तथाऽन्तर्ज्योतिरेव यः।**
**स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति॥२४॥**

**कामः।** क्रोधश्चात्मनः **प्रतिकूलेषु दुःखहेतुषु दृश्यमानेषु श्रूयमाणेषु स्मर्यमाणेषु वा यो द्वेषः स क्रोधः, तौ कामक्रोधावुद्भवो**[१] **यस्य वेगस्य स** कामक्रोधोद्भवो **वेगः। रोमाञ्चनप्रहृष्टनेत्रवदनादिलिङ्गोऽन्तःकरणप्रक्षोभरूपः कामोद्भवो वेगः, गात्रप्रकम्पप्रस्वेदसन्दष्टौष्ठपुटरक्तनेत्रादिलिङ्गः क्रोधोद्भवो वेगः। तं कामक्रोधोद्भवं वेगं य उत्सहते (**[२]**प्रसहते)** सोढुं **प्रसहितुम्, स** युक्तो **योगी सुखी चेह लोके नरः॥२३॥**

**कथम्भूतश्च ब्रह्मणि स्थितो ब्रह्म प्राप्नोतीत्याह भगवान्—** य इति। **योऽन्तःसुखः** अन्तः **आत्मनि सुखं यस्य सोऽन्तःसुखः, तथाऽन्तरेवात्मन्यारामः आरमणं क्रीडा यस्य सो**ऽन्तरारामः,[३]**तथैवान्तरात्मैव ज्योतिः प्रकाशो यस्य**

आनन्दगिरिकृतव्याख्या

**क्रोधश्च मनोविकारविशेषस्तद्वदित्याह—** क्रोधश्चेति। **तमेव क्रोधं स्पष्टयति—** आत्मन इति। **एवं कामक्रोधौ व्याख्याय तयोरुत्कट-त्वावस्थात्मनो वेगस्य ताभ्यामुत्पत्तिमुपन्यस्यति—** ताविति। **यथोक्तवेगावगमोपायमुपदिशति—** रोमाञ्चनहृष्टनेत्रेत्यादिना। **उभयविधवेगं यो जीवन्नेव सोढुं शक्नोति, तं पुरुषधौरेयत्वेन स्तौति—** तमित्यादिना॥२३॥

**ज्ञानस्यात्यन्तमन्तरङ्गम्** [४]**आत्मनिष्ठत्वं दर्शयन् प्रकृतं ब्रह्मविदमेव विशिनष्टि—** कथम्भूतश्चेति। **यथाऽन्तरेव सुखम्, न बाह्यैर्विषयैः, तथाऽन्तरेव ज्योतिर्न श्रोत्रादिभिः। अतो विषयान्तरविज्ञानरहित इत्याह—** तथेति। **यथोक्तविशेषणसमाधिमाञ्जीवन्नेव मुक्तिमधिगच्छतीत्याह—** स योगीति। आत्मन्यन्तःसुख**मिति बाह्यविषयनिरपेक्षत्वं विवक्षितम्।** अन्तरारामत्वं **च स्त्र्यादिविषयापेक्षा-मन्तरेण क्रीडाप्रयुक्तफलभाक्त्वमभिमतम्। इन्द्रियादिजन्यप्रकाशशून्यत्वम्** आत्मज्योतिष्ट्व**मिष्टम्। यथोक्तविशेषणसम्पन्नः समाहितश्च**

भाष्यार्कप्रकाशः

इन्द्रियाणां गोचरं विषयं प्राप्ते, इन्द्रियगोचरतां प्राप्ते इत्यर्थः। इन्द्रियविषयभूते इति यावत्। सुखहेतौ अत एव इष्टे विषये स्त्रीपुत्रादौ या तृष्णा स कामः। विधेयप्राधान्यात् स इति पुंलिङ्गनिर्देशः।

स च विषयः त्रिविधः— श्रूयमाणः, स्मर्यमाणः, अनुभूतश्चेति। यथा देशान्तरस्थितां कामिनीं श्रुत्वा तत्र सकामो भवति पुरुषः। तामेव मनसि स्मृत्वा स्मृत्वा च। स्मरणमिह चिन्तनम्। तामेव सन्निहितामनुभूय तत्र सकामो भवतीति। सति वक्तरि श्रवणम्। तस्मिन्नसति तु स्मरणमिति विवेकः। श्रूयमाणस्मर्यमाणानुभूयमानान्यतमेष्टविषयविषया तृष्णा **कामः** इत्युच्यत इति निष्कृष्टार्थः। तथा दृश्यमानश्रूयमाणस्मर्यमाणान्यतमानिष्टविषयविषयविद्वेषः क्रोधः। उद्भवतः आभ्यामित्यु**द्भवौ** उपादानभूता-वित्यर्थः। कामक्रोधाभ्यामुद्भवः उत्पत्तिर्यस्य स कामक्रोधोद्भव इत्यपि समासो वक्तुमुचितः। नेत्रे च वदनं च नेत्रवदनम्। प्रहृष्टं च तन्नेत्रवदनं च प्रहृष्टनेत्रवदनम्। रोमाञ्चनं प्रहृष्टनेत्रवदनं च रोमाञ्चनप्रहृष्टनेत्रवदने लिङ्गे चिह्ने यस्य स रोमाञ्चनप्रहृष्टनेत्रवदनलिङ्गः अन्तःकरणस्य प्रक्षोभः प्रकृष्टं चलनं विकार इति यावत्, तद्रूपः। **गात्रप्रकम्पः** शरीरचलनं, **प्रस्वेदो** घर्मजलोद्गमः, **सन्दष्टोष्ठपुटौ** रक्तनेत्रे एतदादीनि लिङ्गानि यस्य स तथोक्तः। युक्तो योगी चित्तसमाधानवानित्यर्थः। **सुखी चेहेति** चकारात् परलोकेऽपीत्यर्थः। अयं श्लोको न केवलं संन्यासिविषयः, किन्तु योगिविषयोऽपि। सांख्ययोगयोर्द्वयोरपि श्रेयोमार्गत्वेन दर्शितवेगस्य तदुभयमार्गप्रतिपक्षित्वात् ॥२३॥

**य इति। आक्रीडा** विहारः इति यावत्। **ज्योतिः** दृष्टिरिति यावत्। अन्तरेवेत्येवकारान्न बहिर्विषयेष्वित्यर्थः। **ब्रह्मनिर्वाणं** ब्रह्मानन्दम्। **ब्रह्मभूतः** ब्रह्मतुल्य इति नार्थः, किन्तु ब्रह्मैव भवन् इत्यर्थः। आत्मन एव ब्रह्मत्वादिति भावः। अत्र योगीत्यनेन

१. 'उद्भवौ' इति पा.। २. कुण्डलितः पाठः क्वचिन्न। तत्स्थाने 'जीवन्' 'जीवन्नेव' इति पा.। ३. 'तथैवान्तरेवात्मन्येव' इति पा.। ४. 'आत्ममात्रनिरतत्वम्' इति पा.।

**लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः।**
**छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः॥२५॥**
**कामक्रोधवियुक्तानां यतीनां यतचेतसाम्।**
**अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम्॥२६॥**

**सोऽन्तर्ज्योतिरेव। य ईदृशः स योगी** ब्रह्मनिर्वाणं **ब्रह्मणि निर्वृतिं मोक्षम् इह जीवन्नेव ब्रह्मभूतः सन्** अधिगच्छति **प्राप्नोति॥२४॥**

**किञ्च—** लभन्त इति। **लभन्ते** ब्रह्मनिर्वाणं **मोक्षम्** ऋषयः **सम्यग्दर्शिनः संन्यासिनः** क्षीणकल्मषाः **क्षीण-पापादिदोषाः** छिन्नद्वैधाः **छिन्नसंशयाः** यतात्मानः **संयतेन्द्रियाः** सर्वभूतहिते **रताः सर्वेषां भूतानां हित आनुकूल्ये रताः, अहिंसकाः इत्यर्थः॥२५॥**

**किञ्च—**कामेति। कामक्रोधवियुक्तानां **कामश्च क्रोधश्च कामक्रोधौ ताभ्यां वियुक्तानां** यतीनां **संन्यासिनां** यतचेतसां **संयतान्तःकरणानाम्** अभितः **उभयतो जीवतां मृतानां च** ब्रह्मनिर्वाणं **मोक्षो वर्तते** विदितात्मनां **विदितो ज्ञातः आत्मा येषां ते विदितात्मानस्तेषां विदितात्मनाम्, सम्यग्दर्शिनामित्यर्थः॥२६॥**

आनन्दगिरिकृतव्याख्या

**जीवन्नेव ब्रह्मभावं प्राप्नोति।** [१]ब्रह्मणि **परिपूर्णे** निर्वृतिं **सर्वानर्थनिवृत्त्युपलक्षितां स्थितिम् अनतिशयानन्दाविर्भावलक्षणां प्राप्नोतीत्याह—** य ईदृश इति॥२४॥

**मुक्तिहेतोर्ज्ञानस्य साधनान्तरमाह—** किञ्चेति। **यज्ञादिनित्यकर्मानुष्ठानात्** पापादिलक्षणं **कल्मषं क्षीयते। ततश्च श्रवणाद्यावृत्तेः सम्यग्दर्शनं जायते। ततो मुक्तिरप्रयत्नेन भवतीत्याह—** लभन्त इति। **ज्ञानप्राप्त्युपायान्तरं दर्शयति—** छिन्नेति। **श्रवणादिना संशयनिरसनं, कार्यकरणनियमनं च, दयालुत्वेनाहिंसकत्वमित्येतदपि सम्यग्ज्ञानप्राप्तौ कारणमित्यर्थः।** [२]**अक्षरव्याख्यानं स्पष्टत्वान्न व्याख्यायते॥२५॥**

**पूर्वं कामक्रोधयोर्वेगः सोढव्यो दर्शितः। सम्प्रति तावेव त्याज्यावित्याह—** किञ्चेति। **ननु दर्शितविशेषणवतां मृतानामेव मोक्षो न तु जीवतामिति चेत्? नेत्याह—** अभित इति। **अस्मदादीनामपि तर्हि प्रभूतकामादिप्रभावविधुराणां किमिति मोक्षो न भवतीत्याशङ्क्य,** [३]**सम्यग्दर्शनवैशेष्याभावादित्याह—** विदितेति। **उक्तेऽर्थे श्लोकाक्षराणामन्वयमाचष्टे—** कामक्रोधेत्यादिना॥२६॥

भाष्यार्कप्रकाशः

कर्मयोगीति न भ्रमितव्यम्, तस्यात्मरत्याद्यभावात्। किं त्वात्मनि चित्तसमाधानवान् संन्यास्येवेह योगी॥२४॥

**लभन्त इति।** क्षीणकल्मषाः छिन्नद्वैधाः यतात्मानः सर्वभूतहिते रताः ऋषयः ब्रह्मनिर्वाणं लभन्ते। ऋ गताविति धातोः ऋषिशब्दो निष्पन्नः। गत्यर्थानां ज्ञानार्थत्वादाह— **ऋषयः सम्यग्दर्शिन इति।** संन्यासिनामेव ज्ञाननिष्ठाधिकारादाह— **संन्यासिन इति**॥२५॥

**कामेति।** कामक्रोधवियुक्तानां यतचेतसां विदितात्मनां यतीनां ब्रह्मनिर्वाणमभितो वर्तते। **अभित उभयत इति।** देहत्यागात् प्रागनन्तरं चेत्यर्थः। ईश्वरे अर्पितः सर्वो भावो येन तेन पुरुषेण, ईश्वरे ब्रह्मण्याधाय क्रियमाणः कर्मयोगश्च सत्त्वशुद्ध्यादिक्रमेण मोक्षाय भवतीति शेषः। इति भगवान् पदेपदे प्रतिपदमब्रवीत्, वक्ष्यति चोत्तरत्र॥२६॥

---

१. 'ब्रह्मणि निर्वृतिं प्राप्नोति' इत्यस्यार्थमाह—**ब्रह्मणीति**। २. भाष्यकृतां मूलाक्षरव्याख्यानमित्यर्थः। ३. अप्रतिबद्धात्मसाक्षात्कारः सम्यग्दर्शनविशेषः। तथा च परोक्षात्मज्ञानवत्त्वेऽपि तत्साक्षात्काराभावान्मोक्षाभावः। प्रतिबन्धक्षयेण साक्षात्कारे जाते तु जीवतामपि मुक्तिरेवेति भावः।

**स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः।**
**प्राणापानौ समौ कृत्वा नासाभ्यान्तरचारिणौ॥ २७॥**

**सम्यग्दर्शननिष्ठानां संन्यासिनां सद्योमुक्तिरुक्ता, कर्मयोगश्चेश्वरार्पितसर्वभावेनेश्वरे ब्रह्मण्याधाय क्रियमाणः सत्त्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासक्रमेण मोक्षायेति भगवान् पदे पदेऽब्रवीद् वक्ष्यति च। अथेदानीं ध्यानयोगं सम्यग्दर्शनस्यान्तरङ्गं विस्तरेण वक्ष्यामीति तस्य सूत्रस्थानीयाञ्श्लोकानुपदिशति स्म—** स्पर्शानिति। स्पर्शान् **शब्दादीन् कृत्वा** बहिर्बाह्यान् **, श्रोत्रादिद्वारेणान्तर्बुद्धौ प्रवेशिताः शब्दादयो विषयास्तानचिन्तयतो बाह्याः बहिरेव कृता भवन्ति। तानेवं बहिः कृत्वा, चक्षुश्चैवान्तरे भ्रुवोः कृत्वेत्यनुषज्यते। तथा प्राणापानौ नासाभ्यन्तरचारिणौ समौ कृत्वा॥ २७॥**

आनन्दगिरिकृतव्याख्या

**वृत्तमनूद्योत्तरश्लोकत्रयस्य तात्पर्यार्थमाह—** सम्यग्दर्शनेति। ईश्वरार्पितसर्वभावेनेति। **भगवति परस्मिन्नीश्वरे समर्पितः सर्वेषां देहेन्द्रियमनसां** भाव**श्चेष्टाविशेषो, न क्वचिदपि बहिस्तेषां व्यापारस्तेनेत्यर्थः। कर्मयोगस्य तत्फलस्य चाभिधानानन्तरमित्यथशब्दार्थः। स्वतो बाह्यानां विषयाणां कुतो बहिष्करणमित्याशङ्क्याह—** श्रोत्रादीति। **तेषां बहिष्करणं कीदृगित्याशङ्क्याह**[1]**—** तानिति[2]। **विषयप्रावण्यं परित्यज्य, चक्षुरपि भ्रुवोर्मध्ये विक्षेपपरिहारार्थं कृत्वा, प्राणापानौ च नासाभ्यन्तरचरणशीलौ समौ न्यूनाधिकवर्जितौ कुम्भकेन निरुद्धौ**

भाष्यार्कप्रकाशः

**स्पर्शानिति।** अन्तरङ्गं साधनमिति शेषः। अनेन कर्मयोगस्य सम्यग्दर्शनं प्रति बहिरङ्गसाधनत्वं सूचितम्। ततश्च— 'तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते' इति वचनं कर्मयोगस्तुतिपरमेवेति सिद्धम्।

**यद्वा**, ज्ञानहीनात् केवलकर्मत्यागमात्ररूपात् संन्यासात् कर्मयोगस्य विशिष्टत्वं तत्राभिप्रेतमिति। प्राणायामादियुक्तः केवलसंन्यासस्तु कर्मयोगादुत्कृष्ट एव, ज्ञानं प्रत्यन्तरङ्गत्वात्। अनेन च ध्यानयोगस्यान्तरङ्गत्ववचनेन, कर्मयोगो ध्यानयोगद्वारा सम्यग्दर्शनस्योपायभूतो, न तु साक्षादिति च व्यज्यते। वक्ष्यत्यमुमर्थं भगवान् भाष्यकार एव— 'यावद्ध्यानयोगारोहणसमर्थः तावद् गृहस्थेन कर्म कर्तव्य'मित्यनुपदमेव। **सूत्रस्थानीयान्** सूत्रभूतान् सङ्क्षेपतोऽर्थप्रकाशकानिति यावत्। **उपदिशति स्म** उपदिदेश। 'लट् स्मे' इति स्मयोगे भूतार्थे लट्।

ननु बाह्यान् स्पर्शान् बहिः कृत्वेति वचनं व्यर्थम् , बाह्यत्वेन तेषां बहिरेव सत्त्वादन्तःकर्तुमशक्यत्वेन तत्प्राप्तिं विना अन्तरकृत्वेति निषेधायोगाच्चेत्यत आह— **श्रोत्रादीति।** शब्दादिस्पर्शानां श्रोत्रादिद्वाराऽन्तःप्रवेशस्य सत्त्वात् तेषां बहिःकरणोपदेशः सफलः। तद्बहिःकरणं च तदचिन्तनमेव। तदेवं यो विषयान् न चिन्तयति, तेन विषया बहिः कृता एव भवन्ति। मनसा शब्दादिचिन्तने अकृते सति श्रोत्रादीनां विषयान्तःप्रवेशनसामर्थ्याभावात्। मनःपूर्विका हि इन्द्रियाणां प्रवृत्तिः। **एवमिति।** विषयाचिन्तनद्वारेत्यर्थः।

**ननु** बाह्यस्य घटादेर्वस्तुनः श्रोत्रादिद्वाराऽप्यन्तःप्रवेशोऽनुचितः, असम्भवात्। न हि घटादि वस्तु अन्तः प्रविष्टं दृश्यत इति चेत् , **मैवम्** , अन्तःप्रवेशो नाम विषयस्य बुद्धेर्विषयात्मकत्वमेव । दृश्यते हि कामिनीविग्रहस्य चक्षुर्द्वारेणान्तःप्रवेशः। कथमन्यथा सकृद् दृष्टा नारी चक्षुषि मीलितेऽपि हृदि स्फुरेत् कामुकस्य? कथं वा चक्षुषा कामिनीदर्शनं विना कामिन्याः हृद्यस्फुरणम्? तस्माद् युक्तमुक्तं विषयाणामिन्द्रियद्वारा बुद्धिप्रवेश इति।

मनःपूर्वकेन्द्रियविषयसंयोगे सति तन्मनस्तस्मिन् विषये दृढलग्नं सद् विषयाकारतां प्रतिपद्यत इतीदमेव विषयाणामन्तःप्रवेश इति भावः। मनसो विषयचिन्तनाभावे तु मनसि विषयाणामप्रवेश इत्ययमेव विषयबहिष्कार इति बोध्यम्।

**चक्षुरिति।** दृष्टिमिति यावत्। **भ्रुवोरन्तरे इति।** यथा भ्रूमध्यभागो वीक्ष्येत चक्षुषा, तथा कृत्वेत्यर्थः। **नासाभ्यन्तरचारिणौ** नासिकामध्ये सञ्चरन्तौ प्राणापानौ वायू उच्छ्वासनिश्वासात्मकाविति भावः। कथमन्यथा 'हृदि प्राणो गुदेऽपानः' इत्युक्तलक्षण-

१. तेषामचिन्तनमेव बहिष्करणमिति भावः। २. अत्र—॥ २७॥ श्लोकव्याख्यासमाप्तिः। 'विषयप्रावण्यं परित्यज्य' इत्यादिग्रन्थः उत्तरश्लोके मुद्रितो दृश्यते सर्वत्र।

**यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः।**
**विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः॥२८॥**
**भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।**

यतेन्द्रियेति। यतेन्द्रियमनोबुद्धिः **यतानि संयतानीन्द्रियाणि मनो बुद्धिश्च यस्य स यतेन्द्रियमनोबुद्धिः, मननाद्** मुनिः **संन्यासी**[१] मोक्षपरायणो **मोक्ष एव परमयनं परा गतिर्यस्य सोऽयं मोक्षपरायणो मुनिर्भवेत्।** विगतेच्छाभयक्रोध **इच्छा च भयं च क्रोधश्चेच्छाभयक्रोधास्ते विगता यस्मात् स विगतेच्छाभयक्रोधः। य एवं वर्तते सदा संन्यासी मुक्त एव सः। न तस्य** [२]**मोक्षोऽन्यः कर्तव्योऽस्ति॥२८॥**

**एवं समाहितचित्तेन किं विज्ञेयमित्युच्यते—** भोक्तारमिति। **भोक्तारं** यज्ञतपसां **यज्ञानां तपसां च कर्तृरूपेण**

आनन्दगिरिकृतव्याख्या

**कृत्वा॥२७॥**

**करणानि सर्वाण्येवं संयम्य प्राणायामपरो भूत्वा किं कुर्यादित्यपेक्षायामाह—** यतेन्द्रियेति। **इन्द्रियादिसंयमं कृत्वा मोक्षमेवापेक्षमाणो मननशीलः स्यादित्यर्थः। ज्ञानातिशयनिष्ठस्य सर्वदेच्छादिशून्यस्य संन्यासिनो मुक्तेरनायाससिद्धत्वान्न तस्य किञ्चिदपि कर्तव्यमस्तीत्याह—**विगतेति। **पूर्वार्धाक्षराणि व्याकरोति—**यतेत्यादिना। **द्वितीयार्धाक्षराणि व्याचष्टे—** विगतेत्यादिना॥२८॥

**अधिकारिणो यथोक्तस्य कर्तव्याभावे ज्ञातव्यमपि नास्तीत्याशङ्क्य परिहरति—** एवमित्यादिना। **प्रसिद्धं भोक्तारं व्यवच्छिनत्ति—** सर्वलोकेति। **'ततो ह्यस्य बन्धविपर्ययौ'विति न्यायेन सर्वफलदातृत्वं दर्शयति—** सुहृदमिति। **उक्तेश्वरज्ञाने फलं कथयति—** ज्ञात्वेति।

भाष्यार्कप्रकाशः

प्राणापानयोः नासाभ्यन्तरचारित्वं स्यात्? एक एव वायुर्नासापुटेन निष्क्रामन् प्रविशंश्च प्राणोऽपानः इति चोच्यते। उच्छ्वासनिःश्वासयोः समीकरणं नाम न दीर्घमुच्छ्वसन् नापि निःश्वसन्नित्यर्थः। **यद्वा** नैवोच्छ्वसन्, नापि निःश्वसन्नित्यर्थः। कुम्भके स्थित इति यावत्॥२७॥

**यतेति।** यः सदा यतेन्द्रियमनोबुद्धिः मोक्षपरायणः विगतेच्छाभयक्रोधो मुनिः स मुक्त एव। **यद्वा** यो मुनिः यतेन्द्रियमनोबुद्धिः मोक्षपरायणः विगतेच्छाभयक्रोधः सदा, वर्तत इति शेषः, स मुक्त एव। कथमस्य मुक्तत्वम्? अत आह— **न तस्येति।** मोक्षसाधनान्तरानुष्ठानराहित्यमेवास्य मुक्तत्वमित्यर्थः। एतस्मिन् ध्यानयोगे कृते सति ज्ञानप्राप्तिद्वारा मोक्षस्य भविष्यत्त्वान्नान्यो मोक्षोपायोऽनुष्ठेय इति भावः। न चास्य योगिनो ज्ञानमनुष्ठेयमिति वाच्यम्; ज्ञानस्यानुष्ठेयत्वाभावात्। न च 'श्रोतव्य' इति ज्ञाने विधिः श्रूयत इति वाच्यम्; तस्य विधिच्छायावचनत्वात्। न च सुतरां ज्ञाने विध्यभावे विधिच्छायावचनमपि व्यर्थमिति वाच्यम्; स्वाभाविकविषयप्रवृत्तिविमुखीकरणार्थत्वाद् विधिच्छायावचनस्य। ननु 'ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिना'मिति साङ्ख्यानां ज्ञानयोगो विहित इति चेत्? तत्र ज्ञानयोगस्य संन्यासार्थकत्वात्। **यद्वा**, ब्रह्मणि चित्तसमाधानार्थकत्वात्। उक्तं हि 'ब्रह्मसंस्थोऽमृतत्वमेती'ति ब्रह्मसंस्थत्वं ज्ञानयोगात्मकं संन्यासिनो मोक्षकारणमिति श्रुत्या। तस्माद् ध्यानयोगिनो मोक्षाय कर्तव्यो नास्त्येव। किन्तु ज्ञातव्योऽस्ति। तदुत्तरश्लोकेन वक्ष्यते। न च ब्रह्मणि चित्तसमाधानं कर्तव्यमस्त्येवेति वाच्यम्; तस्य ध्यानेनैव सिद्धत्वात्। न चैवं ध्यानयोगज्ञानयोगयोरेकत्वमिति वाच्यम्; ब्रह्मणि चित्तसमाधानरूपांशे एकत्वेऽपि यत्र चित्तं समाहितं तद् ब्रह्मेति ज्ञानं ध्यानयोगिनो नास्ति, अन्यस्य त्वस्तीति वैलक्षण्यसत्त्वात्। अत एव समाहितचित्तेन ब्रह्मैकमेव ज्ञातव्यमिति वक्ष्यत्यनन्तरश्लोकेन॥२८॥

**भोक्तारमिति।** यज्ञतपसां भोक्तारं सर्वलोकमहेश्वरं सर्वभूतानां सुहृदं मां ज्ञात्वा, योगीति शेषः, शान्तिमृच्छति। **समाहित-**

१. एतदुत्तरम्— 'मोक्षपरायण एवं देहसंस्थानो(नात्)' इति अधिकः पाठः। २. 'मोक्षायान्यः' 'मोक्षादन्यः' इति पा.। ३. द्र. ब्र.सू. ३-२-५।

**सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥ २९॥**

**इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मसंन्यासयोगो नाम पञ्चमोऽध्यायः॥५॥**

**देवतारूपेण च,** सर्वलोकमहेश्वरं **सर्वेषां लोकानां महान्तमीश्वरं सर्वलोकमहेश्वरम् ,** सुहृदं सर्वभूतानां **सर्वप्राणिनां प्रत्युपकारनिरपेक्षतयोपकारिणं, सर्वभूतानां हृदयेशयं सर्वकर्मफलाध्यक्षं सर्वप्रत्ययसाक्षिणं** मां **नारायणं ज्ञात्वा** शान्तिं **सर्वसंसारोपरतिम्** ऋच्छति **प्राप्नोति॥ २९॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये कर्मसंन्यासयोगो नाम पञ्चमोऽध्यायः॥५॥**

आनन्दगिरिकृतव्याख्या

**यज्ञेषु तपस्सु च द्विधा भोक्तृत्वं व्यनक्ति—** कर्तृरूपेणेति। **हिरण्यगर्भादिव्यवच्छेदार्थं विशिनष्टि—** महान्तमिति। **स्वपरिकरोपकारिणं राजानं व्यावर्तयति—** प्रत्युपकारेति। **ईश्वरस्य ताटस्थ्यं व्युदस्यति—** सर्वभूतानामिति। **तर्हि तत्र तत्र व्यवस्थितकर्मतत्फलसंसर्गित्वं स्यादित्याशङ्क्याह—** सर्वकर्मेति। **न च तस्य बुद्धितद्वृत्तिसम्बन्धोऽपि वस्तुतोऽस्तीत्याह—** सर्वप्रत्ययेति। **यथोक्तेश्वरपरिज्ञानफलमभिदधाति—** मां नारायणमिति।

**तदेवं कर्मयोगस्यामुख्यसंन्यासापेक्षया प्रशस्तत्वेऽपि ततो मुख्यसंन्यासस्याधिक्यात् तद्वतो बुद्धिशुद्ध्यादियुक्तस्य कामक्रोधोद्भवं वेगमिहैव सोढुं शक्तस्य शमदमादिमतो योगाधिकृतस्य त्वम्पदार्थाभिज्ञस्य परमात्मानं प्रत्यक्त्वेन जानतो मुक्तिरिति सिद्धम्॥ २९॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते श्रीमद्भगवद्गीताशाङ्करभाष्यव्याख्याने पञ्चमोऽध्यायः॥५॥**

भाष्यार्कप्रकाशः

**चेत्तेनेति।** पूर्वोक्तध्यानयोगिनेत्यर्थः। यज्ञानां तपसां च भोक्तारम्। कथं भोक्तृत्वम्? अत आह— **कर्त्रेति।** यो यज्ञानां तपसां च कर्ता, स एव तत्फलमैहिकामुष्मिकं च भुङ्क्ते इति, कर्तुरेव भोक्तृत्वादाह— **कर्तृरूपेणेति।**

यजमानेन तपस्विना च हविरादिना यः पूज्यते देवः, स तद् हविरादिकं भुङ्क्ते इति देवानां भोक्तृत्वादाह— **देवतारूपेणेति। महान्तमिति।** यस्मादधिकः यस्य समानो वा नास्ति स महान् , तन्निरुपाधिकमिति वा ।कथमस्य कर्तृदेवतात्मकत्वम्? अत आह— **सर्वभूतानां हृदयेशयमिति।** हृदये शेत इति हृदयेशयः तम् , 'शयवासवासिष्व[ष्वि'त्य]लुक्। कथमस्य सर्वलोकेश्वरत्वम्? अत आह— **सर्वकर्मफलाध्यक्षमिति।** सर्वेषां कर्मफलानामध्यक्षः प्रभुः तम्। अयमेक एव पुंसां स्वस्वकर्मानुगुणं फलप्रदः। तत्रेन्द्रादीनां वृथैवाभिमानः वयं फलप्रदा इति। अस्माकं च वृथैव भ्रमः इन्द्रादयः फलदा इति च। एवं सर्वकर्मफलदत्वादेवायं सर्वलोकमहाप्रभुः। कथमस्य सर्वभूतसुहृत्त्वम्? अत आह— **सर्वप्रत्ययसाक्षिणमिति।** सर्वेषां प्रत्ययानां बुद्धिवृत्तीनां साक्षिणं साक्षाद्द्रष्टारं प्रेरकमिति यावत्। अन्तर्यामिण एव साक्षित्वात्। अन्तः स्थित्वा तत्तदिन्द्रियद्वारा तत्तद्विषयानुभवमयमेव दिशति पुरुषस्येत्यर्थः। अत एवायं नारायण इत्याह— **नारायणमिति।** न रीयन्ते न क्षीयन्ते यावद्व्यवहारमिति **नराः** प्राणिनः, साभासबुद्धिशब्दवाच्या जीवा इत्यर्थः। **यद्वा** न रीयन्त इत्यराः, ते न भवन्तीति **नाराः** क्षयिष्णव इत्यर्थः। कार्यकरणसङ्घातात्मका जन्तवः इति यावत्। तेषां समूहो **नारं**, तदेव **अयनं** स्थानं यस्य स नारायणः, तदयति प्राप्नोति वा नारायणः, तं सर्वभूतहृदयेशयमित्यर्थः। नराणां जीवानामिमानि फलानि नाराणि, तेषामयनं प्राप्तिर्यस्मात् तं नारायणं सर्वकर्मफलाध्यक्षमित्यर्थः। नारस्य अयनं प्राप्तिरस्मात् फलानां यस्मात् तं नारायणमिति वा। अर्थस्तु स एव। नराणां जीवानामिमे **नाराः** प्रत्ययाः, तान् **अयति** वेत्तीति नारायणः, तं सर्वप्रत्ययसाक्षिणमित्यर्थः। नारं जीवसमूहमयति वेत्तीति वा नारायणः, तं सर्वजीवसाक्षिणमित्यर्थः। सर्वजीवसाक्षित्वादेव सर्वप्रत्ययसाक्षित्वं सिद्धं भवतीति बोध्यम्। **मामिति।**

आत्मभूतमित्यर्थः। आत्मन एव नारायणत्वान्नारायणस्यैव कृष्णत्वाच्चेति भावः। अन्यथा नारायणस्यात्मभिन्नत्वे तज्ज्ञानेन संसारोपरतिर्न स्यात् पुंसाम्। अन्यज्ञानेनान्यसंसारनिवृत्त्ययोगात् , भिन्नात्मज्ञानस्य प्रत्युत भयहेतुत्वात् 'य उदरमन्तरं कुरुते अथ तस्य भयं भवती'ति श्रुतेः। **शान्तिं** मोक्षमित्यर्थः, तस्यैव संसारोपरमरूपत्वात्। ऋच्छति ऋ गताविति धातोः 'पाघ्रे'ति ऋच्छादेश इति। एतेन ध्यानयोगिनोऽपि ब्रह्मात्मज्ञानादेव मोक्षः, न तु स्वत इति सिद्धम्। अत एव 'तमेव विदित्वाऽतिमृत्युमेती'-त्यादिश्रुतिविरोधो न गीताशास्त्रस्य।

यत्तु **रामानुजः**— मां ज्ञात्वा मदाराधनरूपः कर्मयोग इति सुखेन तत्र प्रवर्तत इत्यर्थ इति, **तत्तुच्छम् ,** मूले मां ज्ञात्वा शान्तिमृच्छतीति ज्ञानशान्तिप्राप्त्योर्मध्ये क्रिया(न)न्तरव्यवधानस्यानुक्तत्वात्। तत्कल्पनस्य चाप्रमाणत्वाद् दर्शितश्रुतिविरोधाच्च, 'सर्वकर्माणि मनसे'त्यारभ्य संन्यासस्यैव प्रस्तुतत्वेन कर्मयोगस्यात्राप्रस्तुतत्वाच्च, 'स्पर्शानि'त्यादिना च ध्यानयोगस्यैवोक्तत्वाच्च नात्र कर्मयोगस्यावकाशः। नापि कर्मयोगफलभूतचित्तशुद्धिलभ्यज्ञानप्राप्त्यनन्तरं पुनः कर्मयोगस्य कर्तव्यत्वप्रसक्तिः॥२९॥

**इति बेल्लङ्कोण्डोपनामकरामकविकृतौ श्रीमद्भगवद्गीताशाङ्करभाष्यार्कप्रकाशे पञ्चमोऽध्यायः॥५॥**

DO NOT PRINT THIS PAGE

ॐ श्रीपरमात्मने नमः

# ॥ अथ षष्ठोऽध्यायः ॥

**श्रीभगवानुवाच —**

**अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।**
**स संन्यासी च योगी च न निरग्निर्न चाक्रियः॥ १॥**

**[१]अतीतानन्तराध्यायान्ते ध्यानयोगस्य सम्यग्दर्शनं प्रति अन्तरङ्गस्य सूत्रभूताः श्लोकाः 'स्पर्शान् कृत्वा बहिः' (भ.गी.५.२७) इत्यादयः उपदिष्टाः। तेषां वृत्तिस्थानीयोऽयं षष्ठोऽध्याय आरभ्यते। तत्र ध्यानयोगस्य बहिरङ्गं कर्म [२]इति यावद् ध्यानयोगारोहणसमर्थः[३], तावद् गृहस्थेनाधिकृतेन कर्तव्यं कर्मेत्यतः तत् स्तौति—** अनाश्रित इति।

**ननु किमर्थं ध्यानयोगारोहणसीमाकरणम्, यावताऽनुष्ठेयमेव विहितं कर्म यावज्जीवम्? न ; 'आरुरुक्षोर्मुने-**

### अनुभूतिस्वरूपाचार्यविरचितगीताभाष्यटिप्पणम्

अध्यायसम्बन्धमभिधाय 'अनाश्रितः कर्मफलम्' इत्यादिश्लोकस्यावान्तरतात्पर्यमाह— **तत्र ध्यानयोगस्येति**।

समुच्चयवादी मर्यादाकरणमाक्षिपति— **ननु किमर्थमिति**। 'यावज्जीवमग्निहोत्रं जुहोती'ति श्रुतेः, 'वीरहा वा एष

### आनन्दगिरिकृतव्याख्या

**ध्यानयोगप्रस्तावानन्तरं तद्योग्यताहेतुकर्मणः स्तुतिं भगवानुक्तवानित्याह[४]—** श्रीभगवानिति। **पूर्वोत्तराध्याययोः सङ्गतिमभिदधानो वृत्तमनूद्याध्यायान्तरमवतारयति—** अतीतेति। **सम्यग्दर्शनप्रकरणे ध्यानयोगस्य प्रसङ्गाभावं व्युदस्यति—** सम्यगिति। **संग्रहविवरणयोरतीतानन्तराध्याययोर्युक्तं हेतुहेतुमत्त्वमिति भावः। अध्यायसम्बन्धमभिधाय, 'अनाश्रितः कर्मफलम्' इत्यादिश्लोकद्वयस्य तात्पर्यमाह—** तत्रेति। **कर्मयोगस्य संन्यासहेतोर्मर्यादां दर्शयितुम्, साङ्गं च योगं विचारयितुमध्याये प्रवृत्ते सतीति सप्तम्यर्थः। संन्यासिना कर्तव्यं कर्मेत्येवं प्रतिभासं व्युदस्यति—** गृहस्थेनेति। **[५]कर्तव्यत्वं स्तुतियोग्यत्वम्** अतः**शब्दार्थः**।

**समुच्चयवादी सीमाकरणमाक्षिपति—** नन्विति। **यावज्जीवश्रुतिवशाद् ध्यानारोहणसामर्थ्ये सत्यपि कर्मानुष्ठानस्य दुर्वारत्वादिति हेतुमाह—** यावतेति। **भार्यावियोगादिप्रतिबन्धाद् यावज्जीवश्रुतिचोदितकर्माननुष्ठानवद्, वैराग्यप्रतिबन्धादपि तदननुष्ठानसम्भवाद्, भगवतो विशेषवचनाच्च न यावज्जीवं कर्मानुष्ठानप्रसक्तिरिति परिहरति—** न, आरुरुक्षोरिति। **उक्तमेवार्थं व्यतिरेकद्वारेण विवृणोति—**

### श्रीबेल्लंकोण्डरामरायकविविरचितः

### भाष्यार्कप्रकाशः

पञ्चमाध्यायानन्तरं षष्ठाध्यायकथने का वा सङ्गतिरिति शङ्कां निराकरिष्यमाणः वृत्तानुवादपुरस्सरम् अध्यायान्तरमवतारयति—**अतीतेति**। पञ्चमाध्यायान्ते आत्मज्ञानं प्रत्यन्तरङ्गसाधनस्य ध्यानयोगस्य सूत्रभूताः श्लोकाः 'स्पर्शान् कृत्वा बहिर्बाह्यान्' इत्यादय उपदिष्टाः। तेषां विवरणस्थानीय एष षष्ठोऽध्यायः। तत्र प्रथमं तावद् यावद् ध्यानयोगारोहणासमर्थः गृहस्थः, तेन अधिकृतेन ध्यानयोगबहिरङ्गसाधनं कर्म शास्त्रविहितमनुष्ठेयम् ; यदा तु ध्यानयोगारोहणसमर्थो भवति तदा कर्मोपरम इति भावः। **एतेन** पञ्चमाध्यायानन्तरं षष्ठाध्यायकथने हेतुहेतुमद्भाव एव सङ्गतिरिति **सूचितम्**।

**ध्यानयोगारोहणसीमाकरणमिति**। यावद् ध्यानयोगारोहणसामर्थ्यं तावदिति मर्यादाया विधानमित्यर्थः। **यावता** निश्चयेनेत्यर्थः। विहितं कर्म **यावज्जीवं** मरणपर्यन्तमित्यर्थः, अनुष्ठेयमेव, 'यावज्जीवमग्निहोत्रं जुहुया'दिति श्रुतेरिति भावः। परिहरति— **नेति**।

---

१. अव्यवहितपूर्वाध्यायान्ते इत्यर्थः। पञ्चमाध्यायान्ते इति यावत्। एवमग्रेऽपि ज्ञेयम्। २. इतिशब्दो हेतौ। यावदिति अवधौ। ३. 'ध्यानयोगारोहणासमर्थः' इति पा.। ४. वेदव्यासः इति अत्र शेषः। ५. 'कर्तव्यत्वस्तुतियोग्यत्वम्' इति पा.। 'कर्तव्यत्वेन स्तुतियोग्यत्वम्' इति पाठो युक्तः।

**योगं कर्म कारणमुच्यते'(भ.गी.६.३) इति विशेषणात् , आरूढस्य च शमेनैव सम्बन्धकरणात्। आरुरुक्षोरारूढस्य च शमः कर्म चोभयं कर्तव्यत्वेनाभिप्रेतं चेत् स्यात् , तदा 'आरुरुक्षोः' 'आरूढस्य च' इति शमकर्मविषयभेदेन विशेषणं, विभागकरणं चानर्थकं स्यात्।**

**तत्र - आश्रमिणां कश्चिद् योगमारुरुक्षुर्भवति, आरूढश्च कश्चित् , अन्ये नारुरुक्षवो न चारूढाः; तानपेक्ष्य 'आरुरुक्षोः, आरूढस्य च' इति विशेषणं विभागकरणं चोपपद्यत एवेति चेत् , न; 'तस्यैव' इति वचनात् ,**

अनुभूतिस्वरूपाचार्यटिप्पणम्

देवानां योऽग्निमुद्वासयते' इति निन्दावचनाच्च यावज्जीवमनुष्ठेयमेव कर्मेत्यर्थः। यथा भार्या(दि)वियोगादिप्रतिबन्धवशाद् यावज्जीवश्रुतिचोदितस्याननुष्ठानं तथा वैराग्यप्रतिबन्धादप्यननुष्ठानं सम्भविष्यति। तथा सर्वज्ञस्य भगवतो विशेषवचनाद् न यावज्जीवमनुष्ठानप्राप्तिरित्याह— **न, आरुरुक्षोरिति**। उक्तमेव व्यतिरेकमुखेन विवृणोति— **आरुरुक्षोः आरूढस्य चेत्यादिना।** आरोढुमिच्छतीत्यारुरुक्षुरित्यत्र सकर्मिका आरोहणेच्छा विशेषणम् ,आरोहणं कृतवानित्यारूढ इत्यत्रेच्छाविषयभूतमारोहणं विशेषणम्। एवं शमकर्मविषययोर्भेदेन विशेषणमनुपपन्नं स्यादित्यर्थः।

विशेषणस्याप्यन्यथाऽप्युपपत्तिं शङ्कते— **तत्राश्रमिणामित्यादिना**। यद्यारुरुक्षोः आरूढ अन्य एव, तदा तस्यैवेति प्रकृतपरामर्शो न स्यादित्याह— **तस्यैवेति**। पुनरपि योगशब्दप्रयोगाद् य एव योगमारुरुक्षुः स एव योगारूढ इति

आनन्दगिरिकृतव्याख्या

आरुरुक्षोरित्यादिना। **आरोढुमिच्छतीत्यारुरुक्षुरित्यत्रारोहणेच्छा विशेषणम् , आरोहणं कृतवानित्यारूढः इत्यत्र पुनः इच्छाविषयभूत-मारोहणं विशेषणम्। एवं शमकर्मविषययोर्भेदेन विशेषणं मर्यादाकरणानङ्गीकरणे विरुद्धमापद्येत, तयोरेव विभागकरणं च भागवतं सीमानङ्गीकारे न युज्येतेत्यर्थः।**

**विशेषणविभागकरणयोरन्यथोपपत्तिमाशङ्कते—**तत्रेति। **व्यवहारभूमिः सप्तम्यर्थः। षष्ठी निर्धारणे। भवत्वधिकारिणां त्रैविध्यम् , तथापि प्रकृते विशेषणादौ किमायातमित्याशङ्क्य , तृतीयापेक्षया तदुपपत्तिरित्याह—** तानपेक्ष्येति। **आरुरुक्षोरारूढस्य च भेदे तस्यैवेति प्रकृतपरामर्शानुपपत्तिरिति दूषयति—** न, तस्येति। **यद्यनारुरुक्षुं पुरुषमपेक्ष्य आरुरुक्षोरिति विशेषणम् , तस्य च कर्म आरोहणकारणम् ,**

भाष्यार्कप्रकाशः

'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते॥' इति वक्ष्यति इहैवाध्याये भगवान्। योगमारुरुक्षोः कर्मणा सम्बन्धः, योगारूढस्य तु शमेन सर्वकर्मसंन्यासात्मकेन सम्बन्धः भगवदभिप्रेतः। ततश्च यावद् ध्यानयोगारोहणसमर्थः, तावत् कर्म कुर्यात् , सति तु योगारोहणे संन्यासमेव कुर्यादिति न यावज्जीवं कर्मकरणम्। ननूभयस्योभयं कर्तव्यत्वेनाभिमतं भगवत इति शङ्कते—**आरुरुक्षोरिति**। अभिप्रेतं स्याच्चेदित्यन्वयः। शङ्कां निराकरोति—**आरुरुक्षोरिति**। मुनेः आरुरुक्षुत्वमिति, आरूढत्वमिति च विशेषणं व्यर्थम् , मुनेः शमः कर्म च कर्तव्यमिति वचनादेव आरुरुक्षोरारूढस्य च मुनेरुभयकर्तव्यत्वसिद्धेः। ननु स्पष्टार्थं विशेषणम् , अत आह— **विभागकरणं चेति**। आरुरुक्षोः कर्म कारणमिति, आरूढस्य शमः कारणमिति च विभागकरणं व्यर्थम् , उभयेनोभयस्यापि कर्तव्यत्वात्।

ननु योगमारुरुक्षोर्मुनेर्यत् कर्म, योगारूढस्य मुनेर्यश्च शमः, तदुभयम् अनारुरुक्षितयोगानाम् अनारूढयोगानां च कर्तव्यत्वेन भगवताऽभिप्रेतमिति शङ्कते— **तत्रेत्यारभ्य चेदित्यन्तेन** ग्रन्थेन। तत्रेत्यस्य व्यवहारभूमावित्यर्थः। अनारुरुक्षूणामनारूढानां चेति पदद्वयस्य मूले शेषः। योगमारुरुक्षोर्मुनेर्विहितं कर्म कारणमुच्यते, योगारूढस्य तस्य मुनेः **शम एव** शमश्च कारणमुच्यत इति पूर्वपक्षिमतानुसारेण श्लोकस्यान्वयः। परिहरति**— नेति**। कारणमाह— **तस्यैवेति वचनादिति**। यः पूर्वं योगमारुरुक्षुरभवत् स एवेदानीं योगमारूढो भवति। अत एव तस्यैवेति तत्पदेन पूर्वोक्तप्रकृतयोगारुरुक्षुग्रहणम्। ततश्च आरुरुक्षुत्वारूढत्वयोः कालभेदेनैकपुरुष-

**पुनर्योगग्रहणाच्च 'योगारूढस्य' इति, य आसीत् पूर्वं योगमारुरुक्षुः, तस्यैवारूढस्य शम एव [1]कर्तव्यः** कारणं[2] **योगफलं प्रति उच्यत इति। अतो न यावज्जीवं कर्तव्यत्वप्राप्तिः कस्यचिदपि कर्मणः।**

**योगविभ्रष्टवचनाच्च। गृहस्थस्य चेत् कर्मिणो योगो विहितः षष्ठेऽध्याये, स योगविभ्रष्टोऽपि कर्मगतिं कर्मफलं**

अनुभूतिस्वरूपाचार्यटिप्पणम्

प्रत्यभिज्ञोदेतीत्याह— **पुनर्योगग्रहणाच्चेति।**

इतश्च न यावज्जीवं कर्म कर्तव्यमित्याह—**योगविभ्रष्टस्य** संन्यासिनो **वचनादिति**। ननु गृहस्थ एव योगभ्रष्टशब्देन

आनन्दगिरिकृतव्याख्या

**अनारूढं च पुरुषमपेक्ष्य आरूढस्येति विशेषणम् , तस्य च शमः संन्यासो योगफलप्राप्तौ कारणमिति विशेषणविभागकरणयोरुपपत्तिः, तदा आरुरुक्षोरारूढस्य च भिन्नत्वात् प्रकृतपरामर्शिनस्तच्छब्दस्यानुपपत्तेः न युक्तमित्थं विशेषणाद्युपपादनमित्यर्थः। किञ्च योगमारुरुक्षोः तदारोहणे कारणं कर्मेत्युक्त्वा पुनः 'योगारूढस्ये'ति योगशब्दप्रयोगाद् यो योगं पूर्वमारुरुक्षुरासीत् तस्यैवापेक्षितं योगमारूढस्य तत्फलप्राप्तौ कर्मसंन्यासः शमशब्दवाच्यो हेतुत्वेन कर्तव्य इति वचनाद् , आरुरुक्षोरारूढस्य चाभिन्नत्वप्रत्यभिज्ञानाद् न तयोर्भिन्नत्वं शङ्कितुं शक्यमित्याह—** पुनरिति। **यत्तु यावज्जीवश्रुतिविरोधाद् योगारोहणसीमाकरणं कर्मणोऽनुचितमिति, तत्राह—** अत इति। **पूर्वोक्तरीत्या कर्मतत्त्यागयोर्विभागोपपत्तौ श्रुतेरन्यविषयत्वाद् योगमारूढस्य मुमुक्षोर्जिज्ञासमानस्य[3] नित्यनैमित्तिककर्मस्वपि परित्यागसिद्धिरित्यर्थः।**

**इतश्च यावज्जीवं कर्म कर्तव्यं न भवतीत्याह—** योगेति। **संन्यासिनो योगभ्रष्टस्य विनाशशङ्कावचनान्न यावज्जीवं कर्म कर्तव्यं प्रतिभातीत्यर्थः। ननु योगभ्रष्टशब्देन गृहस्थस्यैवाभिधानात् , तस्यैवास्मिन्नध्याये योगविधानाद् , योगारोहणयोग्यत्वे सत्यपि यावज्जीवं**

भाष्यार्कप्रकाशः

निष्ठत्वादाश्रमिणां मध्ये कश्चिदारुरुक्षुः कश्चिदारूढश्चेति पुरुषभेदवर्णनमयुक्तमिति भावः। कारणान्तरमाह— **पुनरिति**। योगारूढस्येति पुनर्योगग्रहणाच्चेत्यन्वयः। आरूढस्येत्येतावत एवोक्तौ योगमारुरुक्षोरित्यतो योगपदस्यात्राप्यनुवर्तनेन योगमारूढस्येतीष्टसिद्धौ व्यर्थं पुनर्योगपदग्रहणमित्यर्थः।

न चेदं चोद्यं सिद्धान्तेऽपि समानमिति वाच्यम् , सिद्धान्ते पुनर्योगपदाभावे य एव योगमारुरुक्षुः स एवारूढ इत्युक्तौ, किमारूढः इत्याकाङ्क्षायां योगमिति वक्तुं न शक्यते, एकस्मिन्नेकदा आरुरुक्षुत्वारूढत्वयोः स्थित्ययोगात्। तथा च आसनादिकमारूढः इत्यापतेदिति। न च - यः पूर्वं योगमारुरुक्षुः स इदानीमारूढः, किमारूढः इति शङ्कायां सान्निध्याद् योगमेवेति - वाच्यम्। यः पूर्वं यत् कामितवान् स इदानीं तदेवाप्तवानित्यत्र नियामकाभावात्। पूर्वं काशीं जिगमिषुरिदानीं रामेश्वरं गतः इति दर्शनाच्च, पूर्वस्मिन्नहनि सोऽहं यज्ञं करिष्ये इति सङ्कल्पितवतः पुरुषस्य परस्मिन्नहनि वैराग्यात् कर्मसंन्यासस्य दर्शनाच्च। तस्माद् यः पूर्वं योगमारुरुक्षुः स इदानीं योगमारूढः इति पुनरवश्यं वक्तव्यो योगशब्दः। पूर्वपक्षिमते तु— योगमारुरुक्षोरारूढस्य च कर्म शमश्च कारणमित्येतावतैव योगमारूढस्येति सिध्यतीति व्यर्थमेव पुनर्योगग्रहणम्।

**शम एवेति**। न तु कर्मेत्येवकारार्थः। ननु मूले शमः कारणमुच्यत इत्येवोक्तम् , न तु शमः कर्तव्य इति, अत आह— **कारणमिति**। **हि** यतः, शम इति शेषः, योगफलं प्रति कारणमुच्यते, ततः शमः कर्तव्य इति सिध्यतीत्यर्थः। योगफलं प्रति शमस्य साधनत्वाद् योगफलार्थिना शमः कर्तव्य इति मूलेन सूचितमिति भावः। योगफलं सम्यग्दर्शनमिति विवेकः। **अत इति**। योगारूढस्य कर्मकर्तव्यत्वाभावादित्यर्थः। कस्यचिदपि कर्मणो यावज्जीवं कर्तव्यत्वप्राप्तिर्नेत्यन्वयः।

उक्तार्थे हेत्वन्तरमाह—**योगविभ्रष्टवचनाच्चेति**। 'कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यती'ति, 'शुचीनां श्रीमतां गेहे योगभ्रष्टो ऽभिजायते' इति च योगभ्रष्टप्रतिपादनात्। संग्रहवाक्यमेव विवृणोति— **गृहस्थस्येत्यादिना**। अर्जुनेन योगभ्रष्टस्य नाश आशङ्कितः–

१. 'कर्तव्यम्' इति पा.। २. 'कारणं हि' इति रा.पा.। ३. तत्त्वमिति शेषः। कर्मसु इति विषयसप्तमी।

**प्राप्नोतीति तस्य नाशाशङ्काऽनुपपन्ना स्यात्[1]। अवश्यं हि कृतं कर्म काम्यं नित्यं वा, मोक्षस्य नित्यत्वादनारभ्यत्वे, स्वं फलमारभत एव। नित्यस्य च कर्मणो वेदप्रमाणावबुद्धत्वात् फलेन भवितव्यमित्यवोचाम[2], अन्यथा वेदस्यानर्थक्य-प्रसङ्गादिति। न च कर्मणि सत्युभयविभ्रष्टवचनमर्थवत्, कर्मणो विभ्रंशकारणानुपपत्तेः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

कस्मान्नोच्यते? षष्ठाध्याये योगोऽपि तस्यैव विहितः[3] इत्याशङ्क्याह— **गृहस्थ[स्य] चेदिति।** ननु गृहस्थेनापि मुमुक्षुणा कृतं कर्म मोक्षादन्यत् फलं नारभते। अतः 'छिन्नाभ्रमिव नश्यती'त्याशङ्का युक्तेत्याशङ्क्याह— **अवश्यं हीति।** कर्मणो हि निर्दोषात् [वेदात्] फलदायिनी शक्तिः स्वाभाविकी समधिगता। ब्रह्मात्मभावश्च स्वतःसिद्धत्वात् कर्मफलं [न] भवति। अतः अन्यत् फलमारभत एव कर्मेत्यर्थः। ननु मुमुक्षुर्विरक्तत्वात् काम्यं तावन्न करोति, नित्यं तु निष्फलमित्याशङ्क्याह— **नित्यस्य चेति।** इतश्च गृहस्थो योगभ्रष्टो नोच्यत इत्याह— **न च कर्मणि सतीति।**

आनन्दगिरिकृतव्याख्या

**कर्म कर्तव्यमिति, नेत्याह—** गृहस्थस्येति। [4]**तेनापि मुमुक्षुणा कृतस्य कर्मणो मोक्षातिरिक्तफलानारम्भकत्वाद् योगभ्रष्टोऽसौ छिन्नाभ्रमिव नश्यतीति शङ्का सावकाशेत्याशङ्क्याह—** अवश्यं हीति। **अपौरुषेयान्निर्दोषाद् वेदात् फलदायिनी कर्मणः स्वाभाविकी शक्तिरवगता। ब्रह्मभावस्य च स्वतःसिद्धत्वान्न कर्मफलत्वम्। अतो मोक्षातिरिक्तस्यैव फलस्य कर्म आरम्भकमिति कर्मिणि योगभ्रष्टेऽपि [5]कर्मगतिं गच्छतीति निरवकाशा शङ्केत्यर्थः। ननु मुमुक्षुणा काम्यप्रतिषिद्धयोरकरणात्, कृतयोश्च नित्यनैमित्तिकयोरफलत्वात् कथं तदीयस्य कर्मणो नियमेन फलारम्भकत्वम्? तत्राह—** नित्यस्य चेति। **चकारेण नैमित्तिकं कर्मानुकृष्यते। वेदप्रमाणकत्वेऽपि नित्यनैमित्तिकयो-रफलत्वे दोषमाह—** अन्यथेति। **कर्मणोऽनुष्ठितस्य फलारम्भकत्वध्रौव्याद् गृहस्थो योगभ्रष्टोऽपि कर्मगतिं गच्छतीति न तस्य नाशाशङ्केति शेषः। इतोऽपि गृहस्थो योगभ्रष्टशब्दवाच्यो न भवतीत्याह—** न चेति। **ज्ञानं कर्म चेत्युभयम्, ततो विभ्रष्टोऽयं नश्यतीति** वचनम् **गृहस्थे कर्मणि सति नार्थवद् भवितुमलम्, तस्य कर्मनिष्ठस्य कर्मणो विभ्रंशे हेत्वभावात्, तत्फलस्यावश्यकत्वादित्यर्थः।**

भाष्यार्कप्रकाशः

'कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यती'ति। **योगो** ध्यानयोगस्तस्यैवेह प्रकृतत्वात्। तस्माद् भ्रष्टो योगभ्रष्टः, यस्य योगो विहितः स एव ततो भ्रंशमाप्तुमर्हति, न त्वन्यः। न हि शूद्रः कर्मभ्रष्टो भवेत्, किन्तु द्विज एव, तस्यैव कर्मविधानात्। तथा च यदि गृहस्थस्य ध्यानयोगो विहितस्तर्हि योगभ्रष्टस्य गृहस्थस्यार्जुनेन नाश आशङ्कितःस्यात्, तच्चानिष्टम्, ध्यानयोगाद् भ्रष्टोऽपि गृहस्थः पुनः कर्मणि स्थित्वा तत्फलं प्राप्नुयादेवेति। ननु नास्ति कर्मणां फलमिति वादिनं प्रत्याह— **अवश्यमिति। अनारभ्यत्वे** अकार्यत्वे। नित्यत्वाद-कार्यमेकं मोक्षरूपं फलं विहाय तदतिरिक्ताः धर्मार्थकामास्त्रयोऽपि कर्मभिरारभ्यन्त एव। ननु काम्यस्य कर्मणः कामप्रयुक्तत्वादस्तु फलवत्त्वम्, नित्यस्य तु तन्नास्ति, अकामप्रयुक्तत्वादित्यत आह—**नित्यस्य चेति। अन्यथेति।** नित्यस्य वेदमूलस्य[6] कर्मणः फलाभाव इत्यर्थः। **आनर्थक्यमिति।** निष्फलनित्यकर्मविधानादिति भावः। एवं योगभ्रष्टस्यापि गृहस्थस्य फलप्रदकर्मसत्त्वात् 'छिन्नाभ्रमिव नश्यती'त्येतन्नाशाशङ्का अनुचिताऽर्जुनस्येति प्रतिपाद्य, 'कच्चिन्नोभयविभ्रष्टः' इत्यंशमपि विवृणोति— **न चेति।** उभयविभ्रष्टत्वं नाम कर्मयोगध्यानयोगद्वयतो विभ्रंशः। नायं गृहस्थस्य घटते, तस्य कर्मसत्त्वादित्याह— **कर्मणि सतीति।** कर्माण्यसंन्यस्यैव ध्यानयोगे प्रवृत्तत्वाद् गृहस्थस्य यदा ध्यानयोगाद् भ्रंशस्तदा कर्मयोगे स प्रवर्तत एवेति कथमस्य कर्मयोगाद् भ्रंशः? न कथमपीति भावः।

---

१. उक्तनाशाशङ्कायाः कर्मरहिते संन्यासिन्येव सावकाशता वाच्या, नान्यत्र, ध्यानाद् भ्रंशेऽपि कर्मणः सत्त्वेन तत्फलावश्यंभावात्। ततश्च यावज्जीवं कर्मणः कर्तव्यत्वे संन्यासासंभवात् क्वोक्ताशङ्काऽवकाशमासादयेदित्युक्ताशङ्कैवानुपपन्ना सती यावज्जीवं कर्मणः कर्तव्यत्वाभावमाक्षिपेदिति भावः। २. द्र.भ.गी. ४-१८ पृ. २२४। ३. कस्मान्नोच्यते इत्यनुषङ्गः। ४. नित्यकर्ममात्रकर्तरि मुमुक्षौ ध्यानभ्रष्टे उक्ताशङ्कायाः संभवेनान्यथोपपत्तिमाशङ्क्य परिहरतीत्युत्तरग्रन्थमवतारयति— **तेनापीति।** गृहस्थेनेत्यर्थः। ५. तस्यापि फलप्रापकनित्यादिकर्मणः सत्त्वात् स कर्मगतिं प्राप्नोत्येवेति तस्योभयविभ्रष्टत्वेन नाशाशङ्का निरवकाशा इति योजना। ६. वेदविहितस्येत्यर्थः।

**कर्म कृतमीश्वरे संन्यस्येत्यतः [1]कर्तरि कर्म फलं नारभत इति चेत्? न, ईश्वरे [2]संन्यासस्याधिकतर-फलहेतुत्वोपपत्तेः। मोक्षायैवेति चेत्? स्वकर्मणां कृतानामीश्वरे संन्यासो मोक्षायैव, न फलान्तराय, योगसहितः; योगाच्च विभ्रष्ट इत्यतः तं प्रति नाशाशङ्का युक्तैवेति चेत्? न; 'एकाकी यतचितात्मा निराशीरपरिग्रहः' (भ.गी.६.१०),**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ईश्वरे समर्पणात् कर्तरि फलं नारभते कर्म। अतोऽस्ति भ्रंशकारणमित्याह— **कर्म कृतमिति**। ईश्वरे समर्पणं कर्मणो न भ्रंशकारणम् , राज्ञ आराधनबुद्ध्या वस्त्रादिसमर्पणस्याधिकफलहेतुत्वादित्याह— **न, ईश्वरे न्यासस्येति**। सत्यम् अधिकफलहेतुत्वम्। किन्तु तदेव मोक्षहेतुत्वमित्याह—**मोक्षायैवेति**। तदेव विवृणोति—**सर्वक[स्वक]र्मणामिति**। योगसहितो न्यासो मोक्षाय भवति। योगाच्च विभ्रष्टोऽयं गृहस्थ इति युक्तैव नाशाशङ्केत्यर्थः। ध्यानसहिते ईश्वरे[सहितमीश्वरे] कर्मसमर्पणं मोक्षायेत्यत्र प्रमाणाभावान्न गृहस्थो योगभ्रष्ट इत्याह— **नेति**। इतश्च न गृहस्थो योगभ्रष्ट इत्याह— **एकाकीति**।

आनन्दगिरिकृतव्याख्या

**कृतस्य कर्मणो मुमुक्षुणा भगवति समर्पणात् कर्तरि फलानारम्भकत्वाद् अस्ति विभ्रंशकारणमिति शङ्कते—** कर्मेति। **राजाराधनबुद्ध्या धनधान्यादिसमर्पणस्याधिकफलहेतुत्वोपलम्भाद् ईश्वरे समर्पणं न भ्रंशकारणमिति दूषयति—** नेत्यादिना। **अधिक-फलहेतुत्वेऽपि मोक्षहेतुत्वमिष्यतामिति शङ्कते—** मोक्षायेति। **तदेव चोद्यं विवृणोति—** स्वकर्मणामिति। **सहकारिसामर्थ्यात् तस्य [3]फलान्तरं प्रत्युपायत्वासिद्धिरिति हेतुं सूचयति—** योगेति। **ध्यानसहितस्य संन्यासस्य मोक्षौपयिकत्वे कुतो योगभ्रष्टमधिकृत्य नाशा-शङ्केत्याशङ्क्याह—**योगाच्चेति। **सहकार्यभावे सामग्र्यभावात् फलानुपपत्तेर्युक्ता नाशाशङ्केत्यर्थः। ध्यानसहितमीश्वरे कर्मसमर्पणं मोक्षायेत्यत्र प्रमाणाभावाद् गृहस्थो योगभ्रष्टशब्दवाच्यो न भवतीति दूषयति—** नेति। **गृहस्थस्य योगभ्रष्टशब्दवाच्यत्वाभावे हेत्वन्तरमाह—**एकाकीति। **न खल्वेतानि विशेषणानि गृहस्थसमवायीनि सम्भवन्ति। तेन तस्य ध्यानयोगविध्यभावान्न तं प्रति योग-भ्रष्टशब्दवचनमुचितमित्यर्थः। एकाकित्ववचनं गृहस्थस्यापि ध्यानकाले स्त्रीसहायत्वाभावाभिप्रायेण भविष्यतीत्याशङ्क्य , अग्निहोत्रादिवद्**

भाष्यार्कप्रकाशः

ननु कर्मणो विभ्रंशकारणमस्ति कर्मणामीश्वरार्पणात्मकमिति शङ्कते— **कर्म कृतमिति। अतः** ईश्वरार्पितत्वादित्यर्थः। कर्मेति कर्तृपदम्। **नारभते** न जनयतीत्यर्थः।

**यद्वा** कर्मयोगं विहाय, ध्यानयोगे प्रवृत्तः तमपरिसमाप्यैव मृतो यो गृहस्थः स उभयभ्रष्ट इत्युच्यत इति पूर्वपक्षमभिप्रेत्याह— **न चेति। कर्मणि सतीति**। कर्मसंन्यासस्याकृतत्वादित्यर्थः। न च कर्मयोगाननुष्ठानमेव संन्यास इति वाच्यम् , शूद्रस्यापि संन्यासित्वा-पत्तेः। तस्माद् विधिपूर्वकः कर्मसंन्यास एव संन्यासः। स यस्यास्ति तस्य संन्यासिनः कर्म नास्ति। अन्यस्य त्वस्त्येवेति। ननु यदितः प्राक् गृहस्थेन कर्म कृतं तदीश्वरायार्पितमेवेति नास्ति गृहस्थस्यास्य कर्मेति शङ्कते— **कर्म कृतमिति**।

**अधिकतरेति** अनीश्वरसमर्पितकर्मफलापेक्षयाऽत्यधिकेत्यर्थः। ननु मोक्षापेक्षया कर्माणीश्वरे समर्पितानि कर्मयोगिना। अतः तानि कर्माणि मोक्षेतरत् फलं जनयितुं नेशते। स च मोक्षः परिपक्वकर्मयोगसाध्यः। कर्मयोगपरिपाकश्च यावज्जीवमनभिसंहित-फलकर्मानुष्ठानादेव भवति, न तु मध्ये कर्मत्यागात्। तस्माद् यः कर्मयोगमनुतिष्ठन् तं विहाय ध्यानयोगमाश्रित्य तमप्यपरिसमाप्यैव मृतो गृहस्थः स कर्मयोगाद् ध्यानयोगाच्च भ्रष्ट इत्युभयभ्रष्ट एवेति शङ्कते— **मोक्षायैवेति चेदिति**। सङ्ग्रहवाक्यं विवृणोति— **स्वकर्मणामिति**। [4]अत्र योगपदं कर्मयोगध्यानयोगोभयपरम् , योगद्वयसहितो योगद्वयाद् भ्रष्टश्चेत्यर्थः। **अतः** उभयभ्रष्टत्वादित्यर्थः। **तं प्रतीति**। एवमुभयभ्रष्टं गृहस्थं प्रतीत्यर्थः। परिहरति— **नेति**। 'योगी युञ्जीत सततमात्मानं रहसि स्थितः। एकाकी यतचित्तात्मा निराशीरपरिग्रहः॥ प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः। मनः संयम्य मच्चित्तो युक्त आसीत मत्परः'॥ इती[है]व वक्ष्यते।

१. 'कर्तुः' इति पा.। २. 'संन्यस्तस्य' इति पा.। ३. ईश्वरे संन्यस्तस्य कर्मणो मोक्षातिरिक्तफलं प्रति कारणत्वासिद्धिरिति शङ्कितुराशयः। योगसहितः इति न्यास-विशेषणं, पूर्ववाक्यान्वितं चानन्दगिरिटीकानुसारेण। ४. 'योगसहितः; योगाच्च विभ्रष्टः' इत्यत्र योगसहितः इति पुरुषविशेषणं रामकविव्याख्यानुसारेण।

**'ब्रह्मचारिव्रते स्थितः'(भ.गी.६.१४) इति च कर्मसंन्यासविधानात्। न चात्र ध्यानकाले स्त्रीसहायत्वाशङ्का येनैकाकित्वं विधीयते। न च गृहस्थस्य 'निराशीरपरिग्रहः' इत्यादिवचनमनुकूलम्। उभयविभ्रष्टप्रश्नानुपपत्तेश्च।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

नन्वेकाकित्ववचनं गृहस्थस्यापि ज्ञान[ध्यान]काले स्त्रीसहायत्वाभावाभिप्रायेण भविष्यतीत्याशङ्क्याह— **न चात्रेति**। अप्राप्तप्रतिषेधप्रसङ्गादग्निहोत्रादिवद् ध्यानस्य पत्नीसहायत्वाभावादित्यर्थः। विशेषणान्तरपर्यालोचनयाऽपि एकाकिशब्दो न गृहस्थपर इत्याह— **न च गृहस्थस्येति**। किञ्च यदि गृहस्थस्यैवैकाकित्वं विवक्षितम् , तदा तं प्रति उभयविभ्रष्टप्रश्नो न स्यादित्याह— **उभयविभ्रष्टेति**।

आनन्दगिरिकृतव्याख्या

**ध्यानस्य पत्नीसाध्यत्वाभावाद् अप्राप्तप्रतिषेधान्मैवमित्याह—** न चात्रेति। **विशेषणान्तरपर्यालोचनयाऽपि नायमेकाकिशब्दो गृहस्थपरो भवितुमर्हतीत्याह—** न चेति। **किञ्च गृहस्थस्यैवैकाकित्वादि विवक्षित्वा ध्यानयोगविधौ तं प्रत्युभयभ्रष्टप्रश्नो नोपपद्यत इत्याह—**उभयेति। **न हि गृहस्थं प्रत्युभयस्माद् ज्ञानात् कर्मणश्च विभ्रष्टत्वमुपेत्य प्रष्टुं युज्यते, तस्य ज्ञानाद् भ्रंशेऽपि कर्मणस्तदभावाद् , अनुष्ठीयमान-कर्मभ्रंशेऽपि प्रागनुष्ठितकर्मवशात् फलप्रतिलम्भात्। अतो यथोक्तप्रश्नालोचनया न गृहस्थं प्रति ध्यानविधानोपपत्तिरित्यर्थः।**

भाष्यार्कप्रकाशः

एतच्छ्लोकोक्तानामेकाकित्वापरिग्रहत्वब्रह्मचर्याणां गृहस्थेऽसम्भवात् संन्यासिविषय एवायं ध्यानयोगो न गृहस्थविषय इत्यर्थः।

ननु 'एकाकी'त्यनेन संन्यासी नोच्यते, किन्तु गृहस्थ एव। सद्वितीयस्यापि तस्य ध्यानकाले स्त्रीवियोगेन एकाकित्व-मप्युपपद्यत इत्यत आह— **न चेति**। यदि ध्यानकाले स्त्रीसहायत्वशङ्का स्यात् तर्हि तन्निवृत्तये एकाकित्वविधानं सार्थकं स्यात् , न तु तदस्ति, न हि कर्मकाल इव ध्यानकाले गृहस्थेन स्त्रीसहायेन भाव्यमिति विधिरस्ति, तस्माद् नात्रैकाकिशब्दस्य स्त्रीसहायरहित इत्यर्थः, किन्तु संन्यासीत्येव। ननु 'एकादाकिनिच्चासहाये'[1] इति एकाकिशब्दस्य असहाय इत्यर्थः। तच्चासहायत्वं गृहस्थस्य ध्यानकाले आवश्यकमिति भवतु यथाकथञ्चिद् गृहस्थस्याप्यसहायत्वविधिः, अत आह— **न च गृहस्थस्येति**। कामपरिग्रहाभावादीनां गृहस्थे ऽसम्भवात् तत्साधारण्यादेकाकित्वमपि संन्यासिविषयमेवेत्यर्थः। पूर्वोक्तमेव कारणं पुनराह— **उभयेति**।

**ननु** योगसहितस्य योगाच्च विभ्रष्टस्य गृहस्थस्योभयभ्रष्टत्वमुपपद्यत एवेति प्रागुक्तशङ्कायाः कः परिहारः, येनोभयविभ्रष्ट-प्रश्नानुपपत्तेश्चेति वक्तुं शक्यत इति चेत्? **उच्यते**— एकाकीत्यादिना संन्यासिन एव ध्यानयोगेऽधिकारस्य विहितत्वाद् गृहस्थस्य ध्यानयोगारोहणं नास्त्येव, येन कर्मयोगत्याग आशङ्क्येत गृहस्थस्य भ्रंशहेतुः। एवं गृहस्थस्य ध्यानयोगारोहणाभावादेव न कर्मयोगाद् भ्रंशः, नापि ध्यानयोगादिति नास्ति गृहस्थस्योभयभ्रष्टत्वप्रसक्तिः। संन्यासिनस्तु सोऽस्ति, कर्माणि संन्यस्य ध्यानयोगमधिष्ठितत्वेन कर्मफलभ्रंशाद् ध्यानयोगस्य चापक्वत्वेन ध्यानयोगभ्रंशाच्च। न हि कर्माणि संन्यस्य ध्यानयोगे प्रवृत्तः संन्यासी ध्यानयोगानुष्ठानस्या-शक्यत्वे तं विहाय पुनः कर्मसु प्रवर्तितुमर्हति। न च संन्यासिनोऽपि प्रागनुष्ठितकर्मफलसत्त्वात् कथमुभयभ्रंश इति वाच्यम् , सर्वकर्मसंन्यासेन पूर्वाचरितसर्वकर्मफलत्यागस्यापि कृतत्वात् , पूर्वाचरितकर्मफलभूतस्वर्गादिकामस्य संन्यासेऽनधिकारात् , इहामुत्र-फलभोगविरागस्य संन्यासहेतुत्वात् , 'यदहरेव विरजेत्तदहरेव प्रव्रजेद्' इति श्रुतेः, [2]न संन्यासिनो गृहस्थाश्रमसमयानुष्ठितयज्ञादि-कर्मफलसम्भवः। चित्तशुद्धिस्तु दृष्टफलमेवेति न तन्निराकर्तुं त्यक्तुं वा शक्यते। तस्मात् संन्यासिनः पूर्वाचरितकर्मवैफल्यात् , संन्यासाश्रमस्वीकारानन्तरं कर्मणामकर्तव्यत्वाच्च न कर्माणि सन्तीति कर्मभ्रंशस्तावत् सम्पन्नः। ध्यानयोगस्याप्यसाधितत्वेन तु योगभ्रंशश्च जायते। अत उभयभ्रष्टत्वं संन्यासिन एवोपपद्यत इति कृत्वा गृहस्थविषयोभयभ्रष्टप्रश्नानुपपत्तिर्दुर्वारैव।

एतावता यावद् ध्यानयोगारोहणासामर्थ्यं तावद् गृहस्थेन कर्म कर्तव्यम् , सति तु सामर्थ्ये संन्यस्य ध्यानयोगः कर्तव्य इति

१. अनेन सूत्रेण व्युत्पादितस्येति शेषः। २. संन्यासिनां पूर्वाश्रमकृतकर्मफलाभावे प्रमाणमन्वेषणीयम्।

**'अनाश्रितः' इत्यनेन कर्मिण एव संन्यासित्वं, योगित्वं चोक्तम् , प्रतिषिद्धं च निरग्नेरक्रियस्य च संन्यासित्वं योगित्वं चेति चेत्? न ; ध्यानयोगं प्रति बहिरङ्गस्य सतः कर्मणः फलाकाङ्क्षासंन्यासस्तुतिपरत्वात्। न केवलं निरग्निरक्रिय एव संन्यासी योगी च ; किं तर्हि? कर्म्यपि कर्मफलासङ्गं संन्यस्य कर्मयोगमनुतिष्ठन् सत्त्वशुद्ध्यर्थं संन्यासी च योगी च भवतीति स्तूयते। न चैकेन वाक्येन कर्मफलासङ्गसंन्यासस्तुतिः, चतुर्थाश्रमप्रतिषेधश्चोपपद्यते। न च प्रसिद्धं निरग्नेरक्रियस्य परमार्थसंन्यासिनः श्रुतिस्मृतिपुराणेतिहासयोगशास्त्रेषु विहितं संन्यासित्वं योगित्वं च**

अनुभूतिस्वरूपाचार्यटिप्पणम्

भगवता संन्यासस्य प्रतिषिद्धत्वाद् योगविभ्रष्टो गृहस्थ एवेत्याह— **अनाश्रित इत्यनेनेति**। न निषेधपरं भगवद्वाक्यमित्याह— **न, ध्यानयोगं प्रतीति**। उभयपरत्वे वाक्यभेद इत्याह— **न चैकेनेति**। इतश्च न संन्यासाश्रमप्रतिषेधोऽभिप्रेतः इत्याह— **न च प्रसिद्धमिति**॥ १॥

आनन्दगिरिकृतव्याख्या

**ननु भगवता संन्यासस्य प्रतिषिद्धत्वाद् गृहस्थस्यैव योगविधानात् तस्यैव योगभ्रष्टशब्दवाच्यत्वमिति शङ्कते—** अनाश्रित इत्यनेनेति। **भगवद्वाक्यं न प्रतिषेधपरमिति परिहरति—** न, ध्यानेति। **स्तुतिपरत्वमेव स्फोरयति—** न केवलमिति। **सत्त्वशुद्ध्यर्थमनुतिष्ठन्निति सम्बन्धः। वाक्यस्योभयपरत्वमाशङ्क्य वाक्यभेदप्रसङ्गान्मैवमित्याह—** न चेति। **इतोऽपि भगवतः संन्यासाश्रमप्रतिषेधो ऽभिप्रेतो न भवतीत्याह—** न च प्रसिद्धमिति। **तस्य प्रसिद्धं संन्यासित्वं योगित्वं चेति सम्बन्धः। प्रसिद्धत्वमेव व्याकरोति—** श्रुतीति।

भाष्यार्कप्रकाशः

संन्यासिन एव ध्यानयोगेऽधिकारः ज्ञानयोगवत् , न तु गृहस्थस्येति सिद्धम्।

ननु 'अनाश्रितः कर्मफल'मिति प्रकृतश्लोकेन कर्मिण एव संन्यासित्वं योगित्वं चोक्तम्— 'स संन्यासी च योगी चे'ति। अनग्नेरक्रियस्य च संन्यासित्वं योगित्वं च प्रतिषिद्धम्— 'न निरग्निर्न चाक्रियः' इति। तथा च यः कर्मयोगी गृहस्थः स एव संन्यासी, ध्यानयोगी च, न तु त्वदुक्तसंन्यासाश्रमी संन्यासी, योगी वा भवितुमर्हतीति गृहस्थस्य कर्मिण एव ध्यानयोगेऽधिकारः, न तु संन्यासिन इति भगवतो मतमित्याक्षिपति— **कर्मिण एवेति। यद्वा** संन्यास इति कश्चनाश्रमो नास्त्येव, किं तर्हि कर्मफलसंन्यासी गृहस्थ एव संन्यासीति भगवतो मतमित्याक्षिपति— **कर्मिण एवेति।**

परिहरति— **नेति। स्तुतिपरत्वादिति** दर्शितवचनस्येत्यर्थः। फलाकाङ्क्षायाः **संन्यासः** त्यागः, तस्य स्तुतिः, तत्परत्वात्। स्तुतिप्रकारमेव दर्शयति— **न केवलमित्यादिना स्तूयत** इत्यन्तेन ग्रन्थेन। यः कर्मफलमनाश्रित्य कार्यं कर्म करोति, स च संन्यासी योगी च भवति, निरग्निरक्रिय एव संन्यासी योगी च नेति श्लोकस्यान्वयः। कर्मफलासङ्गं संन्यस्य त्यक्त्वा सत्त्वशुद्ध्यर्थं कर्मयोगमनुतिष्ठन् कर्म्यपीति भाष्यान्वयः। ननु 'संन्यासी च योगी चे'त्यनेन कर्मयोगिस्तुतिः, 'न निरग्निर्न चाक्रियः' इत्यनेन संन्यासप्रतिषेधश्च भगवताऽभिप्रेत इत्यत आह— **न चैकेनेति।** [१]वाक्यभेदाभावात् तादृशाभिप्रायकल्पना नोपपद्यत इत्यर्थः।

**ननु** श्लोकैकत्वेऽपि वाक्यस्य द्वित्वमस्त्येव। 'अनाश्रितः' इत्यारभ्य 'योगी चे'त्यन्तमेकं वाक्यम्। 'न निरग्निर्न चाक्रियः' इति द्वितीयं वाक्यम्। अतो नात्रैकवाक्यत्वम्। **यद्वा** 'यः कर्मफलमनाश्रित्य कार्यं कर्म करोति, स एव संन्यासी योगी चे'त्येव वाक्यम्। स एवेत्येवकारार्थविवरणम्— 'न निरग्निर्न चाक्रियः' इति, अतो न वाक्यद्वित्वम्। तथा च एकेनैव वाक्येन कर्मस्तुतिसंन्यासप्रतिषेधौ उपपद्येते एव, यथा 'आत्मैव ह्यात्मनो बन्धु'रित्यत्र आत्मनो बन्धुत्वम् , अन्यस्याबन्धुत्वं चेति द्वयमेकेन वाक्येन बोध्यते, तद्वदित्यत्राह— **न च प्रसिद्धमिति**। प्रसिद्धं संन्यासित्वं योगित्वं च न च प्रतिषेधति भगवानित्यन्वयः।

---

१. वाक्यैक्यादित्यर्थः। 'न निरग्निर्न चाक्रियः' इत्येतत् न स्वतन्त्रं भिन्नं वाक्यम्। किन्तु 'स संन्यासी च योगी चेति पूर्ववाक्यशेषः। तस्य संन्यासप्रतिषेधार्थाभिप्राये हि वाक्यैक्यं नोपपद्येतेति भावः।

**प्रतिषेधति भगवान्। स्ववचनविरोधाच्च। 'सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन् न कारयन्नास्ते' (भ.गी.५.१३) 'मौनी सन्तुष्टो येनकेनचित्। अनिकेतः स्थिरमतिः'(भ.गी.१२.१९) 'विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः' (भ.गी.२.७१) 'सर्वारम्भपरित्यागी' (भ.गी.१२.१६) इति च तत्र तत्र भगवता स्ववचनानि दर्शितानि, तैर्विरुध्येत चतुर्थाश्रमप्रतिषेधः। तस्माद् मुनेर्योगमारुरुक्षोः प्रतिपन्नगार्हस्थ्यस्य अग्निहोत्रादि कर्म फलनिरपेक्ष-मनुष्ठीयमानं ध्यानयोगारोहणसाधनत्वं बुद्धिशुद्धिद्वारेण प्रतिपद्यत इति 'स संन्यासी च योगी च' इति स्तूयते।**

अनाश्रित इति। अनाश्रितः **न आश्रितोऽनाश्रितः, किम्?** कर्मफलम् [१]**कर्मणः फलं कर्मफलं यत् तदनाश्रितः। कर्मफलतृष्णारहित इत्यर्थः। यो हि कर्मफले तृष्णावान् स कर्मफलमाश्रितो भवति, अयं तु तद्विपरीतः, अतोऽनाश्रितः कर्मफलम्। एवम्भूतः सन्** कार्यं **कर्तव्यं नित्यं काम्यविपरीतमग्निहोत्रादिकं कर्म** करोति **निर्वर्तयति यः**

आनन्दगिरिकृतव्याख्या

**इतोऽपि संन्यासाश्रमं भगवान् न प्रतिषेधतीत्याह—** स्ववचनेति। **विरोधमेव साधयति—** सर्वकर्माणीत्यादिना। **'अनाश्रितः' इत्यादि-वाक्यस्य यथाश्रुतार्थत्वानुपपत्तेः स्तुतिपरत्वमुपपादितमुपसंहरति—** तस्मादिति। **कर्मफलसंन्यासित्वमत्र मुनिशब्दार्थः।**

**स्तुतिपरं वाक्यमक्षरयोजनार्थमुदाहरति—** अनाश्रित इति। **कर्मफलेऽभिलाषो नास्तीत्येतावता कथं तदनाश्रितत्ववाचोयुक्तिरि-त्याशङ्क्य व्यतिरेकमुखेन विशदयति—** यो हीति। **'कार्य'मित्यादि व्याकरोति—** एवम्भूतः सन्निति। **कथं कर्मिणः संन्यासित्वं योगित्वं**

भाष्यार्कप्रकाशः

ननु श्रुत्याद्यपेक्षया सर्वज्ञस्य भगवतः सर्वस्वतन्त्रस्य प्रमाणत्वाच्छ्रुत्यादिविरुद्धमपि भगवान् ब्रूयादेव, तदेव भगवद्वचनमस्माकं प्रमाणमपीत्यत आह— **स्ववचनविरोधाच्चेति**। स्ववचनान्येवोदाहरति— **सर्वकर्माणीत्यादिना**। 'यदहरेव विरजेत् तदहरेव प्रव्रजेदि'त्यादयः श्रुतयः। 'यथोक्तान्यपि कर्माणि परिहाप्य द्विजोत्तमः' इत्यादयः स्मृतयः। भागवतादिपुराणेषु च प्रसिद्धः संन्यासः।

**वस्तुतस्तु** – 'सिंहो माणवकः' इतिवत् 'कर्मी संन्यासी'ति वचनं गौणं स्तुतिपरमित्यविवादम्। सा च स्तुतिः प्रसिद्धसिंहवत् प्रसिद्धसंन्यासिनः सत्त्व एव सम्भवति, न त्वत्यन्तासत्त्वे। न हि प्रसिद्धसिंहस्याभावे 'सिंहो माणवकः' इति वक्तुं शक्यते। सिंहवत् शौर्यधैर्यादिसम्पन्नो माणवकः इति हि तत्र विवक्षितं वक्त्रा। किञ्च **आलङ्कारिकैः**– 'नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुख'मिति प्रसिद्धसुधांश्वपह्नवपूर्वकं कामिनीमुखे सुधांशुत्वमारोप्यमाणं दृश्यते। तत्रापि सन्तमेव प्रसिद्धसुधांशुमपह्नुत्य ते मुखे सुधांशुत्वारोपं कृतवन्तः, न त्वत्यन्तासन्तम्[२]। तद्वदिहापि निरग्निर्न संन्यासी, किन्तु कर्म्यैव संन्यासीति वचनेन प्रसिद्धे संन्यासिनि संन्यासित्व-मपह्नुत्य कर्मिणि तदारोपितमिति सिद्ध एव प्रसिद्धसंन्यासी। **अपि च** प्रसक्तस्यैव निषेधः, नाप्रसक्तस्येति नियमात् परमार्थसंन्यासिनः सुतरामभावे कथं तन्निषेध उपपद्यते? अतो नात्र चतुर्थाश्रमप्रतिषेधो भगवता विवक्षित इति कल्पयितुं शक्यं ब्रह्मणोऽपि।

**तस्मादिति**। संन्यासिन एव ध्यानयोगाधिकारादित्यर्थः। **मुनेरिति**। मननशीलस्येत्यर्थः। न तु संन्यासिन इति, प्रतिपन्नगार्हस्थ्यस्येति विशेषणात्। **अनुष्ठीयमानम्** अग्निहोत्रादि कर्मेति शेषः। **स इति**। य एवं फलनिरपेक्षः शुद्ध्यर्थं कर्मयोगमनुतिष्ठति स इत्यर्थः।

अथ श्लोकं व्याख्यातुमारभते— **अनाश्रित इति**। नञ्तत्पुरुषः। आश्रित इति कर्तरि क्तः। तेन कर्माकाङ्क्षा जातेत्याह— **किमिति**। किमनाश्रित इत्यर्थः। आकाङ्क्षां पूरयति— **कर्मफलमिति**। ननु कालान्तरभाविनः जन्मान्तरभाविनश्च कर्मफलस्य कथमा-श्रयणप्रसक्तिः येनानाश्रित इति तन्निषेधस्यार्थवत्त्वम्? अत आह— **कर्मफलतृष्णेति**। कर्मफले आशाराहित्यमेव तदनाश्रयणमुच्यत इत्यर्थः। कथं पुनराशाराहित्यमात्रेण फलानाश्रयणम्? अत आह— **यो हीति**। फलस्य कामप्रयुक्तत्वात् कामाभावे फलाभाव इत्यर्थः।

१. 'कर्मणाम्' इति पा.। २. सुधांशुमारोपितवन्तः इति शेषः।

**कश्चिद् ईदृशः कर्मी, स कर्म्यन्तरेभ्यो विशिष्यत इत्येवमर्थमाह— स संन्यासी च योगी चेति।** संन्यासः **परित्यागः, स यस्यास्ति स** संन्यासी च ; योगी च **योगश्चित्तसमाधानम् , स यस्यास्ति स योगी च इत्येवंगुणसम्पन्नोऽयं मन्तव्यः। न केवलं निरग्निरक्रिय एव संन्यासी योगी चेति मन्तव्यः। निर्गताः अग्नयः कर्माङ्गभूता यस्मात् स** निरग्निः**,** अक्रियश्च **अनग्निसाधना अप्यविद्यमानाः क्रियाः तपोदानादिका यस्यासौ अक्रियः॥१॥**

आनन्दगिरिकृतव्याख्या

**च, कर्मित्वविरोधादित्याशङ्क्याह—** ईदृश इति। **स्तुतेरत्र विवक्षितत्वान्नानुपपत्तिश्चोदनीयेति मन्वानः सन्नाह—** इत्येवमिति। **'न निरग्नि'रित्यादेरर्थमाह—**न केवलमिति। अग्नयो **गार्हपत्याहवनीयान्वाहार्यपचनप्रभृतयः**[1]**। नन्वनग्नित्वे सिद्धमक्रियत्वम् अग्निसाध्यत्वात् क्रियाणाम्। तथा च 'न निरग्नि'रित्येतावतैवापेक्षितसिद्धेः 'न चाक्रियः' इत्यनर्थकमर्थपुनरुक्तेरिति, तत्राह—**अनग्नीति ॥१॥

भाष्यार्कप्रकाशः

**तद्विपरीत इति** तृष्णावत्पुरुषाद् विलक्षणः। कोऽयम्? अत आह—**योऽनाश्रित इति। एवम्भूतःसन्निति।** कर्मफलमनाश्रितःसन्नित्यर्थः। **कार्यं** कर्तुं योग्यं। किं तत्कार्यम्? अत आह— **नित्यमिति।** नित्यस्याकामप्रयुक्तत्वाच्छास्त्रैकमूलत्वाच्चेति भावः। न तु काम्यमित्याह— **काम्यविपरीतमिति।** काम्यस्य कामप्रयुक्तत्वात् तद्वैपरीत्यं नित्यस्येति भावः। **ईदृश इति।** फलनिरपेक्षं नित्यकर्मकर्तेत्यर्थः। **कर्म्यन्तरेभ्य इति।** फलसापेक्षं कर्माणि कुर्वद्भ्यः इत्यर्थः। **विशिष्यते** उत्कृष्टो भवति। न तु संन्यासिभ्यः, नापि ध्यानयोगिभ्य उत्कृष्टत्वमस्य, कर्मयोगोपेयत्वात् संन्यासध्यानयोगयोः। न हि क्वाप्युपायः उपेयाद् विशिष्यमाणो दृष्टः श्रुतो वेति भावः।

**स इति**। कर्मयोगीत्यर्थः। परमार्थसंन्यासिवैलक्षण्यायाह— **संन्यासः परित्याग इति**। तथा परमार्थयोगिवैलक्षण्यायाह— **योगश्चित्तसमाधानमिति। एवंगुणसम्पन्न इति।** परित्यागचित्तसमाधानरूपगुणयुक्त इत्यर्थः।

**अयं भावः**— यथा सिंहो माणवक इति गौणप्रयोगे सिंहशब्दस्य मुख्यार्थं केसरादिमदाकृतिविशेषं विहाय लक्षणया शौर्यधैर्यादिगुणयोगमर्थं वदन्ति बुधाः, माणवकः सिंहवच्छौर्यधैर्यादिगुणविशिष्ट इति, तद्वत् कर्मी योगी संन्यासी चेति वचनेऽपि योगिसंन्यासिशब्दयोः कर्मसंन्यासिध्यानयोगिरूपार्थौ विहाय लक्षणया कर्मी संन्यासिवद् योगिवच्च परित्यागचित्तसमाधानरूपगुण-विशिष्ट इत्यर्थो ग्राह्यो विद्वद्भिः। तथा च शौर्यधैर्यादिनिमित्तो यथा माणवके सिंहप्रत्ययः, तथा परित्यागनिमित्तश्चित्तसमाधाननिमित्तश्च कर्मिणि संन्यासिप्रत्ययो योगिप्रत्ययश्चेति। यथा संन्यासी कर्माणि परित्यजति, तथा कर्मी कर्मफलानि परित्यजतीति कर्मिसंन्यासिनोः परित्यागविषये सादृश्यम्। यथा योगी ब्रह्मणि चित्तं समाधत्ते, तथा कर्मी कर्मणि चित्तं समाधत्त इति कर्मियोगिनोः सादृश्यं चित्तसमाधाने। कर्मणि चित्तसमाधानं च 'योगः कर्मसु कौशल'मित्यनेन प्रतिपादितं फलतृष्णाऽभावादिरूपम्। तस्मान्न मुख्यं संन्यासित्वं योगित्वं वा कर्मिणि सम्भवति, विरोधात् , किन्तु गौणमेव। विरोधश्च कर्मसंन्यासकर्मकरणयोः प्रसिद्ध एव। ध्यानयोगेऽप्यस्ति हि यज्ञादिविहितकर्मपरित्याग इति।

यद्यपि संन्यासीत्यनेनैव योगीत्यपि सिद्धम् , संन्यासिन एव योगाधिकाराद् , योगिन एव संन्यासित्वात् , तथापि ज्ञानयोग-निष्ठः संन्यासीह संन्यासिशब्देन, ध्यानयोगनिष्ठः संन्यासी तु योगिशब्देनोच्यत इति वैलक्षण्यं बोध्यम्।

किञ्च यदीह कर्मिणि मुख्यं संन्यासित्वं विधित्सितम् , तर्हि संन्यासियोगिशब्दयोरन्यतरेणैवालम् , परन्तु गौणं विधित्सितम् , संन्यासिनि तु गुणद्वयमस्ति परित्यागश्चित्तसमाधानं चेति। तदेव प्रवृत्तिनिमित्तीकृत्य संन्यासियोगिशब्दद्वयं तत्र प्रवर्तते। तस्यैव गुणद्वयस्य कर्मिण्यपि यथाकथञ्चित् सत्त्वेन कर्मिणि गौणं संन्यासित्वं विधित्सितमिति संन्यासी योगीति शब्दद्वयप्रयोगः सार्थकः।

ननु निरग्निरित्यनेनैवाक्रियत्वस्य लाभाद् व्यर्थमक्रिय इति पदम्? अत आह— **अनग्निसाधना इति।** अग्निसहितक्रियाप्रतिषेधो निरग्निशब्देनोक्तः, अग्निरहितक्रियाप्रतिषेधायाक्रिय इति पदमावश्यकमित्यर्थः। साग्नयः क्रिया यज्ञादयः प्रसिद्धाः, निरग्नयः क्रियास्त्वप्रसिद्धा इति तद्बोधनायाह— **तपोदानादिका इति।** अविद्यमानाः क्रिया यस्यासावक्रिय इति सम्बन्धः। 'नञोऽस्त्यर्थानां

१. अन्वाहार्यपचनः दक्षिणाग्निः। प्रभृतिपदेन सभ्यावसथ्ययोः परिग्रहः।

**[1]ननु च निरग्नेरक्रियस्यैव श्रुतिस्मृतियोगशास्त्रेषु संन्यासित्वं योगित्वं च प्रसिद्धम् ; कथमिह साग्नेः सक्रियस्य संन्यासित्वं योगित्वं चाप्रसिद्धमुच्यते इति? नैष दोषः। कयाचिद् गुणवृत्त्योभयस्य सम्पिपादयिषितत्वात्। तत् कथम्?**

अनुभूतिस्वरूपाचार्यटिप्पणम्

उत्तरश्लोकस्य तात्पर्यं दर्शयितुमाशङ्कामाह— **ननु च निरग्नेरित्यादिना।** यदुक्तं संन्यासित्वं योगित्वं च गृहस्थस्य

आनन्दगिरिकृतव्याख्या

**उत्तरश्लोकस्य तात्पर्यं दर्शयितुं व्यावर्त्यामाशङ्कां दर्शयति—** ननु चेति। **प्रसिद्धिं परित्यज्याप्रसिद्धिरुपादीयमाना प्रसिद्धिविरुद्धेति चोद्यं दूषयति—** नैष दोष इति। उभयस्य **साग्नौ सक्रिये च संन्यासित्वस्य योगित्वस्य चेत्यर्थः। गुणवृत्त्योभयसम्पादनं प्रश्नपूर्वकं प्रकटयति—** तत्कथमित्यादिना। **सम्भवति मुख्ये संन्यासित्वादौ किमिति गौणमुभयमभीष्टमित्याशङ्क्य मुख्यस्य कर्मिण्यसम्भवाद् गौणमेव**

भाष्यार्कप्रकाशः

वाच्यो वा चोत्तरपदलोपः' इति वार्तिकात् समास उत्तरपदलोपश्च।

नन्वप्रसिद्धाभिधानमिदमयुक्तं भगवत इत्याशङ्क्य परिहरति— **ननु चेत्यादिना। गुणवृत्त्येति** लक्षणयेत्यर्थः। सम्पादयितुमिष्टं सम्पिपादयिषितं, तत्त्वात्। न वयं निरग्नेरक्रियस्य च संन्यासित्वं योगित्वं वा प्रतिषेधामः, नापि साग्नेः सक्रियस्य तदुभयं विदधामः, किन्तु यथोक्तकर्मयोगिनो लक्षणया संन्यासित्वं योगित्वं च ब्रूमः, संन्यासियोगिसादृश्यस्य परित्यागचित्तसमाधानरूपस्य कर्मिणि सत्त्वात्। अतो न श्रुतिस्मृत्यादिविरोधः।

यत्तु **रामानुजः—** यः कर्म करोति स [संन्यासी च] ज्ञानयोगनिष्ठः,[योगी च] कर्मयोगनिष्ठश्च। सः **[न] निरग्निः**[केवलं] कर्मस्वप्रवृत्तो न भवति, **[न च] अक्रियः** केवलज्ञाननिष्ठश्च न भवति। ज्ञानयोगनिष्ठस्य तु केवलज्ञाननिष्ठैव, कर्मयोगनिष्ठस्य तूभयमस्तीत्यभिप्राय इति, **तत्तुच्छम्** ; यः कर्मी संन्यासी योगी च भवतीत्युक्तः, कथं स एव कर्मी निरग्निर्न भवति अक्रियश्च न भवतीति वक्तुं शक्यते? न ह्येकस्मिन्नेव कर्मिणि संन्यासित्वविधिः तत्प्रतिषेधश्चेति द्वयमुपपद्यते। निरग्न्यक्रियशब्दौ हि संन्यासिनं बोधयतः, तस्यैवाग्निक्रियाऽभावात्। न च - निरग्न्यक्रियशब्दौ कर्मस्वप्रवृत्तं ज्ञाननिष्ठं च बोधयतो, न तु संन्यासिनमिति - वाच्यम् , संन्यासिन एव तथात्वात्। न हि गृहस्थस्य कर्मसु प्रवृत्त्यभावः ज्ञाननिष्ठा च सम्भवतः। कर्मस्वप्रवृत्तिर्हि कर्मसंन्यासः, [2]स एव ज्ञाननिष्ठा च। न च गृहस्थस्यापि नास्तिकस्यातुरस्य वा कर्मस्वप्रवृत्तिरिति वाच्यम् , तादृशगृहस्थस्यात्र शास्त्रे प्रसक्त्यभावात्। कर्म करोतीति आस्तिकं शक्तमेव गृहस्थमुद्दिश्य ह्युच्यते।

**किञ्च** 'स संन्यासी च योगी च' इति चकारेण संन्यासित्वयोगित्वसमुच्चयस्य कर्मिणि त्वदभिमतस्य सिद्धत्वेन 'न निरग्निर्न चाक्रियः' इति पुनरुक्तम्। 'न केवलं कर्मस्वप्रवृत्तो, न केवलं ज्ञाननिष्ठश्चे'त्येतस्य 'संन्यासी च योगी चे'त्यनेनैव सिद्धत्वादिति भावः। अपि च 'न केवलं कर्मस्वप्रवृत्त' इत्यनेन कर्मस्वप्रवृत्तश्चेत्येव लभ्यते, न तु कर्मसु प्रवृत्त इति। तथा च यः कर्म करोति स कर्मस्वप्रवृत्तो ज्ञाननिष्ठश्चेति सिद्धम् ; तच्च पुनरुक्तं कर्मस्वप्रवृत्तत्वस्य ज्ञाननिष्ठत्वस्य चैक्यात्। तथा यः कर्म करोति स संन्यासी योगी कर्मस्वप्रवृत्तो ज्ञाननिष्ठश्चेति त्वदभिमतयोजनया हि सिद्धम्। तत्र कर्मकरणसंन्यासयोः कर्मयोगकर्माप्रवृत्त्योः कर्मनिष्ठत्वज्ञाननिष्ठत्वयोश्च विरोधो बालस्यापि विदित एव। संन्यासीत्यस्य ज्ञाननिष्ठ इत्यर्थाश्रयणेऽपि कर्मकरणकर्माप्रवृत्त्योः कर्मयोगनिष्ठत्वज्ञानयोगनिष्ठत्वयोश्च विरोधः स्फुटः। ज्ञाननिष्ठो ज्ञाननिष्ठश्चेति कर्मस्वप्रवृत्तश्चेति शब्दतोऽर्थश्च पुनरुक्तम्। यः कर्म करोति स कर्मयोगीति सर्वैर्विदितमेवेति कृत्वा यः कर्म करोति स योगीत्युक्तिर्व्यर्था पुनरुक्ता च। यः कर्म करोति स न निरग्निर्न चाक्रियः, किन्तु साग्निः सक्रिय एवेति सर्वजनविदितत्वाद् न निरग्निर्न चाक्रियः इत्युक्तिर्व्यर्था पुनरुक्ता च।

**अथ**[तथा] कर्मयोगनिष्ठस्योभयनिष्ठत्वमित्येतद् **व्याहतम्** , कर्मयोगनिष्ठस्य कर्मयोगनिष्ठत्वेन, ज्ञानयोगनिष्ठस्य ज्ञानयोगनिष्ठत्वेन, उभयनिष्ठस्योभयनिष्ठत्वेन च भाव्यत्वात् कर्मयोगनिष्ठस्य वा ज्ञानयोगनिष्ठस्य वा उभयनिष्ठत्वासम्भवात्। तथा एकस्य

१. **ननु चे**त्यादि भाष्यं प्रथमश्लोकशेषतयैव व्याख्यातं भाष्यार्कप्रकाशकारेण। २. 'सैव' इति पाठः संभाव्यते। स इत्यनेन कर्मसंन्यासो वा परामृश्यते।

**यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।।**
**न ह्यसंन्यस्तसङ्कल्पो योगी भवति कश्चन ॥ २ ॥**

**कर्मफलसङ्कल्पसंन्यासात् संन्यासित्वम् , योगाङ्गत्वेन च कर्मानुष्ठानात् कर्मफलसंकल्पस्य च चित्तविक्षेपहेतोः परित्यागाद् योगित्वं चेति गौणमुभयम् , न पुनर्मुख्यं संन्यासित्वं योगित्वं चाभिप्रेतमित्येतमर्थं दर्शयितुमाह—** यं संन्यासमिति। यं **सर्वकर्मतत्फलपरित्यागलक्षणं** [१]**परमार्थसंन्यासमिति प्राहुः श्रुतिस्मृतिविदो**[२], योगं **कर्मानुष्ठानलक्षणं** तं **परमार्थसंन्यासं** विद्धि **जानीहि , हे पाण्डव !। कर्मयोगस्य प्रवृत्तिलक्षणस्य तद्विपरीतेन निवृत्तिलक्षणेन परमार्थसंन्यासेन कीदृशं सामान्यमङ्गीकृत्य तद्भाव उच्यत इत्यपेक्षायामिदमुच्यते। अस्ति हि परमार्थसंन्यासेन सादृश्यं कर्तृद्वारकं कर्मयोगस्य। यो हि परमार्थसंन्यासी स त्यक्तसर्वकर्मसाधनतया सर्वकर्मतत्फलविषयं सङ्कल्पं प्रवृत्तिहेतुकाम-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

गौणमिति, तदुत्तरार्धयोजनया स्फुटीकर्तुमुत्तरार्धमवतारयति— **कर्मयोगस्य प्रवृत्तिलक्षणस्येत्यादिना।** कर्तृद्वारकं साम्यमस्तीत्युक्तम् , तद् विवृणोति— **यो हीति।** त्यक्तानि सर्वाणि कर्माणि साधनानि च येन स तथोक्तः, तस्य भावः तत्ता, तया

आनन्दगिरिकृतव्याख्या

**स्तुतिसिद्ध्यर्थं तदिष्टमित्यभिप्रेत्याह—** न पुनरिति। **चित्तव्याकुलत्वहेतुकामनात्यागाच्चित्तसमाधानसिद्धेर्योगित्वं कर्मिणोऽपि युक्तम् , संन्यासित्वं तु तस्य विरुद्धमिति शङ्कमानं प्रति उक्तेऽर्थे श्लोकमवतारयति—** इत्येतमिति। **परमार्थसंन्यासं प्राहुरिति सम्बन्धः**[३]। इति **इत्थं संन्यासस्य प्रामाणिकाभ्युपगतत्वादिति** इतिशब्दो **योज्यः**। योगं **फलतृष्णां परित्यज्य समाहितचेतस्तयेति शेषः। यदुक्तं संन्यासित्वं योगित्वं च गृहस्थस्य गौणमिति, तदुत्तरार्धयोजनया प्रकटयितुमुत्तरार्धमुत्थापयति—** कर्मयोगस्येति। **कर्मयोगस्य परमार्थसंन्यासेन कर्तृद्वारकं साम्यमुक्तं व्यक्तीकरोति—** यो हीति। **त्यक्तानि सर्वाणि कर्माणि साधनानि च येन स तथोक्तस्तस्य भावस्तत्ता, तया**

भाष्यार्कप्रकाशः

पुरुषस्य उभयनिष्ठत्वमपि नैव सम्भवति, 'ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिना'मिति भगवतैव साङ्ख्ययोगयोर्भिन्नपुरुषानुष्ठेयत्वस्योक्तत्वात् , स्थितिगतिवत् ज्ञानकर्मणोः परस्परं विरोधाच्च। प्रपञ्चितं चैतदधस्तात्।

तस्मान्न कर्मयोगनिष्ठस्य ज्ञानयोगनिष्ठत्वमुभयनिष्ठत्वं वा स्वप्नेऽपि सम्भवति। यद्येवमसम्भावितार्थं ब्रूयाद् भगवांस्तर्हि सोऽप्यप्रमाणभूत एव स्यात्। अहो! **रामानुजस्य** पाण्डित्यम्। येन भगवत्यप्रमाणबुद्धिरापादिता॥ १ ॥

[४]के प्राहुः? अत आह— **श्रुतिस्मृतिवादा इति।** श्रुतिस्मृतिवाक्यानीत्यर्थः। श्रुतीः स्मृतीश्च वदन्ति ये ते इति वा। श्रुतिस्मृतिविज्ञा इत्यर्थः।

ननु कर्मसंन्यासकर्मानुष्ठानयोर्मिथो विरोधात् कथं कर्मसंन्यासस्य कर्मानुष्ठानरूपयोगत्वसम्भवः? इत्याक्षिपति— **कर्मयोगस्येति।** आक्षेपं समाधत्ते— **अस्ति हीत्यादिना।** कर्मयोगस्य परमार्थसंन्यासेन कर्तृद्वारकं साम्यमस्ति हीत्यन्वयः। तदेव विवृणोति— **यो हीत्यादिना।** संन्यासिनि योगिनि च फलविषयसङ्कल्पत्यागरूपांशस्यैक्यात् कर्तृसाम्यप्रयुक्तं साम्यं संन्यासयोगयोरस्तीत्यर्थः।

तत्रेयान् विशेषः— संन्यासी कर्मविषयं तत्फलविषयं च सङ्कल्पं संन्यस्यति; योगी तु न कर्मविषयम् , किन्तु तत्फलविषयमेव, कर्मविषयसङ्कल्पस्यापि त्यागे कर्मानुष्ठानासम्भवादिति।

अयमेव सङ्कल्पः कामस्य कारणम् , स च कामः कर्मसु प्रवृत्तेर्हेतुरित्याह— **प्रवृत्तिहेतुकामकारणमिति।** सङ्कल्पस्य

१. 'परमार्थसंन्यासं संन्यासमिति' इति पा.। २. 'श्रुतिस्मृतिवादाः' इति रा.पा.। ३. तथा च द्वितीयोपपत्तिः। अन्यथा 'संन्यास इति प्राहुः' इति निपातेनाभिहितत्वात् प्रथमा स्यात्। ४. इतः प्राक् 'अत्रादौ किञ्चिद् व्याख्यानं भ्रष्टम्।' इति रा. पुस्तके मुद्रितं दृश्यते।

**कारणं संन्यस्यति। अयमपि कर्मयोगी कर्म कुर्वाण एव फलविषयं सङ्कल्पं संन्यस्यति इत्येतमर्थं [1]दर्शयन्नाह— न** हि **यस्माद्** असंन्यस्तसङ्कल्पः, असंन्यस्तः **अपरित्यक्तः फलविषयः** सङ्कल्पः **अभिसन्धिर्येन सोऽसंन्यस्तसङ्कल्पः** कश्चन **कश्चिदपि कर्मी** योगी **समाधानवान्** भवति **न सम्भवतीत्यर्थः। फलसङ्कल्पस्य चित्तविक्षेपहेतुत्वात्। तस्माद् यः कश्चन कर्मी संन्यस्तफलसङ्कल्पो भवेत्, स योगी समाधानवान् अविक्षिप्तचित्तो भवेत्। चित्तविक्षेपहेतोः फलसंकल्पस्य संन्यस्तत्वादित्यभिप्रायः। एवं परमार्थसंन्यासकर्मयोगयोः कर्तृद्वारकं संन्याससामान्यमपेक्ष्य 'यं संन्यासमिति प्राहुर्योगं तं [2]विद्धि पाण्डव' इति कर्मयोगस्य स्तुत्यर्थं संन्यासत्वमुक्तम्॥२॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

सर्वकर्मविषयं तत्फलविषयं च [संकल्पं] त्यजतीत्यर्थः॥२॥

आनन्दगिरिकृतव्याख्या

**सर्वकर्मविषयं तत्फलविषयं च सङ्कल्पं त्यजतीत्यर्थः। सङ्कल्पत्यागे तत्कार्यकामत्यागः, तत्त्यागे तज्जन्यप्रवृत्तित्यागश्च सिध्यतीत्यभिसन्धाय विशिनष्टि—** प्रवृत्तीति। **कर्मिण्यपि यथोक्तसङ्कल्पसंन्यासित्वमस्तीत्याह—** अयमपीति। **तदपरित्यागे व्याकुलचेतस्तया कर्मानुष्ठानस्यैव दुःशकत्वादित्यर्थः। उक्तमेव साम्यं व्यक्तीकुर्वन् व्यतिरेकं दर्शयति—** इत्येतमिति। **फलसङ्कल्पापरित्यागे किमिति समाधानवत्त्वाभावः? तत्राह—** फलेति। **व्यतिरेकमुखेनोक्तमर्थमन्वयमुखेनोपसंहरति—** तस्मादिति। **हिशब्दार्थस्य यस्मादित्युक्तस्य तस्मादित्यनेन सम्बन्धः। कर्मिणं प्रति यथोक्तविधौ हेतुहेतुमद्भावमभिप्रेत्य द्वितीयविधौ हेतुमाह—** चित्तविक्षेपेति। **पूर्वश्लोके पूर्वोत्तरार्धाभ्यामुक्तमनुवदति—** एवमिति॥२॥

भाष्यार्कप्रकाशः

विशेषणम्। कामकारणस्य सङ्कल्पस्यैव त्यागात् कामस्यानुदयः, ततश्च कर्मस्वप्रवृत्तिः संन्यासिन इति भावः।

न च योगिनोऽपि सङ्कल्पत्यागात् कामानुदये कथं कर्मसु प्रवृत्तिरिति वाच्यम्; फलविषयसङ्कल्पत्यागात् फलकामानुदयेऽपि योगिनः कर्मविषयसङ्कल्पत्यागाभावात् कर्मकामोदयेन कर्मसु प्रवृत्तिसिद्धेः। न च फलसङ्कल्पाभावे योगिनः कुतः कर्मसङ्कल्प इति वाच्यम्; ईश्वरप्रीतिरूपे चित्तशुद्धिरूपे पापक्षयरूपे वा नित्यकर्मफले योगिनः कामसत्त्वात्, तस्य चेश्वरप्रीत्यादिरूपस्य फलस्य पुण्यपापान्यतरत्वाभावेन देवतिर्यगादिजन्मद्वारा अबन्धकत्वेन फलत्वाभावात्। न चैवं मोक्षस्यापि फलत्वाभाव इति वाच्यम्; तस्येष्टत्वात्। न हि वयं नित्यसिद्धं सच्चिदानन्दब्रह्मरूपं मोक्षं फलं ब्रूमः। यज्जन्यं यच्च बन्धकं तदेव हि फलम्। अत एव नित्यकर्मणः फलाभाववचनमप्युपपद्यते।

**यद्वा** यस्य कस्यापि फलस्य सङ्कल्पो मास्तु योगिनः, तथापि स कर्म करोत्येव, गृहस्थेनाधिकृतेन कर्म कर्तव्यमित्येवंरूपेश्वराज्ञातिक्रमे नरकभयात्। अत एव प्रत्यवायपरिहारार्थानि नित्यकर्माणीति कर्मिणां राद्धान्तः। न च - प्रत्यवायपरिहार एव फलमित्यस्ति तत्सङ्कल्पात् फलसङ्कल्पो योगिन इति - वाच्यम्; प्रत्यवायाभावस्य भावरूपफलत्वायोगात्। फलं हि स्वर्गादिकं पुत्रादिकं भावरूपमेवेष्यते। न च रोगाभावस्यारोग्यस्य फलत्वमस्तीति वाच्यम्; अरोगस्य भाव आरोग्यं दृढगात्रत्वादिकम्, तद्धि भाव एवेति। अथवा ईश्वराज्ञारूपत्वान्मया कर्माणि कर्तव्यानि गृहस्थेनेत्येतावत्येव बुद्धिर्योगिनः, तावतैव कर्मानुष्ठानसम्भवात्। अतो न यस्य कस्यापि फलस्य सङ्कल्पप्रसक्तिरिति।

**न हीति।** हि असंन्यस्तसङ्कल्पः कश्चन योगी न भवति। तस्मात् कर्मयोगिनः फलसङ्कल्पसंन्यासरूपसंन्यासवत्त्वेन संन्यासित्वं सिद्धमिति भावः। एतेनैकस्मिन्नेव कर्मणि चित्तविक्षेपहेतुफलसङ्कल्पत्यागाद् योगित्वं संन्यासित्वं चेत्युभयं सम्भवति लक्षणयेति सिद्धम्।

१. 'दर्शयिष्यन्' इति पा.। २. योगं तं विद्धि। तच्छब्देन परमार्थसंन्यासो गृह्यते। निष्कामकर्मानुष्ठानलक्षणे कर्मयोगे तदभेदासंभवात् गौणोऽयं प्रयोगः स्तुत्यर्थः। स्तुतिश्च वक्ष्यमाणध्यानयोगोपायतया कर्मयोगे प्रवृत्तिसंपादकतयोपयुज्यते।

## आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।
## योगारूढस्य तस्यैव शमः कारणमुच्यते॥ ३॥

**ध्यानयोगस्य फलनिरपेक्षः कर्मयोगो बहिरङ्गं साधनमिति तं संन्यासत्वेन स्तुत्वा, अधुना कर्मयोगस्य**

आनन्दगिरिकृतव्याख्या

**परमार्थसंन्यासस्य कर्मयोगान्तर्भावे कर्मयोगस्यैव सदा कर्तव्यत्वमापद्येत, तेनेतरस्यापि कृतत्वसिद्धेरित्याशङ्क्योक्तानुवादपूर्वक-मुत्तरश्लोकतात्पर्यमाह—** ध्यानयोगस्येति। **भाविन्या वृत्त्या मुनेः योगमारोढुमिच्छोः इष्यमाणस्य योगारोहणस्य कर्म हेतुश्चेद् , अपेक्षितं योगमारूढस्यापि तत्फलप्राप्तौ तदेव कारणं भविष्यति, तस्य कारणत्वे क्लृप्तशक्तित्वादित्याशङ्क्याह—** [१]योगारूढस्येति। **अनारूढस्ये-**

भाष्यार्कप्रकाशः

संन्यस्तसङ्कल्पस्य संन्यासित्वं तावत् प्रसिद्धम् ; अत्र च श्लोके असंन्यस्तसङ्कल्पस्यायोगित्वकथनेन संन्यस्तसङ्कल्पस्यैव योगित्वं प्रतिपादितम्। ततश्च संन्यासिनो योगिनश्च संन्यस्तसङ्कल्पत्वं समानधर्म इति सिद्धम्। एवं संन्यासियोगिनोः साम्यात् तद्द्वारा संन्यासयोगयोः साम्यमिति निष्कर्षः।

**वस्तुतस्तु** सर्वकर्मतत्फलविषयसङ्कल्पसंन्यासाद् यथा सर्वकर्मसंन्याससिद्धिः संन्यासिनः, तथा सर्वकर्मफलविषयसङ्कल्प-संन्यासाद् योगसिद्धिर्योगिन इति संन्यासयोगयोः कारणद्वारा किमपि साम्यमस्त्येव। संकल्पसंन्यासप्रयुक्तत्वात् संन्यासयोगयोः, यथा मृज्जन्यत्वाद् घटशरावयोः साम्यम् , तद्वत्।

यत्तु **रामानुजः—** संन्यासं ज्ञानयोगं योगं कर्मयोगं विद्धि , कर्मयोगान्तर्गतत्वादात्मयाथात्म्यज्ञानस्य। अनात्मन्यात्म-तादात्म्याभिमानः सङ्कल्पस्तदपरित्यागी कर्मयोगी न भवत्येवेति, **तत्तुच्छम् ;** योगान्तर्गतस्य ज्ञानस्य योगशब्दवाच्यत्वं तावद्विरुद्धम् ; पेटिकान्तर्गतस्य वस्त्रस्यापि पेटिकाशब्दवाच्यत्वापत्तेः। लक्षणाश्रयणं तु दुष्टम् , मुख्यार्थपरित्यागे कारणाभावात्। नापि कर्मयोगे ज्ञानयोगस्यान्तर्भावः, कर्मयोगोपेयत्वाज्ज्ञानयोगस्य। नाप्यात्मान्ये[२] आत्माभिमानस्य सङ्कल्पत्वम् , किं तर्ह्यध्यासत्वमेव। तस्य परित्यागे कर्मयोगस्य स्वरूपासिद्धिरेव, अकर्तृत्वादात्मनः, अनात्मनां च जडत्वात्। न हि जडस्य घटादेः कर्तृत्वं दृष्टं लोके श्रुतं वा ।

**किञ्च** अहं कर्म कुर्यामिति सङ्कल्पमूलकत्वं कर्मणः सर्वसम्प्रतिपन्नम्। स चाहङ्कारेऽनात्मन्यात्माभिमानप्रयुक्तः, अहङ्कारस्यैव कर्तृत्वात् , आत्मनश्चाकर्तृत्वात्। तस्याप्यभिमानस्य परित्यागे कथं कर्मयोगसिद्धिः? अतो न कर्मयोगिनोऽध्यासनिवृत्तिरावश्यकी, किं तर्हि? देहातिरिक्तः कश्चिन्नित्य आत्माऽस्तीत्येतावत्येव बुद्धिस्तस्यावश्यकी।

न च - अनात्मनां जडत्वादात्मनश्चाकर्तृत्वे विधिशास्त्रवैयर्थ्यात् , 'कर्ता शास्त्रार्थवत्त्वा'दित्यधिकरणानुसाराच्च कर्तैवात्मेति - वाच्यम् ; शास्त्राणामविद्यावद्विषयत्वात् देहाद्यनात्मसङ्घाते आत्माभिमानिनः कर्तुः सत्त्वान्न शास्त्रवैयर्थ्यम् , नाप्यधिकरणविरोधः। 'निष्कलं निष्क्रियं शान्त'मित्यादिश्रुतिविरोधादात्मा त्वकर्तैव। अन्यथा कर्तृत्वे सति भोक्तृत्वं स्यात् तदुभयसत्त्वे विकारित्वं स्यात् , तस्यापि सत्त्वेऽनित्यत्वं स्यात् – 'अजो नित्यः शाश्वतः' इति 'अविकार्योऽयमुच्यते' इति गीताशास्त्रोक्तार्थ एवाप्रमाणः कल्पितः स्यात्। तस्मान्नास्त्यात्मनः कर्तृत्वमिति सिद्धान्तः।

य एवमात्मानमकर्तारं वेत्ति कथं तस्य कर्म कुर्यामिति सङ्कल्पः, येन कर्मयोगप्रवृत्तिः। तस्मादज्ञ एव कर्मयोगी। ज्ञानार्थं हि स कर्मयोगे प्रवृत्तः। यदि प्रागेव ज्ञानी, तर्हि कुतस्तस्य कर्मयोगप्रवृत्तिः? कस्मान्न [कस्माच्च] कर्मयोगे ज्ञानस्यान्तर्भावः? उक्तमपीदं पुनःपुनर्मया वर्ण्यते प्रतिपत्तृप्रतिपत्तिदार्ढ्याय॥ २॥

वृत्तं कीर्तयन् आरुरुक्षोरिति श्लोकमवतारयति— **ध्यानयोगस्येति। आरुरुक्षोरिति।** योगमारुरुक्षोरित्यन्वयः। योगोऽत्र ध्यानयोगः, न तु कर्मयोगः, कर्मयोगमारुरुक्षोः कर्म कारणमिति वक्तुमयुक्तत्वात् , कर्मयोगारोहणस्यैव कर्मकरणरूपत्वात्। अयं हि

---

१. श्लोकस्थप्रतीकधारणमिदम्। २. 'आत्मान्यदेहादौ' इति पाठः स्यात्।

**ध्यानयोगसाधनत्वं दर्शयति—** आरुरुक्षोरिति। आरुरुक्षोः **आरोढुमिच्छतः अनारूढस्य ध्यानयोगेऽवस्थातुम्** [1]**अशक्तस्यैवेत्यर्थः।** [2]**कस्यारुरुक्षोः?** मुनेः **कर्मफलसंन्यासिन इत्यर्थः। किमारुरुक्षोः? योगम् ; कर्म** कारणं **साधन-मुच्यते। योगारूढस्य पुनस्तस्यैव** शमः **उपशमः सर्वकर्मभ्यो निवृत्तिः** कारणं **योगारूढत्वस्य साधनमुच्यत इत्यर्थः। यावद्यावत् कर्मभ्यः उपरमते**[3]**, तावत्तावत् निरायासस्य जितेन्द्रियस्य चित्तं समाधीयते। तथा सति स झटिति योगारूढो भवति। तथा चोक्तं व्यासेन— 'नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च। शीलं**

आनन्दगिरिकृतव्याख्या

**त्येतस्यैवार्थं स्फुटयति—** ध्यानेति। **मुनित्वं कर्मफलसंन्यासिन्यौपचारिकमित्याह—** कर्मफलेति। साधनं **चित्तशुद्धिद्वारा ध्यानयोग-प्राप्तीच्छायामिति शेषः।** तस्येति **प्रकृतस्य कर्मिणो ग्रहणम्। एवकारो भिन्नक्रमः शमशब्देन सम्बध्यते**[4]**। कस्यान्ययोगव्यवच्छेदेन शमो हेतुरिति, तत्राह—** योगारूढत्वस्येति। **सर्वव्यापारोपरमरूपोपशमस्य योगारूढत्वे कारणत्वं विवृणोति—** यावद्यावदिति। **सर्वकर्म-निवृत्तावायासाभावाद् वशीकृतेन्द्रियग्रामस्य चित्तसमाधाने योगारूढत्वं सिध्यतीत्यर्थः। सर्वकर्मोपरमस्य पुरुषार्थसाधनत्वे पौराणिकीं सम्मतिमाह—** तथा चेति। एकता **सर्वेषु भूतेषु वस्तुनो द्वैताभावोपलक्षितत्वमिति प्रतिपत्तिः।** समता **तेष्वेवौपाधिकविशेषेऽपि स्वतो**

भाष्यार्कप्रकाशः

ध्यानयोगमारोढुं केवलमिच्छति, न तु ध्यानयोगमारुह्य स्थातुं क्षमते; अत एवारुरुक्षुरित्युच्यते इत्यभिप्रेत्याह— **अनारूढस्येत्यादि**। ध्यानयोगस्य मनइन्द्रियजयप्रयुक्तत्वात् तज्जयस्य च दुष्करत्वादुक्तम्— **असमर्थस्येति**। दृष्टस्मृतसर्वविषयेभ्यो व्यावर्त्य केवलात्मनि मनः स्थापयितुमसमर्थस्येत्यर्थः। ननु संन्यासवाचिनो मुनिशब्दस्य कथमिह प्रयोगः? अत आह— **कर्मफलसंन्यासिन इति**। योगिनोऽपि कर्मफलसंन्यासित्वेन गौण्या वृत्त्या संन्यासित्वान्मुनिशब्दबोध्यत्वमस्तीति भावः। भविष्यत्संन्यासित्वाद् भाविनीं वृत्तिमाश्रित्य ओदनं पचतीतिवद् मुनिरिति निर्देश इति वा। कर्मकारकदेवतास्वरूपादिमननशीलत्वान्मुनिरिति वा वक्तुं शक्यते। प्रपञ्चस्य ब्रह्मेव, पुत्रस्य पितेव वा, मुनेः कर्म कारणमिति भ्रमव्युदासायाह— **साधनमिति**। कर्मरूपसाधनेन मुनिर्योगमारोढुं प्रभवति निःश्रेणिकया प्रासादं पुरुष इवेति भावः। एतेन ध्यानयोगारोहणसाधनत्वं कर्मणः सिद्धम्। **तस्यैवेति**। य एवं कर्मानुष्ठानद्वारा योगमारूढस्तस्यैवेत्यर्थः। **शमः** संन्यास इति यावत्। ननु कर्म योगस्य साधनमित्युक्तम् , शमः पुनः कस्य कारणम्? अत आह— **योगारूढत्वस्येति**। कर्मयोगो ध्यानारोहणसामर्थ्यमात्रं जनयति पुरुषस्य, ध्यानयोगारोहणं तु शमसाध्यमेवेत्यर्थः।

**यद्वा** निःश्रेणिकया पुरुषः प्रासादमिव कर्मणा मुनिर्ध्यानयोगमारोहति केवलम्। आरुह्य तत्र चिरं स्थातुं तु मुनेः शम एव साधनम् , यथा प्रासादमारुह्य चिरं स्थातुमासनादिकं साधनं पुरुषस्य। **एतेन** योगे यश्चिरमवस्थितः स एव योगारूढः, न तु योगारोहणमात्रेणेति **सिद्धम्**। एतदनुसारेण **योगारूढत्वस्येत्य**स्य योगमारुह्य चिरमवस्थानस्येत्यर्थो वाच्यः। पूर्वस्मिन् मते तु यथाश्रुत एवार्थः।

ननु कथमुपरमस्य योगारूढत्वसाधनत्वम्? अत आह— **यावद्यावदिति**। **तथा सतीति** चित्तसमाधाने सतीत्यर्थः।

**अयमाशयः**— कर्मिणः फलसङ्कल्पत्यागेन चित्तविक्षेपाभावेऽपि कर्मकारकसामग्रीसम्पादनायासादिना मनइन्द्रियजयस्तस्य दुष्करः, ततस्तस्य चित्तसमाधानं दुर्लभमिति न कर्मी कथमपि योगारूढो भवितुमर्हति, किन्तु संन्यासिन एवायासाभावाद् इन्द्रियजयश्चित्तसमाधानं चेति संन्यास्येव योगारूढो भवितुमर्हति। अतः संन्यासिन एव ध्यानयोगेऽधिकारः, कर्मिणस्तु ध्यानयोगारोहणसामर्थ्याय कर्मयोग एवाधिकार इति।

स्वोक्तार्थे प्रमाणमाह— **नैतादृशमिति**। **ब्राह्मणस्य** संन्यासिन इत्यर्थः। तस्यैव वक्ष्यमाणगुणयोगसम्भवात् ; **एतादृशं** वक्ष्यमाणवित्ततुल्यमित्यर्थः। वित्तं नास्ति। किं तद् वित्तम्? अत आह— **यथेति**। **एकता** सर्वत्रात्मैकत्वबुद्धिः, **समता** सर्वत्रात्म-

१. 'असमर्थस्य' इति रा. पा.। २. 'तस्यारुरुक्षोः'इति, 'कस्य? तस्यारुरुक्षोः' इति च पा.। ३. द्र. टिप्पणी पृ. १०४। ४. तस्य शम एव योगारूढत्वस्य कारणमिति योजनेत्यर्थः।

## यदा हि [१]नेन्द्रियार्थेषु न कर्मस्वनुषज्जते।
## सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते॥ ४॥

**स्थितिर्दण्डनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः' (म.भा.१२.१७५.३७) इति ॥ ३॥**

**अथेदानीं कदा योगारूढो भवतीत्युच्यते—** यदेति। **यदा समाधीयमानचित्तो योगी** [२]**हि** इन्द्रियार्थेषु **इन्द्रियाणामर्थाः शब्दादयस्तेषु** इन्द्रियार्थेषु **,** कर्मसु **च नित्यनैमित्तिककाम्यप्रतिषिद्धेषु प्रयोजनाभावबुद्ध्या** नानुषज्जते **अनुषङ्गं कर्तव्यताबुद्धिं न करोतीत्यर्थः।** सर्वसङ्कल्पसंन्यासी **सर्वान् सङ्कल्पान् इहामुत्रार्थकामहेतून् संन्यसितुं**

आनन्दगिरिकृतव्याख्या

**निर्विशेषत्वधीः।** सत्यता **तेषामेव हितवचनम्।** शीलं **स्वभावसम्पत्तिः।** स्थितिः **स्थैर्यम्।** दण्डनिधानम् **अहिंसनम्।** आर्जवम् **अवक्रत्वम्। क्रियाभ्यः सर्वाभ्यः सकाशादुपरतिश्चेत्येतदुक्तं सर्वं** यथा **यादृशम् , एतादृशं नान्यद् ब्राह्मणस्य** वित्तं **पुमर्थसाधनमस्ति। तस्मादेतदेवास्य निरतिशयं पुरुषार्थसाधनमित्यर्थः॥ ३॥**

**योगप्राप्तौ कारणकथनानन्तरं तत्प्राप्तिकालं दर्शयितुं श्लोकान्तरमवतारयति—** अथेति। **समाधानावस्था** यदेच्युच्यते। **अत एवोक्तम्—** समाधीयमानचित्तो योगीति। **शब्दादिषु कर्मसु चानुषङ्गस्य योगारोहणप्रतिबन्धकत्वात् तदभावस्य तदुपायत्वं प्रसिद्धमिति द्योतयितुं** हीत्यु**क्तम्। सर्वेषामपि सङ्कल्पानां योगारोहणप्रतिबन्धकत्वमभिप्रेत्य सर्वसङ्कल्पसंन्यासीत्यत्र विवक्षितमर्थमाह—** सर्वानिति।

भाष्यार्कप्रकाशः

समत्वबुद्धिः, **सत्यता** ब्रह्मात्मैकसत्यत्वबुद्धिः, **शीलं** सत्स्वभावः, **स्थिति**र्ब्रह्मनिष्ठा, दण्डनिधानं मनोवाक्कायानां दण्डकरणम्। तेषां दण्डो नाम नियमनम् ; स्वायत्तीकरणमिति यावत्। **आर्जवं** सर्वत्र ऋजुबुद्धिः, **ततस्ततः** ताभ्यस्ताभ्यः **क्रियाभ्यः** सर्वकर्मभ्य इत्यर्थः। **उपरमः** निवृत्तिश्च इत्येतत् सर्वं ब्राह्मणस्य वित्तम् , न तु कनकादिकम्। तद्धि अनात्मज्ञस्य वित्तम्। तस्य च लौकिकवित्तस्य वैदिकवित्तस्य चास्ति महदन्तरं यत् तेन तस्य संसारः, अनेन त्वस्य संसारनाश इति। अत उक्तम् - नैतादृशं वित्तमस्तीति। तस्मादुपरतिरेव योगारूढत्वं सम्पादयतीत्यनवद्यम्।

**योगो**ऽत्र वैराग्यम् ; तथा च यावद्वैराग्योदयं कर्म कार्यम् , विरक्तस्य तु संन्यास एव ज्ञानपरिपाकसाधनमिति **मधुसूदनः।** योगो ज्ञानयोगः, शमः समाधिरिति तु **श्रीधरः।**

यत्तु **रामानुजः**— यावदात्मावलोकनरूपमोक्षावाप्ति कर्म कार्यमित्यर्थः इति, यच्च **वेदान्तदेशिकः—** शमः कर्मनिवृत्तिरेव, न तु पारिव्राज्यमिति, तदुभयं **तुच्छम्** , परमते आत्मावलोकनस्यामोक्षत्वात् , कर्मणा आत्मावलोकनासम्भवात् , आत्मावलोकनस्य वेदान्तविचारसाध्यत्वाद् अथवा समाधिसाध्यत्वात्। शमः कर्मनिवृत्तिर्न तु पारिव्राज्यमित्येतदयुक्तम् , गृहस्थस्य कर्मिणः कर्मनिवृत्त्यसम्भवात् संन्यासिनः कर्मासम्भवाच्च कुतः कर्मनिवृत्तेरपारिव्राज्यम्। न च गृहस्थस्यापि ध्यानयोगारूढस्य कर्मनिवृत्तिरिति वाच्यम् ; गृहस्थस्य ध्यानयोगारूढत्वस्यैवासम्भवात्। तस्मात् कर्मसंन्यासं विना कर्मनिवृत्तिर्न सम्भवतीति शमः पारिव्राज्यमेव॥ ३॥

**यदेति। हि यस्मादिति।** यस्मात् कर्मसु विषयेषु चानुषङ्गाभावात् सर्वसङ्कल्पसंन्यासाच्च योगारूढो भवति पुरुषस्तस्माद् योगारूढत्वस्य शमः कारणमित्यर्थः। इन्द्रियाणामिति ग्राह्यग्राहकभावसम्बन्धे शेषे षष्ठी। इन्द्रियग्राह्येष्वर्थेष्वित्यर्थः। **अर्थाः** शब्दादयो विषयाः- अर्थ्यन्ते प्रार्थ्यन्ते संसारिभिरिति अर्थाः। 'यदा हि चे'त्यत्रत्यस्य चकारस्य कर्मस्वित्यनेनान्वय इत्याह— **कर्मसु चेति।** चतुर्विधानि कर्माणि— तत्र नित्यानि अग्निहोत्रादीनि, नैमित्तिकानि दर्शादीनि, काम्यानि कारीरीष्ट्यादीनि, प्रतिषिद्धानि हिंसादीनि। एतेषु कुतो नानुषज्जते? इत्यत आह— **प्रयोजनाभावबुद्ध्येति।** विषयभोगसुखस्य कर्मफलस्य अल्पत्वास्थिरत्वसातिशयत्वदुःखो-

१. 'यदा हि चेन्द्रियार्थेषु' इति रा. पा.। यथाश्रुते— इन्द्रियार्थेषु नानुषज्जते, कर्मसु च नानुषज्जते इति योजना। २. 'हि यस्मात्' इति रा. पा.।

**शीलमस्येति स सर्वसङ्कल्पसंन्यासी,** योगारूढः **प्राप्तयोग इत्येतत् ,** तदा **तस्मिन् काले उच्यते।**

**सर्वसङ्कल्पसंन्यासी इति वचनात् सर्वांश्च कामान् सर्वाणि च कर्माणि [१]संन्यस्येदित्यर्थः। सङ्कल्पमूला हि सर्वे कामाः— 'सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः'(मनु.२.३), 'काम जानामि ते मूलं सङ्कल्पात् त्वं हि जायसे। न त्वां सङ्कल्पयिष्यामि तेन मे न भविष्यसि'(म.भा.१२.१७७.२५) इत्यादिस्मृतेः। सर्वकामपरित्यागे च सर्वकर्मसंन्यासः सिद्धो भवति, 'स यथाकामो भवति तत्क्रतुर्भवति, यत्क्रतुर्भवति तत् कर्म कुरुते' (बृ.उ.४.४.५) इत्यादिश्रुतिभ्यः, 'यद्यद्धि कुरुते [२]कर्म तत्तत् कामस्य चेष्टितम्' (मनु.२.४) इत्यादिस्मृतिभ्यश्च। न्यायाच्च। न हि**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ननु सर्वसङ्कल्पाभावे भवतु कामाभावः। कथमेतावता सर्वकर्माभाव इत्याशङ्क्याह— **सर्वकामपरित्यागे चेति।** कर्मणां कामकार्यत्वादित्यर्थः। अत्र प्रमाणमाह— **स यथेति।** स पुरुषः यत्फलकामो भवति तत्साधनमनुष्ठेयतया बुद्धौ ध्यायतीति तत्क्रतुर्भवतीत्युच्यते। यच्चानुष्ठेयतया गृह्णाति, तदेव कर्म बहिरपि कुरुत इत्यर्थः॥४॥

आनन्दगिरिकृतव्याख्या

**सर्वसङ्कल्पसंन्यासेऽपि सर्वेषां कामानां कर्मणां च प्रतिबन्धकत्वसम्भवे कुतो योगप्राप्तिरित्याशङ्क्याह—** सर्वेति। **सर्वसङ्कल्पपरित्यागे यथोक्तविध्यनुष्ठानमयत्नसिद्धमिति मन्वानः सन्नाह—** सङ्कल्पेति। **मूलोन्मूलने च तत्कार्यनिवृत्तिरयत्न[३]लभ्येति भावः। तत्र प्रमाणमाह—** सङ्कल्पमूल इति। **तत्रान्वयव्यतिरेकावभिप्रेत्योक्तमुपपादयति—** कामेति। **सर्वसङ्कल्पाभावे कामाभाववत् कर्माभावस्य सिद्धत्वेऽपि कर्मणां कामकार्यत्वात् तन्निवृत्तिप्रयुक्तामपि निवृत्तिमुपन्यस्यति—** सर्वकामेति। **यदुक्तं कर्मणां कामकार्यत्वम् , तत्र श्रुतिस्मृती प्रमाणयति—** स यथेति। **स पुरुषः स्वरूपमजानन् यत्फलकामो भवति, तत्साधनमनुष्ठेयतया बुद्धौ धारयतीति तत्क्रतुर्भवति, यच्चानुष्ठेयतया गृह्णाति, तदेव कर्म बहिरपि करोतीति कामाधीनं कर्मोक्तमिति श्रुत्यर्थः। कामजन्यं कर्मेत्यन्वयव्यतिरेकसिद्धमिति द्योतयितुं स्मृतौ** हिशब्दः। **न्यायमेव दर्शयति—** न हि सर्वसङ्कल्पेति। **स्वापादावदर्शनादित्यर्थः। नित्यनैमित्तिककर्मानुष्ठानं**

भाष्यार्कप्रकाशः

दर्कत्वाद्यनुसन्धानेन तस्याप्रयोजनत्वान्नास्ति विषयजन्यं कर्मसाध्यं वा किञ्चिदपि प्रयोजनं विवेकिन इति भावः। ननु कर्मणां घटादिवत् स्वरूपाभावात् कथं तत्सङ्गः पुरुषस्य, येन तन्निवारणं सार्थकं स्याद्? अत आह— **कर्तव्यताबुद्धिमिति।** कर्माणि मया कर्तव्यानि इत्याकारकबुद्धिरेव कर्मसु सङ्गः। स्वरूपवत्सु विषयेषु तु साक्षादेव सङ्ग इति बोध्यम्। यद्वा विषयेषु कर्तव्यताबुद्धिः ग्राह्यताबुद्धिः सङ्ग इति। **इहेति।** इह मनुष्यलोके अर्थाः पशुपुत्रादयः, अमुत्र परलोके अर्थाः स्वर्गादयः। तेषु इहामुत्रार्थेषु कामास्तृष्णाः, तेषां हेतवः कारणानि, तान् । कामस्य सङ्कल्पप्रभवत्वात् कामहेतुत्वं सङ्कल्पस्येति भावः। **शीलं** स्वभावः, ताच्छील्ये णिनिः। **संन्यासीति।** योगमारूढो योगारूढः, 'द्वितीये'ति [४]योगविभागात् समासः। यावदर्थमाह— **प्राप्तयोग इति।** यो विषयकर्मसङ्गरहितः सर्वसङ्कल्पसंन्यासी च तेन ध्यानयोगः सम्यक् प्राप्त इत्यर्थः। **उच्यते** विद्वद्भिरिति शेषः, शास्त्रैरिति वा।

नन्वत्र सङ्कल्पसंन्यास एवोक्तः, न तु कामसंन्यास इत्यत आह— **सर्वेत्यादि।** कारणस्य सङ्कल्पस्यैव त्यागे कुतः कार्यस्य कामस्य सत्त्वमिति भावः। **सङ्कल्पमूला इति।** सङ्कल्पो मूलः कारणं येषां ते सङ्कल्पमूलाः। हिशब्दः प्रसिद्धिं द्योतयति। तामेव प्रसिद्धिं दर्शयति— **सङ्कल्पमूल** इत्यादिना। एवं सङ्कल्पत्यागात् कामत्यागमुक्त्वा कामत्यागात् कर्मत्यागसिद्धिं वदति— **सर्वेति।** कथं कामपरित्यागे कर्मपरित्यागः? इत्यत्र श्रुत्यादीन् प्रमाणयति— **सः** कामी **यथाकामः** यत्पुरुषार्थकामः भवति, **तत्क्रतुः** तत्पुरुषार्थसाधनानुष्ठानदृढनिश्चयो भवति; **यत्क्रतुर्भवति** यदनुष्ठानदृढनिश्चयो भवति, तत् कर्म कुरुते। **न्यायाच्चेति।** यो यत्कामः सः तत्साधकं कर्म कुरुते, तत्तत्कामहेतुत्वात् तत्तत्कर्मणः, यथा जलकामः कूपं गच्छतीत्यनुमानादित्यर्थः। न्यायमेव व्यतिरेकमुखेन द्रढयति—**न हीति।**

१.'संन्यसेद्' इति पा.। २.'जन्तुः' इति पा.। ३.'अयत्नसुलभा' इति पा.। ४.'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः'(पा.सू.२-१-२४) इति सूत्रे इति शेषः।

**उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत्।**
**आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥ ५॥**

**सर्वसङ्कल्पसंन्यासे कश्चित् स्पन्दितुमपि शक्तः। तस्मात् सर्वसङ्कल्पसंन्यासीति वचनात् सर्वान् कामान् , सर्वाणि कर्माणि च त्याजयति भगवान्॥४॥**

**यदैवं योगारूढः, तदा तेन आत्माऽऽत्मनोद्धृतो भवति [१]संसारादनर्थजातात्। अतः—** उद्धरेदिति। **उद्धरेत् संसारसागरे निमग्नम् आत्मना आत्मानम् , [२]तत उद् ऊर्ध्वं हरेद्** उद्धरेत् **योगारूढतामापादयेदित्यर्थः। नात्मानम्**

आनन्दगिरिकृतव्याख्या

**दूरनिरस्तमिति वक्तुमपिशब्दः। श्रुतिस्मृतिन्यायसिद्धमर्थमुपसंहरति—** तस्मादिति॥४॥

**योगारूढस्य किं स्यादित्याशङ्क्याह—** यदैवमिति। **योगारोहस्य दृष्टादृष्टोपायैरवश्यकर्तव्यतायै मुक्तिहेतुत्वं, तद्विपर्ययस्याधःपतनहेतुत्वं च दर्शयति—** अत इति। **तत्र हेतुमाह—** आत्मैव हीति। **उद्धरणापेक्षामात्मनः सूचयति—** संसारेति। **संसारादूर्ध्वं हरणं कीदृगित्याशङ्क्याह—** योगारूढतामिति। **योगप्राप्तावनास्था तु न कर्तव्येत्याह—** नात्मानमिति। **योगप्राप्त्युपायश्चेन्नानुष्ठीयते, तदा योगाभावे संसारपरिहारासम्भवादात्मा अधो नीतः स्यादित्यर्थः। नन्वात्मानं संसारे निमग्नं तदीयो बन्धुः तस्मादुद्धरिष्यति, नेत्याह—**

भाष्यार्कप्रकाशः

**स्पन्दितुं** चलितुमपि। चलनसङ्कल्पाभावे चलनाभावादिति भावः। **यद्वा** चलनसङ्कल्पाभावे चलनकामाभावाच्चलनकामाभावे चलनाभावाच्चेति भावः। सङ्कल्पाभावे कर्माभाव इति व्यतिरेकव्याप्तिरनेन दर्शिता। सङ्कल्पसत्त्वे कर्मसत्त्वमित्यन्वयव्याप्तिस्तु श्रुत्यादिभिर्दर्शिता। अन्वयव्यतिरेकयोर्न्यायत्वं च शास्त्रप्रसिद्धम्। तथा च 'न्यायाच्चे'त्यस्य अन्वयव्यतिरेकरूपन्यायादित्यप्यर्थो वाच्यः। अनुमानमप्येतन्न्यायाधीनसत्ताकमेव, व्याप्तिज्ञानस्यैव तत्रापि कारणत्वात् ; [३]वह्निसत्त्वे धूमसत्त्वं, वह्न्यभावे धूमाभावः इत्यन्वयव्यतिरेकवशादेव हि पर्वते वह्निरनुमातुं शक्यते धूमवत्त्वलिङ्गेन इति।

**तस्मादिति।** सङ्कल्पसंन्यासे कामसंन्यासपूर्वककर्मसंन्याससिद्धेरित्यर्थः। **त्याजयतीति।** योगानुष्ठात्रेति शेषः। अतः सर्वकर्मसंन्यास्येव योगारूढः, न तु गृहस्थ इति नास्ति गृहस्थस्य योगाधिकार इति भावः।

यत्तु विषयाननुषङ्गाभ्यासरूपः कर्मयोग इति **रामानुजः, तत्तुच्छम्** ; कर्मानुष्ठानविषयाननुषङ्गयोर्मिथो विरुद्धत्वात् , इन्द्रियाणां हविरादिविषयानुषङ्गाभावे यज्ञादिकर्मानिष्पत्तेः॥४॥

**उद्धरेदिति।** आत्मा स्वयमात्मना स्वेन संसारानर्थव्रातादुद्धृतो भवति। यद्यप्यात्मनो निमज्जनमुद्धरणं चेति द्वयमसम्भवि, तथापि साभासबुद्धेः, बुद्धिप्रतिफलितचिदाभासस्य वा जीवस्य प्रमातुः कूटस्थात्मस्वरूपापरिज्ञानमूलकं यदासीत् संसारसागरे निमज्जनं तदिदानीं कूटस्थात्मस्वरूपज्ञानाद् विनश्यतीत्यभिप्रेत्येदमुक्तम्। अस्ति हि यावदात्मसाक्षात्कारं बन्धमुक्त्यादिः सर्वोऽपि व्यवहारः अविद्यावस्थायाम्। यथा जले चलति सति तत्प्रतिफलितः सूर्यबिम्बश्चलन्निव लक्ष्यते, तथा बुद्धौ संसरन्त्यां तत्प्रतिफलितश्चिदाभासः संसरन्निव दृश्यतेऽज्ञानात् , 'ध्यायतीव लेलायतीव' इति श्रुतेः। तस्यां च बुद्ध्यां योगेन स्थिरीकृतायां सत्याम् , असंसार्यात्मस्वरूपसाक्षात्कारो जायते, यथा जले निश्चले सति निश्चलसूर्यप्रतिबिम्बसाक्षात्कारः। यत एवं ततो योगेन बुद्धिं स्थिरीकुर्यात् पुरुषः। ततश्चात्मा संसारव्रातादुद्धृतो भवतीत्यर्थः।

**उद्धरेदिति।** अनिमग्नस्योद्धरणासम्भवादाह— **संसारसागरे निमग्न[म्] इति।** संसारसागरनिमग्नबुद्धितादात्म्याध्यासात् स्वयमप्यात्मा तत्र निमग्न इव स्थितः, न तु वस्तुतो निमग्न इति भावः। **आत्मानं** स्वं **स्वतः** स्वेन, सार्वविभक्तिकः तसिः।

१. 'संसारानर्थव्रातात्' इति पा.। २. 'स्वतः' इति रा. पा.। ३. वह्निसत्त्वे एव धूमसत्त्वम् इति एवकारः योजनीयः।

अवसादयेत् **नाधो नयेत् , नाधो गमयेत्। आत्मैव** हि **यस्मादात्मनो बन्धुः। न ह्यन्यः कश्चिद् बन्धुः संसारमुक्तये भवति। बन्धुरपि तावन्मोक्षं प्रति प्रतिकूल एव, स्नेहादिबन्धनायतनत्वात्। तस्माद् युक्तमवधारणम् - आत्मैव ह्यात्मनो बन्धुरिति। आत्मैव** रिपुः **शत्रुः। योऽन्योऽपकारी बाह्यः शत्रुः सोऽप्यात्मप्रयुक्त एवेति युक्तमेवावधारणम् - आत्मैव रिपुरात्मनः - इति॥५॥**

आनन्दगिरिकृतव्याख्या

आत्मैव हीति। **कुतोऽवधारणम् , अन्यस्यापि प्रसिद्धस्य बन्धोः सम्भवात् , तत्राह—** न हीति। **अन्यो बन्धुः सन्नपि संसारमुक्तये न भवतीत्येतदुपपादयति—** बन्धुरपीति। स्नेहादीत्या**दिशब्दात् तदनुगुणप्रवृत्तिविषयत्वं गृह्यते। आत्मातिरिक्तस्यापि शत्रोरपकारिणः सुप्रसिद्धत्वाद् अवधारणमनुचितमित्याशङ्क्याह—** योऽन्य इति॥५॥

भाष्यार्कप्रकाशः

उदित्युपसर्गस्याव्ययस्य ऊर्ध्वार्थकत्वादाह— **ऊर्ध्वं हरेदिति।** नेदमूर्ध्वनयनं स्वर्गाद्यूर्ध्वलोकगमनम् , तस्यापि संसारमण्डलान्तः-पातित्वात्। नापि सत्यलोकगमनम् , तस्यापि मायिकत्वादित्यभिप्रेत्याह— **योगारूढतामापादतेदिति।** प्रमातुरात्मन आत्मस्वरूपा-वलोकननिष्ठत्वापादनमेवोर्ध्वनयनम्। तत एव संसारसागरोद्धरणरूपोर्ध्वगमनसम्भवादिति भावः। **अवसादयेत्** खेदयेत् , नाशयेदिति वा। तच्चाधोनयनरूपमेवेत्याह— **अधो नयेदिति।** संसारसागरे न पातयेदित्यर्थः। आत्मावलोकनाभावे संसारसागरपातादिति भावः।

ननु कूपे पतितं तत उद्धन्तुमशक्तं यथोपरिस्थो रज्ज्वादिसाधनैरुद्धरति, तद्वत् संसारसागरे निमग्नं पुरुषमुद्धरेदेव कश्चिदन्यो गुर्वादिरीश्वरादिर्वा इत्यत आह— **आत्मैवेति।** महावाक्योपदेशमात्रमेव गुरुः करोति; चित्तशुद्धिरूपमनुग्रहमेवेश्वरः करोति; पुरुषस्तु वाक्यार्थमननं निदिध्यासनं च स्वयमेव कुर्यात्। एवं विचारेणात्मसाक्षात्कारानुदये गुरूक्तविधया प्राणायामादिरूपं योगं स्वय-मेवाभ्यसेत् ; विषयेभ्य इन्द्रियाणि मनश्च स्वयमेव निवर्तयेत् ; कूटस्थमात्मानं च स्वयमेव साक्षात्कुर्यात् , न त्वन्यपुरुषसहायसाध्यं किमप्यस्ति। यथा सुषुप्तिः स्वैकसाध्या तथा समाधिरपि स्वैकसाध्य एव। यत एवम् , तत आत्मैवात्मनो बन्धुरित्युच्यते, मुक्ति-प्रदत्वात्। यथा बन्धुः पुरुषस्य भोजनादिसत्कारदानेन सुखप्रदस्तद्वदिति भावः। आत्मा आत्मनो बन्धुरित्यनुक्त्वा आत्मैवात्मनो बन्धुरित्युक्तम् , तत्रावधारणार्थमाह— **बन्धुरपीति।** आत्मन आत्मैव बन्धुः, न त्वन्यः प्राकृतः पितृभ्रात्रादिः। ते हि मोक्षप्रतिकूलत्वाद् आत्मनो नैव बन्धवः। न हि पुरुषार्थप्रतिबन्धकस्य लोके बन्धुत्वं दृश्यते, द्रव्यापहारिणं द्रव्यागमप्रतिबन्धकं वा पुरुषं न हि लोको बन्धुं स्वस्य मन्यते, कं तर्हि? शत्रुमेव। मोक्षस्तु परमपुरुषार्थ इति सर्वास्तिकजनसम्मतम्। यस्तु तस्य प्रतिकूलः कथं स बन्धुर्भवेत्? अतो मोक्षरूपपरमपुरुषार्थप्रतिकूलाः पितृभ्रात्रादयः सर्वेऽपि नैव बन्धवः, किं तर्हि? शत्रव एव, पुरुषार्थप्रतिकूलत्वात्। कुतस्तेषां मोक्षप्रतिकूलत्वम्? अत आह— **स्नेहादिबन्धनायतनत्वादिति।** स्नेहशोकमोहादिबन्धनस्थानत्वादित्यर्थः। पित्रादिर्हि पुत्रादिं स्नेहादिना पाशस्थानीयेन दृढम् बध्नात्येव, न तु मोचयतीत्यर्थः। 'मय्ययं स्नेहादिमान् यतस्ततोऽस्मिन् मया स्नेहादिमता भाव्यम् , कथं मय्यनुरागिणमिमं पुत्रादिजनं परित्यजेयम्? इमे वा मामनुरागिणं विहाय क्व गच्छेयुः?' इत्येवं परस्परं स्नेहमयपाशेन निबद्धा बन्धवः परस्परं बन्धका एवेति भावः। एतेन मुमुक्षोः पितृपुत्रादिसर्वस्वजनपरित्यागरूपः संन्यासाश्रमस्वीकार आवश्यक इति सूचितम्। **तस्मादिति।** प्राकृतानां पित्रादीनां मोक्षप्रतिकूलत्वेनाबन्धुत्वादित्यर्थः। **आत्मैवेति।** योगारूढ आत्मैवेत्यर्थः। अन्यस्यात्मनः शत्रुत्वस्यानन्तरमेव वक्ष्यमाणत्वादिति भावः। न च पित्रादेरप्यात्मत्वात् कथं तस्याबन्धुत्वमिति वाच्यम् ; न ह्ययमात्मानं पित्रादिं मन्यते, किन्तु देहादिसङ्घातमेव, सङ्घातस्य चानात्मत्वं सर्वसम्मतम्। न ह्यात्मनि पित्रादिभेदोऽस्ति, येनायमात्मा मत्पिता, अयं मद्भ्रातेत्येवं प्रतीयात्। किं तर्हि? देहादिसङ्घाते पित्रादिभेदोऽस्ति। देहादिसङ्घातगताकारभेदाद्धि पिताऽयं भ्राताऽयमित्येवं प्रत्येति लोकः। **आत्मैव रिपुरिति।** असम्पादितयोग आत्मैवात्मनः शत्रुः। यस्मादयमात्मानं संसारसागरे निमज्जयति, यथा शत्रुः धनाद्यपहरणेन पुरुषं दुःखसागरे निमज्जयति, तद्वदिति। अत्राप्यवधारणार्थमाह— **योऽन्य इति।** अपकारित्वं शत्रोर्लक्षणम्। ननु पूर्ववाक्येन पित्रादिबन्धूनां मोक्षप्रतिकूलत्वाच्छत्रुत्वमिति व्यवस्थापितम् , सत्सु च तेषु शत्रुषु कथमात्मैव शत्रुरित्यवधारणं युक्तं स्याद्?

**बन्धुरात्माऽऽत्मनस्तस्य येनात्मैवात्मना जितः।**
**अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥६॥**

**आत्मैव बन्धुः, आत्मैव रिपुरात्मनः इत्युक्तम्। तत्र किंलक्षण आत्मा आत्मनो बन्धुः, किंलक्षणो वा आत्मा आत्मनो रिपुरिति? उच्यते—** बन्धुरिति। **बन्धुरात्माऽऽत्मनस्तस्य। तस्यात्मनः स आत्मा बन्धुर्येनात्मना आत्मैव जितः,** आत्मा **कार्यकरणसङ्घातो येन** जितो **वशीकृतः। जितेन्द्रिय इत्यर्थः।** अनात्मनस्तु **अजितात्मनस्तु** शत्रुत्वे **शत्रुभावे वर्तेत आत्मैव शत्रुवत्। यथाऽनात्मा शत्रुरात्मनोऽपकारी, तथाऽऽत्माऽऽत्मनोऽपकारे वर्तेतेत्यर्थः॥६॥**

आनन्दगिरिकृतव्याख्या

**उक्तमनूद्य प्रश्नपूर्वकं श्लोकान्तरमवतारयति—** आत्मैवेत्यादिना। **एकस्यैवात्मनो मिथो विरुद्धं बन्धुत्वं रिपुत्वं च, लक्षणभेदमन्तरेणायुक्तमिति चोदिते वशीकृतसङ्घातस्यात्मानं प्रति बन्धुत्वम्, इतरस्य शत्रुत्वमित्यविरोधं दर्शयति—** बन्धुरित्यादिना। **वशीकृतसङ्घातस्य विक्षेपाभावादात्मनि समाधानसम्भवादुपपन्नमात्मानं प्रति बन्धुत्वमिति साधयति—** तस्येति। **अवशीकृतसङ्घातस्य पुनर्विक्षेपोपपत्तेरात्मनि समाधानायोगादात्मानं प्रति शत्रुभावे प्रसिद्धशत्रुवद् आत्मैव शत्रुत्वेन वर्तेतेत्युत्तरार्धं व्याकरोति—** अनात्मन इति। **दृष्टान्तं व्याचष्टे—** यथेति। **उक्तदृष्टान्तवशादवशीकृतसङ्घातः स्वस्य हितानाचरणादात्मानं प्रति शत्रुरेवेति दार्ष्टान्तिकमाह—**तथेति॥६॥

भाष्यार्कप्रकाशः

अत आह—**आत्मप्रयुक्त इति। यद्वा** धनाद्यपहारिषु बाह्येषु शत्रुषु बहुषु सत्सु कथमात्मैवेत्यवधारणम्? अत आह—**आत्मप्रयुक्त इति।**

**अयं भावः**— पितृपुत्रादिषु बन्धुषु क्षेत्रवित्ताद्यपहारिषु शत्रुषु वा नास्ति स्वतो बन्धुत्वं शत्रुत्वं वा। किं तर्हि? आत्मप्रयुक्तमेव तत्। ममायं पुत्रो ममेदं धनमित्यादिममकाराभावे, अहमनेन वर्धितोऽहमनेन नाशित इत्याद्यहङ्काराभावे कः कस्य कथं बन्धुर्भवेत्? कथं वा शत्रुर्भवेत्? न कथमपि। तथा च अहङ्कारममकाररूपात्माभिमानप्रयुक्तत्वाद् बन्धुत्वशत्रुत्वयोः बन्धुः शत्रुश्चात्मप्रयुक्त एवेति।

एतेन पूर्ववाक्योक्तं बन्धुगतं मोक्षप्रतिकूलत्वरूपं शत्रुत्वम्, एतद्वाक्योक्तमर्थादिपुरुषार्थप्रतिकूलत्वरूपं शत्रुगतं शत्रुत्वं चात्मप्रयुक्तमेव, पित्रादिपिण्डेष्वात्मनः स्नेहाभावे, शत्रुहृतधनादिष्वात्मनो ममकाराभावे च पित्रादीनां मोक्षप्रतिकूलत्वस्य शत्रूणामर्थप्रतिकूलत्वस्य चासम्भवादिति सिद्धम्। अत एवोक्तम्— आत्मैव बन्धुरात्मैव रिपुरात्मन इति॥५॥

[**बन्धुरिति।**] येनात्मना आत्मैव जितः तस्यात्मनः स आत्मा बन्धुः, अनात्मनस्तु शत्रुत्वे आत्मैव शत्रुवद् वर्तेतेत्यन्वयः। जितेन्द्रियः आत्मैवात्मनो बन्धुः, अजितेन्द्रिय आत्मैवात्मनः शत्रुरिति पर्यवसन्नार्थः। किं लक्षणं यस्य स **किंलक्षणः। तस्यात्मनः स आत्मेति।** जितात्मन आत्मनः जितात्मा आत्मा इत्यर्थः। यो हि जितात्मा आत्मा स एव स्वस्य जितात्मनो बन्धुरिति यावत्। कथं स्वेनैवात्मना स्वयमात्मा जितो भवेदित्यत आत्मशब्दस्यार्थान्तरमाह— **कार्यकरणसङ्घात इति।** कार्यं देहः, करणानीन्द्रियाणि, तेषां सङ्घातः समूहः। इन्द्रियव्यापाराधीनत्वात् कायव्यापारस्य न कायजयस्य पृथग्वचनमित्यभिप्रेत्याह— **जितेन्द्रिय इति।** अत्रेन्द्रियशब्देन मनसोऽपि ग्रहणम्, वेदान्तमतैकदेशे मनसोऽपीन्द्रियत्वात्। अन्तरिन्द्रियमिति हि तस्य व्यवहारः। **अनात्मनः** अविद्यमा-[नात्म]न इति नार्थः, तस्यासम्भवात्, असङ्गतत्वाच्च, किन्तु अजितात्मनः इति। शाकपार्थिवादित्वाज्जितपदलोपः। अविद्यमानपदस्यैवाजित इत्यर्थ इति वा, धातूनामनेकार्थत्वात्। 'नञोऽस्त्यर्थाना'मिति विद्यमानपदलोपः। अस्वाधीनत्वाद् विरुद्ध आत्मा यस्य स अनात्मेति वा। नञो विरोधार्थकत्वात्। अजितेन्द्रियस्येत्यर्थः। **आत्मैवेति।** अजितेन्द्रियः स्वयमेवेत्यर्थः। शत्रुवद् वर्तनं नाम अपकारकरणमित्याह— **यथेत्यादिना।** अजितेन्द्रियस्यात्मापकारित्वं चात्मनः संसारसागरे पातनमेव। शत्रोरात्मापकारित्वं चात्मनो दुःखसागरे पातनम्। तस्मादजितेन्द्रियः सन् पुरुषो नात्मानमवसादयेत् शत्रुवत्, किन्तु जितेन्द्रियः सन्नात्मानमुद्धरेन्मित्रवदिति फलितार्थः॥ ६॥

**जितात्मनः प्रशान्तस्य परमात्मा समाहितः।**
**शीतोष्णसुखदुःखेषु तथा [१]मानापमानयोः॥७॥**

जितात्मन इति। जितात्मनः **कार्यकरणादिसङ्घात आत्मा जितो येन स जितात्मा, तस्य जितात्मनः** प्रशान्तस्य **प्रसन्नान्तःकरणस्य सतः संन्यासिनः परमात्मा** समाहितः **साक्षादात्मभावेन वर्तत इत्यर्थः। किञ्च** शीतोष्णसुखदुःखेषु **तथा मानेऽपमाने च** मानापमानयोः **पूजापरिभवयोः [२]समः स्यात्॥७॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

कथं संयतकार्यकरणस्य बन्धुरात्मेत्याशङ्क्याह— **जितात्मनः प्रशान्तस्येति।** न केवलं तस्य परमात्मा साक्षादात्मभावेन वर्तते, शीतोष्णादिभिरप्यसौ तत्त्वज्ञानवान् न चाल्यत इत्याह— **शीतोष्णसुखदुःखेषु तथा मानावमानयोः।** कूटस्थ इत्युत्तरश्लोकेन सम्बन्धः॥७॥

आनन्दगिरिकृतव्याख्या

**कथं संयतकार्यकरणस्य बन्धुरात्मेति? तत्राह—** जितात्मन इति। **जितकार्यकरणसङ्घातस्य प्रकर्षेणोपरतबाह्याभ्यन्तरकरणस्य परमात्मा विक्षेपेण पुनः पुनरनभिभूयमानो निरन्तरं चित्ते प्रथत इत्यर्थः। जितात्मानं संन्यस्तसमस्तकर्माणमधिकारिणं प्रदर्श्य योगाङ्गानि दर्शयति—** शीतेति। **समः स्यादित्यध्याहारः। पूर्वार्धं व्याचष्टे—** जितेत्यादिना। **न केवलं तस्य परमात्मा साक्षादात्मभावेन वर्तते, किन्तु शीतोष्णादिभिरपि नासौ चाल्यते तत्त्वज्ञानादित्युत्तरार्धं विभजते—** किञ्चेति। **तेषु समः स्यादिति सम्बन्धः॥७॥**

भाष्यार्कप्रकाशः

**जितात्मन इति। प्रशान्तस्येति।** वाचिकमानसिककायिकसर्वव्यापारोपरमरूपं प्रकृष्टं शमं प्राप्तस्येत्यर्थः। **समाहितः** सम्यग् आहितः स्थितः, भवतीति शेषः। सम्यक्पदार्थमाह— **साक्षादिति।** प्रत्यक्षमित्यर्थः। केन रूपेण साक्षात्त्वम्? अत आह— **आत्मभावेनेति।** आहितशब्दार्थमाह— **वर्तत इति।** साक्षादात्मत्वेन प्रतिभातीति यावत्।

यस्त्वजितात्मा स आत्मानं कूटस्थमविदित्वा प्रमातारमात्मानं मत्वा कूटस्थमीश्वरमन्यं परोक्षं मन्यते, अतो न तद्दृष्ट्या परमात्मन आत्मत्वेन वर्तनम्। यः पुनर्जितेन्द्रियः स आत्मानं कूटस्थमीश्वरं वेत्तीति तद्दृष्ट्या परमात्मन एवात्मत्वेन वर्तनमिति भावः। जितेन्द्रियस्यैव स्वात्मभूतपरमात्मसाक्षात्कारो न त्वजितेन्द्रियस्येति परमार्थः।

**अत्र** जितात्मनः प्रशान्तस्य हृदि परमात्मा समाहित इत्यप्यन्वयः सम्भवति, अर्थस्तु पूर्वोक्त एव। शास्त्रोपदेशशमदमादिसंस्कृतमनसः आत्मदर्शने करणत्वात् तादृशे समाहिते मनसि परमात्मा स्वयमात्मत्वेन स्फुरतीत्यर्थः। उक्तं हि **हंसगुह्ये व्यासेन भागवते** – 'यदोपरामो मनसो नामरूपरूपस्य दृष्टस्मृतिसम्प्रमोषात्। य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिसद्मने नमः' इति। जितेन्द्रियस्य मनस्युपरते हंसाख्यात्मस्फुरणं स्वत एव भवतीति श्लोकार्थः।

यद्यपि 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती'ति सर्वस्यापि हृदि परमात्मा समाहित एव, तथापि न तु सर्वो वेत्ति, किन्तु प्राज्ञ एव। ततश्च यः परमात्मानं हृद्गतं न वेत्ति, परमात्मा तस्य हृदि अवर्तमान इव वर्तते। पारोक्ष्येण यस्तु वेत्ति तस्य हृदि साक्षादात्मत्वेन वर्तत एवेत्यभिप्रायेण 'जितात्मनः प्रशान्तस्य परमात्मा समाहितः' इत्युक्तं व्यासेन। **शङ्करेण** च तथैव भाषितम्— 'साक्षादात्मभावेन वर्तत इत्यर्थः' इति। साक्षादात्मत्वेन प्रतिभातीति पूर्वोक्तरीतौ तु न काऽपि शङ्केति बोध्यम्।

**किञ्चेति।** जितेन्द्रियस्य योगिन इदमप्यावश्यकमिति भावः। सम इति मूले शेषः। जितेन्द्रिय इति, योगीति वा कर्तुरुभयत्र शेषः। **समो** हर्षविषादवर्जितः। साम्याभावे तु विकारप्रसङ्गेन जितेन्द्रियत्वं भज्येत, तेन च योगो नैव निष्पद्येत। तस्मात् समत्वं योग उच्यत इति प्रागुक्तः समत्वरूपो योगोऽपि ध्यानयोगिन आवश्यक इति भावः॥७॥

---

१. 'मानावमानयोः' इति मूले भाष्ये च पा.। २. 'समः स्यात्' इति क्वचिन्न।

**ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः।**
**युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः॥८॥**
**सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु।**
**साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते॥९॥**

ज्ञानेति। **ज्ञानविज्ञानतृप्तात्मा,** ज्ञानं **शास्त्रोक्तपदार्थानां परिज्ञानम् ,** विज्ञानं **तु शास्त्रतो ज्ञातानां तथैव स्वानुभवकरणम् , ताभ्यां ज्ञानविज्ञानाभ्यां** तृप्तः **सञ्जातालम्प्रत्यय** आत्मा अन्तः**करणं यस्य स** ज्ञानविज्ञानतृप्तात्मा कूटस्थः [1]**अप्रकम्प्यो भवतीत्यर्थः। विजितेन्द्रियश्च। य ईदृशो** युक्तः **समाहित इति स** उच्यते **कथ्यते। स योगी** समलोष्टाश्मकाञ्चनो **लोष्टाश्मकाञ्चनानि समानि यस्य स समलोष्टाश्मकाञ्चनः॥८॥**

**किञ्च—** सुहृदिति। **सुहृदित्यादिश्लोकार्धमेकं पदम्।** सुहृदिति **प्रत्युपकारमनपेक्ष्योपकर्ता।** मित्रं **स्नेहवान्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**अरिः** प्रत्यक्षमपकारकः, अप्रत्यक्षमप्रियो **द्वेष्यः**॥९॥

आनन्दगिरिकृतव्याख्या

**चित्तसमाधानमेव विशिष्टफलं चेदिष्टम् , तर्हि कथम्भूतः समाहितो व्यवह्रियते? तत्राह—** ज्ञानेति। **परोक्षापरोक्षाभ्यां ज्ञानविज्ञानाभ्यां सञ्जातोऽलम्प्रत्ययो यस्मिन्नन्तःकरणे सः, अविक्रियो हर्षविषादकामक्रोधादिरहितो योगी** युक्तः **समाहित इति व्यवहारभागी भवतीति पादत्रयव्याख्यानेन दर्शयति—** ज्ञानमित्यादिना। **स च योगी परमहंसपरिव्राजकः सर्वत्रोपेक्षाबुद्धिः अनतिशयवैराग्यभागीति कथयति—** स योगीति॥८॥

**योगारूढस्य प्रशस्तत्वमभ्युपेत्य योगस्याङ्गान्तरं दर्शयति—** किञ्चेति। **'पदच्छेदः पदार्थोक्ति'रिति व्याख्यानाङ्गं सम्पादयति—**

भाष्यार्कप्रकाशः

**ज्ञानेति।** ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः पुरुषः युक्तः इत्युच्यते। योगीत्यादिकमुत्तरश्लोकान्वयि। **तथैवेति।** शास्त्रोक्तविधयैवेत्यर्थः। **स्वानुभवकरणं** स्वानुभवापादनम्। ज्ञानविज्ञानयोर्विषयपारोक्ष्यापरोक्ष्याभ्यां भेद इति भावः।

**अलम्प्रत्ययो**ऽलम्बुद्धिः, **आत्मा** मनः, बुद्धिर्वा। कूटवत् तिष्ठतीति **कूटस्थः** निर्विकारः, **अप्रकम्पो** निश्चल इति यावत्। यद्यपि वस्तुतः आत्मा कूटस्थ एव, तथापि बुद्धौ चलन्त्यामकूटस्थ इव प्रतिभातीति कूटस्थ इत्युक्तम्। बुद्धिचाञ्चल्याभावात् कूटस्थरूपेण प्रतिभातीत्यर्थः। निश्चलबुद्धिरिति कूटस्थशब्दस्य यावदर्थः। **समाहितः** चित्तसमाधानवान्। योगो हि चित्तसमाधानम्। **उच्यते** शास्त्रैः शास्त्रज्ञैरिति वा। न त्वनेवंविधस्य क्वापि कथमपि चित्तसमाधानं भवितुमर्हतीति भावः।[2](॥८॥)

**सुहृदिति।** समलोष्टाश्मकाञ्चनः सुहृदादिषु साधुषु पापेष्वपि च समबुद्धिर्योगी विशिष्यते। **लोष्टं** मृत्पिण्डः, **अश्मा** पाषाण उपलो मणिर्वा, **काञ्चनं** हेम एतानि यस्य समानि स **समलोष्टाश्मकाञ्चनः।** लोष्टादिषु न परित्याज्यताबुद्धिः, काञ्चने न स्वीकार्यताबुद्धिर्योगिन इत्यर्थः। लोष्टादिकमिव काञ्चनमपि परित्यजत्येव, न तु स्वीकरोतीति यावत् , द्रव्यसाध्यप्रयोजनाभावादस्य। इदं तु काञ्चने भ्रमराहित्यं दुष्करं योगिनः। यत उक्तम् – 'वेधा द्वेधा भ्रमं चक्रे कान्तासु कनकेषु च। तासु तेष्वप्यनासक्तः साक्षाद् भर्गो नराकृतिः॥' इति। तस्मात् काञ्चनं मलवत् परित्याज्यं योगिनः।

१. 'अप्रकम्पः' इति रा. पा.। २. अत्र अष्टमश्लोकव्याख्यासमाप्तिः मुद्रितपुस्तके दृश्यते। परन्तु **सुहृदितीति** प्रतीकधारणोत्तरम् अष्टमश्लोकस्थस्य 'योगी समलोष्टाश्मकाञ्चनः' इत्यस्य नवमश्लोके 'समबुद्धिर्विशिष्यते' इत्यत्रान्वयप्रदर्शनात् , व्याख्यानाच्च अष्टमनवमयोः द्वयोः सह व्याख्यानं कृतमिति प्रतीयते। अथवा **सुहृदितीति** प्रतीकधारणं पश्चान्नेतव्यम्।

**योगी युञ्जीत सततमात्मानं रहसि स्थितः।**
**एकाकी यतचित्तात्मा निराशीरपरिग्रहः॥१०॥**

अरिः **शत्रुः**। उदासीनो **न कस्यचित् पक्षं भजते**। मध्यस्थो [1]**यो विरुद्धयोरुभयोर्हितैषी**। द्वेष्यः **आत्मनोऽप्रियः**। बन्धुः **सम्बन्धीत्येतेषु** साधुषु **शास्त्रानुवर्तिषु , अपि च** पापेषु **प्रतिषिद्धकारिषु सर्वेष्वेतेषु** समबुद्धिः **कः किंकर्मा** [2]**इत्यव्यापृतबुद्धिरित्यर्थः**। विशिष्यते। **'विमुच्यते' इति वा पाठान्तरम्। योगारूढानां सर्वेषामयमुत्तम इत्यर्थः**॥९॥

**अत एवमुत्तमफलप्राप्तये—** योगीति। योगी **ध्यायी** युञ्जीत **समादध्यात्** सततं **सर्वदा** आत्मानम् **अन्तःकरणं** रहसि **एकान्ते गिरिगुहादौ स्थितः सन्** एकाकी **असहायः**। **'रहसि स्थितः, एकाकी च' इति विशेषणात् संन्यासं**

आनन्दगिरिकृतव्याख्या

सुहृदितीति। अरि**र्नाम परोक्षमपकारकः, प्रत्यक्षमप्रियो** द्वेष्य **इति विभागः**। समबुद्धिरिति **व्याचष्टे—** कः किमिति। **प्रथमो हि प्रश्नो जातिगोत्रादिविषयः, द्वितीयो व्यापारविषयः। उक्तप्रकारेणाव्यापृतबुद्धित्वे**[3] **सर्वोत्कर्षो वा सर्वपापविमोक्षो वा सिध्यतीत्याह—** विशिष्यत इति। **पाठद्वयेऽपि सिद्धमर्थं संगृह्य कथयति—** योगारूढानामिति॥९॥

**यथोक्तविशेषणवतो योगारूढेषूत्तमत्वे योगानुष्ठाने प्रयतितव्यमिति अङ्गाभिधानानन्तरं प्रधानमभिदधाति—** अत एवमिति। **आदरनैरन्तर्यदीर्घकालत्वं विशेषणत्रयं योगस्य सूचयति—** सततमिति। **तस्यैव पञ्चाङ्गान्युपन्यस्यति—** रहसीत्यादिना। सर्वदेति **आदरदीर्घकालयोरुपलक्षणम्। प्रत्यगात्मानं व्यावर्तयति—** अन्तःकरणमिति। गिरिगुहादावित्यादिशब्देन **योगप्रतिबन्धकदुर्जनादि-विधुरो देशो गृह्यते। विशेषणद्वयस्य तात्पर्यमाह—** रहसीति। **योगं युञ्जानस्य संन्यासिनो विशेषणान्तराणि दर्शयति—** यतेति। **सति**

भाष्यार्कप्रकाशः

**समबुद्धिरिति। समा** अविकृता बुद्धिर्यस्य स समबुद्धिः, **समः** आत्मा तस्मिन् बुद्धिर्यस्य स समबुद्धिरिति वा, समदर्शीत्यर्थः। इदमेवाह—**अव्याकृतबुद्धिरिति**। अव्याकृतो निर्विकारः आत्मा, [तस्मिन् बुद्धिर्यस्य स इति,] अव्याकृता विकृतिरहिता बुद्धिर्यस्य स इति वा। बुद्धिमेवाभिनीय दर्शयति— **कः कर्ता किं कर्मेति**। आत्मनोऽविकारित्वादनात्मनोऽचेतनत्वान्नास्ति कर्ता। तथा आत्मान्यस्य सर्वस्यापि मृषात्वात् कर्मापि नास्ति। **यद्वा** ममाकर्तृत्वाद् देहादेरनात्मत्वान्नास्ति कर्मेत्यर्थः। **विशिष्यत इति**। न ज्ञानयोगिभ्यः, सर्वोत्तमत्वात् तेषाम्। न च कर्मयोगिभ्यः, कर्मयोग्यपेक्षया ध्यानयोगिन उत्कर्षस्य स्वतःसिद्धत्वेन वचनानर्हत्वात्। किन्तु स्वेतरध्यानयोगिभ्य एवेत्यभिप्रेत्याह— **योगारूढानामिति**। सर्वेषां मध्ये इत्यर्थः। सर्वत्र समबुद्धिमत्त्वात् समबुद्धेश्च ज्ञानयोग-प्रधानांशत्वाच्चेति भावः॥८,९॥

**योगीति**। योगी रहसि स्थितः एकाकी यतचित्तात्मा निराशीरपरिग्रहश्च सन्नात्मानं सततं युञ्जीत ध्यायीत। ध्यानशीलः आत्मानं युञ्जीत, चित्तं ब्रह्मणि समादध्याद्, ब्रह्मणि चित्तसमाधानं कुर्यात्। **असहायः** भार्यादिसहायरहितः। गृहस्थस्य गृह एव स्थितिः, न तु गिरिगुहादौ, भार्यासहितस्यैव गृहस्थस्य कर्मस्वधिकारो, न तु तद्रहितस्येति। **यद्वा** गृहस्थस्य भार्यादिसहायपरित्यागो ऽनुचितः, भार्यादित्यागस्य दोषावहत्वात् , 'ऋतौ भार्यामुपेया'दित्यादिशास्त्रात्। अतो न गृहस्थस्यैकाकित्वं रहःस्थितत्वं वा सम्भवतीति कृत्वा एकाकी रहसि स्थित इति विशेषणात् संन्यासिलाभ इत्याह— **रहसीति।**

न च - भार्यापरित्यागो गृहस्थस्येव संन्यासिनोऽपि दोषावह एव, 'ऋतौ भार्यामुपेया'दिति शास्त्रविरोधादिति - वाच्यम् , ऋताविति शास्त्रस्य परिसङ्ख्याविधित्वेन ऋतुकाल इव तदितरकालेष्वपि भार्यागमनं यस्य नित्यप्राप्तं तं गृहस्थं प्रत्येव ऋतावेव भार्यामुपेयादिति विहितम् , न तु संन्यासिनं प्रति, तस्य भार्याया एवाभावेन तद्गमनस्याप्राप्तत्वात्। न चैतदर्थमपूर्वविधिरेव स इति

१. 'यः' इति क्वचिन्न। २. 'अव्याकृतबुद्धिरिति' इति रा. पा.। ३. 'अव्यापृतबुद्धेः' इति पा.।

**शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।**
**नात्युच्छ्रितं नातिनीचं [१]चैलाजिनकुशोत्तरम्॥ ११॥**

**कृत्वेत्यर्थः। यतचित्तात्मा,** चित्तम् **अन्तःकरणम् ,** आत्मा **देहश्च संयतौ यस्य स** यतचित्तात्मा, निराशीः **वीततृष्णो** अपरिग्रहश्च **परिग्रहरहित इत्यर्थः। संन्यासित्वेऽपि त्यक्तसर्वपरिग्रहः सन् युञ्जीतेत्यर्थः॥ १०॥**

**अथेदानीं योगं युञ्जतः आसनाहारविहारादीनां योगसाधनत्वेन नियमो वक्तव्यः, प्राप्तयोगस्य लक्षणं तत्फलादि चेत्यत आरभ्यते। तत्रासनमेव तावत् प्रथममुच्यते—** शुचाविति। शुचौ **शुद्धे विविक्ते स्वभावतः संस्कारतो वा** देशे **स्थाने प्रतिष्ठाप्य** स्थिरम् **अचलम् आत्मन आसनं** नात्युच्छ्रितं **नातीवोच्छ्रितं नाप्यतिनीचम् , तच्च**

आनन्दगिरिकृतव्याख्या

**संन्यासित्वे किमित्यपरिग्रहग्रहणम् अर्थपुनरुक्तेरित्याशङ्क्य कौपीनाच्छादनादिष्वपि सक्तिनिवृत्त्यर्थमित्याह—** संन्यासित्वेऽपीति॥ १०॥

**योगं योगाङ्गानि चोपदिश्योत्तरसन्दर्भस्य तात्पर्यमाह—** अथेति। **योगस्वरूपकतिपयतदङ्गप्रदर्शनानन्तर्यम्** अथ**शब्दार्थः।** विहारादीना**मित्यादिशब्देन यथोक्तासनादिगतावान्तरभेदग्रहणम्।** तत्फलादि चेत्यादि**शब्देन योगफलं सम्यग्ज्ञानं च तत्फलं कैवल्यम् , ततो भ्रष्टस्यात्यन्तिकाविनष्टत्वमित्यादि गृह्यते। एवं समुदायतात्पर्ये दर्शिते, किमासीनः शयानस्तिष्ठन् गच्छन् कुर्वन् वा युञ्जीतेत्यपेक्षायाम् अनन्तरश्लोकतात्पर्यमाह—** तत्रेति। **निर्धारणे सप्तमी।** प्रथमं **योगानुष्ठानस्य प्रधानम् 'आसीनः सम्भवात्' इति न्यायादिति यावत्। विविक्तत्वं द्वेधा विभजते—** स्वभावत इति। **आसनस्यास्थैर्ये तत्रोपविश्य योगमनुतिष्ठतः समाधानायोगाद् योगासिद्धिरित्यभिसन्धाय विशिनष्टि—** अचलमिति। **आस्यतेऽस्मिन्निति व्युत्पत्तिमनुसृत्याह—** आसनमिति। आत्मन इति **परकीया-सनव्युदासार्थम्। पतनभयपरिहारार्थं** नात्युच्चमित्यु**क्तम्।** नाप्यतिनीच**मिति भूतलपाषाणादिसंश्लेषे वातक्षोभाग्निमान्द्यादिसम्भावितदोष-**

भाष्यार्कप्रकाशः

वाच्यम् , गृहस्थे भार्यागमनस्य नित्यप्राप्तत्वेनापूर्वविधित्वाभावात्। संन्यासिनः सर्वपरित्यागस्य विधानाच्च 'यदहरेव विरजेत्तदहरेव प्रव्रजे'दित्यादिशास्त्रेण। तस्मादेकाकित्वं रहःस्थितिश्चेति द्वयं संन्यासिन एव, न तु गृहस्थस्य। गृहे तिष्ठतीति गृहस्थः, गृहे भार्यया सह तिष्ठतीति गृहस्थ इति च व्युत्पत्तेः।

**संयतौ** नियमितौ युक्ताहारविहारादिना स्वायत्तीकृतावित्यर्थः। **परिग्रहः** धनधान्यादिः। यद्यपि संन्यासिनोऽपरिग्राह्यमेव[२], तथापि संन्यासोचितकाषायाम्बरादिपरिग्रहनिषेधायोक्तम् **अपरिग्रहः** इत्याह— **संन्यासित्वेऽपीति।** संन्यासिनो यः परिग्रहः आवश्यकः, तमपि त्यजेदित्यर्थः। **एतेन** दिगम्बरत्वं दण्डकमण्डलुराहित्यं च परमहंससंन्यासाश्रमलक्षणं **सूचितम्।**

**यद्वा** संन्यासी भवन्नपि यः कश्चन देवालयादिधर्मकार्यार्थं धनादिपरिग्रहं सम्पादयेत् , तं प्रत्याह— **अपरिग्रह इति।** संन्यासिनो देवालयादिधर्मकार्यसाध्यप्रयोजनाभावात् संन्यासिनो मुमुक्षुत्वान्मोक्षस्याकार्यत्वात् किं मुमुक्षोः संन्यासिनो धर्मकार्यै-रधर्मकार्यैर्वा। तस्मात् संन्यासित्वेऽपि परिग्रहरहित एव स्याद् योगी। सति परिग्रहे तद्रक्षादिव्यग्रस्य चित्तस्य ब्रह्मणि समाधानालाभादिति भावः।

यत्तु **रामानुजः—** योगी कर्मयोगनिष्ठः यतचित्तात्मा यतचित्तमनस्क इति, **तत्तुच्छम् ;** कर्मयोगिनो विजनस्थित्यसम्भवात्, कारकादिसापेक्षो हि कर्मयोगः। यतचित्त इत्यनेन यतमना इत्यनेन वा विवक्षितमनोजये सिद्धे यतचित्तमनस्क इति चित्तमनसोर्ग्रहणं पुनरुक्तम्॥ १०॥

**शुचाविति।** प्राप्तयोगलक्षणं योगारूढलक्षणं च वक्तव्यम् , तत्फलादिकं च वक्तव्यमित्यतो हेतोरारभ्यते उत्तरग्रन्थ इति

---

१. 'चेलाजिन' इति पा.। २. धनधान्यादीति शेषः। तच्च 'संन्यासं कृत्वा' इत्यनेनैव लब्धम् , अन्यथा संन्यासासिद्धेरिति शङ्का।

**तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।**
**उपविश्यासने युञ्ज्याद् योगमात्मविशुद्धये॥ १२॥**
**समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।**
**संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्॥ १३॥**

चैलाजिनकुशोत्तरं **चैलमजिनं कुशाश्चोत्तरे यस्मिन्नासने तदासनं चैलाजिनकुशोत्तरम्। पाठक्रमाद् विपरीतोऽत्र क्रमश्चैलादीनाम्॥ ११॥**

**प्रतिष्ठाप्य किम्? —** तत्रेति। तत्र **तस्मिन्नासन उपविश्य योगं युञ्ज्यात्। कथम्? सर्वविषयेभ्य उपसंहृत्य** एकाग्रं **मनः कृत्वा,** यतचित्तेन्द्रियक्रियः **चित्तं चेन्द्रियाणि च चित्तेन्द्रियाणि, तेषां क्रियाः संयताः यस्य स यतचित्तेन्द्रियक्रियः। स किमर्थं योगं युञ्ज्यादित्याह—** आत्मविशुद्धये **अन्तःकरणस्य विशुद्ध्यर्थमित्येतत्॥ १२॥**

[1]**बाह्यमासनमुक्तम्। अधुना शरीरधारणं कथमित्युच्यते—** सममिति। **समं** कायशिरोग्रीवं **कायश्च शिरश्च**

आनन्दगिरिकृतव्याख्या

**निरासार्थम्।** चैलं **वस्त्रम्**; अजिनं **चर्म पशूनाम्, तच्च मृगस्य;** कुशा **दर्भाः, ते चोत्तरे यस्मिन् उपरिष्टादारभ्य तत् तथोक्तम्। प्रथमं चैलम्, ततोऽजिनम्, ततश्च कुशा इति** [2]**प्रतिपन्नपाठक्रममतिक्रम्य, आदौ कुशस्ततोऽजिनं ततश्चैलमिति क्रमं विवक्षित्वाऽऽह—** विपरीतोऽत्रेति॥ ११॥

**यथोक्तमासनं सम्पाद्य किं कर्तव्यमिति प्रश्नपूर्वकं कर्तव्यं तन्निर्दिशति—** प्रतिष्ठाप्येति। **योगं युञ्जानस्य इतिकर्तव्यताकलापं पृच्छति—** कथमिति। **सर्वेभ्यो विषयेभ्यः सकाशात् प्रत्याहृत्य मनसो यद् एकस्मिन्नेव ध्येये विषये समाधानम्, यत् चित्तस्येन्द्रियाणां च बाह्यक्रियाणां संयमनम्, तदुभयं कृत्वा योगमनुतिष्ठेदित्याह—** सर्वेति। **आसने यथोक्ते स्थित्वा यथोक्तया रीत्या योगानुष्ठानस्य प्रश्नपूर्वकं फलमाह—** स किमर्थमित्यादिना॥ १२॥

भाष्यार्कप्रकाशः

शेषः। **शुचौ** स्वभावतः शुद्धे, परिशुद्धे संस्कारतो विविक्ते विजने वा, निःसंसारे इत्यर्थः। **संसारः** पशुशिश्वादिः। शुचौ देशे नात्युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरं स्थिरमात्मन आसनं प्रतिष्ठाप्य इत्यन्वयः। **आसनं** दार्वादिमयं पीठम्। **विपरीत इति।** कुशाजिनचेलानीत्यर्थः। आसनस्योपरि कुशाः, तदुपर्यजिनं, तदुपरि चेलं चेति क्रमः। **प्रतिष्ठाप्य** स्थापयित्वा॥ ११॥

**तत्रेति।** तत्रासने उपविश्य यतचित्तेन्द्रियक्रियःसन् मन एकाग्रं कृत्वा आत्मविशुद्धये योगं युञ्ज्यात्। **एकाग्रमिति।** एकमग्रं चिन्तनीयमस्येत्येकाग्रम्। 'एकाग्रमेकताने स्यादेकाग्रं चाप्यनाकुले' इति विश्वः। **एकतानं** सावधानम्, आत्मैकध्यानपरमिति यावत्। इदं च मनसो विषयप्रत्याहारं विना न सम्भवतीत्यभिप्रेत्याह— **सर्वविषयेभ्य उपसंहृत्येति।** निवर्त्येत्यर्थः। **आत्मविशुद्धये** आत्मा नात्र कूटस्थः, तस्य सर्वपवित्रीकरणचणस्य स्वतः पवित्रतमस्य भवितव्यशुद्ध्यभावात्। किन्तु मन एवेत्याह— **अन्तःकरणमिति।** तस्य शुद्धिर्नाम रागादिदोषाभावः, प्रसन्नतेति यावत्॥ १२॥

**सममिति।** कायशिरोग्रीवं सममचलं च धारयन् स्थिरो भूत्वा स्वं नासिकाग्रं सम्प्रेक्ष्येव दिशश्चानवलोकयन् सन् प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितश्च सन्, योगीति शेषः, मनः संयम्य मच्चित्तः युक्तः मत्परश्च सन्, आसने इति शेषः। आसीत इति श्लोकद्वयस्यान्वयः। [3]कायशिरोग्रीवमिति समाहारत्वादेकत्वं क्लीबत्वं च। कायश्च शिरश्च ग्रीवा च तत्समाहारः कायशिरोग्रीवम्। कण्ठश्रोणिमध्यदेशोऽत्र कायः, ऊर्वादिकायस्यासनबन्धनेनैव समीकृतत्वादचलीकृतत्वाच्च। ग्रीवाग्रहणं स्पष्टार्थम्, शिरश्चलनं विना

---

१. 'बाह्यसाधनमासनम्' इति पा.। २. 'प्रतिपन्नपाठक्रममापातिकं क्रममतिक्रम्य' इति पा.। ३. प्राण्यङ्गत्वात् समाहारद्वन्द्वनियमः।

**प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः।**
**मनः संयम्य मच्चित्तो युक्त आसीत मत्परः॥ १४॥**

**ग्रीवा च कायशिरोग्रीवं तत् समं धारयन् अचलं च। समं धारयतश्चलनं सम्भवति , अतो विशिनष्टि—** अचलमिति। स्थिरः **स्थिरो भूत्वेत्यर्थः। स्वं नासिकाग्रं** सम्प्रेक्ष्य **सम्यक् प्रेक्षणं दर्शनं कृत्वेवेति इवशब्दो लुप्तो द्रष्टव्यः। न हि स्वनासिकाग्रसंप्रेक्षणमिह विधित्सितम्। किं तर्हि? चक्षुषोर्दृष्टिसन्निपातः। स चान्तःकरणसमाधानापेक्षो विवक्षितः। स्वनासिकाग्रसंप्रेक्षणमेव चेद् विवक्षितम् , मनस्तत्रैव समाधीयेत, नात्मनि। आत्मनि हि मनसः समाधानं वक्ष्यति— आत्मसंस्थं मनः कृत्वेति। तस्माद् इवशब्दलोपेनाक्ष्णोर्दृष्टिसन्निपात एव सम्प्रेक्ष्येत्युच्यते।** दिशश्चानवलोकयन् **दिशां चावलोकनमन्तराऽकुर्वन्नित्येतत्॥ १३॥**

**किञ्च—** प्रशान्तेति। प्रशान्तात्मा **प्रकर्षेण शान्त आत्माऽन्तःकरणं यस्य सोऽयं प्रशान्तात्मा,** विगतभीः **विगतभयो** ब्रह्मचारिव्रते स्थितः **ब्रह्मचारिणो व्रतं ब्रह्मचर्यं गुरुशुश्रूषा[१]भिक्षाभुक्त्यादि , तस्मिन्** स्थितः **तदनुष्ठाता**

आनन्दगिरिकृतव्याख्या

**उक्तमनूद्य, अनन्तरश्लोकस्यापुनरुक्तमर्थमाह—** बाह्येति। समत्वम् **ऋजुत्वम्।** कायः **शरीरमध्यम्। अचलमिति विशेषण-मवतार्य तस्य तात्पर्यमाह—** सममिति। **कार्यकरणयोर्विषयपारवश्यशून्यत्वम् अचलत्वं स्थैर्यम्। किमिति इवशब्दलोपोऽत्र कल्प्यते स्वनासिकाग्रसंप्रेक्षणमेव योगाङ्गत्वेनात्र विधित्सितं किं न स्यादित्याशङ्क्याह—** न हीति। **तर्हि किमत्र विवक्षितमिति प्रश्नपूर्वकमाह—**किं तर्हीति। दृष्टिसंनिपातः **दृष्टेः चक्षुषो रूपादिविषयप्रवृत्तिराहित्यम्। कथमसौ अनायासेन सिध्यति? तत्राह—** स चेति। **समाधानस्य प्राधान्येनात्र विवक्षितत्वाद् दृष्टेर्बहिर्विषयत्वेन तद्भङ्गप्रसङ्गात् तस्या विषयेभ्यो व्यावृत्त्याऽन्तरेव सन्निपातो विवक्षितो भातीत्यर्थः। तथापि कथं स्वनासिकाग्रसंप्रेक्षणमत्र श्रुतमविवक्षितमित्याशङ्क्याह—** स्वनासिकेति। **तत्रैव मनःसमाधाने का हानिरित्याशङ्क्य वाक्यशेषविरोधाद् मैवमित्याह—** आत्मनि हीति। **किं तर्हि सम्प्रेक्ष्येत्यादौ विवक्षितमित्याशङ्क्याह—** तस्मादिति। **दक्षिणेतरचक्षुषोर्या दृष्टिस्तस्या बाह्याद् विषयाद् वैमुख्येनान्तरेव सन्निपतनमत्र स्वकीयं नासिकाग्रं नासिकान्तं सम्प्रेक्ष्येति विवक्षितमित्यर्थः। तत्रैवोत्तरमपि विशेषणमनु-कूलमित्याह—** दिशश्चेति। **अनवलोकयन्नासीतेत्युत्तरत्र सम्बन्धः। अन्तराऽन्तरा दिशामवलोकनमपि योगप्रतिबन्धकमिति तत्प्रतिषेधः ॥ १३॥**

**योगं युञ्जानस्य विशेषणान्तराणि दर्शयति—** किञ्चेति। **अन्तःकरणस्य प्रशान्ती रागद्वेषादिदोषराहित्यम् , तस्याश्च प्रकर्षो रागादिहेतोरपि निवृत्तिः।** विगतभयत्वं **सर्वकर्मपरित्यागे शास्त्रीयनिश्चयवशान्निःसन्दिग्धबुद्धित्वम्।** भिक्षाभुक्त्यादीत्या**दिशब्देन त्रिषवण-**

भाष्यार्कप्रकाशः

ग्रीवाचलनासम्भवात् , शिरसि समेऽचले च कृते सति ग्रीवायाः समत्वाचलत्वलाभाच्च।

**स्थिर इति।** स्थैर्यमत्र बुद्धिगतं बोध्यम् , कायगतस्योक्तत्वात्। स्थिरबुद्धिरित्यर्थः। **यद्वा** कायशिरोग्रीवं सममचलं धारयन् अत एव स्थिर इति। अनेन च स्थिरपदेन चिरकालं कायाद्यचलनपूर्वकमासने स्थातुं क्षम इति व्यज्यते।

**दृष्टिसन्निपात** इत्यस्य दृष्टेःसन्निपातो रूपादिविषयप्रवृत्तिराहित्यमित्यर्थः। **स चेति।** दृष्टिसन्निपात इत्यर्थः। अन्तःकरणस्य समाधानमपेक्षत इत्यन्तःकरणसमाधानापेक्षः अन्तःकरणसमाधानार्थ इत्यर्थः। **तत्रैव** नासाग्रसम्प्रेक्षण एव। **स्वं** स्वीयमित्यर्थः। स्वयमिति वा। 'स्वो ज्ञातावात्मनि स्व'मिति आत्मार्थे क्लीबत्वात्[२]॥ १३॥

**प्रशान्तात्मेति। शान्तः** प्रसन्नः। **विगतभीरिति।** निर्जनदेशस्थित्यादिप्रयुक्तभयरहितः, सर्वशून्यात्मावलोकनप्रयुक्तभयरहित

१. 'भिक्षान्नभुक्त्यादि' इति, 'भैक्षभुक्त्यादि' इति च पा.। २. 'स्वो ज्ञातौ, आत्मनि स्वं, त्रिष्वात्मीये, स्वोऽस्त्रियां धने' (अमर. नानार्थ. २११) इति रामकविसंमता योजना। 'स्वो ज्ञातौ आत्मनि, स्वं त्रिष्वात्मीये, स्वोऽस्त्रियां धने' इति योजनायां तु नेदं युक्तम्।

**युञ्जन्नेवं सदाऽऽत्मानं योगी नियतमानसः।**
**शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति॥ १५॥**

**भवेदित्यर्थः। किञ्च** मनः संयम्य **मनसो वृत्तीरुपसंहृत्येतत्।** मच्चित्तो **मयि परमेश्वरे चित्तं यस्य सोऽयं मच्चित्तः,** युक्तः **समाहितः सन्** आसीत **उपविशेत्** मत्परः **अहं परो यस्य सोऽयं मत्परः। भवति कश्चिद् रागी स्त्रीचित्तः, न तु स्त्रियमेव परत्वेन गृह्णाति, किं तर्हि? राजानं, महादेवं वा। अयं तु मच्चित्तो मत्परश्च॥ १४॥**

**अथेदानीं योगफलमुच्यते—** युञ्जन्निति। युञ्जन् **समाधानं कुर्वन्** एवं **यथोक्तेन विधानेन** [1]**सदा आत्मानं योगी** नियतमानसो **नियतं संयतं मानसं मनो यस्य सोऽयं नियतमानसः,** शान्तिम् **उपरतिं** निर्वाणपरमां **निर्वाणं मोक्षः, तत्** परमा **निष्ठा यस्याः शान्तेः सा निर्वाणपरमा, तां निर्वाणपरमां** मत्संस्थां **मदधीनाम्** अधिगच्छति **प्राप्नोति॥ १५॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

निर्वाणपर्यवसायिनीं चित्तस्योपरतिमेकाग्रतां लभत इत्यवान्तरफलं योगस्याह— **शान्तिं निर्वाणपरमामिति।** साऽपि ईश्वरानुग्रहात् भवतीत्याह— **मत्संस्थामिति॥ १५॥**

आनन्दगिरिकृतव्याख्या

**स्नानशौचाचमनादि गृह्यते। विशेषणान्तरमाह—**किञ्चेति। उपसंहृत्य **योगनिष्ठो भवेदिति शेषः। मनोवृत्त्युपसंहारे ध्यानमपि न सिध्येत्,** [2]**तस्य तद्वृत्त्यावृत्तिरूपत्वादित्याशङ्क्याह—** मच्चित्त इति। **विषयान्तरविषयमनोवृत्त्युपसंहारेणात्मन्येव तन्नियमनाद् न ध्यानानुपपत्ति-रित्यर्थः। मच्चित्तत्वेनैव मत्परत्वस्य सिद्धत्वाद् 'मत्परः' इति पृथग्विशेषणमनर्थकमित्याशङ्क्याह—** भवतीति। **अन्तःकरणशुद्धिः योगस्यावान्तरफलम्॥ १४॥**

**सम्प्रति परमफलकथनपरत्वेनानन्तरश्लोकमादत्ते—** अथेति। **योगस्वरूपं, तदङ्गमासनद्वयं, तत्कर्तृविशेषणम् इत्यस्यार्थस्य प्रकथनानन्तरमिति** अथ**शब्दार्थः। आत्मानं युञ्जन्निति सम्बन्धः।** आत्म**शब्दो मनोविषयः।** यथोक्तो विधिः **आसनादिः।** [3]**उक्तविशेषण-त्रयद्योतनार्थं सदेत्युक्तम्।** योगी **ध्यायी संन्यासीत्यर्थः। मनःसंयमस्य योगं प्रत्यसाधारणत्वं दर्शयति—** नियतेति। **शान्तिशब्दितोपरतेः सर्वसंसारनिवृत्तिपर्यवसायित्वं** [4]**मत्वा विशिनष्टि—** निर्वाणेति। **यथोक्तायाः मुक्तेर्ब्रह्मस्वरूपावस्थानाद्** [5]**अनर्थान्तरत्वमाह—** मत्संस्था-मिति। [6]मदधीनां **मदात्मिकामित्यर्थः॥ १५॥**

भाष्यार्कप्रकाशः

इति वा। 'अभये भयदर्शिनः' इति निर्विकल्पसमाधेर्भयहेतुत्वमुक्तं हि **गौडपादाचार्यैः। मनःसंयमनं** नाम मनसो निर्वृत्तीकरणम्; कामादिवृत्तिसत्त्वे मनश्चाञ्चल्यादिति भावः। **मच्चित्तः** आत्मनिष्ठमनाः इत्यर्थः। परमेश्वरस्यैवात्मत्वात्। ननु यो यच्चित्तः स तत्पर एव भवतीति मत्पर इति विशेषणं व्यर्थम्, अत आह— **कश्चिदिति। परत्वेन** उत्कृष्टत्वेन प्राप्यत्वेनेति वा। अयं योगी तु **मत्परश्च** मय्येव परत्वबुद्धिमान्॥ १४॥

**युञ्जन्निति।** योगी नियतमानसः एवं सदा आत्मानं युञ्जन् मत्संस्थां निर्वाणपरमां शान्तिमधिगच्छति। **आत्मानम्** अन्तःकरणं **युञ्जन्** ब्रह्मणि समाहितं कुर्वन्नित्यर्थः। **शान्तिम्** उपरतिम्, सर्वकर्मसंन्यासमिति यावत्। **निष्ठा** पर्यवसानम्, फलमिति यावत्। **मदधीनामिति।** अकर्त्रात्मस्वभावभूतामित्यर्थः। एवं समाहितमनाः निर्व्यापारस्तूष्णीमात्मानमवलोकयन् वर्तत इत्यर्थः॥ १५॥

---

१. 'सदा आत्मानं सर्वदा' इति पा.। २.ध्यानस्य समानविषयकप्रत्ययावृत्तिरूपत्वादित्यर्थः। ३. उक्तं विशेषणत्रयम् आदरनैरन्तर्यदीर्घकालत्वरूपम्। ४. पूर्वं शान्तिं प्राप्यान्ते मुक्तो भवतीति यावत्। ५. मत्संस्थामित्यनेन मुक्तेर्ब्रह्मस्वरूपाभेदमाहेत्यर्थः। ६. 'पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ'(ब्र.सू. ३-२-५) इति न्यायेन मोक्षस्येश्वरप्रसादलभ्यत्वात् तदधीनत्वमुक्तम्। फलितार्थमाह—**मदात्मिकामिति।**

**नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।**
**न चाति स्वप्नशीलस्य जाग्रतो नैव चार्जुन !॥ १६॥**

**इदानीं योगिनः आहारादिनियम उच्यते—** नात्यश्नत इति। नात्यश्नतः **आत्मसम्मितमन्नपरिमाणम् अतीत्य अश्नतोऽत्यश्नतो न योगोऽस्ति। न चैकान्तमनश्नतो योगोऽस्ति, 'यदु ह वा आत्मसम्मितमन्नं तदवति, तन्न हिनस्ति, यद्भूयो हिनस्ति तद् , यत् [१]कनीयोऽन्नं न तदवति'(श.ब्रा.९.२.१.२) इति श्रुतेः। तस्माद् योगी नात्मसम्मितादन्नाद् अधिकं न्यूनं वाऽश्नीयात्।**

**अथवा योगिनो योगशास्त्रे परिपठितादन्नपरिमाणाद् अतिमात्रमश्नतो योगो नास्ति। उक्तं हि— [२]'अर्धं सव्यञ्जनान्नस्य तृतीयमुदकस्य च। वायोः सञ्चरणार्थं तु चतुर्थमवशेषयेत्' इत्यादि परिमाणम्। तथा न चातिस्वप्नशीलस्य योगो भवति, नैव चातिमात्रं जाग्रतो योगो भवति च, अर्जुन !॥ १६॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

करेवकारश्च [उकारो हकारो वाकारश्च] प्रसिद्धिद्योतका निपातौ[निपाताः] । यद् **आत्मसम्मितं** स्वोदरपरिमितम् अन्नं तद् **अवति** रक्षतीत्यर्थः। **अर्धस्येति?**। सव्यञ्जनेन गध? मुदकमुदस्य [सव्यञ्जनेनान्नेनार्धमुदरस्य] पूरयेदित्यर्थः॥ १६॥

आनन्दगिरिकृतव्याख्या

आहारादीत्यादिशब्देन **विहारजागरितादि चोच्यते।** आत्मसम्मितमन्नपरिमाणम् **अष्टग्रासादि। आहारनियमे शतपथश्रुतिं प्रमाणयति—** यदु ह वा इति। **तदन्नं भुज्यमानं 'यदु ह वा' इति प्रसिद्ध्याऽनूदितम्** अवति **अनुष्ठानयोग्यतामापाद्यानुष्ठानद्वारेण भोक्तारं रक्षति, न पुनस्तदन्नमस्यानर्थाय भवतीत्यर्थः। यत्पुनरात्मसम्मिताद्** भूयोऽधिकतरं **शास्त्रमतिक्रम्य भुज्यते,** तदात्मानं हिनस्ति **भोक्तुरनर्थाय भवति। यच्चान्नं** कनीयोऽल्पतरं **शास्त्रनिश्चयाभावादद्यते, तदन्नमनुष्ठानयोग्यतादिद्वारा न रक्षितुं क्षमते। तस्माद् अत्यधिकमत्यल्पं चान्नं योगमारुरुक्षता त्याज्यमित्यर्थः। श्रुतिसिद्धमर्थं निगमयति—** तस्मादिति।

**नेत्यादेर्व्याख्यानान्तरमाह—** अथवेति। **किं तदन्नपरिमाणं योगशास्त्रोक्तं यदधिकं न्यूनं वाऽभ्यवहरतो योगानुपपत्तिरित्याशङ्क्याह—** उक्तं हीति। **'पूरयेदशनेनार्धं तृतीयमुदकेन तु। वायोः सञ्चरणार्थं तु चतुर्थमवशेषयेत्॥' इति वाक्यमादिशब्दार्थः। यथा अत्यन्तमश्नतोऽनश्नतश्च योगो न सम्भवति, तथाऽत्यन्तं स्वपतो जाग्रतश्च न योगः सम्भवतीत्याह—** तथेति॥ १६॥

भाष्यार्कप्रकाशः

**नेति। आत्मसम्मितमिति।** आत्मनः स्वस्य सम्यक् मितं सम्मितम्, आत्मतृप्तये पर्याप्तमित्यर्थः। स्वजठरकोशाय पर्याप्तमिति वा। यदिति श्रुतेरयमर्थः— उ ह वेति प्रसिद्धौ। यदात्मसम्मितमन्नं तत् पुरुषं भोक्तारम् **अवति** रक्षति। तत् तं **न हिनस्ति** न नाशयति रोगादिजननद्वारेति भावः। यद्भूयः अपरिमितमन्नं तत् तं हिनस्ति; यत् कनीयः अल्पमप्यन्नं तद् नावति, किन्तु हिनस्त्येवेत्यर्थः।

**यस्मादिति।** आत्मसम्मितान्न्यूनाधिकान्नयोररक्षकत्वात् प्रत्युत हिंसकत्वाच्चेत्यर्थः। अल्पान्नाशने शरीरधारणं न सम्भवति, अधिकान्नाशने शरीरादीनामात्मवश्यत्वं न सम्भवतीति भावः।

**व्यञ्जनानि** घृतसूपादीनि। **अर्धमिति।** अन्नकोशस्येति शेषः। अयं श्लोकः 'द्वौ भागौ पूरयेदन्नैः तोयेनैकं प्रपूरयेत्। मारुतस्य प्रचारार्थं चतुर्थमवशेषयेत्।' इति प्रकारान्तरेणापि पठ्यते। अर्थस्त्वभिन्न एव। अन्नैरिति बहुत्वं व्यञ्जनापेक्षया। एतेन मिताशिन एव योगलाभ इति सिद्धम्। **अतिस्वप्नशीलं[शीलस्य]** अतिस्वप्नोऽत्यन्तनिद्रा शीलं यस्य स अतिस्वप्नशीलः, नक्तंदिवमपि निद्राण इत्यर्थः; तस्य। अतिनिद्रा अतिजागरणं च योगिना परित्याज्यमित्युत्तरार्धार्थः॥ १६॥

---

१. 'कनीयो न तदवति' इति पा.। २. 'अर्धमशनस्य सव्यञ्जनस्य' इति पा.।

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥ १७॥**
**यदा विनियतं चित्तमात्मन्येवावतिष्ठते।**
**निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा॥ १८॥**
**यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।**

**कथं पुनर्योगो भवतीत्युच्यते—** युक्तेति। युक्ताहारविहारस्य **आह्रियत इत्याहारः अन्नम् , विहरणं विहारः** [१]**पादक्रमः, तौ युक्तौ नियतपरिमाणौ यस्य सः युक्ताहारविहारः तस्य,** तथा युक्तचेष्टस्य **युक्ता नियता चेष्टा यस्य कर्मसु**[२] **तस्य, तथा** युक्तस्वप्नावबोधस्य **युक्तौ स्वप्नश्चावबोधश्च तौ नियतकालौ यस्य तस्य, युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगिनो योगो भवति** दुःखहा **दुःखानि सर्वाणि हन्तीति दुःखहा। सर्वसंसारदुःखक्षयकृद् योगो भवतीत्यर्थः॥ १७॥**

**अथाधुना कदा युक्तो भवतीत्युच्यते—** यदेति। **यदा** विनियतं **विशेषेण नियतं संयतम् , एकाग्रतामापन्नं चित्तं, हित्वा** [३]**बाह्यचिन्ताम्** आत्मन्येव **केवलेऽ**वतिष्ठते। **स्वात्मनि स्थितिं लभत इत्यर्थः।** निःस्पृहः **सर्वकामेभ्यो निर्गता दृष्टादृष्टविषयेभ्यः स्पृहा तृष्णा यस्य योगिनः स** युक्तः **समाहित इत्युच्यते** तदा **तस्मिन् काले॥ १८॥**

**तस्य योगिनः समाहितं यच्चित्तम् , तस्योपमोच्यते—** यथेति। **यथा** दीपः **प्रदीपो** निवातस्थो **निवाते**

आनन्दगिरिकृतव्याख्या

**आहारनिद्रादिनियमविरहिणो योगव्यतिरेकमुक्त्वा तन्नियमवतो योगान्वयमन्वाचष्टे—** कथं पुनरित्यादिना। **अन्नस्य नियतत्वम् 'अर्धमशनस्ये'त्यादि , विहारस्य नियतत्वं 'योजनान्न परं गच्छेदि'त्यादि , कर्मसु चेष्टायाः नियतत्वं वाङ्नियमादि। रात्रौ प्रथमतो दश-घटिकापरिमिते काले जागरणं, मध्यतः स्वपनं, पुनरपि दशघटिकापरिमिते जागरणमिति स्वप्नावबोधयोर्नियतकालत्वम्। एवं प्रयतमानस्य योगिनो** [४]**भवतो योगस्य फलमाह—** दुःखहेति। सर्वाणीत्याध्यात्मिकादिभेदभिन्नानीत्यर्थः। **यथोक्तयोगमन्तरेणापि स्वप्नादौ दुःखनिवृत्तिरस्तीति विशिनष्टि—** सर्वेति। **विशुद्धविज्ञानद्वारेति शेषः॥ १७॥**

**सफलस्य साङ्गस्य योगस्योक्तत्वनन्तरं 'यदा ही'त्यादावुक्तकालानुवादेन** [५]**युक्तं लक्षयितुम् अनन्तरश्लोकप्रवृत्तिं दर्शयति—** अथाधुनेति। **विशेषेण संयतत्वमेव सङ्क्षिपति—** एकाग्रतामिति। **आत्मन्येवेत्येवकारार्थं कथयति—** हित्वेति। केवलत्वम् **अद्वितीयत्वम्। तस्यात्मस्थितिं विवृणोति—** स्वात्मनीति। **चित्तस्य हि** [६]**कल्पितस्यात्मैव तत्त्वम्। तत्पुनरन्यतः सर्वतो निवारितम् अधिष्ठाने निमग्नं तिष्ठतीति भावः। तस्यामवस्थायां सर्वेभ्यो विषयेभ्यो व्यावृत्ततृष्णो युक्तो व्यवह्रियत इत्याह—** निःस्पृह इति॥ १८॥

भाष्यार्कप्रकाशः

**युक्तेति। आह्रियते** भुज्यते। **पादक्रमः** पादविक्षेपः; सञ्चार इति यावत्। न [७]केवलमाहाररहितो गमनरहितश्च स्यात् , नाप्यतिमात्रमाहारवान् सञ्चारवान् वा स्यादित्यर्थः। **कर्मसु** स्नानादिषु **चेष्टा** व्यापारः। **अवबोधो** जागरणम्॥ १७॥

**यदेति।** मनसः केवलात्मस्थितिलाभे सति तदात्मानन्दानुभवव्यग्रतया तन्मनो न बाह्यविषयानुभवसुखमपेक्षते, तुच्छत्वादस्य। अतः सर्वकामेषु निःस्पृहत्वं जायते। य एवंविधो योगी स युक्तः इत्युच्यते विद्वद्भिः, शास्त्रेण वा॥ १८॥

---

१. क्रमु पादविक्षेपे। क्रमः, पादाभ्यां संचरणमित्यर्थः। २. सापेक्षत्वेऽपि गमकत्वात् समासः। ३. 'बाह्यार्थचिन्ताम्' इति पा.। ४. षष्ठ्यन्तमिदं योगविशेषणम्। योगिनो भवति यो योगः तस्येत्यन्वयः। ५.**युक्तः** प्राप्तयोगः। ६.कल्पितस्येति। आत्मनीति शेषः। ७.अत्यन्तमाहाररहितः, सर्वथा गमनरहितश्च न स्यादित्यर्थः।

**योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥ १९ ॥**

**वातवर्जिते देशे स्थितो** नेङ्गते **न चलति, सा** उपमा **उपमीयतेऽनयेत्युपमा योगज्ञैश्चित्तप्रचारदर्शिभिः** स्मृता **चिन्तिता। योगिनो** यतचित्तस्य **संयतान्तःकरणस्य** युञ्जतो **योगमनुतिष्ठतः आत्मनः समाधिमनुतिष्ठत इत्यर्थः ॥ १९ ॥**

आनन्दगिरिकृतव्याख्या

उपमा **योगिनश्चित्तस्थैर्यस्योदाहरणमित्यर्थः। उपमाशब्दस्य प्रदीपविषयत्वसिद्ध्यर्थं करणव्युत्पत्तिं दर्शयति—** उपमीयत इति। योगिनो **यथोक्तविशेषणवतः, चित्तस्थैर्यस्येति शेषः ॥ १९ ॥**

**द्विविधः समाधिः - सम्प्रज्ञातोऽसम्प्रज्ञातश्च। ध्येयैकाकारसत्त्ववृत्तिर्भेदेन कथञ्चिज्ज्ञायमाना** सम्प्रज्ञातः **समाधिः। कथमपि पृथगज्ञायमाना सैव सत्त्ववृत्तिरसम्प्रज्ञातः समाधिः। तत्र सामान्येन समाधिलक्षणमभिधाय, असम्प्रज्ञातस्य समाधेरधुना लक्षणं**

भाष्यार्कप्रकाशः

**यथेति।** निवातस्थो दीपो यथा नेङ्गते, सा यतचित्तस्यात्मनो योगं युञ्जतो योगिनः उपमा स्मृता। **उपमोच्यते** उपमानमुच्यत इत्यर्थः। **यथेति।** यः इत्यर्थः। **सेति** विधेयप्राधान्यात् स्त्रीत्वम् , स इत्यर्थः। दीप इति यावत्। यो दीपो निवातस्थो नेङ्गते स दीपो योगिनः उपमा स्मृता, निवातस्थो निश्चलदीपो योगिनः उपमानभूतः इत्यर्थः। कैः स्मृतेत्यत आह— **योगज्ञैरिति।** योगिन एव स्वानुभवानुसारेण स्वस्योपमानं निवातस्थदीपमुक्तवन्तः इत्यर्थः। 'योगं युञ्जतः' इति पाकं पचति, वाचं वदतीत्यादिवन्निर्देशः। **यद्वा** योगशब्दसान्निध्यबलाद् युञ्जत इत्यस्य अनुष्ठानसामान्यमेवार्थः, न तु योगानुष्ठानविशेषः, पौनरुक्त्यात्। अत एवाह—**अनुतिष्ठत इति। आत्मनो योगं युञ्जतः** आत्मनः समाधिमनुतिष्ठत इत्यर्थः।

**आत्मा**ऽत्र मनः, तस्यैव समाधेयत्वात् , बुद्धिरिति वा, न तु प्रत्यक्, तस्य समाधानाद्ययोगात्। **अथवा** आत्मा प्रत्यगेव, विषयविषयिभावसम्बन्धे शेषे षष्ठी। **आत्मनो योगम्** आत्मविषयकं योगमित्यर्थः। **योगः** चित्तसमाधानम्। पूर्वोक्तार्थे तु समाधान-मात्रमेवार्थः। आत्मविषयकचित्तसमाधानं नाम आत्मनि चित्तसमाधानम् , तद् **युञ्जतो**ऽनुतिष्ठत इति। आत्मनि चित्तं समाहितवत इत्यर्थः। आत्मनि समाहितचित्तस्येति यावत्। **आत्मनो** मनसः इति मते तु— मनसो **योगं** समाधानं, [१]प्रकरणादात्मन्येवेति बोध्यम्।

यथा निवातस्थो दीपः न चलति तथा आत्मयोगे स्थितो योगी न चलतीति परमार्थः। न च - योगिनः आत्मत्वेन आत्मनश्चाचलत्वेन चलनस्य प्रसक्तिरेव नास्तीति कुतो निषेध इति - वाच्यम् ; बुद्धिचाञ्चल्यप्रयुक्तस्यारोपितचलनस्यात्मनि प्रसक्तत्वेन तन्निषेधसम्भवात्।

**यद्वा** [२]यतचित्तस्य योगं युञ्जतो योगिनः **आत्मनः** चित्तस्य सोपमेत्यन्वयः। एवं च निवातस्थितदीपवदात्मस्थितं योगिनश्चित्तं न चलतीति पर्यवसन्नार्थः। अयमेव निर्विकल्पसमाधिः, यत्र निर्वृत्तिकस्य मनसः आत्मस्वरूपे [३]लीनवदवस्थानम्।

[४]श्लोकस्य योजनान्तरमुच्यते— यतचित्तस्यात्मनो योगं युञ्जतो योगिनश्चित्तं नेङ्गत इत्यस्मिन्नर्थे यथा निवातस्थो दीपो नेङ्गते **सा** एषोऽर्थः उपमा दृष्टान्तो योगज्ञैः स्मृतेति। यथा निवातस्थो दीपो नेङ्गते तथा योगिनः आत्मस्थं चित्तं नेङ्गते इति वाक्यार्थद्वयस्य दृष्टान्तदार्ष्टान्तिकभाव इत्यर्थः। आत्मस्थयोगिचित्तं निवातस्थदीपवन्न चलतीत्येव पर्यवसन्नार्थः।

[५]अन्याऽपि योजना प्रदर्श्यते— **यथा** सम्यक् निवातस्थः, निवाते सम्यगवस्थापित इत्यर्थः, दीपो नेङ्गते **सा** निवातस्थो निश्चलः स दीप इत्यर्थः। अन्यत् पूर्ववत् ॥ १९ ॥

---

१. आत्मशब्दस्य मनःपरत्वे आत्मविषयकत्वं समाधानस्य प्रकरणाल्लभ्यमित्यर्थः। २. पूर्वस्मिन् व्याख्याने योगिनः उपमा निवातस्थदीपः। अस्मिंस्तु पक्षे योगिनश्चित्तस्योपमा निवातस्थदीपः। उपमेयसमर्पकम् आत्मपदं मनःपरम्। वैयधिकरण्येनान्वयः— योगिनो य आत्मा तस्येति। ३. लीनवदिति। न तु सुषुप्ताविव मनो लीयतेऽसंप्रज्ञातसमाधौ। तदुक्तम्— 'लीयते हि सुषुप्तौ तन्निगृहीतं न लीयते'(मा.का.३-३५) इति। ४. पूर्वस्मिन् कल्पे दीपः उपमा, अस्मिंस्तु 'निवातस्थो दीपो नेङ्गते' इति वाक्यार्थः उपमा 'योगिनः आत्मस्थं चित्तं नेङ्गते' इति वाक्यार्थस्य। पूर्वं यथाशब्दे थाल्प्रत्ययार्थमविवक्षित्वा यः इत्यर्थः स्वीकृतः, अस्मिंस्तु न तथा । ५. अस्यां योजनायां यथाशब्दस्य सम्यक् इति विवरणम्। निवातस्थनिश्चलदीपः विशिष्टः सेत्यनेन परामृष्टः।

**यत्रोपरमते चित्तं निरुद्धं योगसेवया।**
**यत्र चैवात्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति॥२०॥**
**सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियम्।**
**वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः॥२१॥**

**एवं योगाभ्यासबलादेकाग्रीभूतं निवातप्रदीपकल्पं सत् —** यत्रेति। यत्र **यस्मिन् काल** उपरमते **चित्तमुपरतिं गच्छति** निरुद्धं **सर्वतो निवारितप्रचारं** योगसेवया **योगानुष्ठानेन,** यत्र चैव **यस्मिंश्च काले** आत्मना **समाधिपरिशुद्धेनान्तःकरणेन** आत्मानं **परं** [1]**चैतन्यज्योतिःस्वरूपं** पश्यन् **उपलभमानः स्वे** एवात्मनि तुष्यति **तुष्टिं भजते॥२०॥**

**किञ्च—** सुखमिति। **सुखम्** आत्यन्तिकम् **अत्यन्तमेव भवतीत्यात्यन्तिकम्। अनन्तमित्यर्थः। यत्तद्** बुद्धिग्राह्यं **बुद्ध्यैवेन्द्रियनिरपेक्षया गृह्यत इति बुद्धिग्राह्यम्** अतीन्द्रियम् **इन्द्रियगोचरातीतम् , अविषयजनितमित्यर्थः।** वेत्ति **तदीदृशं सुखमनुभवति** यत्र **यस्मिन् काले,** [2]**न च एव,** अयं **विद्वानात्मस्वरूपे स्थितः, तस्माद्** नैव चलति तत्त्वतः **तत्त्वस्वरूपान्न प्रच्यवते इत्यर्थः ॥२१॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**यत्रोपरमत इत्यादि।** यच्छब्दस्य तं विद्यादिति व्यवहितेन सम्बन्धः। किमर्थं पुनरनुसन्धानेन योगस्य कर्तव्यतोच्यत

आनन्दगिरिकृतव्याख्या

**विवक्षन्नाह—** एवमिति। काले **समाध्युपलक्षिते। एवकारस्तुष्यतीत्यनेन सम्बध्यते। चकारस्य सम्बन्धमाह—** यस्मिंश्चेति। **कालस्तु पूर्ववत्। कर्मकारकत्वेन निर्दिष्टमात्मानं तत्पदार्थत्वेन व्याचष्टे—** परमिति। **आत्मनीत्यस्य त्वम्पदार्थविषयत्वमाह—** स्व एवेति। **परमात्मानं प्रतीच्येव तद्भावेनापरोक्षीकुर्वन् अतुष्टिहेत्वभावात् तुष्यत्येवेत्यर्थः। तस्मिन् काले योगसिद्धिर्भवतीति शेषः॥२०॥**

**योगसिद्धिकालं प्रकारान्तरेण प्रकटयति—** किञ्चेति। **बुद्धिशब्दः स्वानुभवविषयः। इन्द्रियनिरपेक्षस्वानुभवगम्यत्वोक्तेरतीन्द्रियमिति पुनरुक्तमित्याशङ्क्याह—** अविषयेति। **पदच्छेदः—** न चेत्यादि। **अपेक्षितपूरणम्—** आत्मस्वरूप इति। **तस्मात् तत्त्वतः इति**

भाष्यार्कप्रकाशः

**यत्रेति।** प्रदीपकल्पं सदिति चित्तविशेषणम्। **उपरमते** निर्व्यापारं भवति, **सर्वतः** सर्वविषयेभ्यः। **उपलभमानः** अनुभवन् । **ज्योतिर्ज्ञानम्॥२०॥**

**सुखमिति।** यत्तत् प्रसिद्धमित्यर्थः। यद्वा यत् तत् इति पदद्वयम्। यदात्यन्तिकमतीन्द्रियं बुद्धिग्राह्यं च तत् सुखं यत्र वेत्तीत्यन्वयः। **बुद्धिग्राह्यमिति।** 'दृश्यते त्वग्र्यया बुद्ध्ये'ति श्रुतेरिति भावः। यद्यपि विषयसुखमपि बुद्ध्यैव गृह्यते, तथापीन्द्रियद्वारा गृह्यते। विषयेन्द्रियसंयोगाभावे विषयसुखस्यैवानुदयेन कुतः पुनस्तत्प्रत्यक्षम्? केवलाया बुद्धेरित्याह— **इन्द्रियनिरपेक्षयेति।** कुत इन्द्रियनिरपेक्षत्वम्? अत आह— **अतीन्द्रियमिति।** इन्द्रियगोचरं हि वस्तु बुद्ध्या तत्सापेक्षया गृह्यते, इदं त्विन्द्रियातीतमिति नात्र बुद्धेरिन्द्रियापेक्षेति भावः। ननु विषयसुखमपि मानसिकत्वेनातीन्द्रियमेव, मनो हि तव मते नेन्द्रियम् , अत आह— **अविषयजनितमिति।** विषयेन्द्रियसंयोगजं सुखमतीन्द्रियं न भवति, इन्द्रियपरतन्त्रत्वादिति भावः। ईदृशमुक्तलक्षणं **सुखम्** आत्मस्वरूपभूतमानन्दम्। **अयं** योगीत्यर्थः। **तस्मात्** तत्त्वतः तत्त्वादात्मस्वरूपादित्यर्थः। न चलतीत्यस्यार्थमाह—**[न] प्रच्यवत**

---

१. 'चैतन्यं ज्योतिःस्वरूपम्' इति पा.। २. व्याख्यानाङ्गपदच्छेदप्रदर्शनमिदम्। द्र. आनन्दगिरिव्याख्या।

**यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।**
**यस्मिन् स्थितो न दुःखेन गुरुणाऽपि विचाल्यते॥ २२॥**
**तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितम्।**
**स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा॥ २३॥**

**किञ्च—**यमिति। यं लब्ध्वा **यम् आत्मलाभं** लब्ध्वा **प्राप्य च** अपरम् **अन्यं** लाभं **लाभान्तरं ततो ऽधिकमस्तीति** न मन्यते **न चिन्तयति। किञ्च यस्मिन्नात्मतत्त्वे स्थितो** दुःखेन **शस्त्रनिपातादिलक्षणेन गुरुणा महताऽपि न विचाल्यते॥ २२॥**

**'यत्रोपरमते' इत्याद्यारभ्य यावद्भिर्विशेषणैर्विशिष्ट आत्मावस्थाविशेषो योग उक्तः—** तमिति। **तं** विद्याद् **विजानीयाद्** दुःखसंयोगवियोगं **दुःखैः संयोगो दुःखसंयोगस्तेन वियोगो दुःखसंयोगवियोगस्तं दुःखसंयोगवियोगं योग इत्येव संज्ञितं विपरीतलक्षणेन** विद्याद् **विजानीयादित्यर्थः। योगफलमुपसंहृत्य पुनरन्वारम्भेण योगस्य**

आनन्दगिरिकृतव्याख्या

**सम्बन्धः।** नैवेत्येवकारसम्बन्धोक्तिः। **चकारः सप्तम्या सम्बन्धनीयः**[1]**। यत्रेति पूर्ववत् सम्बन्धः॥ २१॥**

**प्रकारान्तरेण प्रकृतं योगं विशिनष्टि—** किञ्चेति। **'आत्मलाभान्न परं विद्यते' इति स्मृत्या व्याचष्टे—** यमात्मलाभमिति। लाभान्तरं **पुरुषार्थभूतम् ;** ततः **तस्मादात्मलाभादिति यावत्। तं विद्यादित्युत्तरत्र सम्बन्धः। यस्मिन्नित्याद्यवतारयति—** किञ्चेति। **अपरिपक्वयोगो यथा दर्शितेन दुःखेन प्रच्याव्यते, न चैवं विचाल्यते यस्मिन् स्थितो योगी, तं योगं विद्यादिति पूर्ववत्॥ २२॥**

**'तं विद्यादि'त्यादि अपेक्षितं पूरयन्नवतारयति—** यत्रेति। **तमित्यात्मावस्थाविशेषं परामृशति। दुःखसंयोगस्य वियोगो वियोग-संज्ञितो युज्यते, स कथं योगसंज्ञितः स्यादित्याशङ्क्याह—** विपरीतेति। **इयं हि योगावस्था समुत्खातनिखिलदुःखभेदेति दुःखसंयोगाभावो योगसंज्ञामर्हतीत्यर्थः। उपसंहृते योगफले किमिति पुनर्योगस्य कर्तव्यत्वमुच्यते? तत्राह—** योगफलमिति। **प्रकारान्तरेण योगस्य**

भाष्यार्कप्रकाशः

**इति।** नैव भ्रश्यतीत्यर्थः। योगिन आत्मस्वरूपाच्चित्तस्य भ्रंशः साक्षादेव सम्भवति, विदुषस्तु अनात्मतादात्म्याध्यासद्वारेति विवेकः॥ २१॥

**यमिति।** यं लब्ध्वा ततोऽधिकमपरं लाभं न च मन्यते, यस्मिन् स्थितो गुरुणा दुःखेनापि न विचाल्यते। लभ्यत इति **लाभः** प्राप्यं वस्तु॥ २२॥

**तमिति।** तं दुःखसंयोगवियोगं योगसंज्ञितं विद्यात्। स योगः अनिर्विण्णचेतसा निश्चयेन योक्तव्यः। **दुःखसंयोगवियोगः** दुःखसंयोगाभावः, दुःखासंयोग इति यावत्। ननु वियोगस्य कथं योगसंज्ञेत्यत आह— **विपरीतलक्षणेनेति।** विरुद्धलक्षणयेत्यर्थः। **यद्वा** योगेऽप्यस्मिन् दुःखसंयोगाभावरूपविपरीतलक्षणसत्त्वाद् योगमेवामुं दुःखसंयोगवियोगं विद्यात्। अस्मिंश्च पक्षे योगसंज्ञितं तं दुःखसंयोगवियोगं विद्यादित्यन्वयः।

**ननु** यत्तच्छब्दार्थयोरैक्येन भाव्यत्वात् 'यत्रोपरमते' 'यत्र चैवात्मना' 'वेत्ति यत्र न चैवायम्' इत्येषु स्थलेषु यच्छब्दस्य कालार्थ उक्तः, 'यं लब्ध्वा' 'यस्मिन् स्थितः' इत्यत्र च आत्मार्थ उक्तः, 'तं विद्या'दिति तच्छब्दस्य तु योगार्थ उक्त इति कथमिदमुप-पद्यते यत्तदोर्भिन्नार्थत्वमिति चेद्? **उच्यते**— तं तत्कालोपलक्षितं तदात्मविषयकं च योगमित्यर्थाददोष इति।

**ननु रामानुजभाष्यरीत्या** यच्छब्दपञ्चकस्य योगार्थ एव वाच्यः, तथा च सति तं योगमिति स्वरसतः सिध्यति

१. यस्मिंश्च काले इत्येवं संबन्ध इति भावः।

**कर्तव्यतोच्यते निश्चयानिर्वेदयोर्योगसाधनत्वविधानार्थम्। स यथोक्तफलो योगो** निश्चयेन **अध्यवसायेन योक्तव्यः** अनिर्विण्णचेतसा **न निर्विण्णमनिर्विण्णम्, किं तत्? चेतः, तेन निर्वेदरहितेन चेतसा चित्तेनेत्यर्थः॥२३॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

इत्याशङ्क्याह— **निश्चयानिर्वेदयोरिति।** शास्त्रानुसारिणाऽऽचार्येणोपदिष्टे विश्वासो **निश्चयः। अनिर्वेदः** अनुद्विग्नचित्तता, तयोरित्यर्थः॥२३॥

आनन्दगिरिकृतव्याख्या

**कर्तव्यत्वोपदेशारम्भोऽत्र** अन्वारम्भः। **योगं युञ्जानः तत्क्षणादुक्तां संसिद्धिमलभमानः संशयानो निवर्तेतेति** [१]**तन्निवृत्त्यर्थं पुनः कर्तव्यत्वोपदेशोऽर्थवानिति मत्वाऽऽह—** निश्चयेति। **तयोः साधनत्वविधानमेवाक्षरयोजनया साधयति—** स यथेति। **इह जन्मनि जन्मान्तरे वा सेत्स्यतीत्य**ध्यवसायः[२]। योक्तव्यः **कर्तव्यः॥२३॥**

भाष्यार्कप्रकाशः

यत्तदोरेकार्थत्वम्, इदानीं तु तच्छब्दस्य लक्षणाश्रयणं दुष्टमिति चेत्, **मैवम्**; यत्र योगे योगसेवया चित्तं निरुद्धमिति वाक्यस्य पुनरुक्तिदोषग्रस्तत्वात्। 'योगश्चित्तवृत्तिनिरोधः' इति **पतञ्जलिना** [३]भाषितम्। इह च 'योगश्चित्तसमाधानम्' इत्युक्तम्। तथा च चित्तं निरुद्धमित्यस्य योग इत्यस्य चैकार्थ्यात् पुनरुक्तिः; योगे योगसेवयेति पुनरुक्तिर्विदितैव।

किञ्च चित्तनिरोधरूपस्य योगस्य चित्तनिरोधाधिकरणत्वमसम्भवि। उक्तं हि— योगे चित्तं निरुद्धमित्यधिकरणत्वं योगस्य। एकस्यैव योगस्याधिकरणत्वं, योगसेवयेति हेतुत्वं च विरुद्धम्। तस्माच्चित्तनिरोधे चित्तनिरोधसेवया चित्तनिरोध इति वाक्यार्थस्य दुष्टत्वं सर्वविदितम्। तथा यत्र योगे आत्मानमात्मना पश्यन्नित्यप्ययुक्तम्, मनसा आत्मदर्शनस्यैव योगत्वात्। योगो हि आत्मनि चित्तसमाधानम्। तथा च योगस्यैव योगाधिकरणत्वमिहापि विरुद्धम्। यं योगं लब्ध्वा ततोऽधिकमपरं लाभं न मन्यत इत्यप्ययुक्तम्, योगप्राप्यस्य योगादधिकस्य मोक्षलाभस्य योग्याकाङ्क्षितस्य सत्त्वात्। अस्मन्मते तु आत्मस्वरूपस्यैव मोक्षत्वान्न मोक्षस्याधिक्यमपरत्वं वा स्यादात्मन इति नैष दोषः। यस्मिन् स्थित इत्यस्य योगे स्थित इत्यप्ययुक्तम्, योगस्य चित्तसमाधानात्मकस्य क्रियारूपस्य पुरुषाधिकरणत्वासम्भवात्। न च स्थित इत्यस्य व्यापृत इत्यर्थ इति वाच्यम्; तदर्थस्य लाक्षणिकत्वेनाभिधेयत्वाभावात्। ष्ठा गतिनिवृत्ताविति हि धात्वर्थः स्मर्यते इति।

**यच्च—** उपरमते अतिशयेन रमते इति **रामानुजः,** तच्च **तुच्छम्**, उपोपसर्गसङ्गतरमधातोरुपरत्यर्थस्यैव दर्शनात्, अर्थान्तरवर्णस्य च क्लिष्टत्वात्, उपरमेद् उपरत उपरम्येत्यादौ त्वयाऽप्यस्मदुक्तार्थस्यैव स्वीकृतत्वात्।

उपसंहृते योगफले किमिति योगस्य पुनः कर्तव्यत्वमुच्यते? तत्राह— **योगफलमिति।** आत्मसुखानुभवः आत्मतुष्टिरात्मलाभः दुःखसंयोगवियोगश्चेत्येतानि योगफलानि। फलमिति तु जात्येकवचनम्। प्रकारान्तरेण योगस्य कर्तव्यत्वोपदेशारम्भो ऽत्रान्वारम्भः। किमर्थं तद्वचनम्? अत आह— **निश्चयेति।** निश्चयानिर्वेदौ योगस्य साधनभूतौ। अतस्तावस्य योगारम्भे कर्तव्यावित्यर्थः। स इत्यस्यार्थमाह— **यथोक्तेति।** यथोक्तानि फलानि यस्य स यथोक्तफलो योगः। ध्यानयोगः निश्चयेन योक्तव्यः। केन योक्तव्य इति करणाकाङ्क्षां पूरयति— **अनिर्विण्णचेतसेति।** न निर्विण्णमनिर्विण्णम्, निर्वेदरहितमित्यर्थः। तच्च तच्चेतः इति कर्मधारयः, तेन। कर्ता तु योगसाधकः पुरुष इति बोध्यम्। साधकेन अनिर्विण्णचेतसा निश्चयेन स योगो योक्तव्य इत्यन्वयः। अनिर्विण्णं चेतो यस्य तेनेति बहुव्रीहिसमासेऽपि यद्यपि कर्तृलाभः, तथापि करणस्य चेतसः प्राधान्येन निर्देशो न स्यात्। तद्धि करणं प्राधान्येन ज्ञेयम्। कर्ता तु वचनं विनाऽपि सिध्यत्येवेति कर्मधारयसमास उक्तः। योगसिद्ध्यादिषु संशये, योगानुष्ठाने निर्वेदे च सति योगो न सिध्येत्, अतस्तौ द्वौ न कर्तव्याविति फलितार्थः॥२३॥

---

१. निवृत्तिनिवृत्त्यर्थमित्यर्थः। २. अत्र मधुसूदन्याम्— 'उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिन्दुना। मनसो निग्रहस्तद्वद्भवेदपरिखेदतः॥' इति गौडपादाचार्यवचनोपन्यासपूर्वकमनिर्वेदस्य साधनत्वं विशदीकृतं तत्रैव द्र.। ३. सूत्रितमित्यर्थः।

**सङ्कल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः।**
**मनसैवेन्द्रियग्रामं विनियम्य समन्ततः॥२४॥**

**किञ्च—** सङ्कल्पेति। सङ्कल्पप्रभवान् **सङ्कल्पः प्रभवो येषां कामानां ते सङ्कल्पप्रभवाः कामास्तान्** त्यक्त्वा **परित्यज्य सर्वान्** अशेषतो **निर्लेपेन। किञ्च मनसैव विवेकयुक्तेन** इन्द्रियग्रामम् **इन्द्रियसमुदायं** विनियम्य **नियमनं कृत्वा** समन्ततः **समन्तात्॥२४॥**

आनन्दगिरिकृतव्याख्या

**इतश्च योगस्य कर्तव्यत्वमिति प्रतिजानीते—** किञ्चेति। **केन क्रमेण कर्तव्यत्वमित्यपेक्षायामाह—** सङ्कल्पेति। सङ्कल्पः **शोभनाध्यासः। सर्वानित्युक्त्वा पुनरशेषत इति पुनरुक्तिरित्याशङ्क्याह—** निर्लेपेनेति। **यथा शेषो न भवति तथा सर्वेषां कामानां शोभनाध्यासाधीनानां त्यागस्य योगानुष्ठानशेषत्ववद् विवेकयुक्तेन मनसा करणसमुदायस्य सर्वतो नियमनमपि तत्र शेषत्वेन कर्तव्यमित्याह—** किञ्चेति॥२४॥

भाष्यार्कप्रकाशः

**सङ्कल्पेति**। प्रभवत्यस्मादिति **प्रभवः** कारणम्। सङ्कल्पात् प्रभवन्तीति सङ्कल्पप्रभवा इत्यपि वक्तुं शक्यम्। **कामाः** विषयाभिलाषाः। **अशेषतो** निःशेषेण। सति कामशेषे तेन लेपः स्यादिति फलितमाह— **निर्लेपेनेति।** कामानां सङ्कल्पप्रभवत्वविशेषणं तु कामत्यागः सङ्कल्पत्यागात् सुकर इति द्योतयितुम्। तेन सर्वसङ्कल्पत्यागपूर्वकं सर्वकामपरित्यागं कृत्वेति सिध्यति। समन्ततः सर्वविषयेभ्य इत्यर्थः। **विनियम्य** निवर्त्य। मनोविनियमने इन्द्रियविनियमनम् अप्रयत्नत एव सिध्यति, मनोव्यापारपूर्वकत्वादिन्द्रियव्यापारस्येति भावः।

यत्तु **रामानुजः**— काम्यन्त इति कामा विषयाः। ते द्विविधाः- स्पर्शजाः सङ्कल्पजाश्चेति। तत्र स्पर्शजाः शीतोष्णादयः स्वरूपतस्त्यक्तुं न शक्याः; सङ्कल्पजास्तु पुत्रमित्रादयः स्वरूपेणैव त्यक्तुं शक्याः; अत एवाशेषतः सङ्कल्पजाः कामास्त्याज्या इति, **तन्मन्दम्**। किमत्र स्पर्शो नाम त्वगिन्द्रियग्राह्यो गुणः? यद्वा विषयेन्द्रियसम्बन्धः? आद्ये - शीतोष्णभेदभिन्नस्य स्पर्शस्यैव विषयत्वेन स्पर्शजत्वं शीतोष्णादेर्न सम्भवति। किञ्च यथा असङ्कल्पजस्पर्शविषयसत्त्वम् , तथा असङ्कल्पजशब्दादिविषयसत्त्वमपीति न विषयद्वैविध्यसिद्धिः। दरीस्थितेन जलस्थितेन वा योगिना शीतस्पर्शस्य उष्णस्पर्शस्य च स्वरूपतस्त्यक्तुं शक्यत्वान्न तयोः स्वरूपतोऽत्याज्यत्वसिद्धिः। द्वितीये - विषयेन्द्रियसम्बन्धरूपस्पर्शोद्भवा विषया इत्ययुक्तम् , विषयोत्पत्तेः प्रागेव विषयेन्द्रियसम्बन्धस्य कारणत्वेन वर्तमानत्वेन विषयोत्पत्तेः प्रागेव विषयसिद्धेः, इन्द्रियसंसृष्टविषयाद् विषयोत्पत्तिरिति स्वस्मात् स्वोत्पत्तिप्रसङ्गाच्च, विषयोत्पत्तेः प्राग्विषयेन्द्रियसम्बन्धायोगाच्च।

तस्मात् स्पर्शजा भोगा एव, न तु विषयाः। स्पर्शास्तु विषया एव, स्पृश्यन्त इति स्पर्शा इति 'मात्रास्पर्शास्तु कौन्तेये'त्यत्र निरुक्तत्वात्। तथा पुत्रक्षेत्रादयो विषयाश्च न स्वसङ्कल्पजाः, किन्त्वीश्वरसङ्कल्पजा एव – 'तदैक्षत बहु स्यां प्रजायेये'ति सङ्कल्प्य 'तत्सृष्ट्वा तदेवानुप्राविशत् , सच त्यच्चाभवदिति, तत्तेज ऐक्षत, तत्तेजः सृष्ट्वा' इत्यादिना ईश्वरस्य जगत्स्रष्टृत्वस्योक्तत्वाद् वेदेन।

इमे चेश्वरसङ्कल्पजा विषया अपि सर्वे न स्वरूपतस्त्यक्तुं शक्याः, न हि सार्वभौमेण राज्ञा भूरूपो विषयस्त्यक्तुं शक्यः, सर्वस्या अपि भूमेः स्वीयक्षेत्रत्वात्। परन्तु तत्र स्वीयत्वाभिमान एव त्यक्तुं शक्यते। स एव हि जीवसङ्कल्पसृष्टः प्रपञ्चः जीवस्य बन्धकश्च।

न हि स्तनादिमत्स्त्रीपिण्डे भार्यात्वरूपभोग्यत्वबुद्ध्यभावे, मृन्मये क्षेत्रे स्वीयत्वबुद्ध्यभावे च तदुभयं पुरुषं बध्नीयात् , स हि जीवसङ्कल्पसम्भवः स्वीयत्वाद्यभिमानरूपः काममयः प्रपञ्चः योगिना सर्वात्मना त्याज्यः योगविरोधात्। अत एवोक्तम् – 'सङ्कल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः' इति। ईश्वरसङ्कल्पसृष्टो विषयप्रपञ्चस्तु चेलाजिनकुशासनादिरूपो योगिनः साधनभूत एवेति न तस्य सर्वस्यापि त्याग उचितः, शक्यश्च। तस्मात् कामा अत्र विषयाभिलाषा एव, न तु विषयाः॥२४॥

**शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया।**
**आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्॥ २५॥**

शनैरिति। **शनैःशनैः, न सहसा** उपरमेद् **उपरतिं कुर्यात्। कया? बुद्ध्या। किंविशिष्टया?** धृतिगृहीतया **धृत्या धैर्येण गृहीतया धृतिगृहीतया, धैर्येण युक्तयेत्यर्थः।** आत्मसंस्थम् **आत्मनि संस्थितम् 'आत्मैव सर्वम्, न ततोऽन्यत्**

आनन्दगिरिकृतव्याख्या

**कामत्यागद्वारेणेन्द्रियाणि प्रत्याहृत्य किं कुर्यादिति शङ्कितारं प्रत्याह—** शनैः शनैरिति। **सहसा विषयेभ्यः सकाशादुपरमे मनसो न स्वास्थ्यं सम्भवतीत्यभिप्रेत्याह—** न सहसेति। **तत्र साधनं धैर्ययुक्ता बुद्धिरित्याह—** कयेत्यादिना। [1]**भूम्यादीरव्याकृतपर्यन्ताः प्रकृतीरष्ट पूर्वपूर्वत्र धारणं कृत्वोत्तरोत्तरक्रमेण प्रविलापयेदिति भावः। अव्यक्तमात्मनि प्रविलाप्यात्ममात्रनिष्ठं मनो विधाय चिन्तयितव्याभावाद् अतिस्वस्थो भवेदित्याह—**आत्मेति। **तत्र संस्थितिमेव मनसो विवृणोति—**आत्मैवेति। **योगविधिमुपक्रम्य किमिद-**

भाष्यार्कप्रकाशः

**शनैरिति।** शनैःशनैरिति [2]नित्यार्थे द्विर्भावः। धृतिगृहीतया बुद्ध्या मनः आत्मसंस्थं कृत्वा शनैःशनैरुपरमेत्, किञ्चिदपि न चिन्तयेत्, उपरमेदित्यस्यैव व्याख्यानभूतं तुरीयपादम्[3]।

ननु मनसः कथमात्मनि स्थितिः? 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे'त्युक्तलक्षणे भूमात्मनि निर्विशेषे चिन्मात्रे अद्वितीयब्रह्मणि निरवकाशे परमार्थसत्ये मनसो व्यावहारिकसत्यस्य जडस्य द्वितीयवस्तुनः स्थित्ययोगात्। सत्यामात्मनि मनसः स्थितौ तेन मनसा सद्वितीयः स्यात् खल्वात्मा, सविशेषश्च जडसंसृष्टश्च। अत एव हि – 'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह' इति श्रुतिर्मनसोऽप्यविषयत्वं वक्त्यात्मनः। न च सर्वभूतानि चात्मनीति सर्वस्यापि जगत आत्मन्येव स्थितत्वस्य वक्ष्यमाणत्वेन मनोमात्रस्यात्मनि स्थितौ को व्याघात इति वाच्यम्; आत्मनि सर्वभूतस्थितेरविद्याकृतत्वात्। अविद्याकृतानि हि सर्वाणि भूतानि न परमार्थसत्यानि। अन्यथा 'एकमेवाद्वितीयं ब्रह्म' इति श्रुतिव्याकोपः स्यात्। न च तथैवात्मनि मनसः स्थितिरप्यविद्याकृतैवेति वाच्यम्; तदभिप्रायवर्णनस्येहानुपयुक्तत्वात्। न ह्यात्मनि मनो रज्जौ सर्पवदविद्यया कल्पितं वर्तत इत्यभिप्रायेण 'आत्मसंस्थं मनः कृत्वे'त्युक्तम्, तथा सति कृत्वेत्यस्य वैयर्थ्यापत्तेः, करणात् प्रागपि तत्रैव सत्त्वात्। वस्तुविषयेभ्यो मनो निवर्त्य आत्मन्येव स्थापयेदिति ह्युच्यते। इदं च स्थापनं नाविद्याकार्यम्, किन्तु विद्याकार्यमेव। तस्मात् कथमात्मनि मनः स्थापयितुं शक्यते योगिना विदुषा वेति, अत आह— **आत्मैवेति।** पेटिकायां वस्त्रस्येवात्मनि मनसः स्थापनं नेह विवक्षितम्, किन्तु आत्मतत्त्वानुसन्धानमेव मनस आत्मनि स्थापनमिति विवक्षितम्। आत्मतत्त्वं च 'इदं सर्वं यदयमात्मा, सर्वं खल्विदं ब्रह्म, नान्यत्किञ्चन मिषदि'त्यादिश्रुतिभ्यः 'सर्वमात्मैव, आत्मनोऽन्यत्किञ्चिदपि नास्ती'त्येवंरूपमिति ज्ञायते इति।

**ननु** 'न ततोऽन्यत् किञ्चिदस्ती'ति सर्वाभावत्वं युक्तम्, अद्वितीयत्वाद् भूमात्मनः। सच्चिदानन्दस्वरूपस्यात्मनस्तु सर्वात्मकत्वमयुक्तम्, सर्वस्य अनृतजडदुःखात्मकत्वात् प्रपञ्चस्य। अतः कथम् 'आत्मैव सर्व'मिति ज्ञानं यथार्थज्ञानं भवितुमर्हतीति चेत्, **उच्यते**— रज्जौ सर्पस्येवात्मन्येव सर्वस्य मायया कल्पितत्वेन भ्रान्त्या प्रतीयमानमिदं सर्वं वस्तुत आत्मैव, यथा रज्जौ भ्रमेण प्रतीयमानः सर्पो वस्तुतो रज्जुरेवेति। तस्माद् रज्जोः सर्पात्मत्वमिव, स्थाणोः पुरुषात्मत्वमिव, गगनस्य नीलात्मकत्वमिवात्मनः सर्वात्मकत्वं युक्तमेवेति।

---

१. एताः प्रकृतयः 'भूमिरापोऽनलो वायुः खम्' इति श्लोकोक्ताः ज्ञेयाः। पूर्वपूर्वस्य कार्यस्योत्तरोत्तरस्मन् कारणे प्रविलापनं कारणातिरिक्ततया तदभावचिन्तनम्। अव्याकृतस्य तु अधिष्ठाने आत्मनि प्रविलापनम्। अत्र मधुसूदन्याम्— 'यच्छेद्वाङ्मनसी प्राज्ञस्तद् यच्छेज्ज्ञान आत्मनि। ज्ञानमात्मनि महति नियच्छेत् तद्यच्छेच्छान्त आत्मनि॥' [क.उ. १.३.१३] इति श्रुतिमुदाहृत्य वागादीन्द्रियवृत्तिनिरोधक्रमेण भूमिकाचतुष्टयं परिकल्प्य मनसः आत्मसंस्थता विस्तरेण निरूपिता तत्रैव द्रष्टव्या। २. 'नित्यवीप्सयोः'(पा.सू. ८-१-४) इति सूत्रेणेति भावः। तत्र **नित्यत्वं** पौनःपुन्यम्। नात्र वीप्सेति भावः। ३. 'न किञ्चिदपि चिन्तयेत्' इति पादः उपरमेदित्यस्यैव व्याख्यानभूतः इत्यर्थः। पादः इति युक्तम्।

**यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।**
**ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥ २६॥**

**किञ्चिदस्ती'त्येवमात्मसंस्थं मनः कृत्वा, न किञ्चिदपि चिन्तयेत्। एष योगस्य परमो [१]विधिः॥ २५॥**

**तत्रैवमात्मसंस्थं मनः कर्तुं प्रवृत्तो योगी—** यत इति। यतो यतः **यस्माद्यस्माद् निमित्ताच्छब्दादेः** निश्चरति **निर्गच्छति [२]स्वाभाविकदोषाद् मनः** चञ्चलम् **अत्यर्थं चलम् , अत एवास्थिरम् ,** ततस्ततः **तस्मात्तस्माच्छब्दादेः निमित्ताद्** नियम्य **तत्तन्निमित्तं याथात्म्यनिरूपणेनाभासीकृत्य[३] वैराग्यभावनया च** एतद् **मनः** आत्मन्येव वशं नयेद् **आत्मवश्यतामापादयेत्। एवं योगाभ्यासबलाद् योगिनः आत्मन्येव प्रशाम्यति मनः[४]॥ २६॥**

आनन्दगिरिकृतव्याख्या

**मुक्तमित्याशङ्क्याह—** एष इति। **यन्मनसो नैश्चल्यमिति शेषः॥ २५॥**

**ननु मनसः शब्दादिनिमित्तानुरोधेन रागद्वेषवशादत्यन्तचञ्चलस्यास्थिरस्य तत्र तत्र स्वभावेन प्रवृत्तस्य कुतो नैश्चल्यं नैश्चिन्त्यं चेति, तत्राह—** तत्रेति। **योगप्रारम्भः सप्तम्यर्थः।** एवंशब्देन **मनसैवेत्यादिरुक्तप्रकारो गृह्यते।** स्वाभाविको दोषो **मिथ्याज्ञानाधीनो रागादिः। शब्दादेर्मनसो नियमनं कथमित्याशङ्क्याह—** तत्तन्निमित्तमिति। याथात्म्यनिरूपणं **क्षयिष्णुत्वदुःखसंमिश्रत्वाद्यालोचनम्। तेन तत्र तत्र वैराग्यभावनया तत्तदाभासीकृत्य ततस्ततो नियम्यैतन्मन इति सम्बन्धः। मनोवशीकरणेनोपशमे किं स्यादित्याशङ्क्याह—** एवमिति। योगाभ्यासो **विषयविवेकद्वारा मनोनिग्रहाद्यावृत्तिः॥ २६॥**

भाष्यार्कप्रकाशः

**न किञ्चिदपि चिन्तयेदिति।** आत्मनोऽन्यस्य कस्यचिदपि वस्तुनोऽभावात् किञ्चिदपि न चिन्तयेत् , किन्त्वात्मानमेव चिन्तयेत् , इयमेवात्मैकचिन्ता उपरतिरित्युच्यते, सर्वव्यापारोपरमरूपत्वात्। **एष इति।** उपरम इत्यर्थः। आत्मैकचिन्तनमिति यावत्॥ २५॥

यत इति श्लोकमवतारयति— **तत्रेति।** योगारम्भे इत्यर्थः। चञ्चलमस्थिरं मनः यतो यतो निःसरति[निश्चरति] ततस्तत एतन्नियम्यात्मन्येव वशं नयेत्। यतोयतः ततस्ततः इति च वीप्सार्थे द्विर्भावः। **निमित्तादिति।** मनसो निःसरणक्रियां प्रति हेतुभूतादित्यर्थः। मनो हि शब्दाद्यर्थः[शब्दाद्यर्थं ग्रहीतुं?] श्रोत्रादिद्वारा बहिर्निर्गच्छति। **स्वाभाविकदोषादिति।** मनसः प्रवृत्तिस्वभावत्वादित्यर्थः। अग्नेरौष्ण्यादिवद् मनसः प्रवृत्तिरेव स्वभावः, न तु निवृत्तिरिति भावः। **स्वाभाविकः** स्वभावसिद्धः। स चासौ दोषः प्रवृत्तिरूपः स्वाभाविकदोषः, तस्मादित्यक्षरार्थः। सङ्कल्पविकल्पात्मकस्य मनसः प्रवृत्तिरेव स्वभावः, प्रवृत्तेः सङ्कल्पविकल्पपूर्वकत्वादिति रहस्यम्। **स्वाभाविकदोषो** रागादिरिति वा। कथं नियमनम्? अत आह— **तत्तदिति।** निमित्तभूतानां शब्दादीनां तेषां तेषां विषयाणां याथात्म्यं मृषात्वरूपम् , तस्य निरूपणेन हेतुना। **अभावीकृत्य** तत्तन्निमित्तान्यभावरूपाणि कृत्वा - मृषैवायं शब्दादिप्रत्ययः, न तु वस्तुतः शब्दादयः सन्ति - आत्मान्यस्य सर्वस्य मिथ्यात्वादित्येवं विवेकज्ञानेन मनसः शब्दादिषु प्रवृत्तिं वारयित्वेत्यर्थः।

एवं मनसः शब्दादिसकाशान्निवर्तने तत्तद्याथात्म्यरूपणमेकं हेतुमुक्त्वा अन्यमाह— **वैराग्यभावनया चेति।** क्षयिष्णुत्वात् सातिशयत्वाद् दुःखोदर्कत्वाच्च न विषयेषु सक्तव्यमित्येवं विषयवैराग्यमुत्पाद्येत्यर्थः। **वैराग्यस्य** विरागत्वस्य **भावना** चिन्तनं तयेत्यक्षरार्थः। **आत्मन्येवेति।** न तु विषयेष्वित्येवकारार्थः। मनसो विषयपारवश्यं वारयित्वा स्वाधीनतां सम्पादयेदित्यर्थः। **एवं** पूर्वोक्तप्रकारेण मनसो विषयप्रवृत्तिवारणपूर्वकमात्मप्रावण्यापादनेनेत्यर्थः। **प्रशाम्यति** प्रकर्षेणोपशमं प्राप्नोति। आत्मन्येव लयं प्राप्नोतीत्यर्थः। 'प्रशान्तमनस'मित्युत्तरश्लोके मनः प्रशान्तेर्वक्ष्यमाणत्वादिह तदानुगुण्येन भाष्ये वाक्यशेष उक्त इति बोध्यम्॥ २६॥

१. 'अवधिः' इति पा.। २. 'स्वभावदोषात्' इति पा.। ३. 'अभावीकृत्य' इति रा. पा.। ४. अत्र मधुसूदन्याम्— उपायेन निगृह्णीयात् इत्यादीनि गौडपादाचार्यवचनान्युदाहृत्य मनोवशीकरणप्रकारो विस्तरेण निरूपितः तत्रैव द्रष्टव्यः।

**प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्।**
**उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्॥ २७॥**
**युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः।**
**सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते॥ २८॥**

प्रशान्तेति। प्रशान्तमनसं [1]**प्रशान्तं मनो यस्य स प्रशान्तमनास्तं प्रशान्तमनसं** ह्येनं **योगिनं सुखमुत्तमं निरतिशयम्** उपैति **उपगच्छति।** शान्तरजसं **प्रक्षीणमोहादिक्लेशरजसमित्यर्थः।** ब्रह्मभूतं **जीवन्मुक्तं 'ब्रह्मैव सर्वं'मित्येवं निश्चयवन्तं ब्रह्मभूतम्** अकल्मषम् [2]**धर्माधर्मादिवर्जितम्॥ २७॥**

युञ्जन्निति। **युञ्जन्** एवं **यथोक्तेन क्रमेण योगी योगान्तरायवर्जितः सदा आत्मानं,** विगतकल्मषो **विगतपापः** सुखेन **अनायासेन** ब्रह्मसंस्पर्शं **ब्रह्मणा परेण संस्पर्शो यस्य तद् ब्रह्मसंस्पर्शं सुखम्** अत्यन्तम् **अन्तमतीत्य वर्तत**

आनन्दगिरिकृतव्याख्या

प्रशान्तम् **आत्मन्येव प्रलीनमिति यावत्। मनस्तद्वृत्त्योरभावे स्वरूपभूतसुखाविर्भावस्य स्वापादौ प्रसिद्धिं द्योतयितुं** हिशब्दः। **मोहादिक्लेशप्रतिबन्धाद् योगिनि यथोक्तसुखाप्राप्तिमाशङ्क्य मनोविलयमुपेत्य परिहरति—**शान्तेति। **तस्यास्मदादिविलक्षणत्वमाह—** ब्रह्मभूतमिति। **अस्मदादेरपि स्वतो ब्रह्मभूतत्वेन तुल्यं जीवन्मुक्तत्वमित्याशङ्क्याह—** ब्रह्मैवेति। **धर्माधर्मप्रतिबन्धादयुक्ता यथोक्तसुख-प्राप्तिरित्याशङ्क्योक्तम्—** अकल्मषमिति॥ २७॥

**उत्तमं सुखं योगिनो भवतीत्युक्तम्, तदेव स्फुटयति—** युञ्जन्निति। क्रमो **यथोक्तो 'मनसैवेन्द्रियग्राम'मित्यादिः।** योगान्तरायो

भाष्यार्कप्रकाशः

**प्रशान्तेति।** प्रशान्तमनसं शान्तरजसं ब्रह्मभूतमकल्मषमेनं योगिनमुत्तमं सुखमुपैति हि। **प्रशान्तमनसम्** आत्मनि लीनहृदयम् अत एव **शान्तरजसं** शान्तं नष्टं रजः मोहादिक्लेशः यस्य तम्। रजो धूलिर्यथा गगनमावृत्य तदप्रकाशजनकं वर्तते तद्वन्मोहादिक्लेश आत्मानमावृत्य तदप्रकाशको वर्तत इति गौण्या वृत्त्या रजःशब्दप्रयोगो मोहादिक्लेशे। **यद्वा** रजो रजोगुणः, तत्कार्यमोहादौ तत्त्वेन व्यपदेश उपचारादिति। **अथवा** रजः मोहादिक्लेशहेतुभूतरजोगुणः। उपलक्षणमिदं सत्त्वतमसोरपि। ध्वस्तसत्त्वरजस्तमोगुणमित्यर्थः। अत एव ब्रह्मभूतं ब्रह्मणा तुल्यम्; नित्यसमासः। तौल्यं च मुक्तत्वरूपम्। यथा ब्रह्म नित्यमुक्तं तथा अयं योगी जीवन्मुक्त इति। अत एवाह— **जीवन्मुक्तमिति।** ब्रह्माभिन्ने आत्मनि ब्रह्मतुल्यत्ववचनमस्वरसमित्यर्थान्तरमाह— **ब्रह्मैवेति।** सर्वं ब्रह्मेति निश्चयज्ञानवन्तमित्यर्थः। यस्य सर्वं ब्रह्मैवेति निश्चयः स स्वयमपि ब्रह्मैव। ततश्च ब्रह्मभूतं ब्रह्मैव भूतमित्यर्थः, 'ब्रह्मविद् ब्रह्मैव भवती'ति श्रुतेः। अत एव **अकल्मषं** धर्माधर्मसंस्कारवर्जितम्। अधर्मवद् धर्मस्यापि बन्धकत्वात् कल्मषत्वम्। भाष्ये आदिपदाद् धर्मग्रहणम्। न हि ब्रह्मणि धर्माधर्मसंस्काराः सन्तीति भावः। एनं योगिनमुत्तमं सुखमात्मानन्दः स्वयमेवोपैति। हिः प्रसिद्धौ। मनोलये सुषुप्त्यादौ स्वरूपसुखाविर्भावः प्रसिद्ध इत्यर्थः॥ २७॥

**युञ्जन्निति।** योगी एवं सदा आत्मानं युञ्जन् विगतकल्मषःसन्, सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते। आत्मानं मनः युञ्जन् ब्रह्मणि समादधानः; आत्मानं कूटस्थं युञ्जन् पश्यन्निति वा। योगोऽस्यास्तीति योगी। योगान्तरायसत्त्वे कथं योगसत्त्वमित्यभि-प्रेत्याह— **योगान्तरायवर्जित इति। अन्तरायाः** विघ्नाः। **यद्वा** आत्मानं युञ्जन्नित्यनेनैव योगिलाभाद् योगिपदं व्यर्थमित्यभिप्रेत्याह— **योगी योगान्तरायवर्जित इति। सदेति** ।विघ्नाभावात् सर्वदा विगतपाप इति। पुण्यस्यापि पापत्वाद् विगतपुण्यपाप इत्यर्थः।

पूर्वश्लोके सुखं योगिनमुपैतीत्युक्तम्। इदानीं तु योगी सुखमुपैतीति। अतः पूर्वश्लोकार्थस्यैव भङ्ग्यन्तरेण कथनमिदम्, न

१. 'प्रकर्षेण शान्तं' इति पा.। २. 'अधर्मादिवर्जितम्' इति पा.।

**सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।**
**ईक्षते योगयुक्तात्मा [1]सर्वत्रसमदर्शनः॥२९॥**

**इत्यत्यन्तम् उत्कृष्टं निरतिशयम्** अश्नुते **व्याप्नोति॥२८॥**

**इदानीं योगस्य [2]यत् फलं ब्रह्मैकत्वदर्शनं सर्वसंसारविच्छेदकारणं, तत् प्रदर्श्यते—** सर्वेति। सर्वभूतस्थं **सर्वेषु भूतेषु स्थितं स्वमात्मानं, सर्वभूतानि चात्मनि, ब्रह्मादीनि स्तम्बपर्यन्तानि च** सर्वभूतानि **आत्मन्येकतां गतानि** ईक्षते **पश्यति** योगयुक्तात्मा **समाहितान्तःकरणः** सर्वत्रसमदर्शनः **सर्वेषु ब्रह्मादिस्थावरान्तेषु विषमेषु सर्वभूतेषु** समं **निर्विशेषं ब्रह्मात्मैकत्वविषयं** दर्शनं **ज्ञानं यस्य सः सर्वत्रसमदर्शनः॥२९॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

सर्वभूतात्मदर्शने हेतुः—सर्वत्र समदर्शनम्। यद् ब्रह्म[बिम्ब]भूतं ब्रह्म स्वस्य स्वरूपत्वेनावगतम् , तस्यैव सर्वत्र प्रतिबिम्बितत्वात् सर्वभूतस्थत्वम्। तत्परतन्त्रमायाधीनत्वात् सर्वस्य विभागस्यात्मन्येव सर्वाणि भूतानि वर्तन्त इत्यर्थः।२९।

आनन्दगिरिकृतव्याख्या

**रागद्वेषादिः। सदा आत्मानं युञ्जन्निति सम्बन्धः। पापपदमुपलक्षणं पुण्यस्यापि।** संस्पर्शः **तादात्म्यमैकरस्यम्।** उत्कर्षो **विषयासंस्पर्शः॥२८॥**

**योगमनुतिष्ठतो ब्रह्मभूतस्य सर्वानर्थनिवृत्तिनिरतिशयसुखप्राप्तिलक्षणो द्विविधो मोक्षो हेतुना केन स्यादिति शङ्कमानं प्रत्याह—** इदानीमिति। **स्वमात्मानमीक्षते इति सम्बन्धः। सर्वभूतान्यपि तद्विशेषणत्वेन पश्यति चेन्न शुद्धवस्तुज्ञानमिति [3]नाविद्यानिवृत्तिरित्याशङ्क्याह—** सर्वभूतानीति। **उक्ते दर्शने चित्तसमाधानमुपायं दर्शयति—** योगेति। विषमेषु **उपाधिषु। तदनुरोधाद् विषममेव दर्शनं तदुपदर्शितदर्शनप्रतिबन्धकं प्रत्युदस्यति—** सर्वत्रेति॥२९॥

भाष्यार्कप्रकाशः

त्वन्यार्थस्य। यद्वा पूर्वश्लोके जीवन्मुक्तिदशानुभाव्यसुखलाभ उक्तः, इह तु विदेहमुक्तिदशानुभाव्यसुखलाभ इति विवेकः। अथवा पूर्वश्लोके योगदशानुभाव्य आत्मानन्द उक्तः, इह तु ब्रह्मानन्द इति। न च कथं ध्यानयोगान्मोक्षसुखलाभ इति वाच्यम् ; ध्यानयोगाज्ज्ञानलाभद्वारा मोक्षसुखलाभात् , ज्ञानलाभस्य चोत्तरश्लोके वक्ष्यमाणत्वात्। श्लोकद्वयमपीदं जीवन्मुक्तिसुखपरमेवेति पक्षे तु नैतच्चोद्यस्यावकाशः, संसारोपरमरूपजीवन्मुक्तिसुखस्य ज्ञानिन इव योगिनोऽपि योगदशायामनुभाव्यत्वात्॥२८॥

**सर्वेति। उत्कृष्टं फलमिति।** एतेन पूर्वश्लोकोक्तं सुखं योगस्य न परमं फलम् , किन्त्ववान्तरफलमेवेति सूचितम्। आत्मानन्दानुभवशालिनोऽपि योगिनो ज्ञानाभावे पुनरुत्पत्तिप्रसङ्गात् , स्वानुभूयमानात्मानन्दस्यात्मत्वेन ज्ञानं विना तस्य कृतकृत्यत्वाभावाच्च। तस्माद् यथा व्यवायस्य तात्कालिकसुखलाभोऽवान्तरफलं, पुत्रोत्पत्तिः प्रधानफलम् , तद्वद् योगस्य तात्कालिकसुखलाभोऽवान्तरफलं, ज्ञानोत्पत्तिरेव प्रधानफलमिति। कीदृशं ज्ञानं योगस्य फलम्? अत आह— **ब्रह्मात्मैकत्वदर्शनमिति।** अहं ब्रह्मास्मीति ज्ञानमित्यर्थः। न ह्यस्माज्ज्ञानादन्यं[न्यः] सर्वसंसारविच्छेदे हेतुरस्तीत्याह— **सर्वेति।** अज्ञानकार्यस्य संसारस्य सम्यग्ज्ञानं विना न हि निवृत्तिः। अज्ञानकृतात्मानात्मतादात्म्याध्यासप्रयुक्तः स्थूलोऽहं, काणोऽहं, सुख्यहं, दुःख्यहमित्यादिसंसारः, अज्ञानकृत एव ईश्वराद्भिन्नोऽहं, ममेश्वरः शास्तेत्यादिसंसारश्च , अहं सच्चिदानन्दरूप आत्मा, न तु देहादिसङ्घातरूपः; अहं ब्रह्मैव, न तु तद्भिन्नः; ईश्वरश्च ब्रह्मैव, न तु तद्भिन्नः, चैतन्यरूपत्वात् ; एवं चाहमीश्वरादभिन्न एवेत्याकारकब्रह्मात्मैक्यज्ञानं विना नैव निवर्तते। न

१.सर्वत्रेति भिन्नं पदं पा.। २.'यदुत्कृष्टं निरतिशयं फलं ब्रह्मात्मैकत्वदर्शनम्' इति रा.पा.। ३ .योगफलं सर्वभूतविशिष्टात्मसाक्षात्कारश्चेत् तस्य शुद्धात्मविषयकाज्ञानसमानविषयकत्वाभावात् न तन्निवर्तकतेति शङ्का। आत्मनि सर्वभूतान्येकत्वं गतानीत्यतः तत्साक्षात्कारस्य सर्वभूतविषयकत्वाभावात् तन्निवर्तकता युक्तेति।

भाष्यार्कप्रकाशः

हि रज्जावारोपितः सर्पो रज्जुज्ञानं विना निवर्तते, येनात्मन्यारोपितः संसारः आत्मज्ञानं विना निवर्तेत। तस्माद् ब्रह्मात्मैकत्वज्ञानमेव संसारच्छेदकारणम्, न तु कर्मणाऽपि समुच्चयः, कर्मज्ञानयोः समुच्चयानुपपत्तेः, कर्मसंसारयोरविरोधाच्चेत्यसकृदुक्तं प्राक्। पुरुषः इति शेषः। योगयुक्तात्मा सन्, सर्वत्रसमदर्शनो भूत्वा, सर्वभूतस्थमात्मानं सर्वभूतानि आत्मनि च ईक्षते इत्यन्वयः।

**आत्मन्येकतां गतानि** आत्माभेदं प्राप्तानि, यथा सर्पो रज्जावैक्यं गच्छति, तद्वत्।

कार्यकारणसङ्घात इह भूतशब्देन विवक्षितः। 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ती'ति श्रुत्या भूतानां स्वोपादाने आत्मनि लयस्योक्तत्वात्। कार्यस्य घटादेः कारणे मृदादौ लयदर्शनात्। कार्यस्य कारणे लयो नाम कारणाभेदेनावस्थानमेव, न त्वन्यदिति सिद्धान्ताद् आत्मनि सर्वभूतलय एव सर्वभूतानामात्मन्येकत्वप्राप्तिरिति भावः। न च कथं प्रलयात् प्रागात्मनि सर्वभूतलय इति वाच्यम्, प्रलयेऽपि सूक्ष्मभूतसत्त्वात्। न प्रलये सर्वभूतानामात्मनि लयः, तथा सति ज्ञानं विनैव प्रलये सर्वमुक्तिप्रसङ्गात्। किन्तु परमार्थदशायामात्यन्तिकप्रलये मोक्षरूपे एव सर्वभूतलयः। प्रलयो हि चतुर्विधः— नित्यः, नैमित्तिकः, [1]महान्, आत्यन्तिकश्चेति। तत्र सुषुप्तिर्नित्यप्रलयः; ब्रह्मणो निशायां नैमित्तिकप्रलयः; ब्रह्मणश्चतुर्मुखस्य द्विपरार्धावसाने महाप्रलयः; मोक्ष आत्यन्तिकप्रलयः। आत्मस्वरूपश्च मोक्ष एवेत्यात्मस्वरूपे सर्वभूतलय उचित एव।

**एतेन** - यः सर्वेषु भूतेषु वर्तते स आत्माऽहमेव, इमानि तु सर्वाणि भूतानि कालत्रयेऽपि मयि न सन्त्येवेति समदर्शी विद्वानीक्षते, पश्यति, जानातीत्यर्थः इति - **सिद्धम्**।

ब्रह्मात्मनोरेकत्वमेव विषयो यस्मिन् तद् **ब्रह्मात्मैकत्वविषयं** दर्शनं ज्ञानं विषयीत्यर्थः। ज्ञानस्य विषयित्वं, ज्ञेयस्य विषयत्वं च न्यायमतप्रसिद्धं च। इदं च ज्ञानम् 'अहं ब्रह्मास्मी'त्याकारकवृत्तिरूपम्, न तु चैतन्यरूपम्, तस्य निर्विशेषत्वेन निर्विषयत्वात्।

यत्तु **रामानुजः—** सर्वभूतसमानाकारं स्वात्मानं, स्वात्मसमानाकाराणि सर्वभूतानि च पश्यतीति, **तत्तुच्छम्**; सर्वभूतस्थमिति आत्मनीति च सर्वभूतानामात्मनश्चाधिकरणत्वस्योक्तत्वात्। सर्वेषु भूतेषु तिष्ठतीति सर्वभूतस्थ इति हि समासः। अनेन च समासेन भूतानामधिकरणत्वं स्फुटमुक्तम्। आत्मनीति च अधिकरणे सप्तमी। आत्मनोऽधिकरणत्वं च स्फुटमुक्तम्। तदेवं स्फुटमुक्तस्याधिकरणत्वस्य त्यागोऽप्रमाणमेव। न च कथमेकस्यैवात्मन आधारत्वमाधेयत्वं चेत्युभयं सम्पद्यत इति वाच्यम्; आकाशे घटस्य, घटे आकाशस्य च सत्त्वदर्शनात्, एवमेवात्मनि भूतानां, भूतेषु चात्मनः सत्त्वानुमानस्य सुकरत्वात्; 'सर्वान्तरः सर्वाधारः' इत्यादिशास्त्राच्च। जागरावस्थायां देहेष्वात्मसत्त्वस्य, स्वप्ने आत्मनि रथादिप्रपञ्चसत्त्वस्य च सर्वानुभवसिद्धत्वाच्च। न हि स्वप्ने आत्मातिरिक्तं रथाद्यधिकरणं किञ्चिदस्ति।

तस्मात् 'सर्वभूतस्थमात्मान'मित्यस्य सर्वभूतसमानाकारमात्मानमिति, 'सर्वभूतानि चात्मनी'त्यस्य स्वात्मसमानाकाराणि सर्वभूतानीति चार्थः स्वमताभिनिवेशकल्पितो मूलविरुद्ध इति स्वस्यापि विदितमेव **रामानुजस्य**।

**किञ्च** यदा सर्वभूतसमानाकारत्वं स्वात्मन उक्तम्, तदैव स्वात्मसमानाकारत्वं सर्वभूतानां सिद्धमेवेति पुनस्तद्वचनं व्यर्थमेव। अपि च भूतशब्दः महाभूतेषु प्राणिषु कार्येषु च प्रयुज्यते, न त्वात्मनि, भूतत्वाभावात् तस्य। न च प्राण्येवात्मेति वाच्यम्; आत्मनः प्राणादिसम्बन्धाभावात्। न च प्राणोपाधिकत्वादात्मा प्राण्येवेति वाच्यम्, घटोपाधिकत्वादाकाशो घटीति वाच्यत्वापत्तेः। उपाधेरपरमार्थत्वात् परमार्थात्मतत्त्वस्य चेहोपदिश्यमानत्वात्। यद्यात्मनां बहुत्वं जात्येकत्वं च स्यात् तर्हि घटानामिवात्मनामपि परस्परसाम्यमज्ञेनापि विदितमेवेति व्यर्थोऽयमुपदेशः। नापि तेन किञ्चिदपि फलम्।

तस्माद् यदि भूतशब्द आत्मवाची, तर्हि आत्मन एवात्मस्थत्वमसम्भवि। यदि भूतशब्दो देहादिसङ्घातवाची, तर्हि तस्यात्मसमानाकारत्वमसम्भवि। देहादेर्जडत्वाद् आत्मनश्च चेतनत्वात्। अतस्तुच्छं **रामानुजभाष्यम्**॥२९॥

---

१. महाप्रलयः। अयमेव प्राकृतप्रलयः इत्युच्यते द्र. वेदान्तपरिभाषा विषयपरिच्छेदः। एतेषु आत्यन्तिकप्रलये एव सर्वभूतानामात्मनि लयः। स एव निरवशेषः। 'एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति, भिद्येते चासां नामरूपे, पुरुष इत्येवं प्रोच्यते, स एषोऽकलोऽमृतो भवति' (प्र.उ. ६.५) श्रुतेः, 'अविभागो वचनात्' (ब्र.सू. ४-२-१६) इति सूत्राच्च। अन्यत्र तु मायोपहितब्रह्मणि लयः। स च सावशेषः।

## यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति।
## तस्याहं न प्रणश्यामि स च मे न प्रणश्यति॥ ३०॥

**एतस्यात्मैकत्वदर्शनस्य फलमुच्यते—** यो मामिति। **यो मां पश्यति वासुदेवं सर्वस्यात्मानं** सर्वत्र **सर्वेषु भूतेषु , सर्वं च ब्रह्मादिभूतजातं** मयि **सर्वात्मनि पश्यति,** तस्य **एवमात्मैकत्वदर्शिनः** अह**मीश्वरो** न प्रणश्यामि **न परोक्षतां गमिष्यामि। स च मे न प्रणश्यति,** स च **विद्वान् मम वासुदेवस्य** न प्रणश्यति **न** [१]**परोक्षो भवति। तस्य च मम चैकात्मत्वात्। स्वात्मा हि नामात्मनः** [२]**प्रिय एव [प्रकाश एव] भवति।** [३]**यस्माच्चाहमेव सर्वात्मैकत्वदर्शी॥ ३०॥**

आनन्दगिरिकृतव्याख्या

**उक्तस्यैकत्वज्ञानस्य** [४]**फलविकल्पत्वशङ्कां शिथिलयति—** एतस्येति। **तत्रैकत्वदर्शनमनुवदति—** यो मामिति। **तत्फलमिदानी-मुपन्यस्यति—** तस्येति। **ज्ञानानुवादभागं विभजते—** यो मामिति। **तत्फलोक्तिभागं व्याचष्टे—** तस्यैवमिति। **अनेकत्वदर्शिनोऽपीश्वरो नित्यत्वान्न प्रणश्यतीत्याशङ्क्याह—** नेति। **अहं परमानन्दो न तं प्रति परोक्षीभवामीत्यर्थः। 'स चे'त्यादि व्याचष्टे—** विद्वानिति। **विद्वानि-वाविद्वानपीश्वरस्य न नश्यतीत्याशङ्क्योक्तम्—** नेत्यादिना। **अविदुषश्च स्वरूपेण सतोऽपि व्यवहितत्वादविद्यया नष्टप्रायतेत्यर्थः। ईश्वरस्य विदुषश्च परस्परमपरोक्षत्वे हेतुमाह—** तस्य चेति। **आत्मैकत्वेऽपि कथं मिथोऽपरोक्षत्वम्? तत्राह—** स्वात्मेति। **विद्वदीश्वरयो-रेकत्वानुवादेन विद्याफलं विवृणोति—** यस्माच्चेति। **तस्मादेकत्वदर्शनार्थं प्रयतितव्यमिति शेषः॥ ३०॥**

भाष्यार्कप्रकाशः

**य इति।** 'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनीक्षते' इत्यस्यैवानुवादः 'यो मां पश्यति सर्वत्र सर्वं च मयि पश्यती'ति। एतस्यात्मैकत्वदर्शनस्य फलं तु— 'तस्याहं न प्रणश्यामि स च मे न प्रणश्यती'ति— इति विवेकः।

**मामिति।** प्रत्यगभिन्नं परमात्मानमित्यर्थः। यः पूर्वश्लोके 'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनीक्षते' इत्युक्तः स एवायं सर्वत्र परमात्मानं सर्वं च परमात्मनि पश्यतीत्यनूदितः, स्वात्मन एव परमात्मत्वाद् , आत्मदर्शनमेव परमात्मदर्शनमिति हेतोः। **आत्मैकत्वदर्शिन इति।** सर्वत्रापीश्वराभिन्न आत्मैक एवास्तीति ज्ञानशालिन इत्यर्थः। ईश्वरपारोक्ष्याभावः फलमित्याह— **न प्रणश्यामीति।** कृतप्रत्यगभिन्नब्रह्मात्मसाक्षात्कारस्य न पुनरीश्वरपारोक्ष्यं, यथैतादृशज्ञानप्राप्तेः प्रागीश्वरपारोक्ष्यम् , तद्वदिति भावः। सति त्वीश्वरपारोक्ष्ये ईश्वरात् स्वस्य भयं संसारश्च स्यात् , 'भीषाऽस्माद्वातः पवते' इति 'य उदरमन्तरं कुरुते अथ तस्य भयं भवती'त्यादिश्रुतिभ्यः। अत ईश्वरपारोक्ष्याभाव उत्कृष्टं फलमेव, मोक्षरूपत्वात्।

फलान्तरमाह— **स च मे न प्रणश्यतीति।** ईश्वरस्यापि स्वयं परोक्षो न भवति, वाञ्छति हि भृत्यादिः सर्वदाऽपि राजपारोक्ष्याभावं स्वस्य, स्वपारोक्ष्याभावं राज्ञश्च। कामुकश्च स्वस्य कामिनीपारोक्ष्याभावं, कामिन्याश्च स्वपारोक्ष्याभावं, तद्वद् विद्वानपि स्वस्येश्वरपारोक्ष्याभावमीश्वरस्य च स्वपारोक्ष्याभावं वाञ्छतीति तदुभयं तस्य सिध्यतीति भावः। ईश्वरस्य स्वपारोक्ष्याभावे स्वस्य चेश्वरपारोक्ष्याभावे हेतुमाह— **तस्य चेति।** ईश्वरस्य विदुषश्च एकात्मत्वादित्यर्थः। नन्वात्मत्वेऽपि कथं पारोक्ष्याभाव इत्यत आह— **स्वात्मेति। प्रकाशः** प्रत्यक्षः। एवकारान्न तु कदाचिदप्यप्रकाश इत्यर्थः। न हि स्वस्य स्वाप्रत्यक्षत्वमिति भावः।

**ननु** तस्याहं न प्रणश्यामि स च मे न प्रणश्यतीति आत्मपरमात्मनोर्भेद एवोपदिष्टो भगवता- 'तस्याह'मिति, 'स च मे' इति, न हि तदहंशब्दयोरेकार्थत्वमिति चेत्? **मैवम्** , 'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनी'ति य एव धर्म आत्मन उक्तः सर्वभूतस्थत्वसर्वभूतान्तरत्वरूपः स एव 'यो मां पश्यति सर्वत्र सर्वं च मयि पश्यती'ति परमात्मनोऽप्युक्तः। न हि धर्मभेदं विना धर्मिभेदः सम्भवति, धर्मभेदस्यैव धर्मिभेदप्रयोजकत्वात्। तथा च 'सर्वभूतस्थ'मिति, 'यो मा'मिति च वाक्यद्वयेनात्मपरमात्मैकत्वं प्रतिपाद्य, कथं पुनः 'तस्याह'मिति वाक्यद्वयेन आत्मपरमात्मभेदं प्रतिपादयेत् सर्वज्ञो भगवान्।

---

१. 'परोक्षीभवति' इति पा.। २. 'प्रकाश एव' इति पा.। ३. इदं वाक्यं भाष्यार्कप्रकाशे उत्तरश्लोकशेषतया योजितम्। ४. 'फलविकलत्वशङ्कां' इति पाठः स्यात्।

## सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः।

**इत्येतत् पूर्वश्लोकार्थं सम्यग्दर्शनमनूद्य तत्फलं मोक्षो [1]विधीयते— [2]सर्वेति। सर्वथा सर्वप्रकारैर्वर्तमानोऽपि**

आनन्दगिरिकृतव्याख्या

**पूर्वार्धेनानूद्योत्तरार्धेन फलविधिरिति मत्वाऽऽह—**इत्येतदिति। **रागादिरहितस्य यमनियमादिसंस्कारवतः स्वैरप्रवृत्त्यसम्भवेऽपि**

भाष्यार्कप्रकाशः

न च - सर्वभूतस्थितात्मस्थितत्वात् परमात्मनः सर्वभूतस्थितिः, सर्वभूताश्रयत्वात् परमात्मनि सर्वभूतस्थितिश्चोच्यते; पर्यङ्ककशिपुशायिनः पुरुषस्य पर्यङ्कशायित्वं, देहाश्रयपीठाश्रयभूमेर्देहाश्रयत्वं च यथोच्यते, तद्वदिति - वाच्यम् , यदि तथा आत्मनि परमात्माऽस्ति, परमात्मन्यात्माऽस्तीति च विवक्षा व्यासमुनेः, तर्हि 'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनी'त्यनन्तरम् 'ईक्षते मयि चात्मानं तमात्मनि च मामपी'त्येव ब्रूयाद् ऋजुमार्गेण, न तु वक्रमार्गेण, वक्रमार्गाश्रयणस्य निष्फलत्वात् प्रतिपत्तृक्लेशकरत्वाच्च। यः कोऽपि त्वादृशो हि महानुभावः 'यो मां पश्यति सर्वत्रे'त्यस्य सर्वत्र स्थिते आत्मनि स्थितं मां यः पश्यतीत्यर्थं जानीयात्। निरवयवे निरवकाशे आत्मवस्तुनि कथं परमात्मस्थित्यवकाशः? आत्मनो निरवयवत्वं सम्प्रतिपन्नम्। न च निरवकाशत्वे विप्रतिपत्तव्यम् , सावयवस्यैव सावकाशत्वं, न तु निरवयवस्येति सिद्धान्तात्। न हि निरवयवः परमाणुः सावकाशः। न चैवं कथं निरवयवे ब्रह्मणि जगत्स्थित्यवकाश इति वाच्यम् , तदनवकाशस्यैवास्माकमिष्टत्वात्। न हि वयं सद्वितीयं ब्रह्म ब्रूमः, येन जगतो ब्रह्मणि स्थितिरस्माकमिष्टा स्यात्। रज्जौ सर्पवद् ब्रह्मणि जगद् मायया प्रतिभाति, न तु वस्तुत इत्यसकृदुक्तं हि। एतेन निरवयवे निरवकाशे परमात्मन्यात्मस्थितिश्च प्रत्युक्ता। परमात्मन्यप्यात्मसत्त्वे आत्मन एव परमात्मान्तरत्वेन त्वदुदाहृतान्तर्यामिब्राह्मणविरोधात्। सर्वान्तरः खलु परमात्मा।

न च - परमात्मन्यात्मा माययाऽस्तीति - वाच्यम् , आत्मनो नित्यशुद्धबुद्धमुक्तस्वभावस्य मायिकत्वासम्भवात्। देहादेरसत्त्वमात्मनश्च सत्त्वं 'नासतो विद्यते भावः' इत्यादिना त्वयाऽप्यभ्युपेतम्। असत्त्वमेव हि मायिकत्वम्। सतो नाशायोगाद् मायिकस्य चावर्जनीयनाशत्वात्। अविनाशस्वभावः सत्त्वम् , विनाशस्वभावस्त्वसत्त्वमिति त्वयैवोक्तत्वात्। तस्मात् सन्नात्मा न मायिकः, येन मायया तस्यात्मनः परमात्मनि स्थितिः स्याज्जगत इव। तदेवमात्मनि परमात्मनः, परमात्मनि चात्मनः स्थित्ययोगात् 'सर्वभूतस्थमात्मान'मित्यनेन, 'यो मां पश्यति सर्वत्रे'त्यनेन च आत्माभिन्नस्य परमात्मनः, परमात्माभिन्नस्य चात्मनः सर्वत्र स्थितिरुक्ता। न तु भिन्नात्मन इति सिद्धेऽद्वैते कथं 'तस्याह'मिति 'स च मे' इति च भेद उच्यते भगवता आत्मेश्वरयोः।

**ननु** भवतु पूर्ववाक्यविरोधः, तथापि 'तस्याह'मिति 'स च म' इति च प्रसिद्धस्य आत्मेश्वरभेदस्य कथमपलाप इति चेत् , **उच्यते**— श्रोतुरर्जुनस्य जीवेश्वरभेदबुद्ध्या विशिष्टत्वात् तं प्रति तथा 'तस्याहं' 'स च म' इत्युपदेशः। लोकसिद्धजीवेश्वरभेदानुवादमात्रं 'तस्याहं' 'स च म' इति, न तु तत्त्वनिर्णयरूपमिति। तथा च य ईश्वरत्वेन लोकस्याभिमतः परोक्षश्च परमात्मा स तत्त्वविदो न परोक्षः। यश्च जीवत्वेन लोकस्याभिमतस्तत्त्ववित् स च नेश्वरस्य परोक्ष इति 'तस्याहं न प्रणश्यामि स च मे न प्रणश्यती'त्यस्यार्थः। एवमापरोक्ष्ये हेतुर्भाष्यकृता दर्शितः— **आत्मैकत्वादिति**। जीवेश्वरयोश्चैतन्यात्मना एकत्वान्न तत्रापरोक्ष्याभावशङ्केति भावः। यद्यपि 'तस्याहं न प्रणश्यामी'त्यनेनैवेष्टं सिध्यति, तथापि दार्ढ्याय 'स च मे' इत्यप्युक्तम्।

यत्तु **रामानुजः**— यः सर्वत्रात्मवस्तुनि च मां पश्यति, मयि सर्वमात्मवस्तु च पश्यतीति, **तत्तुच्छम् ;** आत्मवस्तुनीति आत्मवस्त्विति च मूलाद् बहिः पदद्वयस्य कल्पनाया अप्रमाणत्वात्। अर्थासम्भवस्तु दर्शित एव॥३०॥

**सर्वेति।** य एकत्वमास्थितःसन् सर्वभूतस्थितं मां भजति स योगी सर्वथा वर्तमानोऽपि मयि वर्तते। अत्र पूर्ववाक्यं पूर्वोक्तसम्यग्दर्शनानुवादपरम् , द्वितीयं तु तत्फलप्रदर्शनपरमिति विवेकः। **यस्मादिति।** यस्मात् सर्वात्मैकत्वदर्शी विद्वानहमेव, न तु

---

१. 'अभिधीयते' इति पा.। २. इदं प्रतीकग्रहणं क्वचिन्न।

## सर्वथा वर्तमानोऽपि स योगी मयि वर्तते॥ ३१ ॥

**सम्यग्दर्शी योगी** मयि **वैष्णवे परमे पदे वर्तते। नित्यमुक्त एव सः, न मोक्षं प्रति केनचित् प्रतिबध्यत इत्यर्थः॥ ३१ ॥**

आनन्दगिरिकृतव्याख्या

**तामङ्गीकृत्य ज्ञानं स्तौति—**सर्वथेति। **प्रतिभासतोऽपि यथेष्टचेष्टाङ्गीकारे कुतो ज्ञानवतो नित्यमुक्तत्वम् , प्रातीतिकदुराचारप्रतिबन्धादित्याशङ्क्याह—** न मोक्षमिति॥ ३१ ॥

भाष्यार्कप्रकाशः

मत्तोऽन्य इत्येवकारार्थः। तस्मात् स मय्येव वर्तत इत्याह **सर्वे**ति श्लोकेन भगवान्। 'सर्वभूतस्थ'मिति, 'यो मां पश्यति सर्वत्रे'ति च पूर्वोक्तश्लोकद्वयार्थभूतं सम्यग्दर्शनमनेन श्लोकेनानूद्य तत्फलं मोक्षो विधीयत इत्यन्वयः। तत्र 'सर्वभूतस्थितं यो मां भजत्येकत्वमास्थित' इत्येतद् व्याख्यातप्रायमिति न तस्य भाष्यं कृतम्। **एकत्वं** स्वात्माभेदमित्यर्थः। **आस्थितः** प्राप्तः। **भजति** प्राप्नोति, पश्यतीति यावत्। सेवाया द्वैतिविषयाया अद्वैतात्मन्ययोगात्।

**सर्वथेति।** ज्ञानोत्पत्तिपर्यन्तमेव शास्त्रनियमः, न तु पश्चात्। ततश्च यथेच्छं यथाप्रारब्धमुत्पन्नसम्यग्दर्शनो वर्ततैव; न तु तस्य कोऽपि शास्त्रनिर्बन्धः। शास्त्रस्याविद्यावद्विषयत्वाद् विदुषोऽविद्याया विद्यया नाशितत्वाच्चेति भावः। **मयि** मदीये इत्यर्थः। तमेवाह— **वैष्णवे इति।** विष्णोर्व्यापकस्य परमात्मनो मम सम्बन्धिनि परमे उत्कृष्टे पदे स्वरूपे सच्चिदानन्दलक्षणे वर्तते। **यद्वा** 'तद्विष्णोः परमं पद'मित्युक्तलक्षणे वैष्णवपरमपदशब्दाभिधेये मयीत्यर्थः। स्वस्वरूपस्य स्वाभिन्नत्वाद् यद्वैष्णवं स्वस्वरूपं परमपदशब्दाभिधेयं तत् साक्षाद्विष्णुरेव, न तु विष्णोरन्यत् , निर्धर्मकपरमानन्दबोधस्वरूपे विष्ण्वात्मनि धर्मधर्मिभावकल्पनायोगादिति भावः।

स्वस्वरूपे वर्तनं च विदुषः स्वस्वरूपेणावस्थानमेव; न त्वाधाराधेयभावरूपम् , स्वस्य स्वरूपस्य च आधाराधेयभावायोगात्। स्वमेव हि स्वरूपम्। इदमेव स्वस्वरूपेणावस्थानं मुक्तिः, ब्रह्मभावापत्तेर्मोक्षत्वाद् ब्रह्मभावस्य च ब्रह्माभिन्ने आत्मनि कालत्रयेऽपि सत्त्वादित्यभिप्रेत्याह— **नित्यमुक्त एव स इति।** ईश्वरस्य नित्यमुक्तत्वं सर्वसम्मतम् , जीवस्य नित्यमुक्तत्वं तु सम्यग्दर्शिन एव सम्मतम् , तस्यैव जीवेश्वराभेदज्ञानात्। अत उक्तम्— स एव नित्यमुक्त इति। सम्यग्दर्श्येव नित्यमुक्तः, अन्ये भेदवादिनस्तु न मुक्ताः, किन्तु बद्धा एव, भीतिग्रस्तत्वादिति भावः।

ननु कथमस्य सम्यग्दर्शिनोऽपि नित्यमुक्तत्वम् , देहादिबन्धसत्त्वात्? अत आह— **नेति।** नास्य मोक्षप्रतिबन्धकं किञ्चिदपि वस्त्वस्ति। ब्रह्मात्मैकत्वज्ञानेन सूर्यस्थानीयेन तमःस्थानीयस्याज्ञानस्य पिशाचादिस्थानीयदेहादिकार्यसहितस्य समूलं नाशितत्वादिति भावः। अतो यावत्प्रारब्धं देहादिसत्त्वेऽपि विदुषो न तेन कश्चिद् बन्धः, दग्धपटवद् देहादेस्तस्याबन्धकत्वात्।

**यद्वा** धर्माधर्मादिसंस्काररूपप्रतिबन्धकसत्त्वात् कथं सम्यग्दर्शनमात्रेण मोक्षलाभस्तत्त्वविद इत्यत आह— **नेति।** विद्यया धर्माधर्मादिसंस्काराणां नाशितत्वान्न तत्प्रतिबन्ध इत्यर्थः।

यत्तु **रामानुजः—** मयि वर्तते मत्साम्यमेव पश्यतीत्यर्थः इति, **तत्तुच्छम्** ; तत्पदाभ्यां तदर्थालाभस्य सर्वविदितत्वात्। आत्मपरमात्मनोर्द्वयोर्वस्तुनोर्दर्शने सति रत्नदर्पणयोरिव तत्साम्यं सुबोधं स्यात् , न तु तदस्ति। न हि समाधौ अन्यत्र वा द्वयोर्दर्शनं सम्भवति, किन्त्वात्मन एकस्यैव, अनुभवमात्रस्यैव समाधौ परिशेषात् , अनुभवरूपत्वाच्चात्मनः। यदि चतुर्भुजत्वादिमत्पिण्डः परमात्मा, द्विभुजत्वादिमत्पिण्डो जीवात्मा च स्यात् , तर्हि बुद्धिद्वयं स्यात् , तत्रापि न साम्यस्यास्त्यवकाशः, ईश्वरविग्रहस्याप्राकृतत्वाज्जीवविग्रहस्य च प्राकृतत्वात्। यदि तु स्वभिन्नः परमात्मा स्वेन दृष्टः स्यात् तर्हि परमात्मनो ज्ञेयत्वं स्यात्। तद्धि न सहते श्रुतिः – 'साक्षी चेता केवलो निर्गुणश्चे'त्यादिः; 'नान्योऽतोऽस्ति द्रष्टे'ति च परमात्मनो ज्ञातृत्वमेव ब्रूते श्रुतिः, न तु ज्ञेयत्वम्। सति च ज्ञेयत्वे घटादिवज्जड एव स्यात् परमात्मा अनित्यश्च। तदेवम् आत्मपरमात्मरूपवस्तुद्वयदर्शनासम्भवान्नास्ति तत्साम्यस्यावकाशः ॥ ३१ ॥

**आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।।**
**सुखं वा यदि वा दुःखं स योगी परमो मतः॥३२॥**

**किञ्चान्यत्—** आत्मेति। आत्मौपम्येन **आत्मा स्वयमेवोपमीयते अनया इत्युपमा, तस्या उपमाया भावः**[1] **औपम्यम् , तेनात्मौपम्येन,** सर्वत्र **सर्वभूतेषु** समं **तुल्यं** पश्यति **योऽर्जुन ! स च किं समं पश्यतीत्युच्यते— यथा मम सुखमिष्टं तथा सर्वप्राणिनां सुखमनुकूलम्। वाशब्दः चार्थे।** यदि वा **यच्च दुःखं मम प्रतिकूलमनिष्टं यथा तथा सर्वप्राणिनां दुःखमनिष्टं प्रतिकूलम् इत्येवमात्मौपम्येन सुखदुःखे अनुकूलप्रतिकूले तुल्यतया सर्वभूतेषु समं पश्यति, न कस्यचित् प्रतिकूलमाचरति, अहिंसक इत्यर्थः। य एवमहिंसकः सम्यग्दर्शननिष्ठः स योगी** परम **उत्कृष्टो** मतः **अभिप्रेतः सर्वयोगिनां मध्ये॥३२॥**

आनन्दगिरिकृतव्याख्या

**स्वैराचरणस्याप्रतिबन्धकत्वकथनात् परपीडनस्य योगिनः सम्यग्दर्शनं प्रत्यप्रतिबन्धकत्वप्रसक्तावुक्तम्—** किञ्चेति। **अन्यदपि किञ्चिदुच्यते परमयोगिनो निर्देशद्वारा योगमाहात्म्यमित्यर्थः। उपमैव औपम्यम् , आत्मा च तदौपम्यं च, तेन सर्वभूतेषु यः समं पश्यतीत्युक्तम्**[2]**। तदेव समदर्शनं प्रश्नपूर्वकं विवृणोति—** किमित्यादिना। **विकल्पार्थत्वं वारयति—** वाशब्द इति। **उपदर्शितसमदर्शनफलमभिलपति—** न कस्यचिदिति। **किमपेक्षया तस्य परमत्वम्? तत्राह—** सर्वेति॥३२॥

भाष्यार्कप्रकाशः

**आत्मेति**। हे अर्जुन! यः आत्मौपम्येन सर्वत्र सुखं वा यदि वा दुःखं समं पश्यति, स योगी परमो मत इत्यन्वयः। ननु यदि विदुषो मोक्षं प्रति न कश्चित् प्रतिबन्धस्तर्हि विद्वान् यथेष्टमाचरेदिति पक्षे विद्वान् हिंसामपि कुर्यादेवेत्यत आह— **किञ्चान्यदिति**। आत्मा स्वयमेवोपमा उपमानम् आत्मोपमा, तस्या भाव आत्मौपम्यम् ; स्वसादृश्यं तेनात्मौपम्येन; स्वदृष्टान्तेनेति यावत्। **सुखं वा** सुखं च समं तुल्यं पश्यति, **यदि वा** यच्च, यद्वेत्यर्थः; दुःखं समं पश्यति। कथं सुखदुःखयोः सर्वत्रात्मौपम्येन समदर्शनम्? अत आह— **यथेति**। यथा मम सुखमिष्टमनुकूलं तथा सर्वप्राणिनामपि सुखमिष्टम् , यथा वा मम दुःखमनिष्टं प्रतिकूलं तथा सर्वप्राणिनामपि दुःखमनिष्टम् इत्येवमात्मौपम्येन सर्वभूतेषु सुखदुःखे अनुकूलप्रतिकूले तुल्यतया समं पश्यतीत्यन्वयः। सममित्यस्यार्थः **तुल्यतये**ति। साम्येनेत्यर्थः। किमेतद्दर्शनेन फलम्? अत आह— **न कस्यचिदिति**। यथा स्वस्य प्रतिकूलं दुःखकरं तथैव सर्वस्यापीति यो वेत्ति, स कथं परस्य प्रतिकूलमाचरेत्? न कथमपीत्यर्थः। तस्यापि फलितार्थमाह— **अहिंसक इति**।

**ननु** अज्ञोऽपि यथा स्त्रीगमनं स्वस्य सुखं तथा परस्यापि सुखमेव, यथा शस्त्रपातः स्वस्य दुःखं तथा परस्यापि दुःखमेवेति जानात्येव। कथमन्यथा स्वमित्रस्य परस्य जारस्त्रियमर्पयेत्? कथं वा स्वशत्रोः परस्य शस्त्रपातं कुर्याद् वपुषि? तस्माद् व्यर्थोऽयमुपदेश इति चेत् , **मैवम्** ; अत एव खलु न कस्यचित् प्रतिकूलमाचरतीति भाषितमाचार्यैः। यो हि स्वस्येव परस्यापि स्त्रीगमनं सुखमिति, तदपहरणं दुःखमिति च मन्यते, स कथं परस्त्रीहरणरूपं परस्य प्रतिकूलमाचरेत्? यस्तु परस्त्रीहरणरूपं परस्य प्रतिकूलमाचरति, स हि स्वस्त्रीहरणतुल्यं परस्त्रीहरणं नैव मन्यते, किन्तु परस्त्रीहरणं स्वस्य सुखमित्येव मन्यते।

**अथवा** आत्मौपम्येन सर्वत्र समं सुखं दुःखं वा पश्यन् यः परस्य प्रतिकूलं नाचरति, स योगी परम इत्येव भगवद्वाक्यमिति ब्रूमः। तत्र च परस्य प्रतिकूलं नाचरतीति तु वाक्यशेष इति।

एवं च अहिंसकत्वमनेन श्लोकेन योगिनः परमसाधनमित्युक्तम्। तस्य चाहिंसकत्वस्य सर्वत्रात्मौपम्येन सुखदुःखसमदर्शनं कारणमिति च। अत एव 'य एवमहिंसक' इति भाष्यकारैरहिंसकत्वमेवानूदितम्। न केवलमहिंसकत्वमात्रमेव योगिन उत्कर्षावहम् ,

---

१. टीकानुसारेण तु स्वार्थे ष्यञिति ज्ञायते। २. 'पश्यतीत्युक्ते तदेव' इति पा.।

**अर्जुन उवाच—**

**योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन !।**
**एतस्याहं न पश्यामि चञ्चलत्वात् स्थितिं स्थिराम्॥ ३३॥**
**चञ्चलं हि मनः कृष्ण ! प्रमाथि बलवद् दृढम्।**

**एतस्य यथोक्तस्य** [१]**सम्यग्दर्शनलक्षणस्य योगस्य दुःखसम्पाद्यतामालक्ष्य, शुश्रूषुः ध्रुवं तत्प्राप्त्युपायम् , अर्जुन उवाच—** योऽयमिति। **योऽयं योगस्त्वया प्रोक्तः** साम्येन **समत्वेन, हे मधुसूदन ! एतस्य योगस्य** अहं न पश्यामि **नोपलभे चञ्चलत्वान्मनसः। किम् ?** स्थिराम् **अचलां स्थितिम्** ॥ ३३॥

**प्रसिद्धमेतत्—** चञ्चलमिति। **चञ्चलं हि मनः। कृष्णेति कृषतेर्विलेखनार्थस्य रूपम् , भक्तजनपापादिदोष-**

आनन्दगिरिकृतव्याख्या

**मनश्चञ्चलमस्थिरमित्युपश्रुत्य निर्विशेषे चित्तस्थैर्यं दुःशकमिति मन्वानः तदुपायबुभुत्सया पृच्छतीति प्रश्नमुत्थापयति—** एतस्येति। **तत्प्राप्त्युपायं शुश्रूषुरिति सम्बन्धः॥ ३३॥**

**मनसश्चञ्चलत्वेऽपि तन्निग्रहद्वारा योगस्थैर्यं सम्पाद्यतामित्याशङ्क्याह—** प्रसिद्धमिति। **कृष्णपदपरिनिष्पत्तिप्रकारं सूचयति—** कृष्णेतीति। **कथं कर्षकत्वमाप्तकामस्य भगवतः सम्भवतीत्याशङ्क्याह—** भक्तेति। **ऐहिकामुष्मिकसर्वसम्पदामाकर्षणशीलत्वाच्चेति**

भाष्यार्कप्रकाशः

किन्तु सम्यग्दर्शनपूर्वकं तत्। अन्यथा अज्ञोऽप्यहिंसक उत्कृष्टः स्यादित्याह— **सम्यग्दर्शननिष्ठ इति।** ब्रह्मात्मैकत्वदर्शननिष्ठ इत्यर्थः। एतेन ब्रह्मात्मैकत्वदर्शनसम्पन्नस्यापि योगिनो भूतदया आवश्यकीति सूचितम्।

यत्तु **रामानुजः—** परपुत्रजन्ममरणादिसमं स्वपुत्रजन्ममरणादिकं यः पश्यतीत्यर्थ इति, **तत्तुच्छम्** ; अर्थस्य साधुत्वेऽपि एतदर्थबोधकशब्दाभावान्मूले। आत्मन एव मूले उपमात्वेन ग्रहणात्। परपुत्रजन्ममरणादिनाऽपि स्वस्य सम्बन्धो नास्तीत्येतदंशस्य दुर्वचत्वात्। परस्य शत्रोः पुत्रजन्मना तन्मरणेन च स्वस्य वैमनस्यसन्तोषरूपविकारदर्शनात् , परस्य स्वेतरस्य [२]भावादेः पुत्रजन्मतन्मरणाभ्यां स्वस्य सुखदुःखविकारदर्शनाच्च, तेन च विकारदर्शनेन तत्सम्बन्धस्यानुमीयमानत्वात्। न हि सम्बन्धं विना कार्योदयः। शत्रुपुत्रजन्ममरणादिवत् स्वपुत्रजन्ममरणादिकं द्रष्टव्यमित्यनेन स्वपुत्रजन्ममरणयोरपि दुःखसुखयोः कर्तव्यत्वापत्तेः। स्वबन्धुपुत्रजन्ममरणादिवदिति स्वीकारे [३]उपदेशानर्थक्यापत्तेः। अज्ञोऽपि हि स्वबन्धुपुत्रोदयादाविव स्वपुत्रोदयादौ सुखादिकं भजत्येव। तस्मान्नात्र स्वपुत्रजन्ममरणादेः परपुत्रजन्ममरणादिसाम्यमनेनोच्यत इति वक्तुं शक्यते। न च - परोऽत्र शत्रुमित्राभ्यामन्य उदासीनः, तत्पुत्रजन्मतन्मरणादिना न स्वस्य कोऽपि विकार इति - वाच्यम् , सर्वसमस्य भूतदयादिशालिनः पुरुषस्य परपुत्रमरणस्यापि दुःखावहत्वात्। अन्यथा नैर्घृण्यस्यापि गुणत्वापत्तेः। तस्मात् स्वस्य यथा पुत्रजन्म सुखम् , तन्मरणं च दुःखम् , तद्वत् परस्यापीति बुद्ध्वा यः परस्य पुत्रद्रोहाद्यनिष्टं नाचरति, स योगी परम इत्येव श्लोकार्थः॥ ३२॥

**य इति। साम्येन** समत्वेनोपलक्षित इति शेषः। सर्वत्र समदर्शनरूपो योग इत्यर्थः। **चञ्चलत्वादिति।** कस्येत्यत आह— **मनस इति।** मनसश्चञ्चलत्वादेतस्य स्थिरां स्थितिमहं न पश्यामीत्यन्वयः॥ ३३॥

**चञ्चलमिति।** हिः प्रसिद्धौ। **विलेखनं** छेदनम्। कर्षति भिनत्ति भक्तपापादिदोषमिति कृष्णः आत्मा, आत्मचिन्तनाद्धि सर्वपापक्षयः। 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते॥' इति निरुक्त्यन्तरम्। भवतीति भूः। भू सत्तायाम्। परमानन्दसद्रूप इत्यर्थः। सच्चिदानन्दरूपत्वादात्मन इति भावः।

१. 'समदर्शनलक्षणस्य' रा.पा.। २. 'भावो विद्वान्' इत्यमरः। यद्वा आन्ध्रभाषानुरोधेनायं शब्दः प्रयुक्तः स्यात्। ३. उपदेशं विनैव सिद्धत्वादिति भावः।

**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥ ३४॥**

**श्रीभगवानुवाच—**

**असंशयं महाबाहो ! मनो दुर्निग्रहं चलम्।**
**अभ्यासेन तु कौन्तेय ! वैराग्येण च गृह्यते॥ ३५॥**

**कर्षणात् कृष्णः। तस्य संबुद्धिः - हे कृष्ण !** हि **यस्मात् मनः चञ्चलम् , न केवलमत्यर्थं चञ्चलम् ,** प्रमाथि च **प्रमथनशीलं** प्रमथ्नाति **शरीरमिन्द्रियाणि च विक्षिपति, परवशीकरोति। किञ्च** बलवत् **प्रबलम् , न केनचिन्नियन्तुं शक्यम् , दुर्निवारत्वात्। किञ्च** दृढं **तन्तुनागवदच्छेद्यम् ,** तस्य **एवम्भूतस्य मनसोऽहं** निग्रहं **निरोधं मन्ये वायोरिव, यथा वायोर्दुष्करो निग्रहः, ततोऽपि मनसो दुष्करं मन्ये इत्यभिप्रायः॥ ३४॥**

**श्रीभगवानुवाच - एवमेतद् यथा ब्रवीषि—** असंशयमिति। असंशयं **नास्ति संशयो मनो दुर्निग्रहं चलमित्यत्र हे महाबाहो ! किं तु** अभ्यासेन तु **अभ्यासो नाम चित्तभूमौ कस्यांचित् समानप्रत्ययावृत्तिश्चित्तस्य।** वैराग्येण **वैराग्यं**

आनन्दगिरिकृतव्याख्या

**द्रष्टव्यम्।** प्रमथ्नाति **क्षोभयति। तदेव क्षोभकत्वं प्रकटयति—** विक्षिपतीति। दुर्निवारत्वम् **अभिप्रेताद् विषयादाक्रष्टुमशक्यत्वम्। विशेषणान्तरमाह—** किञ्चेति। **अच्छेद्यत्वं विशेषणान्तरमाह—** किञ्च दृढमिति। तन्तुनागो **वरुणपाशशब्दितो जलचारी पदार्थोऽत्यन्त-दृढतया छेत्तुमशक्यत्वेन प्रसिद्धो विवक्षितः। वायोरित्युक्तं व्यनक्ति—** यथेति॥ ३४॥

**प्रश्नमङ्गीकृत्य प्रतिवचनमुत्थापयति—** श्रीभगवानिति। **कुत्र संशयराहित्यम्? तत्राह—** मन इति। **कथं तर्हि मनोनिरोधो भवति? तत्राह—** किन्त्विति। **अभ्यासस्वरूपं सामान्येन निदर्शयति—** अभ्यासो नामेति। **कस्यांचित् चित्तभूमावित्यविशेषितो ध्येयो विषयो निर्दिश्यते।** समानप्रत्ययावृत्तिः **विजातीयप्रत्ययानन्तरितेति शेषः। चित्तस्येति षष्ठी प्रत्ययस्य तद्विकारत्वद्योतनार्था।**

भाष्यार्कप्रकाशः

[1]तन्तुनाभ ऊर्णनाभः कीटविशेषः; स हि तन्तून् यथा अविच्छेदेन सृजति वयति, दृढं कीटान्तरांस्तत्र बध्नाति, तद्वन्मनोऽपि सङ्कल्पविकल्पादीनविच्छेदेन सृजति, तैः पुरुषं बध्नाति च दृढमिति भावः। एतेन दृढमित्यस्य दृढबन्धकमित्यर्थः सिद्धः। 'तन्तुनाग' इति पाठे वरुणपाशाख्यस्तोयचरः पदार्थस्तन्तुनागः। स ह्यतिदृढत्वादच्छेद्य इति बोध्यम्।

वायोरिवेत्यत्रत्यस्य इवशब्दस्य औपम्यवाचित्वमयुक्तम् , उत्कृष्टस्य मनस अपकृष्टेन वायुना औपम्यायोगात्। उपमानस्य हि चन्द्रादेरुत्कृष्टतया भाव्यं मुखादेरुपमेयात्। वेगवत्तादिषु मनसो वाय्वपेक्षया उत्कृष्टत्वं प्रसिद्धम्। तस्माद् अव्ययानामनेकार्थत्वाद् इवशब्दस्यात्र अप्यर्थकत्वमित्यभिप्रेत्याह— **वायोरपीति**। सुष्ठु दुष्करः सुदुष्करः, तं सुदुष्करम्।

हे कृष्ण! मनः चञ्चलं प्रमाथि बलवद् दृढं च भवति। अहं वायोरिव तस्य निग्रहं सुदुष्करं मन्ये इत्यन्वयः। दुःखेन कर्तुं शक्यो दुष्करः; कर्तुमशक्य इत्यर्थः। ईष(द्द)दिति खर् [खल्][2]॥ ३४॥

**असंशयमिति**। असंशयमित्यर्थाभावेऽव्ययीभाव इत्यभिप्रेत्याह— **नास्ति संशय इति**। कुत्रासंशयम्? अत आह— **मनो दुर्निग्रहं चलमित्यत्रेति**। त्वदुक्तार्थे न कश्चित् संशयः; चञ्चलं हि मन इति त्वदुक्तार्थः सत्य एवेत्यर्थः। तुशब्दार्थमाह— **किं त्विति**। कस्यां चिच्चित्तभूमौ चित्तस्य समानप्रत्ययावृत्तिरभ्यासः; चित्तस्य भूमिः स्थलम् , विषय इति यावत्। विष्णुमूर्त्यादिरूप इति भावः। **समानप्रत्ययाः** एकाकारज्ञानानि, तेषामावृत्तिः; यथा प्रणवोपासकानां प्रणवश्चित्तभूमिः। ॐ ब्रह्म, प्रणवो ब्रह्मेति वा असकृच्चिन्तनं समानप्रत्ययावृत्तिः। यथा वा विष्णुमूर्त्युपासकानां विष्णुमूर्तिश्चित्तभूमिः, तद्विषयाः समानप्रत्ययाः— विष्णुमूर्तिर्ब्रह्म, विष्णुमूर्तिर्ब्रह्म

---

१. भाष्ये 'तन्तुनाभवत्' इति रा.पा.। २. 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' (पा.सू.३-३-१२६) इति सूत्रेण खल् प्रत्ययः।

**असंयतात्मना योगो दुष्प्राप इति मे मतिः।**
**वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः॥ ३६॥**

**नाम दृष्टादृष्टेष्टभोगेषु दोषदर्शनाभ्यासाद् वैतृष्ण्यम् , तेन च वैराग्येण गृह्यते विक्षेपरूपः प्रचारश्चित्तस्य। एवं तन्मनो** गृह्यते **निगृह्यते, निरुध्यत इत्यर्थः॥ ३५॥**

**यः पुनरसंयतात्मा, तेन—** असंयतात्मनेति। असंयतात्मना **अभ्यासवैराग्याभ्यामसंयतः आत्मा अन्तःकरणं यस्य सोऽयम् असंयतात्मा तेनासंयतात्मना योगो** दुष्प्रापो **दुःखेन प्राप्यत इति मे मतिः। यस्तु पुनर्वश्यात्मा अभ्यासवैराग्याभ्यां वश्यत्वमापादित आत्मा मनो यस्य सोऽयं वश्यात्मा, तेन** वश्यात्मना तु यतता **भूयोऽपि प्रयत्नं कुर्वता शक्योऽवाप्तुं योगः** उपायतो **यथोक्तादुपायात्॥ ३६॥**

आनन्दगिरिकृतव्याख्या

**वैराग्यस्वरूपं निरूपयति—** वैराग्यमिति। **तेषु वैतृष्ण्यं वैराग्यं नामेति सम्बन्धः। तत्र हेतुं सूचयति—** दोषेति। **विषयेषु तृष्णाविषयेषु दोषदर्शनमभ्यस्यते। तेन वैतृष्ण्यं जायते। निगृह्यमाणं निर्दिशति—** विक्षेपेति। **तस्मिन्**[१] **गृहीते निरुद्धे । मनोनिरोधेऽस्य किं स्यादित्यपेक्षायामाह—**एवमिति। **अभ्यासहेतुकवैराग्यद्वारा चित्तप्रचारनिरोधे निरुद्धवृत्तिकं मनो विषयविमुखमन्तर्निष्ठं भवतीत्यर्थः ॥ ३५॥**

**संयतात्मनो योगप्राप्तिः सुलभेत्युक्त्वा व्यतिरेकं दर्शयति—** यः पुनरिति। **व्यतिरेकोपन्यासपरं पूर्वार्धमनूद्य व्याकरोति—** असंयतेति। **पूर्वोक्तान्वयव्याख्यानपरमुत्तरार्धं व्याचष्टे—** यस्त्वित्यादिना। **अन्तःकरणस्य स्ववशत्वे सिद्धेऽपि वैराग्यादावास्थावता भवितव्यमित्याह—** यततेति। उपायो **वैराग्यादिपूर्वको मनोनिरोधः॥ ३६॥**

भाष्यार्कप्रकाशः

इत्याकारकाः, तेषामावृत्तिः। यथा वा आत्मोपासकानामात्मा चित्तभूमिः। तद्विषयाश्चित्तस्य समानप्रत्ययाः अहं ब्रह्मास्मि, अहं ब्रह्मास्मीत्येवंरूपा बुद्धिवृत्तयः, तेषामावृत्तिरिति। **दोषाः** क्षयिष्णुत्वसातिशयत्वदुःखोदर्कत्वादयः, तेषां दर्शनाभ्यासाद् असकृद्दर्शनादि-त्यर्थः। जातमिति शेषः। **वैतृष्ण्यं** विगता तृष्णा विषयाभिलाषो यस्य स वितृष्णः तद्भावो वैतृष्ण्यम् , तृष्णाऽभाव इत्यर्थः। **गृह्यते**। किं गृह्यते? अत आह— **चित्तस्य प्रचार इति**। चित्तप्रचारस्याकारमाह— **विक्षेपरूप इति**। विक्षेपश्चलनं; विषयेषु प्रवृत्तिरित्यर्थः। विषयसङ्कल्पविकल्पादिरूपा क्रियेति यावत्। चित्तविक्षेपनिरोधे सति चित्तनिरोधो जातप्राय इत्याह— **एवं तन्मनो गृह्यत इति। तन्मनः** चञ्चलं मन इत्यर्थः।

हे महाबाहो! चलं मनो दुर्निग्रहमित्यसंशयम्। तु , तदिति शेषः। हे कौन्तेय! अभ्यासेन वैराग्येण च गृह्यते, पुरुषेणेति शेषः। चञ्चलमपि मनः अभ्यासवैराग्याभ्यां साधनाभ्यां चित्तविक्षेपनिरोधद्वारा पुरुषेण निरुद्धं भवतीत्यर्थः। सङ्कल्पविकल्पादिक्रियास्वभावस्य मनसः सहसा निर्व्यापारीकरणस्याशक्यत्वात् प्रणवाद्यालम्बनचिन्तनात्मकक्रियायां तन्मनः प्रवर्त्य विषयदोषदृष्ट्या विषयचिन्तनाद् निवर्त्य च शनैःशनैः स्वाधीनं कुर्यात् स्वभावदुष्टं वाजिनमिव कुशल इत्यभिप्रायः॥ ३५॥

**असंयतेति। असंयतो**ऽनियतः; अस्वाधीन इत्यर्थः। दुःखेन प्राप्तुं शक्यो **दुष्प्रापः**, प्राप्तुमशक्य इत्यर्थः। **मे मतिः** मम मतम्। **भूयोऽपीति**। इतः प्राक् मनसः स्वायत्तीकरणे प्रयत्नस्य कृतत्वाद् भूयोऽपीत्युक्तम्। अनेन जितेऽपि मनसि न विश्वासः कर्तव्यः, किन्तु सर्वदापि तज्जय एव कृतावधानेन भवितव्यम् , अन्यथा स्वाभाविकदोषस्य पुनरप्यापातप्रसङ्गान्मनस इति सूचितम्। **उपायः** साधनानुष्ठानम्। तच्चोक्तं निश्चयानिर्वेदसमदर्शनादिकम्॥ ३६॥

---

१. तस्मिन् चित्तप्रचारे निरुद्धे मनोनिरोधः भवतीति शेषः।

**अर्जुन उवाच—**

**अयतिः श्रद्धयोपेतो योगाच्चलितमानसः।**
**अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण ! गच्छति॥ ३७॥**
**कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति।**

**तत्र योगाभ्यासाङ्गीकरणेन [1]इहलोकपरलोकप्राप्तिनिमित्तानि कर्माणि संन्यस्तानि; योगसिद्धिफलं च मोक्ष-साधनं सम्यग्दर्शनं न प्राप्तमिति, योगी योगमार्गाद् मरणकाले चलितचित्त इति तस्य नाशमाशङ्क्यार्जुन उवाच—** अयतिरिति। अयतिः **अप्रयत्नवान् योगमार्गे** श्रद्धया **आस्तिक्यबुद्ध्या चोपेतो योगाद् अन्तकाले(ऽपि)च चलितं मानसं मनो यस्य स** चलितमानसो **भ्रष्टस्मृतिः, सोऽप्राप्य** योगसंसिद्धिं **योगफलं सम्यग्दर्शनम् , कां गतिं, हे कृष्ण ! गच्छति?॥ ३७॥**

कच्चिदिति। कच्चित् **किं नोभयविभ्रष्टः कर्ममार्गाद् योगमार्गाच्च विभ्रष्टः सन् छिन्नाभ्रमिव नश्यति, किंवा न**

आनन्दगिरिकृतव्याख्या

**प्रश्नान्तरमुत्थापयति—** तत्रेत्यादिना। **मनोनिरोधस्य दुःखसाध्यत्वमाशङ्क्य परिहृते सति प्रष्टा पुनरवकाशं प्रतिलभ्योवाचेति सम्बन्धः। लोकद्वयप्रापककर्मसम्भवे कुतो योगिनो नाशाशङ्केत्याशङ्क्याह—** योगाभ्यासेति। **तथापि योगानुष्ठानपरिपाकपरिप्रापितसम्य-ग्दर्शनसामर्थ्यान्मोक्षोपपत्तौ कुतस्तस्य नाशाशङ्केति चेद्? मैवम् ; अनेकान्तरायवत्त्वाद् योगस्येह जन्मनि प्रायेण संसिद्धेरसिद्धिरि-त्यभिसन्धायाह—** योगसिद्धीति। **अभ्युदयनिःश्रेयसबहिर्भावो** नाशः। योगमार्गे **तत्फलस्य सम्यग्दर्शनस्यादर्शनादिति शेषः। तर्हि ततो बहिर्मुखत्वमेवात्यन्तिकं संवृत्तमित्याशङ्क्याह—** श्रद्धयेति। **तर्हि योगमार्गमाश्रयते, नेत्याह—** योगादिति। **मरणकाले व्याकुलेन्द्रियस्य ज्ञानसाधनानुष्ठानावकाशाभावाद् युक्तं ततश्चलितमानसत्वमित्याशङ्क्याह—** भ्रष्टेति। **गम्यत इति** गतिः **पुरुषार्थः। सामान्यप्रश्नमन्तर्भाव्य विशेषप्रश्नो द्रष्टव्यः॥ ३७॥**

भाष्यार्कप्रकाशः

**अयतिरिति। योगाभ्यासकरणेनेति।** असंन्यासिनो योगमार्गानधिकारादिति भावः। **योगमार्गाद्** ध्यानमार्गात्। **मरणकाल इति।** तदानीं कफवातदोषवशादिति भावः। चलितं विक्षिप्तं चित्तं यस्य सः। न हि म्रियमाणस्य चित्तसमाधानं सुकरमिति भावः। **नाशमिति।** कर्मतत्फलसंन्यासादैहिकामुष्मिकभोगभ्रंशः, योगस्य चासमाप्तत्वान्मोक्षाद् भ्रंश इत्युभयभ्रंशरूपो नाश इति भावः। गृहस्थस्य कर्मफलभ्रंशरूपनाशासम्भवात् , मोक्षभ्रंशमात्रेण नाशस्य दुर्वचत्वान्नायं गृहस्थविषयः प्रश्नः, किन्तु संन्यासिविषय एवेति प्रागेव व्यवस्थापितमाचार्यैः।

अयतिः श्रद्धयोपेतः योगाच्चलितमानसः संन्यासीति शेषः, प्रकरणात्। योगसंसिद्धिमप्राप्य हे कृष्ण! कां गतिं गच्छति। यतत इति यतिः, न यतिरयतिः अयतमानः। यावदर्थमाह— **अप्रयत्नवानिति।** यद्वा गतिरितिवद् यतिरिति भावप्रत्ययान्तः। न विद्यते यतिः प्रयत्नो यस्य सोऽयतिः अप्रयत्नः। प्रयत्नोऽस्यास्तीति प्रयत्नवान् स न भवतीत्यप्रयत्नवानिति भाष्ये विग्रहः। आफलोदयं प्रयत्नरहित इत्यर्थः। सुतरामप्रयत्नत्वे योगाच्चलितमानस इति वक्तुमयुक्तत्वात्। श्रद्धाऽत्र योगमार्गविषयिण्येव प्रकरणादित्याह— **योगमार्ग इति।** विषयसप्तमी। **आस्तिक्यबुद्धिः** अस्ति दिष्टम् (इति) मतिर्यस्य स आस्तिकः, तद्भाव आस्तिक्यं तद्बुद्धिः। योगप्राप्यमोक्षादौ अस्तित्वबुद्धिरित्यर्थः। गम्यते प्राप्यत इति गतिः। भ्रष्टेनानेन किं प्राप्यत इत्यर्थः॥ ३७॥

**कच्चिदिति।** हे महाबाहो! पूर्वश्लोकोक्तो योगी अप्रतिष्ठः, ब्रह्मणः पथि विमूढःसन् , अत एव उभयभ्रष्टःसन् , छिन्नाभ्रमिव न

१. 'परलोकेहलोक' इति पा.।

**अप्रतिष्ठो महाबाहो ! विमूढो ब्रह्मणः पथि॥ ३८॥**
**एतन्मे संशयं कृष्ण ! छेत्तुमर्हस्यशेषतः।**
**त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते॥ ३९॥**

**नश्यति** अप्रतिष्ठो **निराश्रयो हे महाबाहो ! विमूढः सन्** ब्रह्मणः पथि **ब्रह्मप्राप्तिमार्गे॥ ३८॥**

एतदिति। [1]**एतन्मे मम संशयं कृष्ण!** छेत्तुम् **अपनेतुम् अर्हस्यशेषतः।** त्वदन्यः **त्वत्तोऽन्य ऋषिर्देवो वा** छेत्ता **नाशयिता संशयस्यास्य न** हि **यस्माद्** उपपद्यते **न सम्भवति, अतस्त्वमेव छेत्तुमर्हसीत्यर्थः॥ ३९॥**

आनन्दगिरिकृतव्याख्या

**प्रश्नमेव विवृणोति—** कच्चिदिति। **प्रशस्तप्रश्नार्थत्वं कच्चिदित्यस्याङ्गीकृत्य व्याचष्टे—** किमिति। **उभयविभ्रष्टत्वं स्पष्टयति—** कर्मेत्यादिना। **वायुना छिन्नं विशकलितमभ्रं यथा नश्यति, तद्वदित्याह—** छिन्नेति। **नाशाशङ्कानिमित्तमाह—** निराश्रय इति। **कर्ममार्गरूपावष्टम्भाभावेऽपि ज्ञानमार्गावष्टम्भस्तस्य भविष्यतीत्याशङ्क्याह—** विमूढः सन्निति। **न हि कर्मिणं प्रतीयमाशङ्का युक्ता, फलाभिलाषं त्यक्त्वेश्वरे समर्प्यासमर्प्य वा कर्मानुतिष्ठतो निरुपचारेण तद्भ्रंशवचनासम्भवात्। सर्वकर्मसंन्यासिनस्तु विहितानां त्यागाज्ज्ञानोपायाच्च विच्युतेरनर्थप्राप्तिशङ्का युक्तेति भावः॥ ३८॥**

**यथोपदर्शितसंशयापकरणार्थमर्जुनो भगवन्तं प्रेरयन्नाह—** एतदिति। **मत्तोऽन्यः कश्चिद् ऋषिर्वा देवो वा त्वदीयं संशयं छेत्स्यतीत्याशङ्क्याह—** त्वदन्य इति। **अन्यस्य संशयच्छेत्तुरभावे फलितमाह—** अत इति॥ ३९॥

भाष्यार्कप्रकाशः

नश्यति कच्चित्? संन्यासस्वीकारात् कर्ममार्गभ्रंशः, योगस्यासमाप्तत्वाद् योगमार्गाद् भ्रंश इत्युभयभ्रंशवान् **उभयभ्रष्टः। छिन्नाभ्रं** वायुना विशकलितो मेघः। तद्धि निराश्रयं गगन एव नश्यति, न तु पर्वतादिकं स्वस्थानं प्राप्नोति, नापि समुद्रं गम्यस्थानम् , किन्तु मध्य एव नश्यति, अत उभयभ्रष्टमेव तत्। स्वस्थानत्यागाद् गन्तव्यस्थानाप्राप्तेश्च; तद्वदयमपीति भावः।

असङ्गस्य ब्रह्मणः कथं मार्गसङ्गित्वम्? अत आह— **ब्रह्मप्राप्तिमार्ग इति।** मोक्षमार्ग इत्यर्थः। अभ्युदयमार्गं विहाय मोक्षमार्गं प्रविष्टः कालाद्यभावात् तत्र निरालम्बनं विमोहं च प्राप्तःसन्नयं योगी न नश्यति किमित्यर्थः। नश्यति किमिति प्रष्टव्ये न नश्यति किमिति प्रश्नः तादृशयोगिनो नाशाभावः स्वस्येष्ट इति सूचयितुम्। छिन्नाभ्रमिवेति तु व्यतिरेकदृष्टान्तः। यथा छिन्नाभ्रं नश्यति, तथाऽयं न नश्यति किमिति। अत्र छिन्नाभ्रं पूर्वस्माद् बृहतो मेघाच्छिन्नः शकलः। परं बृहन्मेघमप्राप्य पूर्वं बृहन्मेघं च त्यक्त्वा मध्ये यथा नश्यति, तद्वदिति **केचित्।**

यत्तु **रामानुजः**— यथावस्थितं स्वर्गादिसाधनभूतं कर्म फलाभिसन्धिरहितस्यास्य पुरुषस्य स्वफलसाधनत्वेन प्रतिष्ठा न भवतीत्यप्रतिष्ठः। प्रक्रान्ते ब्रह्मणः पथि विमूढः तस्मात् पथः प्रच्युतः, अत उभयभ्रष्ट इति, **तत्तुच्छम्** ; स्वर्गादिसाधनभूतस्यापि फलाभिसन्धिरहितस्यानुष्ठितस्य कर्मणः चित्तशुद्धिदुरितक्षयादिरूपमहाफलसत्त्वात् , ईश्वरार्थमनुष्ठितस्यापि कर्मणो महाफलसत्त्वात् , स्वर्गाद्यसाधननित्यकर्मफलसत्त्वाच्च न गृहस्थस्य योगमार्गाश्रयणमात्रेण कर्मपथभ्रंशः। तस्मान्न गृहस्थं प्रत्युभयभ्रष्टप्रश्नोपपत्तिः। प्रतिपादितं चैतदध्यायारम्भ एव **श्रीमच्छङ्करभगवत्पादाचार्यैः** ॥ ३८॥

**एतमिति। एतं** पूर्वोक्तं संन्यासिनोऽप्रतिष्ठितयोगस्योभयभ्रष्टत्वप्रयुक्तनाशसत्त्वासत्त्वरूपमित्यर्थः। ईश्वरादन्यत्वं द्विपात्पश्वादिष्वप्यस्ति, परन्तु तेषु दर्शितसंशयच्छेदनसामर्थ्यशङ्काया एवासम्भव इत्यभिप्रेत्याह— **ऋषिर्देवो वेति। ऋषिः** मन्त्रद्रष्टा वसिष्ठादिः। **देवो** ब्रह्मादिः। सामान्यतःसंशयच्छेदनसामर्थ्यशाल्यपि ऋषिर्देवो वा नास्य संशयस्य छेदने प्रभवतीति मन्येऽहमित्यर्थः। **अत इति।**

१. 'एतं' इति मूले , भाष्ये च रा.पा.।

**श्रीभगवानुवाच—**

**पार्थ ! नैवेह नामुत्र विनाशस्तस्य विद्यते।**
**न हि कल्याणकृत् कश्चिद् दुर्गतिं तात ! गच्छति॥४०॥**

पार्थेति। हे **पार्थ! नैवेह लोके,** नामुत्र **परस्मिन् वा लोके विनाशस्तस्य** विद्यते **नास्ति।** नाशो **नाम पूर्वस्माद् हीनजन्मप्राप्तिः। स योगभ्रष्टस्य नास्ति। न** हि **यस्मात्** कल्याणकृच्**छुभकृत् कश्चिद्** दुर्गतिं **कुत्सितां गतिम्— हे तात! तनोत्यात्मानं पुत्ररूपेणेति पिता तात उच्यते; पितैव पुत्र इति पुत्रोऽपि तात उच्यते; शिष्योऽपि** [1]**पुत्रतुल्यः उच्यते; —**[2]**गच्छति ॥४०॥**

**किं त्वस्य भवति?—** प्राप्येति। **योगमार्गे प्रवृत्तः संन्यासी सामर्थ्यात्** प्राप्य **गत्वा** पुण्यकृताम्

आनन्दगिरिकृतव्याख्या

**योगिनो नाशाशङ्कां परिहरन्नुत्तरमाह—** श्रीभगवानिति। **यदुक्तमुभयभ्रष्टो योगी नश्यतीति, तत्राह—** पार्थेति। **तत्र हेतुमाह—** नैवेति। **योगिनो मार्गद्वयाद् विभ्रष्टस्यैहिको नाशः शिष्टगर्हालक्षणो न भवतीति श्रद्धादेः सद्भावात्। तथापि कथमामुष्मिकनाशशून्यत्वमित्याशङ्क्य तद्रूपनिरूपणपूर्वकं तदभावं प्रतिजानीते—** नाशो नामेति। **तत्र हेतुभागं विभजते—** न हीत्यादिना। **उभयभ्रष्टस्यापि श्रद्धेन्द्रियसंयमादेः सामिकृतश्रवणादेश्च भावादुपपन्नं शुभकृत्त्वम्। तातेति कथं पुत्रस्थानीयः शिष्यः सम्बोध्यते? पितुरेव तातशब्दत्वादित्याशङ्क्याह—** तनोतीति। **तेन पुत्रस्थानीयस्य शिष्यस्य तातेति सम्बोधनमविरुद्धमित्यर्थः। न गच्छति कुत्सितां गतिम्, कल्याणकारित्वादिति नाशाभावः॥४०॥**

**योगभ्रष्टस्य लोकद्वयेऽपि नाशाभावे किं भवतीति पृच्छति—** किं त्विति। **तत्र श्लोकेनोत्तरमाह—** प्राप्येति। **कथं संन्यासीति**

भाष्यार्कप्रकाशः

यस्मादन्यः प्रकृतसंशयच्छेत्ता नास्ति तस्मादित्यर्थः। तवैव सर्वज्ञत्वादिति भावः॥३९॥

**पार्थेति।** ऐहलौकिकतिर्यगादिहीनजन्मप्राप्तिरूपः, पारलौकिकनारक्यादिहीनजन्मप्राप्तिरूपो वा नाशो नास्ति योगभ्रष्टस्येत्यर्थः। कल्याणकृतो दुर्गतिप्राप्त्यसम्भवः सर्वविदित एव। योगो हि परं कल्याणम्। तस्माद् योगकृतो नास्ति दुर्गतिप्राप्तिरिति द्वितीयवाक्यार्थः।

हे **तात** ! हे शिष्य ! कथं शिष्ये तातशब्दप्रयोगः? अत आह— **तनोतीत्यादि।** आत्मानं पुत्ररूपेण **तनोति** विस्तारयति, उत्पादयतीति यावत्, तातः। 'अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे' इति श्रुतेः पितृभुक्तान्नपरिणामरूपवीर्यमयत्वाच्च पुत्रस्य। न च कथमात्मनो जन्यत्वं जनकत्वं वेति वाच्यम्, पितृदेहात् पुत्रदेहो जायत इति कार्यकारणसङ्घातरूपयोरेव पितृपुत्रयोरिह ग्रहणात्।

एवं पितुस्तातशब्दवाच्यत्वमुत्पाद्य[वाच्यत्वं व्युत्पाद्य] पुत्रस्यापि तद् व्युत्पादयति— **पितैवेति।** 'आत्मा वै पुत्रनामासी'ति श्रुतेरिति भावः। अथ शिष्यस्य तत्त्वं प्रतिपादयति— **शिष्योऽपीति।** 'वंशो द्वेधा विद्यया जन्मना चे'ति शास्त्रात् पिता पुत्रं जन्मना जनयति; आचार्यस्तु शिष्यं विद्यया जनयति। तथा च विद्यया जन्यजनकभावः शिष्याचार्ययोरस्तीति गुरुः पिता, शिष्यस्तु पुत्रः। दर्शितरीत्या यथा पुत्रस्तातः, तथा शिष्योऽपि तात एवेत्यभिप्रेत्याह— **शिष्योऽपि पुत्रवदिति। अपुत्रोऽपीति।** पुत्रसदृशः शिष्यो ऽपीत्यर्थः। नञ(र्थ)स्तत्सादृश्यस्याप्यर्थत्वात्। न च पुत्रादन्योऽपुत्र इति तदन्यत्वमत्र नञर्थ इति वाच्यम्, तथा सति पुत्रादन्यस्य घटस्याप्यपुत्रत्वापत्तेः। न चेष्टापत्तिः, अपुत्रस्य घटस्य तातपदवाच्यत्वापत्तेः। 'शिष्योऽपि पुत्र उच्यते' इत्येतावन्मात्रमेव केषुचित् पुस्तकेषु पाठान्तरं दृश्यते॥४०॥

---

१. 'शिष्योऽपि पुत्रवदिति अपुत्रोऽपि तात उच्यते।' इति रा. पा.। 'शिष्योऽपि पुत्र उच्यते' इति पा.। २. 'यतो न गच्छति' इति पा.।

**प्राप्य पुण्यकृतां लोकान् उषित्वा शाश्वतीः समाः।**
**शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते॥४१॥**
**अथवा योगिनामेव कुले भवति धीमताम्।**

**अश्वमेधादियाजिनां लोकान्, तत्र च** उषित्वा **वासमनुभूय** शाश्वतीः **नित्याः** समाः **संवत्सरान्, तद्भोगक्षये** शुचीनां **यथोक्तकारिणां** श्रीमतां **विभूतिमतां** गेहे **गृहे योगभ्रष्टोऽभिजायते** ॥४१॥

अथवेति। **अथवा श्रीमतां कुलादन्यस्मिन्** योगिनामेव **दरिद्राणां कुले** भवति **जायते धीमतां** बुद्धिमताम्। **एतद्धि जन्म यद् दरिद्राणां योगिनां कुले** दुर्लभतरं **दुःखलभ्यतरं पूर्वमपेक्ष्य, लोके जन्म यदीदृशं यथोक्तविशेषणे**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**पूर्वमपेक्ष्येति**। जिज्ञासुत्वावस्थयोः[स्थायाः] पूर्वमनादौ संसारे बहूनीश्वरसूकरादि[नि श्वसूकरादि]जन्मानि बभूवुः। तदपेक्षया दुर्लभतरमित्यर्थः ॥४२॥

॥इति श्रीमद्भगवद्गीताभाष्यटिप्पणे षष्ठोऽध्यायः॥

आनन्दगिरिकृतव्याख्या

**विशेष्यते? तत्राह—** सामर्थ्यादिति। **कर्मणि व्यापृतस्य कर्मिणो योगमार्गप्रवृत्त्यनुपपत्तेः, तत्प्रवृत्तावपि फलाभिलाषविकलस्येश्वरे समर्पितसर्वकर्मणस्तद्भ्रंशाशङ्कानवकाशादित्यर्थः। समानां** नित्यत्वं **मानुषसमाविलक्षणत्वम्**[१]। **वैराग्याभावविवक्षया विभूतिमतां गृहे जन्मेति विशेष्यते॥४१॥**

**श्रद्धावैराग्यादिकल्याणाधिक्ये पक्षान्तरमाह—** अथवेति। **योगिनामिति कर्मिणां ग्रहणं मा भूदिति विशिनष्टि—** धीमतामिति। **ब्रह्मविद्यावतां शुचीनां दरिद्राणां कुले जन्म दुर्लभादपि दुर्लभम्, प्रमादकारणाभावादित्याह—** एतद्धीति। **किमपेक्ष्यास्य जन्मनो दुःखलभ्यादपि दुःखलभ्यतरत्वम्? तदाह—** पूर्वमिति। **यद्यपि विभूतिमतामपि शुचीनां गृहे जन्म दुःखलभ्यम्, तथापि तदपेक्षयेदं जन्म**

भाष्यार्कप्रकाशः

**प्राप्येति**। योगभ्रष्टः पुण्यकृतां लोकान् प्राप्य शाश्वतीः समाः उषित्वा शुचीनां श्रीमतां गेहे अभिजायते। कोऽसौ योगभ्रष्टः? अत आह— **योगमार्गे प्रवृत्तः संन्यासीति**। योगमार्गे प्रवृत्तिं विना ततो भ्रंशायोगात्। असंन्यासिनो योगमार्गेऽधिकाराभावाच्चेति भावः। इदमेव सूचयति— **सामर्थ्यादिति**। योगभ्रष्टपदग्रहणबलादित्यर्थः। पुण्यम् अश्वमेधयागादिरूपं धर्मं कृतवन्त इति पुण्यकृतः। पुण्यं कुर्वन्तीति तु [न] विग्रहः। तेषां लोकानिति। यान् लोकान् ते गच्छन्ति तानित्यर्थः। **नित्या इति**। अनेका इत्यर्थः। अविनाशित्वरूपनित्यत्वासम्भवात् संवत्सराणाम्। कदा जायते? अत आह— **तद्भोगक्षय इति**। प्रारब्धक्षयं विना देवादिशरीरपाता-सम्भवादिति भावः। वेदविहितकर्माननुष्ठातृषु शुचित्वासम्भवादाह— **यथोक्तकारिणामिति**। उक्तमनतिक्रम्य यथोक्तं कर्तुं शीलं येषां ते यथोक्तकारिणः; वेदविहितानुष्ठातार इत्यर्थः; तेषाम्। **विभूतिः** सम्पत्। **अभिजायते** अवश्यं जायते॥४१॥

**अथवेति**। अथवेति पक्षान्तरात् पूर्वं श्रीमत्कुलजन्मपक्षस्योक्तत्वादिदानीं तद्भिन्नदरिद्रकुलजन्मपक्ष उच्यत इत्याह— **श्रीमतां कुलादन्यस्मिन्निति। योगिनां** कर्मयोगिनां दरिद्राणां **कुले** वंशे। ननु श्रीमतां कुले जन्मैव श्लाघ्यम्, न तु दरिद्राणां योगिनामिति मन्वानमालक्ष्यार्जुनमाह— **एतद्धीति**। एतच्छब्दार्थमाह— **दरिद्राणां योगिनां कुले जन्मेति**। अयोगिनां दरिद्राणां कुले जन्मनः पापहेतुत्वाद्, योगिनामपि धनिकानां कुले जन्मनो मदहेतुत्वाच्च दरिद्राणां योगिनामित्युक्तम्। दुःखेन लब्धुं शक्यं दुर्लभम्; अतिशयेन दुर्लभं दुर्लभतरम्; दुःखेनापि लब्धुमशक्यमित्यर्थः। किमपेक्षयेत्यत आह— **पूर्वमपेक्ष्येति**। शुचीनां श्रीमतां गेहे जन्मापेक्ष्येत्यर्थः।

१. मानुषसंवत्सरापेक्षया ब्राह्मसंवत्सरस्य परिमाणतः आधिक्यं विलक्षणत्वम्। तच्च 'सहस्रयुगपर्यन्तम्' (भ.गी. ८-१७) इत्यादिना दर्शितम्।

**एतद्धि दुर्लभतरं लोके जन्म यदीदृशम्॥ ४२॥**
**तत्र तं बुद्धिसंयोगं लभते [१]पौर्वदेहिकम्।**
**यतते च ततो भूयः संसिद्धौ कुरुनन्दन !॥ ४३॥**

**कुले॥ ४२॥**

**यस्मात्—** तत्रेति। तत्र **योगिनां कुले तं** बुद्धिसंयोगं **बुध्या संयोगं बुद्धिसंयोगं लभते** पौर्वदेहिकं **पूर्वस्मिन् देहे भवं पौर्वदेहिकम्।** यतते च **प्रयत्नं च करोति** ततः **तस्मात् पूर्वकृतात् संस्काराद्** भूयो **बहुतरं** संसिद्धौ **संसिद्धिनिमित्तम्, हे कुरुनन्दन !॥ ४३॥**

आनन्दगिरिकृतव्याख्या

**दुःखलभ्यतरं यदीदृशं शुचीनां दरिद्राणां विद्यावतामिति विशेषणोपेते कुले लोके जन्म व[ल]क्ष्यमाणमित्यर्थः॥ ४२॥**

**यदुत्तमतरं जन्मोक्तं तस्योत्तमत्वे हेत्वन्तरमाह—** यस्मादिति। बुध्येति। **आत्मविषययेति शेषः। पूर्वस्मिन् देहे भवं तत्रानुष्ठित-साधनविशेषयुक्तमित्यर्थः। तर्हि यथोक्तजन्मनि साधनानुष्ठानमन्तरेणैव बुद्धिसम्बन्धः स्यादित्याशङ्क्याह—** यतते चेति। प्रयत्नः **श्रवणाद्यनुष्ठानविषयः**[२]॥ ४३॥

भाष्यार्कप्रकाशः

तत्तु शुचीनां श्रीमतां गेहे जन्म दरिद्रयोगिकुलजन्मेतरजन्मापेक्षया उत्कृष्टमेवेति बोध्यम्। **यथोक्तविशेषण इति**। दरिद्रत्वयोगित्वरूप-विशेषणद्वयविशिष्टे इत्यर्थः। यदीदृशं जन्म तदेतज्जन्म लोके दुर्लभतरं हीत्यन्वयः। हिः प्रसिद्धौ॥ ४२॥

**तत्रेति**। दरिद्रयोगिकुलजन्मनः कुतः प्राशस्त्यं श्रीमच्छुचिकुलजन्मापेक्षयेत्यत आह— **तत्रेति।**

**ननु** दरिद्रयोगिकुले जातस्य योगभ्रष्टस्य पौर्वदेहिकबुद्धिसंयोगलाभः; श्रीमच्छुचिकुले जातस्य तस्यैव तल्लाभो नेति कुत उच्यत इति चेत्, **उच्यते**— दारिद्र्यानुभवेन पूर्वजन्मार्जितं पापमेव क्षीयते, न तु सुकृतम्, दारिद्र्यानुभवस्यासुकृतफलत्वात्, 'भिक्षिता शतमखीसुकृतं यत् तत्परिश्रमविदः स्वविभूतौ' इति **श्रीहर्षेण** इन्द्रैश्वर्यस्य शतमखीसुकृतजन्यत्वस्योक्तत्वात्। ऐहिकैश्वर्यस्यापि सुकृतपरिपाकरूपत्वस्य 'शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते' इत्यनेनैवोक्तत्वात्। तस्माद् यैः सम्पदनुभूयते तैः पूर्वसुकृतक्षय एव सम्पाद्यते। अत एव 'पूर्वपुण्यविभवव्ययलब्धाः सम्पदो विपद एव विमृष्टाः' इति **श्रीहर्षः** सम्पदां पूर्वपुण्यक्षयकारित्वेन विपद्रूपत्व-मेवावोचत्। तदेवं सम्पदनुभवेन पूर्वार्जितयोगसुकृतस्य क्षीणत्वान्नास्ति श्रीमच्छुचिकुलजातस्य पौर्वदैहिकबुद्धिसंयोगलाभः। दरिद्रयोगिकुलजातस्य तु दारिद्र्यानुभवेन योगसुकृतस्याक्षीणत्वात् तद्बलेन पौर्वदैहिकबुद्धिसंयोगलाभः। तस्माद् यस्य योगसुकृतं सम्पदनुभवेन क्षीणम्, सोऽपकृष्ट एव दरिद्रयोगिकुलजातापेक्षया, अस्य योगसुकृताङ्कुरस्याक्षीणस्य पुनः प्रयत्नेनाभिवृद्धिं [३]गमिष्य-माणत्वात्। तस्मात् सम्पदनुभवनाशितयोगाङ्कुराच्छ्रीमच्छुचिकुलजन्मनः दारिद्र्यानुभवानाशितवर्धितयोगाङ्कुरं दरिद्रयोगिकुलजन्मैव परमोत्तमम्।

**तं** पूर्वजन्मसम्पादितं **संयोगं** सम्बन्धम्। **बुद्धिश्चित्तसमाधानरूपो** योगः, तद्विषयं ज्ञानं वा। आत्मविषया बुद्धिरिति वा। पौर्वदैहिकम्, अनुशतिकादित्वादुभयपदवृद्धिः। संसिद्धाविति विषयसप्तमी। संसिद्धिर्मोक्षः, सम्यग्दर्शनं वा॥ ४३॥

---

१. 'पौर्वदैहिकम्' इति मूले भाष्ये च पा.। २. विवृतमिदं मधुसूदन्याम्—**ततः** तल्लाभानन्तरं **भूयो**ऽधिकं लब्धायाः भूमेरग्रिमां भूमिं सम्पादयितुं **संसिद्धौ** संसिद्धिर्मोक्षः, तन्निमित्तं **यतते च** प्रयत्नं करोति च। यावन्मोक्षं भूमिकां सम्पादयतीत्यर्थः। तत्र च नित्यानित्यवस्तुविवेकपूर्वकादिहामुत्रार्थभोगवैराग्याच्छमदम-श्रद्धातितिक्षासर्वकर्मसंन्यासादिपुरस्सरा मुमुक्षा **शुभेच्छाख्या** प्रथमा भूमिका। साधनचतुष्टयसम्पदिति यावत्। ततो गुरुमुपसृत्य वेदान्तवाक्य**विचारणा**त्मिका द्वितीया भूमिका। श्रवणमननसंपदिति यावत्। ततः श्रवणमननपरिनिष्पन्नस्य तत्त्वज्ञानस्य निर्विचिकित्सतारूपा **तनुमानसा** नाम तृतीया भूमिका। निदिध्यासन-सम्पदिति यावत्। चतुर्थी भूमिका तु तत्त्वसाक्षात्कार एव। पञ्चमषष्ठसप्तमभूमयस्तु जीवन्मुक्तेरवान्तरभेदा इति। ३. आत्मनेपदं चिन्त्यम्।

**पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः।**
**जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते॥ ४४॥**

**कथं पूर्वदेहबुद्धिसंयोग इति? तदुच्यते—** पूर्वेति। **यः पूर्वजन्मनि कृतोऽभ्यासः स** पूर्वाभ्यासः**, तेनैव बलवता ह्रियते** [१]**संसिद्धौ,** हि **यस्माद् अवशोऽपि स योगभ्रष्टः, न कृतं चेद् योगाभ्यासजात् संस्काराद् बलवत्तरमधर्मादिलक्षणं कर्म, तदा योगाभ्यासजनितेन संस्कारेण ह्रियते। अधर्मश्चेद् बलवत्तरः कृतस्तेन योगजोऽपि संस्कारोऽभिभूयत एव।**

आनन्दगिरिकृतव्याख्या

**यदि पूर्वसंस्कारोऽस्येच्छामुपनयन्** [२]**प्रवर्तयति, तथा चाप्रवृत्तिरनिच्छया स्यादित्याशङ्क्याह—** पूर्वेति। **स हि योगभ्रष्टः समनन्तरजन्मकृतसंस्कारवशाद् उत्तरस्मिञ्जन्मनि अनिच्छन्नपि योगं प्रत्येवाकृष्टो भवतीत्यर्थः। तत्र कैमुतिकन्यायं सूचयति—** जिज्ञासुरिति। **पूर्वार्धं विभजते—** यः पूर्वेति। **तस्मान्नेच्छया तस्य प्रवृत्तिरिति शेषः। योगभ्रष्टस्याधर्मादिप्रतिबन्धेऽपि तर्हि पूर्वाभ्यासवशाद् बुद्धिसम्बन्धः स्यादित्याशङ्क्याह—** नेत्यादिना। **यदि योगभ्रष्टेन योगाभ्यासजनितसंस्कारप्राबल्यात् प्रबलमधर्मप्रभेदरूपं कर्म न कृतं स्यात् , तदा तेन संस्कारेण वशीकृतः सन्निच्छादिरहितोऽपि बुद्धिसम्बन्धभाग् भवतीत्यर्थः। विपक्षे योगसंस्कारस्याभिभूतत्वाद् न कार्यारम्भकत्वमित्याह—**अधर्मश्चेदिति। **योगजसंस्कारस्याधर्माभिभूतस्य कार्यमकृत्वैवाभिभावकप्राबल्ये प्रणाशः स्यादित्याशङ्क्याह—**

भाष्यार्कप्रकाशः

**पूर्वेति।** अवशोऽपि सः तेनैव पूर्वाभ्यासेन ह्रियते। योगस्य जिज्ञासुरपि शब्दब्रह्मातिवर्तते। **सः** दरिद्रयोगिकुले जात इत्यर्थः। इदमेवाह— **योगभ्रष्ट इति।** पूर्वाभ्यासेन ह्रियत इति सामान्यत उक्तांशे विशेषमाह—**तेनेति।** योगभ्रष्टेनेत्यर्थः। तेन कर्म न कृतं चेदित्यन्वयः। कीदृशं कर्मेत्यत आह— **बलवत्तरमिति।** किमपेक्षयेत्यत आह— **योगाभ्यासेति।** किंलक्षणं कर्म, अत आह— **अधर्मादीति।** आदिपदाद् धर्मग्रहणम्। धर्माधर्मापेक्षया योगसंस्कारो बलवत्तरः स्याच्चेदित्यर्थः। **तदेति।** तर्हीत्यर्थः। **ह्रियत इति** योगाभ्यासं प्रति नीयत इत्यर्थः। पुनर्योगमार्गे प्रवर्त्यत इति यावत्। विपक्षे किं भवेदित्यत आह— **अधर्मश्चेदिति।** धर्मस्याप्युपलक्षणमिदम्। अधर्मादिलक्षणं योगसंस्कारापेक्षया बलवत्तरं कर्म तेन कृतं चेत् तर्हि तेन कर्मणा योगजोऽपि संस्कारोऽभिभूयत एव। न च अधर्मेण बलवत्तरेण योगसंस्कारस्याभिभवोऽस्तु नाम, कुतः पुनर्धर्मेणेति वाच्यम् , अधर्मवद् धर्मस्यापि योगप्रतिबन्धकत्वाभ्युपगमात्। अधर्मजन्यद्वन्द्वरोगादेरिव धर्मजन्यबलसम्पदादेरपि चित्तविक्षेपहेतुत्वेन योगप्रतिबन्धकत्वमिति। न च योगसंस्कारोऽपि धर्मसंस्कार एव, योगस्य धर्मत्वादिति वाच्यम् , 'अशुक्लकृष्णं कर्म योगिनः, त्रिविधमितरेषाम्' इति सूत्राच्छुक्लकृष्णमिश्रपदवाच्यधर्माधर्मतदुभयात्मककर्मभिन्नमेव योगिनः कर्मादृष्टाख्यमशुक्लकृष्णमिति धर्माधर्मसंस्कारभिन्न एव योगसंस्कारः। **ननु** अधर्मादिलक्षणकर्मणा योगसंस्कारस्याभिभव इति किम् , नाश इत्येव वक्तव्यम् , अत आह— **नेति।** दीर्घकालस्थस्यापि तस्य योगसंस्कारस्य नाशो नास्तीत्यन्वयः। कालान्तरेणापि योगसंस्कारः स्वकार्यं योगलक्षणमारभत एव, न तु सर्वात्मना नश्यतीत्यर्थः। तस्मान्न सर्वथा योगसंस्कारस्य वैफल्यमिति भावः। **अत इति।** सर्वथा योगसंस्कारस्य नाशाभावादित्यर्थः। **जिज्ञासुरपीति।** न तु ज्ञातयोगस्वरूपोऽपीत्यपेरर्थः। किमुत ज्ञातयोगस्वरूप इति यावत्। **शब्दब्रह्म** शब्दो वेदः, तद्रूपं ब्रह्म शब्दब्रह्म। लक्षणया वेदोक्तकर्मानुष्ठानफलमित्यर्थः। अतिक्रम्य वर्तते **अतिवर्तते।** फलितार्थमाह— **अपाकरिष्यतीति।** निरसिष्यतीत्यर्थः। वेदोक्तकर्मानुष्ठानजन्यं फलं तुच्छीकृत्य तद् विहाय महत्तरमेव फलं प्राप्स्यतीति भावः। **तन्निष्ठः** योगनिष्ठः। जिज्ञासुरपीत्यपिशब्दार्थं स्वयमेव स्फुटीकरोति— **किमुतेत्यादिना।**

यत्तु **रामानुजः**— शब्दब्रह्म देवमनुष्यादिशब्दप्रतिपाद्यप्रकृतिरिति, **तत्तुच्छम्** ; ब्रह्मशब्देनैव प्रकृत्यर्थलाभे शब्दपदवैयर्थ्यात्। न च शब्दाभिलापयोगं ब्रह्मैवाभिधीयते प्रकृतिरिति, अन्यत्तु परब्रह्मेति वाच्यम् , परब्रह्मरूपशब्दाभिलापयोग्यब्रह्मत्वस्य परब्रह्मण्यपि

---

१. संसिद्धौ इति क्वचिन्न। २. 'न प्रवर्तयति, तथा च प्रवृत्तिरनिच्छया' इति पा.।

**तत्क्षये तु योगजः संस्कारः स्वयमेव कार्यमारभते, न दीर्घकालस्थस्यापि विनाशस्तस्यास्तीत्यर्थः।** [1]जिज्ञासुरपि **योगस्य स्वरूपं ज्ञातुमिच्छन्नपि योगमार्गे प्रवृत्तः संन्यासी योगभ्रष्टः सामर्थ्यात् , सोऽपि** शब्दब्रह्म **वेदोक्त-कर्मानुष्ठानफलम्** अतिवर्तते **अतिक्रामति, अपाकरिष्यति; किमुत** [2]**बुद्ध्वा यो योगं तन्निष्ठोऽभ्यासं कुर्यात्॥ ४४॥**

आनन्दगिरिकृतव्याख्या

तत्क्षये त्विति। **कालव्यवधानान्निवृत्तिं शङ्कित्वोक्तम्—**नेति। **तृणजलायुकादृष्टान्तश्रुत्या संस्कारस्य दीर्घतायाः समधिगतत्वादिति भावः। कैमुतिकन्यायोक्तिपरमुत्तरार्धं विभजते—** जिज्ञासुरपीत्यादिना। **अत्रापि संन्यासीति विशेषणं पूर्ववदवधेयमित्याह—** सामर्थ्यादिति। **न हि कर्मी कर्ममार्गे प्रवृत्तस्ततो भ्रष्टः शङ्कितुं शक्यते। अतः संन्यासी पूर्वोक्तैर्विशेषणैर्विशिष्टो योगभ्रष्टोऽभीष्टः। सोऽपि वैदिकं कर्म तत्फलं चातिवर्तते, किमुत योगं बुद्धा तन्निष्ठः सदा अभ्यासं कुर्वन् कर्म तत्फलं चातिवर्तत इति वक्तव्यमिति योजना। योगनिष्ठस्य** कर्मतत्फलातिवर्तनं **ततोऽधिकफलावाप्तिर्विवक्ष्यते॥ ४४॥**

भाष्यार्कप्रकाशः

सत्त्वात्। न च देवमनुष्यादिशब्दाभिलापयोग्यं ब्रह्मात्र विवक्षितमिति वाच्यम् , देवमनुष्यादिविशेषशब्दाभावान्मूले।

**किञ्च** शब्दशब्दस्य शब्दाभिलापयोग्यार्थलाभोऽपि न लक्षणां विना निर्वोढुं शक्यते। अतोऽस्मन्मत इव तव मतेऽपि लक्षणा स्वीकृतैव। अथ योगं जिज्ञासुना प्रकृतिः कथमतिवर्त्येत? न कथमपि। प्रकृत्यतीतो हि तव मते परमात्मैव, तदधीनत्वात् प्रकृतेः। मुक्ताश्च भगवदनुग्रहादेव मायां तरन्ति, न तु स्वतः, न हि योगं जिज्ञासुः परमात्मा, नापि मुक्तः, किन्तु बद्धजीव एव; कथमस्य प्रकृत्यतिवर्तनम्? न च - स च योगं जिज्ञासुर्योगं ज्ञात्वा योगमनुष्ठाय प्रकृतिमतिवर्तत इत्यभिप्रायाज्जिज्ञासुरित्युक्तमिति - वाच्यम् , जिज्ञासुरपीत्यपिशब्देन ज्ञातयोगयोगानुष्ठातृभ्यां जिज्ञासोः पृथक्करणात् , अन्यथाऽपिशब्दवैयर्थ्यप्रसङ्गात्। अपि च अनुष्ठितयोगस्यापि न योगानुष्ठानमात्रेण प्रकृत्यतिवर्तनम् , किन्तु तज्जन्यसम्यग्दर्शनेनैव। ततश्च ज्ञानिन एव प्रकृत्यतिवृत्तिर्न तु योगिन इति सिद्धे किं पुनर्जिज्ञासितयोगस्येति।

**यच्चो**क्तमत्र 'ज्ञानानन्दमयस्त्वात्मा शेषोऽस्य परमात्मनः' इति **वेदान्तदेशिकः**; तच्च **तुच्छम्** ; ज्ञानानन्दमय इति मयटः किं प्राचुर्यमर्थः? यद्वा विकारः? अथ वा स्वार्थः? नाद्यः, आनन्दप्राचुर्ये दुःखाल्पत्वप्रतीतेः। न द्वितीयः, निर्विकारत्वादात्मनः, अकार्यत्वाच्च। नान्त्यः, वैयर्थ्यात्।

वैलक्षण्यार्थकस्तुशब्दोऽप्ययुक्तः; किमिदं वैलक्षण्यं परमात्मापेक्षया? उत अनात्मापेक्षया? नाद्यः, परमात्मनस्तव मते आनन्दमयत्वाज्ज्ञानस्वरूपत्वाच्च। 'आनन्दमयोऽभ्यासा'दिति सूत्रे आनन्दमय ईश्वर इति हि त्वयोक्तम्। कथं ज्ञानानन्दमयः परमात्मा तादृशादेवात्मनो भिन्नः स्यात्? अस्मन्मतेऽपि आनन्दरूपत्वादुभयोर्न भेदः। न द्वितीयः, विज्ञानमयानन्दमयकोशयो-रनात्मनोर्ज्ञानानन्दमयादात्मनः वैलक्षण्यस्य दुरुपपादत्वात्। न च विज्ञानमयकोशो जीवः, आनन्दमयकोश ईश्वरश्चेति वाच्यम् , विज्ञानमयमात्मानमुपसङ्क्रम्येति विज्ञानमयस्यानन्दे लयश्रवणात् , जीवस्य नित्यत्वाच्च। एवमानन्दमयस्याप्यानन्दे लयसम्भवेन तस्येश्वरत्वायोगाच्च। कोशवदात्मस्वरूपावरकत्वेन विज्ञानमयस्यानन्दमयस्य च कोशत्वव्यवहारादात्मनश्च कोशान्तरत्वात्।

एवं विज्ञानानन्दमयकोशयोरान्तरस्य ज्ञानानन्दरूपस्यात्मनो न परमात्मशेषत्वम् , अनन्यशेषत्वादात्मनः, सर्वं प्रति शेषित्वाच्च। आत्मभिन्नत्वे तु ईश्वरस्याप्यात्मशेषत्वापत्तेः, प्रपञ्चवत्। न हि ज्ञानानन्दरूपादात्मनो भिन्न ईश्वरो ज्ञानानन्दरूपो भवितुमर्हति। तथा सति भेदायोगात्। न च घटाद् घटस्येव मृन्मयान्मृन्मयस्य, ज्ञानानन्दरूपादात्मनो ज्ञानानन्दरूप ईश्वरो भिन्न इति वाच्यम् , घटयोर्भेदं प्रत्याकारभेदस्य प्रयोजकस्य सत्त्वात्। जीवेश्वरयोस्तु ज्ञानैकाकारत्वेन भेदप्रयोजकाकारान्तरासत्त्वात्। न च - स्वरूपतो भेदाभावोऽपि धर्मतः सोऽस्ति; आत्मनः किञ्चिज्ज्ञत्वात् परमात्मनश्च सर्वज्ञत्वादिति - वाच्यम् , किञ्चिज्ज्ञत्वसर्वज्ञत्वयो-रुपाधिधर्मत्वेनात्मधर्मत्वाभावात् , औपाधिकभेदस्य चातात्त्विकत्वात्। तस्मान्नास्त्यात्मनः परमात्माऽन्यः शेषी, किन्त्वात्मैव सर्वस्य

---

१. 'अतो जिज्ञासुरपि' इति रा. पा.। २. 'बुद्ध्वा योगं तन्निष्ठोऽभ्यासं कुर्वन्' इति पा.।

**प्रयत्नाद् यतमानस्तु योगी संशुद्धकिल्बिषः।**
**अनेकजन्मसंसिद्धस्ततो याति परां गतिम्॥ ४५॥**
**तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।**

**कुतश्च योगित्वं श्रेय इति—** प्रयत्नादिति। प्रयत्नाद् यतमानः **अधिकं यतमान इत्यर्थः; तत्र** योगी **विद्वान्** संशुद्धकिल्बिषो [1]**विशुद्धकिल्बिषः संशुद्धपापः अनेकेषु जन्मसु किञ्चित्किञ्चित् संस्कारजातमुपचित्य तेनोपचितेनानेकजन्मकृतेन संसिद्धः** अनेकजन्मसंसिद्धः, [2]**ततः समुत्पन्नसम्यग्दर्शनः सन् याति** परां **प्रकृष्टां गतिम्॥ ४५॥**

**यस्मादेवं तस्मात्—** तपस्विभ्य **इति। तपस्विभ्योऽधिको योगी, ज्ञानिभ्योऽपि; ज्ञानमत्र शास्त्रार्थपाण्डित्यम्;**

आनन्दगिरिकृतव्याख्या

**योगनिष्ठस्य श्रेष्ठत्वे हेत्वन्तरं वक्तुमुत्तरश्लोकमवतारयति—** कुतश्चेति। **मृदुप्रयत्नोऽपि क्रमेण मोक्ष्यते चेद् अधिकप्रयत्नस्य क्लेशहेतोरकिञ्चित्करत्वमित्याशङ्क्य हेत्वन्तरमेव प्रकटयति—** प्रयत्नादिति। तत्र **योगविषये प्रयत्नातिरेके सतीत्यर्थः।** ततः **सञ्चितसंस्कारसमुदायादिति यावत्। समुत्पन्नसम्यग्दर्शनवशात् प्रकृष्टा गतिः संन्यासिना लभ्यते। तेन शीघ्रं मुक्तिमिच्छन्नधिकप्रयत्नो भवेद् , अल्पप्रयत्नस्तु चिरेणैव मुक्तिभागित्यर्थः॥ ४५॥**

**सम्यग्ज्ञानद्वारा मोक्षहेतुत्वं योगस्योक्तमनूद्य योगिनः सर्वाधिकत्वमाह—**यस्मादिति। **योगस्य सर्वस्मादुत्कर्षादवश्यकर्तव्यत्वाय योगिनः सर्वाधिक्यं साधयति—** तपस्विभ्य इति। **योगिनो ज्ञानिनश्च पर्यायत्वात् कथं तस्य ज्ञानिभ्योऽधिकत्वमित्याशङ्क्याह—**

भाष्यार्कप्रकाशः

शेषी॥ ४४॥

**प्रयत्नादिति।** ननु यतमान इत्यनेनैवालम्, कः पुनः प्रयत्नादित्यस्यार्थः, प्रत्युत पुनरुक्तिः? अत आह— **अधिकमिति। तत्र** योगमार्गे इत्यर्थः। पापस्य सम्यक् शुद्धिर्नामाभावः। तेन **संशुद्धं** निरस्तमित्यर्थः। **संसिद्धः** सम्यक् चित्तशुद्धिलक्षणसिद्धिं प्राप्त इत्यर्थः। **उपचित्य** वर्धयित्वा। यथा अनेकदिनेषु अनेकरूपिकाः सम्पाद्य धनी भवति कुशलस्तद्वदनेकजन्मसु अनेकयोगसंस्कारान् सम्पाद्य तत्समवायेन संसिद्धिं भजते योगीत्यर्थः। **ततः** संसिद्धिलाभानन्तरं ज्ञानप्राप्तिद्वारा मुक्तो भवतीत्याह— **समुत्पन्नेति। परां गतिं** मोक्षम्॥ ४५॥

**तपस्विभ्य इति।** कथं नित्यमुक्तेभ्यः ज्ञानिभ्यः योगिनः आधिक्यम्? अत आह— **ज्ञानमत्र शास्त्रार्थपाण्डित्यमिति।** न तु ब्रह्मात्मैक्यज्ञानमित्यर्थः। मुक्तिं प्रति ज्ञानस्य साक्षात्साधनत्वात्, ज्ञानसाधनयोगस्य परम्परासाधनत्वाच्चेति भावः। **तस्मादिति।** यस्माद् ध्यानयोगी तपस्व्याद्यधिकस्तस्मादित्यर्थः। आधिक्यस्यैव सर्वैराकाङ्क्ष्यमाणत्वादिति भावः।

**ननु** क्षत्रियस्याज्ञस्य ते कर्मयोग एवाधिकार इति 'कुरु कर्मैव तस्मात्त्वम्, कर्मण्येवाधिकारस्ते' इत्यादिना भगवता पूर्वमर्जुनं प्रत्युपदिष्टम्। इदानीं तु योगी भवेत्युच्यते। ध्यानयोगश्च संन्यासिन एव, न तु गृहस्थस्येति सिद्धान्तितम्। क्षत्रियस्य नास्ति संन्यासाधिकार इति स्थापितम्। अतः कथमुच्यते योगी भवार्जुनेति चेत्? **नैष दोषः**; युद्धादिरूपं कर्मयोगमनुष्ठाय, ततः संन्यस्य योगी भवार्जुनेति श्रीकृष्णतात्पर्यात्। न च क्षत्रियस्य संन्यासेऽनधिकार इति वाच्यम्; शिखायज्ञोपवीतत्यागादिरूपसमन्त्रकमुख्यसंन्यासे क्षत्रियस्यानधिकारेऽपि दारापत्यादिसर्वपरिग्रहपरित्यागरूपामुख्यसंन्यासेऽधिकारोऽस्त्येव, मुचुकुन्दादीनां क्षत्रियाणां सर्वपरिग्रहपरित्यागपूर्वकं कस्मिंश्चिद् विजने देशे ध्यानयोगावस्थिततत्वस्य पुराणादिष्ववगमाद्, एतादृशसंन्यासस्यैव क्षत्रियस्य विहितत्वेन विध्यतिक्रमदोषाभावाच्च। न चैवं संन्यासिन एव ध्यानयोगेऽधिकारे कथमसंन्यासिनां वसिष्ठादीनां ध्यानयोगित्वमिति वाच्यम्; लोकातीतचरितानां तेषामिहोदाहरणस्यायुक्तत्वात्। तत्त्वविदो हि ते यथाप्रारब्धं यथा कथञ्चिद् वर्तन्ते। प्रपञ्चितं चैतदधस्ताद् बहुशः।

१. 'विशुद्धकिल्बिषः' इति क्वचिन्न। २. 'ततो लब्धसम्यग्दर्शनः' इति पा.।

**कर्मिभ्यश्चाधिको योगी तस्माद् योगी भवार्जुन !॥४६॥**
**योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।**
**श्रद्धावान् भजते यो मां स मे युक्ततमो मतः॥४७॥**

**तद्भ्योऽपि** मतो **ज्ञातः** अधिकः **श्रेष्ठ इति,** कर्मिभ्यः **अग्निहोत्रादि कर्म, तद्भ्योऽधिको योगी विशिष्टो यस्मात् तस्माद् योगी भवार्जुन !॥४६॥**

योगिनामिति। **योगिनामपि सर्वेषां** [1]**रुद्रादित्यादिध्यानपराणां मध्ये,** मद्गतेन **मयि वासुदेवे समाहितेन** अन्तरात्मना **अन्तःकरणेन** श्रद्धावान् **श्रद्दधानः सन्** भजते **सेवते यो मां स** मे **मम** युक्ततमः **अतिशयेन युक्तो** मतः **अभिप्रेत इति ॥४७॥**

आनन्दगिरिकृतव्याख्या

ज्ञानमिति। **योगिनः सर्वाधिकत्वे फलितमाह—** तस्मादिति॥४६॥

**ननु आदित्यो विराडात्मा सूत्रं कारणमक्षरमित्येतेषामुपासकाः भूयांसो गम्यन्ते। तेषां कतमः श्रेयानिष्यते? तत्राह—** योगिनामिति। **यो भगवन्तं सगुणं निर्गुणं वा यथोक्तेन चेतसा श्रद्दधानः सन्ननवरतमनुसन्धत्ते, स युक्तानां मध्येऽतिशयेन युक्तः श्रेयान्**

भाष्यार्कप्रकाशः

तस्माद् युक्तमुक्तं भगवता— योगी भवार्जुनेति॥४६॥

**योगिनामिति**। यः श्रद्धावान् सन् मद्गतेनान्तरात्मना मां भजते, स मे सर्वेषां योगिनां मध्ये युक्ततमो मतः। **योगः** क्वापि ध्येये वस्तुनि चित्तसमाधानम् ; स च ध्येयनानात्वान्नानाविध इति तद्वन्तोऽपि नानाविधा एवेत्याह— **योगिनामपि सर्वेषामिति।** सर्वेषामित्यस्यार्थमाह— **रुद्रादित्यादिपरायणानामिति।** रुद्रादित्यादयः परमयनं प्राप्यं येषां तेषां तथोक्तानां रुद्रादित्याद्युपासकानामित्यर्थः। यो यमुपास्ते स तमुपैतीति न्यायात्। 'रुद्रादित्यादिध्यानपराणा'मिति पाठान्तरम्। आदिपदेन विराड्हिरण्यगर्भेन्द्रादिदेवानां परमेश्वरस्य च ग्रहणम्। **वासुदेव इति।** परमेश्वर इत्यर्थः। वसति जगत्ययमिति, वसन्ति जगन्त्यस्मिन्निति [वा] वासुः; स चासौ देवः स्वप्रकाशो वासुदेव इति व्युत्पत्तेः। **मामिति।** सगुणं निर्गुणं वा परमात्मानमित्यर्थः। **सेवत इति।** सोऽहमस्मीति बुद्ध्या प्रत्यगभेदेन चिन्तयतीत्यर्थः। **ममेति।** सर्वज्ञस्य ममेत्यर्थः। एतेन सर्वज्ञेश्वरेण यदभिप्रेतं तत् तथैव भवतीति भगवदभिप्रेतार्थस्य सत्यत्वं सूच्यते।

रुद्रादित्यादीनां जीवत्वात् तदुपासनाया भिन्नोपासनत्वाद् वासुदेवस्य च परमात्मत्वात् तदुपासनाया अभिन्नोपासनत्वाच्च वासुदेवपरो योगी रुद्रादित्यादिपरयोग्यपेक्षया परमोत्कृष्ट इति भावः।

**ननु** अन्तःकरणमायावच्छिन्नयोः प्रत्यक्परयोर्भिन्नत्वात् तदभेदचिन्तनम् अन्नादेर्ब्रह्माभेदचिन्तनमिव काल्पनिकमेवेति चेत् , **मैवम्** ; यदेव मायावच्छिन्नं चैतन्यं तदेवान्तःकरणावच्छिन्नमिति प्रत्यक्परयोरभेदस्य वास्तवत्वात्। घटमठाद्युपाधिभिराकाशस्येव मायान्तःकरणाभ्यां चैतन्यस्य भेदाभावाच्च। न च प्रत्यक्परयोः परिच्छिन्नत्वपूर्णत्वप्रयुक्तोऽस्ति विशेष इति वाच्यम् , ययो[तयो]रौपाधिकत्वेनातात्त्विकत्वाद् , वस्तुतश्चैतन्ये मायान्तःकरणयोरभावाच्च। 'एकमेवाद्वितीयं ब्रह्म' इति हि श्रूयते। अन्यथा प्रतीचः परिच्छिन्नत्वाभ्युपगमे घटादिवदनित्यत्वजडत्वादिकं स्यात्। तच्चानिष्टम् ; 'अजो नित्यः' इत्यादिशास्त्रात्। न च प्रत्यगात्मा जीव एव, जीवेश्वरयोरस्ति हस्तिमशकयोरिव महदन्तरमिति वाच्यम् , 'जीव प्राणधारणे' इत्यनुशासनात् प्राणधारिण एव जीवाः; प्रत्यगात्मा तु अप्राण एव, 'अप्राणो ह्यमनाः शुभ्रः' इति श्रुतेः।

तस्माद् देवमनुष्यादिभेदभिन्नकार्यकरणसङ्घातविशेषेषु अहंममाभिमानिनश्चिदाभासा एव जीवाः; अमीषां च प्रतीचि कूटस्थे

१. 'रुद्रादित्यादिपरायणानाम्' इति पा.।

**इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे आत्मसंयमयोगो नाम षष्ठोऽध्यायः॥ ६॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये आत्मसंयमयोगो (ध्यानयोगो) नाम षष्ठोऽध्यायः॥६॥**

आनन्दगिरिकृतव्याख्या

**ईश्वरस्याभिप्रेतः। न हि तदीयोऽभिप्रायोऽन्यथा भवितुमर्हतीत्यर्थः।**

**तदनेनाध्यायेन कर्मयोगस्य संन्यासहेतोर्मर्यादां दर्शयता साङ्गं च योगं विवृण्वता मनोनिग्रहोपायोपदेशेन योगभ्रष्टस्यात्यन्तिकनाशशङ्कावकाशं शिथिलयता त्वम्पदार्थाभिज्ञस्य ज्ञाननिष्ठत्वोक्त्या वाक्यार्थज्ञानान्मुक्तिरिति साधितम्॥४७॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते श्रीमद्भगवद्गीताशाङ्करभाष्यव्याख्याने षष्ठोऽध्यायः॥६॥**

भाष्यार्कप्रकाशः

कल्पितत्वेन वस्तुतः प्रत्यगात्मत्वमेव, रज्जौ कल्पितस्य सर्पस्य वस्तुतो रज्ज्वात्मत्ववत्। अत एव तत्त्वमस्यादिश्रुतयः जीवेश्वरयोरभेदं ब्रुवन्ति लक्षणया।

तथाहि—अन्तःकरणविशिष्टचैतन्यं संसारिजीवशब्दाभिधेयं त्वम्पदस्य वाच्यार्थः। अन्तःकरणोपहितं निःसंसारं प्रत्यक्चैतन्यं लक्ष्यार्थः। मायाविशिष्टचैतन्यं जगत्कर्तृ ईश्वराख्यं तत्पदस्य वाच्यार्थः। मायोपहितं परं ब्रह्माख्यं चैतन्यं लक्ष्यार्थः। असिपदस्यैक्यमर्थः। वाच्यार्थयोरैक्यानुपपत्त्या लक्ष्यार्थयोस्तदुच्यते; यदेव चैतन्यं मायोपहितं तदेवान्तःकरणोपहितम् , तदेव मायोपहितं चेति; मायान्तःकरणोपाधिभेदेऽप्युपहिताभेदात् ; तथा च तत्त्वमसीत्यस्य वाक्यस्य अखण्डं ब्रह्मैव लक्ष्यार्थः।

एवमनेन प्रथमषट्केन त्वम्पदार्थो निर्धारितः; संसारिणश्चिदाभासस्य कूटस्थे कल्पितस्य स्वस्य रूपं प्रत्यक्चैतन्यमेव निर्धर्मकपरमानन्दबोधरूपमिति॥४७॥

**॥इति बेल्लङ्कोण्डोपनामकरामकविकृते श्रीमच्छाङ्करभगवद्गीताभाष्यार्कप्रकाशे षष्ठोऽध्यायः॥**

***

**समाप्तं प्रथमषट्कम्**

श्रीहयग्रीवार्पणमस्तु

ॐ श्रीपरमात्मने नमः

# ॥ अथ सप्तमोऽध्यायः ॥

**श्रीभगवानुवाच—**

**मय्यासक्तमनाः पार्थ ! योगं युञ्जन् मदाश्रयः।**
**असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु॥ १ ॥**

**'योगिनामपि सर्वेषां मद्गतेनान्तरात्मना। श्रद्धावान् भजते यो मां स मे युक्ततमो मतः॥' (भ.गी.६.४७) इति प्रश्नबीजमुपन्यस्य, स्वयमेव 'ईदृशं मदीयं तत्त्वम् , एवं मद्गतान्तरात्मा स्याद्' इत्येतद् विवक्षुर्भगवानुवाच—**

### आनन्दगिरिकृतव्याख्या

**कर्मसंन्यासात्मकसाधनप्रधानं त्वम्पदार्थप्रधानं च प्रथमषट्कं व्याख्याय, मध्यमषट्कमुपास्यनिष्ठं तत्पदार्थनिष्ठं च व्याख्यातुमारभमाणः समनन्तराध्यायमवतारयति—**योगिनामिति। **अतीताध्यायान्ते - 'मद्गतेनान्तरात्मना यो भजते मा'मिति प्रश्नबीजं प्रदर्श्य, कीदृशं भगवतस्तत्त्वम्? कथं वा** [1]**तद्गतान्तरात्मा स्याद्? इति अर्जुनस्य प्रश्नद्वये जाते,** स्वयमेव **भगवानपृष्टमेतद्**[2] **वक्तुमिच्छन्नुक्तवानित्यर्थः।**

### श्रीबेल्लंकोण्डरामरायकविविरचितः

### भाष्यार्कप्रकाशः

पूर्वोत्तराध्याययोः सङ्गतिं दर्शयति— **योगिनामिति। प्रश्नबीजमुपन्यस्येति**। कीदृशं वासुदेवस्य तव तत्त्वम्? कथं वा योगी वासुदेवगतान्तरात्मा स्यात्? इत्यर्जुनस्य प्रश्नद्वयं यथा स्यात् तथोक्त्वेत्यर्थः। न हि 'तस्माद् योगी भवार्जुन' इति श्लोकेनैव पूर्वाध्यायस्य समाप्तौ कृतायां दर्शितयोः प्रश्नयोरुत्थितिः स्यादिति भावः। **एतेन** [3]तत्पदार्थस्य वासुदेवस्य तत्त्वनिर्धारणपरमिदं सप्तमाध्यायप्रभृतिकं मध्यमषट्कं गीताशास्त्रस्येति **सूचितम्**। **स्वयमेवेति**। अर्जुनेनापृष्टः सन्नेवेत्यर्थः। शिष्यप्रीत्यादिनेति भावः। 'मदीयं तत्त्वमीदृशम् , योगी एवं मद्गतान्तरात्मा स्याद्' इत्येतदंशद्वयं **विवक्षुः** वक्तुमिच्छुः भगवानुवाच— **मयी**त्यादिकम्। हे पार्थ! त्वं मय्यासक्तमनाः मदाश्रयःसन् योगं युञ्जन् असंशयं समग्रं मां यथा ज्ञास्यसि, तच्छृणु इत्यन्वयः। मयीत्यस्यार्थमाह— **परमेश्वर इति।**

**ननु** अस्मत्पदस्य वक्तरि शक्तिः; वक्ता च कृष्णः सङ्घातविशेष एवेति कथं **मयी**ति कृष्णोक्तपदस्य परमेश्वरार्थलाभ इति चेद्? **उच्यते—** कृष्णस्य सङ्घातविशेषेऽहमभिमानाभावात् , स्वस्वरूपचैतन्ये परमात्मन्येव अहम्बुद्धिसत्त्वाद् , अस्मच्छब्दस्य चात्र लाक्षणिकत्वादिति। न चैवमस्मदादिभिरपि 'अहं परमात्मा' इत्युच्येतेति वाच्यम् , इष्टापत्तेः। न च 'अहं ब्रह्मास्मी'त्यत्राहम्पदस्य प्रतीचि लक्षणेति वाच्यम् , प्रत्यक्परयोरभेदात्। न च परः परोक्षः, प्रत्यगात्मा त्वपरोक्ष इति वाच्यम् , 'यः साक्षादपरोक्षाद् ब्रह्म' इति श्रुतेः परस्याप्यपरोक्षत्वात्। न च परः परमाकाशेऽस्ति, प्रत्यगात्मा तु हृदीति वाच्यम् , हृदयाकाशस्यैव परमाकाशत्वात्। 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इति गीतायाम् , अन्तर्यामिब्राह्मणेन च ईश्वरस्य हृदि स्थितिप्रतिपादनाच्च। न च - परस्यैव प्रत्यक्त्वे भ्रामणाद्यनुपपत्तिः, स्वस्य स्वभ्रामणाद्ययोगादिति - वाच्यम् , कार्यकरणसङ्घातस्यानात्मन एवात्ममायया भ्राम्यमाणत्वात्। अन्यथा प्रतीचः सति भ्रमणे विकारित्वादनित्यत्वापत्तेः। न च निर्विकारस्यात्मनः कथं भ्रामणादिविकारापत्तिरिति वाच्यम् , अविकारस्यैव अयस्कान्तोपलस्य लोहभ्रामणदर्शनात्। न ह्ययमात्मा स्वयमेवानात्मनो भ्रामयति कुलालश्चक्रमिव, किन्तु मायया। सा हि सर्वाघटितघटनाधुरन्धरा स्वाश्रयं प्रत्यगात्मानमविकुर्वती एव कार्यं निर्वहति, यथा इन्द्रजालमाया गगनमविकुर्वती एव तत्र गन्धर्वनगरं निर्माति, तद्वत्। तस्मात् कृष्णोक्तस्य अस्मच्छब्दस्य लक्षणया वृत्तिरात्मनि।

---

१. 'मद्गतान्तरात्मा' इति पा.। २. 'भगवान् पृष्टमेतद्' 'अपृष्टमेव तद्' इति पा.। प्रश्नद्वये जाते इत्यस्य भवितुं योग्ये सतीत्यर्थः। अतः अपृष्टमित्युत्तरग्रन्थाविरोधः। ३. 'तत् त्वमसि' इति महावाक्यघटकस्य तत्पदार्थस्येत्यर्थः।

मयीति। **मयि वक्ष्यमाणविशेषणे परमेश्वरे आसक्तं मनो यस्य स** मय्यासक्तमनाः, **हे पार्थ !** योगं युञ्जन् **मनःसमाधानं कुर्वन्** , मदाश्रयः **अहमेव परमेश्वर आश्रयो यस्य स मदाश्रयः। यो हि कश्चित् पुरुषार्थेन केनचिद् अर्थी भवति, स तत्साधनं कर्म अग्निहोत्रादि, तपो, दानं वा किञ्चिदाश्रयं प्रतिपद्यते। अयं तु योगी मामेवाश्रयं प्रतिपद्यते। हित्वाऽन्यत् साधनान्तरं मय्येवासक्तमना भवति। यस्त्वम् एवम्भूतः सन् असंशयं** समग्रं **समस्तं विभूतिबलशक्त्यैश्वर्यादिगुण-सम्पन्नं मां** यथा **येन प्रकारेण ज्ञास्यसि संशयमन्तरेण 'एवमेव भगवान्' इति, तच्छृणु उच्यमानं मया॥ १॥**

आनन्दगिरिकृतव्याख्या

**परमेश्वरस्य** वक्ष्यमाणविशेषणत्वं **सकलजगदायतनत्वादिनानाविधविभूतिभागित्वम्।** तत्रासक्तिर्**मनसो विषयान्तरपरिहारेण**[१] **तन्निष्ठत्वम्। मनसो भगवत्येवासक्तौ हेतुमाह—** योगमिति। **विषयान्तरपरिहारे हि** [२]**गोचरमालोच्यमाने भगवत्येव प्रतिष्ठितं भवतीत्यर्थः। तथापि स्वाश्रये पुरुषो मनः स्थापयति, नान्यत्रेत्याशङ्क्याह—** मदाश्रय इति। **योगिनो यदीश्वराश्रयत्वेन तस्मिन्नेवासक्तमनस्त्वमुपन्यस्तं तदुपपादयति—**यो हीति। **ईश्वराख्याश्रयस्य प्रतिपत्तिमेव प्रकटयति—**हित्वेति। **अस्तु योगिनस्त्वदाश्रयप्रतिपत्त्या मनसस्त्वय्येवासक्तिः, तथापि मम किमायातमित्याशङ्क्य द्वितीयार्धं व्याचष्टे—** यस्त्वमेवमिति। **एवम्भूतो यथोक्तध्याननिष्ठपुरुषवदेव मय्यासक्तमना यस्त्वं, स त्वं तथाविधः सन्** असंशयम् **अविद्यमानः संशयो यत्र ज्ञाने तद् यथा स्यात् तथा मां समग्रं ज्ञास्यसीति सम्बन्धः। समग्रमित्यस्यार्थमाह—** समस्तमिति। विभूतिर्**नानाविधैश्वर्योपायसम्पत्तिः।** बलं **शरीरगतं सामर्थ्यम्।** शक्तिर्**मनोगतं प्रागल्भ्यम्।** ऐश्वर्य**मीशितव्यविषयमीशनसामर्थ्यम्। आदिशब्देन ज्ञानेच्छादयो गृह्यन्ते। असंशयमिति पदस्य क्रियाविशेषणत्वं विशदयन् क्रियापदेन सम्बन्धं कथयति—** संशयमिति। **विना संशयं भगवत्तत्त्वपरिज्ञानमेव स्फोरयति—** एवमेवेति। **भगवत्तत्त्वे ज्ञातव्ये कथं मम** [३]**ज्ञानमुदेष्यति? न हि त्वामृते तदुपदेष्टा कश्चिदस्तीत्याशङ्क्याह—** तच्छृण्विति॥ १॥

भाष्यार्कप्रकाशः

**यद्वा** अभिधयैवेति ब्रूमः। रुद्रादित्यादिसङ्घातविशेषाणां जीवत्वमिव कृष्णसङ्घातविशेषस्येश्वरत्वात् कृष्णोक्तस्यास्मच्छब्दस्य परमेश्वर इत्यर्थ उचित एव। न च सङ्घातविशेषत्वे समाने सति कुतः कृष्ण एवेश्वरो न रुद्रादित्यादय इति वाच्यम् , कृष्णसङ्घातस्य मायामयत्वाद् , रुद्रादीनामस्मदादीनां च सङ्घातस्य कर्माधीनत्वादिति। तस्माच्छ्रीकृष्णदेहेन्द्रियाद्याकारपरिणतमायावच्छिन्नचैतन्यस्य परमेश्वरत्वं युक्तम् , देवमनुष्यादिदेहावच्छिन्नचैतन्यस्य जीवत्वमिवेति सङ्क्षेपः।

कीदृशः परमेश्वर इत्यत आह—**वक्ष्यमाणेति।** वक्ष्यमाणानि विशेषणानि प्रकृतिद्वयवत्त्वसर्वजगत्प्रभवत्वसर्वात्मत्वादीनि यस्य तस्मिन् तथोक्ते। **अर्थी** प्रयोजनवान् ; देवदत्तेन पुत्रवानितिवत् प्रयोगः। यत्किञ्चित्पुरुषार्थाकाङ्क्षीत्यर्थः। आश्रयमाधारं प्रतिपद्यते प्राप्नोति; आश्रयतीत्यर्थः। अयं त्विति **तुशब्दो** वैलक्षण्यार्थः। **मामेवेति।** आत्मानमेवेत्यर्थः। न तु तपोदानादिकमित्येवकारार्थः। अमुमेव विशदयति— **हित्वाऽन्यदिति। यस्त्वमिति।** यो योगी मय्यासक्तमना मदाश्रयश्च भवति, स एवेति शेषः। **त्वम् एवम्भूतः सन्** मय्यासक्तमना मदाश्रयश्च भवन् सन्नित्यर्थः। यद्वा यो मदाश्रयः सन् मय्यासक्तमना भवति, यो मय्यासक्तमनाः सन् मदाश्रयो भवतीति वा त्वम् एवम्भूतः सन्नित्यन्वयः। अथवा एवम्भूतो यथोक्तध्याननिष्ठपुरुषवदेव मय्यासक्तमना यस्त्वं स त्वं तथाविधः सन्निति। वस्तुतस्तु 'यः' इति प्रक्षिप्तमेव।

असंशयमिति क्रियाविशेषणम्। तदेवाह— **संशयमन्तरेणेति।** निःसंशयं यथा तथेत्यर्थः। आत्मस्वरूपे सामग्र्यासामग्र्या-योगादाह— **समस्तविभूतीत्यादि।** समस्तैः- **विभूति**र्विभवः; **बलं** शक्तिः; ऐश्वर्यम् , आदिपदाज्ज्ञानेच्छादिग्रहणम् , एतैर्गुणैः सम्पन्नम् ; तत्र **बलं** शरीरसामर्थ्यम् , **शक्ति**र्मनःसामर्थ्यमिति विवेकः। **मामिति।** मायाविनमीश्वरमित्यर्थः। शुद्धब्रह्मणि विभूत्याद्ययोगात्। ज्ञानस्याकारमाह— **एवमेव भगवानिति।** एवमेव भगवानिति यथा ज्ञास्यसीत्यन्वयः। तन्मयोच्यमानं शृणु। येन प्रकारेण मयोक्ते सति

१. 'परिहाण्या' इति पा.। २. 'गोचर आलोच्यमाने' इत्यानन्दाश्रमसंस्करणे संपादकैरूहितः पाठः। 'गोचरमालोच्य मनो भगवत्येव' इत्यपि पाठः संभाव्यते।
३. 'ज्ञानमुपदेक्ष्यति' इति पा.।

**ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।**
**यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते॥२॥**

**तच्च मद्विषयम्—** ज्ञानमिति। **ज्ञानं** ते **तुभ्यम् अहं** सविज्ञानं **विज्ञानसहितं स्वानुभव[1]युक्तम् इदं** वक्ष्यामि **कथयिष्यामि** अशेषतः **कार्त्स्न्येन। तज्ज्ञानं विवक्षितं स्तौति श्रोतुरभिमुखीकरणाय।** यज्ज्ञात्वा **यज्ज्ञानं ज्ञात्वा नेह** भूयः **पुनरन्यत् ज्ञातव्यं पुरुषार्थसाधनम्** अवशिष्यते [2]**नावशिष्टं भवतीति। मत्तत्त्वज्ञो यः स सर्वज्ञो भवतीत्यर्थः।** [3]**अतो विशिष्टफलत्वाद् दुर्लभं ज्ञानम्॥२॥**

आनन्दगिरिकृतव्याख्या

**ज्ञास्यसीत्युक्त्या परोक्षज्ञानशङ्कायां तन्निवृत्त्यर्थं तदुक्तिप्रकारमेव विवृणोति—** तच्चेति। इदम् **अपरोक्षं ज्ञानं चैतन्यम्। तस्य सविज्ञानस्य प्रतिलम्भे किं स्यादित्याशङ्क्याह—** यज्ज्ञात्वेति। **इदमा चैतन्यस्य परोक्षत्वं व्यावर्त्यते। तदेव सविज्ञानमिति विशेषणेन स्फुटयति। अनवशेषेण तद्वेदनफलोपन्यासेन श्रोतारं तच्छ्रवणप्रवणं करोति—** तज्ज्ञानमिति। **एकविज्ञानेन सर्वविज्ञानश्रुतिमाश्रित्योत्तरार्धतात्पर्यमाह—** यज्ज्ञात्वेति। **भगवत्तत्त्वज्ञानस्य विशिष्टफलत्वमुक्त्वा फलितमाह—** अत इति॥२॥

भाष्यार्कप्रकाशः

त्वं माम् 'एवमेव भगवान्' इति ज्ञास्यसि तेन प्रकारेणाहं वच्मि, मयोच्यमानं तद्वचनं शृणिवत्यर्थः। यद्वा एवम्प्रकारेण त्वं मां ज्ञास्यसि तत्प्रकारवत् मयोच्यमानं शृणिवत्यर्थः। अथवा तदित्यव्ययं तथेत्यर्थे वर्तते। तथा शृणिवत्युक्ते किं शृणिवत्याकाङ्क्षाया जातत्वात् तत्पूरणार्थमाह भाष्यकारः— **मयोच्यमानमिति।** अर्थाद् वचनमिति लभ्यते, ज्ञानमिति वा।

अत्र - 'यथा येन ज्ञानेने'ति **रामानुजः**, तत् तु 'प्रकारवचने थाल्' इति पाणिनीयशासनविरुद्धत्वादुपेक्ष्यम्। मूलकर्तुः सत्यामेतद्विवक्षायां 'येन ज्ञास्यसि तच्छृणु' इत्येव ब्रूयात्॥१॥

**ज्ञानमिति।** किंविषयं ज्ञानम्? अत आह—**तच्च मद्विषयमिति।** ज्ञानं शास्त्रार्थपरिज्ञानम् , विज्ञानं तस्य स्वानुभवकरणमिति प्रागुक्तम्। ज्ञानस्य विज्ञानसाहित्यप्रतिपादनं च - ज्ञानस्यानुभवपर्यवसायित्वं, स्वानुभवसिद्धस्यैव ज्ञानस्य प्रामाण्यं चेत्येतद् द्योतयितुं कृतम्। एवं च स्वानुभवयुक्तं नाम स्वस्य सर्वज्ञेश्वरस्यानुभवसिद्धमित्यर्थः। तेन च वक्ष्यमाणज्ञानस्य परमप्रामाण्यं सिद्धं भवति। यथानुभवं तव शास्त्रार्थज्ञानं वक्ष्यामीति परमार्थः। यद्वा सविज्ञानं यथा तथेति क्रियाविशेषणम्। तथा च मदुक्तं ज्ञानं यथा तवानुभवारूढं भवेत् तथा ज्ञानं वक्ष्यामीत्यर्थः। अस्य च ज्ञानस्य ईश्वरविषयत्वादाह—**मत्तत्त्वज्ञ इति। सर्वज्ञो भवतीति।** ईश्वरतत्त्वस्यैवात्मत्वादीश्वरस्य च सर्वज्ञत्वादात्मवित् पुरुषः सर्वज्ञ एवेत्यर्थः। अथवा ममेश्वरस्य तत्त्वं प्रत्यगभिन्नं ब्रह्मैव, यस्तद् वेद स सर्वज्ञ एव, सर्वस्य ब्रह्मत्वादित्यभिप्रायः।

**एतेन** - तत्त्वविदः कथं सर्वज्ञत्वम्? सर्वप्रपञ्चसाक्षात्काराभावादिति - **निरस्तम्** ; ब्रह्मज्ञानस्यैव सर्वज्ञानत्वात् , एकविज्ञानेन सर्वविज्ञानस्यैतदभिप्रायेणैव श्रुत्या प्रतिज्ञातत्वात् , घटपटादिसर्वप्रपञ्चज्ञानस्य निष्प्रयोजनत्वात् , प्रत्युत द्वैतज्ञानस्य बन्धहेतुत्वाच्चेति। **अनेन** श्लोकेन आत्मज्ञानमेव परमपुरुषार्थसाधनम् , तद्वानात्मैवेश्वरः इति **सिद्धम्।**

यत्तु **रामानुजः— विज्ञानं** विविक्ताकारविषयं ज्ञानम् , यथा 'अहं मद्व्यतिरिक्तात् समस्तचिदचिद्वस्तुजातान्निखिलहेयप्रत्यनीकतया, अनवधिकातिशयासङ्ख्येयकल्याणगुणगणानन्तमहाविभूतितया च विविक्तः'। तेन विविक्तविषयज्ञानेन सह मत्स्वरूपविषयं ज्ञानं वक्ष्यामीति, **तत् तुच्छम्।** विविक्ताकारविषयज्ञानस्य विज्ञानत्वे अविविक्ताकारविषयज्ञानस्य अज्ञानत्वापत्तेः स्वरूपविषयज्ञानस्य नैव ज्ञानत्वमुपपद्यते, ईश्वरस्वरूपस्य त्वदुक्तविधया विविक्तत्वेन [4]तज्ज्ञानस्यापि विविक्तविषयज्ञानत्वेन विज्ञानत्वापत्तेः।

१. 'संयुक्तम्' इति पा.। २. 'नावशेषो' इति पा.। ३. अयं ग्रन्थः उत्तरश्लोकावतरणिकायां रा.पाठे योजितः। ४. अविविक्ताकारेश्वरविषयज्ञानस्यापि वस्तुतो विविक्तेश्वरविषयज्ञानत्वादिति भावः।

भाष्यार्कप्रकाशः

[१]न च - 'ईश्वरश्चिदचिद्वस्तुजाताद् विविक्तः' इति ज्ञानं विज्ञानम्, 'ईश्वरः सच्चिदानन्दमयः' इत्यादिज्ञानं ज्ञानमिति - वाच्यम्, तथात्वे ज्ञानविज्ञानयोरन्योन्याश्रयदोषापत्तेरुभयस्याप्यसिद्धेः, ईश्वरस्य प्रपञ्चाद् विविक्तत्वविज्ञानं विना सच्चिदानन्दमयत्वज्ञानानुदयात्, सच्चिदानन्दमयत्वज्ञानं विना प्रपञ्चविविक्तत्वविज्ञानानुदयाच्च। 'ईश्वरः सच्चिदानन्दरूपः, प्रपञ्चोऽनृतजडदुःखात्मकः' इति ज्ञाने सति 'ईश्वरः प्रपञ्चाद् विविक्तः' इति विवेकस्योपदेशं विनैव सिद्धत्वेन सविज्ञानत्वविशेषणानर्थक्यप्रसङ्गात्, अविवेकस्याज्ञानत्वेन विवेकज्ञानरूपविज्ञानातिरिक्तज्ञानसद्भावस्याप्रमाणत्वाच्च, घटपटविवेकं विना 'घटः' इति 'पटः' इति च स्वरूपज्ञानस्यानुदयाच्च।

**ननु** सर्वथाऽपि 'घटः' इति स्वरूपज्ञानाद् 'घटः पटाद्भिन्नः' इति विवेकज्ञानं भिन्नमेव, ज्ञाने घटमात्रस्यैव विषयत्वात्, विवेकज्ञाने घटपटयोस्तद्भेदस्य च विषयत्वात्। तथा 'ईश्वरः'इति ज्ञानाद् 'ईश्वरः सच्चिदानन्दरूपः' इति ज्ञानाद्वा 'ईश्वरः प्रपञ्चाद्भिन्नः' इति विज्ञानस्य विवेकज्ञानरूपस्य वैलक्षण्यमवश्यमभ्युपेयमिति **चेत्**; तर्ह्याकारभेदात् ज्ञानविज्ञानभेद इवाकारभेदात् ज्ञानभेदोऽपि स्यादेव - घटः पटः कुड्यं कुसूलमिति। न चेष्टापत्तिः, विषयभेदेऽपि विषयिणो ज्ञानस्याभेद इति सिद्धान्तात्। अन्यथा प्रतिविषयं ज्ञानमिव प्रतिज्ञानं ज्ञाताऽपि भिद्यत एव। तथात्वे एकस्मिन्नेव देहे नानाजीवसत्त्वप्रसङ्गः। न च - चैतन्यरूपज्ञानस्यैकत्वेऽपि बुद्धिवृत्तिरूपज्ञानानामनेकत्वात् स्वत एव भेदः, वृत्तेः क्षणिकत्वात्, क्षणे क्षणे जायमानानां वृत्तीनामभेदस्य दुर्वचत्वादिति - वाच्यम्, वृत्तेः क्रियारूपाया जडत्वेनाज्ञानत्वाद्, वृत्तिप्रतिफलितचैतन्यस्यैव ज्ञानत्वात् तत्रापि। तस्माद् वृत्तिभेदेऽपि न ज्ञानभेदः। ज्ञानस्य नित्यत्वात् स्वप्रभत्वाच्च न जन्मादिकम्, किन्तु वृत्तेरेव। तदेव ज्ञानं चैतन्यात्मकमीश्वर इति सिद्धमीश्वरस्यात्मनो ज्ञानैकाकारत्वम्।

**ननु** वृत्तावेव ज्ञानत्वमुपचारादुच्यते; सैव वृत्तिर्ज्ञानविज्ञानभेदभिन्ना; सा चेश्वरविषयेहोच्यते 'सच्चिदानन्दरूप ईश्वरः' इति, 'ईश्वरः प्रपञ्चाद् विविक्तः' इति च; इति चेत्, **मैवम्**। वृत्तिज्ञानं वृत्तिविज्ञानं चेति वृत्तिद्वैविध्यस्य क्वाप्यप्रसिद्धेः। त्वदुक्तवृत्तिविज्ञानस्यापि वृत्तिज्ञानत्वात्, यथा 'घटः' इत्येतद् वृत्तिज्ञानं, तथा 'घटः पटाद्भिन्नः' इत्येतदपि वृत्तिज्ञानमेव हि।

**ननु** घटादिप्रत्यक्षस्थलेऽन्तःकरणस्य चक्षुर्द्वारा विषयदेशं गतस्य विषयाकारेण यः परिणामः स वृत्तिरिति परिभाषितत्वाद् 'घटः' इत्यस्य वृत्तिज्ञानत्वेऽपि 'घटः पटाद्भिन्नः' इत्यस्य न वृत्तिज्ञानत्वम्, घटपटयोरप्रत्यक्षत्वेऽपि 'घटः पटाद्भिन्नः' इत्यस्य ज्ञानस्य जायमानत्वाद्घटपटरूपेणान्तःकरणपरिणामाभावात्, घटपटभेदाकारेणान्तःकरणस्य परिणामासम्भवाच्च। ततश्च 'घटः पटाद् भिन्नः' इतीदं विज्ञानमेव न वृत्तिज्ञानमिति **चेन्न**, एवमपि वृत्तिज्ञानचैतन्यज्ञानातिरिक्तविज्ञानस्याप्रसिद्धत्वात्, तत्कल्पनाया गौरव-[कर]त्वात्, सुखाद्याकारान्तःकरणपरिणामवद् घटपटभेदाकारान्तःकरणपरिणामस्य भवितव्यत्वाद् घटपटभेदज्ञानस्यापि वृत्तिज्ञानत्वसम्भवात्।

**ननु** भवतु नाम विज्ञानमपि वृत्तिज्ञानम्, तथापि घटपटज्ञानयोरिव ज्ञानविज्ञानयोर्दर्शितयोरस्त्याकारभेदाद्भेदः कल्पित इति चेत्, **सत्यम्**; कल्पितोऽस्तु नाम भेदः, न तस्येह प्रयोजनम्, ईश्वरस्वरूपस्यैवेह वक्ष्यमाणत्वात् तावतैवेश्वरजगतोर्वैलक्षण्यसिद्धेः। प्रपञ्चवैलक्षण्यस्यैवेश्वरस्वरूपत्वाच्च। यः प्रपञ्चविलक्षणत्वेनेश्वरं न जानाति, स ईश्वरस्वरूपानभिज्ञ एव हि, ईश्वरस्वरूपस्य प्रपञ्चविलक्षणत्वात्। तस्मात् प्रपञ्चविलक्षणसच्चिदानन्दमयेश्वरस्वरूपज्ञानमेव ज्ञानमित्युच्यते, न तु प्रपञ्चविलक्षणेश्वरज्ञानस्य विज्ञानत्वं तदेकदेशस्य।

**अथ** यदुक्तं चिदचिद्वस्तुवैलक्षण्यमीश्वरस्य, तत्राचिद्वैलक्षण्यसत्त्वेऽपीश्वरे चिद्वैलक्षण्यं नास्ति, चिद्रूपत्वादीश्वरस्य। न हि चिद्रूपश्चिद्विलक्षणो भवेत्। न च - किञ्चिज्ज्ञसावद्यजीववाची चिच्छब्दोऽत्र, तस्माच्च जीवात् सर्वज्ञो निरवद्य ईश्वरो विलक्षण एवेति - वाच्यम्, चैतन्यवाचिनश्चिच्छब्दस्य तादृशजीववाचित्वासम्भवात्। जीवेश्वरयोर्द्वयोरपि वस्तुतश्चिन्मात्रत्वात्, किञ्चिज्ज्ञत्वसर्वज्ञत्वादीनामुपाधिधर्मत्वात्। उपाध्योर्घटमठयोर्भेदेऽप्युपहितस्याकाशस्यैकरूपत्ववद् मायाऽविद्ययोरुपाध्योर्भेदेऽपि चैतन्यस्यैकरूपत्वात्। तस्मान्न चिति किञ्चिज्ज्ञत्वादिजीवधर्माः [सर्वज्ञत्वादीश्वरधर्माः] वा भवितुमर्हन्ति, निर्धर्मकत्वाच्चितः।

नापि चिन्मात्रे ईश्वरे कल्याणगुणसम्भवः, सत्त्वगुणविकारत्वात् कल्याणगुणानाम्, चैतन्यस्य च निर्गुणत्वात्। न च -

१. विविक्तत्वस्यापि ज्ञानविषयत्वविवक्षणान्नोक्तदोष इति शङ्कते—न चेति।

**मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये।**
**यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥३॥**

**कथमित्युच्यते—** मनुष्याणामिति। **मनुष्याणां मध्ये सहस्रेषु अनेकेषु कश्चिद्** यतति **प्रयत्नं करोति** सिद्धये **सिद्ध्यर्थम्। तेषां यततामपि सिद्धानाम् , सिद्धा एव हि ते ये मोक्षाय यतन्ते, तेषां कश्चिदेव हि मां वेत्ति** तत्त्वतो **यथावत्॥३॥**

आनन्दगिरिकृतव्याख्या

**ज्ञानस्य दुर्लभत्वं प्रश्नपूर्वकं प्रकटयति—** कथमित्यादिना। **सहस्रशब्दस्य बहुवाचकत्वमुपेत्य व्याकरोति—** अनेकेष्विति। सिद्धये **सत्त्वशुद्धिद्वारा ज्ञानोत्पत्त्यर्थमित्यर्थः। सिद्ध्यर्थं यतमानानां कथं सिद्धत्वमित्याशङ्क्याह—**सिद्धा एवेति। **सर्वेषामेव तेषां ज्ञानोदयात् तस्य सुलभत्वमित्याशङ्क्याह—** तेषामिति॥३॥

भाष्यार्कप्रकाशः

सत्ताचित्यानन्दादिगुणानां सत्त्वात् कथं निर्गुणत्वं ब्रह्मण इति - वाच्यम् , ब्रह्मणोऽपृथग्भूतत्वात् तेषां सत्तादीनामेव ब्रह्मस्वरूपत्वात्। न च सद्रूपत्वं सत्तारूपत्वं च कथमेकस्येति वाच्यम् , नारायणस्य तद्रूपत्वतत्त्वरूपत्वयोर्भवताऽप्यभ्युपगतत्वात्। 'तदैक्षत' 'तत्त्वं नारायणः परः' इति श्रुतेश्च। तस्मात् तच्छब्दतत्त्वशब्दयोर्यथा ब्रह्मवाचकत्वम् , तद्वत् सच्छब्दसत्ताशब्दयोः चिच्छब्दचित्त्वशब्दयोश्च ब्रह्मवाचकत्वमेव, न तु धर्मधर्मिवाचकत्वम्।

न च - निर्गुणे ब्रह्मणि निर्गुणत्वधर्मसत्त्वात् कथं निर्धर्मकत्वमिति - वाच्यम् , तथा सति निर्धर्मकत्वस्यापि धर्मरूपत्वेन निर्धर्मकत्वाभावस्यैव धर्माभावरूपत्वापत्तेः। न चेष्टापत्तिः, निर्धर्मकत्वाभावस्य धर्मस्वरूपत्वेन धर्माभावरूपत्वासम्भवात्। अथ यदि निर्धर्मकत्वं धर्माभाव इत्येव मतम् , तर्हि निर्गुणत्वमपि गुणाभाव इत्येवेष्यताम्। गुणस्यैव धर्मत्वाद् गुणाभावो हि धर्माभावः। तथा च निर्गुणब्रह्मणो निर्धर्मकत्वमव्याहतम्।

किञ्च यन्निर्गुणे ब्रह्मणि वर्तमानं निर्गुणत्वं तद् ब्रह्मरूपमेव, सत्तादिवत्। अपि च निर्गुणत्वं हि गुणाभावः, स च ब्रह्मरूप एव, सर्वाभावस्यैव ब्रह्मरूपत्वात्। निष्प्रपञ्चं हि ब्रह्म। न च भावरूपस्य ब्रह्मणः कथमभावरूपत्वमिति वाच्यम् , अभावरूपस्य सर्वस्य यथा भावरूपत्वं, तथैव भावरूपस्य ब्रह्मणोऽभावरूपत्वम् , भावाभावविषये भ्रान्तत्वाल्लोकस्य। लोको हि कालत्रयेऽप्यविद्यमानत्वादभावरूपं जगद् भावं मन्यते, तद्विलक्षणं ब्रह्म अभावं मन्यते।

तथा लोकैः सर्वाभावत्वेन व्यवह्रियमाणो भावपदार्थ एव ब्रह्म, सर्वत्वेन व्यवह्रियमाणोऽभावपदार्थ एव प्रपञ्चः। तस्माद् भाव एव सर्वाभावो ब्रह्मेति। न च कथं सर्वाभावस्य भावत्वमिति वाच्यम् , यथा घटाभावाभावस्य भावत्वं तथैवेति, सर्वस्याभावरूपत्वे सर्वाभावो ह्यभावाभावः। स च भाव एवेति भावः इत्यलं प्रसक्तानुप्रसक्तेन॥२॥

**मनुष्याणामिति। अत इति।** मत्तत्त्वज्ञानेन ज्ञातव्यपरिशेषाभावादित्यर्थः। अस्यैव फलितमाह— **विशिष्टफलत्वादिति।** सर्वोत्कृष्टफलप्रदत्वादित्यर्थः। मोक्षप्रदत्वादिति यावत्। मोक्षस्यैव सर्वोत्कृष्टफलत्वादिति भावः। सहस्रशब्दोऽत्र न सङ्ख्याविशेषवाची, किन्त्वनन्तवाचीत्याह—**अनेकेष्विति। सिद्धये** मोक्षार्थं **यततीति** योगाद्यनुष्ठानरूपं प्रयत्नं करोति। एवं मोक्षाय यतमानानां मध्ये कश्चिदेव कुशली मत्तत्त्वज्ञानपूर्वकं मुक्तो भवतीत्याह—**यततामिति। सिद्धानामिति** भाविनीं वृत्तिमाश्रित्य निर्देशः। सिद्धिं प्राप्तुमर्हाणामित्यर्थः। **सिद्धा एवेति।** ये यतन्ते ते सिद्धा एव मोक्षाय; मुक्तप्राया एवेत्यर्थः। औपचारिकोऽयं सिद्धशब्दः। एषां मुक्तप्रायत्वं च इह जन्मनि जन्मान्तरे वा अवश्यं मुक्तिलाभादिति भावः। **यद्वा** ये मोक्षाय यतन्ते, ते पुरुषा वस्तुतो नित्यमुक्तात्मरूपत्वात् सिद्धा एवेत्यर्थः। **कश्चिदेवेति।** यः कोऽपि धन्यः इत्यर्थः। न त्वेक एवेति नियमः, येन 'कश्चिदेव, न द्वौ' इति **वेदान्तदेशिकेन** शङ्करमतं दूष्येत, मृषारोपणप्रथमदेशिको हि **वेदान्तदेशिकः**। अनेन च कश्चिदेवेति वचनेन न सर्वसुलभमिदं ज्ञानम् ,

भाष्यार्कप्रकाशः

किन्तु यस्य कस्यापि सुकृतिनः सुलभत्वाद् दुर्लभतरमेवेति सिद्धम्। इदमेव हि ज्ञानस्य दुर्लभतरत्वमवतारिकायामुक्तमाचार्यैः— 'दुर्लभतरं ज्ञान'मिति[१]।

यत्तु **रामानुजः**— मनुष्याः शास्त्राधिकारयोग्याः, तेषां सहस्रेषु कश्चिदेव सिद्धिपर्यन्तं यतते, सिद्धिपर्यन्तं यतमानानां सहस्रेषु कश्चिदेव मां विदित्वा मत्तः सिद्धये यतते; मद्विदां सहस्रेषु कश्चिदेव तत्त्वतो यथावस्थितं मां वेत्ति। न कश्चिदित्यभिप्रायः। 'स महात्मा सुदुर्लभः' 'मां तु वेद न कश्चन' इति हि वक्ष्यते इति, **तत् तुच्छम् ;** देवादीनामपि शास्त्राधिकारयोग्यत्वस्य शारीरकसूत्रैः **बादरायणेन** व्यवस्थापितत्वात्[२]। 'सिद्धये यतते' इत्यस्य सिद्धिपर्यन्तं यतत इत्यर्थासिद्धेः, 'सिद्धये यतते' इति पदद्वयस्य आवृत्त्या वाक्यभेद-कल्पनस्यान्याय्यत्वात् , मां विदित्वा मत्तः इति पदत्रयस्य मूलाद् बहिः कल्पितत्वेनाप्रमाणत्वात् , सिद्धिपर्यन्तं यतमानानां मध्ये कश्चिदेव सिद्धये यतत इत्यस्य वाक्यस्यानन्वितत्वात् ; सिद्धिपर्यन्तं यतमान एव हि सिद्धये यतमानः। कश्चिन्मां वेत्तीत्यस्य न कश्चिन्मां वेत्तीत्यर्थोऽप्ययुक्तः, विरुद्धलक्षणाश्रयणस्याप्रमाणत्वात्। 'मां तु वेद न कश्चन' इति तु मद्भक्तं मच्छरणं विना कोऽपि मां न वेदेति विवक्षयोक्तत्वात्। अन्यथा येन केनापीश्वरतत्त्वस्य दुर्ज्ञेयत्वे ईश्वरतत्त्वं सम्प्रदायसिद्धं नैव भवेत्। तच्चानिष्टम् , ईश्वरतत्त्वस्यैव लोपप्रसङ्गात्। 'दृश्यते त्वग्र्यया बुद्ध्या' इत्यादिनेश्वरतत्त्वस्य ज्ञेयत्वश्रवणाच्च। 'तमेवं विदित्वाऽतिमृत्युमेति' इति श्रुत्या ईश्वरतत्त्व-ज्ञानादेव मुक्तिप्रतिपादनात् , तस्य चागोचरत्वे मुक्तेरेवाप्रसिद्धेः मुक्त्यर्थं वेदान्तशास्त्रे न कस्यचित् प्रवृत्तिः। गृहस्थं संन्यासाश्रमे प्रवर्तयदिदं वेदान्तशास्त्रमनर्थकरमेव भवेत् , [३]त्रिवर्गसाधकगृहस्थाश्रमत्यागात्। मोक्षस्य संन्यासाश्रमस्वीकारेणालाभाच्च। तस्मान्मां यः कोऽपि धन्यो वेत्तीत्येवाभिप्रायः, न तु न वेत्तीति।

अथ यदुक्तं **वेदान्तदेशिकेन—** मनुष्यशब्दो न जातिविशेषाभिप्रायः, किन्तु सिद्ध्यर्थयतनयोग्यमात्राभिप्रायः इति, तदपि **तुच्छम्** , मुख्यार्थपरित्यागे कारणाभावात्। अर्जुनस्य मनुष्यत्वान्मनुष्याणां भवतामिदं ज्ञानं दुर्लभतरमित्येतावत एवार्थस्य भगवता विवक्षितत्वात्। देवादीनामेतज्ज्ञानदौर्लभ्यसौलभ्यश्रवणेनार्जुनस्य फलाभावात्।

**यच्च** सिद्ध्यर्थयतनमात्रं प्रायेण सर्वसाधारणम् , अतः सिद्धिपर्यन्तमित्युक्तमिति, **तच्चासत्** , सिद्ध्यर्थयतनमात्रस्याप्यसर्व-साधारणत्वात्। न हि सर्वे सिद्ध्यर्थं यतमाना उपलभ्यन्ते। संसारप्रयतनमेव हि सर्वसाधारणम्। किञ्च य एव सिद्ध्यर्थं यतते, स एव सिद्धिपर्यन्तं यतते, मध्ये तद् यतनं नैव जहाति, दैवान्मरणसम्भवे तु जन्मान्तरेऽपि यतत एव। **अथवा** सिद्ध्यर्थं यतमानानां सहस्रेषु सिद्धिपर्यन्तं कश्चिद् यतत इति वक्तव्यम् , सिद्ध्यर्थं यतमानानां सर्वेषामपि सिद्धिपर्यन्तयतनासम्भवात् , यस्य कस्यचिदेव तत्सम्भवाच्च। तच्च नोक्तं मूलकर्त्रा। यदि **रामानुजेन** तदुच्यते तर्हि निर्मूलमेव तत्।

**यच्च** 'यततामपि सिद्धानां कश्चिन्मां वेत्ति' 'मद्वेदिषु न कश्चिन्मां तत्त्वतो वेत्ति' इति वाक्यद्वयं विवक्षितमिति च, **तत् तुच्छम् ।** तादृशविवक्षागमकपदाभावान्मूले। न हि 'यततामपि सिद्धानां कश्चिन्मां वेत्ति, मद्विदां सहस्रेषु कश्चिन्मां तत्त्वतो वेत्ति' इति मूले स्थितम्। तदेतत्कल्पनमपि निर्मूलमेव।

**किञ्च** निर्मूलमप्यसङ्गतं च, यो मां वेत्ति स मां तत्त्वतो न वेत्ति, किन्तु अन्य एव सः यो मां तत्त्वतो वेत्तीति वचन-स्यायुक्तत्वात्। न हि य ईश्वरं तत्त्वतो न वेत्ति, स ईश्वरं वेत्तीत्युच्यते, यश्चेश्वरं तत्त्वतो वेत्ति, स ईश्वरं न वेत्तीत्युच्यते। न च - मां वेत्तीत्यनेन सामान्यत ईश्वरवेदनं, मां तत्त्वतो वेत्तीत्यनेन विशेषत ईश्वरवेदनं चाभिप्रेतमिति - वाच्यम् , निर्विशेषचिन्मात्रे ईश्वरे सामान्यविशेषभावकल्पनायोगात्। न च परोक्षापरोक्षत्वाभ्यां भेद इति वाच्यम् , 'यत्साक्षादपरोक्षाद् ब्रह्म' इति ईश्वरस्य नित्यापरोक्ष-ब्रह्मत्वात्। आत्मन एवेश्वरत्वाच्च। न ह्यात्मा कस्यचिदप्रत्यक्षः। न च ईश्वरस्वरूपस्वभावज्ञानाभ्यां तद्भेदोपपत्तिरिति वाच्यम् , यः ईश्वरस्वरूपं वेत्ति, स एवेश्वरस्वभावं वेत्ति, ईश्वरस्वरूपस्यैवेश्वरस्वभावत्वात्। न हि स्वरूपादन्यः स्वभावोऽस्ति। यस्तु स्वरूपादन्यः स्वभावः स मायैव, स्वरूपस्यैकस्यैव सत्यत्वात्। तस्माद् य ईश्वरं तत्त्वतो वेत्ति स एवेश्वरं वेत्ति, यश्चेश्वरं तत्त्वतो न वेत्ति स ईश्वरं नैव वेत्तीति स्थितम्॥ ३॥

१. 'अतो विशिष्टफलत्वाद् दुर्लभतरं ज्ञानम् , कथमित्युच्यते—' इति भाष्ये रा.पा.। २. देवताधिकरण इति शेषः। ३. त्रिवर्गः= धर्मकामार्थाः।

**भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।**
**अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥४॥**

**श्रोतारं प्ररोचनेनाभिमुखीकृत्याह—** भूमिरिति। **भूमिरिति पृथिवीतन्मात्रमुच्यते, न स्थूला, 'भिन्ना प्रकृतिरष्टधा' इति वचनात्। तथा अबादयोऽपि तन्मात्राण्येवोच्यन्ते। आपोऽनलो वायुः खम्।** मनः **इति मनसः कारणम्**

अनुभूतिस्वरूपाचार्यविरचितगीताभाष्यटिप्पणम्

**पृथिवीतन्मात्रमिति।** गन्धतन्मात्रमुच्यते, **न स्थूला** पञ्चात्मिका, तत्र हेतुमाह— **भिन्ना प्रकृतिरिति। प्रकृतिः** ईश्वरोपाधिर्माया, सैव सकलकार्याकारेण स्थिता। तत्राष्टधेति विशेषणात् सूक्ष्मरूपायाः ग्रहणं विवक्षितमित्यर्थः। उदकादिषु अतिदिशति— **तथा अबादयोऽपीति।** रसतन्मात्रा आपः। रूपतन्मात्रोऽनलः। स्पर्शतन्मात्रो वायुः। शब्दतन्मात्रं खम्।

आनन्दगिरिकृतव्याख्या

**ज्ञानार्थं प्रयत्नस्य, तद्द्वारा ज्ञानलाभस्य, तदुभयद्वारेण मुक्तेश्च दुर्लभत्वाभिधानस्य श्रोतृप्ररोचनं फलमिति मत्वाऽऽह—** श्रोतारमिति। **आत्मनः सर्वात्मकत्वेन परिपूर्णत्वमवतारयन् आदौ अपरां प्रकृतिमुपन्यस्यति—** आहेति। **भूमिशब्दस्य व्यवहारयोग्यस्थूलपृथिवीविषयत्वं व्यावर्तयति—** भूमिरितीति। **तत्र हेतुमाह—** भिन्नेति। **प्रकृतिसमभिव्याहाराद् गन्धतन्मात्रं स्थूलपृथिवीप्रकृतिः** [1]**उत्तरविकारो भूमिरित्युच्यते, न विशेष इत्यर्थः। भूमिशब्दवद् अबादिशब्दानामपि सूक्ष्मभूतविषयत्वमाह—** तथेति। **तेषामपि प्रकृति-**

भाष्यार्कप्रकाशः

**भूमिरिति। प्ररोचनं** रुच्युत्पादनम्। **आहेति।** स्वतत्त्वमिति शेषः। ईश्वरस्य स्वरूपं स्वभावश्च तावदुच्येते, तज्ज्ञानादीश्वरज्ञानसिद्धेः। प्रकृतिशब्दश्च स्वरूपस्वभावयोरुभयोरपि प्रयुज्यते। अत ईश्वरस्य स्वरूपमेका प्रकृतिः, स्वभावोऽन्या प्रकृतिः। तत्र प्रथममनात्मनि ज्ञाते सति पश्चादात्मज्ञानं सुलभमिति तावदनात्मभूतेश्वरस्वभावनामकप्रकृतिं लक्षयति— **भूमिरिति।**

'अष्टौ प्रकृतयः' इति श्रुतेः; 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः॥' इति साङ्ख्यशास्त्राच्च मूलप्रकृतेः, महदहङ्कारपञ्चतन्मात्राणां च प्रकृतीनां विकृतीनां सप्तानां प्रकृतिपदवाच्यत्वम्। **प्रकृतिः** उपादानम् , 'जनिकर्तुः प्रकृति'रिति पाणिनिसूत्रात्[2]। **विकृतिः** कार्यम्। अनादित्वात् सर्वजगदुपादानत्वाच्च मायायाः प्रकृतित्वम्। विकारषोडशककारणत्वान्मूलप्रकृतिकार्यत्वाच्च महदादिसप्तकस्य प्रकृतित्वं विकृतित्वं चेति। तत्र प्रकृतित्वांशग्रहणेन महदादीनां सप्तानां प्रकृतित्वेन व्यपदेशः। भूतपञ्चकमिन्द्रियदशकं, मनश्चेति विकारषोडशकम्। तस्य तु कार्यत्वमेव, न कारणत्वमिति कृत्वा नास्ति प्रकृतित्वेन व्यपदेशः। यद्यपि भौतिकान् देहान् प्रति भूतानां स्थूलानामप्यस्ति कारणत्वम्[3] , तथापि देहानां तत्त्वेष्वप्रवेशात् तत्त्वानामेव परस्परकार्यकारणभावस्य तत्र विवक्षितत्वात्। षोडशकात् कस्यापि तत्त्वस्याप्रादुर्भावान्नास्ति प्रकृतित्वं षोडशकस्य। यद्धि प्रलयेऽपि न नश्यति, [4]तदेव हि तत्त्वं साङ्ख्यानामभिमतम्। **यद्वा** प्राणादिवायुपञ्चकमिन्द्रियदशकं मनश्चेति विकारषोडशकमिति वेद्यम्। इदं सर्वमभिप्रेत्याह— **भूमिरिति पृथिवीतन्मात्रमुच्यत इत्यादि।** अपञ्चीकृतसूक्ष्मभूतानां तन्मात्रत्वेन व्यवहारः। एभ्य एव तन्मात्रेभ्यः पञ्चीकृतेभ्यः स्थूलभूतोत्पत्तिः। यान्यधुनोपलभ्यन्ते तानि स्थूलभूतानि। एतद्भूतोत्पत्तेः प्राक् स्थितानि तु तन्मात्राणीति विवेकः। शब्दस्पर्शरूपाणि तन्मात्राणीति केचित्।

कुतः स्थूलानि विहाय तन्मात्राणां ग्रहणम्? अत आह— **भिन्ना प्रकृतिरष्टधेति वचनादिति।** स्थूलभूतानां प्रकृतित्वाभावादित्यर्थः। तथा मनसः प्रकृतित्वाभावान्मनःशब्दोऽत्र स्वकारणमहङ्कारं लक्षयतीत्याह— **मन इति।** मनोऽन्तःकरणम् , अहङ्कारस्तु

१. 'भूमिरापः' इत्यत्र पाठक्रमेण पूर्वं उत्तरस्य विकारः। २. सूत्रे प्रकृतिपदमुपादानार्थकमिति भावः। ३. तत्त्वान्तरप्रकृतित्वमेवात्र प्रकृतित्वम्। पृथिव्यादिभ्यो जातानां देहादीनां पृथिव्यादित्वमेवेति न तत्त्वान्तरत्वम्। ४. वस्तुतस्तु एवं सति चतुर्विंशतितत्त्वसंख्यानानुपपत्तेः, सर्वेषां प्रलयेऽभावात् , इदं चिन्त्यम्। तत्त्वशब्दस्तु शास्त्रसिद्धप्रमेयपरतयाऽपि नेतुं शक्यः। भूतानां देहानां च स्थूलत्वेन्द्रियग्राह्यत्वयोः साम्यात् न तत्त्वान्तरता। पूर्वपूर्वतत्त्वापेक्षया हि उत्तरोत्तरं स्थूलीभवत् तत्त्वान्तरतामेति।

**अहङ्कारो गृह्यते।** बुद्धिरिति **अहङ्कारकारणं महत्तत्त्वम्।** अहङ्कार **इति अविद्यासंयुक्तमव्यक्तम्। यथा विषसंयुक्तमन्नं विषमुच्यते, एवमहङ्कारवासनावदव्यक्तं मूलकारणम् अहङ्कार इत्युच्यते, प्रवर्तकत्वादहङ्कारस्य। अहङ्कार एव हि सर्वस्य प्रवृत्तिबीजं दृष्टं लोके।** इतीयं **यथोक्ता** प्रकृतिः मे **मम ऐश्वरी मायाशक्तिरष्टधा** भिन्ना **भेदमागता॥४॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त' इति साङ्ख्यप्रक्रियया व्याचष्टे— **मन इति मनस इत्यादिना।** अहङ्कारान्वयव्यतिरेकवत्त्वाद् मनसोऽहङ्कारकार्यत्वमित्यर्थः। प्रथमजं सन्मात्रं **महत्तत्त्वम्**, तदहङ्कारस्य कारणं, 'त्रिविधोऽयमहङ्कारो महत्तत्त्वाद्धि जायते' इति स्मरणादित्यर्थः। 'मनुष्योऽह'मित्यादि मिथ्याज्ञानमविद्या, तत्सहितमव्यक्तं मूलाज्ञानमविद्याशब्देनोच्यते। कया वृत्त्या तदुच्यत इत्याशङ्क्याह— **यथा विष(य)संयुक्तमिति।** मनोबुद्धिशब्दयोरप्यहङ्कारशब्दादि[ब्दवद्] लक्षणैव द्रष्टव्या। कारणत्वगुणयोगाद् अहङ्कारशब्दस्याव्यक्ते गौणी वा वृत्तिरित्याह— **प्रवर्तकत्वादिति॥४॥**

आनन्दगिरिकृतव्याख्या

**समानाधिकृतत्वाविशेषात् तन्मात्राणां पूर्वपूर्वप्रकृतीनामुत्तरोत्तरविकाराणां न विशेषत्वसिद्धिरित्यर्थः। मनःशब्दस्य सङ्कल्पविकल्पात्मककरणविषयत्वमाशङ्क्याह—** मन इतीति। **न खल्वहङ्काराभावे सङ्कल्पविकल्पयोरसम्भवात् तदात्मकं मनः सम्भवतीत्यर्थः। निश्चयलक्षणा बुद्धिरित्यभ्युपगमाद् बुद्धिशब्दस्य निश्चयात्मककरणविषयत्वमाशङ्क्याह—** बुद्धिरितीति। **न हि हिरण्यगर्भसमष्टिबुद्धिरूपमन्तरेण व्यष्टिबुद्धिः सिध्यतीत्यर्थः। अहङ्कारस्याभिमानविशेषात्मकत्वेनान्तःकरणप्रभेदत्वं व्यावर्तयति—** अहङ्कार इतीति। अविद्यासंयुक्तमिति। **अविद्यात्मकमित्यर्थः। कथं मूलकारणस्याहङ्कारशब्दत्वमित्याशङ्क्योक्तमर्थं दृष्टान्तेन स्पष्टयति—** यथेत्यादिना। **मूलकारणस्याहङ्कारशब्दत्वे हेतुमाह—** प्रवर्तकत्वादिति। **तस्य प्रवर्तकत्वं प्रपञ्चयति—** अहङ्कार एवेति। **सत्येवाहङ्कारे ममकारो भवति, तयोश्च भावे सर्वा प्रवृत्तिरिति प्रसिद्धमित्यर्थः। उक्तां प्रकृतिमुपसंहरति—** इतीयमिति। **इयमित्यपरोक्षा, साक्षिदृश्येति यावत्।** ऐश्वरी **तदाश्रया, तदैश्वर्योपाधिभूता। प्रक्रियते महदाद्याकारेणेति** प्रकृतिः। **त्रिगुणं जगदुपादानं प्रधानमिति मतं व्युदस्यति—** मायेति। **तस्याः तत्तत्कार्याकारेण परिणामयोग्यत्वं द्योतयति—** शक्तिरिति। अष्टधेति। **अष्टभिः प्रकारैरिति यावत्॥४॥**

भाष्यार्कप्रकाशः

तत्कारणं तत्त्वान्तरमिति विवेकः। महत्तत्त्वं बुद्धिरित्याह— **बुद्धिरितीति।** मूलप्रकृतिरेवाहङ्कार इत्याह—**अहङ्कार इति। अविद्या** ऽहङ्कारवासना, तत्संयुक्तमव्यक्तं मूलप्रकृतिः अहङ्कार इत्युच्यते। कुतोऽस्याहङ्कारशब्दवाच्यतेत्यत्र दृष्टान्तमाह— **यथेति।** दार्ष्टान्तिकमाह— **एवमिति।** अहङ्कारवासना अविद्याऽस्मिन् अस्तीति अहङ्कारवासनावत्। **मूलकारणम्** आदिकारणमनादीत्यर्थः। मूलप्रकृतिरिति यावत्। अव्यक्तस्य अहङ्कारशब्दवाच्यत्वे हेत्वन्तरमाह—**प्रवर्तकत्वादिति।** अहङ्कारस्य प्रवर्तकत्वात् प्रवर्तकमव्यक्तमहङ्कारशब्दवाच्यमित्यर्थः। अहङ्कारस्य प्रवर्तकत्वमेव दर्शयति— **अहङ्कार एवेति।** सर्वस्य लोकस्य कर्मसु प्रवृत्तौ अहङ्कार एव कारणम्, अहमिदं कुर्यामित्यहङ्कारपूर्वकसङ्कल्पाभावे कर्मसु प्रवृत्त्यसम्भवात्।

**नन्वेवम्** अहङ्कारस्य भवतु प्रवर्तकत्वम्, कथं पुनरव्यक्तस्येति चेद्? **उच्यते**—अज्ञानमूलकत्वादनात्मन्यात्माभिमानरूपस्याहङ्कारस्य, अहङ्कारगतं तत्प्रवर्तकत्वमप्यज्ञानगतप्रवर्तकत्वमूलकमेव, कारणधर्मपूर्वकत्वात् कार्यधर्मस्येति। माया ह्यात्मस्वरूपमावृत्य सर्वं सर्वत्र प्रेरयति।

काऽसौ प्रकृतिः? अत आह— **मायेति।** काऽसौ मायेत्यत आह— **शक्तिरिति।** ईश्वरनिष्ठं जगज्जननादिसामर्थ्यमित्यर्थः। **अष्टधा भिन्नेति।** कार्यकारणरूपेणेति भावः। महदादीनां सप्तानां कार्यप्रकृतित्वान्मूलप्रकृतेः [1]कारणप्रकृतित्वाच्चेति बोध्यम्।

**ननु** साङ्ख्यमतस्य [2]शारीरकशास्त्रे **बादरायणेन** प्रत्याख्यातत्वात् कथं तस्यैवेहोपन्यासः स्वयमेव इति चेद्? **उच्यते**— शारीरके

१. कार्यत्वाभावे सति प्रकृतित्वं विवक्षितम्, कारणत्वस्य कार्यप्रकृतिसाधारणत्वात्। २. द्र. ब्र.सू. १-१-५ इत्यादि।

## अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
## जीवभूतां महाबाहो ! ययेदं धार्यते जगत्॥५॥

अपरेति। अपरा **न परा, निकृष्टाऽशुद्धाऽनर्थकरी संसारबन्धनात्मिका इयम्** । इतः **अस्याः यथोक्तायाः तु**

अनुभूतिस्वरूपाचार्यटिप्पणम्

अस्याः प्रकृतेः हेयत्वं दर्शयति— **अपरेयमिति**। उपादेयज्ञानं दर्शयति— **इतस्त्वन्यामिति**। ज्ञातव्यजीवसद्भाव एव

आनन्दगिरिकृतव्याख्या

**अचेतनवर्गमेकीकर्तुं प्रकृतेरष्टधा परिणाममभिधाय, विकारावच्छिन्न[न्नं] कार्यकल्पं चेतनवर्गमेकीकर्तुं पुरुषस्य चैतन्यस्याविद्याशक्त्यवच्छिन्नस्यापि प्रकृतित्वमुक्तां प्रकृतिमनूद्य दर्शयति—**अपरेति। **निकृष्टत्वं स्पष्टयति—** अनर्थकरीति। **अनर्थकरत्वमेव**

भाष्यार्कप्रकाशः

प्रकृत्यादीनां ब्रह्मणः पृथक्त्वं दूषितम् , न तु प्रकृत्यादीनां स्वरूपमेव निषिद्धम् , मायादिपदार्थानां तत्राप्यभ्युपगतत्वात्। न च महत्तत्वाहङ्कारतत्त्वानभ्युपगमः, बुद्धेरेव महत्तत्त्वत्वात्। एवमेव बुद्ध्याख्यमन्तःकरणं मनः इति, अहङ्कार इति च वृत्तिभेदाद् द्विधोच्यते—'अहंवृत्तिरिदंवृत्तिरित्यन्तःकरणं द्विधा' इति **विद्यारण्य**वचनात्। तत्राहंवृत्तिरहङ्कारः, इदंवृत्तिस्तु मनः। अन्तःकरणपरिणामत्वाद् वृत्तिद्वयात्मकमनोऽहङ्कारद्वयस्य महत्तत्त्वकार्यत्वेन व्यवहारः। तत्र च अहंवृत्तिपूर्वकत्वादिदंवृत्तेरहङ्कारकार्यत्वव्यपदेशो मनस इति।

**किञ्च** साङ्ख्यमते मूलप्रकृतेरेव जगदुपादानत्वमुक्तम् , न ह्यात्मनः,'न प्रकृतिर्न विकृतिः पुरुषः' इत्यात्मन उपादानत्वनिषेधात्। इह तु 'जन्माद्यस्य यतः' इति पुरुषस्यैवोपादानत्वमुच्यते मायाद्वारेति। एवमादि बहुवैलक्षण्यं साङ्ख्याद्वैतयोरूह्यम्। तस्मान्नात्र साङ्ख्यमतोपन्यासः।

**अथवा** 'अदुष्टमन्यतो ग्राह्य'मिति न्यायात् साङ्ख्योक्तोऽप्यदुष्टोंऽशो ग्राह्य एव। तत्र च प्रकृत्यष्टकस्य दर्शितस्य ग्रहणं न दुष्टम् , श्रुतिसिद्धत्वादित्यतस्तदंश इह गृह्यते। 'न प्रकृतिर्न विकृतिः पुरुषः' इति तु न गृह्यते, श्रुतिविरोधात्। यद्यपि वस्तुतः पुरुषस्याप्रकृतित्वमविकृतित्वम् , तथापि मायाद्वारा तस्य प्रकृतित्वं श्रुत्युक्तमिति बोध्यम्।

यत्तु **रामानुजः**—भूम्यादयः यथाश्रुति स्थूलभूताद्यर्थबोधका एवेति, **तत्प्रत्युक्तम् ,** स्थूलभूतादीनां प्रकृतित्वाभावप्रतिपादनात्।

यच्चोक्तं **देशिकेन—** 'एषा हि पूर्वमेका पश्चादष्टधा परिणता' इति, **तदसत्** , पञ्चभूतमनोबुद्ध्यहङ्कारात्मनैव परिणतेति वक्तुमशक्यत्वाद् , भूतपञ्चकप्राणपञ्चकेन्द्रियदशकविषयपञ्चकमनोबुद्ध्यहङ्कारात्मना अष्टाविंशतिधा परिणतेति वक्तव्यत्वात्। घटात्मना परिणतमृदतिरिक्तापरिणतमृद्वद् भूतादिरूपेण परिणतप्रकृत्यतिरिक्तापरिणतप्रकृतेः सत्त्वेन 'पूर्वमेका पश्चादष्टधे'ति वक्तुमयुक्तत्वात्। 'कार्यात्मना अष्टधा, कारणात्मना एके'ति च नवधा स्थितेति वक्तव्यत्वात्। न च कृत्स्नाऽपि प्रकृतिः कार्यात्मना परिणतैवेति वाच्यम् , ईश्वरोपाधेरव्याकृतस्यैवाभावप्रसङ्गात्। जीवस्य च कारणशरीरभूताज्ञानाभावप्रसङ्गात्। न चेष्टापत्तिः, सुषुप्तावज्ञानानुभवसत्त्वात्। व्यवहारकालेऽप्यहमज्ञ इत्यनुभवसिद्धाज्ञानस्य दुरपलापत्वाच्च, घटज्ञानेन तदज्ञाननिवृत्तिदर्शनाच्च। न च - अज्ञानं ज्ञानाभाव एव, न मायेति - वाच्यम् , अनादिभावत्वे सति ज्ञाननिवर्त्यत्वस्य मायालक्षणत्वादज्ञानस्य च तथात्वात् , ज्ञानाभाववानहमिति प्रतीत्यभावात् , अज्ञानवानहमिति प्रतीतिसत्त्वात् [1]भावरूपमेवाज्ञानम् , न त्वभावरूपमिति॥४॥

**अपरेति**। इयं पूर्वोक्ताष्टधा भिन्ना प्रकृतिरपरा। इतस्त्वन्यां जीवभूतां मे प्रकृतिं परां विद्धि। हे महाबाहो! ययेदं जगद् धार्यते। प्रकृतिशब्दार्थमाह— **ममात्मभूतामिति**। मत्स्वरूपभूतामित्यर्थः। पूर्वश्लोकोक्तप्रकृतिस्तु ईश्वरस्वभावभूतेति विवेकः। जीवभूतां जीवयति चेतयति देहमिति जीवः तद्रूपाम् , क्षेत्रं जानातीति क्षेत्रज्ञः; देहेन्द्रियाद्यनात्मपदार्थः सर्वोऽपि क्षेत्रमित्युच्यते, व्यक्ती-

१. अज्ञानस्य भावरूपत्वं प्रत्यक्षानुमानश्रुत्यादिभिः विस्तरेण प्रपञ्चितं पञ्चपादिकाविवरणादौ द्रष्टव्यम्।

अन्यां **विशुद्धां प्रकृतिं ममात्मभूतां विद्धि मे** परां **प्रकृष्टं** जीवभूतां **क्षेत्रज्ञलक्षणां प्राणधारणनिमित्तभूताम् , हे महाबाहो ! यया प्रकृत्या इदं धार्यते जगद् अन्तःप्रविष्टया॥५॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

नास्तीत्याशङ्क्याह— **ययेदं धार्यते जगदिति।** चेतनाधिष्ठितमेवाचेतनं व्यवहारक्षमं रथादिवदित्यर्थः॥५॥

आनन्दगिरिकृतव्याख्या

**स्फोरयति—** संसारेति। **कथञ्चिदप्यनन्यत्वव्यावृत्त्यर्थः** तुशब्दः। अन्याम् **अत्यन्तविलक्षणामिति यावत्। अन्यत्वमेव स्पष्टयति—** विशुद्धामिति। [१]**प्रकृतिशब्दस्यात्र प्रयुक्तस्यार्थान्तरमाह—** ममेति। **प्रकृष्टत्वमेव भोक्तृत्वेन स्पष्टयति—**जीवभूतामिति। **प्रकृत्यन्तराद् अस्याः प्रकृतेरवान्तरविशेषमाह—** ययेति। **न हि जीवरहितं जगद् धारयितुं शक्यमित्याशयेनाह—** अन्तरिति॥५॥

भाष्यार्कप्रकाशः

भविष्यत्ययमंशः त्रयोदशाध्याये, [२]आत्मा कूटस्थः, तल्लक्षणां तत्स्वरूपाम्। अनेन ईश्वरस्वरूपं जीव एवेति जीवेश्वराभेदः स्पष्टः।

जीवति प्राणान् बिभर्ति अस्माद् देह इति जीवः। 'जीव प्राणधारणे' इति व्युत्पत्तिमाश्रित्याह— **प्राणधारणनिमित्तभूतामिति।** देहस्य प्राणधारणे जीवो निमित्तभूत इत्यर्थः। 'जीवापेतं वाव किल शरीरं म्रियते' इति श्रुतेः। **म्रियते** प्राणत्यागं करोतीत्यर्थः। 'मृङ् प्राणत्यागे' इति धातुः।

**ननु** पूर्णस्य जीवस्य कथमपगमनं येन शरीरस्य मरणं स्यादिति चेद् , **उच्यते**— परिपूर्णस्यापि जीवस्य बुद्ध्युपाधिवशाद् गमनादि सम्भवतीव, घटोपाधिवशादाकाशस्येव। 'ध्यायतीव लेलायतीव' इति श्रुतेः। यथा बुद्धौ ध्यायन्त्यामात्मा ध्यायतीव, बुद्धौ चलन्त्यामात्मा चलतीव, तथा बुद्धावुत्क्रामन्त्यामात्मा उत्क्रामतीवेति भावः। एवं चैतन्यस्य प्राणधारणनिमित्तभूतत्वमपि बुद्ध्यवच्छिन्नत्वरूपेणैवेति बोध्यम्।

कथम्भूतया धार्यते जगद्? अत आह— **अन्तःप्रविष्टयेति।** अन्तर्यामिनारायणादिशब्दवाच्यकूटस्थसाक्षिप्रत्यगात्मरूपेण जीवो जगद् अन्तः प्रविश्य धारयतीत्यर्थः। यद्यपि 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इति जीवस्य सर्वजगदन्तर्बहिर्व्याप्तिरस्ति, तथापि बहिर्व्याप्य स्थितस्य तस्य न जगद्धारकत्वमित्यभिप्रेत्याह— **अन्तःप्रविष्टयेति।** अन्तर्व्याप्य स्थितयेत्यर्थः। यथाश्रुतार्थे तु परिपूर्णस्य कथं प्रवेश इति चोद्येत। **यद्वा** परिपूर्णस्यापि बुद्ध्युपाधिवशात् प्रवेशः संभवत्येव, 'तत्सृष्ट्वा तदेवानुप्राविश'दिति श्रुतेः। बुद्ध्यवच्छिन्नत्वाकारेण प्राविशदिति तदर्थः। इदं च स्थावरजङ्गमदेहापेक्षयोक्तम्। अचेतनेषु तु नापूर्वोऽस्ति कश्चनेश्वरस्य प्रवेशः।

एवमन्तर्व्याप्य स्थितं चैतन्यं जीव इति, कूटस्थ इति, साक्षीति, आत्मेति च व्यवहरन्ति; बहिर्व्याप्य स्थितं तु ईश्वर इति, ब्रह्मेति च व्यवहरन्ति। अस्य चान्तर्बहिर्भावस्य चैतन्ये कल्पितत्वाद् वस्तुतो निष्प्रदेशमेकरूपमद्वैतमेव चैतन्यमिति न जीवेश्वरभेदावकाशः। न च जीवस्य कथमचेतनान्तःस्थितिरिति वाच्यम् , चिदाभासलक्षणजीवस्यैव तदनुपपत्तिः, न तु प्रत्यगात्मलक्षणजीवस्य, 'चेतनाचेतनभिदा कूटस्थात्मकृता न हि। किन्तु बुद्धिकृताभासकृतैवेत्यवगम्यताम्॥' इति वचनात्।

यत्तु **रामानुजः—** ईश्वरस्याचेतनरूपा चेतनरूपा च प्रकृती द्वे स्तः; तत्र भोग्यभूता अचेतनप्रकृतिः भूमिरापः इति श्लोकेन दर्शिता; भोक्तृभूता तु चेतनप्रकृतिः सेहोच्यत इति, **तत्तुच्छम्**; 'अविकार्योऽयमुच्यते' इति जीवस्य चेतनस्य [३]भोक्तृत्वविकारनिषेधात् ; अहंवृत्तिरूपविज्ञानमयकोशात्मकबुद्धेरेव भोक्तृत्वात् , तस्याश्च वस्तुतो जडत्वेन भोक्तृभोग्यात्मकप्रकृतेरचेतनत्वात् , चेतनस्य च जीवस्याकर्तृत्वेनाप्यभोक्तृत्वात् , 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते॥' इति, 'न करोति न लिप्यते' इति च जीवस्याकर्तृत्वस्येहैव प्रतिपादितत्वात् , 'निष्कलं निष्क्रियं शान्तम्' इत्यादिश्रुतेः, कर्तृबुद्धितादात्म्याध्यासप्रयुक्तत्वाच्च जीवे कर्तृत्वभ्रमस्य, तदध्यासाभाववत्यां सुषुप्तौ जीवस्य कर्तृत्वादर्शनात् , अकर्तुर्भोक्तृत्वायोगात् , तथा सति सोमयाजिनो

---

१. 'प्रकृतिशब्दस्यान्यप्रयुक्त' इति पा.। २. क्षेत्रज्ञः आत्मा कूटस्थः इति संबन्धः। ३. विकारसामान्यनिषेधे हि भोक्तृत्वरूपो विकारोऽपि निषिद्धो भवति। जीवस्य भोक्तृत्वाभावे कस्य भोक्तृत्वमित्यत आह—**अहंवृत्तीति**। 'इदं हि कर्तृत्वं भोक्तृत्वं च सत्त्वक्षेत्रज्ञयोरितरेतरस्वभावाविवेककृतं कल्प्यते। परमार्थतस्तु नान्यतरस्यापि संभवति, अचेतनत्वात् सत्त्वस्य, अविक्रियत्वाच्च क्षेत्रज्ञस्य'(ब्र.सू. १.२.१२ ) इति भाष्यमिहानुसंधेयम्। तथा द्र.भ.गी. १३- २१।

**एतद्योनीनि भूतानि सर्वाणीत्युपधारय।**
**अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥ ६॥**

एतदिति। **एतद्योनीनि,** एते **परापरे क्षेत्रक्षेत्रज्ञलक्षणे प्रकृती योनिर्येषां भूतानां तानि** एतद्योनीनि **भूतानि सर्वाणि इत्येवम्** उपधारय **जानीहि। यस्माद् मम प्रकृती योनिः कारणं सर्वभूतानाम् अतोऽहं** कृत्स्नस्य **समस्तस्य जगतः** प्रभवः **उत्पत्तिः,** प्रलयो **विनाशस्तथा। प्रकृतिद्वयद्वारेणाहं सर्वज्ञः ईश्वरो जगतः कारणमित्यर्थः॥ ६॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

एवं [१]व्यतिरिक्तात्माभिज्ञेन मुमुक्षुणा ध्येयस्येश्वरस्य कारणत्वादि स्वाभाविकं न भवतीत्याह— **एतद्योनीनीति।** सृष्टेर्जीवादृष्टनिबन्धनत्वाद् जीवस्य निमित्तत्वम् , मायायाश्च परिणामित्वाद् उपादानत्वं **योनित्वम्।** तदुभयोरीश्वरस्य सोपाधिकाकाराश्रयत्वमेवोपादानत्वमित्यर्थः।

**॥ इति श्रीमद्भगवद्गीताभाष्यटिप्पणे सप्तमोऽध्यायः॥**

आनन्दगिरिकृतव्याख्या

**उक्तप्रकृतिद्वये कार्यलिङ्गकमनुमानं प्रमाणयति—** एतद्योनीनीति। **प्रकृतिद्वयस्य जगत्कारणत्वे कथमीश्वरस्य [२]तदुपगतमित्याशङ्क्याह—** अहमिति। **एतद्योनीनीत्युक्ते समनन्तरप्रकृतजीवभूतप्रकृतौ एतच्छब्दस्याव्यवधानात् प्रवृत्तिमाशङ्क्य व्याकरोति—** एते इति। सर्वाणि **चेतनाचेतनानि जनिमन्तीत्यर्थः। सर्वभूतकारणत्वेन प्रकृतिद्वयमङ्गीकृतं चेत् कथम् 'अह'मित्याद्युक्तमित्याशङ्क्याह—** यस्मादिति। मम प्रकृती **परमेश्वरस्योपाधितया स्थिते इत्यर्थः। तर्हि प्रकृतिद्वयं कारणमीश्वरश्चेति जगतोऽनेकविधकारणाङ्गीकरणं स्यादित्याशङ्क्याह—** प्रकृतीति। **अपरप्रकृतेरचेतनत्वात् , परप्रकृतेश्चेतनत्वेऽपि किञ्चिज्ज्ञत्वाद् , ईश्वरस्यैव सर्वज्ञस्य सर्वकारणत्वं युक्तमित्याह—** सर्वज्ञ इति॥ ६॥

भाष्यार्कप्रकाशः

ऽन्यस्यैव स्वर्गफलभोगप्रसङ्गात् , त्वन्मतरीत्या अणुना जीवेन भोक्त्रा कृत्स्नस्य जगतोऽधार्यमाणत्वात्॥ ५॥

**एतदिति। परापरे इति।** क्षेत्रज्ञलक्षणा परा प्रकृतिः, क्षेत्रलक्षणा त्वपरेति विवेकः। इदम्प्रत्ययविषयः भूम्यादिः क्षेत्रम् , अहम्प्रत्ययविषयस्तु चिदात्मा क्षेत्रज्ञ इति विवेकः। न चाहङ्कारोऽप्यहम्प्रत्ययविषय इति वाच्यम् , ममाहङ्कार इति प्रतीत्या अहङ्कारस्य केवलाहम्प्रत्ययविषयत्वाभावात्। न च - ममात्मेति प्रतीत्या आत्माऽपि केवलाहम्प्रत्ययविषयो नेति - वाच्यम् , स्वरूपवाचित्वात् तत्रात्मशब्दस्य। न चाहम्प्रत्ययविषयत्वस्यापि सत्त्वादहङ्कारस्य पाक्षिकात्मत्वं स्यादिति वाच्यम् , अनात्मनः पाक्षिकात्मत्वस्यासम्भवात् ; आत्मतादात्म्याध्यासप्रयुक्तत्वाच्च तदहम्प्रत्ययविषयत्वस्येति।

**योनी** कारणे, उपादाने इति यावत्। न च - क्षेत्रज्ञस्य कथं भूतप्रकृतित्वम् , कार्यकारणयोः सालक्षण्यनियमात् , भूतानां जडत्वात् क्षेत्रज्ञस्य च चेतनत्वादिति - वाच्यम् , परिणामपक्षे एव कार्यकारणसालक्षण्यनियमः, न तु विवर्तपक्षे इति सिद्धान्तात्। मायाप्रकृतेर्भूतानां परिणाम्युपादानत्वेऽपि क्षेत्रज्ञप्रकृतेर्भूतानां विवर्ताधिष्ठानत्वात्। एवं जगद्रूपविवर्ताधिष्ठानत्वलक्षणोपादानत्वसम्भवात् प्रकृतिशब्दवाच्यत्वं क्षेत्रज्ञस्य। प्रकृतिर्ह्युपादानम्। तस्माद् रज्जुः सर्पस्येव, जीवः सर्वभूतानामुपादानमिति स्थितम्। स्वाभिन्नकार्यजनिहेतुत्वमुपादानत्वमिति लक्षणात्। इदं विवर्ताधिष्ठाने परिणामिनि चानुगतं साधारणं लक्षणम्। तदेवं सर्वभूतानां चेतनविवर्तत्वात् चेतनयोनित्वम् , मायापरिणामत्वान्मायायोनित्वम् इत्यस्ति परापरप्रकृतिद्वययोनित्वम्।

परिणामविवर्तलक्षणे तु— उपादानसमसत्ताककार्यापत्तिः **परिणामः**, तद्विषमसत्ताककार्यापत्तिः **विवर्तः** इति बोध्ये।

---

१. 'व्यतिरेकात्माभिज्ञेन' इति पा.। २. तत् = जगत्कारणत्वम्।

भाष्यार्कप्रकाशः

सत्ता च पारमार्थिकी व्यावहारिकी प्रातिभासिकी चेति त्रिविधा। तत्र आद्या ब्रह्मणि क्षेत्रज्ञे; द्वितीया जगति; तृतीया स्वप्नप्रपञ्चे रज्जुसर्पादौ चेति विवेकः। मृद्घटयोरिव मायाजगतोर्व्यावहारिकसत्तावत्त्वाद् उपादानसमसत्ताकं घटादिकमिव जगद्रूपं कार्यं परिणामः। रज्जुसर्पयोरिव व्यावहारिकप्रातिभासिकसत्ताकयोः, ब्रह्मजगतोः पारमार्थिकव्यावहारिकसत्ताकयोर्भिन्नसत्ताकत्वात् सर्परूपमिव जगद्रूपं कार्यं विवर्त इति बोध्यम्।

**सर्वाणि भूतानि** कार्यकरणसङ्घातात्मकानि भौतिकानि, पृथिव्यादिमहाभूतानि च कार्यमात्रं सर्वमित्यर्थः। महदादिसप्तकमपि मूलप्रकृतिक्षेत्रज्ञयोनिकमेव, कार्यत्वात्। मूलप्रकृतिस्तु न कस्यचित् कार्यम् , अनादित्वात्। अत एव तस्या मूलप्रकृतित्वव्यपदेशः। मूलं कारणमित्यर्थः। क्षेत्रज्ञस्त्वजो नित्यः शाश्वत इत्यनादिरेव। ततश्च मूलप्रकृतिं क्षेत्रज्ञं विहाय सर्वं जगत् कार्यभूतमेवेति बोध्यम्।

एवमनादिरपि मूलप्रकृतिः सान्तैव; नैयायिकाभिमतप्रागभाववत् ; न तु नित्या, क्षेत्रज्ञवत्। एवं क्षेत्रज्ञमूलप्रकृत्योः नित्यत्वानित्यत्वाभ्यां ज्ञानजाड्याभ्यां च महदस्ति वैलक्षण्यमिति सिद्धम्।

**ननु** सर्वभूतानां क्षेत्रक्षेत्रज्ञलक्षणप्रकृतिद्वययोनित्वकथनात् कृत्स्नस्य जगतः प्रभवः प्रलयश्च तत्प्रकृतिद्वयमेव स्यान्न त्वीश्वर इति स्थिते कथम् 'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा' इत्युच्यते? अत आह— **यस्मादिति। प्रकृतिरिति।** स्वरूपं स्वभावश्चेत्यर्थः। मत्स्वरूपस्य चैतन्यस्य क्षेत्रज्ञस्य, मत्स्वभावस्य मायाया मूलप्रकृतेश्च सर्वजगदुपादानत्वादीश्वरोऽहं सर्वजगदुपादानं भवामीत्यर्थः। उपादानान्मृदादेर्घटादि कार्यं जायते, पुनरुपादान एव लीयते, घटस्य मृद्येव लयदर्शनात्। तथा चोपादानमेव कार्योत्पत्तिप्रलययोरधिष्ठानमित्यभिप्रायादाह— **प्रभवः प्रलयस्तथेति।** अहं स्वरूपस्वभावद्वारा जगदुपादानभूतः सर्वेश्वर इत्यर्थः। कृत्स्नस्य प्रत्यक्षानुमानागमप्रमाणसिद्धस्य सर्वस्येत्यर्थः। जगतः, जायत इति जं, गच्छतीति गमिति जगत्। 'ह्रस्वस्य पिति कृती'ति तुक्। उत्पत्तिविनाशरूपावस्थावदित्यर्थः। अनित्यमिति यावत्। तस्य **प्रभवः,** प्रभवत्यस्मादिति प्रभवः उत्पत्तिस्थानम्। प्रलीयते ऽस्मिन्निति **प्रलयः** विनाशस्थानम्। भवामीति शेषः। उपादानत्वादिति भावः।

भाष्ये उत्पत्तिविनाशशब्दावपि उत्पत्तिविनाशस्थानपरौ। अन्यथा जन्ममरणरूपधर्मपरत्वे अनन्वयप्रसङ्गात्। न हीश्वरो जगतो जन्मधर्मो मरणधर्मो वा भवेत्। **जगतः कारणमिति** सृष्टिस्थितिलयकारणमित्यर्थः। 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति' इति श्रुतेरिति भावः।

कृत्स्नजगदाकारपरिणतमायाधिष्ठानचैतन्यम् आत्मपरमार्थकूटस्थसाक्षिक्षेत्रज्ञेश्वरब्रह्मादिशब्दप्रतिपाद्यम् अहमेवेत्यत्र पर्यवसन्नार्थः। अनेन जीवेश्वरभेदवादः समूलमुन्मूलितः।

यत्तु **रामानुजः**— चेतनाचेतनप्रकृत्योर्द्वयोरपीश्वरयोनित्वमित्युवाच, **तत्तुच्छम्**; 'अजो नित्यः शाश्वतोऽयं पुराणः' इतीश्वरात् सकाशाज्जीवस्य जन्मनिषेधात्। सति तु जन्मनि 'जातस्य हि ध्रुवो मृत्यु'रिति जीवस्य विनाशप्रसङ्गात्। प्रकृतिपुरुषकालादीनामनादित्वस्य भवताऽप्यभ्युपगतत्वेन, अजामित्यादिश्रुत्यनुसारेण च मायायाः अनादित्वेनेश्वरात् सकाशात् तस्या अपि जन्माभावात्। सति तु मायायाः जन्मनि मायोत्पत्तेः प्रागीश्वरस्यामायित्वप्रसङ्गात्। 'मायिनं तु महेश्वर'मिति श्रुतिविरोधात् , निर्मायस्येश्वरस्य मायाजननसामर्थ्याभावेन मायायाः उत्पत्त्ययोगात् , ईश्वरसामर्थ्यस्यैव शक्तिरूपस्य मायापदवाच्यत्वात् , एतन्मायाजननसामर्थ्यरूपमायान्तरसत्त्वे तन्मायाजननसामर्थ्यरूपमायान्तरस्यापि कल्पनीयत्वात् , तस्याः अपि तदन्यमायायाः इत्येवमनवस्थाप्रसङ्गात् , ईश्वरसामर्थ्यातिरिक्तमायानामकतत्त्वान्तरस्याप्रसिद्धत्वात् , साङ्ख्यमतस्य चावैदिकत्वेनाप्रमाणत्वात्। तस्मात् सिद्धं जीवस्येव मायायाः अप्यनादित्वमिति कथमेतद्योनित्वमीश्वरस्य? अत एव हि परमेश्वरात् सकाशाज्जीवा जायन्त इति दोषाद् भागवतमतं प्रत्याख्यातं **भगवद्बादरायणेन शारीरकशास्त्रे।** न च बुद्ध्युपाधिपरिच्छिन्नत्वरूपेण जीवस्य जन्म, तद्भङ्गरूपेण च नाशो मोक्षरूप इति वाच्यम् , उपाधिगतजन्मनाशाभ्यामुपहितस्य न सम्बन्धः इति सिद्धान्तः। अन्यथा आकाशस्यापि घटजन्मनाशाभ्यां जन्मनाशप्रसङ्गात् , बुद्धिपरिच्छिन्नस्यापि शरीरोपाधिजन्मनाशाभ्यां जन्मनाशप्रसङ्गात्। न चेष्टापत्तिः; 'न हन्यते हन्यमाने शरीरे' इतीहैवोक्तत्वात् , तत्त्वकथनावसरे औपाधिकातात्त्विकजन्मनाशकथनायोगाच्च। तस्माज्जीवस्य मायायाः वा नेश्वरयोनित्वम्।

भाष्यार्कप्रकाशः

या तु श्रुतिस्तेनोपन्यस्ता 'महानव्यक्ते लीयते, अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते, तमः परे देव एकीभवति' इति, तस्याः श्रुतेर्न स्वाभिप्रेतार्थबोधकत्वम्। किन्तु अव्यक्तत्वाक्षरत्वतमस्त्वानि प्रकृतेरवस्थाविशेषा एव। प्रकृतेश्चात्मनि लयोऽस्मदभ्युपगत एव। न च तदकार्यस्य तस्मिन् कथं लय इति वाच्यम्, अकार्यस्यापि प्रागभावस्य लयदर्शनात्, गगनाकार्यस्यापि मेघस्य गगने लयदर्शनात्, कार्पासजन्यस्यापि पटस्याग्नौ लयदर्शनात् कार्यस्यैव कारण एव लय इति न नियमः। नाप्यनया श्रुत्या मायायाः लय उच्यते, किन्तु 'तमः परे देव एकी भवति' इत्येकीभाव एव। स च ब्रह्मणः पृथक्कार्यकरणादिरूपेणानवस्थानमेव।

न चात्राक्षरशब्दो जीववाचीति वाच्यम्, अक्षरमिति क्लीबस्य तस्य जीववाचित्वाभावात्। जीववाच्यक्षरशब्दो हि पुंलिङ्गः। न हि 'अजो नित्यः शाश्वतः' इति जीवं नित्यं ब्रुवाणा श्रुतिरेवेह जीवं विनाशिनं ब्रूयात्, स्ववचोव्याघातात्।

न च - जीवस्य ब्रह्मण्यज्ञानद्वारा सुषुप्तौ लयो दृश्यते, श्रूयते च, 'सति सम्पत्स्य[द्य] न विदुः सति सम्पत्स्या[द्या]महे' इति श्रुतेः, अनुभवाच्च। ततश्च जीवस्याज्ञाने लयः, सजीवस्य चाज्ञानस्य तमसो ब्रह्मणि परमात्मनि लय इति - वाच्यम्, जीवस्य सुषुप्तौ ब्रह्मणि सम्पत्तिर्नाम ब्रह्मस्वरूपेणावस्थानमेव। 'प्राज्ञेनात्मना सम्परिष्वज्य' इति श्रुत्यन्तरात्।

न च ब्रह्मणा जीवस्य सङ्गस्तत्राप्यभिप्रेत इति वाच्यम्, तथापि जीवस्य लयाभावात्। न हि नष्टस्य जीवस्य ब्रह्मणा सह सङ्गः स्यात्, विद्यमानपदार्थद्वयस्यैव परस्परसङ्गदर्शनात्, गगनकुसुमेन गगनस्य सङ्गादर्शनाच्च। तस्माज्जीवस्याविद्यकसंसारित्वरूपप्रहाण-पूर्वकब्रह्मस्वरूपस्थितिरेव सति सम्पत्तिः, वाक्यशेषात्। 'सति सम्पत्स्या[द्या]महे' इति, 'न विदु'रिति हि वाक्यशेषः। नष्टानां जीवानां वेदनस्यैवाप्रसक्तेः कथमप्रसक्तस्य निषेधः। 'न विदु'रिति ह्यज्ञानानुभवो जीवानाम्। अयं च बहुत्वनिर्देशः उपाध्यभिप्रायेण, न तु वस्तुतः, आत्मैकत्वात्।

**अथवा** जीवोपाधेरन्तःकरणस्याज्ञाने लयस्तस्य च ब्रह्मणीत्यौपाधिक एव जीवस्य लयः श्रुत्या विवक्षितः, न तु वस्तुतः, अपरिच्छिन्नस्य पूर्णस्य नित्यस्य तस्य नाशायोगात्, जीवस्यैव वस्तुतो ब्रह्मत्वाच्च। न हि घटाकाशान्महाकाशो भिद्यते, येन बुद्ध्युपाधिकाज्जीवादीश्वरो भिद्येत। एवमुपाधिविलयादेव हि जीवस्य ब्रह्मस्वरूपेणावस्थानं सुषुप्तौ प्रलये मुक्तौ वा। तत्र सुषुप्तिप्रलययोर्जीवोपाधेर्वासनारूपेण वर्तमानत्वात् पुनरागतिः। मुक्तौ तु सर्वात्मना लयान्न पुनरावृत्तिरुपाधेरिति बोध्यम्। [1]इयं चोपाधिर्जीवेऽज्ञानकल्पितेति ज्ञानेन निवर्तत एव। अत एव ज्ञानात् केवलान्मुक्तिं ब्रुवन्ति श्रुतयः।

अथ यदि त्वयाऽपि जीवस्योपाधिभङ्ग एव जीवस्य ब्रह्मणि लय इति विवक्ष्यते, तर्ह्यपसिद्धान्तस्तव, त्वन्मते सायुज्यस्यै-वाभावात्। यदि तु वास्तवो जीवस्य लयो विवक्ष्यते, तर्हि नित्यत्वश्रुतिविरोधः। यदि प्रलये जीवानां लयः, प्रपञ्चे पुनः तदन्येषां जीवानामुदयश्च, तर्हि कृतनाशाकृताभ्यागमप्रसङ्गः। स्रष्टुरीश्वरस्य च वैषम्यनैर्घृण्यदोषप्रसक्तेः। न च कर्मसापेक्षत्वात् तदप्रसक्तिरिति वाच्यम्, कर्तुरेवाभावे कुतः कर्मसत्त्वम्? जीवादृष्टं हि कर्मशब्दवाच्यम्। 'न जायते म्रियते वा विपश्चि[कदाचि]न्नायं भूत्वा भविता वा न भूयः' इति हि स्मृतं भगवतेहैव, [2]श्रुतं च तथा, व्याख्यातं च त्वया तथा; अतः स्ववचनविरोधोऽपि।

या तु स्मृतिरनेनोपन्यस्ता 'प्रकृतिर्या मया ख्याता व्यक्ताव्यक्तस्वरूपिणी। पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि॥' इति, सा च न प्रकृतिपुरुषयोः प्रलये परमात्मनि वास्तवं लयं ब्रूते, विरोधात्। किन्तु प्रकृतिरकार्यक्षमा लीनेव वर्तत इति, पुरुषश्च बुद्धिपरिच्छिन्नो जीवोऽज्ञानतादात्म्याध्यासमापद्य लीन इव वर्तत इति च औपचारिकलयं ब्रूते। अन्यथा प्रलये मायायाः स्वरूपतः सर्वात्मना नाशे सति, जीवाः विनाऽपि यतनं मुच्यन्त एवेति मोक्षशास्त्रवैयर्थ्यम्। सर्वजीवमुक्तौ प्रपञ्चे पुनर्जीवान्तरसृष्टिप्रसङ्गः। न चेष्टापत्तिः, जीवस्य जन्मनाशहीनस्य जन्मनाशप्रसङ्गः, कृतहानाकृताभ्यागमदोषप्रसङ्गः, ईश्वरस्य च वैषम्यादिदोषप्रसङ्गः। प्रलये जीवनाशपक्षे चेमे दोषाः सम्भवन्ति हि।

तस्माद् यथा सुप्तः पुरुषः ब्रह्मणि लीन इत्युच्यते, तथैव प्रलयेऽपीति न वास्तवो जीवस्य लयः। अन्यथा हि सतो जीवस्य नाशे असतो जीवस्य पुनरुत्पत्तौ च 'नासतो विद्यते भावो नाभावो विद्यते सतः' इति गीतावचनमेव विरुध्येत। असतः सत्ताऽयोगात्

१. अयमिति युक्तः पाठः। बुद्धिं विवक्षित्वा वा स्त्रीलिङ्गनिर्देशः। २. 'न जायते म्रियते वा' इति कठोपनिषदि श्रुतम्।

**मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय !।**
**मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥७॥**
**रसोऽहमप्सु कौन्तेय ! प्रभाऽस्मि शशिसूर्ययोः।**

**यतस्तस्मात्—** मत्त इति। मत्तः **परमेश्वरात्** परतरम् अन्यत् **कारणान्तरं किञ्चिद्** नास्ति **न विद्यते। अहमेव जगत्कारणमित्यर्थः। हे धनञ्जय ! यस्मादेवं तस्माद्** मयि **परमेश्वरे सर्वाणि भूतानि,** सर्वमिदं **जगत्** प्रोतम् **अनुस्यूतम् अनुगतम् अनुविद्धम्। ग्रथितमित्यर्थः। [1]दीर्घतन्तुषु पटवत् , सूत्रे च मणिगणा इव॥७॥**

**केन केन धर्मेण विशिष्टे त्वयि सर्वमिदं प्रोतमित्युच्यते—** रस इति। रसोऽहम् **अपां यः सारः स रसः।**

आनन्दगिरिकृतव्याख्या

**प्रधानात्परतोऽक्षरात् पुरुषवत् , परमात्मनोऽपि पराद् अन्यत्परं स्यादित्याशङ्क्य प्रकृतिद्वयद्वारा सर्वकारणत्वमीश्वरस्योक्तमुपजीव्य परिहरति—**यतस्तस्मादिति। **'नान्यदस्ति पर'मित्यत्र हेतुमाह—** मयीति। **परतरशब्दार्थमाह—** अन्यदिति[2]। **स्वातन्त्र्यव्यावृत्त्यर्थमन्तरशब्दः। निषेधफलं कथयति—** अहमेवेति। **सर्वजगत्कारणत्वेन सिद्धमर्थं द्वितीयार्धव्याख्यानेन विशदयति—** यस्मादिति। **अतो [यथा] दीर्घेषु तिर्यक्षु च पटघटितेषु तन्तुषु पटस्यानुगतिरवगम्यते, तद्वन्मय्येवानुगतं जगदित्याह—** दीर्घेति। **यथा च मणयः सूत्रेऽनुस्यूतास्तेनैव ध्रियन्ते, तदभावे विप्रकीर्यन्ते, तथा मयैवात्मभूतेन सर्वं व्याप्तं ततो निष्कृष्टं विनष्टमेव स्यादिति श्लोकोक्तं दृष्टान्तमाह—** सूत्र इति॥७॥

**अबादीनां रसादिषु प्रोतत्वप्रतीतेस्त्वय्येव सर्वं प्रोतमित्ययुक्तमिति मत्वा पृच्छति—** केनेति। **तत्रोत्तरमुत्तरग्रन्थेन दर्शयति—**

भाष्यार्कप्रकाशः

सतश्चासत्ताऽयोगादनुपपन्ना चेयं कल्पना। न चैवं कथं सतः प्रपञ्चस्यापि लय इति वाच्यम् , प्रपञ्चस्यासत्त्वात्। न च - कथमसतः प्रतीतिः शशशृङ्गादेरनुपलम्भादिति - वाच्यम् , असतो रज्जुसर्पादेरुपलभ्यमानत्वात्। असतोऽप्युपलभ्यमानत्वादेव प्रपञ्चस्य शुक्तिरजतादिवन्मिथ्यात्वस्यास्माभिरुच्यमानत्वात्। यत् प्रतीयते बाध्यते च, तद्धि मिथ्या इन्द्रजालादिवत्। तस्मान्नित्यस्य जीवस्य प्रलये मुक्तौ वा न लयः, मायायाश्च प्रलये न लयः, किन्तु मुक्तावेव। प्रलये प्रकृतिपुरुषयोर्लयस्मरणं त्वौपचारिकमेव। एवं प्रकृतिपुरुषयोः प्रलये लयाभावादेव प्रपञ्चे नोत्पत्तिः। अतो नेश्वरयोनित्वं प्रकृतिपुरुषयोरिति स्थितम्॥६॥

**मत्त इति।** हे धनञ्जय! मत्तोऽन्यत् परतरं किञ्चिदपि नास्ति। [3]मत्तोऽन्यत् किञ्चित् परतरं नास्तीति वा। सूत्रे मणिगणा इव मयीदं सर्वं प्रोतम्। **यस्मात् तस्मादिति।** यस्मादहं सर्वस्य जगतः प्रभवः, प्रलयश्च तस्मादित्यर्थः। अन्यशब्दसत्त्वादत्र परतरशब्दो नान्यपरः, पौनरुक्त्यात् , किन्तु कारणपर इत्याह— **कारणान्तरमिति।** कारणस्य कार्यापेक्षयोत्कृष्टत्वात् परशब्दवाच्यत्वम् ।अतिशयेन परं परतरम् , प्रधानकारणमित्यर्थः। मृदादिकारणे घटादिकार्यस्यानुगतत्वदर्शनादाह— **मयि सर्वमिदं प्रोतमिति।** मयि प्रत्यगभिन्ने ब्रह्मणि इदं प्रमेयं सर्वं जगत् प्रोतम्। दृष्टान्तमाह भाष्यकारः— **दीर्घपटतन्तुवदिति।** यथैकस्यां[4] दीर्घतन्तौ पटः प्रोतः, तद्वदित्यर्थः। घटाकारपरिणतमृदि घट इव जगदाकारपरिणतमायायां जगदनुगतम्। तादृशमायाधिष्ठानत्वादात्मनोऽपि जगदनुस्यूतत्वव्यवहार इति भावः। साक्षादन्तर्यामिण्यात्मन्यपीदं जगदनुगतम्। कथमित्यत्र दृष्टान्तमाह मूलकारः— **सूत्रे मणिगणा इवेति।** यथा सूत्रे मणिगणाः प्रकर्षेण ग्रथितास्तथा आत्मनि जगदित्यर्थः। एवं दृष्टान्तद्वयसाधारण्यायैव प्रोतशब्दस्य अनुगतप्रग्रथितरूपार्थद्वयकथनं भाष्ये। एतेन अन्तःप्रविष्टेन सूत्रेण मणिगणा यथा धार्यन्ते, तथा अन्तःप्रविष्टजीवप्रकृत्या जगद् धार्यत इति दृष्टान्तः सूचितः॥७॥

**रस इति।** ननु सर्वं जगत् त्वय्येव कुतः प्रोतम्? किन्तु तत्कारणे[तत्तत्कारणे] तत्तत्कार्यं प्रोतम् , यथा मृदि घटः, तन्तुषु

---

१.'दीर्घपटतन्तुवदि'ति रा.पा.। २.अन्यत् कारणान्तरमित्येव परतरशब्दार्थो ज्ञेयः। ३.अत्र द्वितीययोजनायामुद्देश्यविधेयभेदः विशेषः। ४.पुंलिङ्गनिर्देशो युक्तः।

**प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥**
**पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ।**
**जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥**

**तस्मिन् रसभूते मयि आपः प्रोता इत्यर्थः। एवं सर्वत्र। यथाऽहमप्सु रसः, एवं प्रभाऽस्मि शशिसूर्ययोः।** प्रणवः **ओङ्कारः सर्ववेदेषु । तस्मिन् प्रणवभूते मयि सर्वे वेदाः प्रोताः। तथा** खे **आकाशे शब्दः सारभूतः। तस्मिन् मयि खं प्रोतम्। तथा** पौरुषं **पुरुषस्य भावः पौरुषम् , यतः पुम्बुद्धिर्नृषु , तस्मिन् मयि पुरुषाः प्रोताः ॥८॥**

पुण्य इति। पुण्यः **सुरभिर्गन्धः पृथिव्यां चाहम् , तस्मिन् मयि गन्धभूते पृथिवी प्रोता। पुण्यत्वं गन्धस्य स्वभावत एव पृथिव्यां दर्शितम् , अबादिषु रसादेः पुण्यत्वोपलक्षणार्थम्। अपुण्यत्वं तु गन्धादीनाम् अविद्याऽधर्माद्यपेक्षं**

आनन्दगिरिकृतव्याख्या

उच्यत **इति।** सारो **मधुरः, हेतुरिति यावत्। रसोऽहमिति कथम्? तत्राह—** तस्मिन्निति। **अप्सु यो रसः सारस्तस्मिन् मयि मधुररसे कारणभूते प्रोताः आप इतिवदुत्तरत्र सर्वत्र व्याख्यानं कर्तव्यमित्याह—** एवमिति। **उक्तमर्थं दृष्टान्तं कृत्वा 'प्रभाऽस्मी'त्यादि व्याचष्टे—** यथेति। **चन्द्रादित्ययोर्या प्रभा तद्भूते मयि तौ प्रोतावित्यर्थः। तत्र वाक्यार्थं कथयति—** तस्मिन्निति। **प्रणवभूते तस्मिन् वेदानां प्रोतत्ववद् आकाशे यः सारभूतः शब्दस्तद्रूपे परमेश्वरे प्रोतमाकाशमित्याह—**तथेति। **'पौरुषं नृषु' इति भागं पूर्ववद् विभजते—** तथेत्यादिना। **पुरुषत्वमेव विशदयति—** यत इति। **पुंस्त्वसामान्यात्मके परस्मिन्नीश्वरे प्रोतास्तद्विशेषाः, तदुपादानत्वेन तत्स्वभावत्वादित्यर्थः ॥८॥**

**'मयि सर्वमिदं प्रोतम्' इत्यस्यैव [१]परिपूरणार्थं प्रकारान्तरमाह—** पुण्य इति। **पृथिव्यां पुण्यशब्दितो यः सुरभिः गन्धः सोऽहमस्मीत्यत्र वाक्यार्थं कथयति—** तस्मिन्निति। **कथं पृथिव्यां गन्धस्य पुण्यत्वम्? तत्राह—** पुण्यत्वमिति। **यत्तु पृथिव्यां गन्धस्य**

भाष्यार्कप्रकाशः

पटश्चेति शङ्कायां तत्तद्धर्मविशिष्टे मय्येव तत्तत्कार्यं प्रोतमित्याह— **रस इति।** शब्दादिपञ्चतन्मात्रेभ्यः खादिपञ्चभूतोत्पत्तिश्रवणात् स्वकारणेषु शब्दादिषु खादिभूतानि प्रोतानि। तानि च कारणभूतानि शब्दादिवस्तून्यहमेव, मज्जन्यत्वेन तेषां मदात्मकत्वात् , यथा घटः पृथिवीजन्यत्वात् पृथिव्यात्मकः।

हे कौन्तेय! अहमप्सु रसोऽस्मि, खे शब्दोऽस्मि, पृथिव्यां पुण्यो गन्धोऽस्मि, विभावसौ तेजोऽस्मि। अनुक्तमपि वायौ स्पर्शोऽस्मीतीह ज्ञातव्यम्। कोऽसौ रसः? अत आह— **अपां यः सार इति।** सारः स्थिरांशः, कार्यस्य कारणं स्थिरांशः। यथा घटस्य मृत्तिका, कुण्डलस्य कनकम् , तथाऽपां रसः सारः। एवं खादीनामपि शब्दादयः सारा इत्यूह्यम्। **रसभूत इति।** मायया रसाकारेण परिणते इत्यर्थः। **मयि** आत्मनीत्यर्थः। **प्रभा** चन्द्रिका, आतपश्च। चन्द्रिकारूपमातपरूपं च यत्तेजोऽस्ति शशिसूर्ययोस्तदहमेवेत्यर्थः। 'यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्॥' इति वक्ष्यमाणत्वात्। तेजोऽतिरेकेण चन्द्रसूर्यरूपकार्याभावाच्चन्द्रसूर्यस्थिरांशस्तेज एवेत्यर्थः। एवमग्नेरपि। ओङ्कारस्य सर्ववेदादित्वात् स ओङ्कारोऽहमेव। **पुरुषस्य भाव इति।** वीर्यमिति यावत्। निर्वीर्यस्य क्लीबत्वात् पुंस्त्वहेतुर्वीर्यमेव। कारणभूते च वीर्ये कार्यभूताः पुरुषाः देहशब्दवाच्याः प्रोताः वीर्यमयत्वाद् देहानाम्। यद्यप्यत्र पुरुषशब्दः पुरुषदेहपरः, तथापि स्त्र्यादिदेहानामपि वीर्यकार्यत्वाविशेषाद् देहमात्रपरः। मूले तु — **नृषु** मनुष्येषु , पुरुषेष्विति यावत् , स्त्रीनपुंसकयोर्वीर्याभावात् , यत् पौरुषं वीर्यमस्ति स्थिरांशभूतं, तदहमस्मीत्यर्थः ॥८॥

**पुण्य इति।** इदं पुण्यत्वविशेषणं रसादीनामपि देयमित्याह—**उपलक्षणार्थमिति।** पृथिव्यादिषु स्वाभाविकाः गन्धादयः पुण्याः; आगन्तुकास्त्वपुण्या इत्याह— **अपुण्यत्वं त्विति।** अविद्या चाधर्मश्चाविद्याधर्मौ, तदादीनपेक्षत इति तथोक्तम्। भूतविशेषसंसर्गो निमित्तं

१. 'परिमाणार्थं' इति पा.।

# बीजं मां सर्वभूतानां विद्धि पार्थ ! सनातनम्।

**संसारिणां भूतविशेषसंसर्गनिमित्तं भवति।** तेजश्च **दीप्तिश्चास्मि** विभावसौ **अग्नौ। तथा जीवनं सर्वभूतेषु। येन जीवन्ति सर्वाणि भूतानि तद्** जीवनम्। **तपश्चास्मि तपस्विषु। तस्मिंस्तपसि मयि तपस्विनः प्रोताः॥९॥**

बीजमिति। बीजं **प्ररोहकारणं मां विद्धि सर्वभूतानाम् , हे पार्थ !** सनातनं **चिरन्तनम्। किञ्च** बुद्धिः **विवेक-**

आनन्दगिरिकृतव्याख्या

**स्वाभाविकं पुण्यत्वं दर्शितं, तदबादिषु रसादेरपि स्वाभाविकपुण्यत्वस्योपलक्षणार्थमित्याह—** पृथिव्यामिति। **प्रथमोत्पन्नाः पञ्चापि गुणाः पुण्या एव, सिद्धादिभिरेव**[१] **भोग्यत्वादिति भावः। कथं तर्हि गन्धादीनामपुण्यत्वप्रतिभानम्? तत्राह—**अपुण्यत्वं त्विति। **तदेव स्फुटयति—**संसारिणामिति। **गन्धादयः स्वकार्यैर्भूतैः सह परिणममानाः प्राणिनां पापादिवशादपुण्याः सम्पद्यन्त इत्यर्थः। यच्चाग्नेस्तेजः, तद्भूते मयि प्रोतोऽग्निरित्याह—** तेज इति। **जीवनभूते च मयि सर्वाणि भूतानि प्रोतानीत्याह—** तथेति। **जीवनशब्दार्थमाह—** येनेति। **अन्नरसेनामृताख्येनेत्यर्थः। 'तपश्चास्मी'त्यादेस्तात्पर्यार्थमाह—** तस्मिन्निति। **चित्तैकाग्र्यमनाशकादि वा तपः, तदात्मनीश्वरे प्रोताः तपस्विनः। विशेषणाभावे विशिष्टस्य वस्तुनोऽभावादित्यर्थः॥९॥**

**ननु सर्वाणि भूतानि स्वकारणे प्रोतानि, कथं तेषां त्वयि प्रोतत्वम्? तत्राह—**बीजमिति। **बीजान्तरापेक्षयाऽनवस्थां वारयति—**

भाष्यार्कप्रकाशः

हेतुर्यस्य तत् तथोक्तम्। अविद्याधर्मादिप्रयुक्तभूतविशेषसंसर्गजन्या गन्धादयोऽपुण्या इत्यर्थः। यथा [२]पृथिवीजलसंयोगजन्यौ जल-गन्धपृथिवीरसौ, तद्वदिति भावः। अयं च पृथिवीजलसंयोगादिः संसारिणां भोगार्थमविद्याऽधर्मादिवशाद् भवतीत्याह—**अविद्या ऽधर्माद्यपेक्षमिति।** तत्र सर्वस्याविद्यकत्वादविद्यावशाद् भवतीति सिद्धमेव। अधर्मवशात् तु दुःखहेतुर्गन्धः कर्दमादिजन्यः। आदिपदाद् धर्मवशाज्जलचन्दनसंयोगादिजन्यसुगन्धोऽप्यागन्तुक इति बोध्यम्। एवं रसादिष्वपि। जीवन्त्यनेनेति **जीवनम्** अन्नमित्यर्थः, 'अन्नाद्भूतानि जायन्ते। जातान्यन्नेन जीवन्ति, अन्नं प्रयन्त्यभिसंविशन्ति' इति श्रुतेः। भूतानामन्नकार्यत्वात् सर्वमन्ने प्रतिष्ठितमित्यर्थः। अद्यत इत्यन्नं व्रीह्यादिमयं जलं च। एवं कारणे रसादौ कार्यस्य जलादेः प्रोतत्वमुक्त्वा, अथाकारणेऽपि तपसि तपस्विनां प्रोतत्वमाह—**तपश्चेति।**

**ननु** कथमकारणे तपसि तपस्विनां प्रोतत्वमिति चेद्? **उच्यते**— यथा कार्यं कारणाश्रयम् , एवं तपस्विनः तपआश्रया इति तपस्विनां तपसि प्रोतत्वमौपचारिकमिति। एवं 'बुद्धिर्बुद्धिमतामस्मी'त्यादिष्वपि बोध्यम्। **यद्वा** पूर्वत्र रसजलादिष्वपि अयमेवाश्रया-श्रयिभावो बोध्यः। तथा च रसाद्याश्रयत्वाज्जलादीनां रसादिषु प्रोतत्वमिति। न च - गुणिनमाश्रित्य गुणो वर्तत इति गुण्येव गुणस्याश्रय इति गुणिन्येव गुणः प्रोतः, न तु गुणे गुणी प्रोत इति - वाच्यम् , गुणोऽस्यास्तीति गुणीति व्युत्पत्त्या गुणवत्त्वस्य गुणपूर्वकत्वाद् गुण एव गुण्याश्रय इति। गुणिनि गुणस्यैव प्रधानत्वात् प्रधानाश्रयत्वादप्रधानानां प्रधानभूतो गुण एवाप्रधानगुण्याश्रय इति। अत एव 'अपां यः सारः' इति, 'आकाशे शब्दः सारभूतः' इति च भाष्यम्। सारः प्रधान इत्यर्थात्। एवं तपःप्रधानत्वात् तपआश्रयत्वाच्च तपस्विनस्तपसि प्रोताः। तथा बुद्ध्याश्रयत्वाद् बुद्धिप्रधानत्वाच्च बुद्धिमन्तो बुद्धौ प्रोताः। बलाश्रयत्वाद् बलप्रधानत्वाच्च बलवन्तो बले प्रोता इत्याद्यूह्यम्। **यद्वा** कारणाभावे कार्याभाववद् , विशेषणाभावे विशिष्टाभावात् कारणे कार्यमिव, विशेषणे विशिष्टं प्रोतमिति वेद्यम्॥ ९॥

**बीजमिति।** हे पार्थ! मां सर्वभूतानां सनातनं बीजं विद्धि। बीजशब्दार्थमाह— **प्ररोहकारणमिति। प्ररोहः** प्रादुर्भावः, तत्र कारणम्। यथा वृक्षाणां प्रादुर्भावे वटादिबीजजातं कारणम् , तद्वत् सर्वभूतप्रादुर्भावे अहमेव अनादिकारणमित्यर्थः। तथा च

१. तेषां पापाभावादिति भावः। २. वैशेषिकनये तु पृथिव्यां विजातीयतेजःसंयोगरूपपाकजन्यः रसगन्धादिः। जलादौ गन्धप्रतीतिस्तु औपाधिकी। अत्र 'चन्दना-गर्वादेरुदकादिसम्बन्धजक्लेदादिजमौपाधिकं दौर्गन्ध्यम्' इति ईशावास्योपनिषद्भाष्यमनुसंधेयम्।

## बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥१०॥

**शक्तिरन्तःकरणस्य** बुद्धिमतां **विवेकशक्तिमताम् अस्मि।** तेजः **प्रागल्भ्यं तद्वतां तेजस्विनाम् अहम्॥ १०॥**

आनन्दगिरिकृतव्याख्या

सनातनमिति।**चैतन्यस्याभिव्यञ्जकं तत्त्वनिश्चयसामर्थ्यं बुद्धिः, तद्वतां या बुद्धिस्तद्भूते मयि सर्वे बुद्धिमन्तः प्रोता भवन्तीत्याह—**किञ्चेति। **प्रागल्भ्यवतां यत्प्रागल्भ्यं तद्भूते मयि तद्वन्तः प्रोता इत्याह—**तेज इति। **तद्धि प्रागल्भ्यं यत् पराभिभवसामर्थ्यं परैश्चाप्रधृष्यत्वम्॥ १०॥**

भाष्यार्कप्रकाशः

बीजत्वधर्मविशिष्टे मयि सर्वभूतानि प्रोतानीति फलितार्थः, प्रकरणानुरोधात्। न च 'जीवनं सर्वभूतेषु' इति पुनरुक्तिः, ईश्वरस्य जीवनभूतत्वबीजभूतत्वधर्मद्वयवशात् सर्वभूतप्रोतत्वस्य द्वेधोक्तिरित्यदोषात्।

इदं च बीजमव्यक्तं मायैव, वृक्षस्थानीयं स्थूलं जगत् प्रति सूक्ष्मायाः मायाया एव बीजस्थानीयत्वात्। चिन्मात्रेश्वरे 'अस्थूलमनणु' इति श्रुत्या स्थूलत्वस्य सूक्ष्मत्वस्य च निषिद्धत्वात्। तदेवं मायाभूते मयि सर्वभूतानि प्रोतानीति सिद्धम्।

न च 'मयि सर्वमिदं प्रोत'मित्यस्य पुनरुक्तिरिति वाच्यम् , तस्यैव विवरणपरत्वादस्य। **यद्वा** 'सूत्रे मणिगणा इव' इति दृष्टान्तानुरोधान्मयि प्रत्यगात्मनीति तत्रार्थः। अत्र तु प्रकृत्यात्मक इति भेदात्। **अथवा** दीर्घपटतन्तुवदिति दृष्टान्तानुरोधान्मयीत्यस्य जगदाकारपरिणतमायाधिष्ठानब्रह्मचैतन्ये इति तत्रार्थः; अत्र तु मायाभूते मयीत्येवेति भेदात्। 'मयि सर्व'मित्यनेन प्रत्यक्त्वेन ब्रह्मत्वेन वा सर्वजगदधिष्ठानत्वमीश्वरस्योक्तम् ; 'जीवनं सर्वभूतेष्वि'त्यनेन तु अन्नत्वेन रूपेण; 'बीजं मां सर्वभूताना'मित्यनेन तु मायात्वेन रूपेणेति विवेकः।

**ननु** अन्नस्य ईश्वरविवर्तत्वाद् ईश्वराश्रितमायापरिणामत्वाद् वा ईश्वरस्यान्नात्मत्वमस्तु , कथं पुनर्मायात्मत्वम् , मायायाः अकार्यत्वाद् इति चेत्? **उच्यते—** ईश्वरातिरिक्तस्य सर्वस्यापीश्वरे अध्यस्तत्वान्मायाऽपीश्वरेऽध्यस्तैव; अन्यथा मायायाः अनध्यस्तत्वे सत्यत्वापत्तेः। न च - ईश्वरे जगदध्यस्तं मायया, सा तु केनाध्यस्तम्[स्ता]? न केनापि, अन्यस्याभावात् , भावे वा तस्याप्यध्यस्तस्याप्यन्योऽध्यासकर्ता स्यादित्यनवस्थादोष इति न मायायाः अध्यस्तत्वसिद्धिरिति - वाच्यम् , सा स्वयमेवाध्यस्तेति 'माया चाविद्या च स्वयमेव भवति' इति श्रुतेः। न चासम्भवः, श्रुतिप्रामाण्येन सर्वसम्भवात्। युक्त्या च ज्ञाननिवर्त्यमायायाः अध्यस्तत्वसिद्धेः। न ह्यनध्यस्तं सत्यं वस्तु ज्ञानान्निवर्तेत, अनिवर्त्यत्वस्यैव सत्यत्वस्वरूपत्वात्। धर्मिग्राहकमानेनाध्यस्तमायस्यैवेश्वरस्य सिद्धेः, 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतिसूचितेन जगज्जन्मादिलिङ्गकानुमानेन मायिन ईश्वरस्यैव सिद्धत्वात्। एवं मायायाः स्वयमेवाध्यस्तत्वादेवाकार्यत्वमनादित्वं च। ततश्च स्वाध्यस्तान्नात्मत्वमिव स्वाध्यस्तमायात्मत्वमपीश्वरस्य युक्तमेवेति न कश्चिद् दोषः। मायाया अनीश्वरात्मत्वे मायापरिणामस्यान्नस्याप्यनीश्वरात्मत्वप्रसङ्गात्।

**सनातनमिति**। अनादीत्यर्थः। अस्मिन् वेदान्तमते दृग् दृश्यं चेति द्वावेव पदार्थौ; दृक् क्षेत्रज्ञ आत्मा, दृश्यं क्षेत्रम्। तत् त्रिविधम्— अव्याकृतम् ,[१]अमूर्तं, मूर्तं चेति। तत्राव्याकृतमव्यक्तमज्ञानं माया मूलप्रकृतिरीश्वरोपाधिः; सैवामूर्तस्याकाशादेर्मूर्तस्य पृथिव्यादिप्रपञ्चस्य च कारणत्वाद् बीजमित्युच्यते। यस्य कस्याप्यकार्यत्वात् सनातनमिति च। तच्चाव्याकृतमेकविधमेव। मूर्तामूर्ते तु दृश्यपृथिव्यादिप्रपञ्चात्मना बहुविधे कार्ये च। तत्र— मां मयि मत्तः इत्याद्यस्मच्छब्दप्रतिपाद्योऽत्र दृक्पदार्थ आत्मा; सनातनबीजशब्दप्रतिपाद्यं तु अव्यक्तम् ; रसाबादिशब्दप्रतिपाद्यं तु मूर्तामूर्तात्मकं जगदिति विवेकः। एवं यद्यपि बीजशब्दादेवाव्याकृतपदार्थलाभः, तथापि तस्यानादित्वं स्फुटयितुं सनातनमिति विशेषणम्।

**यद्वा** कारणमात्रवाची बीजशब्दः पृथिव्यादिकारणभूतजलादीनि, घटादिकारणभूतपृथिव्यादीनि, पुत्रादिदेहकारणभूतपित्रादिदेहान् , वृक्षादिकारणभूतबीजादीनि चावान्तरकारणजातं ब्रूयादिति तद्व्यावृत्तये सनातनपदम्। न हि पृथिव्यादिष्वनादिकारण-

१. वायुराकाशं चामूर्तम् , पृथिव्यादित्रयं मूर्तम्।

**बलं बलवतां चाहं कामरागविवर्जितम्।**
**धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ !॥ ११॥**

बलमिति। बलं **सामर्थ्यम् ओजो बलवतामहम्। तच्च बलं** कामरागविवर्जितम् **, कामश्च रागश्च कामरागौ,** कामः **तृष्णा असन्निकृष्टेषु विषयेषु ,** रागो **रञ्जना प्राप्तेषु विषयेषु , ताभ्यां कामरागाभ्यां विवर्जितं, देहादिधारणमात्रार्थं बलं सत्त्वमहमस्मि, न तु यत् संसारिणां तृष्णारागकारणम्। किञ्च** धर्माविरुद्धो **धर्मेण शास्त्रार्थेनाविरुद्धो यः प्राणिषु** भूतेषु **कामः, यथा देहधारणमात्राद्यर्थोऽशनपानादिविषयः, स[1] कामोऽस्मि, हे भरतर्षभ !॥ ११॥**

आनन्दगिरिकृतव्याख्या

**यच्च बलवतां बलं तद्भूते मयि तेषां प्रोतत्वमित्याह—** बलमिति। **कामक्रोधादिपूर्वकस्यापि बलस्यानुमतिं वारयति—** तच्चेति। **कामरागयोरेकार्थत्वमाशङ्क्यार्थभेदमावेदयति—** कामस्तृष्णेत्यादिना। **विशेषणसामर्थ्यसिद्धं व्यावर्त्यं दर्शयति—** न त्विति। **शास्त्रार्थाविरुद्धकामभूते मयि तथाविधकामवतां भूतानां प्रोतत्वं विवक्षित्वाऽऽह—** किञ्चेति। **धर्माविरुद्धं काममुदाहरति—** यथेति॥ ११॥

भाष्यार्कप्रकाशः

त्वमस्ति। न चेश्वरे अनादिकारणत्वसत्त्वात् तत्रातिव्याप्तिरिति वाच्यम् , ईश्वरस्य निर्विशेषचिन्मात्रस्य वस्तुतः कारणत्वाभावात् , वस्तुतोऽनादिकारणत्वस्यैवात्र विवक्षितत्वात् , ईश्वरस्य च मायाद्वारैव जगत्कारणत्वादिति।

सनातनं मां सर्वभूतानां बीजं विद्धीति वाऽन्वयः। सर्वभूतपदेन मूर्तामूर्तप्रपञ्चग्रहणात् तत्कारणस्याव्याकृतस्यैव बीजपदेन ग्रहणमिति।

**अत्र** बीजमुपादानत्वम्[2], सर्वेषां परिणामिद्रव्याणां स्वकार्यपरिणामसामर्थ्यमिति। यद्वा तत्तदवान्तरोपादानद्रव्यमिति **वेदान्तदेशिकः; तदसत्** ; धर्मिवाचिनो बीजशब्दस्योपादानत्वरूपधर्मवाचित्वासम्भवात् , सति मुख्यार्थसम्भवे लक्षणाया अनाश्रयणीयत्वात्। अवान्तरोपादानमित्यपि न युक्तम् , सर्वशब्दस्वारस्यभङ्गापत्तेः।

बुद्धिशब्दो नात्रान्तःकरणपरः, सर्वेषामपि बुद्धिमत्त्वेन बुद्धिमतामिति विशिष्य वक्तुमयुक्तत्वात् ; किन्तु विवेकशक्तिपर इत्याह —**बुद्धिर्विवेकशक्तिरिति।** सदसद्वस्तुविवेचनसामर्थ्यमित्यर्थः। कस्येयं शक्तिः? अत आह—**अन्तःकरणस्येति।** बुद्धिमतामाश्रयभूता प्रधानभूता च बुद्धिरहमस्मीत्यर्थः॥ १०॥

**बलमिति। ओज इति।** शरीरपाटवमित्यर्थः, इन्द्रियपाटवं वा, तदुभयं वा। **असन्निकृष्टाः** दूरस्थाः। **रञ्जना** आसक्तिः; सति बले स्त्र्यादिविषयेषु कामरागौ भवत इति तृष्णारागयोर्बलं कारणमित्युक्तम्। परमकारणं तु तयोरज्ञानमेव।

**ननु** बलवतां बलमस्मि, भूतेषु कामोऽस्मि इत्येवालम् ; किमिति कामरागविवर्जितत्वग्रहणमिति चेत्? **उच्यते**— यथा संसार्यविद्याऽधर्माद्यपेक्षभूतविशेषसंसर्गनिमित्तापुण्यगन्धादिव्यावृत्तये गन्धादीनां पुण्यत्वविशेषणं कृतम् , तथैव संसार्यविद्याऽधर्माद्यपेक्षदुष्टबलकामव्यावृत्तये कामरागविवर्जितत्वधर्माविरुद्धत्वविशेषणकरणमिति।

यद्यपि दुष्टा अदुष्टाश्च सर्वेऽपि भगवदात्मका एव, तथापि ग्राह्यत्वाय इहादुष्टानामेव भगवदात्मत्वमुक्तम्। अत एवोत्तरश्लोके सर्वस्यापि भगवदात्मत्वमुच्यते। एवमेवोत्तरत्रापि 'वृक्षाणामहमश्वत्थः' इत्यादिना तावदुत्कृष्टवस्तूनां स्वात्मत्वमुक्त्वा पश्चात् 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदि'ति सर्वस्यापि स्वात्मत्वं वक्ष्यति। एतेन च उदकादिषु वर्तमाना रसादयो भगवद्रूपेणोपास्याः इति, तपोबुद्धितेजोबलकामाश्चाविरुद्धाः आत्मनि सम्पादयितव्याः[3] इति च योगिन उपदेशः सूचितः॥ ११॥

१. 'स' इति क्वचिन्न। २. पूर्वं 'रसोऽहमप्सु' इत्यादिना प्राधान्येन धर्मनिर्देशात् प्रकरणाद् धर्मपरत्वं बीजशब्दस्येति तदाशयः। पूर्वत्र अप्सु इत्यादिसप्तमीनिर्देशात् तथात्वेऽपि 'बीजं मां सर्वभूतानां विद्धि' इत्यत्र तथा निर्देशाभावात् न धर्मपरत्वमिति समाधानमभिप्रेत्य दूषयति—**धर्मीति**। ३. विरुद्धास्ते वर्जनीयाः इति तात्पर्यम्। योगिन इति। ध्यानयोगिनः कर्मयोगिनश्चेत्यर्थः।

**ये चैव सात्त्विका भावा राजसास्तामसाश्च ये।**
**मत्त एवेति तान् विद्धि न त्वहं तेषु ते मयि॥ १२॥**

**किञ्च—** ये चैवेति। **ये चैव** सात्त्विकाः **सत्त्वनिर्वृत्ता** भावाः **पदार्थाः,** राजसाः **रजोनिर्वृत्ताः,** तामसाः **तमोनिर्वृत्ताश्च ये केचित् प्राणिनां स्वकर्मवशाज्जायन्ते भावाः, तान् मत्त एव जायमानानित्येवं विद्धि सर्वान् समस्तानेव। यद्यपि ते मत्तो जायन्ते, तथापि न त्वहं** तेषु **तदधीनस्तद्वशः, यथा संसारिणः। ते पुनः** मयि **मद्वशा मदधीनाः॥ १२॥**

आनन्दगिरिकृतव्याख्या

**चिदानन्दयोरभिव्यञ्जकानां भावानामीश्वरात्मत्वाभिधानादन्येषामतदात्मत्वप्राप्तावुक्तम्—**किञ्चेति। **प्राणिनां त्रैविध्ये हेतुं दर्शयन् वाक्यार्थमाह—** ये केचिदिति। **तर्हि पितुरिव पुत्राधीनत्वं, त्वत्तो जायमानात् [जायमान]तदधीनत्वं तवापि स्यादिति विक्रियावत्त्वदूष्यत्वप्रसक्तिरित्याशङ्क्याह—** यद्यपीति। **मम परमार्थत्वात् , तेषां कल्पितत्वान्न तद्गुणदोषौ मयि स्यातामित्यर्थः। तेषामपि तद्वदेव** [1]**स्वतन्त्रतासम्भवात् किमिति कल्पितत्वमित्याशङ्क्याह—** ते पुनरिति। **त्रिविधानां भावानां न स्वातन्त्र्यम् , ईश्वरकार्यत्वेन तदधीनत्वात्।**

भाष्यार्कप्रकाशः

**ये चेति।** सत्त्वादागताः सात्त्विकाः सत्त्वगुणाज्जाता इत्यर्थः। निर्वृत्ता निष्पन्ना जाता इति यावत्। रजस इमे राजसाः; तमस इमे तामसाः। **यद्वा** रजसा निर्वृत्ता राजसाः, तमसा निर्वृत्तास्तामसाः।'तेन निर्वृत्तम्' इत्यण्। के ते भावाः? अत आह— **ये केचित् प्राणिन इति।** कुतस्तेषां सात्त्विकत्वादिकम्? अत आह— **स्वकर्मवशादिति।** स्वादृष्टप्रयुक्तसत्त्वादिगुणनिर्वृत्ता इत्यर्थः। एतेन पदार्थानां सात्त्विकत्वादिकं स्वकर्मप्रयुक्तमेव, न तु मत्प्रयुक्तमितीश्वरस्य वैषम्यादिदोषः परिहृतः। **मत्त एवेति** । ईश्वरात् सकाशादेवेत्यर्थः।

**ननु** सत्त्वादिभ्यो जातानां भावानां कथमीश्वरजातत्वावधारणमिति चेत्? **उच्यते—** सत्त्वाद्याकारपरिणतमायावच्छिन्नत्वादीश्वरस्येति, ईश्वराधिष्ठितमायागुणभूतसत्त्वादिकार्यत्वाद् भावानामीश्वरकार्यत्वमिति वा। परमकारणजन्यस्य वस्तुनोऽवान्तरकारणजन्यत्वव्यभिचारेऽपि अवान्तरकारणजन्यस्य वस्तुनः परमकारणजन्यत्वं नैव व्यभिचरति, यथा घटशकलानां मृत्तिकामयत्वम् , न तु शकलमयत्वं घटस्य, तद्वदिति भावः।

मत्त एवेत्यवधारणेन च ये सत्त्वादयस्त्रयो गुणाः ते वस्तुतोऽहमेव; यथा रजतं वस्तुतः शुक्तिकैवेति गम्यते। मत्त इति पञ्चमी जनिकर्तुः प्रकृतिरपादानं स्याद् , अपादाने पञ्चमी स्यादिति व्याकरणात् प्रकृतिरूपापादाने विहितेति कृत्वा तदनुगुणं पदमिह योजयति— **जायमानानिति।** अन्यथा पञ्चम्यनुपपत्तेरिति भावः। **समस्तानिति।** भावानित्यर्थः। तत्र सात्त्विका भावा देवादयः, राजसा मनुष्यादयः, तामसास्तिर्यगादय इति विवेकः।

**ननु** प्राणिनामीश्वरजातत्ववचनादप्राणिनामन्यजातत्वं प्रतिभातीति चेत् , **मैवम्** ; अनुपलब्धकर्तृकक्षित्यादिकार्यलिङ्गकानुमानेनेश्वरस्य तर्कादिमते सिद्धत्वात्। तार्किकादयः अप्राणिक्षित्यादिभवकर्तारमीश्वरं मन्यन्त एवेति नाप्राणिनामीश्वराज्जातत्वमिह वक्तव्यम् , अन्यतःसिद्धत्वात्। किं तर्हि? देवदत्ताद् यज्ञदत्तो, यज्ञदत्ताद् विष्णुमित्रः इत्येवं प्राणिनामेव जन्म प्राणिनः सकाशाद् भवतीति लोकसिद्धतया तन्निरासकं शास्त्रसिद्धं प्राणिनामीश्वरात् सकाशाज्जन्मेहोच्यत इति।

न च कथं वाङ्मात्रेण लोकसिद्धार्थपरित्याग इति वाच्यम् , भ्रमप्रमादादिदूषितलोकदृष्ट्यपेक्षया शास्त्रस्यैव बलवत्तरत्वात् , शास्त्राविरोधिलोकदृष्टेरेव प्रमाणत्वात्। अन्यथा सूर्योदयास्तमयचन्द्रक्षयग्रहणकलङ्कगगननैल्यप्रमुखानामपि लोकदृष्टिसिद्धानां सत्यत्वं स्यात् , शास्त्रं तु 'यतो वा इमानि भूतानि जायन्ते' इति प्राणिनामीश्वरादेव जन्मादिकं ब्रूते। नित्यस्यैकस्याविक्रियस्येश्वरस्यात्मनो नास्ति जन्मादि; देवदत्तादिदेहाकारपरिणतमायायाः सकाशाद् विष्णुदत्तादिदेहानां जन्म। न च मायापरिणामाद् देहात् कुतः पुनः परिणामोदय इति वाच्यम् , अन्नपरिणामस्यापि रक्तस्य क्षीराकारपरिणामदर्शनात् , मृत्परिणामाद् घटात् कपालपरिणामोदयदर्शनाद् ,

१. स्वतन्त्रत्वं परमार्थत्वम्। कल्पितत्वं मिथ्यात्वम्।

## त्रिभिर्गुणमयैर्भावैः एभिः सर्वमिदं जगत्।

**एवम्भूतमपि परमेश्वरं नित्यशुद्धबुद्धमुक्तस्वभावं सर्वभूतात्मानं निर्गुणं [१]संसारदोषबीजप्रदाहकारणं मां नाभिजानाति जगत् इत्यनुक्रोशं दर्शयति भगवान्। तच्च किन्निमित्तं जगतोऽज्ञानमित्युच्यते—** त्रिभिरिति। **त्रिभिः**

आनन्दगिरिकृतव्याख्या

**तथा च कल्पितस्याधिष्ठानसत्ताप्रतीतिभ्यामेव तद्वत्त्वात् तन्मात्रत्वसिद्धिरित्यर्थः॥१२॥**

**सतीश्वरस्य स्वातन्त्र्ये नित्यशुद्धत्वादौ च कुतो जगतस्तदात्मकस्य संसारित्वमित्याशङ्क्य तदज्ञानादित्याह—** एवम्भूतमपीति। **यद्यप्रपञ्चोऽविक्रियश्च त्वं कस्मात् त्वामात्मभूतं स्वयम्प्रकाशं सर्वो जनस्तथा न जानातीति मत्वा शङ्कते—** तच्चेति। **श्लोकेनोत्तरमाह—**

भाष्यार्कप्रकाशः

बीजपरिणामाद् वृक्षात् पुष्पादिपरिणामोदयदर्शनात् , मेघपरिणामाज्जलाद् बुद्बुदादिपरिणामोदयदर्शनात्। इहापि देहभुक्तान्नस्य रक्तात्मना रक्तस्य वीर्यात्मना वीर्यस्य च पिण्डात्मना परिणाम इति न कश्चिद् दोषः।

ननु 'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि' इति पूर्वमुक्त्वा कथमधुना 'न त्वहं तेषु ते मयि' इति विरुद्धमुच्यत इत्यत आह— **तदधीन इति।** अधीनपदस्यात्र शेषः। तस्य चावृत्तिः, वचनविपरिणामश्च। अहं तेष्वधीनो न। ते तु मय्यधीना इति। **यथेति।** यथा भावा मदधीनास्तथाऽहं न तदधीन इत्यर्थः।

के ते भावाः? अत आह— **संसारिण इति।** संसरन्तीति संसारिणः; आत्मानात्मतादात्म्याध्यासवन्त इति भावः। न त्वात्मा, तस्य मम चैकत्वादित्येतदर्थं संसारिपदनिवेशः, आत्मनोऽसंसारित्वात्। न च कथमात्मान्यस्य जडस्य संसारित्वमिति वाच्यम् , आत्माभाससत्त्वाद् बुद्धौ। साभासबुद्धिर्हि जीवः संसारी। **आभासः** प्रतिबिम्बः, अन्यत्रान्यधर्मप्रतिफलनम्। तच्चाज्ञानाद् भवति।

ननु पितुर्जातः पुत्रो यथा पितुर्वशे, पिता च पुत्रस्य वशेऽस्ति, तद्वत् त्वयाऽपि भूतवशे, भूतैश्च त्वद्वशे स्थातव्यमेवेति कुतस्तव भूतावशत्वम्? अत आह— **यद्यपीति।** मत्तो जाता अपि त एव यद्वशे[मद्वशे] सन्ति, न त्वहं तद्वशे इत्यर्थः। स्वस्य सर्वेश्वरत्वात् प्राणिनां परतन्त्रत्वाच्चेति भावः। एवमपरतन्त्रत्वादेवेश्वरस्येश्वरत्वम्। लोके सर्वस्याप्यचेतनस्य चेतनवशत्वदर्शनादात्मनश्चेतनस्य वशे सर्वमचेतनं प्राणिजातं वर्तत इति बोध्यम्। न च बुद्धिश्चेतनैवेति वाच्यम् , आत्मधर्मप्रतिफलनप्रयुक्तत्वाद् बुद्धिगतचेतनत्वस्य। स्वतोऽचेतनैव बुद्धिः, मायापरिणामत्वान्मायायाश्च जडत्वादिति बोध्यम्। एतेन प्राणिशब्दवाच्याः संसारिणः कार्यकारणसङ्घातात्मकाः नात्मा, किन्तु तद्विलक्षणस्तदुपादानमीश्वर एवात्मेति सिद्धम् ॥१२॥

त्रिभिरिति श्लोकमवतारयति— **एवमिति।** एवं पूर्वोक्तरूपेण भूतं स्थितम् **एवम्भूतं** पूर्वोक्तविधमित्यर्थः। परमश्चासावीश्वरश्च परमेश्वरस्तं ब्रह्मविष्णुरुद्रेन्द्रादीश्वराणामीश्वरमित्यर्थः। निरुपाधिकेश्वरमिति वा। **नित्यो** विनाशरहितः; **शुद्धो** निरवद्यः; **बुद्धः** सर्वज्ञः; **मुक्तः** संसाररहितः; **स्वः** स्वासाधारणः **भावो** धर्मो यस्य तं तथोक्तम् ; नित्यं शुद्धं बुद्धं मुक्तं चेत्यर्थः। नित्यत्वादिधर्मवन्तमित्यक्षरार्थः। निर्धर्मकेऽप्यात्मनि नित्यत्वादयो धर्माः कल्पिता व्यवहारार्थमिति बोध्यम्। तच्च कल्पनमनित्याशुद्धजडबद्धजगद्वैलक्षण्यार्थम्। **यद्वा** नित्यादिपदान्यनित्यवैलक्षण्याद्यर्थबोधकानि लक्षणया। तथा चानित्यत्वादिधर्मानात्मनि निरस्यन्ति नित्यादिपदानि; न तु नित्यत्वादिधर्मान् कल्पयन्तीति न कश्चिद् दोषः।

कोऽसौ परमेश्वरः? अत आह— **सर्वभूतात्मानमिति।** पूर्वोक्तानां सर्वेषां भूतानामात्मभूतमित्यर्थः। नास्मिन् सत्त्वादिगुणाः सन्तीत्याह— **निर्गुणमिति।** गुणकार्याभावादिति भावः। न च मायाया गुणवत्त्वादात्मनश्च मायित्वाद् गुणवत्त्वमात्मन इति वाच्यम् , वस्तुतो निर्मायत्वादात्मनः, मायाया एव मिथ्यात्वेन तद्गुणानामपि मिथ्यात्वान्मिथ्यागुणैरात्मनि सगुणत्वस्यासम्भवाद् मिथ्यामरीचिकोदकेन भूमेः पङ्किलत्ववदिति वा सिद्धान्तात्। **मां जगत्** प्राणिनः इत्यर्थः, नाभिजानाति। किमर्थं ज्ञानम्? अत आह—

१. 'संसारबीजदोषप्रदाहाये'ति रा.पा. भाति।

**मोहितं नाभिजानाति मामेभ्यः परमव्ययम्॥ १३॥**
**दैवी ह्येषा गुणमयी मम माया दुरत्यया।**
**मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥ १४॥**

गुणमयैः **गुणविकारैः रागद्वेषमोहादिप्रकारैः** भावैः **पदार्थैः एभिर्यथोक्तैः सर्वमिदं प्राणिजातं** जगद् मोहितम् **अविवेकितामापादितं सत् नाभिजानाति माम्** एभ्यो **यथोक्तेभ्यो गुणेभ्यः** परं **व्यतिरिक्तं विलक्षणं च,** अव्ययं **व्ययरहितम्, जन्मादिसर्वभावविकारवर्जितमित्यर्थः॥ १३॥**

**कथं पुनर्दैवीमेतां त्रिगुणात्मिकां वैष्णवीं मायाम्** [1]**अतिक्रामन्तीत्युच्यते—** दैवीति। दैवी **देवस्य ममेश्वरस्य विष्णोः** [2]**स्वभूता** हि **यस्माद्** एषा **यथोक्ता गुणमयी मम माया,** दुरत्यया **दुःखेनात्ययोऽतिक्रमणं यस्याः सा दुरत्यया।**

आनन्दगिरिकृतव्याख्या

उच्यत इति। एभ्यः **परमित्यप्रपञ्चत्वमुच्यते।** अव्ययमिति **सर्वविक्रियाराहित्यम्॥ १३॥**

**यथोक्तानादिसिद्धमायापारवश्यपरिवर्जनायोगाज्जगतो न कदाचिदपि तत्त्वबोधसमुदयसम्भावनेत्याशङ्कते—** कथं पुनरिति। **भगवदेकशरणतया तत्त्वज्ञानद्वारेण मायातिक्रमः सम्भवतीति परिहरति—** उच्यत इति। **कथं दुरत्ययत्वेन तदत्ययः स्यादिति, तत्राह—** मामेवेति। **प्रधानस्येव स्वातन्त्र्यं मायायाः व्युदस्यति**[3]**—** देवस्येति। [4]**अस्वातन्त्र्ये मायात्वानुपपत्तिं** हि**शब्दद्योतितां हेतूकरोति—** यस्मादिति। **अनुभवसिद्धा सा नाकस्मादपलापमर्हतीत्याह—** एषेति। **जगतस्तत्त्वप्रतिपत्तिप्रतिबन्धभूता गुणाः सत्त्वादयः। ममेति**

भाष्यार्कप्रकाशः

**संसारबीजदोषप्रदाहायेति।** संसारबीजभूता दोषाः अविद्यातत्कार्यरागद्वेषादयश्च, तेषां प्रकर्षेण **दाहाय** दहनार्थं, तूलानग्निनेव[5] इति भावः। **अनुक्रोशं** दयाम्। कुतस्त्वां जगन्न जानातीत्याक्षिपति— **तच्चेति।** तस्य चाक्षेपस्य परिहारोऽनेन श्लोकेनोच्यत इत्याह— **उच्यते त्रिभिरितीति।**

इदं सर्वं जगत् एभिर्गुणमयैस्त्रिभिर्भावैःमोहितं सत् एभ्यः परमव्ययं मां नाभिजानाति। **त्रिभिर्गुणमयैरिति।** त्रिगुणमयैरित्यर्थः। सत्त्वादिगुणत्रयपरिणामभूतैरिति यावत्। रागद्वेषमोहादिप्रकारैः तदादिरूपैरित्यर्थः। रागः सात्त्विको राजसश्च, द्वेषो राजसः, मोहस्तु तामस इति विवेकः। आदिपदात्सुखदुःखादिग्रहणम्। अचेतनस्य मृदादेर्मोहासम्भवादाह— **प्राणिजातमिति।** देवमनुष्यादि चेतनवर्गः इत्यर्थः। अविवेकतां विवेकराहित्यं, विवेक आत्मानात्मविवेकः, स न विद्यते येषां ते अविवेकाः, तेषां भावं, आपादितं प्रापितं, व्यतिरिक्तमन्यं, **गुणविलक्षणं चेति।** गुणगतलक्षणभिन्नलक्षणवन्तमित्यर्थः। चकारात् स्वरूपतः स्वभावतश्च गुणेभ्योऽत्यन्तभिन्नमित्यर्थः। तत्र स्वरूपतो भेदाय परमिति, स्वभावतो भेदाय गुणविलक्षणमिति च पदद्वयनिर्देशः।न व्येति विकारमापद्यत इत्यव्ययः। व्ययो विकारः, न तु परिक्षयमात्रम्। प्राणिनां रागद्वेषमोहादिभिरन्तःकरणस्यात्मानात्मविवेचनसामर्थ्ये नष्टे सति देहादिविलक्षणात्मज्ञानं न सम्भवतीति परमार्थः॥ १३॥

**दैवीति।** सत्त्वादिगुणमयरागद्वेषादिमोहितमपि जगन्मायामोहितमेव मायागुणत्वात् सत्त्वादीनामित्यभिप्रेत्याह भाष्यकारः— **कथं पुनरिति।** देवस्येयं दैवी ताम्; कोऽसौ देवः? अत आह— **वैष्णवीमिति।** केयं विष्णुदेवसम्बन्धिनीत्यत आह— **मायामिति।** काऽसौ मायेत्यत आह— **त्रिगुणात्मिकामिति।** सत्त्वादिगुणत्रयस्वरूपाम्। कुत्रोक्तेयमत आह— **एतामिति।** पूर्वश्लोकोक्तामित्यर्थः। **अतिक्रामतीति** जगदिति कर्तृशेषः। इति शङ्कायामुच्यते— **दैवीति।** दीव्यति स्वयं प्रकाशत इति देवः, ईष्टे शक्नोतीतीश्वरः, वेवेष्टि व्याप्नोतीति विष्णुः। कोऽसौ देवः ईश्वरो विष्णुश्चेत्यत आह— **ममेति।** आत्मन इत्यर्थः। स्वभावः जगन्मोहकत्वजगज्जन्मादि-

१. 'अतिक्रामति' इति रा.पा.। २. 'स्वभावभूता' इति पा.। ३. देवस्य स्वामित्वोक्त्या मायायाः तदधीनत्वलाभादिति भावः। ४. 'स्वातन्त्र्ये' इति पा.। मायेति अभूतस्य कल्पितस्याख्या। कल्पितस्याधिष्ठानसत्ताभानाभ्यामेव तद्वत्त्वात् स्वातन्त्र्ये मायात्वमेवानुपपन्नमिति भावः। ५. दग्धुमिति शेषः।

**तत्रैवं सति सर्वधर्मान् परित्यज्य** मामेव **मायाविनं स्वात्मभूतं सर्वात्मना ये प्रपद्यन्ते, ते मायाम्** एतां **सर्वभूतमोहिनीं** तरन्ति **अतिक्रामन्ति, [१]संसारबन्धनान्मुच्यन्त इत्यर्थः॥ १४॥**

आनन्दगिरिकृतव्याख्या

**प्रागुक्तमेव मायायाः सम्बन्धमनूद्य विधित्सितं दुरत्ययत्वं विभजते—** दुःखेनेति। **'मामेवे'त्यादि व्याचष्टे—** तत्रेति। **तस्मिन् मायारूपे यथोक्तरीत्या दुरत्यये सतीति यावत्।** मामेवेति **एवकारेण मायाया वेद्यकोटिनिवेशाभावो विवक्ष्यते।** सर्वात्मना **कर्मानुष्ठानादिव्यग्रता-मन्तरेणेत्यर्थः। मायातिक्रमे मोहातिक्रमो भवतीति मत्वा विशिनष्टि—** सर्वेति। **मायातत्प्रयुक्तमोहयोरतिक्रमेऽपि कथं पुरुषार्थसिद्धि-रित्याशङ्क्याह—** संसारेति॥ १४॥

भाष्यार्कप्रकाशः

हेतुत्वादिः। गुणाः सत्त्वादयः [२]प्रकृतमुच्यन्ते यस्यां सा गुणमयी, त्रिगुणात्मिकेत्यर्थः। सत्त्वादिगुणत्रयस्वरूपेति यावत्। दुःखेनात्येतुं शक्या दुरत्यया, अत्येतुमशक्येत्यर्थः। [३]तत्रेत्यध्याहारः। तदर्थमाह— **एवं सतीति।** मायाया दुरत्ययत्वे सतीत्यर्थः। 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज' इति वक्ष्यमाणत्वादाह— **सर्वधर्मान् परित्यज्येति। मामेवेति।** यस्य मायया मोहिताः तं मायावन्तं मामेवेत्यर्थः। कस्त्वमत आह— **स्वात्मभूतमिति।** स्वेषां भजमानानाम् आत्मभूतम् आत्मानमित्यर्थः। **सर्वात्मना** सर्वभावेन **प्रपद्यन्ते** भजन्ते, साक्षात्कुर्वन्तीति यावत्।

आरोपितसर्वाधिष्ठानभूतरज्जुस्वरूपज्ञानाद् रज्जुसर्पभ्रमो यथा निवर्तते, तथा आरोपितदेहादिप्रपञ्चाधिष्ठानभूतात्मतत्त्वज्ञानाद् माया सकार्या निवर्तत इति परमार्थः। आत्मानात्मविवेकपूर्वकमात्मसाक्षात्कारे सति कुतः पुनरात्मानात्मनोरविवेकस्यावकाशः? अविवेकस्य चाभावे तदनुमेयमायायाः कथं सत्त्वम्? न कथमपीत्यर्थः।

यद्यप्यात्मसाक्षात्कारमात्रेण देहपातं विना मायाकार्यप्रपञ्चनाशाभावेन मायायाः सत्त्वमनुमीयते, तथापि कृतात्मसाक्षा-त्कारस्य माया दग्धपटवन्निःसारा न बन्धहेतुरिति बोध्यम्। अत एव— 'संसारबन्धनान्मुच्यन्ते' इति भाषितमाचार्यैः। **यद्वा** मायाया आवरणशक्तिर्विक्षेपशक्तिरिति शक्तिद्वयमस्ति। तत्रावरणशक्त्या जीवानामात्मस्वरूपावरणं, तत्पूर्वकः संसारश्च भवति, विक्षेपशक्त्या सर्वप्रपञ्चोदयः; तत्रात्मसाक्षात्कारेणावरणशक्तिर्नश्यति; न तु विक्षेपशक्तिः, आत्मज्ञानविक्षेपशक्त्योरविरोधात्। घटसाक्षात्काराद्धि तद्विरोधिघटावरणमज्ञानमेव नश्यति। इमामेवावरणशक्तिमविद्येति व्यवहरन्ति **केचित्।** तदेवमात्मसाक्षात्कारेणाविद्याया नाशेऽपि मायायाः अनाशात् प्रपञ्चप्रतीतावपि न संसारः।

तथा चाविद्याजनितात्मानात्माविवेकमूलकः संसारः विद्ययाऽऽत्मसाक्षात्काररूपया समूलो निवर्तते। यथा अन्धकारस्थ-स्थाणुपुरुषाविवेकमूलकः स्थाणुपुरुषसंशयः प्रदीपप्रभयाऽन्धकारे नष्टे सति समूलो निवर्तते, तद्वदिति श्लोकस्य परमार्थः।

**एतेन** - देहादिप्रपञ्चो न पुरुषस्य बन्धहेतुः, येन देहादिनाशं विना पुरुषस्य संसारनिवृत्तिर्न स्यादित्यापत्तिर्दीयेत, किन्तु देहाद्यनात्मतादात्म्याध्यास एव। स त्वात्मज्ञानेनैव निवर्तते। अतो मुमुक्षुणाऽऽत्मज्ञानमेव सम्पाद्यं गुरुशुश्रूषावेदान्तश्रवणादिनेति - **सिद्धम्। अनेन** चात्मज्ञानेनात्मन्यारोपितोऽनात्मतादात्म्याध्यासो निवर्तते; अनात्मानस्तु देहादयः प्रारब्धावसाने निवर्तन्ते; तदेवम् आत्मज्ञानाज्जीवन्मुक्तिः, देहतत्त्वात्म[देहपातात्त्वात्म]ज्ञानपूर्वकाद् विदेहमुक्तिरिति **सिद्धम्।**

**वस्तुतस्तु** आत्मनि कालत्रयेऽपि देहादिप्रपञ्चाभावाद् य आत्मानं साक्षात्करोति न तद्दृष्ट्या कोऽप्याविद्यको मायिको वा (ऽ) ज्ञानप्रपञ्चोऽर्थप्रपञ्चश्चेत्यात्मज्ञानात् सकार्याया मायाया निवृत्तिरिति बोध्यम्।

अहङ्कारममकारादिरूपो(ऽ)ज्ञानप्रपञ्चो यस्यैव जीवसृष्टं द्वैतमिति व्यवहाराश्रयत्वम् , अर्थप्रपञ्चस्तु भूम्यादिरूपो यस्येश्वरसृष्ट-द्वैतमिति व्यवहाराश्रयत्वम्। तत्र जीव[सृष्ट]प्रपञ्च एव पुंसां बन्धकः; न त्वीश्वरसृष्टप्रपञ्च इति।

अत्राह **रामानुजीयः**— 'त्वदन्यः शरणं नास्ति त्वमेव शरणं मम। तस्मात् कारुण्यभावेन रक्ष रक्ष जनार्दन॥' इत्येवं

१. 'ते संसारबन्धनान्मुच्यन्ते' इति पा.। २. 'तत्प्रकृतवचने मयट्' इति सूत्रात् मयडिति भावः। ३. तत्र इति पदं भाष्यकारैरध्याहृत्य व्याख्यातमिति भावः।

## न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः।
## माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः॥ १५॥

**यदि त्वां प्रपन्ना मायामेतां तरन्ति, कस्मात् त्वामेव सर्वे न प्रपद्यन्ते? इत्युच्यते—** न मामिति। **न मां**

आनन्दगिरिकृतव्याख्या

**भगवन्निष्ठायाः मायातिक्रमहेतुत्वे तदेकनिष्ठत्वमेव सर्वेषामुचितमिति पृच्छति—** यदीति। **पापकारित्वेनाविवेकभूयस्तया हिंसा-**

भाष्यार्कप्रकाशः

निश्चयरूपं प्रपत्तिमतम् इहोपदिश्यते भगवता। तत्र— [1]**मा**मिति विष्णुः प्रपत्तव्य इति, **एवे**ति न देवतान्तरं प्रपत्तव्यमिति, **प्रपद्यन्त** इति भक्तिज्ञानादिभ्यः प्रपत्तिरेव गरीयसी कर्तव्येति, बहुवचनेन जीवभेदः, मां प्रपद्यन्त इति प्रपत्तिक्रियाकर्तृकर्मणोर्जीवेश्वरयोर्भेदः, 'मायामेतां तरन्ति ते' इति प्रपन्नानामेव मोक्षलाभो मायानिवृत्तिपूर्वक इति च सिद्धम्। तदेवं स्वरसतः सिद्धमर्थं विहाय **शाङ्करी** कुकल्पना अनादरणीयेति।

**अत्रोच्यते**—नेदं प्रपत्तिप्रकरणम् , 'ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः' इति प्रक्रम्य 'ते ब्रह्म तद्विदुः कृत्स्नम्' इत्युपसंहरिष्यमाणत्वात्। 'प्रियो हि ज्ञानिनोऽत्यर्थ'मिति, 'ज्ञानवान् मां प्रपद्यते' इति च ज्ञानस्यैव मध्ये कीर्तितत्वादसकृत्। न च ज्ञानिन एव प्रपत्तिरुपदिश्यत इति वाच्यम् , ज्ञानिनः स्वात्मन एवेश्वरत्वेन स्वात्मातिरिक्तप्रपत्तव्येश्वराभावात्। उक्तं हि— 'सर्वभूतस्थमात्मानम्' इत्यादिना ईश्वरस्यात्मत्वम्। 'ज्ञानी त्वात्मैव मे मतम्' इति भगवता चेहैवोक्तम्। ईश्वरस्य चान्तर्यामित्वाद् आत्मव्यतिरिक्तस्यान्तर्यामिणश्चादर्शनात् , आत्मेश्वरयोर्भेदे ईश्वरस्यासर्वात्मत्वप्रसङ्गात् , प्रपद्यन्त इति बहुवचनस्य उपाधिभेद-बोधकत्वात् , सोपाधिकस्यात्मनः प्रपत्तृत्वान्निरुपाधिकस्य तस्यैव प्रपत्तव्यत्वात् , मामित्यस्मच्छब्दस्य स्वभावादेवात्मपरत्वाद् आत्मनोऽन्यस्य दैवतस्यैवाभावात् , सर्वदेवशरीरोपहितात्मन एकत्वात् , विष्णोश्चात्मत्वाच्छरीरस्य चानात्मत्वेनाविष्णुत्वात् , मामित्यनेना[ना]त्मपरिग्रहे तु वसुदेवात्मजकृष्णशरीरस्यैव वक्तुः परिग्राह्यत्वात् , तस्य च नष्टस्य प्रपत्तेरधुनातनानां पूर्वकालिकानां च कर्तुमशक्यत्वादसम्भावितत्वाच्च, अनात्मोपासनया मायातरणासम्भवाच्च, मायायाश्चात्माश्रयाया आत्मसाक्षात्कारं विनाऽनिवृत्तेरिति।[2]

[3]आत्मप्रपदनं च 'तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम्। एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः॥' इत्युक्तलक्षण-ब्रह्माभ्यास एव, ब्रह्मण एवात्मत्वात्। अयं च ब्रह्माभ्यासो न धर्मान्तरसक्तस्य सुलभ इत्यत आह— **सर्वधर्मान् परित्यज्येति।**

**अनेन** चात्मप्रपत्तौ संन्यासिनामेवाधिकारो न तु गृहस्थानामिति **सूचितम्**। तस्यैव सर्वकर्मसंन्यासविधानेन सर्वधर्मपरि-त्यागसम्भवात्। न हि परित्यक्तसर्वधर्मो गृहस्थो भवितुमर्हति, सर्वधर्मकर्तृत्वस्यैव गृहस्थलक्षणत्वात्। न चायमंशो भाष्ये क्वाप्यनुक्त इति शङ्क्यम् , ज्ञाननिष्ठायाः संन्यास्येकविषयत्वस्य भाष्ये स्फुटमुक्तत्वादात्मप्रपत्तेश्च ज्ञाननिष्ठारूपत्वात्। ब्रह्मणि स्थितिर्हि ज्ञाननिष्ठा। ब्रह्म त्वात्मैव खलु। तस्माद् आत्मप्रपत्तिः ब्रह्मनिष्ठा ज्ञानयोग आत्मसमाधिरित्येतच्छब्दाः पर्याया एव, न त्वतिरिक्तार्थबोधकाः। तदेवं ये संन्यस्य मां प्रपद्यन्ते त एव मायां तरन्तीति बोधयितुमेव सर्वधर्मान् परित्यज्येति भाषितमाचार्यैः। ततश्च मायातरणात्मक-संसारनिवृत्तिकामैर्मायानिवर्तकात्मसाक्षात्कारायावश्यं संन्यासाश्रमः स्वीकर्तव्यो विवेकवद्भिरिति सिद्धम्। अत एव ज्ञानिनां संन्यास एवाधिकार इति, गृहस्थानां न ज्ञानयोगेऽधिकार इति चासकृदुक्तं **भाष्यकारैः**॥ १४॥

**नेति**। दुष्कृतिनो मूढा नराधमाः मायया अपहृतज्ञाना अत एवासुरं भावमाश्रिताः सन्तः मां न प्रपद्यन्ते, जन्मान्तरदुष्कृत-वशान्मायया आत्मानात्मविवेकेऽपहृते सति देहादिष्वात्माभिमानग्रस्ताःसन्तः देहादिविलक्षण आत्मा नास्ति न भातीत्येवं ब्रुवाणाः शिश्नोदरपरायणाः 'आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया' इत्यादि वक्ष्यमाणासुरसम्पच्छालिनः संसरन्तीत्यर्थः॥ १५॥

१. 'मामेव ये प्रपद्यन्ते' इत्यत्र माम् इत्यस्मच्छब्देन विष्णुवाचिना विष्णुः प्रपत्तव्य इति सिध्यति। तथा एवकारेण विष्णुभिन्नदेवता व्यावर्त्यते। 'ये प्रपद्यन्ते' इति बहुवचनेन प्रपत्तॄणां जीवानां परस्परभेदः, 'ये माम्' इति कर्तृत्वेन कर्मत्वेन निर्देशात् जीवेश्वरभेदश्च सिध्यतीति तेषामाशयः। २.अत्र मायाजीवेश्वरस्वरूपतद्भेदा-दिनिरूपणं प्रतिबिम्बवादरीत्या मधुसूदन्याम् , अवच्छेदवादरीत्या भाष्योत्कर्षदीपिकायां च विस्तरेण कृतं द्रष्टव्यम्। ३. स्वाभिमतामात्मप्रपत्तिमाह—**आत्मेति**।

**चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन !।**
**आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ !॥ १६॥**

[1]**परमेश्वरं** दुष्कृतिनः **पापकारिणो मूढाः प्रपद्यन्ते** नराधमाः **नराणां मध्येऽधमा निकृष्टाः, ते च मायया** अपहृतज्ञानाः **सम्मुषितज्ञानाः आसुरं भावं हिंसाऽनृतादिलक्षणम् आश्रिताः॥ १५॥**

**ये पुनर्नरोत्तमाः पुण्यकर्माणः—** चतुर्विधा इति। चतुर्विधाः **चतुःप्रकारा** भजन्ते **सेवन्ते मां जनाः** सुकृतिनः **पुण्यकर्माणः, हे अर्जुन !** आर्तः **आर्तिपरिगृहीतः तस्करव्याघ्ररोगादिनाऽभिभूतः आपन्नः,** जिज्ञासुः **भगवत्तत्त्वं ज्ञातुमिच्छति यः,** अर्थार्थी **धनकामः,** ज्ञानी **विष्णोस्तत्त्वविच्च, हे भरतर्षभ !॥ १६॥**

आनन्दगिरिकृतव्याख्या

**ऽनृतादिभूयस्त्वाद् भूयसां जन्तूनां न भगवन्निष्ठत्वसिद्धिरित्याह—** उच्यत इति। **मौढ्यं पापकारित्वे हेतुः, अत एव निकर्षः। सम्मुषितमिव तिरस्कृतं ज्ञानं स्वरूपचैतन्यमेषामिति ते तथा॥ १५॥**

**केषां तर्हि तन्निष्ठता सुकरेति, तत्राह—** ये पुनरिति। **ते भजन्ते भगवन्तमिति शेषः। ये त्वां भजन्ते ते किं सर्वे मायां तरन्ति? नैव, प्रार्थनावैचित्र्यादित्याह—**चतुर्विधा इति। आपन्नः **तन्निवृत्तिमिच्छन्निति शेषः।** तत्त्वविदिति। **शाब्दज्ञानवान् आत्मतत्त्वसाक्षात्कार-मात्रार्थी मुमुक्षुरित्यर्थः॥ १६॥**

भाष्यार्कप्रकाशः

**चतुर्विधा इति।** चतस्रो विधाः प्रकारा रीतयो तेषां ते चतुर्विधाः, सुकृतं जन्मान्तरार्जितं पुण्यकर्म येषामस्ति ते सुकृतिनः 'अत इनिठनौ' इति इनिप्रत्ययः। सुकृतिनां चातुर्विध्यमेव दर्शयति— **आर्त इत्यादिना।** आर्तिः पीडा दुःखमिति यावत्। **आपन्नः** आपदं प्राप्तः। अत एव— 'विपदः सन्तु नः शश्वद् यासु सङ्कीर्त्यते हरिः' इति भागवते कुन्ती प्राह। **धनकाम** इत्युपलक्षणं पुत्रादिकामानाम्। अमीषां चतुर्णां मध्ये ज्ञानी साक्षादात्मानं मत्वा वासुदेवं भजते, अन्ये त्रयस्त्वीश्वरं परोक्षं मत्वेति विवेकः।

यद्यपि ज्ञान्येक एवात्मानमेव भजते, अन्ये त्वार्तादयः रोगादिनिवृत्त्यर्थं ज्ञानार्थं धनाद्यर्थं वा औषधादिकं कर्मयोगादिकं कृष्यादिकं वा सेवन्ते, देवतान्तराणि वा भजन्ते, वासुदेवं वा भजन्ते, न तु तत्र नियमः; तथापि आर्तादिषु सुकृतिनो वासुदेवं भजन्ते, अन्ये तु भेषजादिकमिति बोध्यम्। अत एव सुकृतिन इत्युक्तम्।

**यद्वा** ये आर्तिहरणाद्यर्थं देवतान्तरादिकं भजन्ते तेऽपि वासुदेवमेव भजन्ते, वासुदेवस्य सर्वात्मत्वात्। 'येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयाऽन्विताः, तेऽपि मामेव कौतेय! यजन्त्यविधिपूर्वकम्' इति नवमाध्याये वक्ष्यमाणत्वात्।

ऐश्वर्यादिमदमत्तास्तु दुष्कृतिनो न मां कथञ्चिदपि कथमपि भजन्त इति सूचयितुम् आर्तग्रहणम् अर्थार्थिग्रहणं च।

अनेन श्लोकेन आर्तिनिवारणार्थं दारापत्यधनादिसिद्ध्यर्थं ज्ञानार्थं मोक्षार्थं च भगवानेक एव नृणां सेव्य इत्युपदिष्टम्। सोपाधिकं निरुपाधिकं वा यस्येश्वरभजनं नास्ति स नराधमः पापः शोच्य एवेति भावः।

**ननु** 'पूर्वजन्मकृतं पापं व्याधिरूपेण बाधते' इति शास्त्रात् पापफलस्य व्याधेः कथं सुकृत्याश्रयत्वम्? एवं दारिद्र्यप्रयुक्तस्य धनार्थित्वस्य वा कथं सुकृत्याश्रयत्वम् , दारिद्र्यस्य पापफलत्वादिति चेत् , **मैवम्** , मनुष्यजन्मनः पुण्यपापमिश्रफलत्वात् पापफलं व्याध्यादिकमनुभवन्नपि पुरुषः कृतपुण्य एव तन्निवृत्त्यर्थं भगवन्तं भजते; भगवद्भजनस्य सुकृतं विना दुर्लभत्वात्। न च धनिकस्यार्तस्य धनभोगेन सुकृतस्य क्षीणत्वादीश्वरभजनं न स्यादिति वाच्यम् , सुकृतकर्मणां विचित्रत्वेनानन्तत्वेन च धनभोगप्रदसुकृतकर्मणो धनभोगप्रदानेन क्षीणत्वेऽपीश्वरभजनप्रदसुकृतकर्मणोऽक्षीणत्वात्। तस्माच्चतुर्विधाः सुकृतिनः परोक्षमपरोक्षं

१. 'परमेश्वरं नारायणं' इति पा.।

**तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते।**
**प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः॥ १७॥**

तेषामिति। तेषां **चतुर्णां मध्ये** ज्ञानी **तत्त्ववित् तत्त्ववित्त्वाद्** **नित्ययुक्तो भवति, एकभक्तिश्च, अन्यस्य भजनीयस्यादर्शनात्। अतः स एकभक्तिः** विशिष्यते **विशेषम् आधिक्यमापद्यते। अतिरिच्यत इत्यर्थः। प्रियो** हि **यस्माद् अहमात्मा ज्ञानिनः, अतस्तस्याहमत्यर्थं प्रियः। प्रसिद्धं हि लोके आत्मा प्रियो भवतीति। तस्माज्ज्ञानिनः [1]आत्मत्वाद् वासुदेवः प्रियो भवतीत्यर्थः।** स च **ज्ञानी** मम **वासुदेवस्यात्मैवेति ममात्यर्थं प्रियः॥ १७॥**

आनन्दगिरिकृतव्याख्या

**चतुर्विधानां तेषां सुकृतिनां भगवदभिमुखानां तुल्यत्वमाशङ्क्याह—** तेषामिति। **तस्य विशिष्यमाणत्वे हेतुमाह—** प्रियो हीति। नित्ययुक्तत्वं **भगवत्यात्मनि सदा समाहितचेतस्त्वम्। असारे संसारे भगवानेव सारः, सोऽहमस्मीत्येकस्मिन्नद्वितीये स्वस्मादत्यन्तमभिन्ने भगवति भक्तिः स्नेहविशेषोऽस्येति** एकभक्तिः। **तस्याधिक्ये हेतुं विवृणोति—** प्रियो हीत्यादिना। **भगवतो ज्ञानिनश्च परस्परं प्रेमास्पदत्वे प्रसिद्धिं प्रमाणयति—** प्रसिद्धं हीति। **आत्मनो ज्ञानिनं प्रति प्रियत्वेऽपि भगवतो वासुदेवस्य कथं तं प्रति प्रियत्वमित्याशङ्क्याह—** तस्मादिति। **अहं ज्ञानिनो निरुपाधिकप्रेमास्पदं, परमपुरुषार्थत्वेनात्मत्वेन च गृहीतत्वादित्यर्थः। ज्ञानिनोऽपि भगवन्तं प्रति प्रियत्वं प्रकटयति—** स चेति ॥ १७॥

भाष्यार्कप्रकाशः

वाऽऽत्मानमीश्वरं भजन्त इति स्थितम्।

भरतवंश्या राजानो भरताः, तेषामृषभः श्रेष्ठो भरतर्षभः, तत्सम्बुद्धिः। कृष्णार्जुनयोर्नरनारायणावतारत्वान्नरावतारस्यार्जुनस्य भरतर्षभत्वमिति भावः। शौर्यधैर्यादिसम्पन्नत्वादिति वा।

अनेन च श्लोकेन शात्रवाभिभूतिरूपविपदं प्राप्तस्य तत्त्वजिज्ञासोः राज्यकामस्य च तव सुकृतिनो मद्भजनमवश्यं कर्तव्यम् । तच्च मद्भजनं तवानभिसंहितफलस्वधर्मयुद्धानुष्ठानरूपमेवेत्यर्जुनस्य उपदेशः सूच्यते॥ १६॥

**तेषामिति।** ननु किमार्तादयश्चत्वारः समाः, उत तेषां मध्ये कश्चिद् विशिष्यते इत्यत आह— **तेषामिति।** तेषां मध्य इत्यर्थः। **नित्ययुक्तः** सदाऽप्यात्मनि चित्तसमाधानवान् भवति; कुतः? तत्त्वविक्त्वादात्मयाथात्म्यवित्त्वादात्मत्वादेवेत्यर्थः। भज्यते सेव्यत इति भक्तिः; 'भक्ति'रिति पाणिनिसूत्रात्। एक आत्मेत्यर्थः, भक्तिर्यस्य स एकभक्तिः। एकस्मिन्नात्मनि भक्तिः स्नेहविशेषो यस्य एकभक्तिरिति वा; आत्मैकभजनतत्पर इत्यर्थः। एवं ज्ञानी नित्ययुक्तत्वादेकभक्तित्वाच्च तेषां मध्ये विशिष्यते। **अत इति।** यस्मादहं ज्ञानिन आत्मा, तस्मादित्यर्थः। मम ज्ञानिन आत्मत्वादिति यावत्। अत्यर्थं भृशं आत्मा प्रियो भवतीति लोके प्रसिद्धम्। शास्त्रे च 'आत्मनस्तु कामाय सर्वं प्रियं भवती'ति परमप्रेमास्पदत्वात् प्रियतमत्वमात्मनः प्रसिद्धम्। तस्माच्छब्दार्थं स्वयमेवाह— **ज्ञानिन आत्मत्वादिति।** ज्ञानिनो वासुदेवः प्रियो भवति आत्मत्वाद् वासुदेवस्येत्यन्वयः। स च ज्ञानी मम प्रिय इत्यत्र हेतुमाह— **आत्मैवेत्यत इति।** आत्मैवेति हेतोरित्यर्थः। आत्मत्वादिति यावत्। यथा ज्ञानिन आत्मत्वाद् वासुदेवः प्रियः, तथा वासुदेवस्यात्मत्वाज्ज्ञानी प्रियः, ज्ञानिवासुदेवयोरेकात्मरूपत्वादिति भावः।

हि यस्मान्नित्ययुक्त एकभक्तिर्ज्ञानी तेषां विशिष्यते तस्मादहं ज्ञानिनोऽत्यर्थं प्रियः; स च मम प्रिय इत्यन्वयः। ज्ञानी नित्ययुक्त एकभक्तिरत एव तेषां विशिष्यते। हि यस्मादहं ज्ञानिन आत्मा तस्मादहं ज्ञानिनोऽत्यर्थं प्रियः; स च ममात्मत्वात् प्रिय इति वा। 'तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते' अत एवेति शेषः। अहं ज्ञानिनोऽत्यर्थं प्रियः; स च मम प्रियो भवति। हिः प्रसिद्धौ इति वा। 'तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते' अहमात्मत्वादिति शेषः। ज्ञानिनोऽत्यर्थं प्रियः भवामि; स चात्मत्वान्मम प्रियो

१. अत्र 'तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मा'(बृ.उ.१-४-८) इति श्रुतिरनुसंधेया।

भाष्यार्कप्रकाशः

भवतीति वा। न चात्मपदाध्याहारे नास्ति प्रमाणमिति वाच्यम् , 'ज्ञानी त्वात्मैव मे मत'मिति वक्ष्यमाणवाक्यस्यैव प्रमाणत्वात्। यद्वा अहं ज्ञानिनोऽत्यर्थं प्रियः, स च मम प्रिय इत्येवात्रान्वयः। तत्र हेतुस्तु 'ज्ञानी त्वात्मैव मे मत'मिति वक्ष्यते। अत एव 'तत् कस्मादित्याहे'त्यवतारितं 'ज्ञानी त्वात्मैवे'ति वाक्यं भाष्यकारैः। अत्रात्मत्वहेतूपन्यासस्तु वक्ष्यमाणश्लोकसिद्धार्थस्येहैव स्पष्टार्थमनुवाद इति बोध्यम्।

यत्तु **रामानुजः**— ज्ञानिनो मदेकप्राप्यस्य मया योगो नित्यः, मय्येकस्मिन्नेव भक्तिः, अतः स एव विशिष्यते। **अत्यर्थम्** अत्यभिधेयम्। ज्ञानिनोऽहं यथा प्रियस्तथा सर्वज्ञेन सर्वशक्तिना मयाऽप्यभिधातुं न शक्यत इत्यर्थः इति, इतरयोस्तु यावत्स्वाभिलषितप्राप्ति मया योगः; स्वाभिलषिते तत्साधनत्वेन च मयि भक्तिरिति च, **तदसत्** ; सति जीवस्येश्वरेण नित्ययोगे नित्यप्राप्त एवेश्वर इति कथं तस्य प्राप्यत्वम्? अप्राप्तस्य हि प्राप्यत्वं सम्भवति। कथं वा परोक्षेण परमपदवैकुण्ठनिलयेनेश्वरेण जीवानां नित्ययोगः? कथं परोक्षेणाऽन्तर्यामिणा वा? न हि त्वमेवं कुर्विति प्रेरकः कश्चिद् हृदये कस्यापि प्रत्यक्षः, किं त्वनुमेय एव, जीवपरतन्त्र्यादिलिङ्गात्। न च - 'अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति' 'आदित्यवर्णः' इत्यादिश्रुत्या हृदि साकार ईश्वरोऽस्तीति - वाच्यम् , [1]निरवयवाणुप्रायजीवान्तरपरमाणुभूतेश्वरस्य भवदभिमतस्य साकारत्वायोगात् , 'अशब्दमस्पर्शमरूपमव्यय'मित्यादिश्रुतिविरोधाच्च, अङ्गुष्ठमात्रत्वादेः कल्पितरूपत्वाच्च। न च कल्पितेश्वररूपेण नित्ययोगो विवक्षित इति वाच्यम् , वास्तवस्वरूपपरित्यागे कारणाभावात् , रूपं कल्पयित्वाऽहं भजनीयः इतीहेश्वरेणानुक्तत्वात् , तत्त्वकथनप्रकरणत्वाच्चास्य।

तथा एकभक्तिशब्देनापि नात्मातिरिक्तपरोक्षेश्वरभक्तिरुच्यते। किं तर्हि? आत्मभक्तिरेव। वस्तुस्वरूपदर्शनं विना वस्तुनि प्रीत्यात्मकभक्त्ययोगात्। कल्पितार्चादिस्वरूपे त्वज्ञजनविषये ज्ञानिनः प्रीत्ययोगात्। 'यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम्। हित्वाऽर्चां भजते मौढ्याद् भस्मन्येव जुहोति सः॥' इति भागवते व्यासेन मौढ्यादिति मूढजनविषयोऽर्चाभजनादिरिति दर्शितत्वात् , तत्त्वविद एव ज्ञानित्वात् , सच्चिदानन्दरूपस्य च तत्त्वत्वात्। अतो न ज्ञानिनः कल्पितेश्वराकारे प्रीतिरुपपद्यते।

'अहं ज्ञानिनोऽभिधेयमतिक्रम्य प्रियः' इति वाक्यस्यानन्वितत्वात् , अभिधेयमतिक्रम्येत्यस्माद् 'अभिधातुं न शक्यते' इत्यर्थालाभात् , अभिधानमतिक्रम्येत्यस्मादेव तादृशार्थलाभसम्भवात् , प्रसिद्धभृशार्थपरित्यागे कारणाभावात् , विषयगतप्रियत्वस्यापीयत्तारहितत्वेनेश्वरप्रियत्वस्येयत्तारहितत्ववचनस्यानर्थकत्वात् , विषयप्रियत्वं सातिशयमीश्वरप्रियत्वं तु निरतिशयमित्येव वक्तव्यत्वात् , ईश्वरस्य चानात्मत्वे निरतिशयप्रियत्वायोगात् , आत्मनो निरतिशयप्रियत्वस्य च श्रुत्यादिसिद्धत्वात् , आत्माभिलषितप्रदानादिनैव परोक्षेश्वरस्य प्रियत्वव्यवहार इति परोक्षेश्वरस्याप्यात्मशेषत्वात्।

'स त्वासक्तमतिः कृष्णे दश्यमानो महोरगैः। न विवेदात्मनो गात्रं तत्स्मृत्याह्लादसंस्थितः॥' इति प्रह्लादस्य कृष्णस्मरणजन्यानन्दस्तु आत्मानन्द एव, नातिरिक्तः, कृष्णस्यात्मत्वात्। साकारेश्वरध्यानजन्योऽप्यानन्दः चूतफलाद्यनुभवजन्यानन्दवद् आत्मानन्दप्रतिबिम्बानन्द एव, न त्वतिरिक्तः। तेन च प्रतिबिम्बानन्दापेक्षया मुख्यत्वं बिम्बानन्दस्यास्त्येवेति सातिशय एव प्रह्लादस्य कृष्णस्मरणजन्यानन्दः, यदि कृष्णः साकार ईश्वरः।

**एवम्** ईश्वरस्मरणाद् भक्तस्य निरतिशयानन्दलाभेन प्रियतमत्वमीश्वरस्य यथा, तथा भक्तस्मरणादपीश्वरस्य निरतिशयानन्दलाभेन प्रियतमत्वं भक्तस्येत्येतदपि **अपहासास्पदम्**। परिपूर्णानन्दस्येश्वरस्य भक्तस्मरणादधिकानन्दलाभ इति, तदभावे आनन्दनाश इति च कल्पनस्याप्रमाणत्वादयुक्तत्वाच्च, ईश्वरेणाप्यानन्दार्थं भक्तस्य स्मरणीयत्वापत्तेः, सर्वसेव्यस्यापीश्वरस्य स्वभक्तसेवकत्वदोषापत्तेः।

आर्तो जिज्ञासुरर्थार्थी ज्ञानी चेति चतुर्विधान् सुकृतिनः उपक्रम्य, 'तत्र ज्ञानी विशिष्यत' इत्युक्त्वा 'इतरेषु तेषु' इति वक्तव्ये 'इतरयोस्तु' इति वचनमयुक्तम्। न चार्तस्यार्थार्थिनश्चैकाधिकारित्वादेकत्वमिति वाच्यम् , अनार्तस्यार्थार्थित्वादर्थानर्थिनः आर्तत्वाच्च। न च - व्याधिनिवृत्तिरूपं धनादिरूपं वा अर्थं प्रयोजनमर्थयते आर्तोऽर्थार्थी वेत्यस्त्युभयत्रार्थार्थित्वरूपमेकत्वमिति - वाच्यम् , तथा

१. निरवयवोऽणुप्रायश्च जीवः, तस्याप्यान्तरत्वेन परिमाणतः परमाणुभूत ईश्वर इत्यर्थः।

**उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्।**
**आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्॥ १८॥**

**न तर्हि आर्तादयस्त्रयो वासुदेवस्य प्रियाः? न; किं तर्हि?—** उदारा इति। उदारा **उत्कृष्टाः सर्व एवैते, त्रयोऽपि मम प्रिया एवेत्यर्थः। न हि कश्चिद् मद्भक्तो मम वासुदेवस्याप्रियो भवति। ज्ञानी त्वत्यर्थं प्रियो भवतीति विशेषः। तत् कस्मादित्याह[१]— ज्ञानी त्वात्मैव, नान्यो मत्तः इति** मे **मम** मतं **निश्चयः।** आस्थितः **आरोढुं प्रवृत्तः** स **ज्ञानी** हि **यस्माद् 'अहमेव भगवान् वासुदेवो नान्योऽस्मि' इत्येवं** युक्तात्मा **समाहितचित्तः सन्** मामेव **परं ब्रह्म गन्तव्यम् अनुत्तमां गतिं गन्तुं प्रवृत्त इत्यर्थः॥ १८॥**

आनन्दगिरिकृतव्याख्या

**ज्ञानी चेदत्यर्थमीश्वरस्य प्रियो भवति, तर्हि विशेषणसामर्थ्यादितरेषामप्रियत्वं प्राप्तमिति शङ्कते—** न तर्हीति। **तेषां भगवन्तं प्रति प्रियत्वमत्र विवक्षितमित्याह—** नेति। **अत्यर्थमिति विशेषणस्य तर्हि किं प्रयोजनमिति पृच्छति—** किं तर्हीति। **सर्वेषां भगवदभिमुखत्वादुत्कर्षेऽपि ज्ञानिनि तदतिरेकमङ्गीकृत्य विशेषणमित्याह—** उदारा इति। **किं तत्र प्रमाणमित्याशङ्क्येश्वरज्ञानमित्याह—** मे मतमिति। **ज्ञानी त्वात्मैवेत्यत्र हेतुमाह—** आस्थित इति। **सर्वशब्दस्य ज्ञानिव्यतिरिक्तविषयत्वमाह—** त्रयोऽपीति। **ज्ञानिव्यतिरिक्तानां भगवदभिमुखत्वेऽपि ज्ञानाभावापराधान्न भगवत्प्रीतिविषयतेत्याशङ्क्याह—** न हीति। **कस्तर्हि ज्ञानवति विशेषः? तत्राह—** ज्ञानी त्विति। **तमेव विशेषं प्रश्नपूर्वकं प्रकटयति—** तत्कस्मादित्यादिना। **सर्वमात्मानं पश्यतोऽपि तस्य तव कथं यथोक्तो निश्चयः स्यादित्याशङ्क्य, आस्थितः इत्येतद् व्याकरोति—** आरोढुमिति। **आरोहे हेतुं सूचयति—** स ज्ञानीति। **आरोढुं प्रवृत्तत्वमेव स्फुटयति—** मामेवेति॥ १८॥

भाष्यार्कप्रकाशः

सति ज्ञानार्थित्वरूपमर्थार्थित्वं जिज्ञासावप्यस्तीति, आर्तजिज्ञास्वर्थार्थिनां त्रयाणामप्येकत्वापत्तेः। ज्ञानस्यापि प्रयोजनरूपार्थत्वाविशेषात्। 'आर्तो जिज्ञासुरर्थार्थी' इति त्रयाणां पृथगुपदेशानर्थक्याच्च। 'जिज्ञासुरर्थार्थी ज्ञानीति त्रिविधाः सुकृतिनो मां भजन्ते' इति, 'अर्थार्थी ज्ञानीति द्विविधाः' इति वा वक्तव्यत्वापत्तेः। तस्माद् इतरयोस्त्विति वचनमयुक्तमेव॥ १७॥

**उदारा इति।** ननु सर्वसमस्य वासुदेवस्य कुतो ज्ञान्येव प्रियः, इतरे त्रयो न प्रिया इति शङ्कायामाह— **न हीति।** आर्तादयस्त्रयो वासुदेवस्य प्रिया न हीति न। **किं तर्हि**? किन्तु। सर्वशब्दः पूर्वोक्तत्रित्वपर इत्याह— **त्रयोऽपीति।** उदारशब्दस्य फलितार्थमाह— **प्रिया एवेति।** यथा राजभक्तो राज्ञः प्रियस्तद्वदिति भावः। **तत्** ज्ञानिनोऽत्यर्थं प्रियत्वमित्यर्थः। **कस्माद्**धेतोरित्यपेक्षायाम् **आह** भगवानिति शेषः। **आत्मैव** अहमेवेत्यर्थः। एवकारार्थमाह— **नान्य इति।** पञ्चम्यास्तसिः **मत्तः** इति।

ननु 'विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥' इति त्वदुक्तरीत्या तव सर्वसमस्य सर्वमप्यात्मैवेति कुतो ज्ञान्येवात्मा, नेतरे त्रयः? इत्यत आह— **आस्थितः स हीत्यादि।** हि सः युक्तात्मा सन् मामेवानुत्तमां गतिमास्थितः। **आस्थितः** आरोढुं प्रवृत्त इत्यस्य फलितार्थमाह— **गन्तुं प्रवृत्त इति।** युक्तः समाहित आत्मा मनो यस्य स **युक्तात्मा।** अस्यैव चित्तसमाधानस्याकारमाह— **अहमेवेत्यादि।** स भगवान् वासुदेवोऽहमेव। अहं वासुदेवादन्यो **नास्मि** न भवामि। अहं ब्रह्मास्मीति महावाक्यार्थजन्यं ज्ञानमिदमिति भावः। गम्यते प्राप्यत इति गतिः, न विद्यते उत्तमा यस्याः सा **अनुत्तमा** सर्वोत्तमेत्यर्थः। परब्रह्मण आत्मन एव परमप्राप्यत्वादनुत्तमगतित्वमिति भावः। 'ब्रह्मविदाप्नोति परम्' इति, 'ब्रह्मविद् ब्रह्मैव भवति' इति च श्रुतेरिति भावः।

अयमाशयः— यद्यप्यार्तादयः सर्वेऽप्यात्मभूता एव, तथापि यः अहं ब्रह्मास्मीति वेद, स एवाहम्, 'ब्रह्मविद् ब्रह्मैव भवती'ति

---

१. 'इत्यत आह' इति पा.।

भाष्यार्कप्रकाशः

श्रुतेः। यस्तु नाहं ब्रह्मेति वेद, स नैवाहम् , ब्रह्मविद आत्मत्वादब्रह्मविदोऽनात्मत्वाच्च। ब्रह्मविद्धि कूटस्थमात्मानं मन्यते, स च कूटस्थो ब्रह्मैव चिन्मात्रत्वात्। अब्रह्मवित्तु अकूटस्थं कर्तारं भोक्तारं च जीवमात्मानं मन्यते। स चाकूटस्थो न ब्रह्म, विकारित्वादकूटस्थस्य, ब्रह्मणश्चाविकारित्वात्। तथा च आर्तादिभिरात्मत्वेनाभिमतः संसारी जीवो नाहमित्यार्तादयो नाहम्। ज्ञानिना कूटस्थश्चिदात्मैवात्मत्वेनाभिमत इति स चिदात्माऽहमेवेति ज्ञानी त्वहमेव। तस्मादार्तादयः संसारिणश्चिदाभासा मत्प्रिया एव। ज्ञानी तु चिदात्मा कूटस्थोऽहमेवेति स्थितम्।

**ननु** अहमेव स भगवान् वासुदेवो नान्योऽस्मीत्ये(वा)[व] समाहितचित्तो ज्ञानी चिदात्मत्वात् परं ब्रह्म प्राप्त एवेति कथमुच्यते 'परं ब्रह्म गन्तुं प्रवृत्तः' इति चेत्? **उच्यते**— यः परं ब्रह्मात्मानं गतः स हि केवलानुभवानन्दरूपेणैवावतिष्ठते, न त्वहं ब्रह्मास्मीत्यनुसन्धत्ते, सर्वोपाधिलयेन तादृशानुसन्धानहेतोश्चित्तोपाधेरभावात्। तस्माद् यो ब्रह्मात्मनाऽवस्थास्यति स युक्तात्मा भवतीत्यभिप्रायाद् गन्तुं प्रवृत्त इत्युक्तम्। न च चिदात्मनो ज्ञानिनः कथं गन्तुं प्रवृत्तिरिति वाच्यम् , चिदात्माऽपि मायया बुद्ध्यादितादात्म्यं प्रतिपद्य संसारी भूत्वा शनैस्तत्तादात्म्यं विहाय कूटस्थात्मस्वरूपानुसन्धानेन स्वचिदात्मत्वं पुनः प्राप्तुं प्रवृत्त इव प्रतिभाति। सर्वस्य बन्धमुक्त्यादिव्यवहारस्य मायामयत्वाद् वस्तुतस्तदसिद्धेरस्माकमलङ्कार एवेति।

[१]**ननु** त्रिगुणात्मिका देवेन विष्णुना क्रीडार्थं निर्मिता प्रकृतिर्माया। अस्या मायाशब्दवाच्यत्वम् आसुरराक्षसास्त्रादीनामिव विचित्रकार्यकरत्वेन। यथा च 'ततो भगवता तस्य रक्षार्थं चक्रमुत्तमम्। आजगाम समाज्ञप्तं ज्वालामालि सुदर्शनम्॥ तेन मायासहस्रं तच्छम्बरस्याशुगामिना। बालस्य रक्षता देहमेकैकश्येन सूदितम्॥' इत्यादौ। अतो मायाशब्दो न मिथ्यार्थवाची। ऐन्द्रजालिकादिष्वपि केनचिन्मन्त्रौषधादिना मिथ्यार्थविषयायाः पारमार्थिक्या एव बुद्धेरुत्पादकत्वेन मायावीति प्रयोगः। तथा मन्त्रौषधादिरेव च तत्र माया। सर्वप्रयोगेष्वनुगतस्यैकस्यैव शब्दार्थत्वात्। तत्र मिथ्यार्थेषु मायाशब्दप्रयोगो मायाकार्यबुद्धिविषयत्वेनौपचारिकः, मञ्चाः क्रोशन्तीतिवत्। अतः सत्यैव माया, 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वर'मिति श्रुतेः। 'त्वं हि लोकगतिर्देव न त्वां केचित् प्रजानते। ऋते मायां विशालाक्षीं तव पूर्वपरिग्रहाम्॥ योगनिद्रा महामाया' इत्यादिप्रयोगाच्च। प्रकृतितत्त्वाभिमानिदेवता वा माया। उभयथाऽपि सत्यैव माया, न मिथ्येति कृत्वा कथं बन्धमुक्त्यादिव्यवहारस्य मिथ्यात्वम् , तद्धेतुमायाया वा? इति **रामानुजी**यपूर्वपक्षः।

**अत्रोच्यते**— एषा गुणमयी पारमार्थिकी भगवन्मायैवेति मायायाः पारमार्थिकत्वं सत्यत्वं ब्रूते स्म **रामानुजः**। किमिदं मायानिष्ठं सत्यत्वम् ? अविनाशित्वरूपम् , यद्वा अर्थक्रियाकारिविचित्रकार्यजनकत्वरूपम्? नाद्यः, प्रकृतिपुरुषयोः परमात्मनि लयस्य त्वयैवोपन्यस्तत्वात्। 'तस्मान्न विज्ञानमृतेऽस्ति किञ्चित् क्वचित् कदाचिद् द्विज वस्तुजातम्।' 'सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत्', 'अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते। तत्तु नाशि न सन्देहो नाशिद्रव्योपपादितम्॥ यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै। परिणामादिसम्भूतां तद्वस्तु नृप तच्च किम्' इति पराशरेणोक्तमिति त्वयैवोदाहृतत्वात् , 'नासतः' इति श्लोकव्याख्यानावसरे नाशिद्रव्योपपादितस्य नाशित्वेन नाशिनो जगतः उपादानस्य प्रकृतेरपि नाशवत्त्वेन भाव्यत्वात् प्रकृतेः सत्यत्वे तदुपपादितस्य जगतोऽपि सत्यत्वप्रसङ्गात्। 'ज्ञानं यथा सत्यमसत्यमन्यदि'त्यात्मनो ज्ञानाकारस्यैकस्यैव सत्यत्वम् , अन्यस्य प्रकृतित्वादेरज्ञानस्य चासत्यत्वं स्फुटमुक्तं हि पराशरेण। तस्मान्नास्ति मायायाः अविनाशित्वरूपं सत्यत्वं त्वन्मतेनापि।

न द्वितीयः, अर्थक्रियाकारिकार्यजनकत्वस्य सत्यत्वे निद्राया अपि सत्यत्वप्रसङ्गात्। सा हि स्वाप्नप्रपञ्चं सृजति, माया यथा जाग्रत्प्रपञ्चम्। रज्जुसर्पभ्रमजनकाविद्याऽपि सत्या स्यादर्थक्रियाकारिकार्यजनकत्वात्। न च रज्जुसर्पादिर्नार्थक्रियाकारीति वाच्यम् , भ्रमकम्पादिकारित्वात्। भवतु वा प्रातिभासिकरजतस्य व्यावहारिकरजतवत् कटकाद्यर्थक्रियाकारित्वाभावः, न तावता व्यावहारिकरजतस्य पारमार्थिकसत्यत्वम् , परमार्थतो रजतस्यैवाभावात्। न हि सुषुप्तावात्मनि रजतादिप्रपञ्चः प्रतिभाति। तस्माद् अर्थक्रियाकारिविचित्रकार्यजनकत्वमात्रेण न मायायाः पारमार्थिकत्वम् , परमार्थतो मायायाः अभावात्। न हि विनाशि वस्तु परमार्थतोऽवतिष्ठते, परमार्थतोऽवस्थानविनाशयोर्विरुद्धत्वात्। यच्च विनाशि, वस्तुतस्तु तन्मिथ्यैव, यथा घटः, यथा वा रज्जुसर्पः। तस्माद्

१. अयं पूर्वपक्षः(७-१४) श्लोके रामानुजभाष्ये दृश्यते।

भाष्यार्कप्रकाशः

विनाशित्वान्मायाऽपि मिथ्यैव। अविनाशित्वमेव सत्यत्वप्रयोजकम् , नार्थक्रियाकारित्वादिकमिति सिद्धान्तात्।

**अथ** यदीश्वरस्याविनाभूता शक्तिर्माया सत्यैव, ईश्वरवदित्युच्यते, **तच्चासत्** ; 'जहात्येनां भुक्तभोगामजोऽन्यः' इतीश्वरेण प्रकृतेः त्यक्तत्वश्रवणात्[1]। न ह्यविनाभूता त्यक्तुं शक्यते। नापि सत्येनेश्वरेण त्यक्ता माया सत्या भवितुमर्हति, मायायाः सत्यत्वे च 'मायामेतां तरन्ति ते' इति मायायास्तर्तव्यत्ववचनं च न सङ्गच्छते। न च - सत्यस्यापि नदीजलस्य बाहुभ्यां तरणवत् सत्याया अपि मायायाः प्रपदनेन तरणमुपपद्यत इति - वाच्यम् , नाशरहितत्वेन मायायाः पारायोगात् , पारप्राप्तेरेव तरणत्वात् , पारस्य च नाशरूपत्वात्। न हि पारे नदीस्वरूपमस्ति। नदीस्वरूपाभावस्यैव पारत्वात् , तद्वन्मायाया अपि पारो नाश एव। न च - संसारमण्डले मायाऽस्ति, विष्णुपदे तु नास्ति, अतो मायातरणमुपपद्यत इति - वाच्यम् , सत्याया विष्णुपदेऽसत्त्वायोगात्। 'नासतो विद्यते भावो नाभावो विद्यते सतः' इति ह्युक्तं भगवता। तथा विष्णुपदे अविद्यमानाया मायायाः सत्त्वं चायुक्तम्। अत एव माया मिथ्येत्युक्तमस्माभिः। या हि सर्वत्र नास्ति सा मिथ्या, यथा घटः। व्यतिरेकेण यथा आत्मा। आत्मा हि सर्वत्रास्ति। अत एव तस्य न कदाचिदप्यभावः। अत एव स सत्यः। उक्तं हि पराशरेणापि— 'ज्ञानं सत्यमसत्यमन्यद्' इति। तस्मान्माया विनाशित्वान्मिथ्यैव, न सत्या।

विचित्रकार्यकरत्वेनास्याः मायाशब्दवाच्यत्वमित्येतदस्माकमिष्टमेव, ऐन्द्रजालिकशक्तेरपि विचित्रकार्यकारिण्या मायाशब्दवाच्यत्वात्। सर्वस्यापि प्रपञ्चस्य मायामयत्वे राक्षसास्त्रादीनां मायामयत्वमस्माकमिष्टमेव। शम्बरस्य मायासहस्रमित्यत्रापि मायाशब्दो मिथ्यार्थ पर एव, चक्रनाश्यत्वलक्षणमिथ्यात्वस्य सत्त्वात्। किञ्चासुरकल्पिता मायाः प्रातिभासिक्य एव रज्जुसर्पादिवन्न पुनर्व्यावहारिक्योऽपि, ऐन्द्रजालिकादयश्च प्रातिभासिक्य एव।

**यदुक्तम्** ऐन्द्रजालिकमणिमन्त्रादिकल्पितार्थानां मिथ्यात्वेऽपि मणिमन्त्रादिरूपा माया सत्यैवेति, **तदपहासास्पदम्**। सर्वत्र शक्तेरेव मायापदवाच्यत्वादीश्वरशक्तिर्मायेति त्वयाऽप्यभ्युपगम्यत्वात् , मणिमन्त्रादिगतविचित्रशक्तेश्च मायायाः विचित्रकार्यानुमेयायाः सत्यत्वस्य दुर्वचत्वात् , मिथ्याकार्यजनकशक्तेरमिथ्यात्वस्यासम्भवात् , शक्तेः सत्यत्वे तत्कार्यस्यापि सत्यत्वापत्तेः, गन्धर्वनगरादिकार्यानुमेयाया मणिमन्त्रादिशक्तेः कार्यकाल एव सत्त्वेन कार्यकालात् प्राक् पश्चाच्चाभावेन रज्जुसर्पस्येव प्रातिभासिकत्वसिद्धेः; प्रातिभासिकत्वस्यैव मिथ्यात्वात्। इन्द्रजालशक्तिमत्सु मणिमन्त्रादिषु मायाशब्दवाच्यत्वे सति ऐन्द्रजालिकेऽपि तद्वाच्यत्वप्रसङ्गात् , लोके तथा प्रसिद्ध्यभावात् , न ह्यैन्द्रजालिकं तन्मण्यादिकं वा लोको मायेति प्रपद्यते, किं तर्हि? इन्द्रजालमेव। मण्यादिकं तु मायासाधनमिति प्रत्येति। पिञ्छाभ्रमणमात्रेण ऐन्द्रजालिको गगने गन्धर्वनगरं निर्मातीत्युक्तौ पिञ्छाभ्रमणपदस्य मायेत्यर्थ इति न हि कोऽपि विवेकी ब्रूते, किं तर्हि? मायामयत्वाद् गन्धर्वनगरमेव मायेति वक्ति। पिञ्छाभ्रमणं तु तादृशमायाजननसाधनमिति। तथा च मणिमन्त्रादयो मायावत् पदार्था एव, न तु माया। मणिमन्त्रादिशक्तिस्तु माया। सा तु मणिमन्त्रादेः सकाशात् पृथक्सत्त्वासत्त्वाभ्यां दुर्निरूपेति मिथ्यैव।

**यत्तु** अर्थस्य मिथ्यात्वेऽपि तद्विषयबुद्धिः पारमार्थिकीति, **तदसत्** , बुद्धेः पारमार्थिकत्वव्यावहारिकत्वप्रातिभासिकत्वानां विषयाधीनत्वात्। ब्रह्मेति बुद्धिः पारमार्थिकी, विषयस्य ब्रह्मणः पारमार्थिकत्वात्। घट इति बुद्धिर्व्यावहारिकी, विषयस्य घटस्य व्यावहारिकत्वात्। रज्जौ सर्प इति बुद्धिः प्रातिभासिकी, विषयस्य रज्जुसर्पस्य प्रातिभासिकत्वादिति सिद्धान्तात्। विषयस्यैव मिथ्यात्वे तद्विषयकविज्ञानस्य सत्यत्वं ह्ययुक्तम्। अन्यथा भ्रमप्रमाज्ञानयोरैक्यप्रसङ्गात्। न च भ्रान्तिज्ञानमपि स्वरूपतः सत्यमिति वाच्यम् , रज्जौ 'अयं सर्पः' इति ज्ञाने विषयस्य सर्पस्यासत्यत्वे 'अयं सर्पः' इति ज्ञानस्य कथं सत्यत्वम्? यत्तु विषयातिरिक्तं शुद्धं ज्ञानस्वरूपं, तदात्मैव; तस्य चोत्पादकं किमपि नास्ति, अजत्वादविक्रियत्वाच्चात्मनः; अतो न मिथ्यार्थविषयस्य ज्ञानस्य पारमार्थिकत्वम् , 'तदभाववति तत्प्रकारकानुभवोऽयथार्थानुभवः' इति न्यायशास्त्राच्च, विषयसत्यत्वासत्यत्वयोरेव ज्ञानसत्यत्वासत्यत्वप्रयोजकत्वस्य लोकतः सिद्धत्वाच्च। एवं मिथ्यार्थविषयज्ञानस्यापि सत्यत्वे 'अग्निना सिञ्चेदि'ति वाक्यजन्यज्ञानस्यापि सत्यत्वापत्तेरप्रामाण्यमेव स्यात् सर्प[ज्ञान]स्य। तस्मादनिर्वचनीयेश्वरशक्तिरेव माया, इन्द्रजालशक्तिवत्। एवमनिर्वचनीयत्वादेव मायाकार्ये जगत्यपि मायात्व-

१. अस्मिन् मन्त्रे अजो जीवः, नेश्वरः। अतः ईश्वरेण मायायास्त्यक्तत्वे कथमिदं प्रमाणमिति चिन्त्यम्।

**बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।**
**वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥१९॥**

**ज्ञानी पुनरपि स्तूयते—** बहूनामिति। **बहूनां जन्मनां ज्ञानार्थसंस्काराश्रयाणाम्** अन्ते **समाप्तौ** ज्ञानवान् **प्राप्तपरिपाकज्ञानो** मां **वासुदेवं प्रत्यगात्मानं प्रत्यक्षतः प्रपद्यते। कथम्? वासुदेवः सर्वमिति। य एवं सर्वात्मानं मां**

आनन्दगिरिकृतव्याख्या

**उत्तरश्लोकस्य गतार्थत्वं परिहरति—** ज्ञानीति। ज्ञानार्थसंस्कारो **वासना तत्तज्जन्मनि पुण्यकर्मानुष्ठानजनिता बुद्धिशुद्धिः,** तदाश्रयाणां **तद्वताम् अनन्तानां जन्मनामिति यावत्। ज्ञानवत्त्वं प्राक्तनेष्वपि जन्मसु सम्भावितमित्याशङ्क्याह—** प्राप्तेति। **ज्ञानवतो भगवत्प्रतिपत्तिं प्रश्नद्वारा विवृणोति—** कथमिति। **यथोक्तज्ञानस्य तद्वतश्च दुर्लभत्वं सूचयति—** य एवमिति। **महत् सर्वोत्कृष्टमात्मशब्दितं**

भाष्यार्कप्रकाशः

व्यवहारः।[१](अनिर्वचनीयत्वं मिथ्यात्वस्य लक्षणम्।)

न चैवम् 'ऋते मायां विशालाक्षी'मित्यादिप्रयोगानिर्वाह इति वाच्यम् , मायावत्यां विशालाक्ष्यां मायाशब्दप्रयोगात्। अन्यथा लक्ष्म्याद्याकारपरिणतमायावच्छिन्नचैतन्ये कथं मायाशब्दप्रयोगः स्यात्? न हि लक्ष्म्यादयश्चैतन्यशून्यजडप्रकृतिरूपाः। न च प्रकृतिरपि चेतनैवेति वाच्यम् , 'ईक्षतेर्नाशब्दम्' इति प्रकृतेरचेतनत्वस्य शारीरकसूत्रे सिद्धान्तितत्वात्। लक्ष्मीपार्वत्यादीनां ब्रह्मविष्ण्वादीनां वा शरीरगत एव स्त्रीत्वपुंस्त्वभेदो, न त्वात्मगत इति कथं लक्ष्म्यादीनां स्त्रीणां प्रकृतित्वं, ब्रह्मादीनां पुंसामीश्वरत्वं च? न कथमपि। जगन्नियमनादिकं तु विष्णोरिव लक्ष्म्या अपि सङ्गच्छत एवात्मत्वात्। अतो विष्णुरिव लक्ष्मीरपीश्वर एव, न माया। एवं ईश्वरत्वेन मायावत्त्वादेव लक्ष्म्यां मायाशब्दप्रयोगः। यदा तु लक्ष्म्या ईश्वरशक्तित्वेन परिग्रहस्तदा लक्ष्मीर्मायैव, न त्वीश्वरः, विवक्षाधीनत्वाच्छब्दप्रवृत्तेः।

कथमन्यथा 'तव पूर्वपरिग्रहा'मित्युच्येत पूर्वपरिग्रहत्वम्? लक्ष्म्या विष्णोरनपायिन्याः परिग्रहात्प्राग् विष्णोर्मायावित्वासिद्धेः। न च - प्रकृतिर्देहाद्याकारपरिणता, माया तु तदभिमानिदेवता लक्ष्मीरिति - वाच्यम् , देहाद्याकारपरिणतप्रकृतेरेव मायात्वात् , अग्न्यादीनां वागाद्यभिमानिदेवतात्वात् , विराट्पुरुषस्यैव कृत्स्नप्रपञ्चाभिमानिदेवतात्वात् , लक्ष्म्या एव विराट्पुरुषत्वे तल्लाभेऽपि मायात्वालाभात्। सति तु मायात्वे लक्ष्म्या अपि मिथ्यात्वापत्तेः। न हि निर्विशेषचैतन्यरूपा लक्ष्मीर्माया भवितुमर्हति, किन्तु मायाविन्येव, जगज्जननादिसामर्थ्यरूपमायायाः लक्ष्म्यामपि सत्त्वात्।

तस्माल्लक्ष्म्याः शक्तिरेव माया, न तु लक्ष्मीः। सा च शक्तिः 'निस्तत्त्वा कार्यगम्याऽस्य शक्तिर्मायाऽग्निशक्तिवद्' इति पञ्चदश्युक्तरीत्या निस्तत्त्वा मिथ्यैव। तदेवं मायामयत्वाद् बन्धमुक्त्यादिव्यवहारस्य मिथ्यात्वं सुस्थितम्॥१८॥

**बहूनामिति।** पुरुषः बहूनां जन्मनामन्ते 'वासुदेवः सर्व'मिति ज्ञानवान् सन् मां प्रपद्यते। **यद्वा** पुरुषः बहूनां जन्मनामन्ते ज्ञानवान् सन् वासुदेवः सर्वमिति मां प्रपद्यते। **अथवा** बहूनां जन्मनामन्ते ज्ञानवान् पुरुषः 'वासुदेवः सर्व'मिति मां प्रपद्यते। स महात्मा सुदुर्लभः। पशुपक्ष्यादिबहुजन्मान्त इति भ्रान्तिवारणायाह— **ज्ञानार्थसंस्काराश्रयाणामिति।** आत्मसाक्षात्कारजनकयोगादिसुकृतजन्यसंस्काराश्रयाणामित्यर्थः। अनेकेषु सहस्रेषु मनुष्यजन्मसु प्राग् योगी कर्मी वा भूत्वा वेदान्तविचारं वा कृत्वा ज्ञानार्थसंस्कारमुपचित्य इदानीं जन्मनि तत्संस्कारवशाद् वेदान्तविचारे प्रवृत्त्य ज्ञानं प्राप्तवानित्यर्थः। किं तज्ज्ञानम्? अत आह— **परिपाकेति।** फलभूतमात्मसाक्षात्कारात्मकं ज्ञानं प्राप्त इत्यर्थः। आत्मैवेदं सर्वमित्याकारिकां ज्ञानस्य परां काष्ठां प्राप्त इति वा। **प्रपद्यते** निरन्तरं भजते, साक्षात्करोतीति वा। कथं प्रपद्यत इत्याक्षिपति— **कथमिति।** कथं ज्ञानवानिति वाऽऽक्षिपति— **कथमिति।** सर्वस्य

---

१. अयं पाठः कुण्डलित एव दृष्टः। सदसद्विलक्षणत्वम् अनिर्वचनीयत्वम्। तद् मिथ्यात्वरूपमपि भवति। प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वादिरूपमपि मिथ्यात्वं निरुक्तं ग्रन्थकारैः। प्रकृते च अनिर्वचनीयत्वोक्त्या मिथ्यात्वमात्रं विवक्षितमिति कुण्डलितपाठार्थः।

**नारायणं [1]प्रतिपद्यते, स महात्मा - न तत्समोऽन्योऽस्ति, अधिको वा[2], अतः सुदुर्लभः। 'मनुष्याणां सहस्रेषु' (भ.गी. ७.३) [3]इति ह्युक्तम् ॥ १९॥**

आनन्दगिरिकृतव्याख्या

**वैभवमस्येति** महात्मा। **महात्मत्वे फलितमाह—** अत इति। **तत्र वाक्योपक्रमानुकूल्यं कथयति—** मनुष्याणामिति॥ १९॥

भाष्यार्कप्रकाशः

वासुदेवत्वे स्वस्यापि वासुदेवत्वं सिद्धमिति भावः। **यद्वा** सर्वमप्यहमेव ममैव वासुदेवत्वात् , सर्वस्य च वासुदेवमयत्वादिति भावः। वसति सर्वभूतेष्विति वासुः, दीव्यति स्वयं प्रकाशत इति देवः, वासुश्चासौ देवो वासुदेव आत्मा, आत्मन एव सर्वान्तरत्वात् स्वयम्प्रभ (व)त्वाच्च। दीपादिप्रातिलोम्येनाञ्चति भासत इति प्रत्यक्। दीपादयो हि स्वात्मानमन्यांश्च परस्मै भासयन्ति। आत्मा तु स्वात्मानमन्यांश्च स्वस्मै भासयतीति दीपादिप्रातिलोम्यादात्मा प्रत्यक्छब्दवाच्यः। **यद्वा** प्रति सर्वमञ्चति, गच्छति, व्याप्नोति, जानातीति वा प्रत्यक्, सर्वव्यापी सर्वसाक्षी चेत्यर्थः। अतति सर्वं व्याप्नोतीत्यात्मा, उभयोः कर्मधारयः। प्रत्यगात्मा अहंशब्दलक्ष्यार्थः कूटस्थः; तच्छब्दलक्ष्यार्थस्तु परमात्मा; उभयोश्च चिन्मात्रत्वाद् एकत्वं 'तत्त्वमसि' 'अहं ब्रह्मास्मी'त्यादिश्रुतिसिद्धम्। अत एव भाष्ये क्वचिद् वासुदेवं परमात्मानं, क्वचित् प्रत्यगात्मानं च प्रतिपादयति **भाष्यकारः**। प्रत्यगात्मपरमात्मशब्दयोरेकार्थवाचित्वाभिप्रायात्।

स इति तच्छब्दार्थमाह— **य इति**। सर्वेषामात्मा सर्वात्मा तं सर्वभूतात्मभूतमित्यर्थः। **नारायणं** परमात्मानं वासुदेवम् **एवम्** उक्तरीत्या वासुदेवः सर्वमिति विधयेत्यर्थः। यः प्रपद्यते स इत्यर्थः। महात्मा समाभ्यधिकरहितः, समाभ्यधिकराहित्यं हि महत्त्वम् ; तच्चात्मनः स्वतःसिद्धमेव। आत्मान्यस्य सर्वस्य मिथ्यात्वेन तस्य समाभ्यधिकवस्तुरहितत्वात्। आत्माल्पं वस्तु तु जगदस्त्येव यावद्व्यवहारम्। व्यवहारेऽपि आत्मनः सम[म् अ]धिकं वा वस्तु नास्ति। आत्मन एकस्यैव चेतनत्वादीश्वरत्वाच्च। आत्मान्यस्य जगतोऽचेतनत्वात् परतन्त्रत्वाच्चेति भावः। अत उक्तम्—**न तत्समोऽन्योऽस्त्यभ्यधिको वेति**। 'न तत्समश्चाभ्यधिकश्च दृश्यते' इति श्रुतेरिति भावः। न च ईश्वरपरा सा श्रुतिर्न ज्ञानिपरेति वाच्यम् , ज्ञानिन आत्मत्वादात्मन ईश्वरत्वाच्च सर्वासामपीश्वरपरश्रुतीनां ज्ञानिनि समन्वयलाभात्। यथा अज्ञानिनि जीवे सर्वजीवश्रुतिसमन्वयलाभः।

**नन्व**ज्ञस्य जीवत्वमनुभवसिद्धम् , प्राज्ञस्येश्वरत्वं तु नानुभवसिद्धम् , यस्मिन् कस्मिन्नपि ज्ञानिनि सर्वज्ञत्वसत्यकामत्वादीश्वरधर्माणामनुपलम्भादिति चेत् , **उच्यते**— सर्वं ब्रह्मेति ज्ञानमेव सर्वज्ञत्वम् , न तु सर्वप्रपञ्चद्रष्टृत्वम्। तथा सत्ये आत्मनि काम एव सत्यकामत्वम् , न त्वमोघतृष्णत्वम्। तच्च ज्ञानिनि दृश्यत एवेति। **अथवा** ये सर्वज्ञत्वादयो धर्मा भवद्भिरीश्वरे दृश्यन्ते, न ते धर्मा ईश्वरगताः, किन्तु मायागता एव। सच्चिदानन्दा एवेश्वरगतधर्माः। ते तु ज्ञानिन्यपि सन्तीति। **यद्वा** विष्ण्वादिशरीरोपाधिके आत्मनि ये सर्वज्ञत्वादिधर्माः सन्ति, ते ज्ञानिशरीरोपाधिकेऽप्यात्मनि सन्त्येव , आत्मन एकत्वात्। न चैवमज्ञानिशरीरोपाधिकेऽप्यात्मनि सन्तीति वाच्यम् , इष्टापत्तेः। परन्तु अज्ञ आत्मानं न वेत्तीत्यत उक्तम्— ज्ञानिशरीरोपाधिकेति। तथा च एकस्यैवात्मन ईश्वरस्य विष्ण्वादिशरीरप्रदेशेषु सर्वज्ञत्वाद्युपलम्भः। अस्मदादिशरीरप्रदेशेषु किञ्चिज्ज्ञत्वाद्युपलम्भः। इयं च निष्प्रदेशे आत्मनि प्रदेशकल्पना मायिकैव [मायिक्येव]। यथा एकस्मिन्नेव गगने क्वचित् प्रदेशे बहुजलमेघोपलम्भः, क्वचिन्निर्जलमेघोपलम्भः[4], तद्वत्। अतो न जीवेश्वरभेदावकाशः सर्वज्ञत्वादिधर्मनिमित्तः कल्पयितुं शक्यते आत्मनि पूर्णे एकरूपे।

**वस्तुतस्तु** हिरण्यगर्भचतुर्भुजत्रिलोचनषडाननगजाननलक्ष्मीपार्वतीसरस्वतीप्रभृतयः, इन्द्रयमवरुणादयः, आदित्यचन्द्राग्न्यादयः, पितरो वसवः सिद्धसाध्यादयो, मनुष्याः, पशुपक्षिसरीसृपकीटादयः, व्रीहिवृक्षलतादयः, स्थावराश्च सर्वेऽपि प्राणिनः जीवा एव, 'जीव प्राणधारणे' इति धातोः प्राणित्वस्य प्राणधारणस्य जीवधर्मत्वात्। 'अप्राणो ह्यमनाः शुभ्रः' इति श्रुत्या ईश्वरस्याप्राणत्वाच्च। न चाप्राणाः पाषाणादय ईश्वर इति वाच्यम् , तेषां शुभ्रत्वभारूपत्वाद्यभावात्। हिरण्यगर्भादीनां जीवत्वस्य सूत्रभाष्यादिसिद्धत्वात्।

१. 'प्रपद्यते' इति पा.। २. 'न तत्समोऽन्योऽस्त्यभ्यधिको वा' इति पा.। ३. 'इत्युक्तम्' इति पा.। ४. गगने प्रदेशभेदः कल्पिततत्वेन संप्रतिपन्नः इति स दृष्टान्तः। तथा च एकस्मिन्नेवात्मनि विरुद्धत्वाभिमतानामपि सर्वज्ञत्वकिञ्चिज्ज्ञत्वादिधर्माणां नात्मभेदकत्वसंभव इति भावः। नैयायिका अपि आत्मविशेषगुणानां शरीरावच्छिन्नात्मप्रदेशे उत्पत्त्या ऽव्याप्यवृत्तित्वं वदन्तः अंशतोऽत्र संप्रतिपन्नाः।

भाष्यार्कप्रकाशः

'हिरण्यगर्भः समवर्तताग्रे' इति श्रुत्या हिरण्यगर्भस्यैव [१]प्रथमजीवस्योक्तत्वात्। चतुर्भुजादीनां सर्वेषां हिरण्यगर्भसन्ततिगतत्वात्। विराट्पुरुषस्यापि हिरण्यगर्भपुत्रत्वात्। हिरण्यगर्भश्च सत्यलोकस्वामी ब्रह्मा। ईश्वरो हि स्वयमविकारी सन् हिरण्यगर्भादिद्वारेण सृष्ट्यादिकं करोति। अत एव 'धाता यथापूर्वमकल्पयद् इति हिरण्यगर्भस्य स्रष्टृत्वमुपपद्यते। एवं चतुर्भुजत्रिलोचनयोः रक्षकत्वनाशकत्वे।

त्रयोऽपीमे सत्यलोकाधिपतय एवेति **केचित्**। एकस्यैव सत्यलोकस्य सत्यवैकुण्ठकैलासात्मना भेदादिति। यथा एकैव भूः भारतादिखण्डभेदभिन्ना। वैकुण्ठकैलासौ [२]सत्यादर्वाक्तनावि**त्यन्ये**। अयमेव सत्यलोकः सगुणमुक्तिक्षेत्रमिति व्यवह्रियते।

इमे ब्रह्मविष्णुरुद्रास्त्रयोऽपि स्वयम्भुव इति **केचित्**। हिरण्यगर्भ एव स्वयम्भूः, विष्णुरुद्रौ तत्पुत्राविति **परे**। विष्णुः स्वयम्भूः, ब्रह्मा तत्पुत्रः, रुद्रस्तु तत्पौत्र **इत्यपरे**। रुद्रः स्वयम्भूः, ब्रह्मविष्णू तत्पुत्रावि**त्यन्ये**। स्वयंप्रभवत्वेऽपि मायाया इवैषामुत्पत्तिलक्षणो विकारोऽस्त्येव, स्वयं भवति जायत इति स्वयम्भूरिति व्युत्पत्तेः। मायामयत्वाच्च तद्विग्रहादीनाम्। ततश्च सर्वथा शरीरेन्द्रियप्राण-मनोभृत एते त्रयोऽपि कार्यत्वाज्जीवा एव। एक एव ह्यज ईश्वरः, अशरीरत्वात् तस्य जन्मायोगात्। सशरीराणां च जन्ममरणयो-रवर्जनीयत्वात् जन्ममरणादिविकारशालिनो ये ते जीवाः संसारिण एवेति सिद्धान्तात्। हिरण्यगर्भस्य द्विपरार्धावसायित्वेन नाशश्रवणात्। तस्मादर्वाक्तनानां ब्रह्मदिनप्रलयादिष्वेव नाशसम्भवात्।

एवं हिरण्यगर्भस्यैव जन्ममृत्युग्रस्तत्वेन जीवत्वे तत्सृष्टानामिन्द्रादीनां देवानां, दक्षादीनां प्रजापतीनां, सनकादीनां परमहंसानां, नारदादीनामृषीणां, पितृसिद्धसाध्यादीनां, मनुष्यपशुपक्ष्यादीनां, वृक्षादीनां वा जन्ममृत्युग्रस्तानां जीवत्वे का विप्रतिपत्तिः? न काऽपीत्यर्थः। एवं रामकृष्णाद्यवताराश्च वैष्णवाः शरीरित्वेन जन्मजरामरणसुखदुःखादिविकारग्रस्तत्वाज्जीवा एव। विष्णोरेव शरीरित्वेन लक्ष्मीवियोगसंयोगादिसुखदुःखादिमत्त्वेन च जीवत्वे का पुनस्तदवताराणां जीवत्वे विप्रतिपत्ती रामकृष्णादीनाम्? तथा च जन्मादिविकारवत्त्वस्य जीवलिङ्गत्वात् , सशरीरस्य च जन्मादिविकारवत्त्वात् सशरीरा ब्रह्मविष्ण्वादयः सर्वेऽपि जीवा एव। अशरीर एक एवात्मा।

एवं स्थिते जीवेश्वरविभागे ये सर्वज्ञत्वसर्वशक्तित्वोपलक्षितेश्वरत्वेन तवान्यस्य वा अभिमताः ब्रह्मविष्णुरुद्रादयः ते सर्वेऽपि जीवा एवेति कथं जीवस्यासर्वज्ञत्वासर्वशक्तित्वासम्भवः? कथं वा निर्विकारे ईश्वरे निर्धर्मके सर्वज्ञत्वादिसम्भवः? तस्मात् किञ्चिज्ज्ञत्वादिगुणवानिव सर्वज्ञत्वादिगुणवानपि जीव एवेश्वरः[३]। ब्रह्मादिष्वीश्वरत्वव्यवहारस्तु भूपालादिषु नृणामीश्वरत्वव्यवहारवत्। जीवोऽपि भूपालो यथा प्रजाः पालयन्नीश्वर इत्युच्यते, तथा ब्रह्मादिरपि लोकान् सृजन् , अवन् , हरंश्चेश्वर इत्युच्यते। न च - 'यतो वा इमानि भूतानि जायन्ते' इति श्रुत्या सृष्टिस्थितिलयानामीश्वरधर्मत्वमुक्तमिति - वाच्यम् , अस्मदादिशरीरसृष्टिस्थितिलयहेतुब्रह्मादि-जीवसृष्टिस्थितिलयहेतुत्वेन परमकारणत्वादीश्वरस्य जगत्सृष्ट्यादिव्यवहारः। यथा पुत्रदेहसृष्टिहेतुं पितृदेहं सृष्टवतः पितामहदेहस्य पुत्रदेहस्रष्टृत्वम् , तद्वत्। यथा वा भूखण्डपालकराजाधिराजस्य भूपालकत्वम् , तद्वत्। यथा प्रजापतिद्वारा हिरण्यगर्भस्य जगत्स्रष्टृत्वं तथा हिरण्यगर्भद्वारा जगत्स्रष्टृत्वमीश्वरस्येति बोध्यम्। हिरण्यगर्भाद्याकारपरिणतमायाधिष्ठानत्वाद्वा हिरण्यगर्भादिस्तम्बान्तजगदा-कारेण विवर्तमानत्वाद्वा। तस्माद् हिरण्यगर्भादिस्तम्बान्तयावच्छरीरिजातस्य सिद्धं जीवत्वम्। तत्र केषाञ्चित् सर्वज्ञत्वं केषाञ्चित्

१. हिरण्यगर्भं प्रकृत्य 'स वै शरीरी प्रथमः स वै पुरुष उच्यते। आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत' इति स्मृतौ प्रथमशरीरित्वोक्तेरिति भावः। तस्य प्रथमत्वं जीवान्तरेभ्यः पूर्वमभिव्यक्तत्वं धर्मज्ञानाद्यतिशयवत्त्वं वा। इत्थमेव 'ब्रह्मा देवानां प्रथमः संबभूव' (मु.उ. १-१-१) इत्यत्र भाष्यकारैर्व्याख्यातम्। २. सत्यात् सत्यलोकादित्यर्थः। ३. वस्तुतो ज्ञानस्वरूपस्यात्मनः ज्ञातृत्वमौपाधिकमेव संभवति। ज्ञातृत्वं हि ज्ञानकर्तृत्वं ज्ञानवत्त्वपर्यवसितम्। सर्वज्ञ इति च सर्वविषय-ज्ञातृत्वमभिप्रेतम्। न च तत् ज्ञानस्वरूपे तस्मिन् अनौपाधिकमुपपद्यते। अत एव भाष्यकारैः गीताद्वितीयाध्याये विदुषो जीवस्यापि विद्वत्त्वमौपाधिकमेव निरूपितम्— 'यथा बुद्ध्याद्याहृतस्य शब्दाद्यर्थस्याविक्रिय एव सन् बुद्धिवृत्त्यविवेकविज्ञानेन अविद्यया उपलब्धा आत्मा कल्प्यते, एवमेव आत्मानात्मविवेक-विज्ञानेन बुद्धिवृत्त्या विद्ययाऽसत्यरूपयैव परमार्थतोऽविक्रिय एवात्मा विद्वानुच्यते।'(पृ.७८) इति। अतश्च निर्विकारे आत्मनि न मुख्यवृत्त्या सर्वज्ञत्वादिसम्भवः। परन्तु जीवस्यैव सर्वज्ञत्वसंभवाद् ब्रह्मविष्णुरुद्राणां जीवत्वोक्तिः एतदीया नान्येषां ग्रन्थकाराणामनुमता। अत एव 'हिरण्यगर्भो नाम मूर्तित्रयादन्यः प्रथमो जीवः' इति वेदान्तपरिभाषा। मूर्तित्रयादन्यः इति विशेषणात् ब्रह्मविष्णुरुद्रलक्षणमूर्त्यन्तर्भावेण जीवत्वं नाभिमतमिति गम्यते।

भाष्यार्कप्रकाशः

किञ्चिज्ज्ञत्वं च तरतमभावेन सिद्धम्। अतो न ज्ञानिन्यात्मनीश्वरधर्मसर्वज्ञत्वाद्यसम्भवदोषः, सर्वज्ञत्वादीनामीश्वरधर्मत्वाभावात् , जीवधर्मत्वाच्च। बुद्धिधर्मा हि ते। साभासबुद्धयश्च जीवाः संसारिणः। न च 'सर्वज्ञः सर्वविद्' इति श्रुतिविरोधः, सर्वावभासकत्वलक्षण-सर्वज्ञत्वस्य तत्र विवक्षितत्वात्।

**अथवा** क्षेत्रशब्दवाच्यं सर्वं जगद् आत्मैक एव जानातीति स क्षेत्रज्ञः सर्वज्ञ एव। य एनं क्षेत्रज्ञमात्मानं[१] वेद स ज्ञान्यपि सर्वज्ञ एव। एवं क्षेत्रज्ञात्मवित्त्वादेव हिरण्यगर्भादीनां सर्वज्ञेश्वरत्वम्। न च हिरण्यगर्भादयो जीवा इति पूर्वोक्तविरोधः, कार्यकरण-सङ्घाताभिमानिदृष्ट्या तेषां जीवत्वम् , आत्मदृष्ट्या त्वीश्वरत्वमिति सिद्धान्तेनाविरोधात्। यं कार्यकरणसङ्घातं चतुर्मुखत्वचतुर्भुजत्व-त्रिलोचनत्वद्विभुजत्वचतुष्पात्त्वादिविशेषवन्तं त्वं ब्रह्मविष्णुरुद्रमनुष्यपश्वादिं मन्यसे, स सर्वोऽपि जीव एव, विकारित्वात्। यस्तु तस्य सर्वस्यान्तर आत्मा दृश्यस्य द्रष्टा क्षेत्रज्ञ आत्मा ईश्वरः, स चैक एवेति ज्ञानी ईश्वर एवात्मत्वात्। अज्ञास्तु जीवा एवानात्मत्वात्। कार्यकरणसङ्घातं हि ते अनात्मानमात्मानं मन्यन्ते। श्रुतयश्च हिरण्यगर्भादीन् क्वचिदीश्वरान् ब्रुवन्ति आत्मदृष्ट्या, क्वचिज्जीवान् ब्रुवन्ति सङ्घातदृष्ट्येति न विरोधः।[२]

**नन्वेवं** संसारिजीवस्यासंसार्यात्मनश्च भेदे सिद्धे कथमद्वैतसिद्धिरिति चेत्? **उच्यते**— यः सङ्घातमात्मानं मन्यते, स सङ्घाताभिमानी जीव एव वेदान्तश्रवणादिना ज्ञातविवेकःसन् सङ्घातातिरिक्तक्षेत्रज्ञमेवात्मानं मन्यते। ततश्च क्षेत्रज्ञः आत्मैव भवति। तथा च जीवस्यैव वस्तुतः क्षेत्रज्ञत्वादद्वैतसिद्धिः।

**ननु** यः सङ्घातं क्षेत्रज्ञं वा आत्मानं मन्यते, स किमात्मा? उतान्यः? नाद्यः, आत्मनस्तथाविधमननासम्भवात्। नान्त्यः, अन्यस्य[३] आत्मबुद्ध्ययोगात् क्षेत्रज्ञे। तद्योगे वा तद्बुद्धेर्भ्रान्तिरूपत्वादिति चेत् , **मैवम्** ; आत्मैव मायया प्राप्तजीवभावः सन्नात्मानं मायया सङ्घातं मन्यते, विद्यया त्वात्मानं क्षेत्रज्ञं कूटस्थमिति। यथा पुरुषः आत्मानं निद्रया हस्त्यादिरूपं मन्यते, प्रबोधेन तु यथापूर्वं मनुष्यम् , तद्वत्। न च कथमविकार्यात्मनः माययाऽपि विकारिजीवत्वमिति वाच्यम् , मायायां तर्काद्यसम्भवात्। रज्ज्वादेरपि मायया सर्पाद्याकारेण प्रतीयमानत्वात्। [४]वस्तुतः आत्मनि जीवत्वासम्भवस्य चास्माकमलङ्कारत्वात्।

तस्मादेक एवात्मा क्षेत्रज्ञ ईश्वरः मायया हिरण्यगर्भादिस्तम्बान्तशरीरिजीवभावमापन्नःसन् बद्ध इव, मुमुक्षुरिव, मोक्षाय यतमान इव प्रतिभाति; मुक्त इति च व्यवह्रियते; वस्तुतस्तु नात्मनि बद्धमुक्तादिव्यवहारः, [५]'न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः। न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥' इति शास्त्रात्। य एवमात्मतत्त्ववित् स ज्ञानी सर्वज्ञ ईश्वर आत्मा नारायण एव।

एवंविधश्च ज्ञानी दुर्लभ एवेत्याह— **अत इति।** अनेकजन्मसञ्चितज्ञानार्थसंस्कारपरिपाकजन्यत्वादात्मज्ञानस्येत्यर्थः। स ज्ञानी सुष्ठु दुर्लभः प्राप्तुमशक्यः। अस्य दुर्लभत्वे पूर्वोक्तगीतावाक्यमेव प्रमाणयति— **मनुष्याणामिति।** अनेकसहस्रेष्वपि मनुष्येषु तत्त्वविदेकोऽपि लभ्येत वा, न वेति भावः। एवं ज्ञानिदौर्लभ्योक्त्या आत्मतत्त्वज्ञानस्य दुर्लभत्वं सिद्धम् । [६]तेन च आत्मनो दुर्लभत्वं सिध्यति। इदं चात्मनो दुर्लभत्वम् 'आश्चर्यवत् पश्यति कश्चिदेनम्' इति प्रागेवोक्तम्।

अहो भगवन्माया ! यतः सर्वात्मभूतत्वेन सर्वप्रत्यक्षं सर्वसुलभमपि कूटस्थचैतन्यमासीत् परोक्षं सुदुर्लभम् ; यतश्चात्म-**न्यप्यनात्मभ्रमः, अनात्मन्यप्यात्मभ्रमो ब्रह्मादिस्तम्बपर्यन्तानां सर्वेषां जीवानाम् !॥ १९॥**

---

१. आत्मानमिति । स्वाभिन्नमिति यावत्। २. अत्र 'हिरण्यगर्भस्तु उपाधिशुद्ध्यतिशयापेक्षया प्रायशः पर एवेति श्रुतिस्मृतिवादाः प्रवृत्ताः। संसारित्वं तु क्वचिदेव दर्शयन्ति। जीवानामुपाधिगताशुद्धिबाहुल्यात् संसारित्वमेव प्रायशोऽभिलप्यते। व्यावृत्तकृत्स्नोपाधिभेदापेक्षया तु सर्वः परत्वेनाभिधीयते श्रुतिस्मृतिवादैः।' (बृ.उ. १-४-६) इति भाष्यमनुसंधेयम्। 'सोऽबिभेत्' (बृ.उ.१-४-२) 'स वै नैव रेमे'(बृ.उ.१-४-३) इत्यादि क्वाचित्कं हिरण्यगर्भस्य संसारित्वप्रदर्शनमिति बोध्यम्। ३. अन्यस्यानात्मनो जडत्वादिति भावः। समाधत्ते—**मैवमिति।** ४. परमार्थत इत्यर्थः। ५. निरोधः प्रलयः, विश्वस्येति शेषः। उत्पत्तिप्रलयादिमत्त्वेनाभिमतस्य द्वैतस्यापरमार्थत्वात् तदभावः, आरोपितस्य सर्पादेः उत्पत्तिप्रलयाद्यनुपलम्भादिति भावः। उत्पत्तिप्रलयादिप्रतीतिस्तु मायिकीत्यभिप्रेत्योक्तम्— **इत्येषेति।** अत्र निरोधाद्यभावः परमार्थ इति नार्थः, किन्तु कल्पितप्रतियोगिकाभावस्याधिष्ठानानतिरिक्तत्वात् सर्वकल्पनास्पदमद्वैतमेतच्छब्दपरामृष्टं परमार्थः इत्यर्थः। एतत्सूचनाय इतिशब्दः। एषेति स्त्रीत्वं तु परमार्थतेति विशेष्यानुरोधेन। भावार्थस्याविवक्षणात् स्वार्थे तल्प्रत्ययः। ६. आत्मलाभस्य तत्साक्षात्कारात्मकत्वात् तद्दौर्लभ्यमेवात्मनो दौर्लभ्यमिति भावः।

**कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः।**
**तं तं नियममास्थाय प्रकृत्या नियताः स्वया॥ २०॥**

**'आत्मैव [1]सर्वं वासुदेवः' इत्येवमप्रतिपत्तौ कारणमुच्यते—** कामैरिति। **कामैः** तैस्तैः **पुत्रपशुस्वर्गादिविषयैः** हृतज्ञानाः **अपहृतविवेकविज्ञानाः** प्रपद्यन्तेऽन्यदेवताः **प्राप्नुवन्ति वासुदेवादात्मनोऽन्या देवताः,** तं तं नियमं **देवताराधने प्रसिद्धो यो यो नियमस्तं तम्** आस्थाय **आश्रित्य** प्रकृत्या **स्वभावेन जन्मान्तरार्जितसंस्कारविशेषेण** नियताः **नियमिताः** स्वया **आत्मीयया॥ २०॥**

आनन्दगिरिकृतव्याख्या

**किमिति तर्हि सर्वेषां प्रत्यग्भूते भगवति यथोक्तज्ञानं नोदेतीत्याशङ्क्य 'न मा'मित्यत्रोक्तं हृदि निधाय ज्ञानानुदये हेत्वन्तरमाह—** आत्मैवेति। **कामैर्नानाविधैरपहृतविवेकविज्ञानस्य देवतान्तरनिष्ठत्वमेव प्रत्यग्भूतपरदेवताप्रतिपत्त्यभावे कारणमित्याह—** कामैरिति। **देवतान्तरनिष्ठत्वे हेतुमाह—** तं तमिति। **प्रसिद्धो** नियमो **जपोपवासप्रदक्षिणानमस्कारादिः। नियमविशेषाश्रयणे कारणमाह—** प्रकृत्येति ॥२०॥

भाष्यार्कप्रकाशः

**कामैरिति।** ननु सर्वोऽपि 'आत्मैव वासुदेवः सर्व'मिति कुतो न प्रतिपद्यत इत्याक्षिपति— **आत्मैवेति।** 'वासुदेव आत्मैव सर्व'मित्येवम् **अप्रतिपत्तौ** प्रतिपत्त्यभावे, सर्वस्येति शेषः।**अन्यदेवता इति।** किमपेक्षयाऽन्यत्वम्? अत आह—**आत्मनो वासुदेवादिति।** देवता इत्येवालम्, मनुष्यपश्वादिवद् देवतानामप्यनात्मत्वात्, देवत्वादेः शरीरधर्मत्वात्। अन्यशब्दस्तु स्पष्टार्थः। आत्मनः सकाशाद् अनात्मानो देवा [देवताः] अन्या इति देवतानामनात्मतां स्फुटयितुमन्यशब्दप्रयोग इति भावः। यो यो यां यां देवतां जन्मान्तरे आराधितवान् तत्संस्कारवशादिह जन्मनि स स तां तां भजत इत्याह— **प्रकृत्या नियताः स्वयेति।**

अत्र **रामानुजः**— प्रकृत्या पापवासनया नियता अन्यदेवताः विष्णुव्यतिरिक्तेन्द्रादिदेवताः आश्रित्यार्चयन्त इति।

**तदसत्,** पापवासनया नियतानां देवताभजनायोगात्, देवतानाराधकानां नास्तिकानां पापिनां सत्त्वात्, विष्णुदेवाराधनवद् इन्द्ररुद्रादिदेवाराधनस्यापि पुण्यवासनाप्रयुक्तत्वात्, इन्द्रादिदेववद् विष्णुदेवस्यापि देवत्वजातिमत्त्वेन तदाराधकस्य रुद्रादिदेवाराधकेभ्य उत्कर्षस्य दुर्वचत्वात्। यथा विष्णुविग्रहः शुद्धसत्त्वमयस्तथा शिवविग्रहोऽपि शुद्धसत्त्वमय एव। एवं ब्रह्मादिविग्रहा अपि सत्त्वमया एवेति वैष्णवशैवहैरण्यगर्भकौमारशाक्तेयादिप्रवादात्, नृसिंहाद्यवतारेषु विष्णोरपि तमोगुणदर्शनात्, दक्षिणामूर्त्याद्यवतारेषु शिवस्यापि सत्त्वगुणदर्शनात्।

एकस्यैवेश्वरस्यात्मनः मायाविनः मायानिष्ठसत्त्वादिगुणभेदेन - स्रष्टृत्वविवक्षायां ब्रह्मेति, पालकत्वविवक्षायां विष्णुरिति, संहर्तृत्वविवक्षायां रुद्र इति च नामभिर्व्यवहारः, न तु ब्रह्मविष्णुरुद्राणां शरीरिणामीश्वरत्वम्, शरीरित्वेश्वरत्वयोर्विरुद्धत्वादिति सिद्धान्तेन विष्णुदेवस्य सत्त्वमयत्वं, ब्रह्मदेवस्य राजसत्वं, रुद्रदेवस्य तामसत्वं वा कल्पयितुमशक्यं हि । सर्वेषामपि देवानां सात्त्विकत्वात्, मनुष्याणां राजसत्वात्, वृक्षादीनां तामसत्वाच्च सत्त्वगुणोद्रेकं विना देवजन्मायोगात्।

मलिनसत्त्वात्मिकाविद्या हि जीवोपाधिः, शुद्धसत्त्वात्मिका तु मायेश्वरोपाधिरिति स्थिते कथं मायोपाधिकयोर्ब्रह्मरुद्रयोः राजसतामसत्वे? कथं वा एकस्येश्वरस्य त्रित्वप्रसक्तिः? तस्मान्न ब्रह्मविष्णुरुद्रास्त्रयोऽपि शरीरिण ईश्वरभूताः, किं तर्हि? एकस्यैवेश्वरस्य ब्रह्मविष्णुरुद्रनामानि सृष्टिस्थितिसंहारप्रयुक्तानि। ततश्च अन्यदेवतापदेनैव विष्णुदेवोऽपीन्द्ररुद्रब्रह्मादिदेववद् गृह्यते, देवत्वात्। तस्य च विष्णुदेवस्यान्यत्वमात्मापेक्षयाऽस्ति, अनात्मत्वाद् देवस्य मनुष्यादिवत्। एवमात्मनोऽन्यान् विष्णुं रुद्रं ब्रह्माणमन्यं वा यो य उपास्ते स सर्वोऽपि तत्कामहृतज्ञान एव। यो निष्कामो मोक्षकामो वा स एक एवात्मानमुपास्ते प्रपद्यते वा। ये तु चित्तशुद्ध्यर्थं निष्कामा अपि

१. 'सर्वः' इति पा.।

**यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति।**
**तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥२१॥**

**तेषां च कामिनां—** य इति। **यो यः कामी यां यां देवतातनुं श्रद्धया संयुक्तो भक्तश्च सन्** अर्चितुं **पूजयितुम् इच्छति, तस्य तस्य कामिनः** अचलां **स्थिरां श्रद्धां तामेव** विदधामि **स्थिरीकरोमि, ययैव पूर्वं प्रवृत्तः॥२१॥**

आनन्दगिरिकृतव्याख्या

**तत्तद्देवताप्रसादात् कामिनामपि सर्वेश्वरे सर्वात्मके वासुदेवे क्रमेण भक्तिर्भविष्यतीत्याशङ्क्याह—** तेषां चेति॥२१॥

भाष्यार्कप्रकाशः

विष्ण्वादीनुपासते ते तु मध्यस्था एव; न त्वज्ञानाः प्राज्ञा [न त्वज्ञाः, नापि प्राज्ञाः] इति बोध्यम्। साकारब्रह्मोपासनत्वात् तस्य।

न च - 'मोक्षमिच्छेज्जनार्दनाद्' इति स्मरणाद् विष्णूपासनं मोक्षप्रदमिति - वाच्यम् , तत्र जनार्दनशब्दस्यात्मवाचित्वात्। **अथवा** चित्तशुद्धिद्वारा विष्णूपासनं ज्ञानप्रदत्वान्मोक्षप्रदमिति। एवं 'ज्ञानं महेश्वरादिच्छेद्'इति महेश्वरोपासनस्यापि ज्ञानप्रदत्वमुक्तमेव।

किं बहुना? निष्कामःसन् यं कमपि देवं सर्वेश्वरत्वेनोपास्ते चेत् तेन चित्तशुद्धिर्भवेदेव, न तु विष्णुमेवेत्यादिर्नियमः, निर्गुणब्रह्मणि कल्पितानां सर्वासां व्यक्तीनां सगुणब्रह्मत्वेन व्यपदेशात् , मायया शरीरेन्द्रियादियुक्तं ब्रह्म हि सगुणब्रह्म। इदं सगुणब्रह्मत्वं पाषाणदार्वादिष्वप्यस्ति। कथमन्यथा श्रीरङ्गनायकजगन्नाथस्वाम्यादीनां सगुणब्रह्मत्वम्? परन्त्वज्ञाः पाषाणादिकं सगुण-ब्रह्मेति न जानन्ति, किन्तु पाषाणत्वादिरूपेणैव प्रतिपद्यन्ते। अत एव 'वासुदेवः सर्वमिति स महात्मा सुदुर्लभः' इत्युक्तम्। न च निर्गुणब्रह्मविदेव महात्मेति वाच्यम् , निर्गुणब्रह्मविदेव सगुणब्रह्मविच्च। न हि निर्गुणत्वसगुणत्वयोर्भेदेऽपि ब्रह्मभेदः। निर्गुणमेकमेव ब्रह्म सर्वजगद्रूपेण सगुणं सत् परिणतं माययेति यो वेद स एव हि ब्रह्मवित्। स एव महात्मा। तस्मादिन्द्रादिदेववद् विष्णुदेवोऽप्यनात्मैव। **अथवा** विष्णुदेववदिन्द्रादिदेवोऽपि सगुणब्रह्मैवेति न रुद्रादिदेवोपासनापेक्षया विष्णुदेवोपासनस्य प्राशस्त्यम् , किन्तु सर्वदेवभजनापेक्षया आत्मभजनमेव प्रशस्तमिति स्थितम्॥२०॥

**यो य इति।** तेषां च कामिनां मध्ये। **तनुं** देवतामित्यर्थः, आत्मनि देवतात्वादिजात्यभावात् , शरीर एव तत्सत्त्वात्। अनेन च ये देवतोपासकास्ते अनृतजडदुःखात्मकशरीरोपासका एव, न त्वात्मोपासका इति स्पष्टम्। यो यो भक्तः यां यां तनुं श्रद्धया अर्चितुमि-च्छति तस्य तस्य तामेव श्रद्धामहमचलां विदधामि; **तामेव** तत्तद्देवताविषयामेवेत्यर्थः।

अत्र **रामानुजः**— यां यामादित्यादिरूपामन्तर्यामिणो मम तनुमिति, 'य आदित्ये तिष्ठन् यस्यादित्यः शरीर'मिति श्रुतेः— इत्याह। तदस्मन्मतरीत्या युक्तमपि स्वमतरीत्या विरुद्धमेव।

तथाहि— चिदचिद्विशिष्टः सकलकल्याणगुणनिलयः दिव्यमङ्गलविग्रहो हि विष्णुः शङ्खचक्रादिदिव्यायुधधरः परमेश्वरस्तव मते, तस्य कथमन्तर्यामित्वम् ? कथं वा आदित्यादिशरीरवत्त्वम्? आदित्यादिशरीराणि हि तत्तदभिमानिजीवसम्बन्धीनि, तत्तच्छरीर-सम्बन्धादेवादित्यादीनां जीवत्वव्यवहारात्। जीवस्य च [1]शारीरकत्वस्य शारीरकसूत्रभाष्यादौ स्थापितत्वात्।

न चादित्यादिशरीरेषु आदित्यादिजीवाः सन्ति, तेष्वीश्वरोऽस्तीति वाच्यम् , अणुपरिमाणेषु निरवयवेषु च जीवेषु दिव्यमङ्गल-विग्रहस्येश्वरस्य सत्त्वायोगात् , मध्यमपरिमाणस्य चिदचिद्विशिष्टस्य च चिदन्तःस्थित्ययोगात्।

अस्मन्मतरीत्या तु सर्वात्मनः ईश्वरस्य सर्वमपि शरीरभूतमेवेति सर्वस्येश्वरतनुत्वोपपत्तिः। न चैवं सर्वस्यापीश्वरशरीरत्वे अशरीरेश्वरश्रुतिविरोध इति वाच्यम् , वस्तुतोऽशरीरस्यापीश्वरस्य मायया सशरीरत्वमिति सिद्धान्तात्। न च माययाऽप्यशरीरस्य कथं सशरीरत्वसम्भव इति वाच्यम् , मायायां सर्वसम्भवात् , असम्भावितसर्वार्थसम्भावनस्यैव मायात्वात्॥२१॥

---

१ 'अनुपपत्तेस्तु न शारीरः' (१.२.३) 'शारीरश्चोभयेऽपि हि भेदेनैनमधीयते' ( १.२.२०) ब्रह्मसूत्रेषु शारीरपदस्य जीवरूपार्थे एव प्रयोगात्। परमते तु — जगच्छरीरकः परमात्मा शारीरः, 'तस्यैष एव शारीर आत्मा' इति श्रुतेः। तद्विषयकं शास्त्रं शारीरकमित्युच्यते। द्र. श्रुतप्रकाशिका १-१-१।

**स तया श्रद्धया युक्तः तस्या राधनमीहते।**
**लभते च ततः कामान् मयैव विहितान् हि तान्॥ २२॥**

**स्वभावतो** [1]**यो यां देवतातनुं श्रद्धयाऽर्चितुमिच्छति—** स तयेति। **स** तया **मद्विहितया श्रद्धया युक्तः सन्** तस्याः **देवतातन्वाः** राधनम् **आराधनम्** ईहते **चेष्टते। लभते च** ततः **तस्याः आराधिताया देवतातन्वाः** कामान् **ईप्सितान्** मयैव **परमेश्वरेण सर्वज्ञेन कर्मफलविभागज्ञतया** विहितान् **निर्मितांस्तान्,** हि **यस्मात् ते भगवता विहिताः कामाः, तस्मात् तान् अवश्यं लभते इत्यर्थः।**

**हितानिति पदच्छेदे हितत्वं कामानामुपचरितं कल्प्यम्, न हि कामाः हिताः कस्यचित्॥ २२॥**

आनन्दगिरिकृतव्याख्या

स्वभावतो **जन्मान्तरीयसंस्कारवशादित्यर्थः। भगवद्विहितया स्थिरया श्रद्धया संस्काराधीनया देवताविशेषमाराधयतोऽपि भगवदनुग्रहादेव फलप्राप्तिरित्याह—** यो यामिति। ईहते **निर्वर्तयतीत्यर्थः। आराधितदेवताप्रसादात् फलप्राप्तौ किमीश्वरेणेत्याशङ्क्य तस्य सर्वज्ञस्य कर्मफलविभागाभिज्ञस्य तत्तद्देवताधिष्ठातृत्वात् तस्यैव फलदातृत्वमित्याह—** सर्वज्ञेनेति। **'एको बहूनां यो विदधाति कामान्' इत्यादिश्रुतिमाश्रित्य**[2] **'हि तान्' इति पदद्वयं व्याचष्टे—** यस्मादिति।

**हितानित्येकं पदमिति पक्षं प्रत्याह**[3]**—** हितानिति। **मुख्यत्वसम्भवे किमित्यौपचारिकत्वमित्याशङ्क्याह—** न हीति ॥ २२॥

भाष्यार्कप्रकाशः

**स इति। मद्विहितया** मया स्थिरीकृतयेत्यर्थः, न तु मयोत्पादितयेति, स्वभावत एवोत्पन्नत्वात्। **देवतातन्वाः** देवतारूपायास्तन्वा इत्यर्थः। **देवतायाः** कार्यकरणसङ्घाताभिमानीन्द्रादिजीवस्य **तनुः** शरीरम् , तस्या इति वा। **चेष्टते** करोति। **(तस्याः सकाशात्) राधनम्** आराधनम् , पूजामिति यावत्। स्वाभाविकश्रद्धया देवतामर्चितुमिच्छति; मत्स्थिरीकृतश्रद्धया तु देवतामर्चतीति विवेकः। **विहितान्** निर्मितान् , न तु दत्तानित्यर्थः। एतद्देवतोपासकस्य एतत्कामलाभ इति सव्यवस्थं निर्मितानित्यर्थः। एतेनेश्वरकृतां व्यवस्थामनतिक्रम्यैव तत्तद्देवतास्तं तं कामं तस्मै तस्मै सेवकाय दिशन्ति, न तु स्वातन्त्र्येणेति सर्वस्येश्वरपारतान्त्र्यं सूचितम्। स तया श्रद्धया युक्तःसन् तस्या राधनमीहते। मयैव विहितान् तान् कामान् ततो लभते च। हिशब्दस्य शेषपूरणेन वाक्यान्तरत्वं दर्शयति— **हि यस्मादिति।** यस्मात् ते कामा मयैवैतदर्थं विहितास्तस्मादेते तान् कामान् लभन्ते तत्तद्देवताद्वारेणेत्यर्थः।

[4]हिशब्दमात्रस्य वाक्यान्तरीकरणमस्वरसमित्यभिप्रेत्याह— **हितानिति।** हितप्रायानित्यर्थः। कामिभिर्हितत्वेनाभिप्रेतानिति यावत्। **उपचरितम्** आरोपितमित्यर्थः। गौणोऽयं कामेषु हितत्वव्यवहारो, न मुख्य इति भावः। तत्रोपपत्तिमाह— **न हीति।** प्रिया एव कामाः, न तु हिताः, संसारबन्धहेतुत्वादिति भावः।

हि तानिति पदच्छेदेऽपि हिशब्दस्य प्रसिद्ध्यर्थमुक्त्वा एकवाक्यान्वयः सुकर एव। परन्तु ईश्वरो देवतोपासकार्थं कामान् निर्मितवानिति कोऽपि न वेदेति तदर्थस्याप्रसिद्धत्वाद्धिशब्दस्यात्र प्रसिद्ध्यर्थकथनमनुपपन्नमिति भाष्यकारहृदयम्। मयैव विहितानिति पदाभावे तु उपासको देवतायाः सकाशात् कामान् लभत इत्येतावत उक्तौ हिशब्दस्य प्रसिद्ध्यर्थत्वमुपपद्यत एव, तदर्थस्य सर्वविदितत्वात्।

**रामानुजस्तु—** तत्तद्देवताराधकस्यापि तत्तत्कर्मानुगुणः तत्तत्फलप्रदोऽहमेवेति व्याचख्यौ; तदपि युक्तमेव, तत्तत्फलप्रददेवताकारपरिणतमायाधिष्ठानस्येश्वरस्य तत्तत्फलप्रदत्वमिति। वस्तुतः फलप्रदत्वं तु विरुद्धमेव निर्धर्मकत्वादात्मनः ॥ २२॥

१. 'यो यो या यामिति।' इति पा.। २. फलमत उपपत्तेः (ब्र.सू. ३.२.३९) इति न्यायोऽप्यनुसंधेयः। ३. कामेषु वस्तुतोऽहितेषु औपचारिकहितत्वकल्पनाप्रयुक्तो ऽस्वरसोऽत्र पक्षेऽभिप्रेतः आनन्दगिर्याचार्याणाम्। ४. रामकवेस्तु पूर्वत्र वाक्यभेदः—यस्मात् ते भगवता विहिताः कामाः, तस्मात् तान् अवश्यं लभते—इति। उत्तरत्र तु तदैक्यमिति इति उत्तरमेव व्याख्यानमभिप्रेतम्।

**अन्तवत्तु फलं तेषां तद् भवत्यल्पमेधसाम्।**
**देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि॥ २३॥**
**अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः।**

**यस्माद् अन्तवत्साधनव्यापाराः अविवेकिनः कामिनश्च ते, अतः—** अन्तवदिति। अन्तवद् **विनाशि तु फलं तेषां तद् भवति** अल्पमेधसाम् **अल्पप्रज्ञानाम्। देवान् देवयजो यान्ति, देवान्** [१]**यजन्त इति** देवयजः **ते देवान् यान्ति, मद्भक्ता यान्ति मामपि। एवं समानेऽप्यायासे मामेव न प्रपद्यन्तेऽनन्तफलाय ।अहो खलु ! कष्टं**[२] **वर्तन्त इत्यनुक्रोशं दर्शयति भगवान्॥ २३॥**

**किन्निमित्तं मामेव न प्रपद्यन्त इत्युच्यते—** अव्यक्तमिति। अव्यक्तम् **अप्रकाशं व्यक्तिमापन्नं प्रकाशं गतम्**

आनन्दगिरिकृतव्याख्या

**प्रेक्षापूर्वकारिणि कामानां हितत्वाभावे हेतुमाह—** यस्मादिति। **किञ्च ये कामिनस्ते न विवेकिनः। ततश्चाविवेकपूर्वकत्वात् कामानां कुतो हितत्वाशङ्केत्याह—** अविवेकिन इति। **कामानामनन्तफलत्वेन हितत्वमाशङ्क्याह—** अत इति। **तेषामविवेकपूर्वकत्वम् अतःशब्दार्थः। तुशब्दोऽवधारणार्थः। कामफलस्य विनाशित्वे किमिति कामनिष्ठत्वं जन्तूनामित्याशङ्क्य प्रज्ञामान्द्यादित्याह—** अल्पेति। **किं तर्हि साधनमनन्तफलायेत्याशङ्क्य भगवद्भक्तिरित्याह—** मद्भक्ता इति। **अक्षरार्थमुक्त्वा श्लोकस्य तात्पर्यार्थमाह—** एवमिति। **देवताप्राप्तौ चेति शेषः। 'मामेवे'त्यादौ देवताविशेषं प्रपद्यन्तेऽन्तवत्फलायेति वक्तव्यम्। उक्तवैपरीत्ये कारणमविवेकातिरिक्तं नास्तीत्यभिप्रेत्याह—** अहो खल्विति॥ २३॥

**भगवद्भजनस्योत्तमफलत्वेऽपि प्राणिनां प्रायेण तन्निष्ठत्वाभावे प्रश्नपूर्वकं निमित्तं निवेदयति—** किन्निमित्तमित्यादिना। अप्रकाशं

भाष्यार्कप्रकाशः

**अन्तवदिति।** अन्तवान् साधनव्यापारः कारकव्यापारो येषां ते **अन्तवत्साधनव्यापाराः। अतः** कामिनामन्तवत्साधनव्यापारत्वादित्यर्थः। अल्पमेधसां 'नित्यमसिच्प्रजामेधयो'रित्यसिच्। **यजन्ते** पूजन्ते। यज देवपूजादिष्विति धातुपाठः। मद्भक्ता आत्मसेविनः, मामात्मानमनादिमनन्तं सच्चिदानन्दमयमीश्वरं परब्रह्म यान्ति; मुच्यन्त इति यावत्। आयासो भजनश्रमः।

इदं च देवयजनात्मभजनक्लेशसाम्यप्रतिपादनं स्थूलदृष्ट्यैव। सूक्ष्मदृष्ट्या तु अनेककारणोपसंहारपूर्वकदेवयजनमेवातिक्लेशावहम्। आत्मयजनं तु सुलभमेव। 'आत्मत्वात् सर्वभूतानां सिद्धत्वादिह सर्वतः' इति प्रह्लादेनोक्तत्वाद् भागवते, कारकोपसंहाराभावाच्च न कश्चिदपि क्लेशः। किन्तु विषयप्रवणस्य मनस आत्मन्यवस्थापनमेवेह क्लेशः। तच्चाविरक्तानां दुष्करमपि विरक्तानाम् अभ्यासवशेन सुकरमेव। विरक्तानां संन्यासिनामेव चात्मभजनेऽधिकार इति प्रागेवोक्तम्। तथा च देवयजने वाचिककायिकमानसिकक्लेशास्त्रयः सन्ति, आत्मभजने तु मानसिकक्लेश एक एव। तस्मादात्मभजने देवयजनवन्नातीवायास इति बोध्यम्।

**अनन्तफलाय** मोक्षायात्मसायुज्यायेति यावत्। कष्टतरमतिकष्टं वर्तते जनानामिति शेषः। अल्पमेधसां तेषां तु तत्फलमन्तवद् भवति। तुशब्दात्प्राज्ञानां निष्कामानां मद्भक्तानामनन्तं फलं भवतीति सूच्यते॥ २३॥

**अव्यक्तमिति।** नन्वनन्तफलाय किमिति सर्वे परमात्मानमेव न प्रतिपद्यन्त इत्याक्षेपसङ्गतिं पूर्वोत्तरश्लोकयोर्दर्शयति— **किन्निमित्तमिति।** केन निमित्तेनेत्यर्थः। अबुद्धयः ममाव्ययमनुत्तमं परं भावमजानन्तः सन्तः मामव्यक्तं व्यक्तिमापन्नं मन्यन्ते। व्यक्तमिति भावे क्तः। व्यक्तिः प्रकाश इति यावत्। तन्न विद्यते यस्य तमव्यक्तम् ; प्रकाशोऽत्र ज्ञानम् ; तथा चाव्यक्तमज्ञातमिति फलितार्थः। **व्यक्तिमापन्नं** व्यक्तं, ज्ञातमिति यावत्। **मन्यन्ते** सम्भावयन्ति, उत्प्रेक्षन्त इति यावत्। [३]**नित्यप्रसिद्धं** सदाऽप्यपरोक्ष-

---

१. 'यजन्ति' इति पा.। २. 'कष्टतरं वर्तते' इति पा.। ३. प्रतीकमिदं ३९८ पृष्ठे द्र.।

भाष्यार्कप्रकाशः

मात्मत्वादिति भावः। **परम्** उत्कृष्टं **भावं** स्वरूपम् , सच्चिदानन्दात्मकं रूपमित्यर्थः। **व्ययो** नाशो, विकार इति वा। न विद्यते उत्तमो यस्मात् तम् **अनुत्तमम्**। मदीयं ममेदम् , [१]'वृद्धाच्छः'। राहोः शिर इतिवद् भेदनिर्देश औपचारिकः, ईश्वरस्यैव सच्चिदानन्दरूपत्वेन सच्चिदानन्दानामीश्वरीयत्वायोगात्। अत एव हि— 'आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति तद्धर्माः अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते' इति प्रोक्त**मार्यैः**[२]। **विषयानुभवः** चैतन्यम् , **नित्यत्वं** सत्तेति विवेकः।

आत्मैवेश्वरः इत्यविदित्वा परोक्षमीश्वरं वैकुण्ठादिगतं विष्ण्वादिकं मन्यमानाः, परोक्षो विष्णुरीश्वरोऽधुना श्रीकृष्णरूपेण भक्तानुग्रहार्थं दुष्टशिक्षणार्थं चावतीर्ण इति आत्मानात्मविवेकशून्या ईश्वरतत्त्वमविद्वांसो मूढा जना मन्यन्त इति निर्गलितार्थः। एतेनात्मपरमात्मभेदवादिनो **द्वैतिनो विशिष्टाद्वैतिनश्च** निरस्ताः।

न च - सर्वेश्वरो विष्णुरजहत्स्वभाव एव वसुदेवसूनुरवतीर्णः इति ममैवं परं भावमजानन्तः प्राकृतराजसूनुसमानमितः पूर्वमनभिव्यक्तमिदानीं कर्मवशाज्जन्मविशेषं प्राप्य व्यक्तिमापन्नं मामबुद्धयो मन्यन्त इति **रामानुज**भाष्यात् कथमनेन श्लोकेन विशिष्टाद्वैतिनिरास इति - वाच्यम् , अयुक्तत्वात् तद्भाष्यस्य। तथाहि— कृष्णावतारस्येतः पूर्वमनभिव्यक्तत्वम् , इदानीं व्यक्तत्वं च सर्वविदितमेवेति कुतस्तज्ज्ञानस्याज्ञविषयत्ववर्णनम्? न हि त्रेतायुगे कृष्णावतारोऽस्ति; न वा कलियुगे, किन्तु द्वापरान्त एव। ततश्च तस्य पूर्वमव्यक्तत्वं मध्ये व्यक्तिमापन्नत्वं च सिद्धमेव। एवं तस्य व्ययोऽपि सिद्ध एव, द्वापरावसाने कृष्णावतारनाशेन कलियुगे तददर्शनात्। अतः कथमव्ययत्वं कृष्णावतारस्य? न च - लीलावशाद् व्यक्तिमापन्नं मां कर्मवशाद् व्यक्तिमापन्नं यतो मन्यन्ते ततस्ते अबुद्धय इति - वाच्यम् , मूले कर्मवशादिति पदाभावा(त्त)न्निर्मूलपदकल्पनस्य चाप्रमाणत्वात्। कल्पनेऽपि स्वेष्टासिद्धेः।

तथाहि— भागवते विदुरमैत्रेयसंवादे **भगवद्बादरायणेन** कश्चित् प्रश्नोत्तरग्रन्थः कृतः; तं तावच्छृणु—

'ब्रह्मन् कथं भगवतश्चिन्मात्रस्याविकारिणः। लीलया वाऽपि युज्येरन् निर्गुणस्य गुणाः क्रियाः॥
क्रीडायामुद्यमोऽर्भस्य कामश्चिक्रीडिषाऽन्यतः। स्वतस्तृप्तस्य च कथं निवृत्तस्य सदा स्वतः॥
अस्राक्षीद् भगवान् विश्वं गुणमय्याऽऽत्ममायया। तया संस्थापयत्येतद् भूयः प्रत्यभिधास्यति॥
देशतः कालतो योऽसाववस्थातः स्वतोऽन्यतः। अविलुप्तावबोधात्मा स युज्येताजया कथम्॥
भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः। अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः॥
एतस्मिन् मे मनो विद्वन् खिद्यते ज्ञानसङ्कटे। तन्मे पराणुद विभो कश्मलं मानसं महत्॥
स इत्थं चोदितः क्षत्त्रा तद्विजिज्ञासुना मुनिः। प्रत्याह भगवच्चित्तः स्मयन्निव गतस्मयः॥
सेयं भगवतो माया यन्नयेन विरुध्यते। ईश्वरस्य विमुक्तस्य कार्पण्यमुत बन्धनम्॥
यथार्थेन विना पुंसो मृषैवात्मविपर्ययः। प्रतीयत उपद्रष्टुः स्वशिरश्छेदनादिना॥
यथा जले चन्द्रमसः कम्पादिस्तत्कृतो गुणः। दृश्यतेऽसन्नपि द्रष्टुरात्मनोऽनात्मनो गुणः॥'

इति चिन्मात्रस्याविकारिणो निर्गुणस्येश्वरस्य कथं लीलयाऽपि गुणक्रियासम्बन्धः? देशकालादिभिरलुप्तज्ञानस्य तस्य कथं प्रकृतिसम्बन्धः? भगवतस्तस्य कथं दुर्भगत्वकर्मक्लेशौ भवतः इति प्रश्ननिष्कर्षः। मायया सर्वमप्युपपद्यते, यथा निद्रया जीवस्य स्वशिरश्छेदनादिकम् , यथा जलचलनवशाच्चन्द्रप्रतिबिम्बस्य चलनादिकम् , तद्वदात्मन्यसन्नप्यनात्मगुणो मायावशात् प्रतिभातीत्युत्तरग्रन्थार्थः।

एवं स्थिते निर्विशेषचिन्मात्रेश्वरस्य कथं लीलया वाऽपि जन्मादिसम्बन्धः? कथं वा कर्मवशात् तस्य जन्म नेत्यपि वक्तुं शक्यते? [३]दैत्यहननार्थं भृगोर्भार्यां हत्वा तेन 'अहमिव त्वमपि भार्यावियोगमनुभव' इति दत्तशापःसन् विष्णुः तच्छापनिर्वहणार्थं

१. अस्मच्छब्दस्य 'त्यदादीनि च'(पा.सू. १-१-७४) इति सूत्रेण वृद्धसंज्ञा। २. 'ननु विषयिणः चिदेकरसस्य कुतो धर्माः ये विषयेऽध्यस्येरन्?' इत्याक्षेपमुद्भाव्य पञ्चपादिकायामुक्तं समाधानमिदम्— 'उच्यते—आनन्दः' इत्यादि।(पृ. ४१) अत्र विवरणे— 'अन्तःकरणवृत्त्युपाधौ नानेवावभासन्ते' इति विवृतम्। वस्तुतोऽभेदेऽपि भेदनिर्देशस्य औपचारिकत्वं तत्राभिप्रेतमिति भावः। ३. इयं कथा वाल्मीकिरामायणे उत्तरकाण्डे द्र.। (वा.रा. ७-५१ सर्गे)

भाष्यार्कप्रकाशः

तत्पापक्षयार्थं च श्रीरामरूपेणावतीर्य सीतावियोगमनुबभूव हि[१]। तथा रामावतारे निगूढःसन् वालिनं हत्वा तत्पापफलभूतं किरातशरताडनकृतं शरीरवियोगं कृष्णावतारेऽनुबभूव हि[२]। तथा च जन्मान्तरार्जितसुकृतदुष्कृतप्रयुक्तसुखदुःखफलानुभवशालिनः कृष्णावतारादेः कथमकर्मप्रयुक्तत्वम्? कथं वा लीलया स्वदुःखप्रयोजककर्मकरणम्? न हि कोऽपि लीलयाऽग्नौ पतति। लीलाप्रयुक्ते वा कर्मप्रयुक्ते वा जन्मजरामरणसुखदुःखादिविकारजाते सति कथमीश्वरत्वमीश्वरस्य? निर्विकारो हीश्वरः, 'अजो नित्यः' इत्यादिश्रुतेः। तस्मादीश्वरस्य लीलया कर्मणा वा न कृष्णावतारपरिग्रहः सम्भवति। न च माययाऽपि न सम्भवतीति वाच्यम् , मायायां सर्वसम्भवात् , ईश्वरस्य न वस्तुतो जन्मादिविकारः, किन्तु मायया जन्मादियुक्त इवास्माकं प्रतिभातीति हि तदर्थः।

तस्मान्नित्यशुद्धबुद्धसिद्धमुक्तस्वभावमात्मानमीश्वरं ये कृष्णात्मनाऽवतीर्णं परोक्षमीश्वरं मन्यन्ते, त एवाबुद्धयः। यद्यपि मायामयं कृष्णावतारं प्राकृतराजसूनुसमं ते[ये] मन्यन्ते, तेऽप्यबुद्धय एव। तथापि तदपेक्षयाऽप्यबुद्धयः पूर्वोक्ता इति बोध्यम्। आत्मानात्मविवेकशून्याः पूर्वोक्ताः, अनात्मस्वेव तारतम्यज्ञानशून्या एते इति भेदात्।

**ननु** यथा राजसूनवः प्राकृता मायामयास्तथा कृष्णोऽपीति कथं कृष्ण एव मायामय इत्युच्यत इति चेत् , **उच्यते**— यथा व्यावहारिकसर्पस्यापि प्रातिभासिकसर्पवन्मायामयत्वे सत्यपि प्रातिभासिकसर्पमेव मायामयं ब्रुवन्ति लोकाः, तथा लोकदृष्ट्या कृष्णस्यैव मायामयत्वमिति। मायाकार्यभूतपरिणामत्वाद् भौतिकत्वेन प्राकृतत्वं राजसूनूनाम् , कृष्णशरीरस्य तु साक्षान्मायाकार्यत्वमेव, न तु भूतपरिणामत्वमित्यभौतिकत्वाद् अप्राकृतत्वेन मायामयत्वेन च व्यपदेशः।

एवं च गगनगन्धर्वनगरादितुल्यः[३] कृष्णावतारः। साक्षाद् गन्धर्वनगरादितुल्यास्तु प्राकृतराजसूनव इति सिद्धम्। गन्धर्वनगरादीनामिन्द्रजालकल्पितानामिव मायाकल्पितस्य कृष्णावतारस्य प्रातिभासिकत्वेन मायामयत्वम्। एवमभौतिकत्वेन मायामयत्वादेव कृष्णावतारस्य गोवर्धनोद्धरणादिलोकातिगचेष्टासम्भवः। यथा वा निद्राजन्यस्य स्वाप्नगजादेः पर्वतोद्धरणादिचेष्टासम्भवः।

इयं च माया आत्मनः ईश्वरस्य स्वभाव एवेति बहुवारमुक्तम्। अत एव रामकृष्णादीनामीश्वरावतारत्वव्यवहारः। आत्ममायाकार्यत्वाद् रामकृष्णादिशरीराणाम्।

यद्यप्येक एवात्मा स्वमायया रामकृष्णादिरूपेणेव मनुष्यपश्वादिरूपेणापि परिणत एवेति रामकृष्णादीनामिव देवमनुष्यपश्वादीनां सर्वेषामपीश्वरावतारत्वमेव सुवचम् , तथापि आत्मा साक्षात् स्वमायया रामकृष्णादिरूपेण परिणतः, महदहङ्कारभूतादिद्वारा तु मनुष्यादिरूपेण परिणत इति न मनुष्यादीनामीश्वरावतारत्वव्यवहारः। न च साक्षान्मायापरिणामस्य महत्तत्वस्येश्वरावतारत्वव्यवहारापत्तिरिति वाच्यम् , इष्टापत्तेः। हिरण्यगर्भात्मकत्वाच्च महत्तत्त्वस्य। हिरण्यगर्भो हीश्वरस्य प्रथमावतारः। तस्यैव प्रथमत्वाज्जीवानाम्। तथा रुद्रमयस्याहङ्कारस्यापीश्वरावतारत्वमेव। तस्मादभौतिकत्वात् साक्षान्मायामया ईश्वरावताराः, अन्ये तु भौतिकत्वात् प्राकृता जीवावतारा इति स्थितम्।

**ननु** दृश्यत्वजडत्वस्थूलत्वाद्यशेषविशेषादेते देहा ईश्वरावताराः, एते पुनर्जीवानामिति कथं सुज्ञेयमिति चेत्? **उच्यते**— लोकातिगप्रभाववशादिति। येषु येषु देहेषु लोकातिगं चरित्रं दृश्यते ते ते ईश्वरदेहाः। यथा समुद्रपानहालाहलपानपर्वतोत्क्षेपणदावानलकबलनसेतुनिर्माणस्तम्भोद्गमनभूम्युद्धरणवेदाहरणत्रिलोकाभिव्यापनादिलोकातिगकर्मभिः अगस्त्यशम्भुहनूमत्कृष्णदाशरथिनरसिंहवराहमत्स्यवामनादीनामीश्वरावतारत्वम्। लोकसामान्यचरित्रास्तु जीवदेहाः, यथा मनुष्यादयः।

अमुमेव भौतिकाभौतिकरूपजीवेश्वरदेहभेदमवलम्ब्य भौतिकदेहस्थमात्मानं जीव इति, अभौतिकदेहस्थमात्मानमीश्वर इति च व्यवहरन्ति। देहभेदाज्जीवांश्चानेकान् वदन्ति। ईश्वरं च देहभेदादेवानेकविधं ब्रुवन्ति। स्वस्वमतरीत्या तत्तद्देहावच्छिन्नमीश्वरं पृथक्पृथग् वदन्ति।

---

१. प्रसिद्धेयं रामायणे कथा। २. किरातशरताडनं श्रीकृष्णस्य भागवतादौ प्रसिद्धम्। वालिवधप्रसङ्गस्य तत्र हेतुत्वं त्वन्वेषणीयम्। ३. मायया अवतारः प्रातिभासिकः इत्ययमेव स्वाशयः पूर्वं 'संभवाम्यात्ममायया' (भ.गी.४-६) इत्यत्रापि प्रकटितो रामकविना।

## परं भावमजानन्तो ममाव्ययमनुत्तमम्॥ २४॥
## नाहं प्रकाशः सर्वस्य योगमायासमावृतः।

**इदानीं मन्यन्ते मां नित्यप्रसिद्धमीश्वरमपि सन्तम्** अबुद्धयः **अविवेकिनः**। परं भावं **परमात्मस्वरूपम्** अजानन्तो **ऽविवेकिनः, ममाव्ययं व्ययरहितम्** अनुत्तमं **निरतिशयं मदीयं भावमजानन्तो मन्यन्त इत्यर्थः॥ २४॥**

[1]**तदीयमज्ञानं किन्निमित्तमित्युच्यते—** नाहमिति। **नाहं प्रकाशः सर्वस्य लोकस्य। केषाञ्चिदेव मद्भक्तानां प्रकाशोऽहमित्यभिप्रायः।** योगमायासमावृतः **योगो गुणानां युक्तिर्घटनम्, सैव माया योगमाया, तया योगमायया**

आनन्दगिरिकृतव्याख्या

**शरीरग्रहणात्पूर्वमिति शेषः।** इदानीं **लीलाविग्रहपरिग्रहावस्थायामित्यर्थः। प्रकाशस्य तर्हि कादाचित्कत्वं भगवति प्राप्तम्, नेत्याह—** नित्येति। **कथं तर्हि भगवन्तमागन्तुकप्रकाशं मन्यन्ते? तत्र अबुद्धयः इत्युत्तरम्। तद् विवृणोति—** परमिति। **'परम् अनुत्तम'मिति विशेषणद्वयं सोपाधिकनिरुपाधिकभावार्थम्॥ २४॥**

[2]**अविवेकरूपमज्ञानं भगवन्निष्ठाप्रतिबन्धकमुक्तम्। तस्मिन्नपि निमित्तं प्रश्नपूर्वकमनाद्यज्ञानमुपन्यस्यति—** तदीयमज्ञानमित्यादिना। **'त्रिभिर्गुणमयैः' इत्यनौपाधिकरूपस्याप्रतिपत्तौ कारणमुक्तम्, अत्र तु सोपाधिकस्यापीति विशेषं गृहीत्वा व्याचष्टे—** नाहमिति। **तर्हि भगवद्भक्तिरनुपयुक्तेत्याशङ्क्याह—** केषाञ्चिदिति। **सर्वस्य लोकस्य न प्रकाशोऽहमित्यत्र हेतुमाह—** योगेति[3]। **अनाद्यनिर्वाच्या-**

भाष्यार्कप्रकाशः

अयमेव जीवेश्वरव्यवहारः श्रुतिभिरप्यनूद्यते स्वमतमद्वैतं सिद्धान्तयितुम्। न हि पूर्वपक्षानुवादं विना सिद्धान्तः सुकरः। नैतावता जीवेश्वरविभागः श्रुत्यभिप्रेत इति भ्रमितव्यम्, अनुवादमात्रत्वात् तस्य। श्रुत्यभिमतमतं तु दर्शितमेव— आत्मैक एवेश्वर इति, तद्भिन्नाः सर्वेऽनात्मान इति, तत्र कल्पिता इति च।

तथा च य एवमात्मानात्मविवेकशून्याः प्राकृताः ते हि रामकृष्णशङ्करागस्त्यहनूमदादींस्तत्तत्कार्यकरणसङ्घातविशेषात्मकानीश्वरत्वेन प्रतिपद्यन्ते। ये तु विवेकिनः ते हि विध्वस्तनिखिलोपाधिकं निरस्ताशेषविशेषं सच्चिदानन्दं सर्वभूतान्तरस्थमात्मानमेकमेव ईश्वरं प्रतिपद्यन्ते इति सिद्धं ज्ञानिनामद्वैतम्, अज्ञानां च द्वैतम्।

विशिष्टाद्वैतं तु सङ्कराणामेव, अश्रौतत्वाद् विशिष्टाद्वैतपदस्य। विशिष्टत्वाद्वैतत्वयोः सामानाधिकरण्यायोगाच्च। प्रतिपादितमिदं विस्तरेण मयैव **सिद्धान्तबिन्दुव्याख्यानभूते सिद्धान्तसिन्धुनामके** ग्रन्थे इत्यत इहोपरम्यते।

तदेवम् अज्ञानसिद्धो द्वैतव्यवहारो मुमुक्षुभिर्नादरणीयः, द्वैतस्य भयहेतुत्वात् 'द्वितीयाद्वै भयं भवती'ति श्रुतेः। अतश्चाभयकामेनाद्वैतभाष्यमेव श्रोतव्यम्, तदर्थश्च मन्तव्यः, निदिध्यासितव्यः, ब्रह्मभूतत्वात् तदर्थस्य॥ २४॥

**नेति**। कुत एवं परमात्मनस्तव स्वरूपं सर्वैरविदितमित्याक्षिपति— **तदज्ञानं किन्निमित्तमिति**। किं निमित्तं यस्य तत् किन्निमित्तम्; केन निमित्तेन भवतीत्यर्थः। इत्यस्याक्षेपस्य समाधानमुच्यते— **नाह**मिति श्लोकेन। अहं सर्वस्य प्रकाशो न भवामि, अयं योगमायासमावृतो मूढो लोकः अजमव्ययं मां नाभिजानाति।

प्रकाशत इति **प्रकाशः** प्रत्यक्ष इत्यर्थः। सर्वस्याप्यप्रकाश(क)त्वे तु ज्ञानमार्गसम्प्रदायस्यैवाप्रवृत्तिः स्यादत आह— **केषाञ्चिदिति।** ममात्मनो भक्ता मद्भक्ता आत्मरताः, तत्त्वविदः इति यावत्। आत्मतत्त्वविदामेव आत्मनि भक्तिः, यथा स्त्रीसौन्दर्यविदामेव स्त्रियां भक्तिः। सच्चिदानन्दलक्षणात्मस्वरूपवेदनाभावादेव लोकस्य नात्मरतिरिति भावः।

गुरुशास्त्रादिना आत्मतत्त्वे ज्ञाते सति पुंसामात्मनि रतिर्भवति, तत आत्मसाक्षात्कारो जायते; एवंविधास्तु पुरुषाः सुदुर्लभा

१. 'तदज्ञानम्' इति पा.। २. भ्रमरूपमज्ञानमित्यर्थः। ३. प्रकाशाभावे हेतुसमर्पकं **योगमायासमावृतः** इति भगवतो विशेषणम्। तच्च 'यया योगमायया समावृतं माम्' इत्यग्रिमश्लोकावतारिकानुगुणम्। रामकविमते तु लोकस्य विशेषणम्। ततश्चाग्रे 'यया योगमायया समावृतो माम्' (पृ ४००) इति पाठः स्यात्।

**मूढोऽयं नाभिजानाति लोको मामजमव्ययम्॥२५॥**

**समावृतः सञ्छन्न इत्यर्थः। अत एव मूढो लोकोऽयं नाभिजानाति मामजमव्ययम् ॥२५॥**

भाष्यार्कप्रकाशः

**ज्ञानाच्छन्नत्वादेव मद्विषये लोकस्य मौढ्यम्। ततश्च मदीयस्वरूपविवेकाभावान्मन्निष्ठत्वराहित्यमित्याह—** अत एवेति॥**२५॥**

भाष्यार्कप्रकाशः

इति प्रागेवोक्तमत एवाह— **केषाञ्चिदेवेति।** अत्यल्पसंख्यानामेवेत्यर्थः। द्वित्रादीनामेवेति भावः। ननु केचिदेव त्वां जानन्ति , न तु सर्वे इत्यत्र को हेतुः? अत आह— **योगमायेति।** केषाञ्चिदेव शङ्करसनकनारदादीनां योगमाययाऽनावृतानामहं प्रकाशः, न तु सर्वस्य लोकस्य, योगमयासमावृतत्वात् सर्वस्येत्यर्थः।

काऽसौ योगमायेत्यत आह— **योग इति।** गुणानां सत्त्वादीनां युक्तिर्योगः। युक्तिशब्दार्थमाह— **घटनमिति। सैवेति।** युक्तिरेवेत्यर्थः। योग एव माया योगमायेति समास इति भावः। 'त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्। मोहितं नाभिजानाति मामेभ्यः परमव्ययम्॥' इति पूर्वमेवोक्तं लोकस्य योगमायासमावरणप्रयुक्तमोहवत्त्वम्। सत्त्वादिगुणत्रयसंयोगवशाल्लोकस्य बुद्धिर्मोह-मापद्यते सुखदुःखनिद्रादिलक्षणम्। ततश्चैवं मूढो लोको मां नाभिजानाति; एवं गुणसंयोगमूढबुद्धित्वाल्लोकस्याहमप्रकाश इति भावः।

[1](योगमायाशब्दस्यार्थान्तरमाह— **अथवा भगवत इति।** चित्तस्य समाधानं **समाधिः**; प्रणिधानं चिन्तनं सङ्कल्प इति यावत्। 'भगवतः सङ्कल्पः' इत्येव पाठान्तरम्। तत्कृता **माया** अविवेकः। योगकृता माया योगमायेति मध्यमपदलोपसमासः। **अथवा** सः कृतो यया सा तत्कृता योगहेतुरित्यर्थः। योगहेतुर्माया योगमायेति समासः। स्वतो निर्विशेषस्य ब्रह्मणः मायायोगादेव सङ्कल्पः जगत्सर्गादिविषयः सम्भवति। अस्मिन् पक्षे **माया** नाम अज्ञानमेव भावरूपमिति।)

लोकश्चात्र चिदाभास एव प्रमातृनामकः, न तु साक्षी प्रत्यगात्मा, साक्षिण एवावृतत्वे जगदान्ध्यप्रसङ्गात्। मामनात्मविलक्षणं स्वात्मभूतं परमात्माभिन्नं प्रत्यञ्चं नाभिजानाति।

ननु यथा लोको योगमायासमावृतज्ञानः सन् त्वां न वेत्ति, तथा त्वमप्यात्मानं न वेत्सि किमित्यत आह— [2]**ययेति।** मम स्वाधीनमायत्वान्मायायाश्च मदीयत्वान्ममैव मायाप्रेरकत्वान्मत्परतन्त्रा मन्नियाम्या मद्दत्तशक्तिर्माया मां मोहयितुं न क्षमत इत्यर्थः। **मदीया सतीति**। मदीया भूत्वेत्यर्थः। तत्र दृष्टान्तमाह— **यथेति। अन्यस्येति** । ऐन्द्रजालिकादेरित्यर्थः। यथा ऐन्द्रजालिकप्रयुक्ता माया द्रष्टृनेव मोहयति, न त्वैन्द्रजालिकम् , तद्वदित्यर्थः। एवं मायाऽमोहितत्वादेवेश्वरस्येश्वरत्वमिति भावः।

अत्र लोकस्य योगमायासमावृतत्वं नाम घटादिवन्नाज्ञानविषयत्वम् , चैतन्यवन्नाज्ञानाश्रयत्वम् , किन्तु योगमायाप्रतिबद्ध-ज्ञानत्वमेव, परमेश्वरस्य ज्ञानं माया न प्रतिबध्नातीति वाक्यानुसारात्। व्यतिरेकदृष्टान्तो हि जीवस्येश्वरः। इदं च मायया प्रतिबद्धं ज्ञानं जीवस्य न स्वरूपचैतन्यम् , तस्यावरणे जगदान्ध्यप्रसङ्गात्। व्यापकस्य तस्य व्याप्यया माययाऽऽवृतत्वासम्भवान्मायाया अपि भासकत्वाच्च चैतन्यस्य। किं तर्हि? वृत्तिज्ञानमेव। मायया जीवावच्छेदकान्तःकरणस्य सत्यावृतत्वे वृत्तिज्ञानस्य प्रतिबन्धो भवति। अन्तःकरणे योगमायासञ्छन्ने सति अहं ब्रह्मास्मीति वृत्तिज्ञानं नोदेतीत्यर्थः।

इदं च जीवावच्छेदकान्तःकरणगतं मायावृतत्वं जीवेऽध्यस्तमित्यभिप्रेत्योक्तम्—**योगमायया समावृतो लोक इति।** योग-मायासमावृतान्तःकरण इत्यर्थः। योगमायाप्रतिबद्धज्ञान इति फलितार्थकथनम्। अन्तःकरणावरणपूर्वकत्वाज्ज्ञानप्रतिबन्धस्य। न च ज्ञानमेव मायाऽऽवृतमिति किमिति नोच्यत इति वाच्यम् , उत्पन्नस्य ज्ञानस्य मायावरणासम्भवात्। अत एवोक्तम्— ज्ञानं न प्रतिबध्नातीति, न तु आवृणोतीत्युक्तम्। न च - ईश्वरस्यान्तःकरणाभावेन वृत्तिज्ञानस्यैवाभावात् कुत उक्तम्— परमेश्वरस्य ज्ञानं न

१. अत्र किञ्चिद् भाष्यवाक्यं रा.पाठानुसारेण लुप्तमिति प्रतीयते। तदेवं संभाव्यते—'अथवा भगवतश्चित्तसमाधिर्योगः, तत्कृता माया योगमाया, तया योगमायया' इति। आनन्दाश्रमपुस्तके तु पादटिप्पण्यामित्थं पाठान्तरं दृश्यते— 'अथवा भगवतो यः संकल्पः स एव योगः, तद्वशवर्तिनी या माया तयाऽऽवृत इत्यर्थः। चित्तसमाधिर्वा योगः, तत्कृता माया योगमाया तया योगमायया' इति। २. भाष्यमिदमुत्तरश्लोकावतरणिकागतं रा.पाठे पूर्वश्लोके स्थितम्।

**वेदाहं समतीतानि वर्तमानानि चार्जुन ।**
**भविष्याणि च भूतानि मां तु वेद न कश्चन॥ २६॥**

**यया योगमायया समावृतं मां लोको नाभिजानाति, नासौ योगमाया मदीया सती ममेश्वरस्य मायाविनो ज्ञानं प्रतिबध्नाति, यथाऽन्यस्यापि मायाविनो माया ज्ञानम् , तद्वत्। यत एवम् , अतः—** वेदाहमिति। **अहं तु वेद जाने**

आनन्दगिरिकृतव्याख्या

**मायया भगवानावृतश्चेत् तस्यापि लोकस्येव ज्ञानप्रतिबन्धः स्यादित्याशङ्क्याह—** ययेति। **न हीयं माया मायाविनो विज्ञानं प्रतिबध्नाति, मायात्वाल्लौकिकमायावत् , अथवा नेश्वरो मायाप्रतिबद्धज्ञानो मायावित्वाल्लौकिकमायाविवदित्यर्थः। भगवतो मायाप्रतिबद्धज्ञानत्वाभावेन सर्वज्ञत्वमप्रतिबद्धं सिद्धमित्याह—** यत इति। **लोकस्य मायाप्रतिबद्धविज्ञानत्वादेव भगवदाभिमुख्यशून्यत्वमित्याह—** मां

भाष्यार्कप्रकाशः

प्रतिबध्नाति मायेति, अप्रसक्तस्य निषेधो ह्यनर्थक इति - वाच्यम् , मायावृत्तिज्ञानसत्त्वादीश्वरस्य। न चेश्वरीयाऽपि माया कुत ईश्वरज्ञानं न प्रतिबध्नातीति वाच्यम् , ईश्वरावच्छेदकमायाया मायावरणाभावेन तदीयज्ञानस्य मायाप्रतिबन्धाभावात्। न हि माया स्वयमेव स्वमावृणुयात् , स्ववृत्तिं वा प्रतिबध्नीयात्। तस्मादीश्वरोपाधेरनावृतत्वादीश्वरस्य ब्रह्माहमस्मीति सदाऽपि ज्ञानमस्ति। जीवोपाधेरावृतत्वाज्जीवस्य ज्ञानं प्रतिबद्धमिति सिद्धम्।

**ननु** यदि जीवेश्वरयोः स्वरूपचैतन्यमनावृतम् , तर्हि तस्य कुतो न भानमिति चेत्? **उक्तमेव** जीवान्तःकरणस्यावृतत्वादिति। ननूक्तमेव, परन्तु तदयुक्तम् , अन्यस्यावरणमन्यस्याप्रकाश इति चेत् , नायं दोषः, चक्षुष आवरणे घटस्याप्रकाशदर्शनात्। न च घटोऽप्यज्ञानावृत एवेति वाच्यम् , चक्षुषोऽन्तःकरणस्य वाऽङ्गुलिनाऽज्ञानेन वाऽऽवृतत्वे सति घटाप्रकाशसिद्धौ घटावारकज्ञानान्तराभ्युपगमस्य व्यर्थत्वात्। तस्मान्न चैतन्यस्यावरणम्।

**ननु** यद्येवं जीवेश्वरयोर्मायावृतत्वानावृतत्वाभ्यां भेदस्तर्हि कथमद्वैतसिद्धिरिति चेत्? **उच्यते—** यावद्व्यवहारं सत्यप्यौपाधिके भेदे परमार्थतश्चैतन्यैकरसत्वेन तयोरेकत्वाज्जीवेश्वरयोश्चैतन्यात्मना अद्वैतसिद्धिरिति॥ २५॥

**वेदेति। यत इति।** यस्मादेवं पूर्वोक्तरीत्या परमेश्वरस्य ज्ञानं माययाऽप्रतिबद्धम् ; लोकस्य ज्ञानं तु मायया प्रतिबद्धम् , **अतः** एवं ममामायावृतत्वाल्लोकस्य च मायावृतत्वादित्यर्थः।

हे अर्जुन! अहं समतीतानि वर्तमानानि भविष्याणि च भूतानि वेद, मां तु कश्चन न वेद। अहं त्विति तुशब्दो जीववैलक्षण्यार्थः। प्रत्यगभिन्नः परमात्मा परमेश्वरोऽहंशब्दार्थः।

न च मायावच्छिन्नचैतन्यस्य परमेश्वरस्य अन्तःकरणोपहितचैतन्यस्य प्रत्यगात्मनश्च कथमभेद इति वाच्यम् , मायावच्छिन्नेश्वरस्य मायोपहितब्रह्मणश्चैक्यं तावत् सर्वविदितम् , अवच्छिन्नत्वोपहितत्वयोर्भेदेऽपि मायाया अभेदेनेश्वरब्रह्मणोरप्यभेदात्। एवं मायोपहितान्तःकरणोपहितयोः प्रत्यग्ब्रह्मणोरप्यभेद एव, उपाध्योर्भेदेऽप्युपहिताभेदात्। तथा मायावच्छिन्नान्तःकरणोपहितयोरप्यभेद एव, उपाध्योर्भेदेऽप्युपहिताभेदात्। यदेव चैतन्यं मायावच्छिन्नं मायोपहितं च तदेवान्तःकरणोपहितमपीति। न चैवम् अन्तःकरणावच्छिन्नं चैतन्यमपि तदेवेति जीवोऽपि प्रत्यगीश्वरब्रह्माभिन्न एवेति वाच्यम् , इष्टापत्तेः।

**तर्हि** लोको मां न वेद अहं सर्वं वेदेति कुतो भेदेन निर्देशो जीवेश्वरयोरिति चेत्? **उच्यते—** उपाधिकृताज्ञत्वप्राज्ञत्वसंसारित्वासंसारित्वादिभेदादिति।

न चैवं प्रत्यग्ब्रह्मणोरभेदेऽप्यस्ति प्रत्यगीश्वरयोर्भेद इति वाच्यम् , जीवस्येवेश्वरस्यापि स्वरूपत्वात् प्रत्यगात्मनः। न च ब्रह्मैवेश्वरस्य स्वरूपमिति वाच्यम् , प्रतीच एव ब्रह्मत्वात् , ब्रह्मणोऽन्तःकरणप्रदेशोपलभ्यमानत्वमात्रेण प्रत्यक्त्वस्योक्तत्वात्। तस्मात् प्रत्यगभिन्न एव परमेश्वरः।

समतीतानि **समतिक्रान्तानि भूतानि, तथा वर्तमानानि चार्जुन ! भविष्याणि च भूतानि वेदाहम्। मां तु वेद न कश्चन, मद्भक्तं मच्छरणमेकं मुक्त्वा। मत्तत्त्ववेदनाभावादेव न मां भजते॥ २६॥**

आनन्दगिरिकृतव्याख्या

त्विति। **कालत्रयपरिच्छिन्नापरिच्छिन्नसमस्तवस्तुपरिज्ञाने प्रतिबन्धो नेश्वरस्यास्तीति द्योतनार्थः तुशब्दः। मां त्विति लोकस्य भगवत्तत्त्वविज्ञानप्रतिबन्धं द्योतयति। तर्हि त्वद्भक्तिर्विफलेत्याशङ्क्याह—** मद्भक्तमिति। **तर्हि सर्वोऽपि त्वद्भक्तिद्वारा त्वां ज्ञास्यति, नेत्याह—** मत्तत्त्वेति। **विवेकवतो मद्भजनम् , न तु विवेकशून्यस्य सर्वस्यापीत्यर्थः॥ २६॥**

भाष्यार्कप्रकाशः

**भविष्याणीति।** भविष्यन्तीत्यर्थः। **भूतानीति।** प्राणिन इत्यर्थः। **वेद** जानामि; स्वरूपचैतन्येन मायावृत्त्या वेति भावः। सृष्टेः प्रागीश्वरस्य मायावृत्तिरूपेण सद्भावश्रवणात्। मां तु कश्चनाप्यविद्वान् प्राणी **न वेद** न जानाति। अविदुषामीश्वरस्यानात्मत्वेन परोक्षत्वादित्यभिप्रायः।

न च - विद्वानिति किम् , सर्वोऽपि न वेदैवेति - वाच्यम् , सर्वस्याप्यनीश्वरत्वे शास्त्रप्रवृत्त्यनुपपत्तेः। न हीश्वरमविद्वांसः आचार्यव्यासादयः शुकादिभ्यः शिष्येभ्य ईश्वरतत्त्वमुपदिशेयुः। अत एवाह— **मद्भक्तं मच्छरणमेकं मुक्त्वेति।** आत्मभक्त आत्मैकशरणश्च स एक एव मां वेद, तस्यात्मतत्त्वज्ञत्वान्न ह्यात्मतत्त्वज्ञानं विना पुंसामात्मरत्यादिकं भवितुमर्हति। तस्य चात्मज्ञस्येश्वरोऽपरोक्ष एवात्मत्वादीश्वरस्य।

यद्यपि विदुषामिवाविदुषामपीश्वर आत्मैव, तथाप्यविद्वांस ईश्वरमात्मानं न मन्यन्ते, किन्त्वन्यमेवेत्यत उक्तम्— विदुषामात्मैवेश्वरो, न त्वविदुषामिति। अविद्वांसो ह्यनात्मन्यन्तःकरणादावात्मबुद्धिं दधत इति तेषामन्तःकरणादिरेवात्मेति अन्तःकरणादिसङ्घाता एवाविद्वांसः प्राणिनः। विद्वांस्तु आत्मनीश्वरे एवात्मबुद्धिं धत्त इति विदुष ईश्वर एवात्मेति विद्वानात्मैवेश्वरः। न तु कार्यकरणसङ्घातरूपः प्राणी। तथा च विद्वानात्मैव मामात्मानं वेत्ति, न त्वन्यः कोऽपि प्राणीति युक्तमुक्तम्— **मां तु वेद न कश्चनेति।**

सर्वाणि भूतानि अहमेव वेद, मामप्यहमेव वेद, किमपि भूतं मां न वेद, यो विद्वान् मां वेद स विद्वानात्माऽहमेवेति न ममान्यवेद्यत्वसम्भव इति फलितार्थः।

'चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रम्' 'यन्मनसा न मनुते येनाहुर्मनो मतम्' 'विज्ञातारमरे केन विजानीयात्' इति श्रुतिभ्यः ज्ञाताऽऽत्मा केनापि न दृश्यते। दृश्यत्वे सति घटस्येवात्मनो जडत्वमिथ्यात्वादिप्रसक्तेः, दृग्रूपेणात्मना कार्यकरणसङ्घाताद्यात्मकसर्वप्रपञ्चस्य भास्यमानत्वेनैव सर्वस्य दृश्यत्वात्। 'तस्य भासा सर्वमिदं विभाती'ति श्रुतेः। प्रपञ्चावभासकादित्यादिज्योतिषामपि तेनैव भास्यमानत्वात् , तस्य चानन्यभास्यत्वात्। अत एव स्वयञ्ज्योतिष्ट्वप्रसिद्धिः, प्रत्यक्त्वप्रसिद्धिश्च। दीपादिप्रातिलोम्येन सर्वं जगदात्मानं चात्मने भासयतीति प्रत्यक्पदनिरुक्तेर्दर्शितत्वात्। अनन्यभास्यत्वे सति सर्वावभासकत्वस्य स्वयञ्ज्योतिर्लक्षणत्वात् , स्वयञ्ज्योतिषि दीपादौ दर्शितलक्षणसमन्वयात् , अनन्यभास्यत्वे सत्यात्मने सर्वावभासकत्वस्य प्रत्यक्स्वयञ्ज्योतिर्लक्षणत्वात्। अथवा अनन्यभास्यत्वे सति सर्वावभासकत्वमित्येव प्रत्यक्स्वयञ्ज्योतिर्लक्षणम्। दीपादीनां च चक्षुरादिभास्यत्वसत्त्वान्न तत्रातिव्याप्तिर्लक्षणस्य। प्रकृतश्लोकेन च मां तु वेद न कश्चनेत्यनेनानन्यभास्यत्वस्य, अहं सर्वं वेदेत्यनेन सर्वावभासकत्वस्य चोक्तत्वात् प्रत्यक्स्वयञ्ज्योतिर्लक्षणपर एवायं श्लोकः।

**ननु** अनन्यभास्यत्वे सति सर्वावभासकत्वमित्येतदात्मनो लक्षणमसम्भवि, आत्मनि 'दृश्यते त्वग्र्यया बुद्ध्या' इति बुद्धिवेद्यत्वश्रवणादिति चेत् , **मैवम्** ; विचारात्मिकया बुद्ध्या आत्मतत्त्वमीदृशमिति ज्ञानमात्रं जायते, न त्वात्मसाक्षात्कारः, तस्यानन्याधीनत्वादिति। कथमन्यथा 'विज्ञातारमरे केन विजानीयाद्' इत्यादिश्रुतिविरोधनिरासः? **अथवा** जाग्रत्स्वप्नवद् विक्षेपशून्यायां, सुषुप्तिवद् लयशून्यायां च शान्तायामेकाग्रायां बुद्धौ[१] पूर्वोक्तलक्षणः स्वयम्प्रभः आत्मा स्फुरतीति बुद्धिवेद्यत्वोपचारः आत्मनः इति बोध्यम्।

१. असंप्रज्ञातसमाधाविति भावः।

भाष्यार्कप्रकाशः

इदं चैतच्छ्लोकोक्तमनन्यावभास्यत्वे सति सर्वावभासकत्वमात्मनो लक्षणं **द्वैतादिमतेषु न** सिध्यति , भिन्नयोर्जीवेश्वरयोः परस्परवेद्यत्वसत्त्वेनानन्यावभास्यत्वाभावात्। न चेश्वरावभास्यत्वस्य जीवे सत्त्वेन जीवे प्रकृतिलक्षणासम्भवेऽपीश्वरे जीवावभास्यत्वाभावाल्लक्षणसङ्गतिरिति वाच्यम् , 'तमेवं विदित्वाऽतिमृत्युमेती'त्यादिना जीवज्ञेयत्वसत्त्वादीश्वरे। 'यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः' इतीहैवोक्तत्वात्। मुक्तौ जीवानामीश्वरसाक्षात्कारसत्त्वाच्च।

अस्मन्मते त्वात्मन एव वेदितृत्वाद् वेद्यत्वाच्च न लक्षणानुपपत्तिः, आत्मावभास्यत्वस्यान्यावभास्यत्वप्रतियोगित्वात्। आत्मा खल्वन्यप्रतियोगी; न ह्यन्यं यः कोऽप्यात्मत्वेन प्रत्येति। न चैकस्यैव कर्तृकर्मत्वं कथमिति वाच्यम् , मायया तदुपपत्तेः। न चास्त्यन्तर्यामिण ईश्वरस्य जीवानवभास्यत्वमिति वाच्यम् , सुतरामन्तर्यामिण ईश्वरस्य जीवप्रमाऽविषयत्वे अन्तर्यामिण एवासिद्धेः।

'मां तु वेद न कश्चने'त्युक्तम् ; तस्य फलमाह— **मत्तत्त्वेति।** आत्मज्ञानं विना आत्मभजनासम्भवादिति भावः।

**ननु** अयं श्लोक ईश्वरपर एव, सर्वज्ञेश्वरश्रीकृष्णपरमात्मना अहमिति मामिति चोक्तत्वात्। अत एव अतीतानागतवर्तमानसर्वभूतज्ञानरूपसर्वज्ञत्वोपपत्तिरिति चेत् , **नेति** केनोक्तम्? न च प्रत्यगात्मपर इति त्वयोक्तमिति वाच्यम् , प्रत्यगात्मा हीश्वरः। न च - अन्तःकरणावच्छिन्नः प्रत्यगात्मा, मायावच्छिन्नः परमात्मेश्वर इति - वाच्यम् , कृष्णस्यापि तच्छरीरान्तरान्तःकरणावच्छिन्नत्वेन प्रत्यगात्मत्वात्। न हि कृष्णशरीरेऽन्तःकरणाभावः, न वा तदवच्छिन्नप्रत्यगात्माभावः। कथमेवं प्रत्यगात्मनः कृष्णस्यापीश्वरत्वम्? यदि प्रत्यगात्मा जीवः स्यात्। न च - कृष्णशरीरगतान्तःकरणं साक्षान्मायापरिणामत्वान्मायैवेति - वाच्यम् , महत्तत्त्वात्मकस्यास्मदन्तःकरणस्यापि साक्षान्मायापरिणामत्वेन मायात्वापत्तेः। न च शुद्धसत्त्वात्मकत्वात् कृष्णान्तःकरणं मायेति वाच्यम् , योगिचित्तस्यापि शुद्धसत्त्वमयत्वेन मायात्वापत्तेः। न च कृष्णस्य सर्वभूतसाक्षात्काररूपसर्वज्ञत्ववत्त्वादीश्वरत्वमिति वाच्यम् , वसिष्ठादियोगिनामपि जीवानां तद्वत्त्वेनेश्वरत्वापत्तेः। न च योगाद्यजन्यं सर्वज्ञत्वं कृष्णस्यास्तीति कृष्णः सर्वज्ञ ईश्वर इति वाच्यम् , तत्रापि कृष्णशरीरान्तरान्तःकरणावच्छिन्नप्रत्यगात्मन एव सर्वज्ञत्वेनेश्वरत्वात्। आत्माभासवशादेवान्तःकरणस्यापि ज्ञातृत्वलाभात्। न च - यदि कृष्णोऽपि प्रत्यगात्मा अस्मदादिवत् तर्ह्यसर्वज्ञ एव स्यात् ; न हि प्रत्यगात्मनामस्माकं सर्वज्ञत्वमनुभवसिद्धम् ; न ह्यनुभवसिद्धं प्रत्यगात्मनामसार्वज्ञ्यं शास्त्रशतेनापि निराकर्तुं शक्यते; तस्मात् सर्वज्ञः कृष्णः परमात्मैव, न प्रत्यगात्मेति - वाच्यम् , यदि प्रत्यगात्मनां किञ्चिज्ज्ञत्वं स्वाभाविकं स्यात् तर्हि सदैकरूपमेव स्यात् तत्किञ्चिज्ज्ञत्वं; न तु तथा दृश्यते। बालस्याकाराद्यक्षरापरिज्ञानात् , तस्यैव तरुणस्य वेदवेदाङ्गादिवित्त्वात् , तस्यैव वृद्धस्य पुनस्तद्विस्माराच्च। किञ्च सुषुप्तावपि तत् किञ्चिज्ज्ञत्वं दृश्येत, न तु दृश्यते। तस्मादन्तःकरणधर्म एव किञ्चिज्ज्ञत्वम्। अन्तःकरणं च सङ्कोचविकासादिकं प्राप्नोति। लीने चास्मिन्नन्तःकरणे सुषुप्तौ नास्ति किञ्चिज्ज्ञत्वोपलम्भः। एवमन्तःकरणे सति किञ्चिज्ज्ञत्वसत्त्वम् , तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्यां किञ्चिज्ज्ञत्वस्यान्तःकरणधर्मत्वं स्थितम्। यथा किञ्चिज्ज्ञत्वं तथा सर्वज्ञत्वमप्यन्तःकरणधर्म एव। योगाभ्यासादिना योग्यन्तःकरणस्य विकसितस्य सर्वज्ञत्वसम्भवाद् वसिष्ठविश्वामित्राद्यन्तःकरणस्य सर्वज्ञत्वसर्वकर्तृत्वादिश्रवणात्।

अन्तःकरणस्य चायं धर्मः केवलं जडस्य चित्प्रतिबिम्बसम्बन्धकृत एवेति तद्धर्म आरोप्यते चिति— 'सर्वज्ञः आत्मा, किञ्चिज्ज्ञः आत्मा' इति। **वस्तुतस्तु** आत्मनः अन्तःकरणादिसर्वावभासकत्वात् सर्वज्ञत्वम्। सर्वज्ञस्य किञ्चिज्ज्ञस्य वा अन्तःकरणस्य सर्वस्यापि साक्षी खल्वात्मा। तथा च सर्वज्ञान्तःकरणसाक्षित्वात् प्रत्यगात्मनि सर्वज्ञत्वोपचारः, किञ्चिज्ज्ञान्तःकरणसाक्षित्वात् किञ्चिज्ज्ञत्वोपचारश्च।

न चैवमनन्यावभास्यत्वे सति सर्वावभासकत्वलक्षणस्य सर्वज्ञान्तःकरणेऽतिव्याप्तिरिति वाच्यम् , तस्य साक्षिभास्यत्वेनानन्यभास्यत्वाभावात्। [1]सर्वावभासकत्वं स्वतः सर्वावभासकत्वमिति विवक्षितम्। तथा चान्तःकरणस्य चित्प्रतिफलनसामर्थ्यादेव भासकत्वम् , न तु स्वत इति न तत्रातिव्याप्तिरिति वा।

---

१. प्रकारान्तरेण सर्वज्ञान्तःकरणेऽतिव्याप्तिं वारयति—**सर्वेति**। 'न तत्र सूर्यो भाति न चन्द्रतारकम्' इत्यादिना आत्मनि अन्यावभास्यत्वं प्रतिषिध्य, 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति स्वतः सर्वावभासकत्वमात्मन एव श्रुत्योक्तमिति बोध्यम्।

भाष्यार्कप्रकाशः

अनेन च सर्वज्ञान्तःकरणेनात्मनस्तादात्म्याध्यासात् सर्वज्ञः परात्मेति, किञ्चिज्ज्ञान्तःकरणेनात्मनस्तादात्म्याध्यासात् किञ्चिज्ज्ञः प्रत्यगात्मेति च भ्रान्ता व्यवहरन्ति। विवेकिनस्तु आत्मान्तःकरणयोस्तादात्म्याध्यासं निरस्य अन्तःकरणादिसर्वसाक्षित्वेन सर्वावभासकत्वात् प्रत्यगात्मानमेव सर्वज्ञमीश्वरं वदन्तीति स्थितम्।

**नन्वे**वमीश्वरस्य कृष्णस्य स्वाभाविकानवधिकातिशयासङ्ख्येययोगविभववदन्तःकरणत्वात् सर्वज्ञत्वम् , अर्जुनादीनां तु तादृशान्तःकरणराहित्यादसर्वज्ञत्वमितीमं व्यवहारसिद्धमेव जीवेश्वरभेदमाश्रित्य 'अहं सर्वाणि भूतानि वेद, मां तु न कश्चन' इत्युक्तं कृष्णेन; न तु तत्त्वदृष्ट्या, तत्त्वत आत्मनि सर्वभूतज्ञानादिरूपान्तःकरणधर्मसर्वज्ञत्वाभावादिति चेत् , **मैवम्** ; तत्त्वकथनसमये शास्त्रदृष्टेरेव आश्रयणीयत्वेन लोकदृष्टेरनाश्रयणीयत्वात्। तादृशान्तःकरणादिसहितेश्वरस्य साकारस्य रामकृष्णादेः सर्वविदितत्वेन 'मां तु वेद न कश्चन' इति वचनस्यायुक्तत्वात्।

न च प्रत्यगात्मनः परिच्छिन्नस्य सर्वभूतसाक्षात्कारो न सम्भवतीति वाच्यम् , प्रत्यगात्मनः परिच्छिन्नत्वे घटादिवदनित्यत्वप्रसङ्गात्। 'नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः' इति वाक्यविरोधात्। परिपूर्ण एव प्रत्यगात्मा। स च सर्वगतत्वात् सर्वं वेदैव; तदन्यस्य सर्वस्यापि जडत्वात् स एवं सर्वं वेद ; तं तु कोऽपि न वेद तदाभासयुक्तमप्यन्तःकरणं तन्नैव भासयेत्। न हि सूर्यादिप्रतिबिम्बं सूर्यादिकं भासयति। इदं चान्तःकरणगतं वेत्तृत्वं तदन्तर्गतचिदाभासस्यैवेति चिद्धर्म एवायमिति न जडस्यान्तःकरणस्य वेत्तृत्वप्रसङ्गः। तस्मात् स्वतो नास्त्येवान्तःकरणस्य किञ्चिज्ज्ञत्वं, सर्वज्ञत्वं वा जडस्येति सिद्धमात्मन एव सर्वद्रष्टृत्वम्।

'नान्योऽतोऽस्ति द्रष्टा' इति श्रुतिरप्यमुमेवार्थमाह; **अतो**ऽस्मादात्मनः अन्यो द्रष्टा नास्तीति श्रुत्यर्थः। यदि श्रुतिगतस्य **अतः** इत्यस्य जीवोऽर्थः, तर्हि द्रष्टुरीश्वरस्य जीवादन्यस्य सिद्धत्वेन तदपलापः सम्भवति। यदि त्वीश्वरोऽर्थस्तर्हीश्वरादन्यस्य जीवस्य द्रष्टुरपलापः। **अथवा** जीवस्य दृश्यत्वेन जडत्वमनित्यत्वं चेति द्वैतिमते न श्रुत्युपपत्तिः। एवं श्रुतिविरुद्धत्वादेव तार्किकादिद्वैतमतान्यप्रमाणानि। श्रुतेरेव प्रबलप्रमाणत्वात् , तदनुग्रहादेव स्मृतीनां प्रामाण्यात्। एवं प्रत्यगभिन्नपरमात्मन एकस्यैव सर्वद्रष्टृत्वं, तदन्यस्यान्तःकरणादिसर्वप्रपञ्चस्यापि दृश्यत्वमिति सिद्धम्।

न च - भूतानि प्रत्यगात्मानः, अहंशब्दार्थस्तु परमात्मेति - वाच्यम् , कार्यकरणसङ्घाताभिमानिनस्तदात्मकाः साभासबुद्धयः प्राणिनो जीवा एवेह भूतानीति सिद्धान्तात्। भवन्तीति भूतानीति हि व्युत्पत्तिः। प्रत्यगात्मनोऽन्यत् सर्वमपि जगत् कार्यत्वेन भूतशब्दवाच्यं हि। प्रत्यगात्मा तु 'अजो नित्यः' इति मन्त्रात् न कार्यभूतः। स एवेहाहंशब्दार्थः, तदन्यस्य परमात्मनोऽभावात्। स चैक एव, द्रष्ट्रन्तरनिषेधश्रवणात्। स एव सर्वज्ञः, क्षेत्रज्ञत्वात् सर्वस्य च क्षेत्रत्वात्। आभासोऽपि चित्कार्यत्वान्मिथ्यात्वाच्च क्षेत्रमेव बुद्ध्यादिवत्।

आभासः सत्य एव चिद्रूपत्वात् , तस्य च चिद्भेदः कल्पित इति **केचित्।** तन्मते तु आभासोऽपि प्रत्यगात्मैवेति न तस्य क्षेत्रत्वम्। बुद्ध्यादय एव क्षेत्रम्।

न च - चिच्चिदाभासयोः कथं प्रत्यगात्मत्वमिति - वाच्यम् , चिच्चिदाभासभेदस्य कल्पितत्वेन तदभेदस्य सिद्धत्वात्। एकैव चिद् उपाधिवशाद् बिम्बप्रतिबिम्बभावेन दृश्यते। यथा एकमेव मुखं दर्पणोपाधिवशादिति, बिम्बप्रतिबिम्बभावस्यौपाधिकत्वेनातात्त्विकत्वादिति।

अत्र च एकस्मिन्नेवाज्ञाने चित् प्रतिफलति; तत्र बिम्बभूता चिदीश्वरः; प्रतिबिम्बभूता तु जीव इति बिम्बप्रतिबिम्बभावेन जीवेश्वरयोः कल्पितं भेदमाहुः। [१]एकस्मिन्नेवान्तःकरणे चित् प्रतिफलति। तत्र बिम्बभूता चित् कूटस्थः प्रत्यगात्मा, प्रतिबिम्बभूतस्तु जीव इति **केचित्।**

अमुं च बिम्बभूतं प्रत्यगात्मानमीश्वरं वक्ष्यति कृष्ण एव— 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती'ति, प्रत्यग्रूपेण तिष्ठतीति तदर्थात्। सर्वथाऽपि बिम्बचैतन्यमीश्वरः, प्रतिबिम्बचैतन्यं जीवः। (श्लोकः–) 'त्वत्प्रभुजीवप्रियमिच्छसि चेन्नरहरिपूजां कुरु सततं, प्रतिबिम्बालङ्कृतिविधिकुशला बिम्बालङ्कृतिमादधते॥ भवमरुभूमौ विरसायां त्वं चेतोभृङ्ग भ्रमसि वृथा, भज भज श्रीलक्ष्मीनरसिंहा-

१. एकजीववादे एकस्मिन्नेवाज्ञाने चित् प्रतिफलतीति पक्षः प्रसिद्धः। एकस्मिन्नेवान्तःकरणे इति तु चिन्त्यं भाति।

भाष्यार्कप्रकाशः

नघपदसरसिजमकरन्दम्॥' इति **शङ्कराचार्योक्तेश्च**।

अयं च प्रतिबिम्बो जीवः उपाधिभूतबुद्धिधर्मान् कर्तृत्वादीनात्मन्यध्यस्य संसरतीव, यथा सूर्यप्रतिबिम्बस्तज्जलचलनाच्चलतीव। बिम्बस्य तूपाधिसंयोगाभावादुपाधिसंयोगे सति प्रतिबिम्बस्यैवानुदयाद् नोपाधिधर्मसम्बन्धः इति प्रत्यगात्मेश्वरो निर्विकारः। प्रतिबिम्बोऽपि वस्तुतो बिम्बाभिन्नत्वादविकार एव, उपाधितादात्म्यभ्रमात्तु विकारीवेति सिद्धं जीवस्यास्य संसारित्वमीश्वराभेदश्च।

अयं च प्रतिबिम्बः बुद्धितादात्म्याध्यासात् क्षेत्रत्वं, प्रत्यग्बिम्बतादात्म्यात्तु क्षेत्रज्ञत्वं च प्रतिपद्यत इति प्रतिबिम्बस्य भूतत्वेन प्रत्यक्त्वेन च निर्देशः सङ्गच्छते, विवक्षाभेदात्। तथा च यः प्रतिबिम्बः आत्मानं चिद्रूपं वेद स ज्ञानी प्रत्यगात्मैव; यस्तु प्रतिबिम्बः आत्मानं कर्तारं भोक्तारं च वेद बुद्धितादात्म्याध्यासात् सोऽविद्वान् जीव एव, न प्रत्यगात्मा, केवलप्रतिबिम्बस्य जीवत्वाभावेऽपि उपाधिधर्माध्यस्तप्रतिबिम्बस्य संसारित्वेन जीवत्वात्।

अमुमेव जीवेश्वरविभागमाश्रित्य प्रवृत्तोऽयं श्लोकः— **वेदाह**मिति। बिम्बभूतः ईश्वरोऽहं प्रत्यगात्मा सर्वाणि वेद भूतानि। यः प्रतिबिम्बो बिम्बप्रतिबिम्बैक्यरूपं तत्त्वं वेत्ति स च प्रत्यगात्मैवेति सर्वाणि वेद भूतानि, मां च वेद स्वाभिन्नमात्मानम्। यस्तूपाधितादात्म्यमापन्नः प्रतिबिम्बः स सर्वाणि वेद [भूतानि], मां च न वेदेत्यर्थः। यः प्रतिबिम्बः एवं प्रत्यगात्मानं न वेद स किञ्चिज्ज्ञः; यस्तु प्रतिबिम्ब आत्मानं वेद स सर्वज्ञ इति सिद्धं बिम्बस्येव प्रतिबिम्बस्यापि सर्वज्ञत्वम्। बिम्बैक्येऽपीमे प्रतिबिम्बाः अनेका[केऽ]न्तःकरणानामनेकत्वात् , सूर्यैक्येऽपि तत्प्रतिबिम्बानेकत्ववत्। अत एवैकः ईश्वरः, जीवाः अनेके इति व्यवहारः।

**वस्तुतस्तु** बिम्बप्रतिबिम्बैक्याज्जीवेश्वरयोरभेद एव। कृष्णश्च वसिष्ठादिवदस्मदादिवच्च प्रतिबिम्ब एव। परन्तु वसिष्ठादिवद् बिम्बतादात्म्यमापन्नः, न त्वस्मदादिवद् बुद्धितादात्म्यमापन्नः। अत एव बिम्बाभेदमात्मनि सिद्धवत्कृत्य सर्वेश्वरं सर्वज्ञं प्रत्यगात्मानम् 'अह'मित्यात्मत्वेन व्यवहरति। एवं वामदेवोऽपि 'अहं मनुरभव'मित्यादि प्रोवाच। प्रह्लादश्च 'मत्तः सर्वमहं सर्वं मयि सर्वं सनातने' इति।

यस्तु बिम्बभूत ईश्वरः स शुद्धचैतन्यं ब्रह्मैव, तस्य नास्ति वक्तृत्वादिव्यवहारः, शरीराद्यभावात्। परन्तु सर्वं केवलं वेद , चैतन्यरूपत्वात्। 'न तस्य कार्यं करणं च विद्यते' 'स सर्वज्ञः सर्वविदि'ति श्रुतेः। तस्मात् सिद्धं प्रत्यगात्मन ईश्वरस्य सर्वज्ञत्वम् अनन्यवेद्यत्वं च। न च ज्ञानिप्रतिबिम्बजीववेद्यत्वमस्तीति वाच्यम् , तस्य बिम्बानन्यत्वाज्ज्ञानिनः प्रतिबिम्बस्य।

**एतेना**न्तःकरणादौ अहमभिमानी प्रतिबिम्बो जीवः किञ्चिज्ज्ञः परतन्त्रः संसारी, बिम्बस्तु सर्वज्ञ ईश्वरः प्रत्यगात्मेति औपाधिको जीवेश्वरभेदः, तत्प्रयुक्तः सर्वव्यवहारः, वस्तुतो जीवेश्वरैक्याद्द्वैतं चेति सर्वमनवद्यं **सिद्धम्**।

यथा मुखमेव दर्पणवशात् प्रतिमुखत्वेन प्रतीयते, तथा चैतन्यमेवोपाधिवशाज्जीवत्वेन प्रतीयते; न तु वस्तुतो जीवोऽस्ति, यथा प्रतिमुखं वस्तुतो नास्ति। तथा च ब्रह्मैव मायया प्राप्तजीवभावं सत् संसरति, विद्यया च विमुच्यत इव। [१]न तु मायाद्युपाधिषु नीरूपेषु ब्रह्मणो नीरूपस्य कश्चिदस्ति प्रतिबिम्बः, असम्भवात्। तदेवं परमार्थदृष्ट्या जीवस्यैव ब्रह्मत्वाज्जीव एव प्रत्यगात्मा सर्वज्ञश्च। तदन्यत् सर्वं जडं दृश्यं च। अत एवोक्तम्— सर्वमहं वेद , मां तु वेद न कश्चनेति।

य एवमात्मानं न वेद स ब्रह्मापि जीवः किञ्चिज्ज्ञोऽज्ञ एव। स चोपाधिभेदादनेक एव, तस्यैवेह भूतशब्देन ग्रहणम्। अयं हि कार्यकरणसङ्घाते भूतशब्दवाच्येऽहमभिमानी। यश्चैवमात्मानं वेद स जीवोऽपि ब्रह्मैव, तस्य च पूर्णत्वादात्मन एकत्वं ब्रह्मणः। तस्मात् तत्त्वविद्दृष्ट्या एक एवात्मा सर्वज्ञ ईश्वरः। अतत्त्वविद्दृष्ट्या त्वीश्वराद्भिन्ना अनेके जीवाः संसारिणः। तदनुसारेण चायं श्लोकः, तत्त्वविदां सर्वज्ञ आत्माऽन्ये त्वनात्मानो जडाः प्राणिन इति वाक्यार्थम् , अतत्त्वविदां तु सर्वज्ञ ईश्वरो, जीवास्तु किञ्चिज्ज्ञाः, नेश्वरज्ञाः इति वाक्यार्थं [२] च जनयतीति युक्तम्।

यत्तु **रामानुजः**— मां कृष्णं कश्चनापीश्वरमवतीर्णं न वेदेति, **तदसत्** , 'मां न वेदे'त्येव मूले स्थितत्वेन 'ईश्वरमवतीर्ण'मिति

१.बिम्बप्रतिबिम्बभाववाचोयुक्त्या विवक्षितमंशं निरूप्यात्मनो मुख्यं प्रतिबिम्बं निराकरोति—न त्विति। **प्रतिबिम्बत्वं** नाम उपाधिप्रयुक्त-व्याप्यवृत्ति-स्वप्रतियोगिक-भेदवत्त्वेनोपाधिसंसृष्टतया प्रतिभातत्वम्। **बिम्बत्वं** तु तादृशभेदवत्त्वेनोपाध्यसंसृष्टतया प्रतीतत्वम्। (द्र.अद्वैतसिद्धान्तसारसंग्रहःपृ. ३७)। २.वाक्यार्थबोधमित्यर्थः।

**इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत !।**
**सर्वभूतानि संमोहं सर्गे यान्ति परन्तप !॥२७॥**

**केन पुनः मत्तत्त्ववेदनप्रतिबन्धेन प्रतिबद्धानि सन्ति जायमानानि सर्वभूतानि मां न विदन्तीत्यपेक्षायाम् इदमाह—** इच्छेति। इच्छाद्वेषसमुत्थेन **इच्छा च द्वेषश्चेच्छाद्वेषौ, ताभ्यां समुत्तिष्ठतीति इच्छाद्वेषसमुत्थः, तेनेच्छाद्वेषसमुत्थेन। केनेति विशेषापेक्षायामिदमाह—** द्वन्द्वमोहेनेति। **द्वन्द्वनिमित्तो मोहो द्वन्द्वमोहः,** तेन। **तावेव इच्छाद्वेषौ शीतोष्णवत् परस्परविरुद्धौ सुखदुःखतद्धेतुविषयौ यथाकालं सर्वभूतैः सम्बध्यमानौ द्वन्द्वशब्देनाभिधीयेते। तत्र यदेच्छाद्वेषौ सुखदुःखतद्धेतुसम्प्राप्त्या लब्धात्मकौ भवतस्तदा तौ सर्वभूतानां प्रज्ञायाः स्ववशापादनद्वारेण परमार्थात्म-**

आनन्दगिरिकृतव्याख्या

**भगवत्तत्त्वविज्ञानप्रतिबन्धकं मूलाज्ञानातिरिक्तं प्रश्नद्वारेणोदाहरति—** केनेत्यादिना। पुनः**शब्दात् प्रतिबन्धकान्तरविवक्षा गम्यते। अपरोक्षमवान्तरप्रतिबन्धकम्** इदमा **गृह्यते। विशेषमाकाङ्क्षापूर्वकं निक्षिपति—** केनेति विशेषापेक्षायामिति। **द्वन्द्वशब्देन गृहीतयोरपीच्छाद्वेषयोर्ग्रहणं द्वन्द्वशब्दार्थोपलक्षणार्थमित्यभिप्रेत्याह—** तावेवेति। [१]**तयोरपर्यायमेकत्रानुपपत्तिं गृहीत्वा विशिनष्टि—** यथाकालमिति। **न च तयोरनधिकरणं किञ्चिदपि भूतं संसारमण्डले सम्भवतीत्याह—** सर्वभूतैरिति। **तथापि कथं तयोर्मोहहेतुत्वमित्याशङ्क्याह—**

भाष्यार्कप्रकाशः

मूलाद् बहिः कल्पनस्याप्रमाणत्वात्। 'मां कृष्णं न वेदे'ति वर्णनं त्वयुक्तम्, कृष्णस्य सर्वतात्कालिकजनविदितत्वात्॥ २६॥

**इच्छेति।** पूर्वस्मिन् श्लोकभाष्ये 'मद्भक्तं मच्छरणमेकं मुक्त्वा मां कोऽपि न जानाती'त्युक्तम्। तत्र शङ्कते त्वदभक्तानां त्वदशरणानां च कार्यकरणसङ्घाताभिमानिनां जीवानां त्वत्तत्त्ववेदने कः प्रतिबन्ध इति— **केनेत्यादिना।** यद्यपि योगमायाप्रतिबन्ध इति प्रागुक्तम्, तथापि प्रतिबन्धान्तरं पृच्छति— **पुनरिति। जायमानानीति।** [२]कार्यकरणसङ्घाततादात्म्याध्यासाच्छरीरेषु जायमानेषु जीवा अपि जायमाना इव प्रतिभान्तीति भावः। **सर्वभूतानीति** कार्यकरणसङ्घाताभिमानिनश्चिदाभासाः, साभासबुद्धयः इति वा। मामात्मानं न विजानन्ति, शरीरादिकं तेऽपि विजानन्त्येवेति मामित्युक्तम्।

उक्तं हि **भागवते बादरायणेनैव**— '[३]न यस्य सख्यं पुरुषोऽवैति सख्युः सखा वसन् संवसतः पुरेऽस्मिन्। गुणो यथा गुणिनोऽव्यक्तदृष्टेस्तस्मै महेशाय नमस्करोमि॥' इति कार्यकरणसङ्घाताभिमानिनां जीवानामन्तर्यामी सङ्घातप्रवर्तकत्वात् सखा; तस्य च तादृशं सख्यं जीवो न वेत्ति। यथा शरीरादिकं जीवस्येति श्लोकार्थः। तथा च शरीरादिवेत्तृत्वादजडाः जीवाः किमिति स्वमात्मानमेवेश्वरं न जानन्तीत्याक्षेपार्थः।

**इच्छा** इष्टविषयेषु रागः; **द्वेषो**ऽनिष्टविषयेष्वप्रीतिः; **समुत्तिष्ठति** जायते। **द्वन्द्वनिमित्तो** द्वन्द्वजन्यः; द्वन्द्वं निमित्तं यस्य स इति बहुव्रीहिः। इच्छाद्वेषरूपद्वन्द्वनिमित्तमोहेनेत्यर्थः। **तावेव** पूर्वोक्तावेवेत्यर्थः। इच्छाद्वेषसमुत्थेनेत्यत्रोक्तावेवेति यावत्। प्रीतिरूपस्य रागस्य, द्वेषस्य चाप्रीतिरूपस्य परस्परविरोधादाह— **परस्परविरुद्धाविति**। तत्र दृष्टान्तमाह— **शीतोष्णवदिति।** सुखे सुखहेतुस्रग्गन्धादौ चेच्छा जायते, दुःखे दुःखहेतुचोरसर्पादौ च द्वेषो जायते पुंसामिति कृत्वाऽऽह— **सुखदुःखतद्धेतुविषयाविति।** सुखदुःखे तद्धेतू च विषयावाश्रयौ ययोस्तौ तथोक्तौ। कालमनतिक्रम्य **यथाकालम्।** कालश्च कर्माधीन इति बोध्यम्। यस्य प्राणिनः यस्मिन् काले यथाप्रारब्धं यत्रेच्छा यत्र वा द्वेषो भवितव्यः[४], तस्य तस्मिन् काले तत्तद्विषये रागो द्वेषो वा भवतीत्यर्थः। **तत्र** एवं स्थिते इत्यर्थः। **यदा** यस्मिन् काले **लब्धात्मकौ** लब्धसत्ताकौ भवतः, उत्पद्येते इत्यर्थः। तदा तौ सर्वभूतानां मोहं जनयतः इत्यन्वयः। तत्र द्वारमाह— **प्रज्ञाया इति**। बुद्धिं रागद्वेषवशां विधायेत्यर्थः। मोहं विशिनष्टि— **परमार्थेति।** परमार्थः सत्यः आत्मा, तद्विषयस्य ज्ञानस्योत्पत्तेः

१. **तयोः** इच्छाद्वेषयोः **अपर्यायं** यौगपद्येन। २. जीवानामौपाधिकं जायमानत्वं दर्शयति—कार्येति। ३. 'पुरुषो वै विसख्युः' इति रा.पुस्तके मु.पा.। ४. यत्रेच्छया यत्र वा द्वेषेण भवितव्यमिति पठितुं युक्तम्। कर्मानुरोधिनि रागद्वेषोत्पत्तियोग्यकाले इति यावत्।

## येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम्।

**तत्त्वविषयज्ञानोत्पत्तिप्रतिबन्धकारणं मोहं जनयतः। न हीच्छाद्वेषदोषवशीकृतचित्तस्य यथाभूतार्थविषयज्ञानमुत्पद्यते बहिरपि। किमु वक्तव्यं ताभ्यामाविष्टबुद्धेः सम्मूढस्य प्रत्यगात्मनि बहुप्रतिबन्धे ज्ञानं नोत्पद्यत इति। अतस्तेनेच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन,** भारत! **भरतान्वयज, सर्वभूतानि सम्मोहितानि सन्ति** सम्मोहं **सम्मूढतां** सर्गे **जन्मनि उत्पत्तिकाल इत्येतत्** ; यान्ति **गच्छन्ति, हे परन्तप ! मोहवशान्येव सर्वभूतानि जायमानानि जायन्त इत्यभिप्रायः। यत एवम् , अतस्तेन द्वन्द्वमोहेन प्रतिबद्धप्रज्ञानानि सर्वभूतानि सम्मोहितानि मामात्मभूतं न जानन्ति। अत एवात्मभावेन मां न भजन्ते॥ २७॥**

**के पुनरनेन द्वन्द्वमोहेन निर्मुक्ताः सन्तस्त्वां विदित्वा यथाशास्त्रमात्मभावेन भजन्त इत्यपेक्षितमर्थं दर्शयितु-**

आनन्दगिरिकृतव्याख्या

तत्रेति। **तयोराश्रयः सप्तम्यर्थः। उक्तमेवार्थं कैमुतिकन्यायेन प्रपञ्चयति—** न हीति। **पूर्वभागानुवादपूर्वकमुत्तरभागेन फलितमाह—** अत इति। **प्रत्यगात्मन्यहङ्कारादिप्रतिबन्धप्रभावतो ज्ञानोत्पत्तेरसम्भवोऽतःशब्दार्थः। कुलप्रसूत्यभिमानेन स्वरूपशक्त्या च युक्तस्यैव यथोक्तप्रतिबन्धप्रतिविघातसामर्थ्यमिति द्योतनार्थम्— 'भारत, परन्तपे'ति सम्बोधनद्वयम्। तत्त्वज्ञानप्रतिबन्धे प्रकृतमवान्तरकारणमुपसंहरति—** मोहेति। **जायमानभूतानां मोहपरतन्त्रत्वे फलितमाह—** यत इति। **भगवत्तत्त्ववेदनाभावे तन्निष्ठत्ववैधुर्यं फलतीत्याह—** अत एवेति॥ **२७॥**

**यदि सर्वाणि भूतानि जन्म प्रतिपद्यमानानि सम्मूढानि सन्ति भगवत्तत्त्वपरिज्ञानशून्यानि भगवद्भजनपराङ्मुखानि, तर्हि शास्त्रानुरोधेन भगवद्भजनमुच्यमानमधिकार्यभावादनर्थकमापद्येतेति शङ्कते—** के पुनरिति। **अनेकेषु जन्मसु सुकृतवशादपाकृतदुरितानां**

भाष्यार्कप्रकाशः

प्रतिबन्धकारणम्[1]। न तूत्पन्नज्ञानप्रतिबन्धको मोहः, किन्तु ज्ञानोत्पत्तेरेव प्रतिबन्धक इत्यर्थः। तदेव विशदयति— **न हीत्यादिना।** इच्छाद्वेषरूपदोषपरवशीकृतचित्तस्य बहिरपि भूतार्थविषयं ज्ञानं नोत्पद्यते हि। **भूतार्थाः** सिद्धार्थाः स्त्र्यादयः। सुभगायामपि स्त्रियां द्वेषे सति सुभगत्वज्ञानानुदयात्। दुर्भगायामपि रागे सति सुभगत्वज्ञानोदयाच्चेति भावः। बहिरपीत्यपिशब्दार्थमाह— **किम्विति।** बहवः प्रतिबन्धा यस्मिन् तस्मिन् बहुप्रतिबन्धे। बहुप्रतिबन्धे सतीति वा, प्रत्यगात्मविषयं ज्ञानम्। मूढस्य यथावस्थितबाह्यविषयज्ञानस्यैवानुदये यथावस्थितान्तरप्रत्यगात्मविषयज्ञानस्यानुदयः किं पुनर्वक्तव्य इत्यर्थः। सम्मोहं यान्तीत्यस्यार्थमाह— **सम्मोहितानि सन्तीति।** सम्यङ्मोहितानि भवन्ति। कदा यान्तीत्यत आह— **सर्ग एवेति।** मोहितान्येव जायन्ते, न तु जन्मानन्तरं मोहं यान्तीत्याह— **मोहवशान्येवेति।** अतिबालस्यापि मात्रादौ रागस्यान्यत्रारागस्य च दर्शनादिति भावः। **प्रज्ञानम्** आत्मज्ञानम्। मोहस्य कार्यमाह— **मां न जानन्तीति। आत्मभावेन** आत्मेति बुद्ध्या। केचिन्मूढा आत्मनोऽन्य ईश्वर इति दार्वादिरूपमीश्वरं भजन्ते, केचिदतिमूढा नास्तिका नैवेश्वरं भजन्त इत्यत उक्तम्— **आत्मभावेनेति।**

हे भारत! हे परन्तप! सर्वभूतानि इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन सर्गे सम्मोहं यान्तीत्यन्वयः। रागद्वेषपरवशचित्तः पुमान् सर्वदाऽपीष्टवस्तुसिद्धयेऽनिष्टवस्तुनाशाय च यतमानः, इष्टविषयप्राप्तिमनिष्टविषयनाशं च पुरुषार्थं मन्यमानः, तदुभयमेव कामयमानः, आत्मानात्मविवेकशून्यं कार्यकरणसङ्घाततादात्म्याभिमानेन मोहेनात्मानं कर्तारं भोक्तारं च मन्यमानः नात्मानमीश्वरं जानातीतीच्छाद्वेषरूपद्वन्द्वमोह एवात्मज्ञाने प्रतिबन्धः। तन्नाशाय च रागद्वेषौ न कर्तव्यौ साधकेनेति प्रागेव प्रतिपादितम् , सूचितं चानेन ॥ २७॥

**येषामिति।** पुण्यकर्मणां येषां जनानां तु पापमन्तगतं ते द्वन्द्वमोहनिर्मुक्ता दृढव्रताःसन्तः मां भजन्ते। अन्तं नाशं गतमन्तगतं

१. मोहः इति शेषः। उत्पन्ने तु तत्त्वज्ञाने निवर्तत एव मोह इति नोत्पन्नज्ञानप्रतिबन्धको मोहः इति भावः। ननूत्पत्तिप्रतिबन्धके तस्मिन् सति कथं ज्ञानोत्पत्तिरिति चेत् , उच्यते— विवेकवैराग्ययोः उत्तेजकत्वेन तत्सत्त्वे मोहस्य प्रतिबन्धाक्षमत्वादिति।

**ते द्वन्द्वमोहनिर्मुक्ताः भजन्ते मां दृढव्रताः॥२८॥**
**जरामरणमोक्षाय मामाश्रित्य यतन्ति ये।**
**ते ब्रह्म तद् विदुः कृत्स्नमध्यात्मं कर्म चाखिलम्॥२९॥**

**मुच्यते—** येषामिति। **येषां** तु **पुनः** अन्तगतं **समाप्तप्रायं क्षीणं पापं जनानां** पुण्यकर्मणां **पुण्यं कर्म येषां सत्त्वशुद्धिकारणं विद्यते ते पुण्यकर्माणस्तेषां पुण्यकर्मणाम्, ते** द्वन्द्वमोहनिर्मुक्ताः **यथोक्तेन द्वन्द्वमोहेन निर्मुक्ता भजन्ते** मां **परमात्मानं दृढव्रताः। एवमेव परमार्थतत्त्वं नान्यथेत्येवं सर्वपरित्यागव्रतेन निश्चितविज्ञानाः** दृढव्रता **उच्यन्ते॥२८॥**

**ते किमर्थं भजन्त इत्युच्यते—** जरेति। जरामरणमोक्षाय **जरामरणयोर्मोक्षार्थं मां परमेश्वरमाश्रित्य मत्समा-**

आनन्दगिरिकृतव्याख्या

**द्वन्द्वप्रयुक्तमोहविरहिणां ब्रह्मचर्यादिनियमवतां भगवद्भजनाधिकारित्वान्न शास्त्रविरोधोऽस्तीति परिहरति—** उच्यत इति। **तुशब्दद्योत्यमर्थमाह—** पुनरिति। [१]**मुक्तेरर्वात्त्वसिद्ध्यर्थं** समाप्तप्रायमित्युक्तम्। **प्रकृतोपयोगं पुण्यस्य कर्मणो दर्शयितुं विशिनष्टि—** सत्त्वेति। [२]**उभयविधशुद्धेर्द्वन्द्वनिमित्तमोहनिवृत्तिं फलमाह—** ते द्वन्द्वेति। **मोहनिवृत्तेर्भगवन्निष्ठापर्यन्तत्वमाह—** भजन्त **इति। तेषां नानापरिग्रहवतां भगवद्भजनप्रतिहतिमाशङ्क्याह—** दृढेति॥२८॥

**यथोक्तानामधिकारिणां भगवद्भजनफलं प्रश्नद्वारा दर्शयति—** ते किमर्थमिति। **जरामरणादिलक्षणो यो बन्धः तद्विश्लेषार्थं भगवद्भजनमित्यर्थः। सम्प्रति सगुणस्य सप्रपञ्चस्य मध्यमानुग्रहार्थं ध्येयत्वमाह—** मामाश्रित्येति। **जरादिसंसारनिवृत्त्यर्थं निर्गुणं निष्प्रपञ्चं मामुत्तमाधिकारिणो जानन्तीत्युक्तं 'मामेव ये प्रपद्यन्ते' इत्यादावित्याह—** जरेति। **मध्यमानधिकारिणः प्रत्याह—** मामिति।

भाष्यार्कप्रकाशः

'तद्विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैती'ति श्रुत्या मुक्तिदशायामेव पुण्यपापयोः सर्वात्मना क्षय इत्यभिप्रेत्याह— **समाप्तप्रायमिति। यद्वा** मनुष्यजन्महेतुभूतमिश्रकर्मणः प्रारब्धस्य यावद्देहपातमक्षीणत्वेऽपि तदन्यत् सर्वं पापं क्षीणमित्याह— **क्षीणं पापमिति।** देवपूजादिष्विवात्र व्रताभावात् कथं दृढव्रतत्वम्? अत आह— **निश्चितविज्ञाना इति।** दृढं निश्चितं व्रतं ज्ञानं येषां ते। व्रततेर्गत्यर्थत्वात् ज्ञानार्थत्वम्। ज्ञानस्याकारं दर्शयति— **एवमेवेति।** सच्चिदानन्दलक्षणमेवेत्यर्थः। **परमार्थतत्त्वम्** आत्मतत्त्वम्। एवकारार्थमाह— **नान्यथेति।**

जन्मान्तरकृताद् इह जन्मनि कृताद्वा निष्कामकर्मणः यज्ञादिरूपाद् योगादिरूपाद्वा पुण्यशब्दिताच्चित्तशुद्धौ सत्यां रागादिदोषाः चित्ते पदं न लभन्ते; प्रत्युत चित्तादपयान्ति; ततश्चापैति मोहः; नष्टे च मोहे आत्मानात्मविवेको जायते; तत आत्मानं साक्षात्कृत्य तमेव भजन्ते, तत्रैव रमन्ते च जीवा इत्यर्थः॥२८॥

**जरेति।** एवमात्मभजनस्य मोक्ष एव फलमित्याह— **जरेति। जरामरणयोः [इति।]** उपलक्षणमिदं जन्मादिविकाराणाम्। **मोक्षः** त्यागस्तस्मै। मयीश्वरे आत्मनि सम्यगाहितं स्थापितं चित्तं येषां ते मत्समाहितचित्ताः, प्रयतन्ते आत्मभजनरूपं प्रयत्नं कुर्वन्ति। तद्विदुरिति तच्छब्दाद् यच्छब्दलाभ इत्यभिप्रेत्याह— **यत्परं ब्रह्म तद्विदुरिति।** ब्रह्मशब्दस्य प्रकृत्यादिपरत्वभ्रमव्युदासायाह भाष्यकारः— **परं ब्रह्मेति।** परं सर्वजगद्विलक्षणं सर्वोत्कृष्टं वा। **अध्यात्मम्** आत्मनीति विभक्त्यर्थेऽव्ययीभावः। सप्तम्यास्तु विषयत्वमर्थ इत्याह— **प्रत्यगात्मविषयमिति।** किं तदात्मविषयं कृत्स्नं यद्विदुरित्युच्यते? अत आह— **वस्त्विति।** तत्त्वमित्यर्थः। सच्चिदानन्दरूपं सर्वज्ञत्वसर्वान्तरत्वादिरूपं वा। **कर्म** यज्ञादिलक्षणम्। एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय श्रुत्या ब्रह्मणि विज्ञाते सर्वं विज्ञातं भवतीत्युक्तत्वात्, आत्मनश्च ब्रह्माभिन्नत्वात्, सर्वस्य च ब्रह्मकार्यत्वादात्मज्ञानाद् ब्रह्मज्ञानं सर्वज्ञानं च सम्भवति। जरामरणमोक्षश्च

१. 'उक्तार्थमात्रसिद्ध्यर्थं' इति पा। २. पापनिवृत्त्या पुण्यप्राप्त्या चेत्युभयविधा शुद्धिः।

## साधिभूताधिदैवं मां साधियज्ञं च ये विदुः।

**हितचित्ताः सन्तो** यतन्ति **प्रयतन्ते ये, ते यद् ब्रह्म परं तद् विदुः** कृत्स्नं **समस्तम्** अध्यात्मं **प्रत्यगात्मविषयं वस्तु तद् विदुः, कर्म च** अखिलं **समस्तं विदुः**॥२९॥

साधीति। साधिभूताधिदैवम् **अधिभूतं चाधिदैवं चातिभूताधिदैवम्, [१]सह अधिभूताधिदैवेन वर्तते इति साधि-**

आनन्दगिरिकृतव्याख्या

**परमेश्वराश्रयणं नाम विषयविमुखत्वेन भगवदेकनिष्ठत्वमित्याह—** मत्समाहितेति। प्रयतनं **भगवन्निष्ठासिद्ध्यर्थं बहिरङ्गाणां यज्ञादीनाम्, अन्तरङ्गाणां च श्रवणादीनामनुष्ठानम्। प्रागुक्तं जगदुपादानं परं ब्रह्म। कथं ब्रह्म विदुरित्यपेक्षायां समस्ताध्यात्मवस्तुत्वेन सकलकर्मत्वेन च तद् विदुरित्याह—** कृत्स्नमिति॥२९॥

**न केवलं भगवन्निष्ठानां [२]सर्वाध्यात्मकर्मात्मकब्रह्मवित्त्वमेव, किन्त्वधिभूतादिसहितं तद्वेदित्वमपि सिध्यतीत्याह—** साधिभूतेति।

भाष्यार्कप्रकाशः

पुरुषार्थः सिध्यतीत्यर्थः।

**नन्वा**त्मविदामपि शुकादीनां मरणश्रवणाद् वसिष्ठादीनां च जरादर्शनात् कथं जरामरणमोक्षः? स ह्यमृतपानविष्ण्वादिवरदान-प्रयुक्त एव देवानाम्, विभीषणमार्कण्डेयादीनां च जरामरणराहित्यदर्शनात् पुराणेष्विति चेत्, **मैवम्**; देवादीनामपि ब्रह्मदिनप्रलये मरणसद्भावान्नामृतपानादिना मरणाभावः। परन्तु जरामरणधर्मवद्देहतादात्म्याभावादेव। न ह्यात्मनोऽजस्य नित्यस्याविकारस्य जन्मादिसम्भवः, येनात्मविदो जराद्यापत्तिः। आत्मविद्धि आत्मा। 'ब्रह्मविद् ब्रह्मैव भवती'ति श्रुतेः, भविष्यतीत्यनुक्त्वा भवतीति वर्तमाननिर्देशाच्च। यस्तु शुकादीनां देहत्यागः स ह्यज्ञदृष्ट्यैव कल्पितः। यद्यात्मनः पूर्णस्यासङ्गस्य शरीरसंयोगोऽस्ति, तर्हीदानीं तद्वियोगो भवतु, न तु सोऽस्ति, विरोधात्। तस्माल्लोकदृष्ट्यैव शुकादीनां मुक्तिरपि। उक्तं हि प्रागेव बन्धमुक्त्यादिसर्वव्यवहारः आध्यासिक इति। इह त्वात्मविद आत्मज्ञानाज्जरामरणादिविकारवदनात्मतादात्म्याध्यासनिवृत्तिरेवोच्यते, न तु मोक्षः। आत्मनो नित्यमुक्तत्वात्।

**अथवा** ज्ञानिनोऽपि प्रारब्धदेहधर्माणां जरामरणादीनामनुभवस्यावर्जनीयत्वादेतद्देहपरित्यागानन्तरमज्ञस्येव पुनर्देहसम्बन्धा-भावान्नास्ति पुनर्जरामरणप्रसक्तिरित्यभिप्रेत्योक्तम्— **जरामरणमोक्षार्थमिति।** पुनर्जन्मनिवृत्त्यर्थमिति यावत्।

न च - 'तत्त्वविदः प्राणा नोत्क्रामन्ती'ति श्रुतेः, प्राणोत्क्रमणस्यैव मरणत्वात्, कथं ज्ञानिनो मरणमिति - वाच्यम्, प्राणोत्क्रमणाभावेऽपि प्राणत्यागोऽस्त्येव, तत्त्ववित्प्राणादीनां वाय्वादिषु लयश्रवणात्। 'मृङ् प्राणत्यागे' इति मरणं वा प्राणत्यागः। न चैवमज्ञस्य सप्राणस्यैव लोकान्तरगमनात् कथं मरणमिति वाच्यम्, शरीरात्माभिमानिनोऽज्ञस्य शरीरप्राणवियोगरूपप्राणत्याग-सद्भावात्। **यद्वा** जरेत्युपलक्षणं रोगादीनाम्; जरारोगादिप्रयुक्तस्य प्राणोत्क्रमणलक्षणस्य मरणस्य मोक्षार्थमित्यर्थः। तत्त्वविद एव हि प्राणोत्क्रमणासम्भवः। परिपूर्णस्य तस्य लोकान्तरगमनासम्भवात्। तस्मादात्मभजनस्य जरामरणमोक्षः, परब्रह्मादिज्ञानं च फलम्॥२९॥

**साधिभूतेति।** ये मद्भक्ता अधिभूताधिदैवाधियज्ञसहितं मां विदुः, ते युक्तचेतसः, प्रयाणकालेऽपि मां विदुश्च, जीवद्दशायां दृढाभ्यासविषयस्यैव वस्तुनो मरणकालेऽपि स्मरणसम्भवात्। तथा च 'याऽन्ते मतिः सा गति'रिति न्यायेनान्ते नारायणस्मरणसिद्ध्यर्थं जीवद्दशायां नारायणभजनमवश्यं कर्तव्यं विषयेषु सङ्गं त्यक्त्वा मुमुक्षुभिः। भरतो हि मृगसङ्गेनान्ते मृगं स्मरन् न मुक्तिं ययौ, अपि तु मृगजन्मैव। अतः परब्रह्मसायुज्यायान्ते नारायणस्मरणमावश्यकं पुंसाम्। तच्च नारायणस्मरणं नारायणनामोच्चारणमात्रं न, किं तर्हि? प्रत्यगात्मनो नारायणस्य यत्तत्त्वं सच्चिदानन्दलक्षणं तस्य स्मरणं सच्चिदानन्दं ब्रह्माहमस्मीति। तच्च विषयेषु रागद्वेषौ विहाय

१. 'तेन सह' इति पा.। २. 'सर्वाध्यात्मिक' इति पा.।

**प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥ ३० ॥**

**इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे**
**ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः ॥ ७ ॥**

**भूताधिदैवं च मां ये विदुः**, साधियज्ञं च **सहाधियज्ञेन साधियज्ञं ये विदुः**, प्रयाणकालेऽपि **मरणकालेऽपि च ते मां विदुः** युक्तचेतसः **समाहितचित्ताः इति ॥ ३० ॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ**
**श्रीमद्भगवद्गीताभाष्ये ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः ॥ ७ ॥**

आनन्दगिरिकृतव्याख्या

**अध्यात्मं, कर्म, अधिभूतम्, अधिदैवम्, अधियज्ञश्चेति पञ्चकमेतद् ब्रह्म ये विदुस्तेषां यथोक्तज्ञानवतां समाहितचेतसामापदवस्थायामपि भगवत्तत्त्वज्ञानमप्रतिहतं तिष्ठतीत्याह—** प्रयाणेति। अपिचेति **निपाताभ्यां तस्यामवस्थायां करणग्रामस्य व्यग्रतया ज्ञानासम्भवेऽपि मयि समाहितचित्तानामुक्तज्ञानवतां भगवत्तत्त्वज्ञानमयत्नलभ्यमिति द्योत्यते।**

[1]**तदनेन सप्तमेनोत्तममधिकारिणं प्रति ज्ञेयं निरूपयता तदर्थमेव सर्वात्मकत्वादिकमुपदिशता प्रकृतिद्वयद्वारेण** [2]**सर्वकारणत्वादिति च वदता तत्पदवाच्यं तल्लक्ष्यं चोपक्षिप्तम् ॥ ३० ॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते**
**श्रीमद्भगवद्गीताशांकरभाष्यव्याख्याने सप्तमोऽध्यायः ॥ ७ ॥**

भाष्यार्कप्रकाशः

प्रत्यगात्मनि मनसः समर्पणं विना न सम्भवतीत्यभिप्रेत्याह— **युक्तचेतस इति।**

येषां तु सन्निपातादिना मरणकाले चित्तसमाधानं दुर्लभम्, ते हि पुनर्जन्म प्रतिपद्य पूर्वाभ्यासवशेन पुनरात्मभजने यतन्ते। सर्वथाऽप्यन्ते नारायणस्मरणं विना न मुक्तिरिति स्थितम्।

'काश्यां तु मरणान्मुक्ति'रिति तु काश्यामन्तकाले शङ्करेण तारकमन्त्रे उपदिष्टे सति पुनर्जन्मनि तारकोपासनपूर्वकमात्मज्ञानं लब्ध्वा मुच्यते जन्तुरित्यभिप्रायगर्भं वाक्यम्। न च ज्ञानान्मुक्तिरिति श्रुतिविरोधः, अन्तकालोपलक्षितज्ञानान्मुक्तिरिति तदर्थात्। ज्ञानाज्जीवन्मुक्तिरिति वा।

**वस्तुतस्तु** नित्यमुक्तस्यात्मनो न कोऽपि बन्धो मोक्षो वा। ज्ञानी त्वात्मैवेति न तस्यान्तकाले जीवद्दशायां वा किञ्चिदात्मस्मरणादिकं मुक्तये कर्तव्यमस्ति, ज्ञानादेव कृतकृत्यत्वात्। येषां तु नास्ति तादृशं निश्चयज्ञानं तेषामन्तकाले नारायणस्मरणं कर्तव्यमिति बोध्यम् ॥ ३० ॥

**इति श्रीबेल्लङ्कोण्डोपनामकरामकविकृते श्रीमच्छङ्करभगवद्गीताभाष्यार्कप्रकाशे**
**ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः ॥ ७ ॥**

---

१. अध्यायतात्पर्यं संगृह्णाति—तदनेनेति। २. 'सर्वकारणत्वादि च' इति पाठः स्यात्।

DO NOT PRINT THIS PAGE

ॐ श्रीपरमात्मने नमः

# ॥ अथाष्टमोऽध्यायः ॥

**अर्जुन उवाच—**

**किं तद् ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम !।**
**अधिभूतं च किं प्रोक्तम् अधिदैवं किमुच्यते ॥ १ ॥**
**अधियज्ञः कथं कोऽत्र देहेऽस्मिन् मधुसूदन !।**
**प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥ २ ॥**

**'ते ब्रह्म तद् विदुः कृत्स्नम्' (भ.गी.७.२९) इत्यादिना भगवताऽर्जुनस्य प्रश्नबीजान्युपदिष्टानि। अतः तत्प्रश्नार्थम् अर्जुन उवाच—** किं तद् ब्रह्मेति॥ १,२॥

**आनन्दगिरिकृतव्याख्या**

**सप्तमाध्यायान्ते 'येषां त्वन्तगतं पापम्' इत्यादिना येषां ब्रह्मादीनाम् अनुसन्धानमुक्तम् , यच्च प्रयाणकाले भगवतः स्मरणं दर्शितम् , तदिदं जिज्ञासमानः सन् पृच्छतीति प्रश्नसमुदायमवतारयति—** ते ब्रह्मेति। प्रश्नबीजानि **तद्विषयभूतानि ब्रह्मादीनि वस्तूनीति यावत्। बुभुत्सितविषयप्रतिलम्भानन्तरं तेषां प्रश्नद्वारा निर्णयार्थम्** [१]**इत्याह—**अत इति। **यदुक्तं 'ते ब्रह्म तद् विदु'रिति, तत् किं सोपाधिकं, निरुपाधिकं वा? ब्रह्मशब्दस्योभयत्रापि सम्भवादिति मत्वाऽऽह—**किं तदिति। **यच्चोक्तं 'कृत्स्नमध्यात्म'मिति तत्रात्मानं देहमधिकृत्य तस्मिन्नधिष्ठाने तिष्ठतीत्यध्यात्मशब्देन श्रोत्रादिकरणग्रामो वा, प्रत्यग्भूतं ब्रह्मैव वा विवक्षितमित्याह—**किमध्यात्ममिति। **'विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपि च।' इति श्रुतौ कर्मणो** [२]**द्वैविध्यनिर्धारणात् 'कर्म चाखिल'मित्यत्र कीदृक् कर्म गृहीतमिति पृच्छति—**किमिति। [३]**क्षराक्षराभ्यां कार्यकारणाभ्यामतीतस्य भगवतो न किञ्चिदवेद्यमस्तीति सूचयति—**पुरुषोत्तमेति। **'साधिभूताधिदैव'मित्यत्राधिभूतशब्देन पृथिव्यादिषु भूतेषु वर्तमानं किञ्चिदेव गृह्यते, किंवा समस्तमेव कार्यमिति निर्दिधारयिषया पृच्छति—**अधिभूतमिति। **अधिदैवमिति च दैवतविषयमनुध्यानं वा, दैवतेष्वादित्यमण्डलादिषु वर्तमानं चैतन्यं वा जिघृक्षितमिति प्रश्नान्तरं प्रस्तौति—**अधिदैवमिति॥ १॥

**'साधियज्ञं चे'त्यत्राधियज्ञशब्देन** [४]**'यज्ञमधिगतो विज्ञानात्मा वा, परदेवता वेति प्रश्नान्तरं प्रकरोति—**अधियज्ञ इति। **स च** कथं **केन प्रकारेण ब्रह्मत्वेन चिन्तनीयः, किं तादात्म्येन, किं वाऽत्यन्ताभेदेनेत्याह—**कथमिति। **सर्वथाऽपि स किमस्मिन् देहे वर्तते, ततो बहिर्वा? देहे चेत् , स कोऽत्र? बुद्ध्यादिस्तद्व्यतिरिक्तो वेति जिज्ञासया ब्रूते—**कोऽत्रेति। [५] **'अधियज्ञः कथं कोऽत्रे'ति न प्रश्नभेदकः[भेदः,] कथमिति तु प्रकारभेदविवक्षयेति द्रष्टव्यम्। यत्तु समाहितचित्तानामुक्तं**[६] **तत्प्रयाणकालेऽपि भगवदनुसन्धानं सिध्यतीति, तदयुक्तम् , उत्क्रमणदशायां करणग्रामवैयग्र्याच्चित्तसमाधानानुपपत्तेरित्यभिप्रेत्याह—**प्रयाणेति॥ २॥

**भाष्यार्कप्रकाशः**

हे पुरुषोत्तम! यद् आत्मभक्ता विदुरित्युक्तम् , तद् ब्रह्म किम्? [अध्यात्मं किम्?] तत् कर्म किम्? अधिभूतं किं प्रोक्तं शास्त्रज्ञैः? अधिदैवं च किमुच्यते? (अधिभूतं किम्? अधिदैवं च किमित्यर्थः।) किं किं वस्तु ब्रह्माध्यात्मादिशब्दैरुच्यत इत्यर्थः॥ १॥

**अधियज्ञ इति।** हे मधुसूदन! अस्मिन् देहे कोऽधियज्ञः? **कथं** चिन्तनीय इति शेषः। प्रयाणकाले च त्वं नियतात्मभिः कथं ज्ञेयोऽसि?॥ २॥

---

१. 'आह' इति पा.। २. वैदिकत्वेन लौकिकत्वेन च कर्मणो द्वैविध्यम्। ३. 'यस्मात् क्षरमतीतोऽहम्' (भ.गी.१५-१८) इति श्लोकानुसारेण पुरुषोत्तमशब्दार्थमाह—**क्षरेति।** ४. 'यज्ञमधिकृतो' इति पा.। ५. किंशब्दद्वयश्रवणेऽपि प्रश्नद्वयं नेह विवक्षितम् , किन्तु कथमिति प्रकारः, कः इति स्वरूपं चैकस्यैव प्रश्नस्य विषयः इति भावः। ६. सिध्यतीत्युक्तम् इत्यन्वयः।

**श्रीभगवानुवाच—**

**अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।**
**भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः॥ ३॥**

**एषां प्रश्नानां यथाक्रमं निर्णयाय श्रीभगवानुवाच—** अक्षरमिति। अक्षरं **न क्षरतीति अक्षरं** [१]**पर आत्मा, 'एतस्य वा अक्षरस्य प्रशासने गार्गि' (बृ.उ.३.८.९) इति श्रुतेः। ओङ्कारस्य च 'ओमित्येकाक्षरं ब्रह्म'(भ.गी.८.१३) इति** [२]**परेण विशेषणाद् अग्रहणम्। परममिति च निरतिशये ब्रह्मण्यक्षरे उपपन्नतरं विशेषणम्। तस्यैव परस्य ब्रह्मणः**

### अनुभूतिस्वरूपाचार्यविरचितटिप्पणम्

नन्वक्षरशब्दस्य वर्णे रूढत्वाद् ओङ्कारः कस्मान्न गृह्यत इत्याशङ्क्याह— **ओङ्कारस्य चेति**। परेण ग्रन्थेनोङ्कारस्य ब्रह्मप्रतीकत्वेन विशेषितत्वाद् नोपक्रमो[मे]ऽप्योङ्कारो ब्रह्मेत्यर्थः। **परम**मिति निरतिशयत्वमुच्यते।[तच्च] देशतश्च कालतश्च वस्तुतश्चानवच्छिन्नत्वं नोङ्कारस्य सम्भवतीत्याह— **परममिति**। प्रतिबिम्बस्य बिम्बात्मकत्वाद् जीवाख्यं चित्प्रतिबिम्बमपि

### आनन्दगिरिकृतव्याख्या

**व्याख्यातप्रश्नसप्तकस्य प्रतिवचनं भागवतमवतारयति—**एषामिति। **क्रमेण कृतानां प्रश्नानां क्रमेणैव प्रतिवचने प्रष्टुरभीष्ट-प्रतिपत्तिसौकर्यं सिध्यतीति बुध्यमानो विशिनष्टि—**यथाक्रममिति। **तत्र प्रश्नत्रयं निर्णेतुं भगवद्वचनमुदाहरति—**अक्षरमिति। **'किं तद् ब्रह्मे'ति प्रश्नस्य प्रतिवचनम्—**अक्षरं ब्रह्म परममिति। **तत्राक्षरशब्दस्य निरुपाधिके परस्मिन्नात्मनि अविनाशित्वव्याप्तिमत्त्व**[३]**सम्बन्धात् प्रवृत्तिं व्युत्पादयति—**अक्षरमित्यादिना। **कथं पुनरक्षरशब्दस्य यथोक्ते परमात्मनि वृद्धप्रयोगमन्तरेण व्युत्पत्त्या प्रवृत्तिराश्रीयते, व्युत्पत्ते-रर्थान्तरेऽपि सम्भवादित्याशङ्क्य द्यावापृथिव्यादिविषयनिरङ्कुशप्रशासनस्य परस्मादन्यस्मिन्नसम्भवात् तथाविधप्रशासनकर्तृत्वेन श्रुतमक्षरं ब्रह्मैवेत्याह—**एतस्येति। **'रूढिर्योगमपहरती'ति न्यायादोङ्कारे वर्णसमुदायात्मन्यक्षरशब्दस्य रूढ्या प्रवृत्तिराश्रयितुमुचितेत्याशङ्क्याह—**ओङ्कारस्येति। **प्रतिवचनोपक्रमे प्रक्रान्तमोङ्काराख्यमक्षरमेवोत्तरत्र विशेषितं भविष्यतीत्याशङ्क्य , परमविशेषणविरोधान्न तस्य प्रक्रमः सम्भवतीत्याह—**परममिति चेति। **'किमध्यात्म'मिति प्रश्नस्योत्तरं 'स्वभावोऽध्यात्म'मित्यादि। तद् व्याचष्टे—**तस्यैवेति। **स्वकीयो भावः**

### भाष्यार्कप्रकाशः

**अक्षरमिति**। परममक्षरं ब्रह्मेत्युच्यते। **क्षरति** नश्यति। अक्षरशब्दस्य परमात्मवाचित्वे श्रुतिं प्रमाणयति—**एतस्येति**। यद्वा अक्षरस्य ब्रह्मत्वे श्रुतिं प्रमाणयति—**एतस्येति**। ईश्वरस्यैव सर्वनियन्तृत्वेन सर्वप्रशासकत्वादीश्वरस्य प्रशासने सूर्याचन्द्रमसौ विधृतौ तिष्ठतः। हे गार्गि ! इति सम्बोधनम्। **विधृतौ** अन्तर्यामिणा तेनैव विशेषेण धृतौ सन्तौ तस्यैव शासने तिष्ठतः। ईश्वराज्ञापरतन्त्रौ सूर्याचन्द्रमसौ दिवारात्री कुरुतः इत्यर्थः। 'भीषाऽस्माद् वातः पवते, भीषोदेति सूर्यः' इति श्रुतेः।

ननु 'ओमित्येकाक्षरं ब्रह्मे'ति श्रुत्या ओङ्कारस्याप्यक्षरत्वाद् ब्रह्मत्वाच्च 'अक्षरं ब्रह्मे'त्यस्य ओङ्कारो ब्रह्मेत्यर्थः किं न स्यादित्यत आह—**ओङ्कारस्येति**। ओङ्कारस्याग्रहणमित्यन्वयः।'ओमित्येकाक्षरं ब्रह्मे'ति श्रुत्या ओङ्कारस्येहाक्षरशब्देन **अग्रहणम्** अप्रतिपादनम्। तत्र हेतुमाह— **परमेण विशेषणादिति**। 'अक्षरं ब्रह्म परम'मिति परमत्वविशेषणसत्त्वादक्षरस्य, अत्र नोङ्कारग्रहणमित्यर्थः।

ननु ओङ्कारस्य वेदादित्वेनोत्कृष्टत्वात्परममक्षरमोङ्कारोऽपि भवितुमर्हतीत्यत आह– **परममिति**। **परः** उत्कृष्टो **मा** न विद्यते यस्मात् तदिति व्युत्पत्त्या परमशब्दस्य निरतिशयवाचित्वाद् ब्रह्मणोऽन्यस्य सर्वस्यापि सातिशयत्वादोङ्कारस्य च वर्णात्मकस्य जडस्य कार्यस्य सातिशयत्वात् परमं निरतिशयमक्षरं ब्रह्मैव, न त्वोङ्कार इति भावः। निरतिशये अक्षरे ब्रह्मणि परममिति विशेषणमुपपन्नतर-

---

१.'परमात्मा' इति पा.। २.परेणेत्यव्ययं परस्तादित्यर्थे। द्र.ब्र.सू. ३,३.५२।'परमेण' इति रा.पा.। ३. अश्नुत इत्यक्षरमिति व्युत्पत्तिमभिप्रेत्योक्तम्—**व्याप्तिमत्त्वेति**।

**प्रतिदेहं प्रत्यगात्मभावः** स्वभावः**, स्वो भावः स्वभावः, अध्यात्ममुच्यते।** आत्मानं **देहमधिकृत्य प्रत्यगात्मतया प्रवृत्तं परमार्थब्रह्मावसानं वस्तु स्वभावः।** अध्यात्ममुच्यते **अध्यात्मशब्देनाभिधीयते।** भूतभावोद्भवकरः**, भूतानां भावो भूतभावस्तस्योद्भवो भूतभावोद्भवस्तं करोतीति भूतभावोद्भवकरः, भूतवस्तूत्पत्तिकर इत्यर्थः।** विसर्गः **विसर्जनं,**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ब्रह्मात्मकमित्याह— **परमार्थब्रह्मावसानमिति**॥ ३॥

आनन्दगिरिकृतव्याख्या

स्वभावः **श्रोत्रादिकरणग्रामः; स च** आत्मनि **देहेऽहम्प्रत्ययवेद्यो वर्तत इत्यमुं प्रतिभासं व्यावर्त्य स्वभावपदं विगृह्णाति—**स्वो भाव इति। **एवं विग्रहपरिग्रहे 'स्वभावोऽध्यात्ममुच्यते' इत्यस्यायमर्थो निष्पन्नो भवतीत्यनुवादपूर्वकं कथयति—**स्वभाव इति। **'तस्यैव परस्ये'-त्यादिनोक्तं न विस्मर्तव्यमिति विशिनष्टि—**परमार्थेति। **परमेव हि ब्रह्म देहादौ प्रविश्य प्रत्यगात्मभावमनुभवति 'तत्सृष्ट्वा, तदेवानुप्राविशत्' इति श्रुतेरित्यर्थः। 'किं कर्मे'ति प्रश्नस्योत्तरमुपादत्ते—**भूतेति। **भूतान्येव भावाः, तेषामुद्भवः समुत्पत्तिः, तां करोतीति व्युत्पत्तिं सिद्धवत्कृत्य विधान्तरेण व्युत्पादयति—**भूतानामिति। भावः **सद्भावो वस्तुभावः। अत एव भूतवस्तूत्पत्तिकर इति वक्ष्यति। वैदिकं कर्मात्रोक्तविशेषणं कर्मशब्दितमिति विसर्गशब्दार्थं दर्शयन् विशदयति—**विसर्ग इत्यादिना। **कथं पुनर्यथोक्तस्य यज्ञस्य सर्वेषु**

भाष्यार्कप्रकाशः

मित्यन्वयः। एवम् 'अक्षरं ब्रह्म परम'मिति प्रथमपादं व्याख्याय 'स्वभावोऽध्यात्ममुच्यते' इति द्वितीयपादं व्याख्यातुमारभते— **तस्यैवेति।** स्वभावः **स्वस्य** परब्रह्मणो **भावः** प्रतिदेहं प्रत्यगात्मरूपेण भवनं स्वभावः। ब्रह्मणः प्रत्यग्रूपेण देहे देहे अवस्थानमिति यावत्। स्वो भावः स्वभाव इति समासे तु तस्येति ब्रह्मवाचिपदाध्याहारप्रसङ्गः। अध्यात्ममित्युच्यते। आत्मन्यध्यात्ममिति नात्र विभक्त्यर्थेऽव्ययीभावसमासो ग्राह्यः, तस्य सप्तम्यर्थपर्यवसानादित्यभिप्रेत्याह— **आत्मानं देहमिति। अधिकृत्य** अधिष्ठित्य[ष्ठाय] **प्रवृत्तं** स्थितं **परमार्थब्रह्मावसानं** परमार्थं सत्यं यद् ब्रह्म पूर्वोक्तं परं ब्रह्म तदेवावसानं समाप्तिर्यस्य तत् तथोक्तम् , परमार्थब्रह्मरूपेण पर्यवसितमित्यर्थः। परमार्थब्रह्मभूतमिति यावत्। एवंविधं वस्तु स्वभावशब्दार्थः। निरुपाधिकं चैतन्यं मायोपाधिकं चैतन्यं वा ब्रह्म; प्रतिदेहं प्रत्यग्रूपेण स्थितम् अन्तःकरणोपाधिकं चैतन्यं स्वभावशब्दवाच्यम् अध्यात्ममिति यावत्। परमात्मा ब्रह्म, प्रत्यगात्मा त्वध्यात्ममिति **फलितार्थः।**

**ननु** 'अध्यात्मं प्रत्यगात्मविषयं वस्तु' इति [1]पूर्वं भाषितम् , अधुना तु प्रत्यगात्मैवेत्युच्यते, अतः कथं पूर्वोत्तरविरोधपरिहार इति चेद्? **उच्यते**— पूर्वं कृत्स्नपदानुगुण्येन वस्त्विति पदमध्याहृत्य अध्यात्ममित्यस्याव्ययीभावसमासः उक्तः। इदानीं तु समासान्तरमिति। **यद्वा** प्रत्यगात्मविषयं प्रत्यगात्मशब्दप्रयोगविषयम् अर्थात् प्रत्यगात्मैवेति; कृत्स्नमित्यस्य पूर्णमित्यर्थः।

अध्यात्ममुच्यते इत्यस्यार्थमाह— **अध्यात्मशब्देनाभिधीयत इति।** अध्यात्ममित्युच्यत इत्यन्वयादेतदर्थलाभः।

एवं 'किं तद् ब्रह्म, किमध्यात्म'मिति प्रश्नद्वयस्य पादद्वयेनोत्तरद्वयं दत्त्वा, 'किं कर्मे'ति प्रश्नस्य पादद्वयेनोत्तरमाह— **भूतेति।** भूतानां प्राणिनां भावः सत्ता, तस्योद्भव उत्पत्तिः भूतभावोद्भवः, तस्य करः कर्ता। उत्पत्तेः प्रागपि सिद्धानां भूतानामभिव्यक्त्यभावाद् असत्प्रायाणामुत्पत्तिवशात् सत्ता सिध्यति, जन्माधीनत्वात् सत्तायाः। जन्मानन्तरभावी खलु सत्ताख्यो विकारः। पुत्रो जातः, जातः पुत्रोऽस्तीति व्यवहारात्। फलितमाह— **भूतवस्तूत्पत्तिकर इति।** भूतानां सिद्धानामेव वस्तूनां प्राणिनां देहसङ्घटनद्वारा उत्पत्तिकर इत्यर्थः। लिङ्गशरीरावच्छिन्ना जीवा अनादिकालमारभ्य स्थिताः। प्रलयेऽप्येषां न नाशः। मोक्ष एव लिङ्गभङ्गाख्यो नाशः। अमी हि स्थूलशरीरसंयोगाख्यमुदयं, तद्वियोगाख्यं नाशं च कर्मवशात् प्रपद्यन्ते। तत्र स्थूलशरीरसंयोगाख्य उदयः इह भूतभावोद्भव-शब्देनोच्यत इति भावः।

**यद्वा** भवन्तीति भूतानीति भूतशब्दः कार्यमात्रपरः। भूतानां कार्यकरणसङ्घातादिरूपाणां कार्याणां भावस्य सत्ताया उद्भवकरः,

१. द्र. भ. गी. ७ -२९।

**अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्।**
**अधियज्ञोऽहमेवात्र देहे देहभृतां वर !॥४॥**

**देवतोद्देशेन चरुपुरोडाशादेर्द्रव्यस्य परित्यागः। स एष विसर्गलक्षणो यज्ञः** कर्मसंज्ञितः **कर्मशब्दितः इत्येतत्। एतस्माद्धि बीजभूताद् वृष्ट्यादिक्रमेण स्थावरजङ्गमानि भूतान्युद्भवन्ति॥३॥**

अधिभूतमिति। अधिभूतं **प्राणिजातमधिकृत्य भवतीति। कोऽसौ? क्षरः, क्षरतीति** क्षरो **विनाशी** भावो **यत्किञ्चिज्जनिमद् वस्त्वित्यर्थः।** पुरुषः **पूर्णमनेन सर्वमिति, पुरि शयनाद्वा पुरुषः आदित्यान्तर्गतो हिरण्यगर्भः सर्व-**

आनन्दगिरिकृतव्याख्या

**भूतेषु सृष्टिस्थितिप्रलयहेतुत्वेन तदुद्भवकरत्वमित्याशङ्क्य 'अग्नौ प्रास्ताऽऽहुतिः' इत्यादिस्मृतिमनुस्मृत्याह—**एतस्माद्धीति॥३॥

**सम्प्रति प्रश्नत्रयस्योत्तरमाह—**अधिभूतमिति। **अधिभूतं च किं प्रोक्तमित्यस्य प्रतिवचनम्—** अधिभूतं क्षरो भाव इति। **तत्र अधिभूतपदमनूद्य वाच्यमर्थं कथयति—**अधिभूतमित्यादिना। **तस्य निर्देशमन्तरेण निर्ज्ञातुमशक्यत्वात् प्रश्नद्वारा तन्निर्दिशति—** कोऽसाविति। **कार्यमात्रमत्र सङ्गृहीतमिति वक्तुमुक्तमेव व्यनक्ति—** यत्किञ्चिदिति। **अधिदैवं किमिति प्रश्ने, पुरुषश्चेत्यादि प्रतिवचनम्। तत्र पुरुषशब्दमनूद्य मुख्यमर्थं तस्योपन्यस्यति—**पुरुष इति। **तस्यैव सम्भावितमर्थान्तरमाह—**पुरि शयनाद्वेति। **वैराजं देहमासाद्य**

भाष्यार्कप्रकाशः

कार्यनिष्ठसत्ताया जन्माधीनत्वात् , जन्मनः प्राक्कार्यस्य चाभावात् , सत्त्वे च पुनरुदयायोगात् , सद्वस्तुनः जन्मनः प्रागभावायोगाच्च जन्माधीनसत्ताकान्येव कार्याणीत्यभिप्रेत्य भूतसत्ताया उत्पत्तिकर इत्यस्य भूतवस्तूत्पत्तिकर इति फलितार्थ उक्तो भाष्यकृद्भिः। भूतवस्तूनि कार्यपदार्थाः, कार्यमात्रं सर्वमित्यर्थः। तदुत्पत्तिकरः, तत्सत्तासम्पादको जन्मद्वारेति यावत्।

**विसर्गो** यज्ञः। यज्ञस्य विसर्गलक्षणत्वादित्याह— **स एवेति**। यज्ञो यजनं देवपूजा, सा च हविरर्पणरूपेति यज्ञस्य विसर्ग एव लक्षणं स्वरूपमिति भावः। एवं विसर्गलक्षणस्य यज्ञस्य क्रियात्वात् कर्मशब्दवाच्यत्वमित्याह— **कर्मसंज्ञित इति**। कर्मेति संज्ञा कर्मसंज्ञा, साऽस्य सञ्जातेति कर्मसंज्ञितः। तारकादित्वादितच्। यावदर्थमाह— **कर्मशब्दित इति**। कर्मशब्दप्रतिपाद्य इत्यर्थः। **वृष्ट्यादि-क्रमेणेति**। 'यज्ञाद् भवति पर्जन्यः, पर्जन्यादन्नसम्भवः, अन्नाद्भवन्ति भूतानि' इति क्रमः प्रागुक्तः।

**ननु** 'अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः। यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥' इति तृतीयाध्याये यज्ञस्य कर्म-समुद्भवत्वमुक्तम्। इदानीं तु कर्मत्वमेवोच्यत इति पूर्वोत्तरविरोध इति चेत् , **मैवम् ;** यज्ञशब्दस्यापूर्वमिति कर्मेति चार्थद्वयसत्त्वाद् यज्ञोऽपूर्वमिति कर्मेति च मतभेदेन व्यवहारात् , यज्ञोऽपूर्वमिति मते यज्ञोत्पादककर्मणि यज्ञशब्दप्रयोगस्य लाक्षणिकत्वात् , यज्ञः कर्मेति मते कर्मजन्ये अपूर्वे यज्ञशब्दप्रयोगस्य लाक्षणिकत्वात् , [१]यज्ञशब्दस्य मुख्यवृत्त्या प्रागपूर्वत्वमुक्तम् , गौणवृत्त्या त्विदानीं कर्मत्वमुक्तम्। **यद्वा** गौणवृत्त्या प्रागपूर्वत्वमुक्तम् , इदानीं मुख्यवृत्त्या कर्मत्वमुक्तमिति पूर्वोत्तरविरोधपरिहारात्।

एवं च कर्मरूपाद् यज्ञाद् अपूर्वयज्ञं[अपूर्वरूपयज्ञः], तस्माद् वृष्टिः, तस्मादन्नं, तस्मात् प्रजाः इत्यपि क्रमः सिद्धः। भाष्ये तु वृष्टेरेवादित्वमुक्तम्। तत्तु कर्मापूर्वयोरेकयज्ञशब्दवाच्यत्वलक्षणैक्यव्यवहारादिति बोध्यम्। एतस्मादिति वाक्यं विसर्गस्य भूतभावोद्भव-करत्वं स्फुटयितुं निबद्धमिति बोध्यम्॥३॥

**अधिभूतमिति**। भूतशब्दार्थमाह—**प्राणिजातमिति**। प्राणिसमूहः; भूतशब्दाद्भूतत्वग्रहणेन[२] तत्समूहलाभः। अधिशब्दार्थमाह — **अधि भवतीति**। अधिकृत्य भवतीत्यर्थः। कोऽसौ यो भूतजातमधि भवतीत्युच्यत इति पृच्छति—**कोऽसाविति**। उत्तरयति— **क्षरो भाव इति**। क्षरति नश्यतीति **क्षरः**, भवति जायत इति **भावः**। 'जातस्य हि ध्रुवो मृत्यु'रिति सिद्धान्तादाह— **जनिमदिति**। जनेरुक्तत्वे

---

१. यज्ञशब्दप्रतिपाद्यस्येत्यर्थः। २. भूतमधिकृत्य भवतीत्यत्र भूतत्वं सामान्यं विवक्षितम्। ततश्चाविशेषेण सर्वभूतलाभः। फलितार्थकथनं प्राणिजातमिति।

**प्राणिकरणानामनुग्राहकः, सोऽधिदैवतम्।** अधियज्ञः **सर्वयज्ञाभिमानिनी देवता विष्ण्वाख्या 'यज्ञो वै विष्णुः' (तै.सं. १.७.४) इति श्रुतेः। स हि विष्णुरहमेव,** अत्र **अस्मिन् देहे यो यज्ञः, तस्याहमधियज्ञः। यज्ञो हि देहनिर्वर्त्यत्वेन देहसमवायीति देहाधिकरणो भवति। देहभृतां वर !॥४॥**

आनन्दगिरिकृतव्याख्या

**आदित्यमण्डलादिषु दैवतेषु [१]अन्तरवस्थितो लिङ्गात्मा व्यष्टिकरणानुग्राहकोऽत्र पुरुषशब्दार्थः। स चाधिदैवतमिति स्फुटयति—** आदित्येति। **अधियज्ञः कथमित्यादिप्रश्नं परिहरन्नधियज्ञशब्दार्थमाह—** अधियज्ञ इति। **कथमुक्तायां देवतायामधियज्ञशब्दः स्यादित्याशङ्क्य , श्रुतिमनुसरन्नाह—**यज्ञो वा इति। **परैव देवताऽधियज्ञशब्देनोच्यते। सा च ब्रह्मणः सकाशादत्यन्ताभेदेन प्रतिपत्तव्येत्याह—**स हि विष्णुरिति। **शास्त्रीयव्यवहारभूमिः** अत्रेत्युक्ता। **देहसामानाधिकरण्याद्वाऽत्रेत्यस्य व्याख्यानम्—**अस्मिन्निति। **किमधियज्ञो बहिरन्तर्वा देहादिति सन्देहो मा भूदित्याह—**देह इति। **ननु यज्ञस्य देहाधिकरणत्वाभावात् कथं तथाविधयज्ञाभिमानिदेवतात्वं भगवता विवक्ष्यते? तत्राह—**यज्ञो हीति। **एतेन तस्य बुद्ध्यादिव्यतिरिक्तत्वमुक्तमवधेयम्। न हि परा देवता दर्शितरीत्याऽधियज्ञशब्दिता [२]बुद्ध्यादिष्वन्तर्भावमनुभवितुमलम्। देहान् बिभ्रतीति** देहभृतः **सर्वे प्राणिनः, तेषामेष** वरः **श्रेष्ठः। युक्तं हि भगवता साक्षादेव प्रतिक्षणं संवादं विदधानस्यार्जुनस्य सर्वेभ्यः श्रैष्ठ्यम्॥४॥**

भाष्यार्कप्रकाशः

विनाश उक्तप्राय इति भावः। उत्पत्तिविनाशवदिति यावत्। भूतशब्देन सर्वप्राणिग्रहणात् तमधिकृत्य सम्भवान्न प्राणि[सम्भवन् अप्राणि]पदार्थजातमेव क्षरो भावः। स च देहादिरूपः शीतोष्णादिरूपश्चेति बोध्यम्। **पूर्णं** व्याप्तम्। पुरि शरीरे शयनादासनात्। पुरं चादित्यशरीरं हिरण्यगर्भस्य तत्र स्थितत्वात् पुरुषशब्दवाच्यस्य। **आदित्यान्तर्गतः** सूर्यमण्डलमध्यस्थः **हिरण्यगर्भः** हिरण्मयः हिरण्यश्मश्रुत्वादिगुणक ईश्वरः सर्वेषां प्राणिनां **करणानाम्** इन्द्रियाणाम् **अनुग्राहकः** शक्तिप्रदः, देवतैव दैवतम् , आदित्यस्य च देवजातित्वाद् दैवतत्वम्। तदधिकृत्य स्थितं वस्त्वधिदैवतम्।

यज्ञमधिकृत्य वर्तमानोऽधियज्ञः सर्वेषु यज्ञेष्वभिमानवान्। विष्णोर्यज्ञाभिमानित्वे श्रुतिं प्रमाणयति—**यज्ञो वै विष्णुरिति।** यज्ञाभिमानित्वादेव यज्ञशब्दवाच्यत्वमिति भावः। कोऽसौ विष्णुः? अत आह— **अहमेवेति।** कृष्ण एवेत्यर्थः। विष्ण्ववतारत्वात् कृष्णस्येति भावः। **तस्याहमधियज्ञः** तस्य देहाश्रयस्य यज्ञस्याधियज्ञोऽभिमानी अहम्। देहं समवैति सङ्गच्छत इति **देहसमवायी** देहसङ्गतः। **देहाधिकरणः** देह अधिकरणमाधारो यस्य सः। देहभृतः प्राणिनस्तेषां वर श्रेष्ठ! यस्मात् त्वं श्रेष्ठस्तस्मात् त इदमुच्यते मयेति भावः।

अधिदैवतमधियज्ञश्च यद्यपि प्रत्यगात्मैव, आदित्यदेहोपाधिकत्वाद् विष्णुदेहोपाधिकत्वाच्च। तथापि तयोरीश्वरशरीरोपाधिकत्वेन पृथङ्निर्देशः, प्रत्यगात्मनां जीवशरीरोपाधिकत्वात्। एवं ब्रह्माध्यात्माधिदैवाधियज्ञानामेकत्वं सिद्धम् , आत्मत्वाच्चतुर्णाम्। अत आत्मज्ञानेन तज्ज्ञानसिद्धिरिति कृत्वा 'ते ब्रह्म तद्विदुरध्यात्मं विदुः साधिदैवं साधियज्ञं च मां विदु'रिति पूर्वोक्तं सुसङ्गतम्। अथ यज्ञस्य कर्मण अधिभूतस्य कार्यजातस्य आत्मकार्यत्वादात्मज्ञानेन तज्ज्ञानसिद्धिः मृज्ज्ञानेन मृत्कार्यघटादिज्ञानवदिति कृत्वा 'ते साधिभूतं मां विदुः कर्म च विदु'रिति पूर्वोक्तं सुसङ्गतम्।

अत्र **रामानुजः**—[३]क्षेत्रज्ञसमष्टिरूपं प्रकृतिविनिर्मुक्तमात्मस्वरूपं ब्रह्म; आत्मनि सम्बध्यमानं भूतसूक्ष्मतद्वासनादिकं प्रकृतिः स्वभावः; मनुष्यादिभावोद्भवकरो योषित्पुरुषसंसर्गजो रेतोविसर्जनं कर्म; शब्दस्पर्शादिः साश्रयः क्षरो भावोऽधिभूतम् ; इन्द्रप्रजापति-[प्रभृति]कृत्स्नदैवतोपरि वर्तमानो विलक्षणशब्दादिभोक्ता पुरुषोऽधिदैवतम् ; अधियज्ञैराराध्यतया वर्तमान इन्द्रादौ मम शरीरभूते आत्मतयाऽवस्थितोऽहमेवाधियज्ञः। तत्र मुमुक्षुभिः प्राप्यतया ब्रह्म, त्याज्यतयाऽध्यात्मम् , उद्वेजनीयतया परिहरणीयतया च कर्म ज्ञातव्यम् ; ऐश्वर्यार्थिभिः प्राप्यतयाऽधिभूतमधिदैवतं च ज्ञातव्यम् ; महायज्ञादिनित्यनैमित्तिकानुष्ठानवेलायां त्रयाणामधिकारिणा-

१. 'योऽन्तरवस्थितो' इति पा.। २. 'बुद्ध्यादिष्वन्तर्भावमनुभावयितुमलम्' इति पा.। ३. तृतीयचतुर्थश्लोकयोः व्याख्यानमिह मिलित्वाऽनूदितम्।

मधियज्ञोऽनुसन्धेयः इति प्राह। **अत्रोच्यते**—क्षेत्रज्ञस्यैकत्वेन तावत् क्षेत्रज्ञसमष्टिर्नास्ति, 'क्षेत्रज्ञं चापि मां विद्धी'ति वक्ष्यमाणत्वात्। अन्तःकरणभेदात् क्षेत्रज्ञभेदोपचारपक्षेऽपि तव मते चिदचिच्छरीरकत्वेनेश्वरस्य क्षेत्रज्ञसमष्टिरूपत्वं न सम्भवति। न हि क्षेत्रज्ञसमष्टिरीश्वरः क्षेत्रज्ञशरीरः स्यात्। नापि - क्षेत्रज्ञसमष्टिर्ब्रह्म, ईश्वरस्त्वन्यश्चिदचिच्छरीरक इति - वाच्यम् , ब्रह्मण ईश्वरशरीरत्वापत्तेः।

**ननु** ब्रह्मणः परमात्मनोऽन्यैव क्षेत्रज्ञसमष्टिरिह ब्रह्मशब्देनोच्यते गौणवृत्त्येति चेत् , **मैवम्।** मुख्यार्थपरित्यागे कारणाभावात्। 'अक्षरं ब्रह्म परम'मिति 'परमं ब्रह्मे'ति शब्दद्वयस्य परमात्मनि योगरूढत्वात्। न च परममित्यस्य प्रकृतिविलक्षणमित्यर्थ इति वाच्यम् , तथात्वेऽपि प्रकृतिविलक्षणस्य परब्रह्मण एव ग्राह्यत्वात्। ब्रह्मणश्च क्षेत्रज्ञादन्यत्वे जडत्वापत्तेः। क्षेत्रक्षेत्रज्ञोभयातिरिक्तस्य वस्तुन एवाभावान्न क्षेत्रक्षेत्रज्ञविलक्षणब्रह्मसिद्धिः। ब्रह्मसधर्मत्वात् क्षेत्रज्ञो ब्रह्मेति वक्तव्ये, तथोक्ते चाक्षरं ब्रह्म परममिति तद्विहाय क्षेत्रज्ञसमष्टिपर्यन्तार्थकल्पनस्याप्रमाणत्वात् , अयुक्तत्वाच्च। न हि परमाक्षरसमष्टिर्ब्रह्मेत्युक्तं मूलकर्त्रा, येन क्षेत्रज्ञसमष्टिरुच्येत। न च क्षेत्रज्ञसमष्टिरूपमात्मस्वरूपमित्यपि युक्तम् , आत्मन एव क्षेत्रज्ञत्वेन तस्यैव तत्समष्टिरूपत्ववर्णनस्यायुक्तत्वात्। न चात्मनां स्वरूपं क्षेत्रज्ञसमष्टिरूपमिति वाच्यम् , व्रीहीणामिवात्मनां राश्यभावात्। न च क्षेत्रज्ञसमष्टिरात्मस्वरूपं परमात्मनः शरीरमित्यर्थ इति वाच्यम् , परमात्मशरीरत्वे आत्मनः विनाशित्वापत्तेः। शीर्यत इति हि शरीरम्। न च तन्नियाम्यत्वात् तच्छरीरत्वमात्मन इति वाच्यम् , अद्वितीये आत्मनि नियामकादिद्वैतायोगात्। सुषुप्तावात्मनो नियाम्यत्वादर्शनात्। व्यवहारकाले तु शरीरादितादात्म्याध्यासप्रयुक्तत्वान्नियाम्यत्वस्य।

न च - यं यूयं प्रत्यगात्मेति व्यवहरथ, तमेव वयं परमात्मेति व्यवहरामः; यं तु यूयं प्रमातेति चिदाभास इति च व्यवहरथ, तं वयं प्रत्यगात्मेति व्यवहरामः; चिदाभासानां पारतन्त्र्यमनेकत्वं च भवद्भिरभ्युपेतमेवेति - वाच्यम् , चिदाभासस्यैव वस्तुतः प्रत्यगात्मत्वात्। सर्पाभासस्येव वस्तुतो रज्ज्वात्मता। सुषुप्तौ [1]चिदाभासलयसाक्षी आत्मा कथं चिदाभासः स्यात्। चिदाभासो ह्यनात्मा। आत्मा हि स्वयम्। यः प्रमातृत्वरहितः प्राज्ञः सुषुप्तिसिद्ध आत्मा स एव हि प्रबोधे स्वानुभूतमज्ञानमानन्दं च स्मरति – 'सुखमहमस्वाप्सं, न किञ्चिदवेदिष'मिति। कथमन्यानुभूतार्थस्यान्यस्मरणम्? अतः प्रत्यगात्मैव स्वयं चिदाभासतादात्म्यमापद्य संसारमापद्यत इवेति न प्रत्यगात्मप्रमात्रोर्भेदः। चिदाभासस्य वास्तवं रूपं चिदेव, अन्तःकरणविशिष्टचैतन्यलक्षणप्रमातुर्वास्तवं रूपं चैतन्यमेवेति प्रकृतिविनिर्मुक्तमात्मस्वरूपं चैतन्यं प्रत्यगात्मैव। न तु चिदाभासत्वप्रमातृत्वविशिष्टचैतन्यस्य प्रकृतिविनिर्मुक्तत्वम् , प्रकृतिपरिणामान्तःकरणविशिष्टत्वात्। तस्मात् प्रकृतिविनिर्मुक्तमात्मस्वरूपं चैतन्यमेव। तच्च क्षेत्रज्ञत्वात् क्षेत्रज्ञमेव; निरुपाधिकत्वादेकमेव; द्वैताभावादद्वितीयमेव। न हि प्रकृतिविनिर्मुक्ते वस्तुनि उपाधिर्द्वैतं वा भवितुमर्हति, सर्वस्यापि द्वैतस्य प्रकृतितत्कार्यरूपत्वात्। एवंविधं च चैतन्यं सच्चिदानन्दलक्षणं परं ब्रह्मैवेति सिद्धमक्षरं परमं ब्रह्मेत्यस्य **भगवत्पादो**क्त एवार्थो ब्रह्म, न तु तदतिरिक्तः कश्चिज्जीवः, सर्वे जीवा वा। ब्रह्मानतिरिक्तस्यैव जीवस्यात्मनः प्रकृतिविनिर्मुक्तत्वम् , तदतिरिक्तस्य तु प्रकृतिसंसृष्टत्वमेवेति।

तथा आत्मनि सम्बध्यमानं भूतसूक्ष्मतद्वासनादिकमित्यप्ययुक्तम् ,असङ्गे आत्मनि भूतसूक्ष्मादिसंबन्धायोगात्। 'असङ्गो ह्ययं पुरुषः' इति हि श्रुतिः। न च मायया तत्सम्बन्धोपपत्तिः, तव मते भूतसूक्ष्मादेः सत्यत्वेन मायिकत्वाभावात्। एवं सत्यया प्रकृत्या आत्मस्वरूपस्य विनिर्मुक्तिरपि न सम्भवति। न हि सत्यं निवर्तमानं क्वापि दृष्टं श्रुतं वा। यदि सत्याऽपि प्रकृतिरीश्वरसेवया निवर्तते, तर्हि कथमीश्वरस्य चिदचिद्विशिष्टत्वम्? न चेश्वरस्य प्रकृत्यनिवृत्तिरिति वाच्यम् , ईश्वरस्यैव प्रकृत्यनिवृत्तौ कथं तत्सेविनां तन्निवृत्तिरुपपद्यते? यदि प्रकृतिसङ्गो दोषस्तर्हि कथं स ईश्वरस्य हेयप्रत्यनीकस्य भवितुमर्हति? यदि तु गुणस्तर्हि कथं मुमुक्षोस्त्याज्यः? न च - ईश्वरस्य प्रकृतिसङ्गो गुणः, जीवस्य तु दोष इति - वाच्यम् , जीवेश्वरयोरुभयोरपि ज्ञानैकाकारत्वेन समानधर्मत्वात् , तत्रैकस्मिन् प्रकृतिसङ्गो गुणोऽन्यस्मिन् दोष इति कल्पयितुमनुचितत्वादप्रमाणत्वाच्च।

न च - शुद्धप्रकृतिसङ्गः ईश्वरस्य गुणः, अशुद्धप्रकृतिसङ्गो जीवस्य दोष इति - वाच्यम् , मुक्तस्य जीवस्येश्वरसाधर्म्याङ्गीकारात् तस्य शुद्धप्रकृतिसङ्गोऽवश्यं स्यादिति कथं मुमुक्षुभिः प्रकृतिविनिर्मुक्तमात्मस्वरूपं प्राप्यं स्यात्? न चाशुद्धप्रकृतिविनिर्मुक्तं शुद्धप्रकृति-

१. सुषुप्तौ अन्तःकरणलयप्रयुक्तः चिदाभासलय इति बोध्यम्।

भाष्यार्कप्रकाशः

संस्पृष्टमात्मस्वरूपं प्राप्यमिति विवक्षितमिति वाच्यम् , तथात्वे आत्मस्वरूपस्य नित्यसिद्धत्वेनाप्राप्यत्वाच्छुद्धप्रकृतिरेव प्राप्येति कृत्वा प्राप्यतयाऽत्र ज्ञातव्या प्रकृतिरेव, न त्वात्मस्वरूपम्।

तथा चाक्षरं ब्रह्म परममित्यस्य परमं शुद्धमक्षरं प्रकृतिर्ब्रह्मेत्यर्थो वाच्यः, न तु प्रकृतिविनिर्मुक्तमात्मस्वरूपं ब्रह्मेति। न च तथैवोच्यत इति वाच्यम् , शुद्धाशुद्धप्रकृतिद्वयसाधारणस्य स्वभावशब्दस्य अशुद्धप्रकृतिपरत्वे प्रयोजकाभावात्। न चाक्षरं ब्रह्म परममित्यनेन शुद्धाया उक्तत्वात् स्वभावशब्देन पारिशेषकन्यायेनाशुद्धोच्यत इति वाच्यम् , ईश्वरः शुद्धप्रकृतिविशिष्ट एवेत्युक्तौ अशुद्धप्रकृतेरीश्वरासम्बन्धित्वप्रसक्तेः। न चेष्टापत्तिः, सर्वमपीश्वरस्य शरीरभूतमिति तवाभ्युपगमात्।

भूतसूक्ष्मादीनां जीवप्रकृतिकार्यत्वे जीवस्यैव जगत्स्रष्टृत्वापत्तेः, ईश्वरप्रकृतिकार्यत्वे जीवस्य तत्सम्बन्धायोगात् ईश्वरस्यैव तत्सम्बन्धापत्तेः, तन्मोक्षार्थमीश्वरस्यापीश्वरान्तरभजनप्रसक्तेः, सर्वजगत्सृष्ट्यादिहेतोः प्रकृतेरेकत्वेन प्रकृतिद्वयकल्पनस्यायुक्तत्वात्। जीवानामनेकत्वेनाशुद्धप्रकृतीनामनेकानामपि कल्पनीयत्वापत्तेः।

किं चेश्वरप्रकृतेः 'दैवी ह्येषा गुणमयी' इति गुणमयत्वेन शुद्धत्वस्याप्यसम्भवात्। शुद्धसत्त्वात्मकत्वं हि प्रकृतेरीश्वर-सम्बन्धिन्याः शुद्धत्वम्। कथं त्रिगुणमयप्रकृतेः शुद्धसत्त्वात्मकत्वम्? कथं वा शुद्धसत्त्वात्मिकाया ईश्वरप्रकृतेः सकाशात् तामस-पृथिव्यादिभूतोत्पत्तिः? न हि महाभूतस्रष्टृत्वं जीवस्योचितम् 'आत्मन आकाशः सम्भूतः' इत्यादिश्रुतिविरोधात्। 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुत्यन्तरसंवादेनात्मशब्दस्येह परमात्मपरत्वावधारणात्। तस्मादेकैव गुणमयी प्रकृतिः, ययेदं सृष्टं यया मुह्यन्ति भूतानि च।

न च - ईश्वरस्यैव शुद्धेति अशुद्धेति च प्रकृतिद्वयमस्ति, तत्राशुद्धप्रकृत्या जगत्सृष्ट्यादिकं करोति; शुद्धा तु ईश्वरस्य दिव्य-मङ्गलविग्रहभूतेति - वाच्यम् , ईश्वरविग्रहस्याप्राकृतत्ववर्णनात्। न च - अप्राकृतत्वं नामाशुद्धप्रकृत्यकार्यत्वमिति - वाच्यम् , तथा कल्पने प्रमाणाभावात्। ईश्वरस्य जीवभूतप्रकृतिरेका, भूम्याद्युपादानभूता प्रकृतिरन्येतीहैवोक्तत्वेन तृतीयप्रकृतिकल्पनस्याप्रमाणत्वात् , तद्विरुद्धत्वाच्च। 'अप्राणो ह्यमनाः शुभ्रः' इत्यादिना ईश्वरस्य सशरीरत्वनिषेधेन विग्रहाभावाच्च । सच्चिदानन्दमयेश्वरस्वरूपं मुक्त्या [मुक्त्वा] सर्वस्यापि प्राकृतत्वेन तस्यैकस्यैवाप्राकृतत्वादप्राकृतं दिव्यमङ्गलं च स्वरूपमीश्वरस्य सच्चिदानन्दमेव, न त्वन्यत्।

यस्तु वैकुण्ठादौ विष्ण्वादिदेहसङ्घः स मायामय एव, दृश्यत्वाज्जडत्वाच्च। तदुपासकानां च तत्सधर्मदेहप्राप्तिर्भवत्येव[1], न तु मुक्तिः, अशरीरस्यैव मुक्तत्वात्। लिङ्गभङ्गो हि मोक्षः।

तथा रेतोविसर्जनं कर्म मुमुक्षुभिः ज्ञातव्यमिति यदुक्तं तद् विदुषां श्रवणानन्दायते। क्रिमिकीटपक्षिपश्वादिभिरपि स्वत एव ज्ञातस्य मैथुनस्य मुमुक्षुभिरपि ज्ञातव्यत्ववचनात्। 'जरामरणमोक्षाय मामाश्रित्य यतन्ति ये। ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम्॥' इति भगवद्भक्तानामेव ब्रह्मज्ञानवन्मैथुनकर्मज्ञानं नेतरेषामिति श्रीकृष्णाशयं वर्णितवतस्तव पाण्डित्यमहो! वस्तुतः शेषांश एवासि ! कथमन्यथा तवेदृशं पाण्डित्यम्? अथवा मैथुनप्रियाणां **भवतां, मध्वानां** चेदं वचनं युक्तमेव, शिष्यस्त्रीबाहुमूलयोः शङ्खचक्राङ्कनवत्।

**यच्च** रेतोविसर्जनस्यैव भूतभावोद्भवकरत्वम् , **तदप्ययुक्तम्** , जरायुजाण्डजस्वेदजोद्भिज्जाख्यचतुर्विधप्राणिमध्ये जरायु-जाण्डजयोः रेतोजत्वेऽपि स्वेदजोद्भिज्जयोस्तदभावात्। तथा अत्र देहे इति प्रत्यक्षदृश्यमानार्जुनादिदेहवाचिनः अत्रेति शब्दस्य इन्द्रादिवाचित्वमप्ययुक्तम् , इन्द्रादीनां परोक्षत्वात्। इन्द्रादिदेह इवार्जुनादिदेहेऽप्यात्मतयाऽवस्थितत्वेनेश्वरस्य तत्परित्यागे कारणाभावात्।

अधिदैवतशब्दस्य अतिदैवतशब्दवद् देवतोपरीत्यर्थसिद्धिरप्ययुक्ता, अधियज्ञ इत्यस्य च यज्ञाराध्य इत्यर्थोऽप्ययुक्तः, उपर्यर्थे आराध्यार्थे वाऽधिशब्दप्रयोगाभावात्। 'आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ! चतुर्विधा भजन्ते माम्।' इति भगवद्भजने चतुर्णामधिकारिणां सत्त्वेन त्रयाणामिति कथनं न्यूनमेवेति प्रागेवोक्तम्॥ ४॥

१. एवकारेण भवदभिमतमुक्तेः स्वरूपं नास्माभिरपलप्यते, किन्तु तस्याः मुख्यमुक्तित्वमेव निराक्रियत इत्यवध्रियते।

**अन्तकाले च मामेव स्मरन् मुक्त्वा कलेवरम्।**
**यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः॥ ५॥**

अन्तकाल इति। अन्तकाले **च मरणकाले** मामेव **परमेश्वरं विष्णुं स्मरन् ,** मुक्त्वा **परित्यज्य** कलेवरं **शरीरं यः** प्रयाति **गच्छति, स** मद्भावं **वैष्णवं तत्त्वं याति।** नास्ति **न विद्यते** अत्र **अस्मिन्नर्थे संशयः - याति वा न वेति॥५॥**

आनन्दगिरिकृतव्याख्या

**यत्तु प्रयाणकाले चेत्यादि चोदितम् , तत्राह—** अन्तकाले चेति। [१]**मामेवेत्यवधारणेनाध्यात्मादिविशिष्टत्वेन स्मरणं व्यावर्त्यते। विशिष्टस्मरणे हि चित्तविक्षेपान्न प्रधानस्मरणमपि स्यात्। न च मरणकाले कार्यकरणपारवश्याद् भगवदनुस्मरणासिद्धिः। सर्वदैव नैरन्तर्येणादरधिया भगवति समर्पितचेतसः तत्कालेऽपि कार्यकरणजातमगणयतो भगवदनुसन्धानसिद्धेः। शरीरे तस्मिन् अहम्ममाभिमानाभावादिति यावत्। प्रयातीत्यत्र प्रकृतशरीरम् अपादानम्। 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुतिमाश्रित्याह—** नास्तीति। [२]**व्यासेध्यं संशयमेवाभिनयति—** याति वेति॥५॥

भाष्यार्कप्रकाशः

**अन्तकाल इति।** 'प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः' इति भगवतोक्ते 'प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः' इत्यर्जुनेन पृष्टम् , तत्रोत्तरमाह— **अन्तकाल इति।** परमेश्वरं विष्णुं प्रत्यगभिन्नं ब्रह्म। आत्मन एव व्यापकत्वाद् विष्णुत्वम् , निरतिशयेश्वरत्वाच्च परमेश्वरत्वमिति विवेकः। **स्मरन्** अहं ब्रह्मास्मीत्यनुसन्दधानः सन् मनसेत्यर्थः। केवलमात्मस्वरूपं चिन्तयन्निति वा। मनो निर्वृत्तिकं विधाय तूष्णीमात्मानमनुभवन्निति वा। प्रयाति गच्छति, म्रियत इति यावत्। स्थूलशरीरत्यागपूर्वकप्रयाणस्यैव मरणत्वात्।

**ननु** तत्त्वविदः प्राणोत्क्रमणाभावेन गमनाभावात् प्रयातीत्ययुक्तमिति चेत् , **उच्यते**—प्रयातीति लोकसिद्धार्थानुवादमात्रम्। तथा च यस्तत्त्ववित् शरीरं मुक्त्वा प्रयातीति लोकैर्मन्यते, स क्वापि न प्रयाति, किन्तु सर्वतः पूर्णस्य निर्विशेषचिन्मात्रस्य ममात्मनो भावं तत्त्वं सच्चिदानन्दरूपं यातीति।

**यद्वा** शरीरं मुच्यति[मुञ्चति] इत्यतोऽनतिरिक्तार्थमेव 'शरीरं मुक्त्वा प्रयाति' इति वाक्यम्। न च पुनरुक्तिः, वाचं वदति, कार्यं करोतीत्यादिवददुष्टत्वात्। तथा च शरीरं मुक्त्वा यः प्रयातीत्यस्य यो म्रियत इत्येतावानेवार्थ इति सिद्धम्।

**अथवा** प्रयातीत्यस्य म्रियत इत्यर्थः। प्रयाणकाल इत्यत्रत्यप्रयाणशब्दस्य मरणार्थदर्शनात्। मरणं च प्राणत्यागः। तथा च **प्रयाति** प्राणांस्त्यजतीति यावत्। लिङ्गशरीरात्मकत्वात् प्राणा उपलक्षणं लिङ्गशरीरस्य। एवं प्राणत्यागो लिङ्गशरीरत्याग इति सिद्धम्। तथा च यः कलेबरं स्थूलं मुक्त्वा प्रयाति लिङ्गं परित्यजति स मद्भावं ब्रह्मसायुज्यं याति। निरुपाधिकस्यैवात्मनो ब्रह्मत्वम्। न च कारणशरीरसत्त्वात् कथं निरुपाधिकत्वमिति वाच्यम् , कारणशरीरस्याज्ञानस्य नाशं विना लिङ्गनाशाभावाल्लिङ्गनाशेनैव कारणनाशस्य सिद्धत्वात्। न च स्थूलशरीरनाशादेव सूक्ष्मदेहसत्त्वेऽपि वैष्णवपदप्राप्तिर्भवतीति वाच्यम् , 'स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चितामेति ततः परं हि माम्। अव्याकृतं भागवतोऽथ वैष्णवः पदं यथाऽहं विबुधाः कलात्यये।' इति **भागवते रुद्र**वचनात्। कलात्ययो लिङ्गभङ्गः, तस्मिन् सत्येव वैष्णवपदप्राप्तिः। किञ्च सति लिङ्गशरीरे तत्तादात्म्याध्यासः स्यात् , ततश्च संसारित्वं स्यात् , तस्मात् तन्नाशं विना कथमसंसारिब्रह्मभावप्राप्तिः?

न च - सलिङ्गा एव मुक्तिक्षेत्रं वैकुण्ठलोकं गच्छन्तीति - वाच्यम् , तस्य वैकुण्ठस्य सगुणमुक्तिक्षेत्रत्वात् सत्यलोकत्वात् [लोकवत्]। न च सगुणमुक्तिरेवेह विवक्षितेति वाच्यम् , मद्भावमिति ब्रह्मसायुज्यरूपनिर्गुणमुक्तिवर्णनात्। न च - मद्भावो मत्स्वभावो मदाकार इति - वाच्यम् , निराकारस्येश्वरस्याकाराभावात्। न च - निराकारमपीश्वरमात्मानं यदाकारोपहितं स्मरति तदाकारं

१. नात्रैवकारेण विष्णुव्यतिरिक्तदेवता व्यावर्त्यते, किन्तु 'तमेवैकं जानथ आत्मानम्' इत्यादाविव विशेष्यात्मस्वरूपातिरिक्तं विशेषणादि सर्वमित्याह—**मामेवेति।**
२. निषेध्यमित्यर्थः। नास्तीत्यभिलप्यमानाभावप्रतियोगिभूतमिति यावत्।

**यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्।**
**तं तमेवैति कौन्तेय ! सदा तद्भावभावितः॥ ६॥**

**न मद्विषय एवायं नियमः, किं तर्हि?—** यं यमिति। यं यं वाऽपि, **यं यं** भावं **देवताविशेषं** स्मरन् **चिन्तयन्** त्यजति **परित्यजति** [१]अन्ते **प्राणवियोगकाले** कलेवरं **शरीरम्**, तं तमेव **स्मृतं भावमेव एति, नान्यम्। कौन्तेय !** सदा **सर्वदा** तद्भावभावितः **तस्मिन् भावस्तद्भावः, स** भावितः **स्मर्यमाणतयाऽभ्यस्तो येन स तद्भावभावितः सन्॥ ६॥**

आनन्दगिरिकृतव्याख्या

**अन्तकाले भगवन्तमनुध्यायतो भगवत्प्राप्तिनियमवदन्यमपि तत्काले देवादिविशेषं ध्यायतो देहं त्यजतस्तत्प्राप्तिरवश्यम्भाविनीति दर्शयति—** नेत्यादिना। **कथं पुनरन्तकाले परवशस्य नियतविषयस्मृतिर्भवितुमुत्सहते? तत्राह—**सदेति। **देवादिविशेषः** तस्मिन्निति **सप्तम्यर्थः।** भावो **भावना वासना। स भावो** भावितः **सम्पादितो येन पुंसा स तथाविधः सन् यं यं भावं स्मरति तं तमेव देहत्यागादूर्ध्वं गच्छतीति सम्बन्धः॥ ६॥**

भाष्यार्कप्रकाशः

प्राप्नोतीति - वाच्यम् , तत्त्वविदा निराकारस्यैवात्मनः सच्चिदानन्दरूपस्य स्मर्यमाणत्वात्। अतत्त्वविदो हि साकारमीश्वरं कल्पयित्वा ध्यायन्ति। स्वतःसिद्धे रूपे सति कल्पितरूपध्यायिनामतत्त्ववित्त्वं सर्वसम्प्रतिपन्नम्। न हि रज्जुं सर्पत्वेन ध्यातवान् पुरुषः रज्जुतत्त्वविदिति वक्तुं शक्यते। वास्तवस्वरूपवेत्तृत्वं हि तत्त्ववित्त्वम्। वास्तवं रूपं चात्मनः सच्चिदानन्दमेव।

तस्मात् साकारेश्वरध्यायिनां वैकुण्ठादिलोकगमनसम्भवेऽपि निराकारप्रत्यगभिन्नब्रह्मात्मध्यायिनां न वैकुण्ठादिलोकगमनसम्भवः, श्रुतिस्मृत्यादिविरोधात्। तथा च मरणकाले आत्मस्वरूपचिन्तकास्तत्त्वविदो मद्भावं ब्रह्मत्वमेव प्रयान्ति, न तु लोकान्तरम्।

मद्भावमित्यत्रत्यस्य भावशब्दस्य च रूपार्थवर्णनमयुक्तम् , भावशब्दादाकारार्थालाभात् , धर्मवाचित्वाद्भावशब्दस्य। न च निर्धर्मकस्यात्मनः कथं धर्म इति वाच्यम् , स्वरूपस्यैव धर्मत्वादत्र। अत एव हि वैष्णवं तत्त्वमित्युक्तं भाष्यकृद्भिः। विष्णोरात्मन इदं वैष्णवं तत्त्वं स्वरूपं सच्चिदानन्दात्मकं याति ब्रह्मैव भवतीत्यर्थः।

**ननु** पूर्वमेव ब्रह्मणः सत आत्मनः कथं पुनर्ब्रह्मभाव इति चेत् , **मैवम्।** पूर्वं नाहं ब्रह्मेति विपरीतज्ञानसत्त्वात् तस्य समूलस्य निवृत्तेरेवेह ब्रह्मभावप्राप्तित्वेन विवक्षितत्वात्॥ ५॥

**यं यमिति। मद्विषय एव** आत्मविषय एव। भावः पदार्थः। **देवताविशेष** इन्द्ररुद्रादिः। प्रायेणास्तिकानामिन्द्रादित्यादिदेवतोपासकत्वादिदमुक्तम्। वस्तुतस्तु यं यं भावं पदार्थमात्रमित्येवार्थः। अन्ते मृगस्मरणेन भरतस्य मृगजन्मप्राप्तिदर्शनात्। कोऽसावन्तकालः? अत आह— **प्राणवियोगकाल इति।** प्राणवियोगोपलक्षितकाले इत्यर्थः। वस्तुतः कालस्यानन्तत्वादियमुक्तिः। परमार्थदशायामेव हि कालस्य नाशः। शरीरं स्थूलमित्यर्थः। एवकारार्थमाह—**नान्यमिति**। कौन्तेयेति सम्बुद्धिरित्याह—**हे कौन्तेयेति**। स्त्रीभ्यो ढक्। कुन्त्या अपत्यं कौन्तेयः। **तस्मिन्** इन्द्रादिदेवताविशेषे **भाव**श्चित्तासक्तिः। भावितो वासितः। आहिताग्न्यादित्वाद् भावितशब्दस्य परनिपातः। भाविततद्भाव इत्यर्थः। सदा तद्भावभावितः सन् अत एव अन्ते यं यं भावं वापि स्मरन् कलेबरं त्यजति, हे कौन्तेय! तं तमेवैति। सदा तद्भावभावनां विना अन्ते तद्भावस्मरणं न भवतीत्यत उक्तम्—**सदा तद्भावभावित इति।** न तु स्मृतभावप्राप्तौ सदा तद्भावभावना कारणम्। यद्यन्ते भावनावशात् सुकृतवशाद् दुष्कृतवशाद्वा इन्द्रादिदेवतास्मरणं स्त्रीपश्वादिस्मरणं वा जायते पुंसस्तर्हीन्द्रादिलोकं प्राप्नोति, स्त्र्यादिजन्म वा प्राप्नोतीति निष्कर्षः। न त्विन्द्रादिदेवभावापत्तिः, अनेकेन्द्रादिप्रसङ्गात्।

**एतेनान्ते** विष्णुमूर्तिस्मरणाद् वैकुण्ठलोकप्राप्तिरित्यपि **सिद्धम्। एतेन** 'आक्रुश्य पुत्रमघवान् यदजामिलोऽपि नारायणेति म्रियमाण उपैति मुक्तिम्' इत्यत्र मुक्तिशब्दो वैकुण्ठलोकपर एव, न तु ब्रह्मसायुज्यपर इति च **सिद्धम्।**

---

१. 'अन्ते अन्तकाले' इति पा.।

## तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च।
## मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः॥७॥

**यस्मादेवमन्त्या भावना देहान्तरप्राप्तौ कारणम्—**[तस्मादिति।] **तस्मात् सर्वेषु कालेषु मामनुस्मर यथाशास्त्रं,**

आनन्दगिरिकृतव्याख्या

**सततभावना प्रतिनियतफलप्राप्तिनिमित्तान्त्यप्रत्ययहेतुरित्यङ्गीकृत्यानन्तरश्लोकमवतारयति—** यस्मादिति। **विशेषणत्रयवतो भगवदनुस्मरणस्य भगवत्प्राप्तिहेतुत्वं तस्मादित्युच्यते।** सर्वेषु कालेषु **आदरनैरन्तर्याभ्यां सहेति यावत्। भगवदनुस्मरणे विशेषणत्रय-**

भाष्यार्कप्रकाशः

**ननु** ब्रह्मसायुज्यमिति काचन मुक्तिर्नास्त्येव; वैकुण्ठलोकप्राप्तिरेव मुक्तिः; तत्र स्थितानामनन्तगरुडादिसूरिणां नित्य-मुक्तत्वात् , तल्लोकप्राप्तानामेव शुकादीनां मुक्तत्वव्यवहारात्। ब्रह्मसायुज्ये तु ब्रह्मणि जीवानां लयात् स्वनाशः। तस्यापुरुषार्थत्वमेव स्यात् ; नापि नित्यानां जीवानां लयो भवितुमर्हति, 'निरञ्जनः परमं साम्युपैती'ति श्रुतेर्ब्रह्मसाम्यमेव जीवानाम् , न तु सायुज्यम् ; साम्यं च सच्चिदानन्दत्वात्मकं शुद्धसत्त्वात्मकशरीरवत्त्वं सर्वज्ञत्वादिकं चेति **द्वैतिनां** पूर्वपक्षः।

**अत्रोच्यते**—मुक्तिर्नाम मोक्षः; परित्याग इति यावत्। कस्येत्याकाङ्क्षायां न स्थूलशरीरस्य, तथात्वे नीवीमोक्षस्यापि मोक्षत्वा-पत्तेः। किन्तु प्रियाप्रियस्पर्शस्य, सुखदुःखादिद्वन्द्वस्येति यावत्। स च सशरीरस्य न सम्भवति, 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इति श्रुतेः। न च स्थूलशरीररहितस्य सम्भवतीति वाच्यम् , स्वप्ने स्थूलशरीराभावेऽपि द्वन्द्वदर्शनात् । सुषुप्तौ स्थूलसूक्ष्म-शरीरद्वयाभावे द्वन्द्वादर्शनाच्च शरीरद्वयरहितस्यैव तत्सम्भवः। न हि मनःप्राणयोः सतोः मनोधर्माणां कामसुखदुःखादीनाम् , प्राण-धर्माणां क्षुत्तृडादीनां भवेदननुभवोऽस्मरणं वा। प्रियाप्रिययोरनुभववत् स्मरणमपि हि सुखदुःखावहम्। यद्यपि वैकुण्ठलोके अप्रिया-नुभवो नास्ति , तथाप्यप्रियस्यानुभूतस्य स्मरणमस्त्येव, मनसः सत्त्वादिति कथं वैकुण्ठलोकस्य मुक्तिक्षेत्रत्वम्? सगुणमुक्तिक्षेत्रमिति तु सुखातिशयसद्भावादुपचारादुक्तम्। एवं वैकुण्ठलोके स्थूलसूक्ष्मशरीरद्वयसत्त्वेन जीवस्याशरीरत्वाभावात् प्रियाप्रियस्पर्शमोक्षो नास्त्येव। तव मते ब्रह्मसायुज्यं तु नास्त्येव। अथ 'अशरीरं वाव सन्तम्' इति श्रुतेर्विषयाभावादप्रामाण्यमेव प्राप्तम्। तच्चायुक्तम् आस्तिकानाम्। तस्माच्छ्रुतिप्रामाण्यादस्ति तावदशरीरत्वं जीवानाम्। तदेवाशरीरत्वं ब्रह्मसायुज्यमित्युच्यते, शरीरासंस्पृष्टशुद्ध-चैतन्यस्यैव ब्रह्मत्वात्। न च जीवस्य ब्रह्मणि लयोऽपुरुषार्थ इति वाच्यम् , चैतन्यरूपे जीवे अन्तःकरणविशिष्टत्वरूपजीवत्वस्यैव नाशः, न तु जीवस्येति स्वनाशाभावात्। अन्तःकरणराहित्यस्यैव ब्रह्मसायुज्यत्वान्न जीवानित्यत्वदोषप्रसक्तिः। ब्रह्माभिन्नत्वाज्जीवस्य। ब्रह्म हि नित्यमिति सम्प्रतिपन्नम्।

'निरञ्जनः परमं साम्य'मित्यत्र च परमं निरतिशयं निरुपाधिकं वा साम्यं समत्वमेकत्वम् , अभेदमिति यावत् , उपैतीत्यर्थात्। यत्सर्वदैकरूपं तद्धि समं, यदनेकरूपं तद् विषममिति समत्वस्यैकत्वात्। तस्माद् घटाकाशस्येव घटनाशेन महाकाशसाम्यं जीवस्यापि उपाधिनाशेन ब्रह्मसाम्यमिति सिद्धं ब्रह्मसायुज्यम्। न हि पूर्णस्य चैतन्यस्यावच्छेदकान्तःकरणनाशे जीवेश्वरभेदो भवितुमर्हति, येन जीवस्य ब्रह्मसायुज्यं न सिध्येत्।

द्वैतिनां तु नास्त्येव ब्रह्मसायुज्यम् , प्रत्यगभिन्नं ब्रह्मेति ज्ञानाभावात् तेषाम्। अत एव ते स्वदृष्ट्या ब्रह्मसायुज्याभावं ब्रुवन्ति , यथा नास्तिकाः स्वदृष्ट्या ब्रह्माभावमिति सङ्क्षेपः॥६॥

**तस्मादिति।** तस्माच्छब्दार्थमाह— **यस्मादित्यादिना। अन्त्या भावना** मरणकालिकं स्मरणमित्यर्थः, यं यं वाऽपि स्मरन्निति पूर्वोक्तानुगुण्यात्। अनुभवजन्यः स्मृतिहेतुः संस्कारो भावनेति न्यायशास्त्रम्। भावनाजन्यत्वाच्च स्मरणस्य भावनात्वेन व्यपदेश इह कृतः। **यद्वा** अन्तकाले स्थिता वासना स्मरणद्वारा देहप्राप्तौ कारणमिति बोध्यम्। **तस्मादिति।** अन्तकालोपलक्षितमत्स्मरणस्य मत्सायुज्यहेतुत्वादित्यर्थः। **सर्वेषु कालेष्विति।** अहोरात्रादिविभागापेक्षया बहुत्वम्। सर्वदाऽपीत्यर्थः। सर्वदाऽपि मयि भावे सत्येवान्ते

युद्ध्य च **युद्धं च स्वधर्मं कुरु। मयि वासुदेवेऽर्पिते मनोबुद्धी यस्य तव स त्वं** मय्यर्पितमनोबुद्धिः **सन् मामेव यथास्मृतम्** एष्यसि **आगमिष्यसि,** असंशयः **न संशयोऽत्र विद्यते॥७॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**मामनुस्मर युद्ध्य चेति।** नात्राविक्रियब्रह्मात्मतासाक्षात्कारस्य कर्मणा समुच्चयो विवक्षितः, तटस्थेश्वरस्मरणस्य कर्मयोगाङ्गत्वेन विवक्षितत्वादित्यर्थः॥७॥

आनन्दगिरिकृतव्याख्या

**साहित्यं यथाशास्त्रमिति द्योत्यते। भगवदनुसन्धानं कर्तव्यमुक्त्वा तेन सह स्वधर्ममपि कुरु युद्धमित्युपदिशता भगवता समुच्चयो ज्ञानकर्मणोरङ्गीकृतो भातीत्याशङ्क्याह—** मयीति। **मनोबुद्धिगोचरं क्रियाकारकफलजातं सकलमपि ब्रह्मैवेति भावयन् युध्यस्वेति ब्रुवता क्रियादिकलापस्य ब्रह्मातिरिक्तस्याभावाभिलापान्नात्र समुच्चयो विवक्षित इत्यर्थः। उक्तरीत्या स्वधर्ममनुवर्तमानस्य प्रयोजनमाह—** मामेवेति। **उक्तसाधनवशात् फलप्राप्तौ प्रतिबन्धाभावं सूचयति—**असंशय इति॥७॥

भाष्यार्कप्रकाशः

मत्स्मरणं लभ्यते, न तु यदा कदापि वेति भावः। एवं मत्स्मरणमपरित्यजन्नेव शास्त्रविहितं स्वधर्मं युद्धं कुर्वित्याह— **मय्यर्पितमनोबुद्धिर्युध्य चेति।**[1] शास्त्रमनतिक्रम्य **यथाशास्त्रं**, शास्त्रसिद्धमित्यर्थः। शास्त्रं च दर्शितम् – 'श्रेयान् स्वधर्मो विगुणः परधर्मा'दिति, क्षत्रियस्य युद्धं स्वधर्म इति च।

**ननु** आत्मभजनलक्षणज्ञाननिष्ठायां संन्यासिनामेवाधिकाराज्ज्ञानिनां कर्मण्यनधिकाराच्च कथमर्जुनायोभयं कर्तव्यतयोपदिश्यते भगवता कर्म च ज्ञानं च— 'सर्वेषु कालेषु मामनुस्मरेति, युद्ध्ये'ति च। भिन्नपुरुषानुष्ठेयत्वं हि कर्मज्ञाननिष्ठयोर्दर्शितं प्राक्। न चैककालावच्छेदेन न दर्शितं तदिति वाच्यम् , 'सर्वेषु कालेष्वि'ति युद्धकालेऽपि भगवद्भजनस्य प्रोक्तत्वात्। न च युद्धातिरिक्तेषु सर्वकालेष्वित्युच्यत इति वाच्यम् , 'मय्यर्पितमनोबुद्धिःसन् युद्ध्ये'त्युक्तत्वात् युद्धकालेऽपि भगवद्भजनस्य कर्तव्यत्वापत्तेः। किञ्च 'कुरु कर्मैव तस्मात्त्व'मिति पूर्वमुक्त्वा कथमधुना 'मामनुस्मर युद्ध्य चे'ति चकारेण कर्मज्ञानसमुच्चय उच्यते भगवता वा? तस्मात् समुच्चयो भगवदभिमत एवेत्यनेन ज्ञायते मामनुस्मर युद्ध्य चेति विधानेनेति चेत् , **मैवम्।** अर्जुनमतत्त्ववित्त्वाज्ज्ञाननिष्ठायामनधिकारिणमभिप्रेत्य 'कुरु कर्मैव तस्मात् त्वम्' इत्युक्तं प्राक्। इदानीं तु स्वोपदेशमहिम्ना तत्त्वविदग्रेसरमर्जुनं मत्वा जनकादिवत् त्वं लोकसंग्रहार्थं कर्म कुरु, ज्ञाननिष्ठायां च वर्तस्वेत्युच्यते भगवतेति न पूर्वापरविरोधः। नाप्यनेन कर्मज्ञानसमुच्चयसिद्धिः, मोक्षाय त्वं युद्ध्य चेत्यनुक्तत्वात्।

'कर्मज्ञानसमुच्चय एव मोक्षफलकः, न तु केवलं ज्ञान'मित्याकारकसमुच्चयवादोऽस्माभिर्निराकृतः। न च कर्मज्ञानयोरेकपुरुषानुष्ठेयत्वासम्भवश्च प्रोक्त इति वाच्यम् , कर्तृत्वाभिमानादिपूर्वककर्मनिष्ठाया ज्ञाननिष्ठायाश्चैकपुरुषानुष्ठेयत्वासम्भवस्यास्माभिरुक्तत्वात् , कर्तृत्वाभिमानादिरहितकर्मणामकर्मत्वस्यैव प्रत्युतोक्तत्वात्। तस्मात् तत्त्वविदाऽर्जुनेन जनकादिना वा क्रियमाणं कर्म न कर्म, वासुदेवेन क्रियमाणं कर्मैवेति नास्ति कर्मज्ञानसमुच्चयः।

एतावताऽर्जुनं प्रति कृष्णस्यायमुपदेशःसिद्धः— भो अर्जुन! त्वं यद्यतत्त्ववित् तर्हि कर्मण्येव तवाधिकार इति कुरु स्वधर्मं युद्धम्। यदि तत्त्ववित् तर्हि मत्तत्त्वस्मरणमविहायैव लोकसंग्रहार्थं युद्धं कुरु स्वधर्मं जनकादिवदिति।

न चार्जुनस्यासंन्यासिनः कथमात्मभजनमिति वाच्यम् , क्षत्रियाणां संन्यासाश्रमस्वीकारस्यानावश्यकत्वाज्जनकादेः संन्यासं विनाऽपि ज्ञाननिष्ठत्वदर्शनात्। न च तत्त्वविदोऽर्जुनस्य ज्ञाननिष्ठायामेवाधिकारात् कर्मण्यनधिकाराद् युद्ध्य चेत्युक्तिरयुक्तेति वाच्यम् , फलाभिसन्ध्यहङ्काररहितस्य युद्धस्याकर्मत्वेनास्मिन्नर्जुनस्याधिकारसत्त्वात्। न च तूष्णीम्भाव एवाकर्मेति वाच्यम् , तस्यापि कर्मत्वस्य स्थापितत्वात् 'कर्मण्यकर्म यः पश्येद्' इति श्लोके। न चैवं ब्राह्मणानामपि गृहस्थानामस्त्यधिकारो ज्ञाननिष्ठायामिति वाच्यम् , ब्राह्मणानां ज्ञाननिष्ठाधिकारसिद्ध्यर्थमेव संन्यासस्य श्रुतिभिर्विहितत्वात्।

१. अत्र भाष्यवाक्ययोः पौर्वापर्ये व्यत्यासोऽस्तीति भाति। भाष्यार्कप्रकाशकृत्स्वीकृतः पाठस्तथा स्यात्।

भाष्यार्कप्रकाशः

न च 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज' इत्यर्जुनस्यापि संन्यासो विहित इति वाच्यम् , सर्वपरिग्रहपरित्यागमात्रस्यैव तेन विधानात्। न च तं विनाऽपि ज्ञाननिष्ठासिद्धौ तस्य विधानं व्यर्थमिति वाच्यम् , सति राज्यादिपरिग्रहे विषयव्याकुलचित्तस्यात्मनि मनःसमाधानं दुर्लभमित्यभिप्रेत्य तद्विधानात्। न च प्रकृते परिग्रहपरित्यागं विनाऽपि ज्ञाननिष्ठोपदिष्टेत्ययुक्तमिति वाच्यम् , सत्यपि परिग्रहे जनकादिवच्चित्तविक्षेपाभावे परिग्रहपरित्यागस्यानावश्यकत्वात्। देहभृतां वरेत्यादिसम्बोधनैरर्जुनस्य स्वोपदेशमहिम्ना जनकादितौल्यप्राप्तिरासीदिति भगवद्धृदयस्य ज्ञायमानत्वात्।

भोः अर्जुन ! यदि त्वं जनकादिवद् दृढबोधस्तर्हि सर्वधर्मपरित्यागमकृत्वैव मामनुस्मर युद्ध्य च, यद्यदृढबोधस्तर्हि तावद् युद्ध्य, पश्चात् सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज इत्यर्जुनं प्रति कृष्णोपदेशसिद्धेः।

न च - 'अर्जुनं तत्त्वविदं मत्त्वैव मामनुस्मर युद्ध्य चेत्युक्तं कृष्णेने'त्युक्तं प्राक्, इदानीं तु 'अदृढबोधं मत्वा सर्वधर्मान् परित्यज्येत्युच्यते' इत्युच्यते, कथमिदं विरुद्धमिति वाच्यम् , अर्जुनं निमित्तीकृत्य सर्वलोकोपकारार्थमस्य शास्त्रस्य प्रवृत्तत्वात् क्वचिदर्जुनस्य दृढबोधत्वेन क्वचिददृढबोधत्वेन च निर्देशः सम्भवत्येव। दृढबोधानामदृढबोधानां च पुंसां शास्त्राधिकारिणां सत्त्वात्।

तस्मात् तत्त्वविज्जनकादिदृष्ट्योक्तमिदम्— मामनुस्मर युद्ध्य चेति। [1]यथा भगवता नारायणेन चतुर्मुखाय - मामनुस्मरन् सृष्टिं कुरु, 'भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचिदि'त्युक्तम् , तद्वत्। अतस्तत्त्वविदः क्षत्रियस्यार्जुनस्य ज्ञाननिष्ठायां स्थितस्यापि युद्धे प्रवृत्तिः सम्भवत्येव जनकादिवद् ब्रह्मादिवच्च।

न चैतावता कर्मज्ञाननिष्ठयोर्युगपदेकपुरुषानुष्ठेयत्वमागतमिति वाच्यम् , ज्ञाननिष्ठपुरुषकृतकर्मणां कर्मत्वाभावात्। यथा संन्यासिकृतानां भिक्षाटनादिकर्मणाम् , यथा वा वासुदेवकृतानां दुष्टशिक्षणादिकर्मणामिति।

न च अहं ब्रह्मास्मीति स्मरतः कथं कर्मसु प्रवृत्तिरिति वाच्यम् , 'प्रकृतेः क्रियमाणानि गुणैः कर्माणी'ति पूर्वोक्तत्वेन प्रकृति-गुणैरेव कर्मणां क्रियमाणत्वाद् न कर्मसु तत्त्वविदः प्रवृत्तिः। तत्त्वविद्धि आत्मा; आत्मा हि पूर्णोऽचलः प्रवृत्तिनिवृत्त्यविषयः। अज्ञो वा तत्त्वविदि तद्देहाद्याश्रयं कर्मारोपयति, यथा आत्मनि स्वदेहाश्रयं भोजनादिकर्म। नैतावता कर्तृत्वप्रसक्तिस्तत्त्वविदः, न ह्यज्ञजनारोपित-नैल्येन गगनस्य नीलत्वं प्रसज्यते। य एवंवित् स देहादिभिः कर्म कुर्वन्नप्यकर्तैव। 'कुर्वन्नपि न लिप्यते' इतीहैवोक्तं हि। अत एव तत्त्वविदा कृतं कर्माप्यकर्मैव, अबन्धकत्वादिति न तत्त्वविदः कर्मण्यधिकार इति।

**ननु** अन्तकालोपलक्षितात्मस्मरणस्यैव मुक्तिहेतुत्वात् , तस्य च सार्वकालिकात्मभजनलभ्यत्वान्मुमुक्षवे अर्जुनाय सर्वेषु कालेषु मामनुस्मरेत्येतावदेव वक्तव्यम् , न तु युध्य चेति, युद्धकरणस्यान्तकालिकात्मस्मरणाहेतुत्वादिति चेत् , **उच्यते**—नेह युद्धं कर्तव्यतयोपदिश्यते, किन्तु युद्धादुपरमं मा कार्षीरिति युद्धादुपरमस्याकर्तव्यत्वमुपदिश्यते, निवृत्तिलक्षणत्वाद् गीताशास्त्रस्य। तस्माद् युध्यस्व विगतज्वर इत्यत्राचार्यैरेवैतद् भाषितम्।

**नन्वेव**मपि अन्तकाले आत्मस्मरणलाभार्थं सर्वदा मामनुस्मरेत्येतावदेव वक्तव्यम् , न तु युद्धादुपरमोऽकर्तव्य इति चेत् , **सत्यम्** , आत्मस्मरणलाभार्थं युध्य चेति नोक्तम् , किन्तु सर्वदाऽप्यात्मानं स्मरतोऽपि तव युद्धादुपरमाद् अनुपरम एव श्रेयान् ऐहिकप्रतिष्ठाहेतुत्वादित्युच्यते – 'शरीरयात्राऽपि च ते न प्रसिध्येदकर्मणः' इति हि प्रागेवोक्तम्।

न च मुमुक्षोस्तत्त्वविदः किमैहिकप्रतिष्ठयेति वाच्यम् , लोकसंग्रहार्थं मुमुक्षुणा तत्त्वविदाऽपि प्रतिष्ठैव सम्पादनीया, न त्वप्रतिष्ठा; अन्यथा अल्पज्ञोऽपि तत्त्ववित्तौल्यमात्मनि सम्भाव्य विड्वराहादिवदभक्ष्यभक्षणादिकं कुर्यात् , तेन चाधः पतेत्। एवं च लोकोपद्रवकारिण्येव स्यात् तत्त्वविदः प्रवृत्तिः। लोकानुग्रह एव कर्तव्यस्तत्त्वविदा वासुदेववत्।

न चैवं तत्त्वविदा ब्राह्मणेन गृहस्थेन लोकसंग्रहार्थं कर्मैव कर्तव्यं, न तु संन्यसितव्यमिति वाच्यम् , लोकसंग्रहार्थं संन्यासस्यैव स्वीकर्तव्यत्वात्। उन्मार्गान्निवर्त्य शास्त्रविहितमार्गे प्रवर्तनं हि लोकस्य लोकसंग्रहः। संन्यासस्तु नोन्मार्गः, किन्तु विहितमार्ग एव, 'ब्राह्मणो निर्वेदमायात्' 'यदहरेव विरजेत् तदहरेव प्रव्रजेद्' इत्यादिश्रुतिभ्यः। स च संन्यासः ज्ञानार्थमेव मुमुक्षोर्ब्राह्मणस्य विहित इति

१. द्र. भागवतम् २.९.३०—३६

**अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।**
**परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन्॥ ८॥**

**किञ्च—** अभ्यासेति। अभ्यासयोगयुक्तेन **मयि [1]चित्तसमर्पणविषयभूते एकस्मिन् तुल्यप्रत्ययावृत्तिलक्षणो**

आनन्दगिरिकृतव्याख्या

**इतश्च पूर्वश्लोकोक्तार्थानुष्ठायी भगवन्तमन्तकाले प्राप्नोतीत्याह—**किञ्चेति। **अभ्यासं विभजते—**मयीति। **न हि चित्तसमर्पणस्य विषयभूतं भगवतोऽर्थान्तरं वस्तु सदस्तीति मन्वानो विशिनष्टि—**चित्तेति। **अन्तरालकालेऽपि विजातीयप्रत्ययेषु विच्छिद्य विच्छिद्य**

भाष्यार्कप्रकाशः

कृत्वा जन्मान्तरीयसंन्यासाश्रमसामयिकवेदान्तश्रवणादिबललब्धतत्त्वज्ञानोऽपि वामदेवादिवत्[2] तत्त्वविद् गृहस्थः लोकसंग्रहार्थं संन्यासाश्रमं स्वीकृत्य वेदान्तश्रवणं गुरुसन्निधौ कुर्यादेव। यथा वा **भगवत्पादश्रीशङ्कराचार्योः** स्वत एव तत्त्वविदोऽपि संन्यस्य श्रीभगवत्पूज्यगोविन्दपादगुरुसन्निधौ वेदान्तश्रवणमकुर्वन् , तद्वदिति।

न च क्षत्रियादीनां विनैव संन्यासं ज्ञाननिष्ठाप्राप्तिर्ब्राह्मणस्य तु नेति किमपराद्धं ब्राह्मणेनेति वाच्यम् , अतीव जन्मान्तरार्जित-पुण्यातिशयबललभ्यत्वाद् ब्राह्मणत्वस्य। महापुण्यो हि ब्राह्मणः। अत एव तस्य संन्यासाश्रमस्वीकारयोग्यता। संन्यासाश्रमो हि सर्वलोकवन्द्यः, यथा ब्राह्मणः सर्ववर्णवन्द्यः। तत्त्वज्ञानमसम्पाद्य मृतस्याप्यस्य न यमदर्शनम् , किन्त्विन्द्रदर्शनमिति स्वर्गप्राप्तिरेव। अथवा पुनर्ब्राह्मणजन्मप्राप्तिः, तत्त्वज्ञानसम्पादने च संन्यासाश्रमस्वीकारोऽन्तरङ्गसाधनम् , सति परिग्रहे चित्तविक्षेपाद् वेदान्तश्रवणा-सिद्धेरिति मुमुक्षोः परिग्रहपरित्याग आवश्यक एवेति कृतं ब्राह्मणेन महदेव सुकृतम् , न त्वपराद्धम् , यत् संन्यासाश्रमस्वीकारयोग्यता ब्राह्मणस्य।

यस्तु ब्राह्मणःसन्नपि परिग्रहपरित्यागं नेच्छति वैराग्याभावात् तस्य संन्यासाश्रमस्वीकारयोग्यतैव नास्ति। 'यदहरेव विरजेत् तदहरेव प्रव्रजेद्' इति वैराग्यस्यैव संन्यासं प्रति हेतुत्वम्। एवं वैराग्यहीनत्वादिहामुत्रफलभोगकामपरवशस्य गृहस्थस्य कुतः पुन-र्वेदान्तश्रवणप्रसक्तिः? 'अथातो ब्रह्मजिज्ञासा' इति साधनचतुष्टयसम्पन्नस्य हि ब्रह्मविचारेऽधिकार इत्युक्तं **बादरायणेन**[3]।

य एवं गृहस्थः शमदमादिसम्पत्त्यभावेऽपि कथञ्चित् कुतूहलितया वेदान्तश्रवणे प्रवर्तते, स हि स्वयमुन्मार्गे प्रवर्तमानः लोकं चोन्मार्गे प्रवर्तयतीति न तस्याचार आस्तिकैर्ग्रहीतुमुचितः। न च कुतूहलकृतमपि वेदान्तश्रवणमनर्थकमिति वाच्यम् , वेदपाठवत् सुकृतहेतुत्वाद् एतत्संस्कारेण जन्मान्तरेऽपि संन्यासाश्रमस्वीकारसम्भवात्। संन्यासस्वीकारप्रतिबन्धकपापस्य निष्कामकर्मादिना नाशे सति संन्याससम्भवात्। तस्मान्मुमुक्षोर्गृहस्थस्य ब्राह्मणस्य संन्यासाश्रमस्वीकारपूर्वकमेव ज्ञाननिष्ठायामधिकारः, संन्यासाभावे तु कर्मनिष्ठायामेव। क्षत्रियादीनां तु तत्त्वविदां विनाऽपि ज्ञाननिष्ठायां कर्मनिष्ठायां वा स्वार्थं लोकसंग्रहार्थं वाऽधिकार इति सुस्थम्॥ ७॥

अथ यश्चाधिदैवतं पुरुषं चिन्तयति स तं यातीत्युच्यते श्लोकद्वयेन—**अभ्यासेति, कविमिति च।** हे पार्थ! यः अभ्यासयोगयुक्तेन नान्यगामिना चेतसा परमं पुराणं कविं दिव्यं सर्वस्यानुशासितारं धातारमणोरणीयांसमादित्यवर्णं तमसः परस्तात् स्थितमिति शेषः। अचिन्त्यरूपं पुरुषमनुस्मरेत् , स तमनुचिन्तयन् याति; यः परमत्वादिविशेषणविशिष्टं पुरुषमनुध्यायति स तमेव पुरुषं यातीत्यर्थः। अस्य च पुरुषस्येश्वरत्वादाह—**मयीति।** पुरुषे इत्यर्थः। **समर्पणा** समर्पणम्। **विलक्षणप्रत्ययैः** विसजातीयज्ञानैः **अनन्तरितः** अव्यवहितः **तुल्यप्रत्ययानां** सजातीयज्ञानानाम् आवृत्तिरभ्यास एव लक्षणं स्वरूपं यस्य सः विलक्षणप्रत्ययानन्तरिततुल्यप्रत्ययावृत्ति-

---

१. 'चित्तसमर्पणाविषयभूते' इति रा.पा.। २. वामदेवस्य हि गर्भगतस्यैव जन्मान्तरीयसंन्यासाश्रम-वेदान्तश्रवणादिबलात् तत्त्वज्ञानमभूदिति 'गर्भ एवैतच्छयानो वामदेव एवमुवाच'(ऐ.उ.२-५) इति श्रुतौ प्रसिद्धम्। ऐहिकाधिकरणे (ब्र.सू. ३-४-५१) भाष्यकारैरप्युक्तम्— 'तथा च श्रुतिः....गर्भस्थ एव च वामदेवः प्रतिपेदे ब्रह्मभावमिति वदन्ती जन्मान्तरसंचितात् साधनाज्जन्मान्तरे विद्योत्पत्तिं दर्शयति।' इति। तादृशोऽपि गृहस्थः लोकसंग्रहार्थं संन्यासं स्वीकृत्य वेदान्तश्रवणं गुरुसन्निधौ कुर्यादेवेति। ३. शास्त्रप्रथमसूत्रेऽस्मिन् शास्त्रारम्भोपयोगितयाऽथशब्देन साधनचतुष्टयसंपत्त्यानन्तर्याभिधानमुखेन नित्यानित्यविवेकवैराग्यादिसंपन्नो ऽधिकारी दर्शित इति बोध्यम्।

**कविं पुराणमनुशासितारम् अणोरणीयांसमनुस्मरेद् यः।**
**सर्वस्य धातारमचिन्त्यरूपम् आदित्यवर्णं तमसः परस्तात्॥९॥**

**विलक्षणप्रत्ययानन्तरितोऽभ्यासः, स चाभ्यासो योगः, तेन युक्तं तत्रैव व्यापृतं योगिनश्चेतः, तेन चेतसा,** नान्यगामिना **नान्यत्र विषयान्तरे गन्तुं शीलमस्येति नान्यगामि, तेन नान्यगामिना,** परमं **निरतिशयं पुरुषं** दिव्यं **दिवि सूर्यमण्डले भवं** याति **गच्छति, हे पार्थ!** अनुचिन्तयन् **शास्त्राचार्योपदेशमनु ध्यायन्नित्येतत्॥८॥**

[1]**किंविशिष्टं च पुरुषं यातीत्युच्यते—**कविमिति। कविं **क्रान्तदर्शिनं सर्वज्ञं,** पुराणं **चिरन्तनम्,** अनुशासितारं **सर्वस्य जगतः प्रशासितारम्,** अणोः **सूक्ष्मादपि** अणीयांसं **सूक्ष्मतरम्** अनुस्मरेद् **अनुचिन्तयेद् यः कश्चित्,** सर्वस्य

आनन्दगिरिकृतव्याख्या

**जायमानेष्वपि सजातीयप्रत्ययावृत्तिरयोगिनोऽपि स्यादित्याशङ्क्याह—**विलक्षणेति। **अभ्यासाख्येन योगेन युक्तत्वं चेतसो विवृणोति—**तत्रैवेति। **तृतीयया परामृष्टोऽभ्यासयोगः सप्तम्याऽपि परामृश्यते। ननु [न तु] प्राकृतानां चेतस्तथेत्याशङ्क्य विशिनष्टि—**योगिन इति। **तच्चेच्चेतो विषयान्तरं परामृशेन्न तर्हि परमपुरुषार्थप्राप्तिहेतुः स्यादित्याशङ्क्याह—**नान्यगामिनेति। **प्रामादिकं विषयान्तरपारवश्यमभ्यनुज्ञातुं ताच्छील्यप्रत्ययः**[2]**। तेन तात्पर्यादपरामृष्टार्थान्तरेण परमपुरुषनिष्ठेनेत्यर्थः। तदेव पुरुषस्य निरतिशयत्वं यदपरामृष्टाखिलानर्थत्वमनतिशयानन्दत्वं च। तच्च प्रागेव व्याख्यातं नेह व्याख्यानमपेक्षते। 'यश्चासावादित्ये' इत्यादिश्रुतिमनुसृत्याह—**दिवीति। **तत्र विशेषतोऽभिव्यक्तिरेव** भवनम्। **पूर्वोक्तेन चेतसा यथोक्तं पुरुषमनुचिन्तयन् याति तमेवेति सम्बन्धः। अनुचिन्तयन्नित्यत्रानुशब्दार्थं व्याचष्टे—**शास्त्रेति। **चिन्तयन्निति व्याकरोति—**ध्यायन्निति॥८॥

पुरुष**मनुचिन्तयन्निति सम्बन्धः। चकारात् कया वा नाड्योत्क्रामन्नित्यनुकृष्यते। तत्र ध्यानद्वारा प्राप्यस्य पुरुषस्य विशेषणानि दर्शयति—**उच्यत इति। **क्रान्तदर्शित्वम् अतीतादेरशेषस्य वस्तुनो** [3]**दर्शनशालित्वम्। तेन निष्पन्नमर्थमाह—** सर्वज्ञमिति। चिरन्तनम् **आदिमतः सर्वस्य कारणत्वादनादिमित्यर्थः। सूक्ष्ममाकाशादि, ततः सूक्ष्मतरं, तदुपादानत्वादित्यर्थः। यो यथोक्तमनुचिन्तयेत् स तमेवानुचिन्तयन् यातीति पूर्वेणैव सम्बन्ध इति योजना। ननु विशिष्टजात्यादिमतो यथोक्तमनुचिन्तनं फलवद् भवति, न त्वस्मदादीना-**

भाष्यार्कप्रकाशः

रभ्यासः। स च प्रकृते पुरुषविषय इत्यभिप्रेत्योक्तम्— **मयीति**। योगश्चित्तसमाधानम्, अभ्यासरूपो योगोऽभ्यासयोगः। तेन युक्तं अभ्यासयोगयुक्तम्, तेन अभ्यासयोगे व्यापृतेनेत्यर्थ इत्याह— **तत्रैवेति**। न अन्यगामि नान्यगामि, नञर्थकनशब्देन समासः, नञा सह समासे तु अनन्यगामीति स्यात्। **अनुचिन्तयन्** अनुसृत्य ध्यायन्। किमनुसृत्येत्यत आह— **शास्त्राचार्योपदेशमिति॥८॥**

**क्रान्तदर्शिनं** दूरदर्शिनम्; फलितमाह— **सर्वज्ञमिति। चिरन्तनम्** अनादिम्। **अनुशासितारं** नियन्तारम्। **सूक्ष्माद्** दुर्ज्ञेयादित्यर्थः। न त्वणुपरिमाणात् सूक्ष्मं परमाणुभूतमित्यर्थः, तथात्वे परमात्मनो विष्णोर्व्यापकत्वभङ्गप्रसङ्गात्। 'अणोरणीयान् महतो महीयान्' इति श्रुतिविरोधात्। न चाणोर्जीवात् सूक्ष्मतरम् अणीयांसमिति वाच्यम्, जीवस्याणुत्वे [4]सावयवत्वप्रसङ्गात्। ततश्चानित्यत्वप्रसङ्गात्, सर्वगतत्वासम्भवप्रसङ्गाच्च। निराकृत एवायं प्रागेव जीवाणुत्ववादः। ईश्वरस्य परमाणुप्रायत्वे 'महतो महीयान्' इति श्रुतिविरोधः, सर्वव्यापित्वाद्यनुपपत्तिश्चेत्यनुपदमेवोक्तम्।

**विचित्रतया** विलक्षणत्वेन परस्परं भिन्नत्वेनेत्यर्थः। **विभक्तारं** विभज्य कृतवन्तम्। अयं प्राणी अस्मात् कर्मण इदं फलमनुभवत्विति व्यवस्थापूर्वकं कर्मफलानि निर्मितवन्तमित्यर्थः। **अचिन्त्यरूपं** चिन्तयितुमशक्यमचिन्त्यं रूपं विग्रहो यस्य तम्, हिरण्यश्मश्रुत्वादिविलक्षणसंस्थानविग्रहत्वात् केनचित् चिन्तयितुं न शक्यते रूपमस्येत्यर्थः। प्रत्यक्षदृष्टं वस्तु चिन्तयितुं शक्यते, अदृष्टमपि

१. 'किंविशिष्टं पुरुषमनुचिन्तयन्, कया वा नाड्योत्क्रामन् यातीत्युच्यते' इति भाष्ये आनन्दगिरीयानुसारिणी योजना। २. 'नान्यगामिना' इत्यत्र णिनिप्रत्ययः इत्यर्थः। ३. 'दर्शनशीलत्वम्' इति पा.। ४. द्र.भ.गी. २-१७।

**कर्मफलजातस्य** धातारं **विधातारं विचित्रतया प्राणिभ्यो विभक्तारं विभज्य दातारम् ,** अचिन्त्यरूपं **नास्य रूपं नियतं विद्यमानमपि केनचिच्चिन्तयितुं शक्यत इत्यचिन्त्यरूपः तम् ,** आदित्यवर्णम् **आदित्यस्येव नित्यचैतन्यप्रकाशो वर्णो यस्य तमादित्यवर्णम् ,** तमसः परस्ताद् **अज्ञानलक्षणाद् मोहान्धकारात् परं तमनुचिन्तयन् यातीति पूर्वेणैव सम्बन्धः॥९॥**

आनन्दगिरिकृतव्याख्या

**मित्याशङ्क्याह—**यः कश्चिदिति। **'फलमत उपपत्तेः' इति न्यायेनाह—**सर्वस्येति। **'एतदप्रमयं ध्रुवम्' इति श्रुतिमाश्रित्याह—**अचिन्त्य-रूपमिति। **न हि परस्य किञ्चिदपि [1]रूपादि वस्तुतोऽस्ति 'अरूपवदेव हि' इति न्यायात्। कल्पितमपि नास्मदादिभिः शक्यते चिन्तयितुमित्याह—** नास्येति। **मूलकारणादज्ञानात् तत्कार्याच्च** परस्ताद् **उपरिष्टाद् व्यवस्थितं परमार्थतोऽज्ञानतत्कार्यास्पृष्टमित्याह—** तमस इति॥९॥

भाष्यार्कप्रकाशः

दृष्टसरूपम्। इदं तु हिरण्यगर्भस्य रूपं शास्त्रैकगम्यत्वाद् दृष्टविलक्षणत्वाच्च चिन्तयितुं न शक्यत इत्यभिप्रायः। न तु रूपस्याभावा-दचिन्त्यत्वमित्याह— **विद्यमानमपीति।** चैतन्यप्रकाशः चैतन्यवत् सर्वमादित्यादिकं प्रकाशयतीति चैतन्यप्रकाशः। यथा चैतन्यं सर्वं बोधयति, तथा पुरुषस्य वर्णो हिरण्मयत्वात् सर्वं भासयति, प्रदीपादिवदित्यर्थः। यथा आदित्यस्य वर्णः सर्वजगदवभासकः प्रत्यक्षः तथा पुरुषस्यापीत्यर्थः। अज्ञानमूढहृदयस्य पुरुषध्यानासम्भवादाह— **तमसः परस्तात् स्थितमिति।** न चेश्वरस्य पुरुषस्य कथं रूपसद्भाव इति वाच्यम् , मायया तत्सद्भावात्।

**अथवा** अस्मद्देहस्थित आत्मा यथा प्रत्यगात्मेति व्यवह्रियते, तथा देवस्य सूर्यस्य मण्डले स्थित आत्मा परमात्मेति व्यवह्रियते। अतोऽस्य परमपुरुषत्वं, प्रतीचस्तु पुरुषत्वम्। एवं सति सूर्यमण्डलान्तःस्थस्य पुरुषस्याधिदैवतस्य यद् वास्तवं रूपं नित्यचैतन्यात्मकं तदेवेह ध्येयत्वेन प्राप्तत्वेन चोच्यते। न तु कल्पितं हिरण्यश्मश्रुत्वादिविशिष्टं रूपम्। न चैवमचिन्त्यरूपमिति विरुध्येदिति वाच्यम् , यदस्य पुरुषस्य विद्यमानं पारमार्थिकं रूपं सच्चिदानन्दात्मकं तत् केनापि चिन्तयितुमशक्यम् अवाङ्मनस-गम्यत्वादित्यविरोधात्। अत एवेदं तमसः परस्तात् स्थितम्। अज्ञानपारगमनं विना चैतन्यसाक्षात्कारासम्भवात्। अज्ञानमत्र समुद्रस्थानीयम् , तन्नाशस्तु परपारस्थानीयः। यथा अन्धकारावृतचक्षुषो घटादिरप्रत्यक्षः तथा अज्ञानावृतचेतसः पुरुषोऽप्रकाशः। अत उक्तम्— अज्ञानात्परतः स्थितमिति। पुरुषस्य स्वरूपमाह— **आदित्यवर्णमिति**। यथा आदित्यस्य वर्णोऽस्ति, तथा पुरुषस्य नित्यचैतन्यप्रकाशोऽस्तीत्यर्थः। यथा आदित्यः सर्वजगदवभासकत्वेन प्रकाशात्मकवर्णशाली, तथा पुरुषः सर्वजगदवभासकत्वेन प्रकाशात्मकचैतन्यशालीति यावत्। आदित्यस्य प्रकाशो दीप्तिः, पुरुषस्य प्रकाशस्तु चैतन्यं ज्ञानमिति विवेकः। अत एवोक्तम्— **नित्यचैतन्यप्रकाश इति**। नित्यचैतन्यात्मकः प्रकाश इत्यर्थः। अस्य परमपुरुषस्य चैतन्यरूपस्य कर्मफलविधातृत्वादिकं तु माययोपपद्यते। सूक्ष्मात् सूक्ष्मतरत्वं चास्मिन्नुपपन्नतरम्। हिरण्यश्मश्रुत्वादिविशिष्टपुरुषे तु नातीवोपपद्यते, साकारस्य दुर्ज्ञेयत्वा-सम्भवात्। अणोरणीयानिति श्रुतिश्च चैतन्यपरैव, साकारस्य पुरुषस्य महतो महीयस्त्वासम्भवात्। न चैवमध्यात्माधिदैवतयो-रेकत्वमेवेति वाच्यम् , इष्टापत्तेः। एक एव ह्यात्मा सूर्यमण्डलमध्यस्थः पुरुषोऽधिदैवतमिति, अस्मदादिदेहस्थः प्रत्यगात्माऽध्यात्म-मिति चोच्यत इत्यौपाधिक एव ह्यध्यात्माधिदैवतयोर्भेदः।

न च स्वान्तरस्थमात्मानं विहाय सूर्यान्तरस्थस्यात्मनश्चिन्तनं व्यर्थमिति वाच्यम् , न व्यर्थम्। यः सूर्ये भक्तः, तस्य सूर्य-भक्तिरूपप्रतिबन्ध[क]सद्भावात् प्रत्यगात्मोपासनं न घटते। स्वात्मभक्तस्यैव हि स्वात्मोपासनं घटते। तस्य सूर्यभक्तस्य मुमुक्षोरात्मनि प्रीतिं जनयितुं हितैषिणी श्रुतिः सूर्यबिम्बोपाधिकपुरुषोपासनं विहितवती। यथा महिषीस्नेहप्रतिबद्धस्य भिक्षोर्महिष्युपाधिकं ब्रह्मोपदिश्य गुरुस्तं भिक्षुमात्मनि व्युत्पन्नं चकार[2], तद्वदिति। एतेन मुक्तिकामानां विष्णुरुद्रादिभक्तानामपि विष्णुरुद्रादिशरीरावच्छिन्नः आत्मैवो-

१. 'रूपं' इति पा.। २. इयं कथा लोकप्रसिद्धेति पञ्चदश्यां ध्यानदीपे ४१-४२ श्लोकयोरुपनिबद्धा।

**प्रयाणकाले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव।**
**भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम्॥ १०॥**

**किञ्च —** प्रयाणेति। प्रयाणकाले **मरणकाले मनसा** अचलेन **चलनवर्जितेन,** भक्त्या युक्तो **भजनं भक्तिस्तया युक्तो** योगबलेन चैव **योगस्य बलं योगबलं समाधिजसंस्कारप्रचयजनितचित्तस्थैर्यलक्षणं योगबलम् , तेन च युक्त इत्यर्थः; पूर्वं हृदयपुण्डरीके वशीकृत्य चित्तं, ततः ऊर्ध्वगामिन्या नाड्या भूमिजयक्रमेण भ्रुवोर्मध्ये प्राणम्** आवेश्य

अनुभूतिस्वरूपाचार्यटिप्पणम्

**ततो** हृदयाद् **ऊर्ध्वगामिन्या** सुषुम्नाख्यया **नाड्या** ऊर्ध्वमाक्रम्य **भूमिजयक्रमेणेति**। [१]कण्ठे यः स्तन इवावलम्बते मांसखण्डः, तं भित्त्वा तालुकयोश्च मध्ये गत्वेत्यर्थः॥ १०॥

आनन्दगिरिकृतव्याख्या

**इतश्च भगवदनुस्मरणं सफलत्वादनुष्ठेयमित्याह—**किञ्चेति। **कदा तदनुस्मरणे प्रयत्नातिरेकोऽभ्यर्थ्यते? तत्राह—**प्रयाणकाल इति। **कथं तदनुस्मरणमित्युपकरणकलापमपेक्षमाणं प्रत्याह—**मनसेति। **योऽनुस्मरेत् स किमुपैति? तत्राह—**स तमिति। **मरणकाले क्लेशबाहुल्येऽपि प्राचीनाभ्यासप्रसादासादितबुद्धिवैभवो भगवन्तमनुस्मरन् यथास्मृतमेव देहाभिमान[२]विगमानन्तरमुपगच्छतीत्यर्थः। भगवदनुस्मरणस्य साधनं 'मनसैवानुद्रष्टव्य'मिति श्रुत्युपदिष्टमाचष्टे—**मनसेति। **तस्य चञ्चलत्वान्न स्थैर्यमीश्वरे सिध्यति, तत् कथं तेन तदनुस्मरणमित्याशङ्क्याह—**अचलेनेति। **ईश्वरानुस्मरणे प्रयत्नेन प्रवर्तितं विषयविमुखं तस्मिन्नेवानुस्मरणयोग्ये पौनःपुन्येन प्रवृत्त्या निश्चलीकृतं ततश्चलनविकलं, तेनेति व्याचष्टे—**चलनेति। **सम्प्रत्यनुस्मरणाधिकारिणं विशिनष्टि—**भक्त्येति। **परमेश्वरे परेण प्रेम्णा सहितो विषयान्तरविमुखो[३]ऽनुस्मर्ता इत्यर्थः। योगबलमेव स्फोरयति—**समाधिजेति। योगः **समाधिः, चित्तस्य विषयान्तरवृत्तिनिरोधेन परस्मिन्नेव स्थापनम्, तस्य** बलं **संस्कारप्रचयो ध्येयैकाग्र्यकरणम्, तेन तत्रैव स्थैर्यमित्यर्थः। चकारसूचितमन्वयमन्वाचष्टे—**तेन चेति। **यत्तु कया नाड्योत्क्रामन् यातीति? तत्राह—**पूर्वमिति। **चित्तं हि स्वभावतो विषयेषु व्यापृतं तेभ्यो विमुखीकृत्य हृदये पुण्डरीकाकारे परमात्मस्थाने यत्नतः स्थापनीयम्। 'अथ यदिदमस्मिन् ब्रह्मपुरे' इत्यादिश्रुतेः। तत्र चित्तं वशीकृत्यादावनन्तरं कर्तव्यमुपदिशति—**तत इति। **इडापिङ्गले दक्षिणोत्तरे नाड्यौ हृदयान्निःसृते निरुध्य, तस्मादेव हृदयाग्राद‍ूर्ध्वगमनशीलया सुषुम्नया नाड्या हार्दं प्राणमानीय [४]कण्ठावलम्बितस्तनसदृशं मांसखण्डं प्रापय्य, तेनाध्वना भ्रुवोर्मध्ये तमावेश्याप्रमादवान् ब्रह्मरन्ध्राद् विनिष्क्रम्य 'कविं पुराण'मित्यादि-विशेषणं परमपुरुषमुपगच्छतीत्यर्थः।** भूमिजयक्रमेणेत्यत्र **भूम्यादीनां पञ्चानां भूतानां** जयो **वशीकरणम् , तस्य तस्य भूतस्य**

भाष्यार्कप्रकाशः

पास्यः, न तु शरीरमिति सिद्धम्।

एवं सूर्यमण्डलस्थे पुरुषे चिन्त्यमाने सति तत्स्वरूपसाक्षात्कारो जायते। ततश्च स एव पुरुषः सर्वगत इति स्वात्मनः तत्पुरुषस्य चाभेदनिश्चयो जायते। ततश्च प्रत्यगभिन्नपरमात्मसाक्षात्काराद् ब्रह्मसायुज्यं प्राप्नोतीति भावः।

**अत्रायं विवेकः**—यः परमात्मानं प्रत्यग्रूपेण भजमानः सदा[५] मरणकाले स्मरति, यश्च सूर्यमण्डलमध्यस्थपुरुषरूपेण स एवाहमिति भजमानोऽन्ते स्मरति, तावुभावपि तत्त्वविदौ ब्रह्मभावं प्राप्नुतः। [६]यस्तु परमात्मानं हिरण्यश्मश्रुत्वादिविशिष्टसूर्यबिम्बस्थ-पुरुषरूपेण भजमानोऽन्ते स्मरति स हिरण्यगर्भलोकं प्राप्नोतीति॥ ९॥

**प्रयाणेति**। एवं ज्ञानिनोऽन्ते कर्तव्यं प्रदर्श्य योगिनः प्रदर्शयति—**प्रयाणेत्यादिना**। **भजनम्** आत्मस्वरूपानुसन्धानम्। **पूर्वम्** आदौ। **ततः** पश्चाद् **नाड्या** सुषुम्नया भूमिजयः, आसनजयः, तत इन्द्रियप्राणमनोजयाः **क्रम**शब्दार्थः। न केवलयोगिनः परमपुरुष-

१. 'कण्ठे कर्णे' इति पा.। २. 'निर्गमा' इति पा.। ३. 'अनुस्मर्तव्य' इति पा.। ४. द्र. तै.उ. भाष्यम् १-६। ५. सदा भजमानः इत्यन्वयः। ६. प्रत्यगभिन्नपरमात्म-साक्षात्काराभावाद् नास्य ब्रह्मसायुज्यमिति भावः।

**यदक्षरं वेदविदो वदन्ति विशन्ति यद् यतयो वीतरागाः।**
**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत् ते पदं संग्रहेण प्रवक्ष्ये॥ ११॥**

**स्थापयित्वा** सम्यग् **अप्रमत्तः सन्** स एवं [1]**विद्वान् योगी 'कविं पुराण'मित्यादिलक्षणं तं परं पुरुषम्** उपैति **प्रतिपद्यते** दिव्यं **द्योतनात्मकम्**॥ १०॥

[2]**(योगमार्गानुगमनेनैव ब्रह्मविद्यामन्तरेणापि ब्रह्म प्राप्यत इत्येवं प्राप्त इदमुच्यते।) पुनरपि वक्ष्यमाणेनोपायेन प्रतिपित्सितस्य ब्रह्मणो वेदविद्वदनादिविशेषणविशेष्यस्याभिधानं करोति भगवान्—** यदक्षरमिति। यदक्षरम् - **न क्षरतीत्यक्षरम् अविनाशि,** वेदविदो **वेदार्थज्ञाः** वदन्ति, **'तद्वा एतदक्षरं गार्गि ब्राह्मणा अभिवदन्ति'(बृ.उ.३.८.८) इति श्रुतेः** [3]**सर्वविशेषनिवर्तकत्वेनाभिवदन्ति—'अस्थूलमनण्व'त्यादि। किञ्च** विशन्ति **प्रविशन्ति सम्यग्दर्शनप्राप्तौ सत्यां यद्** यतयो **यतनशीलाः संन्यासिनो** वीतरागाः **वीतो विगतो रागो येभ्यस्ते वीतरागाः। यच्चाक्षरमिच्छन्तः, ज्ञातुमिति वाक्यशेषः; ब्रह्मचर्यं गुरौ** चरन्ति **आचरन्ति,** तत् ते पदं **तद् अक्षराख्यं** पदं **पदनीयं** ते [4]**तुभ्यं संग्रहेण,** संग्रहः **संक्षेपः,**

आनन्दगिरिकृतव्याख्या

**स्वाधीनचेष्टावैशिष्ट्यम्, तद्द्वारेणेत्युच्यते। 'स तम्' इत्यादि व्याचष्टे—**स एवमिति॥ १०॥

**येन केनचिन्मन्त्रादिना ध्यानकाले भगवदनुस्मरणे प्राप्ते सत्यभिधानेन**[5] **नियन्तुं स्मर्तव्यत्वेन प्रकृतपरमपुरुषस्य त्रैविद्य-वृद्धप्रसिद्ध्या प्रामाणिकत्वमाह—**पुनरपीति। **उपायो वक्ष्यमाण ओङ्कारः। अविषये प्रतीचि ब्रह्मणि वेदार्थविदामपि कथं वचनमित्याशङ्क्या-विषयत्वमत्यक्त्वैवेति मत्वा श्रुतिमुदाहरति—**तद्वा इति। **तथापि तस्मिन्नविषये सर्वविशेषशून्ये वचनमनुचितमित्याशङ्क्याह—**सर्वेति। **न केवलं विद्वदनुभवसिद्धं यथोक्तं ब्रह्म, किन्तु मुक्तोपसृप्यतया मुक्तानामपि प्रसिद्धमित्याह—**किञ्चेति। **केषां पुनः संन्यासित्वम्? तदाह—**वीतरागा इति। **ज्ञानार्थं ब्रह्मचर्यविधानादपि ब्रह्म ज्ञेयत्वेन प्रसिद्धमित्याह—**यच्चेति। **कथं तर्हि यथोक्तं ब्रह्म मम ज्ञातुं शक्यमित्याकुलितचेतसमर्जुनं प्रत्याह—**तत्ते पदमिति॥ ११॥

भाष्यार्कप्रकाशः

सायुज्यप्राप्तिरित्याह— **विद्वान् योगीति**। दीव्यतेर्द्योतनार्थकत्वादाह— **दिव्यं द्योतनात्मकमिति**। चैतन्यरूपमित्यर्थः। यद्यपि रोगार्तस्य म्रियमाणस्य योगिनो दुर्लभोऽयं योगस्तथापि योगिनो योगाभ्यासेन नीरोगत्वान्मृत्युहेतोः कस्यचिद् रोगस्योत्पत्तेः प्राक् स्वयमेव मरणाय यतेत योगीति बोध्यम्। स्वाधीनमरणत्वाद् योगिनो न रोगोत्पत्तिरिति वा॥ १०॥

**यदिति**। **वक्ष्यमाणेनेति**। सर्वद्वाराणीति श्लोकद्वये इति भावः। प्रतिपत्तुमिष्टं प्रतिपित्सितम्। तस्य विशेष्यस्य ब्रह्मणोऽभि-धानमिति सम्बन्धः। **विशेष्यस्य** विशिष्टस्येत्यर्थः। अभिधानं नाम ओमित्येतदिति भावः। वेदविदां **वदनं** वचनम् , आदिशब्दाद् यतिविशन-ब्रह्मचर्यचरणयोर्ग्रहणम्। 'स्थाणुरयं भारवाहः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्' इति श्रुतेः अध्ययनविधेः फलवदर्थावबोधपर्यन्तत्वादाह— **वेदार्थज्ञा इति**। 'सर्वे वेदा यत्पदमामनन्ती'ति श्रुतेर्वेदार्थो ब्रह्म; तज्ज्ञाः ब्रह्मविद इति यावत्। हे गार्गि ! तत् प्रसिद्धमक्षरम् एतत् पूर्वोक्तं ब्रह्मैवेति **ब्राह्मणाः** ब्रह्मवेत्तारोऽभिवदन्ति अभितो वदन्तीति श्रुत्यर्थः। सर्वेभ्यो विशेषेभ्यो निवृत्तं निर्गतं, सर्वे विशेषा निवृत्ता यस्मात् तदिति वा सर्वविशेषनिवृत्तं, तत्त्वेन निर्विशेषत्वेनेत्यर्थः। निर्विशेषत्वे ब्रह्मणः श्रुतिं प्रमाणयति—**अस्थूलमिति**। स्थौल्यसौक्ष्म्यह्रस्वत्वदीर्घत्वादिरहितमित्यर्थः। प्रविशन्ति सायुज्यं प्राप्नुवन्तीत्यर्थः। कदेत्यत आह— **सम्यग्दर्शनप्राप्ताविति**। ब्रह्मात्मसाक्षात्कारे सतीत्यर्थः। मोक्षाय यतनशीलत्वमिहामुत्रार्थफलभोगविरक्तानामेव सम्भवति, न त्वविरक्तानाम्। ते च विरक्ताः संन्यासिन एवेत्यभिप्रेत्याह— **संन्यासिन इति। रागो** दृष्टश्रुतविषयासक्तिः। **वाक्यशेष इति।**

१. 'बुद्धिमान्' इति पा.। २. कुण्डलितः पाठः क्वचिन्न। व्याख्यातृभिरस्पृष्टश्च। ३. 'सर्वविशेषनिवृत्तत्वेन' रा.पा. युक्तो भाति। ४. 'तव' इति पा.। ५. **अभिधानेन** ओङ्कारेण।

**तेन संक्षेपेण** प्रवक्ष्ये **कथयिष्यामि॥ ११॥**

**'स यो ह वै तद्भगवन् मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति, तस्मै स होवाच, एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः'(प्र.उ.५.१,२) इत्युपक्रम्य 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत'(प्र.उ.५.५) इत्यादिना वचनेन, 'अन्यत्र धर्मादन्यत्राधर्मात्'(क.उ.२.१४) इति चोपक्रम्य 'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति। यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्ये-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

यथो[यदो]ङ्कारोपासनं श्रुतिषु विहितम् , तदेवेह भगवता सूत्रितमिति महातात्पर्यमुत्तरग्रन्थस्य दर्शयति—**स यो ह वै तदित्यादिना।** मनुष्येषु मध्ये सः यः कश्चिद्ध वै किल एतत् करोति, किम्? मरणान्तमोङ्कारमुपासीत, कतमं वाव स (ते) तेन लोकं जयतीति सत्यकामेन पृष्टः पिप्पलादः प्रोवाच— एतद्वै सत्यकामेत्यादि। त्रिमात्रमोङ्कारम् इत्येतदक्षरं परमपुरुषदृष्ट्या य उपास्ते 'स सामभिरुन्नीयते ब्रह्मलोक'मित्यादिना वचनेन यथो[यदो]ङ्कारस्योपासनं कालान्तरमुक्तिफलमुक्तम् , तदेवेहापि वक्तव्यमित्यन्वयः। न केवलमाथर्वणे ओङ्कारोपासनमुक्तम् , काठकेऽप्युक्तमित्याह—**अन्यत्र धर्मादित्यादिना।** धर्माधर्माभ्यामसंस्पर्शं ब्रह्मोपक्रम्येत्यर्थः। तपांसि सर्वाणि यत्प्रतिपत्त्यर्थानि वदन्ति तत् पदमोङ्कारमित्यनुध्येयं सङ्क्षेपेण ब्रवीमीत्यर्थः॥ १२॥

आनन्दगिरिकृतव्याख्या

**वक्ष्यमाणेनोपायेनेत्युक्तं व्यक्तीकुर्वन्नोङ्कारद्वारा ब्रह्मोपासनं श्रुत्युक्तमनुक्रामति—**स यो हेति। **सत्यकामेनाभिध्यानफलं जिज्ञासुना 'भगवन्' इति पिप्पलादः सम्बोध्याभिमुखीक्रियते। निपातौ तु प्रसिद्धमर्थमेव द्योतयन्तावभिध्यानस्य फलवत्त्वेन कर्तव्यत्वमावेदयतः। मनुष्येषु मध्ये स योऽधिकृतो मनुष्यः तत् प्रसिद्धमभिध्यानं यथा सिध्यति तथा सर्ववेदसारभूतमोङ्कारमाभिमुख्येन ध्यायीत। तच्चाभिध्यानम् 'आप्रायणादि'ति न्यायेन मरणान्तमनुष्ठेयम्। स चैवमनुतिष्ठन् प्रकृतेनाभिध्यानेन लोकानां जेतव्यानां बहुत्वात् कतमं लोकं जयतीति [1]प्रश्नं पृष्टवते सत्यकामाय पिप्पलादनामा किलाचार्यः प्रतिवचनं प्रोवाच। तत्र प्रथममभिध्येयमोङ्कारं परापरब्रह्मत्वेन महीकरोति—**एतद्वा इति। **त्रिमात्रेणाकारोकारमकारात्मकेनेति यावत्। योऽभिध्यायीत, [सः] तमेव यथाभिध्यातं पुरुषमधिगच्छतीत्यादिवचनेनोपासनमोङ्कारस्योक्तमित्यर्थः। प्रश्नश्रुतिवत् कठवल्ली च तत्रैवार्थे प्रवृत्तेत्याह—**अन्यत्रेति। **अव्यवधानेनोपनिषदां, व्यवधानेन च कर्मश्रुतीनां परस्मिन्नात्मनि पर्यवसानं दर्शयति—**सर्व इति। **तपसामपि सर्वेषां चित्तशुद्धिद्वारा तत्रैव पर्यवसानमित्याह—**

भाष्यार्कप्रकाशः

यदक्षरमिच्छन्त इति वाक्ये ज्ञातुमिति शेष इत्यर्थः। ब्रह्मचर्यं वेदाध्ययनादिकं गुरौ गुरुसन्निधावित्यर्थः। चरन्ति अर्थाद् ब्रह्मचारिणः; यद्वा ब्रह्म जिज्ञासवः। पदनीयं प्राप्यं ब्रह्मेति यावत्। तस्यैवापुनरावृत्तित्वेन मुमुक्षुभिः प्राप्यत्वात्। 'प्रवक्ष्ये' इत्युत्तमपुरुषनिर्देशादहमित्यस्याक्षेपः। **कथयिष्यामीति।** 'परः' इत्यादिश्लोकद्वयेनेति भावः। वेदविदो यदक्षरं वदन्ति, वीतरागाः यतयो यद् विशन्ति, यदिच्छन्तः कुशला ब्रह्मचर्यं चरन्ति, तत् पदं ते संग्रहेण प्रवक्ष्ये इत्यन्वयः॥ ११॥

ननु प्रत्यग्रूपेण पुरुषरूपेण च परमात्मनो भजनमुक्तम् , प्रयाणकाले च तत्स्मरणात् सायुज्यलाभश्चोक्तः, तस्मात् सर्वद्वाराणीत्याद्युत्तरग्रन्थारम्भो व्यर्थ इति शङ्कायां, न व्यर्थः, उत्तमाधिकारिणां पूर्वोक्तविधया ब्रह्मप्रतिपत्तिसम्भवेऽपि मन्दमध्यमाधिकारिणां तदसम्भवात् तेषां गतिप्रदर्शनार्थोऽयमुत्तरग्रन्थ इत्याह— **स य इत्यादिना।** 'स य' इत्यादिरुपनिषत्। अस्याः अयमर्थः— हे भगवन् ! मनुष्येषु मध्ये यः प्रायणान्तं मरणावधि ओङ्कारमभिध्यायीत स तेन ओङ्करध्यानेन कतमं लोकं जयति साधयति, प्राप्नोतीति यावत्। तस्मै एवं पृष्टवते शिष्याय स गुरुरुवाच— हे सत्यकाम ! ओङ्कार इति यत् तदेतत् परं ब्रह्म, अपरं ब्रह्म च

१. 'प्रश्ने' इति पा.।

**सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च।**
**मूर्ध्न्याधायाऽऽत्मनः प्राणम् आस्थितो योगधारणाम्॥ १२॥**

**तत्' (क.उ.२.१५) इत्यादिभिश्च वचनैः परस्य ब्रह्मणो वाचकरूपेण, प्रतिमावत् प्रतीकरूपेण च परब्रह्मप्रतिपत्ति-साधनत्वेन मन्दमध्यमबुद्धीनां विवक्षितस्योङ्कारस्योपासनं कालान्तरे मुक्तिफलमुक्तं यत् , तदेवेहापि 'कविं पुराणमनु-शासितारम्', 'यदक्षरं वेदविदो वदन्ति' इति चोपन्यस्तस्य परस्य ब्रह्मणः पूर्वोक्तरूपेण प्रतिपत्त्युपायभूतस्योङ्कारस्य कालान्तरमुक्तिफलमुपासनं योगधारणासहितं वक्तव्यम् , प्रसक्तानुप्रसक्तं च यत्किञ्चिदित्येवमर्थं उत्तरो ग्रन्थ आरभ्यते—** सर्वेति। सर्वद्वाराणि **सर्वाणि च तानि द्वाराणि च सर्वद्वाराण्युपलब्धौ, तानि सर्वाणि** संयम्य **संयमनं**

आनन्दगिरिकृतव्याख्या

तपांसीति। **तस्यैव च ज्ञानार्थमष्टाङ्गं ब्रह्मचर्यं तत्र तत्र विहितमित्याह—**यदिच्छन्त इति। **तस्य पदनीयस्य ब्रह्मणः सङ्क्षेपेण कथनमोङ्कारद्वारकमिति कथयति—**ओमित्येतदिति। **उदाहृतवचनानां तात्पर्यं दर्शयति—**परस्येति। **तस्य वाचकरूपेण वा तस्यैव प्रतीकरूपेण वा विवक्षितस्योङ्कारस्योपासनं यथोक्तैर्वचनैरुक्तमिति सम्बन्धः। ननु परस्मिन् ब्रह्मणि तत्त्वमस्यादिवाक्यादेव प्रतिपत्तिरधिकारिणो भविष्यति किमित्युपासनमोङ्कारस्योपन्यस्यते तत्राह—**परेति। **यद्यपि विशिष्टस्याधिकारिणो विनैवोपासनमुपनिषद्भ्यो ब्रह्मणि प्रतिपत्तिरुत्पद्यते, तथापि मन्दानां मध्यमानां च तद्धीहेतुत्वेनोङ्कारो विवक्षितः। तच्चोपासनं ब्रह्मदृष्ट्या श्रुतिभिरुपदिष्टमित्यर्थः। तस्य क्रममुक्तिफलत्वादनुष्ठेयत्वं सूचयति—**कालान्तरेति। **भवत्वेवं श्रुतीनां प्रवृत्तिस्तावता प्रकृते किमायातमित्याशङ्क्याह—**उक्तं यदिति। **तदेवेहापि वक्तव्यमित्युत्तरेण सम्बन्धः। उपासनमेवोपास्योपन्यासद्वारा स्फोरयति—**कविमित्यादिना। पूर्वोक्तरूपेणेति **अभिधानत्वेन प्रतीकत्वेन चेत्यर्थः। श्रौतस्योपासनस्यानूद्यमानस्य सोपस्करत्वं सङ्गिरते—**योगेति। **तर्हि कथम् 'अनन्यचेताः सततम्' इत्यादि वक्ष्यते? तत्राह—**प्रसक्तेति। **ओङ्कारोपासनं प्रसक्तम् , तदनन्तरं तत्फलमनुप्रसक्तम् तद्द्वारा चापुनरावृत्त्यादि वक्तव्यकोटि-निविष्टमित्यर्थः। उक्तेऽर्थे समनन्तरग्रन्थमुत्थापयति—**इत्येवमर्थ इति। **श्रोत्रादीनां कुत्र द्वारत्वम्? तत्राह—**उपलब्धाविति। **तेषां संयमनं**

भाष्यार्कप्रकाशः

भवतीति शेषः। **इत्युपक्रम्य** आरभ्य यः पुनरेतं परं पुरुषं **त्रिमात्रेण** अकारोकारमकाररूपमात्रात्रयवता प्लुतस्वरेणेति ओमित्येकेनाक्षरेण वर्णेन अभिध्यायीत, स सामभिः ब्रह्मलोकम् उन्नीयते प्राप्यते। **अन्यत्र धर्माद्** धर्मरहितम् , अन्यत्राधर्माद् अधर्मरहितम्। **आमनन्ति** वदन्ति। तपोभिः कृच्छ्रचान्द्रायणादिभिश्चित्तशुद्धिद्वारा ब्रह्मज्ञानसम्भवात् तपांसि सर्वाणि च यद्वदन्तीत्युक्ते किं तत्पदम्? अत आह श्रुतिः— **ओमित्येतदिति। वाचकरूपेणेति**। वाचकत्वरूपेणेत्यर्थः। **प्रतीकरूपेणेति**। **प्रतीकम्** आरोपालम्बनं, तद्रूपेणेत्यर्थः। यथा प्रतिमा विष्ण्वादिदेवतारोपालम्बनम् , तद्वदोङ्कारोऽपि परब्रह्मारोपालम्बनमित्यर्थः। ब्रह्मणो वाचकत्वात् प्रतीकत्वाच्च मन्दमध्यमबुद्धीनां ब्रह्मप्रतिपत्तौ साधनमोङ्कार इति, तस्योपासनं च ब्रह्मलोकप्राप्तिद्वारा क्रममुक्तिफलकमिति च श्रुत्योक्तं यत् तदेव **इहापि** गीताशास्त्रेऽपीत्यर्थः। श्रुत्यर्थविवरणपरत्वाद् गीताशास्त्रस्येति भावः। **पूर्वोक्तरूपेण** श्रुत्युक्तरूपेणेत्यर्थः। वक्तव्यं भगवतेति शेषः।

**अयं भावः**— ओमित्येतत् शब्दतोऽर्थतश्च परमपरं चेति द्विविधं ब्रह्म; तत्र [१]शब्दतोऽपरं ब्रह्म, अर्थतस्तु परं ब्रह्मेति विवेकः। शब्दस्य ब्रह्मप्रतीकत्वादपरब्रह्मत्वम् , अर्थस्य ब्रह्मत्वात् परब्रह्मत्वम्। तत्र ओमित्येतस्य परब्रह्मणो भजनं सायुज्यलाभश्च पूर्वमुक्तम् , तच्चोत्तमाधिकारिविषयम्। अथ ओमित्येतस्य अपरब्रह्मणो ब्रह्मवाचकस्य त्रिमात्रस्योङ्कारस्य शब्दस्य भजनं ब्रह्मलोकप्राप्तिद्वारा क्रममुक्तिश्च वक्ष्यते। तच्च मन्दमध्यमाधिकारिविषयमिति। **प्रसक्तानुप्रसक्तं** प्रसङ्गादागतमित्यर्थः। **किञ्चिदिति।** ब्रह्मभुवनादयः पुनरावर्तिन इत्यादिकमित्यर्थः। **सर्वेति।** द्वाराणि साधनानि करणानीति यावत्। कुत्र? तदाह— **उपलब्धाविति।** विषयानुभवे इत्यर्थः।

---

१. **शब्दतः इति।** ओंशब्दस्वरूपमित्यर्थः।

**ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्।**
**यः प्रयाति त्यजन् देहं स याति परमां गतिम्॥ १३॥**

**कृत्वा, मनो** हृदि **हृदयपुण्डरीके** निरुध्य **निरोधं कृत्वा, निष्प्रचारमापाद्य, तत्र वशीकृतेन मनसा हृदयादूर्ध्वगामिन्या नाड्योर्ध्वमारुह्य मूर्ध्नि आधायात्मनः प्राणम्** आस्थितः **प्रवृत्तो** योगधारणां **धारयितुम्॥ १२॥**

**तत्रैव च धारयन्—**ओमिति। ओमित्येकाक्षरं ब्रह्म **ब्रह्मणोऽभिधानभूतमोङ्कारं** व्याहरन् **उच्चारयन्, तदर्थभूतं** माम् **ईश्वरम्** अनुस्मरन् **अनुचिन्तयन् यः** प्रयाति **म्रियते स** त्यजन् **परित्यजन्** देहं **शरीरम्। त्यजन् देहमिति** [१]**प्रयाणविशेषणार्थम्। देहत्यागेन प्रयाणमात्मनः, न स्वरूपनाशेनेत्यर्थः। स एवं त्यजन्** याति **गच्छति** परमां **प्रकृष्टां गतिम्॥ १३॥**

आनन्दगिरिकृतव्याख्या

**विषयेषु प्रवृत्तानां दोषदर्शनद्वारा तेभ्यो वैमुख्यापादनम्। कोऽयं मनसो हृदये निरोधस्तत्राह—**निष्प्रचारमिति। **मनसो विषयाकारवृत्तिं निरुध्य हृदि वशीकृतस्य कार्यं दर्शयति—**तत्रेति। **ऊर्ध्वमित्यत्रापि हृदयादिति सम्बध्यते। सर्वाण्युपलब्धिद्वाराणि श्रोत्रादीनि संनिरुध्य, वायुमपि सर्वतो निगृह्य हृदयमानीय, ततो निर्गतया सुषुम्नया कण्ठभ्रूमध्यललाटक्रमेण प्राणं मूर्धन्याधाय, योगधारणामारूढो ब्रह्म व्याहरन् मां च तदर्थमनुस्मरन् परमां गतिं यातीति सम्बन्धः॥ १२॥**

**यथोक्तयोगधारणार्थं प्रवृत्तो मूर्धनि प्राणमाधाय धारयन् किं कुर्यादित्याशङ्क्यानन्तरश्लोकमवतारयति—**तत्रैवेति। **एकं च तदक्षरं चेत्येकाक्षरम् ओमित्येवंरूपम्। तत् कथं ब्रह्मेति विशिष्यते? तत्राह—**ब्रह्मण इति। **यः प्रयातीति मरणमुक्त्वा, त्यजन् देहमिति ब्रुवता पुनरुक्तिराश्रिता स्यादित्याशङ्क्य, विशेषणार्थं विवृणोति—**देहेति। **एवमोङ्कारमुच्चारयन्नर्थं चाभिध्यायन् ध्याननिष्ठः स पुमानित्यर्थः।** परमामिति **गतिविशेषणं** [२]**क्रममुक्तिविवक्षया द्रष्टव्यम्॥ १३॥**

भाष्यार्कप्रकाशः

रूपशब्दादिविषयानुभवसाधनचक्षुःश्रोत्रादिद्वाराणि नियम्येति यावत्। **हृदयपुण्डरीके** पुण्डरीकाकारे हृदयकोशे। **निष्प्रचारमापाद्य** निर्वृत्तिकं विधाय । **तत्र** हृदि **वशीकृतेन** स्थिरीकृतेनेत्यर्थः। मनसा सहेति शेषः। **मूर्ध्नि** ब्रह्मरन्ध्रे **आधाय** निधाय। **आस्थितः** धारयितुं प्रवृत्तः॥ १२॥

**ओमिति। तत्रैव** मूर्ध्न्येव धारयन् प्राणानिति शेषः। ब्रह्मवाचके ओङ्कारे ब्रह्मशब्दो लाक्षणिक इत्याह— **ब्रह्मणोऽभिधानभूतमिति**। वस्तुतो ब्रह्मणि वाच्यवाचकभावाभावादाह— **अभिधानभूतमिति**। अभिधानतुल्यमित्यर्थः। ब्रह्मणो वाचकमिव स्थितमिति यावत्। **तदर्थभूतम्** ओङ्कारवाच्यम्। **प्रयाणविशेषणार्थमिति**। देहत्यागरूपं मरणं प्रपद्यत इत्यर्थः। तदेवाह— **देहेति**। देहत्यागेनैवात्मनो मरणं, न तु स्वरूपनाशेन। यथा देहस्य स्वरूपनाशेन मरणम् , तद्वन्नेत्यर्थः। **स** एवं मृत इति शेषः। गम्यत इति गतिः प्राप्यस्थानं, हिरण्यगर्भलोकमिति यावत्। स्वर्गादिलोकापेक्षया तस्य प्रकृष्टत्वं बोध्यम्। अथवा हिरण्यगर्भलोकप्राप्तिद्वारा प्रकृष्टां गतिं मुक्तिं यातीति, कालान्तरमुक्तिफलत्वादोङ्कारोपासनस्य। न च ओङ्कारोपासकस्यापीश्वरस्मरणसत्त्वान्मुक्तिरेव स्यादिति वाच्यम् , परोक्षेश्वरस्मरणमेव तस्य, न प्रत्यगभिन्नेश्वरस्मरणमिति कृत्वा भिन्नेश्वरस्मरणस्य मुक्त्यहेतुत्वात्।

मामनुस्मरन्निति निर्देशादयं योगी ओङ्कारं वाचकरूपेणोपास्ते, न तु प्रतीकरूपेणेति ज्ञायते। यः प्रतीकरूपेणोपास्ते ओङ्कारं, तस्य हि ओङ्कार एव ब्रह्मबुद्धिः। अन्नादौ सालग्रामादौ वा ब्रह्मबुद्धिवद् विष्ण्वादिबुद्धिवच्चेति न तस्यास्त्योङ्कारातिरिक्तेश्वरस्मरणम्। सर्वद्वाराणि संयम्य, मनः हृदि निरुध्य च आत्मनः प्राणं मूर्ध्न्याधाय योगधारणामास्थितःसन् ब्रह्म ओमित्येकाक्षरं व्याहरन् मामनुस्मरन् यः देहं त्यजन् प्रयाति, स परमां गतिं यातीति श्लोकद्वयस्यान्वयः। अक्षरशब्दोऽत्र वर्णवाच्येव, प्रणवाभिधायकत्वादिति

१. आत्मनः प्रयाणमीदृशमिति विशिष्य तत्स्वरूपबोधनार्थमित्यर्थः। २. ब्रह्मलोकं प्राप्य तत्रैवोत्पन्नसाक्षात्कारान्मुक्तिः क्रममुक्तिः।

**अनन्यचेताः सततं यो मां स्मरति नित्यशः।**
**तस्याहं सुलभः पार्थ ! नित्ययुक्तस्य योगिनः॥ १४॥**

**किञ्च—**अनन्येति। अनन्यचेताः**, न अन्यविषये चेतो यस्य सोऽयमनन्यचेताः योगी,** सततं **सर्वदा यो** मां **परमेश्वरं स्मरति नित्यशः। 'सतत'मिति नैरन्तर्यमुच्यते। 'नित्यशः' इति दीर्घकालत्वमुच्यते। न षण्मासं संवत्सरं वा। किं तर्हि? यावज्जीवं नैरन्तर्येण यो मां स्मरतीत्यर्थः।** तस्य **योगिनोऽहं** सुलभः **सुखेन लभ्यः, हे पार्थ !** नित्ययुक्तस्य **सदा समाहितचित्तस्य योगिनः। यत एवम् अतोऽनन्यचेताः सन् मयि सदा समाहितो भवेत्॥ १४॥**

आनन्दगिरिकृतव्याख्या

**ननु वायुनिरोधविधुराणामुदीरितया रीत्या स्वेच्छाप्रयुक्तोत्क्रमणासम्भवाद् दुर्लभा परमा गतिरापतेदिति, तत्राह—**किञ्चेति। **इतश्च भगवदनुस्मरणे प्रयतितव्यमित्यर्थः। सततं नित्यशः इति विशेषणयोरपुनरुक्तत्वमाह—**सततमित्यादिना। **उक्तमेवापौनरुक्त्यं व्यक्तीकरोति—** नेत्यादिना। [१]**जितासुरिच्छया देहं त्यजति, तदितरस्तु कर्मक्षयेणैवेति विशेषं विवक्ष(य)न्नाह—** यत इति। **अनन्यचेतसं समाहितचेतसं प्रतीश्वरस्य सौलभ्यम्** एवमित्युच्यते॥ १४॥

भाष्यार्कप्रकाशः

॥ १३॥

**अनन्येति।** अन्यस्मिन् विषये चेतो यस्य सोऽन्यचेताः, स न भवतीत्यनन्यचेताः; विषयानासक्तचित्त इत्यर्थः। नित्यशः इत्यनेन षण्मासान् संवत्सरं वेति दीर्घकालत्वं नोच्यत इत्यन्वयः। **यत एवमिति।** यस्मादेवं नित्यशो मां स्मर्तुर्मदेकतानचित्तस्य योगिनः सुलभोऽहम् **अतः** तस्मादित्यर्थः। अनन्यचेता विषयानासक्तचित्तः। समाहितो मदेकतानचित्तः भवेन्मुमुक्षुरिति शेषः।

एतच्छ्लोकोक्तमीश्वरस्मरणं यद्यहं ब्रह्मास्मीत्याकारकं, तर्हि साक्षान्मुक्तिरेव स्मर्तुः; यदि तु परोक्षेश्वरस्मरणं तर्हि क्रममुक्तिरिति बोध्यम्।

**यद्वा** मन्दबुद्धीनामोङ्कारोपासनं कालान्तरमुक्तिफलकं 'सर्वद्वाराणी'ति श्लोकद्वयेनोक्तम्। मध्यमबुद्धीनां तु 'अहं ब्रह्मास्मी'-त्युपासनमिदं विधीयते। यस्य मुमुक्षोर्बहुवारं वेदान्तश्रवणे कृतेऽपि 'अहं ब्रह्मास्मी'ति ज्ञानं न जायते प्रतिबन्धादिबाहुल्यात् , स सर्वदाऽपि 'अहं ब्रह्मास्मी'ति जपेन्मन्त्रवत्। तेन च सर्वप्रतिबन्धक्षये इहैव जन्मनि मुक्तिर्भवेत् । प्रतिबन्धशेषे तु कालान्तरे मुक्तिः। यस्य मुमुक्षोर्बुद्धिमान्द्याद् वेदान्तश्रवणेऽपि नाधिकारः, स ओङ्कारोपासनं कुर्यादिति भावः।

एवं मन्दाधिकारिणां मध्यमाधिकारिणां च ब्रह्मप्राप्त्युपायतया ओङ्कारोपासनम् 'अहं ब्रह्मास्मी'त्युपासनं च यथाप्रतिज्ञमुपदिष्टं भगवता।

यत्तु **रामानुजः**— 'अभ्यासयोगयुक्तेन' इत्यादिना ऐश्वर्यार्थिनामुपासनप्रकारोऽन्त्यप्रत्ययप्रकारश्चोक्तः; 'यदक्षर'मित्यादिना कैवल्यार्थिनाम् ; 'अनन्यचेताः' इत्यनेन तु ज्ञानिनामिति; **तत्तुच्छम्** ; ऐश्वर्यार्थिनां परमपुरुषप्राप्त्यसम्भवात् , 'परमं पुरुषं दिव्यं याती'ति, 'स तं परं पुरुषमुपैति दिव्य'मिति च परमपुरुषप्राप्तेरुक्तत्वात्। न च परमपुरुषप्राप्तिरिह परमपुरुषैश्वर्यप्राप्तिरेवेति वाच्यम् , मुख्यार्थपरित्यागस्यान्याय्यत्वात् , लाक्षणिकार्थकल्पनस्यायुक्तत्वात्। अमीषां श्लोकानामैश्वर्यार्थिपरत्वे प्रमाणाभावात्। 'ऐश्वर्यार्थी भगवद्भक्तः परं पुरुषमुपैती'ति मूले सति ऐश्वर्यार्थिनः परमपुरुषप्राप्त्यभावरूपमुख्यार्थबाधेन तादृशलाक्षणिकार्थः कल्प्येत, न तु तथा मूलमस्ति।

**किञ्च** ऐश्वर्यार्थिनः पुनरावृत्तिं स्वयमेव वक्ष्यति। परमपुरुषश्चायं विष्णुरेव, दिव्यं मामिति वचनादिति त्वयैवोक्तत्वात्। विष्णोरैश्वर्यप्राप्तिश्च विष्णुसारूप्यम् , मत्समानाकारो भवतीति त्वयैवोक्तत्वात्। इदं च सारूप्यं विष्णुलोकं गतानामेव भवितुमर्हति ।

१. उक्तरीत्या वशीकृतप्राणो योगीत्यर्थः।

भाष्यार्कप्रकाशः

तत्र स्थितानामेव पुरुषाणां शङ्खचक्रचतुर्भुजादिमत्त्वश्रवणात्। स च विष्णुलोकोऽपुनरावर्त्यैव तव मत इति कथमैश्वर्यार्थिनां विष्णुभक्तानां विष्णुसारूप्यं गतानां पुनरावृत्तिः? तव मते सायुज्यस्याभावात्। सालोक्यसारूप्यसामीप्यानामेव मुक्तित्वाद्, यदि सारूप्यं प्राप्तस्य पुनरावृत्तिस्तर्हि सालोक्यं सामीप्यं च प्राप्तानां पुनरावृत्तिः स्यादित्यपुनरावृत्तिपदस्यैवाभावप्रसङ्गः।

'मामुपेत्य तु कौन्तेय' इत्यस्य मत्सायुज्यं प्राप्तस्येत्यर्थवादे[1] तव स्वमतभ्रंशः, परमतप्रवेशश्च। मल्लोकमुपेत्येत्यर्थवादे विष्णुसारूप्यं प्राप्तानामैश्वर्यार्थिनां पुनरावृत्तिर्न स्यादिति व्याघातः। अत उभयतःपाशा रज्जुरियं तव। विष्णुलोकस्यापि पुनरावर्त्तित्वे 'आब्रह्मभुवनाल्लोकाः' इति न सङ्गच्छते। ब्रह्मलोकादुपरितनस्यापि विष्णुलोकस्य पुनरावर्तित्वात्। न चैश्वर्यार्थिनश्चतुर्मुखादिलोकान् प्राप्य पुनरावर्तन्त इति वाच्यम् , ऐश्वर्यार्थिनामपि विष्णूपासकानां चतुर्मुखादिलोकप्राप्तेरयुक्तत्वात् 'परमं पुरुषं दिव्यं यातीति विष्णुलोकप्राप्तेरेव युक्तत्वात् , त्वया तथैवोक्तत्वात्। तस्माद् विष्णुभक्तानामप्यैश्वर्यार्थिनां न विष्णुलोकप्राप्तिः, नापि विष्णुसारूप्यप्राप्तिः, किं तर्हि ? मनुष्यलोकप्राप्तिः, अथवा स्वर्गलोकप्राप्तिः। ततश्च पुनरावर्तितैव तेषाम्।

यदि तु वैकुण्ठैश्वर्यार्थिनस्ते, तर्हि तेषां विष्णुलोकप्राप्तिरपुनरावृत्तिश्च। इदमेतेषां वैकुण्ठैश्वर्यार्थित्वं न सकामत्वरूपम् , मोक्षकामत्ववत् , किं तर्हि? निष्कामत्वरूपमेव। एवं निष्कामानां मोक्षकामानां विष्णुलोकप्राप्तिरपुनरावृत्तिश्चोचितैव। एत एव हि कैवल्यार्थिनः। कैवल्यं हि मोक्षः। मोक्षश्च वैकुण्ठप्राप्तिरेव तव मते। ज्ञान्यपि कैवल्यार्थ्येवेति न तयोः पृथक्करणमुचितम्।

न च - कैवल्यमात्मस्वरूपम् , तत् कैवल्यार्थिभिः प्राप्यते, ज्ञानिना तु परमात्मा प्राप्यत इति भेदोऽस्तीति - वाच्यम् , यत् कैवल्यार्थिना प्राप्यते तदात्मस्वरूपं कैवल्यार्थ्येवेति कथमात्मन एव प्राप्तृत्वप्राप्यत्वे? कथं वा नित्यसिद्धस्यात्मस्वरूपस्य पुरुषार्थत्वम्? कथं वा केवलस्यात्मनः परमात्मभेदः? कथं वा ज्ञानिनः परमात्मप्राप्तिः सति आत्मपरमात्मभेदे?

न च क्षीरनीरन्यायेनात्मपरमात्मनोः संयोग इति वाच्यम् , निरवयवत्वादुभयोः। अवयवसंयोगपूर्वको ह्यवयविसंयोगः। नापि क्षीरनीरयोरिवात्मपरमात्मनोर्ज्ञानैकाकारयोरस्ति कश्चिद् विशेषः, येनायमात्माऽयं परमात्मेति व्यवहारः स्यात्। यदि क्षीरे नीरमिव परमात्मन्यात्मा निलीय वर्तेत, तर्हि जीवस्यासौ निलयनावस्था न पुरुषार्थः, स्वरूपस्यैव लीनत्वात्।

न च जीवः परमात्मनि प्रविश्यानन्दमनुभवतीति वाच्यम् , परिपूर्णेऽनवकाशे चैतन्यघने परमात्मनि जीवस्य प्रवेष्टुमवकाशस्यैवाभावात्। सावकाशत्वे तु परमात्मनोऽपूर्णत्वं चलनं च स्यात्। तदेतदखिलं श्रुतिविरुद्धं गीताशास्त्रविरुद्धं च। 'पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते' 'अचलोऽयं सनातनः' इत्यादिशास्त्रात्।

तस्माज्ज्ञानिकैवल्यार्थिनोर्नास्ति फलतः कश्चिदपि भेदः। ब्रह्मण एव तदुभयप्राप्यत्वात्। न च नित्याप्तस्य ब्रह्मणः कथं प्राप्यत्वमिति वाच्यम् , हिरण्यनिधिदृष्टान्तेन नित्याप्तमपि ब्रह्म मायया अप्राप्तमिव भाति यस्मात् , तस्माज्ज्ञानेन तत्प्राप्तिव्यपदेशः।

**किञ्च** 'आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन। मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' इति भगवत्प्राप्तेरेवापुनरावर्तित्वमुक्तम् , न त्वात्मप्राप्तेः। यदि भगवद्भिन्न आत्मा तर्हि तत्प्राप्तिः पुनरावर्तिन्येव स्यात्।

न च 'अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिं, 'यं प्राप्य न निवर्तन्ते' इत्यात्मप्राप्तेरपुनरावर्तित्वं वक्ष्यत इति वाच्यम् , परमात्मवाचित्वादक्षरशब्दस्य 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' इति श्रुतेः, 'यं प्राप्य न निवर्तन्ते तद्धाम परमं मम' इति वाक्यशेषाच्च विष्णुधाम्न एवापुनरावर्तित्वम्।

**अपि च** यथा शत्रुभिरपहृतं राज्यं राजा पुनर्भगवदनुग्रहादिना प्राप्नोति, तथा कामक्रोधादिभिरपहृतमात्मस्वरूपं भगवदनुग्रहादिना जीवः पुनः प्राप्नोतीति हि तवाशयः। स न सङ्गच्छते। राज्ञः पृथग् राज्यमिव जीवात् पृथगात्मस्वरूपं यदि स्यात् , तर्हि अयमुपपद्येत, न त्वेतदस्ति, अपृथक्सिद्धं ह्यात्मनः सच्चिदानन्दात्मकं स्वरूपं, सच्चिदानन्दातिरिक्तस्यात्मवस्तुन एवाभावात्। अत एव हि तस्य स्वरूपमिति निर्देशः। यथा घटस्य कम्बुग्रीवत्वादिकं स्वरूपं, तत्स्वरूपव्यतिरेकेण घटाभावश्च। राज्ञो राज्यं तु न स्वरूपं, किन्तु अतिरिक्तमेव। तस्माद् नात्मस्वरूपस्यान्येनापहरणम् , अपहृते तस्मिन्नात्मनाशप्रसङ्गात्। नापि पुनस्तत्प्राप्तिः, अनित्यत्व-

१. अर्थवादे = मां प्राप्य इत्यर्थकथने इत्यर्थः।

**मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।**
**नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः॥ १५॥**

**तव सौलभ्येन किं स्यादित्युच्यते। शृणु तत् , मम सौलभ्येन यद् भवति—** मामिति। मामुपेत्य **माम् ईश्वरमुपेत्य मद्भावमापद्य,** पुनर्जन्म **पुनरुत्पत्तिं** नाप्नुवन्ति **न प्राप्नुवन्ति। किंविशिष्टं पुनर्जन्म न प्राप्नुवन्ति? तद्विशेषणमाह—** दुःखालयं **दुःखानामाध्यात्मिकादीनाम् आलयम् आश्रयम् , आलीयन्ते यस्मिन् दुःखानीति दुःखालयं जन्म। न केवलं दुःखालयम् ,** अशाश्वतम् **अनवस्थितस्वरूपं च। नाप्नुवन्तीदृशं पुनर्जन्म** महात्मानो **यतयः** संसिद्धिं **मोक्षाख्यां** परमां **प्रकृष्टां** गताः **प्राप्ताः। ये पुनः मां न प्राप्नुवन्ति ते पुनरावर्तन्ते॥ १५॥**

आनन्दगिरिकृतव्याख्या

**किं त्वां प्राप्तास्त्वय्येवावतिष्ठन्ते, किं वा पुनरावर्तन्ते चन्द्रलोकादिवेति सन्देहात् पृच्छति—**तवेति। **तत्रोत्तरश्लोकेन निश्चयं दर्शयति—**उच्यत इति। **ईश्वरोपगमनं न सामीप्यमात्रमिति व्याचष्टे—**मद्भावमिति। **पुनर्जन्मनोऽनिष्टत्वं प्रश्नद्वारा स्पष्टयति—** किमित्यादिना। महात्मत्वं **प्रकृष्टसत्त्ववैशिष्ट्यम्।** यतयः **तस्मिन्नेवेश्वरे समुत्पन्नसम्यग्दर्शिनः भूत्वेति शेषः। भगवन्तमुपगतानामपुनरावृत्तौ ततो विमुखानामनुपजातसम्यग्धियां पुनरावृत्तिरर्थसिद्धेत्याह—**ये पुनरिति॥ १५॥

भाष्यार्कप्रकाशः

प्रसङ्गात्। यद्धि प्राप्यते तदुपायसाध्यत्वादनित्यमेव , कार्यानित्यत्वस्य सम्प्रतिपन्नत्वात्। न च प्रकृतिसंसृष्टेनात्मना प्रकृतिवियुक्तत्वमाप्यत इति वाच्यम् , असङ्गस्य प्रकृतिसंसृष्टत्वस्यैवाभावात्। 'असङ्गो ह्ययं पुरुषः' इति हि श्रुतिः, 'नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः' इति गीता च। न हि संसृष्टस्य सर्वगतत्वं, येन संसृष्टः तद्गतत्वासम्भवात् ; नापि बुद्ध्यादिसंसृष्टस्य सर्वगतत्वं, परिच्छिन्नत्वात्।

**किञ्च** यः प्रकृतिवियोगः परमात्मनैव दुर्लभः कथं स जीवेनाप्येत? न च परमात्मा प्रकृतिवियुक्त एवेति वाच्यम् , चिदचिद्विशिष्टस्य परमात्मत्वात्। न च विशिष्टोऽपि वियुक्त एवेति वाच्यम् , विशिष्टत्ववियुक्तत्वयोर्वैयधिकरण्यात्। एवं प्रकृतिविशिष्टे परमात्मनि क्षीरनीरन्यायेन ज्ञानिजीवानां निलीयावस्थानमप्ययुक्तम् , प्रकृतेरैक्यविरोधिन्याः सत्त्वात्।

**अपि च** सगुणमुक्तिर्निर्गुणमुक्तिरिति द्विविधैव मुक्तिः शारीरकशास्त्रसिद्धा। तत्र निर्गुणमुक्तिर्ब्रह्मसायुज्यं, सगुणमुक्तिः सत्यलोकप्राप्तिः। एवं स्थिते त्वया अक्षरप्राप्तिरिति तृतीया मुक्तिः कल्प्यते, तद्धि शास्त्रविरुद्धम्।

**अपि च** अक्षरं प्राप्ताः अमी जीवाः प्रकृतिवियुक्ताःसन्तः परमात्मानमप्राप्य कथं वर्तेरन्? पूर्णो हि परमात्मा सर्वेषामाधारः। न हि गगनमप्राप्य घटो वर्तेत। यद्यमी परमात्मन्येव स्थितास्तर्हि प्राप्त एव परमात्मेति को भेदो ज्ञानिकैवल्यार्थिनोः? यदि तु ज्ञानिनोऽपि वैकुण्ठलोकप्राप्तिस्तर्हि ऐश्वर्यार्थिकैवल्यार्थिनोरेकत्वमिति नात्राधिकारित्रयकल्पनोचिता **रामानुजीया**॥ १४॥

**मामिति।** 'तस्याहं सुलभः पार्थ' इत्यत्राक्षिपति—**तवेति**। किं फलं स्यात्? **मद्भावं** मत्सायुज्यमिति यावत्। आदिपदाद् आधिदैविकाधिभौतिकग्रहणम्। [1]दुःखालयमित्यस्यार्थान्तरमाह— **आलयमिति। आलयं** लयपर्यन्तं **तस्मिन्** पुनर्जन्मनि दुःखानि सन्तीत्यर्थः। दुःखान्यालयं यस्मिन् तद्दुःखालयमिति समासः। **अनवस्थितं** नैकरूपं स्वरूपं यस्य तत्। देवमनुष्याद्यनेकाकारत्वाज्जन्मन इति भावः। एतेन ब्रह्मणोऽदुःखालयत्वं शाश्वतत्वं च सूच्यते। **मोक्षाख्यां** सिद्धमिति शेषः[2](?)। गतमिति वा। मामुपेत्य न प्राप्नुवन्तीत्यनेन सिद्धमर्थमाह— **ये पुनरिति।** पुनरावर्तन्ते पुनर्जन्म प्राप्नुवन्तीत्यर्थः। महात्मानः परमां संसिद्धिं गताः, अत एव मामुपेत्य अशाश्वतं दुःखालयं पुनर्जन्म नाप्नुवन्ति।

१. भाष्ये— 'आलयं तस्मिन् दुःखानि' इति रा.पा. भाति। २. संसिद्धिमिति पदस्य विवरणे मोक्षाख्यामित्यस्य विशेष्यसाकाङ्क्षत्वादाह— सिद्धमिति। 'सिद्धिमिति शेषः, गतिमिति वा।' इति पाठः संभाव्यते।

**आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन !।**
**मामुपेत्य तु कौन्तेय ! पुनर्जन्म न विद्यते॥ १६॥**

**किं पुनस्त्वत्तोऽन्यत्प्राप्ताः पुनरावर्तन्त इत्युच्यते**—आब्रह्मेति। आ ब्रह्मभुवनाद् **भवन्ति अस्मिन् भूतानीति भुवनम्, ब्रह्मणो भुवनं ब्रह्मभुवनम्, ब्रह्मलोक इत्यर्थः।** आ ब्रह्मभुवनात् **सह ब्रह्मभुवनेन, लोकाः सर्वे** पुनरावर्तिनः

आनन्दगिरिकृतव्याख्या

**'अपाम सोमममृता अभूम' इति श्रुतेः स्वर्गादिगतानामपि समानैवानावृत्तिरित्याशङ्कते**—किं पुनरिति। **अर्थवादश्रुतौ कर्मिणाममृतत्वस्यापेक्षिकत्वं विवक्षित्वा परिहरति**—उच्यत इति। **एतेन भूरादिलोकचतुष्टयं [1]प्रविष्टानां पुनरावृत्तावपि जनआदिलोकत्रयं प्राप्तानामपुनरावृत्तिरिति विभागोक्तिरप्रामाणिकत्वादवहेयेत्यवधेयम्। तर्हि तद्वदेवेश्वरं प्राप्तानामपि पुनरावृत्तिः शङ्क्यते, नेत्याह—**

भाष्यार्कप्रकाशः

**ननु** मामुपेत्यनेनैव संसिद्धिं गताः इति सिद्धत्वात् तदुक्तिः पुनरुक्तिरेवेति चेत्, **मैवम्।** 'संसिद्धिं गताः' इत्यत्र प्रतीयमानस्य सगुणमुक्तिम्, अन्यद्वा चित्तशुद्ध्यादिकं गताः इत्यर्थस्य व्यावृत्तये मामुपेत्येत्युक्तम्। 'मामुपेत्ये'त्यस्य मां सेवित्वेत्याद्यर्थस्य प्रतीयमानस्य व्यावृत्तये 'संसिद्धिं गताः' इत्युक्तमित्यदोषात्। तस्मान्मम सौलभ्ये पुंसामपुनरावृत्तिः स्यादिति भावः।

अयं श्लोकः सायुज्याभाववादिनां कण्ठपाशायते, 'मामुपेत्ये'ति सायुज्यश्रवणात्। न च - मामित्यस्य मत्सालोक्यं, मत्सामीप्यं, मत्सारूप्यं वेत्यर्थ इति - वाच्यम्, मुख्यार्थपरित्यागे लाक्षणिकार्थकल्पने च कारणप्रमाणाभावात्। न च राजानमुपेत्ये-त्यादाविव मामुपेत्येत्यत्रापि सन्निधिप्राप्तिरेव मुख्यार्थ इति वाच्यम्, राजानमुपेत्येत्यादौ साक्षात्प्राप्तेर्बाधितत्वेन सन्निधिप्राप्तिकल्पना, न तु प्रकृते मुख्यार्थस्य बाध इति कथं तत्कल्पना? तस्मात् सन्निधिप्राप्तिर्न मुख्यार्थः।

न च कान्तां प्राप्येत्यत्रेव मामुपेत्येत्यत्रापि जीवेश्वरयोः संयोगोऽर्थ इति वाच्यम्, सावयवद्रव्ययोरवयवसंयोगद्वारा संयोग-संभवेऽपि निरवयवयोः संयोगासंभवात्। जीवेश्वरयोः निरवयवत्वं च संप्रतिपन्नम्। अत एवेश्वरस्य चिद्वैशिष्ट्यासंभवात् चिदचिद्विशिष्ट ईश्वर इति वादोऽस्यात्यन्तमयुक्तः। न च लक्ष्मीवदनन्तवद् वा जीवः सशरीरः सशरीरमीश्वरं संश्लिष्याऽऽस्ते इति वाच्यम्। औपाधिकस्य तादृशसंश्लेषस्यानित्यत्वाद् विश्लेषस्यापि सम्भवाद् मामुपेत्य न पुनरावर्तत इति वक्तुमयुक्तत्वात्। लक्ष्म्या अपि विष्णुं विहाय क्षीरसमुद्रे पुनर्जातत्वात्। सशरीराणामनन्तानां जीवानां मुक्तानां परिच्छिन्नविष्णुशरीरसंश्लेषस्याप्यसम्भवात्। गरुड-विष्वक्सेनादीनां विश्लेषेणैव सत्त्वात्। एवंविधसशरीरेश्वरस्यैव रामकृष्णादिरूपेण पुनरावृत्तौ तद्भक्तानां पुनरावृत्तेः पुनः कैमुतिकन्याय-सिद्धत्वात्।

तस्मादशरीर एवेश्वरः, न तु विशिष्टः। जीवश्चाविद्यया सशरीरोऽपि विद्यया शरीरबन्धान्निर्मुक्त ईश्वरभावमशरीरत्वं मोक्षमापद्यते, न पुनरावर्तत इति स्थितम्॥ १५॥

**आ ब्रह्मेति।** त्वत्तोऽन्यत् किं वा पदं प्राप्ताः पुनरावर्तन्त इति प्रश्ने उच्यते—**आ ब्रह्मेति।** आ इति छेदः। अभिविध्यर्थ-कोऽयमाङ्। आ ब्रह्मभुवनाद् ब्रह्मभुवनमभिव्याप्य। फलितमाह— **सह ब्रह्मभुवनेनेति।** सर्वेषां लोकानामुपरि वर्तमानः ब्रह्माण्डाद् बहिस्स्थः हिरण्यगर्भस्वामिकः द्विपरार्धावसानः सगुणमुक्तिक्षेत्रमर्चिरादिमार्गावधिः सत्यलोको **ब्रह्मभुवनम्।** 'स एतान् ब्रह्म गमयती'ति, 'तान् वैद्युतान् पुरुषोऽमानव[मानस] एत्य ब्रह्मलोकान् गमयति, ते तेषु लोकेषु पराः परावतो वसन्ति' इति च श्रुतेः। बहुवचनं तु तदवान्तरकैलासवैकुण्ठलोकसंग्रहार्थम्।

**ननु** 'आ ब्रह्मभुवनादि'त्यत्राङो मर्यादार्थकत्वमुचितम्, ब्रह्मलोकस्यार्चिरादिमार्गावधेरपुनरावर्तित्वात्। 'शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः' इतीहैव वक्ष्यमाणत्वात्। 'अनावृत्तिः शब्दात्' इति **शारीरक**सूत्रेणापि

---

१. 'प्रवृत्तानां' इति पा.।

**पुनरावर्तनस्वभावाः, हे अर्जुन ! मामेकमुपेत्य तु कौन्तेय!** पुनर्जन्म **पुनरुत्पत्तिः न विद्यते॥ १६ ॥**

आनन्दगिरिकृतव्याख्या

मामिति। [1]**यावत्सम्पातश्रुतिवद् ईश्वरं प्राप्तानां निवृत्ताविद्यानां पुनरावृत्तिरप्रामाणिकीत्यर्थः।** [2]**यस्य स्वाभाविकी वंशप्रयुक्ता च शुद्धिः, तस्यैवोक्तेऽर्थे बुद्धिरुदेतीति मत्वा सम्बुद्धिद्वयम्॥ १६ ॥**

भाष्यार्कप्रकाशः

ब्रह्मलोकस्यानावृत्तित्वस्य सिद्धान्तिततत्वादिति चेत् , **मैवम्**। यदनित्यं तत्पुनरावर्तीति, यन्नित्यं तदपुनरावर्तीति व्याप्तिद्वयस्य सम्प्रतिपन्नत्वात् पुनरावर्तिनः स्वर्गादेरनित्यत्वदर्शनादपुनरावर्तिनः परब्रह्मणः नित्यत्वदर्शनाच्च। यदि सत्यलोकोऽपुनरावर्ती स्यात् तर्हि नित्यः स्यात् , न चेष्टापत्तिः, ब्रह्मभिन्नस्य सर्वस्याप्यनित्यत्वात्। 'तत्सत्यम् अतोऽन्यदार्त'मिति श्रुतेः। नित्यत्वे च 'एकमेवाद्वितीयं ब्रह्म' इति श्रुत्युक्तब्रह्माद्वैतस्य बाधात्। अद्वितीयं स्वसमानाधिकवस्तुरहितम् इत्यर्थवर्णनस्याप्रमाणत्वादयुक्तत्वाच्च। न हीश्वरसमानाधिकवस्तुसद्भावशङ्का कस्यापि जायते येन तन्निवृत्त्यर्थं श्रुतिरद्वितीयं ब्रह्मेति ब्रूयात्। एकमेवेति पदद्वयानर्थक्याच्च।

**किञ्च** 'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्॥' इति स्मृतेः, महाप्रलये ब्रह्मणा हिरण्यगर्भेण सह सर्वेऽपि ज्ञानिनःसन्तः परं पदं प्रविशन्तीति साधिपस्य सलोकस्य सत्यलोकस्य नाशसम्भवात्।

पूर्वोत्तरवाक्यविरोधपरिहारस्त्वेवं नेयः।तथा हि— अस्मिन् महाप्रलये ब्रह्मलोकोऽयं नश्यति; प्रलयावसाने पुनर्ब्रह्मलोको जायते; अतोऽस्ति ब्रह्मलोकस्य पुनर्जन्मेति पुनरावृत्तिस्वभाववानेव ब्रह्मलोकः। यद्यपि यो ब्रह्मलोको नष्टः स एव पुनर्जात इति वक्तुं न शक्यते, तथापि अत्यन्तसादृश्यात् सेयं दीपज्वालेतिवत् सोऽयं ब्रह्मलोक इति प्रत्यभिज्ञया तथोच्यते। **यद्वा** अत्यन्तासतो जन्मायोगाच्छशशृङ्गादेर्जन्मादर्शनाद् ब्रह्मलोकः स्वकारणे मायायां निलीय वर्तमानः पुनर्जायत इति। **अथवा** स्वकारणभूतमायाद्वारा सोऽयं ब्रह्मलोक इति निर्देशः, कारणभेदं विना कार्यभेदस्य दुर्वचत्वात्। वस्तुतस्तु नष्टस्य ब्रह्मलोकस्य पुनरागमनं मास्तु नाम, यज्जन्मनाशवत् तत् पुनरावर्तीतीह विवक्षितम्। तथा च ब्रह्मलोकस्यापि जन्मनाशवत्त्वात् पुनरावर्तित्वमिति।

**अथ**[वा] शुक्लयाऽर्चिरादिकया गत्या ब्रह्मलोकं गतानां जीवानामपुनरावृत्तिस्तु ब्रह्मलोके नष्टे तत्र स्थिता जना न पुनः संसाराय स्वर्गभूम्यादिकमायान्ति प्रलयावसानेऽपि, परन्तु ब्रह्मणा सहैव मुच्यन्त इत्यभिप्रायेणोक्ता। अत एव 'अनावृत्तिः शब्दा'दिति 'कार्यात्यये तदध्यक्षेण सहातः परमभिधाना'दिति च सूत्रसाङ्गत्यम्।

न च ब्रह्मलोकस्यैव पुनरावर्तित्वे तद्गतजनानां कुतः पुनरपुनरावर्तित्वमिति वाच्यम् , विद्यावैभवादिति। न च लोकनाशे लोकस्थजननाशाल्लोकवल्लोकस्थजनोऽपि पुनरावर्त्येवेति वाच्यम् , नाशमात्रं न पुनरावृत्तिकारणं, किन्तु जन्महेतुर्नाशः। तथा च ब्रह्मलोकस्थजनानामुपाधिपरित्यागरूपो नाशो न पुनर्जन्महेतुः। ब्रह्मलोकस्य तु मायानिलयनरूपो नाशः पुनर्जन्महेतुरिति कश्चिद् दोषः। एतेन ब्रह्मलोकं प्राप्तानां स्वर्गादिप्राप्तवद् अवर्जनीयनाशत्वाच्च ब्रह्मलोकस्य पुनरावर्तित्वमिति सिद्धम्।

यद्यपि स्वर्गादिलोकान् गता इव ब्रह्मलोकं गता अपि उपाधिपरित्यागरूपं नाशं प्रपद्यन्ते, तथापि उपाध्यन्तरस्वीकाररूपं जन्म न प्रपद्यन्त इति कृत्वा 'अनावृत्तिः शब्दा'दित्युक्तं सूत्रकृता। 'एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते' इति श्रुत्या च 'एकया यात्यनावृत्ति'मिति गीतया च।

तस्माद् ब्रह्मलोकं गतानां पुनर्जन्माभावेऽपि ब्रह्मलोकः पुनरावर्त्येव। तदिदं सर्वमभिप्रेत्याह भगवान् भाष्यकारः—**सह ब्रह्मभुवनेनेति, पुनरावर्तनस्वभावा इति च।** ब्रह्मलोकस्यापि जन्मनाशवत्त्वात् पुनरावर्तनस्वभाववत्त्वम्। तस्मान्नश्वरत्वात् सर्वेऽपि लोकाः पुनरावर्तिन एव।

किं तदपुनरावर्ति पदम्? अत आह— **मामिति।** तुशब्दो ब्रह्मलोकादिवैलक्षण्यार्थः। तेन च मामेवेत्यवधारणं फलति। **मामुपेत्य** मत्सायुज्यं प्राप्य स्थितस्येति शेषः। ब्रह्मभूतस्येत्यर्थः। पुनर्जन्म न विद्यते। ननु ब्रह्मलोकं प्राप्तानामपि पुनर्जन्म न विद्यत

१. 'तस्मिन् यावत्संपातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते' (छा.उ.५-१०-५) इति श्रुतिः इष्टादिकारिणां धूमादिमार्गेण स्वरारूढानां स्वर्गादितः पुनरावृत्तौ प्रमाणं, न तथेश्वरं प्राप्तानां पुनरावृत्तौ प्रमाणमिति भावः। २. अर्जुन कौन्तेय इति पदद्वयेन शुद्धान्तःकरणत्वं कुलं चार्जुनस्योक्तम्। तदभिप्रायमाह— **यस्येति।**

भाष्यार्कप्रकाशः

एवेति कृत्वा मामेकमुपेत्येति कथमुक्तम्? अत आह— **पुनरावर्तिन इति।** जन्मनाशौ आवृत्तिशब्दार्थः। मद्गतानां न जन्मनाशरूप-पुनरावृत्तिरित्यर्थः।

**यद्वा** ब्रह्मलोकं गतानां जीवानां तत्र दिव्यशरीरपरिग्रहरूपं जन्मास्तीति विद्यत एव पुनर्जन्म, तत्परित्यागप्रयुक्तो नाशश्च। परब्रह्मगतानां तु न शरीरसम्बन्धो, नापि तन्नाश इति भगवन्तमात्मानं गतस्यैव न पुनर्जन्म। न च कैवल्यं गतस्यापि शरीरत्याग-नाशोऽस्तीति वाच्यम् , शरीरं त्यक्तवत एव भगवत्प्राप्तत्वान्न पुनः शरीरत्याग इति। तस्मान्निर्गुणं ब्रह्म गतवत एवापुनरावृत्तिः।

न च 'अनावृत्तिःशब्दा'दिति सूत्रविरोधः, सगुणमुक्तिक्षेत्रं गतस्याप्यपुनरावृत्तिदर्शनादिति वाच्यम् , सगुणमुक्तिं गतस्य तात्कालिकशरीरपरित्यागानन्तरं पुनः शरीरपरिग्रहाभाव इत्यभिप्रायेण तत्सूत्रप्रवृत्तेरिति।

**ननु** भगवन्तं गतानां पुनर्जन्माभावे को हेतुरिति **चेत्**? उक्त एव— उपाध्यभावादिति। एतेन ब्रह्मलोकं गतानामपि स्वर्गादिलोकं गतानामिवोपाधिसद्भावात् पुनर्जन्मार्हत्वमस्तीति सूचितम्।

नैतावता ब्रह्मलोकं गतानां पुनर्जन्मसद्भावः शङ्क्यः, तत्र सम्यग्दर्शनेन तेषामज्ञानस्य समूलस्य नष्टत्वात्। अत एव 'इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः' इति श्रुतिः ब्रह्मज्ञानं मनुष्यलोक एव सम्पादनीयम् , न तु स्वर्गादिलोकेषु , तेषां मोहातिशयजनकत्वात् , यद्यपि ब्रह्मलोके सुसम्पादम् , तथापि तल्लोकप्राप्तिर्दुःसम्पादेत्यवोचत्।

**अथवा** पुनरावृत्तिवाचिना पुनर्जन्मशब्देन तद्धेतुभूतस्थानभ्रंशो लक्ष्यते; न हि पत्तनं गतस्य तत्स्थानभ्रंशं विना ग्रामं प्रति पुनरावृत्तिः सम्भवति। स्थानभ्रंशश्च स्थानत्यागः। एवं स्वर्गादिमिव ब्रह्मलोकं गतस्यापि स्थानभ्रंशोऽस्ति, ब्रह्मलोकत्यागपूर्वकत्वात् परमपदप्रवेशस्य। ब्रह्मप्राप्तानां तु न स्थानभ्रंशः। अत एव सर्वे लोकाः पुनरावर्तिनः; ब्रह्मैकमेवापुनरावर्ति। 'अनावृत्तिः शब्दा'दिति सूत्रं तु ब्रह्मलोकं प्राप्तः पुनः संसारमण्डलं प्रति नावर्तत इत्यभिप्रायेणोक्तं **बादरायणेनेति** बोध्यम्।

तस्मात् ये स्वर्गादिलोकान् गतास्ते पुनः संसारं प्रतिपद्यन्त इति हेतोः पुनरावर्तिन इत्युच्यन्ते। ये ब्रह्मलोकं गतास्ते स्वाश्रयलोकस्य पुनरावर्तित्वात् , स्वेषामुपाधिमत्त्वात् स्वोपाधिनाशस्यावर्जनीयत्वाद्वा पुनरावर्तिन इत्युच्यन्ते। यस्तु परं ब्रह्म प्राप्तः स यया कयाऽपि विधया पुनरावर्तीति वक्तुं न शक्यत इति कृत्वा ये पुनर्मां न प्राप्नुवन्ति ते पुनरावर्तन्ते, मामेकमुपेत्य तु पुनरावृत्तिर्न विद्यत इति भाषित**माचार्यैः**। अर्चिरादिकया गत्या ब्रह्मलोकं प्राप्तो न पुनरावर्तत इति तु पुनः संसारं न प्रतिपद्यते इत्यभिप्रायगर्भ इति न कोऽपि व्याघातः।

अनित्यत्वात् स्वर्गादिलोकवद् ब्रह्मलोकः पुनरावर्ती। ब्रह्मलोकं गतानां ब्रह्मकृतमहावाक्योपदेशजन्यब्रह्मात्मैक्यज्ञानवत्तया ब्रह्मभूतत्वान्न पुनरावृत्तिरिह लोकेऽपरोक्षीकृतात्मतत्त्वशुकवामदेवादिवदिति निष्कर्षः।

तस्मात् 'आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन' इति, 'तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः' इति, 'एकया यात्यना-वृत्ति'मिति, 'तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते' इति च सर्ववाक्यानि निर्विरोधानीति **सङ्क्षेपः**।

यत्तु **रामानुजः**— मां सत्यसङ्कल्पं सर्वज्ञमुपेत्येति, **तदसत्।** जीवेश्वरभेदकमायोपाधिसत्त्वे जीवेश्वरसायुज्यायोगात् , मायाऽभावे सङ्कल्पाद्ययोगात्। न च - विद्यया जीवोपाधेरविद्याया नाशेऽपीश्वरोपाधेर्मायायाः अनाशादस्त्येवोपाधिरीश्वरस्य, सोपाधिकेऽपीश्वरे निरुपाधिकस्य जीवस्य प्रवेशः सम्भवति लवणोदके शुद्धोदकस्येव, उभयोरप्युपाधिसत्त्व एव प्रवेशासम्भव इति - वाच्यम् , जीवस्यैव स्वविद्यया स्वाविद्यां नाशयितुं शक्तत्वे किमीश्वरस्य स्वविद्यया स्वमायां नाशयितुं नासीच्छक्तिः? मायायाः अनाश्यत्वे तु सोपाधिकादीश्वरान्निरुपाधिको जीव एवाधिकं[कः] निरुपाधिकत्वेन जीवस्य ब्रह्मत्वादिति कथं जीवस्येश्वरप्राप्तिः? मायोपाधिकमेव ब्रह्मेत्युक्तौ तु जीव एव सर्वाधिकः स्यात् , सोपाधिकाद् घटाकाशान्निरुपाधिको हि महाकाशोऽधिकः, उपाधिना ह्युपहितः परिच्छिद्यते, अन्यथा उपाधेरुपाधित्वस्यैवाभावात्। न च - मायायाः सर्वव्यापित्वात् तदुपाधिकेश्वरस्यापि व्यापित्वमेव, न तु परिच्छिन्नत्वमिति - वाच्यम् , निरुपाधिकेषु जीवेषु मायाव्याप्तेरभावेन मायायाः सर्वव्यापित्वाभावात्[१]।

१. एतच्च सर्वं प्रतिबन्दिन्यायेनोक्तमिति भाति, मायोपाधिकस्येश्वरस्य व्यापकत्वेऽविवादात्।

**सहस्रयुगपर्यन्तम् अहर्यद् ब्रह्मणो विदुः।**
**रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः॥ १७॥**

**ब्रह्मलोकसहिताः लोकाः कस्मात् पुनरावर्तिनः? कालपरिच्छिन्नत्वात् । कथम्?—** सहस्रेति। सहस्रयुग-

आनन्दगिरिकृतव्याख्या

**ब्रह्मलोकसहितानां पुनरावृत्तौ हेतुं प्रश्नद्वारा दर्शयति—**ब्रह्मेति। **उक्तमेव हेतुमाकाङ्क्षापूर्वकमुत्तरश्लोकेन साधयति—**कथमित्या-

भाष्यार्कप्रकाशः

एवमुपाधिपरिच्छिन्ने ईश्वरे निरुपाधिकस्य जीवस्य प्रवेशोऽपि न सम्भवति, उपाधेस्तत्प्रवेशप्रतिबन्धकत्वात्। न हि घटाकाशे महाकाशः प्रविशेत्। न च जीवस्याणुत्वात् प्रवेश उचित इति वाच्यम् , जीवस्याणुत्वे कृत्स्नशरीरव्यापिवेदनोपलम्भाभावप्रसङ्गात् , परिमाणे[परिच्छिन्नपरिमाणत्वे, तद्वतः] द्रव्यस्य घटादेरनित्यत्वदर्शनेन जीवस्याप्यनित्यत्वप्रसङ्गात्। मायया व्यवहितमीश्वरमणुरपि जीवः प्रवेष्टुं न शक्नुयाच्च। न च मायायामेव प्रविशेदिति वाच्यम् , प्रलयेऽपि मायाप्रवेशसत्त्वेन ज्ञानयोगाद्यानर्थक्यप्रसङ्गात् , सुषुप्तिवन्मुक्तावपि जीवस्याज्ञानाभिभूतत्वप्रसङ्गाच्च। माया ह्यज्ञानम्। एवं मायां प्रविष्टस्य पुनःसंसारं प्रत्यावृत्तिप्रसङ्गाच्च। मायां गतो हि प्रलये प्रपञ्चदशायां पुनरावर्तते। ततश्च 'मामुपेत्य तु कौन्तेय, पुनर्जन्म न विद्यते' इति वचो व्याहन्येत।

न च मायां भित्त्वा तदन्तर्गतमीश्वरचैतन्यं प्रविशेज्जीव इति वाच्यम् , मायाया अनवकाशत्वादभेद्यत्वाच्च। भेद्यत्वे कथमीश्वर एनां न भिन्द्यात्? मायाया बहिरीश्वरस्य सत्त्वे सर्वव्यापित्वभङ्गप्रसङ्गात्। 'अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः' इति श्रुतेः। मायाया अन्तरपीश्वरचैतन्यस्य व्यापित्वे निरवकाशत्वेन जीवप्रवेशायोगात्। सावकाशत्वे तु व्यापित्वायोगात्। चैतन्याद् बहिरेव मायायाः सत्त्वे मायायामेव कारणभूतायां कार्यप्रपञ्चसत्त्वेन चैतन्ये प्रपञ्चसत्त्वायोगात्। प्रपञ्चस्य चेश्वरे सत्त्वश्रवणात्। 'पादोऽस्य विश्वा भूतानि' इति श्रुतेः।

न चाद्वैतमतेऽपि चैतन्ये निरवकाशे कथं प्रपञ्चसत्त्वमिति वाच्यम् , मायया तदुपपत्तेः। न च मायायाः कथं सत्त्वमिति वाच्यम् , मायात्वादेव। नातिशङ्कनीया हि सा माया। अतिशङ्कायां मायास्वरूपस्यैवासिद्धेः। तस्माद् मामित्यस्य प्रत्यगभिन्नं ब्रह्मेत्येवार्थः।

**नन्वेवं** सर्वत्र मामित्येव किमिति वचनम् , त्वामिति कुतो न ब्रूयात्? त्वच्छब्दार्थस्यापि प्रत्यगभिन्नब्रह्मत्वादिति चेत् , **मैवम्** , वक्तुर्ब्रह्मात्मसाक्षात्कारेण स्वात्मनि ब्रह्मत्वनिश्चयान्मामित्युक्तिः। श्रोतुश्च तदभावे स्वात्मनि जीवत्वनिश्चयात् त्वामित्यनुक्तिरिति।

न च वक्तुः कृष्णस्य परमात्मत्वेन मामित्युक्तिरिति वाच्यम् , **स्कान्दपुराणे** माघमाहात्म्ये केनचिद् विप्रेण भार्यां प्रति तत्त्वोप-देशसमये– 'मयि सर्वाणि भूतानि तेषु चाहमवस्थितः। मत्तः परतरं नैव विद्यतेऽहमतः परम्॥' इत्युक्तम्। कोऽत्र मच्छब्दार्थः? न च जीव एवेति वाच्यम् , जीवस्य सर्वभूताधारत्वसर्वभूतान्तरात्मत्वसर्वपरतरत्वनिरतिशयत्वानामीश्वरधर्माणामसिद्धेः। न ह्येकस्मिन् भूते मनुष्यादिदेहे वर्तमानस्य जीवस्याणोः सर्वभूताश्रयत्वसर्वान्तरत्वे सम्भवतः। जीवादधिकस्येश्वरस्य सत्त्वेन जीवस्य सर्वाधिकत्वनिरति-शयत्वे वा न सम्भवतः। तस्मान्मच्छब्दोऽत्र परमात्मैव[1]। न हि वक्ता विप्रमात्रः परमात्मा भवितुमर्हति वासुदेववत् , येन त्वदुक्तरीत्या मच्छब्दार्थः परमात्मेति वक्तुं शक्येत। तस्मात् कृष्णवत् सर्वोऽपि तत्त्ववित् परमात्मैव। परमात्मन एवात्मत्वात् तत्त्वविदश्चात्मत्वात्। अतो नात्र गीताशास्त्रे श्रीकृष्णोक्तस्य मच्छब्दस्य क्वापि जीवभिन्नेश्वरपरत्वमर्थ इति भ्रमितव्यम् , प्रत्युत प्रत्यगभिन्नं ब्रह्मैवार्थ इति ज्ञातव्यमित्यलम्॥ १६॥

**सहस्रेति।** कस्माल्लोकाः पुनरावर्तिन इति प्रश्नः। कालपरिच्छिन्नत्वादित्युत्तरम्। कथं कालपरिच्छिन्ना इति पुनः प्रश्नः। सहस्रयुगेत्यादिकमुत्तरमिति विवेकः।

१. अत एव बादरायणीयं सूत्रम्— 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (ब्र.सू. १-१-३०) इति।

**अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे।**
**रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके॥ १८॥**

पर्यन्तं**, सहस्रं युगानि** पर्यन्तः **पर्यवसानं यस्याह्नः तदहः सहस्रयुगपर्यन्तं,** ब्रह्मणः **प्रजापतेर्विराजो विदुः, रात्रिमपि** युगसहस्रान्ताम् **अहःपरिमाणामेव। के विदुरित्याह—**तेऽहोरात्रविदः। **कालसंख्याविदो जनाः इत्यर्थः। यत एवं कालपरिच्छिन्नास्ते, अतः पुनरावर्तिनो लोकाः॥ १७॥**

**प्रजापतेरहनि यद् भवति रात्रौ च, तदुच्यते—** अव्यक्तेति। अव्यक्तात् **, अव्यक्तं प्रजापतेः स्वापावस्था,**

आनन्दगिरिकृतव्याख्या

दिना। [१]**यथोक्ताहोरात्रावयवमासर्त्वयनसंवत्सरावयवशतसङ्ख्यायुरवच्छिन्नत्वात् प्रजापतेस्तदन्तर्वर्तिनामपि लोकानां यथायोग्यकालपरिच्छिन्नत्वेन पुनरावृत्तिरित्यभिप्रेत्य व्याचष्टे—**सहस्रेत्यादिना। **अक्षरार्थमुक्त्वा तात्पर्यार्थमाह—**यत इति॥ १७॥

**यत् प्रजापतेरहस्तद्युगसहस्रपरिमितम् , या च तस्य रात्रिः, साऽपि तथेति कालविदामभिप्रायमनुसृत्य ब्राह्मस्याहोरात्रस्य कालपरिमाणं दर्शयित्वा, तत्रैव विभज्य कार्यं कथयति—**प्रजापतेरिति। **अव्यक्तमव्याकृतमिति शङ्कां वारयति—**अव्यक्तमित्यादिना।

भाष्यार्कप्रकाशः

यद् यस्मात् ते प्रसिद्धा अहोरात्रविदो जनाः, ब्रह्मणो हिरण्यगर्भस्याहः सहस्रयुगपर्यन्तं, रात्रिं युगसहस्रान्तां च विदुः, तस्मादाब्रह्मभुवनाल्लोकाः पुनरावर्तिनः।

युगशब्दोऽत्र चतुर्युगसमाहारात्मकमहायुगपरः, 'चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते' इति स्मृत्यन्तरसंवादात्। यद्यपि ब्रह्मणो दिनान्ते स्वर्गादिलोकान्तराणामेव नाशः, न तु ब्रह्मलोकस्य; तथापि एवंविधब्रह्मदिनानां षष्ठ्युत्तरत्रिशते ब्रह्मणः संवत्सरो भवति। तादृशसंवत्सराणामर्धशते परार्धं ब्रह्मणो भवति। द्विपरार्धावसानं ब्रह्मणः परमायुः। द्विपरार्धावसाने ब्रह्मलोकस्यापि नाशः। अतः कालपरिच्छिन्न एव स्वर्गादिलोकवद् ब्रह्मलोकोऽपि। यस्यायुः कालः क्षपयति स कालपरिच्छिन्न इत्युच्यते।

एवंविधकालपरिच्छेदरहितस्त्वेक एवेश्वर आत्मा, जन्मनाशरहितत्वेन नित्यत्वादात्मनः। स चात्मा नित्यमशरीर एव, शरीरित्वे शरीराधीनजन्मनाशवत्त्वप्रसङ्गात्। न च ज्ञानात्प्राक् [स]शरीर एवात्मेति वाच्यम् , तदाऽपि सशरीरत्वस्य मायिकत्वात्। न हि निर्विकारस्यात्मनः सदैकरूपस्य कदाचित् सशरीरत्वं कदाचिदशरीरत्वं च भवितुमर्हति।

एतेन सशरीराः विष्णुरुद्रगणपतिकुमारादयः तत्तद्वादिभिरीश्वरत्वेनाभ्युपगताः सर्वेऽपि शरीरिणो देवाः कालपरिच्छिन्ना नश्वरा जीवा एवेति सिद्धम्। अशरीरस्यैकस्यैवात्मन ईश्वरत्वात्। यदि तु विष्ण्वादिशब्दैस्तत्तच्छरीरान्तरः सर्वव्यापी आत्मा विवक्षितः, तर्हि स ईश्वर एवेत्यदोषः।

तस्माद् ब्रह्म सत्यं जगन्मिथ्येति स्थितम्। ब्रह्मभिन्नानां सर्वेषां लोकानां लोकस्थानां लोकपालानां च कालावच्छिन्नत्वेन नश्वरत्वाद् ब्रह्मण एकस्यैवाकालावच्छिन्नत्वेन नित्यत्वान्नश्वरत्वस्यैव त्रिकालबाध्यत्वरूपस्य मिथ्यात्वलक्षणत्वात् , त्रिकालाबाध्यत्वरूपनित्यत्वस्यैव सत्यत्वलक्षणत्वाच्च।

अत एव ये नित्यमात्मानं प्रपद्यन्ते ते न पुनर्जन्म प्रतिपद्यन्ते; ये त्वनित्यान् ब्रह्मलोकादीन् प्राप्नुवन्ति, ते पुनर्जन्म प्रतिपद्यन्त इति सिद्धम्॥ १७॥

**अव्यक्तादिति।** श्लोकस्यार्थं सङ्क्षेपत आह— **प्रजापतेरिति। यद्** जगदित्यर्थः। **स्वपतो** निद्राणस्य। स्वापावस्था निद्रावस्था। अज्ञानमिति यावत्। समष्टिरूपमिति भावः। व्यष्टिरूपमज्ञानं तु अस्मन्निद्रारूपम्। इदं च समष्ट्यज्ञानं नाव्याकृतम् , तद्धीश्वरोपाधिः।

**अत्रेदं बोध्यम्—**यत्रैकमेव लिङ्गं निलीयते तद् व्यष्ट्यज्ञानं प्राज्ञस्योपाधिः। यत्र सर्वाणि लिङ्गानि निलीयन्ते, महाभूतानि तु न

१. अहोरात्रावयवकाः मासादयः संवत्सरान्ताः, संवत्सरावयवकं च शतसंख्यायुरिति योज्यम्।

**तस्मादव्यक्तात् ,** व्यक्तयः **व्यज्यन्त इति व्यक्तयः, स्थावरजङ्गमलक्षणाः सर्वाः प्रजाः,** प्रभवन्ति **अभिव्यज्यन्ते, अह्न आगमोऽहरागमः, तस्मिन्** अहरागमे **काले ब्रह्मणः प्रबोधकाले। तथा** रात्र्यागमे **ब्रह्मणः स्वापकाले प्रलीयन्ते सर्वा व्यक्तयः** तत्रैव **पूर्वोक्ते अव्यक्तसंज्ञके॥ १८॥**

**अकृताभ्यागमकृतविप्रणाशदोषपरिहारार्थं, [1]बन्धमोक्षशास्त्रप्रवृत्तिसाफल्यप्रदर्शनार्थम् , अविद्यादिक्लेशमूल-**

आनन्दगिरिकृतव्याख्या

**जातिप्रतियोगिभूता व्यक्तीर्व्यावर्तयति—**स्थावरेति। **असदुत्पत्तिप्रसक्तिं प्रत्यादिशति—**अभिव्यज्यन्त इति। **पूर्वोक्तमव्यक्तसंज्ञकं स्वापावस्थं ब्रह्म प्रजापतिशब्दितं, तस्मिन्निति यावत्॥ १८॥**

**ननु प्रबोधकाले ब्रह्मणो यो भूतग्रामो भूत्वा तस्यैव स्वापकाले विलीयते, तस्मादन्यो भूयो ब्रह्मणोऽहरागमे भूत्वा पुना रात्र्यागमे परवशो विनश्यति। तदेवं प्रत्यवान्तरकल्पं भूतग्रामविभागो[2] भवेदित्याशङ्क्यानन्तरश्लोकतात्पर्यमाह—**अकृतेति। **प्रतिकल्पं प्राणिनिकायस्य भिन्नत्वे सत्यकृताभ्यागमादिदोषप्रसङ्गात् तत्परिहारार्थं भूतग्रामस्य प्रतिकल्पमैक्यमास्थेयमित्यर्थः। यदि [3]स्थावरजङ्गम-**

भाष्यार्कप्रकाशः

लीयन्ते तत् समष्ट्यज्ञानं हैरण्यगर्भस्वापाख्यं प्राज्ञसमष्ट्युपाधिः। प्राज्ञभेदप्रयोजकाभावात् प्राज्ञस्योपाधिरिति वा। यत्र सर्वाणि लिङ्गानि पञ्चभूतैः समं निलीयन्ते, तदव्याकृतमीश्वरोपाधिः। इदं चाव्याकृतं महाप्रलये वर्तते, तदानीमेव मूर्तामूर्तसर्वदृश्यलयात्। मोक्षे त्वव्याकृतस्यापि नाश इति।

एवं सति अव्यक्तशब्दो यद्यप्यव्याकृतपरस्तथापि नेहाव्यक्तशब्देनाव्याकृतं गृहीत[ग्रहीतु]मुचितम्। अहरागमे रात्र्यागमे इति लिङ्गात् प्रजापतेर्हिरण्यगर्भस्य अहोरात्रिसद्भावः। यत्र प्रजापतिर्जागर्ति तदहः, यत्र स्वपिति सा रात्रिरिति। न हीश्वरस्य जाग्रदाद्यवस्थाः सन्तीति।

**नन्वेव**मव्याकृतोपाधिकस्यैवेश्वरत्वे तस्य महाप्रलय एव सत्त्वेन कालत्रयव्यापकत्वमीश्वरस्य न स्यादिति चेत् , **मैवम्** ; यदेव चैतन्यमव्याकृतेनोपहितं तदेव प्रपञ्चमूर्तामूर्ताभ्यामुपहितं, तदेव चेश्वर इति नेश्वरस्य कालत्रयाव्यापकत्वम्। तदुपाध्यव्याकृतमपि मूर्तामूर्तात्मना परिणतं सदवतिष्ठत इति वा नाव्याकृतस्येदानीमभावः।

**यद्वा** मृदि घटादिवदव्याकृतोपहिते ईश्वरे मूर्तामूर्तजगदिदं कल्पितमिति कृत्वा घटादौ सत्यपि यथा मृदस्ति तथा जगति सत्यपि अव्याकृतमस्त्येवेति न कश्चिद् दोषः। न चाव्याकृतमपि न कालत्रयव्यापकं मुक्तावसत्त्वादिति वाच्यम् , मुक्तौ कालस्यैवाभावात्। जगतः प्राक्, जगतः पश्चात् , जगतः स्थितौ च कालत्रयव्यवहारात्। अव्याकृतस्य च तत्र त्रयेऽपि सत्त्वादिति।

अत्राव्यक्तशब्दः कारणवाची। कार्यस्याव्यक्तं रूपं कारणात्मकमिति **श्रीधरः**। कार्यं हि सृष्टेः प्रागनभिव्यक्तं सत् कारणात्मना वर्तत इति तस्याशयः। अस्मिन् पक्षे व्यक्तीनां भौतिकानां कारणमव्यक्तं भूतजातमेवेह ग्राह्यम् , ब्रह्मदिनप्रलये भूतजातस्य सत्त्वात्। व्यक्तस्य तु भूतजातस्याव्यक्तमव्याकृतं कारणं, तत्तु ब्रह्मप्रलय इति बोध्यम्।

**ननु** अव्यक्ताद् व्यक्तयः प्रभवन्तीत्युक्तम् , किमिमा व्यक्तयः प्रभवात्पूर्वं सन्ति? उत न? आद्ये, उत्पत्तिवैयर्थ्यम्। अन्त्ये, असत्कार्यवादापत्तिरिति चेत् , **मैवम्** ; आद्यपक्षस्यैव परिग्रहात्। न चोत्पत्तिवैयर्थ्यम् , सूक्ष्मावस्थावस्थितानां व्यक्तीनां स्थूलावस्थाप्राप्तेरेवोत्पत्तित्वात्।

ननु प्रलये सूक्ष्मावस्थावस्थिता व्यक्तयः सर्वा हिरण्यगर्भोपाधावज्ञाने निलीय वर्तन्ते, प्रपञ्चे तु स्थूलावस्थावत्त्वेन तत आगच्छन्तीत्युक्तम् , तत्र व्यक्तीनां सूक्ष्मावस्था किं प्राथमिकी? उत स्थूलावस्थेति चेत् , **मैवम्** ; अनादित्वात्॥ १८॥

---

१. 'विधिनिषेधबन्धमोक्ष' इति पा. । २. अन्यः अन्यः इति शेषः। सिद्धान्ते तु—अकृतस्य कर्मणः फलागमः, आदिपदात् कृतस्य कर्मणः विप्रणाशश्च प्रसज्येयाताम्। तथा च शास्त्रप्रामाण्यहानिः, उत्पत्तेः अहेतुकत्वे मुक्तानां पुनरुत्पत्तिप्रसङ्गश्च। तद्वारणाय प्रतिकल्पं सृज्यमानभूतग्रामस्यैक्यमास्थेयमित्यर्थः। ३. 'स्थावर-जङ्गमलक्षणस्य प्राणिवर्गस्य' इति पा.।

**भूतग्रामः स एवायं भूत्वाभूत्वा प्रलीयते।**
**रात्र्यागमेऽवशः पार्थ ! प्रभवत्यहरागमे॥ १९॥**

**कर्माशयवशाच्चावशो भूतग्रामो भूत्वा भूत्वा प्रलीयते इत्यतः संसारे वैराग्यप्रदर्शनार्थं चेदमाह—**भूतग्राम इति। भूतग्रामो **भूतसमुदायः स्थावरजङ्गमलक्षणः, यः पूर्वस्मिन् कल्प आसीत् स एवायम् , नान्यः, भूत्वाभूत्वा अहरागमे, प्रलीयते पुनः पुना** रात्र्यागमे **अह्नःक्षये** अवशोऽस्वतन्त्र **एव, हे पार्थ !** प्रभवति **जायते अवश एवाहरागमे॥ १९॥**

आनन्दगिरिकृतव्याख्या

**लक्षणप्राणिनिकायस्य प्रतिकल्पमन्यथात्वम् , तदैकस्य बन्धमोक्षान्वयिनोऽभावात् काण्डद्वयात्मनो बन्धमोक्षार्थस्य शास्त्रस्य प्रवृत्तिरफला प्रसज्येत। अतस्तत्साफल्यार्थमपि प्रतिकल्पं प्राणिवर्गस्य नवीनत्वानुपपत्तिरित्याह—**बन्धेति। **कथं पुनर्भूतसमुदायो ऽस्वतन्त्रः सन्नवशो भूत्वा प्रविलीयते? तत्राह—**अविद्यादीति। **आदिशब्देनास्मितारागद्वेषाभिनिवेशाः गृह्यन्ते। यथोक्तं क्लेशपञ्चकं मूलं प्रतिलभ्य धर्माधर्मात्मककर्मराशिरुद्भवति, तद्वशादेवास्वतन्त्रो भूतसमुदायो जन्मविनाशावनुभवतीत्यर्थः। प्राणिनिकायस्य जन्मनाशाभ्यासोक्तेरर्थमाह[1]—**इत्यत इति। **संसारे विपरिवर्तमानानां प्राणिनामस्वातन्त्र्यादवशानामेव जन्ममरणप्रबन्धाद् अलमनेन संसारेणेति वैतृष्ण्यं तस्मिन् प्रदर्शनीयम् , तदर्थं चेदं भूतानामहोरात्रमावृत्तिवचनमित्यर्थः। समनन्तरवाक्यम्** इदमा **परामृश्यते। रात्र्यागमे प्रलयमनुभवतोऽहरागमे च प्रभवं प्रतिपद्यमानस्य प्राणिवर्गस्य तुल्यं पारवश्यमित्याशयवानाह—**अह्न इति॥ १९॥

भाष्यार्कप्रकाशः

**भूतेति।** ननु अव्यक्तात्प्रभूता व्यक्तयः पुनरव्यक्तं प्रविष्टाः प्रलये। प्रलयावसाने तु पुनरन्या एव व्यक्तयः प्रभवन्ति। ततश्च पूर्वकल्पस्था व्यक्तयः स्वकृतं कर्म साकल्येनानुपभुज्यैव प्रकृतौ लीना इति कृतहानदोष एकः। प्रलयावसाने पुनरव्यक्तादुद्भूता व्यक्तयः अकृतकर्मफलं भुञ्जत इत्यकृताभ्यागमदोषो द्वितीयः। न हीमाः पूर्वकल्पे कर्म कृतवत्यः, किन्तु पूर्वकल्पस्थाभ्यो ह्यतिरिक्ता एवैता इति विनैव शास्त्राचार्योपदेशादिकं प्रलये अक्लेशेनैव सर्वे जीवा मुच्यन्त इति सर्वमुक्तिरूपो दोषस्तृतीयः, विहितानुष्ठातारो निषिद्धानुष्ठातारश्च स्वर्गिणो नारकिणश्च सर्वेऽप्यविशेषेण प्रलयेऽव्यक्ते लीयन्त इति विधिनिषेधशास्त्रवैयर्थ्यदोषश्चतुर्थः। एतद्दोषचतुष्टयपरिहारार्थं उत्तरश्लोक इत्याह भाष्यकारः—**अकृतेति।** फलान्तरमाह— **अविद्यादीति।** आदिपदाद् रागद्वेषादयः। अविद्यादीनां क्लेशानां मूलभूतं कर्म जीवादृष्टम्। तद्युक्त आशयोऽन्तःकरणं, तद्वशात्। अविद्यादिक्लेशकर्माशयैरपरामृष्टस्त्वीश्वर एक एवेति भावः।

**भूत्वाभूत्वा** कल्पेकल्पे इति भावः। कार्यकरणसङ्घातात्मको भूतग्रामः। स्थावरजङ्गमशरीराभिमानी साभासबुद्धिरूपजीवसमुदाय इत्यर्थः। अयं हि लिङ्गशरीरी जीवसमुदायः कल्पेकल्पे जायते स्थावरजङ्गमात्मकस्थूलशरीरसंयोगात्। तद्वियोगाच्च प्रलयेप्रलये म्रियते।

**एतेन** यः पूर्वकल्पस्थो भूतग्रामः स एवायं वर्तमानकल्पस्थो, न त्वन्य इति न कृतहानाकृताभ्यागमदोषद्वयप्रसङ्गः। स्थूलशरीरनाशेऽपि लिङ्गशरीरस्य प्रलयेऽप्यज्ञाने निलीय वर्तमानत्वेन न प्रलये जीवानां मुक्तिरिति न सर्वमुक्तिप्रसङ्गः। तत्तज्जीवान्तःकरणेषु तत्तज्जीवकृतसुकृतदुष्कृतकर्मवासनासत्त्वात् , तद्वासनावशेन पुनः प्रपञ्चे तत्तदुचितपुण्यपापशरीरभोगसत्त्वाच्च न विधिनिषेधशास्त्रवैयर्थ्यम्। गुरुशास्त्रोपदेशं विना लिङ्गशरीरस्य कालतो नाशाभावान्न मोक्षशास्त्रवैयर्थ्यमिति **सिद्धम्।**

अव्यक्तं चतुर्मुखस्य शरीरमिति **रामानुजः**, तदयुक्तम् ; चतुर्मुखस्य स्थूलशरीरे जीवानां प्रवेशायोगाद् , अत एव ततो निर्गमायोगाच्च। न च पितृदेहात् पुत्रदेह इव चतुर्मुखदेहाद् भूतग्राम उदेतीति वाच्यम् , चतुर्मुखस्य मनसैव प्रायेण सर्वप्रपञ्चस्य जातत्वात्। सङ्कल्पपूर्विका हि सृष्टिः। सनकादीनां ब्रह्ममानसपुत्रत्वेन ब्रह्मशरीरजत्वाभावाच्च। चतुर्मुखदेहात् प्रजापत्यादिदेहानां जातत्वेऽप्यस्मदादिदेहानामजातत्वाच्च।

१. 'भूत्वाभूत्वा प्रलीयते' इति जन्ममरणाभ्यासोक्तेः प्रयोजनमाहेत्यर्थः।

**परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात् सनातनः।**
**यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥२०॥**

**यदुपन्यस्तमक्षरम्, तस्य प्राप्त्युपायो निर्दिष्टः- 'ओमित्येकाक्षरं ब्रह्म' इत्यादिना। अथेदानीमक्षरस्यैव स्वरूपनिर्दिदिक्षया[1] इदमुच्यतेऽनेन योगमार्गेणेदं गन्तव्यमिति—**परस्तस्मादिति। परो **व्यतिरिक्तो भिन्नः। कुतः?** तस्मात् **पूर्वोक्तात्।** तुशब्दो**ऽक्षरस्य विवक्षितस्याव्यक्ताद् वैलक्षण्य[2]प्रदर्शनार्थः।** भावः **अक्षराख्यं परं ब्रह्म। व्यतिरिक्तत्वे सत्यपि सालक्षण्यप्रसङ्गोऽस्तीति तद्विनिवृत्त्यर्थमाह—**अन्य इति। अन्यो **विलक्षणः, स च** अव्यक्तो**ऽनिन्द्रियगोचरः।**

आनन्दगिरिकृतव्याख्या

**'अक्षरं ब्रह्म परम'मित्युपक्रम्य तदनुपयुक्तं किमिदमन्यदुक्तमित्याशङ्क्य, वृत्तमनूद्यानन्तरग्रन्थसङ्गतिमाह—**यदुपन्यस्तमिति। **अक्षरस्वरूपे निर्दिदिक्षिते तस्मिन् पूर्वोक्तयोगमार्गस्य कथमुपयोगः स्यादित्याशङ्क्य तत्प्राप्त्युपायत्वेनेत्याह—** अनेनेति। गन्तव्यमिति **योगमार्गोक्तिरुपयुक्तेति शेषः। पूर्वोक्तादव्यक्तादिति सम्बन्धः। परशब्दस्य व्यतिरिक्तविषयत्वे तुशब्देन वैलक्षण्यमुक्त्वा पुनरन्यशब्दप्रयोगात् पौनरुक्त्यमित्याशङ्क्याह—**व्यतिरिक्तत्व इति। **तुना द्योतितं वैलक्षण्यमन्यशब्देन प्रकटितम्[3]। यतो भिन्नेष्वपि भावभेदेषु सालक्षण्यमालक्ष्यते। ततश्चाव्यक्ताद्भिन्नत्वेऽपि ब्रह्मणस्तेन सादृश्यमाशङ्क्यते, तन्निवृत्त्यर्थमन्यपदमित्यर्थः। यद्वा परशब्दस्य प्रकृष्टवाचिनो**

भाष्यार्कप्रकाशः

तत्तद्व्यष्टिशरीरे तत्तज्जीव इव ब्रह्मशरीरे सर्वजीवानां सत्त्वमित्यप्ययुक्तम्, तथा सति ब्रह्मशरीरे सर्वेषां स्वीयत्वाभिमानस्य भवितव्यत्वात्। निद्रावस्थायामभिमानाभावेऽपि प्रलयावसानोत्तरक्षणे तत्सद्भावात्। न चोत्तरक्षण एव तत आविर्भवन्तीत्यदोष इति वाच्यम्, उत्तरक्षण एव सर्वस्थूलशरीरसृष्ट्यभावाद्, येन तत उत्तिष्ठेरन्, प्रजापत्यादिक्रमेण चिरकालाय हि प्रपञ्चसृष्टिः। न च तत्रैवाज्ञाने निलीय वर्तन्त इति वाच्यम्, तथा सति लाघवादज्ञानमेवाव्यक्तमिति वक्तव्यत्वात्, किम्पुनर्ब्रह्मशरीरपरिग्रहेण॥१९॥

**पर इति।** वृत्तमनुवदति—**यदिति।** यदक्षरं वेदविदो वदन्तीति यदक्षरमुपन्यस्तं तस्याक्षरस्य ब्रह्मणः प्राप्तौ उपायः साधनं निर्दिष्टः ओङ्कारोपासनरूपः, विष्णुस्मरणरूपश्च। आदिपदाद् 'अनन्यचेताः' इति श्लोकस्य संग्रहः। 'मामुपेत्ये'त्यादिकं तु प्रसङ्गादुक्तमिति भावः।

**अथ** अक्षरस्य प्राप्त्युपायनिर्देशानन्तरमित्यर्थः। **अक्षरस्य** उपेयस्य ब्रह्मण इत्यर्थः। एवकाराद् न त्वन्यस्येति भावः। स्वरूपस्य निर्वक्तुमिच्छा निर्विवक्षा, तया। **इदं** पद्यद्वयम्। उक्तिप्रकारमेव दर्शयति—**अनेनेति।** अनेनोक्तेन योगमार्गेण गन्तव्यं ब्रह्मेदमित्युच्यते। **पर इति।** पृथग्भूत इत्यर्थः। घटात् पटवदिति भावः। ननु घटाद्भिन्नोऽपि पटो दृश्यत्वजडत्वादिधर्मैर्घटसलक्षण एवेति तद्वद् अव्यक्ताद्भिन्नोऽयमक्षरो न किमव्यक्तसलक्षण इति शङ्कते— **व्यतिरिक्तत्वे सत्यपीति। तद्विनिवृत्त्यर्थम्** अव्यक्तसालक्षण्यप्रसङ्गनिरासार्थम्। **विलक्षणः** विभिन्नलक्षणः। दृश्यत्वजडत्वमिथ्यात्वप्रमुखलक्षणवद् अव्यक्तम्, द्रष्टृत्वचिदात्मत्वसत्यत्वप्रमुखलक्षणवान् अक्षर इति भावः।

[4]**नेन्द्रियगोचर इति।** [5]एतेन संस्कृतमनोगोचरत्वं सिद्धम्। मनसोऽनिन्द्रियत्वात्। **यद्वा** मतभेदेन मनसोऽपीन्द्रियत्वादगोचर इत्येवार्थः। वाङ्मनसाविषयत्वाद् ब्रह्मणः। न च सुतरामगोचरत्वे शून्यवादापत्तिरिति वाच्यम्। साक्षिचैतन्येन स्वेनैव स्वस्य भास्यत्वात्, शून्यस्यापि साक्षिभास्यत्वात्, अभास्यत्वे [6]शून्यस्यैवाभावप्रसङ्गात्। तस्मादत्यन्तागोचरोऽप्यात्मत्वादेवाक्षरः सिध्यति, आत्मन एवासिद्धौ सर्वासिद्धिप्रसङ्गात्।

१. 'निर्विवक्षया' इति रा.पा.। २. 'विशेषणार्थः' इति पा.। ३. तेन न पौनरुक्त्यमिति भावः। ४. भाष्ये 'अव्यक्तो नेन्द्रियगोचरः' इति रा.पा. भाति। ५. 'न गोचर' इति वक्तव्ये इन्द्रियेति विशेषणात् मनसोऽनिन्द्रियत्वपक्षे तद्गोचरत्वं न व्यावर्त्यत इति अर्थात् संस्कृतमनोगोचरत्वमनुमतमिति भावः। ६. शून्यस्यैवासिद्धिप्रसङ्गादित्यर्थः।

**परस्तस्मादित्युक्तम् , कस्मात्पुनः परः? पूर्वोक्ताद् भूतग्रामबीजभूतादविद्यालक्षणाद्** अव्यक्तात्। [१](अन्यो विलक्षणो भाव इत्यभिप्रायः।) सनातनः **चिरन्तनः,** यः सः **भावः** सर्वेषु भूतेषु **ब्रह्मादिषु नश्यत्सु न विनश्यति॥ २०॥**

आनन्दगिरिकृतव्याख्या

**भावविशेषणार्थत्वे पुनरुक्तिशङ्कैव नास्तीति द्रष्टव्यम्। अनादिभावस्याक्षरस्याविनाशित्वमर्थसिद्धं समर्थयते—**यः स भाव इति। **सर्वं हि विनश्यद् विकारजातं पुरुषान्तं विनश्यति। स तु विनाशहेत्वभावान्न विन[नं]ष्टुमर्हतीत्यर्थः॥ २०॥**

भाष्यार्कप्रकाशः

**तस्मात्** पूर्वोक्तादित्यर्थः। ननु पूर्वमुक्तो भूतग्राम एवेत्यत आह— **भूतग्रामबीजभूतादिति।** एतेन भूतग्रामादपि वैलक्षण्यमुक्तप्रायम् , भूतग्रामस्याप्यव्यक्तकार्यस्य, मृत्कार्यस्य घटस्य मृदात्मत्वमिव, अव्यक्तात्मत्वात्। जलादेर्मृद्वैलक्षण्ये उक्ते सति अनुक्तस्यापि घटवैलक्षण्यस्य सिद्धत्वात्।

न च अव्यक्तस्याचिद्रूपत्वाद् भूतग्रामस्य चिदचिदात्मकत्वाच्च कथमेकात्मत्वमिति वाच्यम् , भूतग्रामस्य चिदचिदात्मकत्वे अव्यक्तप्रभवत्वस्यैवासम्भवप्रसङ्गात्। न ह्यज्ञानाज्ज्ञानं जायते। नापि नित्यं ज्ञानं कथमपि जायते। तस्मादेक एवाक्षरश्चिदात्मकः। तस्मादन्यः सर्वोऽपि भूतग्रामोऽचिदात्मक एव। **अविद्यालक्षणाद्** अज्ञानस्वरूपात्। **ब्रह्मादिषु** हिरण्यगर्भादिस्तम्बान्तेषु कार्यकरणसङ्घातात्मकेषु **भूतेषु** प्राणिषु नश्यत्सु सत्सु, यस्तस्मादव्यक्तात् परोऽन्यः सनातनोऽव्यक्तो भावः, स तु सर्वेषु भूतेषु नश्यत्सु न विनश्यति। भवति सर्वत्र सर्वदाऽस्तीति **भावः** सद्रूपः; अत एवोक्तमक्षराख्यं परं ब्रह्मेति। ब्रह्मण एकस्यैव सद्रूपत्वादन्यस्य सर्वस्यापि मिथ्यात्वात्। स सर्वेषु भूतेषु नश्यत्सु न विनश्यतीत्यनेन 'अविनाशि तु तद्विद्धि येन सर्वमिदं तत'मिति पूर्वोक्तं स्मारितम्। यः स इत्येकत्वनिर्देशेन चात्मन एकत्वं स्थापितम्। न च सर्वेषु भूतेषु जीवेषु नश्यत्सु परमात्मा नश्यतीति वाच्यम् , 'अजो नित्यः शाश्वतः' इति पूर्वोक्तविरोधात्।

यदि तु जीवाः सच्चिदाभासा बुद्धय इति विवक्षितम् , तर्हि संसारिणस्ते अनन्ता नश्वरा एव । तेऽपि मुक्तावेव नश्यन्ति, न तु प्रलये। अन्यथा प्रलये सर्वमुक्तिप्रसङ्गात्। न चैवं सर्वेषु भूतेषु नश्यत्स्विति कथमुक्तमिति वाच्यम् , स्थूलदेहनाशाभिप्रायात्। लोके स्थूलदेहनाशादेव हि 'मृतो देवदत्तः' इत्यादिप्रतीतिः। सूक्ष्मदेहश्चाविद्यायां निलीय संस्कारात्मना वर्तत इति तस्य नाश औपचारिकः। कारणदेहस्तु अविद्यैव। सा चाविद्या विक्षेपशक्तिं सङ्कोच्य केवलामावरणशक्तिमवलम्ब्य जीवान्मोहयन्ती वर्तते प्रलये सुषुप्तौ निद्रेव। एवमव्यक्तस्य प्रलये नाशाभावादेव भूतेषु नश्यत्स्वित्युक्तम्। न त्वव्यक्ते नश्यतीति। न चैवमव्यक्तस्य नित्यत्वप्रसङ्गः, मुक्तौ तन्नाशात्।

ननु अव्यक्तं प्रजापतेः स्वापावस्थेत्युक्तम् , कथं तत्र ब्रह्मणोऽपि नाशः? येन ब्रह्मादिष्वित्युच्यत इति चेत् , नायं दोषः, यदेवाज्ञानं प्रजापतेर्निशायां वर्तते तदेव प्रजापतेर्मरणेऽपीति नित्यनैमित्तिकमहाप्रलयेषु त्रिष्वप्यव्यक्तमेकमेव। सत्यप्यवान्तरविशेषे वस्त्वैक्यात्। तस्मात् प्रजापतेः स्वापावस्थेव मरणावस्थाऽप्यव्यक्तमेवेति।

एवं महाप्रलये स्थावरजङ्गमात्मकब्रह्मादिस्तम्बपर्यन्तसर्वस्थूलदेहानां स्वरूपतो नाशात् सूक्ष्मदेहानामविद्यायां लयरूपनाशाद् एक एवाक्षर आत्मा तमसः परः तमसः साक्षी सन् वर्तत इत्यविनाशी। एवं स्थिते कोऽत्र जीवेश्वरभेदस्य जीवभेदस्यावकाशो वा? न कोऽपि।

यत्तु **रामानुजः**—अव्यक्तोऽक्षरो जीवः, जात्येकत्वादेकत्वनिर्देशः इति, **तत्तुच्छम् ,** प्राणधारणस्य जीवलिङ्गत्वात् , प्राणिनां जीवानामव्यक्तप्रभवत्वेन अव्यक्तात् परान्यत्वाभावात्[२], नश्वरत्वेन चाविनाशित्वाभावात्। त्वदभिमतानाममीषां जीवानां सर्वभूतशब्दवाच्यत्वेन 'सर्वेषु भूतेषु नश्यत्स्वि'त्यनेन परामृष्टत्वादक्षरस्य चामीभ्यो विलक्षणत्वात् , लिङ्गिनां जीवानां प्रमाणव्यक्तत्वेनाव्यक्तत्वायोगात् , सर्वोपाधिविनिर्मुक्तस्याक्षरस्य प्राणाभावेन प्राणधारणप्रयुक्तजीवत्वाभावात् , भेदकाभावेन भेदाभावात् , भेदकसत्त्वे सर्वोपाधिविनिर्मुक्तत्वाभावात् , अक्षरादधिकस्य परमपुरुषस्य सत्त्वे 'पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गति'रिति श्रुतिविरोधात्।

१. कुण्डलितः पाठो न सर्वत्र। २. पूर्वोक्तयोः परत्वान्यत्वयोरभावादित्यर्थः।

**अव्यक्तोऽक्षर इत्युक्तः तमाहुः परमां गतिम्।**
**यं प्राप्य न निवर्तन्ते तद् धाम परमं मम॥२१॥**
**पुरुषः स परः पार्थ ! भक्त्या लभ्यस्त्वनन्यया।**

अव्यक्त इति। **योऽसावव्यक्तोऽक्षर इत्युक्तः तमेवाक्षरसंज्ञकमव्यक्तं भावम्** आहुः परमां **प्रकृष्टां गतिम्।** यं **परं भावं** प्राप्य **गत्वा न निवर्तन्ते संसाराय, तद्** धाम **स्थानं** परमं **प्रकृष्टं** मम **विष्णोः परमं पदमित्यर्थः॥२१॥**

**तल्लब्धेरुपाय उच्यते—**पुरुष इति। पुरुषः **पुरि शयनात् पूर्णत्वाद्वा। स परः, पार्थ!** परो **निरतिशयः, यस्मात्**

आनन्दगिरिकृतव्याख्या

**यथोक्तेऽव्यक्ते भावे श्रुतिसम्मतिमाह—**अव्यक्त इति। **तस्य परमगतित्वं साधयति—**यं प्राप्येति। **योऽसावव्यक्तो भावोऽत्र दर्शितः स 'येनाक्षरं पुरुषं वेद सत्यम्' इत्यादिश्रुतावक्षर इत्युक्तः, तं चाक्षरं भावं परमां गतिं 'पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः' इत्याद्याः श्रुतयो वदन्तीत्याह—**योऽसाविति। **परमपुरुषस्य परमगतित्वमुक्तं व्यनक्ति—**यं भावमिति। **'तद्विष्णोः परमं पदम्' इति श्रुतिमत्र संवादयति—**तद्धामेति॥२१॥

**नन्वव्यक्तादतिरिक्तस्य तद्विलक्षणस्य परमपुरुषस्य प्राप्तौ कश्चिदसाधारणो हेतुरेषितव्यो यस्मिन् प्रेक्षापूर्वकारी तत्प्रेप्सया प्रवृत्तो**

भाष्यार्कप्रकाशः

तस्मादव्यक्तोऽयमक्षरः प्रत्यगभिन्नः परमात्मैव॥२०॥

**अव्यक्त इति।** तमेवाक्षरसंज्ञकं भावं परमां गतिमाहुरित्यन्वयः। **भावः** परब्रह्म। गम्यत इति गतिः प्राप्यस्थानम् , पदमिति यावत्। कस्मादव्यक्तस्य प्रकृष्टगतित्वम्? अत आह— **यं प्राप्य न निवर्तन्त इति।** अपुनरावर्तित्वादव्यक्तोऽयमात्मा परमं पदम् । अन्यत् सर्वं पुनरावर्तित्वात् परमं पदं न भवति स्वर्गादिकमिति भावः। संसाराय संसारमनुभवितुमित्यर्थः। तदिति विधेयप्राधान्यात् क्लीबत्वम्। तन्मम विष्णोः परमं धामेत्यन्वयः। धामशब्दार्थमाह— **स्थानमिति**। यावदर्थमाह— **पदमिति**। स्वरूपमिति फलितार्थः। न हि सर्वव्यापिनो विष्णोः किञ्चित् स्थानं भवितुमर्हति। न वा विष्णोरक्षरस्य स्थानमक्षर एव भवितुमर्हति। एतेनाक्षरस्य स्वरूपं निरुक्तमव्यक्तात् परत्वं तदन्यत्वं सनातनत्वमव्यक्तत्वमविनाशित्वं सर्वभूतविनाशसाक्षित्वं 'तद्विष्णोः परमं पद'मिति श्रुत्युक्तपरमपदत्वमपुनरावर्तित्वं भावत्वं चेत्येवंरूपम्। ततश्च सच्चिदानन्दरूपत्वं सिद्धम्। न चानन्दरूपत्वमसिद्धमिति वाच्यम् , अव्यक्तस्य दुःखात्मत्वेन तद्विलक्षणत्वेन तत्सिद्धेः।

यत्तु **रामानुजः**—अचेतनप्रकृतिरेकं नियमनस्थानं, जीवप्रकृतिर्द्वितीयं, मुक्तस्वरूपं तु परं नियमनस्थानमिति, **तदल्पम् ,** मुक्तात्मस्वरूपस्य स्वाभिन्नत्वेन स्वनियाम्यत्वाभावात्। यदि मुक्तस्यापि नियमनं तर्हि मुक्तत्वस्यैवासिद्धिः, नियमनस्य दुःखहेतुत्वात्। न हि मुक्तौ लेशतोऽपि दुःखसद्भावः। सत्यप्यनात्मन्यन्तःकरणे तत्तादात्म्याध्यासस्याभावमात्रेण सुषुप्तावेव नास्ति किञ्चिदपि नियमनं जीवस्येति स्थिते कथं पुनःसर्वोपाधिनाशेऽपि जीवस्य नियमनं भवेत्? तस्माज्जीववास्तवस्वरूपापरिज्ञानमूलकमिदं **रामानुज**भाष्यम्।

यत्तु धाम तेज इत्यस्यैव व्याख्यानान्तरम् , तद्युक्तमेव, परन्तु विष्णुशेषत्वमक्षरस्यायुक्तम् , अक्षरस्यैवात्मत्वेन सर्वशेषित्वा-दात्मन एव व्यापकत्वेन विष्णुत्वाच्च। प्रकृतिवियुक्तज्ञानैकाकारयोरात्मपरमात्मनोः शेषशेषिभावकल्पनाऽयोगाच्च। मुक्तस्याप्यपरि-च्छिन्नज्ञानरूपत्वेन विष्णोस्तद्वैलक्षण्यायोगाच्च। अपरिच्छिन्नज्ञाने परिच्छेदकाभावेन जीवेश्वरभेदानवकाशाच्च। परिच्छेदकसत्त्वेऽपरि-च्छिन्नज्ञानरूपालाभाच्च। ज्ञानबहुत्वे एकस्य ज्ञानस्य ज्ञानान्तरेणैव परिच्छेदलाभेनापरिच्छिन्नत्वासम्भवाच्च॥२१॥

**पुरुष इति।** भूतानि यस्यान्तःस्थानि, सर्वमिदं येन ततं, स परः पुरुषस्तु हे पार्थ! अनन्यया भक्त्या लभ्यः भवतीति शेषः। पुरि देहे शेत इति पुरुषः। पिपर्ति पूरयति सर्वमिति वा पुरुषः। परिपूर्णस्यापि देहान्तरावस्थितिर्घटते पूर्णस्याकाशस्येव घटान्त-रवस्थितिः। घटकत्वं तु मायाया एव , न ह्यन्यस्यैवंविधशक्तिः। एवं पूर्णत्वादेव परः। न हि परिपूर्णादधिकं वस्तु किञ्चिद् भवितुमर्हति।

**यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम्॥ २२॥**

**पुरुषान्न परं किञ्चित् , स** भक्त्या **लभ्यस्तु ज्ञानलक्षणया** अनन्यया **आत्मविषयया।** यस्य **पुरुषस्य** अन्तःस्थानि **मध्यस्थानि कार्यभूतानि भूतानि। कार्यं हि कारणस्यान्तर्वर्ति भवति।** येन **पुरुषेण** सर्वमिदं **जगत्** ततं **व्याप्तम् आकाशेनेव घटादि॥ २२॥**

आनन्दगिरिकृतव्याख्या

**निर्वृणोति, तत्राह—**तल्लब्धेरिति। **परस्य पुरुषस्य सर्वकारणत्वं सर्वव्यापकत्वं च विशेषणद्वयमुदाहरति—**यस्येति। **निरतिशयत्वं विशद-यति—**यस्मादिति। **तुशब्दोऽवधारणार्थः। भक्तिर्भजनं सेवा प्रदक्षिणप्रणामादिलक्षणा, तां व्यावर्तयति—**ज्ञानेति। **उक्ताया भक्तेर्विषयतो वैशिष्ट्यमाह—**अनन्ययेति। **कोऽसौ पुरुषो यद्विषया भक्तिस्तत्प्राप्तौ पर्याप्तेत्याशङ्क्योत्तरार्धं व्याचष्टे—**यस्येति। **कथम्भूतानां तदन्तःस्थत्वम्? तत्राह—**कार्यं हीति। **'स पर्यगात्' इति श्रुतिमाश्रित्याह—**येनेति॥ २२॥

भाष्यार्कप्रकाशः

पूर्णादन्येषां सर्वेषामपूर्णानामल्पत्वात्।

पुरुषस्य परत्वे श्रुतिं प्रमाणयति—**पुरुषादिति**। 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः। महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः।' इति यस्माच्छ्रुत्युक्तं तस्मात् पुरुषः पर इत्यर्थः। महान् महत्तत्त्वम् , अव्यक्तं प्रकृतिर्माया, पुरुष आत्मा; पूर्वोक्तोऽव्यक्तोऽक्षर इति विवेकः।

भक्तिरत्र ज्ञानमेवेत्याह— **ज्ञानलक्षणमिति[णयेति]**। अद्वितीये आत्मनि सेवाद्ययोगादिति भावः। **अनन्यया** अनन्यविषयये-त्यर्थः। फलितमाह— **आत्मविषययेति**। आत्मविषयया भक्त्या आत्मज्ञानेनेति सिद्धम्। 'ज्ञानादेव तु कैवल्य'मित्यादिशास्त्रादिति भावः।

न च निरवकाशे आत्मनि कथं भूतानि सन्तीति वाच्यम् , मायया निरवकाशेऽप्यात्मनि भूतानामवकाशलाभात्। सत्स्वपि भूतेषु आत्मनो निरवकाशत्वाभङ्गाच्च। ननु भूतानां कुतः पुरुषस्यान्तरवस्थितिः? अत आह— **कार्यभूतानीति**। कार्यत्वाद् भूतानां कारणे पुरुषेऽवस्थितिरुचितेत्यर्थः। औचित्यमेव दर्शयति—**कार्यं हीति**। हिः प्रसिद्धौ। घटादेर्मृदादौ, रजतादेः शुक्तिकादौ च सत्त्वादिति भावः। विवर्तजगदधिष्ठानत्वाज्जगदाकारपरिणतमायाधिष्ठानत्वाद्वा पुरुषस्य भूताधिष्ठानत्वोपपत्तिः।

न केवलं भूतानामन्तरवस्थितत्वेन भूतेभ्यो बहिरेव पुरुषोऽस्ति, किन्त्वन्तरपीत्याह— **येन सर्वमिदं ततमिति**। 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इति श्रुतेरिति भावः। अत एव पूर्णत्वात् पुरुषत्वं पुरुषस्य।

न चैवं पुरुषे भूतसत्त्वे पुरुषस्य सद्वितीयत्वापत्तिरिति वाच्यम् , मृदि घटसत्त्वे घटेन मृदः सद्वितीयत्वादर्शनात् , शुक्तिकायां रजतसत्त्वे रजतेन शुक्तिकायाः सद्वितीयत्वादर्शनाद् , गगने नैल्यसत्त्वे नैल्येन गगनस्य सद्वितीयत्वादर्शनाच्च। न हि मायामयै-र्वस्तुभिः सत्यस्य सद्वितीयत्वम् , मरीचिकाजलैर्भूमेः पङ्किलत्वादर्शनात्। न च मायया सद्वितीयत्वमिति वाच्यम् , तस्यापि मिथ्या-त्वात्। न हि परमार्थतो मायाऽस्ति।

एतेन भूतानां यत्प्रदेशे सत्त्वं तत्प्रदेशस्यात्मना अव्याप्यत्वादपूर्णत्वमात्मन इति शङ्काऽपि प्रत्युक्ता। वस्तुतः पुरुषे भूतानाम-सत्त्वात्। मृदि घटाकारस्येव घटनाम्न इव च पुरुषे भूतानामाकारयोः कल्पितत्वात्।

तस्मादेकमेवाद्वितीयं ब्रह्म पुरुषः। स च ज्ञानैकलभ्यः। पुरुषस्वरूपज्ञानपूर्वकत्वात् पुरुषस्वरूपलाभस्य। न च नित्यसिद्ध-स्वरूपस्य कः पुनरपरो लाभ इति वाच्यम् , नित्यसिद्धेऽप्यर्थेऽज्ञातेऽलब्धत्वव्यवहारात्। यो हि घटस्वरूपं न जानाति स पुरः स्थितमिति घटं नैव लभेतेति।

यत्तु **रामानुजः—**परः पुरुषः परमपुरुषो विष्णुः, न तु प्रत्यगात्मा। तस्य पुरुषत्वेन परमपुरुषत्वाभावात्। स च भक्त्या लभ्य इति, **तन्मन्दम्** , उक्तलक्षणपुरुषाधिकस्य परमपुरुषशब्दवाच्यस्य कस्यचिदभावात्। 'पुरुषान्न परं किञ्चि'दिति श्रुत्या पुरुषाधिकस्य

**यत्र काले त्वनावृत्तिम् आवृत्तिं चैव योगिनः।**
**प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ !॥२३॥**

**प्रकृतानां योगिनां प्रणवावेशितब्रह्मबुद्धीनां कालान्तरमुक्तिभाजां ब्रह्मप्रतिपत्तये उत्तरो मार्गो वक्तव्य इति 'यत्र काले' इत्यादि [1]विवक्षितार्थसमर्पणार्थमुच्यते। आवृत्तिमार्गोपन्यास इतरमार्गस्तुत्यर्थः।** यत्रेति। **यत्र काले प्रयाता**

आनन्दगिरिकृतव्याख्या

**ननु ज्ञानायत्ता परमपुरुषप्राप्तिरुक्ता। न च ज्ञानं मार्गमपेक्ष्य फलाय कल्पते, विदुषो गत्युक्रान्तिनिषेधश्रुतेः, तथाच मार्गोक्ति-रयुक्तेत्याशङ्क्य सगुणशरणानां तदुपदेशोऽर्थवानित्यभिप्रेत्याह—**प्रकृतानामिति। **वक्तव्य इति यत्र काल इत्याद्युच्यत इति सम्बन्धः। स चेद्वक्तव्यस्तर्हि किमित्यध्यात्मादिभावेन सविशेषं ब्रह्म ध्यायतां फलाप्तये मूर्धन्यनाडीसम्बद्धे देवयाने पथ्युपास्यत्वाय वक्तव्ये कालो निर्दि-श्यते? तत्राह—**विवक्षितेति। **सोऽर्थो मार्गस्तदुक्तिशेषत्वेन कालोक्तिरित्यर्थः। पितृयाणमार्गोपन्यासस्तर्हि किमिति क्रियते? तत्राह—**आवृत्तीति। **मार्गान्तरस्यावृत्तिफलत्वादस्य चानावृत्तिफलत्वात्तदपेक्षया महीयानयमिति स्तुतिर्विवक्षितेति भावः। योगिन इति ध्यायिनां**

भाष्यार्कप्रकाशः

निरस्तत्वाच्च। 'मत्तः परतरं नान्य'दिति गीतया च मत्तः पुरुषात्परतरं नान्यदस्तीत्येव श्रुत्यनुसारेणोक्तत्वाच्च। 'अविनाशि तु तद्विद्धि येन सर्वमिदं तत'मिति श्लोकस्य भवताऽपि पुरुषपरत्वेन व्याख्यातत्वात् कुतोऽयं पुरुषः परो न भवेत्? पुरुषस्यैव सर्वव्यापकत्वे परम-पुरुषकल्पनं व्यर्थं, यदि तु पुरुषो न सर्वव्यापकस्तर्हि पुरुषत्वमेव पुरुषस्य भज्येत, अविनाशिश्लोकोक्तं 'येन सर्वमिदं तत'मित्येतद्वि-रुध्येत। न च तत्र सर्वपदस्य देहादिपरत्वेन सङ्कोच इति वाच्यम्, मानाभावात्। व्यष्टिदेहव्यापित्वेनैव पुरुषस्य पूर्णत्वे घटोदरव्यापित्वेन जलस्यापि पूर्णत्वप्रसङ्गात्। किञ्च तव मते पुरुषस्याणुत्वे सुतरां पूर्णत्वानुपपत्तिः। न चात एव पुरुषोऽत्र परमपुरुष इत्युक्तमिति वाच्यम्, अविनाशीति श्लोके पुरुषस्यैवोक्तत्वात्। तस्माज्जीवेश्वरयोर्द्वयोःसर्वव्यापित्वमनुपपन्नम्। उक्तं तु द्वयोरपि सर्वव्यापित्वम् 'अविनाशी'ति, 'पुरुषःस' इति श्लोकद्वयेन भगवतैवेत्येतदनुपपत्तिपरिहाराय जीवेश्वरयोरभेदोऽवश्यमभ्युपगन्तव्यो भवता।

तस्मान्नास्ति पुरुषातिरिक्तः परमपुरुषो यो भक्त्या लभ्यः। परमशब्दसाहचर्यं विनाऽपि पुरुषशब्दस्यैव परमात्मनि प्रयोग-दर्शनाच्च 'तेनेदं पूर्णं पुरुषेण सर्वं' 'सहस्रशीर्षा पुरुषः' इत्यादिश्रुतिषु। न चैवं परमात्मैव पुरुषः जीवस्तु पुरुषशब्दवाच्यो नैवेति वाच्यम्, जीवस्य पुरुषत्वस्य सर्वसम्प्रतिपन्नत्वेन तत्र विप्रतिपत्तेरेवाभावात्।

**ननु** 'अव्यक्तोऽक्षरः' इति श्लोकोक्तादस्य पुरुषस्य वैलक्षण्यमक्षरपुरुषयोर्जीवेश्वरत्वरूपे भेदे सत्येव सिध्यति, न त्वन्यथेति कृत्वा जीवोऽक्षरः, ईश्वरस्तु परमपुरुष इति चेत्, **मैवम्**; अव्यक्तश्लोकेन पुरुषस्य स्वरूपमुक्तम्; अनेन पुरुषस्य प्राप्त्युपाय उच्यत इत्येतद्वैलक्षण्यार्थकत्वात् तुशब्दस्य। अन्यथा प्रकृतिविविक्ताज्ज्ञानैकाकाराज्जीवात् तादृशस्यैवेश्वरस्य कीदृशं वैलक्षण्यं स्यात्? न च ज्ञानबलशक्त्याद्याधिक्याल्पत्वरूपम्। तस्योपाधिधर्मत्वादुपाधेश्च मुक्तौ नष्टत्वात्। न चेश्वरस्यास्त्युपाधिरिति वाच्यम्, जीवो निरुपाधिकः, ईश्वरस्तु सोपाधिक इति वाक्यस्य वक्तुर्लज्जावहत्वात्। निरुपाधिकं हि चैतन्यं ब्रह्म। ईश्वरस्तु न ब्रह्म, सोपाधिकत्वाज्जीवस्तु ब्रह्मैव निरुपाधिकत्वादिति। यदुपासनया जीवस्यैव ब्रह्मत्वम्, किं तस्येश्वरस्याब्रह्मत्वं न्याय्यम्? तस्मादव्यक्ताद् विलक्षणोऽक्षरः पुरुषः प्रत्यगभिन्नः परमात्मैव। तल्लाभोपायश्च ज्ञानमेव। न भक्तिः, भक्तेर्द्वैतविषयत्वाद् द्वैतस्य च भयहेतुत्वेन मुक्त्यनुपायत्वात्॥२२॥

**यत्रेति**। यत्र काले तु प्रयाता योगिन अनावृत्तिमावृत्तिं चैव यान्ति, हे भरतर्षभ! तं कालं वक्ष्यामि। **प्रणवावेशितब्रह्मबुद्धीना-मिति**। प्रणवे ओङ्कारे आवेशिता आहिता ब्रह्मबुद्धिः ब्रह्मेति दृष्टिर्यैस्तेषां तथोक्तानाम्; प्रणवं [2]ब्रह्मदृष्ट्योपासमानानामित्यर्थः। 'ओमित्येकाक्षरं ब्रह्म व्याहरन्' इति श्लोकोक्तरीत्येति भावः। **ब्रह्मप्रतिपत्तये** हिरण्यगर्भलोकप्राप्तये। ब्रह्मलोकप्राप्तिद्वारा परमात्मप्राप्तय

१. 'वीक्षितार्थ' इति रा.पा.। २. 'उपासीनानाम्' इति युक्तम्।

भाष्यार्कप्रकाशः

इति वा। उत्तरमार्गोऽर्चिरादिमार्गः। **वीक्षितार्थः** अपेक्षितार्थः, तत्समर्पणार्थम् उत्तरमार्गो वक्तव्य इत्येतदर्थं 'यत्र काल' इत्याद्युच्यत इत्यन्वयः। ननु तर्हि उत्तरमार्ग एवोच्यताम्? अत आह— **आवृत्तीति**। ज्ञानिस्तुत्यर्थमज्ञानिचरित्रकथनवदिति भावः।

यत्र काले यस्मिन् मार्गे इत्यर्थः। कालशब्दस्यात्र लक्षणया कालाभिमानिदेवतोपलक्षितमार्गपरत्वम्। 'एकया यात्यनावृत्तिमन्यया ऽऽवर्तते पुनः' इति वक्ष्यमाणश्लोकार्थानुगुण्येन सावृत्तित्वानावृत्तित्वयोर्मार्गधर्मत्वेन कालधर्मत्वाभावात्। प्रयाता मृताः स्थूलशरीरवियोगात्मकं मरणं प्राप्य प्रयाणं कृतवन्त इत्यर्थः। **तं कालं** तं मार्गमित्यर्थः। यत्र मार्गे प्रयाता योगिनोऽनावृत्तिं यान्ति तं दक्षिणमार्गं च तुभ्यं वक्ष्यामीत्यर्थः। श्रोतुः सावधानत्वापादनाय वक्ष्यामीत्युक्तिः।

न च कालशब्दस्य मार्गार्थकथनं भाष्यविरुद्धमिति वाच्यम् , तत्र प्रयाता गच्छन्तीत्यादौ भाष्य एव [१]तत्रेत्यस्य मार्गार्थदर्शनात्। तदनुसारेणात्रापि मार्गार्थकथनस्यैवोचितत्वात्।

**ननु** भाष्यमपि मूलविरुद्धमेव, मूले कालशब्दस्यैव दर्शनात्। दक्षिणायने शरतल्पं गतस्य भीष्मस्य स्वच्छन्दमरणस्य उत्तरायणपुण्यकालनिरीक्षणाच्चेति चेत् , **मैवम्** ; 'शुक्लकृष्णे गती ह्येते' इति, 'एते सृती पार्थ जानन्' इति च गत्योरेव परामृष्टत्वात्।

न चोत्तरायणे शुक्लपक्षे अह्नि मृता उत्तरमार्गेण यान्ति; दक्षिणायने कृष्णपक्षे रात्रौ मृता दक्षिणमार्गेण यान्तीत्येतदर्थं कालमार्गावुभावपि वक्तव्याविति वाच्यम् , तथा सति उत्तरायणे यस्य कस्यापि पापिनो मृतिर्न स्यात् , दक्षिणायने यस्य कस्यापि सुकृतिनो मृतिर्न स्यात्। न त्वेवं व्यवस्था दृश्यते; क्रिमिकीटपशुपक्ष्यादीनां स्थावराणां चोत्तरायणेऽपि मरणदर्शनात्। ब्रह्मविदादीनां दक्षिणायनेऽपि मरणदर्शनाच्च।

**किञ्च** उत्तरायणे कृष्णपक्षेऽह्नि मृतानां तत्रैव शुक्लपक्षे रात्रौ मृतानां वा नोत्तरमार्गगतिः स्यात् ; तथा दक्षिणायने शुक्लपक्षे रात्रौ मृतानां तत्रैव कृष्णपक्षेऽह्नि मृतानां वा न दक्षिणमार्गगतिः स्यात्। न चैवंविधानां प्रयाणार्थः कश्चिद् दक्षिणोत्तरान्तरालमार्गः श्रूयते। न चाधोगतिरिति वाच्यम् , पापिनामेव तत्र गतिसद्भावात्। न चामी पापिन एवेति वाच्यम् , [२]विहिताचरणानामपि तथा मृतिदर्शनात्।

**अपि च** दक्षिणायने कृष्णपक्षे निशायामेव मृतानां चन्द्रलोकप्राप्तौ किम्पुनरुत्तरायणे कृष्णपक्षे निशायां मृतानां, किं वा पुनर्दक्षिणायने शुक्लपक्षेऽह्नि मृतानामित्यर्थापत्तेश्च स्यादेव चन्द्रलोकप्राप्तिः। न चेष्टापत्तिः, 'धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्' इति तत्रैव मृतानां चन्द्रलोकप्राप्तिवर्णनात्।

**किञ्च** अहोरात्रिशुक्लकृष्णपक्षोत्तरायणदक्षिणायनव्यतिरिक्तकालस्यैवाभावात् , तेषां च कालानां सुकृतिमृतिविषयत्वान्नारकिणां मृतिकाल एव नास्ति यत्र मृताः पापिनो नरकं गच्छेयुः।

**अपिचास्तु** अहरादीनां कालपरत्वम् , कथं पुनरग्निर्ज्योतिर्धूमानाम्? न ह्यग्निरिति, ज्योतिरिति, धूम इति च कश्चन कालविशेषोऽस्ति। एवमकालवाच्यग्न्यादिशब्दसाहचर्यादहरादिशब्दानामप्यकालवाचित्वमेवोचितम् , न तु कालवाचित्वम्। तस्मादग्न्यादिशब्दाः देवतावाचका एव।देवताश्चेमाः अर्चिरादिमार्गे यथाक्रमं सन्ति योगिनमतिवाहयितुम्। सम्पिण्डितकरणग्रामत्वेन स्वतो गन्तुमशक्यम्।

**ननु** अहरादयः कालवाचिन एव। न चोक्तदोषापत्तिः। यत्र प्रयाता योगिन एव ब्रह्मलोकादिकं गच्छन्ति, न त्वन्ये इति चेत् , **मैवम्** ; प्रणवोपासकानां योगिनां दक्षिणायने मृतानां चन्द्रलोकप्राप्तेर्भवितव्यत्वात्। अयोगिनां सोमयाजिनामुत्तरायणे दक्षिणायने वा मृतानां चन्द्रलोकप्राप्त्यसम्भवात्।

न च कर्मयोगिनोऽपि योगिन एवेति वाच्यम् , तथा सति उत्तरायणे मृतानां कर्मयोगिनां तेषां चन्द्रलोकप्राप्त्यसम्भवात्। न चैवं भीष्मस्योत्तरायणकालावेक्षणं व्यर्थमिति वाच्यम् , न व्यर्थम् , लोकसङ्ग्रहार्थत्वात्। 'सम्पद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले' इति भागवताद् भीष्मस्य ब्रह्मसायुज्यं प्राप्तस्य उत्तरमार्गेणापि गमनासम्भवात्। न हि परिपूर्णब्रह्मभावापन्नस्य गत्यागती स्तः।

**ननु** कोऽसौ लोकसङ्ग्रह इति चेद् , **उच्यते**—योगिनां स्वाधीनमरणत्वात् सर्वैरास्तिकैर्योगित्वेन भवितव्यम् , ते च योगिन उत्तरायणपुण्यकाल एव म्रियेरन् , उत्तरायणे मृतानां तेषां पुत्रैर्विधीयमानं श्राद्धादिकमप्युत्तरायण एव भवेत् तेन च तच्छ्राद्धादेः

१. 'अन्यथा तदा' इति स्यात्। २. विहिताचरणाः इति बहुव्रीहिः।

भाष्यार्कप्रकाशः

महाफलत्वं तत्कर्तुश्च महाफललाभ इति।

**अथवा** प्रायेण पुण्यकाले मृतानामेव पुण्यलोकावाप्तिरित्येतत्प्रदर्शनार्थं भीष्मस्य तादृशाचरणम्। **यद्वा** स्वच्छन्दमरणोऽहमिति दर्शयितुं लोकस्येति।

**ननु** तत्त्वविदो गत्यागत्यभावात् कालापेक्षाऽभावेऽपि चन्द्रलोकं ब्रह्मलोकादिकं वा जिगमिषोरस्ति कालापेक्षा, पुण्यकाले मृतानामेव पुण्यलोकावाप्तिरिति चेत् , **मैवम्** ; शारीरकशास्त्रविरोधात्।

तथाहि—'तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया'(ब्र.सू. ४-२-१७) तस्य म्रियमाणस्य जीवस्य **ओकः** आयतनं हृदयं, तस्याग्रं नाडीमुखं, तस्य **ज्वलनं** भाविफलस्फुरणं प्रद्योताख्यं, तेन प्रकाशितद्वारः विद्यासामर्थ्यात् , विद्याशेषगत्यनुस्मृतियोगाच्च, **हार्दानुगृहीतः** हृदयालयेन सूपासितेन ब्रह्मणा हार्देनानुगृहीतः, शताधिकनाड्या मूर्धस्थानादेव विद्वान् निष्क्रामति, अन्ये तु स्थानान्तरेभ्यः। 'शतं चैका च हृदयस्य नाड्यः, तासामूर्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ती'ति श्रुतेः। अन्याः अन्येषामविदुषामुत्क्रमणे विष्वङ् नानाविधाः नाड्यो भवन्तीत्यर्थः। सुषुम्नाख्या नाडी हृदयान्निर्गता दक्षिणतालुकण्ठान्तस्तननासिकामध्यभित्तिद्वारा ब्रह्मरन्ध्रं प्राप्ता सूर्यरश्मिभिरेकीकृता ब्रह्मलोकमार्गः सगुणब्रह्मोपासकस्य विदुष इति भावः।

'रश्म्यनुसारी' (ब्र.सू.४-२-१८) तस्माच्छताधिकया सुषुम्नाख्यनाड्या निष्क्रामन् पुरुषो रश्म्यनुसारी निष्क्रामति; सूर्यरश्मिसम्बद्धत्वात् सुषुम्नानाड्याः इति तस्माच्छब्दार्थः।

'निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद् दर्शयति च' (ब्र.सू.४-२-१९) तत् किमविशेषेणैवाहनि रात्रौ वा म्रियमाणस्य रश्म्यनुसारित्वम्? आहोस्विदहन्येवेति संशयः; अहन्येवेति पूर्वपक्षः; तेन रात्रौ मृतस्य रश्मिप्राप्त्यर्थं सूर्योदयप्रतीक्षाऽस्ति पूर्वपक्षे। इदमेवाह— निशि नेति। निशि मृतस्य सूर्यरश्म्यनुसारित्वं नेति चेन्न, नाडीरश्मिसम्बन्धस्य यावद्देहभावित्वात्। यावद्देहभावी हि नाडीरश्मिसम्बन्धः। दर्शयति चैतमर्थं श्रुतिः– 'अमुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः' इति। अमुष्मादादित्यात् प्रतायन्ते विस्तरेण निर्गच्छन्ति या रश्मयः ता आसु नाडीषु देहस्थासु सृप्ताः सम्बद्धा भवन्ति। आभ्यो नाडीभ्यो याः प्रतायन्ते ता अमुष्मिन्नादित्ये सृप्ता भवन्तीत्यर्थः। निदाघसमये च निशास्वपि किरणानुवृत्तिरुपलभ्यते, तापादिकार्यदर्शनात्। स्तोकानुवृत्तेस्तु दुर्लक्ष्यत्वम्। यदि तु रात्रौ प्रेतो विनैव रश्म्यनुसारेणोर्ध्वं आक्रमेत रश्म्यनुसारानर्थक्यं स्यात् , न ह्येतद् विशिष्याभिधीयते—यो दिवा प्रैति स रश्मीनपेक्ष्योर्ध्वं आक्रमते, यस्तु रात्रौ सोऽनपेक्ष्यैवेति। अथ तु विद्वानपि रात्रिप्रायणापराधमात्रेण नोर्ध्वं आक्रमेत, तर्हि पाक्षिकफला विद्येति अप्रवृत्तिरेव तस्यां स्यात् , मृत्युकालानियमात्। अथापि रात्रौ प्रेतोऽहरागमं निरीक्षेत, अहरागमेऽप्यस्य कदाचिद्रश्मिसम्बन्धानर्हं शरीरं स्यात् , पावकादिसम्पर्कात्। 'स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छति' इति श्रुतिरनुदीक्षां दर्शयति। [१]**क्षिप्येत्** म्रियेत। तस्मादविशेषेणैवेदं रात्रिन्दिवं रश्म्यनुसारित्वम्।

'अतश्चायनेऽपि दक्षिणे' (ब्र.सू.४-२-२०) अत एव चोदीक्षानुपपत्तेः, विद्यायाः अपाक्षिकफलत्वाच्च, दक्षिणायनेऽपि म्रियमाणो विद्वान् प्राप्नोत्येव ब्रह्मलोकम्। उत्तरायणमरणप्राशस्त्यप्रसिद्धेः, भीष्मस्य च प्रतीक्षादर्शनात् , 'आपूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासा'निति च श्रुतेरपेक्षितव्यमुत्तरायणमितीयमाशङ्का सूत्रेणानेन परिहृता। षडुदङ् मासानेतीति श्रुत्यन्वयः। प्राशस्त्यप्रसिद्धिरविद्वद्विषया। भीष्मस्य तु विदुषोऽप्युत्तरायणप्रतीक्षणमज्ञानामुत्तरायणे दैवान्मरणं चेत् प्रशस्तम् इत्यभिज्ञाभिवदनरूपाचारपरिपालनार्थमिति। एतेनाविदुषामेवोत्तरायणमरणं परलोकसुखावहत्वेन प्रशस्तं, विदुषां तु दहराद्युपासकानां दक्षिणायनमरणमपि ब्रह्मलोकप्रापकमेव, अर्चिरादिमार्गस्यायनद्वयेऽप्यनावृतत्वादिति स्थितम्। श्रुतिरपि– 'तेऽर्चिषमभिसम्भवन्ति, अर्चिषोऽहः, अह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद् यान् षडुदङ्ङेति मासांस्तान् मासेभ्यः संवत्सरं संवत्सरादादित्यम्' इत्यर्चिरहरादीनां प्राप्यत्वेन

१. 'सः- यावत् क्षिप्येन्मनः तावद् - आदित्यं गच्छति'। यावत् क्षिप्येत् मनः तावत् - यावता कालेन मनसः क्षेपः स्यात् तावता कालेन इति भाष्यम्। क्षिप्रत्वं तु विवक्षितम्। रामरायकविना तु 'स यावत् क्षिप्येत् - मनस्तावदादित्यं गच्छति' इत्येवं क्षिप्येदित्यस्य सः इत्यनेन संबन्धं स्वीकृत्य म्रियेतेत्यर्थवर्णनं कृतम् ।

**इति व्यवहितेन सम्बन्धः। यत्र यस्मिन् काले तु** अनावृत्तिम् **अपुनर्जन्म,** आवृत्तिं **तद्विपरीतां चैव,** योगिनः **इति योगिनः कर्मिणश्चोच्यन्ते। कर्मिणस्तु गुणतः 'कर्मयोगेन योगिनाम्'(भ.गी.३.३) इति विशेषणाद् योगिनः। यत्र काले** प्रयाता **मृता योगिनोऽनावृत्तिं यान्ति, यत्र काले च प्रयाताः आवृत्तिं यान्ति, तं कालं वक्ष्यामि भरतर्षभ!॥२३॥**

आनन्दगिरिकृतव्याख्या

**कर्मिणां च तन्त्रेणाभिधानमित्याह—**योगिन इति। **कथं कर्मिषु योगिशब्दो वर्ततामित्याशङ्क्यानुष्ठानगुणयोगादित्याह—**कर्मिणस्त्विति। **गुणतो योगिनः इति सम्बन्धः। तत्रैव वाक्योपक्रमस्यानुकूल्यमाह—**कर्मयोगेनेति। **अवशिष्टान्यक्षराणि व्याचक्षाणो वाक्यार्थमाह—**यत्रेति। योगिनो **ध्यायिनोऽत्र विवक्षिताः, आवृत्तावधिकृता योगिनः कर्मिण इति विभागः॥२३॥**

भाष्यार्कप्रकाशः

देवतारूपत्वमेव ब्रूते, न तु कालविशेषात्मकत्वम्। न ह्यह्नि मृतोऽह्नः शुक्लपक्षं, शुक्लपक्षाद् मासान् वा प्राप्नुयात्। श्रुत्यन्तरमपि – 'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति, स वायुलोकं, स वरुणलोकं, स इन्द्रलोकं, स प्रजापतिलोकं, स ब्रह्मलोक'मिति।

इमे चार्चिरादयो गन्तृणां नेतारः इति 'आतिवाहिकास्तल्लिङ्गा'दिति (ब्र.सू.४-३-४) सूत्रेणापि सिद्धान्तितम्। तस्माद् ब्रह्मलोकादिकं प्रेप्सोर्विदुषो नास्ति कालापेक्षा।

अथवा योगिनः प्रति चायमहरादिकालविनियोगोऽनावृत्तये स्मर्यते, स्मार्ते चैते योगसाङ्ख्ये, न श्रौते, 'योगिनः प्रति च स्मर्यते स्मार्ते चैते' (ब्र.सू.४-२-११) सूत्रात्। तथा च यः श्रुत्युक्तो दहराद्युपासको विद्वान् , तस्य नास्ति कालनियमः। यस्तु स्मृत्युक्तः– 'अनाश्रितः कर्मफलं कार्यं कर्म करोति यः। स संन्यासी च योगी च न निरग्निर्न चाक्रियः॥' इत्युक्तनिष्कामकर्मानुष्ठानलक्षणो योगः, तद्वतः[1], अकर्तृत्वानुभवरूपम् 'इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्' इति स्मृत्युक्तं यत् साङ्ख्यं, तद्वतः साङ्ख्ययोगिनश्च कालापेक्षाऽस्ति। अत एव 'यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः' इत्युक्तम् , न तु 'यत्र मार्गे' इति। तथा च प्रकृतश्लोकस्थ-योगिशब्दस्य निष्कामकर्मानुष्ठातृपरत्वमकर्तृत्वानुसन्धातृपरत्वं च वक्तव्यम् , न तु दहराद्युपासकपरत्वमिति सिद्धम्।

**वस्तुतस्तु** नायमनुपदोक्तः पक्षः समीचीनः, श्रुतिस्मृत्योर्भिन्नार्थत्वस्यायुक्तत्वात् , 'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्' 'धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्' इति श्रौतयोरेव देवयानपितृयाणयोरत्र [2]स्मर्यमाणत्वात्। 'यदा पुनः स्मृतावपि अग्न्याद्या देवता एवातिवाहिक्यो गृह्यन्ते, तदा न कश्चिद्विरोधः' इति भाष्याच्च कालशब्दो मार्गपर एव। न च - कालशब्दो देवतापर इति **भाष्यरत्नप्रभायां** दृश्यत इति - वाच्यम् , मार्गस्यापि देवतामयत्वात्। यत्रार्चिरादिदेवताः आतिवाहिक्यः स एव हि मार्गः। तस्माद् यत्र काल इत्यस्य यस्मिन् मार्ग इत्येवार्थः।

**योगिनः** 'सर्वद्वाराणि संयम्ये'त्युक्तलक्षणयोगशालिनः; ध्यायिन इति यावत्। अमीषां धूमादिमार्गपथिकत्वाभावादाह— **कर्मिणश्चेति**। ननु योगिशब्दात् कथं कर्म्यर्थलाभः? अत आह— **गुणत इति**। गौण्या वृत्त्येत्यर्थः। गौण्या कर्मणि योगशब्दप्रवृत्तौ प्रयोगं प्रमाणयति—**कर्मयोगेनेति**। कर्मैव योगः कर्मयोगः। न हि कर्मयोगयोः सादृश्यं विना कर्मणि योगत्वरूपणं सम्भवति। मुख इव [3]करे चन्द्रत्वरूपणाभावादिति भावः। चित्तशुद्धिहेतुत्वादिकं तु कर्मयोगयोः सादृश्यम्। तद्वारा कर्मियोगिनोरपि सादृश्यात् कर्मिणि योगिशब्दप्रयोगः। **यद्वा** कर्मिणि योगिशब्दप्रवृत्तौ गीतां प्रमाणयति – 'कर्मयोगेन योगिना'मिति। योगिनामिति पदस्य तत्र हि कर्मिणामित्यर्थः। [4]ध्यायिनीव कर्मिण्यपि चित्तसमाधानसत्त्वाद् योगिशब्दप्रयोग इति भावः।

एतेन योगिनामेव देवयानेन ब्रह्मलोकप्राप्त्या अपुनरावृत्तिः; कर्मिणां तु पितृयाणेन चन्द्रलोकप्राप्त्या पुनरावृत्तिरेवेति सिद्धम्।

यत्र काले प्रयाता योगिनोऽनावृत्तिं यान्ति तं कालम् , यत्र काले प्रयाता योगिन आवृत्तिं यान्ति तं कालं च वक्ष्यामि, हे भरतर्षभ! शृणु इत्यन्वयः। भरतर्षभेति सम्बोधनेन श्रोतुं योग्यत्वमस्त्यर्जुनस्येति सूच्यते॥२३॥

---

१. कर्मयोगिनः इति यावत्। २. प्रत्यभिज्ञायमानत्वादित्यर्थः। ३. 'मुखं चन्द्रः' इतिवत् 'करश्चन्द्रः' इति नास्ति। तत्र करे चन्द्रसादृश्याभावाच्चन्द्रत्वरूपणाभाव इति भावः। ४. कर्मिणि योगिशब्दं वर्तयति—ध्यायिनीवेति।

## अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्।
## तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः॥२४॥

**तं कालमाह—**अग्निर्ज्योतिरिति। अग्निः **कालाभिमानिनी देवता। तथा ज्योतिः**[१] **देवतैव कालाभिमानिनी। अथवा अग्निज्योतिषी यथाश्रुते एव देवते।** [२]**भूयसां तु निर्देशः— 'यत्र काले, तं काल'मिति, आम्रवणवत्। तथा** अहः **देवता अहरभिमानिनी।** शुक्लः **शुक्लपक्षदेवता। षण्मासा उत्तरायणम्। तत्रापि देवतैव मार्गभूतेति स्थितोऽन्यत्र**

अनुभूतिस्वरूपाचार्यटिप्पणम्

'यत्र काल' इति कालोपक्रमात् कालाभिमानिनी देवता अग्निर्ज्योतिःशब्दाभ्याममभिधीयत इति परेषां व्याख्यानमनूद्य स्वाभिप्रायेण व्याचष्टे—**अथवेति।** अर्चिरादिमार्गस्थे एव देवते उच्येते। तस्याः अत्र प्रत्यभिज्ञानादित्यर्थः। कस्तर्हि [कथं तर्हि] कालवाचिनामहरादिशब्दानां निर्देश इत्याशङ्क्याह— **भूयसां त्विति।** यथा वृक्षान्तरसद्भावेऽपि बाहुल्याभिप्रायेण आम्रवणमिति प्रयोगः, तथा हि प्रायेणाहरादिकाल[काले] योगिनां [३]मरणं दृष्टमिति कालनिर्देशः। न त्वयं विवक्षितः। 'स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छती'त्यप्रतिबन्धश्रवणादित्यर्थः। प्रेतानां सपिण्डी[संपिण्डित]करणत्वान्मूर्छितानामित्य-

आनन्दगिरिकृतव्याख्या

**कालप्राधान्येन मार्गद्वयोपन्यासमुपक्रम्य तमेव प्रधानीकृत्य देवयानं पन्थानमवतारयति—**तं कालमिति। **यथोपक्रमं व्याख्याय यथाश्रुतं व्याख्याति—**अथवेति। **कथं तर्हि देवतानामतिनेत्रीणां ग्रहणे कालप्राधान्येन निर्देशः श्लिष्यते? तत्राह—**भूयसां त्विति। **मार्गद्वयेऽपि कालाद्यभिमानिन्यो देवताः कालशब्देनोच्यन्ते। कालाभिमानिनीनां भूयस्त्वात् कालशब्देन सर्वासां देवतानाम्** [४]**उपलक्ष्यत्वं विवक्षित्वा कालकथनमित्यर्थः। यथाऽऽम्राणां भूयस्त्वाद् विद्यमानेष्वपि द्रुमान्तरेषु आम्रैरेव वनं निर्दिश्यते, तद्वदित्युदाहरणमाह—** आम्रेति। **ननु मार्गचिह्नानां भोगभूमीनां वा तत्तच्छब्दैरुपादानसम्भवे किमिति देवताग्रहणमित्याशङ्क्य 'आतिवाहिकास्तल्लिङ्गा'दिति**

भाष्यार्कप्रकाशः

**अग्निरिति।** तत्रेत्यनेन यत्रेत्यस्याक्षेपः। यत्र अग्निः ज्योतिः अहः शुक्लः षण्मासा उत्तरायणं चास्तीति शेषः। तत्र प्रयाता ब्रह्मविदो जनाः ब्रह्म गच्छन्तीत्यन्वयः। यथाश्रुते अग्निदेवता ज्योतिर्देवता चेत्यर्थः।

ननु कालशब्दस्य कालाभिमानिदेवतोपलक्षितमार्गपरत्वमुक्तमिति कृत्वा नास्मिन् मार्गे कालाभिमानिभिन्नदेवतासत्त्वमुचितम्। यदि तथा भिन्नदेवतासत्त्वमपीष्यते, तर्हि कालशब्दस्य तादृशार्थवर्णनमनुचितमित्यत आह— **भूयसामिति।** भूयसां बहूनां कालाभिमानिदेवानां सत्त्वादिति शेषः, यत्र काले तं कालमिति निर्देशः। अस्मिन् मार्गे कालाभिमानिदेवतानां भूयसीनां सत्त्वादस्य मार्गस्य कालशब्देन व्यवहारः। अग्न्यादिरूपकालाभिमान्यल्पसङ्ख्याकदेवतावत्त्वेऽपि अहरादिरूपकालाभिमानिबहुसङ्ख्याकदेवतासत्त्वाद् अयं मार्गः काल इत्युच्यत इत्यर्थः।

तत्र दृष्टान्तमाह— **आम्रवणवदिति।** यथा आमलक्याद्यल्पसङ्ख्याकवृक्षान्तरवदपि वनमाम्रबाहुल्यवत्त्वाद् आम्रवणमित्युच्यते, तद्वदित्यर्थः। [५]'प्रनिरन्त'रिति सूत्रेणात्र णत्वम्।

ननु मार्गचिह्नानां भोगभूमीनां वा तत्तच्छब्दैरुपादानसम्भवे किमिति देवताग्रहणमग्न्यादिशब्दैरित्याशङ्क्याह— **मार्गभूता इति [मार्गभूतेति]। अयं न्याय इति।** आतिवाहिककथनात्मको न्याय इत्यर्थः। उक्तं हि **सूत्रभाष्ये**—'तथा च लोके प्रसिद्धेष्वप्यातियात्रिकेषु[५] एवञ्जातीयक उपदेशो दृश्यते— गच्छ त्वमितो बलवर्माणं ततो जयसिंहं ततः कृष्णगुप्त'मिति।

ननु प्रकृतश्लोकोक्ताः अग्न्यादयः किं मार्गचिह्नानि? उत भोगभूमयः? अथवा नेतारो गन्तॄणामिति संशयः। तत्र मार्ग-

---

१. 'ज्योतिरपि' इति पा.। २. 'भूयसा' इति पा.। ३. अत्र— 'मरं दृष्ट'मिति पाठो दृश्यते। ४. 'उपलक्षणत्वं' इति पा.। अत्र सृष्टिन्यायः(भूमन्यायः) सूच्यते। द्र. पू.मी. १-४-२७। ५. द्र पा.सू. ८-४-५। ५. 'आतिवाहिकेषु' इति पाठो भाष्ये दृश्यते।

**न्यायः**[१]। तत्र **तस्मिन् मार्गे** प्रयाताः **मृताः गच्छन्ति ब्रह्म** ब्रह्मविदो [२]**ब्रह्मोपासनपरा जनाः। क्रमेणेति वाक्यशेषः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ना[तानामिवान्या]धीनगमनं वक्तव्यम्। अतः आतिवाहिकदेवता एवोच्यन्त इति। अयं न्यायः 'आतिवाहिकास्तल्लिङ्गाद्' इत्यधिकरणे स्थित इत्यर्थः। ननु ये साक्षाद् ब्रह्मविदः तेऽप्यर्चिरादिमार्गेणैव गच्छन्तीति किमिति क्रममुक्त्यभिप्रायेण

आनन्दगिरिकृतव्याख्या

**न्यायेनोत्तरमाह—**इति स्थित इति। **तेषामग्न्यादीनां समीपमिति सामीप्ये तत्रेति सप्तमी। ब्रह्म कार्योपाधिकं परं वा ब्रह्म परम्परया**

भाष्यार्कप्रकाशः

चिह्नानीति पूर्वपक्षः। तत्स्वरूपत्वादुपदेशस्य। यथा हि कश्चिल्लोके ग्रामं नगरं वा प्रतिष्ठासमानोऽनुशिष्यते— गच्छेतः त्वममुं गिरिं, ततो नदीं, ततो ग्रामं, ततो नगरं वा प्राप्स्यसीति, एवमिहाप्यर्चिषोऽहः अह्न आपूर्यमाणपक्षमिति। यद्वा भोगभूमय इति पूर्वपक्षः। तथा हि लोकशब्देनाग्न्यादीनुपनिबध्नाति—अग्निलोकमागच्छतीत्यादि। लोकशब्दश्च प्राणिनां भोगायतनेषु भाष्यते— 'मनुष्यलोकः पितृलोको देवलोकः' इति च। 'अहोरात्रेषु ते लोकेषु सज्जन्ते' इत्यादि। तस्मान्नातिवाहिका अर्चिरादयः। अचेतनत्वादप्येतेषामातिवाहिकत्वानुपपत्तिः। लोके हि चेतना एव पुरुषा राजनियुक्ता दुर्गेषु मार्गेष्वतिवाह्यानतिवाहयन्तीत्येवं प्राप्ते— आहाचार्यः— 'आतिवाहिकास्तल्लिङ्गाद्' इति (ब्र.सू. ४-३-४) सूत्रम्। अर्चिरादिकाः आतिवाहिका एव, तल्लिङ्गात्। 'चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयती'ति, अमानवस्यातिवाहिकत्वस्य सिद्धत्वात् तल्लिङ्गेनार्चिरादीनामप्यातिवाहिकत्वसिद्धिः। यद्यर्चिरादिषु पुरुषा गमयितारः प्राप्तास्ते च मानवास्ततो युक्तं तन्निवृत्त्यर्थं पुरुषविशेषणम्— अमानवः इति।

ननु लिङ्गमात्रमगमकं न्यायाभावात् , नैष दोषः। 'उभयव्यामोहात्तत्सिद्धेः' (ब्र.सू. ४-३-५)। ये तावदर्चिरादिमार्गगास्ते देहवियोगात् सम्पिण्डितकरणग्रामाः इत्यस्वतन्त्राः, अर्चिरादीनामप्यचेतनत्वादस्वातन्त्र्यमित्यतोऽर्चिराद्यभिमानिनश्चेतना एव देवताविशेषा अतियात्रायां नियुक्ता इति गम्यते। लोके च मत्तमूर्छितादयः सम्पिण्डितकरणग्रामाः परप्रयुक्तवर्त्मानो भवन्ति। अनवस्थितत्वादपि अर्चिरादीनां न मार्गलक्षणत्वोपपत्तिः। न हि रात्रौ प्रेतस्याहःस्वरूपाभिसम्भवः उपपद्यते। न च प्रतिपालनमस्तीत्युक्तं पुरस्तात् , ध्रुवत्वात्तु देवतात्मनां नायं दोषो भवितुमर्हति। अर्चिरादिशब्दता चैषामर्चिराद्यभिमानादुपपद्यते। सम्पिण्डितकरणग्रामत्वादेव गन्तॄणां न तत्रोपभोगः सम्भवति। लोकशब्दस्त्वनुपभुञ्जानेष्वपि गन्तृषु गमयितुं शक्यते। अन्येषां तल्लोकवासिनां भोगभूमित्वात्। अतोऽग्निस्वामिकं लोकं प्राप्तोऽग्निनाऽतिवाह्यते, वायुस्वामिकं लोकं प्राप्तो वायुनेत्येवं योजयितव्यमिति।

**अथा**र्चिरादिमार्गं व्याख्यास्यामः। वशीकृतप्राणाः योगिनः सन्निहितमृत्युं विदित्वा, निःश्रेणिकया प्रासादमिव, सुषुम्णया मूर्धानमधिरुह्य तं भित्त्वा सुषुम्णाग्रसम्बद्धसूर्यरश्मिषु प्रविश्य, तदनुसारेण तावदग्निलोकं गच्छन्ति। तत्रैवाग्निलोके ज्योतिर्देवताको ज्योतिर्लोक इति कश्चिदवान्तरलोकोऽस्ति, तं च गच्छन्ति, अग्निर्ज्योतिरिति द्वयोर्निर्देशात्। श्रुतौ तु 'तेऽर्चिषमभिसम्भवन्ती'त्यग्निलोक एक एवोक्तः ज्योतिर्लोकस्याग्निलोकेऽन्तर्भावाशयेन। एतेनाग्निरूपं ज्योतिरिति **वेदान्तदेशिकोक्तं** परास्तम्। तथा सत्यग्नेरेव ज्योतिष्ट्वेन ज्योतिःपदवैयर्थ्यात्। तेन चाग्निना ज्योतिषा वा अतिवाहिताःसन्तः अहर्लोकं गच्छन्ति; यस्य चाहरभिमानिदेवताविशेषः प्रभुः। तेन चातिवाहिताः शुक्ललोकं गच्छन्ति; यस्य शुक्लपक्षदेवताभिमानी प्रभुः। तेन चातिवाहितास्ततः उत्तरायणलोकं गच्छन्ति। तेन चातिवाहिताः संवत्सरलोकं गच्छन्ति। तेन चातिवाहिताः पुनर्देवलोकं गच्छन्ति। ततः तेन चातिवाहिता वायुलोकं गच्छन्ति। वायुनाऽतिवाहिता आदित्यलोकं गच्छन्ति। आदित्येनातिवाहिताश्चन्द्रमोलोकं गच्छन्ति। पितृयाणप्राप्यचन्द्रलोकादपरोऽयम्। अत एव ज्योतिःशास्त्रेषु चन्द्रादुपरि सूर्यः इति, [३]भागवतादिषु सूर्यादुपरि चन्द्रः इति च द्वेधा निर्देशः सङ्गच्छते, चन्द्रद्वयसद्भावात्। तेन चन्द्रमसाऽतिवाहिता विद्युल्लोकम् , ततस्तु अमानवः पुरुषः कश्चन हिरण्यगर्भनियुक्तः एत्य विद्युल्लोकाद् वरुणलोकं, वरुणलोकादिन्द्रलोकम् , इन्द्रलोकात् प्रजापतिलोकं , प्रजापतिलोकाद् ब्रह्मलोकं गमयति इति ब्रह्मलोको व्याख्यातः। अयमर्चिरादिमार्गः

१. द्र.ब्र.सू. ४-३-४। २. 'ब्रह्मोपासकाः ब्रह्मोपासनपरा' इति पा.। ३. द्र. भाग. ५-२२-८।

**धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्।**
**तत्र चान्द्रमसं ज्योतिः योगी प्राप्य निवर्तते॥२५॥**

**न हि सद्योमुक्तिभाजां सम्यग्दर्शननिष्ठानां गतिरागतिर्वा क्वचिदस्ति, 'न तस्य प्राणा उत्क्रामन्ति'(बृ.उ. ४.४.६) इति श्रुतेः। ब्रह्मसंलीनप्राणा एव ते। ब्रह्ममया ब्रह्मभूता एव ते। [1](क्रमेण तु गच्छन्ति ब्रह्म ब्रह्मविदो जनाः)॥२४॥**

धूम इति। धूमो रात्रिः **धूमाभिमानिनी रात्र्यभिमानिनी च देवता। तथा** कृष्णः **कृष्णपक्षदेवता। षण्मासा**

अनुभूतिस्वरूपाचार्यटिप्पणम्

व्याख्यायत इत्याशङ्क्याह— **न हि सद्योमुक्तिभाजामिति।** विद्यासामर्थ्यात् कलाविलये सति गमनानुपपत्तेरित्यर्थः॥२४॥

आनन्दगिरिकृतव्याख्या

**मुक्त्यालम्बनम्। अत एव क्रमेणेत्युक्तम्। निर्गुणमप्रपञ्चं ब्रह्मास्मीति विद्यावतो व्यवच्छिनत्ति—**ब्रह्मोपासनेति। **ननु ब्रह्मशब्दस्य मुख्यार्थत्वार्थं परब्रह्मविदामेवेयं गतिरुच्यते, न, [2]बादर्यधिकरणविरोधादित्याह—**न हीति ॥२४॥

**प्रकृतं देवयानं पन्थानं स्तोतुं पितृयाणमुपन्यस्यति—**धूम इति। **अत्रापि मार्गचिह्नानि भोगभूमीश्च व्यवच्छिद्यातिवाहिक-**

भाष्यार्कप्रकाशः

[3]उत्तरदिक्स्थत्वादुत्तरमार्गः। देवलोकविषयत्वाद् देवयानमिति चोच्यते।

अत्रापि मार्गे ये ब्रह्मलोकं गतास्त एवापुनरावर्तिनः। ततोऽर्वाक्तनलोकगतास्तु पुनरावर्तिन एव। न चार्वाक्तनलोकाप्राप्तिरिति वाच्यम् , अग्निवाय्वाद्युपासकानामग्न्यादिलोकप्राप्तेः। अत एव हीन्द्रलोकं स्वर्गं गतानामपि पुनरावृत्तिः। तस्मान्नोत्तरमार्गप्राप्तिमात्रेण पुंसामपुनरावृत्तिः, किन्तु ब्रह्मलोकप्राप्तिवशादेवेति स्थितम्।

ननु ब्रह्म ब्रह्मविदो गच्छन्तीत्यत्र यथाश्रुतं ब्रह्मविदः सायुज्यप्राप्तिरूपमर्थं विहाय ब्रह्मोपासनपराः क्रमेण ब्रह्म गच्छन्तीत्यर्थ-कल्पनमन्याय्यमित्यत आह— **न हीति। सद्योमुक्तिभाजामिति**। 'ब्रह्मविद् ब्रह्मैव भवती'ति श्रुतेः ब्रह्मज्ञानमन्वेव तेषां मुक्तिरित्यर्थः। **अथवा** 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ सम्पत्स्ये' इति श्रुतेः ज्ञानिनां देहपातमन्वेव मुक्तिरित्यर्थः। **गतिरागतिर्वा नास्तीति**। 'तत्त्वविदः प्राणा नोत्क्रामन्ति, अत्रैव समवलीयन्ते' इति श्रुतेः। न हि परिपूर्णस्य ब्रह्मणः क्वापि गमनं, कुतश्चिदागमनं वा सम्भवतीति भावः। न च - मुक्तोऽयं ब्रह्मविदेव, न ब्रह्मेति - वाच्यम् , 'ब्रह्मविद् ब्रह्मैव भवती'ति श्रुतेः।

**एतेन** जीवाणुत्ववादः **परास्तो,** जीवमध्यमपरिमाणत्ववादश्च। अणोर्जीवस्य पूर्णब्रह्मत्वायोगात् , मध्यमपरिमाणस्य जीवस्य नित्यब्रह्मत्वायोगाच्च। न च ब्रह्माप्यपूर्णमेवेति वाच्यम् , बृहत्यर्थानुगमात्। अपूर्णस्य न हि निरतिशयवृद्धिः। ब्रह्मशब्दस्य ब्रह्मणि प्रयोगे निरतिशयवृद्धिर्हि प्रवृत्तिनिमित्तम्। वृद्धिमात्रस्य प्रवृत्तिनिमित्तत्वे तु देहादिरपि ब्रह्म भवेदिति।

अत्र ब्रह्मविदो जनाः ब्रह्म हिरण्यगर्भं गच्छन्तीत्यप्यर्थः प्रतिभाति, परन्तु साक्षाद् हिरण्यगर्भप्राप्त्ययोगात् ब्रह्मपदस्य ब्रह्मलोक इति लाक्षणिकार्थः कल्पनीयः स्यादिति तदुपेक्षितं **भाष्यकारैः**।

ओमित्येकाक्षरं ब्रह्मेत्यादिना ब्रह्मोपासकस्य प्रकृतत्वान्मार्गस्य चास्य ब्रह्मोपासकपरत्वाद् ब्रह्मविदः इत्यस्य ब्रह्मोपासनपराः इत्युक्तम्। ब्रह्मबुद्ध्या प्रणवादिकं दहरादिकं वोपासमानाः[4] इत्यर्थः। **एतेन** कर्मिणां क्रमेणापि ब्रह्मप्राप्त्यभावः **सिद्धः**, तेषां मार्गान्तरस्य वक्ष्यमाणत्वात्॥२४॥

**धूम इति**। यत्र 'धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्' इत्येताः सन्ति तत्र मार्गे योगी गत्वा चान्द्रमसं ज्योतिः प्राप्य निवर्तते। **षण्मासा दक्षिणायनमिति।** षण्मासात्मको यो दक्षिणायनकालस्तदभिमानिदेवतेत्यर्थः। **चान्द्रमसं** चन्द्रलोकस्थम्। ज्योतिषो

१. कुण्डलितः पाठः क्वाचित्कः। २. 'कार्यं बादरिरस्य गत्युपपत्तेः' (ब्र.सू. ४-३-७) इत्यधिकरणे ब्रह्मोपासकानां कार्यब्रह्मप्रापणं व्यवस्थापितम्। ३. उत्तर-दिक्स्थत्वं मृग्यम्। ४. 'उपासीनाः' इति युक्तम्।

**शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते।**
**एकया यात्यनावृत्तिम् अन्ययाऽऽवर्तते पुनः॥२६॥**

**दक्षिणायनमिति च पूर्ववद् देवतैव। तत्र चन्द्रमसि भवं** चान्द्रमसं ज्योतिः **फलम्** [1]**इष्टादिकारी** योगी **कर्मी** प्राप्य **भुक्त्वा तत्क्षयाद्** [2]**इह पुनः निवर्तते॥२५॥**

शुक्लेति। शुक्लकृष्णे, **शुक्ला च कृष्णा च शुक्लकृष्णे। ज्ञानप्रकाशकत्वाच्छुक्ला, तदभावात्कृष्णा। एते शुक्लकृष्णे हि गती,** जगतः **इत्यधिकृतानां ज्ञानकर्मणोः, न जगतः सर्वस्यैव एते गती सम्भवतः।** शाश्वते **नित्ये संसारस्य**

अनुभूतिस्वरूपाचार्यटिप्पणम्

गमनद्वयमुपन्यस्य यथावत् तदभिज्ञस्य फलं योगकर्तव्यतां चोपसंहरति श्लोकद्वयेन—**शुक्लकृष्णे इत्यादिना॥२६॥**

**॥ इति श्रीभगवद्गीताभाष्यटिप्पणे अष्टमोऽध्यायः॥**

आनन्दगिरिकृतव्याख्या

**देवताविषयत्वं धूमादिपदानां विभजते—**धूमेत्यादिना। **तत्रेति सप्तमी पूर्ववदेव सामीप्यार्था। इष्टादीत्यादिशब्देन पूर्तदत्ते गृह्येते। 'कृतात्ययेऽनुशयवानि'ति न्यायं सूचयति—**तत्क्षयादिति। **आरोहावरोहयोरभ्यासवाचिना** पुनः**शब्देन संसारस्यानादित्वं सूच्यते ॥२५॥**

**रात्र्यादौ मृतानां ब्रह्मविदामब्रह्मप्राप्तिशङ्कानिवृत्त्यर्थमभिमानिदेवताग्रहणाय मार्गयोर्नित्यत्वमाह—**शुक्लेति। ज्ञानप्रकाशकत्वाद् **विद्याप्राप्यत्वाद् अर्चिरादिप्रकाशोपलक्षितत्वाच्च शुक्ला देवयानाख्या गतिः,** तदभावात् **ज्ञानप्रकाशकत्वाभावाद् धूमाद्यप्रकाशोपलक्षित-त्वादविद्याप्राप्यत्वाच्च कृष्णा पितृयाणलक्षणा गतिः। तयोर्गत्योः श्रुतिस्मृतिप्रसिद्धयर्थो हिशब्दः। जगच्छब्दस्य ज्ञानकर्माधिकृतविषयत्वेन सङ्कोचे हेतुमाह—** न जगत इति। **अन्यथा ज्ञानकर्मोपदेशानर्थक्यादित्यर्थः। तयोर्नित्यत्वे हेतुमाह—** संसारस्येति। **मार्गयो-**

भाष्यार्कप्रकाशः

भोग्यत्वाभावादाह— **फलमिति। इष्टं** यागः, तत्राधिकारी **इष्टाधिकारी,** सोमयाजीत्यर्थः। फलितमाह— **कर्मीति।** अपिशब्दात् पूर्ताधि-कारिग्रहणम्। कर्मिशब्देनेष्टाधिकारिग्रहणात्।

ये शास्त्रसिद्धं स्वस्ववर्णाश्रमविहितं यज्ञादिलक्षणं कर्म सकाममाचरितवन्तः ते, ये वा वापीकूपादिपुण्यकर्माणि कृतवन्तस्ते चैते उभे [उभये] अपि चन्द्रलोकं पितृयाणेन गत्वा, तत्र स्वकृतकर्मफलं भुक्त्वा पुनरिह जन्मने प्रति निवर्तन्त इति परमार्थः। 'अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति' इत्यादिश्रुतिरत्रानुसन्धेया॥२५॥

**शुक्लेति।** देवयानस्य शुक्लत्वे पितृयाणस्य कृष्णत्वे च हेतुमाह— **ज्ञानेति।** ब्रह्मलोकं प्राप्तानां सम्यग्दर्शनसम्भवाद् ब्रह्मलोक-प्रापकमार्गस्य ज्ञानप्रकाशकत्वमिति भावः। **तदभावाद्** ज्ञानप्रकाशनाभावात्। शुक्लस्य चन्द्रादितेजसः घटादिपदार्थप्रकाशकत्वं, नीलस्य तमसस्तदप्रकाशकत्वं च प्रसिद्धमिति प्रकाशकत्वगुणयोगाच्छुक्लत्वं देवयानस्य, तदभावात् कृष्णत्वं पितृयाणस्येति तत्त्वम्।

शुक्लपक्षसम्बन्धात् कृष्णपक्षसम्बन्धाच्च देवयानपितृयाणयोस्ततच्छब्दवाच्यत्वमिति **केचित्।** तन्मन्दम् , सत्स्वहरादिषु शुक्ल-कृष्णयोरेव ग्रहणे हेत्वभावात्। आद्यमर्चिषम् अन्त्यं ब्रह्माणं वाऽवलम्ब्यैव वक्तव्यत्वात्। तथैवार्चिरादिमार्गो धूमादिमार्ग इति च प्रसिद्धत्वादिति।

जगच्छब्दार्थमाह— **ज्ञानकर्मणोरधिकृतानामिति।** प्रपञ्चस्याग्रहणे हेतुमाह— **नेति।** पापिनां नारकगत्यन्तरसद्भावादिति भावः। कथं गत्योर्नित्यत्वम्? अत आह— **संसारस्येति।** यावद्व्यवहारं नित्यत्वादित्यर्थः। प्रवाहरूपेणानाद्यनन्तत्वमिति वा। पूर्वपूर्व-संसारादुत्तरोत्तरसंसार इति संसारो ह्ययमनादिरनन्तश्च। **एतेन** परमार्थतः स्वरूपतश्च संसारवद् गत्योरपि तदन्तरस्थयोर्न नित्यत्वमिति **सिद्धम्। तत्र** गतिद्वयमध्ये। **याति** पुरुषोऽधिकृत इति शेषः।

---

१. 'इष्टाधिकारी' इति रा.पा. । २. 'इह पुनः' इति क्वचिन्नास्ति।

**नैते सृती पार्थ जानन् योगी मुह्यति कश्चन।**
**तस्मात् सर्वेषु कालेषु योगयुक्तो भवार्जुन !॥ २७॥**
**वेदेषु यज्ञेषु तपस्सु चैव दानेषु यत् पुण्यफलं प्रदिष्टम्।**

**नित्यत्वाद्** मते **अभिप्रेते। तत्र** एकया **शुक्लया यात्यनावृत्तिम् ,** अन्यया **इतरयाऽऽवर्तते** पुनः **भूयः**॥ २६॥

नैते इति। **न** एते **यथोक्ते** सृती **मार्गौ, पार्थ ! जानन् 'संसारायैका, अन्या मोक्षाय च[१]' इति, योगी न मुह्यति** कश्चन **कश्चिदपि। तस्मात् सर्वेषु कालेषु** योगयुक्तः **समाहितो भव अर्जुन !**॥ २७॥

**शृणु (तस्य) योगस्य माहात्म्यम्—** वेदेष्विति। वेदेषु [२]**सम्यगधीतेषु ,** यज्ञेषु **च साद्गुण्येनानुष्ठितेषु ,** तपःसु **च सुतप्तेषु ,** दानेषु **च सम्यग्दत्तेषु , यदेतेषु** पुण्यफलम् **पुण्यस्य फलं पुण्यफलं प्रदिष्टं शास्त्रेण।** अत्येति **अतीत्य गच्छति**

आनन्दगिरिकृतव्याख्या

**र्यावत्संसारभावित्वे फलितमाह—**तत्रेति। **क्रममुक्तिः** अनावृत्तिः। **भूयो भोक्तव्यकर्मक्षये शेषकर्मवशादित्यर्थः** ॥ २६॥

**गतेरुपास्यत्वाय तद्विज्ञानं स्तौति—**नैते इति। **योगस्य मोहापोहकत्वे फलितमाह—**तस्मादिति। **ज्ञानप्रकारमनुवदति—**संसारायेति। मोक्षाय **क्रममुक्त्यर्थमित्यर्थः।** योगी **ध्याननिष्ठो गतिमपि ध्यायन् नैव** मुह्यति **केवलं कर्म दक्षिणमार्गप्रापकं कर्तव्यत्वेन प्रत्येतीत्यर्थः। योगस्यापुनरावृत्तिफलत्वे नित्यकर्तव्यत्वं सिद्धमित्युपसंहरति—**तस्मादिति॥ २७॥

**श्रद्धाविवृद्ध्यर्थं योगं स्तौति—**शृण्विति। **पवित्रपाणित्वप्राङ्मुखत्वादिसाहित्यमध्ययनस्य** सम्यक्त्वम्। **अङ्गोपाङ्गोपेतत्वमनुष्ठानस्य** साद्गुण्यम्। **तपसां** सुतप्तत्वं **मनोबुद्ध्याद्यैकाग्र्यपूर्वकत्वम्। दानस्य च सम्यक्त्वं देशकालपात्रानुगुणत्वम्। इदं विदित्वेत्यत्र इदंशब्दार्थमेव स्फुटयति—**सप्तेति। **यद्यपि 'किं तद्ब्रह्म' इत्यादौ, 'अधियज्ञः कथं कोऽत्र' इत्यत्र प्रश्नद्वयं प्रतिभासानुसारेण कैश्चिदुक्तम् , तथापि**

भाष्यार्कप्रकाशः

**ननु** [३]तैत्तिरीयकश्रुतिप्रामाण्यात् धूमादिमार्गेण पितृणामेव महिमानं गत्वा चन्द्रलोकं प्राप्तो यो दक्षिणायने मृतो विद्वान् सोऽपि ब्रह्मलोकं गत्वा नावर्तत एवेति कृत्वा कथमुक्तम् 'अन्ययाऽऽवर्तते' इति चेत् , **नैष दोषः**, अविद्वान् चन्द्रलोकं गतः आवर्तत इति तदर्थात्। विदुषश्चन्द्रलोकं गतस्यापि प्रारब्धावसाने देवयानेन पुनर्ब्रह्मलोकप्राप्तिः सम्भवत्येवेति॥ २६॥

**नेति। न मुह्यतीति**। धूमादिमार्गेण चन्द्रलोकं गत्वा तत्र भोगान् भुञ्जीयेति, इन्द्रलोकादीन् देवयानेन गत्वा वा तत्र भोगान् भुञ्जीयेति मोहं नापद्यते। अशाश्वतत्वात् तद्भोगानां, पुनरावर्तित्वाच्च स्वस्य। ततश्च न कर्मस्विष्टापूर्तेषु प्रवर्तते। परन्तु मोक्षप्रदं ब्रह्मलोकं प्रणवाद्युपासनद्वारेण देवयानेन गन्तुमेव प्रवर्तत इत्यर्थः। **तस्मादिति**। यस्मान्मार्गद्वयज्ञो योगी न मुह्यति तस्मादित्यर्थः। स्वोपदेशेन सृतिद्वयं जानतोऽप्यर्जुनस्य चित्तसमाधानाभावे मोहः स्यादित्यत आह— **योगयुक्तो भवार्जुनेति**॥ २७॥

**वेदेष्विति**। साक्षाद् वेदादिषु पुण्याभावादाह— **सम्यगन्तेष्वित्यादीनि** विशेषणानि। **सम्यगन्ताः** सम्यक्परिसमाप्ताः, तेषु। **दानेष्विति**। दानानि सुवर्णादीनि तेषु, सर्ववेदपारायणात् साद्गुण्येन यज्ञानुष्ठानात् तपःकरणात् पुण्यक्षेत्रेषु द्रव्यविनियोगाच्च यत्फलं भवति पुंसामिति शास्त्रेणोच्यत इत्यर्थः। योगी इदं विदित्वा तत्सर्वं फलजातमत्येति, ततोऽधिकं लभत इत्यर्थः। न केवलं वेदनमात्रात् किं तर्हि एतदनुष्ठानादेवेत्याह— **उक्तमर्थमिति**। सप्त प्रश्नाः—किं ब्रह्म? किमध्यात्मम्? किं कर्म? किमधिदैवम्? किमधिभूतम्? कोऽधियज्ञः? प्रयाणकाले कथं ज्ञेय ईश्वरः? इति। **ऐश्वरम्** ईश्वरस्येदं वैष्णवमित्यर्थः। **स्थानं** स्वरूपमित्यर्थः। **आदौ** सर्वस्य जगत आदौ **भवति** अस्ति प्रकाशत इति वा भवं, 'सदेव सोम्येदमग्र आसी'दिति श्रुतेरिति भावः। कार्यस्य पश्चाद्भवत्वादाह— **ब्रह्मेति**। ईश्वरस्वरूपभूतं सच्चिदानन्दं ब्रह्म प्राप्नोतीत्यर्थः; मुक्तो भवतीति यावत् , सति सम्यग्दर्शने। साक्षात् तदभावे ब्रह्मलोकप्राप्तिद्वारेण वा सायुज्यं लभत इति भावः।

---

१. 'च' क्वचिन्न। २. 'सम्यगन्तेषु' इति रा.पा.। ३. 'अथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं सलोकतामाप्नोति' इति श्रुतिरनुसंधेया।

**अत्येति तत् सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम्॥२८॥**

**इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे**
**अक्षरब्रह्मयोगो नाम अष्टमोऽध्यायः॥८॥**

**तत् सर्वं फलजातम्** इदं विदित्वा **सप्तप्रश्ननिर्णयद्वारेणोक्तमर्थं सम्यगवधार्यानुष्ठाय योगी** परं **प्रकृष्टमैश्वरं स्थानम्** उपैति **च प्रतिपद्यते,** आद्यम् **आदौ भवं, कारणं ब्रह्मेत्यर्थः॥२८॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ**
**श्रीमद्भगवद्गीताभाष्ये अक्षरब्रह्मयोगो नामाष्टमोऽध्यायः॥८॥**

आनन्दगिरिकृतव्याख्या

**प्रतिवचनालोचनायां द्वित्वप्रतीत्यभावात् प्रकारभेदविवक्षया चशब्दद्वयस्य प्रतिनियतत्वान्न सप्तेति विरुध्यते। न चेदं वेदनमापातिकं, किन्त्वनुष्ठानपर्यन्तमित्याह—**सम्यगिति। **प्रकृतो ध्याननिष्ठो** योगीत्युच्यते। ऐश्वरं **विष्णोः परमं पदम् , तदेव तिष्ठत्यस्मिन्नशेषमिति** स्थानम्। **योगानुष्ठानादशेषफलातिशायिमोक्षलक्षणं फलं क्रमेण लब्धुं शक्यमिति भावः।**

**तदनेन सप्तप्रश्नप्रतिवचनेन योगमार्गं दर्शयता ध्येयत्वेन तत्पदार्थो व्याख्यातः॥२८॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते**
**श्रीमद्भगवद्गीताशाङ्करभाष्यव्याख्याने अष्टमोऽध्यायः॥८॥**

भाष्यार्कप्रकाशः

यत्तु **रामानुजः**—परं स्थानं परं पदं वैकुण्ठमिति। **तदयुक्तम्** , वैकुण्ठस्य सत्यलोकावान्तरविशेषस्य सादित्वेनानादित्वा-भावाद् , आद्यम् अनादिमिति तेन व्याख्यातत्वाच्च। न च 'तदक्षरे परमे व्योमन्' इति श्रुतेः परमव्योमरूपवैकुण्ठलोकोऽनादिरिति वाच्यम् , ब्रह्मण एवाक्षरपरमव्योमत्वात्। भूताकाशातिरिक्तश्चिदाकाशो हि परमव्योम। स चाविनाशित्वादक्षरः। चित आकाशत्वं च निष्प्रपञ्चत्वरूपं, निर्लेपत्वादिरूपं वा। यदि त्वात्मातिरिक्तं परमव्योमेति किञ्चिद्वस्तु स्यात् तर्हि तन्निलयस्तदाधेय आत्मा ब्रह्म तन्न्यून एव स्यात् , आधेयस्य न्यूनत्वादाधारात्। तच्चायुक्तम् , निरतिशयत्वाद् ब्रह्मणः। न हि गुणत एव निरतिशय आत्मा, किन्तु स्वरूपतोऽपि। अन्यथा निरतिशयत्वस्यार्धजरतीयतापत्तेः। सर्वाधारस्य परस्य ब्रह्मणो व्योमाधेयत्वे सति सर्वाधारत्वभङ्गाच्च। परमव्योमान्तरस्य तस्य सर्वव्यापित्वाभावप्रसङ्गाच्च। तस्मात् सर्वव्यापिनः सर्वाधारस्य सर्वात्मनो विष्णोर्नास्ति किञ्चिन्नियतं स्थानं, यद् योगी प्रयायात्। सति तु तस्मिन् स्थाने विष्णुत्वस्यैव भङ्गप्रसङ्गादित्यलम्॥२८॥

**अक्षरपरब्रह्मयोग** इति। अक्षरस्याविनाशिनः परब्रह्मणः परमात्मनः योगः सम्बन्धो यस्मिन् स तथोक्तः। अक्षरपरब्रह्म-स्वरूपतत्प्राप्त्युपायादेरस्मिन्नध्याये प्रोक्तत्वात् ।

अमू अर्चिरादि[मार्ग]सङ्ग्रहश्लोकौ –

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्। संवत्सरो देवलोको वायुलोकस्ततः परः॥
आदित्यश्चन्द्रमा विद्युल्लोकश्च वरुणालयः। इन्द्रः प्रजापतिर्ब्रह्मा विद्युतोऽमानवः पुमान्॥

अग्न्यादयश्चतुर्दश लोकाः। अग्न्यादिलोकेषु अग्न्यादयः मानवा एव पुरुषा आतिवाहिकाः, विद्युल्लोकादनन्तरेषु तु अमानवः पुरुषः आतिवाहिकः। अग्निर्ज्योतिरुभावप्येक एवार्चिर्लोक इति बोध्यम्।

धूमो रात्रिः कृष्णपक्षः षण्मासा दक्षिणायनम्। [1]संवत्सरः पितृलोक आकाशश्चन्द्रमण्डलम्॥

इत्ययं धूमादिमार्गसङ्ग्रहश्लोकः।

**॥इति श्रीबेलङ्कोण्डोपनामकरामकविकृते श्रीमच्छङ्करभगवद्गीताभाष्यार्कप्रकाशे अक्षरब्रह्मयोगो नाम अष्टमोऽध्यायः॥८॥**

---

१. धूमादिमार्गे संवत्सरस्य पाठः चिन्त्यः, 'नैते संवत्सरमभि प्राप्नुवन्ति' (छा.उ. ५-१०-३) इति श्रुतेः।

DO NOT PRINT THIS PAGE

ॐ श्रीपरमात्मने नमः

# ॥ अथ नवमोऽध्यायः ॥

**श्रीभगवानुवाच—**

**इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे।**
**ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १ ॥**

**अष्टमे नाडीद्वारेण धारणायोगः सगुणः उक्तः। तस्य च फलम् अग्न्यर्चिरादिक्रमेण कालान्तरे ब्रह्मप्राप्तिलक्षणमेवानावृत्तिरूपं निर्दिष्टम्। तत्र 'अनेनैव प्रकारेण मोक्षप्राप्तिफलमधिगम्यते, नान्यथा' इति [१]तदाशङ्काव्याविवृत्सया श्रीभगवानुवाच—** इदमिति। इदं **ब्रह्मज्ञानं वक्ष्यमाणम् उक्तं च पूर्वेष्वध्यायेषु , तद् बुद्धौ सन्निधीकृत्य 'इद'मित्याह। तुशब्दो विशेषनिर्धारणार्थः। इदमेव तु सम्यग्ज्ञानं साक्षान्मोक्षप्राप्तिसाधनम् , 'वासुदेवः सर्वमिति' (भ.गी.७.१९), 'आत्मैवेदं सर्वम्' (छा.उ.७.२५.२), 'एकमेवाद्वितीयम्' (छा.उ.६.२.१) इत्यादिश्रुतिस्मृतिभ्यः; नान्यत्। 'अथ ये**

### आनन्दगिरिकृतव्याख्या

[२]**अतीतेनागामिनोऽध्यायस्यागतार्थत्वं वक्तुं वृत्तमनुवदति—** अष्टम इति। नाडी **सुषुम्नाख्या। धारणाख्येनाङ्गेन युक्तो योगो** धारणायोगः। सगुणः **सर्वद्वारसंयमनादिर्गुणः, तेन सहित इत्यर्थः। तत्फलोक्त्यर्थम् अनन्तराध्यायारम्भमाशङ्क्याह—** तस्य चेति। **अग्निरर्चिरित्यादिनोपलक्षितेन क्रमवता, देवयानेन पथेति यावत्। ज्ञानानन्तरमेव यथोक्तफललाभादलमनेन मार्गेणेत्याशङ्क्याह—** कालान्तर इति। **अर्चिरादिमार्गेण ब्रह्मप्राप्तौ मुक्तेर्मार्गायत्तत्वात् [३]'न तस्य' इत्यादिश्रुतिविरोधः स्यादित्याशयेन शङ्कते—** तत्रेति। **वृत्तोऽर्थः सप्तम्यर्थः। उक्ताशङ्कानिवृत्त्यर्थम् अनन्तराध्यायमुत्थापयति—** तदाशङ्केति। [४]**सम्प्रयुक्तत्वेनापरोक्षत्वाभावेऽपि पूर्वोत्तरग्रन्थालोचनया बुद्धिसन्निधानाद् इदंशब्देन ब्रह्मज्ञानं गृहीतमित्याह—** तद्बुद्धाविति। **प्रकृताद् ध्यानाज्ज्ञानस्य वैशिष्ट्यावद्योती तुशब्द इत्याह—** तुशब्द इति। **निपातार्थमेव स्फुटयति—** इदमेवेति। **तस्मिन्नर्थे संवादकत्वेन श्रुतिस्मृती दर्शयति—** वासुदेव इति। **अद्वैतज्ञानवद् द्वैतज्ञानमपि केषाञ्चिन्मोक्षहेतुरित्याशङ्क्याह—** नान्यदिति। **द्वैतज्ञानं मोक्षाय न क्षममित्यत्र श्रुतिमुदाहरति—** अथेति।

### श्रीबेल्लंकोण्डरामरायकविविरचितः
### भाष्यार्कप्रकाशः

वृत्तं कीर्तयन् पूर्वाध्यायस्यास्य च सङ्गतिं दर्शयति— **अष्टमे इति। नाडी** सुषुम्ना। **धारणा** प्राणानां नियमनम्। **अनेनैव** सगुणोपासनेनैव। **नान्यथा** सम्यग्दर्शनेन न। **व्याविवृत्सया** व्यावर्तयितुमिच्छया। सन्निहिते वस्तुनीदंशब्दप्रयोगादाह— **बुद्धौ सन्निधीकृत्येति**। पूर्वेष्वध्यायेषूक्तम् उत्तरत्र वक्ष्यमाणं च तत् सर्वं ब्रह्मज्ञानं बुद्धौ सन्निहितं कृत्वा **इद**मित्याह। [५]**विशेषार्थः** पूर्वोक्ताद् योगादस्य ज्ञानस्य वैलक्षण्यं द्योतयितुं **तुशब्द** इत्यर्थः। तमेव विशेषं दर्शयति— **इदमेवेत्यादिना। साक्षादिति**। योगस्तु क्रमेणेति भावः। किं तत् सम्यग्ज्ञानम्? अत आह— **वासुदेवः सर्वमित्यादि**। 'वासुदेवः सर्वमिति स महात्मा सुदुर्लभः' इति गीतावाक्यं स्मृतिः। 'आत्मैवेदं सर्वम् , एकमेवाद्वितीयं ब्रह्म, तदिदं सर्वं यदयमात्मा' इत्यादेरादिपदाद् ग्रहणम्। दर्शितश्रुतिस्मृतिसिद्धं 'सर्वं ब्रह्म, अहं ब्रह्मास्मी'-त्येवंरूपं ज्ञानं सम्यग्ज्ञानमित्यर्थः। **अन्यत्** ज्ञानान्तरं तु सम्यग्ज्ञानं न भवति। मोक्षप्राप्तिसाधनं न भवतीति वा। उक्तार्थे श्रुतिं

---

१. 'तदाशङ्काव्याविवर्तयिषया' इति पा.। २. अध्यायेनेति शेषः। ३. 'न तस्य प्राणा उत्क्रामन्ति' इति श्रुतौ उत्क्रमणनिषेधेन ब्रह्मविदो मार्गाभावबोधनादिति भावः। ४. 'इदमस्तु संनिकृष्ट'मित्युक्तेः ब्रह्मज्ञाने इन्द्रियसंनिकर्षाभावेन इदंशब्दप्रयोगस्यानुपपत्तिं तस्य संनिहितमात्रपरतया समाधत्ते—**संप्रयुक्ते**त्यादिना। संप्रयुक्तत्वेन यदपरोक्षत्वं तदभावेऽपीत्यर्थः। 'असंप्रयुक्तत्वेन' इति वा पाठः स्यात्। ५. भाष्ये 'विशेषार्थः' इति रा.पाठः इति भाति।

**राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्।**
**प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥२॥**

**ऽन्यथाऽतो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति' (छा.उ.७.२५.२) इत्यादिश्रुतिभ्यश्च।** ते **तुभ्यम् ,** गुह्यतमं **गोप्यतमं** प्रवक्ष्यामि **कथयिष्यामि,** अनसूयवे **असूयारहिताय। किं तत्? ज्ञानम्। किंविशिष्टम्?** विज्ञानसहितम् **अनुभवयुक्तम्।** यद् **ज्ञानं** ज्ञात्वा **प्राप्य मोक्ष्यसे** अशुभात् **संसारबन्धनात्॥१॥**

**तच्च** [1]**(स्तौति)—** राजविद्येति। राजविद्या **विद्यानां राजा, दीप्त्यतिशयवत्त्वात्। दीप्यते हीयमतिशयेन ब्रह्मविद्या सर्वविद्यानाम्। तथा** राजगुह्यं **गुह्यानां राजा।** पवित्रं **पावनम् इदम्** उत्तमं **सर्वेषां पावनानां शुद्धिकारणमिदं ब्रह्मज्ञानम् उत्कृष्टतमम्। अनेकजन्मसहस्रसञ्चितमपि धर्माधर्मादि समूलं कर्म क्षणमात्रादेव भस्मीकरोति यतः, अतः**

**अनुभूतिस्वरूपाचार्यविरचितगीताभाष्यटिप्पणम्**

[2]वाऽऽहिताग्निगणपाठात् राजशब्दस्य पूर्वनिपातो द्रष्टव्यः- राजविद्येत्यादौ। 'सुख्यहम्' इतिवद् 'ब्रह्माहमस्मी'ति

आनन्दगिरिकृतव्याख्या

**अविद्याप्रकरणोपक्रमार्थोऽथशब्दः।** अतः **अद्वैताद्** अन्यथा **भिन्नत्वेनेत्यर्थः।** विदुः, **तत्त्वमिति शेषः। द्वैतस्य दुर्निरूपत्वेन कल्पितत्वात् तज्ज्ञानं रज्जुसर्पादिज्ञानतुल्यत्वान्न क्षेमप्राप्तिहेतुरिति चकारार्थः।** असूया **गुणेषु दोषाविष्करणम् , तद्रहिताय, ज्ञानाधिकृतायेत्यर्थः।** ज्ञानं **ब्रह्मचैतन्यं, तद्विषयं वा प्रमाणज्ञानम् , तस्य तेनैव विशेषितत्वानुपपत्तिमाशङ्क्य व्याकरोति—** अनुभवेति। विज्ञानम् **अनुभवः साक्षात्कारः, तेन सहितमित्यर्थः। उक्तज्ञानं प्राप्तस्य किं स्यादित्याशङ्क्याह—** यज्ज्ञानमिति॥१॥

**तदाभिमुख्यसिद्धये तज्ज्ञानं स्तौति—** तच्चेति। **ब्रह्मविद्या विद्यानां राजा श्रेष्ठेत्यत्र हेतुमाह—** दीप्तीति। **कुतो ब्रह्मविद्याया विद्यान्तरेभ्यो दीप्त्यतिशयवत्त्वम्? तदाह—** दीप्यते हीति। **दृश्यते हि विद्वदन्तरेभ्यो लोके पूजातिरेको ब्रह्मविदामिति भावः। उत्कृष्टतमं शुद्धिकारणं ब्रह्मज्ञानमित्येतदुपपादयति—** अनेकेति। **तत्र च श्रुतिस्मृती**[3] **प्रमाणयितव्ये। न शास्त्रैकगम्यमिदं ज्ञानं, किन्तु प्रत्यक्षप्रमेय-**

भाष्यार्कप्रकाशः

प्रमाणयति— **अथ य इति।** अथशब्दः अविद्याप्रकरणोपक्रमार्थः। ये **अतो**ऽस्मादुक्तात् 'सर्वं ब्रह्मे'त्येवम्प्रकाराद् **अन्यथा** प्रकारान्तरेण 'जीवोऽहम् , ईश्वरोऽन्यः' इत्यादिरूपेण विदुः तत्त्वमिति शेषः। **अन्यराजानः** अन्यः इन्द्ररुद्रादिः, राजा प्रभुः, उपास्य इति यावत् ; येषां तेऽन्यराजानः। भिन्नदेवतोपासका इत्यर्थः। तेऽविद्वांसः **क्षय्यलोकाः** क्षय्याः क्षयवन्तः स्वर्गादयो लोकाः प्राप्या येषां ते तथोक्ता भवन्ति। ज्ञानाभावाद् यज्ञादिकर्मसु प्रवर्त्य तत्फलं क्षयिष्णु स्वर्गादिलोकं गच्छन्तीत्यर्थः। यज्ज्ञात्वेति वाक्यस्याकाङ्क्षामाह— **किं तत्? ज्ञानमिति।** विज्ञानसहितमित्यस्याकाङ्क्षामाह— **किंविशिष्टमिति।** केन विशिष्टं **किंविशिष्टम्। मोक्ष्यसे** मुक्तो भविष्यसि। किं तदशुभम्? अत आह— **संसारबन्धनादिति।** [मुमुक्षोः पुण्यमपि] पापम् , पापवत् पुण्यस्यापि बन्धकत्वादिति भावः॥१॥

**राजेति।** 'राजृ दीप्तौ' राजते दीप्यत इति राजा, प्रसिद्धो राजाऽपि हि सर्वेषु पुरुषेषूत्कर्षेण भाति; यथा सर्वपुरुषाणां मध्ये दीप्त्यतिशयत्त्वेन भूपस्य राजत्वं, तथा सर्वविद्यानां मध्ये ब्रह्मविद्याया दीप्त्यतिशयवत्त्वेन राजत्वमितीयं ब्रह्मविद्या **राजविद्या।** गुह्यानां गोप्यानां राजा **राजगुह्यं** परमगुह्यमित्यर्थः। कथमस्योत्तमपवित्रत्वम्? अत आह— **सर्वेषां पावनानामिति।** सर्वपावनपावनत्वादुत्तम-पवित्रत्वमित्यर्थः। अस्य च सर्वपावनपावनत्वं कैमुतिकन्यायसिद्धमित्याह— **अनेकेति। समूलं** साज्ञानम्। लोके पापपरिहारकस्याग्निजलादेः पावनत्वं प्रसिद्धम् , दुःखहेतोर्विप्रस्वापहरणादेः पापत्वं च। तथा धर्मस्य यज्ञादिलक्षणस्य स्वर्गादिसुखहेतुत्वेन पावनत्वम् ,

१. कुण्डलितं क्वचिन्न। २. द्र.पा.सू.२.२.३७।आकृतिगणत्वात् तस्य। विकल्पार्थमेतदादृतम्। अत एव 'राजदन्तादिषु परम्' (पा.सू.२.२.३१) इति विद्यादिशब्दस्य परनिपातः इति न युक्तम्। ३. 'क्षीयन्ते चास्य कर्माणि' इत्यादिः श्रुतिः, 'यथैधांसि समिद्धोऽग्निः...भस्मसात्कुरुते तथा।' इत्यादिः स्मृतिश्चात्रानुसंधेये।

**किं तस्य पावनत्वं वक्तव्यम्? किञ्च** प्रत्यक्षावगमम् **प्रत्यक्षेण सुखादेरिवावगमो यस्य तत् प्रत्यक्षावगमम्। अनेकगुणवतोऽपि धर्मविरुद्धत्वं दृष्टम् , [1]श्येनयाग इव, न तथा आत्मज्ञानं धर्मविरोधि, किन्तु** धर्म्यं **धर्मादनपेतम्। एवमपि स्याद् [2]दुःसम्पाद्यमित्यत आह—** सुसुखं कर्तुम्। **यथा रत्नविवेकविज्ञानम्। तत्राल्पायासानां कर्मणां सुखसम्पाद्यानामल्पफलत्वम् , दुष्कराणां च महाफलत्वं दृष्टमिति, इदं तु सुखसम्पाद्यत्वात् फलक्षयाद् व्येतीति [3]प्राप्तम् , अत आह—** अव्ययम् । **नास्य फलतः कर्मवद् व्ययोऽस्तीति** अव्ययम्। **अतः श्रद्धेयमात्मज्ञानम्॥ २॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

विज्ञानस्यापरोक्षवस्तुविषयत्वात् प्रत्यक्षावगमत्वमाह—**किञ्च[इति]। अनेकगुणवतोऽपि** श्येनयागादेः धर्मविरुद्धत्वं यथा, न तथा ब्रह्मज्ञानम् , 'न हिंस्यात् सर्वाणि भूतानि' इतिवद् निषेधाभावादित्यर्थः। यथा रत्नलक्षणशास्त्राभिज्ञस्य रत्नज्ञानं सुखसाध्यम् , तथा तत्त्वमस्यादिवाक्यनिविष्टलक्ष्यपदार्थाभिज्ञस्य ब्रह्मज्ञानमपि सुकरमित्यर्थः॥ २॥

आनन्दगिरिकृतव्याख्या

**मित्याह—** किञ्चेति। **प्रत्यक्षम्** अवगमो[4] **मानमस्मिन्निति तथा। यद्वा अवगम्यत इत्यवगमः फलं, प्रत्यक्षोऽवगमोऽस्येति दृष्टफलत्वं ज्ञानस्योच्यते। धर्म्यमित्येतद् व्याकरोति—** अनपेतमिति। **धर्मस्येव तस्य क्लेशसाध्यत्वमाशङ्क्याह—** एवमपीति। **तत्र रत्नविषयं विवेकज्ञानं सम्प्रयोगादुपदेशापेक्षादनायासेन दृष्टम् , तथेदं ब्रह्मज्ञानमित्याह—** यथेति। **अव्ययमिति विशेषणमाशङ्कापूर्वकं विवृणोति—** तत्रेत्यादिना। **व्यवहारभूमिः सप्तम्यर्थः। ज्ञानस्याक्षयफलत्वे फलितमाह—** अत इति ॥ २॥

भाष्यार्कप्रकाशः

अधर्मस्य चापावनत्वं दुःखहेतुत्वेन प्रसिद्धमेव। अयं च पावनोऽपि धर्मः शास्त्रदृष्ट्या संसारहेतुत्वेन पाप एव। ततश्च दुःखहेत्वधर्मनिरासकधर्मस्य यथा पावनत्वम् , तथा दुःखहेतुधर्माधर्मनिरासकज्ञानस्य पावनत्वम्। संसारैकदेशनरकनिवर्तकधर्माणामेव पावनत्वे स्वर्गनरकाद्यात्मकसर्वसंसारनिवर्तकज्ञानस्य परमपावनत्वमर्थात् सिद्धमिति भावः।

प्रत्यक्षेणावगमो यस्य तत् **प्रत्यक्षावगमं** सुखादिवत् प्रत्यक्षानुभवविषयमित्यर्थः। **धर्म्यमिति। ननु** धर्माधर्मादिविध्वंसकस्य ज्ञानस्य कथं धर्माविरोधित्वमिति चेद्? **उच्यते—** धर्मशास्त्रं यथाधर्ममित्यादिप्रयोगात् 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इति शास्त्रविहितत्वाज्ज्ञानस्य धर्म्यत्वम्। अनेन भस्मीक्रियमाणो धर्मस्तु पुण्यादृष्टसुकृतादिपर्यायजन्मान्तरकृतसत्कर्मजन्यसद्वासनाविशेषः। स हि जन्मप्रदत्वेन बन्धहेतुत्वाज्ज्ञानेन मुक्तिप्रदेन भस्मीक्रियते। न च पुराकृतसुकृतलभ्यस्य ज्ञानस्य कथं सुकृतनाशकत्वमिति वाच्यम् ; प्रारब्धसुकृतविशेषलभ्यस्य ज्ञानस्य सञ्चितसुकृतनाशकत्वे बाधकाभावात्। प्रारब्धस्य भोगं विना ज्ञानेन क्षयाभावाच्च। **सुसुखं** सुष्ठु सुखमनायासमित्यर्थः। तत्र दृष्टान्तमाह— **यथेति**। इदं रत्नं ब्रह्मजातीयम् , इदं क्षत्रजातीयमित्येवंविधरत्नविवेकज्ञानं यथा सुसुखम् , तद्वदित्यर्थः। अयमात्मा, इदमनात्मा इति विवेकज्ञानस्य बुद्धिसाध्यत्वेन शरीरादिसाध्येषु कर्मस्विव श्रमाभावादिति भावः।

**तत्रेति**। व्यवहारभूमावित्यर्थः। **व्येति** विकारं प्राप्नोति, नश्यतीति यावत्। इति प्राप्ते पूर्वपक्षे इति शेषः। आह उत्तरम्— **अव्ययमिति**। न विद्यते व्ययोऽस्येत्यव्ययम्। यथा कर्मणः फलतः क्षयः, तथा नास्येत्यर्थः। कृतं हि कर्म तत्फलं स्वर्गादिकमनुभाव्य क्षीयते, न तथा ज्ञानम् , नित्यब्रह्मफलत्वाज्ज्ञानस्य। **यद्वा** कर्मणां स्वरूपतः क्षयः कर्मसमाप्तावेव भवति, यज्ञादिकर्मणां पञ्चषादिदिनानन्तरमदर्शनात्। तत्फलं तु किञ्चित्कालमेव तिष्ठति; न सर्वदेति फलतोऽप्यस्ति कर्मणां क्षयः। 'अहं ब्रह्मे'त्यात्मज्ञानस्य तु वृत्तिरूपस्य क्षणिकत्वेऽपि तत्फलस्य ब्रह्मणः शाश्वतत्वान्न ज्ञानस्य फलतः क्षय इति कृत्वा अक्षयफलत्वाज्ज्ञानस्याव्ययत्वम्। क्षयिफलत्वात्तु कर्मणो नाव्ययत्वमिति भावः। एतेन वृत्तिज्ञानस्य कर्मवत् स्वरूपतः क्षयोऽस्त्येवेति सिद्धम्।

शास्त्रैकगम्याद् दुष्करात् क्षयिफलाच्च यज्ञादिलक्षणधर्मात् प्रत्यक्षगम्यं सुकरम् अव्ययफलं चेदं ज्ञानं सर्वस्य विश्वसनीय-

१. 'श्येनयाग इव' इति क्वचिन्न। २. 'दुःखसम्पाद्यम्' इति पा.। ३. 'प्राप्त आह' इति पा.। ४. अवगम्यतेऽनेनेति करणव्युत्पत्त्या प्रमाणपरत्वं बोध्यम्। साक्षिसिद्धमिति यावत्। आवरणनिवृत्तिरूपाभिव्यक्तिमच्चैतन्यं फलम् , अभिव्यञ्जिका वृत्तिः प्रमाणमिति विभागः। समानाधिकरणबहुव्रीहिः। भाष्ये तु फलितार्थकथनम्।

**अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप ।।**
**अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥ ३ ॥**

**ये पुनः—**अश्रद्दधाना इति। अश्रद्दधानाः **श्रद्धाविरहिताः आत्मज्ञानस्य** धर्मस्यास्य **स्वरूपे तत्फले च नास्तिकाः पापकारिणः** [१]**असुराणामुपनिषदं देहमात्रात्मदर्शनमेव प्रतिपन्नाः असुतृपः पापाः पुरुषाः** [२]**(अश्रद्दधानाः), परन्तप ! अप्राप्य मां परमेश्वरम् ; मत्प्राप्तौ नैवाशङ्केति मत्प्राप्तिमार्गसाधनभेदभक्तिमात्रमप्यप्राप्येत्यर्थः।** निवर्तन्ते **निश्चयेन** [३]**वर्तन्ते। क्व?** मृत्युसंसारवर्त्मनि **मृत्युयुक्तः संसारो मृत्युसंसारः, तस्य वर्त्म नरकतिर्यगादिप्राप्तिमार्गः, तस्मिन्नेव वर्तन्त इत्यर्थः ॥ ३ ॥**

आनन्दगिरिकृतव्याख्या

**आत्मज्ञानाख्ये धर्मे श्रद्धावतां तन्निष्ठानां परमपदप्राप्तिमुक्त्वा ततो विमुखानां संसारप्राप्तिमाह—** ये पुनरिति। **आत्मज्ञान-तत्फलयोः नास्तिकानेव विशिनष्टि—** पापेति। **उक्तानाम् आत्मम्भरीणां भगवत्प्राप्तिसम्भावनाऽभावाद् 'अप्राप्य माम्' इत्यप्रसक्त-प्रतिषेधः स्यादित्याशङ्क्याह—** मत्प्राप्ताविति ॥ ३ ॥

भाष्यार्कप्रकाशः

मित्याह—**अत इति**। ज्ञानस्य राजविद्यात्वाद् राजगुह्यत्वात् परमपवित्रत्वात् प्रत्यक्षावगम्यत्वाद् धर्म्यत्वात् सुकरत्वाद् अव्ययफल-त्वाच्चेति **अतः**शब्दार्थः। न च 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवती'ति श्रुतेः कर्मफलमप्यक्षयमेवेति वाच्यम् ; कर्म-प्रशंसापरत्वात् तच्छ्रुतेः। 'यवागूं पिब शिखा ते वर्धिष्यते' इति वाक्यवत् प्ररोचनवाक्यं हि तत्। कर्मफलस्य स्वर्गादेरनित्यत्वं हि श्रुति-स्मृतिन्यायसिद्धम् ॥ २ ॥

**अश्रद्दधाना इति। अस्य धर्मस्येति।** आत्मज्ञाने धर्मत्वारोपः श्रुतिविहितत्वगुणनिमित्तः। ज्ञानस्य कुत्रांशे अश्रद्दधाना इत्यत आह— **स्वरूपे तत्फले चेति**। अस्य धर्मस्य स्वरूपे फले चाश्रद्दधाना इति सम्बन्धः। के ते? अत आह— **नास्तिका इति**। नास्ति दिष्टं [४]मतिर्येषां ते नास्तिकाः, देवो नास्ति, परलोको नास्ति, धर्मो नास्ति इत्येवं प्रतिपन्ना **बौद्धाः** इत्यर्थः। कुत एषां नास्तिकत्वम्? अत आह— **पापकारिण इति**। जन्मान्तरे पापं कृतवन्तः, इदानीमपि तत्संस्कारवशात् पापकरणस्वभाववन्तश्चेत्यर्थः। नास्तिकानां मतं संक्षेपेणाह— **असुराणामिति**। देहमात्रात्मदर्शनरूपामसुराणां विरोचनादीनामुपनिषदं विद्यां प्रतिपन्नाः प्राप्ताः, असुरवद् देह एवात्मेति मन्वाना इत्यर्थः। देह एवात्मेत्यमीषां मतमिति भावः।

अस्मिन् मते— कर्तुर्देहस्यात्मनः इहैव नष्टत्वान्न स्वर्गनरकादिभोगप्रसङ्गः। नापि पुनर्जन्मप्रसङ्गः। निर्वाणस्य प्रदीपस्य पुन-रुत्पत्त्यदर्शनात्। एवं चैहिकभोग एव भोगः। स च जारत्वचोरत्वादिनाऽपि सम्पादनीयः, जन्मान्तराभावेन विधिनिषेधशास्त्रा-नर्थक्यात्। अत एवामी **असुतृपः** प्राणतर्पणपरायणाः; येन केनाप्युपायेनोदरम्भरयः, परदारगमनादिना मनइन्द्रियतर्पणपराश्च देहपातमेव मोक्षं मन्यन्ते, परदारगमनादिकमेव रम्भासम्भोगादिरूपं स्वर्गं मन्यन्ते, ऐहिकमेव दुःखं नरकं मन्यन्ते। यत् प्रत्यक्षप्रमाणसिद्धं तदेव वस्तु; अन्यत् सर्वं तु नास्त्येवेति मतमेतेषाम्। अत एव पापा अमी वेदशास्त्रस्वर्गादिषु विश्वासरहितत्वाद् आत्मज्ञाने तत्फले च विश्वासरहिताः।

न चाद्वैतिनोऽप्येवंविधा एव, ब्रह्मान्यस्मिन्नविश्वासादिति वाच्यम् ; न वयं वेदशास्त्रादिफलं नास्तीति ब्रूमः; किं तर्हि? परमा-र्थतो नास्तीति ब्रूमः। ततश्च यावद्व्यवहारं पुण्यपापसुखदुःखस्वर्गनरकवेदशास्त्रगुरुशिष्यजन्ममरणबन्धमोक्षादिसर्वद्वैतमस्त्येवेति।

अमीषां नास्तिकानां गतिमाह—**अप्राप्येति** श्लोकार्धेन। ननु मामप्राप्येत्युक्तिरयुक्ता, बौद्धानां भगवत्प्राप्तिर्भवेद्वा न वेति शङ्काया उदये तत्परिहारार्थं मामप्राप्येति वक्तव्यम् , प्रकृते तु तच्छङ्काया एवानुदयादित्याक्षिप्य मामप्राप्येत्यस्य मद्भक्तिमप्यप्राप्येत्यर्थमाह

१.द्र.छा.उ. ८.८.५। २.क्वचिन्न। ३.'आवर्तन्ते' इति पा.। ४.'नास्तीति मतिर्येषां ते नास्तिकाः' इति स्यात्।'अस्ति नास्ति दिष्टं मतिः'(पा.सू. ४.४.६०) इति ठक्।

## मया ततमिदं सर्वं जगदव्यक्तमूर्तिना।
## मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥४॥

[१]**स्तुत्याऽर्जुनमभिमुखीकृत्याह—** मयेति। मया **मम यः परो भावस्तेन,** ततं **व्याप्तं सर्वमिदं जगद्** अव्यक्त-मूर्तिना **न व्यक्ता** मूर्तिः **स्वरूपं यस्य मम सोऽहमव्यक्तमूर्तिः, तेन मया अव्यक्तमूर्तिना, करणागोचरस्वरूपेणेत्यर्थः। तस्मिन् मय्यव्यक्तमूर्तौ स्थितानि** मत्स्थानि सर्वभूतानि **ब्रह्मादीनि स्तम्बपर्यन्तानि। न हि निरात्मकं किञ्चिद् भूतं**

आनन्दगिरिकृतव्याख्या

**स्तुतिनिन्दाभ्यां ज्ञाननिष्ठां महीकृत्य ज्ञानं व्याख्यातुमारभते—** स्तुत्येति। **सोपाधिकस्य व्याप्त्यसम्भवमभिप्रेत्य विशिनष्टि—** ममेति। **अनवच्छिन्नस्य भगवद्रूपस्य निरुपाधिकत्वमेव साधयति—**करणेति। **व्याप्यव्यापकत्वेन जगतो भगवतश्च परिच्छेदमाशङ्क्याह—** तस्मिन्निति। **तथापि भगवतो भूतानां चाधाराधेयत्वेन भेदः स्यादित्याशङ्क्याह—** न हीति। **निरात्मकस्य व्यवहारानर्हत्वे फलितमाह—**

भाष्यार्कप्रकाशः

भाष्यकारः— **मत्प्राप्तावित्यादिना**। मत्प्राप्तौ ये मार्गास्तद्भेदस्तद्विशेषरूपा या भक्तिः, तन्मात्रमपि। मात्रमपीत्यनेन ज्ञानोपासनादि-मार्गभेदप्राप्तौ का कथेति सूचितम्। निर्गुणस्य भक्त्यविषयत्वेऽपि सगुणस्य भक्तिविषयत्वमस्तीति भक्तीत्युक्तम्। **अथवा** आत्मनः उपासनादिकं माऽऽस्ताम् , आत्मनि प्रीतिरपि तेषां नास्ति, सत्यां प्रीतौ आत्मदर्शनसाधनान्वेषणादिः स्यादिति प्रीतेरप्यात्म-प्राप्त्युपायत्वमुक्तम् ॥३॥

**मयेति**। इदं सर्वं जगदव्यक्तमूर्तिना मया ततम्। सर्वभूतानि मत्स्थानि भवन्ति। अहं तेषु न चावस्थितः। **भावः** स्वरूपम्। ईश्वरस्य परमपरं चेति स्वरूपद्वयमस्ति। तत्र परं स्वरूपं ब्रह्म सच्चिदानन्दम् , अपरं तु आध्यासिकमोङ्कारादिरूपं बहुविधम्। तत्र परेण भावेन जगतो व्याप्तिरित्याह— **ममेत्यादि। मया** प्रत्यगभिन्नेन परमात्मनेति यावत्। **ततमिति**। परमात्मनः सच्चिदानन्दरूपत्वात् तेनैव रूपेण व्याप्तं जगदिदं सर्वम् , जगदस्ति, जगद्भाति, जगत्प्रियमिति प्रतीतिभिर्जगति सच्चिदानन्दान्वयदर्शनात्। जगति परमात्मा-व्याप्तौ तु नैताः प्रतीतय उपपद्येरन्। कार्ये हि घटे कारणमृदंशव्याप्त्यैव हि मृद्धट इति प्रतीतिः। जगतश्च ब्रह्मकार्यत्वं स्पष्टम्। कीदृशस्तव परो भावः? अत आह— **अव्यक्तमूर्तिनेति**। यदि मनइन्द्रियात्मककरणगोचरस्तर्हीदृश इति वक्तुं शक्येत, न तु तथा करणगोचर इति नास्त्यस्मिन्नीदृक्ता, निर्विशेषचिन्मात्रत्वात्। करणगोचरेण सच्चिदानन्दात्मकेन मम परस्वरूपेण जगदिदं सर्वं व्याप्तमिति निष्कृष्टार्थः। करणागोचरत्वं चास्य 'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह' इत्यादिश्रुतिसिद्धम्। न चानन्दः मनःकरणगोचर इति वाच्यम् , वैषयिकसुखस्यैव तद्गोचरत्वादिति। तस्मिन् पूर्वोक्ते सच्चिदानन्दरूपे ब्रह्मणि मयि ब्रह्मादीनि सर्वाणि भूतानि कार्यकरणसंघातात्मकानि स्थितानि, रज्जौ सर्पवदित्यर्थः। मय्येव भूतानां मायया कल्पितत्वादिति भावः। कुतस्त्वयि स्थितानीत्यत आह— **न हीति**। निरधिष्ठानभ्रमायोगाद् भ्रमस्य चाधिष्ठानात्मकत्वान्निरात्मकं किञ्चिदपि वस्तु न व्यवहारयोग्यं भवति। अन्यथा शशशृङ्गादेरपि व्यवहारार्हत्वापत्तेरिति भावः। **निरात्मकं** निस्तत्त्वं स्वरूपशून्यमिति यावत्। शशशृङ्गादिरूपमिति भावः। न च रज्जुसर्पादिरूपमिति वाच्यम् , रज्जुस्वरूपेणैव रज्जुसर्पस्य स्वरूपवत्त्वेन भ्रमस्य सर्पाधिष्ठानभूतरज्ज्वात्मत्वेन सात्मकत्वात्। भ्रमस्य ह्यधिष्ठानमेव स्वरूपम् , अधिष्ठानातिरिक्तस्वरूपाभावात्। न चायं न्यायो भ्रमस्थले एव, किन्तु कार्यमात्रेऽपि - मृत्कार्यस्य घटस्य स्वाधिष्ठानमृद्रूपातिरिक्तरूपाभावेऽपि मृद्रूपेणैव सरूपत्वदर्शनात्। तस्माद् भ्रमरूपं प्रमारूपं वा सर्वमपि कार्यं स्वाधिष्ठानभूतकारणा-त्मकत्वेन न निरात्मकम् , किन्तु शशशृङ्गादिकमेव निरात्मकमिति स्थितम्। कार्यस्य च कारणमेवाधिष्ठानं मृद्येव घटदर्शनादिति च स्थितम्। एवं सति सर्वेषां ब्रह्मादिस्तम्बपर्यन्तानां भूतानां ब्रह्मकार्यत्वाद् ब्रह्मण्येव स्थितिः। ब्रह्माधिष्ठानत्वाच्च ब्रह्मात्मकत्वं, ब्रह्मात्मकत्वादेव व्यवहारयोग्यत्वमिति सिद्धम्। तथा च व्यवहारयोग्यानां ब्रह्मकार्याणां ब्रह्मात्मकानां चामीषां भूतानां ब्रह्मणि

१. 'ज्ञानस्तुत्या' इति पा.।

**व्यवहारायावकल्पते ।** अतो मत्स्थानि **मयाऽऽत्मनाऽऽत्मवत्त्वेन स्थितानि, अतो 'मयि स्थितानी'त्युच्यन्ते। तेषां भूतानाम् अहमेवात्मा इत्यतस्तेषु स्थित इति मूढबुद्धीनामवभासते। अतो ब्रवीमि— न चाहं** तेषु **भूतेष्ववस्थितो मूर्तवत् संश्लेषाभावेन ;** [१]**आकाशस्याप्यन्तरतमो ह्यहम्। न ह्यसंसर्गि वस्तु क्वचिदाधेयभावेनावस्थितं भवति॥४॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

परमात्मा ना(भि)धेयः, सर्वान्तरत्वात् , न यदेवं न तदेवम् , यथा घट इत्याह— **न चाहं तेष्ववस्थितो मूर्तवदिति।** 'हृदि ब्रह्म' 'सूर्यमण्डले ब्रह्मे'त्यादिनिर्देशविरोधमाशङ्क्याह— **संश्लेषाभावेनेति।** निरवयवत्वाद् न जतुकाष्ठवत् संश्लेषाभावेनावस्थानम्[२], किन्तु उपासकदृष्ट्या हृदयादिष्ववस्थानोपचारः इत्यर्थः। तर्हि आकाशस्यैव सर्वान्तरत्वप्रसिद्धेः परमात्मनः सर्वान्तरत्वमप्रसिद्धमित्याशङ्क्याह—**आकाशस्याप्यन्तरतमो ह्यहमिति।** 'य आत्मा सर्वान्तरः'[इति] श्रुते-

आनन्दगिरिकृतव्याख्या

अत इति। **ईश्वरस्य भूतात्मत्वे तेषु स्थितिः स्यादित्याशङ्क्याह—** तेषामिति। **तस्य तेषु स्थित्यभावं व्यवस्थापयति—** मूर्तवदिति। **संश्लेषाभावेऽपि किमिति नाधेयत्वम् ? अत आह—** न हीति ॥४॥

भाष्यार्कप्रकाशः

स्थितिरुचिता, जलाहरणादियोग्यस्य मृत्कार्यस्य मृदात्मकस्य घटस्य मृदि स्थितिवदिति भावः।

**अत इति।** व्यवहारयोग्यस्य जगतः सात्मकत्वेन भाव्यत्वादित्यर्थः। ननु कुण्डे बदराणामिव कारणे मृदादौ कार्यस्य घटादेः स्थित्यदर्शनात् कथं भूतानां त्वत्स्थत्वम्? अत आह— **मयेति। आत्मना** स्वरूपभूतेन मया भूतानाम् **आत्मवत्त्वेन** स्वरूपवत्त्वेन हेतुना स्थितान्यासन्नित्यतो हेतोर्मयि स्थितानीत्युच्यन्ते। यथा मृत्स्वरूपेणैव स्वरूपवत्त्वाद् घटस्य मृदि स्थितत्वं, तथा मत्स्वरूपेणैव स्वरूपवत्त्वाद् भूतानां मयि स्थितत्वमिति भावः।

न चानृतजडदुःखात्मकानां भूतानां कथं परमात्मस्वरूपत्वमिति वाच्यम् , सर्पस्य रज्जुस्वरूपत्वदर्शनात् , नैल्यस्य गगनस्वरूपत्वदर्शनात् , उदकस्य किरणस्वरूपत्वदर्शनाच्च सच्चिदानन्दलक्षणपरमात्मस्वरूपस्य भूतेष्वप्यन्वयदर्शनाच्च, मृदंशातिरिक्तघटस्येव सच्चिदानन्दांशातिरिक्तभूतपदवाच्यस्यादर्शनाच्च सच्चिदानन्दात्मकान्येव भूतानि। तेषु च भूतेषूपलभ्यमानोऽनृताद्यंशो मायाकार्यम् , नामाकारौ च मायाकार्यमेव। मृदि कम्बुग्रीवाद्याकारघटनाम्नोरिव ब्रह्मणि मनुष्यत्वाद्याकारमनुष्यादिनाम्नां मायया कल्पितत्वात्। तत्रापि नामाकारयोर्वर्तमानः सत्ताद्यंशो ब्रह्मधर्म एवेति नामाकारयोरप्यस्ति ब्रह्मात्मकत्वम्। तस्माद् युक्तमुक्तं सच्चिदानन्दांशातिरिक्तं भूतपदवाच्यं किमपि वस्तु नास्तीति।

एवं भूतानां सच्चिदानन्दब्रह्मात्मकत्वेन ब्रह्मणि स्थितत्वमुचितम्। एवं सर्वस्य ब्रह्मात्मकत्वादेव 'सर्वं ब्रह्म' इति श्रुत्युपपत्तिः। 'वासुदेवः सर्व'मिति गीतोपपत्तिश्च। न चैवं 'ब्रह्म सत्यं जगन्मिथ्या' इत्यस्य विरोध इति वाच्यम् ; जगतः स्वेन रूपेण मिथ्यात्वात् , कारणभूतब्रह्मरूपेण सत्यत्वाच्च। यथा घटः स्वेन रूपेणासत्योऽपि कारणमृद्रूपेण सत्यः। उक्तं हि श्रुत्या— 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य'मिति।

एवं मृदात्मकानां घटानां यथा मृदेव स्वरूपम् , तथा ब्रह्मात्मकानां भूतानां ब्रह्मैव स्वरूपमिति भूतानामात्मा ब्रह्म; आत्मा हि स्वरूपम्। एवं भूतानामात्मत्वादेव ब्रह्म भूतेषु स्थितम्। यथा घटानामात्मा मृदंशो घटेषु स्थित इत्याह— **तेषामित्यादि। इतीति।** भूतानामात्मत्वाद्भूतेष्वहं स्थित इति **इति**शब्दार्थः। **मूढबुद्धीनाम्** अल्पज्ञानाम् **अवभासते** प्रतिभाति। एवंविधभ्रान्तिज्ञानवन्तस्ते इत्यर्थः। **अतः** एवं मूढानामवभासमानत्वादित्यर्थः। **ब्रवीमि** तद्भ्रान्तिनिरासार्थमिति भावः। अहं तेषु भूतेषु नैवावस्थित इति ब्रवीमि। तत्र हेतुमाह— **मूर्तवत्संश्लेषाभावेनेति।** पृथिव्यादीनां मूर्तत्वात् परस्परं संश्लेषोऽस्तीति पृथिव्यां जलं, जले पृथिवी वा वर्तत इति यथा

१. 'आकाशादप्यत्यन्तं विलक्षणतमो ह्यह'मिति रा.पा.भाति। २. निरवयवत्वात् संश्लेषाभावेन जतुकाष्ठवत् नावस्थानम् इत्यन्वयः।

अनुभूतिस्वरूपाचार्यटिप्पणम्

रित्यर्थः। किञ्च 'असङ्गो न हि सज्यते' इति श्रुतेः संसर्गायोग्यत्वावगमादप्यनाधेयत्वं सिद्धमित्याह— **न ह्यसंसर्गीति** ॥४॥

भाष्यार्कप्रकाशः

वक्तुं शक्यते, तथा नाहं क्वचिद् वर्त इति वक्तुं शक्यः, अमूर्तत्वादिति भावः। नन्वमूर्तोऽप्याकाशो घटेऽस्ति, घटश्चाकाश इत्यमूर्तस्याप्यस्ति संश्लेषः खलु मूर्तेनेत्यत आह— **आकाशादप्यत्यन्तं विलक्षणतमो ह्यहमिति।** सुतराममूर्तश्चेदाकाशश्चक्षुरिन्द्रिया-विषय एव स्यात्, तथा अविषयत्वे 'अयमाकाशः' इति प्रतीतिरेव न स्यात्। [1]दृश्यते त्वाकाशः।

इदं चाकाशस्य चक्षुर्विषयत्वं स्वावसृष्टप्रकाशप्रयुक्तम्, अथवा स्वावसृष्टतमःप्रयुक्तम्। न हि तमःप्रकाशान्यतरातिरिक्तः कश्चनाकाश इति पदार्थः केनापि दृश्यते। तदेवं वस्तुतोऽमूर्तत्वेऽपि तमःप्रकाशान्यतरसंश्लेषेण मूर्तत्वादाकाशस्य भवेदेव घटेन संश्लेषः। न चामूर्तस्याकाशस्य तमःप्रकाशसंश्लेषो वा कथमिति वाच्यम्; तमःप्रकाशाभिव्याप्तत्वस्यैव तमःप्रकाशसंश्लेषत्वात्। सा चाभिव्याप्तिः प्रत्यक्षसिद्धेति न तत्रातिशङ्क्यम्। तस्मादाकाशस्य तमःप्रकाशान्यतराभिव्याप्तेरपरिहार्यायाः सत्त्वेन मूर्तत्वाद् भवेदेव घटेन संश्लेषः। न तथा मम सुतराममूर्तस्य। एवमाकाशस्यापि घटादिसङ्गसद्भावादेवासङ्गोऽहमकाशादप्यत्यन्तविलक्षणः। न च तवाप्यस्त्यज्ञानसङ्ग इति वाच्यम्; चैतन्यस्याप्यज्ञानावृतत्वे जगदान्ध्यप्रसङ्गात्। 'असङ्गो ह्ययं पुरुषः' इति श्रुतिविरोधाच्च। तस्माद् अज्ञानमप्यसङ्गे मयि असंसृष्टमेव वर्तते, यथा भूतानि। न चात्र विप्रतिपत्तव्यम्, मायया सर्वस्याप्युपपत्तेः।

ननु भवतु तवामूर्तत्वात् केनापि संश्लेषाभावः, किं ततः? अत आह— **न हीति**। असंसर्गि वस्तु क्वचिदाधेयभावेन स्थितं न हि भवति। आधाराधेयभावस्य संसर्गिवस्तुविषयत्वादिति भावः। **क्वचित्** कुत्रचिदाधारे इत्यर्थः। आधेयभावेन कुत्रचित् सत्त्वे तस्य तेनैव संसर्गसम्भवेनासंसर्गित्वभङ्गप्रसङ्गादिति भावः।

'आकाशस्याप्यन्तरतमो ह्यहम्' इति पाठान्तरम्। तत्पक्षे - नन्वाकाश एवामूर्तः, न त्वमित्यत आह— **आकाशस्याप्यन्तर-तम इति**। अव्याकृतकार्यत्वात् तावदाकाशस्याव्याकृतमन्तरम्, कारणं हि कार्यस्यान्तरं भवति। कारणव्याप्तत्वात् कार्यस्य। तच्चाव्याकृतं चैतन्यस्योपाधित्वाच्चैतन्येन व्याप्तमेव, यथा आकाशस्योपाधिर्घटः आकाशेन व्याप्तः। व्यापकं हि वस्तु व्याप्यस्यान्तरं भवति। किञ्च चैतन्येऽध्यस्तत्वादपि चैतन्येन व्याप्तमेवाव्याकृतम्, यथा रज्जावध्यस्तः सर्पो रज्जुना[2] व्याप्तः। अपि च [3]'यः प्रकृतौ तिष्ठन्नि'त्यन्तर्यामिब्राह्मणमपि चैतन्यस्याव्याकृतान्तःस्थत्वं वदति प्रकृतेरेवाव्याकृतत्वात्। अत एवाव्याकृताच्चैतन्यं परमिति वदति श्रुतिः— 'अव्यक्तात्पुरुषः परः' इति। **अव्यक्तम्** अव्याकृतम्, **पुरुषः** पूर्णः चैतन्यमेवेति। तस्मादाकाशान्तरस्याप्यव्याकृतस्यान्तर-त्वादाकाशस्यान्तरतमः परमात्मा। तथा च आकाशस्यैवामूर्तत्वे तदन्तरतमस्य परमात्मनश्चैतन्यस्यामूर्तत्वं किं वक्तव्यमिति भावः।

न चाव्याकृतस्याप्यन्तर इति कुतो न भाषितमाचार्यैरिति वाच्यम्; अव्याकृतस्य सर्वजनाविदितत्वात्। अमूर्त आकाश इति सार्वजनीनत्वाच्च आकाशस्याप्यन्तरतम इति भाषितम्। आकाशस्यैवामूर्तत्वे आकाशस्याप्यतिशयेनान्तरः परमात्मा अमूर्त इति किं वक्तव्यमिति भावं द्योतयितुं येऽव्याकृतपदार्थानभिज्ञास्तेषाम्[4]। न चात्मन आकाशान्तरत्वे विवदितव्यम्, 'आकाशशरीरं ब्रह्म' 'य आकाशे तिष्ठन्नि'त्यादिश्रुतिप्रामाण्यात्। 'आत्मन आकाशः सम्भूतः' इति श्रुतेराकाशस्यात्मकार्यत्वेनात्मन आकाशान्तरत्वाच्च। न चाव्याकृतशरीरस्याव्याकृतकार्यस्य चाकाशस्य कथमात्मशरीरत्वमात्मकार्यत्वं चेति वाच्यम्; अव्याकृतोपहितस्य ब्रह्मणः शरीरं कार्यं चाकाश इत्यदोषात्। अव्याकृतद्वारा आत्मनः कार्यं शरीरं चाकाश इति वा। आत्मशरीरभूतस्य कार्यभूतस्य चाव्याकृतस्य शरीरभूतं कार्यभूतं चाकाशमात्मनः शरीरभूतं कार्यभूतं च भवत्येव परम्परयेति वा इति।

**हि**शब्दो हेत्वर्थे। **हि** यस्मादहमाकाशस्याप्यन्तरतमः, तस्मादिति शेषः। **यद्वा** हिः प्रसिद्धौ। सा च 'आकाशशरीरं ब्रह्म' इत्यादिश्रुतिस्मृतिसिद्धेति भाव इति व्याख्येयम्॥४॥

---

१. आकाशस्य चाक्षुषत्वं भाट्टमीमांसकानां मतम्। वेदान्तिनां तु साक्षिवेद्यत्वमिष्टम्। २. 'रज्ज्वा' इति पाठो युक्तः। ३. इयमानुपूर्वी अन्तर्यामिब्राह्मणे नोपलभ्यते। 'एतस्मिन्नु खल्वक्षरे गार्गि आकाश ओतश्च प्रोतश्च'(बृ.उ. ३-८-११) इति श्रुतिरपि उक्तार्थे ज्ञेया। ४. 'येऽव्याकृतपदार्थानभिज्ञास्तेषाम् पूर्वोक्तं भावं द्योतयितुम् आकाशस्याप्यन्तरतम इति भाषितम्' इति योजना। तमप्प्रत्ययस्वारस्यायाव्याकृतं मध्ये योजितमिति बोध्यम्।

## न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्।
## भूतभृन्न च भूतस्थो ममात्मा भूतभावनः॥५॥

**अत एवासंसर्गित्वान्मम—** न चेति। **न च मत्स्थानि भूतानि ब्रह्मादीनि। पश्य मे** योगं **युक्तिं घटनम् ,** मे **मम**

अनुभूतिस्वरूपाचार्यटिप्पणम्

नन्वाधेयत्वाभावेऽप्याधारत्वं भविष्यतीत्याशङ्क्याह— **अत एव [इति।]** असंसर्गित्वाद् ममाधारत्वमपि न ततो [जगतो]ऽस्ति। किंतु मायाद्वारकमेव जगदाधारत्वमित्यर्थः॥५॥

आनन्दगिरिकृतव्याख्या

**परमेश्वरस्य भूतेषु स्थित्यभावेऽपि भूतानां तत्र स्थितिरास्थितेति कुतोऽसङ्गत्वम्? तत्राह—** अत एवेति। **न चेत्यत्र चकारो**

भाष्यार्कप्रकाशः

**नेति। अत एवेति।** तस्यार्थमाह— **असंसर्गित्वान्ममेति।** भूतानि मत्स्थानि न भवन्ति, भूतानामपि नाहमाधारः। असंसर्गिवस्तुन आधारत्वस्याप्ययोगादिति भावः। एतेन मत्स्थानि सर्वभूतानीति पूर्वोक्तमपि मूढदृष्ट्यैव, न विद्वद्दृष्ट्येति सिद्धम्। अन्यथा पूर्वोत्तरविरोधात्। न ह्येक एव वक्ता भूतानि मत्स्थानीति, न मत्स्थानीति च ब्रूयादनुन्मत्तः। तस्मान्मयि भूतानि सन्तीति, भूतेष्वहमवस्थितः इति च मूढानामेव प्रतिभाति, न तु तत्त्वविदाम् , असङ्गस्य ममाधाराधेयभावायोगादिति स्थितम्।

**नन्वेवं** 'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि, ईक्षते योगयुक्तात्मा' इत्यादिकं पूर्वमुक्तं विरुध्येतेति चेत् , **मैवम्।** विद्यातारतम्येन विद्वत्तारतम्याद् विदुषां ब्रह्मविद्ब्रह्मविद्वरब्रह्मविद्वर्यब्रह्मविद्वरिष्ठत्वरूपभेदस्य प्रसिद्धत्वात्। ये सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि पश्यन्ति ते ब्रह्मविदः। नाहं भूतानामाधारः, भूतानि च न ममेति ये पश्यन्ति ते ब्रह्मविद्वरिष्ठाः। एतद्दृष्ट्या तु पूर्वोक्तब्रह्मविदः मूढा एव। अतो न विरोध इति।

**ननु** यथान्यायं पूर्वमुपपादितस्य मतस्य कथं प्रतिक्षेप इति चेद्? **उच्यते—** ब्रह्मण्यसङ्गस्वप्रकाशे कालत्रयेऽपि कार्यैः सह माया नास्त्येव, 'एकमेवाद्वितीयं ब्रह्म, नेह नानास्ति किञ्चन' इत्यादिशास्त्रात्। न च ज्ञानकाल एव नास्ति, अज्ञानकाले त्वस्त्येव, यथा रज्जुसर्पोऽध्यासकालेऽस्ति, रज्जुयाथात्म्यज्ञानकाल एव नास्तीति वाच्यम् ; ब्रह्मणो विकारित्वापत्तेः। प्रपञ्चसद्भावाभावाभ्यां हि विकारः प्राप्तो ब्रह्मणः। स हि न युज्यते। सदैकरूपस्याविक्रियस्य ब्रह्मणः विकारित्वे त्वनित्यमेव स्याद् ब्रह्म, लोके विकारिणो घटादेरनित्यत्वदर्शनात्। नित्यं हि ब्रह्म, सजातीयविजातीयस्वगतभेदशून्यमविक्रियं निर्विशेषचिन्मात्रमसङ्गं च। कथं तत्राज्ञानकाले वा प्रपञ्चस्य सद्भावः?

रज्जुसर्पदृष्टान्तोऽपि न युक्तः, रज्जौ सर्पस्यापि कालत्रयेऽभावात्। न ह्यध्यासात्प्राक्काले पश्चात्काले चासन् सर्पः अध्यासकाले भवितुमर्हति, यस्य रज्जौ सर्पभ्रमः आसीत् , स एव भ्रमनिवृत्त्यनन्तरं 'रज्जुरेवायं[१] न सर्पः; केवलमहं भ्रान्तोऽस्मी'ति हि प्रत्येति। न च भ्रमकाले रज्जुः सर्पाकारेण परिणत एवेति वाच्यम् ; क्षीरस्य दध्यात्मनेव रज्जोः सर्पाकारेण परिणन्तुं सामर्थ्याभावात्। सति तु तत्सामर्थ्ये भ्रमं विनापि परिणतैव भवेत्। न हि क्षीरं दध्यात्मना भ्रमकाले परिणमते, किन्तु प्रमाकाल एव, दध्नः प्रमात्वात्[२]। नापि भ्रमकाले रज्जावपूर्वः सर्प उदेतीति वाच्यम् ; सर्पोदयस्यैव भ्रमत्वात्। न च माध्यमिकवच्छून्यवादापत्तिः, सत्यब्रह्माभ्युपगमात्। न च रज्जावपूर्वः सर्प उदेतीति स्वसिद्धान्तभङ्गप्रसङ्ग इति वाच्यम् ; तस्याप्यत्रैव तात्पर्यात्। भ्रान्तदृष्ट्या सर्प उदेतीत्युक्तम् , न त्वभ्रान्तदृष्ट्येति सिद्धान्तात्।

न चैवं प्रपञ्चस्यात्यन्तापलापे विज्ञानवादापत्तिः, क्षणिकविज्ञानवादिनां तेषां सत्यज्ञानवादिनामस्माकं च भेदात्। बुद्धिस्थः प्रपञ्चो बहिःस्थ इवावभातीति विज्ञानवादिनः; वयं तु प्रपञ्चो न बुद्धिस्थः, नापि बहिःस्थः, किन्तु भ्रान्तदृष्ट्या बहिःस्थ इव प्रतिभातीति

---

१. **अयम्** पुरोवर्तिपदार्थः। इयमिति स्त्रीलिङ्गप्रयोगो युक्तः। एवमग्रेऽपि। २. 'प्रमाविषयत्वात्' इति पाठः स्यात्।

ऐश्वरम् **ईश्वरस्येममैश्वरं योगम् , आत्मनो याथात्म्यमित्यर्थः। तथा च श्रुतिरसंसर्गित्वादसङ्गतां दर्शयति– 'असङ्गो न**

आनन्दगिरिकृतव्याख्या

**ऽवधारणार्थः। भूतानामीश्वरे नैव स्थितिरित्यत्र हेतुमाह—**पश्येति। **आत्मनोऽसङ्गत्वं स्वरूपमित्यत्र प्रमाणमाह—**तथा चेति। **असङ्गश्चेद्**

भाष्यार्कप्रकाशः

वदामः। तस्मादस्माकं न विज्ञानवादापत्तिः।

न च 'सर्वं खल्विदं ब्रह्म' इति श्रुतिविरोधः, यद् रजतं सा शुक्तिरितिवद् भ्रान्तदृष्ट्या प्रतीयमानमिदं जगत् [१]न जगत् , किन्तु ब्रह्मैव, ब्रह्मण्येव तेषां जगद्भ्रान्त्युदयाद् रज्जौ सर्पभ्रान्त्युदयवदिति श्रुतितात्पर्यात्।

न चैवं प्रपञ्चस्यात्यन्तासत्त्वे शशश्रृङ्गवत्प्रपञ्चो व्यवहारयोग्यो न भवेदेवेति वाच्यम् ; व्यवहारस्यैवासत्त्वेन तद्योग्यत्वस्य का कथा? भ्रान्तदृष्ट्या तु व्यवहारोऽस्ति, तद्योग्यं जगच्चास्ति, न विद्वद्दृष्ट्या । शशश्रृङ्गादिकं तु भ्रान्तदृष्ट्याऽपि नास्तीति कथं तस्य भ्रान्त-दृष्टिसिद्धव्यवहारयोग्यत्वम्? यो यद्दृष्टिसिद्धः स हि तद्व्यवहारयोग्यः, यथा स्वप्नद्रष्टृदृष्टिसिद्धः स्वाप्नप्रपञ्चः स्वप्नद्रष्टृव्यवहारयोग्य इति।

तस्माद् ब्रह्मणि निष्प्रपञ्चे कालत्रयेऽपि प्रपञ्चो नास्त्येव। एवं प्रपञ्चस्याभावादेव प्रपञ्चे ब्रह्मास्तीति वक्तुं न शक्यते। न हि शशश्रृङ्गे किमपि वस्तु वर्तेत; शशश्रृङ्गं वा कस्मिंश्चिद् वस्तुनि। विद्वद्दृष्ट्या खलु शशश्रृङ्गतुल्यः प्रपञ्चः। भ्रान्तदृष्ट्या तु रज्जुसर्पतुल्यः। 'वन्ध्याकुमारवचने भीतिश्चेदस्ति किञ्चन। शशश्रृङ्गेन नागेन्द्रो मृतश्चेज्जगदस्ति तत्॥' इति तेजोबिन्दूपनिषत्प्रसिद्धेः। उक्तं चेदं गीतायामेव— 'नासतो विद्यते भावो नाभावो विद्यते सतः' इति। ततश्च एकस्मिन् काले सतो वस्तुनः कालान्तरेऽभावो न युक्तः, 'नाभावो विद्यते सतः' इत्युक्तत्वात्। तथा एकस्मिन् कालेऽसतो वस्तुनः कालान्तरे भावोऽपि न युक्तः, 'नासतो विद्यते भावः' इत्युक्तत्वात्। तदेवं ज्ञानकालेऽसतः प्रपञ्चस्य अज्ञानकाले चासत्त्वमयुक्तम्। न हि सत्यं ब्रह्म, ज्ञानकालेऽस्ति अज्ञानकाले नास्तीति वक्तुं शक्यते। अत एव हि ब्रह्मैव सत् , अन्यदसत् इति 'अविनाशि तु तद्विद्धी'त्यत्र प्रतिपादितम्। 'तत् सत्यमतोऽन्यदार्तम्' इति श्रुतिश्च। तस्मादज्ञानकालेऽपि नास्त्येव प्रपञ्चः, तत्सत्त्वं तु भ्रान्तिसिद्धमेव, निष्प्रपञ्चे ब्रह्मणि प्रपञ्चायोगादिति स्थितम्।

आध्यासिकः कश्चन प्रपञ्चो ब्रह्मण्यस्तीति पूर्वमतसंग्रहार्थः[२]। सोऽपि नास्तीत्युत्तरमतसंग्रहार्थः। ब्रह्मण्याध्यासिकप्रपञ्च-सत्त्ववादिनामेव मूढबुद्धित्वे **कृष्ण-शङ्करा**भ्युपगते सति वास्तवप्रपञ्चसत्त्ववादिनां द्वैतिनां विशिष्टाद्वैतिनां च मूढबुद्धित्वं किं वक्तव्यम्?

न चायं वादः **श्रीमदचलमतगुरुशिवरामदीक्षितीयः** इति वाच्यम् ; तन्मते अब्रह्मत्वादात्मनः। स्वरूपनाशस्यैव जीवस्य पुरुषार्थत्वप्रसङ्गाच्च। 'अहं ब्रह्मास्मी'ति श्रुतिविरुद्धं हि तत्। किञ्च परिपूर्णं माया चेति तत्त्वद्वयमप्युपगतवन्तः ते, वयं तु परिपूर्णम् एकमेवेति भेदात्। न च दृग् दृश्यमिति पदार्थद्वयं भवद्भिरभ्युपगतमिति वाच्यम् ; मूढबुद्धिविषयत्वात् तदभ्युपगमस्य। न हि तत्त्वविद्दृष्ट्या दृश्यं तत्त्वं भवितुमर्हति शशश्रृङ्गतुल्यम्। न च बन्धमोक्षादिव्यवस्थानुपपत्तिः, इष्टापत्तेः। उक्तं हि कैवल्योपनिषदि— 'न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः। न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता' इति। बद्धदृष्ट्यैव बन्धमुक्तिव्यवस्था, न तु विद्वद्दृष्ट्या, नित्यमुक्ते निष्प्रपञ्चे ब्रह्मणि तदयोगात्। न च गुरुशिष्यादिसम्प्रदायोच्छेदप्रसङ्गः, शास्त्रवैयर्थ्यं वा; अतिगुह्यस्यास्यार्थस्य गुरुशास्त्रे विना दुर्ज्ञेयत्वात्। 'गुरुशास्त्रे विनाऽत्यन्तं गम्भीरं ब्रह्म वेत्ति कः' इत्युक्तं हि **विद्यारण्यगुरुभिः**। न च - वेदशास्त्रवैयर्थ्यम् , तदर्थयज्ञाद्यनुष्ठानाभावादिति - वाच्यम् ; मूढार्थं तस्यावश्यकत्वात्। 'त्रैगुण्यविषया वेदाः' इत्युक्तमत्रैव। तस्मादात्मा न भूतस्थः; नापि भूतान्यात्मस्थानि; भूतानामभावादिति स्थितम्।

कस्मादभावो भूतानामिति चेद्? असंसर्गित्वादेवात्मनः। सत्सु भूतेषु तैः स्यादात्मनो हि संसर्गः कयाऽपि विधया। असंसर्गित्वे श्रुतिं प्रमाणयति— **असङ्गो न हि सज्जत इति**। आत्मेति शेषः। **मे ऐश्वरं योगं पश्य** ईश्वरस्य मम सम्बन्धिनं योगं पश्येत्यर्थः। योगशब्दस्य फलितार्थमाह— **याथात्म्यमिति**। 'न च मत्स्थानि भूतानि न चाहं तेष्ववस्थितः' इत्युक्तं निष्प्रपञ्चत्वरूपं मत्तत्त्वं पश्येत्यर्थः।

१. 'सर्वं ब्रह्मे'ति बाधायां सामानाधिकरण्यमिति भावः। द्र.ब्र.सू.भा. १.३.१ पृ. २७५। २. संक्षेपेणार्थः इति यावत्।

**हि सज्जते' (बृ.उ.३.९.२६) इति। इदं चाश्चर्यमन्यत् पश्य** भूतभृद् **असङ्गोऽपि सन् भूतानि बिभर्ति। न च भूतस्थः, यथोक्तेन न्यायेन दर्शितत्वाद् भूतस्थत्वानुपपत्तेः।[**ममात्मा**] कथं पुनरुच्यते असौ ममात्मेति? विभज्य देहादिसंघातं तस्मिन् अहङ्कारमध्यारोप्य लोकबुद्धिमनुसरन् व्यपदिशति— 'ममात्मा' इति, न पुनरात्मनः[१] आत्माऽन्यः इति लोकवदजानन्। तथा** भूतभावनो **भूतानि** भावयति **उत्पादयति वर्धयतीति वा भूतभावनः॥५॥**

आनन्दगिरिकृतव्याख्या

**ईश्वरः, तर्हि कथं 'मत्स्थानि भूतानी'त्युक्तम् , कथं च तथोक्त्वा 'न च मत्स्थानी'ति तद्विरुद्धमुदीरितम्? इत्याशङ्क्याह—** इदं चेति। **तर्हि भूतसम्बन्धः स्यादिति? नेत्याह—** न चेति। यथोक्तेन न्यायेन **असङ्गत्वेनेति यावत्। असङ्गतया वस्तुतो भूतासम्बन्धेऽपि कल्पनया तदविरोधान्न मिथो विरोधोऽस्तीति भावः। आत्मनः सकाशादात्मनोऽन्यत्वायोगात् कुतः सम्बन्धोक्तिरित्याशङ्क्याह—** असाविति। [विभज्येति]। **यथा लोको वस्तुतत्त्वमजानन् भेदमारोप्य ममायमिति सम्बन्धमनुभवति, न तथेह सम्बन्धव्यपदेशः, आत्मनि स्वतो भेदाभावात् , अतो भेदेऽसत्येव लोके सम्बन्धबुद्धिदर्शनमनुसरन् भगवानात्मनो देहादिसंघातं विभज्याहङ्कारं तस्मिन्नारोप्य असौ ममात्मेति भेदं व्यपदिशति। तथा च संघातस्य ममेति व्यपदेशात् ततो निकृ[ष्कृ]ष्टस्य स्वरूपस्यात्मशब्देन निर्देशान्न भूतस्थो ऽसावित्यर्थः। पूर्वोक्तासङ्गत्वाङ्गीकारेणैवात्मा भूतानि भावयतीत्याह—** तथेति॥५॥

भाष्यार्कप्रकाशः

पश्येति क्रियापदं पुनराकृष्याह— **इदं चाश्चर्यमन्यत् पश्येति**। वाक्यशेषोऽयम्। अन्यदित्यनेन पूर्वोक्तमेकमाश्चर्यमिति सूचितम्। प्रत्यक्षादिबहुप्रमाणगम्यस्य प्रपञ्चस्य सशास्त्रं सयुक्तिकं सानुभवम् अभावस्य प्रदर्शितत्वात् तस्याश्चर्यत्वमिति भावः। असङ्गोऽपि सन् भूतभृत् , भूतानि बिभर्तीति व्युत्पत्तिः। एवं भूतभृत् सन्नपि न च भूतस्थः। **यथोक्तेन** पूर्वोक्तेन न्यायेन भूतस्थत्वा-नुपपत्तेर्दर्शितत्वादित्यन्वयः। असंसर्गिणः क्वचिदप्याधेयभावेनावस्थितिर्न सम्भवतीति पूर्वोक्तन्यायः।

ननु स्वस्यैवात्मत्वाद् 'ममात्मा भूतभावनः' इति कथमुच्यत इत्याक्षिपति—**कथमिति**। समाधत्ते—**विभज्येति**। **देहादिसंघातं विभज्य** आत्मनः पृथक्कृत्य, **तस्मिन्** संघाते **अहङ्कारमध्यारोप्य** अहम्बुद्ध्यध्यासं कृत्वा **लोकबुद्धिमनुसरन् व्यपदिशति** यथा लोकः संघातेऽहम्बुद्ध्या 'अहं मनुष्यः' इति व्यवहरति, तादृशसंघाताद् विलक्षणं चात्मानं 'ममात्मे'ति, तद्वदित्यर्थः। लोकदृष्ट्या 'ममात्मे'ति निर्देश इत्यर्थः। ननु लोकबुद्धिमनुसरन्निति कथमुच्यते, स्वबुद्ध्यैवोक्तवानित्यत आह—**न पुनरिति**। न हि सर्वज्ञः कृष्णः **लोकवदजानन्** आत्मतत्त्वमविदन् ममात्मेति ब्रूयात्। लोकस्याज्ञानमेवाभिनीय दर्शयति—**आत्मन आत्माऽन्य इति**। मम पुस्तकमितिवद् ममात्मेति वचनं ह्यात्मनो मच्छब्दवाच्यादन्य आत्मा पुस्तकवदिति भेदज्ञानपूर्वकम्। तस्मान्ममात्मेत्यस्य अहमात्मेत्येवार्थः।

असङ्गस्यात्मनो युक्तमेवाभूतस्थत्वं, भूतभृत्त्वं तु विरुद्धमिति विरोधादाश्चर्यमिदमिति भावः। यद्वा भूतभृतोऽपि ममाभूतस्थत्वं विरुद्धम् , भूतान्यन्तःप्रविश्य बिभर्तीति हि भूतभृत्। न चान्तःस्थस्य कथं भरणमिति वाच्यम्; प्राणस्यान्तःस्थस्यापि देहभरणदर्शनात्। तस्माद् विरुद्धमिदमाश्चर्यमिति भावः। अथवा अभूतस्थस्य मम भूतभृत्त्वं विरुद्धम् , भूतान्तःस्थितिप्रयुक्तत्वाद् भूतभरणस्येति। अस्य च विरोधस्य परिहारश्चेत्थम्— असङ्गोऽप्ययं[हं] मायया भूतभृदिति, मायया भूतभृदप्यहं वस्तुतो न भूतस्थ इति, अभूतस्थोऽप्यहं मायया भूतभृदिति, तत्त्वविद्दृष्ट्या न भूतस्थोऽपि मूढदृष्ट्या भूतस्थत्वाद् भूतभृदहमिति वा।

**तथा** असङ्गाक्रियोऽपीत्यर्थः। वस्तुतो भूतानामेवाभावे इदं [भूतभृत्त्वं] भूतभावनत्वं चात्मनि मायया प्रतिभाति मूढदृष्टीनाम्। न च विदुषामप्यस्ति प्रपञ्चसाक्षात्कार इति वाच्यम् ; 'मध्याह्नार्कमरीचिकास्विव पयःपूरो यदज्ञानतः, खं वायुर्ज्वलनो जलं क्षितिरिति त्रैलोक्यमुन्मीलति। यत्तत्त्वं विदुषां निमीलति पुनः स्रग्भोगिभोगोपमं, सान्द्रानन्दमुपास्महे हृदि सदा वामार्धजानिं शिवम्'[२]॥ इति **कृष्णमिश्रो**क्तेः। [३]'मालाफणीव च निलीयति यत्प्रबोधादि'त्यन्यत्राप्युक्तेः। ब्रह्मात्मसाक्षात्कारशालिनां नास्ति पुनः प्रपञ्चसाक्षात्कारः,

१. आत्मनः स्वस्येत्यर्थः। स्वस्य आत्मा स्वस्मादन्यः इति लोको व्यपदिशति तत्त्वमजानन्। न तथेत्यर्थः। २. 'उपास्महे तदमलं स्वात्मावबोधं महः' इति मुद्रितः पाठः। ३. शिखामण्याख्यवेदान्तपरिभाषाव्याख्यागतमङ्गलपद्यैकदेशोऽयम्। निमीलतीति तत्र पाठः।

**यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान्।**
**तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥६॥**

**यथोक्तेन श्लोकद्वयेनोक्तमर्थं दृष्टान्तेनोपपादयन्नाह—** यथेति। **यथा लोके** आकाशस्थितः **आकाशे स्थितो** नित्यं **सदा वायुः सर्वत्र गच्छतीति** सर्वत्रगो महान् **परिमाणतः, तथा**[१] **आकाशवत् सर्वगते मयि असंश्लेषणैव स्थितानि** इति **एवम्** उपधारय **विजानीहि**॥६॥

आनन्दगिरिकृतव्याख्या

**सृष्टिस्थितिसंहाराणाम् असङ्गात्माधारत्वं 'मया ततमिदम्' इत्यादि**श्लोकद्वयेनोक्तोऽर्थः, **तं दृष्टान्तेनोपपादयन्नादौ दृष्टान्तमाहेति योजना।** सदा **इत्युत्पत्तिस्थितिसंहारकालो गृह्यते। आकाशादेर्महतोऽन्याधारत्वं कथम्? इत्याशङ्क्याह—** महानिति। **यथा सर्वगामित्वात् परिमाणतो महान् वायुराकाशे सदा तिष्ठति, तथा आकाशादीनि महान्त्यपि सर्वाणि भूतान्याकाशकल्पे पूर्णे प्रतीच्यसङ्गे परस्मिन्नात्मनि संश्लेषमन्तरेण स्थितानीत्यर्थः**॥६॥

भाष्यार्कप्रकाशः

यथा सुषुप्तौ सर्वेषाम् , यथा वा समाधौ योगिनामिति।

न च यावत्प्रारब्धं विदुषामपि देहादिप्रपञ्चोऽस्त्येवेति वाच्यम् ; 'यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात्। तद्वत् सत्यमविज्ञाय जगत् पश्यति मूढधीः॥ रज्जुखण्डे परिज्ञाते सर्परूपं न तिष्ठति। अधिष्ठाने तथा ज्ञाते प्रपञ्चे शून्यतां गते॥ देहस्यापि प्रपञ्चत्वात् प्रारब्धावस्थितिः कुतः। अज्ञानिजनबोधार्थं प्रारब्धमिति चोद्यते॥' इति नादबिन्दूपनिषदि दर्शनान्नास्ति विदुषः प्रारब्धादिकमिति ॥५॥

**यथेति**। नन्वसङ्गस्य तव वस्तुतोऽभूतस्थत्वेऽपि मायया वा कथं तदुपपत्तिरित्यमूमाशङ्कां दृष्टान्तेन परिहरतीत्याह— **यथेति। उक्तमर्थमिति**। असङ्गित्वभूतभृत्वादिरूपम्। **महानिति**। महत्परिमाण इत्यर्थः। न तु निरतिशयमहत्त्वम् , ब्रह्मनिष्ठत्वात् तस्येति सूचयितुमाह— **परिमाणत इति**। न तु स्वरूपत इति भावः। आकाशगस्य वायोर्यथा आकाशेन न संश्लेषः, तथा मत्स्थानां भूतानां मया न संश्लेषः। तथा च मायया मयि भूतानां सत्त्वेऽपि न ममासङ्गित्वस्य क्षतिः काऽपीति भावः। मूढदृष्टिमभ्युपेत्येदमुक्तम् ; वस्तुतस्तु मयि भूतानि माया वा कालत्रयेऽपि न सन्त्येव, अद्वितीयत्वान्ममासङ्गत्वाच्च।

यत्तु **रामानुजः** - अन्तर्यामिणा मया सर्वं ततम् , मदधीनस्थितिकत्वात् सर्वं मयि स्थितम् , तदधीनस्थितिकत्वाभावादहं न तेषु स्थितः। घटे जलानीव मयि भूतानि न स्थितानि। निरालम्बनेऽप्याकाशे मयैव धृतःसन् वायुर्यथा तिष्ठति, तद्वत् सर्वमपीति। **तदसत्**। अन्तर्यामी हि सर्वस्य जगतोऽन्तरेव व्याप्तुमीष्टे, न तु बहिः, अन्तर्यामित्वादेव। इयं चान्तरेवेश्वरस्य व्याप्तिः श्रुतिविरुद्धा, 'अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः' इति श्रुतेः। सर्वव्यापिन ईश्वरस्यान्तरेव व्याप्तिरिति व्याप्तिसङ्कोचस्यान्याय्यत्वाच्च। न चान्तर्यामिणोऽन्यः कश्चन बहिर्व्यापी विद्यते, तथा सति कश्चिदीश्वरोऽन्तर्यामी, कश्चित्तु बहिर्व्यापीतीश्वरद्वित्वप्रसङ्गात्।

नाप्यन्तर्याम्यधीनस्थितिकानि स्थावरजङ्गमात्मकभूतानि, तेषां जीवाधीनस्थितिकत्वात्। 'जीवापेतं वाव किल शरीरं म्रियते' इत्यादिशास्त्रात्। न चान्तर्याम्यपगमादेव शरीरमरणमिति वाच्यम् ; अचेतनेष्वप्यन्तर्यामिणः सत्त्वेन मृतशरीराद् भस्मनो वा ऽन्तर्यामिणोऽपगत्यसम्भवात्। 'यः पृथिव्यां तिष्ठन्' इत्याद्यन्तर्यामिब्राह्मणात्। न च जीवोऽप्यन्तर्याम्यधीनस्थितिक इति वाच्यम् ; नित्यस्य जीवस्य पराधीनस्थितिकत्वायोगात्। न च जीवः परतन्त्र इति वाच्यम् ; जीवगतपारतन्त्र्यस्य बुद्धिधर्मत्वात्। अचेतनं हि चेतनपरतन्त्रम् , चेतनस्तु स्वतन्त्र एव, चेतनत्वादेव। किञ्च यदि मूलकर्तुरीदृगर्थविवक्षा, तर्हि— 'मद्वशानि तु भूतानि न चाहं तद्वशः पुनः' इत्येव ब्रूयात्। घटे जलानीव मयि भूतानि न स्थितानीत्येतदप्ययुक्तम् , विश्वरूपे तस्मिन् तथैव भूतानां सत्त्वात्। तथा

१. 'सर्वाणि भूतानि' इति शेषः।

## सर्वभूतानि कौन्तेय ! प्रकृतिं यान्ति मामिकाम्।

**एवं वायुराकाश इव मयि स्थितानि सर्वभूतानि स्थितिकाले, तानि—** सर्वेति। **सर्वभूतानि कौन्तेय !** प्रकृतिं

आनन्दगिरिकृतव्याख्या

**आकाशे वाय्वादिस्थितिवद् आकाशादीनि भूतानि स्थितिकाले परमेश्वरे स्थितानि चेत् , तर्हि प्रलयकाले ततोऽन्यत्र तिष्ठेयुरित्याशङ्क्याह—** एवमिति। **प्रकृतिशब्दस्य [1]स्वभाववचनत्वं व्यावर्तयति—** त्रिगुणात्मिकामिति। **सा च 'अपरेयम्' इति प्रागेव**

भाष्यार्कप्रकाशः

विश्वरूपस्य दर्शयिष्यमाणत्वात्। तव मते चिदचिद्विशिष्टस्य साकारस्यैवेश्वरत्वेन विश्वरूपस्यापीश्वरत्वात्।

तथा सर्वाधारस्य स्वयमाधारान्तरानपेक्षस्य वायोर्निरालम्बनेऽप्याकाशे स्थितिसम्भवात् किमीश्वरधृतत्ववर्णनेन? यदि वायुरीश्वरेणाधृतः स्यात् , तर्हि निरालम्बने आकाशे अस्थित्वा क्व वर्तेत? तद् ब्रूहि! येन वायोराकाशस्थित्यर्थमीश्वरधृतत्वमुच्येत।

यथा वायुराकाशस्थितस्तथा भूतानि मत्स्थानीत्येतावत एव मूलस्य स्थितौ, मयैव धृत इति मूलातिरिक्तांशकल्पनं तव हि निर्मूलम् अप्रमाणम् अयुक्तं च, 'मया धृतो यथा खस्थो वायु'रिति मूलस्याभावात्। दार्ष्टान्तिकेऽपि 'तथा मत्स्थानि भूतानि मद्धृतानीति भावये'ति मूलस्याभावात्। आकाशस्थितस्य वायोरीश्वरधृतत्ववदीश्वरस्थितस्य जगत ईश्वरधृतत्वमिति वचनस्याप्ययुक्तत्वात्। न हि दृष्टान्ते ईश्वरधृतो वायुरीश्वरे स्थितः, किन्तु ईश्वरादन्यस्मिन्नाकाशे एव। दार्ष्टान्तिके तु ईश्वरधृतानि भूतानीश्वर एवेति कथमनयोरर्थयोः दृष्टान्तदार्ष्टान्तिकभावः? आन्तरेणेश्वरेण धृतानां कथं वेश्वरे स्थितिः? बहिरीश्वरस्यैवाभावात्। उक्तं हि प्राक् त्वया - अन्तर्यामिणा मया ततमिति। यदि तु बहिरप्यस्तीश्वरस्तर्हि स भवेदेव भूतानामाधारो वायोरिवाकाश इति किमीश्वरधृतत्ववर्णनेन?

किञ्च ईश्वरेण धृतत्वादेव वायुराकाशे वर्तत इत्युक्तम् , स चाकाशः केन धृतः? कुत्र वर्तते? स एव ह्यज्ञातांशः पुनर्वक्तव्यः सर्वज्ञेन। वायोराकाशसत्त्वं तु सर्वविदितमेव, प्रत्यक्षत्वात्। यदि त्वाकाश ईश्वरेण धृत ईश्वरे वर्तत इति मतं, तर्हि स एवार्थ इह दृष्टान्तीकर्तव्यः, दार्ष्टान्तिकानुरोधात्। तत्परित्यागे कारणं नोपलभामहे।

**यद्य[द्]प्यनेनोक्तम्** - ममात्मा मम सङ्कल्पः इति, **तदप्यसत्** - आत्मशब्दस्य मुख्यार्थपरित्यागे कारणाभावात्। भूतभावनक्रियां प्रति कर्ता ह्यात्मा, सङ्कल्पस्तु हेतुरेवेति कर्तारमात्मानं विहाय सङ्कल्पस्य भूतभावनकर्तृत्ववर्णनं चायुक्तम्। सत्यामेतद्विवक्षायां व्यासो ब्रूयाद् - 'आत्मना भूतभावनः' इति।

न च मत्सङ्कल्प एव भूतभावनः, किम्पुनरहमित्यर्थापत्तिसूचनाय 'ममात्मा भूतभावनः' इत्युक्तमिति वाच्यम् ; सङ्कल्पातिरेकेणेश्वरस्य भूतभावनत्वासिद्धेः। 'तदैक्षत बहु स्यां प्रजायेये'ति सङ्कल्पपूर्वकत्वश्रवणात् सृष्टेः। न हीश्वरः कुलाल इव दण्डचक्रादिव्यापारेण घटम् , केनचिद् व्यापारेण जगन्निर्माति, किन्तु सङ्कल्पादेव। येन मम सङ्कल्प एव भूतभावनः, किम्पुनरहमित्युच्येत। सङ्कल्पेनैवाहं भूतभावन इत्युक्तेऽपि तादृशार्थापत्तेः सुलभत्वाच्च।

तस्मान्मम वसुदेवसुतस्य दृश्यमानावयवसन्निवेशवतः पुरुषस्य आत्मा स्वरूपं सच्चिदानन्दलक्षणं परमात्मेति **शङ्करोक्त** एव समीचीनार्थः। न च षष्ठ्यनुपपत्तिः, कृष्णस्यैवात्मत्वादिति वाच्यम् ; दर्शितविधया तत्परिहारात्। कार्यकरणसंघातात्मत्वेन सच्चिदानन्दात्मकत्वेन च विवक्षाभेदेन ममात्मेति षष्ठ्यन्तप्रथमान्तपदद्वयनिर्देशादिति॥ ६॥

**सर्वेति। प्रकृतिं यान्ति** मायायां निलीयन्त इत्यर्थः। हे कौन्तेय ! सर्वभूतानि कल्पक्षये मामिकां प्रकृतिं यान्ति, कल्पादावहं पुनस्तानि विसृजामि।

**ननु** यस्य यत्र लयस्तस्य तस्मादेवोदयस्तत्रैव स्थितिरिति निष्कर्षः, घटस्य मृदि लयस्थित्योर्मृदः उदयस्य च दर्शनात्। प्रकृते तु भूतानां प्रकृतौ लयः, परमात्मनि स्थितिरिति चोच्यते, कथं पुनरस्य विरोधस्य परिहार इति चेत्? **उच्यते—** भूतानां परमात्मनि

---

१. 'शैत्यं हि यत् सा प्रकृतिर्जलस्य' (रघु. ५.५४) 'प्रकृतेर्वशात्' (भ.गी. ९-८) इत्यादौ प्रकृतिशब्दस्य स्वभाववाचकतया प्रयोगस्य दृष्टत्वात् शङ्का।

**कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥७॥**
**प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।**
**भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥८॥**

**त्रिगुणात्मिकामपरां निकृष्टां यान्ति** मामिकां **मदीयां** कल्पक्षये **प्रलयकाले।** पुनर्भूयः तानि **भूतानि उत्पत्तिकाले** कल्पादौ विसृजामि **उत्पादयामि अहं पूर्ववत्** ॥७॥

**एवमविद्यालक्षणाम्—** प्रकृतिमिति। **प्रकृतिं** स्वां **स्वीयाम्** अवष्टभ्य **वशीकृत्य विसृजामि पुनः पुनः प्रकृतितो जातं** भूतग्रामं **भूतसमुदायम्** इमं **वर्तमानं** कृत्स्नं **समग्रम्** अवशम् **अस्वतन्त्रम् , अविद्यादिदोषैः परवशीकृतं** प्रकृतेर्वशात् **स्वभाववशात्** ॥८॥

आनन्दगिरिकृतव्याख्या

**सूचितेत्याह—** अपरामिति। **तस्याश्च ईश्वराधीनत्वेनास्वातन्त्र्यमाह**[१]**—** मदीयामिति। **प्रलयकाले भूतानि यथोक्तां प्रकृतिं यान्ति चेद् उत्पत्तिकालेऽपि ततस्तेषामुत्पत्तेः ईश्वराधीनत्वं भूतसृष्टेर्न स्यादित्याशङ्क्याह—** पुनरिति॥७॥

**तर्हि कीदृशी प्रकृतिः? सा च कथं सृष्टावुपयुक्तेत्याशङ्क्याह—** एवमिति। **संसारस्यानादित्वद्योतनार्थं** पुनःपुनरित्युक्तम्। **भूतसमुदायस्य अविद्याऽस्मितादिदोषपरवशत्वे हेतुमाह—** स्वभाववशादिति॥८॥

**यदि प्राकृतं भूतग्रामं स्वभावादविद्यादितन्त्रं विषमं विदधासि, तर्हि तव विषमसृष्टिप्रयुक्तं धर्मादिमत्त्वमित्यनीश्वरत्वापत्तिरिति**

भाष्यार्कप्रकाशः

स्थितिर्मायाद्वारैव, न तु स्वतः, निष्प्रपञ्चत्वात् तस्य। तथा च परमात्मनि मायाऽस्ति; तस्यां तु भूतानि स्थितानि; तस्यामेव लीयन्ते; तस्या एव जायन्त इत्यविरोधः।

न च मायायाः सत्त्वे ब्रह्मणः सद्वितीयत्वापत्तिः, अग्निशक्त्याऽग्नेरिव मायया स्वशक्त्या परमात्मनः सद्वितीयत्वायोगात्। यदि ब्रह्मणः पृथग् निरूपयितुं शक्या स्यान्माया, तर्हि तया सद्वितीयत्वं स्याद् ब्रह्मणः, न तु तदस्ति। न चैवं मायाया एव जगज्जन्मस्थितिलयहेतुत्वे 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतिः ब्रह्मलक्षणं [ब्रह्मलक्षणबोधिका] न स्यादिति वाच्यम् ; जगदाकारपरिणतमायाऽधिष्ठानत्वेन ब्रह्मणि लक्षणसमन्वयात्।

एवं मायाद्वारेणैवेश्वरस्य भूताधारत्वम् , न तु स्वत इति कृत्वैव 'मत्स्थानि भूतानी'ति, 'न च मत्स्थानि भूतानी'ति च प्रोक्तम्॥७॥

**प्रकृतमिति**। अहं स्वां प्रकृतिमवष्टभ्य प्रकृतेर्वशादवशमिमं कृत्स्नं भूतग्रामं पुनःपुनर्विसृजामि। कुतः प्रकृतिमवष्टभ्य विसर्जनं भूतग्रामस्य? अत आह— **प्रकृतितो जातमिति**। इदमुपलक्षणं प्रकृत्यां लीनमित्यस्य। भूतग्रामलयोदययोः , प्रकृत्याधारत्वात् प्रकृत्याश्रयणं विना नेश्वरस्य भूतग्रामसर्जनं सम्भवतीति भावः। न चैवमीश्वरस्येश्वरत्वभङ्गः , प्रकृतिवशीकरणस्यैवेश्वरत्वात्। जीवो हि प्रकृतिपरतन्त्रः। तस्मादीश्वरः स्वमायया सर्वं जगत् प्रतिकल्पं पुनःपुनरुत्पादयति, प्रतिप्रलयं च पुनःपुनर्मायायां विलापयति। एवमपि विचित्रप्राणिसर्गप्रयुक्तवैषम्यनैर्घृण्ये नेश्वरस्येत्याह— **प्रकृतेर्वशादवशमिति**। **प्रकृतिः** स्वभावो धर्माधर्मसंस्कारः प्राक्तनजन्मार्जितः आत्मनिष्ठः कर्मपर्यायः। स्वस्वकर्मानुगुणं सृजतः ईश्वरस्य न वैषम्यादिदोषप्रसक्तिरिति भावः॥८॥

---

१. **अस्वातन्त्र्यमाहेति**। अत एव सांख्याभिमतायाः त्रिगुणात्मकप्रकृतेः सकाशादस्याः वैलक्षण्यम्। सांख्यैस्तस्याः स्वतन्त्रत्वाङ्गीकारात्। तदुक्तम्— 'तदधीनत्वादर्थवत्' (ब्र.सू. १-४-३) इति। अपिच 'भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम्' (भ.गी. १३-३४) इत्यादौ प्रकृतेः ज्ञानेन निवृत्त्यभिधानात् ज्ञान-निवर्त्यत्वेनापि वैलक्षण्यं बोध्यम्।

**न च मां तानि कर्माणि निबध्नन्ति धनञ्जय !।**
**उदासीनवदासीनमसक्तं तेषु कर्मसु ॥९॥**

**तर्हि तस्य ते परमेश्वरस्य भूतग्राममिमं विषमं विदधतस्तन्निमित्ताभ्यां धर्माधर्माभ्यां सम्बन्धः स्यादिति इदमाह भगवान्—** न च मामिति। **न च** माम् [१]**ईशं** तानि **भूतग्रामस्य विषमविसर्गनिमित्तानि कर्माणि निबध्नन्ति धनञ्जय!। तत्र कर्मणामसम्बद्धत्वे कारणमाह—** उदासीनवदासीनं **यथोदासीन उपेक्षकः कश्चित् तद्वद् आसीनम् आत्मनोऽविक्रियत्वाद् ,** असक्तं **फलासङ्गरहितम् अभिमानवर्जितम् 'अहं करोमी'ति तेषु कर्मसु। अतोऽन्यस्यापि कर्तृत्वाभिमानाभावः फलासङ्गाभावश्च** [२]**असंबन्धकारणम्। अन्यथा कर्मभिर्बध्यते मूढः कोशकारवदित्यभिप्रायः॥९॥**

आनन्दगिरिकृतव्याख्या

**शङ्कते—** तर्हीति। **तत्रेति सप्तम्या परमेश्वरो निरुच्यते। ईश्वरस्य फलासङ्गाभावात् कर्तृत्वाभिमानाभावाच्च कर्मासम्बन्धवद् ईश्वरादन्यस्यापि तदुभयाभावो धर्माद्यसम्बन्धे कारणमित्याह—** अतोऽन्यस्येति। **यदि कर्मसु कर्तृत्वाभिमानो वा कस्यचित्** [३]**कर्मफलसङ्गो वा स्यात् , तत्राह—** अन्यथेति॥९॥

भाष्यार्कप्रकाशः

**नेति**। ननु चौर्यसेवादिकर्मानुगुणचोरभृत्यादिशिक्षणरक्षणादिवशाद् राज्ञ इव, कर्मानुगुणविषमभूतसृष्टिवशादीश्वरस्य धर्माधर्मादिसम्बन्धः स्यादिति शङ्कते— **तर्हीति**। **विषम**मिति क्रियाविशेषणम्। **तन्निमित्ताभ्यां** विषमभूतसर्गनिमित्ताभ्याम्। हे धनञ्जय! उदासीनवदासीनं तेषु कर्मस्वसक्तं मां तानि कर्माणि न च निबध्नन्ति; **न च** नैवेत्यर्थः। तानि कानीत्यत आह— **भूतेति**। विषमसर्गस्य निमित्तानि भूतग्रामस्य सम्बन्धीनि कर्माणि पूर्वप्रपञ्चार्जितानि अदृष्टानि पुण्यापुण्यरूपाणि मां परमेश्वरं न निबध्नन्ति, किन्तु भूतग्राममेव निबध्नन्ति। सुखदुःखादिसंसारसम्पादनद्वारेति भावः।

यद्यप्यन्यदीयकर्मभिरन्यस्य बन्धः शङ्कितुमयुक्तः, तथापि अन्यदीयकर्मानुगुणस्वव्यापारैः स्वस्य बन्धः स्यादिति शङ्कयेद-मुक्तम्। ततश्च भूतग्रामसम्बन्धिकर्माणि तदनुगुणविषमसृष्टिद्वारा नेश्वरस्य बन्धकानीति सिद्धम्। पूर्वप्रपञ्चार्जितभूतग्रामकर्मानुगुणानि विषमाणि भूतग्रामसृष्ट्यादीनि कर्माणि नेश्वरं निबध्नन्तीति परमार्थः।

**तत्र** एवं सति **कर्मणां** सृष्ट्यादिकर्मणां, सृष्ट्यादिव्यापारहेतुभूतग्रामादृष्टाख्यकर्मणामिति वा। **अबन्धकत्वे** धर्माधर्मादिसंसारा-सम्पादकत्वे। उदासीनवदासीनमित्यनेन न तूष्णीं स्थितिर्विवक्षिता , निष्क्रिये आत्मनि तूष्णीमासनरूपक्रियाया अप्ययोगात्। किन्तु यथा द्वयोर्विवदमानयोः चित्तक्षोभादिकं विकारं भजमानयोःसतोः उदासीनोऽन्यस्तत्र न कञ्चिद् विकारं भजते, तद्वदीश्वरोऽपीत्ययमर्थोऽत्र विवक्षित इत्याह - **आत्मनोऽविक्रियत्वादिति**। अविक्रियात्मस्वरूपाभिज्ञत्वादविक्रियमित्यर्थः। अनेन च ईश्वरस्येव जीवस्यापि यद्यप्यात्मा अविक्रियस्तथापि जीवस्तदनभिज्ञत्वाद् विक्रियत इवेति सूचितम्।

**असक्तमिति**। कर्मस्वासङ्गो हि द्विविधः - फलासङ्गरूपः, कर्तृत्वाभिमानरूपश्च। तदुभयरहितमित्याह - **फलेति**। अभिमानस्याकारं दर्शयति - **अहं करोमीति**। तेषु कर्मस्वहं करोमीत्यभिमानवर्जितमित्यन्वयः। **कर्मस्विति**। सृष्ट्यादिव्यापारेषु। **अत इति**। कर्मस्वसक्तत्वेनेश्वरस्य कर्मबन्धाभावादित्यर्थः। **असम्बन्धः** धर्माधर्मादिसंसारासम्बन्धः।

**अन्यथेति**। कर्मस्वसङ्गाभाव इत्यर्थः। कर्मसु सङ्गसत्त्वे इति वा। **बध्यते** संसारं प्राप्यत इत्यर्थः। **मूढ** आत्मस्वरूपानभिज्ञः। अनात्मन्यात्माभिमानशालीति वा। **कोशकारवदिति**। कोशकारः कीटविशेषः[४] । स हि स्वबन्धकं कोशं तनोति, रन्ध्राभावात् तत्रैव कोशे म्रियते। तद्वज्जीवः कर्मसु सङ्गं कुरुते, संसारमापद्यते च॥९॥

---

१. 'ईश्वरम्' इति पा.। २. 'अबन्धकारणम्' इति पा.। ३. 'फलासङ्गो' इति पा.। ४. अत्र मुद्रितपुस्तके ('आन्ध्रे गव्वपुरुगु') इति अधिकः पाठः।

## मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्।
## हेतुनाऽनेन कौन्तेय जगद् विपरिवर्तते ॥१०॥

**तत्र 'भूतग्राममिमं विसृजामि' 'उदासीनवदासीन'मिति च विरुद्धमुच्यत इति, तत्परिहारार्थमाह—** मयेति। **मया सर्वतो दृशिमात्रस्वरूपेण अविक्रियात्मना** अध्यक्षेण **मम माया त्रिगुणात्मिकाऽविद्यालक्षणा** प्रकृतिः सूयते **उत्पादयति** सचराचरं **जगत्। तथा च मन्त्रवर्णः– 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च'(श्वे.उ.६.११) इति** । हेतुना **निमित्तेन** अनेन **अध्यक्षत्वेन, कौन्तेय !**

आनन्दगिरिकृतव्याख्या

**ईश्वरे स्रष्टृत्वमौदासीन्यं च विरुद्धमिति शङ्कते—**तत्रेति। **पूर्वग्रन्थः सप्तम्यर्थः। विरोधपरिहारार्थमुत्तरश्लोकमवतारयति—** तदिति। **तृतीयाद्वयं समानाधिकरणमित्यभ्युपेत्य व्याचष्टे—**मयेत्यादिना। **प्रकृतिशब्दार्थमाह—**ममेति। **तस्या अपि ज्ञानत्वं व्यावर्तयति**[१] **—**त्रिगुणेति। **पराभिप्रेतं प्रधानं व्युदस्यति—** अविद्येति। **साक्षित्वे प्रमाणमाह—** तथा चेति। **मूर्तित्रयात्मना भेदं वारयति—** एक इति। **अखण्डं जाड्यं प्रत्याह—** देव इति। **आदित्यवत् ताटस्थ्यं प्रत्यादिशति—** सर्वभूतेष्विति। **किमिति तर्हि सर्वैर्नोपलभ्यते? तत्राह—** गूढ इति। **बुद्ध्यादिवत् परिच्छिन्नत्वं व्यवच्छिनत्ति—** सर्वव्यापीति। **तर्हि नभोवद् अनात्मत्वम्? नेत्याह—** सर्वभूतेति। **तर्हि तत्र तत्र कर्मतत्फलसम्बन्धित्वं स्यात्? तत्राह—** कर्मेति। **सर्वाधिष्ठानत्वमाह—** सर्वेति। **सर्वेषु भूतेषु सत्तास्फूर्तिप्रदत्वेन सन्निधिः** वासोऽत्रोच्यते। **न केवलं कर्मणामेवायमध्यक्षः, अपि तु तद्वतामपीत्याह—** साक्षीति। **दर्शनकर्तृत्वशङ्कां** [२]**शातयति—** चेतेति। **अद्वितीयत्वं** केवलत्वम्।

भाष्यार्कप्रकाशः

**मयेति**। ननु भूतग्रामस्य विषमोऽपि सर्गः आत्मनोऽविक्रियत्वङ्गमीश्वरं न निबध्नातीत्युक्तं न युक्तम् , आत्मनः सति अविक्रियत्वे ईश्वरो भवतु आत्मनोऽविक्रियत्वङ्गः। तदेव न सम्भवति, 'भूतग्राममिमं कृत्स्नं विसृजामी'ति भूतसर्जनरूपविकारस्यात्मनि प्रोक्तत्वात्। न हि क्रियावान् आत्मा विकाररहितः स्यात्। उदासीनेऽपि विवादादिक्रियाराहित्यं हि विकाराभावे हेतुः। तस्माद् अविक्रियत्वं भूतसर्गादिकर्तृत्वं चेति विरुद्धधर्मद्वयस्यात्मनि सामानाधिकरण्यं न सङ्गच्छत इत्याक्षिपति— **तत्रेति**। **तत्र** पूर्वोक्तार्थे।

मया अध्यक्षेण सता प्रकृतिः सचराचरं सूयते। हे कौन्तेय! अनेन हेतुना जगद् विपरिवर्तते। दृशिमात्रं चैतन्यमेव स्वरूपं यस्य तेन **दृशिमात्रस्वरूपेण**। **अध्यक्षः** प्रभुः,साक्षीति यावत्। यथा देहे गच्छति सति देहधर्मं गमनं देहिन्यारोप्य देही गच्छतीति प्रत्येति लोकः, तथा प्रकृत्यां सृष्टिं कुर्वाणायां प्रकृतिधर्मं सर्गं प्रकृतिमति मायिनीश्वरे आरोप्य 'सृजति जगदीश्वरः' इति वदति शास्त्रविज्जनः। तथा च प्रकृत्यामेव क्रिया, न त्वात्मनीति क्रियाऽभावाद् आत्मा भवत्यविक्रियः। एवमविक्रियमात्मानं वेत्तीति ईश्वरो भवति उदासीनवदासीनः। स्रष्टृप्रकृतिसाक्षित्वाद् ईश्वरस्य स्रष्टृत्वव्यपदेशश्चेति न कश्चिद् विरोध इति समाधानार्थः।

**सूयते** उपलक्षणमिदं रक्षतिहरत्योः[३]। चराणि जङ्गमानि मनुष्यादीनि, अचराणि स्थावराणि तर्वादीनि, तत्सहितं सचराचरम्। सृष्ट्यादिषु ईश्वरः साक्ष्येव, न कर्ता, प्रकृतिरेव कर्त्रीत्युक्तार्थे श्रुतिं प्रमाणयति— **एक इति**। **गूढः** दुर्विज्ञेयत्वेन स्थितः। **कर्माध्यक्षः** अकर्मवश्यः। **अधिवासः** आधारः। **चेता** चेतनः। चकाराद् निष्क्रियः। अनेन मन्त्रवर्णेन साक्षित्वे सिद्धे परमेश्वरस्य, अगतिकत्वात् कर्तृत्वं पतितं प्रकृत्यामिति बोध्यम्। 'अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपा'मित्यादयस्तु साक्षात् कर्तृत्वं बोधयन्ति प्रकृत्याः इति वेद्यम्।

**ननु** यद्येवं जगज्जन्मादिहेतुत्वं प्रकृतेः स्यात् , तर्हि 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतेः प्रकृतेरेव लक्षणं स्यात् , न चेष्टापत्तिः, 'ईक्षतेर्नाशब्द'मिति प्रकृतेस्तन्निरासात्। 'मूलप्रकृतिरविकृति'रिति साङ्ख्यशास्त्रस्यैव सिद्धान्तत्वप्रसङ्गाच्च। उक्तं हि तत्र प्रकृतेर्जगत्कर्तृत्वं, पुरुषस्यौदासीन्यं चेति चेत्? **मैवम्** ; ईश्वराधिष्ठितप्रकृतेः प्रकृतिसंसृष्टेश्वरस्य वा जगज्जन्मादिहेतुत्वं भवितुमर्हति, न

१. प्रकृतिशब्दस्य मायापदेन विवरणे मायापदस्य 'माया प्रज्ञा वयुनम्' इति ज्ञानेऽपि प्रयोगादियं शङ्का। २. निराकरोतीत्यर्थः। ३. रक्षणस्य संहरणस्य चेत्यर्थः।

आनन्दगिरिकृतव्याख्या

**धर्माधर्मादिराहित्यमाह—** निर्गुण इति। **किं बहुना? सर्वविशेषशून्य इति चकारार्थः। उदासीनस्यापीश्वरस्य साक्षित्वमात्रं निमित्तीकृत्य जगदेतत् पौनःपुन्येन सर्गसंहारावनुभवतीत्याह—** हेतुनेति। **कार्यवत् कारणस्यापि साक्ष्यधीना प्रवृत्तिरिति वक्तुं** [१]**व्यक्ताव्यक्तात्मक-**

भाष्यार्कप्रकाशः

तु केवलप्रकृतेः, केवलेश्वरस्य वा, तस्याः जडत्वात् , तस्य चिन्मात्रत्वाच्च। न हि जडायाः सङ्कल्परूपं ज्ञानं सम्भवति; नापि चिन्मात्रस्य मायावृत्तिरूपः सङ्कल्पः सम्भवति।

तत्र साङ्ख्याः केवलप्रकृतेरेव जगद्धेतुत्वं वदन्तीति नास्माकं साङ्ख्यमतप्रवेशदोषः; केवलेश्वरस्य सृष्ट्यादिहेतुत्वं वयं निषेधाम इति न श्रुतिविरोधश्च। 'यतो वा' इति श्रुतिर्हि मायिनमीश्वरं जगद्धेतुं ब्रूते। न च - मायाद्वारा ब्रह्मापि जगत्कारणं ब्रूते श्रुतिरिति - वाच्यम्; तस्यास्माकमिष्टत्वात्। ब्रह्मणि केवले सृष्ट्यादिक्रियाऽयोगादेव हि मायाया द्वारकारणत्वमभ्युपेयते। तस्मादीश्वरप्रकृत्योरविवेक एव ईश्वरस्य जगत्कर्तृत्वं, यथा देहदेहिनोरविवेक एव देहिनो गन्तृत्वम्। सति तु विवेके ईश्वरो नैव कर्ता, यथा देही नैव गन्ता। प्रकृतिरेव कर्त्री, यथा देह एव गन्ता इति स्थितम्।

न च - मायावच्छिन्नचैतन्यस्येश्वरत्वात् प्रकृतिविवेके न सिध्येदीश्वर एवेति - वाच्यम् ; मायावच्छिन्नत्वरूपेश्वरत्वस्यासिद्धावपि चैतन्यरूप ईश्वरः सिद्ध एवेति। ईश्वरस्य स्वस्वरूपं हि चैतन्यमात्रमेव; मायावच्छिन्नत्वं त्वाध्यासिकरूपमेव, मायायाश्चैतन्ये अध्यस्तत्वात्। जीवस्यापि चैतन्यमेव स्वस्वरूपम् ; अन्तःकरणावच्छिन्नत्वं त्वाध्यासिकमेव, अन्तःकरणस्य चैतन्येऽध्यस्तत्वात्।

एवं चैतन्यमात्ररूपत्वादेव जीवेश्वरयोरैक्यं ब्रुवन्ति श्रुतयः तत्त्वमस्यादयः। अत एवेहापि 'एको देवः' इत्युक्तम्। एक एव हि जीवेश्वरयोरात्मा चैतन्यलक्षणः। आत्मा हि स्वरूपम्। तस्माच्चैतन्यलक्षणस्यात्मनोऽकर्तृत्वेनाविक्रियत्वाद् उदासीनवदासीन एवेश्वरः। जगत्कर्तृत्वं तु प्रकृतिगतं प्रकृतिसङ्गाद् आत्मनीश्वरेऽध्यस्तमेवेति स्थितमीश्वरस्याविक्रियत्वमात्मनः।

श्लोकस्योत्तरार्धं व्याख्याति— **हेतुनेति। अध्यक्षत्वेनेति**। ईश्वरस्याध्यक्षत्वेनेत्यर्थः। इदानीं जगद् व्यक्तात्मकं स्फुटस्वरूपम् , प्रलये त्वस्फुटत्वादव्यक्तात्मकम्। अनेन च प्रलयेऽपि न नाशः सम्भवति भूतग्रामस्येति सूचितम् , सूक्ष्मरूपेण तदानीमपि सत्त्वादिति। **विपरिवर्तते** विशेषेण परिवृत्तिं परिभ्रमणं प्रतिपद्यते। व्यक्तावस्थं जगद् अव्यक्तावस्थं भवति; तच्च पुनर्व्यक्तावस्थं भवतीत्येवं कुलालचक्रवज्जगत् परिभ्रमतीत्यर्थः। केवलायाः प्रकृतेः जडत्वेन जगद्विपरिवर्तनासम्भवात् साक्षिण्यध्यक्षे मयि प्रकृतिमधितिष्ठति सति प्रकृतिः जगद् विपरिवर्तयतीति परमार्थः। चित्प्रतिबिम्बसहिता बुद्धिर्यथा जडाऽपि चेतनीभूय पश्यामि शृणोमीत्येवं व्यवहरति, तद्वच्चित्प्रतिबिम्बसहिता प्रकृतिर्जडाऽपि चेतनीभूय सृष्ट्यादिव्यवहारं करोतीति भावः। समष्ट्यज्ञानं **प्रकृतिः**, व्यष्ट्यज्ञानं तु **बुद्धिः**। अत एव सर्वव्यापिनी प्रकृतिः, परिच्छिन्ना तु बुद्धिरिति विवेकः।

**एतेन** ईश्वरस्याध्यक्षत्वं नाम प्रकृतौ प्रतिफलनमिति **सिद्धम्**। ईश्वरे प्रकृत्यां प्रतिफलत्येव प्रकृतेः सृष्ट्यादिसामर्थ्यसम्भवस्योक्तत्वात्। **यद्वा** अध्यक्षत्वं प्रेरकत्वम्। तच्च लोहायस्कान्तन्यायेनेति नेश्वरस्य विकारप्रसङ्गः। इदं च प्रेरणमन्तःप्रवेशपूर्वकमेव, 'यः प्रकृतौ तिष्ठन्' इत्याद्यन्तर्यामिब्राह्मणात्। इदं चेश्वरस्य प्रकृत्यामन्तःप्रवेशनं प्रतिबिम्बरूपेणैव, स्वस्वरूपेण तु प्रवेशात् प्रागेव सिद्धत्वात्। परिपूर्णं हि चैतन्यं सर्वव्यापि। एवं च ईश्वरः प्रतिबिम्बरूपेण प्रकृत्यां प्रविश्य तां सृष्ट्यादिषु नियमयतीत्यध्यक्षस्तस्या इति फलितम्। **अथवा** अध्यक्षत्वं प्रभुत्वम्। प्रकृतिं सर्वेश्वरीं स्ववशीकृत्य राज्यश्रियमिव राजा, तया सृष्ट्यादिलीला निर्वर्तयतीति प्रकृत्यध्यक्ष ईश्वरः। **यद्वा** अध्यक्षयति प्रत्यक्षीकरोति सर्वं स्वत एवेत्यध्यक्षः साक्षी। ईश्वरो हि मायया सर्वं साक्षात्करोति, मायां तु स्वरूपभूतचैतन्येनैव, अज्ञानस्य साक्षिप्रत्यक्षसिद्धत्वात् , सुषुप्तावज्ञानस्य साक्षिणाऽनुभूयमानत्वादिति सिद्धमीश्वरस्य मायासाक्षित्वम्। एवमीश्वरे साक्षित्वेन तिष्ठति सत्येव माया जगद्व्यापारं विधत्ते। यथा राजनि साक्षित्वेन तिष्ठति सति सेना युद्धव्यापारं विधत्ते, तद्वत्। जडत्वेन स्वतोऽसमर्थाया मायाया ईश्वरसाक्षात्कारवशाच्चैतन्यलाभेन सृष्ट्यादिसामर्थ्यसिद्धिरिति भावः।**अथवा** अध्यक्षत्वमधिष्ठातृत्वम्। जडाऽपि प्रकृतिरीश्वराधिष्ठानवशाज्जगद् विधत्ते; यथा जडोऽपि देहो जीवाधिष्ठानवशाद् गमनादिकं कर्म, यथा वा जडोऽपि खड्गो

१. व्यक्तं कार्यम् , अव्यक्तं कारणम्।

जगत् **सचराचरं व्यक्ताव्यक्तात्मकं विपरिवर्तते सर्वावस्थासु । दृशिकर्मत्वापत्तिनिमित्ता हि जगतः सर्वा प्रवृत्तिः— अहमिदं भोक्ष्ये, पश्यामि इदं, शृणोमि इदं, सुखमनुभवामि, दुःखमनुभवामि, [1]तदर्थमिदं करिष्यामि, एतदर्थमिदं करिष्ये, इदं ज्ञास्यामीत्याद्याऽवगतिनिष्ठा अवगत्यवसानैव । 'यो अस्याध्यक्षः परमे व्योमन्' (ऋ.सं.८.७.१७.७,**

अनुभूतिस्वरूपाचार्यटिप्पणम्

चैतन्याधिष्ठितत्वं जगतो विपरिवर्तने हेतुरित्युक्तम्। तदेव विवृणोति— **सर्वावस्थेति।** [2]सर्वावस्थश्चासौ दृशिश्च, तत्कर्मत्वापत्तिनिमित्ता। सर्वत्रोपरक्तचैतन्यविषयत्वापत्तिनिबन्धनेत्यर्थः। **परमे व्योमन्** अव्याकृताकाशे मायायां प्रति-

आनन्दगिरिकृतव्याख्या

**मित्युक्तम्।** सर्वावस्थासु **इत्यनेन सृष्टिस्थितिसंहारावस्था गृह्यन्ते। तथापि जगतः सर्गादिभ्यो भिन्ना प्रवृत्तिः स्वाभाविकी, नेश्वरायत्ते-त्याशङ्क्याह—** दृशीति। **न हि दृशिव्याप्यत्वं विना जडवर्गस्य काऽपि प्रवृत्तिरिति** हि**शब्दार्थः। तामेव प्रवृत्तिमुदाहरति—** अहमित्या-दिना। **भोगस्य विषयोपलम्भाभावेऽसम्भवान्नानाविधां विषयोपलब्धिं दर्शयति—** पश्यामीति। **भोगफलमिदानीं कथयति—** सुखमिति। **विहितप्रतिषिद्धाचरणनिमित्तं सुखं दुःखं चेत्याह—** तदर्थमिति। **न च विमर्शपूर्वकं विज्ञानं विनाऽनुष्ठानमित्याह—** इदमिति। **इत्याद्या प्रवृत्तिरिति सम्बन्धः। सा च प्रवृत्तिः सर्वा दृक्कर्मत्वमुररीकृत्यैवेत्युक्तं निगमयति—** अवगतीति। **तत्रैव च प्रवृत्तेरवसानमित्याह—** अवगत्यवसानेति। **परस्याध्यक्षत्वमात्रेण जगच्चेष्टेत्यत्र प्रमाणमाह—** यो अस्येति। **अस्य जगतो योऽध्यक्षो निर्विकारः स परमे प्रकृष्टे**

भाष्यार्कप्रकाशः

भटाधिष्ठानवशात् छेदनमिति।

ननु प्रकृतेर्जगद्व्यापारं प्रतीश्वरस्याध्यक्षत्वं निमित्तमस्तु नाम। जगतो विपरिवर्तनं प्रति कथं तन्निमित्तम्? अत आह—**सर्वेति**। सर्वासु बाल्यादिषु, जाग्रदादिषु, सुखित्वादिषु चावस्थासु। **दृशिः** ज्ञानक्रिया, तन्निरूपितकर्मत्वं **दृशिकर्मत्वं** दृश्यत्वम् , तस्य **आपत्तिः** प्राप्तिः, सा निमित्तं यस्याः सा **दृशिकर्मत्वापत्तिनिमित्ता**; **हिः** प्रसिद्धौ। जगतः सर्वावस्थासु सर्वा प्रवृत्तिर्दृशिकर्मत्वापत्तिनिमित्ता हीत्यन्वयः। प्रवृत्तिमेवाभिनीय दर्शयति— **अहमिदं भोक्ष्य इत्यादिना। इत्याद्येत्याद्यपदाद्** [3]घ्राणनादानविसर्गादिक्रियान्तरसङ्ग्रहः। अस्याश्च जगत्प्रवृत्तेरात्मैव निष्ठा पर्यवसानं चेत्याह— **अवगतिनिष्ठा अवगत्यवसानेति। अवगतिः** ज्ञानम् आत्मा, तस्यैव सर्वा-धारत्वात् , सर्वशेषित्वाच्चेति भावः। तदेवम् अवगतिनिष्ठत्वाद् अवगत्यवसानत्वाच्च जगत्प्रवृत्तेः अवगतिकर्मत्वापत्तिनिमित्तकत्वमिति अवगतेरेव जगद्विपरिवर्तनं प्रति हेतुत्वाद् ईश्वरस्याध्यक्षत्वं जगद्विपरिवर्तनं प्रति निमित्तमेव। अवगतेरेवेश्वरत्वादध्यक्षत्वाच्चेति सिद्धम्।

अयमाशयः—ब्रह्मादिस्तम्बपर्यन्तचराचरात्मकजगत्पदवाच्यभूतग्रामस्य सर्वाऽपि प्रवृत्तिश्चेतनपरतन्त्रैव, जडस्य तस्य स्वतः प्रवृत्त्ययोगात्। जडस्य चेतनपारतन्त्र्यं च चेतनकटाक्षाधीनशक्तिमत्त्वम् , स्वत एव शक्तिमत्त्वे पारतन्त्र्यायोगात्। तथा च चेतनेनात्मना दृश्यमानः सन्नेव भूतग्रामः 'अहमिदं भोक्ष्ये' इत्यादिकं व्यवहारं करोति, न तु स्वतः, तस्याचेतनत्वात्। तस्मादचेतनानां देहेन्द्रियान्तःकरणानां भोजनदर्शनमननादिप्रवृत्तीः प्रति चेतनात्मदृश्यमानत्वमेव निमित्तम्। इदमेव चेतनकर्तृकमचेतनकर्मकं दर्शनं नियमनमिति प्रेरणमिति च वदन्ति। यस्मादेवमचेतनस्य जगतः सर्वासु प्रवृत्तिषु चेतनकर्तृकं दर्शनं निमित्तं तस्माज्जगद्विपरिवर्तनं प्रत्यपि तदेव निमित्तम्। साक्षित्वं च साक्षाद्दर्शनमेव। यद्वा **विपरिवर्तते** इत्यस्य विविधं प्रवर्तत इत्यर्थः। अन्यत् तुल्यम्। एवं जगत्प्रवृत्तेश्चेतनकर्तृकदर्शनहेतुकत्वाचेतनस्येश्वरस्याध्यक्षत्वं जगत्प्रवृत्तिषु निमित्तं भवति, यथा प्रकृतिप्रवृत्तिष्विति स्थितम्।

एवमीश्वरस्य जगत्प्रकृत्योरध्यक्षत्वे श्रुतिं प्रमाणयति— **यो अस्याध्यक्ष इति। अस्य** जगतः सकारणस्येत्यर्थः। **अध्यक्षः** साक्षी। **परमे व्योमन्** परमाकाशे स्थित इति शेषः। व्योमन्नित्यत्र 'सुपां सुलुक्' इति सप्तम्या लुक्। 'स्वे महिम्नि व्यवस्थितः' इतिवत् परमव्योमरूपस्यापि परमात्मनः परमव्योमस्थितिरुक्ता। न तु परमेश्वरः सर्वाधारो निराधारश्च कुत्रचित् स्वेतराधारे स्थातुमुचितः। **यद्वा** अव्याकृतं परमं व्योम, 'एतस्मिन् खल्वक्षरे गार्ग्याकाशः' इति श्रुतेः। **अथवा** हृदयाकाश एव परमव्योम, 'यो वै स बहिर्धा

१. 'तदर्थमिदं करिष्ये, इदं ज्ञास्यामि' इति पा.। २. भाष्ये 'सर्वावस्थदृशिकर्मत्वापत्तिनिमित्ता' इति एतदनुसारेण पाठ ऊह्यते। ३. 'घ्राणादाने'ति पठितुं युक्तम्।

**तै.ब्रा.२.८.९) इत्यादयश्च मन्त्रा एतमर्थं दर्शयन्ति। ततश्चैकस्य देवस्य सर्वाध्यक्षभूतचैतन्यमात्रस्य परमार्थतः**

अनुभूतिस्वरूपाचार्यटिप्पणम्

बिम्बितो योऽस्य जगतोऽध्यक्षः स वेदेत्यर्थः। अनिर्वाच्यमायानिबन्धना सृष्टिः, परमात्मनस्त्वध्यक्षत्वमात्रमित्येवं स्थिते सति चोद्यान्तरमपि निरस्तमित्याह— **ततश्चैकस्येति।** 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिश्रुतेरेक एव सिद्धातुः[चिद्धातुः] परमात्मा। तस्य चाविक्रियत्वाद् न भोगसम्बन्धोऽस्ति। अतस्तस्य न भोगाय सृष्टिः। [1]अतः जगत्(?) तस्य किन्निमित्ता

आनन्दगिरिकृतव्याख्या

**हार्दे व्योम्नि स्थितो दुर्विज्ञेय इत्यर्थः। ईश्वरस्य साक्षित्वमात्रेण स्रष्टृत्वे स्थिते फलितमाह—** ततश्चेति। **किन्निमित्ता परस्येयं सृष्टिः? न तावद् भोगार्था, परस्य परमार्थतो भोगासम्बन्धित्वात् , तस्य सर्वसाक्षिभूतचैतन्यमात्रत्वात्[2]। न चान्यो भोक्ता, चेतनान्तराभावाद् , ईश्वरस्यैकत्वाद् , अचेतनस्याभोक्तृत्वात्। न च स्रष्टुरपवर्गार्था, तद्विरोधित्वात्। नैवं प्रश्नो वा तदनुरूपं प्रतिवचनं वा युक्तम् , परस्य**

भाष्यार्कप्रकाशः

पुरुषादाकाशो, यो वै सोऽन्तः पुरुष आकाशो, योऽयमन्तर्हृदय आकाशः' इति श्रुतेः। ईश्वरस्य प्रकृतिबुद्ध्यन्तःस्थत्वं चान्तर्यामिब्राह्मणप्रसिद्धम्। मायावच्छिन्नचैतन्यलक्षणो हीश्वरः ईश्वरत्वेन रूपेण प्रकृतौ, प्रत्यक्त्वेन रूपेण बुद्धौ च वर्तत इति सिद्धान्तात्।

**ननु** यो बुद्धौ स्थितः प्रत्यगात्मा, स न जगतोऽध्यक्षः, किन्तु स्वोपाधिबुद्धीन्द्रियादीनामेव, अपरिपूर्णत्वात्। पूर्णो हि परमात्मा; परिच्छिन्नस्तु प्रत्यगात्मा। किं चास्ति प्रत्यक्परयोर्महान् भेदः प्रत्यक्षत्वाप्रत्यक्षत्वरूपः, सद्वितीयत्वाद्वितीयत्वरूपश्च। तदुक्तम् **वाक्यवृत्तौ**— 'आलम्बनतया भाति योऽस्मत्प्रत्ययशब्दयोः। अन्तःकरणसम्भिन्नबोधः स त्वम्पदाभिधः॥ मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः। पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः॥ प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णते। विरुध्येते यतस्तस्माल्लक्षणा सम्प्रवर्तते॥' इति। एवं विरोधादेव हि तत्त्वमस्यादिस्थले लक्षणास्वीकारः। तच्चोक्तं तत्रैव— 'मानान्तरविरोधे तु मुख्यार्थस्य परिग्रहे। मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते॥ तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा। सोऽयमित्यादिवाक्यस्थपदयोरिव नापरा॥' इति। तस्मान्न प्रत्यगात्मनः परमात्मधर्मो जगदध्यक्षत्वं, नापि परमात्मनो बुद्धिस्थत्वमिति चेत्?

**मैवम्।** 'यः साक्षादपरोक्षाद् ब्रह्मे'त्यपरोक्ष एव परमात्मा; 'येन सर्वमिदं तत'मिति गीतावचनात् परिपूर्ण एव प्रत्यगात्मा; बुद्धौ चैतन्यस्याभिव्यक्तत्वाद् बुद्ध्यवच्छिन्नमित्युच्यते चैतन्यम् , न तु बुद्धिपरिच्छिन्नत्वात्। अन्यथा परिच्छिन्नत्वे जडत्वानित्यत्वाद्यापत्तेः, घटादिवदिति। तस्मादेक एवात्मा जगद्धेतुत्वादिधर्मवैशिष्ट्येन परमात्मेति, बुद्ध्यभिव्यक्तत्वादिधर्मवैशिष्ट्येन प्रत्यगात्मेति चोच्यत इति कृत्वा यः परमात्मा स एव बुद्धिस्थितः, यो बुद्धिस्थितः प्रत्यगात्मा स एव जगदध्यक्षः परमात्मा चेति स्थितम्। न च वाक्यवृत्तिविरोधः, अज्ञा हि प्रत्यगात्मानं परिच्छिन्नं परमात्मानं परोक्षं च मन्यन्त इति तद्दृष्ट्या तद्वाक्यप्रणयनात्। कथमन्यथा तैरेवाचार्यैरुपनिषद्भाष्यारम्भे—'याथात्म्यं चात्मनः शुद्धत्वापापविद्धत्वैकत्वनित्यत्वाशरीरत्वसर्वगतत्वादी'त्युच्येत। न च परमार्थतोऽभेदेऽपि यावद्व्यवहारम् अस्त्येवौपाधिको भेदो जीवेश्वरयोरिति वाच्यम् ; औपाधिकभेदस्योपाधिगतत्वेन आत्मगतत्वासम्भवात्। कथमन्यथा 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती'ति ब्रूयात्? ईश्वरो हि व्यवहारदशायां प्रत्यग्रूपेण भूतानां हृद्देशे तिष्ठतीति हि तदर्थः। परमार्थदशायां भूतादेरेवाभावात्। तस्माद् यावद्व्यवहारमपि न प्रत्यगात्मपरमात्मभेदः। ईश्वरस्यैव प्रत्यगात्मत्वात्।

न च निरीश्वरसाङ्ख्यमतप्रवेशापत्तिः वः इति वाच्यम् ; जगद्धेतोरीश्वरस्याभ्युपगतत्वादस्माभिः। न हि बुद्धिसृष्टेः प्राग् बुद्ध्यभिव्यक्तत्वलक्षणं प्रत्यक्त्वमस्ति परमात्मनः, येन प्रत्यगात्मैक एवास्ति, न परमात्मेत्युच्येत साङ्ख्यैरिवास्माभिः।

नापि द्वैतमतप्रवेशः, परमात्मनोऽन्यः प्रत्यगात्मेत्यनभ्युपगमात्। अत एव 'एकमेवाद्वितीयं ब्रह्म, स आत्मा' इत्यादि श्रुतिभिरात्मभेदो निषिद्धः। न केवलं श्रुतिभिः, युक्तिभिश्चात्मभेदो न स्थास्यति। तथाहि - किमात्मभेदः केनापि ज्ञायते? उत न? आद्ये किमात्मना? उतानात्मना? नात्मना, आत्मदृश्यस्यात्मभेदस्य श्वेतपीतादेरिवात्मधर्मत्वायोगात्। नानात्मना, तस्य जडत्वात्। यदि न

१. 'अतः तस्य किन्निमित्ता जगत्सृष्टिरिति संबन्धः' इति पाठः संभाव्यते। २. 'अनश्नन्नन्यो अभिचाकशीति' इति श्रुतेरिति भावः।

**सर्वभोगानभिसम्बन्धिनः अन्यस्य चेतनान्तरस्याभावे भोक्तुरन्यस्याभावात् किन्निमित्तेयं सृष्टिरित्यत्र प्रश्नप्रतिवचने अनुपपन्ने, 'को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः' (ऋ.सं.८.७.१७.८, तै.ब्रा.२.८.९) इत्यादिमन्त्रवर्णेभ्यः। दर्शितं च भगवता 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः'(भ.गी.५.१५) इति** [१]**॥ १०॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

सृष्टिरिति सम्बन्धः। कल्पितानां जीवानां भोक्तृत्वात् तददृष्टनिबन्धना सृष्टिरित्याशङ्क्याह— **अन्यस्य चेतनान्तरस्याभाव इति**। कल्पितानां रज्जुसर्पवज्जडत्वाद् न चेतनत्वमित्यर्थः। अनिर्वाच्यमायाधीना सृष्टिरित्यत्र प्रमाणमाह— **को अद्धा वेदेति। अद्धा** साक्षाद् वस्तुस्वभावपर्यालोचनया को वेद? को वाऽत्र प्रवक्ता स्यादियं विसृष्टिर्यतः बभूवेत्यर्थः। [२]श्रुत्यन्तरं पठति— **कुत आजाता** इत्यादि॥ १०॥

आनन्दगिरिकृतव्याख्या

**मायानिबन्धने सर्गे तस्यानवकाशत्वादित्यर्थः। परस्यात्मनो दुर्विज्ञेयत्वे श्रुतिमुदाहरति—** को अद्धेति। **तस्मिन् प्रवक्ताऽपि संसारमण्डले नास्तीत्याह—** क इहेति। **जगतः सृष्टिकर्तृत्वेन परस्य ज्ञेयत्वमाशङ्क्य कूटस्थत्वात् ततो न सृष्टिर्जातेत्याह—** कुत इति। **न हीयं विविधा सृष्टिरन्यस्मादपि कस्माच्चिदुपपद्यते, अन्यस्य वस्तुनोऽभावादित्याह—** कुत इति। **कथं तर्हि सृष्टिरित्याशङ्क्याज्ञानाधीनेत्याह—** दर्शितं चेति**॥ १०॥**

भाष्यार्कप्रकाशः

ज्ञायते, तर्हि शशशृङ्गवन्नैवास्ति। किञ्च - किमात्मभेदः आत्मनो भिन्नः, उताभिन्नः? आद्ये, अनात्मधर्म एव सः। द्वितीये, आत्मव्यतिरेकेण निरूपणासम्भवाद् भेदस्यात्मन एकत्वमेव स्यात्। न च - आत्मानो बहवः, तथा च एकात्मभेदः अन्यात्मना न गृह्यत इति - वाच्यम् ; 'नान्योऽतोऽस्ति द्रष्टा' इति श्रुतेः। आत्मभेदं विना आत्मबहुत्वस्यासिद्धेश्च।

तदिदं सर्वमभिप्रेत्याह— **एकस्येति। सर्वाध्यक्षभूतेति**। साक्षित्वस्यापि परमार्थत आत्मन्यसम्भवादुक्तम्— **भूतेति**। साक्षिवत् स्थितमित्यर्थः। चैतन्यमेव चैतन्यमात्रम्। **सर्वभोगानभिसम्बन्धिनः** सर्वभोगसम्बन्धरहितस्य, असङ्गत्वादद्वितीयत्वाच्चेति भावः। नन्वेवंविधस्य ईश्वरस्य सृष्टिर्न स्वार्था, स्वस्यासङ्गत्वादविक्रियत्वाच्च; नापि परार्था, अन्यस्याभावादित्याक्षिपति— **ततश्चेत्यादिना**। भोक्तृत्वस्य चेतनधर्मत्वेनाचेतनस्य भोक्तृत्वायोगात् , चेतनस्य चैकत्वेन चेतनान्तराभावात् , तस्य च चेतनस्याविक्रियत्वेन भोक्तृत्वायोगाद् व्यर्थेयं सृष्टिरिति प्रष्टुराशयः। **इत्यत्र** इत्यस्मिन्नाक्षेपे। परिहरति— **प्रश्नप्रतिवचने अनुपपन्ने इति**। तत्र श्रुतिमेव प्रमाणयति— **को अद्धेति। अद्धा** साक्षात् को वेद, न कोऽपीत्यर्थः। **इह** अस्मिन्नर्थे **कः प्रवोचत्** को वदेत् , न कोऽपीत्यर्थः। **आ** इत्याश्चर्ये। **इयं विसृष्टिः** विसर्गः **कुतो जाता** [३]कस्माद्धेतोर्जाता, **कुतः** कस्मादुपादानादिति। **यद्वा** कुतःकुतः इति सम्भ्रमादौ द्विरुक्तिः। ईश्वरस्य परिपूर्णकामस्याविक्रियस्य प्रपञ्चसृष्टौ निमित्तं कोऽपि न वेदेति श्रुत्यर्थः।

न च लीलैव प्रयोजनमिति वाच्यम् ; चिन्मात्रे लीलाया अप्ययोगात्। एवं कर्तुरीश्वरस्य प्रपञ्चसृष्टौ प्रयोजनाभावादपि मायामय्येव सृष्टिरेष्टव्या। सर्वमप्यसङ्गतं मायया हि सङ्गतमिव भवति। उक्तार्थे गीतां प्रमाणयति— **अज्ञानेनेति**। कृत्स्नजगदाकार-परिणतमायया आत्मानात्मविवेकज्ञानमावृतम्। तेन हेतुना आत्मस्वरूपविज्ञानाभावाज्जन्तवो मुह्यन्ति। आत्मानात्मतादात्म्याध्यासं प्रतिपद्य, अनात्मगतं कर्तृत्वादिकमात्मन्यारोप्य, आत्मा कर्तेति मोहं प्रपद्यन्ते। वस्तुतस्तु अकर्ता अविक्रिय एवात्मा ईश्वरः। सृष्ट्यादि-व्यापारस्तु प्रकृत्या एव। दर्शनश्रवणादिव्यापारस्तु जगत एव। जगतः प्रकृतेश्चेयं प्रवृत्तिः सर्वाऽपीश्वरकटाक्षलब्धैवेत्यनवद्यम् ॥ १०॥

---

१. "आगममात्रसमधिगम्य एव त्वयमर्थो धर्मवत्। तथा च श्रुतिः 'नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ' इति, 'को अद्धा वेद क इह प्रवोचत्' 'इयं विसृष्टिर्यत आबभूव' इति चैते ऋचौ सिद्धानामपीश्वराणां दुर्बोधतां जगत्कारणस्य दर्शयतः।" इति भाष्यमिहानुसंधेयम् (ब्र.सू. २-१-६)। २. श्रुत्यन्तरमिति चिन्त्यम् , एकस्या एव श्रुतेः भाष्ये पाठात्। ३. एकस्य कुतःशब्दस्य वैयर्थ्यमाशङ्क्य परिहरति—**कस्मादिति। हेतोः** निमित्तादित्यर्थः। 'अर्वाग् देवा अस्य विसर्जनाय' इत्यादिः श्रुतिशेषः। सृष्ट्युत्तरकालीनत्वाद् देवादयोऽपि सृष्टिकारणं न जानन्तीति तदर्थः। द्र. भ.गी. १०-२।

**अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्।**
**परं भावमजानन्तो मम भूतमहेश्वरम् ॥ ११ ॥**

**एवं मां नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वजन्तूनामात्मानमपि सन्तम्—** अवजानन्तीति । अवजानन्ति **अवज्ञां परिभवं कुर्वन्ति, मां** मूढाः अविवेकिनो मानुषीं **मनुष्यसम्बन्धिनीं** तनुं **देहम्** आश्रितम् , **मनुष्यदेहेन व्यवहरन्तमित्येतत्।** परं **प्रकृष्टं** भावं **परमात्मतत्त्वमाकाशकल्पम् आकाशादप्यन्तरतमम् अजानन्तो मम** भूतमहेश्वरं **सर्वभूतानां महान्तमीश्वरं स्वमात्मानम्। ततश्च तस्य ममावज्ञानभावनेन आहताः वराकास्ते॥ ११ ॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

एवं चेत् परमार्थतः स्रष्टृत्वादिविहीनं शुद्धबुद्धमुक्तस्वभावं ब्रह्म, कुतस्तर्हि केषाञ्चिदेवेह ज्ञानमित्याशङ्क्याह— **एवं मामिति** ॥ ११ ॥

आनन्दगिरिकृतव्याख्या

**सर्वाध्यक्षः सर्वभूताधिवासो नित्यमुक्तश्चेत् त्वम् , तर्हि किमिति त्वामेवात्मत्वेन भेदेन वा सर्वे न भजन्ते? तत्राह—** एवमिति। **विपर्यस्तबुद्धित्वं भगवदवज्ञायां कारणमित्याह—** मूढा इति। **भगवतो मनुष्यदेहसम्बन्धात् तस्मिन् विपर्यासः सम्भवतीत्याह—** मानुषीमिति। **अस्मदादिवद् देहतादात्म्याभिमानं भगवतो व्यावर्तयति—** मनुष्येति। [1]**भगवन्तमवजानतामविवेकमूलाज्ञानं हेतुमाह—** परमिति। **ईश्वरावज्ञानात् किं भवतीत्यपेक्षायां तदवज्ञानप्रतिबद्धबुद्धयः शोच्या भवन्तीत्याह—** ततश्चेति। [2]**भगवदज्ञानादेव हेतोरवजानन्तस्ते जन्तवो** वराकाः **शोच्याः सर्वपुरुषार्थबाह्याः स्युरिति सम्बन्धः। तत्र हेतुं सूचयति—** तस्येति। **प्रकृतस्य भगवतो**ऽवज्ञानम् **अनादरणं निन्दनं वा , तस्य** भावनं **पौनःपुन्यम् , तेना**हताः **तज्जनितदुरितप्रभावात् प्रतिबद्धबुद्धयः इत्यर्थः ॥ ११ ॥**

भाष्यार्कप्रकाशः

**अवजानन्तीति**। **नित्यम्** अविनाशिनम्। भूतग्रामस्तु निरा[विना]शीति भावः। **शुद्धं** निर्मलम्। **बुद्धं** ज्ञातारम्। मूढाः मम भूतमहेश्वरं परं भावमजानन्तः मानुषीं तनुमाश्रितं मामवजानन्ति। **आकाशकल्पम्** आकाशतुल्यम् , तद्वन्निर्लेपमित्यर्थः। आकाश एव किं न स्याद्? अत आह— **आकाशादपीति**। आकाशमभिव्याप्य वर्तमानमित्यर्थः। सर्वभूतानामीश्वर आत्मा परमपुरुषः परमार्थसत्यः श्रीनारायण एवायं वासुदेवः, न तु मनुष्यमात्र इत्येवं रूपं मत्तत्त्वम् अविद्वांसो मूढा मां मनुष्यं मत्वा तिरस्कुर्वन्तीति पर्यवसन्नोऽर्थः। मनुष्योऽयम् , गोपोऽयम् , यादवोऽयमित्येवमवज्ञां कुर्वन्तीति यावत्।

अत्र मानुषीं तनुमित्युपलक्षणम्। तेन क्रिमिकीटपक्षिपश्वादिषु सर्वेषु देहेषु सन्तमात्मानमीश्वरं श्रीकृष्णं परं ब्रह्माविदित्वा, जीवं मत्वा, तत्रापि क्रिम्यादिरूपं मत्वा, क्रिम्यादिदेहानामात्मनश्च तादात्म्याध्यासेन क्रिमिरयमात्मा कीटोऽयमात्मा - इत्यादिविधया स्वात्मानमेव तिरस्कुर्वन्ति आत्मानात्मविवेकशून्या मूढा इति सिद्धम्। ततश्च विवेकिभिरात्मानमनात्मभ्यो विविच्य सच्चिदानन्देश्वररूपतया प्रतिपत्तव्यमित्युपदिष्टप्रायम्।

यत्तु **रामानुजः**—'असक्तं तेषु कर्मसु' इत्यत्र 'तत्र वैषम्ये [3]प्रयोजकत्वरूपसम्बन्धरहित'मिति, 'मयाऽध्यक्षेणे'त्यत्र 'सत्यसङ्कल्पेन मयाऽध्यक्षेण ईक्षिता' इति, 'पश्य मे योगमैश्वर'मित्यत्र 'मम वसुदेवसूनोः सत्यसङ्कल्पत्वं नैर्घृण्यादिदोषरहितत्वमित्यादिकं योगं पश्य' इति, प्रकृतश्लोके च 'भूतमहेश्वरं मां मनुष्यतन्वाश्रयणमात्रेण ममापारकारुण्यौदार्यसौशील्यवात्सल्यादिनिबन्धनं मनुष्यत्वसमाश्रयणलक्षणमिमं परं भावमजानन्तो मूढास्तिरस्कुर्वन्ती'ति (चौचत्)[चावोचत्।]

**तदेतत्** सर्वं मन्दम् ; तेषु कर्मस्विति शब्दद्वयात् 'तत्र वैषम्ये' इत्यर्थावगमो न सम्भवतीति सर्वविदितम्। न च तेषु कर्मसु यद्

१. भगवन्तमवजानतां योऽविवेकस्तस्य हेतुं मूलाज्ञानमाह इत्यन्वयः। २. 'भगवदवज्ञानादेव' इति पा.। ३. असक्तपदार्थविवरणमिदम्। अकर्तृत्वापत्तिनिरासाय इत्थं विवरणमिति तदीयाः।

**मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः।**
**राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥१२॥**

**कथम्? —** मोघाशा इति। मोघाशाः, मोघाः **वृथा** आशाः **आशिषो येषां ते मोघाशाः। तथा** मोघकर्माणः, **यानि चाग्निहोत्रादीनि तैरनुष्ठीयमानानि कर्माणि, तानि च तेषां भगवत्परिभवात् स्वात्मभूतस्यावज्ञानाद् मोघान्येव निष्फलानि कर्माणि भवन्तीति मोघकर्माणः। तथा** मोघज्ञानाः, **मोघं निष्फलं ज्ञानं येषां ते मोघज्ञानाः, ज्ञानमपि तेषां निष्फलमेव स्यात्।** विचेतसो **विगतविवेकाश्च ते भवन्तीत्यभिप्रायः। किञ्च ते भवन्ति** राक्षसीं **रक्षसां** प्रकृतिं

आनन्दगिरिकृतव्याख्या

**भगवन्तमवजानतां प्रश्नपूर्वकं शोच्यत्वं विशदयति—** कथमिति। **भगवन्निन्दापराणां न काचिदपि प्रार्थनाऽर्थवतीत्याह—** वृथेति। **ननु भगवन्तं निन्दन्तोऽपि नित्यं नैमित्तिकं वा कर्मानुतिष्ठन्ति, तदनुष्ठानाच्च तेषां प्रार्थनाः सार्था भविष्यन्तीति, नेत्याह—** तथेति। [1]परिभवः **तिरस्करणम् ,** अवज्ञानम् **अनादरणम्। तेषामपि शास्त्रार्थज्ञानवतां तद्द्वारा प्रार्थनार्थवत्त्वमित्याशङ्क्याह—** तथा मोघेति। **तथापि यौक्तिकविवेकवशात् तत्प्रार्थनासाफल्यमित्याशङ्क्याह—** विचेतस इति। **न केवलमुक्तविशेषणवत्त्वमेव तेषाम् , किन्तु वर्तमानदेहपातादनन्तरं तत्तदतिक्रूरयोनिप्राप्तिश्च निश्चितेत्याह—** किञ्चेति। **मोहकरीमिति प्रकृतिद्वयेऽपि तुल्यं विशेषणम्। 'छिन्धि,**

भाष्यार्कप्रकाशः

वैषम्यं तत्रासक्तमित्यर्थ इति वाच्यम्; वैषम्यपदाध्याहारगौरवात् तस्याप्रमाणत्वाच्च। सर्वान्तर्यामिण ईश्वरस्य विषमकर्मगतवैषम्य-प्रयोजकत्वस्यापि सम्भवात् कथं तत्सम्बन्धराहित्यसिद्धिः?

तथा 'सत्यसङ्कल्पेनेक्षिता प्रकृति'रित्यप्ययुक्तम् , प्रकृतिं विना ईश्वरस्य सङ्कल्पायोगात्। मायावृत्तिः खलु सङ्कल्पः, यथा मनोवृत्तिः।

तथा 'वसुदेवसूनोर्ममे'त्यप्ययुक्तम् , देहस्यैव वसुदेवसूनुत्वाद्, आत्मनश्च तद्विलक्षणत्वाद्, ईश्वरस्यात्मत्वात् , कृष्णस्य विवेकेन आत्मनि वसुदेवसूनुदेहतादात्म्याभिमानस्यायुक्तत्वात् प्रकृतानुपयोगाच्च।

तथा 'मा'मित्यस्य व्यवहितेन 'भूतमहेश्वर'मित्यनेन सम्बन्धकल्पनमन्याय्यम्। 'परं भाव'मित्यस्य 'मनुष्यत्वसमाश्रयण-लक्षणं भाव'मित्यर्थवर्णनमप्ययुक्तम् , मनुष्यत्वसमाश्रयणस्य परभावत्वायोगात्। अप्राकृतदिव्यविग्रहसमाश्रयणं हि परो भावः। अन्यथा अस्मदादीनामपि मनुष्यत्वसमाश्रयणस्य परभावत्वापत्तेः। न चेश्वरीयमनुष्यत्वसमाश्रयणस्य वात्सल्यादिनिबन्धनत्वात् परभावत्वमिति वाच्यम्; अशरीरस्येश्वरस्य वात्सल्यादिनाऽपि मनुष्यत्वाश्रयणायोगात्। मनुष्यत्वं हि देहाश्रयम्। ईश्वरस्य मनुष्यदेहाश्रयणमपि न परभावः, किन्तु मायिकभाव एव। सच्चिदानन्दरूपत्वमेव हीश्वरस्य परो भावः। अन्यत् सर्वमवरो भाव एव, अनुत्कृष्टत्वात्। न चेश्वरस्य मायया मनुष्यदेहाश्रयणं परो भाव इति वाच्यम्; परमव्योमनिलयेश्वरीयाप्राकृतदेहस्यापरभावत्वापत्तेः। मायया सर्वचराचरदेहजालाश्रयस्येश्वरस्य मनुष्यदेहाश्रयणमात्रं कथं वा परो भावो भवितुमर्हति? मानुषीं तनुमाश्रितमिति कण्ठोक्तस्य मनुष्यतन्वाश्रयणस्य परं भावमिति शब्दाभ्यां गूढं पुनर्वचनस्य व्यर्थत्वात् क्लिष्टत्वाच्च, पूर्वोक्तार्थपरामर्शकस्य तदिदमाद्यन्यतम-शब्दस्याभावाच्च मूले इति॥ ११॥

**मोघाशा इति। अवज्ञाभावनं** तिरस्कारकरणम्। **वराका** नीचाः। भगवदनुग्रहाभावे जन्तूनामाशीःप्राप्तिरेव तावन्न भवेत्, कथञ्चित् तत्प्राप्तावपि वैयर्थ्यमेव तासां स्यादित्याह— **मोघाशा इति। भगवत्परिभवादि**ति पदं स्वयमेव व्याख्याति— **स्वात्मभूतस्य चावज्ञानादिति।** भगवतः स्वात्मभूतस्येश्वरस्य परिभवादवज्ञानादिति। **ज्ञानं** शास्त्रार्थपाण्डित्यम्। न त्वात्मानात्मविवेकः। विचेतस इति विवेकाभावस्य वक्ष्यमाणत्वात्। राजसतामसभेदेन राक्षसासुरप्रकृत्योर्भेदः। यद्वा एकैव प्रकृती राक्षसानसुरांश्चाश्रित्य वर्तत इति

१. अपौनरुक्त्यायात्र निन्दाऽर्थो ज्ञेयः।

**महात्मानस्तु मां पार्थ ! दैवीं प्रकृतिमाश्रिताः।**
**भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥१३॥**
**सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः।**

**स्वभावम् ,** आसुरीम् **असुराणां च प्रकृतिं** मोहिनीं **मोहकरीं देहात्मवादिनीं** श्रिताः **आश्रिताः, 'छिन्धि, भिन्धि, पिब, खाद, परस्वमपहर' इत्येवंवदनशीलाः क्रूरकर्माणो भवन्तीत्यर्थः। 'असुर्या नाम ते लोकाः' (ई.उ.३) इति श्रुतेः ॥१२॥**

**ये पुनः श्रद्दधाना भगवद्भक्तिलक्षणे मोक्षमार्गे प्रवृत्ताः—** महात्मान इति। महात्मानस्तु **अक्षुद्रचित्ताः** माम् **ईश्वरं, पार्थ !** दैवीं **देवानां प्रकृतिं शमदमदयाश्रद्धादिलक्षणाम् आश्रिताः सन्तो** भजन्ति **सेवन्ते** अनन्यमनसः **अनन्यचित्ताः ज्ञात्वा** [1]**मां** भूतादिं **भूतानां वियदादीनां प्राणिनां चादिं कारणम्** अव्ययम्॥ १३॥

**कथम्?—** सततमिति। सततं **सर्वदा भगवन्तं ब्रह्मस्वरूपं मां कीर्तयन्तः,** यतन्तश्च **इन्द्रियोपसंहारशमदमदयाऽहिंसादिलक्षणैर्धर्मैः प्रयतन्तश्च,** दृढव्रता **दृढं स्थिरमचाल्यं**[2] **व्रतं येषां ते दृढव्रताः, नमस्यन्तश्च मां हृदयेशयम्**

आनन्दगिरिकृतव्याख्या

**भिन्धि, पिब, खादे'ति प्राणिहिंसारूपो रक्षसां स्वभावः। असुराणां स्वभावस्तु 'न देहि , न जुहुधि, परस्वमेवापहरे'त्यादिरूपः।** मोहो **मिथ्याज्ञानम्। उक्तमेव स्फुटयति—** छिन्धीति॥१२॥

**के पुनर्भगवन्तं भजन्ते? तानाह—** ये पुनरिति। महान् **प्रकृष्टो यज्ञादिभिः शोधितः** आत्मा **सत्त्वं येषामिति व्युत्पत्तिमाश्रित्याह—** अक्षुद्रेति। **तुशब्दोऽवधारणे। प्रकृतिं विशिनष्टि—** शमेति। अनन्यस्मिन् **प्रत्यग्भूते मयि परस्मिन्नेव मनो येषामिति व्युत्पत्त्या व्याकरोति—** अनन्यचित्ता इति। **अज्ञाते सेवानुपपत्तेः शास्त्रोपपत्तिभ्यामादौ ज्ञात्वा ततः** [3]**सेवन्त इत्याह—** ज्ञात्वेति। अव्ययम् **अविनाशिनम्**॥१३॥

**भजनप्रकारं पृच्छति—** कथमिति। **तत्प्रकारमाह—** सततमिति। **सर्वदेति श्रवणावस्था गृह्यते।** कीर्तनं **वेदान्तश्रवणं प्रणवजपश्च।** व्रतं **ब्रह्मचर्यादि।** नमस्यन्तो **मां प्रति चेतसा प्रह्वीभवन्तः** भक्त्या **परेण प्रेम्णा** नित्ययुक्ताः **सन्तः सदा संयुक्ताः॥१४॥**

भाष्यार्कप्रकाशः

तदर्थमुभयग्रहणम्। प्रकृतिमेव दर्शयति— **छिन्धीत्यादिना।** छिन्धि, भिन्धि, प्राणिनश्छेदय, भेदय, पिब मदिरामिति रक्तमिति वा शेषः। **खाद** भक्षय मांसमिति शेषः। **परस्वं** परकीयं धनम्। **वदनं** भाषणं **शीलं** स्वभावः येषां ते **वदनशीलाः। क्रूराणि** लोकद्रोहकारीणि कर्माणि येषां ते क्रूरकर्माणः। एतेन राक्षसासुरप्रकृतिसम्मूढानामेव जन्तूनां भगवत्परिभव इति सिद्धम्। भगवदवज्ञाकराः प्राणिनः मोघाशाः, मोघकर्माणः, मोघज्ञानाः, विचेतसश्च भवन्ति। राक्षसीमासुरीं च प्रकृतिं श्रिता भवन्त्येवेत्यन्वयः॥१२॥

**महात्मान इति।** हे पार्थ! महात्मानस्तु दैवीं प्रकृतिमाश्रिताः सन्तोऽनन्यमनसो भूत्वा भूतादिमव्ययं मां ज्ञात्वा भजन्ति। **माम्** ईश्वरम् , स्वात्मभूतमिति भावः। 'आत्मन आकाशः सम्भूतः' इत्यादिश्रुतिभ्यः आत्मनो भूतादित्वम्। न व्येति विक्रियत **इत्यव्ययः**, तम्। आत्मैवेश्वरो भूतादिरव्ययश्चेति ज्ञात्वा स्वात्मानं महात्मानो भजन्तीत्यर्थः॥१३॥

**सततमिति। नमस्यन्त इति।** नमस्कुर्वन्तः। नन्वादित्यचन्द्रादिरूपस्येश्वरस्य नमस्कार्यत्वमस्तु नाम, कथं पुनरात्मन इति चेद्? उच्यते— परोक्षमीश्वरं यथा द्वैतिनो नमस्कुर्वन्ति, तद्वदद्वैतिन आत्मानमिति। भक्त्या **नित्ययुक्ताः** सर्वदा सहिताः, सदा भक्तियुक्ता इत्यर्थः। यद्वा **नित्ययुक्ता** अनवरतसमाहिताः। **भक्तिः** प्रीतिः। आत्मन उपासनं नाम आत्मस्वरूपानुसन्धानमेवेति बोध्यम्

१. 'मां' इति क्वचिन्न। २. 'अचाञ्चल्यं' इति पा.। ३. 'सेवेतेत्याह' इति पा.।

**नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १४॥**
**ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते।**
**एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५॥**

**आत्मानं भक्त्या नित्ययुक्ताः सन्तः** उपासते **सेवन्ते॥ १४॥**

**ते केन केन प्रकारेणोपासते? इत्युच्यते—** ज्ञानेति। ज्ञानयज्ञेन, **ज्ञानमेव भगवद्विषयं यज्ञः, तेन ज्ञानयज्ञेन** यजन्तः **पूजयन्तो** माम् **ईश्वरं चापि अन्ये अन्यामुपासनां परित्यज्य उपासते। तच्च ज्ञानम्** एकत्वेन **'एकमेव परं ब्रह्म' इति परमार्थदर्शनेन [परमार्थदर्शनम् , तेन] यजन्तः उपासते। केचिच्च** पृथक्त्वेन **आदित्यचन्द्रादिभेदेन 'स एव भगवान्** [1]**विष्णुरादित्यादिरूपेणावस्थितः' इत्युपासते। केचिद् 'बहुधाऽवस्थितः स एव भगवान् सर्वतोमुखो**[2] **विश्वरूपः' इति तं विश्वरूपं सर्वतोमुखं** बहुधा **बहुप्रकारेणोपासते॥ १५॥**

आनन्दगिरिकृतव्याख्या

**उपासनप्रकारभेदप्रतिपित्सया पृच्छति—** ते केनेति। **तत्प्रकारभेदोदीरणार्थं श्लोकमवतारयति—** उच्यत इति। इज्यते **पूज्यते परमेश्वरोऽनेनेति प्रकृते ज्ञाने यज्ञशब्दः।** ईश्वरं चेति **चकारोऽवधारणे। देवतान्तरध्यानत्यागम्** अपिशब्दसूचितं **दर्शयति—**अन्यामिति। अन्ये **ब्रह्मनिष्ठाः इति यावत्। ज्ञानयज्ञमेव विभजते—** तच्चेति। **उत्तमाधिकारिणामुपासनमुक्त्वा, मध्यमानामधिकारिणामुपासनप्रकार-माह—** केचिच्चेति। **तेषामेव प्रकारान्तरेणोपासनमुदीरयति—** केचिदिति। बहुप्रकारेण **अग्न्यादित्यादिरूपेणेति यावत्॥ १५॥**

भाष्यार्कप्रकाशः

॥ १४ ॥

**ज्ञानेति**। **अन्ये** मोघाशा इति श्लोकोक्तेभ्य इतरे। महात्मान इत्यर्थः। मां ज्ञानयज्ञेन यजन्तःसन्त उपासतेऽपि च। अपिचेत्यस्य एवेत्यर्थः। तत्र केचिदेकत्वेन मामुपासते, परे पृथक्त्वेन मामुपासते, इतरे विश्वतोमुखं मामुपासते। एवं महात्मानो मां बहुधोपासते इत्यन्वयः। ईश्वरं चापीत्यनेनान्योपासनायाः प्राप्तत्वादाह— **अन्यामुपासनां परित्यज्येति**। ईश्वरमेवेत्यर्थः। न त्वीश्वरमन्यं चेति। अन्योपासना चेह यक्षरक्षःपिशाचाद्युपासनेति बोध्यम्। क्षुद्रकामार्थं हि ते तैरुपास्यन्ते क्षुद्रैः। तच्चेश्वरविषयं ज्ञानं बहुविधमिति शेषः। एवं ज्ञानस्य बहुविधत्वाज्ज्ञानयज्ञेन यजनं च बहुविधमिति भावः।

तत्र 'एकमेव परं ब्रह्मे'ति परमार्थदर्शनलक्षणः प्रधानः कश्चिज्ज्ञानयज्ञः। तत्रोत्तमानां ज्ञानिनामधिकारः। 'एकमेव ब्रह्म चन्द्रादित्यादिदेवतारूपेण पृथक्त्वेन स्थित'मिति यज्ज्ञानं तल्लक्षणोऽन्यो ज्ञानयज्ञः। तत्र मध्यमानामधिकारः। एकमेव ब्रह्म विश्वरूपेण स्थितमिति यज्ज्ञानं तल्लक्षणोऽपरो ज्ञानयज्ञः। तत्र मन्दानामधिकारः। विश्वरूपध्यानस्य मन्दाधिकारिविषयत्वात्।

यत्तु **रामानुजः** - 'महात्मानस्ते भूतादिमव्ययं वाङ्मनसागोचरनामकर्मस्वरूपं परमकारुणिकतया साधुपरित्राणाय मनुष्यत्वे-नावतीर्णं मां ज्ञात्वे'ति, 'आत्मान्तं मद्दास्यव्यवसायिनो मामुपासते' इति, 'बहुधा पृथक्त्वेन विश्वतोमुखं जगदाकारेण विश्वप्रकार-मवस्थितं मामेकत्वेनोपासते' इति च। **तत् सर्वं मन्दम् ;** महात्मानः कृष्णावतारमुपासत इत्युक्तौ रामावतारोपासकानां क्षुद्रात्मत्वं स्यात्। यदि महात्मानो रामकृष्णादिमनुष्यावतारमुपासत इत्युच्यते, तर्हि मत्स्याद्यवतारोपासकानां क्षुद्रात्मत्वं स्यात्। अथ यदि महात्मानोऽवतारमुपासत इत्युच्यते, तर्हि पर-व्यूह-विभव-अन्तर्यामि-अर्चात्मकतया पञ्चधाऽवस्थितस्येश्वरस्य विभवोपासका एव महात्मानः, अन्ये तु पराद्युपासकाः क्षुद्राः इत्येवोक्तं स्यात्। **परो** नित्यविभूतिर्नारायणः, **व्यूहः** वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाः, **विभवाः** रामकृष्णाद्यवताराः, **अन्तर्यामी** हृद्देशस्थः ईश्वरः, **अर्चा** वेङ्कटेश्वरश्रीरङ्गभद्राद्रिरामप्रभृतयः इति विवेकः।

१. 'आदित्यचन्द्रादिभेदेन स एव भगवान् विष्णुरवस्थितः' इति पा.। २. एतदनन्तरम्— 'विश्वतोमुख' इत्यधिकः पाठः क्वचित्।

भाष्यार्कप्रकाशः

**ननु** महात्मानः कृष्णावतारमेवोपासत इति नास्माभिरुच्यते, किं तर्हि? महात्मान एव कृष्णावतारमुपासत इति चेत्? **मैवम् ;** क्षुद्राणामपि कृष्णोपास्तिदर्शनात्। न च महतामेव कृष्णे ईश्वरबुद्धिरिति वाच्यम् ; क्षुद्राणामपि तद्दर्शनात्।

**ननु** ये कृष्णमवजानन्ति त एव क्षुद्राः, येषां कृष्णे ईश्वरत्वबुद्धिः ते महान्त एवेति चेत्? **नैतदपि युज्यते**; श्रीराम-नरसिंहगणपतिकुमारशङ्करपार्वत्यादीन् येऽवजानन्ति ते न क्षुद्राः, येषां तेषु नेश्वरत्वबुद्धिः, ते महान्तः इत्यस्यापत्तेः। न चेष्टापत्तिः, पाषण्डिनस्तवेष्टापत्तावपि वैदिकानामस्माकं तस्यानिष्टत्वात् , शिवविष्णुगणपतिकुमारादीनां सर्वेषामीश्वरावतारत्वाविशेषात्। तस्माद् अवतारिणमीश्वरं विहायावतारस्य कृष्णस्य भजनवर्णनमिहायुक्तमेव। न चावतार एवेह प्रकृत इति वाच्यम् ; 'सर्वभूतानी'त्यादिना ईश्वरस्यैव प्रकृतत्वात्।

'मां भूतादिमव्ययं ज्ञात्वा' इत्यस्य 'वाङ्मनसे'त्याद्यर्थवर्णनं सुतरामयुक्तम् , तच्छब्दाभ्यां तदर्थानागमात्। न च लक्षणया तदर्थागम इति वाच्यम्; अभिधेयपरित्यागे कारणाभावात्।

**किञ्च** यो मनुष्यत्वेनावतीर्णः, स देह एव, नेश्वर इति मनुष्यदेहे ईश्वरबुद्धिशालिनः ते न महात्मानः, किन्तु क्षुद्रात्मान एव। क्षुद्राणामेव बौद्धादीनां देहात्मबुद्धिदर्शनात्। न च - यः कृष्णदेहम् अहमित्यभिमन्यते तस्मिन्नीश्वरबुद्धिः महतामिति - वाच्यम्; देहात्मभ्रमवतः सर्वज्ञेश्वरत्वायोगात्। अनीश्वरे तस्मिन्नीश्वरबुद्धिमतां महत्त्वायोगाच्च। नापि महतां कृष्णदेहे ईश्वरदेहबुद्धिरिति वाच्यम्; सर्वेष्वपि देहेष्वीश्वरस्यान्तर्यामित्वेन सर्वदेहानामीश्वरदेहत्वात्। न च कृष्णदेहे ईश्वरावतारबुद्धिर्महतामिति वाच्यम्; ईश्वरस्य चिद्रूपस्य देहत्वेनावतारायोगात्। न च कृष्णदेहावच्छिन्नचैतन्ये महतामीश्वरांशत्वेनेश्वरावतारबुद्धिरिति वाच्यम्; ब्रह्मादिस्तम्बपर्यन्तनिखिल-चराचरदेहावच्छिन्नचैतन्यस्य 'ममैवांशो जीवलोके जीवभूतः सनातनः' इतीश्वरांशत्वस्य वक्ष्यमाणत्वात्। न च कृष्णदेहान्तरचैतन्ये महतामीश्वरबुद्धिरिति वाच्यम्; सर्वदेहान्तरचैतन्यस्यापीश्वरत्वात्। तस्माच्चिन्मयस्येश्वरस्य न मनुष्यत्वेनावतारः। नापि कृष्ण-शरीरावच्छिन्नस्यैव चैतन्यस्येश्वरत्वम्। न च कृष्णशरीरस्य मायामयत्वात् तदवच्छिन्नं चैतन्यं सर्वेश्वर इति वाच्यम्; सर्वस्यापि मायामयत्वात्। अवच्छेदकानां भेदेऽपि चैतन्यस्यैकत्वात् परिपूर्णत्वाच्च। तस्मात् सर्वत्रावस्थितं परिपूर्णं चिन्मयमीश्वरमात्मानं मां ज्ञात्वेत्येवार्थः समीचीनः, तथा सत्येव भूताद्यव्ययपदार्थानुगुण्यलाभात्।

तथा 'आत्मान्तं दास्य'मित्यप्ययुक्तम् , आत्मन एवेश्वरत्वेन सर्वशेषित्वात् कथमात्मनोऽन्यशेषत्वसम्भव इति।

तथा 'पृथक्त्वेनावस्थितस्य विश्वतोमुखस्यैकत्वेनोपासन'मित्यप्ययुक्तम् , तादृशोपासनस्य भ्रान्तिरूपत्वात्। न च घट-शरावादिपृथक्त्वेनावस्थिताया मृदः एकत्वेन मृत्त्वेनोपासनवद् इदं न भ्रान्तिरूपमिति वाच्यम्; अविकारस्येश्वरस्य मृद इव परिणामायोगात्। न च सूक्ष्मचिदचिद्विशिष्टस्येश्वरस्य स्थूलजगदाकारपरिणामोऽस्तीति वाच्यम्; तत्रापि विशेषणांशस्यैव सूक्ष्मस्य स्थौल्यप्राप्तिरूपपरिणामः, न तु विशेष्यांशस्येश्वरस्येति कृत्वा ईश्वरस्य स्थूलजगदाकारपरिणामाभावात्। न च - स्थूलजग-च्छरीरकत्वमीश्वरस्य पृथक्त्वमिति - वाच्यम् ; शरीराणां पृथक्त्वेऽपीश्वरस्य शरीरिणः पृथक्त्वायोगात्। अन्यथा सूक्ष्मशरीराणामपि पृथक्त्वेन तद्विशिष्टेश्वरस्यापि पृथक्त्वप्रसङ्गात्। न चेष्टापत्तिः, एकत्वेनेश्वरस्योपासनाऽसम्भवात्[१]। तस्मात् स्थूलजगदाकारेण सूक्ष्म-जगदाकारेण वा बहुधा पृथक्त्वेन परिणामः प्रकृत्या एव, नेश्वरस्येति नेश्वरः पृथक्त्वेन स्थितः।

**अस्मन्मते** तु माययेश्वरस्य विश्वरूपत्वं घटते, मायायां सर्वसम्भवात्। न च - सर्वेष्वपि शरीरेषु एक एवेश्वरः पृथक्त्वेन स्थित इति - वाच्यम्; एकस्य पृथक्त्वस्थितेर्भ्रान्तिरूपत्वाद्, घटपृथक्त्वस्याकाशाभेदकत्ववच्छरीरपृथक्त्वस्येश्वराभेदकत्वात्। अत एव हीश्वरस्यात्मनः एकत्वम् 'एको देवः' इत्यादिश्रुतिसिद्धम्।

**यदि** तु सर्वशरीरावस्थितमीश्वरमेकत्वेनोपासत इत्युच्यते, **तत् सम्मतमेव**। मूलात्तु नैतादृशार्थलाभः। न च पृथक्त्वेनेत्यस्य सर्वशरीरावस्थितत्वेनेति लाक्षणिकार्थ इति वाच्यम्; लाक्षणिकार्थकल्पनस्यान्याय्यत्वात्। न हि मुख्यार्थस्य बाधः, येन लक्षणाश्रयणम् ॥ १५ ॥

१. एकत्वेनेत्यस्य अभेदेनेत्यर्थः। तथोपासनं चासंभवि, पृथक्त्वेनावस्थिते अभेदज्ञानस्य भ्रान्तिरूपत्वादिति भावः।

**अहं क्रतुरहं यज्ञः स्वधाऽहमहमौषधम्।**
**मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥ १६ ॥**
**पिताऽहमस्य जगतो माता धाता पितामहः।**

**यदि बहुभिः प्रकारैरुपासते, कथं त्वामेवोपासत इत्यत आह—** अहमिति। **अहं** क्रतुः [१]**श्रौतकर्मभेदोऽहमेव। अहं** यज्ञः **स्मार्तः। किञ्च** स्वधा **अन्नम् अहम् , पितृभ्यो यद् दीयते।** अहमौषधं **सर्वप्राणिभिर्यदद्यते** [२]**तदौषधशब्दवाच्यम्। अथवा स्वधेति सर्वप्राणिसाधारणमन्नम् , औषधमिति व्याध्युपशमार्थं भेषजम्।** मन्त्रोऽहं **येन पितृभ्यो देवताभ्यश्च हविर्दीयते।** अहमेवाज्यं **हविश्च,** अहमग्निः **यस्मिन् हूयते सोऽग्निरहमेव**[३]**, अहं** हुतं **हवनकर्म च ॥ १६ ॥**

**किञ्च—** पितेति। पिता **जनयिताऽहमस्य जगतो,** माता **जनयित्री,** धाता **कर्मफलस्य प्राणिभ्यो विधाता,**

आनन्दगिरिकृतव्याख्या

**भगवदेकविषयमुपासनं तर्हि न सिध्यतीति शङ्कते—** यदीति। **प्रकारभेदमादाय ध्यायन्तोऽपि भगवन्तमेव ध्यायन्ति, तस्य सर्वात्मकत्वादित्याह—** अत आहेति। **क्रतुयज्ञशब्दयोरपौनरुक्त्यं दर्शयन् व्याचष्टे—** श्रौत इति। **क्रियाकारकफलजातं भगवदतिरिक्तं नास्तीति समुदायार्थः ॥ १६ ॥**

**इतश्च भगवतः सर्वात्मकत्वमनुमन्तव्यमित्याह—** किञ्चेति। पवित्रं **पूयतेऽनेनेति व्युत्पत्त्या परिशुद्धिकारणं पुण्यं कर्मेत्याह—**

भाष्यार्कप्रकाशः

**अहमिति।** ननु तव परब्रह्मत्वाद् एकत्वेनोपासकानां त्वदुपासकत्वमस्तु नाम, कथं पुनरादित्यचन्द्रादिदेवतान्तरोपासकानां विश्वरूपोपासकानां च त्वदुपासकत्वमित्याक्षेपसङ्गतिं पूर्वोत्तरश्लोकयोर्दर्शयति— **यदिति।** सर्वस्यापि जगतो मयि कल्पितत्वात् कल्पितस्याधिष्ठानानतिरेकात् 'सर्वं खल्विदं ब्रह्मे'ति श्रुतेश्च सर्वमप्यहमेव। यत्त्वादित्यादिदेवताशरीरावच्छिन्नं चैतन्यं तस्य मद्रूपत्वाद् आदित्यादयोऽप्यहमेव। ततश्चेश्वरबुद्ध्या आदित्याद्युपासने विश्वोपासने वा ईश्वरोपासनमेव कृतं भवतीति भावः समाधानस्य। अहं क्रतुः भवामीति शेषः। एवमुत्तरत्रापि। ओषध्यः फलपाकान्ताः व्रीह्यादयः, तासामिदम् औषधमन्नम्। **हुतं** हवनाख्यं **कर्म** क्रिया ॥ १६ ॥

**पितेति।** 'मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यह'मिति, 'अहं बीजप्रदः पिता' इति च वचनाज्जगतः पितृत्वमीश्वरस्य। जगन्मातुः प्रकृत्या ईश्वरेऽध्यस्तत्वाद् ईश्वरस्य प्रकृतिरूपत्वेन जगन्मातृत्वम्। **पितामहो** हिरण्यगर्भः, तस्यापीश्वरे कल्पितत्वादीश्वरस्य पितामहत्वम्। **यद्वा** पितैव हिरण्यगर्भः, पितामहस्त्वीश्वर इति। अथवा पुत्रं प्रति पिता यथा निमित्तकारणम्, माता तूपादानकारणम् , तद्वज्जगत् प्रति ईश्वरस्य निमित्तत्वादुपादानत्वाच्च पितृत्वं मातृत्वं च। [४](मातुरुदरात्पुत्रोत्पत्तिदर्शनात् 'जनिकर्तुः प्रकृति'रिति मातुरुपादानत्वम् , तत्र पितुर्निमित्तत्वान्निमित्तकारणत्वमिति विवेकः।) यद्येवमीश्वरो जगतः पिता, तर्हि कः पुनरीश्वरस्य पितेत्यत आह— **पितामह इति।** ईश्वरस्य पितेश्वर एव, न त्वन्यः कश्चिदस्ति, अजत्वात् तस्येति भावः।

**रामानुजस्तु** - जगति तत्र तत्र देवदत्तादीन् पुत्रान् प्रति पितृत्वेन ये विष्णुमित्रादयः सन्ति, मातृत्वेन च याः कलावत्यादयः, पितामहत्वेन च ये यज्ञदत्तादयः, धातृत्वेन च ये उपपतयः शम्भुदत्तादयः ते सर्वेऽपीश्वर एव, ईश्वरशरीरत्वात् तेषाम् , ईश्वरस्य च तदन्तर्यामित्वादित्याह। **तन्मन्दम् ;** जगतः पितेति कृत्स्नजगतोऽपत्यस्थानीयत्वेन तत्प्रति विष्णुमित्रादीनां पितृत्वाद्यसम्भवात् , सत्यां मूलकर्तुरिदंविवक्षायाम् 'पिताऽहमत्र जगती'त्येव ब्रूयाद्, न तु 'पिताऽहमस्य जगतः' इति।

**वेद्यं** ज्ञेयं वस्त्वहमेव, **पवित्रं** पावनं वस्त्वहमेव। यद्वा वेद्यं यत् पवित्रं तद् वस्त्वहमेव, ओङ्कारोऽहमेव, ऋक्सामयजुरात्मनो

---

१. 'श्रौतः कर्मभेदः' इति पाठः टीकानुसारी भाति। २. 'तदौषधशब्दशब्दितं व्रीहियवादिसाधारणम्' इति पा.। ३. एवकारः क्वचिन्न। ४. अयं कुण्डलित एव दृष्टः।

**वेद्यं पवित्रमोङ्कार ऋक् साम यजुरेव च ॥१७॥**
**गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्।**
**प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥१८॥**
**तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च।**

पितामहः **पितुः पिता,** वेद्यं **वेदितव्यं,** पवित्रं **पावनम्,** [१]ओङ्कारः, **ऋक् साम यजुरेव च ॥१७॥**

**किञ्च—** गतिरिति। गतिः **कर्मफलं,** भर्ता **पोष्टा,** प्रभुः **स्वामी,** साक्षी **प्राणिनां कृताकृतस्य,** निवासो **यस्मिन् प्राणिनो निवसन्ति,** शरणम् **आर्तानां** [२]**मत्प्रपन्नानामार्तिहरः,** सुहृत् **प्रत्युपकारानपेक्षः सन् उपकारी,** प्रभवः **उत्पत्तिर्जगतः,** प्रलयः **प्रलीयते अस्मिन्निति। तथा** स्थानं **तिष्ठत्यस्मिन्निति।** निधानं **निक्षेपः कालान्तरोपभोग्यं प्राणिनां,** बीजं **प्ररोहकारणं प्ररोहधर्मिणाम्** अव्ययं **यावत्संसारभावित्वादव्ययम्। न ह्यबीजं किञ्चित् प्ररोहति। नित्यं च प्ररोहदर्शनाद् बीजसन्ततिर्न व्येतीति गम्यते॥ १८॥**

**किञ्च—** तपामीति। **तपाम्यहमादित्यो भूत्वा कैश्चिद् रश्मिभिरुल्बणैः, अहं वर्षं कैश्चिद् रश्मिभिरुत्सृजामि,**

आनन्दगिरिकृतव्याख्या

पावनमिति। **वेदितव्ये ब्रह्मणि वेदनसाधनमोङ्कारः। तत्र प्रमाणम् ऋगादि। चकाराद् अथर्वाङ्गिरसो गृह्यन्ते॥ १७॥**

**भगवतः सर्वात्मकत्वे हेत्वन्तरमाह—** किञ्चेति। **गम्यत इति**[३] **प्रकृतिविलयान्तं कर्मफलं गतिरित्याह—** कर्मेति। पोष्टा **कर्मफलस्य प्रदाता। कार्यकरणप्रपञ्चस्याधिष्ठानमित्याह—** निवास इति। **शीर्यते दुःखमस्मिन्निति व्युत्पत्तिमाश्रित्याह—** शरणमिति। **प्रभवत्यस्माज्जगदिति व्युत्पत्तिमादायोक्तम्—** उत्पत्तिरिति। **कारणस्य कथमव्ययत्वमित्याशङ्क्याह—** यावदिति। **कारणमन्तरेणापि कार्यं कदाचिदुदेष्यति, किं कारणेनेत्याशङ्क्याह—** न हीति। **मा भूत् तर्हि संसारदशायामेव कदाचित् कार्योत्पत्तिरित्याशङ्क्याह—** नित्यं चेति। **कारणव्यक्तेर्नाशमङ्गीकृत्य,** [४]**तदन्यतमव्यक्तिशून्यत्वं पूर्वकालस्य नास्तीति सिद्धवत्कृत्य विशिनष्टि—** बीजेति॥ १८॥

**इतश्च सर्वात्मत्वे भगवतो न विवदितव्यमित्याह—** किञ्चेति। **'आदित्याज्जायते वृष्टिः' इति स्मृतिमवष्टभ्य व्याचष्टे—**कैश्चिदिति।

भाष्यार्कप्रकाशः

[त्मको] वेदोऽहमेव। ऋगहमेव, सामाहमेव, यजुरहमेवेति प्रत्येकान्वयो वा॥ १७॥

**गतिरिति।** अत्र जगतः इति पूर्वश्लोकस्थस्य पदस्यानुवृत्तिः। जगतो गतिरहम्, जगतो भर्ताऽहमित्याद्यूह्यम्। **साक्षी** साक्षाद्द्रष्टा। **कृतं** सत्कर्म, **अकृतं** दुष्कर्म। यद्वा **कृतं** विहितम्, **अकृतम्** अविहितम्। कृतं चाकृतं च कृताकृते, तयोः समाहारः **कृताकृतं** तस्य। कृताकृतयोरित्यर्थः। **निवासो** निलयः। निवसन्त्यस्मिन्निति निवासः। प्रभवत्यस्मादिति **प्रभवः** उपादानम्। प्रभवस्थानप्रलय-शब्दैः सृष्टिस्थितिलयहेतुत्वमुच्यते। **अव्ययं** यावत्संसारमविनाशीत्यर्थः। **अबीजं** बीजरहितं **किञ्चित्** सस्यादि न हि प्ररोहति। **प्ररोहदर्शनादिति।** संसाररूपाङ्कुरस्येति भावः। **बीजसन्ततिः** पुण्यपापादिलक्षणकर्मसन्ततिरिति भावः। **न व्येति** व्ययं नैति।

अत्रापि - 'जगति या याः स्वर्गादिगतयः, धारयितारः, शासितारः, साक्षिणः, वेश्मानि, शरण्यपुरुषाः, हितैषिणः, प्रभवप्रलयस्थानं घटादेः कार्यस्योत्पत्तिप्रलययोर्यत् स्थानं मृदादि तत्, निधानम् उत्पाद्यमुपसंहार्यं च घटादि, अव्ययानि कारणानि च तत् सर्वमहमेव' इति **रामानुजः।** इदं च भाष्यं पूर्वोक्तदोषादेवोपेक्ष्यम्॥ १८॥

**तपामीति।** अहं तपामि; अहं वर्षं निगृह्णामि; अहं वर्षमुत्सृजामि च। केन रूपेण तपसीत्यत आह— **आदित्यो भूत्वेति।** वर्षोत्सर्जननिग्रहणे अप्यादित्यरूपेणैवेत्यभिप्रेत्याह— **कैश्चिद् रश्मिभिरिति।** 'याभिरादित्यस्तपति रश्मिभि'रित्यादिश्रुतेरिति भावः।

१.'ओङ्कारश्च' इति पा.। २.'प्रपन्नानामार्तिहरः' इति पा.। ३.इति व्युत्पत्त्येति शेषः। ४.प्रवाहानादित्वं विवक्षितम्। तच्च स्वपूर्वकालत्वव्यापकस्वसजातीयकत्वम्।

**अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ! ॥ १९ ॥**
**त्रैविद्या मां सोमपाः पूतपापाः यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते।**
**ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान् दिवि देवभोगान् ॥ २० ॥**

**उत्सृज्य पुनर्निगृह्णामि कैश्चिद् रश्मिभिरष्टभिर्मासैः पुनरुत्सृजामि प्रावृषि। अमृतं चैव देवानाम् , मृत्युश्च मर्त्यानाम्।** सद् **यस्य यत् सम्बन्धितया विद्यमानं तत् , तद्विपरीतम्** असत् **चैव, अहमर्जुन ! न पुनरत्यन्तमेवासद् भगवान् स्वयम्। कार्यकारणे** [१]**वा सदसती। ये पूर्वोक्तैरनुवृत्तिप्रकारैः एकत्वपृथक्त्वादिविज्ञानैर्यज्ञैः मां पूजयन्त उपासते ज्ञानविदस्ते यथाविज्ञानं मामेव प्राप्नुवन्ति॥ १९॥**

**ये पुनरज्ञाः कामकामाः—** त्रैविद्या इति। त्रैविद्या **ऋग्यजुःसामविदो** मां **वस्वादिदेवरूपिणं,** सोमपाः **सोमं पिबन्तीति सोमपाः, तेनैव सोमपानेन** पूतपापाः [२]**शुद्धकिल्बिषाः,** यज्ञैरग्निष्टोमादिभिः इष्ट्वा **पूजयित्वा** स्वर्गतिं,

आनन्दगिरिकृतव्याख्या

**वर्षोत्सर्गनिग्रहावेकस्यैकस्मिन् काले विरुद्धावित्याशङ्क्याह—** अष्टभिरिति। **ऋतुभेदेन वर्षस्य निग्रहोत्सर्गावेककर्तृकावविरुद्धावित्यर्थः। यस्य कारणस्य सम्बन्धित्वेन यत् कार्यमभिव्यज्यते तदिह सदित्युच्यते**[३]**, कारणसम्बन्धेनानभिव्यक्तं कारणमेवानभिव्यक्तनामरूपम् असदिति व्यवह्रियते; तदेतदाह—** सदिति। **शून्यवादं व्युदस्यति—** न पुनरिति। **भगवतोऽत्यन्तासत्त्वे कार्यकारणकल्पना निरधिष्ठाना न तिष्ठतीत्यर्थः। तर्हि यथाश्रुतं कार्यस्य सत्त्वं कारणस्य चासत्त्वमास्थेयमित्याशङ्क्य वाशब्देन निषेधति—**कार्येति। [४]**न हि कार्यस्यात्यन्तिकं सत्त्वम् , वाचारम्भणश्रुतेः। नापीतरस्यात्यन्तिकमसत्त्वम् , 'कुतस्तु खलु' इत्यादिश्रुतेरित्यर्थः। उक्तैर्ज्ञानयज्ञैर्भगवदभिनिविष्टबुद्धीनां किं फलमित्याशङ्क्य , सद्यो वा क्रमेण वा मुक्तिरित्याह—** य इति॥ १९॥

**भगवद्भक्तानामपि निष्कामानामेव मुक्तिरिति दर्शयितुं सकामानां पुंसां संसारमवतारयति—** ये पुनरिति। **तिस्रो विद्या अधीयते विदन्तीति वा त्रैविद्या वेदविदः, तदाह—** ऋगिति। **वस्वादीत्यादिशब्देन** [५]**सवनद्वयेशाना आदित्या रुद्राश्च गृह्यन्ते।** शुद्धकिल्बिषाः

भाष्यार्कप्रकाशः

सूर्यरश्मीनामेव कासांचित् पर्जन्यरूपत्वाद् वर्षोत्सर्जनं रश्मीनाम्। **चतुरो मासानिति**। आषाढादिमासचतुष्कमित्यर्थः। अत्यन्तसंयोगे द्वितीया। **अष्टभिर्मासैरिति**। अष्ट मासानित्यर्थः। **पुनरिति**। अनेन वर्षोत्सर्जननिग्रहणयोः प्रवाहानादित्वं द्योत्यते बीजाङ्कुरवत्। **अमृतं** मृत्यभावः, तस्य देवधर्मत्वादाह— **देवानामिति**। यद्वा मरणाभावहेतुः सुधा अमृतम्। मृत्युः मरणं मरणहेतुर्देवताविशेषो वा। मृत्युदेवता हि प्रसिद्धा। यस्य पुत्रादेः यत् सम्बन्धितया विद्यमानं पित्रादिरूपं वस्तु तदहमेव। **तद्विपरीतमिति**। सम्बन्धितया अविद्यमानमित्यर्थः। असम्बन्धितया विद्यमानमिति यावत्। विद्यमानं वस्तु **सत्** , अविद्यमानं तु **असत्** इत्युक्तौ शशशृङ्गादेरपि भगवद्रूपत्वं स्यात्। तच्चानिष्टम् , सद्रूपस्य भगवतः शशशृङ्गादिरूपत्वासम्भवादित्याह— **न पुनरिति**। यद्वा **सत्** व्यक्तत्वात् स्फुटं कार्यम्। **असद्** अव्यक्तत्वादस्फुटं कारणमित्याह— **कार्येति**।

यत्तु **रामानुजः** - 'सद् वर्तमानम् , असद् अतीतमनागतं च' इति; **तन्मन्दम् ;** येन केनापि रूपेण सर्वस्य सर्वदाऽपि वर्तमानत्वेनातीतानागतयोरपि वर्तमानत्वात्॥ १९॥

**त्रैविद्या इति**। तिस्रो विद्या अधीयते विदन्ति वा त्रैविद्याः। **शुद्धं** निरस्तं किल्बिषं येषां ते शुद्धपापाः, निष्पापा इत्यर्थः। स्वरित्यव्ययं स्वर्गे वर्तते। तस्य गतिः स्वर्गतिः, स्वर्गं प्रति गमनमित्येकोऽर्थः। अर्थान्तरमाह— **स्वरेव गतिरिति**। गम्यत इति गतिः

१. आनन्दगिरिव्याख्यानुसारेणात्र वाशब्दो नञोऽनुषङ्गार्थः। 'न वा कार्यकारणे सदसती' इति योजना। २. भाष्ये 'शुद्धपापाः' इति रा.पा. भाति। ३. अभिव्यक्त-नामरूपत्वं सत्त्वम् , अनभिव्यक्तनामरूपत्वं चासत्त्वमिति भावः। द्र.ब्र.सू.२.१.१७। ४. यथाश्रुतसत्त्वासत्त्वयोस्त्यागे बीजमाह—न हीति। ५. 'सवनद्वयेशाना-दित्यरुद्राश्च' इति पा.।

**ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति।**
**[१]एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते ॥२१॥**

**स्वर्गगमनं स्वर्गतिः, तां प्रार्थयन्ते। ते च** पुण्यं **पुण्यफलम्** आसाद्य **सम्प्राप्य** सुरेन्द्रलोकं **शतक्रतोः स्थानम्** अश्नन्ति **भुञ्जते** दिव्यान् **दिवि भवान् अप्राकृतान्** देवभोगान् **देवानां भोगास्तान्**[२] ॥२०॥

ते तमिति। **ते तं भुक्त्वा स्वर्गलोकं** विशालं **विस्तीर्णं, क्षीणे पुण्ये मर्त्यलोकमिमं** विशन्ति **आविशन्ति।** [३]एवं **यथोक्तेन प्रकारेण** [४]त्रयीधर्मं **केवलं वैदिकं कर्म अनुप्रपन्नाः,** गतागतं **गतं चागतं च गतागतं गमनागमनं,** कामकामाः **कामान् कामयन्त इति कामकामाः लभन्ते। गतागतमेव, न तु स्वातन्त्र्यं क्वचिल्लभन्त इत्यर्थः ॥२१॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

तिसृणां विद्यमानां[विद्यानां] समाहारस्त्रैविद्या[५] विद्यते एषां ते त्रैविद्याः। वेदत्रयविहितकर्मकारिण इत्यर्थः ॥२०॥

**॥ इति श्रीगीताभाष्यटिप्पणे नवमोऽध्यायः ॥**

आनन्दगिरिकृतव्याख्या

**निरस्तपापा इति यावत् ॥२०॥**

**तर्हि स्वर्गप्राप्तिरपि भगवत्प्राप्तितुल्येत्याशङ्क्याह—** ते तमिति। **पुण्ये स्वर्गप्राप्तिहेताविति यावत्। प्रसिद्ध्यर्थो हिशब्दः। त्रयाणां हौत्रादीनां वेदत्रयविहितानां धर्माणां समाहारस्त्रिधर्मं, तदेव त्रैधर्म्यम्**[६]**, तदनुप्रपन्नाः। तदनुगता इति यावत्। कामकामानां गमनागमनद्वारा कामितफलाप्तिश्चेदिष्टमेव चेष्टितमित्याशङ्क्याह—** गतेति ॥२१॥

भाष्यार्कप्रकाशः

प्राप्यस्थानम्। त्रैविद्याः सोमपाः पूतपापा मां यज्ञैरिष्ट्वा स्वर्गतिं **प्रार्थयन्ते** याचन्ते। ते पुण्यं सुरेन्द्रलोकमासाद्य दिवि दिव्यान् देवभोगानश्नन्ति। सुरेन्द्रलोकस्य साक्षात्पुण्यत्वाभावादाह— **पुण्यफलमिति**। पुण्यशब्दोऽत्र लक्षणया पुण्यफलपरः। पुण्यं ज्योतिष्टोमादिजन्यम् अदृष्टाख्यं सत्कर्म। इदमेव अपूर्वमित्युच्यते। जीवनिष्ठं चेदम्। ज्योतिष्टोमादिलक्षणः कर्मविशेषो धर्माख्यो वा पुण्यम्। शतक्रतोरिन्द्रस्य स्थानं स्वर्गं [७]यदर्चिरादिमार्गपर्वभूतम्। दिव्यानिति पदं व्याख्याति— **दिवि भवानिति**। भवार्थे यत्प्रत्ययः। **दिवि** स्वर्गे। **अप्राकृतानिति**। अभौमानित्यर्थः, न तु प्रकृत्यजन्यानिति, सर्वस्यापि जगतः प्राकृतत्वात्। **भोगा इति**। भुज्यन्त इति भोगाः; ये भोगाः सुधारम्भादयो देवैर्भुज्यन्ते, तानेव एते भुञ्जत इत्यर्थः ॥२०॥

**त इति। ते** स्वर्गे गताः पुरुषाः **स्वर्गलोकं भुक्त्वा** तल्लोकस्थान् भोगाननुभूयेत्यर्थः। **पुण्ये** स्वर्लोकभोगप्रदप्रारब्धकर्मविशेषे **क्षीणे** भोगवशान्नष्टे सति **मर्त्यलोकं विशन्ति** मुद्गरमुसलप्रहारादिभिः इन्द्रचोदितैराजानिकैर्देवैः निहताः सन्तो देवदेहं विहाय पुनर्मनुष्यदेहं प्रपद्यन्त इत्यर्थः। त्रयीधर्ममनुप्रपन्नाः कामकामा एवं गतागतं लभन्ते। **त्रयी** वेदत्रयं, तत्प्रतिपादितो **धर्मः** ज्योतिष्टोमादिकर्मरूपः, तं त्रयीधर्ममेवानुप्रपन्नाः, न तु निवृत्तिधर्मं शमदमादियुक्तसंन्यासमित्याह— **केवलमिति। वैदिकं** वेदोक्तं कर्म, प्रवृत्तिमार्गमिति भावः। **अनुप्रपन्ना** अनुसृत्य प्राप्ताः, प्रवृत्तिमार्गनिरतान् पूर्वान् मरीच्यादीननुसृत्य स्वयमपि तत्र प्रवृत्ता इत्यर्थः। पूर्वपूर्वजन्मकृतकर्मवासनामनुसृत्य तत्रैव प्रवृत्ता इति वा। **गतं** गमनं स्वर्गं प्रतीति भावः। **आगतम्** आगमनं मर्त्यलोकं प्रतीति भावः। गतागतयोः समाहारो **गतागतं** गतागते इत्यर्थः। जन्ममरणलक्षणः संसारस्तेषामवर्जनीय इति भावः। एवकारार्थमाह— **न त्विति। क्वचिदपि** लोके **स्वातन्त्र्यं** स्वतन्त्रेणावस्थानं नैव लभन्ते। अहो! कामकामानां कर्मिणां दुरवस्थेति भावः ॥२१॥

---

१. 'एवं हि त्रैधर्म्यमनुप्रपन्नाः' इति गीतायां भाष्ये च टीकानुसारी पाठः। २. 'देवानां भोगा देवभोगास्तान्' 'देवानां भोगान्' इति च पा.। ३. 'एवं हि' इति पा.। ४. 'त्रैधर्म्यम्' इति पा.। ५. 'त्रैविद्य'मिति पाठः संभाव्यते। ६. चातुर्वर्ण्यमितिवत् स्वार्थे ष्यञिति भावः। ७. द्र. रामकविव्याख्या भ.गी. ८.२४। पृ ४४९

**अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।**
**तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥२२॥**

**ये पुनर्निष्कामाः सम्यग्दर्शिनः—** अनन्या इति। अनन्याः **अपृथग्भूताः, परं देवं नारायणम् आत्मत्वेन गताः सन्तः चिन्तयन्तो मां ये** जनाः **संन्यासिनः पर्युपासते,** तेषां **परमार्थदर्शिनां** नित्याभियुक्तानां **सतताभियोगिनां** योगक्षेमं योगोऽ**प्राप्तस्य प्रापणं,** क्षेमस्त**द्रक्षणं, तदुभयं** वहामि **प्रापयामि अहम्। 'ज्ञानी त्वात्मैव मे मतम्' (भ.गी. ७.१८) 'स च मम प्रियः' (भ.गी.७.१७) यस्मात् तस्मात् ते ममात्मभूताः प्रियाश्चेति।**

[1]**नन्वन्येषामपि भक्तानां योगक्षेमं वहत्येव भगवान्।** [2]**सत्यमेवं, वहत्येव। किन्त्वयं विशेषः- अन्ये ये भक्तास्ते**

आनन्दगिरिकृतव्याख्या

**फलमनभिसन्धाय त्वामेवाराधयतां सम्यग्दर्शननिष्ठानामत्यन्तनिष्कामानां[णां] कथं योगक्षेमौ स्यातामित्याशङ्क्याह—** ये पुनरिति। **तेषां योगक्षेमं वहामीत्युत्तरत्र सम्बन्धः। येभ्योऽन्यो न विद्यत इति व्युत्पत्तिमाश्रित्याह—** अपृथगिति। **कार्यस्येव कारणे तादात्म्यं व्यावर्तयति—** परमिति। **अहमेव वासुदेवः सर्वात्मा, न मत्तोऽन्यत् किञ्चिदस्तीति ज्ञात्वा तमेव प्रत्यञ्चं सदा ध्यायन्त इत्याह—** चिन्तयन्त इति। **प्राकृतान् व्यावर्त्य मुख्यानधिकारिणो निर्दिशति—** संन्यासिन इति। पर्युपासते **परितः सर्वतोऽनवच्छिन्नतया पश्यन्तीत्यर्थः।** नित्याभियुक्तानां **नित्यमनवरतमादरेण ध्याने व्यापृतानामित्याह—**सततेति। **योगश्च क्षेमश्च योगक्षेमम्। तत्रापुनरुक्त-मर्थमाह—** योग इति। **किमर्थं परमार्थदर्शिनां योगक्षेमं वहसीत्याशङ्क्याह—** ज्ञानी त्विति। **अतस्तेषां योगक्षेमं वहामीति सम्बन्धः।**

**सम्यग्दर्शननिष्ठानामेव योगक्षेमं वहति भगवानिति विशेषणममृष्यमाणः शङ्कते—** नन्विति। **अन्येषामपि भक्तानां भगवान् योगक्षेमं वहतीत्येतदङ्गीकरोति—** सत्यमिति। **तर्हि भक्तेषु ज्ञानिषु च विशेषो नास्तीति पृच्छति—** किन्त्विति। **तत्र विशेषं प्रतिज्ञाय विवृणोति—** अयमित्यादिना। **योगक्षेममुद्दिश्य स्वयमीहन्ते, चेष्टां कुर्वन्तीति यावत्। आत्मविदां स्वार्थं योगक्षेममुद्दिश्य चेष्टाऽभावं**

भाष्यार्कप्रकाशः

**अनन्या इति।** मत्तोऽन्ये न भवन्तीत्यनन्याः, मदभिन्ना इत्यर्थः। कथमभेदो जीवेश्वरयोरत्यन्तविलक्षणयोः? अत आह— **आत्मत्वेनेति।** यदेव जीवस्य स्वरूपभूतं चैतन्यं तदेवेश्वर इति जीवस्यात्मैवेश्वरः। स्वात्मा हि स्वस्मादपृथग्भूतः, स्वस्यैवात्मत्वात्। तथा चेश्वरस्य जीवात्मत्वाज्जीवेश्वरयोरपृथग्भाव इति भावः।

**गताः** प्राप्ताः। नारायण ईश्वरोऽहमेवेति प्रत्ययं प्रतिपन्ना इत्यर्थः। **संन्यासिन इति।** त्यक्तसर्वकर्माण इत्यर्थः। कर्मिणामात्म-स्वरूपचिन्तनानधिकारात्, तेषां तदसम्भवाच्चेति भावः। **पर्युपासते** परितः सर्वतः, सर्वावस्थास्वित्यर्थः। **उपासते** भजन्ते; आत्मारामा भवन्तीत्यर्थः। **अभियोग** आत्मनि चित्तसमाधानम्। **तद्रक्षणं** प्राप्तस्य परिरक्षणम्। यदणिमाद्यैश्वर्यं ज्ञानिभिर्ज्ञानान्न प्राप्तं तदीश्वरः स्वयमेव ज्ञानिनः प्रापयति; यत्तु ज्ञानं तैः प्राप्तं तच्च परिरक्षति, विस्मरणाद्यजननद्वारेति भावः।

कुत ईश्वरो ज्ञानिनां योगक्षेमं वहतीत्यत आह— **ज्ञानी त्विति।** ज्ञानिनामीश्वरात्मत्वेनेश्वरस्य प्रियत्वादित्यर्थः। आत्मनः प्रियत्वं च प्रसिद्धम्। न च जीवस्यैवेश्वर आत्मेति कथमीश्वरस्य जीव आत्मा स्यादिति वाच्यम्; एकमेव चैतन्यं जीवस्येश्वरस्य च स्वरूपमितीश्वरस्याप्यात्मा जीव एव। आत्मा हि स्वरूपम्। तस्माच्चैतन्यरूपा ज्ञानिन ईश्वरस्यात्मभूता एव। चैतन्यरूप ईश्वरश्च ज्ञानिनामात्मभूत एव। अत एव 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय' इत्युक्तमत्रैव। आत्मा हि प्रिय इति। न च अज्ञा अपि चैतन्यरूपत्वात् प्रिया एवेश्वरस्येति वाच्यम्; अज्ञानां देहादेरेवात्मत्वेनाभिमतत्वेन तस्याचैतन्यरूपत्वान्नेश्वरप्रियत्वमिति।

नन्वीश्वरो ज्ञानिनामेव योगक्षेमं वहतीति कथमुच्यते? भक्तानामपि तं वहत्येवेत्याक्षिपति— **नन्विति। अन्येषामिति।** ज्ञानि-

१. 'नन्वन्येषामपि भक्तानाम् .... अतो भगवानेव तेषां योगक्षेमं वहतीति' इत्यन्तं भाष्यमेव रापुस्तके एतच्छ्लोकावतारिकारूपेण व्याख्याने मुद्रितम्। मूले तु तत्र तन्न दृश्यते। एतत्तु प्रामादिकम्, अग्रे तद्भाष्यव्याख्यानदर्शनात्। २. 'सत्यम्, वहत्येव' इति पा.।

**येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयाऽन्विताः।**
**तेऽपि मामेव कौन्तेय! यजन्त्यविधिपूर्वकम् ॥२३॥**
**अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च।**

**स्वात्मार्थं स्वयमपि योगक्षेममीहन्ते। अनन्यदर्शिनस्तु नात्मार्थं योगक्षेममीहन्ते। न हि ते जीविते मरणे वाऽऽत्मनो गृद्धिं कुर्वन्ति। केवलमेव भगवच्छरणास्ते। अतो भगवानेव तेषां योगक्षेमं वहतीति॥२२॥**

**नन्वन्या अपि देवतास्त्वमेव चेत् तद्भक्ताश्च त्वामेव** [१]**यजन्ते। सत्यमेवम्—** य इति। **येऽपि** अन्यदेवताभक्ताः **अन्यासु देवतासु भक्ता अन्यदेवताभक्ताः सन्तो** यजन्ते **पूजयन्ति** श्रद्धयाऽऽस्तिक्यबुद्ध्याऽन्विताः **अनुगताः, तेऽपि मामेव कौन्तेय ! यजन्ति** अविधिपूर्वकम् , अविधिः **अज्ञानम् , तत्पूर्वकम् अज्ञानपूर्वकं यजन्त इत्यर्थः॥२३॥**

**कस्मात् तेऽविधिपूर्वकं यजन्त इत्युच्यते यस्माद्—** अहमिति। **अहं हि** सर्वयज्ञानां **श्रौतानां स्मार्तानां च**

आनन्दगिरिकृतव्याख्या

**स्पष्टयति—** न हीति। गृद्धिः **अपेक्षा, कामना, तामित्येतत्। ज्ञानिनां तर्हि सर्वत्रानास्थेत्याशङ्क्याह—** केवलमिति। **तेषां तदेकशरणत्वे फलितमाह—** अत इति। **इतिशब्दो विशेषशब्देन सम्बध्यते॥२२॥**

**तत्तद्देवतात्मना परस्यैवात्मनः स्थित्यभ्युपगमाद् देवतान्तरपराणामपि भगवच्छरणत्वाविशेषात् तदेकनिष्ठत्वमकिञ्चित्करमिति मन्वानः शङ्कते—** नन्विति। **उक्तमङ्गीकृत्य परिहरति—** सत्यमित्यादिना। **देवतान्तरयाजिनां भगवद्याजिभ्यो विशेषमाह—** अविधीति। **तद् व्याकरोति—** अविधिरिति॥२३॥

**ननु वस्वादित्येन्द्रादिज्ञानपूर्वकमेव तद्भक्तास्तद्याजिनो भवन्तीति कथमविधिपूर्वकं तेषां यजनमिति शङ्कते—** कस्मादिति। **देवतान्तरयाजिनां यजनमविधिपूर्वकमित्यत्र हेत्वर्थत्वेन श्लोकमुत्थापयति—** उच्यत इति। **सर्वेषां द्विविधानां यज्ञानां वस्वादिदेवतात्वेना-**

भाष्यार्कप्रकाशः

भिन्नानामित्यर्थः। **आत्मार्थं** स्वार्थम्। **ईहन्ते** वाञ्छन्ति। **गर्धिं** काङ्क्षाम्। 'गृधू अभिकाङ्क्षाया'मिति धातुः। भावार्थे [२]क्तिन्। हिशब्दः 'नाभिनन्देत मरणं नाभिनन्देत जीवितम्। कालमेव प्रतीक्षेत निर्देशं भृतको यथा॥' इति नारदपरिव्राजकोपनिषत्प्रसिद्धिं दर्शयति। भगवान् शरणमाश्रयो येषां ते **भगवच्छरणाः**। आत्मैकनिरता इत्यर्थः। न तु भक्तवद् योगक्षेमादिनिरता इति भावः। ज्ञानिभिरकाङ्क्षितमपि योगक्षेमं भगवान् स्वयमेव वहति; भक्तैस्तु काङ्क्षितमेव वहति भगवानित्ययं विशेष इति फलितार्थः। तथा च भक्ता भगवता स्वयोगक्षेमं वाहयन्ति, न तु भगवान् स्वयमेव भक्तानां योगक्षेमं वहति। ज्ञानिनस्तु न भगवता तं वाहयन्ति, किन्तु भगवानेव ज्ञानिनां तं वहतीति सिद्धम्।

यत्तु **रामानुजः** - मद्भक्तानां मत्प्राप्तिरूपं योगम् , अपुनरावृत्तिलक्षणं क्षेमं च वहामीति। **तन्मन्दम् ;** ईश्वरस्य परिपूर्णचैतन्यरूपस्यात्मनः नित्याप्तत्वेनाप्राप्तत्वाभावात्। ईश्वरं प्राप्तानां पुनरावृत्तिशङ्काया एवाभावेनापुनरावृत्तिं वहामीति वचनस्य व्यर्थत्वेनायुक्तत्वात्॥२२॥

**य इति**। नन्वादित्यादीनां त्वद्रूपत्वस्योक्तत्वादादित्यादिचिन्तकानामपि योगक्षेमं त्वयैव वहनीयम् , आदित्यादिभक्तानामपि त्वद्भक्तत्वाविशेषादित्याक्षिपति— **नन्विति**। येऽप्यन्यदेवताभक्ताः श्रद्धयाऽन्विताः सन्तोऽन्यदेवता यजन्ते, तेऽपि मामेव यजन्ते ममैवान्यदेवतारूपत्वात्। किन्त्वविधिपूर्वकं यजन्ते। न हि तेषामादित्यादिभक्तानाम् आदित्यादिदेवता ईश्वरात्मिका इति ज्ञानमस्तीति भावः॥२३॥

---

१. 'भजन्ते' इति पा.। २. क्तिन्प्रत्यये 'गृद्धि' इति रूपं स्यात्। अतः इन्प्रत्ययेन निर्वाह्यम्। अथवा गृद्धिमित्येवात्र पाठः स्यात्।

**न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥२४॥**
**यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः।**
**भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥२५॥**

**सर्वेषां यज्ञानां देवतात्मत्वेन भोक्ता च, प्रभुरेव च। मत्स्वामिको हि यज्ञः 'अधियज्ञोऽहमेवात्र' (भ.गी.८.४) इति ह्युक्तम्। तथा न तु मामभिजानन्ति** तत्त्वेन **यथावत्। अतश्चाविधिपूर्वकमिष्ट्वा यागफला**च्च्यवन्ति **प्रच्यवन्ते ते॥२४॥**

[1]**येऽप्यन्यदेवता भक्तिमत्त्वेनाविधिपूर्वकं यजन्ते, तेषामपि यागफलमवश्यम्भावि, कथम्?—** यान्तीति। यान्ति **गच्छन्ति** देवव्रताः **देवेषु व्रतं नियमो भक्तिश्च येषां ते देवव्रताः देवान् यान्ति।** पितॄन् **अग्निष्वात्तादीन् यान्ति पितृव्रताः, श्राद्धादिक्रियापराः पितृभक्ताः।** भूतानि **विनायकमातृगणचतुर्भगिन्यादीनि**[2]**[चतुःषष्टियोगिन्यादीनि] यान्ति** भूतेज्या **भूतानां पूजकाः। यान्ति** मद्याजिनो **मद्यजनशीला वैष्णवाः मामेव** [3]**(यान्ति)। समानेऽप्यायासे मामेव न भजन्तेऽज्ञानात् , तेन तेऽल्पफलभाजो भवन्तीत्यर्थः॥२५॥**

आनन्दगिरिकृतव्याख्या

**हमेव भोक्ता, स्वेनान्तर्यामिरूपेण प्रभुश्चाहमेवेति प्रसिद्धमेतदिति** हि**शब्दः। प्रभुरेव चेत्युक्तं विवृणोति—** मत्स्वामिको हीति। **तत्र पूर्वाध्यायगतवाक्यं प्रमाणयति—** अधियज्ञोऽहमिति। **तथापि देवतान्तरयाजिनां यजनमविधिपूर्वकमिति कुतः सिद्धम्? तत्राह—** तथेति। **ममैव यज्ञेषु भोक्तृत्वे प्रभुत्वे च सतीति यावत्। तयोर्भोक्तृप्रभ्वोर्भावस्तत्त्वं, तेन भोक्तृत्वेन प्रभुत्वेन च मां यथावद् यतो न जानन्त्यतो भोक्तृत्वादिना ममाज्ञानान्मय्यनर्पितकर्माणश्च्यवन्ते कर्मफलादित्याह—** अतश्चेति ॥२४॥

**यद्यन्यदेवताभक्ता भगवत्तत्त्वाज्ञानात् कर्मफलाच्च्यवन्ते, तर्हि तेषां देवतान्तरयजनमकिञ्चित्करमित्याशङ्क्याह—** येऽपीति। **देवतान्तरयाजिनामनावृत्तिफलाभावेऽपि तत्तद्देवतायागानुरूपफलप्राप्तिध्रौव्यान्न तदकिञ्चित्करमित्यर्थः। देवतान्तरयाजिनामावश्यकं तत्फलमाशङ्कापूर्वकमुदाहरति—** कथमित्यादिना। नियमो **बल्युपहारप्रदक्षिणप्रह्वीभावादिरित्यर्थः। देवतान्तराराधनस्यान्तवत्फलमुक्त्वा भगवदाराधनस्यानन्तफलत्वमाह—** यान्तीति। **भगवदाराधनस्यानन्तफलत्वे देवतान्तराराधनं त्यक्त्वा भगदाराधनमेव युक्तम् आयाससाम्यात् , फलातिरेकाच्चेत्याशङ्क्याह—** समानेऽपीति। **अज्ञानाधीनत्वेन देवतान्तराराधनवतां फलतो न्यूनतां दर्शयति—** तेनेति ॥२५॥

भाष्यार्कप्रकाशः

**अहमिति। देवतात्वेनेति।** इन्द्रादिदेवतारूपत्वेनेत्यर्थः। यज्ञेषु हविर्भागभोक्तारो ये इन्द्रादित्यशङ्करादयो देवास्ते सर्वे मयीश्वरे स्वात्मनि कल्पिता इति मदात्मका एव। इन्द्रादिदेवताशरीरावच्छिन्नचैतन्यस्येश्वरत्वाद् इन्द्रादीनामीश्वरात्मकत्वमिति वा। अहं स्वामी प्रभुर्यस्य स मत्स्वामिकः। मम विष्णोरधियज्ञत्वाद् यज्ञस्याहं प्रभुरित्याह— **अधियज्ञ इति। यथावदिति।** एक एवेश्वर इन्द्रादिसर्वदेवतात्मकः सर्वयज्ञात्मकः सर्वयज्ञप्रभुरित्यादिरूपेणेत्यर्थः। **च्यवन्ति** भ्रश्यन्ति। कस्मादपादानादित्यत आह— **यागफलादिति।** ज्ञानादिलक्षणादिति भावः। न तु स्वर्गादिलक्षणात् , तस्य तेषामवश्यम्भावित्वस्य वक्ष्यमाणत्वात्। ये तु ज्ञानिनः सर्वात्मकमीश्वरं ज्ञात्वा यत्किञ्चिदपि फलमनभिसन्धाय केवलं यज्ञादिकर्म कुर्वन्ति, ते ज्ञानप्राप्तिद्वारा मोक्षं लभन्ते, न त्वज्ञा इति भावः॥२४॥

**यान्तीति। देवान् यान्ति** देवलोकं गच्छन्तीत्यर्थः। एवमुत्तरत्रापि। **वैष्णवा** विष्णोरीश्वरस्यात्मनो भक्ताः। **मां यान्ति** ईश्वरसायुज्यं लभन्त इत्यर्थः। ते देवादिभक्ता अल्पफलं क्षुद्रफलं स्वर्गादिकम् , नश्वरत्वात् तस्य। अनेन विष्णुभक्तानां विष्णुसायुज्यरूपमहाफलप्राप्तिरिति द्योतितम्।

---

१. 'येऽप्यन्यदेवताभक्तास्तत्त्वेनाविधिपूर्वकं' इति पा.। २. 'चतुर्भगिन्यादीनि' इत्यस्य स्थाने कोष्ठकस्थः पाठः भाष्योत्कर्षदीपिकायां दृष्टः, आनन्दाश्रमपुस्तके पाठान्तरत्वेन निर्दिष्टश्च। स एव प्रसिद्धार्थकत्वेन युक्त इति भाति। अत्र विनायकाः इति बहुवचनान्तेन विग्रहो बोध्यः। ते च भूतगणविशेषाः। ३. क्वचिन्न।

**पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।**
**तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥२६॥**
**यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।**
**यत्तपस्यसि कौन्तेय ! तत् कुरुष्व मदर्पणम् ॥२७॥**

**न केवलं मद्भक्तानामनावृत्तिलक्षणमनन्तफलम् , सुखाराधनश्चाहम् , कथम् ?—**पत्रमिति। **पत्रं पुष्पं फलं** तोयम् **उदकं यो** मे **मह्यं भक्त्या प्रयच्छति, तद् अहं पत्रादि भक्त्योपहृतं भक्तिपूर्वकं प्रापितं** भक्त्युपहृतम् अश्नामि **गृह्णामि** प्रयतात्मनः **शुद्धबुद्धेः** ॥२६॥

**यत एवम् अतः—** यदिति। **यत् करोषि स्वतः प्राप्तं, यदश्नासि, यच्च** जुहोषि **हवनं निर्वर्तयसि श्रौतं स्मार्तं वा, यद्** ददासि **प्रयच्छसि ब्राह्मणादिभ्यो हिरण्यान्नाज्यादि , यत्** तपस्यसि **तपश्चरसि, कौन्तेय ! तत् कुरुष्व** मदर्पणं **मत्समर्पणम्**[१] ॥२७॥

आनन्दगिरिकृतव्याख्या

**अनन्तफलत्वाद् भगवदाराधनमेव कर्तव्यमित्युक्तम् , सुकरत्वाच्च तथेत्याह—** न केवलमिति। **भगवदाराधनस्य सुकरत्वमेव प्रश्नपूर्वकं प्रपञ्चयति—** कथमित्यादिना। **यद्धि पुष्पादिकं भक्तिपूर्वकं मदर्थमर्पितम् , तेनायं शुद्धचेतास्तपस्वी मामाराधयतीत्यहमवधारयामीत्याह—** पत्रमित्यादिना ॥२६॥

**तदाराधनस्य सुकरत्वे तदेवावश्यकमित्याह—** यत इति। स्वतः **शास्त्रादृते प्राप्तं गमनादीति यावत्।** यदश्नासि **यं कञ्चिद् भोगं भुङ्क्ते। हवनस्य स्वतस्त्वं वारयति—** श्रौतमिति। मत्समर्पणं **तत् सर्वं मह्यं समर्पयेत्यर्थः** ॥२७॥

भाष्यार्कप्रकाशः

यत्तु **रामानुजः** - 'देवव्रता देवान् यजामह इति सङ्कल्पशालिनः देवान् यान्ती'त्यादि। **तन्मन्दम् ;** सङ्कल्पमात्रेण क्रियाकरणं विना फलसिद्ध्ययोगात्। अन्यथा 'अहं काशीं गमिष्यामी'ति सङ्कल्पवशादेव काशीगमनं विनाऽपि गङ्गास्नानविश्वेश्वरदर्शनादिजन्यफलसिद्धिप्रसङ्गात् ॥२५॥

**पत्रमिति। न केवल**मित्यस्य अनन्तफलमित्यनेन सम्बद्धः[न्धः], किन्तु मदाराधने सुखम् अनायासोऽप्यस्तीत्याह— **सुखाराधन इति।** सुखेनाराधनं यस्य स सुखाराधनः; सुखेनाराध्य इत्यर्थः। कथं तव सुखाराधनत्वमित्याक्षिपति - **कथमिति।** यो मे भक्त्या पत्रं पुष्पं फलं तोयं प्रयच्छति प्रयतात्मनो भक्त्युपहृतं तद् अहमश्नामि। **शुद्धबुद्धेः** सम्बन्धीति शेषः। **मे** मह्यं हृदयेशयात्मने सर्वव्यापिने परमात्मने इति वा। आदित्यमण्डलस्थाय पुरुषायेति वा। ईश्वराय पत्राद्युपहरणं च मानसिकमिति बोध्यम्।

**ननु** अभोक्तुरीश्वरस्य कथं पत्राद्यशनमिति **चेद्**? अत एव गृह्णामीति व्याख्यातम् **अश्नामी**ति पदं भाष्यकारैः। ईश्वरस्य सर्वव्यापित्वेन सर्वसंसृष्टत्वात् सर्वं तेन स्वीकृतमेवेति भावः।

काल्यादिदेवताराधने तु रक्तमांसादिवस्तुसम्पादनप्रयासः, ईश्वराराधने तु पत्रपुष्पादीनां सर्वसुलभत्वान्न तत्सम्पादनप्रयास इति सुखाराधन ईश्वर इति श्लोकस्यान्वयः ॥२६॥

**यदिति।[अत इति।]** यत एवं भक्तकर्तृकपत्राद्युपहरणेनापीश्वरस्तुष्टस्तस्मै भक्ताय महाफलं प्रदत्ते, तस्मादित्यर्थः। यद् युद्धादिकं गमनादिकं वा कर्म करोषि, स्वतो यदृच्छया प्राप्तं यदन्नं व्रीह्यादिकमश्नासि, यदाज्यादिकं **जुहोषि** अग्नौ प्रक्षिपसि। इदमेवाह— **श्रौतं स्मार्तं वा हवनं निर्वर्तयसीति।** श्रुतिस्मृतिसिद्धां होमक्रियां निष्पादयसीत्यर्थः। **मदर्पणमिति।** ईश्वरार्पणमस्त्विति मनःशुद्धिपूर्वकं

१. 'नारायणायेति समर्पयामी'ति भावना कर्तव्येति यावत्।

**शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः।**
**संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥२८॥**
**समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।**
**ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥२९॥**

**एवं कुर्वतस्तव यद्भवति तच्छृणु—** शुभाशुभफलैरिति। शुभाशुभफलैः **(एवं) शुभाशुभे इष्टानिष्टे फले येषां तानि शुभाशुभफलानि कर्माणि, तैः शुभाशुभफलैः** कर्मबन्धनैः **कर्माण्येव बन्धनानि कर्मबन्धनानि, तैः कर्मबन्धनैः** एवं **मत्समर्पणं कुर्वन् मोक्ष्यसे । सोऽयं संन्यासयोगो नाम, संन्यासश्चासौ मत्समर्पणतया कर्मत्वाद् योगश्चासाविति, तेन संन्यासयोगेन युक्त** आत्माऽन्तः**करणं यस्य तव, स त्वं** संन्यासयोगयुक्तात्मा **सन् विमुक्तः कर्मबन्धनैर्जीवन्नेव, पतिते चास्मिञ्शरीरे माम्** उपैष्यसि **आगमिष्यसि॥२८॥**

**रागद्वेषवांस्तर्हि भगवान् , यतो भक्ताननुगृह्णाति, नेतरानिति। तन्न ; —** समोऽहमिति। समः **तुल्योऽहं सर्वभूतेषु । न मे द्वेष्योऽस्ति न प्रियः। अग्निवदहम् । दूरस्थानां यथाऽग्निः शीतं नापनयति, समीपमुपसर्पतामपनयति, तथाऽहं भक्ताननुगृह्णामि, नेतरान्। ये भजन्ति तु माम् ईश्वरं भक्त्या, मयि ते स्वभावत एव, न मम रागनिमित्तं, (मयि)**

आनन्दगिरिकृतव्याख्या

**किमतो भवति? तदाह—** एवमिति। **भगवदर्पणबुद्ध्या सर्वकर्म कुर्वतो जीवन्मुक्तस्य प्रारब्धकर्मावसाने विदेहकैवल्यमावश्यकमित्याह—** शुभेत्यादिना। **भगवदर्पणकरणान्मुक्तिः, संन्यासयोगाच्चेति साधनद्वयशङ्कां** [1]**शातयति—** सोऽयमिति ॥२८॥

**भगवतो रागद्वेषवत्त्वेनानीश्वरत्वमाशङ्क्य परिहरति—** रागेत्यादिना। **तर्हि भगवद्भजनम् अकिञ्चित्करमित्याशङ्क्याह—** अग्निवदिति। **तत् प्रपञ्चयति—** यथेति। **भक्तानभक्तांश्च** [2]**अनुगृह्णतोऽननुगृह्णतश्च भगवतो न कथं रागादिमत्त्वमित्याशङ्क्याह—** ये भजन्तीति।

भाष्यार्कप्रकाशः

मह्यं समर्पयेत्यर्थः। एवं सति फलसङ्गत्यागो भवतीति भावः॥२७॥

तमेव भावं स्फुटयति— **शुभाशुभेति। एवं कुर्वत इति।** सर्वमपीश्वरार्पणं कुर्वत इत्यर्थः। फलसङ्गे सति कर्माणि शुभाशुभफलैर्बध्नन्ति पुरुषम् , तत्त्यागे तु नास्त्यस्य कर्मबन्धः। तत्त्यागश्च तस्येश्वरार्पणाद् भवतीति सर्वमीश्वरायार्पयितव्यमिति भावः। **मोक्ष्यसे** त्यक्ष्यसे, निर्मुक्तकर्मबन्धनो भविष्यसि, मुक्तो भविष्यसीति यावत्। सोऽयं पूर्वोक्तः ईश्वरार्पणबुद्ध्या कर्मकरणात्मकः संन्यासयोगः, ईश्वरार्पणतया फलसङ्गत्यागात् संन्यासः, संन्यासशब्दस्य त्यागार्थकत्वात् , कर्मानुष्ठानरूपत्वाद् योग इत्याह— **कर्मत्वादिति**। जीवन्नेव बन्धनैः कर्मभिः **विमुक्तः सन्** जीवन्मुक्तिं प्राप्तः सन्नित्यर्थः। सति कर्मसु कर्तृत्वाभिमाने फलसङ्गे च तत्सिद्ध्यसिद्धिभ्यां हर्षशोकादिविकारः स्यात्, तदभावे तु विकाराभावाज्जीवन्मुक्तिरिति भावः। निर्विकारतयाऽवस्थानस्यैव जीवन्मुक्तिरूपत्वात्। **पतिते** मृते सति। **मामुपैष्यसि** मत्सायुज्यं प्राप्स्यसि; ब्रह्मैव भविष्यसीत्यर्थः॥२८॥

**सम इति। रागद्वेषवानिति**। भक्तेषु रागः, अभक्तेषु द्वेषः। तावस्य स्त इति रागद्वेषवान्। प्राकृतराजादिवदिति भावः। **तन्न** भगवतो रागद्वेषवत्त्वं न। **सम इति**। सर्वभूतेष्वात्मन एकरूपत्वेन; सर्वघटेष्वाकाशस्येव स्थितत्वादिति भावः। एवं सर्वत्रैकरूपत्वादविक्रियत्वाच्चात्मनो न कश्चिद् द्वेष्यः, न कश्चित् प्रियश्चास्ति। प्रीतिद्वेषयोर्निर्धर्मके आत्मन्ययोगादिति भावः। अस्य सर्वसमत्वे दृष्टान्तमाह— **अग्निवदिति**। दृष्टान्तं विवृणोति— **यथेति**। अग्नेः शीतापनयनं स्वभावः, स चाग्निः स्वसमीपं प्राप्तानां सर्वेषामपि

१. नाशयतीत्यर्थः। शदधातोः णिजन्तस्य रूपम्। 'शदेरगतौ तः' (पा.सू. ७-३-४२) इति अगत्यर्थत्वात् तकारः। २. भक्तान् अनुगृह्णतोऽभक्तांश्चाननुगृह्णतो भगवतः इति यथाक्रममन्वयः।

**वर्तन्ते। तेषु चाप्यहं स्वभावत एव वर्ते, नेतरेषु। नैतावता तेषु द्वेषो मम॥२९॥**

आनन्दगिरिकृतव्याख्या

**ये वर्णाश्रमादिधर्मैर्मां भजन्ति, ते तेनैव भजनेनाचिन्त्यमाहात्म्येन परिशुद्धबुद्धयो** मयि [1]**मत्समीपे वर्तन्ते, मदभिव्यक्तियोग्यचित्ता भवन्ति। तुशब्दोऽस्य विशेषस्य द्योतनार्थः।** तेषु च **समीपे तेषामहमपि स्वभावतो वर्तमानस्तदनुग्रहपरो भवामि।** [2]**यथा व्यापकमपि सावित्रं तेजः स्वच्छे दर्पणादौ प्रतिफलति, तथा परमेश्वरोऽवर्जनीयतया भक्तिनिरस्तसमस्तकलुषसत्त्वेषु पुरुषेषु** [3]**सन्निधत्ते, 'दैवीं प्रकृतिमाश्रिताः मां भजन्ती'त्युक्तत्वादित्यर्थः॥२९॥**

भाष्यार्कप्रकाशः

अविशेषेणैव शीतमपनयति; स्वसमीपमगतानां तु न; नैतावताऽग्नेः रागद्वेषरूपः पक्षपातः; किन्त्वग्निसमीपाप्राप्तिः पुरुषस्यैवापराधः। यदि समीपं प्राप्तानां मध्ये केषाञ्चिच्छीतमपनीय केषाञ्चिन्नापनयेत् तर्हि स दोषः स्यादग्नेः, न त्वेतदस्ति। तस्माद् अग्निर्यथा सर्वसमः तथा परमेश्वरोऽपि स्वमाश्रिताननुगृह्णाति, नेतरानिति कृत्वा भगवदनाश्रयणं पुरुषस्यैव दोषः, न तु भगवतः इति।

**ननु** अग्नेः परिच्छिन्नत्वाद् दूरस्थानामग्निसेवा न स्याद् आत्मनस्तु सर्वव्यापिनः कथं कैश्चिदसेव्यत्वमिति चेद्? **नैष दोषः** - सेवाया ज्ञानपूर्वकत्वात् सर्वव्यापिनमप्यात्मानं ये न विदन्ति, ते आत्मना नित्यसङ्गता अपि आत्मानं नैव सेवन्ते; यथा स्वगृहस्थमपि निधिं ये न विदन्ति, ते तं न भजन्त एव। यथा वा स्वकण्ठगतमपि चामीकरं ये विस्मृतवन्तस्ते तं न भजन्त एव, तद्वदिति।

भक्तानामीश्वरे वर्तनम् , ईश्वरस्य भक्तेषु वर्तनं च अग्नेरौष्ण्यवत् स्वभाव एवेत्याह— **ये भजन्तीति**। स्वभावत एवेत्येवकारार्थमाह— **न मम रागनिमित्तमिति**। भक्तानां मयि वर्तने, मम भक्तेषु वर्तने वा, मम भक्तानां वा रागो न निमित्तं, किन्तु स्वभाव एवेत्यर्थः। तथा अभक्तानां मय्यवर्तने, ममाभक्तेष्ववर्तने मम भक्तानां वा द्वेषो न निमित्तं, किन्तु स्वभाव एवेत्याह— **नैतावतेति**। भक्तानामीश्वरे वर्तनं नाम ईश्वरपरायणत्वम् ; तस्य च भक्तेषु वर्तनं भक्तपरायणत्वमिति बोध्यम्।

न च ज्ञानिनां स्वात्मपरायणत्वेन भवितव्यत्वात् कथमीश्वरपरायणत्वम् , ईश्वरस्य वा आत्मारामस्य कथं भक्तपरायणत्वमिति वाच्यम्; ज्ञानिनामात्मन एवेश्वरत्वाद् , ईश्वरस्य च भक्तानामेवात्मत्वात्। भक्तोऽत्र ज्ञानी प्रकरणाद् , आत्मभक्तेश्च ज्ञानसाध्यत्वात्।

तथा च ज्ञानिनाऽऽत्मत्वेनाभिमतं यच्चैतन्यं तस्येश्वरत्वात् ज्ञानिनि वर्तमानः ईश्वरः आत्मनि वर्तमान एव। ईश्वरे वर्तमानो ज्ञानी च स्वात्मनि वर्तमान एवेति ज्ञानीश्वरावुभावप्यात्मनि वर्तनादात्मपरायणावेवेति। नात्र जीवेश्वरभेदः प्रसञ्जनीयः, मयीश्वरे स्वात्मभूते ते वर्तन्ते, तेषु च स्वात्मभूतेषु ज्ञानिष्वहं वर्त इत्यर्थात्। न च ज्ञानिनामीश्वरात्मत्वे विवदितव्यम् , 'ज्ञानी त्वात्मैव मे मत'मित्यत्रैवोक्तत्वात्।

**ननु** मयि ते तेषु चाहमिति अस्मत्तच्छब्दाभ्यां जीवेश्वरयोर्भेदेन निर्देशात् , जीवानां च बहुत्वेन निर्देशात् कथं जीवानामेकेश्वराभेद इति चेद्? **उच्यते**— सप्तम्यन्तयोरस्मत्तच्छब्दयोर्लक्षणया चैतन्यमात्रवाचित्वात् प्रथमान्तयोरभिधया प्रमातृवाचित्वात् प्रमातृणां च बहुत्वात् , जीववदीश्वरस्यापि प्रमातृत्वस्याध्यासिकत्वात् , प्रमातुरीश्वरात् सर्वज्ञात् प्रमातारो जीवाः किञ्चिज्ज्ञा भिन्ना एव, बहव एव च। पारमार्थिकं तु जीवानामीश्वरस्य च स्वरूपं चैतन्यमेवेति सिद्धो जीवेश्वराभेदश्चेति।

यत्तु **वेदान्तदेशिकः** - अहं च ते च अन्योन्यं पित्रादिष्विव न्यस्तभरा इति पिण्डितार्थ इति। **तत्तुच्छम्** , ईश्वरे जीवानां न्यस्तभरत्वेऽपि जीवेष्वीश्वरस्य न्यस्तभरत्वानुपपत्तेः। ईश्वरो हि स्वतन्त्रः सर्वरक्षकश्चेति नास्येतरकर्तृकरक्षापेक्षा, ययेश्वरः स्वरक्षाभरं जीवे न्यसेत्। जीवस्तु परतन्त्रः आत्मानं रक्षितुमक्षमश्चेति स्वरक्षाभरमीश्वरे विन्यसेत्। अत एव हि जीवानामीश्वरशरणागतिः, न तु जीवशरणागतिरीश्वरस्य। अन्यथा ईश्वरस्येश्वरत्वमेव नश्येदिति॥२९॥

---

१. मयीति सप्तमीं सामीप्यपरतया व्याचष्टे— **मत्समीप** इति। सर्वव्यापकस्य परमेश्वरस्याव्यवहितदेशवृत्तित्वरूपमुख्यसामीप्यस्य सर्वत्राविशेषात् तात्पर्यमाह— **मदभिव्यक्तियोग्यचित्ता** इति। २. नन्वेतावता कथं भगवतो वैषम्यपरिहारः? यावता भक्तानेव तच्चित्ते स्फुरन्ननुगृह्णाति, नेतरान् इति वैषम्यभाग् भवत्येवेत्याशङ्कां दृष्टान्तेन परिहरति—यथेत्यादिना। तथा च निष्कामकर्मानुष्ठानभक्तिजन्यचित्तशुद्धिः फलवैषम्ये हेतुरिति भावः। ३. तदीयान्तःकरणेषु प्रतिभासते इति यावत्।

**अपि चेत् सुदुराचारो भजते मामनन्यभाक्।**
**साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः ॥३०॥**
**क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।**
**कौन्तेय ! प्रतिजानीहि न मे भक्तः प्रणश्यति ॥३१॥**
**मां हि पार्थ ! व्यपाश्रित्य येऽपि स्युः पापयोनयः।**

**शृणु मद्भक्तेर्माहात्म्यम्—** अपि चेदिति। अपि चेद् **यद्यपि** सुदुराचारः, **सुष्ठु दुराचारः सुदुराचारः, अतीव कुत्सिताचारोऽपि भजते माम्** अनन्यभाग् **अनन्यभक्तिः सन्** साधुरेव **सम्यग्वृत्त एव स** मन्तव्यो **ज्ञातव्यः।** सम्यग् **यथावद्** व्यवसितो हि स **यस्मात् साधुनिश्चयः सः॥३०॥**

**उत्सृज्य च बाह्यां दुराचारताम् अन्तः सम्यग्व्यवसायसामर्थ्यात्—** क्षिप्रमिति। क्षिप्रं **शीघ्रं भवति** धर्मात्मा **धर्मचित्त एव।** शश्वद् **नित्यं** शान्तिं **चोपशमं** निगच्छति **प्राप्नोति। शृणु परमार्थम् , कौन्तेय!** प्रतिजानीहि **निश्चितां प्रतिज्ञां कुरु - न** मे **मम** भक्तो **मयि समर्पितान्तरात्मा मद्भक्तो न प्रणश्यति - इति॥३१॥**

**किञ्च—** मां हीति। **मां** हि **यस्मात् पार्थ !** व्यपाश्रित्य **मामाश्रयत्वेन गृहीत्वा, येऽपि** स्युः **भवेयुः** पापयोनयः,

आनन्दगिरिकृतव्याख्या

**प्रकृतां भगवद्भक्तिं स्तुवन् पापीयसामपि तत्राधिकारोऽस्तीति सूचयति—** शृण्विति। **सम्यग्वृत्त एव भगवद्भक्तो ज्ञातव्य इत्यत्र हेतुमाह—** सम्यगिति॥३०॥

**हेत्वर्थमेव प्रपञ्चयति—** उत्सृज्येति। **भगवन्तं भजमानस्य कथं दुराचारता परित्यक्ता भवतीत्याशङ्क्याह—** क्षिप्रमिति। **सति दुराचारे कथं धर्मचित्तत्वम्? तदाह—** शश्वदिति। उपशमो [1]**दुराचारादुपरमः। किमिति त्वद्भक्तस्य दुराचारादुपरतिरुच्यते? दुराचारोपहतचेतस्तया किमित्यसौ न नश्यतीत्याशङ्क्याह—** शृण्विति॥३१॥

**इतश्च भगवद्भक्तिर्विधातव्येत्याह—** किञ्चेति। **न मे भक्तः प्रणश्यतीत्यत्र हेतुमाचक्षाणो भक्त्यधिकारे जातिनियमो नास्तीत्याह**

भाष्यार्कप्रकाशः

**अपि चेदिति।** सुदुराचारोऽपि अनन्यभाक् सन् मां भजते चेत् , सः साधुरेवेति मन्तव्यः, हि स सम्यग्व्यवसितः। सुष्टु दुष्ट आचारो यस्य स **सुदुराचारः।** अन्यं न भजत इति **अनन्यभाक्। व्यवसितो** निश्चितः, निश्चयवानिति यावत्। सम्यक् साधु व्यवसितं निश्चयो यस्य स सम्यग्व्यवसितः इत्येकं पदं वा। 'ब्रह्मैवाह'मिति यस्य निश्चयज्ञानं तत्सामर्थ्यात् स पुरुषो दुराचारोऽपि साधुरेव, देहाद्यनात्मधर्मत्वादाचारस्य, न तेनात्मज्ञानिनः काऽपि क्षतिरात्मनो नित्यशुद्धबुद्धमुक्तस्वरूपत्वात् , ज्ञानिनश्चात्मत्वादिति भावः॥३०॥

**क्षिप्रमिति।** दुराचारोऽपि सम्यग्व्यवसायसामर्थ्यात् साधुरेवेत्युक्तं यत् तत् प्रौढ्योक्तमेव। वस्तुतस्तु सम्यग्व्यवसायसामर्थ्यात् स दुराचारमुत्सृज्य सदाचार एव भवतीत्याह— **उत्सृज्येति।** धर्मे आत्मा चित्तं यस्य स **धर्मात्मा। निगच्छति** प्राप्नोति॥३१॥

**मामिति।** ये पापयोनयः स्युः, ते स्त्रियो वैश्याः शूद्रा अपि हे पार्थ! मां व्यपाश्रित्य परां गतिं यान्ति। हि यस्मादेवं तस्मादीश्वरभक्तो न प्रणश्यतीति त्वमेव प्रतिजानीहि। शूद्राणां वेदेषु वैदिकेषु कर्मसु चानधिकारत्वात् पापजन्मत्वम्। वैश्यानां द्विजत्वेन तत्राधिकारेऽपि धान्यादिक्रयविक्रियवृत्त्या पापित्वं तेषाम्। कलौ वैश्यानां शूद्रप्रायत्वादिति वा॥३२॥

---

१. निवृत्तिरूपोपशमस्यावध्याकाङ्क्षां पूरयति— **दुराचारादिति।**

**स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥ ३२ ॥**
**किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा।**
**अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥ ३३ ॥**
**मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।**

**पापा योनिर्येषां ते** पापयोनयः **पापजन्मानः। के त इत्याह— स्त्रियो वैश्यास्तथा शूद्राः। तेऽपि** यान्ति **गच्छन्ति** परां [१]गतिं प्रकृष्टां **गतिम्॥ ३२॥**

किं पुनरिति। **किं पुनर्ब्राह्मणाः** पुण्याः **पुण्ययोनयो भक्ता** राजर्षय**स्तथा राजानश्च त ऋषयश्चेति राजर्षयः। यत एवम् अतो**ऽनित्यं **क्षणभङ्गुरम्** असुखं **च सुखवर्जितम्** इमं लोकं **मनुष्यलोकं प्राप्य, पुरुषार्थसाधनं दुर्लभं मनुष्यत्वं लब्ध्वा** भजस्व **सेवस्व माम्॥ ३३॥**

**कथम्?—** मन्मना इति। **मयि (वासुदेवे) मनो यस्य तव स त्वं** मन्मना भव। **तथा मद्भक्तो भव।** मद्याजी

आनन्दगिरिकृतव्याख्या

— मां हीति॥ ३२॥

**यदि पापयोनिः पापाचारश्च त्वद्भक्त्या परां गतिं गच्छति, तर्हि किमुत्तमजातिनिमित्तेन संन्यासादिना? किं वा सद्वृत्तेन? इत्याशङ्क्याह—** किं पुनरिति। **उत्तमजातिमतां ब्राह्मणादीनामतिशयेन परा गतिर्यतो लभ्यतेऽतो भगवद्भजनं तैरैकान्तेन विधातव्यमित्याह—** यत इति। **मनुष्यदेहातिरिक्तेषु पश्वादिदेहेषु भगवद्भजनयोग्यताभावात् प्राप्ते मनुष्यत्वे तद्भजने प्रयतितव्यमित्याह—** दुर्लभमिति ॥ ३३॥

**भगवद्भक्तेरित्थंभावं पृच्छति—** कथमिति। **ईश्वरभजने इतिकर्तव्यतां दर्शयति—** मन्मना इति। **एवं भगवन्तं भजमानस्य मम**

भाष्यार्कप्रकाशः

**किं पुनरिति**। पापयोनयः स्त्रीवैश्यशूद्रा अपि भगवद्भक्ताश्चेत् परां गतिं यान्ति; किं पुनः पुण्ययोनयो ब्राह्मणा राजर्षयश्च भगवद्भक्ताः परां गतिं यान्तीति वक्तव्यमित्यर्थः। अर्थापत्ति(रिति)रियम्, कैमुत्येनार्थसाधनात्।

**यत एवमिति**। भगवद्भजनाद् मनुष्याणां परमपदप्राप्तिर्यस्माद् भवति, तस्मादित्यर्थः। **क्षणभङ्गुरं** क्षणादेव भङ्गशीलम्, नित्यं मृत्योः सन्निहितत्वादिति भावः। एतेन भगवन्तं श्वो [२]भजिष्यामीत्येवं कालयापना न कर्तव्येति सिद्धम्। **असुखमिति**। रोगादिभूयिष्ठत्वान्मनुष्यदेहस्येति भावः। एतेन विषयेषु न सक्तव्यमिति सूचितम्, तत्र सुखलेशस्याप्यभावात्। इदंशब्दस्य सन्निहितवाचित्वादाह— **मनुष्यलोकमिति**। मनुष्यदेहं प्राप्येत्यर्थः। लोक्यते ज्ञायत इति लोको देह इति व्युत्पत्तेः। न च किमनित्येन मानवदेहेनेत्युपेक्षितव्यमित्याह— **पुरुषार्थसाधनमिति**। न हि पशुपक्ष्यादयः पुरुषार्थं मोक्षं साधयितुमर्हन्ति, तेषां विवेकाभावादिति भावः। ननु पतत्वयं मनुष्यदेहः, पुनर्मनुष्यदेहान्तरप्राप्तौ पुरुषार्थाय यतिष्य इत्यत आह— **दुर्लभमिति**। अतीतानेकजन्मार्जितसुकृतपरिपाकवशादेतन्मनुष्यदेहलाभः, अस्य नाशे तु पुनरेतादृशदेहप्राप्तिर्दुष्प्रापैवेत्यर्थः। अत एव **भागवते प्रह्लादः**— 'कौमार आचरेत् प्राज्ञो धर्मान् भागवतानिह। दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम्॥' इत्युक्तवान्। **मनुष्यत्वं लब्ध्वा** मनुष्यजन्म प्राप्येत्यर्थः। वर्तमान इति शेषः। राजर्षिस्त्वमिति च[३]। मामीश्वरमात्मानं भजस्व॥ ३३॥

**मन्मना इति**। मन्मना भव, मद्भक्तो भव, मद्याजी भव, मां नमस्कुरु। एवं युक्त्वा मत्परायणः सन्नात्मानं मामेवैष्यसि।

---

१. 'गतिम्' इति क्वचिन्न। २. इडागमः चिन्त्यः। ३. शेष इत्यनुषङ्गः।

**मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥३४॥**

**इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः॥९॥**

**मद्यजनशीलो भव। मामेव च नमस्कुरु।** मामेव **ईश्वरम्** एष्यसि **आगमिष्यसि।** युक्त्वा **समाधाय चित्तम् एवम् ,** आत्मानम् **अहं हि सर्वेषां भूतानामात्मा, परा च गतिः, परमयनं, तं माम् एवंभूतमेष्यसीत्यतीतेन पदेन सम्बन्धः; मत्परायणः सन्नित्यर्थः ॥३४॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः॥९॥**

आनन्दगिरिकृतव्याख्या

**किं स्यादित्याशङ्क्याह—** मामेवेति। समाधाय **भगवत्येवेति शेषः। एवमात्मानमित्येतद् विवृणोति—** अहं हीति। **अहमेव परमयनम् तवेति मत्परायणस्तथाभूतः सन् मामेवात्मानमेष्यसीति सम्बन्धः।**

**तदेवं मध्यमानां ध्येयं निरूप्य नवमेनाधमानामाराध्याभिधानमुखेन निजेन पारमार्थिकेन रूपेण प्रत्यक्त्वेन ज्ञानं परमेश्वरस्य परमाराधनमित्यभिदधता सोपाधिकं तत्पदवाच्यं, निरुपाधिकं च तत्पदलक्ष्यं व्याख्यातम्॥३४॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते श्रीमद्भगवद्गीताशाङ्करभाष्यव्याख्याने नवमोऽध्यायः॥९॥**

भाष्यार्कप्रकाशः

युक्त्वेत्यस्यार्थमाह— **चित्तं समाधायेति**। कुतस्तवात्मत्वम्? अत आह— **अहं हीति**। सर्वभूतात्मत्वान्ममात्मत्वमित्यर्थः। **मत्परायणः** अहं परमयनं परा गतिर्यस्य स तथोक्तः। इदमेवाह - **अहं परा च गतिरिति**। गतिः प्राप्यः। परायणशब्दगतपरपदार्थमाह— **अनन्तमिति**। अयनविशेषणत्वात् क्लीबत्वम्। परम् अनन्तम् अयनं गतिः परायणम् , अहमेव परायणं यस्य स **मत्परायणः**। **एवम्भूतमिति**। सर्वभूतानामात्मानं परायणं चेत्यर्थः। **अतीतेनेति**। युक्त्वैष्यसीत्यस्यातीतत्वम्। **एष्यसि** प्राप्स्यसि।

यद्वा मत्परायण इत्यस्य मामेवैष्यसीत्यतीतेन सम्बन्धः, मत्परायणस्त्वं मामेवैष्यसीति। तदेवाह— **मत्परायणः सन्नित्यर्थ इति**। एवं युक्त्वा आत्मानं मामैवेष्यसि, मत्परायणश्च भविष्यसीति वाक्यद्वयान्वयभ्रमव्युदासायोक्तम्— **अतीतेन सम्बन्ध इति**।

वाक्यद्वयान्वये तु ईश्वरसायुज्यप्राप्त्यनन्तरमपि मुक्तस्येश्वरपरायणत्वरूपकर्तव्यशेषसम्भव इत्येष दोषः। मुक्तस्य कृतकृत्यत्व-प्रसिद्धेः।

न च मामेवैष्यसि युक्त्वैवमात्मानमिति समाप्तस्य वाक्यार्थस्य मत्परायण इति पुनरादानात् समाप्तपुनरादानदोषापत्तिरिति वाच्यम्; एवं मत्परायण एव मामेवैष्यसि, नो चेन्नेतीश्वरसायुज्यप्राप्तिं प्रतीश्वरपरायणत्वस्याकाङ्क्षितत्वेन तद्दोषाप्रसक्तेः।

**ईश्वरपरायणत्वं** नाम अनवरतमीश्वरस्वरूपानुसन्धानरूपतदेकनिष्ठत्वमिति बोध्यम्। तस्मात् त्वमीश्वरार्पणबुद्ध्या स्वधर्ममिमं संग्रामं निरभिमानःसन् तावत् कृत्वा पश्चात् सर्वकर्माणि संन्यस्य सम्यग्दर्शनं सम्पाद्य स्वात्मस्वरूपानुसन्धानपरो भव। तथा सति तव ब्रह्मभावो भविष्यतीति पर्यवसन्नार्थः॥३४॥

राजविद्या च तद् राजगुह्यं च राजविद्याराजगुह्यं, तस्य योगोऽत्रेति राजविद्याराजगुह्ययोगः।

**॥इति श्रीबेल्लङ्कोण्डोपनामकरामकविकृते श्रीभगवद्गीताभाष्यार्कप्रकाशे नवमोऽध्यायः॥**

श्रीहयग्रीवार्पणमस्तु

ॐ श्रीपरमात्मने नमः

# ॥ अथ दशमोऽध्यायः ॥

**श्रीभगवानुवाच—**

**भूय एव महाबाहो ! श्रृणु मे परमं वचः।**
**यत् तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया॥ १ ॥**

**सप्तमेऽध्याये भगवतस्तत्त्वं विभूतयश्च प्रकाशिताः, नवमे च। अथेदानीं येषु येषु भावेषु चिन्त्यो भगवांस्ते ते भावाः वक्तव्याः, तत्त्वं च भगवतो वक्तव्यम्** [1]**उक्तमपि दुर्विज्ञेयत्वाद् इत्यतः श्रीभगवानुवाच—** भूय इति। भूय एव **भूयः पुनः, हे महाबाहो ! श्रृणु** मे **मदीयं** परमं **प्रकृष्टं निरतिशयवस्तुनः प्रकाशकं** वचो **वाक्यम्**, यत् **परमं**[2] ते **तुभ्यं** प्रीयमाणाय, **मद्वचनात् प्रीयसे त्वमतीव अमृतमिव पिबन्; ततो वक्ष्यामि** हितकाम्यया **हितेच्छया॥ १ ॥**

### अनुभूतिस्वरूपाचार्यविरचितगीताभाष्यटिप्पणम्

वृत्तानुवादपूर्वकं व्यवहितेन सम्बन्धं कथयति—**सप्तमेऽध्याय इति**। पौनरुक्त्यं परिहरति—**उक्तमपि दुर्विज्ञेयत्वादिति** ॥ १ ॥

### आनन्दगिरिकृतव्याख्या

**अध्यायद्वये सिद्धमर्थं संक्षेपतोऽनुभाषते—** सप्तम इति। तत्त्वं **सोपाधिकं निरुपाधिकं च**। विभूतयः **सविशेषनिर्विशेषरूपप्रतिपत्त्युपयोगिन्यः। उत्तराध्यायस्याध्यायद्वयेन सम्बन्धं वदन्नध्यायान्तरमवतारयति—** अथेति। वक्तव्याः **सविशेषध्याने निर्विशेषप्रतिपत्तौ च** [3]**शेषत्वेनेति शेषः। ननु सविशेषं निर्विशेषं च भगवतो रूपं प्रागेव तत्र तत्रोक्तम्, तत् किमिति पुनरुच्यते? तत्राह—** उक्तमपीति। **यद्यपि तत्र तत्र तत्त्वमुक्तम्, तथापि पुनर्वक्तव्यं दुर्विज्ञेयत्वादिति यतो मन्यते, अत इति योजना। प्रकृष्टत्वं वचसः स्पष्टयति—** निरतिशयेति। **तदेव वचो विशिनष्टि—** यत् परममिति। **सकृदुक्तेरर्थसिद्धेरसकृदुक्तिरनर्थिकेत्याशङ्क्याह—** प्रीयमाणायेति। **ततो वक्ष्यामि तुभ्यमिति पूर्वेण सम्बन्धः।** हितं **दुर्विज्ञेयं तत्त्वज्ञानम्॥ १ ॥**

**कश्चिदन्योऽपि परमं वचो मह्यं वक्ष्यति। तेन च मम तत्त्वज्ञानं भविष्यति। अतो भगवद्वचनमकिञ्चित्करमिति शङ्कित्वा**

### श्रीबेल्लंकोण्डरामरायकविविरचितः

### भाष्यार्कप्रकाशः

वृत्तं कीर्तयति— **सप्तम इति**। सप्तमेऽष्टमे नवमे चाध्याये भगवतस्तत्त्वं प्रकाशितं, विभूतयश्च प्रकाशिताः। **भावाः** पदार्थाः। ननु तत्त्वस्योक्तत्वात् कुतः पुनर्वचनम्? अत आह— **उक्तमपीति**। दुःखेन विज्ञातुं शक्यं **दुर्विज्ञेयं** ज्ञातुमशक्यमित्यर्थः। महान्तौ दीर्घौ आजानुलम्बिनौ बाहू यस्य तत्सम्बुद्धिः **महाबाहो** ! अनेन भगवदंशसम्भूतत्वात् त्वं भगवद्वाक्यश्रवणार्हः इति सूच्यते। वचसः परमत्वं कथम्? अत आह— **निरतिशयवस्तुनः प्रकाशकमिति**। निरतिशयं वस्तु ब्रह्म, तस्य परमत्वात् तत्प्रकाशकवाक्यस्यापि परमत्वमिति भावः। प्रतिपाद्यमहिम्नैव वाक्यस्य गौरवादिति तत्त्वम्। **प्रीयसे** प्रीतिं गच्छसि। **प्रीयमाणाय** प्रीतिं गच्छते। यथा सुधां पिबन् पुरुषः प्रीयते, तथा मद्वचः श्रृण्वन् त्वं प्रीयसे। **ततः** एवं प्रीयमाणत्वात् तव। **हितं** संसारनिवर्तनात्मकम्। तवेति शेषः। तवैव हिताय मया वक्ष्यते, न तु मदर्थम्, मम पूर्णकामत्वादिति भावः॥ १ ॥

---

१. 'बहुकृत्वोऽपि पथ्यं वदितव्यं भवती'ति न्यायेन दुर्विज्ञेयस्य वस्तुनः पुनः कथने पौनरुक्त्यं न दोष इति भावः। एकस्यैव पुनःपुनः कथनस्य अभ्यासरूपतात्पर्यलिङ्गत्वेनाप्युपयोगो ज्ञेयः। २. 'वचः' इति शेषः। ३. उपायत्वेनेत्यर्थः। 'विशेषत्वेन' इति पा.।

**न मे विदुः सुरगणाः प्रभवं न महर्षयः।**
**अहमादिर्हि देवानां महर्षीणां च सर्वशः॥२॥**

**किमर्थमहं वक्ष्यामीत्यत आह—** न म इति। न मे विदुः **न जानन्ति** सुरगणाः [१]**ब्रह्मादयः। किं ते न विदुः? मम** प्रभवं **प्रभावं प्रभुशक्त्यतिशयम्, अथवा** प्रभवं **प्रभवनम् उत्पत्तिम्। नापि** महर्षयो **भृग्वादयो विदुः। कस्मात् ते न विदुः? इत्युच्यते— अहम्** आदिः **कारणं** हि **यस्माद् देवानां महर्षीणां च** सर्वशः **सर्वप्रकारैः॥२॥**

आनन्दगिरिकृतव्याख्या

**परिहरति—** किमर्थमित्यादिना। **इन्द्रादयो भृग्वादयश्च भगवत्प्रभावं न विदन्तीत्यत्र प्रश्नपूर्वकं हेतुमाह—** कस्मादिति। [२]**निमित्तत्वेनोपादानत्वेन च यतो देवादीनां भगवानेव हेतुः, अतः तद्विकारास्ते न तस्य प्रभावं विदुरित्यर्थः॥२॥**

भाष्यार्कप्रकाशः

**नेति**। नन्विन्द्रादयो देवाः, कश्यपादयः ऋषयो वा मह्यं प्रपन्नाय तत्त्वं ब्रूयुरेवेत्याक्षिपति— **किमर्थमहमिति**। मे प्रभवं सुरगणा न विदुः, महर्षयश्च न विदुः। अतो न ते तुभ्यं तत्त्वं वक्तुं शक्नुयुः। ततश्चाहमेव ते वक्ष्यामि। एतेनेश्वरस्यैकस्यैव सर्वज्ञत्वम्, अन्येषां सर्वेषां किञ्चिज्ज्ञत्वमेवेति सिद्धम्।

**नन्व**हं सर्वज्ञत्वात् सर्वं वक्ष्यामीति येन प्रतिज्ञातम्, स किमात्मा? उत प्रमाता? नाद्यः, अविक्रियस्यात्मनो वक्तृत्वादिविकारायोगात्। नान्त्यः, प्रमातुर्जीवत्वेन असर्वज्ञत्वादिति चेत्? **मैवम्**; यथा जीवस्य वास्तवमाध्यासिकं चेति रूपद्वयमस्ति, तथा ईश्वरस्याप्यस्ति। तत्र जीवेश्वरयोर्वास्तवं रूपं चैतन्यलक्षण आत्मैव। तद् एकरूपमेव। आध्यासिकं रूपं तु प्रमातृत्वम्। तज्जीवेश्वरयोर्भिन्नमेव। जीवानां च परस्परं भिन्नमेव। तथा सति यथा जीवो व्यवहारतः प्रमाता, तथा ईश्वरोऽपि प्रमातैव। यथा जीवेषु परस्परं ज्ञानतारतम्यमस्ति, तथा जीवेश्वरयोरस्त्येव। तत्र प्रमाता जीवः किञ्चिज्ज्ञः, तदुपाध्यज्ञानस्य परिच्छिन्नत्वात्। प्रमाता ईश्वरस्तु सर्वज्ञः, तदुपाध्यज्ञानस्यापरिच्छिन्नत्वात्। बुद्धिर्जीवोपाधिः, माया त्वीश्वरोपाधिरिति प्रागेवोक्तम्। बुद्धेः परिच्छिन्नत्वं, मायाया अपरिच्छिन्नत्वं च शास्त्रादिसिद्धम्। एवं सति यः कृष्णशरीरावच्छिन्नः प्रमाता स मायोपाधिक ईश्वर इति सिद्धं तस्य सर्वज्ञत्वम्। इन्द्रादिशरीरावच्छिन्नाः प्रमातारस्तु बुद्ध्युपाधिका जीवा इति सिद्धं तेषां किञ्चिज्ज्ञत्वम्। एवं जीवेश्वरयोः प्रमातृत्वांशे किञ्चिज्ज्ञत्वसर्वज्ञत्वरूपभेदसद्भावेन ऐक्यायोगादेव 'तत्त्वमसी'त्यादौ लक्षणा चैतन्यमात्रविषया स्वीकृता। न च - श्रीकृष्णशरीरे मायावच्छिन्नचैतन्यमस्ति, अस्मदादिशरीरेष्वविद्यावच्छिन्नचैतन्यमस्तीत्यत्र किं नियामकमिति - वाच्यम्, सर्वज्ञत्वकिञ्चिज्ज्ञत्वादेरेव नियामकत्वात्। ततश्च यावद्व्यवहारं प्रमात्रोर्जीवेश्वरयोः प्रमातॄणां जीवानां वा नैक्यमिति कृष्ण ईश्वर एव, इन्द्रादयस्तु जीवा एवेति स्थितम्। परमार्थतस्तु सर्वः प्रमातृवर्गो जीवगण एव। आत्मा एक एवेश्वर इति बोध्यम्। एवं प्रमातुरपीश्वरस्य सर्वज्ञत्वसिद्धेरुचितैव प्रतिज्ञा तस्य।

**आदिरिति**। यथा पुत्रस्य प्रभवं पिता वेत्ति, पितुः प्रभवं तु न पुत्रः, तद्वत् सर्वकारणत्वात् सर्वमीश्वरो वेत्ति, तं तु न सर्वम्, सर्वस्य तत्कार्यत्वादिति भावः। ईश्वरस्य सर्वादित्वं च 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतिसिद्धम्।

**ननु** यदीश्वराज्जीवाः जायेरन्, तर्हि जीवादित्वमीश्वरस्य स्यात्। तदेव नास्ति, जीवानामजत्वेनानादित्वात्। उक्तं हि पूर्वमेव —'अजो नित्यः शाश्वतोऽयं पुराणः'[इति।] 'अजो ह्येको जुषमाणोऽनुशेते' इति श्रुतेश्च। भूतोत्पत्तिश्रुतिस्तु भूतशब्दस्य देहाद्यर्थपरत्ववर्णनेन नेयेति चेत्? **सत्यम्**, इन्द्रादयो हि जीवा देहादिसङ्घातमेवात्मत्वेनाभिमन्यमाना देवोऽहं मनुष्योऽहं ब्राह्मणोऽहमित्येवं प्रतियन्ति, देहे जाते सत्यात्मानं जातम्, देहे नष्टे सत्यात्मानं नष्टं च मन्यन्त इति तद्दृष्ट्योक्तम्— 'अहमादिर्हि देवाना'मिति। देहेन्द्रियादिसङ्घातस्य कार्यत्वेन तत्तादात्म्याध्यासादिन्द्रादिजीवानां कार्यत्वेन सादित्वम्। ईश्वरस्य तु तदभावादनादित्वम्। वस्तुतस्तु जीवोऽपीश्वरवदनादिरेवेति भावः।

---

१. 'ब्रह्मादयः' इति क्वचिन्न। टीकानुसारेणापि नास्तीत्येव भाति। २. 'सर्वशः' इति विशेषणलभ्यमर्थमाह— निमित्तत्वेनोपादानत्वेन चेति।

## योमामजमनादिं च वेत्ति लोकमहेश्वरम्।
## असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥३॥

**किञ्च—** यो मामिति। **यो माम् अजमनादिं च, यस्मादहमादिर्देवानां महर्षीणां च, न ममान्यः आदिर्विद्यते, अतोऽहमजोऽनादिश्च; अनादित्वमजत्वे हेतुः; तं मामजमनादिं च यो** वेत्ति **विजानाति** लोकमहेश्वरं **लोकानां महान्तमीश्वरं** [1]**तुरीयम् अज्ञानतत्कार्यवर्जितम् ,** असम्मूढः **सम्मोहवर्जितः स** मर्त्येषु **मनुष्येषु** सर्वपापैः **सर्वैः पापैः मतिपूर्वामतिपूर्वकृतैः** प्रमुच्यते **प्रमोक्ष्यते॥३॥**

आनन्दगिरिकृतव्याख्या

**इतश्च कश्चिदेव भगवत्प्रभावं वेत्तीत्याह—** किञ्चेति। **कोऽसौ प्रभावो भगवतो यं बहवो न विदुरित्यपेक्षायां, पारमार्थिकं प्रभावं तद्धीफलं च कथयति—** यो मामिति। [2]**पदद्वयापौनरुक्त्यमाह—** अनादित्वमिति॥३॥

भाष्यार्कप्रकाशः

इमे च देवत्वमनुष्यत्वादिजातिविशिष्टदेहाः ईश्वरादेव जायन्त इति 'यतो वा' इति श्रुत्युपपत्तिः, 'अहमादिर्हि देवाना'मिति गीतोपपत्तिश्च।

**किञ्च** अयमीश्वरः स्वयं देहरहितः सन्नेव आकाशादिभूतोत्पादनद्वारा भौतिकानि उत्पादयति सङ्कल्पवशादेव। **यद्वा** भूतानि भौतिकानि च युगपदेवोत्पादयति। **अथवा** हिरण्यगर्भमादावुत्पाद्य तद्द्वारा भूतभौतिकोत्पत्तिं निर्वर्तयति। **यद्वा** स्वयमपि मायया कञ्चिद् देहमधिष्ठाय वर्तमानः सन्नेव तन्नाभीकमलाद् ब्रह्माणमुत्पाद्य तेन सर्वं जगदुत्पादयतीति वा। एवमादयो बहवः सृष्टिप्रकाराः श्रुतिसूत्रपुराणादिषु दृश्यन्ते। सर्वथा चेश्वर एव देवादिजगत्कर्तेत्याह— **सर्वप्रकारैरिति**। एवं देवा महर्षयश्च कार्यभूतदेवत्वमनुष्यत्वादि-विशिष्टदेहादिसङ्घाताभिमानित्वात् सादय एवेति तेषाम् अहमेवादिः, मत्कार्यत्वाद् देहादिसङ्घातानाम्॥२॥

**य इति**। ननु देवानां महर्षीणां च त्वमादिर्भवसि, तव पुनः क आदिः? अत आह— **य इति**। अहमेव सर्वस्य जगत आदिः, न मम कोऽप्यादिः। अन्यथा तस्याप्यन्य आदिरित्यनवस्थादोषापत्तेः। एवमनादित्वादेव अहमजः जन्मरहितः उत्पादकाभावेनोत्पत्त्य-भावात्। एवम् अजत्वेनाकार्यत्वादेव अनन्याधीनस्थितिकोऽहम्। कार्यं हि कारणाधीनस्थितिकम्। ततः स्वतन्त्रत्वाद् अहं **सर्वलोक-महेश्वरो** यस्यान्य ईश्वरो नास्ति स महेश्वरः, यथा महाराजः। य एवम्भूतं माम् [3]**असम्मोहः** ईश्वरो मत्तोऽन्यः इत्याकारकमोहरहितः सन् **वेत्ति** स्वात्मत्वेन जानाति, मर्त्येषु मध्ये स एव विद्वान् सर्वपापैः प्रमुच्यते। ज्ञानानन्तरभावित्वात् पापप्रहाणस्याह— **प्रमोक्ष्यत इति**। पापपदम् उपलक्षणं पुण्यानामपि। तेषामपि बन्धकत्वेन पापत्वात् पापशब्दवाच्यत्वमिति वा। ततश्च संसारान्मोक्ष्यत इत्यर्थः। 'तद्विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्युपैती'ति श्रुतेः।

न चात्र भिन्नेश्वरज्ञानादेव पुंसां पापक्षयो भविष्यतीति कथमभिन्नेश्वरज्ञानमवतारितं त्वयेति वाच्यम् ; ईश्वरतत्त्वज्ञानादेव पाप-क्षयः, न त्वीश्वरभ्रान्तिज्ञानादिति सिद्धान्तात्। ईश्वरतत्त्वस्य च जीवाभिन्नत्वेन भिन्नेश्वरज्ञानस्य भ्रान्तिज्ञानत्वेन पापनिवर्तनाक्षमत्वात्। प्रत्युत पापस्यैव वर्धकत्वात्। जीवरूपेण वर्तमानस्येश्वरस्य नित्यस्याजस्य जन्ममृत्युप्रमुखविकारसम्पादनस्य दोषावहत्वात्। न च कथमीश्वरस्य जीवरूपत्वमिति वाच्यम् ; 'तत्सृष्ट्वा। तदेवानुप्राविशत्' 'ईश्वरो जीवकलया प्रविष्टो भगवानिति' 'ममैवांशो जीवलोके जीवभूतः सनातनः' इति, 'भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः। अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः' इत्येवमादि-श्रुतिस्मृतिपुराणप्रामाण्यात्। न च मायावच्छिन्नस्येश्वरस्य कथं बुद्ध्यवच्छिन्नजीवत्वमिति वाच्यम् ; यदेव चैतन्यं मायावच्छिन्नं तदेव बुद्ध्यवच्छिन्नम्। चैतन्यस्यैकत्वादितीश्वरस्यैव जीवत्वोपपत्तेः। यथा महाकाशस्यैव घटाकाशत्वोपपत्तिः। एवमीश्वरस्यैव जीवत्वाद्

१. 'तुरीयम् अज्ञानतत्कार्यवर्जितम्' इति क्वचिन्न। २. अजम् अनादिम् इति पदद्वयस्य फलत एकार्थकत्वात् पौनरुक्त्यशङ्का। हेतुहेतुमद्भावेन तद्वारणम्। अनादित्वं पूर्वश्लोके सिद्धमिति सामर्थ्याद् हेतुरिति बोध्यम्। दृश्यते चैवं हेतुहेतुमद्भावेन योजनाऽन्यत्रापि। इत्थं च हेतुत्वज्ञापकविभक्त्याद्यभावादिति दूषणम् अकिञ्चित्करम्। ३. 'असम्मोहः' इति रा.पा. भाति।

**बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः।**
**सुखं दुःखं भवोऽभावो भयं चाभयमेव च॥४॥**

**इतश्चाहं महेश्वरो लोकानाम्—** बुद्धिरिति। बुद्धिः **अन्तःकरणस्य सूक्ष्माद्यर्थावबोधनसामर्थ्यम्। तद्वन्तं**

अनुभूतिस्वरूपाचार्यटिप्पणम्

न केवलं दुर्विज्ञेयत्वादिदं तत्त्वं सिद्धम् , हेत्वन्तरमुच्यत इत्याह— **इतश्चाहं महेश्वर इति।** बुद्धिर्भाव[ज्ञान]मित्यादेः 'भवन्ति भावाः' इत्यनेन सम्बन्धः॥४॥

आनन्दगिरिकृतव्याख्या

**भगवतो लोकमहेश्वरत्वे हेत्वन्तरमाह—** इतश्चेति। **मुमुक्षुभिराराध्यत्वसिद्धये बन्धमोक्षसाधनं पुरस्कृत्याशेषजगत्प्रकृत्य-**

भाष्यार्कप्रकाशः

'अजो नित्यः शाश्वतः' इतीश्वरधर्माणामजत्वनित्यत्वादीनां जीवे प्रसञ्जनं प्राक् कृतमिहैव ग्रन्थे। न चाजत्वादीनामीश्वरधर्मत्वे विवदितव्यम् , 'यो मामजमनादिं च' इतीहैवोक्तत्वात्। न च - ईश्वरवज्जीवः अजो नित्यश्चेत्येतावन्मात्रेण कथं जीवेश्वराभेदः? किञ्चिज्ज्ञत्वसर्वज्ञत्वादिबहुवैलक्षण्यसत्त्वादिति - वाच्यम् ; किञ्चिज्ज्ञत्वादीनामाध्यासिकधर्मत्वात्। अविक्रिये निर्धर्मके बोधरूपे आत्मनि किञ्चिज्ज्ञत्वादिविक्रियाऽयोगात् , जीवस्याप्यविक्रियात्मत्वस्य प्रागेवोक्तत्वात्। तस्माज्जीवाभिन्नेश्वरज्ञानमेव यथार्थज्ञानत्वेन पापनिवर्तनक्षमं पुंसामिति स्थितम्।

अत एवोक्तं श्रुत्या— 'अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशु'रिति, 'योऽन्यथा सन्तमात्मानम् अन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चोरेणात्मापहारिणा' इति भारतेन च। तस्माद् भिन्नेश्वरज्ञानिन आत्मानं यथावन्नैव विदन्ति। प्रत्युतान्यथैव विदन्तीति पापकारिण एव ते, न तु निष्पापाः। तथा च पापैः प्रमुच्यत इति लिङ्गाच्च जीवाभिन्नेश्वरज्ञानमेवेह विवक्षितमिति ज्ञायते।

**ननु** इन्द्रादयो जीवाः सादय इति पूर्वश्लोकेनोक्त्वा, इह अहमेवानादिरिति ईश्वरस्यानादित्वं चोक्त्वा कथं जीवेश्वराभेदः प्रतिपाद्यतेऽनुन्मत्तेन व्यासेनेति चेत् , **मैवं वादीः**, देहादिसङ्घातदृष्ट्या देवादीनां सादित्वं पूर्वमुक्तम् , तद्विलक्षणस्यात्मनस्त्वीश्वराभेद इहोच्यत इत्यदोषात्। देहादिसङ्घातविलक्षणः सच्चिदानन्द आत्मैव हीश्वरो नित्योऽजश्च। न ह्यात्मनोऽन्यः कश्चिदीश्वरो नामास्ति।

यत्तु **रामानुजः**— चेतनान्तरसजातीयो भगवान् इत्याकारकमोहरहितः सन् यो मां चिदचिद्विलक्षणतया निखिलहेय-प्रत्यनीकानन्तकल्याणगुणनिलयं कर्मकृताचित्संसर्गरूपजन्मरहितत्वेन बद्धजीवविलक्षणम् आदिमदजत्ववतो मुक्तात्मनश्च विलक्षणम् अजमनादिमीश्वरं जानाति स सर्वपापैः प्रमुच्यत इति। **तत्तुच्छम् ;** चिद्रूपस्येश्वरस्य चिद्विलक्षणत्वायोगात्। 'केवलो निर्गुणश्चे'ति श्रुत्युक्तनिर्गुणस्य गुणनिलयत्वायोगात्। जायमानदेहसंसर्गस्यैव जन्मरूपत्वेन 'कर्मकृताचित्संसर्गो जन्मे'ति वक्तुमयुक्तत्वात् , तस्य च गौरवत्वात्। ईश्वरस्याप्येतादृशजन्मसद्भावेनाजत्वाभावात् बद्धजीववैलक्षण्यासिद्धेः। आदिमत्त्वाजत्वयोर्विरुद्धधर्मयोः एकत्र सामा-नाधिकरण्यायोगेन मुक्तात्मनामादिमदजत्वासिद्धेः। यज्जायते तद्धि आदिमत् , यथा घटः। यत्तु न जायते, कथं तस्यादिमत्त्वम्? किञ्च मुक्तस्येश्वरसायुज्यमापन्नस्य कथमीश्वराद्भेदः? येन मुक्तवैलक्षण्यमीश्वरस्य स्यात्। न चेश्वरसायुज्ये विवदितव्यम् , 'ब्रह्मविद् ब्रह्मैव भवती'ति श्रुतेः। अपि च 'साक्षी चेता' इति श्रुत्युक्तस्य चेतनस्यैकस्येश्वरस्य कथं चेतनान्तरविसजातीयत्वम्? न हि चेतनान्तरमस्ति येन तद्विसजातीयत्वं स्यादीश्वरस्य। 'नान्योऽतोऽस्ति द्रष्टा' इति श्रुत्या हि चेतनान्तरं निषिध्यते इति। उक्तमपीदं पुनःपुनरुच्यते मन्दमत्यनुग्रहार्थम्॥३॥

**बुद्धिरिति। इतश्चेति**। मम सर्वादित्वेन, अनादित्वेन, सुरगणमहर्ष्याद्यविदितप्रभावत्वेन च केवलं न महेश्वरत्वम् , किन्तु हेत्वन्तरादपीत्यर्थः। बुद्धिर्नान्तःकरणं, तस्य द्रव्यत्वेन ज्ञानादिगुणसहपाठायोगादित्यभिप्रेत्याह— **अन्तःकरणस्येति**। बुद्धिशब्दस्य

**अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः।**
**भवन्ति भावा भूतानां मत्त एव पृथग्विधाः॥५॥**

**बुद्धिमानिति हि वदन्ति।** ज्ञानम् **आत्मादिपदार्थानामवबोधः।** असम्मोहः **प्रत्युत्पन्नेषु बोद्धव्येषु विवेकपूर्विका** [1]**प्रवृत्तिः।** क्षमा **आक्रुष्टस्य ताडितस्य वा अविकृतचित्तता।** सत्यं **यथादृष्टस्य यथाश्रुतस्य चात्मानुभवस्य परबुद्धि-संक्रान्तये तथैवोच्चार्यमाणा वाक् सत्यमुच्यते।** दमो **बाह्येन्द्रियोपशमः।** शमः **अन्तःकरणस्य**[2]**।** सुखम् **आह्लादः।** दुःखं **सन्तापः।** भवः **उद्भवः,** अभावः **तद्विपर्ययः।** [3]भयं च **त्रासः,** अभयमेव च **तद्विपरीतम्॥४॥**

अहिंसेति। अहिंसा **अपीडा प्राणिनाम्।** समता **समचित्तता।** तुष्टिः **सन्तोषः पर्याप्तबुद्धिर्लाभेषु।** तपः **इन्द्रिय-संयमपूर्वकं शरीरपीडनम्।** दानं **यथाशक्ति संविभागः।** यशो **धर्मनिमित्ता कीर्तिः।** अयशस्त्व**धर्मनिमित्ताऽकीर्तिः। भवन्ति** भावाः **यथोक्ताः बुद्ध्यादयो** भूतानां **प्राणिनां** मत्त एव **ईश्वरात्** पृथग्विधाः **नानाविधाः स्वकर्मानुरूपेण॥५॥**

आनन्दगिरिकृतव्याख्या

**धिष्ठातृत्वलक्षणं सोपाधिकं भगवत्प्रभावमभिधत्ते—** बुद्धिरिति। **सूक्ष्मादीत्यादिशब्देन सूक्ष्मतरः सूक्ष्मतमश्चार्थो गृह्यते। उक्तं सामर्थ्यं बुद्धिरित्यस्मिन्नर्थे प्रसिद्धिं प्रमाणयति—** तद्वन्तमिति। आत्मादीति। **तदवबोधवन्तं हि ज्ञानिनं वदन्ति।** अन्तःकरणस्य **उपशमो विषयेभ्यो व्यावृत्तिरिति शेषः॥४॥**

यथाशक्तीति। **पात्रे श्रद्धया स्वशक्तिमनतिक्रम्यार्थानां देशकालानुगुण्येन** [4]**प्रतिपादनमित्यर्थः। उक्तानां बुद्ध्यादीनां साश्रयाणाम् ईश्वरादुत्पत्तिं प्रतिजानीते—**भवन्तीति। **नानाविधत्वे हेतुमाह—**स्वकर्मेति। **कथञ्चिदपि तेषामात्मातिरेकेणाभावाद् मत्त एवेत्युक्तम्॥५॥**

भाष्यार्कप्रकाशः

तत्र प्रयोगे लोकप्रसिद्धिं दर्शयति— **तद्वन्तमिति।** तच्छब्दस्यान्तःकरणस्य सूक्ष्माद्यर्थावबोधनसामर्थ्यमर्थः। **बुद्धिमानिति।** अन्यथा सर्वस्याप्यन्तःकरणवत्त्वाविशेषाद् एकस्मिन् पुरुषे बुद्धिमत्त्वप्रसिद्धिर्न सङ्गच्छेतेति भावः। **वदन्ति** लोका इति शेषः। बोद्धुं शक्येषु **बोद्धव्येषु** , बोद्धुं योग्येष्विति वा; विज्ञेयेष्वित्यर्थः। **प्रत्युत्पन्नेषु** उत्पन्नेषूत्पन्नेषु सर्वेषु कार्येष्वित्यर्थः, प्रतेर्वीप्सार्थकत्वात्। 'सप्तम्या बहुलमम्भावः' इति [5]'बहुलग्रहणाद् न अम्भावः। देहेन्द्रियादिसर्वपदार्थेष्विति यावत्। **विवेकपूर्विका** आत्मानात्मविवेकपूर्विकेत्यर्थः। 'उत्पन्नानीमानि सर्वाण्यपि कार्याणि देहादीन्यनात्मानः एव' इत्याकारको विवेकः। स पूर्वः प्रथमो यस्याः सा विवेकपूर्विका विवेक-पुरःसरेत्यर्थः। **मतिप्रवृत्तिः** बुद्धिप्रवृत्तिः असम्मोहः इत्युच्यते। अनात्मसु आत्मेति मोहाभावः इति यावत्। **आत्मानुभवस्य** स्वानुभवसिद्धार्थस्येत्यर्थः। **बाह्येन्द्रियाणि** चक्षुरादीनि। **अन्तःकरणम्** अन्तरिन्द्रियं मनः। **उपशमो** निर्व्यापारता। **तद्विपर्ययः** उत्पत्तिविपर्ययः, नाश इति यावत्। **तदभावो** भयाभावः॥४॥

**अहिंसेति।** सन्तोषमेव विवृणोति— **पर्याप्तेति।** लभ्यन्त इति लाभास्तेषु **पर्याप्तबुद्धिः** अलम्बुद्धिः। तृप्तिरिति यावत्। **संयमो** नियमनम्। शरीरपीडनम् उपवासादिनेति भावः। शक्तिमनतिक्रम्य **यथाशक्ति। संविभागो** धनधान्यादेरर्थिभ्यो विभजनम्। अधर्मो निमित्तं यस्याः सा **अधर्मनिमित्ता अकीर्तिः** दुष्कीर्तिः। भूतानां पृथग्विधा भावा मत्त एव भवन्ति। नन्वेकस्य क्षमादिसद्गुणसर्जनाद् अन्यस्याकीर्त्यादिदुर्गुणसर्जनाच्चेश्वरस्य वैषम्यदोषप्रसक्तिरत आह— **स्वकर्मानुरूपेणेति।** स्वेषां भूतानां यानि कर्माणि पुण्यपापादि-लक्षणान्यदृष्टानि, तदनुरूपेण॥५॥

---

१. 'मतिप्रवृत्तिः' इति रा.पा. भाति। २.'अन्तःकरणस्योपशमः' इति पा.। न चात्र 'शमो मन्निष्ठता बुद्धेः दम इन्द्रियसंयमः'(११-१९-३६) इति भागवतविरोध इति केनचिदुक्तं शङ्क्यम्। 'विरज्य विषयव्राताद् दोषदृष्ट्या मुहुर्मुहुः। स्वलक्ष्ये नियतावस्था मनसः शम उच्यते॥'(वि.चू. २२) इत्युक्तरीत्याऽस्मदभिमतशमपदार्थस्य तदभिन्नत्वात्। ३. 'भयं च त्रासः, अभयमेव च तदभावः' इति रा.पा. भाति। ४. अर्थानां प्रतिपादनं नाम इह धनादेः दानमेवात्र विवक्षितम्। ५. 'तृतीयासप्तम्योः बहुलम्'(पा.सू. २-४-८४) इति सूत्रे इति आदिः।

**महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा।**
**मद्भावा मानसा जाता येषां लोक इमाः प्रजाः॥ ६॥**
**एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः।**
**सोऽविकम्पेन योगेन युज्यते नात्र संशयः॥ ७॥**

**किञ्च—** महर्षय इति। महर्षयः सप्त **भृग्वादयः** पूर्वे **अतीतकालसम्बन्धिनः, चत्वारो** मनवः **तथा, सावर्णाः इति प्रसिद्धाः। ते च** मद्भावाः **मद्गतभावनाः, वैष्णवेन सामर्थ्येनोपेताः,** मानसाः **मनसैवोत्पादिताः मया** जाताः **उत्पन्नाः येषां मनूनां महर्षीणां च सृष्टिः लोके** इमाः **स्थावरजङ्गमलक्षणाः प्रजाः॥ ६॥**

एतामिति। एतां **यथोक्तां** विभूतिं **विस्तारम्,** योगं च **युक्तिं च आत्मनो घटनम्, अथवा योगैश्वर्यसामर्थ्यं सर्वज्ञत्वं योगजं** योगः **उच्यते;** मम **मदीयं (योगं) यो वेत्ति** तत्त्वतः **तत्त्वेन, यथावदित्येतत्। सः** अविकम्पेन **अप्रचलितेन** योगेन **सम्यग्दर्शनस्थैर्यलक्षणेन** युज्यते **सम्बध्यते।** नात्र संशयो **नास्मिन्नर्थे संशयोऽस्ति॥ ७॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

प्रजापतीनामपि मदधीनत्वात् मम सर्वेश्वरत्वं सिद्धमित्याह— **किञ्च महर्षय इति॥ ६॥**

आनन्दगिरिकृतव्याख्या

**न केवलं भगवतः सर्वप्रकृतित्वमेव, किन्तु सर्वज्ञत्वसर्वेश्वरत्वरूपमधिष्ठातृत्वमपीत्याह—** किञ्चेति। **आद्याः** [1]**भृग्वादयो वसिष्ठान्ताः सर्वज्ञाः विद्यासम्प्रदायप्रवर्तकाः।** तथेति **मनूनामपि पूर्वत्वेनाद्यत्वमनुकृष्यते। के ते मनवः? तत्राह—**सावर्णा इतीति। प्रसिद्धाः **पुराणेषु प्रजानां पालकाः स्वयमीश्वराश्चेति शेषः। महर्षीणां मनूनां च तुल्यं विशेषणम्—** ते चेति। **मयि सर्वज्ञे सर्वेश्वरे गता भावना येषां ते तथा। भावनाफलमाह—**वैष्णवेनेति। **वैष्णव्या शक्त्याऽधिष्ठितत्वेन ज्ञानैश्वर्यवन्त इत्यर्थः। तेषां जन्मनो वैशिष्ट्यमाचष्टे—** मानसा इति। **मन्वादीनेव विशिनष्टि—** येषामिति। **विद्यया जन्मना च सन्ततिभूता मन्वादीनामस्मिन् लोके सर्वाः प्रजा इत्यर्थः॥ ६॥**

**सोपाधिकं प्रभावं भगवतो दर्शयित्वा तज्ज्ञानफलमाह—** एतामिति। **बुद्ध्याद्युपादानत्वेन विविधा भूतिर्भवनं वैभवं सर्वात्मकत्वं, तदाह—** विस्तारमिति। **ईश्वरस्य तत्तदर्थसम्पादनसामर्थ्यं योगः, तदाह—** आत्मन इति। योगः **तत्फलमैश्वर्यं सर्वज्ञत्वं सर्वेश्वरत्वं च। मदीयं शक्तिज्ञानलेशमाश्रित्य मन्वादयो भृग्वादयश्चेशते, जानते च। तदाह—** अथवेति। **यथा तौ विभूतियोगौ तथा वेदनस्य निरङ्कुशत्वं**

भाष्यार्कप्रकाशः

**महर्षय इति।** एवं लोकमहेश्वरत्वे हेत्वन्तरमुक्त्वा स्वप्रभावमेव दर्शयति पुनरित्याह— **किञ्चेति।** मद्भावाः पूर्वे सप्त महर्षयः, तथा चत्वारो मनवो मानसाः सन्तो जाताः। मद्भावा मानसाश्च सन्तो जाता इति वा। यद्यपि मनवश्चतुर्दश, तथापि तत्रैकस्मिन् मन्वन्तरे चतुर्णामेव प्रजासृष्टिहेतुत्वादुक्तं चत्वार इति। ब्रह्मसावर्णो, रुद्रसावर्णो, धर्मसावर्णो, दक्षसावर्ण इति तेषां नामानि। मयि भावना येषां ते मद्भावाः, मच्चित्ता इत्यर्थः। मम विष्णोर्भावः सामर्थ्यं येषां त इति वा मद्भावाः। लोके जगति इमाः दृश्यमानाः प्रजा भूतानि॥ ६॥

**एतामिति। विस्तारं** जगद्रूपमिति भावः। **आत्मनो** मम **घटनं** सङ्घटनम्, पितृपितामहादिरूपेण प्रजानां जगति कल्पनमिति यावत्। किं तत् सामर्थ्यम्? अत आह— **सर्वज्ञत्वमिति।** ननु योगसामर्थ्ये कथं योगशब्दप्रवृत्तिः? अत आह— **योगजमिति। उच्यते** लक्षणयेति शेषः। कोऽसौ योगः? अत आह— **सम्यगिति। सम्यग्दर्शनम्** 'अहं ब्रह्मे'ति ज्ञानम्, तस्य **स्थैर्यं** दृढता, तदेव **लक्षणं** स्वरूपं यस्य, तेन तथोक्तेन। 'अहं ब्रह्मे'त्याकारकदृढज्ञानमेव **योगः**, तेन **युज्यते** युक्तो भवति।

---

१. 'भृगुं मरीचिमत्रिं च पुलस्त्यं पुलहं क्रतुम्। वसिष्ठं च महातेजाः सोऽसृजद् मनसा सुतान्॥' इत्युक्ताः इति श्रीधर्यादौ। 'महर्षीणां भृगुरहम्'(१०.२५) इति अग्रिमग्रन्थैकवाक्यत्वात् भृग्वादयः इति भाष्यं युक्तमेव। एतेन मरीच्यादयः इति वक्तव्ये भृग्वादयः इत्ययुक्तमिति दूषणमनवकाशम्। अधिकमन्यत्र द्र.।

**अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते।**
**इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥८॥**

**कीदृशेनाविकम्पेन योगेन युज्यत इति? उच्यते**—अहमिति। अहं **परं ब्रह्म वासुदेवाख्यं** सर्वस्य **जगतः** प्रभवः **उत्पत्तिः, मत्त एव स्थितिनाशक्रियाफलोपभोगलक्षणं विक्रियारूपं** सर्वं **जगत्** **प्रवर्तते** इत्येवं **मत्वा** भजन्ते **सेवन्ते मां** बुधाः[१] **अवगततत्त्वार्थाः** भावसमन्विताः **भावो भावना परमार्थतत्त्वाभिनिवेशस्तेन** समन्विताः **संयुक्ता इत्यर्थः** ॥८॥

आनन्दगिरिकृतव्याख्या

**दर्शयति**— यथावदिति। **सोपाधिकं ज्ञानं निरुपाधिकज्ञाने द्वारमित्याह**— सोऽविकम्पेनेति। **उक्तेऽर्थे प्रतिबन्धाभावमाह**— नास्मिन्निति ॥७॥

**कथं तावकविभूत्यैश्वर्यज्ञानमुक्तयोगस्य हेतुरिति मत्वा पृच्छति**— कीदृशेनेति। **उक्तज्ञानमाहात्म्यात् प्रतिष्ठिता भगवन्निष्ठा सिध्यतीत्याह**— उच्यत इति। **प्रभवत्यस्मादिति** प्रभवः **सर्वप्रकृतिः सर्वात्मेत्याह**— उत्पत्तिरिति। **सर्वज्ञात् सर्वेश्वरान्मत्तो निमित्तात् सर्वं स्थितिनाशादि भवति, मया चान्तर्यामिणा प्रेर्यमाणं सर्वं यथास्वं मर्यादामनतिक्रम्य चेष्टते, तदाह**— मत्त इति। **इत्थं मम सर्वात्मत्वं सर्वप्रकृतित्वं सर्वेश्वरत्वं सर्वज्ञत्वं च महिमानं ज्ञात्वा मय्येव निष्ठावन्तो भवन्तीत्याह**— इत्येवमिति। **संसारासारताज्ञानवतां भगवद्भजने ऽधिकारं द्योतयति**— अवगतेति। **परमार्थतत्त्वे पूर्वोक्तरीत्या ज्ञाते प्रेमादरावभिनिवेशाख्यौ भवतः, तेन संयुक्तत्वं च भगवद्भजने भवति हेतुरित्याह**— भावेति ॥८॥

भाष्यार्कप्रकाशः

**ननु** ईश्वरविभूत्यादिज्ञानाद् विदुषः कथम् 'अहं ब्रह्मे'ति ज्ञानमिति चेद्? **उच्यते**— परब्रह्मण ईश्वरस्यैव स्वात्मत्वादिति।

**अस्मिन्नर्थे** ईश्वरतत्त्वज्ञानाद् 'ब्रह्माहम्' इति सम्यग्दर्शनस्थैर्यं भवतीत्युक्तार्थे, संशयो नास्ति, ईश्वरेण मयैव साक्षादुक्तत्वादिति भावः।

यत्तु **रामानुजः**— 'विभूतिमैश्वर्यं, योगं कल्याणगुणगणं, योगेन भक्तियोगेन' इति, **तन्मन्दम्** ; ईश्वरे तदैश्वर्याद्यनभिज्ञस्यापि भक्तियोगदर्शनात्। तदभिज्ञस्य तस्मिन् भक्तियोगोत्पत्तेर्लोकत एव सिद्धत्वेन वचनस्य व्यर्थत्वाच्च। राजगतैश्वर्यादिगुणाभिज्ञा हि राजानं भजन्ते। योगशब्दस्य कल्याणगुणार्थप्रतिपादनमपि लोकशास्त्रविरुद्धम् ॥७॥

विदुषां सम्यग्दर्शनमेव दर्शयतीत्याह— **कीदृशेनेति। अहमिति**। अस्मच्छब्दोऽत्र लक्षणया चिन्मात्रपर इत्याह— **परं ब्रह्मेति**। वासुदेवशब्दो वसन्ति जगन्त्यस्मिन्निति व्युत्पत्त्या परमात्मपरः। वसति जगतीति व्युत्पत्त्या प्रत्यगात्मपरश्च। तथा च प्रत्यगभिन्नः परमात्मा वासुदेव इति **वासुदेवाख्यः**। **प्रभव** उपादानम् , उत्पत्तिहेतुरिति यावत्। **मत्त एवेति**। वासुदेवाख्यात् परब्रह्मण एवेत्यर्थः। जगतः स्थितिनाशादयोऽपि मत्त एव भवन्तीत्यर्थः। **माम्** आत्मानम्।

**अयमाशयः**— ईश्वराज्जन्मस्थितिलया भवन्तीति श्रूयते। स चेश्वरः सर्वेषु क्षेत्रेषु प्रत्यग्रूपेण वर्तत इति च श्रूयते। ततश्च 'अहमेवेश्वरः, मत्त एव सर्वं जगज्जायते वर्धते लीयते च'। एवमीश्वरमात्मत्वेन मत्वा बुधाः स्वात्मानमेवेश्वरं भजन्ते इति। **यद्वा** परब्रह्मणः सकाशाज्जगज्जन्मादयो भवन्तीति ज्ञात्वा तमेव परमात्मानं स्वात्मभूतं बुधा भजन्ते इति।

**परमार्थतत्त्वाभिनिवेश इति। परमार्थतत्त्वं** ब्रह्म, तस्मिन् **अभिनिवेशः** अहमिति निश्चयः। अहं ब्रह्मेति दृढज्ञानमिति यावत्।

यत्तु **रामानुजः**— 'ईश्वरः श्रीकृष्णो जगत्सृष्ट्यादिहेतु'रिति ज्ञात्वा श्रीकृष्णाख्यं ब्रह्म बुधा भक्तियुक्ता भजन्ते इति। **तन्मन्दम्** ; श्रीकृष्णावतारात् पूर्वोत्तरकालस्थानां कृष्णावतारेऽपि दूरस्थानां श्रीकृष्णभजनासम्भवात् , सन्निहितानामपि विदुषां श्रीकृष्णदेहे ईश्वरबुद्ध्ययोगात् , आत्मनश्च सर्वव्यापित्वादिति ॥८॥

---

१. 'अवगतपरमार्थतत्त्वाः' इति पा.।

**मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।**
**कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥९॥**
**तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।**

**किञ्च—** मच्चित्ता इति। मच्चित्ताः **मयि चित्तं येषां ते मच्चित्ताः**। मद्गतप्राणाः **मां** गताः **प्राप्ताः चक्षुरादयः प्राणाः येषां ते मद्गतप्राणाः। मय्युपसंहृतकरणाः इत्यर्थः। अथवा** मद्गतप्राणाः **मद्गतजीवनाः इत्येतत्।** [१]बोधयन्तः **अवगमयन्तः** परस्परम् **अन्योन्यम् ,** कथयन्तश्च **ज्ञानबलवीर्यादिधर्मैर्विशिष्टं माम् ,** तुष्यन्ति च **परितोषमुपयान्ति,** रमन्ति **च रतिं च प्राप्नुवन्ति प्रियसङ्गत्येव॥९॥**

**ये यथोक्तप्रकारैर्भजन्ते मां भक्ताः सन्तः—** तेषामिति। **तेषां** सततयुक्तानां **नित्याभियुक्तानां निवृत्तसर्वबाह्यैषणानां** भजतां **सेवमानानाम् ; किमर्थित्वादिना कारणेन? नेत्याह—** प्रीतिपूर्वकम् - प्रीतिः **स्नेहः, तत्पूर्वकं मां**

आनन्दगिरिकृतव्याख्या

**न केवलमुक्तमेव भगवद्भजने साधनम् , साधनान्तरं चास्तीत्याह—** किञ्चेति। **ईश्वरात् प्रतीचः प्रागुक्तादन्यत्र चित्तप्रचारराहित्यं भगवद्भजनोपायमाह—** मयीति। **चक्षुरादीनां भगवत्यप्राप्तिस्तदगोचरत्वात् तस्येत्याशङ्क्याह—** मय्युपसंहृतेति। **भगवदतिरेकेण जीवनेऽपि नादरः, तदपि मय्येवार्पितं भक्तानामित्याह—** अथवेति। **आचार्येभ्यः श्रुत्वा वादकथया परस्परं भगवन्तं सब्रह्मचारिणो बोधयन्ति, तदपि भगवद्भजनसाधनमित्याह—** बोधयन्त इति। **आगमोपपत्तिभ्यां भगवन्तमेव विशिष्टधर्माणं शिष्येभ्यो गुरवो व्यपदिशन्ति, तदपि भगवद्भजनमेवेत्याह—** कथयन्त इति। **भक्तानां तुष्टिरती स्वरसतः स्यातामित्याह—** तुष्यन्तीति। **मनोरथपूर्त्या रतिप्राप्तौ कामुकसम्मतमुदाहरणमाह—** प्रियेति॥९॥

**यदुक्तं 'सोऽविकम्पेने'त्यादि तदर्थं भूमिकां कृत्वा तदिदानीमुदाहरति—** ये यथोक्तेति। नित्याभियुक्तानाम् **अनवरतं भगवति ऐकाग्र्यसम्पन्नानामित्यर्थः। पुत्रादिलोकत्रयहेत्वर्थित्वेन वा गर्भदासत्वेन वा प्रत्यहं जीवनोपायसिद्धये वा भजनमिति शङ्कित्वा दूषयति—** किमित्यादिना। **प्रागुक्तां ज्ञानाख्यां भक्तिं स्नेहेन कुर्वतामित्यर्थः। तेभ्योऽहं तत्त्वज्ञानं प्रयच्छामीत्याह—** ददामीति। **उक्तबुद्धिसम्बन्धस्य**

भाष्यार्कप्रकाशः

**मच्चित्ता इति**। देहगतानां प्राणानां चित्प्रतिबिम्बग्रहणासमर्थानामात्मगतत्वासम्भवादाह— **चक्षुरादय इति**। प्राणिति चेष्टते देह एभिरिति प्राणाः इति व्युत्पत्त्या प्राणशब्दश्चक्षुरादिकरणपर इति भावः। चक्षुरादिविषयव्यापाराविषयत्वादात्मनः कथं तेषामात्मगतत्वम्? अत आह— **मय्युपसंहृतेति**। आत्मनि चक्षुरादीनामुपसंहारो नाम निर्व्यापारत्वमेवेति बोध्यम्। **मद्गतजीवना इति**। आत्मस्वरूपानन्दानुभवसुधयैव जीवन्तः इत्यर्थः। आत्मस्वरूपानुसन्धानं विना क्षणमपि प्राणधारणामलभमानाः इति यावत्। **बोधयन्तो** ज्ञापयन्तः। किं तद्? अत आह— **तत्त्वमिति**। आत्मानमिति यावत्। **रमन्ति** रमन्ते, परस्मैपदमार्षम्। दृष्टान्तमाह— **प्रियसङ्गत्येवेति**। इष्टवस्तुसङ्गमादविद्वांसो यथा रमन्ते, तद्वदिति। **यद्वा** प्रियस्य सङ्गत्या कामिन्यो यथा रमन्ते, तद्वदिति। अनेन श्लोकेन ब्रह्माभ्यासः उक्तः – 'तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम्। एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः॥' इति तल्लक्षणात्। **तुष्यन्ती**ति कृतकृत्यतोच्यते, अकृतकृत्यस्य कर्तव्यशेषवत्त्वेन तुष्ट्ययोगात्। इयं च कृतकृत्यता गृहस्थस्य दुर्लभा, तस्य कृत्यशेषसद्भावात्। अतः संन्यासिविषयमेवैतत्। तत्रापि परमहंसविषयमेव, अन्येषां संन्यासिनां दण्डतर्पणादिकृत्यसद्भावात्। एवं कृतकृत्यत्वादेव एते आत्मारामाः भवन्ति, तेषां विषयैः प्रयोजनाभावात्। विषयसुखस्य क्षुद्रत्वाद् , आत्मानन्दस्य शाश्वतत्वाच्चेति॥९॥

**तेषामिति**। **सततयुक्तानां** नित्यमात्मनि चित्तसमाधानशालिनाम्। किमिदमात्मभजनं सोपाधिकम्? इत्याक्षिपति— **किमिति**। **अर्थित्वम्** अर्थादिकाङ्क्षित्वम्। आदिशब्दाद् आर्तिपरिहारादिकं ग्राह्यम्। **प्रीतिपूर्वकमिति**। आत्मनि निरतिशयप्रीतेः स्वतःसिद्धत्वाद्

१. 'बोधयन्तस्तत्त्वम्' इति रा.पा. भाति। अत्र— नित्यं तुष्यन्ति च नित्यं रमन्ति चेति नित्यशब्दान्वयो बोध्यः। भाष्ये तु लेखकप्रमादेन नित्यमिति पदं नष्टम्।

**ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥ १०॥**
**तेषामेवानुकम्पार्थम् अहमज्ञानजं तमः।**
**नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता॥ ११॥**

**भजतामित्यर्थः**; ददामि **प्रयच्छामि** बुद्धियोगं **बुद्धिः सम्यग्दर्शनं मत्तत्त्वविषयं, तेन योगो बुद्धियोगः,** तं **बुद्धियोगम्,** येन **बुद्धियोगेन सम्यग्दर्शनलक्षणेन** मां **परमेश्वरमात्मभूतम् आत्मत्वेन** उपयान्ति **प्रतिपद्यन्ते। के ते? ये मच्चित्तत्वादिप्रकारैः मां भजन्ते ॥ १०॥**

**किमर्थं कस्य वा त्वत्प्राप्तिप्रतिबन्धहेतोः नाशकं बुद्धियोगं तेषां त्वद्भक्तानां ददासि? [1]इत्याकाङ्क्षायामाह—** तेषामिति। **तेषामेव कथं नु नाम श्रेयः स्यादिति** अनुकम्पार्थं **दयाहेतोः अहम्** अज्ञानजम् **अविवेकतो जातं मिथ्या-**

आनन्दगिरिकृतव्याख्या

**फलमाह—** येनेति। **ध्यानजन्यप्रकर्षकाष्ठागतान्तःकरणपरिणामे निरस्ताशेषविशेषभगवद्रूपप्राप्तिहेतौ बुद्धियोगे प्रश्नपूर्वकम् उक्तान-धिकारिणो दर्शयति—** के त इति॥ १०॥

**भगवत्प्राप्तेर्बुद्धिसाध्यत्वे सत्यनित्यत्वापत्तेस्त्वमपि भक्तेभ्यो बुद्धियोगं ददासीत्ययुक्तमिति शङ्कते—** किमर्थमिति। **तेषां बुद्धियोगं किमर्थं ददासीति सम्बन्धः। भगवत्प्राप्तिप्रतिबन्धकनाशको बुद्धियोगः, तेन नास्ति तत्प्राप्तेरनित्यत्वमित्याशङ्क्याह—** कस्येति। **भक्तानां तत्प्राप्तिप्रतिबन्धकं विविच्य दर्शयति—** इत्याकाङ्क्षायामिति। अविवेको **नामाज्ञानम्, ततो जातं मिथ्याज्ञानम्, तदुभयमेकीकृत्य** तमो **विवक्ष्यते। न च तन्नाशकत्वं जडस्य कस्यचित् तदन्तर्भूतस्य युक्तम्, तेन** अहं नाशयामीत्युक्तम्। **केवलचैतन्यस्य जडबुद्धिवृत्ते-**

भाष्यार्कप्रकाशः

नात्मप्रीतेर्बलात्कारेण सम्पाद्यतेति बोध्यम्। **भजतामिति**। प्रमातृणामिति भावः। **ददामीति**। अहमात्मेति शेषः। 'मत्तः स्मृतिः ज्ञानमपोहनं चे'ति वक्ष्यमाणत्वादिति भावः। न च निर्विक्रियस्यात्मनः कथं दातृत्वविकार इति वाच्यम्; आत्मस्वरूपानुसन्धानवशात् पुंसाम् 'आत्मैवाहं परब्रह्मे'ति सम्यग्दर्शनं जायत इत्यभिप्रायेणात्मज्ञानं ददातीत्युक्तत्वात्। न हि मुख्यमत्र दानं विवक्षितं, येनोक्तदोषः स्यात्। **योगः** संयोगः। **प्रतिपद्यन्ते** निश्चयेन जानन्तीति यावत्। अथवा प्राप्नुवन्तीत्येव। ब्रह्मैव भवन्तीति यावत्। ज्ञानिनः सम्यग्दर्शनेन स्वस्मिन् प्रमातृत्वबुद्धिं विहायात्मत्वनिश्चयं प्रतिपद्य ब्रह्मस्वरूपेणैव तिष्ठन्तीति परमार्थः॥ १०॥

**तेषामिति**। ननु किं बुद्धियोगदानेन? साक्षात् सायुज्यमेव भक्तानां देहीति शङ्कायां, बुद्धियोगं विना मत्प्राप्तिप्रतिबन्धकस्याज्ञान-स्य नाशो न स्यादिति भगवत्प्राप्तिप्रतिबन्धकाज्ञाननाशनार्थं बुद्धियोगदानमावश्यकमित्युत्तरमुच्यते, किञ्च भक्तानां बुद्धियोगदानेन तव किं वा फलमिति शङ्कायां, कृपैव फलमित्युत्तरं चोच्यते श्लोकेनानेनेत्याह—**किमर्थमिति**। अनुकम्पाया आकारं दर्शयति— **कथं न्विति**।

**ननु** निर्विकारस्यात्मनः कथं भक्तश्रेयोऽभिलाषित्वमिति चेत्? **नैष दोषः**; मायया तदुपपत्तेः। अयं भावः— यावज्जीवानाम-स्त्यज्ञानं तावत् परोक्ष एव आत्माऽपि ईश्वरः। स च मायावच्छिन्न एव। जीवाज्ञानस्यैव मायायाः तदवच्छेदकत्वात्। अस्य च मायावच्छिन्नस्येश्वरस्य मायया कृपालुत्वादिकमुचितमेव। यदा पुनर्ज्ञानेन तदज्ञानं नाशितं तदा त्वपरोक्ष एवेश्वर आत्मा। स चानवच्छिन्न एव, मायाया अभावात्। तस्य तु निर्विकारत्वेन कृपालुत्वादिकमयुक्तमिति यावदज्ञानमात्मनोऽपीश्वरस्य भक्तश्रेयो-ऽभिलाषित्वमुपपद्यत एवेति।

**ननु** यो बुद्धियोगेन भक्तानामज्ञानं नाशयति अनुकम्पार्थं, स किं मायावच्छिन्न उतान्तःकरणावच्छिन्नः? नाद्यः, तस्यात्म-भावस्थत्वाभावात्। नान्त्यः, तस्य परिच्छिन्नत्वेन सामर्थ्याभावादिति चेत्? **मैवम्**; मायावच्छिन्नः सर्वव्यापी य एवेश्वरः, तस्यैव

१. 'इत्यपेक्षायाम्' इति पा.।

**प्रत्ययलक्षणं मोहान्धकारं** तमो **नाशयामि** आत्मभावस्थः **आत्मनो भावोऽन्तःकरणाशयः, तस्मिन्नेव स्थितः सन्** ज्ञानदीपेन **विवेकप्रत्ययरूपेण भक्तिप्रसादस्नेहाभिषिक्तेन मद्भावनाभिनिवेशवातेरितेन ब्रह्मचर्यादिसाधनसंस्कारवत्प्रज्ञावर्तिना विरक्तान्तःकरणाधारेण विषयव्यावृत्तचित्तरागद्वेषाकलुषितनिवातापवरकस्थेन [1]नित्यप्रवृत्तैकाग्र्य-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ज्ञानस्य दीपसाम्यं दर्शयति—**भक्तीत्यादिना**। भक्तिनिमित्तप्रसादः ईश्वरानुग्रहः, स एव स्नेहः, तत्सिक्तेन। मद्भावनायामभिनिवेश एव वातः तत्प्रेरितेन। ब्रह्मचर्यादिसाधनसंस्कारवती प्रज्ञैव वर्त्तिर्यस्य ज्ञानदीपस्य तेन। विरक्तमन्तः-

आनन्दगिरिकृतव्याख्या

**रिवाज्ञानाद्यनाशकत्वमाशङ्क्य[2] विशिनष्टि—** आत्मेति। तस्याशयः **तन्निष्ठो वृत्तिविशेषः। [3]वाक्योत्थबुद्धिवृत्त्यभिव्यक्तश्चिदात्मा सहायसामर्थ्यादज्ञानादिनिवृत्तिहेतुरित्यर्थः। [4]बुद्धीद्धबोधस्याज्ञानादिनिवर्तकत्वमुक्त्वा बोधेद्धबुद्धेस्तन्निवर्तकत्वमिति पक्षान्तरमाह—** ज्ञानेति। **देहाद्यव्यक्तान्तानात्मवर्गातिरिक्तवस्तुगोचरत्वमाह—** विवेकेति। **भगवति सदा विहितया भक्त्या तस्य प्रसादोऽनुग्रहः, स एव स्नेहः, तेनासेचनद्वारा अस्योत्पत्तिमाह—** भक्तीति। **मय्येव भावनायामभिनिवेशो वातस्तेन प्रेरितोऽयं जायते। न हि वातप्रेरणमन्तरेणादौ दीपस्योत्पत्तिरित्याह—** मद्भावनेति। ब्रह्मचर्यम् **अष्टाङ्गम्। आदिशब्देन शमादिग्रहः। तेन हेतुनाऽऽहितसंस्कारवती या प्रज्ञा तथाविधवर्तिनिष्ठश्चायम्। न हि वर्त्यतिरेकेण दीपो निर्वर्त्यते, तदाह—** ब्रह्मचर्येति। **न चाधाराद्दते दीपस्योत्पत्तिरदृष्टत्वादित्याह—** विरक्तेति। **यद् विषयेभ्यो व्यावृत्तं चित्तं रागाद्यकलुषितं तदेव निवातमपवारकम् [वरकम्], तत्र स्थितत्वमस्य दर्शयति—** विषयेति। **भास्वतेति विशेषणं**

भाष्यार्कप्रकाशः

अन्तःकरणावच्छिन्नत्वेन आत्मभावस्थत्वसम्भवात्। अन्यथा ईश्वरस्य सर्वव्यापित्वस्यैव नाशप्रसङ्गात्। अत एव 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती'ति वक्ष्यते भगवतेहैव। न चेश्वरस्य अन्तःकरणावच्छिन्नत्वे सति परिच्छिन्नत्वेनासर्वज्ञत्वादिकं संभवेदिति वाच्यम् ; अन्तःकरणावच्छिन्नस्यापि सिद्धान्तेऽपरिच्छिन्नत्वाभ्युपगमात्। परिच्छिन्नत्वे तु जीवस्य घटवदनित्यत्वादिप्रसङ्गात्। न चान्तःकरणावच्छिन्ने आत्मनीश्वरे सार्वज्ञ्यं नोपलभ्यत इति वाच्यम् ; उपलभ्यत एव तद् ईश्वरेण। न त्वज्ञेन त्वया, अज्ञत्वादेव तव। न चान्तःकरणावच्छिन्नादन्य एव मायावच्छिन्नः कश्चिदीश्वरो हृद्देशे तिष्ठतीति वाच्यम् ; प्रमाणाभावादनुभवाभावात्। ईश्वरस्यैव जीवरूपेण क्षेत्रेष्वनुप्रवेशश्रवणात्। न च 'द्वा सुपर्णा' इति श्रुतिः प्रमाणमिति वाच्यम् ; चिदाभासप्रत्यगात्मपरत्वात् तच्छ्रुतेः, अथवा बुद्धिचिदात्मपरत्वात्। न च चिदाभास एव जीवः, प्रत्यगात्मा त्वीश्वर इति वाच्यम् ; सुषुप्तौ चिदाभासलयस्य त्वयैवानुभाव्यमानत्वेन तव प्रत्यगात्मत्वात्। चिदाभासो हि संसारी। न हि सुषुप्तौ स दृश्यते – 'अन्धोऽप्यनन्धो भवती'त्यादिश्रुतेश्च। तस्मात् प्रत्यग्रूपेण हृद्देशस्थित ईश्वर एव यावदज्ञानं परोक्षः सन् भक्तानां बुद्धियोगं ददाति माययेति सर्वमनवद्यम्।

**अविवेक** आत्मानात्मविवेकाभावः। **मिथ्याप्रत्ययो**ऽनात्मनि देहादावहम्बुद्धिः। मोह एवान्धकारः तं **मोहान्धकारम्।** तमोमोह एव तमोऽन्धकार इति श्लिष्टरूपकमिति भावः[5]। **आत्मभावः** आत्मनोऽन्तःकरणस्य भावः आशयः, आत्माकारवृत्तिविशेष इत्यर्थः। **यद्वा** आत्मनः स्वस्य भावोऽन्तःकरणाशयः। बुद्धिवृत्तिरित्यर्थः। तस्मिन् स्थितःसन् प्रतिफलनरूपेणेति भावः। विषयत्वेन रूपेणेति वा। **ज्ञानम्** आत्मानात्मविवेकबुद्धिः, तदेव दीपः, तेन **ज्ञानदीपेन**। मोहेऽन्धकारत्वरूपणाज्ज्ञाने दीपत्वरूपणम्। एवं ज्ञानदीप इति रूपणादेव तम इत्यत्र श्लिष्टरूपकमुक्तम्। मूले ज्ञानदीप इत्येकदेशविवर्तिरूपकमुक्तम्। तदेव सावयवरूपकतया निर्दिशति भाष्यकारः— **भक्तिस्नेहेत्यादिना। भक्तिः** आत्मप्रीतिरेव **स्नेहः** तैलं, तेन सिक्तेन। **मद्भावनाभिनिवेशो** मद्भावाग्रह एव **वातः** स्वल्पवायुः, तेनेरितेन। अत्यन्तं वाताभावेऽधिकवातसत्त्वे वा दीपस्थित्ययोगादिति भावः। ब्रह्मचर्यादिसाधनसंस्कारवती या प्रज्ञा सैव वर्तिर्यस्य तेन। विरक्तं यदन्तःकरणं तदेव **आधारः** पात्रं यस्य तेन। विषयेभ्यो व्यावृत्तम् , अत एव रागद्वेषादिभिरकलुषीकृतं चित्तं, तदेव

१. 'नित्यप्रवृत्तैकाग्र्यध्यान' इति पा.। २. बुद्धिवृत्तेर्जडत्वात् केवलचैतन्यस्याज्ञानभासकत्वाच्च न तन्नाशकत्वमिति भावः। ३. **वाक्यं** महावाक्यम्। ४. **बुद्धीद्धबोधः** बुद्धिवृत्त्यभिव्यक्तचैतन्यम्। **बोधेद्धबुद्धिः** चैतन्यप्रतिबिम्बविशिष्टा बुद्धिवृत्तिः। ५. उपमैव तिरोभूतभेदा रूपकमुच्यते। उपमानोपमेययोः सादृश्यातिशयेनाभेदारोप इति यावत्। तत्र च साधारणधर्मस्य श्लेषमूलकत्वे श्लिष्टरूपकम्।

**अर्जुन उवाच —**

**परं ब्रह्म परं धाम पवित्रं परमं भवान्।**
**पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम्॥ १२॥**

**ध्यानजनितसम्यग्दर्शनभास्वता ज्ञानदीपेनेत्यर्थः॥ ११॥**

**यथोक्तां भगवतो विभूतिं योगं च श्रुत्वा अर्जुन उवाच—** परमिति। परं ब्रह्म **परमात्मा** परं धाम **परं तेजः** पवित्रं **पावनं** परमं **प्रकृष्टं भवान्। पुरुषं** शाश्वतं **नित्यं** दिव्यं **दिवि भवम्** आदिदेवं **सर्वदेवानामादौ भवं** [१]**देवम् अजं** विभुं **विभवनशीलम्॥ १२॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

करणमेवाधारं पात्रं यस्य। विषयेभ्यो व्यावृत्तं यच्चित्तं तत एव रागद्वेषाभ्यां [अ]कलुषीकृतम् , स एव निवातापवरकः। तत्रास्ति [तत्र स्थि]तेन। नित्यप्रवृत्तं यदेकाग्रं ध्यानं, तज्जनितं सम्यग्दर्शनमेव **भाः** प्रभा विद्यते यस्य तेनेत्यर्थः॥ ११॥

॥ इति श्रीगीताभाष्यटिप्पणे दशमोऽध्यायः॥

आनन्दगिरिकृतव्याख्या

**विशदयति—** नित्येति। **सदातनं चित्तैकाग्र्यं, तत्पूर्वकं ध्यानं, तेन जनितं सम्यग्दर्शनं फलं, तदेव भाः, तद्वता तत्पर्यन्तेनेत्यर्थः। तेनाज्ञाने सकार्ये निवृत्ते भगवद्भावः स्वयमेव प्रकाशीभवतीति मत्वा व्याख्यातमेव पदमनुवदति—** ज्ञानेति॥ ११॥ ०

**निरस्ताशेषविशेषं निरुपाधिकं सोपाधिकं च सर्वात्मत्वादि भगवतो रूपं तद्धीफलं च श्रुत्वा, निरुपाधिकरूपस्य प्राकृत-बुद्ध्यनवगाह्योक्तिपूर्वकं मन्दानुग्रहार्थं सर्वदा सर्वबुद्धिग्राह्यं सोपाधिकं रूपं विस्तरेण श्रोतुमिच्छन् पृच्छतीत्याह—** यथोक्तामिति। **परं ब्रह्म भवानिति लक्ष्यनिर्देशः। तस्य लक्षणार्थं परं धामेत्यादिविशेषणत्रयम्। धामशब्दस्य स्थानवाचित्वं व्यावर्तयन् व्याचष्टे—** तेज इति। **तस्य चैतन्यस्य** परमत्वं **जन्मादिराहित्येन कौटस्थ्यम्।** प्रकृष्टं पावनम् **अत्यन्तशुद्धत्वमुच्यते। यदेवं लक्षणं परं ब्रह्म तद् भवानेव, नान्य इत्यर्थः। कुतस्त्वमेवमज्ञासीरित्याशङ्क्याप्तवाक्यादित्याह—** पुरुषमिति। **दिवि परमे व्योम्नि भवतीति दिव्यस्तं सर्वप्रपञ्चातीतम्। दीव्यति द्योतत इति देवः, स चादिः सर्वमूलत्वाद् अत एवाजस्तं त्वां सर्वगतम् आहुरिति सम्बन्धः॥ १२॥**

भाष्यार्कप्रकाशः

**निवातापवरकं** वातरहितं निकेतनं, तत्र तिष्ठतीति तत्स्थम् , तेन। चित्तान्तःकरणयोरेकात्मकत्वेऽपि व्यापारभेदात् पृथग् निर्देशः। अन्तःकरणं मनः, चित्तं बुद्धिरिति विवेकः। इति रूपणम्।

अथ भास्वतेति विशेषणं व्याकरोति— **नित्येति। नित्यं** सदा प्रवृत्तं यदेकाग्रं ध्यानं तस्माज्जनितमुदितं यत् सम्यग्दर्शनं ब्रह्मात्मसाक्षात्कारस्तदेव भाः दीप्तिः, तद्वता **नित्यप्रवृत्तैकाग्रध्यानजनितसम्यग्दर्शनभास्वता**। भाः अस्यास्तीति भास्वानिति 'तदस्या-स्त्यस्मिन्निति मतुप्'। अहं तेषामेवानुकम्पार्थम् आत्मभावस्थः सन् भास्वता ज्ञानदीपेनाज्ञानजं तमो नाशयामि। अहमनुकम्पार्थं तेषामेवेति वा। तस्मादीश्वरदत्तबुद्धियोगस्य भगवत्प्राप्तिप्रतिबन्धकाज्ञाननाशनमेव कृत्यमिति सिद्धम्॥ ११॥

**परमिति**। भवान् परमं पवित्रं, परं धाम, परं ब्रह्म भवति। देवर्षिर्नारदः, असितः, देवलः, व्यासः एवमाद्याः सर्वे ऋषयः त्वां शाश्वतं दिव्यमादिदेवमजं विभुं पुरुषमाहुः। स्वयं चैव मे ब्रवीषीति श्लोकद्वयान्वयः। ब्रह्मशब्दस्य प्रकृत्यादिपरत्वात् तद्व्युदासाय परत्व-विशेषणम्। धामशब्दस्य दीपादिपरत्वात् तद्व्युदासाय परत्वविशेषणम्। धाम चात्र ज्ञानम्। चिन्मयस्येश्वरस्य अग्न्यादितेजोरूपत्वा-भावात्। गङ्गादीनामपि पवित्रत्वात् तद्व्युदासाय परमत्वविशेषणम्। दिवि हृदयाकाशे भवतीति **दिव्यः**, देवानामादिः **आदिदेवः**; आदिश्चासौ देवः आदिदेव इति वा समासः। अर्थस्त्वेक एव। **विभवनं** व्यापनं नियमनं वा शीलं यस्य तं **विभवनशीलम्**।

१. 'आदिदेवम्' इति पा.।

**आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा।**
**असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे॥ १३॥**
**सर्वमेतदृतं मन्ये यन्मां वदसि केशव !।**
**न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः॥ १४॥**
**स्वयमेवात्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम !।**

**ईदृशम्—** आहुरिति। आहुः **कथयन्ति त्वाम्** ऋषयो **वसिष्ठादयः सर्वे, देवर्षिर्नारदस्तथा, असितो देवलो ऽप्येवमेवाह , व्यासश्च ;** स्वयं चैव **त्वं** [1]**च ब्रवीषि मे॥ १३॥**

सर्वमिति। सर्वमेतद् **यथोक्तमृषिभिस्त्वया च, एतद्** ऋतं **सत्यमेव मन्ये यन्मां प्रति** वदसि **भाषसे, हे केशव ! न हि** ते **तव भगवन्** व्यक्तिं **प्रभवं विदुः** [2]**न देवाः, न दानवाः॥ १४॥**

**यतस्त्वं देवादीनामादिः, अतः—**स्वयमिति। **स्वयमेवात्मना आत्मानं** वेत्थ **जानासि त्वं निरतिशयज्ञानैश्वर्य-बलादिशक्तिमन्तमीश्वरम् , पुरुषोत्तम ! भूतानि भावयतीति भूतभावनो** हे भूतभावन ! भूतेश ! **भूतानामीशितः, हे**

आनन्दगिरिकृतव्याख्या

**उक्तविशेषणं त्वामृषयः सर्वे यस्मादाहुस्तस्मात् तद्वचनात् तवोक्तं ब्रह्मत्वं युक्तमित्याह—** ईदृशमिति। **ऋषिग्रहणेन गृहीतानामपि नारदादीनां विशिष्टत्वात् पृथग्ग्रहणम्।** असितो **देवलस्य पिता। किमन्यैः? त्वं स्वयमेवात्मानमुक्तरूपं मह्यमुक्तवानि-त्याह—** स्वयं चेति ॥ १३॥

**ऋषिभिस्त्वया चोक्तत्वादुक्तं सर्वं सत्यमेवेति मम मनीषेत्याह—** सर्वमिति। **किं तदित्याशङ्क्यात्मरूपमित्याह—** यन्मामिति। **देवादिभिः सर्वैरुच्यमानतया त्वद्रूपे विशिष्टवक्तृग्रहणमनर्थकमित्याशङ्क्याह—** न हीति। **प्रभवो नाम प्रभावो निरुपाधिकस्वभावः। यदा देवादीनामपि दुर्विज्ञेयं तव रूपम् , तदा का कथा मनुष्याणामित्यर्थः॥ १४॥**

**कश्चिदेव महता कष्टेनानेकजन्मसंसिद्धो जानाति त्वदनुगृहीतस्त्वद्रूपमित्यभिप्रेत्याह—** यत इति। स्वयमेव **उपदेशमन्तरेणे-त्यर्थः।** आत्मना **प्रत्यक्त्वेन, अविषयतयेति यावत्।** आत्मानं **निरुपाधिकं रूपम्। न च** [3]**तव सोपाधिकमपि रूपमन्यस्य गोचरे तिष्ठतीत्याह—** निरतिशयेति। **पुरुषश्चासावुत्तमश्चेति क्षराक्षरातीतपूर्णचैतन्यरूपत्वं सम्बोधनेन बोध्यते। सर्वप्रकृतित्वं सर्वकर्तृत्वं च**

भाष्यार्कप्रकाशः

अत्र सर्वे ऋषयः त्वां शाश्वतत्वादिविशेषणविशिष्टमाहुः। देवर्षिर्नारदस्तथाऽऽह। असितो देवलोऽप्येवमाह। व्यासश्चैवमाह इत्यप्यन्वयो भाष्याभिमत इति बोध्यम्।

भवानित्यस्य त्वामित्यस्य च श्रीकृष्णशरीरावच्छिन्नं चैतन्यमर्थः। तस्यैव परब्रह्मत्वादिविशेषणविशिष्टत्वात्। यद्यप्यर्जुन-शरीरावच्छिन्नं चैतन्यमप्येवंविधमेव। तथापि नार्जुनस्यैतावताऽप्यात्मनीश्वरप्रत्ययः आसीदिति बोध्यम्। अथवा भवानित्यस्य त्वामित्यस्य च चिन्मय आत्मेत्येवार्थः॥ १२ , १३॥

**सर्वमिति।** हे केशव! त्वं मां प्रति यद् वदसि, तदेतत् सर्वमृतं मन्ये। हे भगवन् ! देवाः दानवाश्च ते व्यक्तिं न विदुर्हि। हिः प्रसिद्धौ। **प्रभवम्** आदिं न विदुः। तवानादित्वेन आदेरभावादिति भावः॥ १४॥

**स्वयमिति।** हे पुरुषोत्तम! हे भूतभावन! हे भूतेश! हे देवदेव! हे जगत्पते! त्वं स्वयमेवात्मनाऽऽत्मानं वेत्थ। आत्मस्वरूपज्ञानेनैवेत्यर्थः। पुरुषोत्तमशब्दं भगवान् स्वयमेव व्याख्यास्यति – 'यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि

१. 'चैव' इति पा.। २. नञोऽनुकर्षणमिदम् अन्वयप्रदर्शनार्थम्। नञ् क्वचिन्न दृश्यते। ३. 'एतत्' इति पा.।

**भूतभावन ! भूतेश ! देवदेव ! जगत्पते !॥ १५॥**
**वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः।**
**याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि॥ १६ ॥**
**कथं विद्यामहं योगिन् ! त्वां सदा परिचिन्तयन्।**
**केषु केषु च भावेषु चिन्त्योऽसि भगवन् ! मया॥ १७॥**

**देवदेव ! जगत्पते ! ॥ १५॥**

वक्तुमिति। वक्तुं **कथयितुम् अर्हसि अशेषेण, दिव्या** ह्यात्मविभूतयः **आत्मनो विभूतयो याः**[१]**, ताः वक्तुमर्हसि, याभिः** विभूतिभिः **आत्मनो माहात्म्यविस्तरैः**[२] **इमान् लोकान् त्वं व्याप्य तिष्ठसि॥ १६ ॥**

कथमिति। **कथं** विद्यां **विजानीयाम् अहम् , हे योगिन् ! त्वां सदा परिचिन्तयन् । केषु केषु च** भावेषु **वस्तुषु** चिन्त्योऽसि **ध्येयोऽसि, भगवन् ! मया ॥ १७॥**

आनन्दगिरिकृतव्याख्या

**कथयति—** भूतानीति। **सर्वेश्वरत्वमाह—** भूतानामिति। **उक्तं ते सोपाधिकं रूपं देवादीनामाराध्यतामधिगच्छतीत्याह—** देवेति। **जगतः सर्वस्य स्वामित्वेन पालयितृत्वमाह—** जगदिति॥ १५॥

**यस्मादस्मादृशामगोचरस्तवात्मा जिज्ञासितश्च, तस्मात् त्वयैव** [३]**तद्रूपं वक्तव्यमित्याह—** वक्तुमिति। दिव्यत्वम् **अप्राकृतत्वम्। सम्प्रत्यन्वयमन्वाचष्टे—** आत्मन इति। **वक्तव्याः विभूतीर्विशिनष्टि—** याभिरिति। **यद्वारा लोकान् पूरयित्वा वर्तसे, ताः विभूतीरशेषेण वक्तुमर्हसीत्यर्थः॥ १६॥**

**किमर्थं विभूतीः श्रोतुमिच्छसीत्याशङ्क्य ध्यानसौकर्यप्रकारप्रश्नेन फलं कथयति—** कथमिति। **योगो नामैश्वर्यं, तदस्यास्तीति योगी,** हे **योगिन् ! अहं स्थविष्ठमतिः त्वां केन प्रकारेण सततमनुसन्दधानो विशुद्धबुद्धिर्भूत्वा निरुपाधिकं त्वां विजानीयामिति प्रश्नः।**[४] **प्रश्नान्तरं प्रस्तौति—** केषु केष्विति। **चेतनाचेतनभेदाद् उपाधिबहुत्वाच्च बहुवचनम् ॥ १७॥**

भाष्यार्कप्रकाशः

लोके वेदे च प्रथितः पुरुषोत्तमः' इति। अतो नात्र व्याख्यातः आचार्यैः। सर्वाणि भूतानि प्रकृतिश्च पुरुषशब्दवाच्याः, तेभ्यः पुरुषेभ्यः उत्तमः पुरुषोत्तमः। **यद्वा** पुरुषश्चासावुत्तमश्च पुरुषोत्तमः, क्षराक्षराभ्यामुत्तमः पुरुषोऽयमित्यर्थः। पूर्णत्वात् पुरि शयनाद्वा पुरुष इति निरुक्तिः पुरुषशब्दस्य पुरैव दर्शिता। पुरुषेभ्यो जीवेभ्यः संसारिभ्यश्चिदाभासेभ्यः उत्तमः, असंसारित्वादात्मनः, पुरुषोत्तम इति वा। **भावयति** उत्पादयति। **ईशितः** नियामक, प्रभो इति यावत्। देवानामपि देवः प्रभुर्देवदेवः, तत्सम्बुद्धिः। जगतः पतिः प्रभुः पालकः **जगत्पतिः,** तत्सम्बुद्धिः। यस्मात् त्वमुत्तमः पुरुषः, यस्माच्च जगत्सृष्ट्यादिहेतुः, यस्माच्च जगन्नियामकः, यस्माच्च देवानामधिपतिः, तस्मात् त्वमेव त्वां वेत्सि, न त्वन्यः कोऽपि प्राणी त्वां वेद। त्वज्जन्यत्वात् त्वत्परतन्त्रत्वाच्च सर्वस्येति भावः॥ १५॥

**वक्तुमिति**। यत एवं ततः, या दिव्याः आत्मविभूतयस्ताः अशेषेण वक्तुमर्हसि हि , त्वमिमान् लोकान् याभिर्विभूतिभिर्व्याप्य तिष्ठसि। **यद्वा** याभिर्विभूतिभिस्त्वमिमान् लोकान् व्याप्य तिष्ठसि, याश्च दिव्या आत्मविभूतयस्ताः अशेषेण वक्तुमर्हसि हि॥ १६॥

**कथमिति**। हे योगिन् ! त्वां सदा कथं परिचिन्तयन्नहं विद्याम्? हे भगवन् ! त्वं मया केषु केषु च भावेषु चिन्त्योऽसि? **योगः** सम्यग्दर्शनम् अणिमाद्यैश्वर्ययोगो वा अस्यास्तीति **योगी,** तत्सम्बुद्धिः॥ १७॥

---

१. प्रथमान्तनिर्देशसंगमनाय अध्याहारेण 'आत्मविभूतयः याः ताः' इति योजितम्। २. 'विस्तरैः' इति विस्तारार्थे बोध्यम्। अग्रेऽपि एवम्। ३. 'त्वद्रूपं' इति पा.। ४. बुद्धिशुद्धितदैकाग्र्यद्वारा तत्त्वज्ञानसाधनीभूतध्यानप्रकारः प्रथमप्रश्नविषयः। ध्यानालम्बनविशेषः द्वितीयप्रश्नविषयः।

**विस्तरेणात्मनो योगं विभूतिं च जनार्दन !।**
**भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम्॥ १८॥**

**श्रीभगवानुवाच—**

**हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः।**
**प्राधान्यतः कुरुश्रेष्ठ ! नास्त्यन्तो विस्तरस्य मे॥ १९॥**

विस्तरेणेति। **विस्तरेणात्मनो** योगं **योगैश्वर्यशक्तिविशेषं,** विभूतिं **च विस्तरं ध्येयपदार्थानाम् , हे** जनार्दन **! अर्दतेर्गतिकर्मणो रूपम्। असुराणां देवप्रतिपक्षभूतानां जनानां नरकादिगमयितृत्वाज्जनार्दनः। [१]अभ्युदयनिःश्रेयस-पुरुषार्थप्रयोजनं सर्वैर्जनैर्याच्यत इति वा।** भूयः **पूर्वमुक्तमपि कथय।** तृप्तिः **हि परितोषो** हि **यस्मान्नास्ति** मे **मम** **शृण्वतः त्वन्मुखनिःसृतवाक्यामृतम् ॥ १८॥**

हन्त त इति। हन्त **इदानीं** ते **तव** दिव्याः **दिवि भवाः** आत्मविभूतयः **आत्मनो मम विभूतयो यास्ताः कथयिष्यामीत्येतत्।** प्राधान्यतः **यत्र यत्र प्रधाना या या विभूतिस्तां तां प्रधानां प्राधान्यतः कथयिष्याम्यहम् ,**

आनन्दगिरिकृतव्याख्या

**प्रकृतं प्रश्नमुपसंहरति—** विस्तरेणेति। **अर्दतेर्गतिकर्मणो जनार्दनेति रूपम्। तद् व्युत्पादयति—** असुराणामिति। **प्रकारान्तरेण शब्दार्थं व्युत्पादयति—** अभ्युदयेति। **ननु पूर्वमेव सप्तमे नवमे च विभूतिरैश्वर्यं चेश्वरस्य दर्शितम् , तत् किमिति श्रोतुमिष्यते? तत्राह—** भूय इति। अमृतम् **अमृतप्रख्यमित्यर्थः॥ १८॥**

**प्रष्टारं विश्रम्भयितुं भगवानुक्तवानित्याह—** श्रीभगवानिति। **हन्तेत्यनुमतिं व्यावर्त्य जिज्ञासावच्छिन्नं कालं दर्शयति—** इदानी-मिति। दिवि भवत्वम् **अप्राकृतत्वमस्मदगोचरत्वम्। वाक्यान्वयं द्योतयति—** यास्ता इति। **सर्वविभूतीनां वक्तव्यत्वप्राप्तावुक्तम्—** यत्रेति।

भाष्यार्कप्रकाशः

**विस्तरेणेति**। हे जनार्दन! आत्मनो योगं विभूतिं च विस्तरेण भूयः कथय। हि अमृतं शृण्वतो मे तृप्तिर्नास्ति। ननूक्त एव मम योगो विस्तर[विभूति]श्चेत्यत आह— **विस्तरेणेति**। संक्षेपेणोक्तात् तस्मान्नास्ति मम तृप्तिरिति भावः। कोऽसौ योगः? अत आह— **ऐश्वर्यशक्तिविशेषमिति। विस्तरं** समृद्धिम्। केषां विस्तरः? अत आह— **ध्येयेति। ध्येयाः** चिन्त्याः पदार्था आदित्यादयः। येषु भावेषु भगवांश्चिन्त्यः, तेऽपि भावा भगवदाश्रयत्वेन चिन्त्या एवेति भावः। **गतिकर्मण इति। गतिर्गमनं कर्म** क्रिया, धात्वर्थ इति यावत् , यस्य तस्य तथोक्तस्य, **अर्दतेः** 'अर्द गतियाचनयो'रिति धातोः रूपम् अर्दनः इति। **अर्दयति** गमयतीत्यर्दनः। जनानामर्दनो **जनार्दनः**। कान् किं गमयतीत्यत आह— **असुराणां नरकादिगमयितृत्वादिति**। आदिपदात् पातालादिग्रहणम्। असुराणामिति कर्मणि षष्ठी। देव-प्रतिपक्षत्वादसुरान् नरकादि गमयतीत्याह— **देवेति**। भगवतो देवपक्षपातित्वाद् , राक्षसान्तकत्वाच्चेति भावः। शमदमदयादिसद्गुण-म्पत्तिमत्सु भगवतः प्रीतिः, तादृशाश्च देवा एवेति बोध्यम्। अर्दतेर्याच्ञार्थत्वाद् व्युत्पत्त्यन्तरमाह— **अभ्युदयेति**। जनैर्भक्तैरर्द्यते याच्यते अभ्युदयरूपं निःश्रेयसरूपं वा पुरुषार्थनामकं प्रयोजनमिति **जनार्दनः**। याचतेर्द्विकर्मकत्वाद् अभ्युदयेत्यादिकमुक्तम्। जनाः अभ्युदयादिकम् एनं भगवन्तं याचन्त इत्यर्थः। किं तदमृतम्? अत आह— **वाक्यामृतमिति**। वाक्यरूपममृतमित्यर्थः॥ १८॥

**हन्तेति**। हन्तेत्याश्चर्ये। **दिव्या इति**। दिवि आकाशतुल्ये ब्रह्मणि भवन्तीति भवाः, ब्रह्मण्यधिष्ठाने मायया कल्पिता इति भावः। यत्र यत्र जातौ या या व्यक्तिः प्रधाना तां तामात्मविभूतिं कथयिष्यामीत्यर्थः। **विभूतीनामिति**। भगवत्यात्मनि ब्रह्मणि कल्पिता

१. 'फलमत उपपत्तेः' (ब्र.सू. ३.२.३९) इत्यत्र कर्मफलदातृत्वस्य, 'चतुर्विधा भजन्ते माम्' इत्यत्र भगवतो याच्यत्वस्य च प्रसिद्धत्वान्नेदं व्याख्यानमप्रामाणिकम्।

**अहमात्मा गुडाकेश ! सर्वभूताशयस्थितः।**
**अहमादिश्च मध्यं च भूतानामन्त एव च॥ २०॥**

**कुरुश्रेष्ठ ! अशेषतस्तु वर्षशतेनापि न शक्या वक्तुम्। यतो नास्ति अन्तो विस्तरस्य मे मम विभूतीनामित्यर्थः॥ १९॥**

**तत्र प्रथममेव तावच्छृणु—** अहमिति। **अहम्** आत्मा **प्रत्यगात्मा,** गुडाकेश ! **गुडाका निद्रा, तस्या ईशो** गुडाकेशो **जितनिद्रः इत्यर्थः। घनकेश इति वा।** सर्वभूताशयस्थितः **सर्वेषां भूतानामाशयेऽन्तर्हृदि स्थितोऽहमात्मा प्रत्यगात्मा नित्यं ध्येयः। तदशक्तेन चोत्तरेषु भावेषु चिन्त्योऽहम्, [१]चिन्तयितुं शक्यः यस्माद् अहमेव** आदिः **भूतानां कारणम्, तथा** मध्यं **च स्थितिः,** अन्तः **प्रलयश्च॥ २०॥**

आनन्दगिरिकृतव्याख्या

**किमित्यनवशेषतो विभूतयो नोच्यन्ते? तत्राह—** अशेषतस्त्विति। **तत्र हेतुः—**यत इति॥ १९॥

**विभूतिप्रदर्शने प्रस्तुते सत्यादावेव पारमार्थिकं पारमेश्वरं रूपं दर्शयितुं श्रोतुरर्जुनस्य मनःसमाधानार्थं यतते—** तत्रेति। **सोपाधिकमपि काल्पनिकं परस्य रूपं पश्चाद् वक्ष्यमाणं श्रोतुं चित्तसमाधानं कर्तव्यमेवेत्याह—** तावदिति। **आशेरतेऽस्मिन् विद्याकर्मपूर्वप्रज्ञाः इत्याशयो हृदयम्, सर्वेषां भूतानां हृदयेऽन्तःस्थितो यः प्रत्यगात्मा सोऽहमेवेति वाक्यार्थमाह—** सर्वेषामिति। **यस्तु मन्दो मध्यमो वा परमात्मानमात्मत्वेन ध्यातुं नालम्, तं प्रत्याह—** तदशक्तेनेति। **वक्ष्यमाणादित्यादिषु परस्य न ध्येयत्वम्, अन्यदेव कारणं किञ्चित् तत्र तत्र ध्येयमित्याशङ्क्याह—** यस्मादिति। **सर्वकारणत्वेन सर्वज्ञत्वेन सर्वेश्वरत्वेन च परस्य ध्येयत्वमत्रेप्सितम्, नान्यस्य कस्यचित् कारणस्यादित्यादिषु ध्येयतेत्यर्थः॥ २०॥**

भाष्यार्कप्रकाशः

मायया चराचरात्मकाः सर्वे पदार्था विभूतिशब्देनोच्यन्ते। विशेषेण भूतिर्भवनं विभूतिरिति व्युत्पत्तेः। एकरूपेण स्थितो ह्यात्मा मायया बहुरूपो भवति। अन्तोऽवधिः, न तु नाशः, विभूतीनां नश्वरत्वात्॥ १९॥

**अहमिति**। केषु केषु भावेषु कथं वा तव चिन्तनम्? इत्यर्जुनस्य यः प्रश्नः, तत्रोत्तरं तावद् वक्तीत्याह— **तत्रेति**। हे गुडाकेश! सर्वभूताशयस्थित आत्मा अहमेव। भूतानामादिः, मध्यम्, अन्तश्चाहमेव। 'निद्रालस्ये गुडाके स्यादि'त्यभिधानादाह— **गुडाका निद्रेति। जितनिद्र इति**। परिभूततमोगुण इत्यर्थः। अत एव जितालस्योऽपि गुडाकेश इत्युच्यते। निद्रालस्ययोस्तमोगुणकार्यत्वात्। अर्थान्तरमाह— **घनेति**। वनवासादिषु तपश्चर्यया जटीभूतत्वेन गुडवद् घनाः केशा यस्य स **गुडाकेशः**। गुडकेश इति भवितव्ये पृषोदरादित्वादाकारः। हृदि [गुहा]पदार्थे प्रत्यग्रूपेणेश्वरो नित्यं ध्येय इत्ययं प्रथमः पक्षः। अत एव लीलाशुकः – 'उपासतामात्मविदः पुराणाः परं पुमांसं निहितं गुहायाम्। वयं यशोदाशिशुबाललीलाकथासुधासिन्धुषु लीलयामः॥' इत्यवोचत्। **तदशक्तेनेति**। **तस्मिन्** प्रत्यगात्मध्याने **अशक्तेन** असमर्थेन **तूत्तरेषु** वक्ष्यमाणेष्वादित्यादिष्वित्यर्थः। ननु कुतस्त्वमेव चिन्त्यः? इत्यत आह— **अहमिति**। मत्त एव भूतानि जायन्ते, मय्येव लीयन्ते, भूतानामन्तश्चाहमेव स्थित इत्यहमेव ध्येयः। 'कश्चिद् ध्येयः कारणं तु ध्येयः' इति श्रुतेः। मम कारणत्वात्, मद्भिन्नस्य सर्वस्य मदात्मकत्वाच्चेति भावः।

**रामानुजस्तु—** 'अहमात्मतया सर्वभूताशयस्थितः' इति वदन् 'प्रत्यगात्मनोऽप्यन्तःस्थितोऽयं परमात्मा' इति बभाषे। 'यः सर्वेषु भूतेषु तिष्ठन्' 'य आत्मनि तिष्ठन्' इत्यन्तर्यामिब्राह्मणमत्र प्रमाणत्वेनोपन्यस्तवांश्च। **तदेतद् मन्दम्**; प्रत्यगात्मनोऽन्यस्य परमात्मनो हृद्देशेऽनुपलम्भात्। मनआदिसर्वप्रपञ्चाभावसाक्षित्वेन स्वस्य प्रत्यगात्मन एव स्फुरणात् समाधौ। निरन्तरप्रज्ञानघने आत्मन्यन्यस्य वस्तुमनवकाशाच्च। [२]ब्राह्मणे तु भूतशब्दः प्राणिपरः, आत्मशब्दस्तु बुद्धिपरः[३] इति न तस्योक्तार्थे प्रामाण्यम्॥ २०॥

---

१. 'चिन्तयितुं शक्यः' इति क्वचिन्न। २. अन्तर्यामिब्राह्मणे। ३. 'शारीरश्चोभयेऽपि हि भेदेनैनमधीयते' (ब्र.सू. १-२-२०) इति सूत्रभाष्ये तु 'य आत्मनि तिष्ठन्' इति आत्मपदस्य जीवपरत्वं व्याख्यातम्। तच्च बुद्ध्युपाधिकत्वाज्जीवस्येति संगमनीयम्।

**आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्।**
**मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी॥२१॥**
**वेदानां सामवेदोऽस्मि देवानामस्मि वासवः।**
**इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना॥२२॥**

**एवं च ध्येयोऽहम्—**आदित्यानामिति। [1]आदित्यानां **द्वादशानां** विष्णु**र्नामादित्योऽहम्।** ज्योतिषां **रविः प्रकाशयितॄणाम्** अंशुमान् **रश्मिमान्। मरीचिर्नाम** मरुतां **मरुद्देवताभेदानामस्मि। नक्षत्राणामहं** शशी **चन्द्रमाः॥२१॥**

वेदानामिति। **वेदानां मध्ये सामवेदोऽस्मि।** देवानां **रुद्रादित्यादीनां** वासवः **इन्द्रोऽस्मि।** इन्द्रियाणाम् **एकादशानां चक्षुरादीनां** मनश्चास्मि **सङ्कल्पविकल्पात्मकं मनश्चास्मि। भूतानामस्मि** चेतना **कार्यकरणसङ्घाते**

आनन्दगिरिकृतव्याख्या

**उक्तध्यानाशक्तेभ्यो व्यस्तं विभूतियोगमुपदिशति—** एवञ्चेति। **तत्र तत्र प्रधानत्वेन परस्य ध्येयत्वम् एवंशब्दार्थमेव दर्शयति—** आदित्यानामित्यादिना ॥२१॥

**मन्त्रब्राह्मणसमुदायानामृगादीनां मध्ये सामवेदोऽस्मीति ध्यानान्तरमुदाहरति—**वेदानामिति। सङ्घाते **जीवाधिष्ठिते** [2]**यावत्पञ्चत्वं सर्वत्र व्यापिनी** [3]**चैतन्याभिव्यञ्जिकेति शेषः॥२२-२३॥**

भाष्यार्कप्रकाशः

**आदित्यानामिति।** अनेन च विष्ण्वादयो मद्विभूतय इति कथनेन विष्ण्वादिभावेष्वीश्वरस्य ध्येयत्वं, तेषां भावानां चेश्वरात्मकतया ध्येयत्वं सूच्यते। आदित्यानां विष्णुरहं भवामीति शेषः। तथा च विष्णावादित्ये ध्येय ईश्वरो हिरण्मयपुरुषरूपेणेति द्योत्यते। 'ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः' इति स्मृतेः। ज्योतिषां नक्षत्रादीनां मध्ये अंशुमान् रविरहम्। अनेन च रवेस्तन्मण्डलस्थपुरुषस्य च ध्येयत्वं सूच्यते। **मरुतां** मरुन्नामकदेवताविशेषाणां मध्ये मरीचिरहम्। अनेन च मरीचेस्तदन्तरपुरुषस्य च ध्येयत्वं सूच्यते। नक्षत्राणां मध्ये शश्यहम्। अनेन चन्द्रस्य तन्मण्डलस्थहयग्रीवस्य च ध्येयत्वं सूच्यते। एवमुत्तरत्राप्यूह्यम्।

**ननु** चन्द्रस्य नक्षत्रजातीयत्वाभावात् कथं निर्धारणे षष्ठी इति चेत्? **उच्यते—** भगोलगतानां निशि भासमानानां ज्योतिःपिण्डानां नक्षत्रपदवाच्यत्वाच्चन्द्रोऽपि तादृश एवेति नक्षत्रत्वमस्ति चन्द्रस्य। परन्तु स्थूलस्य ज्योतिःपिण्डस्य चन्द्रपदवाच्यत्वं, सूक्ष्माणां तु तेषां नक्षत्रपदवाच्यत्वं च लोकतः सिद्धमिति। **यद्वा** नक्षत्राणामित्यस्य निशि भगोले भासमानानां ज्योतिःपिण्डानाम् इत्येवार्थो वाच्यः।

**वस्तुतस्तु** 'यो वा इह यजमानोऽमुं लोकं नक्षते तन्नक्षत्राणां नक्षत्रत्व'मिति श्रुतेर्यजमानेन पुण्यफलभोगार्थं देहान्ते गन्तव्या लोका नक्षत्राणीत्युच्यन्ते। श्रुतौ नक्षत इत्यस्य गच्छतीत्यर्थः। नक्षते गच्छति यजमान एतदिति नक्षत्रमिति व्युत्पत्तिः। तथा च शशी च नक्षत्रमेव, इष्टाधि[दि]कारिगन्तव्यलोकत्वाच्छशिन इति। न च नक्षत्राणामधिपतिः शश्यहमिति व्याख्येयमिति वाच्यम् , प्रकरणविरोधात्। आदित्यानामहं विष्णुरित्यादिषु निर्धारणषष्ठ्या एव प्रकृतत्वात्॥२१॥

**वेदानामिति।** यद्यपि मन इन्द्रियं नेति वेदान्तिनः, तथापि तदेकदेशिभिर्मनस इन्द्रियत्वस्याभ्युपगतत्वाद् **एकादश इन्द्रियाणी**त्युक्तम्। मनस इन्द्रियत्वे च प्रमाणमिदमेव गीतावचनं भाष्यवचनं च। न्यायादिमतान्तरदृष्ट्या मनस इन्द्रियत्वमत्रोक्तमिति मनसोऽनिन्द्रियत्ववादिनः आहुः। मनःपूर्वकत्वाच्चक्षुरादिव्यापारस्य मनस उत्कृष्टत्वमिन्द्रियाणाम्। **भूतानां** सर्वप्राणिसम्बन्धिपरिणामानां मध्ये **चेतना** बुद्धेः स्पष्टा वृत्तिः अहमस्मि। भूतानां कार्यकरणानां देहादीनां मध्ये **चेतना** स्पष्टवृत्तिमती बुद्धिरहमस्मीति च

१. अदितिपुत्राणां मध्ये विष्णुनामाऽऽदित्यः, अथवा वामनावतारो विष्णुः। २. यावन्मरणमित्यर्थः। ३. बुद्धिवृत्तेः चैतन्याभिव्यञ्जकत्वाच्चेतनात्वमिति भावः।

**रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम्।**
**वसूनां पावकश्चास्मि मेरुः शिखरिणामहम्॥ २३॥**
**पुरोधसां च मुख्यं मां विद्धि पार्थ ! बृहस्पतिम्।**
**सेनानीनामहं स्कन्दः सरसामस्मि सागरः॥ २४॥**

**नित्याभिव्यक्ता बुद्धिवृत्तिश्चेतना॥ २२॥**

रुद्राणामिति। रुद्राणाम् **एकादशानां शङ्करश्चास्मि।** वित्तेशः **कुबेरो** यक्षरक्षसां **यक्षाणां रक्षसां च।** वसूनाम् **अष्टानां** पावक**श्चास्मि अग्निः। मेरुः** शिखरिणां **शिखरवताम् अहम्॥ २३॥**

पुरोधसामिति। पुरोधसां च **राजपुरोहितानां च** मुख्यं **प्रधानं मां** विद्धि **जानीहि , हे पार्थ ! बृहस्पतिम्। स हि इन्द्रस्येति मुख्यः स्यात् पुरोधाः।** [१]सेनानीनां **सेनापतीनाम् अहं** स्कन्दो **देवसेनापतिः।** सरसां **यानि देवखातानि सरांसि तेषां सरसां सागरो**ऽस्मि **भवामि॥ २४॥**

आनन्दगिरिकृतव्याख्या

**पुरोहितेषु बृहस्पतेर्मुख्यत्वे हेतुमाह—** स हीति॥ २४॥

भाष्यार्कप्रकाशः

वक्तुं शक्यम् , 'प्रेक्षोपलब्धिश्चित् संवित् प्रतिपज्ज्ञप्तिचेतनाः' इति बुद्धिपर्यायत्वाच्चेतनाशब्दस्य। अत एव 'बुद्धिश्चेतना' इति भाष्ये पाठान्तरम्। उपलब्धिचित्संविदादिशब्दानामपि ज्ञानमात्रे प्रसिद्धप्रयोगसत्त्वात् तत्साहचर्येण चेतनाशब्दस्यापि तत्रैव प्रयोग उचितः। **अमर**स्तु लक्षणया बुद्धेः ज्ञानवत्त्वाच्चेतनादिशब्दानां बुद्धिपर्यायत्वमूचे। तथा च चेतनाशब्दस्य स्पष्टबुद्धिवृत्तिरेवाभिधया सिद्धोऽर्थ इति **श्रीशङ्कराचार्य**हृदयम्।

**संघात इति**। तन्मध्ये इत्यर्थः। **व्यक्तेति**। जाग्रदादाविति भावः। सुषुप्तौ तु अस्पष्टबुद्धिवृत्तिरस्ति, तामेवाविद्यावृत्तिमाहुः। तस्यास्तु ज्ञानत्वेन व्यवहाराभावादुक्तं व्यक्तत्वविशेषणम्। 'भूतानां चेतनावतां सम्बन्धिनी चेतनाऽहमस्मी'ति **रामानुज**भाष्यं प्रकरण-विरोधादुपेक्ष्यम्। निर्धारणे षष्ठी हि प्रकृता॥ २२॥

**रुद्राणामिति**। वित्तेशस्य यक्षत्वाद् राक्षसत्वयक्षत्वयोरवान्तरभेदे सत्यपि एकजातित्वाद् यक्षरक्षसां वित्तेश इत्युक्तम्। **यद्वा** एकस्मादेव सन्ध्यारूपात् पितामहशरीराद् यक्षरक्षसां जातत्वादुभयोरेकत्वेन निर्देशः। सशिखरा अशिखराश्चेति द्विविधाः पर्वताः। तत्र सशिखराणां पर्वतानां मध्ये मेरुरहम्। अशिखराणां मध्ये उत्कृष्टस्तु हिमालयः। स च 'स्थावराणां हिमालयः' इतीश्वरत्वेन वक्ष्यते॥ २३॥

**पुरोधसामिति**। पुरोऽग्रे हितं दधत इति **पुरोधसः** पुरोहिताः शतानन्दादयः। कुतो बृहस्पतेः प्राधान्यम्? अत आह— **स हीति**। इन्द्रस्य त्रिलोकाधिपतित्वेन महाराजत्वात् तत्पुरोहितस्योत्कृष्टत्वं राजपुरोहितानां मध्ये इति भावः। पृथग्जनपुरोहितापेक्षया राजपुरोहितस्योत्कृष्टत्वादुक्तम्—**राजपुरोहितानामिति**। सेनां नयन्ति स्ववशमापादयन्तीति सेनान्यः। स्कन्दस्य देवसेनापतित्वात् प्राधान्यमिति सूचनाया(मा)ह— **देवसेनापतिरिति**। वापीकूपतटाकादयो मनुष्यैः खाताः, तेभ्यो देवखातानि सरांस्युत्कृष्टानि, तेषां च सरसां मध्ये सगरैः खातः सागर उत्कृष्टः। यद्यपि मनुष्यखातः सागरस्तथापि गङ्गाजलभरितत्वेन, अपारजलवत्त्वेन, सगराणां देवाधिकप्रभावयुक्तत्वेन वा सागरस्योत्कृष्टत्वमिति बोध्यम्। **अथवा** सगरैः खातादन्य एव ब्रह्मसृष्टः समुद्र इह सागरशब्देन प्रतिपाद्यत इति देवाधिकत्वाद् ब्रह्मणस्तदीयः सागर उत्कृष्ट इति बोध्यम्॥ २४॥

---

१. 'सेनानीना'मिति आर्षम्। 'सेनान्याम्' इति लौकिकं रूपम्।

**महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम्।**
**यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः॥ २५॥**
**अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः।**
**गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः॥ २६॥**
**उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम्।**
**ऐरावतं गजेन्द्राणां नराणां च नराधिपम्॥ २७॥**

महर्षीणामिति। **महर्षीणां भृगुरहम्।** गिरां **वाचां पदलक्षणानाम्** एकमक्षरम् **ओङ्कारः अस्मि। यज्ञानां जपयज्ञोऽस्मि।** स्थावराणां **स्थितिमतां हिमालयः॥ २५॥**

अश्वत्थ इति। अश्वत्थः **सर्ववृक्षाणाम्।** देवर्षीणां **च** नारदः, **देवा एव सन्तः ऋषित्वं प्राप्ता मन्त्रदर्शित्वात्, ते देवर्षयः, तेषां नारदोऽस्मि।** गन्धर्वाणां **चित्ररथो नाम गन्धर्वोऽस्मि।** सिद्धानां **जन्मनैव धर्मज्ञानवैराग्यैश्वर्यातिशयं प्राप्तानां कपिलो मुनिः॥ २६॥**

उच्चैरिति। उच्चैःश्रवसम् **अश्वानाम् उच्चैःश्रवा नामाश्वराजः, तं मां** विद्धि **जानीहि** अमृतोद्भवम् **अमृत-निमित्तमथनोद्भवम्।** ऐरावतम् **इरावत्याः अपत्यं** गजेन्द्राणां **हस्तीश्वराणाम्, तम्, मां विद्धीत्यनुवर्तते।** नराणां **च मनुष्याणां** नराधिपं **राजानं मां** विद्धि **जानीहि॥ २७॥**

आनन्दगिरिकृतव्याख्या

एक**मित्योङ्कारस्य ब्रह्मप्रतीकत्वेन तदभिधानत्वेन च प्रधानत्वमुच्यते। जपयज्ञस्य यज्ञान्तरेभ्यो हिंसादिराहित्येन प्राधान्य-मुपेत्याह—** यज्ञानामिति। **शिखरवतामुच्छ्रितानां पर्वतानां मध्ये मेरुरहमित्युक्तेऽपि स्थितिशीलानां तेषामेव हिमवान् पर्वतराजो ऽस्मीत्यर्थभेदं गृहीत्वाऽऽह—** स्थितिमतामिति॥ २५॥

**सर्ववृक्षाणामित्यत्र सर्वशब्देन वनस्पतयो गृह्यन्ते॥ २६॥ २७॥**

भाष्यार्कप्रकाशः

**महर्षीणामिति।** महर्षयो मरीच्यादयः, तन्मध्ये भृगोरुत्कर्षः, पादे शिवफालनेत्रप्रभावापहारिनेत्रवत्त्वात्, त्रिलोकजनन्या लक्ष्म्याः एतस्मादाविर्भावाद्वा। ओङ्कारस्य पदत्वेन वाक्यत्वाभावाद् वाचां निर्धारणमस्य न सम्भवतीत्यभिप्रेत्याह— **पदलक्षणानामिति।** पदस्वरूपाणां गिराम्, पदानामित्यर्थः। गीर्यन्ते उच्यन्त इति गिरः इति व्युत्पत्त्या गीःशब्दस्यापि पदवाचकत्वादिति भावः। 'ओमित्येकाक्षरं ब्रह्मे'ति श्रुतेरेकमक्षरं प्रणव एवेत्याह— **ओङ्कार इति।** ओङ्कारस्य शब्दत्वाच्छब्दानां मध्ये निर्धारणमस्येति बोध्यम्। ब्रह्मप्रतीकत्वाद् ब्रह्मवाचकत्वाच्च प्राशस्त्यमोङ्कारस्येति भावः। **यज्ञा** द्रव्ययज्ञादयः; **जपयज्ञः** प्रणवजपादिलक्षणयज्ञः। तस्य चित्तशुद्धिं प्रत्यन्तरङ्गत्वेन हिंसारहितत्वेन द्रव्यार्जनादिकायक्लेशानावहत्वेन च प्राशस्त्यम्। **स्थावराः** शिखररहिताः पर्वताः॥ २५॥

**अश्वत्थ इति।** 'मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे। अग्रतः शिवरूपाय वृक्षराजाय ते नमः॥' इति भजनीयत्वाद् अश्वत्थस्योत्कृष्टत्वम्॥ २६॥

**उच्चैःश्रवसमिति।** क्षीरसमुद्रजातत्वेन्द्रवाहनत्वादिभिः उच्चैःश्रवस उत्कर्षः। अमृतोद्भवमिति पदं काकाक्षिन्यायेन उच्चैःश्रव-ऐरावतयोरन्वेति। तच्च प्राशस्त्यहेतुगर्भं विशेषणम्। अत्रामृतपदम् अमृतनिमित्तमथनलक्षकमित्याह— **अमृतनिमित्तमथनोद्भवमिति।** **अमृतं** सुधा, तदुपादानं समुद्रोऽपि लक्षणयाऽमृतमित्युच्यते। **अमृतोद्भवं** क्षीरसमुद्रजातमित्यर्थः। **अमृतं** मथ्यमानावस्था सुधा,

**आयुधानामहं वज्रं धेनूनामस्मि कामधुक्।**
**प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः॥२८॥**
**अनन्तश्चास्मि नागानां वरुणो यादसामहम्।**
**पितॄणामर्यमा चास्मि यमः संयमतामहम्॥२९॥**

आयुधानामिति। **आयुधानामहं** वज्रं **दधीच्यस्थिसम्भवम्।** धेनूनां **दोग्ध्रीणामस्मि** कामधुक् **वसिष्ठस्य सर्वकामानां दोग्ध्री, सामान्या वा कामधुक्।** प्रजनः **प्रजनयिता अस्मि** कन्दर्पः **कामः।** सर्पाणां **सर्पभेदानामस्मि** वासुकिः **सर्पराजः॥२८॥**

अनन्त इति। अनन्तश्चास्मि नागानां **नागविशेषाणां नागराजश्चास्मि।** वरुणो **यादसामहम् अब्देवतानां राजाऽहम्। पितॄणाम्** अर्यमा **नाम पितृराजश्चास्मि। यमः** संयमतां **संयमनं कुर्वतामहम्॥२९॥**

आनन्दगिरिकृतव्याख्या

**प्रजनयतीति व्युत्पत्तिमाश्रित्याह—** प्रजनयितेति। **सर्पाः नागाश्च जातिभेदाद् भिद्यन्ते॥२८॥२९॥३०॥३१॥**

भाष्यार्कप्रकाशः

तदुद्भवमिति वा वक्तुं शक्यते। **इराः** आपः, ता अस्याः सन्तीति **इरावती** गजीरूपिणी मेघबाला॥२७॥

**आयुधानामिति**। आयुधानां खड्गादीनां मध्ये। किं तद् वज्रम्? अत आह— **दधीचीति**। तथा च तपःसारभूतत्वाद् वज्रस्योत्कर्षः। दुहन्ति इष्टानि दिशन्तीति दोग्ध्यः, कामदायिन्यो धेनवः। तासां मध्ये वसिष्ठसम्बन्धिनी समुद्रमथनोद्भवा कामधेनुः अहमस्मि। विश्वामित्रसैन्यनिषूदनसमये म्लेच्छाद्युत्पादनरूपस्य वसिष्ठधेनुसामर्थ्यस्य प्रसिद्धत्वादिति भावः। **सामान्येति**। क्षीराब्धे-रजातेति भावः। अस्मिन् पक्षे धेनवः पयोदोग्ध्यः गावः, तन्मध्ये कामदोग्धृत्वात् कामधुग् धेनुरुत्कृष्टा।[**प्रजन इति**।] जनयितॄणामिति शेषः। प्रजनः कन्दर्पोऽहमस्मि। तपआदिद्वारा प्रजासर्जकेभ्यो दक्षादिप्रजापतिभ्यः मैथुनद्वारा प्रजासर्जकः कन्दर्प उत्कृष्टः। मैथुनेनैव प्रजावृद्धेर्जातत्वात् , मैथुनस्य च कन्दर्पाधीनत्वात्। न हि निष्कामस्य मैथुनप्रवृत्तिः। इदमेव प्रजनयितेति शब्देन सूचितवान् भाष्यकारः। प्रकर्षेण विस्तरेण [विस्तारेण] जनयिता प्रजनयितेति व्युत्पत्तेः। सृष्टिहेतूनामपि विद्याकालकर्मादीनां मध्ये कन्दर्पः श्रेष्ठः। ईश्वरसङ्कल्पस्यैव कामत्वात् , तस्यैव सृष्टौ प्रधानहेतुत्वाच्च। 'तदैक्षत बहु स्या'मिति श्रुतेः। सृष्टेः सङ्कल्पपूर्वकत्वात्। एवं कन्दर्पस्य सृष्टिं प्रति प्रकृष्टहेतुत्वादेव प्रकर्ष इति सूचयितुं प्रजन इति विशेषणम्। प्रकर्षेण जनयतीति प्रजन इति वा। कामानां मध्ये प्रजनः प्रजनयिता पुत्रोत्पत्त्यर्थः कन्दर्पः कामोऽहमस्मीति वा। **यद्वा** सुन्दराणामिति शेषः। जयन्तवसन्तनलकूबरादीनां मध्ये कन्दर्पस्य श्रेष्ठत्वम् , प्रजनयितृत्वात्। कन्दर्पो हि स्त्रीपुरुषयोर्मोहको घटयिता च। **सर्पभेदानामिति**। एकशिरसामित्यर्थः। सविषाणामिति **श्रीधरः**। वासुकेः एकशिरस्कत्वात् सर्पजातीयत्वम्॥२८॥

**अनन्त इति**। **नागभेदानां** बहुशिरसामित्यर्थः। निर्विषाणामिति **श्रीधरः**। शेषस्य सहस्रशिरस्कत्वात् तज्जातीयत्वम् , तत उत्कर्षश्च। **यादसां** जलजन्तूनाम्। वरुणस्यापि जलस्थित्या जलजन्तुत्वात् तत उत्कर्षस्तस्य कृतः। कोऽसौ वरुणः? अत आह— **अब्देवतानां राजेति**। अबभिमानिन्यो देवता अब्देवताः [१]गङ्गाकृष्णादयः, तासां राजा प्रभुः। समुद्रस्य नदीपतित्वात् समुद्रस्यापि पतिरयं वरुणो गङ्गादिदेवताप्रभुरेवेति भावः। यद्यपि यादःशब्दोऽभिधया मत्स्यादिजलजन्तुवाची, वरुणश्च देवजातीयः। तथापि यादःशब्दो लक्षणया जलवासिप्राणिवाचीति बोध्यम्। पितॄणाम् अग्निष्वात्तादीनां मध्ये **अर्यमा** तन्नामकः पितृराजोऽहमस्मि। **संयमनं** दण्डः, शिक्षेति यावत्। **यमो** यमधर्मराजः। अप्रतिहतदण्डो हि स उत्कृष्टः॥२९॥

१. गङ्गाद्या नद्यः।

**प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम्।**
**मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्॥ ३०॥**
**पवनः पवतामस्मि रामः शस्त्रभृतामहम्।**
**झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी॥ ३१॥**

प्रह्लाद इति। प्रह्लादो **नाम चास्मि** दैत्यानां **दितिवंश्यानाम्। कालः** कलयतां **कलनं गणनं कुर्वतामहम्। मृगाणां च** मृगेन्द्रः **सिंहो व्याघ्रो वाऽहम्।** वैनतेयश्च **गरुत्मान् विनतासुतः** पक्षिणां **पतत्रिणाम्॥ ३०॥**

पवन इति। पवनो **वायुः** पवतां **पावयितॄणामस्मि।** रामः शस्त्रभृताम् **अहम् , शस्त्राणां धारयितॄणां दाशरथी रामोऽहम्।** झषाणां **मत्स्यादीनां** मकरो **नाम जातिविशेषोऽहम्।** स्रोतसां **स्रवन्तीनामस्मि** जाह्नवी **गङ्गा॥ ३१॥**

भाष्यार्कप्रकाशः

**प्रह्लाद इति।** प्रह्लादस्य भगवद्भक्त्यादिगुणयोगित्वादुत्कर्षः। कालो हि संवत्सराद्यात्मकः। सुखेन सर्वप्राणिनां ब्रह्मादिस्तम्ब-पर्यन्तानामायुष्यं गणयतीति द्रव्यादिगणनाकारिभ्यः साङ्ख्यगणकादिभ्य उत्कृष्टत्वं कालस्य। मृगाः अरण्यचारिणः पशवः हरिणगज-वराहशरभादयः। सिंहव्याघ्रयोरप्यरण्यचारिपशुत्वाविशेषान्मृगजातीयत्वम्॥ ३०॥

**पवन इति।** पवतां जगत्परिशुद्धिहेतूनां जलाग्न्यादीनां मध्ये वायुरुत्कृष्टः। तस्य निखिलगगनभागचारित्वेन सर्वव्यापित्वात् सर्वपावनत्वमिति। राम इति परशुरामबलरामयोर्व्युदासायाह— **दाशरथिरिति।** न च दाशरथेरेव कथमुत्कृष्टत्वमिति वाच्यम् ; रामबाणस्य सप्ततालपर्वतभूमीनां युगपत् क्षणादेव भेदकत्वेन, अमोघत्वेन च, रामस्यापि सर्वक्षत्रियहन्तृपरशुरामजेतृत्वेन च राम उत्कृष्टः शस्त्रधारिष्विति। यद्यपि परशुरामोऽप्युत्कृष्टस्तथापि तस्मादपि राम उत्कृष्ट इति दाशरथिरिह निर्दिष्टः। शस्त्रभृतः शस्त्रादिभिर्युद्धकारिणो वीरपुरुषाः भीष्मद्रोणाश्वत्थामकर्णार्जुनरावणकुम्भकर्णादयः। रामस्यापि शस्त्रभृत्त्वात् तदन्तःप्रवेशः। शस्त्र-भृत्त्वम् अत्र जातिः। रामस्तु व्यक्तिरिति विवेकः। अतो राम एवात्र विभूतिः; न तु शस्त्रभृतः। शस्त्रभृतां वृक्षादिस्थानीयत्वाद् रामस्य चाश्वत्थस्थानीयत्वात् तत्तज्जातीयोत्कृष्टपदार्थस्यैव विभूतित्वात्।

न च रामस्य सक्षाद् भगवत्त्वात् कथं विभूतित्वमिति वाच्यम् ; योऽत्र दशरथादुत्पन्ने कार्यकरणसङ्घातात्मके देहे स्फुरति तस्य चिन्मयस्यात्मनो रामस्य साक्षाद् भगवत्त्वेऽपि सङ्घातस्य जडस्यानित्यस्य कार्यस्य सविकारस्य भगवत्त्वाभावात्। भगवति परमात्मनि मायया देवादिसङ्घातानामिव तत्सङ्घातस्यापि कल्पितत्वात्। तस्यैव सङ्घातस्य भूतशब्दवाच्यस्य प्राणिनः इह दाशरथिरामत्वेन विवक्षितत्वात्। तस्य च भगवति कल्पितत्वेन भगवद्विभूतित्वात्। न च चिन्मय एव विवक्षित इति वाच्यम् ; चिन्मयस्य शस्त्रभृज्जातीयत्वायोगात्। शस्त्रभृतो हि प्राणिनः, प्राणिहस्तधार्यत्वाच्छस्त्राणाम्।

एतेन **रामानुजो**क्तं शस्त्रभृत्त्वं विभूतिरर्थान्तराभावादिति भाष्यम् , अचिद्विशेषस्य चेतनान्तरस्य वा शस्त्रभृच्छब्दवाच्यस्य अत्रासम्भवादिति **वेदान्तदेशिक**व्याख्यानं च प्रत्याख्यातम्।

शस्त्रभृच्छब्दवाच्यस्य दाशरथिशरीरेऽहमित्यभिमन्यमानस्य कार्यकरणसङ्घातात्मकस्य प्राणिनश्चिन्मयादात्मनोऽन्यस्य प्रमातुरीश्वरस्य सत्त्वात्। अचिद्विशेषस्य रामदेहस्यैव साक्षाच्छस्त्रसम्बन्धसत्त्वात् , चेतनस्य चिदाभासस्य च देहद्वारा शस्त्रसम्बन्ध-सत्त्वादस्त्येव शस्त्रभृद् देहरूपश्चिदाभासरूपो वा। अस्मदादिशरीरेषु वर्तमानश्चिदाभासो जीवः, रामकृष्णादिशरीरेषु वर्तमानस्तु ईश्वर इति व्यवहारविवेकः।

न चेश्वरस्य चिदाभासत्वमयुक्तम् , चिदाभासस्य संसारित्वादिति वाच्यम् ; 'जीवेश्वरावाभासेन करोती'ति श्रुत्यैव जीववद् ईश्वरस्यापि चिदाभासत्वस्योक्तत्वात्। मायायां चित्प्रतिबिम्बो हीश्वरः। आभासश्च प्रतिबिम्ब एवेति चिदाभासस्यापीश्वरस्य सर्वज्ञत्वाद्

**सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन !।**
**अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्॥ ३२॥**

सर्गाणामिति। सर्गाणां **सृष्टीनाम्** आदिः अन्तश्च मध्यं चैवाहम् **उत्पत्तिस्थितिलयाः अहम् , अर्जुन !। भूतानां जीवाधिष्ठितानामेव आदिरन्तश्चेत्याद्युक्तमुपक्रमे, इह तु सर्वस्यैव सर्गमात्रस्येति विशेषः। अध्यात्मविद्या विद्यानाम् , मोक्षार्थत्वात् प्रधानमस्मि। वादः अर्थनिर्णयहेतुत्वात् प्रवदतां प्रधानम् , अतः सोऽहमस्मि। प्रवक्तृद्वारेण वदनभेदानामेव [वा] वादजल्पवितण्डानामिह ग्रहणम् — प्रवदतामिति॥ ३२॥**

आनन्दगिरिकृतव्याख्या

**अहमादिश्चेत्यादावुक्तमेव पुनरिहोच्यते। तथा च पुनरुक्तिरित्याशङ्क्याह—** भूतानामिति। **सर्गशब्देन सृज्यन्त इति सर्वाणि कार्याणि गृह्यन्ते।** अध्यात्मविद्येति [१]**आत्मन्यन्तःकरणपरिणतिः अविद्यानिवर्तिका गृहीता। प्रवदतां सम्बन्धी** वादो **वीतरागकथा तत्त्वनिर्णयावसाना। यदा प्रवदतामिति लक्षणया कथाभेदोपादानं तदा निर्धारणे षष्ठीत्याह—** प्रवक्त्रिति॥ ३२॥ ३३॥

भाष्यार्कप्रकाशः

आत्मस्वरूपज्ञत्वाच्च न संसारित्वम् , यथा वा जीवस्यापि ज्ञानिन इति। तस्माद् मायिकत्वाद् रामावतारो विभूतिरेव, न तु भगवान्। न च रामः परमात्मेति व्यवहारविरोध इति वाच्यम् ; तत्र रामशब्देन चिन्मयस्यैव विवक्षितत्वात्। न चात्रापि सैव विवक्षेति वाच्यम् ; शस्त्रभृत्त्वस्य तद्विवक्षाऽभावगमकत्वादित्युक्तत्वात्।

**किञ्च** 'आदित्यादयः क्षेत्रज्ञा ईश्वरशरीरत्वाच्छस्त्रभृत्स्थानीयाः, रामस्त्वीश्वरः स्वयमेवे'ति यदुक्तं **रामानुजेन ; तच्चासत्** । शस्त्रभृतां जीवानां मध्ये शस्त्रभृतो जीवस्यैवोत्कृष्टस्य भगवद्विभूतित्वेन वक्तव्यत्वात् , तं प्राकरणिकमर्थं विहाय जीवेभ्य ईश्वर उत्कृष्ट इति शस्त्रभृद्भ्योऽशस्त्रभृत ईश्वरस्योत्कृष्टीकरणमिहानुचितमिति।

**मकर इति**। तस्य जलजन्तुषु मत्स्येषूत्कृष्टत्वं बलक्रौर्यादिमत्त्वेन। अत एव तस्य मत्स्यराजत्वव्यपदेशः। **स्रवन्त्यो** नद्यः। विष्णुपादोद्भवत्वादिना गङ्गायाः प्राशस्त्यम्॥ ३१॥

**सर्गाणामिति**। **सृष्टयः** क्रियाः इति यावत्। तासां मध्ये उत्पत्त्यादिक्रियात्रयमीश्वरविभूतिः। गमनभाषणादयः क्रियान्तराणि। ताभ्य उत्कृष्टाः सर्जनरक्षणहरणक्रियाः। न च 'उद्भवश्च भविष्यता'मित्यनेन पौनरुक्त्यम् , तत्रोद्भवशब्दस्याभ्युदयार्थकत्वात्।

**यत्तु** 'सृज्यन्त इति सर्गास्तेषां सृष्टिस्थितिलयहेतुभूतास्तत्र तत्र स्रष्टारः, पालयितारः, संहर्तारश्चाहमेवे'ति **रामानुजः**, **तन्मन्दम्** ; निर्धारणालाभात्। न च प्राणिनां मध्ये स्रष्टारः पालयितारः संहर्तारश्चाहमेवेति निर्धारणसिद्धिरिति वाच्यम् ; स्रष्टृत्वादिधर्मत्रयान्यतमरहितप्राणिमात्रस्यैवाभावात्। तृणादीनामपि कीटकादिस्रष्टृत्वपश्वादिपालकत्वसंहर्तृत्वदर्शनात्। 'आदिरन्तो मध्य'मित्येकवचनशब्दप्रयोगाच्च। पालननाशवाचिनोर्मध्यान्तशब्दयोः पालकहारकेषु लक्षणायाः स्वीकरणीयत्वात् , सम्भवति मुख्यार्थे लक्षणास्वीकारस्यान्याय्यत्वाच्च।

**ननु** सर्गाणां प्राणिनां सृष्टिस्थितिलयानाम् अहमेव हेतुरिति श्लोकार्थ इति चेत्? **मैवम्** ; निर्धारणालाभात्। अहमादिश्च मध्यं चेति पूर्वमेवास्यार्थस्योक्तत्वाच्च।

**ननु** इममेव पुनरुक्तिदोषं, 'भूतानां जीवाविष्टानामेवादिरन्तश्चेत्युक्तमुपक्रमे, इह तु सर्वस्य सर्गमात्रस्यैवेति विशेषः' इति परिहरतो भाष्यकारस्य सर्गाणां सर्वेषां गगनादिपदार्थानां सृष्टिस्थितिलयहेतुरहमेवेत्यर्थ इत्याशय इति निश्चीयत इति चेत्? **तर्हि** निर्धारणमत्राविवक्षितमिति स्रष्टृत्वरक्षकत्वसंहर्तृत्वाण्येव विभूतिरिति च वक्तव्यं स्यात्। एतच्छ्लोकमारभ्यैव तत्र तत्र 'तेजस्तेजस्विनामहम्' इत्यादौ निर्धारणस्यादर्शनात् इत आरभ्य निर्धारणस्य प्रकरणसिद्धस्यापि भङ्ग इति बोध्यम्।

१. आत्मसाक्षात्काररूपाऽन्तःकरणवृत्तिरित्यर्थः।

भाष्यार्कप्रकाशः

न चैवं 'नक्षत्राणां शशी'त्यत्रापि निर्धारणभङ्ग इति वाच्यम् ; तत्र निर्धारणस्य सम्भवात्। अगतिकस्थलेष्वेव तद्भङ्गाभ्युपगमात्। न च प्रकरणभङ्गो वक्तुर्दोषावह इति वाच्यम् ; भगवतः सर्वज्ञस्य प्रकरणभङ्गादिदोषदूरत्वात्। न हि वेदेष्वार्षेषु वा ग्रन्थेषु छन्दोभङ्गादयो दोषत्वेन गृह्यन्ते विद्वद्भिः। तस्मात्प्रकरणभङ्गोऽयमार्षत्वादुपेक्ष्यः।

**अथवा** आदित्यानामित्यारभ्य जाह्नवीत्येतदन्तमेव निर्धारणषष्ठीप्रकरणम्। सर्गाणामित्यारभ्य तु शेषषष्ठ्यपि प्रकृतैवेति निर्धारणषष्ठीवत् शेषषष्ठीप्रयोगेऽपि न प्रकरणभङ्गो दोषः। **यद्वा** विष्ण्वादयो मद्विभूतय इत्येतावदेव भगवता विवक्षितम् , न त्वादित्यादिमध्ये विष्ण्वादय इति। विष्ण्वादीनामादित्यादिषूत्कृष्टत्ववर्णनस्य स्वरूपकथनमात्रपरत्वात्। न चैवं नक्षत्राणां पतिरिति व्याख्यानं युक्तमिति वाच्यम् ; नक्षत्रेषूत्कृष्टत्ववर्णनस्याप्यसिद्धेस्तदेति। न चैवं सर्गाणामिति श्लोके काऽपि न विभूतिरुक्तेति वाच्यम् ; सृष्टिस्थितिलयहेतोरीश्वरस्यैव विभूतेरुक्तत्वात्। न चेश्वरो भगवानेवेति कथं तस्य विभूतित्वमिति वाच्यम् ; जीववदीश्वरस्यापि मायया परमात्मनि कल्पितत्वेन ईश्वरस्यात्मविभूतित्वादिति।

प्रकृतत्वान्निर्धारणषष्ठी नैव त्याज्येति मते, सर्गाणां भूतानां मध्ये सृष्टिस्थितिलयहेतुरीश्वराख्यः प्राण्यहमित्यप्यर्थ आपतति, 'अहमादिश्च मध्यं च भूतानामन्त एव च' इति श्लोकस्यापि निर्धारणषष्ठीप्रकरणान्तर्भावेऽभिप्रेते तु पुनरुक्तिः स्यात्। अतस्तत्परिहारायाह— **भूतानामिति**। भूतशब्देन सजीवा विवक्षिताः, सर्गशब्देन तु सजीवनिर्जीवरूपं कार्यमात्रमिति। ततश्च प्राणिनां मध्ये ईश्वराख्यः प्राण्यहम् , कार्याणां मध्ये चेश्वराख्यं कार्यमहमिति। न चेश्वरस्य कार्यत्वे विवदितव्यम् , 'जीवेशावाभासेन करोती'ति श्रुतेः। न चेश्वरस्य पुनरपि निर्धारणात् पुनरुक्तिरिति वाच्यम् ; निर्धार्यमाणस्येश्वरस्याभेदेऽपि निर्धारणाश्रयाणां भूतानां सर्गाणां च भेदात्। **यद्वा** प्राणिनां मध्ये हिरण्यगर्भाख्य ईश्वर उत्कृष्टः, सर्गाणां मध्ये तु मायाप्रतिबिम्ब ईश्वर इति निर्धार्यमाणभेदोऽपीति।

**वस्तुतस्तु** भगवद्विभूतेर्भगवन्माहात्म्यरूपयोगस्य च जिज्ञासितत्वादर्जुनेन, श्रीकृष्णेनापि विभूतिकथनमध्येऽपि योग उक्तः, प्रकृतत्वात् तस्य चेति बोध्यम्। तथा च 'अहमादिश्चे'ति श्लोकवत् 'सर्गाणा'मित्येषोऽपि भगवन्माहात्म्यप्रदर्शनपर एव। विभूतिश्लोकेषु तु निर्धारणषष्ठी प्रकृता, न तु योगे। अतो नात्र सर्गाणामिति निर्धारणषष्ठी, नापि नक्षत्राणामित्यत्र शेषषष्ठी।

नन्वेवम् 'अहमादि'रित्यनेनास्य पुनरुक्तम्? अत आह— **भूतानां जीवाधिष्ठितानामेवेति**। एवकारान्न तु निर्जीवानाम्। सृज्यत इति सर्गः कार्यम् , तन्मात्रम्। न चैवं सर्गाणामित्यस्य सृष्टीनामिति प्रतिपदमयुक्तमिति वाच्यम् ; सृष्टीनामित्यस्य सृष्टिविषयाणामित्यर्थात्। **उत्पत्तिस्थितिलयाः** तद्धेतुरित्यर्थः। **अथवा** जन्मस्थितिभङ्गाः क्रिया एवार्थः। 'अहमादिश्चे'ति श्लोकेन तु भूतानामुत्पत्तिस्थितिलयहेतुरीश्वरोऽहमित्युक्तम् , इह तु सर्गाणामुत्पत्तिस्थितिलया एवाहमित्युच्यते। अतो न पुनरुक्तिदोषावकाशः।

**न चैवं**[नन्वेवं] पुनरुक्तिशङ्काया एवानवकाशे 'इह तु सर्गमात्रस्येति विशेषः' इति कुत उक्तमाचार्यैरिति चेत्? **उच्यते— इति विशेष** इत्यस्य इत्यपि विशेष इत्यर्थः। अयमाशयः—आदिरन्तो मध्यमिति शब्दत्रयस्य द्विः श्रवणाच्छ्रोतृणां पुनरुक्तिदोषशङ्का स्यात्। तन्निरासे च हेतुद्वयमस्ति, तत्रैकः - आदिमध्यान्तशब्दानां दर्शितार्थभेदरूपः, द्वितीयस्तु - भूतसर्गशब्दयोरर्थभेदरूपश्चेति।

एवमेव सृष्टयः क्रियाः इत्यस्मिन्मतेऽपि पुनरुक्तिदोषप्रसङ्गः शङ्कितुराशयानुगुण्येन प्रसञ्जनीयः। परिहारस्य भाष्ये कण्ठत एवोक्तत्वादिति।

**विद्यानां** वेदवेदाङ्गादीनाम्। **मोक्षार्थत्वादिति**। अन्यास्तु धर्मकामादिफलिका इति भावः। **प्रवदतां** प्रवक्तॄणां यः प्रधानभूतो वादः सोऽहमस्मीति, तेजस्तेजस्विनामितिवत् प्रधानमात्रनिर्देशः।

ननु वादस्य विभूतित्वाद् विभूतिषु निर्धारणषष्ठ्या एव प्रकृतत्वात् कथं शेषषष्ठीग्रहणम्? अत आह— **प्रवक्त्रिति**। तर्हि निर्धारणषष्ठ्येवाश्रीयताम् , तथा च प्रवदतामित्यस्य लक्षणया प्रवक्तृधर्माणां वादजल्पवितण्डानामित्यर्थः। तन्मध्ये वादस्योत्कर्षे हेतुमाह— **अर्थनिर्णयहेतुत्वादिति। वदनभेदानां** वचनविशेषाणाम्। प्रमाणफलतत्त्वबुभुत्सोः कथा **वादः**; [१]उभयसाधनवती विजिगीषुकथा **जल्पः**; स्वपक्षस्थापनाहीना परपक्षविदलनमात्रावसाना **वितण्डा**। इहोपात्तानां त्रयाणां वचनभेदानां भेदान्तरोपलक्षणत्वात्

१. स्वपक्षस्थापनपरपक्षनिराकरणोभयवतीत्यर्थः।

**अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च।**
**अहमेवाक्षयः कालो धाताऽहं विश्वतोमुखः॥३३॥**
**मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम्।**

अक्षराणामिति। अक्षराणां **वर्णानाम्** अकारो **वर्णोऽस्मि। द्वन्द्वः समासोऽस्मि** सामासिकस्य च **समाससमूहस्य। किञ्च अहमेव** अक्षयोऽ**क्षीणः** कालः **प्रसिद्धः क्षणाद्याख्यः। अथवा परमेश्वरः कालस्यापि कालोऽस्मि।** धाताऽ**हं कर्मफलस्य विधाता सर्वजगतो** विश्वतोमुखः **सर्वतोमुखः॥३३॥**

मृत्युरिति। **मृत्युर्द्विविधः - धनादिहरः प्राणहरश्च; तत्र यः प्राणहरः स** सर्वहरः **उच्यते; सोऽहमित्यर्थः। अथवा परः ईश्वरः प्रलये सर्वहरणात् सर्वहरः, सोऽहम्।** उद्भवः **उत्कर्षोऽभ्युदयः, तत्प्राप्तिहेतुश्चाहम्, केषाम्?** भविष्यताम् **भाविकल्याणानाम् उत्कर्षप्राप्तियोग्यानामित्यर्थः। कीर्तिः श्रीः वाक् च नारीणां स्मृतिः मेधा धृतिः क्षमा**

आनन्दगिरिकृतव्याख्या

**सर्वहरशब्दस्य मुख्यमर्थान्तरमाह—** अथवेति। **भाविकल्याणानामित्युक्तमेव स्पष्टयति—** उत्कर्षेति। कीर्तिः **धार्मिकत्व-**

भाष्यार्कप्रकाशः

छलजात्यादिग्रहणम्। अभिप्रायान्तरेण प्रयुक्तस्याभिप्रायान्तरेण दूषणं **छलम्**; असदुत्तरं **जातिः** इत्याद्यन्यतो ग्राह्यम्॥३२॥

**अक्षराणामिति**। अक्षराणि अचो हलश्च, तेषां मध्ये आद्यक्षरम् अकारोऽहम्। अकारो हि सर्ववर्णादित्वात् प्रणवाद्यवयवत्वात् सर्ववर्णप्रकृतित्वाच्चोत्कृष्टः। अकारस्य सर्ववर्णप्रकृतित्वं च – 'अकारो वै सर्वा वाक्' इति श्रुतिसिद्धम्। द्वन्द्वस्य स्वघटकोभयपदार्थ-प्रधानत्वात् प्राधान्यम्। पूर्वपदार्थप्रधानोऽव्ययीभावः; उत्तरपदार्थप्रधानस्तत्पुरुषः; अन्यपदार्थप्रधानो बहुव्रीहिः; उभयपदार्थप्रधानो द्वन्द्व इति प्रायोवादः। **अक्षीण इति**। प्रवाहनित्य इत्यर्थः। अहमेवेत्यादिपादत्रयेण कालादय ईश्वरविभूतय इत्येतावदेवेह विवक्षितम्, न तु निर्धारणम्, षष्ठ्यन्तपदादर्शनात्। न च विभूतिषु निर्धारणषष्ठी प्रकृतेति वाच्यम्; सत्यां षष्ठ्यां निर्धारणं प्रकृतम्, तदभावे तु कथमिति।

अथवा नित्यानित्यलक्षणकालद्वयमध्येऽक्षयः कालोऽहम्। अनित्यः कालः क्षणादिरूपः, नित्यस्त्वीश्वर एवेति सिद्धान्तात्। तदेवाह— **परमेश्वरो वेति**। कुतस्तस्य कालत्वम्? अत आह— **कालस्यापीति**। कलयति परिच्छिनत्ति क्षणादिरूपेण जन्यं कालमिति कालः परमेश्वरः। परमेश्वरेण हि सूर्यगमनादिद्वारा कालः परिच्छिद्यते।

**यद्वा** माहात्म्यपरमिदं वाक्यत्रयम्। तथा च कालस्यापि कालोऽहम्, धाताऽहम्, मृत्युरहमिति भगवान्माहात्म्यकथनम्। **सर्वतोमुखत्वं** सर्वव्यापित्वं, सर्वद्रष्टृत्वं वा। विश्वतोमुखेन मयैव सर्वस्य जगतः कर्मफलं विधीयत इति भगवन्माहात्म्यकथनमिदम्। सर्वेषां तत्तत्कर्मानुगुण्येन फलविधानसामर्थ्यमीश्वरस्यास्तीति द्योतनाय विश्वतोमुखः इत्युक्तम्।

अत्रापि— 'धाता धातॄणां भुवनस्य गोप्ता' इति श्रुतेः धातॄणां मध्ये विश्वतोमुखो धाताऽहमिति निर्धारणं सुवचम्। रथादिनिर्मातारो धातारः, तदपेक्षया कर्मफलविधातुरीश्वरस्योत्कृष्टत्वम्। न चेश्वर एव कथमीश्वरस्य विभूतिरिति वाच्यम्; धातृत्वरूपेण विभूतित्वात्। एवं कालत्वादिना चेति बोध्यम्। विश्वतोमुखश्चतुर्मुखो धाता हिरण्यगर्भोऽहमेवेति वा। विश्वामित्रादिभ्यः तस्योत्कृष्टत्वादीश्वरविभूतित्वमिति बोध्यम्॥३३॥

**मृत्युरिति**। मृत्युद्वयस्य मध्ये सर्वहरो मृत्युरहम्। मृत्युद्वयं दर्शयति— **धनादिहरः प्राणहरश्चेति**। तत्र कः सर्वहरः अत आह— **य इति**। प्राणहर एव सर्वहर इत्युच्यत इत्यर्थः। **यद्वा** मृत्युर्द्विविधः— प्रपञ्चे सर्वप्राणिजीवितहर एको यमनामको मृत्युदेवतेति वा। प्रलये सर्वजगन्नाशक ईश्वरोऽन्यः। तयोर्मध्ये यः सर्वहर ईश्वरः सोऽहमित्याह— **अथवेति**। अयं चेश्वरो मायातमोगुणावच्छिन्नो

**कीर्तिः श्रीर्वाक् च नारीणां स्मृतिर्मेधा धृतिः क्षमा॥ ३४॥**
**बृहत्साम तथा साम्नां गायत्री छन्दसामहम्।**

**इत्येताः उत्तमाः स्त्रीणाम् अहमस्मि यासामाभासमात्रसम्बन्धेनापि लोकः कृतार्थमात्मानं मन्यते॥ ३४॥**

बृहत्सामेति। **बृहत्साम तथा साम्नां प्रधानमस्मि।** गायत्री छन्दसामहं **गायत्र्यादिच्छन्दोविशिष्टानामृचाम्**

आनन्दगिरिकृतव्याख्या

**निमित्ता ख्यातिः।** श्रीः **लक्ष्मीः कान्तिः शोभा,** वाग् **वाणी सर्वस्य प्रकाशिका,** स्मृतिः **चिरानुभूतस्मरणशक्तिः,** मेधा **ग्रन्थधारणशक्तिः,** धृतिः **धैर्यं,** क्षमा **मानापमानयोरविकृतचित्तता। स्त्रीषु कीर्त्यादीनामुत्तमत्वमुपपादयति—** यासामिति॥ ३४॥

**वेदानां सामवेदोऽस्मीत्युक्तम्। तत्रावान्तरविशेषमाह—** बृहदिति। **छन्दसां मध्ये गायत्री नाम यच्छन्दस्तदहमित्ययुक्तम् ,**

भाष्यार्कप्रकाशः

रुद्रनामक इति बोध्यम्। तथा च रुद्र ईश्वरविभूतिरिति सिद्धम्। ब्रह्मविष्णुरुद्राणां त्रयाणामीश्वरे ब्रह्मणि कल्पितत्वेन विभूतित्वात्। **अथवा** एकस्यैवेश्वरस्य मायावच्छिन्नचैतन्यलक्षणस्य स्रष्टृत्वरक्षकत्वसंहर्तृत्वगुणयोगाद् ब्रह्मविष्णुरुद्रशब्दवाच्यत्वम्। तत्र संहर्तृत्वगुणयोगी यः परमेश्वरः सोऽहम्। अस्य च सगुणेश्वरस्य निर्गुणब्रह्मत्वायोगात् तद्विभूतित्वमेव।

**यत्तु वेदान्तदेशिकः**—यमादेशकारिप्राणहरणाधिकृतः पुरुषविशेषो मृत्युरिति, **तन्मन्दम्** ; तादृशस्याप्रमाणत्वात्। यमदूतानां च बहुत्वात्। न च मृत्युदेवतैवेति वाच्यम् ; तस्या भगवदाज्ञापरतन्त्रत्वेन यमादेशकारित्वाभावात्।

**ननु** 'भूतानामन्त एव चे'त्यनेन लयहेतोरीश्वरस्योक्तत्वादत्र 'मृत्युरीश्वरः' इति व्याख्यानं पुनरुक्तमिति चेत्? **मैवम्** ; तत्र लयस्थानमात्रस्यैवोक्तत्वात्। 'अहमादि'रिति श्लोकस्य भगवन्माहात्म्यकथनपरत्वेन विभूतिपरत्वाभावाच्च। न च 'सर्गाणा'मिति श्लोकार्थेन पुनरुक्तमिति **वाच्यम्** ; सृष्टिस्थितिलयत्रितयहेतुत्वेन तत्रेश्वरो निर्धारितः, अत्र तु केवललयहेतुत्वेनेति भेदात्। सर्गेषु तत्रेश्वरो निर्धारितः, मृत्युद्वये त्वत्रेति भेदादिति वा। ईश्वरश्च त्रिनेत्रो रुद्र इति व्याख्याने नैव पुनरुक्तिप्रसङ्गः।

अत्र संहर्तॄणां मध्ये सर्वसंहर्ता मृत्युरहमिति **मधुसूदनः**।

उच्चैरभितो भवत्युदेतीति **उद्भवो**ऽभ्युदयो धर्मादिरूपः। लक्षणया अभ्युदयप्राप्तिहेतुरप्युद्भव एव। उद्भवत्यस्मात् पुंसामभ्युदय इति व्युत्पत्त्या उद्भवशब्दोऽभिधयाऽपि दर्शितमर्थं बोधयत्येव। न चोद्भवशब्दोऽत्र उत्पत्तिपर इति वाच्यम् ; आदिरित्यनेन तस्योक्तत्वात्। न च मृत्युशब्दसाहचर्यादत्रोद्भवशब्द उत्पत्तिपर एवेति वाच्यम् ; मृत्युशब्दस्यापि मरणार्थवाचित्वाभावादत्र। किं तर्हि? सर्वप्राणहरणरूपाशुभहेतुर्मृत्युरित्युक्तत्वेन सर्वाभ्युदयरूपशुभहेतुः कः? इत्याकाङ्क्षायां सोऽप्यहमेवेत्युक्तमिति पूर्वोत्तरसङ्गतिसद्भावाद् यथोक्त एवार्थः। **भाविकल्याणानामिति**। भावि भविष्यत् कल्याणं शुभं येषां तेषां **भाविकल्याणानां** पुरुषाणाम्। इदमेव स्पष्टयति— **उत्कर्षेति**। उत्कर्षप्राप्तियोग्यत्वमेव भाविकल्याणत्वमिति भावः। अकल्याणस्य सर्वहरणस्य प्रतियोगितया कल्याणलाभः। शुभाशुभे हि प्रतियोगिपदार्थौ।

नारीणां मध्ये कीर्त्यादिनामिका या उत्तमोत्तमाः स्त्रियः ताः सर्वा अप्यहमेव। धर्मस्य पत्न्यः कीर्त्यादिगुणाभिमानिन्यो देवताः कीर्त्यादिशब्देनोच्यन्ते। तत्र **कीर्तिः** यशः, धार्मिकत्वनिमित्तख्यातिः। **श्रीः** सम्पत्। **वाग्** विद्या। **स्मृतिः** स्मरणम्। **मेधा** ग्रन्थधारणशक्तिर्बुद्धेः। **धृतिः** धैर्यम्। **क्षमा** मानावमानयोरविकृतचित्तता। कुतः कीर्त्यादीनामुत्तमोत्तमत्वम्? अत आह— **यासामिति**। यासां कीर्तिलक्ष्मीसरस्वत्यादिदेवतानाम् **आभासमात्रसम्बन्धो**ऽत्यल्पसम्बन्धः, तदभिमानविषयकीर्तिसम्पदादिगुणाल्पयोगगम्य० इति भावः। तेनापि **लोको** जनः, स्त्रियः पुरुषाश्चात्मानं कृतार्थं मन्यन्ते। संसारिणामज्ञानां हि कीर्तिधनादिभिरात्मनि कृतार्थबुद्धिः, विदुषां तु ज्ञानेनैव ॥ ३४॥

**बृहदिति**। साम्नां मध्ये उत्कृष्टं बृहत्सामाख्यं साम, 'बृहच्च वा इदमग्रे रथन्तरं चे'ति श्रुतेः। 'त्वामिद्धि हवामहे' इत्यस्यामृचि

## मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥ ३५॥

**गायत्री ऋग् अहमस्मीत्यर्थः। मासानां मार्गशीर्षोऽहम्। ऋतूनां** कुसुमाकरो **वसन्तः ॥ ३५॥**

आनन्दगिरिकृतव्याख्या

**छन्दसामृग्भ्योऽतिरेकेण [1]स्वरूपासंभवादित्याशङ्क्याह—** गायत्र्यादीति। **द्विजातेर्द्वितीयजन्मजननीत्वादित्यर्थः।** मार्गशीर्षो **मृगशीर्षेण युक्ता पौर्णमास्यस्मिन्निति मार्गशीर्षो मासः, सोऽहम्, पक्वसस्याढ्यत्वादित्याह—** मासानामिति। वसन्तो **रमणीयत्वादिति शेषः ॥ ३५॥**

भाष्यार्कप्रकाशः

गीयमानं साम बृहत्साम। छन्दसाम् उष्णिगनुष्टुपत्रिष्टुप्प्रमुखानां मध्ये गायत्रीछन्दोऽहमिति व्याख्याने गायत्रीछन्दस उत्कर्षे हेतुर्नास्तीत्यभिप्रेत्याह— **ऋचामिति**। पादबद्धो वेदभाग ऋगित्युच्यते। गायत्री ऋक् गायत्रीछन्दोविशिष्टा ऋक्। गायत्रीछन्दस्तु षडक्षरपादबद्धम्। यथा— 'मारायुधभूता बाला शफराक्षी। कान्तं हरिमागाल्लक्ष्मीस्तनुमध्या ॥' इति श्लोकः। एवं षडक्षरैश्चतुर्भिः पादैः बद्धा ऋक् गायत्रीछन्दोविशिष्टा।

(ननु) यद्येवं लोकवद् वेदेऽपि षडक्षरपादचतुष्टयवत एव छन्दसो गायत्रीसंज्ञत्वम् , तर्हि 'तत्सवितु'रिति मन्त्रस्य गायत्रीछन्दस्कत्वं न स्यात् , 'तत्सवितु'रित्यस्य मन्त्रस्य विश्वामित्र ऋषिः, सविता देवता, गायत्री छन्द इति तु मन्त्रशास्त्रे प्रसिद्धम्। तथा 'उदु त्यं जातवेदस'मित्यादिमन्त्राणां च गायत्री छन्द इति प्रसिद्धम्। एवं गायत्री त्रिपदेत्यपि प्रसिद्धम् ,'गायत्री चतुर्विंशत्यक्षरा त्रिपदा षट्कुक्षि'रिति मन्त्रप्रयोगे दर्शनात्। तस्माद् वेदेऽष्टाक्षरपदत्रयैव गायत्री। एवम्भूतगायत्रीछन्दोविशिष्टत्वादपि तत्सवितुरित्यस्य गायत्रीमन्त्रत्वव्यवहारः। न च 'तत्सवितुर्वरेण्य'मिति सप्ताक्षरमेव प्रथमपाद इति वाच्यम् ; णियमित्यक्षरद्वयपाठात्। न च 'परोरजसि सावदो'मिति चतुर्थपादोऽप्यस्तीति वाच्यम् ; तस्य मन्त्रान्तरत्वात्। त्रिपदाया एव गायत्र्याः सर्वत्रोपदेशादिषु प्रसिद्धत्वात्।

**एवम्** 'उदु त्यं जातवेदस'मित्यादिऋक्ष्वपि त्रिपदैव एकैका ऋक्, 'उदु त्यं जातवेदसं देवं वहन्ति केतवः, दृशे विश्वाय सूर्यम्' इत्यस्या एकऋक्त्वात्। न च 'अप त्ये तायवो यथे'त्येतदप्यस्या एव पादभूतमिति वाच्यम् ; 'नवाद्या गायत्री छन्दः' इति वचनानुरोधेन 'उदु त्यं जातवेदस'मिति [2]मन्त्रे नवगायत्रीऋचां भवितव्यत्वात्। सप्तविंशतिपादानां दृश्यमानत्वाच्च एकैकस्या ऋचः पादत्रयात्मकत्वेन भवितव्यत्वात्। तस्मादष्टाक्षरत्रिपदैव गायत्री।

लोके तु चतुर्विंशत्यक्षरा गायत्री षडक्षरपादचतुष्टयत्त्वेन **पिङ्गल**मुनिना कल्पिता। चतुष्पात्त्वेऽपि चतुर्विंशत्यक्षरसङ्ख्यायाः सत्त्वाद् गायत्रीत्वम्। न च लोकवद् वेदेऽपि चतुर्विंशत्यक्षरामृचं चतुर्धा विभज्य षड्भिरक्षरैरेकः पाद इति कल्प्यतामिति वाच्यम् ; 'उदु त्यं जातवेदस'मित्यत्र 'उदु त्यं जातवे' इति पादविभागस्य कर्तुमशक्यत्वात्। न ह्येकस्मिन् पदे यतिविच्छेदः स्यात्। [न च] तर्हि लोक एवाष्टाक्षरं पादत्रयं गायत्रीछन्दसः कल्प्यतामिति वाच्यम् ; लोके श्लोकानां चतुष्पादवत्त्वेन भाव्यत्वात्। तस्मादष्टाक्षरमेव गायत्रीपादः। न च गायत्र्यनुष्टुप्छन्दसोः साङ्कर्यमिति वाच्यम् ; गायत्र्याः त्रिपदत्वाद् अनुष्टुभश्चतुष्पदत्वाच्च , गायत्र्याश्चतुर्विंशत्यक्षरत्वाद् अनुष्टुभो द्वात्रिंशदक्षरत्वाच्च वैलक्षण्यात्। तथा च त्रिष्टुभादिच्छन्दोबद्धानामृचां मध्ये गायत्रीछन्दोबद्धैव ऋगुत्कृष्टा।

सा च ऋग्दर्शिता— 'तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदया'दिति। अस्य च मन्त्रस्य [3]गायत्रीदेवताकत्वाद् गायत्रीछन्दोबद्धत्वाच्च गायत्रीति व्यपदेशः। 'उदु त्यं जातवेदस'मित्यादीनां तु गायत्रीछन्दस्कत्वेऽपि गायत्रीदेवताकत्वं नास्तीति, नास्ति तेषां गायत्रीमन्त्रव्यवहारः। एवं गायत्रीछन्दोविशिष्टऋचामपि गायत्रीमन्त्र एवोत्कृष्ट इति, त्रिष्टुभादिच्छन्दोविशिष्टानामृचां मध्येऽपि गायत्रीमन्त्र एवोत्तमोत्तमः इति गायत्रीशब्देनात्र गायत्रीमन्त्र एव ग्रहीतुमर्हः, 'न गायत्र्याः परो मन्त्रः' इत्यनेन गायत्रीमन्त्रस्य प्राशस्त्यं स्फुटमुच्यते।

ननु काऽसौ गायत्रीदेवतेति चेत्? सवितुर्वरेण्यं यत्तेजस्तदेव। किं ज्योतिः? न, चैतन्यमेव। सूर्यमण्डलावच्छिन्नं चैतन्यं

१. 'स्वरूपभावात्' इति पा.। २. सूक्ते इति पठनीयम्। द्र. ऋग्वेदः १-५०-१। ३. चिन्त्यमिदम्। तस्य सवितृदेवताकत्वेन प्रसिद्धेः। 'सूर्यमण्डलावच्छिन्नं चैतन्यं गायत्रीत्युच्यते' इत्यादिवक्ष्यमाणरीत्या वा कथंचिद् योज्यम्।

भाष्यार्कप्रकाशः

गायत्रीत्युच्यते। सूर्यस्य तावत् सर्वसाक्षित्वेनेश्वरत्वप्रसिद्धेः, तस्यापि सूर्यस्य यदन्तरं चैतन्यं तदेवेश्वरो गायत्रीत्युच्यते। नैतावता अस्मदादिशरीरावच्छिन्नस्यानवच्छिन्नस्य वा चैतन्यस्य गायत्रीव्यवहाराभावः, चिच्छक्तेरेव गायत्रीत्वात्। तस्माच्चैतन्यं परं ब्रह्मैव गायत्री। न च स्त्रीलिङ्गप्रयोगात् कालीसरस्वत्यादिशक्तिर्गायत्रीति वाच्यम् ; चैतन्ये निर्विशेषे आत्मेति, ब्रह्मेति पुन्नपुंसकशब्दयोरिव गायत्रीति स्त्रीलिङ्गस्यापि प्रयोगसम्भवात्। एवं ब्रह्मपरत्वाज्जीवब्रह्माभेदरूपतत्त्वार्थबोधकत्वाच्च गायत्रीमन्त्रः सर्वमन्त्रोत्कृष्टः।

अयं गायत्रीमन्त्रार्थः— **यः** ईश्वरो **नः** जीवानां **धियः प्रचोदयात्** प्रेरयति, 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया' इति वचनात् , 'यो भूतेषु तिष्ठन्' इत्याद्यन्तर्यामिब्राह्मणाच्च। यच्छब्दात् तच्छब्दाध्याहारः। तस्य **सवितुः** मायया जगत्सृष्टिस्थितिलयहेतुभूतस्य **देवस्य** क्रीडत ईश्वरस्य सम्बन्धि, **तत्** स्वरूपभूतम् , वस्तुत ईश्वरस्यैव ब्रह्मत्वादिति भावः। बिम्बभूतमिति वा, जीवेश्वरयोर्मायाविद्योपाधिद्वयप्रतिफलितब्रह्मचैतन्यप्रतिबिम्बरूपत्वादिति भावः। **तत्** नित्यापरोक्षतया सच्चिदानन्दरूपतया प्रसिद्धमिति वा। **वरेण्यम्** उत्कृष्टं **[भर्गः]** तेजः ज्ञानं, चैतन्यमिति यावत्। ब्रह्मेति भावः। **धीमहि** सोऽहमिति प्रत्यगभिन्नत्वेन पश्यामः इति।

**गायत्री छन्दसामहम्** मन्त्राणां मध्ये गायत्रीमन्त्रोऽहमित्यर्थः, ऋचां मन्त्रत्वात्। एवं सति गायत्रीत्येकवचनमपि स्वरसतः सङ्गच्छते, गायत्रीमन्त्रस्यैकत्वात्।

**यद्वा** गायत्रीछन्दोविशिष्टा या ऋचः 'उदु त्यं जातवेदस'मित्यादयः ताः सर्वा अप्यहमेव। जात्यभिप्रायाद् गायत्री-त्येकवचनम्। गायत्रीछन्दस एकत्वादिति वा। छन्दोवाचिना हि गायत्रीशब्देन तद्विशिष्टा ऋग् लक्षिता।

तदेवं गायत्रीमन्त्रस्य गायत्रीछन्दोविशिष्टमन्त्राणां वा भगवद्विभूतित्वमिति सिद्धम्।

न च गायत्रीछन्दोबद्धमन्त्राणां कुत उत्कृष्टत्वमिति वाच्यम् ; तज्जातौ गायत्रीमन्त्रस्य पठितत्वादिति। **यद्वा** 'अग्रं वै छन्दसां गायत्री' इति श्रुतेर्गायत्र्याश्छन्दसामग्रत्वादुत्कृष्टत्वम्। न च 'उक्तात्युक्ता तथा मध्ये'ति पिङ्गलवचनाद् [1]'उक्तैव छन्दः प्रथममिति वाच्यम् ; 'अग्निमीळे पुरोहित'मिति ऋच एव सर्ववेदानामादित्वात् , तस्याश्च ऋचो गायत्रीछन्दोबद्धत्वात्। 'अग्निमीळे' इति मन्त्रस्य अग्निर्देवता, गायत्री छन्द इति मन्त्रपाठे दर्शनात्।

**ननु** गायत्रीछन्दोबद्धमन्त्राणामितरच्छन्दोबद्धमन्त्रेभ्य उत्कृष्टत्वे यदि गायत्रीछन्दोबद्धत्वमेव हेतुस्तर्हि छन्दसां मध्ये गायत्री-छन्दस उत्कृष्टत्वं सिद्धमेवेति गायत्री छन्दसामहमित्यस्याभिधासिद्ध एवार्थो वाच्यः। त्रिष्टुभा[बा]दिच्छन्दसां मध्ये गायत्रीछन्दो ऽहमिति। यथा च भाषितं **रामानुजेन**। तद् विहाय किमिति लाक्षणिकार्थकल्पनाक्लेश आचार्याणामिति चेत्? **उच्यते**— पादाक्षरसङ्ख्या-विशेषनियमस्य छन्दःशब्दार्थत्वात् तन्मात्रस्य नोत्कृष्टत्वम् , किन्तु तद्विशिष्टस्य शब्दसमूहस्यैवेति। न च श्रुतिविरोधः, तत्रापि छन्दोविशिष्टानां मध्ये गायत्रीछन्दोविशिष्टैवोत्कृष्टेति विवक्षया अविरोधात्। तादृशस्यैव मन्त्रस्य 'अग्निमीळे' इत्यस्य वेदादौ स्थितत्वेनाग्रत्वाच्च।

**ननु** 'अग्निमीळे' इति मन्त्रस्य वेदादौ स्थितस्य गायत्रीछन्दोविशिष्टत्वेन गायत्रीछन्दोविशिष्टा ऋच उत्कृष्टा इति यथोच्यते तथा वेदादौ 'अग्निमीळे' इति मन्त्रे गायत्रीछन्दसो वर्तमानत्वाद् गायत्रीछन्दोऽपि छन्दसामुत्कृष्टमिति वक्तुं शक्यमेवेति चेत्? **सत्यम्**। उक्तन्यायेन वेदादावग्नेः सत्त्वादग्निरेव देवोत्कृष्ट इति वक्तुमपि शक्यत्वात्। न चेष्टापत्तिः, 'देवानामस्मि वासवः' इति गीताविरोधात्। 'अग्निर्वै देवानामवमो विष्णुः परमः' इति श्रुतिविरोधाच्च।

**ननु** श्रुतिस्मृतिविरोधादग्नेर्वेदादिस्थितिप्रयुक्तमुत्कृष्टत्वं मास्तु नाम, तदविरोधाद् गायत्रीछन्दसो वेदाद्यमन्त्रस्थितिप्रयुक्त उत्कर्षः स्यादिति चेत्? **मैवम्** ; अग्निशब्दोत्तरद्वितीयाविभक्तेरग्निशब्दस्य वा वेदादिगतत्वेनोत्कृष्टत्वमिति वक्तव्यत्वात्।

**अथवा** भवतु छन्दोमात्रस्यापि तस्योत्कर्षः, तथापि यन्मन्त्राधीनश्छन्दोमात्रस्योत्कर्षः स एव मन्त्र इहोत्कृष्टत्वेन ग्राह्यो लाघवात्। तज्जातीयत्वादन्ये च तादृशा इति बोध्यम्।

१. उक्तेति छन्दोविशेषनाम। उदाहृतं वचनं वृत्तरत्नाकरे दृश्यते। द्र.वृत्त. १-१९।

**द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम्।**
**जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम्॥३६॥**
**वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः।**
**मुनीनामप्यहं व्यासः कवीनामुशना कविः॥३७॥**

द्यूतमिति। द्यूतम् **अक्षदेवनादिलक्षणं** छलयतां **छलस्य कर्तृणामस्मि। तेजस्विनां तेजोऽहम्। जयोऽस्मि जेतृणाम्। व्यवसायोऽस्मि व्यवसायिनाम्। सत्त्वं** सत्त्ववतां **सात्त्विकानाम् अहम्॥३६॥**

वृष्णीनामिति। [1]**वृष्णीनां वासुदेवोऽस्मि अयमेवाहं** [2]**त्वत्सखः। पाण्डवानां धनञ्जयः त्वमेव।** मुनीनां **मनन-**

आनन्दगिरिकृतव्याख्या

**द्यूतमुक्तलक्षणं सर्वस्वापहारकारणम् अन्यापदेशेन पराभिप्रेतं विघ्नतां, स्वाभिप्रेतं वा सम्पादयतामित्याह—** छलस्येति। तेजो**ऽप्रतिहताज्ञा। उत्कर्षो** जयः। व्यवसायः **फलहेतुरुद्यमः। धर्मज्ञानवैराग्यादि सत्त्वकार्यं** सत्त्वम्॥३६॥

उशना **शुक्रः। कविशब्दोऽत्र यौगिको, न रूढः, पौनरुक्त्यात्**[3]॥३७॥

भाष्यार्कप्रकाशः

**वस्तुतस्तु** ऋगतिरेकेण छन्दसोऽभावाद् ऋक्सत्तयैव छन्दसः सत्तावत्त्वम्, न तु छन्दसः स्वातन्त्र्येण सत्तेति कृत्वा छन्दःशब्देनेह स्वतन्त्रसत्ताशालिनी ऋगेव ग्राह्येति बोध्यम्। तस्मान्नात्र गायत्रीछन्दस ईश्वरविभूतित्वं प्रतिपादितम्।

मार्गशीर्षस्य सस्यादिसम्पत्तिहेतुत्वात्, व्रताद्युचितकालत्वाद्वा उत्कृष्टत्वम्। वसन्तस्य तु 'वसन्ते वसन्ते ज्योतिषा यजेते'ति ज्योतिष्टोमकालत्वात्, पुष्पसमृद्धिमत्त्वेन प्राणिसुखकरत्वादिति वा उत्कृष्टत्वम्॥३५॥

**द्यूतमिति।** छलं कुर्वन्तीति छलयन्तः तेषां **छलयताम्।** लक्षणया छलानां मध्ये द्यूतमस्मि। द्यूतलक्षणमाह— **अक्षदेवनादि-लक्षणमिति।** क्रयविक्रयऋणदायसंवित्सङ्गरादयश्छलानि, वञ्चनास्पदत्वात् तेषाम्। द्यूतस्य सर्वाधिकत्वं च क्षणादेव धर्मराजादीनां द्यूते पराजयेन निःस्वभवनाद्, दुर्योधनादीनां च राजराजीभवनाज्जयेनेति बोध्यम्। एवं धनापहरणफलकेषु वञ्चनाविषयेषु क्रयविक्रयादि-सर्वच्छलेषु द्यूतस्य प्रकृष्टत्वादेव 'अक्षैर्मा दीव्यः' इति श्रुतिर्द्यूतं निषेधति। तेजस्विनां यत् प्रधानं तेजः, जेतृणां यः प्रधानो व्यवसायः, सत्त्ववतां यत् प्रधानं सत्त्वं तत् सर्वमहमस्मि। नात्र निर्धारणम्, किन्तु विभूतिमात्रकथनमेव।

**यद्वा** तेजऔदार्यवैभवादीनां मध्ये तेजोऽहम्, जयापजययोर्मध्ये जयोऽहम्, सन्धिविग्रहयानयुद्धजयादिषु जेतृधर्मेषु जयोऽहमिति वा। **व्यवसायः** उद्योगः। उद्योगानुद्योगयोरुद्योगोऽहम्; 'उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी'रित्युद्योगस्य प्रशंसितत्वात्। सङ्कल्पविकल्पनिश्चयादीनां मध्ये उद्योग उत्कृष्ट इति वा। अहमेवं करिष्यामीत्यादिसङ्कल्पादिभ्यः कर्मसु प्रवृत्तिरूपस्योद्योगस्य फलहेतुत्वेन प्रकृष्टत्वमिति बोध्यम्। सत्त्ववतां **सत्त्वं** सामर्थ्यम्, तच्च वाक्कायेन्द्रियमनोविषयत्वभेदेन चतुर्विधम्। ततश्च वाक्पाटव-कायपाटवेन्द्रियपाटवमनःपाटवानां मध्ये **सत्त्वं** मनःपाटवमहमस्मि। मनःपाटवस्यैव विद्यामोक्षादिहेतुत्वेनोत्कृष्टत्वात्। **यद्वा** सात्विकानां धर्मेषु सत्त्वादिषु सत्त्वमहम्। **सत्त्वं** शमदमादिलक्षणम्। आदिपदाद् यज्ञादिधर्मा ग्राह्याः। **अथवा** सत्त्वरजस्तमसां मध्ये सात्त्विकानां गुणो यः सत्त्वं सोऽहमेवेत्यर्थः। सत्त्वस्य च शमदमज्ञानादिहेतुत्वादुत्कृष्टत्वम्॥३६॥

**वृष्णीनामिति। वृष्णयो** यादवाः। कोऽसौ वासुदेवः? अत आह— **अयमेवेति।** तव यस्मिन् सखेति बुद्धिः स वसुदेवसूनु-रित्यर्थः। रामावतारवत् कृष्णावतारस्यापीश्वरे कल्पितत्वादीश्वरविभूतित्वम्। धनं जयतीति धनञ्जयः इति व्युत्पत्त्या निखिलराज-विजयित्वरूपोत्कर्षः सिद्धोऽर्जुनस्येति द्योत्यते। कृष्णार्जुनयोर्नरनारायणावतारत्वेन कृष्णस्येवार्जुनस्यापि विष्णववतारत्वाद् वा

१. 'वृष्णीनां यादवानाम्' इति पा.। २. 'त्वत्सखा' इति पा.। ३. 'उशना भार्गवः कविः' इति कोशात् कविशब्दः शुक्रे रूढः। प्रकृते तु कवयितृपर इति भावः।

**दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम्।**
**मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम्॥ ३८॥**
**यच्चापि सर्वभूतानां बीजं तदहमर्जुन !।**

**शीलानां सर्वपदार्थज्ञानिनामप्यहं व्यासः।** कवीनां **क्रान्तदर्शिनाम् उशना कविरस्मि॥ ३७॥**

दण्ड इति। **दण्डो** दमयतां **दमयितृणामस्मि अदान्तानां दमनकारणम्। नीतिरस्मि** जिगीषतां **जेतुमिच्छताम्। मौनं चैवास्मि** गुह्यानां **गोप्यानाम्। ज्ञानं ज्ञानवतामहम्॥ ३८॥**

यच्चापीति। **यच्चापि सर्वभूतानां** बीजं **प्ररोहकारणं तदहम् , अर्जुन!। प्रकरणोपसंहारार्थं विभूतिसंक्षेपमाह—**

आनन्दगिरिकृतव्याख्या

**अदान्तान् उत्पथान् [उत्पथात् ] पथि प्रवर्तयतां** दण्डोऽहम् **उत्पथप्रवृत्तौ निग्रहहेतुरित्यर्थः।** नीतिः **न्यायो धर्मस्य जयोपायस्य प्रकाशकः।** मौनं **वाचंयमत्वम् , उत्तमा वा चतुर्थाश्रमप्रवृत्तिः। श्रवणादिद्वारा परिपक्वसमाधिजन्यं सम्यग्ज्ञानं** ज्ञानम्॥ ३८॥

भाष्यार्कप्रकाशः

उत्कर्षः। नरनारायणौ हि विष्ण्वंशसम्भूतावृषी।

अत्र वृष्णीनामहमिति, पाण्डवानां त्वमिति चोक्तेऽस्मत्त्वच्छब्दाभ्यां ग्रहणमात्मनः स्यात्। वासुदेवो धनञ्जयः इत्युक्ते तु यो वसुदेवाज्जातः स कार्यकरणसङ्घात एव वासुदेवशब्देन, येन शत्रूणां धनं जितं स सङ्घात एवार्जुनशब्देन च ग्राह्यः स्यात्। तयोश्च सङ्घातयोरीश्वरविभूतित्वं युक्तमीश्वरे कल्पिततत्वाद् , आत्मनस्तु न युक्तमात्मन एवेश्वरत्वादिति बोध्यम्।

**मुनयो** मननशीलाः सर्वपदार्थज्ञा वा। तेषां मध्ये व्यासः उत्कृष्टः, आत्मस्वरूपमननशीलत्वात् सूत्रपुराणादिप्रबन्धकर्तृत्वेन वेदविभाजनेन च सर्वज्ञत्वाच्च। वेदान् व्यस्यति विभजतीति हि व्यास इति व्युत्पत्तिः। 'व्यासो नारायणो हरि'रिति नारायणांशत्वाद्वा व्यासस्योत्कर्षः। **क्रान्तदर्शिनो** दूरदृष्टयः। भूतभविष्यद्वृत्तान्तवेदनशीला इति यावत्। **उशना** शुक्रः कविरिति पर्यायाः। उशनाभिधः कविः शुक्रोऽहमित्यर्थः। शुक्रस्य विपश्चित्प्राथम्यं तु 'न कश्चिन्नोपनयते पुमानन्यत्र भार्गवात्। शेषसम्प्रतिपत्तिस्तु बुद्धिमत्स्ववतिष्ठते' इति प्रसिद्धम्। नीतिशास्त्रादिकर्तृत्वाच्च॥ ३७॥

**दण्ड इति**। दमयतां धर्मेषु वादिप्रतिवादिवाक्यश्रवणसाक्षिविचारणादिषु शिक्षणरूपो यो दण्डः सोऽहमस्मि। कुतस्तस्य श्रेष्ठत्वम्? अत आह— **अदान्तानामिति**। अदान्तानामपि दमेन दान्तत्वं भवतीति दमस्योत्कृष्टत्वम्। **यद्वा** दमयतां राजगुर्वादीनां दमयितव्येषु भृत्यशिष्यादिषु कर्तव्या ये भावा नयभयदयादयः, तेषां मध्ये दम एवोत्कृष्टः। दमादेव भृत्यादीनां दान्तीभूतत्वादिति। निर्धारणानाग्रहे तु दमयतां यः प्रधानो दण्डः सोऽहमस्मीति बोध्यम्। एवमुत्तरत्रापि। जिगीषतां ये शौर्यधैर्यादयो गुणास्तेषां मध्ये नीतिरस्मि, नीतिपूर्वकत्वाज्जयलाभस्य। गुह्यानां गोप्यानां धनकनकौषधादीनां गोपनाः ये वस्त्रपेटिकादयः, तेषां मध्ये मौनमुत्कृष्टमहमस्मि। तथा च गुह्यशब्दोऽत्र लक्षणया गुह्यगोपनपरः। वस्त्रादिभिर्गोपितमपि वस्तु सुवर्णादिकं मौनाभावे विवृतमेव स्यात्। मद्वस्त्रग्रन्थौ रूपिकाऽस्तीति वाचैव गोप्यवस्तुनः स्फुटीकृतत्वसम्भवात्। तथा पेटिकादिभिर्गोपयितुमशक्यमपि रहस्यं वाङ्मौनेन गोपयितुं शक्यत एव। तस्मान्मौनस्य गोपनेषूत्कृष्टत्वम्। ज्ञानवतां ये ज्ञानशमदमसुखादयो गुणास्तेषां मध्ये ज्ञानमहमस्मि। ज्ञानवतां यत् प्रधानं ज्ञानं तदहमस्मीति वा॥ ३८॥

**यदिति**। बीजानां मध्ये यत् सर्वभूतानां बीजं तदहमस्मि। सर्वभूतबीजं तु प्रकृतिरिति बोध्यम्। एतेन प्रकृतेरपीश्वरविभूतित्वं सिद्धम्। प्रकृतेः सूक्ष्मावस्थापन्नायाः स्थूलावस्थजगद्रूपं प्रति बीजत्वं, यथा बीजस्य वृक्षादिं प्रतीति बोध्यम्। विस्तरेणोक्तां विभूतिं

---

१. 'गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थम्' इत्यत्र मौनशब्दस्य संन्यासार्थे प्रयोगदर्शनादिति भावः।

**न तदस्ति विना यत् स्यान्मया भूतं चराचरम्॥ ३९॥**
**नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप !।**
**एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया॥ ४०॥**
**यद्यद् विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा।**

**न तदस्ति भूतं** चराचरं **चरम् अचरं वा मया विना यत् स्याद् भवेत्। मयाऽपकृष्टं**[१] **परित्यक्तं निरात्मकं शून्यं हि तत् स्यात्। अतो मदात्मकं सर्वमित्यर्थः॥ ३९॥**

नान्तोऽस्तीति। **नान्तोऽस्ति मम दिव्यानां विभूतीनां विस्तराणाम्, परन्तप!। न हीश्वरस्य सर्वात्मनो दिव्यानां विभूतीनामियत्ता शक्या वक्तुं ज्ञातुं वा केनचित्।** एष तु उद्देशतः **एकदेशेन प्रोक्तो विभूतेर्विस्तरो मया॥ ४०॥**

यद्यदिति। **यद्यद् लोके** विभूतिमद् **विभूतियुक्तं** सत्त्वं [२]**वस्तु** श्रीमद्, ऊर्जितमेव वा **श्रीः लक्ष्मीः, तया**

आनन्दगिरिकृतव्याख्या

[३]**जाड्यमात्रप्रतिबिम्बितं चैतन्यं** बीजम्। **किमिति स्थावरं जङ्गमं वा त्वदतिरेकेण न भवति? तत्राह—**मयेति। **तस्यापि स्वरूपेण सत्त्वमाशङ्क्योक्तम्—** शून्यं हीति। **आत्मनोऽपकर्षादित्यर्थः। मयैव सच्चिदानन्दस्वरूपेण सर्वस्य सिद्धेरिति** अतःशब्दार्थः॥ ३९॥

**दिव्यानां विभूतीनां परिमितत्वशङ्कां वारयति—** नेत्यादिना। **तदेवोपपादयति—** न हीति। **कथं तर्हि विभूतेर्विस्तरो दर्शितः? तत्राह—** एष त्विति॥ ४०॥

**अनुक्ताः अपि परस्य विभूतीः संग्रहीतुं लक्षणमाह—** यद्यदिति। वस्तु **प्राणिजातं,** श्रीमत् **समृद्धिमद्वा कान्तिमद्वा। सप्राणं**

भाष्यार्कप्रकाशः

सङ्क्षेपेण वदति— **नेति**। यच्चराचरं भूतं मया विना स्यात्, तन्नास्ति। चरमचरं वा किमपि भूतं मया विना नास्त्येवेत्यर्थः। मया विनेत्यस्यार्थमाह— **मयाऽप्रविष्टमिति**। सच्चिदानन्दरूपेण सर्वव्यापिना सर्वस्यात्मभूतेन मयाऽव्याप्तमित्यर्थः।

कल्पितस्याधिष्ठानात्मकत्वात् कार्यस्य च कारणात्मकत्वात् सर्वं जगदीश्वरात्मकमेवेति जगतः स्वरूपम् ईश्वर एव। यथा घटस्य मृत्, यथा वा सर्पस्य रज्जुः। ईश्वरस्य जगत्यप्रवेशे तु जगतः स्वरूपस्यैवाभावाच्छून्यत्वम्। किञ्च सच्चिदानन्देश्वरस्याप्रवेशे जगदस्ति, जगद्भाति, जगत्प्रियमिति व्यवहारो न सिध्येत्, सच्चिदानन्दानामीश्वरधर्मत्वेन जगति तत्सङ्क्रमणं विना तादृशव्यवहारासम्भवात्। तथा च शशशृङ्गादिवद् जगन्नास्ति, न भाति, न प्रियमित्येव प्रतीयेतेति शून्यमेव स्याज्जगदिति।

**ननु** सर्वव्यापीश्वरस्य कथं जगत्यप्रवेशः सम्भाव्येतेति चेत्? **उच्यते—** ईश्वरस्य जगतश्च पृथक्करणमेव जगतीश्वरस्याप्रवेशत्वेन विवक्षितम्। पृथक्करणं च जगति दृश्यमानानां सत्ताजाड्यादिधर्माणां विवेचनम्। अयमीश्वरधर्मः, अयं जगद्धर्म इति बुद्ध्या जगतः सकाशादीश्वरधर्माणां विवेचने कृते सति अनृतमेव जगत् सिध्यति; अनृतस्य च शशशृङ्गादिवच्छून्यत्वमेवेति। एतेन सर्वस्यापि जगत ईश्वरे कल्पितत्वादीश्वरविभूतित्वमिति सिद्धम्॥ ३९॥

**नेति**। **अन्तः** अवधिः, इयत्तेति यावत्। घटोऽहं पटोऽहम् अश्माऽहं मृत्तिकाऽहमित्येवं मम विभूतिः सर्वा वक्तुमहमपि न शक्नोमि, अनन्तत्वाद् विभूतीनाम्। परन्तु सर्वाः अहं जानामि, सर्वज्ञत्वात्। अन्ये तु ज्ञातुमपि न शक्नुवन्ति, किञ्चिज्ज्ञत्वादिति भावः। **एकदेशेनेति**। कासाञ्चित् प्रधानविभूतीनां ग्रहणेनेति भावः। विभूतेरिति जात्येकवचनम्। विभूतीनामित्यर्थः॥ ४०॥

**यदिति**। लोके यद्यत् सत्त्वं विभूतिमत्, श्रीमत्, ऊर्जितमेव वा भवति, तत्तत् सत्त्वं त्वं मम तेजोंऽशसम्भवमेवावगच्छ। **विभूतिः** ऐश्वर्यम्, सामर्थ्यमिति यावत्। **श्रीः** सम्पत्। **तेजोंऽशः** ज्ञानैकदेशः। यद्यपि 'ममैवांशो जीवलोके जीवभूतः सनातनः' इति

१. 'मयाऽप्रविष्टम्' इति रा.पा.। २. 'वस्तुजातं' इति पा.। ३. जाड्यम् अविद्या।

**तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्॥४१॥**
**अथवा बहुनैतेन किं ज्ञातेन तवार्जुन !।**
**विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्॥४२॥**

**इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोऽध्यायः॥१०॥**

**सहितम्, उत्साहोपेतं वा, तत्तदेव** अवगच्छ **त्वं जानीहि** मम **ईश्वरस्य** तेजोंऽशसम्भवं **तेजसोंऽशः एकदेशः सम्भवो यस्य तत् तेजोंऽशसम्भवमित्यवगच्छ त्वम्॥४१॥**

अथवेति। **अथवा बहुना** एतेन **एवमादिना किं ज्ञातेन तव, अर्जुन ! स्यात् सावशेषेण? अशेषतः त्वम् इमम्**

आनन्दगिरिकृतव्याख्या

**बलवदूर्जितम्, तदाह—** उत्साहेति। **सम्भवत्यस्मादिति** सम्भवः। **तेजसश्चैतन्यस्येश्वरशक्तेर्वा अंशस्तेजोंऽशः सम्भवोऽस्येति तेजोंऽशसम्भवम्। तदाह—** तेजस इति॥४१॥

**सर्वेषां सुगमत्वायावयवशो विभूतिमुक्त्वा, [१]शक्तानुग्रहार्थं साकल्येन तामाह—** अथवेति। **पक्षान्तरपरिग्रहार्थम् अथवेत्युक्तम्।** [२]बहुना **विस्तीर्णेन** एतेन **ग्रन्थेन (सं)ज्ञातेन सावशेषेण तव शक्तस्य न किञ्चित् फलं स्यादित्याह—** बहुनेति। **न हि विभूतिषूक्तासु ज्ञातासु सर्वं ज्ञायते, कासाञ्चिदेव विभूतीनामुक्तत्वादित्यर्थः। तर्हि केनोपदेशेनाल्पाक्षरेण सर्वोऽर्थो ज्ञातुं शक्यते? तत्राह—** अशेषत इति।

भाष्यार्कप्रकाशः

वचनात् सर्वेऽपीश्वरांशसम्भवा एव। तथापि साधारणप्राणिषु ईश्वरीयसर्वज्ञत्वरूपज्ञानधर्मैकदेशो नास्ति, विभूतिभूतेषु तु तदस्तीति विभूतीनामीश्वरतेजोंऽशसम्भवत्वम्। तेजश्चात्रोपलक्षणं बलक्रिययोः। ईश्वरस्य स्वाभाविक्यो या ज्ञानबलक्रियास्तदंशसम्भवमित्यर्थः। अत एवेश्वरविभूतिषु रामकृष्णमहेन्द्रादिषु ज्ञानबलक्रियाधिक्यदर्शनम्।

**यद्वा** तेजःशब्दोऽत्र भगस्योपलक्षणम्। ऐश्वर्यवीर्ययशःश्रीज्ञानवैराग्याणि भग इत्युच्यन्ते। तदेकदेशसम्भवमिति। जीवाः ईश्वरचैतन्यांशभूताः, विभूतयस्तु ईश्वरचैतन्यांशभूताः तद्गुणांशयुक्ताश्चेति भावः। अतो नात्र तेजःशब्दः स्वरूपचैतन्यपर इति बोध्यम्। **यद्वा** जीवाः प्रत्यगात्मनः परब्रह्मणश्चैतन्यस्यांशभूताः, महाकाशस्येव घटाकाशाः। रामकृष्णादिविभूतयस्तु सर्वज्ञत्वादिगुणविशिष्टस्य मायिन ईश्वरस्यांशभूताः। अत एव विभूतिष्वीश्वरगुणैकदेशोपलम्भः। अस्मिन् पक्षे ममेश्वरस्य यत् तेजः सर्वज्ञत्वादिगुणयोगि चैतन्यम्, तदंशसम्भवमित्यर्थः।

न च 'ममैवांशः' इतीश्वरांशत्वमुच्यते जीवानामिति वाच्यम्; तत्र ममेत्यस्य परब्रह्मण इत्यर्थात्। ईश्वरेण प्रयुक्तो ह्यस्मच्छब्दो लक्षणया परमात्मानं वक्ति, जीवेन प्रयुक्त इवास्मच्छब्दो लक्षणया प्रत्यगात्मानम्।

यत्तु **रामानुजः**— मम तेजः सामर्थ्यं नियमनशक्तिरिति, **तन्मन्दम्**; ईश्वरांशेषु प्रभुषु नियमनशक्तिदर्शनेऽपि ज्ञानिविरक्तादिषु तददर्शनात्। अथ तेजः सर्वज्ञत्वसर्वकर्तृत्वसर्वेश्वरत्वादिरूपं सामर्थ्यमित्युच्यते, तर्हि तत् तेजो भगरूपमेव। एवं च तेजःशब्दस्य उपलक्षणत्वं विनैव भगवाचकत्वं सम्भवतीति समीचीनमेवेदं व्याख्यानम्। **अवगच्छ** विद्धि॥४१॥

**अथवेति**। ननु 'न तदस्ति विने'त्यनेन सर्वस्य जगतः ईश्वरविभूतित्वस्योक्तत्वात्, विभूतिमन्तः श्रीमन्त ऊर्जिता एव मत्तेजोंऽशसम्भवत्वाद् मद्विभूतयः, अनीश्वरा दरिद्रा निरुत्साहास्तु मत्तेजोंऽशासम्भवत्वान्न मद्विभूतय इति वचनं विरुद्धमिति शङ्कायाम्— मत्तेजोंऽशसम्भवं विभूत्यादिगुणयुक्तं भूतं मद्विभूतिरिति प्राधान्येनोक्तं ध्येयत्वार्थम्। वस्तुतस्तु सर्वं जगद् मद्विभूतिरेव, मत्तो जातत्वात्, मय्येव कल्पितत्वात् सर्वस्य मदात्मकत्वादित्याह— **अथवेति**। अथवेति पक्षान्तरे। **बहुनेति**। आदित्योऽहम्

१. 'भक्तानुग्रहार्थं' इति पा.। २. 'बहुधा' इति पा.।

**उच्यमानमर्थं शृणु।** विष्टभ्य **विशेषतः स्तम्भनं दृढं कृत्वा इदं कृत्स्नं जगद्** एकांशेन **एकावयवेन एकपादेन, सर्वभूतस्वरूपेणेत्येतत्; तथा च मन्त्रवर्णः—'पादोऽस्य [1]सर्वा भूतानि'(छा.उ.३.१२.५) इति; स्थितोऽहमिति॥४२॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीभगवद्गीताभाष्ये विभूतियोगो नाम दशमोऽध्यायः॥१०॥**

आनन्दगिरिकृतव्याख्या

विशेषतः स्तम्भनं **विधरणम्।** सर्वभूतस्वरूपेण **सर्वप्रपञ्चोपादानशक्त्युपाधिकेन एकेन पादेन कृत्स्नं जगद् विधृत्य स्थितोऽस्मीति सम्बन्धः। तत्रैव श्रुतिं प्रमाणयति—** तथा चेति।

**तदनेन भगवतो नानाविधाः विभूतीर्ध्येयत्वेन ज्ञेयत्वेन चोपदिश्यन्ते[दिश्य, अन्ते] सर्वप्रपञ्चात्मकं ध्येयं रूपं दर्शयित्वा, 'त्रिपादस्यामृतं दिवि' इति [2]प्रपञ्चाधिकं निरुपाधिकं तत्त्वमुपदिशता परिपूर्णसच्चिदानन्दैकतानः तत्पदलक्ष्योऽर्थो निर्धारितः॥४२॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते श्रीमद्भगवद्गीताशाङ्करभाष्यव्याख्याने दशमोऽध्यायः॥१०॥**

भाष्यार्कप्रकाशः

अश्वत्थोऽहम् इन्द्रोऽहं चन्द्रोऽहमित्येवमादिभिर्बहुभिर्ज्ञातैः किं फलं तव? न किमपीत्यर्थः। तत्र हेतुमाह— **सावशेषेणेति**। अशेषतो विभूतीनां वक्तुमशक्यत्वात् प्रत्येकविधयेति भावः। अहमिदं कृत्स्नं जगद् एकपादेन विष्टभ्य स्थितः। **स्तम्भनं कृत्वेति**। अभिव्याप्येत्यर्थः; आक्रम्येति वा, नियम्येति वा। सर्वथाऽपि सर्वं जगत् स्वस्यैकस्मिन्नेव पादे यथा स्यात् पादान्तरे यथा न स्यात्, तथा कृत्वेत्यर्थः।

एतेन - इदं सर्वं जगद् आत्मगर्भे धर्तुं भगवानीश्वरः कथं शक्नुयादिति शङ्का - परास्ता। भगवतः पादमात्रमेव स्वान्तः सर्वं जगद् बिभर्ति, किं पुनश्चतुष्पाद् ब्रह्मेत्यर्थापत्तेः। तथा - सर्वस्मिन् ब्रह्मणि जगतः सत्त्वे मुक्तप्राप्यब्रह्माभावप्रसङ्ग इति शङ्का च प्रत्युक्ता, मुक्तप्राप्यस्य त्रिपाद्ब्रह्मणः सत्त्वात्।

ननु निरंशस्येश्वरस्य कुतोंऽशित्वम्? अत आह— **तथा चेति**। श्रुतिप्रामाण्यान्निरंशस्यापि सांशत्वमभ्युपेयमिति भावः। अस्येश्वरस्य विश्वा सर्वाणि भूतानि **पादः** एकोंऽशः। अस्यैकः पादो जगति वर्तत इत्यर्थः। अस्यैकपादे जगद् वर्तत इति वा। अस्यैकः पादो जगद्रूपेण वर्तत इति वा। अस्यैकः पादो जगद्रूपेण दृश्यत इति वा। अत एवोक्तम्— 'सर्वभूतस्वरूपेणेत्येतद्' इति भाष्यकारैः।

**ननु** श्रुत्युक्तस्यापि विरुद्धार्थस्य कथं ग्राह्यत्वमिति चेत्? **मैवम्**; निरंशस्यापि मायया सांशत्वसम्भवात्। माया हि ब्रह्मण एकदेशे स्थिता, यथा घटशक्तिर्मृद एकदेशे स्निग्धमृदि। न च मायाऽपि कथं ब्रह्मण एकदेशं विभज्य तत्र स्थितवतीति वाच्यम्; मायाकृत्यस्यानिर्वचनीयत्वेन तत्रातिशङ्कानवकाशात्। अयमेव सर्वभूतात्मको ब्रह्मण एकः पादो मायीति, ईश्वर इति चोच्यते। मायाशबलितस्य मायावच्छिन्नस्य ब्रह्मण एवेश्वरत्वात्। निर्मायं तु शुद्धचैतन्यं परब्रह्मैव। तदेव तत्त्वं मायाया अतात्त्विकत्वेन समायस्यापि अतात्त्विकत्वात्। तथा मायामयानि भूतान्यपि अतात्त्विकान्येव। तदेव तत्त्वं प्रत्यगात्मेति सिद्धं जीवेश्वरैक्यम्।

**यत्तु रामानुजः**— 'मम महिम्नोऽयुतायुतांशेन विष्टभ्ये'ति, **तन्मन्दम्**; एकांशेनेति पदाद् अयुतायुतांशेनेत्यर्थालाभात्, महिम्न इति पदस्यासत्त्वाच्च। सर्वस्य जगतो भगवद्विभूतित्वे वक्तव्ये जगन्नियमनस्य वक्तुमनुचितत्वाच्च। तस्माच्छङ्करोक्त एवार्थः शङ्करः इति॥४२॥

विभूतीनां योगः सम्बन्धो यस्मिन् स विभूतियोगो नामाध्यायः।

**इति श्रीबेल्लङ्कोण्डोपनामकरामकविकृते श्रीभगवद्गीताशाङ्करभाष्यार्कप्रकाशे विभूतियोगो नाम दशमोऽध्यायः॥१०॥**

श्रीहयग्रीवार्पणमस्तु

१. 'विश्वा' इति पा.। २. 'प्रपञ्चातीतं' इति पा.।

DO NOT PRINT THIS PAGE

ॐ श्रीपरमात्मने नमः

# ॥ अथैकादशोऽध्यायः ॥

## अर्जुन उवाच—

**मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम्।**
**यत् त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम॥ १ ॥**

**भगवतो विभूतयः उक्ताः। तत्र च 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' (भ.गी.१०.४२) इति भगवताऽभिहितं श्रुत्वा यज्जगदात्मरूपम् आद्यमैश्वरम् , तत् साक्षात्कर्तुमिच्छन् अर्जुन उवाच—** मदिति। मदनुग्रहाय

### आनन्दगिरिकृतव्याख्या

**तेन तेनात्मना भगवदनुसन्धानार्थमुक्ताः विभूतीरनुवदति—**भगवत इति। **परस्य सोपाधिकं निरुपाधिकं च चिद्रूपं [१]ध्येयत्वेन ज्ञेयत्वेन चोक्तमित्यर्थः। सोपाधिकमैश्वरं रूपमशेषजगदात्मकं विश्वरूपाख्यमधिकृत्य अध्यायान्तरमवतारयन् अनन्तरप्रश्नोपयोगित्वेन वृत्तं कीर्तयति—** तत्र चेति। **यदेतदशेषप्रपञ्चात्मकम् अखिलस्यैतस्य जगतः कारणं सर्वज्ञं सर्वैश्वर्यवद् रूपमुक्तम् , तदिदं श्रुत्वा तस्य साक्षात्कारं यियाचिषुरादौ पृष्टवानित्याह—** श्रुत्वेति। **मयि करुणां निमित्तीकृत्य उपकारोऽनुग्रहः, तदर्थमिति वचसो विशेषणम्।**

### श्रीबेल्लंकोण्डरामरायकविविरचितः

### भाष्यार्कप्रकाशः

पूर्वाध्यायान्ते 'विष्टभ्याहम्' इत्यनेन भगवता जगदात्मको मदेकांशः इत्युक्तं स्वस्य जगदात्मकत्वम्। तदेव प्रधानमीश्वरस्यैश्वर्यम्। तद्दिदृक्षया पृच्छत्यर्जुन इत्याह— **भगवतेति**।

**ननु** भगवति ब्रह्मणि सर्वं जगत् कल्पितमिति भगवतो जगदात्मत्वमुक्तम्। [२]तच्च दृश्यत एव, आकाशादिजगतो दर्शनादिति चेत्? **मैवम्** ; केवलं जगद् दृश्यते, न त्विदं जगद् ब्रह्मणि वर्तमानत्वेन दृश्यत इति।

**ननु** जगतो ब्रह्मणि वर्तमानत्वं द्रष्टुमशक्यम् , ब्रह्मदर्शनं विना तदयोगात् ; ब्रह्म च दृग्रूपत्वान्न दृश्यम् ; ततश्च जगतो ब्रह्मणि वर्तमानत्वं शास्त्रैकवेद्यमेवेति चेत्? **सत्यम्** ; ब्रह्मणि वर्तमानत्वेन जगतो दुर्दर्शत्वेऽपीश्वरे वर्तमानत्वेन सुदर्शमेव। ईश्वरस्य मायावच्छिन्नचैतन्यलक्षणस्य माययैव जगन्मयशरीरोपपत्तेः।

**अयं भावः**— ईश्वरस्य बहूनि रूपाणि सन्ति। तत्र प्रधानं रूपं चैतन्यं ब्रह्म, तत्त्वत्वात् तस्य; द्वितीयं तु मायावच्छिन्नचैतन्यम् ; तृतीयमन्तःकरणावच्छिन्नम् ; चतुर्थं विराड्रूपम् ; ततः पद्मनाभरामकृष्णादीनि। तत्र ब्रह्मरूपेणेश्वरस्य जगदात्मत्वं शास्त्रैकवेद्यम्। मायावच्छिन्नचैतन्यरूपेण च। अनुमानमप्यत्र प्रमाणमेव। अन्तःकरणावच्छिन्नमात्मत्वान्नित्यापरोक्षमेव। विराड्रूपेण जगदात्मत्वं तु प्रत्यक्षप्रमाणवेद्यमेवेतीश्वरस्य विराड्रूपदिदृक्षया पृच्छत्यर्जुन इति।

**ननु** विश्वरूप ईश्वरोऽपि नित्यापरोक्ष एव; विश्वस्य चक्षुरादिप्रमाणवेद्यत्वादिति चेत्? **सत्यम्** ; विश्वरूपस्येश्वरस्य विश्वमेव रूपम् ; तत्तु सर्वं न कस्यचित् प्रत्यक्षं, किन्त्वणुमात्रमेव। अतः साकल्येन विश्वस्य दिदृक्षया पृच्छत्यर्जुन इति।

**अथवा** विश्वं प्रत्यक्षं भवतु नाम, विश्वेन रचितावयवसन्निवेशः ईश्वरविग्रहस्त्वप्रत्यक्षः इति तद्दर्शनाय पृच्छत्यर्जुनः।न च - [न] ईश्वरेण तादृशं रूपं ममास्तीत्युक्तम् , येनार्जुनस्य प्रश्नावकाशः स्यादिति - वाच्यम् ; 'विष्टभ्याह'मित्यनेनोक्तत्वात्। न च - ब्रह्मण्येकदेशे जगदस्तीति हि तच्छ्लोकार्थ इति - वाच्यम् ; यत्र जगदस्ति तस्यैव ब्रह्मपादस्येश्वरभूतत्वात्।

---

१. सोपाधिकं ध्येयत्वेन, निरुपाधिकं च ज्ञेयत्वेनोक्तम् इति अन्वयः। २. तच्च = भगवतो जगदात्मकं रूपम्।

**भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया।**
**त्वत्तः कमलपत्राक्ष ! माहात्म्यमपि चाव्ययम्॥ २॥**
**एवमेतद् यथाऽऽत्थ त्वमात्मानं परमेश्वर! ।**
**द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम !॥ ३॥**

[1]**मदनुग्रहार्थं** परमं **निरतिशयं** गुह्यं **गोप्यम्** अध्यात्मसंज्ञितम् **आत्मानात्मविवेकविषयं यत्** त्वयोक्तं वचो **वाक्यम्**, तेन **ते वचसा** मोहोऽयं विगतो **मम अविवेकबुद्धिरपगतेत्यर्थः**॥ १॥

**किञ्च—** भवेति। भवः **उत्पत्तिः**, अप्ययः **प्रलयः, तौ भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया, न संक्षेपतः**, त्वत्तः **त्वत्सकाशात्, कमलपत्राक्ष ! कमलस्य पत्रं कमलपत्रं, तद्वदक्षिणी यस्य तव स त्वं** कमलपत्राक्षः। **हे कमलपत्राक्ष !** [2]**(महात्मनो भावः) माहात्म्यमपि च** अव्ययम् **अक्षयम्, श्रुतमित्यनुवर्तते**॥ २॥

एवमिति। **एवमेतत्, नान्यथा,** यथा **येन प्रकारेण** आत्थ **कथयसि त्वमात्मानम्, परमेश्वर ! । तथापि द्रष्टुमिच्छामि** ते **तव ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सम्पन्नम्** ऐश्वरं **वैष्णवं रूपम्, पुरुषोत्तम !**॥ ३॥

आनन्दगिरिकृतव्याख्या

निरतिशयत्वं **परमपुरुषार्थसाधनत्वम्। 'अशोच्यानि'**त्यादि [3]**त्वम्पदार्थप्रधानं** वाक्यम्। **मोहस्य** अयमित्यात्मसाक्षिकत्वं **दर्शयति।** अविवेकबुद्धिः **अज्ञानविपर्यासात्मिका**॥ १॥

**सप्तमादारभ्य तत्पदार्थनिर्णयार्थमपि भगवदुक्तं वचो मया श्रुतमित्याह—** किञ्चेति। **'त्वत्तो भूतानामुत्पत्तिप्रलयौ' 'त्वत्तः श्रुता'वित्याभ्यां** [4]**सम्बध्यते। महात्मनस्तव भावो** माहात्म्यं **पारमार्थिकं सोपाधिकं वा सर्वात्मत्वादिरूपम्। श्रुतमिति परिणम्यानुवृत्तिं द्योतयितुम्** अपिचेत्युक्तम्॥ २॥

**त्वदुक्तेऽर्थे विश्वासाभावान्न तस्य दिदृक्षा, किन्तु कृतार्थीबुभूषयेत्याह—** एवमेतदिति। येन प्रकारेण **सोपाधिकेन निरुपाधिकेन चेत्यर्थः।** [5]**यदि ममाप्तत्वं निश्चित्य मद्वाक्यं ते मानम्, तर्हि किमिति मदुक्तं दिदृक्षते? कृतार्थीबुभूषयेत्युक्तं मत्वाऽऽह—** तथापीति। **चतुर्भुजादिरूपनिवृत्त्यर्थमाह—** ऐश्वरमिति। **तद् व्याचष्टे—** ज्ञानेत्यादिना॥ ३॥

भाष्यार्कप्रकाशः

**अथवा** यदि त्वमेव जगदात्मकस्त्वय्येव जगदस्ति, तर्हि तादृशं तव रूपं दर्शय, तव च तादृग्रूपमस्तीति यशोदादिभिरुच्यत इति पृच्छत्यर्जुन इति।

**मदनुग्रहायेति**। प्रथमपादेऽक्षराधिक्यमार्षम्। आत्मानमधिकृत्य वर्तमानमध्यात्मम्, तदिति संज्ञा अस्य सञ्जातमित्यध्यात्मसंज्ञितम्। आत्मानात्मविवेको **विषयः** प्रतिपाद्यं यस्य तद् **आत्मानात्मविवेकविषयम्**। त्वया मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितं यद् वचः उक्तम्, तेन ममायं मोहो विगतः॥ १॥

**भवेति**। हे कमलपत्राक्ष ! मया त्वत्तो भूतानां भवाप्ययौ विस्तरशः श्रुतौ। अव्ययं माहात्म्यं च श्रुतम्॥ २॥

**एवमिति**। हे परमेश्वर ! त्वं यथा आत्मानं कथयसि, एतदेवमेव। हे पुरुषोत्तम! ते ऐश्वरं रूपं द्रष्टुमिच्छामि। ते **ऐश्वरम्** ईश्वरस्य विष्णोः तव सम्बन्धि रूपं, विश्वरूपमित्यर्थः। ईश्वरेण मायया कल्पितमिति भावः॥ ३॥

१. 'ममानुग्रहार्थं' इति पा.। २. 'महात्मनो भावः' इति क्वचिन्न। ३. अध्यात्मविशेषणबललभ्यमिदम्। ४. त्वत्तः इति पदम् 'त्वत्तः उत्पत्तिप्रलयौ' 'त्वत्तः श्रुतौ' इत्युभाभ्यां संबध्यते इति भावः। ५. यदि ममाप्तत्वं निश्चित्य स्थितस्य ते मद्वाक्यं मानम्, तर्हि किमिति मदुक्तं दिदृक्षसे? इत्याशङ्कायां न त्वदुक्तेऽर्थे विश्वासाभावात् दिदृक्षा, किन्तु कृतार्थीबुभूषयेत्युक्तं मत्वाऽऽह— इति योजना।

**मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ! ।**
**योगेश्वर ! ततो मे त्वं दर्शयात्मानमव्ययम्॥४॥**

**श्रीभगवानुवाच—**

**पश्य मे पार्थ ! रूपाणि शतशोऽथ सहस्रशः।**
**नानाविधानि दिव्यानि नानावर्णाकृतीनि च॥५॥**
**पश्यादित्यान् वसून् रुद्रानश्विनौ मरुतस्तथा।**

मन्यस इति। मन्यसे **चिन्तयसि यदि** मया **अर्जुनेन तच्छक्यं द्रष्टुमिति,** प्रभो ! **स्वामिन्,** योगेश्वर ! **योगिनो योगाः, तेषामीश्वरो योगेश्वरः, हे योगेश्वर ! यस्मादहमतीवार्थी द्रष्टुम्,** ततः **तस्माद्** मे **मदर्थं दर्शय त्वम् आत्मानम् अव्ययम्** ॥४॥

**एवं चोदितोऽर्जुनेन भगवानुवाच—** पश्येति। **पश्य** मे **मम, पार्थ ! रूपाणि** शतशोऽथ सहस्रशः **अनेकशः इत्यर्थः। तानि च** नानाविधानि **अनेकप्रकाराणि, दिवि भवानि** दिव्यानि **अप्राकृतानि,** नानावर्णाकृतीनि **च** नाना **विलक्षणाः नीलपीतादिप्रकाराः** वर्णाः**, तथा** आकृतयः **अवयवसंस्थानविशेषाः येषां रूपाणां तानि नानावर्णाकृतीनि च** ॥५॥

पश्यादित्यानिति। **पश्य आदित्यान् द्वादश, वसूनष्टौ, रुद्रानेकादश, अश्विनौ द्वौ, मरुतः** [१]**सप्त सप्तगणाः ये**

आनन्दगिरिकृतव्याख्या

**द्रष्टुमयोग्ये कुतो दिदृक्षेत्याशङ्क्याह—** मन्यस इति। **प्रभवति सृष्टिस्थितिसंहारप्रवेशप्रशासनेभ्यः इति** प्रभुः। **लक्षणया योगशब्दार्थमाह—** योगिन इति। **'ततः' इत्यादि व्याचष्टे—** यस्मादिति॥४॥

**अर्जुनमतिभक्तं सखायं प्रार्थितप्रतिश्रवणेनाश्वासयितुमाह—** एवमिति॥५॥

भाष्यार्कप्रकाशः

**मन्यस इति**। हे प्रभो ! तद् रूपं मया द्रष्टुं शक्यमिति मन्यसे यदि, **ततस्तर्हि** , हे योगेश्वर ! अव्ययमात्मानं मे त्वं दर्शय। [२]**योगिनः** इति जात्येकवचनम्। योगिनामित्यर्थः। **योगा इति** चित्तसमाधानविशेषाः अणिमादयो वा तेषाम्, **ईश्वरः** प्रभुर्नियन्ता। एतेन सर्वा अपि योगशक्तय ईश्वरपरतन्त्रा इति सूचितम्। 'योगिनो योगाः' इति पाठान्तरे योगशब्दस्य योगिपरत्वम् अर्शआद्यजन्तत्वादिति बोध्यम्। 'ततः' इत्यस्य तर्हीत्यर्थमनाश्रित्य, 'तस्मादि'ति कारणार्थत्वमाश्रित्य, यत्तदोर्नित्यसम्बन्धाद् 'यतः' इति पदमध्याहृत्य, पदान्तराध्याहारेण वाक्यं सृजति— **यस्मादहमतीवार्थी द्रष्टुमिति**। **अर्थी** काङ्क्षावान्। **मदर्थमिति** मद्वाञ्छापरिपूर्णार्थमेव, न तु नटस्य रामादिवेषपरिदर्शनमिव तव विश्वरूपसंदर्शनं स्वप्रयोजनार्थमिति भावः। **अव्ययम्** अवधिरहितमित्यर्थः। **आत्मानं** जगन्मयं त्वामित्यर्थः॥४॥

**पश्येति**। भगवतो विश्वरूपत्वे विश्वगतानां सर्वेषामपि भगवद्रूपत्वस्यागतत्वात् सर्वाण्यपि तानि भगवद्रूपाण्येवेति कृत्वा प्राह भगवान्— **मे रूपाणि शतशः सहस्रशः पश्येति**। शतसहस्रशब्दौ सङ्ख्यावाचिनौ न, किन्त्वमितवाचिनावित्याह— **अनेकश इति**। असङ्ख्येयानीत्यर्थः। **दिवि** आत्मनि परमाकाशे भवानि। **अप्राकृतानि** [३]मायामयानि॥५॥

---

१. सप्त सप्तगणाः- एकोनपञ्चाशदिति यावत्। २.'योगिनो योगानामीश्वरो' इति रा.पा. भाति। ३. मायारूपप्रकृतिकार्यत्वाभावशङ्कानिरासाय व्याचष्टे—**मायेति**।

**बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ! ॥ ६॥**
**इहैकस्थं जगत् कृत्स्नं पश्याद्य सचराचरम्।**
**मम देहे गुडाकेश! यच्चान्यद् द्रष्टुमिच्छसि॥ ७॥**
**न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा।**
**दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्॥ ८॥**

**सञ्जय उवाच—**

[1]**तान् तथा। बहूनि अन्यान्यपि अदृष्टपूर्वाणि मनुष्यलोके त्वया, त्वत्तोऽन्येन वा केनचित् , पश्य** आश्चर्याणि **अद्भुतानि, भारत !॥ ६॥**

**न केवलमेतावदेव,—** इहैकस्थमिति। **इह** एकस्थम् **एकस्मिन् एव स्थितं जगत्** कृत्स्नं **समस्तं पश्य** अद्य **इदानीं** सचराचरम् **सह चरेणाचरेण च** [2]**वर्तमानं मम देहे , गुडाकेश !** यच्चान्यद् **जयपराजयादि यच्छङ्कसे 'यद्वा जयेम यदि वा नो जयेयुः' (भ.गी.२.६) इति यदवोचः, तदपि द्रष्टुं यदीच्छसि॥ ७॥**

**किन्तु—** न तु मामिति। **न तु मां विश्वरूपधरं** [3]**शक्यसे द्रष्टुम्** अनेन **एव प्राकृतेन** स्वचक्षुषा **स्वकीयेन चक्षुषा। येन तु शक्यसे द्रष्टुं दिव्येन, तद् दिव्यं ददामि** ते **तुभ्यं चक्षुः, तेन पश्य मे योगम्** ऐश्वरम् **ईश्वरस्य मम ऐश्वरम्** योगम् **योगशक्त्यतिशयमित्यर्थः॥ ८॥**

आनन्दगिरिकृतव्याख्या

**दिव्यानि रूपाणि पश्येत्युक्तम् ; तान्येव लेशतोऽनुक्रामति—** पश्यादित्यानिति। **तान् मरुतस्तथा पश्येति सम्बन्धः। नानाविधानीत्युक्तम् ; तदेव स्फुटयति—** बहूनीति। अदृष्टपूर्वाणि **पूर्वमदृष्टानि। नानावर्णाकृतीनीत्युक्तं व्यनक्ति—** आश्चर्याणीति॥ ६॥

**न केवलमादित्यवस्वाद्येव मद्रूपं त्वया द्रष्टुं शक्यम् , किन्तु समस्तं जगदपि मद्देहस्थं द्रष्टुमर्हसीत्याह—** नेत्यादिना। [4]**सप्तमीद्वयं मिथः सम्बध्यते। समासान्तर्गताऽपि सप्तमी तत्रैवान्विता।** यदीच्छसि, **तर्हि इहैव पश्येति सम्बन्धः॥ ७॥**

**मन्यसे यदीत्युक्तमनुवदति—** किन्त्विति। **सप्रपञ्चमनवच्छिन्नं मां स्वचक्षुषा न शक्नोषि द्रष्टुमित्याह—** न त्विति। **कथं तर्हि त्वां द्रष्टुं शक्नुयामित्याशङ्क्याह—** येनेति। **दिव्यस्य चक्षुषो वक्ष्यमाणयोगशक्त्यतिशयदर्शने विनियोगं दर्शयति—** तेनेति॥ ८॥

**इमं वृत्तान्तं धृतराष्ट्राय सञ्जयो निवेदितवानित्याह—** सञ्जय इति। **मदीयं विश्वरूपाख्यं रूपं न प्राकृतेन चक्षुषा निरीक्षितुं क्षमं,**

भाष्यार्कप्रकाशः

**पश्येति**। तत्र कानिचिद् रूपाणि नामभिर्निर्दिशति— **पश्यादित्यानिति**॥ ६॥

**इहेति**। अद्य सचराचरं सर्वं जगद् **इह** अस्मद्देहे **एकस्थम्** एकदेशस्थं पश्य। एकस्थं जगत् पश्येति वा। हे गुडाकेश ! यच्चान्यद् द्रष्टुमिच्छसि तत् सर्वमपि मम देहे पश्य॥ ७॥

**नेति**। **प्राकृतेन** [5]मांसमयेनेत्यर्थः। **स्वस्य** तव चक्षुः स्वचक्षुः, तेन। **दिव्यम्** अप्राकृतम् , मन्मायया कल्पितम् , तेजोमयमित्यर्थः॥ ८॥

---

१. 'तान्। तथा च बहूनि' इति पा.। २. 'वर्तते' इति पा.। ३. शक्नोषीत्यर्थः। दैवादिकस्य शकधातोः कर्तरि लकारे रूपम्। ४. इहेति देहे इति च सप्तमीद्वयम् इह देहे इत्येवं विशेषणविशेष्यभावेन संबध्यत इत्यर्थः। एकस्मिन् स्थितम् एकस्थम् इति समासान्तर्गतं सप्तम्यन्तमपि देहमेव परामृशतीत्यर्थः। देहशब्देन विश्वरूपं विवक्षितम्। ५. मांसमयेनेति अज्ञलोकदृष्ट्येति बोध्यम् , इन्द्रियस्य तथात्वाभावात्।

**एवमुक्त्वा ततो राजन्! महायोगेश्वरो हरिः।**
**दर्शयामास पार्थाय परमं रूपमैश्वरम्॥ ९॥**
**अनेकवक्त्रनयनम् अनेकाद्भुतदर्शनम्।**
**अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम्॥ १०॥**
**दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्।**
**सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम्॥ ११॥**

एवमिति। एवं **यथोक्तप्रकारेण उक्त्वा,** ततः **अनन्तरं** राजन् **धृतराष्ट्र!** महायोगेश्वरो **महांश्चासौ योगेश्वरश्च** हरिः **नारायणो** दर्शयामास **दर्शितवान्** पार्थाय **पृथासुताय** परमं रूपं **विश्वरूपम् ऐश्वरम्॥ ९॥**

अनेकेति। अनेकवक्त्रनयनम् **अनेकानि वक्त्राणि नयनानि च यस्मिन् रूपे तदनेकवक्त्रनयनम्।** अनेकाद्भुत-दर्शनम् **अनेकान्यद्भुतानि विस्मापकानि दर्शनानि यस्मिन् रूपे तदनेकाद्भुतदर्शनम्। तथा** अनेकदिव्याभरणम् **अनेकानि दिव्यान्याभरणानि यस्मिन् तदनेकदिव्याभरणम्। तथा** दिव्यानेकोद्यतायुधम् **दिव्यानि अनेकानि अस्यादीनि उद्यतानि** आयुधानि **यस्मिन् तद् दिव्यानेकोद्यतायुधं दर्शयामासेति पूर्वेण सम्बन्धः॥ १०॥**

**किञ्च—** दिव्येति। दिव्यमाल्याम्बरधरम् **दिव्यानि** माल्यानि **पुष्पाणि** अम्बराणि **वस्त्राणि च ध्रियन्ते येनेश्वरेण तं दिव्यमाल्याम्बरधरम्,** दिव्यगन्धानुलेपनम् **दिव्यं गन्धानुलेपनं यस्य तम् दिव्यगन्धानुलेपनम्,** सर्वाश्चर्यमयम् **सर्वाश्चर्यप्रायं देवम्,** अनन्तं **नास्यान्तोऽस्तीत्यनन्तः, तम्,** विश्वतोमुखं **सर्वतोमुखं, सर्वभूतात्मभूतत्वात्। तम्, दर्शयामास**[1]**। अर्जुनो ददर्शेति वाऽध्याह्रियते॥ ११॥**

आनन्दगिरिकृतव्याख्या

**किन्तु दिव्येनेत्यादि** यथोक्तप्रकारः। अनन्तरं **दिव्यचक्षुषः प्रदानादिति शेषः। हरत्यविद्यां सकार्यामिति** हरिः। **यदीश्वरस्य मायोपहितस्य परममुत्कृष्टं रूपं तद् दर्शयाम्बभूवेत्याह—** परममिति॥ ९॥

**तदेव रूपं विशिनष्टि—** अनेकेति। **दिव्यानि** आभरणादीनि **हारकेयूरादीनि भूषणानि।** उद्यतानि **उच्छ्रितानि॥ १०॥**

**उक्तरूपवन्तं भगवन्तं प्रकारान्तरेण विशिनष्टि—** किञ्चेति। अर्जुन इति[2]। **अध्याहारेऽपि पदसंघटनासम्भवात्॥ ११॥**

भाष्यार्कप्रकाशः

**एवमिति**। हरति आश्रितानां संसारमिति **हरिः** परमात्मा। **परमं** परम् अधिकं मा नास्ति यस्मात् तत् परमम्, सर्वाधिकम्, विश्वमयमिति यावत्॥ ९॥

**अनेकेति**। विश्वरूपमेव विशिनष्टि— **अनेकेति**। दृश्यन्त इति दर्शनानि, दृश्यानि, विषयाः इति यावत्। [3]अनेकानामद्भुतानां दर्शनं यस्मिन् तदिति वा। **उद्यतानि** उद्धृतानि, शत्रुमारणे उद्युक्तानीति वा। **दिव्यत्वम्** अप्राकृतत्वम्, मायामयत्वमिति यावत्॥ १०॥

**दिव्येति**। धरतीति धरः, दिव्यमाल्याम्बराणां धरो दिव्यमाल्याम्बरधर इति समासः। **गन्धानुलेपनं** गन्धचर्चा। सर्वाण्या-श्चर्याणि [4]प्रकृतमुच्यन्ते यस्मिन् तं सर्वाश्चर्यमयम्, सर्वाश्चर्यप्रचुरमित्यर्थः। **सर्वतोमुखमिति**। अनेकमुखमित्यर्थः। तत्र हेतुमाह—**सर्व-भूतेति**। एकैकभूतस्य एकैकं मुखमिति सर्वभूतानामनन्तमुखानि सन्ति, तानि सर्वाण्यपि मुखानि ईश्वरमुखान्येव। ईश्वरस्य सर्वभूत-

१.'दर्शयामासे'ति पूर्वेण सम्बन्धः पूर्ववद् इति भावः। २.इदं क्वचिन्न। ३.'अनेकेषा'मिति पाठः संभाव्यते। ४.'तत्प्रकृतवचने मयट्' इति प्राचुर्ये मयडिति भावः।

**दिवि सूर्यसहस्रस्य भवेद् युगपदुत्थिता।**
**यदि भाः सदृशी सा स्याद् भासस्तस्य महात्मनः॥ १२॥**
**तत्रैकस्थं जगत् कृत्स्नं प्रविभक्तमनेकधा।**
**अपश्यद् देवदेवस्य शरीरे पाण्डवस्तदा॥ १३॥**
**ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः।**
**प्रणम्य शिरसा देवं कृताञ्जलिरभाषत॥ १४॥**

**या पुनर्भगवतो विश्वरूपस्य भाः, तस्याः उपमोच्यते—** दिवीति। दिवि **अन्तरिक्षे, तृतीयस्यां वा दिवि, सूर्याणां सहस्रं** सूर्यसहस्रम्**, तस्य युगपदुत्थितस्य सूर्यसहस्रस्य या युगपदुत्थिता भाः, सा यदि सदृशी स्यात्** तस्य महात्मनो **विश्वरूपस्य**[1] **भासः। यदि वा न स्यात्। ततोऽपि विश्वरूपस्यैव भाः अतिरिच्यत इत्यभिप्रायः॥ १२॥**

**किञ्च—** तत्रैकस्थमिति। तत्र **तस्मिन् विश्वरूपे एकस्मिन् स्थितम्** एकस्थं **जगत् कृत्स्नं प्रविभक्तम्** अनेकधा **देवपितृमनुष्यादिभेदैः,** अपश्यद् **दृष्टवान्** देवदेवस्य **हरेः शरीरे** पाण्डवो**ऽर्जुनस्तदा॥ १३॥**

तत इति। **ततस्तं दृष्ट्वा स विस्मयेनाविष्टो** विस्मयाविष्टः, **हृष्टानि रोमाणि यस्य सोऽयं** हृष्टरोमा **चाभवद्**

आनन्दगिरिकृतव्याख्या

**ननु** [2]**प्रकृष्टस्य भगवतो रूपस्य दीप्तिरस्ति, न वा? न चेत् काष्ठादिसाम्यम्, यद्यस्ति, कीदृशी सा? इत्याशङ्क्याह—** या पुनरिति। **सा यदि स्यात्, तद्भासः सदृशी सेति योजना। असम्भाविताभ्युपगमार्थो** यदिशब्दः। स्याच्छब्दोऽनिश्चयार्थः। **सा कथञ्चित् सदृशी सम्भवति, न तु भवत्येवेति विवक्षित्वाऽऽह—** यदि वेति॥ १२॥

**न केवलमुक्तमेवार्जुनो दृष्टवान्, किन्तु तत्रैव विश्वरूपे सर्वं जगदेकस्मिन्नवस्थितमनुभूतवानित्याह—**किञ्चेति। तदा **विश्वरूपस्य भगवद्रूपस्य दर्शनदशायामित्यर्थः॥ १३॥**

**विश्वरूपधरस्य भगवतः, तस्मिन् एकीभूतजगतश्चोक्तविशेषणस्य दर्शनानन्तरं किमकरोदित्यपेक्षायामाह—** तत इति।

भाष्यार्कप्रकाशः

रूपत्वादिति भावः॥ ११॥

**दिवीति**। उपमीयतेऽनयेति **उपमा** उपमानम्। दिवि सूर्यसहस्रस्य भाः युगपदुत्थिता स्याच्चेत्, सा तस्य महात्मनो भासः सदृशी स्यात्। [3]सम्भावितोपमाऽलङ्कारः। दिव्येक एव सूर्योऽधुनाऽस्ति; न तस्य भगवद्विश्वरूपसमाना कान्तिः, किं तर्हि? तादृशाः सूर्याः सहस्रं दिवि स्युः, ते च संहता भवेयुः, न तु व्यस्ताः, व्यस्तत्वे कान्त्युत्कर्षालाभात्। तथा च परस्परसंश्लिष्टसहस्रसूर्यसदृश-कान्ति भगवद्विश्वरूपमिति सिद्धम्। **तृतीयस्यामिति**। मर्त्यपातालापेक्षया स्वर्गस्य तृतीयत्वादिति भावः। सूर्यसहस्रस्य युगपदुत्थानं विना तद्भाया युगपदुत्थानं न सम्भवतीत्यभिप्रेत्याह— **युगपदुत्थितस्येति। महात्मन इति**। महत्परिमाणदेहस्येत्यर्थः। यावदर्थमाह— **विश्वरूपस्येति**। पक्षान्तरमाह— **यदि वा न स्यादिति**। यद्वा सा सदृशी न स्यादित्यर्थः। फलितमाह— **तत इति**। सूर्यसहस्रभास इत्यर्थः। **अतिरिच्यत इति**। उत्कृष्टा भवतीत्यर्थः॥ १२॥

**तत्रेति**। तदा पाण्डवो देवदेवस्य तत्र शरीरे एकस्थमनेकधा प्रविभक्तं कृत्स्नं जगदपश्यत्। **एकस्थम्** एकदेशस्थम्॥ १३॥

**तत इति**। ततः स धनञ्जयः विस्मयाविष्टो हृष्टरोमा चाभवत्। भूत्वेति वा शेषः। शिरसा देवं प्रणम्य कृताञ्जलिपुटःसन्

१. 'विश्वरूपस्यैव' इति पा.। २. 'प्रकृतस्य' इति पा.। ३. असम्भावितोपमा इति स्यात्। द्र. काव्यादर्शः २-३९।

**अर्जुन उवाच—**

**पश्यामि देवांस्तव देव ! देहे सर्वांस्तथा भूतविशेषसङ्घान्।**
**ब्रह्माणमीशं कमलासनस्थम् ऋषींश्च सर्वानुरगांश्च दिव्यान्॥ १५॥**

**धनञ्जयः।** प्रणम्य **प्रकर्षेण नमनं कृत्वा प्रह्वीभूतः सन् शिरसा** देवं **विश्वरूपधरं** कृताञ्जलिः **नमस्कारार्थं सम्पुटीकृत-हस्तः सन्** अभाषत **उक्तवान्॥ १४॥**

**कथम्? यत् त्वया दर्शितं विश्वरूपं तदहं पश्यामीति स्वानुभवमाविष्कुर्वन् अर्जुन उवाच—** पश्यामीति। पश्यामि **उपलभे, हे देव ! तव देहे देवान् सर्वान् , तथा** भूतविशेषसङ्घान् **भूतविशेषाणां स्थावरजङ्गमानां नानासंस्थानविशेषाणां सङ्घाः भूतविशेषसङ्घास्तान्। किञ्च** ब्रह्माणं **चतुर्मुखम्** ईशम् **ईशितारं प्रजानां** कमलासनस्थं **पृथिवीपद्ममध्ये मेरुकर्णिकासनस्थमित्यर्थः।** ऋषींश्च **वसिष्ठादीन् सर्वान् ,** उरगांश्च **वासुकिप्रभृतीन्** दिव्यान् **दिवि भवान्॥ १५॥**

आनन्दगिरिकृतव्याख्या

**आश्चर्यबुद्धिः** विस्मयः। **रोम्णां** हृष्टत्वं **पुलकितत्वम्।** प्रकर्षो **भक्तिश्रद्धयोरतिशयः॥ १४॥**

**कथं भगवन्तं प्रत्यर्जुनो भाषितवानिति पृच्छति—** कथमिति। **तत्प्रश्नमपेक्षितं पूरयन्नवतारयति—** यत्त्वयेति। **भूतविशेषसङ्घेषु देवानामन्तर्भावेऽपि पृथक्करणमुत्कर्षात्। ब्रह्मणः सर्वदेवतात्मत्वेऽपि तेभ्यो भेदकथनं तदुत्पादकत्वादिति मत्वाऽऽह—** किञ्चेति। **ऋषीणामुरगाणां च किञ्चिद्वैषम्यात् पृथक्त्वम्**[1]। दिव्यानित्युभयेषां **विशेषणम्॥ १५॥**

भाष्यार्कप्रकाशः

इदमभाषत॥ १४॥

**पश्यामीति**। हे देव ! तव देहे सर्वान् देवान् पश्यामि; तथा भूतविशेषसङ्घान् पश्यामि; ईशं कमलासनस्थं ब्रह्माणं पश्यामि; सर्वान् ऋषींश्च पश्यामि; दिव्यानुरगांश्च पश्यामि। **यद्वा** पश्यामीत्येकक्रिययैव सर्वद्वितीयान्तपदानामन्वयः। **भूतविशेषसङ्घानिति**। नानाविधसंस्थानविशेषविशिष्टचराचरात्मकभूतसमूहानित्यर्थः। **संस्थानम्** अवयवसन्निवेशः। **ईशिता** प्रभुः, नियन्तेति यावत्। तत्तत्कर्मानुगुणं तं तं प्राणिनं नियमयतीति भावः। ननु ब्रह्मणो महात्मनः कथं पद्ममध्यस्थितिर्भृङ्गस्येव क्षुद्रस्येत्यत आह— **पृथिवीति**। पृथिव्येव पद्मम् , तन्मध्यस्थमेरुरेव कर्णिका; मेरुशिखरे सत्यलोके वर्तनाद् ब्रह्मणः कमलासनस्थत्वमिति भावः। अत एव 'धाताऽब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः' इति कमलासनशब्दस्य ब्रह्मदेववाचित्वमुक्तम् **अमरा**दिभिः कोशकारैः। न च श्रीविष्णुमूर्तिनाभीपद्मप्रभवत्वादस्य कमलासनत्वमिति वाच्यम् ; विष्णोर्जगन्मयविग्रहस्य पादस्थानीयं पातालं, नाभिस्थानीयं भूतलं, शिरःस्थानीयं तु सत्यतलमिति[2] प्रसिद्ध्या भूपद्मस्यैव विष्णुनाभीपद्मत्वात्। **यद्वा** ब्रह्मणश्चतुर्मुखस्य विष्णुनाभीपद्मे विलक्षणे स्थितिः प्रलयकाल एव, न त्वधुनेति कृत्वा अधुना ब्रह्मणः कमलासनं मेरुशिखररूपमेवेति बोध्यम्। न च - पद्माकार आसनविशेषः पद्मासनमित्युच्यते, भद्रासनस्वस्तिकासनाद्यन्तर्गतः, तस्मिन्नासने स्थितत्वात् कमलासनस्थ इति सुवचमिति - वाच्यम् ; विश्वरूपदर्शनक्षुभिताशयस्य चतुर्मुखस्य तदानीं नैश्चल्येन पद्मासने स्थित्ययोगात्।

यत्तु **रामानुजः**— ब्रह्माणम् अण्डाधिपतिं चतुर्मुखम् , तथा कमलासने ब्रह्मणि स्थितमीशं चेति। **तदसत्** ; ब्रह्मणि स्थितस्य चिन्मात्रस्य चक्षुरविषयत्वात्। नीरूपो ह्यन्तर्यामी। न च - ब्रह्मणो मते स्थितमीशं रुद्रमित्यर्थ इति - वाच्यम् ; कमलासनस्थशब्देन

१. भूतविशेषसङ्घेषु ऋषीणामुरगाणां चान्तर्भावेऽपि पृथक्करणमित्यर्थः। २. सत्यलोक इत्यर्थः।

**अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वा[1] सर्वतोऽनन्तरूपम्।**
**नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर ! विश्वरूप !॥ १६॥**
**किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतोदीप्तिमन्तम्।**
**पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद् दीप्तानलार्कद्युतिमप्रमेयम्॥ १७॥**

**किञ्च—** अनेकेति। अनेकबाहूदरवक्त्रनेत्रम् **अनेके बाहव उदराणि वक्त्राणि नेत्राणि च यस्य तव स त्वमनेकबाहूदरवक्त्रनेत्रः, तमनेकबाहूदरवक्त्रनेत्रं पश्यामि** त्वा त्वां सर्वतः **सर्वत्र** अनन्तरूपम् **अनन्तानि रूपाण्यस्येति अनन्तरूपः, तमनन्तरूपम् , नान्तम्** अन्तोऽवसानम् , **न** मध्यम् **मध्यं नाम द्वयोः कोट्योरन्तरम् , न पुनस्तव आदिम्** , **तव देवस्य नान्तं पश्यामि, न मध्यं पश्यामि, न पुनरादिं पश्यामि, हे विश्वेश्वर ! हे विश्वरूप !॥ १६॥**

**किञ्च—** किरीटिनमिति। किरीटिनम् **किरीटं नाम शिरोभूषणविशेषः, तद् यस्यास्ति स किरीटी, तं किरीटिनम् , तथा** गदिनं **गदा अस्य विद्यत इति गदी, तं गदिनम् , तथा** चक्रिणं **चक्रमस्यास्तीति चक्री, तं चक्रिणं च** तेजोराशिं **तेजःपुञ्जं** सर्वतोदीप्तिमन्तं **सर्वतो [2]दीप्तिरस्यास्तीति सर्वतोदीप्तिमान् , तं सर्वतोदीप्तिमन्तं पश्यामि त्वां**

आनन्दगिरिकृतव्याख्या

**यत्र भगवद्देहे सर्वमिदं दृष्टं तमेव विशिनष्टि—** अनेकेति। आदिशब्देन **मूलमुच्यते। 'नान्तं न मध्य'मित्यत्रापि पश्यामीत्यस्य प्रत्येकं सम्बन्धं सूचयति—** नान्तं पश्यामीति॥ १६॥

**विश्वरूपवन्तं भगवन्तमेव प्रकारान्तरेण प्रपञ्चयति—** किञ्चेति। **परिच्छिन्नत्वं व्यावर्तयति—** सर्वत इति। [3]**दुर्निरीक्ष्यं पश्यामी-**

भाष्यार्कप्रकाशः

कमलासनमतस्थमित्यर्थस्याप्रतिपाद्यमानत्वात्।

**ननु** ब्रह्मविष्णुरुद्राणां त्रिमूर्तित्वेऽपि विष्णोः साक्षान्नारायणत्वात् तद्देहे ब्रह्मेव शिवोऽप्यस्तीति कमलासनस्थं ब्रह्माणं, तथा ईशं शिवं च पश्यामीति व्याख्येयमिति चेत्? **मैवम्** ; सर्वान् देवानित्यनेन रुद्रादित्यादिसर्वदेवानां प्रतिपादितत्वाद् , ईश्वरस्य शम्भोश्च रुद्रगणान्तःपातित्वान्न पृथक् कथनावसर इति। कमलासनस्थं कैलासगिरौ पद्मासनसमासीनमीशं शिवं चापश्यदिति व्याख्यानेऽपि नास्माकं काऽपि क्षतिः। विष्णुशिवयोश्चैतन्यात्मना अभेदेऽपि सङ्घातात्मना भेदसद्भावात्। विष्णोरेवावतारविशेषत्वाद् विष्णुशिवविग्रहयोः। **दिवि** [4]पातालस्वर्गे भवा दिव्यास्तान्॥ १५॥

**अनेकेति**। अनेकबाहूदरवक्त्रनेत्रम् अनन्तरूपं त्वा सर्वतः पश्यामि। हे विश्वेश्वर ! विश्वरूप ! तव पुनरन्तं न पश्यामि; मध्यं न पश्यामि; आदिं न पश्यामि। त्वामेव सर्वत्र पश्यामि, न तु तवादिमध्यावसानानीति परमार्थः। **द्वयोः कोट्योः** आद्यन्तयोरित्यर्थः ॥ १६॥

**किरीटिनमिति**। **किरीट**मिति जात्येकवचनम्। अनेककिरीटयुक्तमित्यर्थः। अनेकशिरस्कत्वाद् विराट्पुरुषस्य। गदाचक्रयोस्तु प्राधान्येन निर्देशः। गदाचक्रशङ्खासिधनुराद्यनन्तायुधविशिष्टमित्यर्थः। तेजसां राशिः पुञ्जो यस्य तं तेजोराशिम(न)न्तमित्यर्थः। **यद्वा** तेजोराशिमति तेजोराशित्वरूपणम् , 'स राशिरासीन्महसां महोज्ज्वलः'[5]इतिवत्। **सर्वतोदीप्तिमन्तं** यस्य दीप्तिः सर्वतः सर्वत्रास्ति तम्। **तेजः** प्रभापिण्डः, **दीप्तिस्तु** प्रभेति विवेकः। अग्नितत्प्रभावत्। दुर्निरीक्ष्यं दुःखेन निरीक्षितुं शक्यम् , निरीक्षितुमशक्यमित्यर्थः। प्रमातुं परिच्छेत्तुमशक्यम् **अप्रमेयम्**॥ १७॥

---

१.'त्वाम्' पा.। २.'दीप्तिर्यस्यास्ति सः' पा.। ३. दुर्निरीक्ष्यत्वे कथं भगवतो दर्शनमिति शङ्कां परिहरति—दुर्निरीक्ष्यमिति। भगवदनुग्रहलब्धदिव्यचक्षुष्काणां दृश्यः, इतरेषां दुर्निरीक्ष्य इति भावः। ४. उरगाणां पातालभवत्वप्रसिद्धेः दिव्यानिति व्याचष्टे—पातालेति। ५. तेजोराशिविशिष्टे राजनि नले तेजोराशित्वरूपणमिदम् ।

**त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम्।**
**त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे॥ १८॥**
**अनादिमध्यान्तमनन्तवीर्यम् अनन्तबाहुं शशिसूर्यनेत्रम्।**
**पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम्॥ १९॥**

दुर्निरीक्ष्यं **दुःखेन निरीक्ष्यो दुर्निरीक्ष्यस्तं दुर्निरीक्ष्यं** समन्तात् **समन्ततः सर्वत्र** दीप्तानलार्कद्युतिम् **अनलश्चार्कश्च अनलार्कौ, दीप्तावनलार्कौ दीप्तानलार्कौ, तयोर्दीप्तानलार्कयोर्द्युतिरिव** द्युतिस्तेजो **यस्य तव स त्वं दीप्तानलार्कद्युतिस्तं त्वां दीप्तानलार्कद्युतिम्,** अप्रमेयं **न प्रमेयम् अप्रमेयम्। अशक्यपरिच्छेदमित्यर्थः**[१]॥ १७॥

**इत एव ते योगशक्तिदर्शनादनुमिनोमि—** त्वमिति। **त्वम्** अक्षरम् **न क्षरतीति,** परमं **ब्रह्म** वेदितव्यं **ज्ञातव्यं मुमुक्षुभिः। त्वमस्य** विश्वस्य **समस्तस्य जगतः** परं **प्रकृष्टं** निधानं **निधीयतेऽस्मिन्निति निधानम्, पर आश्रय इत्यर्थः। किञ्च त्वम्** अव्ययो **न तव व्ययो विद्यत इत्यव्ययः,** शाश्वतधर्मगोप्ता **शश्वद्भवः शाश्वतो नित्यो धर्मस्तस्य गोप्ता शाश्वतधर्मगोप्ता,** सनातनः **चिरन्तनः त्वं पुरुषः परो** मतोऽ**भिप्रेतो** मे **मम**॥ १८॥

**किञ्च—** अनादीति। अनादिमध्यान्तम् **आदिश्च मध्यं चान्तश्च न विद्यते यस्य सोऽयमनादिमध्यान्तस्तं त्वाम् अनादिमध्यान्तम्,** अनन्तवीर्यं **न तव वीर्यस्यान्तोऽस्तीत्यनन्तवीर्यस्तं त्वाम् अनन्तवीर्यम्, तथा** अनन्तबाहुम् **अनन्ता बाहवो यस्य तव स त्वम् अनन्तबाहुस्तं त्वामनन्तबाहुम्,** शशिसूर्यनेत्रं **शशिसूर्यौ नेत्रे यस्य तव स त्वं शशिसूर्यनेत्रस्तं त्वां शशिसूर्यनेत्रं चन्द्रादित्यनयनं पश्यामि त्वां** दीप्तहुताशवक्त्रं **दीप्तश्चासौ हुताशश्च** [२]**सः वक्त्रं यस्य तव स त्वं दीप्तहुताशवक्त्रः, तं त्वां दीप्तहुताशवक्त्रं स्वतेजसा** विश्वमिदं **समस्तं** तपन्तं [३]**तापयन्तम्**॥ १९॥

आनन्दगिरिकृतव्याख्या

**त्यधिकारिभेदादविरुद्धम्। पुरतो वा पृष्ठतो वा पार्श्वतो वा नास्य दर्शनम्, किन्तु सर्वत्रेत्याह—** समन्तत इति। **दीप्तिमत्त्वं दृष्टान्तेन स्पष्टयति—** दीप्तेति॥ १७॥

**सप्रपञ्चे भगवद्रूपे प्रकृते प्रकरणविरुद्धं 'त्वमक्षर'मित्यादिनिरुपाधिकवचनमित्याशङ्क्याह—** इत एवेति। योगशक्तिः **ऐश्वर्यातिशयः।** न क्षरतीति **निष्प्रपञ्चत्वमुच्यते**[४]**। परमपुरुषार्थत्वात् परमार्थत्वाच्च ज्ञातव्यत्वम्। 'यस्मिन् द्यौः पृथिवी'त्यादौ प्रपञ्चायतनस्यैव ततो निष्कृष्टस्य ज्ञातव्यत्वश्रवणात् कुतो ब्रह्मणो ज्ञातव्यत्वम्? तत्राह—** त्वमस्येति। **निष्प्रपञ्चस्य ब्रह्मणो ज्ञेयत्वे हेत्वन्तरमाह—** किञ्चेति। **अविनाशित्वात् तवैव ज्ञातव्यत्वादतिरिक्तस्य नाशित्वेन हेयत्वादित्यर्थः। ज्ञानकर्मात्मनो धर्मस्य नित्यत्वं** [५]**वेदप्रमाणकत्वम्। 'धर्मसंस्थापनार्थाय सम्भवामी'त्युक्तत्वाद्** गोप्ता **रक्षिता**॥ १८॥

**भगवतो विश्वरूपाख्यं रूपमेव पुनर्विवृणोति—** किञ्चेति। **हुतमश्नातीति** हुताशो **वह्निः**॥ १९॥

भाष्यार्कप्रकाशः

**त्वमिति**। त्वं वेदितव्यमक्षरं परममसि। त्वमस्य विश्वस्य परं निधानमसि। त्वं शाश्वतधर्मगोप्ता अव्ययोऽसि। त्वं सनातनः पुरुष इति मे मतोऽसि। **अक्षरम्** अविनाशि। **परमं** निरतिशयम्। फलितमाह— **ब्रह्मेति**। तस्यैव सर्वातिशयत्वेन निरतिशयत्वात्। कैर्वेदितव्यम्? अत आह— **मुमुक्षुभिरिति**। तेषामेव मुक्त्यर्थं ब्रह्मजिज्ञासुत्वादिति भावः। **सनातनः** पुराणः॥ १८॥

**अनादीति**। अनादित्वादिविशेषणविशिष्टं त्वां पश्यामीत्यन्वयः॥ १९॥

---

१.'इत्येतत्' इति पा.। २.'तद्वद् वक्त्रं' इति पा.। ३.'संतापयन्तम्' इति पा.। ४.अर्थादिति शेषः। सप्रपञ्चस्य क्षरणावश्यकत्वादिति भावः। ५.'वेदप्रमाणकम्' पा.।

**द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः।**
**दृष्ट्वाऽद्भुतं [1]रूपमिदं तवोग्रं लोकत्रयं प्रव्यथितं महात्मन्!॥२०॥**
**अमी हि [2]त्वा सुरसङ्घा विशन्ति केचिद् भीताः प्राञ्जलयो गृणन्ति।**
**स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः॥२१॥**

द्यावापृथिव्योरिति। **द्यावापृथिव्योः** इदमन्तरं **ह्यन्तरिक्षं व्याप्तं त्वया** एकेन **विश्वरूपधरेण दिशश्च सर्वाः व्याप्ताः।** दृष्ट्वा **उपलभ्य** अद्भुतं **विस्मापकं रूपमिदं तव** उग्रं **क्रूरं, लोकानां त्रयं** लोकत्रयं प्रव्यथितं **भीतं प्रचलितं वा,** हे महात्मन्! **अक्षुद्रस्वभाव!॥२०॥**

**अथाधुना - पुरा 'यद्वा जयेम यदि वा नो जयेयुः'(भ.गी.२.६) इत्यर्जुनस्य यः संशयः आसीत्, तन्निर्णयाय पाण्डवजयमैकान्तिकं दर्शयामीति प्रवृत्तो भगवान्। तं पश्यन्नाह—** अमी हीति। **किञ्च** अमी हि **युध्यमाना योद्धारः** त्वा **त्वां** सुरसङ्घाः **येऽत्र भूभारावतारायावतीर्णा वस्वादिदेवसङ्घा मनुष्यसंस्थानास्त्वां** विशन्ति **प्रविशन्तो दृश्यन्ते। तत्र केचिद् भीताः प्राञ्जलयः सन्तो** गृणन्ति **स्तुवन्ति त्वाम् अन्ये पलायनेऽप्यशक्ताः सन्तः। युद्धे प्रत्युपस्थित उत्पातादिनिमित्तान्युपलक्ष्य 'स्वस्त्यस्तु जगतः' इत्युक्त्वा** महर्षिसिद्धसङ्घाः **महर्षीणां सिद्धानां च सङ्घाः स्तुवन्ति त्वां स्तुतिभिः** पुष्कलाभिः **सम्पूर्णाभिः॥२१॥**

आनन्दगिरिकृतव्याख्या

**प्रकृतभगवद्रूपस्य व्याप्तिं व्यनक्ति—** द्यावापृथिव्योरिति। **तस्यैव भयङ्करत्वमाचष्टे—** दृष्ट्वेति॥२०॥

**'अमी ही'त्यादिसमनन्तरग्रन्थस्य तात्पर्यमाह—** अथेति। [3]**तं भगवन्तं पाण्डवजयमैकान्तिकं दर्शयन्तं पश्यन्नर्जुनो ब्रवीतीत्याह—** तं पश्यन्निति। **विश्वरूपस्यैव प्रपञ्चनार्थमनन्तरग्रन्थजातमिति दर्शयति—** किञ्चेति। **असुरसङ्घा इति पदं छित्वा भूभारभूता दुर्योधनादयस्त्वां विशन्तीत्यपि वक्तव्यम्। उभयोरपि सेनयोरवस्थितेषु योद्धुकामेष्ववान्तरविशेषमाह—** तत्रेति। **समरभूमौ समागतानां द्रष्टुकामानां नारदप्रभृतीनां विश्वविनाशमाशङ्कमानानां तं परिजिहीर्षतां स्तुतिपदेषु भगवद्विषयेषु प्रवृत्तिप्रकारं दर्शयति—** युद्ध इति॥२१॥

भाष्यार्कप्रकाशः

**द्यावापृथिव्योरिति**। एकेन त्वया इदं द्यावापृथिव्योरन्तरं व्याप्तम्, सर्वा दिशश्च व्याप्ताः, हे महात्मन्! उग्रं तवेदं रूपं दृष्ट्वा **लोकत्रयं** लक्षणया तद्वर्तिनो जनाः। [4]न च प्रतिकूलानुकूलमध्यस्थरूपजनत्रयमित्यभिधासिद्ध एवार्थो ग्राह्य इति वाच्यम्; लोकशब्दस्य लक्षणयैव जनार्थे [5]प्रवृत्तिः, न त्वभिधयेति तदर्थस्यापि लाक्षणिकत्वात्। प्रतिकूलत्वादिविशेषणकल्पने प्रमाणाद्यभावाच्च। प्रव्यथितं भवतीति शेषः॥२०॥

**अमी इति**। अमी सुरसङ्घास्त्वां विशन्ति हि। केचिद् भीताः अत एव प्राञ्जलयः सन्तो गृणन्ति। महर्षिसिद्धसङ्घाः त्वां स्वस्तीत्युक्त्वा पुष्कलाभिः स्तुतिभिः स्तुवन्ति। अमी इत्यस्यार्थमाह— **युध्यमाना इति**। प्रत्यक्षेण दृश्यमाना युद्धं कुर्वन्तो भीष्मादयो योद्धारः। ननु कथमेषां सुरसङ्घत्वम्? अत आह— **ये त्विति**। मनुष्याणामिव संस्थानम् आकारोऽवयवसन्निवेशो येषां ते **मनुष्यसंस्थानाः**। मनुष्यजात्यवतीर्णा इत्यर्थः। **विशन्तीति**। अनेन भगवतैव भीष्मादयः संह्रियन्त इति सूच्यते। इदमेव 'अमी च त्वा'(भगी ११-२६) इति श्लोकेन स्फुटं वक्ष्यते॥२१॥

---

१. 'रूपमुग्रं तवेदं' इति पा.। २. 'त्वां' इति पा.। ३. भगवान् तं पश्यन्नाह इत्यन्वयभ्रमव्युदासाय व्याचष्टे—तमिति। ४. लोकत्रयमित्यस्य रामानुजोक्तमर्थं प्रतिक्षिपति— न चेति। ५. 'लोकस्तु भुवने जने' इत्यमरः लक्षणाभिप्रायेण नेयः। द्र.अग्रे पृ.५३३।

**रुद्रादित्या वसवो ये च साध्याः विश्वेऽश्विनौ मरुतश्चोष्मपाश्च।**
**गन्धर्वयक्षासुरसिद्धसङ्घाः वीक्षन्ते त्वां विस्मिताश्चैव सर्वे॥ २२॥**
**रूपं महत् ते बहुवक्त्रनेत्रं महाबाहो ! बहुबाहूरुपादम्।**
**बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाऽहम्॥ २३॥**
**नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम्।**

**किञ्चान्यत्—** रुद्रेति। **रुद्रादित्याः वसवो ये च साध्याः - रुद्रादयो गणाः,** विश्वे **देवाः,** अश्विनौ **च देवौ,** मरुतश्च **वायवः,** ऊष्मपाश्च **पितरः,** गन्धर्वयक्षासुरसिद्धसङ्घाः **गन्धर्वाः हाहाहूहूप्रभृतयः, यक्षाः कुबेरप्रभृतयः, असुराः विरोचनप्रभृतयः, सिद्धाः कपिलादयस्तेषां सङ्घाः गन्धर्वयक्षासुरसिद्धसङ्घाः, ते** वीक्षन्ते **पश्यन्ति त्वां** विस्मिताः **विस्मयमापन्नाः सन्तः, त एव सर्वे॥ २२॥**

**यस्मात्—** रूपमिति। **रूपं** महद् **अतिप्रमाणं** ते **तव** बहुवक्त्रनेत्रं **बहूनि** वक्त्राणि **मुखानि** नेत्राणि **चक्षूंषि च यस्मिंस्तद् रूपं बहुवक्त्रनेत्रम् , हे महाबाहो** ! बहुबाहूरुपादं **बहवो बाहवः ऊरवः पादाश्च यस्मिन् रूपे तद् बहुबाहूरुपादम् , किञ्च** बहूदरं **बहून्युदराणि यस्मिन्निति तद् बहूदरम् ,** बहुदंष्ट्राकरालं **बह्वीभिर्दंष्ट्राभिः** करालं **विकृतं तद् बहुदंष्ट्राकरालम् , दृष्ट्वा रूपमीदृशं,** लोकाः **लौकिकाः प्राणिनः** प्रव्यथिताः **प्रचलिताः भयेन, तथाऽहमपि॥ २३॥**

**तत्रेदं कारणम्—**नभःस्पृशमिति। नभःस्पृशं [१]**द्युस्पर्शमित्यर्थः;** दीप्तं **प्रज्वलितम् ,** अनेकवर्णम् [२]**अनेके वर्णा**

आनन्दगिरिकृतव्याख्या

**दृश्यमानस्य भगवद्रूपस्य विस्मयकरत्वे हेत्वन्तरमाह—** किञ्चेति। त एव **उक्ता रुद्रादयः सर्वे विस्मयमापन्नास्त्वां पश्यन्तीति सम्बन्धः॥ २२॥**

**लोकत्रयं प्रव्यथितमित्युक्तमुपसंहरति—** यस्मादिति। **ईदृशं यस्मात् ते रूपं, तस्मात् तं[तद्] दृष्ट्वेति योजना। भयेन लौकिकवद् अहमपि** व्यथितो **व्यथां पीडां देहेन्द्रियप्रचलनं प्राप्तोऽस्मीत्याह—** तथेति॥ २३॥

**अर्जुनस्य विश्वरूपदर्शनेन व्यथितत्वे हेतुमाह—** तत्रेति॥ २४॥

भाष्यार्कप्रकाशः

**रुद्रेति**। ये च रुद्रादित्याः, ये च वसवः, ये च साध्याः, ये च विश्वेदेवाः, यौ चाश्विनौ, ये च मरुतः, ये चोष्मपाः, ये च गन्धर्वयक्षासुरसिद्धसङ्घाः, ते ते सर्वे लोका विस्मिताः सन्तः त्वां वीक्षन्त एव। रुद्राश्चादित्याश्च **रुद्रादित्याः**॥ २२॥

**रूपमिति**। हे महाबाहो! बहुवक्त्रनेत्रं बहुबाहूरुपादं बहूदरं बहुदंष्ट्राकरालं महत् ते रूपं दृष्ट्वा लोकाः प्रव्यथिताः। तथाऽहमपि प्रव्यथितः। लोकशब्दो लक्षणया लोकस्थपर इत्याह— **लौकिकाः प्राणिन इति**। न च 'लोकस्तु भुवने जने' इति कोशादभिधयैव तदर्थागम इति वाच्यम् ; [३]शब्दस्यानेकार्थत्वस्यान्याय्यत्वात्। एक एवाभिधेयोऽर्थः, अन्ये तु लाक्षणिका एव। लाक्षणिका अर्था अपि कोशेऽभिधेयैः सह सङ्गृहीताः नानार्थत्वलाभायेति। 'व्यथ भयचलनयो'रिति धातुः। तत्र चलनार्थमाश्रित्याह— **प्रचलिता इति**। तत्र हेतुमाह— **भयेनेति**। भयार्थाश्रयणे तु भीता इत्येव सिध्यति, न तु भीत्या चलिता इति। अत आश्रितश्चलनार्थ इति बोध्यम्। **तथा** लोकवदित्यर्थः॥ २३॥

**नभःस्पृशमिति**। हे विष्णो! नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं त्वां दृष्ट्वा प्रव्यथितान्तरात्मा सन् धृतिं शमं च

१.'द्युस्पृशम्' इति रा.पा.। २.'अनेकवर्णाः' पा.। ३.लोकशब्दस्य भुवनवाचकस्य तद्वर्तिजने लक्षणयैव प्रवृत्तिसंभवे न जनेऽपि शक्तिकल्पना, गौरवादिति भावः।

**दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो!॥२४॥**
**दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि।**
**दिशो न जाने न लभे च शर्म प्रसीद देवेश ! जगन्निवास !॥२५॥**
**अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसङ्घैः।**

**भयङ्करा नानासंस्थानाः यस्मिंस्त्वयि तं त्वामनेकवर्णम् ,** व्यात्ताननम् - व्यात्तानि **विवृतानि** आननानि **मुखानि यस्मिंस्त्वयि तं त्वां व्यात्ताननम् ,** दीप्तविशालनेत्रम् - दीप्तानि **प्रज्वलितानि** विशालानि **विस्तीर्णानि नेत्राणि यस्मिंस्त्वयि तं त्वां दीप्तविशालनेत्रम् , दृष्ट्वा हि त्वां** प्रव्यथितान्तरात्मा - प्रव्यथितः **प्रभीतोऽन्तरात्मा मनो यस्य मम सोऽहं प्रव्यथितान्तरात्मा सन्** धृतिं **धैर्यं न** विन्दामि **न लभे,** शमं **चोपशमं मनस्तुष्टिम् , हे विष्णो !॥२४॥**

**कस्मात् ?—** दंष्ट्राकरालानीति। दंष्ट्राकरालानि **दंष्ट्राभिः** करालानि **विकृतानि ते तव मुखानि** दृष्ट्वैव **उपलभ्य** कालानलसन्निभानि **प्रलयकाले लोकानां दाहकोऽग्निः कालानलः, तत्सन्निभानि कालानलसदृशानि दृष्ट्वेत्येतत् , दिशः पूर्वापरविवेकेन न जाने, दिङ्मूढो जातोऽस्मि, अतो** न लभे च **नोपलभे च** शर्म **सुखम्। अतः** प्रसीद **प्रसन्नो भव, हे देवेश ! जगन्निवास !॥२५॥**

**येभ्यो मम पराजयाशङ्का[2]ऽऽसीत् , सा चापगता, यतः—** अमी चेति। **अमी च त्वां** धृतराष्ट्रस्य पुत्राः **दुर्योधनप्रभृतयः त्वरमाणा विशन्तीति व्यवहितेन सम्बन्धः। सर्वे** सहैव [3]**संहताः** अवनिपालसङ्घैः **अवनिं पृथ्वीं**

आनन्दगिरिकृतव्याख्या

**दृश्यमानेऽपि भगवद्देहे परितोषाद्यभावे कारणान्तरं प्रश्नपूर्वकमाह—** कस्मादिति। दृष्ट्वैवेत्येवकारेण [4]**प्राप्तिर्व्यावर्त्यते॥२५॥**

**अस्माकं जयं परेषां पराजयं च दिदृक्षन्तं [5][दिदृक्षुस्तं] पश्यामीत्याह—**येभ्य इति। **तत्र हेतुत्वेन श्लोकमवतारयति—**यत इति।

भाष्यार्कप्रकाशः

न विन्दामि हि। ननु नभसः सर्वसंस्पृष्टत्वाद् व्यर्थं नभःस्पृशमिति विशेषणम् , क्षुद्राणामपि तथात्वाद्, अत आह— **द्युस्पृशमिति**। अन्तरिक्षलोकस्पृशमित्यर्थः। स्वर्गलोकस्पृशमिति वा। व्याप्तमहाकाशमिति यावत्। त्वद्रूपगताः नभोव्यापित्वव्यात्ताननत्वदीप्तविशालनेत्रत्वदीप्तत्वानेकवर्णत्वरूपा धर्माः लोकत्रयस्य मम च प्रव्यथितत्वे कारणम्। एवं सर्वलोकभीतिकरत्वादेव एवंविधत्वदर्शनात् प्रव्यथितं मनो मे। भीते च मनसि कथं धैर्यशमयोरवस्थानम्? न कथमपीत्यर्थः॥२४॥

**दंष्ट्रेति**। ननु कस्मात् तव धृतिशमयोरप्राप्तिरिति शङ्कायां तव रूपस्य भीषणत्वादेवेत्याह— **दंष्ट्रेति**। यद्यपि पूर्वश्लोके स्वेनैवोक्तमिदम् , तथाप्यर्जुनोऽव्यवस्थितचित्तत्वात् सम्भ्रमेण उक्तमेव पुनरपि वदतीति बोध्यम्। हे देवेश! जगन्निवास! दंष्ट्राकरालानि कालानलसन्निभानि ते मुखानि दृष्ट्वैव दिशोऽहं न जाने। शर्म च न लभे। तस्मात् प्रसीद। **पूर्वापरविवेकेनेति**। इयं दिक् पूर्वा, इयं तु पश्चिमेत्येवं विवेकेनेत्यर्थः। दिङ्मात्रज्ञानाभावे 'दिशो न जाने' इति वक्तुमेवासङ्गतत्वादिति भावः। **दिङ्मूढः** दिङ्मोहमापन्नः॥२५॥

**अमी चेति**। अमी सर्वे च धृतराष्ट्रस्य पुत्राः अवनिपालसङ्घैः सहैव दंष्ट्राकरालानि भयानकानि ते वक्राणि त्वरमाणाःसन्त एव विशन्ति। तथा असौ भीष्मो द्रोणः सूतपुत्रश्चैते अस्मदीयैरपि योधमुख्यैः सह दंष्ट्राकरालानि भयानकानि ते वक्राणि त्वरमाणा विशन्ति॥२६॥

१. 'चोपशमनम्' इति पा.। २.'याऽऽसीत् , प्रागेवाऽऽसीत्' इति पा.। ३. 'सहिताः'इति पा.। ४. दृष्ट्वैव, न तु प्राप्येति यावत्। ५. अत्र 'दिदृक्षन् तं पश्यामि' इति छेदः स्यादिति भाति। परं दिदृक्षन् इति परस्मैपदप्रयोगः चिन्त्य इति कोष्ठके संभावितपाठनिवेशः।

**भीष्मो द्रोणः सूतपुत्रस्तथाऽसौ सहास्मदीयैरपि योधमुख्यैः॥ २६॥**
**वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि।**
**केचिद् विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः॥ २७॥**
**यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति।**
**तथा तवामी नरलोकवीराः विशन्ति वक्त्राण्यभिविज्वलन्ति॥ २८॥**
**यथा प्रदीप्तं ज्वलनं पतङ्गाः विशन्ति नाशाय समृद्धवेगाः।**

**पालयन्तीत्यवनिपालाः, तेषां सङ्घैः। किञ्च भीष्मो, द्रोणः,** सूतपुत्रः **कर्णः, तथाऽसौ**[१] **सह** अस्मदीयैरपि **धृष्टद्युम्न-प्रभृतिभिः** योधमुख्यैः **योधानां मुख्यैः प्रधानैः सह॥ २६॥**

**किञ्च—** वक्त्राणीति। वक्त्राणि **मुखानि** ते **तव** त्वरमाणाः **त्वरायुक्ताः सन्तो विशन्ति। किंविशिष्टानि मुखानि? दंष्ट्राकरालानि** भयानकानि **भयङ्कराणि। किञ्च, केचिद् मुखानि प्रविष्टानां मध्ये विलग्नाः** दशनान्तरेषु **दन्तान्तरेषु मांसमिव भक्षितं,** संदृश्यन्ते **उपलभ्यन्ते** चूर्णितैः **चूर्णीकृतैः** उत्तमाङ्गैः **शिरोभिः॥ २७॥**

**कथं प्रविशन्ति मुखानीत्याह—** यथा नदीनामिति। **यथा** नदीनां **स्रवन्तीनां** बहवः **अनेके अम्बूनां वेगाः** अम्बुवेगाः **त्वराविशेषाः समुद्रमेव** अभिमुखाः **प्रतिमुखाः** द्रवन्ति **प्रविशन्ति,** तथा **तद्वत् तव** अमी **भीष्मादयो** नरलोकवीराः **मनुष्यलोकशूराः विशन्ति वक्त्राणि** अभिविज्वलन्ति **प्रकाशमानानि॥ २८॥**

**ते किमर्थं प्रविशन्ति, कथं चेत्याह—** यथेति। **यथा प्रदीप्तं** ज्वलनम् **अग्निं** पतङ्गाः **पक्षिणो विशन्ति** नाशाय

आनन्दगिरिकृतव्याख्या

**न केवलं दुर्योधनादीनामेव पराजयः, किन्तु भीष्मादीनामपीत्याह—** किञ्चेति॥ २६॥

**भगवद्रूपस्योग्रत्वे हेत्वन्तरमाह—** किञ्चेति। **प्रविष्टानां मध्ये केचिदिति सम्बन्धः॥ २७॥**

**उभयोरपि सेनयोरवस्थितानां राज्ञां भगवन्मुखप्रवेशं निदर्शनेन विशदयति—** कथमित्यादिना॥ २८॥

**प्रवेशप्रयोजनं तत्प्रकारविशेषं चोदाहरणान्तरेण स्फोरयति—** ते किमर्थमित्यादिना॥ २९॥

भाष्यार्कप्रकाशः

**वक्त्राणीति**। केचिच्चूर्णितैरुत्तमाङ्गैरुपलक्षिता दशनान्तरेषु विलग्नाःसन्तो मया संदृश्यन्ते। ननु दशनान्तरेषु केचित् किमिव विलग्नाः? अत आह— **भक्षितं मांसमिवेति**। यथा भक्षितमांसविशेषो दन्तान्तरे लगति, तद्वदित्यर्थः॥ २७॥

**यथेति**। कथं विशन्तीति धार्तराष्ट्रादय इति कर्तुःशेषः। यथा नदीनां बहवोऽम्बुवेगाः समुद्रमभिमुखा एव द्रवन्ति, तथाऽमी नरलोकवीरा अभिविज्वलन्ति तव वक्त्राणि विशन्ति। समुद्रे नदीनामम्बुवेगा इव, तव वक्त्रेषु धार्तराष्ट्रादयो विशन्तीत्यर्थः। समुद्रस्थानीयं विराड्रूपं, नदीसङ्गमस्थलस्थानीयानि मुखानि, नदीजलस्थानीयास्तु धार्तराष्ट्रादय इति विवेकः॥ २८॥

**यथेति**। प्रवेशमात्रे दृष्टान्तः पूर्वश्लोकेनोक्तः, अनेन तु नाशाय प्रवेशे दृष्टान्त इति विशेषसद्भावान्न पुनरुक्तिः। **यद्वा** अबुद्धिपूर्वकप्रवेशे नदीवेगो दृष्टान्त उक्तः, बुद्धिपूर्वकप्रवेशे तु पतङ्ग इति विवेकः। यथा पतङ्गाः समृद्धवेगाःसन्तो नाशाय प्रदीप्तं ज्वलनं विशन्ति, तथैव लोकाः समृद्धवेगाःसन्तो नाशायैव तवापि वक्त्राणि विशन्ति। **ज्वलनं** दीपज्वालादिरूपमग्निम्॥ २९॥

---

१. असाविति बुद्धिस्थेन विद्वेष्टृत्वेन कर्णस्य परामर्शः। असौ अजय्यत्वेन प्रसिद्धो भीष्मः इत्यन्यत्र।

**तथैव नाशाय विशन्ति लोकाः तवापि वक्त्राणि समृद्धवेगाः॥२९॥**
**लेलिह्यसे ग्रसमानः समन्ताल्लोकान् समग्रान् वदनैर्ज्वलद्भिः।**
**तेजोभिरापूर्य जगत् समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो !॥३०॥**
**आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर ! प्रसीद।**
**विज्ञातुमिच्छामि भवन्तमाद्यं न हि प्रजानामि तव प्रवृत्तिम्॥३१॥**

**विनाशाय** समृद्धवेगाः- **समृद्ध उद्भूतो वेगो गतिर्येषां ते समृद्धवेगाः, तथैव नाशाय विशन्ति** लोकाः **प्राणिनः तवापि वक्त्राणि समृद्धवेगाः॥२९॥**

**त्वं पुनः—** लेलिह्यस इति। लेलिह्यसे **आस्वादयसि** ग्रसमानः **अन्तः प्रवेशयन्** समन्तात् **समन्ततो लोकान्** समग्रान् **समस्तान्** वदनैः **वक्त्रैः** ज्वलद्भिः **दीप्यमानैः, तेजोभिः** आपूर्य **संव्याप्य जगत्** समग्रं **सहाग्रेण, समस्त-मित्येतत्। किञ्च** भासो **दीप्तयः तव** उग्राः **क्रूराः** प्रतपन्ति [१]**प्रतापं कुर्वन्ति, हे** विष्णो ! **व्यापनशील !॥३०॥**

**यत एवमुग्रस्वभावः, अतः—** आख्याहीति। आख्याहि **कथय** मे **मह्यं को भवान् एवम्** उग्ररूपः **(अति) क्रूराकारः। नमोऽस्तु** ते **तुभ्यं, हे** देववर ! **देवानां प्रधान !** प्रसीद **प्रसादं कुरु।** विज्ञातुं **विशेषेण ज्ञातुमिच्छामि**

आनन्दगिरिकृतव्याख्या

**योद्धुकामानां राज्ञां भगवन्मुखप्रवेशप्रकारं प्रदर्श्य, तस्यां दशायां भगवतस्तद्भासां च प्रवृत्तिप्रकारं प्रत्याययति—** त्वं पुनरिति। **भगवत्प्रवृत्तिमेव[मेवं] प्रत्याय्य, तदीयभासां प्रवृत्तिं प्रकटयति—** किञ्चेति॥३०॥

**भगवद्रूपस्यार्जुनेन दृष्टपूर्वत्वात् तस्य तस्मिन् न जिज्ञासेत्याशङ्क्याह—** यत इति। **उपदेशं शुश्रूषमाणेनोपदेशकर्तुः प्रह्वीभवनं कर्तव्यमिति सूचयति—** नमोऽस्त्विति। **क्रौर्यत्यागमर्थयते—** प्रसादमिति। **त्वमेव मां जानीषे, किमर्थमित्थमिदानीमर्थयसे, मदीयां चेष्टां**

भाष्यार्कप्रकाशः

**लेलिह्यस इति**। त्वं तु समन्ताज्ज्वलद्भिर्वदनैः समग्रान् लोकान् ग्रसमानःसन् लेलिह्यसे। हे विष्णो! तवोग्राः भासः तेजोभिः समग्रं जगदापूर्य प्रतपन्ति। **भासो** दीपादिस्थानीयाः सान्द्राः, **तेजांसि** तु प्रभास्थानीया विरला इति विवेकः।

**भाष्यकारा**भिमतान्वयस्तु— त्वं समग्रं जगत् तेजोभिरापूर्य समन्ताज्ज्वलद्भिर्वदनैः समग्रान् लोकान् ग्रसमानो लेलिह्यसे। हे विष्णो! तवोग्रा भासस्तु प्रतपन्तीति। अस्मिन्नन्वये तु भासां तेजसां चैकार्थ्येऽप्यनन्वयदोषो नास्तीति बोध्यम्।

न च 'तेजोभिरापूर्य जगत् समग्र'मित्यस्य पूर्ववाक्यान्वये समाप्तपुनरादानदोष इति वाच्यम् , अनाकाङ्क्षितविशेषणस्यैव बहिर्भूतत्वे स दोषः, न त्वाकाङ्क्षितविशेषणस्येति सिद्धान्तात्। न चेदं तेजोभिर्जगतः आपूरणं विश्वरूपस्य नाकाङ्क्षितमेव विशेषणमिति वाच्यम् ; तेजोभिर्जगतः आपूरणं विना लोकग्रसनाद्यसम्भवेन तस्याकाङ्क्षितत्वात्। व्याघ्रादयोऽपि स्वतेजसा मृगादीन् परिभूय हि ग्रसन्ते, आस्वादयन्ति च। तद्वदीश्वरोऽपि स्वतेजसा जगत्परिभूयैव ग्रसते आस्वादयति च। तेजसा जगद्व्याप्तिर्हि जगत्परिभवः। येन जगदाक्रान्तं तस्य तेजस उत्कर्षः, तेजो यज्जगदाचक्राम तस्य जगतोऽपकर्षश्चेति। प्रतपन्तीत्यत्र कर्मादर्शनात् किमत्र कर्मेति सन्दिहानं प्रति धात्वर्थसङ्गृहीतकर्मत्वादकर्मकोऽयं धातुरिति बोधयितुमाह प्रेत्युपसर्गयुक्तस्य तपतेरर्थम्[२]— **सन्तापमिति**॥३०॥

**आख्याहीति**। उग्ररूपो भवान् कः? मे आख्याहि। हे देववर! ते नमोऽस्तु। प्रसीद। आद्यं भवन्तं विज्ञातुमिच्छामि। हि तव प्रवृत्तिं न प्रजानामि। मया तव विश्वरूपं जिज्ञासितं प्रार्थितं च। त्वया तु व्यात्ताननत्वादिभिरतिघोरं रूपं दर्शितम्। तत्र पृच्छामि

१.'संतापं' इति रा.पा. भाति। २.संतापं कुर्वन्ति इति विवरणात् संतापस्य कर्मणो धात्वर्थेऽन्तर्भाव इति भावः। वस्तुतस्तु जगत् इति कर्मणोऽत्रापि योजना युक्ता।

**श्रीभगवानुवाच—**

**कालोऽस्मि लोकक्षयकृत् प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्तः।**
**ऋतेऽपि [1]त्वा न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः॥ ३२॥**
**तस्मात् त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम्।**

**भवन्तम्** आद्यम् **आदौ भवमाद्यम्। न** हि **यस्मात् प्रजानामि** तव **त्वदीयां** प्रवृत्तिं **चेष्टाम्॥ ३१॥**

कालोऽस्मीति। **कालोऽस्मि** लोकक्षयकृत् **लोकानां क्षयं करोतीति लोकक्षयकृत्** प्रवृद्धो **वृद्धिं गतः। यदर्थं प्रवृद्धः, तच्छृणु। लोकान्** समाहर्तुं **संहर्तुम्** इह **अस्मिन् काले प्रवृत्तः।** ऋतेऽपि **विनाऽपि** त्वा **त्वां न भविष्यन्ति भीष्मद्रोणकर्णप्रभृतयः** सर्वे**, येभ्यस्तवाशङ्का, येऽवस्थिताः** प्रत्यनीकेषु **अनीकमनीकं प्रति प्रत्यनीकेषु , प्रतिपक्षभूतेषु अनीकेषु** योधाः **योद्धारः॥ ३२॥**

**यस्मादेवम्—** तस्मात्त्वमिति। **तस्मात् त्वमुत्तिष्ठ। भीष्मद्रोणप्रभृतयोऽतिरथाः अजेया देवैरप्यर्जुनेन जिताः**

आनन्दगिरिकृतव्याख्या

**दृष्ट्वा तथैव प्रतिपद्यस्वेत्याशङ्क्याह—** न हीति॥ ३१॥

**स्वयं यदर्था च स्वप्रवृत्तिः तत् सर्वं भगवानुक्तवानित्याह—** श्रीभगवानिति। कालः **क्रियाशक्त्युपहितः परमेश्वरः।** अस्मिन्निति **वर्तमानयुद्धोपलक्षितत्वं कालस्य विवक्षितम्। लोकसंहारार्थं त्वत्प्रवृत्तावपि नासावर्थवती, प्रतिपक्षाणां भीष्मादीनां मत्प्रवृत्तिं विना संहर्तुमशक्यत्वादित्याशङ्क्याह—** ऋतेऽपीति॥ ३२॥

**तवौदासीन्येऽपि प्रतिकूलानीकस्था मत्प्रातिकूल्यादेव न भविष्यन्तीत्येवं यस्मान्निश्चितं तस्मात् त्वदौदासीन्यमकिञ्चित्कर-**

भाष्यार्कप्रकाशः

कस्त्वमिति। किं विश्वरूपः स एवायं त्वम्? यद्वा तवेदं विश्वरूपादन्यद् रूपम्? अथवा त्वत्तोऽयमन्यः पुरुषः कश्चिद् घोराकृतिः, तव सौम्यपुरुषत्वादिति?। **चेष्टामिति।** एवं घोरं रूपं धृत्वा त्वया किं वा चिकीर्षितम्? तदहं न जाने इत्यर्थः॥ ३१॥

**काल इति।** लोकान् समाहर्तुमिह प्रवृत्तो लोकक्षयकृत् प्रवृद्धः कालोऽहमस्मि। प्रत्यनीकेषु ये योधाः अवस्थितास्ते सर्वे त्वा ऋतेऽपि न भविष्यन्त्येव। मया त्वत्प्रार्थनामनुसृत्य विश्वरूपमेव दर्शितम्। तद्धि विश्वरूपम् अनेकवक्त्रनयनत्वादिना स्वत एव घोरम्। तत्र च भूभूर[भार]सञ्जिहीर्षयेश्वरस्य ममाधुना लयव्यग्रत्वाद् मम चेदं रूपमतिघोरं व्यात्ताननत्वदशनान्तरविलग्नयोधत्वदंष्ट्राकरालत्वादिभिः। तस्मादेवं घोररूपोऽहमीश्वरः काल एव। किं कालो यमस्त्वम्? नेत्याह— **लोकक्षयकृदिति।** सर्वेषां लोकपाललोकस्थजनसहितानां भूरादिलोकानां क्षयकृत् नाशकारी। यमस्यापि यमोऽहमीश्वर एव, न तु यम इति भावः।

**यद्वा** कालः संवत्सराद्यात्मकः किम्? नेत्याह— **लोकक्षयकृदिति।** संवत्सरचक्रप्रवर्तकस्य सूर्यस्यापि क्षयकृत्त्वान्नाहं जन्यकालः, किन्तु नित्यकाल ईश्वर एवेति भावः। कीदृशः कालः? अत आह— **प्रवृद्ध इति।** विश्वरूप ईश्वरोऽहमित्यर्थः। किमर्थं विश्वरूपधारणमिदम्? अत आह— **लोकानिति।** अस्मिन् लोके अस्मिन् काले, एतान् लोकान् भीष्मद्रोणादीन् जनान् **समाहर्तुं** गिलितुम् , नाशयितुमिति यावत्। **प्रवृत्तो** विश्वरूपधारणे प्रवृत्तः। **यद्वा** लोकसमाहरणे प्रवृत्तः। एवमत्र प्रवृत्तोऽहमिति ते दर्शयितुं प्रवृद्धः। **अथवा** प्रवृद्धो ग्रसनोन्मुखावस्थः। **प्रत्यनीकेषु** प्रतिसैन्यम् उभयसेनयोरित्यर्थः। **यद्वा** सेनां सेनां प्रत्यवस्थिताः। उभयसेनयोरवस्थिता इत्येव यावत्। **प्रतिपक्षभूतेष्विति।** परस्परमिति शेषः। अन्योन्यं प्रतिपक्षभूतयोः द्वयोः सेनयोरिति प्रत्यनीकेषु इत्यस्यार्थः। यद्वा **प्रत्यनीकेषु** शात्रवसैन्येषु , तेषामेव प्रतिकूलसैन्यत्वेन प्रत्यनीकत्वात् , इदमेवाह—**प्रतिपक्षभूतेष्विति।**

१. 'त्वां' इति पा.।

**मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्!॥३३॥**
**द्रोणं च भीष्मं च जयद्रथं च कर्णं तथाऽन्यानपि योधवीरान्।**
**मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान्॥३४॥**

**सञ्जय उवाच—**

**इति यशो लभस्व; केवलं पुण्यैर्हि तत् प्राप्यते।** जित्वा शत्रून् **दुर्योधनप्रभृतीन् भुङ्क्ष्व राज्यं** समृद्धम् **असपत्नम् अकण्टकम्। मयैव एते** निहताः **निश्चयेन हताः प्राणैर्वियोजिताः पूर्वमेव। निमित्तमात्रं भव त्वम्,** हे सव्यसाचिन्! सव्येन **वामेनापि हस्तेन शराणां [1]क्षेपात् सव्यसाचीत्युच्यतेऽर्जुनः॥३३॥**

द्रोणं चेति। **द्रोणं च, येषु येषु योधेष्वर्जुनस्याशङ्काऽऽसीत्, तांस्तान् व्यपदिशति भगवान्—मया हतानिति। तत्र द्रोणभीष्मयोस्तावत् प्रसिद्धमाशङ्काकारणम्। द्रोणो धनुर्वेदाचार्यः दिव्यास्त्रसम्पन्नः आत्मनश्च विशेषतो गुरुः गरिष्ठः। भीष्मः [2]स्वच्छन्दमृत्युः दिव्यास्त्रसम्पन्नश्च परशुरामेण द्वन्द्वयुद्धमगमत्, न च पराजितः। तथा जयद्रथः, यस्य पिता तपश्चरति मम पुत्रस्य शिरो भूमौ निपातयिष्यति यस्तस्यापि शिरः पतिष्यतीति। कर्णोऽपि वासवदत्तया**

आनन्दगिरिकृतव्याख्या

**मित्याह—** यस्मादिति। उत्तिष्ठ **युद्धायोन्मुखीभवेत्यर्थः। यशोलाभमभिनयति—** भीष्मेति। **किं तेनापुमर्थेनेत्याशङ्क्याह—** पुण्यैरिति। **राज्यभोगेऽपेक्षिते किमनपेक्षितेनेत्याशङ्क्याह—**जित्वेति। **भीष्मादिष्वतिरथेषु सत्सु कुतो जयाशङ्केत्याशङ्क्याह—** मयैवैत इति। **तर्हि मृतमारणार्थं न मे प्रवृत्तिः, तत्राह—** निमित्तेति। **सव्यसाचिपदं विभजते—** वामेनेति॥३३॥

**मयैवेत्यादिनोक्तं प्रपञ्चयति—** द्रोणं चेति। **किमिति कतिचिदेवात्र द्रोणादयो गण्यन्ते? तत्राह—** येष्विति। **द्रोणादिषु कुतः शङ्केत्याशङ्क्य द्वयोः शङ्कानिमित्तमाह—** तत्रेत्यादिना। **जयद्रथेऽपि शङ्कानिमित्तमाह—** तथेति। **दिव्यास्त्रसम्पन्न इति सम्बन्धः। तत्र शङ्कायां कारणान्तरमाह—** यस्येति। **कर्णेऽपि तत्कारणं कथयति—** कर्णोऽपीति। [3]**पूर्ववदेव सम्बन्धः। हेत्वन्तरमाह—** वासवेति। **सा**

भाष्यार्कप्रकाशः

नन्वेवं प्रतिकूलान्यनीकानि प्रत्यनीकानीति न भाषितमाचार्यैरिति चेत्, तर्हि वीप्सायामेव प्रतिरस्तु। सर्वसैन्येष्वित्यर्थः। इमानि च सर्वसैन्यानि शात्रवाण्येवेत्याह— **प्रतिपक्षभूतेष्विति**॥३२॥

यस्मादेवं मयैव कालेनैते हनिष्यन्ते, तस्मादित्यर्थः। तस्मात् त्वं युद्धायोत्तिष्ठ; यशो लभस्व; शत्रून् जित्वा अकण्टकं राज्यं भुङ्क्ष्व; शत्रून् जित्वा यशो लभस्वेति वा, काकाक्षिन्यायेन द्वयोः सम्बध्यत इति वा। **एते** धार्तराष्ट्रादयः मयैव **पूर्वमेव** त्वद्धननात् प्रागेवेत्यर्थः। निहताः। तच्च दर्शितं तवेति भावः। हे सव्यसाचिन्! त्वं निमित्तमात्रं भव। दैवं तवानुकूलम्, तेषां तु प्रतिकूलम्, अतस्तवैव जयः स्यात्। तथापि न त्वयोदासितव्यम्, पौरुषं विना केवलदैवालम्बनस्य क्षुद्रजनविषयत्वाद् व्यर्थत्वाच्चेति भावः। तस्मादुत्तिष्ठ। सव्यसाचिनस्तवापि न दुष्करमिदं युद्धम्, किन्तु सुकरमेवेति भावः॥३३॥

**द्रोणमिति।** त्वं मया हतं द्रोणं भीष्मं जयद्रथं कर्णं च जहि। तथा मया हतानन्यानपि योधवीरान् जहि। मा व्यथिष्ठाः। युध्यस्व। रणे सपत्नान् जेतासि। **आशङ्का** 'मयैते न हनिष्यन्ते, एत एव मां हनिष्यन्ती'त्येवमाकारिका। **जयद्रथः** सैन्धवः। **यस्येति।** यो मम पुत्रस्य शिरो भूमौ निपातयिष्यति तस्यापि शिरो भूमौ पतत्वित्यभिसन्धिमत् तपः यस्य पिता **चरति** चराचरे[चचारे]त्यर्थः। एवं

१. 'क्षेप्ता' इति पा.। सव्येन वामेनापि हस्तेन सचति संदधाति शरानिति सव्यसाची। सच संधाने इति धातोर्णिनिः। 'उभौ मे दक्षिणौ पाणी गाण्डीवस्य विकर्षणे। तेन देवमनुष्येषु सव्यसाचीति मां विदुः।' (म.भा. ४.३९.१७)। २. भीष्मस्य स्वच्छन्दमृत्युता पितृप्रसादेन लब्धा। ३. कर्णोऽपि दिव्यास्त्रसम्पन्न इति सम्बन्धः कर्तव्य इत्यर्थः।

**एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी।**
**नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य॥ ३५॥**

**शक्त्या त्वमोघया सम्पन्नः सूर्यपुत्रः कानीनो यतः, अतस्तन्नाम्नैव निर्देशः। मया हतान् त्वं जहि निमित्तमात्रेण।** मा व्यथिष्ठाः **तेभ्यो भयं मा कार्षीः। युध्यस्व, जेतासि दुर्योधनप्रभृतीन्** रणे **युद्धे** सपत्नान् **शत्रून्॥ ३४॥**

एतच्छ्रुत्वेति। **एतच्छ्रुत्वा वचनं केशवस्य पूर्वोक्तं** कृताञ्जलिः **सन्** वेपमानः **कम्पमानः किरीटी नमस्कृत्वा** भूयः **पुनरेव** आह **उक्तवान् कृष्णं** सगद्गदम् - **भयाविष्टस्य दुःखाभिघातात्, स्नेहाविष्टस्य च हर्षोद्भवाद् अश्रुपूर्णनेत्रत्वे सति श्लेष्मणा कण्ठावरोधः, ततश्च वाचोऽपाटवं[1] मन्दशब्दत्वं यत् स गद्गदः, तेन सह वर्तत इति सगद्गदम् , वचनमाहेति वचनक्रियाविशेषणमेतत्।** भीतभीतः **पुनःपुनर्भयाविष्टचेताः सन्** प्रणम्य **प्रह्वो भूत्वा आहेति व्यवहितेन सम्बन्धः। अत्रावसरे सञ्जयवचनं साभिप्रायम्। कथम्? द्रोणादिष्वर्जुनेन निहतेष्वजेयेषु चतुर्षु निराश्रयो दुर्योधनो निहत एवेति मत्वा धृतराष्ट्रो जयं प्रति निराशः सन् सन्धिं करिष्यति, ततः शान्तिरुभयेषां भविष्यतीति। तदपि नाश्रौषीद् धृतराष्ट्रः, भवितव्यवशात् ॥ ३५॥**

### अनुभूतिस्वरूपाचार्यविरचितगीताभाष्यटिप्पणम्

श्रीकृष्णो[ष्णेना]र्जुनाय विश्वरूपं दर्शितमिति तन्मध्ये पाण्डवजयः कौरवपराजयश्चार्जुनेन दृष्टः। तं दृष्ट्वा कृष्णं प्रणम्यार्जुन उवाचेत्येतद् धृतराष्ट्रं प्रति सञ्जयः कथयामास। तत् केनाभिप्रायेणेत्याशङ्क्याह—**अत्रावसरे सञ्जयवचनमित्यादिना॥** ३५॥

#### आनन्दगिरिकृतव्याख्या

**खल्वमोघा पुरुषमेकमत्यन्तसमर्थं घातयित्वैव निवर्तते। जन्मनाऽपि तस्य शङ्कनीयत्वमाह—** सूर्येति। **कुन्ती हि कन्यावस्थायां मन्त्रप्रभावं ज्ञातुमादित्यमाजुहाव, ततस्तस्यामेवावस्थायामयमुद्बभूव, तदाह—** कानीन इति। **एतदेवाभिप्रेत्य कर्णग्रहणमित्याह—** यत इति। **उक्तेष्वन्येषु च न त्वया शङ्कितव्यमित्याह—** मयेति॥ ३४॥

**पराजयभयात् करिष्यति सन्धिमिति बुद्ध्या सञ्जयो राज्ञे वृत्तान्तमुक्तवानित्याह—** सञ्जय इति। पूर्वोक्तं वचनं **कालोऽस्मीत्यादि। विश्वरूपदर्शनदशायामर्जुनस्य भगवता संवादवचनं किमिति सञ्जयो राज्ञे व्यजिज्ञपदित्याशङ्क्य, तदुक्तेस्तात्पर्यमाह—** अत्रेति। **तमेवाभिप्रायं प्रश्नद्वारा विशदयति—** कथमित्यादिना। **तर्हि सञ्जयवचनं श्रुत्वा किमिति राजा सन्धिं न कारयामासेति? तत्राह—** तदपीति॥ ३५॥

#### भाष्यार्कप्रकाशः

च जीवताऽस्य दुर्जयत्वं सिद्धम्। **सूर्यपुत्र इति**। सूर्यस्य प्रसिद्धतेजआदिगुणवत्त्वात् तत्पुत्रस्य कर्णस्यापि पितृसमानगुणवत्त्वेन दुर्जयत्वमिति भावः। कथमयं सूर्यपुत्रः? अत आह— **कानीन इति**। कन्याया अपत्यं कानीनः। 'कन्यायाः कनीन च' इति कनीनादेशः। सूर्यात् कन्यायां कुन्त्यां जात इत्यर्थः। अनेन च कुन्त्याः प्रथमं प्रभूतोऽयं महासत्त्व इति सूच्यते। जेतासीति लुट् प्रयोगः। जेष्यसीत्यर्थः॥ ३४॥

**एतदिति**। केशवस्य एतद् वचनं श्रुत्वा वेपमानः किरीटी कृताञ्जलिःसन् नमस्कृत्वा भीतभीतःसन् प्रणम्य कृष्णं प्रति सगद्गदं भूय एवाह। ननु सञ्जय उवाचेति वचनमत्र व्यर्थम् , कृष्णार्जुनप्रश्नोत्तरिकाया असमाप्तत्वादित्यत्राह— **अत्रेति। सञ्जयवचनमिति**। एतच्छ्रुत्वेत्यादिश्लोकरूपमित्यर्थः।

अयं भावः—'श्रीभगवानुवाच...जेतासि रणे सपत्ना'नित्यन्तं वाक्यजातम्। ततस्तु 'अर्जुन उवाचे'त्यर्जुनवचनमेव

१. 'अपाटवात्' इति पा.।

**अर्जुन उवाच—**

**[1]स्थाने हृषीकेश ! तव प्रकीर्त्या जगत् प्रहृष्यत्यनुरज्यते च।**
**रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घाः॥३६॥**

स्थान इति। स्थाने **युक्तम्। किं तत्?** तव प्रकीर्त्या **त्वन्माहात्म्यकीर्तनेन श्रुतेन, हे हृषीकेश ! यद् जगत्** प्रहृष्यति **प्रहर्षमुपैति, तत् स्थाने युक्तमित्यर्थः। अथवा विषयविशेषणं स्थान इति। युक्तो हर्षादिविषयः भगवान् , यत ईश्वरः सर्वात्मा सर्वभूतसुहृच्चेति। तथा** अनुरज्यतेऽ**नुरागं चोपैति, तच्च [स्थाने] विषये[2] इति व्याख्येयम्। किञ्च रक्षांसि** भीतानि **भयाविष्टानि दिशो** द्रवन्ति **गच्छन्ति, तच्च स्थाने विषये। सर्वे** नमस्यन्ति **नमस्कुर्वन्ति च** सिद्धसङ्घाः

अनुभूतिस्वरूपाचार्यटिप्पणम्

स्थाने इत्यव्ययं पदं युक्तत्ववाचीत्यङ्गीकृत्य क्रियाविशेषणपरतया व्याख्यातम्। इदानीं सप्तम्यन्तं स्थाने इति पदं गृहीत्वा विषयार्थत्वमाह— **अथवा विषयविशेषणमिति।** भो हृषीकेश! तव प्रकीर्त्या त्वयि विषये जगत् [प्र]हृष्यति, त्वय्यनुरागविषयेऽनुरागं चोपैतीति व्याख्येयः। रक्षांसि भीतानि सन्तीति यत् , तच्च त्वयि स्थाने भयविषये भयानके सत्येवेत्यर्थः। नमस्करणमपि त्वयि विषये॥३६॥

आनन्दगिरिकृतव्याख्या

**किं तदर्जुनो भगवन्तं प्रति सगद्गदं वचनमुक्तवानिति? तदाह—** अर्जुन इति। **विषयविशेषणत्वमेव व्यनक्ति—** युक्त इति। **भगवतो हर्षादिविषयत्वं युक्तमित्यत्र हेतुमाह—** यत इति। **तव प्रकीर्त्या हर्षवद् अनुरागं च गच्छति जगदित्याह—** तथेति। तच्चेत्य**नुरागगमनम्। रक्षःसु जगदेकदेशभूतेषु प्रतिपक्षेषु कुतो जगतो भगवति हर्षानुरागावित्याशङ्क्याह—** किञ्चेति। **इतश्च जगतो**

भाष्यार्कप्रकाशः

निबद्धव्यम् , न त्वनवसरं सञ्जयवचनमिति। ततश्च कृष्णार्जुनप्रश्नोत्तरिकाया मध्ये सञ्जयवचननिबन्धनं 'कालोऽस्मी'त्यारभ्य 'जेतासि रणे सपत्नानि'त्यन्तं श्रीकृष्णवाक्यं श्रुत्वा सन्धिं करिष्यति धृतराष्ट्र इत्याशया धृतराष्ट्रं प्रति सञ्जयो 'जेतासि रणे सपत्नानि'त्यन्तं ग्रन्थमुक्त्वा तूष्णीं बभूव क्षणकालम्। तथापि धृतराष्ट्रे सन्धावप्रवृत्ते सति पुनः सञ्जयो वक्तुं प्रववृत इत्येतद्वृत्तान्तसूचनाय सञ्जय उवाचेति सञ्जयवचनमिह निबद्धं भगवता बादरायणेनेति।

**नाश्रौषीदिति**। त्वदुक्तविधया सन्धिमहं करिष्यामीति नाङ्गीचकारेत्यर्थः। नन्विदमश्रवणं कस्य दोषः? अत आह— **भवितव्येति**। 'यद् भावि तद् भवत्येव, यदभावि न तद् भवेद्' इति न्यायात् भवितव्यं कुरुपाण्डवयुद्धमवश्यं भवत्येव, न त्वभवितुं शक्नोतीति भावः॥३५॥

**स्थान इति**। हे हृषीकेश! तव प्रकीर्त्या जगत् प्रहृष्यति, अनुरज्यते च। तदेतत् स्थाने। रक्षांसि भीतानि सन्ति दिशो द्रवन्ति। सर्वे सिद्धसङ्घाश्च नमस्यन्ति। तच्च स्थाने। **यद्वा** विषय इति शेषः। तद् भगवान् स्थाने विषयः। एवमुत्तरत्रापि। अत्र चत्वारि वाक्यानि। चतुर्ष्वपि स्थानेपदस्यानुवृत्तिः। तत्पदस्य विषयपदस्य च चतुर्ष्वपि शेष इति च बोध्यम्। तत् जगतः प्रहर्षणं स्थाने युक्तम्। तत् जगतोऽनुरञ्जनं च स्थाने युक्तम्। तद् रक्षसां पलायनं स्थाने। तत् सिद्धसङ्घनमस्करणं स्थाने। एवं तत् तस्माद् भगवान् स्थाने युक्तो विषय इति। कस्य भगवान् युक्तो विषयः? अत आह— **हर्षादीति**। आदिपदाद् अनुरागपलायननमस्कारग्रहणम्। हर्षादीनां विषयो **हर्षादिविषयः**। भगवतो हर्षादिविषयत्वं युक्तमित्यर्थः। नन्वीश्वरस्य परस्य कीर्तौ श्रुतायां कुतो जगतः प्रहर्षः? अत आह— **सर्वभूतसुहृदिति**। यतो भगवानीश्वरः सर्वभूतसुहृत् , तस्मात् स्वसुहृद ईश्वरस्य कीर्तिश्रवणाज्जगतः प्रहर्षणमुचितमेवेति भावः। इदं च

१. अयं श्लोको रक्षोघ्नमन्त्रत्वेन मन्त्रशास्त्रे प्रसिद्धः। स च नारायणाष्टाक्षरसुदर्शनास्त्रमन्त्राभ्यां सम्पुटितो ज्ञेय इति रहस्यमिति गूढार्थदीपिका। २. युक्ते विषये इत्यर्थः।

**कस्माच्च ते न नमेरन् महात्मन् ! गरीयसे ब्रह्मणोऽप्यादिकर्त्रे।**
**अनन्त ! देवेश ! जगन्निवास ! त्वमक्षरं सदसत् तत्परं यत् ॥ ३७॥**

**सिद्धानां समुदायाः कपिलादीनाम् , तच्च स्थाने॥ ३६ ॥**

[१]**भगवतो हर्षादिविषयत्वे हेतुं दर्शयति—** कस्माच्चेति। कस्माच्च **हेतोः** ते **तुभ्यं** न नमेरन् **न नमस्कुर्युः, हे महात्मन् !** गरीयसे **गुरुतराय यतो** ब्रह्मणो **हिरण्यगर्भस्यापि आदिकर्ता कारणम् अतस्तस्माद्** आदिकर्त्रे **कथमेते न नमस्कुर्युः? अतो हर्षादीनां नमस्कारस्य च स्थानं त्वमर्हो विषय इत्यर्थः। हे अनन्त ! देवेश ! हे जगन्निवास ! त्वमक्षरं तत् परं यद् वेदान्तेषु श्रूयते। किं तत्? सदसदिति।** [२]सद् **विद्यमानम् ,** असच्च **यत्र नास्तीति बुद्धिः। ते उपधानभूते सदसती यस्याक्षरस्य, यद्द्वारेण सदसदित्युपचर्यते। परमार्थतस्तु सदसतः परं तद् अक्षरम्। यदक्षरं वेदविदो वदन्ति तत् त्वमेव, नान्यदित्यभिप्रायः॥ ३७॥**

आनन्दगिरिकृतव्याख्या

**भगवति हर्षादि युक्तमित्याह—** सर्व इति॥ ३६ ॥

**उक्तेऽर्थे हेत्वर्थत्वेनोत्तरश्लोकमवतारयति—**भगवत इति। महात्मत्वम् **अक्षुद्रचेतस्त्वम्। गुरुतरत्वान्नमस्कारादियोग्यत्वमाह—** गुरुतरायेति। **तत्रैव हेत्वन्तरमाह—** यत इति। **महात्मत्वादिहेतूनामुक्तानां फलमाह—** अत इति। **तत्रैव हेत्वन्तराणि सूचयति—** हे अनन्तेति। **अनवच्छिन्नत्वं सर्वदेवनियन्तृत्वं सर्वजगदाश्रयत्वं च तव नमस्कारादियोग्यत्वे कारणमित्यर्थः। तत्रैव हेत्वन्तरमाह—** त्वमिति। **तत्र मानमाह—** यदिति। **कथमेकस्यैव सदसद्रूपत्वम्? तत्राह—** ते इति। **कथं सतोऽसतश्चाक्षरं प्रत्युपाधित्वम्? तदाह—** यद्द्वारेणेति। **तत्परं यदित्येतद् व्याचष्टे—** परमार्थतस्त्विति। **अनन्तत्वादिना भगवतो नमस्कारादियोग्यत्वमुक्तम्॥ ३७॥**

भाष्यार्कप्रकाशः

सर्वभूतसुहृत्त्वमुपलक्षणं सर्वभूतात्मत्वस्य। स्वसुहृदः स्वात्मभूतस्य चेश्वरस्य कीर्तिश्रवणाज्जगतः प्रहर्षणमनुरञ्जनं च युक्तमेवेति भावः। के ते सिद्धाः? अत आह— **कपिलादीनामिति॥ ३६ ॥**

**कस्मादिति**। हर्षादीनां विषयो हर्षादिविषयः, तत्त्वे। भगवत्कीर्तिश्रवणादिना जगतो हर्षादिलाभाद् भगवान् हर्षादिविषय इत्युच्यते। कथमेते न नमस्कुर्युः? अपि तु सर्वथाऽपि नमस्कुर्युरेवेत्यर्थः। **अत इति**। यस्मादेवं सर्वे त्वामेव नमस्कुर्युस्तस्मादित्यर्थः। त्वमेव हर्षादीनां नमस्कारस्य च स्थाने विषयः। स्थानेपदार्थमाह— **अर्ह इति**। प्रजापतिद्वारा सर्वजगत्स्रष्टुर्ब्रह्मणोऽपि प्रधानजीवस्य यः उत्पादकः, स हि सर्वाधिक इति हर्षादेर्युक्तविषय इत्यर्थः। एतेन क्षुद्रदेवतादीनां हर्षाद्यनर्हविषयत्वं सूचितम्।

यत् सदसत् , यच्च तत्परं तदक्षरं त्वमेवेत्यन्वयः। वर्तमानकालोपलक्षितं जगत् सत् , भूतं भविष्यच्चासत्। वर्तमान एव पुत्रादौ अस्तीति प्रत्येति लोकः; न तु नष्टे, नाप्युत्पत्स्यमाने। **यद्वा** व्यावहारिकं जगत् सत् , प्रातिभासिकं त्वसत् , रज्ज्वादौ सद्बुद्धिदर्शनात् , रज्जुसर्पादौ स्वाप्निकरथादौ चासद्बुद्धिदर्शनात्। **अथवा** स्थूलावस्थं कार्यं सत् , सूक्ष्मावस्थं कारणं त्वसत्। प्रपञ्चे जगदस्तीति प्रलये सूक्ष्मतया विद्यमानेऽपि जगति नास्तीति बुद्धिरस्त्येव प्राणिनाम्। तथा च प्रपञ्चदशापन्नप्रकृतिःसत् , प्रलयदशापन्नप्रकृतिरसदिति सिद्धम्।अनयोश्च सदसतोरक्षरोपाधिभूतत्वाद् अक्षरमपि सदसदित्युपचर्यत इत्याह— **ते इति**। **ते** सदसती **उपधानभूते** उपाधिभूते। वस्तुतोऽक्षरस्य निरुपाधिकत्वाद् **भूते** इत्युक्तम्। **यद्द्वारेणेति**। सदसदुपाधिद्वारेत्यर्थः। **उपचर्यते** लक्षणयोच्यते।

ननु अक्षरं लक्षणया सदसदित्युच्यत इत्युक्तम् , अमुख्यवृत्त्या किमित्युच्यते? अत आह— **परमार्थतस्त्विति**। उपचारं विनेत्यर्थः। **परं** विलक्षणं सदसतोर्जडत्वाद् दृश्यत्वाद् विकारित्वाद् अनित्यत्वाद् असत्यत्वाच्च, अक्षरस्य चिन्मात्रत्वाद् द्रष्टृत्वाद्

---

१. 'अतश्च भगवतः' इति रा.पा.। २. 'तत् सद् यद् विद्यमानम्' इति पा.।

**त्वमादिदेवः पुरुषः पुराणः त्वमस्य विश्वस्य परं निधानम्।**
**वेत्ताऽसि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप !॥ ३८॥**

**पुनरपि स्तौति—** त्वमिति। **त्वम्** आदिदेवः**, जगतः स्रष्टृत्वात् ,** पुरुषः **पुरि शयनात् ,** पुराणः **चिरन्तनः त्वमेवास्य विश्वस्य** परं **प्रकृष्टं** निधानं **निधीयतेऽस्मिञ्जगत् सर्वं महाप्रलयादाविति। किञ्च** वेत्ताऽसि **वेदिताऽसि सर्वस्यैव वेद्यजातस्य। यच्च** वेद्यं **वेदनार्हं** [१]**तच्चासि,** परं च धाम **परमं पदं वैष्णवम्। त्वया** ततं **व्याप्तं** विश्वं **समस्तम् , हे** अनन्तरूप ! **अन्तो न विद्यते तव रूपाणाम्॥ ३८॥**

आनन्दगिरिकृतव्याख्या

**सम्प्रति जगत्स्रष्टृत्वादिनाऽपि तद्योग्यत्वमस्तीति स्तुतिद्वारा दर्शयति—** पुनरपीति। **जगतः स्रष्टा पुरुषो हिरण्यगर्भ इति पक्षं प्रत्याह—** पुराण इति। **स्रष्टृत्वं निमित्तत्वमेवेति तटस्थेश्वरवादिनः, तान् प्रत्युक्तम्—** त्वमेवेति। महाप्रलयादा**वित्यादिपदमवान्तर-प्रलयार्थम्। ईश्वरस्योभयथा कारणत्वं सर्वज्ञत्वेन साधयति—** किञ्चेति। **वेद्यवेदितृभावेनाद्वैतानुपपत्तिमाशङ्क्याह—** यच्चेति। **मुक्त्यालम्ब-नस्य ब्रह्मणोऽर्थान्तरत्वं शङ्कित्वोक्तम्—**परं चेति। **यत् परमं पदं तदपि च त्वमेवेति सम्बन्धः। तस्य पूर्णत्वमाह—** त्वयेति। **व्याप्यव्यापकत्वेन भेदं शङ्कित्वा, कल्पितत्वात् तस्य मैवमित्याह—** अनन्तेति॥ ३८॥

भाष्यार्कप्रकाशः

अविकारित्वाद् नित्यत्वात् सत्यत्वाच्च सदसद्वैलक्षण्यमक्षरस्य। **यदक्षरमिति**। ब्रह्मविद्भिः यद् वस्तु अक्षरत्वेन निर्णीयोच्यते, तद् वस्तु , ब्रह्मेति यावत् , त्वमेव। अन्यत्तु त्वन्न भवतीत्यर्थः।

यत्तु **रामानुजः**— 'अक्षरं जीवः स त्वमेव, सत् कार्यावस्थप्रकृतिस्त्वमेव, असत् कारणावस्थप्रकृतिस्त्वमेव, ताभ्यां प्रकृति-पुरुषाभ्यां परं मुक्तजीवस्वरूपं यत् तदपि त्वमेव' इति। **तन्मन्दम्।** अनेकवाक्यकल्पनाया गौरवाद् , अप्रमाणत्वाच्च, 'वायुर्यमः' इति श्लोकार्थेन विभूतिनिर्देशेऽप्यन्यत्र तदभावेनात्रापि विभूतिनिर्देशकल्पनाया अनुचितत्वात् , स्वरूपकथनपरत्वादस्योत्तरश्लोकस्य च, बद्धात्ममुक्तात्मनोः स्वरूपैकत्वेन तद्भेदकल्पनस्यान्याय्यत्वाच्च॥ ३७॥

**त्वमिति**। त्वमादिदेवः पुराणः पुरुषोऽसि। त्वमस्य विश्वस्य परं निधानमसि। त्वं वेत्ताऽसि। त्वं वेद्यं च। त्वं परं धामासि। हे अनन्तरूप! त्वया विश्वं ततम्। देवानामादिः **आदिदेवः**, आदिश्चासौ देवश्चादिदेव इति वा। यो हि ब्रह्मादिस्तम्बपर्यन्तदेवमनुष्यादि-भेदभिन्नचराचरसर्वप्राणिजातस्याप्राणिजातस्य च जगतः स्रष्टा स आदिदेव ईश्वरः परमात्मा। अयमेव प्रत्यगात्माऽपीत्याह— **पुराणः पुरुष इति**। प्रत्यगात्माऽप्यनादिरेवेति सूचयितुमाह— **चिरन्तन इति**। न च परमात्मैक एवानादिरिति वाच्यम् ; परमात्मन एव सर्वव्यापिनः शरीरेषु प्रत्यग्रूपेण स्थितत्वादिति। नन्वस्य जगत्स्रष्टृत्वे जगन्नाशकः क इत्यत आह— **त्वमस्येति**। आदिपदादवान्तर-प्रलयसंग्रहः। सर्वं जगत् प्रलये स्वात्मन्युपसंहरतीति, लयहेतुरयमेवेत्यर्थः। अत्र जगत आत्मनि स्थितिकथनान्मध्येऽपि जगद् आत्मन्येव वर्तत इति स्थितिहेतुरप्ययमेवेति सिद्धम्।

**ननु** [२]प्रपञ्चप्रलययोर्द्वयोरपि यदि जगदात्मन्येव वर्तते, तर्हि को भेदः प्रपञ्चप्रलययोरिति चेत्? **उच्यते**— प्रपञ्चदशायामात्मनि जगत् प्रविभक्तनामरूपं स्फुटं वर्तते। प्रलये तु नामरूपविभागानर्हं सूक्ष्मत्वादस्फुटं निलीय, सुषुप्तावात्मन्यन्तःकरणवदिति।

**वेत्तेति**। सर्वसाक्षित्वेन सर्वज्ञत्वादिति भावः। **वेद्यमिति**। (ननु) घटादयो वेत्तुं शक्यत्वाद् वेद्याः, अयं तु वेत्तुं योग्यत्वाद् वेद्यः। संसारनिवर्तकत्वादस्य वेदनं योग्यम्। अत एव श्रुतिरपि – 'तमेवैकं जानथ आत्मान'मिति वदति। तस्मादयमेक एव मुमुक्षुभिः ज्ञेयः संसारनाशायेत्याह— **तदपीति**। ब्रह्मापीत्यर्थः। तस्यैव वेदनार्हत्वात्। न चैकस्यैव ज्ञानक्रियायां कर्मकर्तृविरोधो वेत्तेति वेद्यमिति चेति

१. 'तदपि त्वम् , परं' इति पा.। २. प्रपञ्चस्य स्थितिः प्रपञ्चपदेन गृह्यते।

**वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च।**
**नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते॥ ३९॥**
**नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ! ।**

**किञ्च—** वायुरिति। **वायुस्त्वं, यमश्च, अग्निः,** वरुणः **अपाम्पतिः,** शशाङ्कः **चन्द्रमाः,** प्रजापतिस्त्वं **कश्यपादिः,** प्रपितामहश्च **पितामहस्यापि पिता प्रपितामहः, ब्रह्मणोऽपि पितेत्यर्थः। नमो नमः** ते **तुभ्यम् अस्तु सहस्रकृत्वः, पुनश्च भूयोऽपि नमो नमस्ते। बहुशः नमस्कारक्रियाभ्या(सा)वृत्तिगणनं कृत्वसुचोच्यते। पुनश्च भूयोऽपीति श्रद्धाभक्त्यतिशयाद् अपरितोषमात्मनो दर्शयति॥ ३९॥**

**तथा—** नम इति। **नमः** पुरस्तात् **पूर्वस्यां दिशि तुभ्यम् , अथ** पृष्ठतस्ते **पृष्ठतोऽपि च ते नमोऽस्तु ते** सर्वत

अनुभूतिस्वरूपाचार्यटिप्पणम्

सहस्रकृत्व इति कृत्वसुचः प्रत्ययार्थमाह—[**बहुश इति**।] आवृत्तिगणनं कृत्वसुच्प्रत्ययेनोच्यते, ['संख्यायाः] क्रियाभ्यावृत्तिगणने कृत्वसुच्' इति **पाणिनिस्मरणादित्यर्थः** ॥ ३९॥

**इति श्रीगीताभाष्यटिप्पणे एकादशोऽध्यायः॥**

आनन्दगिरिकृतव्याख्या

**तस्य सर्वात्मत्वे हेत्वन्तरमाह—** किञ्चेति। कश्यपादि**रित्यादिशब्देन विराड्दक्षादयो गृह्यन्ते।** पितामहो **ब्रह्मा, तस्य पिता सूत्रात्माऽन्तर्यामी चेत्याह—** ब्रह्मणोऽपीति। **सर्वा देवतास्त्वमेवेत्युक्ते फलितमाह—** नम इति। **सहस्रकृत्वः इति कृत्वसुचो विवक्षितमर्थमाह—** बहुश इति। **पुनरुक्तितात्पर्यमाह—** पुनश्चेति। **श्रद्धाभक्त्योरतिशयात् कृतेऽपि नमस्कारे** परितोषाभावो **बुद्धेः** आत्मनो **ऽलम्प्रत्ययराहित्यम्। तद्दर्शनार्थं पुनरुक्तिरित्यर्थः॥ ३९॥**

**विधान्तरेण भगवन्तं स्तुत्या नमस्कुर्वन्नभिमुखीकरोति—** तथेति। **यस्यां दिशि सवितोदेति सा पूर्वा दिगुच्यते। तस्यां**

भाष्यार्कप्रकाशः

वाच्यम् ; जगतो वेत्ता, प्रमातृभिर्वेद्यश्चेत्यदोषात्। **वैष्णवं** विष्णोः परमात्मनः स्वरूपभूतं धाम तेजः स्थानमिति वा। पद्यते गम्यत इति पदं स्वरूपं, स्थानं वा। मुक्तजीवानां प्रवेशभूमित्वाद् ब्रह्मणः स्थानत्वव्यपदेशः॥ ३८॥

**वायुरिति**। वाय्वादयः प्रजापत्यन्ता विभूतयः। प्रपितामह इति माहात्म्यकथनम्। तत्र पितामहस्तु विभूतिरेव। यदि तु ब्रह्मा यन्नाभिकमलात्प्रसूतः स पद्मनाभो विग्रहविशेष इह विवक्षित इत्युच्येत, तर्हि प्रपितामहः पद्मनाभोऽपि विभूतिरेव। ब्रह्मणि तस्यापि कल्पितत्वात्।

ननु सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्प्रत्ययस्य विहितत्वात् , सहस्रकृत्वः इत्यनेन बहुशो नमस्कारक्रियाभ्यावृत्तेरुक्तत्वात् पुनश्च भूयोऽपीत्यादिर्व्यर्थ इत्याशङ्क्य समाधत्ते— **बहुश इति**। यद्यपितथाप्योः शेषः। यद्यपि बहुशो नमस्कारक्रियाभ्यावृत्तिगणनं कृत्वसुचा उच्यते, तथापि पुनश्च भूयोऽपीति श्रद्धाभक्त्यतिशयादात्मनोऽपरितोषं दर्शयति। **यद्वा** श्रद्धाभक्त्यतिशयाद् उच्यत इति शेषः। तेन चात्मनोऽपरितोषं दर्शयतीति। **अपरितोषं** नमस्कारक्रियायामसन्तुष्टिम्। तृप्त्यभावमिति यावत्। बहुवारं नमस्कुर्वतोऽप्यर्जुनस्य पुनःपुनस्तं नमस्कुर्यामित्येव बुद्धिरास, तृप्त्यभावाद् , यथा वा बहुवारं प्रेक्षमाणस्यापि कामिनीं कामुकस्य पुनः पुनस्तां पश्येयमित्येव बुद्धिः, तद्वदिति भावः॥ ३९॥

**नम इति**। **पृष्ठतः** पश्चिमदिशीत्यर्थः। हे सर्व! ते सर्वत एव नमोऽस्तु। पूर्वपश्चिमातिरिक्तदिक्षट्कग्रहणं सर्वतःशब्दादिह। हे

**अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः॥४०॥**
**सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण! हे यादव! हे सखेति।**
**अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वाऽपि॥४१॥**

एव **सर्वासु दिक्षु सर्वत्र स्थिताय, हे सर्व !** अनन्तवीर्यामितविक्रमः- **अनन्तं वीर्यमस्य, अमितो विक्रमोऽस्य;** वीर्यं **सामर्थ्यम्।** विक्रमः **पराक्रमः; वीर्यवानपि कश्चिच्छत्रुवधादिविषये न पराक्रमते, मन्दपराक्रमो वा; त्वं त्वनन्तवीर्यः अमितविक्रमश्चेत्यनन्तवीर्यामितविक्रमः,** सर्वं **समस्तं जगत्** समाप्नोषि **सम्यग् एकेनात्मना व्याप्नोषि यतः** [१]ततः **तस्माद्** असि **भवसि सर्वः। त्वया विनाभूतं न किञ्चिदस्तीत्यर्थः॥४०॥**

**यतोऽहं त्वन्माहात्म्यापरिज्ञानादपराद्धः[२], अतः—** सखेति। सखा **समानवयाः इति** मत्वा **ज्ञात्वा विपरीत-बुद्ध्या** प्रसभम् **अभिभूय प्रसह्य यदुक्तम्— 'हे कृष्ण ! हे यादव ! हे सखे'ति च,** अजानता **अज्ञानिना मूढेन। किमजानतेत्याह—** महिमानं **माहात्म्यं तव** इदम् **ईश्वरस्य विश्वरूपम्। तवेदं महिमानमजानतेति [३]वैयधिकरण्येन**

आनन्दगिरिकृतव्याख्या

**व्यवस्थितं सर्वं त्वमेव। तस्मै** ते **तुभ्यं नमोऽस्त्वित्याह—** नम इति। अथ**शब्दः समुच्चये। पश्चादपि स्थितं सर्वं त्वमेव। तस्मै** ते **तुभ्यं नमोऽस्त्वित्याह—** अथेति। **किं बहुना? यावत्यो दिशस्तत्र सर्वत्र यद् वर्तते तदशेषं त्वमेव। तस्मै तुभ्यं प्रह्वीभावः स्यादित्याह—** नमोऽस्त्विति। **फलितं सर्वात्मत्वं सूचयति—** हे सर्वेति। **वीर्यविक्रमयोर्न पौनरुक्त्यमित्याह—** वीर्यमित्यादिना। **वीर्यवतो विक्रमा-व्यभिचाराद् अर्थपौनरुक्त्यमाशङ्क्याह—**वीर्यवानिति। **भगवति लोकतो विशेषमाह—**त्वं त्विति। **उक्तं सर्वात्मत्वं प्रपञ्चयति—** सर्वमिति। **सप्रपञ्चत्वं वारयति—** त्वयेति॥४०॥

**अज्ञाननिमित्तमपराधं क्षमापयति—** यत इति। **इदंशब्दार्थमाह—** विश्वरूपमिति। **न हि इदमित्यस्य महिमानमित्यस्य च सामानाधिकरण्यं, लिङ्गव्यत्ययादित्याह—** तवेति। **पाठान्तरसम्भावनायां सामानाधिकरण्योपपत्तिमाह—** तवेत्यादिना। **यदुक्तवानस्मि तदहं क्षामये त्वामिति सम्बन्धः॥४१॥**

भाष्यार्कप्रकाशः

सर्व! सर्वात्मकेत्यर्थः। सर्वतः स्थितायेति शेषः। ते नम इति वा अन्वयः। ननु कुतोऽहं सर्वः? अत आह— **अनन्तेति**। यत इति शेषः। अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि तत् सर्वोऽसि। अनन्तं वीर्यं यस्य सोऽनन्तवीर्यः। अमितो विक्रमो यस्य सोऽमितविक्रमः। द्वयोः कर्मधारयः। अमितविक्रमपदवैयर्थ्यं वारयति— **वीर्यवानपीति**। मन्दपराक्रमो वा भवेदिति शेषः। **एकेनात्मनेति**। स्वस्वरूपेणेत्यर्थः। चैतन्यरूपेणेति यावत्। **व्याप्नोषीति**। चैतन्यस्य सर्वव्यापित्वादिति भावः। आत्मभूतेन त्वया सर्वस्य व्याप्तत्वेन सर्वात्मा त्वं सर्वशब्दवाच्योऽसीत्यर्थः। **अत इति**। सर्वव्यापित्वात् तवेत्यर्थः॥४०॥

**सखेति। अपराद्ध इति**। अपराधं कृतवानस्मि। इदमित्यस्य महिमानमित्यस्य च क्लीबपुंस्त्वभेदेन भिन्नलिङ्गत्वादाह— **वैयधिकरण्येनेति। इदम्** विश्वरूपं तव त्वदीयं भवति। तं विश्वरूपत्वाख्यं महिमानमजानतेति इदम्महिमपदयोः वैयधिकरण्येन सम्बन्धः। तवेदं विश्वरूपं तदेव महिमानमिति व्यस्तरूपके तु सामानाधिकरण्यमपि सिध्येदेवेति बोध्यम्। तवेदं महिमानमजानता मया सखेति मत्वा प्रमादात् प्रणयेन वाऽपि प्रसभं हे कृष्ण! हे यादव! हे सखे ! इति यदुक्तम् । हे सखे इतीत्यत्र हे सख इति [इति] भवितव्ये हे सखेति [इति] वचनमार्षम्। **सामानाधिकरण्यमिति।** इदम्महिमशब्दयोरेकाश्रयवृत्तित्वम्। इमं महिमानमिति पदयोः

१. 'अतः' इति रा.पा. भाति। २. 'अपराधी' इति पा.। ३. इदं विश्वरूपं तव महिमानम् अजानता इति योजना। इदमिति न साक्षान्महिमविशेषणमिति भावः।

**यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु।**
**एकोऽथवाप्यच्युत! तत् समक्षं तत् क्षामये त्वामहमप्रमेयम्॥४२॥**
**पिताऽसि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्।**

**सम्बन्धः। 'तवेमम्' इति पाठो यद्यस्ति तदा सामानाधिकरण्यमेव। मया** प्रमादाद् **विक्षिप्तचित्ततया, प्रणयेन वाऽपि।** प्रणयो **नाम स्नेहनिमित्तो** [१]**विश्रम्भः, तेनापि कारणेन यदुक्तवानस्मि॥ ४१॥**

यच्चेति। **यच्च** अवहासार्थं **परिहासप्रयोजनाय** असत्कृतः **परिभूतः** असि **भवसि। क्व? विहारशय्यासनभोजनेषु —विहरणं** विहारः **पादव्यायामः, शयनं** शय्या, आसनम् **आस्थायिका,** भोजनम् **अदनमित्येतेषु विहारशय्यासन-भोजनेषु** एकः **परोक्षः सन्** असत्कृतोऽसि **परिभूतोऽसि, अथवाऽपि हे अच्युत ! तत् समक्षम्। तच्छब्दः क्रियाविशेषणार्थः। प्रत्यक्षं वाऽसत्कृतोऽसि,** तत् **सर्वमपराधजातं** क्षामये **क्षमां कारये त्वामहम्** अप्रमेयं **प्रमाणातीतम्॥४२॥**

**यतस्त्वम्—** पिताऽसीति। पिताऽसि **जनयिताऽसि** लोकस्य **प्राणिजातस्य** चराचरस्य **स्थावरजङ्गमस्य। न**

आनन्दगिरिकृतव्याख्या

**यदयुक्तमुक्तं तत् क्षन्तव्यमित्येव न, किन्तु यत् परीहासार्थं क्रीडादिषु त्वयि तिरस्करणं कृतं तदपि सोढव्यमित्याह—** यच्चेति। विहरणं **क्रीडा व्यायामो वा।** शयनं **तल्पादिकम्।** आसनम् **आस्थायिका सिंहासनादेरुपलक्षणम्।** एतेषु **विषयभूतेष्विति यावत्। एकशब्दो रहसि स्थितमेकाकिनं कथयतीत्याह—**परोक्षः सन्निति। **प्रत्यक्षं परोक्षं वा** तद् **असत्करणं परिभवनं यथा स्यात् तथा यन्मया त्वमसत्कृतोऽसि, तत् सर्वमिति योजनामङ्गीकृत्याह—**तच्छब्द इति। **क्षमा कारयितव्येत्यत्रापरिमितत्वं हेतुमाह—**अप्रमेयमिति॥४२॥

[२]**वाचनिकं मदीयमपराधजातं त्वया क्षन्तव्यमित्युक्तम्। इदानीं मदीयोऽपराधो न त्वया ग्रहीतव्यः, गृहीतोऽपि सोढव्यः इत्याह—** यत इति। **गुणाधिक्यात् पूजार्हत्वम्। धर्माधर्मात्मज्ञानसम्प्रदायप्रवर्तकत्वेन शिक्षयितृत्वाद् गुरुत्वम्। गुरूणामपि** [३]**सूत्रादीनां**

भाष्यार्कप्रकाशः

विशेषणविशेष्यभावेनान्वय इति यावत्। **प्रमादो**ऽनवधानता, चित्तैकाग्र्याभाव इत्याह— **विक्षिप्तचित्ततेति। प्रविलम्भो** वञ्चना। मया यदुक्तमिति कर्मणिप्रयोगं कर्तरिप्रयोगेण विनिमयति— **यदुक्तवानस्मीति।** अहमिति शेषः॥ ४१॥

**यच्चेति।** मयैकः सन् त्वमपहासार्थं विहारशय्यासनभोजनेषु असत्कृतोऽसीति यच्च, अथवा, हे अच्युत ! तत्समक्षम् असत्कृतोऽसीति यत् , तत् समस्तम् अप्रमेयं त्वामहं क्षामये। **आस्थायिका** उपवेशनम्। **समक्ष**मिति वक्ष्यमाणत्वादेकशब्दः परोक्षवाचीत्याह— **एकः परोक्ष इति।** एकत्वस्यैव परोक्षत्वप्रयोजकत्वादिति भावः। गृहे स एको वर्तत इत्यनेन गृहवर्तिपुरुषस्य पुरुषान्तरप्रत्यक्षत्वाभावो ह्येकत्वेन सूच्यते। द्वयोः सत्त्वे तु परस्परं प्रत्यक्षत्वं स्यादित्येकत्वमेव परोक्षत्वप्रयोजकम्। **तदि**त्यस्य तथेत्यर्थ इत्याह— **क्रियाविशेषणेति। अप्रमेयम्** अपरिच्छिन्नम्। यन्मया प्रणयादिना लाघवाद् , हे यादवेत्यादिकमुक्तम् , यच्च मया विहारादिषु तव पारोक्ष्ये परिहासार्थम् असत्कृतं, यच्च तव समक्षम् असत्कृतं तत् सर्वं क्षमस्वेति त्वां प्रार्थय इत्यर्थः॥ ४२॥

**पितेति।** ननु त्वादृश एवाहमपीति किं मत्क्षमाप्रार्थनया तवेत्यत आह— **पितेति।** त्वं चराचरस्यास्य लोकस्य पिताऽसि, पूज्यश्चासि, गरीयान् गुरुश्चासि। हे अप्रतिमप्रभाव! लोकत्रयेऽपि त्वत्समो न ह्यस्ति। अभ्यधिकोऽन्यः कुतः?। अतिशयेन गुरुः **गरीयान्** गुरूणामपि गुरुरित्यर्थः। गुरुर्गरीयानित्यस्य गुरूणामपि ये गुरवो ब्रह्मादयस्तेषामपि गुरुः परमगुरुः, यस्येतरो गुरुर्नास्ति स इत्यर्थः। चतुर्मुखस्यापि वेदोपदेष्टृत्वादिति भावः। **यद्वा** अतिशयेन महत्तरः, 'महतो महीयान्' इति श्रुतेः।

---

१. 'प्रविलम्भो' इति रा.पा. भाति। 'विप्रलम्भो' इति स्यात्। २.'वाचनिकं...इत्याह— यत इति।' इति क्वचिन्न दृश्यते। ३. सूत्रादीनां हिरण्यगर्भादीनामित्यर्थः।

**न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव!॥४३॥**
**तस्मात् प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम्।**

**केवलं त्वमस्य जगतः पिता,** पूज्यश्च **पूजार्हो यतो गुरुः,** गरीयान् **गुरुतरः। कस्माद् गुरुतरस्त्वमित्याह— न (च)** त्वत्समः **त्वत्तुल्यः अन्योऽस्ति। न हीश्वरद्वयं सम्भवति, अनेकेश्वरत्वे व्यवहारानुपपत्तेः। त्वत्सम एव तावदन्यो न सम्भवति, कुत एवान्योऽभ्यधिकः स्यात्** लोकत्रयेऽपि **सर्वस्मिन्?** अप्रतिमप्रभाव! **प्रतिमीयते यया सा प्रतिमा, न विद्यते प्रतिमा यस्य तव प्रभावस्य स त्वमप्रतिमप्रभावः, हे अप्रतिमप्रभाव ! निरतिशयप्रभावेत्यर्थः॥४३॥**

**यत एवम्—** तस्मादिति। **तस्मात्** प्रणम्य **नमस्कृत्य,** प्रणिधाय **प्रकर्षेण नीचैर्धृत्वा** कायं **शरीरं** प्रसादये

आनन्दगिरिकृतव्याख्या

**गुरुत्वाद् गरीयस्त्वम्। तदेव प्रश्नद्वारा साधयति—** कस्मादिति। **ईश्वरान्तरं तुल्यं भविष्यतीत्याशङ्क्याह—** न हीति। **ईश्वरभेदे प्रत्येकं स्वातन्त्र्यात् तदैकमत्ये हेत्वभावात् , नानामतित्वे चैकस्य सिसृक्षायामन्यस्य सञ्जिहीर्षासम्भवाद् व्यवहारलोपादयुक्तमीश्वरनानात्वमित्यर्थः। अभ्यधिकासत्त्वं कैमुतिकन्यायेन दर्शयति—** त्वत्सम इति। **तत्र हेतुमवतार्य व्याकरोति—** अप्रतिमेत्यादिना॥४३॥

[1]**निरतिशयप्रभावं हेतूकृत्याप्रतिमेत्यादिना, प्रसादये प्रणामपूर्वकं त्वामित्याह—**यत इति। **प्रसादनानन्तरं भगवता कर्तव्यं**

भाष्यार्कप्रकाशः

**न त्वत्सम इति**। ननु कुतो मत्समो नास्ति, ब्रह्मविष्णुरुद्राणां त्रयाणां परस्परं समत्वाद् , अत आह— **न हीति**। ईश्वरस्य किमीश्वरान्तरं समः? यद्वा जीवः? नाद्यः, ईश्वरद्वयाभावात् ; नान्त्यः, जीवस्यासर्वज्ञत्वादसर्वकर्तृत्वादिभ्यश्च। तस्मादसम एवेश्वरः। ब्रह्मविष्णुरुद्रनामभिस्तु स एक एवेश्वरो व्यवह्रियते, चतुर्मुखरुद्रौ तु जीवावेव। एक एव विष्णुर्मायी मायावच्छिन्नचैतन्यलक्षण ईश्वरः। अतो नास्य समं वस्त्वस्ति। ननु ब्रह्मविष्णुरुद्रगणपतिकुमारवाय्वादित्यमहेन्द्रादयोऽनेके ईश्वराः सन्तु, को दोषः? तत्राह— **अनेकेति**। यदि बहवः ईश्वरास्तर्हि एकस्य यदा सृष्टीच्छा, तदैवान्यस्य संहारेच्छा स्यात्। न चेष्टापत्तिः, प्रपञ्चस्यैवासम्भवप्रसङ्गात्। तथा च प्रपञ्चसृष्ट्यादिसर्वव्यवहाराणामनुपपत्तिः स्यात्।

न[ननु] चैवमेकेश्वरत्वे कथं चतुर्मुखादीनां बहूनामीश्वरत्वव्यवहार इति चेत्? **उच्यते**। तत्तच्चतुर्मुखादिशरीरावच्छिन्नसर्वज्ञ-चैतन्यदृष्ट्येति। ये तु चतुर्मुखादिसङ्घातेऽहमभिमानिनस्ते जीवा एव, यस्तेषामान्तरः कूटस्थः स त्वीश्वरः। स चैक एवेति चतुर्मुखादीनां कूटस्थदृष्ट्या ईश्वरत्वं, सङ्घाताभिमानिप्रमातृदृष्ट्या तु जीवत्वमिति भावः। न चैवं सर्वेऽपि चैतन्यदृष्ट्या ईश्वरा एवेति वाच्यम् ; इष्टापत्तेः। चैतन्यमेव हि सर्वत्रापीश्वर इति, साक्षीति, कूटस्थ इति, आत्मेति चोच्यते। अत एव हि सर्वात्मत्वमीश्वरस्य।

**प्रतिमीयत इति**। सदृशीक्रियत इत्यर्थः। **प्रतिमा** उपमेत्यर्थः। उपमानमिति यावत्। एवमप्रतिमप्रभावत्वादेव ईश्वरस्य निरतिशयत्वं, सर्वातिशयत्वं च॥४३॥

**तस्मादिति**। यस्मादेवं सर्वोत्कृष्टस्त्वं तस्मादित्यर्थः। तस्मात् प्रणम्य, कायं प्रणिधाय, ईशमीड्यं त्वामहं प्रसादये। हे देव! पुत्रस्यापराधं पितेव, सख्युरपराधं सखेव, प्रियायाः अपराधं प्रिय इव ममापराधं सोढुमर्हसि।

'प्रियाया अर्हसी'ति पठितव्ये 'प्रियायार्हसी'त्यकारलोपपाठ आर्षः। **त्वां प्रसादये** त्वत्प्रसादं प्रार्थयामीत्यर्थः। **प्रसादः** प्रसन्नता। पितेत्यादिदृष्टान्तत्रयं साभिप्रायम्। अ(यम)भिप्रायश्च— जगतः स्रष्टृत्वात् पालकत्वाच्चेश्वरस्य पितृत्वम् , कार्यत्वात् पाल्यत्वाच्चार्जुनस्य पुत्रत्वम्। तथा करणप्रेरकत्वादिना ईश्वरस्य सर्वभूतसखत्वात् सखित्वम् , अर्जुनस्य च तत्प्रीतिकारित्वात् सखित्वम्। निरतिशयप्रेमास्पदत्वाद् आनन्दमयेश्वरस्य प्रियत्वम् , तत्परतन्त्रत्वादर्जुनस्य प्रियात्वमिति। एवं च पितृत्वात् सखित्वात्

१. 'निरतिशयप्रभावत्वं हेतुं कृत्वा प्रतिप्रसादये' इति पा.।

**पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव! सोढुम्॥ ४४॥**
**अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे।**
**तदेव मे दर्शय देव ! रूपं प्रसीद देवेश ! जगन्निवास !॥ ४५॥**
**किरीटिनं गदिनं चक्रहस्तम् इच्छामि त्वां द्रष्टुमहं तथैव।**
**तेनैव रूपेण चतुर्भुजेन सहस्रबाहो ! भव विश्वमूर्ते !॥ ४६ ॥**

**प्रसादं कारये त्वामहम्** ईशम् **ईशितारम्** ईड्यं **स्तुत्यम्।** त्वं पुनः **पुत्रस्यापराधं पिता यथा क्षमते सर्वम् , सखेव च सख्युरपराधम् , यथा वा प्रियः प्रियायाः अपराधं क्षमते, एवम् अर्हसि, हे देव !** सोढुं **प्रसहितुं क्षन्तुमित्यर्थः॥ ४४॥**

अदृष्टेति। अदृष्टपूर्वं **न कदाचिदपि दृष्टपूर्वमिदं विश्वरूपं तव मयाऽन्यैर्वा, तदहं दृष्ट्वा हृषितोऽस्मि, भयेन च प्रव्यथितं मनो मे। अतस्तदेव** मे **मम दर्शय, हे देव ! रूपं यद् मत्सखम्। प्रसीद देवेश !** जगन्निवास ! **जगतो निवासो जगन्निवासः, हे जगन्निवास !॥ ४५॥**

**किञ्च—** किरीटिनमिति। किरीटिनं **किरीटवन्तं तथा** गदिनं **गदावन्तं चक्रहस्तम्** इच्छामि त्वां **प्रार्थये त्वां द्रष्टुमहं** तथैव **पूर्ववदित्यर्थः। यत एवं तस्मात्** तेनैव रूपेण **वसुदेवपुत्ररूपेण चतुर्भुजेन, सहस्रबाहो ! वार्तमानिकेन विश्वरूपेण, भव विश्वमूर्ते ! उपसंहृत्य विश्वरूपं तेनैव रूपेण वसुदेवपुत्ररूपेण भवेत्यर्थः॥ ४६ ॥**

आनन्दगिरिकृतव्याख्या

**प्रार्थयते—** त्वं पुनरिति। **प्रिय इव प्रियायाः इतीवकारोऽनुषज्यते। प्रियायार्हसीति छान्दसः सन्धिः।** क्षन्तुं **मदपराधजातमिति शेषः ॥४४॥**

**हेतूक्तिपूर्वकं विश्वरूपोपसंहारं प्रार्थयते—** अदृष्टेति। हृषितो **हृष्टस्तुष्ट इति यावत्। भयेन तद्धेतुविकृतदर्शनेनेत्यर्थः॥ ४५॥**

**तदेव दर्शयेत्युक्तम् , किं तदित्यपेक्षायामाह—**किरीटिनमिति। **चक्रं हस्ते यस्य तमिति व्युत्पत्तिं गृहीत्वाऽऽह—**चक्रेति। **मदीयेच्छा फलपर्यन्ता कर्तव्येत्याह—** यत इति। **चतुर्भुजत्वे कथं सहस्रबाहुत्वम्? तत्राह—** वार्तमानिकेनेति। **सति विश्वरूपे कथं पूर्वरूपभाक्त्वम्? तत्राह—** उपसंहृत्येति॥ ४६ ॥

भाष्यार्कप्रकाशः

प्रियत्वाच्च त्वं ममापराधं क्षन्तुमर्हसीति।

अत्र - प्रियस्त्वं [१]प्रियाय मे इति **रामानुज**व्याख्या। न युक्ता सा, पितेव पुत्रस्येति दृष्टान्तानुरोधेन [२]प्रियस्य ममेति वक्तव्यत्वात्। न च - मे प्रियाय मम प्रीत्यर्थमित्यर्थ इति - वाच्यम् ; तथापि दृष्टान्ताननुरोधात्। न च दृष्टान्तेऽपि पुत्रस्य प्रियाय पितेवेति वाच्यम् ; पुत्रस्य प्रियाय पुत्रस्यापराधं पितेवेति पुत्रशब्दस्यावृत्तिप्रसङ्गात्। स्वप्रीत्यर्थमेव पिता पुत्रापराधं सहते, न तु पुत्रप्रीत्यर्थमिति सिद्धान्तात्। 'आत्मनस्तु कामाय सर्वं प्रियं भवती'ति श्रुतेः॥ ४४॥

**अदृष्टेति। हृषितो** हृष्टः॥ ४५॥

**किरीटिनमिति।** अहं तथैव किरीटिनं गदिनं चक्रहस्तं त्वां द्रष्टुमिच्छामि। हे सहस्रबाहो! विश्वमूर्ते! तेनैव चतुर्भुजेन रूपेणोपलक्षित इति शेषः। भव। यद्यपि वसुदेवपुत्ररूपं द्विभुजमेव, तथापि चतुर्भुजत्वस्य कादाचित्कत्वात् तत्रापि तथोक्तमिति बोध्यम् ॥ ४६ ॥

१. 'प्रियायार्हसि' इत्यत्र प्रियायेति चतुर्थ्यन्ततया तन्मते पदच्छेदः। २. 'पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियस्यार्हसि' इति हि तथा सति वक्तव्यम्।

**श्रीभगवानुवाच—**

**मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात्।**
**तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम्॥४७॥**
**न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः।**
**एवंरूपः शक्य[१] अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर॥४८॥**

**अर्जुनं भीतमुपलभ्य उपसंहृत्य विश्वरूपं प्रियवचनेनाश्वासयन् श्रीभगवानुवाच—** मयेति। **मया** प्रसन्नेन**—** प्रसादो **नाम त्वय्यनुग्रहबुद्धिः, तद्वता प्रसन्नेन मया तव, हेऽर्जुन ! इदं** परं रूपं **विश्वरूपं दर्शितम्** आत्मयोगाद् **आत्मन ऐश्वर्यस्य सामर्थ्यात्,** तेजोमयं **तेजःप्रायं** विश्वं **समस्तम्** अनन्तम् **अन्तरहितम् आदौ भवम्** आद्यं **यद् रूपं** मे **मम** त्वदन्येन **त्वत्तोऽन्येन केनचिन्न दृष्टपूर्वम्॥४७॥**

**आत्मनो मम रूपदर्शनेन कृतार्थ एव त्वं संवृत्तः इति तत् स्तौति—** न वेदेति। **न** वेदयज्ञाध्ययनैः **चतुर्णामपि वेदानामध्ययनैः यथावद् यज्ञाध्ययनैश्च। वेदाध्ययनैरेव यज्ञाध्ययनस्य सिद्धत्वात् पृथग् यज्ञाध्ययनग्रहणं यज्ञविज्ञानोपलक्षणार्थम्। तथा** न दानैः **तुलापुरुषादिभिः, न च** क्रियाभिः **अग्निहोत्रादिभिः श्रौतादिभिः, नापि** तपोभिरुग्रैः **चान्द्रायणादिभिः** [२]उग्रैः **घोरैः** एवंरूपो **यथादर्शितं विश्वरूपं यस्य सोऽहमेवंरूपः** शक्यो **न शक्योऽहं** नृलोके **मनुष्यलोके द्रष्टुं** त्वदन्येन **त्वत्तोऽन्येन, कुरुप्रवीर !॥४८॥**

आनन्दगिरिकृतव्याख्या

**अर्जुनेन 'स्थाने हृषीकेशे'त्यादिनोक्तस्य भगवतो वचनमवतारयति—** अर्जुनमिति। **भगवत्प्रसादैकोपायलभ्यं तद्दर्शनमित्याशयेनाह—** मयेति॥४७॥

**तच्छब्देन प्रकृतं दर्शनं परामृश्यते। वेदाध्ययनात् पृथग् यज्ञाध्ययनग्रहणं पुनरुक्तेरयुक्तमित्याशङ्क्याह—** न वेदेति। **न च वेदाध्ययनग्रहणादेव यज्ञविज्ञानमपि गृहीतमध्ययनस्यार्थावबोधान्तत्वादिति वाच्यम् ; तस्याक्षरग्रहणान्ततया** [३]**वृद्धैः साधितत्वादिति भावः। श्लोकपूरणार्थमसंहितकरणम्।** त्वत्तोऽन्येन **मदनुग्रहविहीनेनेति शेषः॥४८॥**

भाष्यार्कप्रकाशः

**मयेति**। हे अर्जुन! प्रसन्नेन मया आत्मयोगात् तवेदं तेजोमयं विश्वमनन्तमाद्यं परं तद्रूपं दर्शितम्। मे यद्रूपं त्वदन्येन न दृष्टपूर्वम्। **आत्मयोग** ईश्वरसामर्थ्यं, तस्मात्॥४७॥

**नेति**। हे कुरुप्रवीर! नृलोके एवंरूपोऽहं त्वदन्येन द्रष्टुं वेदयज्ञाध्ययनैर्न शक्यः, दानैर्न शक्यः, क्रियाभिश्च न शक्यः, उग्रैस्तपोभिर्न शक्यः। मनुष्याणां तपआदिभिर्मद्विश्वरूपसाक्षात्कारो न स्यात्। तवैकस्यैव मदनुग्रहाज्जातः। एवं यतस्ततस्त्वं कृतार्थ एव जात इति भावः।

ननु वेदाध्ययनादेव वेदगतयज्ञभागाध्ययनमपि सिद्धमिति किमर्थं पृथग् यज्ञाध्ययनमुक्तमित्याशङ्क्य , यज्ञविज्ञानोपलक्षणार्थं तदिति परिहरति— **वेदाध्ययनैरेवेति**। यज्ञानां विशेषेण ज्ञानं विज्ञानं तस्योपलक्षणार्थमिति। वेदाध्ययनैः, यज्ञविज्ञानैश्चेत्यर्थः। यज्ञविज्ञानं नाम यथा यथा यज्ञाः कर्तव्यास्तथा तथा तद्विशेषज्ञानम्। नृशब्दग्रहणाद् देवानां ब्रह्मादीनामेवेदं विश्वरूपं द्रष्टुं शक्यमिति ज्ञायते॥४८॥

---

१. शक्य अहमिति सन्धिरार्षः। २. क्वचिन्न। ३. पञ्चपादिकाविवरणादौ अध्ययनविधेः अक्षरग्रहणपर्यन्तत्वं साधितम्। द्र.पं.वि.तृतीयवर्णकम्।

**मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ् ममेदम्।**
**व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य॥४९॥**

**सञ्जय उवाच—**

**इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः।**
**आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा॥५०॥**

**अर्जुन उवाच—**

**दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन! ।**
**इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः॥५१॥**

मा ते व्यथेति। मा ते व्यथा **मा भूत् ते भयम् , मा च** विमूढभावो **विमूढचित्तता,** दृष्ट्वा **उपलभ्य रूपं घोरम्** ईदृग् **यथादर्शितं ममेदम्।** व्यपेतभीः **विगतभयः प्रीतमनाश्च सन्** पुनः **भूयः** त्वं तदेव [मे] **चतुर्भुजं शङ्खचक्रगदाधरं तवेष्टं रूपमिदं प्रपश्य ॥४९॥**

इत्यर्जुनमिति। इति **एवम् अर्जुनं वासुदेवः तथाभूतं वचनमुक्त्वा** स्वकं **वसुदेवगृहे जातं रूपं** दर्शयामास **दर्शितवान्** भूयः **पुनः।** आश्वासयामास च **आश्वासितवांश्च भीतमेनं भूत्वा पुनः** सौम्यवपुः **प्रसन्नदेहो महात्मा॥५०॥**

दृष्ट्वेदमिति। **दृष्ट्वेदं मानुषं रूपं मत्सखं प्रसन्नं तव सौम्यं, जनार्दन !** इदानीम् **अधुना अस्मि** संवृत्तः **सञ्जातः। किम्?** सचेताः **प्रसन्नचित्तः** प्रकृतिं **स्वभावं गतश्चास्मि॥५१॥**

आनन्दगिरिकृतव्याख्या

**विश्वरूपदर्शनमेवं स्तुत्वा यद्यस्माद् दृश्यमानाद् बिभेषि, तर्हि तदुपसंहरामीत्याह—** मा ते व्यथेति। [१]**बहुविधमनुभूतत्वमभिप्रेत्य ईदृगित्युक्तम्। इदमिति प्रत्यक्षयोग्यत्वम्।**[२]॥४९॥

**तदिदं वृत्तं राज्ञे सूतो निवेदितवानित्याह—** सञ्जय इति। तथाभूतं वचनं **मया प्रसन्नेनेत्यादि। चतुर्भुजं** रूपम्। **किं तस्य रूपस्य परिचितपूर्वस्य प्रदर्शनेन? [तत्राह—**आश्वासयामासेति।**] प्रसन्नदेहत्वेन चार्जुनं प्रत्याश्वासनं भगवतो युक्तमित्यत्र हेतुमाह—**महात्मेति ॥५०॥

**एवं भगवदाश्वासितः सन्नर्जुनस्तं प्रत्युक्तवानित्याह—** अर्जुन इति॥५१॥

भाष्यार्कप्रकाशः

**मेति।** ईदृग्घोरं ममेदं रूपं दृष्ट्वा ते व्यथा मास्तु। विमूढभावश्च मास्तु। त्वं व्यपेतभीः प्रीतमनाश्च सन् तदेवेदं मे रूपं **प्रपश्य** प्रकर्षेण पश्य॥४९॥

**इतीति।** वासुदेवः इति तथा अर्जुनं प्रत्युक्त्वा, भूयः स्वकं रूपं दर्शयामास। महात्मा पुनः सौम्यवपुर्भूत्वा भीतमेनम् आश्वासयामास च। महात्मा वासुदेव इति वा॥५०॥

**दृष्ट्वेति।** हे जनार्दन ! इदानीं तव सौम्यं मानुषमिदं रूपं दृष्ट्वा सचेताः प्रकृतिं गतः संवृत्तोऽस्मि॥५१॥

१. 'बहुतिथमनुभूतत्वमभिप्रेत्य तदेवेत्युक्तम्' इति पा.। २. एतदुत्तरं 'तदेवेत्युक्तम् इदमिति' इति पाठः क्वचित्। तत्र - 'तदेवेत्युक्तं विवृणोति— चतुर्भुजमिति।' इति पाठः संभाव्यते।

**श्री भगवानुवाच—**

**सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम।**
**देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः॥५२॥**
**नाहं वेदैर्न तपसा न दानेन न चेज्यया।**
**शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा॥५३॥**
**भक्त्या त्वनन्यया शक्य[1] अहमेवंविधोऽर्जुन ! ।**
**ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप !॥५४॥**

सुदुर्दर्शमिति। सुदुर्दर्शं **सुष्ठु दुःखेन दर्शनमस्येति सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम, देवा अप्यस्य मम रूपस्य** नित्यं **सर्वदा** दर्शनकाङ्क्षिणो **दर्शनेप्सवोऽपि न त्वमिव दृष्टवन्तः, न द्रक्ष्यन्ति चेत्यभिप्रायः॥५२॥**

**कस्मात्?—** नाहमिति। **नाहं** वेदैः **ऋग्यजुःसामाथर्ववेदैश्चतुर्भिरपि, न** तपसा **उग्रेण चान्द्रायणादिना, न** दानेन **गोभूहिरण्यादिना, न च** इज्यया **यज्ञेन पूजया वा शक्यः** एवंविधो **यथादर्शितप्रकारो द्रष्टुम् , दृष्टवानसि मां यथा त्वम्॥ ५३॥**

**कथं पुनः शक्य इति? उच्यते—** भक्त्येति। **भक्त्या तु , किंविशिष्टयेत्याह—** अनन्यया **अपृथग्भूतया, भगवतो ऽन्यत्र पृथग् न कदाचिदपि या भवति सा त्वनन्या भक्तिः, सर्वैरपि करणैर्वासुदेवादन्यन्नोपलभ्यते यया साऽनन्या**

आनन्दगिरिकृतव्याख्या

**उपास्यत्वाय विश्वरूपं स्तोतुं भगवदुक्तिमुत्थापयति—** भगवानिति। **त्वद्व्यतिरिक्तानामिदं रूपं द्रष्टुमशक्यमित्येतद् विशदयति—** देवा अपीति॥ ५२॥

**दर्शनोपायाभावाद् दुर्दर्शत्वमिति शङ्कते—** कस्मादिति। **वेदादिषूपायेषु सत्स्वपि भगवानुक्तरूपो न शक्यो द्रष्टुमित्याह—**नाह-मिति। **तर्हि दर्शनायोग्यत्वाद् द्रष्टुमशक्यत्वमित्याशङ्क्याह—** दृष्टवानिति॥ ५३॥

**केनोपायेन तर्हि द्रष्टुं शक्यो भगवानिति पृच्छति—** कथमिति। **शास्त्रीयज्ञानद्वारा तद्दर्शनं सफलं सिध्यतीत्याह—** उच्यत इति। **न भक्तिमात्रं तत्र हेतुरिति तुशब्दार्थं स्फुटयति—** किमित्यादिना। **अनन्यां भक्तिमेव व्यनक्ति—** सर्वैरिति ॥५४॥

भाष्यार्कप्रकाशः

**सुदुर्दर्शमिति**। त्वं यन्मम रूपं [दृष्टवानसि,] तदिदं रूपम् , नृणामिति शेषः, सुदुर्दर्शम्। यतो देवा अपि नित्यमस्य रूपस्य दर्शनकाङ्क्षिणः[2] ॥५२॥

**नेति**। त्वं मां यथा दृष्टवानसि तथा द्रष्टुमेवंविधोऽहं देवैर्न [वेदैर्न] शक्यः। तथा एवंविधोऽहं वेदैर्द्रष्टुं न शक्य इति वा। तपसा न शक्यः, दानेन न शक्यः, इज्यया च न शक्यः॥ ५३॥

**भक्त्येति**। हे परन्तप! अर्जुन! एवंविधोऽहं ज्ञातुं द्रष्टुं तत्त्वेन प्रवेष्टुं च, ज्ञातुं तत्त्वेन द्रष्टुं प्रवेष्टुं चेति वा, तत्त्वेन ज्ञातुं द्रष्टुं प्रवेष्टुं चेति वा। **अनन्यया** भगवदेकपरयेत्यर्थः। भगवद्भक्तानां भगवदनुग्रहाद् भगवद्विश्वरूपपरिज्ञानदर्शने मोक्षश्च इत्येते भवन्ति। न तु वैदिकास्तपस्विनो दातारः सोमयाजिनो वा मद्रूपज्ञानादौ प्रभवन्तीति परमार्थः। **तत्त्वेनेति**। यथावदित्यर्थः।

---

१. सन्धिरार्षः। २. तथा च मनुष्याणां सुदुर्दर्शत्वं कैमुतिकन्यायसिद्धमिति भावः।

**मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः।**
**निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव !॥५५॥**

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
विश्वरूपदर्शनयोगो नाम एकादशोऽध्यायः॥११॥

**भक्तिः; तया भक्त्या शक्योऽहम्** एवंविधो **विश्वरूपप्रकारः,** हे **अर्जुन ! ज्ञातुं शास्त्रतः, न केवलं ज्ञातुं शास्त्रतः,** द्रष्टुं **च साक्षात्कर्तुं** तत्त्वेन **तत्त्वतः,** प्रवेष्टुं **च मोक्षं च गन्तुम्, परन्तप !॥५४॥**

**अधुना सर्वस्य गीताशास्त्रस्य सारभूतोऽर्थो निःश्रेयसार्थोऽनुष्ठेयत्वेन समुच्चित्योच्यते—** मत्कर्मकृदिति। मत्कर्मकृद् **मदर्थं कर्म मत्कर्म, तत् करोतीति मत्कर्मकृत्,** मत्परमः- **करोति भृत्यः स्वामिकर्म, न त्वात्मनः परमा प्रेत्य गन्तव्या गतिरिति स्वामिनं प्रतिपद्यते, अयं तु मत्कर्मकृन्मामेव परमां गतिं प्रतिपद्यत इति मत्परमः। अहं परमः परा गतिर्यस्य सोऽयं मत्परमः, तथा** मद्भक्तो **मामेव सर्वप्रकारैः सर्वात्मना सर्वोत्साहेन भजत इति मद्भक्तः,** सङ्गवर्जितो **धनमित्रपुत्रकलत्रबन्धुवर्गेषु सङ्गवर्जितः, सङ्गः प्रीतिः स्नेहः, तद्वर्जितः,** निर्वैरो [१]**निर्गतवैरः, सर्वभूतेषु शत्रुभावरहितः आत्मनोऽत्यन्तापकारप्रवृत्तेष्वपि।** यः **ईदृशो मद्भक्तः स मामेति। अहमेव तस्य परा गतिर्नान्या** [२]**कदाचिद् भवति। अयं तवोपदेशः इष्टो मयोपदिष्टः, हे पाण्डवेति॥५५॥**

इति श्रीपरमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
श्रीमद्भगवद्गीताभाष्ये विश्वरूपदर्शनयोगो नामैकादशोऽध्यायः॥११॥

आनन्दगिरिकृतव्याख्या

**भक्त्या त्विति विशेषणाद् अन्येषामहेतुत्वमाशङ्क्याह—** अधुनेति। समुच्चित्य **सङ्क्षिप्य, पुञ्जीकृत्येति यावत्। मत्कर्मकृदित्युक्ते मत्परमत्वमार्थिकमिति पुनरुक्तिरित्याशङ्क्याह—** करोतीति। **भगवानेव परमा गतिरिति निश्चयवतस्तत्रैव निष्ठा सिध्यतीत्याह—** तथेति। **न तत्रैव सर्वप्रकारैर्भजनं धनादिस्नेहाकृष्टत्वादित्याशङ्क्याह—** सङ्गेति। **द्वेषपूर्वकानिष्टाचरणं** वैरम्। **अनपकारिषु तदभावेऽपि भवत्येवापकारिष्विति शङ्कित्वाऽऽह—** आत्मन इति। **एतच्च सर्वं सङ्क्षिप्यानुष्ठानार्थमुक्तम्। एवमनुतिष्ठतो भगवत्प्राप्तिरवश्यम्भाविनीत्युपसंहरति—** अयमिति।

भाष्यार्कप्रकाशः

**ननु** केऽमी भक्ताः? कीदृशमनीभिर्दृश्यं विश्वरूपमिति चेत्? **उच्यते**— ईश्वरं परोक्षत्वेन ये प्रपद्यन्ते, आत्मत्वेन प्रपद्यन्ते ये, ते च द्विविधा अपि भक्ता इहोच्यन्ते। तत्रात्मतत्त्वविदो 'मायिकमिदं विश्वरूप'मिति विलासार्थं तत् पश्यन्ति। परोक्षेश्वरज्ञास्तु विश्वरूपमत्यद्भुतं भगवत इति साभिलाषमत्यादरेण पश्यन्तीति विवेकः॥ ५४॥

**मत्कर्मेति। निःश्रेयसार्थो** मोक्षफलकः। **समुच्चित्य** निश्चित्य। **मत्कर्मकृद्** ईश्वरप्रीत्यर्थं नित्यनैमित्तिकादिविहितकर्मकारी। आसंन्यासं कर्मणाम् अत्यक्तव्यत्वादिति भावः। ननु भृत्योऽपि स्वाम्यर्थं कर्म युद्धादिकं करोति, न त्वात्मार्थम्, अत आह— **मत्परम इति**। या प्रेत्य गन्तव्या सा परमा गतिः। भृत्यस्तु प्रेत्य न स्वामिनं प्रतिपद्यत इति भृत्यस्य न स्वामी परमा गतिः। भक्तस्तु प्रेत्य भगवन्तमेतीति भगवान् भक्तस्य परमा गतिः। एवं यतोऽहं भक्तस्य परमा गतिः, अतो भक्तो मत्परमः इत्युच्यते।

अनेन च श्लोकेन त्वमपि मद्भक्त्यादिविशिष्टःसन् मदर्थं युद्धाख्यं नित्यं कर्म कुरु, मत्परमो भविष्यसि, मामेवैष्यसि,

१. 'निर्गतवैरोऽतः' इति पा.। २. 'गतिः काचित्' इति पा.।

आनन्दगिरिकृतव्याख्या

**तदेवं भगवतो विश्वरूपस्य सर्वात्मनः सर्वज्ञस्य सर्वेश्वरस्य मत्कर्मकृदित्यादिन्यायेन क्रममुक्तिफलमभिध्यानमभिवदता तत्पदवाच्योऽर्थो व्यवस्थापितः॥५५॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते श्रीमद्भगवद्गीताशाङ्करभाष्यव्याख्याने एकादशोऽध्यायः॥११॥**

भाष्यार्कप्रकाशः

ज्ञानोत्पत्तिद्वारा मोक्ष्यस इति यावत्। इत्युपदेशोऽर्जुनस्य सूच्यते॥५५॥

**इति श्रीबेल्लङ्कोण्डोपनामकरामकविकृतौ श्रीमद्भगवद्गीताशाङ्करभाष्यार्कप्रकाशे विश्वरूपसंदर्शनयोगो नाम एकादशोऽध्यायः॥११॥**

श्री हयग्रीवार्पणमस्तु

DO NOT PRINT THIS PAGE

ॐ श्रीपरमात्मने नमः

# ॥ अथ द्वादशोऽध्यायः ॥

**अर्जुन उवाच —**

**एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।**
**ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १ ॥**

**[1]द्वितीयप्रभृतिष्वध्यायेषु विभूत्यन्तेषु परमात्मनो ब्रह्मणोऽक्षरस्य [2]विध्वस्तसर्वोपाधिविशेषस्योपासनमुक्तम्। सर्वयोगैश्वर्यसर्वज्ञानशक्तिमत्सत्त्वोपाधेरीश्वरस्य तव चोपासनं तत्र तत्रोक्तम्। विश्वरूपाध्याये तु ऐश्वरमाद्यं समस्तजगदात्मरूपं विश्वरूपं त्वदीयं दर्शितमुपासनार्थमेव त्वया। तच्च दर्शयित्वोक्तवानसि— 'मत्कर्मकृत्' (भ.गी.११.५५) इत्यादि। अतोऽहमनयोरुभयोः पक्षयोर्विशिष्टतरबुभुत्सया त्वां पृच्छामीत्यर्जुन उवाच—**एवमिति। **एवमिति अतीता-**

### आनन्दगिरिकृतव्याख्या

**'अशोच्यान्' इत्यादिषु विभूत्यध्यायावसानेषु अध्यायेषु निरुपाधिकस्य ब्रह्मणो ज्ञेयत्वेनानुसन्धानमुक्तमिति वृत्तं कीर्तयति—** द्वितीयेति। **अतिक्रान्तेषु तत्तदध्यायेषु सोपाधिकस्यापि ब्रह्मणो ध्येयत्वेन प्रतिपादनं कृतमित्याह—** सर्वेति। **सर्वस्यापि प्रपञ्चस्य** योगो **घटना जन्मस्थितिभङ्गप्रवेशनियमनाख्या,** तत्र ऐश्वर्यं **सामर्थ्यं, तेन सर्वत्र ज्ञेये प्रतिबन्धविधुरया ज्ञानशक्त्या विशिष्टस्य सत्त्वाद्युपहितस्य भगवतो ध्यानं तत्र तत्र प्रसङ्गमापाद्य मन्दमध्यमयोरनुग्रहार्थमुक्तमित्यर्थः। एकादशे वृत्तमनुवदति—** विश्वरूपेति। **अध्यायान्ते भगवदुपदेशमनुवदति—**तच्चेति। **यथाधिकारं तारतम्योपेतानि साधनानि नियन्तुमध्यायान्तरमवतारयन्नादौ प्रश्नमुत्थापयति—**अत इति।

### श्रीबेल्लंकोण्डरामरायकविविरचितः

### भाष्यार्कप्रकाशः

वृत्तं कीर्तयित्वा तत्र प्रश्नसङ्गतिमर्जुनस्य दर्शयति— **विभूत्यन्तेष्विति**। विभूत्यध्यायान्तेष्वित्यर्थः। दशमाध्यायावसानेष्विति यावत्। **अध्यायेष्विति** नवस्विति भावः। विध्वस्ताः निरस्ताः सर्वे उपाधिविशेषा यस्य तस्य **विध्वस्तसर्वोपाधिविशेषस्य** निरुपाधिकस्य, शुद्धस्येति यावत्। **तव चेति**। मायाशबलितब्रह्मण इत्यर्थः। **उभयोरिति**। निर्गुणसगुणब्रह्मोपासनयोरित्यर्थः। न च निर्गुणसगुणोपासनयोः फलभेदाद् अन्यतरस्योत्कृष्टत्वं सुबोधमिति वाच्यम् ; फले भेदाभावाद् , उभयस्यापि सायुज्यफलश्रवणात्। न च निर्गुणोपासनस्यैव सायुज्यं फलमिति वाच्यम् ; मत्कर्मकृदित्यादिना सगुणोपासनस्यापि सायुज्यफलकथनादित्यभिप्रेत्याह— **मत्कर्मकृदित्याद्युक्तवानसीति। अत इति।** फलैकत्वादित्यर्थः। ये भक्ता एवं सततयुक्ताः सन्तः त्वां पर्युपासते, ये चाप्यव्यक्तमक्षरं पर्युपासते, तेषां मध्ये के योगवित्तमाः? अयमाशयः— सर्वत्र लोके आस्तिकानां प्रवृत्तिर्निवृत्तिश्चेति मार्गद्वयमेवास्ति। तथा च दर्शितं भाष्यारम्भे भाष्यकृद्भिः। तदेव मार्गद्वयम् – 'लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ। ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्॥' इति श्रीकृष्णेनाप्युक्तम्। निवृत्तिर्ज्ञानयोगः, प्रवृत्तिस्तु कर्मयोग इति विवेकः। इयमेव प्रवृत्तिः कर्मफलासङ्गादित्यागद्वारा कर्मयोगीभूय मुमुक्षून् संसारात् तारयति, तदत्यागात्तु संसारिणः संसारयतीति बोध्यम्। इदं च मार्गद्वयं भिन्नाधिकारिविषयम् , एकस्य युगपन्मार्गद्वयप्रवृत्त्यसम्भवात्। तत्र ज्ञानिनां निवृत्तिर्विषयः– 'ज्ञानयोगेन साङ्ख्याना'मित्युक्तत्वात्। 'वेदाविनाशिनं नित्यं य एनमजमव्ययम्। कथं स पुरुषः पार्थ कं घातयति हन्ति कम्॥' इति ज्ञानिनः सर्वकर्माभावस्योक्तत्वाच्च। अमी च ज्ञानिनः संन्यासिन एव, तेषामेव कर्मपरित्यागसम्भवात्। अग्निहोत्रादिकं सर्वं कर्म परित्यज्य व्रजति हि परिव्राट्। कर्मिणस्तु परिशेषाद् ब्रह्मचारिगृहस्थवानप्रस्थाः। अमीषां प्रवृत्तिरेव विषयः। एवं स्थिते ये निर्गुणं प्रत्यगभिन्नं परमात्मानमुपासते, तेषां ज्ञानिनां संन्यासिनां

१. 'द्वितीयाध्यायप्रभृतिषु विभूत्यन्तेषु अध्यायेषु' इति पा.। २. 'विध्वस्तसर्वविशेषणस्य' इति पा.।

भाष्यार्कप्रकाशः

विश्वरूपोपासनमिदं विधीयते किम्? यद्वा कर्मिणाम्? नाद्यः, निर्गुणोपासकानां सगुणोपासनाया असम्भवात्। मत्कर्मकृदित्यादिना विश्वरूपोपासकानां भक्तानां कर्मविधानाच्च। न हि संन्यासिनां कर्म सम्भवति। तस्मात् कर्मिणामेव विश्वरूपोपासनम्। एवं कर्मयोगिनां विश्वरूपादिसगुणोपासकानामिह भक्तशब्देन व्यवहारः। अन्येषां तु ज्ञानिशब्देनेति विवेकः। न च कर्मिभ्यो ज्ञानिभ्यश्चान्ये एव भक्ता इति वाच्यम्; 'ये वर्णाश्रमधर्मस्थास्ते भक्ताः केशवं प्रति' इति स्मरणात्। 'लोकेऽस्मिन् द्विविधा निष्ठे'ति निष्ठाद्वैविध्यस्यैवेहाप्युक्तत्वेन निष्ठात्रैविध्यकल्पनस्याप्रमाणत्वात्। तस्मात् स्ववर्णाश्रमधर्माचरणमेव भक्तिः। न च पूज्येषु प्रीतिर्भक्तिरिति वाच्यम्; पूज्यप्रीति-कारित्वस्यापि धर्म एवान्तर्भावात्। न च सगुणस्य साकारस्य भगवत उपासनं भक्तिरिति वाच्यम्; तस्या अपि कर्मस्वेवान्तर्भावात्। ब्राह्मणानां विहितेषु षट्कर्मसु देवार्चनं ह्येकं कर्म। तस्मान्न कर्मयोगाद् भिन्नो भक्तियोगः। न च - बहिः प्रतिमादौ देवार्चनस्य कर्मत्वेऽपि, मनसि भगवद्विग्रहार्चनस्याकर्मत्वमिति - वाच्यम्; तस्यापि मानसिकक्रियात्वेन कर्मत्वात्। अहमिदानीं भगवतः स्नानं कल्पयामि, प्राग्दन्तधावनं कल्पितम्, अथ वस्त्रबन्धनं कल्पयिष्यामीत्येवं हि बहिरिव मनस्यप्यनुसन्धत्ते भक्तः। एवं मानसिकैरपि अनेकै-र्वस्त्राभरणाद्युपकरणैः साध्यस्य भगवन्मानसिकार्चनस्य कथमकर्मत्वम्? कारकव्यापारतन्त्रं हि कर्म। तस्माद् भक्तियोगः कर्मयोगा-दनन्य इति स्थितम्। अनयोश्च योगयोः कः उत्तम इति पृच्छत्यर्जुनः।

**ननु** कर्मयोगाज्ज्ञानयोग उत्तम इति कृष्णेनोक्तम्, अर्जुनेनावधारितं च, 'ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन' इत्युक्तत्वादर्जुनेन। ज्ञानयोगिनां साक्षान्मोक्षः, कर्मयोगिनां तु ज्ञानद्वारेति फलभेदोऽप्युक्तः, चित्तशुद्धेरेव कर्मफलत्वात्। ततश्च योगद्वारा योगिनश्चोत्कर्षसिद्धेर्ज्ञानयोगिन उत्कर्ष इति ज्ञात एवांशे नास्त्यर्जुनस्य प्रश्नावकाशः। न च कर्मिभ्यो ज्ञानिनामुत्कृष्टत्वेऽर्जुनेन ज्ञातेऽपि भक्तेभ्यो ज्ञानिनामुत्कृष्टत्वं न ज्ञातमिति वाच्यम्; कर्मिणामेव भक्तत्वात् इति चेत्? **उच्यते**— कर्मयोगाद् भक्तियोगो ऽनतिरिक्त इति नार्जुनो वेत्ति। ज्यायसी चेदिति प्रश्नात् प्राग् भक्तियोगस्तु नोक्तः। ततश्च सगुणब्रह्मोपासनं विना ये फलाभिसन्धिं त्यक्त्वा यज्ञादिकर्माणि कुर्वन्ति, तेभ्यः कर्मिभ्य उत्तमा भवन्तु ज्ञानिनः। ये सगुणब्रह्मोपासनं कुर्वन्त एव कर्मयोगे स्थिताः, तेभ्यः किं ज्ञानिनः उत्तमाः, उत नेति संशयादर्जुनस्य प्रश्न उपपद्यत इति। न च सगुणब्रह्मोपासन एव स्थिताः कर्मयोगे त्वस्थिता एते कर्मिभ्योऽन्ये भक्ता इति वाच्यम्; मत्कर्मकृदिति कर्मकरण एव भक्तिमार्गस्योपसंहृतत्वात्। एवं सततयुक्ता इत्येवंशब्देना-तीतानन्तरश्लोकेन मत्कर्मकृदित्यादिना प्रोक्तस्यैवार्थस्य परामर्शनात्। न हीश्वराभक्त ईश्वरार्थं कर्म करोति, स्वामिभक्तस्यैव भृत्यस्य स्वामिकार्यकरणदर्शनात्। नापि ज्ञानी कर्म करोति, त्यक्तसर्वक्रियत्वात् संन्यासिनस्तस्य। तस्मात् कर्मयोग्येव भक्तः। एतदज्ञानात्त्वर्जुनस्य प्रश्नः। **यद्वा** कर्मयोगाज्ज्ञानयोग उत्तम इति श्रीकृष्णेनादावुक्तमर्थं श्रीविश्वरूपसंदर्शनसंक्षुब्धान्तरङ्गतया विस्मृत्यार्जुनः पृच्छति— 'ये विश्वरूपोपासकास्त्वत्कर्मकृतो भक्तास्तेऽपि त्वामेव यान्ति, 'मत्कर्मकृदि'ति, 'यः स मामेती'ति चोक्तत्वात्। ये च शुद्धं प्रत्यगभिन्नं ब्रह्मोपासते, तेऽपि त्वामेव यान्ति, 'अनन्यचेताः सततं यो मां स्मरति नित्यशः। तस्याहं सुलभः पार्थ' इत्यादिदर्शनात्। अतो नानयोः फलतो वैलक्षण्यं ज्ञातुं शक्यते। तस्मादहं पृच्छामि भक्तज्ञानिनोर्मध्ये क उत्तमः' इति।

**ननु** भगवताऽपि कथमुक्तं कर्मणः साक्षात् कैवल्यं 'यः स मामेती'ति चेत्? **मैवम्**; यः स ज्ञानद्वारा मामेतीति भगवदाशयात्। तदाशयापरिज्ञानात्त्वर्जुनस्य प्रश्नः।

यत्तु **रामानुजः** - विश्वरूपेश्वरोपासका भक्ताः, प्रत्यगात्मोपासकास्तु ज्ञानिनः, तदुभयतारतम्यजिज्ञासया प्रश्नोऽर्जुनस्येति। **तन्मन्दम्।** किमयं प्रत्यगात्मा जीवः, उतेश्वरः? आद्ये - जीवाद् ईश्वरस्योत्कृष्टत्वेन जीवोपासकाद् ईश्वरोपासकस्योत्कृष्टत्वसिद्धेः प्रश्नस्यैवानवकाशः। द्वितीये - स्वमतत्यागः, परमतप्रवेशश्च।

**किञ्च** अन्योपासकानां तदन्यप्राप्तिर्विरुद्धा। जीवोपासकानां त्वीश्वरप्राप्तिः वक्ष्यते, 'ये त्वक्षरं पर्युपासते तेऽपि मामेव प्राप्नुवन्ती'ति वक्ष्यमाणत्वात्। न च 'मां प्राप्नुवन्ती'त्यस्य मत्समानाकारमसंसारिणमात्मानं प्राप्नुवन्तीत्यर्थ इति वाच्यम्; मुख्यार्थ-परित्यागे कारणाभावात्, लक्षणाश्रयणस्याप्रमाणत्वात्। न हि मामिति शब्दो मत्समानाकारमित्यमुमर्थं शक्त्या बोधयतुमीष्टे। तस्माद् ब्रह्मप्राप्तिश्रवणाद्, ब्रह्मोपासकानामेव ब्रह्मप्राप्तिसम्भवाद् अक्षरोपासका एते ब्रह्मोपासका एव। तच्च प्रत्यगभिन्नमेव।

**नन्तरश्लोकेनोक्तमर्थं परामृशति 'मत्कर्मकृदि'त्यादिना**[१]। **एवं** सततयुक्ताः **नैरन्तर्येण भगवत्कर्मादौ यथोक्तेऽर्थे समाहिताः सन्तः प्रवृत्ता इत्यर्थः; ये** भक्ताः **अनन्यशरणाः सन्तः** त्वां **यथादर्शितं विश्वरूपं** पर्युपासते **ध्यायन्ति, ये चान्येऽपि त्यक्तसर्वैषणाः संन्यस्तसर्वकर्माणो यथाविशेषितं ब्रह्म** अक्षरं **निरस्तसर्वोपाधित्वाद्** अव्यक्तम् **अकरण-गोचरम् ; यद्धि लोके करणगोचरं तद् व्यक्तमुच्यते, अञ्जेर्धातोस्तत्कर्मकत्वात् ; इदं त्वक्षरं तद्विपरीतं** [२]**शिष्टैश्च**

## अनुभूतिस्वरूपाचार्यविरचितगीताभाष्यटिप्पणम्

'अञ्जू व्यक्तिश्लक्ष्ण[म्रक्षण]कान्तिगतिषु' इत्यस्य धातोर्विपूर्वस्य **तत्कर्मकत्वादिति** व्यक्तिवाचकत्वात्। विशेषा-वगतिरेव ह्यभिव्यक्तिरित्यर्थः॥ १॥

### आनन्दगिरिकृतव्याख्या

**सोपाधिकध्यानस्य निरुपाधिकज्ञानस्य चोक्तत्वादित्यर्थः।** एवंशब्दार्थमुक्त्वा **तमनूद्य 'सततयुक्ताः' इति भागं विभजते—**एवमिति। **'ये भक्ताः' इत्यनूद्य व्याचष्टे—** अनन्येति। **मन्दमध्यमाधिकारिणः सगुणशरणानुक्त्वा, निर्गुणनिष्ठानुत्तमाधिकारिणो निर्दिशति—** ये चेति। यथाविशेषितम् **अनिर्देश्यं सर्वत्रगमचिन्त्यं कूटस्थमित्यादिवक्ष्यमाणविशेषणविशिष्टमित्यर्थः। न क्षरति, अश्नुते वेत्यक्षरम्। 'अव्यक्तम्' इत्येतद् व्याचष्टे—** निरस्तेति। **करणागोचरत्वं व्यतिरेकद्वारा स्फोरयति—** यद्धीति। **यथाविशेषितमित्युक्तं स्पष्टयति—** शिष्टैश्चेति।

### भाष्यार्कप्रकाशः

**किञ्च** ईश्वरस्य सोपाधिकं निरुपाधिकं चेति रूपद्वयमस्ति, तत्र सच्चिदानन्दलक्षणं चैतन्यं निरुपाधिकं रूपम् , विश्वरूपादिकं तु सोपाधिकमित्यस्यार्थस्य सम्प्रतिपन्नत्वात् , सोपाधिकेश्वरोपासकानां [निरुपाधिकेश्वरोपासकानां] चोभयेषामपीश्वरोपासकत्वेन साम्याद् , अमीषां के योगवित्तमाः इत्यर्जुनस्य जिज्ञासया प्रश्न उपपद्यते, न त्वन्यथेत्येवं प्रश्नोपपत्तेश्चाक्षरमिह ब्रह्मैव, न तु तद्भिन्नः प्रत्यगात्मा। न च सोपाधिकोपासकानां न साक्षान्मोक्ष इति सिध्येदेव विवेकोऽर्जुनस्य प्रश्नं विनाऽपीति वाच्यम् ; 'यः स मामेती'ति सोपाधिकोपासकस्यापि साक्षान्मोक्षस्योक्तत्वात्। न च विरुद्धार्थः कथमुक्तो भगवतेति वाच्यम् ; स कर्मी मां ज्ञानद्वारैतीति श्रीकृष्णाशय इति पूर्वमेवोक्तत्वात्।

**ननु** यदि विश्वरूपोपासकानां न साक्षान्मोक्षः, तर्हि भगवता कृष्णेनार्जुनप्रश्नानन्तरमपि, 'न भक्तानामस्ति साक्षान्मोक्षः, परन्तु ज्ञानिनामेवे'ति कुतो नोक्तमिति चेत्? **उच्यते**— उक्तमेव भगवता व्यङ्ग्यमर्यादया। कथम्? 'मय्यावेश्ये'ति भक्तानां युक्ततमत्व-मित्येवोक्तम् , न तु 'मां प्राप्नुवन्ती'ति भगवत्प्राप्तिः। अक्षरोपासकानां तु 'ते प्राप्नुवन्ति मामेवे'ति भगवत्प्राप्तिरेवोक्ता, न तु युक्ततमत्वादिकम्। अनेन च ज्ञानिनामेव साक्षान्मोक्षः, भक्तानां तु ज्ञानद्वारेति भगवदाशय इति ज्ञायते।

**रामानुजभाष्यरी**त्या त्वीश्वरोपासकानां युक्ततमत्वम् , जीवोपासकानामीश्वरप्राप्तिरिति महानयं विरोधः इति।

तस्मात् सगुणनिर्गुणब्रह्मोपासकयोर्योगिसाङ्ख्ययोरन्यतरप्राशस्त्यबुभुत्सया पृच्छत्यर्जुनः— **एवं सततेति**। सततं नैरन्तर्येण युक्ताः समाहिताः सततयुक्ताः। क्वामीषां योगः? अत आह— **भगवत्कर्मादाविति**। भगवदर्थानि कर्माणि भगवत्कर्माणि यज्ञादीनि नित्यनैमित्तिकानि। आदिपदाद् विश्वरूपध्यानादिकं गृह्यते। भक्तेः परां काष्ठामाह— **अनन्यशरणा इति**। न विद्यते ईश्वरादन्यः शरणं रक्षिता येषां ते तथोक्ताः। ईश्वरमेव सर्वात्मना शरणं गता इत्यर्थः। एतेनानन्यशरणत्वं भक्तेर्लक्षणमिति सिद्धम्।

**यथेति**। दर्शितं विश्वरूपमनतिक्रम्य **यथादर्शितविश्वरूपम्** त्वां पर्युपासते तव विश्वरूपं ध्यायन्तीत्यर्थः। **एषणा** दारधनपुत्र-विषयाः त्रयोऽभिलाषाः। **यथाविशेषितमिति**। यथोक्तविशेषणविशिष्टमित्यर्थः। अक्षरस्य विशेषणानि तु 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥' इत्यादिश्रुतिप्रसिद्धानि इहापि तत्र तत्रोक्तानि बोध्यानि। **यद्वा** अव्यक्तत्वरूपविशेषणविशिष्टमित्यर्थः। अव्यक्तत्वे हेतुमाह— **निरस्तेति**। उपाधीनां करणविषयत्वान्निरुपाधिक-चैतन्यस्य तदविषयत्वाच्चेति भावः। **करणानि** मनआदीन्द्रियाणि। **तत्कर्मकत्वादिति**। तत् करणगोचरं वस्तु कर्म यस्य तत्त्वात्।

१. 'मत्कर्मकृदित्यादिना अतीतानन्तरश्लोकेनोक्तमर्थं परामृशति— एवमिति' इत्यन्वयः। २. 'विशिष्टैः'इति रा.पा.।

**श्रीभगवानुवाच—**

**मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।**
**श्रद्धया परयोपेतास्ते मे युक्ततमा मताः॥२॥**

**उच्यमानैर्विशेषणैर्विशिष्टम् ; तद् ये चापि पर्युपासते** तेषाम् **उभयेषां मध्ये** के योगवित्तमाः **केऽतिशयेन योगविदः इत्यर्थः॥१॥**

**श्रीभगवानुवाच। ये त्वक्षरोपासकाः सम्यग्दर्शिनो निवृत्तैषणास्ते तावत् तिष्ठन्तु। तान् प्रति यद् वक्तव्यं तदुपरिष्टाद् वक्ष्यामः। ये त्वितरे—** मयीति। मयि **विश्वरूपे परमेश्वरे** आवेश्य **समाधाय मनो** ये **भक्ताः सन्तो** मां **सर्वयोगेश्वराणामधीश्वरं सर्वज्ञं विमुक्तरागादिक्लेशतिमिरदृष्टिं** नित्ययुक्ताः **अतीतानन्तराध्यायान्तोक्तश्लोकार्थन्यायेन**

आनन्दगिरिकृतव्याख्या

**पूर्वार्धगतक्रियापदस्यानुषङ्गं सूचयति—** तदिति। **सर्वे तावदेते** योगं **समाधिं विन्दन्तीति** योगविदः। **के पुनरतिशयेनैषां मध्ये योगविदो योगिनः इति पृच्छति—** केऽतिशयेनेति॥१॥

**किमनयोर्योगयोर्मध्ये सुशक्यो योगो वा पृच्छ्यते, किं वा साक्षान्मोक्षहेतुरिति विकल्प्य क्रमेणोत्तरं भगवानुक्तवानित्याह—** श्रीभगवानिति। **यदि द्वितीयः, तथाविधयोगस्य वक्ष्यमाणत्वान्न प्रष्टव्यतेत्याह—** ये त्वक्षरेति। **यद्याद्यः, तत्राह—** ये त्विति। सर्वयोगेश्वराणां **सर्वेषां योगमधितिष्ठतां योगिनामित्यर्थः।** विमुक्ता **त्यक्ता रागाद्याख्य**[१]**क्लेशनिमित्तभूता तिमिरशब्दितानाद्यज्ञानकृता दृष्टिरविद्या मिथ्याधीर्यस्य तमिति विशिनष्टि—**विमुक्तेति। **नित्ययुक्तत्वं साधयति—**अतीतेति। **तत्रोक्तो योऽर्थो मत्कर्मकृदित्यादि , तस्मिन् निश्चयेन अयनमायो गमनं, तस्य नियमेनानुष्ठानं, तेनेत्यर्थः।** उपासते **मयि स्मृतिं सदा कुर्वन्तीत्यर्थः। उक्तोपासकानां युक्ततमत्वं व्यनक्ति—**

भाष्यार्कप्रकाशः

सकर्मकोऽयं [२]व्यजिधातुः प्रकटनार्थकः। गोपी भावं व्यञ्जयतीत्यादिप्रयोगात्। कर्म चास्य प्रकटीकरणयोग्यमेव भवति, अप्रकटीकरणीयस्य प्रकटीकरणासम्भवात्। करणग्राह्यमेव प्रकटीकरणीयम् , अकरणग्राह्यस्य प्रकटनायोगात्। व्यङ्ग्यं हि घटादिकं व्यञ्जकैश्चक्षुरादिभिर्व्यज्यते। तस्माद् व्यजिधातोर्व्यङ्ग्यकर्मकत्वात् तस्याकर्मभूत एवात्मा अव्यक्तः। अथवा **तत्कर्मकत्वात्** तत् करणगोचरीकरणमेव कर्म क्रिया, अर्थ इति यावत् , यस्य तत्त्वात्। करणगोचरीकरणं प्रकटीकरणं, प्रकटनमिति यावत्। यथाविशेषितमित्येतस्यार्थमाह— **विशिष्टैरिति। विशिष्टैर**साधारणैः। चकारादुक्तैरित्यर्थः। वक्ष्यमाणैरिति च। **उभयेषां** विश्वरूपोपासकानामक्षरोपासकानां चेत्यर्थः। **योगवित्तमाः** योगं कर्मयोगं ज्ञानयोगं च विदन्ति भजन्त इति योगविदः - योगिनो ज्ञानिनश्च। तमप्रत्ययार्थमाह— **अतिशयेनेति**। तेषां के योगवित्तमाः? तेषां योगविदामुभयेषां मध्ये के उत्तमाः इत्यर्थः। यद्यपि तमप्रत्ययो विच्छब्दान्वयी, तथापीह योगशब्देनान्वेतव्यः। ततश्च तेषां मध्येऽतिशयितं योगं के भजन्तीति फलितार्थः। यदाश्रितो योगोऽतिशयितस्तेऽतिशययोगवत्त्वाद् योगवित्तमा इत्युच्यन्ते। **यद्वा** योगमतिशयेन विदन्तीति योगवित्तमाः, योगस्य परां काष्ठां गतवन्त इत्यर्थः। कर्मयोगज्ञानयोगयोरुभयोरपि योगत्वात् , तत्र कर्मिणां ज्ञानिनां वा योगस्य परा काष्ठा सिध्यतीति प्रश्नः। किं विश्वरूपोपासनं योगस्य परा काष्ठा, उत परब्रह्मोपासनमिति यावत्। न च - विदन्तीत्यस्य भजन्तीति व्याख्यानमयुक्तमिति - वाच्यम् ; धातूनामनेकार्थकत्वात् , कर्मयोगादीनामनुष्ठानं विना ज्ञानमात्रात् फलाभावाच्च॥१॥

**मयीति**। ये परया श्रद्धयोपेता मयि मन आवेश्य नित्ययुक्ताः सन्तो मामुपासते, ते युक्ततमा मे मताः। **उक्तश्लोकेति**। 'मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः। निर्वैरः सर्वभूतेषु' इति न्यायेनेत्यर्थः। अतिशयेन युक्ताः युक्ततमाः। **युक्ताः** समाहिताः।

१. 'रागाद्याख्या क्लेशनिमित्तभूता' इति मु.पा.। रागाद्याख्यानां क्लेशानामविद्या कारणमिति योगशास्त्रे प्रसिद्धम्। द्र. योगदर्शनम् २पादे सू.३,४। २. भाष्ये 'व्यञ्जेर्धातोस्तत्कर्मकत्वात्' इति पाठः अत्रादृत इति भाति। व्यजिधातुः धातुपाठे नोपलभ्यते। चुरादिगणपाठस्य बाहुलकत्वादिदं संगमनीयमिति भाति।

**सततयुक्ताः सन्तः उपासते श्रद्धया** परया **प्रकृष्टयोपेतास्ते** मे **मम** मताः **अभिप्रेताः - युक्ततमा इति। नैरन्तर्येण हि ते मच्चित्ततया अहोरात्रमतिवाहयन्ति। अतो युक्तं तान् प्रति युक्ततमाः इति वक्तुम्॥ २॥**

आनन्दगिरिकृतव्याख्या

नैरन्तर्येणेति। **तदेव स्फुटयति—** अहोरात्रमिति। **अह्नि च रात्रौ चातिमात्रम् अतिशयेन मामेव विषयान्तरविमुक्ताः चिन्तयन्तीत्यर्थः ॥२॥**

भाष्यार्कप्रकाशः

कुतोऽमीषां भक्तानां युक्ततमत्वम्? अत आह— **नैरन्तर्येणेति**। **अतिवाहयन्ति** गमयन्ति।

अयं भावः— ये तु विश्वरूपोपासनशून्याः केवलं कर्मयोगिनस्ते युक्ताः, ये तु विश्वरूपोपासकाः कर्मयोगिनस्ते युक्ततमा इति। न चाक्षरोपासकेभ्योऽपि कर्मयोगिन उक्तलक्षणा उत्कृष्टा इति युक्ता ज्ञानिनः, युक्ततमास्तु भक्ता इति वाच्यम् ; कर्मज्ञानयोगयोः ज्ञानयोगस्य प्रशस्ततरत्वस्य प्रागेव बहुशः प्रपञ्चितत्वात्। मोक्षं प्रत्यव्यवहितो हि ज्ञानयोगः। इहाप्ययमर्थो वक्ष्यते – 'ते प्राप्नुवन्ति मामेवे'ति।

**ननु** सगुणोपासकानां निर्गुणोपासकानां च मध्ये के युक्ततमाः इत्यर्जुनप्रश्नस्य केवलकर्मिणां सगुणोपासकानां च मध्ये सगुणोपासका युक्ततमा इति श्रीकृष्णोत्तरमननुरूपमिति चेत्? **मैवम्** ; किं सगुणोपासका युक्ततमाः उत निर्गुणोपासका इति अर्जुनप्रश्नस्यानुरूपमेव श्रीकृष्णोत्तरं सगुणोपासका एव युक्ततमा इति।

तर्हि निर्गुणोपासकाः किं युक्ताः? अतो वक्ष्यति – 'ते प्राप्नुवन्ति मामेवे'ति। निर्गुणोपासका न युक्ताः, नापि युक्ततमाः, किन्तु साक्षादहमेव ते। 'ज्ञानी त्वात्मैव मे मत'मित्युक्तत्वादिति तदाशयः।

**ननु** यद्येवं तर्हि तेषां मध्ये के अतिशयेन योगविद इति प्रश्नोऽनुपपन्न इति चेत्? **मैवम् ;** तस्याप्यत्रैव तात्पर्यात्। यद्यपि तेषां मध्ये के युक्ततमा इति प्रश्नेन के पुनर्युक्ता इति प्रश्नान्तरं गम्यते, तथापि न तदिहानुसंहितम्। यद्वा भवतु प्रश्नान्तरमिहानुसंहितं, तथापि नानुपपत्तिः, तेषां मध्ये न केऽपि युक्ताः, किन्तु भक्ता युक्ततमा एव, ज्ञानी त्वहमेव, युक्तास्तु केवलं कर्मिण एवेत्युत्तरकल्पनोपपत्तेः।

**ननु** उभयेषां योगिनां मध्ये के पुनरुत्तमाः इति प्रश्नार्थो वर्णितः पूर्वम् , इदानीमुत्तरं त्वन्यथाऽवतारितमिति चेत्? **मैवम्** ; ते प्राप्नुवन्ति मामेवेत्यनेन ज्ञानिनामेवोत्तमत्वमिति सिद्धत्वादुत्तरस्य। न च - ते मे युक्ततमा मताः इति साक्षादुत्तमत्वं भक्तानामेवोक्तमिति - वाच्यम् ; युक्ततमा इत्यस्योत्तमाः इत्यर्थालाभात्। न च - योगवित्तमा इत्यनेनाभिन्नार्थक एव युक्ततमा इत्ययं शब्द इति - वाच्यम् ; वक्तृविवक्षयाऽर्थभेदसम्भवाच्छब्दद्वयस्य।

तथाहि— सगुणोपासकानामक्षरोपासकानां च मध्ये के पुनरुत्तमाः इति विवक्षया 'के योगवित्तमाः' इत्युक्तमर्जुनेन, उत्तमानामेव योगवित्तमत्वादित्याशयात्। भगवांस्तु तद्विवक्षां ज्ञात्वाऽपि तेषां मध्ये के पुनर्युक्ततमा इत्यमुमेव यथाश्रुतार्थं गृहीत्वा उत्तरयामास— भक्ता एव युक्ततमा इति। एतावता श्रीकृष्णोत्तरवाक्येनार्जुनस्य स्वविवक्षानुसारेण भक्ता एवोत्तमा इति कृष्णेनोत्तरमुक्तमिति प्रत्ययः स्यात् , तन्निरासाय च वक्ष्यति— ज्ञानिनो मामेव प्राप्नुवन्ति, ममैव ज्ञानित्वात्। अतो न युक्तो नापि युक्ततमो ज्ञानी, किन्त्वहमेवेति। ततश्चार्जुनविवक्षितप्रश्नस्यापि दत्तमुत्तरं भवति। तदेवम् अर्जुनहृद्गतार्थस्य भक्तज्ञानिनोः क उत्तम इत्यस्य, अर्जुनप्रश्नवाक्यबललभ्यस्य के युक्ततमा इत्यस्य च भगवता दत्तमुत्तरद्वयमिति बोध्यम्।

**वस्तुतस्तु** तेषां के योगवित्तमा इत्यस्य यथाश्रुत एवार्थः। भक्तानां ज्ञानिनां चोभयेषां मध्ये के युक्ततमा इति। युक्ततमज्ञाने सति परिशेषाद् युक्तज्ञानं भवेदिति के वा युक्ता इति न पृष्टमर्जुनेन। आवां रामलक्ष्मणावित्युक्ते कोऽनयोः राम इति प्रश्नवत्। भगवांश्च प्रश्नानुरूपं प्रतिवचनं ददौ— भक्ता युक्ततमा इति। ततः परिशेषन्यायेन ज्ञानिनां युक्तत्वे सिद्धे प्रत्याह भगवान् – 'ते प्राप्नुवन्ति मामेवे'ति। ज्ञानिनो न युक्ता नापि युक्ततमाः, किन्त्वहमेवेति। तथा च 'ते मे युक्ततमा मताः' इति भगवदुत्तरश्रवणाज्जातोऽर्जुनस्य भक्ताः युक्ततमत्वाज्ज्ञानिभ्यो युक्तेभ्य उत्तमाः इत्याकारकः प्रत्ययः 'ते प्राप्नुवन्ति मामेवे'ति वचनश्रवणान्निर्मूलं नष्टः आसीत्। परन्तु

**ये त्वक्षरमनिर्देश्यम् अव्यक्तं पर्युपासते।**
**सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्॥ ३॥**

**किमितरे युक्ततमा न भवन्ति? न, किन्तु तान् प्रति यद् वक्तव्यं तच्छृणु—** ये त्विति। **ये त्वक्षरम्** अनिर्देश्यम् **अव्यक्तत्वादशब्दगोचरमिति**[1] **न निर्देष्टुं शक्यते; अतोऽनिर्देश्यम् ,** अव्यक्तं **न केनापि प्रमाणेन व्यज्यत इत्यव्यक्तं** पर्युपासते **परि समन्ताद् उपासते। उपासनं नाम? यथाशास्त्रमुपास्यस्यार्थस्य विषयीकरणेन सामीप्यमुपगम्य**

अनुभूतिस्वरूपाचार्यटिप्पणम्

[**अशब्दगोचरमितीति**।] तात्पर्यवृत्त्या वेदान्तवेद्यमपि ब्रह्म शब्दशक्त्यविषयत्वाद् अनिर्देश्यमित्यर्थः॥ ३॥

आनन्दगिरिकृतव्याख्या

**'वक्ष्यामः तदुपरिष्टादि'त्युक्तं प्रश्नपूर्वकं प्रकटयति—**किमित्यादिना। **पूर्वेभ्यः फलतो विशेषार्थः तुशब्दः। अव्यक्तत्वमनिर्देश्यत्वे हेतुरित्याह—** अव्यक्तत्वादिति। **यतोऽव्यक्तम् अतोऽनिर्देश्यमिति योजना। निरुपाधिकेऽक्षरे कथमुपासनेति पृच्छति—** उपासनमिति।[2]

भाष्यार्कप्रकाशः

ज्ञानिनो भगवदात्मत्वादुत्तमाः। भक्तास्तु भगवदभिमतत्वात् तेभ्योऽपकृष्टा इति प्रत्यय आसीत्। तस्मात् केवलकर्मयोगिनो युक्ताः, भक्तियोगसहितकर्मयोगिनस्तु युक्ततमाः, समयग्दर्शिनस्तु भगवानेवेति कृत्वा नात्र युक्ततमा इत्यनेन ज्ञान्यपेक्षया भक्तानामुत्तमत्वमर्थ इति भ्रमितव्यम्। ज्ञानस्य मोक्षं प्रति साक्षात्साधनत्वाद् भक्तेर्ज्ञानद्वारेति परम्परासाधनत्वाच्च। भक्तियोगो हि कर्मयोगादनतिरिक्तः। कर्मणश्च ज्ञानादपकृष्टत्वं बहुशः प्रपञ्चितं प्रागेव।

तस्मादत्र ज्ञान्यपेक्षया भक्ता युक्ततमत्वादुत्तमा इति, भक्ता मोक्षं शीघ्रं गच्छन्तीति च **रामानुज**व्याख्यानं नादर्तव्यम्। भक्तानां परम्परया मोक्ष इति, ज्ञानिनां साक्षान्मोक्ष इति च सिद्धान्तितत्वेन ज्ञानिनामेव शीघ्रं मोक्षलाभात्। 'ब्रह्मविद् ब्रह्मैव भवति, तस्य तावदेव चिरं यावन्न विमोक्ष्ये' इत्यादिश्रुतिभ्यः। तस्माद् भक्ता भगवतो युक्ततमत्वेनाभिमताः। ज्ञानिनस्तु साक्षादात्मत्वेनाभिमता इति ज्ञानिन एवोत्तमाः॥ २॥

**य इति**। ये त्विन्द्रियग्रामं संनियम्य सर्वत्र समबुद्धयः सर्वभूतहिते रताश्च सन्तोऽनिर्देश्यमव्यक्तं सर्वत्रगमचिन्त्यं कूटस्थमचलं ध्रुवमक्षरं पर्युपासते ते मामेव प्राप्नुवन्तीति श्लोकद्वयान्वयः। **निर्देष्टुं** प्रतिपादयितुम्। यदि शब्देन प्रतिपाद्येत, तर्हि शब्दगोचरत्वाद् व्यक्तमेव भवेत्।

**ननु** यदि शब्दागोचरं ब्रह्म, तर्हि प्रत्यक्षाद्यविषयत्वाद् धर्मादिवच्छास्त्रप्रमाणाविषयत्वाच्चासदेव भवेदिति चेत्? **मैवम्** ; अनुभवैकवेद्यत्वाद् , आत्मत्वेन सर्वप्रत्यक्षत्वात् , तद्विषयत्वेनैव सर्वस्य सत्तालाभाच्च।

**नन्वत्यन्तं** शब्दागोचरत्वे कथं ब्रह्मणो व्यवहार्यत्वम्? कथं वा शास्त्रसम्प्रदायप्रवृत्तिः? कथं वा शास्त्रयोनित्वाधिकरणसङ्गतिः? कथं वा श्रुतिगीतोपपत्तिरिति चेत्? **उच्यते**— सुखतापादिवदनुभवैकवेद्यमेव ब्रह्म। न हि मम सुखमीदृशं, ताप ईदृश इति कोऽपि वक्तुं क्षमते। तद्वद् ब्रह्मेदृशमिति कोऽपि वक्तुं नेष्टे। एवं दुर्वचत्वादेव तस्य शब्दागोचरत्वम्, न तु ब्रह्मादिशब्दानां तद्वाचकत्वाभावात्। यद्वा ब्रह्मादिशब्दा अभिधया न ब्रह्म बोधयन्ति, किन्तु लक्षणया। एवमभिधाऽविषयत्वादेव ब्रह्मणः शब्दागोचरत्वमिति।

**वस्तुतस्तु** अद्वितीये ब्रह्मणि शब्दाद्यभावात् कथं शब्दगोचरत्वं ब्रह्मणः? व्यवहारस्तु माययोपपद्यते। माया हि शब्दागोचरे ब्रह्मणि शब्दादीन् कल्पयित्वा तद्गोचरत्वमपि कल्पयति। तस्माच्छब्दागोचरस्यापि ब्रह्मणो मायया भवति व्यवहार्यत्वमिति। **उपासत इति**। 'अहं ब्रह्मास्मी'त्याकारेणेति भावः। **यथाशास्त्रं** शास्त्रोक्तविधयेत्यर्थः। **उपास्यस्यार्थस्य** प्रकृते परमात्मनः। अन्यत्र तु विश्वरूपरामकृष्णादिरूपादिकमुपास्यार्थ इति बोध्यम्।

---

१. इतिशब्दो हेत्वर्थे। २. 'आत्मेत्येवोपासीत'(बृ.उ. १-४-७) इत्यत्रेवात्रापि उपासनं ज्ञानमेव विवक्षितमिति भावः।

**तैलधारावत् समानप्रत्ययप्रवाहेण दीर्घकालं यदासनं तदुपासनमाचक्षते। अक्षरस्योपास्यस्य विशेषणमाह—** सर्वत्रगं **व्योमवद् व्यापि** अचिन्त्यं **चाव्यक्तत्वादचिन्त्यम् ; यद्धि करणगोचरं तद् मनसाऽपि चिन्त्यम् , तद्विपरीतत्वाद् अचिन्त्यमक्षरम् ;** कूटस्थं **दृश्यमानगुणमन्तर्दोषं वस्तु कूटम् ; [१]कूटरूपं कूटसाक्ष्यमित्यादौ कूटशब्दः प्रसिद्धो लोके। तथा च [२]अविद्याद्यनेकसंसारबीजम् अन्तर्दोषवद् मायाऽव्याकृतादिशब्दवाच्यतया 'मायां तु प्रकृतिं विद्यान्मायिनं तु**

आनन्दगिरिकृतव्याख्या

**शास्त्रतोऽक्षरं ज्ञात्वा** तदुपेत्य **आत्मत्वेनोपगम्य** [३]आसते **तथैव तिष्ठन्ति, पूर्णचिदेकतानमक्षरमात्मानमेव सदा भावयन्तीत्येतदिह विवक्षितमित्याह—**यथेति। **अव्यक्तत्वमेवाचिन्त्यत्वेऽपि हेतुरित्याह—**यद्धीति। [४]**कूटशब्दस्योक्तार्थत्वं वृद्धप्रयोगतः साधयति—**कूटरूपमिति। **आदिपदमनृतार्थम्। प्रकृते किं तदनृतं कूटशब्दितमित्याशङ्क्याह—** तथा चेति। **उक्तरीत्या कूटशब्दस्यानृतार्थत्वे सिद्धे यदनेकस्य**

भाष्यार्कप्रकाशः

**विषयीकरणं** गोचरीकरणं, साक्षात्कार इति यावत्। **उपगम्येति**। मनस इति कर्तुःशेषः। समानोऽभिन्नः प्रत्ययानां प्रवाहस्तेन, तैलधारावदविच्छिन्नेनेत्यर्थः। **आसनं** स्थितिः। मनस इत्यस्याध्याहृतस्यानेनान्वयः— यन्मनस आसनमिति। ब्रह्माद्युपास्यविषयकमानसिकदीर्घकालावच्छिन्नप्रत्ययप्रवाह उपासनमित्युच्यत इत्यर्थः। उपास्यविषयकनिरन्तरप्रत्ययप्रवाहोपलक्षिततया मनस उपास्यसमीपे आसनमुपासनमिति निरुक्तेरिति भावः। मनस उपास्यसमीपे स्थितिः सुषुप्तावपि सम्भवति, मनसस्तदा ब्रह्मण्येव लयाद् , अत आह— **प्रत्ययप्रवाहेणेति**। सत्यपि अहं ब्रह्मास्मीति वाचिकप्रत्ययप्रवाहे विषयान्तरसङ्गेन मनसो ब्रह्मणो दूरतः स्थितावुपासनं न सम्भवतीत्यत आह— **सामीप्यमुपगम्येति**। निर्विकल्पकसमाधौ ब्रह्मणः समीपे स्थितस्यापि मनसः प्रत्ययाभावान्नोपासनमित्यत आह— **प्रत्ययप्रवाहेणेति**। कथं मनस उपास्यसामीप्योपगतिः? अत आह— **विषयीकरणेनेति**। वृत्तिद्वारा मनो विषयसमीपं गच्छतीति भावः।

उपास्यस्याक्षरस्य **विशेषणम्** जात्येकत्वाद् विशेषणान्याह— **सर्वत्रगमि**त्यादीनि। इमान्येव विशेषणानि 'विशिष्टैर्विशेषणैरुच्यमानै'रित्यनेन संगृहीतानि प्राग् भाष्ये। 'एको देवः' इत्यादिश्रुतिसिद्धानि चेमान्येव। सर्वत्र गच्छतीति **सर्वत्रगं** सर्वव्यापीत्यर्थः। तत्र दृष्टान्तमाह— **व्योमवदिति**। **तद्विपरीतत्वात्** करणागोचरत्वादित्यर्थः। **अनिर्देश्यं** वाचा वक्तुमशक्यम् , **अचिन्त्यं** मनसा चिन्तयितुमशक्यमिति न पौनरुक्त्यम्। न च मनसाऽप्यचिन्त्यत्वे 'मनसैवानुद्रष्टव्य'मिति श्रुतिविरोध इति वाच्यम् ; मनसा इदमीदृशमिति चिन्तयितुमशक्यमित्यर्थात् , ब्रह्मणि चेदृक्ताया अभावान्निर्विशेषचिन्मात्रे। **दृश्यमानाः** बहिरुपलभ्यमाना गुणा यस्य तद् **दृश्यमानगुणम्**। **अन्तर्गर्भे** दोषा यस्य तद् **अन्तर्दोषं वस्तु** कृत्रिममैन्द्रजालादिकं मिथ्यावस्त्वित्यर्थः। **कूटरूपकमिति**। रूपकं रूप्यं, रजतमिति यावत्। रजतवद् बहिरवभासमानं वस्तुतो रजतगुणरहितं च रङ्गादिकं वस्तु रजतत्वेन व्यवह्रियमाणं सत् कूटरूपकमित्युच्यते। नेदं यथार्थरूपकं, रजतगुणराहित्यात्। नापि शुक्तिरजतवत् प्रातिभासिकं, कटकाद्युपयोगित्वात्। किन्तु विलक्षणं कृत्रिमं कूटरूपकमेव। इदमधुना [५]द्रुषद्रूपकमिति व्यवह्रियते। **कूटसाक्ष्यमिति**। कूटं च तत् साक्ष्यं च कूटसाक्ष्यम्। साक्षिणो भावो धर्मो वा साक्ष्यम्। कौटसाक्ष्यमिति पाठे तु कूटसाक्षिणो भावो धर्मो वा कौटसाक्ष्यम्। यथार्थवाक्यवदवभासमानं वस्तुतोऽयथार्थं वाक्यं कूटसाक्ष्यम् , अयथावृत्तं वाक्यमित्यर्थः। **प्रसिद्ध इति**। अनृतार्थवाचित्वेन प्रसिद्ध इत्यर्थः।

ननु लोके बहिः सत्यवस्तुवदवभासमानाः वस्तुतस्त्वसत्याः कूटरूपककूटसाक्ष्यादिपदार्थाः कूटशब्दवाच्याः भवन्तु नाम, प्रकृते कूटशब्दवाच्यं वस्तु किम्? अत आह— **तथा चेति**। **अविद्या** तूलाज्ञानम् , आदिपदादस्मितारागद्वेषादिग्रहणम्। अविद्यादीन्यनेकानि संसारबीजानि यत्र तत् तथोक्तम्। अत एवान्तर्दोषं मायाऽव्याकृतकूटेत्यत्रादिपदाच्छक्तिप्रकृत्यज्ञानादिपरिग्रहः। एवमाद्यनेकशब्दवाच्यतया प्रसिद्धम्। क्व प्रसिद्धम्? अत आह— **मायां त्वित्यादि**। यद् वस्तु तत् कूटमित्युच्यते। **ननु दृश्यमानगुणत्वं**

१. 'कूटरूपकम्' इति पा.। २. 'अविद्यादि अनेकसंसारबीजम्' इति आनन्दगिरीयानुसारी पदच्छेदः। ३.'उपासते' इति मु.पा.। ४. 'कूटस्थशब्दस्य' इति पा.।
५. इदमान्ध्रभाषायामिति भाति।

**महेश्वरम्'(श्वे.उ.४.१०) 'मम माया दुरत्यया' (भ.गी.७.१४) इत्यादौ प्रसिद्धं यत् तत् कूटम् , तस्मिन् कूटे स्थितं कूटस्थं तदध्यक्षतया। अथवा राशिरिव स्थितं कूटस्थम्। अत एवाचलम्। यस्मादचलं तस्माद् ध्रुवं नित्यमित्यर्थः ॥३॥**

आनन्दगिरिकृतव्याख्या

**संसारस्य बीजं निरूप्यमाणं नानाविधदोषोपेतं 'तद्धेदं तर्ह्यव्याकृतम्' 'मायां तु प्रकृतिम्' 'मम माया' इत्यादौ माया[दि]शब्दिततया**

भाष्यार्कप्रकाशः

नोक्तमिति चेत्? सुग्रहत्वधिया नोक्तं भाष्यकारैः। सत्यत्वप्रियत्वादयो दृश्यमानगुणाः। तदेवं वस्तुतो दोषवदापाततो गुणवच्चाज्ञानं कूटमित्युच्यत इति सिद्धम्।

इदं हि स्वकार्यैः सहानृतजडदुःखात्मकमपि सच्चिदानन्दमिव प्रतिभाति, तथा व्यवह्रियते च। यथा कूटरूपकं यथार्थरूपकवत्। न च - कूटरूपकं यथार्थरूपकवत् कूटमज्ञानं यथार्थ[र्था]ज्ञानवत् प्रतिभातीति वक्तव्यम् , न चेष्टापत्तिः, यथार्थ[र्था]ज्ञानस्याभावात् , सत्त्वेऽद्वैतहानेश्च। तथा यथार्थ[र्था]ज्ञानस्याभावे तु इदमज्ञानं कूटाज्ञानं भवितुं नार्हतीति - वाच्यम् ; अनृतजडदुःखात्मकतया [अ]सच्चिदानन्दमिदमज्ञानं सच्चिदानन्दब्रह्मवद् अस्ति भाति प्रियमिति सच्चिदानन्दत्वेन व्यवह्रियत इति अस्याज्ञानस्य कूटवस्तुत्वसिद्धेः। वस्तुतोऽरजतमपि रजतत्वेन प्रतिभासमानं कटकाद्युपयोगि हि वस्तु कूटरजतमिति। **एतेन** अज्ञानस्यानृतत्वे कथमर्थक्रियाकारित्वम् , तज्जन्यप्रपञ्चस्य वा कथं तदिति शङ्का **प्रत्युक्ता**। अनृतस्यापि कूटरूपकस्य अर्थक्रियाकारित्वदर्शनात्। तस्मात् सत्यवदवभासमानं वस्तुतस्त्वसत्यम् अज्ञानं कूटमेव।

**ननु** कूटरूपकपदवाच्यं द्रुषदादिरूपं किञ्चिद् वस्त्वस्त्येव, परन्तु तद्वस्तु स्वस्वरूपेणाव्यवह्रियमाणमन्यरूपेण व्यवह्रियमाणं च सत् कूटशब्दवाच्यं भवति, तद्वदिहाप्यज्ञानमिति किञ्चिद्वस्त्वस्ति वा, न वा? आद्ये अद्वैतहानिः, द्वितीये कस्य कूटत्वम् , अज्ञानस्यैवाभावादिति चेत्? **मैवम्** ; ब्रह्मण्यध्यस्तत्वात् सप्रपञ्चमिदमज्ञानं ब्रह्मैव, आरोप्यस्याधिष्ठानात्मकत्वात्। तथा च वस्तुतोऽज्ञानपदवाच्यं वस्तु ब्रह्मैव। तद् ब्रह्मैकमेवास्ति कालत्रयेऽपि नान्यदिति नाद्वैतहानिः। तदेव सच्चिदानन्दं ब्रह्म, अनृतजडदुःखात्मकाज्ञानस्वरूपेण गृह्यमाणं सत् कूटमित्युच्यते। तथा च सच्चिदानन्दात्मकस्वरूपेणागृह्यमाणम् अनृतजडदुःखरूपेण च गृह्यमाणं कूटशब्दवाच्यमज्ञानशब्दवाच्यं च वस्त्वस्त्येव ब्रह्मेति न कश्चिद् दोषः।

न च - एवं कूटरूपकसत्यरूपकवत् कूटाज्ञानसत्याज्ञानयोरभावेऽपि कूटब्रह्मसत्यब्रह्मणोः सद्भावः सिध्यति, तच्चानिष्टम् , क्वापि ब्रह्मणः कूटत्वाश्रवणादिति - वाच्यम् ; कार्यब्रह्मकारणब्रह्मशब्दाभ्यां कूटब्रह्मसत्यब्रह्मणोरेवाभिधीयमानत्वात्। ब्रह्मकार्यं ह्यज्ञानं कार्यब्रह्मेति हि व्यवह्रियते, अकार्यत्वाद् ब्रह्मणः।

न चाज्ञानप्रतिफलितश्चिदाभास ईश्वरः कार्यब्रह्मेति वाच्यम् ; तस्यापि चिदाभासस्य मिथ्यात्वेन कूटत्वात्। अज्ञानप्रतिफलितचिदाभासवत् साभासाज्ञानस्यापीश्वरत्वाच्च। तस्मात् कार्यब्रह्म कूटब्रह्मैव। कार्यस्य सर्वस्यापि मिथ्यात्वेन कूटत्वात्। तच्च कूटब्रह्म अज्ञानं, तस्यैव परिणामो जगदिति जगदप्यज्ञानमेव। न च ब्रह्मद्वयमप्रसिद्धमिति वाच्यम् ; 'बाढम् , द्वे ब्रह्मणी' इति भाष्यकारैरुक्तत्वात्। 'एतद्वै सत्यकाम यत्परं चापरं च' इति श्रुत्याऽपि परापरब्रह्मद्वयस्योक्तत्वात्। एतत्कार्यापरब्रह्मव्यावृत्तये एव परं ब्रह्मेति ब्रह्मणः परत्वविशेषणदानाच्च तत्र तत्र।

एवमज्ञानस्य कूटब्रह्मत्वादेव ब्रह्मशब्दवाच्यत्वमपि। 'मम योनिर्महद् ब्रह्म' इत्यादिप्रयोगदर्शनात्। तस्मात् कूटरूपकसत्यरूपकवत् कूटब्रह्मसत्यब्रह्मणी द्वे स्तः। तत्र कूटब्रह्म दृश्यमज्ञानादिकं, सत्यब्रह्म तु दृगात्मेति विवेकः। **तस्मिन्निति** अज्ञाने इत्यर्थः। किमज्ञानेऽस्य स्थितिः कुण्डे बदरवद्? अत आह— **तदध्यक्षतयेति**। अज्ञानस्य साक्षित्वेन स्थितमित्यर्थः। अज्ञानसाक्षिणमिति कूटस्थशब्दस्य यावदर्थः। न च साक्षित्वेनापि कथमज्ञाने ज्ञानस्य स्थितिरिति वाच्यम् ; चैतन्यरूपज्ञानस्याज्ञानाविरोधित्वात्। अज्ञानमस्ति, अज्ञानं भाति, अज्ञानं प्रियमिति प्रतीतीनामज्ञाने ब्रह्मव्याप्तिं विनाऽसम्भवात्। अत एव ब्रह्मणः

आनन्दगिरिकृतव्याख्या

**प्रसिद्धमविद्यादि[1] तदिह कूटशब्दितमित्यर्थः। तत्रावस्थानं केन रूपेणेत्याकाङ्क्षायामाह[2]—** तदध्यक्षतयेति। **कूटस्थशब्दस्य निष्क्रियत्व-मर्थान्तरमाह—** अथवेति। **पूर्वमुपजीव्यानन्तरविशेषणद्वयप्रवृत्तिमाह—** अत एवेति॥ ३॥

भाष्यार्कप्रकाशः

सर्वान्तरात्मत्वम्, सच्चिदानन्दरूपेण सर्वत्र व्याप्य स्थितत्वात्।

कूटस्थशब्दस्यार्थान्तरमाह— **अथवेति**। कूटो राशिः स इव तिष्ठतीति कूटस्थं, यथा व्रीह्यादिराशिः स्वोचितं देशमवष्टभ्य निरन्तरमवतिष्ठते तद्वद् महतो महानयमात्मा सर्वं जगदवष्टभ्य निरन्तरं तिष्ठतीत्यर्थः। **अत एवेति**। राशिवत्स्थितत्वादेवेत्यर्थः। न हि राशिश्चलति। यद्वा **अत एव** मायाऽध्यक्षत्वादेवेत्यर्थः। मायायाः सर्वव्यापित्वेन तदध्यक्षस्यापि सर्वव्यापित्वात् परिपूर्णत्वेन तस्याचलत्वं युक्तमिति भावः। **अचलं** न चलतीत्यचलः तं चलनरहितमित्यर्थः। अपरिपूर्णस्य परिच्छिन्नस्य चलनसम्भवात् तादृशस्य चानित्यत्वादचलोऽयं नित्य इत्याह— **ध्रुवं नित्यमिति**। न हि परिपूर्णं वस्तु क्वापि चलितुमर्हति, येन तस्यानित्यत्वं स्यात्। अस्माद् देशात् क्वापि गतं हि वस्तु नष्टमित्युच्यते। यथा देवदत्तादिः स्वर्गादिकम्।

अत्र **रामानुजः** - अक्षरं प्रत्यगात्मस्वरूपं, अनिर्देश्यं देहादन्यतया देवादिशब्दानिर्देश्यं, सर्वत्रगं देवादिदेहेषु वर्तमानं कूटस्थं सर्वसाधारणम् अचलम् अप्रच्युताकारमिति। **तत्तुच्छम्**; यदि देवादिशब्दैरनिर्देश्यतया स्यादक्षरमनिर्देश्यम्, तर्हि ब्रह्मानन्दादिशब्दै-रनिर्देश्यतया स्याद् देहोऽप्यनिर्देश्यः। 'यत्तदद्रेश्यमग्राह्यम्', 'यतो वाचो निवर्तन्ते' इत्यादिश्रुतयस्त्वात्मन एवानिर्देश्यत्वं ब्रुवन्ति, न तु देहस्येति। कथमयं श्रुतिविरुद्धार्थः परिगृह्येत? तथा तव मते अण्वात्मनां कथं देवाद्यनेकदेहवृत्तिः? न चैकस्मिन् देहे एक आत्मेत्येव सर्वदेहस्थमपि वाच्यम्; तथा सति एकदेहस्थः एक एवात्मेति स्यादात्मनः एकदेहस्थत्वादेकदेशस्थत्वमेव, न तु सर्वत्रगत्वम्। सर्वशब्दस्य देवादिदेहपरतया सङ्कोचोऽप्ययुक्तः, पाषाणादिसर्वपरिग्रहस्य युक्तत्वात्। पाषाणादिपरिग्रहे तु पाषाणादावचेतने चेतनस्याक्षरस्याभावान्न स्यात् सर्वत्रगत्वमक्षरस्य।

**ननु** एक एवात्मा कालभेदेन देवादिशरीरपरिग्रहाद् देवादिशरीरेषु सर्वत्रास्तीति सर्वत्रगः इत्युच्यत इति चेत्? **मैवम्**; वर्तमानमित्यनेन कालविशेषस्योक्तत्वात्। वर्तमानकाले एकस्य देहिनो देहान्तरेषु स्थित्ययोगात्। कायव्यूहविद्या तु मायामयी नेहोदाहरणमर्हति। अस्मिन् मतेऽपि सर्वशब्दसङ्कोचदोषस्तदवस्थ एव।

तथा सर्वसाधारणः कूटस्थः इत्यप्ययुक्तम्, सर्वसाधारणत्वस्य कूटस्थत्वे पृथिव्यादिपदार्था अपि कूटस्थाः स्युः। तेऽपि हि पशुपक्षिमनुष्यादिसर्वसाधारणा भवन्ति। जलं हि पानार्थं सर्वसाधारणं, पृथिवी च निवासार्थं, वायुश्च प्राणनार्थं, गगनं चावकाशार्थं, तेजश्च शीतापनयनाद्यर्थम्। किञ्चात्मनो भोगायतनत्वाद् देहोऽपि सर्वात्मसाधारणः इति सोऽपि कूटस्थ एव स्यात्। न च सर्व-साधारणत्वं नाम तत्तद्देवाद्यसाधारणाकारासम्बद्धमित्यर्थ इति वाच्यम्; एवंविधमप्यसाधारणत्वं जलादीनामस्त्येव। न हि जलादयो देवाद्यसाधारणाकारसम्बद्धाः। न च जलादिषु रसत्वाद्यसाधारणाकारसम्बन्धोऽस्तीति वाच्यम्; जीवेऽपि चेतनत्वाद्यसाधारणाकार-सम्बन्धसद्भावात्। न च निराकारस्यैव सर्वसाधारणत्वम्, न तु साकारस्येति वाच्यम्; वाय्वाकाशयोरपि कूटस्थत्वप्रसङ्गात्, मनइन्द्रियादीनां च निराकाराणाम्।

एवं कूटस्थशब्दस्याभिधेयमर्थं विहाय लाक्षणिकस्य सर्वसाधारणत्वरूपार्थस्य कल्पनमयुक्तम्, अप्रमाणं च। तथा अचलमित्यस्य अप्रच्युताकारमित्यर्थवर्णनमप्ययुक्तम्, आकारान्न चलतीत्यचलः इत्याकारस्यापादानस्य कल्पनस्यायुक्तत्वात्। न चलतीत्यचलः इत्यपादानं विनैव निरुक्तिसिद्धेः अपादानस्य स्वकपोलकल्प्यत्वात्। घटोऽपि मृत्स्वरूपान्न चलतीत्यचलत्वं स्याद् घटस्यापि। न चोत्क्रान्तिमतो जीवस्य स्पन्दनिषेधादेरनुपपन्नत्वाच्चलनरहितः इति त्वदुक्तार्थोऽप्ययुक्त एवेति वाच्यम्; सर्वव्यापकस्या-चलस्याप्यात्मनः बुद्धितादात्म्याध्यासेनोत्क्रान्त्यादिसिद्धेः 'ध्यायतीव लेलायतीव' इति श्रुतेः। बुद्धौ चलन्त्यामात्मा चलतीव, तस्या-मुत्क्रामन्त्यामात्मोत्क्रामतीव, न तु स्वत इति युक्तमचलत्वं, चलनरहितत्वादात्मनः॥ ३॥

१. अत्रादिपदेनाहंकारादिकं ग्राह्यमिति भाष्योत्कर्षदीपिका। २. 'त्याशङ्कायामाह' इति पा.।

**संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।**
**ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः॥४॥**
**क्लेशोऽधिकतरस्तेषाम् अव्यक्तासक्तचेतसाम्।**

संनियम्येति। संनियम्य **सम्यङ् नियम्य उपसंहृत्य** इन्द्रियग्रामम् **इन्द्रियसमुदायं,** सर्वत्र **सर्वस्मिन् काले** समबुद्धयः **समा तुल्या बुद्धिर्येषाम् इष्टानिष्टप्राप्तौ ते समबुद्धयः,** ते य **एवंविधास्ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः। न तु तेषां वक्तव्यं किञ्चिद्—मां ते प्राप्नुवन्तीति। 'ज्ञानी त्वात्मैव मे मतम्' (भ.गी.७.१८) इति ह्युक्तम्। न हि भगवत्स्वरूपाणां सतां युक्ततमत्वम् अयुक्ततमत्वं वा वाच्यम् ॥४॥**

आनन्दगिरिकृतव्याख्या

**कथमक्षरमुपासते? तदुपासने वा किं स्यादिति? तदाह—** संनियम्येति। तुल्या **हर्षविषादरागद्वेषादिरहिता। सम्यग्ज्ञानेनाज्ञानस्यापनीतत्वात्** [1]**क्रमपरापेक्षयोरसम्भवं विवक्षित्वाऽऽह—** ते य इति। **सर्वेभ्यो भूतेभ्यो हिते रताः - सर्वेभ्यो भूतेभ्यो हितमेव चिन्तयन्तः तदेवाचरन्ति। ज्ञानवतां यथाज्ञानं भगवत्प्राप्तेरर्थसिद्धत्वादनुवादमात्रमेतदित्याह—** न त्विति। **ज्ञानिनो भगवत्प्राप्तिः सिद्धैवेत्यत्र प्रमाणमाह—** ज्ञानी त्विति। **ज्ञानवतां भगवत्प्राप्तौ त एव युक्ततमा वक्तव्याः, कथं सगुणब्रह्मोपासकान् युक्ततमानुक्तवानसि? इत्याशङ्क्याह—** न हीति॥४॥

भाष्यार्कप्रकाशः

**संनियम्येति**। **समेति**। हर्षोद्वेगादिरहिता एकरूपेत्यर्थः। सर्वेषां भूतानां **हिते** हितकरणे, तत्त्वोपदेशादिद्वारेति भावः। हिते आत्मनीति वा। **रताः** आसक्ताः। मां परमात्मानमेव प्राप्नुवन्ति, न त्वन्यमित्येवकारार्थः। मां प्राप्नुवन्त्येवेत्यप्यन्वयः। एवकारान्नाप्राप्तिशङ्केति भावः। सर्वं वाक्यं सावधारणमिति न्यायात्। त एव, मामेव, प्राप्नुवन्त्येवेति वाऽन्वयः। 'त एवे'त्येवकारान्न तु कर्मयोगिनः इत्यर्थः। यद्वा न तु भक्ताः इत्यर्थः। भक्तानां साक्षान्मोक्षाभावादिति भावः।

ननु मां ते प्राप्नुवन्तीति यदुक्तं तन्नोपपद्यते, तथाहि— किमप्राप्तस्य तव प्राप्तिरिति विवक्षितम्? यद्वा नित्यप्राप्तस्येति? नाद्यः, अप्राप्तत्वेन प्राप्यत्वे परमात्मनः कार्यत्वादनित्यत्वं स्यात् , सर्वव्यापकत्वं च न स्यात्, सर्वेण सर्वदा सम्बद्धं हि वस्तु सर्वव्यापीत्युच्यते। न द्वितीयः, नित्याप्तस्य पुनः प्राप्त्ययोगादिति शङ्कामभ्युपेत्य समाधत्ते— **न त्विति**। यत् त्वया आशङ्कितं तत् सत्यमेव, अत एव 'ते मां प्राप्नुवन्ती'ति तेषां पुरतो नैव वक्तव्यम्। किन्तु 'ते अहमेवे'ति वक्तव्यम्। तर्हि कृष्णेन कुतस्तथा नोक्तम्? अत आह— **ज्ञानी त्विति**। तथा च 'ज्ञानी त्वात्मैव मे मत'मिति पूर्वोक्तवाक्यानुसारादिहापि तथैव वक्तव्यं, न तु ते मां प्राप्नुवन्तीति वक्तव्यम्।

तर्हि कृष्णेन कुत उक्तम् 'ते मां प्राप्नुवन्ती'ति चेत्? **उच्यते**— हिरण्यनिधिदृष्टान्ताद् विस्मृतकण्ठचामीकरन्यायाच्च नित्याप्तोऽप्यात्मा अज्ञानादनाप्त इव प्रतीतः, ज्ञानात् तदज्ञाननाशे तु प्राप्त इवेति नित्याप्तस्यापि प्राप्तिरुपपद्यत इति।

ननु 'तेषां के योगवित्तमाः' इति भगवतोऽर्जुनेन पृष्टस्य ज्ञानिनो मामेव प्राप्नुवन्तीत्युत्तरमयुक्तम्, किं तर्हि? ज्ञानिनो युक्ता इत्येव वक्तव्यम् , भक्तानां युक्ततमत्वस्योक्तत्वाद्, अत आह— **न हीति**। भगवानेव स्वरूपं येषां तेषां **भगवत्स्वरूपाणाम् ,** 'निर्विशेषचिन्मात्रः सदाशिवोऽह'मिति भगवति चैतन्यरूपे आत्मबुद्धिशालिनामित्यर्थः। सतां विदुषां युक्ततमत्वं युक्तत्वं वा न हि वाच्यम् ; अक्षरोपासकाः कर्मयोगिन इव न युक्ताः, विश्वरूपोपासका इव न युक्ततमाः, किं तर्हि? साक्षाद्भगवानेव ते। प्रत्यगभिन्नत्वात् परमात्मनः। 'ज्ञानी त्वात्मैव मे मत'मिति भगवद्वचनाच्चेति भावः॥४॥

**क्लेश इति**। अव्यक्तासक्तचेतसां तेषामधिकतरः क्लेशो भवतीति शेषः। हि अव्यक्ता गतिर्देहवद्भिर्दुःखमवाप्यते। दुःखं कृच्छ्रे-

१. क्रमः— चित्तशुद्धिज्ञानप्राप्त्यनन्तरमिति मुक्तौ क्रमः। 'तेषामहं समुद्धर्ता' इति च परापेक्षा दर्शिता। द्वयमपीदं निर्गुणविदां नास्ति। तत्र हेतुः— सम्यग्ज्ञानेनेति। 'क्रमपरम्परापेक्षयोः' इति पा.।

## अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते॥५॥

**किन्तु—** क्लेश इति। क्लेशोऽधिकतरः, **यद्यपि मत्कर्मादिपराणां क्लेशोऽधिक एव, क्लेशोऽधिकतरस्तु अक्षरात्मनां** [1]**परमार्थदर्शिनां देहाभिमानपरित्यागनिमित्तः;** अव्यक्तासक्तचेतसाम् **अव्यक्ते आसक्तं चेतो येषां ते अव्यक्तासक्तचेतसः, तेषाम् अव्यक्तासक्तचेतसाम्।** अव्यक्ता हि **यस्माद् या गतिरक्षरात्मिका, दुःखं सा** देहवद्भिः **देहाभिमानवद्भिः अवाप्यते। अतः क्लेशोऽधिकतरः।** [2]**अक्षरोपासकानां यद् वर्तनं तदुपरिष्टाद् वक्ष्यामः॥५॥**

आनन्दगिरिकृतव्याख्या

**सगुणोपासकेष्वपि** [3]**कथमित्याह—** किन्त्विति। **अक्षरोपासनस्य दुष्करत्वाद् उपासनान्तरस्य सुकरत्वादित्यभिप्रेत्याह—** क्लेश इति। अधिक एव **इतरेभ्यो द्वैतदर्शिभ्यः कामिभ्यः इति शेषः। तेषां क्लेशस्याधिकतरत्वे हेतुं मत्वा विशिनष्टि—** देहेति। अव्यक्तम् **अत्यन्तसूक्ष्मं निर्विशेषमक्षरम् , तस्मिन्** आसक्तम् **अभिनिविष्टं चेतो येषां, तेषामिति यावत्। अक्षरोपासकानां क्लेशस्याधिकतरत्वे भगवानेव हेतुमाह—** अव्यक्तेति। दुःखं **दुःखेन, कृच्छ्रेणेति यावत्।** अतो **देहाभिमानत्यागादित्यर्थः। ते कथं वर्तन्ते? तत्राह—** अक्षरेति॥५॥

भाष्यार्कप्रकाशः

णेति क्रियाविशेषणम्। अधिकतरः इति द्वयोर्निर्धारणे डतरच्। कस्मात्पुनः अधिकादयमधिकतरः इत्यत आह— **मत्कर्मादिपराणामिति**। भक्तानां क्लेशोऽधिकः, ज्ञानिनां तु तस्मादधिकतरः इत्यर्थः। 'अक्षरात्मना'मिति अव्यक्तासक्तचेतसामित्यस्य प्रतिपदम्। तस्यार्थमाह— **परमात्मदर्शिनामिति**। परमात्मानं प्रत्यगभिन्नं द्रष्टुं शीलं येषां तेषां तथोक्तानाम्। कस्मान्निमित्तादेषामधिकतरः क्लेशः? अत आह— **देहेति**। देहाभिमानपरित्याग एव ज्ञानिक्लेशस्य भक्तक्लेशादधिकतरत्वे निमित्तम्।

**एतेन** भक्तानां देहाभिमानोऽस्तीति **सिद्धम्**। पुंसामनादिकालादारभ्य देहाभिमानोऽस्ति, तस्य परित्यागस्त्वधिकक्लेशावहः, परित्यागस्य दुष्करत्वात्। देहाभिमानेऽपरित्यक्ते तु परमात्मन्यात्मबुद्धिर्न स्यात्। अतो निर्गुणोपासकैर्देहाभिमानस्तावत् कृच्छ्रेण त्याज्यः। भक्तास्तु विश्वरूपे देहे ईश्वरबुद्धिं, स्वमनुष्यादिदेहे च जीवबुद्धिं कुर्वन्तीति न तेषां देहाभिमानत्यागप्रयुक्तक्लेशोऽस्तीति भावः।

**अव्यक्ते** आत्मनीत्यर्थः। आसमन्तात् सक्त**मासक्तम्**। गम्यत इति **गतिः**। प्राप्यं वस्त्वित्यर्थः। काऽसौ गतिः? अत आह— **अव्यक्तेति**। तदर्थमाह— **अक्षरात्मिकेति**। आत्मस्वरूपेत्यर्थः। आत्मैव गतिरिति यावत्। आत्मान्यस्य स्वर्गादेः सर्वस्यापि प्राप्यस्य व्यक्तत्वेनाव्यक्तत्वाभावात् आत्मरूपैव गतिरव्यक्ता। आत्मनोऽव्यक्तत्वं तु प्रागेव दर्शितम्। **अव्यक्ते**त्यस्य करणागोचरेति यथाश्रुतार्थः; अक्षरात्मिकेति तु फलितार्थः। ननु सर्वेषां देहोऽस्त्येव? अत आह— **देहाभिमानवद्भिरिति**। अनादिकालादारभ्यानेकजन्मस्वभ्यस्तस्य देहाभिमानस्य परित्यागो दुष्करः, तत्परित्यागं विना आत्मा दुर्लभः, तस्मादक्षरोपास्तौ क्लेशोऽधिकतर इति भावः। **अत इति**। देहाभिमानिभिरात्मनो दुरवापत्वाद् देहाभिमानस्य च दुस्त्यजत्वादित्यर्थः। यस्मादात्मा देहाभिमानिभिर्दुर्लभः, यस्माच्च देहाभिमानो दुस्त्यजः, तस्माद् आत्मलाभार्थमक्षरोपासकानामधिकतरः क्लेश इति परमार्थः।

**ननु** [4]आत्मप्राप्तेर्दुर्लभत्वे देहाभिमानिनामात्मोपासनं सुलभमेवेति चेत्? **मैवम्** ; 'अहं ब्रह्मे'त्यक्षरोपासनस्यापि 'नाहं देहः' इति देहाभिमानत्यागपूर्वकत्वात्। न च ज्ञानादेव कैवल्यसिद्धेः किमक्षरोपासनेनेति वाच्यम् ; ये तु श्रवणादिनैवात्मानं ब्रह्मेति विदितवन्तस्तेषां ज्ञानादेव कैवल्यमिति नोपासनेन फलम्। ये तु प्रतिबन्धबाहुल्याद् बहुशः श्रवणादिनाऽपि नात्मानं विदुः, तेषामक्षरोपासनमिदं विहितम्[5]। ततश्चोपासनात् तेषामात्मनि ब्रह्मबुद्धिर्भवति, उपासनमहिम्ना प्रतिबन्धक्षयात्। इदं च यावदात्मसाक्षात्कारं कर्तव्यम् , न तु पश्चात् , फलाभावात् , नीरलाभानन्तरं खनित्रपरित्यागवदिति बोध्यम्॥५॥

---

१. 'परमात्मदर्शिनाम्' इति पा.। २. इदं भाष्यमुत्तरश्लोके व्याख्यातं रा.पा.। ३. युक्ततमत्वमिति शेषः। ४. देहाभिमानिनामात्मज्ञानाभावेन तत्प्राप्तेः दुर्लभत्वेऽपि आत्मोपासने देहात्माभिमानत्यागस्यानावश्यकत्वात् कुतो दौर्लभ्यमिति शङ्का। ५. द्र. पञ्चदशी ध्यानदीपप्रकरणम्।

**ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः।**
**अनन्येनैव योगेन मां ध्यायन्त उपासते॥६॥**
**तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।**
**भवामि न चिरात् पार्थ ! मय्यावेशितचेतसाम्॥७॥**

ये त्विति। **ये तु सर्वाणि कर्माणि** मयि **ईश्वरे संन्यस्य** मत्पराः **अहं परो येषां ते मत्पराः सन्तः** अनन्येनैव **अविद्यमानम् अन्यद् आलम्बनं विश्वरूपं देवमात्मानं मुक्त्वा यस्य सोऽनन्यः, [1]तेनानन्येनैव; केन?** योगेन **समाधिना मां** ध्यायन्तः **चिन्तयन्तः उपासते॥६॥**

**तेषां किम्?—**तेषामिति। तेषां **मदुपासनैकपराणाम्** अहम् **ईश्वरः समुद्धर्ता। कुत इत्याह—** मृत्युसंसार-

आनन्दगिरिकृतव्याख्या

**यद्यक्षरोपासका मामेवाप्नुवन्तीति [2]विशेष्यन्ते, तत् किं सगुणोपासकाः त्वां नाप्नुवन्ति? न, तेषामपि क्रमेण मत्प्राप्तेरित्याह—** ये त्विति। तु**शब्दः शङ्कानिवृत्त्यर्थः॥६॥**

**तेषां भगवद्ध्यायिनां किं फलतीति शङ्कामनुभाष्य फलमाह—** तेषामित्यादिना। समुद्धर्ता **सम्यगूर्ध्वं नेता ज्ञानावष्टम्भ-**

भाष्यार्कप्रकाशः

**ये त्विति**। अयं श्लोको भक्तविषयः इत्याह— **अक्षरेति**। **वर्तनं** प्रवृत्तिर्व्यवहरणमिति यावत्। स्थितिरिति वा। **उपरिष्टादिति**। 'अद्वेष्टा सर्वभूताना'मिति श्लोकमारभ्येति भावः। इदानीं तु भक्तानां वर्तनं वच्मीति भावः। अहं **परः** उत्कृष्टः, ईश्वर इति वा येषां ते **मत्पराः**। मयि परमेश्वरत्वबुद्धिमन्तः इत्यर्थः। योऽयं विश्वरूपः स एव परमेश्वरः इति कृतनिश्चयाः इत्यर्थः। **अनन्येनेति**। अन्यालम्बनरहितेनेत्यर्थः। विश्वरूपैकालम्बनेनेति यावत्। **आलम्बनमिति**। मनसः इति भावः॥६॥

**तेषामिति**। हे पार्थ! अहं मय्यावेशितचेतसां तेषां मृत्युसंसारसागराद् नचिरात् समुद्धर्ता भवामि। मय्यावेशितचेतसस्तान् भक्तानहं मृत्युसंसारसागराद् नचिरादेवोद्धारयिष्यामीत्यर्थः। न चिरात् नचिरादिति नशब्देन समासः। अतो न नलोपः। **मदुपासनेति**। मम विश्वरूपस्योपासनं मदुपासनं, तदेवैकं परं प्रधानं येषां तेषां तथोक्तानाम्, मदुपासने एकस्मिन्नेव पराणाम् आसक्तानामिति वा। भक्तानामिति यावत्। **समुद्धर्ता** उत्तारकः। ज्ञानप्रदानद्वारेति भावः। न हि ज्ञानं विना मोक्षः सम्भवति।

न चेश्वरः स्वयमेव भक्तानां स्वस्वरूपं मोक्षं दिशतीति वाच्यम्; मोक्षस्य नित्यसिद्धत्वेनादेयत्वात्। देयत्वे च धर्मादिवदनित्यत्वप्रसङ्गात्, नित्यो हि मोक्षः। न चेश्वरानुग्रहाज्जीवस्येश्वरसायुज्यं भवतीति वाच्यम्; ईश्वरसायुज्यस्यापि नित्यसिद्धत्वात्। ईश्वरः परमात्मैव हि जीवः प्रत्यगात्मा। न चेश्वरानुग्रहाद् दुःखध्वंसलक्षणो मोक्षः स्याज्जीवानामिति वाच्यम्; असङ्गस्यानन्दस्य जीवस्य दुःखसम्बन्धासम्भवात्। सुखदुःखादीनां मनोधर्मत्वाच्च। 'कामः सङ्कल्पः' इति श्रुतेः। न च निरतिशय-ब्रह्मानन्दप्राप्तिरिति वाच्यम्; तस्यापि स्वतःसिद्धत्वेन ब्रह्मानन्दस्यानागन्तुकत्वात्। न च स्वस्वरूपेण तिष्ठतीति वाच्यम्; प्रागपि जीवस्य स्वस्वरूपाच्च्युत्यभावात्। अविक्रियो हि जीवः प्रत्यगात्मा, 'अजो नित्यः' इत्यादिमन्त्रात्।

**कथं** तर्हीश्वरस्य संसारसागराज्जीवोद्धारणम्? **उच्यते—** ज्ञानप्रदानद्वारेति। अज्ञानाज्जीवः आत्मानं देहादिरूपं मत्वा संसारसागरे पतितः। स एवेश्वरानुग्रहादात्मानं देहादिविलक्षणं सच्चिदानन्दं ज्ञात्वा संसारसागरादुत्तीर्णो भवति। 'ईश्वरानुग्रहादेव पुंसामद्वैतवासना' इति स्मरणादीश्वरानुग्रहो ज्ञानप्रयोजक एव, न तु मोक्षप्रयोजकः, मोक्षस्याप्रयोज्यत्वात्। अज्ञानमूलो हि रज्जुसर्पभ्रमो रज्जुतत्त्वज्ञानादेव निवर्तते, न त्वन्यस्माद् यथा, तथा अज्ञानमूलो जीवस्यात्मनि संसारित्वभ्रमो जीवतत्त्वज्ञानादेव

१. 'तेनानन्येनैव केवलेन योगेन' इति पा.। २. 'विशिष्यन्ते' इति पा.।

भाष्यार्कप्रकाशः

निवर्तते, नान्यथा। तथा चेश्वरमाययाऽपहृतविवेकान् अनात्मतादात्म्याध्यासमापद्य संसरतो जीवान् , भगवान् भक्त्या तोषितश्चेत् तैः, विवेकिनः कृत्वा अनात्मतादात्म्याध्यासं नाशयित्वा आत्मसाक्षात्कारं तेभ्यो दिशति, ततश्च ते मुच्यन्ते। अत उक्तम्— ईश्वरो भक्तान् संसारसागरात् तारयतीति।

एवमीश्वराधीनस्थितिकत्वादेव भक्तानां मार्जारकिशोरन्यायोऽमीषु सञ्चारितः पूर्वैः। मार्जारो हि स्वशिशुं स्वयमेव वक्त्रेण गृहीत्वा स्थलान्तरं नयति, तद्वदीश्वरोऽपि भक्तान् स्वयमेव ज्ञानप्रदानद्वारा संसारात् तारयतीति। ज्ञानिनस्तु नेश्वरस्तारयति, किं तर्हि? त एव तरन्ति स्वयम् , 'अहं ब्रह्मास्मी'ति ब्रह्मापरोक्षज्ञानादेव भास्करालोकात् तिमिरस्येव सर्वसंसारस्याज्ञानमयस्य समूलस्य निवृत्तेः। अत एवामीषु मर्कटकिशोरन्यायः सञ्चारितः पूर्वैः। मर्कटकिशोरो हि स्वयमेव मर्कटोदरं परिरभ्य वृक्षान्तरं गच्छति। तथा ज्ञान्यपि स्वयमेवेश्वरमात्मानं साक्षात्कृत्य ब्रह्मसायुज्यं प्रतिपद्यत इति।

अनेन स्वतः संसारसागरोत्तरणक्षमाः ज्ञानिनः तदक्षमेभ्यो भक्तेभ्यः उत्कृष्टा इति सूचितम्। यस्मादहमेव भक्तानां संसार-सागरादुद्धर्ता, ततः संसारसागरतरणे भक्तानां न कश्चित् क्लेशः। ज्ञानिनस्तु स्वयमेव संसारसागरं तरन्तीति तेषामस्ति संसारसागरतरणे क्लेशोऽधिकः इति भावोऽत्र गम्यते।

यद्यपि भक्ता अपीश्वरानुग्रहाज्ज्ञानं लब्ध्वा तेनैव ज्ञानप्लवेन संसारसागरं स्वयमेव तरन्ति, पूर्वं भक्तानामेवेदानीं ज्ञानित्वात्। ततश्च भक्तानामीश्वरः संसारसागरात् समुद्धर्तेति वक्तुं न शक्यम् , तथापि भक्तानां समुद्धर्तेश्वर इत्यस्य भक्तानामीश्वरः संसारसागरो-त्तारकं ज्ञानं दिशतीत्येतावत एवार्थस्येह विवक्षितत्वात्। ज्ञानिनां तु न कश्चित् संसारः, नापि तदुद्धारकः, ज्ञानिन एवेश्वरत्वादिति।

अथवा ये सगुणब्रह्मोपासकास्तानहं संसाराज्ज्ञानप्रदानद्वारा उद्धारयामि। ये तु निर्गुणोपासकास्ते स्वयमेवात्मानं साक्षात्कृत्य संसारं तरन्तीति। न हि सगुणोपासकाः निर्गुणोपासकीभूय मुक्ता भविष्यन्तीति स्थितं, येन पूर्वं भक्तानामेवेदानीं ज्ञानित्वादितिवद् वक्तुमत्र शक्येत। न हि निर्गुणोपासनं ज्ञानम् , किं तर्हि? निर्गुणब्रह्मसाक्षात्कार एव। तदेवं सगुणोसकान् मार्जारकिशोरन्यायेनाहं संसारात् तारयामि। निर्गुणोपासकास्तु मर्कटकिशोरन्यायेन स्वयमेव तरन्ति। ज्ञानिनां तु न कश्चित् संसारः, नापि तत्तरणमिति विवेकः सिद्धः।

न चैवमव्यक्तोपासकाः ज्ञानित्वेन इतः प्राग् व्यवहृता इति तद्विरोधः इति वाच्यम् ; आत्मानात्मविवेकरूपज्ञानवत्त्वेन तेषां ज्ञानित्वव्यवहारात्।

**नन्वे**वं सगुणोपासका अपीश्वरानुग्रहादात्मसाक्षात्कारं लब्ध्वा आत्मानमेव प्रतिपद्यन्ते, अव्यक्तोपासकाश्चात्मसाक्षात्कारं लब्ध्वा आत्मानं प्रतिपद्यन्ते। ततश्च 'ते प्राप्नुवन्ति मामेवे'ति ज्ञानिनः प्रति, 'ते मे युक्ततमा मताः' इति भक्तान् प्रति च यदुक्तमीश्वरेण तन्न सङ्गच्छत इति चेत्? **मैवम्** ; अक्षरोपासकानां तत्त्वसाक्षात्कारात् प्रागपि तत्त्वस्य परोक्षं ज्ञानमस्ति। ततश्च ज्ञानिनोऽमी सच्चिदानन्दमीश्वरमेवात्मत्वेन प्रतिपद्यन्ते। भक्तानां तु तदपि नास्ति, आत्मानात्मविवेकस्यैवाभावात्। तदेवं परोक्षज्ञानिनो ऽक्षरोपासनवशाद् अपरोक्षमीश्वरं प्राप्नुवन्तीति 'ते प्राप्नुवन्ति मामेवे'त्युक्तम्। तत्त्वसाक्षात्कारलक्षणेश्वरप्राप्तिरूपफलादन्यस्य अक्षरोपासनजन्यस्य फलस्याभावात्। भक्तास्तु ईश्वरोपासनवशात् तावद् विवेकं प्रतिपद्य, पश्चात् परोक्षज्ञानं प्रतिपद्य, ततस्तत्त्वसाक्षात्कारं प्रतिपद्यन्त इति कृत्वा भक्तानामीश्वरप्राप्तिरूपफलादन्यफलयोः प्राप्तव्ययोः विवेकज्ञानयोः सत्त्वाद् भक्ताः मां प्राप्नुवन्तीति नोक्तम् , भक्तानां विवेकादिप्राप्तेरपि सद्भावात्। किन्तु युक्ततमाः इत्युक्तम् , विवेकादिप्राप्तिद्वारा तेषामपि क्रमेण मोक्ष-सद्भावात्। तथा च विवेकविज्ञानशून्येभ्यो भक्तेभ्यः तद्युक्ताः ज्ञानिनः उत्तमाः इति सिद्धम्।

तदेवं सगुणोपासकान् विवेकविज्ञानहीनान् भगवान् स्वयं तत्प्रदानद्वारा संसारात् तारयति। विवेकविज्ञानवन्तस्त्वक्षरो-पासकाः स्वयमेव विवेकादिसाधनैस्तरन्तीति नाक्षरोपासकानामीश्वरानुग्रहापेक्षा। न हि ते ईश्वरमात्मनोऽन्यं मन्यन्ते, येनात्मनो जीवस्य परित्राणाय स्यात् तेषामीश्वरानुग्रहापेक्षा। किन्तु आत्मानमेवेश्वरं मन्यन्त इति[१]।

१. अहमीश्वरः इति मन्यन्ते इति नार्थः, किन्तु आत्मनः ईश्वरस्वरूपचैतन्यादभेदं मन्यन्त इत्यर्थः ।

भाष्यार्कप्रकाशः

**ननु** नचिराच्छब्दस्वारस्याद् भक्तानामीश्वरस्तत्त्वसाक्षात्कारं सुखेन शीघ्रं दिशतीति गम्यते। ततश्चाभक्तानामात्मसाक्षात्कारो दुर्लभ इति सूच्यते। अतो भक्तिरेव ज्यायसी चेत्? **मैवम्** ; ते प्राप्नुवन्ति मामेवेत्यनेन अक्षरोपासकानामेव भगवत्प्राप्तिः सुलभेति प्रोक्तत्वात्। ईश्वरस्यापि भक्तानां तत्त्वसाक्षात्कारं साक्षाद् दातुमशक्तत्वात्। अन्यथा विवेकादिसाधनवैयर्थ्यप्रसङ्गात्। किं तर्हि? विवेकादिदानद्वारैव। तथा च मोक्षं प्रति विवेकादिमन्तोऽक्षरोपासका एवान्तरङ्गाः, तद्रहितास्तु भक्ता बहिरङ्गा एव।

न चेश्वरो भक्तानां विवेकं परोक्षज्ञानमपरोक्षज्ञानं च युगपदेव दिशति, अथवा क्षिप्रमेवेति वाच्यम् ; किं निर्गुणोपासकेष्वीश्वरस्य प्रद्वेषे निमित्तं, येन तेषां विवेकज्ञानवतामपि क्षिप्रं परमात्मसाक्षात्कारं न दिशति? न च भक्त्यभाव एवेति वाच्यम् ; कूटस्थेश्वरे तेषामपि भक्तिसद्भावात्। आत्मरता हि ते। न हि विश्वरूप एवेश्वरः, कूटस्थस्त्वनीश्वर इति वक्तुं शक्यते, येन कूटस्थरतानामीश्वराभक्तत्वं स्यात्। प्रत्युत कूटस्थ एवेश्वरः, सच्चिदानन्दरूपत्वात् , विश्वरूपं तु मायामयत्वादनीश्वरमेव। एवं सति ये यथार्थं कूटस्थमात्मानमीश्वरमुपासते त एवेश्वरस्य प्रियाः। वक्ष्यत्यमुमेवार्थम्— अद्वेष्टेत्यादिना। ये त्वयथार्थं विश्वरूपोपहितमीश्वर-मुपासते, ते नातीवेश्वरस्य प्रियाः। पितुर्हि पण्डिते पुत्रे प्रीतिः, न तु मूर्खे। भगवांस्तु सर्वस्य पिता। अतः पण्डिता एव ब्रह्मादयः पुत्रास्तस्य प्रियाः। आत्मत्वाच्च ज्ञानिनः प्रियाः ईश्वरस्य। एवं प्रियानप्यमूनीश्वरः संसारसागरान्न तारयति, कुतः? अक्षरोपासनेन तेषामात्मसाक्षात्कारे सति तत्तर्तव्यसंसारसागरस्यैवाभावात्। तस्मादीश्वरो भक्तानामेव संसारसागरादुद्धारकः, न तु ज्ञानिनामिति युक्तमुक्तम्। नैतावता भक्ता एवेश्वरस्य प्रिया इति भ्रमितव्यम् , ज्ञानी प्रियः इति वक्ष्यमाणत्वादुक्तत्वाच्च। नापि ज्ञानिनां स्वयं संसारसागरतरणक्लेश इति भ्रमितव्यम् , तेषां संसारस्यैवाभावात्। नाप्यक्षरोपासकानां स्वयं संसारसागरतरणक्लेश इति भ्रमितव्यम् , तेषामपीश्वरानुग्रहादेव तत्त्वसाक्षात्कारे सति संसारस्यैवाभावात्।

**नन्वे**वमपरोक्षज्ञानप्रदानद्वारा ज्ञानिनामपि संसारसागराद् ईश्वर एवोद्धर्तेति कथमुक्तम् - भक्तानामेवेति चेद्? **उच्यते**— परोक्षज्ञानिदृष्ट्याऽपि नास्त्यात्मनोऽन्य ईश्वरः, यः संसाराज्ज्ञानिनः उद्धरेत्। किं तर्हि? ज्ञानिनामात्मैवेश्वरः। एतेषामात्मानुग्रह एवेश्वरानुग्रहः। एतेनात्मैवोद्धारयति, न त्वात्मनोऽन्य ईश्वरः, भक्तास्त्वात्मनोऽन्यमीश्वरं मन्यन्ते। अतस्तान् भिन्न एवेश्वर उद्धारयति। अत एवोक्तम् — भक्तानामीश्वर उद्धारकः, ज्ञानिनस्तु स्वयमेवोत्तरन्तीति। परोक्षज्ञानिनः स्वात्मनैवोत्तीर्यन्ते, अपरोक्षज्ञानिन उत्तीर्णा एव, भक्तास्त्वीश्वरेणोत्तार्यन्त इति विवेकः।

यद्यपि भक्तानां परोक्षत्वेनाभिमतोऽपीश्वर आत्मैव, तथापि ते आत्मानमीश्वरं न विदुः। अतोऽस्मान् सर्वज्ञ ईश्वर उत्तारयिष्य-तीति तेषां निश्चयः। तमनुसृत्योक्तं भगवताऽपि— 'तेषामहं समुद्धर्ता' इति। इदं चेश्वरकर्तृकं भक्तोद्धारणं तत्त्वज्ञानदानद्वारैवेति वेद्यम्।

**ननु** यद्यात्मैवेश्वरः, कथं तर्हि ज्ञानिन आत्मानुग्रहः? न हि स्वयं स्वस्यानुग्राहकः स्यादिति चेत्? **मैवम्** ; ज्ञानिनो हि प्रमातारः आत्मानुग्रहादपरोक्षज्ञानं लभन्ते, आत्मानुग्रहादेव हि इतः प्राक् परोक्षज्ञानलाभः आसीदेषाम्। किं बहुना? आत्मानुग्रहादेव प्रमातॄणां घटादिविषयलाभोऽपि। आत्मनोऽन्यस्य सर्वस्यापि जडत्वादात्मप्रतिफलनेनैव प्रमातुरहङ्कारस्य चेतनत्वापत्तेः। न चैवमात्मनः सकाशादत्यन्तं भिन्न एव प्रमातेति वाच्यम् ; आत्मप्रतिबिम्बरूपस्य प्रमातुर्बिम्बादात्मनः सकाशादत्यन्तं भेदस्य, अत्यन्तमभेदस्य वा दुर्निरूपत्वात्। एवमनिर्वाच्यत्वादेव मिथ्यात्वं प्रमातुः। यत्तु प्रमातरि प्रतिबिम्बेऽनुगतं शुद्धचैतन्यमात्रं तदेव सत्यं, तदेव स्वस्वरूपं च प्रमातुरिति नात्यन्तं भिन्न आत्मनः प्रमाता, वस्तुतः प्रमातुरेवात्मत्वादिति संक्षेपः।

तस्मादहमन्य ईश्वरादिति ये मन्यन्ते, तान् विवेकविज्ञानादिप्रदानद्वारा अनुगृह्णातीश्वरः। ये त्वहमेवेश्वर इति मन्यन्ते ते स्वयमेवोत्तरन्तीत्यभिप्रायेणोक्तम् – 'तेषामहं समुद्धर्ता' इति भगवता। सम्यगुद्धर्ता **समुद्धर्ता** यथा पुनःसंसारसागरोन्मज्जनं न स्यात् तथा सम्यगुद्धर्तेत्यर्थः। [१]परमपदस्यापुनरावर्तित्वाद् , भक्तानां च क्रमेण परमपदलाभाच्चेति भावः। जन्ममरणसुखदुःखरोगारोग्य-शीतोष्णवृद्धिक्षयादिलक्षणः संसारः। तत्र मृत्योः पतितत्वेऽपि पुनस्तद्ग्रहणं तस्य भयङ्करत्वप्रदर्शनार्थम्। समुद्रे मकर इव संसारे मृत्युरतीव भयङ्करो हि। स्वस्य स्वीयस्य वा मरणादनुमितादपि हि नित्यं बिभेति लोकः, न तु तज्जन्मादेः। दुःखदा अपि

१. पुनःसंसारसागरोन्मज्जनाभावे हेतुमाह— परमेति।

**मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।**
**[१]निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ ८ ॥**

सागरात् **मृत्युयुक्तः संसारो मृत्युसंसारः, स एव सागर इव सागरः, [२]दुस्तरत्वात्; तस्माद् मृत्युसंसारसागराद् अहं तेषां समुद्धर्ता भवामि; न चिरात्, किं तर्हि? क्षिप्रमेव, हे पार्थ !** मय्यावेशितचेतसां **मयि विश्वरूपे आवेशितं प्रवेशितं समाहितं चेतो येषां ते मय्यावेशितचेतसः, तेषाम्** ॥ ७ ॥

**यत एवं तस्मात्—** मय्येवेति। मय्येव **विश्वरूपे ईश्वरे** मनः **सङ्कल्पविकल्पात्मकम्** आधत्स्व **स्थापय, मय्येव अध्यवसायं कुर्वतीं** बुद्धिम् **आधत्स्व** निवेशय। **ततस्ते किं स्यादिति शृणु—** निवसिष्यसि **निवत्स्यसि निश्चयेन मदात्मना मयि निवासं करिष्यस्येव** अतः **शरीरपाताद् ऊर्ध्वम्**, न संशयः **संशयोऽत्र न कर्तव्यः** ॥ ८ ॥

आनन्दगिरिकृतव्याख्या

**दानेनेत्यर्थः।** मृत्युः **अज्ञानं, मरणाद्यनर्थहेतुत्वात्, तेन कार्यतया युक्तः संसारः** ॥ ७ ॥

**भगवदुपासना विशिष्टफलेत्येवं यतः सिद्धम्, अतो भगवन्निष्ठायां प्रयतितव्यमित्याह—** यत इति। [३]**असंहिताकरणं श्लोकपूरणार्थम्। मनोबुद्ध्योः भगवत्यवस्थापने प्रश्नपूर्वकं फलमाह—**तत इति। **भगवन्निष्ठस्य तत्प्राप्तौ प्रतिबन्धाभावं सूचयति—** संशयोऽत्रेति ॥ ८ ॥

भाष्यार्कप्रकाशः

शीतदारिद्र्यादयो न मृत्युवद् भीतिं कुर्युः, धनिकोऽपि हि मृत्युभीतो धनादिकं परित्यजत्येव। तदेवमतिभयङ्करेण दुर्वारेण मृत्युना युक्तत्वात् संसारोऽतिभयङ्करो दुस्तरश्च।

ननु कथं संसारस्य सागरत्वम्? अत आह— **सागर इवेति**। कस्मिन्नंशे संसारसागरयोरौपम्यम्? अत आह— **दुस्तरत्वादिति**। सागर इव दुस्तरत्वात् संसारसागर इत्युच्यते उपचारात्। संसारश्चासौ सागर इति कर्मधारयः। न च संसारः स एव सागर इति भाष्ये विग्रहो दर्शितः, ततोऽवधारणपूर्वपदकर्मधारयोऽयम्, न तु विशेषणसमास इति वाच्यम्; व्याकरणशास्त्रे क्वाप्यवधारणपूर्वपदकर्मधारयादर्शनात्। सम्भावनावधारणपूर्वपदकर्मधारययोर्विशेषणसमासत्वात् 'विशेषणं विशेष्येण बहुल'मिति तद्विधायकसूत्रात्। मयूरव्यंसकादित्वाद् विशेष्यस्यापि संसारस्य पूर्वनिपातः। एवं रूपकसमासेषु सर्वत्राप्यूह्यम्। अत्र संसारः सागर इवेत्युपमितसमासोऽपि वक्तुं शक्यते।

यत्तु **रामानुजः** - मृत्युभूतात् संसाराख्यात् सागरादिति, **तदयुक्तम्** - मृत्योरपि संसारान्तःपातित्वेन संसारस्य मृत्यूपमानौचित्यात्। यच्च नचिरात् क्षिप्रमेव भक्तान्तारयामि, ज्ञानिनस्तु चिरेणेति, तच्चायुक्तम् - ज्ञानस्यैव मोक्षं प्रत्यन्तरङ्गत्वेन सन्निहितत्वात् ज्ञानिनामेवाचिरेण मोक्षलाभः। भक्तानां तु ज्ञानद्वारा क्रमेणेति भक्तानामेव चिरेण मोक्षलाभ इति सिद्धान्तात्। न चैवं नचिरादित्यपार्थमिति वाच्यम्; केवलकर्मयोग्यपेक्षया नचिरादित्युक्तत्वात्। यज्ञयागादिकर्मानुष्ठात्रपेक्षया विश्वरूपोपासकानां द्रुतं चित्तशुद्धिर्भवति, ततो ज्ञानप्राप्तिरिति भावः ॥ ७ ॥

**मयीति**। यत एवं मय्यावेशितचेतसां तेषामहं मृत्युसंसारसागरात् समुद्धर्ता, तस्मादित्यर्थः। मनोबुद्ध्योरपौनरुक्त्यायाह— **सङ्कल्पेति**। एकमेवान्तःकरणं संशयनिश्चयगर्वस्मरणात्मकचतुर्विधवृत्तिभेदात् क्रमेण मनोबुद्ध्यहङ्कारचित्तशब्दैरुच्यते, तत्र सङ्कल्पविकल्पौ संशयः, बुद्धिमिति निश्चयात्मिकामित्यर्थः। इदमेवाह— **अध्यवसायं कुर्वतीमिति**। **अध्यवसायो** निश्चयः। **तत इति**। मयि मनोबुद्ध्योर्निवेशनादित्यर्थः। अत ऊर्ध्वं मय्येव निवसिष्यसि। ननु कथमाधाराधेयभाव एकस्यैवात्मनः? इत्यत आह— **मदात्मनेति**। मत्स्वरूपेण तव स्थितिरेव मयि वासस्तवेति विवक्षितेति भावः[४]। यद्यपि देहपातात् प्रागपीश्वरस्वरूपेणैव जीवः स्थितः,

१. इडागमः आर्षः। २. 'दुरुत्तरत्वात्' इति पा.। ३. 'मय्येव अत' इत्यत्र सवर्णदीर्घाकरणमित्यर्थः। ४. 'वशीकृते मनस्येषां सगुणब्रह्मशीलनात्। तदेवाविर्भवेत् साक्षादपेतोपाधिकल्पनम्॥' इति न्यायात् सगुणनिष्ठाऽपि अन्ते निर्गुणब्रह्मभाव एव पर्यवस्यतीति भावः।

**[१]अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्।**
**अभ्यासयोगेन ततो मामिच्छाऽऽप्तुं धनञ्जय !॥९॥**

अथेति। [२]**अथ एवं यथा** [३]**अवोचम् तथा मयि चित्तं** समाधातुं **स्थापयितुं** स्थिरम् **अचलं** [४]**न शक्नोषि चेत् ,** ततः **पश्चाद्** अभ्यासयोगेन **चित्तस्य एकस्मिन्नालम्बने सर्वतः समाहृत्य पुनः पुनः स्थापनम् अभ्यासः, तत्पूर्वको योगः समाधानलक्षणः, तेनाभ्यासयोगेन** मां **विश्वरूपम्** इच्छ **प्रार्थयस्व** आप्तुं **प्राप्तुम् , हे धनञ्जय !॥९॥**

आनन्दगिरिकृतव्याख्या

**मतप्रदर्शनपूर्वकं भगवत्प्राप्तावुपायान्तरमाह—** अथेत्यादिना। एकमालम्बनं **स्थूलं प्रतिमादि**। समाधानं [५]**ततः अभ्यन्तरे विश्वरूपे चित्तैकाग्र्यम् ॥९॥**

भाष्यार्कप्रकाशः

जीवेश्वरयोश्चैतन्यरूपत्वात् , तथापि जीवन्मुक्तिदशायां कदाचिद् देहादितादात्म्याध्यासः स्यादिति न सर्वदा जीवस्येश्वरात्मना स्थितिः, विदेहकैवल्ये तु देहाद्यभावात्, अज्ञानस्य च नष्टत्वान्न देहाद्यभिमान इति तदा सर्वदाऽपि जीवस्येश्वररूपेण स्थितिः स्यात्। अत एव विदेहकैवल्यस्यापुनरावर्तित्वम्। अयं चार्थ एवकारेण ज्ञाप्यते। अत ऊर्ध्वं मयि निवसिष्यस्येव, न तु पुनरागमिष्यसीत्यर्थात्। यद्वा मय्येव निवसिष्यसि, न तु देहादिसंसार इत्यर्थात्। तथा चात ऊर्ध्वं सर्वदाऽपि मय्येव निवसिष्यस्येवेति फलितार्थः।

**संशय इति**। निवसिष्यसि वा न वेत्याकारक इति भावः। निवसिष्यामि न वेत्याकारक इति वा। विश्वरूपे ईश्वरे मनोबुद्ध्योराधानाच्चित्तशुद्धिज्ञानप्राप्तिद्वारा परमात्मसायुज्यं स्यादिति परमार्थः।

न च विश्वरूपोपासनमात्रादेव परमपदप्राप्तिरत्राभिधीयत इति वाच्यम् ; ज्ञानादेव मुक्तिरित्येतदर्थप्रतिपादकश्रुतिस्मृत्यादिविरोधात्। अज्ञानकृतस्य संसारस्य ज्ञानं विना नाशायोगात्। ईश्वरोपासनस्य च क्रियात्वेनाज्ञानाविरोधित्वाद् विश्वरूपेश्वरोपासकानां नाहं ब्रह्मेति, अहमज्ञ इति, अहं मनुष्यः संसारीति चाज्ञानदर्शनात्। विश्वरूपे च देहे तेषामीश्वरभ्रान्तिदर्शनात्। तस्माद् विश्वरूपोपासकानामपि ज्ञानद्वारैव मोक्षः॥ ८॥

**अथेति**। अथ त्वं मयि चित्तं स्थिरं यथा तथा समाधातुं न शक्नोषि चेत् , हे धनञ्जय ! ततो मामभ्यासयोगेनाप्तुमिच्छ। **यथाऽवोचमिति**। यथाऽहमुक्तवानस्मि तथा मदुक्तप्रकारेण मयि विश्वरूपे। अभ्यासपदार्थमाह— **चित्तस्येति**। स्वाभिमते सुन्दरे कस्मिंश्चित् पद्मादिवस्तुनि विषयान्तराच्चित्तमानीय स्थापयेत्। तच्चेच्चित्तं सहजचापल्याद् विषयान्तरं गच्छति, तर्हि पुनरपि तदानीय पद्मादिवस्तुनि स्थापयेत्। एवं प्रत्यहं बलादपि चित्तमेकस्मिन् वस्तुनि स्थापयेच्चिरम्। एवङ्करणमभ्यासः। अनेन चाभ्यासेन चित्तसमाधाने पुरुषः शक्तो भवति। चित्तसमाधनं नाम चित्तस्य स्वाभिमतेऽर्थे चिरं स्थापनम्। ततश्च पद्मादाविव विश्वरूपेऽपीश्वरे चित्तसमाधानं स्यादिति भवेत् तस्य विश्वरूपप्राप्तिरिति। **मां विश्वरूपं प्राप्तुमिति**। विश्वरूपं मां साक्षात्कर्तुमित्यर्थः। विश्वरूपे मनः स्थापयितुमिति यावत्। विश्वरूपात्मना मनः परिणमयितुमिति फलितार्थः। ध्यानेन हि ध्यातुर्ध्येयात्मता स्यादिति।

**यद्वा** अभ्यासयोगेन निमित्तेन, मनसा करणेन। **मामाप्तुमिति**। मां ध्यातुमित्यर्थः। विषयीकर्तुमिति यावत्। मनसो मद्रूपत्वमापादयितुमिति फलितार्थः। मनो हि वृत्त्या बहिर्घटादिरूपं प्राप्नोति यथा, तथा अन्तरपि वृत्त्या विश्वरूपभगवद्रूपं प्राप्नुयात्। एवं विश्वरूपात्मना मनसोऽवस्थानं यदि त्वं प्रार्थयसि, तर्हि पद्माद्यात्मना मनसोऽवस्थापनं तावदभ्यसेः[६]। यथा स्थूलप्रस्तरमुद्धरिष्यन् पुरुषः तावत् सूक्ष्मप्रस्तरोद्धारणमभ्यस्यति, तद्वत्॥९॥

---

१. इदानीं सगुणब्रह्मध्यानाशक्तानाम् अशक्तितारतम्येन प्रतिमादौ ध्यानाभ्यासः, भागवतधर्मानुष्ठानम् , सर्वकर्मफलत्यागः इति साधनानि त्रिभिः श्लोकैरुच्यन्ते। द्र. मधुसूदनी। २. 'अथ त्वं' इति रा.पा.। ३. 'अवोचाम' इति पा.। ४. 'कर्तुं न शक्नोषि' इति पा.। ५. ततः = प्रतिमादेः। इदं च 'योगः समाधानलक्षणः' इति भाष्यगतसमाधानपदार्थविवरणम्। ६. 'अस गतिदीप्त्यादानेषु' इति भौवादिकस्य धातोः रूपमिदम्। 'अभ्यस्यति' इति तु 'असु क्षेपणे' दैवादिकस्येति बोध्यम्।

**अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव।**
**मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि॥ १०॥**
**अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः।**
**सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्॥ ११॥**

अभ्यासेऽपीति। **अभ्यासेऽपि** असमर्थोऽसि **अशक्तोऽसि, तर्हि** मत्कर्मपरमो **भव, मदर्थं कर्म मत्कर्म, तत्परमो मत्कर्मपरमो मत्कर्मप्रधान इत्यर्थः। अभ्यासेन विना मदर्थमपि कर्माणि केवलं कुर्वन्** सिद्धिं [१]**सत्त्वशुद्धि-योगज्ञानप्राप्तिद्वारेण अवाप्स्यसि॥ १०॥**

अथैतदिति। **अथ पुनः** एतदपि **यदुक्तं मत्कर्मपरमत्वं तत् कर्तुमशक्तोऽसि,** मद्योगमाश्रितो **मयि क्रियमाणानि कर्माणि संन्यस्य यत् करणं तेषामनुष्ठानं, स मद्योगः, तमाश्रितः सन्** सर्वकर्मफलत्यागं **सर्वेषां कर्मणां फलसंन्यासं सर्वकर्मफलत्यागं** ततः **अनन्तरं कुरु** यतात्मवान् **संयतचित्तः सन्नित्यर्थः॥ ११॥**

आनन्दगिरिकृतव्याख्या

**द्वैताभिनिवेशादभ्यासाधीने योगेऽपि सामर्थ्याभावे पुनरुपायान्तरमाह—** अभ्यासेऽपीति। **अभ्यासयोगेन विना भगवदर्थं कर्माणि कुर्वाणस्य किं स्यादित्याशङ्क्याह—** अभ्यासेनेति। सिद्धि**र्ब्रह्मभावः**। अपि**रुक्तव्यवधिसूचनार्थः॥ १०॥**

**भगवत्कर्मपरत्वमप्यशक्यमिति शङ्कते—** अथेति। **बहिर्विषयाकृष्टचेतस्त्वादित्यर्थः। तर्हि भगवत्प्राप्त्युपायत्वेन संयतचित्तो भूत्वा कर्मफलसंन्यासं कुर्वित्याह—** मद्योगमिति॥ ११॥

भाष्यार्कप्रकाशः

**अभ्यास इति**। मत्कर्म **परमं** प्रधानं यस्य स मत्कर्मपरमः, ईश्वरार्पणबुद्ध्या यज्ञादिविहितकर्मकारीत्यर्थः। सहजचपलस्य चित्तस्यैकत्रावस्थानरूपाभ्यासस्यापि दुष्करत्वाच्चित्तसमाधानं विनैव यज्ञादिकर्मणां सुकरत्वादभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भवेत्युक्तम्। कर्मणां बन्धकत्वादुक्तं मत्कर्मेति। कर्माणि हि फलद्वारा बध्नन्ति पुरुषम्। यदि कर्मणां फलमीश्वरे समर्पितम् , तर्हि कर्माणि नैव बध्नन्ति तम्।

ननु विश्वरूपोपासनादभ्याससाध्याद् भवति पुंसां सिद्धिः, किम्पुनः त्वत्कर्मकरणात्? अत आह— **मदर्थमिति**। मदर्थं कर्माणि कुर्वन्नपि सिद्धिमवाप्स्यसि। अपिशब्दात् किं पुनः मद्विश्वरूपोपासकः इति द्योत्यते। अभ्याससापेक्षत्वाद् विश्वरूपोपासनं दुष्करम् , तन्निरपेक्षत्वात् कर्म सुकरमिति सूचनायाह— **अभ्यासेन विनेति**। **केवलमिति**। फलसङ्गादिराहित्येनेत्यर्थः। यद्वा **केवलं** भक्तियोगा-संस्पृष्टत्वेनेत्यर्थः। अथवा विवेकादिराहित्येनेत्यर्थः। काऽसौ सिद्धिः? अत आह— **सत्त्वेति**। चित्तशुद्धिमित्यर्थः। अर्थान्तरमाह— **मुक्तिमिति**। कथं कर्मकरणान्मुक्तिः? अत आह— **योगेति**। चित्तसमाधानं **योगः**॥ १०॥

**अथेति**। अथ एतदपि कर्तुमशक्तोऽसि यदि, तर्हि यतात्मवान् मद्योगमाश्रितश्च सन् सर्वकर्मफलत्यागं कुरु। एतच्छब्दार्थमाह —**मत्कर्मपरत्वमिति**। ईश्वरार्थं कर्मानुष्ठानमित्यर्थः। मद्योगशब्दार्थमाह— **मयीति**। क्रियमाणानि कर्माणि मयि संन्यस्य तेषां यत् करणं स मद्योग इत्यन्वयः। मयि योगो मद्योगो, मदाधारको मद्विषयो वा कर्मयोगः। ईश्वरे कर्मणां संन्यासो नाम तत्फलपरित्यागः, सर्वकर्मफलत्यागं कुर्विति वक्ष्यमाणत्वात्। न च पुनरुक्तिः, ईश्वरे सर्वकर्मफलसमर्पणात्मकं मद्योगमाश्रितत्वादेव त्वं सर्वकर्मफलत्यागं कुर्विति हेतुहेतुमद्भावात्।

---

१. 'सत्त्वशुद्धिं , मुक्तिं वा योगज्ञानप्राप्तिद्वारेण' इति रा.पा. भाति।

भाष्यार्कप्रकाशः

**ननु** मदर्थं कर्माणि कुर्विति पूर्वोक्तस्य मयि संन्यस्य कर्माणि कुर्वित्यधुनोक्तस्य चार्थस्य को भेद इति चेत्? **उच्यते**— ईश्वरार्थं यः कर्म करोति, तेन कर्मणि कर्तृत्वाभिमानोऽपि न कर्तव्यः। ईश्वरयोगाश्रितो यः कर्म करोति, तेन फलत्यागमात्रमेव कर्तव्यमिति। तत्र कर्तृत्वाभिमानपरित्यागस्य दुष्करत्वात् तदपेक्षया सुकरोऽयं मार्ग उपन्यस्तः फलपरित्यागरूपो भगवता दयालुना श्रीकृष्णेनेति बोध्यम्।

**यद्वा** ईश्वरेण यज्ञादिकर्मणां विहितत्वात् तानि केवलं मया कर्तव्यानि, राज्ञा विहितानि कर्माणि भृत्येनेव, अकरणे नरकपातादिलक्षणप्रत्यवायादिति मत्वा 'यः कर्म करोति स ईश्वरार्थं कर्मकर्ता' इत्युच्यते। ईश्वराज्ञानिर्वर्तिततया ईश्वरप्रीत्यर्थतया च तत्कर्मण ईश्वरार्थत्वात्। न च - निष्कामस्य पूर्णकामस्य चेश्वरस्य, राज्ञ इव सकामस्य भृत्यकर्मणा, जीवकर्मणा कोऽर्थः? येनेश्वरस्य प्रीतिः स्यादिति - वाच्यम् ; फलाभावेऽपि स्वाज्ञानुसारेण कर्माणि कृतानीति तत्कर्तरि प्रीयते महेश्वरः, यथा विद्यां सम्पादयेति स्वाज्ञया गुरुकुलं प्रविश्य विद्यामधीयाने पुत्रे प्रीयते पिता, तद्वत्।

**अथवा** यथोक्तकर्मकरणद्वारा चित्तशुद्धिप्राप्त्यादिक्रमेण जीवा एते मुच्यन्त इति तेषु प्रीतिर्भगवतः। यथा तत्त्वविदो गुरोः शिष्ये। एवमेते ईश्वरार्थं कर्म केवलं कुर्वन्ति, अन्ये तु कृतकर्मफलमीश्वरे समर्पयन्तीति भेदः।

**अथवा** यज्ञादिकर्मभिरीश्वर एवाराध्यत इतीश्वराराधनबुद्ध्या कृतानि कर्माणीश्वरार्थकर्माणि। इन्द्रचन्द्रादित्यगणपत्यादयो देवता मया कर्मभिराराध्यन्ते, यत्त्वमीषामाराधनजन्यं फलं तन्न मम, किन्त्वीश्वरस्यैवेति बुद्ध्या यानि कृतानि कर्माणि, तानि तु नेश्वरार्थानि, किं तर्हि तत्फलमेवेश्वरार्थमिति मत्कर्मकृतां फलत्यागिनां च भेदः। सर्वाणि कर्माणि विधाय ब्रह्मार्पणमस्त्विति तत्फलपरित्यागः सुकरः। इमानि सर्वकर्माण्यपीश्वराराधनार्थानीत्यनुसन्धानं तु दुष्करमिति पक्षद्वयमुपन्यस्तम्।

यत्तु **रामानुजः** - मदर्थं कर्माणि मदीयानि आलयनिर्माणोद्यानकरणप्रदीपारोपणमार्जनाभ्युक्षणोपलेपनपुष्पाहरणपूजाप्रवर्तननामसङ्कीर्तनप्रदक्षिणस्तुतिनमस्कारादीनि; सर्वकर्मफलत्यागस्तु यज्ञादिकर्मफलस्वर्गादिपरित्याग इति। **तत्तुच्छम्** - यज्ञादिकर्माणामपीश्वराराधनरूपत्वेनालयनिर्माणादिवदीश्वरार्थकर्मत्वात्। अन्यथा आलयनिर्माणादिकर्माण्येव विदध्याच्छ्रुतिरपि, न तु यज्ञादीनि। 'त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते' इत्यादिनेहापि यज्ञादीनामीश्वराराधनरूपत्वस्योक्तत्वात्। किञ्च यज्ञाद्यपेक्षया पुष्पाहरणादिकर्मणां सुकरत्वेन यज्ञाद्यशक्तस्यैव पुष्पाहरणादिकर्माधिकारात् 'अथैतदप्यशक्तोऽसी'ति पुष्पाहरणादिकर्माशक्तस्य यज्ञादिकर्मफलत्यागविधानमयुक्तम्। अपि च आलयनिर्माणादीनां पूर्तकर्मत्वेन, पूर्तकर्मणश्च चन्द्रलोकभोगफलकत्वेन, फलत्यागस्य [1]चाहितत्वेन न तेषां सत्त्वशुद्धिरपि सिध्येत् , किं पुनर्मोक्षः?

अपि च 'अहरहः सन्ध्यामुपासीत', 'वसन्ते वसन्ते ज्योतिषा यजेत' इत्यादिश्रुतिसिद्धसन्ध्यायज्ञादिकर्मपरित्यागे, आलयनिर्माणादिकर्मस्वीकारे च परित्यक्तभर्तृकायाः स्वीकृतजाराया जारिण्या इव तवापि दुर्गतिरेव स्यात्। न च सन्ध्यायज्ञादिकर्मसु स्थित्वैवालयनिर्माणादीनि कुर्यादिति वाच्यम् ; एकत्र कर्मणि व्यापृतस्य कर्मान्तरे प्रवृत्त्यसम्भवात्। यज्ञादिकर्मानधिकारिणामद्विजानां परलोकभोगायैव पूर्ताख्यकर्मणामीश्वरेण निर्मितत्वात्। 'यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम्। हित्वाऽर्चां भजते मौढ्याद् भस्मन्येव जुहोति सः॥' इति प्रतिमायां भगवदाराधनस्य निन्दितत्वात्। प्रतिमार्चनस्य स्त्रीशूद्रादिसर्वसुकरत्वेन महानुभावं पार्थं प्रति 'अथैतदप्यशक्तोऽसी'ति वक्तुमयुक्तत्वात्। प्रतिमार्चनापेक्षया यज्ञादिकर्मफलत्यागस्य सुकरत्वं विदुषामपहासास्पदमेवेति हेतोश्च।

**यच्च** मद्योगं मद्भक्तियोगमाश्रितः सन् एतत् कर्तुमशक्तोऽसीत्यन्वयस्तेन दर्शितः, **तदप्यसत्** - मद्योगमाश्रितः इत्यस्य पूर्ववाक्यान्वये [1]समाप्तपुनरादानदोषात्। यद्यार्षेषु ग्रन्थेषु तादृशा दोषा नाश्रीयन्ते, तर्हि मद्योगमित्यस्य मद्भक्तियोगमित्यर्थश्च लाक्षणिकत्वादुपेक्ष्यः। मयि योगश्चित्तसमाधानमर्थाद्भक्तिरेवेति न लक्षणा दोष इत्यभ्युपगमेऽपि भगवति चित्तं समाधातुमशक्तस्यैव मदर्थं कर्माणि कुर्विति उपदिष्टत्वेन ईश्वरकर्मपरस्येश्वरे चित्तसमाधानाभावाद् मद्योगमाश्रितो मदर्थं कर्माणि कर्तुमशक्तोऽसीति वर्णनमयुक्तमेवेति।

---

१. 'अविहितत्वेन' इति पाठः संभाव्यते।

**श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद् ध्यानं विशिष्यते।**
**ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्॥ १२॥**

भाष्यार्कप्रकाशः

अत्र मद्योगमाश्रितः सन्नेतदपीत्यन्वयोऽपि गम्यते। मद्योगशब्दस्य तु **शङ्करोक्त** एवार्थः। तथा चेश्वरे कर्तृत्वादिसंन्यास-पूर्वकमीश्वरार्थं कर्म कर्तुं यो न शक्नोति, तेन कर्मफलपरित्यागः कर्तव्यो नियतात्मनेति सिध्यति निरवद्यः पन्थाः।

माऽस्तु ममैतत् कर्मफलमित्यनुसन्धानमात्रमेवास्य फलत्यागिनः कर्तव्यः[व्यम्]। ईश्वरार्थं कर्मकृतस्तु— ईश्वराराधनायैतत् कर्म मया क्रियत इति, अनेन कर्मणा मयेश्वर एक एवाराध्यत इति वा, ईश्वरप्रीतये एतत् कर्म क्रियत इति वा, न मया कर्म क्रियते किन्त्वीश्वरेणैवेति वा, न मया कर्म क्रियते किन्तु प्रकृत्यैवेति वा। एवमाद्यनुसन्धानं कर्तव्यमिति दुष्करम् ईश्वरकर्मप्रधानत्वं कर्मफलत्यागापेक्षयेति भावः॥ ११॥

**श्रेय इति। अभ्यासाद्** अनुष्ठानात् कर्मणां 'मत्कर्मपरमो भवे'त्युक्तलक्षणाद् **ज्ञानं** शास्त्रार्थपाण्डित्यम् , आत्मानात्मपदार्थ-ज्ञानमिति यावत्। **श्रेयः** प्रशस्यतरं हि। हिः प्रसिद्धौ। ज्ञानाच्च तस्माद् ध्यानं विश्वरूपोपासनं विशिष्यते। ध्यानात् तस्मात् सर्वकर्मफलत्यागो विशिष्यते। यद्यपीश्वरार्थकर्मकरणाशक्तस्यैव फलत्यागो विहितस्तथापि फलत्यागः सर्वोत्कृष्ट एव। कुतः? **त्यागाच्छान्तिरनन्तरम्** त्यागादनन्तरमेव यस्माच्छान्तिः स्यात् , तस्मात् त्यागो विशिष्यते ज्ञानविशिष्टादपि ध्यानादिति।

यद्यपि पूर्वं विश्वरूपोपासन-अभ्यास-मत्कर्मपरमत्व-फलत्यागरूपाश्चत्वार उपायाः उक्ताः, त एवेहापि वक्तव्याः, तेषां मध्ये कर्मफलत्याग उत्कृष्ट इति तस्य स्तवनीयत्वात् , तथापि चित्तस्यैकत्रावस्थापनलक्षणाभ्यासो नेह गृहीतः, अभ्यासस्य विश्वरूपोपा-सनहेतुत्वेन साक्षान्मोक्षमार्गत्वाभावात्। विश्वरूपध्यानसामर्थ्याय ह्यभ्यासो विहितः। ज्ञानं तु पूर्वमनुक्तमप्युक्तम् , इह तस्यापि मोक्षमार्गत्वेन तदपेक्षयाऽपि फलत्यागस्य प्राशस्त्यस्य वक्तव्यत्वात्।

न चैवं ज्ञानायोगादप्यस्य प्राशस्त्यं वक्तव्यमेवेति तस्यापीह ग्रहणं भवेदिति वाच्यम् ; अज्ञविषयत्वादस्य श्लोकस्य। अज्ञस्य ज्ञानयोगानधिकारेण ज्ञानयोगो हि न तस्य मोक्षमार्गः। न चाज्ञस्य कथं शास्त्रार्थपरिज्ञानमिति वाच्यम् ; सुतरामज्ञस्यावैदिकस्य नास्तिकस्य कर्मण्यप्यनधिकारेणात्मयाथार्थ्यज्ञानशून्यस्यैवेहाज्ञत्वेन विवक्षितत्वात्। शास्त्रार्थविदोऽपि सम्यग्दर्शनशून्या ह्यज्ञा इति।

यद्वा अभ्यासाच्चित्तस्यैकत्र स्थापनलक्षणात् ज्ञानं शास्त्रार्थपरिज्ञानं श्रेयः, अभ्यासस्तु ईश्वरकर्मपरमत्वाच्छ्रेयानिति बोध्यम्। अन्यत्सर्वं पूर्ववत्। मत्कर्मपरमत्व अभ्यास-शास्त्रार्थज्ञान-ध्यान-फलत्यागानां मध्ये फलत्याग उत्कृष्ट इति।

अथवा अभ्यासाच्चित्तस्यैकत्र स्थापनलक्षणाज्ज्ञानं शास्त्रार्थयज्ञादिकर्मपरिज्ञानं लक्षणया तत्प्रयुक्तमीश्वरार्थकर्मपरत्वं श्रेयः, अन्यत्पूर्ववत्। यद्यप्यभ्यासेऽप्यसमर्थस्येश्वरार्थकर्मपरत्वं विहितं, तथापि अभ्यासादविवेकपूर्वकात् श्रेय एव ज्ञानपूर्वकमीश्वरकर्म-परत्वम्। विश्वरूपोपासनं प्रति त्वन्तरङ्गहेतुत्वाद् विश्वरूपोपासनानन्तरमभ्यास उक्त इति बोध्यम्। विश्वरूपोपासनाभ्यास-मत्कर्मपरमत्व-फलत्यागानां मध्ये फलत्याग एवोत्कृष्ट इति भावः।

अत्र **अभ्यासाद्** विश्वरूपोपासनात्मकाद् **ज्ञानं** ज्ञानयोग आत्मानात्मविवेचनरूप इति भावः- श्रेयः, तस्माच्च ज्ञानात्परोक्षात् श्रवणादिलक्षणाद् ध्यानं तादृशज्ञानपूर्वकमात्मोपासनं विशिष्यते। ध्यानात् सर्वकर्मफलत्यागः सर्वकामप्रहाणं भवतीति शेषः। आत्मोपासकानामात्मैककामत्वेन कामान्तराभावादिति भावः। त्यागाच्छान्तिरनन्तरं भवतीत्यर्थोऽप्यापतति - स त्वप्रकृतत्वादुपेक्ष्यः, अनात्मविदां कर्मफलत्यागस्यात्र स्तूयमानत्वात् , तस्यैव प्रकृतत्वात् , अथैतदप्यशक्तोऽसीति, कुरु कर्मफलत्यागमिति च पूर्वमुक्तत्वात्।

यत्तु **रामानुजः** - अभ्यासाद् भगवति स्मृत्यभ्यासाद् ज्ञानमात्मापरोक्ष्यज्ञानं श्रेयः आत्मविहितत्वे विशिष्यते, ज्ञानाद् ध्यानं विशिष्यते, ध्यानात् फलत्यागेनानुष्ठितं कर्मैव विशिष्यते, तदनन्तरं निरस्तपापतया मनसः शान्तिर्भविष्यति, शान्ते मनस्यात्मध्यानं सम्पत्स्यते, ध्यानाच्चात्मापरोक्ष्यं, तदापरोक्ष्यात् परा भक्तिरिति भक्तियोगाभ्यासाशक्तस्यात्मनिष्ठैव श्रेयसी, आत्मनिष्ठस्यापि अशान्त-

भाष्यार्कप्रकाशः

मनसो निष्ठाप्राप्तयेऽन्तर्गतात्मज्ञानानभिसंहितफलकर्मनिष्ठैव श्रेयसीत्यर्थ इति। **तत्तुच्छम्** – 'क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसा'-मित्यात्मनिष्ठाया एव भक्तियोगाद् विश्वरूपोपासनात्मकादधिकक्लेशावहत्वस्योक्तत्वात्, ज्ञानयोग एव भक्तियोगाद् दुष्कर इति ज्ञानयोगाशक्तस्यैव भक्तियोगेऽधिकारः। युक्तं चेदम्— ज्ञानयोगिनो ह्यात्मानात्मविवेकः, अनात्मस्वात्माभिमानत्यागः, उन्मेष-निमेषादिसर्वकर्मसु देहादेः कर्तृत्वं न ममेति स्वस्याकर्तृत्वानुसन्धानं, दृश्यमानसर्वप्रपञ्चमिथ्यात्वनिश्चयः- एवमादयो बहवो गुणा आवश्यकाः। तदभावे ज्ञानयोगासिद्धेः। तस्माद् दुष्करोऽज्ञस्य ज्ञानयोगः। भक्तियोगस्तु - ब्राह्मणोऽहं विष्णुशर्मा मोक्षाय भगवन्तं रामचन्द्रं भजामीत्यनुसन्धानसाध्यः इति न तत्र देहाभिमानत्यागः, नाप्यात्मानात्मविवेकः, नापि कर्तृत्वाभिमानत्यागः। तस्मात् सुकरो भक्तियोगः। न च पत्रपुष्पाद्युपकरणसम्पादनक्लेशाद् दुष्करो भक्तियोग इति वाच्यम् ; तथा सति बहूपकरणसाध्यः कर्मयोग एव दुष्कर इति कर्मयोगाशक्तस्यैव भक्तियोगाधिकार इति वक्तव्यत्वात्। तस्मान्मनःक्लेश एव क्लेशः, न तु कायक्लेशः क्लेशः। अन्यथा कर्मयोगापेक्षया कृषेरेव दुष्करत्वप्राप्तेः।

एवं ज्ञानयोगस्य दुष्करत्वादेव ज्ञानिनां स विहितः— 'लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ। ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्॥' इति। भक्तियोगो हि कर्मयोगान्तर्गत एवेत्युक्तं प्राक्। निष्ठाद्वयस्यैव भगवता प्रोक्तत्वेन तृतीयनिष्ठाकल्पनस्या-युक्तत्वात्। तस्मात् कर्मयोगस्तदन्तर्गतभक्तियोगो वा ज्ञानयोगाशक्तस्याज्ञस्यैव श्रेयःप्राप्तिहेतुत्वेन विहित इति भक्तियोगाशक्तस्य ज्ञानयोगः, ज्ञानयोगाशक्तस्य तु कर्मयोग इति न वक्तुं शक्यते। भक्तियोगकर्मयोगयोरेकत्वेन ज्ञानयोगं प्रत्युत्कर्षापकर्षयोरेकस्यैव दुर्वचत्वात्।

**तथा** आत्मापरोक्ष्यात् परा भक्तिः स्यादित्यप्ययुक्तम् - अपरोक्षीकृतात्मस्वरूपस्य विदुषः आत्मन एवेश्वरत्वेनात्मभिन्नेश्वर-स्यैवाभावात् कुतो भक्तिमार्गावकाशः? स हि सेव्यसेवकद्वयाश्रयः। प्रकृते तु आत्मेश्वरभेदाभावात् कथं सेव्यसेवकभावः? न च भिन्न एवात्मन ईश्वर इति वाच्यम् ; 'ज्ञानी त्वात्मैव मे मत'मित्युक्तत्वाद् , ईश्वरस्य च सर्वात्मत्वात् सर्वभूतानां हृद्देशे आत्मन एवावस्थानाद् ईश्वरस्य च सर्वान्तरत्वेनात्मत्वात्। 'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशु'रिति भिन्नात्मज्ञानस्य श्रुत्यैव निन्दितत्वात्। तस्मादज्ञविषय एवायं भिन्नात्मज्ञानप्रयुक्तो भक्तियोगः।

'तरति शोकमात्मविदि'ति[1] आत्मापरोक्ष्यज्ञानादेव सर्वसंसारनिवृत्तिश्रवणात् कथं भक्तेर्ज्ञानात्परत्वम्? किन्तु अवरत्वमेव। ज्ञानं विना भक्त्या संसारस्यानिवृत्तेः। संसारो ह्यज्ञानकृतत्वाज्ज्ञानैकनाश्यः। न चात्मज्ञानाद् आत्मानन्दलाभ एव, भक्त्या तु ब्रह्मानन्दलाभ इति वाच्यम् ; आत्मानन्दस्यैव ब्रह्मानन्दत्वात्। भक्तस्य ब्रह्मानन्दालाभाच्च। स्वकल्पितविश्वरूपानुभवजन्यानन्द एव हि भक्तस्य भक्तिदशायां स्फुरति। स च मायिक एव। तस्मादनित्य एव च। नित्यो हि ब्रह्मानन्दः, ब्रह्मणस्तस्य नित्यत्वात्। एवं फलतोऽधिकत्वादेव दुष्करेऽपि ज्ञानयोगे ज्ञानिनः प्रवर्तन्ते। दुष्करत्वादेव च ज्ञानिविषयोऽयम्। अज्ञा हि न दुष्करं कर्तुमर्हन्ति, किन्तु प्राज्ञा एव। ततश्च ज्ञानिविषयात् ज्ञानयोगादज्ञविषयस्य भक्तियोगस्य कथमपि नास्त्युत्कर्षः, किन्त्वपकर्ष एवेति ज्ञानयोगाशक्तस्य अज्ञस्यैव भक्तियोग इति स्थितम्।

**अथ** आत्मनिष्ठस्यापि कर्मनिष्ठैव श्रेयसीति यदुक्तम् , **तदयुक्तम्** , आत्मनिष्ठाकर्मनिष्ठयोरेकत्रावस्थानायोगात् , त्यक्तसर्व-कर्मण एवात्मनिष्ठायामधिकारात् , संन्यासिनः पुनः कर्मनिष्ठाप्राप्त्ययोगात्। आत्मनिष्ठाप्राप्त्यनर्हस्यैव विक्षिप्तचित्तस्याज्ञस्य चित्तशुद्ध्यर्थं कर्मनिष्ठाया विहितत्वात्। आत्मनिष्ठस्यात्मनिष्ठयैव कृतकृत्यत्वात्। ज्ञानिन एवात्मनिष्ठत्वेन तस्य कर्मानधिकारस्य पूर्वमेव स्थापितत्वाद् 'वेदाविनाशिन'मिति श्लोकभाष्यादौ। तस्माद् अज्ञस्यात्मनिष्ठाप्राप्त्यनर्हस्यैव कर्मनिष्ठा श्रेयसीति स्थितम्।

**यच्चानेनोक्तम्** – फलत्यागान्मनःशान्तिः, मनःशान्तेरात्मध्यानम् , आत्मध्यानादात्मापरोक्ष्यम् , आत्मापरोक्ष्याद् भक्तिश्च भविष्यतीति। तत्रात्मापरोक्ष्याद् भक्तिरिति निरस्तम्। आत्मापरोक्ष्यानन्तरं कृतकृत्यत्वेन प्राप्तप्राप्यत्वेन च कर्तव्यस्य प्राप्यस्य वा अभावात्। आत्मसाक्षात्कार एव हि सर्वावधिः। आत्मध्यानादेवात्मापरोक्ष्यमिति तु नियन्तुं न शक्यते, आत्मोपासनं विनाऽपि

१. अत्र शोकशब्देन शोककारणमविद्या लक्ष्यते। तरणं निवृत्तिः। उद्देश्यविधेयभावमहिम्ना चोद्देश्यतावच्छेदकात्मज्ञानप्रयोज्यत्वं शोकनिवृत्तौ लभ्यते इति ज्ञेयम्।

**इदानीं सर्वकर्मफलत्यागं स्तौति—** श्रेय इति। श्रेयो **हि प्रशस्यतरं ज्ञानम्। कस्मात्? [१]अविवेकपूर्वकादभ्यासात्। तस्मादपि** ज्ञानाद् **ज्ञानपूर्वकं ध्यानं विशिष्यते। ज्ञानवतो ध्यानादपि कर्मफलत्यागो विशिष्यत इत्यनुषज्यते। एवं कर्मफलत्यागात् पूर्वविशेषणवतः** शान्तिः **उपशमः सहेतुकस्य संसारस्य** अनन्तरमेव **स्यात् , न तु कालान्तरमपेक्षते।**

**अज्ञस्य कर्मणि प्रवृत्तस्य पूर्वोपदिष्टोपायानुष्ठानाशक्तौ सर्वकर्मणां फलत्यागः श्रेयःसाधनमुपदिष्टम् , न**

अनुभूतिस्वरूपाचार्यटिप्पणम्

यदुक्तं सर्वकर्मफलत्यागं स्तौतीति, तदिदानीं प्रकटयति— **अज्ञस्य कर्मणि प्रवृत्तस्येत्यादिना**॥ १२॥

आनन्दगिरिकृतव्याख्या

**उत्तरश्लोकतात्पर्यमाह—** इदानीमिति। ज्ञानं [२]**शब्दयुक्तिभ्यामात्मनिश्चयः।** अभ्यासो **ज्ञानार्थश्रवणाभ्यासः, अनिश्चयपूर्वको ध्यानाभ्यासो वा[३]। तस्य विशिष्यमाणत्वे साक्षात्कारहेतुत्वं हेतुः। त्यागस्य विशिष्टत्वे हेतुमाह—** एवमिति। **प्रीणातु भगवानिति तस्मिन् कर्मसंन्यासपूर्वकमित्यर्थः।** पूर्वविशेषणवतः **नियतचित्तस्य पुंसो यथोक्तत्यागादित्यर्थः। अनन्तरमेवेत्युक्तं व्यनक्ति—** न त्विति।

**ननु कर्मफलत्यागस्य सद्यःशान्तिकरत्वे, सम्यग्धीरेव तथेति श्रुतिस्मृतिप्रसिद्धिर्विरुध्येत, तत्राह—** अज्ञस्येति। **दीर्घेण कालेनादरनैरन्तर्यानुष्ठिताद् ध्यानाद् वस्तुसाक्षात्कारद्वारा संसारदुःखोपशान्तेस्तथाविधाद् ध्यानात् त्यागस्य विशिष्टत्वोक्तेः तदीयस्तुतिः**

भाष्यार्कप्रकाशः

श्रवणादिना आत्मसाक्षात्कारसम्भवात्। श्रवणाद्यशक्तस्य अनुत्तमस्यैवात्मध्यानस्य विहितत्वाद् , उत्तमाधिकारिणां श्रवणादेरेव विहितत्वात्। मूले त्यागाच्छान्तिरनन्तरमितिवत् - शान्तेरनन्तरं ध्यानम् , ध्यानादनन्तरं ज्ञानमिति क्रमस्यादर्शनात्। किञ्च त्याग-शान्त्योरिव ज्ञानध्यानयोरुपायोपेयभावः कार्यकारणभावो वा विवक्षितः स्याद् यदि, तर्हि उपेयात् ज्ञानाद् उपायस्य ध्यानस्य, शान्तिद्वारा उपायस्य त्यागस्य ध्यानादुपेयाच्च श्रेष्ठत्ववचनमयुक्तं स्यात्। उपायादुपेयं हि प्रशस्यतरम्। उपेयस्य प्रशस्तत्वादेव उपेयप्राप्त्यनन्तरमुपायपरित्यागः। उपायस्यैव प्रशस्तत्वे तु उपेयप्राप्तिकामो नैव स्याज्जनानाम्।

नाप्यभ्यासं प्रति ज्ञानस्योपायत्वं सङ्गच्छते, अविवेकपूर्वकत्वादभ्यासस्य, ज्ञानस्य चाविवेकनाशकत्वात्। न हि भक्तिमार्गे विश्वरूपं दृश्यमानमेवेश्वरं मन्यमानानां तद्विविक्तस्य द्रष्टुरीश्वरस्यात्मनो ज्ञानं भवितुमर्हति। सति त्वनात्मविविक्तद्रष्ट्रात्मज्ञाने न ह्यनात्मनि देहे विश्वात्मके रज्येरन् ते, किन्तु सच्चिदानन्दे स्वात्मन्येवेश्वरे। तस्मान्नास्त्यभ्यासे आत्मानात्मविवेक इति। तस्माद् अज्ञस्य कर्मणि प्रवृत्तस्य ज्ञानमार्गेऽनधिकाराद् विश्वरूपोपासनाभ्यासेश्वरकर्मपरत्वरूपोपायानुष्ठानाशक्तेश्च कर्मफलत्याग एव सुकरत्वाच्छान्तिहेतुत्वाच्च श्रेयानिति यथोक्त एवार्थः।

अथ भाष्यं व्याख्यायते— 'प्रशस्यस्य श्रः' इति श्रादेशः, तरबर्थे ईयसुन् प्रत्ययश्चेत्यभिप्रेत्याह— **प्रशस्यतरमिति**। अभ्यासाज्ज्ञानस्योत्कृष्टत्वे हेतुमाह— **अविवेकपूर्वकादिति**। ज्ञाने तु विवेकोऽस्तीति भावः। **ज्ञानवत इति**। ज्ञानयुक्तादित्यर्थः। **पूर्वोक्तविशेषणवत इति**। ध्यानोत्कृष्टत्वरूपविशेषणयुक्तादित्यर्थः। **उपशमो** निवृत्तिः **सहेतुकस्य** अज्ञानस्य [साज्ञानस्य], संसारं प्रत्यज्ञानस्यैव हेतुत्वात्। **अनन्तरमेवेति**। यदा फलत्यागस्तदैवेत्यर्थः। एवकारार्थमाह—**न तु कालान्तरमिति**।

प्रकृतश्लोकोपदिष्टार्थमाह— **अज्ञस्येति**। अज्ञोऽपि संन्यस्य यमनियमाद्यनुतिष्ठेदित्यत आह— **कर्मणि प्रवृत्तस्येति**। गृहस्थस्येत्यर्थः। **पूर्वोपदिष्टोपायानां** विश्वरूपोपासनाभ्यासेश्वरकर्मपरत्वानामनुष्ठानस्य **अशक्तौ** सामर्थ्याभावे। **न प्रथममेवेति**। शक्त्यशक्त्यवेक्षणं विनैव कर्मफलत्यागः श्रेयःसाधनमज्ञस्येति न वक्तव्यमित्यर्थः।

१. 'विवेकपूर्वकाद्' इति पा.। २. वेदान्तश्रवणमननाभ्यामित्यर्थः। ३. 'निश्चयपूर्वको ध्यानाभ्यासो वा' इति पा.। एतदुत्तरम्— ध्यानं निश्चयपूर्वकं निदिध्यासनापरपर्यायमित्यर्थकः पाठोऽपेक्षितः। तस्येत्याद्युत्तरग्रन्थश्च इत्थं योज्यः— ज्ञानाच्छ्रवणमननपरिनिष्पन्नादपि **ध्यानं** निदिध्यासनसंज्ञं **विशिष्यते**ऽतिशयितं भवति। तत्र हेतुमाह—साक्षात्कारेति। तस्य साक्षात्कारं प्रत्यव्यवहितहेतुत्वादित्यर्थः- इति।

**प्रथममेव। अतश्च 'श्रेयो हि ज्ञानमभ्यासाद्' इति उत्तरोत्तरविशिष्टत्वोपदेशेन सर्वकर्मफलत्यागः स्तूयते, सम्पन्न-साधनानुष्ठानाशक्तावनुष्ठेयत्वेन श्रुतत्वात्। केन साधर्म्येण स्तुतित्वम्? 'यदा सर्वे प्रमुच्यन्ते'(क.उ.६.१४) इति सर्वकामप्रहाणाद् अमृतत्वमुक्तम् , तत् प्रसिद्धम्। कामाश्च सर्वे श्रौतस्मार्त[१]सर्वकर्मणां फलानि। तत्त्यागे च विदुषो [२]ज्ञाननिष्ठस्यानन्तरैव शान्तिरिति सर्वकामत्यागसामान्यम् [३]अज्ञकर्मफलत्यागस्यास्तीति तत्सामान्यात् सर्वकर्मफल-**

आनन्दगिरिकृतव्याख्या

**अत्रेष्टेत्याह—**अतश्चेति। **तत्र हेतुमाह—** सम्पन्नेति। सम्पन्नानि **प्राप्तानि** साधनानि **अक्षरोपासनादीनि, तेषां मध्ये पूर्वपूर्वस्यानुष्ठानाशक्तौ उत्तरोत्तरस्यानुष्ठेयत्वेनोपदेशात् , त्यागे चोपदेशपर्यवसानादित्यर्थः। त्यागे विशिष्टत्ववचनस्य केन साधर्म्येण तं प्रति स्तुतित्वमिति पृच्छति—** केनेति। **उत्तरमाह—** यदेति। अमृतत्वमुक्तम् **'अथ मर्त्योऽमृतो भवति' इति शेषादिति शेषः। कामप्रहाणस्यामृतत्वार्थत्वम् 'अथाकामयमानः' इत्यादावपि सिद्धमित्याह—** तदिति। **कामत्यागस्यामृतत्वहेतुत्वेऽपि, कथं कर्मफलत्यागस्य तद्धेतुत्वमित्याशङ्क्याह —** कामाश्चेति। **कर्मफलत्यागादेव शान्तिश्चेद् ज्ञाननिष्ठोपेक्षितेत्याशङ्क्याह—** तत्त्यागे चेति। **तथापि कथमज्ञस्य कर्मफलत्यागस्तुति-रित्याशङ्क्याह—**इति सर्वेति। **विद्यावतस्त्यागवद् अविद्वत्त्यागस्यापि त्यागत्वाविशेषाद् विशिष्टत्वोक्तिर्युक्तेति स्तुतिमुपसंहरति—**इति

भाष्यार्कप्रकाशः

एतेनाशक्तस्यैवाज्ञस्य कर्मणि प्रवृत्तस्य कर्मफलत्यागः श्रेयःसाधनम् , न तु शक्तस्याज्ञस्य, नापि कर्मण्यप्रवृत्तस्याज्ञस्येति, किं पुनः प्राज्ञस्य संन्यासिनः इत्यर्थात् सूच्यते। **अतश्चेति**। अशक्तस्य कर्मिणः कर्मफलत्यागस्यैव श्रेयःसाधनत्वादित्यर्थः। **उत्तरोत्तर-विशिष्टत्वोपदेशेनेति**। उत्तरस्योत्तरस्य ज्ञानध्यानादेः, पूर्वस्मात्पूर्वस्माद् अभ्यासज्ञानादेः विशिष्टत्वस्य उत्कृष्टत्वस्य उपदेशेन कथनेन सर्वकर्मफलत्यागः सर्वोत्कृष्ट इति स्तूयते। अभ्यासाज्ज्ञानस्य, ज्ञानाद् ध्यानस्य च विशिष्टत्वं वस्तुस्वभावसिद्धमेव, न तद्वचनं स्तुतिः। किं तर्हि? सर्वकर्मफलत्यागस्य अभ्यासज्ञानध्यानासमर्थाज्ञकर्मिविषयस्य अभ्यासज्ञानध्यानेभ्य उत्कृष्टत्वकथनमेव स्तुतिः, अयथार्थ-वर्णनस्य स्तुतित्वात्। यथा राजानं प्रति त्वमिन्द्रस्त्वं चन्द्र इति वचनस्य स्तुतित्वम्।

नन्वेवं शक्ताज्ञविषयेभ्योऽभ्यासादिभ्यः परम् अशक्ताज्ञविषयत्वेन निकृष्टस्य फलत्यागस्य कुत उत्कृष्टत्वप्रतिपादनम्? अत आह— **सम्पन्नेति**। सम्पन्नानामुत्तमानां साधनानां विश्वरूपोपासनादीनामुपायानामनुष्ठानाशक्तौ। **तेन धर्मेणेति**। अशक्तानुष्ठेयत्वरूप-धर्मेणेत्यर्थः। **स्तुतित्वं** कर्मफलत्यागो विशिष्यत इति वचनस्येति शेषः। यद्वा स्तूयत इति स्तुतिः स्तुत्यं वस्तु , तद्भावः स्तुतित्वं, स्तुतिरिति यावत्। कर्मफलत्यागस्येति भावः। अशक्ताज्ञकर्मिविषयत्वेनासुलभत्वात् [त्वेन सुलभत्वात् ] कर्मफलत्यागः सर्वोत्कृष्ट इति कथ्यते, न तु वस्तुतो ज्ञानादिभ्य उत्कृष्टत्वादिति भावः।

नन्वेवमज्ञाशक्तकर्मिजनसुलभत्वादेव कर्मफलत्यागो विशिष्ट इति स्तूयतां, त्यागाच्छान्तिरनन्तरमिति शान्तिहेतुत्वात् कर्म-फलत्यागस्योत्कृष्टत्वमिति तु न युक्तं वक्तुम् , कर्मफलत्यागसंसारोपरमयोः कार्यकारणभावाभावेन यदनन्तरन्यायाभावात्। कर्मफल-त्यागाच्चित्तशुद्धिः, ततो ज्ञानं, ततः संसारोपरम इति क्रमात्। तस्मात् कथमज्ञकर्मिविषयात् कर्मफलत्यागात् संसारनाशः? अत आह— **यदेति**। 'यदा सर्वे प्रमुच्यन्ते कामाः येऽस्य हृदि स्थिताः' इत्यनेन सर्वकामत्यागादमृतत्वं मोक्षः स्यादित्युक्तं, **तत्** सर्वकामप्रहाणादमृतत्वं **प्रसिद्धं च** शास्त्रे। चकारादनुभवाच्च, निष्कामस्य सुखदर्शनादिति भावः। काम्यन्त इति कामा इति व्युत्पत्त्या आह— **फलानीति**। स्वर्गादीनीत्यर्थः। **ज्ञाननिष्ठस्येति**। संन्यासिन आत्मनिष्ठस्येत्यर्थः। **अनन्तरमेवेति**। कामत्यागानन्तरक्षण एवेत्यर्थः। **शान्तिरिति**। तत्प्रसिद्धं चेत्यन्वयः। ननु भवतु विदुषां सर्वकामत्यागादनन्तरमेव शान्तिः, प्रकृते अज्ञानां कथं कर्मफलत्यागादनन्तरमेव शान्तिरित्युक्तम्? अत आह— **सर्वकामेति**। विदुषां सर्वकामत्याग इवाविदुषां कर्मफलत्यागोऽपि त्यागात्मक एवेति भवति त्यागांशे सादृश्यमुभयोः।

**यद्वा** विदुषां सर्वकामत्यागे इवाविदुषां कर्मफलत्यागेऽपि सर्वकामत्यागत्वरूपं सर्वकामत्यागसामान्यमस्ति। कर्मफलानामेव

१. 'सर्व' इति क्वचित् नास्ति। २. 'ध्याननिष्ठस्य' इति पा.। ३. 'अन्य'इति पा.।

**त्यागस्तुतिरियं प्ररोचनार्था। यथा अगस्त्येन ब्राह्मणेन समुद्रः पीतः इति इदानीन्तना अपि ब्राह्मणाः ब्राह्मणत्वसामान्यात् स्तूयन्ते। एवं कर्मफलत्यागात् कर्मयोगस्य श्रेयःसाधनत्वमभिहितम्॥ १२॥**

आनन्दगिरिकृतव्याख्या

तत्सामान्यादिति। **किमर्था स्तुतिरित्याशङ्क्य त्यागे रुचिमुत्पाद्य प्रवर्तयितुमित्याह—** प्ररोचनार्थेति। **त्यागस्तुतिं दृष्टान्तेन स्पष्टयति—** यथेति। **फलत्यागः श्रेयोहेतुश्चेत् कर्मत्यागादपि फलत्यागसिद्धेरलं कर्मानुष्ठानेनेत्याशङ्क्याह—** एवं कर्मेति। **फलाभिलाषं त्यक्त्वा कर्मानुष्ठानस्यार्पितस्येश्वरे [1]श्रेयोहेतुतया विवक्षितत्वान्नानुष्ठानानर्थक्यमित्यर्थः॥ १२॥**

भाष्यार्कप्रकाशः

कामत्वात् त्यागस्य चोभयत्रैकत्वात्। भवतु , किं ततः? आह— **तत्सामान्यादिति**। विद्वत्सर्वकामत्यागसादृश्यादित्यर्थः। सर्वकामत्यागत्वरूपजातिवशादिति वा। **इयं** त्यागाच्छान्तिरनन्तरमित्येषेत्यर्थः। स्तुतेः फलमाह— **प्ररोचनार्थमिति**। कर्मफलत्यागे रुच्युत्पादनार्थमज्ञस्य कर्मिण इति भावः। अज्ञा उपासनाद्यशक्ता मुमुक्षवः। हा! धिगस्मान् , काऽस्माकं गतिरिति खिद्यमानाः भगवतैवं कृपालुना समुपलाल्यन्ते – 'माऽस्तु वः खेदः, कर्मफलत्यागो युष्माकं सुकरः, स च न निकृष्टः पन्थाः, किन्तूत्कृष्ट एव। कर्मफलत्यागादनन्तरमेव युष्माकं मोक्षलाभा'दिति। एवं भगवद्वचनमधिगम्य क्षिप्रमेवास्माकं फलत्यागान्मोक्षो भवेत् , अन्येषां तु चिरादेवेति मन्यमाना उत्साहात् कर्मफलत्यागे प्रवर्तन्ते ते, ततश्च चित्तशुद्धिज्ञानप्राप्तिद्वारा क्रमेणैव मुच्यन्त इति भावः। प्ररोचनार्थत्वे दृष्टान्तमाह— **यथेति**। शूद्रादीनां ब्राह्मणेषु भक्त्यादिप्रजननार्थं ब्राह्मणाः स्तूयन्ते शास्त्रकृद्भिः - किमिति? 'अहो! ब्राह्मणानां महिमा! यैः पीतः समुद्रः, शायितो विन्ध्याद्रिः, ध्रियते च दक्षिणभूमण्डल'मित्येवम्। इदं हि स्तुतिवचनमेव, न यथार्थवचनम् , आधुनिकब्राह्मणानां समुद्रपानाद्यभावात्। किं तर्हि? एकेनैवागस्त्येन समुद्रपानादिकं कृतम् , अगस्त्यस्येवेदानीन्तनानामपि विष्णुशर्मादीनां ब्राह्मणत्वात् तेन ब्राह्मणत्वसामान्येन स्तूयन्ते आधुनिकाः। अगस्त्यब्राह्मणस्थानीयः विद्वत्सर्वकामत्यागः, आधुनिकब्राह्मणस्थानीयः सर्वकर्मफलत्यागः। ब्राह्मणत्वस्थानीयं तु त्यागसामान्यम्। विद्वत्कामत्यागस्य शान्तिहेतुत्वादविद्वत्कर्मफलत्यागोऽपि शान्तिहेतुरिति स्तूयते कर्मफलत्यागेऽज्ञजनप्रवर्तनार्थं, यथा पीतार्णवागस्त्यब्राह्मणस्य महानुभावत्वादतादृशा अपि ब्राह्मणा महानुभावा इति कीर्त्यन्ते ब्राह्मणपूजादौ शूद्रादीनां प्रवर्तनार्थम् , तद्वदिति भावः।

एतेन ब्राह्मणजातेरगस्त्याश्रयेणेव त्यागस्य विद्वदाश्रयेणोत्कृष्टत्वं प्राप्तम्। तच्च ब्राह्मणजातेरुत्कृष्टत्वमाधुनिकविष्णुशर्माद्याश्रयेऽपि न नष्टम् , आधुनिकब्राह्मणानामप्युत्कृष्टत्वेन कीर्त्यमानत्वात् , यथा, तथा त्यागस्य विद्वदाश्रयलब्धमुत्कृष्टत्वमविद्वदाश्रयादपि न नष्टमिति त्यागः स्तूयते— **त्यागाच्छान्तिरनन्तरमिति। एवमिति**। त्यागस्योत्कृष्टत्वादेवेत्यर्थः। कर्मफलत्यागाद् हेतोः कर्मयोगस्य श्रेयःसाधनत्वम् अज्ञानामिति शेषः।

**ननु** शान्तिशब्दस्य संसारोपरमार्थमुक्त्वा कर्मफलत्यागस्य शान्तिहेतुत्वासम्भवं मत्वा विद्वत्त्यागस्य शान्तिहेतुत्वात् तत्साम्येनाविद्वत्त्यागोऽपि शान्तिहेतुरिति स्तूयत इति किमनया कल्पनया फलम्? शान्तिश्चित्तशुद्धिरित्यर्थो वर्ण्यताम् , तथा सति अविद्वत्कर्मफलत्यागस्य चित्तशुद्धिहेतुत्वसम्भवात् सर्वं वाक्यं यथार्थमेव स्याद् युक्तमेवेदं यथार्थवादिन ईश्वरस्येति चेत्? **मैवम्** ; चित्तशुद्धिहेतोः फलत्यागस्य चित्तशुद्धिसाध्यध्यानादुत्कृष्टत्ववर्णनायोगात्। न च सुलभत्वमेवोत्कृष्टत्वमिति वाच्यम् ; तर्हि 'सुलभं ज्ञानमभ्यासाज्ज्ञानाद् ध्यानं च भारत। ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्॥' इत्येव ब्रूयाद् वेदव्यासः। न च - ध्यानात् फलत्याग एव सुलभः, अभ्यासाज्ज्ञानं तु विशिष्टमेव, तथा ज्ञानाद् ध्यानमपि विशिष्टमेवेति - वाच्यम् ; ज्ञानध्यानयोः प्रकृतस्य विशिष्टत्वस्य त्यागे भङ्गायोगात्।

**नन्वेवं** ध्यानादुत्कृष्टो यो विद्वत्कर्तृकः सर्वकामत्यागः स एवेहोच्यताम् , तथा सति त्यागात् तस्मात् संसारोपरमलक्षणशान्तिः भवितुमर्हेति चेत्? **मैवम्** ; अप्रकृतत्वात् तस्य। 'अथ चित्तं समाधातुं न शक्नोषि मयि स्थिर'मित्यादिना अशक्ताज्ञ-

१. 'श्रेयोहेतुतायाः' इति पा.।

**अत्र चात्मेश्वरभेदमाश्रित्य विश्वरूप ईश्वरे चेतःसमाधानलक्षणो योगः उक्तः, ईश्वरार्थं कर्मानुष्ठानादि च।**

आनन्दगिरिकृतव्याख्या

**सम्प्रति 'अद्वेष्टा' इत्याद्यवतारयितुं वृत्तं कीर्तयति—** अत्र चेति। **तयोश्चेदात्यन्तिकोऽभेदो, न तर्हीश्वरे मनःसमाधानरूपो योगोऽत्यन्ताभेदे ध्यातृध्येयत्वाभावात्। न चात्यन्ताभेदे कर्मानुष्ठानं तत्फलत्यागो वा, [1]परस्परं तदयोगादित्यर्थः। भगवदुक्तिसामर्थ्यादपि**

भाष्यार्कप्रकाशः

गतिप्रदर्शनस्य प्रकृतत्वात्। अद्वेष्टेत्यादिना विद्वद्गतेः प्रदर्शयिष्यमाणत्वाच्चाज्ञपरत्वादस्य श्लोकस्य। तस्मात् सर्वकामत्यागस्य शान्तिहेतुत्वात् सर्वकर्मफलत्यागोऽपीह शान्तिहेतुत्वेन स्तुतः प्ररोचनार्थमिति युक्तमुक्तम्— शान्तिश्च संसारोपरम इति।

वस्तुतश्चित्तशुद्धिहेतोरपि कर्मफलत्यागस्य त्यागसामान्येन सर्वकामत्यागाभेदात् संसारोपरमहेतुत्वेन ध्यानादुत्कृष्टत्वम् , ध्यानज्ञानयोस्तु ज्ञानाभ्यासाभ्यां स्वत एव मुख्यमुत्कृष्टत्वमिति वस्तुगतिः। एवं कर्मफलत्यागे सर्वकामत्यागाभेदारोपपूर्वकं संसारोपरमहेतुत्वकथनं तु कर्मफलत्यागप्ररोचनार्थम्। सुलभोऽयं कर्मफलत्यागो निष्फल इति न तत्र प्रवृत्तिः स्यादज्ञानामिति कृत्वा तत्र तेषां प्रवर्तनार्थम्— नायं सुलभोऽपि निष्फलः, किं तर्हि? सर्वोत्कृष्टफलमेव, संसारोपरमस्यानन्तरमेव हेतुत्वादित्युक्तं भगवता।

**ननु** य एव सर्वकामत्यागः स एव कर्मफलत्यागः इति को भेदो विद्वदविद्वदाश्रययोस्तयोः? **उच्यते**— क्रियमाणकर्मणां फलत्यागः **कर्मफलत्यागः**। स विदुषां न सम्भवति, तेषां कर्मण्यनधिकारात्। ऐहिकामुष्मिकसर्ववस्तुविषयकामनापरित्यागः **सर्वकामत्यागः**। स चाविदुषां न सम्भवति, तेषां जीवितहेतौ जलान्नादौ कर्मनिर्वर्तकेषु समित्कुशादिषु च कामसत्त्वादिति।

**नन्वे**वमपि विज्ञानादनन्तरमेव संसारोपरम इति वक्तव्ये कथं त्यागादित्युक्तम् , न हि सर्वकामत्यागादप्यनन्तरमेव स्यात् संसारोपरम इति चेत्? **मैवम्** ; आत्मस्वरूपसाक्षात्कारं विना विदुषामपि सर्वकामत्यागो न सम्भवति। उत्कृष्टं वस्तु लब्ध्वैव हि अपकृष्टे वस्तुनि कामनां त्यजति लोकः। परमानन्दमये आत्मस्वरूपे अधिगते सत्येव क्षुद्रसुखहेतुष्वन्नादिषु कामनात्यागः।

**नन्वेवं** 'तरति शोकमात्मविदि'ति ज्ञानसंसारयोः यदनन्तरन्याय उक्तः स न सिध्येत् , मध्ये कामत्यागेन व्यवधानादिति चेत्? **मैवमपि**, यदैवात्मसाक्षात्कारस्तदैव सर्वकामत्यागः संसारोपरमश्च भवतीति ज्ञानानन्तरं न सर्वकामत्यागात्मकं किञ्चित् कृत्यं कर्तव्यमस्ति, येन तद्व्यवधानं स्यात्।

**यद्वा** ज्ञानयोगे प्रवृत्तस्य विदुषः यदा सर्वकामत्यागस्तदा ज्ञाननिष्ठापरिपाक इति ज्ञायते। अपरिपक्वज्ञानस्य सर्वकामत्यागासम्भवात्। ज्ञानस्य परिपाक आत्मतत्त्वसाक्षात्कार एव। तथा च त्यागादनन्तरं जातायाः शान्तेर्न त्याग एव हेतुः, किं तर्हि? त्यागसहकृतं ज्ञानमेवेति न 'तरति शोकमात्मविदि'ति श्रुतिविरोधः, नापि ज्ञानशान्त्योर्मध्ये त्यागाख्यस्य किञ्चित्कृत्यस्य कर्तव्यतेति।

**अथवा** त्यागादनन्तरमेव शान्तिर्भवेदिति न त्यागशान्त्योः कार्यकारणभावः। किं तर्हि? लक्ष्मणादनन्तरमेव शत्रुघ्नो जात इतिवज्ज्ञानादादौ त्यागो जातोऽनन्तरमेव शान्तिरिति ज्ञानत्यागयोरिव ज्ञानशान्त्योरपि कार्यकारणभाव इति। न चैवमपि ज्ञानशान्त्योर्मध्ये त्यागाख्यं किञ्चित्कर्तव्यमस्तीति वाच्यम् ; त्यागेनैव ज्ञानं परिपक्वमित्यनुमीयमानत्वात्। यथा ज्ञानादनन्तरं संसारोपरमस्याकर्तव्यत्वं, तथैव त्यागस्यापीति बोध्यम्। तस्माद् विदुषां यदैवात्मसाक्षात्कारस्तदैव सर्वकामप्रहाणम् , तदैव सर्वसंसारोपरमः, कामपूर्वत्वात् संसारस्येति स्थितम्॥ १२॥

ननु अविदुषामेव कर्मयोगः कर्मफलत्यागाच्छ्रेयः साधनमिति कथमुच्यते? विदुषामपि स एवेत्यत आह— **अत्र चेति**। **अत्र** प्रकरणे। **आत्मेश्वरभेदम्** आत्मनःसकाशाद् ईश्वरस्य भेदम्। अज्ञानकार्यमिदं भेददर्शनमिति भावः। **कर्मानुष्ठानादि चेति**। उक्तमिति शेषः। आदिपदात् फलत्यागस्य ग्रहणम्। न च भेदमाश्रित्योक्तमिति कथं वक्तुं शक्यत इति वाच्यम् ; उपास्यस्य विश्वरूपस्य उपासकस्य स्वस्य च भेदं विना उपासनायोगात्। विश्वरूपे देवे ईश्वरभ्रमं, मनुष्यदेहे जीवभ्रमं च विधाय हि विश्वरूपं भक्तो ध्यायति। यज्ञादिकं कर्मापि 'इन्द्रादिराराध्यदेवता मत्तोऽन्यः, आराधको ब्राह्मणोऽहमन्यः' इति भेदबुद्धिना[2] हि क्रियते। तस्माज्जीवेश्वरभेदमा-

१. 'अपरस्य तद्योगाद्' 'परस्परं तद्योगाद्' इति पाठान्तरे दृश्येते। २. बहुव्रीहिसमासः, पुरुषेणेति शेषः। 'भेदबुद्ध्या' इति वा पाठः स्यात्।

**'अथैतदप्यशक्तोऽसि' इत्यज्ञानकार्यसूचनान्नाभेददर्शिनोऽक्षरोपासकस्य कर्मयोग उपपद्यत इति [१]दर्शयति। तथा कर्मयोगिनोऽक्षरोपासनानुपपत्तिं दर्शयति भगवान्— 'ते प्राप्नुवन्ति मामेव'(भ.गी.१२.४) इति। अक्षरोपासकानां कैवल्यप्राप्तौ स्वातन्त्र्यमुक्त्वा, इतरेषां पारतन्त्र्यमीश्वराधीनतां दर्शितवान्— 'तेषामहं समुद्धर्ता' (भ.गी.१२.७) इति। यदि हीश्वरस्यात्मभूतास्ते मताः, अभेददर्शित्वादक्षरस्वरूपा एव ते इति समुद्धरणकर्मवचनं तान्प्रति अपेशलं स्यात्।**

आनन्दगिरिकृतव्याख्या

**कर्मयोगादि नाभेददृष्टिमतो भवतीत्याह—** अथेति। **अक्षरोपासकस्य कर्मयोगायोगवत् कर्मयोगिनोऽक्षरोपासनानुपपत्तिरपि दर्शितेत्याह** —तथेति। **अक्षरोपासकाः सम्यग्धीनिष्ठाः यथाज्ञानं भगवन्तमेवाप्नुवन्ति, न तथा कर्मिणः साक्षात् तदाप्तावुचिताः। तथा च कर्मिणो नाक्षरोपासनसिद्धिरित्यर्थः। इतश्चाक्षरोपासनं कर्मानुष्ठानं च नैकत्र युक्तमित्याह—**अक्षरेति। **नन्वक्षरोपासकवद् अन्येषामपीश्वरात्मत्वा-**

भाष्यार्कप्रकाशः

श्रित्यैव विश्वरूपध्यानादिकमत्रोक्तम्। स च भेदोऽज्ञविषय इति प्रकृतवचनान्यप्यज्ञविषयाण्येव। किमत्र लिङ्गम्? अत आह— **अथैतदिति**। अशक्तिर्ह्यज्ञानकार्यम्। किमनेनाशक्तिवचनेन सूचितम्? अत आह— **नेति**। अज्ञस्याक्षरोपासनं, विज्ञस्य कर्मयोगश्च नोपपद्यत इति सूचितं भगवतेत्यर्थः। अशक्तस्याज्ञस्यैव योगादिविधानात् शक्तस्य विज्ञस्य तन्न विहितमिति गम्यत इति भावः।

युक्तमेवेदम् , कर्मयोगस्य भक्तियोगस्य वा जीवेश्वरभेदबुद्धिसाध्यत्वाज्ज्ञानयोगस्य चाभेदबुद्धिसाध्यत्वाद् अज्ञानामभेदबुद्ध्ययोगाज्ज्ञानिनां च भेदबुद्ध्ययोगादिति। न चात्मेश्वरभेदवादिनोऽपि ज्ञानिन एवेति वाच्यम् ; 'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशु'रिति भेदवादिनां पशुत्वस्य श्रुत्यैवोक्तत्वात्। 'य उदरमन्तरं कुरुते अथ तस्य भयं भवति, द्वितीयाद्वै भयं भवती'त्यादिश्रुतिभ्यः भिन्नात्मज्ञानस्य निन्दितत्वाच्च। तस्मादज्ञविषयमेवेदं प्रकरणमिति।

ननु कर्मयोगस्याज्ञविषयत्वेऽपि तदन्तर्गतो भक्तियोगो नाज्ञविषयः, किं तर्हि? प्राज्ञविषय एव। एवं प्राज्ञत्वादेव भक्तानामपि मोक्षलाभो ज्ञानिवदिति शङ्कायामाह— **त इत्यादिना**। यद्यक्षरोपासका इव विश्वरूपोपासका अपि ज्ञानिनः स्युः, तर्हि अक्षरोपासकानामिव भक्तानामपि स्वतन्त्र एव मोक्षः स्यात्, न चेष्टापत्तिः, 'ते प्राप्नुवन्ति मामेवे'ति, 'तेषामहं समुद्धर्ते'ति च भगवतैवाक्षरोपासकानां मोक्षे स्वातन्त्र्यं, भक्तानां मोक्षे पारतन्त्र्यं चोक्तमिति भगवद्वचनविरोधात्। तस्मात् करतलामलकवत् स्वतन्त्रं कैवल्यमक्षरोपासकानाम्। भक्तानां तु ईश्वरायत्तमिति न भक्ता ज्ञानिनः।

ननु ईश्वराधीनकैवल्यत्वमात्रेण कथं भक्तानामज्ञत्वं, स्वाधीनकैवल्यत्वमात्रेण कथं वा अक्षरोपासकानां विज्ञत्वम्? अत आह— **यदि हीति**। यदि हीत्यस्य यस्माच्चेत्यर्थः। ते ज्ञानिन ईश्वरस्यात्मभूता मताः। 'ज्ञानी त्वात्मैव मे मत'मित्युक्तत्वात्। तस्मादात्मेश्वरयोरभेददर्शित्वादीश्वरस्वरूपा एव ते ज्ञानिनः। अतस्तान् प्रति **समुद्धरणकर्मविषयवचनं** समुद्धरणमिति कर्म क्रिया तद्विषयं वचनं 'ज्ञानिन ईश्वरः समुद्धरती'त्याकारकं वाक्यमित्यर्थः। **अपेशलम्** असुन्दरम् ,अयुक्तमिति यावत्। एव स्यान्न तु पेशलम्। ज्ञानिन एवेश्वरस्यात्मत्वादिति भावः। समुद्धरणक्रिया हि समुद्धर्तृसमुद्धार्यवस्तुद्वयतन्त्रा। उद्धर्तुरभावे उद्धार्यस्याभावे वोद्धारणासम्भवात्। प्रकृते तु वस्तुद्वयं नास्ति, उद्धर्तुरीश्वरस्यैवोद्धार्यात्मत्वात्। न ह्येकस्यैवोद्धर्तृत्वमुद्धार्यत्वं च सम्भवति, कर्मकर्तृन्यायविरोधात्। तथा च समुद्धरणक्रियानिरूपितकर्मत्वं ज्ञानिनां, ज्ञानिकर्मकसमुद्धरणक्रियानिरूपितं कर्तृत्वमीश्वरस्य च नोपपद्यते। ज्ञानीश्वरयोरेकात्मत्वात्। य एवमात्मानमेवेश्वरं मन्यन्ते ते कथम् 'ईश्वरेण वयमुद्धरिष्यामहे' इति भ्रमं प्रतिपद्येरन्? कथं वेश्वरोऽपि ज्ञानिनमात्मत्वेन मन्यमानो ज्ञानिनमहं मृत्युसंसारसागरादुद्धरिष्यामीति ब्रूयात्? न कथमपि। अत एव—'भक्तानामहं समुद्धर्ता' इत्युक्तमीश्वरेण, न तु 'ज्ञानिनां समुद्धर्ते'ति। ज्ञानिनस्तु स्वात्मानं मां स्वयमेव प्राप्नुवन्तीत्युक्तमीश्वरेण 'ते प्राप्नुवन्ति मामेवे'ति। तस्मादात्मनः सकाशाद्भिन्न ईश्वर इति ये मन्यन्ते, तेषामीश्वराधीनकैवल्यानाम् अज्ञानामज्ञत्वं सुप्रसिद्धमेव। भिन्नेश्वरज्ञानस्या-

१. 'दर्शयति, तथा कर्मयोगिनोऽक्षरोपासनानुपपत्तिम्। 'ते प्राप्नुवन्ति मामेव' (भ.गी.१२.४) इत्यक्षरोपासकानां कैवल्यप्राप्तौ स्वातन्त्र्यमुक्त्वा' इत्यादिः पाठः। यथास्थितस्तु आनन्दगिरीयानुसारी।

**यस्माच्चार्जुनस्यात्यन्तमेव हितैषी भगवान् तस्य सम्यग्दर्शनानन्वितं कर्मयोगं भेददृष्टिमन्तमेवोपदिशति। न चात्मानमीश्वरं प्रमाणतो बुद्ध्वा कस्यचिद् गुणभावं जिगमिषति कश्चिद् , विरोधात्। तस्माद् अक्षरोपासकानां**

अनुभूतिस्वरूपाचार्यटिप्पणम्

...भेदालम्बनस्य कर्मयोगः स्यात् , अक्षरोपासकस्य कर्मयोगासम्भव इत्याह— **यस्माच्चेति**। हेत्वन्तरमाह— **न चात्मानमिति**। यस्मादक्षरोपासकानां कर्मयोगो विरुद्धः, तस्मान्निवृत्तिनिष्ठत्वमेव तेषामित्युत्तरग्रन्थस्य सम्बन्धमाह— **तस्मादित्यादिना**॥ १३॥

**॥ इति श्रीगीताभाष्यटिप्पणे द्वादशोऽध्यायः॥**

आनन्दगिरिकृतव्याख्या

**विशेषात् कुतस्तदधीनत्वम्? तत्राह—** यदीति। **कर्मयोगस्याक्षरोपास्तेश्च युगपदेकत्रायोगे हेत्वन्तरमाह—** यस्माच्चेति। **'कुरु कर्मैवे'- त्यादाविति शेषः। किञ्चाक्षरोपासको वाक्यादीश्वरमात्मानं वेत्ति, नासौ क्रियायां गुणत्वेन कर्तृत्वमनुभवति, गुणत्वेश्वरत्वयोरेकत्र व्याघाताद् , अतोऽपि नाक्षरोपासनं कर्मानुष्ठानं चैकत्र युक्तमित्याह—**न चेति। **अक्षरोपास्तिकर्मयोगयोरेकत्र [1]पर्यायायोगे फलितमाह—**

भाष्यार्कप्रकाशः

ज्ञानकार्यत्वात्। भिन्नेश्वरज्ञानं विना 'अस्माकं कैवल्यमीश्वराधीन'मिति भ्रमायोगात्।

ये त्वात्मानमेवेश्वरं मन्यन्ते ते मुक्ता एव नित्यमिति स्वतन्त्रमेव कैवल्यं तेषामिति न तेषाम् 'ईश्वराधीनं कैवल्य'मिति भ्रमः। ततश्च 'तेषामहं समुद्धर्ते'ति यान् प्रत्युक्तं ते भक्ताः अज्ञा एव। अज्ञानामेवेश्वराधीनं कैवल्यमिति भ्रमात्। 'ते प्राप्नुवन्ति मामेवे'ति यान् प्रत्युक्तं ते तु प्राज्ञा एवाक्षरोपासकाः। प्राज्ञानामेवेश्वरात्मैक्यज्ञानेन नित्यसिद्धो मोक्ष इति मोक्षस्वातन्त्र्यज्ञानात्।

तस्मादज्ञानामेव भक्तिमार्गादावधिकारः, ज्ञानिनां त्वक्षरोपासन एवेति भक्तियोगस्याज्ञविषयत्वं स्थितम्। युक्तं चेदं कर्मयोगान्तर्गतत्वेनास्यापि भक्तियोगस्य कर्मयोगवदज्ञविषयत्वम्। कर्मयोगो ह्यज्ञविषयः। 'ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिना'मित्युक्तत्वात्। 'आत्मानात्मविवेकज्ञानवन्तः साङ्ख्याः' इति साङ्ख्यशब्दार्थो ग्रन्थारम्भे भाष्ये एव दर्शित **आचार्यैः**। तद्विपरीतत्वाद् योगिनः अज्ञा एव।

अथ अद्वेष्टेत्याद्युत्तरग्रन्थस्य भूमिकामारचयति — **यस्मादिति**। ननु अर्जुनस्यात्यन्तहितैषिणा भगवता य एवोत्तमः पन्थाः स एवोपदेष्टव्यः, न त्वन्यः, प्रकृते च कर्मयोग एवोपदिष्ट इत्युत्तम एव कर्मयोगो ज्ञानयोगात्। 'मय्येव मन आधत्स्व, अभ्यासेन मामाप्तुमिच्छ, मत्कर्मपरमो भव, सर्वकर्मफलत्यागं कुरु' इति ह्युपदिष्टमिति शङ्कायां भेददृष्टिमतोऽज्ञस्यैव मया कर्मयोगो हिततम इत्युक्तं, प्राज्ञस्याभेददर्शिनस्तु ज्ञानयोग एव हिततमः, स एव कर्मयोगादुत्तमः, एवमुत्तमत्वादेव ज्ञानयोगस्य ज्ञानिनो मम प्रिया इति वक्तुमारभते भगवान् अद्वेष्टेत्यादिनोत्तरग्रन्थेन यावदध्यायपरिसमाप्ति इतीममर्थमाह भाष्यकारः— **यस्माच्चेत्यादिना**। यस्माच्चार्जुनस्यात्यन्तमेव हितैषी भगवान् तस्मादक्षरोपासकानां साक्षादमृतत्वकारणं धर्मपूगं वक्ष्यामीति प्रवर्तत इत्यन्वयः।

तर्हि कर्मयोगोपदेशः किमर्थः? अत आह— **तस्येति**। **सम्यग्दर्शनानागन्धितं** सम्यग्दर्शनगन्धशून्यं कर्मयोगं भेददृष्टिमन्तमेवोद्दिश्य तस्योपदिशति। नन्वभेददृष्टिमन्तमुद्दिश्य नोपदिशतीति कथं ज्ञायते? अत आह— **न चेति**। कश्चित्प्राज्ञ आत्मानमीश्वरं प्रमाणतः तत्त्वतो बुद्ध्वा ज्ञात्वा कस्यचिदन्यस्य गुणभावं शेषत्वं जिगमिषति प्राप्तुमिच्छति। न च जिगमिषतीत्यन्वयः। चकार एवार्थकः, कुतो नैवेच्छतीत्यत आह— **विरोधादिति**। ईश्वरोऽन्यः सर्वज्ञत्वादिगुणयुक्तः, अहमीश्वरादन्यः किञ्चिज्ज्ञत्वादिगुणयुक्त इति यो मन्यते, स एवेश्वरं भक्त्या भजते राजानमिव भृत्यः। शेषिणस्तस्येश्वरस्य स्वयं शेषभूतश्च भवति। शेषी स्वतन्त्रः, शेषस्त्वस्वतन्त्र इति विवेकः। यः पुनरीश्वरोऽहमित्यात्मानमेवेश्वरं मन्यते स हि नेश्वरं भक्त्या भजते, स्वस्यैवेश्वरत्वात्। सेव्यसेवकभावो हि द्विनिष्ठः। अतो ज्ञानी आत्मानं शेषिणमेव मन्यते, न तु शेषभूतं कस्यचित्। तस्मान्नाभेददृष्टिमतो विश्वरूपोपासनादिकर्मयोगसम्भवः।

---

१. 'अयोगे' इति पा.।

**सम्यग्दर्शननिष्ठानां संन्यासिनां त्यक्तसर्वैषणानाम् 'अद्वेष्टा सर्वभूतानाम्' इत्यादिधर्मपूगं[१] साक्षादमृतत्वकारणं**

आनन्दगिरिकृतव्याख्या

तस्मादिति। **अज्ञानां कर्मिणां वक्ष्यमाणधर्मजातस्य साकल्येनायोगादक्षरनिष्ठानामेवेदमुच्यते। अविरुद्धांशस्य तु सर्वार्थत्वमिष्टमेवेत्यर्थः।**

भाष्यार्कप्रकाशः

अभेदज्ञानस्य शेषशेषिभावस्य च विरोधात्। **तस्मादिति**। भेददृष्टिमन्तं प्रति कर्मयोगस्यैवार्जुनायोपदिष्टत्वाद् अर्जुनहितैषिणा भगवतेत्यर्थः।

**इत्यादीति**। इत्यादिश्लोकोक्तमित्यर्थः। सर्वभूताद्वेषादिरूपमिति यावत्। आदिशब्दान्मैत्रकरुणादिसङ्ग्रहः। **साक्षादिति**। भक्तानां धर्मपूगस्तु क्रमेण मोक्षकारणं, न तु साक्षादिति भावः। मोक्षं प्रति ज्ञानस्यैवान्तरङ्गत्वात्। न हि ज्ञानोदयानन्तरं मुमुक्षुणा मोक्षं प्रति किञ्चित् कर्तव्यमस्ति। कर्मयोगस्तु भक्त्यादिलक्षणो बहिरङ्गः, कर्मयोगस्य चित्तशुद्धिज्ञानप्राप्तिद्वारा मोक्षहेतुत्वेन भक्तानां ज्ञानार्थं श्रवणादेः कर्तव्यत्वादिति।

एवमर्जुनस्यात्यन्तं हितैषिणा भगवता अर्जुनायाज्ञविषयः कर्मयोगः, प्राज्ञविषयो ज्ञानयोगश्चेति द्वयमुपदिष्टम्। यद्यर्जुनः प्राज्ञस्तर्हि ज्ञानयोगमभ्यसेत् , यदि त्वज्ञस्तर्हि कर्मयोगमभ्यसेदिति दृष्ट्या। अत एव 'मय्येव मन आधत्स्वे'ति भक्तियोगमुपदिश्य तावत् पश्चाद् 'अथैतदप्यशक्तोऽसी'त्यशक्तत्वमर्जुने सम्भाव्याभ्यासयोग उक्तः। ततोऽभ्यासेऽप्यर्जुनस्याशक्तत्वं सम्भाव्य ईश्वरकर्मपरमत्वमुक्तम् – 'अभ्यासेऽप्यसमर्थोऽसी'त्यादिना। ततश्च तत्राप्यशक्तं सम्भाव्य कर्मफलत्यागः उक्तः। अनेन च किं ज्ञायते? अक्षरोपासनाशक्तिमर्जुने सम्भाव्यैव विश्वरूपोपासनमादावुक्तमिति। अक्षरोपासनस्य दुष्करत्वं च 'क्लेशोऽधिकतरः' इत्यनेन सूचितम्।

**वस्तुतस्तु** न ह्येकस्यैवार्जुनस्य विश्वरूपोपासनाभ्यासादौ शक्तत्वमशक्तत्वं च भवितुमर्हति, न वाऽर्जुनस्य शक्तिविषयमिदमिति सर्वज्ञो भगवान् न वेदेति वक्तुमुचितं, येन तत्राप्यशक्तोऽसीति पक्षान्तरमुपदिश्येत भगवता। तस्मादर्जुनं निमित्तीकृत्य भगवता सर्वलोकहिताय शास्त्रमिदमुच्यते। तत्र यः प्राज्ञः सोऽक्षरोपासनं कुर्यात् , यस्त्वज्ञः स विश्वरूपोपासनम् , यस्तत्राप्यशक्तः सोऽभ्यासम् , यः पुनस्तत्राप्यशक्तः स मत्कर्मपरमत्वम् , यस्तत्राप्यशक्तः स फलत्यागं कुर्यात्। अतो नार्जुनस्यैतेषु सर्वेष्वधिकारप्रसङ्गः। तस्मादर्जुनस्य हितैषिणाऽपि भगवता सर्वलोकहितार्थं भेददृष्टिमन्तमुद्दिश्य कर्मयोगमुपदिश्य, अभेददृष्टिमन्तमुद्दिश्य ज्ञानयोगोऽप्युपदिश्यत इति ज्ञानयोग एवोत्तमः, प्राज्ञविषयत्वात्। उत्तमो हि मार्गः प्राज्ञैराश्रीयते, उत्तममार्गाश्रयणं प्राज्ञत्वलक्षणमिति।

**यद्वा** यदर्जुनेन पृष्टं तदुत्तरितं भगवता – 'ते मे युक्ततमा मताः' इति, 'ते प्राप्नुवन्ति मामेवे'ति च। तत्र कर्मयोगे स्वल्पः क्लेशः, ज्ञानयोगे त्वधिक इति कर्मयोगस्य सौकर्यमुक्तम्। भक्तिमार्गेऽप्यशक्तानां गत्यन्तराणि च दर्शितानि। अतः समाप्तो ग्रन्थः। ततश्चाद्वेष्टेत्याद्युत्तरग्रन्थारम्भानवकाश इति शङ्कायामाह— **यस्माच्चेति**। लोके हितैषिणो हि पुरुषा यस्य हितमिच्छन्ति, तेन पृष्टं सर्वमप्युत्तरयन्ति, अत्यन्तहितैषिणस्तु पृष्टादन्यदपि ब्रुवन्ति, प्रष्टुर्हितकरत्वात् स्वोक्तार्थस्य। तथा भगवानप्यर्जुनस्यात्यन्तहितैषित्वाद् अपृष्टमप्यर्थं हितायार्जुनस्योपदिशतीत्याह— **यस्माच्चेति**। श्रुते त्वक्षरोपासकानां धर्मपूगे, क्लेशाधिक्ये सत्यप्यमीषां मार्ग एव सर्वाधिक इति ज्ञानमर्जुनस्य स्यात् , ततश्च क्लेशाधिक्यमभ्युपगम्याप्यर्जुनः प्रविशेदेव ज्ञानमार्गे, ततश्च स्वाधीन एव स्यादर्जुनस्यापि मोक्ष इति भगवतः आशयः। अत एवात्यन्तमर्जुनस्य हितैषी भगवान् , अर्जुनं ज्ञानमार्गे प्रवर्त्य स्वाधीनमोक्षं तं कर्तुमिच्छुत्वात्।

**अथवा** अर्जुनस्य ज्ञानमार्गे प्रवेशो मा भून्नाम, ज्ञानिनां धर्मपूगश्रवणादर्जुनस्य ज्ञानिष्वीश्वरबुद्धिर्भवेत् ; ततश्च ज्ञानिनां सतां सङ्गादिषु प्रवर्तेत; सत्सङ्गो हि ज्ञानलाभहेतुः; तत्प्रवृत्तिवशाज्ज्ञानी भूत्वा मुच्येतेति भगवदाशयः। एवमर्जुनस्यात्यन्तहितैषित्वादेव भगवानर्जुनस्याज्ञविषयं कर्मयोगमुपदिश्य प्राज्ञानां धर्मपूगं वक्ष्यामीति प्रवर्तते। अन्यत्तुल्यमिति।

**एतेन** 'अद्वेष्टा' इत्यारभ्य ज्ञानयोगप्रकरणमिति प्रकरणभेदः **फलितः**। अतो न कर्मिणां ज्ञानिनां वक्ष्यमाणधर्मसाङ्कर्यम्।

---

१. धर्मपूगः धर्मसमूहः। अग्रे वक्ष्यमाणानि ज्ञानिनो भक्तस्य लक्षणानि साधकस्य यत्नसंपाद्यत्वेन साधनतयोपयुज्यन्ते। द्र.भाष्ये पृ. १२१।

**अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।**
**निर्ममो निरहङ्कारः समदुःखसुखः क्षमी॥ १३॥**

**वक्ष्यामीति प्रवर्तते—** अद्वेष्टेति। **अद्वेष्टा** सर्वभूतानां **सर्वेषां भूतानां न द्वेष्टा, आत्मनो दुःखहेतुमपि न किञ्चिद् द्वेष्टि, सर्वाणि भूतान्यात्मत्वेन हि पश्यति।** मैत्रः- **मित्रभावो मैत्री, मित्रतया वर्तत इति मैत्रः।** करुण एव च - **करुणा कृपा दुःखितेषु दया, तद्वान् करुणः सर्वभूताभयप्रदः संन्यासीत्यर्थः।** निर्ममो [1]**ममप्रत्ययवर्जितः,** निरहङ्कारो **निर्गताहम्प्रत्ययः।** समदुःखसुखः **समे दुःखसुखे द्वेषरागयोरप्रवर्तके यस्य स समदुःखसुखः,** क्षमी **क्षमावान् आक्रुष्टोऽभिहतो वाऽविक्रिय एवास्ते॥ १३॥**

आनन्दगिरिकृतव्याख्या

**सर्वेषां भूतानां मध्ये यो दुःखहेतुः तं विद्वानपि द्वेक्ष्येवेत्याशङ्क्याह—** आत्मन इति। **तत्र हेतुः—** सर्वाणीति। **सर्वभूतानामित्युभयतः सम्बध्यते।** ममप्रत्ययवर्जितो **देहेऽपीति शेषः। वृत्तस्वाध्यायकृताहङ्कारान्निष्क्रान्तत्वमाह—** निर्गतेति॥ १३॥

भाष्यार्कप्रकाशः

**अद्वेष्टेत्यादि।** यः कोऽपि सर्वभूतानि अद्वेक्ष्यैव[न द्वेक्ष्येव], केषाञ्चिद् द्वेष्टुमशक्यत्वात् , केषाञ्चिदयोग्यत्वाच्चेत्यत आह— **आत्मन इति।** आत्मनः सुखहेतुं प्राणिनमज्ञोऽपि न द्वेष्टि, दुःखहेतुं तु द्वेष्टि सर्पादिकम् ; प्राज्ञस्तु दुःखहेतुमपि न द्वेष्टि, किम्पुनः सुखहेतुमित्युच्यते—**अद्वेष्टा सर्वभूतानामिति।** कुतो न द्वेष्टीत्यत आह— **सर्वभूतानीति।** 'मयि सत्यसुखाम्भोधौ बहुधा विश्ववीचयः। उत्पद्यन्ते विलीयन्ते मायामारुतसम्भ्रमात्॥' इति शास्त्रादात्मन्येव सर्वभूतानां मायया कल्पितत्वात् सर्वेषु भूतेषु चात्मन एव सर्वत्रानुगतत्वाच्च सर्वभूतानि स्वात्मेत्येव पश्यति प्राज्ञः 'ऐतदात्म्यमिदं सर्वं' 'सर्वं खल्विदं ब्रह्म'त्यादिश्रुतिभ्यः। आत्मनश्च परमप्रेमास्पदत्वं प्रसिद्धमिति नोचितः आत्मनि द्वेषो मूर्खस्यापि। न हि मूर्खोऽप्यात्मत्वेनाभिमतं स्वदेहमग्न्यादिना तापयति। तथा प्राज्ञोऽप्यात्मत्वेनाभिमतं दुःखहेतुमपि सर्पादिभूतं न द्वेष्टि। न च - प्राज्ञः सर्पादिदेहमात्मत्वेन कथं प्रत्येति? यः स्वदेहमेवात्मत्वेन न पश्यति; देहाद्भिन्नं ह्यात्मानमीश्वरं मन्यत इति - वाच्यम् ; भूतानामात्मनि कल्पितत्वेन कल्पितस्याधिष्ठानात्मकत्वाद् भूतान्यात्मत्वेन गृह्णाति प्राज्ञः। **यद्वा** आत्मनो [2]भूतान्तरत्वादिति। न तु मूर्खवद् देहमात्मत्वेन गृह्णातीति। एवं सर्वात्मदर्शिनः प्राज्ञस्य सर्वस्याप्यात्मत्वान्न कस्मिंश्चिदपि द्वेषः। अयं हि सर्वभूताद्वेषः सर्वात्मज्ञानप्रयुक्तत्वाद् नाज्ञेषु कर्मिषु भक्तेषु वा स्वप्नेऽपि सम्भवेत्। अतः प्राज्ञधर्म एवायम्।

**मैत्र इति।** मित्रस्य भावो मैत्री, मैत्री अस्यास्तीति मैत्रः, अर्शआद्यजन्तः। **मित्रतया** मैत्र्या वर्तत इति मैत्र इति तु फलितार्थ-कथनम्। इयं च सर्वभूतमैत्री प्राज्ञधर्म एव। यस्य सर्वात्मभावस्तस्यैव सर्वत्र मैत्री, नेतरस्य। एवं करुणाऽपि। विशेषणत्रयस्य फलितार्थमाह— **सर्वभूतेति।** सर्वेषामपि भूतानामभयप्रदोऽभयमेव प्रदत्ते, न तु भयम्। द्वेषाभावान्मैत्रीकरुणयोः सत्त्वाच्चेति भावः। क एवंविधः? अत आह—**संन्यासीति।** संन्यासिनामेव रागद्वेषयोःसमूलनाशादिति भावः। न च मैत्रीकरुणाभ्यां भूतेषु तस्य रागः स्यादिति वाच्यम् ; रागं विनापि दुःखितेषु शुनकादिषु करुणादिदर्शनान्महताम्। करुणाऽभावे तु दुःखितशिष्यदुःखापनोदनार्थं गुरुर्न प्रयतेत, शास्त्रसम्प्रदायश्च विच्छिद्येत, नैर्घृण्यदोषश्च गुरोः स्यात्। अत एव हीश्वरोऽपि दयासमुद्र इति गीयते। मैत्री तु स्नेहः सर्वभूतेष्वात्मत्वेन प्रीतिः। तेषां हितैषित्वं वा। असंन्यासिनं कर्मिणमज्ञं दृष्ट्वा भूतानि बिभ्यति - छेत्स्यति अस्मानिति सोमलता-पश्वादयः, निरसिष्यति अस्मानिति भूतप्रेतराक्षसादयः, अर्थं याचिष्यति अस्मानिति राजादय इन्द्रादयश्च, कृत्येष्वारोप्य पीडयिष्यति अस्मानिति दारापत्यसोदरादयः। संन्यासिनं दृष्ट्वा तु न कोऽपि प्राणी बिभेति। अत उक्तम्—**सर्वभूताभयप्रद इति।** एतेन सर्वभूत-

---

१. 'ममेति प्रत्ययवर्जितः' इति पा.। २. सर्वभूतान्तरात्मत्वादित्यर्थः।

**सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।**
**मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥ १४॥**

सन्तुष्ट इति। **सन्तुष्टः** सततं **नित्यं देहस्थितिकारणस्य लाभेऽलाभे चोत्पन्नालम्प्रत्ययः, तथा गुणवल्लाभे विपर्यये च सन्तुष्टः, सततं** योगी **समाहितचित्तो** यतात्मा **संयतस्वभावो** दृढनिश्चयो **दृढः स्थिरो निश्चयोऽध्यवसायो यस्यात्मतत्त्वविषये स दृढनिश्चयो** मय्यर्पितमनोबुद्धिः [१]**सङ्कल्पविकल्पात्मकं मनः, अध्यवसायलक्षणा बुद्धिः, ते**

आनन्दगिरिकृतव्याख्या

**अक्षरोपासकस्य ज्ञानवतो विशेषणान्तराण्याह—** सन्तुष्ट इति। **सततमिति सर्वत्र सम्बध्यते। कार्यकरणसङ्घातः** स्वभाव-

भाष्यार्कप्रकाशः

भयप्रदस्य सर्वात्मज्ञानशून्यस्याज्ञस्य कर्मिणो भक्तस्य वा अद्वेषमैत्रीकरुणाः भूतेषु न भवन्तीति सिद्धम्। सत्सु तेषामेतेषु धर्मेषु पशुलतापुष्पफलादिच्छेदनाद्ययोगात्। तस्माद् अद्वेषमैत्रीकरुणावान् संन्यास्येव, न कर्मी।

**ममप्रत्यय इति**। देहादौ ममायमिति ज्ञानम्। **अहम्प्रत्यय इति**। देहादावहमित्यभिमानः। इदं द्वयं ह्यज्ञानामस्ति - ब्राह्मणोऽहं ज्योतिष्टोमं करोमीति, मम हस्ते कृष्णमृगशृङ्गोऽस्तीति च तेषां प्रत्ययात्। संन्यासी तु - नाहं देहादिः, न मम देहादिना कोऽपि सङ्गो ऽसङ्गस्येति च प्रत्येतीति तद्द्वयरहितः। **समेति**। द्वेषजनकं दुःखं, रागजनकं सुखम् ; दुःखजनके द्वेषाभावः, सुखजनके रागाभावश्च यस्य स उच्यते समदुःखसुख इति। द्वेषप्रवर्तकं दुःखं, रागप्रवर्तकं सुखं च स्वनिष्ठद्वेषप्रवर्तकत्वरागप्रवर्तकत्वरूपविरुद्धधर्मप्रहाणेन परस्परं समं भवति। द्वेषजनकत्वरहिते दुःखे, रागजनकत्वरहिते सुखे च गुणत्वरूपस्य वस्तुत्वरूपस्य वा समानस्यैव धर्मस्य सत्त्वात् , अत उक्तम् — **समदुःखसुख इति**। समे तुल्ये द्वेषप्रवर्तकत्वरागप्रवर्तकत्वरूपधर्माभावात् पदार्थत्वरूपेण परस्परं समाने सुखदुःखे यस्य स समदुःखसुखः। इदं चोक्तं प्राक् 'दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः' इति। इदं च समदुःखसुखत्वम् — सर्वं मिथ्येति, निर्विशेषचिन्मात्रोऽहमिति च ज्ञानाभावे न सिध्येदेवेति ज्ञानिन एवायं धर्मः। **आक्रुष्टो**ऽधिक्षिप्तः, **अभिहत**स्ताडितो वा योऽविक्रिय आस्ते स **क्षमी**त्युच्यते। अयं च देहादावहङ्कारममकारशून्यस्य ज्ञानिन एव धर्मः। सति त्वभिमाने ताडनादिजन्यदुःखादिविकारः स्यादेव। अभिमानाभावे तु वल्मीकत्यक्तसर्पनिर्मोकताडनादिना यथा सर्पस्य न कोपादिविकारः, तथाऽमुष्यापि। सर्पस्य निर्मोक इव ज्ञानिनो देहेऽपि अहम्ममाभिमानाभावस्य तुल्यत्वात्। कर्मिणस्तु अभिमानसत्त्वान्न क्षमा॥ १३॥

**सन्तुष्ट इति**। सततंशब्दः काकाक्षिन्यायेनोभयान्वयी—सततं सन्तुष्टः, सततं योगीति। **देहस्थितिकारणस्यान्ना**देर्लाभे, जीविताशाभावादिति भावः। देहादावभिमानाभावादिति वा। यो हि देहमात्मानमात्मीयं वा मन्यते, स देहस्थित्यर्थमन्नादिलाभे तुष्यति, तदलाभे च खिद्यते। यस्तु देहाद् विलक्षणमसङ्गमात्मानं वेत्ति, किं तस्यान्नादिना देहस्थितिहेतुना? अतस्तस्य तत्रालम्बुद्धिरुचितेति भावः। **एतेन** सन्तोषोऽयं कर्मिणो न सम्भवतीति **सूचितम्**। तथा सततं समाहितचित्तः, चित्तविक्षेपहेत्वभावात्। देहाद्यभिमानो हि चित्तविक्षेपहेतुः, तत्पूर्वकत्वात् सर्वव्यवहारस्य। सुषुप्तौ ह्यभिमानाभावाद् व्यवहाराभावो दृश्यते। यद्यपि कर्मी कदाचिच्चित्तसमाधानं कुर्यात् , तथापि न सर्वदा कर्तुं क्षमते। अत उक्तम्— सततं योगीति।

**यद्वा** फलत्यागात् कर्मिणश्चित्तसमाधानलाभो यद्यपि भवेत् , तथापि देहाद्यभिमानात्यागाच्चित्तसमाधानं नावतिष्ठते। देहाद्य-भिमानपूर्वकं समित्कुशादिबहूपकरणसम्पादनस्य कर्तव्यत्वात् कथं कर्मिणश्चित्तसमाधानगन्धः? फलत्यागप्रयुक्तं चित्तसमाधानं तु फलसिद्ध्यसिद्ध्यादिसम्भावनाप्रयुक्तविकारराहित्यमात्रमेवेति बोध्यम्। संयतो नियतः स्वभावः प्रकृतिर्येन स **संयतस्वभावः**। बलात्कारेण धर्माधर्मादिलक्षणं स्वस्वभावमपि नियमितवानित्यर्थः। इदं च स्वभावनियमनम् ईश्वरस्यासाधारणो गुणो वशीकृत-प्रकृतित्वाद् ईश्वरस्य; ज्ञानिनश्चेश्वरत्वादुपपद्यत इति बोध्यम्। न च 'स्वभावो दुरतिक्रमः' इति वाच्यम् ; पुरुषकारस्य व्यर्थत्वापत्तेः।

---

१. 'सङ्कल्पात्मकं' इति पा.।

**यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।**

**मय्येवार्पिते स्थापिते यस्य संन्यासिनः स मय्यर्पितमनोबुद्धिः, यः ईदृशो मद्भक्तः स मे प्रियः। 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' (भ.गी.७.१७) इति सप्तमेऽध्याये सूचितम्, तदिह प्रपञ्च्यते॥ १४॥**

यस्मादिति। यस्मात् **संन्यासिनो** नोद्विजते **नोद्वेगं गच्छति, न सन्तप्यते, न** [1]**संक्षुभ्यति लोकः; तथा लोकाद्**

आनन्दगिरिकृतव्याख्या

**शब्दार्थः।** स्थिरत्वं **कुतर्कादिनाऽनभिभवनीयत्वम्।** मद्भक्तो **मद्भजनपरः,** [2]**ज्ञानवानिति यावत्। ज्ञानवतो भगवत्प्रियत्वे प्रमाणमाह—** प्रियो हीति। **किमर्थं तर्हि पुनरुच्यते? तत्राह—** तदिहेति॥ १४॥

भाष्यार्कप्रकाशः

**अथवा** नियतः आत्मचिन्तनादिलक्षणः स्वभावो यस्य स तथोक्तः। नियमेन स्वविहिते श्रवणादौ वर्तमान इत्यर्थः।

**ननु** कर्म्यपि नियमेन कर्मणि प्रवृत्त एवेति चेत्? **मैवम्**; श्रवणादिप्रवृत्तेरेवेह स्वभावत्वेन विवक्षितत्वात्।

**अथवा** यतात्मा निश्चलस्वभावः, स्वभावः कार्यकरणसङ्घातः **इत्यानन्दगिरिः**। दृढो निश्चयोऽहं ब्रह्मेत्याकारको यस्य स दृढनिश्चयः। कर्मिणां तु नास्ति अहं ब्रह्मेति निश्चयः, देहाभिमानानाशात्, आत्मज्ञानाभावाच्च।

**मय्येवेति**। स्वात्मन्येवेश्वर इत्यर्थः। न तु विश्वरूपे मयीति, तस्याज्ञविषयत्वाद्, अस्य च प्राज्ञप्रकरणत्वात्। **मद्भक्त इति।** आत्मनिष्ठ इत्यर्थः। ज्ञानप्रकरणत्वादस्य, विश्वरूपोपासकस्य ईश्वरभक्तस्य प्रागुक्तधर्मायोगाच्च। स ह्यज्ञः, विश्वरूपदेहे ईश्वराभिमानित्वात्।

ननु 'यो मद्भक्तः स मे प्रियः' इत्यस्य 'ज्ञानी यः स मे प्रियः' इत्यर्थवर्णनमयुक्तम्? अत आह— **प्रिय इति**। सप्तमाध्यायस्थवाक्यविरोधादिह मद्भक्तो ज्ञान्येव, तत्र ज्ञानी मम प्रिय इत्युक्तत्वाद्, इह भक्तो मम प्रियः इत्युक्तौ स्ववाक्यव्याघातात्। **सूचितमिति**। संक्षेपत उक्तमित्यर्थः। **यद्वा** सप्तमाध्यायस्थात् 'प्रियो हि ज्ञानिनः' इति वचनादिहापि मद्भक्त इत्यस्य ज्ञानीत्येवार्थ इति ध्वनितमित्यर्थः। एवं च 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' इत्यनेनैककण्ठ्यान्मद्भक्तो मे प्रिय इत्यत्रापि ज्ञानी मम प्रिय इत्येवार्थः स्वीकर्तव्य इति सिद्धम्। **यद्वा** 'प्रियो हि ज्ञानिन' इत्यत्रैव ज्ञानिनो भगवत्प्रियत्वमुक्तमिति पुनरत्र तद्वचनं पुनरुक्तिदोषावहमेवेत्यत आह—**प्रिय इति**। सप्तमाध्याये **सूचितं** संक्षेपत उक्तमेव ज्ञानिन ईश्वरप्रियत्वम्। तत्तु इह **प्रपञ्च्यते** विस्तरेणोच्यते। तस्मान्न पुनरुक्तिदोष इति भावः।

यत्तु **रामानुजः** - कर्मनिष्ठस्योपादेया गुणा अद्वेष्टेत्यादिनोच्यन्त इति; **तत्तुच्छम्**; कर्मयोगिनां निर्ममत्वाद्यसम्भवस्य दर्शितत्वात्। ब्राह्मणोऽहमित्याद्यभिमानं विना कर्मसु प्रवृत्त्यनुपपत्तेः। मद्भक्त इत्यस्य 'मां कर्मयोगेन भजमान' इत्यर्थवर्णनमप्ययुक्तम्, कर्मयोगेनेति निर्मूलार्थकल्पनस्याप्रमाणत्वात्। ज्ञानी मम प्रिय इति सप्तमाध्यायोक्तात् स्ववाक्यादेव कर्मी मम प्रिय इत्यस्यार्थस्य व्याघातात्। सततं योगीत्यस्य प्रकृतिविविक्तात्मानुसन्धानपर इत्यर्थकथनमप्ययुक्तम्, प्रकृतिविविक्तात्मानुसन्धानस्याक्षरोपासकज्ञानविषयस्य कर्मिष्वसम्भवात्। कर्मानुष्ठानात्मानुसन्धानयोर्युगपदेकपुरुषकर्तृकत्वानुपपत्तेः। अत एव – 'लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ। ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्॥' इति निष्ठाद्वयमधिकारिद्वयस्य विविच्योक्तं भगवतैव। अत्रापि प्रकरणे 'एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते। ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः॥' इति कर्मयोगस्य, अक्षरात्मानुसन्धानस्य चाधिकारिद्वयनिष्ठत्वं दर्शितम्, भक्तानामात्मोपासकानां च कक्षद्वयेन निर्देशात्। यदि भक्तानां कर्मयोगिनामेवात्मानुसन्धानात्मकम् अक्षरोपासनमपि स्यात् तर्ह्यात्मोपासकानां भक्तानां च मध्ये के योगवित्तमा इति कथं प्रष्टुं शक्यतेऽर्जुनेन? तस्माद् भिन्नैरेव कर्मिभ्यो भवितव्यमात्मानुसन्धानपरैः। प्रपञ्चितं चैतद् बहुशः पूर्वं कर्मज्ञानसमुच्चयवादनिराकरणप्रसङ्गे॥ १४॥

---

१. 'संक्षुभ्यते' इति पा.। २. भक्तिः परमार्थतत्त्वज्ञानलक्षणेति भावः।

**हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५॥**
**अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।**
**सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६ ॥**

**नोद्विजते च यः;** हर्षामर्षभयोद्वेगैः **हर्षश्चामर्षश्च भयं चोद्वेगश्च तैर्हर्षामर्षभयोद्वेगैः मुक्तः;** हर्षः **प्रियलाभे अन्तःकरणस्योत्कर्षो रोमाञ्चनाश्रुपातादिलिङ्गः,** अमर्षः [1]**असहिष्णुता,** भयं **त्रासः,** उद्वेगः **उद्विग्नता, तैर्मुक्तो यः स च मे प्रियः ॥ १५॥**

अनपेक्ष इति। **देहेन्द्रियविषयसम्बन्धादिषु अपेक्षाविषयेषु** अनपेक्षो **निःस्पृहः,** शुचिः **बाह्येनाभ्यन्तरेण च शौचेन सम्पन्नः,** दक्षः **प्रत्युत्पन्नेषु कार्येषु सद्यो यथावत् प्रतिपत्तुं समर्थः,** उदासीनो **न कस्यचिद् मित्रादेः पक्षं भजते यः स उदासीनो यतिः,** गतव्यथो **गतभयः,** सर्वारम्भपरित्यागी **आरभ्यन्त इत्यारम्भाः इहामुत्रफलभोगार्थानि कामहेतूनि[2] कर्माणि सर्वारम्भाः, तान् परित्यक्तुं शीलमस्येति सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६ ॥**

आनन्दगिरिकृतव्याख्या

**उद्वेगादिराहित्यमपि ज्ञानवतो विशेषणमित्याह—** यस्मादिति। **न केवलमुद्वेगं प्रत्यपादानत्वमेव संन्यासिनोऽनुपपन्नम् , किन्तु तत्कर्तृत्वमपीत्याह—** तथेति। असहिष्णुता **परकीयप्रकर्षस्येति शेषः। त्रासः तस्करादिदर्शनाधीनः। उद्विग्नत्वमचेतनात् , चेतनाधीनस्य लोकादिति गतत्वात्[3] (इति यावत् )** ॥ १५॥

**निरपेक्षत्वादिकमपि ज्ञानिनो विशेषणमित्याह—** अनपेक्ष इति। **आदिपदमपेक्षणीयसर्वसंग्रहार्थम्। प्रतिपत्तव्येषु प्रतिपत्तुम् , कर्तव्येषु कर्तुं चेत्यर्थः। परैस्ताडितस्यापि गता व्यथा भयमस्येति व्युत्पत्तिमाश्रित्याह—** गतेति। **न च क्षमीत्यनेन पौनरुक्त्यम् ,**

भाष्यार्कप्रकाशः

**यस्मादिति। उद्वेगः** सन्तापः, संक्षोभ इति यावत्। प्रियस्य वस्तुनो लाभे सति जायमानोऽन्तःकरणस्योत्कर्षो **हर्ष** इत्युच्यते। रोमाञ्चनाश्रुपातादयो हर्षस्य लिङ्गानीत्याह— **रोमाञ्चनेति।** रोमाञ्चनाश्रुपातादयो लिङ्गानि यस्य स इति बहुव्रीहिः। उद्विग्नः संक्षुब्धः। एवंविधो यः संन्यासी स च मे प्रियः। चकारात् संन्यासिनः पूर्वश्लोकोक्ता एतच्छ्लोकोक्ताश्च गुणा आवश्यका इति सूच्यते समुच्चयार्थात्। एवमुत्तरश्लोकेषु वक्ष्यमाणा अपीति बोध्यम्। कर्मी तु धनधान्याहरणयाचनलतापश्वादिच्छेदनादिना लोकक्षोभकः, नास्तिकप्रायाल्लोकात् स्वयमप्युद्विजते। कर्मसिद्ध्या हर्षः, स्वाधिककर्मकर्तृषु अमर्षः, प्रायश्चित्तादेर्भयम् , अनशनादिक्लेशादुद्विग्नतेति। नामी कर्मिधर्माः, किन्तु ज्ञानिन एव। अत एव एवंविधो ज्ञानी भगवतः प्रियः। 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' इत्युक्तत्वात् ॥ १५॥

**अनपेक्ष इति।** देहश्चेन्द्रियाणि च विषयाः शब्दादयश्च देहेन्द्रियविषयाः, तेषां सम्बन्धादिषु। आदिपदाद् वृद्ध्यादिग्रहणम्। 'देहादिसम्बन्धो मम स्यात् , स च चिरमवतिष्ठे'दित्याद्यपेक्षारहितोऽनपेक्षः। अथवा विषयसम्बन्धो विषयप्राप्तिः। देहश्चेन्द्रियाणि च विषयसम्बन्धश्च देहेन्द्रियविषयसम्बन्धाः, आदिपदाज्जरारोगाद्यभावादिग्रहणम्। अयं न कर्मिणः सम्भवति, कर्मणो देहादिसाध्यत्वेन तस्य देहादिपाटवापेक्षत्वात्। **शौचं** परिशुद्धिः, बाह्यं स्नानादिजन्यम्। आभ्यन्तरं तु मानसिकं शमदमादिजन्यम्। अविक्षिप्तचित्तत्वं हि चित्तस्य शुद्धिः। संन्यासिनस्तु चित्तविक्षेपाभावादुपपद्यते आभ्यन्तरशुद्धिः। कर्मिणस्तु नोपपद्यते, कर्मतत्साधनसम्पादनादिना चित्तविक्षेपात् तस्य। **प्रत्युत्पन्नेष्विति।** [4]उत्पन्नेषूत्पन्नेषु प्रत्युत्पन्नेषु सर्वेष्वपि प्राप्तेष्वित्यर्थः। **यथावत्प्रतिपत्तुमिति।** मिथ्यात्वेन

१. 'अभिलषितप्रतिघातेऽसहिष्णुता' इति पा.। २. क्लीबत्वोपपत्तिः ५८४ पृष्ठे द्र.। ३. 'लोकान्नोद्विजते' इत्यत्र लोकादित्युपादानात् चेतनाधीनोद्वेगराहित्यं विवक्षितम्। इह तु अचेतनाधीनः स ग्राह्यः पौनरुक्त्यपरिहारायेत्यर्थः। कुण्डलितं क्वचिन्न। ४. वीप्सार्थे प्रतीत्यव्ययस्योत्पन्नशब्देनाव्ययीभावसमास इति भावः।

**यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।**
**शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः॥ १७॥**
**समः शत्रौ च मित्रे च तथा मानापमानयोः।**
**शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः॥ १८॥**

**किञ्च—** यो नेति। **यो न हृष्यति इष्टप्राप्तौ, न द्वेष्टि अनिष्टप्राप्तौ, न शोचति प्रियवियोगे, न चाप्राप्तं काङ्क्षति,** शुभाशुभे **पुण्यपापे कर्मणी परित्यक्तुं शीलमस्येति** शुभाशुभपरित्यागी **भक्तिमान् यः स मे प्रियः॥ १७॥**

सम इति। **समः शत्रौ च मित्रे च, तथा** मानापमानयोः **पूजापरिभवयोः, शीतोष्णसुखदुःखेषु समः, सर्वत्र च सङ्गविवर्जितः॥ १८॥**

आनन्दगिरिकृतव्याख्या

**प्रत्युत्पन्नायामपि व्यथायामपकर्तृष्वनपकर्तृत्वं क्षमित्वमित्यभ्युपगमात्॥ १६॥**

**द्वेषहर्षादिराहित्यमपि ज्ञानिनो लक्षणमित्याह—** किञ्चेति। **सर्वारम्भपरित्यागीत्यनेन विहितकाम्यत्यागस्योक्तत्वाद् विहितादन्यत्र मा सङ्कोचीति विशिनष्टि—** शुभाशुभेति॥ १७॥

सम इति। **अद्वेष्टेत्यादिना द्वेषादिविशेषाभाव उक्तः, सम्प्रति सर्वत्रैवाविकृतचित्तत्वमुच्यते।** सर्वत्र **चेतने स्त्र्यादौ, अचेतने च चन्दनादावित्यर्थः॥ १८॥**

भाष्यार्कप्रकाशः

ज्ञातुमित्यर्थः। कार्यमात्रं हि मिथ्या। तस्य मिथ्यात्वमेव याथार्थ्यम्। कार्यमात्रस्य नैवं प्रतिपत्तुं कर्मी क्षमते, ज्ञानाभावात् , कर्मणो मिथ्यात्वज्ञाने तत्र प्रवृत्त्यनुपपत्तेश्च। स यतिरुदासीनः इत्यन्वयः। कर्मिणा तु मित्रादयः सत्कार्याः कर्मनिर्वर्तनार्थमिति भावः। **गतभय इति**। द्वितीयवस्त्वभावात्। 'द्वितीयाद्वै भयं भवती'ति श्रुतिः। अद्वितीयात्मैव सर्वमिति हि प्रत्येति विद्वान्। अतः कथं तस्य भयम्? उक्तं हि **मुरारिणा**ऽपि – 'भयमिति किमेतद् ब्राह्मणस्ये'ति। कर्मिणस्तु द्वैतसद्भावादस्त्येव भयमिति भावः। अत्र गतव्यथो गतदुःख इत्यपि वक्तुं शक्यम्। कर्मिणः कर्मनिर्वर्तकसाधनादिसम्प्रदानप्रयुक्तबहुक्लेशसद्भावान्न गतव्यथत्वम्। संन्यासिनस्तु नास्ति कश्चिदपि क्लेश इति गतव्यथत्वमिति भावः।

**सर्वारम्भाः** सर्वकर्माणि, इहामुत्रफलानां पशुपुत्रस्वर्गादिलक्षणानां भोग्यानां **भोगा** अनुभवा एव **अर्थाः** प्रयोजनानि येषां तानि **इहामुत्रफलभोगार्थानि** कामानां हेतूनि[1] यज्ञादीनि। इदं हि सर्वकर्मपरित्यागित्वं संन्यासिन एव लक्षणमिति सुविदितम् , कर्मिणः कर्मत्यागायोगात्। य एवंविधो मद्भक्तः ज्ञानी, स मे प्रियो भवति॥ १६॥

**य इति**। न हृष्यति, कर्मी तु कर्मपरिकरादिप्राप्तौ हृष्यत्येव, प्रायश्चित्तानिष्टप्राप्तौ द्वेष्ट्येव, कर्मभ्रंशे शोचत्येव, कर्मपरिसमाप्त्यादिकं काङ्क्षत्येव, अशुभं कर्म त्यजन्नपि शुभं कर्म न त्यजत्येव, कर्मत्यागे कर्मित्वासिद्धेः। य एवंविधो **भक्तिमान्** ज्ञानवान् , स मे प्रियः॥ १७॥

**सम इति**। कर्मविघातुकेषु शत्रुषु कर्मिणो द्वेषात् , तदुपकारिषु मित्रेषु प्रीतेश्च, न शत्रुमित्रसमत्वं भवितुमर्हति। प्राज्ञस्य तु शत्रुमित्रयोरेकात्मबुद्ध्या समत्वम्। मानावमानयोर्देहादिगोचरतया आत्मविषयत्वाभावं यः पश्यति, स ज्ञानी मानावमानयोः समः। यस्तु अहं ब्राह्मणः सोमयाजीत्यभिमन्यते, स हि कर्मी मानं गृह्णाति, अवमानं न सहत इति बोध्यम्। शीतोष्णयोः सुखदुःखयोश्च **समो**ऽविकृतचित्तः। शीतोष्णयोर्देहधर्मत्वं, सुखदुःखयोर्मनोधर्मत्वं च पश्यन् ज्ञानी न तत्र विक्रियते। कर्मी तु देहाद्यभिमाना-

१. वस्तुतस्तु— कामाः हेतवो येषां कर्मणामिति बहुव्रीहिरत्र युक्तः। भाष्ये— कामहेतूनि इति पाठः उपलभ्यते। स चेत्थं समर्थनीयः।

**तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।**
**अनिकेतः स्थिरमतिः भक्तिमान् मे प्रियो नरः॥ १९॥**

**किञ्च—** तुल्यनिन्देति। तुल्यनिन्दास्तुतिः **निन्दा च स्तुतिश्च निन्दास्तुती, ते तुल्ये यस्य स तुल्यनिन्दास्तुतिः,** मौनी **मौनवान् संयतवाक् , सन्तुष्टो** येन केनचि**च्छरीरस्थितिहेतुमात्रेण। तथा चोक्तम्— 'येन केनचिदाच्छन्नो येन केनचिदाशितः। यत्रक्वचनशायी स्यात् तं देवा ब्राह्मणं विदुः॥'(म.भा.१२.२४५.१२) इति। किञ्च** अनिकेतो **निकेतः आश्रयो निवासो नियतो न विद्यते यस्य सोऽयमनिकेतः, 'नागारे' (म.भा.अनु. १४१.८२) इत्यादिस्मृत्यन्तरात्।** स्थिरमतिः **स्थिरा परमार्थवस्तुविषया मतिर्यस्य स स्थिरमतिः, भक्तिमान् मे प्रियो नरः॥ १९॥**

आनन्दगिरिकृतव्याख्या

**वाग्यतत्वादिविशेषणमपि ज्ञाननिष्ठस्यास्तीत्याह—** किञ्चेति। निन्दा **दोषसङ्कीर्तनम्।** स्तुतिः **गुणगणनम्। देहस्थितिमात्रफलेनान्नादिना ज्ञानिनः सन्तुष्टत्वे स्मृतिं प्रमाणयति—** तथा चेति। **नियतनिवासराहित्यमपि ज्ञानवतो विशेषणमित्याह—** किञ्चेति। [१]**'न कुड्यां नोदके सङ्गो न चैले न त्रिपुष्करे। नागारे नासने नान्ने यस्य वै मोक्षवित्तु सः॥' इति स्मृतिमुक्तेऽर्थे प्रमाणयति—** नेत्यादिना। [२]**पुनःपुनर्भक्तेर्ग्रहणमपवर्गमार्गस्य परमार्थज्ञानस्योपायत्वार्थम्॥ १९॥**

भाष्यार्कप्रकाशः

च्छीतादिप्राप्तौ विक्रियत इति भावः। **सर्वत्रेति।** देहे तदनुबन्धिषु दारापत्यपशुमित्रगृहधनधान्यादिषु च सङ्गो नास्ति संन्यासिनः, त्यक्तसङ्गत्वात् तस्य। सर्वं परित्यज्य हि स गतः। देहस्तु तत्राहंममाभिमानाभावात् त्यक्तप्राय एव। कर्मी तु ससङ्ग एव, असङ्गत्वे कर्मण एवासिद्धेः॥ १८॥

**तुल्येति।** 'निन्दास्तुत्योर्देहविषयत्वमेव, न त्वात्मविषयत्व'मिति पश्यन् ज्ञानी तदुभयत्र तुल्यबुद्धिर्भवति। कर्मी तु 'मामयं निन्दती'ति द्वेष्टि, 'मामयं स्तौती'ति हृष्यति च, देहाभिमानादिति भावः। **संयता** नियमिता **वाग्** वागिन्द्रियं येन स तथोक्तः। मितभाषीत्यर्थः। अत्यन्ताभाषित्वे शिष्योपदेशाद्यसिद्धेरिति भावः। कर्मिणा तु बहुभाषिणा भवितव्यम् - त्वमेवं कुरु, त्वमेवं कुरु, त्वमेतद् देहीत्याद्यनेकवाक्यप्रयोगस्यावश्यकत्वात् तस्य। येन केनचित् कौपीनादिना क्षुद्रपरिधानेनाच्छन्नः, येन केनचिच्छाकफलादिना **आशितो** भोजितः, यत्र क्वचन भूम्यादौ **शायी** शयितश्च स्यात् , य एवम्भूतः स संन्यासी, तं देवा ब्राह्मणं विदुः।

एतेन ब्राह्मणशब्दः संन्यासिनि सार्थक इति सिद्धम्। अत एव 'ब्राह्मणः संन्यासी'त्युक्तं भाष्यकारैः 'ब्राह्मणस्य विजानतः' इत्यत्र। यो हि ब्रह्मज्ञानी आत्मनिष्ठः स ब्राह्मणः, संन्यास्येव तादृशः, अन्यस्यात्मनिष्ठायामनधिकारात्। स च संन्यासी देहाद्यभिमानाभावाद् ब्रह्मात्मज्ञानाच्च कौपीनच्छन्नं पीताम्बरच्छन्नं च देहं सममेव पश्यति, तथा मृष्टान्नममृष्टान्नं च सममेव पश्यति, हंसतूलिकातल्पं भूतलं च सममेव पश्यति; न तु कर्मी, तस्य देहाभिमानात्यागाद् , ब्रह्मात्मज्ञानाभावाच्चेति भावः।

**आश्रय इति।** गृहदेवालयादिरित्यर्थः। ननु संन्यास्यपि क्वचन देवालयादौ वर्तत इत्यत आह— **नियत इति।** गृहस्थवदिति भावः। ग्रामैकरात्रन्यायेन यतेः सञ्चारादिति तत्त्वम्। अनिकेतशब्दस्योक्तार्थपरत्वे प्रमाणमाह—[३]**अनगार इति।** स्मृत्यन्तरेऽनगारत्वस्योक्तत्वाद् इह तदनुक्तेरनिकेतत्वस्यैवोक्तत्वादुभयोरैकार्थ्येन भाव्यमिति भावः।

**स्थिरमतिरिति।** ब्रह्मैव परमार्थवस्तु , तच्चाहमेवेति दृढबुद्धिः कर्मिणः स्वप्नेऽपि न स्यात् , कर्तृत्वादिमत्संसार्यात्मज्ञानवत एव कर्मित्वात्। य एवंविधो भक्तिमान् ज्ञानी स नरो मे प्रियः। मनुष्यं पार्थमुद्दिश्योच्यमानत्वाद् नरः इत्युक्तम्॥ १९॥

१. 'न कुट्याम्' इति पा.। २. भक्तेर्ज्ञानलक्षणायाः प्रक्रान्तत्वेऽपि सगुणभक्तेः ज्ञानद्वारा मोक्षसाधनतायामविवादात् साऽपीह ग्राह्येति भावः। 'अत्र पुनः पुनर्भक्तेरुपादानं भक्तिरेवापवर्गस्य पुष्कलं कारणमिति द्रढयितुम्' इति च मधुसूदनी। एवं च निर्गुणब्रह्मवादो भक्तिविरोधीति केषांचिदाक्षेपोऽसंगतः। ३. रा. पुस्तके भाष्ये नागारे इत्यस्य स्थाने 'अनगारे' इति पाठो मुद्रितो दृश्यते।

**ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते।**
**श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः॥२०॥**

**इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे**
**भक्तियोगो नाम द्वादशोऽध्यायः॥१२॥**

**'अद्वेष्टा सर्वभूतानाम्'(भ.गी.१२.१३) इत्यादिना अक्षरोपासकानां निवृत्तसर्वैषणानां संन्यासिनां परमार्थज्ञान-निष्ठानां धर्मजातं प्रक्रान्तमुपसंह्रियते—** ये त्विति। **ये तु संन्यासिनो** धर्म्यामृतं **धर्मादनपेतं धर्म्यं च तदमृतं च तद् अमृतत्वहेतुत्वात्। इदं** यथोक्तम् **अद्वेष्टा सर्वभूतानामित्यादिना** पर्युपासते **अनुतिष्ठन्ति, श्रद्दधानाः सन्तो** मत्परमाः **यथोक्तोऽहमक्षरात्मा परमो निरतिशया गतिर्येषां ते मत्परमाः, [**भक्ताः**] मद्भक्ताश्च उत्तमां परमार्थज्ञानलक्षणां भक्तिम् आश्रिताः, तेऽतीव मे प्रियाः। 'प्रियो हि ज्ञानिनोऽत्यर्थम्'(भ.गी.७-१७) इति यत् सूचितं तद् व्याख्यायेहोपसंहृतम्— 'भक्तास्तेऽतीव मे प्रियाः' इति। यस्माद् धर्म्यामृतमिदं यथोक्तमनुतिष्ठन् भगवतो विष्णोः परमेश्वरस्यातीव [१]प्रियो**

आनन्दगिरिकृतव्याख्या

**अद्वेष्टेत्यादिधर्मजातं ज्ञानवतो लक्षणमुक्तम्। तदुपपादितमनूद्योपसंहारश्लोकमवतारयति—** अद्वेष्टेत्यादिना। **चतुर्थपादस्य तात्पर्यमाह—** प्रियो हीति। **यद्यपि यथोक्तं धर्मजातं ज्ञानवतो लक्षणम् , तथापि जिज्ञासूनां ज्ञानोपायत्वेन यत्नादनुष्ठेयमिति वाक्यार्थमुपसंहरति—** यस्मादिति।

भाष्यार्कप्रकाशः

**य इति**। ये तु श्रद्धाना मत्परमाश्च सन्त इदं यथोक्तं धर्म्यामृतं पर्युपासते ते भक्ता मे अतीव प्रियाः। धर्म्यं धर्मान्निवृत्ति-लक्षणादनपेतं धर्म्यम्। अमृतशब्दोऽत्रोपचारादमृतहेतुपर इत्याह— **अमृतत्वहेतुत्वादिति**। अमृतत्वं मोक्षः, अमृतं शाश्वतं सुखात्मकं वा ब्रह्म, तद्भावोऽमृतत्वमिति व्युत्पत्तेः। ब्रह्मभावो हि मोक्षः। **यथोक्तं** पूर्वोक्तमित्यर्थः। [२]योग्यमुक्तमिति वा। केनोक्तम्? अत आह— **अद्वेष्टेति**। भक्ताः इत्यस्यार्थमाह— **भक्तिमास्थिता इति**। केयं भक्तिः? अत आह— **परमार्थज्ञानलक्षणामिति**। इयमेवोत्तमेत्याह— **उत्तमामिति**। ननु विश्वरूपोपासनात्मिका भक्तिरेवेह गृह्यताम्? अत आह— **प्रियो हीति**। यज्ज्ञानिनः प्रियत्वं संक्षेपतः प्रागुक्तं तदेवेह विस्तरेणोच्यत इति नात्र भक्तानामवकाश इति भावः। फलितार्थमाह— **यस्मादित्यादिना**। विष्णोः परं धाम जिगमिषुणा मुमुक्षुणा इत्यन्वयः। यो हि विष्णोः प्रियः स एव विष्णोः परं धाम प्रपद्येत, न त्वन्यः। न ह्यप्रियस्य कोऽपि स्वकं धाम दिशेदिति भावः।

वस्तुतस्तु ज्ञानिन आत्मत्वादेव विष्णोः प्रियत्वमिति यो विष्णोः प्रिय आत्मा ज्ञानी स विष्णोरात्मन एव स्वस्वरूपं सच्चिदा-नन्दात्मकं प्राप्नोतीति भावः। य एवं ज्ञानी विष्णोः प्रिय आत्मत्वात् स ज्ञानी आत्मा साक्षाद् विष्णुरेव भवति, विष्णोरेवात्मत्वात्। ज्ञानी विष्णुश्चेत्युभयमप्येक एव ह्यात्मा। तस्माद् ज्ञान्येव विष्णुरात्मेति सिद्धान्तः।

यत्तु **रामानुजः** - 'अद्वेष्टे'त्यादिना कर्मयोगिधर्मा उक्ताः, 'ये त्वि'त्यनेन तु भक्तियोगिधर्म उच्यत इति, **तत्तुच्छम्** - सर्वारम्भ-परित्यागस्य कर्मिणि सुतरामप्यसम्भवस्य सर्वजनविदितत्वात्। न च विहितेतरकर्मपरित्यागीत्यर्थ इति वाच्यम् ; सर्वशब्दसङ्कोचानुप-पत्तेः। सत्यां तद्विवक्षायां व्यासः- 'निषिद्धकर्मसन्त्यागी'त्येव ब्रूयात्। तथा अनिकेतत्वमपि गृहिणः कर्मिणो न सम्भवति। न च निकेतादिष्वसक्त इति तदर्थ इति वाच्यम् ; 'सङ्गवर्जितः' इत्यनेन पौनरुक्त्याद् , अस्य [३]तदर्थस्य च लाक्षणिकत्वात्। आत्मनि स्थिरमतिरित्यप्ययुक्तम् , कर्मिणोऽज्ञस्यात्मचिन्तनासम्भवात्। तथा 'ये त्वि'ति श्लोकः भक्तविषय इत्यपि न युक्तम् , 'धर्म्यामृतमिद'-मिति पूर्वोक्तार्थस्येदंशब्देन परामर्शात्। पूर्वोक्तार्थस्य च कर्मिधर्मत्वेन त्वदभिमतत्वात्।

---

१.'अतीव मे प्रियः' इति पा.। २.यथोक्तमिति योग्यार्थे यथाशब्दस्य अव्ययीभावसमास इति भावः। ३.निकेतादिष्वसक्त इत्यनिकेतशब्दार्थस्येत्यर्थः।

**भवति, तस्मादिदं धर्म्यामृतं मुमुक्षुणा यत्नतोऽनुष्ठेयं विष्णोः प्रियं परं धाम जिगमिषुणेति वाक्यार्थः॥२०॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यपूज्यपादश्रीमदाचार्यश्रीशङ्करभगवतः कृतौ श्रीभगवद्गीताभाष्ये**
**भक्तियोगो नाम द्वादशोऽध्यायः॥१२॥**

आनन्दगिरिकृतव्याख्या

**तदेवं सोपाधिकाभिध्यानपरिपाकाद् निरुपाधिकमनुसन्दधानस्य 'अद्वेष्टा सर्वभूताना'मित्यादिधर्मविशिष्टस्य मुख्यस्याधिकारिणः श्रवणाद्यावर्तयतः तत्त्वसाक्षात्कारसम्भवात् ततो मुक्त्युपपत्तेः तद्धेतुवाक्यार्थधी[1]विषयत्वयोग्यः तत्पदार्थोऽनुसन्धेयः इति सिद्धम्॥२०॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते**
**श्रीमद्भगवद्गीताशाङ्करभाष्यव्याख्याने द्वादशोऽध्यायः॥१२॥**

भाष्यार्कप्रकाशः

न च 'ये त्वि'ति **तु**शब्दाद् 'अतीव मे प्रियाः' इति **अतीव**शब्दप्रयोगाच्च पूर्वोक्ताधिकारिणः सकाशाद् भिन्न एवेह ग्राह्य इति वाच्यम्; **तु**शब्दस्य विश्वरूपोपासकेभ्यो ज्ञानिवैलक्षण्यद्योतनार्थत्वात्। ज्ञानिनस्तव प्रियत्वे कस्तर्हि तव प्रियतम इति शङ्कायां ज्ञान्येव मम प्रियतमः, न त्वन्य इत्येतदर्थम् **अतीव**शब्दस्येह प्रयोगात्। न हि ज्ञान्यपेक्षया कश्चित् प्रियोऽस्तीश्वरस्य। 'ज्ञानी त्वात्मैव मे मत'मित्युक्तत्वात्। आत्मनश्च प्रियत्वं सुप्रथितम्। तस्मात् प्रियप्रियतरप्रियतमत्वभेदो नेह सञ्चारयितव्यः। ज्ञानिन एकस्यैव विष्णोः प्रियत्वेन तस्यैव प्रियतमत्वादिव्यपदेश इति कृत्वा, य एव मम प्रिय इत्युक्तं सङ्क्षेपविस्तराभ्यां, स एव ज्ञानी ममातीव प्रियः, न त्वन्यः प्रियः प्रियतमो वेत्येतदर्थमिह **अतीव**शब्दस्य प्रयुक्तत्वात्। न च 'ज्ञानी त्वात्मैव मे मत'मित्यनेनापि भक्तस्यैव प्रियतमात्मत्वमभिहितमिति वाच्यम्; ज्ञानीति कण्ठत एवोक्तत्वात्। न च **भक्ताः** इतीह कण्ठोक्तमिति वाच्यम्; पूर्वोक्तस्य 'ज्ञानी त्वात्मैव मे मतम्' 'स च मम प्रिय' इत्यस्यार्थस्याविरोधायेहापि ज्ञानिन एव **भक्त**शब्देन ग्राह्यत्वात्।

न च कथं भक्तेः ज्ञानत्वमिति वाच्यम्; 'भक्तिः पुंसि रतिः पुमान् स भगवान् यः केवलात्माऽस्ति वः। तत्साक्षात्कृतिरेव ते किल मते ज्ञानं तदेकं न द्वयम्॥' इति **मदुक्त**विधया केवलात्मनीश्वरे रतेरेव ज्ञानत्वाद् भक्तित्वाच्च। उक्तं हि भाष्यकारैरपि– 'परमार्थज्ञानलक्षणामुत्तमां भक्ति'मिति। एतेन चोत्तमशब्देन विश्वरूपोपासनादिलक्षणभक्तेरधमत्वं प्रतीयते। युक्तं चैतत् , भेदबुद्धिग्रस्तत्वात् तस्याः। आत्मेश्वरभेदबुद्धिर्हि श्रुत्यादिभिर्निन्दिता। तस्माद् 'ये त्वि'ति श्लोकेन 'अद्वेष्टे'त्यादिना प्रक्रान्तो ज्ञानिधर्मपूग एवोपसंह्रियत इत्यनवद्यम्॥२०॥

**इति श्रीबेल्लङ्कोण्डोपनामकरामकविकृतौ श्रीभगवद्गीताशाङ्करभाष्यार्कप्रकाशे**
**भक्तियोगो नाम द्वादशोऽध्यायः॥१२॥**

श्रीहयग्रीवार्पणमस्तु

**भक्तियोग इति**। भक्तेर्विश्वरूपोपासनात्मिकायाः अनुत्तमायाः, अक्षरोपासनात्मिकायाः उत्तमायाश्च योगः सम्बन्धोऽत्रेति भक्तियोगः। सगुणनिर्गुणेश्वरभक्तिद्वयप्रतिपादकोऽध्याय इत्यर्थ इति। **भक्तिः** भजनम् उपासनमिति यावत्। सगुणस्य निर्गुणस्य चेश्वरस्य तदिह प्रोक्तमिति भक्तियोगोऽयमध्याय इति।

**॥इति मध्यमषट्कम्॥**

१. 'विषयोऽन्वययोग्यः' इति पा.।

ॐ श्रीपरमात्मने नमः

# ॥ अथ त्रयोदशोऽध्यायः ॥

[१](अर्जुन उवाच—

प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च।
एतद् वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव !॥)

**श्रीबेल्लंकोण्डरामरायकविविरचितः**

**भाष्यार्कप्रकाशः**

प्रकृतिपुरुषादिपदार्थानां पूर्वाध्यायेषु तत्र तत्रोक्तत्वात् तद्याथात्म्यबुभुत्सया पृच्छत्यर्जुनः— **प्रकृतिमिति**। हे केशव! प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च ज्ञानं ज्ञेयं चेत्येतद् वेदितुमिच्छामि। का प्रकृतिः? कः पुरुषः? किं क्षेत्रम्? कः क्षेत्रज्ञः? किं ज्ञानम्? किं ज्ञेयम्? इति पृच्छामीत्यर्थः। इत्यर्जुनेन पदार्थषट्कं पृष्टम्, प्रकृतिक्षेत्र(ज्ञ)योः, पुरुषक्षेत्रज्ञयोश्चैक्यज्ञानाभावप्रयुक्तोऽयं पदार्थषट्कप्रश्नः। [२]**यद्वा** कार्यकरणसङ्घातलक्षणं शरीरं **क्षेत्रं** चराचरात्मकम्। तस्य पाषाणादेरचेतनस्य गगनादीनां च हेतुर्माया **प्रकृतिः**। ततश्च पटात् तन्तोरिव, क्षेत्रात् प्रकृतेर्भेदात् क्षेत्रप्रकृती द्वौ पदार्थौ, सङ्घाताकारपरिणतक्षेत्रातिरिक्तायाः पाषाणाद्याकारेण परिणतायाः कार्यावस्थ-प्रकृतेः, कारणावस्थप्रकृतेश्चापरिणतायाः सत्त्वात्। एवं **क्षेत्रज्ञः** संसारी प्रमाता, तस्यैव ज्ञातृत्वात्। **पुरुष**स्तु साक्षी, उदासीनत्वादिति पुरुषक्षेत्रज्ञावपि द्वौ पदार्थावित्यभिप्रायात् पदार्थषट्कप्रश्नोऽर्जुनस्य युक्त इति।

एवम् अर्जुनप्रश्नानुरोधेन भगवताऽपि पदार्थषट्कमेवोक्तं च, 'इदं शरीरं क्षेत्रम्' इति, 'एतद् यो वेत्ति स क्षेत्रज्ञः' इति, 'तत्त्वार्थ-ज्ञान[तत्त्वज्ञानार्थ]दर्शनम्, एतज्ज्ञानमिति प्रोक्तम्' इति, 'भूतभर्तृ च तज्ज्ञेयम्' इति, 'पुरुषं प्रकृतिं चैव विद्ध्यनादी उभावपि' इति च वक्ष्यमाणत्वात्।

**यद्वा** पदार्थचतुष्टयमेवार्जुनेन पृष्टम्; **प्रकृतिं** प्रकृतिशब्दाभिधेयं क्षेत्रं, **पुरुषं** पुरुषशब्दाभिधेयं क्षेत्रज्ञं, ज्ञानं, ज्ञेयं चाहं वेदितु-मिच्छामीत्यर्थात्। अत एव भगवताऽपि पदार्थचतुष्टयमेव निरूपितं च। 'इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः। [३]एतद् विज्ञाय मद्भक्तो मद्भावायोपपद्यते॥' इत्युपसंहारात्। क्षेत्र(ज्ञ)स्योक्तत्वेन क्षेत्रज्ञश्चोक्त इति तत्र बोद्धव्यम्। न चैवमुपसंहारानन्तरं 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपी'ति प्रकृतिपुरुषावपि निरूपिताविति वाच्यम्, 'इदं शरीरं क्षेत्रम्' इतिवद् 'इयं प्रकृतिः, अयं पुरुषः' इत्यनि-रूपितत्वात्। पूर्वं निरूपितयोः क्षेत्रक्षेत्रज्ञयोरेव प्रकृतिपुरुषशब्देन परामर्शनादिति।

न च - क्षेत्रज्ञानज्ञेयज्ञानफलकीर्तनमिव, प्रकृतिपुरुषज्ञानफलमपि कीर्तयिष्यति भगवान्— 'य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह। सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते॥' इति; ततश्च प्रकृतिपुरुषावपि पृथग्ज्ञातव्यावेवेति - वाच्यम्; फलैकत्वेन ज्ञानैकत्वाद् ज्ञेयैकत्वमपीति। न हि क्षेत्रक्षेत्रज्ञज्ञानातिरिक्तमस्ति प्रकृतिपुरुषज्ञानम्; परन्तु क्षेत्रक्षेत्रज्ञावेव प्रकृतिपुरुषौ, तज्ज्ञानेन मोक्षः स्यादिति उक्त एवार्थोऽनुवाद्यते दार्ढ्याय।

न च - क्षेत्राद् भिन्ना प्रकृतिरस्ति, घटभिन्नमृद्वदिति - वाच्यम्; 'महाभूतान्यहङ्कारः' इत्यष्टधा भिन्नायाः प्रकृतेरपि क्षेत्रत्वस्य वक्ष्यमाणत्वात्। न च क्षेत्रज्ञात् संसारिणः पुरुषो भिन्न इति वाच्यम्; क्षेत्रज्ञस्यैव साक्षित्वात्, साक्ष्येव हि सर्वार्थद्रष्टृत्वेन ज्ञाता उदासीनश्च। संसारित्वं तु तस्याहङ्कारतादात्म्याध्यासजन्यम्; तस्मात् क्षेत्रज्ञः पुरुष एव। प्रमाता संसारी त्वहङ्कार एव। तस्मात् पदार्थचतुष्टयमेवार्जुनेन पृष्टम्।

**अथवा** - प्रकृतिं क्षेत्रं, पुरुषं क्षेत्रज्ञं ज्ञेयं, ज्ञानं चेत्येतद् वेदितुमिच्छामीति पदार्थत्रिकमेवार्जुनेन पृष्टम्, कृष्णेन पदार्थत्रिकस्यैव निरूपयिष्यमाणत्वात् – 'इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः' इति।

---

१. कुण्डलितो ग्रन्थः क्वाचित्कः। २. क्षेत्रप्रकृतिपदयोः, क्षेत्रज्ञपुरुषपदयोश्चार्थभेदमाह— यद्वेत्यादिना। ३. 'मद्भक्त एतद् विज्ञाय' इति प्रसिद्धः पाठः।

**सप्तमेऽध्याये सूचिते द्वे प्रकृती ईश्वरस्य - त्रिगुणात्मिकाऽष्टधा भिन्ना अपरा, संसारहेतुत्वात् ; परा चान्या जीवभूता क्षेत्रज्ञलक्षणा ईश्वरात्मिका, याभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिस्थितिलयहेतुत्वं प्रतिपद्यते। तत्र क्षेत्र-क्षेत्रज्ञलक्षणप्रकृतिद्वयनिरूपणद्वारेण तद्वतः ईश्वरस्य तत्त्वनिर्धारणार्थं [1]क्षेत्राध्यायः आरभ्यते। अतीतानन्तराध्याये च**

### अनुभूतिस्वरूपाचार्यविरचितगीताभाष्यटिप्पणम्

त्रयोदशाध्यायस्य व्यवहितेन सम्बन्धमाह— **सप्तमेऽध्याय इत्यादिना**। द्वादशाध्यायेनापि सम्बन्धान्तरमाह—

### आनन्दगिरिकृतव्याख्या

**प्रथममध्यमयोः षट्कयोः त्वमूतत्पदार्थावुक्तौ। अन्तिमस्तु षट्को [2]वाक्यार्थनिष्ठः [3]सम्यग्धीप्रधानोऽधुनाऽऽरभ्यते। तत्र क्षेत्रा-ध्यायम् अन्तिमषट्काद्यमवतितारयिषुर्व्यवहितं वृत्तं कीर्तयति—** सप्तम इति। **प्रकृतिद्वयस्य स्वातन्त्र्यं वारयति—** ईश्वरस्येति। **'भूमिः' इत्यादिनोक्ता [4]सत्त्वादिरूपा प्रकृतिः अपरेत्यत्र हेतुमाह—** संसारेति। **'इतस्त्वन्याम्' इत्यादिनोक्तां प्रकृतिमनुक्रामति—** परा चेति। **परत्वे हेतुं सूचयति—** ईश्वरात्मिकेति। **किमर्थमीश्वरस्य प्रकृतिद्वयमित्याशङ्क्य , कारणत्वार्थमित्याह—** याभ्यामिति। **वृत्तमनूद्य वर्तिष्य-माणाध्यायारम्भप्रकारमाह—** तत्रेति। **व्यवहितेन सम्बन्धमुक्त्वा, अव्यवहितेन तं विवक्षुरव्यवहितमनुवदति—** अतीतेति। **निष्ठोक्तेति**

#### भाष्यार्कप्रकाशः

**यद्वा** सप्तमाध्याये ईश्वरस्य प्रकृतिद्वयमस्तीत्युक्तम् , ततः पृच्छत्यर्जुनः— प्रकृतिमिति। **क्षेत्रं** क्षेत्रलक्षणामष्टधा भिन्नामपरां प्रकृतिं, **पुरुषं** क्षेत्रज्ञं तल्लक्षणां परां प्रकृतिं, **ज्ञेयं** तत्प्रकृतिद्वयवन्तमीश्वरम् , ज्ञानं च वेदितुमिच्छामीति पदार्थचतुष्टयप्रश्नः। तथैव भगवदुत्तरं च। क्षेत्रज्ञलक्षणायाः प्रकृतेः ज्ञेयाद् ब्रह्मणोऽनन्यत्वात् 'इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः' इत्युक्तमिति।

**ननु** पदार्थद्वयमेव प्रष्टव्यम् - दृग्दृश्ययोर्द्वयोरेव पदार्थत्वात्। तथा च प्रकृतिं क्षेत्रं ज्ञेयं दृश्यं वस्तु, पुरुषं क्षेत्रज्ञं ज्ञानं दृग्वस्तु च वेदितुमिच्छामीत्यन्वयः। प्रकृत्यादिशब्दप्रतिपाद्यं दृश्यं, पुरुषादिशब्दप्रतिपाद्यं दृग्वस्तु च ज्ञातुमिच्छामीत्यर्थ इति चेत् , **मैवम्** ; भगवता पदार्थत्रिकस्योक्तत्वात्। न च ज्ञानस्य भगवदुक्तस्य क्षेत्रेऽन्तर्भाव इति वाच्यम् ; क्षेत्रं सर्वमुक्त्वा पश्चात् पृथक् ज्ञानस्योक्तत्वात्। 'एतज्ज्ञानमिति प्रोक्तम्' इति निरूपितत्वात्। अन्यथा 'एतत् क्षेत्रं समासेन' इत्येतत्प्रागेव ज्ञानमपि महाभूतादिषु ब्रूयात् , 'एतज्ज्ञान-मिति प्रोक्तम्' इति च न ब्रूयात्। यद्यपि वस्तुतो ज्ञानमपि तत्त्वार्थदर्शनादिलक्षणं बुद्धिधर्मत्वात् क्षेत्रमेव, तथापि तस्यावश्य-सम्पादनीयत्वद्योतनाय पृथक्प्रश्नानुसारेण च पृथगुक्तं क्षेत्रादिति मन्तव्यमिति।

**वस्तुतस्तु** अर्जुनेनाज्ञत्वात् स्वस्य, अज्ञत्वमात्मन्यारोप्य, अज्ञदृष्ट्या वा अज्ञजनबोधनार्थं पदार्थषट्कमेव पृष्टम्। न ह्यज्ञो वेद प्रकृतिक्षेत्रयोः पुरुषक्षेत्रज्ञयोः क्षेत्रज्ञब्रह्मणोर्वा ऐक्यम्। सति तु तद्वेदने प्रश्नस्यैवायोगात्। अज्ञातार्थज्ञानाय हि प्रश्नः। भगवांस्तु— तदाशयमालक्ष्य मैवं पदार्थषट्कभ्रमं कार्षीः, किन्तु प्रकृतिपुरुषावेव क्षेत्रक्षेत्रज्ञावित्युच्येते; अतः पदार्थचतुष्टयमेव तुभ्यं मया निरूपयिष्यत इति सूचयन् प्रत्युत्तरं वक्तुमारब्धवान्— इदं शरीरमित्यादिना। कथमन्यथा प्रश्नक्रमं विहाय क्षेत्रमादौ निरूपयेद् भगवान्? कथं वा ततः क्षेत्रज्ञम्? प्रकृतिर्ह्यादौ निरूपयितव्या, पश्चात्पुरुष इति क्रमात्। न चैवं पदार्थचतुष्टयं निरूप्यापि 'पदार्थत्रयमेव मया निरूपितं ते' इति कुत उपसंहारवाक्ये भगवानुक्तवानिति वाच्यम् ; 'क्षेत्रज्ञं चापि मां विद्धि' इति क्षेत्रज्ञज्ञेयब्रह्मणोरेक-त्वस्योक्तत्वादिति सङ्क्षेपः।

**वस्तुतस्तु** प्रक्षिप्त एवायं श्लोकः, **श्रीशङ्करानन्दगिरि-श्रीधर-मधुसूदन-रामानुजा**दिभिरव्याकृतत्वात् , नागरग्रन्थेष्वसत्त्वाच्च।

**अष्टधेति**। प्रकृतिमहदहङ्कारपञ्चतन्मात्ररूपेणेत्यर्थः। **अपरा** निकृष्टा। तत्र हेतुमाह— **संसारहेतुत्वादिति**। अज्ञानतत्कार्य-प्रयुक्तो हि संसारः। क्षेत्रज्ञविवर्तत्वान्मायापरिणामत्वाच्च जगतः, ईश्वरस्य स्वतो मायाधिष्ठानद्वारेण च जगज्जन्मादिहेतुत्वमित्याह— **याभ्यामिति। तद्वत इति**। प्रकृतिद्वयवत इत्यर्थः। सच्चिदानन्दलक्षणो मायालक्षणश्चेत्युभौ स्वभावौ स्तः परमेश्वरस्येति भावः।

---

१. 'क्षेत्रज्ञाध्यायः' इति पा.। २. त्वंतत्पदार्थयोरैक्यं वाक्यार्थः। तत्तात्पर्यक इत्यर्थः। ३. **सम्यग्धीः** तत्त्वज्ञानम् **प्रधानं** प्रयोजनं यस्य सः। ४. त्रिगुणात्मिका।

**'अद्वेष्टा सर्वभूतानाम्' (भ.गी.१२.१३) इत्यादिना यावदध्यायपरिसमाप्तिः तावत् तत्त्वज्ञानिनां संन्यासिनां निष्ठा— यथा ते वर्तन्त इत्येतदुक्तम्। केन पुनस्ते तत्त्वज्ञानेन युक्ताः यथोक्तधर्माचरणाद् भगवतः प्रिया भवन्तीत्येवमर्थश्च अयमध्यायः आरभ्यते। [1]प्रकृतिश्च त्रिगुणात्मिका सर्वकार्यकरणविषयाकारेण परिणता पुरुषस्य भोगापवर्गार्थ-कर्तव्यतया देहेन्द्रियाद्याकारेण संहन्यते। सोऽयं सङ्घातः— इदं शरीरम्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**अतीतानन्तरेति**। ननु सप्तमेऽध्याये या प्रकृतिरुक्ता ततोऽन्यदेव शरीरमिहोच्यते। अतस्तेनास्य सम्बन्धः कथमित्या-शङ्क्याह— **प्रकृतिश्चेति**। पुरुषस्य भोगापवर्गलक्षणो योऽर्थः सः शरीरे सति सम्पद्यते। तत्कर्तव्यतया प्रकृतिर्देहाद्याकारेण संहन्यते। अतः शरीरस्य प्रकृत्यात्मकत्वाद् घटते सम्बन्ध इत्यर्थः।

आनन्दगिरिकृतव्याख्या

**सम्बन्धः। निष्ठामेव व्याचष्टे—**यथेति। वर्तन्ते **धर्मजातमनुतिष्ठन्ति, तथा - पूर्वोक्तेन प्रकारेण सर्वमुक्तमिति योजना। अव्यवहितमेवानूद्य**[2] **तेनोत्तरस्य सम्बन्धं सङ्गिरते—** केनेति। **तत्त्वज्ञानोक्तेरुक्तार्थेन समुच्चयार्थश्चकारः। जीवानां सुखदुःखादिभेदभाजां प्रतिक्षेत्रं भिन्नानां नाक्षरेणैक्यमित्याशङ्क्य , संसारस्यात्मधर्मत्वं निराकृत्य संघातनिष्ठत्वं वक्तुं संघातोत्पत्तिप्रकारमाह—** प्रकृतिश्चेति। **भोगश्चापवर्गश्चार्थौ, तयोरेव कर्तव्यतयेति यावत्। नन्वनन्तरश्लोके शरीरनिर्देशात् तस्योत्पत्तिर्वक्तव्या, किमिति संघातस्योच्यते? तत्राह—** सोऽयमिति।

भाष्यार्कप्रकाशः

**यावदध्यायपरिसमाप्ति**र्भवति तावद् - अध्यायपरिसमाप्तिपर्यन्तमित्यर्थः। यथा **ते** संन्यासिनो वर्तन्ते तथा संन्यासिनां निष्ठोक्तेत्यन्वयः। संन्यासिनस्ते केन वा तत्त्वज्ञानेन युक्ताः सन्तो यथोक्तधर्माचरणेन भगवतः प्रिया भवन्तीत्येतदुक्तमित्येवमर्थ एतत्प्रश्नोत्तरार्थ इत्यर्थः। ईश्वरतत्त्वनिर्धारणार्थेन सहास्य समुच्चयार्थश्चकारः। सप्तमाध्याये सङ्क्षेपेणोक्तानां क्षेत्रक्षेत्रज्ञेश्वराणां याथात्म्यनिर्धारणार्थं, संन्यासिनां ज्ञाननिरूपणार्थं पूर्वाध्यायोक्तधर्मवतां चायमध्यायः आरभ्यते भगवता **बादरायणेने**त्यर्थः। क्षेत्रं, क्षेत्रज्ञः, ईश्वरः, संन्यासिनां क्षेत्रादियाथार्थ्यविदां ज्ञानं चेति पदार्थचतुष्टयमस्मिन्नध्याये निरूप्यत इति भावः। प्रकृतिपुरुषकथनं तु क्षेत्रक्षेत्रज्ञनिरूपणादनन्यमेवेति न प्रकृतिपुरुषयोर्निरूपणमपीह क्रियत इत्युक्तम्।

**इदमिति**। इदं प्रत्यक्षादिप्रमाणैरुपलभ्यमानमित्यर्थः। शीर्यत इति शरीरम्। किं तद्? अत आह— **प्रकृतिश्चेति**। सर्वकार्य-करणविषयाकारेण परिणता त्रिगुणात्मिका प्रकृतिः पुरुषस्य भोगापवर्गार्थकर्तव्यतया हेतुना देहेन्द्रियाद्याकारेण संहन्यत इत्यन्वयः। महाभूतानि पञ्चाहङ्कारो बुद्धिरिति प्रकृतिविकृतयः सप्त **कार्य**शब्देनोच्यन्ते; इन्द्रियाणि दश, मन एकं च **करण**शब्देन; इन्द्रियगोचराः शब्दादयः पञ्च **विषय**शब्देनेति विवेकः। तथा च त्रयोविंशतितत्त्वाकारेण परिणामात् 'सर्वकार्यकरणविषयाकारेण परिणते'त्युक्तम्। त्रयो गुणाः सत्त्वादयः। **प्रकृति**र्मूलप्रकृतिर्माया; **पुरुषस्य** जीवस्य भोगापवर्गरूपावर्थौ **कर्तव्यौ** सम्पादयितव्यौ यस्याः, तया [तत्तया]। भोगापवर्गसम्पादनार्थमित्यर्थः। शरीरं विना जीवस्य भोगमोक्षयोरसिद्धेः। अत एव हि 'आत्मनो भोगायतनं शरीरम्' इति शरीरस्य लक्षणमुक्तं **तार्किकैः**। तत्र च मनुष्यशरीर एव जीवेन मोक्षः सम्पादयितव्यः। कीटादिशरीरेषु ज्ञानाभावेन तदयोगादिति बोध्यम्। इदम्पदेन चात्र मनुष्यशरीरमेव निर्दिष्टमिति ज्ञायते। भोगस्तु सर्वशरीरसाधारणः। अत एव भोगायतनत्वमात्रमेव शरीरस्य लक्षणम्। इह तु मनुष्यशरीरस्य भगवता विवक्षितत्वाद् **भोगापवर्गार्थकर्तव्यतये**त्युक्तं भाष्यकारैः। **देहेन्द्रियाद्याकारेण** आदिपदाद् विषयग्रहणम्। पञ्चीकृतपञ्चभूतकार्यं देहः। स च चराचरभेदेन द्विविधः। इन्द्रियादिसमवेत[3]देहाकारेणेत्यर्थः।

**यद्वा** देहः स्थूलशरीरम् , 'दिह उपचये' इति धातोः[4], स्थूलस्यैव उपचयापचयदर्शनाच्च। इन्द्रियाणि दश, आदिपदात् प्राण-पञ्चकं मनश्च गृह्यते। तद्धि षोडशकं सूक्ष्मशरीरम्। तथा च स्थूलसूक्ष्मशरीराकारेणेत्यर्थः। **संहन्यते** संहता भवति। त्रयोविंशतितत्त्व-

१. प्रकृतिश्चेत्यादिग्रन्थः रा.पाठे श्लोकोत्तरं ज्ञेयः। २. 'एवमनूद्य' इति पा.। ३. सहितेत्यर्थः। ४. देहशब्दनिष्पत्तेरिति शेषः।

**श्रीभगवानुवाच—**

**इदं शरीरं कौन्तेय ! क्षेत्रमित्यभिधीयते।**
**एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः॥१॥**

**तदेतद् भगवानुवाच—** इदमिति। **इदमिति सर्वनाम्नोक्तं विशिनष्टि—** शरीरमिति। **हे कौन्तेय ! क्षतत्राणात्, क्षयात्, क्षरणात्, क्षेत्रवद्वाऽस्मिन् कर्मफलनिर्वृत्तेः**[1] क्षेत्रमिति। **इतिशब्द एवंशब्दपदार्थकः। 'क्षेत्रम्' इत्येवम्** अभिधीयते **कथ्यते।** एतत् **शरीरं क्षेत्रं यो** वेत्ति **विजानाति, आपादतलमस्तकं ज्ञानेन विषयीकरोति, स्वाभाविकेन**

अनुभूतिस्वरूपाचार्यटिप्पणम्

शब्द एव पदार्थोऽस्येति **शब्दपदार्थकः। इतिशब्देन** एवंशब्दोऽभिधीयते, न हेतुत्वाद्यर्थान्तरमित्यर्थः॥१॥

आनन्दगिरिकृतव्याख्या

**उक्तेऽर्थे भगवद्वचनमवतारयति—** तदेतदिति। **तत्र** [2]**द्रष्टृत्वेन संघातदृश्यादन्यमात्मानं निर्दिशति—** इदमिति। [4]उक्तं **प्रत्यक्ष-दृश्यत्वविशिष्टं किञ्चिदिति शेषः। शरीरस्यात्मनोऽन्यत्वं क्षेत्रनामनिरुक्त्या ब्रूते—**क्षतेति। क्षयो **नाशः,** क्षरणम**पक्षयः। यथा क्षेत्रे बीजमुप्तं फलति, तद्वदित्याह—** क्षेत्रवद्वेति। **क्षेत्रपदादुपरि स्थितम्** इतिपदं **क्षेत्रशब्दविषयम्, अन्यथा वैयर्थ्यादित्याह—** इतिशब्द इति। क्षेत्रमित्येवम्[3] **अनेन क्षेत्रशब्देनेत्यर्थः। दृश्यं देहमुक्त्वा ततोऽतिरिक्तं द्रष्टारमाह—** एतदिति। स्वाभाविकं **मनुष्योऽहमिति ज्ञानम्,**

भाष्यार्कप्रकाशः

सम्मेलनजन्यत्वाद् देहस्येति भावः। इदं च तत्त्वानां संहतत्वमीश्वरानुग्रहादेवेति **भागवते** [5]प्रसिद्धम्। न हि जडा प्रकृतिः संहन्तुमीष्टे। **सोऽयमिति।** मायापरिणामदेहेन्द्रियादिसङ्घातः इत्यर्थः।

शरीरस्य क्षेत्रशब्दवाच्यत्वे हेतुमाह— **क्षतत्राणादिति।** क्षतात् त्रायत इति क्षेत्रम्। ज्ञानोत्पादनद्वारा नरकपातादिलक्षणात् क्षतात् त्रायते हि पुमांसं शरीरम्। यद्वा भोगायतनत्वाच्छरीरस्य एतदभावे भोगक्षतिः स्यात् पुंस इति भोगक्षतिरूपात् क्षतात् पुमांसं त्रायते शरीरं भोगप्रदानद्वारेति। अथवा यथा चर्मादिलक्षणः कवचः शरीरं क्षतात् त्रायते, शरीरावरणत्वात् तस्य, तथा शरीरस्यापि जीवावरणत्वात्, स्वान्तःस्थितं शरीरिणं त्रायते क्षतादिदं शरीरम्। अत एव स्वताडनायागतं प्रबलं दृष्ट्वा नेत्रे निमीलयति पुरुषः - ताड्यतां नाम शरीरम्, मम पुनस्ताडनं मा भूदिति भ्रमेण। न च कुतस्तत्प्रत्ययस्य भ्रमत्वमिति वाच्यम्; ताडनाद्यविषयत्वाद् नीरूपस्यात्मनः। हेत्वन्तरमाह— **क्षयादिति।** क्षीयत इति क्षेत्रम्। **क्षयो** वृद्धिप्रतियोगी, नाशो वा। स हि सर्वानुभवसिद्धः। व्युत्पत्त्यन्तरमाह— **क्षरणादिति।** क्षरतीति क्षेत्रम्। **क्षरणं** स्वस्वरूपात्प्रच्युतिः। शरीरं हि नैकरूपेणावतिष्ठते, भस्मादिरूपेण शरीरस्य परिणामात्। हेत्वन्तरमाह— **क्षेत्रवदिति।** क्षेत्रतुल्येऽस्मिन् शरीरे क्षेत्रशब्दप्रयोग औपचारिक इति भावः। क्षेत्रतौल्ये हेतुमाह— **कर्मफलेति।** यथा प्रसिद्धे व्रीह्यादिक्षेत्रे व्रीह्यादिसस्यफलसिद्धिः, तथा कर्मफलानां रोगारोग्यसुखदुःखादीनाम् अस्मिन् निष्पत्तेरिदं शरीरं क्षेत्रमित्युच्यते। पृषोदरादित्वाद् रूपसिद्धिः। **इतिशब्दार्थमाह— एवंशब्दपदार्थक इति।** एवंशब्दस्य यो विषयः पदार्थः, स एव इतिशब्दस्येत्यर्थः। तथा च 'क्षेत्रमित्यभिधीयते' इत्यस्य क्षेत्रशब्देनोच्यत इत्यर्थः। 'स्वाभाविकेन ज्ञानेनापादतलमस्तकं विषयी-करोती'ति **वेत्तिशब्दार्थः।** यस्य ज्ञाने शरीरमिदमापादतलमस्तकं विषयो भवतीत्यर्थः। ज्ञानं विषयि, ज्ञेयास्तु विषया इति प्रसिद्धम्। **आपादतलमस्तकमिति।** पादतलादारभ्य मस्तकमभिव्याप्येत्यर्थः। पादतलं मस्तकं चेत्युभयमभिव्याप्येति वा। सर्वैरप्यवयवैः सहेत्यर्थः। सर्वमपीति यावत्। पश्वादयोऽपि हि स्वाभाविकेन ज्ञानेन स्वं शरीरं सर्वं विदन्ति, पुच्छादौ ताडितस्यापि पशोः

१. 'निष्पत्तेः' इति पा.। २. 'दृश्यत्वेन द्रष्टुरात्मनः अन्यं संघातं निर्दिशति' इति पाठः अपेक्षितः। ३. अत्र एवंशब्देन क्षेत्रशब्दः परामृश्यते। तथा चात्रेतिशब्दस्य क्षेत्रशब्देनेत्यर्थलाभः। एवमग्रे 'क्षेत्रज्ञ इति' इत्यत्रापि इतिशब्दस्य क्षेत्रज्ञशब्देनेत्यर्थो बोध्यः। ४. इदमा प्रत्यक्षदृश्यत्वविशिष्टं यदुक्तम्, तद् विशिनष्टि इत्यर्थः। ५. द्र. भागवतम् स्क.३. अ.२६।

**औपदेशिकेन वा वेदनेन विषयीकरोति विभागशः,** तं **वेदितारं** प्राहुः **कथयन्ति— क्षेत्रज्ञः इति। इतिशब्द एवंशब्द-पदार्थक एव, पूर्ववत्। 'क्षेत्रज्ञः' इत्येवम् आहुः[१]। के?** तद्विदः। **तौ क्षेत्रक्षेत्रज्ञौ ये विदन्ति[२], ते तद्विदः॥१॥**

आनन्दगिरिकृतव्याख्या

औपदेशिकं **देहो नात्मा, दृश्यत्वादित्यादि।** विभागशः **स्वतोऽतिरिक्तत्वेनेत्यर्थः। क्षेत्रमित्यत्रेतिशब्दवदत्रापि** इति**शब्दस्य क्षेत्रज्ञशब्द-विषयत्वमाह—** इतिशब्द इति। क्षेत्रज्ञ इत्येवं **क्षेत्रज्ञशब्देन तं प्राहुरिति सम्बन्धः। प्रवक्तॄन् प्रश्नपूर्वकमाह—** क इत्यादिना॥१॥

भाष्यार्कप्रकाशः

भयचलनादिदर्शनात्। एवं मनुष्योऽपि पादतले कण्टकेन विद्धः सन्, शिरसि केशेनाकृष्टः संश्च युगपच्छोचति। तस्मात् सर्वमपि शरीरं विषयीकरोत्येव स्वाभाविकज्ञानेन शरीरी। सर्वशरीरव्यापित्वादापादतलमस्तकं शरीरं व्याप्य हि शरीरी वर्तते। कथमन्यथा 'शिरसि मे वेदना, पादे मे कण्टकः' इति युगपदेव जानीयाच्छरीरी? अतो विभुरेव जीवः। अणुत्वे तु नैतत् सिध्येत्, अणोः सर्वशरीरव्यापि-वेदनोपलम्भासम्भवात्। मध्यमपरिमाणत्वे तु मनुष्यशरीरिणः पापवशात् कीटशरीरप्राप्तौ कीटशरीरे मनुष्यशरीरादुत्क्रान्तो जीवो न मायात्, शरीरसमपरिमाणस्य शरीरादुत्क्रान्तिरपि न सिध्येत्, नासारन्ध्रादेरुत्क्रान्तिमार्गस्य सूक्ष्मत्वात्। शरीरादुत्क्रममाणश्च मध्य-मपरिमाणश्चेज्जीवः सर्वैः पार्श्वस्थैर्दृश्येत च, न तु तथा दृश्यते। तस्माद् विभुरेवायम्। तथा औपदेशिकेन ज्ञानेन वा शरीरं विभागशो विषयीकरोतीति **वेत्ति**शब्दस्यान्योऽर्थः। उपदेशाद् गुरोर्लब्धमौपदेशिकम्, तेन ज्ञानेन **विभागशः** आत्मानात्मविवेकपूर्वकम्। 'अहमात्मा, इदमनात्मे'ति विवेकेनेत्यर्थः। इदं शरीरम्, इदमिन्द्रियम्, अयं विषय इति विवेकेनेति वा। न तु करचरणविभागात्, तस्य स्वाभाविकज्ञानविषयत्वात्। **तं वेदितारमिति**। विविच्याविविच्य वा शरीरस्य ज्ञातारमित्यर्थः। अविद्वद्वचनस्याप्रमाणत्वादाह— **तद्विद इति**। एतेन शरीरं क्षेत्रं, शरीरी क्षेत्रज्ञ इति सिद्धम्। इमावेव प्रकृतिपुरुषावपि। देहेन्द्रियादिसङ्घाताकारपरिणतप्रकृतेरेव क्षेत्रत्वाद्, एतस्मिन् क्षेत्रे पुरि शयनात् क्षेत्रज्ञस्य पुरुषत्वाच्च। एवं क्षेत्रक्षेत्रज्ञयोरेव प्रकृतिपुरुषत्वात् प्रकृतिपुरुषौ न पृथग् निरूपितौ श्रीकृष्णेन।

**ननु** शरीरमेव क्षेत्रमित्युक्तम्, क्षेत्रस्य प्रकृतिकार्यत्वेऽपि कार्यादन्यत्वात् कारणस्य, क्षेत्रादन्यैव प्रकृतिः। अतो न क्षेत्र-निरूपणेन प्रकृतिर्निरूपितेति वक्तुं शक्यत इति चेत्? **मैवम्**; इदं शरीरं क्षेत्रमित्युक्तम्, न त्विदं शरीरमेव क्षेत्रमिति। ततश्च शरीरादन्योऽपि क्षेत्रपदार्थः कश्चन भवितुमर्हत्येव। अत एव 'महाभूतान्यहङ्कारः' इत्यादिना क्षेत्रपदार्थं वक्ष्यति भगवान्। तथा च शरीरात्मना परिणता, पृथिव्यादिभूताद्यात्मना परिणता, अपरिणता मूलप्रकृतिश्च क्षेत्रमेवेति सर्वाऽपि प्रकृतिः क्षेत्रमेव, या ईश्वरस्यापर-प्रकृतित्वेन सप्तमाध्याये निर्दिष्टा सा। इदं शरीरं क्षेत्रमिति तु शरीरस्य सर्वजनप्रसिद्धत्वाच्छरीरादेव शरीरिणो विविच्य ज्ञातव्यत्वाद् मुमुक्षुणा, शरीरस्य क्षेत्रत्वं तावद् दर्शितं श्रीकृष्णेन। शरीरात्माभिमानो हि संसारस्य प्रथमं कारणम्, दारापत्याद्यभिमानानां शरीराभिमानमूलकत्वात्। शरीरशरीरिविवेचने कृते तु तन्नाशात् सर्वसंसारनाश इति शरीरशरीरिणावेव विविच्य ज्ञातव्यौ मुमुक्षुणा तावत्। तत्र च शरीरमेव तावत् ज्ञातव्यं यत्र स्वस्याभिमानः, तद्विवेकज्ञाने सति तु आत्मविवेकज्ञानं सुलभम्। आरोप्यसर्पमिथ्यात्व-ज्ञानपूर्वकत्वाद् अधिष्ठानरज्जुयाथार्थ्यज्ञानस्य। शरीरं हि क्षेत्रज्ञमायया अध्यस्तम्। अत एव शरीरमादौ निर्दिष्टम्। तच्चेदंशब्देन विशेषितम्। तेन च किं ज्ञायते? स्थूलं सूक्ष्मं कारणं वा सर्वमपि शरीरमिदम्प्रत्ययविषयत्वान्नैवात्मा; आत्मा ह्यहंप्रत्ययविषयः। 'अहमिदं जानामी'ति सर्वैरहम्प्रत्ययविषयत्वेन वेदितुरात्मनो गृह्यमाणत्वादिति। अत एव 'युष्मदस्मत्प्रत्ययगोचरयो'रिति युष्मदस्म-त्प्रत्ययविषयत्वमपि देहजीवयोर्विवेकायोपन्यस्तं भाष्यकारैः **सूत्रभाष्यारम्भे**। 'एतद् यो वेत्ति' इत्यनेन च वेदितुर्विषयिणः आत्मनो विषयाद् वेद्याच्छरीराद् वैलक्षण्यं दर्शितम्। अत एव 'विषयविषयिणो'रिति विषयविषयित्वरूपं वैलक्षण्यं दर्शितमाचार्यैर्देहजीवयोः **सूत्रभाष्ये**। शरीरमित्यनेन च विनाशित्वमुक्तमिति विनाशिनः शरीराज्जीवस्याविनाशित्वलक्षणं वैलक्षण्यं सूच्यते। किञ्चात्मान्यस्य सर्वस्याप्यनित्यत्वाच्छरीरशब्देन[३] क्षेत्रशब्दवाच्यतया वक्ष्यमाणं महाभूताद्यात्मकं सर्वं जगत्, तद्धेतुः प्रकृतिश्च ग्रहीतुं शक्यत एव।

---

१. 'आहुः' इति क्वचिन्न। आनन्दगिरीयानुसारेणापि नास्तीति ज्ञायते। तत्र 'तं प्राहुरिति सम्बन्धः' इति पूर्वेणान्वयोक्तेः। २. 'विदन्ति विजानन्ति' इति पा.।
३. शीर्यत इति शरीरमिति व्युत्पत्तेरिति भावः।

**क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत।**
**क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत् तज्ज्ञानं मतं मम॥२॥**

**एवं क्षेत्रक्षेत्रज्ञावुक्तौ किमेतावन्मात्रेण ज्ञानेन ज्ञातव्याविति? नेत्युच्यते—** क्षेत्रज्ञमिति। **क्षेत्रज्ञं यथोक्तलक्षणं चापि** मां **परमेश्वरम् असंसारिणं** विद्धि **जानीहि।** सर्वक्षेत्रेषु **यः क्षेत्रज्ञो ब्रह्मादिस्तम्बपर्यन्तानेकक्षेत्रोपाधिप्रविभक्तः, तं**

आनन्दगिरिकृतव्याख्या

**दृश्यानां दुःखादीनां [1]भेदकानां यावद्देहभाविनामनात्मधर्मत्वसिद्धये द्रष्टारं देहादन्यमुक्त्वा, सांख्यानामिव [2]तावन्मात्रेण मुक्तिनिवृत्तये तस्य सर्वदेहेष्वैक्योक्तिपूर्वकं स्वेन परमार्थेनाक्षरेणैक्यं[3] वृत्तमनूद्य प्रश्नद्वारा दर्शयति—** एवमित्यादिना। यथोक्तलक्षणं **दृश्याद् देहान्निष्कृष्टं द्रष्टारमित्यर्थः।** चापि इति **निपातौ जीवस्याक्षरत्वज्ञानस्य देहादन्यत्वज्ञानेन समुच्चयार्थौ भिन्नक्रमौ 'न क्षेत्रज्ञं सांख्यवद् दृश्यादन्यमेव विद्धि , किन्तु मां चापि विद्धी'ति सम्बध्येते। यः सर्वक्षेत्रेष्वेकः क्षेत्रज्ञस्तं मामेव विद्धीति सम्बन्धं सूचयति—**सर्वेति।

भाष्यार्कप्रकाशः

अपि च ईश्वरस्यैव क्षेत्रज्ञत्वादीश्वरस्य च सर्वव्यापित्वात् सर्वमपीश्वरशरीरमेवेति शरीरशब्देन सर्वं सुग्रहमेवेति ज्ञायते। [4]केवलयोगेन शरीरशब्दस्य सर्वानात्मवाचित्वेऽपि योगरूढ्या देहवाचित्वादुक्तम् - 'सङ्घातः' इति **भाष्यकृद्भिरिति**॥१॥

**क्षेत्रज्ञमिति। एतावन्मात्रेणेति।** 'शरीरं क्षेत्रम् , तज्ज्ञः क्षेत्रज्ञः' इत्याकारेणेत्यर्थः। **इति** शङ्कायामिति **नेत्युच्यते।** तावन्मात्रज्ञानस्य फलाभावादिति भावः। युक्तं चैतत् - 'इदम् शरीरं क्षेत्रम् , एतज्ज्ञोऽहं क्षेत्रज्ञः' इति वेदनमात्रेण 'अहं ब्रह्मे'ति सम्यग्दर्शनासम्भवाद् ब्रह्मात्मज्ञानं विना संसारभयानिवृत्तेः। 'य उदरमन्तरं कुरुते, अथ तस्य भयं भवती'ति श्रुतेः **उद् [अरम्]** अल्पमप्यन्तरं जीवेश्वरयोर्यः कुरुते तस्य भिन्नात्मज्ञानिनो भयं भवति। एवम् 'ईश्वरोऽन्यः, अहमन्यः' इति भेदज्ञानादेव 'भीषाऽस्माद्वातः पवते' इत्यादिश्रुतिप्रतिपादितविधया वाय्वादीनामीश्वराद्भीतिः। ईश्वरो हि जीवादन्यत्वेनाभिमतश्चेज्जीवान् नियमयति, यथा भृत्यादन्यत्वेनाभिमतो राजा भृत्यान्। अत एवेश्वरस्य स्वातन्त्र्यं, जीवानां पारतन्त्र्यं च। अभेदज्ञानिनस्तु नैतदस्ति, ईश्वरस्यैवात्मत्वात् क्व नियम्यनियामकभावः? क्व वा ईश्वराज्ञातिक्रमादिजन्यभयावकाशः? अस्माच्च सम्यग्दर्शनाज्जीवस्य सर्वसंसारनिवृत्तिरिति कृत्वा 'क्षेत्रज्ञः ईश्वराभेदेन ज्ञातव्यः' इत्ययमर्थोऽर्जुनेन[ऽर्जुनाय] श्लोकेनोच्यत इति भावः। न चेश्वराभेदज्ञानिनो यमादिभ्योऽस्ति भयमिति वाच्यम् ; ईश्वरपरतन्त्रत्वाद् यमादीनां, स्वस्य चेश्वरत्वात्। यद्वा ईश्वरस्य सर्वात्मत्वात् स्वस्य चेश्वरत्वाद् यमादीनामप्यात्मत्वेन नास्य भीतिः कुतश्चिदिति। अथवा ईश्वरे सर्वस्य कल्पितत्वाद् यमादीनामपि भूतानां कल्पितत्वेन मिथ्यात्वात् स्वस्य चात्मन ईश्वराभिन्नत्वेन सर्वाधिष्ठानत्वात् सत्यत्वान्नित्यत्वाच्च न मिथ्याभूतेभ्यो यमादिभूतेभ्यो भयमद्वैतिनः। मरीचिकोदकाद् भूमेः पङ्किलत्वभयाभावात्। तस्मात् सर्वसंसारनिबर्हणाय जीवेश्वराभेदो ज्ञातव्यो मुमुक्षुणा। ईश्वरे असंसारित्वनिश्चयात् तस्य। 'जीवोऽहं संसारी, ईश्वर एक एवासंसारी'ति प्रत्येति सर्वः आस्तिकजनः।

**ननु** संसार्यसंसारिणोर्जीवेश्वरयोरेकत्वज्ञानस्य भ्रमत्वात् कथं तादृशादपि ज्ञानान्मुमुक्षोः संसारनिवृत्तिरिति चेत्? **मैवम्** ; जीवे संसारस्य देहादितादात्म्याध्यासप्रयुक्तत्वात्। जीव(स्व)स्वरूपस्य च सच्चिदानन्दलक्षणस्य परमेश्वरत्वादिति। तस्मात् क्षेत्रज्ञः ईश्वराभेदेन ज्ञातव्यः इत्येवमर्थमयं क्षेत्रज्ञश्लोकः आरभ्यते— सर्वक्षेत्रेषु वर्तमानं क्षेत्रज्ञं च **मामपि** मामेव विद्धि। **अपिरेवार्थे।** ईश्वर एव सर्वक्षेत्रेषु क्षेत्रज्ञरूपेण वर्तत इति विद्धीत्यर्थः। सर्वक्षेत्रेष्विति बहुवचनात् , क्षेत्रज्ञमित्येकवचनाच्च शरीरानेकत्वं जीवैकत्वं च बोध्यत इत्यभिप्रायादाह— **ब्रह्मादीति।** ईश्वरस्यैव क्षेत्रज्ञत्वादीश्वरस्य चैकत्वात् क्षेत्रज्ञः एक एव। स च महाकाशो घटाद्युपाधिभिरिव ब्रह्मादिस्तम्बपर्यन्तैरनेकैः क्षेत्रलक्षणोपाधिभिः प्रकर्षेण विभक्तः। अत एव नानाजीवभ्रमो लौकिकानां तार्किकादीनां च। न ह्युपाधि-

१. दुःखादीनां प्रतिदेहं व्यवस्थयोपलम्भात् आत्मभेदकत्वेन पराभिमतानामित्यर्थः। २. आत्मनो देहादिव्यतिरेकज्ञानमात्रेणेत्यर्थः। सांख्यमते हि प्रकृतिपुरुषविवेकख्यातेः अपवर्गसाधनत्वमुपगतम्। 'तन्मात्रेण' इति पा.। ३. ऐक्यं दर्शयतीत्यन्वयः। ४. शरीरशब्देन रूढ्यर्थग्रहणे हि सकलानात्मासंग्रहः, योगार्थग्रहणे तु रूढ्यर्थस्य देहस्यापि तदन्तर्भावात् तत्संग्रह इति भावः।

**निरस्तसर्वोपाधिभेदं सदसदादिशब्दप्रत्ययागोचरं विद्धीत्यभिप्रायः। हे भारत ! यस्मात् क्षेत्रक्षेत्रज्ञेश्वरयाथात्म्यव्यतिरेकेण न ज्ञानगोचरमन्यदवशिष्टमस्ति, तस्मात्** क्षेत्रक्षेत्रज्ञयोः **ज्ञेयभूतयोः** यद् ज्ञानम् **- क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन विषयीक्रियेते, तद्** ज्ञानं **सम्यग्ज्ञानमिति** मतम् अभिप्रायो मम **ईश्वरस्य विष्णोः।**

आनन्दगिरिकृतव्याख्या

**तत्तत्क्षेत्रोपाधिकभेदभाजः तत्तच्छब्दधीगोचरस्य कथं तद्विपरीतब्रह्मत्वधीरित्याशङ्क्याह—**ब्रह्मादीति। **उत्तरार्धं विभजते—**यस्मादिति। **तदेव विशिनष्टि—** क्षेत्रेति। **न च - भेदविषयत्वान्न सम्यग्ज्ञानं [1]तदिति - युक्तम्, तस्य विवेकज्ञानस्य वाक्यार्थज्ञानद्वारा मोक्षौपयिकत्वेन सम्यक्त्वसिद्धेरिति भावः।**

भाष्यार्कप्रकाशः

भेदादुपहितस्य वास्तवो भेदो भवितुमर्हति। अत एव 'न त्वेवाहं जातु नासम्' इति श्लोकभाष्ये **भाष्यकारै**रुक्तम्— 'देहभेदानुवृत्त्या बहुवचनं नात्मभेदाभिप्रायेण' इति। **तमिति**। यः प्रविभक्तस्तं क्षेत्रज्ञमित्यर्थः। **निरस्तसर्वोपाधिभेदं** सर्वोपाधिविशेषविनिर्मुक्तमित्यर्थः। अत एव **सदसदादिशब्दप्रत्ययागोचरं** यदिन्द्रियादिगोचरं तद् वस्तु सदित्युच्यते। आत्मा त्वव्यक्तत्वान्न सच्छब्दज्ञानविषयः, यदविद्यमानं तदसदित्युच्यते। आत्मा तु विद्यमानत्वादसच्छब्दप्रवृत्त्यविषयः। आदिपदाद् द्रष्टृदृश्यादिशब्दग्रहणम्। आत्मा न द्रष्टा, निर्धर्मकत्वाद्, दृश्याभावाच्च। नापि दृश्यम्, अनुपलभ्यमानत्वादिति बोध्यम्। न च कथमुपाधिप्रविभक्तमुपाधिरहितत्वेन जानीयाद् विद्वानिति वाच्यम्; उपाधीनां मायया कल्पितत्वेनोपाधिप्रविभक्तत्वस्य वस्तुतः क्षेत्रज्ञे अभावात्। तथा च मायया उपाधिप्रविभक्तत्वेन हेतुना नानात्वेन संसारित्वेनानीश्वरत्वेन च प्रतीयमानोऽयं क्षेत्रज्ञः। वस्तुत एक एवेश्वरो निरुपाधिकः परमात्मेति ज्ञातव्यः इति सिद्धम्।

श्लोकस्योत्तरार्धकथने हेतुमाह— **यस्मादिति**। क्षेत्रं च क्षेत्रज्ञेश्वरश्च क्षेत्रक्षेत्रज्ञेश्वरौ, तयोर्याथात्म्यं तत्त्वम्। यद्वा क्षेत्रं क्षेत्रज्ञ ईश्वरश्चेति त्रयाणां द्वन्द्वः। अज्ञदृष्ट्या क्षेत्रज्ञेश्वरयोर्द्वयोर्ग्रहणम्। **ज्ञानगोचरं** ज्ञानविषयम्, ज्ञेयमिति यावत्। अन्यन्नास्ति। क्षेत्रक्षेत्रज्ञयोः प्रकृतिपुरुषयोर्दृश्यदृशोर्द्वयोरेव पदार्थत्वेन तृतीयपदार्थाभावादिति भावः। अथवा इदं क्षेत्रं शरीरमनात्मा, क्षेत्रज्ञोऽहमीश्वर आत्मेति ज्ञानात् सर्वसंसारनिवृत्तेः संसारनाशायान्यज्ज्ञातव्यं नास्तीति भावः। **तस्मादिति**। क्षेत्रक्षेत्रज्ञेश्वरयाथात्म्यव्यतिरिक्तज्ञातव्यांशाभावादित्यर्थः। **ज्ञेयभूतयोरिति**। ज्ञानस्वरूपोऽपि क्षेत्रज्ञो ज्ञेय एव, 'मनसैवानुद्रष्टव्यम्' इति श्रुतेः, 'शास्त्रयोनित्वात्' इत्यधिकरणाच्च। ज्ञेयत्वस्य मायया कल्पितत्वादिति भावः। येन ज्ञानेन क्षेत्रक्षेत्रज्ञौ विषयीक्रियते तज्ज्ञानं क्षेत्रक्षेत्रज्ञयोर्ज्ञानमित्युच्यत इत्यन्वयः। यस्मिन् ज्ञाने क्षेत्रं क्षेत्रज्ञश्च विषयौ भवतः, तज्ज्ञानमित्यर्थः। क्षेत्रक्षेत्रज्ञविषयकं ज्ञानमिति यावत्। इदं क्षेत्रमिति, अहं क्षेत्रज्ञ ईश्वर इति च क्षेत्रक्षेत्रज्ञयोर्यदपरोक्षज्ञानं तदिति भावः। ननु यत् क्षेत्रक्षेत्रज्ञयोर्ज्ञानं तज्ज्ञानमिति सर्वस्यापि मतमेवेति कृत्वा किं मम मतमित्युच्यते? अत आह— **सम्यग्ज्ञानमिति**। संसारनिवर्तकत्वं ज्ञानस्य सम्यक्त्वम्। क्षेत्रक्षेत्रज्ञज्ञानमेव सम्यग्ज्ञानमिति मम मतं, न तु घटपटादिज्ञानम्। तार्किकादयस्तु घटादिज्ञानमपि सम्यग्ज्ञानमिति मन्यन्ते। यद्वा इदं क्षेत्रमहं क्षेत्रज्ञेश्वर इति यज्ज्ञानं तदेव सम्यग्ज्ञानमिति मम मतं, अन्येषां तु भिन्नात्मज्ञानमेव सम्यग्ज्ञानमिति मतमिति भावः। ननु यथा तार्किकादिमतं तवाग्राह्यं, तथा तवापि मतं तेषामग्राह्यम्, अत आह— **ममेश्वरस्य विष्णोरिति**। ईश्वरस्य मम यदेव मतं तदेव सर्वैर्ग्राह्यमिति भावः।

---

१.तत् = क्षेत्रक्षेत्रज्ञयोः विवेकज्ञानम्। भेदस्याविद्याकल्पितस्यावास्तवत्वात् तज्ज्ञानं कथं सम्यग्ज्ञानमिति शङ्का। सत्यम्, अखण्डब्रह्मात्मज्ञानमेव सम्यग्ज्ञानम्। तदौपयिकत्वात् तु सम्यग्ज्ञानमिदम्। तथाहि— जीवानां संसारिणां प्रतिक्षेत्रं भिन्नानाम् असंसारिणैकेन परमात्मना कथमभेदः स्यादित्याशङ्कायां, संसारस्य भिन्नत्वस्य चाविद्याकल्पितानात्मधर्मत्वान्न जीवस्य धर्मः संसारित्वं भिन्नत्वं चेति वक्तव्यम्। तदर्थं च देहेन्द्रियान्तःकरणेभ्यः क्षेत्रेभ्यो विवेकेन क्षेत्रज्ञः पुरुषो जीवः प्रतिक्षेत्रमेक एव निर्विकारः इति प्रतिपादनीयम्। तेन जीवस्वरूपस्य स्वतो भेदाद्यभावात् परमात्माभेदः अविरुद्धः। इत्येतदर्थं क्षेत्रक्षेत्रज्ञविवेकज्ञानम् आवश्यकम् इति सम्यग्ज्ञानौपयिकत्वं तस्येति। अत एव प्रतियोगितया क्षेत्रनिरूपणमिह युज्यते। **यत्तु** क्षेत्रशब्देनाव्यक्तादिकं सर्वं गृह्यते। तेन सर्वज्ञ ईश्वरः क्षेत्रज्ञः। क्षेत्रज्ञत्वविशिष्टभगवज्ज्ञानोपयोगितया क्षेत्रनिरूपणमिति। **तदयुक्तम्**, एवं हि विशिष्टबुद्धौ विशेषणज्ञानविधया क्षेत्रनिरूपणस्योपयोग उक्तो भवति। न चेह तदपेक्ष्यते। भगवान् सर्वज्ञः इति ज्ञापनार्थं सर्वनिरूपणादर्शनात् तद्वदिहाप्युपपत्तेः। क्षेत्रमात्रनिरूपणेनासंकुचितसर्वज्ञत्वस्यासिद्धेश्च।

[जीवब्रह्माभेदे पूर्वपक्षः]

**ननु सर्वक्षेत्रेष्वेक एवेश्वरः, नान्यः तद्व्यतिरिक्तो भोक्ता विद्यते चेत् , तत ईश्वरस्य संसारित्वं प्राप्तम्। ईश्वरव्यतिरेकेण वा संसारिणोऽन्यस्याभावात् संसाराभावप्रसङ्गः। तच्चोभयमनिष्टम् ; बन्धमोक्षतद्धेतुशास्त्रानर्थक्यप्रसङ्गात् , प्रत्यक्षादिप्रमाणविरोधाच्च। प्रत्यक्षेण तावत् सुखदुःखतद्धेतुलक्षणः संसारः उपलभ्यते। जगद्वैचित्र्योपलब्धेश्च धर्माधर्मनिमित्तः संसारोऽनुमीयते। सर्वमेतदनुपपन्नम् आत्मेश्वरैकत्वे।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

'क्षेत्रज्ञं चापि मां विद्धी'त्यनेन क्षेत्रज्ञेश्वरैकत्वमुक्तम् , तदाक्षिपति— **ननु सर्वक्षेत्रेष्विति।** किमीश्वरस्य क्षेत्रज्ञमात्रत्वं, क्षेत्रज्ञस्य वा ईश्वरमात्रत्वमिति वाच्यम्। प्रथमे संसारित्वमीश्वरस्य स्यात्। द्वितीये संसार्यभावः स्यादित्यर्थः। ननु नास्त्येव चैतन्यैकरसं वस्तु विहायेश्वरः, संसारी वेत्याशङ्क्याह— **तच्चोभयमिति।**[१]...प्रत्यक्षेण गृह्यते येन विरोधः स्यादित्याशङ्क्याह— **प्रत्यक्षेण तावदिति।** आदिशब्दसूचितमनुमानविरोधमाह— **जगद्वैचित्र्योपलब्धेरिति।** केचिज्जन्मत एव सुखिनः, अन्ये

आनन्दगिरिकृतव्याख्या

**जीवेश्वरयोरेकत्वमुक्तमाक्षिपति—** नन्विति। **जीवेश्वरयोरेकत्वे - जीवस्येश्वरे वा, तस्य जीवे वाऽन्तर्भावः? नाद्यः; जीवस्य परस्मादन्यत्वाभावे संसारस्य निरालम्बनत्वानुपपत्त्या**[२] **परस्यैव तदाश्रयत्वप्रसङ्गादित्यर्थः। 'अनश्नन्नन्यो अभिचाकशीति' इति श्रुतेर्न तस्य संसारितेत्याशङ्क्य द्वितीयं दूषयति—**ईश्वरेति। **जीवे चेदीश्वरोऽन्तर्भवति, तदाऽपि ततोऽन्यसंसार्यभावात् , तस्य च संसारोऽनिष्ट इति संसारो जगत्यस्तं गच्छेदित्यर्थः। प्रसङ्गद्वयस्येष्टत्वं निराचष्टे—** तच्चेति। **संसाराभावे 'तयोरन्यः पिप्पलं स्वाद्वत्ति' इत्यादिबन्धशास्त्रस्य, तद्धेतुकर्मविषयकर्मकाण्डस्य चानर्थक्यम् ; ईश्वराश्रिते च संसारे तदभोक्तृत्वश्रुतेर्ज्ञानकाण्डस्य मोक्षतद्धेतुज्ञानार्थस्यानर्थक्यम् ; अतो न प्रसङ्गयोरिष्टतेत्यर्थः। संसाराभावप्रसङ्गस्यानिष्टत्वे हेत्वन्तरमाह—** प्रत्यक्षादीति। **तत्र प्रत्यक्षविरोधं प्रकटयति—** प्रत्यक्षेणेति।

भाष्यार्कप्रकाशः

नन्वीश्वरोक्तोऽप्यसङ्गतार्थः कथं स्वीकार्योऽस्माभिरिति। तदुक्तार्थासाङ्गत्यमेव दर्शयति— **नन्वित्यादिना।** 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरेकः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति॥' इति श्रुत्या, स्मृत्यनुभवाभ्यां च, जीवाः संसारिणः कर्मफलभोक्तारः, ईश्वरस्त्वसंसारी साक्षीति स्थितायां वस्तुगतौ, तां विहाय सर्वक्षेत्रेष्वेक एवेश्वरः क्षेत्रज्ञोऽस्ति, न तद्व्यतिरिक्तः कश्चन भोक्ता संसारी जीवोऽस्तीत्युक्तौ, ततः ईश्वरस्य संसारित्वं प्राप्तम् , ईश्वरव्यतिरेकेण संसारिणोऽभावात् संसाराभावप्रसङ्गो वा प्राप्तः। न चेष्टापत्तिरित्याह— **तच्चोभयमनिष्टमिति।** तत्र हेतुमाह— **बन्धेति।** नित्यमुक्तस्येश्वरस्यैव संसारित्वेन बद्धत्वे तदन्यस्य च जडत्वे मोचकस्य चेतनान्तरस्याभावान्मुक्त्यनुपपत्तिः। ईश्वरस्य च स्वतन्त्रत्वेन भाव्यत्वाद् बन्धानुपपत्तिः। न हि स्वतन्त्रः कश्चित् स्वयं बन्धमनुभवति। अस्वतन्त्रस्य च नेश्वरत्वोपपत्तिः। ईश्वरात् परस्यान्यस्याभावादीश्वरस्य पारतन्त्र्यानुपपत्तिश्च। न च प्रकृतिपरतन्त्रत्वमीश्वरस्येति वाच्यम् ; प्रकृतेरेवेश्वरपरतन्त्रत्वात्। जडवस्तु हि चेतनपरतन्त्रं लोके दृश्यते। प्रकृतिश्च जडा। ईश्वरश्चेतनः। तस्मादीश्वरपरतन्त्रैव प्रकृतिरिति नेश्वरस्य पारतन्त्र्योपपत्तिः, ईश्वरत्वस्यैवाभावप्रसङ्गात्। तथा संसाराभाववादे च बन्धमोक्षयोरनुपपत्तिरेव। न च संसाराभाववादे बन्धस्यैवानुपपत्तिरिति वाच्यम् ; बन्धपूर्वकत्वेन मोक्षस्य बन्धाभावे मोक्षाभावात्। पश्चादिर्हि बद्ध एव मुच्यते, न त्वबद्ध इति। एवं बन्धमोक्षयोरसिद्धौ तद्धेतुशास्त्रस्यापि वैयर्थ्यमेव प्रसज्यते। ततश्च मूलच्छेदप्रसङ्गः, वेदान्तशास्त्रस्यैवानवतारात्। एवं व्यर्थशास्त्रकर्तृत्वेनेश्वरस्यासर्वज्ञत्वप्रसङ्गश्च। संसाराभावप्रसङ्गे दोषान्तरमाह— **प्रत्यक्षेति।** तत्र प्रत्यक्षप्रमाणविरोधं दर्शयति— **प्रत्यक्षेणेति। उपलभ्यते** अनुभूयत इत्यर्थः। सुखदुःखे तद्धेतूनि[३] शीतोष्णादीनि तल्लक्षणः। प्रत्यक्षादीत्यादिपदगृहीतानुमानप्रमाणं दर्शयति— **जगदिति।** जगद्वैचित्र्यान्यथानुपपत्त्या लिङ्गेन धर्माधर्मनिमित्तसंसारोऽनुमीयते, धनिकत्वदारिद्र्यरुग्णत्वनीरोगत्वसुखित्वदुःखित्वराजत्वभृत्यत्वभार्यात्वभर्तृत्वप्रमुखं **जगद्वैचित्र्यम्।** तद्धि धर्माधर्मप्रयुक्तं धर्मवशाद्

१. अत्र ग्रन्थपातोऽनुमीयते। २. निराश्रयत्वानुपपत्त्येत्यर्थः। ३. 'तद्धेतवः' इति पाठो युक्तः।

[जीवब्रह्माभेदे सिद्धान्तः]

**न ; ज्ञानाज्ञानयोरन्यत्वेनोपपत्तेः। 'दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता' (क.उ.२.४)। [1]तथा**

अनुभूतिस्वरूपाचार्यटिप्पणम्

जन्मत एव दुःखिन इत्यादिजगद्वैचित्र्योपलब्धेस्तत्कारणमनुमीयते - 'पुण्यो वै पुण्येने'ति शास्त्रानुसारेण धर्माधर्मनिमित्तत्वमनुमीयते। तत् संसारित्वाभावे विरुध्यत इत्यर्थः।

परमार्थतः स्वरूपैक्येऽप्यज्ञानोपाधौ संसारित्वम् , सम्यग्ज्ञानविषयस्यासंसारित्वमिति परिहरति— **न, ज्ञानाज्ञानयोरिति।** ज्ञानाज्ञानयोरन्यत्वेन बन्धमोक्षव्यवस्थोपपत्तेः नैकात्म्ये कश्चिद् विरोध इत्यर्थः। वस्तुसंग्रहवाक्यं व्याख्यातुं ज्ञानाज्ञानयोरन्यत्वमाह— **दूरमित्यादिना। अविद्या या च विद्येति**। चेति प्रसिद्धौ। ते विद्याविद्ये **दूरं विपरीते** अत्यन्तविरुद्धे

आनन्दगिरिकृतव्याख्या

**आदिशब्दोपात्तमनुमानविरोधमाह—** जगदिति। **विमतं विचित्रहेतुकम् , विचित्रकार्यत्वात् , प्रासादादिवदित्यर्थः। प्रत्यक्षानुमानागमविरोधादयुक्तमैक्यमित्युपसंहरति—** सर्वमिति।

**ऐक्येऽपि संसारित्वमविद्यातः, विद्यातोऽसंसारित्वमिति विभागाद् नानुपपत्तिरित्युत्तरमाह—** नेत्यादिना। **तयोः स्वरूपतो**

भाष्यार्कप्रकाशः

धनिकत्वादिः, अधर्मवशाद् दारिद्र्यादिश्च भवतीत्याभ्यामेव धर्माधर्माभ्यां सुखदुःखादिलक्षणः संसारः।

अत्रायं प्रयोगः - धर्माधर्मनिमित्तः संसारोऽस्ति, धर्माधर्मकृतजगद्वैचित्र्योपलब्धेः - इति। **यद्वा** - धर्माधर्मौ स्तः, धर्माधर्मप्रयुक्तजगद्वैचित्र्योपलम्भादिति धर्माधर्मावनुमाय, संसारोऽस्ति तद्धेतुधर्माधर्मसत्त्वादिति संसारोऽनुमेयः। जगद्वैचित्र्यलक्षणकार्याद् धर्माधर्मानुमानं, धर्माधर्मलक्षणकारणात् संसारानुमानमिति भावः। तस्मात् क्षेत्रज्ञेश्वरैकत्वे **एतत्** पूर्वोक्तं सर्वम् **अनुपपन्नम्** अनुपपत्तिकरमिति जीवेश्वराभेदवादो न युक्तः। भेदवादे तु न कोऽपि दोषः, असंसारिणः संसारिजनमोचकाच्चेतरेषां संसारिणां बद्धजीवानां सत्त्वेन बन्धमोक्षाद्युपपत्तेरिति द्वैतिनां **पूर्वः पक्षः**।

उक्तं पूर्वपक्षं दूषयति— **नेति**। आत्मेश्वराभेदवादे न किमप्यनुपपन्नमित्यर्थः। तत्र हेतुमाह— **ज्ञानाज्ञानयोरिति**। ज्ञानाज्ञानयोः **अन्यत्वेन** भिन्नत्वेन हेतुना **उपपत्तेः** बन्धमोक्षादेः सर्वस्योपपन्नत्वादित्यर्थः। आत्मेश्वरैकत्वाश्रयो ज्ञानमार्गः, तदनेकत्वाश्रयो ऽज्ञानमार्गः। तौ परस्परं भिन्नौ। अज्ञानमार्गे एव जीवेश्वरयोर्भेदः, जीवस्य बन्धः, ईश्वरस्य नित्यमुक्तत्वं जीवमोचकत्वं च, जीवनानात्वं, तदाश्रयः सर्वसंसारः। ज्ञानमार्गे तु जीव एवेश्वरः। स च सच्चिदानन्दलक्षणः, तस्य न कोऽपि बन्धः, नापि ततो मोक्षः, नापि संसारः,बन्धादीनां सर्वेषां मिथ्यात्वादात्मन एकस्यैव सत्त्वात्। एवं मार्गद्वये सति नेश्वरस्य संसारित्वम् , नापि संसारस्य सुतरामभावः।

ज्ञानिदृष्ट्या संसारस्यैवाभावादीश्वरस्य जीवत्वेऽपि न संसारित्वम्। अज्ञानिदृष्ट्या तु संसारस्य सत्त्वेऽपि जीवादीश्वरस्य भिन्नत्वेन नेश्वरस्य संसारित्वम्। जीवस्य संसारिणः सत्त्वान्न बन्धमोक्षादिशास्त्रानर्थक्यमिति भावः। न च ज्ञानिदृष्ट्या संसाराभावे बन्धमोक्षादिशास्त्रानर्थक्यं तत्र प्राप्तमिति वाच्यम् ; तद्दृष्ट्या शास्त्राणामेवाभावात्। तद्दृष्ट्या ब्रह्मैकमेव ह्यस्ति— 'न निरोधो न चोत्पत्तिर्न बद्धो स च साधकः। न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥' इति ह्युक्तं श्रुत्या। न च परमार्थदशामधिकृत्य तथोक्तं श्रुत्येति वाच्यम् ; ज्ञानमार्गस्य परमार्थदशात्वात् , अज्ञानमार्गस्य व्यवहारदशात्वाच्च।

**अथवा** वासनावशाज्ज्ञानिदृष्ट्या शास्त्राणि सन्तु नाम, तथापि तानि मिथ्याभूतान्येवेति तदानर्थक्यमिष्टमेव। न चोपजीव्यविरोधस्यान्याय्यत्वाच्छास्त्रादेव ज्ञानं लब्धवतः पुरुषस्य शास्त्रनिराकरणमयुक्तमिति वाच्यम् ; नीरलाभानन्तरं खनित्रस्यानर्थक्यवद् ज्ञानलाभानन्तरं शास्त्रं व्यर्थमेवेति का तन्मिथ्यात्वज्ञानेन क्षतिः? यदि ज्ञानी - 'शास्त्रं संसारनिवर्तकज्ञानप्रदं न' इति ब्रूयात् , तर्हि स्यादुपजीव्यविरोधदोषः, परन्तु शास्त्रोक्तविधयैव गुरुशास्त्रादिकं सर्वं मिथ्येति वदति, अतो न दोषः। **किञ्च** यदि ज्ञानी शास्त्रमधिगत्यापि 'सर्वं

१. 'तथा च' इति पा.।

**तयोर्विद्याऽविद्याविषययोः फलभेदोऽपि विरुद्धो निर्दिष्टः— 'श्रेयश्च प्रेयश्च' (क.उ.२.२) इति। विद्याविषयः श्रेयः, प्रेयस्तु अविद्याकार्यमिति। तथा च व्यासः— 'द्वाविमावथ पन्थानौ' (म.भा.१२.२४१.६) इत्यादि , 'इमौ द्वावेव पन्थानौ'[1] इत्यादि च। इह च द्वे निष्ठे उक्ते। अविद्या च [2]सह कार्येण विद्यया हातव्येति श्रुतिस्मृतिन्यायेभ्योऽवगम्यते।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

इत्यर्थः। **विषूची** नानागती, भिन्नफले इत्यर्थः। फलभेदद्वारको विद्याविद्ययोर्भेदः श्रुत्योक्त इत्याह— **तथा तयोरिति।** हेयत्वोपादेयत्वकृतोऽपि भेद इत्याह— **अविद्या च सह कार्येणेत्यादिना।**

आनन्दगिरिकृतव्याख्या

**विलक्षणत्वे श्रुतिमाह—**दूरमिति। अविद्या या च विद्येति। **प्रसिद्धे एते विद्याविद्ये** दूरं विपरीते **अत्यन्तविरुद्धे इत्यर्थः।** विषूची **नानागती, भिन्नफले इत्यर्थः। स्वरूपतो विरोधवत् फलतोऽपि सोऽस्तीत्याह—**तथेति। **फलभेदोक्तिमेव व्यनक्ति—**विद्येति। **तयोर्द्विधा[3] विलक्षणत्वे वेदव्यासस्यापि सम्मतिमाह—**तथा चेति। **उक्तेऽर्थे भगवतोऽपि सम्मतिमुदाहरति—**इह चेति। **द्वयोरपि निष्ठयोस्तुल्यमुपादेयत्वमिति**

भाष्यार्कप्रकाशः

द्वैतं सत्यम्' इति ब्रूयात् , तदैव शास्त्रविरोधी स्यात् – 'ब्रह्म सत्यं, जगन्मिथ्या' इति हि शास्त्रम्। एवं यः शास्त्रविरुद्धार्थं ब्रूयात् स एवेश्वरस्यापि विरोधी, ईश्वराज्ञारूपत्वाच्छास्त्रस्य। तस्माद् द्वैतिन एव शास्त्रविरोधिनः, शास्त्रानभिमतत्वाद् भिन्नात्मज्ञानस्य। यत एवं मार्गद्वयमस्ति ततो नेश्वर[स्य] संसारादिदोषप्रसङ्गः।

ननु ज्ञानमार्ग एवात्मेश्वरैकत्वम् , नाज्ञानमार्ग इत्येतत् स्वकपोलकल्पितमिति शङ्कायां नेत्याह— **दूरमिति**। एते विषूची मार्गौ **दूरं विपरीते** अतीव परस्परं विलक्षणे। के ते विषूची? अत आह— **अविद्या या च विद्येति ज्ञातेति**। या अविद्येति ज्ञाता, या च विद्येति ज्ञाता ते इत्यन्वयः। अविद्यामार्गो विद्यामार्गश्चेत्यर्थः। अज्ञानमार्गे जीवः संसारी नाना भिन्न ईश्वरात् , ईश्वरस्त्वसंसारी एकः। ज्ञानमार्गे तु जीवोऽसंसारी एक ईश्वरः, संसारस्तु मिथ्यैवेति मार्गद्वयस्यातीव वैलक्षण्यमिति भावः। दक्षिणोत्तरदिगभिमुखमार्गद्वयवदिति। न केवलं स्वरूपत एव तयोर्भेदः, किन्तु फलतोऽपीत्याह— **तथेति। विरुद्ध इति**। परस्परं भिन्नः। अविद्याफलस्य स्वर्गादेर्बन्धहेतुत्वात् ज्ञानफलस्य च मोक्षत्वादिति भावः। फले एव दर्शयति— **श्रेयश्चेति**। 'श्रेयश्च प्रेयश्च मनुष्यमेतः' इति कठोपनिषत्। श्रेयः अभिवृद्धिः स्वर्गपशुपुत्रादिलक्षणम् इति भ्रमनिरासायाह— **विद्याविषय इति**। आत्यन्तिकपुरुषार्थस्यैव श्रेयस्त्वाद् विद्याविषयो मोक्षः **श्रेयः**। आपाततः प्रियत्वेन भासमानत्वात् स्वर्गपशुपुत्रादिलक्षणं **प्रेयः** फलमविद्यायाः। प्रेयसः स्वर्गादेर्जन्यत्वादविद्याकार्यत्वमित्युक्तम्। मोक्षस्य च नित्यत्वेनाजन्यत्वाद् विद्याविषयः **श्रेय** इत्युक्तम्। **विद्याविषयः** विद्यागोचरः। विद्यया प्राप्य इति यावत्। न च मोक्षस्य नित्यप्राप्तस्य ब्रह्मभावरूपस्य कथं प्राप्यत्वमिति वाच्यम्। [4]हिरण्यनिधिदृष्टान्तेन प्राप्यत्वोपचारात्। एवं मोक्षस्य विद्याफलत्वमप्यौपचारिकमेव, बन्धनिवृत्तेरेव विद्याफलत्वात्। ततश्च बन्धहेतोरविद्याफलाद् बन्धनिवृत्तिर्विद्याफलमतीव विलक्षणमिति भावः।

एवं श्रुतिं प्रमाणीकृत्य स्मृतिं प्रमाणयति— **द्वाविमाविति**। भोगमोक्षप्रापकौ द्वौ मार्गावित्यर्थः। बन्धमोक्षप्रापकाविति वा। भोगस्यैव बन्धत्वात्। गीतामपि प्रमाणयति—**इह चेति**। 'ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्' इति ज्ञानकर्ममार्गद्वयस्योक्तत्वादिति भावः। न च कर्ममार्ग एव दर्शितो, न त्वज्ञानमार्ग इति वाच्यम् ; कर्ममार्गस्यैवाज्ञविषयत्वेनाज्ञानमार्गत्वात्।

**ननु** कर्ममार्गवज्ज्ञानमार्गोऽपि व्यवहारदशायामेवास्ति, न तु परमार्थतः, परमार्थदशायामात्मध्यानाद्ययोगात् ; तथा च ज्ञानमार्गो न परमार्थदशेति कृत्वा ज्ञानिदृष्ट्याऽप्यस्त्येव संसार इति कथं त्वया संसाराभावः प्रतिपादित इति चेत्? **उच्यते**— यो हि ज्ञानयोगेऽधिकृतः स हि संसारं मिथ्येति पश्यति, यस्तु परमार्थदशायामवस्थितः स संसारं नैव पश्यतीति ज्ञानमार्गः परमार्थदशायाः

१. 'इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ भवतः क्रियापथश्चैव पुरस्तात् संन्यासश्चोत्तरेण' इतीशावास्योपनिषद्भाष्ये बृहदारण्यकोपनिषद्भाष्ये चोद्धृतं वचनम्।
२. 'कार्यैः' इति रा.पा.। ३. 'द्विधा' इति क्वचिन्न। ४. 'तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयुः...'इति दृष्टान्तः। द्र.छा.उ.८.३.२।

**श्रुतयस्तावत् - 'इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः'(के.उ.२.५), 'तमेवं विद्वानमृत इह भवति, नान्यः पन्था विद्यतेऽयनाय' (श्वे.उ.३.८), 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन' (तै.उ.२.९)। अविदुषस्तु – 'अथ तस्य भयं भवति' (तै.उ.२.७) 'अविद्यायामन्तरे वर्तमानाः' (क.उ.२.५), 'ब्रह्म वेद ब्रह्मैव भवति' (मु.उ.३.२.९), 'अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानाम्' (बृ.उ.१.४.१०) आत्मविद् यः 'स इदं सर्वं**

आनन्दगिरिकृतव्याख्या

**शङ्कां शातयति—** अविद्या चेति। **अविद्या सकार्या हातव्येत्यत्र श्रुतीरुदाहरति—** श्रुतयस्तावदिति। **इहेति जीवदवस्थोच्यते। चेच्छब्दो विद्योदयदौर्लभ्यद्योती।** अवेदीद् **अहं ब्रह्मेति विदितवानित्यर्थः।** अथ **विद्यानन्तरमेव** सत्यम् **अवितथं पुनरावृत्तिवर्जितं कैवल्यं स्यादित्याह—**अथेति। **अविद्याविषयेऽपि श्रुतिमाह—** न चेदिति। **जन्ममरणादिरूपा संसृतिः** विनष्टिः। **तस्याः** महत्त्वं **सम्यग्ज्ञानं विना निवर्तयितुमशक्यत्वम्। विद्याविषये श्रुत्यन्तरमाह—**तमेवमिति। **परमात्मानं प्रत्यक्त्वेन यः साक्षात्कृतवान् स देही जीवन्नेव मुक्तो भवतीत्यर्थः। विद्यां विनाऽपि हेत्वन्तरतो मुक्तिमाशङ्क्याह—** नेति। **भयहेतुमविद्यां निराकुर्वती तज्जं भयमपि निरस्यति विद्येत्यत्र वाक्यान्तरमाह—**विद्वानिति। **अविद्याविषये वाक्यान्तरमाह—**अविदुष इति। **प्रतीच्येकरसे स्वल्पमपि भेदं मन्यमानस्य भेददृष्ट्यनन्तरमेव संसारध्रौव्यमित्यर्थः। तत्रैव श्रुत्यन्तरमाह—** अविद्यायामिति। **तन्मध्ये तत्परवशतया स्थितास्तत्त्वमजानन्तो देहाद्यभिमानवन्तो मूढाः संसरन्तीत्यर्थः। विद्याविषये श्रुत्यन्तरमाह—**ब्रह्मेति। **अविद्याविषये श्रुत्यन्तरमाह—**अन्योऽसाविति। **भेददृष्टिमनूद्य तन्निदानमविद्येत्याह—** नेति। **स च मनुष्याणां पशुवद् देवादीनां प्रेष्यतां प्राप्नोतीत्याह—** यथेति। **विद्याविषये वाक्यान्तरमाह—** आत्मविदिति। **इदं सर्वं**

भाष्यार्कप्रकाशः

सन्निहितः, अत उक्तमुपचारात् ज्ञानमार्गः परमार्थदशेति। अत एव अथवेति पक्षान्तरमारब्धम्। तस्माद् व्यवहारदशायामेव मार्गद्वयमिदमस्ति। न चैवं ज्ञानिदृष्ट्याऽपि संसारोऽस्तीति वाच्यम् ; असंसारिब्रह्मात्मदर्शनस्यैव ज्ञानत्वात्। न च ज्ञानमार्गपरिपाकदशायामेवात्मसाक्षात्कारात् संसाराभाव इति वाच्यम् ; तत्प्रारम्भेऽपि संसारे तस्य मिथ्यात्वनिश्चयेन संसाराभावात्। अथवा यस्य ज्ञानमार्गः परिपक्वः स एव ज्ञानी, तदृदृष्ट्यैव संसाराभाव इत्युच्यत इति। एवं मार्गद्वयोपन्यासेन च किं ज्ञायते? अविद्ययेश्वरस्य बन्धः, विद्यया तु तन्मुक्तिरिति। अज्ञानवशादेवेश्वरं बद्धं संसारिजीवं मन्यते लोकः। विद्यया अज्ञाननाशे तु नित्यमुक्त एवेश्वरो जीव इति प्रत्येतीति च। अविद्यावस्थायामेव सर्वः संसारो, न तु विद्यावस्थायामिति च। यस्मादेवमविद्ययैव सर्वः संसारः, तस्मात् त्यक्तव्येयमविद्येत्याह— **अविद्येति। सह कार्यैः** रागद्वेषादिभिः सह।

नन्वविद्या हातव्येत्ययमर्थः कुतोऽवगम्यते? अत आह— **श्रुतीति**। अवगतिप्रकारमेव दर्शयति— **श्रुतय इत्यादिना। इह** जीवद्दशायां जन्मनीति वा। **अवेदीद्** ब्रह्म जानीयाच्चेद् अथ **सत्यं** ब्रह्म, मोक्ष इति यावत् ; **अस्ति** सिध्यति, ब्रह्मैव भवतीति वा। 'ब्रह्मविद् ब्रह्मैव भवती'ति श्रुत्यन्तरात्। इह ब्रह्म नावेदीच्चेद् **महती** अधिका **विनष्टिः** नाशः स्थावरादिजन्मनरकादिप्राप्तलक्षण इति भावः। भवेदिति शेषः। **तं** परमात्मानमेवात्माभेदेन **विद्वान्** जानन् पुरुषः इहैव **अमृतो** मुक्तो भवति। **अयनाय** मोक्षाय अन्यः पन्था न विद्यते। ब्रह्मणः आनन्दमिति राहोः शिर इतिवन्निर्देशः। आनन्दस्वरूपं ब्रह्मेत्यर्थः। **विद्वान्** आत्माभेदेन जानन् पुरुषः **कुतश्चन** कस्माच्चिदपि रोगव्याघ्रसर्पादिलक्षणाद् भयहेतोः सकाशान्न बिभेति। स्वस्य ब्रह्मत्वादिति भावः। **तस्येति**। अनात्मज्ञस्येत्यर्थः। 'अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः। जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथाऽन्धाः॥' इति। **जङ्घन्यमानाः** भृशं पीड्यमानाः **परियन्ति** विभ्रमन्तीति **मुण्डक**पाठः। दन्द्रम्यमाणा इति **कठ**पाठः। **दन्द्रम्यमाणा** अत्यर्थं कुटिलामनेकरूपां गतिं गच्छन्त इत्यर्थः। **अन्योऽसाविति। असौ** ईश्वरो**ऽन्यो** भिन्नः। **देवानामिति**। स कर्मी देवानां **पशुः** पशुवद्भोग्य इत्यर्थः। यथा मनुष्यस्य गवादिपशुर्भोग्यस्तद्वदिति भावः। [१]यस्य मूढस्य इदं सर्वं जगद् भवति। प्राज्ञस्य तु ब्रह्मैकमेवास्ति, सर्वस्य जगतो मिथ्यात्वेनाभावात्। भावे वा सर्वस्यापि ब्रह्मत्वात् सर्वं ब्रह्मैव भवति। 'यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा

१. भाष्ये 'आत्मविद् यः स इदं सर्वं भवति' इत्यस्य स्थाने 'यस्येदं सर्वं भवति' इति पाठं स्वीकृत्येदं व्याख्यानं भाति।

**भवति' (बृ.उ. १.४.१०) 'यदा चर्मवत्' (श्वे.उ.६.२०) इत्याद्याः सहस्रशः। स्मृतयश्च - 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः' (भ.गी.५.१५) 'इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः' (भ.गी.५.१९) 'समं पश्यन् हि सर्वत्र' (भ.गी. १३.२८) इत्याद्याः। न्यायतश्च - [1]'सर्पान् कुशाग्राणि तथोदपानं ज्ञात्वा मनुष्याः परिवर्जयन्ति। अज्ञानतस्तत्र पतन्ति केचिज्ज्ञाने फलं पश्य यथा विशिष्टम्॥'(म.भा.१२.२०१.१७)। तथा च देहादिष्वात्मबुद्धिः अविद्वान् रागद्वेषादिप्रयुक्तो धर्माधर्मानुष्ठानकृद् जायते म्रियते चेत्यवगम्यते। देहादिव्यतिरिक्तात्मदर्शिनो**

अनुभूतिस्वरूपाचार्यटिप्पणम्

अविद्यान्वयव्यतिरेकवत्त्वन्यायाच्च बन्धस्याविद्यात्मकत्वमवगम्यत इत्याह— **न्यायतश्चेति।** अत्रैव संवादकं स्मृतिवाक्यमाह—**[सर्पानिति।]** विशिष्टं फलं ज्ञाने यथा स्यात् तथा पश्येत्यर्थः। उक्तमेवाविद्यान्वयव्यतिरेकवत्त्वं विवृणोति— **तथा चेत्यादिना।**

आनन्दगिरिकृतव्याख्या

**प्रत्यग्भूतं पूर्णं ब्रह्मेत्यर्थः। ज्ञानादेव तु कैवल्यमित्यत्र श्रुत्यन्तरमाह—** यदेति। **न खल्वाकाशं चर्मवद् मानवो वेष्टयितुमीष्टे। तथा परमात्मानं प्रत्यक्त्वेनाननुभूय न मुच्यत इत्यर्थः। आदिशब्देनानुक्ता विद्याऽविद्याफलभेदार्थाः श्रुतयो गृह्यन्ते। तासां भूयस्त्वेन प्रामाण्यं सूचयति—** सहस्रश इति। **विद्याऽविद्याविषये स्मृतीरुदाहरति—** स्मृतयश्चेति। **तत्राविद्याविषयं वाक्यमाह—** अज्ञानेनेति। **विद्याविषयं वाक्यद्वयं दर्शयति—**इहेत्यादिना। **विद्याफलमनर्थध्वस्तिः, अविद्याफलमनर्थाप्तिरित्येतद् अन्वयव्यतिरेकाख्यन्यायादपि सिध्यतीत्याह —** न्यायतश्चेति। **तत्रैव पुराणसम्मतिमाह—** सर्पानिति। उदपानं **कूपम्। यथाऽऽत्मज्ञाने विशिष्टं फलं स्यात् तथा पश्येति योजना। न्यायतश्चेत्यन्वयव्यतिरेकाख्यं न्यायमुक्तं विवृणोति—** तथा चेति। **तत्रादावन्वयमाचष्टे—** देहादिष्विति। **अनाद्यनिर्वाच्याविद्यावृतः चिदात्मा देहादावनात्मन्यात्मबुद्धिमादधाति, तद्युक्तो रागादिना प्रेर्यते, तत्प्रयुक्तश्च कर्मानुतिष्ठति, तत्कर्ता च यथाकर्म नूतनं देहमादत्ते, पुरातनं त्यजतीत्येवमविद्यावत्त्वे संसारित्वं सिद्धमित्यर्थः। व्यतिरेकमिदानीं दर्शयति—**देहादीति। **श्रुतियुक्तिभ्यां भेदे ज्ञाते रागादिध्वस्त्या**

भाष्यार्कप्रकाशः

देवमविज्ञाय दुःखस्यान्तो भविष्यति॥' इति। यथा चर्म वेष्टयन्ति तथा आकाशं मानवाः यदा वेष्टयिष्यन्ति तदा देवं परमात्मानं प्रत्यगभिन्नमविज्ञाय दुःखस्य संसारस्यान्तो भविष्यतीत्यर्थः। आकाशवेष्टनवत् ब्रह्मवेदनं विना संसारनाशनमशक्यमिति भावः। **तेनेति**। अज्ञानेन ज्ञानस्यावृतत्वेन हेतुना जन्तवो **मुह्यन्ति** वयं संसारिण ईश्वराद् भिन्ना इत्यादिमोहं यान्ति। न्यायतश्चेत्यस्यावगम्यत इत्यनेनान्वयः। **सर्वानिति**। **मनुष्याः** कुशलाः केचित्। **सर्वान्** सर्वाणीत्यर्थः। कुशाग्राणि दृष्ट्वेति शेषः। तथा उदपानं ज्ञात्वा परिवर्जयन्ति। **अज्ञानतः** उदपानमिति ज्ञानाभावात् तु **केचिद्** अविवेकिनः **तत्र** तृणाच्छन्नकूपे पतन्ति। तस्माज्ज्ञाने विशिष्टं फलं **यथा** यथावत् पश्य। एवमज्ञानं संसारकूपपतनहेतुः पुंसां, ज्ञानं तु तत्परिहारहेतुरिति भावः। इदमेवाह— **तथा चेति**। रागद्वेषादिप्रहाण-मपेक्षत इति [2]**रागद्वेषादिप्रहाणापेक्षः** तस्मात्। **धर्माधर्मप्रवृत्तिः** धर्माधर्मार्थकर्मप्रवृत्तिः। **तदुपशमः** तन्निवृत्तिः, तस्मात् सर्वकर्मसंन्या-सादित्यर्थः। हेतुरयं मुक्तिं प्रति। देहादिष्वात्मबुद्धौ सत्यां देहादिसुखहेतुषु चन्दनादिषु रागः, तद्दुःखहेतुषु शीतवातातपादिषु द्वेषः। ताभ्यां च रागद्वेषाभ्यां हेतुभ्यां सुखार्थं दुःखनिवृत्त्यर्थं च धर्माननुतिष्ठति, दुःखहेतुशत्रुसर्पचोरादिनिवृत्त्यर्थमधर्मं च हिंसादि-लक्षणमनुतिष्ठति। एवं धर्माधर्मानुष्ठानवशात् सुकृतदुष्कृतफले स्तः। तद्भोगार्थं देवमनुष्यपश्वादिरूपेण जायते, पुनर्धर्माधर्मादिलक्षणं कर्म कुरुते, प्रारब्धावसाने म्रियते, पुनः कर्मफलानुभवार्थं जायते, पुनः कर्म कुरुते, पुनरपि म्रियत इत्येवमवर्जनीयसञ्चारं जन्ममरणलक्षणं संसारचक्रं प्रतिपद्य अज्ञः खिद्यते। यथा [3]वेक्षुखण्डः प्रसिद्धं चक्रमिति। एवं च जन्ममरणलक्षणसंसारस्य धर्माधर्मानुष्ठानं हेतुः, तस्य च रागद्वेषादिकं हेतुः, तस्य च देहादिष्वात्मबुद्धिर्हेतुरिति सर्वानर्थमूलकन्दं देहादिष्वात्मभ्रमं त्यजेद् विद्वानित्याह— **देहादीति**। देहादिष्वात्मबुद्ध्यभावे रागद्वेषाभावः, ततो धर्माधर्मानुष्ठानाभावः, ततः संसाराभाव इति सोऽयमर्थो न

१. 'सर्वान्' इति रा.पा.। २. इदम् उपशमविशेषणम्। ३. इक्षुदण्डः रसनिःसारणार्थं यन्त्रे निक्षिप्तः तच्चक्रं प्रतिपद्य भ्रमति, तथेत्यर्थः।

**[1]रागद्वेषादिप्रहाणापेक्षधर्माधर्मप्रवृत्त्युपशमाद् मुच्यन्ते इति न केनचित् प्रत्याख्यातुं शक्यं न्यायतः।**

**तत्रैवं सति क्षेत्रज्ञस्येश्वरस्यैव सतोऽविद्याकृतोपाधिभेदतः संसारित्वमिव भवति, यथा देहाद्यात्मत्वमात्मनः। सर्वजन्तूनां हि प्रसिद्धो देहादिष्वनात्मसु आत्मभावो निश्चितोऽविद्याकृतः। यथा स्थाणौ पुरुषनिश्चयः। न चैतावता**

अनुभूतिस्वरूपाचार्यटिप्पणम्

एवं ज्ञानाज्ञानयोः स्वरूपभेदं कार्यभेदं च प्रतिपाद्य, पूर्वोक्तं परिहरति— **तत्रैवं सतीति।** ननु जीवस्य ब्रह्मात्मकत्वं चेत् स्वाभाविकम् , तर्हि जीवे प्रकाशमाने किमिति न प्रकाशत इत्याशङ्क्याह— **यथा देहाद्यात्मत्वमिति।** यथा देहादिव्यतिरिक्तत्वमात्मनः स्वाभाविकमपि न प्रकाशते। किन्तु विपरीतं देहाद्यात्म(व)त्वं प्रकाशते, तथा अविद्यावशात् जीवस्य स्वाभाविक्यपि ब्रह्मात्मकता न प्रकाशते, संसारित्वं च प्रकाशत इत्यर्थः। ननु जीवस्यासङ्गत्वव्याघाताद् देहात्मत्वं [न] सम्भवतीत्याशङ्क्य मिथ्याभ्या[ध्या]सेन तात्त्विकासङ्गत्वस्य व्याघातो नास्तीत्यभिप्रेत्य दृष्टान्तमाह— **न चैतावता**

आनन्दगिरिकृतव्याख्या

**कर्मोपरमाद् अशेषसंसारासिद्धिरित्यविद्याराहित्ये बन्धध्वस्तिरित्यर्थः। उक्तान्वयादेरन्यथासिद्धिं शिथिलयति—**इति नेति। **उक्तमन्वयादि वादिना केनचिदपि न्यायतो न शक्यं प्रत्याख्यातुम् , तदन्यथासिद्धिसाधकाभावादित्यर्थः।**

**अन्वयादेरनन्यथासिद्धत्वे चोद्यमपि प्राचीनं प्रतिनीतमित्याह—** तत्रेति। **ज्ञानाज्ञानयोरुक्तन्यायेन स्वरूपभेदे कार्यभेदे च स्वारस्येन परापरयोरैक्येऽपि बुद्ध्याद्युपाधिभेदादाविद्यकमात्मनः संसारित्वमाभासरूपं प्रातिभासिकं सिध्यतीत्यर्थः। आत्मनो ब्रह्मता स्वतश्चेद् अहमित्यात्मभावेन ब्रह्मताऽपि भायादित्याशङ्क्याह—**यथेति। **[2]देहाद्यतिरिक्तत्वस्यात्मनो वैदिकपक्षे स्वतस्त्वेऽपि तस्मिन्नहमिति [3]भात्येव तदतिरिक्तत्वं न भाति, किन्त्वविद्यातो देहाद्यात्मत्वमेव विपरीतं भासते। तथा आत्मनो ब्रह्मत्वे स्वाभाविकेऽपि तस्मिन् भात्येव ब्रह्मत्वं न भाति, अविद्यातोऽब्रह्मत्वमेव त्वस्य [4]भातीत्यर्थः। आत्मनो देहाद्यात्मत्वमाविद्यं भातीत्युक्तमनुभवेन स्पष्टयति—** सर्वेति। **अतस्मिंस्तद्बुद्धिरविद्याकृतेत्यत्र दृष्टान्तमाह—**यथेति। **पुरःस्थिते वस्तुनि स्थाणावविद्यया पुमानिति निश्चयो जायते, तथा देहादावनात्मनि आत्मधीरविद्यातो निश्चितेत्यर्थः। देहात्मनोरैक्यज्ञाने देहधर्मस्य जरादेरात्मनि, आत्मधर्मस्य च चैतन्यस्य देहे विनिमयः स्यादित्याशङ्क्याह—** न चेति। **स्थाणौ पुरुषत्वं भ्रान्त्या भातीत्येतावता पुरुषधर्मः शिरःपाण्यादिर्न स्थाणोर्भवति, तद्धर्मो वा वक्रत्वादिर्न पुंसो**

भाष्यार्कप्रकाशः

केनचित् प्रत्याख्यातुं शक्यः।

तस्मादज्ञस्यैव संसारो न प्राज्ञस्येति कथमीश्वरस्य संसारित्वम्? कथं वा संसाराभावः? संसारिणामज्ञानां सत्त्वादितीममर्थमाह— **तत्रेत्यादिना। तत्रेति** व्यवहारभूमावित्यर्थः। **एवं सतीति।** देहाद्यभिमानिन एव संसारो, न तु देहादिव्यतिरिक्तात्मदर्शिन इति स्थिते सतीत्यर्थः। **ईश्वरस्यैवेति।** असंसारिण एवेत्यर्थः। **अविद्याकृतम**ज्ञानकृतम्। ननु कथमसंसारिणः क्षेत्रज्ञस्याविद्यावशादपि संसारित्वमित्यतो दृष्टान्तमाह— **यथेति।** आत्मनो यथा देहादिरूपत्वमविद्याकृतं, तद्वदिति भावः। ननु नास्त्यात्मनो देहाद्यात्मत्वम् , अत आह— **सर्वेति। सर्वजन्तूनां** सर्वप्राणिनाम् अनात्मसु देहादिष्वविद्याकृतो निश्चित आत्मभावः प्रसिद्धो हि। देवोऽहं, मनुष्योऽहं, काणोऽहं, बधिरोऽहमित्यादिव्यवहारादिति भावः। तत्रापि दृष्टान्तमाह— **यथा स्थाणाविति।** मन्दान्धकारे दृष्टे स्थाणौ यथा अविवेकिनः पुरुष इति निश्चयः, तद्वदित्यर्थः। ईश्वरमेव सन्तं क्षेत्रज्ञमज्ञानादज्ञाः संसारिणं मन्यन्ते तार्किकादयः। यथा वा बौद्धादयः देहमेवात्मानं, यथा वा कुदृष्टयः स्थाणुमेव पुरुषमिति यावत्। ननु सर्वजन्तुप्रसिद्धनिश्चयबलात् संसार्येव क्षेत्रज्ञ इत्यत आह— **न चेति। एतावता** अज्ञानकृताज्ञजननिश्चयमात्रेणेत्यर्थः। यथा अज्ञजननिश्चयमात्रेण स्थाणुः पुरुषो न भवति, पुरुषो वा स्थाणुर्न भवति, तथा अज्ञजननिश्चयमात्रेण देह आत्मा न भवति, आत्मा वा देहो न भवति। न च - आत्मा देहो मा भून्नाम, संसारी तु भवेदेव,

१. 'रागद्वेषादिप्रहाणापेक्षाद्' 'रागद्वेषादिप्रहाणात् तदपेक्ष' इति पा.। २. 'देहाद्यतिरेकस्य' इति पा.। ३. सप्तम्यन्तमिदम्। भाति सत्येवेत्यर्थः। ४. भास्यतीत्यर्थः' इति पा.।

**पुरुषधर्मः स्थाणोर्भवति, स्थाणुधर्मो वा पुरुषस्य। तथा न [1]चैतन्यं धर्मो देहस्य, देहधर्मो वा [2]चेतनस्य। सुखदुःख-मोहात्मकत्वादिः आत्मनो न युक्तोऽविद्याकृतत्वाविशेषात् , जरामृत्युवत्।**

[अविषयेऽप्यात्मनि अनात्माध्याससाधनम् ]

**न ; अतुल्यत्वादिति चेत्? स्थाणुपुरुषौ ज्ञेयावेव सन्तौ ज्ञात्राऽन्योन्यस्मिन्नध्यस्तौ अविद्यया। देहात्मनोस्तु**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**पुरुषधर्म इति।** 'कामः सङ्कल्पो विचिकित्सा' इत्यादिश्रुतेः सुखदुःखदेहात्मकत्वादेः[मोहात्मकत्वादिः] सूक्ष्मदेहस्य धर्मश्चैतन्यात्मनो न युक्तस्तत्त्वतः इत्यर्थः।

सुखदुःखादिस्तत्त्वत आत्मधर्मो न भवति, भ्रमसिद्धत्वात् , जरामृत्युवदित्युक्तम्। तत्रासिद्धो हेतुः। नन्वतस्मिंस्त-द्बुद्धित्वात् स्थाणौ पुरुषबुद्धिवद् भ्रमत्वमुक्तम् , न, विलक्षणत्वाद् दृष्टान्तस्य। तद्वैलक्षण्यं विवृणोति— **स्थाणुपुरुषाविति**। यो भ्रमः स ज्ञेयस्य ज्ञेयान्तरे दृष्टः। इहोभयोर्ज्ञेयत्वं व्यापकं व्यावर्तमानं स्वव्याप्यं भ्रमत्वमपि व्यावर्तयति। तस्मादुपाधिधर्म-

आनन्दगिरिकृतव्याख्या

**दृश्यते, मिथ्याध्यस्ततादात्म्याद् वस्तुतो धर्माव्यतिकरादिति। दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह—** तथेति। **जरादेरनात्मधर्मत्वेऽपि सुखादेरात्मधर्मत्वमिति केचित् , तान् प्रत्याह—** सुखेति। **कामसङ्कल्पादिश्रुतेरनात्मधर्मत्वज्ञानादित्यर्थः। किञ्च विमतो नात्मधर्मो ऽविद्याकृतत्वात् , जरादिवत् । न च हेत्वसिद्धिः, अतस्मिंस्तद्बुद्धिविषयत्वेन स्थाणौ पुरुषत्ववदविद्याकृतत्वस्योक्तत्वादिति मत्वाऽऽह—** अविद्येति।

**स्थाणौ पुरुषत्ववदाविद्यत्वं देहादेरयुक्तम् , दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यादिति शङ्कते— नेति। तदेव प्रपञ्चयति—**स्थाणिवत्या-दिना। **ज्ञेयस्य ज्ञेयान्तरेऽध्यासाद् अत्र [3]चोभयोर्ज्ञेयत्वस्य व्यापकस्य व्यावृत्त्या व्याप्याध्यासस्यापि व्यावृत्तिरित्यर्थः। देहात्मबुद्धेः**

भाष्यार्कप्रकाशः

देहातिरिक्तस्याप्यात्मनः संसारोपलम्भादिति तार्किकादिदृष्टिमाश्रित्य - वाच्यम् ; देहधर्मत्वात् संसारस्य। न च सुखदुःखादयो न देहधर्माः, किन्तु मनोधर्मा एवेति वाच्यम् ; मनसोऽपि सूक्ष्मदेहत्वात्। तस्मात् सुखदुःखमोहादिलक्षणः संसारो देहधर्म एवेति नात्मनो युक्तः, आत्मनस्तु चैतन्यमेक एव धर्मः। स च न देहस्य युक्तः, जडत्वात्। तस्माद् देह एव संसारी नात्मा, देहात्मनोरविवेकात्तु देहधर्मः संसारः आत्मन्यध्यस्तः इति संसार्यात्मेति मन्यन्ते मूढाः, देहं च चेतनः इति। तस्मात् तार्किकाद्यभिमतदेहभिन्नत्वा-देवासंसार्यात्मेति सिद्धम्। ननु स्थाणुपुरुषयोरितरेतरधर्माध्यासो युक्त एव भवतु, देहात्मनोस्तु न भवतीत्यत आह— **अविद्येति**। अज्ञानकृतत्वांशे भेदाभावाद् युक्त एवेत्यर्थः। ननु कुतः संसार आत्मनो न युक्तः? इत्यत्र दृष्टान्तमाह— **जरामृत्युवदिति**। आस्तिका हि सर्वे देहभिन्नमात्मानं मन्वानाः जरामृत्यू देहधर्माविव, न त्वात्मधर्माविति प्रतियन्ति। कथमन्यथा देहे मृतेऽपि देहिनः श्राद्धादिकं कुर्युः? कथं वा स्वर्गादिफललोभेन यज्ञादिकं कुर्युः? तथा च यथा जरामृत्यू स्थूलदेहधर्मौ, तथा सुखदुःखादयः सूक्ष्मदेहधर्मा एव। अतस्तेषां नात्मधर्मत्वं युक्तमिति भावः।

**नातुल्यत्वादिति चेदि**ति पूर्वपक्षः। तं स्वयमेव व्याख्याति— **स्थाणिवति**। ज्ञेयावेव सन्तौ स्थाणुपुरुषौ ज्ञात्रा अविद्यया अन्योऽन्यस्मिन्नध्यस्तावित्यन्वयः। अतुल्यत्वात् स्थाणुपुरुषदृष्टान्तो न युक्त इति चेदिति संक्षिप्तप्रश्नार्थः। विस्तृतप्रश्नार्थस्तु स्फुट एव। यस्य स्थाणौ पुरुषनिश्चयः स हि स्थाणुपुरुषाभ्यामन्य एव, प्रकृते तु यस्य देहे आत्मबुद्धिः स आत्मैव, न तु देहात्मनोरन्य इति कृत्वा स्थाणुपुरुषवद् देहात्मनोरितरेतराध्यास इति वक्तुं न युक्तमिति भावः। अन्यस्मिन्नन्य इति भ्रमो भवेदेव। स्वस्मिन् पुनरन्य इति भ्रमः, अन्यस्मिन् स्वयमिति भ्रमश्च भवितुं नार्हति, स्वस्य नित्यापरोक्षत्वादेव। न हि स्वकरस्थं दण्डं कोऽपि पुरुषत्वेन सर्पत्वेन वा अध्य-सेत्। तस्मादात्मनि देह इति, देहे आत्मेति च भ्रमो न युक्त आत्मनः। देहस्य तु सुतरां न युक्तः, जडत्वात्। न हि स्थाणुरहं पुरुष इति,

१. 'चैतन्यधर्मः' इति पा.। २. 'चैतन्यस्य' इति पा.। ३. उभयोः = अधिष्ठानारोप्ययोः ज्ञेयत्वस्येत्यर्थः। एकस्य ज्ञेयत्वेऽपि उभयोस्तन्नेति भावः।

**ज्ञेयज्ञात्रोरेवेतरेतराध्यास इति न समो दृष्टान्तः। अतः देहधर्मो ज्ञेयोऽपि ज्ञातुरात्मनो भवतीति चेत्? न ; अचैतन्यादिप्रसङ्गात्। यदि हि ज्ञेयस्य देहादेः क्षेत्रस्य धर्माः सुखदुःखमोहेच्छादयो [१]ज्ञातुर्भवन्ति, तर्हि ज्ञेयस्य क्षेत्रस्य धर्माः [२]केचनात्मनो भवन्त्यविद्याध्यारोपिताः जरामरणादयस्तु न भवन्तीति विशेषहेतुर्वक्तव्यः। न भवन्तीत्यस्त्यनुमानम् – अविद्याध्यारोपितत्वाज्जरादिवदिति[३], हेयत्वादुपादेयत्वाच्चेत्यादि। तत्रैवं सति कर्तृत्वभोक्तृत्वलक्षणः**

अनुभूतिस्वरूपाचार्यटिप्पणम्

सुखदुःखादिः परमार्थत एवोपहिते जीवे भातीत्यर्थः। अतिप्रसङ्गेन परिहरति— **न, अचैतन्यादीति**। उपाधिधर्मत्वाविशेषात् अचेतनत्वं जन्मजरामरणादिकं च प्रसज्येतेत्यर्थः। स्वपक्षे पुनर्विशेषं स्मारयति— **न भवन्तीत्यादिना।** ततः किं फलितमित्यत आह— **तत्रैवं सतीत्यादिना।** ज्ञेयस्य ज्ञेयान्तर एवाध्यासो भवतीत्यस्य नियमस्य व्यभिचारो दर्शितः,

आनन्दगिरिकृतव्याख्या

**भ्रमत्वाभावे फलितमाह—**अत इति। **उपाधिधर्माणां सुखादीनामुपहिते जीवे वस्तुत्वमयुक्तम्, अतिप्रसङ्गादिति परिहरति—**नेत्यादिना। **अतिप्रसङ्गमेव प्रकटयति—** यदीति। [४]**सुखादीनामात्मधर्मत्वं चेद् उपाधिधर्मत्वादचैतन्यं जरादिकं चात्मनो दुर्वारं स्यादित्यर्थः। सुखादिरात्मधर्मो नेति पक्षेऽपि नास्ति विशेषहेतुरित्याशङ्क्याह—** नेति। **तदेवानुमानं साधयति—** अविद्येति। **विमतं नात्मधर्मः, आगमापायित्वात्, संसारवदिति। अनुमानान्तरमाह—** हेयत्वादिति। **आदिशब्दाद् दृश्यत्वजडत्वादि गृह्यते। सुखादीनां जरादिवदात्म-**

भाष्यार्कप्रकाशः

पुरुषो वा स्थाणुरहमिति क्वापि भ्राम्येदित्याशयः। **अत इति**। देहात्मनोरितरेतराध्यासायोगादित्यर्थः। सत्य एवायमज्ञनिश्चयो, न भ्रम इत्याह— **देहेति**। देवोऽहं, मनुष्योऽहं, काणोऽहं, बधिरोऽहं, सुख्यहं, दुःख्यहमित्यादिप्रतीतयो न भ्रमाः, किन्तु प्रमा एव, देहाद्याश्रयमात्रेण देहधर्माणामपि जीवे सङ्क्रमात्। यथा पृथिवीसंयोगाज्जलस्य गन्धगुणसङ्क्रमः। तस्मात् संसार्येवात्मेति पूर्वपक्षः।

परिहरति— **नेति**। हेतुमाह— **अचैतन्यादिप्रसङ्गादिति**। यदि देहधर्मा आत्मनः स्युस्तर्हि देहधर्मो जाड्यमपि स्यादात्मनः। आदिपदाद् विकारित्वानित्यत्वादिसङ्ग्रहः। न चेष्टापत्तिः – 'अजो नित्यः शाश्वतोऽयं पुराणः' 'साक्षी चेता केवलो निर्गुणश्च' इत्यादिशास्त्रविरोधात्। जीवस्यापि जडत्वे जगदान्ध्यप्रसङ्गात्। ननु देहधर्माः सर्वे जीवस्य भवन्तीति नास्माभिरुच्यते, किन्तु सुखदुःखमोहादय एव भवन्ति, जरामरणजाड्यादयस्तु न भवन्तीति पूर्वपक्षमुद्भाव्य परिहरति— **यदि हीत्यादिना**। ज्ञेयस्य क्षेत्रस्य केचिद् धर्माः सुखदुःखमोहेच्छाद्वेषादयो ज्ञातुरात्मनो भवन्ति, ज्ञेयस्य क्षेत्रस्य केचिद् धर्मा अविद्यारोपिताः, जरामरणादयस्तु ज्ञातुरात्मनो न भवन्तीति पूर्वपक्ष इति यद्युच्यते, तर्हि विशेषहेतुर्वाच्य इति पृच्छति सिद्धान्ती। देहधर्माणां मध्ये केचिदेवात्मनो भवन्ति, केचिन्न भवन्तीत्येवंरूपविशेषस्य को हेतुरित्यर्थः।

ननु सुखादय आत्मधर्मा न भवन्तीति तव पक्षेऽपि विशेषहेतुर्नास्तीत्याशङ्क्य परिहरति— **नेति**। सुखादय आत्मधर्मा न भवन्तीति तव पक्षेऽपि विशेषहेतुरनुमानमस्तीत्यर्थः। तदेवानुमानं दर्शयति—**अविद्येति**। सुखादयः आत्मधर्मा न भवन्तीत्यविद्याध्यारोपितत्वाज्जरादिवदिति प्रयोगः। अनुमानान्तरमाह— **हेयत्वादिति**। आत्मन्यविद्याध्यारोपिता एव सुखदुःखादयो देहधर्माः, हेयत्वादुपादेयत्वाच्च, जरामरणादिवदिति प्रयोगः। यदि सुखदुःखादय आत्मधर्मास्तर्हि आत्मना ते हातुं न शक्याः। न हि चैतन्यानन्दादय आत्मना त्यक्तुं शक्यन्ते। यदि त्वात्मन्यनध्यस्ताः केवलमनात्मधर्मास्तर्ह्युपादातुं न शक्यन्ते। न ह्यन्यधर्मोऽन्येनोपादीयते। इमे तु सुखदुःखादयो ज्ञानिना त्यज्यन्ते, अज्ञानिना तूपादीयन्ते। यथा देहधर्मौ जरामरणे ज्ञानिना त्यज्येते। नाहं जीर्णो नापि मृतः, किन्तु देह एव जीर्णो मृतश्चेति हि ज्ञानिनः प्रत्ययाः। अज्ञेन तूपादीयेते 'जीर्णोऽहं, मृतोऽहं, [५]मरिष्येऽहम्' इति तत्प्रत्ययात्। तस्मादात्मन्युपलभ्यमानाः सर्वेऽपि सुखदुःखजरामरणादिदेहधर्मा आत्मन्यध्यस्ता एवाविद्यया, न त्वनध्यस्ताः, नाप्यात्मानः स्वाभाविका वा भवन्तीति स्थितम्।

---

१. 'ज्ञातुरात्मनो भवन्ति' इति पा.। २. 'केचित्' इति पा.। ३. 'जरामरणादिवदिति' इति पा.। ४. उपाधिधर्माणाम् इत्यादिः। ५. मरिष्यामीति युक्तम्।

**संसारो ज्ञेयस्थो ज्ञातर्यविद्ययाऽध्यारोपित इति न तेन ज्ञातुः किञ्चिद् दुष्यति; यथा बालैरध्यारोपितेनाकाशस्य तलमलवत्त्वादिना। एवं च सति सर्वक्षेत्रेष्वपि सतो भगवतः क्षेत्रज्ञस्येश्वरस्य संसारित्वगन्धमात्रमपि नाशङ्क्यम्। न हि क्वचिदपि लोकेऽविद्याध्यस्तेन धर्मेण कस्यचिद् उपकारोऽपकारो वा दृष्टः।**

**यत्तूक्तम् - न समो दृष्टान्तः - इति; तदसत्। कथम्? अविद्याध्यासमात्रं हि दृष्टान्तदार्ष्टान्तिकयोः साधर्म्यं विवक्षितम्। तन्न व्यभिचरति। यत्तु ज्ञातरि व्यभिचरतीति मन्यसे, तस्याप्यनैकान्तिकत्वं[१] दर्शितं जरादिभिः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

जरादेर्ज्ञातर्यपि अध्यासदर्शनादित्याह— **तस्याप्यनैकान्तिकत्वमिति।**

आनन्दगिरिकृतव्याख्या

**धर्मत्वाभावे तस्य वस्तुतोऽसंसारितेति फलितमाह—** तत्रेति। **आरोपितेनाधिष्ठानस्य वस्तुतोऽस्पर्शे दृष्टान्तमाह—** यथेति। **पराभिन्नस्यात्मनः संसारित्वमध्यस्तमिति स्थिते यत् परस्य संसारित्वापादनम् , तदयुक्तमित्याह—** एवञ्चेति। **आत्मनि संसारस्यारोपितत्वात् तदभिन्ने परस्मिन्नाशङ्कैव तस्यायुक्तेत्येतदुपपादयति—** न हीति।

**स्थाणौ पुरुषनिश्चयवद् आत्मनो देहाद्यात्मत्वनिश्चयस्याध्यस्ततेत्ययुक्तम् , दृष्टान्तस्य ज्ञेयमात्रविषयत्वाद् , [२]इतरस्य ज्ञेयज्ञातृविषयत्वादित्युक्तमनुवदति—** यत्त्विति। **वैषम्यं दूषयति—** तदसदिति। **तर्हि केन साधर्म्यमिति पृच्छति—** कथमिति। **अभीष्टं साधर्म्यं दर्शयति—** अविद्येति। **तस्योभयत्रानुगतिमाह—** तन्नेति। **ज्ञेयान्तरे ज्ञेयस्यारोपनियमाज्ज्ञातरि नारोपः स्यादित्याशङ्क्याह—** यत्त्विति। **नायं नियमो, ज्ञातरि जराद्यारोपस्योक्तत्वादित्याह—** तस्यापीति। **ज्ञेयस्यैव ज्ञेयान्तरेऽध्यासनियमस्येति यावत्। अतो ज्ञातरि नारोप-**

भाष्यार्कप्रकाशः

**ज्ञेयस्थः** देहेन्द्रियादिक्षेत्रस्थः; **ज्ञातरि** क्षेत्रज्ञे। अनेनाविद्यया आत्मनि देहधर्मसंसारारोपणेनेत्यर्थः। किञ्चिदपि न दुष्यति, नास्त्यात्मनः कियानपि संसारदोष इत्यर्थः। तत्र दृष्टान्तमाह— **यथेति**। बालैरध्यारोपितेन तलमलिनत्वादिना आकाशस्य न कोऽपि लेपो यथा, तद्वदित्यर्थः। **तल**मिन्द्रनीलकटाहः, तद्वन्मलिनं तलमलिनं, तद्भावस्तत्त्वम्। आदिपदात् पीतत्वश्वेतत्वादिग्रहणम्। नीरूपमप्याकाशं बाला नीलमिति, सन्ध्याम्बुदावरणे सति पीतमिति, शारदमेघावरणे सति श्वेतमिति च मन्यन्ते। न तावता गगनस्य नैल्यादिसम्बन्धः। एवमसंसारिणमप्यात्मानं संसारिणं मन्यन्तेऽज्ञाः। तावता नात्मनः कोऽपि संसार इति भावः। **एवं च सतीति**। अविद्याकृतदेहादितादात्म्याध्यासजन्य एवात्मनः संसारो, न तु स्वत इति स्थिते सतीत्यर्थः। **भगवत इति**। 'भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः' इति भागवतादिति भावः। **गन्धो** लेशः। कुतो न शक्यम्? अत आह— **न हीति**। अविद्यया रज्ज्वाद्यधिष्ठाने आरोपितेन सर्पादिभ्रमेण रज्ज्वादेर्न कोऽप्युपकारः, नापि कश्चिदपकारो दृष्टः। न हि सर्पाध्यासमात्रेण रज्जोर्विषदंष्ट्रादिमत्त्वं स्यात्। न हि मध्याह्नार्ककिरणव्याप्तमरुभूमौ जलाध्यासमात्रेण भूमेर्द्रवादिलाभः। न हि च शुक्तिकायां रजताध्यासमात्रेण शुक्तिकायाः कटकाद्युपयोगित्वलाभः। तद्वदात्मनि देहधर्माध्यासमात्रेण न स्यादेवात्मनः संसार इति भावः।

ननु ज्ञेयौ स्थाणुपुरुषावविद्यया ज्ञात्रा अन्योन्यस्मिन्नध्यस्तौ, देहात्मनोस्तु ज्ञेयज्ञात्रोरेवेतरेतराध्यास इति न समो दृष्टान्त इति पूर्वपक्षस्य किमुत्तरम्? अत आह— **यत्तूक्तमिति**। **असद्** अयुक्तमित्यर्थः। ननु कुतस्तद्वचनस्यायुक्तत्वम्? अत आह— **अविद्येति**। **तत्** साधर्म्यमित्यर्थः। **न व्यभिचरति** नैकत्राव्याप्तिं भजत इत्यर्थः। ननु ज्ञातर्यविद्यया ज्ञेयधर्माध्यासो न सम्भवतीत्यत आह— **यत्त्विति**। तस्यापि जरादिभिर्नैकान्तिकत्वं दर्शितमित्यन्वयः। **तस्यापि** ज्ञातर्यविद्यया ज्ञेयधर्माध्यासो न सम्भवतीत्यस्यापीत्यर्थः। **नैकान्तिकत्वं** व्यभिचारः।

**अयं भावः** - ज्ञेयज्ञात्रोरितरेतराध्यासो न भवतीति यदुक्तं त्वया तद्वाक्यमपि सव्यभिचारत्वाद् दुष्टमेव। न च तस्य व्यभिचाराभावः शङ्क्यः, ज्ञेयदेहधर्माणां जरामरणादीनां ज्ञातर्यध्यासदर्शनात्। न च तथा अध्यासो नास्तीति वाच्यम् ; जातोऽहं, वृद्धोऽहं,

१. 'नैकान्तिकत्वम्' इति रा. पा.। २. दार्ष्टान्तिकस्येत्यर्थः।

[अविद्यायाः आत्मधर्मत्वनिरासः]

**अविद्यावत्त्वात् क्षेत्रज्ञस्य संसारित्वमिति चेत् , न ; अविद्यायास्तामसत्वात्। तामसो हि प्रत्ययः आवरणात्मकत्वादविद्या - विपरीतग्राहकः, संशयोपस्थापको वा, अग्रहणात्मको वा - विवेकप्रकाशभावे तदभावात्। तामसे**

अनुभूतिस्वरूपाचार्यटिप्पणम्

'आत्मनः परिणामो वा विज्ञानं वाऽन्यवस्तुनः' इत्युक्तत्वादविद्याऽप्यात्मधर्म एव। अतस्तयाऽपि पारमार्थिकमेव संसारित्वमित्याह— **अविद्यावत्त्वादिति।** अविद्यायाः आत्मधर्मत्वमसिद्धम् , अविक्रियस्य स्वतः परिणामसम्बन्धायोगादित्यभिप्रेत्याह— **न, अविद्यायास्तामसत्वादिति।** तमःशब्देनानाद्यनिर्वचनीया अविद्याशक्तिरुच्यते, 'नासदासीन्नो सदासीत्। तम आसीदि'त्यादिश्रुतेः। तत्कार्यत्वाद् विपरीतज्ञानादेरात्मधर्मत्वं नास्तीत्यर्थः। **आवरणात्मकत्वादिति।** सम्यग्वस्तुप्रकाशकत्वाभावादित्यर्थः। न केवलमविद्याकार्यत्वाद् विपरीतज्ञानादेरविद्यात्वम् , विद्याहेयत्वाच्चेत्याह— **विवेकेति।** किञ्च

आनन्दगिरिकृतव्याख्या

**व्यभिचारशङ्केत्यर्थः।**

**आत्मन्यविद्याध्यासे, तत्राविद्यायाः स्वाभाविकत्वात् [१]तदधीनं संसारित्वमपि [२]तथा स्यादिति शङ्कते—** अविद्यावत्त्वादिति। **काऽविद्या? विपरीतग्रहादिर्वा, अनाद्यनिर्वाच्याज्ञानं वा? नाद्यः, विपरीतग्रहादेः तमःशब्दितानिर्वाच्याज्ञानकार्यत्वात्[३] तन्निष्ठस्य आत्मधर्मत्वायोगादित्याह—** नेत्यादिना। **तदेव प्रपञ्चयति—** तामसो हीति। आवरणात्मकत्वं **वस्तुनि सम्यक्प्रकाशप्रतिबन्धकत्वम्। विपरीत-**

भाष्यार्कप्रकाशः

जीर्णोऽहं, मृतोऽहं, मरिष्येऽहमित्यादिप्रतीतिभिरेव तदध्याससिद्धेः। तस्माज्ज्ञेयज्ञात्रोरितरेतराध्याससम्भवाद् देहधर्मस्य संसारस्य जीवेऽध्यासः सम्भवत्येवेति। ज्ञेययोः स्थाणुपुरुषयोरपीतरेतराध्यासो न ज्ञात्रा कृतः, किन्त्वविद्ययैव। तथा ज्ञेयज्ञात्रोरप्यविद्यया क्रियत इति कृत्वा स्वस्मिन्नन्य इति भ्रमः, अन्यस्मिन् स्वयमिति भ्रमो वा अविद्यावशादुपपद्यत एव। ब्राह्मणस्य विष्णुशर्मणः स्वप्ने क्षत्रियः कृष्णवर्माऽहमिति भ्रमदर्शनात्। तस्माज्ज्ञेययोरिव ज्ञेयज्ञात्रोरप्यविद्ययेतरेतराध्यासः सम्भवत्येवेति न कोऽपि दोषः। ज्ञेयज्ञातृव्यतिरिक्ताया एवाविद्याया अध्यासकल्पकत्वादिति भावः।

ननु यद्यविद्यया स्थाणौ पुरुषधर्माध्यास इव जीवे देहधर्मसंसाराध्यासः कृतः, तर्हि सा अविद्या क्षेत्रज्ञे वर्तत इति कृत्वा तयैवाविद्यया क्षेत्रज्ञस्य संसारित्वं प्राप्तम् , अविद्यावत एव संसारित्वदर्शनादिति पृच्छति— **अविद्यावत्त्वादिति**। परिहरति— **नेति**। तत्र हेतुमाह— **अविद्यायास्तामसत्वादिति**। कथमविद्या तमोगुणमयी? इत्यत आह— **तामस इति**। तामसः प्रत्यय एवावरणात्मकत्वाद् अविद्येत्युच्यते यस्मात् तस्मात् तमोगुणमय्येवाविद्या। तूलाज्ञानस्याविद्यात्वादिति भावः। कः पुनः स तामसः प्रत्ययः? अत आह— **विपरीतेति**। विपरीतग्राहकः, संशयोपस्थापकः, अग्रहणात्मकश्चेति त्रिविधः प्रत्ययोऽविद्येत्युच्यते। अविद्याकार्यत्वात् संशयविपर्ययाग्रहणानामविद्यात्वमिति भावः। स्थाणुर्वा पुरुषो वेति ग्रहणं संशयः, नायं स्थाणुः किन्तु पुरुष एवेति स्थाणोः पुरुषत्वेन ग्रहणं विपर्ययः, नास्ति स्थाणुरिति स्थाण्वज्ञानमग्रहणमिति विवेकः। एवं प्रकृते च आत्मा किं देह उत देहादन्य इति संशयः, देह एवात्मेति विपर्ययः, नास्त्यात्मेति कश्चिदित्यग्रहणम्। एतत्त्रिविधतामसप्रत्ययप्रयुक्त एव संसार इति संसारोऽविद्याकार्यमेव।

नन्विदं प्रत्ययत्रयं विद्यैवास्तु, अत आह— **विवेकेति**। विवेकप्रकाशे सति प्रत्ययत्रयाभावाद् , विवेकप्रकाशाभावे एतत्सद्भावान्नास्य विद्यात्वम्। विद्या हि प्रमाज्ञानम्। यथा स्थाणोः स्थाणुत्वेन ग्रहणम्। एवमात्मन आत्मत्वेन ग्रहणमेव विद्या। इदं च प्रमाज्ञानमात्मानात्मादिपदार्थविवेकप्रयुक्तम्। अग्रहणादिस्तु विवेकाभावप्रयुक्त इत्यग्रहणादिरेवाविद्या। कस्मात्पुनर्विद्याविद्ययोरिदं वैलक्षण्यम्? अत आह— **आवरणात्मकत्वादिति, विद्याप्रकाशेति च**। अविद्या ह्यावरणात्मिका। विद्या तु प्रकाशात्मिका। ततश्चाविद्यया स्थाण्वादिपदार्थ आव्रियते, पटेनेव रूपिका। यद्वा अन्धकारेणेव घटः। विद्यया तु स्थाण्वादिपदार्थः प्रकाश्यते, दीपेनेव घटः।

१. 'तदधीनत्वं' इति पा.। २. **तथा** स्वाभाविकम्। अविद्याध्यासस्यानादित्वादिति भावः। ३. **कार्यत्वात्** परिणामत्वात् , अत एव तन्निष्ठता।

**चावरणात्मके तिमिरादिदोषे सति अग्रहणादेरविद्यात्रयस्योपलब्धेः।**

**अत्राह— एवं तर्हि ज्ञातृधर्मोऽविद्या[१]। न ; करणे चक्षुषि तैमिरिकत्वादिदोषोपलब्धेः। यत्तु मन्यसे - ज्ञातृधर्मो**

अनुभूतिस्वरूपाचार्यटिप्पणम्

अन्वयव्यतिरेकाभ्यां दोषप्रसूतत्वावगमादपि न विपर्ययादेरात्मधर्मत्वमित्याह— **तामसे चेति।**

तर्हि दोषस्य भिन्नस्थानभूतत्वेन निमित्तकारणत्वाद् भावकार्यस्य च सोपादानत्वनियमादुभयसम्प्रतिपन्नः आत्मैव कारणं विपर्ययादेरस्त्वित्याह— **अत्राह एवं तर्हीति।** सत्योपादानत्वेऽपि विपर्ययादेरबाध्यत्वापातान्नात्मनः उपादानत्वं सम्भवति। किन्तु दोषस्य चक्षुरादिधर्मत्वदर्शनाद् अग्रहणादेरपि दोषत्वात् करणधर्मत्वमेव वाच्यम्। तच्च करणं 'माययाऽपहृतज्ञानाः' इत्यादिस्मृतेरनिर्वाच्याविद्यैवेत्याह— **न, करणे चक्षुषीति।** वस्तुसंग्राहकं पूर्वपक्षसिद्धान्तभाष्यद्वयं

आनन्दगिरिकृतव्याख्या

**ग्रहणादेरविद्याकार्यत्वं विद्यापोह्यत्वेन साधयति—** विवेकेति। [२]**न च - कारणाविद्या अनाद्यनिर्वाच्या आत्मधर्मः स्यादिति - युक्तम् , अनिर्वाच्यत्वादेव तस्यास्तद्धर्मत्वस्य दुर्वचत्वादिति**[३] **भावः। किञ्च विपरीतग्रहादेरन्वयव्यतिरेकाभ्यां दोषजन्यत्वावगमादपि नात्मधर्मतेत्याह—** तामसे चेति। [४]**तमःशब्दिताज्ञानोत्थवस्तुप्रकाशप्रतिबन्धकस्तिमिरकाचादिदोषः। तस्मिन् सति— अज्ञानम् , मिथ्याधीः, संशयश्चेति त्रयस्योपलम्भाद् , असति तस्मिन्नप्रतीतेः, अन्वयव्यतिरेकाभ्यां विपरीतज्ञानादेर्दोषाधीनत्वाधिगमान्न केवलात्मधर्मतेत्यर्थः।**

**दोषस्य निमित्तत्वाद् , भावकार्यस्योपादाननियमाद् , अनिर्वाच्याविद्यायाश्चासम्मतेः, आत्मैव**[५] **विपर्ययादेरुपादानमिति चोदयति —** अत्राहेति। **विपरीतग्रहादेर्दोषोत्थत्वं सप्तम्यर्थः। अग्रहादित्रितयम्** अविद्या। **विपर्ययादेः सत्योपादानत्वे सत्यत्वप्रसङ्गाद् नात्मा तदुपादानम् , किन्तु दोषस्य चक्षुरादिधर्मत्वग्रहणाद् , अग्रहणादेरपि दोषत्वात् करणधर्मत्वे[र्मत्वम् ]** ; करणम् **अविद्योत्थमन्तःकरणम्। न च तद्धेतुरविद्याऽसिद्धेति वाच्यम् ; अज्ञोऽहमित्यनुभवात् , स्वापे चाज्ञानपरामर्शात् तदवगमात् , कार्यलिङ्गकानुमानादागमाच्च तत्प्रसिद्धेरिति परिहरति—** नेत्यादिना। **संगृहीतचोद्यपरिहारयोश्चोद्यं विवृणोति—** यत्त्विति। **अविद्यावत्त्वेऽपि ज्ञातुरसंसारित्वादुत्खात-**

भाष्यार्कप्रकाशः

तस्मादन्धकारवदावरणात्मिका अविद्या, दीपवत्प्रकाशात्मिका विद्या। अन्धकार एव स्थाणोरग्रहणविपरीतग्रहणसंशयाः, न तु प्रकाशे। तथा अविद्यायामेवात्मनोऽग्रहणविपरीतग्रहणसंशयाः, न तु विद्यायामित्यविद्याकृत एव संसारः।

नन्वविद्यावशादेवाग्रहणादिकमित्यत्र किं निदर्शनम्? अत आह— **तामस इति। तामसे** तमोगुणमये आवरणात्मके च तिमिरादिदोषे; चक्षुष इति शेषः; सत्येव अग्रहणविपरीतग्रहणसंशयात्मकाविद्यात्रयस्योपलब्धेरिति। यथा तामसत्वादावरणात्मकत्वाच्च तिमिरादिदोषः स्थाण्वादिपदार्थाग्रहणविपरीतग्रहणसंशयात्मकत्रिविधप्रत्ययजनकः पुंसाम् , तथा तामसत्वादावरणात्मकत्वाच्चाविद्यारूपो दोषस्त्रिविधप्रत्ययजनक इति भावः। संसारहेतूनामग्रहणादितामसप्रत्ययानामविद्याकार्यत्वात् तामसाविद्याकार्यमेव संसार इत्यविद्याया एव संसारो, न तु क्षेत्रज्ञस्येति भावः।

**अत्राह** पूर्वपक्षीति शेषः। किमाह? तद् दर्शयति— **एवमिति। एवं** संसारोऽविद्यायाश्चेदित्यर्थः। तर्हि सा अविद्या ज्ञातृधर्म एवेति पुनः क्षेत्रज्ञस्य संसारित्वं प्राप्तमित्याशयेनाह— **ज्ञातृधर्मोऽविद्येति।** लोके चक्षुषस्तिमिरादिदोषवशादपि द्रष्टुरेवाग्रहणादिकर्तृत्वदर्शनात् - यः स्थाणुं न गृह्णाति, विपर्ययेण वा गृह्णाति, संशयेन वा गृह्णाति, तस्यैव हि धर्मास्तदग्रहणादयः। तद्वदविद्यावशाद् यः पुमान् क्षेत्रज्ञः संशयादिकं प्रतिपद्यते, तस्यैव धर्मास्ते संशयादय इति संशयादिप्रयुक्तः संसारः क्षेत्रज्ञस्यैवेति पूर्वपक्षाशयः। परिहरति— **नेति।** अविद्या ज्ञातृधर्मो न भवतीत्यर्थः। कुतः? तदाह— **करण इति।** तिमिरादिदोषोऽग्रहणादिहेतुः करणस्य चक्षुष एव

१. इतीति शेषः। २. न द्वितीयः इत्याह— न चेति। ३. अनिर्वाच्यस्य परमार्थधर्मत्वाभावादिति भावः। ४. दोषस्य तामसत्वमुपपादयति— तम इति। 'तमश्शब्दिताज्ञानोत्थः वस्तुप्रकाशप्रतिबन्धकस्तिमिरकाचादिः दोषः' इति पाठः स्यात्। अज्ञानं ज्ञानाभावः, मिथ्याधीः भ्रमः। ५. 'तस्यैव विपर्ययादेरुपादानत्व'मिति पा.।

**ऽविद्या; तदेव चाविद्याधर्मवत्त्वं क्षेत्रज्ञस्य संसारित्वम् ; तत्र यदुक्तम् 'ईश्वर एव क्षेत्रज्ञो[१], न संसारी' इति, एतदयुक्तम् - इति। तन्न; यथा करणे चक्षुषि विपरीतग्राहकादिदोषस्य दर्शनान्न विपरीतादिग्रहणं तन्निमित्तो वा तैमिरिकत्वादिदोषो ग्रहीतुः, चक्षुषः संस्कारेण तिमिरेऽपनीते ग्रहीतुरदर्शनान्न ग्रहीतुर्धर्मो यथा, तथा सर्वत्रैवाग्रहणविपरीतसंशयप्रत्ययाः [२]तन्निमित्ताः करणस्यैव कस्यचिद् भवितुमर्हन्ति, न ज्ञातुः क्षेत्रज्ञस्य। संवेद्यत्वाच्च तेषां प्रदीपप्रकाशवन्न ज्ञातृ-धर्मत्वम्। संवेद्यत्वादेव स्वात्मव्यतिरिक्तसंवेद्यत्वम्। सर्वकरणवियोगे च कैवल्ये सर्ववादिभिरविद्यादिदोषवत्त्वा-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

क्रमेण व्याचष्टे— **यत्त्वित्यादिना। विपरीतादिग्रहणमिति।** विपरीतादिग्रहणं न ग्रहीतुरिति सम्बन्धः। तत्र हेतुमाह— **चक्षुषः संस्कारेणेति**। अग्रहणादिः न तत्त्वत आत्मधर्मः, दोषत्वात् , कामिलादिवदित्युक्तम्। हेत्वन्तरमाह— **संवेद्यत्वाच्चेति।** ननु प्रदीपप्रकाशस्य परवेद्यत्वादनात्मधर्मत्वम्। भ्रमादेस्तु स्वसंवेद्यत्वादात्मधर्मत्वं भविष्यतीत्याशङ्क्याह—**स्वात्मव्यतिरिक्त (स्य)संवेद्यत्वमिति ।** अग्रहणादिः परवेद्यः, वेद्यत्वाद्, दीपवदित्यर्थः। किञ्चाग्रहणादिर्नात्मधर्मः, व्यभिचारित्वात् , कृशत्वा-

आनन्दगिरिकृतव्याख्या

**दंष्ट्रोरगवदविद्या किं करिष्यतीत्याशङ्क्याह—** तदेवेति। **मिथ्याज्ञानादिमत्त्वमेवात्मनः संसारित्वमिति स्थिते, फलितमाह—** तत्रेति। **'न; करणे चक्षुषि' इत्यादिनोक्तमेव परिहारं प्रपञ्चयति—** तन्नेत्यादिना। **तिमिरादिदोषस्तत्कृतो विपरीतग्रहादिश्च न ग्रहीतुरात्मनोऽस्तीत्यत्र हेतुमाह—** चक्षुष इति। **तद्गतेनाञ्जनादिसंस्कारेण तिमिरादौ पराकृते देवदत्तस्य ग्रहीतुर्दोषाद्यनुपलम्भान्न तस्य तद्धर्मत्वम्। अतो विमतं तत्त्वतो नात्मधर्मो दोषत्वात् , तत्कार्यत्वाद्वा, सम्मतवदित्यर्थः। किञ्च विपरीतग्रहादिस्तत्त्वतो नात्मधर्मः, वेद्यत्वात् , सम्प्रतिपन्नवदि-त्याह—** संवेद्यत्वाच्चेति। **किञ्च यद् वेद्यं तत् स्वातिरिक्तवेद्यम् , यथा दीपादीति व्याप्तेर्विपरीतग्रहादीनामपि वेद्यत्वादतिरिक्तवेद्यत्वे[३], संवेदिता न संवेद्यधर्मवान् , वेदितृत्वाद् , यथा देवदत्तो न स्वसंवेद्यरूपादिमानित्यनुमानान्तरमाह—** संवेद्यत्वादेवेति। **किञ्च विपरीतग्रहादयः तत्त्वतो नात्मधर्माः, व्यभिचारित्वात् , कृशत्वादिवदित्याह—** सर्वेति। **उक्तमेव विवृण्वन्नात्मनो विपरीतग्रहादिः**

भाष्यार्कप्रकाशः

धर्मः, न तु कर्तुरात्मनः, चक्षुष्येव करणे तद्दोषदर्शनात्। एवमग्रहणादिहेतुरविद्याऽपि करणस्यैव धर्मो, न तु कर्तुरात्मनः। इदमेव सङ्क्षिप्तमर्थं विस्तरेण वक्ति— **यत्त्वित्यादिना**। अविद्याया ज्ञातृधर्मत्वादविद्यावत्त्वस्यैव संसारित्वात् क्षेत्रज्ञः संसार्येवेति कृत्वा तस्या-संसारीश्वरत्वकथनमयुक्तमिति यत्पूर्वपक्षिणोक्तम् , तन्न। कुतः? करणे चक्षुष्येव विपरीतग्राहकसंशयोत्थापकाग्रहणात्मकतिमिरादि-दोषदर्शनात्। ग्रहीतुर्विपरीतादिग्रहणं न; तन्निमित्तभूतस्तिमिरादिदोषोऽपि न। कुतो न? इत्यत आह— **चक्षुष इति**। चक्षुषः संस्कारेण हेतुना चक्षुषः सकाशात् तिमिरादिदोषेऽपनीते सति ग्रहीतुस्तद्दोषस्य, तत्प्रयुक्ताग्रहणादेर्वा अदर्शनात्। तस्मात् तिमिरादिदोषो न ग्रहीतुर्धर्मः, किन्तु करणचक्षुर्धर्म एव। एवं दृष्टान्तमुपपाद्य दार्ष्टान्तिकमुपपादयति— **तथेति। सर्वत्रेति**। सर्वव्यवहारेष्वित्यर्थः। अग्रहणविपरीतसंशयात्मकाः प्रत्ययाः **सनिमित्ताः** सकारणाः कस्यचित् करणस्यैव धर्मा भवितुमर्हन्ति, ज्ञातुः क्षेत्रज्ञस्य धर्मा भवितुं नार्हन्ति। यथा प्रदीपप्रकाशो न द्रष्टृपुरुषधर्मस्तथा तेषामग्रहणादीनां न ज्ञातृधर्मत्वं, **संवेद्यत्वात्** ज्ञेयत्वात्। ज्ञात्रा हि ज्ञायन्ते ते। येन यज्ज्ञायते स हि तस्माद् भिन्नः; यथा पुरुषो घटात्। न चास्य लक्षणस्य व्यभिचारः शङ्क्यः सुखादिषु , सुखादीनां मनआदिधर्मत्वात्। नापि सत्यत्वानन्दा[नन्दत्वा]दिषु , तेषामात्मानन्यत्वाभ्युपगमात्। निर्धर्मकत्वाच्चात्मनः। न च तेषां संवेद्यत्वे विप्रतिपत्तव्यमित्याह— **संवेद्यत्वादेवेति**। स्वात्मव्यतिरिक्तस्य सर्वस्यापि जगत्सं[जगतः सं]वेद्यत्वाद् अविद्यादयोऽप्यात्मव्यतिरिक्तत्वेन संवेद्या एव।

किञ्चाविद्यादीनामात्मधर्मत्वाभ्युपगमो द्वैतिनामपि विरुद्ध इत्याह— **सर्वकरणेति**। कैवल्ये मोक्षे चक्षुरादिकरणवियोगे सति सर्ववादिभिरात्मनोऽविद्यादिदोषवत्त्वस्यानभ्युपगमादिति। नन्वात्मधर्मः सन्नपि अविद्याऽग्रहणादिः मुक्तौ तस्मादपैतीत्यत आह—

१. क्षेत्रज्ञः ईश्वर एवेत्यन्वयः। २. 'सनिमित्ताः' इति रा.पा.। ३. सिद्धे इति शेषः। तेषामात्मधर्मत्वं वारयितुमनुमानान्तरम्—संवेदितेत्यादि। देवदत्तेन संवेद्यं रूपादि देवदत्तधर्मो न भवतीति दृष्टान्तोपपत्तिः।

**नभ्युपगमात्[1]। आत्मनो यदि [2]क्षेत्रज्ञस्याग्न्युष्णवत् स्वो धर्मस्ततो न कदाचिदपि तेन वियोगः स्यात्। अविक्रियस्य च व्योमवत् सर्वगतस्यामूर्तस्यात्मनः केनचित् संयोगवियोगानुपपत्तेः सिद्धं क्षेत्रज्ञस्य नित्यमेवेश्वरत्वम्। 'अनादित्वान्निर्गुणत्वाद्' (भ.गी.१३.३२) इत्यादीश्वरवचनाच्च।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

दिवदित्याह— **सर्वकरणवियोगे चेति।** ननु मोक्षे मनसो वियोगाद् भ्रमाद्यनुत्पादः। अतो व्यभिचारित्वमप्रयोजकमित्याशङ्क्याह— **अविक्रियस्य चेति।** आत्मा न संयोगाद्यर्हः, सर्वगतत्वाद्, अविक्रियत्वाद्, अमूर्तत्वाद्, व्योमवत्। [3]व्योम्नश्च संयोगित्वे न द्वितीयः संयोगः स्यात् , संयुक्तस्वरूपातिरिक्तरूपान्तराभावात्। कल्पितसंयोगैः संयोगित्वे चातात्त्विकत्वप्रसङ्गाद् न साध्यवैकल्यम्। तदेवं विपर्ययादेः तत्त्वतः आत्मधर्मत्वाभावे किं साध्यमित्याशङ्क्याह— **सिद्धं क्षेत्रज्ञस्येति।** अज्ञत्वादिविरुद्धधर्माक्रान्तत्वेन क्षेत्रज्ञस्येश्वरत्वासम्भावना जायते। ततोऽज्ञत्वाभावे सा शङ्का निरस्ता स्यात्। चिन्मात्रतन्त्रानाद्यनिर्वचनीयाविद्याप्रतिबिम्बितस्य चिद्धातोरज्ञत्वादेरतात्त्विकत्वात् तात्त्विकेश्वरत्वाविरोधादित्यर्थः। निर्धर्मकत्वे भगवद्वाक्यमपि प्रमाणमित्याह— **अनादित्वादिति।**

आनन्दगिरिकृतव्याख्या

**स्वाभाविको वाऽऽगन्तुको वेति विकल्प्याऽऽद्यं दूषयति—**आत्मन इति। **अतोऽनिर्मोक्षः, अविद्यातज्जध्वस्तेरसद्भावादिति भावः। आगन्तुकोऽपि स्वतश्चेद् अमुक्तिः, परतश्चेत् , तत्राह—** अविक्रियस्येति। **विभुत्वादविक्रियत्वादमूर्तत्वाच्च आत्मा व्योमवन्न केनचित् संयोगविभागावनुभवति; न हि विक्रियाऽभावे व्योम्नि वस्तुतः संयोगविभागौ; असङ्गत्वाच्चात्मनस्तदसंयोगाद् न परतोऽपि तस्मिन् विपरीतग्रहादीत्यर्थः। तस्यात्मधर्मत्वाभावे फलितमाह—** सिद्धमिति। **आत्मनो निर्धर्मकत्वे भगवदनुमतिमाह—** अनादित्वादिति।

भाष्यार्कप्रकाशः

**यदीति**। अग्नेरुष्णत्ववद् यदि क्षेत्रज्ञस्य संसारित्वं स्वधर्मः स्यात् , तर्हि तेन धर्मेण तस्य धर्मिणः कदाचिदपि वियोगो न स्यात् , न हि उष्णत्वमग्नेरपैति क्वापि। यदा त्वपैति तदाऽग्निरेव नश्यति। दोषान्तरमप्याह— **अविक्रियस्येति**। अविक्रियस्य धर्मसंयोगवियोगात्मिका विक्रिया नोपपद्यते। व्योमवत् सर्वगतस्य चात्मनः केनचिदपूर्वः संयोगः, केनचिद् वियोगश्च नोपपद्यते। तथा अमूर्तस्याप्यात्मनः। लोके हि मूर्तस्य परिच्छिन्नस्य सविक्रियस्यैव वस्तुनो घटादेः केनचित् संयोगवियोगौ दृश्येते। तस्मात् क्षेत्रज्ञस्य नित्यमेवेश्वरत्वमसंसारित्वं सिद्धम्। **नित्य**मित्यनेन द्वैतमत इव मुक्तावेवासंसारित्वं क्षेत्रज्ञस्येति नोच्यते, किन्तु सर्वदाऽपि मुक्त एव क्षेत्रज्ञः, नित्यमुक्तत्वादीश्वरस्येत्युच्यत इति गम्यते। न च कथं बन्धदशायामप्यसंसारित्वमिति वाच्यम् ; बन्धस्य संसारस्य अविद्यादिधर्मत्वेन व्यवस्थापितत्वात्।

**ननु** तिमिरादिदोषः करणस्य चक्षुषो धर्मो यथा, तथा अग्रहणादिदोषः कस्यचित् करणस्य धर्म इत्युक्तम् , तच्च करणं न दर्शितमिति चेद् , **उच्यते**— ज्ञेयस्य देहादेः क्षेत्रस्य धर्माः सुखदुःखमोहेच्छादय इति प्रागेवोक्तं भाष्यकृद्भिरिति। देहेन्द्रियमनांसि हि करणानि। न चेन्द्रियमनसां करणत्वेऽपि देहस्य न करणत्वमिति वाच्यम् ; गमनादिक्रियासु पादादिद्वारा देहस्यापि करणत्वदर्शनात्। तेषु चाविद्याग्रहणादिदोषा अन्तःकरणधर्माः। तस्मादविद्याकृतः सर्वोऽपि संसारोऽन्तःकरणस्यैव। अन्तःकरणादविद्यायां विद्यया अपनीतायां सत्यामात्मनः संसारादर्शनादिति सिद्धं क्षेत्रज्ञस्यासंसारीश्वरत्वम्।

उक्तार्थे गीतां प्रमाणयति— **अनादित्वादिति**। न हि निर्गुणस्य संसारधर्मप्रसक्तिरिति भावः। एतावता ग्रन्थसन्दर्भेणेश्वरस्य संसारित्वं प्राप्तमिति प्रश्नः समाधापितः। एतेन वशीकृतप्रकृतेः स्वतन्त्रस्येश्वरस्य कथं जीवत्वप्रयुक्तः संसार इति शङ्काऽपि प्रत्युक्ता। अज्ञानकृतत्वाज्जीवस्य संसारित्वव्यवहाराय।

१. 'नभ्युपगमादात्मनः। यदि' इति रा.पा.। २. 'क्षेत्रज्ञस्य संसारित्वमग्न्युष्णत्ववत्' इति पा.। ३. व्योम्नः सर्वमूर्तद्रव्यसंयोगित्वेन परैरङ्गीकारात् दृष्टान्ते साध्यवैकल्यं परिहरति— व्योम्नश्चेति।

[जीवब्रह्माभेदे शास्त्रानर्थक्यादिदोषपरिहारः]

**नन्वेवं सति संसारसंसारित्वाभावे शास्त्रानर्थक्यादिदोषः स्यादिति चेत्? न ; सर्वैरभ्युपगतत्वात्। सर्वैः हि आत्मवादिभिरभ्युपगतो दोषो नैकेन परिहर्तव्यो भवति[1]। कथमभ्युपगत इति? मुक्तात्मनां हि संसारसंसारित्व-व्यवहाराभावः सर्वै-रेवात्मवादिभिरिष्यते। न च तेषां शास्त्रानर्थक्यादिदोषप्राप्तिरभ्युपगता। तथा नः क्षेत्रज्ञानाम् ईश्वरैकत्वे[2] सति शास्त्रानर्थक्यं भवतु , अविद्याविषये चार्थवत्त्वम्। यथा द्वैतिनां सर्वेषां बन्धावस्थायामेव शास्त्रा-द्यर्थवत्त्वम् , न मुक्तावस्थायाम् , एवम्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

विद्यादिशास्त्रस्यार्थवत्त्वान्यथानुपपत्त्या तात्त्विकमेव संसारित्वं वक्तव्यमिति शङ्कते— **नन्वेवमिति।** किं परमार्थ-स्वरूपपर्यालोचनया शास्त्रस्यार्थवत्त्वं विवक्षितम् , किं वा व्यवहारतः? प्रथमं प्रत्याह— **न, सर्वैरिति।** परमार्थे आत्म-स्वरूपावस्थाने सर्वैः शास्त्रानर्थक्यस्याभ्युपगमाद् अनुदय एवार्थापत्तेरित्यर्थः। ननु सर्वैरभ्युपगतमित्येतावता तव किमायातमित्याशङ्क्याह— **सर्वैर्हीति।** सर्वैरभ्युपगतत्वाद् गुण एव स इत्यर्थः। सर्वेषामभ्युपगमं विवृणोति प्रश्नपूर्वम्— **कथमित्यादिना।** अस्माकं क्षेत्रज्ञानामीश्वरैकत्वेऽवगते सति शास्त्रानर्थक्यं भवतु , न तद् दोषायेत्यर्थः। द्वितीयेऽन्यथा ऽप्युपपत्तिमाह— **अविद्याविषये चेति।**

आनन्दगिरिकृतव्याख्या

**ईश्वरत्वे सत्यात्मनोऽसंसारित्वे विधिशास्त्रस्याध्यक्षादेश्चानर्थक्यात् तात्त्विकमेव तस्य संसारित्वमिति शङ्कते—** नन्विति। **विद्यावस्थायामविद्यावस्थायां वा शास्त्रानर्थक्यमिति विकल्प्याऽऽद्यं प्रत्याह—**न, सर्वैरिति। **विदुषो मुक्तस्य संसारतदाधारत्वयोरभावस्य सर्ववादिसम्मतत्वात् तत्र शास्त्रानर्थक्यादि चोद्यं मयैव न प्रतिविधेयमित्यर्थः। संग्रहवाक्यं विवृणोति—**सर्वैरिति। **अभिप्रायाज्ञानात् प्रश्ने स्वाभिप्रायमाह—** कथमित्यादिना। **तर्हि मुक्तान् प्रति विधिशास्त्रस्याध्यक्षादेश्चानर्थक्यमित्याशङ्क्याह—** न चेति। **न हि व्यवहारातीतेषु तेषु गुणदोषाशङ्केत्यर्थः। द्वैतिनां मते [3]मुक्तात्मस्विवास्मत्पक्षेऽपि क्षेत्रज्ञस्येश्वरत्वे तं प्रति च शास्त्राद्यानर्थक्यं विद्यावस्थायामास्थितमिति फलितमाह—** तथेति। **द्वितीयं दूषयति—** अविद्येति। **तदेव दृष्टान्तेन विवृणोति—** यथेति। **एवमद्वैतिनामपि विद्योदयात् प्रागर्थवत्त्वं शास्त्रादेरिति शेषः।**

भाष्यार्कप्रकाशः

अथ संसाराभावप्रसङ्गश्चेति दोषं परिहर्तुमारभतेऽनुवादपूर्वकम्—**नन्वेवमित्यादिना।** [4]**संसारित्वं** संसारः। दोषः स्यादित्यन्त-मनुवादः। नेति परिहार इति विवेकः। तत्र हेतुमाह— **सर्वैरिति**। तस्यार्थमाह— **सर्वैरिति**। देहादन्यः आत्माऽस्तीति वदन्तः आस्तिकाः आत्मवादिनः। संसारः, संसारित्वव्यवहारश्च तयोरभावः। संसारे सति संसारित्वव्यवहारः स्यात् , संसाराभावात् तद्व्यवहाराभावः। एवं संसाराभावादेव तेषां मुक्तत्वव्यवहारः। **तेषां** मुक्तात्मनामित्यर्थः। तेषां शास्त्रानर्थक्यादिकं यद्यपि प्राप्तं, तथापि न तद् दोषतयाऽभ्युपगतम्। न हि शास्त्रादिना मुक्तानां कोऽप्यर्थः, येन मुक्तान् प्रति शास्त्रादेरर्थवत्त्वं स्यात्। आदिपदाद् बन्धमुक्तिव्यवस्थाभावादिर्गृह्यते। **ईश्वरैकत्वे सतीति**। विद्यावस्थायामित्यर्थः। **अर्थवत्त्वमिति**। शास्त्रस्येति शेषः। **एवमिति**। अविद्यावस्थायामेव शास्त्रादेरर्थवत्त्वं, न तु विद्यावस्थायामित्यर्थः। द्वैतमते यथा जीवस्य मुक्तिदशायां शास्त्राद्यानर्थक्यम् , तथा अद्वैतमते जीवस्य विद्यादशायां शास्त्राद्यानर्थक्यम्। द्वैतमते यथा जीवस्य संसारदशायां शास्त्राद्यर्थवत्त्वम् , तथा अद्वैतमते जीवस्याविद्यादशायां शास्त्राद्यर्थवत्त्वमिति तुल्यमिति भावः।

---

१. 'यश्चोभयोः समो दोषः' इति न्यायादिति भावः। 'एवमेते दोषाः साधारणत्वान्नान्यतरस्मिन् पक्षे चोदयितव्या भवन्तीत्यदोषतामेवैषां द्रढयति, अवश्याश्रयि-तव्यत्वात्'(ब्र.सू. २-१-१०) इति भाष्यमनुसंधेयम्। २. साक्षात्कृते इति शेषः। ३. मुक्तात्मस्विति विषयसप्तमी। ४. भाष्ये 'नन्वेवं संसारित्वाभावे' इति पा. भाति।

**नन्वात्मनो बन्धमुक्तावस्थे परमार्थत एव वस्तुभूते द्वैतिनां [१]नः सर्वेषाम् , अतो हेयोपादेयतत्साधनसद्भावे शास्त्रार्थवत्त्वं स्यात्। अद्वैतिनां पुनर्द्वैतस्यापरमार्थत्वादविद्याकृतत्वाद् बन्धावस्थायाश्चात्मनोऽपरमार्थत्वे निर्विषयत्वाच्छास्त्राद्यानर्थक्यमिति चेत्? न ; आत्मनो[२]ऽवस्थाभेदानुपपत्तेः। यदि तावदात्मनो बन्धमुक्तावस्थे, युगपत् स्यातां क्रमेण वा? युगपत्तावद् विरोधान्न सम्भवतः। स्थितिगती इवैकस्मिन्। [३]क्रमभावित्वे च निर्निमित्तत्वेऽनिर्मोक्षप्रसङ्गः,**

अनुभूतिस्वरूपाचार्यटिप्पणम्

न द्वैतवादिभिरद्वैतवादिनां साम्यं भवति, अवस्थाभेदाभावादित्याह— **नन्वात्मनो बन्धमुक्तावस्थे इत्यादिना**। द्वैतवादिनामपि तत्त्वत आत्मनोऽवस्थाभेदो निरूपयितुं न शक्यत इत्याह— **नात्मनोऽवस्थाभेदोऽनुपपत्तेरिति** । क्रमभावित्वपक्षेऽपि निर्निमित्तत्त्वं सनिमित्तत्त्वं वा? आद्ये सदा प्रसङ्गाद् अनिर्मोक्षः स्यात्। द्वितीयं प्रत्याह— **स[अन्य]निमित्तत्वे चेति।**

आनन्दगिरिकृतव्याख्या

**द्वैतिभिरद्वैतिनां न साम्यमिति शङ्कते—** नन्विति। **अवस्थयोर्वस्तुत्वे तन्मते शास्त्राद्यर्थवत्त्वं फलितमाह—** अत इति। **सिद्धान्ते तु नावस्थयोर्वस्तुतेति वैषम्यमाह—** अद्वैतिनामिति। **व्यावहारिकं द्वैतं तन्मतेऽपि स्वीकृतमित्याशङ्क्याह—** अविद्येति। **कल्पितद्वैतेन व्यवहारान्न तस्य वस्तुतेत्यर्थः। बन्धावस्थाया वस्तुत्वाभावे दोषान्तरमाह—** बन्धेति। **आत्मनस्तत्त्वतोऽवस्थाभेदो द्वैतिनामपि नास्तीति परिहरति—** नेति। **अनुपपत्तिं दर्शयितुं विकल्पयति—** यदीति। **तत्राद्यं दूषयति—** युगपदिति। **द्वितीयेऽपि, क्रमभाविन्योरवस्थयोः निर्निमित्तत्वं सनिमित्तत्वं वेति विकल्प्य, आद्ये सदा प्रसङ्गाद् बन्धमोक्षयोरव्यवस्था स्यादित्याह—** क्रमेति। **कल्पान्तरं निरस्यति—**

भाष्यार्कप्रकाशः

द्वैती पुनः पूर्वपक्षयति— **नन्वित्यादिना चेदित्यन्तेन** ग्रन्थेन। सर्वेषां द्वैतवादिनां मते आत्मनो बन्धमुक्तावस्थे परमार्थत एव वस्तुभूते स्तः। परमार्थभूते एव भवत इत्यर्थः। न तु मिथ्याभूते इत्येवकारार्थः। अत एवमात्मनो बन्धमुक्तावस्थयोर्वास्तवत्वात् हेयस्य संसारस्य तद्धेतुकामादिदोषस्य च, उपादेयस्य मोक्षस्य तद्धेतुशमदमज्ञानादेश्च सद्भावे सति शास्त्रादेरर्थवत्त्वं स्यात्। **अपरमार्थत्वात्** मिथ्यात्वात्। आत्मनो बन्धावस्थायाश्चाविद्याकृतत्वाद्धेतोः अरपरमार्थत्वे सति **निर्विषयत्वाद्** विषयाभावाद्, बन्धस्यैवाभावादित्यर्थः; शास्त्रानर्थक्यं स्यादिति। अयं भावः - सर्पस्य सत्यत्वे तत्ताडनदण्डादेरर्थवत्त्वं स्यात् , सर्पस्यैव मिथ्यात्वे किं दण्डादिना? स्वप्नोपलब्धपश्वादेः सत्यत्वे तत्पोषणार्थं तृणाद्याहरणश्रमोऽर्थवान् स्यात् , तस्यैव मिथ्यात्वे किं श्रमेण? मनोरथोपलब्धकान्तायाः सत्यत्वे तद्भोगयाचनादिश्रमोऽर्थवान् स्यात् , तस्या एव मिथ्यात्वे किं याचनादिना? एवं जीवस्य बन्धः सत्यो यदि तन्मोक्षाय गुरुशास्त्रादेरर्थवत्त्वं स्याद् , बन्धस्यैवासत्यत्वे किं गुरुशास्त्रादिना? तस्माद् द्वैतमते शास्त्राद्यर्थवत्त्वमस्ति, न त्वद्वैतमत इति। परिहरति— **नेति**। हेतुमाह— **आत्मन इति। अवस्थाभेदो**ऽवस्थाविशेषो बन्धादिरूपः, तद्वत्त्वस्यानुपपत्तेः। अनुपपत्तिमेव दर्शयति— **यदीति**। यदीति प्रश्नार्थे। तावच्छब्दो निश्चयार्थे। आत्मनो बन्धमुक्तावस्थे तावद् यथार्थतो युगपत् **स्यातां यदि** भवेतां किम् , यद्वा क्रमेण? इति विकल्पः। तावत् तत्र स्थितिगती इव बन्धमोक्षौ युगपदेकस्मिन्नात्मनि न सम्भवतः - गतिनिवृत्तिगमने यथैकस्मिन् पुरुषे युगपन्न सम्भवतः, तथा बन्धमुक्तावस्थे एकस्मिन्नात्मनि युगपन्न सम्भवत इत्यर्थः। तत्र हेतुमाह— **विरोधादिति**। स्थितिगत्योरिव बन्धमोक्षयोः परस्परविरोधात्। न हि विरुद्धार्थयोः सामानाधिकरण्यं यौगपद्येन सम्भवति, शीतोष्णयोः सुखदुःखयोश्च युगपत्सामानाधिकरण्यादर्शनाच्च। इदानीं सुखमनुभवन्नपि पुरुषः क्षणान्तरे वृश्चिकदंशनादिना दुःखमनुभवतीति **युगपदि**त्युक्तम्। एवमिदानीं तिष्ठन्नपि पुरुषः क्षणान्तरे गच्छेदिति **युगपदि**त्युक्तं भाष्येऽपि। तथा इदानीं बद्धस्यात्मनः कालान्तरे मुक्तिः स्यादिति **युगपदि**त्युक्तम्। अथ द्वितीयं विकल्पं दूषयति— **क्रमेति**। क्रमेणात्मनो बन्धमोक्षौ स्त इति पक्षेऽपि किं निर्निमित्तौ भवतः? उत सनिमित्तौ? इति विकल्प्य प्रथमं दूषयति—**निर्निमित्तत्व इति**। यदि निमित्तं विनाऽप्यात्मनः क्रमेण बन्धमोक्षौ स्याताम् , तर्हि मुक्तस्याप्यात्मनो निमित्तं

१. 'नः' इति क्वचिन्न। २. 'अवस्थाभेदवत्त्वानुपपत्तेः' इति पा.। ३. 'क्रमभावित्वे च निर्निमित्तत्वं सनिमित्तत्वं वा' इति पा.।

**अन्यनिमित्तत्वे च स्वतोऽभावादपरमार्थत्वप्रसङ्गः। तथा च सत्यभ्युपगमहानिः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

बन्धमोक्षावस्थे न परमार्थे, औपाधिकत्वात् , स्फटिकलौहित्यवदित्यर्थः।

आनन्दगिरिकृतव्याख्या

अन्येति। **बन्धमोक्षावस्थे न परमार्थे, अस्वाभाविकत्वात् , स्फटिकलौहित्यवदिति स्थिते, फलितमाह—** तथा चेति। [1]**वस्तुत्वमिच्छताऽवस्थयोरवस्तुत्वोपगमादित्यर्थः।**

भाष्यार्कप्रकाशः

विना पुनर्बन्धः स्यादिति मोक्षाभावः स्यादात्मनः। द्वितीयं दूषयति— **अन्यनिमित्तत्व इति**। यद्यात्मनो बन्धमोक्षौ प्रत्यविद्यारागादिकं विद्याशमादिकं वा किञ्चिन्निमित्तमस्ति, तर्हि तेनैव निमित्तेनात्मनो बन्धमोक्षौ भवतः, न तु स्वत इत्यपरमार्थत्वमेव बन्धमोक्षयोरापतितम्। यत् स्वतो नास्ति तद् हि अपरमार्थं वस्त्विति लोकस्थितिः। यथा स्वतोऽविद्यमानरज्जुसर्पशुक्तिरजतादेरपरमार्थत्वम्। न हि रज्जुसर्पादिकं कोऽपि द्वैती सत्यं मन्यते, किन्तु मिथ्याभूतमेव। चक्षुर्गतकाचकामलादिदोषनिमित्तकत्वाद् रज्जुसर्पादेः। सत्यसर्पस्तु न काचादिदोषनिमित्तक इति निर्निमित्त एवेति परमार्थभूत एव। तस्माद् निर्निमित्त एव पदार्थः सत्यः, सनिमित्तस्तु असत्य एव। न च सत्यसर्पोऽप्यज्ञाननिमित्तकत्वात् सनिमित्त एवेत्यसत्य एवेति वाच्यम् ; अद्वैतिमते तथैव, ब्रह्मान्यस्य सर्वस्यापि मिथ्यात्वात्। द्वैतिमते तु सत्यसर्पो नि[र्नि]मित्तत्वेन सत्य इत्यभ्युपगम्यत इति तन्मतानुसारेणेयमुक्तिः। यद्वा अद्वैतिनोऽपि काचादिदोषाप्रयुक्तं सर्पं व्यावहारिकसत्यं मन्यन्ते, रज्जुसर्पं तु दोषप्रयुक्तं व्यवहारतोऽप्यसत्यं मन्यन्त इति तावन्मात्रेणेयमुक्तिः।

ननु भवत्वात्मनो बन्धमोक्षयोरपारमार्थ्यम् , किं ततः? अत आह— **तथा चेति**। बन्धमोक्षयोरपरमार्थत्वे सतीत्यर्थः। **अभ्युपगमहानिः** - बन्धमोक्षौ सत्याविति द्वैतिभिरभ्युपगताविति बन्धमोक्षसत्यत्वाभ्युपगमस्य **हानिः** क्षतिः। स्वमतप्रच्युतिरूपदोष इत्यर्थः।

**ननु** सर्वमपि जगत् सनिमित्तत्वादेव सत्यं, निर्निमित्तस्य गन्धर्वनगरस्वप्नरथादेरसत्यत्वात्। सर्पान्निमित्ताज्जातो हि सर्पः सत्यः। सर्पादजातत्वादेव रज्जुसर्पोऽसत्यः। यस्य कार्यस्य यत्कारणं निमित्तत्वेन प्रसिद्धं तस्मान्निमित्ताज्जातं तद् वस्तु सत्यमिति हि लोकव्यवहारः। न हि निर्निमित्तं वस्तु जगति किञ्चिदप्यस्ति। रज्जुसर्पादयस्तु प्रसिद्धसर्पादिनिमित्तादनुद्भूताः इति, अप्रसिद्धरज्ज्वादिनिमित्तादुद्भूताः इति च असत्याः इत्यभ्युपगम्यन्ते। तस्माद् विपरीतनिमित्तादुद्भूतमेव वस्त्वपरमार्थम् , न तु सनिमित्तं वस्त्विति सनिमित्तौ बन्धमोक्षौ परमार्थावेवेति चेत् , **मैवम्** । 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति श्रुत्या कारणमेव सत्यं, कार्यं तु मिथ्यैव। न हि कारणमृदादिव्यतिरेकेण कार्यस्य घटादेरुपलम्भः। तस्मादनिमित्तं निमित्तमेव वस्तु सत्यम्। अत एव 'ब्रह्म सत्यं जगन्मिथ्या' इत्यद्वैत्यभ्युपगमः। 'तत्सत्यम् , अतोऽन्यदार्तम्' इति श्रुतिश्च। मृदादिवस्तु घटादीन् प्रति निमित्तमपि जलादिजन्यत्वादनिमित्तं न भवतीति नैव सत्यम्। 'मृत्तिकेत्येव सत्यम्' इति तु घटादिविकारदृष्ट्या प्रोक्तम्। एवं सर्वं जगदपि कार्यत्वान्निमित्तं न भवतीत्यसत्यमेव। ब्रह्म तु सर्वस्य निमित्तम् , 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतेः। अकार्यत्वादनिमित्तं च।[2] अत एव हि – 'अजो नित्यः शाश्वतोऽयं पुराणः' इत्यादिसमन्वयः। न हि सनिमित्तं वस्त्वजं स्यात् , न वा नित्यम्। अत एवानादिरात्मेत्याद्यपि सङ्गच्छते। तथा चानिमित्तं निमित्तं वस्तु सत्यमिति लक्षणस्य ब्रह्मण्येव समन्वयादन्यत्राप्रवृत्तेश्चाव्यभिचारित्वं स्थितम्। एवं स्थिते सनिमित्तत्वेन भवदभिमतस्य सर्वस्यापि द्वैतस्यासत्यत्वं दुष्परिहरमेव, किम्पुनर्दुर्निमित्तस्य रज्जुसर्पादेरिति।

ननु भवतु नाम वस्तुतोऽसत्यत्वं जगतः, यावद्व्यवहारं तु तत्सत्यमेव। तथा च सनिमित्तौ बन्धमोक्षौ यावद्व्यवहारं सत्यावेवेति चेत् , नेति को वदेत्? अज्ञानाश्रयो हि बन्धमुक्त्यादिसर्वव्यवहारः, ततश्चाज्ञानदशायामात्मनो बन्धमोक्षौ स्त एव, विद्यावस्थायामेव हि तदभावोऽस्माभिरुच्यते। न चैवमात्मनो बन्धमुक्त्यवस्थावत्त्वं सिद्धमिष्टमिति भ्रमितव्यम् , विद्यावस्थायां तदभावादेव वस्तुतस्तदभाव

१. **वस्तुत्वम्** परमार्थत्वम्। २. एतदनन्तरम् - (निमित्तं यस्य नास्ति तदनिमित्तम्) इति कुण्डलितः पाठो दृश्यते। स टिप्पणरूपः स्यात्।

**किञ्च बन्धमुक्तावस्थयोः पौर्वापर्यनिरूपणायां बन्धावस्था पूर्वं प्रकल्प्या अनादिमती अन्तवती च। तच्च प्रमाणविरुद्धम्। तथा मोक्षावस्था आदिमती अनन्ता च प्रमाणविरुद्धैवाभ्युपगम्यते। न चावस्थावतोऽवस्थान्तरं[1]**

अनुभूतिस्वरूपाचार्यटिप्पणम्

इतश्च न पारमार्थिकमवस्थावत्त्वमित्याह— **किञ्चेति।** यदनादि भावरूपं तन्नित्यम् , यथाऽऽत्मेति व्याप्तिविरुद्ध-मित्यर्थः। यत् सादि भावरूपं तदन्तवत् , यथा घटादि [इति] व्याप्त्यन्तरविरोधमाह— **तथा मोक्षावस्थेति।** किञ्च पूर्वावस्था-परित्यागोत्तरावस्थाव्याप्त्याःसन्तो[स्थावाप्त्योरात्मनो]ऽवश्यमवस्थावतोऽतिशयो वक्तव्यः। तथा च सातिशयत्वादनित्यत्वं

आनन्दगिरिकृतव्याख्या

**इतश्चावस्थयोर्न वस्तुत्वमित्याह—** किञ्चेति। **अवस्थयोर्वस्तुत्वमिच्छता तयोर्यौगपद्यायोगाद् वाच्ये क्रमे बन्धस्य पूर्वत्वं, मुक्तेश्च पाश्चात्त्यमिति स्थिते बन्धस्या[ना]दित्वकृतं दोषमाह—** बन्धेति। **तस्याश्चाकृताभ्यागमकृतविनाशनिवृत्तयेऽनादित्वमेष्टव्यम् , अन्तवत्त्वं च मुक्त्यर्थमास्थेयम् । तच्च यदनादिभावरूपं तन्नित्यं यथाऽऽत्मेति व्याप्तिविरुद्धमित्यर्थः। मोक्षस्य पाश्चात्त्यकृतं दोषमाह—** तथेति। **सा हि ज्ञानादिसाध्यत्वादादिमती पुनरावृत्त्यनङ्गीकारादनन्ता च। तच्च यत् सादिभावरूपं तदन्तवद् यथा पटादीति व्याप्त्यन्तरविरुद्धमित्यर्थः। किञ्च क्रमभाविनीभ्यामवस्थाभ्यामात्मा सम्बध्यते, न वा? प्रथमे पूर्वावस्थया सहैवोत्तरावस्थां गच्छति चेद् , उत्तरावस्थायामपि पूर्वावस्थावस्थानादनिर्मोक्षः, यदि पूर्वावस्थां त्यक्त्वोत्तरावस्थां गच्छति, तदा पूर्वत्यागोत्तराप्त्योरात्मनः सातिशयत्वान्नित्यत्वानुपपत्ति-**

भाष्यार्कप्रकाशः

इति सिद्धत्वात्। तस्मान्नास्त्यात्मनः परमार्थतो बन्धमुक्तावस्थे। अत एव – 'न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः। न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥' इति श्रुतिरुपपद्यते।

यद्येवमात्मनः परमार्थतो बन्धमुक्तावस्थे न स्त इति नाभ्युपगम्यते, तर्ह्यनित्यत्वमप्यात्मनः स्यादित्याह— **किञ्चेति**। बन्धं विना मुक्त्ययोगान्मुक्तिर्बन्धपूर्विका, तस्य च बन्धस्यान्ताभावे मुक्त्ययोगाद् बन्धावस्था सान्ता, आद्यदर्शनादनादिश्च। **तच्चेति**। अनादिः सान्तो बन्ध इति कल्पनं तच्छब्दार्थः। **प्रमाणविरुद्धमिति**। अनादेरनन्तत्वेन भाव्यत्वादिति भावः। सादिरनन्ता च मोक्षावस्थेत्यप्रमा-णमेवेत्याह— **तथेति**। सादेः सान्तत्वेनैव भाव्यत्वादिति भावः। तस्मात् सान्तस्य बन्धस्यानादित्वं, सादेर्मोक्षस्यानन्तत्वं चेत्युभयं प्रमाणविरुद्धमेव। अनादित्वानन्तत्वयोर्वैयधिकरण्यादर्शनात्। यस्यादिरस्ति तस्यान्तोऽप्यवश्यमस्ति। यस्यान्तोऽस्ति तस्यादिरप्यव-श्यमस्ति – 'जातस्य हि ध्रुवो मृत्यु'रित्यादिगीतावचनादनुभवाच्च। आत्मैक एवानादिरनन्तश्च। तदन्यत् सर्वं जगत् सादि सान्तं च।

**ननु** आद्यन्तयोर्वैयधिकरण्यमस्ति, प्रागभावस्यानादित्वात् सान्तत्वाच्च, प्रध्वंसाभावस्य सादित्वादनन्तत्वाच्चेति चेत् , **मैवम्** ; तस्य तार्किकसमयस्याप्रमाणत्वात्। न च अनादिभावत्वे सति ज्ञाननिवर्त्यत्वादज्ञानस्यानादित्वं सान्तत्वं चास्तीति वाच्यम् ; अज्ञानस्यापि सादित्वात् – 'माया चाविद्या च स्वयमेव भवती'ति श्रुतेः। अनादित्ववचनं तु इदमिदानीं जातमिति वक्तुमशक्यत्वा-भिप्रायकम्। यथा अविद्याकार्यस्यापि संसारस्य प्रवाहानादित्वादनादित्वव्यपदेशः। इदं चाज्ञानमात्मन्यध्यस्तत्वादात्मकार्यमेव। यथा जगदविद्यया आत्मन्यध्यस्तं सदात्मकार्यमित्युच्यते। एवं कार्यत्वात् साद्येवाज्ञानमिति तस्य सान्तत्वं युक्तम्। ननु निर्धर्मकस्यात्मनः कर्तृत्वासम्भवादात्मा नाज्ञानं सृजति, जगत्तु सृजत्यज्ञानमात्माश्रयं सत् , अतः कथमविद्यायाः कार्यत्वमिति चेदविद्यां न कोऽपि सृजति, किन्तु सा स्वयमेव भवति – 'माया चाविद्या च स्वयमेव भवती'ति श्रुतेः। तस्मात् सान्तो बन्धः सादिरेव भवितुमर्हति। सादिश्च मोक्षः सान्त एव। न चेष्टापत्तिः, बन्धस्य सादित्वे बन्धात् प्रागसंसारित्वादात्मनः। तदा मोक्षशास्त्राद्यानर्थक्यम्। मोक्षस्य सान्तत्वे पुनर्बन्धप्रसङ्गः; ततश्च (शास्त्रस्य) शास्त्राद्यानर्थक्यम्। नित्यपुरुषार्थं मोक्षं मत्वा हि धनधान्यप्रासादादिकं सर्वमुत्सृज्य मोक्षमार्गे प्रयतते विद्वान् । मोक्षस्यापि स्वर्गादिवदनित्यत्वे व्यर्थोऽयं मोक्षमार्गप्रवृत्तिप्रयास इति न मोक्षशास्त्रे कोऽपि प्रवर्तेतेति।

ननु प्रमाणविरुद्धार्थोऽप्यभ्युपगम्यतां, को दोषस्तत्राह— **न चेति**। अवस्थावतोऽवस्थान्तरं गच्छतः पदार्थस्य नित्यत्वमुप-

१. 'न चावस्थातोऽवस्थान्तरं' इति पा.।

**गच्छतो नित्यत्वमुपपादयितुं शक्यम्। अथानित्यत्वदोषपरिहाराय बन्धमुक्तावस्थाभेदो न कल्प्यते, अतो द्वैतिनामपि शास्त्रानर्थक्यादिदोषोऽपरिहार्य एवेति समानत्वान्नाद्वैतवादिना परिहर्तव्यो दोषः[१]।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

दुर्वारमित्याह— **न चावस्थात इति।** यद्युक्तदोषभीत्या तत्त्वतोऽवस्थावत्त्वं नाङ्गीक्रियते, तदा मदुक्तमेव सिद्धमित्याह— **अथेत्यादिना।**

आनन्दगिरिकृतव्याख्या

**रित्याह—** न चेति। **आत्मनोऽवस्थाद्वयसम्बन्धो नास्तीति द्वितीयमनूद्य दूषयति—** अथेत्यादिना।

भाष्यार्कप्रकाशः

पादयितुं न शक्यम्। घटत्वावस्थावतः कपालत्वावस्थां गच्छतो घटस्य अनित्यत्वदर्शनात्। अवयवित्वावस्थावतो भस्माद्यवस्थां गच्छतः शरीरस्य चानित्यत्वदर्शनात्। एवं बद्धत्वावस्थावतो मुक्तावस्थां गच्छत आत्मनः स्यादेवानित्यत्वम्।

**ननु** [२]सत्कार्यवादेऽवस्थानामेवानित्यत्वम् , अवस्थावतो द्रव्यस्य तु नित्यत्वमेव। मृद्द्रव्यं हि घटत्वकपालत्वचूर्णत्वाद्यवस्थाः अनुभवदपि मृद्रूपेण नित्यमेवास्ति, घटत्वाद्यवस्थास्तु नश्यन्ति, जायन्ते च। अतोऽवस्था एवानित्याः। एवं बद्धमुक्तयन्यतरावस्था-वानात्मा नित्य एव, अवस्थाद्वयेऽप्यात्मन एकस्यैवानुगमात्। बन्धमुक्त्यवस्थे त्वनित्ये, बन्धदशायां मुक्त्यभावाद् , मुक्तिदशायां बन्धाभावाच्च। तस्मादवस्थावतोऽप्यात्मनः स्यादेव नित्यत्वमिति चेत् , **मैवम्** ; असत्कार्यवादस्येव सत्कार्यवादस्यापि दूषितत्वात्। कार्यं पूर्वमसदेव कारकव्यापारेणाविर्भवतीत्यसत्कार्यवादः। यद्यसत एवोत्पत्तिस्तर्हि शशशृङ्गमप्याविर्भवेदिति कृत्वा कार्यं पूर्वं सदेव कारकव्यापारेणाभिव्यज्यत इति सत्कार्यवादः। यदि कार्यं पूर्वमेवास्ति तर्हि कारकव्यापारवैयर्थ्यमेवेति कृत्वा कार्यं न सत् , नाप्यसत् , किन्तु मिथ्यैवेति मिथ्यावादः। एवं स्थिते यदि घटत्वाद्यवस्था घटाद्युत्पत्तेः प्रागेव मृदः सन्ति, तर्हि कुलालव्यापारानर्थक्यं, पिण्डाकारमृद्यपि घटोपलब्धिप्रसङ्गः। यदि प्राक् न सन्ति, तर्हि शशशृङ्गवत् घटस्याप्यनुदयप्रसङ्गः। तस्मान्मृदो घटत्वाद्यवस्था मिथ्याभूता एव। तथा प्रकृतेऽप्यात्मनो बन्धमुक्तावस्थे मिथ्याभूते एव, बन्धात् प्रागेव बन्धसत्त्वे रागादिदोषानर्थक्यप्रसङ्गात् , तदसत्त्वे शशशृङ्गवदनुत्पत्तिप्रसङ्गात् , तथा मुक्तेः प्रागेव मुक्तिसत्त्वे गुरुशास्त्राद्यानर्थक्यप्रसङ्गः, तदसत्त्वे शशशृङ्गवन्मुक्तेरनुत्पत्तिप्रसङ्गः।

**नन्वेवं** मिथ्याकार्यवादेऽप्यवस्था एव मिथ्याभूताः, न तु अवस्थावद् द्रव्यमिति कृत्वा बन्धमुक्त्यवस्थयोरेव मिथ्यात्वम् , आत्मा तु नित्य एव, सत्यत्वात् , मृद्द्रव्यवदिति चेत् , **मैवम्।** अवस्थानां मिथ्यात्वे तद्वतो द्रव्यस्यापि मिथ्यात्वात्। तथाहि— पिण्डाद्यवस्थानापन्नं मृद्द्रव्यं किं सावस्थमुत निरवस्थम्? आद्ये मृद्द्रव्यगतायास्तस्या अपि गन्धवत्त्वाद्यवस्थाया मिथ्यात्वमेव स्याद् अवस्थात्वात् पिण्डाद्यवस्थावत्। द्वितीये निरवस्थं तन्मृद्द्रव्यं किंरूपम्? अनिर्वाच्यमेव। न च मृद्रूपमिति वाच्यम्। मृदि मृत्त्वावस्थायाः सत्त्वेन मृद्रूपं सावस्थमेवेति मृत्त्वावस्थाया अभावे तस्य मृद्रूपत्वस्यैवासिद्धेः। एवं सावस्थादेव मृद्द्रव्यान्मृत्त्वावस्थायाः मिथ्याया[३] अपगमे सति मृद्द्रव्यमेव तावन्न सिध्येदिति मिथ्यैव मृद्द्रव्यम्। न हि घटाद् घटत्वे पृथक्कृते सति घटपदार्थः कश्चिदुपलभ्येत। ननु घटाद् घटत्वेऽपनीते मृदवशिष्यते, मृदो मृत्त्वेऽपनीते तु जलमवशिष्यते, जलजन्यत्वान्मृद इति चेत् , तर्हि तस्मादपि जलात् सावस्थाज्जलत्वावस्थायां मिथ्याभूतायामपनीतायां जलमपि मिथ्यैव भवेत्। किन्तु तेजोरूपेण वर्तेत। एवं तेजआदिष्वपि द्रष्टव्यम्। तथा च सति घटत्वादिवन्मृत्त्वजलत्वादीनामप्यवस्थानां मिथ्यात्वेन मृज्जलादीनामप्यवस्थावतां द्रव्याणां मिथ्यात्वमेव। तेन च यद्यदवस्थावत् तत्तन्मिथ्येति व्याप्तिः सिध्यति। यद्यात्मावस्थावान् स्यात् , तर्हि मिथ्यैव स्यादित्यवस्थावत्त्वेन स्यादनित्यत्वदोष आत्मनः। **अत इति।** आत्मनो बन्धमुक्त्यवस्थाभावादित्यर्थः।

---

१. 'यश्चोभयोः समो दोषः परिहारोऽपि समः। नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे॥' इति न्यायादिति भावः। २. कार्यमुत्पत्तेः प्रागपि कारणात्मना सत् इति वादः सत्कार्यवादः सांख्यादीनाम्। कार्यमुत्पत्तेः प्राग् न केनापि रूपेण सत् इति वादः असत्कार्यवादो नैयायिकादीनाम्। 'तद्धेदं तर्ह्यव्याकृतमासीत्'(बृ.उ. १.४.७) इत्यादिश्रुत्या कार्यस्योत्पत्तेः प्राक् अव्याकृतरूपेण सत्ताङ्गीकारेऽपि तद् रूपमनिर्वचनीयमिति वेदान्तिनः। ३. 'मिथ्याभूतायाः' इति पाठो युक्तः।

**न च शास्त्रानर्थक्यम् , यथाप्रसिद्धाविद्वत्पुरुषविषयत्वाच्छास्त्रस्य। अविदुषां हि फलहेत्वोरनात्मनोरात्मदर्शनम् , न विदुषाम्। विदुषां हि फलहेतुभ्यामात्मनोऽन्यत्वदर्शने सति तयोः 'अह'मित्यात्मदर्शनानुपपत्तेः। न ह्यत्यन्तमूढ उन्मत्तादिरपि जलाग्न्योश्छायाप्रकाशयोर्वा ऐकात्म्यं पश्यति, किमुत विवेकी? तस्मान्न विधिप्रतिषेधशास्त्रं तावत्**

अनुभूतिस्वरूपाचार्यटिप्पणम्

यदुक्तं विद्याविषयेऽर्थवत्त्वमिति, तदिदानीं विवृणोति— **न च शास्त्रानर्थक्यमित्यादिना। फलहेत्वोरिति।** भोक्तृत्वकर्तृत्वयोः देहादृष्टयोर्वा अनात्मनोः भोक्ता, [कर्ता,] मनुष्योऽहमिति आत्मदर्शनं प्रत्यक्षसिद्धमधिकारकारणम्। तस्माद् अविद्वद्विषयमेव विधिप्रतिषेधशास्त्रमित्यर्थः। ननु विदुषामपि 'मनुष्योऽह'मिति व्यवहारदर्शनात् किमिति तद्विषयं शास्त्रं न स्यादित्याशङ्क्याह— **न, विदुषामित्यादिना।** ब्राह्मणत्वादिधर्मविशिष्टाद् विधिप्रतिषेधशास्त्रविषयादात्मनोऽन्यत्वं

आनन्दगिरिकृतव्याख्या

**तर्हि पक्षद्वयेऽपि दोषाविशेषान्नाद्वैतमतानुरागे हेतुरित्याशङ्क्य अविद्याविषये चेत्युक्तं विवृणोति—** न चेति। **तदेव स्फुटयति—** अविदुषां हीति। फलं **भोक्तृत्वम् , कर्तृत्वं** हेतुः। **यद्वा** फलं **देहविशेषः,** हेतुः **अदृष्टम्**[१]। **तयोरनात्मनोः भोक्ताऽहं कर्ताऽहं मनुष्यो ऽहमित्याद्यात्मदर्शनमधिकारकारणम्। तेनाविद्वद्विषयं विधिनिषेधशास्त्रमित्यर्थः। विदुषामपि मनुष्योऽहमित्यादिव्यवहारात् तद्विषयं शास्त्रं किं न स्यादित्याशङ्क्याह—** नेति। **भोक्तृत्वकर्तृत्वाभ्यां, ब्राह्मण्यादिमतो देहाद् , धर्माधर्माभ्यां चात्मनोऽन्यत्वं पश्यतो न विधिनिषेधाधिकारित्वम् , उक्तफलादावात्मीयाभिमानासम्भवादित्यर्थः। आत्मनो देहादेरन्यत्वदर्शिनो न देहादावात्मधीरित्येतदुपपादयति—**न हीति। **विदुषो न विधिनिषेधाधिकारितेत्युक्तमुपसंहरति—**तस्मादिति। **शास्त्रस्याविद्वद्विषयत्वमिव विद्वद्विषयत्वमपि मन्तव्यम् ,**

भाष्यार्कप्रकाशः

ननु तर्हि द्वैतिनामिवाद्वैतिनां मतमपि दोषग्रस्तमेव, शास्त्रानर्थक्यादिति शङ्कायां स्वमते दोषाभावं साधयति— **न चेति**। अद्वैतिमत इति शेषः। शास्त्रानर्थक्यं नास्ति। तत्र हेतुमाह— **यथेति**। यथेत्यस्य तावदित्यर्थः। शास्त्रस्य **प्रसिद्धाविद्वत्पुरुषविषयत्वात्** शास्त्रस्य विधिप्रतिषेधात्मकस्य देहाद्यभिमानित्वेन प्रसिद्धाविद्वत्पुरुषगोचरत्वात्। अविद्वांसः पुरुषा अज्ञानादात्मानं ब्राह्मणं कर्तारं मन्यमानाः स्वर्गादिफलप्राप्तये, नरकाद्यनिष्टनिरासाय च विधिप्रतिषेधशास्त्रेऽधिक्रियन्ते इति नास्मन्मते शास्त्रानर्थक्यमविदुषां शास्त्राधिकारिणां सत्त्वादिति भावः।

ननु शास्त्रस्याविद्वद्विषयत्वं कुतो नियम्यते, विद्वद्विषयत्वमप्यस्तु , अत आह— **अविदुषामिति**। अविदुषामेवानात्मनोः फलहेत्वोरात्मदर्शनं भवति, न तु विदुषामिति। **फलं** देवशरीरादिकं, **हेतुर्**मनुष्यशरीरेन्द्रियादिकं वाङ्मनःकायनिर्वर्त्यत्वाद् वाचिकमानसिककायिककर्मणां, तयोरनात्मनोरात्मदर्शनम् अहमिति बुद्धिः। मनुष्योऽहं , ब्राह्मणोऽहं कर्म करोमि, देवो भूत्वाऽहं स्वर्गमनुभविष्यामीत्यादिप्रतीतेरज्ञानाम्। देहभिन्नात्मदर्शिनां विदुषां तु फलहेत्वोर्नास्त्यात्मबुद्धिः। कुतो नास्ति? अत आह— **न हीति**। अत्यन्तमूढः, **विवेकशून्यत्वं** मूढत्वम् , तद्धि आत्मानात्मगोचरम्। स्वपरविवेकादिशून्यत्वं **त्वत्यन्तमूढत्वम्**। मूढो ह्यात्मानात्मविवेकशून्यत्वात् फलहेत्वोरनात्मनोरात्मनश्चैकत्वं पश्यति। एवमस्यात्मानात्मैकत्वदर्शने आत्मानात्मविवेकशून्यत्वमेव हेतुः। सति तद्विवेके तदेकत्वदर्शनानुपपत्तेः। यथा अत्यन्तमूढ उन्मत्तादिरपि जलाग्न्योः छायाप्रकाशयोर्वा एकात्मतां न पश्यति, कुतः? जलाग्निविवेकस्य छायाप्रकाशविवेकस्य च सत्त्वात् तस्य। इदं जलम् अयमग्निरिति विवेकाभावे तु तदेकत्वं पश्येदेव। न च पश्यत्येवेति वाच्यम् ; तथा सति दर्शने उन्मत्तः पिपासोपशमायाग्निं भक्षयेत्। तापोपशमाय चाग्नौ पतेत्। न त्वेवं दृश्यते। तस्माज्जलाग्न्योश्छायाप्रकाशयोर्वा विवेकवानत्यन्तमूढोऽपि यथा तयोरेकत्वं न पश्यति, तथा आत्मानात्मनोर्विवेकवान् पुरुषः तयोरेकत्वं न पश्यतीति किमु वक्तव्यमित्यर्थः। आत्मानात्मविवेकशून्यो मूढस्तु तयोरेकत्वं पश्येदेव।

**तस्मादिति**। यस्माच्छास्त्रमविवेकिविषयं तस्मादित्यर्थः। यद्वा यस्माच्छास्त्रं फलहेत्वोरात्मदर्शिनो विषयस्तस्मादित्यर्थः।

१. धर्माधर्मावित्यर्थः।

**फलहेतुभ्यामात्मनोऽन्यत्वदर्शिनो भवति। न हि 'देवदत्त ! त्वमिदं कुरु' इति कस्मिंश्चित् कर्मणि नियुक्ते विष्णुमित्रः 'अहं नियुक्तः' इति तत्रस्थो नियोगं शृण्वन्नपि प्रतिपद्यते। नियोगविषयविवेकाग्रहणात् तूपपद्यते प्रतिपत्तिः। तथा फलहेत्वोरपि।**

**ननु प्राकृतसम्बन्धापेक्षया युक्तैव प्रतिपत्तिः शास्त्रार्थविषया, फलहेतुभ्यामन्यात्मत्वदर्शनेऽपि सति—**

अनुभूतिस्वरूपाचार्यटिप्पणम्

पश्यतो न विधिप्रतिषेधाधिकारत्वमित्यत्र दृष्टान्तमाह— **न हि देवदत्तेत्यादिना**। यदा तु विधिविषयो विवेको न गृह्यते, तदा घटते विधिप्रतिपत्तिरित्याह— **नियोगविषयेति**।

यथा पुत्रविषयप्रायश्चित्तनियोगप्रतिपत्तिः पितुः अन्यत्र[न्यत्व]दर्शनेऽपि दृश्यते, तथा(पि) विवेकिनोऽपि भविष्यतीत्याह— **ननु प्राकृतेति**। प्रकृतेर्जातः **प्राकृतः**। अनाद्यविद्याकृतदेहादिसम्बन्धेनेत्यर्थः। पित्रादीनां पुत्राभिमानाद्

आनन्दगिरिकृतव्याख्या

**उभयोरपि शास्त्रश्रवणाविशेषादित्याशङ्क्याह—**न हीति। तत्रस्थो **यस्मिन् देशे देवदत्तः स्थितस्तत्रैव वर्तमानः सन्नित्यर्थः। ननु देवदत्ते नियुक्ते विष्णुमित्रोऽपि कदाचिन्नियुक्तोऽस्मीति प्रतिपद्यते। सत्यम् , नियोगविषयाद् नियोज्यादात्मनो विवेकाग्रहणाद् नियोज्यत्व-भ्रान्तेरित्याह—** नियोगेति। **अविवेकिनो नियोगधीर्भवतीति दृष्टान्तमुक्त्वा, फले हेतौ चात्मदृष्टिविशिष्टस्याविदुषः सम्भवत्येव विधि-निषेधाधिकारित्वमिति दार्ष्टान्तिकमाह—** तथेति।

**विधिनिषेधशास्त्रमविद्वद्विषयमिति वदता शास्त्रानर्थक्यं समाहितम्। सम्प्रति शास्त्रस्य विद्वद्विषयत्वेनैवार्थवत्त्वं शक्यसमर्थनमिति शङ्कते—** नन्विति। प्रकृतिः **अविद्या, ततो जातो यो देहादावभिमानात्मा[१] सम्बन्धो विद्योदयात् प्रागनुभूतः, तदपेक्षया 'विधिना प्रवर्तितोऽस्मि' 'निषेधेन निवर्तितोऽस्मी'ति विधिनिषेधविषया सत्यामपि विद्यायां धीर्युक्तैवेत्यर्थः। विदुषोऽपि पूर्वमाविद्यं सम्बन्धमपेक्ष्य**

भाष्यार्कप्रकाशः

फलहेतुभ्यामिति पञ्चमी। 'यजेते'त्यादि विधिशास्त्रं, 'न परदारान् गच्छेदि'त्यादि प्रतिषेधशास्त्रं, तदुभयमप्यनात्मभ्यो विविच्यात्मानं यः पश्यति, तस्य न भवति। कुतो न भवतीत्यतो दृष्टान्तमाह— **न हीति। नियुक्त इति**। यज्ञदत्तेन नियुक्ते सति देवदत्त इत्यर्थः। तत्रस्थो विष्णुमित्रः नियोगं शृण्वन् 'अहं नियुक्त' इति नैव **प्रतिपद्यते** मन्यते। यद्वा शृण्वन्नपि नियोगं **न प्रतिपद्यते** न प्राप्नोति। यज्ञदत्तेन देवदत्ताय नियुक्तं जलाहरणादिकं कर्म विष्णुमित्रः सन्निहितोऽपि न करोति। तन्नियोगस्य देवदत्तविषयत्वेन स्वविषयत्वाभावात्। यदि विष्णुमित्रस्य 'किं देवदत्तोऽस्मिन् कर्मणि नियुक्तः उताहम्' इति संशयस्तदा नियोगविषयविवेकज्ञानाभावाद् विष्णुमित्रस्य देवदत्तकर्मणि प्रवृत्तिरुपपद्यते। **प्रतिपत्तिः** नियोगप्राप्तिः, नियुक्तकर्मणि प्रवृत्तिरिति यावत्। अथवा प्रतिपत्तिः अहमत्र नियुक्त इति ज्ञानमुपपद्यते। **तथा** यथा नियोगविषयविवेकाग्रहणाद् देवदत्तेन कर्तव्ये कर्मणि विष्णुमित्रस्य प्रवृत्तिस्तथेत्यर्थः। फलहेत्वोरनात्मनोः आत्मनश्च यस्य नास्ति विवेकस्तस्यैव विधिप्रतिषेधशास्त्रानुसारेण कर्मसु प्रवृत्तिरुपपद्यत इत्यर्थः। यद्वा देवदत्तनियोगे विष्णुमित्रस्य स्वनियोग इति भ्रमाद् यथा प्रवृत्तिः,(न) तथा फलहेत्वोरनात्मनोरात्मेति भ्रमात् कर्मसु प्रवृत्तिरविदुषामिति।

ननु फलहेतुभ्यामात्मनोऽन्यत्वदर्शने सत्यपि विदुषां प्राकृतसम्बन्धापेक्षया शास्त्रार्थविषया प्रतिपत्तिर्युक्तैव, देहान्यात्मदर्शि-नामपि देहे ज्वरग्रस्ते सति तापोपलम्भात्। अस्ति हि देहे देहिनः **प्राकृतः सम्बन्धः** प्रकृतेर्जातो ममाभिमानरूपः। यथा गृहे गृहिणः, गृहे दग्धे सति गृहाद् भिन्नस्यापि गृहिणो दाहदुःखाद्युपलम्भः, तद्वत् प्रकृतेऽपि। इममेव प्राकृतसम्बन्धमपेक्ष्य विद्वानपीष्टफलहेतौ प्रवर्तितोऽस्मीति, अनिष्टफलहेतोः निवर्तितोऽस्मीति च मन्यमान इष्टे प्रवर्तते, अनिष्टान्निवर्तते। देहसौख्येनात्मसौख्यस्य देहासौख्येनात्मासौख्यस्य चानुभवात्। तथैव स्वर्गे कमपि दिव्यं देहमाश्रित्य सुखमनुभविष्यामीति, यातनादेहाश्रयणप्रयुक्तं दुःखं मम मा भूदिति च प्रतिपद्य विहितं करोति, अविहितं च परित्यजतीति विदुषामपि विहिताविहितपरिज्ञानार्थं शास्त्रमावश्यकमेव। ततश्च

१. अध्यासात्मक इत्यर्थः।

**'इष्टफलहेतौ प्रवर्तितोऽस्मि', 'अनिष्टफलहेतोश्च निवर्तितोऽस्मी'ति। यथा पितृपुत्रादीनामितरेतरात्मान्यत्वदर्शने सत्यपि अन्योन्यनियोगप्रतिषेधार्थप्रतिपत्तिः। न ; व्यतिरिक्तात्मदर्शनप्रतिपत्तेः प्रागेव फलहेत्वोरात्माभिमानस्य सिद्धत्वात्। प्रतिपन्ननियोगप्रतिषेधार्थो हि फलहेतुभ्यामात्मनोऽन्यत्वं प्रतिपद्यते, न पूर्वम्। तस्माद् विधिप्रतिषेध-शास्त्रम् अविद्वद्विषयमिति सिद्धम्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

घटते अन्योन्यनियोगप्रतिपत्तिः, तत्त्वदर्शिनः पुनः देहादिषु मिथ्याभिमानाभावाद् न देहादिविषयनियोगप्रतिपत्तिरित्याह— **न, व्यतिरिक्तात्मनेति**। किञ्च सम्यग्दर्शनस्यादृष्टासाध्यत्वाद् विधिप्रतिषेधशास्त्रानुष्ठानं सम्यग्दर्शनात् पूर्वमित्याह— **प्रतिपन्ननियोगे(ने)ति**।

आनन्दगिरिकृतव्याख्या

**विधिनिषेधविषयां धियमुक्तामेव व्यक्तीकरोति—** इष्टेति। **नन्वविदुषो मिथ्याभिमानवन्न विदुषः सोऽनुवर्तते, तथा च आविद्यसम्बन्धापेक्षया न युक्ता विदुषो यथोक्ता धीरिति, तत्राह—** यथेति। **पिता पुत्रो भ्रातेत्यादीनां मिथोऽन्यत्वदृष्टावप्यन्योन्यनियोगार्थस्य निषेधार्थस्य च धीर्दृष्टा। पितरमधिकृत्य विधौ निषेधे वा तस्य तदनुष्ठानाशक्तौ पुत्रस्य तद्विषया धीरिष्टा, 'अथातः सम्प्रत्तिर्यदा प्रैष्यन् मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोकः' इत्यादिसम्प्रत्तिश्रुत्या शेषानुष्ठानस्य पुत्रकार्यताप्रतिपादनात्। पुत्रं चाधिकृत्य विधिनिषेधप्रवृत्तौ तस्य तदशक्तौ पितुस्तदर्था धीरुपगता, तथा भ्रात्रादिष्वपि द्रष्टव्यम्। एवं विदुषो हेतुफलाभ्यामन्यत्वदर्शनेऽपि प्राक्कालीनाविद्यदेहादिसम्बन्धादविरुद्धा विधिनिषेधार्था धीरित्यर्थः। पुत्रादीनां मिथ्याभिमानान्मिथो नियोगधीर्युक्ता, तत्त्वदर्शिनस्तु तदभावान्न देहादिसम्बन्धाधीना नियोगधीरिति परिहरति—** नेत्यादिना। **किञ्च 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' इति सर्वापेक्षाधिकरणे सम्यग्ज्ञानस्यादृष्टसाध्यत्वोक्तेर्विधिनिषेधार्थानुष्ठानं सम्यग्ज्ञानात्पूर्वमिति कुतो विदुषस्तदनुष्ठानमित्याह—** प्रतिपन्नेति। **सत्यदृष्टे सम्यग्धीदृष्टेरसति चाशुद्धबुद्धेस्तदभावादन्वयव्यतिरेकाभ्यां, विविदिषावाक्याच्च विधिनिषेधानुष्ठानात्पूर्वं न सम्यग्धीरित्याह—**न पूर्वमिति। **विधिनिषेधयोर्विद्वद्विषयत्वायोगे फलितमाह—** तस्मादिति।

भाष्यार्कप्रकाशः

विद्वद्विषयत्वमपि शास्त्रस्य सम्भवेदेव। तत्र दृष्टान्तमाह— **यथेति**। पितुरन्यः पुत्रोऽहमिति, पुत्रादन्यः पिताऽहमिति ज्ञाने सत्यपि, पितुर्नियोगे पुत्रः प्रवर्तते तस्य सुखादिसम्पादनार्थं, पिता च पुत्रमविहितात् प्रतिषेधति पुत्रस्य नरकदुःखाद्यभावार्थं, तद्वदिति। पितृपुत्रयोः इतरेतरात्मान्यत्वदर्शिनोरपि ममाभिमानलक्षणप्राकृतसम्बन्धापेक्षया परस्परनियोगप्रतिषेधार्था प्रतिपत्तिर्यथोपपद्यते, तथा आत्मा-नात्मनोः इतरेतरभिन्नत्वदर्शने सत्यपि प्राकृतसंबन्धस्यापेक्षया विधिप्रतिषेधार्था प्रवृ[प्रतिप]त्तिरुपपद्यत इति भावः। इतरस्मादितरस्यात्माऽहमन्य इति दर्शनमितरेतरात्मान्यत्वदर्शनम्। आत्मनोऽन्यत्वम् आत्मान्यत्वम् , इतरस्यात्मान्यत्वम् इतरात्मान्यत्वम् , इतरस्मादितरात्मान्यत्वम् इतरेतरात्मान्यत्वमिति समासः। **इतरस्मात्** पित्रादेः, **इतरस्य** पुत्रादेरित्यर्थः। अन्योन्यस्य नियोगप्रतिषेधावर्थौ यस्याः सा अन्योन्यनियोगप्रतिषेधार्था। प्रतिपत्तिर्ज्ञानं, प्रवृत्तिरिति यावत्।

**ननु** पितुरन्योऽहं पुत्रः इति ज्ञानवान् पुत्रः पित्रर्थमात्मार्थं नियोगप्रतिषेधौ प्रतिपद्यतां नाम, ममायं जनकः इति प्राकृतसम्बन्धात्। देहादन्योऽहमिति ज्ञानवांस्तु देहार्थमात्मार्थं वा न विधिनिषेधयोः प्रतिपत्तिं भजते, देहस्येहैव नाशाद् आत्मनश्चासङ्गाविक्रियत्वादिति चेत् , **मैवम्** ; देहादन्योऽहमिति ज्ञानवानपि देहो ममेति प्राकृतसम्बन्धादेतद्देहे वर्तमानः कर्म कुर्यादेव, स्वर्गे मम कश्चिद्दिव्यदेहः स्यादित्यात्मार्थमेव, मम क्षुद्रदेहो मा भूदिति निषिद्धाचरणाच्च निवर्तत इति। विवेकिनां फलहेत्वोरनात्मनो-रात्मबुद्ध्यभावेऽप्यात्मीयबुद्धिसत्त्वाच्छास्त्रार्थविषयप्रवृत्तिरुपपद्यत एवेति पूर्वपक्षाशयः। परिहरति—**नेति**। हेतुमाह— **व्यतिरिक्तेति**। **व्यतिरिक्तस्य** देहादिभिन्नस्यात्मनो **दर्शनं** ज्ञानं तस्य **प्रतिपत्तेः** प्राप्तेः **प्रागेव** देहाद् भिन्नोऽहमात्मेति ज्ञानोदयात् पूर्वमेवेत्यर्थः। फलहेत्वोरात्माभिमानस्य सिद्धत्वात्। प्रतिपन्ननियोगप्रतिषेधार्थं फलहेतुभ्यामन्यत्वमात्मनः प्रतिपद्यते। न तु नियोगप्रतिषेधप्रतिपत्तेः पूर्वमेव फलहेतुभ्यामात्मनोऽन्यत्वं प्रतिपद्यत इति।

**ननु 'स्वर्गकामो यजेत', 'कलञ्जं न भक्षयेदि'त्यादावात्मव्यतिरेकदर्शिनामप्रवृत्तौ केवलदेहाद्यात्मदृष्टीनां च,**

अनुभूतिस्वरूपाचार्यटिप्पणम्

अविद्वद्विषयत्वमेवाक्षेपसमाधानपूर्वकं स्पष्टयति— **ननु स्वर्गकाम इत्यादिना।** किञ्च विवेकिनां यत्राप्रतिप[प्रवृ]त्तिः

आनन्दगिरिकृतव्याख्या

**शास्त्रस्याविद्वद्विषयत्वेनोक्तमर्थवत्त्वमाक्षेपसमाधिभ्यां प्रपञ्चयितुमाक्षिपति—** नन्विति। **चकारादूर्ध्वम् अप्रवृत्तिरिति सम्बध्यते।**

भाष्यार्कप्रकाशः

**अयमर्थः**—अनादिकालादारभ्य फलहेत्वोरात्मेत्यभिमानस्तावत् सिद्धः प्राणिनाम्। तेनैवाभिमानेन नियोगप्रतिषेधौ प्रतिपद्यते 'ब्राह्मणोऽहं स्नानसन्ध्यादेवार्चनादिषु नियुक्तः शास्त्रेणेश्वरेण वा, मद्यपानादिभ्यश्च प्रतिषिद्धः' इति विहिते कर्मणि प्रवर्तते, निषिद्धात्तु निवर्तते। एवं प्रतिपद्य पश्चाच्चिन्तयति विवेकी 'यदि देह एवाहं, तर्हि देहस्येहैव नाशाद्व्यर्थेयं प्रवृत्तिर्विहिते, निषिद्धाच्च निवृत्ति'रिति। ततश्च शास्त्रप्रामाण्यादास्तिकोऽयं देहादन्यमात्मानं मन्यते। इदं चास्य देहाद् भिन्नात्मज्ञानं स्वप्रतिपन्ननियोग-प्रतिषेधसिद्ध्यर्थमेव। देहाद् भिन्नस्यात्मनः सत्त्वादिहानुष्ठितकर्मफलं परलोके आत्मना भुज्यत इति निश्चयेन स्वप्रतिपन्ननियोग-प्रतिषेधयोर्निर्वर्तनात्। तस्माद् देहाद् भिन्नः कर्ता भोक्ता चात्माऽस्तीत्येवंरूपम् अज्ञस्य कर्मणि प्रवृत्तस्य यज्ज्ञानं तत् स्वाचर्यमाण-कर्मनिर्वर्तनार्थमेव, न तु मोक्षार्थम्। यद्ययं कर्मणि प्रवृत्तेः प्रागेव देहाद् भिन्नमात्मानं मनुयात् तर्हि कर्मणि नैव प्रवर्तेत, स्वस्मिन् कर्तृत्वभोक्तृत्वनिश्चयानुदयात् तस्य। ततश्च देहादावात्माभिमानात् कर्मणि प्रवृत्तस्य देहविलक्षणात्मज्ञाने पश्चाज्जातेऽपि तज्ज्ञानं स्वानुष्ठीयमानकर्मफलभोक्त्रात्मसम्पादनद्वारा कर्मनिर्वर्तनार्थकमेव, न तु कर्मसंन्यासार्थकमिति स्थितम्।

**नन्वेतेन** प्रकृतप्रश्नस्य किमुत्तरमायातमिति चेद्? **उच्यते**— यस्याज्ञस्य देहादौ अहमित्यभिमानः, तस्यैव कर्मणि प्रवृत्तस्य देहान्यात्मदर्शने सति देहादौ ममेत्यभिमानः, कर्ताऽहं भोक्ताऽहमित्यभिमानश्च। तथा च देहभिन्नात्मदर्श्यप्ययं कर्तृत्वाद्यभिमान-सद्भावादज्ञ एव। यस्तु कर्मण्यप्रवृत्तो देहान्यात्मदर्शी, यश्च कर्मणि प्रवृत्तोऽपि देहान्याकर्त्रभोक्त्रात्मदर्शी, स विद्वान् देहादिकं तदाश्रयं कर्म तत्फलादिकं वा ममत्वेन न पश्यति, असङ्गत्वादकर्तृत्वादभोक्तृत्वान्निर्विकारत्वाच्चात्मनः। तस्मात् प्राकृतसम्बन्धापेक्षया शास्त्रार्थ-विषयप्रतिपत्तिर्देहभिन्नात्मदर्शिनोऽपि कर्तृभोक्त्रात्मदर्शिनो देहादिसम्बन्ध्यात्मदर्शिनश्चाज्ञस्यैव भवति। न त्वकर्त्रभोक्त्रसङ्गात्मदर्शिनः प्राज्ञस्य, तस्य देहादौ ममाभिमानस्याप्यभावात्। न देहादिभिर्विदुषः प्राकृतोऽपि सम्बन्धगन्धः कश्चिदस्ति। अज्ञानकृतो हि प्राकृतः सम्बन्धः।

**तस्मादिति**। यस्माद् देहादौ अहम्ममाभिमानवतः कर्तृभोक्त्रात्मदर्शिन एव शास्त्रं प्रवर्तकं, निवर्तकं च, न तु देहादावहम्ममाभिमानरहितस्यासङ्गाकर्त्रभोक्त्रात्मदर्शिनस्तस्मादित्यर्थः। **अविद्वांसो**ऽविद्यावन्तः। अनात्मसु देहादिष्वहम्ममाभिमान-हेतुरज्ञानमविद्या। अविद्याकार्यत्वात् तदभिमानोऽप्यविद्यैव। अविद्वांसो विषयः शास्त्रार्थप्रतिपत्त्यर्हत्वेन गोचरो यस्य तदविद्वद्विषयम्। अविद्वदधिकारिकमिति यावत्। न च - विधिप्रतिषेधशास्त्रस्यार्थवत्त्वेऽप्यविद्वद्विषयत्वेन, मोक्षशास्त्रं तु व्यर्थमेव , तत्राविदुषामप्यधि-काराभावादिति - वाच्यम् ; अविद्वांसो ह्यात्मानं संसारिणं बद्धं मन्यमानास्तन्मोचनाय गुरोः सकाशाच्छास्त्रमधिगत्य शमदमादिसम्पादनद्वारा ज्ञानं सम्पाद्य मुच्यन्त इति न मोक्षशास्त्रस्याप्यनर्थकत्वं, तस्याप्यविद्वद्विषयत्वात्। तस्मात् सर्वाण्यपि विधिप्रतिषेधमोक्षशास्त्राणि अविद्वद्विषयाण्येव। तत्र विधिप्रतिषेधशास्त्रं सकामाज्ञविषयं, मोक्षशास्त्रं तु निष्कामाज्ञविषयमिति विवेकः। न च मोक्षकामिविषयमिति वाच्यम् ; मोक्षकामस्य कामाभावरूपत्वात्। निष्कामो हि मुमुक्षुः। यः पुंसां बन्धहेतुः स एव कामो, न त्वन्य इति सिद्धान्तात्।

ननु 'कर्ता शास्त्रार्थवत्त्वादि'ति व्यासेन शास्त्रस्यार्थवत्त्वं साधितं कर्तुः सत्त्वात्। प्रकृते तु कर्तुरभावाच्छास्त्रं व्यर्थमेवे-त्यापतितम्। अतः सूत्रविरोध इत्याक्षिपति— **नन्विति**। शास्त्रार्थयज्ञाद्यनुष्ठाने अज्ञा न प्रवर्तन्ते, तेषां देहात्मवादित्वाद् , देहस्य चेहैव नाशात् , स्वर्गादिफलभोक्तुरभावाद् , देहस्यैव कर्तृत्वाद् व्यर्थं कर्मानुष्ठानमिति दृष्ट्या। तथा प्राज्ञा अपि न प्रवर्तन्ते, देहव्यतिरिक्ताकर्त्र-

**अतः कर्तुरभावाच्छास्त्रानर्थक्यमिति चेत्? न ; यथाप्रसिद्धित एव प्रवृत्तिनिवृत्त्युपपत्तेः। ईश्वरक्षेत्रज्ञैकत्वदर्शी ब्रह्मवित् तावन्न प्रवर्तते। तथा नैरात्म्यवाद्यपि 'नास्ति परलोकः' इति न प्रवर्तते। यथाप्रसिद्धितस्तु विधिप्रतिषेधशास्त्रश्रवणान्यथानुपपत्त्याऽनुमितात्मास्तित्वः आत्मविशेषानभिज्ञः कर्मफलसञ्जाततृष्णः श्रद्दधानतया च प्रवर्तत इति सर्वेषां नः प्रत्यक्षम्। अतो न शास्त्रानर्थक्यम्। विवेकिनामप्रवृत्तिदर्शनात् तदनुगामिनामप्रवृत्तौ शास्त्रानर्थक्यमिति चेत्? न ;**

आनन्दगिरिकृतव्याख्या

**आत्मनो देहाद् व्यतिरेकं पश्यतां देहाद्यभिमानरूपाधिकारहेत्वभावाद् विधितो यागादावप्रवृत्तिः, निषेधाच्चाभक्ष्यभक्षणादेर्न निवृत्तिः, अतस्तेषां प्रवृत्तिनिवृत्त्योरभावे देहादावात्मत्वमनुभवतामपि न ते युक्ते, तेषां पारलौकिकभोक्तृप्रतिपत्त्यभावादित्यर्थः। विदुषामविदुषां च प्रवृत्तिनिवृत्त्यभावे फलितमाह—** अत इति। **आत्मनो देहाद्यतिरेकं परोक्षम् , अपरोक्षं च देहाद्यात्मत्वं पश्यतः शास्त्रानुरोधादेव प्रवृत्तिनिवृत्त्युपपत्तेर्न शास्त्रानर्थक्यमित्युत्तरमाह—** नेत्यादिना। **प्रसिद्धिरत्र शास्त्रीयाऽभिमता। एतदेव विवृण्वन् ब्रह्मविदो वा, नैरात्म्यवादिनो वा, परोक्षज्ञानवतो वा प्रवृत्तिनिवृत्ती विवक्षसीति विकल्प्याऽऽद्यं दूषयति—** ईश्वरेति। **न निवर्तते चेत्यपि द्रष्टव्यम्। द्वितीयं निरस्यति—** तथेति। **पूर्ववदत्रापि सम्बन्धः। तृतीयमङ्गीकरोति—** यथेति। **विधिनिषेधाधीनां प्रसिद्धिमनुरुन्धानः सन्निति यावत्। चकाराद् निवर्तते चेत्यनुकृष्यते। ब्रह्मविदं नैरात्म्यवादिनं च त्यक्त्वा, देहाद्यतिरिक्तमात्मानं परोक्षम् , अपरोक्षं च देहाद्यात्मत्वं पश्यतो विधिनिषेधाधिकारित्वे सिद्धे फलमाह—** अत इति। **विधान्तरेण शास्त्रार्थानर्थक्यं चोदयति—** विवेकिनामिति। **दृष्टा हि तेषां विधिनिषेधयोरप्रवृत्तिः। न हि देहादिभ्यो निष्कृष्टमात्मानं दृष्टवतां तयोरधिकारः। तेन तान् प्रति शास्त्रं नार्थवत्। न च देहाद्यात्मत्वदृशः तत्राधिक्रियन्ते, तेषां 'यद्यदाचरती'ति न्यायेन विवेकिनोऽनुगच्छतां विध्यादावप्रवृत्तेः। अतोऽधिकार्यभावाद् विध्यादिशास्त्रस्य**

भाष्यार्कप्रकाशः

भोक्त्रात्मदर्शित्वात् तेषाम्। तस्मात् 'स्वर्गकामो यजेते'त्यादिविधिशास्त्रं, 'न कलञ्जं भक्षयेदि'त्यादिप्रतिषेधशास्त्रं च व्यर्थमेव, शास्त्रार्थानुष्ठातुरभावादित्यर्थः। **देहात्मदृष्टीनां चे**त्यनन्तरम् अप्रवृत्ताविति शेषः। यद्वा 'इत्यादौ आत्मव्यतिरेकदर्शिनां, केवलं देहात्मदृष्टीनां चाप्रवृत्ता'वित्यन्वयः। **अत इति**। अज्ञानां विज्ञानां च शास्त्रार्थानुष्ठानाप्रवृत्तेरित्यर्थः। **कर्तुः** शास्त्रार्थानुष्ठातुः। कर्तुरभावे - त्वमेवं कुरु, त्वमेवं मा कुरु - इति शासनस्य व्यर्थत्वादिति भावः। परिहरति— **नेति**। यथाप्रसिद्धे पूर्वोक्तरीत्या देहादन्य आत्मा कर्ता भोक्ता चास्तीति ज्ञानवत्त्वेन प्रसिद्धे पुरुष एव प्रवृत्तिनिवृत्त्योरुपपत्तेः। संग्रहोक्तं वाक्यमेव विवृणोति— **ईश्वरेति**। ईश्वरक्षेत्रज्ञयोरेकत्वं द्रष्टुं शीलमस्येति ईश्वरक्षेत्रज्ञैकत्वदर्शी ब्रह्मवित् , कर्मणीति शेषः। **तावन्न प्रवर्तते** नैव प्रवर्तते। **नैरात्म्यवादी** शून्यवादी, देहात्मवादीति यावत्। बौद्धादिर्नास्तिक इति भावः। परलोको नास्तीति बुद्ध्या कर्मणि न प्रवर्तते। उभयातिरिक्तः कर्मितया प्रसिद्ध आस्तिकस्तु वैदिकः शास्त्रप्रामाण्यनिश्चयाद् विधिप्रतिषेधशास्त्रस्यान्यथानुपपत्त्या देहातिरिक्तस्य कर्तुरात्मनोऽभावे प्रामाण्यानुपपत्त्या हेतुना **अनुमितात्मास्तित्वः** अनुमितमात्मास्तित्वं येन स तथोक्तः। देहातिरिक्तः कश्चिदात्माऽस्ति कर्ता भोक्ता च, शास्त्रप्रामाण्यस्यान्यथानुपपत्तेरित्यनुमानेनैवात्मानं ज्ञातवानित्यर्थः। अत एव **आत्मविशेषानभिज्ञः** अकर्त्रभोक्तृसच्चिदानन्दलक्षणः आत्मेत्येवं विशेषाकारेण आत्मानं नाभिजानातीत्यर्थः। अत एवात्मनो भोक्तृत्वभ्रमात् कर्मफले स्वर्गादौ सञ्जाता **तृष्णा**ऽभिलाषो यस्य स तथोक्तः। एवंविधः पुरुषः श्रद्दधानःसन् कर्मणि प्रवर्तत इत्येतत् सर्वेषां नः प्रत्यक्षमनुभवसिद्धम्। **अत इति**। देहातिरिक्तकर्तृभोक्त्रात्मवादिनः कर्मिणोऽज्ञस्य सत्त्वात् कर्तुरित्यर्थः। **शास्त्रानर्थक्यं न**। उक्तलक्षणं कर्तारमुपलभ्यैव 'कर्ता शास्त्रार्थवत्त्वादि'त्युक्तं व्यासेनेति न सूत्रविरोधः[1]। नापि शास्त्रानर्थक्यदोषोऽस्माकमिति भावः।

नन्वेवंविधस्य कर्तुर्दुर्लभत्वाच्छास्त्रस्यानर्थक्यमेवेत्याक्षिपति— **विवेकिनामिति**। विवेकिनां ब्रह्मविदां कर्मणि प्रवृत्त्यदर्शनात्। 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरे जनाः' इति न्यायेनाविवेकिनामपि विवेक्यनुसारिणां कर्मण्यप्रवृत्तौ सत्यां शास्त्रानर्थक्यम् , यथाप्रसिद्धस्य

१. अत एव 'कर्ता शास्त्रार्थवत्त्वात्' (ब्र.सू. २.३.३२) इत्येतदधिकरणव्युत्पादितस्यात्मनः कर्तृत्वस्यौपाधिकत्वं 'यथा च तक्षोभयथा' (ब्र.सू. २.३.४०) इति तदुत्तराधिकरणे व्यवस्थापितम्।

**कस्यचिदेव विवेकोपपत्तेः। अनेकेषु हि प्राणिषु कश्चिदेव विवेकी स्याद् , यथेदानीम्। न च विवेकिनमनुवर्तन्ते मूढाः, रागादिदोषतन्त्रत्वात् प्रवृत्तेः। अभिचरणादौ च प्रवृत्तिदर्शनात्। स्वाभाव्याच्च प्रवृत्तेः। 'स्वभावस्तु प्रवर्तते' (भ.गी. ५.१४) इति ह्युक्तम्। तस्मादविद्यामात्रं[1] संसारो यथादृष्टविषय एव। न क्षेत्रज्ञस्य केवलस्याविद्या, तत्कार्यं च। न च**

अनुभूतिस्वरूपाचार्यटिप्पणम्

तत्रेतरे न प्रवर्तन्त इत्यशक्यं वक्तुम्। 'श्येनेनाभिचरन् यजेते'त्यादौ प्रवृत्तिदर्शनादित्याह— **अभिचरणादौ चेति**। इतश्च [न] विवेकिनामप्रवृत्तिदर्शनादज्ञस्य प्रवृत्त्यभाव इत्याह— **स्वाभाव्याच्चेति**। अज्ञानां प्रवृत्तेः स्वाभाविकत्वाद् न यावदज्ञान-

आनन्दगिरिकृतव्याख्या

**तदनुसारिशिष्टाचारस्य चानर्थक्यमित्यर्थः। किं सर्वेषां विवेकित्वादधिकार्यभावादानर्थक्यं शास्त्रस्योच्यते? किंवा कस्यचिदेव विवेकित्वेऽपि तदनुवर्तित्वादन्येषामप्रवृत्तेरानर्थक्यं चोद्यते? तत्र प्रथमं प्रत्याह—** न, कस्यचिदिति। **'मनुष्याणां सहस्रेष्वि'ति न्यायेनोक्तमेव स्फुटयति** —अनेकेष्विति। **तत्रानुभवानुरोधेन दृष्टान्तमाह—** यथेति। **द्वितीयं दूषयति—** न चेति। **किञ्च विवेकिनामप्रवृत्तावन्येषामप्यप्रवृत्ति-रित्याशङ्कां निरसितुं श्येनादौ तदप्रवृत्तावपीतरप्रवृत्तेरित्याह—** अभिचरणादौ चेति। **अविवेकिनां रागादिद्वारा प्रवृत्त्यास्पदं सर्वं संग्रहीतुमादिपदम्। इतश्च विवेकिनां प्रवृत्त्यभावेऽपि नाज्ञस्याप्रवृत्तिरित्याह—** स्वाभाव्याच्चेति। **प्रवृत्तेः स्वभावाख्याज्ञानकार्यत्वे भगवद्वाक्यमनुकूलयति—** स्वभावस्त्विति। **प्रवृत्तेरज्ञानजत्वे विधिनिषेधाधीनप्रवृत्तिनिवृत्त्यात्मकबन्धस्याविद्यामात्रत्वादविद्वद्विषयत्वं शास्त्रस्य सिद्धमिति फलितमाह—** तस्मादिति। **दृष्टमेवानुसरन्नविद्वान्** यथादृष्टः**,** तद्विषयः **तदाश्रयः संसारः। तथा च प्रवृत्ति-निवृत्त्यात्मकसंसारस्याविद्वद्विषयत्वात् तद्धेतुविधि[निषेध]शास्त्रस्यापि तद्विषयत्वमित्यर्थः। नन्वविद्या क्षेत्रज्ञमाश्रयन्ती स्वकार्यं**

भाष्यार्कप्रकाशः

कर्तुर्दुर्लभत्वादिति भावः। परिहरति— **नेति**। कर्तार एव सुलभाः, विवेक्येव दुर्लभः। कुतः? कस्यचिदेव सुकृतिनः 'बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते' इति न्यायेन विवेकस्य ज्ञानस्योपपत्तेः प्राप्तेः। इदमेव भङ्ग्यन्तरेणाह— **अनेकेष्विति**। 'मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥' इति गीतावचनादिति भावः। ननु भवतु कश्चिदेव विवेकी, तदनुवर्तिनस्तु बहवः स्युरत आह— **यथेति**। मूढा विवेकिनमिदानीं यथा नानुवर्तन्ते, तथा पूर्वमपि, भविष्यत्कालेऽपीत्यर्थः। यद्वा यथेत्यस्य तावदित्यर्थः। इदानीं विवेकिनं मूढा नैवानुवर्तन्ते, तत्र हेतुमाह—**रागादीति**। प्रवृत्तेः रागादिदोषतन्त्रत्वात्। रागादिदोषदूषिता मूढाः विवेकिनं नैवानुवर्तन्ते, किन्तु रागादिदोषवशात् कर्मण्येव प्रवर्तन्ते। ननु रागादिदोषवशात् कर्मणि न प्रवर्तन्ते मूढाः, किन्तु श्रेष्ठाचरणदर्शनादेव। श्रेष्ठा हि जनकादयः कर्मणि प्रवृत्ताः। उक्तं च भगवताऽपि 'वर्त एव च कर्मणि, मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः' इत्यत आह— **अभिचारेति**। **अभिचारः** शत्रुमारणकर्म। आदिपदात् परदारगमनादिकम्। मूढाः इदानीं हिंसादिकर्मणि प्रवर्तमाना दृश्यन्ते, किं ते श्रेष्ठाचरणानुसारात् तत्र प्रवृत्ताः? उत रागादिदोषवशात्? नाद्यः - श्रेष्ठानां हिंसादिनिषिद्धकर्मस्वप्रवृत्तत्वात्। अतः परिशेषाद् रागादिदोषवशादेव। तथा च य एव दोषोऽभिचारादौ पुंसां प्रवर्तकः, स एव रागादिदोषो यज्ञादिकर्मस्वपि प्रवर्तक इत्यवश्यमभ्युपेयम् , प्रवृत्त्यैक्यात्। एकत्र दृष्टस्यैव कारणस्येतरत्राभ्युपगमनीयत्वात्। रागादिदोषोऽज्ञानां कर्मणि प्रवर्तकः, प्रवृत्तिहेतुत्वादभिचारादाविवेत्यनुमानात्। न हि कोऽपि जनकेन कर्म कृतं मया कर्तव्यमिति कुरुते, किन्तु कर्मणा स्वर्गादिफलं स्यादिति स्वर्गादिफलरागेणैव। यथा शत्रौ द्वेषेणाभिचारं करोति, तद्वदिति। न च श्रीकृष्णवाक्यविरोधः, रागादिदोषात् स्वत एव कर्मणि प्रवृत्तानामपि विहितकर्मसु रुच्युत्पादनार्थं तथोक्तत्वात्। न केवलं प्रवृत्तेः रागादिदोषतन्त्रत्वं, किन्तु स्वभावत्वमपीत्याह— **स्वाभाव्याच्चेति**। स्वभावत एव पुंसां प्रवृत्तिर्भवतीत्यर्थः। तत्र गीतां प्रमाणयति— **स्वभावस्त्विति**। धर्माधर्मलक्षणसंस्कारवशात् प्रवृत्तिस्वभावा एव सन्तो जायन्ते मूढा जन्मत आरभ्य भोजनादिकर्मसु प्रवर्तनस्वाभाव्यात् , तथैव यज्ञादिकर्मस्वपि स्वभावत एव प्रवर्तन्त इति भावः। **तस्मादिति**। यस्मादविद्वद्विषयं शास्त्रं तदर्थानुष्ठानं च, तस्मादित्यर्थः। **अविद्यामात्रो**ऽविद्याकृत इत्यर्थः। **यथादृष्टो**

१. 'अविद्यामात्रः' इति रा.पा. भाति।

**मिथ्याज्ञानं परमार्थवस्तु दूषयितुं समर्थम्। न ह्यूषरदेशं स्नेहेन पङ्कीकर्तुं शक्नोति मरीच्युदकम्। तथा अविद्या क्षेत्रज्ञस्य न किञ्चित् कर्तुं शक्नोति। अतश्चेदमुक्तम्— 'क्षेत्रज्ञं चापि मां विद्धि' (भ.गी.१३.२) 'अज्ञानेनावृतं ज्ञानम्' (भ.गी. ५.१५) इति च।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

निरोधसम्भव इत्यर्थः। अविद्यासम्बन्धोऽपि न तात्त्विक इत्याह— **न क्षेत्रज्ञस्य केवलस्येति।** नन्वविद्यासम्बन्धस्यातात्त्विकत्वेऽपि तत्कृतं संसारित्वं तात्त्विकं भविष्यति। प्रतिबिम्बस्यातात्त्विकत्वेऽपि तद्गम्यस्य बिम्बस्य गम्य[सत्य]तादर्शनादित्यत आह— **न च मिथ्याज्ञानमिति।** यतोऽध्यस्तदोषेण नाधिष्ठानं लिप्यते, अतो भगवता युक्तमुक्तमित्याह— **इदमुक्तमिति।**

आनन्दगिरिकृतव्याख्या

**संसारमपि तस्मिन्नाधत्ते, तेन तस्यैव शास्त्राधिकारित्वम् , नेत्याह—** नेति। **अविद्यादेः शुद्धे क्षेत्रज्ञे वस्तुतोऽसम्बन्धेऽपि तत् तस्मिन्नारोपितं तमेव [1]दुःखीकरोतीत्यत्राह—** न चेति। **तदेव दृष्टान्तेन स्पष्टयति—** न हीति। **क्षेत्रज्ञस्य वस्तुतोऽविद्याऽसम्बन्धे भगवद्वचोऽपि द्योतकमित्याह—** अत इति। **क्षेत्रक्षेत्रज्ञयोरैक्ये किमित्यसावात्मानम् 'अह'मिति बुध्यमानोऽपि, स्वस्येश्वरत्वम् 'ईश्वरोऽस्मी'ति न बुध्यते? तत्राह—** अज्ञानेनेति।

भाष्यार्कप्रकाशः

यथाप्रसिद्धः कर्मी अज्ञः, तद्विषय एव संसारः। एवकारार्थमाह— **नेति**। केवलस्य क्षेत्रज्ञस्याविद्या तत्कार्यं च नास्ति, विदुष आत्मत्वात्। क्षेत्रज्ञस्य विदुषो नास्त्यविद्यादिकमिति न विद्वद्विषयः संसार इत्यर्थः। नन्वविवेकिभिरात्मनि कल्पितोऽप्यविद्यामयः संसार आत्मानं बध्नीयादेवेत्यत आह— **न चेति**। मिथ्यात्वेन ज्ञायत इति **मिथ्याज्ञानं** मिथ्याभूतं वस्तु प्रातिभासिकं गन्धर्वनगररज्जुसर्पस्वप्नरथादिकं, **परमार्थवस्तु** गगनरज्ज्वादिकम् - कर्म, **दूषयितुं** स्वतादात्म्यमापादयितुमित्यर्थः। स्वस्वधर्मांस्तत्र प्रसञ्जयितुमिति यावत्। नैव समर्थम्। तत्र दृष्टान्तमाह— **न हीति**। मरीच्युदकं कर्तृ। **स्नेहेन** द्रवेण। ऊषरदेशं पङ्किलं कर्तुं नैव शक्नोति। यथार्थमुदकं मरुभूमिं प्रविष्टं चेत् स्वधर्मं द्रवं तस्याः सम्पाद्य तां पङ्किलां करोति, मरीचिकोदकं तु न तथेत्यर्थः। दार्ष्टान्तिकमाह— **तथेति**। अविद्या क्षेत्रज्ञस्य किञ्चिदपि संसारित्वं कर्तुं न शक्नोति, मिथ्यात्वादविद्यायाः। अनाद्युपादानत्वे सति मिथ्यात्वं ह्यविद्याया लक्षणम्। मिथ्यात्वं सदसदनिर्वाच्यत्वम्। तूलाज्ञानमविद्येति पक्षे तूपादानत्वे सति मिथ्यात्वमिति तल्लक्षणम्। उभयथाऽपि मिथ्यैवाविद्या। अविद्याया एव मिथ्यात्वे तत्कार्यसंसारमिथ्यात्वे न विप्रतिपत्तिः। न च सत्यैवाविद्येति वाच्यम् ; 'नासतो विद्यते भावो नाभावो विद्यते सतः' इत्युक्तन्यायेन सत्याया अविद्याया ज्ञानेन निवृत्त्ययोगात्। न हि ज्ञाननिवर्त्यं वस्तु क्वापि सत्यं दृष्टम् , रज्जुज्ञाननिवर्त्यसर्पादेर्मिथ्यात्वदर्शनात्। नाप्यत्यन्तमसत्या, शशशृङ्गवदप्रतीत्यभावात्। यस्मात् प्रतीयते, बाध्यते च, तस्मान्मिथ्यैवाविद्या, रज्जुसर्पादिवदिति।न चेति वाक्यस्यान्योऽप्यर्थः प्रतिभाति। तथाहि - मिथ्या च तदज्ञानं च **मिथ्याज्ञानं**, **परमार्थवस्तु** परमार्थसत्यं ब्रह्म **दूषयितुं** संसारीकर्तुं , मिथ्याभूतं कर्तुं वा न समर्थम् , सत्यमिथ्यावस्तुनोरितरेतरतादात्म्याद्यनुपपत्तेरिति भाव इति। ननु मिथ्याज्ञानेनापि सत्यवस्तुनो दोषः स्यादिति शङ्कायां लोकप्रसिद्धं दृष्टान्तमाह— **न हीति**। पुनरपि सुबोधाय दार्ष्टान्तिकमाह— **तथेति**। एतेन - अज्ञैरात्मनि कल्पितेन संसारेण न कोऽपि लेपः क्षेत्रज्ञस्य, यथा अज्ञकल्पितमरीचिकोदकेन मरुभूमेर्द्रवाभाव इति सिद्धम्। यद्वा अविद्यया क्षेत्रज्ञे कल्पितेन संसारेण तस्य न कोऽपि लेपः, यथा अविद्यया मरुभूमौ कल्पितेन जलेन तस्या द्रवाभाव इति सिद्धम्। ततश्चाज्ञानादात्मानं क्षेत्रज्ञं संसारिणं [2]मन्वन्तु नामाज्ञाः, न तावता अज्ञप्रत्ययमात्रेणात्मनः कोऽपि संसारः। न हि गगनं नीलमिति बालप्रत्ययमात्रेण गगनस्य नैल्यसम्भवः। तस्मान्नास्ति क्षेत्रज्ञस्य किञ्चिदपि संसारित्वम्। **अत इति**। क्षेत्रज्ञस्य वस्तुतोऽसंसारित्वादित्यर्थः। क्षेत्रज्ञो वस्तुत ईश्वर एव, अज्ञानेन तज्ज्ञानस्यावरणात् क्षेत्रज्ञः संसारीति जन्तवो

---

१. 'दुःखाकरोतीत्यत्राह' इति पा.। २. मन्वतामिति भाव्यम्। परस्मैपदप्रयोगश्चिन्त्यः।

[यौक्तिकात्मविवेकस्यापरोक्षभ्रमानिवर्तकता]

**अथ किमिदं संसारिणामिव 'अहमेवं, ममैवेदम्' इति पण्डितानामपि? शृणु , इदं तत् पाण्डित्यम् , यत् क्षेत्र एवात्मदर्शनम्। यदि पुनः क्षेत्रज्ञमविक्रियं पश्येयुः, ततो न भोगं कर्म वाऽऽकाङ्क्षेयुः— मम स्यादिति। विक्रियैव हि भोगकर्मणी। अथैवं सति फलार्थित्वादविद्वान् प्रवर्तते। विदुषः पुनरविक्रियात्मदर्शिनः फलार्थित्वाभावात् प्रवृत्त्यनुपपत्तौ कार्यकरणसङ्घातव्यापारोपरमे निवृत्तिरुपचर्यते।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

यदि परमार्थतो नास्ति संसारसम्बन्धः, तर्हि पण्डितानुभवविरोधः इत्याह— **अथ किमिदमिति**। यौक्तिकविवेकज्ञानस्यापरोक्षभ्रमानिवर्तकत्वात् पण्डिता अपि भ्रान्ता एवेत्याह— **शृण्विदं तदिति**। फलितमाह— **अथैवं सतीत्यादिना।**

आनन्दगिरिकृतव्याख्या

**आत्मनो वस्तुतः संसारासंस्पर्शे विद्वदनुभवविरोधः स्यादिति चोदयति—** अथेति। एवमित्याभिजात्यादिवैशिष्ट्यमुक्तम् , **इदमा क्षेत्रकलत्रादि।** पण्डितानामपि **प्रतीतं संसारित्वमिति शेषः। किं पाण्डित्यं देहादावात्मदर्शनम्? किंवा कूटस्थात्मदृष्टिः? आहो संसारित्वादिधीः? इति विकल्प्याऽऽद्यं निराकुर्वन्नाह—** शृण्विति। [१]**तच्च वस्तुतोऽसंसारित्वाविरोधि, प्रातिभासिकं तु संसारित्वमिष्टमिति शेषः। द्वितीयं दूषयति—** यदीति। **न हि कूटस्थात्मविषयं संसारित्वं प्रतीयते येन वस्तुतोऽसंसारित्वं विरुध्येत, कूटस्थात्मधीविरुद्धायाः संसारित्वबुद्धेरनवकाशितवादित्यर्थः। आत्मानमक्रियं पश्यतोऽपि कुतो भोगकर्मणी न स्यातामित्याशङ्क्याह—** विक्रियेति। **अविक्रियात्मबुद्धेः भोगकर्माकाङ्क्षयोरभावे कस्य शास्त्रे प्रवृत्तिरित्याशङ्क्याह—** अथेति। **फलार्थित्वाभावाद् विदुषो न कर्मणि प्रवृत्तिरित्येवं स्थिते सत्यनन्तरम् अविद्वान् फलार्थित्वात् तदुपाये कर्मणि प्रवर्तते, शास्त्राधिकारीत्यर्थः। विदुषो वैधप्रवृत्त्यभावेऽपि निषेधाधीननिवृत्तेरपि दुर्वचत्वात् तस्य निवृत्तिनिष्ठत्वासिद्धिरित्याशङ्क्याह—** विदुष इति।

भाष्यार्कप्रकाशः

मुह्यन्तीति **इद**मुक्तं भगवतेति शेषः।

ननु यदि विद्वद्दृष्ट्या असंसार्येव क्षेत्रज्ञः, अविद्वद्दृष्ट्यैव संसारी, तर्ह्यज्ञानामिव विदुषामप्यनात्मनि देहादावहमिदमिति ममेदमिति च कोऽयमभिमानः? संसारहेतुरयमभिमानोऽज्ञानप्रयुक्तो हि; अज्ञानं च न युक्तं विद्यावताम्। तस्माद् विदुषामपि अनात्मसु अहम्ममाभिमानसत्त्वाद् देहात्मनोः संसर्गः सत्य एवेति देहादिमत्त्वात् संसार्येव क्षेत्रज्ञ इत्याशयेन पृच्छति द्वैती— **अथेति**। आह सिद्धान्ती— **शृण्विति**। **क्षेत्रे** शरीर एव **यदात्मदर्शनम्** आत्मेति बुद्धिस्तदिदं तेषामहमिदं ममेदमित्यभिमानिनां **पाण्डित्यं** विद्वत्ता। अयं भावः - अत्यन्तं मूढा देहमेवात्मानं मन्यन्ते, आस्तिकास्तु देहादन्यं कर्तारं भोक्तारं चात्मानं मन्यन्त इत्यास्तिकानां देहेऽहमभिमानाभावेऽप्यन्तःकरणेऽहमभिमानोऽस्ति, अन्तःकरणधर्माणां भोक्तृत्वादीनामात्मन्यध्यासात्। न ह्यन्तःकरणाद् विलक्षणमात्मानं ते विदुः। ततश्च देहे ममाभिमानस्तेषामिति। उक्तार्थानभ्युपगमे दोषमाह— **यदीति**। यदि तेषां वैदिकानामन्तःकरणे क्षेत्रेऽहम्ममाभिमानाभावस्तर्हि कर्तुर्भोक्तुश्चान्तःकरणाद् विलक्षणमविक्रियमेव क्षेत्रज्ञमात्मानं पश्येयुः; यदि तथा पश्येयुस्ततस्तर्हि ममायं भोगः स्यादिति भोगं कर्म वा न काङ्क्षेयुः। **हि** यस्माद् भोगाः कर्माणि च विक्रियैव। तस्माद् विक्रियारहित आत्मनि भोगाद्ययोगान्नास्त्यविक्रियात्मदर्शिनां भोगादिकाङ्क्षा। एवं सति अविक्रियात्मदर्शिनां भोगादिकाङ्क्षाऽभावे सतीत्यर्थः। क्षेत्र एवात्मदर्शने सतीति वा। अविद्वान् क्षेत्रात्मदर्शी कर्ता भोक्ता चात्मेति प्रतिपद्यमान इत्यर्थः। **फलार्थित्वाद्** हेतोः **प्रवर्तते** कर्मणि प्रवृत्तो भवति। अविक्रियमात्मानं द्रष्टुं शीलमस्यास्तीत्यविक्रियात्मदर्शी, तस्य विदुषस्त्वात्मनोऽभोक्तृत्वेन फलार्थित्वाभावात् फलाकाङ्क्षाऽभावाद्धेतोः प्रवृत्त्यनुपपत्तिः।

ननु प्रवृत्तिवन्निवृत्तिरपि कर्मैवेति 'कर्मण्यकर्म यः पश्येदि'ति श्लोकभाष्ये प्रोक्तत्वात् कथमकर्तुर्विदुषो निवृत्त्युपपत्तिः? अत आह— **प्रवृत्त्यनुपपत्तौ सत्यां निवृत्तिरुपचर्यत इति**। कार्यकरणसङ्घातस्य व्यापारः कर्म यज्ञादिलक्षणः, तस्योपरमो निवृत्तिरि-

१. **तच्च** क्षेत्र एवात्मदर्शनम्।

[क्षेत्रज्ञजीवभेदपरपरव्याख्यानखण्डनम्]

**इदं चान्यत् पाण्डित्यं [१]कस्यचिदस्तु— क्षेत्रज्ञ ईश्वर एव; क्षेत्रं चान्यत् क्षेत्रज्ञस्यैव विषयः; अहं तु संसारी सुखी दुःखी च; संसारोपरमश्च मम कर्तव्यः क्षेत्रक्षेत्रज्ञविज्ञानेन, ध्यानेन चेश्वरं क्षेत्रज्ञं साक्षात्कृत्वा तत्स्वरूपावस्थानेनेति; यश्चैवं बुध्यते, यश्च बोधयति, नासौ क्षेत्रज्ञः- इति। एवं मन्वानो यः स [२]पण्डितापसदः संसारमोक्षयोः शास्त्रस्य चार्थवत्त्वं करोमीति, आत्महा, स्वयं मूढोऽन्यांश्च व्यामोहयति, शास्त्रार्थसम्प्रदायरहितत्वात्**

अनुभूतिस्वरूपाचार्यटिप्पणम्

परव्याख्यानमनुवदति— **इदञ्चान्यदिति**। 'क्षेत्रज्ञं चापि मां विद्धी'त्यनेन सर्वक्षेत्रान्तर्यामी जीवादन्य ईश्वरः प्रतिपाद्यते। न तु जीवस्येश्वरात्मता प्रतिपाद्यत इत्यर्थः। कस्माज्जीवस्येश्वरात्मता न प्रतिपाद्यते? (इत्यत आह—) बन्धमोक्षशास्त्रार्थवत्त्वानुपपत्तेरित्याह—**अहं तु संसारीति**। मम ज्ञानेनेश्वरभावः कर्तव्य इति यः स्वयं मन्यते, यं वा बोधयति स कथमीश्वरः स्यात्? यदि स्यात् तदा शास्त्राद्युपदेशोऽनर्थकत्वा[र्थकः स्या]दित्यर्थः। एतद् दूषयति— **एवं मन्वानो य**

आनन्दगिरिकृतव्याख्या

**तृतीयमुत्थापयति—** इदं चेति। **सिद्धान्तादविशेषमाशङ्क्य क्षेत्रस्य क्षेत्रज्ञाद् वस्तुतो भिन्नत्वेन तद्विषयत्वाङ्गीकारान्मैवमित्याह—** क्षेत्रं चेति। **अहंधीवेद्यस्यात्मनो वस्तुतः संसारित्वस्वीकाराच्च सिद्धान्ताद् भेदोऽस्तीत्याह—** अहं त्विति। **संसारित्वमेव स्फोरयति—** सुखीति। **संसारित्वस्य वस्तुत्वे तदनिवृत्त्या पुमर्थासिद्धिरित्याशङ्क्याह—** संसारेति। **कथं तदुपरमस्य हेतुं विना कर्तव्यत्वमित्याशङ्क्याह—** क्षेत्रेति। **क्षेत्रं ज्ञात्वा ततो निष्कृष्टस्य क्षेत्रज्ञस्य ज्ञानं कथं संसारोपरतिमुत्पादयेदित्याशङ्क्याह—** ध्यानेनेति। **संसारित्वमात्मनो बुध्यमानस्य तद्रहितादीश्वरादन्यत्वमिति वक्तुम् इतिशब्दः। तदेवान्यत्वमुपपादयति—** यश्चेति। **मम संसारिणोऽसंसारीश्वरत्वं कर्तव्यमित्येवं यो बुध्यते, यो वा तथाविधं ज्ञानं तव कर्तव्यमित्युपदिशति, स क्षेत्रज्ञादीश्वरादन्यो ज्ञेयोऽन्यथोपदेशानर्थक्यादित्यर्थः। 'आत्मा संसारी परस्मादात्मनोऽन्यः, तस्य ध्यानाधीनज्ञानेनेश्वरत्वं कर्तव्य'मित्येतज्ज्ञानं पाण्डित्यमिति मतं दूषयति—** एवमिति। **'अयमात्मा ब्रह्म' इत्यात्मनो ब्रह्मत्वश्रुतिविरोधादित्यर्थः। ननु संसारस्य वस्तुत्वाङ्गीकारात् तत्प्रतीत्यवस्थायां कर्मकाण्डस्यार्थवत्त्वम् , संसारित्वनिरासेनात्मनो ब्रह्मत्वे ध्यानादिना साधिते मोक्षावस्थायां ज्ञानकाण्डस्यार्थवत्त्वम् , तत् कथं यथोक्तज्ञानवान् पण्डितापसदत्वेनाक्षिप्यते?**

भाष्यार्कप्रकाशः

त्युपचारादुच्यते। कार्यकरणसङ्घातव्यापारादुपरतो भवति। न त्वहं व्यापारोपरमं करोमीति मन्यते, येन निवृत्तिः कर्म स्यादिति भावः। तस्मात् कर्तृभोक्रन्तःकरणतादात्म्याध्यासशालिनां वैदिकानां सम्यग्दर्शनशून्यानामेवाहम्ममाभिमानो, न तु तत्त्वविदाम्।

**अन्यदिति**। पूर्वोक्तादितरत्। **केषाञ्चिदिति**। द्वैतिनामित्यर्थः। तत् पाण्डित्यमेव दर्शयति— **क्षेत्रज्ञ इत्यादिना। ईश्वर एवेति**। न तु जीव इत्येवकारार्थः। स्वस्य संसारित्वात् , क्षेत्रज्ञस्य चासंसारित्वादिति भावः। क्षेत्रज्ञस्य साक्षिण ईश्वरस्य **विषयो** गोचरः, तत्प्रकाश्यमिति यावत्। क्षेत्रं चान्यत् , क्षेत्रज्ञाज्जीवाच्च विलक्षणमेव। अहं क्षेत्रक्षेत्रज्ञयोरन्यः संसारी जीवः। कुतः? यतः सुखी दुःखी च भवामि, क्षेत्रक्षेत्रज्ञविज्ञानेन ध्यानेन चेश्वरं क्षेत्रज्ञं साक्षात्कृत्वा तत्स्वरूपावस्थानेन, भ्रमरकीटन्यायादिति भावः; मम संसारोपरमः कर्तव्य इतीदमन्यत् पाण्डित्यं केषाञ्चिदस्त्वित्यन्वयः। क्षेत्रज्ञमेव संसारिणं मन्यन्ते पूर्वोक्ताः। अमी तु क्षेत्रज्ञमीश्वरं मन्वानाः तस्मादन्यमेव संसारिणमात्मानं मन्यन्त इति भेदः।

किमिदं पाण्डित्यं दुष्टम्? अत आह— **यश्चेति**। यश्च बुध एवमुक्तरीत्या **बुध्यते** वेत्ति, यश्च गुरुः शिष्यानेवं बोधयति; किं बुध्यते? किं वा बोधयति? इत्यत आह— **नासौ क्षेत्रज्ञ इति। असौ** जीवः क्षेत्रज्ञो न भवतीति। यः **एवं मन्वान** एतादृशज्ञानवान् स **पण्डितापशदः** नीचपण्डितः। संसारमोक्षयोर्मिथ्यात्वे शास्त्रमनर्थकं स्यादिति तत्सत्यत्ववर्णनद्वारा शास्त्रस्यार्थवत्त्वं सम्पादयामीति प्रवृत्त इति शेषः, मन्यमान इति वा। अत एवात्मानं हन्ति नाशयति संसारादनिर्मोचनद्वारेति **आत्महा**। एवंविधः स पण्डितापशदः

१. 'केषांचिदस्तु' इति पा.। २. 'पण्डितापशदः' इति पा.।

**श्रुतहानिमश्रुतकल्पनां च कुर्वन्। तस्मादसम्प्रदायवित् सर्वशास्त्रविदपि [1]मूर्खवदेवोपेक्षणीयः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**इत्यादिना**। 'अयमात्मा ब्रह्मे'ति श्रुतेः सिद्धमात्मनो ब्रह्मतत्त्वं[ब्रह्मत्वं] यत् [2]तत्तिरस्कारेणात्मानं हतवानित्याह— **आत्महा चेति।** तथा च श्रुतिस्मृती - 'एका[ये के चा]त्महनो जनाः' 'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चोरेणात्मापहारिणा॥' इति। अन्यथाऽप्युपपन्नशास्त्रार्थवत्त्वलाभे स्वरूपभूतमपि ब्रह्म जिहासति, ततो मूढ इत्यर्थः। प्रसिद्धक्षेत्रज्ञानुवादेन अप्रसिद्धेश्वरात्मत्वमुपदिश्यमानं 'तत्त्वमसी'ति यच्छ्रुतं तस्य हानिम् , अश्रुतस्य च जीवेश्वरयो-स्तात्त्विकभेदस्य कल्पनां च कुर्वन्नन्यान् व्यामोहयतीत्यर्थः।

आनन्दगिरिकृतव्याख्या

**तत्राह—** संसारेति। **करोमीति मन्यमानो यः स पण्डितापसद इति पूर्वेण सम्बन्धः। कर्मकाण्डं हि कल्पितं संसारित्वमधिकृत्य साध्यसाधनसम्बन्धं बोधयदर्थवदिष्टम् ; ज्ञानकाण्डमपि तथाविधं संसारित्वं पराकृत्याखण्डैकरसे प्रत्यग्ब्रह्मणि पर्यवस्यदर्थवद् भवेदित्यर्थः। किञ्चात्मनः शास्त्रसिद्धं ब्रह्मत्वं त्यक्त्वाऽब्रह्मत्वं कल्पयन्नात्महा भूत्वा लोकद्वयबहिर्भूतः स्यादित्याह—** आत्महेति। **ननु 'क्षेत्रज्ञं चापि मां विद्धी'त्यनेन सर्वक्षेत्रान्तर्यामी परो जीवादन्यो निरुच्यते, न जीवस्येश्वरत्वमत्र प्रतिपाद्यते, तत् कथमित्थमाक्षिप्यते? तत्राह—** स्वयमिति। **किञ्च 'तत्त्वमसी'तिवत् प्रसिद्धक्षेत्रज्ञानुवादेनाप्रसिद्धं तस्येश्वरत्वमिहोपदेशतः श्रुतं, तस्य हानिम् , अश्रुतस्य च जीवेश्वरयोस्तात्त्विकभेदस्य कल्पनां कुर्वन् कथं व्यामूढो न स्यादित्याह—** श्रुतेति। **ननु केचन व्याख्यातारो यथोक्तं पाण्डित्यं पुरस्कृत्य 'क्षेत्रज्ञं चापी'त्यादिश्लोकं व्याख्यातवन्तः। तत् कथमुक्तं पाण्डित्यमास्थातुर्व्यामूढत्वम्? तत्राह—** तस्मादिति।

भाष्यार्कप्रकाशः

स्वयं मूढःसन् अन्यांश्च व्यामोहयति। कुतः? शास्त्रार्थसम्प्रदायरहितत्वात्। शास्त्रस्य यः सम्प्रदायसिद्धोऽर्थस्तज्ज्ञानशून्यः। स्वस्य सम्प्रदायविद्गुरूपदेशाभावादिति भावः। व्यासशुकादिगुरुशिष्यपरम्परा **सम्प्रदाय** इत्युच्यते। तं **विन्दति** भजत इति **सम्प्रदायवित्**। तत्परम्पराप्रविष्ट इति यावत्। स चासौ गुरुर्गोविन्दयोगीन्द्रः, तदुपदेशः शङ्कराचार्यस्यास्तीति शङ्करोक्त एवार्थो ग्राह्यः। व्यासो हि मूलकर्ता स्वाभिप्रायं स्वशिष्याय स्वपुत्राय च यथावद् बोधयामास। स च शुको गौडपादाय शिष्याय, स च गौडपादो गोविन्दयोगीन्द्राय, स च शङ्करायेत्येवं गीतार्थसंप्रदायः। अयं च शंकरः स्वाभिप्रायं सर्वजनसुलभं चकार भाष्यरचनाद्वारेति कृत्वा यः एतद्भाष्यपाठकः स च सम्प्रदायविद् गुरुरेव। अन्ये तु **रामानुजादयो** दर्शितसम्प्रदायशून्या एवेति कृत्वा तद्भाष्यपाठकोऽपि सम्प्रदायरहित एव। शास्त्रार्थस्य यः सम्प्रदायो बोधकबोध्यरूपगुरुशिष्यादिपरम्परा **तद्रहितत्वात्** तदन्तःप्रवेशाभावादित्यक्षरार्थः।

अस्माद्धेतोः **श्रुतहानिं** यथाश्रुतार्थपरित्यागम् , **अश्रुतकल्पनाम्** अयथाश्रुतार्थकल्पनां च **कुर्वन्** , शास्त्रस्य स्वातन्त्र्येण कञ्चिदपार्थं परिकल्पयन्नित्यर्थः। कुर्वन् सन् अन्यान् व्यामोहयतीति सम्बन्धः। **तस्मादिति**। यस्मादेवं पण्डितापशदः स्वयं मूढोऽन्यान् व्यामोहयति तस्मादित्यर्थः। यस्माच्छ्रुतहानिमश्रुतकल्पनां च करोति, तस्मादिति वा। सर्वशास्त्रविदपि असम्प्रदायवित् स पण्डितापशदो **मूर्ख इव** अज्ञ इवोपेक्षणीयः, न तु संसेव्यः शिष्यैः, तदुपदिष्टार्थस्य प्रमाणविरुद्धत्वेनानर्थहेतुत्वाच्छिष्यस्य।

कथमिति चेद्? **उच्यते** – 'इदम् शरीरं कौन्तेय क्षेत्रमित्यभिधीयते' इति शरीरस्य क्षेत्रत्वमुक्त्वा 'एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः' इति शरीरज्ञातुः क्षेत्रज्ञत्वमुक्तं भगवता। शरीरज्ञातृत्वं च शरीरिणो जीवस्य सर्वानुभवसिद्धम् - मनुष्योऽहं, स्थूलोऽहं, ममाङ्गं, मम हस्त इत्यादिप्रतीतेः। तस्य च क्षेत्रज्ञस्य 'क्षेत्रज्ञं चापि मां विद्धी'तीश्वराभेद उक्तः। मामित्यस्मच्छब्दार्थस्य श्रीकृष्णस्येश्वरत्वस्य सर्वसम्मतत्वात्। एवं यथाश्रुतमर्थं विहाय, जीवो न क्षेत्रज्ञः, किन्त्वीश्वर एव क्षेत्रज्ञ इत्यर्थवर्णनमश्रुतकल्पनमेव।

---

१. 'मूर्ख इवोपेक्षणीयः।' इति रा.पा.। २. तिरस्करणमेवेह हननमभिप्रेतमिति भावः। 'कथं त आत्मानं नित्यं हिंसन्ति? अविद्यादोषेण विद्यमानस्यात्मनः तिरस्करणात्। विद्यमानस्य आत्मनो यत्कार्यं फलम् अजरामरत्वादिसंवेदनलक्षणं तद्धतस्येव तिरोभूतं भवतीति प्राकृता अविद्वांसो जनाः आत्महन उच्यन्ते। तेन ह्यात्महननदोषेण संसरन्ति ते' इति ईशावास्योपनिषद्भाष्यमिहानुसंधेयम्।

भाष्यार्कप्रकाशः

क्षेत्रज्ञेश्वरादन्यस्य जीवस्य तद्ध्यानेन तत्स्वरूपावस्थितिरित्यप्ययुक्ता, अन्यस्यान्यस्वरूपापत्त्ययोगात् , विद्यमानरूपपरित्यागे जीवस्य नाशप्रसङ्गात् , रूपान्तरपरिग्रहे च जन्मप्रसङ्गात् , तथा च सति जीवस्यानित्यत्वप्रसङ्गात्। घटो हि कम्बुग्रीवादिस्वाकारपरित्यागे नष्ट इति, कपालात्मना जात इति च, ततोऽनित्य इति च प्रसिद्धम्। न च पूर्वरूपमपरित्यज्यैव जीव ऐश्वरं रूपं भजत इति वाच्यम् ; रूपद्वयसामानाधिकरण्यायोगात् , दृष्टान्ताभावाच्च। न च भ्रमरकीटन्यायोऽत्र दृष्टान्त इति वाच्यम् ; कीटस्यापि कीटरूपत्यागादेव भ्रमररूपप्राप्तेः। न हि कीटभ्रमररूपद्वयस्यैकत्रोपलम्भः, येन कीटः कीटरूपमपरित्यज्यैव भ्रमररूपं प्राप्त इत्युच्येत। कथं वा कीटस्य कीटरूपत्यागं विना भ्रमररूपप्राप्तिः सम्भवेत्? कीटभ्रमररूपयोरन्योन्यविलक्षणत्वात्। अविलक्षणत्वे च कीटोऽयं भ्रमरोऽयमिति विवेकव्यवहारानुपपत्तेः। न च घटरूपं परित्यज्य कपालरूपं प्राप्तस्य मृद्द्रव्यस्य नित्यत्वदर्शनात् पूर्वरूपपरित्यागपूर्वकोत्तररूपस्वीकारेऽपि न जीवस्यानित्यत्वदोष इति वाच्यम् ; घटकपालद्वयानुगतस्य मृद्द्रव्यस्यैकत्वादस्तु नित्यत्वं, प्रकृते तु कीटभ्रमरयोरिव जीवेश्वरयोरेकात्मत्वाभावान्न भवेज्जीवस्य नित्यत्वम्। **किञ्च** मृद्द्रव्यस्य नित्यत्वेऽपि तद्विकारयोः घटकपालयोरनित्यत्वमेव यथा, तथा जीवेश्वरयोरनित्यत्वमेव स्यात् , तदनुगतस्य यस्य कस्यापि वस्तुनः सत्यत्वं नित्यत्वं च स्यात्। तच्चानुगतं वस्तु नास्त्येव तव मते। तत्सत्त्वे वा जीववदीश्वरोऽप्यनित्य एव स्यादिति हन्त! महदनिष्टं यज्जीवनित्यत्वं साधयतस्तवेश्वरानित्यत्वमपि प्राप्तम्।

**यदि** जीवेश्वरद्वयानुगतचैतन्यमेव नित्यं सत्यं च, घटकपालद्वयानुगतमृद्द्रव्यवदित्यभ्युपैषि, **तर्हि** मृदात्मत्वेन घटकपालयोरिव चैतन्यात्मत्वेन जीवेश्वरयोरप्येकत्वं स्यादेवेति स्वमतभङ्गः, परमतस्वीकारश्च तव।

**किञ्च** जीवेश्वरयोः किं घटपटयोरिव रूपतो भेदः? यद्वा लवणकर्पूरयोरिव धर्मतः? यद्वा घटयोरिव व्यक्तितः? अथवा घटरूपयोरिव पदार्थतः? यद्वा वाय्वाकाशयोरिव गुणतः? अथवा घटकलशयोरिव नामतः? न तावदाद्यः, नीरूपत्वाद् द्वयोः। न द्वितीयः, निर्धर्मकत्वात्। न तृतीयः, व्यक्तिद्वयानुपलम्भात् , अव्यक्तत्वेन व्यक्तेरेवाभावाच्च। न चतुर्थः, आत्मत्वेनोभयोरेकपदार्थत्वात्। न पञ्चमः, निर्गुणत्वात्। अतः षष्ठः पक्षः परिशिष्टः। घटः इति, कलशः इति च यथैकस्यैव वस्तुनो नामद्वयं, तथा जीवः इतीश्वरः इति च एकस्यैव चैतन्यस्य नामद्वयमिति। तस्माज्जीवेश्वरयोर्भेदवादो नोपपद्यते। न चाभेदवादोऽप्ययुक्त एव, भेदप्रसक्तिं विना भेदनिषेधायोगात् , भेदस्याभावे प्रसक्त्ययोगाच्चेति वाच्यम् ; अज्ञदृष्ट्या जीवेश्वरभेदस्य प्रसक्तत्वादिति।

न च - अन्तःकरणावच्छिन्नत्व-मायावच्छिन्नत्वरूपविशेषणभेदाज्जीवेश्वरभेदः इति - वाच्यम् ; निर्विशेषचिन्मात्रे विशेषणायोगात्। अत एव हि निर्धर्मक आत्मेत्युच्यते। न च परिपूर्णं चैतन्यमन्तःकरणादिना परिच्छिद्यते। भवतु वा घटाकाशमठाकाशयोरिवौपाधिकभेदः। न स जीवेश्वरवास्तवभेदजननक्षमः, [१]उपाधिभेदस्याप्रयोजकत्वात्। न हि घटमठभेदादाकाशस्य भेदः। न ह्युपाधितो भिद्यमानं किञ्चन वस्तु दृश्यते। अत एव किं जीवेश्वरयोरुपाधितो भेदो वेति न विकल्पितं प्राक्, दृष्टान्ताभावात्। न च घटाकाशमठाकाशौ दृष्टान्ताविति वाच्यम् ; तद्भेदस्यासम्प्रतिपन्नत्वात्। सम्प्रतिपन्नो हि दृष्टान्ततया स्वीकार्यः। तस्मादयुक्तोऽप्रमाणश्च जीवेश्वरभेदवादः। न च सप्रमाण एवेति वाच्यम् ; 'स आत्मा तत्त्वमसी'त्यादिप्रमाणविरोधात्। न च 'द्वा सुपर्णा' इति श्रुतिः प्रमाणमिति वाच्यम् ; तस्य सत्त्वजीवपरत्वेन [२]व्याख्यातत्वात्। **यद्वा** प्रमातृसाक्षिपरत्वात्। साक्षिण्येव कूटस्थे प्रमातृत्वस्य कल्पितत्वात् साक्ष्येव जीव इति न प्रमातृसाक्षिणोर्वास्तवः कश्चिद् भेदः। अमुमेव प्रमातारमध्यस्ताहङ्काररूपं जीवं मन्यन्तेऽविद्वांसः। न चाहङ्कारः स एव जीव इति वाच्यम् ; अहङ्कारस्य सुषुप्तौ लयदर्शनाज्जीवस्यानित्यत्वापत्तेः, अहङ्कारलयसाक्षित्वेन सुषुप्तौ जीवस्य सत्त्वाच्च।

तस्मादप्रमाण एव जीवेश्वरभेदवादः। एवमप्रमाणत्वादयुक्तत्वादेव च – 'अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशु'रिति च भिन्नात्मज्ञानी निन्दितः श्रुत्या पशुरिति। इदमेवाभिप्रेत्य पशुत्वं **मूर्ख इवे**त्युक्तमाचार्यैः। एवं भेदवादिनः पशोर्मूर्खस्य दुर्वारं संसारभयम्। 'य उदरमन्तरं कुरुते, अथ तस्य भयं भवती'ति श्रुतेः। ईश्वरस्यासंसारित्वेन तस्माद् भिन्नस्य जीवस्य संसारित्वेनैव

१. उपधेयस्य वास्तवभेदे इति आदौ शेषः। २. पैङ्गिरहस्यब्राह्मणेनेति शेषः। द्र. ब्र.सू.भा. १-२-१२।

[संक्षेपेण पूर्वोक्तदोषनिरसनम्]

**यत्तूक्तमीश्वरस्य क्षेत्रज्ञैकत्वे संसारित्वं प्राप्नोति, क्षेत्रज्ञानां चेश्वरैकत्वे संसारिणोऽभावात् संसाराभावप्रसङ्ग इति। एतौ दोषौ प्रत्युक्तौ विद्याऽविद्ययोर्वैलक्षण्याभ्युपगमादिति। कथम्? अविद्यापरिकल्पितदोषेण तद्विषयं वस्तु पारमार्थिकं न दुष्यतीति। तथा च दृष्टान्तो दर्शितो मरीच्यम्भसोषरदेशो न [1]पङ्कीक्रियत इति। संसारिणोऽभावात् संसाराभावप्रसङ्गदोषोऽपि संसारसंसारिणोरविद्याकल्पितत्वोपपत्त्या प्रत्युक्तः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**यदुक्त**मित्यारभ्य **अत्राहे**त्यतः प्राक्तनेन ग्रन्थेन स्वपक्षे विस्तरेण परिहृतमपि चोद्यं सङ्क्षिप्य परिहरति। क्षेत्रज्ञेश्वरैकत्वसम्भावनायैव इदम्।

आनन्दगिरिकृतव्याख्या

**'क्षेत्रज्ञं चापी'त्यत्र क्षेत्रज्ञेश्वरयोरैक्यं स्वाभीष्टं [2]स्पष्टयितुं प्रत्युक्तमेव चोद्यमनुद्रवति—** यत्तूक्तमिति। **तात्त्विकमेकत्वम् , अतात्त्विकं संसारित्वमित्यङ्गीकृत्योक्तमेव समाधिं स्मारयति—** एताविति। **ईश्वरस्य संसारित्वं, संसार्यभावेन संसाराभावश्चेत्युक्तौ दोषौ विद्याऽविद्ययोर्वैलक्षण्येऽपि कथं प्रत्युक्ताविति पृच्छति—** कथमिति। **कल्पितसंसारेण कल्पनाधिष्ठानमद्वयं वस्तु वस्तुतो न सम्बद्धमिति परिहरति—** अविद्येति। तद्विषयं **कल्पनास्पदम् , अधिष्ठानमिति यावत्। कल्पितेनाधिष्ठानस्य वस्तुतोऽसंस्पर्शे दृष्टान्तं स्मारयति—** तथा चेति। **ईश्वरस्य संसारित्वाप्रसङ्गं प्रकटीकृत्य प्रसङ्गान्तरनिरासमनुस्मारयति—** संसारिण इति।

भाष्यार्कप्रकाशः

भाव्यत्वाच्च। तथा च संसारनिवर्तकसम्यग्दर्शनप्राप्तियोग्यं मनुष्यजन्म प्राप्यापि यः सम्यग्दर्शनमसम्पाद्यात्मानं संसारान्न मोचयति, स मनुष्यापशद आत्महा भवत्येव। आत्मानं **हन्ति** संसारपातनेन नाशयतीत्यात्महा इति व्युत्पत्तेः। अस्य च नरकप्राप्तिः श्रुत्यैवोक्ता– 'अन्धं तमः प्रपद्यन्ते [प्रविशन्ति] ये के चात्महनो जनाः' इति। तस्मात् स्वयं नरकं गमिष्यन् अन्यानपि गमयतीत्ययमुपेक्षणीय एव, 'दुष्टं दूरतो वर्जयेदि'ति न्यायात्। अन्यथा एतदनुसरिणामन्येषामप्यन्धतमःप्राप्तेरवर्जनीयत्वात्।

यद्यप्यात्मा न केनचिद् हन्यते, 'नायं हन्ति न हन्यते' इति गीतावचनात् , तथापि अज्ञानकल्पितः प्रमातृलक्षण आत्मा हन्यत एवामीभिः, असंसार्यात्माऽहं ब्रह्मेति ज्ञानेन प्रमातुः सकाशात् संसारनिवृत्तेः, एतज्ज्ञानाभावे तदनिवृत्तेश्च। अन्यथा शास्त्रमनर्थकमेव स्यात्। तस्मादयमात्महैव। अनेनात्मत्वेनाभिमतस्य प्रमातुः संसारपतनरूपहानिसद्भावादिति। तस्मादसंसारीश्वर एव क्षेत्रज्ञ इति स्थितम्।

एतावता ग्रन्थसन्दर्भेण किं लब्धम्? तदाह— **यत्त्वित्यादिना**। कुतः प्रत्युक्तौ? अत आह— **विद्येति**। विद्याऽविद्ययोः परस्परं विलक्षणत्वाद् विद्यया असंसारीश्वरत्वमात्मनः क्षेत्रज्ञस्य, अविद्यया तु संसारित्वमिति भेदाभ्युपगमात्। ननु विद्यया संसाराभावे ऽप्यात्मनोऽविद्यया संसारोऽस्त्येवेति संसारित्वं पक्षे प्राप्तमीश्वरस्येत्यत आह— **अविद्येति**। अविद्याकृतसंसारेण नात्मनः कोऽपि लेपो, मरीच्युदकेन मरुदेशवदिति पूर्वोक्तार्थमाह— **अविद्येति**। नन्वेवं संसारिणोऽभावे संसाराभावप्रसङ्गः प्राप्तः, अत आह— **सोऽपि दोषः प्रत्युक्त इति**। तत्र हेतुमाह— **संसारेति**। संसारसंसारिणोरुभयोरप्यविद्याकल्पितत्वेन मिथ्यात्वाद् विदुषां तदभाव इष्ट एव, विद्यादशायां तदुभयादर्शनात्। न ह्यन्तःकरणादात्मनि विवेचिते सति कोऽपि संसार्युपलभ्यते। अन्तःकरणतादात्म्याध्यासमापन्नो हि प्रमाता, संसारसुखदुःखवत्त्वात्। न चान्तःकरणस्य संसारः इति वाच्यम् ; आत्मतादात्म्याध्यासाभावे केवलान्तःकरणस्य जडत्वेन संसारानुपपत्तेः। न हि घटादीनां जडानां संसारो दृश्यते। तस्मादात्मान्तःकरणाविवेकमूलकः संसारः, संसारी प्रमाता चेति, नास्ति विवेकिदृष्ट्या कोऽपि संसारः संसारी वेति स्थितम्।

---

१. 'आर्द्रीक्रियते' इति पा.। २. पूर्वोक्तस्यैवार्थस्य संक्षिप्य पुनः कथनं स्पष्टप्रतिपत्त्यर्थमिति भावः।

**नन्वविद्यावत्त्वमेव क्षेत्रज्ञस्य संसारित्वदोषः, तत्कृतं च सुखित्वदुःखित्वादि प्रत्यक्षमुपलभ्यते इति चेत् , न ; ज्ञेयस्य क्षेत्रधर्मत्वाज्ज्ञातुः क्षेत्रज्ञस्य तत्कृतदोषानुपपत्तेः। यावत्किञ्चित् क्षेत्रज्ञस्य दोषजातमविद्यमानमासञ्जयसि, तस्य ज्ञेयत्वोपपत्तेः क्षेत्रधर्मत्वमेव, न क्षेत्रज्ञधर्मत्वम्। न च तेन क्षेत्रज्ञो दुष्यति, ज्ञेयेन ज्ञातुः संसर्गानुपपत्तेः। यदि हि संसर्गः स्याज्ज्ञेयत्वमेव नोपपद्येत। यद्यात्मनो धर्मोऽविद्यावत्त्वं दुःखित्वादि च, कथं भोः प्रत्यक्षमुपलभ्यते? कथं वा क्षेत्रज्ञधर्मः? 'ज्ञेयं च सर्वं क्षेत्रं, ज्ञातैव क्षेत्रज्ञः' इत्यवधारितेऽविद्यादुःखित्वादेः क्षेत्रज्ञविशेषणत्वं क्षेत्रज्ञधर्मत्वं, तस्य च**

आनन्दगिरिकृतव्याख्या

**न तावदविद्या संसारं संसारिणं च कल्पयति स्वतन्त्रा,** [1]**तत्त्वव्याघातात्। पारतन्त्र्ये चाश्रयान्तराभावात् क्षेत्रज्ञस्य तद्वत्त्वे**[2] **संसारित्वमिति शङ्कते—** नन्विति। **न चाविद्यावत्त्वमविद्याकृतम् ,** [3]**अनवस्थानादिति भावः।** [4]**यत्तूत्खातदंष्ट्रोरगवदविद्या किं करिष्यतीति, तत्राह—**तत्कृतं चेति। **अविद्यातज्जयोर्ज्ञेयत्वान्नात्मधर्मतेत्युत्तरमाह—** नेत्यादिना। **तदेव प्रपञ्चयति—** यावदिति। **ज्ञेयस्य क्षेत्रधर्मत्वेऽपि क्षेत्रद्वारा क्षेत्रज्ञस्य तत्कृतदोषवत्तेत्याशङ्क्याह—** न चेति। **क्षेत्रस्यापि ज्ञेयत्वाद् न तेन चितो वस्तुतः स्पर्शोऽस्तीत्युपपादयति—** यदीति। **धर्मधर्मित्वेन संसर्गेऽपि ज्ञेयत्वे का क्षतिरित्याशङ्क्याह—** यदीति। **आत्मधर्मस्यात्मना ज्ञेयत्वे स्वस्यापि ज्ञेयत्वापत्त्या कर्तृकर्मविरोधः स्यादित्यर्थः। किञ्च विमतं न क्षेत्रज्ञाश्रितम् , तद्वेद्यत्वाद् , रूपादिवदित्याह—** कथं वेति। **किञ्च 'महाभूतानी'त्यादिना ज्ञेयमात्रस्य क्षेत्रान्तर्भावाद् नाविद्यादेर्ज्ञातृधर्मतेत्याह—** ज्ञेयं चेति। **किञ्च 'एतद्यो वेत्ती'त्युक्तत्वात् क्षेत्रज्ञस्य ज्ञातृत्वनिर्णयाद् न तत्र ज्ञेयं किञ्चित्**

भाष्यार्कप्रकाशः

अविद्यावत्त्वात् संसारित्वं क्षेत्रज्ञस्येति पूर्वोक्तं परिहृतं च दोषं पुनरुत्थाप्य परिहरति स्थूणानिखननन्यायेन दोषपरिहार-दृढीकारार्थम्— **नन्विति। तत्कृतमिति**। अविद्यावत्त्वप्रयुक्तम् , अविद्याकृतमिति यावत्। **प्रत्यक्षमुपलभ्यते** सर्वैरनुभूयत इत्यर्थः। परिहरति— **नेति**। हेतुमाह— **ज्ञेयस्येति**। ज्ञेयस्याविद्यावत्त्वस्य क्षेत्रधर्मत्वात्। अविद्या कस्यचित् करणस्यैव धर्म इति पूर्वमुक्तम्। करणस्य क्षेत्रत्वान्न तेनास्य व्याघातः। ननु ज्ञेयधर्मेणाप्यविद्यया ज्ञातुर्दोषः स्याद् , अत आह— **ज्ञातुरिति। तत्कृतेति**। ज्ञेयधर्माविद्या-कृतेत्यर्थः। ज्ञेयघटधर्मो जाड्यादिर्न हि ज्ञातुः कमपि दोषामापादयन् दृष्ट इति भावः। दोष इत्युपलक्षणं गुणस्यापि। भाष्ये दोषशब्दस्तु संसाररूपदोषपर एव। ननु मास्तु संसारित्वदोषः क्षेत्रज्ञस्य, किञ्चिज्ज्ञत्वादिदोषस्त्वपरिहार्योऽत आह— **यावदिति। यावत्किञ्चिदिति**। यत्किञ्चिदित्यर्थः। **दोषजातं** दोषगणम् , **आसञ्जयसि** आ समन्तात् सङ्गतं करिष्यसि; सम्भावयसीति यावत् ; तस्य सर्वस्यापि दोषजातस्य **ज्ञेयत्वोपपत्तेः** ज्ञेयत्वादित्यर्थः; क्षेत्रधर्मत्वमेव। अत्र दोषशब्दो गुणस्याप्युपलक्षणम् , गुणदोषशून्यत्वादात्मनः। 'अपदोषतैव विगुणस्य गुणः' इति **माघो**ऽप्याह। यद्वा गुणा अपीह दोषत्वेनैव व्यपदिश्यन्ते, गुणानामपि संसारहेतुत्वेन दोषत्वात्। एवकारार्थमाह— **न क्षेत्रज्ञधर्मत्वमिति**। यो यो धर्मः साक्षिणा क्षेत्रज्ञेन ज्ञायते, स सर्वोऽपि क्षेत्रधर्म एव। अत एव निर्धर्मकः साक्षीति सिद्धान्त इति भावः। ननु भवति क्षेत्रधर्म एवाविद्या, तथापि तेन क्षेत्रधर्मेण क्षेत्रस्य भवतु संसारित्वदोषः, यथाऽग्निधर्मेणौष्ण्येन लोहस्य तापकत्वदोषः, अत आह— **न चेति**। तेन क्षेत्रधर्मेणाविद्ययेति यावत्। **क्षेत्रज्ञो न दुष्यति** दोषं न प्रतिपद्यते। हेतुमाह— **ज्ञेयेनेति**। अग्निलोहयोस्तु ज्ञेयत्वादुभयोः संसर्गोऽस्तु, क्षेत्रक्षेत्रज्ञयोस्तु ज्ञेयज्ञात्रोः संसर्गो नोपपद्यत इत्यर्थः। उपपद्यत एवेति वदन्तं प्रत्याह— **यदि हीति**। ज्ञातृज्ञेययोः संसर्गः स्याच्चेत् तर्हि ज्ञातुर्ज्ञातृत्वमेव नोपपद्यते। अग्निसंसर्गाल्लोहस्याग्न्यात्मत्वमिव ज्ञेयसंसर्गाद् ज्ञातुर्ज्ञेयात्मत्वप्राप्तौ कथं ज्ञातृत्वं तस्य स्यात्? न कथमपीति भावः। एवं यो यो धर्मो ज्ञात्रा ज्ञायते स सर्वोऽपि ज्ञेयस्य धर्म एवेति स्थिते आह— **यदीति**। अविद्यावत्त्वं दुःखित्वादि च यद्यात्मनो धर्मस्तर्हि **कथं भोः!** कथं वा भोः! इति पूर्वपक्षिसम्बोधनं (वा); प्रत्यक्ष**मुपलभ्यते** ज्ञायते अविद्यावत्त्वं दुःखित्वं च [5]कर्म?। ज्ञेयं च तत् सर्वमविद्यावत्त्वादिकं कथं वा क्षेत्रज्ञधर्मः स्यात्? न कथमपीत्यर्थः। ज्ञेयस्य क्षेत्रज्ञधर्मत्वं, क्षेत्रज्ञधर्मस्य च ज्ञेयत्वमित्युभयं विरुद्धमेवेति भावः। इदमेवाह— **क्षेत्रेति**। क्षेत्रज्ञातैव क्षेत्रज्ञः, न

१. तत्त्वं स्वातन्त्र्यम्। आश्रयं विना स्थितिरिति यावत्। २. परिशेषाद् वक्तव्ये सतीति शेषः। ३. अविद्यावत्त्वस्याविद्याकृतत्वे तत्कारणस्याप्यविद्यान्तरस्य वाच्यतयाऽनवस्थापत्तिरित्यर्थः। ४. द्र.पृ. ६०५-६०६। ५. ज्ञानस्य कर्मेत्यर्थः।

**प्रत्यक्षोपलभ्यत्वमिति विरुद्धमुच्यतेऽविद्यामात्रावष्टम्भात् केवलम्।**

**अत्राह— सा अविद्या कस्येति? यस्य दृश्यते तस्यैव।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

अविद्यासम्बन्धस्याप्रामाणिकत्वद्योतनाय प्रश्नमुद्भावयति— **अत्राहेति।** अविद्याया आश्रयसापेक्षत्वात् सा चेद् दृष्टा

आनन्दगिरिकृतव्याख्या

**प्रविशतीत्याह—** ज्ञातैवेति। **क्षेत्रक्षेत्रज्ञयोरेवंस्वाभाव्ये सिद्धे सिद्धं क्षेत्रधर्मत्वमविद्यादेरिति फलितमाह—** इत्यवधारित इति। **विरोधाच्च न क्षेत्रज्ञधर्मत्वमविद्यादेरित्याह—** क्षेत्रज्ञेति। **विरुद्धवादित्वे मूलं दर्शयति—** अविद्येति। **मात्रपदस्य व्यावर्त्यं मानयुक्त्याख्यमवष्टम्भान्तर-मिति वक्तुं** केवल**पदम्।**

**ययाऽविद्यया विरुद्धमपि निर्वोढुं शक्यते, तस्याः स्वातन्त्र्याभावात्, चितोऽन्यस्याविद्यमानत्वेनातदाश्रयत्वात्, [१]तस्याः विद्या-स्वभावतया तदाश्रयत्वव्याघातादाश्रयजिज्ञासया पृच्छति—** अत्राहेति। **आश्रयमात्रं पृच्छ्यते, तद्विशेषो वा? प्रथमे प्रश्नस्यानवकाशत्वं**

भाष्यार्कप्रकाशः

तु क्षेत्रमित्येवकारार्थः। एवमवधारिते सति अविद्यादुःखित्वादेः क्षेत्रज्ञविशेषणत्वं, तस्य च क्षेत्रज्ञविशेषणस्य प्रत्यक्षोपलभ्यत्वमिति च विरुद्धमिदम् अविद्यामात्रावष्टम्भात् केवलमुच्यते। क्षेत्रज्ञस्य दुःखित्वादि प्रत्यक्षमुपलभ्यत इति ह्युक्तं पूर्वपक्षिणेति भावः। क्षेत्रज्ञविशेषणत्वमिति पदं स्वयमेव व्याख्याति— **क्षेत्रज्ञधर्मत्वमिति**। एवं विरुद्धार्थकथने हेतुरविद्यावष्टम्भमात्रमेव। अविद्या चेयं मायैव। न तु पूर्वोक्ततामसप्रत्ययः। माया च मूलाज्ञानम्। **अवष्टम्भो** नामावलम्बनम्।

न च क्षेत्रधर्मवत् क्षेत्रज्ञधर्मोऽपि क्षेत्रज्ञेन ज्ञायत एव, अन्यथा ज्ञानानन्दादिक्षेत्रज्ञधर्माणामभावापत्तेरिति वाच्यम् ; 'सच्चिदानन्दं ब्रह्म' इति श्रुत्या ज्ञानानन्दसद्रूपे क्षेत्रज्ञे ज्ञानानन्दादिधर्मायोगाद् ज्ञानानन्दादिरात्मनः स्वरूपमेव। अत एव निर्धर्मक आत्मेति सिद्धान्तः। न च ज्ञात्राऽनुभूयमानस्यानन्दस्य न ज्ञातृस्वरूपत्वमिति वाच्यम्, अहमानन्दमनुभवामीति त्रिपुट्या अदर्शनात्। न हि सुप्तिमूर्छादौ त्रिपुटी दृश्यते, किन्तु केवलमनुभव एव, तस्यैवानन्दरूपत्वात् सत्यत्वाच्च। अहं सुखं अनुभवामीति तु अन्तःकरणधर्मस्य सुखस्यैवानुभवः, न त्वात्मानन्दस्य। तस्मादनुभव एवानन्दः सन् च। स एव क्षेत्रज्ञः। न हि केवलेऽनुभवे यः कोऽपि धर्मोऽस्ति, येन क्षेत्रज्ञः सधर्मकः स्यात्। तस्माज्ज्ञातुरात्मनः स्वस्वरूपमेव ज्ञानमानन्दश्च न तु गुण इति सिद्धान्तः। एवं सति ज्ञानानन्दादेः साक्षिरूपत्वेन स्वत एव भानमुपपद्यते। न च ज्ञानादीनामात्मधर्मत्वव्यवहारविरोध इति वाच्यम्; 'आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति तद्धर्माः अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्ते' इति वचनात् पृथगवभासप्रयुक्तत्वात् तद्व्यवहारस्य।

**ननु** सच्चिदानन्दानामात्मस्वरूपत्वमस्तु नाम, सर्वान्तरत्वसर्वनियामकत्वसर्वविशेषितसर्वाधारत्वापहतपाप्मत्वादयो धर्माः आत्मनः सन्ति वा न वा? आद्ये - ते धर्माः किमात्मना वेद्यन्त उतान्येन? नात्मना, ज्ञातृधर्माणां ज्ञातृवेद्यत्वानुपपत्तेस्त्वयैवोक्तत्वात्। नान्येन, आत्मान्यस्य सर्वस्यापि जडत्वात्। द्वितीये - 'एको देवः' इत्यादिश्रुतिविरोधः, तत्र सर्वान्तरत्वादिधर्माणामुक्तत्वात्, अनु-भवविरोधश्चेति चेत्, **मैवम्**; यदि सर्वं सत्यं स्यात्, तर्हि सर्वान्तरत्वादिधर्माः आत्मनः सत्याः स्युः, न तु सर्वस्य सत्यत्वम्, 'तत् सत्यम्, अतोऽन्यदार्तम्' इति श्रुत्या ब्रह्मण एकस्यैव सत्यत्वात्, तदन्यस्य सर्वस्यापि मिथ्यात्वात्। तस्मादविद्ययाऽऽत्मनि कल्पिता एव सर्वान्तरत्वादिधर्माः, सर्वप्रपञ्चवत्। तथा तद्धर्माणां साक्षिभास्यत्वं च कल्पितमेवेति [न] ज्ञातृधर्माणां ज्ञातृवेद्यत्वं, न वा ज्ञातृवेद्यानां ज्ञातृधर्मत्वम्। न चैवं ज्ञेयस्य तद्धर्माणां तस्य[२] तेषां ज्ञातृवेद्यत्वस्यापि मायया कल्पितत्वमेवेति वाच्यम्; इष्टापत्तेः।

ननु सेयमविद्या किमात्मसम्बन्धिनी, उतानात्मसम्बन्धिनी? नाद्यः, असङ्गस्वप्रकाशस्यात्मनोऽविद्यासम्बन्धायोगात्। नान्त्यः, अनात्मनो जडस्याज्ञानाश्रयत्वायोगात्। न च स्वतन्त्रैवेति वाच्यम् ; जडत्वेन पारतन्त्र्यादित्यभिप्रेत्याविद्यायाः आश्रयजिज्ञासया पृच्छति— **अत्रेति**। न च करणधर्मोऽविद्येति पूर्वमुक्तमिति वाच्यम् ; तामसप्रत्ययरूपाविद्यायाः करणधर्मत्वस्य

१. **तस्याः**= चितः। २. 'तत्साक्षिभास्यत्वस्य च कल्पितत्वे' इति योज्यम्। पूर्वत्र ज्ञातृधर्माणामुक्तो न्यायोऽत्रापि समान इति भावः।

**कस्य दृश्यत इति? अत्रोच्यते— अविद्या कस्य दृश्यत इति प्रश्नो निरर्थकः। कथम् ? दृश्यते चेदविद्या, तद्वन्तमपि पश्यसि। न च तद्वति उपलभ्यमाने 'सा कस्य' इति प्रश्नो युक्तः। न हि गोमत्युपलभ्यमाने 'गावः कस्य' इति प्रश्नोऽर्थवान् भवेत्।**

**ननु विषमो दृष्टान्तः; गवां तद्वतश्च प्रत्यक्षत्वात् तत्सम्बन्धोऽपि प्रत्यक्ष इति प्रश्नो निरर्थकः; न तथा अविद्या,**

अनुभूतिस्वरूपाचार्यटिप्पणम्

आश्रयोऽपि दृष्ट एवेति प्रश्नो नोपपद्यत इत्याह— **यस्य दृश्यत इति।**

आश्रयविशेष(ण)ज्ञानाय प्रत्य[प्रश्न] इत्याह— **कस्य दृश्यत इति।** ज्ञाते प्रश्नानुपपत्तेः प्रष्टव्यार्थाज्ञानाश्रयः आत्मा पृष्टः[प्रष्टुः] स्वानुभवसिद्धः इति प्रश्नो न सम्भवतीत्याह— **अत्रोच्यत इत्यादिना।**

आनन्दगिरिकृतव्याख्या

**मत्वाऽऽह—** यस्येति। **अविद्या दृश्याऽदृश्या वा? दृश्यत्वे पारतन्त्र्यात् किञ्चिन्निष्ठत्वेनैव तद्दृष्टेर्नाश्रयमात्रं प्रष्टव्यम्। अदृश्यत्वे वा अप्रकाशत्वादसिद्धिरेव स्यादित्यर्थः।**

**द्वितीयमालम्बते—** कस्येति। **अविद्यायाः दृश्यमानत्वादाश्रयविशेषस्यात्मनोऽपि स्वानुभवसिद्धत्वात् प्रश्नस्य निरवकाशतेत्युत्तरमाह—** अत्रेति। **प्रश्नानर्थक्यं प्रश्नद्वारा स्फोरयति—** कथमित्यादिना। **तथापि कथं प्रश्नासिद्धिः? तत्राह—** न चेति। **तदेव दृष्टान्तेन स्पष्टयति—** न हीति।

**दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं चोदयति—** नन्विति।

भाष्यार्कप्रकाशः

तत्रोक्तत्वान्मायारूपाविद्याया आश्रयस्य पृष्टत्वादिहेति। **अत्र** अस्मिन्नंशे आह , पूर्ववादीति शेषः। किमाह? इत्यत आह— **सेति**। सा यदवष्टम्भात् केवलं विरुद्धमुच्यते, सा अविद्या अनाद्यनिर्वाच्यं मायानामकं मूलाज्ञानम् , कस्येति सम्बन्धसामान्ये शेषषष्ठी; कस्य सम्बन्धिनीत्यर्थः। किमाश्रयेति यावत्। अथ सिद्धान्ती - किं त्वया अविद्यायाः आश्रयमात्रं पृच्छ्यते? उत तद्विशेष इति विकल्प्य, प्रथमे प्रश्नस्यानवकाशं मत्वाऽऽह— **यस्येति**। यस्याविद्या दृश्यते तस्यैव। यस्येति तस्येति च शेषषष्ठ्यौ। अविद्या यदाश्रयत्वेन दृश्यते स एवाविद्यायाः आश्रय इत्यर्थः। अयं भावः - किमविद्या दृश्या, उतादृश्या? दृश्यत्वेऽविद्यायाः पारतन्त्र्यात् किञ्चिन्निष्ठत्वेनैव तद्दर्शनादाश्रयमात्रं प्रष्टव्यम्। अदृश्यत्वे त्वविद्यायाः अप्रकाशत्वादसिद्धिरेव स्यादिति।

ननु मया अविद्यायाः आश्रयविशेषः पृच्छ्यते इत्याह पूर्ववादी— **कस्येति**। किमाश्रयाऽविद्या दृश्यत इत्यर्थः। अविद्याया आश्रयविशेषः कः इति यावत्। अविद्याया दृश्यमानत्वादाश्रयविशेषस्यात्मनोऽपि स्वानुभवसिद्धत्वात् प्रश्नस्यानवकाशत्वमित्युत्तरमाह सिद्धान्ती— **अत्रेति**। **अत्रा**स्मिन् प्रश्ने **उच्यते** उत्तरं मयेति शेषः। किमुच्यते? अत आह— **अविद्येति**। कस्याविद्येति सम्बन्धः। किमाश्रया अविद्येत्यर्थः। कस्मात् प्रश्नो निरर्थक इति पृच्छति पूर्ववादी— **कथमिति**। प्रश्नानर्थक्यं स्फुटयति सिद्धान्ती— **दृश्यत इति**। त्वयेति शेषः। अविद्या दृश्यते चेत् तर्हीति शेषः। **तद्वन्त**मविद्यावन्तमपि **पश्यसि** जानासि। साश्रयस्य हि वस्तुनो दर्शनमाश्रयदर्शनं विना न सम्भवतीति कृत्वा[१] कथं तवाविद्याश्रयवस्तुदर्शनं विना अविद्यादर्शनं जातमित्यर्थः। तथापि कथं प्रश्नवैयर्थ्यम्? अत आह— **न चेति**। **तद्वतीति**। अविद्यावतीत्यर्थः। **सेति**। अविद्येत्यर्थः। अविद्यायाः अविद्यावतश्च दर्शने सत्यविद्या कस्येति प्रश्नो न युज्यत इति यावत्। तत्र दृष्टान्तमाह— **न हीति**। गावोऽस्य सन्तीति गोमान् , तस्मिन् गोमति पुरुषे गवां तद्वतश्च दर्शने सत्येव गोमान् देवदत्तो मया दृष्ट इति प्रत्येति विष्णुमित्रः, न तु तत्प्रत्ययानन्तरं कस्य गाव इति पृच्छति। विदितार्थे प्रश्नानवकाशादिति भावः।

ननु गाव इव गोमानिव चाविद्या तद्वांश्च न मया प्रत्यक्षेण दृश्येते, येन प्रश्नो निरर्थकः स्यात् , किन्तु अप्रत्यक्षेणैवेति कृत्वा न मम प्रश्नस्यानर्थक्यमित्याह पूर्ववादी— **नन्विति**। अविद्यायाः प्रत्यक्षत्वाभ्युपगमेऽविद्यावतोऽपि प्रत्यक्षत्वमभ्युपगन्तव्यं स्यादिति कृत्वा

१. अज्ञानस्य च साश्रयस्यैव दर्शनम् , 'अहं न जानामि' इत्येव प्रतीतेरिति भावः।

**तद्वांश्च प्रत्यक्षौ, यतः प्रश्नो निरर्थकः स्यात्।**

**अप्रत्यक्षेणाविद्यावता अविद्यासम्बन्धे ज्ञाते किं तव स्यात्? अविद्याया अनर्थहेतुत्वात् परिहर्तव्या स्यात्। यस्याविद्या, स तां परिहरिष्यति। ननु ममैवाविद्या। जानासि तर्ह्यविद्यां, तद्वन्तं चात्मानम्। जानामि, न तु प्रत्यक्षेण। अनुमानेन चेज्जानासि कथं सम्बन्धग्रहणम्? न हि तव ज्ञातुर्ज्ञेयभूतया अविद्यया तत्काले सम्बन्धो ग्रहीतुं शक्यते[१],**

अनुभूतिस्वरूपाचार्यटिप्पणम्

प्रष्टुः स्वाज्ञाननिरासाय हि प्रश्नः। यद्यज्ञानाश्रयः परोक्ष एव तथा[तदा] प्रश्नो निरर्थक इत्याह— **अप्रत्यक्षेणाविद्यावतेति**। अगृहीताभिप्रायस्य चोद्यमुद्भाव्य प्रश्नानुपपत्तिं विवृणोति—[**अविद्याया इति।]** अविद्याया अनर्थहेतुत्वादित्याह पूर्ववादी। जानाम्यात्मानम् , किन्तु प्रत्यक्षेण न जानामि। अतः पृच्छामीत्यर्थः। एवं वदताऽनुमेयत्वमुक्तं स्यात्। तन्न सम्भवतीत्याह— **अनुमानेन चेदिति**। अहमविद्यावान् तत्कार्यवत्त्वात् , न य एवं स एवम् , यथा मुक्त इत्यनुमानेन चेद् जानासि, कथं तर्हि अविद्यया तव सम्बन्धग्रहणम्? काऽनुपपत्तिरित्यत आह— [**न हीति**।] ननु यद्येकस्य कर्तृत्वकर्मत्वा-

आनन्दगिरिकृतव्याख्या

**अज्ञानाश्रयस्य परोक्षत्वेऽपि प्रश्ननैरर्थक्यमित्याह—** अप्रत्यक्षेणेति। **अविद्यावतोऽप्रत्यक्षत्वेऽपि तेनाविद्यासम्बन्धे सिद्धे प्रष्टुस्तव प्रश्नानर्थक्यसमाधिर्न कश्चिदित्यर्थः। अबुद्धपराभिसन्धिः शङ्कते—** अविद्याया इति। **अविद्यावतस्तत्परिहाराद् नान्येन प्रयतितव्यमित्याह** —यस्येति। **ममैवाविद्यावत्त्वात् तत्परिहारे मया प्रयतितव्यमिति शङ्कते—** नन्विति। **तर्हि प्रश्नानर्थक्यमिति सिद्धान्ती स्वाभिसन्धिमाह—** जानासीति। **आत्मानमविद्यावन्तं जानन्नपि तद्विषयाध्यक्षाभावात् पृच्छामीति शङ्कते—** जानामीति। **अविद्यावतोऽप्रत्यक्षत्वं वदता तस्य - अहमविद्यावान् अविद्याकार्यवत्त्वाद् व्यतिरेकेण मुक्तात्मवदिति अनुमेयत्वमिष्टमित्यभ्युपेत्य दूषयति—** अनुमानेनेति। **आत्मनोऽविद्यासम्बन्धग्रहे काऽनुपपत्तिरित्याशङ्क्य , ज्ञातैवात्मा स्वस्याविद्यासम्बन्धं बुध्यतेऽन्यो वा ज्ञातेति विकल्प्याऽऽद्यं दूषयति—** न हीति।

भाष्यार्कप्रकाशः

उभावपि न प्रत्यक्षावित्युक्तम्। अविद्यावतः परोक्षत्वेऽपि प्रश्नो व्यर्थ एवेत्याह सिद्धान्ती— **अप्रत्यक्षेणेति**। अप्रत्यक्षेणाविद्यावता सहाविद्यासम्बन्धे ज्ञाते सिद्धे सति तव किं समाधानं स्यान्न किमपि। अविद्यावतोऽप्रत्यक्षत्वेऽपि तेनाविद्यासम्बन्धे सिद्धे प्रष्टुस्तव प्रश्नानर्थक्यसमाधानं न किमप्यस्तीत्यर्थः। अविद्यया सम्बन्धः कश्चिदस्तीति परोक्षज्ञाने सत्यपि कस्याविद्येति प्रश्नो निष्फल एवेति भावः। ननु दुष्टाविद्यापरिहारार्थत्वेन प्रश्नः सफल एवेत्याह पूर्ववादी— **अविद्याया इति**। **अनर्थः** शोकमोहादिलक्षणः संसारः। **परिहर्तव्येति**। अविद्येति[अविद्यावतेति] कर्तृपदशेषः। ननु य एवाविद्यावान् स एव स्वानर्थहेतुमविद्यां परिहरिष्यतीति कृत्वा किं तवाविद्याश्रयविशेषजिज्ञासाप्रयुक्तप्रश्नेन फलमित्याह सिद्धान्ती— **यस्येति**। त्वया परोक्षेण ज्ञातेयमविद्या यस्य सम्बन्धिनी स एवैनां परिहरिष्यतीति किं तवान्यदीयाविद्यापरिहारेणेति भावः। ननु नाहमन्यदीयाविद्यापरिहारार्थं पृच्छामि, किन्तु मदीयाविद्यापरिहारार्थमेवेत्याह— **नन्विति**। ननु यदि त्वदीयैवाविद्या त्वया परिजिहीर्षिता, तर्हि त्वमविद्यां तद्वन्तं चात्मानं जानास्येवेति कस्याविद्येति प्रश्नो व्यर्थ एवेत्याह सिद्धान्ती— **जानासीति**। ननु यद्यहं गोमन्तं देवदत्तमिवाविद्यावन्तमात्मानं प्रत्यक्षेण जानामि, तर्हि व्यर्थ एव स्यात् प्रश्नः, न तु तथा जानामि; किन्तु अहमविद्यावान् , अविद्याकार्यशोकमोहादिमत्त्वात् , व्यतिरेकेण मुक्तात्मवत् इत्यनुमानेन जानामि। तस्मान्न प्रश्नानर्थक्यमित्याह पूर्ववादी— **जानामीति**। जानामि परोक्षेणेति शेषः। प्रत्यक्षेण तु न जानामीत्यन्वयः। अविद्यायास्तद्वतो मम चाप्रत्यक्षत्वात् पारोक्ष्येण तदुभयं विदित्वा कस्याविद्येति पृच्छामीति भावः। नन्वनुमानेन चेत् त्वमविद्यां तद्वन्तं च जानासि, तर्हि तव कथं स्वस्याविद्यायाश्च वर्तमानस्य सम्बन्धस्य ग्रहणमित्याक्षिपति— **अनुमानेनेति**। नन्वनुमानेनैव सम्बन्धोऽपि गृह्यताम् ; का तत्रानुपपत्तिः? अत आह सिद्धान्ती— **न हीति**। **तत्काल इति**। यस्मिन् कालेऽविद्यां जानासि तस्मिन् काल इत्यर्थः। आत्मा

१. आत्माविद्यासंबन्धग्रहणस्य संबन्धिभूतात्मग्रहणसापेक्षत्वात् ततः प्रागात्मनोऽपि ग्रहणमावश्यकमिति भावः।

**[1]अविद्याया विषयत्वेनैव ज्ञातुरुपयुक्तत्वात्। न च ज्ञातुरविद्यायाश्च संबन्धस्य यो ग्रहीता, ज्ञानं चान्यत् तद्विषयं संभवति, अनवस्थाप्राप्तेः। यदि ज्ञात्राऽपि ज्ञेयसम्बन्धो ज्ञायेत, अन्यो ज्ञाता कल्प्यः स्यात् , तस्याप्यन्यः, तस्याप्यन्य इत्यनवस्था अपरिहार्या। यदि पुनरविद्या ज्ञेया, अन्यद्वा ज्ञेयं ज्ञेयमेव। तथा ज्ञाताऽपि ज्ञातैव, न ज्ञेयं**

अनुभूतिस्वरूपाचार्यटिप्पणम्

योगादविद्यां प्रति ज्ञातुरात्मनोऽविद्यावत्तया ज्ञेयत्वं न सम्भवति, तर्हि अन्येन ज्ञेयत्वं भवत्वित्याशङ्क्याह— **न च ज्ञातुरित्यादिना।** एवं तावदात्मनः (स्व)स्वज्ञेयत्वपरज्ञेयत्वासम्भवात् तस्याविद्यासम्बन्धो न प्रामाणिकः, किन्तु [2]नित्यानुभवगम्यः इत्युपपाद्य, स्वपक्षलाभमाह— **यदि पुनरित्यादिना।**

आनन्दगिरिकृतव्याख्या

तत्काले **स्वस्याविद्यां प्रति ज्ञातृत्वावस्थायामिति यावत्। अविद्यां विषयत्वेन गृहीत्वा तज्ज्ञातृत्वेनैवोपयुक्तस्यात्मनः तस्याः**[3] **स्वात्मनि कुतः सम्बन्धज्ञातृत्वम् , एकस्य कर्मकर्तृत्वविरोधादित्याह—**अविद्याया इति। **द्वितीयं निरस्यति—** न चेति। **यो ग्रहीता स न सम्भवतीति सम्बन्धः।** तद्विषयमिति। **ज्ञातुरविद्यायाश्च सम्बन्धस्तच्छब्दार्थः। अनवस्थामेव प्रपञ्चयति—** यदीति। **आत्मनः स्वपरज्ञेयत्वायोगात् ,**

भाष्यार्कप्रकाशः

अविद्याग्रहणसमयेऽविद्यासम्बन्धं ग्रहीतुं न शक्नोतीत्यत्र को हेतुरित्यत्राह— **अविद्याया इति।** अविद्यां विषयत्वेनैव गृहीत्वा तज्ज्ञातृत्वेनैवोपयुक्तस्यात्मनो न सम्बन्धज्ञातृत्वसम्भवः इत्यर्थः। ननु योऽविद्यां गृह्णाति तस्य ज्ञातुरात्मनोऽन्य एव ज्ञाता आत्माविद्यासम्बन्धं गृह्णातु , को दोषः? तत्राह— **न चेति।** ज्ञातुरात्मनोऽविद्यायाश्च यः सम्बन्धस्तस्य यो ग्रहीता, स न सम्भवति; **तद्विषय**मविद्यात्मसम्बन्धविषयमन्यच्च ज्ञानं न सम्भवति। असम्भवे हेतुमाह— **अनवस्थाप्राप्तेरिति।** अनवस्थामेव दर्शयति— **यदीति।** ज्ञेयेन सम्बन्धो यस्य स ज्ञेयसम्बन्धो ज्ञाताऽपि। यद्वा ज्ञाता ज्ञेयसम्बन्धश्चेत्यर्थः। ज्ञायेत यदि तर्ह्यस्य ज्ञानायान्यो ज्ञाता कल्प्यः स्यात् , अन्यं ज्ञातारं विना प्रकृतज्ञातुः ज्ञेयत्वायोगात्। स चान्यो ज्ञाता केनचिदपरेण ज्ञायेतैव प्रकृतज्ञातृवदिति कृत्वा अन्यज्ञातृ-ज्ञानायापरो ज्ञाता कल्प्यः; स चान्यो ज्ञाता केनचिदितरेण ज्ञात्रा ज्ञायेतैव, ज्ञातृत्वांशेऽविशेषात् प्रकृतान्ययोरस्य चेत्येतस्यापरस्य ज्ञातुः ज्ञानार्थमितरो ज्ञाता कल्प्य इत्यनवस्था अपरिहार्या स्यात्।

**नन्वेवं** ज्ञातुरात्मनो ज्ञेयत्ववचने भवत्यनवस्थादोष इति ज्ञातुः ज्ञेयत्वं मा भून्नाम, अविद्यात्मसम्बन्धस्य ज्ञेयत्वे का अनुपपत्तिरिति चेत्? **मैवम्** ; ज्ञातुरात्मनो ज्ञेयत्वं विना तन्निष्ठाविद्यासम्बन्धस्य ज्ञेयत्वायोगात्। आत्माविद्योभयपदार्थज्ञानाधीनं ह्यात्माविद्यासम्बन्धज्ञानमिति। अत एव ज्ञातुरात्मनः कर्मकर्तृत्वविरोधादपि नाविद्यात्मसम्बन्धस्य ज्ञेयत्वमित्यभियुक्ताः।

**ननु** अविद्यावतः आत्मनोऽनुमानवेद्यत्वं यथा दुष्टम् , तथा प्रत्यक्षवेद्यत्वमपि दुष्टमेवेति कृत्वाऽनुमानेन चेज्जानासि कथं सम्बन्धग्रहणमित्याचार्यैः कुतो भाषितमिति चेद्? **उच्यते—** स्वप्रकाशस्यात्मनः नित्यापरोक्षचैतन्यरूपत्वान्नास्त्यात्मनः प्रत्यक्षत्वे काऽपि विप्रतिपत्तिः, 'यत्साक्षादपरोक्षाद् ब्रह्म' इति श्रुतेः, आत्मप्रत्यक्षस्य सार्वजनीनत्वाच्च। न हि कोऽपि ममाहमप्रत्यक्ष इति मन्यते। न चैतावन्मात्रेण ज्ञातुर्ज्ञेयत्वसम्भवः, प्रमाणव्यापारप्रयुक्तत्वाज्ज्ञेयत्वस्य। तथाहि— चक्षुरादीन्द्रियव्यापारानन्तरं घटसुखादि-प्रत्यक्षसम्भवाद् घटादेः ज्ञेयत्वम् , आत्मा तु प्रमाणव्यापारात् प्रागेवास्तीति भातीति च कथं तस्य ज्ञेयत्वम्? न कथमपीति।

एवमात्मनः प्रत्यक्षत्वेनाज्ञेयत्वे सिद्धे , अविद्यायाश्च न जानामीत्यनुभवबलेन प्रत्यक्षत्वे सिद्धे , तत्सम्बन्धोऽपि प्रत्यक्ष एवेति कृत्वा नास्त्यविद्यावत आत्मनः प्रत्यक्षत्वे कोऽपि दोष इति। ननु यद्येवं ज्ञातुर्ज्ञेयत्ववचनेऽनवस्थादोषस्तर्हि ज्ञातुर्ज्ञेयत्वं माऽस्त्वित्याह— **यदीति।** आत्मातिरिक्तं सर्वमप्यविद्यादिकं वस्तु जडत्वाज्ज्ञेयमेव, न ज्ञातृ। आत्मैक एव चेतनत्वात् ज्ञातैव न ज्ञेय इत्यर्थः। ननु आत्मा ज्ञातैव भवतु, अविद्या ज्ञेयैव भवतु, किमेतावता स्वप्रकाशासङ्गचिद्रूपस्य परमात्मनः कथमविद्यासङ्ग इत्यत्र

१. 'अविद्याविषयित्वेनैव' इति पा.। २. नित्यानुभवः साक्षी। साक्षिगम्य इत्यर्थः। ३. **तस्याः** अविद्यायाः।

**भवति। यदा चैवम् , अविद्यादुःखित्वाद्यैर्न ज्ञातुः क्षेत्रज्ञस्य किञ्चिद् दुष्यति।**

**नन्वयमेव दोषो यद् दोषवत्क्षेत्रविज्ञातृत्वम्। न ; विज्ञानस्वरूपस्यैवाविक्रियस्य विज्ञातृत्वोपचारात्। यथोष्ण-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ज्ञातृत्वे विकारवत्त्वादनित्यत्वप्रसङ्ग इत्याह— **नन्वयमेवेति।** ज्ञानस्य क्रियात्वानभ्युपगमान्न दोष इत्याह— **न, विज्ञानस्वरूपस्यैवेति।** अयं चार्थोऽस्माभिर्भगवद्वचनानुसारेणैवोक्तः, न स्वमनीषिक एवेत्य[स्वमनीषिकयैवेत्याह—]

आनन्दगिरिकृतव्याख्या

**तस्मिन्नविद्यासम्बन्धस्याप्रामाणिकत्वाद् , नित्यानुभवगम्यत्वे स्थिते फलितमाह—** यदि पुनरिति। यदा चैवं **तदेत्यध्याहार्यम्।**

**ज्ञातुरात्मनो न किञ्चिद् दुष्यतीत्येतदमृष्यमाणः शङ्कते—** नन्विति। **किं ज्ञातृत्वं ज्ञानक्रियाकर्तृत्वं, ज्ञानस्वरूपत्वं वा? नाद्यः, तदनभ्युपगमात् तत्प्रयुक्तदोषाभावात् , द्वितीये ज्ञातृत्वस्यौपचारिकत्वान्न तत्कृतो दोषोऽस्तीत्याह—** नेत्यादिना। **असत्यामपि क्रियायां**

भाष्यार्कप्रकाशः

समाधानमायातम्? इत्यत आह— **यदेति**। यदा चैवमात्मा ज्ञातैव, न ज्ञेयः, अविद्यादिकं ज्ञेयमेव, न ज्ञातृ इति नियमः सिद्धस्तदेति शेषः। किञ्चिदपि न दुष्यतीति। न कोऽपि दोष इत्यर्थः। आत्मन्यविद्यासम्बन्धस्याप्रामाणिकत्वादिति भावः।

**अत्रेदमाकूतम्** - स्फीतालोकवति सूर्ये [१]पेचकानुभवसिद्धान्धकारवद् असङ्गस्वप्रकाशेऽप्यात्मन्यज्ञजनानुभवसिद्धमस्ति किञ्चिदज्ञानमप्रामाणिकं मिथ्याभूतमनिर्वाच्यम्। सूर्ये पेचकानुभवसिद्धं तम इवात्मन्यज्ञानुभवसिद्धमज्ञानमपि कालत्रयेऽपि नास्तीति कृत्वा कथमात्मन्यविद्यासम्बन्धः इति प्रश्नो व्यर्थ एव। न हि वयमात्मन्यविद्यासम्बन्धं सत्यं ब्रूमः; अज्ञदृष्ट्या त्वात्मन्यविद्यासम्बन्धोऽस्त्येव कश्चिन्मिथ्याभूतोऽप्रामाणिकः, अहमज्ञः इति तदनुभवस्य दुरपलापत्वात्। इदं चाज्ञानुभवसिद्धमात्माश्रयमज्ञानं नातीव विचारणीयम् , अविचारसिद्धत्वादस्येन्द्रजालादिवत्। एवमज्ञानस्यैवाविचारसिद्धत्वे कथं पुनस्तस्यात्मनि सम्बन्धस्य विचारक्षमत्वं स्यात्? न कथमपि। तस्मादात्मन्यविद्यासम्बन्धो दुर्निरूपः। एवमात्मन्यविद्यासम्बन्धस्यैव दुर्निरूपत्वे कथं पुनरविद्याकार्यदुःखादिसम्बन्धस्य सुनिरूपत्वं स्यात्? न कथमपि। तस्मादसङ्गस्वप्रकाशचिद्रूप एवात्मा, न त्वविद्यादुःखादिसम्बद्धः।

न चाज्ञोऽहं दुःख्यहमित्यादिप्रत्यक्षसिद्धस्य कथमज्ञानदुःखादिसम्बन्धस्यात्मन्यपलाप इति वाच्यम् ; प्रत्यक्षसिद्धस्यापि प्रमाणविरुद्धस्यार्थस्य रज्जुसर्पादेरिवापलापस्य सुशकत्वात् कर्तुम्। आत्मन्यज्ञानादिसम्बन्धस्याप्रामाणिकत्वं तु दर्शितमेवाचार्यैः। तदेव पुनरपि सुखबोधाय दर्शयामि— आत्मनाऽनुभूयमानाः इमेऽज्ञानदुःखादयः किमात्मधर्माः? उतानात्मधर्माः? नाद्यः - आत्मधर्माणामात्मनाऽनुभूयमानत्वायोगात् , आत्मधर्मानुभवितुरात्मान्तरस्य चाभावात् , सत्त्वे चानवस्थादोषात् , 'नान्योऽतोऽस्ति द्रष्टा' इति श्रुतिविरोधाच्च। अतः परिशेषादनात्मनोऽन्तःकरणादेरेव धर्माः। तेषां चानात्मधर्माणां कथमात्मनि सम्बन्धः? न हि घटधर्माणां कम्बुग्रीवादीनां द्रष्टर्यात्मनि सम्बन्धः। न चान्तःकरणस्याज्ञानाश्रयत्वं कथमचेतनस्येति वाच्यम् ; आत्मप्रतिबिम्बग्रहणेन तस्य सचेतनत्वात्। अमी चानात्मधर्मा अनादिमायया स्वात्मन्यध्यस्ता रज्जौ सर्पवदिति हेतोः प्रत्येति लोकः- अहमज्ञो दुःखी चेति। अमीभिश्चाध्यस्तैरविद्यादुःखित्वाद्यैरात्मनो न कोऽपि दोषः। यथा बालेनाध्यस्तैस्तलमलिनत्वाद्यैर्गगनस्य न कोऽपि लेपः, तद्वदिति। आत्मनाऽनुभूयमाना चेयमनादिमाया नात्मधर्मः, स्वानुभूतस्य स्वधर्मत्वायोगात्। नाप्यनात्मधर्मः, मायाकार्यत्वादनात्मनः। तस्माद् अनिर्वाच्यैव धर्मत्वेन धर्मित्वेन वा मायेति।

ननु क्षेत्रज्ञस्यानात्मनोऽविद्यादुःखित्वादिभिरनात्मधर्मैर्माऽस्तु नाम कोऽपि दोषः, तैः सह सङ्गाभावात्। तथाप्यस्त्येव कश्चिद् दोष इत्याह पूर्ववादी— **नन्विति**। क्षेत्रं जानातीति क्षेत्रज्ञ इति व्युत्पत्तेः। आत्मनः क्षेत्रज्ञत्वात् क्षेत्रस्य चान्तःकरणशरीरादिलक्षणस्य दुःखजरादिदोषयुक्तत्वाद् दोषयुक्तक्षेत्रदर्शनमात्मनो दोष एव, दुष्टभार्यापुत्रादिदर्शनवत्। क्षेत्रज्ञस्य क्षेत्रे स्वीयाभिमानसत्त्वादिति भावः। परिहरति सिद्धान्ती— **नेति**। आत्मनः क्षेत्रज्ञत्वलक्षणं ज्ञातृत्वमपि न तात्त्विकम् , अविक्रियस्यात्मनो ज्ञातृत्वायोगात् , ज्ञातृत्वं हि

१. पेचकः = उलूकः।

**तामात्रेणाग्नेस्तप्तिक्रियोपचारः, तद्वत् । यथाऽत्र भगवता क्रियाकारकफलात्मत्वाभावः आत्मनि स्वत एव दर्शितः,**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**यथाऽत्र भगवतेत्यादिना।** स्वतः आत्मनि क्रियाकारकफलात्मकत्वाभावो यथा भगवता दर्शितः इत्युत्तरेणान्वयः। **तथा**

आनन्दगिरिकृतव्याख्या

**क्रियोपचारं दृष्टान्तेन स्फुटयति—**यथेति। **आत्मनि वस्तुतो विक्रियाऽभावे भगवदनुमतिं दर्शयति—**यथाऽत्रेति। **गीताशास्त्रं सप्तम्यर्थः। स्वत एवात्मनि [1]क्रियाद्यात्मत्वाभावो भगवता शास्त्रे यथोक्तस्तथैव व्याख्यातमस्माभिरिति सम्बन्धः। कथं तर्हि क्रियादिरात्मनि भाति?**

भाष्यार्कप्रकाशः

विकारः। किन्तु ज्ञानस्वरूप एवात्मा, 'सत्यं ज्ञानम्' इति श्रुतेः।

**ननु** ज्ञानस्यापि कथमविक्रियत्वम्? घटज्ञानं पटज्ञानमित्यादिभेदरूपविकारदर्शनादि चेत् , **मैवम्** ; घटादिविषयाणामेव तत्र भेदः, न तु ज्ञानस्य। सर्वदाऽप्येकरूपैव हि संवित् , या स्वयम्प्रभत्वादात्मानमन्यांश्चावभासयति सूर्यादिप्रकाशवत्। न हि घटप्रकाश-कुड्यप्रकाशकुसूलप्रकाशादिषु घटादिभेदेऽपि प्रकाशभेदः, सर्वत्र प्रकाशस्यैकरूपत्वात्। न च घटज्ञानादयो वृत्तय इति वाच्यम् ; वृत्तीनां जडत्वेन ज्ञानत्वाभावात्। वृत्तिप्रतिफलितचैतन्यस्य ज्ञानत्वेन वृत्तीनां ज्ञानत्वोपचारात्। तस्मादयं घटः इत्यादिजन्य-ज्ञानहेतुभूतबुद्धिवृत्तिष्वनुगतं, घटादीनां भेदेऽपि स्वयमभिन्नम् , अत एवाविकारि यज्ज्ञानं, तदेवात्मेति न ज्ञानस्वरूपस्यात्मनः कोऽपि विकारः। न हि कामिनीकुचादिकं पश्यतः पुरुषस्य चित्तक्षोभादिविकारे सत्यपि कामिनीकुचादिज्ञानस्य कोऽपि विकारः। तस्माज्ज्ञानस्वरूपस्याविक्रियस्यात्मन औपचारिकमेव ज्ञातृत्वं, न वास्तवमिति न तस्य ज्ञातृत्वप्रयुक्तदोषः।

ननु कथं ज्ञानस्य ज्ञातृत्वोपचारः? अत आह दृष्टान्तम्— **यथेति**। अग्नेरुष्णतामात्रेण यथा तापक्रियोपचारः। अग्निः केवलमुष्ण एव, न तु तापक्रियाकर्ता, कर्तृत्वस्य चेतनधर्मत्वात्। न ह्यचेतनं वस्तु क्वापि किमपि कर्म कुर्वद् दृश्यते। अग्नेरचेतनत्वं च प्रत्यक्षम्। अतो नाग्निस्तापकः। एवमतापकत्वेऽपि अग्निर्दहतीति तापक्रियाकर्तृत्वमग्नावुपचर्यते, उष्णत्वात्। तस्मादुष्णत्वमात्रेण यथा अचेतनस्य तापकत्वरूपचेतनधर्मोपचारः- अग्निर्दहतीति, तद्वत् प्रकाशत्वमात्रेण ज्ञानस्वरूपस्य क्षेत्रज्ञस्य ज्ञातृत्वोपचारः— क्षेत्रज्ञः क्षेत्रं जानातीति।

**एतेन** क्षेत्रज्ञेश्वरस्य सर्वावभासकत्वलक्षणं सर्वज्ञत्वमिति **सूचितम्**। न च - कथमेतत्क्षेत्रवर्तिनः क्षेत्रज्ञस्य सर्वावभासकत्वम् , सर्वस्यासन्निहितत्वादिति - वाच्यम् ; य एवैतत्क्षेत्रे वर्तते स एव सर्वक्षेत्रेष्वपि, 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत' इत्युक्तत्वात्। तथा च सर्वक्षेत्रवर्तिनः सर्वव्यापिनोऽस्य सर्वमपि सन्निहितमेवेति। सर्वावभासकत्वात् सर्वज्ञ एव क्षेत्रज्ञ ईश्वरः, न तु किञ्चिज्ज्ञो जीवः। न च क्षेत्रज्ञः सर्वमवभासयन् सन् प्रत्यक्षो न भवतीति वाच्यम् ; अवभासयन् सन्नपि क्षेत्रज्ञः किं तव प्रत्यक्षः? नाहं क्षेत्रज्ञं जानामीति तव प्रतीतेः। अत एव ह्यज्ञानवान् भवान्। यदि तव क्षेत्रज्ञप्रत्यक्षं, तर्हि विद्वानेव भवेत्। न च जानाम्यहं क्षेत्रज्ञमिति वाच्यम् ; किं गुरुशास्त्रोक्त्या परोक्षेण जानासि? यद्वा अपरोक्षेण? आद्ये - तयैव सर्वज्ञमपि विद्धि। द्वितीये - क्षेत्रज्ञसाक्षात्कारवतस्तव सर्वमहं न जानामीति कथमज्ञानसद्भावः? क्षेत्रज्ञसाक्षात्कारेण सकार्यस्य सर्वस्याप्यज्ञानस्य नष्ट(व्य)त्वात् , सूर्यसाक्षात्कारेण तिमिरस्येव। तस्मात् क्षेत्रज्ञप्रत्यक्षं विना क्षेत्रज्ञधर्माणां सर्वज्ञत्वसर्वान्तर्यामित्वादीनां प्रत्यक्षं नैव भवेत् , तत्संशयो वा नैव निवर्तेतेति, कुरु श्रवणमननादिकं क्षेत्रज्ञप्रत्यक्षार्थित्वं चेत् तव। श्रवणादावशक्तश्चेन्निर्विकल्पसमाधिं कुरु। तत्राप्यशक्तश्चेत् सविकल्पसमाधिं कुरु। तत्राप्यशक्तश्चेत् कर्मयोगमनुतिष्ठ। न तु क्षेत्रज्ञोऽसंसारीश्वरः सर्वज्ञ इति भगवदुक्तार्थे [2]संशयमकार्षीः, 'संशयात्मा विनश्यती'ति संशयात्मनः संसारनरकादिलक्षणविनाशसम्भवात्। तस्मादास्तिकैः सर्वैरपीश्वरवचनस्य ग्राह्यत्वादसंसारिसर्वज्ञेश्वर एव क्षेत्रज्ञः। तथैव विदुषामनुभवश्चेति सङ्क्षेपः।

ननु भगवता नायमर्थो दर्शित इत्यत्राह— **यथाऽत्रेत्यादिना। अत्र** अस्मिन् श्लोके, अस्मिन्नध्याये वा अविद्याध्यारोपितमेव

१. क्रियाद्यभाव इत्यर्थः। सिद्धान्ते धर्मधर्मिणोः तादात्म्यात् क्रियाद्यात्मत्वाभावः इत्युक्तम्। २. संशयं मा कार्षीः इत्यर्थो विवक्षितः।

**[1]अविद्याध्यारोपित एव क्रियाकारकादिरात्मन्युपचर्यते, तथा तत्र तत्र 'य एनं वेत्ति हन्तारम्' (भ.गी.२.१९) 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः' (भ.गी.३.२७) 'नादत्ते कस्यचित् पापम्' (भ.गी.५.१५) इत्यादिप्रकरणेषु [2]दर्शितम् , तथैव च व्याख्यातमस्माभिः। उत्तरेषु च प्रकरणेषु दर्शयिष्यामः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

तत्राविद्याध्यारोपितमेव क्रियाकारकाद्यात्मन्युपचर्यत इति भगवता यथैव दर्शितम् , तथैव व्याख्यातमस्माभिरित्यन्वयः ॥२॥

आनन्दगिरिकृतव्याख्या

**तत्राह—** अविद्येति। **यथा वस्तुतो नास्त्यात्मनि क्रियादिः, उपचारात्तु भाति, तथा तत्र तत्रातीतप्रकरणेषु भगवता कृतो यत्नः इत्याह—** तथेति। **न केवलमतीतेष्वेव प्रकरणेषु वास्तवक्रियाद्यभावादात्मन्याध्यासिकी तद्धीरुक्ता, किन्तु वक्ष्यमाणप्रकरणेष्वपि तथैव भगवदभिप्रायदर्शनं भविष्यतीत्याह—** उत्तरेषु चेति।

भाष्यार्कप्रकाशः

क्रियाकारकादि आत्मन्युपचर्यते, स्वतस्तु आत्मनि क्रियाकारकफलात्मत्वाभाव एवेति भगवता यथाऽत्र दर्शितं, तथा तत्र तत्र भगवता दर्शितमित्यन्वयः। आत्मनि क्रियाकारकफलात्मत्वमौपचारिकमेव, अविद्याध्यारोपितत्वं[त्वात् ], न तु वास्तवं, स्वतोऽभावात्। यद्धि स्वाभाविकं तद् वास्तवमिति, यदागन्तुकं तद् दोषादिजन्यत्वादवास्तवमिति हि प्रसिद्धम्। रज्जौ स्वाभाविकरज्जुत्वस्य वास्तवत्व-दर्शनाद्, आगन्तुकसर्पत्वस्य मिथ्यात्वदर्शनाच्च। तस्मादात्मनि क्रियाकारकफलात्मत्वं मिथ्यैवेत्ययमर्थः कारुणिकेन भगवता बहुषु प्रदेशेषु प्रकृतस्थलवद् दर्शित एवेत्यर्थः। एतेन एतच्छ्लोकस्यापार्थकल्पने तत्तत्प्रकरणविरोध इति, बहुप्रकरणसंवादित्वादस्य श्लोकस्यायमेवार्थः समीचीन इति च ज्ञायते।

**क्रियाकारकफलात्मत्वाभाव इति**। क्रियायाः देहाश्रयत्वात् क्रियाशब्देन देहो लक्ष्यते, कारकाणि करणानि [3]मनइन्द्रियाणि, फलं विषयः शब्दादिः, तस्यैव भोग्यत्वेन फलत्वात् , स्वर्गादावपि तेषामेव शब्दादीनामनुभवात्। न हि विषयपञ्चकातिरिक्तं किञ्चिद् भोग्यमस्ति जगति। तानि क्रियाकारकफलानि आत्मा स्वरूपं यस्य तस्य भावः क्रियाकारकफलात्मत्वं, तस्याभावस्तथोक्तः। आत्मा न कार्यकरणसङ्घातरूपः, किन्तु सच्चिदानन्दरूप एव, सच्चिदानन्दानामेवात्मनः स्वाभाविकत्वात्। क्रियाकारकफलानि त्वविद्यया आत्मन्यध्यस्तानि, रज्जौ सर्पवत्। अधिष्ठानस्याध्यस्तात्मत्वं तु क्वापि सत्यत्वेन न दृष्टं, रज्जोः सर्पात्मत्वस्य सत्यत्वेनादर्शनात्। तस्मादधिष्ठानस्यात्मनोऽध्यस्तक्रियाकारकफलात्मत्वं कल्पितत्वेन मिथ्यात्वादौपचारिकमेवेति भावः। **उपचर्यत इति**। अध्यस्यत इत्यर्थः। **उपचारो** ह्यध्यासः, अन्यत्रान्यधर्मारोपस्यैवोपचारत्वादिति। यथा माणवके सिंहत्वोपचारः। सिंहो माणवकः इति ह्यौपचारिकः प्रयोगः। न च [4]**अविद्याध्यारोपितम् उपचर्यते** इति पौनरुक्त्यं शङ्क्यम् , अविद्यया तावदात्मनि क्रियाकारकादीनामध्यासः, पश्चात् क्रियाकारकादिधर्मस्यात्मन्यध्यास इति। [5]अयमेवान्योन्याध्यास इत्युच्यते, अन्योन्यधर्माध्यासस्यैवान्योन्याध्यासत्वात्। तथा च 'अविद्याध्यारोपित'मित्यनेन धर्म्यध्यासस्य, 'उपचर्यते' इत्यनेन धर्माध्यासस्य चोक्तत्वान्न पुनरुक्तिः। तत्र धर्म्यध्यासात् क्रियाकारकादिप्रतीतिः, धर्माध्यासात्तु 'मनुष्योऽहं, काणोऽहं, सुखयह'मित्यादिप्रतीतिरिति विवेकः। अज्ञानकार्योऽयमेवाध्यासः सर्वसंसारहेतुरिति सङ्क्षेपः।'तत्र तत्रे'त्यस्यार्थमाह— **य एनमित्यादिप्रकरणेष्विति। तथैवेति**। यथा भगवता दर्शितं तथैवेत्यर्थः। **एतेनान्येषां** व्याख्यातृणां भगवदनभिप्रेतार्थवर्णनं मूलस्येति **सूच्यते। दर्शयिष्याम इति**। इममेवार्थमिति शेषः।

१. 'अविद्याध्यारोपितमेव क्रियाकारकाद्यात्मन्युपचर्यते' इति पा.। २. 'दर्शितः' इति पा.। ३. मनश्च इन्द्रियाणि चेति द्वन्द्वः। ४. उपचारस्याध्यासरूपत्वे इयं पौनरुक्त्यशङ्का। क्रियाकारकादिस्वरूपाध्यासः, तस्यात्मसंबन्धिताध्यासः इति अर्थभेदादपौनरुक्त्यमिति समाधानम्। ५. अध्यासभाष्ये तु— 'अन्योन्यस्मिन् अन्योन्यात्मकताम् , अन्योन्यधर्मांश्चाध्यस्य' इति धर्मिणोः परस्परमध्यासं प्रदश्य, धर्माणां पृथगन्योन्याध्यासः प्रदर्शितः। 'इदमर्थवस्त्वपि भवेद् रजते परिकल्पितं रजतवस्त्विदमि' (सं.शा.१-३४) इत्यादिसंक्षेपशारीरकवचनाच्च तथैव ज्ञायते। लघुचन्द्रिकादिग्रन्थेषु च (पृ.३९) भ्रमस्थले पञ्चपदार्थोत्पत्ति-प्रदर्शनपूर्वकमिदमेव निरूपितमिति ज्ञेयम्।

**हन्त तर्ह्यात्मनि क्रियाकारकफलात्मतायाः स्वतोऽभावेऽविद्यया चाध्यारोपितत्वे कर्माण्यविद्वत्कर्तव्यान्येव, न विदुषामिति प्राप्तम्। सत्यमेवं प्राप्तम्। एतदेव च 'न हि देहभृता शक्यम्'(भ.गी.१८.११) इत्यत्र दर्शयिष्यामः। सर्वशास्त्रार्थोपसंहारप्रकरणे च 'समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा'(भ.गी.१८.५०) इत्यत्र विशेषतो दर्शयिष्यामः। अलमिह बहुप्रपञ्चनेनेत्युपसंह्रियते॥२॥**

आनन्दगिरिकृतव्याख्या

**आत्मनि वास्तवक्रियाद्यभावेऽध्यासाच्च तत्सिद्धौ कर्मकाण्डस्याविद्वदधिकारित्वप्राप्तौ 'विद्वान् यजेत' 'ज्ञात्वा कर्मारभेत' इत्यादिशास्त्रविरोधः स्यादिति शङ्कते—** हन्तेति। **शास्त्रस्य व्यतिरेकविज्ञानाभिप्रायत्वाद् अशनायाद्यतीतात्मधीविधुरस्यैव कर्मकाण्डाधिकारितेत्यङ्गीकरोति—** सत्यमिति। **कथमज्ञस्यैव कर्माधिकारित्वमुपपन्नमित्याशङ्क्याह—** एतदेव चेति। **ज्ञानिनो ज्ञाननिष्ठायामेवाधिकारः, निष्ठान्तरे त्वज्ञस्यैवेत्युपसंहारप्रकरणे विशेषतो भविष्यतीत्याह—** सर्वेति। **तदेवानुक्रामति—** समासेनेति। **जीवब्रह्मणोरैक्याभ्युपगमे न किञ्चिदवद्यमित्युपसंहरति—** अलमिति॥२॥

भाष्यार्कप्रकाशः

नन्वेवमात्मनि स्वतः क्रियाकारकफलात्मत्वाभावे विदुषां सर्वकर्माभावः प्राप्तः इति पृच्छति— **हन्त ! तर्हीति**। अविदुषामविद्यायाः सत्त्वादविद्यावस्थायामात्मनि क्रियाकारकफलात्मतायाः प्रतिभानादविद्वांसो 'ब्राह्मणोऽहं, स्वर्गादिकं मे भूयादि'ति कर्मणि प्रवर्तन्ते, फलहेत्वोरात्माभिमानात्। विदुषां त्वविद्यायाः अभावाद् विद्यावस्थायामात्मनि क्रियाकारकफलात्मतायाः अप्रतीतेः विद्वांसः सच्चिदानन्दलक्षणोऽहमित्यात्मयाथाम्यज्ञानेन फलहेत्वोरनात्मनोरात्माभिमानाभावाद् 'ब्राह्मणोऽहं, स्वर्गादिकं मे भूयादि'ति कर्मणि नैव प्रवर्तन्ते। एवं विदुषां शास्त्रार्थे कर्मण्यप्रवृत्तौ शास्त्रस्यार्धजरतीयन्यायेन नैरर्थक्यमर्धांशतः प्राप्नोति। **अथवा** मूढविषयत्वेन कृष्यादिवद् बुद्धागमादिवद्वा विद्वद्ब्राह्मणाग्राह्यत्वेन सर्वात्मना व्यर्थत्वमेव भवेत्। विद्वद्ग्राह्यमेव हि सार्थकम्। एवं शास्त्रानर्थक्यदोषः पुनः प्राप्त इति पूर्वपक्ष्याशयः। प्रश्नमङ्गीकरोति— **सत्यमिति। एतदेवेति**। विदुषां कर्माभावमेवेत्यर्थः। ये कर्मण्यधिकृता अज्ञास्ते शास्त्रार्थकर्मणि न प्रवर्तेरन् यदि, तर्हि शास्त्रमनर्थकं स्याद् विधिप्रतिषेधात्मकम् , अज्ञार्थमेव तच्छास्त्रस्य प्रवृत्तत्वात्। न तु विदुषां प्रवृत्त्यभावेन शास्त्रस्यानर्थक्यम् , विद्वदर्थं शास्त्रस्याप्रवृत्तत्वात्। न हि नटार्थं निर्मितं भरतशास्त्रं ब्राह्मणादीनां तत्राप्रवृत्तिमात्रेण निरर्थकमिति वक्तुं शक्यते एकदेशेन सर्वात्मना वा। यद् यदर्थं निर्मितं तत्र ते यदि न प्रवर्तेरन् तर्हि तदनर्थकं स्यात्। न त्वन्येषामप्रवृत्त्या। यथा देवदत्तार्थं राज्ञा कारिते गृहे यदि देवदत्तो न निवसेत् तर्हि तदनर्थकं स्यात् , तद्वत्। न च विधिप्रतिषेधशास्त्रं विद्वदविद्वत्साधारण्येन प्रवृत्तमिति वाच्यम् ; 'वेदाविनाशिनं नित्यं य एनमजमव्ययम्। कथं स पुरुषः पार्थ कं घातयति हन्ति कम्॥' इति विदुषां सर्वकर्माभावं वदन्नीश्वरः कथं विद्वदर्थं विधिप्रतिषेधशास्त्रं निर्मायात्? तस्माद् विद्वदर्थमीश्वरेण शास्त्रस्यानिर्मितत्वाद् विदुषां (न) तत्राप्रवृत्त्या न शास्त्रस्य सर्वात्मनाऽर्धांशेन वा नैरर्थक्यम्। न हि ब्राह्मणार्थं निर्मितेषु वैश्वदेवादिषु शूद्रादीनामप्रवृत्तौ शास्त्रस्यानर्थक्यम्। प्रत्युत प्रवृत्तावेवानर्थक्यम् , अन्यधर्मेऽन्यप्रवृत्तेर्नरकहेतुत्वात्। धर्माधर्मनिरूपणद्वारा लोकान् नरकादुत्तारयितुं हि शास्त्रमीश्वरेण निर्मितम्। तस्माद् विदुषां सर्वकर्मसंन्यासिनां कर्मणि प्रवृत्तिर्नरकहेतुरेव। अविदुषां कर्मिणां कर्मण्यप्रवृत्तिरपि नरकहेतुरेव। य एतदजानन्तो मूढाः विद्वदनुसारेण स्वयमपि कर्मसु न प्रवर्तन्ते, तेषामज्ञानामप्रवृत्त्याऽपि न शास्त्रस्य वैयर्थ्यमेकदेशेन प्राप्नोति, पुरुषापराधमात्रेण शास्त्रं न दुष्यतीति हेतोः। न हि रोगिनिन्दया सरसं कदलीफलं विरसं भवेत्। परन्तु येऽधिकृता अपि कर्मणि न प्रवर्तन्ते, त एव दुष्यन्ति। ये यत्राधिकृतास्ते तत्राप्रवृत्त्या दुष्यन्ति, तच्छास्त्रं तु न दुष्यति। यथा जलाहरणकर्मण्यधिकृतः तत्राप्रवृत्त्या दुष्टोऽयमिति स्वामिना हन्यते, न तु स्वाम्याज्ञा दुष्यति, तद्वत्। तस्मात् कर्मण्यधिकृतैरेवाज्ञैः त्रैवर्णिकैः कर्म विहितं कार्यं, निषिद्धं तु परित्याज्यं, न तु संन्यासिनो विधिनिषेधौ स्तः। यथा वा स्त्रीशूद्रादीनामिति विदुषां सर्वकर्मसंन्यास एव प्राप्तः। अयमर्थः पूर्वमपि बहुशः प्रपञ्चितः **शङ्कराचार्यैः**। लोकानुग्रहार्थमुत्तरत्रापि वक्ष्यामः इत्याह— **न हीति**। प्रकरणान्तरं दर्शयति— **सर्वेति**। 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज' इति श्लोकव्याख्यानसमये इत्यर्थः। तस्यैव श्लोकस्य सर्वशास्त्रार्थोपसंहारप्रकरणत्वात्। ननु

भाष्यार्कप्रकाशः

यदुत्तरत्र दर्शयिष्यते तदिहैव वक्तव्यम् , अत आह— **अलमिति**। वाचामधिकविस्तारस्य जिज्ञासुजनमनःक्लेशावहत्वादिति भावः। **उपसंह्रियते** सङ्क्षिप्यते, समाप्यत इति यावदिति।

अत्राह **रामानुजः—** 'क्षेत्रज्ञं चापि मां विद्धी'ति सामानाधिकरण्यदर्शनादीश्वरस्यैव सतोऽज्ञानात् क्षेत्रज्ञत्वमिव भवति, तन्निवृत्त्यर्थश्चायमेकत्वोपदेशः, अनेन चाप्ततमभगवदुपदेशेन 'रज्जुरेषा न सर्पः' इत्याप्तोपदेशेन सर्पत्वभ्रमनिवृत्तिवत् क्षेत्रज्ञत्वभ्रमो निवर्तत इति केचिदाहुरिति। आह **वेदान्तदेशिक**श्चार्थमस्य— 'सर्वज्ञस्येश्वरस्यैव सतोऽज्ञानात् क्षेत्रज्ञत्वभ्रमो भवति, स एव चेश्वरः क्षेत्रज्ञायोपदिशतीति च व्याकुलभाषिणस्ते' - इति।

[1]**अत्र विचार्यते**— नाद्वैतिभिरस्माभिरीश्वरस्यैवाज्ञानात् क्षेत्रज्ञत्वमित्युक्तम्। किं तर्हि? ईश्वरस्यैव सतः क्षेत्रज्ञस्याज्ञानात् संसारित्वमित्युक्तम्। तस्मान्नेश्वरस्य क्षेत्रज्ञत्वभ्रमः, किन्त्वीश्वरस्य क्षेत्रज्ञत्वं [2]प्रमैव, ईश्वरस्यैव क्षेत्रज्ञत्वात् , तस्य चासंसारित्वात्। अतस्मिंस्तद्बुद्धिर्हि भ्रमः। ईशनक्षेत्रज्ञानरूपप्रवृत्तिनिमित्तभेदादीश्वरक्षेत्रज्ञशब्दद्वयवाच्यत्वमेकस्यैव सच्चिदानन्दस्य। तस्मादीश्वरस्येश्वरत्वमिव क्षेत्रज्ञत्वमपि न भ्रमः। ईश्वरस्य साक्षित्वं च श्रुतिसिद्धम् , 'साक्षी चेता' इति मन्त्रात्। क्षेत्रज्ञत्वमेव हि साक्षित्वं, साक्षात् पश्यति सर्वं साक्षीति व्युत्पत्तेः, ज्ञेयस्य सर्वस्यापि क्षेत्रत्वाच्च। उदासीनत्वे सति द्रष्टृत्वं हि लोकेऽपि साक्षित्वम्। तथा द्रष्टुरीश्वरस्योदासीनत्वादेवाविक्रियत्वम्। न हि विवदमानाविव साक्षी सुखदुःखादिविकारं प्राप्नोति। अत एव हि तस्योदासीनत्वम्। एवमविक्रियत्वादेवासंसारित्वमीश्वरस्य। सुखदुःखादिविकारस्यैव संसारत्वात्। तस्मादसंसारीश्वर एव क्षेत्रज्ञ इत्यस्माभिरुच्यते। सत्य एवायमर्थो, न तु रज्जुसर्पवद् भ्रमः, रज्जौ सर्पस्येव ईश्वरे क्षेत्रज्ञः कल्पितः इत्यस्माभिरनुक्तत्वात्।

एवं स्थिते, ये - ईश्वरस्य क्षेत्रज्ञत्वभ्रमः इत्यस्माभिरुक्तमिति - मन्यन्ते, त एव भ्रान्ताः; न त्वीश्वरः, नापि वयम्। तेषां तु युष्माकं भ्रमः उपपन्न एव, भ्रमहेतोरज्ञानस्य सत्त्वात्। अत एवाज्ञानाद्धि युष्माकं क्षेत्रज्ञादन्य ईश्वर इति, क्षेत्रज्ञः संसारी जीव इति च भ्रमः। तथा क्षेत्रज्ञं चापीति श्लोकस्यापार्थकल्पनं च। कथम्? **उच्यते**— क्षेत्रज्ञं च मां मदात्मकं विद्धि , अपिशब्दात् क्षेत्रमपि मदात्मकं विद्धि इत्यस्मिंस्तव व्याख्याने क्षेत्रज्ञास्मच्छब्दयोः प्रतीयमानस्य मुख्यसामानाधिकरण्यस्य भङ्ग एको दोषः। मामित्यसमस्तपदस्य मदात्मकमिति समासकल्पनमन्यः। आत्मशब्दस्य स्वरूपार्थकत्वे स्वमतप्रच्युतिरपरः। यथा देहस्य जीवः शरीरित्वादात्मा तथा जीवस्य शरीरस्य शरीरित्वादीश्वर आत्मेत्यात्मशब्दस्य शरीर्यर्थवर्णने नित्ये जीवे शीर्यत इति व्युत्पत्तिसिद्धशरीरशब्दप्रवृत्तिनिमित्ताभावोऽन्यः। एतद्दोषपरिहाराय अनित्यत्वस्वीकारे 'अजो नित्यः' इति गीताविरोधोऽपरः। आत्मा शेषीत्यर्थवर्णने अनन्यशेषतया सर्वशेषितया च प्रसिद्धस्यात्मनो जीवस्य ईश्वरशेषत्वकल्पनमन्यः। देहो जीवस्येव जीव ईश्वरस्यापृथक्सिद्धविशेषणत्वादीश्वरात्मक इति वर्णने तु दृष्टान्तदार्ष्टान्तिकयोरुभयोरप्यनुपपत्तिरेव, ज्ञेयज्ञात्रोर्देहजीवयोर्ममेदमित्यहमिति च पृथक्प्रतीयमानयोरपृथक्सिद्ध्ययोगात्। देहात्पृथग् जीवस्यासिद्धौ बौद्धमताभ्युपगमप्रसङ्गः, देहात्मवादित्वात् तेषां बौद्धानाम्। जीवात्पृथग् जीव [देह]स्यासिद्धौ देहस्य मरणाभावप्रसङ्गः, जीवापेतशरीरस्यैव मृतत्वव्यवहारात्। सर्वदाऽपि जीवादपृथक्सिद्धत्वाच्च देहस्य। एवं जीवात्पृथगीश्वरस्यासिद्धौ ईश्वरस्य संसारित्वप्रसङ्गः, जीवेश्वराभेदस्वीकारेण स्वमतप्रच्युतिः, परमतप्रवेशश्च। सर्वदाऽपीश्वरस्य जीववैशिष्ट्ये सत्यग्निसङ्गाल्लोहस्यौष्ण्यमिव जीवसङ्गादीश्वरस्यापि संसारित्वप्रसङ्गश्च। जीवेश्वरयोर्नियाम्यनियामकभावाद्यसिद्धिश्च। ईश्वरात्पृथग्जीवस्यासिद्धौ जीवस्य संसारिणोऽभावप्रसङ्गः, संसाराभावप्रसङ्गश्च। ईश्वरनियाम्यत्वमेव जीवस्य स्वभावः इत्यप्ययुक्तम् , सुषुप्तौ जीवेश्वरयोर्नियाम्यनियामकभावस्य चादर्शनात्। न हि सुषुप्तौ जीवः केनचिन्नियम्यमानो दृष्टः। न हि स्वभावः क्वचिदप्यपैति। किञ्च अध्यासं विना अन्येन केनापि हेतुना यदि जीवो देहात्मकः, देहो वा जीवात्मकः स्यात् तर्हि तद्दृष्टान्तेन जीवस्येश्वरात्मत्वमीश्वरस्य वा जीवात्मत्वमुच्येत। न तु तथाऽस्ति। न हि विद्वान् कोऽपि स्वं देहात्मकं जानाति, देहं वा स्वात्मकम्। किन्तु स्वस्मादन्यमेव देहं देहादन्यमेव स्वं च वेत्ति। य आत्मानं मनुष्यं वेद स ह्यविद्वान्। भगवान् सर्वज्ञः कथमात्मानं जीवं, जीवं वा आत्मानं विद्यात्? येन जीवो मदात्मक इति ब्रूयात्। तस्माद् देहात्मनोर्जीवेश्वरयोर्वा सामानाधिकरण्यं प्रति नापृथक्सिद्धविशेषणत्वं

१. परेणास्मन्मतमनूद्य यद् दूषितम् , तत्रानुवादभागमुपन्यस्य खण्डयति— अत्रेत्यादिना। २. प्रमितमेवेत्यर्थः। 'क्षेत्रज्ञत्वप्रमैव' इति वा पाठः स्यात्।

भाष्यार्कप्रकाशः

हेतुः, किन्त्वज्ञानमेव। दृश्यते तु – 'क्षेत्रज्ञं चापि मां विद्धी'ति जीवेश्वरयोः सामानाधिकरण्यम् ; तद्धेतुरज्ञानं तु ईश्वरे न सम्भवतीति दुष्टमेव तवेदं व्याख्यानम्। न हि त्वदुक्तविधया स्वापृथक्सिद्धविशेषणं जानन्नपि देहं विवेकी कोऽपि मनुष्यं मां विद्धीति ब्रूते, येनेश्वरः सर्वज्ञो जीवं मां विद्धीति ब्रूयात्। यस्तु देवं मां विद्धीति ब्रूते तस्य देहात्माभिमानो नैव नष्टः, देवत्वमनुष्यत्वादेर्देहधर्मत्वेन जीवधर्मत्वाभावात्। एवमीश्वरस्यापि जीवे आत्माभिमानो न नष्टः इति यदि ब्रूषे, तर्हि तस्यासर्वज्ञत्वप्रसङ्गः। यदि नष्टः इति ब्रूषे, तर्हि जीवं मां विद्धीत्युपदेशानुपपत्तिरिति। क्षेत्रस्य तु ईश्वरात्मत्वमस्त्येव, ईश्वरे तस्य कल्पिततत्वेन ईश्वरस्वरूपत्वात्। अधिष्ठानस्वरूपं ह्यध्यस्तं वस्तु। ईश्वरस्य क्षेत्रान्तरात्मत्वाचास्तु क्षेत्रस्येश्वरात्मत्वम्। तथापि अपिशब्दान्न सोऽर्थ इह व्यञ्जतया विवक्षितः। सर्वक्षेत्रेष्विति कण्ठत एव ईश्वरस्य सर्वक्षेत्रान्तरात्मत्वस्योक्तत्वात्। क्षेत्रेषु वर्तमानो हि क्षेत्रान्तरात्मा। ईश्वरे कल्पितत्वात् क्षेत्रमीश्वरात्मकमिति तु न तव मतम्। अतस्तस्येह विवक्षितत्वं त्वया न वक्तव्यम् , स्वमतभ्रंशपरमतस्वीकारदोषापत्तेस्तव। तथा सर्वक्षेत्रेषु क्षेत्रज्ञमिति जात्येकवचनमिति तव वचनं चायुक्तम् , सर्वक्षेत्रेष्विति बहुत्वनिर्देशस्वारस्यभङ्गात्। जात्येकत्वस्वीकारे प्रमाणाभावात्। सत्यां तादृशविवक्षायां 'क्षेत्रज्ञानपि मां विद्धी'त्येव ब्रूयाद् **बादरायणः**। नापि सच्चिदानन्दलक्षणे क्षेत्रज्ञे जातिः काचिदस्ति। किञ्च यदि व्यक्तिभेदः स्यात् , तर्हि जातिभेदो नास्तीति वक्तुमुचितम् ; न तु व्यक्तिभेदोऽस्ति। अव्यक्तत्वादक्षरस्य क्षेत्रज्ञस्य। न हि निराकारस्य वायोराकाशस्य वा व्यक्तिभेदोऽस्ति, येन निराकारस्य जीवस्य स स्यात्। तस्मात् क्षेत्रज्ञानेकत्वमप्रमाणमेव। न च सुख-दुःखादिसाङ्कर्यप्रसङ्गः, तस्यान्तःकरणधर्मत्वादन्तःकरणानां चानेकत्वात्। नापि विभोः क्षेत्रज्ञस्यानेकत्वं भवितुमर्हति, परिच्छिन्ना-नामिवान्तःकरणानाम्। न च क्षेत्रज्ञोऽपि परिच्छिन्न एवेति वाच्यम् ; तथा सत्यनित्यत्वप्रसङ्गात्। एवं नित्याद् विभोः ज्ञातुश्च जीवादीश्वरस्य किम्प्रयुक्तो भेदस्त्वया विवक्षितः? अनित्यत्वपरिच्छिन्नत्वज्ञेयत्वप्रयुक्त इव देहस्य भेदः, न किम्प्रयुक्तोऽपि, सत्यत्वादीनामीश्वरेऽपि सत्त्वात्। न च सर्वज्ञत्वादिप्रयुक्त इति वाच्यम् ; तस्य मायाधर्मत्वेनेश्वरधर्मत्वाभावात्। सर्वावभासकत्व-लक्षणसर्वज्ञत्वस्य जीवेऽपि सत्त्वात्। तस्मान्न जीवेश्वरभेदः। नापि जीवानेकत्वम्। तादृशज्ञानस्य च संसारहेतुत्वेन न सम्यग्ज्ञानत्वमपीत्यलम्।

[१]अथ यदप्याह **रामानुजः** - अयमुपदेष्टा भगवान् वासुदेवः किमात्मयाथात्म्यसाक्षात्कारेण निवृत्ताज्ञानः, उत न? आद्ये - निर्विशेषचिन्मात्रैकस्वरूपे आत्मन्यतद्रूपाध्यासासम्भावनया कौन्तेयादिभेददर्शनं, तान् प्रत्युपदेशादिव्यापाराश्च न सम्भवन्ति। अथात्मसाक्षात्काराभावादनिवृत्ताज्ञानश्चेत् तर्ह्यज्ञत्वादेवात्मज्ञानोपदेशासम्भव इति, **तत्तुच्छम्** - य आत्मानं निवृत्ताज्ञानमनिवृत्ताज्ञानं वा मन्यते स मूर्ख एव। आत्मनि कालत्रयेऽप्यज्ञानाभावात्। अज्ञानप्रसक्तिं विना तन्निवृत्त्ययोगाच्च। वासुदेवस्त्वात्मैवेति कृत्वा कथं तस्याज्ञानप्रसङ्गः, तन्निवृत्तिर्वा? यश्चैनं वासुदेवं कौन्तेयाय कमप्यर्थमुपदिशन्तं मन्यते स आत्मतत्त्वयाथात्म्यगन्धशून्य एव। न हि निर्विशेषचिन्मात्र आत्मा कस्मैचित् किमप्युपदिशेत् , वागाद्यभावात्। यस्तूपदिशन् दृश्यते स कार्यकरणसङ्घात एव, नात्मा। न हि ज्ञाता परमात्मा केनचिद् दृश्येत। कार्यकरणसङ्घातस्य च भेददर्शनोपदेशादिव्यापारा उपपद्यन्त एव। आत्मैकत्वेऽपि सङ्घाताना-मनेकत्वात् परस्परं भेदात् करणादिमत्त्वाच्च। न च जडत्वान्नोपपद्यन्त इति वाच्यम् ; आत्मप्रतिफलनेन चैतन्यलाभात् सङ्घातस्य। तस्माद् देहे गच्छति सति अहं गच्छामीति यथा अज्ञानां भ्रमस्तथा सङ्घाते वदति सति आत्मा वदतीति, सङ्घाते शृण्वति सति आत्मा शृणोतीति चाज्ञानां भ्रमः। एवमुपदेशके वसुदेवपुत्रे सङ्घातविशेषे, श्रोतरि च कौन्तेये सङ्घातविशेषे यस्यात्मेति भ्रमस्तस्य तव देहात्माभिमानिनः पाण्डित्यमहो !

**ननु** माऽस्त्वात्मन्युपदेशादिव्यवहारः, यः सङ्घातविशेषमहमित्यभिमन्यते स वासुदेवः प्रमाता किमात्मयाथात्म्यसाक्षात्कारेण निवृत्ताज्ञानः? उत न? आद्ये - भेददर्शनाद्यनुपपत्तिः। द्वितीये - उपदेशानुपपत्तिरिति चेत् , **मैवमपि**। आत्मैकत्वं प्रमातृभेदं च विदुषः कृष्णस्य भेददर्शनोपदेशाद्युपपद्यत एवेति। यदि प्रमातृभेदो न स्यात् तर्हि कौन्तेयादिभेददर्शनानुपपत्तिः स्यात्। यद्यात्मैकत्वदर्शनं न स्यात् तर्ह्यात्मोपदेशो न स्यात्। न त्वेतदस्ति। प्रमातृभेदस्य सत्त्वात् प्रमातृविशेषस्य च कृष्णस्यात्मैकत्वदर्शनसत्त्वादिति भावः।

१. परोक्तदूषणमनूद्य निराकरोति—अथेत्यादिना।

भाष्यार्कप्रकाशः

**ननु** यः प्रमाता आत्मानं सच्चिदानन्दमद्वितीयं ब्रह्म पश्यति स विद्वान् कृष्णः पुनरात्मानं प्रमातारं कथं जानीयात्? कथं वा कौन्तेयायोपदिशेदिति चेत्? **मैवमपि** - व्यवहारपरमार्थदशयोर्भेदेन तदुपपत्तेः। यथा तव समाधिव्यवहारदशयोर्भेदः, यथा वा शूद्रादीनामतिमूर्खाणामपि निद्राव्यवहारदशयोर्भेदः। अथवा निद्राजागरणदशयोः। प्रमाता यदा आत्मानं साक्षात्करोति, सा हि परमार्थदशा। न तथा [तदा] कोऽपि वक्ता, कोऽपि श्रोता, कश्चिदुपदेशो वा विद्यते। यदा तूपदेशादिव्यवहारं करोति सा हि व्यवहारदशा; तदा वक्तृश्रोतृशास्त्राणि सन्त्येवेति न काऽप्यनुपपत्तिः।

**ननु** व्यवहारदशायामपि विदुषः प्रमातुरहं ब्रह्मेति ज्ञानमस्ति वा? न वा? आद्ये - अद्वितीयत्वाद् ब्रह्मण उपदेशानुपपत्तिः। द्वितीये - अज्ञत्वादेवोपदेशानुपपत्तिरिति चेत् , **मैवमपि।** व्यवहारदशायां ब्रह्मात्मज्ञानस्य परोक्षकल्पत्वेन भेददर्शनोपदेशयोरुपपत्तेः। अपरोक्षत्व एव भेददर्शनाभावः। परोक्षज्ञानस्याप्यभाव एवाज्ञत्वादुपदेशाभाव इति हेतोः[१]। न चापरोक्षतया दृष्टस्यात्मनः कथं पुनः परोक्षत्वमिति वाच्यम् ; यावद्विदेहकैवल्यमविद्याया दग्धपटवत् सत्त्वात्। अविद्यावरणाद्धि आत्मनः पारोक्ष्यम्। न च प्रकाशरूपस्यात्मनः कथमज्ञानावरणमिति वाच्यम् ; अहमज्ञ इत्यनुभवबलाद् 'अज्ञानेनावृतं ज्ञानम्' इत्यादिशास्त्रप्रामाण्याच्च। आत्मनोऽज्ञानावरणाभ्युपगमात्। तस्माद् व्यवहारदशायां गुरुशिष्यशास्त्रादिसर्वद्वैतसत्त्वाद् भेददर्शनादिकमुपपद्यत एव वसुदेवसूनोः प्रमातुः कृष्णस्येति स्थितम्।

**वस्तुतस्तु** तव मत एवायमुपदेशानुपपत्तिदोषः, तथाहि - जीवान्तर्यामी जीवशरीरकः परमात्मा शरीरं जीवं स्वात्मकं जानन् कथं तस्मा उपदिशेत्? जीवोऽन्योऽहमन्यस्तस्मान्न जीवो मदात्मक इति ज्ञाने सति ह्युपदेश उपपद्यते। न हि मनुष्योऽहमिति मन्यमानः कोऽपि मूढः शरीराय स्वात्मकाय किमप्युपदिशति। देवदत्तोऽहमन्यः, विष्णुमित्रोऽयमपरः, अतो नायं मदात्मक इति ज्ञानाद्धि देवदत्तो गुरुर्विष्णुमित्राय किमप्युपदिशति। न च जीवस्यान्तरात्माऽहं जीवादन्य इति ज्ञानादुपदिशतीति वाच्यम् ; देहादन्योऽहं देहस्यान्तरात्मेति ज्ञानादपि जीवस्य देहं प्रत्युपदेशादर्शनात्। न च देहस्याचेतनत्वादुपदेशानुपपत्तिरिति वाच्यम् ; जीवे सति देहस्य चेतनत्वात्। कथमन्यथा चेतनाचेतनव्यवहारः? न हि गच्छन्तं वदन्तं वा देहं कोऽप्यचेतनं मन्यते। किन्तु मृत्पाषाणादिकमेव। नापि जीवः स्वान्तरवस्थितं स्वस्मै कमप्युपदिशन्तं स्वस्मादन्यं स्वस्य शरीरिभूतं कञ्चन पश्यति, येन तदनुभवबलाद्वा स्वशरीराय जीवाय शरीरीश्वर उपदिशतीत्यभ्युपगम्येत।

न च कृष्णार्जुनोपदेशदृष्टान्तबलादभ्युपगन्तव्यमिति वाच्यम् ; अर्जुनाद् बहिरुपलभ्यमानस्य कृष्णस्यार्जुनान्तःस्थितिप्रयुक्तान्तरात्मत्वायोगात्। न च य एव कृष्णशरीरान्तरात्मा स एवार्जुनशरीरान्तरात्मेति वाच्यम् ; एकात्मवादप्रसङ्गात्। अनेकात्मवादी हि भवान्। न चार्जुनशरीरे अन्तरात्मतया स्थितो यः स एव कृष्णशरीरे प्रमातृतया स्थितःसन्नर्जुनशरीरस्थप्रमात्रे उपदिशतीति वाच्यम् ; कृष्णशरीरप्रमातर्यप्यर्जुनशरीरप्रमातरीवान्तरात्मनोऽवश्यं स्थातव्यतयाऽर्जुनप्रमात्रन्तर्यामिणः कृष्णप्रमातृरूपत्वासम्भवात्। किन्तु कृष्णप्रमात्रन्तर्यामिरूपत्वमेव तस्य। अन्यथा अन्तर्यामिणः प्रमातृरूपत्वेऽन्तर्यामित्वभङ्गप्रसङ्गात्। प्रमातुरन्तःस्थित्वा प्रमातारं यमयतीति ह्यन्तरात्मेत्युच्यते। कृष्णप्रमातुरेवार्जुनान्तर्यामित्वे कृष्णप्रमात्रन्तर्यामिणोऽर्जुनान्तर्यामिणोऽप्यन्तर्यामीति प्राप्तत्वाच्च। न चेष्टापत्तिः, अन्तर्यामिणोऽप्यन्तर्यामिणोऽन्यस्य कल्पने तस्याप्यन्यस्य कल्पनीयतया अनवस्थादोषात्। अन्तर्यामिब्राह्मणविरोधाच्च। तस्मादन्तर्यामिण ईश्वरस्य स्वशरीरभूतान् जीवानुद्दिश्योपदेशो नोपपद्यते। जीवानां स्वशरीरत्वेन स्वाभिन्नत्वात् स्वस्य च करणाभावादिति।

**यदपि** तेनोक्तम् - एवमादिवादाः अनाकलितश्रुतिस्मृतीतिहासपुराणन्यायस्ववाग्विरोधैरज्ञानिभिर्जगन्मोहनाय प्रवर्तिताः इति, **तदप्ययुक्तम्** । अत्राह **वेदान्तदेशिको—** युक्तमेवेति। कथम्? उच्यते। शङ्करमते भेदश्रुतयः, सगुणश्रुतयः, अन्तर्यामिश्रुतयः, प्रकृतिपुरुषनित्यत्वश्रुतयः, तथाविधाश्च स्मृत्यादयो विरुद्धा एव। अभेदश्रुत्यादयश्च मुख्यार्थपरित्यागेन निर्विशेषलक्षकतया तैरेवाभ्युपगमान्मुख्यार्थप्रतिपादकाकारेण विरुद्धाः। विषयव्यवस्थादिभिर्विरोधपरिहारे सम्भवति सति बाध्यबाधकभावाभ्युपगमान्न्यायविरोधः।

१. परोक्षज्ञानस्याप्यभाव एवाज्ञत्वाद् उपदेशाभाव इति हेतोः भवदुक्तोपदेशानुपपत्तिर्नेति योजना।

भाष्यार्कप्रकाशः

ब्रह्म निर्विशेषमेवंत्वादित्यत्र हेतुसाध्यधर्मान्वयावश्यम्भावात् , अनुभूतिरवेद्येत्यत्रानुभूतिशब्दबोध्यत्वादेरवश्याभ्युपगन्तव्यत्वाच्च स्ववचनविरोधः। एवं ब्रह्म न शब्दप्रतिपाद्यमित्यादिष्वपि भाव्यमिति।

[1]**अथ** कथमयुक्तमिति चेद्? **उच्यते**— व्यवहारः, परमार्थ इति, अविद्या च विद्या चेति चास्त्यवस्थाद्वयम्। तद्धि न स्वकपोलकल्पितम् , किन्तु श्रुतिसिद्धमेव। दर्शिताश्च श्रुतयः प्रकृतश्लोकभाष्य एव **शङ्कराचार्यैः**। स्मृतिसिद्धं च। स्मृतीनामपि तत्रैव तैरेव दर्शितत्वात्। एवं पुराणादिष्वपि प्रसिद्धमेव। अनुभवसिद्धं च। एवं सति यावद्व्यवहारं यावदविद्यं वा जीवेश्वरभेदादय उपपद्यन्त एव। 'जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा। अविद्यातच्चित्तोर्योगः षडस्माकमनादयः॥' इति वचनाद् व्यवहारदशायामविद्यावस्थायां जीवेश्वरभेदसत्त्वात् 'द्वा सुपर्णा' इत्यादिभेदश्रुत्युपपत्तिः। ईश्वरस्य सत्यकामत्वसर्वेश्वरा[रत्वा]दिगुणसत्त्वात् 'सत्यकामः सत्यसङ्कल्पः' इत्यादिसगुणश्रुत्युपपत्तिः। जीवेश्वरयोर्नियाम्यनियामकभावसत्त्वाद् 'य आत्मनि तिष्ठन्नि'त्याद्यन्तर्यामिश्रुत्युपपत्तिः। विद्यासूर्योदयपर्यन्तं प्रकृतिरूपान्धकारस्य सत्त्वात् प्रकृतेर्नित्यत्वव्यवहारः। यथा प्रलये नङ्क्ष्यमाणानामपि मृत्तिकादीनां यावत्प्रपञ्चं सत्त्वान्नित्यत्वव्यवहारः, घटादीनां तथाऽसत्त्वादनित्यत्वव्यवहारश्च, तद्वत् प्रकृतेरपि सापेक्षनित्यत्वसत्त्वान्नित्यत्वश्रुत्यविरोधः। पुरुषस्यात्मनस्तु पारमार्थिकत्वेन निरपेक्षनित्यत्वमस्त्येवेति न पुरुषनित्यत्वप्रतिपादकश्रुतिविरोधोऽस्माकम्।

एवं स्मृत्यादयोऽप्यविरुद्धा एव। तत्त्वमसीत्याद्यभेदश्रुतयस्तु परमार्थदशायां विद्यावस्थायां निर्विशेषं ब्रह्मैकमेवास्तीति लक्षणया प्रतिपादयन्तीति न तच्छ्रुतिविरोधः। न च मुख्यार्थपरित्यागाद् विरोध इति वाच्यम् ; सति तु मुख्यार्थबाधे लक्ष्यार्थस्यैव स्वीकार्यत्वात्। न च मुख्यार्थस्य बाधो नास्तीति वाच्यम् ; तत्पदमुख्यार्थस्य सर्वज्ञपरोक्षेश्वरस्य त्वम्पदमुख्यार्थस्य किञ्चिज्ज्ञप्रत्यक्षजीवस्य च असिपदोक्तैक्यानुपपत्तेः। न च ईश्वरात्मको जीव इत्यर्थवर्णने मुख्यार्थस्याबाध इति वाच्यम् ; त्वं जारिणी मा भूरिति वधूमनुशास्य श्वश्रूः स्वयं जारिण्यभूदिति लोकन्यायात्। तव लक्ष्यार्थस्वीकारदोष इत्यस्मानाक्षिप्य त्वं लक्ष्यार्थमेव स्वीकरोषीत्यहो तव विद्यावैभवम् ! तत्पदस्येश्वरात्मक इत्यर्थो हि न मुख्यः। किमिति त्वया यथाश्रुतं जीवेश्वरयोर्मुख्यं सामानाधिकरण्यं नाभ्युपेयते? यदि विरोधादिति ब्रूषे, तर्हि तथैवास्माकमपीति विद्धि। न च - तत्पदे एकस्मिन्नेवास्माभिर्लक्षणा स्वीकृता, त्वया तु पदत्रयेऽपीति - वाच्यम् ; यथैकस्मिन् पदे लक्षणा तव न दुष्यति, तथा पदत्रयेऽप्यस्माकं नैव दुष्यतीति। किञ्च लाक्षणिकोऽप्यस्मदुक्तार्थो निरवद्यः, त्वदुक्तस्तु सावद्य एव। तच्च दर्शितमिहैव 'मां मदात्मकम्' इति त्वदुक्तार्थविमर्शनप्रकरण इतीहोपरम्यते।

'साक्षी चेता केवलो निर्गुणश्च' इत्यादिनिर्गुणश्रुतयस्तु विद्यादशायां निर्गुण एवात्मेति बोधयन्तीति नास्माकं तद्विरोधः। निर्गुणशब्दस्य हेयगुणरहित इति त्वदुक्तार्थ एव दुष्टः। गुणशब्देन दोषप्रतिभटानामेव ग्रहीतुमचितत्वात् , 'गुणदोषौ बुधो गृह्णन्' इत्यादिप्रसिद्धेः। न चैवं तवापि मते निर्दोषत्वं न स्यादात्मन इति वाच्यम् ; 'निर्गुणश्चे'ति चकारेण 'अपहतपाप्मे'ति श्रुत्यन्तरेण वा निर्दोषत्वलाभात्। तथा अभेदश्रुतिभेदश्रुतीनां निर्गुणश्रुतिसगुणश्रुतीनां च विद्याऽविद्यारूपदशाभेदाद् विषयव्यवस्था कृतैवास्माभिः। बाध्यबाधकभावस्तु विद्ययाऽविद्याया बाध्यमानत्वाद् विद्याविषयाभिरभेदश्रुतिभिरविद्याविषयाः भेदश्रुतयो बाध्यन्त इत्यभिप्रायेणोक्तः। भेदश्रुतीनां बाधो नाम तदर्थस्य विद्यावस्थायामप्रामाण्यमेव। यथा रज्जुज्ञानेन सर्पज्ञानस्याप्रामाण्यम् , तद्वत्। न चैवमप्रमाणमर्थं कथं ब्रूयाच्छ्रुतिरिति वाच्यम् ; अविद्यावस्थायां प्रमाणत्वात् तदर्थस्य जीवेश्वरभेदादिरूपस्य। तस्मादविद्यावस्थाविषयजीवेश्वरभेदादिप्रतिपादकश्रुतीनां 'द्वा सुपर्णा' इत्यादीनां, विद्यावस्थाविषयजीवेश्वराभेदादिप्रतिपादकश्रुतीनां तत्त्वमस्यादीनां च विभिन्नविषयत्वान्न कोऽपि बाध्यबाधकभावः कल्पयितुं शक्यते। तस्मान्नास्ति न्यायविरोधः।

**ननु** निर्विशेषं ब्रह्मेति स्ववचनं विरुद्धम् , ब्रह्म निर्विशेषं चिन्मात्रत्वाद्, व्यतिरेकेण घटवदिति ब्रह्मणि पक्षे निर्विशेषत्वचिन्मात्रत्वरूपसाध्यहेतुभूतयोर्धर्मयोरवश्यम्भावित्वात् , निर्विशेषत्वचिन्मात्रत्वरूपधर्मद्वयात्मकविशेषवतो ब्रह्मणो निर्विशेषत्वासम्भवाच्चेति चेत् , **मैवम्** ; सविशेषं ब्रह्मेति वदतस्तव मतेऽपि किं ब्रह्मणि वर्तमाना विशेषाः सविशेषरूपा उत निर्विशेषाः? आद्ये - तेष्वपि विशेषेषु वर्तमानाः विशेषाः सविशेषाः इत्येवमनवस्था दोषः। द्वितीये निर्विशेषेषु ब्रह्मणि वर्तमानेषु विशेषेषु निर्विशेषत्वमस्ति वा न

१. सिद्धान्तं परोक्तदूषणोद्धारेण समर्थयते—अथेत्यादिना।

भाष्यार्कप्रकाशः

वा? आद्ये - अस्मासु पतितो दोषस्त्वय्यपि पतति। द्वितीये - निर्विशेषत्वाभावे कथं निर्विशेषत्वं तेषाम्? न हि घटत्वाभाववान् घटः स्यात् , येन निर्विशेषत्वाभाववद् वस्तु निर्विशेषं स्यात्। तस्मात् स्ववचनव्याघातदोषोऽपरिहार्य एवेति नात्र दोषेऽस्माभिः समाधानं वक्तव्यम्। यो हि दोषस्तव मते न स्यात् , अस्मन्मते स्यात् स एवास्माभिः परिहर्तव्यः[१]।

नन्वस्मन्मते प्रसक्तोऽयं दोषः कथं परिहार्य इति यद्यस्मदीयः पृच्छेत् तर्हि ब्रूमः - निर्विशेषत्वं न विशेषरूपं, नापि सविशेषरूपं, विरोधात्। किं तर्हि? निर्विशेषरूपमेव। यथा निर्धर्मत्वं न धर्मरूपं, किन्तु निर्धर्मरूपमेव। न च दृष्टान्ते विवदितव्यम् , निर्धर्मत्वस्य धर्मरूपत्वे निर्धर्मे धर्मायोगान्निर्धर्मत्वरूपधर्मवत् तद्वस्तु निर्धर्मकं नैव स्यात्। न च सधर्मकमस्त्विति वाच्यम् ; निर्धर्मकस्य सधर्मकस्य च परस्परं विलक्षणत्वात्। निर्धर्मकं न स्वप्नेऽपि सधर्मकं भवितुमर्हति।

**ननु** निर्धर्मकं निर्विशेषं निर्गुणं वा वस्त्वेव नास्ति, सर्वमपि वस्तु सधर्मकं सविशेषं सगुणमेव। अत एव निर्धर्मत्वनिर्विशेषत्वनिर्गुणत्वानां दुर्वचत्वादभाव इति चेत् , **मैवम्** ; यावद्विशेषाभावो निर्विशेषत्वं, यावद्धर्माभावो निर्धर्मत्वं, यावद्गुणाभावो निर्गुणत्वमिति तेषां सुवचत्वात्। न च यावद्विशेषाभावोऽपि विशेषरूप एवेति वाच्यम् ; विशेषस्य भावरूपत्वाद् विशेषाभावस्य चाभावरूपत्वाद् विशेषाभावाभावस्यैव पुनर्भावरूपत्वाच्च न विशेषाभावो विशेषरूपः, किं तर्हि? निर्विशेषरूप एव। एवं धर्माभावो निर्धर्मरूप एव, गुणाभावोऽपि निर्गुणरूप एव। तस्माद् विशेषाभाववति ब्रह्मणि न कोऽपि विशेषः आसञ्जनीयः। विशेषविरोधिनस्तदभावस्य तत्र सत्त्वात्। न चैवं विशेषाभावरूपधर्मसत्त्वान्निर्धर्मकं ब्रह्म न भवेदिति वाच्यम् ; विशेषाभावस्याभावरूपत्वेन, धर्मस्य च भावरूपत्वेन विशेषाभावस्य धर्मरूपत्वाभावात्। तस्माद् न्यायमते [२]निर्विकल्पज्ञानवदस्मन्मते निर्विशेषब्रह्मणः सिद्धिरिति। वस्तुतस्तु निर्विकल्पज्ञानमेव ब्रह्म। तार्किकास्तु नैतज्जानन्तीति बोध्यम्। तस्माद् ब्रह्म निर्विशेषं, चिन्मात्रत्वाद्, व्यतिरेकेण घटादिवदिति प्रयोगो निर्दुष्ट एव।

न च - विशेषाभावरूपत्वेन निर्विशेषत्वस्य विशेषरूपत्वाभावेऽपि, चिन्मात्रत्वस्य भावरूपत्वेन विशेषरूपत्वाच्चिन्मात्रत्वरूपविशेषवतो ब्रह्मणः कथं निर्विशेषत्वमिति - वाच्यम् ; चिन्मात्रत्वं चिदेवेत्यभ्युपगमात्। अन्यथा चिति चित्त्वमस्ति, चित्त्वे पुनश्चित्त्वत्वमस्ति, तस्मिंस्तु चित्त्वत्वत्वमस्तीत्येवं कल्पयितव्यत्वेनानवस्थापत्तेः। तस्माच्चिन्मात्रत्वं चिद्रूपमेव। न तु धर्मः, निर्धर्मिकायां चिति धर्मायोगात्। न चैवं चिति चित्त्वाभावे कथं चित्पदप्रयोगस्तस्मिन्निति वाच्यम् ; जाड्याभावरूपस्य चित्त्वस्य सत्त्वात्। अत एव सत्यज्ञानादिशब्दानां ब्रह्मणि लक्षणा स्वीकृता। अनृतत्वाभावजाड्याभावादिरूपप्रवृत्तिनिमित्तभेदेन ब्रह्मणि प्रयुक्ताः सत्यज्ञानादिशब्दाः केवलं चैतन्यं लक्षणया बोधयन्तीति। तस्माच्चिद्रूपं जाड्याभावरूपं वा चिन्मात्रत्वं न धर्म इति न चिन्मात्रत्वेन ब्रह्मणः सविशेषत्वप्रसङ्ग इति सिद्धं निर्विशेषं ब्रह्मेति।

तथा अनुभूतिशब्दबोध्याया अनुभूतेः कथमवेद्यत्वम्? इत्यपि न युक्तः प्रश्नः, अनुभूतेर्वेद्यत्वे सति तदनुभूतिकर्मकस्य तद्वेदितृकर्तृकस्यानुभवस्य पुनर्वेद्यत्वं स्यादित्येवमनुभवपरम्परा प्रसज्यते, ज्ञानस्य च ज्ञेयत्वं विरुद्धम्। ज्ञानं हि विषयि, ज्ञेयं तु विषय इति भेदात्। न च ज्ञातुरात्मनो ज्ञानत्वमयुक्तमिति वाच्यम् ; अनुभवस्य वेद्यत्वाभावे सति स एव सर्ववेत्तेत्यनुभवस्यैव ज्ञातृत्वोपचारात्। सर्वमप्यनुभवे विषयीभवतीति युक्तमनुभवस्य विषयिण आत्मत्वम्। न चैवमनुभवशब्दवेद्येऽनुभवे कथमवेद्यत्वमिति वाच्यम् ; अनुभवशब्दो हि जडो नात्मानमनुभवं वेदितुमर्हति। न चावेद्यं वस्तु इदम् अनुभव इति वेदितुं कथं शक्यत इति वाच्यम् ; वेदनमात्रे वेद्यत्वस्योपचारात्। न चावेद्यवस्तुनः कथं सत्तानिश्चय इति वाच्यम् ; स्वप्रकाशत्वात्। न हि स्वप्रकाशे स्वात्मवस्तुनि सत्तासंशय उपपद्यते। न चावेद्यं वस्त्वनुभवशब्देन कथं बोधयितुं शक्यमिति वाच्यम् ; सर्वं वेत्त्यनुभवः, न केनापि वेद्यत इति वक्तुं कः पुनस्तव वाग्बन्धः? तथा ब्रह्म न शब्दप्रतिपाद्यमित्यपि न विरुद्धम्। न च ब्रह्मशब्देन स्वयं प्रतिपादयन्नपि ब्रह्म कथं शब्दप्रतिपाद्यं नेति ब्रूषे इति वाच्यम् ; ब्रह्म ब्रह्मशब्दलक्ष्यं वस्तु शब्दैः सत्यब्रह्मादिशब्दैरभिधया न प्रतिपाद्यत इति तदर्थात्। ततश्च ब्रह्मादिशब्दानां लक्षणया तत्र प्रवृत्तिरिति।

---

१.अन्यस्य 'यश्चोभयोः समो दोषः' इति न्यायविषयत्वादिति भावः। २.निर्विकल्पकज्ञानस्य प्रकारतादिविषयताविशेषशून्यत्वम्। ब्रह्मणस्तु सर्वविशेषशून्यत्वम्।

भाष्यार्कप्रकाशः

**ननु** किं तत् , यत्र ब्रह्मादिशब्दानां लक्षणया प्रवृत्तिरिति चेद्? **उच्यते**—चैतन्यमिति। न च चैतन्यशब्दवाच्यत्वं कथं वा तस्येति वाच्यम् ; ब्रह्मणः सुतरामपि शब्दाविषयत्वेऽव्यवहार्यत्वप्रसङ्गात् 'शास्त्रयोनित्वादि'ति सूत्रविरोधात्। शास्त्रैकवेद्यत्वं हि ब्रह्मणस्तेनोच्यते। शास्त्रं हि शब्दात्मकम्। 'वेदैश्च सर्वैरहमेव वेद्यः' इति वक्ष्यमाणगीताविरोधश्च। शब्दविषयत्वे च– 'यद्वाचा ऽनभ्युदितं येन वागभ्युद्यते' 'यन्मनसा न मनुते येनाहुर्मनो मतम्' 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' 'ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः। कथं चरन्ति श्रुतयः साक्षात् सदसतः परे॥' इति, 'अव्यक्तोऽक्षरः' इत्यादि श्रुतिस्मृतिपुराणविरोधः। तस्मात् परमार्थत एव शब्दाविषयं ब्रह्म। [1]तथा शब्दादीनामेवाभावात् कथं पुनस्तद्वेद्यत्वं ब्रह्मणः प्रसज्येत?

व्यवहारतस्तु शब्दविषयमेव, शास्त्रयोनित्वाद् ब्रह्मणः। अविद्यया कल्पितं हि ब्रह्मणि शास्त्रं यथा तथा शास्त्रवेद्यत्वमपि कल्पितम्। अत एव ब्रह्मणो ज्ञेयत्वमुपचारादित्युक्तम्। तस्माद् व्यवहारदशायां शब्दप्रतिपाद्यमेव ब्रह्म। अथवा शब्दैर्ब्रह्म इदमीदृशमिति प्रतिपादयितुं न शक्यते, निर्विशेषत्वादित्यभिप्रायेण ब्रह्म न शब्दप्रतिपाद्यमित्युक्तं, न तु ब्रह्मादिशब्दाविषयत्वादिति सङ्क्षेपः।

[2]**वस्तुतस्तु** श्रुतिस्मृत्यादिविरोधाः अशनय इव पतन्ति परेषामेव शिरस्सु। तथाहि– 'ऐतदात्म्यमिदं सर्वं, स आत्मा, तत्त्वमसि' 'नान्योऽतोऽस्ति द्रष्टा' 'अयमात्मा ब्रह्म' 'प्रज्ञानं ब्रह्म' 'सच्चिदानन्दं ब्रह्म' 'सत्यं ज्ञानमनन्तं ब्रह्म' 'निष्कलं निष्क्रियं शान्तं' 'साक्षी चेता केवलो निर्गुणश्च' 'एकमेवाद्वितीयं ब्रह्म' 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' 'य उदरमन्तरं कुरुते अथ तस्य भयं भवति' 'द्वितीयाद्वै भयं भवति' 'अशब्दमस्पर्शमरूपमव्ययम्' 'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः' 'असङ्गो ह्ययं पुरुषः' 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमा, यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्' 'नेह नानास्ति किञ्चन' 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वात्मैवाभूत्तत्केन कं पश्येत्' 'सदेव सोम्येदमग्र आसीत्' 'ब्रह्मैवेदममृतं पुरस्तात्' 'यत्तदद्रेश्यमग्राह्यम्' 'यद्वाचाऽनभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥' 'अविज्ञातं विजानतां विज्ञातमविजानताम्' इत्यादि**श्रुतयः**, 'अहमात्मा गुडाकेश सर्वभूताशयस्थितः' 'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि' 'क्षेत्रज्ञं चापि मां विद्धि' 'ज्ञानी त्वात्मैव मे मतम्' 'वासुदेवः सर्वमिति' 'अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्' 'अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते' 'भूतभृन्न च भूतस्थो भूता[ममा]त्मा भूतभावनः' 'सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः' 'अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः। शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते॥' 'भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः' 'अहमेवासमेकोऽग्रे नान्यद् यत्सदसत्परम्' 'ब्रह्मन् कथं भगवतश्चिन्मात्रस्याविकारिणः। लीलया वापि युज्येरन् निर्गुणस्य गुणाः क्रियाः॥' 'सेयं भगवतो माया यन्नयेन विरुध्यते। ईश्वरस्य विमुक्तस्य कार्पण्यमुत बन्धनम्॥' 'यथा जले चन्द्रमसः कम्पादिस्तत्कृतो गुणः। दृश्यतेऽसन्नपि द्रष्टुरात्मनोऽनात्मनो गुणः॥' 'देशतः कालतो योऽसाववस्थातः स्वतोऽन्यतः। अविलुप्तावबोधात्मा स युज्येताजया कथम्॥' इति **स्मृत्यादयश्च** परमेश्वरं प्रकृत्यादिसङ्गरहितं ब्रुवन्तीति चिदचिद्विशिष्टेश्वरवादविरोधः। गुणक्रियादिरहितं ब्रुवन्तीति सगुणक्रियेश्वरवादविरोधः। जीवेश्वराभेदं ब्रुवन्तीति तद्भेदवादविरोधः। एकमात्मानं ब्रुवन्तीति नानात्मवादविरोधः। अद्वितीयं ब्रह्म ब्रुवन्तीति प्रकृतिपुरुषेश्वरत्रयनित्यत्ववादविरोधः। ब्रह्म सत्यं जगन्मिथ्येति ब्रुवन्तीति जगत्सत्यत्ववादविरोधः। चिद्रूपमेवेश्वरं ब्रुवन्तीति चिद्विशिष्टेश्वरवादविरोधः। ज्ञानानन्दस्वरूपमेवात्मानं ब्रुवन्तीति ज्ञानानन्दगुणकेश्वरवादविरोधः। कालत्रयेऽपीशितव्याभावं ब्रुवन्तीतीश्वरेशितृत्ववादविरोधः। ब्रह्मणोऽज्ञेयत्वं ब्रुवन्तीति ज्ञेयत्ववादविरोधः। ईश्वरस्यैवाज्ञानेन संसारित्वं ब्रुवन्तीति बद्धमुक्तजीवद्वयाभ्युपगमविरोधः। एवमादयः शतशः सहस्रशो वा सन्तीत्यलम्।

**न्यायविरोधस्तु** अद्वितीयादिशब्दानां स्वसमानद्वितीयवस्तुरहितत्वाद्यपार्थकल्पनादिभिः स्फुट एव। **स्ववचनविरोधस्तु**— एकमेवाद्वितीयमसङ्गं च ब्रह्म प्रकृतिपुरुषविशिष्टम् , ज्ञानगुणक ईश्वरो ज्ञानस्वरूपः, आनन्दगुणक ईश्वर आनन्दस्वरूपः, अविक्रिय ईश्वरो जगद्रूपेण परिणतः, जीवरूप ईश्वरो जीवान्तरः, द्रष्टेश्वरो भक्तदृग्गोचरः, अनित्यं जगत् सत्यं, नित्यो जीवः संसारी,

१. **तथा** परमार्थत इत्यर्थः। २. तदुक्तान् सर्वान् विरोधान् तन्मते पातयति—**वस्तुतस्त्विति**।

भाष्यार्कप्रकाशः

सच्चिदानन्दाद् भिन्न ईश्वरः सच्चिदानन्दः, चिद्रूपो जीवश्चिद्रूपेश्वरस्य शरीरम् , अज्ञो जीवो ज्ञानरूपः, अणुर्जीवः सर्वगतः, परिच्छिन्नो जीवो नित्यः— एवमादिः। एवं विरुद्धत्वादुपेक्ष्यं परेषां मतम्।

**ननु** श्रुत्याद्यविरुद्धमेवास्माकं दर्शनम् , तथाहि – 'अस्मान्मायी सृजते विश्वमेतदस्मिंश्चान्यो मायया सन्निरुद्धः' 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' 'क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः' 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' 'पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्' 'ज्ञाज्ञौ द्वावजावीशनीशौ' 'नित्यो नित्यानां चेतनश्चेतनानाम्' 'भोक्ता भोग्यं प्रेरितारं च मत्वा' 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति' 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति' 'अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्' 'अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' 'गौरनाद्यन्तवती सा जनित्री भूतभाविनी' 'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः' 'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः' 'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरम्' 'योऽक्षरमन्तरे सञ्चरन् यस्याक्षरं शरीरं यमक्षरं न वेद' 'एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः' 'अन्तःप्रविष्टः शास्ता जनानां सर्वात्मा' 'तदैक्षत बहु स्यां प्रजायेय' 'तत्तेजोऽसृजत' 'सोऽकामयत' 'स तपोऽतप्यत' 'तत्सृष्ट्वा तदेवानुप्राविशत् , तदनुप्रविश्य सच्च त्यच्चाभवत्' इत्याद्याः श्रुतयः, 'प्रकृतिं विद्धि मे परां जीवभूताम्' 'सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्' 'मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्' 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' 'मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्' इति स्मृतयः जीवेश्वरभेदादौ प्रमाणमिति चेत् ,

**मैवम्** ; श्रुतीनां स्मृतीनां च त्वया कल्पितत्वाद् विरुद्धार्थस्य। तथाहि – 'अस्मान्मायी सृजते' इति श्रुतेः मायी ईश्वरो जगत् सृजति, अन्यो जीवस्तु मायया जगति निरुद्ध इति हि त्वयोच्यते, 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी'ति श्रुत्यन्तरात् , 'ममैवांशो जीवलोके जीवभूतः सनातनः' इति स्मृतेश्च ईश्वरांशो जीव इति तावदविरुद्धम्। ईश्वरस्य जगत्स्रष्टृत्वे तदंशस्य तत्र सन्निरोध इति तु विरुद्धम्। न ह्यंशिन ईश्वरादन्यो भवितुमर्हत्यंशो जीवः। एवं सर्वांशसमष्टेरेवांशीश्वरत्वेन सर्वजीवसंसारोऽपीश्वरस्य प्राप्तः। न चांशादन्य एव अंशीति वाच्यम् ; क्वापि अंशिनोऽन्यस्यांशस्यादर्शनात्। न चैवमीश्वरादनन्य एव जीवः, किन्तु जीवादेवेश्वरोऽन्य इति वाच्यम् ; तथा सति ईश्वरादनन्यत्वेन जीवस्याप्यसंसारित्वसर्वज्ञत्वादिप्रसङ्गात्। किञ्च चिदचिद्विशिष्टेश्वरस्यांशोऽपि चिदचिद्विशिष्ट एव भवितुमर्हति। न चेष्टापत्तिः, चिदेव जीव इति तवाभ्युपगमात्। न च चिदचिद्विशिष्टेश्वरस्य यश्चिदंशः स जीव इति वाच्यम् ; तथा सति अचितोऽपीश्वरांशा[शत्वा]पत्तेः। ईश्वरात् सकाशाच्चितोऽचितश्च पृथक्करणे ईश्वरस्यैवासिद्धेः। न च चिदचिदीश्वरनामकं पदार्थत्रयमस्तीति वाच्यम् ; तर्हीश्वरांशो जीवो नैव भवेत् , चिदचिद्विलक्षणत्वादीश्वरस्य।

**अपिच** किमीश्वरः चिद्रूपः? यद्वा अचिद्रूपः? अथवा चिदचिद्रूपः? अथवा चिदचिदनिर्वाच्यः? नाद्यः, जीवत्वापत्तेः। न द्वितीयः, जडत्वापत्तेः। न तृतीयः, एकस्योभयरूपत्वायोगात्[१]। न चतुर्थः, मिथ्यात्वापत्तेः। चित्त्वेनाचित्त्वेन वा अनिर्वाच्यं वस्तु हि मिथ्याभूतमेव। अथवा शशशृङ्गादिवदसदेव। तादृशवस्तुनोऽसम्भवात्। 'सच्चिदानन्दं ब्रह्मे'त्यादिश्रुतिविरोधाच्चेश्वरस्य चिदचिद्विलक्षणत्वासिद्धिः। न चेश्वरस्य ज्ञातृत्वाच्चितो ज्ञानत्वाच्च न चिद्रूप ईश्वरः, किन्तु चिद्युक्त इति वाच्यम् ; तर्हि जीवस्यापि चिद्युक्तत्वमेव स्याज्ज्ञातृत्वात्। न चेष्टापत्तिः, जीवेश्वरवैलक्षण्यासिद्धेः। तस्मादीश्वरांशस्य जीवस्येश्वरादन्यत्वमसिद्धम्। न हि महाकाशांशस्य घटाकाशस्य महाकाशादन्यत्वम्। तथा च ईश्वरादन्यो जीवः कथं मायया सन्निरुध्येत? ईश्वरवत् तदंशोऽपि जीवो ह्यसंसारी भवितुमर्हति। महाकाशवत् तदंशो घटाकाशो निर्लेपो न दृश्यते किम्? न चैवं कथं श्रुतेरर्थवत्त्वमिति वाच्यम् ; मायया जीव ईश्वरादन्य इव सन्निरुद्ध इव च प्रतीयते, न तु वस्तुत इति तदर्थात्।

एतेन ब्रह्मण एव जीवत्वमज्ञानादिति प्रलापो निर्मूलित इति **वेदान्तदेशिक**प्रलापो निर्मूलितः। अज्ञानाद् गगनस्य नैल्यमिव, रज्जोः सर्पत्वमिव, स्वपतो देशान्तरगन्तृत्वमिव, ब्रह्मणो जीवत्वमुपपद्यत इति 'मायायां सर्वसम्भवादि'ति न्यायात्। न चेश्वरे कथमज्ञानमिति वाच्यम् ; एवंविधजीवत्वादिभ्रमजननशक्तेरेवाज्ञानत्वात्। एवं शक्तिमत्त्वादेव मायीत्युच्यत ईश्वरः।

१. एकत्र चित्त्वाचित्त्वयोः विरुद्धत्वादिति भावः।

भाष्यार्कप्रकाशः

ननु कस्य भ्रमः इति चेद्? यस्यास्ति तस्यैव। ममैवास्तीति चेत्, तर्हि तवैवास्तु। कथमीश्वरांशस्य मम जीवस्य भ्रमः इति चेत्? स्वस्येश्वरांशत्वापरिज्ञानादेव। **ननु** जीवत्वभ्रमादीश्वरांशत्वापरिज्ञानम्, तदपरिज्ञानाज्जीवत्वभ्रम इत्यन्योन्याश्रयः इति चेत्, **मैवम्**; अनादित्वात्। ननु माया नाम प्रकृतिरेव, नार्थान्तरमिति चेत्, सैव प्रकृतिरज्ञानम्, अज्ञानस्यैव जगदुपादानत्वात्।

**ननु** क्षरं प्रधानम्, अक्षरः पुरुषः, तयोः पतिरीश्वर इति 'क्षरं प्रधानम्' इति श्रुत्योच्यत इति परस्परविलक्षणं त्रयमिति चेत्, **मैवम्**; भोक्तुर्विकारिणो जीवस्याक्षरत्वायोगात्। भोक्ता हि भोगसिद्ध्यसिद्धिनाशादिना विक्रियते। 'कूटस्थोऽक्षर उच्यते' इत्यविक्रियो ह्यक्षरः। सविक्रियो नश्यति, घटादेः सविकारस्य नाशदर्शनाद्, अक्षरस्त्वविनाशीति कथं भोक्तुरक्षरत्वम्? प्रकृतिपुरुषयोर्नित्यत्वेन प्रधानस्य कथं वा क्षरत्वम्? क्षरति नश्यतीति हि क्षरम्। तस्मात् प्रधानपरिणामभूतं देहादिकं क्षरम्, 'क्षरः सर्वाणि भूतानी'ति स्मरणात्; सर्वेषां भूतानां प्रधाने लयदर्शनात् प्रधानमक्षरम्; क्षेत्रज्ञ ईश्वरस्तु 'एको देवः' इति बोध्यम्। यद्वा ज्ञाननाश्यत्वात् प्रकृतिः क्षरं, हरः परमात्मा अक्षरं, क्षरात्मानावित्यत्रात्मशब्दस्तु प्रकृतिवाची, क्षरशब्दो भूतवाची।

न च प्रकृतावात्मशब्दप्रयोगे विवदितव्यम्, स्वभावे आत्मशब्दप्रयोगात्। स्वभावस्यैव प्रकृतित्वाच्च। ईश्वरस्यैव स्वभावो हि प्रकृतिः। न च 'प्रधानक्षेत्रज्ञपति'रिति श्रुत्यन्तरात् क्षरात्मानौ प्रधानक्षेत्रज्ञावेव, ईश्वरस्यैव तत्पतित्वमिति वाच्यम्; प्रधानक्षेत्रज्ञपतिरिति श्रुतौ प्रधानशब्दः प्रकृतिवाची, क्षेत्रज्ञशब्दस्तु भूत(शब्द)वाचीत्यभ्युपगमात्। सचेतनानि हि भूतानि क्षेत्रं जानन्ति आत्मचैतन्यप्रतिफलनवशात्। न च 'एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ' इति गीताविरोधः, यस्य ज्ञातृत्वमेकमेवास्ति, न ज्ञेयत्वं स एव क्षेत्रज्ञ इति वादात्। ब्रह्मादिभूतानि तु घटादिकं जानन्त्यपि ज्ञायन्त एवात्मना साक्षिणेति न मुख्यं ज्ञातृत्वं तेषाम्।

**यद्वा** यः स्वयमेव जानाति स क्षेत्रज्ञः। भूतानि तु न स्वतो ज्ञातुं क्षमन्ते, जडत्वात्। किन्तु आत्मप्रतिफलनवशादेवेति न क्षेत्रज्ञत्वं भूतानाम्। तस्माच्छ्रुतौ क्षेत्रज्ञशब्दो भूतपर एव। कूटस्थ आत्मा क्षेत्रज्ञस्तु गुणेशत्वान्निर्गुणश्च। न हि गुणानामीशो गुणवान् भवेत्। एवं निर्गुणत्वादेवाविक्रियः क्षेत्रज्ञ आत्मा।

**ननु** गुणेशः ईश्वर एव, न त्वात्मा, 'आत्मेश्वरम्' इति श्रुत्यन्तरादिति चेत्, **मैवम्**; आत्मनः प्रकृतेरीश्वर आत्मेश्वर इति तदर्थात्। आत्मा चेश्वरश्चात्मेश्वर इति वा। कथमन्यथा 'अहमात्मा गुडाकेश' इति स्मरणादात्मन एव सत ईश्वरस्य भवेदात्मेश्वरत्वमुपपन्नम्।

**ननु** जीव आत्मा, ईश्वरस्तु परमात्मा। अज्ञो जीवः, प्राज्ञ ईश्वरः। परतन्त्रो जीवः, स्वतन्त्र ईश्वरः। तथा च श्रुतिः – 'ज्ञाज्ञौ द्वावजावीशानीशाविति' इति चेत्, **मैवम्**; यः प्रकृतिविविक्तमात्मानं वेत्ति स विद्वानात्मज्ञः, यस्तं न जानाति सोऽज्ञः। आत्मविद एवात्मत्वात् स ईशः, अनात्मविदस्तु संसारित्वात् सोऽनीशः। उभावप्यजावेव, अनात्मविदः प्रमातुरपि वस्तुत आत्मत्वात्। अनात्मतादात्म्याध्यासतदभावप्रयुक्तभेदेन तु द्वावित्युक्तं न त्वात्मभेदात्।

**नन्वात्मभेदोऽस्त्येव**, 'नित्यो नित्यानाम्' इति श्रुतेः। तथा जीवेश्वरभेदोऽप्यस्ति, 'एको बहूनां यो विदधाति कामा'निति तत्रैव दर्शनादिति चेत्, **मैवम्**; कार्यकरणसङ्घाताभिमानिनां ब्रह्मादिस्तम्बपर्यन्तानां प्रमातॄणां वस्तुत आत्मत्वेन नित्यत्वान्नित्यानामित्युक्तं, व्यवहारतो बहुत्वाद् बहूनामित्युक्तम्। तेषां हि कामप्रदः क्षेत्रज्ञ ईश्वर आत्मैक एव। यद्वा कामप्रद ईश्वरोऽप्यत्र प्रमातैव, तस्य चात्मत्वेन नित्यत्वम्, व्यवहारतो हि जीववदीश्वरः प्रमाता, परमार्थतस्त्वीश्वरवज्जीव आत्मेति सिद्धान्तात्।

**ननु** जीवो भोक्ता, प्रधानं भोग्यम्, ईश्वरः प्रेरिता, पृथगीश्वरज्ञानादेव मुक्तिरिति 'भोक्ता भोग्यं प्रेरितारं चे'त्यादिश्रुतिसिद्धमिति चेत्, **मैवम्**; अन्तःकरणतादात्म्याध्यासापन्नस्य प्रमातुर्भोक्तृत्वाद्, आत्मन एवायस्कान्तशिलालोहन्यायेनाविक्रियस्यैव प्रेरकत्वात्। भिन्नात्मज्ञानस्य भयादिहेतुत्वस्य[1] श्रुतिसिद्धत्वेन भिन्नात्मज्ञानं मोक्षहेतुरित्यर्थवर्णनस्यायुक्तत्वात्। स्वस्माद् भिन्नमीश्वरं सर्वेऽपि मूर्खाः परोक्षत्वेन जानन्तीति तेषामपि तेन मोक्षप्रसङ्गात्। अपरोक्षत्वेन ज्ञानं तु न सम्भवति, द्रष्टुरीश्वरस्य जीवदृश्यत्वासम्भवात्। अपरोक्षेण परमात्मदर्शने सत्यपि राजदर्शनेन प्राकृतस्येव न दुःखनिवृत्तिः, किन्तु तापातिशय एव, स्वस्मादुत्कृष्टदर्शनस्य तापहेतुत्वात्। न

१. 'उदरमन्तरं कुरुते। अथ तस्य भयं भवति' इत्यादिश्रुतिः ज्ञेया।

भाष्यार्कप्रकाशः

ह्यसंसारीश्वरदर्शनेन जीवस्य स्यात् संसारनिवृत्तिः। न चार्थिना दृष्टो याचितश्च राजा यथा तस्य धनादिकं ददाति, तथा जीवेन दृष्टः सेवितो याचितश्चेश्वरस्तस्य मोक्षं दिशतीति वाच्यम् ; मोक्षस्य देयत्वेन साध्यत्वेऽनित्यत्वप्रसङ्गात्। अविक्रियस्य चेश्वरस्य दातृत्वा-योगात्। दातृत्वं हि विकारः।

**ननु** साक्षिण ईश्वराद् भिन्न एव भोक्ता जीवः, 'तयोरन्यः' इति श्रुतेरिति चेत् , **मैवम्** ; त्वया जीवत्वेनाभिमतस्य प्रमातुरेव भोक्तृत्वं, न त्वात्मनः। आत्मा हि साक्षी। स एवेह अन्यस्त्वनश्नन्नभिचाकशीतीत्युच्यते। असावेवात्मा प्रमातुः स्वरूपमिति वस्तुत आत्मभूत एव प्रमाता। कथमन्यथा साक्षिणा अनुभूतानां स्वापाज्ञानानन्दानां प्रमात्रा स्मर्यमाणत्वम्— 'सुखमहमस्वाप्सं न किञ्चिदवेदिष'मिति।

**ननु** न क्षेत्रज्ञ आत्मा साक्षी, सुषुप्तिमूर्छाप्रलयेषु तस्यात्यन्तमज्ञत्वेन साक्षित्वासम्भवादिति चेत् , **मैवम्** ; अनुभवपूर्वकत्वेन स्मरणस्य दर्शितस्मरणेनानुभवस्य कल्प्यमानत्वात्। न च भ्रान्तिसिद्धमेव तज्ज्ञानं 'सुखमहमस्वाप्स'मितीति वाच्यम् ; सुषुप्तौ तवाज्ञत्वं किं त्वया वेद्यते? उतान्येन? न त्वया, तव ज्ञानाभावात्। नान्येन, अन्यस्याभावात्। 'यत्र सर्वमात्मैवाभूत् तत् केन कं पश्येदि'ति श्रुत्या सुषुप्त्यादिषु सर्वद्वैताभावो हि प्रोच्यते। न चेश्वरेण वेद्यत इति वाच्यम् ; कथं तत् त्वया ज्ञातुं शक्यते? तस्माद् असाक्षिकमिदमज्ञत्वमसिद्धमेव, शशशृङ्गादिवत्। तथा सुषुप्तिरप्यसिद्धैव स्यात् , तस्या अपि साक्षिणोऽभावात्। तवासाक्षित्वाच्च। किञ्च सुषुप्तादुत्थितो भवान् केनचिदसुप्तेन - 'किं त्वयैतावन्तं कालमनुभूत'मिति पृष्टः किमुत्तरं ब्रूते? 'न किञ्चिदपि' इति ब्रूषे त्वम्। तच्चोत्तरमयुक्तं स्यात् , यत्किञ्चिज्ज्ञानं मम नास्तीत्याकारकज्ञानस्याप्यज्ञस्य तवायोगात्। तस्मात् स्वापादिषु तवाज्ञानाद्यनुभवो ऽस्त्येवेति साक्ष्येवात्मा। साक्षिरूपेणानुभूतस्याज्ञानादेस्तव साक्षिणोऽन्यस्य प्रमातुः स्मरणायोगात् प्रमाता साक्षिणो नात्यन्तं भिन्नः, नाप्यभिन्नः, प्रमातृसाक्षिणोः संसारतदभावप्रयुक्तभेददर्शनात्। एवं साक्षिणः सकाशाद् भिन्नत्वेनाभिन्नत्वेन वा प्रमातुर्दुर्वचत्वाद् मिथ्यात्वमेव। अज्ञानेन तु साक्षिण्यात्मनि कल्पितं प्रमातृत्वम्। अत एव अज्ञानी संसरति, ज्ञानी तु नेतीममर्थमाह श्रुतिः— 'अजामेकाम्' इति।

न च जीवः प्रकृतिं जुषमाणः संसरति, ईश्वरस्तु भुक्तभोगां तां जहातीति श्रुत्यर्थ इति वाच्यम् ; ईश्वरस्य नित्यमुक्तत्वेन पूर्वं प्रकृतिभोगात् संसार इति वक्तुमयुक्तत्वात्। प्रकृतिभोगाभावे भुक्तभोगामिति वचनविरोधात्। प्रकृतिं भुञ्जानस्य बद्धस्येश्वरस्य मोचकान्तराभावेन मुक्त्यभावप्रसङ्गात्। न च जीवैर्भुक्तभोगामिति वाच्यम् ; भुक्तेति भूतार्थक्तप्रत्ययश्रवणात्। जीवा इदानीमपि प्रकृतिं भुञ्जते हि। तस्माद् विद्वदविद्वत्परैवेयं श्रुतिः। विद्वान् हि विद्योदयात् प्राक् प्रकृतिं भुक्त्वा विद्योदयानन्तरं जहातीति। न चैकस्यैवात्मनः कथं विद्वदविद्वद्भेद इति वाच्यम् ; प्रमातृभेदप्रयुक्तत्वात् तद्व्यवहारस्य। अथवा उपाधिभेदादिति।

**ननु** विदुषाऽपि कथं प्रकृतिस्त्यक्तुं शक्यते? अन्ताभावात्। तथा च श्रुतिः – 'गौरनाद्यन्तवती' इति चेत् , **मैवम्** ; यावद्व्यवहारं यावद्विद्योदयं वा तस्या अन्ताभावस्य विवक्षितत्वात्। 'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः' इत्यज्ञानस्य ज्ञाननाश्यत्वस्मरणात्। ज्ञानाज्ञानविरोधस्य सम्मतत्वाच्च। न च ज्ञानाभाव एवाज्ञानमिति वाच्यम् ; अहं ज्ञानाभाववानिति प्रतीत्यभावात्। ज्ञानाभावस्याभाव-रूपत्वेन ज्ञानावरणताऽयोगात्। न च तेजोऽभावरूपस्य तमस इवावरणत्वं सम्भवतीति वाच्यम् ; तमसोऽपि भावरूपत्वाभ्युपगमात्। तमो द्रव्यम् , आवरकत्वात् , कुड्यादिवदित्यनुमानात्। अन्धकारस्य चक्षुर्ग्राह्यत्वाच्च घटवत्। न च घटाभावोऽपि चक्षुर्ग्राह्य एवेति वाच्यम् ; घटाभावाधिकरणस्य भूतलस्यैव चक्षुर्ग्राह्यत्वात्। तस्मात् तमोवदज्ञानं भावरूपमेव। अत एव 'अज्ञानेनावृतं ज्ञानम्' इत्यादि सङ्गच्छते।

**ननु** 'अजो ह्येकः' इति श्रुतेर्विद्वदविद्वद्विषयत्वस्य वक्तुं शक्यत्वेऽपि, 'समाने वृक्षे' इति श्रुतेः तत्त्वं वक्तुमशक्यम् , समान इति दर्शनात्। समानो हि वृक्ष एकं शरीरम्। तत्र निमग्नः पुरुषो जीवो मुह्यमानोऽसामर्थ्याच्छोचति। ईश्वरं तन्महिमानं च यदा पश्यति तदा जीवो वीतशोको भवतीति श्रुत्यर्थात्। अतो जीवेश्वरौ भिन्नावेवेति चेत् , **मैवम्** ; प्रमातृसाक्षिपरत्वादेतच्छ्रुतेः। प्रमाता हि शरीरतादात्म्याध्यासं प्रपद्य शरीरे निमग्नः, साक्षी तु तदभावादनिमग्नः। सुषुप्तौ साक्षिणो न हि शरीरतादात्म्याध्यासो दृश्यते,

भाष्यार्कप्रकाशः

तद्वज्जागरस्वप्नयोरपीति मन्तव्यम्। अविकारित्वेन ज्ञातृत्वस्यैव साक्षिलक्षणत्वात्। जागरादावपि वृत्त्यभावदशायां साक्षिस्वरूपं बोद्धुं शक्यमेवासंसारित्वरूपम्। अयं च साक्षी प्रमातुरात्मैव। ततश्च यदा प्रमाता अहं ब्रह्मास्मीति विद्याबलादात्मानं साक्षिणं स्वयम्प्रकाशत्वादिरूपं तन्महिमानं च पश्यति, तदा नाहं संसारी मम साक्षित्वादिति निश्चित्य वीतशोको भवति। न तु स्वान्येश्वर-ज्ञानात् स्वस्य संसारनिवृत्तिः, रङ्गनायकाद्यर्चादर्शनेन संसारनिवृत्त्यदर्शनात्। तव मते अर्चाः अपीश्वरस्वरूपभूता हि। तस्मान्नेयं श्रुतिर्जीवेश्वरभेदं साधयितुं क्षमते।

**नन्वेवं** 'य आत्मनि तिष्ठन्नि'त्यन्तर्यामिब्राह्मणं भेदं साधयतीति चेत्? **मैवमपि**; आत्मशब्दस्य तत्र बुद्ध्याद्यन्यार्थत्वात्[१]। न च साक्षिपर एवेति वाच्यम् ; साक्षिण एव सर्वान्तरत्वेन सर्वात्मभूतत्वात् साक्षिण आन्तरस्यान्यस्य साक्षिणोऽदर्शनात्। तत्कल्पने तस्या-प्यन्यः साक्षी, तस्याप्यन्यः साक्षी कल्प्येतेत्यनवस्थादोषात्। 'नान्योऽतोऽस्ति द्रष्टा' इति श्रुत्या साक्ष्यन्तरनिषेधात्। 'साक्षी चेता' इति श्रुत्या ईश्वरस्यैव साक्षित्ववचनान्न साक्षिणः पर ईश्वरः, किन्तु साक्षी क्षेत्रज्ञ एवेश्वरः। न चेश्वर एव साक्षी, न तु क्षेत्रज्ञ इति वाच्यम् ; असाक्षिणः क्षेत्रज्ञत्वायोगात्। न हि स्वविकारं स्वयं पश्येत्। अतः प्रमातुर्विकारिणः स्वविकारदर्शनासम्भवात् प्रमातृविकाराभिज्ञः प्रमातुरन्य एव क्षेत्रज्ञः साक्षीति।

**ननु** जीवसाक्षिणः परिच्छिन्नस्याक्षरादिसर्वान्तरात्मत्वं न सम्भवति। तस्मात् सर्वभूतान्तरात्मा नारायण एव, न तु साक्षी क्षेत्रज्ञ इति चेत् , **मैवमपि**; 'चेतनाचेतनभिदा कूटस्थात्मकृता न हि। किन्तु बुद्धिकृताभासकृतैवेत्यवगम्यताम्॥' इति वचनाद् अचेतनेष्वपि साक्ष्यस्त्येव, प्रमाता तु नास्ति। तथा च प्रमातैव परिच्छिन्नः, साक्षी तु पूर्ण एव। अत एवायमेकः, साक्षिभेदे मानाभावात्। ज्ञातृत्वादेव देवः स्वयम्प्रकाशः सर्वप्रमात्रन्तर्यामित्वान्नारायणश्च। देहेषु मृतेष्वपि प्रमातारो **न रीयन्ते** न क्षीयन्त इति **नराः** सर्वभूतानि, तेषां समूहो नारम् , तदयनं स्थानं यस्य स नारायण इति व्युत्पत्तेः। एवं सर्वत्रावस्थितस्यापि साक्षिणः सर्वेण सह सङ्गाभावादाकाशवदपहतपाप्मत्वम्। पाप्मशब्दः सर्वविकारोपलक्षकः, विकाराणां दोषत्वात् पाप्मत्वमिति।

नन्वेवं साक्षिणः सर्वशासनं न घटते, ईश्वरधर्मत्वाच्छासनस्य; साक्षिणश्चाविक्रियत्वादिति चेत् , समानोऽयं दोषस्तवापि। 'साक्षी चेता' इति श्रुतिप्रामाण्यादीश्वरस्य साक्षित्वं त्वयाऽभ्युपगतमेवेति कथमीश्वरस्यापि साक्षिणः शासनासम्भव इति। तर्हि कथं श्रुत्युपपत्तिरिति यदि ब्रूयादस्मदीयः, तर्हि ब्रूमः— अयस्कान्तशिलालोहन्यायेनाविक्रियस्यैव साक्षिणः शास्तृत्वोपपत्तिरिति। गमनादिविक्रियारहितैव ह्ययस्कान्तशिला लोहमाकर्षति। तस्मात् 'अन्तःप्रविष्टः शास्ता जनानाम्' इति श्रुतिरपि साक्षिपरैव। तस्यैव सर्वात्मत्वात्। सर्वेषां प्रमातॄणां जनानामात्मा हि सः। एवं शास्तृत्वादेव साक्षिण ईश्वरशब्दवाच्यत्वमपि सङ्गच्छते।

नन्वस्य साक्षिणः स्रष्टृत्वं नोपपद्यते, स्रष्टृत्वस्य सङ्कल्पपूर्वकत्वात् , सङ्कल्पस्य मनोधर्मत्वात् , साक्षिणो मनोऽभावादिति चेत् , समानोऽयं दोषस्तवापि। न हीश्वरस्य मनोऽस्ति, महाभूतसत्त्वांशप्रकृतिकस्य मनसः कथं महाभूतसृष्टेः प्राक्सत्त्वं स्यात्? न चेश्वरस्य मायया सङ्कल्पोपपत्तिरिति वाच्यम् ; तयैव साक्षिणोऽपि तदुपपत्तेः। न च कथं ज्ञानस्वरूपस्य साक्षिणोऽज्ञानसम्बन्ध इति वाच्यम् ; यथा तवेश्वरस्य सर्वज्ञस्याज्ञानसम्बन्धः, तथैवेति। साक्षिस्वरूपभूतज्ञानस्याज्ञानाविरोधित्वात् प्रत्युताज्ञानस्यापि भासकत्वात् साक्षिणोऽप्यज्ञानसम्बन्ध इत्यस्मदीयान् प्रत्युत्तरम्। स च साक्ष्यज्ञानयोः सम्बन्धः जगद्रूपकार्यान्यथानुपपत्त्या कल्पित एवेति न वस्तुतोऽस्ति, जगत एव वस्तुतोऽभावात्। अत एवासङ्गाद्वितीयत्वमात्मनः। न च पारमार्थिकमेवेदं जगदिति वाच्यम् ; सुषुप्तिप्रलयादावसत्त्वात्। न च सूक्ष्मरूपेण प्रलयादावप्यस्तीति वाच्यम् ; मुक्तौ सूक्ष्मरूपेणाप्यसत्त्वात्। न च किं तत्र मानमिति वाच्यम् ; 'यत्र तु सर्वमात्मैवाभूत् तत्र केन कं पश्येदि'त्यादिश्रुतेरेव प्रमाणत्वात्। न च सुषुप्तौ अज्ञानादिकमस्त्येवेति तथैव मुक्तावपीति कल्प्यत इति वाच्यम् ; मुक्तावज्ञानसत्त्वे सुप्तवन्मुक्तस्यापि पुनरावृत्तिप्रसङ्गात्।

**ननु** सुप्तदृष्ट्या जगत इव, मुक्तदृष्ट्या अज्ञानस्याप्यभावेऽपि तदितरदृष्ट्या तदस्त्येवेति कथमज्ञानाभाव इति चेत् , **मैवम्** ; मुक्त-दृष्ट्या अज्ञानाभावस्यैव अस्माभिरुच्यमानत्वात्। वस्तुतस्तु यदेव मुक्तदृष्ट्याऽस्ति, तदेव सर्वदाऽप्यस्ति, मुक्तस्य विद्वत्त्वात्। न ह्यविदुषो

१. समानप्रकरणे शाखान्तरे 'यो विज्ञाने तिष्ठन्' इति पाठोऽपि अस्योपोद्बलकः।

भाष्यार्कप्रकाशः

मुक्तिः, विदुषश्चात्मत्वान्मुक्त आत्मैव। तद्दृष्ट्या तु किमपि नास्त्येव, आत्मन एकस्यैव सत्त्वात्। तस्मात् कालत्रयेऽपि परमार्थतो जगदज्ञानं वा नास्त्येव, तत्प्रतीतिस्तु मिथ्यैव। अत एव ब्रह्मण एकत्वाद्युपपत्तिः।

**ननु** निर्गुणस्य साक्षिणः कामायोगात् 'सोऽकामयत' इति श्रुतिः सगुणमीश्वरं ब्रूत इति कृत्वा सगुण एवेश्वरः, न तु निर्गुणसाक्षी भवेदीश्वर इति चेत् , **मैवम्** ; निर्गुणस्यापि साक्षिणो मायया कामोपपत्तेः। यथा जीवस्य मनोधर्माः कामसङ्कल्पादयः, तथा ईश्वरस्य मायाधर्माः कामादयः। मायी खल्वीश्वरः साक्षी।

**ननु** 'तत्सृष्ट्वा, तदेवानुप्राविशदि'ति श्रुत्युक्तोऽनुप्रवेशः पूर्णस्य साक्षिणो न घटत इति **चेत्** , समानोऽयं दोषस्तवापि; पूर्णत्वेनाभिमतत्वादीश्वरस्य त्वया। न च जीवरूपेणेश्वरस्यानुप्रवेशः सम्भवतीति वाच्यम् ; जीवाद् विलक्षणस्येश्वरस्य जीवरूपानुप्रवेशासम्भवात्। न च अन्तर्यामिरूपेणानुप्रवेश इति वाच्यम् ; प्रवेशात् प्रागेव तत्र सत्त्वाद् , अन्यथा अपूर्णत्वापत्तेः। अस्मदीयान् प्रति तु पूर्णस्यापि साक्षिणोऽन्तःकरणोपहितत्वेन रूपेणान्तःप्रवेशोपपत्तिरित्युत्तरम्। न च अन्तःकरणोपहित एव साक्षीति वाच्यम् ; अन्तःकरणोपहितोऽपि साक्षीति वक्तव्यम्। अविद्योपहितस्य अथवा मायोपहितस्यापि साक्षित्वात्। अविद्येति मायेति च पर्यायशब्दौ। न च अविद्योपहितस्य कथमन्तःकरणोपहितत्वमिति वाच्यम् ; मठोपहितस्याप्याकाशस्य मठान्तःस्थघटोपहितत्वदर्शनात्। न च अविद्याऽन्तःकरणभेदात् तदुपहितयोरपि भेद इति वाच्यम् ; औपाधिकभेदस्याप्रयोजकत्वात्। न हि घटमठभेदेऽप्याकाशो भिद्यते। नन्वन्तःकरणावच्छिन्नो जीवः, तदुपहितो जीवसाक्षी, मायावच्छिन्नः ईश्वरस्तदुपहितः ईश्वरसाक्षीति **वेदान्तपरिभाषायां** दृश्यत इति चेत् , तस्य मतान्तराभिप्रायत्वान्न तद्विरोधोऽस्य। 'साक्षी चेता' इति श्रुत्या ईश्वरस्यैवेह साक्षित्वेन प्रतिपादनान्नेश्वरादन्यः कश्चन साक्षी कल्प्यः, तस्यैव साक्षिणोऽन्तःकरणोपहितत्वसम्भवान्न साक्ष्यन्तरकल्पना युक्ता।

**नन्वेवं** साक्ष्येकत्वे श्रुत्युपपत्तावपि नानुभवोपपत्तिः, देवदत्तयज्ञदत्तयोः साक्ष्येकत्वे सति देवदत्तसाक्ष्यनुभूतस्वापादीनां देवदत्तप्रमात्रेव यज्ञदत्तप्रमात्राऽपि स्मर्यमाणत्वापत्तेरिति चेत् , **नायं दोषः**, साक्षी यदन्तःकरणोपहितःसन् यदनुभूतवान् , तदन्तःकरणावच्छिन्नेनैव तत् स्मर्यत इति कल्पनेनादोषात्।

**ननु** 'तदनुप्रविश्य, सच्च त्यच्चाभवदि'ति कथं भूतपञ्चकात्मत्वं साक्षिणो ज्ञानस्वरूपस्य? [1](वाय्वाकाशावमूर्तौ सच्छब्दवाच्यौ, तेजोजलपृथिव्यस्तु त्यच्छब्दवाच्या इति विवेकः।) न च तव मतेऽप्यस्त्ययं दोष इति वाच्यम् ; मम मते ईश्वरस्य चिदचिद्विशिष्टत्वेनाचिदंशप्रयुक्तभूतात्मत्वसम्भवादिति चेत् , **मैवम्** ; साक्षिणोऽपि मायया जगदात्मत्वोपपत्तेः। स्थाणोः पुरुषात्मत्वस्य, रज्जोः सर्पात्मत्वस्य, गगनस्य नीलात्मत्वस्य च दर्शनात्। न च अचिद्रूपमायायाः कथं चिति साक्षिणि सम्भव इति वाच्यम् ; चिच्छक्तेरेव मायात्वात्।

**हन्त!** तर्हि अचिद्विशिष्ट एव साक्षी कथं चिन्मात्र इति चेत् , **मैवम्** – 'निस्तत्त्वा कार्यगम्याऽस्य शक्तिर्मायाऽग्निशक्तिवत्' इति कार्यगम्याया मायाशक्तेरग्निशक्तिवन्मिथ्यात्वात्। न ह्यग्नेः पृथग् अपृथग्वा अग्निशक्तिर्दृश्यते, नाप्यग्निशक्त्या सद्वितीयत्वमग्नेः। अग्निरेकः तच्छक्तिरन्येति पदार्थद्वयत्वेनाग्रहणात्। तद्वत्साक्षिणः पृथङ्मायाशक्तिरपीति। तस्मान्न मिथ्याभूतया मायया साक्षिणः स्याद् वैशिष्ट्यं, गन्धर्वनगरेणेव गगनस्य। अतश्चिन्मात्र एव साक्षी।

**अत्रेदं रहस्यम्** - रज्जुस्वरूपेऽज्ञाते सति सर्पभ्रमोदयवत् साक्षिस्वरूपसाक्षात्काराभावे जगद्भ्रमोदय इति हेतोः साक्षी मायया जगत् सृजतीत्युच्यते, न तु वस्तुतः साक्षी जगज्जनयति। अविक्रिये तस्मिन् स्रष्टृत्वायोगात्। अत एव न तत्र काऽपि माया विद्यते। सर्जनशक्तेरेव मायात्वात्। अत एव 'एकमेवाद्वितीयं ब्रह्मे'ति सजातीयविजातीयस्वगतभेदशून्यः साक्षीत्युच्यते श्रुत्या। चेतनान्तराभावात् सजातीयभेदाभावः। अचेतनाभावाद् विजातीयभेदाभावः। वृद्ध्यादिविकाराभावात् स्वगतभेदाभाव इत्यद्वैतं ब्रह्म। तस्मिन् न कोऽपि जीवेश्वरादिभेदः प्रसञ्जयितुं शक्यते, श्रुत्यादिविरोधादिति। 'प्रकृतिं विद्धी'त्यादिस्मृतयस्तु **शङ्कराचार्यै**-रेवाद्वैतपरतया व्याख्याता इति नेह तासां पुनर्व्याख्यानं क्रियते। तस्माच्छ्रुतयः स्मृतयो वा जीवेश्वरभेदादौ न प्रमाणम् , किन्त्वज्ञानमेकमेव।

१. कुण्डलितः एवायं पाठः मुद्रितपुस्तके वर्तते। उदाहृतश्रुतिगत-सत्-त्यच्छब्दार्थस्फुटीकरणाय केनचिल्लिखिता टिप्पणी स्यादिति भाति।

भाष्यार्कप्रकाशः

वस्तुतस्तु **द्वैतिनां** जीवेश्वरभेदवादिन्यः श्रुतयः प्रमाणम् ,[१]अभेदवादिश्रुतयस्तु कण्ठपाशाः। **अद्वैतिनां** तु व्यवहारदशायां भेदश्रुतयः, परमार्थतस्त्वभेदश्रुतयश्च प्रमाणमिति न श्रुतिविरोधलेशोऽपि। **विशिष्टाद्वैतिनां** तु श्रुतिसामञ्जस्यं मनागपि नास्ति। विशिष्टाद्वैतस्य क्वापि श्रुतावदर्शनात्। एवं स्थिते भेदाभेदश्रुतीनां परस्परविरोधपरिहाराय प्रवृत्तमस्मदीयं मतमिति ब्रुवाणा वैष्णवा अवैदिकैरेव सम्मान्याः। न च श्रुतिविरुद्धमपि न्यायाविरुद्धमस्मद्दर्शनमिति वाच्यम् ; विशिष्टत्वाद्वैतत्वयोः एकत्वासंभवेन विशिष्टाद्वैतशब्दप्रयोगस्यैवान्याय्यत्वात्। न च विशिष्टं च तदद्वैतं च विशिष्टाद्वैतमिति नास्माभिरुच्यते, किं तर्हि? विशिष्टयोरद्वैतमित्युच्यत इति वाच्यम् ; विशिष्टयोरभेदासम्भवात्। न हि दण्डविशिष्टपुरुषः पटविशिष्टपुरुषादनन्यो भवेत्। न च सूक्ष्मचिदचिद्विशिष्टस्येश्वरस्य स्थूलचिदचिद्विशिष्टेश्वरस्य चाद्वैतमुच्यतेऽस्माभिरिति वाच्यम् ; स्थूलसूक्ष्मयोः परस्परविरुद्धयोरद्वैतायोगात्। न च विशेषणांशपरित्यागेन विशेष्यस्यैक्यमुच्यत इति वाच्यम् ; अस्मन्मतप्रवेशप्रसङ्गात्। 'तत्त्वमसी'त्यत्रैवमेव ह्यस्माभिरुच्यते। न च न वयं जीवेश्वराभेदं ब्रूमः, येन युष्मन्मतप्रवेशः स्यात् , किन्तु ईश्वरस्यैवेति वाच्यम् ; ईश्वरस्यैकस्य भेदप्रसक्तेरेवाभावेन तन्निषेधायोगात्। किञ्च श्रीरामपरशुरामयोरिव सूक्ष्मचिदचिद्विशिष्टस्थूलचिदचिद्विशिष्टयोर्द्वयोरुपलम्भे सति ईश्वरत्वेनाभेदः शक्यते वक्तुं तयोः, न तथाऽस्ति।प्रलयकाले सूक्ष्मोपाधेः, प्रपञ्चे स्थूलोपाधेश्चोपलम्भात्। न च य एव प्रलये सूक्ष्मोपाधिविशिष्टः, स एवाधुना स्थूलोपाधिविशिष्ट इत्युच्यते। यथा य एव पूर्वं दशरथादवतीर्णः, स एवेदानीं वसुदेवादितिवदिति वाच्यम् ; स्थूलसूक्ष्मरूपेणोपाधौ विक्रियमाणायामप्युपहितो नैव विक्रियत इत्यविकारीश्वरप्रतिपादनेनैवाभीष्टे सिद्धे विशिष्टाद्वैताख्याश्रौतमतान्तरकल्पनस्यायुक्तत्वात्। एवं य एव कीटशरीरगः, स एवेदानीं मनुष्यशरीरगः इत्येवं जीवानामपि विशिष्टाद्वैतकल्पनप्रसङ्गादिति।

यच्च **रामानुजेनोक्तम्**— नास्मन्मते यः कश्चिदपि विरोधः, तथाहि– 'अनेन जीवेनात्मनाऽनुप्रविश्ये'ति जीवस्य यच्छ्रुतं ब्रह्मात्मकत्वं तदात्मशरीरभावनिबन्धनमेव। 'तदनुप्रविश्य, सच्च त्यच्चाभवदि'त्यनेनैकार्थ्यात्। कार्यावस्थः कारणावस्थश्च स्थूलसूक्ष्मचिदचिद्वस्तुशरीरः परमात्मैवेति कारणात् कार्यस्यानन्यतया एकविज्ञानेन सर्वविज्ञानं चोपपद्यते, सर्वे वाचकशब्दाः चिदचिद्विशिष्टपरमात्मवाचका इति सर्ववेदवेद्यत्वं मुख्यं ब्रह्मणः सिध्यति। स्थूलसूक्ष्मभेदाद् ब्रह्मैव चिदचिद्विशिष्टं कार्यं, कारणं चेति सङ्घातस्योपादानत्वेऽपि चिदचिद्ब्रह्मणां न स्वभावसङ्करः। परस्य ब्रह्मणः कार्यानुप्रवेशेऽपि स्वरूपान्यथाभावाभावादविकृतत्वमुपपन्नतरम्। स्थूलावस्थस्य नामरूपविभागविभक्तस्य चिदचिद्वस्तुनः आत्मतयाऽवस्थानात् कार्यत्वमप्युपपन्नं ब्रह्मणः। अवस्थान्तरापत्तिरेव हि कार्यता। निर्गुणवादश्च परस्य ब्रह्मणो हेयगुणसम्बन्धाभावादुपपद्यते। ज्ञानस्वरूपं ब्रह्मेति वादश्च सर्वज्ञेश्वरस्य स्वरूपं ज्ञानैकनिरूपणीयं स्वप्रकाशतया ज्ञानस्वरूपं चेत्यभ्युपगमादुपपन्नतरः। 'नेह नानास्ती'त्यादिना तु अब्रह्मात्मकवस्तुनानात्वं प्रतिषिध्यते, ब्रह्मण एव नानाप्रकारेणावस्थितत्वात्। एवं चिदचिदीश्वराणां स्वरूपतः स्वभावतश्च भेदान्नाभेदवादोपपत्तिरिति।

**तत् सर्वं तुच्छम्।** तथाहि—'अनेन जीवेनात्मनाऽनुप्रविश्ये'ति श्रुतेर्जीवशरीरेणानुप्रविश्येति हि तवाभिमतोऽर्थः, आत्मशब्दस्य शरीरवाचित्वदर्शनादिति। तन्न सङ्गच्छते, चिदचिद्विशिष्टेश्वरस्य चिच्छरीरेण प्रवेशायोगात्।

**ननु** ईश्वरस्य शरीरं चिदचिन्मिश्रमिति नास्माभिरुच्यते। किं तर्हि? चिदेकं शरीरम् , अचिदन्यच्छरीरमीश्वरस्येत्युच्यते इति चेत् , **नैतदपि युक्तम्** , अचिदमिश्रितस्य चिन्मात्रस्येश्वरशरीरस्यादर्शनात्। जीवो ह्यन्तःकरणाद्यचिन्मिश्रितः। चिन्मिश्रितस्याचितो देहस्येश्वरशरीरत्वानुपपत्तेश्च।

**ननु** ईश्वरस्य पाषाणादिकमचेतनं शरीरं, चेतनो जीवश्च शरीरं, जीवशरीरत्वाद् देहश्च जीवद्वारा शरीरमिति चेत् , **नैतदपि युक्तम्** , देहे स्वत ईश्वराभावप्रसङ्गात्। 'समाने वृक्षे' इति श्रुत्या जीववदीश्वरस्यापि देहे सत्त्वश्रवणाच्च। जीवे देहादुत्क्रान्ते सति ईश्वरस्यापि जीवद्वारा उत्क्रान्तत्वेन मृते तस्मिन्नचेतने शरीरे ईश्वरासत्त्वेन सर्वमचिद्वस्त्वीश्वरशरीरमित्यभ्युपगमभङ्गप्रसङ्गाच्च। अथ जीवे देहे मृदादौ चास्तीश्वर इति वर्णने देहे ईश्वरद्वयसत्त्वप्रसङ्गात्। देहे कश्चिदीश्वरः, देहान्तस्थजीवे कश्चनेश्वर इति।

**ननु** देहे पररूपेण, जीवेऽन्तर्यामिरूपेण चास्तीश्वर इति चेत् , **नैतदपि युक्तम्** , जीववदीश्वरस्यापि देहित्वप्रसङ्गात्। देहे

१. 'अभेदश्रुतयः' इति तैः व्यवह्रियमाणा अपि ताः अभेदं हित्वैव शरीरशरीरिभावेन सामानाधिकरण्यस्य योजनात् तन्मतेऽनुपपन्नाः।

भाष्यार्कप्रकाशः

वर्तमाने परे जीवो वर्तत इति जीवस्य परान्तर्यामित्वप्रसङ्गाच्च। किञ्च यदि चिदचिच्छरीरो भवेदीश्वरस्तर्हि चिदचित्पदार्था ईश्वरो न भवन्ति। तथा च दृश्यमानं चिदचिदात्मकं सर्वमपि जगदीश्वरो न भवति। न चेष्टापत्तिः, 'सर्वं ब्रह्मे'ति श्रुतिविरोधात्। 'वासुदेवः सर्वम्' इति गीताविरोधात्। सर्वशरीरकं ब्रह्मेत्यर्थवर्णने तु सर्वशब्दे लक्षणास्वीकारदोषात्। 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित' इति श्रुत्या जगतो बहिर्वर्तमानस्य ब्रह्मणः जगच्छरीरत्वाद् ब्रह्मशरीरकं जगदिति वक्तुं शक्यत्वात्। 'पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत' इति परमात्मानः श्रुत्युक्तपरिपूर्णत्वभङ्गप्रसङ्गाच्च। न हि ब्रह्मातिरिक्तस्य कृत्स्नस्य जगतः सत्त्वे ब्रह्मणः स्यात् पूर्णत्वम्। एवं चिदचिदात्मकस्य सर्वस्य जगतोऽब्रह्मत्वे कथं ब्रह्मणः सर्वशब्दवाच्यत्वमपि भवेत्? सर्वशरीरत्वात् सर्वशब्दवाच्यत्वमिति तु न युक्तम् , जीवे मनुष्यादिशब्दवाच्यत्वव्यवहारवदीश्वरे सर्वशब्दवाच्यत्वव्यवहारस्याप्यविवेकमूलत्वापत्तेः। न हि शरीराज्जीवं विविच्य जानन् कोऽपि विद्वान् जीवं मनुष्यं पशुं वा ब्रूयात्। न चैवमविवेकादेव सर्वशब्दवाच्यत्वमस्तीश्वरस्येति वाच्यम् ; 'वेदैश्च सर्वैरहमेव वेद्यः' इति कथं सर्वज्ञेश्वरस्य स्वस्मिन् सर्वशब्दवेद्यत्वभ्रमः? (वेदाः खलु शब्दात्मकाः।)[1]

**किञ्च** यदि घटपटादयः सर्वे शब्दाः ईश्वरमेव ब्रूयुस्तर्हि घटपटादिपदार्थवाचकशब्दानामेवाभावात् सर्वव्यवहारलोपप्रसङ्गः। घटशब्दस्य घटान्तर्यामिशब्दस्य चैकेश्वरवाचकत्वं विरुद्धम्। सर्वे वाचकाः शब्दाश्चिदचिद्विशिष्टपरमात्मवाचका इति स्ववचोविरोधश्च। चिदचिद्विशिष्टसमासगतचिदचिच्छब्दयोः परमात्मवाचित्वे परमात्मविशिष्टपरमात्मेत्यपार्थप्रसङ्गात्। परमात्मावाचित्वे सर्वे शब्दाः परमात्मवाचका इत्यस्यासिद्धेः।

**किञ्च** परमात्मवाचक इत्ययं शब्दः परमात्मानं वक्ति वा, न वा? आद्ये - तस्य शब्दविशेषणत्वासिद्धिः। द्वितीये - सर्वशब्दवाच्यत्वभङ्गप्रसङ्गः। अपि च अपरमात्मेति शब्दः परमात्मानं वक्ति वा, न वा? आद्ये - नञ्समासविरोधः। द्वितीये - सर्वशब्दवाच्यत्वभङ्गप्रसङ्गः। किञ्च नास्तीत्ययं शब्द ईश्वरं ब्रूते वा, न वा? आद्ये - ईश्वरस्य सद्रूपत्वासिद्धिः। द्वितीये - सर्वशब्दवाच्यत्वभङ्गप्रसङ्गः। तथा शब्दावाच्य इति शब्द ईश्वरं ब्रूते वा, न वा? आद्ये - शब्दवाच्यत्वविरोधः। द्वितीयेऽपि - स एव। तथा चिच्छब्देनेश्वर उच्यते वा, लक्ष्यते वा? नाद्यः - चितो जीवस्यानीश्वरत्वात्। अन्त्ये तु सर्वे शब्दाः परमात्मवाचका इत्यभ्युपगमविरोधः। तस्माच्चिदचिदादिशब्दानां तद्विशिष्टेश्वरे त्वया लक्षणैवावश्यं स्वीकर्तव्या। तस्मान्न मुख्यं सर्वशब्दवाच्यत्वमस्ति ब्रह्मणः। नापि शरीरशरीरिभावनिबन्धनं जीवस्य ब्रह्मात्मकत्वम्। न च 'सच्च त्यच्चाभवदि'त्यनेनैकार्थ्यभङ्गप्रसङ्गः, मायया ईश्वरस्य जगद्रूपत्वसिद्धेः।

**ननु** जीवब्रह्मणोः शरीरशरीरिभावनिबन्धनभेदासत्त्वे कथं मुख्याभेदः? कथं वा 'आत्मने'ति श्रुत्युपपत्तिरिति चेद्? **उच्यते**— जीवब्रह्मणोः सच्चिदानन्दरूपत्वान्मुख्य एवाभेदः। सति मुख्यस्याभेदस्य सम्भवे लाक्षणिकशरीरशरीरिभावादिप्रयुक्ताभेदकल्पनं चान्याय्यम्। 'आत्मने'त्यस्य तु शरीरेणेति नार्थः, किन्तु स्वरूपेणेति। जीवेन स्वरूपेण प्रविश्येत्यर्थः। अन्तःकरणोपहितत्वेन रूपेण प्रविश्येति यावत्। अन्तःकरणोपहितचैतन्यस्यैव जीवत्वात्। परिपूर्णस्येश्वरस्य यदन्तःकरणोपहितत्वं तदेव जीवरूपानुप्रवेश इतीहोच्यते। न हि मुख्यः प्रवेशः सम्भवति, प्रवेशात् प्रागेव तत्र सत्त्वात् पूर्णस्य चैतन्यस्य ब्रह्मण इति।

**अथ** यदुक्तं कार्यावस्थः कारणावस्थश्च परमात्मैवेति, **तदयुक्तम्** , परमात्मनोऽविक्रियस्यावस्थायोगात्। सविक्रियस्य हि देहस्य बाल्याद्यवस्था दृष्टा, नाविक्रियस्यात्मनः। न च स्वशरीरयोश्चिदचितोर्ये कार्यकारणावस्थे ते परमात्मन उच्येते इति वाच्यम् ; किं विवेकेनोच्येते, यद्वा अविवेकेन? नाद्यः - शरीरशरीरिविवेके सति शरीरावस्थानां शरीरिण्ययोगात्। द्वितीये तु - अविवेकमूलकं त्वद्वचनमप्रमाणमेव। न हि देहदेह्यविवेकप्रयुक्तः देही जीर्णो जातो मृत इति व्यवहारः प्रमाणं स्यात्। न चैवमेकविज्ञानेन सर्वविज्ञानोपपत्तिः, सूक्ष्मचिदचिद्विशिष्टेश्वरज्ञानस्य स्थूलचिदचिद्विशिष्टेश्वरज्ञानवत् सर्वविज्ञानरूपत्वेनैकविज्ञानरूपत्वाभावात्। यद्वा स्थूलचिदचिद्विशिष्टेश्वरज्ञानस्य सूक्ष्मचिदचिद्विशिष्टेश्वरज्ञानवत् सर्वविज्ञानरूपत्वाभावादिति। कारणज्ञानेन हि कार्यज्ञानं प्रतिज्ञायते। ईश्वरस्तु कारणमेवेति कथं तस्य कार्यत्वम्?

१. कुण्डलितः एवायं पाठः मुद्रितपुस्तके वर्तते।

भाष्यार्कप्रकाशः

**ननु** सूक्ष्मयोश्चिदचितोः कारणत्वं, स्थूलयोस्तु कार्यत्वमिति चेत् , **मैवमपि,** ईश्वरस्येश्वरं प्रतीव चिदचितोः चिदचितौ प्रति कारणत्वाद्ययोगात्। न हि पटः पटं प्रति, तन्तुस्तन्तुं प्रति वा कारणं कार्यं वा स्यात्। न च स्थूलं वृक्षं प्रति सूक्ष्मस्य बीजस्य कारणत्ववत् स्थूलौ चिदचितौ प्रति सूक्ष्मचिदचितोः कारणत्वमिति वाच्यम् ; बीजाङ्कुरयोरिव कार्यकारणयोर्नामभेदेन भवितव्यत्वात् प्रकृते चिदचितोरेव कार्यत्वेन कारणत्वेन च नामभेदादर्शनात्। न हि सूक्ष्मावस्था मृत् स्थूलावस्थां मृदं प्रति कारणमिति कोऽपि वदेत्। किन्तु घटं प्रति मृत् कारणमिति। रूपभेदनामभेदौ हि कार्यकारणयोरावश्यकौ। नीरूपत्वाच्चिति रूपभेदः सुतरां नास्त्येव। तस्मात् कारणस्य परमात्मनो ज्ञानेन कार्यस्य जगतो ज्ञानमित्येवावश्यं वाच्यम् ; एवं परमात्मनः कारणत्वे सति अजस्य जीवस्य कार्यत्वायोगाज्जीवपरमात्मनोरभेदसिद्धिः। कारणात् कार्यस्यानन्यत्वेन कारणपरमात्मज्ञानात् कार्यजगज्ज्ञानसिद्धिरिति। न च कार्यस्य मुख्यमेव ब्रह्मत्वमस्तीति वाच्यम् ; सर्वकारणस्य निष्कारणस्य ब्रह्मणः कार्यत्वायोगात्। कार्यत्वे सत्यनित्यत्वप्रसङ्गात्। तस्मात् कारणमेव ब्रह्म, न कार्यम्। जगत् कार्यमेव, न कारणम्।

**ननु** कारणभूतमृद एव घटरूपेण कार्यत्वदर्शनाद् ब्रह्मैव कार्यमिति चेत् , **मैवम्** ; मृदो घटात्मनेव ब्रह्मणो जगद्रूपेण परिणामाभावात्। न हि मृद्घटयोरिव जगद्ब्रह्मणोरेकद्रव्यत्वम् , येन कार्यकारणयोरैक्यं मुख्यं स्याज्जगद्ब्रह्मणोः। ब्रूषे हि त्वमपि चेतनाचेतनात्मकाज्जगतो विलक्षणं ब्रह्मेति। न ह्येकद्रव्यत्वे सति वैलक्षण्यं वक्तुमुचितम्। वयमपि ब्रूमोऽचितो जगतः सकाशादत्यन्तविलक्षणं चिद्रूपं ब्रह्मेति। न चाज्ञानविशिष्टं ब्रह्म जगद्रूपेण परिणतमिति, भवति ब्रह्मणः कारणत्वं कार्यत्वं चेति वाच्यम् ; अज्ञानस्यैव तत्रापि जगद्रूपेण परिणामो न तु ब्रह्मण इति जगदज्ञानयोरेव कार्यकारणभावात्। न ह्यविक्रियस्य ब्रह्मणः कार्यरूपेण परिणाम उपपद्यते। न च सूक्ष्मे अज्ञाने स्थूलजगदाकारेण परिणते सति तदान्तरं ब्रह्मापि सौक्ष्म्यं विहाय स्थौल्यं भजत इति वाच्यम् ; ब्रह्मण्यविक्रिये नित्ये स्थूलत्वसूक्ष्मत्वयोरयोगात्। एकामवस्थां विहायान्यामवस्थां गच्छद्धि वस्तु लोकेऽनित्यं दृश्यते। यथा बाल्यावस्थां विहाय यौवनावस्थां गच्छतो देहस्यानित्यत्वम्। तस्मान्नास्ति ब्रह्मणोऽवस्थान्तरप्राप्तिः। तस्मादज्ञानगते एव सौक्ष्मस्थौल्ये अविवेकाद् ब्रह्मण्यध्यस्येते। न तु वस्तुतः सूक्ष्मं स्थूलं वा ब्रह्म, परिपूर्णत्वादविक्रियत्वात् सदैकरूपत्वान्नित्यत्वाच्च ब्रह्मणः। न च चितोऽपि सौक्ष्म्यस्थौल्यावस्थे स्त इति वाच्यम् ; तत्सत्त्वे जीवस्याप्यनित्यत्वप्रसङ्गात्। नित्यो जीवोऽविक्रियश्चेति हीहापि प्रतिपादितं गीतायाम्।

न च स्थूलावस्थस्याचिद्वस्तुन आत्मतयाऽवस्थानात् कार्यत्वं ब्रह्मण इति वाच्यम् ; मनुष्यादिशरीरेष्वात्मतया अवस्थानाज्जीवस्यापि कार्यत्वप्रसङ्गात्। एवंविधकार्यत्वस्य च आत्मानात्मविवेकप्रयुक्तत्वेनाग्राह्यत्वात्। न हि देहस्य जन्मवत्त्वेन कार्यत्वे, जीवस्यापि कार्यत्वं मुख्यं भवितुमर्हति। आदिमतो हि वस्तुनः कार्यत्वं मुख्यम्। अनादित्वान्निर्गुणत्वाच्च न ब्रह्म जीवो वा कार्यं भवितुमर्हति। न च न निर्गुणं ब्रह्म, किन्तु सगुणं निर्दोषमेवेति वाच्यम् ; ब्रह्मणि वर्तमानानां गुणानां ब्रह्मभास्यत्वायोगात् साक्ष्यन्तराभ्युपगमेऽनवस्थादोषात्। गुणस्य गुण्यन्तरत्वेन ब्रह्मणोऽपि सगुणत्वे ब्रह्मान्तरत्वाद् गुणस्य सर्वान्तरत्वं ब्रह्मणो न स्यात्। ज्ञानस्वरूपत्वाच्च ब्रह्मणो न सगुणत्वोपपत्तिः।

न च ज्ञानस्वरूपं ब्रह्मेति वादः ब्रह्मणो ज्ञानैकनिरूपणीयत्वाभिप्रायक इति वाच्यम् ; सर्वस्यापि वस्तुनो ज्ञानैकनिरूपणीयत्वेन ज्ञानस्वरूपत्वप्रसङ्गात्। अयं घट इति ज्ञानेन हि घटोऽपि निरूप्यते। न च ज्ञानगुणकत्वाज्ज्ञानैकनिरूपणीयत्वमिति वाच्यम् ; मनसोऽपि ज्ञानगुणकत्वात् कामसङ्कल्पादिज्ञानानि हि मनसो गुणाः। ततश्च मनोऽपि ज्ञानस्वरूपं स्यात्। स्वप्रकाशतया ज्ञानस्वरूपत्वमिति तु युक्तमेव, ज्ञानस्यैव स्वप्रकाशत्वात्। [1]ज्ञानं हि न परप्रकाश्यं, प्रकाशवत्। सर्वस्यापि ज्ञानप्रकाश्यत्वात् सर्वावभासकं च ज्ञानं, प्रकाशवत्। यदि ज्ञानप्रकाशकमन्यत् स्यात् , तर्हि किं तज्ज्ञानमुताज्ञानम्? न हि ज्ञानाज्ञानातिरिक्तं किञ्चिद् वस्त्वस्ति। आद्ये - तस्याप्यन्यदित्यनवस्था। द्वितीये - अज्ञानस्य ज्ञानावभास्यस्य ज्ञानावभासकत्वविरोधः। तस्मिंश्च सदैकरूपे ज्ञाने ब्रह्मणि कालत्रयेऽपि जगदभावादद्वितीयं ब्रह्म। न च 'नेह नानास्ती'ति श्रुत्या अब्रह्मात्मकवस्तुनानात्वं प्रतिषिध्यत इति नाद्वैतत्वं

१. ज्ञानस्य स्वप्रकाशत्वेऽनुमानं प्रमाणयति— ज्ञानमिति। परप्रकाश्यत्वाभाववत्स्वरूपत्वं स्वप्रकाशत्वम्। अवभासकत्वं हेतुरिति बोध्यम्।

**तत् क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत्।**
**स च यो यत्प्रभावश्च तत् समासेन मे शृणु॥ ३॥**

**'इदं शरीरम्' इत्यादिश्लोकोपदिष्टस्य क्षेत्राध्यायार्थस्य संग्रहश्लोकोऽयमुपन्यस्यते—** तत् क्षेत्रं यच्चेत्यादि। **व्याचिख्यासितस्य ह्यर्थस्य संग्रहोपन्यासो न्याय्य इति। यन्निर्दिष्टम् 'इदं शरीर'मिति, तत् तच्छब्देन परामृशति।**

आनन्दगिरिकृतव्याख्या

**एवं श्लोकद्वयं व्याख्याय श्लोकान्तरमवतारयति—** इदमिति। [1]**कुत्र संग्रहोक्तिरुपयुज्यते? तत्राह—** व्याचिख्यासितस्येति। **प्रति-**

भाष्यार्कप्रकाशः

ब्रह्मण इति वाच्यम् ; ब्रह्मणश्चिदचिद्विलक्षणत्वेन चिदचितोर्ब्रह्मरूपत्वाभावात् कथं तयोर्ब्रह्मात्मकत्वम्? न च ब्रह्म आत्मा यस्य तद् ब्रह्मात्मकमिति व्युत्पत्त्या सर्वं जगद् ब्रह्मात्मकमेव, ब्रह्मणः सर्वान्तरात्मत्वादिति वाच्यम् ; एवंविधवस्तुनानात्वप्रतिषेधे कतिपय-वस्तुसत्त्वस्य सिद्धत्वात्। श्रुतौ नानेति, किञ्चनेति च पदयोरेव दर्शनेन अब्रह्मात्मकेति स्वकपोलकल्पितपदस्याप्रमाणत्वात्। अथवा तवेदं युक्तमेव, अद्वितीयमित्यस्य स्वसमानद्वितीयरहितमिति, ज्ञानमानन्दमित्यस्य ज्ञानगुणकमानन्दगुणकमिति, तत्त्वमित्यस्य त्वच्छरीरकं तदिति च कल्पयितुः। न हि यथाश्रुतार्थस्वीकारस्तवोचितो विशिष्टाद्वैताख्यमश्रौतं मतं कल्पयितुः।

**यच्चोक्तं** - ब्रह्मैव नानाप्रकारमवस्थितमिति, तदप्ययुक्तम् , निष्प्रकारे ब्रह्मणि नानाप्रकारायोगात्। न च प्रकृतेर्नानाप्रकारत्वाद् ब्रह्मापि नानाप्रकारमिति वाच्यम् ; घटकरकादिनानाप्रकारावस्थितायां मृदि वर्तमाने आकाशे नानाप्रकारादर्शनात्। सर्वत्राप्येकरूपमेव हि ब्रह्म, गगनवत्। अनेकरूपत्वे तु सविक्रियत्वेनानित्यमेव स्यात्। न हि त्वदभिमतजीवोऽपि पक्षिपशुकीटमनुष्यादिनानाविधशरीरा-नुगतोऽपि भजते नानाप्रकारताम् , किं पुनर्ब्रह्म? न चाविवेकाज्जीवो नानाप्रकारतां भजत इति वाच्यम् ; अविवेकादप्यन्यस्य वस्तुनोऽन्यवस्तुत्वासम्भवात्। न ह्यविवेकादप्यग्निर्जलं भवति। यद्वा शीतो भवति। न च मनुष्योऽहमित्यभिमानाद् भवति जीवो मनुष्य इति वाच्यम् ; तथा सति मनुष्यदेहस्येहैव नाशाज्जीवस्यापि नाशः स्यात्। न हि रज्जौ सर्पोऽयमिति भ्रमाद् रज्जुः सर्पो भवति। तस्मादन्यत्रान्यबुद्धिर्भ्रम एव। तादृशभ्रममात्रेणान्यस्यान्यत्वं न भवतीति [न] जीवे मनुष्यत्वादिदेहप्रकाराः।

एवं मनुष्यत्वादिप्रकारशून्यं जीवं दर्शयितुं हीदं गीताशास्त्रं प्रवृत्तं, 'न हन्यते हन्यमाने शरीरे' इत्यादिदर्शनात्। देहात्मभ्रमेण शोचतोऽर्जुनस्य शोकापनोदो हि देहविलक्षणात्मस्वरूपकथनसाध्यः। न त्वविवेककृतमनुष्यत्वादिप्रकारवज्जीवकथनसाध्यः। तस्माद् देहादत्यन्तविलक्षणे जीवे देहप्रकारः कोऽपि न सम्भवति यथा तथा जगतोऽत्यन्तविलक्षणे ब्रह्मणि जगत्प्रकारः कोऽपि न सम्भवत्येव। जीवस्य देह इव, ब्रह्मणः सर्वमपि शरीरमिति हि त्वयैवोच्यते। न ह्यविवेकं विना शरीरधर्माः शरीरिणि सम्भवन्ति। एवं जगद्धर्माणामनृतत्वनश्वरत्वजडत्वादीनां ब्रह्मण्यसम्भवे, देहधर्माणां जरामरणादीनां सूक्ष्मदेहधर्माणां सुखदुःखादीनां कारणदेहधर्माणां मोहादीनां च जीवेऽसम्भवे ब्रह्मणो जीवस्य च स्वरूपं चैतन्यमात्रमेवावशिष्टम्। तस्य च कालत्रयाबाध्यत्वात् सत्यत्वं, परमप्रियत्वादानन्दरूपत्वमिति सच्चिदानन्दं ब्रह्मैव जीवः। निष्प्रकारकत्वेन परिपूर्णत्वेन च चैतन्यस्य भेदकप्रकाराभावान्न भेदः कश्चिदपीति स्थितमद्वैतम्।

अत एवोक्तम् – 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत' इति। एतदद्वैतज्ञानस्यैव जीवे कल्पितसर्वसंसारतमोनिरसन-भास्करत्वात् सम्यग्ज्ञानत्वम्। यद्धि सर्वानर्थनिबर्हणक्षमं तद्धि सम्यग्ज्ञानम्। अस्य च सम्यग्ज्ञानत्वं न मन्दप्रज्ञपुरुषकल्पितं, किन्तु सर्वज्ञेश्वरोक्तमेवेति सत्यमेव। एतदभिप्रायेणैवोक्तम् – 'क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत् तज्ज्ञानं मतं मम' इति॥ २॥

तदिति श्लोकमवतारयति— **इदमिति**। व्याचिख्यासितस्य ह्यर्थस्य संग्रहोपन्यासो न्याय्यः इति हेतोः 'इदं शरीरं कौन्तेय क्षेत्र-मित्यभिधीयते' इत्यादिश्लोकोपदिष्टस्य क्षेत्राध्यायार्थस्य 'तत् क्षेत्रं यच्चे'त्यादिरयं संग्रहश्लोकः उपन्यस्यत इत्यन्वयः। व्याख्यातुमिष्टस्य

१. संग्रहोक्तेः प्रयोजनप्रश्नोऽयम्।

[1]**यच्चेदं निर्दिष्टं क्षेत्रम् ,** तद् यादृग् **यादृशं स्वकीयैर्धर्मैः। चशब्दः समुच्चयार्थः।** यद्विकारि **यो विकारोऽस्य तद् यद्विकारि ,** यतो **यस्माच्च** यत् **कार्यम् उत्पद्यत इति वाक्यशेषः।** स **च यः क्षेत्रज्ञो निर्दिष्टः सः** यत्प्रभावो **ये प्रभावा उपाधिकृताः शक्तयो यस्य स यत्प्रभावश्च,** तत् **क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं यथाविशेषितं** समासेन **संक्षेपेण** मे **मम वाक्यतः** शृणु **श्रुत्वाऽवधारयेत्यर्थः॥ ३॥**

आनन्दगिरिकृतव्याख्या

**पत्तिसौकर्यार्थं संग्रहोक्तिरर्थवतीत्यर्थः। वक्ष्यमाणेऽर्थे श्रोतुर्मनःसमाधानार्थं सूत्रितवाक्यार्थोपायविवरणप्रतिज्ञामभिप्रेत्याह—** यन्निर्दिष्टमिति। **इदं शरीरमिति यन्निर्दिष्टं तच्छरीरं तच्छब्देन परामृशति, प्रकृतार्थत्वात् तस्येति योजना। तत् क्षेत्रं ज्ञातव्यमित्यध्याहारः।** यच्चेति **येन रूपेण रूपवदिति तदेव क्षेत्रं विशेष्यते। तस्य क्षेत्रस्य स्वकीया धर्मा जन्मादयस्तैर्विशिष्टस्य ज्ञेयत्वे हेयत्वं फलति। चशब्दपञ्चकस्येतरेतरसमुच्चयार्थत्वमाह—** चशब्द इति। **विकारित्वेनापि हेयत्वं सूचयति—** यद्विकारीति। **यत् कार्यं तत् सर्वं यस्मादुत्पद्यते तत् कारणत्वाज्ज्ञातव्यमित्याह—** यत इति। **क्षेत्रमिव क्षेत्रज्ञं ज्ञातव्यं दर्शयति—** स चेति। **स ज्ञातव्य इति सम्बन्धः। चक्षुराद्युपाधिकृतदृष्ट्यादिशक्तिवशात् तस्य ज्ञातव्यत्वं सूचयति—** यत्प्रभाव इति। **तेनोक्तेन प्रभावेण तस्य ज्ञातव्यतेति शेषः। कथं यथाविशेषितं क्षेत्रं क्षेत्रज्ञो वा शक्यो ज्ञातुमित्याशङ्क्य , भगवद्वाक्यादित्याह—** तदिति॥ ३॥

भाष्यार्कप्रकाशः

व्याचिख्यासितस्य वक्ष्यमाणस्येत्यर्थः। संग्रहेण सङ्क्षेपेणोपन्यासः कथनं **संग्रहोपन्यासः**। न्यायादनपेतो **न्याय्यः**। इत्यादीत्यादिपदात् – 'एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः' इत्यस्य ग्रहणम्। **क्षेत्राध्यायार्थस्य** प्रकृतक्षेत्रक्षेत्रज्ञविभागयोगाख्यत्रयोदशाध्यायार्थस्येत्यर्थः। इत्यादीत्यादिपदात् 'यादृक् च यद्विकारि यतश्च यत् , स च यो यत्प्रभावश्च तत् समासेन मे शृणु' इत्यस्य ग्रहणम्। **संग्रहश्लोक इति**। सङ्गृह्यते सङ्क्षेपेणोच्यतेऽध्यायार्थोऽस्मिन्निति संग्रहः, स चासौ श्लोकः, संग्रहेणाध्यायार्थप्रतिपादकः श्लोक इत्यर्थः। **अयमिति**। प्रकृत इत्यर्थः। **उपन्यस्यते** उच्यते। पूर्वश्लोके इदं शरीरमिति यन्निर्दिष्टं तदिह तच्छब्देन परामृश्यत इत्याह— **यदिति**। यच्चेत्यस्यान्वयमाह— **इदंनिर्दिष्टमिति**। इदंशब्देन निर्दिष्टमित्यर्थः। इदमित्यनुकरणशब्दः। इदमा निर्दिष्टमिदन्निर्दिष्टमिति समासः। अध्याहारोऽयम्। यच्चेदंनिर्दिष्टं तत् क्षेत्रं यादृक् च यद्विकारि यतश्च यदुत्पद्यते। यः क्षेत्रज्ञ इति निर्दिष्टः स च यत्प्रभावश्च तत् समासेन मे, वाक्यत इति शेषः, शृणु।

**यादृशमिति**। यद्धर्मकमित्यर्थः। उक्तानुक्तसंग्राहकश्चकार इत्याह— **चशब्द इति**। यादृक्त्वस्य यद्विकारित्वादिना सह समुच्चयार्थ इति वा। [2]यश्चासौ विकारो यद्विकारः, सोऽस्यास्तीति यद्विकारि। मत्वर्थीय इनिः। यद्विकारकमित्यर्थः। **यस्माच्च** उपादानादित्यर्थः। यच्छब्दार्थमाह— **कार्यमिति। उत्पद्यत इति वाक्यशेष इति**। प्रकृतवाक्ये उत्पद्यत इति क्रियापदस्य शेष इत्यर्थः। यत् कार्यं यदुपादानकमिति वाक्यार्थः। **उपाधिकृताः शक्तयः** चक्षुराद्युपाधिकृता दर्शनादिशक्तयः। **यथाविशेषितमिति**। यथोक्तविशेषणमित्यर्थः। वाक्यतः शृण्वित्यस्यानन्वयादाह— **श्रुत्वेति**। **अवधारय** निश्चिनु। निश्चयेन विद्धीत्यर्थः।

क्षेत्रस्य के धर्माः? के विकाराः? क्षेत्रशब्दवाच्यानां पदार्थानां मध्ये कस्य कार्यस्य किमुपादानम्? क्षेत्रज्ञस्य के प्रभावाः? इति प्रश्नचतुष्टयस्येहोत्तरमुच्यते सङ्क्षेपेणेत्यर्थः। क्षेत्रस्य धर्मा विकारा उपादानं क्षेत्रज्ञप्रभावश्चेहोच्यन्ते सङ्क्षेपेणेति यावत्। न च ज्ञानज्ञेययोः प्रकृतिपुरुषयोश्च वक्ष्यमाणत्वात् कथमिह सङ्क्षेपश्लोके तदग्रहणमिति वाच्यम् ; ज्ञानप्रकृत्योः क्षेत्रत्वात् , ज्ञेयपुरुषयोः क्षेत्रज्ञत्वाच्च। न चात्रापि विवदितव्यम् , 'बुद्धिरव्यक्तमेव च' इत्यव्यक्तस्य प्रकृतेः साक्षादेव क्षेत्रत्वस्य वक्ष्यमाणत्वाज्ज्ञानस्य बुद्धिधर्मत्वाच्च। 'परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः' इति पुरुषस्य ज्ञेयपरमात्मत्वकथनात् क्षेत्रज्ञस्य पुरि सत्त्वेन पुरुषत्वस्य सम्मतत्वाच्च।

यत्तु **रामानुजः—** तत् क्षेत्रं यच्च यद् द्रव्यम् , यादृक् च येषामाश्रयभूतम् , यद्विकारि ये चास्य विकाराः, यतश्च यतो हेतोरिदमुत्पन्नं - यस्मै प्रयोजनायोत्पन्नमित्यर्थः; यत् यत्स्वरूपं चेदम् , स च यः स च क्षेत्रज्ञो यः यत्स्वरूपो, यत्प्रभावश्च ये चास्य

१. अत्र 'इदन्निर्दिष्टम्' इति समस्तं पदं रा.पाठे। २. अनेन कर्मधारयोत्तरमिनिप्रत्यय इति सूचितम्। तेन बहुव्रीहित्वभ्रान्त्येनिप्रत्ययवैयर्थ्यापादनं परेषामपास्तम्।

**ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्।**
**ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ ४ ॥**

**तत् क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं विवक्षितं स्तौति श्रोतृबुद्धिप्ररोचनार्थम्—** ऋषिभिरिति। ऋषिभिः **वसिष्ठादिभिः** बहुधा **बहुप्रकारं** गीतं **कथितम्।** छन्दोभिः **छन्दांसि ऋगादीनि, तैः छन्दोभिः** विविधैः **नानाप्रकारैः** पृथग् **विवेकतो गीतम्। किञ्च** ब्रह्मसूत्रपदैश्चैव **ब्रह्मणः सूचकानि वाक्यानि ब्रह्मसूत्राणि, तैः** पद्यते **गम्यते ज्ञायते ब्रह्मेति तानि**

आनन्दगिरिकृतव्याख्या

**श्लोकान्तरस्य तात्पर्यमाह—** तदित्यादिना। विवक्षितं **जिज्ञासितव्यमित्यर्थः। स्तुतिफलमाह—** श्रोत्रिति। **न केवलमाप्तोक्तेरेव क्षेत्रादियाथात्म्यं सम्भावितं, किन्तु वेदवाक्यादपीत्याह—** छन्दोभिश्चेति। **ऋगादीनां चतुर्णामपि वेदानां नानाप्रकारत्वं शाखाभेदादिष्टम्। न केवलं श्रुतिस्मृतिसिद्धमुक्तं याथात्म्यम् , किन्तु यौक्तिकं चेत्याह—** किञ्चेति। **कानि तानि सूत्राणीत्याशङ्क्याह—** आत्मेत्येवेति।

भाष्यार्कप्रकाशः

प्रभावाः, तत् सर्वं समासेन सङ्क्षेपेण मे मत्तः शृण्विति। **तन्मन्दम्** - शब्दादिगुणानामपि क्षेत्रत्वेन क्षेत्रं द्रव्यमेवेति नियमाभावात्। [१]न च जडाजडद्रव्यमध्ये किं द्रव्यमित्यर्थः इति वाच्यम् ; उभयविधद्रव्यस्यापि क्षेत्रत्वाक्रान्तत्वात्। चेतनानि मनुष्यादिभूतानि, अचेतनानि मृत्पाषाणादीन्यपि ज्ञेयत्वात् क्षेत्रशब्दवाच्यान्येव हि। न चात्मा अजडद्रव्यं, तदन्यत् सर्वं जडद्रव्यं परमात्मा तूभयविलक्षण इति वाच्यम् ; आत्मनो द्रव्यत्वे मानाभावात्। न च तर्कशास्त्रं मानमिति वाच्यम् ; तद्रीत्या परमात्मनोऽप्यजडद्रव्यत्वात्। न च वेदान्ताः प्रमाणमिति वाच्यम् ; तत्र चिद्रूपः परमात्मेति दर्शनात्। जीवस्यापि चिद्रूपत्वदर्शनाच्च। न च ज्ञानगुणकत्वाज्जीवो द्रव्यमिति वाच्यम् ; परमात्मनोऽपि तव मते ज्ञानगुणकत्वेन चिद्द्रव्यत्वापत्तेः। तस्मादचिद्वस्त्वेव द्रव्यं, गुणवत्त्वात् , न तु चिद्वस्तु द्रव्यं निर्गुणत्वादिति स्थिते, कथं क्षेत्रस्य द्रव्यविशेषनिर्धारणार्थः प्रथमयच्छब्द इति कल्पयितुं शक्येत? न च पृथिव्यप्तेजआदिषु किं द्रव्यं क्षेत्रमित्युच्यत इति वाच्यम् ; न्यायशास्त्रपठितात्मव्यतिरिक्ताष्टद्रव्याणामपि क्षेत्रत्वेन तद्विशेषनिर्धारणालाभात्।

**किञ्च** 'इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते' इति शरीरस्य क्षेत्रत्वस्योक्तत्वाच्छरीरस्य चाचित्त्वात् किं चिद्द्रव्यं क्षेत्रम् , उताचिद्द्रव्यमिति शङ्काया एवानुदयात् कथमत्र क्षेत्रस्य यद्द्रव्यत्ववादः? एवं यत्स्वरूपं चेदमित्यप्यनर्थकमेव। इदं शरीरमित्यनेन स्वरूपस्याप्युक्तत्वात्। तथा स च क्षेत्रज्ञो य इत्यप्यपार्थम्– 'एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः' इत्युक्तत्वाज्जीवः क्षेत्रज्ञ इति। न च क्षेत्रज्ञस्य स्वरूपमनुक्तमिति वाच्यम् ; एतद्यो वेत्तीत्यनेन ज्ञानस्वरूपत्वस्योक्तत्वात्। म इत्यस्य मत्त इत्यर्थवर्णनमप्ययुक्तं, पञ्चम्यां म इत्यादेशाभावादस्मच्छब्दस्येति॥३॥

**ऋषिभिरिति**। पूर्वश्लोकोक्तं तत्पदमिहानुवर्तते। तत् क्षेत्रक्षेत्रज्ञयाथात्म्यं बहुधा ऋषिभिर्गीतम्। विविधैश्छन्दोभिः पृथग्गीतम् , विनिश्चितैर्हेतुमद्भिर्ब्रह्मसूत्रपदैश्चैव गीतमित्यन्वयः। यद्वा तद् ऋषिभिः विविधैश्छन्दोभिः विनिश्चितैर्हेतुमद्भिर्ब्रह्मसूत्रपदैश्चैव बहुधा पृथग्गीतमित्यन्वयः। वसिष्ठादिभिरित्यादिपदाद् विश्वामित्रयाज्ञवल्क्यादिग्रहणम्। **बहुप्रकारमिति**। एक एवार्थो बहुभिः प्रकारैरुक्त इत्यर्थः। ऋगादीनीत्यादिपदाद् यजुरादिग्रहणम्। विवेकत इत्यात्मानात्मविवेकादित्यर्थः। ब्रह्मसूत्राणि शारीरकसूत्राणि, तानि च तानि पदानि च ब्रह्मसूत्रपदानि ब्रह्मप्रतिपादकानि सूत्रभूतानि वाक्यानीत्यर्थः। पद्यते ब्रह्म एभिरिति पदानि। ननु कानि तानि ऋगादीनि क्षेत्र-क्षेत्रज्ञयाथात्म्यप्रतिपादकानीत्यत आह— **'आत्मेत्येवोपासीत' इत्येवमादिभिरिति**। आदिपदात् 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादि-श्रुतिग्रहणम्। वसिष्ठसंहितादिषु तु वसिष्ठाद्युक्तश्लोका ज्ञेयाः। 'ज्ञोऽत एवे'त्यादिब्रह्मसूत्राणि तद्ग्रन्थे द्रष्टव्यानि। ननु पद्यते एभिर्ब्रह्मेति पदत्वमुक्तं ब्रह्मसूत्राणाम् , तत् कुतः? अत आह— **ब्रह्मसूत्रेति। आत्मा ज्ञायत इति**। अनात्मविवेकादिति भावः। हेतवो युक्तयः सन्त्यत्रेति हेतुमन्ति तैर्हेतुमद्भिः। **अत एव विनिश्चितैरिति**। युक्तियुक्तत्वेन निश्चयप्रत्ययोत्पादकत्वाद् ब्रह्मसूत्रैरात्मा ज्ञायत इति

१. प्रथमयच्छब्दो जडाजडद्रव्यविशेषनिर्धारणार्थः इति वेदान्तदेशिकोक्तं निरस्यति— न चेति।

**महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च।**
**इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः॥५॥**

**पदान्युच्यन्ते, तैरेव च क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं गीतमित्यनुवर्तते। 'आत्मेत्येवोपासीत'(बृ.उ.१.४.७) इत्यादिभिर्हि ब्रह्मसूत्रपदैरात्मा ज्ञायते।** हेतुमद्भिः **युक्तियुक्तैः** विनिश्चितैः **निःसंशयरूपैः, निश्चितप्रत्ययोत्पादकैरित्यर्थः॥४॥**

**स्तुत्याऽभिमुखीभूतायार्जुनायाह भगवान्—** महाभूतानीति। महाभूतानि [१]**महान्ति च तानि, सर्वविकार-व्यापकत्वाद् , भूतानि च सूक्ष्माणि। स्थूलानि तु इन्द्रियगोचरशब्देनाभिधायिष्यन्ते।** अहङ्कारो **महाभूतकारणम् अहम्प्रत्ययलक्षणः। अहङ्कारकारणं** बुद्धिः **अध्यवसायलक्षणा। तत्कारणम्** अव्यक्तमेव **च। न व्यक्तम् अव्यक्तम् अव्याकृतमीश्वरशक्तिः, 'मम माया दुरत्यया'(भ.गी.७.१४) इत्युक्तम्।** एव**शब्दः प्रकृत्यवधारणार्थः। एतावत्येवाष्टधा भिन्ना प्रकृतिः। चशब्दो भेदसमुच्चयार्थः।** इन्द्रियाणि दश **- श्रोत्रादीनि पञ्च बुद्ध्युत्पादकत्वाद् बुद्धीन्द्रियाणि, वाक्पाण्यादीनि पञ्च कर्मनिर्वर्तकत्वात् कर्मेन्द्रियाणि, तानि दश।** एकं च; **किं तत्? मनः एकादशं सङ्कल्पाद्यात्मकम्।**

आनन्दगिरिकृतव्याख्या

**आदिपदेन 'ब्रह्मविदाप्नोति परम्' 'अथ योऽन्यां देवताम्' इत्यादीनि विद्याऽविद्यासूत्राण्युक्तानि। आत्मेति क्षेत्रज्ञोपादानम्। तच्च क्षेत्रोपलक्षणम्। 'अथातो ब्रह्मजिज्ञासा' इत्यादीन्यपि सूत्राण्यत्र गृहीतानि, अन्यथा छन्दोभिरित्यादिना पौनरुक्त्यादिति मत्वा विशिनष्टि—** हेतुमद्भिरिति॥४॥

**क्षेत्रादियाथात्म्यस्तुत्या प्रलोभिताय, 'किं तद्?' इति जिज्ञासवे यथोद्देशं क्षेत्रं निर्दिशति—**स्तुत्येति। **महत्त्वे हेतुमाह—**सर्वेति। **भूतशब्देन स्थूलानामपि विशेषाभावाद् ग्रहे का हानिरित्याशङ्क्याह—** स्थूलानीति। **अहङ्कारोऽहम्प्रत्ययलक्षण इति सम्बन्धः। भूतानां प्रातीतिकत्वेनाभिमानमात्रात्मत्वं मत्वाऽहङ्कारं विशिनष्टि—** महाभूतेति। **'महतः पर'मित्यादौ प्रसिद्धं महच्छब्दार्थमहङ्कारहेतुमाह—** अहङ्कारेति। **ईश्वरशक्तिरित्युक्ते चैतन्यमपि शङ्क्येत, तदर्थमाह—**ममेति। **अवधारणरूपमर्थमेव स्फुटयति—**एतावत्येवेति। **पञ्च तन्मात्राणि, अहङ्कारः, महद् , अव्याकृतमित्यष्टधा भिन्नत्वम्। मूलप्रकृत्या सह तन्मात्रादिभेदानां समुच्चयश्चकारार्थः। दशेन्द्रियाण्येव विभज्य व्युत्पादयति—** श्रोत्रेत्यादिना। [२]**तदेव प्रश्नद्वारा स्फुटयति—** किं तदिति। **शब्दादिविषयशब्देन स्थूलानि भूतानि गृह्यन्ते।**[३] **उक्तेषु**

भाष्यार्कप्रकाशः

ब्रह्मसूत्राणां पदत्वं युक्तमिति भावः। **निश्चयप्रत्यय इति।** आत्मा देहादिभ्यो विलक्षणः सच्चिदानन्दब्रह्मरूप इति निश्चयज्ञानमित्यर्थः। तस्मान्मद्वक्ष्यमाणार्थस्य श्रुतिस्मृतिन्यायसिद्धत्वाच्च ग्राह्यत्वमिति भावः॥४॥

**महाभूतानीति।** सर्वविकाराः सर्वकार्याणि। **सूक्ष्माणीति।** अपञ्चीकृतानीत्यर्थः। प्रकृत्यवधारणार्थ इत्यस्यार्थं स्वयमेवाह— **एतावत्येवेति।** भेदसमुच्चयः प्रकृत्यवान्तरभेदसमुच्चय इत्यर्थः। बुद्ध्युत्पादकत्वात् ज्ञानजनकत्वात्। **शब्दादय इति।** शब्दादिगुणकपञ्च-स्थूलभूतानीत्यर्थः। स्थूलानि त्विन्द्रियगोचरशब्देनाभिधास्यन्त इत्युक्तत्वात्। स्थूलसूक्ष्मभेदाद् भूतानि दश, ज्ञानकर्मभेदादिन्द्रियाणि दश, मनोबुद्ध्यहङ्कारभेदाद् अन्तःकरणत्रयं, प्रकृतिरेका मिलित्वा चतुर्विंशतिः। **कपिलावतारोक्त**साङ्ख्याद् भिन्नमस्ति किञ्चित् साङ्ख्यं नाम मतम्। यत्रायं तत्त्वसंग्रहश्लोकः – 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः' इति। सप्त महदहङ्कारपञ्चतन्मात्राणि। षोडश इन्द्रियदशकं स्थूलभूतपञ्चकं मनश्च। अत्र महत्तत्वं बुद्धिरिति विवेकः। पुरुषस्तु पञ्चविंशः। **आचक्षत इति** कथयन्ति। साङ्ख्याः आचक्षते इत्यनेन न वेदान्तमते तत्त्वत्वमेतेषामिति सूचितम् , ब्रह्मभिन्नस्य

---

१.'महान्ति च तानि महाभूतानि, तेषां महत्त्वं सर्वविकारव्यापकत्वाद् द्रष्टव्यम् , तानि भूतानि च सूक्ष्माणि, न स्थूलानि। स्थूलानि तु' इति पा.। २. एकं चेति यदुक्तमिति शेषः। ३. एतदुत्तरमयं पाठः स्यात् 'शब्दादीनामेव ग्रहणे कर्मेन्द्रियाणां विषयानुक्तेर्वैरूप्यप्रसङ्गात् , क्षेत्रनिरूपणस्य च प्रकृतत्वात्' इति। द्र.पृ. ६५२।

**इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः।**
**एतत् क्षेत्रं समासेन सविकारमुदाहृतम्॥ ६ ॥**

**पञ्च** चेन्द्रियगोचराः **शब्दादयो विषयाः। तान्येतानि सांख्याश्चतुर्विंशतितत्त्वान्याचक्षते॥५॥**

**अथेदानीम् आत्मगुणा इति यानाचक्षते वैशेषिकाः, तेऽपि क्षेत्रधर्मा एव, न तु क्षेत्रज्ञस्येत्याह भगवान्—** इच्छा द्वेष इति। इच्छा **यज्जातीयं [1]सुखहेतुमर्थमुपलब्धवान् पूर्वम्, पुनस्तज्जातीयमुपलभमानः तमादातुमिच्छति सुखहेतुरिति। सेयमिच्छा [2]अन्तःकरणधर्मो ज्ञेयत्वात् क्षेत्रम्। तथा** द्वेषो **यज्जातीयमर्थं दुःखहेतुत्वेनानुभूतवान्**

आनन्दगिरिकृतव्याख्या

**तन्मात्रादिषु तन्त्रान्तरीयसम्मतिमाह—** तानीति। **'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकश्च विकारः' इति पठन्ति** ॥५॥

**अव्यक्ताहङ्कारादीनां त्रैगुण्याभिमानादिधर्मकत्वं प्रसिद्धमिति [3](शब्दादीनामेव ग्रहणे कर्मेन्द्रियाणां विषयानुक्तेर्वैरूप्यप्रसङ्गात्, क्षेत्रनिरूपणस्य च प्रकृतत्वात्) स्वरूपनिर्देशेनैव 'तत् क्षेत्रं यच्च यादृक् च' इति व्याख्यातम्। इदानीम् इच्छादीनामात्मविकारत्वनिवृत्तये क्षेत्रविकारत्वनिरूपणेन 'यद्विकारी'त्येतद् निरूपयन् मतान्तरनिवृत्तिपरत्वेन श्लोकमवतारयति—**अथेति। **सर्वज्ञोक्तिविरोधाद् हेयं** वैशेषिकं **मतमिति मत्वोक्तम्—** भगवानिति। **उपलब्धजातीयस्योपलभ्यमानस्यादानेच्छायां हेतुमाह—** सुखेति। इति**शब्दो हेत्वर्थः। सुखहेतुत्वात् तस्मिन्निच्छेत्यर्थः। इच्छां सुखतद्धेतुविषयत्वेन व्याख्यायात्मधर्मत्वं तस्याः व्युदस्यति—** सेयमिति। **तथापि कथं क्षेत्रान्तर्भूतत्वम्? तत्राह—** ज्ञेयत्वादिति। **इच्छावद् द्वेषोऽपि धर्मो बुद्धेरित्याह—** तथेति। **कोऽसौ द्वेषो यस्य बुद्धिधर्मत्वम्? तत्राह—**

भाष्यार्कप्रकाशः

सर्वस्याप्यतत्त्वत्वात्। 'तत्त्वं नारायणः परः' इति श्रुतेः।

**ननु** इदं शरीरं क्षेत्रमिति पूर्वमुक्तम्, इदानीं तु महाभूतानीत्याद्यन्यदुच्यत इति कथं स्ववचोव्याघाताभाव इति चेत्? **नैष दोषः**, दर्शितचतुर्विंशतितत्त्वात्मकत्वात् त्रिविधस्य शरीरस्य। तथाहि— अव्यक्तं मूलप्रकृतिरज्ञानं कारणशरीरम्। मनोबुद्ध्यहङ्काराः पञ्चतन्मात्राणि दशेन्द्रियाणि च लिङ्गशरीरम्। स्थूलभूतानि पञ्च तु स्थूलशरीरं स्थूलभूतकार्यत्वादस्येति। एतच्छरीरत्रयातिरिक्तपदार्थाभावादिदं शरीरं क्षेत्रमित्युक्तम्। चतुर्विंशतितत्त्वानि हि शरीरत्रयम्। चतुर्विंशतितत्त्वसमष्टिसङ्घातरूपमिदं शरीरं चतुर्विंशतितत्त्वानि च क्षेत्रमिति फलितार्थः।

**ननु** इन्द्रियगोचरशब्देन यदि शब्दादिविषयाः गृह्यन्ते, तर्हि स्थूलभूतपञ्चकस्याक्षेत्रत्वम्; यदि स्थूलभूतानि गृह्यन्ते, तर्हि शब्दादिविषयाणामक्षेत्रत्वमिति चेत्? **नैष दोषः**, शब्दादिविषयपञ्चकातिरिक्तस्थूलभूतपदवाच्यवस्तुन एवाभावात्। न हि गन्धरसाद्यतिरिक्तपृथिवीजलादिसद्भावः। बुद्ध्या पृथिवीजलादिभ्यः सकाशाद् गन्धरसादिषु विवेचितेषु सत्सु पृथ्व्यादीनां निस्तत्त्वत्वसिद्धेः। अत एव साङ्ख्यैरपि पृथिव्यादयः पञ्च शब्दादयः पञ्च च पृथङ् न गृहीताः। तस्माच्छब्दादय एव शब्दादिगुणकपञ्चभूतानीति स्थितम्। ततश्च शब्दादिगुणानां गगनादिद्रव्याणां च क्षेत्रत्वमिति सिद्धम्। न च प्राणस्य पृथगनुक्तिरिति वाच्यम्; तस्यान्तरवायुत्वेन वायावन्तर्भावादिति ॥५॥

**इच्छेति**। **यज्जातीयमिति**। यस्यां जातौ भवमित्यर्थः। सुखात्मकं सुखहेतुभूतमित्यर्थः। **अर्थं** पदार्थं चूतफलादिकमिति भावः। **उपलब्धवान्** अनुभूतवान्। **समुपलभमानः** पश्यन्। सुखहेतुरिति हेतोः पुनस्तमर्थं समादातुमिच्छतीत्यन्वयः। **सेयमिति**। पूर्वानुभूतसजातीयसुखहेतुपदार्थादानकामना इच्छेत्युच्यते। इच्छा अन्तःकरणस्य धर्मः, ज्ञेयत्वात् सुखादिवदिति, इच्छा क्षेत्रं, ज्ञेयत्वाद् देहादिवदिति च प्रयोगौ सूचयति— **अन्तःकरणस्येत्यादिना। तथेति** पूर्ववाक्यार्थसमाप्तिद्योतकमव्ययम्। **अनुकूलमिति**। यस्मिन्

१. 'सुखात्मकं' इति रा.पा.। २. 'अन्तःकरणस्य धर्मः' इति रा.पा.। ३. कुण्डलितो ग्रन्थः सर्वत्र इह मुद्रितोऽपि पूर्वपृष्ठे संगतः स्यात्। द्र. टि.पृ.६५१।

**पुनस्तज्जातीयमर्थमुपलभमानः तं द्वेष्टि [1]दुःखहेतुरिति। सोऽयं द्वेषो ज्ञेयत्वात् क्षेत्रमेव। तथा** सुखम् **अनुकूलं [2]प्रसन्नसत्त्वात्मकं ज्ञेयत्वात् क्षेत्रमेव।** दुःखं **प्रतिकूलात्मकं ज्ञेयत्वात् तदपि क्षेत्रम्।** संघातो **देहेन्द्रियाणां संहतिः। तस्यामभिव्यक्ताऽन्तःकरणवृत्तिः, तप्त इव लोहपिण्डेऽग्निः, आत्मचैतन्याभासरसविद्धा** चेतना, **सा च क्षेत्रं ज्ञेयत्वात्।** धृतिः **यया अवसादप्राप्तानि देहेन्द्रियाणि ध्रियन्ते, सा च ज्ञेयत्वात् क्षेत्रम्। सर्वान्तःकरणधर्मोपलक्षणार्थमिच्छादिग्रहणम्। यत उक्तं तदुपसंहरति—** एतदिति। **एतत् क्षेत्रं समासेन** सविकारं **सह विकारेण महदादिना** उदाहृतम् **उक्तम्॥ ६॥**

आनन्दगिरिकृतव्याख्या

यज्जातीयमिति। **तस्यापीच्छावत् क्षेत्रान्तर्भावमाह—** सोऽयमिति। **इच्छाद्वेषवद् बुद्धिधर्मः सुखमपीत्याह—** तथेति। **तस्यापि स्वरूपोक्त्या क्षेत्रान्तःपातित्वमाह—** अनुकूलमिति। **दुःखस्यापि स्वरूपोक्त्या क्षेत्रमध्यवर्तित्वमाह—** दुःखमिति। **देहेन्द्रियात्मवादौ व्युदसितुं क्षेत्रान्तर्भूतमेव संघातं विभजते—** देहेति। **विज्ञानवादं प्रत्याह—** तस्यामिति। **तप्ते लोहपिण्डे वह्नेरभिव्यक्तिवदुक्तसंहतौ बुद्धिवृत्तिरभिव्यज्यते। तत्र चाग्निरभिव्यक्तो लोहपिण्डमेवाग्निबुद्ध्या ग्राहयति। तथाऽऽत्मचैतन्यं बुद्धिवृत्तावभिव्यक्तं तामेवात्मतया बोधयति। अतस्तदाभासानुविद्धा सैव चेतनेत्युच्यते। सा च मुख्यं चेतनं प्रति ज्ञेयत्वादतद्रूपत्वात् क्षेत्रमेवेत्यर्थः। धृतिस्वरूपोक्त्या क्षेत्रत्वं तस्या दर्शयति—** धृतिरित्यादिना। **नन्वन्येऽपि सङ्कल्पादयो मनोधर्माः सन्ति, ते किमित्यत्र क्षेत्रत्वेन नोच्यन्ते? तत्राह—** सर्वेति। **तस्योपलक्षणार्थत्वे हेतुमाह—** यत इति। **इच्छादिवद् अस्मिन्नवसरे सङ्कल्पादीनामपि दर्शितत्वं सिद्धवत्कृत्य प्रकरणविभागार्थं यतो भगवानुक्तं क्षेत्रमुपसंहरति, अतो युक्तमिच्छादिग्रहस्य सर्वानुक्तबुद्धिधर्मोपलक्षणार्थत्वमित्यर्थः॥ ६॥**

भाष्यार्कप्रकाशः

ममेदमनुकूलमिति बुद्धिः पुंसां तत् सुखम्। किंस्वरूपं तदित्यत आह— **सत्त्वात्मकमिति**। अन्तःकरणसत्त्वगुणपरिणामविशेष एव सुखमित्यर्थः। एतद्विपरीतं दुःखमित्याह— **प्रतिकूलात्मकमिति**। [3]सङ्घाते या चेतना सा च क्षेत्रमेव। सङ्घातशब्दार्थमाह— **देहेति**। **संहतिः** संश्लेषः। तस्मिन् तप्ते लोहपिण्डेऽग्निरिव अभिव्यक्ता आत्मचैतन्याभासरसविद्धा अन्तःकरणवृत्तिः **चेतना**। **अभिव्यक्ता** प्रकटीभूता, तत्तादात्म्यं प्राप्तेति यावत्। आत्मनो यश्चैतन्याभासः चित्प्रतिफलनं स एव रसः तेन विद्धा व्याप्ता। अन्तःकरणस्य वृत्तिः परिणामविशेषः। स्थूलोऽहं, काणोऽहं, सुख्यहमित्याद्याकारिका सा चेतनेत्युच्यते। धृतिर्धैर्यम्। अवसादं शैथिल्यात्मकं नाशं। विष्टभ्य संस्तभ्य।

ननु इच्छाद्वेषादीनामेव क्षेत्रत्वे कामसङ्कल्पश्रद्धाह्रीभीत्यादीनां किं न क्षेत्रत्वम्? अत आह— **सर्वेति**। इच्छादयः केचिदन्तःकरणधर्मा इहोपात्ताः। अमी चोपलक्षणतया सर्वानप्यन्तःकरणधर्मान् क्षेत्रमिति ज्ञापयन्तीत्यर्थः।

**ननु** इच्छादयः क्षेत्रधर्मा एव, न तु क्षेत्रज्ञधर्मा इत्यवतारिकायामुक्तम् , इदानीं त्विच्छादयः क्षेत्रमित्येवोच्यते; अतो विरोध इति चेत्? **मैवम्** ; अन्तःकरणादिवदन्तःकरणादिधर्माणामपि क्षेत्रत्वेनाविरोधात्। न हि क्षेत्रक्षेत्रज्ञातिरिक्तं क्षेत्रधर्मात्मकं किञ्चिद् वस्त्वस्ति। दृग्दृश्ययोर्द्वयोरेवास्मिन् मते पदार्थत्वात्। दृगेव क्षेत्रज्ञः, दृश्यं तु क्षेत्रमिति विवेकः। **महदादिनेति**। आदिपदात् साङ्ख्योक्ताहङ्कारतन्मात्रादिग्रहणम्। तेषां सर्वेषामपि मूलप्रकृतिकार्यत्वेन विकारत्वात्। **क्षेत्रमिति**। प्रकृतिलक्षणमिति भावः। तस्या एव महदादिविकारसहितत्वात्। मूलप्रकृतिः महदादिविकाराः इच्छादितद्धर्माः एतत्सर्वमपि दृश्यं क्षेत्रमेवेति निर्गलितार्थः।

ननु इदं शरीरं क्षेत्रमिति पूर्वमुक्तम् , इदानीं तु महाभूतानीत्यादिना ततोऽन्यदेव क्षेत्रमित्युच्यते; अत आह— **[4]यस्येति। क्षेत्रभेदजातस्येति**। क्षेत्रशब्दवाच्यप्रकृतिमहदादिभेदसमूहस्य। इह व्यष्ट्या निर्दिष्टानां महाभूतादीनां क्षेत्रभेदानां समष्टिरेव शरीरं पूर्वं क्षेत्रमित्युक्तमिति न विरोध इति भावः। महाभूतादिभेदभिन्नं धृत्यन्तं तत् क्षेत्रं व्याख्यातमिति सम्बन्धः।

१. 'दुःखहेतुरिति' इति रापुस्तके पाठः, नान्यत्र। २. 'प्रसन्नं सत्त्वात्मकं' इति पा.। ३. मूले भाष्ये च 'संघाते चेतना धृतिः' इति रा.पा. भाति। द्र. पृ. ६६०।
४. अयं प्रतीकः भाष्ये उत्तरश्लोकावतारिकायां द्रष्टव्यः।

भाष्यार्कप्रकाशः

यत्तु **रामानुजः** - इच्छा द्वेषः सुखं दुःखमिति क्षेत्रकार्याणि क्षेत्रविकाराः उच्यन्ते। यद्यप्येतानीच्छादीन्यात्मधर्मभूतानि, तथाप्यात्मनः क्षेत्रसम्बन्धप्रयुक्तानीति क्षेत्रकार्यतया क्षेत्रविकारा उच्यन्त इति। **तत्तुच्छम्** - 'कामः सङ्कल्पः' इत्यारभ्य 'तत्सर्वं मन एवे'ति मनोधर्मत्वश्रवणादिच्छादीनाम्। आत्मधर्मत्वे सुषुप्तौ मनसि लीने सति तद्दर्शनप्रसङ्गात्। इच्छादिविकाराणामात्मनि सत्त्वे सविक्रियत्वप्रसङ्गादात्मनः, तेन चानित्यत्वदोषप्रसङ्गात्। स्वधर्मस्य स्ववेद्यत्वानुपपत्त्या आत्मना वेद्यमानानामिच्छादीनामात्मधर्मत्वायोगाच्च। न च 'स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ते' इति मुक्ताश्रितत्वेन कामसङ्कल्पयोः श्रवणादात्मधर्मावेवैताविति वाच्यम्; सगुणमुक्तिं प्राप्तपुरुषविषयत्वात् तच्छ्रुतेः। सगुणमुक्तौ हि हिरण्यगर्भलोके मनआदयः सन्ति। न हि कैवल्ये कामादिसद्भावः। न च तत्रापि विवदितव्यम्, सुप्तिमृतिमूर्छासु कामाद्यदर्शनादात्मनस्तेन न्यायेन मुक्तावपीत्यनुमानात्। 'स्वाप्ययसम्पत्त्यो'रिति सूत्रेण 'तत्र केन कं पश्येदि'त्यादिश्रुतेः सुषुप्तिमुक्तिविषयत्वस्य स्थापितत्वात्। तच्छ्रुतौ च श्रवणदर्शनादिसर्वज्ञाननिषेधाच्च। न च सुखादयः आत्मधर्मभूतज्ञानावस्थाविशेषाः इति वाच्यम्; आत्मनो ज्ञानस्वरूपस्य धर्मभूतज्ञानस्यैवाभावात्। न हि स्वरूपभूते ज्ञाने धर्मभूतं किञ्चिज्ज्ञानान्तरं भवितुमर्हति। तस्यापि धर्मभूतज्ञानस्य ज्ञानस्वरूपत्वे तस्मिन्नपि धर्मभूतज्ञाने ज्ञानान्तरमित्येवमनवस्थादोषात्। ज्ञानस्वरूपत्वाभावे ज्ञानत्वस्यैवासिद्धेः। न च धर्मधर्मिणोरुभयोरेकमेव ज्ञानं स्वरूपमिति वाच्यम्; धर्मधर्मिभेदासिद्धेः। न च 'सोऽकामयते'तीश्वरस्य करणरहितस्य कामः श्रूयत इति कामादय आत्मधर्मा इति वाच्यम्; मायया ईश्वरस्य कामसङ्कल्पसम्भवाद् मायाधर्मावेव कामसङ्कल्पौ जगत्सृष्टिविषयाविति। न च मुक्तिकालिकब्रह्मानन्दानुभवरूपसुखस्य मुक्तात्मधर्मत्वात् तत्साजात्येन सुखं सर्वमप्यात्मधर्म एवेति वाच्यम्; तत्सुखस्यात्मस्वरूपत्वेनात्मधर्मत्वायोगात्। सच्चिदानन्दं हि ब्रह्म। ब्रह्मानन्दानुभवोऽप्यात्मानन्दान्नातिरिच्यते। लौकिकसुखानुभवस्तु सुखादतिरिच्यते। सुखस्य विषयत्वात् ज्ञानस्य विषयित्वाच्च। न ह्यानन्दानुभवादन्यः कोऽपि मुक्तावस्ति। अनुभवितुरन्यस्य सत्त्वे त्रिपुट्या 'एकमेवाद्वितीयं ब्रह्म' इति श्रुतिविरोधात्, आत्मनो ज्ञानस्वरूपत्वप्रतिपादकश्रुतिविरोधाच्च।

**ननु** ज्ञानत्वेन प्रसिद्धाः कामसङ्कल्पादयो यदि मनोधर्मत्वेन मनोवृत्तिरूपाः स्युः, तर्हि वृत्तीनां जडत्वाज्ज्ञानत्वप्रसिद्धिविरोधः, विषयप्रकाशनासामर्थ्यं च। न च वृत्तीनां चैतन्यसम्बन्धेन विषयप्रकाशनसामर्थ्यमिति वाच्यम्; निर्विशेषचैतन्यस्य सर्वविषयविमुखस्य विषयप्रकाशायोग्यत्वेन तत्साहाय्यस्य 'शतमप्यन्धानां न पश्यती'ति न्यायेन विषयप्रकाशसामर्थ्यानापादकत्वात्। निर्विशेषचैतन्यस्य तद्योग्यत्वे तेनैव प्रकाशाद्युपपत्तौ वृत्त्यवच्छेदकल्पनायाः अनर्थकत्वात्। न च संसारदशायां [1]सङ्कुचितस्य तस्य विषयव्यवस्थौपयिकतया साफल्यमिति वाच्यम्; तस्य सङ्कोचाङ्गीकारे निर्विकारत्वादिप्रतिपादकश्रुत्यादिविरोधात्, चक्षुरादिवृत्तिभिरेव विषयव्यवस्थोपपत्तेश्च। धर्मभूतज्ञानस्य च विकारोऽङ्गीकृत एवेति न किञ्चिदनुपपन्नमस्माकमिति चेत्, मैवम्; यद्यात्मा ज्ञानस्वरूपो न स्यात्, तर्हि विषयप्रकाशो न स्यात्, ज्ञानस्वरूपत्वं तु श्रुत्यादिसिद्धम्। न च निर्विशेषत्वेन निर्धर्मके आत्मनि प्रकाशकत्वधर्मायोग इति वाच्यम्; अप्रकाशकत्वस्याप्ययुक्तत्वात्। प्रकाशकत्वस्य प्रकाशादनतिरिक्तत्वाज्ज्ञानस्य च प्रकाशात्मकत्वात्। व्यापकत्वाच्च साक्षिचैतन्यस्य न विषयवैमुख्यम्। अविद्यान्तःकरणादीनां साक्षिभास्यत्वेऽपि घटादीनां वृत्तिभास्यत्वान्न वृत्तिवैयर्थ्यम्। अन्तःकरणोपहितस्य साक्षिचैतन्यस्य चक्षुरादिद्वारा वृत्तिनिर्गमनं विना घटादिबाह्यविषयसंसर्गाभावान्न साक्षिभास्यत्वं घटादीनाम्।

**वस्तुतस्तु** साक्षिणाऽप्यविद्यादयोऽविद्याकारवृत्त्यैवावभास्यन्त इति बोध्यम्। तप्तलोहस्याग्नितादात्म्यादौष्ण्यमिव वृत्तेश्चित्प्रतिफलनाद् भासकत्वं सम्भवति। अन्तःकरणोपहितत्वेन हेतुना साक्षिचैतन्यस्य स्वतः सर्वविषयानवभासकत्वेऽपि न सङ्कोचः। यथा घटोपहितत्वेन हेतुना घटाकाशस्य सर्वव्यापित्वाभावेऽपि न सङ्कोचः, दृश्यमानसङ्कोचस्यातात्त्विकत्वादौपाधिकत्वेन। यद्धि स्वाभाविकं तद्धि तात्त्विकम्। यथा गगनस्य नीरूपत्वम्। तस्मान्नात्मनः कोऽपि विकारः। **वस्तुतस्तु** चैतन्यस्यान्तःकरणेन निरवयवस्य परिच्छेदायोगात् पूर्णमेव साक्षिचैतन्यमिति बोध्यम्।

धर्मभूतज्ञानं तु नास्त्यात्मन इति प्रागेव निराकृतम्। वृत्तिज्ञानं तु मनोधर्म एव नात्मधर्मः, निर्धर्मकत्वादात्मनः इति

१. धर्मभूतज्ञानस्य कर्मवशात् संकोचविकासौ तन्मतसिद्धौ।

**अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्।**
**आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥७॥**

**यस्य क्षेत्रभेदजातस्य संहतिरिदं शरीरं क्षेत्रमित्युक्तम् , तत् क्षेत्रं व्याख्यातं महाभूतादिभेदभिन्नं धृत्यन्तम्। क्षेत्रज्ञो वक्ष्यमाणविशेषणो यस्य सप्रभावस्य क्षेत्रज्ञस्य परिज्ञानादमृतत्वं भवति, तं 'ज्ञेयं यत्तत्प्रवक्ष्यामि' (भ.गी. १३.१३) इत्यादिना सविशेषणं स्वयमेव वक्ष्यति भगवान्। अधुना तु तज्ज्ञानसाधनगणम् अमानित्वादिलक्षणं, यस्मिन् सति तज्ज्ञेयविज्ञाने योग्योऽधिकृतो भवति, यत्परः संन्यासी ज्ञाननिष्ठः उच्यते**, **तम् अमानित्वादिगणं ज्ञान-साधनत्वाज्ज्ञानशब्दवाच्यं विदधाति भगवान्—** अमानित्वमिति। अमानित्वम् - **मानिनो भावो मानित्वम् आत्मनः श्लाघनं, तदभावोऽमानित्वम्।** अदम्भित्वम् - **स्वधर्मप्रकटीकरणं दम्भित्वं, तदभावोऽदम्भित्वम्।** अहिंसा **अहिंसनं प्राणिनामपीडनम्।** क्षान्तिः **परापराधप्राप्तावविक्रिया।** आर्जवम् **ऋजुभावोऽवक्रत्वम्।** आचार्योपासनं **मोक्षसाधनो-**

आनन्दगिरिकृतव्याख्या

**विरक्तस्य ज्ञानेऽधिकाराय वैराग्यार्थं क्षेत्रं व्याख्यातमित्यनुवदति—**यस्येति। क्षेत्रभेदजातस्य **व्यष्टिदेहविभागस्य सर्वस्येत्यर्थः।** संहतिः **समष्टिशरीरम्। ननूक्ते क्षेत्रे क्षेत्रज्ञो वक्तव्यः, तं हित्वा किमित्यन्यदुच्यते? तत्राह—** क्षेत्रज्ञ इति। **'अनादिमदि'त्यादिना वक्ष्यमाणविशेषणं क्षेत्रज्ञं स्वयमेव भगवान् विवक्षितविशेषणसहितं 'ज्ञेयं यत्तद्' इत्यादिना वक्ष्यतीति सम्बन्धः। किमिति क्षेत्रज्ञो वक्ष्यते? तत्राह—** यस्येति। **'ज्ञेयं यत्तद्' इत्यतः प्राक्तनग्रन्थस्य तात्पर्यमाह—** अधुनेति। अमानित्वादिलक्षणं **विदधातीत्युत्तरत्र सम्बन्धः। ज्ञानसाधनसमुदायबोधनं कुत्रोपयुज्यते? तत्राह—**यस्मिन्निति। **योग्यमधिकृतमेव विवृणोति—**यत्पर इति। **'एतज्ज्ञानम्' इति वचनात् कथमिदं ज्ञानसाधनम्? इत्याशङ्क्याह**[१]**—** तमिति। **तद्विधानस्य वक्तृद्वारा दार्ढ्यं सूचयति—** भगवानिति। **अमानित्वादिनिष्ठस्यान्तर्धियो ज्ञानमिति नियमार्थमाह—** अमानित्वमिति। मानः **तिरोहितोऽवलेपः। स चात्मन्युत्कर्षारोपहेतुः। सोऽस्येति मानी। न मानी अमानी, तस्य भावोऽमानित्वमिति व्याकरोति—** अमानित्वमित्यादिना। **प्रतियोगिमुखेनादम्भित्वं विवृणोति—** अदम्भित्वमिति। **वाङ्मनोदेहै-रपीडनं प्राणिनाम्** अहिंसनम्। **तदेवाहिंसेत्याह—**अहिंसेति। **परापराधस्य चित्तविकारकारणस्य प्राप्तावेवाविकृतचित्तत्वेनापकार-सहिष्णुत्वं क्षान्तिरित्याह—** क्षान्तिरिति। अवक्रत्वम् **अकौटिल्यं यथाहृदयव्यवहारः, सदैकरूपप्रवृत्तिनिमित्तत्वं चेत्यर्थः। 'उपनीय तु**

भाष्यार्कप्रकाशः

सङ्क्षेपः ॥६॥

**अमानित्वमिति। वक्ष्यमाणेति**। 'अनादिमत्परं ब्रह्मे'त्यादिनेति भावः। **अमृतत्वं** मोक्षः। **तं** क्षेत्रज्ञम्। न च ज्ञेयं ब्रह्म वक्ष्यतीति वाच्यम् ; क्षेत्रस्यैव ज्ञेयत्वात्। उक्तं हि 'क्षेत्रज्ञं चापि मां विद्धी'ति। अमानित्वादिलक्षणं **तज्ज्ञानसाधनगणं** क्षेत्रज्ञज्ञानसाधनचयं भगवान् विदधातीत्यन्वयः। मुमुक्षुणा क्षेत्रज्ञसाक्षात्काराय अमानित्वादयो गुणाः आत्मनः सम्पाद्याः इति भगवता विधीयत इत्यर्थः। विदधातीत्यनेन यथा अज्ञस्य चित्तशुद्धये कर्मयोगो विहितः, तथा मुमुक्षोरमानित्वादिगुणयोगो विहित इति ज्ञायते। ननु ज्ञानमेवार्जुनेन पृष्टमिति तदेव वाच्यमित्यत आह— **ज्ञानसाधनत्वाज्ज्ञानशब्दवाच्यमिति**। आत्मसाक्षात्काररूपे ज्ञाने ज्ञातव्यविशेषाभावेन प्रश्नायोगाज्ज्ञानसाधनविशेषजिज्ञासयैव ज्ञानप्रश्नोऽर्जुनस्यापीति बोध्यम्।

**परापराधेति**। परकर्तृकापराधेत्यर्थः। **अविक्रियेति**। स्वापराधकर्तृषु कोपादिविकाराभावः। **अवक्रत्वम**कौटिल्यम्। यः शास्त्रार्थं स्वयमाचरन्नन्यानप्याचरयति, [२]स विद्वानाचार्यः इत्युच्यते। स च शास्त्रार्थः प्रकृते मोक्षसाधनान्येवेत्यभिप्रेत्याह— **मोक्षेति**।

---

१. ज्ञायतेऽनेनेति ज्ञानमिति करणे ल्युडिति भावः। २. आचार्यशब्देन 'आचिनोति हि शास्त्रार्थम् आचारे स्थापयत्यपि। स्वयमाचरते यस्मात् तस्मादाचार्य उच्यते॥' इत्युक्तलक्षणः आचार्यः ग्राह्यः इति भावः।

**इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।**
**जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥८॥**

**पदेष्टुराचार्यस्य शुश्रूषादिप्रयोगेण सेवनम्।** शौचं **कायमलानां मृज्जलाभ्यां प्रक्षालनम् , अन्तश्च मनसः प्रतिपक्ष-भावनया रागादिमलानामपनयनं शौचम्।** स्थैर्यं **स्थिरभावो, मोक्षमार्ग एव [१]कृताध्यवसायत्वम्।** आत्मविनिग्रहः, [२]**आत्मनोऽपकारकस्यात्मशब्दवाच्यस्य कार्यकरणसङ्घातस्य** विनिग्रहः **स्वभावेन सर्वतः प्रवृत्तस्य सन्मार्ग एव निरोध आत्मविनिग्रहः॥७॥**

**किञ्च -** इन्द्रियेति। इन्द्रियार्थेषु **शब्दादिषु [३]दृष्टादृष्टेषु भोगेषु विरागभावो** वैराग्यम्। अनहङ्कारः **अहङ्काराभाव एव च।** जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं **जन्म च मृत्युश्च जरा च व्याधयश्च दुःखानि च तेषु जन्मादिदुःखान्तेषु**

आनन्दगिरिकृतव्याख्या

**यः शिष्यम्' इत्यादिनोक्तमाचार्यं व्यवच्छिनत्ति—** मोक्षेति। शुश्रूषादीत्यादिपदं **नमस्कारादिविषयम्। बाह्यमाभ्यन्तरं च द्विप्रकारं शौचं क्रमेण विभजते—** शौचमित्यादिना। **मनसो रागादिमलानामिति सम्बन्धः। तदपनयोपायमुपदिशति—** प्रतिपक्षेति। **रागादिप्रतिकूलस्य** भावना **विषयेषु दोषदृष्ट्यावृत्तिः, तयेति यावत्। स्थिरभावमेव विशदयति—** मोक्षेति। **आत्मनो नित्यसिद्धस्यानाधेयातिशयस्य कुतो विनिग्रहः? तत्राह—** आत्मन इति॥७॥

**न केवलममानित्वादीन्येव ज्ञानस्यान्तरङ्गसाधनानि, किन्तु वैराग्यादीन्यपि तथाविधानि सन्तीत्याह—** किञ्चेति। **दृष्टादृष्टेष्वने-कार्थेषु रागे, तत्प्रतिबद्धं ज्ञानं नोत्पद्येतेति मत्वा व्याकरोति—** इन्द्रियेति। **आविर्भूतो गर्वो**ऽहङ्कारः। **तदभावोऽपि ज्ञानहेतुरित्याह—** अनहङ्कार इति। **इन्द्रियार्थेषु वैराग्यमुक्तमुपपादयति—** जन्मेति। **प्रत्येकं दोषानुदर्शनमित्युक्तम्। तत्र जन्मनि दोषानुदर्शनं विशदयति—**

भाष्यार्कप्रकाशः

श्रोतुमिच्छा शुश्रूषा, तत्प्रयुक्तगुरुकार्यकरणमपि शुश्रूषेत्युच्यते। **आदि**शब्देन नमस्कारादिग्रहणम्। **प्रयोगः** करणम्। तेन रूपेण सेवनमुपासनमित्युच्यते। **शौचं** शुचित्वम्। तद् द्विविधम् - कायिकं मानसिकं चेत्याह— **कायेति**। प्रतिपक्षाणां वैराग्यशान्त्यादीनां **भावनया** आत्मनि सम्पादनेनेत्यर्थः। **कृतव्यवसायत्वं** कृतनिश्चयत्वम्। आत्मनः क्षेत्रज्ञस्य निग्रहाद्यविषयत्वादाह— **कार्यकरण-संघातस्येति**। ननु कथं तस्यात्मशब्दवाच्यत्वम्? अत आह— **आत्मन उपकार[क]तयेति**। यद्यपि क्षेत्रज्ञस्य न कोऽप्युपकारोऽपकारो वा, तथापि साधनानुष्ठातॄणां प्रमातर्यैवात्माभिमानादुक्तम् **आत्मन उपकार[क]तयेति**। प्रमातुर्हि पश्वादिशरीराणि ज्ञानसाधनानुष्ठाना-योग्यानीति तद्योग्यत्वाद् मनुष्यशरीरमुपकारकम् , मनुष्यशरीर एव मनसोऽपि विवेकादिज्ञानलाभान्मनुष्यशरीरस्थस्यैव लिङ्गशरीर-स्यापि प्रमात्रुपकारकत्वम्। तस्मात् स्थूलसूक्ष्मशरीरद्वयस्य कार्यकरणसङ्घातनामकस्य विनिग्रहः कर्तव्यो मुमुक्षुणा। **सर्वत इति**। सर्वविषयेष्वित्यर्थः। **सन्मार्ग एवेति**। मोक्षमार्ग एव निरोधः प्रवर्तनं स्थापनमिति यावत्। देहादिभिर्मोक्षसाधनान्येव यथाऽनुष्ठीयेरन् , ऐहिकामुष्मिकफलहेतूनि नरकहेतूनि वा विहितानि निषिद्धानि च कर्माणि यथा नानुष्ठीयेरन् तथा प्रयतनमात्मविनिग्रह इति भावः॥७॥

**इन्द्रियेति**। इन्द्रियाणां करणानामर्था विषया इन्द्रियार्थाः शब्दादयः। आदिपदात् स्पर्शरूपरसगन्धग्रहणम्। ते चेष्टानिष्टभेदेन द्विविधाः, पुनश्च दृष्टादृष्टभेदेन द्विविधाः। दृष्टाः ऐहिकाः, अदृष्टाः आमुष्मिकाः। तत्र दृष्टानिष्टविषयेष्वदृष्टानिष्टविषयेषु च पुंसां स्पृहैव नास्तीति तद्वैराग्यप्रतिपादनं व्यर्थमित्यभिप्रेत्याह— **दृष्टादृष्टेष्टविषयभोगेष्विति**। भुज्यन्त इति भोगाः। दृष्टाश्चादृष्टाश्च दृष्टादृष्टाः। ते च त इष्टा विषया भोगाश्च तेषु। यद्वा भोगा अनुभवा दृष्टादृष्टेष्टविषयाणां भोगा इति समासः, तेषु। लाक्षणिकोऽयमर्थः - इन्द्रियार्थशब्दस्य इन्द्रियार्थभोगरूपार्थवर्णनात्। स्त्रीपुत्रपशुगृहादिषु रम्भादिषु चेति भावः। विगतो रागः स्पृहा यस्मात् स विरागः, तस्य भावो वैराग्यं

१. 'कृतव्यवसायत्वम्' इति रा.पा. भाति। २. 'आत्मन उपकारकतयाऽऽत्म' इति पा.। ३. 'दृष्टादृष्टेष्टविषयभोगेषु' 'दृष्टादृष्टेषु विषयभोगेषु' इति पा.।

**प्रत्येकं दोषानुदर्शनम्। जन्मनि गर्भवासयोनिद्वारनिःसरणं दोषः, तस्यानुदर्शनमालोचनम्। तथा मृत्यौ दोषानुदर्शनम्। तथा जरायां प्रज्ञाशक्तितेजोनिरोधदोषानुदर्शनम् , परिभूतता चेति। तथा व्याधिषु शिरोरोगादिषु दोषानुदर्शनम्। तथा दुःखेष्वध्यात्माधिभूताधिदैवनिमित्तेषु। [1]अथवा दुःखान्येव दोषो दुःखदोषः, तस्य जन्मादिषु पूर्ववदनुदर्शनम्। दुःखं जन्म, दुःखं मृत्युः, दुःखं जरा, दुःखं व्याधयः। दुःखनिमित्तत्वाज्जन्मादयो दुःखं, न पुनः स्वरूपेणैव दुःखमिति। एवं जन्मादिषु दुःखदोषानुदर्शनाद् देहेन्द्रियविषयभोगेषु वैराग्यमुपजायते। ततः प्रत्यगात्मनि प्रवृत्तिः**

आनन्दगिरिकृतव्याख्या

जन्मनीति। **यथा जन्मनि दोषानुसन्धानं, तथा मृत्यौ दोषस्य सर्वमर्मनिकृन्तनादेरालोचनं कार्यमित्याह—** तथेति। **जन्मनि मृत्यौ च दोषानुसन्धानवज्जरादिष्वपि दोषानुसन्धानं कर्तव्यमित्याह—** तथेति। **व्याधिषु दोषस्यासह्यतारूपस्यानुसन्धानम्। दुःखेषु त्रिविधेष्वपि दोषानुसन्धानं प्रसिद्धम्। व्याख्यानान्तरमाह—** अथवेति। **यथा जन्मादिषु दुःखान्तेषु दोषदर्शनमुक्तम् , तथा तेष्वेव दुःखाख्यदोषस्य दर्शनं स्फुटयति—** दुःखमित्यादिना। **कथं जन्मादीनां बाह्येन्द्रियग्राह्याणां दुःखत्वम्? तत्राह—** दुःखेति। **जन्मादिषु दोषानुदर्शनकृतं फलमाह—** एवमिति। **वैराग्ये सत्यात्मदृष्ट्यर्थं करणानां तदाभिमुख्येन प्रवृत्तिरिति वैराग्यफलमाह—** तत इति। **जन्मादिदुःख-**

भाष्यार्कप्रकाशः

रागाभाव इति यावत्। न अहङ्कारोऽनहङ्कार इति नञ्समासः। नञोऽभावार्थकत्वादाह— **अहङ्काराभाव इति**। देहादिष्वहमित्यभिमानाभावः। अहङ्कारस्य बलवदनिष्टहेतुत्वादावश्यकोऽस्य परित्याग इत्याह— **एव चेति**। वसत्यस्मिन्निति वासो गर्भः कुक्षिः, स चासौ वासो गर्भवासः, तस्माद् योनिद्वारेण निःसरणं बहिर्निर्गमनम्। **यद्वा** गर्भे वासो निवासो गर्भवासः, स च योनिद्वारनिःसरणं च तयोः समाहारो गर्भवासयोनिद्वारनिःसरणं, मलमूत्रादिदुर्गन्धप्रचुरे करचरणचालनाद्यवकाशशून्ये मातृकुक्षौ विष्ठायां क्रिमिरिव निवास एको दोषः, सूक्ष्मान्मूत्रक्लिन्नाच्च योनिद्वारान्निःसरणमन्यो दोष इति जन्मनि द्विविधदोषानुदर्शनमित्यर्थः। उपलक्षणमिदम् , अन्येषामपि दोषाणां सत्त्वात्। मातृभुक्तकट्वन्नरसपानजन्यसन्तापः, उच्छ्वासनिश्वासनिरोधः, करणानामस्वातन्त्र्यमित्यादयः। यद्वा गर्भवासशब्देनैव तत्प्रयुक्तसर्वदोषग्रहणमिति। **आलोचनमिति**। अनेन मम पुनर्जन्म भूयाद् विषयसुखलाभार्थमिति पुरुषस्य कामना निवर्तत इति भावः। मृत्यौ प्राणोत्क्रमणकफरज्जुकण्ठबन्धनश्वासनिरोधादयो दोषाः, तेषामालोचनेन यदि मम पुनर्जन्म स्यात् तर्हि पुनरपि मृत्युः स्यात् स च मृत्युर्बहुदोषग्रस्तत्वान्मम मा भूदिति जन्ममृत्युहरमोक्षाय यतत इति भावः। प्रज्ञानिरोधो बुद्धिमान्द्यम् , शक्तिनिरोधः चक्षुरादीनां पादादीनां च रूपादिग्रहणेषु गमनादिषु चासामर्थ्यम् , तेजोनिरोधो निर्वीर्यत्वम् , दारापत्यादितिरस्कृतत्वमप्यन्यो दोषो जरायामित्याह— **परिभूतता चेति**। पुत्रादयो हि धनधान्यार्जनाद्यसमर्थं वृद्धमधिक्षिपन्ति। तदधिक्षेपो दुःसह इति भावः। व्याधिषु शिरोरोगादिषु तापाशक्तिमनःक्षोभादिदोषानुदर्शनम्। तेन च रोगनिलये शरीरे स्पृहाभावः सिध्यतीति भावः। आत्मनि सङ्घाते भवा आध्यात्मिकाः ज्वरादयः, आधिभौतिकाः वाताग्न्यादिभूतप्रयुक्ताः, आधिदैविकाः दैवादापतिताः, ते त्रयो निमित्तानि येषां तेषु तथोक्तेषु दुःखेषु मनःक्षोभादिदोषानुदर्शनम्। अर्थान्तरमाह— **अथवेति**। दुःखस्यैव दोषत्वाद् दुःखे पुनर्दोषदर्शनमित्यस्वरसादर्थान्तरं वर्णितमाचार्यैरिति बोध्यम्। जन्मादिषु दुःखरूपदोषस्यानुदर्शनमित्यर्थः। जन्मादिषु दुःखहेतुत्वरूपदोषदर्शनमिति यावत्। दुःखस्य स्वरूपतः एकत्वेऽपि विषयभेदाद् बहुत्वमित्यभिप्रेत्याह— **दुःखान्येव दोष इति**। अनुचिन्तनप्रकारमेव दर्शयति— **दुःखं जन्मेत्यादिना**। ननु दुःखहेतूनां जन्मादीनां कथं दुःखस्वरूपत्वम्? अत आह— **दुःखनिमित्तत्वादिति**।

**ननु** जन्मनि दुःखं, मृत्यौ दुःखमित्येवं दोषानुदर्शनमिति कुतो नोक्तमिति चेद्? **उच्यते**— जन्मनि दुःखमस्तीत्येवमुक्तौ दुःखादन्यस्यापि कस्यचित् सत्ता प्रतीयते। जन्म दुःखमित्युक्तौ तु दुःखमेव तत्रास्ति, न त्वन्यत् किमपीति प्रतीयत इति। अत एव स्मृत्यन्तरेऽपि – 'जन्म दुःखं, जरा दुःखं, जाया दुःखं पुनःपुन'रिति दृश्यते। जन्मादिषु दुःखदोषानुदर्शनस्य संसारे वैराग्योत्पत्तिः फलमित्याह— **जन्मादिष्विति**। वैराग्यस्य फलमाह— **तत इति**। वैराग्यादित्यर्थः। आत्मदर्शनाय करणानां प्रत्यगात्मनि प्रवृत्ति-

१. जन्ममृत्युजराव्याधिषु दुःखदोषयोरनुदर्शनम् इत्यादिविग्रहोऽपि व्याख्यान्तरे दर्शितः।

**असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु।**
**नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥ ९॥**
**मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।**

**करणानामात्मदर्शनाय। एवं ज्ञानहेतुत्वाज्ज्ञानमुच्यते जन्मादिदुःखदोषानुदर्शनम्॥ ८॥**

**किञ्च—** असक्तिरिति। असक्तिः - **सक्तिः सङ्गनिमित्तेषु विषयेषु प्रीतिमात्रम् , तदभावोऽसक्तिः।** अनभिष्वङ्गो **ऽभिष्वङ्गाभावः;** अभिष्वङ्गो **नाम सक्तिविशेष एवानन्यात्मभावनालक्षणः। यथाऽन्यस्मिन् सुखिनि दुःखिनि वा अहमेव सुखी दुःखी च, जीवति मृते वा अहमेव जीवामि मरिष्यामि चेति। क्व इत्याह—** पुत्रदारगृहादिषु। **पुत्रेषु , दारेषु , गृहेषु , आदिग्रहणादन्येष्वपि अत्यन्तेष्टेषु दासवर्गादिषु। तच्चोभयं ज्ञानार्थत्वाज्ज्ञानमुच्यते। नित्यं च** समचित्तत्वं **तुल्यचित्तता। क्व ?** इष्टानिष्टोपपत्तिषु **इष्टानामनिष्टानां** चोपपत्तयः **सम्प्राप्तयः, तास्विष्टानिष्टोपपत्तिषु नित्यमेव तुल्यचित्तता। इष्टोपपत्तिषु न हृष्यति, न कुप्यति चानिष्टोपपत्तिषु। तच्चैतद् नित्यं समचित्तत्वं ज्ञानम्॥ ९॥**

**किञ्च—** मयि चेति। मयि **चेश्वरे** अनन्ययोगेन **अपृथक्समाधिना 'नान्यो भगवतो वासुदेवात् परोऽस्ति, अतः**

आनन्दगिरिकृतव्याख्या

**दोषानुदर्शनं ज्ञानहेतुषु किमित्युपसङ्ख्यातमित्याशङ्क्य वैराग्यद्वारा धीहेतुत्वादित्याह—** एवमिति॥ ८॥

**ज्ञानस्यान्तरङ्गमेव हेत्वन्तरमाह—**किञ्चेति। **नन्वसक्तिरेवाभिष्वङ्गाभावः। तथा च पुनरुक्तिरित्याशङ्क्याभिष्वङ्गोक्तिद्वारा निरस्यति—** अभिष्वङ्गो नामेति। **अन्यस्मिन्नेव पुत्रादावनन्यत्वधिया तद्गते सुखादावात्मनि तद्भावनाख्यं सक्तिविशेषमेवोदाहरति—** यथेति। **उक्तविशेषणयोराकाङ्क्षाद्वारा विषयमाह—** क्वेत्यादिना। **उक्तविशेषणयोर्ज्ञानशब्दस्योपपत्तिमाह—** तच्चेति। **सदा हर्षविषादशून्य-मनस्त्वमपि ज्ञानहेतुरित्याह—** नित्यं चेति। **तदेव विभजते—** इष्टेति। **तस्य ज्ञानहेतुत्वं निगमयति—** तच्चैतदिति॥ ९॥

**साधनान्तरमाह—** किञ्चेति। **अनन्ययोगमेव संक्षिप्तं व्यनक्ति—** नेत्यादिना। **उक्तधीद्वारा जातायाः भक्तेर्भगवति स्थैर्यं**

भाष्यार्कप्रकाशः

र्भवतीत्यन्वयः। यद्यपि संस्कृतस्य मनस एकस्यैव करणस्यात्मनि प्रवृत्तिः, तथापि मनोऽधीनत्वात् सर्वकरणानां **करणाना**मित्युक्तम्। अन्तःकरणस्यात्मनि प्रवृत्तिः, चक्षुरादीनां तु विषयेष्वप्रवृत्त्या आत्मनि प्रवृत्तिरुपचर्यत इति भावः। **एवमिति**। वैराग्योत्पादनद्वारा आत्मनि अन्तःकरणस्य प्रवृत्तिहेतुत्वेनेत्यर्थः। **ज्ञानहेतुत्वादिति**। आत्मसाक्षात्कारसाधनत्वात्। **ज्ञानमुच्यते** ज्ञानमित्युच्यते। उपचारेणेति भावः॥ ८॥

**असक्तिरिति**। सक्तिः सङ्गः, न सक्तिरसक्तिः। **प्रीतिमात्रमिति**। प्रीतिविशेषस्यानन्यात्मभावनालक्षणस्य अभिष्वङ्गशब्देन वक्ष्यमाणत्वादिति भावः। सङ्गनिमित्तात् पुत्रादिविषयादात्मनोऽनन्यत्वेन भावना अनन्यात्मभावना। अनन्योऽनतिरिक्तः, स चासौ आत्मा, तस्य भावनेति समासः। **भावना** चिन्तनम्। अनन्यात्मभावनामेव दर्शयति— **यथेति**। **अन्यस्मिन्** स्वस्मादितरस्मिन् दारापत्यमित्रादौ सुखिनि सति 'अहमेव सुखी'ति, तस्मिन् दुःखिनि सति 'अहमेव दुःखी'ति, तस्मिन् जीवति सति 'अहमेव जीवामी'ति, तस्मिन् मृते सति 'अहमेव मरिष्यामी'ति च। एवंरूपः प्रत्ययोऽनन्यात्मभावनेत्युच्यते। [1]'अहमेव मृतः' इति प्रतीत्ययोगाद् मरिष्यामीत्युक्तमिति बोध्यम्। **उभयमिति**। असक्तिरनभिष्वङ्गश्चेत्यर्थः। तुल्यमविकृतत्वादेकरूपं चित्तं यस्य, तस्य भावस्तुल्यचित्तता। **ज्ञानमिति**। ज्ञानहेतुत्वाज्ज्ञानमित्यर्थः। एवमन्यत्रापि बोध्यम्॥ ९॥

**मयीति**। **अनन्यो**ऽपृथग्भूतः, स चासौ योगः अनन्ययोगः, तेन। व्यभिचरितुं शीलमस्याः अस्तीति व्यभिचारिणी, सा न

१. मरिष्यामीति भविष्यत्कालप्रयोगस्य तात्पर्यमाह—अहमेवेति। जीवतः इति शेषः।

**विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥१०॥**
**अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।**
**एतज्ज्ञानमिति प्रोक्तम् अज्ञानं यदतोऽन्यथा॥११॥**

**स एव नो गति'**रित्येवं **निश्चिता अव्यभिचारिणी बुद्धिरनन्ययोगः, तेन भजनं** भक्तिः, **न व्यभिचरणशीला** अव्यभिचारिणी। **सा च ज्ञानम्।** विविक्तदेशसेवित्वं **विविक्तः स्वभावतः संस्कारेण वा अशुच्यादिभिः सर्पव्याघ्रादिभिश्च रहितोऽरण्यनदीपुलिनदेवगृहादिः**[1] **विविक्तो देशः, तं सेवितुं शीलमस्येति विविक्तदेशसेवी, तद्भावो विविक्तदेशसेवित्वम्। विविक्तेषु हि देशेषु चित्तं प्रसीदति** [2]**यतः, ततः आत्मादिभावना विविक्त उपजायते, अतो विविक्तदेशसेवित्वं ज्ञानमुच्यते।** अरतिः **अरमणम् ,** [3]**क्व?** जनसंसदि **जनानां प्राकृतानां संस्कारशून्यानामविनीतानां (**[4]**कलहोन्मुखितचित्तानां)** संसत् **समवायो जनसंसत् , न संस्कारवतां विनीतानां संसत् , तस्या ज्ञानोपकारकत्वात्। अतः प्राकृतजनसंसद्यरतिः ज्ञानार्थत्वाज्ज्ञानम्॥१०॥**

**किञ्च—** अध्यात्मेति। अध्यात्मज्ञाननित्यत्वम् **आत्मादिविषयं ज्ञानमध्यात्मज्ञानम् , तस्मिन् नित्यभावो**

आनन्दगिरिकृतव्याख्या

**दर्शयति—** नेति। **तत्रापि ज्ञानशब्दस्तद्धेतुत्वादित्याह—** सा चेति। **देशस्य विविक्तत्वं द्विविधमुदाहरति—** विविक्त इति। **तदेव स्पष्टयति—** अरण्येति। **उक्तदेशसेवित्वं कथं ज्ञाने हेतुः? तत्राह—** विविक्तेष्विति। **आत्मादीत्यादिशब्देन परमात्मा, वाक्यार्थश्चोच्यते। नन्वरतिविषयत्वेनाविशेषतो जनसंसन्मात्रं किमिति न गृह्यते? तत्राह—**तस्या इति।**'सन्तः सङ्गस्य भेषजम्' इत्युपलम्भादित्यर्थः॥१०॥**

**साधनान्तरमाह—**किञ्चेति। आत्मादीत्या**दिशब्दोऽनात्मार्थः। तद्विषयं** ज्ञानं **विवेकः,** तन्नित्यत्वं **तत्रैव निष्ठावत्त्वम्। विवेकनिष्ठो**

भाष्यार्कप्रकाशः

भवतीत्यव्यभिचारिणी। **व्यभिचारो** नाम एकत्र स्थितायाः अन्यत्र गमनम्। वासुदेवभजनस्य देवतान्तरविषयत्वं व्यभिचार इति भावः। न चानन्ययोगेनेत्यनेन पुनरुक्तिः, अव्यभिचारित्वस्य बुद्धिगतत्वेन भक्तिगतत्वेन च भेदात्। बुद्धिर्ज्ञानमात्मतत्त्वस्य। तच्च दर्शितं 'नान्यो भगवतः' इत्यादिना। भक्तिरात्मचिन्तनमिति विवेकः। ध्यानमिति यावत्। मानसी क्रियेयम्। मलमूत्रादयोऽशुचिपदार्थः। आदिशब्दात् कण्टकादिग्रहणम्। भयशब्दः सर्पचोरव्याघ्रत्रयान्वयी - सर्पभयं चोरभयं व्याघ्रभयमिति। आदिपदात् पिशाचभयादि-ग्रहणम्। ग्राम्यजनसञ्चारादिग्रहणं च। अरण्यं नदी पुलिनं देवतागृहमादिपदात् पर्वतदर्यादिग्रहणम्। **विविक्त इति**। विजनः परिशुद्धश्चेत्यर्थः। **प्रसीदति** प्रसादमधिगच्छति। अन्यत्र तु क्षोभं प्राप्नोतीति भावः। **तत इति**। चित्तप्रसादादित्यर्थः। आत्मादीत्यादि-पदादनात्मग्रहणम्। अनात्मानोऽपि भावयितव्या एव त्याज्यत्वार्थमिति भावः। **अथवा** परमात्मा आदिपदार्थः। प्रत्यगात्मपरमात्मनोः एकत्वेन चिन्तनम् आत्मपरमात्मभावना। **प्राकृताः** विषयप्रवणा ग्राम्या मूर्खाः, तेषां सभायां हि स्त्रीद्यूतपानादिप्रसङ्ग एव, न तु भगवत्कथेति हेतोः तत्रारतिरावश्यकी। **संस्कारः** शास्त्रार्थपरिज्ञानं शमदमादिश्च, तद्वतां सतां सभायां हि भगवत्कथा प्रस्तूयत इति न तत्रारतिः कार्या। अत एव 'सत्सङ्गत्वे निःसङ्गत्वं निःसङ्गत्वे निर्मोहत्वम्। निर्मोहत्वे निश्चलतत्त्वं निश्चलतत्त्वे जीवन्मुक्ति'रिति सत्सङ्गः स्तूयते॥१०॥

**अध्यात्मेति**। आत्मनि अध्यात्मम् , आत्मविषयमित्यर्थः। आत्मशब्दस्योपलक्षणत्वमभिप्रेत्याह—**आत्मादिविषयमिति**। यद्वा आत्मानं देहमधिकृत्य वर्तमानं सर्वमध्यात्ममित्युच्यते, तस्याध्यात्मस्यात्मादेर्ज्ञानम्[5]। आदिपदादनात्मनां परमात्मनो वा ग्रहणं

१. 'गृहादिभिः' इति मुद्रितःपाठः। २.'यतः' इति क्वचिन्न। ३. 'क्व' इति क्वचिन्न। ४. कुण्डलितः पाठः न सार्वत्रिकः। ५. पूर्वं विभक्त्यर्थेऽव्ययीभावः। अध्यात्मं ज्ञानम् अध्यात्मज्ञानमिति विग्रहः। अस्मिन् पक्षे तु 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति तत्पुरुषसमासः। तदापि अध्यात्मस्येति प्रयोगोपपत्तिः चिन्त्या।

**नित्यत्वम्। अमानित्वादीनां ज्ञानसाधनानां भावनापरिपाकनिमित्तं तत्त्वज्ञानम् , तस्य अर्थो मोक्षः संसारोपरमः, तस्यालोचनं** तत्त्वज्ञानार्थदर्शनम्। **तत्त्वज्ञानफलालोचने हि तत्साधनानुष्ठाने प्रवृत्तिः स्यादिति।** एतद् **अमानित्वादि तत्त्वज्ञानार्थदर्शनान्तमुक्तं ज्ञानमिति प्रोक्तम् , ज्ञानार्थत्वात्।** अज्ञानं **यद्** अतः **अस्माद् यथोक्ताद्** अन्यथा **विपर्ययेण - मानित्वं, दम्भित्वं, हिंसा, अक्षान्तिः, अनार्जवमित्यादि अज्ञानं विज्ञेयं** [१]**परिहरणाय संसारप्रवृत्तिकारणत्वादिति ॥११॥**

आनन्दगिरिकृतव्याख्या

**हि वाक्यार्थज्ञानसमर्थो भवति। तेषां** भावनापरिपाको **नाम यत्नेन साधितानां प्रकर्षपर्यन्तत्वम् , तन्निमित्तं** तत्त्वज्ञानम् **ऐक्यसाक्षात्कारः। तत्फलालोचनं किमर्थमित्याशङ्क्याह—** तत्त्वेति। प्रवृत्तिः स्यादिति। **अतस्तत्त्वज्ञानार्थदर्शनमर्थवदिति शेषः। ज्ञानस्यान्तरङ्गहेतुमुक्त-मुपसंहरति—** एतदिति। **किमिति** [२]**तस्य विज्ञेयत्वमित्याशङ्क्याह—** परिहरणायेति। **तत्र हेतुः—** संसारेति। **तस्य** प्रवृत्तिः **उत्पत्तिः, तद्धेतुत्वान्मानित्वादि त्याज्यम् । ज्ञाते च त्याज्यत्वम् ; तेन तस्य ज्ञेयतेत्यर्थः।** इति**शब्दः साधनाधिकारसमाप्त्यर्थः ॥११॥**

भाष्यार्कप्रकाशः

पूर्ववत्। अध्यात्मज्ञानम् , तस्मिन् नित्यत्वं नित्यमपि स्थितिरित्यर्थः। सर्वदाऽप्यात्मादिभावनेत्यर्थः। न त्वध्यात्मज्ञाने नित्यत्वबुद्धिः। आत्मान्यस्यानित्यत्वेन तद्बुद्धेरप्रमात्वादनुपयुक्तत्वाच्चेति भावः। भावनायाः परिपाकस्य निमित्तं कारणमित्यध्यात्मज्ञाननित्यत्वस्य विशेषणम्। अध्यात्मज्ञाननित्यत्वादमानित्वादिभावनापरिपाको भवतीत्यर्थः। तस्मात् तत्परिपाकार्थमध्यात्मज्ञाननित्यत्वमावश्यकं मुमुक्षोरिति भावः। तत्त्वज्ञानमात्मसाक्षात्कारः। तस्यार्थः फलं मोक्षः। मोक्षशब्दार्थमाह— **संसारोपरम इति**। बन्धाभावस्य मोक्षत्वा-दिति भावः। **आलोचनमिति**। तत्त्वज्ञानादेव मोक्षो भवति नान्यस्मादित्येवंरूपमिति भावः। **तत्साधनेति**। तत्त्वज्ञानसाधनेत्यर्थः। यथा कर्मफलस्वर्गाद्यालोचनं विना कर्मण्यप्रवृत्तिस्तथेति भावः। **एतत्** पूर्वोक्तं तदेवाह— **अमानित्वादीति।** अमानित्वमादिर्यस्य तदमानित्वादि। तत्त्वज्ञानार्थदर्शनमन्तो यस्य तत् तत्त्वज्ञानार्थदर्शनान्तं गुणबृन्दमिति विशेष्यशेषः।

ननु गुणबृन्दस्य कथं ज्ञानत्वप्रवचनम्? अत आह— **ज्ञानार्थत्वादिति**। ज्ञानमर्थः फलं यस्य तत्त्वात्। ज्ञानायेदं ज्ञानार्थं, तत्त्वादिति वा। **यथोक्तादिति**। पूर्वोक्तादित्यर्थः। विपर्ययेणेत्यनन्तरं भातीति शेषः। यदतोऽन्यथा भाति तदज्ञानमित्यन्वयः। किं तद् यदतो विपर्ययेण भातीत्यत आह— **मानित्वेति**। मानित्वादयोऽज्ञानकार्यत्वादज्ञानत्वेन विज्ञेया इत्यर्थः। न तु ज्ञानाभावरूपत्वेन, ज्ञानाभावस्याभावत्वेनैव मानित्वादिभावकारणत्वायोगात्। मानित्वादीनां च लोके ज्ञानत्वेनैव व्यवहारो, न तु ज्ञानाभावरूपत्वेनेति न मानित्वादिकं ज्ञानाभावः।

ननु अमानित्वादेर्विज्ञेयत्वमस्तु नाम अनुष्ठानार्थम् , मानित्वादेः कुतो विज्ञेयत्वम्? अत आह— **संसारस्य परिहरणायेति**। यथाऽनुष्ठानाय धर्मः, परिहरणायाधर्मश्च शास्त्रेण विज्ञेयस्तथा अमानित्वादिकमनुष्ठानाय, मानित्वादिकं परिहरणाय च विज्ञेयमिति भावः। मानित्वादौ परिहृते सति संसारः परिहृतो भवतीति संसारपरिहरणाय मानित्वादिपरिहारः कर्तव्य इति तत्त्वम्।

ननु संसारपरिहाराय मानित्वादिपरिहारः किमिति कार्योऽत आह— **प्रवृत्तिकारणत्वादिति**। मानित्वादेरिति शेषः। आत्म-श्लाघादम्भादिहेतोर्हि यज्ञादिषु प्रवर्तते मूढजनः।

यत्तु **रामानुजः** - तत्त्वज्ञानार्थचिन्तनमिति पाठं परिकल्प्य, तत्त्वज्ञानप्रयोजनं यच्चिन्तनं तन्निरतत्वमित्यवोचत् , **तत्तुच्छम्** , तत्त्वज्ञानार्थचिन्तननिरतत्वमिति पदाभावात्। लाक्षणिकार्थकल्पनस्यान्याय्यत्वात्। किं तत् तत्त्वज्ञानार्थं चिन्तनमिति प्रश्नस्योद्भूतत्वेन तदुत्तरस्यादर्शनान्मुमुक्षूणां क्व वा प्रवृत्तिः स्यात्? न ह्यविदितेऽर्थे कस्यापि प्रवृत्तिर्भवेत्। एवम् - [३]'सङ्घाते चेतना धृति'रित्यत्रापि 'सङ्घातश्चेतना धृति'रिति पाठं प्रकल्प्य चेतनस्य जीवस्याधृतिराधारः सङ्घातः शरीरमिति यद् व्याचख्यावयम् , **तच्च तुच्छम्** , इदं शरीरं

१. 'संसारस्य परिहरणाय, प्रवृत्तिकारणत्वादिति' इति रा.पा. भाति। २. **तस्य** पूर्वोक्तज्ञानविपरीतस्याज्ञानस्य मानित्वादेः। ३. 'सङ्घातश्चेतना धृतिः' इत्ययमेव गीतापाठः अद्यत्वे सर्वत्रोपलभ्यते।

**ज्ञेयं यत् तत् प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते।**
**अनादिमत् परं ब्रह्म न सत् तन्नासदुच्यते॥ १२॥**

**यथोक्तेन ज्ञानेन ज्ञातव्यं किमित्याकाङ्क्षायामाह—** ज्ञेयं यत्तदित्यादि। **ननु यमाः नियमाश्चामानित्वादयः। न तैर्ज्ञेयं ज्ञायते। न ह्यमानित्वादि कस्यचिद् वस्तुनः परिच्छेदकं दृष्टम्। सर्वत्रैव च यद्विषयं ज्ञानं, तदेव तस्य ज्ञेयस्य परिच्छेदकं दृश्यते। न ह्यन्यविषयेण ज्ञानेनान्यदुपलभ्यते। यथा घटविषयेण ज्ञानेनाग्निः। नैष दोषः, ज्ञाननिमित्तत्वाज्ज्ञानमुच्यत इति ह्यवोचाम। ज्ञानसहकारिकारणत्वाच्च।** ज्ञेयमिति। ज्ञेयं **ज्ञातव्यं यत् तत्** प्रवक्ष्यामि **प्रकर्षेण यथावद् वक्ष्यामि। किम्फलं तदिति प्ररोचनेन श्रोतुरभिमुखीकरणायाह—**(यज्ज्ञात्वेति।) **यद् ज्ञेयं ज्ञात्वा** अमृतम् [१]**अमृतत्वम्**

आनन्दगिरिकृतव्याख्या

**उत्तरग्रन्थमवतारयति—**यथोक्तेनेति। **अमानित्वादीनां ज्ञानत्वमाक्षिपति—**नन्विति। **वस्तुपरिच्छेदकत्वाज्ज्ञानत्वमाशङ्क्याह—** न हीति। **परिच्छेदकत्वाज्ज्ञानत्वं, ज्ञानत्वात् परिच्छेदकत्वमित्यन्योन्याश्रयादित्यभिप्रेत्याह—** सर्वत्रेति। **स्वार्थस्यैव ज्ञानं परिच्छेदकमित्येतद् व्यतिरेकद्वारा विशदयति—** न हीति। **व्यतिरेकदृष्टान्तमाह—** यथेति। **अमानित्वादीनां ज्ञानत्वमाक्षिप्तं प्रतिक्षिपति—** नैष दोष इति। **तत्र हेतुत्वेनोक्तं स्मारयति—**ज्ञानेति। **तेषु ज्ञानशब्दे हेत्वन्तरमाह—**ज्ञानेति। **अमानित्वादीनां ज्ञानत्वमुक्त्वा ज्ञातव्यमवतारयति —**ज्ञेयमिति। **प्रश्नद्वारा ज्ञेयप्रवचनस्य फलमुक्त्वा, प्ररोचनं कृत्वा तेन श्रोतुराभिमुख्यमापादयितुं** [२]**प्रवचनफलोक्तिपरमनन्तरवाक्य-**

भाष्यार्कप्रकाशः

क्षेत्रमिति पूर्वं सौलभ्येनोक्तस्यार्थस्य 'सङ्घातश्चेतना धृति'रिति क्लेशेन कथनं हि दुष्टं पुनरुक्तं च॥ ११॥

**ज्ञेयमिति**। यज्ज्ञेयं ज्ञातुं योग्यं मुमुक्षुभिर्विद्वद्भिरिति वा। यज्ज्ञात्वा विद्वानमृतं मोक्षमश्नुते प्राप्नोति, तद्वस्तु प्रवक्ष्यामि। अनादिमत्परं ब्रह्म ज्ञेयं, तत्परं ब्रह्म सदिति नोच्यते, असदिति च नोच्यते। पूर्वोक्तस्य चास्य च सङ्गतिं दर्शयति— **यथोक्तेनेति। ज्ञानेनेति**। ज्ञानसाधनैरित्यर्थः। तेषामेव पूर्वोक्तत्वात्। ज्ञानसाधनानां ज्ञेयज्ञापकत्वं नास्तीत्याक्षिपति— **नन्विति**। अमानित्वादयो यमा नियमाश्च पूर्वोक्ताः इति शेषः। यमनियमादिभिरात्मविनिग्रहो भवतीत्यात्मविनिग्रहशब्देन यमनियमादयो लक्ष्यन्त इति बोध्यम्। आदिपदादासनप्राणायामादिग्रहणम्। **परिच्छेदकं** भेदकम्। नन्वमानित्वादेः कुतो वस्तुपरिच्छेदकत्वाभावः? अत आह— **सर्वत्रेति**। **तदेव** तद्विषयं ज्ञानमेव। ननु कोऽयं नियमः? अत आह— **न हीति**। तत्र दृष्टान्तमाह— **यथेति**।

**एतेन** ज्ञेयस्य ज्ञानेनोपलभ्यमानत्वात् ज्ञानपरिच्छेद्यत्वमिति **सूचितम्**। घट इहास्तीति ज्ञानं हि पटादिभ्यः देशान्तर-कालान्तरवर्तिघटेभ्यश्च परिच्छिद्य घटं प्रकृतमुपलम्भयति।

**ननु** घटे वर्तमानः शुक्लगुणो नीलघटात् प्रकृतघटं परिच्छिद्य बोधयत्येव। कथमन्यथा विशेषणस्योपाधेर्वा व्यावर्तकत्वं लक्षणं स्यात्? तस्माज्ज्ञानमेव वस्तुनः परिच्छेदकमिति नियमस्यासिद्धिरिति चेत् , **मैवम्** ; तत्रापि घटः शुक्ल इति शुक्लगुणज्ञानस्यैव परिच्छेदकत्वात्। न ह्यज्ञातः शुक्लगुणो घटं परिच्छेत्तुं क्षमते। तस्माद् विशेषणज्ञानस्योपाधिज्ञानस्य च वस्तुपरिच्छेदकत्वमिति कृत्वा ज्ञायमानस्यैव विशेषणस्योपाधेर्वा व्यावर्तकत्वं लक्षणम्। उपाधिविशेषणयोर्ज्ञानेनैव परिच्छेददर्शनाच्च। कथमन्यथा -[३]विशेषणमिदम् , उपाधिरयमिति व्यवहारः स्यात्? तस्माज्ज्ञानमेव ज्ञेयपरिच्छेदकं नामानित्वादिकमिति कृत्वा कथमुक्तम् अमानित्वादिना ज्ञातव्यमिति पूर्वपक्षः। परिहरति तं सिद्धान्ती— **नैष दोष इति**। यथोक्तेन ज्ञानेनेत्यस्य अमानित्वादिसाधनजन्येनेति, अमानित्वादिसाधनसह-कृतेनेति वा ज्ञानेनेत्यर्थात् पूर्वोक्तदोषाभाव इति भावः। प्रेत्युपसर्गस्यार्थमाह— **प्रकर्षेणेति**। यावदर्थमाह— **यथावदिति**। **तत्** प्रवचनं **किम्फलम्** किं फलं यस्य तदिति बहुव्रीहिः। **इति** शङ्कायाम् , **प्ररोचेनेन** उपच्छन्दनेन। **मृतं** मृतिः, तदभावोऽमृतमित्यभिप्रेत्याह—

१. 'अमृतत्वम्' इति क्वचिन्न। २. 'प्ररोचन' इति पा.। ३. विधेयान्वितं सद् व्यावर्तकं विशेषणम्। तदनन्वितं वर्तमानं सद् व्यावर्तकम् उपाधिः। विधेयनियन्त्रितं च विशेषणत्वमुपाधित्वं च। 'नीलो घटो दृष्टः' इत्यत्र नीलत्वं विशेषणम् , 'नीलो घटः स्पृष्टः' इत्यत्र तु उपाधिः। अधिकं लघुचन्द्रिकादौ द्र. पृ. २६४ ।

**अश्नुते, न पुनर्म्रियत इत्यर्थः।** अनादिमद् **आदिरस्यास्तीत्यादिमत् , न आदिमद् अनादिमत्। किं तत्? परं निरतिशयं ब्रह्म, ज्ञेयमिति प्रकृतम्।**

[परकीयव्याख्यानिरसनम]

**अत्र केचिद् अनादि मत्परमिति पदं छिन्दन्ति, बहुव्रीहिणोक्तेऽर्थे मतुप आनर्थक्यमनिष्टं स्यादिति। अर्थविशेषं च दर्शयन्ति— अहं वासुदेवाख्या परा शक्तिर्यस्य तद् मत्परमिति। सत्यमेवम् अपुनरुक्तं स्याद् , अर्थश्चेत् सम्भवति।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

आदिर्न विद्यतेऽस्येति **बहुव्रीहिणोक्तेऽर्थे** आदिमत्त्वप्रतिषेधलक्षणे मतुपः आनर्थक्यं स्यादित्यर्थः।

आनन्दगिरिकृतव्याख्या

**मित्याह—** किमित्यादिना। **तदेव विशिनष्टि—** अनादिमदिति। **आदिमत्त्वराहित्यमव्याकृतस्याप्यस्ति, अतो विशेषं दर्शयति—** किं तदिति। **भोक्तुरपि भोग्यात् परत्वमित्यतो विशिनष्टि—** ब्रह्मेति।

**अनादीत्येकं पदम् , मत्परमिति चापरमिति पदच्छेदान्न पुनरुक्तिरिति मतान्तरमुत्थापयति—** अत्रेति। **एकपदत्वसम्भवे किमिति पदद्वयमित्याशङ्क्याह—** बहुव्रीहिणेति। **आदिरस्य नास्तीति यो बहुव्रीहिणोक्तोऽर्थः, तस्मिन् आदिमत्त्वनिषेधे नास्ति मतुपोऽर्थवत्त्वमिति मतुबानर्थक्यमनिष्टं स्यादिति मत्वा पदं छिन्दन्तीति पूर्वेण सम्बन्धः। आदिरस्य नास्तीत्यनादीत्युक्त्वा मत्परमित्युच्यमाने कोऽर्थः स्यादित्याशङ्क्याह—** अर्थेति। **उक्तव्याख्यानस्यायुक्तत्वान्नायं पुनरुक्तिसमाधिरित्याह—** सत्यमिति। **अर्थासम्भवं समर्थयते—**

भाष्यार्कप्रकाशः

**अमृतमिति**। प्रकृतदेहपरित्यागरूपमरणस्यावर्जनीयत्वादाह— **पुनर्न म्रियत इति**। मुच्यत इति यावत्। पुनर्जन्मप्रयुक्तत्वात् पुनर्मरणस्य, मुक्तौ पुनरावृत्त्यभावेन पुनर्जन्माभावाच्चेति भावः।

**आदिः** कारणं, 'तदस्यास्त्यस्मिन्' इति मतुपि **आदिमत्**। ततो नञ्समासे **अनादिमत्** , कारणरहितमित्यर्थः। अजमिति यावत्। **ज्ञेयमिति**। क्षेत्रज्ञलक्षणं ब्रह्मैवात्र ज्ञेयमित्युच्यत इत्यर्थः। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति श्रुतेरिति भावः।

**ननु** क्षेत्रज्ञो ज्ञातैवेति पूर्वमुक्तम् , कथमधुना तस्य ज्ञेयत्वमिति चेत्? **नैष दोषः,** ज्ञानस्वरूपे क्षेत्रज्ञे ज्ञातृत्वस्याप्ययुक्तत्वात् , तद्वत् ज्ञेयत्वस्याप्यौपचारिकत्वात्। **ननु** 'नान्योऽतोऽस्ति द्रष्टे'ति द्रष्ट्रन्तरनिषेधादेकस्यैवात्मनः कथं ज्ञातृत्वं ज्ञेयत्वं च, कर्तृकर्मविरोधादिति चेत्? **मैवम्** ; ज्ञाता प्रमाता, स हि स्वस्वरूपमात्मानं क्षेत्रज्ञं ज्ञानस्वरूपं संस्कृतमनसा जानातीति एकस्यैवात्मनोऽन्तःकरणावच्छिन्नत्वरूपेण ज्ञातृत्वम् , अन्तःकरणवृत्त्यवच्छिन्नत्वरूपेण ज्ञानकरणत्वम् , अन्तःकरणोपहितत्वरूपेणाविद्योपहितत्वरूपेण वा ज्ञेयत्वं, स्वतस्तु ज्ञानत्वमित्यभ्युपगमात्। तस्मात् प्रमात्रा संस्कृतमनसा ज्ञातव्यमेव क्षेत्रज्ञलक्षणं ब्रह्म।

**ज्ञेयमिति प्रकृतमिति**। अस्मिन् प्रकरणे ज्ञेयत्वेन निर्दिष्टमित्यर्थः।

**ननु** न आदिर्यस्य तदनादीति बहुव्रीहिणैव मतुबर्थस्योक्तत्वात् 'न कर्मधारयान्मत्वर्थीयः' इति शास्त्राद् व्यर्थोऽत्र मतुप्प्रत्ययः। 'तत्पुरुषः समानाधिकरणः कर्मधारयः' इति यत्र समानाधिकरणं पदद्वयमस्ति तत्र कर्मधारयसमासमकृत्वा बहुव्रीहिसमासे कृते सत्येव मत्वर्थलाभात् कर्मधारयान्मत्वर्थीयप्रत्ययो न कर्तव्यः, यथा पीताम्बरः इति बहुव्रीहिणैव पीताम्बरवत्त्वरूपेऽर्थे सिद्धे सति, पीतं च तदम्बरं च पीताम्बरमिति कर्मधारयं कृत्वा, पीताम्बरमस्यास्तीति पीताम्बरवानिति मतुब्विधानं व्यर्थम् , तद्वत् न आदिरनादिरनादिरस्यास्तीत्यनादिमदिति मतुब्विधानं व्यर्थमिति भावः। इमं दोषमपाकर्तुं च अनादीत्येव पदविभागः कर्तव्य इत्याक्षिपति— **अत्र केचिदिति**। ननु मत्परमित्यस्य कोऽर्थस्त्वन्मते? अत आह— **अर्थविशेषमिति**। तमेव दर्शयति—**अहमिति**। अहं परा यस्य तन्मत्परम्। वासुदेव ईश्वरः। स हि ब्रह्मण ईशनरूपा परा शक्तिः। ब्रह्मण एव सशक्तिकस्येश्वरत्वादीश्वरस्य ब्रह्मशक्तित्वेन निर्देशः। परिहरति सिद्धान्ती— **सत्यमिति**। मत्परमित्यस्य त्वदुक्तार्थः सम्भवति चेत् तव मते पुनरुक्तिदोषो न स्यात्। अर्थस्तु नैव सम्भवति।

**न त्वर्थः सम्भवति, ब्रह्मणः सर्वविशेषप्रतिषेधेनैव विजिज्ञापयिषितत्वात् - न सत् तन्नासदुच्यत इति। विशिष्टशक्तिमत्त्वप्रदर्शनं विशेषप्रतिषेधश्चेति विप्रतिषिद्धम्। तस्मान्मतुपो बहुव्रीहिणा समानार्थत्वेऽपि प्रयोगः श्लोकपूरणार्थः।**

**अमृतत्वफलं ज्ञेयं मयोच्यत इति प्ररोचनेनाभिमुखीकृत्याह— न सत् तज्ज्ञेयमुच्यत इति, नापि असत् तदुच्यते।**

**ननु महता परिकरबन्धेन कण्ठरवेणोद्घुष्य 'ज्ञेयं प्रवक्ष्यामी'ति, अननुरूपमुक्तम्— न सत् तन्नासदुच्यत इति? न ; अनुरूपमेवोक्तम्। कथम्? सर्वासु ह्युपनिषत्सु ज्ञेयं ब्रह्म 'नेति नेति' (बृ.उ.२.३.६) 'अस्थूलमनणु' (बृ.उ. ३.८.८) इत्यादिविशेषप्रतिषेधेनैव निर्दिश्यते, न 'इदं तद्' इति, वाचोऽगोचरत्वात्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

आत्मप्रकाशत्व[शस्य] सिद्धत्वान्नात्मप्रकाशनाय विधिमुखेन उपदेशो युक्तः। किन्तु अध्यस्ता[तद्]धर्मनिवृत्तये निषेधमुखेनैवोपदेशो युक्त इत्युक्तम्। (तत्र निर्दिष्टं सञ्जय इति।) (तत्र निर्दिष्टं सञ्जयति।)[तत्र निर्दिष्टं प्रपञ्चयति—]

आनन्दगिरिकृतव्याख्या

ब्रह्मण इति। **तथापि विशिष्टशक्तिमत्त्वं किं न स्यादित्याशङ्क्याह—** विशिष्टेति। **तथापि मतुपो बहुव्रीहिणा तुल्यार्थस्य कथं नानर्थक्यम्? तत्राह—** तस्मादिति।

**'अनादिमत्परं ब्रह्मे'त्यत्र पक्षान्तरं प्रतिक्षिप्य स्वपक्षः समर्थितः। सम्प्रति ब्रह्मणो ब्रह्मत्वादेव कार्यकारणात्मकत्वप्राप्तौ उक्तानुवादद्वारा 'न सदि'त्याद्यवतारयति—** अमृतत्वेति। सत् **कार्यमभिव्यक्तनामरूपत्वात् ,** असत् **कारणं तद्विपर्ययादिति विभागः।**

[१]**ज्ञेयप्रवचनमनिर्वाच्यविषयत्वात् प्रक्रमप्रतिकूलमित्याक्षिपति—** नन्विति। **निर्विशेषस्य वस्तुनो ज्ञेयत्वात् तद्विषयं प्रवचनं प्रक्रमानुकूलमित्युत्तरमाह—**नेत्यादिना। [२]**अनिर्वाच्यत्वे 'न सत् तन्नासद्' इत्युच्यमाने कथमिदमनुरूपमिति पृच्छति—**कथमिति। **ब्रह्मात्मप्रकाशस्य सिद्धत्वात् तदर्थं विधिमुखेनोपदेशायोगाद् , अध्यस्ततद्धर्मनिवृत्तये निषेधद्वारोपदेशस्य वेदान्तेषु प्रसिद्धेरारोपितविशेषनिषेधरूपमिदं प्रवचनमुचितमिति परिहरति—** सर्वास्विति। **ज्ञेयस्य ब्रह्मणो विधिमुखोपदेशायोगे हेतुमाह—** वाच इति।

भाष्यार्कप्रकाशः

तत्र हेतुमाह— **ब्रह्मण इति**। निर्विशेषस्यैव ब्रह्मण इह ज्ञापयितुमिष्टत्वादिति। कथमिदं ज्ञायते? अत आह— **न सदिति**। सत्त्वासत्त्वविशेषशून्यस्यैव ब्रह्मणः इहोच्यमानत्वादित्यर्थः। ननु निर्विशेषमेव ब्रह्म मत्परं भवतु , को दोषस्तत्राह— **विशिष्टेति**। ईश्वराख्यशक्तिमत्त्वरूपविशेषप्रदर्शनं, विशेषप्रतिषेधश्चेति विप्रतिषिद्धं विरुद्धम्। **तस्मादिति**। त्वदुक्तार्थस्य विरुद्धत्वेनासम्भवादित्यर्थः। अनादि परं ब्रह्मेत्युक्तौ श्लोको न पूर्येताष्टाक्षरपादत्वादनुष्टुभः इति हेतोः अनादिमत् परं ब्रह्मेत्युक्तम्।

न च - 'अनादि परमं ब्रह्मे'त्युक्तौ श्लोकः पूर्येतेति - वाच्यम् ; आर्षेयग्रन्थेषु 'स्थितस्य गतिश्चिन्तनीये'ति न्यायेन पाठान्तरकल्पनाशङ्कायाः अकर्तव्यत्वात्। 'परं ब्रह्मे'त्यनेनैवाभीष्टसिद्धौ 'परमं ब्रह्मे'ति पाठस्यापि गौरवावहत्वेन दुष्टत्वाच्च।

अमृतत्वं मोक्षः फलं यस्मात् तद् **अमृतत्वफलम्**। यज्ज्ञानादमृतत्वं भवति तदित्यर्थः। **अभिमुखीकृत्येति**। श्रोतारमिति शेषः। आह भगवानिति शेषः।

'ज्ञेयं प्रवक्ष्यामी'त्युद्घुष्येत्यन्वयः। उद्घोषं कृत्वा **उद्घुष्य**। 'न सत्तन्नासदुच्यते' इत्यननुरूपमुक्तमिति पूर्वपक्षः। नेति परिहारः। **कथमिति**। कथमनुरूपमुक्तमिति प्रश्नः। उत्तरमाह—**सर्वास्विति**। **हि** यस्मात् सर्वासूपनिषत्सु निर्विशेषमेव ब्रह्म निर्दिश्यते। श्रुतिमेव दर्शयति— **नेतीति**। **विशेषाः** स्थूलत्वाणुत्वह्रस्वत्वादयः। तेषां प्रतिषेधेन, निषेधमुखेनेत्यर्थः। 'इदं तदि'ति तु न निर्दिश्यते, कुतः? **अगोचरत्वाद्** अविषयत्वाद् वाचः, 'यतो वाचो निवर्तन्ते' इति श्रुतेरिति भावः।

---

१. 'सत् असत् इति वा नोच्यते' इति तत्प्रवचनमित्यर्थः। २. वक्तुमशक्यत्वे इत्यर्थः। 'न सत् नासत् उच्यते' इत्युक्ते वागगोचरत्वपर्यवसानादिति भावः।

[ज्ञेयस्य वागगोचरत्वोपपादनम्]

**ननु न तदस्ति यद्वस्तु अस्तिशब्देन नोच्यते। अथास्तिशब्देन नोच्यते, नास्ति तज्ज्ञेयम्। विप्रतिषिद्धं च— 'ज्ञेयं तद् , अस्तिशब्देन नोच्यते' इति च। न तावन्नास्ति, नास्तिबुद्ध्यविषयत्वात्। ननु सर्वा बुद्धयः अस्तिनास्तिबुद्ध्यनुगता एव। तत्रैवं सति ज्ञेयमपि अस्तिबुद्ध्यनुगतप्रत्ययविषयं वा स्यात् , नास्तिबुद्ध्यनुगतप्रत्ययविषयं वा स्यात्? न ; अतीन्द्रियत्वेनोभयबुद्ध्यनुगतप्रत्ययाविषयत्वात्। यद्धीन्द्रियगम्यं वस्तु घटादिकं तदस्तिबुद्ध्यनुगतप्रत्ययविषयं वा**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**ननु न तदस्तीति**। यद् वस्तु अस्तिशब्देन नोच्यते तद् नास्ति, यथा नृश्रृङ्गम् , तथेति। एवं च सति अस्तिशब्देन नोच्यते चेद् ब्रह्म तदपि नास्त्येवेत्यर्थः। ब्रह्म अवस्तु स्याद् , अस्तिशब्दावाच्यत्वात् , नृश्रृङ्गवत्यत्रादिप्रयोजकत्वमाह— **न तावन्नास्तीति**। नास्तिबुद्ध्यविषयत्वमेव चोद्यपूर्वकं विवृणोति— **ननु सर्वा बुद्धय इत्यादिना।**

आनन्दगिरिकृतव्याख्या

**ब्रह्मणोऽस्तिशब्दावाच्यत्वे नरविषाणवन्नास्तित्वमित्यनिष्टमाशङ्कते—**नन्विति। **एवमुत्सर्गेऽपि ब्रह्मणि किमायातमित्याशङ्क्याह—**अथेति। **ज्ञेयस्यास्तिशब्दावाच्यत्वे व्याघातश्चेत्याह—** विप्रतिषिद्धं चेति। **अस्तिशब्दावाच्यत्वादवस्तु ब्रह्मेत्यत्राप्रयोजकत्वमाह—** न तावदिति। **नास्तिबुद्धिविषयत्वमेवावस्तुत्वे निमित्तम्। अतस्तदभावाद् ब्रह्मणो नावस्तुतेति। एतदेव व्यक्तीकर्तुं चोदयति—** नन्विति। **सर्वासां धियामस्तिधीत्वेन नास्तिधीत्वेन वाऽनुगतत्वेऽन्यतरधीगोचरत्वाभावे ब्रह्मणोऽनिर्वाच्यत्वं दुर्वारमिति फलितमाह—**तत्रेति। **ब्रह्मणो घटादिवैलक्षण्यादुभयबुद्ध्यविषयत्वेऽपि नानिर्वाच्यतेत्याह—**नेत्यादिना। **घटादेरिन्द्रियग्राह्यस्योभयबुद्धिविषयत्वेऽपि ब्रह्मणस्तदग्राह्यस्य नोभयधीविषयत्वम् , तथापि नानिर्वाच्यत्वं, सच्चिदेकतानस्य शब्दप्रमाणाद् अविषयत्वेन दृष्टत्वादित्युक्तमेव प्रपञ्चयति—**यद्धीति।

भाष्यार्कप्रकाशः

अननुरूपत्वमेव स्फुटयति पूर्ववादी— **नन्विति**। यद् वस्तु अस्तीति शब्देनोच्यते, तद् वस्तु अस्ति, विद्यत एव। तद् विद्यमानं वस्तु नास्तीति, ज्ञेयमिति च विप्रतिषिद्धम्। तथा ज्ञेयं तदस्ति, अस्तिशब्देन नोच्यत इति च विप्रतिषिद्धम्। अयमर्थः - यत्परं ब्रह्म ज्ञेयमिति वदसि, तद् वस्त्वस्ति वा न वा? अस्तित्वे सच्छब्दवाच्यस्य ज्ञेयस्य तस्य ब्रह्मणः कथं सच्छब्दाविषयत्वम्? वदसि हि त्वं न सत् तदिति? द्वितीये - असतस्तस्य ब्रह्मणः कथं ज्ञेयत्वम्? न हि शशश्रृङ्गादिकं ज्ञातुं शक्यते, युज्यते वा। तस्माद् यदि ज्ञेयं ब्रह्मास्ति, तर्हि सच्छब्देनोच्यत एव, यदि ब्रह्म नास्ति, तर्हि तज्ज्ञेयं न भवत्येवेति कथं ज्ञेयस्य ब्रह्मणोऽस्तिशब्दाविषयत्वं, कथं वा असतो ब्रह्मणो ज्ञेयत्वमिति। परिहरति—**नेति**। ब्रह्मण इति शेषः। अस्तिनास्तिबुद्ध्योः **अविषयत्वाद्** अगोचरत्वात्। ब्रह्म हि घटवदस्तीति वा, शशश्रृङ्गमिव नास्तीति वा वक्तुं न शक्यते, सदसद्बुद्ध्यविषयत्वात्। एवं सत्त्वासत्त्वरहितत्वादेव निर्विशेषत्वं ब्रह्मणः। अन्यथा घटवत् सविशेषमेव स्यात् सच्छब्दवाच्यत्वे सति ब्रह्म।

ननु यद्यस्तिबुद्धेर्नास्तिबुद्धेश्चाविषयं ब्रह्म, तर्हि ब्रह्मबुद्धेरप्यविषयमेव। अस्तिनास्तिबुद्ध्यननुगतबुद्धेरेवाभावादिति शङ्कते— **नन्विति**। सर्वत्र सद्बुद्धिरसद्बुद्धिश्चेति बुद्धिद्वयमेवोपलभ्यते। घटबुद्धिपटबुद्धिकुड्यबुद्धिकुसूलबुद्धिशशश्रृङ्गबुद्धिनरश्रृङ्गबुद्ध्यादयस्तु सद्बुद्धिविशेषा असद्बुद्धिविशेषा वा भवन्तीति सद्बुद्ध्या असद्बुद्ध्या वानुगतत्वं घटबुद्ध्यादीनाम्। एवं सति ब्रह्मबुद्धिरपि सद्बुद्ध्यनुगता वा स्याद्, असद्बुद्ध्यनुगता वा स्यान्न त्वतिरिक्ता। सदसद्बुद्ध्यननुगतबुद्धेरेवाभावात्। तथा च ज्ञेयं ब्रह्मापि सद्बुद्ध्यनुगतब्रह्मबुद्धिविषयं वा स्याद् असद्बुद्ध्यनुगतब्रह्मबुद्धिविषयं वा स्यादिति कृत्वा सद्बुद्धेरसद्बुद्धेर्वा विषयमेव स्याद् ब्रह्म न त्वविषयम्। अन्यथा ब्रह्मबुद्धेरप्यविषयत्वेन ज्ञेयं ब्रह्मेति वक्तुमशक्यत्वादिति भावः। अमुं पूर्वपक्षं परिहरति—**नेति**। **अतीन्द्रियत्वेने**न्द्रियागोचरत्वेन हेतुना। **उभयबुद्धी** सदसद्बुद्धी, तदनुगतः प्रत्ययो ब्रह्मबुद्धिः, तस्याः अविषयत्वात्। तदेवोपपादयति— **यदिति**। हिः प्रसिद्धौ। यदिन्द्रियगम्यं घटादिकं वस्तु तदस्तिबुद्ध्यनुगतस्य सद्बुद्ध्यनुगतस्य प्रत्ययस्य घटादिबुद्धेर्विषयं वा स्यात्। नास्तिबुद्धिरसद्बुद्धिः, तदनुगतस्य प्रत्ययस्य घटादिबुद्धेर्विषयं वा स्यात्। घटस्य भावाभावाभ्यामुभयबुद्ध्यनुगतप्रत्ययविषयत्वमिति भावः। इदं तु ज्ञेयमतीन्द्रियत्वेन हेतुना

**स्यात् , नास्तिबुद्ध्यनुगतप्रत्ययविषयं वा स्यात्। इदं तु ज्ञेयम् अतीन्द्रियत्वेन शब्दैकप्रमाणगम्यत्वान्न घटादिवद् उभयबुद्ध्यनुगतप्रत्ययविषयमित्यतो न सत् तन्नासदित्युच्यते।**

भाष्यार्कप्रकाशः

घटवदुभयबुद्ध्यनुगतप्रत्ययविषयं न भवति। अस्यातीन्द्रियत्वे हेतुमाह— **शब्दैकप्रमाणगम्यत्वादिति**। 'शास्त्रयोनित्वादि'त्यधिकरणे स्थापितं ब्रह्मणः शब्दप्रमाणैकवेद्यत्वम्। **अत इति**। सदसद्बुद्ध्यनुगतप्रत्ययाविषयत्वाद् ब्रह्मण इत्यर्थः। तद् ब्रह्म सदिति नोच्यते, असदिति च नोच्यते, सद्बुद्धिविषयं हि वस्तु सदित्युच्यते, असद्बुद्धिविषयं त्वसदित्युच्यते, उभयबुद्ध्यविषयत्वाद् ब्रह्म नोभयथोच्यत इति भावः।

**ननु** ज्ञेयं ब्रह्म किं ब्रह्मबुद्धिविषयम् उत तदविषयम्? आद्ये - सद्बुद्धिविषयत्वमसद्बुद्धिविषयत्वं वा प्राप्तं ब्रह्मणः। द्वितीये - ब्रह्मबुद्ध्यविषयं तद् वस्तु ब्रह्म कथं स्यात्? न हि घटबुद्ध्यविषयं वस्तु पटः घटः स्यादिति चेत्? **उच्यते**— यदि ब्रह्म इन्द्रियगम्यं स्यात् तर्हि ब्रह्मबुद्धिरुभयबुद्ध्यनुगतप्रत्ययः स्यात्। न तु तथाऽस्ति। तस्मान्न सद्बुद्धिविशेषो नाप्यसद्बुद्धिविशेषो भवति ब्रह्मबुद्धिरिति ब्रह्मबुद्धिविषयं तद् वस्तु ब्रह्म भवत्येवेति।

**ननु** यद् वस्तु सद्बुद्धेरसद्बुद्धेश्चाविषयं, तद् वस्तु मिथ्याबुद्धिविषयमेव, सदसदनिर्वचनीयत्वस्यैव मिथ्यात्वादिति किं ब्रह्म मिथ्याबुद्धिविषयं मायादिवदिति चेत्? **मैवम्** ; मिथ्याबुद्धेरपि वस्तुतोऽसद्बुद्धिविशेषत्वात्। यद्वा मिथ्याबुद्धेरप्यविषयमेव ब्रह्म, ब्रह्मबुद्धेः मिथ्याबुद्धित्वाभावात् तद्विशेषत्वाभावाच्च।

**ननु** 'नासतः' इति श्लोकभाष्ये 'सर्वत्र सद्बुद्धिरसद्बुद्धिश्चेति बुद्धिद्वयोपलब्धे'रित्युक्तमाचार्यैः, इह तु सद्बुद्धिरसद्बुद्धिर्ब्रह्मबुद्धिर्मिथ्याबुद्धिरिति बुद्धिचतुष्टयमुच्यते त्वया परस्परानुगतं, तत एको विरोधः। सर्वं जगदसद्बुद्धिविषयं, ब्रह्मैकमेव सद्बुद्धिविषयमिति 'अविनाशी'ति श्लोकभाष्ये आचार्यैरुक्तम् , तैरेवेह न सद्बुद्धिविषयं ब्रह्मेत्युच्यत इति द्वितीयः। घटादेः सद्बुद्धिविषयत्वमुच्यत इति तृतीयः। 'मनसैवानुद्रष्टव्यम्' इति मनइन्द्रियगम्यस्य ब्रह्मणो धर्मादिवदतीन्द्रियत्वमुच्यत इति चतुर्थः। यद्यतीन्द्रियत्वेन ब्रह्म सदसद्बुद्ध्यविषयं स्यात् , तर्हि धर्माद्यपि शास्त्रैकप्रमाणत्वेनातीन्द्रियत्वात् सदसद्बुद्ध्यविषयमेव स्यादिति ब्रह्मणोऽसदृशस्य धर्मादिसादृश्यं स्यादिति पञ्चमः। सद्रूपस्य ब्रह्मणः सच्छब्दावाच्यत्वमुच्यत इति षष्ठः। 'अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदु'रित्यादिश्रुतिविरोधः सप्तमः इति चेत्?

**उच्यते**— यत् कालत्रयाबाध्यं नित्यं वस्तु , तत् सत् , अन्यदसदिति बुद्ध्या 'नासतः' इत्यादौ ब्रह्मैव सत् , जगदसदित्युक्तम्। तथैव सद्बुद्धिरसद्बुद्धिश्चेति बुद्धिद्वयमेवोपलभ्यत इत्युक्तम्। दृग्दृश्यभूतब्रह्मजगदतिरिक्तपदार्थासत्त्वात् तद्विषयस्य बुद्धिद्वयस्यैवोपलम्भात्। मिथ्याबुद्धेश्चासद्विषयत्वादसद्बुद्धित्वमेव। ब्रह्मबुद्धेश्च सद्विषयत्वात् सद्बुद्धित्वमेव। ततो न बुद्धिचतुष्टयप्रसङ्गः, विषयचतुष्टयाभावात्। इदमेवाभिप्रेत्य श्रुत्याऽपि ब्रह्मणोऽस्तित्वमुच्यते, सद्रूपत्वं च। इह तु यदिन्द्रियगम्यं तदेव वस्तु सद्वाऽसद्वा भवतीत्युच्यते। तथा च त्रिकालाबाध्यत्वरूपपूर्वोक्तसत्तातः इन्द्रियगम्यत्वरूपा इहोक्ता सत्ता भिद्यत एव। इन्द्रियगम्यत्वरूपायाः एतत्सत्तायाः ब्रह्मण्यभावाद् घटादिषु सत्त्वाच्च, ब्रह्मणः सद्बुद्ध्यविषयत्वं, घटादेस्तद्विषयत्वं चोच्यत इति न पूर्वोत्तरविरोधः। मनसोऽनिन्द्रियत्वाद् , इन्द्रियत्वे वा [1]असंस्कृतमनसो ब्रह्मदर्शनेऽकरणत्वाच्चातीन्द्रियत्वमुच्यते ब्रह्मणः। धर्मादेरतीन्द्रियत्वांशे ब्रह्मसादृश्ये सत्यपि त्रिकालाबाध्यत्वांशे तन्नास्तीति न ब्रह्मणोऽसदृशत्वभङ्गप्रसङ्गः। न हि शास्त्रैकवेद्यत्वे सति ब्रह्मसदृशः स्यादिति स्वर्गादिलोको ऽस्माकमिन्द्रियगोचरो भवितुमर्हति। इन्द्रियगम्यवस्तुवाचिना सच्छब्देनातीन्द्रियं ब्रह्म नोच्यत इति न ब्रह्मणः सद्रूपत्वासम्भवः, त्रिकालाबाध्यचैतन्यवाचिना सच्छब्देनोच्यमानत्वाद् ब्रह्मण इति।

**ननु** 'तन्नास्ति ज्ञेयं भवति, ज्ञेयं तदस्ति अस्तिशब्देन नोच्यते'[2] इति विप्रतिषिद्धमिति यदुक्तं तस्य का गतिरित्यत आह—

१. असंस्कृतमनोभिन्नेन्द्रियागम्यत्वमिहातीन्द्रियत्वमिति परिष्कार्यमिति भावः। ब्रह्म स्वयंप्रकाशत्वान्न करणविषय इति वा। द्र.पृ. ९०। २. 'न सत्' इत्यस्य नास्तीति विवरणम्। नास्तीति, ज्ञेयमिति च एको विप्रतिषेधः। ज्ञेयं तदस्ति, अस्तिशब्देन नोच्यत इति चापरो विप्रतिषेधः इति योजना।

**यत्तूक्तम् - विरुद्धमुच्यते 'ज्ञेयं तत्' 'न सत् तन्नासदुच्यते' इति। न विरुद्धम् ; 'अन्यदेव तद् विदितादथो अविदितादधि' (के.उ.१.३) इति श्रुतेः। श्रुतिरपि विरुद्धार्थैति चेद्, यथा यज्ञाय शालामारभ्य 'को हि तद् वेद यद्यमुष्मिन् लोकेऽस्ति वा न वेति' (तै.सं.६.१.१) इत्येवमिति चेत्? न ; विदिताविदिताभ्यामन्यत्वश्रुतेः अवश्य-विज्ञेयार्थप्रतिपादनपरत्वात्। 'यद्यमुष्मिन्' इत्यादि तु विधिशेषोऽर्थवादः[१]।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

विदिताविदितान्यत्वाभिधानेन श्रुत्वा[श्रुत्या] प्रतिपाद्यस्य ज्ञेयत्वमुक्तम्। ततः प्रमाणसिद्धत्वान्न विरोध इत्याह— **न विरुद्धमिति।** विरुद्धार्था श्रुतिरपि न प्रमाणमित्यत्रोदाहरणमाह— **यथा यज्ञायेति।** भेदे सति ज्ञेयत्वमज्ञेयत्वं वा स्यात्। अतो ज्ञेयत्वाज्ञेयत्वप्रतिषेधेनात्मभूतब्रह्मप्रतिपादने(न) श्रुतेस्तात्पर्यान्न विरुद्धार्थत्वमित्याह—**न, विदिताविदितेति।** दृष्टान्तेऽपि स्वार्थे तात्पर्याभावान्न विरुद्धार्थत्वमित्याह— **यद्यमुष्मिन्निति।**

आनन्दगिरिकृतव्याख्या

**परोक्तं विरोधमनुवदति—** यत्त्विति। **श्रुत्यवष्टम्भेन निराचष्टे—** न विरुद्धमिति। **साऽपि विरुद्धार्थत्वान्न मानम् , बोधकस्या-विरोधापेक्षत्वादिति शङ्कते—** श्रुतिरिति। **तस्या विरुद्धार्थत्वेनाप्रामाण्ये दृष्टान्तमाह—** यथेति। **'प्राचीनवंशं करोती'ति पारलौकिकफल-यज्ञानुष्ठानार्थं शालानिर्माणं प्रस्तुत्य 'को हि तद् वेद' इत्याद्या परलोकसत्त्वे सन्दिहाना यथा विरुद्धार्था श्रुतिरप्रमाणम् , एवं विदिता-विदितान्यत्वश्रुतिरपीत्यर्थः। नेयं श्रुतिर्विरुद्धार्थत्वेनामानतया हातव्या, ब्रह्मण्यद्वितीये [२]प्रत्यक्ताप्रतिपादनेन मानत्वादित्युत्तरमाह—** न, विदितेति। **यत्तु विरुद्धार्थत्वे 'को हि' इत्युदाहृतम् , तदसद् , अर्थवादस्य विधिशेषस्य स्वार्थेऽतात्पर्यादित्याह—** यदीति।

भाष्यार्कप्रकाशः

**यत्त्विति**। ज्ञेयं तन्न सत् , तत् नासदुच्यत इति विरुद्धमुच्यत इति यत्तूक्तं तन्न विरुद्धमित्यन्वयः। अविरुद्धत्वे श्रुतिं प्रमाणयति— **अन्यदिति**। तद् ब्रह्म विदितादन्यद्, अविदिताच्चान्यदित्यर्थः। विदिताविदिताभ्यां तत् पृथक्, बोधस्वरूपकमिति भावः।

अतीन्द्रियत्वेन अस्तिनास्तिशब्दाभ्यां यन्नोच्यत इति वयं ब्रूमः, तद् ब्रह्म यदि ज्ञेयं स्यात् तर्हि विरुद्धवादः स्यात् ; न तु तज्ज्ञेयम् , किन्तु ज्ञानमेव। ज्ञेयत्वे सति ब्रह्मणः केनचिद् विदितत्वमेव स्याद् अथवा केनचिदविदितत्वं स्यात्। यथा ज्ञेयो घटः केनचिद् विदितः, केनचिदतिबालेनाविदितश्च भवति। ब्रह्म तु न केनापि विदितम् , नाप्यविदितम्। तस्मान्न ज्ञेयं ब्रह्म। अत्रास्य ज्ञेयत्ववचनं त्वौपचारिकमित्यभिसन्धिः। एवं ब्रह्मणो ज्ञेयत्वेऽसिद्धे अविद्यमानस्य कथं ज्ञेयत्वम्? ज्ञेयस्य वा कथमविद्यमानत्वम्? इति विरोधद्वयमपास्तम्। अनया च 'अन्यदेवे'ति श्रुत्या अतीन्द्रियत्वेन सदसच्छब्दवाच्यमपि तद् ब्रह्म ज्ञानस्वरूपत्वाद् विद्यमानमेव। ज्ञानं हि त्रिकालाबाध्यमिति ज्ञायते। न च - यदि ज्ञानं सर्वदाऽस्ति तर्हि घटादयः सर्वदा भासेरन्निति - वाच्यम् ; ज्ञानं हि स्वविषयं सर्वमवभासयत् सत् स्वयमवभासते। घटादयो विषयास्तु न सर्वदा ज्ञानस्य विषया भवन्ति, येन सर्वदा घटादिस्फुरणं स्यात्। किन्तु कदाचित् किञ्चिदेव ज्ञानस्य विषयो भवति। यथेदानीं घटः क्षणान्तरे पटः क्षणान्तरे पुस्तकं निद्रायामज्ञानमित्येवम्। तस्माद् विषयाणां क्षणिकत्वेऽपि विषयिणो ज्ञानस्य त्रिकालाबाध्यत्वलक्षणं सत्यत्वमस्त्येव। अत एव – 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति श्रुतिरुपपद्यते। तदेव ज्ञानं ब्रह्म। न तु ज्ञेयमिति।

ननु विरुद्धार्थत्वाच्छ्रुतिरप्यप्रमाणमेवेति शङ्कते— **श्रुतिरपीति**। यज्ञाय शालामारभ्य प्रवृत्ता 'अन्तर्हितो हि देवलोको मनुष्य-लोकान्नास्माल्लोकात् प्रे[स्वे]तव्यमिवेत्याहुः को हि तद्वेद यद्यमुष्मिन् लोकेऽस्ति वा न वेति' इति श्रुतिः संशयात्मकत्वाद् विरुद्धार्था यथा, तद्वद् 'अन्यदेवे'ति श्रुतिरपि विरुद्धार्थैति चेत् , मैवम् वक्तव्यमिति शेषः। ब्रह्म प्रतिपादयितुं प्रवृत्तत्वात् प्रकृतश्रुतेरित्याह— **विदितेति**। अवश्यविज्ञेयार्थो ब्रह्म। ननु 'यद्यमुष्मिन्' इति श्रुतिरपि ज्ञेयार्थप्रतिपादनपरैवेत्यत आह— **यदीति**। विधेर्यज्ञविधेः शेषभूतो

१. 'दिक्ष्वतीकाशान् करोति'(तै.सं.६.१.१) इति विधेः शेषोऽयम्। २. प्रत्यगात्मतेत्यर्थः। ममेदं विदितम् , इदमविदितमिति स्वात्मानमपेक्ष्यैव विदिताविदितत्वे भवतः इति ताभ्यामन्यत्वोक्तौ स्वात्मत्वमेव पर्यवस्यतीति भावः।

**उपपत्तेश्च, सदसदादिशब्दैर्ब्रह्म नोच्यत इति। सर्वो हि शब्दोऽर्थप्रकाशनाय प्रयुक्तः श्रूयमाणश्च श्रोतृभिः जातिक्रियागुणसम्बन्धद्वारेण सङ्केतग्रहणसव्यपेक्षोऽर्थं प्रत्याययति, नान्यथा, अदृष्टत्वात्। तद्यथा— गौः अश्व इति वा जातितः, पचति पठतीति वा क्रियातः, शुक्लः कृष्ण इति वा गुणतः, धनी गोमानिति वा सम्बन्धतः। न तु ब्रह्म जातिमत् , अतो न सदादिशब्दवाच्यम्। नापि गुणवद् येन गुणशब्देनोच्येत, निर्गुणत्वात्। नापि क्रियाशब्दवाच्यं निष्क्रियत्वात् , 'निष्कलं निष्क्रियं शान्तम्' श्वे.उ.६.१९) इति श्रुतेः। न च सम्बन्धि, एकत्वाद् अद्वयत्वाद् अविषयत्वाद्**

अनुभूतिस्वरूपाचार्यटिप्पणम्

यत् शब्दवाच्यं तद् जात्यादिमद् दृष्टम् । तद्व्यापकं व्यावर्तमानं ब्रह्मणः शब्दवाच्यत्वमपि व्यावर्तयतीत्याह— **उपपत्तेश्चेत्यादिना।** न तु ब्रह्म जातिमद् 'अगोत्रमवर्णम्' इति श्रुतेरित्यर्थः॥ १२॥

आनन्दगिरिकृतव्याख्या

**यत्र जात्यादिमत्त्वं तत्र**[1] **वाच्यत्वम् , यथा गवादौ, न ब्रह्मणि जात्यादिमत्त्वम् , अतस्तस्यावाच्यत्वाद् निषेधेनैव बोध्यत्वमित्याह—** उपपत्तेश्चेति। नोच्यत इति **निषेधेनैव तस्योपदेश इति शेषः। जात्यादिमतोऽर्थस्यैव वाच्यत्वम् , तत्रैव सङ्गतिग्रहादिति प्रपञ्चयति—** सर्वो हीति। **अश्रुतस्य जात्यादिद्वारेणाज्ञातसङ्गतेर्वा शब्दस्य न बोधकत्वम् , अदृष्टेरित्याह—** नान्यथेति। **जात्यादेः सच्छब्दविषयत्वमुदाहरति—** तद्यथेत्यादिना। **ब्रह्मणस्तु** [2]**'अगोत्रमवर्ण'मित्यादिश्रुतेर्जात्यादिमत्त्वाभावान्न शब्दवाच्यतेत्याह—** न त्विति। **'केवलो निर्गुणश्चे'ति श्रुतेर्गुणद्वारा ब्रह्मणो न वाच्यतेत्याह—** नापीति। **निष्क्रियत्वे मानमाह—** निष्कलमिति। **ब्रह्मणो** [3]**ऽद्वयत्वस्याशेषोपनिषत्सु सिद्धत्वाद् , विशिष्टस्य [द्विनिष्ठस्य] सम्बन्धस्य तस्मिन्नसिद्धेर्न तद्द्वाराऽपि तस्य वाच्यतेत्याह—** न चेति।

भाष्यार्कप्रकाशः

ऽर्थवादः। प्रधानो विधिः यजेतेत्यादिः। अर्थवादस्त्वप्रधानत्वात् तच्छेषभूतः। विधिशेषत्वेनैवार्थवादानामुपयोगो न तु स्वातन्त्र्येणेति भवत्वर्थवादवाक्यस्य स्वार्थे तात्पर्याभावादप्रामाण्यम्। प्रकृतश्रुतिस्तु ब्रह्मप्रतिपादनपरत्वात् प्रधानवाक्यमेवेति न दृष्टान्तसम्प्रतिपत्तिरिति भावः।

न केवलं श्रुतिरेव प्रमाणं, किन्तूपपत्तिरपीत्याह— **उपपत्तेश्चेति। उपपत्तिर्युक्तिः।** ज्ञेयमपि ब्रह्म सदादिशब्दैर्नोच्यत इत्यत्रोपपत्तेश्च सत्त्वान्न विरुद्धवादप्रसङ्ग इत्यर्थः। चकारो दर्शितश्रुतिसमुच्चयार्थः। उपपत्तिमेव दर्शयति— **सर्व** इत्यादिना **युक्तमित्यन्तेन। अर्थप्रकाशनार्थाय** वक्तृभिरिति शेषः। प्रयुक्तः श्रोतृभिः श्रूयमाणः सर्वः शब्दः जातिक्रियागुणसम्बन्धद्वारेण सङ्गतिग्रहणसव्यपेक्षः सन्नर्थं प्रत्याययति, न त्वन्यथा, लोके अन्यथा अदृष्टत्वादिति। अर्थो घटादिः, तत्प्रकाशनमेवार्थः प्रयोजनं तस्मै; तदर्थमित्यर्थः। **सर्वः शब्दः** सर्वविधः शब्दः, सर्वे शब्दा इति यावत् ; जात्येकत्वम् ; **सव्यपेक्षः** सापेक्षः **प्रत्याययति** बोधयति। **अन्यथा** जात्यादिद्वारेण सङ्गतिग्रहणनिरपेक्षः सन्नित्यर्थः; **न** अर्थं न प्रत्याययतीत्यर्थः; **अदृष्टत्वाद्** अनुपलभ्यमानत्वादित्यर्थः। गोत्वाश्वत्वादिकं जातिः। अनेकव्यक्तिष्वनुगतो धर्मो **जातिः**। कर्मेन्द्रियनिर्वर्त्या क्रिया पचनपठनादिः। शुक्लकृष्णादयो गुणाः। स्वस्वामिभावादयः सम्बन्धाः। निर्धर्मकत्वाद् ब्रह्मणि न जातिः, निष्क्रियत्वान्न क्रिया, निर्गुणत्वान्न गुणः, एकत्वान्न सम्बन्ध इति ब्रह्म जात्यादिमद् न भवति। **अत इति**। जात्यादिशून्यत्वाद् ब्रह्मण इत्यर्थः; ब्रह्म सदसदादिशब्दवाच्यं न भवति। सच्छब्दो हि सत्तारूपजातिमद्वस्तुवाची। आदिपदादसच्छब्दग्रहणम्। स च असत्त्वरूपधर्मवद्वस्तुवाची। ब्रह्मणि तु न सत्ता विद्यते, नाप्यसत्त्वमिति कृत्वा सदिति असदिति वा वक्तुं ब्रह्म न शक्यते। **नापि गुणवदिति**। ब्रह्मेति शेषः। **येनेति**। गुणवत्त्वेनेत्यर्थः। **गुणशब्देनेति**। शुक्लकृष्णादिना कुतो न गुणवद् ब्रह्म? अत आह— **निर्गुणत्वादिति**। शुक्लं ब्रह्म, कृष्णं ब्रह्मेत्येवं वक्तुं न शक्यत इत्यर्थः। **क्रियाशब्दः** क्रियावाचिशब्दः। सम्बन्धोऽस्यास्तीति सम्बन्धि। कस्मान्न सम्बन्धि ब्रह्म? इत्यत आह— **एकत्वादिति**। ननु एकमेव ब्रह्मास्तु, अनेकब्रह्माणि न सन्तु, घटपटादिवस्तुभिः

१. तत्रैव इति एवकारः शेषः। तेन जात्यादिमत्त्वस्य व्यापकत्वलाभः। ततश्च व्यापकस्य जात्यादिमत्त्वस्याभावाद् व्याप्यवाच्यत्वाभावः सिध्यति। २. 'अगोत्रत्वमवर्णत्वम्' इति पा.। ३. 'अद्वतीयत्वस्य' इति पा.।

**आत्मत्वाच्च न केनचिच्छब्देनोच्यत इति युक्तम्, 'यतो वाचो निवर्तन्ते' (तै.उ.२.९) इत्यादिश्रुतिभ्यश्च॥ १२॥**

आनन्दगिरिकृतव्याख्या

**ब्रह्मण्यभिधावृत्त्या शब्दाप्रवृत्तौ हेत्वन्तराण्याह—** अद्वयत्वादिति। **ब्रह्मणोऽवाच्यत्वे श्रुतिमपि संवादयति—** यत इति॥ १२॥

भाष्यार्कप्रकाशः

अन्यसम्बन्धित्वं स्यादेवेत्यत आह— **अद्वयत्वादिति**। द्वितीयं वस्तु नास्ति ब्रह्मणः, 'एकमेवाद्वितीयं ब्रह्मे'ति श्रुतेरिति भावः। एतेन शब्दप्रवृत्तिनिमित्तानां जातिगुणक्रियासम्बन्धानां ब्रह्मण्यभावाद् ब्रह्म न शब्दप्रतिपाद्यमिति सिद्धम्। अस्यैव ब्रह्मणः शब्दाप्रतिपाद्यत्वस्य हेत्वन्तरमाह— **अविषयत्वादिति**। वाचामगोचरत्वादित्यर्थः। न च ब्रह्मापि विषय एवेति वाच्यम्; विषयित्वात् तस्य। कुतोऽस्य विषयित्वम्? अत आह— **आत्मत्वादिति**। आत्मनो विषयित्वमनात्मनां सर्वेषां विषयत्वं च 'विषयविषयिणो'रिति सूत्रभाष्ये स्पष्टम्। ज्ञानस्वरूपत्वादात्मा विषयी, ज्ञेयत्वादन्यत् सर्वं विषय इति। **यद्वा** शब्दप्रवृत्तिनिवृत्तानां जात्यादीनामभावेन सदादिशब्दावाच्यत्वेऽपि ब्रह्मणः संज्ञामात्रप्रयोजकयदृच्छाशब्दवाच्यत्वं स्यादित्यत आह—**अविषयत्वादिति**। संज्ञासंज्ञिसम्बन्धवत्येव वस्तुनि डित्थडबित्थादिसंज्ञाशब्दाः प्रवर्तन्ते। ब्रह्म न च सम्बन्धीत्युक्तम्। तस्माद् यदृच्छाशब्दानामप्यविषयमेव ब्रह्म। 'न नामरूपे गुणदोष एव वा' इति ब्रह्मणि नाम्नोऽप्यभावादिति। एवं ब्रह्मणः सर्वशब्दाविषयत्वे हेत्वन्तरमाह— **आत्मत्वाच्चेति**। येनात्मना सर्वे शब्दाः प्रकाश्यन्ते तमात्मानं पुनः कः शब्दः प्रकाशयेत्? शब्देन ह्यर्थः प्रकाश्यते। अर्थप्रकाशकत्वमेव हि शब्दस्य शक्तिः। तद्रहितस्तु भेर्यादिशब्दवच्छ्रोत्रप्रवेशमात्रफलकत्वाद् व्यर्थ एव। इयं च शब्दशक्तिर्ब्रह्मणि विधुरैव, 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती'ति च श्रुतेः सर्वावभासके ब्रह्मणि शब्दावभास्यत्वासम्भवात्। य आत्मा घटोऽयं पटोऽयमितिवच्छब्दोऽयमिति जानाति स आत्मा घटेनेव शब्देन कथं बोध्येत? न कथमपीत्यर्थः।

**ननु** जडेन शब्देन यदि घटो बोध्येत तर्ह्यात्मा न बोध्यत इति वक्तुं युक्तम्, तदेव न सम्भवतीति चेत्, **मैवम्**; घट इति शब्दो जडत्वात् स्वयं घटं न वेत्तु नाम, अन्यस्मै पुरुषाय तु घटं बोधयत्येव। आत्मा तु नैवं घटवच्छब्देन बोध्यत इत्यदोषात्। ननु आत्मशब्दोऽप्यात्मानं बोधयत्येव घटमिवेति चेत्, सत्यं बोधयति, कस्मै बोधयतीति वक्तव्यम्। न तावदात्मने, बोधनात् प्रागप्य-परोक्षत्वादात्मनः। आत्मा हि स्वयम्। न हि स्वस्य स्वयं परोक्षः कदाचिदपि। नाप्यन्यस्मै, आत्मान्यस्य सर्वस्यापि जडत्वात्। न च प्रमात्रे इति वक्तव्यं, तस्यापि वस्तुत आत्मत्वादिति। तदेवमात्मत्वान्न शब्दप्रतिपाद्यत्वं ब्रह्मण इति स्थितम्।

**ननु** यदि ब्रह्म शब्दाप्रतिपाद्यमिन्द्रियागम्यं च, तर्हि तुच्छमेवेति चेत्, **मैवम्**; आत्मत्वेन नित्यापरोक्षत्वात्। तुच्छं हि न प्रतिभाति कदाचिदपि शशशृङ्गवत्। ननु यद्येवमतीन्द्रियं शब्दाविषयमपि ब्रह्म नित्यापरोक्षमात्मत्वादिति न तत्र चक्षुरादेरिव शब्दस्यापि कोऽप्युपकारस्तर्हि व्यर्थं शास्त्रमिति चेत्, न व्यर्थम् - अतीन्द्रियः शब्दाविषयो नित्यापरोक्षश्चैतन्यरूप आत्मैव ब्रह्मेत्येतदर्थज्ञानाय शास्त्रस्यावश्यकत्वात्। न हि शास्त्रं गुरूपदेशं वा विना औत्पत्तिकेन ज्ञानेन यः कोऽपि यथोक्तमर्थं जानीयात्। गुरुशास्त्रसत्त्वेऽपि यः कश्चिन् महामतिरेव यथोक्तमर्थं वेत्ति – 'श्रुत्वाऽप्येनं वेद न चैव कश्चिदि'त्युक्तत्वात्। न पुनः सर्वे श्रोतारः शास्त्रस्य। किम्पुनर्गुरु-शास्त्राभावे। सर्वो ह्यौत्पत्तिकेन ज्ञानेनात्मानं मनुष्यं जातं वृद्धं सुखिनं दुःखिनं वा मन्यते। न त्वविक्रियं सच्चिदानन्दं ब्रह्म। न च कोऽयमात्मन्येवान्यभ्रम इति वाच्यम्; न हि दृष्टेऽनुपपत्तिरिति न्यायात्। अयुक्तोऽप्यात्मन्यन्यभ्रमो नापलपितव्योऽनुभवबलात्। नापि तद्धेतुविचारः कर्तव्यः। किन्तु केवलं परिहर्तव्यः। रोगिणा हि स्वानुभवसिद्धस्य रोगस्य नाशायैव यतितव्यं, न तु रोगहेत्वादि-विचारः कर्तव्यः, निष्फलत्वादिति। यथा रोगस्य भेषजं प्रसिद्धं, तथा प्रकृतसंसारभ्रमस्य तत्त्वज्ञानं नाशकत्वेन प्रसिद्धम्। तच्च शास्त्रतो गुरूपदेशाद्वा सम्पाद्यमिति महाफलमेव वेदान्तशास्त्रम्, साक्षादात्मबोधनाशक्तत्वेऽप्यात्मनि कल्पितसर्वभ्रमनिवृत्तिकरतत्त्वज्ञान-जनकत्वादिति।

**ननु** शास्त्रे श्रूयमाणात्मब्रह्मसच्चिदादिशब्दाः किमात्मानं बोधयन्तः सन्तः संसारभ्रमं निवर्तयन्ति? उताबोधयन्तः? आद्ये - ब्रह्म न शब्दप्रतिपाद्यमित्यस्य विरोधः। द्वितीये - आत्माबोधने कथं संसारभ्रमनिवृत्तिः? न हि कल्पितसर्पभ्रमनिवृत्तिरधिष्ठानरज्जु-

भाष्यार्कप्रकाशः

तत्त्वज्ञानं विना सम्भवतीति चेत् , **मैवम्** ; आत्मब्रह्मादिशब्दा आत्मानम् इदं तदिति न प्रतिपादयन्ति, किन्त्वनात्माब्रह्मासदादिभ्यो विलक्षणत्वेन केवलं प्रतिपादयन्ति[१]। ततश्च श्रोतुः आत्मनि अनात्माब्रह्मासदादिभ्रमो निवर्तते। अहमात्मा ब्रह्म सच्चिदानन्दमिति ज्ञानं जायते। ततः संसारो निवर्तत इति। न चेदं तदिति कुतो न प्रतिपादयन्तीति वाच्यम् ; अविषयत्वादात्मनः। इदंशब्दो हि विषयमभिधत्ते। चाक्षुषश्रावणादिप्रत्यक्षविषये वस्तुन्येव इदंशब्दप्रयोगात्। आत्मा तु विषय्येवेति न विषयः। न हि चाक्षुषादिप्रत्यक्ष-विषयः आत्मा, अतीन्द्रियत्वात्। अनुभवरूपो ह्यात्मा, अनुभवश्च स्वैकवेद्य इति सम्प्रतिपन्नमिति।

**ननु** आत्मशब्दः आत्मानं न प्रतिपादयतीति विरुद्धम् , यथा घटशब्दो घटं न प्रतिपादयतीति चेत् , **न विरुद्धम् ;** घटं न प्रतिपादयतीत्यत्र घटशब्देन किं त्वया विवक्षितम्? कम्बुग्रीवाद्याकारवन्मृत्पिण्डविशेषो विवक्षितः। स चेन्द्रियगोचर एवेति युक्तं तस्य घटशब्देन प्रतिपादनम्। आत्मानं न प्रतिपादयतीत्यत्र आत्मशब्देन किं त्वया विवक्षितम्? यद् विवक्षितं तद् यदि त्वं शब्देन प्रतिपादयेः, तर्ह्यात्मशब्दोऽन्यो वा प्रतिपादयेदेवात्मानम्। न तु त्वमात्मशब्देन मया विवक्षितमिदमिति वक्तुं क्षमसे, निर्विशेषत्वात् तस्येति। तस्मात् केनचिच्छब्देनाप्यात्मा नोच्यत इति युक्तम्।

ननु पुरुषबुद्धितन्त्रत्वादुपपत्तिर्न प्रमाणम् , अत आह— **यत इति**। श्रुतिमूलत्वादुपपत्तिः प्रमाणमेवेति भावः। इत्यादीत्यादि-पदात् – 'यद्वाचाऽनभ्युदितम्' इत्यादिग्रहणम्। चकारात् – 'ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः। कथं चरन्ति श्रुतयः साक्षात् सदसतः परे॥' इत्यादिस्मृतिग्रहणम् , [२]अनुभवस्य च ग्रहणम्। एवं श्रुतियुक्त्यनुभवसिद्धत्वाच्छङ्कराचार्योक्त एवार्थो ग्राह्यः। अतीन्द्रि-यत्वाद् ब्रह्म घटवन्न सत् , शब्दैकवेद्यत्वादशून्यत्वादात्मत्वाच्च शशशृङ्गवत् न चासत् , निर्विशेषत्वाद् ब्रह्म सदसच्छब्दवाच्यं न भवति, घटादिवत्। ज्ञानस्वरूपत्वाद् ब्रह्म ज्ञेयं न भवति, घटवत्। ब्रह्म परमनादिमत्वाद् घटवत्। क्षेत्रज्ञ एव परं ब्रह्म, अद्वितीय-ज्ञानस्वरूपत्वाद् घटवत्। क्षेत्रज्ञाभिन्नं ब्रह्मैव मुमुक्षुभिर्ज्ञेयम् , ब्रह्मात्मज्ञानस्यैव मोक्षहेतुत्वाद् घटवत्। इति व्यतिरेकदृष्टान्तोपनिबद्धाः प्रयोगाः इह सूच्यन्ते।

न चान्वयदृष्टान्ताः किमिति न दर्शिता इति वाच्यम् ; ब्रह्मण एकस्यैव निर्विशेषसत्यज्ञानानन्दरूपत्वेन तदन्यस्य सर्वस्यापि सविशेषानृतजडदुःखरूपत्वेन चान्वयदृष्टान्ताभावादिति सङ्क्षेपः।

यत्तु **रामानुजः** - ब्रह्मभिन्नस्य क्षेत्रज्ञस्य स्वरूपमिह विशोध्यते, अमानित्वादिसाधनैः ज्ञेयं प्राप्यं यत् प्रत्यगात्मस्वरूपं तत् प्रवक्ष्यामि, यज्ज्ञात्वा अमृतं जन्ममरणादिरहितमात्मानं प्राप्नोति। अनादि, तत एवानन्तं च। मत्परम् अहमेव परः शेषी यस्य तत्। ब्रह्म बृहत्त्वगुणयोगि शरीरादर्थान्तरभूतं स्वतः शरीरादिभिः परिच्छेदरहितं क्षेत्रज्ञतत्त्वमित्यर्थः। 'ब्रह्मणो हि प्रतिष्ठाऽहममृतस्या-व्ययस्य च' इत्यादिषु ब्रह्मशब्द आत्मन्यपि प्रयुज्यते। न सत् तन्नासदुच्यते। कार्यकारणरूपावस्थाद्वयरहिततया सदसच्छब्दाभ्याम् आत्मस्वरूपं नोच्यत इति, **तत्तुच्छम्** - किं प्रत्यगात्मस्वरूपं प्रत्यगात्मनो भिन्नमुताभिन्नम्? नाद्यः, स्वस्मात् स्वस्वरूपस्य भिन्नत्वायोगात्। न द्वितीयः, अभिन्नत्वे प्राप्तुः प्रत्यगात्मनः स्वस्वरूपस्य प्राप्यत्वायोगात्। तथा ज्ञाधातोः ज्ञानार्थकत्वस्य प्रसिद्धत्वेन तद् विहाय प्राप्त्यर्थकल्पनं चायुक्तम् - ज्ञेयं प्राप्यमिति। अनादीत्यनेनैव कार्यावस्थारहितत्वस्योक्तत्वेन न सदुच्यत इत्यस्य पुनरुक्तिः। अणोर्जीवस्य बृहत्त्वगुणस्तावदयुक्तः, येन ब्रह्मशब्दवाच्यः स्याज्जीवः।

न च मुक्तौ स्वरूपाविर्भावदशायां बृहत्त्वं स्यादिति वाच्यम् ; मुक्तौ पूर्वमवस्थितात् स्वरूपात् किमन्यदाविर्भवति? उत तदेव? आद्ये - पूर्वस्थितस्वरूपत्यागाज्जीवस्य मरणं, स्वरूपान्तराविर्भावात्तु जन्मेति जन्ममरणवाननित्य एव स्याज्जीवः। तच्चाविर्भूतं स्वरूपमनित्यमेव स्यात्। यद्यत् सादि तत्तत् सान्तमिति व्याप्तेः। द्वितीये - पूर्वमेवावस्थितस्य पुनराविर्भावोऽयुक्तः, आविर्भावात् प्रागेव स्थितत्वात्। तथा बृहत्त्वमपि किमपूर्वमाविर्भवति? उत पूर्वमेवावस्थितम्? नाद्यः, बृहत्त्वस्याविर्भावे सत्यनित्यत्वप्रसङ्गात्। आविर्भावात् प्रागेव स्थितत्वे पुनराविर्भावायोगाच्च। किञ्चाविर्भवदिदं बृहत्त्वं जीवस्याणुत्वमपहृत्याविर्भवति वा? उतानपहृत्य? आद्ये

१. सत्यत्वादिविशिष्टशक्तैः पदैः शुद्धस्य शक्त्याऽप्रतिपाद्यत्वेऽपि 'यतो वाचो निवर्तन्ते' इति श्रुत्या शक्तिवृत्तेरेव निषेधात् , औपनिषदत्वश्रुत्यनुरोधेन विशेषणांश-त्यागरूपलक्षणया तत्प्रतिपादनाभ्यनुज्ञानाद् न विरोधः इत्यपि बोध्यम्। अधिकमन्यत्रानुसंधेयम्। २. अनुभवशब्देन विद्वदनुभवस्य ग्रहणम्।

भाष्यार्कप्रकाशः

जीवस्य नाशप्रसङ्गः, अणुस्वरूपत्वाज्जीवस्य। द्वितीये बृहत्त्वस्यासिद्धिः, बृहत्त्वविरोध्यणुत्वस्य वर्तमानत्वात्।

**किञ्च** यदि स्वभावादणुरपि मुक्तौ बृहत्त्वमापद्येत जीवस्तर्हि जीवः सावयव एव स्यात्। न ह्यणुपरिमाणं वस्तु बह्वणुसंयोगं विना मध्यमपरिमाणमपि भवेत् , किं पुनर्महत्वपरिमाणम्। सावयवत्वे चानित्य एव स्यात्। निरवयवो जीव इति तवाप्यभिमतत्वेन तद्विरोधश्च। न च संसारदशायां शरीरादिपरिच्छेदाज्जीवस्याणुत्वं, मुक्तौ तु तद्राहित्याद् बृहत्त्वमिति वाच्यम् ; अपरिच्छेद्यस्य जीवस्य परिच्छेदायोगात्। परिच्छेद्यत्वे च घटादिवदनित्यत्वप्रसङ्गात्।

**किञ्च** शरीरादिना कस्य परिच्छेदः? न जीवस्य, परिच्छिन्नस्यैव जीवत्वेन परिच्छेदात् प्राग् जीवस्यैवाभावात्। भावे त्वपरिच्छिन्न एव सः। न चेष्टापत्तिः, अपरिच्छिन्नस्याणुत्वासम्भवात्। नापि परमात्मनः, तस्य परिच्छेदे सति जीवत्वप्रसङ्गात्। परमात्मनः सकाशाद् भिन्नो हि तव मते जीवः।

**ननु** मास्तु बृहत्त्वगुणयोगः, रूढ्यैव ब्रह्मशब्द आत्मवाची - 'ब्रह्मणो हि प्रतिष्ठा' इति प्रयोगादिति चेत् , **मैवम्** ; तत्रापि ब्रह्मशब्दस्य परमात्मवाचित्वस्यैव वक्ष्यमाणत्वात्। परमात्मन्येव रूढत्वात् तस्य। प्रत्यगात्मनि तु परमात्माभेदाद् ब्रह्मशब्दप्रयोगः। न च 'ब्रह्मणो हि प्रतिष्ठे'त्यत्र ब्रह्मशब्दस्य परमात्मवाचित्वे कथं स्वस्य स्वयमेव प्रतिष्ठा स्यादिति वाच्यम् ; परमात्मनः प्रत्यगात्मा प्रतिष्ठा इति वक्ष्यमाणत्वात्।

तथा मत्परमित्यप्ययुक्तम् - बन्धदशायां जीवस्येश्वरशेषत्वेऽपि मुक्तौ न तच्छेषत्वं कल्पयितुं शक्यम्। ईश्वरवज्जीवस्यापि मुक्तस्य बृहत्त्वात् सच्चिदानन्दरूपत्वाच्च तव मतानुसारेणापि। मुक्तौ हि जीवस्येश्वरसाधर्म्यं भवतीति वदति भवान् । 'मम साधर्म्यमागताः' इति गीतां च तत्र प्रमाणयति। न हि समानधर्मवतोर्वस्तुनोः परस्परं शेषशेषिभावः कल्पयितुं शक्यते। धनिकत्वदारिद्र्याद्यसमानधर्मकयोर्हि राजभृत्ययोः शेषशेषिभावो दृश्यते लोके। राज्ञोरपि सार्वभौममण्डलाधिपयोरसमानधर्मकयोरेव शेषशेषिभावः। दम्पत्योरपि भार्यात्वभर्तृत्वरूपासमानधर्मकयोरेव। एवं पुत्रपित्रादीनामपि पाल्यपालकत्वादिरूपासमानधर्मकाणामेवेति न समानधर्मकयोः क्वचिदपि शेषशेषिभावः। न च जीवादीश्वरः उत्कृष्टधर्मक इति वाच्यम् ; 'मम साधर्म्यमागताः' इति गीताविरोधात्।

**ननु** जीवेश्वरयोरुभयोरपि सच्चिदानन्दरूपत्वेऽपि जीवस्य मुक्तस्य न जगद्व्यापारः, ईश्वरस्य तु सोऽस्तीति जीवादुत्कृष्ट एवेश्वर इति चेत् , **मैवम्** ; सगुणमुक्तिक्षेत्रं हिरण्यगर्भलोकं प्रविष्टानामेव जीवानां जगद्व्यापाराभाव इति [1]सूत्रकाराभिमतत्वेन तेषां शरीरादिपरिच्छेदसत्त्वात्परिच्छिन्नानां तेषां मुक्तानामपरिच्छिन्नेश्वरसाधर्म्यासम्भवात्। न च मुक्तजीववदीश्वरोऽपि सशरीर एवेति वाच्यम् ; सशरीरस्य तस्य हिरण्यगर्भस्य, विष्णोः, शिवस्यान्यस्य वा जीवत्वेनेश्वरत्वाभावात्। अशरीरो हीश्वरः, ईश्वरस्य बृहत्त्वेन शरीरादिपरिच्छेदासम्भवात् , 'अशब्दमस्पर्शमरूपमव्ययम्' इत्यादिना परमात्मनोऽशरीरत्वप्रतिपादनाच्च। न च मुक्तजीवः ईश्वरवद् अशरीर एवेति वाच्यम् ; शरीराभावे जीवेश्वरभेदकोपाध्यभावेन जीवेश्वरभेदस्य दुर्वचत्वात्। न ह्यपरिच्छिन्नं बृहत्त्वगुणयोगि परिपूर्णं वस्तुद्वयं भवितुमर्हति। जीववस्तुना ईश्वरस्य, ईश्वरवस्तुना जीवस्य च परिच्छेदसम्भवेनापरिच्छिन्नत्वायोगात्। अत एव बृहत्त्वपूर्णत्वयोरप्ययोगात्। देशतः कालतो वस्तुतश्च परिच्छेदशून्यं हि वस्त्वपरिच्छिन्नं ब्रह्मेत्युच्यते। न च - ब्रह्मणः स्वशरीरभूतेन जीवेन नास्ति परिच्छेद इति - वाच्यम् ; जीवस्यापि शरीरेण परिच्छेददर्शनात्। शरीरशरीरिणौ किं पदार्थद्वयम् , उतैकः पदार्थः? आद्ये, परस्परपरिच्छेदः सिद्ध एव। द्वितीये, शरीरशरीरिभावस्यैवासिद्धिः[2]।

तस्माद् यदि जीवेश्वरौ द्वौ स्तः, तर्हि जीवेन परिच्छेदादीश्वरस्यैव पूर्णत्वलक्षणं बृहत्त्वमसिद्धमितीश्वर एव न ब्रह्म, किम्पुनर्जीवः। अहो ! तव पाण्डित्यप्रकर्षः! येन जीवस्य ब्रह्मत्वं साधयिष्यता त्वया ब्रह्मण एव ब्रह्मत्वं लोपितम्।

**एतेन** मुक्तिदशायां प्रकृतिसत्त्वमप्य**पास्तम्** , सत्यां प्रकृतौ ब्रह्मणः प्रकृतितः परिच्छेदसम्भवात्। तस्मात् परमार्थतो न जीवेश्वरभेदोऽस्ति, नापि प्रकृतिस्तत्कार्यं जगद्वाऽस्ति। अत एव 'एकमेवाद्वितीयं ब्रह्मे'ति श्रुतिरुपपद्यत इति स्थितमद्वैतम्॥ १२॥

---

१. द्र. 'जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च' (ब्र.सू. ४-४-१७)। २. जीवेश्वरयोः शरीरशरीरिभावः विशिष्टाद्वैतसिद्धान्तेऽभिमतः। स च शरीरशरीरिणोः भेदापेक्ष इति एकपदार्थत्वेनाभेदे न संभवति। न च जीवेश्वरयोः शरीरशरीरिभावः प्रामाणिकोऽपीति अन्यत्र विस्तरः।

**सर्वतःपाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्।**
**सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति॥ १३॥**

**सच्छब्दप्रत्ययाविषयत्वादसत्त्वाशङ्कायां ज्ञेयस्य, सर्वप्राणिकरणोपाधिद्वारेण तदस्तित्वं प्रतिपादयन् तदाशङ्का-निवृत्त्यर्थमाह—** सर्वत इति। सर्वतःपाणिपादं **सर्वतः पाणयः पादाश्चास्येति सर्वतःपाणिपादं तज्ज्ञेयम्। सर्वप्राणि-करणोपाधिभिः क्षेत्रज्ञस्यास्तित्वं विभाव्यते। क्षेत्रज्ञश्च क्षेत्रोपाधितः उच्यते। क्षेत्रं च पाणिपादादिभिरनेकधा भिन्नम्। क्षेत्रोपाधिभेदकृतं विशेषजातं मिथ्यैव क्षेत्रज्ञस्येति तदपनयनेन ज्ञेयत्वमुक्तम्— 'न सत्तन्नासदुच्यते' इति। उपाधिकृतं**

आनन्दगिरिकृतव्याख्या

**सर्वविशेषरहितस्यावाङ्मनसगोचरस्यादृष्टेः, दृष्टेश्च विपरीतस्य, प्राप्ते ब्रह्मणः शून्यत्वे, प्रत्यक्त्वेनेन्द्रियप्रवृत्त्यादिहेतुत्वेन कल्पित-द्वैतसत्तास्फूर्तिप्रदत्वेनेश्वरत्वेन च सत्त्वं दर्शयन्नादौ देहादीनां प्रवृत्तिमतां रथादिवदचेतनानां प्रेक्षापूर्वकप्रवृत्तिमत्त्वाच्चेतनाधिष्ठितत्वमनुमि-मानस्तत्प्रत्यक्चेतनं ब्रह्मेत्याह—** सच्छब्देति। तदस्तित्वमिति **तच्छब्दो ज्ञेयब्रह्मार्थः।** तदाशङ्केति **तच्छब्देनासत्त्वमुच्यते। ननु सर्वदेहेषु पाणिपादमस्येति कथं पाणीनां च पादानां च देहस्थत्वेनात्मधर्मत्वम्? तत्राह—** सर्वेति। **करणप्रवृत्ती रथादिप्रवृत्तिवत् प्रेक्षापूर्वकप्रवृत्ति-त्वाच्चेतनाधिष्ठातृपूर्विकेत्यर्थः। उक्तप्रवृत्त्या चेतनास्तित्वसिद्धावपि कथं क्षेत्रज्ञास्तित्वमित्याशङ्क्य , चेतनस्यैव क्षेत्रोपाधिना क्षेत्रज्ञत्वाच्चेत-नास्तित्वं तदस्तित्वमेवेत्याह—** क्षेत्रज्ञश्चेति। **तस्य क्षेत्रोपाधित्वेऽपि कथं पाणिपादाक्षिशिरोमुखादिमत्त्वमित्याशङ्क्याह—** क्षेत्रं चेति। **अतश्चोपाधितस्तस्मिन् विशेषोक्तिरिति शेषः। कथं तर्हि न सत्तन्नासदिति निर्विशेषत्वोक्तिरित्याशङ्क्याह—** क्षेत्रेति। **पाणिपादादिमत्त्व-मौपाधिकं मिथ्या चेज्ज्ञेयप्रवचनाधिकारे कथं तदुक्तिरित्याशङ्क्याह—** उपाधीति। **मिथ्यारूपमपि ज्ञेयवस्तुज्ञानोपयोगीत्यत्र वृद्ध-**

भाष्यार्कप्रकाशः

**सर्वत इति**। पूर्वोत्तरश्लोकयोः शङ्काद्वारेण सङ्गतिं दर्शयति— **सच्छब्देति**। ज्ञेयस्य ब्रह्मणः सच्छब्दप्रत्ययाविषयत्वादसत्त्वा-शङ्कायां प्राप्तायां सत्यां तदस्तित्वं ज्ञेयस्य सत्त्वम्। यद्यपि न सत्तदुच्यत इत्यनेन प्राप्ता तदसत्त्वशङ्का नासत्तदुच्यत इत्यनेन निराकृतैव, तथापि सच्छब्दप्रत्ययाविषयस्य तस्य कथमसच्छब्दवाच्यत्वाभाव इति प्राप्तैव पुनस्तदसत्त्वाशङ्केति बोध्यम्। सर्वतःपाणिपादमित्याद-यस्त्रयोऽलुक्समासाः। [१]'हलदन्तात्सप्तम्याः संज्ञायाम्' इत्यसंज्ञात्वेऽप्यत्र प्रयोगस्त्वार्षः। तत् सर्वतःपाणिपादं सर्वतोऽक्षिशिरोमुखं सर्वतःश्रुतिमच्च भवति। तद् लोके सर्वमावृत्य तिष्ठति। यद्वा सर्वतः पाणिपादं सर्वतोऽक्षिशिरोमुखं सर्वतः श्रुतिमत् सत् लोके सर्वमावृत्य तिष्ठति। **सर्वतः** सर्वत्र। ननु कथं ब्रह्मणो निराकारस्य सर्वतःपाणिपादत्वम्? अत आह— **सर्वप्राणिकरणोपाधिभिरिति**। सर्वेषां प्राणिनां यानि करणानीन्द्रियाणि पाण्यादीनि तान्येवोपाधयः, तैः। सर्वप्राण्यन्तरात्मनः क्षेत्रज्ञस्य सर्वक्षेत्रोपाधिकत्वात् सर्वक्षेत्रगताः सर्वेऽपि पाणयः पादा उपाधय एवेत्यौपाधिकमस्य सर्वतःपाणिपादत्वं, न तु स्वाभाविकमिति भावः। अमीभिरेवोपाधिभि-रुपहितस्य क्षेत्रस्यास्तित्वं निश्चीयत इत्याह— **सर्वप्राणीति**। उपाधीनामिन्द्रियगम्यत्वेन सत्त्वात्। सद्भिरमीभिरात्मा अनुमीयते, उपहितपरतन्त्रत्वादुपाधीनाम्। आत्मा तावदस्ति, पाण्याद्युपाधिमत्त्वाद् घटोपाधिकाकाशवदिति। पाण्याद्युपाधयः कस्यचित् परतन्त्रा उपाधित्वात् कुण्डलवदिति च प्रयोगादिति भावः।

ननु सर्वप्राणिकरणानां कुतः क्षेत्रज्ञोपाधित्वम्? अत आह— **क्षेत्रज्ञस्येति**। क्षेत्रज्ञस्य क्षेत्राणि सर्वाण्युपाधयः। तद्द्वारा पाण्यादयोऽप्युपाधय एव। पाण्यादीनां क्षेत्रपदवाच्यशरीरावयवत्वादिति भावः। यद्वा सङ्घातः शरीरं यथा क्षेत्रं तथा पाण्यादयोऽपि क्षेत्रमेव, ज्ञेयत्वादिति कृत्वा क्षेत्रोपाधिकत्वात् क्षेत्रज्ञस्य पाण्यादय उपाधय एवेति भावः। इदमेवाह— **क्षेत्रं चेति**। आदिपदाच्छिरोऽक्ष्यादिग्रहणम्। **अनेकधेति**। अष्टधा भिन्ना प्रकृतिस्तावत् क्षेत्रमित्युक्तम् , तत्प्रकृतिविकारभूतं सर्वमपि दृश्यं तथैव क्षेत्रं ज्ञेयत्वादिति। ननु किमिदमौपाधिकं सर्वतःपाणिपादत्वादिकं क्षेत्रज्ञस्य सत्यम्? अत आह— **तदिति**। क्षेत्रज्ञस्य क्षेत्रोपाधिकृतं च तत्

१. वस्तुतस्तु सर्वतः इत्यत्र सुपोऽभावात् लुको नात्र प्राप्तिः। अत एतत्सूत्रोपन्यासश्चिन्त्यः।

**मिथ्यारूपमपि अस्तित्वाधिगमाय ज्ञेयधर्मवत् परिकल्प्योच्यते—'सर्वतःपाणिपाद'मित्यादि। तथाहि सम्प्रयदायविदां वचनम्—'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते' इति। सर्वत्र सर्वदेहावयवत्वेन गम्यमानाः पाणिपादादयो**

आनन्दगिरिकृतव्याख्या

**सम्मतिमाह—** तथाहीति। **पाणिपादादीनामन्यगतानामात्मधर्मत्वेनारोप्य व्यपदेशे को हेतुरिति चेत्? तत्राह—** सर्वत्रेति। **ज्ञेयस्य ब्रह्मणः शक्तिः सन्निधिमात्रेण प्रवर्तनसामर्थ्यम् , तत्सत्त्वं निमित्तीकृत्य स्वकार्यवन्तो भवन्ति पाण्यादय इति कृत्वेति योजना।**

भाष्यार्कप्रकाशः

सर्वं विशेषजातं सर्वतःपाणिपादत्वादिधर्मजातं मिथ्यैव। उपाधिधर्माणामुपहिते वस्तुतोऽसम्भवादिति भावः। **इति** एवं मिथ्यात्वाद् हेतोः। **तदपनयनेन** मिथ्याभूतोपाधिकृतविशेषसमूहापनयनेन। सर्वविशेषप्रतिषेधेनेत्यर्थः। **ज्ञेयत्वमुक्तं** क्षेत्रज्ञस्येति शेषः। निर्विशेषं ब्रह्म ज्ञेयमित्यर्थः। केनोक्तमित्यतस्तद्वाक्यमेव दर्शयति— **न सदिति।** ननु 'न सदि'त्यादिना निर्विशेषब्रह्मणो ज्ञेयत्वमुक्त्वा कथमिह सर्वतः पाणिपादमित्यौपाधिकं सविशेषत्वमुच्यते तस्य ब्रह्मण इत्यत आह— **उपाधीति।** **अस्तित्वाधिगमाय** ज्ञेयस्य सद्भावज्ञानायेत्यर्थः। **ज्ञेयधर्मवदिति।** न तु वस्तुतो ज्ञेयधर्म इति भावः। सर्वतःपाणिपादमित्याद्युच्यत इत्यन्वयः। औपाधिकं सर्वतःपाणिपादत्वादिलक्षणं मिथ्यारूपं ज्ञेयधर्मत्वेन परिकल्प्य ज्ञेयस्यास्तित्वाधिगमायोच्यत इत्यर्थः। निर्विशेषचिन्मात्रस्य स्वस्वरूपेण बोधयितुमशक्यत्वात् तत्र कल्पितमौपाधिकं मिथ्यारूपमाश्रित्य तत्सद्भावं प्रतिपादयति भगवान् सर्वतःपाणिपाद-मित्यादिनेति भावः। उक्तार्थे वृद्धसम्मतिं दर्शयति— **तथा हीति।** निष्प्रपञ्चं निर्विशेषं ब्रह्म अध्यारोपापवादाभ्यां **प्रपञ्च्यते** प्रतिपाद्यत इत्यर्थः। **अध्यारोपो** निर्विशेषे ब्रह्मणि केषांचिद् विशेषाणां कल्पनम्। **अपवादः** कल्पिततद्विशेषाणां निरसनमिति विवेकः। अत एव **विद्यारण्यगुरुभिरप्युक्तम्** – 'अवाङ्मानसगम्यं तं श्रुतिर्बोधयितुं गिरा। जीवमीशं जगद्वाऽपि समाश्रित्य प्रबोधयेत्॥' इति। अवाङ्मानसगम्यस्य वस्तुन इदं तदिति वक्तुमशक्यत्वात् तत्र जीवेशत्वादिविशेषान् परिकल्प्य तन्निरसनद्वारा तद्वस्तु प्रतिपादयितुं शक्यत इति तदाशयः।

[1]यथा गगनस्वरूपानभिज्ञेन पृष्टः कश्चिद् विद्वान्— 'किं गगन'मिति, तं प्रत्युत्तरयति— 'यदुपरि नीलं दृश्यते तद् गगन'-मिति। तस्य श्रोतुर्नीलं गगनमिति प्रत्ययजननानन्तरं तु 'गगनं न नीलं, किन्तु नीरूपमेव, नैल्यं कल्पितं तत्रे'ति बोधयति। एवं बोधने तु मिथ्याभूतं नैल्यं त्यक्त्वा वस्तुभूतं गगनं प्रत्येति स श्रोता, तथा किं ब्रह्मेत्यविदुषा पृष्टो विद्वान् तं प्रत्युत्तरयेत् – 'अन्नं ब्रह्म, कं ब्रह्म, खं ब्रह्म, मनो ब्रह्म, जीवो ब्रह्म, ईशो ब्रह्म, सर्वं ब्रह्मे'ति। तस्य श्रोतुर्दृश्यं सर्वं ब्रह्मेति प्रत्ययजननानन्तरं तु न ब्रह्म अन्नत्वादिविशेषवत् , किन्तु निर्विशेषमेव। अन्नादयः कल्पितास्तत्रेति बोधयेत्। एवं बोधने तु मिथ्याभूतं विशेषजातं त्यक्त्वा वस्तुभूतं ब्रह्म निर्विशेषं प्रतिपद्यते स श्रोता। अयं चाध्यारोपापवादन्यायः 'अन्नं ब्रह्मे'त्यादिभिः 'नेति नेती'त्यादिभिश्च श्रुतिभिः सूचितः। ता हि श्रुतयो ब्रह्मण्यन्नादिकं परिकल्प्य 'नेति नेती'त्यनेन सर्वं विशेषजातं निरस्यन्ति। एवं प्रकृतेऽपि 'सर्वतःपाणिपाद'मित्यादिना ज्ञेयब्रह्मणि पाणिपादादीनध्यारोप्य (परिकल्प्य) पश्चात् 'न सत्तन्नासदुच्यते' इति कल्पितविशेषजातनिरसनमुखेन निर्विशेषं ब्रह्म प्रतिपादयति भगवानिति।

**ननु** नात्राध्यारोपापवादन्यायः प्रवर्तते, अध्यारोपात् प्रागेवापवादस्योक्तत्वादिति चेत् , **नैष दोषः,** 'सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्' इति पश्चादप्यपवादस्य वक्ष्यमाणत्वात्। 'न सत्तन्नासदुच्यते' इत्यनेन निर्विशेषं ब्रह्म केवलमुपक्षिप्तम्। तस्य च ज्ञेयत्वाद्यर्थं सर्वतःपाणिपादत्वादयो विशेषाः परिकल्पितास्तस्मिन् 'सर्वतःपाणिपाद'मिति श्लोकेन। एवं कल्पितविशेषजातनिरसन-मुखेन निर्विशेषं ब्रह्म प्रतिपाद्यते 'सर्वेन्द्रिये'त्युत्तरश्लोकेनेत्यत्र क्रमो ज्ञेयः इति।

उपाधिकृतं मिथ्यारूपमप्यस्तित्वाधिगमाय ज्ञेयधर्मवत् परिकल्प्योच्यते 'सर्वतःपाणिपाद'मित्यादीति यदुक्तं तदेव विशदयति— **सर्वत्रेति।** सर्वत्र जगतीत्यर्थः। सर्वेषां देहानां मनुष्यादिशरीराणामवयवत्वेन रूपेण **गम्यमानाः** प्रतीयमानाः

१.अध्यारोपापवादाभ्यां वस्तुप्रतिपत्तिमुदाहरति—यथेति। 'किं गगन'मिति पृष्टः कश्चिद् विद्वान् तं प्रत्युत्तरयति 'यदुपरि नीलं दृश्यते तद् गगन'मिति इत्यन्वयः।

**ज्ञेयशक्तिसद्भावनिमित्तस्वकार्याः इति ज्ञेयसद्भावे लिङ्गानि ज्ञेयस्येत्युपचारत उच्यन्ते। तथा व्याख्येयमन्यत्। सर्वतःपाणिपादं तज्ज्ञेयम्।** सर्वतोऽक्षिशिरोमुखं **सर्वतोऽक्षीणि शिरांसि मुखानि च यस्य तत् सर्वतोऽक्षिशिरोमुखम्।** सर्वतःश्रुतिमत् **श्रुतिः श्रवणेन्द्रियम् , तद् यस्य तच्छ्रुतिमत् ,** लोके **प्राणिनिकाये सर्वम्** आवृत्य **संव्याप्य** तिष्ठति **स्थितिं लभते**[१] ॥ १३ ॥

आनन्दगिरिकृतव्याख्या

**सर्वतोऽक्षीत्यादावुक्तमतिदिशति—** तथेति। **तज्ज्ञेयं यथा सर्वतःपाणिपादमिति व्याख्यातं तथेत्युक्तमेव स्फुटयति—** सर्वत इति। **सर्वतोऽक्षीत्यादेरक्षरार्थमाह—** सर्वतोऽक्षीति। **अक्षिश्रवणवत्त्वम् अवशिष्टज्ञानेन्द्रियवत्त्वस्य, पाणिपादमुखवत्त्वं चावशिष्टकर्मेन्द्रियवत्त्वस्य मनोबुद्ध्यादिमत्त्वस्य चोपलक्षणम्। एकस्य सर्वत्र पाण्यादिमत्त्वं साधयति—** सर्वमिति ॥ १३ ॥

भाष्यार्कप्रकाशः

पाणिपादादयः, आदिपदाच्छिरोऽक्ष्यादिग्रहणम्। ज्ञेयस्य ब्रह्मणः शक्तयो ज्ञानबलक्रियात्मिकाः, तासां सद्भावोऽस्तित्वं निमित्तं येषां तानि स्वकार्याणि ग्रहणादीनि येषां ते ज्ञेयशक्तिसद्भावनिमित्तस्वकार्याः **इति** हेतोः, ज्ञेयस्य ब्रह्मणः सद्भावे **लिङ्गानि** ज्ञापकानि, साधनानीति यावत्। वह्नेः सद्भावे धूमवदिति भावः। एवं ज्ञेयसद्भावं प्रति लिङ्गभूताः पाणिपादादयो ज्ञेयस्यावयवाः इति शेषः। सम्बन्धिनः इति वा। **उपचारत उच्यन्त इति**।

अयमर्थः - चक्षुःश्रोत्रपाणिपादादिषु दृश्यमानाः ज्ञानक्रियादिशक्तयः स्वकारणशक्तिपूर्वकाः, कार्यशक्तेः कारणशक्तिपूर्वकत्वात् मृच्छक्तिपूर्वकघटशक्तिवदित्यनुमानेन चक्षुरादिशक्तिभिर्ब्रह्मशक्तयोऽनुमीयन्ते। शक्तयः शक्तिमद्वस्त्वाश्रयाः, गुणत्वाच्छुक्लादिवदिति प्रयोगाच्छक्तिभिः शक्तिमद्वस्तु ज्ञाप्यते। एवं सति पाणिपादादयः स्वशक्त्यनुमितकारणशक्तिद्वारा शक्तिमज्ज्ञेयं ब्रह्म गमयन्तीति पाणिपादादयो ज्ञेयसद्भावे लिङ्गानि। अमीभिश्च लिङ्गैः पाण्यादिभिः ज्ञेयब्रह्मसत्त्वं ज्ञाप्यते, यथा धूमलिङ्गेन पर्वते वह्निसत्त्वं, तद्वदिति।

**तथेति**। यथा सर्वतःपाणिपादमित्येतद् व्याख्यातम् , तथा अन्यत् सर्वतोऽक्षिशिरोमुखमित्याद्यपि व्याख्येयमित्यर्थः। अत्र पाणिपादादिशब्दैरिन्द्रियाणामेव ग्रहणम्। तानि चेन्द्रियाणि मनोरूपान्तरिन्द्रियगम्यान्येवेतीन्द्रियाणां[२] नातीन्द्रियत्वप्रसङ्गः। **निकायः** समूहः। **स्थितिं** गतिनिवृत्तिम् , 'ष्ठा गतिनिवृत्ता'विति धात्वर्थपाठात्। **न चलतीति**, परिपूर्णत्वादिति भावः।

अनेन च तिष्ठतीत्यनेन ज्ञेयस्य ब्रह्मणः सद्भावः सूच्यते। न हि शशशृङ्गं तिष्ठतीत्युच्यते। न चलतीत्यनेन च त्रैकालिकी ब्रह्मणः सूच्यते सत्ता। न हि चलतो घटस्य त्रैकालिकी सत्ता दृश्यते। तस्मान्निर्विशेषं परिपूर्णं ब्रह्मैकमेव सदिति पर्यवसन्नार्थः।

यत्तु **रामानुजः** - तत् परिशुद्धात्मस्वरूपं सर्वतःपाणिपादादिकार्यशक्तम् – 'अपाणिपादो जवनो ग्रहीता' इति श्रुत्या परमात्मनस्तथात्वान्मुक्तजीवस्यापि तत्साम्यापत्त्या तथात्वमिति, लोके यद् वस्तुजातं तत् सर्वं व्याप्य तिष्ठति देशादिपरिच्छेदरहिततया सर्वगतमित्यर्थः इति, **तत्तुच्छम्** - अकर्तुरात्मनः पाणिपादादिकार्यकर्तृत्वायोगात्। 'निष्कलं निष्क्रियं शान्तम्' इति श्रुतेरात्मनि ग्रहणादिक्रियाऽयोगात्। श्रुतिस्तु - सर्वेन्द्रियोपाधिगुणानुगुणजवनादिशक्तिमत् ज्ञेयमित्येवं प्रदर्शनार्था। ईश्वरशक्त्यैव हि सर्वाणि करणानि सशक्तिकानि। जीवस्याणोर्बृहता परमात्मना साम्यकथनं तु विदुषां हासायैव। एवम् अणोः परिच्छिन्नस्य देशादिपरिच्छेदराहित्यं, तत्प्रयुक्तं सर्वगतत्वं च सुतरामयुक्तम्।

**यत्तु** मुक्तिदशायामपि जीवोऽणुस्वरूप एव, अन्यथा अणुत्वपरित्यागपूर्वकबृहत्त्वाविर्भावे स्वरूपविकारप्रसङ्गेन निर्विकारश्रुतिविरोधादिति **वेदान्तदेशिको** वदन् धर्मभूतज्ञानद्वारा जीवस्य सर्वव्यापित्वमुक्तवान् , **तच्चायुक्तम्** - मूलेऽसतो धर्मभूतज्ञानाख्यद्वारस्य कल्पनं न न्याय्यमिति। निर्धर्मकज्ञानस्वरूपजीवे धर्मभूतज्ञानासम्भवस्तु प्रागेव प्रतिपादितः। नापि मुक्तस्य परमपदनिलयस्य धर्मभूतज्ञानेनापि सर्वव्याप्तिः। सर्वस्य वस्तुजातस्य ब्रह्माण्डान्तर्गतत्वात् परमपदस्य च ब्रह्माण्डाद् बहिस्थत्वात्। न च - गृहाद् बहिस्थः पुरुषश्चक्षुषा गृहान्तरस्थं घटमिव ब्रह्माण्डान्तस्थमपि सर्वं धर्मभूतज्ञानेन व्याप्नोतीति - वाच्यम् ; तथा सति संसारदुःखाकुलानेक-

---

१. एतदुत्तरम्— 'न चलतीत्यर्थः' इति पाठः क्वचित्। २. इन्द्रियाणां प्रत्यक्षत्वं नेष्टम्। पाणिपादादिशब्दैः तत्तदिन्द्रियाधिष्ठानविवक्षायां तु प्रत्यक्षत्वमिष्टम्।

**सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।**
**असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च॥ १४॥**

**उपाधिभूतपाणिपादादीन्द्रियाध्यारोपणाज्ज्ञेयस्य तद्वत्ताशङ्का मा भूदित्येवमर्थः श्लोकारम्भः—** सर्वेन्द्रियेति। सर्वेन्द्रियगुणाभासं **सर्वाणि च तानीन्द्रियाणि श्रोत्रादीनि बुद्धीन्द्रियकर्मेन्द्रियाख्यानि, अन्तःकरणे च बुद्धिमनसी ज्ञेयोपाधित्वस्य तुल्यत्वात् सर्वेन्द्रियग्रहणेन गृह्यन्ते। अपि चान्तःकरणोपाधिद्वारेणैव श्रोत्रादीनामप्युपाधित्वमित्यतः अन्तःकरणबहिष्करणोपाधिभूतैः सर्वेन्द्रियगुणैरध्यवसायसङ्कल्पश्रवणवचनादिभिरवभासत इति सर्वेन्द्रियगुणाभासं**

आनन्दगिरिकृतव्याख्या

**आरोपादृते साक्षादेव ज्ञेयस्य पाण्यादिमत्त्वमाशङ्क्याह—** उपाधीति। **इन्द्रियविशेषणीभूतसर्वशब्दाज्ज्ञेयोपाधित्वन्यायाविशेषाच्चात्र बुद्ध्यादेरपि ग्रहणमित्याह—** अन्तःकरणे चेति। **श्रोत्रादीनां ज्ञेयोपाधित्वस्य मनोबुद्धिद्वारत्वादपि तयोरिह ग्रहणमित्याह—** अपि चेति। **तयोरपीहोपादाने फलितमाह—** इत्यत इति। **अक्षरार्थमुक्त्वा वाक्यार्थमाह—** सर्वेति। **उपाधिद्वारा कल्पितव्यापारवत्त्वे**

भाष्यार्कप्रकाशः

प्राणिदर्शनप्रयुक्तदुःखस्य मुक्तेष्वपि सम्भवप्रसङ्गात्। स्वरूपज्ञानस्य निर्विकारत्वेऽपि धर्म[भूत]ज्ञानस्य सुखदुःखाद्यनेकविषयकत्वेन सविकारत्वाज्जीवस्य धर्मतः सविकारत्वप्रसङ्गात्। अस्मन्मते तु त्वदुक्तधर्मज्ञानस्यान्तःकरणधर्मत्वेन न धर्मतः सविकारत्वं जीवस्य। एवमीश्वरीयसर्वविषयकज्ञानस्यापि मायाधर्मत्वेन न धर्मतः सविकारत्वमीश्वरस्य। किञ्च धर्मभूतमिदं वृत्तिज्ञानं क्षणिकमिति कथं तस्य सर्वव्यापित्वम्? न ह्येतस्मिन् क्षणे वर्तमानः सुखादिपदार्थः क्षणान्तरे वर्तते। ततः क्षणान्तरीयज्ञानस्य कथमेतत्क्षणवर्तिसुखादिव्यापित्वम्? तस्माज्जीवस्याणोर्येनकेनापि प्रकारेण सर्वगतत्वं न सिध्येदिति सर्वगतत्वाद् देशाद्यपरिच्छिन्नं परिपूर्णं ब्रह्मैव जीव इति स्थितमद्वैतम्॥ १३॥

**सर्वेति**। पूर्वोत्तरश्लोकयोः शङ्काद्वारा सङ्गतिं दर्शयति— **उपाधीति**। **तद्वत्ताशङ्का** पाणिपादादियुक्तत्वशङ्का। अन्तःकरणस्यैकत्वेऽपि मनोबुद्धिभेदेन द्विविधत्वादाह— **अन्तःकरणे चेति**। अन्तःकरणभूते इत्यर्थः। यथेन्द्रियाणि दश प्रसिद्धानि ज्ञेयस्य क्षेत्रज्ञस्योपाधयस्तथा बुद्धिमनसी अपि ज्ञेयस्योपाधित्वात् सर्वेन्द्रियशब्देन प्रतिपाद्येते इत्यर्थः। मन इन्द्रियं न भवतीति मतमाश्रित्येदमुक्तम्, मनोऽपीन्द्रियमेवेति मते तु न काऽप्यनुपपत्तिः। ननु दशेन्द्रियाण्येव ज्ञेयस्योपाधिः, मनोबुद्धी तु नैवोपाधिरित्युच्यताम्, अत आह— **अपि चेति**। इन्द्रियप्रवृत्तेर्मनःप्रवृत्तिपूर्वकत्वेनान्तःकरणोपाधिद्वारेणैव श्रोत्रादीनि ज्ञेयस्योपाधयः, न तु स्वत इत्यर्थः। आत्मनोऽन्तःकरणमुपाधिः, अन्तःकरणस्य तु श्रोत्रादीनीत्यन्तःकरणोपहितस्यैवात्मनः श्रोत्रादीन्युपाधिः, न केवलात्मनः। आत्मेन्द्रिययोरन्तःकरणेन व्यवधानादिति भावः। [1]आत्मनि तावदन्तःकरणमध्यस्यते, पश्चात्त्विन्द्रियाणीति कृत्वाऽन्तःकरणस्यात्मनः सन्निहितोपाधित्वम्, इन्द्रियाणां तु व्यवहितोपाधित्वमिति तत्त्वम्।

**अत इति**। सर्वेन्द्रियग्रहणेन दशेन्द्रियाणां मनोबुद्ध्योरपि ग्रहणादित्यर्थः। सर्वेन्द्रियशब्दवाच्यानाम् अन्तःकरणबहिष्करणानां मनोबुद्धिज्ञानकर्मेन्द्रियाणामुपाधिभूता गुणाः सर्वेन्द्रियगुणाः। यथा आत्मनोऽन्तःकरणमुपाधिः, अन्तःकरणस्य च श्रोत्रादीनि, तेषां गुणा अपि तथैवोपाधयः इत्यर्थः। उपाधिलक्षणस्य व्यावर्तकत्वस्य गुणेष्वपि सत्त्वात्। अध्यवसायरूपो हि गुणो बुद्धिं सङ्कल्पगुणवतो मनसो व्यावर्तयति। तथा च परम्परयेन्द्रियवत् तद्गुणाः मनोबुद्धिगुणाश्चात्मनः उपाधिभूता एव। यद्वा अध्यवसायाद्यतिरेकेण बुद्ध्याद्यभावादन्तःकरणात्मकोपाधिभूताः बहिष्करणात्मकोपाधिभूताश्च गुणा एव। गुणानेव दर्शयति— **अध्यवसायेति**। अध्यवसायो बुद्धेर्गुणः, सङ्कल्पो मनसः, श्रवणं श्रोत्रस्य, वचनं वाचः। आदिपदाद् दर्शनग्रहणादिग्रहणम्। कथमवभासते? अत आह— **सर्वेति**। तज्ज्ञेयं सर्वेन्द्रियव्यापारैरध्यवसायश्रवणादिभिर्व्यापृतमिव, सव्यापारमिवावभासत इति शेषः। उपाधिभूतेष्वन्तरिन्द्रियबहिरिन्द्रिय-

१. अयं चाध्यासक्रमः विवरणादौ निरूपितो द्रष्टव्यः। (पञ्चपादिकाविवरणम् पृ. २६३)

**सर्वेन्द्रियव्यापारैर्व्यापृतमिव तज्ज्ञेयमित्यर्थः। 'ध्यायतीव लेलायतीव' (बृ.उ.४.३.७) इति श्रुतेः। कस्मात् पुनः कारणान्न व्यापृतमेवेति गृह्यत इत्यत आह—** सर्वेन्द्रियविवर्जितं **सर्वकरणरहितमित्यर्थः। अतो न करणव्यापारैर्व्यापृतं तज्ज्ञेयम्। यस्त्वयं मन्त्रः– 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः' (श्वे.उ.३.१९) इत्यादिः, सः 'सर्वेन्द्रियोपाधिगुणानुगुण्यभजनशक्तिमत् तज्ज्ञेय'मित्येवम्प्रदर्शनार्थो, न तु साक्षादेव जवनादिक्रियावत्त्वप्रदर्शनार्थः। 'अन्धो मणिमविन्दत्' (तै.आ.१.११) इत्यादिमन्त्रार्थवत् तस्य मन्त्रस्यार्थः। यस्मात् सर्वकरणवर्जितं**

आनन्दगिरिकृतव्याख्या

**मानमाह—** ध्यायतीति। **कल्पितमेवास्य व्यापारवत्त्वम् , न वास्तवमित्यत्र भगवतोऽपि सम्मतिमाकाङ्क्षाद्वारा दर्शयति—** कस्मादित्यादिना। **सर्वकरणराहित्ये फलमाह—** अत इति। **साक्षादेव ज्ञेयस्य वेगवद्विहरणादिक्रियावत्ताया मान्त्रवर्णिकत्वात् कुतोऽस्य करणव्यापारैरव्यापृतत्वमित्याशङ्क्यानुवादपूर्वकं मन्त्रस्य प्रकृतानुगुणत्वमाह—** यस्त्विति। **करणगुणानुगुण्यभजनमन्तरेण साक्षादेव जवनादिक्रियावत्त्वप्रदर्शनपरत्वे मन्त्रस्य मुख्यार्थत्वं स्यादित्याशङ्क्य , तदसम्भवान्नैवमित्याह—** अन्ध इति। **अर्थवादस्य श्रुतेऽर्थे तात्पर्याभावान्न प्रकृतप्रतिकूलतेत्यर्थः। सर्वकरणराहित्यं तद्व्यापारराहित्यस्योपलक्षणमित्यङ्गीकृत्योक्तमेव हेतुं कृत्वा वस्तुतः सर्वसङ्गवर्जितत्वमाह—**

भाष्यार्कप्रकाशः

तद्गुणेष्वात्मन्यध्यस्तेषु सत्स्वात्मा सव्यापार इव भातीत्यर्थः। तत्र श्रुतिं प्रमाणयति— **ध्यायतीवेति**। बुद्धौ ध्यायन्त्यां ध्यायतीव, तस्यां चलन्त्यां लेलायति चलतीव। आत्मेति शेषः। इवशब्दान्न वस्तुतो ध्यायति, लेलायति वेत्यर्थः। व्यापृतमिवेत्यत्र इवशब्दाच्च न वस्तुतो व्यापृतमित्यर्थः। कुतो ब्रह्म वस्तुतो न व्यापृतमित्याक्षिपति— **कस्मादिति**। सर्वेन्द्रियविवर्जितमित्यत्रापीन्द्रियशब्दोऽन्तरिन्द्रियबहिरिन्द्रियोभयपर इत्याह—**सर्वकरणरहित इति**। अन्तःकरणबहिष्करणरहित इत्यर्थः। अतः सर्वकरणराहित्यादित्यर्थः। यदि करणान्यात्मनः सन्ति, तर्हि करणव्यापारैरात्मनो व्यापारवत्त्वं स्यात्। न तु तथा, करणरहितत्वादात्मन इति भावः। न च करणानि कर्तृपरतन्त्रत्वात् कर्तुरेव, कर्ता चात्मैवेति कथं करणाभाव आत्मन इति वाच्यम् ; अकर्तृत्वादात्मनः। यः करणैर्व्याप्रियते स कर्ता प्रमातैव।

ननु करणाभावेऽप्यात्मनः सव्यापारत्वं ब्रूते श्रुतिरिति कथमव्यापृतत्वमात्मन इत्याक्षेपं हृदि निधाय समाधत्ते— **यस्त्विति**। मन्त्रः श्रुतिः। पादरहितोऽप्यात्मा जवनो वेगशीलः; पाणिरहितोऽपि ग्रहीता सर्वं गृह्णाति; अचक्षुरपि पश्यति; स आत्मा अकर्णोऽपि श्रृणोतीत्यादिः यो मन्त्रः सोऽयं मन्त्रस्तु ज्ञेयं ब्रह्म सर्वेन्द्रियोपाधिगुणानुगुण्यभजनशक्तिमदित्येवं प्रदर्शनार्थो बोधनफलको भवतीति शेषः। सर्वेन्द्रियोपाधिगुणानां गमनग्रहणादीनामानुगुण्यस्य भजनमेव शक्तिर्यस्य, तद्भजने शक्तिर्यस्य तदिति वा तथोक्तम्। तस्मात् सर्वेन्द्रियानुग्राहकसर्वशक्तिमत्त्वस्य माययाऽऽत्मनि सम्भवादुच्यते आत्मा 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः' इति। न तु निष्क्रियत्वादात्मनः साक्षादेव तस्मिन् ग्रहणादिक्रियाः सम्भवन्तीत्येवमसम्भवार्थवर्णनं श्रुतेरपि घटत इत्याह— **न त्विति**। यदि साक्षादात्मनि गमनादिक्रियाः स्युः, तर्हि 'निष्कलं निष्क्रियं शान्तम्' इति श्रुतिविरोधः। तस्माच्छ्रुत्यन्तराविरोधाय प्रकृतमन्त्रस्यार्थवत्तार्थं च प्रकृतमन्त्रार्थ एवं वर्णनीयः— सर्वेन्द्रियोपाधिगुणानुगुण्यभजनशक्तिमानात्मेति।

ननु मुख्यार्थपरित्यागेन तदन्यार्थकल्पनं श्रुतौ क्वापि न दृष्टम् , अत आह— **अन्ध इति**। 'अन्धो मणिमविन्दत् , तमनङ्गुलिरावयत् , अग्रीवः प्रत्यमुञ्चत् , तमजिह्वा असश्चत' इत्यरुणम्। अस्य हि मन्त्रस्य यथाश्रुतार्थः प्रत्यक्षादिप्रमाणविरुद्धः। 'पङ्गुः पर्वतश्रृङ्गमेति, बधिरो गाथां श्रृणोत्यादरादि'ति लौकिकवाक्यवत्। न हि चक्षुरङ्गुलिग्रीवाजिह्वारहितानां मणिदर्शन-तद्ग्रहण-तद्धारण-तद्वर्णनानि सम्भवन्ति, पङ्गुबधिरयोः पर्वतश्रृङ्गारोहणगाथाश्रवणवत्। तस्मादन्ध इति मन्त्रस्य प्रत्यक्षाद्यविरुद्धः कोऽप्यर्थोऽवश्यं वाच्यः। अन्यथा निरर्थकत्वे विरुद्धार्थकत्वे वा वेदस्याप्रामाण्यापत्तेः। कथमिति चेद्? **उच्यते**— [१]अन्धादयः स्वप्ने मणिदर्शनादिकं कृतवन्त इति, मनसा कृतवन्त इति वा। कथमन्यथा अन्धादीनां मणिदर्शनादिकं सम्भवेत्? कथं वा सर्वतः परिपूर्णस्यात्मनश्चलनं,

१. '**अन्धो** योगाभ्यासेन निरुद्धेन्द्रियः **मणिं** मणिमिव स्वप्रकाशमात्मानम् **अविन्दत्** समाधिना पश्यति' इति सायणभाष्योक्तार्थोऽप्यनुसंधेयः। द्र. तै. आ. १-११।

**ज्ञेयं तस्माद्** असक्तं **सर्वसंश्लेषवर्जितम्। यद्यप्येवं तथापि** सर्वभृच्चैव। **सदास्पदं हि सर्वम्, सर्वत्र सद्बुद्ध्यनुगमात्। न हि मृगतृष्णिकादयोऽपि निरास्पदा भवन्ति। अतः** सर्वभृत् **सर्वं बिभर्तीति। स्यादिदं चान्यज्ज्ञेयस्य सत्त्वाधिगमद्वारम् -** निर्गुणं **सत्त्वरजस्तमांसि गुणाः, तैर्वर्जितं तज्ज्ञेयम्। तथापि** गुणभोक्तृ **च गुणानां सत्त्वरजस्तमसां शब्दादिद्वारेण सुखदुःखमोहाकारपरिणतानां** भोक्तृ **च उपलब्धृ तज्ज्ञेयमित्यर्थः॥ १४॥**

आनन्दगिरिकृतव्याख्या

यस्मादिति। **वस्तुतः सर्वसङ्गाभावेऽपि सर्वाधिष्ठानत्वमाह—** यद्यपीति। **स्वसत्तामात्रेणाधिष्ठानतया सर्वं पुष्णातीत्येतदुपपादयति—** सदिति। [1]**विमतं सति कल्पितम्, प्रत्येकं सदनुविद्धधीबोध्यत्वात्, प्रत्येकं** [2]**चन्द्रानुविद्धधीबोध्यचन्द्रभेदवदित्यर्थः। सर्वं सदास्पदमित्ययुक्तम्, मृगतृष्णिकादीनां तदभावादित्याशङ्क्याह—** न हीति। **तेषामपि कल्पितत्वे निरधिष्ठानत्वायोगाद् निरूप्यमाणे तदधिष्ठानं सदेवेति सर्वस्य सति कल्पितत्वमविरुद्धमित्यर्थः। सर्वाधिष्ठानत्वेन ज्ञेयस्य ब्रह्मणोऽस्तित्वमुक्तमुपसंहरति—** अत इति। **इतश्च ज्ञेयं ब्रह्मास्तीत्याह—** स्यादिदं चेति। **न हि तस्योपलब्धृत्वमसत्त्वे सिध्यतीत्यर्थः॥ १४॥**

भाष्यार्कप्रकाशः

सर्वेण सर्वदा सम्बद्धस्य च ग्रहणादिकं वोपपद्येत? इति बोध्यम्।

अत्र 'अन्धो मणिमविन्दत्' इति मन्त्रो यथाऽर्थशून्यस्तथा अपाणिपाद इति मन्त्रोऽप्यर्थशून्य एव, 'पङ्गुः पर्वतशृङ्गमेती'ति लौकिकवाक्यवदिति **केचिद्** वदन्ति, **तत्तु** भाष्याननुगुणं, वेदस्य निरर्थकत्वेनाप्रामाण्यापादनं चेत्युपेक्ष्यम्। **संश्लेषः** सम्बन्धः, सङ्ग इति यावत्। 'असङ्गो ह्ययं पुरुषः' इति श्रुतेरिति भावः। यदि करणयुक्तं स्यात् तर्हि परिच्छिन्नमेव स्यात्, करणवतो देहस्य परिच्छेददर्शनादित्यभिसन्धिः। **एवमिति**। असङ्गमित्यर्थः। **तथापीति**। असक्तत्वेऽपीत्यर्थः। कथमस्य सर्वभृत्त्वम्? अत आह— **सदिति**। हि यस्मात् सर्वं सदास्पदं सदाश्रयं, सति कल्पितमिति यावत्। सदास्पदत्वे हेतुमाह— **सर्वत्रेति**। यथेदमर्थे कल्पिते सर्परजतादाविदम्बुद्धिरनुगता इदं रजतम्, अयं सर्प इति, तथा सन् घटः, सन् पट इति प्रतीतिदर्शनादिति भावः।

ननु जलादीनां सदास्पदत्वेऽपि मृगतृष्णिकादीनां निरास्पदत्वमेव, मिथ्यात्वात् तेषामित्यत आह— **न हीति**। मरुभूम्यवच्छिन्नसद्वस्त्वास्पदैव मृगतृष्णिका। आदिपदाद् रज्जुसर्पशुक्तिरजतादिग्रहणम्। तेऽपि रज्जुशुक्त्याद्यवच्छिन्नसदास्पदा एव। अत एव मृगतृष्णिकाऽस्तीत्येवं सत्सामानाधिकरण्यप्रतीतिः। **अत इति**। एवं सर्वस्य सति कल्पितत्वेन सदास्पदत्वादेवेत्यर्थः। सर्वं बिभर्तीति सर्वभृत्। सर्वस्य स्वस्मिन् कल्पितत्वेन मिथ्यात्वादेव न तेन सर्वेण क्षेत्रज्ञस्य सद्वितीयत्वादिकमिति बोध्यम्। अन्यथा असक्तसर्वभृत्त्वयोर्विरुद्धधर्मयोरेकत्र सामानाधिकरण्यायोगात्। वस्तुतोऽसक्तमपि मायया सर्वभृदिति भावः। एवं क्षेत्रज्ञस्य सर्वभृत्त्वात् सर्वोपाधिभिरस्यास्तित्वं विभाव्यते। अथास्यास्तित्वाधिगमे द्वारान्तरं दर्शयतीत्याह— **स्यादिति**। इदं चान्यज्ज्ञेयस्य सत्त्वाधिगमद्वारं स्यात्। तदेव द्वारान्तरं दर्शयति— **निर्गुणमित्यादिना**। निर्गुणस्याप्यस्य क्षेत्रज्ञस्य यद् गुणभोक्तृत्वमस्ति, तेन लिङ्गेन ज्ञेयस्य सत्त्वमधिगम्यत इत्यर्थः। न च सत्त्वादिगुणाभावेऽपि कल्याणगुणाः सन्तीति कथं निर्गुणत्वं ब्रह्मण इति वाच्यम्; सत्त्वात्मकत्वात् कल्याणगुणानाम्। **एतेन** सत्त्वादिगुणाभावेऽपि कल्याणगुणाः सन्तीति निर्गुणश्रुतिः सत्त्वादिगुणराहित्यप्रदर्शनपरैवेति परोक्त**मपास्तम्।**

कथं गुणानां भोग्यत्वम्? अत आह— **शब्दादीति**। शब्दादयो विषयाः स्वसंसर्गेण पुरुषस्य सुखं दुःखं मोहं च जनयन्तीति शब्दादिद्वारा सुखाद्यात्मना सत्त्वादीनां परिणाम इति सत्त्वादिगुणपरिणामाः सुखदुःखमोहा भोग्या एवेति गुणानां भोग्यत्वमुक्तम्। उपलब्धृ ज्ञातृ। एतेन भोक्तृत्वलक्षणोऽपि विकारो नास्ति क्षेत्रज्ञस्येति सूचितम्। ज्ञातृत्वरूपभोक्तृत्वस्यैवेहोक्तत्वात्। ज्ञातृत्वं च साक्षि-

---

१. अयमर्थः- **विमतं** कल्पितत्वाकल्पितत्वविप्रतिपत्तिविषयः प्रपञ्चः पक्षः। **सति कल्पितत्वं** सद्रूपज्ञाननिवर्त्यत्वं साध्यम्। **सदनुविद्धधीबोध्यत्वं** सत्तादात्म्येन प्रतीयमानत्वं हेतुः। चन्द्रतादात्म्येन प्रतीयमानजलतरङ्गप्रतिबिम्बो दृष्टान्तः। स च प्रत्येकं चन्द्र इति प्रतीतिविषयश्चन्द्रे कल्पितः, एवं 'सन् घटः' इत्यादिप्रतीतिविषयो घटादिः सत्पदार्थे कल्पित इति साध्यते। अनुवृत्ते व्यावृत्तं कल्पितमिति सारः। अधिकमन्यत्र द्र. अद्वैतसिद्धिः पृ. ३१६-३१८। २. 'चन्द्राभेदानुविद्ध' इति पा.।

## बहिरन्तश्च भूतानाम् अचरं चरमेव च।

**किञ्च—** बहिरन्तरिति। बहिः **त्वक्पर्यन्तं देहमात्मत्वेनाविद्याकल्पितमपेक्ष्य, तमेवावधिं कृत्वा बहिरुच्यते।**

आनन्दगिरिकृतव्याख्या

**इतोऽपि ज्ञेयं ब्रह्मास्तीत्याह—** किञ्चेति। **बहिरिति व्याख्येयमादाय व्याचष्टे—** त्वगिति। **भूतेभ्यो बहिर्बाह्यविषयाद्यात्मक-**

भाष्यार्कप्रकाशः

त्वम्। तच्चोदासीनत्वे सति साक्षाद्द्रष्टृत्वरूपम्। उदासीनस्य ह्यविक्रियत्वं लोकतश्च सिद्धम्। न हि सुखादिकं साक्षात् पश्यन्नात्मा सुखादिना विक्रियते। अन्तःकरणं हि सुखादिना विक्रियमाणं दृश्यते साक्षिणा। कथं साक्षिणा दृश्यमानाः सुखादयः साक्षिधर्माः साक्षिभोग्या वा भवेयुः? तस्मात् सुखादिसाक्ष्येवात्मेह गुणभोक्तृत्वेनोच्यते।

**नन्वेवं** सुखदुःखादिज्ञातृत्वं कथं ज्ञेयस्य सद्भावं प्रतिपादयेदिति चेत्? **उच्यते**— सुखादयः सज्ञातृकाः, ज्ञेयत्वाद् , घटवदिति प्रयोगात् ज्ञेयैः सुखादिभिः ज्ञाता क्षेत्रज्ञोऽनुमीयत इति। एवंविधं सद्रूपं क्षेत्रज्ञलक्षणं ब्रह्म ज्ञेयमित्याह— **तदिति**। **अर्थ इति**। प्रकृतश्लोकस्येति भावः।

यत्तु **रामानुजः** - सर्वेन्द्रियगुणाभासं सर्वेन्द्रियवृत्तिभिरपि विषयान् ज्ञातुं समर्थं, स्वभावतः सर्वेन्द्रियविवर्जितं विनैवेन्द्रियवृत्तिभिः सर्वं जानाति। असक्तं स्वभावतो देवादिदेहसङ्गरहितं सर्वभृत् सर्वदेहभरणसमर्थं निर्गुणं स्वभावतः सत्त्वादिगुणरहितं गुणानां सत्त्वादीनां भोक्तृभोगसमर्थं चेति, **तत्तुच्छम्** - आत्मनः स्वभावतः सर्वेन्द्रियविवर्जितत्वमसक्तत्वं निर्गुणत्वं चेत्युक्तौ सर्वेन्द्रियगुणाभासत्वं सर्वभृत्त्वं गुणभोक्तृत्वं चेत्येतत् त्रयं स्वभावतो नास्तीति सिद्धम्।

**ननु** तर्हि किं तत् त्रयं स्वरूपतोऽस्ति, यद्वा उपाधितः। नाद्यः, स्वरूपे तदयोगात्। नान्त्यः, परिशुद्धात्मस्वरूपस्येहोच्यमानत्वेनौपाधिकधर्मकथनायोगात्। निरुपाधिकं हि परिशुद्धात्मस्वरूपम्। उपाधिरहितत्वस्यैव परिशुद्धत्वरूपत्वात्। इन्द्रियवृत्तीनामेवोपाधित्वेनोपाधित इन्द्रियवृत्तिभिर्विषयान् ज्ञातुं समर्थमित्यप्ययुक्तम्। आत्मनः इन्द्रियवृत्तिभिर्विषयज्ञानसामर्थ्यमस्तीत्याबालगोपालं प्रसिद्धत्वेन तत्कथनमपि व्यर्थत्वेन शास्त्रस्याप्रामाण्यापादकमित्ययुक्तमेव। अज्ञातार्थज्ञापनं हि शास्त्रस्य प्रामाण्यावहम्। सर्वेन्द्रियगुणैराभासो ज्ञानं यस्येति समासेनेन्द्रियवृत्तिभिर्विषयान् जानातीत्येव सिद्धत्वेन विषयज्ञानसमर्थमिति समर्थपदस्य मूलाद् बहिः कल्पनं चायुक्तम्। निरिन्द्रियपरिशुद्धमुक्तात्मस्वरूपस्येन्द्रियवृत्तिभिर्विषयज्ञानसामर्थ्यमस्ति वा न वेति संदेहोऽतिमूढानामपि न जायत इति व्यर्थमेवैतत्कथनम्।

सर्वेन्द्रियविवर्जितमित्यस्य यथाश्रुतमिन्द्रियरहितत्वरूपमर्थं विहाय, विनैवेन्द्रियवृत्तिभिः सर्वं जानाति इत्यर्थवर्णनमपि अयुक्तम् , लाक्षणिकत्वात्। सर्वावभासकस्य स्वप्रकाशस्यात्मनो विनैवेन्द्रियवृत्तिभिः सर्वज्ञानकथनमप्यकिञ्चित्करम्। आत्मनः सर्वदेहभरणसामर्थ्यस्य जीवापाये शरीरपतनदर्शनेन सर्वैर्विदित[त्व]मेवास्तिकैरिति तत्कथनं चानर्थकम्। एकैकदेहभरणसमर्थ एवात्मा, न तु युगपत् सर्वदेहभरणसमर्थ इति तत्कथनमयुक्तं च। मृत्पाषाणाद्यशेषदृश्यवस्तुवाचिनः सर्वशब्दस्य देहपरत्वेन सङ्कोचोऽप्ययुक्तः। देवादिदेहसङ्गरहितस्य देवादिदेहभरणसामर्थ्यमस्ति वा न वा? इति सन्देहस्यैवानुदयेन तत्सामर्थ्यप्रतिपादनं चायुक्तम्। देहानामेवोपाधित्वेनोपाधितो देहभरणसमर्थमित्यप्ययुक्तम्। सर्वभृच्छब्दस्य सर्वं बिभर्तीत्येव यथाश्रुतार्थत्वेन तं विहाय सर्वभरणसमर्थमित्यर्थकथनं चायुक्तम्। एवं गुणभोक्तृशब्दस्यापि गुणभोगसमर्थमित्यर्थकथनमयुक्तम्। मुक्तात्मस्वरूपस्य परिशुद्धस्य निर्गुणत्वेन गुणभोगसामर्थ्यमस्यास्ति वा न वेति शङ्काया एवानुदयेन तत्कथनं चानर्थकम्। बद्धदशायामिव मुक्तदशायामप्यात्मनो देहादिसत्त्वे सर्वदाऽपि देहादिसङ्गोऽस्त्येवात्मन इति कथमसक्तत्वं स्वभावतोऽपि स्यादात्मनः? गुणभोगसत्त्वे वा कथमविक्रियत्वम्? [१]जक्षणादिश्रुतिस्तु हिरण्यगर्भलोकप्राप्तजीवपरैव, न मुक्तात्मपरा॥ १४॥

**बहिरिति**। नात्र बहिःशब्देन गृहादिभ्यो बहिर्भावो विवक्षितः, किन्तु देहादेवेत्याह— **त्वगिति**। अविद्यया आत्मत्वेन गृहीतम्।

१. 'जक्षत् क्रीडन् रममाणः' इति श्रुतिः।

## सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चान्तिके च तत्॥ १५॥

**तथा प्रत्यगात्मानमपेक्ष्य देहमेवावधिं कृत्वा** अन्तरुच्यते। **बहिरन्तश्चेत्युक्ते मध्येऽभावे प्राप्त इदमुच्यते—** अचरं चरमेव **च यच्चराचरं देहाभासमपि तदेव ज्ञेयम्, यथा रज्जुसर्पाभासः।**

**यद्यचरं चरमेव च स्याद् व्यवहारविषयं सर्वं ज्ञेयम्, किमर्थम् इदमिति सर्वैर्न विज्ञेयमिति? उच्यते— सत्यं**

आनन्दगिरिकृतव्याख्या

**मित्यर्थः। कथमनात्मन एवात्मत्वम्? कल्पनयेत्याह—**आत्मत्वेनेति। **अन्तःशब्दार्थमाह—** तथेति। **भूतानां चराचराणाम्** अन्तः **मध्ये, प्रत्यग्भूतमित्यर्थः। द्वितीयं पादमवतार्य व्याचष्टे—** बहिरित्यादिना। **यन्मध्ये भूतात्मकं नानाविधदेहात्मना भासमानं तदपि ज्ञेयान्तर्भूतं तत्त्वं सदित्यर्थः। कथं चराचरात्मनो भूतजातस्य ज्ञेयत्वम्? तत्राह—** यथेति। **अधिष्ठाने रज्ज्वां कल्पितसर्पादेरन्तर्भाववद् देहाभासस्यापि ज्ञेयान्तर्भावान्नासत्त्वं मध्ये ज्ञेयस्य शङ्कितव्यमित्यर्थः।**

**सर्वात्मकं चेज्ज्ञेयं सर्वैरिदमिति किमिति न गृह्येतेति शङ्कते—** यदीति। **इदमिति ग्राह्यत्वयोग्यत्वाभावान्नेत्याह—** उच्यत इति। **सर्ववस्त्वात्मना भासते[1], तदयोग्यत्वं कथमित्याशङ्क्याह—** सत्यमिति। **सूक्ष्मत्वेऽपि किं स्यादित्याशङ्क्याह—** अत इति। सूक्ष्मत्वम्

भाष्यार्कप्रकाशः

यद्वा अविद्ययाऽऽत्मनि कल्पितं, तयैवात्मत्वेन गृहीतमिति शेषः। कल्पनेऽविद्या कर्त्री, ग्रहणे तु हेतुरिति विवेकः। त्वच एव देहपदार्थमांसाद्यपेक्षया बाह्यत्वादाह— **त्वक्पर्यन्तमिति**। **तमेव** देहमेव। अन्तःशब्देन देहादन्तर्भावो विवक्षित इत्याह— **तथेति**। प्रत्यगात्मन एव सर्वान्तरत्वेन **तमपेक्ष्येत्**युक्तम्। भूतानां कार्यकरणसङ्घातात्मकानां ब्रह्मादिस्तम्बपर्यन्तानां प्राणिनां देहाद् बहिः, देहेन्द्रियप्राणमनोऽज्ञानानां स्थूलसूक्ष्मकारणशरीरभूतानामन्तश्च तज्ज्ञेयं वर्तत इति शेषः। प्रत्यग्रूपेणान्तः, पररूपेण बहिश्चेति विवेकः। अन्तःकरणोपहितत्वं चैतन्यस्य प्रत्यक्त्वम्, मायोपहितं तु परत्वम्, चैतन्यमेव क्षेत्रज्ञ इति बोध्यम्।

प्रत्यगात्मपरमात्मभेदवादिनां तु नैतत् सिध्येत् - यदात्मनो बहिरन्तर्व्याप्तिः, अन्तःस्थितस्य प्रतीचो बहिःस्थित्ययोगाद्, बहिःस्थितस्य परस्यान्तःस्थित्ययोगात्। एवं क्षेत्रज्ञस्यान्तर्बहिर्व्यापकत्वादेव सर्वव्यापकत्वमेकत्वं च श्रुतिसिद्धं सङ्गच्छते। तथाहि श्रुतयः – 'अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणःस्थितः' 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मे'त्याद्याः।

ननु देहादन्तर्बहिरेवास्ते क्षेत्रज्ञः, न तु देहः क्षेत्रज्ञ इति कथं सर्वव्यापित्वं क्षेत्रज्ञस्य? कथं वा 'सर्वं ब्रह्मे'ति श्रुत्युपपत्तिरिति शङ्कते— **बहिरिति**। **मध्य इति**। अन्तर्बहिःप्रदेशयोर्मध्यप्रदेश इत्यर्थः। यत्र देहोऽस्ति तत्रेति भावः। **अभावे** क्षेत्रज्ञस्यासत्त्वे प्राप्ते सति। 'अचरं चरमेव चे'तीदमुत्तरमुच्यते। यच्चरं जङ्गममचरं स्थावरं तरुगुल्मलतादिकं तदपि ज्ञेयमेव। कथं चराचरस्य ब्रह्मत्वम्? अत आह— **देहाभासमिति**। देहरूपेणापाततोऽविचारतो भासत इति देहाभासम्। अज्ञानादेव चराचरस्य देहत्वेन प्रतीतिः, विचारात्तु चराचरं सर्वमपि ब्रह्मैवेति मध्येऽपि ब्रह्मैवास्तीत्यर्थः। ब्रह्मणि कल्पितस्य देहाभासस्य (देहभ्रमस्य) अधिष्ठानरूपत्वादिति भावः। तत्र दृष्टान्तमाह— **यथेति**। रज्जौ कल्पितः सर्पाभासो यथा रज्जुरूप इति शेषः। न च ज्ञेये ब्रह्मणि चराचरस्याविद्याकल्पितत्वे विवदितव्यम्, 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुतिभ्यः, स्वप्नदशायामात्मनि रथादिकल्पनस्य दर्शनाच्च। कारणव्यतिरेकेण कार्यं नास्ति, मृद्व्यतिरेकेण घटादर्शनाद्, रज्जुव्यतिरेकेण सर्पादर्शनाच्चेत्यादियुक्तिभ्यश्च।

ननु यदि व्यवहारविषयं चराचरं सर्वमपि ब्रह्मैव, तर्हि कुतोऽस्य इदन्त्वेनाविज्ञेयत्वमित्याक्षिपति— **यदीति**। व्यवहारविषयं चरमचरं च सर्वं ज्ञेयमेव स्याद् यदीत्यन्वयः। किमर्थमिदं ब्रह्मेति सर्वैर्न विज्ञेयमिति प्रश्नः। विज्ञेयत्वे हेतुप्रदर्शनायाह— **व्यवहार-विषयमिति**। मनुष्योऽयं ब्राह्मणोऽयमित्यादिप्रतीतिगोचरमित्यर्थः। चराचरस्य इदं तदिति व्यवहारविषयत्वाच्चराचरात्मकं ब्रह्मापि इदं तदिति व्यवहारविषयं स्यादेव, यथा रज्जुसर्पाभासवद्रज्जुरपि व्यवहारविषयः, तद्वदिति भावः। **उच्यते** उत्तरमिति शेषः। **सत्यं** युक्त एव

---

१. 'भासतः' इति पा.। तत्र भातः (= भासमानस्य) इति पाठो युक्तः।

**सर्वाभासं तत् , तथापि व्योमवत् सूक्ष्मम्। अतः सूक्ष्मत्वात् स्वेन रूपेण तज्ज्ञेयमपि** अविज्ञेय**मविदुषाम्। विदुषां तु 'आत्मैवेदं सर्वम्'(छा.उ.७.२५.२) 'ब्रह्मैवेदं सर्वम्'(बृ.उ.२.५.१) इत्यादिप्रमाणतो नित्यं विज्ञातम्। अविज्ञाततया** दूरस्थं **वर्षसहस्रकोट्याऽप्यविदुषामप्राप्यत्वात् ,** अन्तिके च तद् **आत्मत्वाद् विदुषाम्॥ १५॥**

आनन्दगिरिकृतव्याख्या

**अतीन्द्रियत्वम्। तस्याविज्ञेयत्वे कुतस्तज्ज्ञानान्मुक्तिः? तत्राह—** अविदुषामिति। **विशेषणफलमाह—** विदुषां त्विति। **तेषामात्मत्वेन ज्ञातं चेत् कथं दूरस्थत्वमित्याशङ्क्याह—** अविज्ञाततयेति। **कथं तर्हि तस्य प्रत्यक्त्वम्? तत्राह—** अन्तिके चेति। **विद्वदविद्वद्भेदापेक्षया 'दूरात्सुदूरे तदिहान्तिके च' इति श्रुतिः**[१]**। तदर्थोऽत्र प्रसङ्गादनूदितः इत्यर्थः॥ १५॥**

भाष्यार्कप्रकाशः

प्रश्न इत्यर्थः। यद्यपि ब्रह्मेति पदद्वयस्य शेषः, **सर्वाभासं** सर्वजगद्रूपेणापाततो भासत इति सर्वाभासं, **तथापि** सर्वाभासत्वेऽपीत्यर्थः। सूक्ष्मत्वे दृष्टान्तमाह— **व्योमवदिति**। सर्वव्यापकं वाय्वादिसर्वजगदधिष्ठानं च व्योम यथा सूक्ष्ममतीन्द्रियत्वात् तद्वद् ब्रह्मापीत्यर्थः।

न च सर्वैश्चक्षुषा गृह्यमाणस्य व्योम्नः कथमतीन्द्रियत्वमिति वाच्यम् ; यच्चक्षुषा गृह्यते न तद् व्योम, किन्तु तदावारकं तेजस्तमो वा। न हि नीरूपं व्योम चक्षुषा ग्रहीतुं शक्यते। रूपग्राहकमेव हि चक्षुः। शब्दादिरूपत्वाभावान्नापि श्रोत्रादिभिर्गृह्यते व्योम। एवमतीन्द्रियत्वादेव व्योम्नः साक्षिभास्यत्वमभ्युपेयते। न च वायुरपि तादृश एवेति वाच्यम् ; नीरूपोऽपि वायुस्त्वगिन्द्रियेण गृह्यत एव, स्पर्शात्मकत्वात्। न चैवं शब्दात्मकत्वाद् व्योमापि श्रोत्रेण गृह्यत इति वाच्यम् ; श्रोत्रेण भेर्यादिशब्दं प्रतिपद्यमानो यः कोऽप्यनुन्मत्तः पुरुषो न मया व्योम प्रतिपन्नमिति वेत्ति। प्रतिध्वनिरेव हि व्योम्नो गुणः। न च सर्वे जना अवकाशं व्योमेति प्रतिपद्यन्त एवेति कथं तस्य सूक्ष्मत्वमिति वाच्यम् ; औपाधिकमेव व्योम्नो रूपं सर्वे व्योमत्वेन प्रतिपद्यन्ते, न तु निरुपाधिकम्। व्योम्नः उपाधिस्तु तेजस्तमसोरन्यतरदित्युक्तमेव। किञ्च नावकाशमात्रस्य व्योमत्वम् , अवकाशस्य धर्मत्वादाकाशस्य चावकाशधर्मकत्वेन द्रव्यत्वात्। स चावकाशो न चक्षुर्ग्राह्यो नीरूपत्वात्। किं तर्हि? अवकाशस्यावधिभूता ये भित्त्यादयः पदार्थास्त एव चक्षुषा गृह्यन्ते। तस्माद् अवकाशस्याकाशस्य वा नेन्द्रियगम्यत्वमित्यतीन्द्रियत्वात् सूक्ष्ममेव व्योम। न चैवं व्योमैव क्षेत्रज्ञः इत्युच्यतामिति वाच्यम् ; जडत्वात् , साक्षिभास्यत्वात् , 'आत्मन आकाशः सम्भूतः' इति श्रुत्या कार्यत्वात् , सावकाशत्वाद् व्योम्नः। ज्ञानस्वरूपत्वात् , स्वप्रकाशत्वात् , सर्वावभासकत्वादनादित्वाद् , निरवकाशत्वाच्च क्षेत्रज्ञस्य।

अतः इत्यस्यार्थं स्वयमेवाह— **सूक्ष्मत्वादिति**। तज्ज्ञेयं स्वेन रूपेणाविदुषामविज्ञेयमपि विदुषां नित्यविज्ञातमेवेत्यन्वयः। सूक्ष्मार्थदर्शिनो हि विद्वांसः। ननु कथं विदुषामप्यतीन्द्रियार्थदर्शित्वम्? अत आह—**आत्मैवेदं सर्वमित्यादिप्रमाणत इति**। अतीन्द्रियार्थदर्शने शास्त्रमेव करणम् , तच्च शास्त्रं विदुषामस्तीति विदुषां नित्यापरोक्षमेव ब्रह्म, स्वात्मत्वादिति भावः। ननु अविदुषामपि प्रत्यक्षमेव ब्रह्म, जगद्रूपत्वाद् ब्रह्मण इत्यत्राह— **स्वेन रूपेणेति**। सच्चिदानन्दादिरूपेणेत्यर्थः। न तु कल्पितजगद्रूपेणेति भावः। सर्पाभासाधिष्ठानं रज्जुरिन्द्रियगम्यत्वात् सर्वैर्विज्ञेयैव। जगदाभासाधिष्ठानं ब्रह्म तु सूक्ष्मत्वात् सर्वैरविज्ञेयमेव। न चैवं शून्यत्वप्रसङ्गः, विद्वद्भिः ज्ञेयत्वाद् ब्रह्मणः। अविद्वद्भिरपि जगद्रूपेण विज्ञेयत्वादिति तत्त्वम्। एवं सूक्ष्मत्वेनाविदुषामविज्ञाततया दूरस्थं तदित्याह— **अविज्ञाततयेति**। 'दूरात्सुदूरे तदिहान्तिके च' इति मुण्डकश्रुतिरिहानुसन्धेया। नन्वविज्ञातत्वमात्रेण कथं सर्वव्यापिनः आत्मनो दूरस्थत्वम्? अत आह— **वर्षेति**। यो हि ग्रामादिः गन्त्रा बहुभिर्वत्सरैः प्राप्यते स तस्य गन्तुर्दूरस्थः इति प्रसिद्धम् , यस्तु बहुभिरपि वत्सरैर्नैव प्राप्यते तस्य दूरस्थत्वं किम्पुनर्वक्तव्यम्? ब्रह्म तु कोटिसङ्ख्याकवर्षसहस्रैरपि अविद्वद्भिर्नैव प्राप्यत इति कृत्वा अतीव दूरस्थमविदुषामित्यर्थः। यद्यपि शतसंवत्सराः एव नृणां परमायुः, तथाप्यनेकजन्मगतायुःपरिगणनया कोटिसंख्याकवर्षसहस्रसिद्धिरिति बोध्यम्। यद्वा देवानामनेकसंवत्सरपरिमितायुष्कत्वात् तद्दृष्ट्योक्तमिति बोध्यम्। **वस्तुतस्तु** अपरिमितसंवत्सराभिप्रायेणैव वर्षसहस्रकोट्येत्युक्तः, न तु सङ्ख्याविशेषे वक्तुस्तात्पर्यम्। ततश्चाविदुषामतीव दुर्लभं ब्रह्मेति फलितार्थः। अविदुषां दूरस्थमपि तद् ब्रह्म

१. 'तद् दूरे तद्वन्तिके' इति श्रुतिरपीहानुसन्धेया।

## अविभक्तं च भूतेषु विभक्तमिव च स्थितम्।

**किञ्च—** अविभक्तमिति। अविभक्तं **च प्रतिदेहं व्योमवत् तदेकं** भूतेषु **सर्वप्राणिषु** विभक्तमिव **च स्थितम्** ,

आनन्दगिरिकृतव्याख्या

**ज्ञेयस्यास्तित्वे हेत्वन्तरमाह—** किञ्चेति। **तद्धि प्रतिदेहं नभोवदेकम् , तद्भेदे मानाभावाद् , भिन्नत्वे च घटवदनात्मत्वापातात्। अतोऽद्वितीयं सर्वत्र प्रत्यग्भूतं ज्ञेयं नास्तीत्यतिसाहसमित्याह—** अविभक्तं चेति। **कथं तर्हि [1]देहादेर्भेदधीरित्याशङ्क्य , कल्पनयेत्याह—**

भाष्यार्कप्रकाशः

विदुषा**मन्तिके** समीप एव वर्तत इति शेषः। तत्र हेतुमाह— **आत्मत्वादिति**। आत्मा हि स्वयम्। न चाविदुषां कुतस्तन्नात्मेति वाच्यम् ; यद्यप्यविदुषामप्यात्मैव तत् , तथापि अविद्वांसस्तदात्मत्वेन न जानन्ति, देहात्मभ्रमजीवेश्वरभेदभ्रमादिदूषितहृदयत्वात्। अत एवाविदुषां तत् परोक्षमिव भाति। यथा निधिज्ञस्य सन्निहितोऽपरोक्षोऽपि निधिस्तदविज्ञस्य दूरस्थः परोक्षश्च, तद्वदात्मज्ञस्य सन्निहितो नित्यापरोक्षोऽप्यात्मा अनात्मज्ञस्य दूरस्थः परोक्षश्चेति भावः। एतेनैकस्यैव ब्रह्मणः कथं दूरस्थत्वान्तिकस्थत्वरूपविरुद्ध-धर्मसामानाधिकरण्यमिति प्रत्युक्तम् , विद्वदविद्वद्विषयभेदेन तदुपपत्तेर्दर्शितत्वादिति।

यत्तु **रामानुजः** - पृथिव्यादीनि भूतानि परित्यज्याशरीरो बहिर्वर्तते, तेषामन्तश्च वर्तते, स्वभावतोऽचरं देहित्वे चरं च, एवं सर्वशक्तियुक्तं सर्वज्ञं तदात्मतत्त्वमस्मिन् क्षेत्रे वर्तमानमप्यतिसूक्ष्मत्वात् संसारिभिरविज्ञेयमिति, **तत्तुच्छम्** , किं मुक्तिदशावस्थितं परिशुद्धात्मस्वरूपं सशरीरमुताशरीरम्? यद्वोभयात्मकम्? आद्ये, शरीराद् बहिर्वृत्तिरसिद्धा। द्वितीये, तदन्तर्वृत्तिरयुक्ता। तृतीये, सशरीरत्वाशरीरत्वयोर्विरुद्धयोः सामानाधिकरण्यायोगः स्फुट एवेति नोभयात्मकत्वसिद्धिः। न च कदाचित् सशरीरम् , अशरीरं च कदाचिदिति वाच्यम् , परिशुद्धात्मस्वरूपस्य कादाचित्कसशरीरत्वाद्ययोगात्। उपाधिकृतं हि सशरीरत्वमात्मनः, स्वाभाविकं त्वशरीरत्वमेव। न हि सशरीरत्वमशरीरत्वं चेत्युभयं स्वाभाविकं भवितुमर्हति। यद्धि स्वाभाविकं तद्धि परिशुद्धं रूपमात्मनः। औपाधिकस्योपाधिप्रयुक्तत्वेनापरिशुद्धत्वात्। एवमशरीरस्य परिशुद्धात्मस्वरूपस्य कथं भूतानामन्तर्वृत्तिः? सत्यां ह्यन्तर्वृत्तौ सशरीरत्वं स्यात् तस्य। परिशुद्धात्मस्वरूपकथनप्रकरणे 'देहित्वे चरं च' इति कथमुच्यते? न हि परिशुद्धमात्मस्वरूपं देहवद् भवति, देहवत्त्वस्यापरिशुद्धिहेतुत्वात्।

**किञ्च** आत्मनः स्वाभाविकमचरत्वं प्रति किं पूर्णत्वं हेतुः? उत करणराहित्यम्? नाद्यः - अणोस्तस्य पूर्णत्वायोगात्। पूर्णस्य च तस्य देहेन परिच्छेदायोगाच्च। नान्त्यः - 'अपाणिपादो जवनो ग्रहीता' इति श्रुत्या करणाभावेऽपि गमनादिक्रियावत्त्वप्रतिपादनात्। एवं निर्हेतुकाचरत्वासिद्धौ चरत्वमेव स्वाभाविकमिति सिद्धमात्मनः। ततश्च श्रुतिस्मृत्यादिविरोधः। किञ्चिज्ज्ञोऽल्पशक्तिर्जीवः, सर्वज्ञः सर्वशक्तिरीश्वर इति जीवेश्वराभेदासिद्ध्यर्थं ब्रुवताममीषां सर्वज्ञं सर्वशक्तियुक्तं परिशुद्धात्मस्वरूपमिति प्रवचनं विरुद्धम्। यद्येवं जीवः सर्वज्ञः सर्वशक्तिश्च स्यात् तर्हि किमर्थं जीवादन्येश्वरकल्पनम्? जगत्सृष्ट्याद्यर्थं हीश्वराभ्युपगमः। तच्च जगत्सृष्ट्यादिकं सर्वज्ञसर्वशक्ति-मत्पुरुषसाध्यमिति जीवादेव सृष्ट्यादिसम्भवः। इदं चेश्वरादन्यस्य जीवस्य सर्वज्ञत्वादिप्रवचनं श्रुतिविरुद्धम्। 'स सर्वज्ञः सर्ववित्' 'पराऽस्य शक्तिर्विविधैव श्रूयत' इतीश्वरस्यैव तद्धर्मवत्त्वश्रवणात्। जीवस्य किञ्चिज्ज्ञत्वादेरनुभवसिद्धस्य दुरपलापत्वाच्च। किं चान्त-र्बहिश्च भूतानामिति मूलस्य कदाचिदन्तः कदाचिद् बहिरित्यर्थकल्पनं चायुक्तम् , कदाचित्पदाध्याहारे प्रमाणाभावात्। भूतानां बहिरित्यस्य पृथिव्यादिभूतानि परित्यज्येत्यप्ययुक्तम् , आकाशपरित्यागस्य दुष्करत्वात्। आकाशो हि सर्वव्यापकः। ब्रह्माण्डाद् बहिरप्यवकाशसत्त्वेनाकाशसत्त्वात्। न हि त्वदभिमते वैकुण्ठलोकेऽप्यवकाशाभावो येनाकाशाभावः स्यात् । अवकाशवान् ह्याकाशः इति॥ १५॥

**अविभक्तमिति**। **अविभक्तं** विभागरहितम्। किम्प्रयुक्तोऽस्य विभागः? अत आह— **प्रतिदेहमिति**। देहे देहे प्रतिदेहम्।

१. 'देहभेदे भेदधीः' इति पाठः संभाव्यते। द्र. भाष्योत्कर्षदीपिका।

**भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च॥ १६॥**

**देहेष्वेव विभाव्यमानत्वात्।** भूतभर्तृ च **भूतानि बिभर्तीति तज्ज्ञेयं भूतभर्तृ च स्थितिकाले ; प्रलयकाले** ग्रसिष्णु **ग्रसनशीलम् ; उत्पत्तिकाले** प्रभविष्णु **च प्रभवनशीलम् ; यथा रज्ज्वादिः सर्पादेर्मिथ्याकल्पितस्य॥ १६॥**

आनन्दगिरिकृतव्याख्या

भूतेष्विति। **तत्र हेतुः—** देहेष्विति। **कार्याणां स्थितिहेतुत्वाच्च ज्ञेयमस्तीत्याह—** भूतेति। [1]**निमित्तोपादानतया तेषां प्रलये प्रभवे च कारणत्वाच्च तदस्तीत्याह—** प्रलयेति। **तर्हि कार्यकारणत्वस्य वस्तुत्वान्नाद्वैतमित्याशङ्क्याह—** यथेति[2]॥ १६॥

भाष्यार्कप्रकाशः

देहभेदेऽपि नात्मभेद इत्यर्थः। तत्र दृष्टान्तमाह— **व्योमवदिति**। यथा व्योम प्रतिघटं न भिद्यते, तथाऽयमात्मा प्रतिदेहं न भिद्यत इत्यर्थः। अत एव तद् ब्रह्मैकम्। एवं स्वतोऽविभक्तत्वेऽप्यज्ञानाद् विभक्तमिव भातीत्याह— **भूतेष्विति**। ननु सर्वव्यापिनः कथं भूतेष्वेव स्थितिरुच्यते? अत आह— **देहेष्विति**। **विभाव्यमानत्वाद्** उपलभ्यमानत्वात्। अन्तर्मुखानां विदुषां देह एवात्मसाक्षात्कारसम्भवाद् देहेषु स्थितमित्युच्यत इति भावः। विभक्तमिवेति इवशब्दान्न वस्तुतोऽस्य परिपूर्णस्य विभागसम्भव इति सूच्यते। **बिभर्ति** धरति। प्रकर्षेण बहुधा भवनं प्रभवनं 'तदैक्षत बहु स्यां प्रजायेय' इति श्रुतिसिद्धबहुभवनमित्यर्थः। भूतानां सर्वेषां सृष्टिस्थितिलयकारणमिति पदत्रयार्थः, 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ती'ति श्रुतेरिति भावः। आत्मन्येवाविद्या-कल्पितं भूतजातं तत्रैव वर्तते, तत्रैव लीयते चेति परमार्थः। तत्र दृष्टान्तमाह— **यथेति**। मिथ्याकल्पितस्य सर्पादेः रज्ज्वादिर्यथा स्थित्यादिहेतुस्तद्वदित्यर्थः। रज्जावज्ञानात् सर्पो जायते, तत्रैव वर्तते, पुनस्तत्रैव लीयते; एवं शुक्तिकायां रजतं जायते, वर्तते, लीयते च यथा, तद्वदिति भावः। **एतेन** जगतः सृष्टिस्थितिलयहेतुः क्षेत्रज्ञादन्यः कश्चनेश्वर **इत्यपास्तम्**।

यत्तु **रामानुजः** - अविभक्तं ज्ञानैकाकारतया जातित एकम् , अविदुषां देवोऽयं मनुष्योऽयमिति विभक्तमिव स्थितं, भूतभर्तृ शरीरं बिभर्ति, ग्रसिष्ण्वन्नादिकमत्ति, प्रभविष्णु ग्रस्तानामन्नादीनां रेतोरक्तादिरूपेण परिणामहेतुरिति। **तत्तुच्छम्** - अव्यक्तस्यात्मनो व्यक्तितो नानात्वायोगात् कथं जात्येकत्वम्? निर्धर्मके आत्मनि धर्मायोगात् कथं वा जात्येकत्वम्? सति व्यक्तितो नानात्वे विदुषामपि विभक्तत्वेन प्रतिभायादेवेति कथमविदुषां विभक्तमिवेत्युच्यते? विदुषां देवत्वादिभ्रमाभावेऽप्यहमिति, स इति, त्वमिति, देवदत्त इति च प्रमा भवत्येव हि। यथा देवत्वादिः स्थूलदेहधर्म इति त्वं जानासि, तथा सुखित्वादिकं सूक्ष्मदेहधर्म इति, मोहः कारणदेहधर्म इति च जानीहि। एवं शरीरत्रयमात्मनः सकाशाद् विवेचिते तु किमात्मनो भेदकं स्याद् येनात्मनो नानात्वं स्याद् व्यक्तितः। तस्मात् त्वमहमित्यादिभेदोऽपि भ्रम एव, न प्रमा।

न च 'न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः' इतीश्वरेणैवोक्तत्वात् प्रमैवेति वाच्यम् ; लोकदृष्ट्या तथोक्तत्वात्। यदुक्तमात्मा शरीरं बिभर्तीति तदयुक्तम् , प्राणादीनामेव शरीरभर्तृत्वात्। एवं ग्रसनादिकमपि प्राणादिधर्म एव नात्मधर्मः। अन्यथा सविकारत्वप्रसङ्गादात्मनः। न ह्यात्मा किञ्चिद् ग्रसितुं क्षमतेऽन्नादिकं, करणरहितत्वात्। किन्तु प्राणाधिष्ठितं शरीरमेव मुखेन गिलति। शरीरमेव च तदन्नादेः रक्ताद्यात्मना परिणामहेतुश्च। न च मृतशरीरं किमपि न ग्रसेदिति वाच्यम् ; प्राणाधिष्ठितं शरीरमित्युक्तत्वात्। न च जीवापेतस्य शरीरस्य ग्रसनाद्यदर्शनाज्जीवधर्मा एव ग्रसनादय इति वाच्यम् ; जीवस्य क्षेत्रज्ञलक्षणस्य परिपूर्णत्वेनापगमासम्भवात्। यस्तु शरीरादपैति स लिङ्गशरीरावच्छिन्नः प्रमातैव। तस्य च न स्वतो ग्रसनकर्तृत्वम् , शरीरस्यैव स्थूलस्य भोगायतनत्वेन तं विना ग्रसनासम्भवात्। नापि केवलशरीरस्य तदस्ति, सुषुप्तिमूर्छादौ तददर्शनात्। किं तर्हि लिङ्गशरीरस्थूलशरीरोभयावच्छिन्नस्यैव प्रमातुः शरीरावयवद्वारा अन्नादिग्रसनं, मनोद्वारा सुखाद्युपभोगश्चेति कृत्वा प्रमात्रधिष्ठितशरीरस्यैवान्नग्रसनादिकं, न तु क्षेत्रज्ञस्यात्मनः। तस्य शरीरात् प्रमातुश्च विलक्षणत्वादिति॥ १६॥

---

१. 'निमित्ततया, उपादानतया च' इत्यर्थो वोध्यः। अत एव प्रकृत्यधिकरणव्युत्पादिताभिन्ननिमित्तकारणत्वोपपत्तिः(ब्र.सू. १-४-२३)। २. विवर्तोपादानत्वं पर्यवसितम्। तथा च कार्यकारणत्वस्य मिथ्यात्वान्नाद्वैतक्षतिरिति भावः।

**ज्योतिषामपि तज्ज्योतिः तमसः परमुच्यते।**
**ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम्॥ १७॥**

**किञ्च सर्वत्र विद्यमानं सन्नोपलभ्यते चेत् , ज्ञेयं तमस्तर्हि? न ; किं तर्हि?—** ज्योतिषामपीति। ज्योतिषाम् आदित्यादीनामपि तद् ज्ञेयं ज्योतिः। **आत्मचैतन्यज्योतिषेद्धानि ह्यादित्यादीनि ज्योतींषि दीप्यन्ते, 'येन सूर्यस्तपति तेजसेद्धः' (तै.ब्रा.३.१२.९)** **'तस्य भासा सर्वमिदं विभाति' (मु.उ.२.२.१०) इत्यादिश्रुतिभ्यः। स्मृतेश्चेहैव—**

आनन्दगिरिकृतव्याख्या

**इतोऽपि ज्ञेयस्यास्तित्वमित्याह—** किञ्चेति। **हेत्वन्तरमेव स्फोरयितुं शङ्कते —** सर्वत्रेति। **न तत् तमो मन्तव्यमित्याह—** नेति। **तर्हि किं तस्य रूपमिति पृच्छति—** किं तर्हीति। **तत्रोत्तरम्—** ज्योतिषामिति। **सूर्यादीनां बुद्ध्यादीनां च प्रकाशकत्वादस्ति ज्ञेयं ब्रह्मेत्याह—**ज्योतिषामिति। **तदेवोपपादयति—**आत्मेति। **तत्र श्रुतिद्वयं प्रमाणयति—**येनेति। **उक्तेऽर्थे वाक्यशेषमपि दर्शयति—** स्मृतेश्चेति।

भाष्यार्कप्रकाशः

**ज्योतिषामिति**। 'सूक्ष्मत्वात् तदविज्ञेय'मित्यनेन सर्वत्र विद्यमानं सदपि ज्ञेयं सर्वैर्नोपलभ्यत इत्युक्तत्वेन तत्राक्षिपति— **सर्वत्रेति**। सर्वत्र विद्यमानं सदपि ज्ञेयं नोपलभ्यते चेत् , तर्हि ज्ञेयं तमोऽज्ञानमेवेति प्रश्नः। नेति परिहारः। तर्हि किमिति पुनः प्रश्नः? 'ज्योतिषामपि तज्ज्योति'रित्युत्तरम्। अज्ञानं ह्यतीन्द्रियत्वात् सर्वैर्नोपलभ्यते, किन्त्वहमज्ञ इत्यनुभवबलादेवाध्यवसीयते। ततः किमज्ञानस्वरूपं ब्रह्मेति प्रष्टुराशयः। अज्ञानस्यावरणस्वभावत्वाद् ब्रह्मणश्च सर्वावभासनस्वभावत्वान्नाज्ञानस्वरूपं ब्रह्म, किन्तु ज्योतीरूपमेवेत्युत्तरयितुराशयः।

ननु यदि ब्रह्म तेजोरूपं, तर्हि किमादित्यादितेजो ब्रह्मेत्यत आह— **ज्योतिषामपि तज्ज्योतिरिति**। आदित्यादयो हि घटादिपदार्थानवभासयन्तीति ज्योतिःशब्देनोच्यन्ते। भासकत्वस्य ज्योतिर्लक्षणत्वात्। तेऽप्यादित्यादयः आत्मचैतन्येन भास्यन्त इति ज्योतिषामपि ज्योतिर्ब्रह्मेत्युच्यते। अज्ञानेन तु घटादिपदार्था आव्रियन्त एवेति सर्वावभासकस्य ब्रह्मणो नाज्ञानरूपत्वं, नापि कतिपयपदार्थावभासकतेजोरूपत्वं, किन्तु चैतन्यरूपत्वमेवेति भावः।

ननु भासकानामादित्यादिज्योतिषां कुतः पुनर्भास्यत्वमित्यतः श्रुत्यादीन् प्रमाणयति— [1]**ज्योतिषेत्यादीन्**। **ज्योतिषा** चैतन्येनेद्धानि भासितानि सन्ति **दीप्यन्ते** भासन्ते, आदित्यादिज्योतींषीति शेषः। [2]**येन** चैतन्यलक्षणेन तेजसा **इद्धो** दीप्तः सन् सूर्यस्तपति। तस्यात्मनो भासा स्वरूपचैतन्येन सर्वमिदं जगद् विभाति। स्मृतेश्चेति चकारादनुभवग्रहणम्। आत्मना हि सूर्यचन्द्रनक्षत्राग्निविद्युद्दीपादिज्योतींषि दृश्यन्ते। अतः आत्मभास्यत्वं तेषाम्।

**ननु** सूर्यादिभिर्घटादयः प्रकाशिता एव, न तु विदिताः; आत्मना तु घटादिर्विदित एव, न तु प्रकाशितः इति कथं वेदितुरात्मनो भासकत्वमिति चेत्? **मैवम्** ; सूर्यादिज्योतींषि जडत्वाद् घटादींश्चेतनेभ्यः प्रकाशयन्ति, आत्मा तु चेतनत्वात् सर्वमात्मने प्रकाशयतीति सर्वत्र ज्ञानजनकत्वमेव प्रकाशकत्वम्। ततश्चात्मविदिता घटादय आत्मप्रकाशिता एव। सूर्यादिभिः पुरुषेभ्यो बोधिता घटादयश्च सूर्यादिप्रकाशिता एव। अयं घट इति बोधजनकत्वाद्धि दीपेन घटः प्रकाशित इत्युच्यते। तदजनकत्वाच्च तमसा घटः आवृतः इत्युच्यते। तस्मात् प्रकाशनवेदनयोरेकार्थत्वमेव। लौकिकास्तु परस्मै बोधनं प्रकाशनम् - यथा दीपो घटं पुरुषाय बोधयति, स्वयं बोधनं तु वेदनम् - यथा आत्मा घटं बुध्यत इति भेदं परिकल्प्य व्यवहरन्ति। तस्माद् घटादिवत् सूर्यादिज्योतींष्यपि ज्ञेयत्वादात्मभास्यान्येवेति ज्योतिषामपि ज्योतिरेव तत्। न च ज्ञेयस्यापि सूर्यादिवदन्यावभास्यत्वं शङ्क्यम् , स्वप्रकाशज्ञानस्वरूपत्वात् तस्य। अन्यथा अनवस्थादोषापत्तेः।

**ननु** 'ज्योतिषामपि तज्ज्योतिस्तमसोऽपि तमः किमु?' इति शङ्कायाम् , 'तमसश्चापि तज्ज्योतिरित्याह भगवान् हरिः'— **तमसः**

१. भाष्ये 'ज्योतिषेद्धानि दीप्यन्ते' इति श्रुत्युदाहरणं रा.पाठे भाति। २. 'येन सूर्य' इति भाष्योद्धृतश्रुत्यर्थमाह—येनेति।

**'यदादित्यगतं तेजः' (भ.गी.१५.१२) इत्यादेः।** तमसः [1]**अज्ञानात्** परम् **असंस्पृष्टम् उच्यते। ज्ञानादेर्दुःसम्पादनबुद्ध्या**

आनन्दगिरिकृतव्याख्या

**ज्ञेयस्यातमस्त्वेऽपि तमःस्पृष्टत्वमाशङ्क्योक्तम्—** तमस इति। **उत्तरार्धस्य तात्पर्यमाह—** ज्ञानादेरिति। उत्तम्भनम् **उद्दीपनम् ,**

भाष्यार्कप्रकाशः

**परमुच्यते इति**। अज्ञानवाची तमःशब्दस्तत्कार्यमोहादेरप्युपलक्षक इत्याह— **अज्ञानादेरिति**। **परं** विप्रकृष्टम्। फलितमाह— **असंस्पृष्टमिति**। तमसेति शेषः। तमःसंस्पर्शरहितमित्यर्थः। यद्वा संस्पृष्टमिति भावे क्तः। संस्पर्श इत्यर्थः। न विद्यते संस्पृष्टं यस्य तदसंस्पृष्टं, तमसः परमसंस्पृष्टं संस्पर्शरहितमिति स एवार्थः। **उच्यते** शास्त्रेणेति शेषः। ज्योतिषामिव तमसोऽप्यवभासकं ज्योतिर्भिरिव तमसाऽप्यसंस्पृष्टं तदित्यर्थः। न च भासकस्य भास्येन संसर्गाभावे भासनं न स्यादिति वाच्यम् ; भासकस्य दीपज्वालादेर्घटादिना सति संसर्गे घटादिभानासम्भवात्। घटाद्यसंस्पृष्टस्यैव हि दीपस्य घटादिभासकत्वम्। चक्षुरपि न स्वसंस्पृष्टं करतलादिकं भासयति, किन्तु व्यवहितमेव। एवमात्माऽपि सूर्यादिभिरसंस्पृष्ट एव तान् भासयति, न तु संस्पृष्ट इति। **यद्वा** ननु सूर्यादिज्योतींष्यज्ञानेनावृतानि, चक्षुर्वृत्त्या सूर्याद्यावारकाज्ञाननाशे सत्येव सूर्यादिभानात् , घटाज्ञाननाशे घटभानवत्। न हि चक्षुषि निमीलिते सूर्यादयो ज्ञायन्ते केनचित्। एवं ज्योतिषां ज्योतिस्तदपि किमज्ञानेनावृतमिति शङ्कायामाह भगवान्— **तमसः परमुच्यत इति**। सूर्यादीनामिवात्मनो नास्त्यज्ञानसंसर्गः, येनात्मनः सूर्यादीनामिव तम आवरणं स्यात्।

**नन्वेव**मा[मना]वृतत्वे सत्यात्मनः सदाऽपि भानं स्यादिति चेत् , **सत्यम्** , सर्वदाऽपि भात्येव तत्। न हि कोऽपि घटो न भातीतिवद् अहं न भामीति मन्यते। नित्यापरोक्षो ह्यात्मा सर्वस्य। अत एव नात्मभानार्थं चक्षुरादीनां करणत्वम्। न हि कोऽपि सूर्यमिवात्मानं चक्षुषा पश्यति। **किञ्च** येनेदं सर्वं ज्ञायते तमात्मानं केन विजानीयात् 'विज्ञातारमरे केन विजानीयादि'त्यादिश्रुतेश्च नात्मनो भास्यत्वं, येन तस्याज्ञानावरणत्वं स्यात्। सूर्यादयो घटादिभासका अपि चक्षुरादिभास्या इति भास्यत्वाद् भवति तेषामज्ञानावरणं, न त्वात्मनः सर्वावभासकस्य स्वप्रकाशस्य अनन्यावभास्यस्य। यद्येवंविध आत्माऽप्यावृतः स्यात् , तर्हि तं कः पुनर्भासयेत्? सर्वेऽप्यात्मचैतन्याभासलब्धज्ञानशक्तयो हि मनआदिपदार्थाः, स्वतस्तु जडा एव। तस्माज्जगदान्ध्यप्रसङ्ग एवेति।

**किञ्च** यद्यात्मा आवृतः स्यात् , तर्हि तदात्मन आवरणं केन भास्येत? न तावदात्मना, तस्यावृतत्वात्। नाप्यन्येन, तस्य जडत्वात्। एवमसाक्षिकमात्मावरणं कथमभ्युपगन्तुं युज्यते? तस्मादनावृतः स्वप्रकाश एवात्मेति सिद्धान्तः। न चैवमात्म-साक्षात्कारार्थिकायाः अहं ब्रह्मास्मीति बुद्धिवृत्तेरनावश्यकत्वाच्छास्त्रं व्यर्थमिति वाच्यम् ; यद्यपि सर्वे आत्मानं विदन्ति, तथापि न सच्चिदानन्दरूपत्वेन विदन्ति, किन्तु देवोऽहं मनुष्योऽहमित्याद्याकारेण विदन्ति, यथा बालाः सूर्यं विदन्त्येव, न तु प्रकाशात्मकत्वेन विदन्ति, किन्तु फलत्वेन विदन्ति, तद्वत्। तस्य च भ्रमस्य निवृत्त्यर्थं शास्त्रमावश्यकम्। यथा बालस्य पित्राद्युपदेशः— 'यस्त्वया फलत्वेन ज्ञायते, सोऽसौ न फलं, किन्तु प्रकाशात्मकः सूर्य एवे'ति, तद्वत् 'भोः शिष्य! यस्त्वया मनुष्याद्यात्मत्वेन ज्ञायते, नासौ त्वं, किन्तु सच्चिदानन्दं ब्रह्मैव त्वमसी'ति गुरुकर्तृकः शास्त्रोपदेश आवश्यक इति भावः।

न च नित्यापरोक्षे आत्मनि कथं देहादिभ्रमसम्भव इति वाच्यम् ; किमस्माकं भ्रमकारणविचारेण? भ्रमस्य सार्वजनीनस्य दुरपलापत्वात् तन्निरासायैव यतितव्यं येन केनापि हेतुना। शिरोरोगे सति तन्निरासायाजामोदगन्धस्तत्र[2] लिप्यते, न तु कुत इदं जातमिति विचारेण किमपि फलमिति। अथापि वक्तव्यमिति यद्याग्रहस्तर्हि ब्रवीमि - बुद्धिगताज्ञानदोष इति। यथा चक्षुर्गततिमिरादि-दोषो द्विचन्द्रभ्रमस्य। यथा वा निद्रादोष आत्मनि शिरश्छेददर्शनभ्रमस्य। कस्य भ्रम इति चेद्? यो भ्रान्तस्तस्यैव। प्रपञ्चितं चैतत् प्रागित्युपरम्यत इह। यद्यात्मनि कथञ्चिदपि भ्रमाज्ञानाद्ययोग इति तवाग्रहस्तदयोगोऽस्माकमलङ्कारायैव। न हि वयं भ्रमादिकमात्मनि युक्तमिति ब्रूमः, किन्त्वयुक्तमित्येव। अयुक्तस्यापि प्रतीतिर्गगननैल्यादिप्रतीतिवदुपपद्यत एव मायावशान्न तु वस्तुत इति सङ्क्षेपः। तस्मादनावृतमेव तद् ब्रह्म।

---

१. 'अज्ञानादे'रिति रा. पा.। २. अजामोदगन्धः औषधविशेषः। 'अजमोदा तूग्रगन्धा' इत्यमरः।(अमर. २-४-१४५)

**प्राप्तावसादस्य उत्तम्भनार्थमाह—** ज्ञानम् **अमानित्वादि** , ज्ञेयम् **'ज्ञेयं यत्तत्प्रवक्ष्यामी'त्यादिनोक्तम्** , ज्ञानगम्यम् **ज्ञेयमेव ज्ञातं सज्ज्ञानफलमिति ज्ञानगम्यमुच्यते, ज्ञायमानं तु ज्ञेयम्। तदेतत् त्रयमपि** हृदि **बुद्धौ** सर्वस्य **प्राणिजातस्य** विष्ठितं **विशेषेण स्थितम्। तत्रैव हि त्रयं विभाव्यते**[1] ॥ १७॥

आनन्दगिरिकृतव्याख्या

**प्रकटीकरणमिति यावत्।** ज्ञानममानित्वादि **करणव्युत्पत्त्येति शेषः। ज्ञानगम्यं ज्ञेयमिति पुनरुक्तिं शङ्कित्वोक्तम्—** ज्ञेयमिति। **उक्तत्रयस्य बुद्धिस्थतया प्राकट्यं प्रकटयति—** तदेतदिति। **तत्रानुभवमनुकूलयति—** तत्रैवेति॥ १७॥

भाष्यार्कप्रकाशः

ननु यथोक्तममानित्वादिकं दुःखेनापि सम्पादयितुमशक्यमिति कोऽपि विद्वानमानित्वादिसम्पादने न प्रयतते। अविदुषां तु नात्र शास्त्रार्थेऽधिकारः, तेषां कर्मण्येवाधिकारात्। तस्माद् व्यर्थोऽयं शास्त्रार्थ इति शङ्कते— **ज्ञानादेरिति**। विदुषां तु ज्ञानादेर्दुःखसम्पादन-बुद्ध्या तत्रेति शेषः। अवसादस्य प्राप्तौ सत्यामित्यन्वयः। तुशब्दोऽविद्वद्वैलक्षण्यार्थः। अविदुषामत्रानधिकारादिति भावः। ज्ञानादेरि-त्यादिपदाज्ज्ञेयग्रहणम्। सूक्ष्मत्वात्तदविज्ञेयमिति ज्ञेयस्यापि दुर्विज्ञेयत्वेन तत्सम्पादनमपि दुष्करमिति भावः। दुःखेन सम्पादनं यस्य तद् दुःखसम्पादनं, दुःसम्पादमित्यर्थः। तदिति बुद्धिर्दुःखसम्पादनबुद्धिस्तया तत्र ज्ञानादिसम्पादने **प्राप्तावसादस्य** प्राप्तशैथिल्यस्य निरुद्योगस्येत्यर्थः। उत्तम्भनार्थमुत्साहजननार्थमित्यर्थः। आह भगवान् ज्ञानं ज्ञेयमित्यादिश्लोकोत्तरार्धमिति शेषः। **उक्तमिति**। ब्रह्मेति शेषः। ज्ञेयस्य ज्ञानगम्यस्य च ब्रह्मत्वात् पुनरुक्तप्राप्तौ तन्निरासायाह— **ज्ञेयमेवेत्यादि**। ज्ञायमानं ब्रह्म ज्ञेयम्। ज्ञातं ब्रह्म तु ज्ञानगम्यमिति न पौनरुक्त्यम् , ज्ञायमानत्वज्ञातत्वोपाधिभेदेनैकस्यापि ब्रह्मणो भेदेन निर्देशात्। कथं ज्ञातस्य ब्रह्मणो ज्ञानगम्यत्वम्? अत आह— **ज्ञानफलमिति**। फलं हि साधनेन गम्यते (प्राप्यते), ब्रह्म च ब्रह्मज्ञानेन गम्यत इति ब्रह्मज्ञानस्य फलं ब्रह्मैवेत्यर्थः। ब्रह्मणो नित्याप्तत्वात् कथं तस्य फलत्वम्? अत आह— **ज्ञातं सदिति**। नित्याप्तमपि ब्रह्म ज्ञातं सदेव फलं भवति। अज्ञातस्य ज्ञातत्वेऽप्यनाप्तस्य फलत्वायोगात्। स्वगृहस्थो हि निधिर्नित्याप्तोऽप्यज्ञातत्वान्न फलम्। परगृहस्थो निधिर्ज्ञातोऽप्यनाप्तत्वान्न फलमिति भावः। **एतेन** नित्याप्तस्य ब्रह्मणो ज्ञानं निष्फलमिति शङ्का **परास्ता**।

ज्ञानं ज्ञेयं ज्ञानगम्यं चेत्येतत् त्रयं सर्वस्य हृदि विष्ठितमित्यन्वयः। हृच्छब्दो न हृत्पुण्डरीकपरः, तत्र यथोक्तत्रयस्यासत्त्वात् , किन्तु बुद्धिपर इत्याह— **हृदि बुद्धाविति**। प्राणिजातस्य प्रमातृवर्गस्येत्यर्थः। कथं बुद्धावपि तत्त्रयस्य स्थितिः? अत आह— **तत्रैवेति**। बुद्धावेवेत्यर्थः। **विभाव्यते** ज्ञायत इत्यर्थः। विचार्यत इति वा। स्वबुद्धिस्थत्वेन ज्ञानादिसम्पादनस्य सुलभत्वाद् विदुषां न तत्रावसादः कर्तव्य इति भावः।

न च अमानित्वादेर्बुद्धिगम्यत्वेऽपि, 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति श्रुतेर्मनसोऽप्यगोचरस्य ब्रह्मणः कथं बुद्धिगम्यत्वमिति वाच्यम् ; 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभि'रिति श्रुतेर्ब्रह्मणो बुद्धिगम्यत्वात्। असंस्कृतमनसोऽगोच-रत्वेन पूर्वश्रुत्यविरोधाच्च। **वस्तुतस्तु** अमानित्वादिज्ञानसम्पादनमेव दुष्करम् , ज्ञेयं तु नित्याप्तत्वात् सुलभमेवेति न तत्सम्पादने कोऽपि विदुषामवसाद इति बोध्यम्।

**रामानुजस्तु** - तदात्मस्वरूपं ज्ञानं ज्ञानैकाकारमिति ज्ञेयम् , तच्च ज्ञानगम्यमिति व्याचख्यौ, **तन्मन्दम्** , 'ज्योतिषामपि तज्ज्योति'रित्यनेन ज्ञानैकाकारत्वस्योक्तत्वाज्ज्ञानमित्यस्य पुनरुक्तेः। इतिशब्दाध्याहारगौरवाच्च। 'तज्ज्ञानं ज्ञानगम्यं चे'त्येतावतैव विवक्षितार्थसिद्धौ ज्ञेयमित्यस्यानर्थकत्वाच्च, 'ज्ञानमिति ज्ञेयम्' इतिवद् 'ज्ञानगम्यमिति ज्ञेयम्' इत्यपि वक्तव्यत्वापत्तेश्च॥ १७॥

१. अत्र 'ज्ञेयं यत् तत् प्रवक्ष्यामि' इत्यारभ्य 'तमसःपरमुच्यते' इत्येतच्छ्लोकपूर्वार्धपर्यन्तं ज्ञेयनिरूपणम्। तत उत्तरार्धे ज्ञानसाधनं, ज्ञेयं, ज्ञानफलं चेति त्रयस्य सुसंपादत्वबोधनार्थं सर्वप्राणिबुद्धिस्थत्वमुच्यते। इति भाष्यानुसारेण योजना। माध्वमते तु— प्रकृतस्य ज्ञेयस्य ज्ञानपदेन स्वज्ञानत्वरूपं स्वप्रकाशत्वं, पूर्वं परज्ञेयत्वस्योक्तत्वेऽपि ज्ञेयपदेन स्वज्ञेयत्वं चात्रोच्यते। जीवानामपि स्वप्रकाशत्वेऽपि तस्येशाधीनत्वात् , ईशस्यातथात्वात् , स्वज्ञेयत्वस्य च एकस्मिन् कर्मकर्तृ-भावविरोधाद् दुर्घटत्वेऽपि भगवत्प्रभावप्रदर्शनार्थं तदुक्तिरिति योजना। तत्र ज्योतिषां ज्योतिरित्यनेनैवानन्याधीनस्वप्रकाशत्वलाभात् पौनरुक्त्यम् , तथा कर्मकर्तृ-भावस्यैकस्मिन् प्रमाणसिद्धत्वे न दौर्घट्यम् , अप्रामाणिकत्वे च भ्रमसिद्धत्वेन मायिकत्वमेव पर्यवसितमिति बोध्यम्।

**इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः।**
**मद्भक्त एतद् विज्ञाय मद्भावायोपपद्यते॥ १८॥**

**यथोक्तार्थोपसंहारार्थोऽयं श्लोक आरभ्यते—** इति क्षेत्रमिति। इति एवं क्षेत्रं **महाभूतादि धृत्यन्तम् , तथा** ज्ञानम् **अमानित्वादि तत्त्वज्ञानार्थदर्शनपर्यन्तम् ,** ज्ञेयं **च 'ज्ञेयं यत्तद्' इत्यादि 'तमसः परमुच्यत' इत्येवमन्तम् उक्तं** समासतः **संक्षेपतः। एतावान् हि सर्वो वेदार्थो गीतार्थश्चोपसंहृत्योक्तः। अस्मिन् सम्यग्दर्शने कोऽधिक्रियते इति? उच्यते—** मद्भक्तः **मयीश्वरे सर्वज्ञे परमगुरौ वासुदेवे समर्पितसर्वात्मभावो यत् पश्यति श्रृणोति स्पृशति वा 'सर्वमेव भगवान् वासुदेवः' इत्येवंग्रहाविष्टबुद्धिः मद्भक्तः, स** एतद् **यथोक्तं सम्यग्दर्शनं विज्ञाय,** मद्भावाय **मम भावो मद्भावः परमात्मभावः तस्मै,** मद्भावायोपपद्यते **मोक्षं गच्छति॥ १८॥**

आनन्दगिरिकृतव्याख्या

**त्वमर्थशुद्ध्यर्थं सविकारं क्षेत्रं, पदवाक्यार्थविवेकसाधनं चामानित्वादि , तत्पदार्थं च शुद्धं [1]तद्भावोक्त्यर्थमुक्त्वा तेषां फलमुपसंहरति —**यथोक्तेति। **पूर्वार्धं विभजते—** इत्येवमिति। **वक्तव्यान्तरे सति किमिति त्रितयमेव सङ्क्षिप्योपसंहृतम्? तत्राह—** एतावानिति। **उत्तरार्धमाकाङ्क्षाद्वाराऽवतारयति—** अस्मिन्निति। **ईश्वरे समर्पितसर्वात्मभावमेवाभिनयति—** यत्पश्यतीति। विज्ञाय **लब्ध्वेत्यर्थः॥ १८॥**

भाष्यार्कप्रकाशः

**इतीति**। यथोक्तार्थस्य पूर्वोक्तार्थस्य उपसंहार एवार्थः फलं यस्य स **यथोक्तार्थोपसंहारार्थः**। **उपसंहृत्य** सङ्क्षिप्य क्रोडीकृत्येति वा। गुरूणामपि गुरुः **परमगुरुः**। **वासुदेवे** प्रत्यगभिन्ने परमात्मनि। सर्वमात्मेति भावो बुद्धिः **सर्वात्मभावः**। सर्वात्मभावस्य वासुदेवे समर्पणप्रकारमेव दर्शयति— **यत्पश्यतीत्यादिना**। वाशब्दाद् यज्जिघ्रति यदास्वादयति यत् सङ्कल्पयति यन्निश्चिनोति यदनुभवतीत्यादि-ग्रहणम्। तत् सर्वं शब्दस्पर्शरूपरसगन्धसुखदुःखादिकं विषयजातम्। उपलक्षणमिदं येन पश्यति येन जिघ्रतीत्यादेश्चक्षुरादि-करणजातस्य, अहङ्कारस्य च कर्तुः। अनात्मजातं सर्वमपीति भावः। भगवान् वासुदेव एव, 'सर्वं ब्रह्मे'ति श्रुतेः, 'वासुदेवः सर्वम्' इति गीतायाश्च। सर्वस्य वासुदेवे कल्पितत्वात् कल्पितस्य चाधिष्ठानात्मकत्वादिति भावः। **ग्रहो** ज्ञानम् , **बुद्धिरन्तः**करणम्। यः सर्वं वासुदेव इति प्रत्येति स ज्ञानी मद्भक्त इत्यर्थः। **मद्भावायेति**। मम परमात्मनः सच्चिदानन्दलक्षणो यो भावः, स मद्भावः, तस्मै। ब्रह्मभूयायेत्यर्थः। **उपपद्यते** युज्यते। कल्पत इति यावत्। मद्भावं प्रतिपद्यत इत्यर्थः। फलितमाह— **मोक्षं गच्छतीति**।

**ननु** मुक्तौ सर्वेन्द्रियनिषेधेन तदधीनज्ञानाभावात् पाषाणकल्पत्वमात्मन इति कोऽस्मै[स्यै] स्थावरत्वरूपमुक्तये स्पृहयेद् विना त्वादृशं मूढम्? न च कोऽपि न स्पृहयेत् को दोष इति वाच्यम् ; मुमुक्षोरेवाभावेन शास्त्राधिकार्यलाभाच्छास्त्रमनर्थकमेवेति चेत् , **मैवम्** ; सुषुप्तौ सर्वेन्द्रियनिषेधेन तदधीनज्ञानाभावेऽपि स्वस्य पाषाणकल्पत्वं जानन्नपि त्वं सुषुप्तिं न स्पृहयसि किम्? यदि न स्पृहयसि, तर्हि कतिपयदिनैरेव संसिद्धिं गमिष्यसि। यदि स्पृहयसि, तर्हि तथैव मुक्तिं वयं स्पृहयामहे। न च - सुषुप्तावानन्दोऽस्ति, स चाविद्यावृत्तिभि-रनुभूयते जीवेनेति - वाच्यम् ; अज्ञानवत्यामेव सुषुप्तावानन्दसद्भावे तद्रहितायां मुक्तावानन्दो नास्ति किम्? न च विद्यमानोऽप्यानन्दः करणाभावान्नानुभूयते मुक्ताविति वाच्यम् ; अननुभूतानन्दस्य कथं सद्भावाभ्युपगमः? यो हि जडाभिरपि वृत्तिभिरानन्दमनुभवति स किं स्वत आनन्दमनुभवितुं न शक्नुयात्? भवतु वा वृत्तिभिरानन्दस्यानुभवः। तासां वृत्तीनां केनानुभवः? यदि वृत्तयः केनापि नानुभूयन्ते, तर्हि तद्वृत्तिसत्त्वे किं प्रमाणम्? न ह्यसाक्षिकं किमपि वस्त्वभ्युपगम्यते। घटमनुभवन्ती हि चक्षुर्वृत्तिः किं त्वया नानुभूयते? अनुभूयते चेत् , तथैवाविद्यावृत्तिरप्यनुभूयत एवात्मनेति विद्धि। यथा सुखरूपान्तःकरणवृत्तिरात्मनाऽनुभूयते, तद्वत्। यः सुखरूपवृत्ति-प्रतिफलितमात्मानन्दं सुखरूपवृत्तीश्चानुभवति स आत्मा किं स्वरूपानन्दं नानुभवेत्? वस्तुतस्तु मुक्तावानन्दस्याननुभाव्यत्वमस्तु

१. **तद्भावः** त्वम्पदार्थस्य शुद्धब्रह्मभावः। ऐक्यसिद्ध्यर्थं पदार्थशोधनमिति भावः।

**प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।**
**विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान्॥ १९॥**

**तत्र सप्तमे ईश्वरस्य द्वे प्रकृती उपन्यस्ते परापरे क्षेत्रक्षेत्रज्ञलक्षणे। 'एतद्योनीनि भूतानि'(भ.गी.७.६) इति चोक्तम्। क्षेत्रक्षेत्रज्ञप्रकृतिद्वययोनित्वं कथं भूतानामिति? अयमर्थोऽधुनोच्यते—** प्रकृतिमिति। **प्रकृतिं पुरुषं चैव**

आनन्दगिरिकृतव्याख्या

**'प्रकृति'मित्यादि वक्ष्यमाणम् अनन्तरपूर्वग्रन्थसम्बन्धीत्याशङ्क्य , व्यवहितेन सम्बन्धार्थं व्यवहितमनुवदति—** तत्रेति। **तयोश्च प्रकृत्योरुक्तं भूतकारणत्वमित्याह—** एतदिति। **भूतानामिव प्रकृत्योरपि प्रकृत्यन्तरापेक्षयाऽनवस्थानान्न भूतयोनितेति शङ्कते—** क्षेत्रेति। **तत्राकृताभ्यागमादिवारणाय बन्धस्य निदानज्ञानार्थमात्मनो विक्रियावत्त्वादिदोषनिरासार्थं च प्रकृतिपुरुषयोरनादित्वं क्षेत्रत्वेनोक्तानां प्रकृतिं प्रति विकारभावं च दर्शयति—** अयमर्थ इति। **'स च यो यत्प्रभावश्च' इत्युद्दिष्टं व्याचष्टे—** प्रकृतिमिति। **ईश्वरस्यापरा प्रकृतिरत्र**

भाष्यार्कप्रकाशः

नाम, अनुभवरूपत्वं केन वार्यते? अनुभवरूपो ह्यानन्दः आत्मा। एवमननुभाव्यत्वादेव ह्यात्मानन्दस्यानुभवरूपत्वम्। न हि स्वप्रकाशोऽनुभवः केनाप्यनुभूयते; अनुभवस्यानुभाव्यत्वायोगात् , तद्योगे वा अनवस्थादिदोषापत्तेः। अयं चानुभवरूपो बिम्बभूत आत्मानन्दः सर्वैरप्याकाङ्क्ष्यत एव विद्वद्भिः, ये सुषुप्तौ स्वप्रतिबिम्बानन्दमनुभूय स्वापानन्तरं 'सुखमहमस्वाप्सम्' इति स्मरन्ति, कथं तैरज्ञानसम्बन्धरहितोऽपरिच्छिन्नो बिम्बानन्दो न काङ्क्ष्येत? सुषुप्तावज्ञानसत्त्वाद्धि तदानीन्तनानन्दाप्रकाशः। एवमप्रकाशमानेऽपि सौषुप्तानन्दे येषां स्पृहा, तेषां कथं प्रकाशमानमोक्षानन्दे न स्यात् स्पृहा? येषां प्रकाशमाने परिच्छिन्ने क्षणिके विषयानन्दे स्पृहा, तेषां कथं प्रकाशमानेऽपरिच्छिन्ने शाश्वते ब्रह्मानन्दे न स्पृहा? तस्मान्न मुक्तात्मनः पाषाणकल्पता, किन्तु स्वस्वरूपानन्दानुभवरूपतैव। पाषाणस्य जडत्वादात्मनश्च ज्ञानानन्दरूपत्वादिति।

**ननु** सुषुप्तावानन्दस्याप्रकाशमानत्वमज्ञानादित्युक्तं यत् तन्न सङ्गच्छते - आत्मन्यज्ञानावरणाभावस्य दर्शितत्वादिति चेत् , **नैष दोषः**; ज्ञानानन्दोभयरूप आत्मा, तत्र ज्ञानस्वरूपत्वस्यानावृतत्वेऽपि सुखरूपत्वस्यावृतत्वमेवेति। सर्वो हि जन आत्मानं ज्ञातारं वेत्ति, न तु सुखरूपम्। ततश्चानुभवबलादुक्तार्थः कल्प्यत इति नातिशङ्कनीयम्। अनुभवावसानत्वात् सर्वस्य। यद्वा सुषुप्तावविद्यावृत्ति-प्रतिफलित एवानन्दोऽनुभूयत इति स आवृत एव। बिम्बभूतात्मानन्द एवानावृतः। न चानावृतस्य बिम्बभूतानन्दस्य संसारदशायामपि स्फुरणप्रसङ्ग इति वाच्यम् ; स्फुरतोऽपि तस्यानन्दस्य विषयव्यापृतायां बुद्धावभानम्। अत एव समाधौ तस्य स्फुरणमिति। न हि भासमानमपि सूर्यं मलदूषितादर्शो गृह्णीयात् , तिमिरदूषितं चक्षुर्वा। न चात्मनैव गृह्यतां किं बुद्ध्येति वाच्यम् ; आत्मा सदा स्वानन्दमनुभवन्नेव वर्तते। देहात्माभिमानिनस्तु नैतज्जानन्ति। किन्तु बुद्ध्यनुभूतं सुखाभासमेव 'वयं सुखमनुभवामः' इति मन्यन्ते, बुद्धावात्माभिमानात् तेषाम्। तस्मात् पिण्डं समुत्सृज्य करं लेढीति न्यायेन मूढाः आत्मानन्दानुभवं विहाय विषयसुखानुभवमि-च्छन्ति। प्राज्ञास्तु विषयसुखं विहायात्मानन्दमनुभवन्ति समाधौ यथा, तथा प्राज्ञा अद्वैतिनो ब्रह्मानन्दमिच्छन्ति, मूढास्तु वैकुण्ठादि-लोकगतं विषयसुखमेवेति युक्तं ब्रह्मविदां ब्रह्मानन्दानुभवलक्षणो मोक्षो निरतिशयफलमिति। विज्ञाय मद्भावायेत्यनेन च मोक्षस्य ज्ञानमेव साधनं, न त्वन्यदिति स्थापितम्। 'ब्रह्मविद् ब्रह्मैव भवती'ति श्रुतेः। एतेन कर्मज्ञानसमुच्चयो मोक्षसाधनमित्यपास्तम्।

यत्तु **रामानुजः** - मद्भावायोपपद्यतेऽहमिवासंसारी भवतीति, **तन्मन्दम्** - सति जीवेश्वरभेदे तत्प्रयुक्तसंसारानिवृत्तेः। औपाधिको हि संसारः। जीवेश्वरभेदश्चोपाधिकृत एवेति। जीवस्यान्तःकरणमुपाधिः, ईश्वरस्याज्ञानमिति सत्यज्ञानादौ कथं तत्प्रयुक्तसंसाराभावः? निरुपाधिकत्वे च शुद्धचैतन्यस्य भेदकाभावाद् भेदाभाव एवेति॥ १८॥

**प्रकृतिमिति**। 'प्रकृतिं पुरुषं चैव, क्षेत्रं क्षेत्रज्ञमेव च, एतद्वेदितुमिच्छामि, ज्ञानं ज्ञेयं च केशव॥' इत्यर्जुनेन पृष्टानां मध्ये क्षेत्रं

**ईश्वरस्य प्रकृती, तौ प्रकृतिपुरुषौ उभावपि** अनादी **विद्धि। न विद्यत आदिर्ययोस्तौ अनादी। नित्यत्वादीश्वरस्य तत्प्रकृत्योरपि युक्तं नित्यत्वेन भवितुम्। प्रकृतिद्वयवत्त्वमेव हीश्वरस्येश्वरत्वम्। याभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिस्थितिप्रलयहेतुः, ते द्वे अनादी सत्यौ संसारस्य कारणम्।**

आनन्दगिरिकृतव्याख्या

**प्रकृतिशब्देनोक्ता, परा तु प्रकृतिर्जीवाख्या पुरुषशब्देन विवक्षितेति व्याकरोति—** ईश्वरस्येति। **तयोरनादित्वं व्युत्पादयति—** नेत्यादिना। **तत्र युक्तिमाह—** [१]नित्यत्वादीश्वरस्येति। **ईश्वरस्योक्तप्रकृतिद्वयवत्त्वं कथमित्याशङ्क्याह—** प्रकृतीति। **तस्य जगज्जन्मादौ स्वातन्त्र्यमेव ईश्वरत्वम्, न प्रकृतिद्वयवत्त्वमित्याशङ्क्याह—** याभ्यामिति। **प्रकृत्योरनादित्वं कुत्रोपयुक्तमित्याशङ्क्याह—** ते इति।

भाष्यार्कप्रकाशः

क्षेत्रज्ञो ज्ञानं ज्ञेयं चेति चतुष्टयं निरूपितं कृष्णेन। अथ प्रकृतिपुरुषौ निरूपयितुमारभते— **प्रकृतिमित्यादिना**। न च 'तत् क्षेत्रं यच्चे'ति, 'स च यो यत्प्रभावश्चे'ति क्षेत्रक्षेत्रज्ञयोरेवेह वक्ष्यमाणत्वेन प्रतिज्ञातत्वाज्ज्ञानज्ञेययोः प्रकृतिपुरुषयोश्च निरूपणमसङ्गतमिति वाच्यम् ; ज्ञानप्रकृत्योः क्षेत्रत्वात्, पुरुषज्ञेययोः क्षेत्रज्ञत्वाच्च स्वप्रतिज्ञातक्षेत्रक्षेत्रज्ञनिरूपणान्तर्गतमेव ज्ञानादिचतुष्टयनिरूपणमिति।

हे अर्जुन! ये त्वया षट् पदार्थाः पृष्टास्ते वस्तुतः पदार्थद्वयमेव - क्षेत्रं क्षेत्रज्ञश्चेति। तत्र क्षेत्रस्यैवावान्तरभेदो ज्ञानममानित्वादि-लक्षणम्। तच्चोक्तम्। क्षेत्रं च महाभूतादिकं निरूपितम्। क्षेत्रज्ञ एव ज्ञेयं ब्रह्म। तच्चोक्तम्। यस्त्वव्यक्तलक्षणः क्षेत्रविशेषः स एव प्रकृतिरुच्यते। यः पुनः क्षेत्रज्ञः स एव पुरुषः। तावेव क्षेत्रक्षेत्रज्ञलक्षणौ प्रकृतिपुरुषौ पुनर्निरूपयामि यत्किञ्चिद्धर्मविशेषप्रदर्शनार्थं, शृण्वित्यभिप्रायेणाह भगवान्— **प्रकृति**मित्यादि। ननु क्षेत्रक्षेत्रज्ञयोर्निरूपितत्वात्पुनः प्रकृतिपुरुषनिरूपणं व्यर्थमिति शङ्कायां, न व्यर्थम्, भूतयोनित्वादिप्रदर्शनार्थत्वादित्याह भाष्यकारः— **तत्रेति**। तत्र पूर्वोक्त इत्यर्थः। कथं भूतानां क्षेत्रक्षेत्रज्ञप्रकृतिद्वययोनित्वमिति प्रश्नस्यायमुत्तरभूतोऽर्थोऽधुनोच्यते।

**ननु** प्रकृतिपुरुषयोरनादित्वे नित्यत्वे तद्विशिष्टत्वे चेश्वरस्य, प्रकृतिपुरुषेश्वरास्त्रयोऽपि नित्या एवेतीश्वरः प्रकृतिपुरुषविशिष्ट एवेति च यत् परमतं तत्र प्रविष्टः किल भवन्मताचार्यः **शङ्करभगवत्पाद** इति चेत्, **मैवम्** ; ईश्वरस्य स्वरूपभूता जीवलक्षणा प्रकृतिः, स्वभावभूता तु क्षेत्रलक्षणेति सप्तमाध्याय एवोक्तत्वाज्जीवलक्षणस्वरूपातिरिक्तेश्वरस्यैवाभावात् जीवलक्षणेश्वरप्रकृतेर्नित्यत्वं तावद-विवादम्, अनादित्वादनन्तत्वाच्च तस्याः। क्षेत्रलक्षणप्रकृतेस्तु यावद्विद्योदयं नित्यत्वात् सापेक्षमेव नित्यत्वं, न तु निरपेक्षं सान्तत्वात् क्षेत्रप्रकृतेः। अस्या अनादित्वं च पराधीनजन्माभावरूपत्वमेव। न हि 'आत्मनः आकाशः, आकाशाद् वायुः' इतिवत् 'आत्मनो ऽन्यस्माद् वा प्रकृतिर्जायते' इति क्वापि श्रूयते। न च सुतरां जन्माभाव इति वाच्यम् ; 'माया चाविद्या च स्वयमेव भवती'ति जन्मश्रवणात्। न च 'जीवेशावाभासेन करोती'ति तयोर्मायावशं जन्म श्रूयत इति वाच्यम् ; ब्रह्मणि निर्गुणे जीवत्वेश्वरत्वयोरौपाधि-कत्वेन मायाकृतत्ववर्णनात्। एवं प्रकृतेः सादित्वादेव सान्तत्वमनित्यत्वं च। न च - सत्यावित्येवोक्तमाचार्यैरिति - वाच्यम् ; व्यावहारिकसत्यत्वं प्रकृतेः, पारमार्थिकसत्यत्वं पुरुषस्येत्यदोषात्[२]। इदं च पुरुषशब्दवाच्यं जीवलक्षणं चैतन्यमीश्वरस्य स्वरूपमिति ईश्वरस्य तद्वत्त्वमुच्यते। राहोः शिरः इति शिरोवत्त्वमिव राहोः। यद्वा महाकाशस्य घटाकाश इव जीव ईश्वरस्यांश इति तद्वत्त्व-मीश्वरस्योक्तम्। तस्मान्नाचार्यस्य परमतप्रवेशप्रसङ्गः। ते हि पुरुषेश्वरयोः स्वरूपतः स्वभावतश्च भेदं वर्णयन्ति, पुरुषस्य चेश्वरशेषत्वं, प्रकृतेश्च मुक्तावपि सत्त्वमिति।

**ननु** प्रकृतिद्वयवत्त्वस्यैवेश्वरत्वान्मुक्तौ तदभावे ईश्वरस्यानीश्वरत्वप्रसङ्गः स्याद्, अथवा ईश्वराभावप्रसङ्ग इति चेत्, **मैवम्** ; मुक्तावीशितव्याभावेनेश्वरत्वाभावस्यास्माकमिष्टत्वात्। निर्विशेषचिन्मात्रस्यैवेश्वरत्वाद् ईश्वराभावप्रसङ्गस्तु न।

हन्त तर्हि, 'ईश्वरस्य नित्यत्वात् तत्प्रकृत्योरपि नित्यत्वेन भवितुं युक्तं, प्रकृतिद्वयवत्त्वमेव हीश्वरत्व'मिति भाष्यविरोधस्तवेति

१. 'नित्येश्वरत्वादीश्वरस्य' इति मूले, टीकायां प्रतीकधारणे च पा.। २. वस्तुतस्तु 'ते द्वे अनादी सत्यौ संसारस्य कारणम्' इति भाष्यवाक्ये 'सत्यौ' इति नेदं सत्यशब्दस्य रूपम्, किन्तु शतृप्रत्ययान्तस्य सतीशब्दस्य, अन्यथा स्त्रीलिङ्गे विशेष्ये 'सत्यौ' इति पुंलिङ्गविशेषणासंगतेः इति बोध्यम्।

[परकीयव्याख्यानिरसनम्]

**न आदी अनादी इति तत्पुरुषसमासं केचिद् वर्णयन्ति। तेन हि किल ईश्वरस्य कारणत्वं सिध्यति। यदि पुनः प्रकृतिपुरुषावेव नित्यौ स्यातां तत्कृतमेव जगत्, नेश्वरस्य जगतः कर्तृत्वमिति। तदसत्; प्राक् प्रकृतिपुरुषयोरुत्पत्तेः**

आनन्दगिरिकृतव्याख्या

**मतान्तरमाह—** नेत्यादिना। **तयोर्मूलकारणत्वाभावे कस्य तदेष्टव्यमित्याशङ्क्याह—** तेन हीति। **प्रकृत्योरेव मूलकारणत्वे श्रुतिस्मृतिसिद्धमीश्वरस्य तथात्वं न स्यादित्याह—** यदीति। **प्रकृतिद्वयस्य कार्यत्वपक्षं प्रत्याह—** तदसदिति। **किञ्च प्रकृतिद्वयमनपेक्ष्य**

भाष्यार्कप्रकाशः

चेत्, **मैवम्**; व्यवहारदशामाश्रित्योक्तत्वादस्यार्थस्य। यावद्व्यवहारं हि प्रकृतिपुरुषेश्वरास्त्रयोऽपि नित्याः। पुरुषेश्वरयोर्भेदश्च नित्यः। परमार्थतस्त्वीश्वर एक एव नित्यः। तस्य पुरुषाद्भेदश्च मिथ्या। प्रकृतिश्च मिथ्यैवेति। अत एव हि 'दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता' इति श्रुतिर्विद्याविद्यामार्गद्वयस्यात्यन्तवैलक्षण्यं ब्रूते। न च विद्यादशायां द्वैतमस्ति, 'ऐतदात्म्यमिदं सर्वम्, नेह नानास्ति किञ्चने'त्यादिश्रुतिभ्यः। अविद्यया हि ब्रह्मणि जीवत्वेश्वरत्वजगन्ति कल्पितानि। कथं तानि विद्यायामुपलभ्येरन्? अत एव 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा, यो वै भूमा तदमृतम्' इति, 'तत्र केन कं पश्येदि'त्याद्याः श्रुतयश्चोपपद्यन्ते। एवं जीवेशत्वादिरहितं चिन्मात्रमेव हि लक्षणया तत्त्वमस्यादिमहावाक्यान्यपि बोधयन्ति। तस्माद् ब्रह्मणः प्रकृतिद्वयवत्त्वरूपमीश्वरत्वमविद्यावस्थायामेव; प्रकृतेश्च नित्यत्वं सत्यत्वं च व्यावहारिकमेव; एक एवेश्वरः परमार्थतो नित्यः सत्यश्च। प्रपञ्चितश्चायमर्थो 'अविनाशि तु तद्विद्धी'त्यादौ। भाष्यकृतश्चायमेवाभिप्रेतोऽर्थः। अन्यथा स्ववचोविरोधात्। प्रकृते च 'याभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिप्रलयहेतु' रिति वचनात्। न हि परमार्थतो जगदस्ति, येन तदुत्पत्त्यादिकं पारमार्थिकं स्यात्; तद्धेतुत्वं चेश्वरस्य सत्यं स्यात्। तस्माद् व्यावहारिकमेव जगज्जन्मादिहेतुत्वं, तत्प्रयुक्तमीश्वरत्वं च ब्रह्मण इति स्थितम्।

प्रकृतेर्जगद्रूपेण परिणामाज्जगद्धेतुत्वं, पुरुषस्य तु विवर्तनादिति विवेकः। पुरुषस्य ज्ञातृत्वात्प्रकृतेश्च सुखाद्यात्मना परिणामात् संसारकारणत्वं वक्ष्यत इति तदभिप्रायादाह— **संसारकारणे इति**। पुरुषस्य पारमार्थिकसत्यत्वात् प्रकृतेश्च व्यावहारिकसत्यत्वादुक्तम्- **सत्याविति**। न तु प्रकृतिरपि परमार्थतः सत्येति भ्रमितव्यं, विद्यादशायां तदभावात्। देहादिप्रपञ्चस्तु सादित्वाद् यावद्व्यवहारमपि अस्थिरत्वान्न सत्य इति भावः।

ननु यद्यनादी प्रकृतिपुरुषौ स्यातां, तर्हि तावेव जगत्कारणभूतौ भवत इति कथमीश्वरस्य जगत्कारणत्वम्? न च प्रकृतिद्वारा जगत्कारणत्वमीश्वरस्येति वाच्यम्; अनाद्योस्तयोर्मुख्यकारणत्वमेवोच्यतां किमिति द्वारकारणत्वम्? तदतिरिक्तेश्वरकल्पनं वा किमर्थम्? न च जडायाः प्रकृतेरीक्षणायोगात्, पुरुषस्य चोदासीनत्वादीश्वरस्य जगत्कारणत्वमुक्तमिति वाच्यम्; पुरुषसंसर्गवशेन जडाया अपि प्रकृतेरीक्षणसम्भवाद् यथा जीवचैतन्याभासेन मनःसङ्कल्पसम्भवः। तौ च प्रकृतिपुरुषौ प्रतीश्वरस्य कारणत्वाभावेन ईश्वरस्य सर्वकारणत्वासम्भवाच्च। तस्मान्न प्रकृतिपुरुषावनादी, किन्तु सादी एव भवतः। न च प्रकृति[त]गीतागतानादिवचनविरोधः, न आदी अनादीति तत्पुरुषसमासेन तयोः सादित्वालाभात्। यद्धि कारणं न भवति, तद्धि कार्यमेव भवेत्, कारणभिन्नस्य कार्यत्वात्। आदिपदस्य कारणवाचित्वान्नञश्च तदन्यवाचित्वादिति पूर्वपक्षमुद्भावयति—**न आदी इति**। **तेनेति**। तत्पुरुषसमासवर्णनेनेत्यर्थः। **किलेत्यनेन** तद्वर्णनस्यायुक्तत्वं सूच्यते। **नेश्वरस्येति**। नित्याभ्यामेव प्रकृतिपुरुषाभ्यां जगत्सृष्ट्यादिसम्भवादिति भावः। न च सादित्वे तयोः कथं जगत्कर्तृत्वाभाव इति वाच्यम्; यस्तयोरादिस्तस्यैव जगत्कर्तृत्वाभ्युपगमः। यथा सादेराकाशस्य वायुकारणत्वेऽपि यदाकाशस्य कारणं तदेव वायोरपीत्यभ्युपगम्यते, तद्वत्। परमकारणस्यैवेश्वरस्य कारणत्वं नावान्तरकारणयोः प्रकृतिपुरुषयोराकाशादेरिवेति न प्रकृतिपुरुषयोर्जगत्कारणत्वं सादित्वे स्यादिति भावः। परिहरति—**तदसदिति**। प्रकृतिपुरुषयोरुत्पत्तेः प्रागीशितव्यवस्त्वभावादीश्वरस्यानीश्वरत्वप्रसङ्गः। तदुत्पत्तेः पश्चात्तु तयोरेवेशितव्ययोः सत्त्वात् स्यादीश्वरत्वमीश्वरस्येति कृत्वा **प्रागित्युक्तम्**।

**ईशितव्याभावाद् ईश्वरस्यानीश्वरत्वप्रसङ्गात्। संसारस्य निर्निमित्तत्वेऽनिर्मोक्ष(त्व)प्रसङ्गात् शास्त्रानर्थक्यप्रसङ्गात् , बन्धमोक्षाभावप्रसङ्गाच्च। नित्यत्वे पुनरीश्वरस्य प्रकृत्योः सर्वमेतदुपपन्नं भवेत्। कथम्?** विकारांश्च गुणांश्चैव

आनन्दगिरिकृतव्याख्या

**ईश्वरस्य संसारहेतुत्वे स्वातन्त्र्यान्मुक्तानामपि ततः संसाराप्तेरनिषेधान्मोक्षशास्त्राप्रामाण्यान्न तस्यैव संसारहेतुतेत्याह—** संसारस्येति। निर्निमित्तत्वं **प्रकृतिद्वयापेक्षामृते परस्यैव निमित्तत्वमिति यावत्। किञ्च कार्यत्वे प्रकृत्योस्तदुदयात्पूर्वं बन्धाभावे तद्विश्लेषात्मनो मोक्षस्याभावात् कदाचिदुभयाभावे पुनस्तदप्रसङ्गान्न प्रकृतिद्वयस्य कार्यतेत्याह—** बन्धेति। **प्रकृत्योर्मूलकारणत्वे नानुपपत्तिरित्याह—** नित्यत्व इति। **स्वपक्षे दोषाभावं प्रश्नपूर्वकं प्रपञ्चयति—** कथमित्यादिना। **सम्भवः सत्ताप्रापको हेतुः। प्रकृतेरनादित्वे विकाराणां गुणानां**

भाष्यार्कप्रकाशः

**ननु** तव मतेऽपि प्रकृतेः सम्भूतिश्रवणेन सादित्वात् पुरुषस्यानादित्वेऽपीश्वरादभिन्नत्वात् प्रकृत्युत्पत्तेः प्रागीशितव्याभावेने-श्वरस्यानीश्वरत्वप्रसङ्गोऽस्त्येवेति चेत् , **मैवम्** ; प्रकृतेः सम्भूतिश्रवणेऽपि इयमिदानीं सम्भूतेति वक्तुमशक्यत्वेनानादित्वात्। पुरुषस्येश्वरादभेदेऽपि तद्भेदस्याविद्यया कल्पितस्य पूर्वोक्तन्यायेनैवानादित्वात्। 'जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा। अविद्या तच्चितोर्योगः षडस्माकमनादयः॥' इति वचनात् प्रकृतिपुरुषयोः प्रागिति वक्तुं न शक्यते। तस्माद् यावदविद्यम् अनादिकालादारभ्य सर्वदाऽपीशितव्यसत्त्वान्नास्मन्मते ईश्वरस्यानीश्वरत्वप्रसङ्गः।

किमीश्वरः प्रकृतिपुरुषौ प्रपञ्चं वा स्वेच्छया सृजति? उत यत्किञ्चिन्निमित्तमाश्रित्य? आद्ये - ईश्वरीयेच्छाया नित्यत्वेन सर्वदाऽपि प्रकृतिपुरुषप्रपञ्चसद्भाव एवेति न संसारनिवृत्तिः। द्वितीये - यन्निमित्तं तद्वक्तव्यम् , न तावज्जीवादृष्टाख्यं कर्म, तस्य प्रकृत्यन्तःपातित्वाज्जीवस्य सादित्वेन सान्तत्वात् तत्कर्मणो निराश्रयस्य सत्त्वायोगात्। जीवस्योत्पत्तेः प्राक् कर्मण एवासम्भवाच्च। कर्ता हि जीवः स्वयमुत्पन्नः कर्म कुर्यात् , न त्वनुत्पन्नः। नाप्यज्ञानम् , तस्य प्रकृतित्वात्। एवम् अनिमित्तस्यापि कार्यस्याभ्युपगमे निर्निमित्तः संसारो नैव निवर्तेत। विद्यमानसंसारस्य ज्ञानान्निवृत्तावपि निर्निमित्तः संसारः पुनरन्य आपतेदेव। न च कथं भवेदिति वाच्यम् ; निर्निमित्तसंसारं प्रति कथमिति निमित्तप्रश्नायोगात्। ननु माऽस्तु संसारस्यानिवृत्तिः, को दोषः? तत्राह— **शास्त्रेति**। संसारनिवृत्त्यर्थं हि वेदान्तशास्त्रं भगवता निर्मितं, तन्निवृत्त्यभावे किमर्थं तच्छास्त्रम्? व्यर्थमेवेत्यर्थः। निर्निमित्तस्य कार्यस्य दुरभ्युपगमत्वात् संसारो निर्निमित्तः कदाऽपि न स्यादेवेति बन्धाभावप्रसङ्गः। बन्धपूर्वकत्वान्मोक्षस्य मोक्षाभावप्रसङ्गश्चेत्याह— **बन्धमोक्षेति**। बन्धमोक्षयोरभावप्रसङ्गादिति समासः। न च ईश्वरस्य निमित्तस्य सत्त्वान्न निर्निमित्तत्वमिति वाच्यम् ; ईश्वरस्य मुख्यकारणत्वेन निमित्तकारणत्वायोगात्। प्रकृतिपुरुषावेव हि संसारस्य निमित्तकारणे। तयोश्च तव मते सादित्वान्न कारणत्वमिति। न च प्रकृतिपुरुषयोरनादित्वेऽपि भवेयुरमी दोषा इति वाच्यमित्याह— **नित्यत्वे त्विति**। एतत् पूर्वोक्तम्। **सर्वमिति**। शास्त्रसार्थक्यं बन्धमोक्षौ चेत्यर्थः। प्रकृतिपुरुषयोः संसारनिमित्तयोः सत्त्वान्न निर्निमित्तत्वं संसारस्य। प्रकृतेर्ज्ञानेन नाशान्न पुनःसंसारप्रसङ्गः, निमित्ताभावात् , पुरुषस्यैकस्य संसारं प्रत्यनिमित्तत्वात्। ज्ञानजनकत्वेन च शास्त्रं सार्थकम्। प्रकृतेरनादित्वेन सर्वदाऽपि सत्त्वात् तत्कृतो बन्धोऽस्ति। बन्धस्य सद्भावादेव तन्निवृत्तिरूपो मोक्षोऽप्यस्तीति न काचिदनुपपत्तिरिति भावः।

न च प्रकृतिपुरुषयोरनादित्वे ईश्वरस्य जगत्कारणत्वासिद्धिः, प्रकृतिपुरुषाभ्यां निमित्ताभ्यामेवेश्वरस्य जगत्कारणत्वात्। वस्तुतो निर्विशेषचिन्मात्रेश्वरस्य जगत्कारणत्वासम्भवात्। न च प्रकृतिपुरुषयोरेव मुख्यकारणत्वमस्त्विति वाच्यम् ; प्रकृतेर्जडत्वात् , पुरुषस्य चोदासीनत्वात्। न च पुरुषसंसर्गात् प्रकृतेः, प्रकृतिसम्बन्धात् पुरुषस्य वा ईक्षणसम्भवात् तयोरेव मुख्यकारणत्वमिति वाच्यम् ; असङ्गस्य पुरुषस्य प्रकृतिसंसर्गायोगात् , प्रकृतिसंसृष्टस्य वा प्रकृतिपरवशत्वेन पुरुषस्य परिच्छन्नज्ञानस्य सृष्टिसंकल्पा-योगात् , तादृशपुरुषसम्बन्धेन प्रकृतेर्वा सृष्टिसङ्कल्पायोगात्। ईश्वरस्य तु वशीकृतमायत्वादपरिच्छिन्नज्ञानस्य सृष्टिसङ्कल्पोपपत्तिः। प्रकृतेरीश्वरचैतन्याभासेन [1]'वृत्तिसम्भवेऽपि न सङ्कल्पयितृत्वं तस्याः, चेतनधर्मत्वादीक्षणस्य'[2]। सति मुख्येक्षणे ईश्वरीये प्राकृतगौणे-

१. वृत्तिरूपपरिणामसंभवेऽपीत्यर्थः। २. द्र.ब्र.सू. १-१-५.

**वक्ष्यमाणान्** विकारान् **बुद्ध्यादिदेहेन्द्रियान्तान्** गुणांश्च **सुखदुःखमोहप्रत्ययाकारपरिणतान्** विद्धि **जानीहि प्रकृतिसम्भवान्** प्रकृतिः **ईश्वरस्य विकारकारणशक्तिस्त्रिगुणात्मिका माया, सा सम्भवो येषां विकाराणां गुणानां च तान् विकारान् गुणांश्च विद्धि** प्रकृतिसम्भवान् [1]**प्रकृतिपरिणामान्॥ १९॥**

आनन्दगिरिकृतव्याख्या

**च तत्कार्यत्वादात्मनो निर्विकारत्वं निर्गुणत्वं च सिध्यतीति भावः॥ १९॥**

भाष्यार्कप्रकाशः

क्षणस्वीकारस्यान्याय्यत्वाच्च। **यदुक्तम्** - प्रकृतिपुरुषौ प्रत्यकारणत्वादीश्वरस्य सर्वकारणत्वासिद्धिरिति, **तन्न**, सर्वं कार्यजातं प्रत्येव [कारणत्वात्] सर्वकारणत्वादीश्वरस्येति।

**नन्वसङ्गे**श्वरस्य कथं मायित्वम्? ईश्वरस्यैव पुरुषत्वेन कथमीश्वरस्यापरिच्छिन्नज्ञानत्वम् , जीवस्य परिच्छिन्नज्ञानत्वं च? इति चेत् , **नैष दोषः ;** विद्यावस्थायामेवेश्वरः पुरुषो वाऽसङ्गः। अविद्यावस्थायां तु माय्येवेश्वरः, मायापरतन्त्र एव जीवश्च। विद्यावस्थायामेव पुरुष ईश्वरः, अविद्यावस्थायां तु पुरुष ईश्वराद् भिन्न एव। न चाविद्ययाऽपि कथमीश्वरस्य जीवत्वमिति वाच्यम् ; 'मायायां सर्वसम्भवादि'ति न्यायात्। यदि वस्तुतो वयमीश्वरस्य जीवत्वं ब्रूमस्तर्हि कथमीश्वरस्य जीवत्वमिति चोद्येत, न तु तथा ब्रूमः, न हि रज्जोरविद्यया सर्पत्वं दृश्यमानं विप्रतिषिद्धम् , येनेश्वरस्याविद्यया दृश्यमानं जीवत्वं विप्रतिषिद्धं स्यात्। तस्मादनादिरपि प्रकृतिर्न जगत्कारणं जडत्वात् , 'ईक्षतेर्नाशब्दम्' इति सूत्राच्च। तथाऽनादिरपि जीवो न जगत्कारणम् , प्रकृतिपरतन्त्रत्वेनानीश्वरत्वात्। किन्त्वीश्वर एव वशीकृतप्रकृतिः सर्वज्ञः सर्वशक्तिः जगत्कारणम् , 'यतो वे'त्यादिश्रुतेः, 'जन्माद्यस्य यतः' इति [2]स्मृतेश्च। एवं जगत्सृष्ट्यादिसमर्थत्वादेवास्येश्वरत्वव्यवहारः। ईश्वरो हि समर्थः। ईष्टे इतीश्वर इति व्युत्पत्तेः। अत एव निरीश्वरसाङ्ख्यवादस्याश्रौतत्वादप्रामाण्यमयुक्तत्वाच्च। न चैवं भिन्नेश्वरयोगवादः प्रमाणमिति वाच्यम् ; जीवेश्वरभेदस्याविद्यया कल्पितत्वेनातात्त्विकत्वाद् अद्वैतस्यैव श्रौतत्वाद् युक्तत्वाच्च। तस्मादद्वैतवाद एव श्रुतियुक्त्यनुभवसिद्धत्वात् प्रमाणमिति सङ्क्षेपः।

नन्वीश्वरप्रकृत्योर्नित्यत्वे कथं सर्वमेतदुपपद्यते? इत्याक्षिपति— **कथमिति**। तयोरेव संसारकारणत्वात् सर्वमुपपद्यत इत्यभिप्रेत्य तत्संसारकारणत्वमेव दर्शयति— **विकारांश्चेत्यादिना**। विकारांश्च गुणांश्चैव प्रकृतिसम्भवान् विद्धि। प्रकृतिर्मूलप्रकृतिः; विकारा महदादिप्रकृतिकार्याणि; बुद्धिशब्देन महत्तत्त्वस्य ग्रहणम्। आदिपदादहङ्कारपञ्चतन्मात्रदशेन्द्रियप्राणपञ्चकमनसां ग्रहणम्। देहः स्थूलस्तेन पञ्चभूतग्रहणम्। पञ्चभूतात्मकत्वात् तस्य। प्रतीयन्त इति प्रत्ययाः विषयाः। प्रत्यया ज्ञानानि, वृत्तय इति यावदिति वा। **वक्ष्यमाणानिति**। 'कार्ये'त्युत्तरश्लोकेनेति भावः। सम्भवत्यस्मादिति सम्भवः, उत्पत्तिहेतुरित्यर्थः। प्रकृतेः सकाशात् सम्भवः उत्पत्तिर्येषां तानित्यपि वक्तुं शक्यम्। कथं प्रकृतिसम्भवत्वं तेषाम्? अत आह— **प्रकृतिपरिणतानिति**। मूलप्रकृतिरेकैव मृद्द्रव्यमेकं घटकपालकरकाद्याकारेणेव बुद्ध्यादिविकाराकारेण सुखदुःखादिगुणाकारेण च परिणतेत्यर्थः। गुणानां स्वरूपेण दुर्ज्ञेयत्वादाह— **सुखाद्याकारपरिणतानिति**। एतेन 'तत् क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यदि'ति श्लोकप्रतिज्ञातार्थ उक्तप्रायः। सर्वविकारयुक्तं सर्वगुणयुक्तं च प्रकृतिलक्षणं क्षेत्रमेव। सर्वं कार्यं प्रकृतित एव जायत इति चेहोक्तत्वात्। 'महाभूतानी'ति श्लोकेन तु सार्धेन क्षेत्रं पूर्वमेव दर्शितमिति बोध्यम्।

न चैवं सर्वस्य जगतः प्रकृतिसम्भवत्वे कथमीश्वरस्य जगत्कर्तृत्वमिति वाच्यम् ; ईश्वरसङ्कल्पवशादेव तदीया प्रकृतिरियं जगदाकारेण परिणतेति जगत्कर्तृत्वमीश्वरस्य। यथा कुलालसङ्कल्पकृतिभ्यां घटाद्याकारपरिणामवत्यामपि मृदि घटादिकर्तृत्वं कुलालस्य, तद्वत्। न चैवं प्रकृतेरेव जगदुपादानत्वे ईश्वरस्याभिन्ननिमित्तोपादानत्वं न सङ्गच्छत इति वाच्यम् ; जगद्विवर्ताधिष्ठानत्वेन तादृशप्रकृत्यधिष्ठानत्वेन वा ईश्वरस्य कर्तृत्वोपादानत्वयोः सिद्धेः। अत एव 'याभ्यां प्रकृतिभ्यामीश्वरो जगत्सृष्ट्यादिहेतु'रिति भाषितमाचार्यैः।

---

१. 'प्रकृतिपरिणतान्' इति रा.पा.भाति। २. 'जन्माद्यस्य यतः' इति भागवतश्लोको ग्राह्यः स्मृतित्वोक्तेः।

**कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते।**
**पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते॥२०॥**

**के पुनस्ते विकारा गुणाश्च प्रकृतिसम्भवाः?[१]—** कार्येति। कार्यकरणकर्तृत्वे - **कार्यं शरीरम् , करणानि च तत्स्थानि त्रयोदश। देहस्यारम्भकाणि भूतानि [२]पञ्च, विषयाश्च प्रकृतिसम्भवा विकाराः पूर्वोक्ता इह कार्यग्रहणेन गृह्यन्ते। गुणाश्च प्रकृतिसम्भवाः सुखदुःखमोहात्मकाः करणाश्रयत्वात् करणग्रहणेन गृह्यन्ते। तेषां कार्यकरणानां**

आनन्दगिरिकृतव्याख्या

**विकाराणां गुणानां प्रकृतेश्च स्वरूपमाकाङ्क्षाद्वारा निर्णेतुमुत्तरश्लोकपूर्वार्धं पातयति—** के पुनरिति। **पुरुषस्यानादित्वकृतं बन्धहेतुत्वमाह—** पुरुष इति। **पूर्वार्धं व्याचष्टे—** कार्यमित्यादिना। **ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं मनो बुद्धिरहङ्कारश्चेति त्रयोदश करणानि। तथापि भूतानां विषयाणां चाग्रहणात् कथं तेषां प्रकृतिकार्यतेत्याशङ्क्याह—**देहस्येति। **तथापि गुणानामिहाग्रहणान्न प्रकृतिकार्यत्वम्?**

भाष्यार्कप्रकाशः

**ननु** ईश्वरस्य जगत्सृष्ट्यादिहेतुत्वे प्रकृतिरेवोपयुज्यते, प्रकृतिपरिणामत्वाज्जगतः, न तु पुरुष इति कथं 'याभ्यां प्रकृतिभ्या'-मित्युक्तमिति चेत् , **मैवम्** ; भोक्तुरभावे भोग्यस्य जगतोऽप्यभावप्रसङ्गात् पुरुषस्य भोक्तृत्वं भोग्यजगत्सद्भावं प्रति निमित्तमिति पुरुषस्यापि द्वारकारणत्वमुक्तमिति। ईश्वरः प्रकृतिद्वारा जगत् सृजति, तच्च सृष्टं जगत् पुरुषद्वारा भुङ्क्ते इति प्रकृतिपुरुषाभ्यां जगद्धेतुत्वमीश्वरस्येति भावः। यद्वा यत् पुरुषस्य स्वरूपभूतं कूटस्थचैतन्यं तत्रैव देहादिप्रपञ्चस्याविद्यया कल्पितत्वात् पुरुषस्यापि जगद्धेतुत्वमिति। न चैवमीश्वरस्य जगद्धेतुत्वाभ्युपगमभङ्गप्रसङ्गः, ईश्वरस्यैव कूटस्थत्वात्। अथवा देहादिरूपव्यष्टिप्रपञ्चाधिष्ठानं कूटस्थचैतन्यमन्तःकरणोपहितत्वात् तस्य। समष्टिप्रपञ्चाधिष्ठानं तु ईश्वरचैतन्यं मायोपहितत्वात् तस्य। तथा च ईश्वरस्य स्वतःसर्वजगदधिष्ठानत्वम् , कूटस्थपुरुषद्वारा तु तत्तद्व्यष्टिदेहाद्यधिष्ठानत्वमिति नेश्वरस्य जगद्धेतुत्वाभ्युपगमविरोधः। नापि पुरुषस्य द्वारकारणत्वाभ्युपगमविरोध इति।

यत्तु **रामानुजः—** विकारानिच्छाद्वेषादीन् , गुणानमानित्वादींश्चेति, **तदयुक्तम्** - इच्छादीनामपि गुणत्वादमानित्वादीनामपि विकारत्वाच्चान्यतरशब्देनैव तदुभयग्रहणसम्भवेनान्यतरशब्दनैरर्थक्यात्॥१९॥

**कार्येति**। शरीरं स्थूलम्। करणानि अन्तःकरणबहिष्करणानि। **त्रयोदशेति।** मनोबुद्ध्यहङ्कारैः सह ज्ञानकर्मेन्द्रियाणि दशेत्यर्थः। एकस्यैवान्तःकरणस्य मनआदिभेदेन त्रिविधत्वात् त्रयाणां तेषामन्तःकरणत्वेन ग्रहणम्। साधकतमं करणम्। श्रवणादिगमनादिमननादिक्रियासु प्रकृष्टोपकारत्वाच्छ्रोत्रादिपादादिमनआदीनां करणत्वम्। एतेषां त्रयोदशानामपि प्रकृतिकार्यत्वेन करणत्वेऽपि कार्यशब्देन ग्रहणमुपपन्नम्। भूतानि पृथिव्यादीनि। विषयाः शब्दादयः। एते प्रकृतिसम्भवा विकाराः 'विकारांश्चे'ति पूर्वश्लोकोक्ताः। त एव विकारा इह कार्यशब्देन गृह्यन्ते। गृह्यतेऽनेनेति ग्रहणं शब्दः। प्रकृतिसम्भवा गुणाः पूर्वश्लोकोक्ताः सुखादय इह करणशब्देन गृह्यन्ते लक्षणयेत्याह— **गुणाश्चेति**। पूर्वोत्तरश्लोकयोः समानार्थत्वेन भाव्यत्वादिति भावः। अन्यथा कार्यशब्देन देहग्रहणे करणशब्देनेन्द्रियग्रहणे च सति विषयादिविकारग्रहणं सुखादिग्रहणं च न स्यात्। न चेष्टापत्तिः, पूर्वश्लोके तेषां सर्वेषामपि प्रकृतिसम्भवत्वेनोक्तत्वादिहापि तत्कर्तृत्वे प्रकृतिर्हेतुरिति वक्तव्यत्वात्। तदनुक्तौ सुखादीनां प्रकृत्यन्यकर्तृकत्वप्रसङ्गात्। कथं करणग्रहणेन गुणग्रहणम्? अत आह— **करणाश्रयत्वादिति**। सुखादयो ह्यन्तःकरणाश्रयाः। सुखादिवृत्तीनामन्तःकरणपरिणामविशेषरूपत्वात्। उत्पादकत्वं जननमिति यावत्। केन हेतुना कारणत्वम्? अत आह— **आरम्भकत्वेनेति**। तन्तुः पटस्येव, मृद् घटस्येवेति भावः। कर्तृत्वे हेतुत्वमित्यस्य कर्तृत्वमित्येव पर्यवसन्नार्थत्वादाह— **कार्यकरणकर्तृत्व इति**। अत एव – 'कार्यकरणकर्तृत्वे कारणं प्रकृतिं विदु'रिति भागवतं च। प्रकृतिपुरुषावनादी संसारकारणे इति पूर्वमुक्तम्। कथं तयोः संसारकारणत्वमिति प्रश्ने

१. 'इत्याह—कार्येति।' इति पा.। २. 'पञ्च' इति क्वचिन्न।

**कर्तृत्वमुत्पादकत्वं यत् तत् कार्यकरणकर्तृत्वं, तस्मिन् कार्यकरणकर्तृत्वे** हेतुः **कारणमारम्भकत्वेन प्रकृतिरुच्यते। एवं कार्यकरणकर्तृत्वेन संसारस्य कारणं प्रकृतिः। 'कार्यकारणकर्तृत्वे' इत्यस्मिन्नपि पाठे** कार्यम् **यद् यस्य (वि)परिणामः तत् तस्य कार्यं विकारः, विकारि कारणम्। तयोर्विकारविकारिणोः कार्यकारणयोः कर्तृत्व इति। अथवा - षोडश विकाराः कार्यम् , सप्त प्रकृतिविकृतयः कारणम् , तान्येव कार्यकारणान्युच्यते। तेषां कर्तृत्वे हेतुः प्रकृतिरुच्यते आरम्भकत्वेनैव। पुरुषश्च संसारस्य कारणं यथा स्यात् , तदुच्यते—** पुरुषो **जीवः क्षेत्रज्ञो भोक्तेति पर्यायः। सुखदुःखानां भोग्यानां** भोक्तृत्व **उपलब्धृत्वे हेतुरुच्यते।**

**कथं पुनरनेन कार्यकरणकर्तृत्वेन सुखदुःखभोक्तृत्वेन च प्रकृतिपुरुषयोः संसारकारणत्वमुच्यत इति? अत्रोच्यते— कार्यकरणसुखदुःखरूपेण हेतुफलात्मना प्रकृतेः परिणामाभावे, पुरुषस्य च चेतनस्यासति तदुपलब्धृत्वे**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**षोडश विकाराः कार्यमिति।** पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, एकमन्तःकरणम् , पञ्च विषया इत्यर्थः। महदहङ्कारपञ्चभूततन्मात्राणीति सप्त। **तेषां कर्तृत्व इति**। तान् प्रति कर्तृत्वस्य **हेतु**राश्रयः इत्यर्थः॥२०॥

आनन्दगिरिकृतव्याख्या

**तत्राह—**गुणाश्चेति। **उक्तरीत्या निष्पन्नमर्थमाह—**एवमिति। **पाठान्तरमनूद्य व्याख्यापूर्वकमर्थाभेदमाह—**कार्येत्यादिना। **व्याख्यान्तर-माह—** अथवेति। **एकादशेन्द्रियाणि, पञ्च विषयाः इति षोडशसङ्ख्याको विकारोऽत्र कार्यशब्दार्थः, महानहङ्कारो भूततन्मात्राणीति प्रकृतिविकृतयः सप्त कारणम् , तेषामारम्भकत्वेन कर्तृत्वेन** हेतुराश्रयो **मूलप्रकृतिरित्यर्थः। उत्तरार्धस्य तात्पर्यमाह—** पुरुषश्चेति। **तस्य परमात्मत्वं व्यवच्छिनत्ति—** जीव इति। **तस्य प्राणधारणनिमित्तस्य तदर्थं चेतनत्वमाह—** क्षेत्रज्ञ इति। **तस्यानौपाधिकत्वं वारयति—** भोक्तेति।

**तयोः संसारकारणत्वमुपपादयितुं शङ्कते—** कथमिति। **अन्वयव्यतिरेकाभ्यां तयोस्तथात्वमित्याह—** अत्रेति। **तत्र व्यतिरेकं**

भाष्यार्कप्रकाशः

'विकारांश्चे'त्यादिकमुक्तम्। तेन च प्रकृतेस्तावत् संसारकारणत्वं सिद्धमित्याह— **संसारकारणमिति**। देहादिप्रपञ्चस्यैव संसारत्वात् तत्प्रपञ्चारम्भकप्रकृतिः संसारकारणमित्यर्थः। यद् यस्य परिणामः, तत् तस्य कार्यम्। तत्र प्रथमान्तपदार्थः कार्यं विकारः, षष्ठ्यन्तपदार्थः कारणं विकारि। यथा मृदः परिणामो घटो मृदः कार्यमिति कार्यं घटो विकारः, कारणं मृत् तु विकारि । ताभ्यां च विकारविकारिवाचिभ्यां कार्यकारणशब्दाभ्यां पूर्वोक्तान्येव कार्यकरणानि विकारा गुणाश्चोच्यन्ते। ततश्च 'कार्यकारणकर्तृत्व' इति पाठेऽपि स एवार्थः। महदादीनामहङ्कारादीन् प्रति कारणत्वात् प्रकृत्यादीन् प्रति कार्यत्वाच्च कार्यकारणशब्दाभ्यां तद्ग्रहणसम्भवादिति भावः। अस्मिन्नेव पाठेऽर्थान्तरमाह— **अथवेति**। 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः॥' इति साङ्ख्योक्तविधया षोडशविकाराणां दशेन्द्रियभूतपञ्चकमनसां कार्यशब्देन ग्रहणम्। मूलप्रकृतिं प्रति विकृतित्वेने-न्द्रियादीन् प्रति प्रकृतित्वेन च प्रकृतिविकृतिभूतानां महदहङ्कारपञ्चतन्मात्राणां सप्तानां कारणशब्देन ग्रहणम्। तेषां कर्तृत्वे सृष्टौ तु मूलप्रकृतिर्हेतुरित्यर्थः। केन रूपेणेत्यत आह— **आरम्भकत्वेनैवेति**। ननु प्रकृतिवत् पुरुषोऽपि किमारम्भकत्वेन संसारस्य कारणम्? यद्वा विवर्ताधिष्ठानत्वेनेति शङ्कायां विवर्ताधिष्ठानत्वेन सर्पस्य रज्जुवत् , संसारस्य पुरुषः कारणं भवत्येव। इह तु भोक्तृत्वेनापि कारणमेवेत्युच्यत इत्याह— **पुरुषश्चेति**। **उपलब्धृत्वे** ज्ञातृत्व इति यावत्। **भोक्तृत्वे हेतुः** भोक्तेत्यर्थः। ज्ञातेति यावत्। सुखदुःखयोः विषयभेदाद् बहुत्वमित्यभिप्रेत्य **सुखदुःखानामि**त्युक्तम्। भोक्तुरभावे भोग्याभावाद् भोक्ता पुरुषः संसारकारणमिति भावः।

ननु कार्यकरणकर्तृत्वमात्रेण प्रकृतेः, भोक्तृत्वमात्रेण पुरुषस्य च कथं संसारकारणत्वमित्याक्षिपति— **कथमिति**। समाधानं शङ्कायाः प्रवदामीति प्रतिजानाति— **अत्रोच्यत इति**। **हेतवः** कार्यकरणानि। **फलानि** सुखदुःखानि। सुखदुःखहेतुभूतकार्यकरणात्मना

**कुतः संसारः स्यात्? यदा पुनः कार्यकरणसुखदुःखस्वरूपेण हेतुफलात्मना परिणतया प्रकृत्या भोग्यया पुरुषस्य तद्विपरीतस्य भोक्तृत्वेनाविद्यारूपः संयोगः स्यात् , तदा संसारः स्यादिति। अतो यत् प्रकृतिपुरुषयोः कार्यकरण-कर्तृत्वेन सुखदुःखभोक्तृत्वेन च संसारकारणत्वमुक्तम् , तद् युक्तमुक्तम्। कः पुनरयं संसारो नाम? सुखदुःखसम्भोगः संसारः। पुरुषस्य च सुखदुःखानां सम्भोक्तृत्वं संसारित्वमिति॥ २०॥**

आनन्दगिरिकृतव्याख्या

**दर्शयति—** कार्येति। **न हि नित्यमुक्तस्यात्मनः स्वतः संसारोऽस्तीत्यर्थः। इदानीमन्वयमाह—** यदेति। **अन्वयादिफलमुपसंहरति—** अत इति। **आत्मनोऽविक्रियस्य संसरणं नोचितमित्याक्षिपति—** कः पुनरिति। **सुखदुःखान्यतरसाक्षात्कारो भोगः। स चाविक्रियस्यैव द्रष्टुः संसारः। तथाविधभोक्तृत्वमस्य संसारित्वमित्युत्तरमाह—** सुखेति। **श्लोकव्याख्यासमाप्तौ** इतिशब्दः॥ २०॥

भाष्यार्कप्रकाशः

कार्यकरणफलभूतसुखदुःखात्मना चेत्यर्थः। भोक्तृभोग्ययोरुभयोरभावे संसाररूपभोगस्य कुतः सद्भावः? न कुतोऽपीत्यर्थः। यद्यपि देहादिप्रपञ्च एव संसारस्तथापीह तद्भोगः संसार इत्युच्यते। ततश्च देहादिप्रपञ्चरूपसंसारं प्रति प्रकृतेरारम्भकत्वेन पुरुषस्य विवर्ताधिष्ठानत्वेन च कारणत्वमस्तु नाम। देहादिप्रपञ्चकृतसुखदुःखभोगरूपसंसारं प्रति कथं प्रकृतिपुरुषयोः कारणत्वम्? अत आह— **यदेति। तद्विपरीतस्येति**। प्रकृतेः परस्येत्यर्थः। भोक्तृत्वेन रूपेण संयोगः। सोऽयमसङ्गस्य पुरुषस्य कथमित्यत आह— **अविद्यारूप इति**। मिथ्याभूत इत्यर्थः। मायामयत्वादिति भावः। भोग्यभोक्तृभूतयोः प्रकृतिपुरुषयोः संयोगस्य भोगरूपसंसारं प्रति निमित्तत्वात् प्रकृतिवत्पुरुषोऽपि संसारस्य कारणमेवेत्यर्थः। प्रकृतिपुरुषयोः कार्यकरणकर्तृत्वेन सुखदुःखभोक्तृत्वेन च यत् संसारकारणत्वमुक्तं तद् युक्तमेवोक्तमित्यन्वयः। कः पुनरयं संसारः यत्कारणत्वं प्रकृतिपुरुषयोरिति पृच्छति— **क इति**। उत्तरमाह— **संसारो नाम सुखदुःख-सम्भोग इति**। उक्तलक्षणसंसारवत्त्वादेव पुरुषस्य संसारित्वव्यवहार इत्याह— **पुरुषस्येति**। सुखदुःखभोगरूपसंसारवत्त्वात् पुरुषः संसारीत्युच्यत इत्यर्थः। न चाविक्रियस्य पुरुषस्य कथं भोक्तृत्वमिति वाच्यम् ; मिथ्याभूतभोक्तृत्वे विवादायोगात्। 'क्षेत्रज्ञं चापि मां विद्धी'त्यसंसारित्वं ह्यात्मनस्तत्त्वमित्युक्तम्।

यत्तु **रामानुजः** - कार्यकरणानां क्रियाकारित्वे पुरुषाधिष्ठिता प्रकृतिरेव हेतुरिति। **तत्तुच्छम्** - प्रकृतिपरिणामभूतानां कार्यकरणानामेव पुरुषाधिष्ठितानां क्रियाकारित्वे सम्भवति सति कोऽर्थः पुरुषाधिष्ठितप्रकृतेस्तद्धेतुत्ववर्णनेन? न च पुरुषाधिष्ठिता बुद्धिस्तद्धेतुरिति वाच्यम् ; तस्या अप्यन्तःकरणत्वेन करणान्तर्गतत्वात्। न च पुरुषाधिष्ठिताज्ञानं तद्धेतुरिति वाच्यम् ; सुषुप्तावपि पुरुषाधिष्ठिताज्ञानसत्त्वेन कार्यकरणानां क्रियाकारित्वप्रसङ्गात्। **किञ्च** प्रकृतेः क्रियाकारित्वे यदेव हेतुस्तदेव पुरुषाधिष्ठितत्वं कार्यकरणानां क्रियाकारित्वेऽपि हेतुरिति कृत्वा अधिष्ठाता पुरुष एव कार्यकरणानां क्रियाकारित्वे हेतुः स्यात्। न चेष्टापत्तिः, कर्तृत्वे हेतुः प्रकृतिः, भोक्तृत्वे हेतुः पुरुष इति मूलोक्तार्थविरोधात्। न च सत्यपि मूलविरोधे 'कर्ता शास्त्रार्थवत्त्वादि'ति सूत्रानुसारादयमर्थः कल्प्यत इति वाच्यम् ; 'प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः। यः पश्यति तदात्मानमकर्तारं स पश्यति॥' इति, 'प्रकृत्या क्रियमाणानि गुणकर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते॥' इत्यादिशास्त्रादकर्तुरात्मनः कर्तृत्वं प्रतिपादयितुं न तत् सूत्रं शक्नुयात् , किन्त्वहङ्कार एव कर्तेति सूत्रकारस्याप्याशयः[१]। सूत्रकारगीताकारयोरेकत्वेन विरुद्धार्थकथनासम्भवात्। तस्मात् प्रकृतिरेव कर्त्री, पुरुष एव भोक्तेति स्थितम्।

न च जडायाः प्रकृतेः कथं कर्तृत्वमिति वाच्यम् ; ईश्वरेक्षणवशात् तस्याः कर्तृत्वलाभात्। न चाविकारस्य पुरुषस्य कथं भोक्तृत्वमिति वाच्यम् ; साक्षित्वरूपभोक्तृत्वस्याविकारत्वात्। **ननु** सुखदुःखसाक्षात्काररूपभोगस्याविकारत्वेऽपि सुखदुःखानुभवरूपभोगस्य सुख्यहं दुःख्यहमिति प्रतीतिसिद्धस्य कथं विकारत्वाभाव इति चेत् , **सत्यं** विकार एव सः। अविकारेऽपि पुरुषे स विकारोऽविद्यावशात् सम्भवत्येव, गगने नैल्यमिव। यथा अकर्तर्यपि पुरुषे 'गन्ताऽहं ग्रहीताऽह'मित्यादिप्रतीतिसिद्धं कर्तृत्वमज्ञानात्

१. आरोपितमेवात्मनः कर्तृत्वमभिप्रेतम् , 'यथा च तक्षोभयथा'(ब्र.सू. २-३-४०) इत्यधिकरणे स्पष्टमेतत्।

**पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्।**
**कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥२१॥**

**यत् पुरुषस्य सुखदुःखानां भोक्तृत्वं संसारित्वमित्युक्तम् , तस्य तत् किन्निमित्तमिति? उच्यते—** पुरुष इति। पुरुषो **भोक्ता** प्रकृतिस्थः **प्रकृतौ अविद्यालक्षणायां कार्यकरणरूपेण परिणतायां स्थितः प्रकृतिस्थः**, **प्रकृतिमात्मत्वेन गत इत्येतत् ;** हि **यस्मात् तस्माद्** भुङ्क्ते **उपलभत इत्यर्थः;** प्रकृतिजान् **प्रकृतितो जातान् सुखदुःखमोहाकाराभिव्यक्तान् गुणान् 'सुखी, दुःखी, मूढः, पण्डितोऽह'मित्येवम्। सत्यामप्यविद्यायां सुखदुःखमोहेषु गुणेषु भुज्यमानेषु यः** सङ्गः **आत्मभावः,** [१]**संसारस्य स प्रधानं कारणं जन्मनः, 'स यथाकामो भवति तत्क्रतुर्भवति'**[२] **(बृ.उ. ४.४.५)**

आनन्दगिरिकृतव्याख्या

**श्लोकान्तरं प्रश्नोत्तरत्वेनावतारयति—** यदिति। **निमित्तं वक्तुमादौ संसारित्वमस्याविद्यैक्याध्यासादित्याह—** पुरुष इति। **यस्मात् प्रकृतिमात्मत्वेन गतः, तस्माद् भुङ्क्ते इति योजना। गुणविषयं भोगमभिनयति—** सुखीति। **अविद्याया भोगहेतुत्वात् किं कारणान्वेषणयेत्याशङ्क्याह—** सत्यामपीति। **सङ्गस्य जन्मादौ संसारे प्रधानहेतुत्वे मानमाह—** स यथेति। **उक्तेऽर्थे द्वितीयार्धमवतार्य व्याचष्टे—**

भाष्यार्कप्रकाशः

सम्भवति, तद्वत्। अयमेवार्थ उत्तरश्लोके स्फुटीभविष्यति॥२०॥

**पुरुष इति**। **यद्** यस्मादित्यर्थः। तस्मादिति शेषः। **तस्य** पुरुषस्य **तत्** संसारित्वं प्रति किं वा निमित्तम्। यद्वा **तत्** संसारित्वं **किन्निमित्तं** किंहेतुकमिति बहुव्रीहिः। इति शङ्कायां प्राप्तायां सत्यामिति शेषः। **उच्यते** उत्तरमिति शेषः। **हि** यस्मात् पुरुषः प्रकृतिस्थो भवति, तस्मात् प्रकृतिजान् गुणान् **भुङ्क्ते** अनुभवति। कथं पुरुषस्य प्रकृतिस्थत्वम्? अत आह— **प्रकृतिमिति**। **गतः** प्राप्तः। अहमेव प्रकृतिरिति प्रकृतितादात्म्यमापन्न इत्यर्थः। यद्यपि पुरुषस्य प्रकृतौ तत्कार्ये वा न साक्षादात्मभावस्तथापि अहमज्ञ इति, अहं कर्तेति, अहं मनोमीति[३], अहं निश्चिनोमीति, अहं पश्यामीति, अहं स्पृशामीति, अहं वदामीति, अहं जिघ्रामीति, अहं गच्छामीत्येवमादिरूपेण तद्धर्मानात्मन्यध्यस्यतीति बोध्यम्। क्वचित् कार्यविशेषे देहादौ तु साक्षादेवात्मभावोऽध्यस्यते। देवोऽहं, मनुष्योऽहमित्यादिप्रतीतेः। एवमनात्मभिः प्रकृतितत्कार्यादिभिस्तद्धर्मैश्च आत्मन्यध्यस्तैर्भवत्यात्मनः संसारो मिथ्याभूत इति सिद्धमध्यासस्य संसारनिमित्तत्वम्। शरीरादेरन्नादिभोगवन्नात्मनः सुखादिभोगः, किं तर्हि? चक्षुरादेर्घटाद्युपलब्धिवदात्मनः सुखाद्युपलब्धिरेवेत्याह— **उपलभत इत्यर्थ इति**। जानातीति यावत्। वस्तुतः सुखादिसाक्षिभूतस्यात्मनः सुखादिभोगासम्भवादिति भावः। सुखाकारेण सत्त्वगुणस्य, दुःखाकारेण रजोगुणस्य, मोहाकारेण तमोगुणस्य च परिणामात् सुखादीनां प्रकृतिजगुणत्वेन व्यवहारः।

**पण्डित इति**। सत्त्वगुणपरिणामः पाण्डित्यमिति बोध्यम्। यद्यपि सुखदुःखादिसाक्षात्कर्ता हि पुरुषः सुखमहं जानामि, दुःखमहं जानामीत्येवं प्रतीयात् , न तु सुख्यं दुःख्यहमित्येवम् , सुखदुःखादेरन्तःकरणधर्मत्वेन पुरुषस्य तद्वत्ताभावात्। तथाप्यनात्मतादात्म्याध्यासवशात् सुख्यहं दुःख्यहमित्येवं प्रत्येति। न तु सुखमहं जानामीत्येवमिति भावः। यद्वा भुङ्क्ते उपलभते, अनुभवतीति यावत्। अनुभवप्रकारमेव दर्शयति— **सुखीत्यादिना**। सुखी, दुःखी, मूढः, पण्डितोऽहमित्येवं प्रकृतिजान् गुणान् भुङ्क्ते इत्यन्वयः। पुरुषस्य संसारं प्रति नाविद्यामात्रं कारणं, नापि तत्कार्यभूताः सुखदुःखादयः कारणं, नापि तत्साक्षात्कारः कारणं, सुषुप्तौ यथोक्तसर्वसत्त्वेऽपि पुरुषस्य संसारादर्शनात्। किन्तु अध्यास एव कारणमित्याह— **सत्यामित्यादिना**। अविद्यायां सत्यामपि न सा प्रधानकारणं, किन्त्वन्यदेवेत्येतदर्थ**मपि**शब्दग्रहणम्। भुज्यमानेषु ज्ञायमानेषु गुणेषु यः पुरुषस्य आत्मभावरूपः सङ्गः, स पुरुषस्य जन्मनः संसारस्य प्रधानं कारणम्। अविद्यादयस्त्वप्रधानं कारणमिति भावः। अविद्याद्यभावेऽध्यासायोगात्। **आत्मभावः** आत्मबुद्धिः। ममेमे गुणाः इति

१. 'संसारस्य' इति क्वचिन्न। 'स प्रधानं कारणमस्य पुरुषस्य जन्मनः' इति पा.। २. 'यत्क्रतुर्भवति तत् कर्म कुरुते यत् कर्म कुरुते तदभिसंपद्यते' इति श्रुतिशेषः।
३. 'मन्वे' इति युक्तम्।

**इत्यादिश्रुतेः। तदेतदाह—** कारणं हेतुः गुणसङ्गो **गुणेषु सङ्गो**ऽस्य **पुरुषस्य भोक्तुः**, सदसद्योनिजन्मसु **सत्यश्चासत्यश्च योनयः सदसद्योनयः, तासु सदसद्योनिषु जन्मानि सदसद्योनिजन्मानि, तेषु सदसद्योनिजन्मसु विषयभूतेषु कारणं गुणसङ्गः। अथवा सदसद्योनिजन्मसु अस्य संसारस्य कारणं गुणसङ्गः इति संसारपदमध्याहार्यम्। सद्योनयो देवादियोनयः, असद्योनयः पश्वादियोनयः। सामर्थ्यात् सदसद्योनयो मनुष्ययोनयोऽप्यवरुद्धाः[१] द्रष्टव्याः। एतदुक्तं भवति—[२]प्रकृतिस्थत्वाख्याऽविद्या, गुणेषु च सङ्गः कामः संसारस्य कारणमिति। तच्च परिवर्जनायोच्यते[३]। अस्य च**

आनन्दगिरिकृतव्याख्या

तदेतदित्यादिना। **साध्याहारं योजनान्तरमाह—** अथवेति। **सदसद्योनीर्विविच्य व्याचष्टे—** सद्योनय इति। **योनिद्वयनिर्देशान्मध्यवर्तिन्यो मनुष्ययोनयोऽपि ध्वनिताः इत्याह—** सामर्थ्यादिति। **सङ्गस्य संसारकारणत्वे नाविद्यायास्तत्कारणत्वम्, एकस्मादेव हेतोस्तदुपपत्तेरित्याशङ्क्याह—** एतदिति। **अविद्या उपादानम्, सङ्गो निमित्तमित्युभयोरपि कारणत्वं सिध्यतीत्यर्थः। द्विविधहेतूक्तेर्विवक्षितं फलमाह—** तच्चेति। **सासङ्गस्याज्ञानस्य स्वतोऽनिवृत्तेस्तन्निवर्तकं वाच्यमित्याशङ्क्याह—** अस्येति। **वैराग्ये सति संन्यासः, तत्पूर्वकं च ज्ञानं**

भाष्यार्कप्रकाशः

गुणानामात्मन्यध्यास इति यावत्। आत्मशब्दोऽत्रात्मीयवाची। इयं च गुणेष्वात्मीयबुद्धिरुपलक्षणं गुणवत्यन्तःकरणे आत्मबुद्धेः। धर्माध्यासवद् धर्म्यध्यासस्यापि संसारकारणत्वाद् धर्म्यध्यासपूर्वकत्वाच्च धर्माध्यासस्य। किन्तु स च धर्म्यध्यास इह न साक्षादुपलभ्यते, 'अहं मनः' इति प्रतीत्यभावात्। ततश्च धर्माध्यासेनानुमीयते। अत एव धर्माध्यास एव साक्षादुपलभ्यमानः संसारहेतुत्वेन भाष्ये निर्दिष्ट इति बोध्यम्।

सङ्गस्य संसारहेतुत्वे श्रुतिं प्रमाणयति— **स इति**। स पुरुषो **यथाकामो** यादृशकामो भवति **तत्क्रतु**स्तादृशकामप्रदक्रतुकर्ता भवति। स्वर्गकामो ज्योतिष्टोमं करोति, [४]पशुकामः कारीरेष्टिमित्येवं काम्येषु स्वर्गादिषु यः पुरुषस्य ममायं भूयादिति सङ्गः, स एव यज्ञाद्यनुष्ठापनद्वारा देवादिजन्मप्राप्तिलक्षणसंसारहेतुरिति श्रुत्यभिप्रायः। अस्य सदसद्योनिजन्मसु गुणसङ्गः कारणम्। सद् उत्कृष्टं देवादिशरीरम्, असद् निकृष्टं पश्वादिशरीरम्, तयोर्योनयः उपस्थेन्द्रियाधिष्ठानानि गुदानि, तद्युक्ता गर्भकोशा वा, तासु जन्मानि उत्पत्तयः। तेष्विति विषयसप्तमी। **अस्येति**। पुरुषानुभवसिद्धस्येत्यर्थः। **गुणसङ्गः** सत्त्वादिगुणयुक्तः सङ्गः कामः। सत्त्वगुणवशात् पुरुषो मम देवयोनिजन्म भूयादिति कामयते, रजोगुणवशात्तु मम मनुष्यजन्म भूयादिति, तमोगुणवशात्तु मम पशुजन्म भूयादिति। गुणपरतन्त्रो ह्यज्ञो जीवः स्वानिष्टमपि काङ्क्षत्येव तत्रेष्टबुद्ध्या - यथा कर्मपरतन्त्रः पुरुषः स्वानिष्टमपि परद्रव्यापहारादिकं काङ्क्षति, यथा वा रुग्णः स्वानिष्टमपि चूतफलादिकम्, तद्वत्। एवं कामयमानश्च स स्वकामानुगुण्येन तत्तज्जन्म प्रतिपद्यत इति गुणप्रयुक्तो देवादियोनिजन्मसङ्ग एव पुरुषस्य संसारकारणमित्यर्थः। पुण्यमयत्वाद् देवादियोनयः सद्योनयः। पापमयत्वात् पश्वादियोनयो ऽसद्योनयः। पुण्यपापोभयात्मिकास्तु मनुष्ययोनयः। सदसद्योनिष्विव मनुष्ययोनिष्वपि सङ्गसम्भवात् तासामपीह ग्रहणमित्याह— **सामर्थ्यादिति**। सदसद्योनिग्रहणबलादित्यर्थः। यद्वा समस्तपदसामर्थ्यादिति। सच्च तदसच्च सदसत्, तस्य योनिः सदसद्योनिरिति समासे कृते उभयात्मकमनुष्ययोन्यर्थलाभादिति भावः। **अविरुद्धा इति**। पुण्यपापोभयात्मकत्वादिति भावः। पुण्ययोनयः पापयोनयश्च परस्परं विरुद्धाः पुण्यपापयोर्विरुद्धत्वात्। मनुष्ययोनयस्त्वविरुद्धा इत्यभिसन्धिः। यद्वा **अविरुद्धाः** नोत्कृष्टा नाप्यपकृष्टाः, किन्तु समाना इत्यर्थः। फलितं वदामीत्याह— **एतदिति**। **प्रकृतिस्थत्वम्** आत्मानात्मनोस्तादात्म्याध्यासः, अविद्या, **गुणेषु सङ्गः** आत्मन्यनात्मधर्माध्यासः, कामः स्वर्गादिकामना इत्येतच्चतुष्टयं संसारस्य कारणमित्येतदुक्तं भवतीत्यन्वयः। गुणसङ्गशब्दस्य द्वेधाऽर्थवर्णनाद् धर्माध्यासकामयोः सिद्धिः। प्रकृतिस्थ इति पदेन प्रकृतेरपि कारणत्वस्य सूचितत्वाद् धर्म्यध्यासाविद्ययोः सिद्धिरिति विवेकः। ननु किमर्थमुक्तं संसारकारणम्? अत आह— **तच्चेति**। संसारकारणं तच्छब्दार्थः। **अस्य च** संसारस्येत्यर्थः। **सवैराग्यसंन्यासं** वैराग्य-

१. **अवरुद्धाः** संगृहीता इत्यर्थः। 'अविरुद्धाः' इति पा.। २. 'प्रकृतितत्त्वाख्या' इति पा.। ३. ज्ञाते हि तत् परिवर्जयितुं शक्यमिति भावः। ४. 'पशुकामः चित्रेष्टिं, वृष्टिकामः कारीरीष्टिम्' इति पाठः संभाव्यते।

**निवृत्तिकारणं [1]ज्ञानं सवैराग्यसंन्यासं गीताशास्त्रे प्रसिद्धम्। तच्च ज्ञानं [2]पुरस्तादुपन्यस्तं क्षेत्रक्षेत्रज्ञविषयम्। 'यज्ज्ञात्वाऽमृतमश्नुते' इत्युक्तं चान्यापोहेन, अतद्धर्माध्यारोपेण च॥२१॥**

आनन्दगिरिकृतव्याख्या

**सासङ्गाज्ञाननिवर्तकमित्यर्थः। उक्ते ज्ञाने मानमाह—**गीतेति। **अध्यायादौ चोक्तं ज्ञानमुदाहृतमित्याह—**तच्चेति। **तदेव ज्ञानं 'यज्ज्ञात्वे'-त्यादिना 'न सत्तन्नासदि'त्यन्तेनान्यनिषेधेन, 'सर्वतःपाणिपाद'मित्यादिना चातद्धर्माध्यासेनोक्तमित्याह—** यज्ज्ञात्वेति॥२१॥

भाष्यार्कप्रकाशः

संन्याससहितं ज्ञानं निवृत्तिकारणम्। किं तज्ज्ञानम्? अत आह— **गीताशास्त्रे प्रसिद्धमिति**। गीताशास्त्रे कुत्र प्रकरणे प्रसिद्धम्? अत आह— **पुरस्तादिति**। किंविषयं तज्ज्ञानम्? अत आह— **क्षेत्रेति**। ननु पुरस्तादुपन्यस्तस्य क्षेत्रक्षेत्रज्ञविषयस्य ज्ञानस्य संसार-निवृत्तिकारणत्वं कुत्रोक्तम्? अत आह— **यज्ज्ञात्वेति**। अमृतं मोक्षो हि संसारनिवृत्तिः। दृश्यं क्षेत्रं नाहं, क्षेत्रज्ञ ईश्वर एवाहमिति ज्ञानात् सर्वसंसारनिवृत्तिरविद्याकल्पितत्वात् संसारस्य पुरुषे, रज्जौ सर्पवदिति भावः। यज्ज्ञात्वेति ज्ञेयं कथमुक्तम्? अत आह— **अन्यापोहेनेति**। **अन्यापोहो**ऽतन्निरसनम् , तेन 'न सत्तन्नासदुच्यते' इति निषेधमुखेनेत्यर्थः। प्रकारान्तरमाह—**[अ]तद्धर्मेति**। सर्वतः पाणिपादं तदित्यादिरूपेणेति भावः।

यत्तु **रामानुजः -** प्रकृतिसंसर्गवशात् पुरुषस्य सत्य एव बन्धः, प्रकृतिसंसर्गस्य गुणसङ्गो हेतुः। स च बीजाङ्कुरन्यायात् प्रवाहानादिः। अमानित्वादिभिस्तु गुणसङ्गो निवर्तत इति। **तत्तुच्छम् ,** 'असङ्गो ह्ययं पुरुष' इति श्रुतेरसङ्गस्य पुरुषस्य प्रकृतिसङ्गः सत्यः कथं भवितुमर्हति? किं व्योम्नः सत्यः स्यान्नैल्यगुणसङ्गः? यदि प्रकृतिः सत्या स्यात् , तर्हि पुरुषस्य तत्सङ्गः सत्यः स्यात्। न हि प्रकृतिः सत्या, 'एकमेवाद्वितीयं ब्रह्मे'ति श्रुत्या, 'नेह नाना' इत्यादिश्रुत्या च ब्रह्मणि द्वितीयवस्त्वभावात्। कथं प्रकृतेरेवासत्यत्वे सत्सङ्गः सत्यः स्यात्? एवं प्रकृतिसङ्गस्यैवासत्यत्वे तत्प्रयुक्तगुणसङ्गस्य बन्धस्य वा कथं सत्यत्वम्? किञ्च प्रकृतिसङ्गप्रयुक्तस्य गुणसङ्गस्य प्रकृतिसङ्गं प्रति हेतुत्वं तु सुतरामयुक्तम्। न च बीजाङ्कुरादिप्रसङ्गः। प्रकृतिसङ्गस्यानादित्वाद् , गुणसङ्गस्य सादित्वाच्च। न च प्रकृतिरेवानादिः, तत्सङ्गस्तु सादिरेवेति वाच्यम् ; अनाद्योः प्रकृतिपुरुषयोरन्योन्यसङ्गरहितयोः सत्त्वे प्रमाणाभावात्। सत्त्वे वा पश्चात् तत्सङ्गहेत्वभावेनासिद्धेः सङ्गस्य। न चाज्ञानं सङ्गहेतुरस्तीति वाच्यम् ; अज्ञानस्यैव प्रकृतित्वात्। प्रकृतेरन्यत्वे चाज्ञानस्य तदज्ञानपुरुषयोः सङ्गोऽस्ति वा न वा? आद्ये - कस्तत्सङ्गहेतुः? द्वितीये - सङ्गहेत्वभावे सङ्गरूपकार्यस्य सिद्धिः कथम्? यद्यज्ञानपुरुषयोरन्यः सङ्गहेतुः स्यात् , तेन सह पुरुषस्य सङ्गे को हेतुः? एवमनवस्थादोषप्राप्तिः। न च तत्परिहारायाज्ञानपुरुषयोः सङ्गं प्रत्यज्ञानमेव हेतुरिति वाच्यम् ; स्वसङ्गं प्रति स्वस्यैव हेतुत्वे आत्माश्रयादिदोषप्रसङ्गात्। तस्मादनादिरेव प्रकृतिपुरुषसङ्गः। उक्तं हि– 'अविद्यातच्चितोर्योगः षडस्माकमनादयः' इति। एवमनादिरयं प्रकृतिसङ्गो गुणसङ्गस्य हेतुरेव। प्रकृतिपुरुषसङ्गजन्यत्वाद् गुणानां तद्द्वारा तत्सङ्गस्य च तज्जन्यत्वात्। एवं सति गुणसङ्गः प्रकृतिपुरुषसङ्गहेतुरिति कथनं तु मृदुत्पत्तिं प्रति घटो हेतुरिति वाक्यवत् परिहासास्पदमेव।

**यच्चानेनोक्तम् -** अमानित्वादिभिः सत्योऽपि बन्धो निवर्तत इति, **तदयुक्तम् -** सत्यस्य क्वापि निवृत्त्यदर्शनात् , निवर्तमानस्य सत्यत्वादर्शनाच्च। न च दण्डप्रतिहत्या सत्योऽपि सर्पो निवर्तत एव, तया तस्य मरणदर्शनादिति वाच्यम् ; तत्सर्पसत्यत्वस्य विप्रतिपन्नत्वात्। सम्प्रतिपन्नं हि दृष्टान्ततया वाच्यम्। न च तव मते ब्रह्मान्यस्य सर्वस्याप्यसत्यत्वाद् दृष्टान्तासिद्धिरिति वाच्यम् ; तथा दृष्टान्ताभावादेव सर्वं मिथ्येत्यस्माभिरुच्यमानत्वात्। श्रुतियुक्त्यनुभवविरुद्धस्य चार्थस्याग्राह्यत्वात्। श्रुतिस्तावत् – 'यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्' इति, 'तत्सत्यं स आत्मा तत्त्वमसि' 'अतोऽन्यदार्तम्' इति च ब्रह्मणः सत्यत्वम् , अन्यस्य च मिथ्यात्वं ब्रूते। युक्तिश्च ब्रह्म सत्यं, त्रिकालाबाध्यत्वाद् , व्यतिरेकेण घटवत् , जगन्मिथ्या, प्रतीतिसमयनियतसत्ताकत्वात् , स्वप्नरथादिवदि-न्द्रजालवच्चेति व्यतिरेकदृष्टान्तप्रयोगात्मिका बोध्या। सति त्वन्वयदृष्टान्ते सम्प्रतिपन्ने 'ब्रह्म सत्यं जगन्मिथ्या' इत्यस्मदभ्युपगमो

१. 'ज्ञानवैराग्ये ससंन्यासे' इति पा.। २. 'पुरस्तादुपन्यस्तं क्षेत्रक्षेत्रज्ञविषयम्— 'यज्ज्ञात्वाऽमृतमश्नुते' इति। उक्तं चान्यापोहेन' इति योजनान्तरम्।

## उपद्रष्टाऽनुमन्ता च भर्ता भोक्ता महेश्वरः।
## परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः॥२२॥

[1]**तस्यैव पुनः साक्षान्निर्देशः क्रियते—** उपद्रष्टेति। उपद्रष्टा **समीपस्थःसन् द्रष्टा स्वयमव्यापृतः, यथा ऋत्वि-**

आनन्दगिरिकृतव्याख्या

**प्रकृतस्यैव मोक्षहेतोर्ज्ञानस्य साक्षान्निर्देशायोत्तरश्लोकमुत्थापयति—** तस्येति। **कार्यकरणानां व्यापारवतां समीपे स्थितः सन्निधिमात्रेण तेषां साक्षीत्येवमर्थत्वेन उपद्रष्टेति पदं व्याचष्टे—** समीपस्थ इति। **लौकिकस्येव द्रष्टुरस्यापि स्वव्यापारविशिष्टतया निष्क्रियत्वविरोधमाशङ्क्याह—** स्वयमिति। **स्वव्यापारादृते सन्निधिरेव द्रष्टृत्वम्। दृष्टान्तेन स्पष्टयति—** यथेति। **उपद्रष्टेत्यस्यार्थान्तरमाह—**

भाष्यार्कप्रकाशः

व्याहन्येत। न च जगत् सत्यं प्रतीयमानत्वाद् ब्रह्मवदिति वाच्यम् ; ब्रह्मणि हेत्वसिद्धेः। न हि ब्रह्मणो ज्ञेयत्वमस्ति, ज्ञानस्वरूपत्वात् तस्य। धर्मादिवच्छास्त्रैकगम्येऽतीन्द्रिये ब्रह्मवस्तुनि प्रतीयमानत्वायोगात्। यदिन्द्रियगम्यं तद्धि प्रतीयमानं सुखादिकं घटादिकं च। ब्रह्म तु न चक्षुरादिभिर्दृश्यते, नापि मनसा चिन्त्यते, 'अप्राप्य मनसा सह' इति श्रुतेः, 'यत्तदद्रेश्यमग्राह्यम्' इति श्रुतेश्च। तस्मात् प्रतीतिरूपे ब्रह्मणि हेत्वसिद्धिः।

**ननु** जगत् सत्यं, त्रिकालाबाध्यत्वाद् , ब्रह्मवदिति प्रयोगः। न च हेत्वसिद्धिः पक्षे, प्रलयेऽपि सूक्ष्मरूपेण जगतः सत्त्वादिति चेत् , **मैवमपि**[2], किं स्थूलं जगत् त्रिकालाबाध्यमुत सूक्ष्मम्? नाद्यः, तस्य प्रलयेऽसत्त्वात्। नान्त्यः, तस्य प्रपञ्चकालेऽसत्त्वात्। न च स्थूलसूक्ष्मोभयात्मकं जगत् सत्यमिति वाच्यम् ; उभयात्मकजगत एवासिद्धेः। न हि स्थूलं जगत् सूक्ष्मात्मकं सूक्ष्मं जगत् स्थूलात्मकं वा भवेत्। स्थूलसूक्ष्मत्वयोर्विरुद्धधर्मयोर्युगपत्सामानाधिकरण्यायोगात्। न च— प्रकृतिः सत्या, त्रिकालाबाध्यत्वाद् , ब्रह्मवदिति— वाच्यम् ; तत्रापि किं स्थूला प्रकृतिः सत्या? उत सूक्ष्मा? आद्ये - प्रलये तदभावान्न सत्यत्वम्। द्वितीये - प्रपञ्चे तदभावादिति। न चैवं स्थूलं ब्रह्म सत्यं, किं[किंवा] सूक्ष्ममिति विकल्प्यत इति वाच्यम् ; ब्रह्मणि स्थूलत्वाद्यभावात्। 'अस्थूलमनण्वह्रस्वम्' इति श्रुतेः।

**वस्तुतस्तु** मुक्तौ प्रकृतेस्तत्कार्यस्य वा असत्त्वान्न कालत्रयाबाध्यत्वलक्षणं सत्यत्वं तस्यास्तस्य वेति बोध्यम्। एवं प्रकृतितत्कार्ययोरसत्यत्वे सिद्धे तत्प्रयुक्तगुणसङ्गस्य बन्धस्य वा सिद्धमेवासत्यत्वमेवं बन्धस्यासत्यत्वादेव ज्ञानात् तन्निवृत्तिः। 'यज्ज्ञात्वाऽमृतमश्नुते' इति ह्युक्तम्। न हि ज्ञानेन निवर्तमानस्य क्वापि सत्यत्वं दृष्टम्। त्वदभिप्रायानुसारेणापि सत्यसर्पस्य ज्ञानादनिवृत्तेः रज्जुसर्पस्यैव रज्जुज्ञानान्निवृत्तेः। न चामानित्वादिसाधनैर्निवर्तत इति वाच्यम् ; अमानित्वादयो हि ज्ञानसाधनानि, न तु मोक्षसाधनानि। ततश्चामानित्वादिसाधनजन्यज्ञानादेव बन्धनिवृत्तिः। 'एतद्विज्ञाय मद्भक्तो मद्भावायोपपद्यते' इति ह्युक्तम्।

**यदप्यनेनोक्तम्** - सदसद्योनिजन्मस्वित्यस्य साध्वसाधुषु योनिष्विति, **तदप्ययुक्तम्** - योनिगतसाधुत्वासाधुत्वयोर्योन्याश्रयशरीरगतसाधुत्वासाधुत्वप्रयुक्तत्वेन तद् विहायैतत्कल्पनस्यायुक्तत्वात्। न हि योनीनां स्वतः साधुत्वासाधुत्वे स्तः। मनुष्यपश्वादियोनीनां सर्वासामपि मलादिदूषितत्वांशे एकत्वादिति॥२१॥

**उपद्रष्टेति। तस्यैव** पुरुषस्य पुनः **साक्षात्** स्वेन रूपेणेत्यर्थः। एतेन पुरुषस्य पूर्वश्लोकोक्तं संसारित्वमाध्यासिकरूपमेव, न तु स्वाभाविकमिति सूचितम्। **निर्देशः** प्रतिपादनं क्रियते उपद्रष्टेति श्लोकेनेति भावः। अस्मिन् देहे वर्तमानः परः पुरुषः उपद्रष्टेति, अनुमन्तेति, भर्तेति, भोक्तेति, महेश्वर इति, परमात्मेति चापि, श्रुताविति शेषः; उक्तो भवति। उप समीपे पश्यतीत्युपद्रष्टा। न तु किमपि करोतीत्याह— **स्वयमिति। अव्यापृतः** व्यापाररहितः। उदासीनत्वे सति द्रष्टृत्वमुपद्रष्टृत्वम् , साक्षित्वमिति यावदिति भावः। न च सन्निहितत्वमपि लक्षणे निवेशनीयमिति वाच्यम् ; असन्निहितस्य दर्शनायोगात्। आत्मनश्च नित्यसन्निहितत्वात्। एवंविधस्योप-

१. तदेवं प्रकृतिमिथ्यातादात्म्यात्पुरुषस्य संसारो न स्वरूपेणेत्युक्तम्। कीदृशं पुनस्तस्य स्वरूपमित्याकाङ्क्षायां तस्य स्वरूपं साक्षान्निर्दिशतीत्यर्थः। एतेन पूर्वश्लोको जीवपरः, अयं तु परमात्मपर इति अपास्तम्। २. अत्र हेत्वसिद्धिः बाधश्च, ज्ञाननिवर्त्यत्वबोधकश्रुत्यादिना जगतो ब्रह्मज्ञानबाध्यत्वादिति बोध्यम्। प्रलयकालसत्त्वं बाधात्पूर्वकालिकमिति बाध्यत्वेऽप्यविरुद्धम्।

**ग्यजमानेषु यज्ञकर्मव्यापृतेषु तटस्थोऽन्योऽव्यापृतो यज्ञविद्याकुशल ऋत्विग्यजमानव्यापारगुणदोषाणामीक्षिता, तद्वत् कार्यकरणव्यापारेष्वव्यापृतोऽन्यः तद्विलक्षणः तेषां कार्यकरणानां सव्यापाराणां सामीप्येन द्रष्टा उपद्रष्टा। अथवा देहचक्षुर्मनोबुद्ध्यात्मानो द्रष्टारः; तेषां बाह्यो द्रष्टा देहः, तत आरभ्यान्तरतमश्च प्रत्यक्समीप आत्मा द्रष्टा। यतः परोऽन्तरतमो नास्ति द्रष्टा, सोऽतिशयसामीप्येन द्रष्टृत्वादुपद्रष्टा स्यात्। यज्ञोपद्रष्टृवद्वा सर्वविषयीकरणाद् उपद्रष्टा।**

आनन्दगिरिकृतव्याख्या

अथवेति। **बह्वनां द्रष्टृत्वेऽपि कस्योपद्रष्टृत्वम्? तत्राह—**तेषामिति।**उपोपसर्गस्य सामीप्यार्थत्वेन प्रत्यगर्थत्वात् , तत्रैव[१] सामीप्यावसानात् प्रत्यगात्मा च द्रष्टा चेत्युपद्रष्टा, सर्वसाक्षी प्रत्यगात्मेत्यर्थः। उक्तमेव व्यनक्ति—** यत इति। **यथा यजमानस्य ऋत्विजां च यज्ञकर्मणि गुणं दोषं वा सर्वयज्ञाभिज्ञः सन्नुपद्रष्टा विषयीकरोति, तथाऽयमात्मा चिन्मात्रस्वभावः सर्वं गोचरयतीत्युपद्रष्टेति पक्षान्तरमाह—** यज्ञेति।

भाष्यार्कप्रकाशः

द्रष्टृत्वे दृष्टान्तमाह—**यथेति**। **तटस्थः** समीपस्थः। यज्ञकर्मस्वव्यापृत इति यावत्। क्रियानन्वयित्वं हि तटस्थत्वम्। तटस्थशब्दार्थं स्वयमेवाह—**अव्यापृत इति**। यद्वा समीपस्थत्वमात्रमेव तटस्थत्वमिह विवक्षितम् , ततो नाव्यापृतपदस्य पुनरुक्तिः। यज्ञदर्शनार्थमागतस्य लोकजनस्याज्ञस्य व्यावृत्तये आह— **यज्ञेति**। ऋत्विजो यजमानस्य च ये व्यापारास्तेषु वर्तमानानां गुणानां दोषाणां च **ईक्षिता** ज्ञाता। एवंविधो यथा यज्ञकर्मण्युपद्रष्टा, तद्वत्। प्रकृतमाह— **कार्येति**। अन्यः कार्यकरणेभ्यः ऋत्विग्यजमानस्थानीयेभ्यः परः। तेभ्यः कार्यकरणेभ्यो विलक्षणः। **सामीप्येन** समीपस्थित्येत्यर्थः। **द्रष्टा** साक्षात्कर्ता। कार्यकरणेषु कर्मसु व्यापृतेषु सत्सु स्वयं समीपस्थःसन् तत् सर्वं साक्षात्करोतीत्यर्थः। सूर्यः सव्यापारं जगदिवेति भावः। अर्थान्तरमाह— **अथवेति**। **तेषामिति**। मध्य इति शेषः। तत आन्तरं द्रष्टृ चक्षुः, तत आन्तरतरं मनः, तत आन्तरतमा द्रष्ट्री बुद्धिः, ततोऽप्यतिशयेनान्तरतमः प्रत्यगात्मा। न तस्यान्तरोऽस्त्यन्तः[ऽस्त्यन्यः], तस्यैव सर्वान्तरत्वात्। न चान्तर्यामीश्वरोऽस्तीति वाच्यम् ; 'एष त आत्माऽन्तर्याम्यमृतः' इति प्रत्यगात्मन एवान्तर्यामित्वात्। न च 'ते' इति प्रतीचो निर्देश इति वाच्यम् ; प्रमातृवाचित्वात् तस्य। प्रमातुर्हि स्वस्वरूपं प्रत्यगिति तस्यात्मत्वेन व्यपदेशः। तस्मादन्तर्यामिब्राह्मणं सर्वमपि प्रत्यगात्मपरमेव। परमात्माभिन्नत्वाच्च प्रत्यगात्मनः। एवं सर्वान्तरत्वादेव प्रत्यगात्मनः समीपद्रष्टृत्वादुपद्रष्टृत्वम्। न च कस्य समीप इति वाच्यम् ; स्वस्यैवेति। आत्मा ह्यात्मनो निरतिशयसमीपस्थः। स्वेन स्वस्य नित्याप्तत्वेन दूरस्थत्वासम्भवात्। न च स्वस्यैव कथं स्वसमीपस्थत्वमिति वाच्यम् ; आरोपात्। स्वस्मिन्नेव स्वसमीपस्थत्वं ह्यारोप्यते। ममात्मा सन्निहित इति व्यवहारात्। प्रत्यगपेक्षया तु बुद्धिः किञ्चिद्दूरस्था, अनात्मत्वात् तस्याः। तदपेक्षया मनः पुनः किञ्चिद्दूरस्थम् , बुद्ध्या व्यवधानात्। तदपेक्षया चक्षुर्दूरस्थम् , मनोबुद्धिद्वयव्यवधानात्। तदपेक्षया देहोऽतिदूरस्थः, मनोबुद्धिचक्षुस्त्रयव्यवधानात्। तदपेक्षया घटादयो यद्यपि दूरस्थास्तथापि न ते द्रष्टारः, किन्तु दृश्या एव। यद्यपि बुद्ध्यादयोऽपि दृश्या एव, तथापि तेषां द्रष्ट्रात्मतादात्म्याध्यासाद् द्रष्टृत्वसम्भवः। ब्राह्मणोऽहं जानामि, घटमहं पश्यामि, अहमिदं [२]मनोमि, अहमिदं निश्चिनोमीत्येवं प्रतीतेः। चक्षुःशब्दश्च ज्ञानेन्द्रियपञ्चकोपलक्षणार्थः। अहं शृणोमीत्येवं श्रोत्रादेरपि द्रष्टृत्वप्रतीतिदर्शनात्।

**ननु** मनोबुद्ध्योरेकान्तःकरणात्मकयोः कथमन्तर्बहिर्भाव इति चेद्? **उच्यते**— मनोमयकोशाद् विज्ञानमयकोशस्यान्तरत्वेन श्रुतिप्रतिपादनात्। न च प्राणमयानन्दमयकोशयोः कस्मान्नेह ग्रहणमिति वाच्यम् ; तयोर्द्रष्टृत्वप्रतीत्यदर्शनात्। न च श्रुतावपि मनोमयाद् विज्ञानमयकोशस्य बुद्धेरान्तरत्वप्रतिपादनं कुत इति वाच्यम् ; सङ्कल्पपूर्वकत्वान्निश्चयस्य। पूर्वं सङ्कल्प्य हि पश्चाद् निश्चिनोति। एवं निश्चयस्य सङ्कल्पादान्तरत्वाद् बुद्धेरान्तरत्वम्। निश्चयात्मिका हि बुद्धिः, सङ्कल्पात्मकं हि मनः। एवं देहादिबुद्ध्यन्तसर्वद्रष्ट्रान्तरत्वादात्मन उपद्रष्टृत्वम्।

अर्थान्तरमाह— **यज्ञेति**। उपद्रष्टृशब्दोऽत्र तत्सदृशे लाक्षणिकः। सिंहो माणवक इत्यत्र सिंहशब्दवत्। तथा च उपद्रष्टा यज्ञे प्रसिद्धः, तत्तुल्यत्वादात्माऽप्युपद्रष्टेत्युच्यते। उपद्रष्टृतुल्य इत्युपद्रष्टृशब्दस्य पर्यवसन्नार्थः। आत्मनः उपद्रष्टृतौल्यं च प्रागेव

१. 'उपोपसर्गः सामीप्ये तत् प्रतीचि समाप्यते।'(बृ.वा. १-१-४) इति वार्तिकमिहानुसंधेयम्। २. 'मन्वे' इति युक्तम्।

अनुमन्ता च **अनुमोदनमनुमननम् , कुर्वत्सु तत्क्रियासु परितोषः, तत्कर्ताऽनुमन्ता च। अथवाऽनुमन्ता कार्यकरण-प्रवृत्तिषु स्वयमप्रवृत्तोऽपि प्रवृत्त इव तदनुकूलो विभाव्यते, तेनानुमन्ता। अथवा प्रवृत्तान् स्वव्यापारेषु तत्साक्षिभूतः कदाचिदपि न निवारयतीत्यनुमन्ता।** भर्ता [१]**भरणं नाम देहेन्द्रियमनोबुद्धीनां संहतानां चैतन्यात्मपारार्थ्येन निमित्तभूतेन चैतन्याभासानां यत् स्वरूपधारणं, तत् चैतन्यात्मकृतमेवेति भर्ता आत्मेत्युच्यते।** भोक्ता **अग्न्युष्णवद्**

आनन्दगिरिकृतव्याख्या

**अनुमन्ता चेत्येतद् व्याकरोति—** अनुमन्तेति। **ये स्वयं कुर्वन्तो [२]व्यापारवन्तो भवन्ति तेषु कुर्वत्सु सत्सु यास्तेषां क्रियास्तासु पार्श्वस्थस्य परितोषोऽनुमननम्। तच्चानुमोदनम्। तस्य सन्निधिमात्रेण कर्ता यः सोऽनुमन्तेत्यर्थः। व्याख्यान्तरमाह—** अथवेति। **तदेव स्फुटयति—** कार्येति। **अर्थान्तरमाह—** अथवेत्यादिना। **भर्तेति पदमादाय किं भरणं नामेति पृच्छति—** भर्तेति। **तद्रूपं निरूपयन्नात्मनो भर्तृत्वं साधयति—** देहेति। **भोक्तेत्युक्ते क्रियावत्त्वे प्राप्ते 'भोगश्चिदवसानते'ति न्यायेन विभजते—** अग्नीति। **विशेषणान्तरमादाय व्याचष्टे—**

भाष्यार्कप्रकाशः

प्रतिपादितम्। तदेव सङ्क्षेपेण पुनराह— **सर्वेति**। सर्वेषां कार्यकरणतद्व्यापाराणाम्। अन्यत्र ऋत्विग्यजमानव्यापाराणाम्। **विषयीकरणं** साक्षात्कारः, तस्मात् सर्वविषयीकरणात्। अयं हेतुः अथवेति पक्षान्तरेऽप्यन्वेति। सर्वेषां देहादिबुद्ध्यन्तानां द्रष्टाभासानां दृश्यानां विषयीकरणाद् दर्शनादिति। सर्वथाऽपि साक्षित्वमुपद्रष्टृत्वमिति सिद्धम्। एवमुपद्रष्टृशब्दं व्याख्यायाथानुमन्तृशब्दं व्याख्याति— **अनुमन्ता चेति। कुर्वत्स्विति**। अन्येषु क्रियाः कुर्वत्सु सत्स्वित्यर्थः। तत्क्रियासु विषय इति विषयसप्तमी। **परितोषः** सन्तोषः। तत्कर्ता अनुमननकर्ता। कार्यकरणादिषु कर्मव्यापृतेषु सत्सु स्वयमकुर्वन्नपि कृतकृत्य इव तृप्यतीत्यर्थः। नित्यतृप्तत्वादात्मन आनन्द-रूपत्वाच्चेति भावः। न चैवं तेष्वकुर्वत्सु सत्स्वपरितोष आत्मन इति वाच्यम् ; आनन्दरूपे आत्मनि दुःखहेतोरपरितोषस्यायोगात्। कार्यकरणानां देहेन्द्रियमनसां प्रवृत्तयो व्यापाराः गमनदर्शनमननादयस्तासु कार्यकरणप्रवृत्तिषु तदनुकूलस्तत्प्रवृत्त्यनुकूलः **विभाव्यते** ज्ञायते। **तेन** तथाविभावनेन हेतुना। स्वव्यापारेष्विति। कार्यकरणानां ये नियतव्यापारास्तेष्वित्यर्थः। **प्रवृत्तान्** कार्यकरणात्मकान् कर्तॄनिति भावः। **न निवारयतीति**। न च प्रेरयतीति शङ्क्यम्। प्रवृत्तेस्तेषां स्वाभाविकत्वेन परप्रेरणायोगात्। आत्मनश्चोदासीनस्य प्रेरकत्वासम्भवाच्च।

**भर्ता** भरणकर्ता। किं तद् भरणम् , यत्कर्तृत्वेनात्मा भर्ता स्यात् , अत आह— **भरणं नामेति**। देहेन्द्रियमनोबुद्धीनां स्वरूपधारणं भरणम्। देहादीनि स्वस्वरूपं स्वयं धर्तुं न क्षमन्ते, किन्त्वात्मानुग्रहादेव। आत्मानुग्रहश्चात्मचैतन्यस्य देहादिषु प्रतिफलनम्। देहादीनां स्वरूपं च चैतन्याभासः। चेतनवदाभासन्ते हि देहादयः। तदेतदाह— **देहेति**। संहतानामन्योन्यं मिलितानां देहेन्द्रियमनोबुद्धीनां यत् स्वरूपधारणं तच्चैतन्यात्मकृतमेवेत्यन्वयः। कीदृशानां देहादीनाम्? अत आह— **चैतन्याभासानामिति**। चैतन्यस्याभासः प्रतिफलनं यासु तासां तथोक्तानाम्। किं तत्र निमित्तम्? अत आह— **चैतन्येति**। पारमार्थ्येन परमार्थसता निमित्तभूतेन चैतन्यात्मना चैतन्यस्वरूपेणेति। मुखं मुकुरस्थप्रतिमुखस्येव पारमार्थिकात्मचैतन्यं देहादिगतात्मचैतन्याभासस्य निमित्तमित्यर्थः। देहादिस्वरूपभूतचैतन्याभासस्य बिम्बभूतात्मचैतन्यनिमित्तकत्वाद् देहादिस्वरूपधारणरूपभरणकर्ता आत्मेति फलितार्थः। आत्मचैतन्यप्रतिफलनवशादेव देहादयश्चेतनवदाभासन्त इति कृत्वा देहादीनां चेतनीकरणरूपं भरणमात्मायत्तमेवेति भर्तृत्वमात्मन इति भावः।

**ननु** उपाधेर्दर्पणस्य यदि मुखाभासः स्वरूपं स्यात् तदा देहाद्युपाधीनां चैतन्याभासः स्वरूपं स्यात्। न तु तथाऽस्ति। ततः कथमुक्तं देहादीनां चैतन्याभासः स्वरूपमिति चेद्? **उच्यते—** केवलदर्पणस्य मृदात्मकस्य मुखाभासस्वरूपाभावेऽपि साभासदर्पणस्य मुखाभासः स्वरूपमेव। मृदंशस्येवाभासस्यापि दर्पणे दर्शनात्। आभासस्थले मृदंशादर्शनाच्च। तत्रापि मृदंशदर्शने आभासाभाव-प्रसङ्गात्। एवं साभासानां देहादीनामाभासः स्वरूपमेव। चेतनोऽहं मनुष्य इत्यादिव्यवहारेण मनुष्यदेहादेश्चैतन्यवत्त्वोपलम्भात् , तस्य

१. स्वाभाविकौदासीन्याविरोधेन भर्तृत्वादि निर्वक्ति— भरणमित्यादिना। २. 'व्यापारयन्तो' इति पा.।

**नित्यचैतन्यस्वरूपेण बुद्धेः सुखदुःखमोहात्मकाः प्रत्ययाः सर्वविषयविषयाश्चैतन्यात्मग्रस्ता इव जायमानाः विभक्ताः विभाव्यन्त इति भोक्ता आत्मोच्यते।** महेश्वरः **सर्वात्मत्वात् स्वतन्त्रत्वाच्च महानीश्वरश्चेति महेश्वरः।** परमात्मा **देहादीनां बुद्ध्यन्तानां प्रत्यगात्मत्वेन कल्पितानामविद्यया, परमः उपद्रष्टृत्वादिलक्षणः आत्मेति** परमात्मा। [1]**सोऽतः**

आनन्दगिरिकृतव्याख्या

महेश्वर इति। **परमात्मत्वमुपपादयति—** देहादीनामिति। **अविद्यया कल्पितानामिति सम्बन्धः।** परमत्वं **प्रकृष्टत्वम्। स पूर्वोक्त-**

भाष्यार्कप्रकाशः

च चैतन्यस्य चैतन्याभासरूपत्वाच्चेति। न हि स्वप्रतिफलितचैतन्यस्य स्वस्वरूपत्वेनाग्रहणे चेतनोऽहं मनुष्य इत्यादिव्यवहार उपपद्यते। न च चेतनोऽहं मनुष्य इति व्यवहरतोऽज्ञस्य कथमीदृशं ज्ञानमिति वाच्यम् ; आत्मचैतन्याभासवानहं मनुष्य इति ज्ञानाभावेऽपि चेतनोऽहं मनुष्य इति ज्ञानसत्त्वात् तदभिमतमनुष्यचैतन्यस्य च चैतन्याभासरूपत्वादिति। बालाः खलु दर्पणप्रतिफलितमपि मुखाभासं मुखत्वेनैव गृह्णन्ति। किं तावता प्रतिबिम्बस्य बिम्बत्वं स्यात्? तस्मादज्ञा देहादिगतं चैतन्यं स्वरूपचैतन्यमेव मन्यन्ते। वस्तुतस्तु तत् प्रतिफलितचैतन्यमेवेति देहादिगतचैतन्याभासस्यात्मचैतन्यनिमित्तकत्वाद् देहादिस्वरूप-भूतचैतन्याभासधारणमात्मनः सम्भवत्येवेति युक्तमुक्तम्—आत्मा भर्तेति।

**यद्वा** साभासानां देहादीनां यत् स्वरूपं तस्य धारणमात्मकृतमेव। आत्मसत्तास्फुरणानुगमादेव देहादिस्वरूपस्य सत्तास्फूर्ति-लाभात्। तस्मात् स्वसत्तया स्फुरणेन च देहादीन् संहतान् साभासान् बिभर्तीति भर्ताऽयमात्मा। चैतन्यात्मपारार्थ्येनेति पाठे तु देहादीनां चैतन्याभासत्वं चैतन्यात्मपारार्थ्येन निमित्तेन जातमिति। अयमाशयः - लोके चैतन्यत्वेनाभिमता देहादयः न चेतनाः - चैतन्यात्मपरार्थत्वात्। न हि देवदत्तपरार्थस्य घटस्य चेतनत्वं दृष्टं लोके। न हि घटो जलादिकं स्वार्थं बिभर्ति, किन्तु पुरुषार्थमेवेति सर्वमपि परार्थं वस्तु जडमेव। न [स] च परश्चैतन्यात्मैक एवेति देहादयश्चैतन्यात्मपरार्था एव। आत्मनः सुखदुःखादि-भोगावच्छेदकत्वाद् देहादीनाम्। एवं सति देहादीनां चैतन्यमाभासमात्रमेवेति तत्स्वरूपधारणमात्मकृतमेव।

**भोक्तेति**। बुद्धेर्जायमानाः सर्वविषयविषया विभक्ताः सुखदुःखमोहात्मकाः चैतन्यात्मग्रस्ता इव स्थिताः प्रत्यया अग्न्युष्णवन्नित्यचैतन्यस्वरूपेण विभाव्यन्त इति हेतोरात्मा भोक्तेत्युच्यत इत्यन्वयः। बुद्धेः सकाशाज्जायमाना उत्पद्यमानाः, सर्वे विषयाः स्रक्-चन्दनरोगादयो विषया येषां ते तथोक्ताः। इष्टानिष्टविषयप्राप्त्यादिजन्या इत्यर्थः। **विभक्ताः** परस्परमसङ्कीर्णाः सुखादिस्वरूपाः **प्रत्ययाः** वृत्तिज्ञानानि। **चैतन्यात्मना** चैतन्यस्वरूपेण, स्वरूपचैतन्येनेति यावत्। **ग्रस्ता इव** गिलिता इव स्थिताः। चैतन्याभासरसविद्धत्वाद् वृत्तीनां गिलितत्वोत्प्रेक्षेयम्। अत एव वृत्तीनां जडानामपि ज्ञानत्वेन व्यवहार इति भावः। अग्नेरुष्णवदात्मनः स्वरूपभूतं नित्यचैतन्यं तेन। **विभाव्यन्ते** ज्ञायन्ते। साक्षिचैतन्येनैव वृत्तीनामवभास्यमानत्वात्। घटादीनामिव सुखादिवृत्तीनामपि वृत्त्यन्तरभास्यत्वाभ्युपगमेऽनवस्थादोषप्रसङ्गात्। अविद्यान्तःकरणादिवद् वृत्तयः साक्षिभास्या एव। अग्न्युष्णवदिति दृष्टान्तेन चैतन्यमात्मन एव स्वरूपम् , बुद्ध्यादेस्तु अग्नितादात्म्याल्लोहादेरिव आत्मतादात्म्याध्यासप्रयुक्तमिति गम्यते। साभाससुखादिबुद्धि-वृत्तिसाक्षात्कारादात्मनो भोक्तृत्वमिति फलितार्थः। एतेन सुखादिभोगस्तत्प्रयुक्तो विकारो वा बुद्धेरेव, न त्वात्मन इति सिद्धम्। एतद्बुद्धि-तादात्म्याध्यासात् तत्पूर्वकबुद्धिधर्माध्यासाच्चात्मनः संसारित्वं, न तु स्वत इति भावः। 'साभासबुद्धेः कर्तृत्वमवच्छिन्नेऽविकारिणि। साक्षिण्यारोप्यते भ्रान्त्या जीवत्वं च तथाऽबुधैः॥' इति स्मृत्यन्तराच्च। जीवत्वं संसारित्वमित्यर्थः। बुद्धिधर्मस्तदिति भावः। न च उपद्रष्टृभोक्तृपदयोः पुनरुक्तिः साक्षित्व एव पर्यवसानात् पदद्वयस्येति वाच्यम् ; कार्यकरणतद्व्यापारद्रष्टृत्वेन, बुद्धिवृत्तिद्रष्टृत्वेन च भेदात्। सर्वान्तरतमद्रष्टृत्वेन, बुद्धिवृत्तिद्रष्टृत्वेन वा भेदात्। एकस्यैव साक्षित्वस्य विषयभेदाद् द्वेधा निर्देशेऽपि न पुनरुक्तिरिति भावः।

**महेश्वर इति**। स्वतन्त्रस्य राजादेरीश्वरत्वं तावत् प्रसिद्धमिति स्वातन्त्र्यमेवेश्वरत्वम्। तेऽपि राजादय ईश्वरा दैवादिपरतन्त्रा एवेति न महेश्वराः। यस्मादधिको नास्त्यन्य ईश्वरः, यस्य वा नास्तीश्वरो नियामको स हि महेश्वरः। ब्रह्मादयोऽपि कालादिपरतन्त्रा

१. 'सोऽन्तः' इति भाष्ये टीकाप्रतीकधारणे च पा.। 'अन्यः परमात्मे'ति रामकविटीकायां प्रतीकधारणं दृश्यते। तेन श्रुतिवाक्यं किञ्चिद् इह गृहीतमिति भाति।

भाष्यार्कप्रकाशः

एवेति न महेश्वराः, किन्तु पुरुष एक एव महेश्वरः। न चास्य नियामकः कश्चिदस्ति, सर्वात्मत्वादस्य। एक एव हि पुरुषः क्षेत्रज्ञो ब्रह्मादिस्तम्बपर्यन्तेषु सर्वक्षेत्रेषु वर्तत आत्मत्वेन, सर्वेषां भूतानामात्मनि कल्पितत्वेन कल्पितानामधिष्ठानरूपत्वेन च। सर्वभूतानामधिष्ठानभूतो हि सर्वात्मा पुरुषः। न च कथमन्तःकरणोपहितत्वेन परिच्छिन्नस्य पुरुषस्य सर्वाधिष्ठानत्वमिति वाच्यम् ; अन्तःकरणस्यापि पुरुषे कल्पितत्वेन तस्य कल्पितान्तःकरणस्य पुरुषपरिच्छेदकत्वासम्भवात्। परिच्छिन्नं हि पुरुषमन्तःकरणं परिच्छेत्तुं न क्षमते, [1]पुनरुक्त्यादिदोषात्। किन्त्वपरिच्छिन्नमेव। अपरिच्छिन्नस्य च तस्य वस्तुतोऽन्तःकरणपरिच्छेदासम्भवात् कथं परिच्छिन्नत्वं पुरुषस्य? तस्मादपरिच्छिन्न एव पुरुषेऽन्तःकरणादिकं सर्वं जगत् कल्पितमिति सर्वाधिष्ठानत्वं पुरुषस्य सिद्धम्। अत एवास्य प्रत्यगात्मनोऽपि परमात्मत्वमिहैवोच्यते – 'परमात्मेति चाप्युक्तः' इति।

**ननु** कूटस्थे व्यष्टिदेहादिरध्यस्तः, परमात्मनि तु सर्वं जगदिति पूर्वमुक्तं त्वयेति चेत् , **नैष दोषः** - कूटस्थपरमात्मनोरन्तः-करणोपहितत्वमायोपहितत्वरूपकल्पितभेदमाश्रित्य तथोक्तत्वात्। कथमन्यथा तत्त्वमस्यादिना कूटस्थपरमात्माभेदः प्रतिपाद्येत?

**ननु** किं भिन्नयोः कूटस्थपरमात्मनोरभेदः प्रतिपाद्यते, उताभिन्नयोः? नाद्यः - भिन्नयोरभेदासम्भवात्। नान्त्यः - अभेदे कूट-स्थपरमात्मनोरिति भेदेन निर्देशायोगादिति चेत् , **मैवम्** ; एकस्मिन्नेवात्मनि लौकिकैस्तार्किकादिभिश्च प्रसञ्जितस्य कूटस्थपरमात्म-त्वरूपभेदस्य तत्त्वमसीत्यनेन निरस्यमानत्वादिति। एवं सर्वात्मत्वादेव स्वतन्त्रत्वं च पुरुषस्य। सति हि परवस्तुनि तत्तन्त्रत्वं स्यात् पुरुषस्य। तदेव नास्ति , पुरुषात्मकत्वात् सर्वस्य। सच्चिदानन्दरूपपुरुषस्य सर्वस्मात् पृथक्करणे पटात् तन्तोरिव सर्वस्यैवाभावप्रसङ्गात् पटाभावप्रसङ्गवत्। अत एव तन्तुपरतन्त्रपटवत् सर्वमपि पुरुषपरतन्त्रमेव। तस्मात् पुरुष एव महेश्वर इत्याह— **सर्वात्मत्वादित्यादिना**। **परमात्मेति**। परम उत्कृष्टश्चासावात्मेति परमात्मा।

ननु किमयमात्मनां मध्ये उत्कृष्ट आत्मा? उतानात्मनां मध्ये? नाद्यः - अनेकात्माभावात्। नान्त्यः - अनात्मनां मध्येऽना-त्मन एव कस्यचिन्निर्धारणीयत्वेनात्मनिर्धारणायोगात्। न हि मनुष्याणामुत्तमः सुर इति वक्तुमुचितम्। अत आह— **देहादीनामिति**। अविद्यया प्रत्यगात्मत्वेन कल्पितानां देहादीनामव्यक्तान्तानां मध्ये परम इति। अज्ञानाद् बौद्धादयः केचिद् देहमेवात्मानं मन्यन्ते, केचिदिन्द्रियाणि, केचित् प्राणं, केचिन्मनः, केचिद् बुद्धिं, प्राज्ञास्तु देहादिविलक्षणमेव प्रत्यञ्चमित्येवं स्थिते अज्ञप्राज्ञाभ्यामात्मत्वेन गृह्यमाणानां देहेन्द्रियमनोबुद्धिपुरुषाणां मध्ये पुरुषस्य परमत्वं निर्धार्यते परमात्मेति शब्देनेति। अव्यक्तशब्दोऽत्र बुद्धिपरः। प्रकृतेः साक्षादात्मत्वेनाग्रहणात्। यदि काणोऽहमितिवद् अज्ञोऽहमित्यात्मनीन्द्रियधर्मवत् प्रकृतिधर्मस्याध्यासः धर्म्यध्यासं सूचयतीत्यात्मनि प्रकृत्यध्यासोऽप्यस्तीत्युच्यते, तर्ह्यव्यक्तशब्दः प्रकृतिपर एव।

**वस्तुतस्तु** अव्यक्तशब्दोऽत्र प्रत्यगात्मपर एव, करणागोचरत्वलक्षणाव्यक्तत्वस्यात्मनि दर्शितत्वात् – 'अव्यक्तोऽक्षर उच्यत' इत्युक्तत्वात्। एवमव्यक्तशब्देन पुरुषग्रहणे सत्येव निर्धारणमुपपद्यते पुरुषस्य। कथमन्यथा देहादीनामनात्मभूतानां मध्ये निर्धारणं स्यादात्मनः? देहादिमध्ये तस्यासत्त्वात्। यद्येवं तर्हि प्रत्यगात्मत्वेन कल्पितानामित्यस्य कथमव्यक्ते समन्वयः पुरुष इति चेत् , **नैष दोषः**, छत्रिणो गच्छन्तीतिवल्लक्षणया अकल्पितेऽपि पुरुषे तदन्वयात्। यद्वा प्रत्यगात्मसहितानामिति शेषः। ततश्च देहादयो बुद्धिपर्यन्ता ये कल्पितात्मानः, यश्च कल्पितः प्रत्यगात्मा, तेषां सर्वेषां मध्ये प्रत्यगात्मा परम इति। सत्यसर्पमिथ्यासर्पयोर्यथा सत्यसर्पः उत्कृष्टस्तथा अकल्पितात्मकल्पितात्मनोर्मध्ये अकल्पितात्मोत्कृष्टः इति भावः।

किंलक्षणोऽयमकल्पितात्मेत्यत आह— **उपद्रष्टृत्वादिलक्षण इति**। यद्वा कुतः प्रत्यगात्मनः परमत्वम्? अत आह— **उपद्रष्टृत्वेति**। हेतुगर्भमिदं विशेषणम्। तथा चोपद्रष्टृत्वादिलक्षणवत्त्वात् परमः पुरुष इत्यर्थः। देहादयस्तु दृश्यत्वविकारित्व-प्रमुखासल्लक्षणत्वादनुत्कृष्टा इति भावः। **सः** पुरुष इत्यर्थः। कुत्रोक्तः? अत आह— **श्रुताविति**। श्रुतिमेव दर्शयति— **अन्यः परमात्मेति**। श्लोकस्थेतिशब्दार्थमाह— **अनेन शब्देनेति**। श्रुतिसिद्धत्वादयमर्थः सर्वैरास्तिकैर्ग्राह्य इति भावः। किंच उक्तः इत्यनेन कर्तुरीश्वरस्याक्षेपः। येनेश्वरेण वेदे प्रोक्तः सोऽयमर्थस्तेनैव गीतायामप्युच्यत इति भावः। देहपदान्वयायाकाङ्क्षामुद्भावयति—

१. परिच्छिन्नत्वादेव तस्य पुनरन्तःकरणेन परिच्छेदो व्यर्थः, अतः पुनरुक्तितुल्यो दोषः इति भावः।

**परमात्मा** इति **अनेन शब्देन चाप्युक्तः कथितः श्रुतौ। क्वासौ? अस्मिन् देहे पुरुषः** परोऽव्यक्तात्[१]। **'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः' (भ.गी.१५.१७) इति यो वक्ष्यमाणः, 'क्षेत्रज्ञं चापि मां विद्धि' (भ.गी.१३.३) इत्युपन्यस्तः, व्याख्यायोपसंहृतश्च॥२२॥**

आनन्दगिरिकृतव्याख्या

**विशेषणवानिति यावत्। परमात्मशब्दस्य प्रकृतात्मविषयत्वे श्रुतिमनुकूलयति—** अत इति। **तस्य ताटस्थ्यं प्रश्नद्वारा प्रत्याचष्टे—** क्वेति। **कस्मात् परत्वम्? तदाह—** अव्यक्तादिति। **तत्रैव वाक्यशेषानुकूल्यमाह—** उत्तम इति। **सोऽस्मिन् देहे परः पुरुष इति सम्बन्धः। शोधितार्थयोरैक्यज्ञानं प्रागुक्तं फलोक्त्या स्तौति—** क्षेत्रज्ञं चेति॥२२॥

भाष्यार्कप्रकाशः

**क्वासाविति**। असौ पुरुषः क्वास्तीत्यर्थः। **देहेऽस्मिन्निति**। अस्मिन् दृश्यमाने मनुष्यपश्वादिलक्षणे देहे। जात्येकवचनं सर्वक्षेत्रेष्वित्युपक्रमे प्रोक्तत्वात्। वर्तमान इति शेषः। यद्वा क्वासौ, उपलभ्यत इति शेषः। अस्मिन् देहे बुद्ध्यादिसाक्षित्वेनोपलभ्यमान इत्यर्थः। 'मनीषिणोऽन्तर्हृदि सन्निवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः। वह्निं यथा दारुषु पाञ्चदश्यं मनीषया निष्कर्षन्तीह गूढम्॥' इति भागवतात्। **इह** देह इत्यर्थः। एतेन सर्वव्यापिनः पुरुषस्य कथं देहे ऽस्मिन्नित्युक्तिरिति शङ्का परास्ता। **पर इति**। अन्य इत्यर्थः। विलक्षण इति यावत्। कस्मादित्यत आह— **अव्यक्तादिति**। प्रकृतेः परत्वे प्रोक्ते सति तत्कार्येभ्योऽपि परत्वं सिध्यतीति भावः। यद्वा कार्यात्मना परिणताच्चाव्यक्तात् पर इति। कोऽसौ पुरुषोऽत आह— **उत्तम इति**। 'क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते' इति पूर्वार्धम्। कूटस्थोऽव्यक्तम्। **अन्यः** क्षराक्षराभ्यां भूततत्प्रकृतिभ्यामितरः। एतेनाव्यक्तादिति स्वेनाध्याहृतं गीतासिद्धमेवेति सूचितम्। अतो न स्वकपोलकल्पनप्रसङ्गः। **वक्ष्यमाण इति**। पञ्चदशाध्याय इति भावः। न केवलं वक्ष्यमाणः, किन्तूक्त एवापीत्याह— **क्षेत्रज्ञं चेति**। **उपन्यस्त** उदाहृतः। एतेन पूर्वोत्तरग्रन्थसन्दर्भानुगुणेन मध्येऽपि स एवार्थो ग्राह्य इति सूचितम्। ततश्च पुरुषस्याभ्यासः सूचितः। असकृद्वचनं ह्यभ्यासः। एवं पुरुषस्य परमात्मत्वमसकृदुक्तमिति जीवेश्वराभेद एव प्रमाणम् , न तु तद्भेद इति भेदवादस्याप्रमाणत्वं सिद्धम्। यो वक्ष्यमाणो यश्चोपन्यस्तः, स एव पुरुषः इह व्याख्यायोपसंहृत इति। **व्याख्याय** प्रतिपाद्य उपसंहृत इत्यर्थः।

यत्तु **रामानुजः** - अस्मिन् देहेऽवस्थितो यः पुरुषो देहप्रवृत्त्यनुगुणसङ्कल्पादिरूपेण देहस्योपद्रष्टा अनुमन्ता च भवति, तथा देहस्य भर्ता देहप्रवृत्तिजनितसुखदुःखयोर्भोक्ता च भवति, एवं देहनियमनेन देहभरणे, देहशेषित्वेन च देहेन्द्रियमनांसि प्रति महेश्वरो भवति, देहेन्द्रियमनांसि प्रति परमात्मेति चाप्युक्तः, पुरुषः परोऽपरिच्छिन्नज्ञानशक्तिः, अनादिप्रकृतिसम्बन्धकृतगुणसङ्गादेतद्देहमात्रमहेश्वरो भवति, देहमात्रपरमात्मा च भवतीति। तदेतत् **सर्वमतितुच्छम्** - स्थूलदेहप्रवृत्त्यनुगुणसङ्कल्पस्य सूक्ष्मदेहभूतमनोधर्मत्वेन पुरुषस्य सङ्कल्पायोगात्। न ह्यन्यधर्मोऽन्यस्य सम्भवति, विनाऽध्यासात्। स चाध्यासस्त्वया नाङ्गीकृत एव, परमेश्वरस्यापि स्वाभाविकमेवेक्षणमिति वदसि हि त्वम् ! किं पुनर्जीवस्य। यदि जीवस्य सङ्कल्पः स्वाभाविक एव स्यादग्न्युष्णवत् तर्हि सुषुप्तावपि स दृश्येत। मूर्छादिष्वपि दृश्येत। न तु तथा दृश्यते। तस्मान्न पुरुषधर्मः सङ्कल्पः। तथा सुखदुःखभोगस्य बुद्धिधर्मत्वेन न पुरुषस्य सुखदुःखभोक्तृत्वं संसारलक्षणं सम्भवति। 'अविकार्योऽयमुच्यते' इति ह्युक्तमत्रैव। तत्कथमस्य विकारः स्यात् सुखादिभोगरूपः?

न च गुणसङ्गाद् भवतीति वाच्यम् ; 'असङ्गो ह्ययं पुरुषः' इति श्रुत्युक्तासङ्गपुरुषस्य गुणसङ्गासम्भवात्। तथा प्रकृतिसङ्गोऽपि नार्ह आत्मनः। अस्मन्मते तु सङ्गस्य मिथ्याभूतत्वादात्मनि सङ्गोपपत्तिः। त्वं हि सङ्गं सत्यं ब्रवीषि, त्वादृशो हि विद्वांसः पुरुषगतेश्वरत्वस्य सङ्कोचं सम्भावयेयुरिति मत्वैव भगवता **बादरायणेन** महेश्वरशब्दः प्रयुक्तः। तथापि यदि सङ्कोचं त्वं ब्रवीषि देहादीन् प्रति महेश्वरः इति कस्तर्हि तव शासिता? एवं महच्छब्दस्यानर्थक्यसम्पादनेन स्फुटं तव मूलच्छेदपाण्डित्यम्। 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति श्रुतिसंवादी हि महेश्वरशब्दस्यात्र प्रयोगः। देहेन्द्रियमनांसि प्रतीति कथं मूलाद् बहिः कल्पनं तव? ईश्वरे योगरूढयोर्महेश्वरपरमात्मशब्दयोः सति जीवेश्वरभेदे कथं प्रयोगः स्याज्जीवविषयः? देहमात्रमहेश्वर इति देहमात्रपरमात्मेति च

१. 'अव्यक्तात् पुरुषः परः' इति श्रुतेरिति भावः।

# य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह।
# सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते॥ २३॥

**तमेतं यथोक्तलक्षणमात्मानम्—** य इति। **यः** एवम् **यथोक्तप्रकारेण वेत्ति पुरुषं साक्षाद् आत्मभावेन 'अयमहम्' इति,** प्रकृतिं **च यथोक्ताम् अविद्यालक्षणां** गुणैः **स्वविकारैः सह** [1]**निवर्तिताम् अभावमापादितां विद्यया,**

आनन्दगिरिकृतव्याख्या

यथोक्तप्रकारेण **जीवेश्वरादिसर्वकल्पनाधिष्ठानत्वेनेत्यर्थः।** साक्षाद् **अपरोक्षत्वेनेति यावत्।** यथोक्ताम् **अनाद्यनिर्वाच्याम् , सर्वो-**

भाष्यार्कप्रकाशः

किं गीताशास्त्रे क्वापि प्रयोगोऽस्ति? येन तदनुरोधेन महेश्वरपरमात्मशब्दयोस्तादृशार्थकथनं युज्येत।

**किञ्च** कर्माधीनकरणप्रवृत्तेरस्य जीवस्य संसारिणः कथं देहमात्रं प्रत्यपीश्वरत्वम्? व्याधिग्रस्तो हि पदमपि चालयितुं न क्षमते। यदि देहः स्वतन्त्रः स्यात् , तर्हि कथं सर्वेऽपि जीवा देहं परित्यज्य परमप्रेमास्पदं , गच्छेयुः कालवशाद् यमलोकादिकम्? तस्मात् कालकर्मादिपरतन्त्रे देहे न स्वातन्त्र्यं जीवस्य। एवं देहमात्रं प्रत्यपीश्वरत्वस्यैवासिद्धौ कुतः पुनर्महेश्वरत्वसिद्धिः पुरुषस्य? 'देहः किमन्नदातुः स्वं निषेक्तुर्मातुरेव वा' इति हि भागवते स्मर्यते। अन्नदातृपितृमातृभार्याराजशुनकाग्न्यादयो हि बहवः सन्ति देहस्येश्वराः। यस्य पुनरज्ञस्यैतद्देहेऽहमभिमानः सोऽप्यन्नदात्रादिपरतन्त्र एव। भृत्यादीनां राजादिपारतन्त्र्यस्य दर्शनात्। देहस्य राजचोदित-क्रियाकारित्वेन हि भृत्यस्य राजपारतन्त्र्यम्। तस्माद् यो देहः स्वाभिमानेन जीवमपि परतन्त्रयति तद्देहे कथं जीवस्य स्वातन्त्र्यम्? जीवस्य गमनादिसङ्कल्पेऽपि न स्वातन्त्र्यं कर्माधीनत्वात् सङ्कल्पस्य। न हि कोऽपि स्वानिष्टं संसारं स्वेच्छया सङ्कल्पयेत्। 'मत्तः स्मृतिर्ज्ञानमपोहनञ्च' इति स्मरणादीनां भगवदायत्तत्वं च वक्ष्यति भगवानेवेहैव। एवं संसारिणो जीवस्य यत्र कुत्रापि स्वातन्त्र्याभावादेव ह्यनीश्वरत्वमुच्यते – 'ज्ञाज्ञौ द्वावजावीशनीशौ' इति श्रुत्या यस्त्वसंसारी जीवः प्राज्ञः स सर्वं प्रत्यपीश्वर एवेति कथं तस्य देहमात्रेश्वरत्वं वक्तुं शक्यते? न च कथमीश्वरं प्रत्यपि जीवस्येश्वरत्वमिति वाच्यम् ; ईश्वरस्यैव जीवत्वात्। उक्तं हि – 'क्षेत्रज्ञं चापि मां विद्धी'ति। अर्चारूपस्त्वदभिमतेश्वरस्तु जीवस्याज्ञस्यापि परतन्त्र एव। करणकलेबरादिमतां श्रीरामादीनां च दशरथादिजीवाज्ञापरिपालकत्वेन तत्पारतन्त्र्यं प्रसिद्धमेव। यः पुनरीश्वरः सर्वान्तरोऽशरीरः स एव स्वतन्त्रः सर्वशेषी। स च प्रत्यगात्मैव, तस्यैव सर्वान्तरत्वादिति युक्तं महेश्वरत्वं प्रत्यगात्मनः। न च प्रत्यगात्मा परमात्मपरतन्त्र एवेति वाच्यम् ; यः परमात्मपरतन्त्रः सोऽज्ञः प्रमातैव, न कूटस्थः। यः कूटस्थः स परमात्मैव, न परतन्त्र इति। न चानुभवसिद्धस्य राजादिपारतन्त्र्यस्य जीवगतस्य कथमपलाप इति वाच्यम् ; य आत्मानं राजादिपरतन्त्रं मन्यते स देहाद्यात्माभिमानवानेव, न तु तद्विलक्षणमात्मानं वेत्ति। न हि देहादिविलक्षणस्य राजादिपारतन्त्र्यं वक्तुं शक्यते। किं सुप्तिमृतिमूर्छासु स्वस्य राजादिपारतन्त्र्यानुभवः? किञ्च राजभृत्ययोः प्रमातृभेद एव, न त्वात्मभेदः। आत्मनः सर्वैकत्वादिति कथमात्मनः पारतन्त्र्यप्रसक्तिरेकस्याद्वितीयस्य ब्रह्मण आत्मनः? न चैवमात्मनोऽपरतन्त्रत्वेऽपि न सर्वं प्रति स्वातन्त्र्यमिति वाच्यम् , आत्मनश्चेतनत्वात् अन्यस्य च जडत्वाज्जडस्य च चेतनपारतन्त्र्यस्य सर्वविदितत्वादिति। एवमात्मनोऽन्यस्य तत्समस्य तदधिकस्य वा अभावात् सर्वं प्रत्यात्मा परमात्मैव, न तु देहमात्रं प्रति। 'न तत्समश्चाभ्यधिकश्च दृश्यते' इति श्रुतेः। न च श्रुतिरीश्वरपरेति वाच्यम् ; ईश्वरस्यैवात्मत्वादिति सङ्क्षेपः॥ २२॥

**य इति**। य एवं पुरुषं गुणैः सह, निवर्तितामिति शेषः; प्रकृतिं च वेत्ति स सर्वथा वर्तमानोऽपि भूयो नाभिजायते। कथं पुरुषस्य वेदनम्? अत आह— **साक्षादात्मभावेनेति**। तदेवाभिनीय दर्शयति— **अयमहमस्मीति**। अयं प्रत्यगभिन्नः परमात्मा पुरुषो ऽहमस्मीत्यर्थः। 'अहं ब्रह्मास्मीति, अयमात्मा ब्रह्मे'ति च श्रुतेरिति भावः। कृतात्मसाक्षात्कार इत्यर्थः। अयं घट इति यथा घटमपरोक्षीकृतवांस्तथा स्वात्मानमपि अयमहमस्मीति साक्षात्कृतवानिति यावत्। कया निवर्तिताम्? अत आह— **विद्ययेति**। विद्यया

१. मोक्षसाधनज्ञानविषयत्वस्य आत्ममात्रे स्वीकारात् , प्रकृतौ तदभावात् , श्रुत्यादिपर्यालोचनया निवर्तितामित्याद्यध्याहृत्य व्याख्यातम्।

सर्वथा **सर्वप्रकारेण वर्तमानोऽपि स** भूयः **पुनः पतितेऽस्मिन् विद्वच्छरीरे देहान्तराय** नाभिजायते **नोत्पद्यते। देहान्तरं न गृह्णातीत्यर्थः। अपिशब्दात् किमु वक्तव्यं स्ववृत्तस्थो न जायत इत्यभिप्रायः।**

आनन्दगिरिकृतव्याख्या

**नर्थोपाधिभूतामित्यर्थः। विद्यया प्रागुक्तैकत्वगोचरया प्रकृतिमविद्यारूपां सकार्यामभावमापादितां यो वेत्तीति सम्बन्धः।** सर्वप्रकारेण **विहितेन निषिद्धेन चेत्यर्थः।** [1]**पुनर्नकारोऽन्वयार्थः। निपातसूचितं न्यायमाह—** अपीति।

भाष्यार्कप्रकाशः

ब्रह्मात्मसाक्षात्कारेण। सत्यात्मसाक्षात्काररूपसूर्योदये सकार्यमविद्यालक्षणं तमो निवर्तत इत्यर्थः। न च नाशमापादितायाः प्रकृतेः कथं ज्ञानमिति वाच्यम् ; निवृत्तप्रकृतेः ज्ञानाविषयत्वेऽपि प्रकृतिनिवृत्तेर्ज्ञानविषयत्वेन तथोक्तत्वात्।

**ननु** 'गुणैः सह प्रकृतिं वेदे'त्येव मूले स्थितत्वान्निवर्तितामिति पदाध्याहारो निर्मूलत्वादप्रमाण इति चेत् , **मैवम्** ; सत्यात्मसाक्षात्कारे वेद्यानां प्रकृतितद्गुणानामभावेन तद्दर्शनासम्भवात्। आत्मसाक्षात्कार एव हि प्रकृतितत्कार्यानुभवात्मकसंसारस्यावधिः। यथा सूर्यसाक्षात्कारो निशायास्तत्कार्यपिशाचादीनां च दर्शनस्यावधिः। आत्मसाक्षात्काररूपविद्यावस्थायां हि – 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदि'ति श्रुत्या सर्वद्वैतदर्शनाभावः प्रतिपादितः। तस्मान्निवर्तितामिति पदमवश्यमध्याहर्तव्यमन्यथाऽर्थानुपपत्तेः। **स इति**। य आत्मसाक्षात्कारनिवृत्ताज्ञानतत्कार्यः स इत्यर्थः। न च कृतात्मसाक्षात्कार इत्यनेनैव निवृत्ताज्ञानत्वस्य लाभात् प्रकृतिं च गुणैः सहेत्युक्तिर्व्यर्थेति वाच्यम् ; आत्मसाक्षात्कारानन्तरमपि प्रकृतितत्कार्यसद्भावशङ्का कस्यचित् स्यादिति तन्निरासाय तद्वचनात्। अथवा, आत्मसाक्षात्कारो द्विविधः - परोक्षोऽपरोक्षश्चेति। तत्र परोक्षात्मज्ञानान्न प्रकृत्यादिनिवृत्तिः, किन्त्वपरोक्षात्मसाक्षात्कारादेवेति कृत्वा य एवं वेत्ति पुरुषमित्यनेनापरोक्षात्मसाक्षात्कार एव विवक्षित इति सूचनाय प्रकृतिं च गुणैः सहेत्युक्तम्। **सर्वप्रकारेणेति**। स्नानसन्ध्यादिकं विहाय बालोन्मत्तपिशाचादिवदवधूतमार्गेणेत्यर्थः। 'निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः' इति **शुक**वचनादिति भावः। **विद्यमानो** वर्तमान इत्यर्थः। मुक्तिं यास्यतीति किमु वक्तव्यमित्यन्वयः। एतेनाविहितमार्गसञ्चारे विदुषा नाभिनिवेशः कर्तव्य इति सूचितम्। सर्वथेत्यनेन च विहितमार्गेऽपि नाभिनिवेशः कार्य इति, ततश्च यथाप्रारब्धं विदुषां कार्यकरणानि देवार्चनस्नानशौचभिक्षादौ विहिते प्रवर्तन्तामथवा अवधूतमार्गे। उभयथाऽपि न विदुषः काऽपि क्षतिः, कार्यकरणेषु तस्याहम्ममाभिमानाभावादिति सिद्धम्। **भूयो नाभिजायते** पुनर्जन्म न प्रतिपद्यत इत्यर्थः। तदेवाह— **पतित इति**। अस्मिन् प्रारब्धे विदुषः शरीरे प्रारब्धावसानात् पतिते मृते सति, अन्यो देहो देहान्तरं, तस्मै। देहान्तरं परिगृह्येत्यर्थः। फलितमाह— **देहान्तरमिति**। जीवस्याजस्य ज्ञानात् प्रागपि न जन्मसम्भवः। किम्पुनर्ज्ञानात्पश्चादिति भावः।

**नन्वेवं** भूयो नाभिजायत इत्ययुक्तम् , भूय इत्यनेनेतः प्राग् जन्मसद्भावसूचनाद् , अजस्य कदाऽपि जन्मायोगाच्चेति चेत् , **सत्यम्** , अत एव देहान्तरं न गृह्णातीति तदर्थ उक्तः। विद्यमाने देहे नष्टे सति जीवो मृत इति, देहान्तरपरिग्रहे जीवो जात इति चाज्ञाः पश्यन्ति देहजन्मनाशावात्मनि। देहे जाते मृते वा जीवो जातो मृत इति लोकव्यवहारदर्शनात्। इमौ चाज्ञानमूलौ जन्मनाशौ जीवस्य न स्त इत्यज एव जीवः। अपि तु अज्ञानवशाद् देही प्रकृतदेहं परित्यज्य देहान्तरं परिगृह्णात्यनादिकालादारभ्य। तस्मिंश्चाज्ञाने नष्टे देहान्तरं न परिगृह्णाति, ज्ञानोदयात् प्राक् परिगृहीतं देहं तु त्यजतीति। अयं च प्रकृतदेहत्यागः सर्वव्यापिन आत्मनो न सम्भवत्येव, तथापि विद्वद्देहाश्रयप्राणादीनां वाय्वादिषु लयान्निष्प्राणं विद्वद्देहं 'विदुषा आत्मना त्यक्तः' इति लोकाः मन्यन्ते। यथा वा निष्प्राणं पाषाणादिकमविद्वांस आत्मरहितं मन्यन्ते।

न च विदुषोऽपि प्राणोत्क्रमणमस्त्येवेति कथं तल्लय इति वाच्यम् ; 'तत्त्वविदः प्राणा नोत्क्रामन्ति, अत्रैव समवलीयन्ते' इति श्रुतेः। प्राणादिष्वात्माभिमानिनि प्रमातरि विद्यया ब्रह्मभावं गते सति चैतन्याभासशून्याः प्राणादयः स्वस्वकार्येषु लीयन्त एव, न तूत्क्रमणादिषु क्षमन्ते। चैतन्याभासप्रयुक्तत्वात् प्राणादीनामुत्क्रमणादिसामर्थ्यस्येति भावः। न च - विद्यमानचैतन्याभासे नष्टेऽपि पुन-

१. 'न स भूयः पुनः पतितेऽस्मिन् विद्वच्छरीरे देहान्तराय नाभिजायते' इति पाठः आनन्दगिरिदृष्टः स्यादिति भाति। अत एव पुनर्नकारस्येत्थं सार्थक्यं वर्णितम्। (द्र.भ.गी. २-१६, २-७२)

[ज्ञानोत्तरं जन्माभावोपपादनम्]

**ननु यद्यपि ज्ञानोत्पत्त्यनन्तरं पुनर्जन्माभाव उक्तः, तथापि प्राग् ज्ञानोत्पत्तेः कृतानां कर्मणाम् , उत्तर-कालभाविनां च, यानि चातिक्रान्तानेकजन्मकृतानि तेषां च, फलमदत्त्वा नाशो न युक्त इति स्युस्त्रीणि जन्मानि। कृतविप्रणाशो हि न युक्त इति। यथा फले प्रवृत्तानामारब्धजन्मनां कर्मणाम्। न च कर्मणां विशेषोऽवगम्यते। तस्मात्**

आनन्दगिरिकृतव्याख्या

**'न स भूयोऽभिजायते' इत्युक्तमाक्षिपति—** नन्विति। **ज्ञानोत्पत्त्यनन्तरं जन्माभावस्योक्तत्वात् पुनर्देहारम्भमुपेत्य नाक्षेपः स्यादित्याशङ्क्याह—** यद्यपीति। **तथापि स्युस्त्रीणि जन्मानीति सम्बन्धः। वर्तमानदेहे ज्ञानात्पूर्वोत्तरकालानां कर्मणां फलमदत्त्वा नाशायोगाज्जन्मद्वयमावश्यकम्। अतीतानेकदेहेष्वपि कृतकर्मणां 'नाभुक्तं क्षीयते कर्म' इति स्मृतेरदत्त्वा फलमनाशादस्ति तृतीयमपि जन्मेत्याह—** प्रागिति। **फलदानं विनाऽपि कर्मनाशे दोषमाह—** कृतेति। **न युक्त इति कृत्वा फलमदत्त्वा कर्मनाशो नेति शेषः। विमतानि**

भाष्यार्कप्रकाशः

श्चैतन्याभासान्तरं गृह्णीयुरेव प्राणाद्युपाधयः, बिम्बचैतन्यस्य सर्वव्यापिनः सन्निहितत्वादिति - वाच्यम् ; चैतन्याभासनाशसमकालमेव प्राणाद्युपाधिनाशात्। **यद्वा** प्राणाद्युपाधीनां चैतन्याभासान्तरग्रहणशक्तिनाशात्। अथवा प्राणाद्युपाधिनाशानन्तरमेव चैतन्याभासस्य चैतन्येनैक्यप्राप्तिः, नाशसमकालमेवेति वा। दर्पणनाशे मुखप्रतिबिम्बस्य मुखैक्यप्राप्तिवत्। प्राणादीनामुपाधीनां लयं प्रति तु प्रारब्ध-नाशसहकृत आत्मसाक्षात्कारो हेतुरिति। एवं विद्वच्छरीरात् प्राणोत्क्रमणासम्भवादेव शरीरे पतित इत्युक्तम् , न तूत्क्रान्तप्राण इति। शरीरस्य पतनं नाम प्राणनादिक्रियाशून्यत्वम्। मृत्पाषाणादिवदचेतनत्वेन भूमौ पतनमिति वा। तस्मादात्मसाक्षात्कारनिवृत्ताज्ञान-तत्कार्यः प्रमाता ब्रह्मभावं गच्छति, 'ब्रह्मविद् ब्रह्मैव भवति', 'तरति शोकमात्मविदि'त्यादिश्रुतेरिति स्थितम्।

**ननु** विद्यया प्रकृतितद्गुणेषु नाशमापादितेषु सत्सु कथं विदुषः सर्वथा वर्तनं सम्भवेत् सत्सु देहेन्द्रियादिषु? कथं वा प्रकृति-तद्गुणानां नाशः सम्भवेद् विदुष इति चेत् , **नैष दोषः** - प्रकृतितद्गुणानां नाशापादनं नाम आत्मैवेदं सर्वम् , नात्मव्यतिरेकेण किञ्चिदस्तीत्यनुसन्धानम्। तेन हि प्रकृतितद्गुणानामप्रतीतिः, किन्तु ब्रह्मण एकस्यैव प्रतीतिः। न च प्रतीत्यभावमात्रेण कथं स्वरूपतः प्रकृतितद्गुणानां नाश इति वाच्यम् ; सुषुप्तौ जगतोऽपि प्रतीत्यभावमात्रेण नाशसम्भवात्। न हि विद्यमानमपि देहादिजगत् सुप्तपुरुषदृष्ट्या अस्ति। एवं विद्वद्दृष्ट्या नास्त्येव जगत्। सर्वथा वर्तनं च विदुषो न स्वदृष्ट्या सम्भवति, किन्तु लोकदृष्ट्या। लोको हि कार्यकरणेषु व्यापृतेषु व्यापृत आत्मेति मन्यतेऽविद्यावशात्। एवं विदुषः प्राणोत्क्रमणाद्यभावश्च लोकदृष्ट्यैवोक्तम्। न तु विद्वद्दृष्ट्या 'अप्राणो ह्यमनाः शुभ्रः' इति न सन्ति हि विदुषः प्राणादयः। आत्मा हि विद्वान्। आत्मनि हि बन्धमोक्षादयो न सन्तीति प्रागेव बहुशः प्रतिपादितम्। तस्मादविदुषो बन्धव्यवहारवद् विदुषो मोक्षव्यवहारश्च लोकस्याविद्याकृत एव। तस्माद् विदुष आत्मनः प्रकृतितद्गुण-देहेन्द्रियादयो नैव सन्तीति कुतः सर्वथा वर्तनसम्भवः? न कुतोऽपि। लोकदृष्टिमाश्रित्य तु 'सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते' इत्युक्तमिति सर्वमनवद्यम्।

**नन्विति**। 'न स भूयोऽभिजायते' इत्युक्तमिदं वचनमयुक्तम्। तेन वाक्येन हि ज्ञानोत्पत्त्यनन्तरं पुनर्जन्माभाव उक्तः। विचार्य-माणे तु विदुषोऽपि पुनर्जन्माभावो न सम्भवति। न हि विद्योदयसमकालमेव विद्वान् शरीरं परित्यजति, किं तर्हि प्रारब्धावसान एव, 'प्रारब्धं भोगतो नश्येदि'ति शास्त्रात् , 'देहोऽपि दैववशगः खलु कर्म यावत् स्वारम्भकं प्रति समीक्षत एव सासु'रिति भागवताच्च। **स्वारम्भकं कर्म** प्रारब्धकर्मेत्यर्थः। येन प्रकृतदेह आरब्धस्तत्कर्म प्रारब्धमित्युच्यत इति भावः। यथा सत्यामपि विद्यायां प्रारब्धं स्वं फलमदत्त्वा न नश्यति, तथा सञ्चितकर्माण्यागामिकर्माणि च स्वं स्वं फलमदत्त्वा नैव नश्यन्ति। इह जन्मनि पूर्वजन्मसु वा ज्ञानोत्पत्तेः प्राक्कृतानि कर्माण्यनारब्धकार्याणि सञ्चितानीत्युच्यन्ते। तेषां सञ्चितानां द्विविधत्वम् - इहजन्मकृतत्वेन, पूर्वजन्मकृतत्वेन च। ज्ञानोत्पत्त्युत्तरकालमिह जन्मनि कृतान्यनारब्धकार्याणि कर्माणि आगामीनीत्युच्यन्ते। अमीषां त्रिविधकर्मणामफलप्रदत्वेन नाशो न युक्त इति त्रीणि जन्मानि स्युरेव विदुषः। न हि कृतविप्रणाशो युक्तः। कृतस्य कर्मणः फलमदत्त्वा नाशः **कृतविप्रणाशः** इत्युच्यते। **फले**

**त्रिप्रकाराण्यपि कर्माणि त्रीणि जन्मान्यारभेरन्। संहतानि वा सर्वाण्येकं जन्मारभेरन्। अन्यथा [१]कृतविप्रणाशे सति सर्वत्रानाश्वासप्रसङ्गः, शास्त्रानर्थक्यं च स्यादित्यत इदमयुक्तमुक्तम्— 'न स भूयोऽभिजायते' इति।**

**न; 'क्षीयन्ते चास्य कर्माणि' (मु.उ.२.२.८), 'ब्रह्म वेद ब्रह्मैव भवति' (मु.उ.३.२.९), 'तस्य तावदेव चिरम्' (छा.उ.६.१४.२) [२]इषीकातूलवत् सर्वाणि कर्माणि प्रदूयन्ते (द्र.छा.५.२४.३) इत्यादिश्रुतिशतेभ्यः उक्तो विदुषः सर्वकर्मदाहः। इहापि चोक्तः— 'यथैधांसि' (भ.गी.४.३७) इत्यादिना सर्वकर्मदाहः। वक्ष्यति च। उपपत्तेश्च।**

आनन्दगिरिकृतव्याख्या

**कर्माणि फलमदत्त्वा न क्षीयन्ते, वैदिककर्मत्वादारब्धकर्मवदिति मत्वाऽऽह—** यथेति। **नाशो न ज्ञानादिति शेषः। नन्वनारब्धकर्मणां ज्ञानान्नाशो युक्तोऽप्रवृत्तफलत्वाद्,आरब्धकर्मणां तु प्रवृत्तफलत्वेन बलवत्त्वान्न ज्ञानात् तन्निवृत्तिरिति, नेत्याह—** न चेति। **अज्ञानोत्थत्वेन ज्ञानविरोधित्वाविशेषात् प्रवृत्ताप्रवृत्तफलत्वमनुपयुक्तमिति भावः। कर्मणां फलमदत्त्वा नाशाभावे फलितमाह—** तस्मादिति। **ननु कर्मणां बहुत्वात् तत्फलेषु जन्मसु कुतस्त्रित्वम्? आरम्भककर्मणां त्रिप्रकारत्वादिति चेन्न, अनारब्धत्वेनैकप्रकारकत्वसम्भवात् , तत्राह—** संहतानीति। **नास्ति ज्ञानस्यैकान्तिकफलत्वमिति शेषः। उक्तकर्मणां जन्मानारम्भकत्वे प्रागुक्तं दोषमनुभाष्य तस्यातिप्रसञ्जकत्वमाह—** अन्यथेति। सर्वत्रेति **आरब्धकर्मस्वपीति यावत्। फलजनकत्वानिश्चयोऽनाश्वासः। कर्मणां जन्मानारम्भकत्वे कर्मकाण्डानर्थक्यं दोषान्तरमाह—** शास्त्रेति। **अनारब्धकर्मणां सत्यपि ज्ञाने जन्मान्तरारम्भकत्वध्रौव्ये फलितमाह—** इत्यत इति।

**श्रुत्यवष्टम्भेन परिहरति—** नेत्यादिना। **ज्ञानादनारब्धकर्मदाहे भगवतोऽपि सम्मतिमाह—** इहापीति। **ज्ञानाधीनसर्वकर्मदाहे 'सर्वधर्मान्परित्यज्ये'ति वाक्यशेषोऽपि प्रमाणीभवतीत्याह—** वक्ष्यति चेति। **ज्ञानादनारब्धाशेषकर्मक्षये युक्तिरपि वक्तुं शक्येत्याह—**

भाष्यार्कप्रकाशः

फलदाने। आरब्धं जन्म यैस्तेषामारब्धजन्मनां कर्मणां, प्रारब्धानामित्यर्थः। **विशेषो** भेदः। आगामीनि सञ्चितानि च कर्माणि फलमदत्त्वा न नश्यन्ति, प्रारब्धकर्मवत् कर्मत्वादिति, कृतविप्रणाशस्यायुक्तत्वादिति वा प्रयोगः।

**त्रिप्रकाराणीति**। त्रिविधानि, अतिक्रान्तानेकजन्मकृतानि, इह जन्मनि ज्ञानोत्पत्तेः प्राक् कृतान्यनन्तरं कृतानि चेति। ननु त्रिप्रकाराणामपि कर्मणामेकस्मिन्नेव जन्मनि फलदानेन विप्रणाशोऽस्तु , किमिति जन्मत्रयाभ्युपगम इति शङ्कायां सत्यमित्याह— **संहतानि वेति**। सर्वाणि कर्माणि मिलितानि भूत्वा एकं जन्मारभेरन्। ननु कृतविप्रणाशमात्रेण विदुषः पुनर्जन्मसम्भवप्रतिपादनमयुक्तमित्यत आह— **अन्यथेति**। तस्यैवार्थमाह— **कृतविप्रणाश इति**। सतीति शेषः। सर्वत्रापि यज्ञादिवैदिककर्मस्वनाश्वासप्रसङ्गो यथा नास्तिकानाम्। सत्यनाश्वासे न कोऽपि तत्र प्रवर्तेतास्तिकोऽपि। मया क्रियमाणेनानेन कर्मणा मम स्वर्गादिकं स्यादिति निश्चयपूर्विका हि कर्मणि प्रवृत्तिरज्ञानां वैदिकानाम्। भवत्वप्रवृत्तिः, किं तत इत्यत आह— **शास्त्रेति**। यज्ञादिकर्तृपुरुषाभावे यज्ञादिप्रतिपादकं शास्त्रं व्यर्थमेव स्यात्। न च शास्त्रस्य वैयर्थ्यमिष्टमीश्वराज्ञारूपत्वात्। तन्न्यायेन प्रकृतगीताशास्त्रस्यापि व्यर्थत्वप्रसङ्गात्। **इतिशब्दः** पूर्वपक्षोपपादनसमाप्तौ। **अत इति**। कृतविप्रणाशस्यायुक्तत्वेन विदुषः पुनर्जन्मसम्भवादित्यर्थः।

पूर्वपक्षं परिहरति— **नेति**। विदुषा प्रारब्धफलमेव भोक्तव्यं, न त्वागामिसञ्चितकर्मफलमित्ययं विशेषः शास्त्रादेवावगम्यते। तथाहि - श्रुतयस्तावत् - अस्मिन् **परावरे** परे ब्रह्मादयोऽवरे यस्मात् तस्मिन् परावरे प्रत्यगभिन्ने परमात्मनि दृष्टे साक्षात्कृते सति, अस्य साक्षात्कर्तुः कर्माणि **क्षीयन्ते** फलमप्रदायैव नश्यन्ति। यो ब्रह्माहमस्मीति वेद स ब्रह्मैव भवति, न तु पुनर्जन्म प्रतिपद्यत इत्येवकारार्थः। तस्य विदुषस्तावदेव प्रारब्धावसानमेव चिरं विलम्बो, मोक्षं प्रतीति शेषः। **यावन्न विमोक्ष्ये** प्रकृति[त]शरीरं न त्यजति। **अथ** शरीरपतनानन्तरं **सम्पत्स्यते** मुक्तिं यास्यतीत्यर्थः। **इषीका** मुञ्जान्तर्गतसूक्ष्मावयवस्तन्तुरूपः, तद्वत् , [३]तूलवच्च सर्वाणि कर्माणि विदुष इति शेषः। **प्रदूयन्ते** प्रकर्षेण विनाश्यन्ते। ज्ञानाग्निनेति शेषः। 'यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन। ज्ञानाग्निः

१. 'कृतविनाशे' इति पा.। २. 'इष्टकेषीकातूलानां चिततूलभारिषु'(पा.सू. ६-३-६५) इति ह्रस्वविधानात् 'इषीकतूलवत्' इति पठितव्ये 'इषीकातूलवत्' इति पाठः श्रौतनिर्देशानुकरणत्वेन समर्थनीयः। ३. 'इषीकातूलवत्' इति द्वन्द्वसमासोत्तरं वतिप्रत्ययः इति प्रत्येकं तद्योगमभिप्रेत्येत्थं व्याख्यानम्।

**अविद्याकामक्लेशबीजनिमित्तानि हि कर्माणि जन्मान्तराङ्कुरमारभन्ते। इहापि च साहङ्काराभिसन्धीनि कर्माणि फलारम्भकाणि, नेतराणीति तत्र तत्र भगवतोक्तम्। 'बीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः। ज्ञानदग्धैस्तथा क्लेशैर्नात्मा सम्पद्यते पुनः' (म.भा. ३.२००.१०) इति च।**

**अस्तु तावज्ज्ञानोत्पत्त्युत्तरकालकृतानां कर्मणां ज्ञानेन दाहः, ज्ञानसहभावित्वात्। न त्विह जन्मनि ज्ञानोत्पत्तेः प्राक् कृतानाम्[१], अतीतानेकजन्मान्तरकृतानां च दाहो युक्तः। न ; सर्वकर्माणीति विशेषणात्।**

आनन्दगिरिकृतव्याख्या

उपपत्तेश्चेति। **तामेव विवृणोति—** अविद्येति। **अज्ञस्याविद्यास्मितारागद्वेषाभिनिवेशाख्यक्लेशात्मकानि सर्वानर्थबीजानि, तानि निमित्तीकृत्य यानि धर्माधर्मकर्माणि तानि जन्मान्तरारम्भकाणि, यानि तु विदुषो विद्यादग्धक्लेशबीजस्य प्रतिभासमात्रशरीराणि कर्माणि, न तानि शरीरारम्भकाणि दग्धपटवदर्थक्रियासामर्थ्याभावादित्यर्थः। प्रतीतिमात्रदेहानां कर्माभासानां न फलारम्भकतेत्यस्मिन्नर्थे भगवतोऽपि सम्मतिमाह—** इहापीति। **तत्त्वज्ञानादूर्ध्वं प्रातीतिकक्लेशानां कर्मद्वारा देहानारम्भकत्वे वाक्यान्तरमपि प्रमाणयति—** बीजानीति।

**ज्ञानानन्तरभाविकर्मणां ज्ञानेन दाहमङ्गीकरोति—**अस्त्विति। **विरोधिग्रस्तानामेवोत्पत्तेरिति हेतुमाह—** ज्ञानेति। **अस्मिञ्जन्मनि जन्मान्तरे वा ज्ञानात्पूर्वभाविकर्मणां न ततो दाहः, विरोधिनं विना प्रवृत्तेरित्याह—** न त्विति। **श्रुतिस्मृतिविरोधान्नैवमिति परिहरति—**

भाष्यार्कप्रकाशः

सर्वकर्माणि भस्मसात्कुरुते तथा॥' आदिपदात् 'ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः' इत्यादिग्रहणम्। सर्वकर्मदाह उक्त इत्यन्वयः। वक्ष्यति च ज्ञानात् कर्मक्षयमिति भावः। उपपत्तिमेव दर्शयति— **अविद्येति**। अविद्याकामक्लेशा एव बीजानि चूतादिफलान्तर्गतसारांशाः। तान्येव निमित्तं येषां तानि तथोक्तानि। कर्माणि चूतादिफलस्थानीयानीति भावः। जन्मान्तररूपमङ्कुरमारभन्ते, जनयन्तीति यावत्। इहजन्मन्यपि **साहङ्काराभिसन्धीनि** अहं करोमीत्यहङ्कारः कर्तृत्वाभिमानरूपः, अभिसन्धिः फलाकाङ्क्षा, तद्युक्तानि कर्माणि कृष्यादीनि फलारम्भकाणि सस्यादिफलं जनयन्ति। इतराण्यहङ्काराभिसन्धिरहितानि कर्माणि ग्रामं गच्छतस्तृणस्पर्शनादीनि फलारम्भकाणि न भवन्ति। तथाऽहङ्कारफलाभिसन्धिरहितानि विदुषः कर्माण्यपि जन्मान्तररूपफलारम्भकाणि न भवन्ति। तत्सहितान्यविदुषः कर्माण्येव जन्मान्तरमारभन्ते। यथा निर्बीजानि फलानि नाङ्कुरमारभन्ते, तथा अविद्याकामादिरहितानि विदुषः कर्माणि पुनर्जन्म नारभन्ते। यथा सबीजानि फलान्यङ्कुरमारभन्ते, तथा अविद्याकामादिसहितानि अविदुषः कर्माणि जन्मान्तरमारभन्त इति फलितार्थः। इतीत्यस्योपपत्तेश्चेत्यनेनान्वयः। भगवताऽप्युपपत्तिवचनं दर्शितमित्याह— **तत्रतत्रेति**। यथा अग्न्युपदग्धानि बीजानि व्रीह्यादीनि पुनर्न प्ररोहन्त्यङ्कुररूपेण न प्रादुर्भवन्ति, नाङ्कुरमारभन्त इति यावत्। तथा ज्ञानदग्धैः **क्लेशैः** क्लेशहेतुभिः कर्मभिर्निमित्तैरात्मा जीवः पुनर्न **सम्पद्यते** जन्म न प्राप्नोति। अग्निना बीजगतरोहणशक्तिरिव ज्ञानेन कर्मगतपुनर्जन्मप्रदानशक्तिर्दह्यत इति भावः।

ननु ज्ञानात् प्राक् कृतानां कर्मणां साहङ्कारफलाभिसन्धिकत्वादविद्यादिमत्त्वाच्च पुनर्जन्मप्रदानशक्तिरस्त्येव, ज्ञानादनन्तरमेव हि विद्वानभिमानाभिसन्धिराहित्येन कर्माणि कुरुते, ततश्चागामिकर्मणामेव ज्ञानेन पुनर्जन्मप्रदानशक्तिनाश इत्याक्षिपति— **अस्त्वित्यादिना**। ज्ञानेन सह भवन्तीति ज्ञानसहभावीनि, तेषां भावस्तत्त्वम् , तस्मा**ज्ज्ञानसहभावित्वात्**। ज्ञानसहितत्वादित्यर्थः। ज्ञानपूर्वकत्वादिति यावत्। ज्ञानेनैव कर्मणां दाहोऽस्तु इत्यन्वयः। **न त्विति**। दाहो न युक्त इत्यन्वयः। ज्ञानसहभावित्वाभावादिति भावः। परिहरति— **नेति**। हेतुमाह— **सर्वेति**। 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' इति श्लोके कर्मशब्दस्य सर्वशब्देन विशेषणादित्यर्थः। 'सर्वाणि कर्माणीति विशेषणा'दिति पाठे इषीकातूलवदिति [२]श्रुताविति बोध्यम्। ननु ज्ञानोत्तरकालभाविकर्मणां निरवशेषत्व-

१. 'कृतानां कर्मणाम्' इति पा.। २. 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते'(द्र.छा.५.२४.३) इति श्रुतौ सर्वे इति पाप्मविशेषणादित्यर्थः। पाप्मपदस्य तत्र कर्मपरत्वादिति भावः। 'सर्वाणि कर्माणि' इति व्यस्तनिर्देशं प्रदर्शयितुमिदमुक्तम्। स्मृतौ 'सर्वकर्माणि' इति समासनिर्देशात्। वस्तुतस्तु तथा निर्देशेऽतात्पर्यात् श्रुतिस्मृती उभे अपि ग्राह्ये।

**ज्ञानोत्तरकालभाविनामेव सर्वकर्मणामिति चेत्? न ; सङ्कोचे कारणानुपपत्तेः।**

**यत्तूक्तम् - यथा वर्तमानजन्मारम्भकाणि कर्माणि न क्षीयन्ते फलदानाय प्रवृत्तान्येव, सत्यपि ज्ञाने, तथा अनारब्धफलानामपि कर्मणां क्षयो न युक्तः - इति, तदसत्। कथम्? तेषां मुक्तेषुवत् प्रवृत्तफलत्वात्। यथा पूर्वं लक्ष्यवेधाय मुक्त इषुर्धनुषो लक्ष्यवेधोत्तरकालमपि आरब्धवेगक्षयात् पतनेनैव निवर्तते, एवं शरीरारम्भकं कर्म शरीरस्थितिप्रयोजने निवृत्तेऽप्यासंस्कारवेगक्षयात् [1]पूर्ववत् प्रवर्तत एव। [2]स एवेषुः प्रवृत्तिनिमित्तानारब्धवेगस्तु**

अनुभूतिस्वरूपाचार्यटिप्पणम्

यथा धनुषः सकाशान्मुक्त इषुः बलवच्छेदनादिप्रतिबन्धमन्तरेण न मध्ये पतति, तथा प्रवृत्तफलानां कर्मणां न क्षयः सम्भवति। तत्त्वज्ञानं च न बलवत् , पूर्वप्रवृत्तेन कर्मणोत्पत्तिसमय एव प्रतिबन्ध[बद्ध]शक्तित्वादित्यर्थः। अनारब्धफलानां तु क्षयः सम्भवतीत्यत्रापीषुरेव दृष्टान्त इत्याह— **स एवेषुरिति।** प्रवृत्तिनिमित्तो वेगो नारब्धोऽनेनेति

आनन्दगिरिकृतव्याख्या

नेत्यादिना। **सर्वशब्दश्रुतेः सङ्कोचं शङ्कते—** ज्ञानेति। **प्रकरणादिसङ्कोचकाभावान्नैवमित्याह—** नेति।

**आक्षेपदशायामुक्तमनुमानमनुवदति**[3]**—** यत्त्विति। **आभासत्वादिदमसाधकमिति दूषयति—** तदसदिति। **व्याप्त्यादिसत्त्वे कथमाभासत्वमिति पृच्छति—** कथमिति। [4]**प्रवृत्तफलत्वोपाधिना हेतोर्व्याप्तिभङ्गादाभासत्वधीरित्याह—** तेषामिति। **तदेव प्रपञ्चयति—** यथेत्यादिना। **धनुषः सकाशादिषुर्मुक्तो बलवत्प्रतिबन्धकाभावे मध्ये न पतति, तथा प्रबलप्रतिबन्धकं विना प्रवृत्तफलानां कर्मणां भोगादृते न क्षयः। न च तत्त्वज्ञानं तादृक्प्रतिबन्धकम् , उत्पत्तावेव पूर्वप्रवृत्तेन कर्मणा प्रतिबद्धशक्तित्वादित्यर्थः। यत्र ज्ञानेनादाह्यत्वं तत्र प्रवृत्तफलत्वमित्यन्वयेऽपि, यत्राप्रवृत्तफलत्वं तत्र ज्ञानदाह्यत्वमिति न व्यतिरेकसिद्धिरित्याशङ्क्याह—** स एवेति। **प्रवृत्तौ निमित्तभूतो**

भाष्यार्कप्रकाशः

सिद्धये सर्वपदविशेषणमस्त्वित्याक्षिपति—**ज्ञानेति**। परिहरति—**नेति**। सर्वशब्दस्य ज्ञानोत्तरकालभाविकर्मपरत्वेन सङ्कोचे कारणं नास्तीत्यर्थः।

ननु यदि सर्वशब्दसङ्कोचो न न्याय्यः, तर्हि प्रारब्धकर्माण्यपि गृह्यन्तां, यदि प्रारब्धकर्मग्रहणं तव नेष्टं, तर्हि तद्वत् सञ्चितकर्मग्रहणं मम नेष्टमित्याक्षिपति— **यत्त्विति। उक्तमिति**। यथा फले प्रवृत्तानामारब्धजन्मनां कर्मणामित्यनेनेति भावः। सत्यपि ज्ञाने फलदानाय प्रवृत्तानि वर्तमानजन्मारम्भकाणि कर्माणि यथा न क्षीयन्ते तथा अनारब्धफलानामपि कर्मणां क्षयो न युक्त इति यत्तूक्तमित्यन्वयः। प्रारब्धकर्मणामिव सञ्चितागामिकर्मणामपि भोगं विना क्षयो न युक्त इत्यर्थः। परिहरति—**तदसदिति**। कथमसदित्याक्षिपति—**कथमिति**। हेतुमाह—**तेषामिति**। तेषां प्रारब्धकर्मणां मुक्तेषुवत् प्रयुक्तबाणानामिव प्रवृत्तफलत्वात्। प्रवृत्तमारब्धं फलं यैस्तानि प्रवृत्तफलानि, तत्त्वात्। दृष्टान्तं विवृणोति—**यथेति**। **पूर्वम्** आदौ **लक्ष्यवेधाय** लक्ष्यस्य मृगादेर्वेधाय हिंसनाय धनुषः सकाशान्मुक्तः। 'धनुषा मुक्तः' इति वा पाठः। धानुष्केण प्रयुक्त इति यावत्। इषुः लक्ष्यवेधोत्तरकालमपि आरब्धवेगक्षयाद्धेतोः **पतनेन** भुवि पतनेनैव निवर्तते। मृगशरीरं भित्त्वा स्ववेगानुगुणं किञ्चिद्दूरं गत्वा वेगे नष्टे सति भुवि पततीत्यर्थः। न तु सति वेगे मृगशरीरभेदनसमकालमेव पततीति भावः। दार्ष्टान्तिकमाह—**एवमिति**। **आसंस्कारवेगक्षयात्** संस्कारवेगनाशपर्यन्तमित्यर्थः। **पूर्वेति**। शरीरस्थितिप्रयोजननिवृत्तेः पूर्वं यज्ज्ञानम् 'अहमिदम्' 'ममेद'मित्याकारकं, तेन संस्कृतेनान्तःकरणेन हेतुना। विदुषां ज्ञानोत्पत्त्यनन्तरं शरीरस्थित्या न किञ्चित् प्रयोजनमस्ति, कर्मकरणाद्यभावात्। तथापि शरीरं न पतति, प्रारब्धकर्मावसानाभावात्। मुक्तेषुस्थानीयं प्रारब्धकर्म। लक्ष्यवेधस्थानीया शरीरस्थितिप्रयोजननिवृत्तिः। आरब्धवेगक्षयस्थानीयः संस्कारक्षयः। लक्ष्यवेधोत्तरकालशरगमनस्थानीया शरीरस्थितिप्रयोजननिवृत्त्युत्तरकाल(ज्ञानोत्पत्त्युत्तरकाल)देहादिप्रवर्तकत्वरूप-

---

१. 'पूर्वज्ञानसंस्कृतेनान्तःकरणेन' इति रा.पा. भाति। २.'यथा स एवेषुः' इति रा.पा.। ३. विमतानि कर्माणि, फलमदत्त्वा न क्षीयन्ते, वैदिककर्मत्वाद् , आरब्धकर्मवदिति आक्षेप्तुरनुमानम्। ४. दृष्टान्ते प्रवृत्तफलत्वं साध्यव्यापकम् , पक्षे तदभावात् साधनाव्यापकं चेति भवत्युपाधिः। अतः सोपाधिकत्वात् व्याप्त्यसिद्धिः।

**अमुक्तो धनुषि प्रयुक्तोऽप्युपसंह्रियते, तथाऽनारब्धफलानि कर्माणि स्वाश्रयस्थान्येव ज्ञानेन निर्बीजीक्रियन्त इति पतितेऽस्मिन् विद्वच्छरीरे 'न स भूयोऽभिजायते' इति युक्तमेवोक्तमिति सिद्धम्॥ २३॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

विग्रहः॥ २३॥

**इति श्रीगीताभाष्यटिप्पणे त्रयोदशोऽध्यायः॥**

आनन्दगिरिकृतव्याख्या

**ऽनारब्धो वेगोऽनेनेति विग्रहः।** स्वाश्रयस्थानि **साभासान्तःकरणनिष्ठानीति यावत्।** [१]**विमतानि तत्त्वधीनिमित्तनिवृत्तीनि, तत्कृतकारण-निवृत्तित्वाद् , रज्जुसर्पादिवदिति व्यतिरेकसिद्धिरिति भावः। विदुषो वर्तमानदेहपाते देहहेत्वभावात् तत्त्वधीरैकान्तिकफलेत्युपसंहरति—** पतित इति॥ **२३॥**

भाष्यार्कप्रकाशः

कर्मप्रवृत्तिरिति विवेकः। **पूर्वज्ञानसंस्कृतेने**त्यनेन संस्काररूपं तज्ज्ञानं दग्धपटवदबन्धकमिति गम्यते। अथागामिसञ्चितकर्मणोः प्रारब्धकर्मवैलक्षण्यं सदृष्टान्तमाह— **स एवेति। प्रवृत्तिनिमित्तं** लक्ष्यं, तत्प्रति अनारब्धवेगः। कुतो वेगस्यानारम्भक इत्यत आह— **अमुक्त इति**। मुक्तस्य ह्यारब्धवेगत्वम्। कुत्र स्थितः? अत आह— **धनुषि प्रयुक्त इति**। अनुसंहित इत्यर्थः। **उपसंह्रियते**, धानुष्केणेति शेषः। धनुषो मुक्तस्तु नोपसंहर्तुं शक्यत इति भावः। दार्ष्टान्तिकमाह— **तथेति**। स्वाश्रयमन्तःकरणम् , तत्स्थान्येव **निर्बीजीक्रियन्ते** पुनर्जन्मजननासमर्थानि क्रियन्त इत्यर्थः। धानुष्कस्थानीयो विद्वान् , धनुःस्थानीयमन्तःकरणम् , तत्स्थेषुस्थानीयानि तत्स्थकर्माणि, उपसंहारस्थानीयं तु निर्बीजीकरणमिति विवेकः। ज्ञानात् प्राक् फलाभिसन्ध्यादिमन्त्यपि कर्माणि सञ्चितानि ज्ञानादनन्तरं फलाभिसन्ध्यादिपरित्यागे सति स्वं फलं प्रदातुं न क्षमन्त इति भावः।

**ननु** एतेन कृतविप्रणाशदोषः कथं परिहृत इति चेद्? **उच्यते**— अविद्वद्विषय एव कृतविप्रणाशो दोषः, शास्त्रानर्थक्या-पादकत्वात्। अविद्वांसो हि शास्त्रार्थाधिकारिणः। विद्वद्विषयस्तु कृतविप्रणाशो गुण एव, मोक्षप्रदत्वेन मोक्षशास्त्रसार्थक्यावहत्वात्।

**ननु** यद्यविद्वद्विषयाण्येव कर्माणि, तर्हि विदुषामागामिकर्मोपन्यासः कथमिति चेत् , **नैष दोषः** - 'सर्वथा वर्तमानः' इत्यनेन सूचितानामवधूतचेष्टानां कर्मत्वेनोपन्यासात्। **यद्वा** जनकादीनां विदुषामागामिकर्मसत्त्वादिति। प्रपञ्चितं चैतदादावेव जनकादीनां कर्म न कर्म, फलाभिसन्ध्याद्यभावाद् वासुदेवकर्मवदिति। तस्मादस्मिन् विद्वच्छरीरे पतिते सति स विद्वान् भूयो नाभिजायते। प्राणाद्युपाधीनां स्वस्वकारणेषु लीनत्वादिति भावः। लिङ्गशरीरसत्त्वप्रयुक्तं हि पुनर्जन्म। तच्च नष्टमिति न विदुषः पुनर्जन्मप्रसङ्गः।

यत्तु **रामानुजः** - सर्वथा वर्तमानोऽपि देवमनुष्यादिदेहेष्वतिमात्रक्लिष्टप्रकारेण वर्तमानोऽपि स प्रकृतिपुरुषविवेकसम्पन्नो भूयो नाभिजायते, प्रकृत्या सम्बन्धं नार्हति, आत्मानं प्राप्नोतीति, **तन्मन्दम्** - विदुषो देवादिदेहस्थितिप्रयुक्तक्लेशायोगात्। अविदुषः प्रकृति-पुरुषविवेकायोगाच्च। न ह्यसङ्गं सच्चिदानन्दमद्वितीयं परं ब्रह्मात्मानं विदुषः कोऽपि क्लेशो भवितुमर्हति। न ह्यानन्दे आत्मनि क्लेशो युज्यते। क्लेशो हि दुःखम्। अपरिच्छिन्नस्य पूर्णस्यात्मनः कथं शुकस्येव पञ्जरे देहे वर्तनं क्लेशकारणं स्यात्? किमाकाशो घटे क्लिष्टः सन् वर्तते? सरूपस्य हि वस्तुनः करचरणादिचालनाक्षमस्वल्पावकाशवद्वस्तुनि स्थितिः क्लिष्टा स्यात् , न तु नीरूपस्य, तत्रापि निर-वयवस्य। आत्मा हि नीरूपो निरवयवश्च। न हि सर्वव्यापी विभुरात्मा देह एव वर्तेत। निर्विकारे चात्मनि कथं क्लेशरूपविकारसद्भावः? 'अविकार्योऽयमुच्यते' इति ह्युक्तम्। एवं स्थिते य आत्मानं देहपरिच्छिन्नं देहेऽतिमात्रक्लेशेन वर्तमानं मन्यते, स मूर्ख एवेति कथं तस्य प्रकृतिपुरुषविवेकसद्भावः? असङ्गस्य पुरुषस्य प्रकृतितो विवेचितस्य विवेचनात् प्राक् पश्चाद्वा कथं प्रकृतिसङ्गः? कथं वा गुणसङ्गः? एवं प्रकृत्यादिसङ्गरहितस्य कथं वा क्लेशः? कथं वा देहस्थितिः? देहे स्थितस्य क्लेशमनुभवतो 'मम देहो' 'देहेऽहम्' इत्यभिमन्यमानस्य कथं वा पुनर्देहाप्राप्तिः? पुनर्जन्महेत्वोरज्ञानाभिमानयोः सत्त्वात्। एवंविधस्य कथमात्मप्राप्तिः? न कथमपीति ॥ २३॥

---

१. पूर्वपक्षोक्तानुमानस्य प्रत्यनुमानमाह—विमतानीति।

**ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना।
अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे ॥२४॥**

**अत्रात्मदर्शने उपायविकल्पाः इमे ध्यानादयः उच्यन्ते—** ध्यानेनेति। ध्यानेन - **ध्यानं नाम? शब्दादिभ्यो विषयेभ्यः श्रोत्रादीनि करणानि मनस्युपसंहृत्य, मनश्च प्रत्यक्चेतयितरि एकाग्रतया यच्चिन्तनं तद् ध्यानम्। तथा ध्यायतीव बकः, 'ध्यायतीव पृथिवी...ध्यायन्तीव पर्वताः' (छा.उ. ७.६.१) इत्युपमोपादानात् तैलधारावत् सन्ततो ऽविच्छिन्नप्रत्ययो ध्यानम्। तेन ध्यानेन** आत्मनि **बुद्धौ पश्यन्ति** आत्मानं **प्रत्यक्चेतनम्** आत्मना[१] **ध्यानसंस्कृतेनान्तःकरणेन केचिद् योगिनः। अन्ये साङ्ख्येन योगेन, साङ्ख्यं नाम - इमे सत्त्वरजस्तमांसि गुणा मया दृश्याः, अहं तेभ्योऽन्यस्तद्व्यापारसाक्षिभूतो नित्यो गुणविलक्षण आत्मेति चिन्तनम्। एष साङ्ख्यो योगः, तेन पश्यन्ति आत्मानमात्मनेति वर्तते।** कर्मयोगेन **कर्मैव योग ईश्वरार्पणबुद्ध्याऽनुष्ठीयमानं घटनरूपं योगार्थत्वाद् योग**

आनन्दगिरिकृतव्याख्या

**'ज्ञेयं यत्तदि'त्यादिना तत्पदार्थस्त्वम्पदार्थश्चानन्तरमेव शोधितौ। तयोरैक्यं च 'क्षेत्रज्ञं चापि मां विद्धि' इत्युक्तम्। इदानीं तद्दृष्टिहेतून् यथाधिकारं कथयति—** अत्रेति। **ध्यानाख्यं साधनं किंरूपमिति पृच्छति—** ध्यानं नामेति। **तद्रूपं वदन्नुत्तरमाह—** शब्दादिभ्य इति। **एकाग्रतयोपसंहृत्येति सम्बन्धः।** यच्चिन्तनं **प्रत्यक्चेतयितरीति पूर्वेणान्वयः। किं तच्चिन्तनमित्युक्ते दृष्टान्तद्वारा श्रुत्यवष्टम्भेन ध्यानं प्रपञ्चयति—** तथेति। **विवक्षितध्यानानुरोधेनेति यावत्। आत्मानं पश्यन्ति परमात्मतयेति शेषः।** केचिदिति **उत्तमाधिकारिणो गृह्यन्ते। मध्यमाधिकारिणो निर्दिशति—** अन्य इति। **साङ्ख्यशब्दितं साधनं किं नामेत्युक्ते विचारजन्यं ज्ञानम् , तदेव ज्ञानं हेतुतया योगतुल्यत्वाद् योगशब्दितमित्याह—** साङ्ख्यमिति। **अधमानधिकारिणः सङ्गिरते—** कर्मेति। **चित्तैकाग्र्यं योगस्तादर्थ्यं**

भाष्यार्कप्रकाशः

**ध्यानेनेति। आत्मदर्शनमा**त्मसाक्षात्कारः। तस्मिन् विषये। विषयेभ्यः प्रत्याहृत्येति शेषः। **उपसंहृत्येति**। निर्व्यापारीकृत्ये-त्यर्थः। मनोव्यापारपूर्वकत्वाच्छ्रोत्रादिव्यापारस्य श्रोत्रादीनां मनस्युपसंहार उक्तः। **चेतयति** स्वाभासेन बुद्ध्यादिकं देहान्तं चेतनीकरो-तीति चेतयिता आत्मा, प्रत्यक्चेतयिता प्रत्यगात्मा, तस्मिन् मनश्चोपसंहृत्य मनोऽपि निर्व्यापारीकृत्वेत्यर्थः। यच्चिन्तनं तद् ध्यानमि-त्युच्यते। चिन्तने करणं तु संस्कृतमन्तःकरणमेव, तद्धर्मत्वाद् ध्यानस्य। एवमेकाग्रात्मचिन्तनस्य ध्यानत्वे प्रमाणमाह— **ध्यायतीवेति**। निर्व्यापारेषु बकादिषु ध्यायतीवेति ध्यातृसादृश्यप्रतिपादनान्न हि बकादीनां वस्तुतो ध्यानप्रसक्तिः, बकस्य मत्स्यग्रहणप्रवणस्य प्रत्यक्चिन्तनासम्भवात् , पृथिवीपर्वतयोरचेतनत्वाच्च; किन्तु यथा निर्विकल्पसमाधिस्था योगिनः प्रत्यगात्मानं ध्यायन्ति तथेमे बकादयोऽपि ध्यायन्त इव निर्व्यापारतया वर्तन्त इति। तस्मात् कार्यकरणानां निर्व्यापारत्वे सति यदेकाग्रं चिन्तनं तद् ध्यानम्। एवं निर्विकल्पसमाधेर्ध्यानत्वं प्रदर्श्य सविकल्पसमाधेस्तत् प्रदर्शयति— **तैलधारावदिति**। सन्ततोऽविच्छिन्नश्च यः प्रत्ययोऽहम्ब्रह्मेति बुद्धिवृत्तिस्तद् ध्यानम्। तेन निर्विकल्पेन सविकल्पेनापि द्विविधेन ध्यानेनेत्यर्थः। आत्मनि बुद्धावधिष्ठाने। आत्मस्वरूपाभिव्यक्तिस्थानत्वं बुद्धेरिति भावः। केन पश्यन्तीत्यत आह— **ध्यानेनेति**। ध्यानेन संस्कृतेन निश्चलीकृतेनान्तःकरणेन 'मनसैवानुद्रष्टव्यम्' इति श्रुतेरिति भावः। के ते केचिद्? अत आह— **योगिन इति**।

साङ्ख्यं नाम चिन्तनमित्यन्वयः। चिन्तनप्रकारमेव दर्शयति— **इम इति**। य इमे गुणाः सत्त्वरजस्तमांसीति, ये च तद्व्यापाराः सुखदुःखमोहात्मकवृत्तयस्तेषां साक्षिभूतः। अत एव तेभ्यो गुणेभ्यो विलक्षणः। अत एव नित्यः। एवंविध आत्मेति यच्चिन्तनं तत् साङ्ख्यमित्युच्यते। एष आत्मज्ञानात्मको योगः साङ्ख्ययोगः। तेनात्मनाऽऽत्मानं पश्यन्ति। एते योगिभ्योऽन्ये साङ्ख्या इत्यर्थः।

१. 'आत्मना स्वेनैव प्रत्यक्चेतनेन' इति पा.।

**अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते।**
**तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥२५॥**

**उच्यते गुणतः, तेन सत्त्वशुद्धिज्ञानोत्पत्तिद्वारेण चापरे॥२४॥**

अन्ये त्विति। **अन्ये त्वेषु विकल्पेष्वन्यतमेनापि** एवं **यथोक्तमात्मानम् अजानन्तः** अन्येभ्यः **आचार्येभ्यः श्रुत्वा इदमेव चिन्तयतेत्युक्ता** उपासते **श्रद्दधानाः सन्तश्चिन्तयन्ति, तेऽपि च** अतितरन्त्येव **अतिक्रामन्त्येव** मृत्युं **मृत्युयुक्तं संसारमित्येतत्।** श्रुतिपरायणाः **श्रुतिः श्रवणं परम् अयनं गमनं, मोक्षमार्गप्रवृत्तौ परं साधनं येषां ते श्रुतिपरायणाः,** [१]**केवलपरोपदेशप्रमाणाः स्वयं विवेकरहिता इत्यभिप्रायः। किमु वक्तव्यम्— प्रमाणं प्रति स्वतन्त्रा विवेकिनो मृत्युम् अतितरन्तीत्यभिप्रायः॥२५॥**

आनन्दगिरिकृतव्याख्या

**कर्मणः शुद्धिहेतोरस्ति। तेन गौण्या वृत्त्या योगशब्दितं कर्मेत्याह—** गुणत इति। **अपरे पश्यन्त्यात्मानमात्मनेति पूर्ववदनुषङ्गमङ्गीकृत्याह—** तेनेति॥२४॥

**अधमतमानधिकारिणो मोक्षमार्गे प्रवृत्तिं प्रतिलम्भयति—** अन्ये त्विति। **आचार्याधीनां श्रुतिमेवाभिनयति—** इदमिति। **उपासनमेव विवृणोति—** श्रद्धाना इति। **परोपदेशात् प्रवृत्तानामपि प्रवृत्तेः साफल्यमाह—** तेऽपीति। **तेषां मुख्याधिकारित्वं व्यावर्तयति —** श्रुतीति। **तेऽपीत्यपिना सूचितमर्थमाह—** किमिति॥२५॥

भाष्यार्कप्रकाशः

**कर्मयोगेनेति।** चित्तसमाधानात्मकयोगत्वं कथं कर्मणः? अत आह— **योगार्थत्वादिति।** चित्तसमाधानार्थत्वादित्यर्थः। योगार्थं कर्म योग इति कथमुच्यते? अत आह— **गुणत इति।** उपचारादित्यर्थः। लक्षणयेति यावत्। ननु कर्मानुष्ठानेन कथमात्मदर्शनम्? अत आह— **सत्त्वेति।** सत्त्वमन्तःकरणं तस्य शुद्धिर्नैर्मल्यं, विक्षेपाभाव इति यावत्। ततो ज्ञानोत्पत्तिः तद्वारेण। **अपरे** कर्मिण इत्यर्थः।

अनेन श्लोकेन ध्यानयोगः, कर्मयोगो, ज्ञानयोगश्चेति त्रयः उपायाः आत्मदर्शने प्रोक्ताः। तत्राप्रतिबन्धसंन्यासिरूपोत्तमाधिकारिविषयः साङ्ख्ययोगः, सप्रतिबन्धसंन्यासिरूपमध्यमाधिकारिविषयो ध्यानयोगः, असंन्यासिविषयस्तु कर्मयोग इति विवेकः। ध्यानयोग एवोत्तमाधिकारिविषयः, ज्ञानयोगस्तु मध्यमविषय इति केचित्।

**रामानुजस्तु** - निष्पन्नयोगानां ध्यानयोगे, अनिष्पन्नयोगानां ज्ञानयोगे, उत्तमानां कर्मयोगे चाधिकार इत्युवाच। **तदसत्** - विदुषामुत्तमानां संन्यास एवाधिकार इति स्थापितत्वात् पूर्वमेव। न ह्यात्मानं सच्चिदानन्दलक्षणमविक्रियमकर्तारं पश्यन्तो विद्वांसः कर्म कुर्युः, देहाद्यभिमानपूर्वकत्वात् कर्मयोगस्य। असमाहितचित्तानां यदि ज्ञानयोगेऽधिकारः स्यात् , तर्हि विन्ध्यः प्लवेत् सागरे[२]। चित्तसमाधानपूर्वको ह्यात्मानात्मविवेकः। आत्मा हि निरतिशयसूक्ष्मः। कथं तज्ज्ञानं विक्षिप्तचित्तस्य सम्भवेत्? असमाहितचित्तो हि बाह्यं घटादिवस्त्वपि न सम्यग्ग्रहीतुं शक्नुयात् , किं पुनरन्तरात्मानमणोरणीयांसम्। ये तु समाहितचेतसः प्राज्ञास्तेषां चित्तविक्षेपादिरूपप्रतिबन्धाभावेन सुलभ एवात्मसाक्षात्कार इति किमर्थस्तेषां ध्यानयोगो यमनियमादिसाधनापेक्षत्वेन क्लेशावहः ॥२४॥

**अन्ये त्विति।** एवमजानन्तः अन्ये तु अन्येभ्यः श्रुत्वा उपासते। श्रुतिपरायणास्ते चापि मृत्युमतितरन्त्येव। एतेषु पूर्वोक्तेषु विकल्पेषु ध्यानयोगज्ञानयोगकर्मयोगाख्येषूपायविकल्पेषु अन्यतमेन। बहूनां निर्धारणे डतमच्। येन केनापि योगेनात्मानमजानन्तो ज्ञातुमसमर्था इत्यर्थः। अहं ब्रह्मास्मीत्युपदेशं श्रुत्वा। फलितार्थमाह— **इदमेव चिन्तयतेत्युक्ता इति।** आचार्यैरिति शेषः। आत्मानं ब्रह्मत्वेन न जानन्ति। किन्तु अहं ब्रह्मास्मीतीदं त्वं सर्वदा चिन्तय [३](सततमविच्छिन्नं यथा तथा आवर्तय) इति गुरुभिरुपदिष्टाः सन्तः श्रद्धया ये यथोपदिष्टमुपासते तेऽपि मोक्षं यास्यन्तीत्यर्थः। श्रुतिपरायणा इत्यस्य फलितार्थमाह— **केवलमिति।** परोपदेश एव प्रमाणं

१. 'केवलं परोपदेशप्रमाणकाः' इति रा.पा.। २. तद्वदसंभवीति भावः। ३. अयं पाठः कुण्डलित एव दृष्टः मुद्रितपुस्तके।

**यावत् संजायते किञ्चित् सत्त्वं स्थावरजङ्गमम्।**
**क्षेत्रक्षेत्रज्ञसंयोगात् तद् विद्धि भरतर्षभ ! ॥२६॥**

**क्षेत्रज्ञेश्वरैकत्वविषयं ज्ञानं मोक्षसाधनं 'यज्ज्ञात्वाऽमृतमश्नुते' इत्युक्तम् , तत् कस्माद्धेतोरिति तद्धेतुप्रदर्शनार्थं श्लोक आरभ्यते—** यावदिति। यावद् **यत् किञ्चित्** सञ्जायते **समुत्पद्यते** सत्त्वं **वस्तु** , [1]**किमविशेषेण? नेत्याह—** स्थावरजङ्गमम् **स्थावरं जङ्गमं च, क्षेत्रक्षेत्रज्ञसंयोगात् तद् जायत इत्येवं** विद्धि **जानीहि , हे भरतर्षभ ! ।**

[क्षेत्रक्षेत्रज्ञयोः संयोगस्याध्यासरूपत्वनिरूपणम्]

**कः पुनरयं क्षेत्रक्षेत्रज्ञयोः संयोगोऽभिप्रेतः? न तावद् रज्ज्वेव घटस्य अवयवसंश्लेषद्वारकः सम्बन्धविशेषः संयोगः क्षेत्रेण क्षेत्रज्ञस्य सम्भवति, आकाशवन्निरवयवत्वात्। नापि समवायलक्षणः तन्तुपटयोरिव, क्षेत्रक्षेत्रज्ञयो-**

आनन्दगिरिकृतव्याख्या

**ऐक्यधीर्मुक्तिहेतुरिति प्रागुक्तमनूद्य प्रश्नपूर्वकं जिज्ञासितहेतुपरत्वेन श्लोकमवतारयति—** क्षेत्रेति। **सर्वस्य प्राणिजातस्य क्षेत्रक्षेत्रज्ञसम्बन्धाधीना यस्मादुत्पत्तिस्तस्मात् क्षेत्रज्ञात्मकपरमात्मातिरेकेण प्राणिनिकायस्याभावादैक्यज्ञानादेव मुक्तिरित्याह—** कस्मादिति।

**क्षेत्रक्षेत्रज्ञसम्बन्धमुक्तमाक्षिपति—** कः पुनरिति। **क्षेत्रज्ञस्य क्षेत्रेण सम्बन्धः संयोगो वा समवायो वेति विकल्प्याऽऽद्यं दूषयति—** न तावदिति। **द्वितीयं निरस्यति—** नापीति।

भाष्यार्कप्रकाशः

येषां ते परोपदेशप्रमाणकाः। **विवेकः** आत्मानात्मविवेकः। तेऽपीत्यपिशब्दसूचितामर्थापत्तिमाह— **किम्विति। प्रमाणं** शास्त्रं प्रति **स्वतन्त्राः** शास्त्रार्थपरिज्ञानक्षमाः इत्यर्थः। अतिक्रामन्तीति किमु वक्तव्यमित्यन्वयः।

यत्तु **रामानुजः** - येऽन्येभ्यः श्रुत्वा कर्मयोगादिकमुपासते ते, ये च श्रुतिपरायणास्ते च मृत्युमतितरन्तीत्यवदत् , तत्तुच्छम् - यत्तच्छब्दद्वयाध्याहारपूर्वकवाक्यभेदकल्पनस्यायुक्तत्वात्। न च श्रुत्वेत्यस्य श्रुतिपरायणा इत्यस्य च पौनरुक्त्यदोषनिरासाय वाक्यभेद आवश्यक इति वाच्यम् ; श्रुतिपरायणत्वादेव श्रुत्वोपासत इति हेतुहेतुमद्भावेनापौनरुक्त्यात्॥२५॥

**यावदिति। अत्रेति**। अस्मिन्नध्याय इत्यर्थः। 'क्षेत्रज्ञं चापि मां विद्धी'ति, क्षेत्रज्ञेश्वरैकत्वविषयं ज्ञानं 'यज्ज्ञात्वाऽमृतमश्नुते' इति मोक्षसाधनमित्युक्तम्। कस्माद्धेतोस्तज्ज्ञानं मोक्षसाधनमिति शङ्कायां तद्धेतुप्रदर्शनार्थमयं यावदिति श्लोक आरभ्यते। स्थावरजङ्गमं यावत्किञ्चित् सत्त्वं सञ्जायते तत् क्षेत्रक्षेत्रज्ञसंयोगाज्जायत इति विद्धि। यावच्छब्दस्य यदित्यर्थः। **किंविशेषेणेति**। कीदृशं तद् वस्त्वित्यर्थः। कश्चासौ विशेषः किंविशेषः, तेन युक्तं सत्त्वमित्यक्षरार्थः। स्थावरं तरुगुल्मादिकं, जङ्गमं पशुपक्ष्यादिकं च चेतनजातमित्यर्थः। अचेतनजातं तु मृत्पाषाणादिकं क्षेत्रमेवेति भावः।

नन्वसङ्गस्य क्षेत्रज्ञस्य कथं क्षेत्रेण सह संयोग इत्यभिप्रेत्याक्षिपति— **कः पुनरिति**। रज्जुघटयोर्हि परस्परावयवसंश्लेषद्वारा संयोगाख्यः कश्चित् सम्बन्धविशेषोऽस्ति, न तादृशः क्षेत्रक्षेत्रज्ञयोर्भवितुमर्हति, क्षेत्रस्य सावयवत्वेऽपि क्षेत्रज्ञस्य निरवयवत्वात्। न हि घटरज्ज्वोरिव घटाकाशयोः संयोगः स्यात्। न च मृद्घटयोरिव क्षेत्रक्षेत्रज्ञयोः समवायः सम्बन्धः, क्षेत्रज्ञादुपादानात् क्षेत्रं जातमिति, क्षेत्रात् क्षेत्रज्ञो जात इति वा क्षेत्रक्षेत्रज्ञयोरितरेतरकार्यकारणभावानभ्युपगमात्। इतरस्य क्षेत्रक्षेत्रज्ञयोरन्यतरस्य इतरमन्यतरं प्रति कार्यकारणभावस्यानभ्युपगमात्। न च 'यतो वा इमानी'ति श्रुत्या क्षेत्रज्ञस्येश्वरस्य क्षेत्रं प्रति कारणत्वमस्तीति वाच्यम् ; परिणाम्युपादानत्वलक्षणकारणत्वाभावात्। परिणाम्युपादानकारणस्यैव कार्येण सह समवायसम्बन्धाभ्युपगमात्। क्षेत्रज्ञस्तु विवर्तोपादानम् , सर्पाभासस्य रज्जुवत्। न हि रज्जुसर्पाभासयोर्लोके समवायसम्बन्धो दृश्यते। तस्मात् संयोगलक्षणः समवायलक्षणो वा संबन्धो नास्ति क्षेत्रक्षेत्रज्ञयोः इति कथमुक्तं क्षेत्रक्षेत्रज्ञसंयोगादिति। एवं संयोगासम्भवादेव हि 'असङ्गो ह्ययं पुरुषः' इति श्रुत्युपपत्तिः।

१. 'किंविशेषेणेत्याह' इति रा.पा. भाति।

**रितरेतरकार्यकारणभावानभ्युपगमादिति।**

**उच्यते— क्षेत्रक्षेत्रज्ञयोः विषयविषयिणोः भिन्नस्वभावयोः इतरेतरतद्धर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनः, रज्जुशुक्तिकादीनां तद्विवेकज्ञानाभावाद् अध्यारोपितसर्परजतादिसंयोगवत्। सोऽयम् अध्यासस्वरूपः क्षेत्रक्षेत्रज्ञसंयोगो मिथ्याज्ञानलक्षणः। यथाशास्त्रं क्षेत्रक्षेत्रज्ञलक्षणभेदपरिज्ञानपूर्वकं प्राग्दर्शितरूपात् क्षेत्राद् , मुञ्जादिवेषीकाम् , यथोक्तलक्षणं क्षेत्रज्ञं [१]प्रविभज्य 'न सत् तन्नासदुच्यते' (भ.गी.१३.१३) इत्यनेन निरस्त-**

आनन्दगिरिकृतव्याख्या

**वास्तवसम्बन्धाभावेऽपि तयोरध्यासरूपः सोऽस्तीति परिहरति—** उच्यत इति। **भिन्नस्वभावत्वे हेतुमाह—** विषयेति। **इतरेतरवत् क्षेत्रे क्षेत्रज्ञे वा तद्धर्मस्य क्षेत्रानधिकरणस्य क्षेत्रज्ञगतस्य चैतन्यस्य, क्षेत्रज्ञानाधारस्य च क्षेत्रनिष्ठस्य जाड्यादेरारोपरूपो योगस्तयोरित्याह—** इतरेति। **तत्र निमित्तमाह—** क्षेत्रेति। **अविवेकादारोपितसंयोगे दृष्टान्तमाह—** रज्ज्विति। **उक्तं सम्बन्धं निगमयति —** सोऽयमिति। **तस्य निवृत्तियोग्यत्वं सूचयति—** मिथ्येति। **कथं तर्हि मिथ्याज्ञानस्य निवृत्तिरित्याशङ्क्याह—** यथेति। **'योऽयं विज्ञानमयः प्राणेषु' इत्यादि त्वम्पदार्थविषयं शास्त्रमनुसृत्य विवेकज्ञानमापाद्य, महाभूतादिधृत्यन्तात् क्षेत्राद्युपद्रष्टृत्वादिलक्षणं प्रागुक्तं क्षेत्रज्ञं मुञ्जेषीकान्यायेन विविच्य, सर्वोपाधिविनिर्मुक्तं ब्रह्म स्वरूपेण ज्ञेयं योऽनुभवति तस्य मिथ्याज्ञानमपगच्छतीति सम्बन्धः। कथमस्य**

भाष्यार्कप्रकाशः

तस्माच्छ्रुतिविरुद्धो निरुपपत्तिश्च प्रकृतगीतोक्तार्थोऽप्रमाण एवेति पूर्वपक्षः।

समाधानमुच्यतेऽस्य मयेति प्रतिजानाति—**उच्यत इति**। क्षेत्रक्षेत्रज्ञयोरध्यासरूपः संयोगोऽस्तीति न काचिदनुपपत्तिः। अध्यासरूपसंयोगस्य मिथ्यात्वेन नासङ्गश्रुतिविरोध इत्याह— **क्षेत्रेत्यादिना**। विषयो ज्ञेयं, विषयि ज्ञानम् , ज्ञानस्वरूपत्वादात्मनः। **भिन्नस्वभावयोः** सच्चिदानन्दस्वभाव आत्मा, अनृतजडदुःखात्मकं क्षेत्रमिति भावः। इतरस्मिन् क्षेत्रे इतरस्य क्षेत्रज्ञस्य, तद्धर्माणां चैतन्यादीनां चाध्यासः। तथा इतरस्मिन् क्षेत्रज्ञे इतरस्य क्षेत्रस्य, तद्धर्माणां सुखादीनां चाध्यासः। यथा देवोऽहं मनुष्योऽहमिति धर्म्यध्यासः, सुख्यहं दुःख्यहं पश्याम्यहमित्यादिर्धर्माध्यासः। स लक्षणं यस्य स तथोक्त इति संयोगविशेषणम्। एतस्याध्यासस्य किं निमित्तम्? अत आह— **क्षेत्रक्षेत्रज्ञेति**। इदं क्षेत्रम् अयं क्षेत्रज्ञ इति क्षेत्रक्षेत्रज्ञयोर्यः स्वरूपविवेकस्तदभाव एव निबन्धनं निमित्तं यस्य स तथोक्तः। क्षेत्रक्षेत्रज्ञसंयोग इहाभिप्रेत इति शेषः। तत्र दृष्टान्तमाह— **रज्ज्विति**। तच्छब्दस्य रज्जुशुक्तिकादिस्वरूपाण्यर्थः। तेषां विवेकरूपस्य विज्ञानस्याभावाद् हेतोरध्यारोपितैः सर्परजतादिभी रज्जुशुक्तिकादीनां यथा संयोग इतरेतराध्यासलक्षणस्तद्वदिति। रज्जुसर्पयोरिव शुक्तिकारजतयोरिव च स्वरूपविवेकाभावेन क्षेत्रक्षेत्रज्ञयोः इतरेतरतादात्म्याध्यासलक्षणः संयोग उपपद्यत इत्यर्थः। रज्जौ सर्पस्येव, शुक्तिकायां रजतस्येव च, क्षेत्रज्ञे क्षेत्रस्याविद्यया कल्पितत्वेनारोप्याधिष्ठानयोः संयोगादिरूपसम्बन्धाभावे ऽप्यध्यासरूपसम्बन्धसत्त्वात् क्षेत्रक्षेत्रज्ञसंयोगोऽध्यासरूप एवेति भावः।

अस्य चाध्यासरूपसम्बन्धस्य किं लक्षणम्? अत आह— **सोऽयमिति**। मिथ्याज्ञानं भ्रमस्तदेव लक्षणं यस्य स तथोक्तः। अतस्मिंस्तद्बुद्धेरध्यासरूपत्वाद् भ्रम एवाध्यास इति भावः। **एतेन** क्षेत्रक्षेत्रज्ञसंयोगो भ्रान्तिसिद्ध एव, न तात्त्विक इति **सिद्धम्**।

**यद्वा** मिथ्या च तदज्ञानं च मिथ्याज्ञानं, तदेव लक्षणं स्वरूपं यस्य स मिथ्याज्ञानलक्षणः। कार्यस्य कारणस्वरूपत्वाद् अज्ञानकारणस्याध्यासस्याज्ञानमेव स्वरूपं घटस्य मृदिवेति भावः। एतेनाविद्याकृतः क्षेत्रक्षेत्रज्ञसंयोगो रज्जुसर्पसंयोगवदिति अविद्याया मिथ्यात्वात् तत्कृतसंयोगोऽपि मिथ्यैवेति सूचितम्। एतदर्थमेव हि मिथ्यापदेन विशेषितमज्ञान**माचार्यैः**।

एतस्य चाध्यासरूपस्य मिथ्याज्ञानस्य निवृत्त्युपायं दर्शयति— **यथाशास्त्र**मित्यारभ्य **मिथ्याज्ञान**मित्यन्तेन ग्रन्थेन। **यथाशास्त्रं** वेदान्तशास्त्रमनतिक्रम्य, तदुक्तविधयेत्यर्थः। क्षेत्रक्षेत्रज्ञयोर्यो **लक्षणभेदः** सत्यत्वमिथ्यात्वादिस्वरूपभेदः, तत्परिज्ञानं पूर्वं यस्य तत् तथेति प्रविभज्यमानमित्यस्य विशेषणम्। प्राग्दर्शितमहङ्कारादिकं रूपं यस्य तस्मात् **प्राग्दर्शितरूपात्** क्षेत्रात् सकाशाद् , मुञ्जात्

१. 'प्रविभज्यमानम्' इति रा.पा.भाति।

**सर्वोपाधिविशेषं ज्ञेयं ब्रह्म स्वरूपेण यः पश्यति, 'क्षेत्रं च [1]मायानिर्मितहस्तिस्वप्नदृष्टवस्तुगन्धर्वनगरादिवद् असदेव सदिवावभासते' इत्येवं निश्चितविज्ञानो यः, तस्य यथोक्तसम्यग्दर्शनविरोधाद् अपगच्छति मिथ्याज्ञानम्। तस्य जन्महेतोरपगमाद् 'य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह' (भ.गी.१३.१४) इत्यनेन - विद्वान् भूयो नाभिजायत इति यदुक्तम् , तदुपपन्नमुक्तम्॥ २६॥**

आनन्दगिरिकृतव्याख्या

**निर्विशेषत्वं क्षेत्रज्ञस्य सविशेषत्वहेतोः सत्त्वादित्याशङ्क्याह—** क्षेत्रं चेति। **बहुदृष्टान्तोक्तेर्बहुविधत्वं क्षेत्रस्य द्योत्यते। उक्तज्ञानाद् मिथ्याज्ञानापगमे हेतुमाह—** यथोक्तेति। **तथापि कथं पुरुषार्थसिद्धिः, कालान्तरे तुल्यजातीयमिथ्याज्ञानोदयसम्भवादित्याशङ्क्याह—** तस्येति। **सम्यग्ज्ञानादज्ञानतत्कार्यनिवृत्त्या मुक्तिरिति स्थिते फलितमाह—** य एवमिति॥ २६॥

भाष्यार्कप्रकाशः

सकाशादिषीकामिव, **प्रविभज्यमानं** विविच्य गृह्यमाणमित्यर्थः। यथोक्तानि लक्षणान्यनादित्वसाक्षित्वादीनि यस्य तं **यथोक्तलक्षणं** क्षेत्रज्ञं ब्रह्मस्वरूपेण यः पश्यतीत्यन्वयः। कीदृशं क्षेत्रज्ञम्? अत आह— **निरस्तसर्वोपाधिविशेषमिति**। केनोक्तम्? तत्राह— **न सत्तन्नासदुच्यत इत्यनेन** वाक्येनोक्तम्। ज्ञेयत्वेनोक्तश्चायमेवेत्याह— **ज्ञेयमिति**। क्षेत्रं चासदेव सदिववभासत इति यः पश्यतीत्यन्वयः। कथमसतः सद्रूपेण भानमित्यतो दृष्टान्तानाह— **मायेति**। मायया इन्द्रजालेन निर्मिताः हस्तिहर्म्यादयस्तद्वत्। स्वप्ने दृष्टानि वस्तूनि रथादयस्तद्वत्। तानि हि निद्रया मायाशक्त्या कल्पितानि। गगने कल्पितगन्धर्वनगरादिवच्चेति। ननु भुवि मूर्तिमत्यां मायया हस्त्यादिनिर्माणं भवतु नाम, कथं पुनरमूर्ते ब्रह्मणीत्यत आह—**गगने गन्धर्वनगरादिवदिति**। नन्वनात्मनि गगने गन्धर्वनगरादिनिर्माणं मायया क्रियेत नाम, कथं पुनरात्मन्येवेत्यत आह— **स्वप्नदृष्टवस्तुवदिति**। स्वप्नपदार्था हि निद्रया आत्मन्येव कल्पिताः।

**एतेन** क्षेत्रज्ञे क्षेत्रमिदं मायया कल्पितमिति **सूचितम्**। यथा मायामयहस्तिहर्म्यादिपदार्थाः असन्तोऽपि सन्त इव प्रतिभान्ति, तद्वत् क्षेत्रमसदपि सदिवावभासत इत्यर्थः। एतेन क्षेत्रस्य शशशृङ्गादिसाम्यं निरस्तम् , प्रतीयमानत्वात्। न हि शशशृङ्गादिकं प्रतीयते केनापि। ब्रह्मवत् सत्यत्वं च निरस्तम् , बाध्यमानत्वात्। यथा प्रबोधादिना स्वप्नपदार्थादयो बाध्यन्ते, तथा क्षेत्रमपि विद्यया बाध्यत इति। एवं प्रतीयमानत्वाद् बाध्यमानत्वाच्च क्षेत्रमिदमसदिति सदिति वा वक्तुं न युज्यते, किन्तु मिथ्येत्येव वक्तुं युज्यते। प्रतीयमानत्वे सति बाध्यमानत्वं हि मिथ्यात्वम् , रज्जुसर्पादावुक्तलक्षणदर्शनात्। रज्जुसर्पादयो हि मिथ्यात्वेन सम्प्रतिपन्नाः। न च विद्यादशायामपि क्षेत्रमस्तीति वाच्यम् ; 'नेह नानास्ती'ति श्रुतिविरोधात्। तस्माद् ब्रह्मैकमेव प्रत्यगभिन्नं सत्यम् , क्षेत्रं मिथ्यैव। एवं यो **निश्चितविज्ञानः** निश्चितं विज्ञानं ब्रह्माहमस्मीति ज्ञानं यस्य स तथोक्तः। तस्य मिथ्याज्ञानमपगच्छतीत्यन्वयः। तत्र हेतुमाह— **यथोक्तेति**। सम्यग्दर्शनेन हि ब्रह्मात्माभेदलक्षणेन मिथ्याज्ञानं बाध्यते, सूर्येण तम इव। ननु मूलाज्ञाननाशं विना कथं मिथ्याज्ञाननाशः? अत आह— **तस्येति**। मिथ्याज्ञानस्य जन्महेतोर्मूलाज्ञानस्यापगमादिति। अहं ब्रह्मास्मीति सम्यग्दर्शनेन मूलाज्ञानं सकार्यं निवर्तत इत्यर्थः। अज्ञानकार्यं ह्यध्यासरूपं मिथ्याज्ञानम्। मिथ्या च तज्ज्ञानं च मिथ्याज्ञानमितीह समासः। भ्रमरूपं ज्ञानमिति यावत्।

अविद्याकृतः क्षेत्रक्षेत्रज्ञसंयोगो विद्यया निवर्त्यते। अविद्याकृतो रज्जुसर्पाभाससंयोगो यथा रज्जुयाथात्म्यज्ञानेन निवर्त्यते। आत्मयाथात्म्यज्ञानमेव हि विद्या, न तर्कव्याकरणादिपाण्डित्यम्। आत्मनि चाविद्यया कृते क्षेत्रे विद्यया नाशिते सति क्षेत्रक्षेत्रज्ञसंयोगोऽपि नष्ट एव, क्षेत्रस्यैवाभावात्। इयं च विद्या बुद्धिवृत्तिरूपा क्षेत्रं नाशयित्वा स्वयमपि नश्यति, कतकरजो यथा जलगतं मालिन्यं नाशयित्वा स्वयमपि नश्यति, तद्वत्। तस्मादात्मनो विद्यया च न द्वैतप्रसङ्ग इति स्थितमद्वैतम्।

सम्यग्ज्ञानाद् अज्ञानतत्कार्यनिवृत्त्या मुक्तिरिति स्थिते फलितमाह— **य एवमिति**। **उपपन्नं** युक्तम्।

यत्तु **रामानुजः** - यावत्सत्त्वं जायते तावत् संयोगादेव जायते संयुक्तमेव जायत इति। **तदयुक्तम्** - यावच्छब्दस्य साकल्यार्थमुक्त्वा तावच्छब्दाध्याहारस्य गौरवावहत्वात् , तावच्छब्दार्थस्यापि साकल्यत्वेन पुनरुक्तत्वाच्च। किञ्चित्त्वसकलत्वयोरेकत्र स्थातुमयुक्त-

१. 'मायानिर्मितहस्तिहर्म्यादिवत् स्वप्नदृष्टवस्तुवत् गगने गन्धर्वनगरादिवद्' इति रा.पा.।

भाष्यार्कप्रकाशः

त्वाच्च। उत्तरवाक्यगततच्छब्दान्वयाय यच्छब्दस्याध्याहर्तव्यत्वापत्तेश्च। सकलं सत्त्वं सञ्जायते, सकलं संयोगाज्जायत इति वाक्यद्वयकल्पनं चायुक्तम् , सकलं सत्त्वं संयोगाज्जायत इत्येकवाक्यस्यैव न्यायत्वात्।

तच्छब्दो जन्मपरामर्शीति **वेदान्तदेशिको**क्तिश्चायुक्ता। मूलस्थस्य सञ्जायत इति पदस्यैवात्रापि वाक्ये समन्वयेनेष्टसिद्धौ, तद् विहाय, तत् सत्त्वजन्म भवतीति क्रियान्तराध्याहारस्यायुक्तत्वात्। न च [1]यावच्छब्दो यच्छब्दार्थावाचक इति वाच्यम् ; तच्छब्दप्रतिद्वन्द्वितया यावच्छब्दनिर्देशस्यैव यावच्छब्दस्य यच्छब्दार्थकत्वगमकत्वात्। न च - न निघण्टुप्रमाणमस्तीति - वाच्यम् ; महर्षिप्रयोगस्यैव निघण्टुत्वात्। तस्माद् यत्किञ्चित् सत्त्वं जायते, तत् सर्वं संयोगादेव जायत इति व्याख्येयम्। यत्किञ्चिच्छब्दद्वयसामर्थ्यात् सर्वसिद्धिरिति न यच्छब्दस्य मन्दप्रयोजनत्वशङ्काऽपि।

**यच्च** संयोगात् सञ्जायत इत्यस्य संयुक्तमेव जायत इत्यर्थ इति, **तच्चायुक्तम्** - तस्माद् वाक्यात् तादृशार्थालाभात्। संयोगो हि सत्त्वं प्रति कारणतया निर्दिष्टम्। अन्यथा सर्वं सत्त्वं क्षेत्रक्षेत्रज्ञसंयुक्तमित्येव ब्रूयात् , न तु संयोगाज्जायत इति। किञ्च यत् क्षेत्रक्षेत्रज्ञसंयुक्तमेव जायत इति त्वं वदसि, किं तद् वस्तु? न च सत्त्वमिति वाच्यम् ; न हि तत्संयुक्तत्वप्रयोजकक्षेत्रक्षेत्रज्ञाभ्यामन्यत्। यो हि यत्संयुक्तः, स हि तस्मादन्यः। यथा रज्जुसंयुक्तो घटो रज्जोरन्यः। न च क्षेत्रक्षेत्रज्ञसंयुक्त ईश्वर इति वाच्यम् ; तस्य जन्मायोगात्। तस्मात् क्षेत्रक्षेत्रज्ञसंयुक्तस्य ताभ्यामन्यस्य जायमानस्य वस्तुनोऽभावात् क्षेत्रक्षेत्रज्ञसंयुक्तं सत्त्वं जायत इत्ययुक्तम्। न च क्षेत्रक्षेत्रज्ञद्वयमितरेतरसंयुक्तं सञ्जायत इत्यर्थ इति वाच्यम् ; जन्मनः प्रागेव सिद्धयोरन्योन्यसंयुक्तयोः कथं पुनर्जन्म देहदेहिनोः? न च जन्मनः प्राक् सूक्ष्मरूपेण स्थितयोः संयुक्तयोः क्षेत्रक्षेत्रज्ञयोः स्थूलरूपापत्तिरूपं जन्म भवतीति वाच्यम् ; क्षेत्रज्ञस्याविकारस्य स्थूलसूक्ष्मत्वविकारायोगात्। नापि सूक्ष्मरूपावस्थितक्षेत्रसंयुक्तः क्षेत्रज्ञः स्थूलरूपावस्थितक्षेत्रसंयुक्तत्वरूपेण जायत इति वाच्यम् ; प्रकृतश्लोकादुक्तार्थालाभात्।

**ननु** तव पक्षेऽपि क्षेत्रक्षेत्रज्ञसंयोगाज्जायमानं तत् सत्त्वं किं तदुभयात्मकमुत न? आद्ये - जन्मनः प्रागेव सिद्धस्योभयात्मकस्य तस्य कथं पुनर्जन्म? अन्त्ये अनुभयात्मकं हि सत्त्वं नास्तीति चेत् , **मैवम्** ; अष्टधा परिणता प्रकृतिः क्षेत्रं, क्षेत्रज्ञः ईश्वरः, तयोर्य आध्यासिकसम्बन्धः स सर्वभूतोत्पत्तिं प्रति निमित्तम् , पुरुषाधिष्ठितमहाभूतादिलक्षणक्षेत्रकार्यत्वाद् ब्रह्मादिस्तम्बपर्यन्तभौतिकप्राणिजातस्य। न हि केवलप्रकृतेः केवलेश्वराद्वा जगज्जायते, किन्तु प्रकृतिसंयुक्तात् पुरुषात् पुरुषाधिष्ठितायाः प्रकृतेर्वा सकाशाद् भवति जगत्। तस्मात् प्रकृतिपुरुषसंयोगः सर्वप्राण्युत्पत्तिनिमित्तमिति।

**यद्वा** क्षेत्रं मूलप्रकृतिः, क्षेत्रज्ञ ईश्वरः, तदुभयसंयोगान्महदहङ्काराद्युत्पत्तिद्वारा सर्वभूतोत्पत्तिरिति। कार्यकरणसङ्घातात्मकं चरमचरं च प्राणिजातं क्षेत्रपरिणामभूतं क्षेत्रज्ञादन्यदेवेति युक्तं तस्य जन्म। तदेवेह सत्त्वशब्देन गृह्यते, न तु क्षेत्रज्ञः, तस्य जन्मायोगात्। 'अजो नित्यः' इति दर्शितत्वात्। अस्मिंश्च सत्त्वे चैतन्याभासदर्शनाच्चैतन्याभासस्य च चैतन्यांशत्वात् कारणक्षेत्रक्षेत्रज्ञयोरिव कार्यक्षेत्र-क्षेत्रज्ञयोरपि अध्यासलक्षणसम्बन्धोऽस्तीति कृत्वा सोऽयं कार्यक्षेत्रक्षेत्रज्ञसंयोगः कारणक्षेत्रक्षेत्रज्ञसंयोगपूर्वक एवेति कारणक्षेत्रक्षेत्रज्ञसंयोगाच्चिदाभाससंयुक्तस्य कार्यक्षेत्रस्य जन्म भवतीति भावः।

**एतेन** प्रकृतिः पुरुषस्तत्संयोगश्चेति त्रयं भूतोत्पत्तिं प्रति निमित्तमिति **सिद्धम्**। न च प्रकृतिपुरुषसंयोग एक एवेह निमित्तमित्युक्तमिति वाच्यम् ; भूतोत्पत्तिं प्रति तत्संयोगस्य कारणत्वेऽपि संयोगं प्रति तयोः कारणत्वादिति। यद्वा संयोगद्वारा प्रकृतिपुरुषद्वयं निमित्तम्। अथवा प्रकृतितत्संयोगद्वारा पुरुष एक एव निमित्तम्।

'यतो वा' इत्यादिश्रुत्यनुसारेण पुरुष एवेश्वरो जगत्कारणमिति वक्तव्ये, तद् विहाय, प्रकृतिपुरुषसंयोगः कारणमिति कथनं तु अज्ञानमूलकप्रकृतिपुरुषसंयोगस्य जगत्कारणत्वेन, ज्ञानात् तत्संयोगनिवृत्तौ सर्वसंसारनिवृत्तिः स्यादिति सूचनार्थमिति बोध्यम्

---

१. 'यावद् यत् किञ्चित् सञ्जायते समुत्पद्यते सत्त्वं वस्तु' (पृ. ७१३) इति भाष्ये यावच्छब्दस्य यच्छब्देन व्याख्यानम्। तदुपरि परोक्तं यावच्छब्दस्य यच्छब्दार्थावाचकत्वं, तथा व्याख्यानस्य यावच्छब्देन साकल्यलाभात् मन्दप्रयोजनत्वं चेति दूषणमुद्धरति— न चेति। यच्छब्दनिष्पन्नस्य यावच्छब्दस्य प्रत्ययार्थाविवक्षया प्रयोगो न दुष्करः, तथा च किंचित्पदसमभिव्याहारं विना सर्वार्थालाभात् तत्सार्थक्यमिति भावः। परमते किंचित्पदवैयर्थ्यापत्तिरपि बोध्या।

**समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।**
**विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति॥२७॥**

**'न स भूयोऽभिजायते' इति सम्यग्दर्शनफलम् अविद्यादिसंसारबीजनिवृत्तिद्वारेण जन्माभावः उक्तः। जन्मकारणं चाविद्यानिमित्तकः क्षेत्रक्षेत्रज्ञसंयोगः उक्तः। अतस्तस्याः अविद्यायाः निवर्तकं सम्यग्दर्शनमुक्तमपि पुनः शब्दान्तरेणोच्यते—** समं सर्वेष्वित्यादि। समं **निर्विशेषं** तिष्ठन्तं **स्थितिं कुर्वन्तम् , क्व?** सर्वेषु **समस्तेषु** भूतेषु **ब्रह्मादिस्थावरान्तेषु प्राणिषु , कम्?** परमेश्वरम् **देहेन्द्रियमनोबुद्ध्यव्यक्तात्मनोऽपेक्ष्य परमश्चासौ ईश्वरश्च ईशनशील-श्चेति परमेश्वरः, तं सर्वेषु भूतेषु समं तिष्ठन्तम्। तानि विशिनष्टि—** विनश्यत्स्विति; **तं च परमेश्वरम्—**

आनन्दगिरिकृतव्याख्या

**उत्तरग्रन्थमवतारयितुं व्यवहितं वृत्तं कीर्तयति—** नेत्यादिना। अविद्या **अनाद्यनिर्वाच्यमज्ञानम् , मिथ्याज्ञानं तत्संस्कारश्चादि-शब्दार्थः। व्यवहितमनूद्याव्यवहितमनुवदति**—जन्मेति। **व्यवधानाव्यवधानाभ्यां सर्वानर्थमूलत्वादज्ञानस्य तन्निवर्तकं सम्यग्ज्ञानं वक्तव्य-मित्याह—** अत इति। **तस्यासकृदुक्तत्वात् तदुक्तार्थप्रवृत्तिर्वृथेत्याशङ्क्यातिसूक्ष्मार्थस्य शब्दभेदेन पुनःपुनर्वचनमधिकारिभेदानुग्रहायेति मत्वाऽऽह—** उक्तमिति। **सर्वत्र परस्यैकत्वान्नोत्कर्षापकर्षवत्त्वमित्याह—** सममिति। **परमत्वमीश्वरत्वं चोपपादयति—** देहेति। आत्मा **जीवः। तमित्यादिनाऽन्वयोक्तिः। आश्रयनाशादाश्रितस्यापि नाशमाशङ्क्याह—** तं चेति। **अविनश्यन्तमिति विशिनष्टीति सम्बन्धः।**

भाष्यार्कप्रकाशः

॥२६॥

**सममिति**। वृत्तवर्तिष्यमाणयोः सङ्गतिसूचनाय वृत्तमनुवदति—**न स भूय** इत्यादिना **उक्त** इत्यन्तेन ग्रन्थेन। **सम्यग्दर्शनफलं** ज्ञानफलभूतो जन्माभाव उक्तः। **अत इति**। अविद्यानिमित्तकक्षेत्रक्षेत्रज्ञसंयोगस्य जन्मकारणत्वादित्यर्थः। **तस्या इति**। जन्मकारण-भूतसंयोगकारणभूताया इत्यर्थः। जन्मनः परमकारणभूताया इति यावत्। अविद्याया निवृत्तौ क्षेत्रक्षेत्रज्ञसंयोगो निवर्तते, ततश्च जन्म निवर्तत इति तावदविद्यैव विद्यया निवर्तनीयेति भावः। उक्तमपि सुबोधाय पुनरुच्यत इत्याह— **उक्तमपीति**। एतेन ज्ञानस्य दुर्बोधत्वं सूचितम्। न ह्यात्मन्यनादिकालान्निरूढोऽनात्माभिमानः संसारित्वभ्रमश्च सुखेन निवर्तते। नापि तदनिवृत्तिं विना ब्रह्माहमस्मीति निरूढं ज्ञानं भवति। तस्मात् पुनःपुनरुच्यते आत्मतत्त्वं कृपालुना भगवता भक्तानुग्रहार्थमिति भावः। **शब्दान्तरेणेति**। भङ्ग्यन्तरेणे-त्यर्थः। यः विनश्यत्सु सर्वेषु भूतेषु समं तिष्ठन्तमविनश्यन्तं परमेश्वरं पश्यति, स एव पश्यति। **निर्विशेषं** यथा तथेति स्थितिक्रिया-विशेषणम्। एकरूपेणेत्यर्थः। सच्चिदानन्दस्वरूपेणेति यावत्। **निर्विशेष**मिति परमेश्वरविशेषणं वा। सर्वेषु तिष्ठन्तमित्यनेनात्मभेद-स्याप्रामाण्यं सूचितम्। आधारबहुत्वस्याधेयैकत्वस्य च बहुवचनैकवचनाभ्यामुक्तत्वात्। ततश्चौपाधिकभेदोऽप्यात्मन्यप्रमाणः इति सिद्धम्। **स्थितिं** गतिनिवृत्तिं कुर्वन्तं, न हि परिपूर्णमचलं वस्तु क्वापि गच्छेदिति भावः। एतेन सर्वव्यापित्वलक्षणं विभुत्वं सिद्धम्। **ब्रह्मा** हिरण्यगर्भः। **प्राणिनः** कार्यकरणसङ्घातात्मकाः। **परमः** उत्कृष्टः। किमपेक्षयाऽस्योत्कर्षः? अत आह— **देहेति**। आत्मत्वेनाविद्यया परिकल्पितेभ्यो देहात्मेन्द्रियात्ममनआत्मबुद्ध्यात्माव्यक्तात्मभ्यः[१] उत्कृष्टः। अहमज्ञः इति प्रतीत्या अज्ञानस्याप्यात्मत्वमवगम्यत इत्यभिप्रेत्योक्तम् **अव्यक्तात्मेति**। न त्वज्ञानमहमिति साक्षादज्ञाने आत्मत्वप्रतीतिः कस्यापि। काणोऽहं बधिरोऽहमित्यादिप्रतीत्या त्विन्द्रियस्यात्मत्वमिति बोध्यम्। न हि कोऽपि चक्षुरहं श्रोत्रमहमिति प्रत्येति। देहो हि घटपटादीनामीशनशीलः, देहपरतन्त्रत्वात् तेषाम्। स च इन्द्रियपरतन्त्रः, इन्द्रियव्यापारपूर्वकत्वाद् देहव्यापारस्येति देहस्य ईशनशीलानीन्द्रियाणि। तेषां मनः ईश्वरम्। तस्य बुद्धिरीशनशीला। तस्या अज्ञानम्[२]। अमीषां सर्वेषामपि ईशनशीलः आत्मेति परमेश्वरत्वमात्मन इति भावः। न चाज्ञानस्येशनशीलः परमात्मैव, न त्वात्मेति वाच्यम् ; आत्मन एव परमात्मत्वात् , 'परमात्मेति चाप्युक्तः' इति ह्युक्तम्। **तं चेति**। विशिनष्टीति शेषः। ननु

१. 'देहेन्द्रियमनोबुद्ध्यव्यक्तात्मनः' इति भाष्ये आत्मशब्दस्य प्रत्येकं योजनेति भावः। २. ईशनशीलमिति शेषः।

अविनश्यन्तमिति, **भूतानां परमेश्वरस्य चात्यन्तवैलक्षण्यप्रदर्शनार्थम्। कथम्? सर्वेषां हि भावविकाराणां जनिलक्षणो भावविकारो मूलम्। जन्मोत्तरभाविनोऽन्ये सर्वे भावविकारा विनाशान्ताः। विनाशात् परो न कश्चिदस्ति भावविकारः, भावाभावात्। सति हि धर्मिणि धर्माः भवन्ति। अतोऽन्त्यभावविकाराभावानुवादेन पूर्वभाविनः सर्वे भावविकाराः प्रतिषिद्धा भवन्ति सह [१]तत्कार्यैः। तस्मात् सर्वभूतैर्वैलक्षण्यमत्यन्तमेव परमेश्वरस्य सिद्धम् , निर्विशेषत्वम् , एकत्वं**

आनन्दगिरिकृतव्याख्या

**उभयत्र विशेषणद्वयस्य तात्पर्यमाह—** भूतानामिति। **नाशानाशाभ्यां वैलक्षण्येऽपि कथमत्यन्तवैलक्षण्यं सविशेषत्वभिन्नत्वयोस्तुल्यत्वा-दिति शङ्कते—** कथमिति। **भूतानां सविशेषत्वादिभावेऽपि परस्य तदभावादत्यन्तवैलक्षण्यमिति वक्तुं जन्मनो भावविकारेष्वादित्वमाह—** सर्वेषामिति। **तत्र हेतुमाह—** जन्मेति। **न हि जन्म अन्तरेणोत्तरे विकारा युज्यन्ते, जन्मवतस्तदुपलम्भादित्यर्थः। विनाशानन्तरभाविनोऽपि विकारस्य कस्यचिदुपपत्तेर्न तस्यान्त्यविकारत्वमित्याशङ्क्याह—** विनाशादिति। **तस्यान्त्यविकारत्वे सिद्धे फलितमाह—** अत इति। **तेषां जन्मादीनां** कार्याणि **कादाचित्कसत्त्वानि [२]तदधिकरणानि, तैः सहेति यावत्। परमेश्वरस्य भूतेभ्योऽत्यन्तवैलक्षण्यमुक्तमुपसंहरति —**तस्मादिति। निर्विशेषत्वं **सर्वभावविकारविरहितत्वं कूटस्थत्वम्।** एकत्वम् **अद्वितीयत्वम्। यः पश्यतीत्यादि व्याचष्टे—** य एवमिति।

भाष्यार्कप्रकाशः

भूतानां विनश्यत्स्विति विशेषणदानं, परमेश्वरस्याविनश्यन्तमिति विशेषणदानं च व्यर्थमित्यत आह— **भूतानामिति। वैलक्षण्यं** भेदः। **एतेन** भूतानि प्राणिनो जीवा आत्मशब्दवाच्या एवेत्य**पास्तम्।** भूतविलक्षणपरमेश्वरस्यैवात्मत्वात्। भूतानामनात्मत्वात् तत्र दृश्यमान-चैतन्यस्य चाभासभूतत्वादिति। कथं वैलक्षण्यप्रदर्शनमित्याक्षिपति— **कथमिति**। तदेवोपपादयति— **सर्वेषामिति**। भवन्तीति भावाः पृथिव्यादिपदार्थाः। तेषां विकाराः - जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, नश्यतीति षट्। तेषां मध्ये जनिलक्षणो भावविकारो मूलमादिः प्रथम इत्यर्थः। **अन्ये** सत्तादिविनाशान्ताः सर्वे पञ्चेत्यर्थः। भावविकाराः जन्मोत्तरकाले भवन्तीति जन्मोत्तरकालभाविनः। जातस्यैव देहादिभावस्य सत्तावृद्धिपरिणामापक्षयनाशदर्शनाज्जनिरूपविकार एव तेषामादिरित्यर्थः। ननु नाशानन्तरं कोऽप्यस्तु विकार इति विकाराणां विनाशान्तत्वकथनमयुक्तमित्यत आह— **विनाशादिति**। **विनाशो**ऽदर्शनं, तं प्राप्तस्या-सतो वस्तुनः शशशृङ्गादितुल्यस्य कथं पुनर्भावविकारप्राप्तिः? भावो हि सन् पदार्थः। तद्विकाराश्च सत एव वस्तुनो भवितुमर्हन्ति, न त्वसत इति भावः। इदमेवाह— **भावाभावादिति**। भावस्य सत्पदार्थस्याभावात्। नन्वसतोऽपि विकाराः भवन्तु , अत आह— **सतीति**। धर्मिणि देहादिभावपदार्थे सति धर्मा भवन्ति। धर्मिण एवाभावे कथं धर्मभवनं, न कथमपीत्यर्थः।

**ननु** 'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च' इति गीतावचनादेव नष्टस्य पुनर्जन्मरूपविकारः उपलभ्यते, दृश्यते च नष्ट-स्यापि देहस्य भस्मात्मना जन्म, घटस्य च कपालाद्यात्मनेति। तस्मान्नान्त्यविकारो नाश इति चेत् , **मैवम्** ; यदि निर्वाणस्य प्रदीपस्य पुनरागमनं भवेत् तर्हि नष्टं पुनर्जायेत। गीतावचनं तु देहजन्मनाशप्रयुक्तजन्मनाशवन्तं जीवमभिप्रेत्य प्रवृत्तम् - मृतस्य देहादुत्क्रान्तस्य प्राणोपाधिकस्य जीवस्य देहान्तरप्राप्तिरूपं जन्म ध्रुवमिति, प्रकृतदेहत्यागरूपं मरणं च तस्य ध्रुवमिति। देहे भस्मतामापन्ने सति देहो जातः इति व्यवहाराभावान्न देहस्य भस्मात्मना जन्म, किन्तु भस्मतापत्त्या देहस्य नाश एव। करचरणादिमत्पिण्डविशेषो हि देहः। यदि स देहस्याकारो भस्मनि दृश्येत, तर्हि देहः पुनर्जात इति वक्तुमुचितम्। यो यस्य नियत आकारस्तन्नियताकारादर्शनमेव हि तस्य नाशः। तस्माद् भस्मीभूतस्य देहस्य पुनर्जन्म भवेद् यदि, निर्वाणस्य प्रदीपस्य पुनरागमनं भवेदेव। सत्कार्यवादिनाऽपि देहारम्भकपृथिव्यादिद्रव्यस्य देहरूपत्वं विहाय भस्मरूपप्राप्तिरिति वदताऽपि देहरूपस्य नष्टत्वमवश्यमभ्युपेयमेवेति देहो नष्ट एव। न हि करचरणाद्यवयवसन्निवेशात्मकमाकारं विहाय कश्चिद् देहपदार्थोऽस्ति। स च देहे भस्मीभूते सति नैव दृश्यत इति देहस्यादर्शनरूपो नाशो युक्त एव। तस्य चादर्शनं गतस्य देहस्य नष्टदीपवन्नास्ति पुनरुदयः। न हि भस्मीभवनात् पूर्वं दृष्टः पित्रादिदेहाकारः पुत्रादिना पुनर्दृश्यते, येन नाशानन्तरं द्रव्यस्य पुनर्जन्मविकारापत्तिः। न च दीपो नष्टः

१. 'कार्यैः' इति पा.। २. जन्मादिभावविकाराधिकरणानीत्यर्थः।

पुनरुदेत्येवाग्निसंयोगाद् वर्तेरिति वाच्यम् ; नष्टादन्यस्या एव दीपज्वालायाः पुनरुदयात्। 'सोऽयं दीपः' इति प्रत्यभिज्ञा तु भ्रम एव, न प्रमा। नष्टस्य पुनरुदितस्य च दीपस्य भेदात्। तस्मान्नष्टस्य करचरणाद्याकारवतो देहस्य कम्बुग्रीवाद्याकारवतो घटस्य वा न पुनर्जन्म। ये तु दृश्यन्ते भस्मकपालादयस्ते न देहघटादिपदार्थाः। भस्मनि कपालादौ वा देह इति घट इति च लोकानां प्रत्ययादर्शनात्। अनुभवविरुद्धार्थो हि न ग्राह्यः। नापि नष्टस्य पुनर्जन्म शास्त्रसिद्धम् , जीवस्यैव नित्यस्य देहान्तरप्राप्तिरूपं पुनर्जन्म शास्त्रसिद्धम् , न त्वनित्यस्य देहस्य। अत एव ह्यनित्यत्वं देहस्य। यत्पुनरदर्शनम् , तस्मान्नाशादनन्तरं भावस्यैवाभावाद् भावस्य सत्त्वे नाशस्यैवायोगान्नास्ति कोऽपि भावविकार इति भावविकाराणां नाश एव परमावधिः। **अत इति**। नाशात् परस्य भावविकारस्याभावादित्यर्थः। आत्मन इति शेषः। अन्त्यभावविकारस्य नाशस्याभावानुवादेनाभावस्य पूर्वं बहुवारं प्रतिपादितत्वादिह तत्प्रतिपादनमनुवादभूतमेवेति भावः। **तत्पूर्वभाविनः** नाशात् प्राक्तनाः सर्वे जन्मादयो विकारास्तत्कार्यैः सह प्रतिषिद्धा भवन्ति।

**ननु** अविनश्यन्तमित्यनेन नाशाभाव एव प्रतिपादित इति कथं जन्मादिविकाराभावसिद्धिरिति चेद्? **उच्यते**— यस्य नाशो नास्ति, तस्य जन्मापि नास्ति, जन्मपूर्वकत्वान्नाशस्य। जातस्य हि घटस्य नाशो दृश्यते, न त्वजातस्य। न ह्यजातस्य शशशृङ्गस्य नाशप्रतीतिः। यद्धि जन्मना दृष्टिपथं गतं, तदेव हि प्राप्तुमर्हत्यदर्शनरूपं नाशम्। आत्मा न जायते, नाशरहितत्वात् , [1]यन्नाशवत् तदेव जायते , यथा घटः इति प्रयोगः। न च जन्मवानपि भूम्याकाशादिर्नित्यः, तस्य नाशादर्शनादिति वाच्यम् ; येनाकाशादेर्नाशो न दृष्टः तेन त्वया किमाकाशादेर्जन्म दृष्टम्? तव स्वादृष्टे भूम्यादिनाशे यथा अप्रत्ययः, तथा स्वेनादृष्टे भूम्यादिजन्मन्यप्रत्ययो युक्त एव। ओमिति चेत् , तर्हि भूम्यादेर्जन्माभावादेव नाशाभावः इत्यभ्युपगच्छ। यदि शास्त्रान्निश्चेतुमिच्छसि, तर्हि 'आत्मन आकाशः सम्भूतः' इत्यादिशास्त्रादाकाशादीनां जन्म, तत्प्रयुक्तं नाशं च प्रत्ये[प्रती]हि। न चाकाशादिनाशे शास्त्रं प्रमाणं नास्तीति वाच्यम् ; 'यत्प्रयन्त्यभिसंविशन्ती'त्यादि शास्त्रस्य सत्त्वात्। तस्माच्छास्त्रादुपपत्तेश्च जन्मनाशयोर्न क्वापि सामानाधिकरण्यव्यभिचारः। एवं नाशाभावेन जन्माभावे सिद्धे सत्तावृद्ध्यादीनां जन्मपूर्वकाणां भावविकाराणामभावोऽपि सिध्यति। न हि जन्मरहितस्य सत्तावृद्ध्यादयो दृश्यन्ते। जातस्यैव देहादेस्ते दृश्यन्ते।

**ननु** वृद्धिपरिणामादीनां विकाराणां जन्मपूर्वकत्वेऽपि सत्तारूपविकारस्य न जन्मपूर्वकत्वं, जन्मरहितेऽपि ब्रह्मणि सत्ताया दर्शनात्। सच्चिदानन्दं ब्रह्मेति हि श्रूयते , 'अविनाशि तु तद्विद्धी'ति च स्मर्यते सत्त्वं ब्रह्मण इति चेत् , **मैवम्** ; किं देहादयो जन्मनः प्राक् सन्ति? उत पश्चात्? नाद्यः - जन्मनः प्राग्देहोऽस्तीति व्यवहारादर्शनात् , किन्तु पश्चादेव। तस्माद् देहादिगतं सत्त्वं जन्मरूपविकारपूर्वकमेव। ब्रह्मगतं तु सत्त्वं न जन्मपूर्वकम् - जन्माभावाद् ब्रह्मणः। अत एव हि कालत्रयाबाध्यं ब्रह्म। न हि जन्मनः प्रागसद्वस्तु कालत्रयाबाध्यं भवितुमर्हति। असत्त्वादेव जन्मनः प्राक्काले। तथा च त्रिकालाबाध्यत्वलक्षणं ब्रह्मगतं सत्त्वं न विकारः - अकार्यत्वात् तस्य। कार्यं हि विकारः। देहादिगतं सत्त्वं तु इन्द्रियगोचरत्वलक्षणम्। तद्धि विकारः, जन्मा[न]न्तरभावित्वेन कार्यत्वात्। इन्द्रियगोचरत्वाद्धि जातं देहमस्तीति प्रत्येति लोकः। देहस्तावज्जायते समनन्तरमेवेन्द्रियगोचरो भवतीति जन्मपूर्वकत्वं सत्तायाः। न हि जन्मनः प्रागिन्द्रियगोचरत्वं देहस्य। तस्मादिन्द्रियगोचरत्वरूपसत्ताविकारो वृद्ध्यादिविकारवज्जन्मपूर्वक एव। अमी एवेन्द्रियगोचरीभवनयोग्याः पदार्थाः भावशब्देनोच्यन्ते देहादयः। तेषां चामी विकारा जन्मादयः सम्भवन्ति। आत्मा त्वतीन्द्रियः। न तस्य कोऽपि भावविकारः।

एवमविकारस्य परमेश्वरस्य सर्वभूतवैलक्षण्यमत्यन्तं सिद्धमेव। सविकारत्वाद् भूतानाम्। भूतानि हीन्द्रियगोचराणि ब्रह्मादिस्तम्बपर्यन्तानि द्विपरार्धशतसंवत्सरादिपरिमितायुष्कालानि क्षेत्रक्षेत्रज्ञसंयोगाज्जातानि वर्धमानानि विपरिणममानान्यपक्षीयमाणानि चेति षड्भावविकारवन्त्येव, 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुतेः। तस्मात् सविकारेभ्यो भूतेभ्यो निर्विकारः सर्वभूतान्तरात्मा परमेश्वरोऽत्यन्तं विलक्षण एव। एवं निर्विकारत्वादेव निर्विशेषः। विशेषो हि विकारः। एवं सजातीयविजातीयस्वगतभेदरूपविशेषाभावादेव एकश्चेत्याह— **निर्विशेषत्वमेकत्वं चेति**। सिद्धमिति शेषः। पश्यति जानाति, दृशेः ज्ञानार्थकत्वस्यापि

१. यज्जायते तत् नाशवत् इति व्यतिरेकव्याप्तिः योज्या।

**च। य एवं यथोक्तं परमेश्वरं पश्यति, स पश्यति।**

**ननु सर्वोऽपि लोकः पश्यति, किं विशेषणेनेति? सत्यं पश्यति, किन्तु विपरीतं पश्यति। अतो विशिनष्टि—** स एव पश्यतीति। **यथा तिमिरदृष्टिरनेकं चन्द्रं पश्यति, तमपेक्ष्यैकचन्द्रदर्शी विशिष्यते - स एव पश्यतीति, तथैवेहापि एकमविभक्तं यथोक्तमात्मानं यः पश्यति, स विभक्तानेकात्मविपरीतदर्शिभ्यो विशिष्यते - स एव पश्यतीति। इतरे पश्यन्तोऽपि न पश्यन्ति, विपरीतदर्शित्वाद् , अनेकचन्द्रदर्शिवदित्यर्थः॥२७॥**

आनन्दगिरिकृतव्याख्या

**उक्तविशेषणमीश्वरं पश्यन्नेव पश्यतीत्युक्तमाक्षिपति—**नन्विति। **ईश्वरपराङ्मुखस्यानात्मनिष्ठस्य तद्दर्शित्वेऽपि विपरीतदर्शित्वाद् ईश्वरप्रवणस्यैव सम्यग्दर्शित्वमिति विवक्षित्वा विशेषणमिति परिहरति—** सत्यमिति। **उक्तमेव दृष्टान्तेन विवृणोति—** यथेत्यादिना। **यः पश्यतीत्यादेरर्थमुपसंहरति—** इतर इति। **परवस्तुनिष्ठेभ्यो व्यतिरिक्ताः इत्यर्थः॥२७॥**

भाष्यार्कप्रकाशः

सत्त्वात्। **स पश्यतीति**। स विद्वानित्यर्थः।

ननु सर्वोऽपि लोकः परमेश्वरं पश्यत्येव, आत्मत्वात् तस्य। आत्मा ह्यात्मनः नित्यापरोक्षः। आत्मा हि स्वयम्। न हि स्वस्य स्वयं कदाचिदपि परोक्षः स्यात् तस्माद् यः पश्यति स एव पश्यतीत्युक्तमयुक्तमित्याक्षिपति— **नन्विति**। विशेषणं पृथक्कथनम्। तेन पूर्वपक्षमङ्गीकरोति - **सत्यमिति। पश्यतीति**। सर्वलोक आत्मानं परमेश्वरं पश्यत्येव, किन्तु विपरीतं यथा तथा पश्यति, आत्मानं विपरीतलक्षणं पश्यतीति वा। **अत इति**। सर्वलोकस्य विपरीतात्मदर्शित्वादित्यर्थः। **विशिनष्टीति**। यथोक्तात्मदर्शिनं विशिष्य कथयति। कथं विशिनष्टीत्यत आह— **स एव पश्यतीति**। य आत्मानं परमेश्वरं पश्यति, स एव विद्वान् , अन्ये तु विपरीतदर्शिनो मूढा एवेत्यर्थः।

यद्वा य आत्मानं परमेश्वरं पश्यति, स एव परमेश्वरं पश्यति। अन्ये तु परमेश्वरं नैव पश्यन्ति। आत्मभिन्नत्वात् परमेश्वरस्य तद्दृष्ट्या । अथवा य एवं यथोक्तं परमेश्वरं पश्यति, स एव सम्यक् पश्यति। अन्ये तु मिथ्यैव पश्यन्तीत्यर्थः। तत्र दृष्टान्तमाह— **यथेति**। तिमिरोपहतदृष्टिश्चन्द्रं पश्यति, निर्दोषदृष्टिश्च चन्द्रं पश्यति। तत्र तिमिरदृष्टिश्चन्द्रमनेकत्वेन पश्यति। अन्यस्तु यथावदेकत्वेन पश्यति। एवं सति यश्चन्द्रमेकं पश्यति, स एव पश्यति, न त्वन्ये, तेषामनेकचन्द्रदर्शित्वादिति विशिष्यते उत्कृष्टत्वेन कथ्यत इत्यर्थः।

**अविभक्तमिति**। उपाधिकृतविभागरहितमित्यर्थः। विभक्ता उपाधित इत्यर्थः। अनेके चात्मान इति ये विपरीतं पश्यन्ति, ते विभक्तानेकात्मविपरीतदर्शिनः। **एतेना**त्मनो ये किलौपाधिकं नानात्वं वदन्ति, त एव विपरीतदर्शिन इत्युक्तौ किम्पुनः स्वत एव नानात्ववादिन इत्यर्थापत्तिः **सूच्यते**। यद्वा विभक्ताः स्वत एव परस्परं भिन्नाः, अत एवानेके आत्मान इति विपरीतं पश्यन्ति ये, ते तथोक्ताः। स एव पश्यतीति विशिष्यत इत्यन्वयः। इतरे भिन्नानेकात्मदर्शिनः पश्यन्तोऽप्यात्मानं न पश्यन्ति। कुतः? विपरीतदर्शित्वात्। तत्र दृष्टान्तमाह— **अनेकचन्द्रदर्शिवदिति**। यथा चन्द्रं पश्यन्तोऽप्यनेकचन्द्रदर्शिनो नैव पश्यन्ति, तद्वदित्यर्थः। प्रत्यक्षेऽपि चन्द्रे एकस्मिन् तिमिरोपहतदृष्टीनां यथा नानाचन्द्रबुद्धिः, नित्यापरोक्षेऽप्येकस्मिन्नात्मनि निर्विशेषेऽविद्यादूषितबुद्धीनां नानात्मबुद्धिः, संसार्यात्मबुद्धिः, ईश्वराद् भिन्नात्मबुद्धिः, अनात्मन्यात्मबुद्धिश्चेति भावः।

यत्तु **रामानुजः** - एवमितरेतरयुक्तेषु सर्वेषु भूतेषु देवादिविषमाकाराद् विविक्तं तत्रतत्र तत्तद्देहेन्द्रियमनांसि प्रति परमेश्वरत्वेन स्थितमात्मानं ज्ञातृत्वेन समानाकारं तेषु देहादिषु विनश्यत्सु विनाशानर्हस्वभावेनाविनश्यन्तं यः पश्यति, स आत्मानं यथावस्थितं पश्यति - इति, **तत्तुच्छम्** , सर्वेषु भूतेषु तिष्ठन्तमिति पदत्रयस्यैकवाक्यत्वेन प्रतीयमानस्य सर्वेषु भूतेषु देवादिविषमाकाराद् विविक्तमिति, सर्वेषु भूतेषु स्थितमिति च वाक्यद्वयत्वेन व्याख्यानस्याप्रमाणत्वात्। देवादिविषमाकाराद् विविक्तमिति वाक्याध्याहारस्यान्याय्यत्वात्। सर्वेषु भूतेष्विति पदस्य त्रेधा आवृत्तौ प्रमाणाभावात् - सर्वेषु भूतेषु विविक्तं, सर्वेषु भूतेषु स्थितं, सर्वेषु भूतेषु विनश्यत्स्वविनश्यन्तमिति कथनमयुक्तमेव। तथा परमेश्वरमित्यस्य तत्तद्देहेन्द्रियमनांसि प्रति परमेश्वरत्वेनेत्यप्ययुक्तम् ; मूलाद्

भाष्यार्कप्रकाशः

बहिर्बहुपदकल्पनस्यायुक्तत्वात् , परमेश्वरमित्यस्यैव विशेष्यत्वेन तद्विशेषणीकरणस्यात्मानमिति पदाध्याहारस्य चाप्रमाणत्वात्। सममित्यस्य ज्ञातृत्वेन समानाकारमित्यप्ययुक्तम् - मूलाद् बहिर्बहुपदकल्पनस्यात्रापि सत्त्वात्।

न च श्लोकस्य सूत्रवत्स्थितत्वात् तद्गतपदान्वयाय मूलाद् बहिः बहुपदकल्पनं न्याय्यमिति वाच्यम् ; तद्विनाऽप्यन्वयसम्भवस्य दर्शितत्वात् तत्कल्पनस्यान्याय्यत्वमेवेति। न च शब्दतोऽन्याय्यत्वेऽपि न्याय्यमेवार्थतः इति वाच्यम् ; अर्थतोऽप्यन्याय्यत्वात्। तथाहि— यद्यात्मा देवादिविषमाकारैः संयुक्तः स्यात् तदोच्येत विविक्त इति। न ह्यास्तिकः कोऽपि देहादिविलक्षणं कर्तारं भोक्तारं चात्मानं विदन् करचरणादिमन्तमात्मानं जानीयाद् बौद्धवत्। किन्तु 'मम देहः' इत्येव प्रत्येति। स च प्रत्ययो देवादिविषमाकाराद् वियुक्तः आत्मेत्युपदेशान्नैवापगच्छति। गृहाकाराद् विविक्तस्यापि बौद्धाभिमतदेहात्मनो गृहे ममत्वप्रत्ययस्य सत्त्वात्। देहादीन् प्रति परमेश्वरत्वं तु महेश्वर इत्यत्र निरस्तम्। ज्ञातृत्वेन समानाकारमात्मानमित्यप्ययुक्तम् , केनास्यात्मनः समानाकारता? न तावद् अनात्मना, तस्य जडत्वात्। नाप्यात्मना, स्वस्यैवात्मत्वात्। न च परमात्मनेति वाच्यम् ; सर्वज्ञेश्वरगतसर्वज्ञत्वरूपज्ञातृत्वस्य किञ्चिज्ज्ञजीवगतकिञ्चिज्ज्ञत्वरूपज्ञातृत्वस्य च भेदात्। नाप्यन्येनात्मनेति वाच्यम् ; आत्मानमित्येकत्वेनैवानेकात्मवादस्य निर्मूलितत्वात्। न चात्मानमिति जात्येकत्वमिति वाच्यम् ; आत्मनि जातेरेवाभावात्। किञ्च भवतु वा अज्ञानकृतः (आत्मकृत) आत्मभेदः, तथापि नात्मनां परस्परं साम्यम् - तर्कशास्त्रवित्त्वरूपज्ञातृत्वस्य व्याकरणशास्त्रवित्त्वरूपज्ञातृत्वस्य च पुरुषद्वयनिष्ठस्य भेदेन ज्ञातृत्वसाम्याभावात्। यदि तु ज्ञानमात्रमेव ज्ञातृत्वमिति गृह्यते, तर्हि तस्य निरुपाधिकस्य ज्ञानस्य भेदकाभावात् सिद्धमेवैकत्वं ज्ञानस्वरूपस्यात्मनः।

यच्च **वेदान्तदेशिकेनोक्तम्** - क्षेत्राकारपरिणतप्रकृतिबहुत्वात् तत्तच्छरीरसंयुक्ताः पुरुषा अप्यनेक एव। सर्वत्र पार्थक्येन सुखदुःखाद्युपलब्धेः। न च निरवयवस्यात्मनः कथं संयोग इति वाच्यम् ; 'युतसिद्धयोः सम्बन्धः संयोगः' इति लक्षितसंयोगस्य निरवयवेऽपि सम्भवात्। निरवयवयोर्निरवयवसावयवयोः सावयवयोश्च संयोगः सम्भवत्येव। आत्मन्यध्यासलक्षणः सम्बन्धो नोपपद्यत एवेति, **तत्तुच्छम्** - युतसिद्धयोः सावयवयोरेव सम्बन्धः संयोग इति लक्षणात्। अन्यथा निरवयवयोर्निरवयवसावयवयोर्वा सम्बन्धस्यैवाभावेन तल्लक्षणस्य दुष्टत्वप्रसङ्गात्। न हि कपिना वृक्षः संयुक्त इतिवदाकाशेन वृक्षः संयुक्त इति लोके कोऽपि प्रत्येति, घटाकाशो वा मठाकाशेन संयुक्त इति च प्रत्येति। संयुक्तव्यवहारहेतुर्हि संयोगः। न च - विभुराकाशः, विभुत्वं च सर्वमूर्तद्रव्यसंयोगित्वमित्यस्त्येव निरवयवस्याप्याकाशस्य घटादिसंयोगः। तथा आत्मा मनसा संयुज्यते, मन इन्द्रियेणेत्यात्मादीनां निरवयवानामेव संयोग इति - वाच्यम् ; उक्ततर्कशास्त्रस्याप्रमाणत्वात्। अत एव हि तर्कशास्त्रमधीयानो गर्दभात्मना पुनर्जायते[१] इति स्मर्यते। 'असङ्गो ह्ययं पुरुषः' इत्यादिश्रुतिविरुद्धं ह्यात्ममनःसंयोगप्रतिपादनादिकम्। घटाकाशयोः संयुक्तत्वव्यवहाराभावेनाकाशस्य मूर्तद्रव्यसंयोगित्वरूपविभुत्वं चायुक्तम्। न च गुणगुणिनोरिव समवायसम्बन्धोऽस्तु क्षेत्रक्षेत्रज्ञयोरिति वाच्यम् ; गुणिनि गुण इव निर्विशेषे क्षेत्रज्ञे कालत्रयेऽपि क्षेत्ररूपविशेषसत्त्वायोगात्। सत्त्वे पुनर्गुणाद् गुणिन इव क्षेत्रात् क्षेत्रज्ञस्य विभाग एव न सिध्येत्। न चेष्टापत्तिः, प्रकृतिवियुक्तमात्मानं प्रपद्यत इति त्वयैवोच्यमानत्वात्। एवमसङ्गस्य पूर्णस्य चैतन्यस्य क्षेत्रज्ञस्य भेदकोपाधिसम्बन्धासम्भवाद् एक एवात्मा। तस्मिन्ननेकत्वबुद्धिस्त्वध्यासकृतैव। न चात्मनि कथमध्यास इति वाच्यम् ; रज्जौ सर्पस्येवात्मनि संसारस्याध्यासः सम्भवत्यविद्ययेत्युक्तत्वात्। न च द्रष्टुः दृश्ये रज्ज्वादौ सर्पादिभ्रमः स्यान्नाम, कथं पुनः द्रष्टर्येव स्वस्मिन् देवादिभ्रमः इति वाच्यम्। न हि वयं द्रष्टुरात्मनः क्षेत्रज्ञस्य स्वस्मिन्ननात्मभ्रमो भवतीति वदामः, किन्तु प्रमातुरात्मन्यनात्मभ्रम इति ब्रूमः। न च प्रमातैव क्षेत्रज्ञ आत्मेति वाच्यम् ; सत्यं प्रमातैव क्षेत्रज्ञो ज्ञातृत्वात् , तथापि यावत्पर्यन्तं प्रमाता संसारिणमात्मानं मन्यते तावत्पर्यन्तं क्षेत्रज्ञोऽपि सन् प्रमाता क्षेत्रज्ञाद् भिन्न इव। विद्यावस्थायामेव प्रमातुः क्षेत्रज्ञात्मत्वम् , अविद्यावस्थायां तु संसारित्वमेवेति युक्तः संसारिणः प्रमातुरात्मन्यप्यनात्मभ्रमः, अविद्यावत्त्वात् , निद्रावतो ब्राह्मणस्यात्मनि क्षत्रियभ्रमवदिति।

**यच्चानेनोक्तम् -** अविनश्यन्तमिति विशेषणं जीवपरत्व एव घटते, न त्वीश्वरपरत्वे, देहाभिमानिनो हि जीवं विनश्यन्तं

१. 'अधीत्य गौतमीं विद्यां गार्दभीं योनिमाप्नुयात्' इति स्मृतिरिति वदन्ति।

**समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम्।**
**न हिनस्त्यात्मनाऽऽत्मानं ततो याति परां गतिम्॥ २८॥**

**यथोक्तस्य सम्यग्दर्शनस्य फलवचनेन स्तुतिः कर्तव्येति श्लोक आरभ्यते—** समं पश्यन्निति। **समं** पश्यन् **उपलभमानो** हि **यस्मात् ,** सर्वत्र **सर्वभूतेषु** समवस्थितं **तुल्यतयाऽवस्थितम्** ईश्वरम् **अतीतानन्तरश्लोकोक्तलक्षण-मित्यर्थः। समं पश्यन् , किम् ?** न हिनस्ति **हिंसां न करोति,** आत्मना **स्वेनैव स्वम्** आत्मानम्। ततः **तदहिंसनाद् याति** परां **प्रकृष्टां** गतिं **मोक्षाख्याम्।**

आनन्दगिरिकृतव्याख्या

**प्रकृतसम्यग्ज्ञानेन किमित्यपेक्षायां तत्फलोक्त्या तस्यैव स्तुत्या तद्धेतौ पुरुषं प्रवर्तयितुं श्लोकान्तरमित्याह—** यथोक्तस्येति। यस्मादित्यस्य ततः**शब्देन सम्बन्धः। सर्वभूतेषु तुल्यतयाऽवस्थितं पूर्वोक्तलक्षणमीश्वरं निर्विशेषं पश्यन्नात्मानमात्मना यस्मान्न हिनस्ति** ततः **तस्मान्मोक्षाख्यां परां गतिं यातीति योजना। तत्र पादत्रयेण ज्ञानादज्ञानध्वस्त्या ध्वस्तिरनर्थस्योक्ता। अज्ञानमिथ्याज्ञानयोरावरण-योर्नाशे सर्वोत्कृष्टां गतिं परमपुरुषार्थं परमानन्दमनुभवति विद्वानिति चतुर्थपादार्थः।**

भाष्यार्कप्रकाशः

मन्यन्ते, न त्वीश्वरमिति विनाशप्रसक्तेरेवाभावादीश्वरस्य तन्निषेधो व्यर्थ इति। **तत्तुच्छम्** - आस्तिका एवात्राधिकारिणो न तु नास्तिक इति तावदविवादम्। अधीतवेदवेदाङ्गानामेव वेदान्तशास्त्रेऽधिकारात्। ते चास्तिकाः देहादिविलक्षणं नित्यमेवात्मानं मन्यन्ते। अन्यथा स्वर्गादिफलभोगाय यज्ञादिकर्मसु तेषामप्रवृत्त्यापत्तेः। मृतं पित्रादिकं प्रति पिण्डप्रदानाद्ययोगाच्च। तस्मात् कथं जीवेऽपि नाशप्रसक्तिः? यदि देहनाशाज्जीवनाशमेते मन्यन्ते, तर्हि श्रीरामस्य श्रीकृष्णस्य वा परमेश्वरत्वेनाभिमतस्य देहनाशदर्शनादीश्वरस्यापि नाशं ते किमिति न मन्येरन्? ये तु नास्तिकास्ते जीवमिवेश्वरमपि नाभ्युपगच्छन्त्येवेति कथं तद्दृष्ट्या ईश्वरनित्यत्वम्? तस्माद् ईश्वरवज्जीवेऽपि नाशप्रसक्त्यभावाद् व्यर्थ एव तन्निषेधः। अत एव अविनश्यन्तमित्यस्य निर्विकारत्वप्रतिपादनं फलमित्युक्तमाचार्यैः। न च षड्भावविकाराभाव एव प्रतिपादित इति वाच्यम् ; यस्य षड्भावविकारास्तस्यैव तदतिरिक्तविकारा अपि। सुखदुःखादिविकाराः खलु जन्मादिविकारप्रयुक्ताः। अत एव सह तत्कार्यैः प्रतिषिद्धा भवन्तीत्युक्तम्। न चात्मनि नाशवद् विकारित्वस्याप्यप्रसक्तिरिति वाच्यम् ; आस्तिकैरपि कर्ता भोक्ताऽऽत्मेति गृह्यमाणत्वात्। कर्तृत्वादिकं हि विकारः। तस्मादीश्वरस्यापि क्षेत्रज्ञस्याविनश्यन्तमिति विशेषणदानं युक्तमेव। मूढैरास्तिकैर्विपरीतत्वेन (विकारिजीवत्वेन) गृह्यमाणो यः क्षेत्रज्ञः स वस्तुतो निर्विकारः परमेश्वर एवेति जीवेश्वराभेदरूपमहावाक्यार्थबोधसम्भवात्। न च निर्विकारत्ववचनमात्रेण कथं परमेश्वरत्वं जीवस्येति वाच्यम् ; निर्विकारत्व-प्रतिपादनेनासंसारित्वलाभाद् असंसारित्वस्य चेश्वरधर्मत्वात्। यो हि सुखदुःखादिभिर्विक्रियते, स हि संसारी जीव इति हि सर्वेषामास्तिकानां प्रत्ययः। तस्मान्निर्विकारोऽसंसारी क्षेत्रज्ञ ईश्वर एव, न तु तद्भिन्नः, 'क्षेत्रज्ञं चापि मां विद्धि' इत्युपक्रमादिति॥ २७॥

**सममिति**। हि सर्वत्र समं यथा तथा अवस्थितमीश्वरं पश्यन् हि पुरुषः, आत्मना आत्मानं न हिनस्ति। ततः परां गतिं याति। **स्तुतिरिति**। त्वमिन्द्रः इत्यादिवन्मिथ्यार्थप्रवचनरूपा स्तुतिर्नेह ग्राह्या, किन्तु यथार्थकथनरूपैव। पश्यन्नित्यनेन चक्षुर्व्यापारो न विवक्षितः, अतीन्द्रियत्वादात्मनः, किन्तु बुद्धिव्यापार एवेत्याह— **उपलभमान इति**। विदन्नित्यर्थः। 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभि'रिति श्रुतेरिति भावः। **हिशब्दार्थमाह— यस्मादिति**। अस्य ततस्तस्मादित्युत्तरेणान्वयः। **तुल्यतयेति**। एकरूपेणेत्यर्थः। अवस्थानक्रियायाः विशेषणमिदम्। पक्षान्तरमाह— **समं पश्यन्निति**। दर्शनक्रियायाः विशेषणमिति भावः। तस्माद्धेतोरित्यर्थः। हेतुमेव दर्शयति— **अहिंसनादिति**। यद्यपि यो हेतुरहिंसने स एवेह तच्छब्देन ग्राह्यः, तथापि तत्कार्यभूतमहिंसनमिह गृहीतं कार्ये कारणभावोपचारादिति। अहिंसने हेतुस्तु ईश्वरसमदर्शनम्। यस्मादीश्वरं समं पश्यति, तस्मादात्मानं न हिनस्ति। तस्माच्चाहिंसनात् परां गतिं यातीति परमार्थः।

**ननु नैव कश्चित् प्राणी स्वयं स्वमात्मानं हिनस्ति, कथमुच्यतेऽप्राप्तं 'न हिनस्ती'ति यथा 'न पृथिव्या-मग्निश्चेतव्यो नान्तरिक्षे' (तै.सं.५.२.७.१) इत्यादि। नैष दोषः, अज्ञानाम् आत्मतिरस्करणोपपत्तेः। सर्वो ह्यज्ञो ऽत्यन्तप्रसिद्धं साक्षादपरोक्षादात्मानं तिरस्कृत्य, अनात्मानमात्मत्वेन परिगृह्य तमपि धर्माधर्मौ कृत्वोपात्तमात्मानं हत्वाऽन्यमात्मानमुपादत्ते नवम् , तं चैवं हत्वाऽन्यम् , एवं तमपि हत्वाऽन्यम् इत्येवम् उपात्तमुपात्तमात्मानं**

आनन्दगिरिकृतव्याख्या

**'न हिनस्त्यात्मनाऽऽत्मान'मिति यथाश्रुतमादाय चोदयति—** नन्विति। **'न पृथिव्या'मिति प्राप्तिद्वारा निषेधवद् 'नान्तरिक्षे न दिवी'ति प्राप्त्यभावाच्चायं निषेधो मुख्यो नेष्यते। तथेहापि प्राप्तिं विना निषेधो न युक्तिमानित्याह—** यथेति। **अज्ञानामात्मनैवात्महिंसा-सम्भवाद् विदुषां तदभावोक्तिर्युक्तेति समाधत्ते—** नैष दोष इति। **संग्रहवाक्यं विवृणोति—** सर्वो हीति। **अनात्मशब्दो देहादिविषयः।**

भाष्यार्कप्रकाशः

**एतेन** विषमेश्वर(भिन्नेश्वर)दर्शनस्य आत्महिंसाहेतुत्वं **सूचितम्**। ते च द्वैतिनः आत्महिंसकत्वादन्धं तम एव प्रपद्यन्ते, 'अन्धं तमः प्रपद्यन्ते (प्रविशन्ति) ये के चात्महनो जनाः' इति श्रुतेः। भिन्नेश्वरज्ञानिनामेवात्महत्वे किं पुनर्निरीश्वरवादिनां साङ्ख्यानां, देहात्मवादिनां बौद्धादीनां वेत्यर्थापत्तिः सूच्यते।

ईश्वरसमदर्शिभ्योऽन्येषामात्महत्वमेव दर्शयितुं पूर्वपक्षमुद्भावयति—**नन्विति**। यः कोऽप्यतिमूर्खोऽपि प्राणी स्वयं स्वमात्मानं नैव हिनस्ति। न ह्यात्मनि कस्यापि द्वेषः, येनात्महिंसनं स्यात्। आत्मसुखविघातुकेऽन्यस्मिन्नेव सर्वस्य द्वेषः, तद्धिंसनं च, शत्रुहिंसाया दर्शनात्। आत्मोपभोगार्थमप्यन्यमेव पश्वादिकं हिंसन्ति, न त्वात्मानम् आत्मार्थमन्यार्थं वा। एवं सत्यप्रसक्तस्य निषेधायोगात् कथमप्राप्तमात्महिंसनमुच्यते न हिनस्तीति निषेधकथनद्वारा? न हिनस्तीति निषेधो ह्यात्मनि हिंसनं प्रसञ्जयित्वा[१] निषेधति। तस्मादप्रसक्तस्य हिंसनस्यात्मनि प्रसञ्जनमयुक्तम्। इदं च 'आत्मानं न हिनस्ती'ति वचनं 'पृथिव्यामग्निर्न चेतव्यः' इति प्राप्तिद्वारा निषेधवत्। 'नान्तरिक्षे न दिवी'ति प्राप्त्यभावाच्चायं निषेधो मुख्यो नेष्यते यथा, तद्वदिहापि प्राप्तिं विना हिंसायाः आत्मनि निषेधो न युक्त इत्याह— **यथेति**। न चायुक्तोऽयं पूर्वपक्षः, राजादिभीत्या स्वशिरश्छेदकानां जलेऽग्नौ वा स्वयमेव निपत्य मृतानां दृश्यमानत्वादिति वाच्यम् ; तत्रापि देहादन्येनैव देहिना देहस्य हिंसितत्वादिति।

पूर्वपक्षं परिहरति— **नैष दोष इति**। **एषः** अप्राप्तात्महिंसननिषेधो दोषो न भवति। कुतः? अज्ञानामात्मतिरस्करणोपपत्तेः। संग्रहोक्तं विवृणोति— **सर्व इति**। हिः प्रसिद्धौ, यस्मादिति वा। हन्तीत्यनन्तरं तस्मादिति शेषः कर्तव्यः। यस्माद् हन्ति सर्वोऽज्ञः आत्मानं, तस्मात् सर्वोऽज्ञः आत्महेत्यन्वयः। **तिरस्कृत्येति**। तमात्मत्वेनापरिगृह्येत्यर्थः। अनात्मानं देहं स्थूलमात्मत्वेन परिगृह्य देहमेवात्मानं मत्वेत्यर्थः। धर्माधर्मौ कृत्वा जन्मान्तर इति भावः। **उपात्तं** स्वीकृतं तमपि देहं मानुषं **हत्वा** भोगेन प्रारब्धकर्मणो ऽवसादनापादनद्वारा नाशयित्वा सञ्चितकर्मप्रयुक्तं **नवं** नूतनमन्यं देवमनुष्यतिर्यगादिलक्षणं देहमात्मत्वेनोपादत्ते। तमपि पूर्वोक्तविधया हत्वा तस्मादन्यं देहं नवमात्मत्वेनोपादत्ते। एवमात्मत्वेनोपात्तमात्मानं देहात्मानं हन्तीत्यात्महा।

अयमर्थः - यद्यपि जीवो 'न जायते म्रियते वे'ति, 'नायं हन्ति न हन्यते' इति च शास्त्रान्नित्य एव, तथापि मूढो जनः देहादन्यमात्मानं न वेद, किन्तु देहमेवात्मानं वेद। स्थूलोऽहं, कृशोऽहं, रुग्णोऽहं, वृद्धोऽहं, मनुष्योऽहमित्यादिव्यवहारात्। एवं देहात्माभिमानादेव राजादिभीत्या देहात्मानमवसादयितुं मूर्खाः शिरश्छेदजलाग्निपातादिकं कुर्वन्ति। राजा च देहात्मानमव-सादयितुमेव सापराधस्य शिरश्छेदादिदण्डं विधत्ते। एवं देहात्मघातुकाः आत्महनस्तावत् सर्वत्र विदिता एव। न च जीवेन देहो नाश्यत इति वाच्यम् ; हस्तेन खड्गेन वा देहस्य नाश्यमानत्वेन देहस्य जीवनाश्यत्वादर्शनात्। न हि स्वहस्तमन्यहस्तं वा छिन्दन् मूर्खो जीवो हस्तं छिनत्तीति मन्यते, किन्त्वहमेव ममैव शत्रोरेव वा हस्तं छिनत्तीति मन्यते। अतो न मूर्खस्य जीवे आत्मबुद्धिः, किन्तु देह एवात्मबुद्धिरिति।

१. 'प्रसज्य' इति पाठो युक्तः।

**हन्तीत्यात्महा सर्वोऽज्ञः। यस्तु परमार्थात्मा, [१]असावपि सर्वदा अविद्यया हत इव, विद्यमानफलाभावादिति सर्वे आत्महन एवाविद्वांसः। यस्त्वितरो यथोक्तात्मदर्शी, सः उभयथाऽप्यात्मनाऽऽत्मानं** न हिनस्ति [२]**न हन्ति, ततो याति परां गतिम्। यथोक्तं फलं तस्य भवतीत्यर्थः॥२८॥**

आनन्दगिरिकृतव्याख्या

**अविदुषामारोपितात्महन्तृत्वं निगमयति—** इत्यात्महेति। **तथापि पारमार्थिकस्यात्मनो हननाभावान्न तेषां सर्वेषामात्महन्तृत्वमित्याशङ्क्याह—** यस्त्विति। **उक्तरीत्या सर्वेषामविदुषामात्महन्तृत्वं सिद्धमित्युपसंहरति—** सर्व इति। **आत्मनैवात्महननमविदुषां दृष्टम्। तदिह विद्वद्विषये शक्यं निषेद्धुमित्याह—** यस्त्वितर इति। उभयथाऽपीति। **आरोपानारोपाभ्यामित्यर्थः। ज्ञानादनर्थभ्रमभ्रंशे पूर्वोक्तपरमानन्दप्राप्त्या परितृप्तत्वं युक्तमित्याह—** तत इति॥२८॥

भाष्यार्कप्रकाशः

एवं लोकतः प्रसिद्धमेव तावदात्महिंसनम्। अथ शास्त्रादपि तत्प्रसिद्धमेव। शास्त्रेण हि पूर्वोत्तरजन्मनी प्रसाधिते कृतविप्रणाशाकृताभ्यागमरूपदोषद्वयनिरासाय दृश्यमानधनिकत्वदरिद्रत्वरुग्णत्वनीरोगत्वादिभोगवैचित्र्यनिर्वाहाय च। तच्च जन्म कर्माधीनं विचित्रकर्मकृतत्वात् पश्वादिविचित्रदेहानाम्। तच्च कर्म कर्त्रधीनं कृष्यादिकर्मणः कर्त्रधीनत्वदर्शनात्। स च कर्ता देहात्मैव। देहस्यैव स्नानादिकर्मसु व्यापृतिदर्शनात्। इन्द्रियात्ममनआत्मबुद्ध्यात्मानस्तु देहात्मन एवानुग्राहकाः। तांश्चेन्द्रियाद्यात्मनो मूढो न जानातीति देहात्मैव सर्वविदितः कर्ता। अयं हि देहात्मा प्रारब्धं कर्म सुखदुःखादिभोगेन नाशयित्वा देहात्मान्तरोत्पादकं च कर्म कृत्वा प्रकृतदेहात्मानमुत्तरजन्मनि फलोपभोगार्थं नाशयति। एवमनादिकालादारभ्य कोटिशो देहात्मनो नाशितवान् अयमज्ञः, उत्तरत्र च कोटिशो देहात्मनो नाशयिष्यति च। अतोऽयमात्महेत्युच्यते, आत्मत्वेन गृहीतानां देहानां नाशकत्वात्। न च देहानां नाशेऽपि कथमात्मनाश इति वाच्यम्; आत्मत्वेन गृहीतत्वाद् देहस्य तन्नाशे आत्मनाशस्तज्जन्मन्यात्मजन्म च सम्भवत्यज्ञदृष्ट्या। अज्ञो हि देहात्माभिमानाद् 'जातोऽहं, मरिष्येऽह'मिति मन्यते।

ननु आत्मत्वेन गृहीतस्यापि देहस्यानात्मत्वान्न देहात्महिंसको भवत्यात्महेत्यत आह— **यस्त्विति**। देहात्मादयो मिथ्यात्मानः, वस्तुतोऽनात्मत्वात्। प्रत्यगात्मा तु परमार्थात्मा, वस्तुत आत्मत्वात्, सत्यत्वाच्च। य इत्युपक्रमात् स इति शेषः। **सोऽसावपीति**। सोऽपीति वा पाठः। अविद्यया सर्वदा हत एव। अविद्यया परमार्थात्मानमपि हिंसन्त्येवाज्ञा इत्यर्थः। कथमविद्याहतत्वं परमार्थात्मनः 'नायं हन्ति न हन्यते' इत्युक्तलक्षणस्येत्यत आह— **विद्यमानेति**। विद्यमानफलं सत्त्वस्य फलमित्यर्थः। तदभावात्। यो हि निध्यादिः पदार्थः स्वगतधनादिना लोकं तर्पयति स निध्यादिर्विद्यत इत्युच्यते। यस्त्वन्यः पिशाचाद्याक्रान्तः स न लोकोपकारक इति विद्यमानोऽपि न विद्यत इत्येवोच्यते। तथा विद्यमानोऽपि स्वर्गादिरनुपलभ्यमानत्वादविद्यमान इव भात्येव। एवं विद्यमानोऽप्यात्मा सच्चिदानन्दमयः अविद्ययाऽऽवृतत्वादज्ञैर्नोपलभ्यते, नापि तेषां स्वानन्दानुभवं प्रदत्त इत्यविद्यमान इव निरर्थक एव। तथा चाज्ञाः विद्यमानस्य सच्चिदानन्दरूपस्याप्यात्मनोऽविद्यया हेतुना अविद्यमानत्वनिरर्थकत्वकल्पका इति कृत्वा सर्वेऽविद्वांसः आत्महन एव। आत्मत्वेन परिगृहीतस्य देहात्मनः परमार्थात्मनश्च दर्शितविधया नाशकत्वादिति भावः। **उभयथाऽपीति**। आत्मत्वेन परिगृहीतस्य देहात्मनः क्षयापादनरूपेण, परमार्थात्मनो नैरर्थक्यापादनरूपेण च मार्गद्वयेनेति भावः। **आत्मानमिति**। देहात्मानं प्रत्यगात्मानं चेति भावः। अपि चानात्मानं देहान्तःकरणादिकमात्मत्वेन परिगृह्य आत्मनः संसारित्वकल्पनम्, परमेश्वरे आत्मनीश्वरभिन्नजीवत्वकल्पनम्, ज्ञानसम्पादनयोग्यं मानुषादिजन्म प्राप्याप्यनादिकालादारभ्याज्ञानादात्मनि प्रसक्तस्य संसारस्य ज्ञानेनानिर्मूलनं चेत्येवमादीन्यात्महिंसनान्यज्ञानां विपरीतज्ञानां च सम्भवन्तीति बोध्यम्। **यथोक्तं फलं** मोक्षः।

यत्तु **रामानुजः** - न हिनस्ति रक्षति संसारान्मोचयति। ततः परां गतिमात्मानं यातीति, **तन्मन्दम्** - संसारान्मोचयतीत्यनेनैवात्मप्राप्तेः सिद्धत्वेन पौनरुक्त्यात्। न ह्यात्मा नाम कश्चिदप्राप्तः प्राप्यते, किन्तु प्राप्त एवात्मनि प्रकृतिसङ्गप्रयुक्तः संसारो नश्यतीति

१. 'सोऽसावपि' इति रा.पा.। २. 'न हन्ति' इति क्वचिन्न।

**प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः।
यः पश्यति तथाऽऽत्मानमकर्तारं स पश्यति॥ २९॥**

**सर्वभूतस्थमीश्वरं समं पश्यन् न हिनस्त्यात्मनाऽऽत्मानमित्युक्तम् , तदनुपपन्नं स्वगुणकर्मवैलक्षण्यभेदभिन्नेषु आत्मस्वित्येतदाशङ्क्याह—**प्रकृत्यैवेति। प्रकृत्या, **प्रकृतिर्भगवतो माया त्रिगुणात्मिका 'मायां तु प्रकृतिं विद्याद्' (श्वे. उ. ४.१०) इति मन्त्रवर्णात्। तया प्रकृत्यैव च, नान्येन, महदादिकार्यकारणाकारपरिणतया** कर्माणि **वाङ्मनःकायारभ्याणि** क्रियमाणानि **निर्वर्त्यमानानि** सर्वशः **सर्वप्रकारैः** यः पश्यति **उपलभते, तथाऽऽत्मानं क्षेत्रज्ञम्** अकर्तारं **सर्वोपाधिविवर्जितम्**[१] , स पश्यति **स परमार्थदर्शीत्यभिप्रायः। निर्गुणस्याकर्तुः निर्विशेषस्याकाशस्येव भेदे** [२]**प्रमाणानुपपत्तिरित्यर्थः॥ २९॥**

आनन्दगिरिकृतव्याख्या

**श्लोकान्तरं शङ्कोत्तरत्वेनावतारयितुमनुवदति—** सर्वेति। **प्रतिदेहं धर्माधर्मादिमत्त्वेनात्मनो भेदभानान्न सम्यग्दर्शनमिति शङ्कते—** तदिति। स्वगुणैः **सुखदुःखादिभिः,** स्वकर्मभिश्च **धर्माधर्माख्यैर्वैलक्षण्यात् प्रतिदेहं भेदे , तद्विशिष्टेष्वात्मसु कथं साम्येन दर्शनमित्येतदाशङ्क्य परिहरतीत्याह—** एतदिति। **प्रकृतिशब्दस्य स्वभाववाचित्वं व्यावर्तयति—**प्रकृतिरिति। **मायाशब्दस्य संवित्पर्यायत्वं प्रत्याह—** त्रिगुणेति। **उक्ता परस्य शक्तिर्मायेत्यत्र श्रुतिसम्मतिमाह—** मायां त्विति। **अन्येन केनचित् क्रियमाणानि न भवन्ति कर्माणीत्येवकारार्थमाह—** नान्येनेति। **किं तदन्यन्निषेध्यमित्युक्ते साङ्ख्याभिप्रेता प्रधानाख्या प्रकृतिरित्याह—** महदादीति। सर्वप्रकारत्वं **काम्यत्वनिषिद्धत्वादिना प्रकारबाहुल्यम्। आत्मानमुक्तविशेषणं यः पश्यतीति पूर्वेण सम्बन्धः। स पश्यतीत्ययुक्तम् , पुनरुक्तेरित्याशङ्क्याह —** स परमार्थेति। **आत्मनां प्रतिदेहं भिन्नत्वे तेषु समदर्शनमयुक्तमित्युक्तस्य कः समाधिरित्याशङ्क्याह—** निर्गुणस्येति ॥ २९॥

भाष्यार्कप्रकाशः

॥ २८॥

**प्रकृत्येति**। स्वेषामात्मनां गुणाः सत्त्वादयस्तत्प्रयुक्ता अन्ये च ज्ञानादयः। कर्माण्यदृष्टाख्यानि। तेषां वैलक्षण्यं वैषम्यं तत्प्रयुक्तो यो भेदस्तेन भिन्नेषु। भिन्ना एवात्मानः, परस्परभिन्नगुणकर्माश्रयत्वाद् घटादिवदिति प्रयोगः। एवं भिन्नेष्वात्मसु विषये एकेश्वरात्मदर्शनं पूर्वोक्तमयुक्तमेव। मिथ्याज्ञानरूपत्वादिति भावः। सर्वशः कर्माणि प्रकृत्यैव च क्रियमाणानि यः पश्यति स तदात्मानमकर्तारं पश्यति। तदेति पदच्छेदे यदेति शेषः। भगवतः प्रत्यगभिन्नपरमात्मनः सम्बन्धिनी। प्रकृत्यैवेत्येवकारार्थमाह—**नान्येनेति**। नात्मनेत्यर्थः। प्रकृत्यात्मभ्यामन्यस्याभावात्। ननु देहादिभिः कर्मणां क्रियमाणत्वात् कथं प्रकृत्येत्युक्तम्? अत आह—**महदिति**। महत्वबुद्धिः[३]। आदिपदान्मनइन्द्रियदेहग्रहणम्। महदादीनि च कार्यकरणानि च महदादिकार्यकरणानि तेषामाकारः स्वरूपं तेन परिणतया परिणामं प्राप्तया। कार्यकरणसङ्घातात्मिकयेति यावत्। स्थूलसूक्ष्मशरीरद्वयरूपप्रकृत्येति भावः। कर्माणि त्रिविधानि वाचिकमानसिककायिकभेदादित्यभिप्रेत्याह— **वागिति**। वाचा मनसा कायेन चारब्धुं शक्यानि योग्यानि वा वाङ्मनःकायारभ्याणि भाषणमननगमनादीनि। **सर्वप्रकारैरिति**। सर्वथेत्यर्थः। सर्वविधानीति यावत्। बहुभिर्ज्ञानसाधनमार्गैरिति वा। **उपलभते** जानाति। स पूर्वोक्तश्चासावात्मा तदात्मा[४], तं तदात्मानम्। कुतो ह्यकर्तृत्वम्? अत आह— **सर्वोपाधिविवर्जितमिति**। मनोवागाद्युपाधिप्रयुक्तत्वान्मननादिकर्तृत्वस्येति भावः। परमार्थं सत्यमात्मानं द्रष्टुं शीलमस्येति परमार्थदर्शी। आत्मविदिति यावत्। यथार्थदर्शीति वा। ये त्वात्मानं कर्तारं पश्यन्ति, ते तु विपरीतदर्शिन एवेति भावः। **निर्गुणस्य** सत्त्वादिगुणरहितस्य। अत एवास्य गुणप्रयुक्तो भेदो न सम्भवतीति भावः। **अकर्तुरिति**। अत एवास्य कर्मप्रयुक्तो भेदो न सम्भवतीति भावः। नापि स्वरूपप्रयुक्तो भेदोऽस्येत्याह—

१. 'यः पश्यति' इत्यनुषङ्गः। एतदर्थमेव 'तथाऽऽत्मान'मित्यत्र तथाशब्दः। एतेन तथाशब्दवैयर्थ्यं परिहृतम्। २. 'प्रमाणानुपपत्तेः'इति पा.। ३. 'महत्तत्त्वं बुद्धिः' इति पाठोऽपेक्षितः। ४. 'यः पश्यति तदात्मानम्' इति रा.पा.।

## यदा भूतपृथग्भावमेकस्थमनुपश्यति।
## तत एव च विस्तारं ब्रह्म सम्पद्यते तदा॥ ३०॥

**पुनरपि तदेव सम्यग्दर्शनं शब्दान्तरेण प्रपञ्चयति—** यदेति। यदा **यस्मिन् काले** भूतपृथग्भावं **भूतानां पृथग्भावं पृथक्त्वम् , एकस्मिन्नात्मनि स्थितम्** एकस्थम् अनुपश्यति [१]**शास्त्राचार्योपदेशमनु आत्मानं प्रत्यक्षत्वेन पश्यति— आत्मैवेदं सर्वमिति,** तत एव च **तस्मादेव च** विस्तारम् **उत्पत्तिं विकासम् 'आत्मतः प्राणः आत्मत आशा**

आनन्दगिरिकृतव्याख्या

**प्रकृतेर्विकाराणां च साङ्ख्यवत् पुरुषादन्यत्वप्रसक्तौ प्रत्याह—** पुनरपीति। **उपदेशजनितं प्रत्यक्षदर्शनमनुवदति—** आत्मैवेति। **भूतानां विकाराणां नानात्वं प्रकृत्या सहात्ममात्रतया प्रलीनं पश्यति। न हि भूतपृथक्त्वं सत्यां प्रकृतौ केवले परस्मिन् विलापयितुं शक्यत इत्यर्थः। परिपूर्णादात्मन एव प्रकृत्यादेर्विशेषान्तस्य स्वरूपलाभमुपलभ्य तन्मात्रतां पश्यतीत्याह—** तत एवेति। **उक्तमेव विस्तारं श्रुत्यवष्टम्भेन स्पष्टयति—**आत्मत इति। **ब्रह्मसम्पत्तिर्नाम पूर्णत्वेनाभिव्यक्तिः, अपूर्णत्वहेतोः सर्वस्यात्मसात्कृतत्वादित्याह—** ब्रह्मैवेति।

भाष्यार्कप्रकाशः

**निर्विशेषस्येति**। एवंविधस्यात्मनः आकाशस्येव भेदे **प्रमाणानुपपत्तेः** प्रमाणाभावादित्यर्थः। भेदे यत् प्रमाणं परैरुपन्यस्तमसच्छास्त्रादि-रूपम् , तस्य **अनुपपत्तेः** अयुक्तत्वादिति वाऽर्थः। तस्मान्नास्ति स्वगुणकर्मवैलक्षण्यभेदभिन्नत्वमात्मनः, प्राकृतगुणादीनामात्म-सम्बन्धित्वाभावात्।

[२]अत्र वैलक्षण्यशब्दस्य विशेषार्थकत्वमङ्गीकृत्य गुणानां कर्मणां वैलक्षण्यानां च भेदः इत्यपि व्याख्यानं सम्भवति, निर्विशेषस्येत्युपसंहारभाष्यानुसारात्। एवं निरुपाधिकस्यात्मनो गुणकर्मादिप्रयुक्तभेदाभावात् सिद्धमेकेश्वरत्वम्। न च पार्थक्येनोप-लभ्यमानानां गुणादीनां का गतिरिति वाच्यम् ; प्रकृतिरेव गतिरिति दर्शितत्वाद् भगवता। न च कर्मणामेव प्रकृत्याश्रयत्वं दर्शितमिति वाच्यम् ; गुणप्रयुक्तत्वात् कर्मणां गुणानां च प्रकृत्याश्रयत्वस्य भाष्ये दर्शितत्वात् - त्रिगुणात्मिका मायेति। विशेषाणां च गुणकर्म-प्रयुक्तत्वात् प्रकृत्याश्रयत्वमेव। स्वरूपप्रयुक्तविशेषाणां च प्रकृतिस्वरूपप्रयुक्तत्वात् प्रकृत्याश्रयत्वमेव। तथा च स्वगुणकर्मवैलक्षण्य-भेदभिन्नत्वं कार्यकरणसङ्घाताकारपरिणतप्रकृतेरेव, न तु मूलप्रकृतेस्तस्या अभिन्नत्वात्। नाप्यात्मनस्तस्य गुणादिरहितत्वात्। एवं च सति, अज्ञानान्मूढाः प्रकृतिं तद्धर्मांश्चात्मन्यध्यस्य सगुणः कर्ता सविशेषो बहुविध आत्मेति प्रतियन्ति द्वैतिनस्तार्किकादयः। यथा वा तेभ्योऽप्यतिमूढा देवो मनुष्यः पशुरात्मेति। तस्मात् स्थितमद्वैतम्॥ २९॥

**यदेति**। यदा, विद्वानिति शेषः। भूतपृथग्भावमेकस्थमनुपश्यति, तत एव च विस्तारं पश्यति, तदा ब्रह्म सम्पद्यते। एकस्थं यथा तथेति क्रियाविशेषणम्। एकस्थं भूतपृथग्भावमिति वा। भूतान्येव पृथग्भूतानि, न त्वात्मा। तच्च भूतपृथक्त्वमात्मन्यध्यस्तमविद्य-येत्येकस्थमित्युच्यते। सर्वेषां भूतानामात्मनि कल्पितत्वात् तद्गतं पृथक्त्वमात्मन्यध्यस्तमिति भावः। अनुपश्यतीत्यत्रोपसर्गार्थमाह— **शास्त्रेति**। अनुसृत्य पश्यत्यनुपश्यति। आत्मस्थभूतपृथग्भावदर्शनेनात्मदर्शनं सिद्धमित्यभिप्रेत्याह— **आत्मानं प्रत्यक्षत्वेन पश्यतीति**। घटस्थं जलमिति दर्शनस्य यथा जलाधिकरणघटदर्शनायत्तत्वं, तथा भूतपृथग्भाव आत्मस्थ इति दर्शनस्य पृथग्भूतभूताधिकरणात्म-साक्षात्कारायत्तत्वमिति भावः। कथमात्मनः प्रत्यक्षत्वेन दर्शनम्? अत आह— **आत्मैवेदं सर्वमिति**। 'आत्मैवेदं सर्वम्' इति श्रुत्युक्तविधया आत्मानं प्रत्यक्षत्वेन पश्यतीत्यर्थः। इदं रजतं शुक्तिरितिवदिदं सर्वमात्मेति बाधसामानाधिकरण्यमुपपद्यत इति भावः। **तस्मादेवेति** आत्मनः सकाशादेवेत्यर्थः। **उत्पत्तिविकासमिति**। भूतानामिति भावः। **विकाशो**ऽतिशयः। आत्मन एव सर्वभूतोत्पत्तिं प्रति हेतुत्वे श्रुतिमाह— आत्मतः प्राणः, भवतीति शेषः। आत्मतो मनो भवति। आत्मत आकाशो भवति। आत्मतः इति पञ्चम्यास्तसिः।

१. 'शास्त्राचार्योपदेशतो मत्वा आत्मप्रत्यक्षत्वेन पश्यति' इति पा.। यथास्थितपाठे— **आत्मानम्** आत्मानतिरिक्तम् , कल्पितस्याधिष्ठानानतिरिक्तत्वादिति योज्यम्। २. **अत्र** 'स्वगुणकर्मवैलक्षण्यभेदभिन्नेषु आत्मसु' इति भाष्ये इत्यर्थः।

**अनादित्वान्निर्गुणत्वात् परमात्माऽयमव्ययः।**
**शरीरस्थोऽपि कौन्तेय ! न करोति न लिप्यते॥ ३१॥**

**आत्मतः स्मर आत्मत आकाश आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभावावात्मतोऽन्नम्' (छा.उ. ७.२६.१) इत्येवमादिप्रकारैः विस्तारं यदा पश्यति,** ब्रह्म सम्पद्यते **ब्रह्मैव भवति** तदा **तस्मिन् काल इत्यर्थः॥ ३०॥**

**एकस्यात्मनः सर्वदेहात्मत्वे तद्दोषसम्बन्धे प्राप्त इदमुच्यते—** अनादीति। अनादित्वाद् **अनादेर्भावोऽनादित्वम् आदिः कारणं, तद् यस्य नास्ति तदनादि। यद्ध्यादिमत् तत् स्वेनात्मना व्येति, अयं तु अनादित्वात् [1]निरवयव इति**

आनन्दगिरिकृतव्याख्या

**ज्ञानसमानकालैव मुक्तिरिति सूचयति—** तदेति॥ ३०॥

**परिपूर्णत्वेन सर्वात्मत्वे प्राप्तमात्मनो देहादिगतेन कर्तृत्वादिना तद्वत्त्वम्। दृष्टं हि पवित्रस्यापि पञ्चगव्यादेरपवित्रसंसर्गात् तद्दोषेण [2]दुष्टत्वमित्याशङ्कामनूद्योत्तरत्वेन श्लोकमवतारयति—** एकस्येति। **अनादित्वमेव साधयति—** आदिरिति। **तथापि किं स्यादित्याशङ्क्य कार्यत्वकृतव्ययाभावः सिध्यतीत्याह—** यद्धीति। **तथापि गुणापकर्षद्वारको व्ययो भविष्यति, नेत्याह—** तथेति। **निरवयवत्वादेव**

भाष्यार्कप्रकाशः

आत्मन इत्यर्थः। **स्मरः** कामो भवति। आत्मतस्तेजो भवति। आत्मत आपो भवन्ति। आत्मत **आविर्भावतिरोभावौ** जन्मनाशौ भूतानामिति शेषः, भवतः। आत्मतोऽन्नं भवति। सर्वाणि भूतान्यात्मनः सकाशादेव भवन्ति। आत्मन्येव वर्तन्ते। आत्मन्येव लीयन्ते। यथा सर्पाभासो रज्जोरेव भवति, रज्जावेव वर्तते, रज्जावेव लीयते। तस्माद् यथा सर्पाभासो रज्जुरेव, तथा जगत् सर्वमात्मैव। इति यस्यात्मतत्त्वसाक्षात्कारः स **ब्रह्म सम्पद्यते** ब्रह्म प्राप्नोति। फलितमाह— **ब्रह्मैव भवतीति**। यद्वा ब्रह्मेति प्रथमान्तं सम्पद्यतिर्भवत्यर्थः। आत्मन एव ब्रह्मत्वादित्यभिप्रायः। 'ब्रह्मविद् ब्रह्मैव भवती'ति श्रुतेः।

यत्तु **रामानुजः** - भूतानां देवत्वमनुष्यत्वह्रस्वत्वदीर्घत्वादिलक्षणं पृथग्भावमेकस्थं प्रकृतिस्थं यदा पश्यति, नात्मस्थं, तत एव प्रकृतित एवोत्तरोत्तरपुत्रपौत्रादिभेदविस्तारं च यः पश्यति, स ब्रह्म सम्पद्यते अनवच्छिन्नं ज्ञानैकाकारमात्मानं प्राप्नोतीत्यर्थः इति, **तन्मन्दम्** - भूतानामेव प्रकृतित्वाद् देवत्वादिकं भूतगतमेव नात्मगतमित्यनुसन्धानेनेष्टसिद्धौ देवत्वादिकस्य प्रकृतिगतत्वानुसन्धानेन फलाभावात्। तथा आधुनिकप्रपञ्चस्य प्रकृतिपरिणामत्वानुसन्धानेनैवेष्टसिद्धौ उत्तरोत्तरपुत्रपौत्रादिप्रपञ्चप्रकृतिपरिणामत्वानुसन्धानेन फलाभावाच्च। स्वमते अणोरात्मनः परिच्छिन्नत्वेनापरिच्छिन्नत्वासम्भवाच्च। संसारदशायामणुत्वेऽपि मुक्तौ विभुत्वमिति वादेऽणुत्व-परित्यागविभुत्वस्वीकाररूपविकारप्रसङ्गादात्मनोऽनित्यत्वप्रसङ्गाच्च। यदि तु संसारदशायामात्मपरिच्छेदकस्य बुद्धिरूपोपाधेर्मुक्तौ नष्टत्वाद् विभुरेवात्मेत्यभ्युपगम्यते, तर्हि औपाधिकमेवाणुत्वं जीवस्य, न स्वाभाविकमिति कृत्वा विभुरेव जीवः इत्यभ्युपगच्छ। एवं विभुत्वे सिद्धे ईश्वरत्वं च सिद्धमेव। सर्वव्यापित्वस्येश्वरलक्षणत्वात्। न च - जीवो नेश्वरः, किन्तु ईश्वरवद् विभुरिति - वाच्यम्; एकस्यैव व्यापित्वं सम्भवति, नानेकेषामिति। अनेकसत्त्वे नैकस्यापि सर्वव्यापित्वं सम्भवति, परस्परव्याप्त्यभावात् परस्परस्येति॥ ३०॥

**अनादित्वादिति। सर्वदेहात्मत्वे** सर्वेषां देहानां भूतानामात्मत्वे अन्तरात्मत्वे सति, तदन्तःस्थितौ सत्यामित्यर्थः। तेषां भूतानां ये दोषाः सुखदुःखादिविकारास्तेषां सम्बन्धे आत्मनः प्राप्ते सति अनादित्वादितीदं पद्यमुच्यते। **आदिमत्** कार्यमित्यर्थः। तद् घटादिरूपं कार्यं स्वेनात्मना स्वस्वरूपेण **व्येति** विकारमाप्नोति, घटादेः कपालत्वादिप्राप्तिरूपविकारदर्शनादिति भावः। यदादिमत् तद् व्येति सावयवत्वाद् यथा घटः। अनादिमानात्मा तु न व्येति, निरवयवत्वात्। आदिमत्त्वसावयवत्वविकारित्वानां न क्वापि वैयधिकरण्यलक्षणो व्यभिचारः। यत् सावयवं वस्तु तस्यावयवसङ्कोचविकासाद्यात्मकः स्वरूपविकारः स्यात् , स कथं निरवयवस्य? यच्च सावयवं वस्तु

१. अनादित्वेन निरवयवत्वमर्थादाक्षिप्यते, सावयवस्य सादित्वनियमेनानादित्वानुपपत्तेरिति भावः। तेन स्वावयवहान्या स्वीयगुणादिहान्या वा व्ययः प्रसिद्धो ऽत्रानादित्वान्निर्गुणत्वादिति हेतूक्त्याऽऽत्मनो निषिध्यते। (द्र.भ.गी. २-१७ पृ.६३)। २. 'न हि पूतं स्याद् गोक्षीरं श्वदृतौ धृतम्' इति न्यायादिति भावः।

भाष्यार्कप्रकाशः

तस्य द्व्यणुकत्र्यणुकादिक्रमेणोत्पत्तिः स्यात् , सा चोत्पत्तिः कथं निरवयवस्य? तस्मान्निरवयवस्यात्मनो न कार्यत्वं, नापि विकारित्वम् , सावयवस्यैव देहादेस्तदुभयमपीति कृत्वा अनादित्वादित्यनेन निरवयवत्वं तत्पूर्वकं निर्विकारत्वं चात्मनः सिद्धमित्यभिप्रायः। एतेनाकाशादिलक्षणं यत्किञ्चिज्जायमानं वस्तु तत् सर्वं सावयवमेव, सादित्वादिति सिद्धम्। सूक्ष्मावस्थावस्थितद्रव्यस्य स्थूलावस्था-प्राप्तिरेवोत्पत्तिर्बीजाङ्कुरवन्मृत्पिण्डघटवच्च। सा चावयवविकासं विना न घटत इति कृत्वा यत् कार्यं तत् सावयवमिति व्याप्तेर्न क्वापि व्यभिचारः।

**ननु** कार्येऽप्याकाशे निरवयवत्वदर्शनादस्ति व्यभिचारः। उक्तं हि भाष्यकृद्भिरेव—आकाशवन्निरवयवत्वादिति चेत् , **मैवम्** ; निर्धान्ये घटे यावानाकाशोऽस्ति तावानाकाशस्तस्मिन्नेव सधान्ये घटे न दृश्यते, तस्मिन्नेव पुनर्धान्यपरिपूर्णे घटे नैवोपलभ्यते कियानप्याकाशः। अयं चोपलभ्यमानो घटाकाशस्य सङ्कोचनाशादिराकाशावयवनाशं विना न घटते। तस्मात् सावयव एवाकाशः। एवं मठाकाशोऽपि सावयव एव। निर्जने मठे यावनाकाशस्तावान् न हि सजने तस्मिन्नेव मठे उपलभ्यते। तथा महाकाशोऽपि सावयव एव। गृहादिरहिते बहिर्यावानाकाश उपलभ्यते तत्रैव बहिर्गृहादिनिर्माणे सति तावत आकाशस्यानुपलम्भात्। न चावकाशस्यैव वृद्धिक्षयौ नाकाशस्येति वाच्यम् ; अवकाशातिरिक्तस्याकाशस्यैवादर्शनात्। एवं सावयवत्वादेव 'आत्मन आकाशः सम्भूतः' इति सम्भवश्रवणमाकाशस्योपपद्यते। न च भाष्यविरोधः, मतान्तराभिप्रायेण तद्वचनस्योपपत्तेः। कथमन्यथा घटादिभिराकाशस्य परिच्छेदः स्यात्? घटादयो हि स्वावयवैराकाशमाक्रम्य तत्राकाशबुद्धिं निरस्य घटादिबुद्धिं जनयन्ति। अत एव हि घटादीनामाकाश-परिच्छेदकत्वम्। न चैवमात्मनोऽप्यहङ्कारादिपरिच्छेदसत्त्वात् सावयवत्वमेवेति वाच्यम् ; यदि सर्पेण रज्जोः परिच्छेदः स्यात् , तर्हि अहङ्कारादिभिः स्यादात्मनोऽपि परिच्छेदः। न हि सर्प इव कालत्रयेऽप्यस्त्यात्मन्यहङ्कारादिकं जगत् , येन जगता परिच्छेदः स्यादात्मनः। अत एव हि जगतो मिथ्यात्वं ब्रवीति श्रुतिः – 'अतोऽन्यदार्तम्' इति।

न हि मिथ्यावस्तुना सत्यवस्तुनः कोऽपि परिच्छेदादिः सम्भवति, मृगतृष्णोदकेन भूमेः पङ्किलत्वादर्शनात्। अत एव 'एकमेवाद्वितीयं ब्रह्मे'ति श्रुतिरुपपद्यते। तस्मादपरिच्छिन्नो निरवयवोऽनादिरविकार्येवात्मा। गगनादिकं तु परिच्छिन्नं सावयवं सादि सविकारं च। न च महाकाशोऽपरिच्छिन्न एवेति वाच्यम् ; घटमठादिभिः परिच्छेदाभावेऽपि महाकाशस्य ब्रह्माण्डकर्परपरिच्छेदो ऽस्त्येव। भूतलमारभ्य ब्रह्माण्डोर्ध्वकर्परपर्यन्तं व्याप्य वर्तमानो ह्याकाशो महाकाशः इत्युच्यते। तस्माद् भूतलब्रह्माण्डोर्ध्वकर्पराभ्यां परिच्छिन्न एव महाकाशः। एवं परिच्छिन्नत्वादेव सावयवः। एवं सावयवत्वादेव सादिः। एवं सादित्वादेव सविकारश्च। अत एव दृश्यत्वमनात्मत्वं चाकाशस्य। अन्यथा आकाश एव स्यादात्मा **आधुनिकाचलमतरी**त्येति सङ्क्षेपः।

**नन्वेवं** सावयवत्वे सत्याकाशस्य घटादिभिः संयोगः स्यादेव तस्येति कथमुक्तमाकाशस्य न घटादिसंयोगः इति? कथं वा घटसंयुक्त आकाश इति, आकाशसंयुक्तो वा घट इति व्यवहाराभावः, भूतलं घटसंयुक्तमितिवदिति चेद्? **उच्यते**— आकाशस्य सूक्ष्मत्वात् तदवयवा अप्यतिसूक्ष्माः इति तेषामाकाशावयवानां घटावयवसंयोगो दुर्विज्ञेयः। एवमाकाशावयवानां तत्संयोगस्य च दुर्विज्ञेयत्वादेव सावयव आकाशः इति, घटसंयुक्त आकाशः इति वा न लोकव्यवहारः। अमुमेव लोकव्यवहारमाश्रित्य आकाशवन्निरवयवत्वादित्युक्त**माचार्यैः**। लोकप्रसिद्धं हि दृष्टान्ततया वक्तव्यम्। शास्त्रदृष्ट्या तु सावयव एवाकाशः। घटादिभिस्तस्य परिच्छेददर्शनादिति।

नन्वेवं निरवयवस्यात्मनः क्षेत्रसंयोगो नास्तीत्यत्र [१]किं दृष्टान्तम्? न हि दृष्टान्तशून्योऽर्थो ग्राह्यः। न ह्यात्मनोऽन्यन्निरवयवं किञ्चिदस्ति, यस्य दृष्टान्तत्वेन स्वीकार्यत्वं स्यादिति चेत् , मैवम् ; अन्वयदृष्टान्ताभावेऽपि व्यतिरेकदृष्टान्तसत्त्वेन तदर्थस्य ग्राह्यत्वात्। आत्मनः क्षेत्रसंयोगो नास्ति, निरवयवत्वाद् , व्यतिरेकेण घटादिवदिति प्रयोगसिद्धेः। एवमन्वयदृष्टान्ताभावादेव 'न तत्समो ऽस्त्यभ्यधिकः कुतोऽन्यः' इति श्रुत्युपपत्तिः[स्मृत्युपपत्तिः]। ननु स्वरूपतो विकाराभावेऽप्यात्मनो गुणतो विकारः स्यादत आह— **निर्गुणत्वादिति**। नीलगुणवतश्चूतफलादेः परिणामावस्थायां नीलगुणनाशपूर्वकपीतगुणाविर्भावरूपगुणविकारो दृश्यते। तथा

१. 'को दृष्टान्तः' इति पाठो युक्तः।

**कृत्वा न व्येति; तथा निर्गुणत्वात् , सगुणो हि गुणव्ययाद् व्येति, अयं तु निर्गुणत्वान्न व्येति; इति परमात्माऽयम्** अव्ययः **नास्य व्ययो विद्यत इत्यव्ययः। यत एवमतः** शरीरस्थोऽपि, **शरीरेष्वात्मनः उपलब्धिर्भवतीति शरीरस्थः उच्यते; तथापि न करोति। तदकरणादेव तत्फलेन न लिप्यते। यो हि कर्ता स कर्मफलेन लिप्यते। अयं त्वकर्ता, अतो न फलेन लिप्यत इत्यर्थः।**[1]

[आत्मनः आविद्यककर्तृत्वभोक्तृत्वयोर्निरूपणम्]

**कः पुनर्देहेषु करोति, लिप्यते च? यदि तावदन्यः परमात्मनो देही करोति लिप्यते च, तत इदमनुपपन्नमुक्तं**

आनन्दगिरिकृतव्याख्या

**अवयवद्वारकस्य, निर्गुणत्वाद् गुणद्वारकस्य च व्ययस्याभावेऽपि स्वभावतो व्ययः स्यादित्याशङ्क्याह—** परमात्मेति। **परमात्मनः स्वतः परतो वा व्ययाभावे फलितमाह—** यत इति। [2]**स्वमहिमप्रतिष्ठस्य कथं शरीरस्थत्वम्? तत्राह—** शरीरेष्विति। **सर्वगतत्वेन सर्वात्मत्वेन च देहादौ स्थितोऽपि स्वतो देहाद्यात्मना वा न करोति कूटस्थत्वाद् , देहादेश्च कल्पितत्वादित्यर्थः। कर्तृत्वाभावेऽपि भोक्तृत्वं स्यादित्याशङ्क्याह—** तदकरणादिति। **तदेवोपपादयति—** यो हीति।

**परस्य कर्तृत्वादेरभावे कस्य तदिष्टमिति पृच्छति—** कः पुनरिति। **परस्मादन्यस्य कस्यचिज्जीवस्य कर्तृत्वादीत्याशङ्कामनुवदति—** यदीति। **तस्मिन् पक्षे प्रक्रमभङ्गः स्यादिति दूषयति—** तत इति। **ईश्वरातिरिक्तजीवानङ्गीकारान्नोपक्रमविरोधोऽस्तीति शङ्कते—**

भाष्यार्कप्रकाशः

काठिन्यगुणतस्तण्डुलसञ्चयस्य पाकवशात् काठिन्यगुणनाशपूर्वकमृदुत्वगुणाविर्भावरूपगुणविकारो दृश्यते। तथा निद्रादशायां तमोगुणवतोऽन्तःकरणस्य प्रबोधे तमोगुणनाशपूर्वकरजोगुणाविर्भावरूपगुणविकारो दृश्यते। एवं यस्य कस्यापि गुणस्य क्षेत्रज्ञेऽभावान्न विकारित्वप्रसङ्गस्तस्येति भावः। **व्यय इति**। विकारः इत्यर्थः। अयं परमात्माऽव्ययः, अनादित्वान्निर्गुणत्वाच्च। यद्धि सादि सगुणं च तद् विक्रियते, यथा घटः इति। **यद्वा** अयं परमात्मा स्वरूपतोऽविक्रियः, अनादित्वाद् , व्यतिरेकेण घटवत्। अयं परमात्मा गुणतश्चाव्ययः, निर्गुणत्वाद् , घटवदिति। यत एवमव्ययः परमात्मा तत इति शेषः। **शरीरस्थ इति**। ननु सर्वत्रावस्थितस्यात्मनः कथं शरीर एव स्थितिरत आह— **शरीरेष्विति। उपलब्धिः** साक्षात्कारः। बुद्धौ खलु विदुषामात्मसाक्षात्कारः। सा च बुद्धिः सूक्ष्मशरीरभूता स्थूलशरीरस्था चेति बुद्धिस्थस्यात्मनः शरीरस्थत्वव्यपदेश इति भावः। केन न लिप्यते? अत आह— **तत्फलेनेति। न लिप्यते** न सम्बध्यत इत्यर्थः। कर्तुरेव कर्मफलसङ्गरूपो लेपः, न त्वकर्तुः। न ह्येकस्मिन् भोजनादिकर्म कुर्वति सति तस्मादन्योऽकर्ता तत्फलेन क्षुधापनयनादिना लिप्यते। तस्मादकर्तुरात्मनो न कर्मफललेपः।

एवं कर्मफललेपाभावादेव निर्विकारत्वमात्मनः। न हि कर्मफलमननुभवतो भवेद् विकारित्वं क्वापि, सुखदुःखकामक्रोधजन्मवृद्ध्यादीनां कर्मफलानामनुभवस्यैव विकारत्वात्। तस्मादविकारित्वादात्मनो न कर्मकर्तृत्वं तत्फलभोक्तृत्वं वा सम्भवति, विरोधात्। ततश्चाकर्तुरविकारस्यात्मनः शरीरादिदोषसम्बन्धप्रसक्तिर्नास्ति। सति दोषसम्बन्धे आत्मनः सविकारत्वप्रसङ्गात्। सति चाकर्तृत्वे आत्मनः शरीरादिकर्मकृतदोषसम्बन्धायोगाच्च। तस्मादकर्ताऽभोक्ता निर्विकारो निर्गुणोऽनादिरेकः आत्मेति सिद्धान्तः।

ननु यदि देहस्थः आत्मा न करोति, लिप्यते न च, तर्हि कोऽन्यो देहेऽस्मिन्नहं कर्ता सुखादिभोक्ता चेत्यभिमन्यमानः? इत्याक्षिपति— **कः पुनरिति**। किं देहेऽकर्तुरभोक्तुश्चात्मनः कश्चिदन्यो देही विद्यते, उत न? आद्ये - 'क्षेत्रज्ञं चापि मां विद्धी'-त्यादिशास्त्रविरोधः। द्वितीये तु - अनुभवविरोध इति भावः। तस्मात् पर ईश्वरादन्यः संसारी जीवो नास्तीति न वाच्यम् ; ईश्वरस्य संसारित्वायोगात्। उपलभ्यमानसंसारस्य दुरपलापत्वेनेश्वराद् भिन्नस्य संसारिणो जीवस्यावश्यमभ्युपगन्तव्यत्वाच्चेति भावः। एवं

---

१. अयं परमात्मा शरीरस्थोऽपि अव्ययः, अनादित्वात् , निर्गुणत्वात्। (लौकिकक्रियां) न करोति, (चिन्तासंतापादिना) न लिप्यते च। अथवा श्रुतितात्पर्यापरिज्ञानप्राप्तमद्वैतं निराकर्तुमयं श्लोकः। अयं परमात्मा शरीरस्थो(=जीवो)ऽपि न, अनादित्वात् , निर्गुणत्वात्। (अयं परमात्मा सर्वं) करोति, (अतः) न लिप्यते। इति माध्वप्रदर्शिता श्लोकयोजना। अत्रापदार्थव्याख्यानम् , नञोऽयथाश्रुतान्वयश्च स्पष्टः। २.'स भगवः कस्मिन् प्रतिष्ठित इति, स्वे महिम्नि' इति श्रुतेरिति भावः।

**क्षेत्रज्ञेश्वरैकत्वम् - क्षेत्रज्ञं चापि मां विद्धीत्यादि। अथ नास्तीश्वरादन्यो देही, कः करोति लिप्यते चेति वाच्यम् , परो वा नास्तीति। सर्वथा दुर्विज्ञेयं दुर्वाच्यं चेति भगवत्प्रोक्तमौपनिषदं दर्शनं परित्यक्तं** वैशेषिकैः, [१]साङ्ख्यार्हतबौद्धैश्च। **तत्रायं परिहारो भगवता स्वेनैवोक्तः 'स्वभावस्तु प्रवर्तते' (भ.गी.५.१४) इति। अविद्यामात्रस्वभावो हि करोति लिप्यते**

आनन्दगिरिकृतव्याख्या

अथेति। **तर्हि प्रतीतकर्तृत्वादेरधिकरणं वक्तव्यमिति पूर्ववाद्याह—** क इति। **परस्यैव कर्तृत्वाद्याधारत्वान्नास्ति वक्तव्यमित्याशङ्क्याह—** परो वेति। नास्तीति **वाच्यमिति पूर्वेण सम्बन्धः। न हि कर्तृत्वादिभाक्त्वे परस्यास्मदादिवदीश्वरत्वमिति भावः। परस्यान्यस्य वा कर्तृत्वादावविशिष्टे 'शरीरस्थोऽपी'त्यादिश्रुतिमूलमपि ज्ञातुं वक्तुं चाशक्यत्वात् त्याज्यमेवेति परीक्षकसम्मत्योपसंहरति—**सर्वथेति। **परस्य वस्तुतोऽकर्तुरभोक्तुश्चाविद्यया तदारोपाद् आदेयमेव भगवन्मतमिति परिहरति—** तत्रेति। **तमेव परिहारं प्रपञ्चयति—** अविद्येति।

भाष्यार्कप्रकाशः

पूर्वपक्षयद्भिर्वैशेषिकैः साङ्ख्यैर्हतबौद्धैश्च भगवत्प्रोक्तमौपनिषदं दर्शनं परित्यक्तमित्यन्वयः। वैशेषिकाः सगुणमीश्वराद्भिन्नं चात्मानं वदन्ति। साङ्ख्यास्तु नास्त्येश्वरः इति वदन्ति। दैवादज्ञानाद्वा हताः नाशिताः पुरुषार्थाद् भ्रंशिता बौद्धास्तु देहमेवात्मानं वदन्ति। तस्मादमीभिः श्रीकृष्णेन सर्वज्ञेश्वरेण भ्रमप्रमादादिदोषगन्धशून्येन प्रोक्तम् उपनिषत्सम्मतं च **दर्शनं** ज्ञानं मतमिति वा, जीवेश्वराभेद-रूपमिति भावः; परित्यक्तमेव। दर्शितपूर्वपक्षस्य स्वयं समाधानमनुपलभमानत्वादिति भावः। किमिति परित्यक्तम्? अत आह— **सर्वथेति**। दर्शनमिति [२]कर्तुरत्रान्वयः। दर्शनं सर्वथा **दुर्विज्ञेयं** विज्ञातुमशक्यम्। ननु स्वदुर्विज्ञेयत्वमात्रेण किं दर्शनं दुष्यतीत्यत आह— **दुर्वाच्यं चेति**। वक्तुमशक्यमित्यर्थः। अस्मिन् दर्शने दर्शितपूर्वपक्षस्य समाधानमस्माकं स्वयं दुर्विज्ञेयं, समाधाता चान्यो नास्ति, समाधानस्य दुर्वचत्वात्। अत एव दर्शनमपि दुर्विज्ञेयं दुर्वाच्यं चेति भावः। **यद्वा** परो नास्तीति न वाच्यम्। ननु कुतो न वाच्यम् ; सुवचमेव परो नास्तीत्यत आह— **सर्वथेति**। अस्य समाधानमिति शेषः। दर्शितपूर्वपक्षस्य समाधानमस्माकं दुर्विज्ञेयम् अन्यस्य च दुर्वाच्यं च। इति मत्वेति शेषः। वैशेषिकादिभिर्दर्शनं परित्यक्तमित्यन्वयः।

ननु किं वैशेषिकाद्यभिमतरीत्या नास्त्यत्र परिहारः अत आह— **तत्रेति**। उक्तपूर्वपक्ष इत्यर्थः। परिहारमेव भगवदुक्तं दर्शयति— **स्वभाव इति**। तमेव विवृणोति— **अविद्येति**। अविद्या अज्ञानम् , तदेवाविद्यामात्रम् , तदेव स्वभावोऽविद्यामात्रस्वभावः। अविद्यामात्रमित्यर्थः। स्वभावशब्दस्येहाविद्येत्यर्थ इति भावः। परमात्मनः स्वभावभूतत्वादविद्यायाः। करोति कर्म, लिप्यते च तत्फलेनेति हेतोरहं कर्ताऽहं भोक्तेति व्यवहारो भवति। कर्ताऽहं भोक्ताऽहमित्यनुभवसिद्धः कर्तृत्वभोक्तृत्वलक्षणः संसारः परमात्मनो ऽविद्याकृत एवेत्यर्थः। स्वभावस्त्विति तुशब्दार्थमाह— **न त्विति**। तदिति कर्तृत्वं भोक्तृत्वं चेत्यर्थः। न त्वस्तीत्यन्वयः।

अयं भावः - किमविद्यावस्थायां देहे कः करोति लिप्यते चेति त्वं पृच्छसि? उत विद्यावस्थायाम्? आद्ये - अविद्यया आत्मनि कल्पितस्य साभासाहङ्कारस्य कर्तुर्भोक्तुश्च सत्त्वाद् यावदविद्यं जीवेश्वरभेदस्यास्माभिः स्वीकृतत्वादस्त्येवेश्वराद् भिन्नो जीवः संसारी आत्माहङ्कारान्योन्याध्यासलक्षणः कर्ताऽहं भोक्ताऽहमित्यभिमन्यमानः। तदाश्रयश्च सर्वोऽपि व्यवहार इति नाज्ञानुभवविरोधः। न हि प्राज्ञस्य कर्ताऽहं भोक्तेत्यनुभवः। किन्त्वज्ञानामेव। अज्ञविषया ह्यविद्यावस्था। अस्यां चावस्थायां भगवता न जीवेश्वरैक्यमुच्यत इति न गीताशास्त्रस्याविद्वदनुभवस्य च परस्परं विरोधः, विभिन्नविषयत्वात्। क्षेत्रज्ञं चापीत्यादिकं हि विद्यादशावस्थितं जीवेश्वराद्वैतं ब्रूते। तस्मादविद्यावस्थायां देहे देही करोति, लिप्यते च। द्वितीये - न कोऽपि करोति लिप्यते च, विद्यया अविद्यायां नाशितायां तत्कृताध्या-सस्यापि नाशादसंसारीश्वर एव जीव इति। कर्तारं भोक्तारं च अहङ्कारमात्मन्यध्यस्य हि कर्ताऽहं भोक्ताऽहमित्यभिमन्यतेऽज्ञः। अध्यासाभावे कथं कर्तृत्वादिकम्? सुषुप्तौ जीवस्याध्यासाभावेन संसारादर्शनात्। अयं चाध्यासोऽज्ञानमूल इति नष्टेऽज्ञाने ज्ञानेन, कथमध्यासः स्यात्? तस्मान्नास्ति विद्यावस्थायां कर्ता भोक्ता चेश्वरादन्यो जीवः। किन्त्वकर्त्रभोक्त्रीश्वर एव जीवः। न चानुभवविरोधः, कर्ताऽहं भोक्तेति विद्वदनुभवाभावात्। न चाविद्वदनुभवविरोधः, अविद्यादशाविषयत्वादविद्वदनुभवस्य। न हि विभिन्नविषययोर्बाधः,

१. 'साङ्ख्यैर्हतबौद्धैश्च' इति रा.पा.। २. कर्तुरिति पाठो न युक्तः। विशेष्यमित्यर्थोऽपेक्षितः।

**इति व्यवहारो भवति, न तु परमार्थत एकस्मिन् परमात्मनि तदस्ति। [1]अत एतस्मिन् परमार्थसाङ्ख्यदर्शने स्थितानां ज्ञाननिष्ठानां परमहंसपरिव्राजकानां तिरस्कृताविद्याव्यवहाराणां कर्माधिकारो नास्तीति तत्रतत्र दर्शितं भगवता॥ ३१॥**

आनन्दगिरिकृतव्याख्या

**व्यावहारिके कर्तृत्वादाविष्टे पारमार्थिकमेव किं नेष्यते? तत्राह—** न त्विति। **वास्तवकर्तृत्वाद्यभावे लिङ्गमुपन्यस्यति—** अत इति॥ ३१॥

भाष्यार्कप्रकाशः

विद्वदनुभव एव विद्यादशाविषयः, विद्याविद्यादशयोर्भेदात्। विदुषां चाविद्यादशाऽयोगादविदुषां च विद्यादशाऽयोगात्। इमामेव दशामधिकृत्य 'क्षेत्रज्ञं चापि मां विद्धी'ति गीताशास्त्रं प्रवर्तितं भगवता। तस्मात् परमार्थतोऽसंसारीश्वर एव जीवः। अज्ञानात्तु जीवः संसारी भिन्न ईश्वरादिति मूढानां व्यवहारः। यथा परमार्थतो नीरूपमेव गगनम्; बालानां त्वज्ञानान्नीलं गगनमिति व्यवहार इति।

**अत एवेति**। परमार्थत आत्मनि कर्तृत्वाद्यभावादेवेत्यर्थः। **एतस्मिन्निति**। प्रकृतगीताशास्त्रोक्त इत्यर्थः। **परमार्थसाङ्ख्यदर्शन** इति। साङ्ख्यं द्विविधं परमार्थसाङ्ख्यमपरमार्थसाङ्ख्यं चेति। कपिलेन देवहूतये प्रोक्तं तत्त्वमसीत्याद्युपनिषत्सिद्धं च जीवेश्वराभेद-विषयमात्मज्ञानं परमार्थसाङ्ख्यम्। तदेवेहाप्युच्यते। तत्त्वसङ्ख्यानात्मकं निरीश्वरं साङ्ख्यं त्वपरमार्थम्। तत्र यत् परमार्थसाङ्ख्यरूपं दर्शनं मतमद्वैतमिति यावत्। ज्ञानमिति वा। तत्र स्थितानामत एव **ज्ञाननिष्ठानां** ज्ञाने ब्रह्मात्मदर्शन एव निष्ठा नितरां सर्वदा स्थितिर्येषां तेषाम्, अत एव तिरस्कृतः सर्वोऽपि कर्तृत्वादिलक्षणोऽविद्याव्यवहारो यैस्तेषां विद्यया नाशितत्वादविद्यायास्तत्प्रयुक्तस्य सर्व-व्यवहारस्यापि तिरस्कारो लोप इति यावत्। **परमहंसपरिव्राजकानां** कुटीचकबहूदकहंसपरमहंसाख्यचतुर्विधपरिव्राजकमध्ये तुरीयाणां संन्यासिनामित्यर्थः। [2]**एतेन** कुटीचकादीनां दण्डकमण्डलुतर्पणादिलक्षणं किञ्चित् कर्मास्तीति **सूचितम्**। **कर्माधिकारो नास्तीति**। अनेनासंन्यस्तानां श्रौतस्मार्तविहितकर्मपरित्यागो नरकावह इति सूचितम्, तेषां तत्राधिकारसत्त्वात्। येषां यत्राधिकारः, तैस्तत्रावश्यं प्रवर्तितव्यम्, अन्यथा नरकादिदुःखं स्यात्। यथा येषां मन्त्रिभृत्यादीनां यत्र मन्त्रसेवादौ राजविहिते कर्मण्यधिकारः, तैस्तत्र प्रवर्तितव्यम्, अन्यथा राजदण्डदुःखं स्यात्, तद्वदिति भावः। **भगवतेति**। य एव प्रवृत्तिलक्षणं निवृत्तिलक्षणं च मार्गद्वयं निर्माय, तच्च वेदेन प्रकाश्य, तदनुविधायिभ्यो भक्तेभ्योऽभ्युदयं निःश्रेयसं च फलं वितरन्, तदननुविधायिनो नरकपातनादिना शिक्षयन् सर्वेश्वरः सर्वनियन्ता सर्वज्ञः सर्वविच्च भवति, यस्माद् भीत्यैव 'भीषाऽस्माद्वातः पवते' इत्यादिश्रुत्युक्तविधया वातसूर्यचन्द्राग्नीन्द्रब्रह्मादयः स्वं स्वमधिकारं निर्वर्तयन्ति, यस्माद् भीत्या मृत्युरपि धावति, तेन भगवता दर्शितमिदं शास्त्रं केनापि नातिवर्तनीयमित्यभिप्रायाद् भगवता दर्शितमित्युक्तम्। **तत्रतत्रेति**। 'वेदाविनाशिनम्' इत्यादिप्रकरणेष्वित्यर्थः।

यत्तु **रामानुजः** - अयं परमात्मा देहान्निष्कृष्टस्वभावेन निरूपितः शरीरस्थोऽप्यनादित्वादनारभ्यत्वादव्ययो व्ययरहितः। निर्गुणत्वात् सत्त्वादिगुणरहितत्वान्न करोति, न लिप्यते देहस्वभावैर्न लिप्यते इति, **तत्तुच्छम्** - देहाद्यपेक्षयैवास्य परमात्मत्वम्, न त्वीश्वरापेक्षया। प्रत्युत ईश्वर एव जीवात्मापेक्षया परमात्मेति धिगस्य दर्शनम्। किं भगवतो व्यासस्य जीवात्मानं निरूपयिष्यतः प्रत्यगात्मेति जीवात्मेति वा पदं नास्फुरद् येन परमात्मेत्यसकृद् ब्रूयादपरमात्मानम्? किं वा प्रत्यगात्मेति जीवात्मेति वा कथने जीवस्य देहाद्यपेक्षया न सिध्यत्युत्कर्षः? देहापेक्षया जीवस्योत्कृष्टत्वं बौद्धातिरिक्तसर्वजनविदितमेवेति किं तत्प्रतिपादनेन फलं वा? न करोतीति पदसन्निधानसामर्थ्याद् न लिप्यत इत्यस्य कर्मफललेपेऽर्थे सिद्धे तं विहाय देहस्वभावैरिति कथं स्वकपोलकल्पितम्? देहान्निष्कृष्टस्वभावस्य देहस्वभावालेपः सिद्ध एवेति किमर्थं तद्वचनम्? न हि गृहस्थस्य गृहस्वभावलेपः प्राप्नोति, येन शरीरस्थस्य शरीरस्वभावलेपः प्राप्नोतीति तत्प्रतिषेधाय देहस्वभावैर्न लिप्यत इति वक्तव्यं स्यात्। न ह्यप्राप्तप्रतिषेधो न्याय्यः।

यच्च **वेदान्तदेशिकः** - ज्ञानसङ्कोचरूपव्ययस्य ज्ञानादिगुणानां देहादिप्रेरणरूपकर्तृत्वस्य चात्मनि सत्त्वादिति, **तदप्ययुक्तम्** - ज्ञानसङ्कोचादिसत्त्वेऽविकारत्वहानेः। न हि स्वरूपत एव विकाराभाव आत्मनः, न तु धर्मत इति सङ्कोचः कल्पयितुमुचितः। तथा सति

---

१. 'अत एव' इति रा पा.। २. चतुर्विधपरिव्राजकमध्ये परमहंसपरिव्राजकानां विशिष्य कर्माधिकाराभावप्रतिपादनेनेत्यर्थः। सूचितमिति। विशेषनिषेधस्य शेषाभ्यनुज्ञानार्थतान्यायेनेति भावः।

**यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते।**
**सर्वत्रावस्थितो देहे तथाऽऽत्मा नोपलिप्यते॥ ३२॥**

**किमिव न करोति, न लिप्यत इत्यत्र दृष्टान्तमाह—** यथा सर्वगतमिति। **यथा** सर्वगतं **व्याप्यपि सत्** [1]सौक्ष्म्यात् **सूक्ष्मभावाद्** आकाशं **खं** नोपलिप्यते **न सम्बध्यते, सर्वत्रावस्थितो देहे तथाऽऽत्मा नोपलिप्यते॥ ३२॥**

आनन्दगिरिकृतव्याख्या

सूक्ष्मभावात् **अप्रतिहतस्वभावत्वादित्यर्थः**। न सम्बध्यते **पङ्कादिभिरिति शेषः॥ ३२॥**

भाष्यार्कप्रकाशः

पक्षेणाविकारत्वमिव पक्षेण सविकारत्वप्रसङ्गात्। न हि श्रुतिः क्वाप्यात्मानं सविकारं ब्रूते, सविकारत्वे सति अनित्यत्वापत्तेः। ज्ञानेच्छादयोऽन्तःकरणगुणा एव, न त्वात्मनः इति प्रागेव स्थापितम्। सत्त्वादिगुणप्रयुक्ताश्च ज्ञानादिगुणाः। 'तत्र सत्त्वं निर्मलत्वात् प्रकाशकम्' इत्यादेर्वक्ष्यमाणत्वात्। मूलभूतसत्त्वादिगुणनिषेधे कथं तत्कार्यभूतज्ञानादिगुणवत्त्वमात्मनः स्यात्? न कथमपि। यद्यात्मनः प्रेरणकर्तृत्वं स्यात् , तर्हि न करोतीत्ययुक्तं स्याद् वचनम्। न हि प्रेरणं कुर्वन्नात्मा न करोतीत्युच्येत। न हि न करोतीत्यस्य प्रेरणादेरन्यन्न करोतीति सङ्कोचः कल्पयितुमुचितः। तथा सति देहोऽपि न करोतीति वक्तुं शक्यत्वात्। न हि देहेनापि सर्वं कर्म क्रियते पर्वतोत्क्षेपणवायुस्तम्भनादेरशक्यत्वाद् देहस्य। न चैवमात्मनः प्रेरकत्वाभावेऽन्तर्यामिश्रुतिविरोध इति वाच्यम् ; अयस्कान्तशिला-लोहन्यायेनाकर्तुरप्यात्मनः सकाशाच्छरीरादिप्रेरणसम्भवात्। न ह्यस्मद्धृदि यः कोऽपि 'त्वमेवं कुरु' इति प्रेरणं कुर्वन्नुपलभ्यते। नापि करणरहितस्येश्वरस्य प्रेरणमपि सम्भवति, करणव्यापारत्वात् प्रेरणस्य वाचिकादिरूपस्य। अथवा आत्माश्रया मायैव प्रेरयति देहादिकम्। तच्च मायाकर्तृकं प्रेरणमात्मन्युपचर्यतेऽज्ञानात्। यथा देहे गच्छति सति देही गच्छतीति। एवं भूतानि मायायां प्रेरयन्त्यां सत्यां मायी प्रेरयतीश्वरः इति व्यवहारः। इदमेव वक्ष्यति भगवानिहैव गीताशास्त्रे— 'भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायये'ति। न च माया करणमेव भ्रामणं प्रति, न कर्त्री, किन्त्वीश्वर एव कर्तेति वाच्यम् ; 'न तस्य कार्यं करणं च विद्यते' इति शास्त्रादीश्वरस्य करणरहितत्वात्। माया हीश्वरस्य शक्तिः, न तु करणम्। न ह्यग्निशक्तिरग्नेः करणम्। तस्मादीश्वरशक्तिभूतमायानिष्ठं प्रेरणरूपं कर्म ईश्वरेऽध्यस्तमिति नेश्वरः प्रेरणकर्ता। किन्त्वकर्तैवेश्वरः आत्मा। 'प्रकृत्यैव च कर्माणी'ति ह्युक्तम्। यद्यत् कर्मतया प्रसिद्धं लोके, यो यश्च गुणतया प्रसिद्धस्तत्सर्वमपि प्रकृतिगतमेव। अत एव 'केवलो निर्गुणश्च, निष्कलं निष्क्रियं शान्तम्' इत्यादिश्रुत्युपपत्तिः। न च देहाद्याकारपरिणतप्रकृतिकार्यमेव कर्म, न मूलप्रकृतिकार्यमिति वाच्यम् ; गमनादिकर्मणां परिणतप्रकृतिकार्यत्वेऽपि प्रेरणरूपं कर्म मूलप्रकृतिकार्यमेवेति। तत्र च देहप्रेरणमिन्द्रियाकारप्रकृतिकार्यम् , इन्द्रियप्रेरणं मनःप्रकृतिकार्यम् , मनःप्रेरणं च बुद्धिप्रकृतिकार्यम् , बुद्धिप्रेरणं च मायाकार्यमिति मायायाः परमप्रेरकत्वं सिध्यति। न च - जडायाः मायायाः कथं प्रेरकत्वम्? तद्धि चेतनधर्म इति - वाच्यम् ; ईश्वरचैतन्याभाससत्त्वेन मायायास्तदुपपत्तेः। तस्माद् मायाद्वारेणैव प्रेरकत्वमीश्वरस्य, स्रष्टृत्वादिवत् , न तु स्वतः इत्यकर्तैवेश्वर आत्मेति सङ्क्षेपः।

हे कौन्तेय ! अनादित्वान्निर्गुणत्वाच्चाव्ययोऽयं परमात्मा शरीरस्थोऽपि न करोति, न लिप्यते - इत्यन्वयः॥ ३१॥

**यथेति**। सर्वगतमप्याकाशं सौक्ष्म्याद्धेतोर्यथा नोपलिप्यते, तथा सर्वत्र देहेऽवस्थितोऽप्यात्मा नोपलिप्यते । **न सम्बध्यत इति**। घटादिदोषैरिति भावः। **सर्वत्र देहे** सर्वेषु देहेष्वित्यर्थः। **नोपलिप्यते** देहादिगतकर्तृत्वभोक्तृत्वादिदोषैर्न सम्बध्यते। देहाद्याश्रयकर्मणा बुद्धिभोग्यकर्मफलेन च नात्मनः कोऽपि सम्बन्धगन्धः इति भावः।

देहादिभिर्नित्यसंयुक्तत्वमात्मनो यदिहोक्तं **रामानुजेन ,** तत् प्रागेव निरस्तम् , असङ्गे निरवयवे आत्मनि देहादिसङ्गा-संभवादिति ॥ ३२॥

---

१. **सौक्ष्म्यात्** असङ्गस्वभावत्वात् इत्यपि बोध्यम्।

**यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।**
**क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत !॥ ३३॥**
**क्षेत्रक्षेत्रज्ञयोरेवम् अन्तरं ज्ञानचक्षुषा।**

**किञ्च—** यथा प्रकाशयतीति। **यथा** प्रकाशयति **अवभासयति एकः कृत्स्नं लोकमिमं** रविः **सविता आदित्यः,** तथा **तद्वद् महाभूतादिधृत्यन्तं क्षेत्रम् एकः सन् प्रकाशयति।** कः? क्षेत्री **परमात्मेत्यर्थः। रविदृष्टान्तोऽत्रात्मनः उभयार्थोऽपि भवति—** [१]**रविवत् सर्वक्षेत्रेष्वेक एव आत्मा, अलेपकश्चेति॥ ३३॥**

**समस्ताध्यायार्थोपसंहारार्थोऽयं श्लोकः—** क्षेत्रक्षेत्रज्ञयोरिति। **क्षेत्रक्षेत्रज्ञयोः यथाव्याख्यातयोः** एवं **यथा-प्रदर्शितप्रकारेण** अन्तरम् **इतरेतरवैलक्षण्यविशेषं** ज्ञानचक्षुषा [२]**शास्त्राचार्योपदेशजनितमात्मप्रत्ययिकं**[३] **ज्ञानं चक्षुस्तेन**

आनन्दगिरिकृतव्याख्या

**'न करोति न लिप्यते चे'त्यत्र द्रष्टृत्वेन दृश्यधर्मशून्यत्वं हेतुमाह—** किञ्चेति। **दृष्टान्तेन विवक्षितमर्थं दर्शयति—** रवीति। **उभय-विधमर्थमेव स्फुटयति—** रविवदिति॥ ३३॥

**अध्यायार्थं सफलमुपसंहरति—** समस्तेति। विशेषं **कौटस्थ्यपरिणामादिलक्षणम्।**

भाष्यार्कप्रकाशः

**यथेति।** एको रविर्यथाकृत्स्नमिमं लोकं प्रकाशयति, हे भारत! क्षेत्री तथा कृत्स्नं क्षेत्रं प्रकाशयति। यथा सूर्यः प्रतिपुरुषं दृश्यमानोऽप्येकः सन्नेव समस्तं जगदवभासयति तथा क्षेत्रज्ञ ईश्वरः प्रतिदेहं दृश्यमानोऽप्येकः सन्नेव समस्तं क्षेत्रं प्रकाशयति। तस्माद् द्रष्टृपुरुषभेदेऽपि सूर्यैकत्ववद् देहभेदेऽप्यात्मैकत्वमेव। तत्रानेकत्वबुद्धिस्तु भ्रम एव, 'एको देवः सर्वभूतेषु गूढः' इति मन्त्रवर्णाच्च। तथा सर्वावभासकस्यापि सूर्यस्य यथा न सर्वदोषलेपस्तथा सर्वावभासकस्य सर्वज्ञस्य क्षेत्रज्ञस्य न क्षेत्रदोषलेपश्चेति भावः। उभयथाऽपीत्युक्तमेवार्थं प्रपञ्चयति— **रविवदिति।** सर्वक्षेत्रेष्वात्मन एकत्वे अलेपत्वे च रविर्दृष्टान्तभूत इत्यर्थः। **अलेपक इति।** लेपकरहित इत्यर्थः। अमुं लेपयितुं कोऽपि न शक्नोतीत्यर्थः। लेपकाभावादेव लेपरहित इति भावः। अलेप इति बहुव्रीहेः कप्रत्यय इति वा। लेपरहित इत्यर्थः। प्रकाशयतीत्यनेनेन च भासकस्य भास्यगुणदोषसम्बन्धो नास्तीति सूच्यते। दीपचक्षुःसूर्यादीनां घटादिगत-नैल्यादिगुणदोषसम्बन्धादर्शनादिति भावः। अत एवासङ्गस्वप्रकाशः आत्मा। सत्त्वादिगुणादिसङ्गस्तस्मिन्नविद्ययाऽध्यस्त एव, न तात्त्विक इति सिद्धमसंसारीश्वरत्वं क्षेत्रज्ञस्य। यत् किलोपन्यस्तमादौ 'क्षेत्रज्ञं चापि मां विद्धी'ति, तदिह समापितम्।

**रामानुजस्तु** - एकैकं क्षेत्रमेकैकः क्षेत्रज्ञो भासयतीत्युवाच, तदसत् - कृत्स्नं क्षेत्रमिति कृत्स्नत्वविशेषणसङ्कोचायोगात्। आपादतलमस्तकं सर्वं शरीरं भासयतीत्यर्थो हि क्षेत्रं भासयतीत्यनेनैव सिध्येत्। न च प्रतिदेहं भिन्ना एवात्मानः, अन्यथा सुखादि-व्यवस्थाऽसिद्धेरिति वाच्यम् ; सुखादीनामन्तःकरणधर्मत्वेनान्तःकरणानां भेदेन च तद्व्यवस्थोपपत्तेः। न च साक्ष्येकत्वे चैत्रसाक्ष्यनु-भूतस्य मैत्रान्तःकरणेनानुसन्धानप्रसङ्ग इति वाच्यम् ; साक्षिणा यदन्तःकरणावच्छेदेन यदनुभूतं तेनैवान्तःकरणेन तत् स्मर्यत इत्यतिप्रसङ्गाभावात्॥ ३३॥

**क्षेत्रेति।** एवं ज्ञानचक्षुषा क्षेत्रक्षेत्रज्ञयोरन्तरं भूतप्रकृतिमोक्षं च ये विदुस्ते परं यान्ति। **समस्तेति।** समस्तस्याध्यायार्थस्य क्षेत्र-ज्ञाध्यायार्थस्य उपसंहारः अर्थः प्रयोजनं यस्य सोऽयं तथोक्तः श्लोकः। क्षेत्रज्ञस्यातीन्द्रियत्वेन घटपटयोरिव क्षेत्रक्षेत्रज्ञयोरन्तरं द्रष्टुं मांसमयं लोकप्रसिद्धं चक्षुरिन्द्रियं न प्रभवतीत्यभिप्रेत्याह भगवान्—**ज्ञानचक्षुषेति। आत्मप्रत्यायिकमिति।** आत्मप्रत्ययजनकमित्यर्थः।

१. रविदृष्टान्तो हि श्रुतौ एकस्य सतः प्रकाशकत्वे, अलेपकत्वे च निबद्धः— 'यथा ह्ययं ज्योतिरात्मा विवस्वान्' 'सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः'इत्यादौ। अतो दार्ष्टान्तिकेऽपि तथा विवक्षेति भावः। २.'शास्त्राचार्योपदेशप्रसादजनितम्' इति पा.। ३.'आत्मप्रत्यायकम्''आत्मप्रत्यायिकम्' इति पा.।

**भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम्॥ ३४॥**

**इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे [1]क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोऽध्यायः॥ १३॥**

**ज्ञानचक्षुषा,** भूतप्रकृतिमोक्षं **च भूतानां प्रकृतिः अविद्यालक्षणा अव्यक्ताख्या, तस्या भूतप्रकृतेर्मोक्षणम् अभावगमनं च ये विदुः विजानन्ति,** यान्ति **गच्छन्ति ते** परं [2]**परमार्थतत्त्वं ब्रह्म। न पुनर्देहमाददत इत्यर्थः॥ ३४॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये प्रकृतिपुरुषविवेकयोगो नाम त्रयोदशोऽध्यायः॥ १३॥**

आनन्दगिरिकृतव्याख्या

**तदेवम् अमानित्वादिनिष्ठतया क्षेत्रक्षेत्रज्ञयाथात्म्यविज्ञानवतः सर्वानर्थनिवृत्त्या परिपूर्णपरमानन्दाविर्भावलक्षणपुरुषार्थसिद्धिरिति सिद्धम्॥ ३४॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते श्रीमद्भगवद्गीताशाङ्करभाष्यव्याख्याने त्रयोदशोऽध्यायः॥ १३॥**

भाष्यार्कप्रकाशः

येन ज्ञानेनायमात्मा ब्रह्मेति निश्चयो भवति तदित्यर्थः। चक्षुवदर्थावभासकत्वाज्ज्ञाने चक्षुष्ट्वारोपः। भूतानां कार्याणां प्रकृतिः कारणं मायेत्यभिप्रायादाह— **अविद्येति**। अविद्या अज्ञानं लक्षणं स्वरूपं यस्याः सा। अव्यक्तमित्याख्या नाम यस्याः सा अव्यक्ताख्या। तस्या इति षष्ठी। अभावगमनं नाशापादनं तावत् ज्ञानचक्षुषा क्षेत्रात् क्षेत्रज्ञं विविच्य ज्ञात्वा पश्चात् क्षेत्रज्ञात् सकाशात् क्षेत्रं विवेचयेत्। एवं विविच्यमाने तु क्षेत्रे क्षेत्रं शनैरभावमेव प्राप्नोति, निस्तत्त्वत्वात्। क्षेत्रस्याभावापादनं च ये विदुः। यद्वा गमनं प्राप्तिमित्येवार्थः। क्षेत्राद्विवेचितं क्षेत्रं स्वयमेवाभावं गच्छतीत्यर्थः। इतीममर्थं ये विदुः कालत्रयेऽपि क्षेत्रज्ञ एक एवाहं ब्रह्मास्मि, क्षेत्रं तु कदाचिदपि नास्तीति ये विदुरिति यावत्। ते परं ब्रह्म यान्ति प्राप्नुवन्ति। नित्याप्तस्य ब्रह्मणः कथं पुनः प्राप्तिरत आह— **न पुनर्देहमाददत इति**। पुनर्जन्म न भजन्त इत्यर्थः। देहस्वीकारस्यैव जन्मत्वादिति भावः। संसारान्मुच्यन्त इति यावत्। विदेहकैवल्यं प्राप्य परब्रह्मस्वरूपेण वर्तन्ते, न पुनः संसारायागच्छन्तीति फलितार्थः।

क्षेत्रक्षेत्रज्ञयोरन्तरदर्शनं विवेचनप्रकारश्चोक्तोऽपि पुनरुच्यतेऽलसानुग्रहार्थम्। तथाहि - दृश्यं सगुणं सक्रियं सविकारमनित्यं क्षेत्रं तद् यदिदन्तयोपलभ्यते, द्रष्टा निर्गुणो निष्क्रियो निर्विकारो नित्यः क्षेत्रज्ञः, योऽस्मिन् देहे अहमिति स्फुरत्यहङ्कारसाक्षित्वेन। स च क्षेत्रज्ञः सच्चिदानन्दरूपः। तच्च क्षेत्रमनृतजडदुःखात्मकम्। क्षेत्रमस्ति भाति प्रियं चेति व्यवहारसिद्धानां सत्ताभानानन्दानां क्षेत्रज्ञकारणधर्माणां क्षेत्रकार्ये सङ्क्रान्तानां पृथक्करणे तु क्षेत्रशब्दवाच्यं किमपि नावशिष्यते। न चैवं क्षेत्रज्ञादपि सत्तादिपृथक्करणे किमपि नावशिष्यत इति वाच्यम् ; यः पृथक्करोति तस्यैव क्षेत्रज्ञस्यावशिष्टत्वात् , तस्य च सच्चिदानन्दरूपत्वेन तस्मात् तेषां पृथक्करणायोगाच्च। तथा चैक एव क्षेत्रज्ञः अहं ब्रह्मास्मि, मयि कालत्रयेऽपि क्षेत्रं नास्ति, मिथ्यात्वात् क्षेत्रस्येति य आत्मवित् स शोकं तरति, 'तरति शोकमात्मविदि'ति श्रुतेः। स ब्रह्म भवति 'ब्रह्मविद् ब्रह्मैव भवती'ति श्रुतेरिति भावः।

यत्तु **रामानुजः** - भूतप्रकृतिमोक्षं भूतमय्याः प्रकृतेर्भूतानां जीवानां प्रकृतेर्वा मोक्षसाधनममानित्वादिकमवगम्य य आचरन्ति, ते परं निर्मुक्तबन्धनमात्मानं यान्तीति, **तत्तुच्छम्** - ये विदुरिति मूलस्य ये विदित्वाऽऽचरन्तीत्यर्थकल्पनस्यायुक्तत्वात्। अज्ञानातिरिक्त-प्रकृतिनामकतत्त्वान्तराभ्युपगमस्य, असङ्गपुरुषस्य तत्प्रकृतिकृतसत्यसङ्गाभ्युपगमस्य, संसारदशायामिव मुक्तिदशायामपि प्रकृतिरस्ति, तत्सङ्गस्तु नास्ति पुरुषस्येति कल्पनस्य, मुक्तिदशायामपि न जीवस्य ब्रह्मभावप्राप्तिः, किन्तु स्वरूपप्राप्तिरेवेति वर्णनस्य च

---

१. 'प्रकृतिपुरुषविवेकयोगः' इति पा.। २. 'परमात्मतत्त्वं' इति पा.।

भाष्यार्कप्रकाशः

श्रुतिस्मृतिन्यायादिविरुद्धत्वात्। न हि श्रुतौ प्रधानमिति किञ्चित् तत्त्वान्तरं श्रूयते। 'ईक्षतेर्नाशब्दम्' इत्यशब्दं हि तत्। श्रुत्यसिद्धत्वाद्धि तस्याशब्दत्वं **व्यासेनैव** प्रतिपादितम्। नापि तत्सत्त्वे श्रुत्यतिरिक्तं किञ्चित् प्रमाणं पश्यामः। अपरमार्थसाङ्ख्यबुद्धिपरिकल्पितं हि तत्। तत एवानुमानिकत्वं तस्य। तच्चानुमानिकाधिकरणे[1] निराकृतं भगवता **व्यासेनैव**। तया च प्रकृत्या असङ्गपुरुषः संसृष्टः इति कथनं महद् विचित्रम् । न ह्यसङ्गो निरवयवः पुरुषः केनचित् संसृज्यते। संसृष्टत्वे पुनरसङ्गत्वस्वरूपस्यैव नाशप्रसङ्गात्। यदि संसार इव मुक्तावपि प्रकृतिः स्यात् तर्हि तया संसृज्येतैव पुरुषः। विभुत्वात् पुरुषस्य व्यापित्वात् प्रकृतेश्च। निरर्थकतत्सद्भावकल्पनस्य चाप्रमाणत्वात्। पुरुषस्य संसारयितृत्वं प्रकृतिसद्भावस्य फलम्। न च सत्त्वादिगुणरहिता परिशुद्धप्रकृतिर्मुक्तविषयेति वाच्यम् ; निर्गुणप्रकृतेरेवाभावात् निर्गन्धपृथिवीवत्। एवं प्रकृतिमुक्तस्य ब्रह्मभावाप्राप्तिश्च विरुद्धा, प्रकृतिविमोक्षेण तत्कार्यमहदादिसर्वोपाधिनाशात् , निरुपाधिकस्य चापरिच्छिन्नस्यात्मनः परिपूर्णचैतन्यरूपत्वेन ब्रह्मभूतत्वाच्च। यद्यात्मा सावयवः स्यात् तर्हि राहुणा चन्द्रस्येव प्रकृत्या तस्य ग्रासरूपो बन्धः स्यात्। तत्प्रयुक्तो मोक्षश्च स्यात्। सावयवत्वे चात्मनोऽनित्यत्वं स्यात्। अनित्यस्यात्मनो नित्यमोक्षो नैव युज्यते। किञ्च तव मते ईश्वरस्यैव प्रकृतिमोक्षो नास्तीति किं पुनर्जीवस्य। प्रकृतिपुरुषसंसृष्टो हीश्वरः। य ईश्वरः स्वस्यैव प्राप्तं प्रकृतिसङ्गं निवारयितुं नेष्टे, स कथमन्यस्य जीवस्य तं निराकुर्यात्? प्रकृतिमुक्तस्य वा जीवस्य प्रकृतिसंयुक्तेश्वरसङ्गो दुर्वार इतीश्वरद्वारा पुनः प्राप्तश्च मुक्तावपि जीवस्य प्रकृतिसङ्गः। पटसंयुक्तघटसंयोगाद् भूतलस्येव पटसङ्गः। न चेश्वरस्य यत्रांशे प्रकृतिसङ्गस्तत्रांशे न पुरुषसङ्गः, किन्त्वन्यांश एवेति वाच्यम् ; निरवयवेश्वरस्य निरंशस्यांशकल्पनायोगात्। सांशत्वे चानित्यत्वप्रसङ्गाद् घटादिवदीश्वरस्य। निष्कलश्रुत्या चेश्वरस्य सांशत्वं प्रतिषिद्धम् , असङ्गश्रुत्या च प्रकृत्यादिसङ्गम् ,'एकमेवाद्वितीयम्' इति श्रुत्या च प्रकृत्यादिद्वैतम् , तत्त्वमस्यादिश्रुत्या च जीवेश्वरद्वैतम् , अशब्दमिति सूत्रेण च प्रकृतेरज्ञानातिरिक्ततत्त्वान्तरत्वम्। 'यो वै भूमा तदमृतम्' इति श्रुत्या ब्रह्मण एकस्यैव नित्यत्वं सत्यत्वं च। 'अतोऽन्यदार्तम्' इत्यनया सर्वद्वैतस्यासत्यत्वमनित्यत्वं च। उक्तार्थप्रतिपादिकाः स्मृतयस्तु— 'मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय' इत्याद्याः इहैव ग्रन्थे द्रष्टव्याः। तस्माद् विरुद्धं परेषां दर्शनमग्राह्यमेव। श्रुतिस्मृत्याद्यनुगृहीतमद्वैतदर्शनमेकमेव ग्राह्यं मुमुक्षुभिरिति सर्वं **शिवम्**॥ ३४॥

**इति श्रीबेल्लङ्कोण्डोपनामकरामकविकृते श्रीमच्छङ्करभगवद्गीताभाष्यार्कप्रकाशे**
**प्रकृतिपुरुषविवेकयोगो नाम त्रयोदशोऽध्यायः॥ १३॥**

---

१. द्र. ब्र.सू. १-४-१।

DO NOT PRINT THIS PAGE

ॐ श्रीपरमात्मने नमः

# ॥ अथ चतुर्दशोऽध्यायः ॥

**श्रीभगवानुवाच—**

**परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्।**
**यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः॥ १॥**

**सर्वमुत्पद्यमानं क्षेत्रक्षेत्रज्ञसंयोगादुत्पद्यत इत्युक्तम्। तत् कथमिति तत्प्रदर्शनार्थं 'परं भूयः' इत्यादिरध्यायः आरभ्यते। अथवा ईश्वरपरतन्त्रयोः क्षेत्रक्षेत्रज्ञयोर्जगत्कारणत्वम्, न तु साङ्ख्यानामिव स्वतन्त्रयोः - इत्येवमर्थं, प्रकृति-**

**अनुभूतिस्वरूपाचार्यविरचितगीताभाष्यटिप्पणम्**

चतुर्दशादयोऽध्यायाः स्पष्टार्थाः।[१]

**आनन्दगिरिकृतव्याख्या**

**क्षेत्रक्षेत्रज्ञसंयोगस्य सर्वोत्पत्तिनिमित्तत्वमज्ञातं ज्ञापयितुम् अध्यायान्तरमवतारयन् अध्याययोरुत्थाप्योत्थापकत्वरूपां सङ्गति-माह—** सर्वमिति। **विधान्तरेणाध्यायारम्भं सूचयति—** अथवेति। **तदेव वक्तुमुक्तमनुवदति—** ईश्वरेति। प्रकृतिस्थत्वं **पुरुषस्य प्रकृत्या**

**श्रीबेल्लंकोण्डरामरायकविविरचितः**

**भाष्यार्कप्रकाशः**

[२]**उत्पद्यमानं सर्वं क्षेत्रक्षेत्रज्ञसंयोगादुत्पद्यत इत्युक्तम्।** 'यावत् सञ्जायते किञ्चित् सत्त्वं स्थावरजङ्गमम्। क्षेत्रक्षेत्रज्ञसंयोगात् तद्विद्धि भरतर्षभ!॥' इति श्लोकेनेति भावः। **तत्** क्षेत्रक्षेत्रज्ञसंयोगाद् भूतानां जननमित्यर्थः। कथमिति शङ्कायां तत्प्रकारं प्रदर्शयितुं चतुर्दशाध्याय आरभ्यते भगवतेति शेषः। सङ्गत्यन्तरं दर्शयति— **अथवेति**।

**ननु** प्रकृतिपुरुषसंयोगाज्जगज्जायत इत्युक्तम्; 'क्षेत्रज्ञं चापि मां विद्धी'त्यादिना पुरुष एवेश्वर इति चोक्तम्; ततश्च सिद्धमद्वैतस्य निरीश्वरसाङ्ख्यत्वम्, पुरुषातिरिक्तेश्वरानभ्युपगमादद्वैतमतेऽपि इति **शङ्कायाम्**, न वयं साङ्ख्या इव प्रकृतिपुरुषयोः स्वतन्त्रयोरेव जगत्कारणत्वं ब्रूमः, किन्त्वीश्वरपरतन्त्रयोरेव। यद्यपि साङ्ख्याः 'न प्रकृतिर्न विकृतिः पुरुषः' इति पुरुषस्य जगत्कारणत्वं स्वातन्त्र्येण पारतन्त्र्येण वा न प्रतिपादयन्ति, किन्तु स्वतन्त्रायाः प्रकृतेरेव तत् प्रतिपादयन्ति। तथापि छत्रिन्यायेन द्वयोरपीत्युच्यत इति बोध्यम्। एवम् अद्वैतमते क्षेत्रस्यैवेश्वरपरतन्त्रत्वात् क्षेत्रज्ञस्य चेश्वरत्वेन स्वतन्त्रत्वादुभयोरीश्वरपारतन्त्र्यकथनमपि छत्रिन्यायेनैवेति बोध्यम्।

अयं चेश्वरः क्षेत्रज्ञ उदासीनो न जगत्कारणम्, किन्तु प्रकृतिस्थो गुणसक्तश्चेत्यस्ति साङ्ख्याद्वैतमतयोर्महद् वैषम्यम्। साङ्ख्यमते— प्रकृतिः स्वतन्त्रा जगद्धेतुः, पुरुषस्तूदासीनो न जगद्धेतुरिति। अद्वैतमते ईश्वरपरतन्त्रा प्रकृतिः, तत्संयुक्तः क्षेत्रज्ञश्चोभयं जगत्कारणमिति चाभ्युपगमात्। **यद्वा** विद्यादशायामेव क्षेत्रज्ञस्येश्वरैकत्वमद्वैतिनो वदन्ति, न त्वविद्यादशायाम्। अविद्यादशायां हि प्रकृतिस्थो गुणयुक्तश्च क्षेत्रज्ञ ईश्वरपरतन्त्र एव, प्रकृतिवदिति कृत्वा ईश्वरपरतन्त्रयोः प्रकृतिपुरुषयोर्जगत्कारणत्वं वदतां सेश्वरसाङ्ख्यानामद्वैतिनां, प्रकृतिपुरुषौ स्वतन्त्रौ प्रकृतिश्च जगत्कारणमिति वदतां निरीश्वरसाङ्ख्यानां च महदस्ति वैलक्षण्यमित्येवं प्रदर्शनार्थमेव क्षेत्रज्ञस्य प्रकृतिस्थत्वं, गुणेषु सङ्गश्च संसारकारणमित्युक्तम्। 'पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्। कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु॥' इति श्लोकेनेति भावः। न चेश्वरस्यैव क्षेत्रज्ञस्य कथमीश्वरपारतन्त्र्यमिति वाच्यम्; वस्तुत

१. अतो न व्याख्यायन्ते। इतः परम् अष्टादशे एव किंचिदुच्यते (पृ. ८४७) इति भावः। २. भाष्यवाक्यमिदं प्रतीकतया धृतम्।

**स्थत्वं, गुणेषु च सङ्गः संसारकारणमित्युक्तम् ; कस्मिन् गुणे कथं सङ्गः? के वा गुणाः? कथं वा ते बध्नन्तीति ? गुणेभ्यश्च मोक्षणं कथं स्यात् ? मुक्तस्य च लक्षणं वक्तव्यमित्येवमर्थं च। [1](श्रीभगवानुवाच—)** परमिति। **परं ज्ञानमिति व्यवहितेन सम्बन्धः।** भूयः **पुनः पूर्वेषु सर्वेष्वध्यायेष्वसकृदुक्तमपि प्रवक्ष्यामि। तच्च** परं **परवस्तुविषयत्वात्। किं तत् ? ज्ञानम् , सर्वेषां ज्ञानानाम्** उत्तमम् **उत्तमफलत्वात् । ज्ञानानामिति नामानित्वादीनाम् , किं तर्हि? यज्ञादि-ज्ञेयवस्तुविषयाणामिति। तानि न मोक्षाय, इदं तु मोक्षायेति परोत्तमशब्दाभ्यां स्तौति श्रोतृबुद्धिरुच्युत्पादनार्थम्।**

आनन्दगिरिकृतव्याख्या

**सहैक्याध्यासः। तस्यैव** गुणेषु **शब्दादिविषयेषु** सङ्गोऽभिनिवेशः। **षड्विधामाकाङ्क्षां निक्षिप्य तदुत्तरत्वेनाध्यायारम्भे पूर्ववदेव पूर्वाध्याय-सम्बन्धसिद्धिरित्याह—**कस्मिन्निति। **पूर्वोक्तेनार्थेनास्याध्यायस्य[2] समुच्चयार्थश्चकारः। परमित्यस्य भाविकालार्थत्वं व्यावर्तयितुं सङ्गतिमाह —** परमिति। **भूयःशब्दस्याधिकार्थत्वमिह नास्तीत्याह—** पुनरिति। **पुनःशब्दार्थमेव विवृणोति—** पूर्वेष्विति। **पुनरुक्तिस्तर्हीत्याशङ्क्य सूक्ष्मत्वेन दुर्बोधत्वात् पुनर्वचनमर्थवदित्याह—** तच्चेति। **विशेष्यं प्रश्नद्वारा निर्दिशति—** किं तदिति। [3]**निर्धारणार्थां षष्ठीमादाय तस्य प्रकर्षं दर्शयति—** सर्वेषामिति। **'परम् , उत्तम'मिति पुनरुक्तिमाशङ्क्य विषयफलभेदान्मैवमित्याह—** उत्तमेति। **'ज्ञानं ज्ञेय'मित्यादौ ज्ञानशब्दे-नामानित्वादीनामुक्तत्वात् , तन्मध्ये च ज्ञानस्य साध्यत्वेनोत्तमत्वान्न तस्य वक्तव्यतेत्याशङ्क्याह—** ज्ञानानामिति। **नामानित्वादीनां ग्रहणमिति शेषः। इतिशब्दादूर्ध्वं पूर्ववदेव शेषो द्रष्टव्यः। यथोक्तज्ञानापेक्षया कुतस्तज्ज्ञानस्य प्रकर्षः? तत्राह—** तानीति। **स्तुतिफल-**

भाष्यार्कप्रकाशः

ईश्वरोऽपि क्षेत्रज्ञो मायया प्रकृतिस्थत्वादिना जीवभावमापन्नः सन्नीश्वरपरतन्त्रो भवतीति। न च माययाऽपि कथमयुक्तार्थस्योपपत्तिरिति वाच्यम् ; मायायां सर्वसम्भवादिति न्यायात् का नामानुपपत्तिः? मायया हि रज्जुरपि सर्पो भवति; गगनमपि नीलं भवति; मरुभूमिरपि जलप्रायप्रदेशो भवति; तल्पे शयानोऽपि देशान्तरे रथादिभिर्व्याप्रियते; स्वं छिन्नं शिरः स्वयमेव पश्यति; मृतोऽहमिति स्वयमेव रोदिति निद्रायाम्; चक्षुषस्तिमिरदोषादप्येकं चन्द्रमनेकत्वेन पश्यति; इन्द्रजालेनापि गगने हस्तिहर्म्यादयः कल्प्यन्ते, दृश्यन्ते चास्मदादिभिः। तस्मादीश्वरस्यापि क्षेत्रज्ञस्य मायया पारतन्त्र्यादिकं घटत एव, अघटितघटनापटीयस्त्वान्मायाया इति।

ननूक्तमेव, किं ततः? इत्यत आह— **कस्मिन्निति**। तत्रेति शेषः। कस्मिन् गुणे क्षेत्रज्ञस्य कथं सङ्गः? के वा गुणाः कथं क्षेत्रज्ञं बध्नन्ति? कथं क्षेत्रज्ञस्य गुणेभ्यो मोक्षणं स्यात्? मुक्तस्य च किं लक्षणम्? इति प्राप्तानां प्रश्नानामुत्तरप्रदानार्थं चायमध्याय आरभ्यते। **परमिति**। अहमिति शेषः। **भूयः**, ते इति शेषः। ज्ञानानां मध्ये **उत्तमं** परं तज्ज्ञानं प्रवक्ष्यामि। सर्वे मुनयो यज्ज्ञात्वा इतः परां सिद्धिं गताः। भूय इत्यनेन पूर्वमस्योक्तत्वमवगम्यत इत्यभिप्रेत्याह— **पूर्वेष्विति**। तत्त्वस्य दुर्बोधत्वात् पुनःपुनः शब्दान्तरेण प्रतिपादनमिति भावः। **प्रवक्ष्यामीति**। प्रकर्षेण यथावद् वक्ष्यामि। परवस्तु ब्रह्म। तद्विषये ज्ञानेऽपि परत्वमुपचारादित्याह— **परवस्तुविषयत्वादिति**। **यद्वा** ज्ञानस्योत्कर्षापकर्षौ ज्ञेयाधीनौ, न तु स्वत इत्यभिप्रेत्य परवस्तुविषयत्वादित्युक्तम्। ननु प्रथमान्तं ज्ञानं ब्रह्मविषयम् , षष्ठ्यन्तज्ञानानि किंविषयाणीत्यत आह— **यज्ञादीति**। यज्ञ आदिर्येषां तानि यज्ञादीनि, तानि च तानि ज्ञेयवस्तूनि, यज्ञादिज्ञेयवस्तूनि विषया येषां तानि तथोक्तानि। [4]यज्ञयागपूर्तादिधर्मविषयाणीत्यर्थः। ननु षष्ठ्यन्तज्ञानशब्देन पूर्वाध्यायोक्ताः अमानित्वादयो गृह्यन्ताम् , ते हि ज्ञानत्वेन प्रतिपादिताः, अत आह— **न त्विति**। ज्ञानसाधनान्येवामानित्वादीनि, न तु ज्ञानानीति भावः। ननु यद् ब्रह्मविषयं, यच्च धर्मविषयं तदुभयमपि सविषयज्ञानत्वेन तुल्यमेव, निर्विषयं चैतन्यरूपज्ञानमेवोत्तमम् , अत आह— **उत्तमफलत्वादिति**। ननु यज्ञादयो ऽप्युत्तमफलान्येव स्वर्गादीनि दिशन्तीत्यत आह— **तानि न मोक्षायेति**। यज्ञादिविषयज्ञानानि यज्ञाद्यनुष्ठापनद्वारा स्वर्गादीन्येव दिशन्ति, न तु मोक्षं, निरतिशयपुरुषार्थो हि मोक्षः उत्तमफलम्। ननु ब्रह्मज्ञानमपि तादृशमेवेत्यत आह— **इदं त्विति**। ब्रह्मज्ञानं तु मोक्षाय भवतीति शेषः। अनुष्ठानापेक्षाभावश्चाधिकोऽत्र गुणोऽस्तीति बोध्यम्। अयं चार्थः परोत्तमशब्दाभ्यां सिद्ध इत्याह— **परेति**। परविषयमुत्तमफलकं च ज्ञानम् अपरविषयेभ्योऽनुत्तमफलकेभ्यो ज्ञानेभ्य उत्कृष्टमिति भावः। इदं ज्ञानं परापरवस्तुविषयाणां ज्ञानानां

१. कुण्डलितः पाठः आनन्दाश्रमपुस्तके नास्ति। २. अध्यायार्थस्येत्यर्थः। ३. ज्ञानानां मध्ये उत्तमं ज्ञानमित्यत्र निर्धारणं षष्ठ्यर्थः। ४. यज्ञो यागविशेषः।

**इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।**
**सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥२॥**

**यज्ज्ञात्वा** यद् **ज्ञानं** ज्ञात्वा **प्राप्य** मुनयः **संन्यासिनो मननशीलाः सर्वे** परां सिद्धिं **मोक्षाख्याम्** इतोऽस्माद् **देहबन्धनादूर्ध्वं** गताः **प्राप्ताः**॥१॥

**अस्याश्च सिद्धेरैकान्तिकत्वं दर्शयति—** इदमिति। इदं ज्ञानं **यथोक्तम्** उपाश्रित्य **ज्ञानसाधनमनुष्ठायेत्येतत्।** मम **परमेश्वरस्य** साधर्म्यं **मत्स्वरूपताम्** आगताः **प्राप्ता इत्यर्थः, न तु समानधर्मतां साधर्म्यम् , क्षेत्रज्ञेश्वरयोर्भेदा-**

आनन्दगिरिकृतव्याख्या

**माह—** श्रोतृबुद्धीति। ज्ञानं ज्ञात्वा[१]। **ज्ञानस्य ज्ञेयत्वोपगमादनवस्थेत्याशङ्क्याह—** प्राप्येति। **मुनिशब्दस्य चतुर्थाश्रमविषयत्वे तन्मात्रादेव ज्ञानायोगात् कुतस्तेषां मुक्तिरित्याशङ्क्याह—** मननेति। **सिद्धेर्ज्ञानत्वं परामिति विशेषणाद् व्यावर्त्य मुक्तित्वमाह—**मोक्षाख्यामिति। **देहाख्यस्य बन्धनस्य** [२]**अध्यक्षत्वमाह—** अस्मादिति॥१॥

**ज्ञानफलस्य कर्मफलवैलक्षण्यमाह—** अस्याश्चेति। **कथं ज्ञानाश्रयणम्? तद्धेतुश्रवणादिसामग्रीसम्पत्तिद्वारेत्याह—** ज्ञानेति। **साधर्म्ये गोगवययोरिव विद्वदीश्वरयोरपि भेदः स्यादित्याशङ्क्याह—** मत्स्वरूपतामिति। **साधर्म्यस्य मुख्यत्वे भेदध्रौव्याद् गीताशास्त्र-**

भाष्यार्कप्रकाशः

मध्ये परमुत्तमं च परवस्तुविषयत्वान्मोक्षाख्योत्तमफलवत्त्वाच्च। यत् परवस्तुविषयमुत्तमफलवच्च न भवति तज्ज्ञानमपरमनुत्तमं च, यथा घटज्ञानमिति प्रयोगः। पूर्वार्धोक्तस्य ज्ञानस्यैवेह यच्छब्देन ग्राह्यत्वात् , ज्ञानस्य च स्वप्रकाशस्य ज्ञानान्तरवेद्यत्वासम्भवात् , तत्कल्पने चानवस्थादोषादाह— **प्राप्येति**। असंन्यासिनां श्रवणमननाद्यनधिकारात् , गृहदारापत्यादिपोषणादिव्यग्रतया मननावकाशा-सम्भवाच्च **मुनयो मननशीलाः संन्यासिनः** इत्युक्तम्। तत्त्वविदः सकाशाद् ज्ञानं प्राप्य, श्रुत्वेति यावत्। पश्चात् स्वयं मननं कृत्वेत्यर्थः। यत इमे संन्यासिनो मननशीलास्तत एव श्रुत्वा मननं कुर्वन्तीति भावः। यद्वा **ज्ञानं प्राप्य** श्रवणमननादिना ज्ञानं लब्ध्वेत्यर्थः। **सर्वे** प्राचीनाः याज्ञवल्क्यादयः। **देहबन्धनादिति**। देहबन्धनं विहायेति ल्यब्लोपे पञ्चमी।

यत्तु **रामानुजः**— सत्त्वादिगुणविषयमिदं ज्ञानं प्रकृतिपुरुषविषयज्ञानानामुत्तममित्याह। **तत्तुच्छम्।** सत्त्वादिगुणविषय-ज्ञानस्य प्रकृतिविषयज्ञानाद् भिन्नत्वासिद्धेः। प्रकृतेरेव हि गुणाः सत्त्वादयः। सत्त्वादिगुणवती हि प्रकृतिः। पुरुषविषयज्ञानस्य मोक्षप्रदस्य परमात्मवस्तुविषयस्य च कथं सत्त्वादिगुणविषयज्ञानापेक्षया भवेदनुत्तमत्वम्? न कथमपीति।

**यच्च** यज्ज्ञानं ज्ञात्वेति, **तदप्यसत्।** ज्ञानस्य ज्ञेयत्वायोगात्। ज्ञानं हि विषयि, ज्ञेयं तु विषयः। न हि विषयि विषयो भवेत्। अन्यथा घटज्ञानमपि घटो भवेत् ॥१॥

**इदमिति**। तेषां मोक्षं गतानां किं फलम् , को लाभः इति शङ्कायामिदमिति पद्यमुच्यते। तस्याश्च मोक्षाख्यायाः सिद्धेर्गतेः **ऐकान्तिकत्वं** ध्रुवत्वं चोच्यते इदमिति पद्येन। इदं वक्ष्यमाणं परवस्तुविषयं ज्ञानमुपाश्रित्य प्राप्य मम साधर्म्यमागताः, मुक्ताः इति यावत्। मुनयः इति शेषः। सर्गेऽपि नोपजायन्ते, प्रलये च न व्यथन्ति। मुक्तानामपुनरावृत्तिः फलमिति भावः। **एतेन** मोक्षस्य ध्रुवत्वं **सिद्धम्**। यदेव वक्ष्यमाणं, तदेव पूर्वोक्तं चेत्यभिप्रेत्याह— **यथोक्तमिति। ज्ञानमिति**। अहं ब्रह्मास्मीत्याकारकमिति भावः। तत्प्राप्तौ साधनं दर्शयति— **ज्ञानसाधनमनुष्ठायेति**। ज्ञानसाधनामानित्वाद्यनुष्ठानद्वारा ज्ञानं प्राप्येति यावत्। यद्वा **इदं** पूर्वोक्तं **ज्ञानं** ज्ञानसाधनम् अमानित्वादिकम् **उपाश्रित्य** अनुष्ठाय, ततः सम्यग्दर्शनप्राप्तिद्वारा मम **साधर्म्यं** [३]समानोऽभिन्नो धर्मः सच्चिदानन्दलक्षणं स्वरूपं यस्य, तस्य भावः साधर्म्यम् , **मत्स्वरूपतां** मदभिन्नस्वरूपत्वम् , मद्भावमिति यावत् ; **आगताः** ब्रह्मभूताः इत्यर्थः। **समानधर्मतेति**।

---

१. भाष्यप्रतीकधारणमिदम्। तस्य च यथाश्रुतार्थे दोषं प्रदर्शयति—ज्ञानस्येति। २. **इतः** इतीदंशब्देन प्रत्यक्षतया निर्देष्टुं योग्यं देहबन्धनमाहेत्यर्थः। ३. समान-शब्दः सामानाधिकरण्यमित्यादाविवाभिन्नपरः, न तु तुल्यपरः, भगवत्तुल्यस्यान्यस्यासंभवात्।

**मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्।**
**सम्भवः सर्वभूतानां ततो भवति भारत! ॥३॥**

**नभ्युगमाद् गीताशास्त्रे। फलवादश्चायं स्तुत्यर्थमुच्यते।** सर्गेऽपि **सृष्टिकालेऽपि** नोपजायन्ते **नोत्पद्यन्ते,** प्रलये **ब्रह्मणोऽपि विनाशकाले** न व्यथन्ति च **व्यथां नापद्यन्ते, न च्यवन्तीत्यर्थः॥२॥**

**क्षेत्रक्षेत्रज्ञसंयोगः ईदृशो भूतकारणमित्याह—** ममेति। मम **स्वभूता मदीया माया त्रिगुणात्मिका प्रकृतिः**

आनन्दगिरिकृतव्याख्या

**विरोधः स्यादित्याह—** न त्विति। **ज्ञानस्तुतये तत्फलस्य विवक्षितत्वाच्च नात्र सारूप्यमिष्टमित्याह—** फलेति। [1]**सारूप्ये धीफलं हित्वा ध्यानफलमप्रस्तुतं प्रसज्येतेत्यर्थः। ईश्वरात्मतां गतानामेवावान्तरसर्गादौ जन्माद्यभावेऽपि महासर्गादौ तद् भविष्यतीत्याशङ्क्याह—** सर्गेऽपीति॥२॥

**ज्ञानस्तुत्या तदभिमुखायावहितचेतसे विवक्षितमर्थमाह—** क्षेत्रेति। **स्वरूपत्वेन स्वभूतत्वं वारयति—** मदीयेति। **ईश्वरीं**

भाष्यार्कप्रकाशः

तुल्यधर्मत्वमित्यर्थः। ननु स्वत एव ब्रह्मभूतस्य कथं पुनः ब्रह्मभावप्राप्तिरुच्यते? अत आह— **स्तुत्यर्थ इति।** न तु वस्तुतो मोक्षाख्यं स्वरूपातिरिक्तं ज्ञानप्राप्यं किञ्चित् फलमस्तीति भावः। **ब्रह्मण इति।** हिरण्यगर्भस्य विनाशकाले द्विपरार्धावसाने। बहुवचनप्रयोगस्तु लोकव्यवहारसिद्धोपाधिभेदाभिप्रायेण, न त्वात्मभेदाभिप्रायेण। लोके हि शुको मुक्तः, वामदेवो मुक्तः, जनको मुक्तः इत्येवं व्यवहारो दृश्यते। स च शुकत्ववामदेवत्वजनकत्वादिः शरीरगत एव, न त्वात्मगतः, नामरूपाद्यभावादात्मनि।

यत्तु **रामानुजः**— साधर्म्यं सादृश्यमिति, **तत्तुच्छम्।** सर्वज्ञसर्वेश्वरसर्वशक्तिसर्वनियामकसर्वजगत्सृष्टिस्थितिसंहारकर्तृसर्वग-कल्याणगुणनिलयपरमात्मसादृश्यस्य किञ्चिज्ज्ञपरतन्त्राल्पशक्तिनियाम्याजगत्कर्तृनिर्गुणाणुस्वरूपजीवेऽसम्भवात्। न हि मुक्तावपि अणोर्जीवस्यासर्वगस्य भवितुमर्हति सर्वज्ञत्वसर्वान्तर्यामित्वादीश्वरधर्मसञ्चयः। न च मुक्तौ सर्वव्याप्येव जीव इति वाच्यम्; तथा सति बहूनां मुक्तजीवानां सर्वव्यापिनां सत्त्वेन सर्वभूतानां हृद्देशे ईश्वरवत् ते सर्वे जीवा अपि वर्तेरन्। न चेष्टापत्तिः, 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती'ति वक्ष्यमाणत्वेन सर्वे मुक्तजीवा हृद्देशे तिष्ठन्तीति क्वाप्यप्रतिपादनेन, अन्तर्यामिब्राह्मणादिषु एकस्यैवेश्वरस्य सर्व-भूतस्थितिप्रतिपादनेन च विरोधात्। बहुषु नियामकेषु सत्सु एको बद्धजीवः केन नियमितं कुर्यात्? बहूनां नियामकेश्वराणां सत्त्वे कथमेकेश्वरत्वव्यवहारः? न च मुक्तजीवाः सर्वव्यापिनः सन्तोऽप्यनियामकाः सन्तस्तूष्णीं वर्तन्त इति वाच्यम्; तथा सतीश्वरसाध-र्म्यायोगात्। एतेषां मुक्तजीवानामीश्वरानियाम्यत्वे ईश्वरस्य सर्वेश्वरत्वाभावप्रसङ्गात्। तन्नियाम्यत्वे च बन्धमुक्तयोरविशेषात्। अस्मद्धृदीश्वरसत्त्वं नियमनलिङ्गेनानुमीयते, अनन्तमुक्तजीवसत्त्वं तु केन प्रमाणेन वेद्यते? न केनापि। न च शास्त्रेणेति वाच्यम्; शास्त्रे अनन्ताः मुक्तजीवाः भूतानां हृदि वर्तन्ते ईश्वरवदिति क्वाप्यप्रतिपादनात्। **किञ्च** यत्प्रदेशे जीवाः सन्ति, तत्प्रदेशे नेश्वर इति न स्यादीश्वरस्य सर्वव्यापित्वमपि। प्रकृतिपुरुषसंयुक्तेश्वरस्य प्रकृतिवियुक्तपुरुषस्य वा कथं साम्यम्? यदि मुक्तजीवेश्वरयोः क्वचिदंशे साम्यं क्वचिदंशे वैषम्यमित्युच्यते, तर्हि बद्धजीवेश्वरयोरपि ज्ञातृत्वनित्यत्वाद्यंशे साम्यमस्त्येवेति व्यर्थं स्यात् 'मम साधर्म्यमागताः' इति वचनम्। आगतेः प्रागेव साधर्म्यसत्त्वादिति॥२॥

**ममेति।** क्षेत्रक्षेत्रज्ञसंयोगो भूतकारणमित्युक्तं पूर्वाध्याये। स कीदृशः संयोगः? इति शङ्कायामीदृशः इत्युच्यते ममेति श्लोकेनेत्याह—**क्षेत्रेति। स्वभूतेति।** ईश्वरस्य सच्चिदानन्दत्वं मायित्वं चेत्यस्ति रूपद्वयम्। वस्तुतः सच्चिदानन्दो, व्यवहारतस्तु मायीति। तत्र व्यवहारतः ईश्वरस्य स्वकीयत्वात् स्वभूतैव माया। ईश्वरशक्तेरेव मायात्वादिति भावः। न च स्वभूतेत्यत्र स्वशब्दः आत्मवाची, किन्त्वात्मीयवाच्येवेत्याह— **मदीयेति।** ननु अव्यक्तस्य कथं महत्त्वम्, व्यक्ते हि वस्तुनि महत्त्वमल्पत्वं वा निश्चेतुं शक्यम्, अत

१. सारूप्यं चेत् साधर्म्यं विवक्ष्यते, तदा प्रस्तुतज्ञानफलं विहायाप्रस्तुतध्यानफलकथनमिहासंगतं प्रसज्येतेत्यर्थः।

योनिः **सर्वभूतानां कारणम्। सर्वकार्येभ्यो महत्त्वाद् भरणाच्च स्वविकाराणां** महद् ब्रह्मे**ति योनिरेव विशिष्यते।** तस्मिन् **महति ब्रह्मणि योनौ** गर्भं **हिरण्यगर्भस्य जन्मनो बीजं सर्वभूतजन्मकारणं बीजं** दधामि **निक्षिपामि, क्षेत्रक्षेत्रज्ञ-प्रकृतिद्वयशक्तिमानीश्वरः** अहम् **अविद्याकामकर्मोपाधिस्वरूपानुविधायिनं क्षेत्रज्ञं क्षेत्रेण संयोजयामीत्यर्थः।** सम्भवः

आनन्दगिरिकृतव्याख्या

**चिच्छक्तिं व्यावर्तयति—** त्रिगुणात्मिकेति। **साङ्ख्यीयप्रकृतिरपि** मदीयेति **व्यावर्तिता। योनिशब्देन सर्वाणि भवनयोग्यानि कार्योणि प्रति उपादानत्वमभिप्रेतमित्याह—** सर्वभूतानामिति। **प्रकृतेर्महत्त्वं साधयति—** सर्वेति। [१]**सर्वकार्यव्याप्तिमादाय योनावेव ब्रह्मशब्दः। लिङ्ग-वैषम्याद् 'महद् ब्रह्मे'त्यर्थान्तरं किञ्चिदित्याशङ्क्याह—** योनिरिति। **तस्मिन्नित्यादि व्याचष्टे—** तस्मिन्निति। **ईदृशस्य क्षेत्रक्षेत्रज्ञसंयोगस्य भूतकारणत्वमिति वक्तुमुपक्रम्य किमिदमन्यदादर्शितमित्याशङ्क्याह—** क्षेत्रेति। **गर्भशब्देनोक्तसंयोगस्य फलं दर्शयति—** सम्भव इति।

भाष्यार्कप्रकाशः

आह— **सर्वकार्येभ्य इति**। सर्वकार्यापेक्षयाऽधिकत्वात् कारणस्य महत्त्वं प्रकृतेरिति भावः। ननु मिथ्याभूतायाः प्रकृतेः कथं ब्रह्मत्वम्? सत्यं हि ब्रह्मेत्यत आह— **स्वविकाराणामिति**। महदहङ्कारभूताद्यात्मविकाराणां [२]**बृंहणत्वाद्** वर्धकत्वाद् ब्रह्मत्वं प्रकृतेः। बृंहणाद् ब्रह्मेति व्युत्पत्तेरिति भावः। **योनिरेवेति**। प्रकृतिरेवेत्यर्थः। योनिप्रकृतिशब्दयोर्द्वयोरपि कारणवाचित्वात् प्रकृतौ योनिशब्दप्रयोगः।

**सर्वेति**। सर्वेषां भूतानां प्रजापतीन्द्रादीनां प्राणिनां जन्मनः कारणं सृष्टिकर्तेत्यर्थः। यः हिरण्यगर्भः ब्रह्मा तस्य जन्मन उत्पत्तेर्बीजं कारणं क्षेत्रज्ञमिति यावत्। **निक्षिपामीति**। यथा पिता पुत्रजन्मनः कारणं रेतोरूपं गर्भं स्त्रीयोनौ निक्षिपति, तद्वदिति भावः।

क्षेत्रे क्षेत्रज्ञं निक्षिपामीत्युक्तवाक्यतः सिद्धमर्थमाह— **क्षेत्रेति**। क्षेत्रक्षेत्रज्ञ एव प्रकृतिद्वयं, तदेव शक्ती चिच्छक्तिर्जडशक्तिश्चेति यस्य स तथोक्तोऽहमीश्वरः। अविद्याकामकर्माण्येवोपाधयः तेषां स्वरूपमनुविधातुं शीलमस्येति तं तथोक्तमविद्याकामकर्मरूपोपाधि-तादात्म्याध्यासमापन्नमित्यर्थः। अविद्याकामकर्मयुक्तमिति यावत्। संसारस्य बीजानीमानि त्रीणीति भावः। अविद्या अज्ञानं, काम इच्छा, कर्म अदृष्टं जन्मान्तरीयमिति विवेकः। केवलक्षेत्रज्ञस्य क्षेत्रसंयोगासम्भवादिदं विशेषणमुक्तम्। एतेन वस्तुत ईश्वरस्यापि क्षेत्रज्ञस्य जीवभावः प्राप्तोऽविद्ययेति सिद्धम्। अत एवास्येश्वरपारतन्त्र्यं प्रकृतिपारतन्त्र्यं च। एवंविधं जीवं क्षेत्रेण प्रकृत्या संयोजयामीत्येवं प्रकृत्या पुरुषे संयोजिते सतीश्वरेण ततो हिरण्यगर्भशरीरं जायते, तेन च तच्छरीराभिमानिना हिरण्यगर्भेण सर्वाणि भूतानि सृज्यन्त इत्याह— **सम्भव इति**।

**अयमभिप्रायः**— प्रपञ्चावसाने क्षेत्रज्ञः स्थूलशरीरोपाधीनां सर्वेषां नाशे सति कारणोपाधिभिरविद्याभिः सूक्ष्मशरीरोपाधिभिः कामाद्याश्रयैर्मनोबुद्ध्यात्मकैर्लिङ्गैश्च सहितः सन्नीश्वरप्रकृतौ मूलाज्ञाने निलीय वर्तते प्रलयावसानपर्यन्तम्। ततः प्रलयावसाने स एव सोपाधिकः क्षेत्रज्ञ ईश्वरसङ्कल्पवशात् पुनः स्थूलशरीरैः संयुज्यते। तानि च स्थूलशरीराणि न युगपदेवाविर्भवन्ति, पूर्वमपि युगपदनष्टत्वात् , किन्तु क्रमेणैव। तत्र चादौ हिरण्यगर्भाख्यं स्थूलशरीरं जायते, ततः क्रमेण प्रजापतिमन्वादय इति। अत एव 'हिरण्यगर्भः समवर्तताग्रे' इति श्रुतिः। पितृदेहात् पुत्रदेहवद्धिरण्यगर्भदेहात् प्रजापत्यादिदेहसम्भवाद् हिरण्यगर्भस्य जगत्स्रष्टृत्व-व्यपदेशश्चेति।

**ननु** क्षेत्रज्ञं लिङ्गिनं क्षेत्रेण संयोजयति, ततो हिरण्यगर्भो जायत इत्ययुक्तम् , हिरण्यगर्भस्य स्थूलशरीरस्य जन्मनः प्राक् तेन सह क्षेत्रस्य संयोगासम्भवादिति चेत् , **नैष दोषः।** स्थूलशरीराकारपरिणामोन्मुखप्रकृतिरिह क्षेत्रशब्दार्थः। तेन लिङ्गिनं योजयति, लिङ्गिसंसृष्टं च तत् क्षेत्रं स्थूलशरीराकारपरिणतं भवति। यथा सजीवं जातं शरीरं पुनर्वृध्या स्थौल्यं भजते, तद्वदिति।

**ननु** प्रपञ्चदशायां स्थूलोपाधिप्रयुक्त इव प्रलयदशायां सूक्ष्मोपाधिप्रयुक्तोऽस्त्येव क्षेत्रज्ञभेदः, तथा च क्षेत्रज्ञं क्षेत्रेण संयोजया-मीत्युक्तिरयुक्तेति चेत् , **मैवम्** ; उपाधिभेदस्य क्षेत्रज्ञभेदाप्रयोजकत्वात् । न हि घटाद्युपाधिभेद आकाशं भेदयेत्।

**ननु** माऽस्तु क्षेत्रज्ञभेदः, लिङ्गिभेदस्त्वस्त्येव, लिङ्गिनां परस्परभेदस्य सम्मतत्वात्। अन्यथाऽन्तःकरणाभेदे सुखदुःखादि-

१.सर्वकार्यव्याप्तिरूपगुणमादाय गौण्या ब्रह्मशब्दप्रयोगः, यौगिको वेत्यर्थः। २. भाष्ये 'भरणादि'त्यस्य स्थाने 'बृंहणाद्' 'बृंहणत्वाद्' इति पा.।

**सर्वयोनिषु कौन्तेय ! मूर्तयः सम्भवन्ति याः।**
**तासां ब्रह्म महद् योनिरहं बीजप्रदः पिता ॥४॥**

**उत्पत्तिः सर्वभूतानां हिरण्यगर्भोत्पत्तिद्वारेण** ततः **तस्माद् गर्भाधानाद् भवति, हे भारत !॥ ३॥**

सर्वयोनिष्विति। सर्वयोनिषु **देवपितृमनुष्यपशुमृगादिसर्वयोनिषु , हे कौन्तेय !** मूर्तयो **देहसंस्थानलक्षणाः**

आनन्दगिरिकृतव्याख्या

**'आदिकर्ता स भूतानाम्' इति स्मृत्या हिरण्यगर्भकार्यत्वावगमाद् भूतानां कथं यथोक्तगर्भाधाननिमित्तत्वम्? इत्याशङ्क्याह—** हिरण्यगर्भेति॥३॥

**ननु कथमुक्तकारणानुरोधेन हिरण्यगर्भोद्भवमभ्युपेत्य भूतानामुत्पत्तिरुच्यते, देवादिजातिविशेषेषु देहविशेषाणां कारणान्तरस्य सम्भवात् , तत्राह—** सर्वयोनिष्विति। **तत्र तत्र हेत्वन्तरप्रतिभासे कुतोऽस्य[1] हेतुत्वमित्याशङ्क्य , तत्तद्रूपेणास्यैवावस्थानादित्याह—**

भाष्यार्कप्रकाशः

साङ्कर्यप्रसङ्गात्। अमी च लिङ्गिनः सर्वे प्रलये ईश्वरप्रकृतौ निलीय वर्तन्त इत्युक्तम् , तत्र कं लिङ्गिनं केन क्षेत्रेण संयोजयतीश्वरः प्रलयावसाने इति **चेद्**?

उक्तमेव भाष्यकारैः— हिरण्यगर्भजन्मनो बीजमिति। यस्य हिरण्यगर्भशरीरप्राप्तिहेतुभूतमदृष्टमस्ति, तं लिङ्गिनं हिरण्यगर्भशरीराकारपरिणामोन्मुखप्रकृत्या संयोजयति तावदीश्वरः। ततः सचेतनं हिरण्यगर्भशरीरं जायते, स च तच्छरीराभिमानी हिरण्यगर्भः स्वयमन्यान् लिङ्गिनः क्षेत्रान्तरैः संयोजयति, एवं सर्वभूतसम्भवो भवति— 'धाता यथापूर्वमकल्पय'दिति श्रुतेः। **धाता** विधाता हिरण्यगर्भो ब्रह्मा। न चैवं हिरण्यगर्भकर्तृके जगति कथमीश्वरस्य स्रष्टृत्वमिति वाच्यम् ; जगत्स्रष्टुर्हिरण्यगर्भस्यापि स्रष्टृत्वेनेश्वरस्य जगत्स्रष्टृत्वमिति। यथा पितृस्रष्टा पितामहः पौत्रस्यापि स्रष्टा, तद्वत्। अत एव परमकारणत्वमीश्वरस्येति।

एतावता परमेश्वरः स्वप्रकृतौ निलीय वर्तमानं ब्रह्माधिकारप्राप्तियोग्यादृष्टशालिनं लिङ्गिनं क्षेत्रज्ञं स्वसङ्कल्पवशाद्धिरण्यगर्भशरीराकारपरिणामोन्मुखया प्रकृत्या संयोजयतीति फलितार्थः सिद्धः 'मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यह'मित्यस्य। प्रकृत्या क्षेत्रज्ञस्य संयोजनं नाम तत्तादात्म्याध्यासापादनम् , 'अध्यासलक्षणः संयोगः' इति दर्शितत्वा**दाचार्यैः**। अयं चाध्यासोऽविद्याकृत एवेति दर्शितं च। तस्मादविद्यामय एव सर्वः सृष्ट्यादिव्यवहारः।

**रामानुजस्तु**— अचेतनेऽपरप्रकृतिभूते महति ब्रह्मणि योनिभूते परप्रकृतिभूतं चेतनपुञ्जरूपं गर्भं दधामि, भोगक्षेत्रभूतया अचेतनप्रकृत्या भोक्तृवर्गपुञ्जभूतां चेतनप्रकृतिं संयोजयामीत्यर्थः। ततः संयोगाद् ब्रह्मादिस्तम्बपर्यन्तसर्वप्राण्युत्पत्तिरिति जगाद। **तन्मन्दम्।** चेतनपुञ्जस्य युगपदेव प्रकृतिसंयोजने सति युगपदेव ब्रह्मादिसर्वजगदुत्पत्तिप्रसङ्गात्। पुराणादिसिद्धब्रह्मप्रजापत्यादिपुत्रपौत्रादिक्रमविरोधाच्च। चेतनोपाधिभूतलिङ्गशरीरपुञ्जस्यापरप्रकृतित्वेन चेतनपुञ्जस्य परप्रकृतित्वमात्रासम्भवाच्च। न हि निरुपाधिकचैतन्यस्य पुञ्जत्वं सम्भवतीति। अन्वयस्तु— मम मदीया योनिः प्रकृतिर्महद् ब्रह्म, इत्युच्यत इति शेषः। तस्मिन् महति ब्रह्मणि। अन्यत् सुगमम्। मम मदीयं योनिः कारणभूतं महद् यद् ब्रह्म प्रकृतिस्तस्मिन्निति **रामानुजीयान्वयः**॥३॥

**सर्वेति**। हे कौन्तेय! सर्वयोनिषु या मूर्तयः सम्भवन्ति तासां महद् ब्रह्म योनिर्भवति। अहं बीजप्रदः पिता भवामि। सर्वयोनिष्वित्यत्रत्यसर्वशब्दार्थमाह—**देवेति**। आदिशब्दात् पक्षिसर्पादिग्रहणम्। योनयो जातयः। **मूर्छिताः** प्रवृद्धा अङ्गानि करचरणादीन्येवावयवा यासां ता मूर्छिताङ्गावयवाः। स्थावरजङ्गमात्मका देहा मूर्तय इति यावत्। सर्वावस्थं सर्वकार्यावस्थम् , अत एव महद् ब्रह्म प्रकृतिः। बीजं गर्भं क्षेत्रज्ञलक्षणं प्रदत्त इति **बीजप्रदः**, गर्भाधातेत्यर्थः। **पितेति**। यः प्राकृतः पिता स्त्रीयोनौ गर्भाधातृत्वेन प्रसिद्धः, स न गर्भाधाता, किन्तु रेतोनिधातैव। स्त्रीयोन्याकारेणावस्थितायां प्रकृतौ बीजलक्षणगर्भाधाता तु परमेश्वर एव। **यद्वा** नार्याः

१. महद्ब्रह्मशब्देनोक्तस्यार्थस्येत्यर्थः।

# सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
# निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥५॥

**मूर्च्छिताङ्गावयवा मूर्तयः सम्भवन्ति याः,** तासां **मूर्तीनां ब्रह्म महत् सर्वावस्थं** योनिः **कारणम् ,** अहम् **ईशो** बीजप्रदो **गर्भाधानस्य कर्ता पिता** ॥४॥

**के गुणाः, कथं बध्नन्तीत्युच्यते—** सत्त्वमिति। **सत्त्वं रजः तम इत्येवन्नामानः। गुणाः इति पारिभाषिकः शब्दः, न रूपादिवद् द्रव्याश्रिताः गुणाः। न च गुणगुणिनोरन्यत्वमत्र विवक्षितम्। तस्माद् गुणा इव नित्यपरतन्त्राः**

आनन्दगिरिकृतव्याख्या

सर्वावस्थमिति ॥४॥

**एवं क्षेत्रक्षेत्रज्ञसंयोगाज्जगदुत्पत्तिं दर्शयता ब्रह्मैवाविद्यया संसरतीत्युक्तम्। इदानीमध्यायादावुक्तमाकाङ्क्षाद्वयं पूर्वमनूद्यानन्तर-श्लोकेनोत्तरमाह—** के गुणा इति। **सत्त्वादिषु कथं गुणशब्दप्रवृत्तिरित्याशङ्क्य परतन्त्रत्वादित्याह—** गुणा इति। **रूपादिष्विव गुणशब्दः सत्त्वादिषु द्रव्याश्रितत्वं निमित्तीकृत्य किं न स्यादित्याशङ्क्य प्रकृत्यात्मकानां तेषां [1]सर्वाश्रयत्वान्नैवमित्याह—** न रूपादिवदिति। **गुणानां प्रकृतेश्च पृथगुक्तेरन्यत्वे कुतस्तेषां प्रकृत्यात्मत्वमित्याशङ्क्याह—** न च गुणेति। **अत्यन्तभेदे गवाश्ववत् [2]तद्भावासम्भवादित्यर्थः। [3]भेदे**

भाष्यार्कप्रकाशः

गर्भाधाता पुरुषः, पुरुषस्य गर्भाधाता तु परमेश्वरः। न हि केवलरेतोनिधानमात्रेण नार्याः गर्भो जायते। तस्मात् परमेश्वरः रेतोरूपेणावस्थितायां प्रकृतौ क्षेत्रज्ञलक्षणं बीजं निदधाति, तेन पुरुषस्तावद् गर्भवान् भवति, पश्चात् स्वेन धृतं सजीवरेतोरूपं गर्भं पुरुषः स्त्रीयोनौ निक्षिपति। सा च तेन गर्भवती भवति। एवं स्थिते गर्भाधाता परमेश्वर एव जायमानस्य पिता। अन्यः पिता त्वौपचारिक एवेति कृत्वा अहं बीजप्रदः पितेत्युक्तं भगवता। एतेन पुत्रोत्पत्तिं प्रति प्रकृतपितरौ नैव प्रधानकारणमिति सिद्धम्। अयं चेश्वरः कर्मसापेक्षः सन्नेव गर्भं दधातीति न वैषम्यादिदोषप्रसक्तिरीश्वरस्य।

**ननु** यद्येवं परमेश्वर एव सर्वत्र गर्भाधाता, तर्हि हिरण्यगर्भस्य स्रष्टृत्वाभ्युपगमो व्यर्थ इति **चेन्न।** हिरण्यगर्भाख्यजीव-स्वरूपावस्थितपरमेश्वरसङ्कल्पायत्तः क्षेत्रक्षेत्रज्ञसंयोग इत्यभ्युपगमात्। यद्वा राजचोदितभटकृतशत्रुविजये यथा राजकृतत्वव्यपदेशः, तथा परमेश्वरचोदितहिरण्यगर्भकृतभूतसृष्टौ परमेश्वरकृतत्वव्यपदेशः। अथवा भूतसृष्टौ परमेश्वर एव मुख्यं कारणम् , हिरण्यगर्भस्तु द्वारकारणमिति ॥४॥

**सत्त्वमिति**। हे महाबाहो! प्रकृतिसम्भवाः सत्त्वं रजस्तम इति गुणा देहेऽव्ययं देहिनं निबध्नन्तीव। ननु रूपसङ्ख्यापरिमाण-संयोगविभागादिवत् सत्त्वादिगुणत्रयस्येन्द्रियवेद्यत्वाभावाद्, ईश्वरशक्तिभूतायाः प्रकृतेश्चाग्निशक्तेरिव द्रव्यत्वाभावाद्, द्रव्याश्रितत्वस्य च गुणलक्षणत्वात् कथं प्रकृत्याश्रयाणां सत्त्वादीनां गुणत्वव्यवहारः? अत आह— **गुणा इति पारिभाषिकः शब्द इति**। वेदान्तशास्त्रसङ्केत-सिद्धसत्त्वादीनां गुणाः इति संज्ञेत्यर्थः। एवं सत्त्वादीनां गुणसंज्ञायाः पारिभाषिकत्वादेव रूपादीनामिव द्रव्याश्रितत्वलक्षणं गुणत्वं नास्तीत्याह— **नेति**। सत्त्वादय इति शेषः। रूपादिवद् द्रव्याश्रिता गुणा न भवन्ति। प्रकृतेरद्रव्यत्वात् , सत्त्वादीनां चातीन्द्रियत्वादिति भावः। **तस्मादिति**। सत्त्वादीनां रूपादिवद् गुणत्वाभावादित्यर्थः। **गुणगुणिनोः** सत्त्वादिगुणानां तदाश्रयप्रकृतेश्चेत्यर्थः। **अत्र** शास्त्रे ऽन्यत्वं न विवक्षितम्। यद्वा गुणगुणिनोः रूपघटयोरिव, सत्त्वादिगुणत्रयप्रकृत्योरन्यत्वमत्र न विवक्षितम्। 'गुणाः प्रकृतिसम्भवाः' इति सत्त्वादित्रयप्रकृत्योः कार्यकारणभावस्योच्यमानत्वात् कार्यकारणयोश्चानन्यत्वाद् , द्रव्यगुणयोश्चा(न)न्यत्वादिति भावः। तथाहि[4]— कारणतन्तुनाशे कार्यपटनाशात् , तन्तुव्यतिरेकेण पटादर्शनाच्च, कारणस्यैव कार्यात्मना परिणामदर्शनाच्च कार्यकारणयोरनन्यत्वं

१. प्रकृतेः सर्वकार्योपादानत्वेन तदात्मकानां गुणानामपि सर्वाश्रयत्वमिति भावः। २. **तद्भावः** तादात्म्यम्। ३. 'भेदाभेदे च' इति पा.। ४. कार्यकारणयोरनन्यत्वं, गुणगुणिनोरन्यत्वं च साधयति—तथाहीति। सिद्धान्ते कार्यकारणयोर्गुणगुणिनोश्च तादात्म्येऽपि तस्य वृत्तिनियामकत्वतदभावरूपवैलक्षण्यादन्यत्वानन्यत्वोक्तिः।

**क्षेत्रज्ञं प्रति, अविद्यात्मकत्वात्, क्षेत्रज्ञं निबध्नन्तीव। तमास्पदीकृत्यात्मानं प्रतिलभन्त इति निबध्नन्तीत्युच्यते। ते च**

आनन्दगिरिकृतव्याख्या

**ऽभेदे च तद्भावासम्भवाद् [1]विशेषात् कुतस्तेषु गुणपरिभाषेत्याशङ्क्याह—** तस्मादिति। **क्षेत्रज्ञं प्रति नित्यपारतन्त्र्ये हेतुमाह—** अविद्येति। **के गुणाः इत्यस्योत्तरमुक्तम्, कथं बध्नन्तीत्यस्योत्तरमाह—** क्षेत्रज्ञमिति। **तदेवोपपादयति—** तमास्पदीकृत्येति। **प्राकृतानां गुणानां प्रकृत्यात्मकत्वमाह—** ते चेति। **सम्भवत्यस्मादिति सम्भवः। प्रकृतिः सम्भवो येषां ते तथेति। साङ्ख्यीयां प्रकृतिं प्रधानाख्यां**

भाष्यार्कप्रकाशः

स्फुटम्। अन्धेनापि त्वगिन्द्रियेण रूपव्यतिरेकेण घटस्य गृह्यमाणत्वात्, पृथिवीं विनाऽपि घ्राणेन गन्धस्य गृह्यमाणत्वाच्च, आमचूत-फले समवेतस्य नीलरूपस्य पाकदशायां फलानाशेऽपि नाशसम्भवात्, पीतरूपान्तरस्य फलानुदयेऽप्युत्पत्तिदर्शनाच्च गुणगुणिनोः अन्यत्वं स्फुटम्। तस्माद् घटस्य रूपमिव सत्त्वादयो न प्रकृतेर्गुणाः, किन्तु प्रकृतेः परिणामा एव, मृदः परिणामो घट इव। अमीषु च प्रकृतिपरिणामेषु सत्त्वादिषु गुणव्यवहारः पारिभाषिकः।

**नन्वेवं** गुणवती प्रकृतिरिति कथं भाष्यते तत्र तत्र भाष्यकारैरेवेति चेत्, **उच्यते**— घटवती मृत्तिकेतिवद् गुणवती प्रकृतिरिति व्यवहारात्। कारणे हि कार्यं वर्तते। कारणद्रव्यस्याकारान्तरस्यैव कार्यत्वात्। यथा मृद्द्रव्यस्य कम्बुग्रीवाद्याकारः कार्यं घट इत्युच्यते। एवं कार्यकारणयोरनन्यत्वादेव कार्यमिथ्यात्वं कारणसत्यत्वं च श्रुत्युक्तमुपपद्यते। कारणव्यतिरेकेण कार्यस्यासत्त्वं हि कार्यमिथ्यात्वम्। तस्मात् प्रकृतेरनन्याः सत्त्वादयः प्रकृतिकार्यभूता न प्रकृतिगुणा इति सत्त्वादिगुणवत्त्वप्रयुक्तं द्रव्यत्वं न प्रकृतेः। प्रकृतिरूपद्रव्याश्रित-त्वप्रयुक्तं गुणत्वं च न सत्त्वादीनामिति स्थितम्। यदि जाड्यादिगुणवत्त्वात् पृथिव्यादिद्रव्योपादानत्वाच्च प्रकृतिर्द्रव्यमेवेत्याग्रहस्तर्हि ज्ञानादिगुणवत्त्वादन्तःकरणाद्युत्पत्तिं प्रति हेतुत्वाच्च सत्त्वादयोऽपि द्रव्याण्येव स्युरिति कथं सत्त्वादीनां गुणत्वम्? न कथमपीत्यर्थः।

नन्वेवं सत्त्वादीनां गुणा इत्येव संज्ञा किमिति कल्पिता? डित्थादिसंज्ञाः किमिति न कल्पिताः? अत आह— **गुणा इवेति**। यद्वा गुणा इति पारिभाषिकः शब्द इत्येकः पक्ष उक्तः। अथ गुणा इत्यौपचारिकः प्रयोग इति पक्षमन्यमाह— **गुणा इवेति**। 'गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु' इति कोशादप्रधाने गुणशब्दो वर्तते। परतन्त्राणां चाप्रधानत्वं प्रसिद्धम्। प्रधानो हि राजादिः स्वतन्त्रः। गृहे स्वतन्त्रो हि यजमानः प्रधान इत्युच्यते। यथा रूपादिगुणा नित्यमपि द्रव्यमेवाश्रित्य वर्तन्ते। न हि घटादिकं विना रूपादिगुणाः पृथगुपलभ्यन्ते। ततस्ते द्रव्यपरतन्त्रा एव, द्रव्यसत्ताभानाधीनसत्ताभानवत्त्वाद् गुणानाम्। तथा सत्तादयोऽपि क्षेत्रज्ञं प्रति नित्यपरतन्त्रा एव, नित्यं क्षेत्रज्ञपरतन्त्रा इत्यर्थः। एवं परतन्त्रत्वात् सत्त्वादयो गुणा इत्युच्यन्त उपचारादिति भावः।

ननु सत्त्वादीनां कुतः क्षेत्रज्ञपरतन्त्रत्वम्? अत आह— **अविद्यात्मकत्वादिति**। अविद्या प्रकृतिरात्मा स्वरूपं येषां तत्त्वात्। कार्यस्य कारणात्मकत्वादविद्याकार्याणि सत्त्वादीन्यविद्यात्मकान्येव। अविद्या चाचेतनत्वाच्चेतनपरतन्त्रैव, दण्डादिवदित्यविद्यात्मका गुणा अपि चेतनपरतन्त्रा एवेति भावः। यद्वा अविद्यात्मकत्वान्मिथ्याभूतत्वादित्यर्थः। अविद्याया हि मिथ्यात्वं स्वरूपम्, तदात्मकानां सत्त्वादीनां च तदेवेति। एवं मिथ्याभूताः सत्त्वादयः क्षेत्रज्ञे कल्पितत्वेन तत्सत्ताभानाधीनसत्ताभानवत्त्वात् तत्परतन्त्रा एव। यथा रज्जु-कल्पितसर्पाभासो रज्ज्वधीनसत्त्वादिमत्त्वाद् रज्जुपरतन्त्रः, तद्वदिति भावः। एतेन सत्त्वादिपारतन्त्र्यप्रतिपादनं क्षेत्रज्ञस्याज्ञान-विलसितमेवेति सिद्धम्। न चानुभवसिद्धस्य जीवपारतन्त्र्यस्य कथमपलाप इति वाच्यम्; न हि वयमज्ञानुभवसिद्धं जीव-पारतन्त्र्यमपलपामः, किन्तु विद्वदनुभवसिद्धं जीवपारतन्त्र्याभावं प्रतिपादयाम इति। ननु यद्येवं स्वतन्त्र ईश्वरः क्षेत्रज्ञस्तत्परतन्त्राश्च गुणाः सत्त्वादयः कथं तर्हि ते तं निबध्नन्तीत्यत आह— **तमिति**। **तं** गुणकल्पनाधिष्ठानभूतं क्षेत्रज्ञम् **आस्पदीकृत्य** आधारीकृत्य **आत्मानं** स्वरूपं **प्रतिलभन्ते** प्राप्नुवन्ति। गुणाः इति कर्तृपदम्। निरधिष्ठानभ्रमायोगात्। यथा सर्पाभासो रज्जुमास्पदीकृत्य स्वप्रतिष्ठां लभते, तद्वदिति भावः। अविद्यया क्षेत्रज्ञे कल्पिता गुणास्तेनैव भास्यमानाश्च सन्तः गुणाः सन्तीति भान्तीति च प्रतिष्ठां लभन्ते। कथमन्यथा जडा मिथ्याभूताश्चेमे गुणाः आत्मानं प्रख्यापयेयुः— इमे वयं स्मः इति। तस्माद् गुणानां सत्तास्फुरणे क्षेत्रज्ञाधीने

१. कुतो विशेषादित्यन्वयः।

प्रकृतिसम्भवाः **भगवन्मायासम्भवाः निबध्नन्तीव, हे** महाबाहो ! **महान्तौ समर्थतरावाजानुप्रलम्बौ बाहू यस्य स महाबाहुः, हे महाबाहो !** देहे **शरीरे** देहिनं **देहवन्तमव्ययम्। अव्ययत्वं चोक्तम् - [१]अनादित्वादित्यादिश्लोके। ननु देही न लिप्यत इत्युक्तम्। तत् कथमिह निबध्नन्तीत्यन्यथोच्यते? परिहृतमस्माभिरिवशब्देन— निबध्नन्तीवेति॥५॥**

आनन्दगिरिकृतव्याख्या

**व्यावर्तयति—** भगवदिति। **इवकारानुबन्धेन नितरां बध्नन्ति स्वविकारवत्तयोपदर्शयन्तीति क्रियापदं व्याख्याय, महाबाहुशब्दं व्याचष्टे—** महान्ताविति। देहवन्तं **देहमात्मानं मन्यमानं देहस्वामिनमित्यर्थः। कूटस्थस्य कथं बध्यमानत्वमित्याशङ्क्य 'कुर्यान्मेरावणुधियम्'[२] इति न्यायेन मायामाहात्म्यमिदमित्याह—** अव्ययमिति। **स्वतो धर्मतो वा व्ययराहित्यम् ? इत्यपेक्षायामाह—** अव्ययत्वं चेति। **'लिप्यते न स पापेने'त्यनेन विरुद्धमिदं निबध्नन्तीति वचनमिति शङ्कते—** नन्विति। **इवकारानुबन्धेन क्रियापदं व्याचक्षाणैरस्माभिरस्य चोद्यस्य परिहृतत्वान्नैवमित्याह—** परिहृतमिति॥५॥

भाष्यार्कप्रकाशः

एवेत्यभिसन्धिः।

**ननु** क्षेत्रज्ञमास्पदीकृत्यात्मानं प्रतिलभन्त इति हेतोः कथं निबध्नन्तीत्युच्यत इति चेद् , **उच्यते**— आत्मनि कल्पितत्वेन गुणानामात्मस्वरूपावरणद्वारा तद्बन्धकत्वमिति। कल्पितेन ह्यधिष्ठानस्वरूपं तिरोधाप्यते, सर्पाभासेन रज्जुस्वरूपवत्। तमास्पदीकृत्यात्मानं प्रतिलभमानत्वेन तस्मिन् कल्पितास्ते गुणाः सत्स्वरूपावरकत्वात् तं निबध्नन्तीत्युच्यत इति भावः। न चात्मभास्या गुणाः कथमात्मस्वरूपावरका इति वाच्यम् ; सूर्यभास्यस्य राहोर्मेघस्य वा सूर्यस्वरूपावरकत्वदर्शनात्।

ननु यद्यात्मनि कल्पितैर्गुणैरात्मस्वरूपमाव्रियते, तर्हि लिप्त एव गुणैरात्मेति कृत्वा कथमुक्तं 'शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते' इत्येवमाक्षिपति— **नन्विति। इवशब्देनेति**। वस्तुत आत्मानं न निबध्नन्ति, किन्तु निबध्नन्त इव दृश्यन्तेऽज्ञैः। न हि परिपूर्णस्वप्रकाशासङ्गाद्वितीयचिद्रूपात्मनि गुणास्तत्प्रयुक्तावरणादीनि वा भवितुमर्हन्ति। तस्मात् सर्वमिदं मायामयमेव, न तु तात्त्विकमिति भावगर्भेणेवशब्देन परिहृतं तद् यदाक्षिप्तं पूर्ववादिभिरिति भावः। निबध्नन्तीवेतीवशब्देनेत्यन्वयः। न चायं परिहारः आचार्यैः स्वकपोलकल्पितः, किन्तु 'सेयं भगवतो माया यन्नयेन विरुध्यते, ईश्वरस्य विमुक्तस्य कार्पण्यमुत बन्धनम्॥' इति भागवते **बादरायणेनैव** भगवता दर्शित इति बोध्यम्। तस्मात् कालत्रयेऽप्यात्मन्यविद्यागुणसङ्गसंसारादिकं नास्त्येवेति परमार्थः।

यत्तु **रामानुजः**— सत्त्वरजस्तमांसि त्रयो गुणाः प्रकृतेः स्वरूपानुबन्धिनः स्वभावविशेषाः प्रकाशादिकार्यैकनिरूपणीयाः प्रकृत्यवस्थायामनुद्भूतास्तद्विकारेषु महदादिषूद्भूताः देहिनमेनमव्ययं स्वतो गुणसम्बन्धानर्हं देहे वर्तमानत्वोपाधिना निबध्नन्तीति। **तत्तुच्छम् ,** यदि प्रकृतेः स्वरूपानुबन्धिनस्ते, तर्हि प्रकृतिं कदाचिदपि न त्यजेतुः। प्रकृत्यवस्थायामनुद्भूताः इति त्वयैवोच्यते। अतः कथमयं विरोधः परिह्रियेत?

न च [**ननु** ] गुणसाम्यावस्था हि प्रकृत्यवस्था। तस्यां साम्येन वर्तन्त एव सत्त्वादयः। विषमतया तु महदादिषूद्भूता इति चेत् , **मैवम्** ; घटकपालकरकादयः सर्वेऽपि मृदि साम्येन वर्तन्त एवेतिवदप्रमाणत्वात् तद्वचनस्य। सत्त्वादीनामन्योन्यवैषम्यं हि स्वरूपम् , तेषां साम्यं तु घटकपालादीनामिव स्वरूपनाशे सत्येव सम्भवति, न तु स्वरूपे सति। [३]प्रकाशकत्व-रञ्जकत्व-मोहकत्वरूप-विरुद्धधर्माश्रयाणां तेषां कथं साम्यं स्यात्? दर्शितधर्मरहितायां प्रकृत्यवस्थायां कथं धर्मिसत्त्वमनुमातुं शक्यम्?

न च महदादिकार्यगतसत्त्वादिभिस्तत्कारणप्रकृतिगतसत्त्वाद्यनुमानमिति वाच्यम् ; घटादिकार्यगतकम्बुग्रीवाद्याकारैर्मृद्यपि कम्बुग्रीवाद्याकाराणामनुमेयत्वापत्तेः। न चेष्टापत्तिः, प्रत्यक्षविरोधात्। न च कारणगुणानामेव कार्ये सङ्क्रमणान्महदादिगतसत्त्वादि-गुणाः प्रकृतिगुणा एवेति वाच्यम् ; समवायिकारणगुणानां रूपादीनामेव कार्ये सङ्क्रमणमिति सिद्धान्तात्। न हि रूपादिगुणेषु सत्त्वादयः पठिताः। नाप्यतीन्द्रियाणां तेषां रूपाद्यनुप्रवेशनं न्याय्यम् , रूपादीनामिन्द्रियगम्यत्वात्। किञ्च प्रकाशादिकार्यैकनिरूपणीयत्वाद्

१. द्र. भ.गी. १३-३१। 'अनादित्वादित्यादिश्लोकेन' इति पा.। २. द्र. बृ.वा.१-३-३१३ । ३. प्रकाशकत्वादयः क्रमेण सत्त्वादीनां धर्माः। द्र. सां.का. १३।

भाष्यार्कप्रकाशः

महदादिषु सत्त्वादयः सन्तु नाम, कथं पुनः प्रकृत्यवस्थायां तत्सत्त्वम् , तत्प्रयुक्तप्रकाशादिकार्याभावात्। महदादिद्वारा प्रकृतेस्तद्वत्तासाधनं तु गौरवावहं व्यर्थं च। सत्त्वादिगुणोत्पादनशक्तियुक्तत्वमात्रेण तु प्रकृतेर्गुणसाम्यावस्थात्वप्रतिपादनं, न तु त्रयो गुणास्तत्र साम्येन सन्तीति। तथा सति प्रकाशकत्वादितद्धर्माणामपि साम्येन प्रतीतिप्रसङ्गात्।

**किञ्च** सत्त्वादीनामुद्भूतत्वं वदता त्वया कार्यत्वमवश्यमभ्युपेयम् , ब्रूहि कस्य कार्याणि सत्त्वादीनि? न तावत् प्रकृतिकार्याणि, प्रकृतिस्वरूपानुबन्धित्वात् तेषाम् , गन्धवत्त्वमिव पृथिवीस्वरूपानुबन्धि । स्वरूपनिरूपकधर्मा हि धर्मिणं कदाचिदपि न त्यजन्तीति **वेदान्तदेशिकेनै**वोक्तत्वादिह। न ह्युत्पत्तेः प्रागसतां सत्त्वादीनां प्रकृतिस्वरूपानुबन्धित्वं सम्भवति, प्रकृतिरनादिर्हि। नापि पुरुषकार्याणि, तस्याकर्तृत्वात्। नापीश्वरकार्याणि, प्रकृतिपुरुषद्वारैवेश्वरस्य कर्तृत्वाभ्युपगमात्। न चैवं सत्त्वादयोऽनादयः इति वाच्यम् ; 'गुणाः प्रकृतिसंभवाः' इतीहैवोच्यमानत्वात्। न च प्रकृतौ साम्येन वर्तमाना गुणा वैषम्येण ततो जायन्त इति वाच्यम् ; साम्येन गुणवर्तनस्य निराकृतत्वात्। समाः सत्त्वादिगुणा अनादयः, विषमास्तु सादय इति क्वापि शास्त्रेऽदर्शनात्। न च समाः सत्त्वादिगुणा एव प्रकृतिरिति वाच्यम्। तथा सति सत्त्वादिगुणातिरिक्तप्रकृतिकल्पनस्य, प्रकृतिः धर्मिपदार्थः सत्त्वादयस्तु तद्धर्मा इति वादस्य चायुक्तत्वात्।

तस्माद् यदि प्रकृतिस्वरूपानुबन्धिस्वभावविशेषाः सत्त्वादयस्तर्हि तेषां प्रकृतेः सकाशात् सम्भवकथनं विरुध्यते। न हि धर्मिणः सकाशाज्जायमानः क्वापि धर्मो दृश्यते। तथा सति धर्मोत्पत्तेः प्राग् धर्मिण एव धर्मित्वस्याभावप्रसङ्गात्। उत्पत्तेः प्रागपि धर्मस्य सत्त्वे तदुत्पत्त्ययोगाच्च। घटात् सकाशाद् रूपस्योत्पत्तिप्रसङ्गाच्च। धर्मिपरतन्त्रस्य धर्मस्य केवलं जन्मायोगाच्च। न हि निराश्रयो रूपादिः क्वाप्युपलभ्यते। अथ यदि प्रकृतेः सकाशाद् गुणानां सम्भवो यथोक्तोऽभ्युपेयते, तर्हि मृदो घट इव प्रकृतेः सत्त्वादयः परिणामा एव, न तु स्वरूपानुबन्धिधर्मविशेषाः। एवं प्रकृतिपरिणामत्वे सति सत्त्वादीनां द्रव्यत्वमेव स्यान्महदादिवत्। युक्तं च द्रव्यत्वं सत्त्वादीनां ज्ञानादिगुणवत्त्वात्। गुणवत्त्वं हि द्रव्यस्य लक्षणम्।

**ननु** प्रकृतेर्द्रव्यात् सकाशाज्जायमानाः सत्त्वादयो न द्रव्याणि, किन्तु गुणा एव, यथाऽन्तःकरणाद् द्रव्याज्जायमानाः सुखदुःखादयो न द्रव्याणि, किन्तु गुणा एव, तद्वत्। ततश्च सुखदुःखादीनामन्तःकरणधर्मत्ववत् सत्त्वादीनां प्रकृतिधर्मत्वं सिध्यतीति चेत् , **मैवम्** ; न वयं द्रव्याद् गुणा न जायन्त इति ब्रूमः, किं तर्हि? ययोर्गुणगुणिनोः समवायः सम्मतः, स गुणस्तस्माद् गुणिनो न जायत इति ब्रूमः। 'सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च। प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥' इति सत्त्वादिभ्योऽपि ज्ञानादयो भवन्तीति वक्ष्यमाणत्वाच्च। सुखादीनामन्तःकरणधर्मत्ववज्ज्ञानादीनां सत्त्वादिधर्मत्वाच्च प्रकृतेः सकाशाज्जायमानाः सत्त्वादयोऽन्तःकरणादिवद् द्रव्याण्येव, न गुणाः, [1]गुणवत्त्वादिति।

**ननु** यदि सत्त्वादयो द्रव्याणि, तर्हि किमिति नोपलभ्येरन्निति चेत्? **नायं नियमः -** यद् द्रव्यं तदुपलब्धव्यमिति। प्रकृतेरप्यनुपलभ्यायाः द्रव्यत्वाभ्युपगमात् तव। यथा महदादिकार्यानुमेया प्रकृतिस्तथा प्रकाशादिकार्यानुमेयाः सत्त्वादय इति। यदि व्यक्तान्येव द्रव्याणीत्युच्येत, तर्हि प्रकृतिवत् सत्त्वादिरपि द्रव्यं मा भूदव्यक्तत्वात्। न चैवं सत्त्वादीनां द्रव्यत्वे कुतो महदादिषु तदनुप्रवेश इति वाच्यम् ; यथा प्रकृतिर्द्रव्यमपि महदादिषु स्वकार्येष्वनुगता, तद्वदिति।

**ननु** द्रव्यपरतन्त्रत्वात् सत्त्वादयो गुणा एव, न तु द्रव्याणि, 'शुद्धसत्त्वगुणा माया' 'मलिनसत्त्वगुणा अविद्या' 'अहङ्कारस्त्रिविधः - सात्त्विको राजसस्तामसश्चेति' 'पञ्चभूतसत्त्वांशसमष्टिकार्यं मन' इत्यादिव्यवहारादिति चेत् , **मैवम्** ; परिणामिनः परिणामवत्त्वमुचितम् , मृद इव घटवत्त्वम्। तथा च घटो मृदीव, प्रकृतौ सत्त्वादयाः शुद्धाः अशुद्धा वा वर्तन्त एव। तेन शुद्धसत्त्वा माया, मलिनसत्त्वाऽविद्येति व्यवहार उपपद्यते। सत्त्वस्य शुद्धिर्नाम रजआद्यनभिभूतत्वम् , तदभिभूतत्वं त्वशुद्धत्वमिति विवेकः। एवमुद्भूतगुणा माया महदाद्यात्मना परिणतेत्यहङ्कारस्य त्रिविधत्वं युक्तम्। तथा भूतानां च सत्त्वादिगुणवत्त्वं युक्तमिति।

**ननु** घटात्मना परिणताया मृत्तिकाया अन्यैव मृत्तिका करकात्मना परिणमते। न तु घटाकारवती सैव मृत्तिका घटाकारानुपमर्देन करकाद्याकारं भजते यथा, तथा सत्त्वाद्याकारपरिणतायाः प्रकृतेरन्यैव महदाद्याकारेण परिणमेत। न तु सैव सत्त्वादिगुणाकारा-

१. गुणवत्त्वस्य द्रव्यलक्षणत्वादिति भावः।

भाष्यार्कप्रकाशः

नुपमर्देन महदाद्याकारं भजते। एवं सति महदादिकार्याणां प्रकृतिमयत्वे सत्यपि न सत्त्वादिमयत्वं स्यादिति चेत् , **मैवम्** ; जलसंयोगात् पिण्डाकारेण परिणतो यश्चूर्णपुञ्जः स एव घटाद्याकारेण परिणमते, न त्व[तु]पिण्डाकारः। एवमीश्वरसङ्कल्पात् सत्त्वादिगुणत्रयाकारेण परिणामं प्राप्ता या प्रकृतिः सैव महदाद्याकारेण परिणमते, न त्वन्या। प्रलयेऽपि प्रपञ्चप्रसङ्गात्। प्रलये ह्यपरिणता सत्त्वादिरूपेण प्रकृतिरस्ति। अत एव गुणसाम्यावस्था प्रकृतिरिति प्रवादः। तदानीं सत्त्वादिगुणाभावात् प्रकृतौ। एवं गुणत्रयाकारपरिणत-प्रकृतिपरिणामत्वान्महदादीनां गुणत्रयवत्त्वमिति। न च पिण्डाकारपरिणतमृत्कार्येष्वपि घटादिषु पिण्डवत्त्वं नोपलभ्यत इति वाच्यम् ; चूर्णपुञ्जमेलनविशेषो हि पिण्डः। किं घटे अमिलितश्चूर्णपुञ्जः क्वापि दृश्यते? किन्तु मिलित एव। तादृशमिलितचूर्णपुञ्जवत्त्वमेव पिण्डवत्त्वं घटस्येति। तस्मात् प्रकृतेः प्रथमो विकारः सत्त्वादिगुणत्रयम्। सत्त्वादिरूपविकृतप्रकृतिविकारास्तु महदादय इति सिद्धं सत्त्वादित्रयस्य प्रकृतिविकारत्वेन प्रकृतिवद् द्रव्यत्वम्। अत एवोक्तम्— 'गुणाः प्रकृतिसम्भवाः' इति। कथमन्यथा सत्त्वादिसमवेत-प्रकृतिकार्यत्वं स्यात् सत्त्वादेः, [1]रूपसमवेतघटकार्यत्वमिव रूपस्य। तस्मात् सिद्धं सत्त्वादीनां रूपादिवदगुणत्वम्। यदि सत्त्वादिषु गुणत्वलोभेन प्रकृतिसमवेतत्वं त्यज्यते, तर्हि सत्त्वादीनां प्रकृतिस्वरूपनिरूपकधर्मत्वं नैव स्यात्। न हि कपिसंयोगो वृक्षस्य स्वरूपनिरूपकधर्मः स्यात् , येन सत्त्वादिगुणसंयोगः प्रकृतेः स्वरूपनिरूपकधर्मः स्यात्।

**नन्वेवं** मूलप्रकृतेर्महदाद्याकारपरिणामवत् सत्त्वाद्याकारपरिणामे सति 'मूलप्रकृतिरविकृति'रिति साङ्ख्यकारिकायां सत्त्वादयः कुतो नोक्ताः इति **चेत्**? पृच्छ साङ्ख्यम् , न हि वयं साङ्ख्याः। एवमादिदोषवशादेव हि साङ्ख्यदर्शनमप्रमाणमिति वयं ब्रूमः। न च सत्त्वा-द्याकारपरिणतप्रकृतिरेव महदादिहेतुत्वेन मूलप्रकृतिरिति ग्रहणे साङ्ख्यमतं न दुष्यतीति वाच्यम् ; तादृशप्रकृतेर्विकृतित्वेनाविकृतित्वा-भावात् 'मूलप्रकृतिरविकृति'रिति विशेषितत्वाच्च। तस्मात् प्रकृत्यज्ञानाव्यक्तशक्त्यविद्यामायादिपर्यायवतः ईश्वरस्वभावस्य परिणाम-विशेषा एव सत्त्वादयो, न तु गुणाः।

**नन्वन्तः**करणपरिणामसुखादिवृत्तीनां गुणत्वात् प्रकृतिपरिणामसत्त्वादित्रयस्य गुणत्वमस्त्विति चेत् , **मैवम्** ; दृष्टान्ता-सम्प्रतिपत्तेः। न ह्यन्तःकरणपरिणामा[न् ] वृत्तीर्वयं गुणाः इति ब्रूमः, किं तर्हि? अन्तःकरणात्मकत्वाद् द्रव्याण्येव। न हि द्रव्यस्य क्वापि गुणाकारेण परिणामः उचितः। कार्यकारणयोः सालक्षण्यनियमात्।

**नन्वेवं** शुक्लादिगुणाः किं कस्यापि विकाराः, उत न? आद्ये, यस्य विकारास्ते तत् किं द्रव्यमुतान्यत्? द्रव्यत्वे कथं द्रव्यस्य गुणरूपेण परिणामः? अन्यत्तु नास्त्येव। द्वितीये, रूपादीनां जायमानत्वेन प्रसिद्धानामनादित्वमयुक्तम् , अप्रमाणं चेति चेत् , **मैवम्** ; शुक्लादिगुणा द्रव्याश्रिताः सन्त एव जायन्ते, न तु पृथक्। तथा सति वाय्वाकारपरिणतप्रकृतेः सकाशात् तेजोद्रव्यं जायते, तच्च सरूपं जायत इति नात्र कार्यकारणवैलक्षण्यप्रसङ्गः। वायुतेजसोर्द्रव्यत्वादुभयोरपि। न च सरूपत्वनीरूपत्वाभ्यां वैलक्षण्यमिति वाच्यम् ; अत्यन्ताभेदे कार्यकारणयोः कार्यकारणभावस्यैवाभावप्रसङ्गात्। कारणे आकाशेऽविद्यमानस्यापि स्पर्शगुणस्य कार्ये वायौ प्रादुर्भाव-दर्शनाच्च।

**नन्वेवं** नीरूपद्रव्यस्य सरूपद्रव्याकारपरिणामेऽपि द्रव्यस्य गुणाकारपरिणामः सिद्ध इति चेत् , **मैवम्** ; तत्र द्रव्यांश एव परिणतत्वं, गुणांशे तु विवर्तत्वमेवेति। न च कारणे वाय्वादावप्यनुद्भूतरूपमस्तीति वाच्यम् ; अनुद्भूतत्वेनादृश्यमानस्य रूपस्य सत्त्वे मानाभावात्। एवमात्मन्यप्यनुद्भूतरूपसत्त्वकल्पनप्रसङ्गात्। तस्य च 'अशब्दमस्पर्शमरूपमव्यय'मित्यादिशास्त्रविरोधात्। अनुद्भूत-रूपाभ्युपगमेऽपि तस्यैवोद्भूतरूपत्वेन परिणामो, न तु द्रव्यस्येति सिद्धत्वाच्च। तस्मान्न सत्त्वादयो गुणाः, किन्तु महदादिवत् प्रकृत्यवस्थाविशेषा एव।

**यच्च** सत्त्वादीनामगुणत्वे गुणशब्दप्रसिद्धिर्विरुद्धेति **वेदान्तदेशिकः। तदयुक्तम्** , गुणशब्दप्रसिद्धेः पारिभाषिकत्वेनैवोपपन्न-त्वात्। [2]शास्त्रं ह्यनादिकालात् प्रवृत्तम् , तद्बलाच्च सत्त्वादीनां गुणशब्दप्रसिद्धिः। यथा मायायाः प्रकृत्यादिशब्दप्रसिद्धिः। न हि शास्त्रं विना मायायाः प्रकृत्यादिशब्दप्रसिद्धिमपि जानीयुः केऽपि। तस्माच्छास्त्रसिद्ध एवायमिति नाप्रसिद्धः।

---

१. रूपसमवेतो घटोऽप्रसिद्धः। अतो न तत्कार्यत्वं रूपस्य। 'घटसमवेतरूपे'ति वा स्यात्। २. सत्त्वादिषु गुणशब्दस्य पारिभाषिकत्वं सांख्यसंमतमेवेति बोध्यम्।

**तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्।**
**सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ! ॥६॥**

[१]तत्र सत्त्वमिति। तत्र **सत्त्वादीनां [२]मध्ये सत्त्वस्यैव तावल्लक्षणमुच्यते। [३]तत्र निर्मलत्वात् स्फटिकमणिरिव, प्रकाशकम्** अनामयं **निरुपद्रवं सत्त्वम्। तद् निबध्नाति। कथम्?** सुखसङ्गेन। **'सुख्यह'**मिति [४]**विषयभूतस्य सुखस्य विषयिण्यात्मनि संश्लेषापादनं मृषैव सुखे सञ्जनमिति। सैषा अविद्या। न हि विषयधर्मो विषयिणो भवति। इच्छादि च**

आनन्दगिरिकृतव्याख्या

**किंलक्षणो गुणः केन बध्नातीत्यपेक्षायामाह—** तत्रेति। **निर्धारणार्थतया सप्तमीं व्याचष्टे—** तत्र सत्त्वादीनामिति। **पुनः** तत्रेत्य**नुवादमात्रम्।** निर्मलत्वं **स्वच्छत्वमावरणवारणक्षमत्वम्। तस्मात्** प्रकाशकं **चैतन्याभिव्यञ्जकम्।** निरुपद्रवमिति। **निर्मलं सत् सुखस्याति[भि]व्यञ्जकमित्यर्थः। केन द्वारेण तदात्मानं निबध्नातीति पृच्छति—** कथमिति। **सुखसङ्गेन बध्नातीत्युत्तरम्। तदेव विवृणोति —** सुख्यहमित्यादिना। **मुख्यसुखस्याभिव्यञ्जकसत्त्वपरिणामोऽत्र** विषयसम्भूतं **सुखमुच्यते। संश्लेषापादनमेव विशदयति—** मृषैवेति। **किमिति मृषैवेति विशेषणम् , सङ्गस्य वस्तुत्वसम्भवादित्याशङ्क्याह—** सैषेति। **ननु इच्छा सङ्गोऽभिनिवेशश्चेत्येकोऽर्थः। तत्रेच्छादेरात्मधर्मत्वात् किमविद्ययेत्याशङ्क्य , मनोधर्मत्वादिच्छादेर्नात्मधर्मतेत्याह—** न हीति। **इच्छादेरनात्मधर्मत्वे किं प्रमाणमित्याशङ्क्याह—**

भाष्यार्कप्रकाशः

**यच्च** देहे वर्तमानत्वोपाधिना निबध्नन्तीति, **तदप्ययुक्तम् ,** घटे वर्तमानत्वोपाधिना गगनस्य घटकृतबन्धाभावाज्जीवस्यापि देहाश्रयगुणकृतबन्धायोगात्। 'स्वतो बन्धानर्ह'मिति हि त्वयैवोच्यते। शरीरस्थत्वं च न बन्धहेतुरिति 'शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते' इत्यनेनोक्तं भगवतैव। तस्मादलेपकस्य बद्धत्वं दुर्घटमेव॥५॥

**तत्रेति।** हेऽनघ ! तत्र निर्मलत्वात् प्रकाशकमनामयं सत्त्वं सुखसङ्गेन ज्ञानसङ्गेन च देहिनं बध्नाति। **तत्र** सत्त्वादीनां मध्य इत्यर्थः। **तावद्** आदावित्यर्थः। **लक्षणमिति।** स्वरूपमित्यर्थः। येनोक्तेन धर्मजातेन सत्त्वं लक्ष्यते तदिति वा। प्रकाशकत्वे सत्यात्मनि ज्ञानसुखासञ्जकत्वं सत्त्वस्य लक्षणम्। आत्मन्यतिव्याप्तिवारणाय विशेष्यदलम्। अविद्यायामतिव्याप्तिवारणाय प्रकाशकत्वे सतीति विशेषणम्। यदि सत्त्वमप्यविद्यैवेति मतम् , तर्हि स्वरूपकथनमात्रपरमेव तत् , न व्यावर्तकमिति बोध्यम्। सत्त्वस्य प्रकाशकत्वे हेतुः—**निर्मलत्वादिति।** सत्त्वं प्रकाशकं निर्मलत्वात् स्फटिकमणिवदिति। एवं प्रकाशकत्वादेवानामयं, निर्गच्छत्युपद्रवो यस्मात् तत् निरुपद्रवम्। सत्त्वं निरुपद्रवम् प्रकाशकत्वाद् आतपवद् , व्यतिरेकेणान्धकारवच्च। सत्त्वे प्रवृद्धे सति शमदमादिद्वारा ज्ञानं सम्पादयितुं शक्यत इति हेतोर्निरुपद्रवत्वमुक्तं सत्त्वस्य। एतेन प्रकाशकत्वं, निरुपद्रवत्वं, ज्ञानसुखासञ्जकत्वं चेति त्रीणि सत्त्वस्य लक्षणभूता धर्मा इति सिद्धम्। **बध्नाति** देहिनमिति शेषः। बन्धनप्रकारं दर्शयितुमाक्षिपति—**कथमिति। सुखसङ्गेनेति।** सुखसङ्गजननेनेत्यर्थः। इदमेवाह — **सुखस्य संश्लेषापादनेनेति।** कीदृशस्य सुखस्य कुत्र संश्लेषापादनम्? अत आह— **विषयभूतस्य सुखस्य विषयिण्यात्मनीति।** कथं विषयभूतत्वं सुखस्येत्यत आह— **सुख्यहमिति।** सुख्यहमिति प्रतीतौ हि सुखं विषयभूतम् , आत्मा तु विषयीभूत इति भावः। आत्मवेद्यत्वात् सुखस्यात्मविषयत्वं, सुखवेदितृत्वादात्मनः सुखविषयित्वं चेति बोध्यम्। संश्लेषापादनमेवाभिनीय दर्शयति— **ममैवं सुखं सञ्जातमिति।** यथा पुरुषस्य ममैव सुखं सञ्जातमिति प्रत्ययः स्यात् , तथा पुरुषे विषयिणि विषयभूतं सुखमासञ्जयतीति भावः। किमिदमासञ्जनं सत्यम्? अत आह— **मृषैवेति।** सत्त्वकर्तृकमात्माधिष्ठानकं सुखासञ्जनं मिथ्यैवेत्यर्थः। एवं मिथ्यात्वादेव सुखासञ्जनमविद्येत्याह—**सैषेति।** विधेयप्राधान्यात् स्त्रीत्वम्। तदिदं सुखसञ्जनमविद्येत्यर्थः। **यद्वा** ममैव सुखं सञ्जातमिति सैषा प्रतीतिरविद्येत्यर्थः। तदेवोपपादयति— **न हीति।** विषयस्यान्तःकरणस्य धर्मः सुखं विषयिणो न भवति हि। विषयस्य घटस्य धर्मो

१. 'तत्र सत्त्वादीनां सत्त्वस्यैव तावल्लक्षणमुच्यते— तत्र सत्त्वमिति।' इति पा.। २. 'मध्ये' इति क्वचिन्न। ३. 'तत्र' इति क्वचिन्न। ४. 'विषयसंभूतस्य' इति पाठः आनन्दगिरिदृष्टः इति भाति।

**धृत्यन्तं क्षेत्रस्यैव विषयस्य धर्म इत्युक्तं भगवता। अतोऽविद्ययैव स्वकीयधर्मभूतया विषयविषय्यविवेकलक्षणया अस्वात्मभूते सुखे सञ्जयतीव, [1]आसक्तमिव करोति, असङ्गं सक्तमिव करोति, असुखिनं सुखिनमिव। तथा** ज्ञानसङ्गेन **च। ज्ञानमिति सुखसाहचर्यात् [2]क्षेत्रस्यैवान्तःकरणस्य धर्मो, नात्मनः। आत्मधर्मत्वे सङ्गानुपपत्तेर्बन्धानुपपत्तेश्च। सुख इव ज्ञानादौ सङ्गो मन्तव्यः, हे** अनघ **अव्यसन !॥ ६॥**

आनन्दगिरिकृतव्याख्या

इच्छादि चेति। **तस्यात्मधर्मत्वासम्भवे फलितमाह—** अत इति। सञ्जयतीव **सत्त्वमिति शेषः। इवकारप्रयोगे हेतुमाह—** अविद्ययेति। **तस्याः वस्तुतो नात्मसम्बन्धस्तथापि सम्बन्ध्यन्तराभावाद् अस्वातन्त्र्याच्चात्मधर्मत्वमापाद्य दृष्टत्वमाचष्टे—** स्वकीयेति। **वृत्तिमदन्तः-करणस्य विषयत्वाद् आत्मनः साधकत्वेन तद्विषयित्वेऽपि तदविवेकरूपाऽविद्येति तत्स्वरूपमाह—**विषयेति। **यथोक्ताविद्यामाहात्म्यमिदं यदस्वरूपेऽतद्धर्मे च सक्तिसम्पादनमित्याह—** अस्वेति। **तदेव स्फुटयति—** सक्तमिवेति। **प्रकारान्तरेण सत्त्वस्य [3]निबन्धृत्वमाह—** तथेति। **ज्ञायतेऽनेनेति सत्त्वपरिणामो ज्ञानम्। तेन ज्ञान्यहमिति विपरीताभिमानेन सत्त्वमात्मानं निबध्नातीत्याह—** ज्ञानमित्यादिना। **विपक्षे दोषमाह—**आत्मेति। **स्वाभाविकत्वेन प्राप्तत्वात् , तत्र स्वतः संयोगात् , तद्द्वारा बन्धे च तन्निवृत्त्यनुपपत्तेः नात्मधर्मत्वमित्यर्थः। ज्ञानैश्वर्यादावपि क्षेत्रधर्मे सङ्गस्य पूर्ववदाविद्यकत्वं सूचयति—** सुख इवेति। **पापादिदोषहीनस्यैवात्र शास्त्रेऽधिकार इति द्योतयति—** अनघेति॥ ६॥

भाष्यार्कप्रकाशः

यथा जाड्यादिर्विषयिणो द्रष्टुर्न भवति, तद्वदिति भावः। ननु सुखं न विषयधर्मः, किन्तु विषयिधर्म एव, सुख्यहमिति प्रतीतेः, अत आह— **इच्छादीति। अतः** सुखसञ्जनस्य मृषात्वादित्यर्थः। सत्त्वमिति कर्तुःशेषः। अविद्यैव सुखे आत्मानं सञ्जयतीवेत्यन्वयः। सञ्जनहेतुरविद्या। किमियमविद्या मूलाज्ञानम् , उत तूलाज्ञानम्? अत आह— **स्वकीयधर्मभूतयेति**।[4] स्वशब्दः सत्त्वगुणपरः। अविद्यायाः लक्षणमाह— **विषयेति। विषयविषयिणोः** मनआत्मनोः **अविवेको** विवेकाभाव एव **लक्षणं** स्वरूपं यस्यास्तया तथोक्तया। कीदृशं सुखम्? अत आह— **अस्वात्मभूत इति**। अस्वधर्मभूत इत्यर्थः। अस्वरूपभूत इति वा। नेदं सुखमात्मनः स्वरूपभूत आनन्दः, किन्तु मनोवृत्तिप्रतिफलितानन्द एवेति भावः। सञ्जयतेरर्थमाह— **असङ्गं सक्तमिवेति**। इवशब्दान्न वस्तुत इति भावः। निर्धर्मकेऽसङ्गे आत्मनि सुखसङ्गायोगादिति भावः। कथमसङ्गं सक्तमिव करोतीत्यत आह— **असुखिनं सुखिनमिवेति**। असुखिनं सुखरहितमात्मानं सुखिनमिव करोति। सत्त्वं कर्तृ।

अयमर्थः— सत्त्वगुणप्रयुक्तादात्मानात्माविवेकादनात्मधर्मं सुखमात्मन्यध्यस्य सुख्यहमिति प्रत्येत्यविद्वानिति। ततश्च बद्ध इव भवतीति। ज्ञानमत्र न चैतन्यम्। तस्यात्मधर्मत्वेन, मनोधर्मसुखसाहचर्यान्मनोधर्मवृत्तिज्ञानस्यैव ग्राह्यत्वेन च चैतन्याग्रहणात्। **साहचर्यादिति**। सहचरितासहचरितयोः सहचरितस्यैव ग्रहणमिति न्यायादिति भावः। क्षेत्रस्यैव विषयस्य जडस्यान्तःकरणस्य धर्मो वृत्त्यात्मकं ज्ञानमित्यन्वयः। अन्तःकरणस्य विषयात्मना परिणामो वृत्तिः। एवकारार्थमाह— **नात्मन इति**। आत्मनो धर्मभूतं चैतन्यं नेह ज्ञानशब्देनोच्यत इत्यर्थः। वृत्त्यात्मकं ज्ञानमन्तःकरणस्यैव धर्मो, नात्मन इति वा। कुतो वृत्तिज्ञानस्य नात्मधर्मत्वम्? अत आह— **आत्मेति**। यदि वृत्तिज्ञानमप्यात्मधर्मः स्यात् , तर्हि तेनात्मनः सङ्गो न स्यात्। सङ्गात् प्रागेव तस्य सिद्धत्वात्। न हि वृक्षस्य कपिसङ्गवशाज्जाड्यसङ्गोऽस्तीति वक्तुं शक्यते। तथाऽन्यधर्मस्यान्यत्राध्यासाद् बन्धः, न तु स्वधर्मस्य क्वापि बन्धकत्वमित्याह— **बन्धानुपपत्तेश्चेति**। एतेन ज्ञानशब्देन चैतन्यग्रहणे चैतन्येन सहात्मनः सङ्गानुपपत्तिः, चैतन्यस्य बन्धकत्वाभावाद् बन्धानुपपत्तिश्चेति सूचितम्। नन्वनात्मधर्मेण ज्ञानेन कथमात्मनः सङ्गः? अत आह— **सुख इवेति**। आध्यासिक एव सङ्गो न तात्त्विक इति भावः। आदिपदाद् रागादिग्रहणम्। सत्त्वगुणप्रयुक्तादात्मानात्माविवेकादनात्मधर्मं ज्ञानमात्मन्यध्यस्य ज्ञान्यहमिति प्रत्येत्यविद्वान्। ततश्च

---

१. 'आसक्तमिव करोति, असङ्गं' इति क्वचिन्न। २. 'क्षेत्रस्यैव विषयस्यान्तःकरणस्य' इति पा.। ३. 'निबन्धनत्वमाह' इति पा.। ४. तथा च न मूलाज्ञानमिहाविद्या, तस्य सत्त्वधर्मत्वासंभवादिति भावः।

**रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।**
**तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥७॥**
**तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।**

रज इति। **रजो** रागात्मकम् **रञ्जनाद् रागः, गैरिकादिवद् रागात्मकं** विद्धि **जानीहि**। तृष्णासङ्गसमुद्भवं **तृष्णा अप्राप्ताभिलाषः, आसङ्गः प्राप्ते विषये मनसः प्रीतिलक्षणः संश्लेषः, तृष्णासङ्गयोः समुद्भवं तृष्णासङ्गसमुद्भवम्।** तन्निबध्नाति **तद् रजः निबध्नाति, हे कौन्तेय !** कर्मसङ्गेन **दृष्टादृष्टार्थेषु कर्मसु सञ्जनं तत्परता कर्मसङ्गः, तेन निबध्नाति रजो देहिनम्॥७॥**

तमस्त्विति। **तमः तृतीयो गुणः,** अज्ञानजम् **अज्ञानाज्जातमज्ञानजं विद्धि।** मोहनं **मोहकरम् अविवेककरं**

आनन्दगिरिकृतव्याख्या

**रजस्तर्हि किंलक्षणम् , कथं वा पुरुषं निबध्नातीत्याशङ्क्याह—** रज इति। **रज्यते संसृज्यतेऽनेन पुरुषो दृश्यैरिति रागः। असावात्माऽस्येति** रागात्मकं **रजो जानीहीत्याह—** रञ्जनादिति। **समुद्भवत्यस्मादिति** समुद्भवः। **तृष्णा चासङ्गश्च तृष्णासङ्गौ, तयोः समुद्भवस्तमिति विग्रहं गृहीत्वा कार्यद्वारा रजो विवक्षुस्तृष्णासङ्गयोरर्थभेदमाह—** तृष्णेत्यादिना। **रजसो लक्षणमुक्त्वा निबन्धृत्वप्रकार-माह—** तद्रज इति। **कर्मसङ्गं विभजते—** दृष्टेति। **अकर्तारमेव पुरुषं करोमीत्यभिमानेन प्रवर्तयतीत्यर्थः॥७॥**

**तमस्तर्हि किंलक्षणम् , कथं वा पुरुषं निबध्नाति? तत्राह—** तमस्त्विति। **गुणानां प्रकृतिसम्भवत्वाविशेषेऽपि तमसो**

भाष्यार्कप्रकाशः

बद्ध इव भवतीतीहाप्यर्थो बोद्धव्यः।

यत्तु **रामानुजः**— सत्त्वं पुरुषस्य ज्ञानसुखयोः सत्यमेव सङ्गं जनयतीति। **तदयुक्तम् ,** निर्धर्मकेऽसङ्गे चात्मनि सत्यसुखज्ञान-सङ्गासम्भवात्। न च मिथ्याभूतोऽपि सङ्गो न युक्त इति वाच्यम् ; गगने नीरूपेऽपि नैल्यस्य मिथ्याभूतस्य दर्शनात्॥६॥

**रज इति**। रजो रागात्मकं विद्धि। तृष्णासङ्गसमुद्भवं तत् कर्मसङ्गेन देहिनं निबध्नाति। यद्वा रजो रागात्मकं तृष्णासङ्गसमुद्भवं च विद्धि। तृष्णासङ्गसमुद्भवं रजो रागात्मकं विद्धीति वा। रागात्मकं रजः तृष्णासङ्गसमुद्भवं विद्धि इति वा। रागः आत्मा स्वरूपं यस्य तद् **रागात्मकम्**। रागशब्दव्युत्पत्तिमाह— **रञ्जनाद्राग इति**। दृष्टान्तमाह— **गैरिकादिवदिति**। यथा गैरिकादिधातुरसः पटादेः रञ्जकस्तद्वदयं मनसः इति भावः। रञ्जकत्वे सति देहिनः कर्मासञ्जकत्वं रजसो लक्षणम्। कथं रञ्जकत्वम्? अत आह— **तृष्णेति**। तृष्णासङ्गजननद्वारा रञ्जकत्वं रजसः इत्यर्थः। अप्राप्ते वस्तुन्यभिलाषस्तृष्णा। प्राप्ते वस्तुनि मनसः प्रीतिलक्षणः संश्लेषः आसङ्गः, आसक्तिरिति यावत्। दृष्टाः पशुपुत्रादयः, अदृष्टाः स्वर्गादयश्च दृष्टादृष्टाः अर्थाः फलानि येषां तेषु दृष्टादृष्टादिषु [**दृष्टादृष्टार्थेषु**] दृष्टार्थेष्व-दृष्टार्थेषु चेत्यर्थः। कर्मसु कृष्यादिषु , इष्ट्यादिषु च यः सङ्गः सञ्जनं सक्तिस्तात्पर्यमिति यावत्। स कर्मसङ्गः, तेन कर्मसङ्गेन कर्मसु सक्तिजननद्वारेत्यर्थः। अन्वयं दर्शयति—**निबध्नाति रजो देहिनमिति**। रजो देहिनं निबध्नातीवेत्यर्थः। रजोगुणप्रयुक्तादात्मा-नात्माविवेकान्मनोधर्मौ तृष्णासङ्गावात्मन्यध्यस्य देहाद्याश्रयं कर्म चात्मन्यध्यस्य, अस्मै फलायाहमिदं करोमीति प्रत्येत्यविद्वान्। ततश्च तत्फलमनुभवन् बद्ध इव भातीति परमार्थः।

**रामानुजस्तु**— रागो योषित्पुरुषयोरन्योन्यस्पृहा, तद्धेतुत्वाद् रागात्मकः। तृष्णा शब्दादिसर्वविषयस्पृहा, सङ्गः पुत्रमित्रादिषु सम्बन्धिषु संश्लेषस्पृहा, तथा देहिनं कर्मसु स्पृहाजननद्वारेण रजो निबध्नातीति। **तन्मन्दम् ,** एकस्या एव स्पृहायाः विषयभेदेन बहुधा निर्देशस्य फलाभावात् , शब्दादिसर्वविषयस्पृहातिरिक्तयोषित्पुरुषान्योन्यस्पृहाद्यभावाच्च॥७॥

**तम इति**। अज्ञानजं तमस्तु सर्वदेहिनां मोहनं विद्धि। तमस्त्वज्ञानजं सर्वदेहिनां मोहनं च विद्धीति वा। तत् प्रमादालस्य-

## प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत!॥ ८॥

सर्वदेहिनां **सर्वेषां देहवताम्।** प्रमादालस्यनिद्राभिः **प्रमादश्चालस्यं च निद्रा च प्रमादालस्यनिद्राः,** [1]**ताभिः** तत् **तमो निबध्नाति, भारत ! ॥८॥**

### आनन्दगिरिकृतव्याख्या

**ऽज्ञानजत्वविशेषणं** [2]**तद्विपरीतस्वभावानापत्तेरिति मत्वाऽऽह—** अज्ञानादिति। **मुह्यत्यनेनेति** मोहनं **विवेकप्रतिबन्धकमिति कार्यद्वारा तमो निर्दिशति—** मोहनमित्यादिना। **लक्षणमुक्त्वा तमसो बन्धनकरत्वं दर्शयति—** प्रमादेति। **कार्यान्तरासक्ततया चिकीर्षितस्य कर्तव्यस्याकरणं प्रमादः, निरीहतयोत्साहप्रतिबन्धस्त्वालस्यम् , स्वापो निद्रा, ताभिरात्मानमविकारमेव तमोऽपि विकारयतीत्यर्थः॥८॥**

### भाष्यार्कप्रकाशः

निद्राभिः देहिनं निबध्नाति। **अज्ञानं** ज्ञानाभावः, न तु प्रकृतिः। सत्त्वरजसोरपि प्रकृतिजत्वांशेऽविशेषात्। 'गुणाः प्रकृतिसम्भवाः' इति ह्युक्तम्। न चाभावात् कथं भावस्योत्पत्तिरिति वाच्यम् ; ज्ञानाभाववत्प्रकृतिजत्वेन ज्ञानाभावजत्वव्यपदेशात्। **यद्वा** चिदाभासशून्यम-ज्ञानं केवलमिहाज्ञानशब्देन विवक्षितम् , सत्त्वरजसोः कारणमज्ञानं तु चिदाभासरहितम्। कथमन्यथा सत्त्वरजसोरपि चिदाभास-साहित्यप्रयुक्तं ज्ञानं स्यात्। न च सत्त्वादेव ज्ञानं न तु रजस इति वाच्यम् ; तृष्णादीनामपि ज्ञानविशेषत्वात्। न चैवं ज्ञानसङ्गेन देहिबन्धकत्वं रजसोऽप्यस्तीति वाच्यम् ; ज्ञानसङ्गप्रयुक्तकर्मसङ्गेन बन्धकत्वं रजस इति विशेषात्। तृष्णासङ्गव्यतिरिक्तज्ञानसङ्गेन सत्त्वं बध्नातीति विशेषादिति वा। **वस्तुतस्तु** आवरणात्मकः आवरणशक्तिप्रधानो वा प्रकृत्यंशोऽत्राज्ञानशब्देन विवक्षित इति वेद्यम्। **मोहनमिति**। आत्मानात्माविवेको मोहः।

**ननु** सत्त्वरजसोरप्यस्त्येवेदं मोहकत्वमिति चेत्? **सत्यमस्ति**। किन्तु अयमात्मा, अयमनात्मेति विवेकाभावः सत्त्वादि-प्रयुक्तः। आत्मानात्माख्यपदार्थज्ञानाभावस्तु तमःप्रयुक्त इति भेदः। **अविवेककरमिति**। ज्ञानाभावजनकमित्यर्थः। मोहनं भ्रान्ति-जनकमिति **श्रीधरः**। **प्रमादो**ऽनवधानता। **आलस्यं** मान्द्यम्। **निद्रा** सुप्तिः। मोहकत्वे सति प्रमादालस्यनिद्राभिरात्मनो बन्धकत्वं तमसो लक्षणम्। तमोगुणप्रयुक्तादविवेकाद् अनात्मधर्मान् प्रमादालस्यनिद्राः आत्मन्यध्यस्य प्रमत्तोऽहम् अलसोऽहं सुप्तोऽहमिति प्रत्येत्य-विद्वान् ; ततश्च बद्ध इव भवतीति परमार्थः। प्रमादालस्यनिद्राश्चान्तःकरणधर्मा इति बोध्यम्। न च निद्रायामन्तःकरणस्यैवाभावात् कथं निद्रायास्तद्धर्मत्वमिति वाच्यम् ; अन्तःकरणस्य प्रकृतौ निलीयावस्थानस्यैव निद्रात्वेन अन्तःकरणनिलयनावस्था निद्रा अन्तःकरणधर्म एवेति।

श्लोकत्रयस्यायमभिप्रायः— प्रकृतिकार्येऽन्तःकरणे सत्त्वादिगुणत्रयमनुगतमस्ति। तत्रान्तःकरणे गुणत्रयवति यः सत्त्वांशः तत्कार्ये सुखज्ञाने। ते चाविद्यया आत्मन्यध्यस्ते भूत्वा बन्धके भवत इवात्मनः। यो रजोंऽशः तत्कार्ये तृष्णासङ्गौ। तत्प्रयुक्तं कर्म च तत्कार्यम्। तत्त्रयमप्यविद्ययाऽऽत्मन्यध्यस्तं सद् बन्धकमिवात्मनः। यश्च तमोंऽशः, तत्कार्याणि मोहप्रमादालस्यनिद्राः। ताश्चाविद्य-याऽऽत्मन्यध्यस्ताः सत्यः आत्मनो बन्धिका इवेति। सर्वोऽप्ययमात्मबन्धोऽविद्यामयत्वान्मृषैव, न वास्तव इति इवशब्दाभिप्राय इति॥८॥

---

१. 'ताभिः प्रमादालस्यनिद्राभिः' इति पा.। २. 'गुणाः प्रकृतिसम्भवाः'(१४-५) इति त्रयाणामपि अज्ञानात्मकप्रकृतिजत्वस्य साधारण्ये सति तमसः अज्ञानजत्व-विशेषणस्याभिप्रायमाह—**तद्विपरीतेति**। 'ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत'इत्युक्तेः आवरणत्वरूपकारणस्वभावविपरीतस्वभावस्य तमस्यभावादित्यर्थः। अत एव तमःकार्येऽपि मोहादौ अज्ञानशब्दप्रयोगः। एवमेव गुणशब्दप्रयोगः कार्ये कारणे चास्मिन् प्रकरणे द्रष्टव्यः। एवं च - अज्ञानजम् इत्यत्र अज्ञानाज्जातम् अज्ञानजमिति व्याख्याने 'प्रमादमोहौ तमसो भवतोऽज्ञानमेव च' (१४-१७) इति वाक्यशेषे अज्ञानस्य तमःकार्यत्वप्रतिपादनविरोधं मत्वा, अज्ञानं जायते यस्मादिति यद् विग्रहप्रदर्शनं मध्वाचार्याणाम् , तदापाततः। अज्ञानजमित्यस्य अज्ञानजनकमिति अर्थवर्णनस्यास्वरसत्वात्। 'कर्मणः सुकृतस्याहुः' इति कर्मणः प्रक्रान्तत्वेन संक्षेपेण सात्त्विकादिकर्मफलस्य प्रदर्शके तस्मिन् श्लोके अज्ञानपदेन बुद्धेर्जाड्यापरपर्यायाविवेकस्यैवोक्तत्वात् तस्य च तमोजन्यत्वोक्तेरविरोधात्। इह तु गुणस्वरूपप्रदर्शनावसरे कारणानुरूप्यज्ञापनायाज्ञानजत्वोक्तेः। अत एव आनन्दगिर्याचार्यैः— 'अज्ञानं विवेकाभावः' इति तत्र व्याख्यातम्।

**सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।।**
**ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत॥९॥**
**रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।।**

**पुनर्गुणानां व्यापारः संक्षेपतः उच्यते—** सत्त्वमिति। **सत्त्वं सुखे** सञ्जयति **संश्लेषयति। रजः कर्मणि, हे भारत ! सञ्जयतीति** [1]**वर्तते।** ज्ञानं **सत्त्वकृतं विवेकम्** आवृत्य **आच्छाद्य तु तमः स्वेनावरणात्मना प्रमादे सञ्जयत्युत।** प्रमादो **नाम प्राप्तकर्तव्याकरणम्** ॥९॥

**उक्तं कार्यं कदा कुर्वन्ति गुणाः इत्युच्यते—** रज इति। **रजस्तमश्च उभावप्यभिभूय सत्त्वं** भवति **उद्भवति वर्धते यदा तदा लब्धात्मकं सत्त्वं स्वकार्यं ज्ञानसुखाद्यारभते। हे भारत ! तथा रजोगुणः सत्त्वं तमश्चैवोभावप्यभिभूय वर्धते यदा तदा कर्मतृष्णादि[2] स्वकार्यमारभते। तमआख्यो गुणः सत्त्वं रजश्चोभावप्यभिभूय तथैव वर्धते यदा तदा ज्ञानावरणादि स्वकार्यमारभते॥ १०॥**

आनन्दगिरिकृतव्याख्या

**उक्तानां मध्ये कस्मिन् कार्ये कस्य गुणस्योत्कर्षः? तत्राह—** पुनरिति। **सुखे साध्ये विषये समुत्कृष्यते सत्त्वमित्याह—** सत्त्वमिति। **सञ्जयतीत्यस्यार्थमाह—** संश्लेषयतीति। **कर्मणि साध्ये रजः समुत्कृष्यत इत्याह—** रज इति। **प्रमादे प्राधान्यं तमसो दर्शयति—** ज्ञानमिति॥९॥

**इतरेतराविरोधेन वा सत्त्वादयो गुणाः युगपदुत्कृष्यन्ते, विरोधेन वा, क्रमेण वेति सन्देहात् पृच्छति—** उक्तमिति। **सत्त्वोत्कर्षार्थिनामितराभिभवार्थं क्रमपक्षमाश्रित्योत्तरमाह—** उच्यत इति। **सत्त्वाभिवृद्धिमेव विवृणोति—** तदेति। **रजस्तमसोस्तिरोधानदशायामिति यावत्। रजसो वृद्धिप्रकारं , तत्कार्यं च कथयति—** तथेति। **तमसोऽपि विवृद्धिं , तत्कार्यं च निर्दिशति—** तम इति॥ १०॥

भाष्यार्कप्रकाशः

**सत्त्वमिति**। देहिनमिति शेषः। सत्त्वं सुखे सञ्जयति। रजः कर्मणि सञ्जयति। तमस्तु ज्ञानमावृत्य प्रमादे सञ्जयत्युत संश्लेषयति; सङ्गमयतीवेत्यर्थः। केनावृत्येत्यत आह— **स्वेनेति**। किंरूपेण स्वेनेत्यत आह— **आवरणात्मनेति**। स्वस्वरूपेणैवावृत्येत्यर्थः। आवारकत्वात् स्वस्वरूपस्य तमस इति भावः। आवरणात्मकं हि तमः, प्रकाशात्मकं तु सत्त्वं, रागात्मकं तु रज इति बोध्यम्। प्रमादशब्दार्थमाह— **प्राप्तेति**। प्राप्तं शास्त्रादज्ञस्य प्राप्तं यत् कर्तव्यं कर्म, तस्याकरणं प्रमाद इत्युच्यते। इदमेव ह्यनवधानं नाम, यत् कर्तव्यस्य कर्मणोऽकरणम्। कर्तव्यात् कर्मणोऽन्यत्र प्रवृत्तिहेतुभूतमनवधानं प्रमाद इति **रामानुजः**। तन्मन्दम्— कर्तव्याकरणस्यैवानवधानत्वेन तदन्यत्र प्रवृत्तिहेतुरनवधानमिति कल्पनस्यन्याय्यत्वात्। यो ह्यनवहितचित्तः स प्राप्तमेव न करोति, किं पुनरप्राप्तं न करोतीति॥९॥

**रज इति**। हे भारत! सत्त्वं कर्तृ , रजस्तमश्चाभिभूय भवति। रजः कर्तृ , सत्त्वं तमश्चाभिभूय भवति। तथा तमः कर्तृ , सत्त्वं रजश्चाभिभूय भवति। यदा, तदा सत्त्वादयः स्वं स्वं कार्यमारभन्त इति वाक्यशेषः। **अभिभूय** तिरस्कृत्य। **उद्भवतीति**। ननु प्रागेव सिद्धस्य कथं पुनरुद्भवः? अत आह— **वर्धत इति**। **लब्धात्मकं** प्राप्तप्रतिष्ठम्। **आरभते** जनयति।

**रामानुजस्तु**— सत्त्वादयः प्रकृतिसंसृष्टात्मस्वरूपानुबन्धिन इत्युक्तवान्। तत्तु देहाकारपरिणतप्रकृतिस्वरूपानुबन्धिनः सत्त्वादयो गुणा इति। तदीयेनैव वचनेन पराहतम्। न हि प्रकृतिस्वरूपानुबन्धिनो गुणाः प्रकृतिविलक्षणात्मस्वरूपानुबन्धिनो भवितुमर्हन्ति। नाप्यात्मस्वरूपस्य प्रकृतिसंसृष्टत्वमस्ति, असङ्गत्वादात्मनो निरवयवत्वाच्च॥ १०॥

१. 'अनुवर्तते' इति पा.। २. 'कर्म कृष्यादि' इति पा.।

**रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा॥ १०॥**
**सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते।**
**ज्ञानं यदा तदा विद्याद् विवृद्धं सत्त्वमित्युत॥ ११॥**
**लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा।**

**यदा यो गुणः उद्भूतो भवति, तदा तस्य किं लिङ्गमित्युच्यते—** सर्वद्वारेष्विति। सर्वद्वारेषु **आत्मन उपलब्धिद्वाराणि श्रोत्रादीनि सर्वाणि करणानि, तेषु सर्वद्वारेषु अन्तःकरणस्य बुद्धेर्वृत्तिः** प्रकाशो **देहेऽस्मिन्नुपजायते तदेव ज्ञानम्। यदैवं प्रकाशो ज्ञानाख्य उपजायते तदा ज्ञानप्रकाशेन लिङ्गेन विद्याद् विवृद्धमुद्भूतं सत्त्वमिति** उत अपि **॥ ११॥**

**रजसः उद्भूतस्येदं चिह्नम्—** लोभ इति। **लोभः परद्रव्यादित्सा,** प्रवृत्तिः **प्रवर्तनं सामान्यचेष्टा,** आरम्भः **उद्यमः, कस्य? कर्मणाम्।** अशमः **अनुपशमः, हर्षरागादिप्रवृत्तिः,** स्पृहा **सर्वसामान्यवस्तुविषया तृष्णा, रजसि गुणे**

आनन्दगिरिकृतव्याख्या

**उत्तरश्लोकत्रयस्याकाङ्क्षां दर्शयति—**यदेति। **सत्त्वोद्भवलिङ्गदर्शनार्थमनन्तरं श्लोकमुत्थापयति—**उच्यत इति। **सर्वद्वारेष्वित्यादिसप्तमी निमित्ते नेतव्या।** उतशब्दोऽपिशब्दपर्यायोऽप्यतिशयार्थः॥ ११॥

**अतिशयेनोद्भूतस्य रजसो लिङ्गमाह—** रजस इति। **उपक्रमपर्यायस्यारम्भस्य विषयं पृच्छति—** कस्येति। **काम्यानि निषिद्धानि च लौकिकानि कर्माणि विषयत्वेन निर्दिशति—** कर्मणामिति। अनुपशमो **बाह्यान्तःकरणानामिति शेषः। लोभाद्युपलम्भाद् रजोवृद्धिर्बोद्धव्येति भावः॥ १२॥**

भाष्यार्कप्रकाशः

**सर्वेति।** **उद्भूतः** प्रवृद्धः। **तस्य** प्रवृद्धगुणस्य, गुणवृद्धेरिति वा। **लिङ्गं** चिह्नं, ज्ञापकमिति यावत्। **इति** शङ्कायामुच्यते सर्वद्वारेष्विति श्लोकः। यदा अस्मिन् देहे सर्वद्वारेषु प्रकाशो ज्ञानमुपजायते तदा सत्त्वं विवृद्धमिति विद्यादुत। उपलब्धिर्घटादिज्ञानम्, तद्द्वाराणि। चक्षुरादिद्वारेण निर्गतान्तःकरणवृत्त्या हि घटादिकं विषयमुपलभत आत्मा प्रमाता। **सर्वेषु द्वारेष्विति।** न युगपत्, किन्तु क्रमेणेति भावः। न ह्येकमेवान्तःकरणं युगपत् सर्वद्वारेभ्यो निर्गत्य शब्दस्पर्शादिसर्वविषयाकारेण परिणन्तुमीष्टे। युगपत् सर्वेन्द्रियज्ञानानुत्पत्तिर्हि मनसो लिङ्गमिति[१] वृद्धव्यवहारात्।

प्रकाशशब्दार्थमाह— **बुद्धेर्व्याप्तिरिति। तदेवेति।** प्रकाश एवेत्यर्थः। क्लीबत्वं तु सामान्यात्। प्रकाश इति यद्वस्तु तदेवेति वा। प्रकाशनमेवेति वा। **ज्ञानमिति।** वृत्तिज्ञानमित्यर्थः। **ज्ञानप्रकाशेनेति।** ज्ञानाख्यप्रकाशेनेत्यर्थः। सूर्यादिप्रकाशव्यावृत्त्यर्थं ज्ञानविशेषणम्। प्रकाशो बुद्धिव्याप्तिः, स एव ज्ञानमिति, ज्ञानस्य प्रकाशत्वविशेषणं तु चैतन्यव्यावृत्त्यर्थमिति बोध्यम्। तस्मान्नान्यतरवैयर्थ्यम्। अन्यतरवैयर्थ्यमेव हि पुनरुक्तिदोषबीजम्। तस्मान्न पौनरुक्त्यम्। उतेत्यव्ययस्यार्थमाह— **अपीति।** चेत्यर्थः।

यत्तु **रामानुजः**— वस्तुयाथात्म्यप्रकाशे ज्ञानमुपजायत इति, **तन्मन्दम्**, वस्तुयाथात्म्यप्रकाशस्यैव ज्ञानत्वेन ज्ञानप्रकाशयोराधाराधेयभावायोगाद्, विषयविषयिभावायोगाच्च॥ ११॥

**लोभ इति।** हे भरतर्षभ ! रजसि विवृद्धे सति लोभः प्रवृत्तिः कर्मणामारम्भोऽशमः स्पृहा इत्येतानि जायन्ते। लिप्सा लब्धुमिच्छा। आरम्भप्रवृत्त्योः सामान्यविशेषभावाद् भेद इत्याह— **सामान्यचेष्टेति।** गमनादिसामान्यव्यापारः प्रवृत्तिः, यज्ञादिकर्मविशेषव्यापार आरम्भ इति विवेकः। **कर्मणामिति।** यज्ञादीनामित्यर्थः। **उपशमो** निवृत्तिः, तदभावोऽनुपशमः। फलितार्थमाह— **हर्षेति।**

१. द्र. न्यायसूत्रम् १.१.१६

**रजस्येतानि जायन्ते विवृद्धे भरतर्षभ !॥ १२॥**
**अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च।**
**तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन !॥ १३॥**
**यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत्।**
**तदोत्तमविदां लोकानमलान् प्रतिपद्यते॥ १४॥**

**विवृद्ध एतानि लिङ्गानि जायन्ते, हे भरतर्षभ !॥ १२॥**

अप्रकाश इति। अप्रकाशोऽ**विवेकोऽत्यन्तम्**, अप्रवृत्तिश्च **प्रवृत्त्यभावः, तत्कार्यं प्रमादो मोह एव चाविवेको मूढतेत्यर्थः। तमसि गुणे विवृद्ध एतानि लिङ्गानि जायन्ते, हे कुरुनन्दन !॥ १३॥**

**मरणद्वारेणापि यत्फलं प्राप्यते तदपि** [१]**सङ्गरागहेतुकं सर्वं गौणमेवेति दर्शयन्नाह—** यदेति। **यदा सत्त्वे प्रवृद्धे उद्भूते तु** प्रलयं **मरणं** याति **प्रतिपद्यते** देहभृद् **आत्मा तदा** उत्तमविदां **महदादितत्त्वविदामित्येतत्। लोकान्** अमलान् **मलरहितान्** प्रतिपद्यते **प्राप्नोतीत्येतत्॥ १४॥**

आनन्दगिरिकृतव्याख्या

**उद्भूतस्य तमसो लिङ्गमाह—** अप्रकाश इति। **सर्वथैव ज्ञानकर्मणोरभावो विशेषणाभ्यामुक्तः।** तत्कार्यमिति **तच्छब्दो दर्शिताविवेकार्थः। प्रमादो व्याख्यातः।** मोहो **वेदितव्यस्यान्यथावेदनम्। तस्यैव मौढ्यान्तरमाह—** अविवेक इति। **अविवेकातिशयादिना प्रवृद्धं तमो ज्ञेयमिति भावः॥ १३॥**

**सात्त्विकादीनां भावानां पारलौकिकं फलविभागमुदाहरति—** मरणेति। सङ्गः **सक्तिः,** रागः **तृष्णा। तद्बलादनुष्ठानद्वारा लभ्यमानमित्यर्थः।** गौणं **सत्त्वादिगुणप्रयुक्तमिति यावत्। तत्र सत्त्वगुणवृद्धिकृतफलविशेषमाह—** यदेति। मलरहितान् **रजस्तमसोरन्यतरस्योद्भवो मलम्, तेन रहितान् आगमसिद्धान् ब्रह्मलोकादीनित्यर्थः॥ १४॥**

भाष्यार्कप्रकाशः

हर्षरागादिविषयेषु प्रवृत्तिरशम इत्यर्थः। सर्वसामान्यवस्तूनि शब्दादयः, येषु सर्वेषां जन्तूनामभिलाषः। **लिङ्गानीति**। ज्ञापकानि कार्याणीत्यर्थः। कार्येण हि कारणमनुमीयत इति कारणस्य कार्यं लिङ्गम् , वह्नेर्धूमवत्। लोभः स्वकीयद्रव्यस्यात्यागशीलतेति **रामानुजः**। तत्तु 'कामस्यान्तं तु क्षुत्तृड्भ्यां क्रोधस्यान्तं फलोदयात्। नरो याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः॥' इति भागवतविरुद्धत्वादुपेक्ष्यम् ॥ १२॥

**अप्रकाश इति**। हे कुरुनन्दन! तमसि विवृद्धे सत्यप्रकाशोऽप्रवृत्तिः प्रमादो मोह एव चेत्यादीनि जायन्ते। अत्यन्तमविवेकः स्वपरज्ञानाभावः। **तत्कार्यमिति**। तमःकार्यमित्यर्थः। एवं तत्कार्य इत्यत्रापि। मोहशब्दार्थमाह— **अविवेक इति**। फलितमाह— **मूढतेति**। अप्रकाशमोहयोः सुतरां ज्ञानाभावाल्पज्ञानसत्त्वाभ्यां भेदः। अप्रकाशो ज्ञानाभावः, मोहस्तु विपरीतज्ञानमिति **रामानुजः।** तदयुक्तम्— विपरीतज्ञानस्य रजआद्युद्रेकदशायामपि सत्त्वात्॥ १३॥

**यदेति**। तदपि फलं सहेतुकं सकारणं गौणं सत्त्वादिगुणप्रयुक्तमेवेत्यर्थः। यदा देहभृत् सत्त्वे प्रवृद्धे सति तु प्रलयं याति, तदा अमलानुत्तमविदां लोकान् प्रतिपद्यते। **आत्मेति**। अनात्मन्यात्माभिमानवानज्ञ इत्यर्थः। यद्वा आत्मा प्रलयं यातीव, लोकान् प्रतिपद्यत इवेति बोध्यम्। न हि वस्तुत आत्मनो मरणादिसम्भवः।

**उत्तमविदां** तत्त्वविदां **लोकान्** समूहान् प्रतिपद्यते, आत्मविदां कुलेषु जायत इत्यर्थः इति **रामानुजः। तन्मन्दम्** ,

१. 'सहेतुकं' इति पा.।

**रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते।**
**तथा प्रलीनस्तमसि मूढयोनिषु जायते॥ १५॥**
**कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम्।**
**रजसस्तु फलं दुःखमज्ञानं तमसः फलम्॥ १६॥**

रजसीति। **रजसि गुणे विवृद्धे** प्रलयं **मरणं गत्वा प्राप्य** कर्मसङ्गिषु **कर्मासक्तियुक्तेषु मनुष्येषु जायते।** तथा **तद्वदेव** प्रलीनो **मृतस्तमसि विवृद्धे** मूढयोनिषु **पश्वादियोनिषु जायते॥ १५॥**

**अतीतश्लोकार्थस्यैव सङ्क्षेपः उच्यते—** कर्मण इति। **कर्मणः** सुकृतस्य **सात्त्विकस्येत्यर्थः। आहुः शिष्टाः सात्विकमेव निर्मलं फलमिति।** रजसस्तु **फलं दुःखं, राजसस्य कर्मण इत्यर्थः,** [१]**कर्माधिकारात्, फलमपि दुःखमेव कारणानुरूप्याद् राजसमेव। तथा अज्ञानं** तमसः **तामसस्य कर्मणोऽधर्मस्य फलं पूर्ववत्॥ १६॥**

आनन्दगिरिकृतव्याख्या

**रजःसमुद्रेके मृतस्य फलविशेषं दर्शयति—** रजसीति। जायते **शरीरं गृह्णातीत्यर्थः। यथा सत्त्वे रजसि च प्रवृद्धे मृतो ब्रह्म-लोकादिषु मनुष्यलोके च देवादिषु मनुष्येषु च जायते, तथैवेत्याह—** तद्वदिति॥ १५॥

**भावानां फलमुक्त्वा सात्त्विकादीनां कर्मणां फलमाह—** अतीतेति। **सुकृतस्य शोभनस्य कृतस्य पुण्यस्येत्यर्थः। सात्त्विकस्या-शुद्धिरहितस्येति यावत्।** सात्त्विकं **सत्त्वेन निर्वृत्तम्।** निर्मलं **रजस्तमःसमुद्भवान्मलान्निष्क्रान्तम्। रजःशब्दस्य राजसे कर्मणि कुतो वृत्तिः? तत्राह—** कर्मेति। दुःखमेव [२]**दुःखबहुलं सुखमेवेत्यर्थः। कथमित्थं व्याख्यायते? तत्राह—** कारणेति। **पापमिश्रस्य पुण्यस्य रजोनिमित्तस्य कारणत्वात् तदनुरोधात् फलमपि रजोनिमित्तं यथोक्तं युक्तमित्यर्थः।** अज्ञानम् **अविवेकप्रायं दुःखं तामसाधर्मफलमित्याह**

भाष्यार्कप्रकाशः

लोकशब्दस्य प्रसिद्धं भुवनार्थं त्यक्त्वा अप्रसिद्धसमूहार्थकल्पनम्, तत्रापि समूहान् प्रतिपद्यत इत्यस्य कुलेषु जायत इत्यर्थवर्णनं चायुक्तमिति॥ १४॥

**रजसीति**। देही रजसि प्रवृद्धे सति प्रलयं गत्वा कर्मसङ्गिषु जायते। तथा तमसि प्रवृद्धे सति प्रलीनःसन् मूढयोनिषु जायते। **मनुष्येष्विति**। देवादीनां कर्माधिकाराभावादिति भावः। एतेन सत्त्वे प्रवृद्धे मृतानां देवादिजन्मप्राप्तिरिति सिद्धम्।

यत्तु **रामानुजः**— सत्त्वे प्रवृद्धे मृत इहैव मनुष्येषु तत्त्ववित्सु जातःसन् पुण्यकर्मस्वधिकरोति। रजसि तु स्वर्गादिफल-साधनकर्मस्विति, **तत्तुच्छम्**। स्वर्गादिकर्मणामपुण्यकर्मत्वस्यान्याय्यत्वात्। न चात्मयाथात्म्यज्ञानसाधनानि कर्माणि पुण्यकर्माणीति वाच्यम्; यज्ञादीनामपि तथात्वात्। न च फलाभिसन्धिरहितानि पुण्यकर्माणीति वाच्यम्; तेषां पुण्यपापोभयातिरिक्तत्वात्। पापकर्मवत् पुण्यकर्मापि देवादिजन्मप्रदानद्वारा बन्धकं हि। तस्माद् यानि पुण्यकर्माणि स्वर्गादिसाधनानि तान्येव यज्ञादीनि फलाभिसन्धिरहितानि ज्ञानसाधनानीति नास्ति यज्ञाद् व्यतिरिक्तं ज्ञानसाधकं पुण्यकर्म। किञ्च कर्मसङ्गिषु जायत इति रजसि मृते विषय एव स्मर्यते, न तु सत्त्वे मृते विषय इति कथं सत्त्वे मृतानाम् कर्मसङ्गित्वं कल्पयितुं शक्यमनुच्छृङ्खलप्रवृत्तिना केनापि॥ १५॥

**कर्मण इति**। सुकृतस्य कर्मणः सात्त्विकं निर्मलं फलमाहुः। रजसस्तु दुःखं फलमाहुः। तमसस्त्वज्ञानं फलमाहुः। सात्त्विकस्य सत्त्वगुणप्रयुक्तस्य। **सात्त्विकं** सत्त्वप्रधानम्, अत एव निर्मलं फलं देवत्वादिलक्षणं सुखहेतुभूतम्। **रजस इति**। कर्मप्रकरणादत्र न गुणग्रहणं युक्तमित्याह— **राजसस्येति**। **कर्माधिकारादिति**। 'रजः कर्मणि भारत' इत्युक्तत्वादिति भावः। **फलमपीति**। यथा कर्मोपकरणादिसम्पादनादिना दुःखम्, तद्वत् तत्फलमपीत्यपेरर्थः। **दुःखं** दुःखकरमेवेत्यर्थः। तच्च फलं राजसमेव।

१. 'कर्मणः सुकृतस्याहुः' इति कर्मणः प्रक्रान्तत्वादित्यर्थः। २. दुःखस्यैव तत्फलत्वे प्रवृत्त्यनुपपत्तिं मत्वा व्याचष्टे—दुःखेति।

**सत्त्वात् संजायते ज्ञानं रजसो लोभ एव च।**
**प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥ १७॥**
**ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।**
**जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः॥ १८॥**

**किं च गुणेभ्यो भवति—** सत्त्वादिति। **सत्त्वाल्लब्धात्मकात्** सञ्जायते **समुत्पद्यते ज्ञानम्। रजसो लोभ एव च। प्रमादमोहौ चोभौ तमसो भवतः, अज्ञानमेव च भवति॥ १७॥**

**किञ्च—** ऊर्ध्वमिति। **ऊर्ध्वं** गच्छन्ति **देवलोकादिषूत्पद्यन्ते** सत्त्वस्थाः **सत्त्वगुणवृत्तस्थाः**[१]। मध्ये तिष्ठन्ति **मनुष्येषूत्पद्यन्ते राजसाः।** जघन्यगुणवृत्तस्थाः **जघन्यश्चासौ गुणश्च जघन्यगुणस्तमः, तस्य वृत्तं निद्रालस्यादि , तस्मिन् स्थिता जघन्यगुणवृत्तस्थाः मूढाः** अधो गच्छन्ति **पश्वादियोनिषूत्पद्यन्ते तामसाः॥ १८॥**

आनन्दगिरिकृतव्याख्या

— तथेति॥ १६॥

**विहितप्रतिषिद्धज्ञानकर्माणि सत्त्वादीनां** [२]**लक्षणानि सङ्क्षिप्य दर्शयति—** किञ्चेति। ज्ञानं **सर्वकरणद्वारकम्।** अज्ञानं **विवेकाभावः ॥ १७॥**

**सात्विकादिज्ञानकर्मफलान्युक्त्वाऽनुक्तसंग्रहार्थं सामान्येनोपसंहरति—** किञ्चेति। **वक्ष्यमाणफलद्वाराऽपि सत्त्वादिज्ञानमित्यर्थः। सत्त्वगुणस्य वृत्तं शोभनं ज्ञानं कर्म वा, तत्र तिष्ठन्तीति तथा।** राजसाः **रजोगुणनिमित्ते ज्ञाने कर्मणि वा निरताः॥ १८॥**

भाष्यार्कप्रकाशः

कुतः? कारणानुरूप्यात्। कारणस्य कर्मणो राजसत्वात् तत्फलस्यापि राजसत्वमिति भावः। **अधर्मस्येति**। हिंसादिलक्षणस्येत्यर्थः। एतेन राजसं कर्म धर्मरूपमिति सूचितम्। **पूर्ववदिति**। तामसमेवेत्यर्थः। सात्त्विकं कर्म कृत्वा देवत्वादिलक्षणं सुखादिलक्षणं ज्ञानलक्षणं वा फलं लभन्ते। राजसं कर्म कृत्वा मनुष्यत्वलक्षणं विहितानुष्ठानरूपं दुःखात्मकं वा फलं लभन्ते। तामसं कर्म कृत्वा पशुत्वादिलक्षणं मोहाद्यात्मकं फलं लभन्ते। तत्र फलाभिसन्धिरहितं कर्म सात्त्विकम् , तद्युक्तं विहितं कर्म राजसम् , हिंसादिरूपं तु तामसमिति विवेकः॥ १६॥

**सत्त्वादिति**। सत्वाज्ज्ञानं सञ्जायते, रजसो लोभ एव सञ्जायते च, तमसः प्रमादमोहौ भवतः, अज्ञानमेव भवति च। प्रवृद्धेभ्य एव सत्त्वादिभ्य उक्तकार्यसम्भव इत्यभिप्रेत्याह— **लब्धात्मकादिति**। रजस्तमोभिभवपूर्वकं प्राप्तप्रतिष्ठादित्यर्थः। एवं लब्धात्मकाद् रजसो, लब्धात्मकात् तमसश्चेत्यपि बोध्यम्। **अज्ञानं** निद्रादिरूपं मूलाज्ञानम्। ज्ञानाभाव इति **रामानुजः**। अभावस्य जनिलक्षणभाव-विकारायोगात् तदुक्तमुपेक्ष्यम्॥ १७॥

**ऊर्ध्वमिति**। ये आमरणं सत्त्वस्थास्ते मरणानन्तरमूर्ध्वं गच्छन्ति। ये त्वेवमामरणं रजःस्थास्ते मरणानन्तरं पुनरपि मध्य एव तिष्ठन्ति। ये त्वामरणं तमःस्थास्ते मरणानन्तरमधो गच्छन्ति। **उत्पद्यन्त इति**। देवादिजन्म लभन्त इत्यर्थः। सत्त्वगुणस्य या वृत्तयः, तासु स्थिताः। सात्त्विककार्यपरा इत्यर्थः। मध्ये तिष्ठन्ति मनुष्येष्वेवोत्पद्यन्ते। **राजसाः** रजोगुणवृत्तिस्थाः। राजसकर्मकर्तार इत्यर्थः। [३]**तामस इति**। तमोगुण इत्यर्थः। स्वार्थेऽण्। उत्कृष्टत्वाद् देवादिजन्मन ऊर्ध्वस्थत्वम् , अपकृष्टत्वात् पश्वादिजन्मनोऽधःस्थत्वम् , उत्कर्षापकर्षरहितत्वान्मनुष्यजन्मनो मध्यस्थत्वमिति भावः। पुण्यप्रयुक्तत्वाद् देवजन्मोत्कृष्टम् , पापप्रयुक्तत्वात् पश्वादिजन्मापकृष्टम् , उभयात्मकत्वान्मनुष्यजन्म मध्यस्थमिति बोध्यम्।

१. 'वृत्तिस्थाः' इति पा.। एवमग्रेऽपि। २. लक्षणानि ज्ञापकानि। यथा कार्याकार्यविवेकः सत्त्वस्य ज्ञापकः। ३. भाष्ये 'जघन्यगुणस्तामसः' इति रा.पा. भाति।

**नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति।**
**गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति॥ १९॥**

**पुरुषस्य [१]प्रकृतिस्थत्वरूपेण मिथ्याज्ञानेन युक्तस्य भोग्येषु गुणेषु सुखदुःखमोहात्मकेषु 'सुखी दुःखी मूढोऽहमस्मी'त्येवंरूपो यः सङ्गः, तत् कारणं पुरुषस्य सदसद्योनिजन्मप्राप्तिलक्षणस्य संसारस्येति समासेन पूर्वाध्याये यदुक्तं तदिह 'सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः' इत्यत आरभ्य गुणस्वरूपं, [२]गुणवृत्तं स्ववृत्तेन च गुणानां बन्धकत्वं [३]गुणवृत्तनिबद्धस्य च पुरुषस्य या गतिरित्येतत् सर्वं [४]मिथ्याज्ञानम् अज्ञानमूलं च बन्धकारणं विस्तरेणोक्त्वा, अधुना सम्यग्दर्शनान्मोक्षो वक्तव्यः इत्याह भगवान्—** नान्यमिति। नान्यं **कार्यकरणविषयाकारपरिणतेभ्यो गुणेभ्यः**

आनन्दगिरिकृतव्याख्या

**कस्मिन् गुणे कथमित्यादिप्रश्नान् प्रत्याख्याय, गुणेभ्यो मोक्षणं कथमिति प्रत्याख्यानार्थं वृत्तानुवादपूर्वकं मिथ्याज्ञाननिवर्तकं सम्यग्ज्ञानं प्रस्तौति—** पुरुषस्येत्यादिना। पुरुषस्य या गतिः **सा चेति शेषः।** मोक्षो **गुणेभ्यो विश्लेषपूर्वको ब्रह्मभावः। सम्यग्ज्ञानोक्तिपरं श्लोकं व्याख्यातुं प्रतीकमादत्ते—** नान्यमिति। **सत्त्वादिकार्यविषयस्य गुणशब्दस्य विवक्षितमर्थमाह—** कार्येति। **विद्यानन्तर्यम्**

भाष्यार्कप्रकाशः

ऊर्ध्वं गच्छन्ति मुच्यन्त इति **रामानुजः**, तदयुक्तम्— 'नास्त्यकृतः कृतेने'ति श्रुत्या सात्त्विककर्मकरणादपि मुक्त्यसम्भवात्। मुक्तेर्ब्रह्मभावलक्षणाया ऊर्ध्वस्थत्वासम्भवाच्च। परिपूर्णं हि ब्रह्म॥ १८॥

**नेति**। वर्तिष्यमाणसङ्गतये वृत्तं कीर्तयति— **पुरुषस्येत्यादिना**। पुरुषस्य गुणेषु यः सङ्गः, तत् संसारस्य कारणमिति समासेन पूर्वाध्याये यदुक्तं तदिह विस्तरेणोक्त्वा इति वृत्तानुकथनम्। कीदृशस्य पुरुषस्य? मिथ्याज्ञानेन युक्तस्य। किं तन्मिथ्याज्ञानम्? **प्रकृतिसत्त्वरूपं** प्रकृतिरस्तीत्येवंरूपं कालत्रयेऽप्यविद्यमानायां प्रकृतौ यदस्तित्वज्ञानं तन्मिथ्याज्ञानम्। यथा मरुमरीचिकास्वविद्यमाने जलेऽस्तित्वज्ञानम् , एवं प्रकृतावस्तित्वभ्रमो भवतीति भावः।

कीदृशेषु गुणेषु? भोग्येषु सुखदुःखमोहात्मकेषु सत्त्वादिगुणत्रयकार्यत्वात् सुखदुःखमोहानां गुणत्वव्यवहार औपचारिकः। यद्वा द्रव्याश्रितत्वरूपं गुणत्वलक्षणमिह बोध्यम् , सुखादीनामन्तःकरणद्रव्याश्रितत्वाद् गुणत्वमिति। यद्वा सुखदुःखमोहात्मना परिणतत्वात् सत्त्वादिगुणा एव सुखदुःखमोहात्मका इतीहोच्यन्ते, घटरूपा मृदितिवत्। कीदृशः सङ्गः? सुख्यहं दुःख्यहं मूढोऽहमित्येवंरूपः। अनात्मधर्माणां सुखदुःखमोहानामात्मन्यध्यासरूपोऽयं सङ्ग इति भावः। **तदिति**। स सङ्ग इत्यर्थः। सामान्ये नपुंसकम् , विधेयप्राधान्यादिति वा।

कीदृशस्य संसारस्य? सदसद्योनिजन्मप्राप्तिलक्षणस्य। सद्योनयो देवादयः, असद्योनयः पश्वादयः, सदसद्योनयो मनुष्याः; तासु योनिषु जन्मप्राप्तिरेव लक्षणं स्वरूपं यस्य तस्य तथोक्तस्य। **समासेन** सङ्क्षेपेण। **यदुक्तमिति**। 'कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु' इति श्लोकेनेति भावः। तदिहेत्यत्रत्यतच्छब्दार्थमाह— **एतत्सर्वं मिथ्याज्ञानमिति**। किं तत्सर्वम्? अत आह— **गुणस्वरूपमित्यादि**। गुणानां सत्त्वादीनां स्वरूपं प्रकाशकत्वरञ्जकत्वमोहकत्वात्मकम् , गुणानां **वृत्तिं** व्यापारं ज्ञानलोभप्रमादाद्यात्मकम् , गुणानां स्ववृत्तेन स्वीयव्यापारेण पुरुषस्य बन्धकत्वम् , गुणवृत्तिरेव निबन्धनं बन्धकं यस्य तस्य, गुणवृत्तिभिर्निबन्धनं बन्धो यस्य तस्येति वा, गुणेषु वृत्तिः प्रवृत्तिरेव स्थितिरेवेति वा, निबन्धनं बन्धो यस्य तस्येति वा। **गुणवृत्तनिबद्धस्येति** नागरपुस्तकपाठः। तदा तृतीयातत्पुरुषः। पुरुषस्य या गतिर्मरणानन्तरं यत्प्राप्यमित्यर्थः। तामिति शेषः।

पूर्वाध्याये यत् समासेनोक्तम् इहाध्याये तदेतत् सर्वं मिथ्याज्ञानं विस्तरेणोक्त्वेत्यन्वयः। कीदृशं मिथ्याज्ञानम्? अत आह— [५]**अज्ञानमूलबन्धकारणमिति**। अज्ञानं मूलं यस्य सोऽज्ञानमूलः, स चासौ बन्धस्तस्य कारणम् अज्ञानात् प्रपञ्चस्य जातत्वेन, जाते प्रपञ्चे

१. 'प्रकृतिसत्त्वरूपेण' इति, २. 'गुणवृत्तिम्' इति, ३. 'गुणवृत्तिनिबद्धस्य' इति च रा.पा.भाति। ४. 'मिथ्याज्ञानमूलं बन्धकारणं' इति पा.। ५. अयं रा.पा.भाति।

**कर्तारमन्यं यदा** द्रष्टा **विद्वान् सन्** [1]**नानुपश्यति। गुणा एव सर्वावस्थाः सर्वकर्मणां कर्तारः इत्येवं पश्यति। गुणेभ्यश्च** परं **गुणव्यापारसाक्षिभूतं वेत्ति,** मद्भावं **मम भावं** [2]**( वासुदेवत्वं 'वासुदेवः सर्वम्' इत्येवं पश्यन् सन् )** स **द्रष्टाऽधिगच्छति॥ १९॥** [3]

आनन्दगिरिकृतव्याख्या

अनु**शब्दार्थः। अक्षरार्थमुक्त्वा पूर्वार्धस्यार्थिकमर्थमाह—** गुणा एवेति। सर्वावस्थाः **तत्तत्कार्यकरणाकारपरिणता इति यावत्।** सर्वकर्मणां **कायिकवाचिकमानसानां विहितप्रतिषिद्धानामित्यर्थः।** परं **व्यतिरिक्तम्। व्यतिरेकमेव स्फोरयति—** गुणेति। **निर्गुणब्रह्मात्मानमित्यर्थः।** मद्भावं **ब्रह्मात्मताम् असौ प्राप्नोति। ब्रह्मभावोऽस्याभिव्यज्यत इत्यर्थः॥ १९॥**

भाष्यार्कप्रकाशः

सुखाद्यात्मके पुरुषस्य ममाहमिति प्रत्ययस्य बन्धहेतुत्वेन च। अज्ञानं मिथ्याज्ञानं चेत्युभयं बन्धकारणमित्यर्थः। अज्ञानमूलं च तद् बन्धकारणं चेति वा समासः। मिथ्याज्ञानस्याज्ञानं कारणं, तच्च मिथ्याज्ञानं बन्धस्य कारणमित्यर्थः। तस्य च बन्धस्य मोक्षोपायो ज्ञानं वक्तव्यम् - बन्धं श्रुत्वा भीतानां श्रोतॄणां मा भैष्ट इत्यभयप्रदानार्थमित्यभिप्रयन्नाह— **मोक्षो वक्तव्य इति। अत इति।** मोक्षस्य ज्ञानस्य वा तदुभयस्य वा वक्तव्यत्वादित्यर्थः।

यदा द्रष्टा गुणेभ्योऽन्यं कर्तारं नानुपश्यति, गुणेभ्यश्च परम् आत्मानं वेत्ति स तदा मद्भावमधिगच्छति। प्रकृतिस्तावद् गुणत्रयाकारेण परिणता। सा च त्रिगुणात्मिका प्रकृतिर्देहेन्द्रियविषयाकारेण परिणतेति कृत्वा 'कार्यकरणविषयाकारेण परिणतेभ्यो गुणेभ्यः' इत्युक्तम्। एतेन प्रकृतेर्गुणत्रयद्वारेणैव जगदात्मना परिणामो, न तु स्वत इति सिद्धम्।

**गुणा एवेति**। कार्यकरणाद्यात्मना परिणताः सत्त्वादय एवेत्यर्थः। **सर्वावस्थास्विति**। जाग्रदादिष्वित्यर्थः। सुखित्वदुःखित्वाद्यवस्थास्विति वा। **सर्वकर्मणामिति**। वाचिककायिकमानसिकानां विहितानां प्रतिषिद्धानां सामान्यानां वा सर्वेषां कर्मणाम्। **पश्यति** जानाति, अनुसन्धत्त इति यावत्। **परम्** अन्यं विलक्षणं वा। परत्वमेव दर्शयितुमाह— **गुणव्यापारसाक्षिभूतमिति**। गुणानां तद्व्यापाराणां च साक्षाद् द्रष्टारं, गुणानां ये व्यापारास्तेषां साक्षाद् द्रष्टारमिति वा। तच्च साक्षित्वं निर्धर्मके आत्मनि कल्पितमेवेति सूचयितुमाह— **साक्षिभूतमिति**। न तु वस्तुतः साक्षिणमित्यर्थः। आत्मानमिति शेषः। **वेत्ति** जानाति, साक्षात्करोतीति यावत्। परोक्षज्ञानात् संसारस्यानिवृत्तेरिति भावः। **वासुदेवत्वं** ब्रह्मभावम् , कैवल्यमिति यावत्। य एवं वेद तस्यैव वासुदेवः सर्वमिति सर्वात्मज्ञानम् , तदेव मोक्षकारणमित्याह— **वासुदेव इति**। सत्यात्मस्वरूपसाक्षात्कारे सर्वस्यात्मनि कल्पितत्वात् सर्वमात्मैवेति ज्ञानं जायते; ततश्च सर्वं ब्रह्मस्वरूपेणैव भाति; ब्रह्मातिरिक्तं किञ्चिदपि न भाति; ततः केवलात्मस्वरूपेण जीवद्दशायामेव तिष्ठति विद्वानिति भावः। एतेन विद्वान् मद्भावमधिगच्छतीति वर्तमानक्रियानिर्देशाज्जीवत एव कथं केवलात्मभावप्राप्तिरिति शङ्का परास्ता। सर्वस्य ज्ञानिदृष्ट्या मिथ्यात्वेनात्मनः केवलत्वादिति। अत्र वासुदेवत्वमधिगच्छतीत्युक्ते कथं जीवत एव वासुदेवत्वप्राप्तिरिति शङ्कायां तदपनोदनायाह— **वासुदेवः सर्वमिति पश्यन्निति**। इति व्याख्येयम्।

एतच्छ्लोकस्य जीवन्मुक्तिपरत्वं चोत्तरश्लोकभाष्ये स्फुटीभविष्यति। वर्तमानधात्वर्थनिर्देश एव भाष्यस्यापि लिङ्गमिति बोध्यम्। अन्यथा हि 'मद्भावं सोऽधियास्यती'ति ब्रूयात्। अस्योत्तरश्लोकस्य च जीवन्मुक्तिपरत्वादेवार्जुनः 'त्रीन् गुणानतिवर्तते' इति जीवत एव गुणातिवर्तनं कथमिति प्रक्ष्यति। अतिवर्तत इति वर्तमानधात्वर्थनिर्देशात् तत्रापि।

यत्तु **रामानुजः**— सत्त्वस्थानामूर्ध्वगमनप्रकार एवानेन श्लोकेनोच्यत इति, **तत्तुच्छम्** , सत्त्वस्थानां ज्ञान्यहं सुख्यहमिति सत्त्वकार्यज्ञानादेरात्मन्यध्यासात्। कथमन्यथा तेषां सत्त्वस्थत्वं स्यात्? ये तु नाहं सुखीत्यादिप्रकारेणानुसन्दधते, ते गुणातीता एव।

१. पुनः नकारोऽन्वयार्थः। २. कुण्डलितः पाठः क्वचिन्न। ३. अत्र गुणेभ्योऽन्यस्य कर्तृत्वाभावे 'कर्तारमीशम्' इति श्रुतिविरोधात् कर्तृपदं परिणामिकर्तृपरतया, 'नान्यम्' इत्यत्र ना (= पुरुषः) अन्यम् इति पदं छित्त्वा - यदा गुणेभ्योऽन्यं कर्तारं पश्यति, तदा द्रष्टा पुरुषः, अन्यथा पशुः— इति च व्याख्यातं माध्वैः। तदयुक्तम्। सोपाधिकत्वनिरुपाधिकत्वाभ्यामेकत्र कर्तृत्वाकर्तृत्वयोरविरोधात् कर्तृपदार्थसंकोचे कारणाभावात्। ना इति छेदे— यदा गुणेभ्योऽन्यं गुणेभ्यश्च परं कर्तारं पश्यति इत्येतावतोपपत्तौ, अनुपश्यति वेत्ति इति पदद्वयवैयर्थ्याच्च।

**गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान्।**
**जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते॥ २०॥**

**कथमधिगच्छतीत्युच्यते—** गुणानिति। **गुणान्** एतान् **यथोक्तान्** अतीत्य **जीवन्नेवातिक्रम्य मायोपाधिभूतान् त्रीन् देही** देहसमुद्भवान् **देहोत्पत्तिबीजभूतान् ,** जन्ममृत्युजरादुःखैः**, जन्म च मृत्युश्च जरा च दुःखानि च जन्ममृत्युजरादुःखानि, तैः जीवन्नेव विमुक्तः सन् विद्वान्** अमृतमश्नुते। **एवं मद्भावमधिगच्छतीत्यर्थः॥ २०॥**

आनन्दगिरिकृतव्याख्या

**अनर्थव्रातरूपमपोह्य विद्वान् ब्रह्मत्वं प्राप्नोतीत्येतत् प्रश्नद्वारा विवृणोति—** कथमित्यादिना। **यथोक्तानित्येतदेव व्याचष्टे—** मायेति। **मायैवोपाधिः,** तद्भूतान् **तदात्मनः सत्त्वादीननर्थरूपानित्यर्थः। एभ्यः समुद्भवन्तीति समुद्भवाः, देहस्य समुद्भवा देहसमुद्भवाः, तानिति व्युत्पत्तिं गृहीत्वा व्याचष्टे—** देहोत्पत्तीति। **यो विद्वान् अविद्यामयान् गुणाञ्जीवन्नेवातिक्रम्य स्थितस्तमेव विशिनष्टि—** जन्मेति। **पुरस्ताद् विस्तरेणोक्तस्य प्रसङ्गाद् , अत्र संक्षिप्तस्य सम्यग्ज्ञानस्य फलमुपसंहरति—** एवमिति॥ २०॥

भाष्यार्कप्रकाशः

उक्तं हि 'निस्त्रैगुण्यो भवार्जुन' इति। तस्माज्ज्ञानिविषयमेवेदम्। न च पूर्वं सात्त्विका एवेदानीं ज्ञानिनो जाता इति ज्ञानिविषयमपीदं सात्त्विकविषयमेवेति वाच्यम्। पूर्वं गृहिण एवेदानीं संन्यासिनो जाता इति संन्यासिविषया दण्डकमण्डलुशिखायज्ञोपवीतत्यागादयः किं गृहिविषया भवन्ति? तस्मात् सात्त्विकेभ्योऽन्य एवैते ज्ञानिन इति स्थितम्॥ १९॥

**गुणानिति**। देही देहसमुद्भवानेतान् त्रीन् गुणानतीत्य जन्ममृत्युजरादुःखैर्विमुक्तः सन्नमृतमश्नुते। **जीवन्नेवेति**। अश्नुत इति वर्तमानधातुनिर्देशादधिगच्छत्यतिवर्तत इति पूर्वोत्तरग्रन्थसन्दर्भाच्च जीवन्नेवेत्युक्तम्। **मायोपाधिभूतानिति**। मायापरिणामत्वाद् गुणाः मायाया उपाधिभूताः, यथा मृदो घटाकार उपाधिः। **यद्वा** मिथ्याभूताः आत्मन उपाधयः इति वा। देहस्य समुद्भवो येभ्यस्तान् देहसमुद्भवान्। सत्त्वादिगुणपरिणामत्वाद् देहस्येति भावः। देहस्योत्पत्तिं प्रति बीजभूतान् कारणभूतान्। यद्यपि जन्मादयो दुःखहेतुत्वाद् दुःखानि, तथापि तदतिरिक्तरोगादिसङ्ग्रहाय दुःखग्रहणम्। यद्वा जन्ममृत्युजरा दुःखहेतवः। दुःखं तु तज्जन्यं रोगादिजन्यं च। एवं दुःखतत्कारणोभयसंग्रहार्थं जन्ममृत्युजरादुःखैरित्युक्तिः। **अथवा** येऽन्ये दुःखहेतवस्ते सर्वे जन्ममृत्युजराप्रयुक्ता एवेति दुःखतद्धेतुजन्मादित्रयरूपकार्यकारणविमुक्तिकथनाय **जन्ममृत्युजरादुःखैरित्युक्तम्**।

**ननु** यदि जीवन्नेव मृत्युना विमुच्येत, तर्हि जीवन्मुक्तस्य विदेहकैवल्यं न स्यादेव। तथा जरया विमुच्येत चेज्जीवन्मुक्तः सदाऽपि तरुण एव भवेत् , न तु वृद्धः। द्वयमपीदमनुपपन्नम् , जीवन्मुक्तस्यापि वृद्धत्वमृतत्वयोर्दर्शनादिति चेत् , **मैवम्** ; 'नाहं देहादिः, किन्तु ब्रह्मैवाहमस्मी'ति जानतो जीवन्मुक्तस्य देहाद्याश्रयजन्मादिभिः कथं सङ्गः स्यात्? न कथमपि। देहादितादात्म्याध्यासाद्धि जातोऽहं, जीर्णोऽहं, मरिष्येऽहमिति प्रत्येत्यविद्वान्। तस्मादविद्यया आत्मन्यध्यस्तैरनात्मधर्मैर्जन्मादिभिराध्यासिको य आत्मनः सम्बन्धस्तं विद्यया विद्वान् परिहरतीति जन्मादिभिर्विमुक्त इत्युच्यते विद्वान्। न हि विदुष्यात्मनि जन्मादयः सन्ति, येन जीवन्मुक्तस्यात्मनो जरामृत्यू पुनः स्याताम्। विद्वद्देहस्य च जरामृत्यू अवर्जनीये एवेति स्यादेव विदेहकैवल्यं जीवन्मुक्तस्य। अस्य च विदुषो जीवन्मुक्तत्वं विदेहमुक्तत्वं च न स्वदृष्ट्या, विद्वद्दृष्ट्या बन्धमोक्षादिद्वैताभावात्। 'न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः। न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥' इति श्रवणात्। किन्त्वज्ञदृष्ट्यैव। अज्ञो हि विद्वच्छरीरे प्राणान् धरति सति विद्वान् जीवन्मुक्त इति, अप्राणे सति विदेहमुक्त इति च प्रत्येति। तस्मान्न कोऽपि दोषः।

**अमृतं** ब्रह्म, **अश्नुते** प्राप्नोति। इयमेव ब्रह्मप्राप्तिर्मद्भावमधिगच्छतीति पूर्वश्लोकेनोक्तेत्याह— **एवमिति**।

यत्तु **रामानुजः**— अमृतमात्मानमनुभवति, एष मद्भाव इत्यर्थ इति। **तत्तुच्छम् ,** आत्मेश्वरयोर्भिन्नत्वेन कथमात्मप्राप्तेर्भगवद्भावत्वम्? न च यथाऽहमीश्वर आत्मानमनुभवामि, तथा जीवोऽप्यात्मानमनुभवतीत्यर्थ इति वाच्यम् ; मद्भावशब्दादुक्तार्थालाभात्।

**अर्जुन उवाच—**

**कैर्लिङ्गैस्त्रीन् गुणानेतानतीतो भवति प्रभो !।**
**किमाचारः कथं चैतांस्त्रीन् गुणानतिवर्तते॥ २१ ॥**

**जीवन्नेव गुणानतीत्यामृतमश्नुत इति प्रश्नबीजं प्रतिलभ्य, अर्जुन उवाच—** कैरिति। **कैः** लिङ्गैः **चिह्नैः त्रीन्** एतान् **व्याख्यातान् गुणान्** अतीतः **अतिक्रान्तो भवति, प्रभो !** किमाचारः **कोऽस्याचार इति किमाचारः**। कथं **केन च प्रकारेण एतान् त्रीन् गुणान्** अतिवर्तते **अतीत्य वर्तते॥ २१ ॥**

आनन्दगिरिकृतव्याख्या

**सम्यग्धीफलं गुणातिक्रमपूर्वकममृतत्वमुक्तं श्रुत्वा, मुक्तस्य लक्षणं वक्तव्यमिति प्रकृतं विवक्षित्वा प्रश्नमुत्थापयति—** जीवन्नेवेति। **ये व्याख्याताः सत्त्वादयो गुणास्तत्परिणामभूतानध्यासानतिक्रान्तः सन् कैर्लिङ्गैर्ज्ञातो भवतीति तानि वक्तव्यानि सिद्ध्यर्थं पूर्वमनुष्ठेयानि पश्चादयत्नलभ्यानि लिङ्गानि, कानि तानीति पृच्छति—** कैरिति। **यथेष्टचेष्टाव्यावृत्त्यर्थं प्रश्नान्तरम्—** किमाचार इति। **ज्ञानस्य गुणात्ययोपायस्योक्तत्वाद् उपायप्रकारजिज्ञासया प्रश्नान्तरम्—** कथमिति॥ २१ ॥

भाष्यार्कप्रकाशः

न च 'मम साधर्म्यमागताः' इति पूर्वोक्तानुगुण्येनेहापि मद्भाव इत्यस्य मत्साधर्म्यमित्यर्थः इति वाच्यम् , मद्भावपदानुरोधेन मम साधर्म्यमित्यस्यापि मदभेद इत्येवार्थ इति वक्तुं शक्यत्वात्। नापि 'परमं साम्यमुपैती'ति श्रुतिप्रामाण्याद् मद्भाव इत्यस्य मत्साम्यमित्यर्थ इति वाच्यम् ; 'ब्रह्मविद् ब्रह्मैव भवती'त्यादिश्रुत्यन्तरानुरोधेन 'परमं साम्यमुपैती'ति श्रुतेरपि ब्रह्माभेदप्राप्तिपरत्वनिश्चयात्। न च 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेन भवति। एवं मुनेर्विजानत आत्मा भवति गौतम॥' इति श्रुतिरिह प्रमाणमिति वाच्यम् ; शुद्धस्योदकस्येव शुद्धस्यात्मनो न भेदः। यस्तूपाधिप्रयुक्तो भेदः, स उपाधिनाशान्नष्ट इति जीवस्य ब्रह्माभेद एव तच्छ्रुतितात्पर्यात्। कलशे गृहीतं गङ्गोदकं गङ्गायां पुनः कलशादवतारितं चेद् गङ्गाऽभेदमेवायाति। गङ्गातः कलशोदकस्य यो भेदकः कलशात्मक उपाधिस्तस्य त्यागात्। न तु गङ्गासाम्यं प्रयाति, साम्यस्य तत्रादर्शनात्। साम्यं हि वस्तुद्वयोपलब्ध्यधीनम्। प्रकृते तु जलरूपमेकमेव वस्तूपलभ्यत इति कथं साम्यावकाशः? एवमीश्वरचैतन्याज्जीवचैतन्यस्य यो भेदक उपाधिरन्तःकरणात्मकस्तस्य विद्यया नाशे सति जीवचैतन्यमीश्वरचैतन्याभेदमेव प्रपद्यते, न तु साम्यं भेदकाभावेन भेदाभावात्। न ह्यन्तःकरणनाशानन्तरं चैतन्यद्वयोपलम्भः, येन साम्यस्यावकाशः स्यात्। तस्मादुपाधिसद्भावदशायामेव जीवेश्वरयोः साम्यं ज्ञातृत्वादिरूपं, न तूपाधिराहित्य इति न प्रकृतश्रुतेः जीवेश्वरसाम्यप्रतिपादकत्वं, किन्तु तदभेदप्रतिपादकत्वमेव। न हि घटे नष्टे सति घटाकाशमहाकाशयोः साम्यं भवितुमर्हति, किन्त्वभेद एव। न च तादृगेवेति तादृक्छब्दस्वारस्यात् साम्यपरत्वं श्रुतेरिति वाच्यम् ; तादृक्छब्दस्यापि तदभेद एव तात्पर्यात्। न हि न्यायविरुद्धमर्थं श्रुतिरप्यभिप्रेयात्। नापि 'परेण परधर्मा च भवत्येव समेत्य वै' इति वसिष्ठसंहितानुसारात् साम्यस्वीकार इति वाच्यम् ; किमुपाधिं परित्यज्य परेण समेति जीवः, उतापरित्यज्य? यदि परित्यज्य समेति, तर्हि परधर्मा भवतीत्यस्य पराभेदं प्राप्नोतीत्येवार्थः। द्वितीये तु— परसदृशधर्म इत्येवार्थः। अस्मिन् पक्षे तु समेत्येत्यस्यानुपपत्तिः। सति भेदकोपाधौ तत्सङ्गत्ययोगात्। न च घटपटयोरिव सङ्गतिरिह वाच्या, निरवयवासङ्गचैतन्यस्य तादृशसङ्गायोगात्। यदि तु शङ्खचक्रादिमानीश्वरोऽत्र परशब्देन विवक्षितस्तर्हि समेत्येत्यस्य सान्निध्यं प्राप्येत्यर्थः। सगुणमुक्तश्चायं जीवः करणकलेबरादिमानेवेति स्वयमपि शङ्खचक्रादिमत्त्वरूपमीश्वरसाधर्म्यं प्राप्नुयादेव। तस्मान्नेयं स्मृतिर्जीवेश्वराभेदं श्रुतिशतसिद्धं निरोद्धुमीष्टे इति। किञ्च 'यो वै भूमा तदमृत'मिति श्रुतेरमृतशब्दस्य भूमब्रह्मवाचित्वे सति तमर्थं विहाय जीवब्रह्मभेदं कल्पयित्वा जीवरूपमर्थं वर्णयतस्तव साहसिक्यं प्रति को नाम बुधो न विस्मयेतेति॥ २०॥

**श्रीभगवानुवाच—**

**प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।।**
**न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति॥ २२॥**

**गुणातीतस्य लक्षणं गुणातीतत्वोपायं चार्जुनेन पृष्टोऽस्मिञ्श्लोके प्रश्नद्वयार्थं प्रतिवचनं भगवानुवाच। यत्तावत् कैर्लिङ्गैर्युक्तो गुणातीतो भवतीति, तच्छृणु—** प्रकाशमिति। प्रकाशं **च सत्त्वकार्यं,** प्रवृत्तिं **च रजःकार्यं,** मोहमेव **च तमःकार्यम् इत्येतानि न द्वेष्टि** सम्प्रवृत्तानि **सम्यग्विषयभावेनोद्भूतानि — 'मम तामसः प्रत्ययो जातः, तेनाहं मूढः', तथा 'राजसी प्रवृत्तिर्ममोत्पन्ना दुःखात्मिका, तेनाहं रजसा प्रवर्तितः प्रचलितः स्वरूपात् , कष्टं मम वर्तते योऽयं मत्स्वरूपावस्थानाद् भ्रंशः', तथा 'सात्त्विको गुणः प्रकाशात्मा मां विवेकित्वमापादयन् सुखे च सञ्जयन् बध्नाति' इति**

आनन्दगिरिकृतव्याख्या

**प्रश्नस्वरूपमनूद्य तदुत्तरं दर्शयति—** गुणातीतस्येति। **पृष्टो भगवानिति सम्बन्धः**[1]**। किंवृत्तस्य त्रिधा प्रयोगदर्शनात्** प्रश्नद्वयार्थम् **इत्युपलक्षणम्। प्रश्नत्रयार्थमिति द्रष्टव्यम्। उत्तरमवतार्यानन्तरश्लोकतात्पर्यमाह—** यत्तावदिति। **तानि सम्यग्दर्शी न द्वेष्टीत्युक्तमेव स्पष्टयितुं निषेध्यमसम्यग्दर्शिनो द्वेषं तेषु प्रकटयति—** ममेत्यादिना। **सम्यग्दर्शिनः सम्प्रवृत्तेषु प्रकाशादिषु द्वेषाभावमुपसंहरति—**

भाष्यार्कप्रकाशः

**कैरिति। प्रश्नबीजमिति**। जीवन्मुक्तेः प्रोक्तत्वाज्जीवन्मुक्तस्य लक्षणादिजिज्ञासा जाताऽर्जुनस्येति भावः। एतान् त्रीन् गुणानतीतो विद्वान् कैर्लिङ्गैरुपलक्षितो भवति? किमाचारश्च भवति? विद्वानेतान् त्रीन् गुणान् कथं चातिवर्तते? गुणातीतस्य कानि लक्षणानीति प्रथमः प्रश्नः। क आचार इति द्वितीयः। गुणातिक्रमणे किं साधनमिति तृतीयः। तत्राचारप्रश्नस्यापि लक्षणे पर्यवसानं बोध्यम्। आचारविशेषस्यापि जीवन्मुक्तचिह्नत्वात्। ततश्च प्रश्नद्वयमेवेह पर्यवसन्नम्। अत एव गुणातीतस्य लक्षणं गुणातीतत्वोपायं चार्जुनेन पृष्टः इति वक्ष्यति भाष्यकारो भगवान्॥ २१॥

**प्रकाशमिति। प्रश्नद्वयार्थमिति**। प्रश्नद्वयस्येत्यर्थः। तावदादौ कैर्लिङ्गैर्युक्तो गुणातीतो भवतीति यत्पृष्टं **तच्छृणु** तस्योत्तरं शृणु इत्यर्थः। सम्प्रवृत्तानि प्रकाशं च प्रवृत्तिं च मोहमेव चेत्येतानि न द्वेष्टि जीवन्मुक्त इति शेषः। गुणातीत इति वा। निवृत्तानि च तानि न काङ्क्षति। प्रकाशो ज्ञानम् , प्रवृत्तिः कर्मसु प्रवर्तनम् , मोहोऽविवेकः। **न द्वेष्टि** तेष्वप्रीतिं न करोतीत्यर्थः। 'द्विष अप्रीतौ' इति धातु-पाठात्। सम्यक्प्रवृत्तानि सम्प्रवृत्तानि। सम्यक्छब्दार्थमाह— **विषयभावेनेति**। विषयत्वेन, गोचरत्वेनेति यावत्। प्रवृत्तशब्दार्थ-माह— **उद्भूतानीति**। विषयभूतानीति यावत्। घटनिरूपणाद्धि घटाभावो ज्ञातुं शक्यते। एवं द्वेषाभावप्रदर्शनाय गुणकार्येषु द्वेषप्रकारं तावद् दर्शयति—**ममेत्यादिना**। मम तामसस्तमोगुणजन्यः प्रत्ययोऽविवेको जातो हिंसादिबुद्धिर्जातेति वा। तेन प्रत्ययेन, प्रत्यय-जन्मनेति वा। अहं मूढ आसम् , भवामीति वा। राजसी दुःखात्मिका कर्मसु प्रवृत्तिर्ममोत्पन्ना, तेन रजसा प्रवर्तितोऽहं स्वरूपात् प्रच्यावितः। हा! कष्टं मम वर्तते। किं तत् कष्टम्? अत आह— **योऽयमिति**। योऽयं स्वरूपावस्थानाद् भ्रंशः स्वरूपस्थितेः प्रच्युतिः तदिदं महत् कष्टमित्यर्थः।

नन्वेवं तमोरजसोर्द्वेष उचित एव, कष्टहेतुत्वात् , कुतः पुनः सत्त्वे द्वेषः? अत आह—**तथेति**। प्रकाशात्मा सात्त्विको गुणः मां विवेकित्वमापादयन् मम शब्दस्पर्शादिविषयज्ञानं जनयन् सन् मां सुखेन चासञ्जयन् सन् मां बध्नाति। एवं बन्धहेतुत्वात् सत्त्वेऽपि द्वेष उचित एवेति भावः। इत्येवं गुणांस्तत्कार्याणि च न द्वेष्टि। कुतो न द्वेष्टीत्यत आह— **सम्यग्दर्शित्वेनेति**। अहं ब्रह्मास्मि, सर्वं ब्रह्मेत्येवंरूपेण ज्ञानेन सत्त्वादिभ्रमनाशादिति भावः। **तत्** तस्मात् सम्यग्दर्शित्वादित्यर्थः। एवमुक्तरीत्या गुणातीतः सम्प्रवृत्तानि

१. 'कैर्लिङ्गैः' इत्यस्मिञ्श्लोके गुणातीतस्य लक्षणं, तदीयाचारं, गुणातीतत्वोपायं च अर्जुनेन पृष्टो भगवान् प्रश्नत्रयार्थं पञ्चभिः श्लोकैरुवाचेति संबन्धः इत्याशयः।

**उदासीनवदासीनो गुणैर्यो न विचाल्यते।**
**गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते॥२३॥**

**तानि द्वेष्टि असम्यग्दर्शित्वेन। तदेवं गुणातीतो न द्वेष्टि सम्प्रवृत्तानि। यथा च सात्त्विकादिपुरुषः सात्त्विकादिकार्याणि आत्मानं प्रति प्रकाश्य निवृत्तानि काङ्क्षति, न तथा गुणातीतो निवृत्तानि काङ्क्षतीत्यर्थः। एतन्न परप्रत्यक्षं लिङ्गम् , किं तर्हि? स्वात्मप्रत्यक्षत्वाद् [१]आत्मार्थमेवैतल्लक्षणम्। न हि स्वात्मविषयं द्वेषम् आकाङ्क्षां वा परः पश्यति॥२२॥**

**अथेदानीं 'गुणातीतः किमाचारः' इति प्रश्नस्य प्रतिवचनमाह—** उदासीनेति। उदासीनवद् **यथोदासीनो न कस्यचित् पक्षं भजते तथाऽयं गुणातीतत्वोपायमार्गेऽवस्थितः** आसीनः **आत्मविद् गुणैः** यः **संन्यासी न विचाल्यते**

आनन्दगिरिकृतव्याख्या

तदेवमिति। **'न निवृत्तानी'त्यादि व्याचष्टे—** यथा चेति। **तेषामनात्मीयत्वं सम्यक्पश्यन् आत्मानुकूलप्रतिकूलतारोपणेन नोद्विजते, तेभ्यश्च न स्पृहयतीत्यर्थः। स्वानुभवसिद्धं गुणातीतस्य लक्षणमुक्तमित्याह—** एतन्नेति। **परप्रत्यक्षत्वाभावं प्रपञ्चयति—** न हीति। **आश्रयो विषयः॥२२॥**

**'कैर्लिङ्गै'रित्यादि परिहृत्य द्वितीयं प्रश्नं परिहरति—**अथेति। **दृष्टान्तं व्याचष्टे—**यथेति। **उपेक्षकस्य पक्षपाते तत्त्वायोगादित्यर्थः।**

भाष्यार्कप्रकाशः

प्रारब्धवशात् प्राप्तानि पूर्वोक्तानि प्रकाशादीनि न द्वेष्टि, निवृत्तानि च तानि न काङ्क्षति। क इव न काङ्क्षतीत्यतो व्यतिरेकदृष्टान्तमाह— **यथा चेति**। सात्त्विकादिरित्यादिपदाद् राजसतामसग्रहणम्। **आत्मानं प्रति** सात्त्विकादिपुरुषं प्रतीत्यर्थः। प्रकाश्य स्वस्वरूपं प्रकटयित्वा[२] निवृत्तानि सत्त्वादिकार्याणि सात्त्विकादिः पुरुषो यथा च काङ्क्षतीत्यन्वयः। **एतदिति**। प्रवृत्तेषु सत्त्वादिकार्येष्वद्वेषणम् , निवृत्तानां तेषामकाङ्क्षणं चेत्यर्थः। **परस्य** जीवन्मुक्तादन्यस्य लोकस्य प्रत्यक्षं **लिङ्गं** चिह्नम् , जीवन्मुक्तस्येति शेषः; न भवति। परहृदयस्याप्रत्यक्षत्वाज्जीवन्मुक्तगतमिदं लिङ्गं परो न जानीयादिति नेदं जीवन्मुक्तलिङ्गं परप्रत्यक्षमित्यत्यर्थः। स्वात्मनः स्वस्य स्वहृदयस्येति वा प्रत्यक्षं स्वात्मप्रत्यक्षं, तत्त्वात्। स्वैकवेद्यत्वादित्यर्थः। **आत्मार्थमेवेति**। स्वार्थमेव। अहं जीवन्मुक्तो वा न वेति स्वात्मानं जीवन्मुक्तत्वेन निश्चेतुमिदं लिङ्गमुक्तमित्यर्थः। अहं जीवन्मुक्तः, प्रवृत्ताद्वेषित्वात् , निवृत्तानाकाङ्क्षित्वादिति वेत्तुमित्यर्थ इति यावत्। कुतो नेदं परार्थम्? अत आह— **न हीति**। स्वात्मविषयं स्वहृदयगोचरं द्वेषं काङ्क्षां वा परो न हि पश्यति। अस्य हृदयेऽमीषु प्राप्तेषु विषयेषु द्वेषोऽस्ति, अमीषु निवृत्तेषु विषयेषु काङ्क्षाऽस्तीति परहृदयं प्रविश्य को जानीयात्? न कोऽपीत्यर्थः। परहृदयस्याप्रत्यक्षत्वादिति भावः।

यत्तु **रामानुजः**— सम्प्रवृत्तान्यनिष्टानि न द्वेष्टि, निवृत्तानीष्टानि न काङ्क्षतीति, तदयुक्तम्— इष्टानिष्टपदाभावान्मूले। यानि प्रकाशादिकार्याणीष्टत्वेनाभिमतान्यज्ञानां तेषु प्राज्ञस्येष्टप्रत्ययाभावात्। बन्धहेतुत्वात् तान्यप्यनिष्टान्येव हि प्राज्ञस्य। न हि कस्यापि मोह इष्टः स्यात्। येन निवृत्तमिष्टं मोहमज्ञोऽपि काङ्क्षेत्। न ह्यप्रसक्तस्य निषेध उचित इति॥२२॥

**उदासीनेति**। जीवन्मुक्तलक्षणप्रश्नान्तर्गतमेवाचारप्रश्नमुत्तरयतीत्याह— **अथेति। उदासीनवदिति**। ननु जीवन्मुक्तस्यौदासीन्यं विधेयं चेच्छ्रीकृष्णव्यासशुकशङ्करादीनां जीवन्मुक्तानामुदासीनत्वे सति वेदान्तशास्त्रस्यैव समूलोच्छेदप्रसङ्गः। अत एव हि 'स्वयं तीर्णः परांस्तारये'दिति शास्त्रं जीवन्मुक्तस्य स्वयंतीर्णस्य परेषां तारणं विधत्ते। न च शिष्योपदेशादिव्यतिरिक्तविषयमौदासीन्यमिति वाच्यम् ; बौद्धादिभिः सह शङ्कराचार्यादीनां विवादायोगात्। न च शिष्योपदेशादीत्यादिपदादद्वैतमतस्थापनं ग्राह्यम् , ततश्च तत्स्थापनार्थं बौद्धादिविवादो युक्त एवेति वाच्यम् ; तथा दुष्टशिक्षणार्थं कृष्णस्य युद्धव्यापारोऽपि युक्त एव। एवं क्रमक्रमेण सर्वे व्यापारा अपि

१. 'आत्मविषयमेवैतल्लक्षणम्' इति पा.। २. 'प्रकटय्य' इति पठितुं युक्तम्। ३. 'उदासीनवदासीनं नाम' इति पूर्वमुद्रितः पाठः।

**विवेकदर्शनावस्थातः[1]। तदेतत् स्फुटीकरोति— गुणाः कार्यकरणविषयाकारपरिणताः अन्योन्यस्मिन् वर्तन्त इति योऽवतिष्ठति। छन्दोभङ्गभयात् परस्मैपदप्रयोगः। [2]योऽनुतिष्ठतीति वा पाठान्तरम्।** नेङ्गते **न चलति। स्वरूपावस्थ एव भवतीत्यर्थः॥ २३॥**

आनन्दगिरिकृतव्याख्या

**आत्मविद् आत्मकौटस्थ्यज्ञानेनासीनो निवृत्तकर्तृत्वाभिमानोऽप्रयतमानो भवतीति दार्ष्टान्तिकमाह—** तथेति। **गुणातीतत्वोपायमार्गो ज्ञानमेव। शब्दादिभिर्विषयैरस्य कूटस्थत्वज्ञानात् प्रच्यवनमाशङ्क्याह—** गुणैरिति। **उपनतानां विषयाणां रागद्वेषद्वारा प्रवर्तकत्वमित्येतत् प्रपञ्चयति—** तदेतदिति। **योऽवतिष्ठति स गुणातीत इत्युत्तरत्र सम्बन्धः। अवपूर्वस्य तिष्ठतेरात्मनेपदे प्रयोक्तव्ये कथं परस्मैपदमित्याशङ्क्याह—** छन्दोभङ्गेति। **पाठान्तरे तु बाधितानुवृत्तिमात्रमनुष्ठानम्। करणाकारपरिणतानां गुणानां विषयाकारपरिणतेषु तेषु प्रवृत्तिर्न ममेति पश्यन् अचलतया कूटस्थदृष्टिमात्मनो न जहातीत्याह—** नेङ्गत इति॥ २३॥

भाष्यार्कप्रकाशः

जीवन्मुक्तस्य प्राप्नुवन्त्येवेति कथमौदासीन्यमिति चेत् , सत्यम् , अत एव उदासीनवदित्युक्तम्। तेन च [3]उदासीनवदासनं नाम न कर्मस्वप्रवृत्तिः, किन्तु कुर्वन्नपि न लिप्यत इत्युक्तलक्षणं गुणकर्मसु कर्तृत्वाभिमानादिराहित्यरूपमेव।

तथाहि चित्रदीपिकायां **विद्यारण्यगुरुभि**रुक्तम् —

'यदा सर्वे प्रभिद्यन्ते हृदयग्रन्थयस्त्विति। कामा ग्रन्थिस्वरूपेण व्याख्याता वाक्यशेषतः॥ अहङ्कारचिदात्मानावेकीकृत्याविवेकतः। इदं मे स्यादिदं मे स्यादितीच्छाः कामशब्दिताः॥ अप्रवेश्य चिदात्मानं पृथक् पश्यन्नहङ्कृतिम्। इच्छंस्तु कोटिवस्तूनि न चाथो ग्रन्थिभेदतः॥ ग्रन्थिभेदेऽपि सम्भाव्या इच्छाः प्रारब्धदोषतः। बुद्ध्वाऽपि पापबाहुल्यादसन्तोषो यथा तव॥ अहङ्कारगतेच्छाद्यैर्देहव्याध्यादिभिस्तथा। वृक्षादिजन्मनाशैर्वा चिद्रूपात्मनि किं भवेत्॥ ग्रन्थिभेदात्पुराऽप्येवमिति चेत् तन्न विस्मर। अयमेव ग्रन्थिभेदस्तव तेन कृती भवान्॥ नैवं जानन्ति मूढाश्चेत् सोऽयं ग्रन्थिर्न चापरः। ग्रन्थितद्भेदमात्रेण वैषम्यं मूढबुद्धयोः॥ प्रवृत्तौ वा निवृत्तौ वा देहेन्द्रियमनोधियाम्। न किञ्चिदपि वैषम्यमस्त्यज्ञानिविबुद्धयोः॥ व्रात्यश्रोत्रिययोर्वेदपाठापाठकृता भिदा। नाहारादावस्ति भेदः सोऽयं न्यायोऽत्र योज्यताम्॥ न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति। उदासीनवदासीन इति ग्रन्थिभिदोच्यते।। औदासीन्यं विधेयं चेद् वच्छब्दो व्यर्थतामियात्। न शक्ता अस्य देहाद्या इति चेद् रोग एव सः॥ तत्त्वबोधं क्षयव्याधिं मन्यन्ते ये महाधियः। तेषां प्रज्ञाऽतिविशदा किं तेषां दुःशकं वद॥ भरतादेरप्रवृत्तिः पुराणोक्तेति चेत् तदा। जक्षन् क्रीडन् रतिं विन्दन्नित्यश्रौषीर्न किं श्रुतिम्॥ न ह्याहारादि सन्त्यज्य भरताद्याः स्थिताः क्वचित्। काष्ठपाषाणवत् किन्तु सङ्गभीता उदासते॥' इति।

उदासीन इवोदासीनवत्। 'तेन तुल्यं क्रिया चेद्' इति वतिरौपम्ये पर्यवस्यति। उदासीनतत्त्वविदोः साम्यमेव दर्शयति— **यथेति। कस्यचिदिति**। विवदमानयोर्मध्ये कस्यापीत्यर्थः। तथा गुणातीतत्वोपायमार्गे स्थितोऽयमात्मविदपि न कस्यचित् पक्षं भजत इत्यर्थः। आसीन इत्यस्यैव व्याख्यानम्— **स्थित इति**। क्व स्थित इति शङ्कायां गुणातीतत्वोपायमार्ग इत्युक्तम्। कोऽसावासीनोऽत आह— **आत्मविदिति**। यथोदासीनः पक्षद्वयस्थेषु मिथःकलहायमानेषु स्वयमविकृतो वर्तते, तथा कार्यकरणेषु स्वस्वव्यापारान् कुर्वत्सु सत्सु जीवन्मुक्तः स्वयमविकृतो वर्तत इति भावः। **न विचाल्यते** न भ्रश्यते। कस्मादपादानादत आह— **विवेकदर्शनावस्थाया इति**। **विवेक** आत्मानात्मविवेकः। 'गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते' इति पूर्वोक्तमनुसृत्याह— **अन्योऽन्यस्मिन्निति। अवतिष्ठतीति**। विवेकदर्शनावस्थायामेव तिष्ठतीत्यर्थः। न तु कर्मस्वहं वर्ते इति मन्यत इत्यर्थः।

ननु 'समवप्रविभ्यः स्थः' इति शास्त्रादवतिष्ठत इत्यात्मनेपदेन भाव्यमत आह— **छन्दोभङ्गभयादिति**। योऽवतिष्ठते नेङ्गत इति पाठे छन्दोभङ्गदोषः स्यादिति भावः। **नितिष्ठतीति**। नितरां तिष्ठति। निष्ठितो भवतीत्यर्थः। आत्मदर्शन एव निष्ठां प्राप्नोतीति यावत्। स्वरूप एवावतिष्ठत इति स्वरूपावस्थः। स्वस्वरूपदर्शन एव स्थित इति यावत्। य उदासीनवदासीनोऽत एव गुणैर्न विचाल्यते, यो

१. 'विवेकदर्शनावस्थायाः' इति पा.। २. 'यो नितिष्ठतीति' इति रा.पा.। 'नु तिष्ठति' इत्यपि संभाव्यते। ३. 'अनुवर्त्यः' इति , 'इमं यच्छब्दं' इति वा पाठः स्यात्।

**समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः।**
**तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः॥२४॥**
**मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः।**

**किञ्च—** समदुःखेति। समदुःखसुखः **समे दुःखसुखे यस्य स समदुःखसुखः।** स्वस्थः **स्वे आत्मनि स्थितः प्रसन्नः।** समलोष्टाश्मकाञ्चनो **लोष्टं चाश्मा च काञ्चनं च समानि यस्य स समलोष्टाश्मकाञ्चनः।** तुल्यप्रियाप्रियः **प्रियं चाप्रियं च प्रियाप्रिये तुल्ये समे यस्य सोऽयं तुल्यप्रियाप्रियः।** धीरो **धीमान्।** तुल्यनिन्दात्मसंस्तुतिः **निन्दा चात्मसंस्तुतिश्च निन्दात्मसंस्तुती, तुल्ये निन्दात्मसंस्तुती यस्य यतेः स तुल्यनिन्दात्मसंस्तुतिः॥२४॥**

**किञ्च—**मानापमानयोरिति। [1]**मानापमानयोः** तुल्यः **समो निर्विकारः।** तुल्यो मित्रारिपक्षयोः। **यद्यपि उदासीनाः भवन्ति केचित् स्वाभिप्रायेण, तथापि पराभिप्रायेण मित्रारिपक्षयोरिव भवन्तीति तुल्यो मित्रारिपक्षयो-**

आनन्दगिरिकृतव्याख्या

**गुणातीतस्य लिङ्गान्तरमाह—** किञ्चेति। **तयोः** समत्वं **रागद्वेषानुत्पादकतया स्वकीयत्वाभिमानानास्पदत्वम् ,** प्रसन्नत्वं **स्वास्थ्यादप्रच्युतिरविक्रियत्वम्। विद्वद्दृष्ट्या प्रियाप्रिययोरसम्भवेऽपि लोकदृष्टिमाश्रित्याह—** प्रियं चेति। **प्रियाप्रियग्रहणेन गृहीतानां काञ्चनादीनां ब्रह्मणपरिव्राजकवत् पृथग्ग्रहणम्।** निन्दा **दोषोक्तिः,** आत्मसंस्तुतिः **आत्मनो गुणकीर्तनम्॥२४॥**

**इतश्च गुणातीतः शक्यो ज्ञातुमित्याह—** किञ्चेति। मानः **सत्कारः, तिरस्कारो**ऽपमानः। **परदृष्ट्या यौ सखिशत्रू तयोः पक्षयोर्निर्विशेषो न कस्यचित् पक्षे तिष्ठतीत्याह—** तुल्य इति। **विदुषो मित्रादिबुद्ध्यभावात् तुल्यो मित्रारिपक्षयोरित्ययुक्तमित्याशङ्क्याह—**

भाष्यार्कप्रकाशः

गुणा वर्तन्त इत्येवावतिष्ठति नेङ्गते। अत्र यच्छब्दस्य गुणातीतः स उच्यत इति तच्छब्देनान्वयः। अयं यच्छब्दः पूर्वश्लोकेऽप्यनुवर्त्य[3] यः प्रकाशादीनि सम्प्रवृत्तानि न द्वेष्टि, निवृत्तानि च न काङ्क्षति, स गुणातीत उच्यत इत्युत्तरेणान्वय इति व्याख्यानं साधीय इव भाति॥२३॥

**समेति।** यः इति शेषः। समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः तुल्यप्रियाप्रियः धीरः तुल्यनिन्दात्मसंस्तुतिः मानावमानयोस्तुल्यो मित्रारिपक्षयोस्तुल्यः सर्वारम्भपरित्यागी च भवति स गुणातीतः इत्युच्यत इति श्लोकद्वयान्वयः। दुःखसुखयोः साम्यं नाम यथा सुखमन्तःकरणधर्मस्तथा दुःखमपीत्यनुसन्धानेन स्वस्य निर्विकारत्वम्। **स्वस्थः** आत्मानुसन्धानतत्परः। अर्थान्तरमाह— **प्रसन्न इति।** क्षोभरहित इत्यर्थः। समानि लोष्टमश्मा काञ्चनं चेत्येतानि यस्य स तथोक्तः। लोष्टादौ न त्याज्यताबुद्धिः, काञ्चने नोपादेयताबुद्धिश्चास्येति भावः। प्रियमिष्टं स्रक्चन्दनादिकमप्रियमनिष्टं दुर्गन्धादिकं तदुभयमपि पूर्वोक्तरीत्या तुल्यमस्य। प्रियमिति स्रक्चन्दनादिकं न गृह्णाति, अप्रियमिति दुर्गन्धादिकं न परित्यजतीति भावः। **धीमान्** पण्डितः। **निन्दा** आत्मदूषणम् , **आत्मसंस्तुतिः** स्वभूषणम्। तयोस्तुल्यत्वं च निन्दास्तुती देहादिगोचर एव, न त्वात्मगोचर इत्यनुसन्धानान्निन्दायां द्वेषबुद्धेः, स्तुतौ प्रीतेश्चाकरणम् ॥२४॥

**मानेति। मानः** पूजा, अवमानः तिरस्कारः, तयोस्तुल्यः समः। साम्यमेवाह— **निर्विकार इति।** मानप्रयुक्तश्चित्तस्य हर्षः, अवमानप्रयुक्तः खेदश्च नास्त्यस्येत्यर्थः। ननूदासीनस्य कथं मित्रारिपक्षसद्भावः? पक्षद्वयप्रवेशराहित्यं ह्यौदासीन्यमत आह— [2]**यद्यपीति।** परेष्वन्येषु जनेषु विषये मित्रारिभावः— ममायं मित्रम् , अयमरिरिति प्रत्ययोऽस्य तत्त्वविदो यद्यपि नास्ति, तथापि परेषां प्रतिभासः प्रतीतिः सम्भवतीत्यन्वयः। प्रतिभासमेव दर्शयति—**वयमिति।** अस्य तत्त्वविदो वयं मित्राणि, अस्य वयमरातयः शत्रव

१. 'मानावमानयोः' इति मूले भाष्ये च रा.पा.। २. अत्र भाष्ये रामकविदृष्टः पाठः इत्थं संभाव्यते— 'यद्यपि परेषु मित्रारिभावोऽस्य नास्ति, तथापि परेषां वयमस्य मित्राणि, वयमस्यारातयः इति प्रतिभासः सम्भवति, तदभिप्रायेण मित्रारि' इति।

**सर्वारम्भपरित्यागी गुणातीतः स उच्यते॥ २५॥**
**मां च योऽव्यभिचारेण भक्तियोगेन सेवते।**
**स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते॥ २६॥**

**रित्याह।** सर्वारम्भपरित्यागी **दृष्टादृष्टार्थानि कर्माणि आरभ्यन्त इत्यारम्भाः। सर्वानारम्भान् परित्यक्तुं शीलमस्येति सर्वारम्भपरित्यागी, देहधारणमात्रनिमित्तव्यतिरेकेण सर्वकर्मपरित्यागीत्यर्थः। गुणातीतः स उच्यते।**

**'उदासीनवद्' इत्यादि 'गुणातीतः स उच्यते' इत्येतदन्तमुक्तं यावद् यत्नसाध्यं तावत् संन्यासिनाऽनुष्ठेयं गुणातीतत्वसाधनं मुमुक्षोः, स्थिरीभूतं तु स्वसंवेद्यं सद् गुणातीतस्य यतेर्लक्षणं भवतीति॥ २५॥**

**अधुना 'कथं च त्रीन् गुणानतिवर्तते' इत्यस्य प्रश्नस्य प्रतिवचनमाह—** मां चेति। **मां चेश्वरं नारायणं सर्वभूतहृदयाश्रितं यो यतिः कर्मी वा** अव्यभिचारेण **न कदाचिद् यो व्यभिचरति** [1]**भक्तियोगः— भजनं भक्तिः, सैव**

आनन्दगिरिकृतव्याख्या

यद्यपीति। **सर्वकर्मत्यागे देहधारणमपि निमित्ताभावान्न स्यादित्याशङ्क्याह—** देहेति। **उक्तविशेषणो गुणातीतो ज्ञातव्यः इत्याह—** गुणेति। **यदुक्तमुपेक्षकत्वादि , तद् विद्योदयात्पूर्वं यत्नसाध्यं विद्याधिकारिणा ज्ञानसाधनत्वेनानुष्ठेयम्। उत्पन्नायां तु विद्यायां जीवन्मुक्तस्योक्तधर्मजातं स्थिरीभूतं स्वानुभवसिद्धलक्षणत्वेन तिष्ठतीत्युक्ते धर्मजाते विभागं दर्शयति—** उदासीनवदित्यादिना॥ २५॥

**प्रश्नद्वयमेवं परिहृत्य तृतीयं प्रश्नं परिहरति—** अधुनेति। **मच्छब्दस्य संसारिविषयत्वं व्यावर्तयति—** ईश्वरमिति। **तत्रैव नारायणशब्दान्मूर्तिभेदो**[2] **व्यावर्त्यते। तस्य ताटस्थ्यं व्यवच्छिनत्ति—** सर्वेति। **मुख्यामुख्याधिकारिभेदेन विकल्पः। भक्तियोगस्य**

भाष्यार्कप्रकाशः

इति। **तदभिप्रायेणेति**। अन्यजनदृष्ट्येत्यर्थः। आरभ्यन्ते क्रियन्त इत्यारम्भाः दृष्टादृष्टार्थानि कर्माणि। ननु भोजनादिकर्मपरित्यागे शरीरमेव पतेद् , अत आह— **देहेति**। देहधारणमात्रं निमित्तं प्रयोजनं येषां तेषां कर्मणाम् , तेभ्यः कर्मभ्यः इति वा। **व्यतिरेकेण** तान्यविहायेत्यर्थः। देहधारणमात्रनिमित्तकर्मेतरसर्वकर्मपरित्यागीति यावत्।

ननु यदुक्तमुदासीनत्वादिधर्मजातं तत् किं गुणातीतत्वसाधनम्? यद्वा गुणातीतस्य लक्षणम्? इति शङ्कायामाह— **उदासीनवदित्यादि**। उदासीनवदिति श्लोकमारभ्येत्यर्थः। गुणातीतः स उच्यते इत्येतदन्तमुक्तं धर्मजातं यावत्पर्यन्तं यत्नसाध्यं भवति तावत्पर्यन्तं संन्यासिनानुष्ठेयं सन्मुमुक्षोर्गुणातीतत्वसाधनं भवति। तदेव धर्मजातं स्थिरीभूतं स्वसंवेद्यं स्वानुभवैकसिद्धं सद् गुणातीतस्य यतेर्लक्षणं भवतीत्यन्वयः। भगवतोक्तमौदासीन्यादिधर्मजातं साध्यावस्थापन्नं सन्मुमुक्षोः संन्यासिनो गुणातीतत्वसाधनं भवति। सिद्धावस्थासम्पन्नं सत्तु गुणातीतस्य लक्षणं भवतीति कृत्वा एकस्मिन्नेव धर्मजातेऽवस्थाभेदेन साधनत्वलक्षणत्वसम्भव इत्यर्थः। दर्शितधर्मजातः[3] स्वस्मिन् स्थिरीभूतो वा न वेति वेदनं कथमिति शङ्कायामाह— **स्वसंवेद्यमिति**। स्वानुभवेनैव तद्वेदनमित्यर्थः। यस्यौदासीन्यादिकं दर्शितं धर्मजातं स्थिरीभूतं स गुणातीत इत्युच्यत इति परमार्थः॥ २५॥

**मामिति**। **विशिष्टतरः** उत्कृष्टतरः। पूर्वस्मात्पूर्वोक्तादुदासीनत्वादिधर्मजातादित्यर्थः। योऽव्यभिचारेण भक्तियोगेन मां च सेवते स एतान् गुणानतीत्य ब्रह्मभूयाय कल्पत इत्यन्वयः। चकारोऽवधारणार्थः। **मां च** मामेवेति। कस्त्वम्? अत आह— **ईश्वरं नारायणमिति**। कुतो नारायणस्त्वम्? अत आह— **सर्वभूतहृदयाश्रयमिति**। नराणां भूतानां समूहो नारं, तदयनं स्थानं यस्य स नारायण इति व्युत्पत्तेः। यद्वा क्वासीत्यत आह— **सर्वभूतेति**। सर्वात्मभूतत्वादिति भावः। एतेनेश्वरभजनस्य सौलभ्यं सूचितम्। **यतिः, कर्मी वेति**। औदासीन्यसमलोष्टाश्मकाञ्चनत्वाद्यात्मकं पूर्वोक्तं गुणातीतत्वसाधनं संन्यासिविषयमेव, सर्वारम्भपरित्यागस्य संन्यास-

१. 'भक्तियोगेन भजनं' इति पा.। २. ईश्वरनारायणशब्दयोः सामानाधिकरण्येन प्रयोगस्याभिप्रायमाह—**तत्रैवेति**। **मूर्तिभेदः** शङ्खचक्रादिविशिष्टो मूर्तिविशेष इत्यर्थः। ३. 'दर्शितधर्मजातम्' इति पठितुं युक्तम्।

**योगः, तेन विवेकज्ञानात्मकेन** भक्तियोगेन **सेवते, स गुणान् समतीत्य** एतान् **यथोक्तान् ,** ब्रह्मभूयाय **भवनं भूयो**

आनन्दगिरिकृतव्याख्या

**याद‍ृच्छिकत्वं व्यवच्छेत्तुमव्यभिचारेणेत्युक्तम्। तद् व्याचष्टे—** नेति। **भजनं परमप्रेमा, स एव युज्यतेऽनेनेति योगः।** सेवते **पराक्चित्ततां**

भाष्यार्कप्रकाशः

रूपत्वात्। न ह्यसंन्यस्तस्य यज्ञादिविहितकर्मपरित्यागो युक्तः, प्रत्यवायावहत्वात्। न च - सर्वारम्भपरित्यागित्वं नाम सांसारिक-सर्वकर्मपरित्यागित्वमेव, न तु चित्तशुद्धिज्ञानप्राप्तिहेतुकर्मपरित्यागित्वमिति - वाच्यम् ; सांसारिकत्वविशेषणकल्पनस्याप्रमाणत्वात् सर्वपदस्वारस्यभङ्गात्। गृहस्थेन सांसारिककृष्यादिजीवनहेतुकर्मपरित्यागस्यापि दुष्करत्वात्। न हि गृहस्थस्य भिक्षाटनेऽधिकारः, येन कृष्यादि सांसारिकं कर्म विहाय जीवेत् संन्यासिवत्। किञ्च यान्येव विहितानि कर्माणि तान्येव सांसारिकाणि चित्तशुद्ध्यादिसम्पादकानि च भवन्ति फलाभिसन्धितदभावाभ्यामिति कथं तत्कर्मपरित्यागः स्याद् गृहस्थस्य कर्मस्वधिकृतस्याज्ञस्य?

**अपिच** यदपि मैथुनाख्यं सांसारिकं कर्म, तस्य वा कथं परित्यागो गृहस्थस्य? 'ऋतौ भार्यामुपेयात्' इति हि श्रूयते। स्वस्थस्य ऋतौ भार्यामुपेक्षितवतः प्रत्यवायश्च स्मर्यते। तस्मात् संसारिणो गृहस्थस्य न सांसारिककर्मपरित्यागित्वमपि सम्भवतीति संन्यासिविषयमेव तत्। संन्यासिनामेव धर्माधर्माख्यद्विविधकर्मपरित्यागात्मकं भिक्षाटनादिजीवनहेतुकर्मसु गुणकृतत्वानुसन्धानेन तत्परित्यागात्मकं च संन्यसनमुपपद्यत इति। तस्माद् 'उदासीनवदि'त्यादिश्लोकत्रयं संन्यासिविषयमेव। 'मां चे'ति श्लोकस्यापि संन्यासिविषयत्वशङ्कायां प्राप्तायामाह भाष्यकारः— यतिः कर्मी वेति। एतच्छ्लोकोक्तं भगवद्भजनं संन्यास्यसंन्यास्युभयपरमुभयोरपि तत्राधिकारादिति भावः।

**ननु** नैतद् युक्तम् , कर्मात्मके भक्तियोगे संन्यासिनां, ज्ञानात्मके भक्तियोगे गृहिणां चानधिकारात्। न च कर्मात्मकभक्तियोगो नास्तीति वाच्यम् ; 'ये वर्णाश्रमधर्मस्थास्ते भक्ताः केशवं प्रती'ति **हारीत**स्मृतेः। अत्रोक्तो भक्तियोगस्तु ज्ञानात्मक एव। 'मां यो भजते' इति मूलात्। 'विवेकविज्ञानात्मकेन' इति भाष्याच्च। कथमत्र ज्ञानयोगे भक्त्यात्मके कर्मिणामधिकारः? 'लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ। ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्॥' इति ह्युक्तं भगवता। विदुषां संन्यासिनां ज्ञानयोग एवाधिकारः, अविदुषां कर्मिणां तु कर्मयोगाधिकार इति तत्र तत्र भाष्यकारैरेव व्यवस्थापितं हि। तस्मात् कथं तैरेव भाष्यकारैरिह स्वोक्तविरुद्धार्थः प्रोच्यते— यतिः कर्मी वेति इति चेद्? **उच्यते**— यो विद्वानपि प्रारब्धादिवशात् संन्यासमनुपेत्य कर्मण्येव फलाभिसन्ध्यादिराहित्येन प्रवर्तते जनकादिवत् , स इह कर्मीत्युच्यते, न त्वज्ञः, तस्य विवेकविज्ञानासम्भवात्। न ह्यज्ञत्वविवेकज्ञानयोर्विरुद्धयोरेकत्र स्थितिः स्यात्। अयं च जनकादिः कर्मयोग्यपि वस्तुतः साङ्ख्य एवेति साङ्ख्यस्यास्य कर्मिणो ज्ञानयोगेन निष्ठा स्यादेवेति। न हि कर्तृत्वाद्यभिमानरहितं कर्म कर्म भवति। न चैवं योगिनां ज्ञानयोगे, साङ्ख्यानां कर्मयोगे चाधिकारः प्राप्तो भगवन्नियमविरुद्ध इति वाच्यम् ; अतत्त्वविदां योगिनां ज्ञानयोगे, साङ्ख्यानां कर्मयोगे चाधिकारस्य भगवदनभिमतत्वात्। [१](तत्त्वविदां साङ्ख्यानां कर्मयोगाधि-कारस्येति।)

अयं भावः— असंन्यासिनो योगिनः, संन्यासिनस्तु साङ्ख्याः। 'संन्यासिनां साङ्ख्याना'मिति तत्र तत्र भाष्यकारैरेवोक्तत्वात्। तत्र योगिनो यदि योगवशात् तत्त्वविदो भवेयुस्तर्हि ते प्रारब्धवशात् संन्यासं वा स्वीकुर्युः, राज्यं वा पालयेयुः, अवस्थाद्वयेऽपि 'अहं ब्रह्मास्मी'ति ज्ञानात्मकं भगवद्भजनं न जहति, तत्त्ववित्त्वात् तेषाम्। इदमेव हि तत्त्ववित्त्वं यदहं ब्रह्मास्मीति निश्चयज्ञानम्। साङ्ख्यास्तु श्रवणादिवशात् तत्त्वज्ञानं प्राप्यापि स्वसंन्यासं त्यक्त्वा पुनर्गार्हस्थ्यं स्वीकृत्य कर्म कर्तुं नार्हन्ति, वान्ताशनवत् संन्यासिनां गार्हस्थ्यस्वीकारस्य दुष्टत्वात्। एवं सति तत्त्वविदामतत्त्वविदां वा साङ्ख्यानां ज्ञानयोग एवाधिकारः, न कर्मयोगे। अतत्त्वविदां योगिनां तु कर्मयोग एवाधिकारः। तत्त्वविदां योगिनां तु यथाप्रारब्धमुभयत्रापि।

**नन्वेवं** तत्त्ववित्साङ्ख्यापेक्षया तत्त्वविदो योगिन एव विश्रृङ्खलत्वं सिद्धमिति **चेत्**? सिध्यतु नाम, तत्त्ववित्त्व एवास्माकमभि-

---

१. अत्र 'तत्त्वविदां साङ्ख्यानां कर्मयोगाधिकारस्य भगवदनभिमतत्वात्' इति पाठान्तरं निर्दिष्टं स्यादिति भाति।

**ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च।**
**शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च॥ २७॥**

**इति श्रीमद्भवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे**
**गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः॥ १४॥**

**ब्रह्मभूयाय ब्रह्मभवनाय मोक्षाय** कल्पते **समर्थो भवतीत्यर्थः॥ २६ ॥**

**कुत एतदित्युच्यते—**ब्रह्मण इति। ब्रह्मणः **परमात्मनो** हि **यस्मात्** प्रतिष्ठाऽहं **प्रतितिष्ठत्यस्मिन्निति प्रतिष्ठाऽहं**

आनन्दगिरिकृतव्याख्या

**विना सदाऽनुसन्दधातीत्यर्थः।** सः **भगवदनुग्रहकृतसम्यग्धीसम्पन्नो विद्वान् जीवन्नेवेत्यर्थः॥ २६॥**

**विद्वान् ब्रह्मैवेत्यत्र हेतुं पृच्छति—** कुत इति। **तत्रोत्तरमाह—** उच्यत इति। **ब्रह्मशब्दस्यासति बाधके मुख्यार्थग्रहणमभिप्रेत्याह—** परमात्मन इति। **तं प्रति प्रत्यगात्मनो यत् प्रतिष्ठात्वं तदुपपादयति—** प्रतितिष्ठतीति। **यद् ब्रह्म प्रत्यगात्मनि प्रतितिष्ठति**

भाष्यार्कप्रकाशः

निवेशो, न तु साक्षात्तत्त्ववित्त्वे। **ननु** यदि योगिनोऽपि तत्त्वविदस्तर्ह्यसंन्यासिनामपि वेदान्तशास्त्राधिकारः प्राप्तः, तच्चायुक्तम् , 'शान्तो दान्त उपरतः' इति श्रुत्या उपरतस्य संन्यासिन एव तत्राधिकारस्य विहितत्वात्। 'अथातो ब्रह्मजिज्ञासा' इति सूत्रभाष्येऽप्येतदर्थस्यैव प्रपञ्चितत्वादिति चेत्? **सत्यम्** ; संन्यासिनामेव वेदान्तशास्त्रेऽधिकारः, ये त्वसंन्यासिनोऽपि प्रारब्धवशाद् वामदेवादिवच्छ्रवणादिकं विनैव तत्त्वविदो जातास्तेषां वेदान्तशास्त्रेऽधिकारनिषेधेन तत्प्रतिपादनेन वा किं फलं स्यात्? न किमपि। न हि भुक्तवन्तं प्रति मा भुङ्क्ष्वेति वचनं सार्थकं स्यात्। तस्मादतत्त्वविदामसंन्यासिनामेव वेदान्तशास्त्रेऽधिकारः श्रुत्या प्रतिषिध्यते। न तु तत्त्वविदामसंन्यासिनां, नाप्यतत्त्वविदां संन्यासिनामिति सिद्धम्। क्वचित्तु अतत्त्वविदामप्यसंन्यासिनां द्विजानां वेदाधिकारसत्त्वाद् वेदान्तश्रवणाधिकारोऽप्यस्तीति दृश्यते। अलमतिप्रसङ्गेन।

यो यतिः तत्त्ववित् कर्मी वा **अव्यभिचारेण** ध्रुवेण, अन्यदेवताविषयत्वमनापन्नेनेति वा। **विवेकविज्ञानम्** आत्मानात्मविवेकरूपं ज्ञानं, तदेवात्मा स्वरूपं यस्य तेन। [1]भगवदनुग्रहाद् यः **प्रसाद**श्चित्तशुद्धिः, तस्माज्जायत इति तथोक्तः। चित्तशुद्धिपूर्वकत्वाज्ज्ञानस्येति भावः। **भवनं** स्थितिः, सत्त्वमिति यावत्। ब्रह्मणो भवनं ब्रह्मभवनं तस्मै **ब्रह्मभवनाय**, ब्रह्मस्वरूपेणावस्थानायेत्यर्थः। फलितमाह— **मोक्षायेति**। **कल्पते** 'क्लृपू [कृपू ]सामर्थ्ये' इति धातुपाठादाह— **समर्थो भवतीति**। समर्थीभवतीति पाठे, असमर्थः समर्थो भवति समर्थीभवति। ज्ञानात् प्राग् ब्रह्मस्वरूपेणावस्थातुमसमर्थः, इदानीं तु समर्थो भवतीत्यर्थः। वस्तुतो ब्रह्मभूतस्याप्यस्याज्ञानाद् ब्रह्मस्वरूपेणावस्थातुमसामर्थ्यमासीदिव, ज्ञानेन तु तदज्ञाने नाशिते सति सामर्थ्यं पुनरासीदिवेत्यर्थः। न हि वस्तुतो बन्धमोक्षौ स्तः चिन्मात्रे केवले सदाशिवे आत्मनि॥ २६ ॥

**ब्रह्मण इति**। ननु 'गुणातीतः स उच्यते' इति, 'ब्रह्मभूयाय कल्पते' इति च साध्यमेकमेव निर्दिष्टम् , गुणातीतं ब्रह्मेति गुणातीतत्वस्य ब्रह्मभावत्वात्। अतस्तत्साधनतारतम्यमयुक्तम् , फलभेदस्यैव साधनतारतम्यप्रयोजकत्वात्। त्वया त्वौदासीन्यगुणकर्तृत्वानुसन्धानाद्यपेक्षया भगवद्भजनमेव विशिष्टमित्युच्यते, तदेतत् कुतो हेतोरिति पृच्छति— **कुत एतदिति**। उत्तरं वच्मीति प्रतिजानाति — **उच्यत इति**। एतत् कुत इति शङ्कायामिदं पद्यमुच्यत इत्यर्थः। **यद्वा** यो मां भजते स ब्रह्मभूयाय कल्पत इति यदुक्तं तदेतत् कुत इत्यत्रोच्यत इत्यर्थः। हि अहममृतस्याव्ययस्य च शाश्वतस्य धर्मस्य सुखस्य ऐकान्तिकस्य च ब्रह्मणः प्रतिष्ठा। यस्मादहमीदृशस्य ब्रह्मणः प्रतिष्ठा तस्मान्मद्भक्तो ब्रह्मभूयाय कल्पत इत्येतदुक्तमित्यर्थः। यस्मादहं ब्रह्मणः प्रतिष्ठा, तस्मान्मद्भजनं गुणातीतत्वप्राप्तौ

१. भाष्ये 'विवेकज्ञानात्मकेन भक्तियोगेन - स हि भक्तियोगो भगवदनुग्रहप्रसादजो भवति - सेवते' इति क्वचित् पाठः। तदनुसारिणीयं व्याख्या।

**प्रत्यगात्मा। कीदृशस्य ब्रह्मणः?** अमृतस्य **अविनाशिनः,** अव्ययस्य **अविकारिणः,** शाश्वतस्य **च नित्यस्य** धर्मस्य

आनन्दगिरिकृतव्याख्या

**तत् किंविशेषणमित्यपेक्षायामुक्तम्—** अमृतस्येत्यादि। **तत्रामृतशब्देनाव्ययशब्दस्य पुनरुक्तिं परिहरति—** अविकारिण इति। नित्यत्वम्

भाष्यार्कप्रकाशः

विशिष्टं साधनमिति वाऽर्थः। **प्रतिष्ठा** आधारः, स्वरूपमिति यावत्। स्वरूपे हि स्वयं तिष्ठति, यथा स्वरूपभूतमृदि घटः। तस्मात् स्वस्य स्वरूपमेवाधारः। 'स्वे महिम्नि प्रतिष्ठितः' इति श्रुतेश्च। **महिम्नि** स्वरूप इत्यर्थः। अनेन च स्वस्य स्वरूपमेवाधार इति प्रतिपादनेन स्वरूपातिरिक्तः कोऽपि नास्याधार इति, स्वरूपस्य स्वस्मादनतिरिक्तत्वेन स्वस्य स्वयमेवाधार इति च ज्ञायते। ततश्च स्वरूपत्वमाधारस्य सिद्धं भवति। अत एवोक्तम्— आधारः, स्वरूपमिति यावदिति। वक्ष्यति च 'सम्यग्ज्ञानेन परमात्मतया निश्चीयते प्रत्यगात्मे'ति भाष्यकारः इहैव।

ननु कोऽसौ यो ब्रह्मणः प्रतिष्ठेत्युच्यते? अत आह— **अहमिति**। तदर्थमाह— **प्रत्यगात्मेति**। अहंशब्दलक्ष्यार्थत्वात् प्रतीच इति भावः।

**ननु** वक्तुरीश्वरत्वेन कृष्णस्य तल्लक्ष्यार्थः परमात्मैव भवेन्न तु प्रत्यगात्मेति चेत् , **मैवम्** ; देहत्रयान्तरचैतन्यस्य प्रत्यगात्मत्वं, तद्बाह्यचैतन्यस्य परमात्मत्वमिति व्यवहारात्। अयं च व्यवहारोऽविद्याकल्पित इति नातिशङ्कनीयम्। एवं प्रत्यगात्मनः परमात्माधारत्वं चाविद्याकृतमेव। न हि विद्यादशायां प्रत्यगात्मेति परमात्मेति च भेदव्यवहारः सम्भवति। भेदव्यवहारहेतुभूतदेहाद्युपाध्यभावात्। देहादौ सति हि देहादेरिदमान्तरम् , इदं बाह्यमिति वक्तुं शक्यते। तस्माद् यद् देहत्रयान्तरं प्रत्यक्चैतन्यं तदेव परमात्मनः स्वरूपत्वात् प्रतिष्ठाभूतमिति कृत्वा ब्रह्मणोऽहं प्रतिष्ठेत्युच्यते।

**ननु** घटाकाशस्य महाकाश एव प्रतिष्ठा, न तु महाकाशस्य घटाकाशः, विरुद्धत्वात् ; तथा परमात्मैव प्रत्यगात्मनः प्रतिष्ठा, अपरिच्छिन्ने परमात्मन्यन्तःकरणपरिच्छिन्नस्य प्रत्यगात्मनः कल्पितत्वाद् अथवा सत्त्वादिति चेत् , **मैवम्** ; परमात्मवत् प्रत्यगात्मनोऽप्यपरिच्छिन्नत्वादन्यथा परिच्छिन्नत्वे सत्यनित्यत्वप्रसङ्गात्। यदि देहादिभिरान्तरस्य प्रतीचः परिच्छेदः स्यात् , तर्हि तैरेव बाह्यस्य परमात्मनोऽपि परिच्छेदः स्यादेव। देहाद् बहिर्वर्तमानत्वोपाधिपरिच्छिन्नत्वात् परमात्मनः। न हि स परमात्मा देहादन्तर्वर्तते येन पूर्णः स्यात्। अन्तर्बहिर्मध्ये च व्याप्तो हि परिपूर्ण इत्युच्यते। 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इति श्रुतेश्च। अत एव हि प्रत्यक्परभेदो निषिध्यते। तस्मादपरिच्छिन्न एव प्रत्यगात्मा। तस्यान्तरत्वकथनं तु हृद्देशोपलब्धिप्रयुक्तम्। हृदि ह्युपलभ्यते प्रत्यगात्मा मनीषिभिरहङ्कारसाक्षित्वेन। साक्षिणा ह्यन्तःकरणादिकं भास्यते। स च साक्षी स्वयमेव स्फुरति, स्वप्रकाशत्वात्। एतत्साक्षिभास्यत्वादेव सर्वं जगत्साक्ष्याश्रयमित्युच्यते। भासको हि भास्यस्याधारः। भासकाधीनसत्ताभानवत्त्वाद् भास्यस्य। न हि भासकाभावे भास्यं स्फुरेत्। न हि दीपाद्यभावे घटः स्फुरति, न वाऽस्तित्वं प्रतिपद्यते। यथा जगदिदं साक्षिभास्यं तथा जगदाश्रयब्रह्मचैतन्यमपि साक्षिभास्यमेव। न हि अन्तः साक्षी यथाऽहमिति स्फुरति, तथा बहिर्ब्रह्मचैतन्यमहमिति स्फुरति। अहङ्काराश्रयत्वप्रयुक्तं हि साक्षित्वम्। [1]सुषुप्तावपि हि सूक्ष्मरूपेणाहङ्कारोऽस्ति। मृतिमूर्छादिषु तदहङ्काराभावादेव हि साक्षित्वस्याप्यभावः। साक्ष्यस्य सत्त्वे हि साक्षित्वं स्यादात्मनः। अहङ्काराभावसाक्षित्वं तु चैतन्यरूपमेव। निर्धर्मकं हि चैतन्यम्। तस्माद् अहङ्काराश्रयेणैव साक्षिणा जगदधिष्ठानं ब्रह्म ज्ञायत इति परमात्मनः प्रत्यगात्मैव प्रतिष्ठेत्युक्तम्। न चैतावता ब्रह्मणो ज्ञेयत्वापत्तिः, स्वभास्यत्वप्रयुक्तं ज्ञेयत्वं यथा नास्ति साक्षिणस्तथैव स्वाभिन्नसाक्षिभास्यत्वप्रयुक्तमपि ज्ञेयत्वं न ब्रह्मण इति।

यद्यपि परमात्मा स्वरूपचैतन्येन मायावृत्तिभिर्वा सर्वमवभासयति सर्वज्ञत्वादिति सर्वसाक्ष्येव। तथापि परमात्मनिष्ठं तद्भासनं नास्माकं प्रत्यक्षं, प्रत्यगात्मनिष्ठं तु प्रत्यक्षमिति तथोक्तम्। **यद्वा** सर्वावभासकोऽपि परमात्मा साक्षिभास्य एव, यथा साक्ष्यपि प्रत्यगात्मा प्रमातृभास्यः। तस्मात् परमात्मावभासकत्वात् परमात्मनः प्रतिष्ठा भवति प्रत्यगात्मा। प्रत्यगात्मना हि वेद्यते परमात्मा।

१. ननु तर्हि सुषुप्तौ साक्षी न स्यात् , अहंकाराभावादित्याशङ्क्य तत्रापि तत्सद्भावमाह—सुषुप्ताविति।

[1]**ज्ञानयोगधर्मप्राप्यस्य,** सुखस्य **आनन्दरूपस्य** ऐकान्तिकस्य **अव्यभिचारिणः। अमृतादिस्वभावस्य परमात्मनः परमानन्दस्वरूपस्य प्रत्यगात्मा प्रतिष्ठा सम्यग्ज्ञानेन परमात्मतया निश्चीयते। तदेतद् 'ब्रह्मभूयाय कल्पते' इत्युक्तम्। यया चेश्वरशक्त्या भक्तानुग्रहादिप्रयोजनाय ब्रह्म** [2]**प्रतिष्ठते - प्रवर्तते सा शक्तिर्ब्रह्मैवाहं शक्तिशक्तिमतोरनन्यत्वादि-त्यभिप्रायः। अथवा ब्रह्मशब्दवाच्यत्वात् सविकल्पकं ब्रह्म, तस्य ब्रह्मणः - निर्विकल्पकोऽहमेव, नान्यः -** प्रतिष्ठा

आनन्दगिरिकृतव्याख्या

**अपक्षयराहित्यम् , तेन पूर्वाभ्यामपौनरुक्त्यम्। प्रसिद्धार्थस्य धर्मशब्दस्य ब्रह्मण्यनुपपत्तिमाशङ्क्याह—** ज्ञानेति। **अर्थेन्द्रियसम्बन्धोत्थं सुखं व्यावर्तयितुमैकान्तिकस्येत्युक्तम्। अक्षरार्थमुक्त्वा वाक्यार्थमाह—** अमृतादीति। **प्रतिष्ठा यस्मादिति पूर्वेण सम्बन्धः। तस्मात् प्रत्यगात्मा परमात्मतया निश्चीयते सम्यग्ज्ञानेनेति योजना। अस्य श्लोकस्य पूर्वश्लोकेनैकवाक्यतामाह—** तदेतदिति। **विवक्षितं वाक्यार्थं प्रपञ्चयति—** ययेति। **'सा शक्तिर्ब्रह्मैवे'ति कथं सामानाधिकरण्यम्? तत्राह—** शक्तीति। **व्याख्यानान्तरमाह—** अथवेति। **विशेषणानि पूर्ववदपौनरुक्त्यानि नेतव्यानि।**

भाष्यार्कप्रकाशः

**अविनाशिन इति**। विनाशाभावादेव जन्मादिविकाराभाव इत्याह— **अविकारिण इति**। अत एव नित्यत्वमस्येत्याह— **नित्यस्येति। धर्मस्येति**। धर्मप्राप्ये ब्रह्मणि धर्मत्वमुपचारात्। स च धर्मो ब्रह्मप्रापको ज्ञानयोगरूप एवेत्यभिप्रेत्याह— **ज्ञानयोगधर्मप्राप्यस्येति। अव्यभिचारिण इति**। सत्यस्येत्यर्थः। **अमृतादिस्वभावस्येति**। अमृतत्वाव्ययत्वशाश्वतत्वज्ञानप्राप्यत्वसत्यत्वस्वभावस्येत्यर्थः। सुखं तु न स्वभावः, किन्तु स्वरूपमेवेत्याह— **परमानन्देति**। निरतिशयं सर्वातिशयं निरुपाधिकं च यत्सुखं शाश्वतं तद्धि परमानन्दः। 'आनन्दो ब्रह्मेति व्यजाना'दिति श्रुतेस्तदेव ब्रह्मस्वरूपं च। प्रत्यगात्मा परमात्मनः प्रतिष्ठेत्युक्तत्वाद् विद्वान् प्रत्यगात्माऽहं परमात्मस्वरूप एवेति निश्चिनुयात्। ततश्च निश्चयात् स ब्रह्मभूयाय कल्पत इत्यर्थः।

**यद्वा** अहमित्यस्य वक्ता कृष्ण ईश्वर एवार्थः। ततश्चाहमीश्वरो ब्रह्मणः प्रतिष्ठा। प्रतितिष्ठतेऽस्मादिति प्रतिष्ठा। प्रवृत्तिसाधनभूत इत्यर्थः। इदमेवाह— **ययेति**। ब्रह्म यया ईश्वराख्यया शक्त्या भक्तानुग्रहादिप्रयोजनाय प्रतितिष्ठते, सा शक्तिरहं ब्रह्मैव। कथं शक्तेः ब्रह्मत्वम्? अत आह— **शक्तीति**। अयमर्थः— निर्विशेषं ब्रह्मैव मायोपाधिकं सदीश्वर इत्युच्यते, मायावच्छिन्नचैतन्यस्येश्वरत्वात्। तत्र चैतन्यांशस्य ब्रह्मत्वेन मायाया एवेश्वरांशत्वं सिद्धम्। अतो नास्ति मायातिरिक्तः कश्चनेश्वरः। एवमन्तःकरणातिरिक्तो जीवोऽपि नास्त्येव। अन्तःकरणावच्छिन्नं चैतन्यं जीव इति लक्षणे चैतन्यांशस्य ब्रह्मत्वात्। अत एव 'न जीवो नामान्योऽस्त्यनुभवमयान्तःकरणतो न मायातश्चेशो न हि चिदपरूपा प्रतिफले'दिति **हयग्रीवस्तुति**र्मदीयैव सङ्गच्छते। अनुभवमयेति हयग्रीवस्य ब्रह्मणः सम्बोधनम्। सा चेश्वरशब्दवाच्या मायाख्या शक्तिरेवेति ब्रह्मणोऽनन्यैव यथाऽग्निशक्तिरग्नेरनन्या। तस्मादीश्वरोऽहं ब्रह्मैवेतीश्वरं मां ब्रह्मत्वेन जानीयादिति। एवं ज्ञानात् फलं तु प्रत्यगात्मनः परमात्माभेदनिश्चयात् परमात्मशक्तेरीश्वरस्य प्रत्यगात्मशक्तेर्जीवस्य चाभेदसिद्धिः। यद्वा स्वशक्तिभूतादीश्वरात् स्वस्य प्रतीचः भीत्यभावः फलम्। अभयं हि मोक्षः।

पक्षान्तरमाह—**अथवेति**। ब्रह्मणः सविकल्पकस्य निर्विकल्पकोऽहं प्रतिष्ठा। कथं सविकल्पकत्वं ब्रह्मणः? अत आह— **ब्रह्मशब्दवाच्यत्वादिति**। ब्रह्मशब्दवाच्यत्वरूपधर्मस्य ब्रह्मणि सद्भावादन्यथा ब्रह्मशब्दावाच्यत्वापत्तेरिति भावः। अहंशब्दस्तु लक्षणया निर्विकल्पकं वस्तु बोधयतीति कृत्वा अहंशब्दलक्ष्यार्थभूतो निर्विकल्पकस्त्ववाच्य एव। इदं निर्विकल्पकं वस्तु भवतीति वक्तुमशक्य इत्यर्थः। न चैवं निर्विकल्पकशब्दवाच्यत्वं तत्राप्यस्तीति वाच्यम् ; निर्विकल्पकशब्दवाच्यत्वस्य निर्विकल्पकत्वप्रयोजकत्वेन सविकल्पकत्वानावहत्वात्। न चाहंशब्दलक्ष्यत्वरूपविकल्पोऽस्तीति वाच्यम् ; अहंशब्दलक्ष्यत्वमित्यस्यावाच्यत्वमित्येवार्थात्। न चावाच्यत्वरूपो विकल्पोऽस्तीति वाच्यम् ; अवाच्यत्वविकल्पस्य वक्तुमशक्यत्वेन तस्य विकल्पत्वानभ्युपगमात्। यो हि विकल्पत्वेन वक्तुं शक्यः, स एव हि विकल्प इत्युच्येत। तस्मात् सविशेषस्य ब्रह्मणो निर्विशेषं प्रतिष्ठा। प्रतितिष्ठत्यस्मिन्निति प्रतिष्ठेति

१. अत्र 'धर्मज्ञानस्य' इति अधिकं क्वचित्। २. 'प्रतितिष्ठते' इति पा.।

**आश्रयः, किंविशिष्टस्य?** अमृतस्य **अमरणधर्मकस्य** अव्ययस्य **च व्ययरहितस्य**[१]। **किञ्च** शाश्वतस्य **च नित्यस्य** धर्मस्य **ज्ञाननिष्ठालक्षणस्य,** सुखस्य **तज्जनितस्य** ऐकान्तिकस्य **(च) एकान्तनियतस्य च प्रतिष्ठाऽहमिति** [२]**वर्तते** ॥२७॥

**इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः॥ १४॥**

आनन्दगिरिकृतव्याख्या

**तदनेनाध्यायेन क्षेत्रक्षेत्रज्ञसंयोगस्य संसारकारणत्वम् , पञ्चप्रश्ननिरूपणद्वारेण च सम्यग्ज्ञानस्य सकलसंसारनिवर्तकत्वम् इत्येतदुपपादयता मुमुक्षोर्यत्नसाध्यं गुणैरचाल्यत्वादि मुक्तस्यायत्नसिद्धं लक्षणमिति निर्धारितम्॥ २७॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते श्रीमद्भगवद्गीताशाङ्करभाष्यव्याख्याने चतुर्दशोऽध्यायः॥ १४॥**

भाष्यार्कप्रकाशः

व्युत्पत्तिमभिप्रेत्याह— **आश्रय इति**। निर्विशेषे वस्तुनि मायया विशेषस्य कल्पितत्वात् सविशेषं ब्रह्मापि कल्पितमेव। विशेष्यांशस्य चैतन्यस्याकल्पितत्वेऽपि विशेषणांशस्य कल्पितत्वेन विशिष्टस्यापि कल्पितत्वव्यवहारात्। यथा घटाकाशस्य महाकाशे कल्पितत्वम्।

ननु सविशेषे ब्रह्मणि के विशेषाः सन्ति कल्पिता अविद्ययेति पृच्छति— **किंविशिष्टस्येति**। कैर्विशेषैर्विशिष्टस्येत्यर्थः। अमृतत्वमव्ययत्वं चेति द्वाभ्यां विशेषाभ्यां विशिष्टस्येत्यर्थः। किं तत् सविशेषं ब्रह्मेत्यत आह— **मोक्षाख्यस्येति**। **हि** यस्माद् **मदाश्रयं** निर्विकल्पकवस्त्वाश्रयम् - बहुव्रीहिः- अनन्तमव्ययममृतं ब्रह्म मुमुक्षुभिः प्राप्यते, तस्मादस्यापि मोक्षाख्यस्य सविशेषस्य ब्रह्मणोऽहं निर्विशेषचैतन्यं प्रतिष्ठा।

अयमर्थः— यन्निर्धर्मकं चैतन्यं तन्न केनापि प्राप्तुमर्हति, निर्धर्मके तस्मिन् प्राप्यत्वरूपधर्मायोगात्। यत्तु मुमुक्षुभिः प्राप्यते तन्मोक्षाख्यं ब्रह्म सधर्मकमेव। अमृतत्वाव्ययत्वरूपधर्मवत्त्वात् तस्य। मोक्षो हि शाश्वतो निर्विकारश्च। शुद्धचैतन्ये बन्धवन्मोक्षस्याप्यभावात्। निर्विकारः शाश्वतो मोक्षः कल्पित एवाविद्यया चैतन्ये। निर्विकारत्वादिधर्माणां चैतन्ये कल्पितत्वात् तद्वतो मोक्षस्यापि कल्पितत्वमिति भावः। ज्ञाननिष्ठालक्षणधर्मस्य नित्यत्वं च नित्यफलवत्त्वरूपं, यावद्विदेहकैवल्यमवस्थितत्वरूपं वा।

**सुखस्येति**। जीवन्मुक्तिसुखस्येत्यर्थः। मोक्षसुखस्य ब्रह्मण इत्यनेनोक्तत्वात्। **एकान्तनियतस्य** अव्यभिचारिणः, सर्वदाऽपि स्थायिन इत्यर्थः। यावद्विदेहकैवल्यं जीवन्मुक्तिसुखस्य विदुषां स्थायित्वादिति भावः। अहं निर्विकल्पकं चैतन्यं प्रतिष्ठा आश्रयः। **इति प्रवर्तत इति**। विद्वानिति शेषः। विद्वदात्मन एव निर्विकल्पकचैतन्यत्वादिति भावः। य एवं प्रवर्तते स ब्रह्मभूयाय कल्पते।

अनेन च श्लोकेन - निर्विकल्पकं चैतन्यमेवात्मा। तत्रैव बन्धप्रपञ्चवन्मोक्षाख्यं ब्रह्म जीवन्मुक्तिसुखं तत्साधनज्ञानयोगश्च इत्येतत् सर्वं कल्पितम्। तथा प्रत्यगात्मपरमात्मभेदः, प्रत्यगात्मनि जीवः, परमात्मनीश्वरश्च कल्पितः। ततश्च भक्तानुग्रहादि सर्वं द्वैतं तत्रैव कल्पितम्। तथा प्रत्यगात्मपरमात्मनोर्ज्ञातृत्वज्ञेयत्वप्रयुक्तः आधाराधेयभावश्च तत्रैव कल्पितः। तदेतत्सर्वकल्पनक्षमा चाघटितघटनापटीयस्तमा माया। सा च अहं ब्रह्मास्मीति ज्ञानादेव निवर्तते। य एवं विद्वानात्मानं नारायणं भक्तियोगेन भजते, स तदैव ब्रह्मभूयाय कल्पते। औदासीन्यादिसाधनसम्पन्नस्तु क्रमेण ब्रह्मभूयाय कल्पते। तस्मादात्मभजनमेव जीवन्मुक्तिविदेहमुक्तिद्वयसाधनमिति सिद्धम्।

यदुत्तमं ज्ञानं प्रवक्ष्यामीति भगवता प्रोक्तमादौ, तदुक्तं 'प्रकाशं चे'त्यारभ्य यावदध्यायपरिसमाप्ति ग्रन्थेन। **अथवा** उत्तमज्ञानसाधनमुक्तम्— 'प्रकाशं चे'त्यादिना। ज्ञानं तु साक्षाद् 'ब्रह्मणोऽहम्[ब्रह्मणो हि]' इति श्लोकेनोक्तमिति बोध्यम्। इदमेवात्मज्ञानमुत्तराध्याये विस्तरेण वक्ष्यति च।

---

१. एतदुत्तरं 'मोक्षाख्यस्य, मदाश्रयं हि अनन्तमव्ययममृतं ब्रह्म मुमुक्षुभिः प्राप्यते' इति रा.पा. भाति। २. 'अनुवर्तते' इति पा.। 'प्रवर्तते' इति रा.पा. ।

भाष्यार्कप्रकाशः

यत्तु **रामानुजः**— अहमव्यभिचारिभक्तियोगेन सेवितोऽमृतस्याव्ययस्य च ब्रह्मणः प्रतिष्ठेति, जीवस्य फलदशाभावित्वेन निर्दिष्टं रूपमिह ब्रह्मशब्देनोपचर्यत इति **देशिकश्च। तन्मन्दम् ;** जीवस्य यदि फलदशायां विद्यमानरूपादन्यद्रूपं भवति तर्हि जीवः सविकार एव स्यात्। पूर्वरूपपरित्याग उत्तररूपस्वीकारश्च विकारो हि। ततश्चानित्यत्वं स्यात्। अणोर्जीवस्य बृहत्त्वप्राप्तावणुत्वनाशेन नाशप्रसङ्गात् , बृहत्त्वजन्मना जन्मप्रसङ्गाच्च। ज्ञानधर्मबृहत्त्वं तु निरस्तं बहुशः पूर्वम्। तच्च फलदशाभाविजीवस्य बृहत्त्वं जीवाश्रयमेवेति न तस्य ब्रह्माश्रयत्वं च सम्भवति। येन बृहत्त्वमधिगतं स हि बृहत्त्वस्याश्रयः। न चेश्वरगतं बृहत्त्वं जीवस्यागतमिति वाच्यम् ; ईश्वरस्याब्रह्मत्वप्रसङ्गात्। नापीश्वरगतबृहत्त्वतुल्यं बृहत्त्वं जीवस्य प्रादुर्भूतमिति वाच्यम् ; तथा सति जातस्य तस्य बृहत्त्वस्य 'जातस्य हि ध्रुवो मृत्यु'रिति शास्त्रान्नाशस्यावश्यम्भावित्वेन मोक्षस्यानित्यत्वप्रसङ्गात्। तस्माद् बन्धदशायां विद्यमानमेवाज्ञान-तिरोहितत्वेनाविद्यमानतुल्यं बृहत्त्वं मोक्षदशायामज्ञानावरणनाशात् पुनः स्फुरतीति ब्रह्मैव जीवः, तस्य च ब्रह्मभूतजीवस्य ब्रह्मणः प्रतिष्ठात्वं तु पूर्वोक्तविधया कल्पितमेवाविद्ययेति बोध्यम्।

न च विद्यामविद्या कथं कल्पयेदिति वाच्यम् ; विद्याया बुद्धिवृत्तिविशेषात्मिकाया अविद्याकल्पितबुद्धिपरिणामात्मकत्वेना-विद्याकल्पितत्वसम्भवात्। न हि परमार्थदशायां विद्या विद्यते, येन कथं विद्याया अविद्याकल्पितत्वमिति शङ्क्येत। किं सुप्तिमूर्छादौ परमार्थदशायां केनापि विद्या अनुभूयते? तस्मात् परमार्थत एकमेवाद्वितीयं ब्रह्म, बन्धमोक्षविद्यादयः सर्वेऽप्यविद्याभूमावेवेति स्थितमद्वैतम् ॥ २७॥

**इति श्रीबेल्लङ्कोण्डोपनामक रामकविकृतौ श्रीभगवद्गीताशाङ्करभाष्यार्कप्रकाशे**
**गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः ॥ १४॥**

ॐ श्रीपरमात्मने नमः

# ॥ अथ पञ्चदशोऽध्यायः ॥

**श्रीभगवानुवाच—**

**ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्।**
**छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्॥ १ ॥**

**यस्माद् मदधीनं कर्मिणां कर्मफलम् , ज्ञानिनां च ज्ञानफलम् , अतो भक्तियोगेन मां ये सेवन्ते, ते मत्प्रसादाज्ज्ञानप्राप्तिक्रमेण गुणातीताः मोक्षं गच्छन्ति; किमु वक्तव्यम् आत्मनस्तत्त्वमेव सम्यग् विजानन्तः इत्यतो भगवान् अर्जुनेनापृष्टमपि[1] आत्मनस्तत्त्वं विवक्षुरुवाच—** ऊर्ध्वमूलमित्यादि। **तत्र तावद् [2]वृक्षरूपककल्पनया वैराग्यहेतोः [3]संसारस्वरूपं वर्णयति ; विरक्तस्य हि संसाराद् भगवत्तत्त्वज्ञानेऽधिकारो, नान्यस्येति।** ऊर्ध्वमूलमिति।

**आनन्दगिरिकृतव्याख्या**

**[4]ज्ञानेन गुणात्यये दर्शिते; नाशित्वे तेषां विना [5]ज्ञानेनात्ययाद् ; अनाशित्वे तेनापि तदयोग्यत्वाद् न ज्ञानं गुणात्ययहेतुरित्याशङ्कां निरस्य[6], साक्षादेव श्रवणादिहेतुं संन्यासं विधित्सुर्ब्रह्मत्वस्य परमपुरुषार्थतां च विवक्षुरध्यायान्तरमारभते—** यस्मादिति। **कर्मिणो ज्ञानिनश्च शास्त्रेऽधिकृताः। तत्र कर्मिणां कर्मानुकूलं फलमीश्वरायत्तम् , 'फलमत उपपत्तेः' इति न्यायात्। ज्ञानिनामपि तत्फलमीश्वरायत्तमेव 'ततो ह्यस्य बन्धविपर्ययौ' इत्युक्तत्वात्। यस्मादेवं तस्माद् ये भक्त्याख्येन योगेन मामेव सेवन्ते, ते मत्प्रसादद्वारा ज्ञानं प्राप्य गुणातीताः मुक्ता भवन्तीति स्थितमित्यर्थः। ये त्वात्मनस्तत्त्वमेव सन्देहाद्यपोहेन जानन्ति, ते तेन ज्ञानेन गुणातीताः सन्तो मुक्तिं गच्छन्तीति किमु वक्तव्यमिति अर्थसिद्धमर्थमाह—** किमु वक्तव्यमिति। **आत्मतत्त्वाज्ञानं यतः संसारहेतुः, ज्ञानं मोक्षानुकूलम् , अतोऽर्जुनेन किं तदित्यपृष्टमपि तत्त्वं भगवानुक्तवान् , प्रश्नाभावेऽपि तस्य तद्व्युत्पादनाऽभिमानादित्याह—** अत इति। **तत्त्वे विवक्षिते किमिति संसारो वर्ण्यते? तत्राह—** तत्रेति। **अध्यायादिः सप्तम्यर्थः। वैराग्यमपि किमिति मृग्यते? तत्राह—** विरक्तस्येति। इति **वैराग्याय संसारवर्णनमिति शेषः। नाशसंभावनायै वृक्षरूपकं बन्धहेतोर्दर्शयति—** ऊर्ध्वमूलमिति। **कथं कालतः सूक्ष्मत्वम्? तदाह—**

**श्रीबेल्लंकोण्डरामरायकविविरचितः**

**भाष्यार्कप्रकाशः**

यस्मात् प्राणिनां कर्मिणां कर्मफलं, ज्ञानिनां ज्ञानफलं च **मदधीनम्** ईश्वरायत्तम् , **अतः** तस्माद् भक्तियोगेन ये मां सेवन्ते ते मम प्रसादाज्ज्ञानप्राप्तिक्रमेण गुणातीताः जीवन्मुक्ताः सन्तो मोक्षं गच्छन्ति। यस्मादेवं मां केवलं भजन्त एव मोक्षं गच्छन्ति, तस्मादात्मनो ममैवं वक्ष्यमाणविधं तत्त्वं सम्यग् विजानन्तो मोक्षं गच्छन्तीति किमु वक्तव्यम्? **इत्यतः** भगवत्तत्त्वज्ञानस्य मोक्षहेतुत्वादित्यर्थः। अर्जुनेनापृष्टमप्यात्मनस्तत्त्वं विवक्षुःसन् भगवानुवाच— **ऊर्ध्वमूल**मित्यादिपञ्चदशाध्यायम्। **तत्रेति**। अध्याये। **तावदिति**। आदौ **वैराग्यहेतोः** वैराग्यार्थं वृक्षरूपकल्पनया **संसाररूपं वर्णयति** संसारवृक्षं कथयतीत्यर्थः। किं फलं वैराग्यादत आह— **विरक्तस्येति**। संसाराद् विरक्तस्यैव भगवत्तत्त्वज्ञानेऽधिकारः, **अन्यस्य** संसारासक्तस्य नाधिकारः। अत एव हि संसारं परित्यज्य व्रजन्ति परिव्राजकास्तत्त्वज्ञानलाभार्थम्। गृहिणां हि कुटुम्बपोषणासक्तचेतसां पुत्रादिजन्ममरणादिप्रयुक्तसुखदुःखविक्षिप्तचेतसां च कामातुराणां कथं वेदान्तश्रवणादिकं सम्भवेत्? न कथमपीति भावः।

**ऊर्ध्वमूलमिति**। यं संसारवृक्षमिति शेषः। ऊर्ध्वमूलमधःशाखमव्ययमश्वत्थं प्राहुः श्रुतयः, वेदविदो वा। यं संसारमिति वा।

---

१. 'अपृष्टोऽपि' इति पा.। २. 'वृक्षरूपकल्पनया' इति रा.पा.। ३. 'संसाररूपं' इति रा.पा.। ४. भक्तियोगस्य ज्ञानद्वारा गुणात्ययहेतुत्वात् ज्ञानेनेत्युक्तम्। 'भक्तियोगेन' इति पा.। ५. 'ज्ञानेनानत्ययाद्' इति पा.। ६. आत्मतत्त्वाज्ञानं यतः तद्धेतुः, अतः आत्मतत्त्वज्ञानेन तदत्ययः इति शङ्कानिरासो बोध्यः।

ऊर्ध्वमूलं **कालतः सूक्ष्मत्वात् कारणत्वाद् नित्यत्वाद् महत्त्वाच्च** ऊर्ध्व**मुच्यते ब्रह्म अव्यक्तमायाशक्तिमत्। तद् मूलमस्येति सोऽयं संसारवृक्षः ऊर्ध्वमूलः। श्रुतेश्च 'ऊर्ध्वमूलोऽवाक्छाखः' (क.उ.६.१) इति। पुराणे च— 'अव्यक्तमूलप्रभवस्तस्यैवानुग्रहोत्थितः[1]। बुद्धिस्कन्धमयश्चैव इन्द्रियान्तरकोटरः॥ महाभूतविशाखश्च विषयैः [2]पत्रवांस्तथा। धर्माधर्मसुपुष्पश्च सुखदुःखफलोदयः॥ आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः। एतद्ब्रह्मवनं चैव**

आनन्दगिरिकृतव्याख्या

कारणत्वादिति। **तदेव कथम्? कार्यापेक्षया नियतपूर्वभावित्वादित्याह—** नित्यत्वादिति। **सर्वव्यापित्वाच्चोत्कर्षं सम्भावयति—** महत्त्वाच्चेति। ऊर्ध्वम् **उच्छ्रितम् , उत्कृष्टमिति यावत्। तस्य कूटस्थस्य कथं मूलत्वमित्याशङ्क्याह—** अव्यक्तेति। **स्मृतिमूलत्वेन श्रुतिमुदाहरति—** श्रुतेश्चेति। [3]अवाञ्चो **निकृष्टाः शाखा इव महदाद्याः यस्य स तथा। प्रकृते संसारवृक्षे पुराणसम्मतिमाह—**पुराणे चेति। अव्यक्तम् **अव्याकृतं, तदेव मूलं, तस्मात् प्रभवनं प्रभवो यस्य स तथा। तस्यैव मूलस्याव्यक्तस्यानुग्रहाददतिदृढत्वाद्** उत्थितः **संवर्धितः। तस्य लौकिकवृक्षसाधर्म्यमाह—** बुद्धीत्यादिना। **वृक्षस्य हि शाखाः स्कन्धादुद्भवन्ति, संसारस्य च बुद्धेः सकाशान्नानापरिणामाः जायन्ते, तेन बुद्धिरेव स्कन्धः, तन्मयः तत्प्रचुरोऽयं संसारतरुः। इन्द्रियाणाम**न्तराणि **छिद्राणि कोटराणि यस्य स तथा। महान्ति भूतानि पृथिव्यादीन्याकाशान्तानि विशाखाः स्तम्भा यस्य स तथा।** आजीव्यत्वम् **उपजीव्यत्वम्। ब्रह्मणाऽधिष्ठितो वृक्षो ब्रह्मवृक्षः। तथापि ज्ञानं**

भाष्यार्कप्रकाशः

यं संसारमश्वत्थमूर्ध्वमूलमधःशाखमव्ययं प्राहुरिति वा। यस्य छन्दांसि पर्णान्याहुः। भवन्तीति वा। तं संसारवृक्षं यो वेद स वेदविद् भवति। यथा वृक्षः समूलः सशाखः सपर्णो बीजाङ्कुरभावेन प्रवाहानादिः प्रवाहानन्तश्चेत्यन्वयः[त्यव्ययः], तथा संसारोऽयं समूलः सशाखः सपर्णः प्रवाहतोऽनादिरनन्तश्चेत्यव्ययश्चेति साधर्म्यसत्त्वात् संसारे वृक्षत्वारोपणमिति बोध्यम्। अव्यक्तमायाशक्तिमद् ब्रह्म ऊर्ध्वमित्युच्यते। कुत उच्यते? अत आह— **सूक्ष्मत्वादिति**। किमपेक्षया? अत आह— **कालत इति**। कालो हि सूक्ष्मः, तस्मादपि ब्रह्म सूक्ष्मम्। संवत्सरादिलक्षणकालस्य विज्ञेयत्वेन स्थूलत्वेऽपि कलाकाष्ठादिलक्षणकालस्य दुर्विज्ञेयत्वेन सूक्ष्मत्वम् , ब्रह्मणश्चातीन्द्रियस्य दुर्विज्ञेयत्वं स्फुटमेव। ऊर्ध्वस्थस्य च नक्षत्रादेः सूक्ष्मत्वदर्शनात् सूक्ष्मत्वादिदं ब्रह्माप्यूर्ध्वमित्युच्यते। तथा **कारणत्वादिति**। 'यतो वा इमानी'त्यादिश्रुतेर्ब्रह्म जगत्कारणम्। कारणं च वस्तु कार्यादूर्ध्वमिति प्रतीतिः। एवं कारणत्वाद् ब्रह्मोर्ध्वमित्युच्यते। **नित्यत्वादिति**। अनित्यं संसारमण्डलमतीत्य वर्तते नित्यत्वाद् ब्रह्मेत्यूर्ध्वमित्युच्यते। तथा **महत्त्वादिति**। उत्कृष्टत्वादूर्ध्वत्वं ब्रह्मण इति भावः।

**यद्वा** ऊर्ध्वं ब्रह्म सूक्ष्मत्वादिहेतुचतुष्टयेन मूलमित्युच्यते। वृक्षस्यापि हि बीजं मूलमल्पपरिमाणत्वात् सूक्ष्मं, वृक्षोदयं प्रति हेतुत्वात् कारणम् , अङ्कुरात्मना पुनर्बीजात्मना पुनरङ्कुरात्मनेत्येवं परिणममानत्वात् प्रवाहनित्यं, कार्यमहत्त्वान्महच्च। एवं ब्रह्मापि। 'अणोरणीयान्महतो महीया'निति श्रुत्या ब्रह्मणः सूक्ष्मत्वमहत्त्वे, 'यतो वे'त्यादिश्रुत्या कारणत्वम् , 'अजो नित्यः' इत्यादिश्रुत्या नित्यत्वं चेति बोध्यम्। निर्विशेषस्य ब्रह्मणः संसारमूलत्वायोगादाह—**अव्यक्तेति**। अव्यक्तं, माया, शक्तिश्चेति पर्यायाः। अव्यक्तमाया-शब्दद्वयवाच्या या शक्तिस्तद्युक्तमित्यर्थः। मायाशबलितमीश्वराख्यं ब्रह्म जगद्धेतुत्वात् संसारवृक्षस्य मूलमित्युच्यत इति परमार्थः।

ननु क्वोक्तं संसारवृक्षस्योर्ध्वमूलत्वम्? अत आह— **ऊर्ध्वमूलो हीति** श्रुतिम्। **एष इति**। संसाररूप इत्यर्थः। **सनातनः** अनादिः। **अव्यक्तेति**। अव्यक्तं माया, तदेव मूलं, तस्मात् प्रभवतीत्यव्यक्तमूलप्रभवः। तस्यैवाव्यक्तमूलस्यानुग्रहाद् **उच्छ्रितः** प्रवृद्धः। बुद्धिरेव स्कन्धः प्रकाण्डो बुद्धिस्कन्धः, तन्मयो **बुद्धिस्कन्धमयः**। वृक्षस्य स्कन्धाच्छाखा इव, संसारस्य बुद्धेः सकाशाद् नानाविधपरिणामाः भवन्तीतीयमुक्तिः। इन्द्रियान्तराण्येव कोटरा यस्य स **इन्द्रियान्तरकोटरः**। इन्द्रियाणां रन्ध्राभावेऽपि तदधिष्ठान-चक्षुःश्रोत्रादीनां सरन्ध्रत्वादियमुक्तिः। महाभूतान्येव विशाखा विविधाः शाखा यस्य स **महाभूतविशाखः**। विषयैः शब्दादिभिः **पत्रवान्** पत्राण्यस्य सन्तीति तथोक्तः, विषया एव पत्राणीत्यर्थः। धर्माधर्मावेव सुपुष्पाणि यस्य स **धर्माधर्मसुपुष्पः**। सुखदुःखयोरेव फलानामुदयो यस्मात् सः, उदयोऽभिवृद्धिर्यस्य स इति वा **सुखदुःखफलोदयः**। सर्वभूतानां सर्वेषां प्राणिनां मनुष्यादीनामन्यत्र

१. 'नुग्रहोच्छ्रितः' इति रा.पा.। २. 'पत्रशाखवान्' इति पा.। ३. 'अर्वाञ्चः' इति पा.।

**ब्रह्माचरति [1]नित्यशः॥ एतच्छित्त्वा च भित्त्वा च ज्ञानेन परमासिना। ततश्चात्मरतिं प्राप्य [2]तस्मान्नावर्तते पुनः॥'(द्र. म.भा.आश्व.४७.१२-१५) इत्यादि। तमूर्ध्वमूलं [3]संसारं मायामयं वृक्षम्** अधःशाखं **महदहङ्कारतन्मात्रादयः शाखा इवास्याधो भवन्तीति सोऽयमधःशाखः, तमधःशाखम्। न श्वोऽपि स्थातेत्यश्वत्थः, तं क्षणप्रध्वंसिनम्** अश्वत्थं प्राहुः **कथयन्ति।** अव्ययं **संसारमायायाः अनादिकालप्रवृत्तत्वात् सोऽयं संसारवृक्षोऽव्ययः, [4]अनाद्यनन्तदेहादिसन्तानाश्रयो हि सुप्रसिद्धः। तमव्ययम्। तस्यैव संसारवृक्षस्येदमन्यद् विशेषणम् - छन्दांसि यस्य पर्णानि ।** छन्दांसि **छादनाद्**

आनन्दगिरिकृतव्याख्या

**विना छेत्तुमशक्यतया** सनातनः **चिरन्तनः। एतच्च ब्रह्मणः परस्यात्मनो** वनं **वननीयं, सम्भजनीयम्। अत्र हि ब्रह्म प्रतिष्ठितम्। तस्य वृक्षस्य संसाराख्यस्य तदेव ब्रह्म सारभूतम्। अथवाऽस्य ब्रह्मवृक्षस्यानवच्छिन्नस्य संसारमण्डलस्य तदेतद् ब्रह्म वनमिव वनं वननीयं सम्भजनीयम्। न हि ब्रह्मातिरिक्तं संसारस्य आस्पदमस्ति, ब्रह्मैवाविद्यया संसरतीत्यभ्युपगमादित्यर्थः। अहं ब्रह्मेति दृढज्ञानेन उक्तं संसारवृक्षं छित्त्वा प्रतिबन्धकाभावादात्मनिष्ठो भूत्वा पुनरावृत्तिरहितं कैवल्यं प्राप्नोतीत्याह—** एतदिति। **अधःशाखमित्येतद् व्याचष्टे—** महदिति। **आदिशब्देनेन्द्रियादिसंग्रहः। संसारवृक्षस्यातिचञ्चलत्वे प्रमाणमाह—** प्राहुरिति। **क्षणध्वंसिनोऽव्ययत्वं विरुद्धमित्याशङ्क्याह —** संसारेति। **तदेवोपपादयति—** अनादीति। छादनं **रक्षणं प्रावरणं वा; कर्मकाण्डानि खल्वारोहावरोहफलानि नानाविधार्थवादयुक्तानि**

भाष्यार्कप्रकाशः

काकादीनां चाजीव्यः उपजीव्यः, आश्रय इति यावत्। एवंविधः **सनातनो** बीजाङ्कुरन्यायादनादिर्ब्रह्मवृक्षः। ब्रह्म प्रकृतिः, तत्कार्यत्वात् संसारोऽपि ब्रह्म, तदेव वृक्षोऽश्वत्थः। ब्रह्मणा परमात्मना अधिष्ठितो वृक्षो ब्रह्मवृक्ष इति वा।

**एतद्ब्रह्मवन**मित्येकं पदम्। **एतस्य** अस्य **ब्रह्मणो** जीवरूपस्य **वनं** भजनीयम् , भोग्यमिति यावत्। **ब्रह्म** परमात्मा अत्र साक्षिवदाचरति, ब्रह्मैव साक्षिभूतमित्यर्थः। निर्विशेषे ब्रह्मणि वस्तुतः साक्षित्वस्याप्ययोगात् साक्षिवदाचरतीत्युक्तम्। 'अहं ब्रह्मास्मी'त्याकारेण ज्ञानेनैव परमेणासिना खड्गेन। एतद् देहरूपं वृक्षम्। सामान्ये क्लीबत्वम्। एतद् ब्रह्मवनमिति वा। छित्त्वा भित्त्वा च। देहस्य छेदनं भेदनं च तत्राहङ्कारममकारयोरकरणमेव। अकृते च तदभिमानद्वये छिन्नभिन्नवृक्ष इव देहो हि नश्यति। ज्ञानेनाज्ञानं नाशयित्वेति वा। नाशिते त्वज्ञाने देहभ्रंशः स्यादिति भावः। अज्ञानमूलत्वाद् देहस्य। न हि वृक्षस्य मूले छिन्ने सति वृक्षो जीवेत्। ततश्चाज्ञाननाशानन्तरमात्मगतिम् आत्मरूपां गतिं प्राप्य तस्मादात्मरूपान्मोक्षात् पुनर्नावर्तते, तद् ब्रह्मरूपेणैव तिष्ठतीत्यर्थः।

कोऽसावूर्ध्वमूलः? अत आह— **संसारमिति**। संसरति देही एतत्तादात्म्याद्यध्यासेनेति **संसारो** देहादिप्रपञ्चः। नायं सत्यः इत्याह— **मायामयमिति**। मायाकार्यत्वाद् मायावद् मिथ्याभूतमित्यर्थः। अधोभूताः शाखाः यस्य सोऽधःशाखः। कास्ताः शाखाः? अत आह— **महदिति**। कारणत्वाद् ब्रह्मण ऊर्ध्वत्वम् , कार्यत्वान्महदादीनामधःस्थत्वमिति बोध्यम्। अस्य संसारवृक्षस्योर्ध्वभूतं ब्रह्म मूलम् , अधोभूता महदादयस्तु शाखा इति परमार्थः। **एतेन** - वृक्षस्य कथं मूलमूर्ध्वं स्याच्छाखाः कथमधो भवेयुरिति शङ्काऽपि **प्रत्युक्ता**। अत्रोर्ध्वाधःशब्दाभ्यां ब्रह्मणो महदादीनां चोच्यमानत्वात्। न हि ब्रह्ममूलो महदादिशाखश्च संसारः इति वृक्षरूपणे कोऽपि विरोधः। अथवोर्ध्वशब्दस्यैवात्र ब्रह्मपरत्वम् , अधःशब्दस्तु शाखाविशेषणभूत एव। शाखाशब्दात्तु [5]निगीर्णातिशयोक्त्या तत्तुल्य-महदादिग्रहणमिति स्वीकारेऽपि न दोषः, शाखानां वृक्षस्य पत्रपुष्पाद्यपेक्षयाऽधःस्थत्वात्।

अश्वत्थशब्दं निर्वक्ति— **न श्वोऽपीति**। फलितमाह— **क्षणप्रध्वंसिनमिति**। यद्यपि देहादय एतत्क्षणे दृष्टाः, क्षणान्तरे पुनर्दृश्यन्त एव, न क्षणप्रध्वंसस्तेषाम् , तथापि क्षणान्तरेऽवश्यं दृश्यन्त इति वक्तुं न शक्यते मरणसम्भवात्। तस्मात् क्षणप्रध्वंसशीला एव देहादय इत्यभिप्रेत्य क्षणप्रध्वंसिनमित्युक्तम्। अत एव ताच्छील्ये णिनिः प्रयुक्तः— प्रध्वंसिनमिति। वृक्षोऽप्यश्वत्थसंज्ञः प्रसिद्ध एव। **अव्ययमिति**। ननु क्षणप्रध्वंसिनः संसारस्य कथमव्ययत्वम्? अत आह— **मायाया इति**। नन्वनादिकालमारभ्य प्रवृत्तत्वे

१. 'साक्षिवत्' इति पा.। २. 'यस्मात्' इति पा.। ३. 'संसारमायामयम्' इति पा.। ४. 'अनाद्यन्त' इति .पा.। ५. उपमेयस्य स्वशब्देनोल्लेखं विना उपमान-वाचकेनैव शब्देन ग्रहणं तस्य निगरणम्। प्रकृते शाखाशब्देन महदादिग्रहणं तथा।

**ऋग्यजुःसामलक्षणानि** यस्य **संसारवृक्षस्य पर्णानीव** पर्णानि। **यथा वृक्षस्य परिरक्षणार्थानि पर्णानि, तथा वेदाः संसारवृक्षपरिरक्षणार्थाः, धर्माधर्मतद्धेतुफल[१]प्रकाशनार्थत्वात्। यथाव्याख्यातं संसारवृक्षं समूलं यः** तं **वेद स** वेदविद् **वेदार्थविदित्यर्थः। न हि संसारवृक्षादस्मात् समूलाज्ज्ञेयोऽन्योऽणुमात्रोऽप्यवशिष्टोऽस्ति इत्यतः सर्वज्ञः सर्व-वेदार्थविदिति समूलसंसारवृक्षज्ञानं स्तौति॥ १॥**

आनन्दगिरिकृतव्याख्या

**संसारवृक्षं रक्षन्ति, तन्निष्ठं दोषं चावृण्वन्ति, तेन तानि छन्दांसि पर्णानीव भवन्तीत्यर्थः। तदेव प्रपञ्चयति—** यथेति। **उक्तेऽर्थे हेतुमाह—** धर्मेति। **कर्मकाण्डानां वेदानामिति शेषः। कर्मब्रह्माख्यसर्ववेदार्थस्य तत्रान्तर्भावमुपेत्य व्याचष्टे—** वेदार्थेति। **समूलसंसारवृक्षज्ञानेऽमूलं हित्वा मूलमेव निष्कृष्य ज्ञातुं शक्यमिति तज्ज्ञानार्थं प्रयतितव्यमिति मत्वा तज्ज्ञानस्तुतिरत्र विवक्षितेत्याह—** न हीति॥ १॥

भाष्यार्कप्रकाशः

मायैवाव्यया स्यात् , कथं पुनस्तत्कार्यसंसारः अव्ययः? अत आह— **अनादीति**। न विद्येते आद्यन्तौ यस्य सोऽनाद्यन्तः, स चासौ देहादिसन्तानः, स आश्रयो यस्य स तथोक्तः। बीजाङ्कुरन्यायेन प्रवाहाकारेण पूर्वपूर्वदेहादेरुत्तरोत्तरदेहादिर्भवन् सन् न कदाऽप्युपरमत इत्यनन्तत्वं देहादिसन्तानस्य। प्रलयेऽपि सूक्ष्मरूपेण सत्त्वादयमिदानीमारब्ध इति वक्तुमशक्यत्वादनादित्वं च। एवमस्यानादित्वे हेतुर्मायायाः एतन्मूलभूतायाः अनादित्वमेवेति **मायायाः अनादिकालप्रवृत्तत्वादि**त्युक्तम्। तथा मायायाः अनन्तत्वमेव देहादि-सन्तानस्यानन्तत्वे कारणम्। एवंविधसन्तानाश्रयत्वादेव संसारस्याप्यनाद्यनन्तत्वमिति युक्तमव्ययत्वं संसारस्येति भावः। एवं सुखदुःखसम्भोगरूपसंसारस्य तु स्वत एवाव्ययत्वम् , स्थूलदेहस्य नश्यत्त्वेऽपि सूक्ष्मदेहस्याविनाशित्वात्। प्रपञ्चरूपसंसारस्य त्वव्ययत्वं स्फुटमेव, प्रलयेऽपि जगतः सूक्ष्मरूपेण सत्त्वात्। तस्मात् सर्वथाऽप्यव्यय एव संसारो यावदविद्यम्। **अन्यदिति**। विलक्षणमित्यर्थः। अन्यद् विशेषणं विशेषणान्तरम्[२]। छन्दःशब्दस्य व्युत्पत्तिमाह— **छादनादिति**।[३] रक्षणादिति यावत्। छादन-पूर्वकत्वाद् रक्षणस्य। कवचो हि देहमाच्छाद्य रक्षति शस्त्रादेः सकाशात्। अथर्वणवेदस्य ऋगादिवेदत्रयान्तःपातित्वादाह— **ऋग्यजुःसामात्मकानीति**। पर्णशब्दोऽत्र लक्षणया तत्सदृशपरः। छन्दसां प्रसिद्धपर्णत्वासम्भवादित्याह—**पर्णानीवेति। रक्षणार्थानीति**। पर्णानि हि वृक्षमाच्छाद्य वातातपादिभ्यो रक्षन्ति। एवं संसारवृक्षं वेदाः परिरक्षन्ति। तत्र हेतुमाह— **धर्मेति**। धर्माधर्मयोस्तद्धेतूनां विहितप्रतिषिद्धकर्मणां तत्फलस्य स्वर्गनरकादेश्च प्रकाशनं प्रतिपादनम् अर्थः प्रयोजनं येषां तत्त्वात्। **धर्मो** यागादिजन्यमपूर्वं सुकृतात्मकमात्मनिष्ठम्। **अधर्मो** हिंसादिजन्यं दुष्कृतमिति विवेकः। विद्वांसोऽपि वेदप्रामाण्याद् यज्ञादिकमनुष्ठाय स्वर्गादिकं प्राप्य तत्पुण्यक्षयात् पुनर्भुवि मनुष्यात्मना [४]प्रजाय पुनः कर्माणि कुर्वन्तीति विदुषामपि जन्ममरणादिलक्षणोऽयं संसारो वेदमूलक एव। नास्तिका अपि हिंसादिलक्षणं कर्म विधाय तत्फलानुभवाय नरकं पश्वादिजन्म च प्राप्य पुनर्म्रियन्ते पुनरुत्पद्यन्त इत्ययमर्थोऽपि वेदादेव ज्ञायत इति तेषां संसारोऽपि वेदमूल एव। तस्माद् वेदैः संसारः परिरक्ष्यत इति भावः। अत एव 'त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन' इत्युक्तं भगवता।

**समूलमिति**। मूलेन ब्रह्मणा मायिना सहेत्यर्थः। केवलसंसारवेदनेन फलाभावादिति भावः। ब्रह्मज्ञानाद्धि मोक्षः। ननु सर्वेऽपि वेदविद एव वेदपाठकाः इत्यत आह— **वेदार्थविदिति**। वेदान् प्रायशः पठन्त्येव ब्राह्मणाः, परन्तु तदर्थं ते न जानन्ति। अर्थज्ञान-शून्याश्च वैदिकाः वेदेनैव निन्दिताः— 'स्थाणुरयं भारवाहः किलाभूदधीत्य वेदं न विजानाति योऽर्थ'मिति। तस्माद् वेदपाठकानां वेदार्थज्ञानमावश्यकम् , तज्ज्ञानादेव दर्शितसमूलसंसारज्ञानसम्भवात्।

ननु यः समूलं संसारं वेद स कथं सर्ववेदार्थविद् भवेत् , अन्यस्याविज्ञेयस्य बहुधा सत्त्वाद्, अत आह— **न हीति**। दृग्दृश्याभ्यां पदार्थाभ्यामन्यत् किमपि नास्ति। तत्र - ब्रह्म दृक् । माया, तत्कार्यं सर्वं जगद् दृश्यम्। एवं स्थिते मूलस्य मायावतो

१. 'प्रदर्शनार्थत्वात्' इति पा.। २. 'इदमन्यद् विशेषणान्तरम्' इति भाष्यपाठः क्वचिद् दृश्यते। तमनुसृत्यापौनरुक्त्याय अन्यदित्येतत् विलक्षणमिति व्याख्याय विशेषणान्तरमित्यस्येत्थं व्याख्यानं भाति। ३. 'छादयन्ति ह वा एनं छन्दांसि पापात् कर्मणः' (ऐ.आ. २-१-६) इति श्रुतिरप्यनुसंधेया। ४. जनित्वेत्यर्थः।

भाष्यार्कप्रकाशः

ब्रह्मणो, वृक्षस्य जगद्रूपसंसारस्य च ज्ञाने सति किं पुनरवशिष्येत ज्ञेयतया? न किमपि, ताभ्यामन्यस्याभावात्। वेदार्थानां यज्ञादिकर्मणां ब्रह्माद्युपासनानां च सर्वेषां संसारान्तःपातित्वाद् , वेदान्तार्थस्य च ब्रह्मत्वेन मूलान्तःपातित्वाच्चेति भावः। **अत इति**। समूलात् संसारवृक्षादन्यस्य ज्ञेयस्याभावादित्यर्थः। सर्ववेदार्थविद् यः स सर्वज्ञ एवेति समूलस्य वृक्षस्य संसारस्य विज्ञानं स्तौति। समूलवृक्षविज्ञानिनां सर्वज्ञत्वे सति तद्विज्ञानस्य सर्वोत्कर्षः प्राप्नोति। यथा धनवतः पुरुषस्य कीर्तनीयत्वे सति धनस्याप्युत्कर्षः, तद्वत्। धर्मोत्कर्षपूर्वकत्वाद् धर्म्युत्कर्षस्येति भावः।[१]

यत्तु **रामानुजः** - सप्तलोकोपरि निविष्टचतुर्मुखादित्वेन तस्योर्ध्वमूलत्वम् , पृथिवीनिवासिसकलनरपशुमृगक्रिमिकीटपतङ्ग-स्थावरान्ततया अधःशाखत्वम्। संसारस्यावेदत्वेऽपि संसारविद् वेदविदेव। वेदो हि संसारवृक्षच्छेदोपायं वदति। छेद्यवृक्षस्वरूपज्ञानं छेदनोपायज्ञानोपयोगीति वेदविदित्युच्यत इति। **तत्तुच्छम्** ; चतुर्मुखः किं जगद्रूपसंसारस्यादिः, उत देहरूपस्य, अथवा सुखदुःख-सम्भोगरूपस्य? नाद्यः, 'जन्माद्यस्य यतः' इति सूत्रेणेश्वरस्यैव जगत्कारणत्वेन जगदादित्वस्य स्थापितत्वात्। आदिर्हि कारणम्। न द्वितीयः, देवमनुष्यादिदेहान् प्रति चतुर्मुखस्यादित्वेऽपि चतुर्मुखदेहं प्रति चतुर्मुखस्यादित्वाभावात्। न हि पुत्रदेहस्यादिः पिता पितृ-देहस्याप्यादिर्भवति। न तृतीयः, चतुर्मुखस्यापि सुखदुःखसम्भोगसत्त्वेन तदादित्वाभावात् तस्य। न हि स्वानर्थकरं संसारं चतुर्मुखः स्वयं सृजति।

**ननु** आदिर्न कारणम् , किन्त्वाद्यवयवः, यथा वृक्षस्यादिमध्यान्तावयवाः सन्ति, भूसन्निहितभागः आदिर्वृक्षस्य, चरमभागो ऽन्तः, स्कन्धादिभागस्तु मध्यः, तथा जगद्रूपसंसारस्य चतुर्मुख आदिभागः, पृथिवीनिवासिनो मनुष्यादयो मध्यभागः, पातालवासिनो ऽन्तभागः इति चेत् , **नैतदप्युचितम्** ; तथा सति चतुर्मुखस्यैकस्यैव कथमादित्वम्? तल्लोकवासिनः सर्वेऽप्यादिभूता एव। **किञ्च** वृक्षाश्रयपक्षिकीटादिप्रायाः जगदाश्रयचतुर्मुखादिप्राणिनः, न तु स्कन्धशाखादिस्थानीयाः। सत्यादिलोका एव तत्स्थानीयाः, लोकात्मकत्वाज्जगतः। तथा च जगतः सत्यलोक आदिः, भूलोको मध्यः, पाताललोकोऽन्तः। यद्वा स्वर्गलोकः आदिः, मर्त्यलोको मध्यः, पाताललोकोऽन्तः इति सत्यलोकादित्वं स्वर्गलोकादित्वं वा जगद्वृक्षस्य वक्तव्यमिति कथं चतुर्मुखादित्वं तस्य?

**अपिच** यद्यत्रोर्ध्वशब्देनाद्यवयवो विवक्षितः स्यात् , तर्हि अधःशब्देन किं मध्यावयवो विवक्षितः? यद्वाऽन्तावयवः? अथवोभयम्? नाद्यः, स्थावरान्ततयेति स्ववचोविरोधात्। न द्वितीयः, न हि पृथिवी तन्निवासिनः स्थावराः पर्वतादयो वा जगद्वृक्षस्यान्तभागः स्यात्। न तृतीयः, तद्विवक्षानुसारेण त्वया पृथिवीनिवासिमनुष्यादिमध्यतया पातालनिवासिसर्पाद्यन्ततया चाधःशाख इत्युच्यत इत्यनुक्तत्वात्। **किञ्च** 'अव्यक्तमूलप्रभवः' इति पुराणं च प्रकृतगीतामूलभूतश्रुतिगतोर्ध्वमूलपदस्य मायाकारणकत्वरूपार्थमेव प्रतिपादयतीति तद्विरोधश्च तव। तस्मादूर्ध्वं ब्रह्म मूलं कारणमस्येत्यूर्ध्वमूलमित्येव व्याख्येयम्। न च ब्रह्मणः कारणत्वप्रतिपादकस्य तवापि मायाकारणत्वप्रतिपादकपुराणविरोध इति वाच्यम् ; शक्तिशक्तिमतोरभेदात्। केवलाव्यक्तस्य केवलब्रह्मणो वा कारणत्वाभावात्। अव्यक्तशक्तिमद् ब्रह्म ब्रह्माश्रयमव्यक्तं वा जगतः कारणमिति न कश्चिद् विरोधः।

**यच्चानेनोक्तम्** - संसारो न वेदः इति, **तदप्ययुक्तम्** , वेदस्यापि संसारपदवाच्यजगदन्तःपातित्वेन संसारस्यापि वेदत्वात्। यज्ञादिसंसारस्य वेदार्थत्वेन च वेदस्य संसारप्रतिपादकत्वात् संसारस्य वेदत्वमिति वा, प्रतिपाद्यप्रतिपादकयोरभेदात्।[२]

**यच्च** वेदः संसारवृक्षच्छेदोपायं वदतीति, **तदप्ययुक्तम्** , यज्ञादिप्रतिपादकवेदभागस्य संसारप्रवृद्ध्युपायप्रतिपादकत्वात्। वेदार्थो हि यज्ञादिः संसारं वर्धयतीति॥ १॥

१. ज्ञानवतः स्तुतिः ज्ञानस्तुतौ पर्यवस्यतीति भावः। अत्र च आत्मतत्त्वस्य विज्ञेयत्वात् तज्ज्ञाने विरक्तानामेवाधिकारात् , संसाराद्वैराग्यसिद्धये संसारवृक्षस्व-रूपवर्णनमिति भाष्यकारैरुक्तम्। वैराग्यसिद्ध्युपयोगितया संसारवृक्षस्य सम्यग् यथार्थस्वरूपवर्णनं भाष्यकारैः कठोपनिषद्भाष्ये (क.उ.६.१) कृतं तत्रैव द्रष्टव्यम्।

२. प्रतिपाद्यप्रतिपादकयोरभेदमादाय सामानाधिकरण्येन व्यवहारस्य 'ओमित्येतदक्षरमिदं सर्वम्' (मा.उ. १) इत्यादौ दर्शनादिति भावः। इदं च संसारस्य वेदत्वोपपादनं प्रौढ्यैव। तस्यावेदत्वेऽपि वेदार्थस्य समस्तस्य तदन्तर्भावात् तद्विदः समस्तवेदार्थज्ञत्वस्य समर्थितत्वात्। **वस्तुतस्तु** समूले संसारवृक्षे ज्ञाते अध्यारोपापवादन्यायेन आरोपितसंसारनिषेधेन तन्मूलत्वेनोक्तमात्मतत्त्वं निष्कृष्य ज्ञातुं शक्यमिति आत्मतत्त्वज्ञानमेवेत्थं स्तुतमिति ज्ञेयम्। स्पष्टं चेदम् आनन्दगिरीयव्याख्याने । अत एव 'स वेदवित् स आत्मवित् स सर्ववित्' (बृ.उ. ३.७.१) इत्यन्तर्यामिज्ञानस्तुतिः इत्यलम्।

**अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः।**
**अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके॥ २॥**

**तस्यैव संसारवृक्षस्यापरा अवयवकल्पनोच्यते—** अधश्चेति। अधो **मनुष्यादिभ्यो यावत्स्थावरम् ,** ऊर्ध्वं **च** [१]**यावद् 'ब्रह्मा विश्वसृजो धर्म' इत्येतदन्तं यथाकर्म यथाश्रुतं ज्ञानकर्मफलानि** तस्य **वृक्षस्य शाखा इव** शाखाः प्रसृताः **प्रगताः** गुणप्रवृद्धाः **गुणैः सत्त्वरजस्तमोभिः** प्रवृद्धाः **स्थूलीकृताः उपादानभूतैः** विषयप्रवालाः **विषयाः शब्दादयः प्रवाला इव देहादिकर्मफलेभ्यः शाखाभ्योऽङ्कुरीभवन्तीव, तेन विषयप्रवालाः शाखाः। संसारवृक्षस्य** [२]**परममूलम्**

आनन्दगिरिकृतव्याख्या

**अवयवसम्बन्धिनी** अपरा **प्रागुक्तादतिरिक्ता कल्पनेति यावत्। आ मनुष्यलोकाद् आ विरिञ्चे[**[३]**आऽवीचे]रित्यधःशब्दार्थमाह—** मनुष्यादिभ्य इति। **तस्मादेवारभ्य आ सत्यलोकादित्यूर्ध्वशब्दार्थमाह—** यावदिति। **शाखाशब्दार्थं दर्शयति—** ज्ञानेति। **तेषां हेत्वनुगुणत्वेन बहुविधत्वं सूचयति—** यथेति। **प्रत्यक्षाणां शब्दादिविषयाणां** प्रवालत्वं **शाखासु पल्लववत्वम्। अङ्कुरत्वं स्फोरयति—** देहादीति। **ऊर्ध्वमूलमित्यत्र संसारवृक्षस्य मूलमुक्तम् , किमिदानीम् अधश्च मूलानीत्युच्यते? तत्राह—** संसारेति। अनुप्रविष्टत्वं **सर्वेषु**

भाष्यार्कप्रकाशः

**अध इति।** [४]अपरेति छेदः। पूर्वोक्तादन्येत्यर्थः। गुणप्रवृद्धा विषयप्रवालाश्च तस्य शाखाः अधश्चोर्ध्वं च प्रसृताः भवन्ति। कर्मानुबन्धीनि तस्य मूलान्यधश्च मनुष्यलोकेऽनुसन्ततानि भवन्ति। अधःशब्दार्थमाह— **मनुष्यादीति। मनुष्यो** मानवदेहः आदिर्यस्य तन्मनुष्यादि। **यावत्स्थावरं** स्थावरान्तमित्यर्थः। मनुष्यपशुपक्षिसरीसृपक्रिमिकीटमत्स्यकच्छपतरुगुल्मलतादिकमिह दृश्यमानं भुवि सर्वं चराचरजन्तुजातमधःशब्दार्थः। 'मनुष्यादिभ्य' इति पाठे मनुष्यादिभ्य आरभ्येति शेषः। आदिपदात् पश्वादिग्रहणम्। ऊर्ध्वशब्दार्थमाह— **अत इति।** मनुष्यलोकादित्यर्थः। ऊर्ध्वं वर्तमाना गरुडगन्धर्वयक्षरक्षःपितृमातृगणसिद्धसाध्यचारणदेवदानवादयश्चतुर्मुखेन सह सर्वेऽपि प्राणिन ऊर्ध्वशब्दार्थः। इदमेवाह— **यावदिति। ब्रह्मणो** हिरण्यगर्भस्य। **धाम** लोकः। तत्र वर्तमानसनकादिसर्वप्राणिसङ्ग्रहाय धामशब्दग्रहणम्। **एतदन्तमिति।** चतुर्मुखान्तमित्यर्थः। चतुर्मुखजन्मनोऽपि ज्ञानकर्मफलत्वादिति भावः।

**यद्वा** एतस्मिन् प्रपञ्चे प्रकृतचतुर्मुखादन्यस्य चतुर्मुखस्यासम्भवाच्चतुर्मुखलोकप्राप्तिरेव फलमिति विवक्षणे एतदन्तमित्यस्य चतुर्मुखधामान्तमित्येवार्थः। एवमधऊर्ध्वशब्दाभ्यां ब्रह्मादिस्थावरान्तचराचरसर्वप्राणिसङ्ग्रहः कृतः। अमूनि हि चराचरजन्तुजालानि कर्मानुसारेण शास्त्रानुसारेण च ज्ञानकर्मफलानीत्याह—**यथाकर्मेति।** ज्ञानमुपासनादिकम्, न तु तत्त्वज्ञानम् , मोक्षस्यैव तत्प्राप्यत्वात्। कर्म यज्ञादिकं फलाभिसन्धिपूर्वकं, तद्रहितं च। फलाभिसन्धिरहितकर्मकृदपि तत्त्वविदां कुलेषु जायते इत्युक्तत्वात्। तयोः फलानि तत्प्राप्याणीत्यर्थः। 'देवान् देवयजो यान्ती'त्यादिना देवयजनादीनां देवत्वादिप्राप्तिहेतुत्वस्योक्तत्वादिति भावः। इमानि भूतानि संसारवृक्षस्य शाखास्थानीयानीत्याह— **तस्येति।** प्रगता व्याप्ता इति यावत्। स्थूलीकृताः स्थौल्यं प्रापिताः। यथा **प्रवालाः** पल्लवाः शाखाशालाशिफाजटाभ्योऽङ्कुरीभवन्ति तथा कर्मफलेभ्यश्चराचरेभ्यो देहेभ्यः शब्दादयो जायन्त इति विषयेषु प्रवालत्वारोपणमित्याह — **विषया इत्यादिना।** देहादीत्यादिपदादिन्द्रियादिग्रहणम्। गुणप्रवृद्धाः विषयप्रवालाश्च मनुष्यादिस्थावरान्ताः ब्रह्मादिमनुष्यान्ताश्च सर्वे भूतसङ्घाः शाखा इव संसारवृक्षस्याधश्चोर्ध्वं च प्रसृता भवन्तीत्यर्थः।

**एतेन** तन्त्रादिनाऽधःशब्दस्योर्ध्वशब्दस्य च भूतपरत्वे[त्वेन] भूताश्रयदेशपरत्वेन च द्वेधा व्याख्यानं कृतमिति **सिद्धम्।**

यद्वा शाखारूपविषयनिर्देशेन ब्रह्मादिस्थावरान्तसर्वप्राणिनिकायरूपविषयो लक्ष्यते। ततश्च वृक्षतुल्यस्यास्य संसारस्य प्रवालतुल्यविषयोपलक्षिताः, जलादितुल्यगुणप्रवृद्धाश्च शाखातुल्याः सर्वभूतसङ्घा अधश्चोर्ध्वं च प्रसृता भवन्तीत्यर्थः। मनुष्यादिस्थावरान्त-

१. 'यावद् ब्रह्मणो विश्वसृजो धाम' इति पा.। २. 'परं मूलम्' इति पा.। ३. अवीचिः नरकविशेषः। अयमेव पाठो युक्तः, विरिञ्चिपदवाच्यस्य ब्रह्मणः ऊर्ध्वशब्देन ग्राह्यत्वाद्, अधःशब्देन ग्रहणायोगात्। ४. 'अपरावयवकल्पना' इत्यत्र अपरेति अवयवविशेषणत्वभ्रमनिरासाय पदच्छेदो दर्शितः।

**उपादानकारणं पूर्वमुक्तम्। अथेदानीं कर्मफलजनितरागद्वेषादिवासनाः** मूलानीव **धर्माधर्मप्रवृत्तिकारणानि अवान्तर-भावीनि, तानि** अधश्च **देवाद्यपेक्षया, मूलानि** अनुसन्ततानि **अनुप्रविष्टानि कर्मानुबन्धीनि** कर्म **धर्माधर्मलक्षणम्** अनुबन्धः **पश्चाद्भावी येषामुद्भूतिमनु उद्भवति तानि** कर्मानुबन्धीनि**, मनुष्यलोके विशेषतः। अत्र हि मनुष्याणां कर्माधिकारः प्रसिद्धः॥२॥**

आनन्दगिरिकृतव्याख्या

**लिङ्गेष्वनुगततया** सन्ततत्वम् **अविच्छिन्नत्वम्। रागादीनां कर्मफलजन्यत्वं प्रकटयति—** कर्मेति। **कर्मणां रागादीनां मिथो हेतु-हेतुमत्त्वम्। तेषां तथात्वेनानवच्छिन्नतया प्रवृत्तिविशेषतो मनुष्यलोके भवतीत्यत्र हेतुमाह—** अत्र हीति। **कर्मव्युत्पत्त्या प्राणिनिकायो** लोकः। **मनुष्यश्चासौ लोकश्चेत्यधिकृतो ब्राह्मण्यादिविशिष्टो देहो** मनुष्यलोकः॥२॥

भाष्यार्कप्रकाशः

जन्तुसन्ततिर्यत्रास्ति सोऽधःशब्दार्थः। ब्रह्मादिमनुष्यान्तजन्तुसन्ततिर्यत्रास्ति स ऊर्ध्वशब्दार्थः। मनुष्यादीति तद्गुणसंविज्ञान-बहुव्रीहिः। मनुष्यान्तेति त्वतद्गुणसंविज्ञानबहुव्रीहिः। स्वविवरभूतपाताललोकसहिता पृथिवी अधःशब्दार्थः। सत्यादिलोकसहितः स्वर्गलोक ऊर्ध्वशब्दार्थ इति यावत्। एवं चाधो मर्त्यलोकपाताललोकयोरूर्ध्वं स्वर्गलोके च ये प्राणिनो ब्रह्मादिस्तम्बान्तास्ते संसार-वृक्षस्याधोभागोर्ध्वभागद्वयव्यापिन्यः शाखा इत्युच्यत इति परमार्थः।

**ननु** कोऽयं संसारः? यस्य प्राणिनः शाखाः। न तावत् प्रपञ्चः, तस्य लोकानामेव शाखात्वेन भवितव्यत्वात्। लोकमयो हि प्रपञ्चः, प्राणिनस्तु पक्षिप्राया एव। नापि देहः, तस्य सर्वभूतशाखावत्त्वासम्भवात्। नापि सुखदुःखादिसम्भोगः, तस्य प्राण्याश्रयकत्वेन प्राणिमत्त्वासम्भवादिति चेत् , **उच्यते—** जन्ममरणादिलक्षणः सुखदुःखादिसम्भोग एव संसारः। सर्वेऽपि संसारिणः प्राणिनोऽमुमेव संसारमाश्रयन्त इति प्राणिनामाश्रय एव संसारः, शाखानां वृक्ष इव। प्राणिनां संसारस्य चेतरेतराश्रयाश्रयिभावात् प्राणिन आश्रित्य वर्तमानोऽपि संसारः प्राणिनामाश्रयो भवति, यथा भर्तृभार्ये परस्परम्। **यद्वा** अविद्यामयोऽयं संसारः, अविद्यायाश्च सर्वप्राण्याश्रयत्वात् संसारस्य च तथात्वमिति। अथवा प्रपञ्च एवेह संसारः। स हि यथा लोकमयस्तथा भूतमयश्च। तथा च लोका इव लोकस्थप्राणिनोऽपि तस्य शाखा इव भवन्तीति। **यद्वा** सर्वे प्राणिनः स्वाश्रयलोकद्वारेण संसारवृक्षस्य शाखा इव भवन्तीति। **यद्वा** प्रपञ्चो वृक्षो लोकाः शाखा याः स्कन्धादुपरि प्रादुर्भूताः स्थूलाः, ये तु शाखासूद्भूताः शालाशिफाजटाशब्दैरुच्यमानाः सूक्ष्मसूक्ष्मतरसूक्ष्मतमवृक्षावयवाः तत्स्थानीयास्तु प्राणिन इति।

**परं** प्रधानमित्यर्थः। **पूर्वमिति**। ऊर्ध्वमूलमित्यनेनेत्यर्थः। धर्माधर्मयोर्यज्ञादिहिंसादिविहितनिषिद्धकर्मणोः प्रवृत्तौ प्रवर्तने कारणानि पुंसामिति भावः। **अवान्तरभावीनीति**। अप्रधानानीत्यर्थः। अवान्तरे मध्ये भवन्तीत्यवान्तरभावीनि। **अधश्चेति**। मनुष्यलोक इत्यस्य विशेषणम्। कथमस्याधस्त्वम्? अत आह— **देवाद्यपेक्षयेति**। स्वर्गाद्यपेक्षयेत्यर्थः। कर्मेत्यनुबन्धः कर्मानुबन्धः, स एषामस्तीति **कर्मानुबन्धीनि**। रागद्वेषादिवासनाप्रयुक्तत्वात् कर्मणः क्रियमाणस्य वासनापेक्षया पश्चाद्भावित्वमिति भावः। येषां रागद्वेषादिसंस्काराणाम् उद्भूतिम् उत्पत्तिम् अनुसृत्योद्भवति, कर्मेति शेषः। तानि कर्मानुबन्धीनीत्युच्यन्ते। **मनुष्यलोके** भूलोके।

ननु पशुलोक इत्युक्तेऽपि भूलोक एव सिध्यति, किमिति मनुष्यशब्दोपादानम्? अत आह— **विशेषत इति**। अत्र हि भूलोके मनुष्याणां विशेषतः कर्माधिकारः प्रसिद्धः। विशेषत इत्यनेन पश्वादीनामपि सामान्यतो मैथुनादिकर्माधिकारोऽस्तीति सूच्यते। **अथवा मनुष्यलोको** मनुष्यसमूहः। किमिति मूलानि मनुष्यसमूहेऽनुसन्ततानीत्यत आह— **विशेषत इति**। अत्र प्रपञ्च इत्यर्थः। विशेषत इत्यनेन देवादीनां क्वाचित्कः कर्माधिकार इति सूच्यते। मनुष्येषु वर्तमानास्तत्तत्कर्मानुमेयाः जन्मान्तरकृतकर्मप्रयुक्ता रागद्वेषादि-वासनाः संसारवृक्षस्यावान्तरमूलानि। मनुष्याणामधःस्थत्वादिमानि मूलानि चाधश्चेत्युक्तानि। वृक्षस्यापि ह्यवान्तरमूलान्यधोव्यापीनि सन्ति। अज्ञानमूलकः पूर्वपूर्वकर्मवासनाभिरभिवर्धितश्च जन्ममरणादिप्रयुक्तसुखदुःखसम्भोगात्मकः प्राणिनां संसार इति श्लोकद्वयस्य फलितार्थः।

**न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा।**
**अश्वत्थमेनं सुविरूढमूलम् असङ्गशस्त्रेण दृढेन छित्त्वा ॥३॥**

**यस्त्वयं वर्णितः संसारवृक्षः—** न रूपमिति। **न रूपमस्य इह यथोपवर्णितं तथा नैवोपलभ्यते, स्वप्नमरीच्युदकमायागन्धर्वनगरसमत्वात्। दृष्टनष्टस्वरूपो हि स इति। अत एव** नान्तो **न पर्यन्तो निष्ठा परिसमाप्तिर्वा विद्यते।**

आनन्दगिरिकृतव्याख्या

**पुनःपुना रागादिना प्रवृत्तत्वेनानादित्वान्न संसारवृक्षः स्वयमुच्छिद्यते, न चोच्छेत्तुं शक्यते केनापीत्याशङ्क्याह—** यस्त्विति। **यथा पूर्वं वर्णितम् , यथा च लोके प्रसिद्धम् , तथाऽस्य रूपमिह शास्त्रादनुमीयते; तथा चास्य ज्ञानापनोद्यत्वं युक्तमित्याह—** यथेति। **तस्याप्रमितत्वे हेतुमाह—** स्वप्नेति। **तस्य स्वप्नादिसमत्वे दृष्टनष्टस्वरूपत्वं हेतुं करोति—**दृष्टेति। **इत्यमेयतेति शेषः। तमेवामेयत्वं हेतुं कृत्वाऽवसानमपि तस्य न भातीत्याह—**अत एवेति। **ज्ञानं विना भ्रान्तिवासनाकर्मणामन्योन्यनिमित्तत्वात् नावसानमस्तीत्यर्थः।**

भाष्यार्कप्रकाशः

**रामानुजस्तु** - अधःशाखमिति पूर्वश्लोकपदस्य यमर्थमाह 'मनुष्यपश्वादयः शाखाः' इति, तमेवार्थमत्राप्याहेति पुनरुक्तिस्तन्मते। न च **शङ्कर**मते पूर्वापरविरोधः, संसारवृक्षस्य महदादयः शाखाः इति पूर्वमुक्त्वा, मनुष्यादयः शाखाः इत्यधुनोक्तत्वादिति वाच्यम् ; महदादयस्तत्सङ्घातात्मकमनुष्यादयश्चास्य शाखाः इत्यदोषात्॥२॥

**नेति**। अस्य रूपमिह यथावर्णितमिति शेषः, तथा नोपलभ्यते। अस्यान्तो नास्ति, आदिर्नास्ति, सम्प्रतिष्ठा च नास्ति। सुविरूढमूलमेनमश्वत्थं दृढेनासङ्गशस्त्रेण छित्त्वा ततो यस्मिन् गताः भूयो न निवर्तन्ति, तत् पदं परिमार्गितव्यम्। **नोपलभ्यत इति**। संसारस्य रूपं न दृश्यत इत्यर्थः। विद्यावस्थायामिति भावः। अविद्यावस्थायामस्य सर्वैर्दृश्यमानत्वेनादृश्यमानत्वोक्तेर्विरुद्धत्वात्। **यद्वा** अस्य रूपं यथा सत्यमिवोपवर्णितम् , तथा सत्यतया नोपलभ्यते, किन्तु मिथ्यात्वेनैव दृश्यते। किमिवोपलभ्यते? अत आह— **स्वप्नेति**। यद्वा विद्यावस्थायां कुतो नोपलभ्यते? अत आह— **स्वप्नेति**। स्वप्नस्थरथादयः **स्वप्न**पदार्थाः। **माया** ऐन्द्रजालिकेन दर्शितो विग्रहादिः। कुतः संसारस्य स्वप्नादिसाम्यम्? अत आह— **दृष्टेति**। हि यस्मात् स संसारो **दृष्टनष्टस्वरूपो** यदा दृष्टं तदैव नष्टम् , पूर्वं दृष्टं पश्चान्नष्टं वा दृष्टनष्टं स्वरूपं यस्य स तथोक्तः। प्रतिभानसमयनियतसत्ताकः इत्यर्थः। स्वप्नादयश्च तादृशा एवेति स्वप्नादिसाम्यं संसारस्येति भावः। **अत एव** मिथ्यात्वादेवेत्यर्थः। व्यावहारिकसत्यस्य वस्तुनः स्वरूपं हि परिनिष्ठितं घटः सर्वथा सर्वदा च घट एव, न तु पट इति। प्रातिभासिकस्तु सर्पाभासादिः कदाचित् सर्पत्वेन दृश्यते, कदाचिद् दण्डत्वेन, कदाचिद् रज्जुत्वेनेति न तस्य परिनिष्ठितं स्वरूपमस्ति। तथा घटस्य मुद्गरप्रहारादिना समाप्तिरस्ति, सर्पाभासस्य तु न समाप्तिः। तदानीं रज्जुज्ञानेन समाप्तावपि पुनर्मन्दान्धकारे सा रज्जुः क्षिप्तोरगी भवेदेव। तथा व्यावहारिकस्य घटस्यादिरस्ति, अयं घटः इदानीं कुलालेन कृतः इति दर्शनात्। स्वाप्निकस्य तु नादिरुपलभ्यते। तथा व्यावहारिकस्य मध्यः उपलभ्यते, प्रातिभासिकस्य तु न, आद्यन्तज्ञानप्रयुक्तत्वान्मध्यज्ञानस्य।

**एवं** प्रातिभासिकस्य आद्यन्तमध्यानामनुपलम्भेनाभावे सिद्धे , संसारस्यापि स सिध्यति प्रातिभासिकत्वात्। अयं संसारोऽनुपलभ्यमानादिमध्यान्तः, प्रातिभासिकत्वात् , स्वप्नपदार्थवदिति प्रयोगः। संसारः प्रातिभासिकः, दृष्टनष्टस्वरूपत्वात् , स्वप्नादिवदिति च। न च व्यावहारिकसंसारस्य कथं प्रातिभासिकत्वमिति वाच्यम् ; व्यवहारप्रतीत्योरविशेषात्। प्रातिभासिकत्वादेव हि संसारस्य सुषुप्तौ प्रतिभासाभावादभावः। न चैवं सर्पाभासवत् सर्वस्यापि प्रातिभासिकत्वे भ्रमप्रमाविवेकानुपपत्तिरिति वाच्यम् ; सिद्धान्ते सर्वस्यापि भ्रमत्वात्। अज्ञदृष्ट्या तु कल्पितः प्रातिभासिकव्यावहारिकभेदः, तत्त्वविद्दृष्ट्या तु ब्रह्मणोऽन्यस्य सर्वस्यापि कल्पितत्वेन प्रातिभासिकत्वमेवेति न कश्चिद् दोषः।

**ननु** अयं देहः इदानीं जातः, इदानीं वर्धते, इदानीं मृतः इति देहस्याद्यन्तमध्योपलम्भात् कथं प्रातिभासिकत्वमिति चेत्? **उच्यते**— संसारस्य वयमादिमध्यान्तानुपलम्भं ब्रूमः, न तु देहस्य। पूर्वपूर्वकर्मवशादुत्तरोत्तरदेहजन्ममरणलक्षणः संसारो ह्यनादि-

**तथा** न च आदिः **इत आरभ्यायं प्रवृत्तः इति न केनचिदवगम्यते।** न च सम्प्रतिष्ठा **स्थितिः मध्यम् अस्य न केनचिदुपलभ्यते। अश्वत्थमेनं यथोक्तं** सुविरूढमूलं **सुष्ठु विरूढानि विरोहं गतानि सुदृढानि मूलानि यस्य तमेनं सुविरूढमूलम्** असङ्गशस्त्रेण - असङ्गः [1]**पुत्रवित्तलोकैषणाभ्यो व्युत्थानम् , तेनासङ्गशस्त्रेण** दृढेन **परमात्माभिमुख्य-निश्चयदृढीकृतेन पुनःपुनर्विवेकाभ्यासाश्मनिशितेन** छित्त्वा **संसारवृक्षं सबीजमुद्धृत्य**[2] ॥ ३॥

आनन्दगिरिकृतव्याख्या

**इदम्प्रथमत्वमपि नास्य परिच्छेत्तुं शक्यमित्याह—** तथेति। **आद्यन्तवद् मध्यमपि नास्य प्रामाणिकमित्याह—** मध्यमेति। **संसारवृक्ष-स्याश्वत्थशब्दितस्य क्षणभङ्गुरस्य स्वयमेवोच्छेदसम्भवात् तदुच्छेदार्थं न प्रयतितव्यमित्याशङ्क्याह—** अश्वत्थमिति। व्युत्थानं **वैराग्यपूर्वकं पारिव्राज्यम्। दृढीकृतत्वमेव विवेकपूर्वकत्वेन स्फुटयति—** पुनःपुनरिति॥ ३॥

भाष्यार्कप्रकाशः

रनन्तश्च। अत एवामध्यश्च। न चैवं व्यावहारिकदेहस्य कथं प्रातिभासिकत्वमिति वाच्यम् ; दृष्टनष्टस्वरूपत्वाद् देहस्य प्रातिभासिकत्वम् , न त्वादिमध्यान्तानुपलम्भात्। न चानन्तस्य संसारस्य कथं देहवद् दृष्टनष्टस्वरूपत्वमिति वाच्यम् ; संसारस्य सुषुप्त्यादौ नाशदर्शनेन तथात्वात्। न च प्रबोधे पुनर्दृश्यत एवेति वाच्यम् ; प्रबोधे दृश्यमानस्य संसारान्तरत्वात्। पूर्वानुभूतसंसारो हि सुषुप्तौ नष्टः। सोऽयं संसारः इति प्रत्यभिज्ञा तु सेयं दीपज्वालेतिवत् साजात्यादिति।

नन्वज्ञानमूलोऽयं संसारः कथमनादिः स्यात्? अत आह— **इत आरभ्येति**। नास्य संसारस्य जन्माभावप्रयुक्तमनादित्वं वयं ब्रूमः, किं तर्ह्यज्ञायमानजन्मकालवत्त्वरूपमनादित्वमेवेति।

**ननु** न केनचिदवगम्यत इत्ययुक्तम् , ईश्वरेण तस्यावगम्यमानत्वाद् , अन्यथा तस्यासर्वज्ञत्वापत्तेरिति चेत् , **मैवम्** ; किमयमीश्वरश्चिन्मात्रः, उत मायामयः? यं त्वं सर्वज्ञं ब्रूषे, आद्ये, निर्धर्मकस्य न तस्य ज्ञातृत्वधर्मप्रसङ्गः। द्वितीये, सोऽपि कल्पित एव मायया संसारवदिति कथं तस्य मायामयसंसारादिपरिज्ञातृत्वम्?[3] न चैवमीश्वरस्य सर्वज्ञत्वभङ्गप्रसङ्गः, यज्ज्ञातुं शक्यते तदपरिज्ञानस्यैव सर्वज्ञत्वभङ्गहेतुत्वात्। न च संसारस्रष्टुरीश्वरस्य कथं तदाद्यपरिज्ञातृत्वमिति वाच्यम् ; पूर्वपूर्वं संसारं दृष्ट्वा उत्तरोत्तरं संसारं सृष्टवानीश्वरः इत्यदोषात्। अन्यथा हि विषमसृष्टिप्रयुक्तवैषम्यादिदोषप्रसक्तिः स्यादीश्वरस्य।

**किञ्च** अज्ञानादपि वासनारूपेणाज्ञानेऽवस्थित एव संसारो जायते, नापूर्वः इति कृत्वा कथमज्ञानमूलकत्वमात्रेणेश्वरेण संसारस्यादिर्ज्ञातुं शक्येत? अभावादेवादेः। न ह्यविद्यमानशशशृङ्गापरिज्ञानमात्रेणेश्वरस्य सर्वज्ञत्वहानिः। एतत्संसारस्य हेतुस्तु न केवलमविद्या, किन्तु चिदविद्यासंयोगः। उक्तं हि क्षेत्रक्षेत्रज्ञसंयोगः संसारस्य कारणमिति। स च संयोगोऽनादिरिति तत्प्रयुक्तः संसारोऽप्यनादिरेव। यदैव संयोगस्तदैव हि संसारः प्रवृत्तः। तस्मात् कार्यत्वेऽप्यनादिरेव संसारः। ज्ञाननाश्यत्वादस्यानन्तत्वं तु व्यवहारसापेक्षम् , अथवा अविद्यासापेक्षमिति बोध्यम्।

**मूलानि** रागद्वेषादिवासनाः। रागादिप्रयुक्तो हि संसारः। **अथवा** अज्ञानप्रयुक्तो रागद्वेषाद्यभिवर्धितश्च संसारः। मित्रशब्देन भार्या गृह्यते। भार्या हि भर्तुर्मित्रमिवेष्टप्रापिका, अनिष्टनिवारिका च। लोकैषणं नाम स्वर्गादिलोकप्राप्त्याशा। तेभ्यो व्युत्थानं नाम तत्परित्यागः। संन्यासः इति यावत्। 'व्युत्थायाथ भिक्षाचर्यं चरन्ती'ति श्रुतेः। गृहस्थस्य हि पुत्रादिसङ्गो दुष्परिहर इति भावः। **परमात्माभिमुख्यं** परमात्मानुसन्धानप्रावण्यम् , तस्मिन् यो निश्चयोऽध्यवसायः तेन दृढीकृतेन। **पुनःपुनर्विवेकाभ्यासः** आत्मानात्मविवेकस्यासकृदावर्तनम् अहमात्मा इदमनात्मेत्येवंरूपम् , तदे**वाश्मा** शाणोपलस्तेन **निशितेन** तीक्ष्णीकृतेन। **सबीजं** साज्ञानमूलम् [4]**उद्भिद्य** उच्चैर्भित्त्वा। संन्यासाश्रमं स्वीकृत्य वैराग्यशमदमादिभिः रागद्वेषादीनि संसारवृक्षमूलानि छित्त्वा, आत्मानात्मविवेकज्ञानेन संसारवृक्षप्रधानमूलमज्ञानं च छित्त्वेत्यर्थः।

---

१. 'पुत्रमित्रवित्तलोकैषणाभ्यो' इति रा.पा.। २. आत्मतत्त्वज्ञानेन संसारस्य मूलाज्ञानेन सहोच्छेद इह च्छेदनमभिप्रेयते। क्त्वाप्रत्ययस्तु समानकाले व्याख्येयः।
३. एतदुत्तरं टिप्पणीरूपः (संसारस्यादिर्जन्मेत्यर्थः।) इति कुण्डलितः पाठः मुद्रितपुस्तके उपलभ्यते। ४. 'उद्भिद्य' इति रा.पा. भाति।

**ततः पदं तत् परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूयः।**
**तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥४॥**

तत इति। ततः **पश्चाद् यत् पदं वैष्णवं तत्** परिमार्गितव्यम् **, परिमार्गणम् अन्वेषणम् , ज्ञातव्यमित्यर्थः। यस्मिन् पदे गताः प्रविष्टाः** न निवर्तन्ति **नावर्तन्ते** भूयः **पुनः संसाराय। कथं परिमार्गितव्यमित्याह।** तमेव **च यः पद-**

आनन्दगिरिकृतव्याख्या

**उद्धृत्य किं कर्तव्यम्? तदाह—**तत इति। पश्चाद् **अश्वत्थादूर्ध्वं व्यवस्थितमित्यर्थः। किं तत् पदं यदन्विष्य ज्ञातव्यम्? तदाह—**

भाष्यार्कप्रकाशः

यत्तु **रामानुजः** - अस्य वृक्षस्य चतुर्मुखादित्वेनोर्ध्वमूलत्वं, तत्सन्तानपरम्परया मनुष्याग्रत्वेनाधःशाखत्वं, मनुष्यत्वे कृतैः कर्मभिर्मूलभूतैः पुनरप्यधश्चोर्ध्वं च प्रसृतशाखत्वमिति यथेदं रूपं निर्दिष्टम् , न तथा संसारिभिरुपलभ्यते। मनुष्योऽहं देवदत्तस्य पुत्रो यज्ञदत्तस्य पिता तदनुरूपपरिग्रहश्चेत्येतावन्मात्रमुपलभ्यते। तथाऽस्य वृक्षस्यान्तो विनाशोऽपि गुणमयभोगेष्वसङ्गकृत इति नोपलभ्यते। तथाऽस्य गुणसङ्ग एवादिरिति नोपलभ्यते। तस्य प्रतिष्ठा चानात्मन्यात्माभिमानरूपमज्ञानमिति नोपलभ्यते। प्रतितिष्ठत्यस्मिन्नेवेति ह्यज्ञानमेवास्य प्रतिष्ठेति, **तन्मन्दम्** ; यदि संसारवृक्षस्य चतुर्मुख आदिः स्यात् , तर्हि स्थावरमेवाग्रं स्यात् , न तु मनुष्यः। तस्य ब्रह्मादिस्थावरान्तप्राणिवर्गमध्यस्थत्वात्। न च स्थावराणां ब्रह्मसन्तानपरम्परान्तःपातित्वं नास्तीति वाच्यम् ; ब्रह्मणः स्रष्टृत्वसङ्कोचस्यान्याय्यत्वात्। सर्वं जगत् सृष्टं हि चतुर्मुखेन प्रजापत्यादिद्वारा। न च मनुष्यत्वकृतकर्मवशादेव पश्चाद्यधःशाखप्रसार इति वाच्यम् ; मनुष्यसृष्टेः प्रागपि पश्वादिसृष्टिसम्भवात्। तथा संसारिभिरस्य रूपं नोपलभ्यते यथोक्तमित्यप्ययुक्तम् ; किमिमे संसारिणो वेदवेदाङ्गाध्ययनसम्पन्ना उत मूर्खाः? आद्ये, तैरेतज्ज्ञायत एव। द्वितीये, किं नास्तिकजनमतस्येह वर्णनेन फलम्? न च वेदवेदाङ्गादिविदो न संसारिण इति वाच्यम् ; यज्ञादिकर्मप्रवृत्त्यादिरूपसंसारस्य तेषु दर्शनात्। न चास्तिकेष्वप्यवेदविदो नैतज्जानन्तीति वाच्यम् ; किं तदपरिज्ञानप्रतिपादनादिह फलम्? तेभ्योऽप्यत्यन्तमूढो बालो ह्यात्मानं मनुष्य इति, देवदत्त इत्यपि च न जानातीति कथमुक्तं मनुष्य इत्यादिकमुपलभ्यत इति? तथा नान्त इत्यस्यान्तो गुणमयभोगासङ्गकृत इति नोपलभ्यत इत्यर्थस्य कथमागमः? न च तथेत्यस्यात्राप्यन्वयात् तदर्थागम इति वाच्यम् ; यथोक्तं तथेति हि तथाशब्दार्थः। रूपं तु पूर्वमुक्तमिति तत्र तथाशब्दान्वयो न्याय्यः। न हीह गुणमयभोगासङ्गादिकं वर्णितं प्राग् येनास्य तथाशब्देन ग्रहणं स्यात्। न च त्रयोदशाध्यायोक्तार्थस्येह ग्रहणं न्याय्यं व्यवहितत्वात्। तत्रापि गुणसङ्गः संसारकारणमित्येवोक्तम् , न त्वसङ्गस्तन्नाशकारणमिति। तत्त्विहैवोच्यते– 'असङ्गशस्त्रेण दृढेन छित्त्वा' इति। न चादिरित्यत्र तथाशब्दानुवर्तनेऽपि गुणसङ्ग आदिरित्यर्थस्यासिद्धिरेव। गुणसङ्गपदार्थवाचकत्वाभावात् तथाशब्दस्य। तथाशब्दो हि प्रकारवाची गुणसङ्गं न बोधयेत्। गुणसङ्ग इति पदस्याध्याहारस्त्वप्रमाणः। तं विनाऽप्यन्वयसम्भवे तदध्याहारस्यायुक्तत्वाच्च। सम्प्रतिष्ठेत्यत्राप्यज्ञानमेवेति पदकल्पनस्यापि मूलाद् बहिरयुक्तत्वादप्रमाणत्वाच्च।

एवम् अन्त इति, आदिरिति, सम्प्रतिष्ठेतीति शब्दत्रयकल्पनमपि गौरवावहत्वादयुक्तमेव। न ह्यन्तो नोपलभ्यत इति लघुवाक्यान्वयं विहाय, गुणमयभोगासङ्ग एवान्तः इति नोपलभ्यत इति गुरुवाक्यान्वयकल्पनं युक्तमिति कोऽपि विद्वान् प्रत्येति। युक्त एवायं **रामानुजस्य** यथाश्रुतार्थपरित्यागोऽपार्थकल्पनं च **विशिष्टाद्वैताख्या**श्रौतमताभिमानपिशाचग्रस्तस्येति॥ ३॥

**तत इति। पश्चादिति**। संसारनाशाच्चित्ते शुद्धे सतीत्यर्थः। संसारो हि चित्तविक्षेपकः। वैष्णवं पदं विष्णोरात्मनः स्वरूपं सच्चिदानन्दाख्यं **परिमार्गितव्यम्** अन्वेष्टव्यम्। 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' इति श्रुतेरिति भावः। परिमार्गशब्दार्थमाह— **अन्वेषणमिति**। ज्ञानमिति यावत्। परिमार्गितव्यस्य फलितार्थमाह— **ज्ञातव्यमिति। प्रविष्टा इति**। यत्सायुज्यं प्राप्ताः इत्यर्थः। न निवर्तन्तीति परस्मैपदमार्षम्। किमर्थं नावर्तन्ते? अत आह— **संसारायेति**। संसरणायेत्यर्थः। पुनः संसारं न प्राप्नुवन्तीत्यर्थः। यथा स्वर्गादिपदे प्रविष्टाः पुनरावर्तन्ते न तथेति भावः। आदौ सृष्टेः प्रागपि भवति अस्तीति, आदौ भव आद्यः अनादिरित्यर्थः। पुरुषं

**निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः।**
**द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत्॥५॥**

**शब्देनोक्तः,** आद्यम् **आदौ भवमाद्यं पुरुषं प्रपद्य** [1]**इत्येवं परिमार्गितव्यं तच्छरणतयेत्यर्थः। कोऽसौ पुरुषः इत्युच्यते** यतो **यस्मात् पुरुषात् संसारमायावृक्षप्रवृत्तिः** प्रसृता **निःसृता, ऐन्द्रजालिकादिव माया,** पुराणी **चिरन्तनी॥४॥**

**कथम्भूतास्तत्पदं गच्छन्तीत्युच्यते—**निर्मानेति। निर्मानमोहाः **मानश्च मोहश्च मानमोहौ, तौ निर्गतौ येभ्यस्ते निर्मानमोहाः, मानमोहवर्जिताः,** जितसङ्गदोषाः **सङ्ग एव दोषः सङ्गदोषः, जितः सङ्गदोषो यैस्ते जितसङ्गदोषाः,** अध्यात्मनित्याः **परमात्मस्वरूपालोचननित्यास्तत्पराः,** विनिवृत्तकामाः **विशेषतो निर्लेपेन निवृत्ताः कामाः येषां ते**

आनन्दगिरिकृतव्याख्या

यस्मिन्निति। [2]**येन सर्वं पूर्णं तम्, पूर्षु वा शयानं** पुरुषं प्रपद्ये **शरणं गतोऽस्मीत्यर्थः। विवर्तवादानुरोधिनं दृष्टान्तमाह—** ऐन्द्रेति॥४॥

**परिमार्गणपूर्वकं वैष्णवं पदं गच्छतामङ्गान्तराण्याकाङ्क्षापूर्वकं कथयति—** कथमित्यादिना। मानो**ऽहङ्कारः,** मोह**स्त्वविवेकः।** जितसङ्गदोषाः **शत्रुमित्रसन्निधावपि द्वेषप्रीतिवर्जिता इत्यर्थः।** तत्परत्वं **श्रवणादिनिष्ठत्वम्।** संन्यासिनो **वैराग्यद्वारा त्यक्तसर्वकर्माणः**

भाष्यार्कप्रकाशः

पूर्णमात्मानं प्रपद्ये स एवाहमस्मीति भजे इत्यनुसन्धानवान् सन् विद्वान् पदं परिमार्गयेदित्याह— **इत्येवमिति**। एवमहं ब्रह्मास्मीति तत्त्वज्ञानात् परमपदप्राप्तिर्भवेद् विदुष इति भावः। यतः पुराणी प्रवृत्तिः प्रसृता, तमेव चाद्यं पुरुषं प्रपद्य इत्यन्वयः। कस्य प्रवृत्तिरत आह— **संसारेति**। संसाराख्यमायावृक्षस्य **प्रवृत्तिः** प्रवर्तनं, **प्रसृता** जातेति यावत्। अनादिरयं संसारवृक्षो यस्मान्मायिनः परमेश्वरात् प्रवृत्तः सोऽयं परमात्मेह पुरुष इत्युक्त इत्यर्थः।

प्रपद्येदिति **रामानुजीय**पाठस्तु पद्यतेः परस्मैपदित्वस्यापाणिनीयत्वादुपेक्ष्यः। **यच्चानेन** - 'प्रपद्येयतः' इति पाठेऽपि प्रपद्य इयत इति छित्वा तमेव चाद्यं पुरुषं प्रपद्य शरणमुपगम्य इयतोऽज्ञाननिवृत्त्यादेः कृत्स्नस्यैतस्य साधनभूता प्रवृत्तिः पुराणी पुरातनी प्रसृता, पुरातनानां मुमुक्षूणां प्रवृत्तिः पुराणी। पुरातना हि मुमुक्षवो मामेव शरणमुपगम्य निर्मुक्तबन्धाः सञ्जाता इत्यर्थः इत्युक्तम् , **तच्चासत्**। या प्रसृता सा न शरणं प्रपन्ना, किन्तु पुरातना मुमुक्षव एवेति समानकर्तृकत्वाभावेन प्रपद्येति ल्यपोऽनुपपत्तेः। पुराणानामियं प्रवृत्तिः पौराणीति 'तस्येदम्' इत्यणि 'टिड्ढाणे'ति ङीपा भाव्यत्वेन पुराणीति रूपासिद्धेः। इयतः प्रवृत्तिरित्यस्य इयतः साधनभूता प्रवृत्तिरिति कल्पनं चान्याय्यम् , इयतः इत्यस्याज्ञाननिवृत्त्याद्यर्थश्च स्वकपोलकल्पितत्वादुपेक्ष्यः। न हि इयच्छब्दादभिधया तादृगर्थलाभः सम्भवति। न च **शङ्कर**मतेऽपि प्रपद्य इत्युत्तमपुरुषस्य वाक्यानन्वय इति वाच्यम् ; तं प्रपद्ये इति तत् पदं परिमार्गितव्यमिति वाक्यान्वयलाभात्। यतः पुराणी प्रवृत्तिः प्रसृता तमेव चाद्यं पुरुषं प्रपद्य इति, यस्मिन् गताः भूयो न निवर्तन्ति, तत् पदं ततः परिमार्गितव्यमिति श्लोकस्यान्वयः पर्यवसन्नः॥४॥

**निर्मानेति**। निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः विनिवृत्तकामाः अमूढाः यतयः इति शेषः। सुखदुःखसंज्ञैर्द्वन्द्वैर्विमुक्ताः सन्तः तदव्ययं पदं गच्छन्ति। **मानो**ऽहंममाभिमानः। **मोहो**ऽज्ञानम्। **मूढो**ऽविवेकी तद्भिन्ना अमूढाः विवेकिनः इत्यर्थः। निर्लेपेन निःशेषेणेत्यर्थः। गृहिणां दारापत्यादिसङ्गस्यावर्जनीयत्वादुक्तम्— **यतय इति**। अध्यात्ममात्मनि **नित्याः** आसक्ताः, आत्मन्यासक्तिः नामात्मस्वरूपालोचनासक्तिरित्यभिप्रेत्याह— **परमात्मेति**। इदं मे स्यादिदं मे स्यादितीच्छाः कामाः। प्रियमिष्टं सुखसंज्ञं सुखे तद्धेतौ च सर्वेषामिच्छाऽस्ति हि। अप्रियमनिष्टं दुःखसंज्ञं दुःखे तद्धेतौ च सर्वेषामकामोऽस्ति हि। आदिपदात् स्तुतिनिन्दादिद्वन्द्वग्रहणम्। यद्यपि शीतोष्णमानावमानादयः सर्वे द्वन्द्वपदार्थाः प्रियाप्रियद्वन्द्वेऽन्तर्भूतास्तथापि तद्विशेषसङ्ग्रहायादि-

१. इत्येवं तच्छरणतया परिमार्गितव्यमित्यर्थः- इत्यन्वयः। एतेन— तमेव प्रपद्य इत्येवं परिमार्गितव्यमिति संबन्धोऽयुक्तः, तस्य परिमार्गणत्वाभावादिति दूषणं निरस्तम्। २. पुरुषशब्दस्य व्युत्पत्तिद्वयम्—येनेत्यादि।

**[१]न तद् भासयते सूर्यो न शशाङ्को न पावकः।**
**यद् गत्वा न निवर्तन्ते तद् धाम परमं मम॥ ६॥**

**विनिवृत्तकामाः यतयः संन्यासिनो** द्वन्द्वैः **प्रियाप्रियादिभिः** विमुक्ताः **सुखदुःखसंज्ञैः परित्यक्ताः गच्छन्ति** अमूढाः **मोहवर्जिताः पदमव्ययं** तद् **यथोक्तम्**॥ ५॥

**तदेव पदं पुनर्विशिष्यते—** नेति। **तद् धामेति व्यवहितेन धाम्ना सम्बन्धः। तद्** धाम **तेजोरूपं पदं न भासयते** सूर्यः **आदित्यः सर्वावभासनशक्तिमत्त्वेऽपि सति। तथा न** शशाङ्कः **चन्द्रः,** न पावकः **नाग्निरपि। यद् धाम वैष्णवं पदं गत्वा प्राप्य न निवर्तन्ते, यच्च सूर्यादिर्न भासयते, तद्** धाम **पदं परमं मम विष्णोः**॥ ६॥

आनन्दगिरिकृतव्याख्या

**इत्यर्थः। [२]आदिशब्देन तद्धेतुग्रहः।** मोहवर्जितत्वम् **उक्तहेतुतः सञ्जातसम्यग्धीत्वम्**॥ ५॥

**तच्चेत् पदं वेद्यं, कर्तुरन्यत् कर्मेति[३] द्वैतापातः, अवेद्यं चेद् अपुमर्थत्वात् प्रेप्सितत्वासिद्धिरित्याशङ्क्याह[४]—** तदेवेति॥ ६॥

भाष्यार्कप्रकाशः

पदनिर्देशः कृतः इति बोध्यम्। 'न ह वै स शरीरस्य प्रियाप्रिययोरपहतिरस्ति, अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इति श्रुतेः अशरीरत्वं प्राप्नुवन्तीत्यर्थः। पद्यते गम्यत इति **पदं** स्वरूपम्, ब्रह्मेति यावत्॥ ५॥

**नेति**। तत् सूर्यो न भासयते, शशाङ्को न भासयते, पावको न भासयते, यद् गत्वा न निवर्तन्ते तद् धाम मम परमं, पदमिति शेषः। **यद्वा** यद् गत्वा न निवर्तन्ते तद् धाम मम परमं पदम्, तद् धाम सूर्यो न भासयते, शशाङ्को न भासयते, पावको न भासयते। **तेजो** ज्ञानम्, न त्वालोकः, तस्य दृश्यत्वेनानात्मत्वात्। आत्मा हि द्रष्टा। ननु घटः पटं न भासयत इतिवत् सूर्यस्तन्न भासयत इत्यनेन धाम्नः क उत्कर्षो लब्धः? अत आह— **सर्वेति**। अह्नि यः सर्वं जगदवभासयितुमीष्टे, स सूर्योऽपि तन्नावभासयत इत्यर्थः। तथा निशि यः सर्वावभासकश्चन्द्रः, सोऽपि तन्नावभासयते। यश्च सन्ध्ययोः सर्वावभासकोऽग्निर्यश्चान्तर्गृहे सर्वावभासको दीपादिः, स चाग्निर्न तद् भासयितुमीष्टे। आत्मभास्या हि ते कथमात्मानं भासयेरन्? 'अयं सूर्यः, अयमिन्दुः, अयमग्निः, अयं दीपः' इति क्षेत्रज्ञ एव सूर्यादीन् जानातीति सूर्यादीनामवभासकः। सूर्यादयस्तु जडा एव, ते हि स्वात्मानमेव न विदुः 'अहं रविः, अहं दीपः' इत्येवम्, किं पुनरन्यान् अवभासयेरन्? न च सूर्यादयश्चेतना एवेति वाच्यम्; यः सूर्यादिमण्डलान्तर्वर्ती पुरुषो, देहवर्ती पुरुष इव, स एक एव चेतनो द्रष्टा क्षेत्रज्ञश्च। तदतिरिक्तं मण्डलं तु देहवज्जडमेवेति।

**नन्वेवं** जडस्य सूर्यादेः कथं सर्वावभासनशक्तत्वमिति चेद्, **उच्यते—** देहान्तर्वर्ती प्रत्यगात्मा यथा बाह्यघटाद्यवभासने चक्षुर्वृत्त्यादिकमपेक्षते, तथा सूर्यादिज्योतिरप्यपेक्षत एव। अज्ञानेनेवान्धकारेणापि घटादेरावृतत्वात्। अज्ञाननिरसनाय चक्षुर्वृत्तिः, अन्धकारनिरसनाय सूर्यादितेजश्च क्षमत इति।

**यद्वा** अज्ञानेनावृतो घटः पुनरन्धकारेणाप्यावृतः। पटेन वेष्टितं वस्तु पेटिकयेव। तस्य चान्धकारस्यापगमनाभावे चक्षुर्वृत्ते-र्घटाज्ञानसम्बन्धो न स्यात्। न हि बाध्यबाधकयोः सम्बन्धं विना बाधकेन बाध्यं नाश्येत। तस्माच्चक्षुर्वृत्तिरेव सूर्यादिज्योतिरपेक्षते; क्षेत्रज्ञस्तु वृत्तिमपेक्षत इति। तथा चान्धकारनाशकत्वलक्षणं सर्वावभासकत्वं सूर्यस्य, अज्ञाननाशकत्वलक्षणं भासकत्वं चक्षुर्वृत्तेश्चा-स्तीति सूर्यादिरप्यवभासक एव, वृत्तिवत्।

न चैवमन्धकारे सूर्यादितेजसा नाशिते, अज्ञाने वृत्त्या नाशिते च, घटः स्वयमेव स्फुरेदिति किं क्षेत्रज्ञेनेति वाच्यम्; जडत्वाद्

---

१. 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः' इति श्रुत्यर्थोऽत्रानुसंधेयः। अत्र श्लोके सूर्यचन्द्राग्नीनां भासकत्वनिषेधस्य तद्देवताकानां चक्षुर्मनोवाचामविषयत्वबोधने तात्पर्यमिति नीलकण्ठीयव्याख्याने उक्तम्। २. भाष्ये 'प्रियाप्रियादिभिः' इत्यत्र आदिपदेनेत्यर्थः। ३. वेदितुः अन्यत्वं वेद्यस्य पदस्य स्यादित्यर्थः। ४. वेदितुरात्मत्वेन स्वप्रकाशत्वेन चोक्तशङ्कानिरासो बोध्यः।

**ममैवांशो जीवलोके जीवभूतः सनातनः।**
**मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति॥७॥**

**यद् गत्वा न निवर्तन्त इत्युक्तम्। ननु सर्वा हि गतिरागत्यन्ता, 'संयोगा विप्रयोगान्ताः' (म.भा. ११.२.३) इति हि प्रसिद्धम्, कथमुच्यते तद्धाम गतानां नास्ति निवृत्तिरिति? शृणु तत्र कारणम्—** ममैवेति। ममैव **परमात्मनो नारायणस्य** अंशो **भागोऽवयवः एकदेशः इत्यनर्थान्तरम्।** जीवलोके **जीवानां लोके संसारे** जीवभूतः **कर्ता भोक्ता**

आनन्दगिरिकृतव्याख्या

**उक्तमनूद्याक्षिपति—** यद्गत्वेति। **तत्र प्रसिद्धिं प्रमाणयति—** संयोगा इति। **गमनस्यागमनान्तत्वप्रसिद्धेरयुक्तं यद्गत्वेत्यादीत्युपसंहरति—** कथमिति। **आक्षेपं परिहरति—** शृण्विति। **भगवत्प्राप्तेर्निवृत्त्यन्तत्वाभावः सप्तम्यर्थः। जीवस्य परांशत्वेऽपि कथमुक्तदोष-**

भाष्यार्कप्रकाशः

घटस्य। न हि स्फुरणं स्वयं सम्भवति तस्य। न हि 'घटोऽह'मिति घटः आत्मानं वेत्ति, नापि 'पटोऽय'मिति पटं वा वेत्ति। तस्माद् 'अयं घटः' इति घटे ज्ञाततवरूपं भास्यत्वं जीवप्रयुक्तमेवेति जीव एव भासकः। न हि वृत्तिरपि 'अयं घट' इति जानाति जडत्वात् तस्याश्च। तस्माद् घटादिभासने करणभूतं चक्षुरपि सूर्योऽपि 'इदं चक्षुः, अयं सूर्यः' इति जीवेन ज्ञायेतैवेति सर्वावभासकत्वं जीवस्य सिद्धं सर्वज्ञातृत्वलक्षणम्, न त्वन्धकारनिरसनरूपम्, नाप्यज्ञाननिरसनरूपमिति बोध्यम्।

न चैवं जीवस्य सर्वावभासकत्वे विवदितव्यम्, 'साक्षी चेते'ति श्रुत्यैव साक्षित्वलक्षणसर्वावभासकत्वस्योक्तत्वात्। न च जीवो घटादिमिवात्मानमपि वृत्त्यादिसापेक्षः सन्नेव भासयतीति पराधीनप्रकाश एवेति भास्य एवेति वाच्यम्; अन्धकारे स्वप्ने सुषुप्त्यादौ च सूर्यादिज्योतिरभावेऽपि वृत्त्यभावेऽपि जीवस्य स्वत एव भासमानत्वात्। अत एव हि स्वयञ्ज्योतिरित्युच्यत आत्मा। तस्मात् सूर्यादयः सर्वेऽपि भासकत्वेन प्रसिद्धाः आत्मभास्या एवेति न तं भासयितुं सूर्यादिः कोऽपि शक्नोति। पदस्य पूर्वश्लोके प्रकृतत्वादुक्तम्— पदमिति। यत् सर्वावभासकमनन्यावभास्यं च तेजस्तदेव मम पदम्, तदेव गत्वा न पुनरावर्तन्ते मुक्ता इति परमार्थः।

यत्तु **रामानुजः** - तद् धामात्मज्योतिर्मम मदीयं ममैवांश इत्यर्थः इति, **तन्मन्दम्**; अंशांशिभावस्यात्राविवक्षितत्वात्। उत्तरश्लोकेन तस्य वक्ष्यमाणत्वाच्च॥६॥

**ममेति**। ननु 'सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः। संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम्॥' इति संयोगस्य वियोगान्तत्वप्रसिद्धेः सर्वाऽपि गतिरागत्यन्तैवेति कृत्वा, 'यद् गत्वा न निवर्तन्ते' इत्युक्तमयुक्तमित्याक्षिपति— **नन्विति**। गतिः प्राप्तिः संयोगः, आगतिरागमनं वियोगः। येन यद् गम्यते, तेन ततः आगम्यते। यथा कर्मिणा स्वर्गो गम्यते तत आगम्यते च। तथा मुमुक्षुणा यद् धाम गम्यते, तद्धाम्नः पुनः स आगच्छत्येव। **ननु** ग्रामान्तरं गतः कश्चित् पुनः स्वग्रामं प्रत्यागच्छति, कश्चित् तत्रैव तिष्ठतीति कथमुच्यते आगच्छत्येवेति चेत्? **मैवम्**; यावज्जीवं तत्र स्थित्वाऽपि मरणानन्तरं तत् परित्यज्यान्यत्र गच्छत्येवेति। न हि वयं यस्माद् गतः, तत् पुनः प्राप्नोतीति ब्रूमः, किं तर्हि? यं गतः, तं परित्यज्यागच्छतीत्येव ब्रूमः। येन तद् गम्यते तेन तत् त्यज्यत इत्येव व्याप्तिनियम इति भावः।

**निवृत्तिः** पुनरावृत्तिः। तद्धामपरित्याग इति यावत्। जीवलोके प्रसिद्ध इति शेषः। सनातनो जीवभूतो ममैवांशः प्रकृतिस्थानि मनःषष्ठानीन्द्रियाणि कर्षति। यद्वा सनातनो ममैवांशो जीवलोके जीवभूतः, स इति शेषः; प्रकृतिस्थानि मनःषष्ठानीन्द्रियाणि कर्षति। **अनर्थान्तरमिति**। अंशभागावयवैकदेशाख्यं पदचतुष्टयमर्थान्तररहितमेकस्मिन्नेवार्थे वर्तते। अभिन्नार्थकमिति यावत्। पर्यायपदानि चत्वारीति भावः। **यद्वा** अर्थान्तरं तत्त्वान्तरं न भवति। अहं परमात्मैव जीवः, न तु मदर्थान्तरं जीवः, मदंशत्वाज्जीवस्य। कोऽसावंशः? अत आह— **भाग इति**। तदर्थमाह— **अवयव इति**। तस्यापि फलितमाह— **एकदेश इति**। यथा जलस्य तटाकगतस्यांशः एकदेशो जलादर्थान्तरं [न], तद्वज्जीवोऽपीति भावः। यद्वा ममैवांशः इत्यत्रैवकारार्थमाह— **अर्थान्तरमिति**। ममैवांशो, न त्वर्थान्तरं

**इति प्रसिद्धः** सनातनः **चिरन्तनः। यथा जलसूर्यकः सूर्यांशो जलनिमित्तापाये सूर्यमेव गत्वा [1]न निवर्तते, [2]तथा अयमप्यंशः तेनैवात्मना [3]संगच्छति एवमेव। यथा वा घटाद्युपाधिपरिच्छिन्नो घटाद्याकाश आकाशांशः सन् घटादिनिमित्तापाये आकाशं प्राप्य न निवर्तते इत्येवम्। अत उपपन्नमुक्तम् — यद् गत्वा न निवर्तन्त इति।**

**ननु निरवयवस्य परमात्मनः कुतोऽवयवः एकदेशोंऽशः इति। सावयवत्वे च विनाशप्रसङ्गोऽवयवविभागात्।**

आनन्दगिरिकृतव्याख्या

**समाधिरित्याशङ्क्य प्रतिबिम्बपक्षमादाय दृष्टान्तेन प्रत्याचष्टे—**[4]यथेति। **अवच्छेदपक्षमाश्रित्य दृष्टान्तान्तरेणोक्तदोषसमाधिं दर्शयति—** यथा वेति। **आक्षेपसमाधिमुपसंहरति—** अत इति।

**परस्य निरवयवत्वात् तदंशत्वं जीवस्यायुक्तमिति शङ्कते—** नन्विति। **तस्य निरवयवत्वं साधयति—** सावयवत्वे चेति। **वस्तुतो**

भाष्यार्कप्रकाशः

मत्तः इत्यर्थः। जीवेन लोक्यते दृश्यत इति जीवलोकः इति व्युत्पत्त्याऽऽह— **संसार इति**। जगतीति यावत्। अज्ञाः वैदिकास्तार्किकादयश्च कर्तारं भोक्तारं जीवं मन्यन्त इत्यत आह— **कर्ता भोक्तेति**। कर्ता भोक्तेति वैदिकादयो यं व्यवहरन्ति, स जीवो ममैवांश इत्यर्थः। **एतेन** यथाऽहमकर्ताऽभोक्तेति प्रसिद्धस्तथा मदंशोऽप्यकर्ताऽभोक्ता चैव, तस्मिन् कर्ता भोक्तेति प्रत्ययस्तु भ्रम एव, न प्रमेति **सिद्धम्**। जीवो भूतो जातो **जीवभूतः**। **अनेन** च भूतशब्दनिर्देशेन न वस्तुतः कर्तृत्वभोक्तृत्वप्रयुक्तजीवत्वं मदंशस्येति **सूच्यते**।

ननु भवतु तवांशो जीवः, किं तावता तव पदं गतानामपुनरावृत्तौ कारणं सिद्धम्? अत आह— **यथेति**। **जलसूर्यको** जले सूर्यप्रतिबिम्बः। सूर्य इव सूर्यकः 'इवे प्रतिकृतौ' इति कन्। प्रतिबिम्बो हि बिम्बस्यांश इति सूर्यांश इत्युक्तम्। जलमेव **निमित्तं** प्रतिबिम्बभावं प्रति कारणम् , तस्य **अपाये** नाशे सति। **ततः** सूर्यात्। तथा चिदाभासो जीवोऽपि चिद्रूपपरमात्मनः प्रतिबिम्बत्वेन तदंशः प्रतिबिम्बनिमित्तस्याविद्यायाः अन्तःकरणस्य वा ज्ञानान्नाशे सति परमात्मचैतन्यं तत्पदं गत्वा ततो न निवर्तत इति **प्रतिबिम्बपक्षा**नुसारेणोत्तरमुक्तमाचार्यैः। अथा**वच्छेदपक्षा**नुसारेणाह— **यथा वेति**। घटादीत्यादिपदात् करकमठादिग्रहणम्। एवमन्तःकरणावच्छिन्नोऽविद्यावच्छिन्नो वा चैतन्यरूपो जीवः स्वोपाधिभूताविद्यान्तःकरणनाशे सत्यपरिच्छिन्नं परिपूर्णं परमात्मचैतन्यं प्राप्य न ततो निवर्तते। एकमेव चैतन्यं पूर्णं महाकाश इवोपाधिवशात् परिच्छिन्नमिव प्रतिभाति, तदुपाधिनाशे तु परिपूर्णं सदेवावतिष्ठत इति कथं पूर्णचैतन्यस्य महाकाशस्येव गमनादिकमिति भावः। अयं चोपाधिपरिच्छेदः परिपूर्णस्याज्ञानकृत एवेति तदज्ञाननाशे कथं पुनरुपाधिपरिच्छेददर्शनं स्यात्? न कथमपीत्यभिसन्धिः। **अत इति**। जलसूर्यकघटाकाशदृष्टान्तद्वयेन परमात्मांशस्य जीवस्य परमात्मप्राप्तौ सत्यां पुनरावृत्त्यभावस्य स्थापितत्वादित्यर्थः। **उपपन्नं** युक्तम् , सदृष्टान्तत्वाद् युक्तिमदित्यर्थः। उक्तमेव स्मारयति— **यद् गत्वा न निवर्तन्त इति**।

परिपूर्णचैतन्यस्य स्वरहितस्वप्रतिफलनयोग्यदेशाभावात्। मुखं हि स्वरहितेऽत एव स्वप्रतिफलनयोग्ये दर्पणप्रदेशे प्रतिफलति। अपरिच्छिन्नस्य निरवयवस्य निरवकाशस्य चैतन्यस्य चोपाधिपरिच्छेदायोगात्। सावयवस्य सावकाशस्य हि महाकाशस्य घटादिपरिच्छेदः। चैतन्यप्रतिफलनं चैतन्यपरिच्छेदश्चेत्युभयमपि भ्रान्तिसिद्धमेव, न वास्तवमिति तत्त्वम्[5]। इदमेव प्रकटयितुं पूर्वपक्षयति— **नन्विति। निरवयवस्येति**। सावयवस्यैव सांशत्वान्निरवयवोऽयं निरंश एवेति कथमस्यावयवोंऽशो वा सिध्येत्? न कथमपि। एवमंशाभावादेवैकदेशस्याप्यभावः। अंशो ह्येकदेशः। यथा मृदंशो मृदवयवस्त्र्यणुकादिर्मृद एकदेशः। यद्येवं निरवयवस्यांशासिद्धिस्तर्हि ममैवांश इति प्रकृतगीताप्रामाण्यादस्तु परमात्मनः सावयवत्वम्? अत आह— **सावयवत्वे चेति**। विनाशाख्यदोषप्रसङ्गात्। सावयवो हि घटादिर्नश्यन् दृष्टः। कुतः सावयवस्य विनाशः? अत आह— **अवयवविभागादिति**। घटो ह्यवयवी कपालाद्यवयवविश्लेषाद् विनश्यति। एवमनन्तानां जीवरूपाणामवयवानां परमात्मनः सकाशाद् वियोगे सति नश्येत्

१. 'ततो न निवर्तते' इति पा.। २. 'तथा अयमप्यंशः' इति क्वचिन्न। ३. 'तेनैवात्मना गच्छत्येवमेव' इति पा.। ४. तथा च प्राप्यस्यात्मत्वादेव न ततः प्रत्यावृत्तिरिति भावः। ५. प्रतिबिम्बावच्छेददृष्टान्तयोः विवक्षितांशः ऐक्यप्रतिपत्तिरेवेति दार्ष्टान्तिके न वास्तवतद्भावापेक्षेति भावः।

भाष्यार्कप्रकाशः

परमात्मेत्यर्थः। न च परमात्मनो विनाशित्वं युक्तमिति वाच्यम् ; अविनाशित्वस्य पूर्वं प्रतिपादितत्वात्। 'अविनाशी वा अरेऽयमात्मा' इति श्रुतेश्च। न च जीव एवाविनाशी, परमात्मा तु विनाश्येवेति वाच्यम् ; अवयविन एवानित्यत्वे तदवयवानां नित्यत्वस्यायुक्तत्वात्। अवयविनो देहस्य घटस्य तटाकजलस्य वा अनित्यस्यावयवाः करचरणादयः कपालादयो बिन्द्वादयश्च नित्यत्वेन किं दृश्यन्ते? नित्यत्वे चावयवानां कथमवयविनः स्यादनित्यत्वम्?

**नन्व**वयविनां द्व्यणुकादीनामनित्यत्वस्यावयवस्य परमाणोर्नित्यत्वस्य च शास्त्रान्तरसिद्धत्वात् कथमित्थमुच्यते इति चेत्? **मैवम्** ; अण्ववयवस्य निरवयवस्य परमाणोरस्माभिरनभ्युपगतत्वात्। न हि वयं परमात्मनोऽन्यत् किमपि निरवयवं नित्यं वा ब्रूमः। 'यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्य'मिति श्रुतेः, 'तत्सत्यं स आत्मा, अतोऽन्यदार्त'मिति श्रुतेश्चैकमेव ब्रह्म सत्यं नित्यं च; ततोऽन्यदनित्यं मिथ्यैवेति ह्यस्माकमभ्युपगमः। शास्त्रान्तरं तु नास्माकं प्रमाणम् , असच्छास्त्रत्वात् तस्य। वेदान्तशास्त्रमेकमेव हि प्रमाणम् , यथावस्थितवस्तुतत्त्वप्रतिपादकत्वात्। अन्यानि सर्वाणि तु मिथ्याभूतवस्तुप्रतिपादकान्येवेत्यप्रमाणान्येव। श्रुतयो हि सर्वेषामास्तिकानां प्रमाणम् , तत्सम्मतं च वेदान्तशास्त्रम्।

किञ्च वेदान्ता एवास्माकं शास्त्रम् , ते चापौरुषेयत्वात् स्वतः प्रमाणम्। तस्मात् तार्किकाद्यभिमतनिरवयवपरमाणुकल्पना अयुक्ता। न चाणोः सावयवत्वात् तदवयवस्य निरवयवत्वेन भवितव्यमनवस्थादोषादन्यथेति वाच्यम् ; निरवयवस्य परमाणुद्वयस्य परमाणुसहस्रस्य वा संयोगान्न भवेदणूत्पत्तिः, प्रथिमानुपपत्तेः। सावयवस्य हि वस्तुनोऽवयवान्तरसंयोगात् प्रथिमा जायते। निरवयवस्य च संयोग एव तावन्न सम्भवति। अवयवसंश्लेषरूपत्वात् संयोगस्य। तस्मादीश्वरसङ्कल्पात् सावयवा एवाणवस्तावज्जाताः। तदणुद्वयादिसंयोगाद् द्व्यणुकाद्युत्पत्तिरिति। ते चानित्या अणवः, सावयवत्वात्। अवयविनोऽणोस्तु पृथङ्नावयवोपलम्भः। सति तदुपलम्भेऽणोरेवासिद्धेः। सावयवस्यैवोपलभ्यमानत्वं, न तु निरवयवस्येति कृत्वा अण्ववयवोपलम्भासम्भवाच्च।

**ननु** यद्यणुः सावयवः स्यात् तर्हि स्वघटकीभूतैः कैरवयवैरणोः सावयवत्वमुच्यते? न हि परमाणवोऽनभ्युपगता भवद्भिरिति चेत् , **उच्यते—** निरवयवे ब्रह्मणि मायया सावयवाः अणवः कल्पिताः। अणुत्वात्मकं सावयवत्वं कल्पितमित्यर्थः। तस्मिंश्चाणुत्वावच्छिन्ने ब्रह्मणि तथा द्व्यणुकादयः कल्पिताः। एवं सत्यणूनामवयवाः मायामया एवेति सिद्धम्।

**ननु** सर्वमपि जगन्मायामयमेवेति कृत्वा किं विशेषेणाणूनामवयवा मायामया इति कथनेनेति चेत्? **मैवम्** ; अवयवद्वयसंयुक्तो हि तव मतेऽणुः[1]। स च संयोगात् प्राक् नैव सिध्यति, संयोगपूर्वकत्वात् संयुक्तस्य। अवयवद्वयं हि संयुक्तं सदणुमुत्पादयति। स चाणूदयं प्रति कारणभूतः परमाणुरवयवः इति सम्मतं तव। अत एव हि निरवयवः परमाणुरित्यभ्युपगमः। स च परमाणुः कस्यावयवः? न तावदणोरवयवः, परमाणुद्वयसंयोगात् प्रागणोरभावात्। नापि परमाणोः, स्वस्य स्वयमेवावयव इति वचनस्यायुक्तत्वात्। नापि ब्रह्मणः, तस्य सावयवत्वप्रसङ्गादनित्यत्वप्रसङ्गाच्च। तस्मान्मायाया एवावयवः परमाणुरिति सिद्धम्।

एवं मायाया अवयवः परमाणुरित्यपि न निश्चेतुं क्षमम् , मायाया निरवयवत्वेन सावयवत्वेन वा निरूपयितुमशक्यत्वात्। अव्यक्ता हि मिथ्याभूता माया। तस्मात् परमाणुत्वेनाभिमता इमे अण्ववयवाः मायाकार्यत्वान्मायामयाः। अतीन्द्रियत्वाद् मिथ्याभूतत्वाच्च मायावन्निरवयवत्वेन सावयवत्वेन वा निरूपयितुमशक्याः। तस्मान्निरवयवपरमाणुकल्पना तार्किकादीनामयुक्तैव। परमाणवो हि न निरवयवाः, नापि सावयवाः, किन्त्वनिर्वाच्या एवेति। यद्यप्येवं जगदपि सत्त्वासत्त्वाभ्यामनिर्वाच्यम् ; तथापि सावयवत्वेन निर्वाच्यमेवेति जगतः परमाणूनां च भेदोऽवगन्तव्यः। तस्मात् सावयवस्याणोर्येऽवयवास्ते सावयवत्वेन निरवयवत्वेन वा निरूपयितुं न शक्याः इति [न] निरवयवपरमाणुसिद्धिः, नापि नित्यपरमाणुसिद्धिः, किन्तु निरवयव एक एव नित्य आत्मेति कथं निरवयवस्य परमात्मनो ममैवांश इत्यंशः प्रोक्त इति पूर्वपक्षः।

परिहरति तम्—**नैष दोष इति**। निरवयवस्यांशवत्त्वकथनं न दोष इत्यर्थः। तत्र हेतुमाह— **अविद्येति**। यतो यस्मादविद्याकृतोपाधिपरिच्छिन्नः परमात्मन एकदेशोंऽश इव कल्पितस्तस्मान्नैष दोष इत्यर्थः। अपरिच्छिन्नेऽप्यात्मनि मायाऽन्तःकरणाद्युपाधि-

१. अणुपदेन द्व्यणुकं गृह्यते।

**नैष दोषः, अविद्याकृतोपाधिपरिच्छिन्नः एकदेशोंऽश इव कल्पितो यतः। दर्शितश्चायमर्थः क्षेत्राध्याये विस्तरशः। स च जीवो मदंशत्वेन कल्पितः कथं संसरति, उत्क्रामति चेति? उच्यते—** मनःषष्ठानीन्द्रियाणि **श्रोत्रादीनि** प्रकृतिस्थानि **स्वस्थाने कर्णशष्कुल्यादौ प्रकृतौ स्थितानि** कर्षति **आकर्षति॥७॥**

आनन्दगिरिकृतव्याख्या

**निरंशस्यापि परस्य कल्पनया जीवोंऽशो भविष्यतीति परिहरति—** नैष दोष इति। **वस्तुतस्तु जीवस्य नांशत्वम् , परमात्मना तावन्मात्रताया दर्शितत्वादित्याह—**दर्शितश्चेति। **यदि परस्यांशत्वेन कल्पितो जीवो वस्तुतस्तदात्मैव, न तर्हि तस्य संसारित्व-मुत्क्रान्तिर्वेति शङ्कते—** कथमिति। **जीवस्य संसरणमुत्क्रमणं चोपपादयितुमुपक्रमते—** उच्यत इति॥७॥

भाष्यार्कप्रकाशः

परिच्छेदः कल्पितः। तस्माच्च परिच्छेदादंशसिद्धिः। यथा अपरिच्छिन्नस्याप्याकाशस्य घटाद्युपाधिपरिच्छेदः। तस्माच्च घटाकाशाद्यंशसिद्धिस्तद्वदिति भावः। निरंशस्यापि परमात्मनो मायया जीवरूपोंऽशः कल्पितो, न वस्तुतोंऽशोऽस्तीति न कोऽपि दोषः। यदि मरीच्युदकेन मरुभूमेः पङ्किलत्वं स्यात् , तर्हि मायाकल्पितांशेन परमात्मनः सांशत्वं स्यादिति भावः। **कल्पित इति**। माययेति शेषः। या माया निरंशेऽप्यंशं कल्पितवती, सैवासंसारिण्यपि तस्मिन्नंशे जन्ममरणादिलक्षणं संसारं च कल्पितवतीत्याह— **मन इति** मूलम्। **संसरतीति**। सुखदुःखादिकमनुभवतीत्यर्थः। **उत्क्रामति** म्रियते, मरणलक्षणं संसारमनुभवतीत्यर्थः। मनःषष्ठानीत्यर्धश्लोकेन सह शरीरं यदवाप्नोतीत्युत्तरश्लोको जीवस्य जन्ममरणलक्षणसंसारप्रकारं दर्शयति। श्रोत्रमिति श्लोकस्तु सुखदुःखसम्भोगात्मकसंसारप्रकारं दर्शयतीति विवेकः। **प्रकृतिः** स्वस्थानं; तच्च षोढा भिन्नम् ; तत्र मनसो हृत्पुण्डरीकं, श्रोत्रस्य कर्णशष्कुली, चक्षुषो नेत्रगोलकं, स्पर्शनस्य त्वक्, रसनस्य जिह्वाग्रं, घ्राणस्य नासिकाग्रमिति विवेकः।

यत्तु **रामानुजः** - मद्विभूतिभूतो मदंशः इति, यच्च **वेदान्तदेशिकः**— 'पादोऽस्य विश्वा भूतानि' 'तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्', 'यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्व एवात्मानो व्युच्चरन्ती'त्यादिश्रुतिप्रतीतांशत्वं विशिष्टे विशेषणांशतयेति 'अंशो नानाव्यपदेशा'दित्यधिकरणे 'प्रकाशादिवत्तु नैवं परः' इति सूत्रे स्थापितम्। अतोऽनेकेष्वेव केनचिदुपाधिना एकतयाऽभिमतेषु कश्चिन्निरूप्यमाणः 'अंशः' इति व्यपदिश्यते। एवमेव हि पटादिराश्यादिष्वपि। तच्च विशेषणविशेष्यभावेनावस्थिते-ष्वपि विशिष्टैक्ये विशेषणांश इत्यादिव्यपदेशेषु तुल्यम्। तस्मादत्रात्यन्तभिन्नयोर्जीवपरयोर्विभूतितद्वद्भावेन विशिष्टैक्याद् विशेषणभूतो जीवो निष्कृष्य व्यपदिश्यमानः प्रधानापेक्ष(त)यांऽश इति व्यपदिश्यत इति भावः— इति।

**तत् सर्वं तुच्छम्**। तथाहि— यदि विशिष्टस्य विशेषणमंशः स्यात् तर्हि धनिकस्य धनमंशः, दण्डिनः पुरुषस्य च दण्डोंऽशः स्यात्। नैवं लोके प्रतीतिरस्ति। न हि यः कोऽपि रूपिकां दण्डं वा दृष्ट्वा पुरुषांशोऽयमिति प्रत्येति। एवं प्रकृतिपुरुषविशिष्टेश्वरस्य पुरुषवत् प्रकृतिरप्यंश एव स्याद् विशेषणत्वांशेऽभेदात्। न चेष्टापत्तिः, 'ममैवांशो जीवभूत' इतिवद् 'ममैवांशः प्रकृतिभूतः' इति क्वाप्यप्रतिपादनात्। ईश्वरांशात् प्रधानादीश्वरांशस्य जीवस्य निष्कर्षणासम्भवाच्च। यद्धि विशेषणं धर्मभूतं तत्तु विशिष्टस्यांश इति वक्तुं शक्यते। यथा ज्ञानवान् पुरुषः। ज्ञानं हि पुरुषधर्मत्वात् पुरुषांशः। न च अपृथक्सिद्धविशेषणमंश इत्युच्यत इति कृत्वा ईश्वरस्यापृथक्सिद्धविशेषणत्वादंशभूतो जीव इति वाच्यम् ; ईश्वरात् पृथक्सिद्धत्वाज्जीवस्य। कथमन्यथा जीवेश्वरयोरत्यन्तं भेदःस्यात्? न हि घटादत्यन्तं भिन्नः पटो घटस्यापृथक्सिद्धविशेषणांशः स्यात्। गुणिनो घटस्य तु गुणो रूपमपृथक्सिद्धविशेषणं स्यात्। द्रव्यात् पृथग् रूपस्यानुलम्भात्। ईश्वरात् पृथग्जीवोऽहं संसारीत्युपलभमानो जीवः कथं तदपृथक्सिद्धविशेषणं स्यात्? कथं वा अनन्यशेषतया ऽहमिति स्फुरन् जीवो विशेष्यभूतः परमात्मनो विशेषणं स्यात्?

न च भार्या भर्तुरिव जीवः ईश्वरस्य शेषतया विशेषणमिति वाच्यम् ; यथा भार्या भर्तुः शेषः, तथा भर्ता भार्याया अपि शेषभूत एव। विनिगमनाभावाच्च नैकतरस्यापि शेषत्वम् , किन्त्वात्मशेषत्वमेवोभयोरपि। न हि भर्तृसुखार्थं भार्या भर्तारं सेवते, नापि भार्यासुखार्थं भर्ता भार्यां पोषयति, किन्त्वात्मसुखार्थमेवेत्यात्मा शेष्येव, न कस्यापि शेषः। तस्मान्न परमात्मन आत्मा विशेषणभूतः।

भाष्यार्कप्रकाशः

**किञ्च** दण्डी पुरुषो, नीलमुत्पलमित्यादौ विशेषणविशेष्योभयांशप्रतीतिरस्ति। एवं प्रकृतिपुरुषवानीश्वरः इत्यत्रापि तदुभयांशप्रतीतिरावश्यकी। तत्र प्रकृतिपुरुषौ विशेषणांशः। कः पुनर्विशेष्यांशः? न त्वीश्वरः, तस्य प्रकृतिपुरुषविशिष्टत्वरूपत्वात्। यदि तु प्रकृतिपुरुषविलक्षणः कश्चन विशेष्यांश ईश्वराख्योऽस्ति, तर्हि तत्पृथक्सिद्धावेव प्रकृतिपुरुषौ। स चेश्वरांशो वक्तव्यः- किं सच्चिदानन्दरूपः, उतान्यः? आद्ये, जीवोऽपि तादृश एव। 'निरञ्जनः परमं साम्युपैतीति हि त्वयाऽपि जीवेश्वरयोः परमं सादृश्यमभ्युपेयते ज्ञानैकाकारत्वादिरूपम् । तथा च परस्परसदृशयोर्जीवेश्वरयोः कथं विशेषणविशेष्यभावः? द्वितीये, सच्चिदानन्दरूपादन्यो जडस्वरूप एव स्यादिति कथं तथापि प्रकृतीश्वरयोर्विशेषणविशेष्यभावः? विशेषणविशेष्ययोर्हि वैलक्षण्येन भाव्यम् , तच्च न दृश्यते, प्रकृतिवैलक्षण्ये सति पुरुषसालक्षण्यापत्तेः। तदुभयवैलक्षण्यस्य च दुर्वचत्वात्।

तस्मादीश्वरशक्तित्वेनेश्वरवत् सच्चिदानन्दस्वरूपाभावेन च प्रकृतेरीश्वरापृथक्सिद्धविशेषणत्वमस्तु। अग्नेः पृथगग्निशक्तेरिवेश्वरात्पृथगीश्वरशक्तेर्मायाया असिद्धत्वादीश्वरस्वभावत्वेनेश्वरविशेषणत्वाच्च। पुरुषस्तु नेश्वरशक्तिर्नाप्यसच्चिदानन्दस्वरूप इति कथं तस्येश्वरापृथक्सिद्धविशेषणत्वं भवेत्? यदि जीव ईश्वराद् भिन्नस्तर्हि तत्पृथक्सिद्ध एव। यदि त्वभिन्नस्तर्हीश्वरस्याविशेषणभूत एव। यद्यद् वस्तु पृथक्त्वेनापृथक्त्वेन वा दुर्निरूपम् , तद्धि तदपृथक्सिद्धविशेषणम्। यथा अग्निशक्तिरग्नेः पृथक्त्वेनापृथक्त्वेन वा दुर्निरूपेत्यग्नेरग्निशक्तिरपृथक्सिद्धविशेषणम्। यथा वा नीलो गुण उत्पलात् पृथक्त्वेनापृथक्त्वेन वा दुर्निरूप इति नील उत्पलस्यापृथक्सिद्धविशेषणम्। एवमीश्वरशक्तिर्माया ईश्वरात् पृथक्त्वेनापृथक्त्वेन वा दुर्निरूपेति भवतु सा ईश्वरस्यापृथक्सिद्धविशेषणम्। पुरुषस्तु नैवम् , ईश्वरात्पृथग् अहमज्ञः संसारीति जीवस्योपलम्भात्। तस्मात् त्वदुक्तविधया प्रकृतेरेवेश्वरांशत्वं प्राप्तम् , न तु पुरुषस्येत्यहो! मूलच्छेदी तव पाण्डित्यप्रकर्षः। न चेश्वरस्याचिदिव चिदपि प्रकृतिरेवेति प्रकृतिवत् पुरुषोऽपीश्वरशक्तिरेवेति वाच्यम् ; ईश्वरस्याचिद्रूपत्वाभावादचित्प्रकृतिरीश्वरशक्तिः स्यात् , चिद्रूपत्वसत्त्वात्तु कथं चित्प्रकृतेः पुरुषस्येश्वरशक्तित्वम्? न हि चितश्चिदेव शक्तिरिति वक्तुमुचितम्। न हि स्वस्य स्वयमेव शक्तिः स्यात्। न चैवं चिदचिद्विलक्षण ईश्वरश्चिद्रूपो नेति वाच्यम् ; 'सत्यं ज्ञानमनन्तं ब्रह्म'त्यादि श्रुतिभिरीश्वरस्य चिद्रूपत्वप्रतिपादनात्। न हि दृग्दृश्याभ्यामन्यद् यत्किञ्चिदपि वस्त्वस्ति लोके यदीश्वर इति त्वयोच्येत। न च ज्ञातृज्ञानज्ञेयाख्यानि त्रीणि वस्तूनि सन्ति, तत्र ज्ञाता ईश्वरः, ज्ञानं जीवः, ज्ञेयमव्यक्तमिति वाच्यम् ; जीवो ज्ञातेति तवाभ्युपगमात्। ज्ञानस्वरूपः ईश्वरः इति च। न चेदानीं सोऽभ्युपगमः परित्यज्यत इति वाच्यम् ; श्रुत्यादिविरोधात्। न हि ज्ञानस्वरूपत्वाभावं ज्ञातृत्वाभावं वा श्रुत्यादयो ब्रुवन्ति जीवस्येश्वरस्य वा। तस्माज्ज्ञातुर्जीवस्येश्वरस्य वा ज्ञानमेव स्वरूपमिति दृग्दृश्याख्यं पदार्थद्वयमेवेति दृश एव दृग् विशेषणमिति वादोऽयुक्तः। न च दृग्रूपत्वेऽपि जीवेश्वरयोर्धर्मभूतज्ञानसुखादिषु तारतम्यसत्त्वाद् वैलक्षण्यमस्त्येवेति वाच्यम् ; निर्विशेषज्ञाने विशेषापादकधर्मायोगाद् , यत्किञ्चिद् धर्मजातमासञ्जयसि त्वं तत्र, तत् सर्वं मायाकल्पितमेवेत्यभ्युपगमाच्च। तस्मान्निर्विशेषचिन्मात्र एव जीव ईश्वरश्चेति कथं तयोरन्योन्यविशेषणविशेष्यभावसिद्धिः?

**अथवा** भवत्वल्पज्ञो जीवः, सर्वज्ञः ईश्वरश्च। तथापि न तवेष्टसिद्धिः, ज्ञातृत्वस्य [ज्ञानस्य] एवोभयोराकारत्वात्। ज्ञानैकाकारौ हि जीवेश्वरौ श्रुत्यनुभवादिभ्यः। ततश्च धर्मतो वैलक्षण्ये सत्यपि स्वरूपतो वैलक्षण्याभावादेकस्वरूपयोर्जीवेश्वरयोः कथं विशेषणविशेष्याभावः? न ह्यल्पो घटाकाशो महाकाशस्य विशेषणं भवति। नाप्यल्पं करतलगृहीतं जलं महतो गङ्गाजलस्य विशेषणं भवति। तुष्यतु दुर्जन इति न्यायेनैकस्वरूपयोरेव घटाकाशमहाकाशयोरल्पत्वमहत्त्वाभ्यां विशेषणविशेष्यभावाङ्गीकारेऽपि कथमस्मदुक्तांशासिद्धिः? स्वरूपस्यैक्ये सति महतो हि वस्तुनोऽल्पं वस्त्वंश इत्यस्माभिरुच्यते। तदेव विशेषणमिति त्वयोच्यते। एवं च विशेषणांशशब्दयोरेव भेदः, न त्वर्थभेदः इति कृत्वा कथमुच्यते— विशेषणांश एव, न स्वरूपांशः— इति।

न च निरंशस्येश्वरस्य स्वरूपांशासम्भवाद् विशेषणांशः इत्युक्तमिति वाच्यम् ; निरंशस्य स्वरूपांशवन्निर्विशेषस्य विशेषणांशोऽपि न सम्भवत्येवेति विशेषणांश इतिवदस्यापि स्वरूपांश इत्येव फलितार्थसिद्धेश्च दर्शितत्वात्। न च - अंशी ईश्वरः, दण्डी पुरुष इत्यत्र पुरुष इव विशेष्यम् , अंशो जीवस्तु दण्डवद् विशेषणमिति विशेषणांश एव जीवः ईश्वरस्य, न स्वरूपांशः- इति वाच्यम् ; दण्डव्यतिरिक्तपुरुषवदंशव्यतिरिक्तांशीश्वरानुपलम्भात्। यद्युपलभ्यते, तर्हि स नांश्येव। यथा अवयवी देहः करचरणा-

## शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः[१]।
## गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्॥८॥

**कस्मिन् काले?—**शरीरमिति। यच्चापि **यदा चापि उत्क्रामति** ईश्वरो **देहादिसङ्घातस्वामी जीवः तदा कर्षतीति**

आनन्दगिरिकृतव्याख्या

**स्वस्थाने स्थितानामिन्द्रियाणां जीवेनाकर्षणस्य कालं पृच्छति—** कस्मिन्निति। **जीवस्योत्क्रान्तिर्नैश्वरस्येत्याशङ्क्येश्वर-**

भाष्यार्कप्रकाशः

ह्यवयवातिरेकेण न दृश्यते। यदि दृश्यते तर्हि देहोऽपि निरवयव एव स्यात्। ततश्च करचरणादयोऽवयवा देहस्य स्वरूपांशभूता एव, न तु विशेषणांशभूताः। तद्वदीश्वरांशाः जीवा अप्यंशिन ईश्वरस्य स्वरूपांशा एव, न तु विशेषणांशाः इति।

तस्मादंशांशिभावो विशेषणविशेष्यभावादतिरिक्त एव। न च - ईश्वरात्पृथग् जीवस्योपलम्भाज्जीवो नेश्वरस्यांशः, किन्तु दण्डः पुरुषस्येव विशेषणभूत एव; अत एव निरंशस्येश्वरस्य कथमंशित्वमिति चोद्यमपि नात्र प्रवर्तते - इति वाच्यम्। महाकाशात् पृथग् घटाकाशस्येवेश्वरात् पृथग् जीवस्योपलम्भोऽविद्योपाधिकृत एव, न तु तात्त्विकः इत्यसकृदुक्तत्वात्। तथा निरंशस्यांशित्वं चाविद्योपाधिकृतमेव, न तात्त्विकम्। तस्मान्निरंशस्यापीश्वरस्य चैतन्यरूपस्य चैतन्यरूपो जीवो भवति स्वरूपांश एवाविद्योपाधि-वशाद्, घटाद्युपाधिवशाद् घटाद्याकाशो यथा महाकाशस्य स्वरूपांशः इत्यनवद्यम्। 'पादोऽस्ये'ति श्रुतिस्तु निर्विशेषे आत्मन्येकदेशे सर्वं चराचरं जगद् वर्तते माययेति ब्रूते। न तु जीवा ईश्वरस्य अपृथक्सिद्धविशेषणानीति, तत्र तदर्थाप्रतीतेः। न हि श्रुतौ क्वापि जीवः ईश्वरस्यापृथक्सिद्धविशेषणमिति दृश्यते। तस्मादियमश्रौतकल्पनैव।

'तस्यावयवभूतै'रित्यत्र तु अवयवैरिति स्फुटमुक्तमेव जीवस्येश्वरांशत्वम्। अंशो ह्यवयवः। यथा देहस्यैवांशः करादिरवयवः। न ह्यवयवशब्दोऽपृथक्सिद्धविशेषणार्थवाची, येन तवेष्टसिद्धिः। अग्नेरिति वाक्यमपि महतोऽग्नेरल्पाः स्फुलिङ्गाः यथा अंशभूतास्तथैव परमात्मनोंऽशा जीवाः इति प्रतिपादयति। उपाधिभेदात्तु आत्मान इति बहुवचननिर्देशः। न हि निरुपाधिक आत्मा अंशो भवितुमर्हति, उपाधिपरिच्छिन्नस्यैव चैतन्यस्यांशत्वात्। एवम् 'अंशो नानाव्यपदेशा'दित्यधिकरणेऽपि **शङ्कराचार्यै**रंशांशिभाव एव जीवेश्वरयोः मायामयः साधित इति न सूत्रसामञ्जस्यं तवास्ति।

**यदप्युक्तं** नीलपीतरक्ताद्यनेकपटेषु पटत्वरूप एक उपाधिरंश इत्युच्यत **इति**, तच्च न दृष्टान्तभावमर्हति, पटानेकत्ववदात्माने-कत्वस्यासम्प्रतिपन्नत्वात्। पटा हि नीलपीतादिगुणवशादनेके भवन्ति। कथं निर्गुणात्मानेकत्वम्? 'अशब्दमस्पर्शमरूपमव्यय' मित्यादिश्रुतयो हि निर्गुणमात्मानं ब्रुवन्ति। न च नीलपीतादिगुणवत्त्वेन जीवो येन केनाप्यनुभूयते। न च सुखदुःखाद्यनुभव-वैचित्र्यादात्मानेकत्वमिति वाच्यम् ; सुखदुःखादिवैचित्र्यस्यान्तःकरणानेकत्वप्रयोजकत्वात्। अन्तःकरणधर्माः खलु सुखदुःखादयः। सुखादीनामात्मधर्मत्वे तु मूर्छादिष्वपि तदुपलम्भः स्यात्। प्रकृतगीताशास्त्रविरोधश्च, इच्छाद्वेषसुखादेः क्षेत्रत्वस्य प्रतिपादनादस्मिन्। तस्मादुपाधित एवात्मानेकत्वमाकाशानेकत्ववन्न तूपाधितः एकत्वमात्मन इति बोध्यम्॥७॥

**शरीरमिति**। ईश्वरो यच्चाप्युत्क्रामति तदा प्रकृतिस्थानि मनःषष्ठानीन्द्रियाणि कर्षति। ईश्वरो यच्छरीरमवाप्नोति तदा वायु-राशयाद् गन्धानिवैतानि गृहीत्वा संयाति। ननु लिङ्गशरीरोपाधिपरिच्छिन्नस्य स्थूलशरीरादुत्क्रममाणजीवस्य कथमीश्वरत्वम्? अपरिच्छिन्नो हीश्वरः, अत आह— **देहादीति**। वस्तुतो निरुपाधिकत्वेनापरिच्छिन्नेश्वरोऽपि जीवोऽविद्यया सोपाधिकत्वेन परिच्छिन्नः सन् देहादिसङ्घातस्वामित्वरूपमीश्वरत्वं भजत इत्यर्थः। **यद्वा** कस्यायमीश्वरः क्षेत्रज्ञः? अत आह— **देहादीति**। क्षेत्रस्येश्वरः इत्यर्थः। न

१. 'ममैवांशो जीवभूतः मनःषष्ठानीन्द्रियाणि कर्षति' इति पूर्वश्लोके जीवस्य प्रकृतत्वात् 'शरीरादुत्क्रामति, शरीरमवाप्नोति' इत्यत्रापि कर्तृत्वेन स एव संबध्यते। तत्र च ईश्वरशब्दः देहादिसङ्घातस्वामित्वाद् योगेनोपपन्नः। रूढित्यागस्तु प्रकरणानुरोधान्न दुष्यति। अग्रिमश्लोकोऽपि 'अधिष्ठाय मनश्चायं विषयानुपसेवते' इति विषयभोगप्रतिपादनात् जीवविषय एव। एवं चात्र ईश्वरशब्दरूढ्यनुरोधेन - जीवस्योत्क्रान्तिकाले ईश्वरः एतानि गृहीत्वा संयातीति व्याख्यानम् , अग्रिमश्लोके ऽपीश्वरस्य विषयभोगवर्णनं च वाक्याभाससमाश्रयणेन यत् माध्वैः कृतं तन्नादर्तव्यं विद्वद्भिः।

**श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च।**
**अधिष्ठाय मनश्चायं विषयानुपसेवते॥९॥**
**उत्क्रामन्तं स्थितं वाऽपि भुञ्जानं वा गुणान्वितम्।**

**श्लोकस्य [१]द्वितीयपादोऽर्थवशात् प्राथम्येन सम्बध्यते। यदा च पूर्वस्माच्छरीराच्छरीरान्तरमवाप्नोति तदा गृहीत्वैतानि मनःषष्ठानीन्द्रियाणि** संयाति **सम्यग् याति गच्छति। किमिवेत्याह—** वायुः **पवनो गन्धानिव** आशयात् **पुष्पादेः॥८॥**

**कानि पुनस्तानीति? —** श्रोत्रमिति। **श्रोत्रं चक्षुः** स्पर्शनं **च त्वगिन्द्रियं** रसनं **जिह्वा घ्राणमेव च मनश्च षष्ठं प्रत्येकमिन्द्रियेण सहाधिष्ठाय देहस्थो** विषयान् **शब्दादीन् उपसेवते॥९॥**

**एवं देहगतं देहात्—** उत्क्रामन्तमिति। उत्क्रामन्तं **परित्यजन्तं देहं पूर्वोपात्तं,** स्थितं **वाऽपि देहे तिष्ठन्तं,**

आनन्दगिरिकृतव्याख्या

**शब्दार्थमाह—** देहादीति। **उत्क्रान्त्यनन्तरभाविनी गतिरित्येतद्** अर्थवशादित्युक्तम्। **अवशिष्टानि श्लोकाक्षराण्याचष्टे—** यदा चेति॥८॥

**मनःषष्ठानीन्द्रियाण्येव प्रश्नद्वारा विशेषतो दर्शयति—** कानीति॥ ९॥

**'शरीर'मित्यादिश्लोके देहादात्मनोऽतिरेकमुक्त्वा, 'श्रोत्रं चक्षु'रित्यादौ स्वाभिलषिते विषये यथायथं करणानां प्रवर्तकत्वात् तेभ्यो**

भाष्यार्कप्रकाशः

हि क्षेत्रक्षेत्रज्ञातिरिक्तं किञ्चिदपि वस्त्वस्ति, यस्यायं क्षेत्रज्ञो भवेदनीश्वरः। तस्मात् सर्वस्यापीश्वर एव जीव इति न जीवेश्वरभेदावकाशः, नापि जीवगतेश्वरत्वसङ्कोचः। कर्षतीति पूर्वेणान्वय इति शेषः। **तृतीयः पादो** गृहीत्वैतानि संयातीत्ययमित्यर्थः। **प्राथम्येन** शरीरं यदवाप्नोतीत्यनेनेत्यर्थः। प्रथम एव प्राथम्यमिति चतुर्वेदादित्वात् स्वार्थे ष्यञ्। **सम्बध्यते**ऽन्वितो भवति। तमेवान्वयं दर्शयति— **यदा चेति**। यदित्यस्य यदेत्यर्थः। लिङ्गशरीरावयवभूतानि मनःषष्ठानीन्द्रियाणि इति बोध्यम्। वस्तुतोऽपरिच्छिन्नेश्वरस्यापि जीवस्य सूक्ष्मशरीरोपाधिवशात् प्रकृतशरीरादुत्क्रमणं शरीरान्तरप्राप्तिश्च भवतीति परमार्थः।

यच्छरीरमवाप्नोति यस्माच्छरीरादुत्क्रामतीति **रामानुजः। तन्मन्दम्** ; यच्छरीरमवाप्नोति तच्छरीरं संयातीति वचनस्य पुनरुक्तिदोषग्रस्तत्वात्। यच्चेत्यस्य यस्माच्चेत्यर्थकल्पनस्याप्ययुक्तत्वाच्च। न हि प्रथमान्ताद् द्वितीयान्ताद्वा पञ्चम्यन्तार्थलाभः। श्रीशङ्करमते तु यदित्यव्ययमिति न दोषः॥८॥

**श्रोत्रमिति**। अयं श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च मनश्चाधिष्ठाय विषयानुपसेवते। इन्द्रियाणि प्रत्येकमधिष्ठाय तत्तत्प्रत्येकेन्द्रियेण सह मनश्चाधिष्ठाय देहस्थः सन्नपि जीवः शब्दादिबाह्यविषयाननुभवतीत्याह— **प्रत्येकमिति**। युगपत् सर्वैरिन्द्रियैः शब्दादिसर्वविषयानुभवासम्भवात् प्रत्येकमित्युक्तम्। मनस्यन्यत्र गते सति शब्दादिविषयग्रहणासम्भवाद् **इन्द्रियेण सह मनश्चाधिष्ठाये**त्युक्तम्। विनापीन्द्रियसाहित्यं मनसा सुखादेरनुभवाद् **मनश्चाधिष्ठाये**त्युक्तम्। जीवस्य मनःषष्ठेन्द्रियाधिष्ठानं नाम मनइन्द्रियतद्धर्माणामात्मन्यध्यास एव। तथा च मनोधर्माध्यासात् सुख्यहं दुःख्यहमिति, चक्षुरादीन्द्रियधर्माध्यासात् पश्यामि, शृणोमि, स्पृशामि, जिघ्रामि, स्वादयामि चेति प्रत्येत्यविद्यावान् जीवः। एवमज्ञानकृतानात्मतद्धर्माध्यासवशाज्जीवस्य सुखदुःखादिसम्भोगलक्षणः संसारः सम्भवतीत्यभिप्रायः।

अधिष्ठाय स्वस्वविषयवृत्त्यनुगुणानि कृत्वेति **रामानुजः। तन्मन्दम्**। चक्षुषो रूपग्रहणे पक्ष्मोन्मीलनरूपपुरुषप्रयत्नसापेक्षत्वेऽपि त्वगादीनां स्पर्शादिग्रहणे तन्नैरपेक्ष्यात्॥९॥

**उत्क्रामन्तमिति**। गुणैः सत्त्वादिगुणकार्यैरित्यर्थः। **संयुक्तमिति**। अन्तःकरणतादात्म्याध्यासादिति भावः। **एवं** जीवम्

१. 'तृतीयः पादः' इति रा.पा. भाति। तत्र च प्राथम्यपदस्य प्रथम इत्यर्थं स्वीकृत्य - तृतीयपादः प्रथमपादेन संबध्यते तदीयं व्याख्यानम्। वस्तुतस्तु पूर्वदेहादुत्क्रान्त्युत्तरमेव शरीरान्तरावाप्तेरौचित्यात् उत्क्रान्तिप्रतिपादको द्वितीयपादः पूर्वं योजनीयः—यदा उत्क्रामति जीवः तदा कर्षतीति। अतो यथाश्रुतं साधीयः।

## विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥ १० ॥

भुञ्जानं **वा शब्दादींश्चोपलभमानं** गुणान्वितं **सुखदुःखमोहाख्यैः गुणैरन्वितम् अनुगतं संयुक्तमित्यर्थः। एवम्भूतमपि एनम् अत्यन्तदर्शनगोचरप्राप्तं** विमूढाः **दृष्टादृष्टविषयभोगबलाकृष्टचेतस्तया अनेकधा मूढाः नानुपश्यन्ति। अहो कष्टं वर्तत इत्यनुक्रोशति च भगवान्। ये तु पुनः प्रमाणजनितज्ञानचक्षुषः त एनं पश्यन्ति** ज्ञानचक्षुषो **विविक्तदृष्टयः इत्यर्थः ॥ १० ॥**

आनन्दगिरिकृतव्याख्या

**ऽतिरिक्तश्चात्मेत्युक्तम् । तर्हि तमुत्क्रान्त्यादि कुर्वन्तं स्वरूपत्वात् किमिति सर्वे न पश्यन्तीत्याशङ्क्याह—** एवमिति। **सन्निहिततमत्वेन दर्शनयोग्यमपि विषयपारवश्यादात्मानं सर्वे न पश्यन्तीति भगवतोऽनुक्रोशं दर्शयति—**एवम्भूतमिति। **तर्हि केषामात्मदर्शनम्? तदाह—** ये तु पुनरिति॥ १० ॥

भाष्यार्कप्रकाशः

अत्यन्तं **दर्शनगोचरं** ज्ञानविषयं प्राप्तं, ज्ञानविषयभूतमित्यर्थः। सुज्ञेयमिति यावत्। **दृष्टविषयभोगः** शब्दादिविषयाणामनुभवः, **अदृष्टविषयभोगः** स्वर्गादिविषयकाम इति विवेकः। न ह्यदृष्टानां विषयाणामनुभवः सम्भवतीहैव। **अथवा** अस्मिन् जन्मनि दृष्टविषयभोगः, परेत्य देवादिलोके उद्भूय तत्रादृष्टविषयभोगः इति बोध्यम्। दृष्टाश्चादृष्टाश्च विषया दृष्टादृष्टविषयास्तेषां **भोगो**ऽनुभवः, तद्बलेनाकृष्टं चेतो येषां तेषां भावस्तत्ता, तया हेतुना। अनेकधा **विमूढाः** विमोहं प्राप्ताः। आत्मानात्मविवेकशून्याः इत्यर्थः। **नानुपश्यन्ति** न जानन्ति।

अयं भावः - यो देहादुत्क्रामति, स न देहः। यथा गृहान्निष्क्रामन् पुरुषो न गृहं भवति। यश्च देहे तिष्ठति सोऽपि न देहः। यथा गृहे तिष्ठन् पुरुषो न गृहम्। एवमनात्मनः स्थूलदेहस्य जीवस्य च विवेके सुकरे सति मूढा इमं विवेकमकृत्वा स्थूलोऽहं, कृशोऽहं, मनुष्योऽहमिति व्यवहरन्ति। तथा यश्चक्षुरादिभी रूपादीन् विषयाननुभवति, मनसा च सुखादीन् , स हि चक्षुरादिभ्यो भिन्न एव, करणाद्भिन्नत्वात् कर्तुः, लवित्रादिव च्छेदकः इति सूक्ष्मशरीरात्पृथग् विविच्य ग्रहीतुं शक्यमपि जीवं मूढाः न जानन्ति। किन्तु सूक्ष्मशरीरस्य जीवस्य च विवेकमकृत्वा काणोऽहं, बधिरोऽहं, सुख्यहं, दुःख्यहमिति व्यवहरन्ति। तथा 'अहमज्ञ' इति योऽज्ञानमनुभवति, 'नाहं किञ्चिदवेदिष'मिति योऽनुसन्धत्ते स हि अज्ञानाद्भिन्नः। न हि घटमनुभवन् पुरुषो घटो दृष्टः। अनुभूताद्धि अनुभविता भिन्न इति कारणशरीरात्पृथग् विविच्य ग्रहीतुं शक्यमपि जीवं मूढा न जानन्ति। किन्तु कारणशरीरस्य जीवस्यास्य चाविवेकं कृत्वा, 'अहमज्ञ' इति व्यवहरन्ति। तथा यस्य येन सहाध्यासिकः सम्बन्धः, स वस्तुतस्तेन रहित एव। यथा गगनस्य नीलेन सहाध्यासिकः सम्बन्ध इति गगनं वस्तुतो नीलगुणरहितमेव। एवं सुखादिभिर्गुणैर्जीवस्याध्यासिकः सम्बन्ध इति जीवो वस्तुतः सुखादिरहित एव। एवं निर्गुणत्वेन सुग्रहमपि जीवं मूढा न जानन्ति, किन्तु सगुणमेव प्रतिपद्य 'सुख्यहं, दुःख्यहं , मूढोऽह'मिति व्यवहरन्ति। यद्वा यो येन संयुक्तः, स तस्य न स्वाभाविको धर्मः। संयोगस्य वियोगपूर्वकत्वाद् वियोगावसानत्वाच्च। स्वभावसिद्धस्य वियोगानर्हत्वाच्च। यथा पटेन संयुक्तस्य घटस्य न पटः स्वाभाविको धर्मः, घटपटयोर्वियोगसम्भवात्। अग्नेरौष्ण्यं तु स्वाभाविको धर्मः। न ह्यग्न्यौष्ण्ययोर्वियोगः। न ह्यग्निरौष्ण्येन संयुक्त इति व्यवहारः। एवं सुखादिगुणसंयुक्तस्य जीवस्य सुखादिगुणा न स्वाभाविकाः। निर्गुणत्वमेव तस्य स्वाभाविकम्। ते च जीवेऽध्यस्ता गुणा अन्यदीया एवेति मूढा न जानन्ति।

एवमविदुषां मूढानां संसारदुःखमवर्जनीयमिति भगवत एतेष्वनुक्रोशः सूच्यत इत्याह— **अहो इति**। **कष्टं** दुःखं वर्तते। मूढानामिति शेषः। अनुक्रोशो दया। प्रमाणं वेदान्तशास्त्रम् , तज्जनितं यज्ज्ञानमात्मानात्मविवेकरूपं तदेव चक्षुर्येषां ते तथोक्ता **ज्ञानचक्षुषः**। फलितार्थमाह— **विविक्तदृश इति**। विविक्तं यथा तथा पश्यन्तीति विविक्तदृशः। विविक्तमात्मानं पश्यन्तीति विविक्तदृश इति वा। आत्मानात्मविवेकसम्पन्ना इत्यर्थः। ते एनमात्मानं **पश्यन्ति** अनात्मभ्यो देहेन्द्रियान्तःकरणेभ्यो विवेकेन जानन्तीत्यर्थः

**यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम्।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः॥ ११॥**

**केचित्तु—** यतन्त इति। यतन्तः **प्रयत्नं कुर्वन्तो** योगिनश्च **समाहितचित्ताः** एनं **प्रकृतमात्मानं** पश्यन्ति **'अयमहमस्मि' इत्युपलभन्ते** आत्मनि **स्वस्यां बुद्धौ अवस्थितम्। यतन्तोऽपि शास्त्रादिप्रमाणैः** अकृतात्मानः **असंस्कृतात्मानः तपसेन्द्रियजयेन च दुश्चरितादनुपरताः** [1]**अशान्तदर्पाः प्रयत्नं कुर्वन्तोऽपि नैनं पश्यन्ति** अचेतसः **अविवेकिनः॥ ११॥**

**यत् पदं सर्वस्यावभासकमप्यग्न्यादित्यादिकं ज्योतिर्नावभासयते, यत् प्राप्ताश्च मुमुक्षवः पुनः संसाराभिमुखाः**

आनन्दगिरिकृतव्याख्या

**ज्ञानचक्षुःशब्देन न्यायानुगृहीतं शास्त्रं ज्ञानसाधनमुक्तम्। तत् किमिदानीं शास्त्रमात्रेण न्यायानुगृहीतेनात्मानं पश्यन्ति? नेत्याह—** केचित्त्विति। प्रयत्नः **श्रवणमननात्मकः। शास्त्रादिप्रमाणैर्यतन्तोऽपीति सम्बन्धः। असंस्कृतात्मत्वं प्रकटयति—** तपसेति। **दुश्चरितादविरतिफलं कथयति—**अशान्तेति। **अशुद्धबुद्धीनामविवेकिनां सदपि श्रवणादि न फलवदिति मत्वाऽऽह—**प्रयत्नमिति॥ ११॥

**अनन्तरश्लोकचतुष्टयस्य वृत्तानुवादद्वारा तात्पर्यार्थमाह—** यत्पदमिति। **जीवात्मत्वेन चिद्रूपत्वमुक्त्वा तदीयचैतन्येनादित्यादी-**

भाष्यार्कप्रकाशः

॥ १०॥

**यतन्त इति**। यतन्तो योगिनश्चात्मन्यवस्थितमेनं पश्यन्ति। **अकृतात्मानो**ऽचेतसस्तु यतन्तोऽप्येनं न पश्यन्ति।**केचित्त्विति**। ज्ञानचक्षुषः पश्यन्तीति पूर्वमुक्तत्वात् तेभ्योऽन्ये योगिन इमेऽपि पश्यन्तीत्युच्यत इत्यर्थः। उत्तमानां श्रवणादिवशादेवात्मसाक्षात्कारः, मन्दबुद्धीनां तु योगवशादात्मसाक्षात्कार इत्याह— **यतन्तो योगिन इति**। **च**शब्दो ज्ञानिसमुच्चयार्थः। योगोऽत्र न कर्मयोगः, तस्यात्मसाक्षात्कारं प्रति व्यवहितसाधनत्वात् , किन्तु ध्यानयोग एवेत्याह— **समाहितचित्ता इति**। ध्यानादिना येषां चित्तमात्मप्रवणं जातं त इत्यर्थः। चित्तसमाधानं चाभ्याससाध्यमित्यभिप्रेत्याह— **यतन्त इति**। **प्रयत्नो**ऽभ्यासः। कथं पश्यन्तीत्यत आह— **अयमिति**। **उपलभन्ते** साक्षात्कुर्वन्ति। जानन्तीति यावत्। आत्मानमिति भावः। **स्वस्यामिति**। स्वकीयायामित्यर्थः। यदवच्छिन्नोऽयमात्मा तद्बुद्धावित्यर्थः। कैरकृतात्मत्वम्? अत आह— **शास्त्रादिप्रमाणैरिति**। शास्त्राचार्योपदेशशमदमादिभिर्येषां मनः संस्कृतं न भवति, ते **ऽकृतात्मानः**। अत एव **अचेतसः** आत्मानात्मविवेकविधुराः, ते यतन्तोऽपि। [2]केन साधनेन यतनम्? अत आह— **तपसेति**। कीदृशं तपः? अत आह— **इन्द्रियजयेनेति**। इन्द्रियाणां जयो विषयेष्वप्रवृत्तिर्यस्माद् भवति तदिन्द्रियजयं, तेन तपसा। तपसा इन्द्रियजयेनेति साधनद्वयं वा। **तपः** कृच्छ्रचान्द्रायणादिकम्। इन्द्रियाणि विषयेभ्यः समाकृष्य बलादात्मवश्यानि कुर्वन्नप्ययमविवेकी शास्त्रादिसंस्काररराहित्येन चित्तशुद्ध्यभावाद् दुश्चरितान्नोपरमते। नाप्यस्य मनसि कामक्रोधादिदर्पः शाम्यतीत्यभिप्रेत्याह— **दुश्चरितादिति**। दुष्टं च तच्चरितं प्रवृत्तिश्च दुश्चरितं, तस्मात् अनुपरताः मनसा स्वभावानुगुणं दुष्टमेव ध्यायन्तीत्यर्थः। तत्र हेतुमाह— **अशान्तदर्पा इति**। अशान्तो दर्पः कामक्रोधाद्युद्भवो वेगो येषां ते तथोक्ताः। एवंविधाः प्रयत्नं कुर्वन्तोऽप्येनं न पश्यन्ति। किं पुनः प्रयत्नमकुर्वन्त इति **अपिशब्दार्थः**। तस्मान्मुमुक्षुर्यथाधिकारं श्रवणादौ योगे वा प्रवर्तेतात्मसाक्षात्कारार्थमिति सिद्धम्।

अत्र— मत्प्रपत्तिपूर्वकं यतन्त इति **रामानुजः**, तत्तु तदभिप्रायेण दुष्टमेव, अहमीश्वरादन्यः, मामीश्वरो रक्षत्वित्यभिसन्धेः प्रपत्तित्वमिति तदभ्युपगमात्। एतदभिप्रायेण मत्प्रपत्तिपूर्वकमिति मूलाद्बहिः कल्पनस्यान्याय्यत्वाच्च॥ ११॥

**यदिति**। आकाशस्य घटाकाशादय इव यस्य पदस्य जीवाः अंशा इत्यन्वयः। के ते जीवाः? अत आह— **उपाधिभेदमनु-**

१. 'अशान्तदर्पात्मानः' इति पा.। २. 'शास्त्रादिप्रमाणैः अकृतात्मानः तपसेन्द्रियजयेन च यतन्तोऽपि दुश्चरिताद्यनुपरमात् नैनं पश्यन्ति'- इति रामकविसंमता योजना। 'तपसेन्द्रियजयेन च अकृतात्मानः शास्त्रादिप्रमाणैः यतन्तोऽपि नैनं पश्यन्ति' - इत्यन्येषां योजना।

**यदादित्यगतं तेजो जगद् भासयतेऽखिलम्।**
**यच्चन्द्रमसि यच्चाग्नौ तत् तेजो विद्धि मामकम्॥ १२॥**

**न निवर्तन्ते, यस्य च पदस्योपाधिभेदमनुविधीयमाना जीवाः घटाकाशादय इवाकाशस्यांशाः, तस्य पदस्य सर्वात्मत्वं सर्वव्यवहारास्पदत्वं च विवक्षुः चतुर्भिः श्लोकैर्विभूतिसङ्क्षेपमाह भगवान्**—यदिति। **यदा**दित्यगतम् **आदित्याश्रयम्। किं तत्?** तेजो **दीप्तिः प्रकाशो जगद्** भासयते **प्रकाशयति** अखिलं **समस्तम् , यच्च**न्द्रमसि **शशभृति तेजोऽवभासकं वर्तते, यच्चाग्नौ** हुतवहे **, तत् तेजो** विद्धि **विजानीहि** मामकं **मदीयं मम विष्णोस्तज्ज्योतिः। अथवा यदादित्यगतं** तेजः **चैतन्यात्मकं ज्योतिः, यच्चन्द्रमसि यच्चाग्नौ वर्तते, तत् तेजो विद्धि** मामकं **मदीयं मम विष्णोस्तज्ज्योतिः।**

**ननु स्थावरेषु जङ्गमेषु च तत् समानं चैतन्यात्मकं ज्योतिः, तत्र कथमिदं विशेषणं - यदादित्यगतमित्यादि। नैष दोषः, [१]सत्त्वाधिक्यादाविस्तरत्वोपपत्तेः। आदित्यादिषु हि सत्त्वमत्यन्तप्रकाशम् अत्यन्तभास्वरम् , अतस्तत्रैव**

आनन्दगिरिकृतव्याख्या

**नामवभासकत्वाच्च ब्रह्मणश्चिद्रूपत्वमित्याह—** यदादित्येति। **चिद्रूपस्यैव ब्रह्मणः सर्वात्मकत्वप्रतिपादकत्वेन श्लोकं व्याचष्टे—** यदित्यादिना। **आदित्यादौ तत्र तत्र स्थितं ब्रह्मचैतन्यज्योतिः सर्वावभासकमित्यर्थः। ब्रह्मणः सर्वज्ञत्वेन चिद्रूपत्वमत्र विवक्षितमिति व्याख्यान्तरमाह—** अथवेति।

**चैतन्यज्योतिषः सर्वत्राविशेषाद् आदित्यादिगतत्वविशेषणमयुक्तमिति शङ्कते—** नन्विति। **सर्वत्र सत्त्वेऽपि क्वचिदेवाभिव्यक्ति-विशेषाद् विशेषणमिति परिहरति—** नैष दोष इति। **तदेव प्रपञ्चयति—** आदित्यादिष्विति। **सर्वत्र चैतन्यज्योतिषस्तुल्यत्वेऽपि**

भाष्यार्कप्रकाशः

**विधीयमाना इति**। अन्तःकरणाद्युपाधिभेदमनुसृत्य भिन्ना इव प्रतीयमाना इत्यर्थः। मायया भिन्ना इव क्रियमाणा इति वा। सर्वस्यात्मा सर्वात्मा, तत्त्वं **सर्वात्मत्वम्। सर्वव्यवहारास्पदत्वं** सूर्यचन्द्रादिसर्वजगदधिष्ठानत्वमित्यर्थः। भासनधारणपचनादिसर्वव्यवहाराधिष्ठान-त्वमिति वा। तत् पदमेव सर्वस्यात्मेति, तस्मिन्नेव पदे सर्वं जगत् सर्वो व्यवहारश्च कल्पित इति विवक्षुरित्यर्थः। आदित्यगतं यत् तेजोऽखिलं जगद् भासयते, चन्द्रमसि वर्तमानं यत् तेजोऽखिलं जगद् भासयते, अग्नौ वर्तमानं यत् तेजोऽखिलं जगद् भासयते, तत् तेजो मामकं विद्धि। यद्वा आदित्यगतं यत् तेजोऽखिलं जगद् भासयते, चन्द्रमसि यत् तेजो वर्तते, अग्नौ च यत् तेजो वर्तते, तत् तेजो मामकं विद्धि। सूर्यचन्द्राग्निषु यस्तेजोरूपः प्रधानांशः स मदीय एवेत्यर्थः। मन्मायामयत्वात् तस्येति भावः। ममैव मायाशक्तिविशेषः सूर्यादिषु तेजोरूपेण स्थित्वा सर्वं जगदवभासयतीति परमार्थः।

**यद्वा** अहमेव मायया सूर्यादिषु तेजोरूपेण वर्तमानः सन् सर्वं जगदवभासयामीति। सर्वथाऽपि सूर्यादिगता या जगदवभासन-शक्तिः सा मदीयैव, न तु सूर्यादिसम्बन्धिनी। सर्वत्रापि शक्तेर्मत्स्वभावत्वान्ममैव शक्तिमदीश्वरत्वाच्च। ईश्वरात्सकाशात् सूर्यादीनां पृथक्करणे सति तेषां निस्तत्त्वत्वापत्तेश्च। न हि सूर्योऽस्ति सूर्यो भातीत्यत्र सूर्यात् सकाशादस्तिभात्योः पृथक्करणे सूर्यशब्दवाच्यं किमप्यवशिष्यते। तस्मात् सूर्यावच्छिन्नचैतन्यनिष्ठैव जगदवभासनशक्तिः शक्तेरीश्वरोपाधित्वात्। **एतेन** यत्र क्वापि वस्तुनि यत्कियती शक्तिरुपलभ्यते, सा सर्वाऽपि तत्तद्वस्त्ववच्छिन्नचैतन्यनिष्ठैवेति **सिद्धम्।**

ननु नीरूपस्येश्वरस्य कथं तेजोवत्त्वम्[२]? तेजो हि सरूपम् , अतः कथमुक्तं मदीयं तेज इति शङ्कायाम् , सत्यपि समाधाने मायया तेजोवत्त्वमित्येवमादिरूपे, निःशङ्कमर्थं दिदर्शयिषुराह—**अथवेति। विष्णोस्तज्ज्योतिरिति**। परमात्मनोंऽशभूतं चैतन्यमित्यर्थः।

**आविस्तरेति**। अतिशयेनाविर्भवतीत्याविस्तरं प्रकटतरमित्यर्थः। सत्त्वं गुणः। अत्यन्तं प्रकाशत इत्यत्यन्तप्रकाशम्।

---

१. 'सत्त्वाधिक्यादाधिक्योपपत्तेः' इति पा.। २. 'तसौ मत्वर्थे' इति सकारान्तस्य भसंज्ञाविधानात् तेजस्वत्त्वम् इति युक्तम्।

**आविस्तरं ज्योतिरिति तद् विशिष्यते, न तु तत्रैव तदधिकमिति। यथा हि लोके तुल्येऽपि मुखसंस्थाने न काष्ठकुड्यादौ मुखमाविर्भवति, आदर्शादौ तु स्वच्छे स्वच्छतरे च तारतम्येनाविर्भवति, तद्वत् ॥१२॥**

आनन्दगिरिकृतव्याख्या

**क्वचिदेवाभिव्यक्त्या विशेषणोपपत्तिं दृष्टान्तेन स्पष्टयति—** यथा हीति॥१२॥

भाष्यार्कप्रकाशः

तस्यैवार्थमाह— **अत्यन्तभास्वरमिति**। अत्यन्तप्रकाशनशीलमित्यर्थः, सत्त्वस्य प्रकाशात्मकत्वात्। **अत इति**। आदित्यादिषु सत्त्वाधिक्यादित्यर्थः। आदित्यादिषु सत्त्वस्यात्यन्तभास्वरत्वादिति वा। सर्वत्र भास्वरस्यापि सत्त्वस्यादित्यादिष्वत्यन्तभास्वरत्वं रजस्तमसोरत्यल्पत्वप्रयुक्तमित्यवगन्तव्यम्। श्रीकृष्णाद्यवतारेषु तु सूर्यादिभ्योऽपि सत्त्वाधिक्यमिति बोध्यम्। **तत्रैवेति**। सूर्यादिष्वेवेत्यर्थः। तज्ज्योतिरित्यर्थः। **विशिष्यते** उत्कृष्टतया प्रतिपाद्यत इत्यर्थः। आदित्यादिषु चैतन्यस्य सत्त्वाधिक्यप्रयुक्तं प्रकटतरत्वमेव, न तु स्वरूपत आधिक्यमित्याह— **न त्विति**। **तत्रैव** सूर्यादिष्वेवेत्यर्थः। न तु स्थावरादिष्वित्येवकारार्थः। चेतनाचेतनेषु सर्वेष्वपि चैतन्यमेकरूपमेव, निर्विशेषचैतन्ये न्यूनाधिकभावायोगात्। किन्तु यत्र चेतनेषु त्रिगुणात्मिका बुद्धिरस्ति, तत्र चैतन्यं स्फुटं भाति। तन्मध्येऽपि यत्रादित्यादिषु सत्त्वगुणप्रचुरा बुद्धिस्तत्र चैतन्यं स्फुटतरमवभासते। यत्र च श्रीकृष्णादिषु शुद्धसत्त्वप्रधाना बुद्धिरस्ति, तत्र चैतन्यं स्फुटतममवभासते। तथा च मनुष्याद्यपेक्षया सूर्यादिगतचैतन्यस्य स्फुटतरत्वाद् 'यदादित्यगतं तेजः' इत्याद्युक्तमित्यर्थः।

उक्तार्थे दृष्टान्तमाह— **यथा हीत्यादिना**। **मुखसंस्थाने** मुखाकारे। स्वच्छे आदर्शे, स्वच्छतरे मणौ, च मुखं तारतम्येनाविर्भवति, प्रतिफलतीति यावत्। [1]काष्ठादर्शदर्पणेषु यथा मुखं क्रमेण - न प्रतिफलति, प्रतिफलति, अतिशयेन प्रतिफलति, तथा मृत्पाषाणादिषु , स्थावरजङ्गमादिषु आदित्यादिषु च चैतन्यं न प्रतिफलति, प्रतिफलति, अतिशयेन प्रतिफलति चेत्यर्थः। न चैवम् अचेतनेषु चैतन्यप्रतिफलनाभावात् काष्ठेषु मुखमिव तत्र चैतन्यं नास्तीति वाच्यम् ; चैतन्यप्रतिफलनस्यैवाभावः, न तु चैतन्यस्येति। न हि मुखमिव चैतन्यं परिच्छिन्नम् , येन काष्ठादौ मुखमिव, चैतन्यं मृदादौ न स्यात्। अपरिच्छिन्नं परिपूर्णं हि चैतन्यम्। न च प्रतिफलनात् प्रागपि चेतनेषु चैतन्यसत्त्वे कथं पुनः प्रतिफलनमिति वाच्यम् ; मायया प्रतिफलनसम्भवात्। यथा नीरूपस्यापि चैतन्यस्य प्रतिफलनसम्भवः। तस्मात् सूर्यादिदेवेषु सत्त्वाधिक्याच्चैतन्यस्य स्फुटतरमवभासः। चैतन्यस्यावभासनं नाम प्रतिफलनमेव। एवं स्फुटतरचैतन्यावभासवत्त्वादेव सूर्यादिदेवानां सर्वजगदवभासकत्वरूपं सर्वज्ञत्वं च शास्त्रोक्तं सङ्गच्छते। परमेश्वरापेक्षया सूर्यादीनामल्पज्ञत्वेऽप्यस्मदाद्यपेक्षया सर्वज्ञा हि ते। कथमन्यथा सूर्याद्युपास्तिः श्रुतिभिरुच्येत? इति।

**यद्वा** आदित्यादिदेवानामन्तःकरणेषु प्रतिफलितं यत् तेजश्चैतन्यं वर्तते, तद् मामकमेव। 'आनन्दं ब्रह्मण' इतिवद् 'राहोः शिर' इतिवच्चाभेदेऽपि भेदेन निर्देशो 'मम चैतन्य'मिति। बिम्बभूतमीश्वरचैतन्यमादित्याद्यन्तःकरणेषु प्रतिबिम्बरूपेण वर्तत इत्यर्थः। अयं च चेतनप्रतिबिम्बो न मृदादिष्वस्ति। अन्तःकरणोपाध्यभावात् तत्र। एवं चैतन्यप्रतिबिम्बसत्त्वासत्त्वप्रयुक्तैव चेतनाचेतनभिदा। न तु कूटस्थचैतन्यकृता, तस्य सर्वव्यापित्वात्। ननु माऽस्तु नाम मृदादौ चैतन्यप्रतिबिम्बः, स्थावरपश्वादिष्वस्त्येवेति कथम् आदित्यगतमित्याद्युक्तमित्याक्षिपति— **ननु स्थावरेष्वित्यादिना**। अन्यत् सर्वं समानम्।

**नन्वेवं** प्रतिबिम्बजीवपक्षे उपाधिप्रयुक्तप्रतिफलनतारतम्यादादित्यादीनामस्तूत्कर्षः, कथं पुनरवच्छेदपक्षे उपपत्तिरिति चेत् , **उच्यते**— उपाधिधर्माः सुखादयो यथोपहितेऽध्यस्यन्ते मायया, यथा च ब्रह्मेन्द्रदेवाद्यन्तःकरणगतसत्त्वशुद्धितारतम्यप्रयुक्तमानन्दतारतम्यमप्युपहिते माययाऽध्यस्यते 'स एको मानुष आनन्दः' इत्यादिश्रुत्या, तथा आदित्यादिदेवान्तःकरणगतसत्त्वशुद्धिविशेषप्रयुक्तज्ञानाधिक्यमप्युपहिते चैतन्ये माययाऽध्यस्यत इति आदित्यादीनां सत्त्वादिगुणोत्कर्षप्रयुक्तं वृत्तिज्ञानाधिक्यमेव तत्सर्वज्ञत्वप्रयोजकं, न तु चैतन्याधिक्यम् , निर्विशेषत्वाच्चैतन्यस्येति भाव इति।

१. अत्र आदर्शदर्पणयोः स्वच्छस्वच्छतरत्वाभ्यां भेदो विवक्षितः।

## गामाविश्य च भूतानि धारयाम्यहमोजसा।
## पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः॥ १३॥

**किञ्च—** गामिति। गां **पृथिवीम्** आविश्य **प्रविश्य धारयामि** भूतानि **जगद् अहम्** ओजसा **बलेन, यद् बलं कामरागविवर्जितमैश्वरं रूपं जगद्विधारणाय पृथिव्यां प्रविष्टम्, येन गुर्वी पृथिवी नाधः पतति, न विदीर्यते च। तथा च मन्त्रवर्णः 'येन द्यौरुग्रा पृथिवी च [१]दृढा' (ऋ.सं.१०.१२१.५) इति, 'स दाधार पृथिवीम्' (तै.सं.४.१.८) इत्यादिश्च।**

आनन्दगिरिकृतव्याख्या

**इतश्च सर्वात्मत्वं प्रकृतपदस्य युक्तमित्याह—** किञ्चेति। **ईश्वरो हि पृथिवीदेवतारूपेण पृथिवीं प्रविश्य भूतशब्दितं जगदैश्वरेणैव बलेन बिभर्ति। ततो गुर्व्यपि पृथिवी विदीर्य नाधो निपततीत्यत्र प्रमाणमाह—** तथा चेति। **[२]परस्यैव हिरण्यगर्भात्मनाऽवस्थानान्न मन्त्रयोरन्यपरतेति भावः। देवतात्मना द्यावापृथिव्योरुग्रत्वमुद्धरणसामर्थ्यं तथापीश्वरायत्तमेव स्वरूपधारणं तदपेक्षया दुर्बलत्वादिति**

भाष्यार्कप्रकाशः

**रामानुजस्तु** मामकं तेजो मया तेभ्यो दत्तमित्याह। **तन्मन्दम्**; ममेदं मामकमिति व्युत्पत्तिस्वारस्यभङ्गात्। न ह्यन्यस्मै दत्तां गां कोऽपि मामिकेयं गौरिति ब्रूते। स्वत्वनिवृत्तिपूर्वकपरकीयत्वानुकूलव्यापारो हि दानम्। ततश्च दत्ते वस्तुनि कथमीश्वरस्य स्वत्वम्? येन ममेदं तेज इति ब्रूयात्। न च भूतपूर्वगत्या मामकमित्युक्तमिति वाच्यम्; पूर्वं मामकमिति साक्षादेव तत्कथनस्य न्याय्यत्वात्। 'तत्पूर्वं विद्धि मामक'मिति हि श्लोकः कर्तुं शक्यते। किञ्च सूर्यादिभ्यस्तेजोदानात् प्राक् किमयमीश्वरस्तेजस्वी, उत न? आद्ये, 'अशब्दमस्पर्शमरूपमव्यय'मिति श्रुतिविरोधः। द्वितीये, स्वस्यैव तेजोऽभावे कथमन्यस्मै प्रदानं तस्य सम्भवति? किञ्च भगवतः सकाशात् तेजसः प्राप्तेः प्राक् किं सूर्यादयस्तेजोमया उत जलमयाः, अथवा पृथिवीमयाः, यद्वा वायुमयाः, उत स्विदाकाशमयाः? नाद्यः, तेजसः प्राप्तेः प्राक् तेजोमयत्वायोगात्। न द्वितीयतृतीयौ, प्रमाणाभावात्। न चतुर्थपञ्चमौ, नीरूपत्वप्रसङ्गात्। यद्यपि चन्द्रस्य जलमयत्वं वक्तुं शक्येत। सूर्याग्न्योस्तु न तद् वक्तुं शक्यमिति बोध्यम्। अपि च यदि सूर्यादीनां प्रकाशः स्वाभाविकधर्मो न स्यात् तर्हि कदाचिदप्रकाशः स्यादेव तेषाम्। संयोगस्य वियोगान्तत्वेन संयुक्तधर्मस्य विनाशसम्भवात्। न हि प्रकाशात्मकानां सूर्यादीनां स्वरूपनाशं विना प्रकाशनाशः सम्भवति। मेघाद्यावरणात्तु अस्माकमेव सूर्यादिप्रकाशादर्शनम्, न तु तेषां प्रकाशनाशः। तस्मात् प्रकाशात्मका एव सूर्यादयो भगवता सृष्टाः मायया। न तु सूर्यादीन् सृष्ट्वा पश्चात् तेभ्योऽदिशत् तेजः। यथा रसगन्धाद्यात्मक-जलपृथिव्यादयः इति स्थितम्॥ १२॥

**गामिति**। अहं गामाविश्य च ओजसा भूतानि धारयामि। अहं रसात्मकः सोमो भूत्वा सर्वाश्चौषधीः पुष्णामि। अहमोजसा गामाविश्य च भूतानि धारयामीति वा। चैतन्यरूपेण सर्वत्र सममवस्थितोऽपीश्वरः तत्तद्विशिष्टशक्तिमत्त्वेन रूपेण पुनः प्रविष्ट इव। तत आह— **गामाविश्येति**। ओजसा रूपेण गामाविश्येत्यन्वये तु न काऽप्यनुपपत्तिः। किं तदोजः? अत आह— **यद्बलमिति**। 'बलं बलवतामस्मि कामरागविवर्जित'मिति पूर्वमुक्तत्वादिति भावः। **ऐश्वरं रूपमिति**। ईश्वरीयमायाशक्तिविशेष इत्यर्थः। न हि सच्चिदानन्दस्येश्वरस्य बलं रूपं भवितुमर्हतीति भावः। **येनेति**। बलेनेत्यर्थः। **अध इति**। समुद्रजल इति भावः। विदीर्यते भिद्यते। येनैश्वरबलरूपेण द्यौरुग्रा पृथिवी च द्वे दृढे भवत इति शेषः। दार्ढ्यं च जगद्धारणसामर्थ्यमविदीर्यमाणत्वं च। स पृथिवीमिमां **द्यामुत** द्यां च **दाधार** दधार, दीर्घश्छान्दसः। स ईश्वर इत्यर्थः। **अत इति**। ईश्वरानुप्रवेशेनैव पृथिव्या जगद्धारणादिशक्तिमत्त्वादिति भावः। **धारयामि** धरामीत्यर्थः। पृथिव्या धारयामीति वा। **एतेन** पृथिवीनिष्ठत्वेन दृश्यमाना सर्वजगद्धारणशक्तिरीश्वरशक्तिरेवेति **सिद्धम्**। अहमेव बलस्वरूपेण पृथिव्यां वर्तमानः सन् जगदिदं सर्वं धारयामीति परमार्थः। अनेन च पृथिव्यां बलमहमस्मीति प्रतिपादनेन सर्वेषु वस्तुषु दृश्यमानं यत्किञ्चिद् बलमप्यहमेवेति सिद्धं भवति।

१. 'दृढे' इति रा.पा.। स च तैत्तिरीयपाठानुसारी (तै.सं.४.१.८)। २. परमात्मनि प्रकृते हिरण्यगर्भसूक्तगतमन्त्रोदाहरणमसंगतमित्याशङ्क्याह— परस्येति।

**अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।**
**प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्॥ १४॥**

**अतो गामाविश्य च भूतानि चराचराणि धारयामीति युक्तमुक्तम्। किञ्च पृथिव्यां जाताः** ओषधीः **सर्वाः व्रीहियवाद्याः** पुष्णामि **पुष्टिमतीः रसस्वादुमतीश्च करोमि** सोमो भूत्वा रसात्मकः [1]**सोमः सर्वरसात्मको रसस्वभावः। सर्वरसानामाकरः सोमः। स हि सर्वाः ओषधीः** [2]**स्वात्मरसानुप्रवेशेन पुष्णाति॥ १३॥**

**किञ्च—** अहमिति। **अहमेव** वैश्वानरः **उदरस्थोऽग्निः भूत्वा 'अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते' (बृ.उ.५.९.१) इत्यादिश्रुतेः, वैश्वानरःसन्** प्राणिनां **प्राणवतां देहम्** आश्रितः **प्रविष्टः** प्राणापानसमायुक्तः

आनन्दगिरिकृतव्याख्या

**द्रष्टव्यम्। ईश्वरस्य सर्वात्मत्वे हेत्वन्तरमाह—** किञ्चेति। **रसात्मकसोमरूपतापत्तावपि कथमोषधीरीश्वरः सर्वाः पुष्णातीत्याशङ्क्याह—** सर्वेति॥ १३॥

**भगवतः सर्वात्मत्वे हेत्वन्तरमाह—** किञ्चेति। **अहमेवेत्यहंशब्देन परो लक्ष्यते।** भूत्वा **पचामीति सम्बन्धः। परस्यैव जाठरात्मना स्थितौ श्रुतिं प्रमाणयति—** अयमिति। **बाह्यं** [3]**भौममग्निं व्यावर्तयति—** योऽयमिति। [4]**देहान्तरारम्भकं तृतीयं भूतं व्यवच्छिनत्ति—** येनेति। **जाठरात्मना परः स्थितश्चेत् तस्य देहाश्रितत्वं सिद्धमिति न पृथग् वक्तव्यमित्याशङ्क्य 'पुरुषविधं पुरुषेऽन्तः**

भाष्यार्कप्रकाशः

**रसेति**। यो जलस्य गुणः स रसः। चन्द्रस्य च जलमयत्वाद् रसस्वभावत्वम्। **सर्वरसानामिति**। सर्वेषां व्रीह्यादिगतानां रसानामाकरो निलयः। रसस्यैकत्वेऽप्युपाधिनानात्वात् सर्वरसेत्युक्तिः। **स्वात्मरसानिति**। स्वगतं रसमित्यर्थः। यद्यपि जलगतरसेनैव वर्धन्ते व्रीह्यादयः, फलन्ति च। तथापि चन्द्र एव तत्पोषकः, ओषधीशत्त्वात् तस्य। चन्द्रकरसम्पर्कद्वारा तद्गतं रसं पीत्वा हि सर्वा ओषधयः परिपुष्टा रसवत्यश्च भवन्ति। न हि चन्द्रकरसम्पर्करहितो व्रीह्यादिर्गृहे जलेन सिक्तोऽपि वर्धते, फलति वा। तस्मात् सोमगता सर्वौषधिपोषणशक्तिरीश्वरशक्तिरेव। ईश्वर एव सोमे रसस्वरूपेण वर्तमानः सन् पुष्णात्योषधीरिति च सिद्धम्।

**एतेन** जलादिगतो रसोऽपीश्वरात्मक एवेति **सूच्यते**। एवं श्लोकद्वयेन तेजोबलरसानां त्रयाणामीश्वरविभूतित्वमिति फलितम्। सोमो भूत्वेत्यनेन तु न केवलं रस एवेश्वरः, किन्तु तदाश्रयः सोमोऽपीश्वर एवेति प्रतिपाद्यते। अनेनैव न्यायेन सूर्याग्निभूमीनामपीश्वरविभूतित्वं गम्यते। ततश्च सूर्यादयः तद्गततेजआदयः, तद्गतभासकत्वादयश्चेत्येतत् सर्वमपीश्वरविभूतिरेव, कल्पितत्वान्मायया सर्वस्यास्येश्वरे इति फलति॥ १३॥

**अहमिति**। अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितःसन् प्राणापानसमायुक्तश्च सन् चतुर्विधमन्नं पचामि। न केवलं बाह्याग्निरेवाहम् , किन्तु जाठराग्निरप्यहमेवेत्याह— **अहमिति**। यद्वा बाह्याग्निगतसर्वावभासकत्वशक्तिरेव नास्मदीया, किन्तु जाठराग्निगतान्नपचनशक्तिरप्यस्मदीयैवेत्याह— **अहमिति**। जाठराग्नेर्वैश्वानरत्वे प्रमाणमाह— **अयमिति**। **अन्तःपुरुषे** शरीरमध्ये योऽयमग्निरस्ति, सोऽयं वैश्वानर इत्युच्यते। येनान्तःस्थाग्निनेदं भुक्तमन्नं पच्यते। बाह्याग्निस्तण्डुलानामेव पचने प्रभवति, न तु भुक्तस्यान्नस्य, बाह्याग्निसंयोगाभावात् तस्य। अपक्वस्य त्वन्नस्य रक्तादिरूपेण परिणामो न सम्भवति। तस्माद् भुक्तान्नपरिणामहेतुरस्ति जठरे कश्चिदग्निर्वैश्वानर इति। मृतशरीरे जठराग्न्यभावादाह— **प्राणिनामिति**। अन्तःकरणादेर्जठराग्न्याश्रयत्वाभावादाह— **देहमिति**। स्थूलशरीरमित्यर्थः। **प्रविष्ट इति**। देहान्तःस्थत्वरूपमाश्रयत्वमिहोक्तम् , न तु देहाद् बहिः [5]पटादिवद् वर्तमानत्वरूपमिति भावः। बाह्यो ऽप्यग्निर्वातसंयुक्त एव ज्वलतीत्यत आह— **प्राणापानसमायुक्त इति**। यद्यपि प्राण एव जठराग्निवर्धकः, तथाप्यपानेन मलानिःसारणे

१. 'सोमः सन् रसात्मको' इति पा.। २. 'स्वात्मरसाननुप्रवेशयन्' इति रा.पा.। ३. पार्थिवेन काष्ठादिनेन्धनेन दीप्यमानत्वात् बाह्याग्नेः भौमत्वम्। ४. पाञ्चभौतिकत्वाद् देहस्य तदारम्भकत्वेनान्तरं तेज इत्यर्थः। ५. देहावरणवस्त्रादिवदित्यर्थः।

## सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च।

**प्राणापानाभ्यां** समायुक्तः **संयुक्तः** पचामि **पक्तिं करोमि,** अन्नम् **अशनं** चतुर्विधं **चतुष्प्रकारम्— भोज्यं, भक्ष्यं, चोष्यं, लेह्यं च। भोक्ता वैश्वानरोऽग्निः, भोज्यमन्नं सोमः, तदेतदुभयमग्नीषोमौ सर्वमिति पश्यतोऽन्नदोषलेपो न भवति॥ १४॥**

**किञ्च—** सर्वस्येति। सर्वस्य **च प्राणिजातस्य अहमात्मा सन्** हृदि **बुद्धौ सन्निविष्टः, अतो** मत्तः **आत्मनः**

आनन्दगिरिकृतव्याख्या

**प्रतिष्ठितं वेद' इति श्रुतिमाश्रित्याह—** प्रविष्ट इति। **परस्य जाठरात्मनोऽन्नपाके सहकारिकारणमाह—** प्राणेति। संयुक्तत्वं **सन्धुक्षितत्वम्। अन्नस्य चातुर्विध्यं प्रकटयति—** भोज्यमिति। **भोक्तरि वैश्वानरदृष्टिर्भोज्ये सोमदृष्टिरेवं भोक्तृभोज्यरूपं सर्वं जगदग्नीषोमात्मना भुक्तिकाले ध्यायतो भोक्तुरन्नकृतो दोषो नेति प्रासङ्गिकं सफलं ध्यानं दर्शयति—** भोक्तेति॥ १४॥

**इतश्च सर्वात्मत्वेन सर्वव्यवहारास्पदत्वमीश्वरस्येत्याह—** किञ्चेति। प्राणिजातं **ब्रह्मादिपुत्तिकान्तम्। आत्मतया बुद्धौ सन्निविष्टत्वं तद्गुणदोषाणामशेषेन द्रष्टृत्वम्।** अतो **बुद्धिमध्यस्थस्य गुणदोषद्रष्टृत्वादिति यावत्।** मत्तः **सर्वकर्माध्यक्षाज्जगद्यन्त्र-**

भाष्यार्कप्रकाशः

सति न हि प्राणोऽग्निं ज्वलयितुमीष्ट इत्यत उक्तम्— **प्राणापानसमायुक्त इति। पक्तिं** पाकं, परिणामं रक्ताद्यात्मनेति यावत्। **भोज्यं** प्रधानमन्नं शाल्यादि। **भक्ष्यं** माषवटकादि। **चोष्यम्** इक्षुखण्डादि। **लेह्यं** पायसादि। चतस्रो **विधाः** रीतयो यस्य तच्चतुर्विधम्। **एतेन** जठराग्नेस्तद्गतपचनशक्तेश्चेश्वरविभूतित्वं **सिद्धम्।** एवं तेजोऽबन्नात्मिकायाः अवान्तरप्रकृतेरीश्वरविभूतित्वमिति फलितम्। सूर्यादेः सोमस्य पृथिव्याश्चेश्वरविभूतित्वस्योक्तत्वात्।([1]अन्नं पृथिवी) ततश्च त्रिवृत्कृततेजआदिभूतत्रयकार्यस्य सर्वस्यापि जगतो भगवद्विभूतित्वं फलति।

प्रसङ्गादत्र विशेषमाह— **भोक्तेति। उभयम्** अग्न्यन्नद्वयम् अग्नीषोमावित्युच्यते। 'ईदग्नेः सोमवरुणयोः' इति ईत्वम्। इदमुभयं सर्वमिति पश्यतः पुरुषस्य अन्नदोषलेपोऽन्नदोषसम्बन्धो न भवति। अन्नस्य हि पाकादिसामयिकक्रिमिकीटादिनाशप्रयुक्ताः कुट्टनीपेषण्यादयो दोषाः सन्ति, यन्निरसनाय हि वैश्वदेवो विहितः। तद्दोषसम्बन्धस्तु वैश्वदेवविहीनस्यापि दर्शितज्ञानवतो न भवति।

**ननु** कुतो न भवति 'इदमन्नं सोमः, अयमग्निर्भोक्ता वैश्वानरः' इति ज्ञानमात्रेण? इति चेत् , **उच्यते**— यो ह्यन्नमत्ति, तस्यान्नदोषो भवति, न त्वनश्नतः, अन्यथाऽतिप्रसङ्गात्। न हि चैत्रभुक्तान्नगतगुणदोषप्रसक्तिर्मैत्रस्य। अन्यथा चैत्रे भुक्तवति सति अभुक्तवतोऽपि मैत्रस्य क्षुन्निवृत्तिः स्यात्। एवं सति 'योऽन्नमत्ति सः वैश्वानरोऽग्निरेव, न त्वहम् , ममाभोक्तृत्वादि'ति यो वेत्ति कथं तस्यान्नदोषलेपो भवितुमर्हति? न कथमपि। **किञ्च** योऽस्मद्देहेऽन्नमत्ति सोऽग्निः साक्षाद्भगवद्रूपो वैश्वानर एव। यच्चेदमन्नं तच्च साक्षाद्भगवद्रूपः सोम एव, 'सोमो भूत्वे'ति, 'वैश्वानरो भूत्वे'ति च सोमवैश्वानरयोर्भगवद्रूपत्वप्रतिपादनादिति - यो जानाति, कथं तस्यान्नदोषगन्धसम्बन्धः? न कथमपि। अन्नस्य भगवदात्मकत्वानुसन्धानेन सर्वदोषप्रहाणात्।

**नन्वन्नस्य** कथं सोमत्वम् , व्रीह्यादिपोषको हि सोम इति चेत्? **उच्यते**— सोमपुष्टव्रीह्यादिमयत्वादन्नस्य सोमत्वम् , सोमरस-मयत्वाद्वा, सोमदेवताकत्वादिति वा। एवमग्नीषोमदर्शनस्यान्नदोषनाशकत्वादेव तत्प्रतिपादकोऽयं श्लोकः परिषेचनकाले स्मार्तैः पठ्यते ॥ १४॥

**सर्वस्येति।** अहं सर्वस्य हृदि सन्निविष्टश्च। मत्तः सर्व(ज्ञ)स्य स्मृतिर्ज्ञानमपोहनं च भवति। अहमेव सर्वैर्वेदैश्च वेद्यः। अहमेव वेदान्तकृत्। अहमेव वेदविच्च भवामीति शेषः। **सन्निविष्टः** सम्यङ्निविष्टः प्रविष्टः, प्रविश्य स्थितः इति यावत्। ननु सर्वव्यापिनश्चैतन्य-रूपेश्वरस्य कः पुनरपरः प्रवेशः इत्यत आह— **आत्मा सन्निति।** आत्मरूपेणेत्यर्थः। 'अनेन जीवेनात्मनाऽनुप्रविश्य' इति श्रुतेरिति भावः। शुद्धचैतन्यात्मना सर्वत्रावस्थितोऽपीश्वरः अन्तःकरणावच्छिन्नचैतन्यरूपेण प्रतिबिम्बरूपेण वा प्राणिनां बुद्धौ प्रविष्ट इति

१. टिप्पणीरूपः अयं पाठ इति भाति।

तत्त्वम्। **एतेनेश्वरादर्थान्तरं जीव इति परास्तम्।** न चान्तर्यामिरूपेणेश्वरो जीवस्य बुद्धौ प्रविष्ट इति जीवादर्थान्तरमेवेश्वर इति वाच्यम् ; हृदि प्रविष्टस्य जीवान्येश्वरस्यानुपलम्भात्। न च नियमनादिभिर्लिङ्गैरनुमेय इति वाच्यम् ; प्रतीच एव नियमनादिसम्भवात्। न च स्वयमेव स्वस्य कथं नियामक इति वाच्यम् ; प्रत्यगात्मनः प्रमातृनियमनसम्भव इत्यदोषात्। न च प्रत्यगात्मैव प्रमातेति वाच्यम् ; अन्तःकरणोपहितस्य प्रत्यगात्मत्वम् , तदवच्छिन्नस्य (तद्विशिष्टस्य) चैतन्यस्य प्रमातृत्वमिति कल्पितभेदसत्त्वात्। न च विशेष्य-चैतन्यांशेऽभेद एवेति वाच्यम् ; तत्र नियमनादेरप्यभावात्। न च प्रत्यगात्मैवान्तर्यामीश्वरो जीवाद्भिन्न इति वाच्यम् ; जीवस्यैव स्वस्वरूपत्वात् प्रत्यगात्मनः। न च 'गुहां प्रविष्टौ परमे परार्ध्ये' इति, 'द्वा सुपर्णा'विति, 'ज्ञाज्ञौ द्वावजा'विति च श्रुतयो जीवेश्वरयोर्द्वयोर्गुहाहितत्वं ब्रुवन्तीति वाच्यम् ; एकस्यैव चैतन्यस्यान्तःकरणे उपहितत्वरूपेण विशिष्टत्वरूपेण द्वेधा प्रवेशः; अथवा बिम्बत्वरूपेण प्रतिबिम्बत्वरूपेण द्वेधा प्रवेश इति विवक्षितत्वात्। न च केनचित् स्वस्मादन्येनेश्वरेण प्रयुक्त इव जीवोऽनुभवति संसारमिति वाच्यम् ; अविद्यावस्थायां जीवो नात्मानं प्रत्यञ्चं मन्यते। असंसारी हि प्रत्यगात्मा क्षेत्रज्ञः, किन्तु संसारिणं प्रमातारमेव मन्यते। ततश्च साक्षिणा स्वेनैव प्रत्यगात्मना नियमितोऽपि परेण नियमितोऽहमिति प्रत्येति। स्वयमपि प्रत्यगात्मा हि जीवस्याज्ञानतः परोक्षकल्पतयाऽवतिष्ठते। अत एव स्वात्मभूतमपि प्रत्यञ्चं परोक्षेश्वरं मन्यन्ते मूढाः, द्वैतिनश्च तार्किकादयः। तस्मात् प्रत्यगात्मनः क्षेत्रज्ञादर्थान्तरं न भवत्यन्तर्यामीश्वरः, यमन्तर्यामिब्राह्मणादयः प्रतिपादयन्ति।

इयं जीवरूपा प्रकृतिरीश्वरस्य परा विभूतिः। क्षेत्रलक्षणा अपरा विभूतिस्तु पूर्वश्लोकत्रयेण प्रतिपादिता। न च कथमीश्वरस्यैव सतो जीवस्य (कथम्) ईश्वरविभूतित्वमिति वाच्यम् ; अन्तःकरणाद्युपाधिप्रयुक्तत्वाज्जीवस्येश्वरविभूतित्वव्यवहारस्य। निरुपाधिकचैत-न्यस्य हि सोपाधिकचैतन्यं विभूतिः। विशेष्यांशस्याविभूतित्वेऽपि विशेषणांशस्योपाधेर्विभूतित्वेन विशिष्टस्यापि विभूतित्वव्यवहारात्। न च 'यदादित्यगत'मिति श्लोकेनैव जीवविभूतिरुक्तेति वाच्यम् ; तत्रादित्यादित्रयगतस्यैव जीवचैतन्यस्य विभूतित्वेन प्रतिपादनम् , इह तु सर्वगतस्येति भेदात्। यथा 'आदित्यानामहं विष्णु'रित्यादिकं प्रतिपाद्य विशेषतः, अन्ते 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगद्' इति सामान्यतः प्रतिपादितम् , तद्वदिति। अथवा आदित्यगतप्रमातृचैतन्यस्य भगवद्विभूतित्वं पूर्वमुक्तम् , इदानीं तु साक्षिचैतन्यस्येति भेदः। न च साक्षिचैतन्यं शुद्धमेवेति कथं विभूतित्वं तस्येति वाच्यम् ; शुद्धचैतन्ये साक्षित्वधर्मायोगात् साक्षिचैतन्यं सोपाधिकमेव। अन्तःकरणोपहितं हि चैतन्यं साक्षीत्युच्यते। तस्मादीश्वरादनर्थान्तरमपि साक्षी प्रत्यगात्मा क्षेत्रज्ञो जीव ईश्वरस्य निरुपाधिकचैतन्यस्य विभूतिभूत एव।

**अत इति।** बुद्धौ मम सन्निविष्टत्वादेवेत्यर्थः। **मत्त इति।** अस्मच्छब्दलक्ष्यार्थभूतादात्मन इत्यर्थः। अथवा प्रत्यग्रूपेणावस्थितात् परमेश्वरान्मत्तः इत्यर्थः। **स्मृतिरनुभूतार्थस्मरणम् , ज्ञानमनुभवः, अपोहनं** तदुभयस्य नाशः- एतत् त्रयं भवति। तथाहि— यः पूर्वेद्युः घटमनुभूतवान् प्रमाता स तन्निशि ब्रह्मणि सम्पन्नत्वान्नष्ट एव , 'प्राज्ञेनात्मना सम्परिष्वज्ये'ति, 'सति सम्पत्स्यते' इति च श्रुतेः। प्रमाता हि सुप्तावन्तःकरणतादात्म्याध्यासं विहाय कूटस्थात्मनाऽवतिष्ठते। अतस्तदा चैतन्यस्य प्रमातृत्वनाशात् प्रमाता नष्ट एव। सुप्त्यनन्तरं ब्रह्मणः सकाशादज्ञानकर्मवशात् पुनरुत्थितः परेद्युः प्रमाता तु पूर्वस्मात् प्रमातुरन्य एवेति कथं तस्य पूर्वदिनानुभूतघटस्मरणं सम्भवेत् साक्ष्यनुग्रहं विना? न कथमपि। न चैवं प्रतिसुषुप्ति प्रमातृनाशे प्रतिजागरं प्रमात्रन्तरोदये च कृतहानाकृताभ्यागमदोषप्रसङ्ग इति वाच्यम् ; प्रमातृनाशेऽप्युपाध्यनाशात् , उपाध्याश्रयत्वाच्च कर्मणः। न चान्तःकरणं नश्यत्येवेति वाच्यम् ; अविद्यायाः कारणशरीरस्य तूलाज्ञानस्योपाधेरनाशात् , तन्नाशस्यैव मोक्षत्वात् , तत्सत्त्वादेव पुनरावृत्तिप्रसङ्गात्। न चोपाध्यनाशे कथमुपहितनाश इति वाच्यम् ; प्रमात्रुपाधेरन्तःकरणस्य नाशेन प्रमातृनाशात्। अविद्या हि प्राज्ञस्योपाधिः। न च प्रमातुर्नष्टस्य दीपस्येव निर्वाणस्य कथं पुनरावृत्तिरिति वाच्यम् ; यदन्तःकरणावच्छिन्नः पूर्वः प्रमाता तदन्तःकरणावच्छिन्न एवायमुत्तरः प्रमातेति प्रमात्रभेदेन पुनरावृत्ति-सम्भवात्।

**अथवा** अज्ञाने निलीय वर्तमानस्यान्तःकरणस्य ततः पुनरागमनात् [तत्-]तादात्म्याध्यासमापन्नः प्रमाताऽपि पुनरागत इत्युच्यते। न चैवं प्रमाताऽपि निलीय वर्तत एव सुषुप्तौ, न नष्ट इति वाच्यम् ; तस्यैव निलयनस्य नाशत्वेनास्माभिर्विवक्षितत्वात्। यद्वा

**सर्वप्राणिनां स्मृतिः, ज्ञानं, तदपोहनं च[1]। येषां [2]पुण्यकर्मणां पुण्यकर्मानुरोधेन ज्ञानस्मृती भवतस्तथा [3]पापकर्मणां**

आनन्दगिरिकृतव्याख्या

**सूत्रधारादित्यर्थः। प्राणिनां स्मृतिज्ञानयोस्तदपायस्य च भगवदधीनत्वे भगवतो वैषम्यं स्यादित्याशङ्क्याह—** येषामिति।

भाष्यार्कप्रकाशः

अन्तःकरणमज्ञाने संस्काररूपेण वर्तते, इदमेव निलीय वर्तनमन्तःकरणस्य। स च संस्कारोऽन्तःकरणमिव न प्रमातृत्वमावहति कूटस्थस्येति न सुषुप्तौ प्रमातृसद्भावः। यदि सुषुप्तौ संसारः स्यात् तर्हि संसारी प्रमाताऽपि स्यात्। न तु तथा दृश्यते। तस्मात् सुषुप्तौ प्रमाता नष्ट एव। कूटस्थात्मना तु तस्य नित्यत्वप्रतिपादनम्। एवं सति योऽहं पूर्वेद्युर्घटमद्राक्षं सोऽहमिदानीं स्मरामीति स्मरणं प्रमातुः स्मर्तुरनुभवितृन्यस्य कथं सम्भवेत्? न हि चैत्रानुभूतोऽर्थो मैत्रेण स्मर्यते, अनुभवजन्यसंस्कारकार्यत्वात् स्मरणस्य। तच्च स्मरणमनुभवसिद्धं दुरपलापमिति कूटस्थानुग्रहकृतमेव स्मरणम्। कूटस्थ एव पूर्वदिनावस्थितप्रमातृरूपेण घटमनुभूतमुत्तरदिनावस्थितप्रमातृरूपेण स्मरति, यथा प्रमाता चक्षुषा दृष्टं करेण स्पृशति, तद्वदिति भावः।

**अपिच** साक्षिणाऽनुभूतस्य सुषुप्तिगतस्यानन्दस्याज्ञानस्य च प्रबोधे प्रमात्रा स्मरणं दृश्यते— सुखमहमस्वाप्सम् , न किञ्चिद्वेदिषमिति। तद्धि स्मरणं साक्ष्यनुग्रहादेवेति स्फुटम्। तथाऽनुभवश्च साक्षिणः सकाशादेव भवति। साक्षिचैतन्यप्रतिफलनप्रयुक्तत्वाद् वृत्तिज्ञानस्य। प्रमातृभावमापन्नं हि साक्षिचैतन्यं विषयावच्छिन्नब्रह्मचैतन्याभिन्नं सदनुभव इत्युच्यते। अत एव हि 'तस्य भासा सर्वमिदं विभाति' इति श्रुतिरुपपद्यते। तस्य साक्षिणो भासा स्वरूपचैतन्येन सर्वमिदं जगद् विभातीति श्रुत्यर्थः। साक्षिणोऽन्यस्य सर्वस्य जडत्वात् साक्ष्यनुग्रहादेवान्तःकरणस्य ज्ञानलाभ इति तत्त्वम्। तथा अपोहनं च साक्षिणः सकाशादेव भवति। सूर्ये तिमिरेण तिरोहिते सति यथा घटादिप्रकाशाभावः, एवं साक्षिण्यज्ञानेनाच्छादिते सति ज्ञानस्मरणाभावः। अन्तःकरणस्य तमोगुणोद्रेके सति प्रमात्रा न किञ्चिदनुभूयते, न किञ्चित् स्मर्यते, किन्तु निद्रादिकं प्रपद्यते। तत्र च कारणं तमोमयेऽन्तःकरणे साक्षिचैतन्यस्य स्फुटमस्फुरणमेव। अत्यन्तास्फुरणे तु मान्द्याद्यनुभवोऽपि न स्यात्।

**अथवा** अत्यन्तं तमसा दूषितेऽन्तःकरणे नैव प्रतिफलति साक्षिचैतन्यम् , काष्ठादाविव मुखं, कर्दमच्छन्नदर्पणे मुखमिव च। तदैव निद्राति प्रमाता, स च निद्रानुभवः साक्षिण एव, न प्रमातुः। एवमन्तःकरणे तमसा दूषिते सति साक्षी अज्ञानेनावृत इव भवति। न तु वस्तुतस्तस्यावरणम् , जगदान्ध्यप्रसङ्गात्। अत उक्तं 'ज्ञानस्मरणाभावोऽपि साक्षिण एवे'ति, सूर्यादेव घटादिप्रकाशाभाव इतिवत्। सूर्यानुदयप्रयुक्तो घटाद्यप्रकाशो यथा सूर्याद् भवतीत्युच्यते, तथा साक्ष्यप्रतिफलनप्रयुक्तो ज्ञानाद्यभावः साक्षिणः सकाशाद् भवतीत्युच्यते। राजानुग्रहाभावकृतमर्थिनां दारिद्र्यं राजकृतमिति यथोच्यते, तद्वच्चेति भावः। अथवा वृत्तय इव वृत्त्यन्तरालाः वृत्त्यभावाश्च साक्षिणा भास्यन्त इति सिद्धान्ताज्ज्ञानाद्यभावोऽपि साक्षिभास्यत्वेन साक्षिणो भवतीत्युच्यते। न ह्यभास्यमसाक्षिकं वस्तु किञ्चिदपि अस्तीति प्रतिपत्तुमर्हम्। अन्यथा शशशृङ्गादेरप्यस्तित्वप्रतीतिप्रसङ्गात्। तस्मात् साक्ष्यभास्यत्वे ज्ञानाभावस्य स्वरूपासिद्धिरेवेत्युपपन्नमुक्तं साक्षिणोऽपोहनमिति।

ननु यद्येवं तर्ह्यात्मन ईश्वरस्य वैषम्यादिप्रसङ्गः। केचित् किञ्चिज्जानन्ति, केचिदधिकं जानन्ति, केचिज्ज्ञातं विस्मरन्ति, केचित् स्मरन्ति चेत्येवमादेर्वैषम्यस्य साक्षिप्रयुक्तत्वाद् , अत आह— **येषामिति**। पुण्यपापकर्मप्रयुक्तसत्त्वादिगुणन्यूनाधिकभावकृतान्तःकरणशुद्ध्यशुद्धितारतम्यकृतमेव साक्षिप्रतिफलनवैचित्र्यम् , न तु साक्षिस्वरूपकृतम् , यथा दर्पणगतस्वच्छत्वास्वच्छत्वादितारतम्यकृतं मुखप्रतिफलनवैचित्र्यम् , न तु मुखस्वरूपकृतम् , तद्वदिति न साक्षिणो वैषम्यावकाश इत्यर्थः।

यद्वा, **स्मृतिः** शास्त्राचार्योपदेशाद्याहितसंस्कारजनितं स्मरणम् , **ज्ञानं** कार्याकार्यविषयविवेकः, **अपोहनं** तदुभयभ्रंशः। ननु एकस्यैव प्राणिनः कथं स्मृतिर्ज्ञानवत्त्वं तद्भ्रंशवत्त्वं चेत्यत आह— **येषामिति**। पुण्यकर्मणां सर्वप्राणिनां पुण्यकर्मानुसारेण स्मृतिज्ञाने जायमाने अपि मत्त एव भवतः। तथा पापकर्मणां सर्वप्राणिनां पापानुरोधेन जायमानमपि स्मृतिज्ञानापोहनं मत्त एव भवति। ईश्वरस्य

१. 'अपगमनं च' इत्यधिकं क्वचित्। २. 'येषां यथा पुण्यकर्मिणां' इति पा.। ३. 'पापकर्मिणां' इति पा.।

**वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद् वेदविदेव चाहम्॥ १५॥**

**पापकर्मानुरूपेण स्मृतिज्ञानयोः** अपोहनं **च अपायनम् अपगमनं च। वेदैश्च सर्वैः** अहमेव **परमात्मा** वेद्यो **वेदितव्यः,** वेदान्तकृद् **वेदान्तार्थसम्प्रदायकृदित्यर्थः,** वेदविद् **वेदार्थविदेव चाहम्॥ १५॥**

आनन्दगिरिकृतव्याख्या

स्मृतिर्**जन्मान्तरादावनुभूतस्य परामर्शः। देशकालस्वभावविप्रकृष्टस्यापि** ज्ञान**मनुभवः।** [1]**धर्माधर्माभ्यां विचित्रं कुर्वतो नेश्वरस्य वैषम्यमिति भावः। वेदवेद्यं परं ब्रह्म भगवतोऽन्यदिति शङ्कां वारयति—** वेदैरिति। [2]**वेदान्तानां पौरुषेयत्वं परिहरति—** वेदेति। **तदर्थसम्प्रदायप्रवर्तकत्वार्थं तदर्थयाथातथ्य-ज्ञानवत्त्वमाह—** वेदार्थेति॥ १५॥

भाष्यार्कप्रकाशः

कर्मादिसाक्षित्वान्मत्त एवेत्युक्तम्। पूर्वोक्तविधया साक्षिप्रतिफलनतदभावयोर्ज्ञानतदभावहेतुत्वादिति वा। पुण्यकर्मणां पुण्यानुरोधेन, पापकर्मणां पापानुरोधेन च तत्तत्फलभूतं स्मरणं ज्ञानमपोहनं चाहमेव साक्षी परमेश्वरः प्रत्यगात्मा क्षेत्रज्ञः प्रदिशामि, मन्मायाकृतत्वात् सर्वव्यवहारस्येति परमार्थः। **अपगमनं** नाशः। 'सम्मोहात्स्मृतिविभ्रमः, स्मृतिभ्रंशाद् बुद्धिनाशः' इति पूर्वमुक्तम्। स च सम्मोहोऽज्ञानकार्यमेव, तच्चाज्ञानमीश्वरस्योपाधिरेवेति भगवन्माययैव प्राणिनामपोहनसम्भव इति भावः।

**वेदैरिति**। 'सर्वे वेदा यत्पदमामनन्ति' इति श्रुतेरिति भावः। यद्यपि यज्ञादिप्रतिपादका अपि सन्ति वेदाः, तथापि यज्ञादेः सर्वस्य जगतो भगवति परमात्मनि कल्पितत्वेन भगवदात्मकत्वात् तत्प्रतिपादका अपि वेदाः परमात्मप्रतिपादका एव। 'वासुदेवः सर्व'मिति ह्युक्तमत्रैव। 'सर्वं खल्विदं ब्रह्मे'ति श्रुतिश्च। वेदैश्चेति चकारात् स्मृत्यादिग्रहणम्। किं बहुना? अकारादिपञ्चाशन्मातृकाक्षरान्यतमघटिताः सर्वेऽपि घटपटविष्णुशङ्करादिशब्दास्तत्तद्घटाद्यर्थबोधकतया लौकिकैः गृह्यमाणा अपि वस्तुतो घटाद्यवच्छिन्नचैतन्येश्वरवाचिन एवेति बोध्यम्। न चैवं 'यतो वाचो निवर्तन्त' इति श्रुतिविरोधः, निर्विशेषचैतन्यपरत्वात् तच्छ्रुतेः। सविशेषं हि चैतन्यं सर्वे शब्दाः प्रतिपादयन्तीति वयं ब्रूमः।

**परमात्मेति**। सर्वजगदाश्रयचैतन्यमित्यर्थः। परमात्मचैतन्ये हि सर्वं जगत् कल्पितं मायया। प्रत्यगात्मा तु सर्वान्तर इति न सर्वशब्दप्रतिपाद्यः, तत्र सर्वस्याकल्पितत्वात्। अत उक्तं **परमात्मेति**। परमात्माभेदेन तु प्रत्यगात्मनः सर्वात्मत्वकथनं सर्वाधिष्ठानकल्पनं चेति बोध्यम्। न हि प्रत्यगात्मपरमात्मनोर्वास्तवो भेदोऽस्ति, किन्त्वौपाधिक एव। देहाद्युपाधिप्रयुक्तो हि पूर्णचैतन्यस्यान्तरत्वबाह्यत्वरूपो भेदः। तस्मात् प्रत्यगभिन्नः परमात्मैव सर्ववेदवेद्यः। **वेदान्तकृदिति।** 'तेने ब्रह्म हृदा य आदिकवये' इति भागवताद् नारायणः परमेश्वरो ब्रह्मणे चतुर्मुखाय तावद् वेदान्तार्थमुपदिदेश, स च सनकादिभ्यः, ते नारदाय, स व्यासाय, स शुकायेत्येवं वेदान्तार्थसम्प्रदायप्रवर्तक इत्यर्थः। केवलवेदवित्त्वस्याधुनिकब्राह्मणेष्वपि सत्त्वाद् वेदार्थविदित्युक्तम्। वेदार्थश्च ब्रह्म सर्वस्यापि ब्रह्मत्वात्। ब्रह्मविदित्यर्थः। सर्वज्ञ इति यावत्। न तु मदन्यः कश्चित् सर्वज्ञोऽस्ति, मदन्यस्य सर्वस्य जडत्वात्। क्षेत्रज्ञस्य च मदात्मकत्वादित्यभिप्रायः।

यत्तु **रामानुजः** - सर्वस्य चेति चशब्दात् सोमवैश्वानरयोर्ग्रहणमिति, देवमनुष्यादिशब्दैर्जीवात्मेव सूर्यादिशब्दैस्तदन्तर्यामी ईश्वरः प्रतिपाद्यत इति, वेदानामन्तः फलम् , तत्कृत् तत्प्रदातेति च। **तन्मन्दम्** ; सर्वशब्देनैव सोमादेरपि ग्रहणे सति तत्समुच्चायकत्वेन चशब्दस्य व्यर्थत्वात्। वैश्वानरस्य जठराग्नेर्जडत्वेन तदन्तरीश्वरप्रवेशासम्भवाच्च। जीवरूपेणेश्वरप्रवेशो ह्यत्र विवक्षितः। अन्तर्यामिरूपेणापि न हि जडे ईश्वरस्य प्रवेशः, फलाभावात्। न हि जडमीश्वरेण नियम्यते। **एतेन** सूर्यादिशब्दैः तदन्तर्यामीश्वरप्रतिपादने सम्भवत्यपि यूपादिशब्दैस्तदसम्भवाद् अनया विधया सर्ववेदवेद्यत्वं नास्तीश्वरस्येति **सिद्धम्।**

**किञ्च** देवमनुष्यादिशब्दाः देवादिदेहतादात्म्याध्यासमापन्नं जीवं प्रतिपादयन्तु नाम। कथं पुनरीश्वरमध्यासशून्यं प्रति-

१. जीवकृतधर्माधर्मावपेक्ष्य तथा कुर्वतो न वैषम्यमित्यर्थः। २. यथाश्रुते इति शेषः। वेदानामन्तो निर्णयो यस्मात् स वेदान्तः, ब्रह्मसूत्ररूपः, तस्य व्यासरूपेण कर्ता इति माध्वाः। तत्र वेदान्तशब्दस्य रूढ्यर्थत्यागोऽस्वरसः। स्वमते तु रूढिपूर्वकलक्षणा योगापेक्षया बलवतीति न्यायः।

**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।**
**क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥ १६ ॥**

**भगवतः ईश्वरस्य नारायणाख्यस्य विभूतिसङ्क्षेपः उक्तो विशिष्टोपाधिकृतः 'यदादित्यगतं तेजः' इत्यादिना। अथाधुना तस्यैव क्षराक्षरोपाधिप्रविभक्ततया निरुपाधिकस्य केवलस्य [1]स्वरूपनिर्दिधारयिषयोत्तरे श्लोकाः आरभ्यन्ते। तत्र सर्वमेवातीतानागताध्यायार्थजातं त्रिधा राशीकृत्याह—** द्वाविमाविति। द्वाविमौ **पृथग् राशीकृतौ** पुरुषावित्युच्येते लोके **संसारे।** क्षरश्च **क्षरतीति क्षरो विनाशी इति एको राशिः, अपरः पुरुषः** अक्षरः **तद्विपरीतः। भगवतो मायाशक्तिः**

आनन्दगिरिकृतव्याख्या

**उत्तरश्लोकानां तात्पर्यं वक्तुं वृत्तं कीर्तयति—**भगवत इति। विशिष्टोपाधिः **आदित्यादिः। सम्प्रति आऽध्यायसमाप्तेरुत्तरसंदर्भस्य तात्पर्यमाह—**अथेति। **न केवलं निरुपाधिकात्मस्वरूपनिर्धारणायोत्तरग्रन्थः, किन्तु सर्वस्यैव गीताशास्त्रस्यार्थनिर्णयार्थमित्याह—** तत्रेति। **क्षराक्षरोपाधिभ्यां परमात्मना च राशित्रयम्। उक्तेन सर्वात्मत्वेनाशुद्ध्यादिदोषप्रसक्तावुक्तम्—** द्वाविमाविति। [2]**पुरुषोपाधित्वात् पुरुषत्वं, न साक्षादिति विवक्षित्वाऽऽह—** पुरुषाविति। **परं पुरुषं व्यावर्तयति—** भगवत इति। **तत्र कार्यलिङ्गकमनुमानं** [3]**सूचयति—**

भाष्यार्कप्रकाशः

पादयेयुः? यदीश्वरोऽप्यध्यासवान् तर्ह्यज्ञ एव स्यात् सोऽपि, जीववत्। न चेश्वरस्याध्यासाभावेऽपि वेदानां तत्सत्त्वात् प्रतिपादनं सम्भवतीति वाच्यम् ; तथा सति वेदानामज्ञत्वेनाप्रमाणत्वापत्तेः। न हि देवोऽहं मनुष्योऽहमिति जीवस्याज्ञस्य वचनं प्रमाणं, येन तादृशं 'सूर्य ईश्वरश्चन्द्र ईश्वरः' इति वेदवचनं प्रमाणं स्यात्। किञ्च जडस्य वेदस्य कथमध्याससम्भवः? न हि घटस्याध्यासो दृष्टः। वेदपुरुषस्तु सर्वज्ञ एवेति कथं तस्याध्यासः सम्भवति?

वेदान्तकृदित्यस्यापि वेदफलप्रदातेत्यर्थोऽप्ययुक्त एव, वेदोक्तकर्मफलप्रदातेत्यर्थस्य लाक्षणिकत्वात्। केवलवेदस्य फलाभावाच्च। 'वेदाक्षराणि यावन्ति पठितानि द्विजोत्तमैः। तावन्ति हरिनामानि कीर्तितानि न संशयः॥' इति स्मृतेश्चोच्चार्यमाणवेदस्यैव फलवत्त्वप्रतिपादनपरत्वम् , न केवलवेदस्य। किञ्च करोतीति कृदित्यस्य दातेत्यर्थवर्णनमपि व्याकरणविरुद्धम्। यच्च वेदान्तशब्दस्योपनिषत्परत्वे प्रकृतासङ्गतमिति **वेदान्तदेशिकः, तदसत्** , विभूतिकथनप्रस्तावे वेदान्तसम्प्रदायकृत्त्वविभूतिवर्णनस्यापि सङ्गतत्वात् ॥ १५ ॥

**द्वाविति। विशिष्टोपाधयः** तेजोबलादयः तत्तदुपाधयः परस्परं भिन्नाः। तत्कृतो भगवतो विभूतिसङ्क्षेपो 'यदादित्यगतं तेजः' इत्यादिना ग्रन्थेनोक्तः। प्रकर्षेण विभक्तः **प्रविभक्तः** प्रविविक्तस्तद्भावेन **प्रविभक्ततया** क्षराक्षरोपाधिद्वयाद् विविच्येत्यर्थः। **निरुपाधिकस्य** उपाधिरहितस्य, निर्विशेषस्येति यावत्। अत एव **केवलस्य** एकस्यात्मनश्चिन्मात्रस्येति वा। **तत्त्वं** याथार्थ्यं, स्वरूपमिति यावत्। तस्य निर्धारयितुमिच्छया **निर्दिधारयिषया । त्रिधा राशीकृत्येति**। राशित्रयीकृत्येत्यर्थः।

लोके क्षरश्चाक्षर एव चेति इमौ द्वौ पुरुषावित्युच्येते। सर्वाणि भूतानि क्षर इत्युच्यन्ते। कूटस्थोऽक्षर इत्युच्यते। **संसारः** सुखदुःखसम्भोगः, तस्मिन् , तदाश्रयभूतावित्यर्थः। अथवा संसारो व्यवहारः, तस्मिन् विषये, व्यवहारगोचरावित्यर्थः। पुरुषोत्तमो ह्यव्यवहार्यः, 'यत्तदद्रेश्यमग्राह्य'मित्यादिश्रुतेः। लोके जगतीति तु नोक्तमाचार्यैः, क्षराक्षरयोरेव जगत्पदार्थत्वेन क्षराक्षरातिरिक्तजगत्पदार्थाभावात्। क्षरति नश्यतीति **क्षरः। एको राशि**रेका कोटिरित्यर्थः। **तद्विपरीतः** क्षराद् विलक्षणोऽविनाशित्वादिति भावः। भगवन्मायाशक्तिरेवाक्षरः पुरुष इत्युच्यते। अनेकेषां संसारिणां जन्तूनां प्राणिनां ये कामकर्मादिसंस्कारास्तेषामाश्रयः। प्रलयदशायां सुषुप्तौ च संस्काररूपेण हि तत्तज्जीवोपाध्यन्तःकरणानि प्रकृतौ निलीय वर्तन्ते। तानि च प्रलयावसाने पुनः प्रादुर्भवन्ति प्रकृतेः

१. 'तत्त्वस्वरूपनिर्दिधारयिषया' 'तत्त्वनिर्दिधारयिषया' इति पा.। २. चेतनवाचिनः पुरुषशब्दस्य जडे प्रयोगमुपपादयति—पुरुषोपाधित्वादिति। तत्तादात्म्याध्यासात् तच्छब्दता। ३. जडस्य जगद्रूपकार्यस्य उपादानकारणं जडं किंचिदपेक्षणीयम्। अतः भगवतो मायाशक्तिरेव तदुपादानमिति भावः।

**क्षराख्यस्य पुरुषस्योत्पत्तिबीजम् अनेकसंसारिजन्तुकामकर्मादिसंस्काराश्रयोऽक्षरः पुरुषः उच्यते। कौ तौ पुरुषौ? इत्याह स्वयमेव भगवान्— क्षरः** सर्वाणि भूतानि **समस्तं विकारजातमित्यर्थः।** कूटस्थः **कूटो राशिः, राशिरिव स्थितः। अथवा - कूटो माया वञ्चना जिह्मता कुटिलतेति पर्यायाः। अनेकमायावञ्चनादिप्रकारेण स्थितः कूटस्थः, संसारबीजानन्त्याद् न क्षरतीति** अक्षरः **उच्यते॥ १६ ॥** [१]

आनन्दगिरिकृतव्याख्या

क्षराख्यस्येति। **मायाशक्तिं विना भोक्तॄणां कर्मादिसंस्कारादेवोक्तकार्योत्पत्तिरित्याशङ्क्य तस्य निमित्तत्वेऽपि मायाशक्तिरुपादानमिति मत्वाऽऽह—** अनेकेति। **कामकर्मादीत्यादिशब्देन ज्ञानं गृह्यते। 'प्रकृतिं पुरुषं चैवे'ति प्रकृतयोरिह ग्रहणमिति शङ्कामाकाङ्क्षाद्वारा वारयति—** कौ ताविति। **कूटशब्दार्थमुक्त्वा तेन स्थितस्य कूटस्थतेति सम्पिण्डितमर्थमाह—** अनेकेति। **तस्य कथमक्षरत्वम्? विना ब्रह्मज्ञानमनाशादित्याह—** संसारेति॥ १६ ॥

भाष्यार्कप्रकाशः

सकाशादिति प्रकृतिर्भूतोत्पत्तिबीजम्। वृक्षोत्पत्तिं प्रति बीजस्येव भूतोत्पत्तिं प्रति प्रकृतेः कारणत्वेन बीजत्वात्। **विकारजातं** कार्यवर्गं [वर्गः]ब्रह्मादिस्तम्बपर्यन्तश्चेतनवर्गः, मृत्पाषाणाद्यचेतनवर्गश्चेत्यर्थः। भवन्तीति भूतानीति व्युत्पत्त्या भूतशब्दस्य कार्यमात्रपरत्वादिति भावः।

अन्यथा **रामानुजोक्त**विधया चेतनवर्गमात्रग्रहणेऽचेतनवर्गस्य राशित्रयाद् बहिर्भूतत्वं स्यात्। न चेष्टापत्तिः, भगवता राशि-चतुष्टयस्याप्रतिपादितत्वात्। क्षराक्षरपुरुषोत्तमाख्यं राशित्रयं हीह प्रतिपादितम्। क्षराक्षराभ्यामन्यस्य पुरुषोत्तमस्याचेतनत्वं च स्यात्। चेतनवर्गात् कूटस्थाच्चाचेतनवर्गो ह्यन्य इति। **राशिरिवेति**। अप्रकम्प्यस्वभाव इत्यर्थः। कूट इव तिष्ठतीति कूटस्थः। कूटरूपेण तिष्ठतीति च कूटस्थ इति व्युत्पत्त्यन्तरमाश्रित्याह— **अथवेति**। एकमेवाज्ञानं मायावञ्चनाजिह्मताकुटिलताशब्दैरुच्यत इति मायादि-प्रकारेण स्थितमित्यर्थः। **माया** इन्द्रजालादिः। **वञ्चना** प्रतारणम् , पश्यतो हरणादिकम्। **जिह्मता** कपटस्वभावः। **कुटिलता** कौटिल्यमित्येतेषामवान्तरस्वरूपभेदसत्त्वान्मायावञ्चनादिप्रकारेणेत्युक्तम्। चतुर्णामप्यज्ञानपदार्थत्वात् पर्याया इत्युक्तम्। ननु ज्ञान-नाश्यायाः प्रकृतेः कथमक्षरकूटस्थत्वम्? अत आह— **संसारेति**। संसारबीजानां कामकर्माविद्यानामानन्त्याद् बीजाङ्कुरन्यायेना-नन्तत्वात् तदाश्रया प्रकृतिरप्यनन्तैव। न ह्याश्रयस्य सान्तत्वे तदाधेयस्यानन्तत्वं स्यात्। एवमनन्तत्वात् प्रकृति**र्न क्षरति** न नश्यतीत्यक्षर इत्युच्यते। यावज्ज्ञानोदयमक्षरत्वस्य विवक्षितत्वात् सापेक्षं नित्यत्वमस्ति मायाया इति भावः। एवं सर्वं कार्यजातमेकः पुरुषो विनाशिस्वभावात् , कारणं माया त्वन्यः पुरुषोऽविनाशिस्वभावात्। अतः कार्यं जगत् क्षरपदार्थः, कारणमज्ञानं माया त्वक्षरपदार्थः इति राशिद्वयमनेन श्लोकेन प्रतिपादितम्। तृतीयराशिं तु पुरुषोत्तमाख्यमुत्तरश्लोकेन प्रतिपादयिष्यति।

यत्तु **रामानुजः** - तत्र क्षरशब्दनिर्दिष्टः पुरुषो जीवशब्दाभिलपनीयब्रह्मादिस्तम्बपर्यन्तक्षरणस्वभावाचित्संसृष्टसर्वभूतानि, अचित्संसर्गवियुक्तः स्वेन रूपेणावस्थितो मुक्तात्मा अक्षरः पुरुषः, एकत्वनिर्देशस्तु अचिद्वियोगरूपैकोपाधिनाऽभिहित इति, **तत् तुच्छम्।** किमिह जीव ईश्वरश्च विविच्य प्रदश्यर्ते, उताविविच्य? आद्ये, अचित्संसृष्टो जीवः क्षर इत्ययुक्तम्। द्वितीये, ईश्वरोऽप्यचिद्विशिष्ट एवेति क्षर एव स्यादिति कथं तस्य क्षरादन्यत्वम्? तथाऽचिद्विशिष्ट एवेति कथमक्षरादन्यत्वं च तस्य?

१. क्षरतीति व्युत्पत्त्या क्षरः कार्यवर्गः, अक्षरः कारणं माया इति अद्वैतिव्याख्यानम्। तत्र 'क्षरः सर्वाणि भूतानि' इति चेतनवाचिनो भूतशब्दस्य, पुरुषशब्दस्य च प्रयोगोऽनुपपन्नः इति अस्वरसात् 'क्षरो ब्रह्मादिजीवराशिः, अक्षरो लक्ष्मीः' इति माध्वाः। तत्रापि नित्यत्वाज्जीवस्य क्षरत्वं कथमिति शङ्कायां 'ब्रह्मरुद्रादयः सर्वे शरीरक्षरणात् क्षराः। श्रीरक्षरात्मेत्युदिता नित्यचिद्देहका यतः॥' इति शरीरक्षरणाक्षरणाभ्यामेव जीवानां लक्ष्म्याश्च क्षराक्षरशब्दवाच्यत्वमुपपादितम्। लक्ष्म्याश्च क्षरशब्दोक्तचेतनाचेतनात्मकराशेः नियामकत्वेन प्रकृतित्वं चोक्तम्— 'चेतनाचेतनस्यास्य राशेः संस्थापकत्वतः। कूटस्थ आत्मा सा ज्ञेया' इति। इदं च घट्टकुटीप्रभातायितम्। क्षरशरीरसंबन्धात् क्षरत्वोक्तौ हि मुख्यं क्षरत्वं कार्यस्य देहस्यैवेति सिध्यति। तथा च क्षरशब्दो मुख्यार्थकः कार्यवर्गग्रहणे। किंच लक्ष्म्याः स्वरूपतः अक्षरत्वसंभवेऽपि अक्षरदेहकत्वेनाक्षरत्वोक्तिः अत्र क्षराक्षरविभागः उपाधिप्राधान्येनैव विवक्षित इति गमयति। तथाच पुरुषोपाधिरूपयोः कार्यकारणयोः जगन्माययोः क्षराक्षरशब्दवाच्यत्वं मुख्यमिति तयोः ग्रहणमेव युक्तम्।

भाष्यार्कप्रकाशः

अचिद्विविक्तचित्प्रदर्शनं च कूटस्थोऽक्षर इति कथम्? न च जीवः प्रकृतेर्विविच्याविविच्य च द्वेधा प्रदर्श्यते, ईश्वरस्तु विविच्यैव प्रदर्श्यत इति न दोष इति वाच्यम् ; किं बद्धजीवो विविच्याविविच्य च प्रदर्श्यते, उत मुक्तजीवः? नाद्यः, तस्य विविच्य प्रदर्शनायोगात्। विवेचिते सति बद्धत्वस्यैवापायात्। नान्त्यः, तस्याविविच्य प्रदर्शनायोगात्। विविक्त एव हि मुक्तः। तथा किं विशिष्टेश्वरो विविच्य प्रदर्श्यते? उत शुद्धचिन्मात्रः? नाद्यः, विशिष्टस्य विवेचनायोगात्। नान्त्यः, तव मते निर्विशेषचिन्मात्रेश्वरानभ्युपगमात्। न च जीवो बन्धदशायां क्षरणस्वभावाचिद्वैशिष्ट्यात् क्षरः; मुक्तिदशायां तद्वियोगादक्षर इति; प्रकृतिपुरुषविशिष्टोऽपीश्वरः प्रकृतिपुरुषाभ्यामन्य एव, दण्डविशिष्टः पुरुषो दण्डादिवेति चोच्यत इति वाच्यम् ; किं जीवस्य स्वभावतः क्षरणं धर्मः? उताक्षरणम्? आद्ये, कथमक्षरत्वं तस्य? द्वितीये, कथं क्षरत्वम्? न च स्वभावतोऽक्षरोऽपि जीवोऽचिद्वैशिष्ट्यात् क्षर इति वाच्यम् ; स्वभावसिद्धस्य धर्मस्य स्वरूपनाशं विना विनिमयायोगात्। न ह्यग्निरुष्णस्वभावः शीतस्वभावो भवति विना स्वरूपनाशम्। न चाचिद्विशिष्टे जीवेऽचिद्गतं क्षरणमारोप्यत इति वाच्यम् ; स्वसिद्धान्तभङ्गप्रसङ्गात्। न च 'विशेष्यस्य बाधे सति विधिनिषेधौ विशेषणमुपसङ्क्रामत' इति न्यायेनाचिद्विशिष्टो जीवः क्षर इत्युक्तेऽचित एव विशेषणांशस्य क्षरत्वमापततीति वाच्यम् ; तथा सत्यचित्पदार्थः क्षरः, चित्पदार्थोऽक्षर इत्येव वक्तव्यम् , किमनया अचिद्विशिष्टो जीवः क्षर इति कुकल्पनया? न च मूलकर्तुरेवायं दोषः, न ममेति वाच्यम् ; अहो! तव पाण्डित्यप्रकर्षः! येन भगवत्यपि पराशरसूनौ दोषमासञ्जयसि।

सर्वाणि भूतानीत्यस्य सर्वमचिद्द्रव्यमित्यर्थवर्णने सति किं तव रसना विदीर्यते? अपि च तव मते प्रकृतेरपि नित्यत्वेन कथं क्षरणस्वभावमचिद्द्रव्यं भवेत्? न च कारणप्रकृतिरेव नित्या, तत्परिणामास्तु देहादयोऽनित्या एवेति वाच्यम् ; तथा सति सर्वं कार्यजातं क्षर इति **श्रीशङ्करभगवत्पादाचार्य**प्रोक्तार्थ एव घट्टकुटीप्रभातन्यायेन तवापि पर्यवसानात्। एवं क्षरशब्देन विनाश्यचिद्द्रव्यप्रतिपादने सत्यविनाश्यचिद्द्रव्यप्रतिपादनस्याप्यावश्यकत्वादिह केन वाक्येन पुनस्तदविनाश्यचिद्द्रव्यं प्रतिपादितम्। न च 'कूटस्थोऽक्षर उच्यत' इति वाक्येनेति वाच्यम् ; अन्यथा व्याख्यातत्वात्तद्वचनस्य त्वया। न च तत्प्रतिपादनमनावश्यकमिति वाच्यम् ; विनाशी अविनाशी चेति द्वावेव हि पदार्थौ। तदतिरिक्तपदार्थाभावात्। न हि विनाशाविनाशावेकस्मिन् स्तः, येन तदुभयात्मकं पदार्थान्तरं स्यात्। तत्र कार्यजातं सर्वं विनाशिपदार्थः। स क्षरः सर्वाणि भूतानीत्यनेनोक्तः। अविनाशी तु द्विविधः- चिदचिद्भेदात्। न हि चेतनादचेतनाच्चान्यद् वस्त्वस्ति, तदुभयात्मकं तदुभयविलक्षणं वा। न च तदुभयविलक्षण ईश्वरोऽस्तीति वाच्यम् ; चेतनत्वेनेश्वरस्य तद्विलक्षणत्वासम्भवात्। द्रष्टा हीश्वरस्त्वयाऽप्यभ्युपगतः। कथमचेतनस्य द्रष्टृत्वम्? तस्मादविनाशी द्विविध एव, चिदचिद्भेदात्। तत्र च 'उत्तमः' इति श्लोकेन चित् प्रतिपाद्यते। अचित्तु न केनापीति कृत्वा प्रतिपाद्यस्याप्रतिपादनं दोष एव।

तथा एक एव चित्पदार्थः 'कूटस्थ' इति वाक्येनापि प्रतिपाद्येत चेत् पुनरुक्तिदोषश्च। न च न पुनरुक्तिदोषः, यथा अविनाशी पदार्थो द्विविधः तथा चित्पदार्थोऽपि द्विविध एव, जीवेश्वरभेदात्। तत्र जीवः कूटस्थवाक्येनेश्वरः परमात्मवाक्येन च प्रतिपाद्यत इति वाच्यम् ; 'परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः' इति परमात्मवाक्यस्यापि जीवप्रतिपादकत्वात्। कूटस्थवाक्यस्यापि निर्विकारेश्वरप्रतिपादकत्वाच्च। 'एतस्य वा अक्षरस्ये'ति श्रुतिर्ह्यक्षरशब्दमीश्वरं परं ब्रूते। न च तत्तत्प्रकरणादिवशात् तत्तच्छब्दानां तत्तदर्थविशेषवाचकत्वमिति प्रकृतेऽक्षरशब्दः कूटस्थशब्दश्च जीवपर एव। परमात्मशब्दस्तु ईश्वरपर एवेति वाच्यम् ; चित्पदार्थस्येश्वरस्याचित्पदार्थाद् वैलक्षण्यसत्त्वेऽपि चित्पदार्थाज्जीवाद्वैलक्षण्यस्य दुर्वचत्वेन 'उत्तमः पुरुषस्त्वन्यः' इति कथनस्यासङ्गतत्वापत्तेः। न च ज्ञानैकाकारयोरपि जीवेश्वरयोर्धर्मतो भेदोऽस्तीति वाच्यम् ; निर्धर्मकत्वाच्चैतन्यस्य जीवेश्वरस्वरूपभूतस्य। प्रकृतिवियुक्तं हि मुक्तप्राप्यमात्मस्वरूपं सच्चिदानन्दं सुखादिसंसाररहितं सर्वज्ञं चेति तवाप्यभ्युपगमः। तस्मान्न सर्वज्ञत्वकिञ्चिज्ज्ञत्वप्रयुक्तोऽपि जीवेश्वरभेदोऽस्ति। न च सर्वज्ञं यदि चैतन्यं तर्हि सधर्मकमेवेति वाच्यम् ; सर्वज्ञत्वं सर्वावभासनम् , तच्चानुभवमात्रं चैतन्यमेवेत्यभ्युपगमात्। तस्मादिह कूटस्थवाक्यमविनाश्यचिद्द्रव्यमेव प्रतिपादयति, न त्वात्मानम् , तस्योत्तरवाक्येन प्रतिपादयिष्यमाणत्वादिति नात्र जीवेश्वरभेदकल्पनं न्याय्यमिति स्थितमद्वैतम्॥ १६॥

**उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।**
**यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥ १७॥**

**आभ्यां क्षराक्षराभ्याम्** अन्यः **विलक्षणः क्षराक्षरोपाधिद्वयदोषेणास्पृष्टो नित्यशुद्धबुद्धमुक्तस्वभावः—** उत्तम इति। उत्तमः **उत्कृष्टतमः पुरुषस्तु** अन्योऽत्यन्तविलक्षण **आभ्याम्** , परमात्मेति **परमश्चासौ देहाद्यविद्याकृतात्मभ्यः आत्मा च सर्वभूतानां प्रत्यक्चेतनः इत्यतः परमात्मेति** उदाहृतः **उक्तो वेदान्तेषु। स एव विशिष्यते - यो** लोकत्रयं **भूर्भुवःस्वराख्यं स्वकीयया चैतन्यबलशक्त्या** आविश्य **प्रविश्य** बिभर्ति **स्वरूपसद्भावमात्रेण बिभर्ति धारयति** अव्ययो

आनन्दगिरिकृतव्याख्या

**कार्यकारणाख्यौ राशी दर्शयित्वा राश्यन्तरं दर्शयति—** आभ्यामिति। **वैलक्षण्यफलमाह—** क्षरेति। **उपाधिद्वयकृतगुणदोषा-स्पर्शे फलितमाह—** नित्येति। आभ्यां **क्षराक्षराभ्यामिति यावत्।** उत्तमोऽन्य **इति पदद्वयं वस्तुतः सर्वथैव क्षराक्षरात्मत्वाभावदृष्ट्यर्थम्। जडवर्गस्यान्यत्वकृतं स्वातन्त्र्यं निरयति—** स एवेति। **लोकत्रयमित्युपलक्षणम्। सर्वं जगदपि विवक्षितम्। चैतन्यमेव बलम् , तत्र शक्तिर्माया, तयेति यावत्। जगद्धारणे परस्य व्यापारान्तरं वारयति—** स्वरूपेति। **न चास्यान्यो धारयिता, स्वतोऽचलत्वादित्याह—**

भाष्यार्कप्रकाशः

**उत्तम इति**। सोऽन्यः उत्तमः पुरुषस्तु परमात्मेत्युदाहृतः। अव्ययः ईश्वरो यः लोकत्रयमाविश्य बिभर्ति। अन्यत्वं पूर्वोक्त-क्षराक्षरापेक्षयेत्याह— **आभ्यामिति**। उपाधिसंसृष्टस्योपाध्यन्यत्वायोगादाह— **अस्पृष्ट इति**। निरुपाधिक इत्यर्थः। कार्योपाधिकारणो-पाधिद्वयरहित इति यावत्। अत एव नित्यशुद्धबुद्धमुक्तस्वभावः; अत एव पूर्वोक्तपुरुषद्वयादयमुत्तमः पुरुष इत्याह— **उत्तम इति**। पूर्णत्वात् पुरि देहे शयनाद्वा पुरुषः। क्षराक्षरयोरुपाध्योस्तु पुरुषभोग्यत्वात् पुरुषत्वम्। न च पुरुषशब्दस्य जीववाचित्वाद् बद्धमुक्तजीवौ द्वावेव क्षराक्षरपुरुषाविति वाच्यम् ; 'स वा एष पुरुषोऽन्नरसमयः' इति श्रुत्या देहस्यापि पुरुषत्वस्योक्तत्वात्। अस्यां पुरि उपाधौ शेते परमात्मेति पुरुष इति व्युत्पत्त्या च पुरुषशब्दः क्षराक्षरोपाधिपरः। **अत्यन्तेति**। प्रकृतेस्तत्कार्यस्य च जडत्वादनृतत्वाद् दुखत्वाच्च, परमात्मनश्चेतनत्वात् सत्यत्वादानन्दत्वाच्च वैलक्षण्यमत्यन्तमित्यर्थः। 'सच्चिदानन्दं ब्रह्मे'त्यादिश्रुतेरिति भावः।

**देहादीति**। देहादिरूपेभ्योऽविद्याकृतेभ्य आत्मभ्य आत्माभासेभ्य इत्यर्थः। देहात्मेन्द्रियात्ममनआत्मबुद्ध्यात्माव्यक्तात्मभ्यः इति यावत्। परम उत्कृष्ट अकल्पितत्वादिति भावः। **आत्मा** सर्वभूतानामन्तरात्मा। केन रूपेणेत्यत आह— **प्रत्यक्त्वेनेति**। कथ-मात्मत्वम्? अत आह— **चेतन इति**। आत्मा हि सर्वं चेतयति, स्वभासा चेतयितृत्वस्यैवात्मधर्मत्वात्। 'तस्य भासा सर्वमिदं विभाती'ति श्रुतेः।

**ननु** परमात्मशब्दादभिधया अक्लेशेन परिपूर्णचैतन्येश्वरवाचिनः क्लेशेन प्रत्यगात्मार्थाकर्षणमयुक्तमिति चेत् , **मैवम् ,** 'परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः' इति पूर्वानुरोधात्। परिपूर्णचैतन्यस्यैव प्रत्यगात्मत्वाच्चोपाधिवशात्। किञ्च 'यो लोकत्रयमाविश्ये'ति सर्वभूतान्तःप्रवेशेन लिङ्गेन सर्वान्तरचैतन्यमेवेह ग्रहीतुमुचितम्। क्वोदाहृतोऽत आह— **वेदान्तेष्विति। विशिष्यत इति**। विशेषणविशिष्टतया प्रतिपाद्यत इत्यर्थः। तस्यैव कश्चिद् विशेषणविशेषः (धर्मविशेषः) कथ्यत इति यावत्। **स्वकीयया** स्वाभाविक्येत्यर्थः, मायामय्येति यावत्। **बलशक्त्या** सहेति शेषः।

अयं भावः— परमात्मा निर्विशेषचिन्मात्रोऽपि मायया ज्ञानबलक्रियाशक्तियुक्तप्रत्यग्रूपेण सर्वान्तरात्मा सन् ज्ञानशक्त्या सर्वं चेतयति, बलशक्त्या सर्वं बिभर्ति, यथा अपतितं स्यात् तथा बिभर्तीत्यर्थः। क्रियाशक्त्या तु सर्वं कर्म कारयतीति। तत्र बलशक्तिकार्य-मिहोच्यते— 'यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः' इति। कथं बिभर्तीत्यत आह— **स्वरूपेति**। बिम्बप्रतिबिम्बभावविशिष्टम् अन्तःकरणावच्छिन्नं वा चैतन्यमिह स्वरूपशब्दार्थः, न तु शुद्धम् , तस्य मृतशरीरेऽपि सत्त्वात् तेन मृतशरीरस्याधृतत्वाच्च। **एतेन**

**यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः।**
**अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥ १८॥**

**नास्य व्ययो विद्यत इत्यव्ययः।** [1]**कः?** ईश्वरः **सर्वज्ञो नारायणाख्यः ईशनशीलः॥ १७॥**

**यथाव्याख्यातस्येश्वरस्य पुरुषोत्तमः इत्येतन्नाम प्रसिद्धम् , तस्य नामनिर्वचनप्रसिद्ध्याऽर्थवत्त्वं**[2] **नाम्नो दर्शयन् निरतिशयोऽहमीश्वरः इत्यात्मानं दर्शयति भगवान्—** यस्मादिति। **यस्मात्** क्षरमतीतोऽहं **संसारमायावृक्षम् अश्वत्थाख्यम् अतिक्रान्तोऽहम् , अक्षरादपि संसारमायावृक्षबीजभूतादपि** चोत्तमः **उत्कृष्टतमः, ऊर्ध्वतमो वा।** अतः

आनन्दगिरिकृतव्याख्या

अव्यय इति। **'संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः' इति श्रुत्यर्थं गृहीत्वाऽऽह—** ईश्वर इति॥ १७॥

**किञ्च लोकवेदयोर्भगवतो नामप्रसिद्ध्या सिद्धमप्रपञ्चत्वमित्याह—** यथेति। **अश्वकर्णादिवदस्य नाम्नो रूढत्वादर्थविशेषाभावाद् भगवतोऽपि लौकिकेश्वरवदीश्वरत्वं सातिशयमिति, नेत्याह—** तस्येति। **यस्मादित्यस्यापेक्षितं निक्षिपति —** अत इति। **उत्तमः पुरुष इति वाक्यशेषः॥ १८॥**

भाष्यार्कप्रकाशः

औपाधिकमेवेदं लोकत्रयभरणमात्मन इति सिद्धम्। मात्रपदाद् राष्ट्रभरणे राज्ञ इव, लोकत्रयभरणे नात्मनः कोऽपि प्रयत्नादिरिति **सूच्यते**। ततश्च निर्विकारत्वं सिध्यति।

न च लोकत्रयवर्तिचराचरभूतसङ्घात एव प्रत्यगात्मना ध्रियते, न तु लोकत्रयमिति वाच्यम् ; लोकत्रयशब्दस्यात्र तद्वर्तिभूतसङ्घाते लाक्षणिकत्वात्। न च चतुर्दशलोकसत्त्वात् कथं लोकत्रयमिति वाच्यम् ; सर्वेषां त्रिष्वेवान्तर्भावात्। **अव्ययो**ऽविक्रिय इत्यर्थः। ईश्वरशब्दार्थमाह— **ईशनशील इति**। ईशनं नियमनं तस्य च ज्ञानपूर्वकत्वादाह— **सर्वज्ञ इति**। सर्वावभासक इत्यर्थः। मायया सर्वं वेत्तीति वा। तस्य च प्रसिद्धं नाम निर्दिशति— **नारायणाख्य इति**। नारस्य भूतसङ्घस्यायनं प्रवृत्तिर्यस्मात् स नारायणः। प्रत्यगात्मना विधृत एव सन् भूतसङ्घः प्रवर्तते हि। इदमेवोक्तम् – 'यो लोकत्रयमाविश्य बिभर्ती'ति। तस्मात् प्रत्यगात्मैव नारायणः। नारस्यायनं स्थितिर्यस्मिन् स नारायण इति व्युत्पत्त्या तु परमात्माऽपि नारायण एव। अत एव 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इति श्रुतेः। एवं नारायणाख्यं परिपूर्णमेकमेव चैतन्यं सर्वं भूतसङ्घं प्रत्यग्रूपेण प्रविश्य बलशक्त्या धारयत् सत् क्षराक्षरविलक्षणपुरुषोत्तमशब्दवाच्यं भवतीति फलितोऽर्थः। कार्यप्रकृतिः क्षरपुरुषः, कारणप्रकृतिरक्षरपुरुषः, प्रत्यगभिन्नः परमात्मा तूत्तमपुरुष इति विवेकः। श्लोकस्य—अन्यः परमात्मा तूत्तमः पुरुष इत्युदाहृत इत्यप्यन्वयः सम्भवति।

यत्तु **रामानुजः** - क्षराक्षरशब्दनिर्दिष्टाभ्यां बद्धमुक्तपुरुषाभ्यामन्यः पुरुषोत्तम ईश्वरः परमात्मा, अचेतनं बद्धमुक्तजीवौ चेति लोकत्रयं य आत्मतया आविश्य बिभर्ति, अव्ययत्वादीश्वरत्वाद् व्यापकत्वाद् भर्तृत्वाच्च लोकत्रयादर्थान्तरभूत ईश्वर इति, **तत्तुच्छम्** ; असङ्गपुरुषस्याचित्संयोगवियोगायोगेन बद्धत्वमुक्तत्वावस्थयोरसम्भवात्। निरुपाधिकस्य च मुक्तात्मनः सव्ययत्वानीश्वरत्वाद्ययोगात्। ज्ञानैकाकारयोर्जीवेश्वरयोरेकपदार्थत्वेन पदार्थद्वित्वायोगाज्जीवादीश्वरो नार्थान्तरभूतः। अत एवोक्तं हि 'ममैवांशो जीव' इति भगवता। यश्च तस्यापि **रामानुजेन** दर्शितोऽपार्थः, स तत्रैव परिहृतः॥ १७॥

**यस्मादिति**। अहं यस्मात् क्षरमतीतो यस्माच्चाक्षरादप्युत्तमः, अतोऽहं लोके वेदे च पुरुषोत्तम इति प्रथितोऽस्मि। ऊर्ध्वमूल-मित्युपक्रमादुपसंहारेऽपि तं स्मारयति— **संसारेति**। सर्वभूतमयः संसारवृक्षः क्षरपदार्थः, तमतीतोऽतिक्रान्तः क्षरादुत्तम इत्यर्थः। **बीजेति**। यद्यप्यूर्ध्वमूलमिति साव्यक्तं ब्रह्मैव मूलमित्युक्तम् , तथापि तत्र मायांशस्यैव बीजत्वमिति बोध्यम्। निर्विशेषचिन्मात्रस्य जगद्धेतुत्वाभावाद् **अक्षराद**व्यक्तादित्यर्थः। **उत्कृष्टतम इति**। सच्चिदानन्दरूपत्वादिति भावः। **ऊर्ध्वतम इति**। 'तमसः परस्ता'दिति

१. 'कः?' इति क्वचिन्न। २. 'अन्वर्थत्वम्' इति पा.।

**यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्।**
**स सर्वविद् भजति मां सर्वभावेन भारत !॥ १९॥**
**इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ !।**

**ताभ्यां क्षराक्षराभ्यामुत्तमत्वाद्** अस्मि **भवामि लोके वेदे च** प्रथितः **प्रख्यातः पुरुषोत्तम इत्येवं मां भक्तजनाः विदुः। कवयः काव्यादिषु चेदं नाम निबध्नन्ति , पुरुषोत्तम इत्यनेनाभिधानेनाभिगृणन्ति॥ १८॥**

**अथेदानीं यथानिरुक्तमात्मानं यो वेद तस्येदं फलमुच्यते—** यो मामिति। **यो** माम् **ईश्वरं यथोक्तविशेषणम्** एवं **यथोक्तेन प्रकारेण** असम्मूढः **सम्मोहवर्जितः सन् जानाति अयमहमस्मीति पुरुषोत्तमम् , स** सर्ववित् **सर्वात्मना सर्वं वेत्तीति सर्वज्ञः सर्वभूतस्थं भजति मां** सर्वभावेन [१]**सर्वात्मचित्ततया, हे भारत !॥ १९॥**

**अस्मिन्नध्याये भगवत्तत्त्वज्ञानं मोक्षफलमुक्त्वा, अथेदानीं तत् स्तौति—** इति गुह्यतममिति। इति **एतद्** गुह्यतमं **गोप्यतमम् , अत्यन्तरहस्यमित्येतत्। किं तत् ? शास्त्रम्। यद्यपि गीताख्यं समस्तं शास्त्रमुच्यते, तथापि**

आनन्दगिरिकृतव्याख्या

**आत्मनोऽप्रपञ्चत्वं ज्ञानफलोक्त्या स्तौति—** अथेति। **यथोक्तविशेषणं सर्वात्मत्वादिविशेषणोपेतमिति यावत्। क्षराक्षरातीतत्वं यथोक्तप्रकारः।** सम्मोहवर्जितः **सम्मोहेन देहादिष्वात्मात्मीयत्वबुद्ध्या रहितः इत्यर्थः। भगवन्तं जानतः सर्ववित्त्वं तस्यैव सर्वात्मना मेयत्वादित्याह—** स सर्वविदिति। **सर्वात्मनि मय्येवासक्तचित्तत्वेनेत्यर्थः॥ १९॥**

**अध्यायार्थमनूद्योपसंहारश्लोकमवतारयति—** अस्मिन्निति। **सर्वस्यां गीतायां शास्त्रशब्दे वक्तव्ये कथमस्मिन्नध्याये तत्प्रयोगः स्यादित्याशङ्क्याह—**यद्यपीति। **सन्निहितमध्यायं स्तोतुमपि कुतस्तत्र शास्त्रशब्दस्तदर्थाभावात् , तत्राह—**सर्वो हीति। **गीताशास्त्रार्थस्य**

भाष्यार्कप्रकाशः

श्रुतेरिति भावः। सबीजात् संसारमण्डलादुपरि वर्तते, न तु तदन्तः देहादिपदार्थवदिति परमार्थः। अत इत्यस्यार्थं स्वयमेवाह— **ताभ्यामिति**। पुरुषाभ्यां द्वाभ्यां क्षराक्षराभ्यामुत्तमः पुरुषोत्तम इति निरुक्तिः। पुरुषेषु क्षराक्षरपरमात्मसु त्रिषु मध्ये उत्तमः पुरुषोत्तमः इति निरुक्तिरप्यस्ति, तस्याः अप्यत्रैव पर्यवसानं बोध्यम्। लोके प्रसिद्धिं दर्शयितुं कवयः इत्यादिकमुक्तम्। स च '[न च] तेन विना निद्रां लभते पुरुषोत्तमः' इत्यादिकाव्ये प्रयोगः॥ १८॥

**य इति**। य एवमसम्मूढः सन् मां पुरुषोत्तमं जानाति, हे भारत! स सर्वविद् भवति, मां सर्वभावेन भजति। सम्मोह आत्मानात्माविवेकः। ज्ञानप्रकारं दर्शयति— **अयमहमस्मीति**। पुरुषोत्तमं प्रत्यगभिन्नं परमात्मानम् , परमात्माभिन्नं प्रत्यगात्मानमिति वा, क्षराक्षरविलक्षणं चैतन्यमिति परमार्थः। **सर्वभावेनेति**। आत्मैवेदं सर्वमिति बुद्ध्येत्यर्थः। **सर्वात्मकतयेति**। सर्वात्मभावेन इत्यर्थः। मां परमात्मानं भजति प्राप्नोति, परमात्मसायुज्यं लभते। निर्मुक्तोपाधिःसन् परिपूर्णचैतन्यात्मनाऽवतिष्ठत इति यावत्। यः परमात्माभिन्नं प्रत्यगात्मानमयमहमस्मीति साक्षात्कुरुते, तस्य ज्ञातव्यांशशेषाभावात् सर्ववित्त्वं, देहावसाने परमात्मसायुज्यं च भवतीति फलितार्थः। यद्वा भजति सेवते। तथा च य एवमात्मानमपरोक्षतया वेद स विद्वान् यावद्देहापायं सर्वं विषयजातं सेवमानोऽपि स्वसेव्यमानं सर्वं तद् ब्रह्मेत्येव वेदेति ब्रह्मैव सेवते। ब्रह्म हि सर्वात्मकं 'सर्वं ब्रह्मे'ति श्रुतेरिति फलितार्थः।

यत्तु **रामानुजः** - ईश्वरं पुरुषोत्तमं ज्ञात्वा सर्वप्रकारैर्भजते जीव इति, **तन्मन्दम्** ; अङ्गैरपीश्वरस्य सेव्यमानत्वात्॥ १९॥

**इतीति**। हे अनघ! इतीदं गुह्यतमं शास्त्रं मयोक्तम्। हे भारत! मुमुक्षुरेतद्बुद्ध्वा बुद्धिमान् कृतकृत्यश्च स्यात्। मोक्षः फलं यस्य तन्मोक्षफलम्। ननु गीताशास्त्रे असमाप्ते सत्येव कथमुक्तम् 'इति शास्त्र'मितीत्यत आह— **यद्यपीति**। ननु कथमस्याध्यायस्यैकस्य

१. 'सर्वात्मतया' इति रा.पा.।

**एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ! ॥ २० ॥**

**इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः ॥ १५ ॥**

**अयमेवाध्यायः इह शास्त्रमित्युच्यते स्तुत्यर्थम् , प्रकरणात्। सर्वो हि गीताशास्त्रार्थोऽस्मिन्नध्याये समासेनोक्तः। न केवलं [1]गीताशास्त्रार्थ एव, किन्तु सर्वश्च वेदार्थः इह परिसमाप्तः। 'यस्तं वेद स वेदवित्' (भ.गी.१५.१), 'वेदैश्च सर्वैरहमेव वेद्यः'(भ.गी.१५.१५) इति चोक्तम्। इदमुक्तं कथितं मया हे** अनघ **अपाप ! ।** एतत् **शास्त्रं यथादर्शितार्थं बुद्ध्वा बुद्धिमान्** स्याद् **भवेत् , नान्यथा,** कृतकृत्यश्च**, भारत ! कृतं** कृत्यं **कर्तव्यं येन स कृतकृत्यः। विशिष्टजन्म-प्रसूतेन ब्राह्मणेन यत् कर्तव्यं तत् सर्वं भगवत्तत्त्वे विदिते कृतं भवेदित्यर्थः। न चान्यथा कर्तव्यं परिसमाप्यते कस्यचिदित्यभिप्रायः। 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते'(भ.गी. ४.३३) इति चोक्तम्। 'एतद्धि जन्मसामग्र्यं**

आनन्दगिरिकृतव्याख्या

**सर्वस्यात्र सङ्क्षिप्तत्वादेव केवलं शास्त्रशब्दो न भवति, किन्तु वेदार्थस्यापि सर्वस्यात्र समाप्तेर्युक्तं शास्त्रपदमित्याह—** नेति। **तत्र गमकमाह —** यस्तमिति। **भगवत्तत्त्वज्ञाने कृतकृत्यतेत्येतदुपपादयति—** विशिष्टेति। **नान्यथेत्युक्तं प्रपञ्चयति—** न चेति। **सत्यपि तत्त्वज्ञाने कर्मणां कर्तव्यत्वान्न कर्तव्यसमाप्तिरित्याशङ्क्याह—** सर्वमिति। **तत्त्वज्ञाने कृतार्थतेत्यत्र मनोरपि सम्मतिमाह—** एतद्धीति। **भारतेति सम्बोधनतात्पर्यमाह—** यत इति।

भाष्यार्कप्रकाशः

शास्त्रत्वम्? अत आह—**सर्वो हीति**। क्षराक्षरपरमात्मव्यतिरिक्तगीताशास्त्रार्थाभावादिति भावः। **इह** अस्मिन्नध्याये। कुतः परिसमाप्तः? अत आह— **यस्तमिति**। समूलसंसारविद एव वेदार्थवित्त्वाद् वेदार्थस्य समूलसंसारस्येहोक्तत्वाच्चेति भावः। कारणान्तरमाह— **वेदैश्चेति**। सर्ववेदवेद्यस्य सर्ववेदार्थभूतस्य परमात्मन इह प्रतिपादितत्वादिति भावः। तव निष्पापत्वादेतच्छ्रवणं जातमित्याह— **हे अनघेति**। **यथादर्शितार्थं** यथोक्तार्थकमित्यर्थः। दर्शितमर्थमनतिक्रम्येति वा। **बुद्धिमान्** सदसद्विवेकशालीत्यर्थः, पण्डित इति यावत्। अनात्मविवेकेनात्मविऊदिति परमार्थः। **अन्यथेति**। एतच्छास्त्रमविदित्वेत्यर्थः। एतच्छास्त्रार्थमन्यथा विदित्वेति वा। **विशिष्टजन्म** सद्वंशः। **ब्राह्मणेनेति**। संन्यासिनेत्यर्थः। 'ब्राह्मणस्य विजानतः' इत्यत्र तथा व्याख्यातत्वादाचार्यैः। संन्यासिनामेव गीताशास्त्रेऽधिकाराच्च। **यत्कर्तव्यमिति**। स्वाश्रमविहितं कर्मेत्यर्थः। यद्वा संन्यासाश्रमस्वीकारात् प्राग् यत् कर्तव्यं यज्ञादिकमस्ति, तत् सर्वं संन्यासाश्रमं स्वीकृत्य प्रकृतशास्त्रार्थवेदने सति तेन कृतमेव भवतीत्यर्थः।

अथवा कलियुगे क्षत्रवैश्ययोः शूद्रप्रायत्वाद् ब्राह्मणेनेत्युक्तम् , ततश्च ब्राह्मणेन द्विजेन यत् कर्तव्यं यज्ञादिकं तत् सर्वं संन्यासाश्रमस्वीकारद्वारा वेदान्तश्रवणं कृत्वा भगवत्तत्त्वे विदिते सति कृतं भवेदित्यर्थः। **एतेन** ब्राह्मणस्यैव गीतास्वधिकारो नान्येषाम् , नापि स्त्रीणामिति **सिद्धम्।** असंन्यासिनामपि ब्राह्मणानां क्वचिद् वेदान्तशास्त्रेऽधिकारदर्शनाद् गृहस्थादीनामपि ब्राह्मणानां वेदान्तपाठ इव गीतापाठेऽप्यस्त्यधिकारः, तदर्थविचारे च। भाष्यकाराणां तु वेदान्तानां गीतानां वा पाठमात्र एवासंन्यासिनामधिकारः, अर्थविचारे तु संन्यासिनामेवेति मतम्। स्त्रीशूद्रादीनां पाठमात्रेऽपि गीतानाम् , वेदानामिव नाधिकारः इति सर्वेषां सम्मतम् , 'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा' इति स्मरणात् , त्रयीतुल्यत्वाच्च गीतायाः। भगवद्गीतासूपनिषत्स्विति ह्युच्यते।

**अन्यथेति**। भगवत्तत्त्ववेदनं विनेत्यर्थः। ज्योतिष्टोमादौ कृतेऽपि चयनादेः कर्तव्यस्यावशिष्यमाणत्वादिति भावः। उक्तार्थे गीतामेव प्रमाणयति— **सर्वमिति**। मनुस्मृतिं च प्रमाणयति— **एतदिति**। 'यद्विष्णोर्लिङ्गधारण'मिति पाठान्तरम्। विष्णोर्लिङ्गं संन्यासस्तद्धारणमिति यत् तदेतदेव **जन्मसामग्र्यं** जन्मनः सामग्र्यं साफल्यं यस्मात् तत् तथोक्तम् , संन्यासिनां तत्त्वविदामेव

१. 'गीताशास्त्रार्थ एव' इति क्वचिन्न।

**ब्राह्मणस्य विशेषतः। प्राप्यैतत् कृतकृत्यो हि द्विजो भवति नान्यथा॥' (म.स्मृ.१२.९३) इति च मानवं वचनम्। यत एतत् परमार्थतत्त्वं मत्तः श्रुतवानसि, ततः कृतार्थस्त्वं भारतेति॥ २०॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीभगवद्गीताभाष्ये पुरुषोत्तमयोगो[1] नाम पञ्चदशोऽध्यायः॥ १५॥**

आनन्दगिरिकृतव्याख्या

**तदनेनात्मनो देहाद्यतिरिक्तत्वं, चिद्रूपत्वं, सर्वात्मत्वं, कार्यकारणविनिर्मुक्तत्वेनाप्रपञ्चत्वं, तस्याखण्डैकरसब्रह्मात्मत्वज्ञानाद् अशेषपुरुषार्थपरिसमाप्तिरित्युक्तम्॥ २०॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते श्रीमद्भगवद्गीताशाङ्करभाष्यव्याख्याने पञ्चदशोऽध्यायः॥ १५॥**

भाष्यार्कप्रकाशः

जन्मफलम् , अन्येषां तु पश्वादिजन्मवद् व्यर्थमेवेत्यर्थः। अकृतकृत्यत्वादज्ञानामिति भावः। एतत्तत्त्वश्रवणादर्जुनोऽपि कृतकृत्य एवेत्याह— **यत इति**। **एतेन** येषामेतदध्यायार्थश्रवणं भवति, ते सर्वेऽपि कृतार्था एवार्जुनवदिति **सूच्यते**।

इदं च भारतेति सम्बोधनसूचितमिति न निर्मूलं भाष्यम्। क्षत्रियाणामसंन्यासिनामपि गीतार्थश्रवणाधिकारोऽस्तीति भगवता अर्जुनाय गीतार्थस्योपदेश एव सूचयतीति कृत्वा कथमर्जुनाय कृष्णेनोक्तमिति न शङ्कनीयमिति। अयं चाध्यायः सर्वगीतार्थवेदार्थपरिसमाप्तिमत्त्वेनोत्कृष्ट इति कृत्वा सर्वगीताशास्त्रपारायणासमर्थाः शिष्टाः इममध्यायमन्वहं पठन्ति। एतत्पाठवशाच्च सर्वपापविनिर्मुक्ताः इह जन्मनि, जन्मान्तरे वा शमदमादिपूर्वकं संन्यासमुपलभ्य, वेदान्तश्रवणादिना तत्त्वं ज्ञात्वा मुक्तिं यास्यन्तीति कृत्वा एतत्पाठोऽपि क्रमेण कृतकृत्यताहेतुरेव। तस्मात् सर्वैरपि मुमुक्षुभिः पठनीयोऽयमध्यायः सर्वथा श्रोतव्यश्चास्यार्थश्चिन्तनीयश्च। धन्योऽस्म्यहं यदेतदध्यायभाष्यार्थविवरणं लब्धं मम। ये चैतत् पश्यन्ति, वदन्ति, शृण्वन्ति ते च धन्या एव। 'एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्चे'त्युक्तत्वेन ज्ञानमात्रमेव कृतकृत्यत्वकारणम् , न तु कर्मज्ञानसमुच्चय इति सूचितम्। ततश्च – 'तरति शोकमात्मवि'दिति श्रुत्यनुसारो गीतायाः सिध्यति। अत एवोपनिषत्तौल्यं गीताया उपनिषदभेदश्च, उपनिषदर्थप्रतिपादकत्वाद् गीताया इति॥ २०॥

पुरुषोत्तमप्राप्तिः - परमात्मस्वरूपप्रतिपादनमिति यावत्। पुरुषोत्तमस्य प्राप्तिर्यस्मात् तत् पुरुषोत्तमप्राप्ति ज्ञानं, तस्य योगः सम्बन्धो यत्र स पुरुषोत्तमप्राप्तियोगः। पुरुषोत्तमप्राप्तिर्मोक्षः, तत्प्रदायकः प्रकृताध्यायार्थश्च पुरुषोत्तमप्राप्तिरुच्यत इति वा; ये गत्यर्थास्ते ज्ञानार्थका इति प्राप्तिर्ज्ञानमित्यर्थ इति वा। क्षराक्षरपुरुषाभ्यामुत्तमस्य पुरुषस्य परमात्मन इह प्रतिपादितत्वादस्याध्यायस्य पुरुषोत्तमप्राप्तियोग इति नाम कृतमिति भावः।

**इति श्रीबेल्लङ्कोण्डोपनामक रामकविकृतौ श्रीभगवद्गीताभाष्यार्कप्रकाशे पुरुषोत्तमप्राप्तियोगो नाम पञ्चदशोऽध्यायः॥ १५॥**

**॥ श्रीहयग्रीवार्पणमस्तु॥**

१. 'पुरुषोत्तमप्राप्तियोगः' इति रा.पा.।

DO NOT
PRINT
THIS PAGE

ॐ श्रीपरमात्मने नमः

# ॥ अथ षोडशोऽध्यायः ॥

**श्री भगवानुवाच—**

**अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।**
**दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥ १॥**

**दैवी आसुरी राक्षसी चेति प्राणिनां प्रकृतयो नवमेऽध्याये सूचिताः। तासां विस्तरेण प्रदर्शनाय 'अभयं सत्त्वसंशुद्धिः' इत्यादिरध्यायः आरभ्यते। तत्र संसारमोक्षाय दैवी प्रकृतिः[1], निबन्धनायासुरी राक्षसी च इति, दैव्याः आदानाय प्रदर्शनं क्रियते, इतरयोः परिवर्जनाय च। श्रीभगवानुवाच—** अभयमिति। अभयम् **अभीरुता।** सत्त्वसंशुद्धिः **सत्त्वस्यान्तःकरणस्य संशुद्धिः, संव्यवहारेषु परवञ्चनामायाऽनृतादिपरिवर्जनम् , शुद्धसत्त्वभावेन व्यवहारः इत्यर्थः।** ज्ञानयोगव्यवस्थितिः **ज्ञानं शास्त्रतः आचार्यतश्चात्मादिपदार्थानामवगमः, अवगतानामिन्द्रियाद्युपसंहारेणैकाग्रतया स्वात्मसंवेद्यतापादनं योगः, तयोर्ज्ञानयोगयोः** व्यवस्थितिः **व्यवस्थानम् , तन्निष्ठता। एषा प्रधाना दैवी**

## आनन्दगिरिकृतव्याख्या

**व्यवहितेन सम्बन्धं वदन्नध्यायान्तरमवतारयति—** दैवीति। सूचिताः **'राक्षसीमासुरीं चैव प्रकृतिं मोहिनीम्' इत्यादाविति**[2] **शेषः। प्रकृतीनां विस्तरेण दर्शनं कुत्रोपयोगीत्याशङ्क्य विभज्योपयोगमाह—** संसारेति। अतीते चाध्याये **'कर्मानुबन्धीनि अधश्च मूलान्यनुसन्ततानि' इत्यत्र कर्मव्यङ्ग्याः** वासनाः **संसारस्यावान्तरमूलत्वेनोक्ताः, ताः मनुष्यदेहे प्राग्भवीयकर्मानुसारेण व्यज्यमानाः सात्त्विकादिभेदेन दैव्यादिप्रकृतित्रयत्वेन विभक्ताः वितिस्तीर्षुः भगवानुक्तवानित्याह—** श्रीभगवानिति। अभीरुता **शास्त्रोपदिष्टेऽर्थे सन्देहं हित्वाऽनुष्ठाननिष्ठत्वम्।** परवञ्चना **परस्य व्याजेन वशीकरणम् ,** माया **हृदयेऽन्यथा कृत्वा बहिरन्यथा व्यवहरणम् ,** अनृतम् **अयथादृष्टकथनम्। आदिपदेन विप्रलम्भादिग्रहः। उक्तमर्थं संक्षिप्याह—** शुद्धेति। एषेति **अभयाद्या ज्ञानादिस्थित्यन्ता त्रिधोक्तेति यावत्।**

## भाष्यार्कप्रकाशः

**प्रकृतयः** स्वभावाः। **नवम इति।** 'मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः। राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः॥ महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः। भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्॥' इति तत्रोक्तत्वादिति भावः। सङ्क्षेपेणोक्तार्थस्य विस्तरेण कथनमिह सङ्गतिरिति बोध्यम्। किमर्थं तत्प्रदर्शनम्? अत आह— **तत्रेति।** प्रकृतित्रयमध्य इत्यर्थः। **संसारेति।** 'दैवी सम्पद् विमोक्षाय निबन्धायासुरी मते'ति वक्ष्यमाणत्वादिहैवेति भावः। **आदानायेति।** धर्मवत् स्वीकारायेत्यर्थः। **इतरयोः** राक्षस्याः आसुर्याश्चेत्यर्थः। **परिवर्जनायेति।** अधर्मवदिति भावः। दैवी विज्ञाता ग्रहणयोग्या, आसुरी राक्षसी च विज्ञाता परित्यागयोग्येति तद्विज्ञानमावश्यकमिति तद्विज्ञानार्थमाह भगवानिममध्यायं षोडशमिति भावः। **अभयमिति।** 'द्वितीयाद्वै भयं भवती'ति श्रुतेरद्वितीयब्रह्मज्ञानसाध्यमिदमभयं भयाभावः। देहादिकं सर्वमनित्यमिति निश्चयाद् व्याध्यादिभ्यो भयाभावोऽभयमिति वा। न तु नास्तिकवद् नरकादेर्भयाभावः इहाभयमित्युक्तमिति भ्रमितव्यम् , तस्यासुरसम्पद्विषयत्वात्। **शुद्धसत्त्वभावेनेति।** निष्कापट्येनेत्यर्थः। अन्तरेकमर्थं निधाय बहिरन्यार्थस्य कथनं कपटस्वभावः, तद्विपरीतोऽयं शुद्धसत्त्वस्वभावः। यदन्तर्बहिश्चैकरूप्येण वर्तनम्। **स्वात्मसंवेद्यतापादनं** स्वानुभवापादनम्। **एषेति।** अभयादित्रिकमित्यर्थः। का दैवीत्यत आह— **सात्त्विकीति।** सात्त्विकीं लक्षयति—

---

१. **अभयं** सर्वभूताभयदानसङ्कल्पपालनम् । एतच्चान्येषामपि परमहंसधर्माणामुपलक्षणम् । **सत्त्वसंशुद्धिः** श्रवणादिपरिपाकेणान्तःकरणस्यासम्भावनाविपरीतभावनादिमलराहित्यम्। **ज्ञानमात्मसाक्षात्कारः, योगो** मनोनाशवासनाक्षयानुकूलः पुरुषप्रयत्नः, ताभ्यां विशिष्टा संसारिविलक्षणावस्थितिर्जीवन्मुक्तिः **ज्ञानयोगव्यवस्थितिः** इति व्याख्यायां फलभूतैव दैवी सम्पदियं द्रष्टव्या। इति मधुसूदनी। २. आदिपदेन 'श्रिताः। महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः' इति ग्राह्यम्।

**अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।**
**दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥२॥**

**सात्त्विकी सम्पत्। यत्र च येषामधिकृतानां या प्रकृतिः सम्भवति, सात्त्विकी सोच्यते।** दानं **यथाशक्ति संविभागोऽन्नादीनाम्।** दमश्च **बाह्यकरणानामुपशमः। अन्तःकरणस्योपशमं शान्तिं वक्ष्यति।** यज्ञश्च **श्रौतोऽग्निहोत्रादिः, स्मार्तश्च देवयज्ञादिः।** स्वाध्यायः **ऋग्वेदाद्यध्ययनमदृष्टार्थम्।** तपो [१]**वक्ष्यमाणं शारीरादि।** आर्जवम् **ऋजुत्वं सर्वदा॥१॥**

**किञ्च—**अहिंसेति। अहिंसा **अहिंसनं प्राणिनां पीडावर्जनम्।** सत्यम् **अप्रियानृतवर्जितं यथाभूतार्थवचनम्।** अक्रोधः **परैराक्रुष्टस्याभिहतस्य वा प्राप्तस्य क्रोधस्योपशमनम्।** त्यागः **संन्यासः, पूर्वं दानस्योक्तत्वात्।** शान्तिः **अन्तःकरणस्योपशमः।** अपैशुनम् **अपिशुनता, परस्मै पररन्ध्रप्रकटीकरणं पैशुनम्, तदभावोऽपैशुनम्।** दया **कृपा भूतेषु दुःखितेषु।** अलोलुप्त्वम्[२] **इन्द्रियाणां विषयसन्निधावविक्रिया।** मार्दवं **मृदुता अक्रौर्यम्।** ह्रीः **लज्जा।** अचापलम् **असति प्रयोजने वाक्पाणिपादादीनामव्यापारयितृत्वम्॥२॥**

आनन्दगिरिकृतव्याख्या

**तामेव सात्त्विकीं प्रकृतिं प्रकटयति—** यत्रेति। **ज्ञाने कर्मणि वाऽधिकृतानाम् अभीरुताद्या या प्रकृतिः, सा तेषां तत्र सात्त्विकी सम्पदित्यर्थः। महाभाग्यानामत्युत्तमा दैवी सम्पदुक्ता; सम्प्रति सर्वेषां यथासम्भवं सम्पदं व्यपदिशति—** दानमिति। [३]**बाह्यकरणविशेषणे कारणमाह—** अन्तःकरणस्येति। **देवयज्ञादिरित्यादिशब्देन पितृयज्ञो भूतयज्ञो मनुष्ययज्ञश्चेति त्रयमुक्तम्। ब्रह्मयज्ञस्य स्वाध्यायेन पृथक्करणात्॥१॥**

**दैवीं सम्पदमभिजातस्य विशेषणान्तराणि दर्शयति—** किञ्चेति। **त्यागशब्देन दानं कस्मान्नोच्यते? तत्राह—** पूर्वमिति। लज्जा **अकार्यानुवृत्तिहेतुगर्हानिमित्ता मनोवृत्तिः॥२॥**

भाष्यार्कप्रकाशः

**यत्रेति।** **यत्र** च ब्रह्मचर्याग्निहोत्रादौ, **येषां** ब्रह्मचारिगृहस्थादीनाम्। **यत्र** च इज्याध्ययनयुद्धादौ, **येषां** ब्राह्मणक्षत्रियादीनामिति वा। या **प्रकृतिः** स्वभावः, प्रवृत्तिरिति यावत्। सम्भवति सा सात्त्विकीत्युच्यते। स्वस्ववर्णाश्रमविहितानुष्ठानं सात्त्विकी प्रकृतिरित्यर्थः। शक्तिमनतिक्रम्य **यथाशक्ति** स्वशक्त्यनुगुणमित्यर्थः। **अन्नादीनाम्** अन्नधान्यधनादीनां **संविभागः** अर्थ्यादिभ्यो यथार्हं विभजनम्। **उपरमो** निर्व्यापारता। **वक्ष्यतीति।** शान्तिरित्यनेनेति भावः। **अदृष्टार्थमिति।** आमुष्मिकफलकमित्यर्थः। इदं विशेषणं स्वाध्याये तपसि चान्वेति। **शारीरादीति।** 'देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्। ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्। स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥ मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः। भावसंशुद्धिरित्येतत् तपो मानसमुच्यते॥' इत्यनन्तराध्याये वक्ष्यति। **ऋजुत्वमवक्रत्वम्**, समस्वभाव इति यावत्॥१॥

**अहिंसेति।** न हिंसा अहिंसा, हिंसाऽभावः। **अप्रियानृतवर्जितमिति।** अप्रियानृताभ्यामन्यदित्यर्थः। यदप्रियं न भवति, यच्चानृतं न भवति तदिति यावत्। प्रियं नामात्र हितम्, न त्विष्टम्, यथाभूतार्थवचनस्यापि केषाञ्चित् पिशुनादीनामनिष्टत्वात्। अनिष्टमपि हितमेव चोरस्यापि सत्यवचनम्, राजदण्डनेन पापक्षयादिति। यद्वा **अप्रियानृतवर्जितम्** अप्रियत्वानृतत्वरहितम्। तथा च स्मर्यते – 'सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम्। प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः॥' इति। **यथाभूतार्थवचनमिति।** यथाभूतप्रियार्थवचनमित्यर्थः। योऽर्थो यथाभूतस्तस्यार्थस्य प्रियस्य तथैव कथनमिति यावत्। यथाभूतस्याप्यप्रियस्य वर्जनाय

१. 'देवद्विजगुरुप्राज्ञपूजनम्' इति वक्ष्यमाणमित्यर्थः। न च वक्ष्यमाणतपोग्रहणे शौचाहिंसादेः तदन्तर्भावात् पौनरुक्त्यमिति वाच्यम्। गोबलीवर्दन्यायेन तदतिरिक्तस्यैव तपःपदेनात्र ग्रहणात्। २. लोलुप्यतेः कर्तरि क्विपि लोलुप् शब्दः, ततः त्वप्रत्ययान्तेन नञ्समासे अलोलुप्त्वमिति रूपं बोध्यम्। अलोलुपत्वम् इत्यर्थः। ३. बाह्येति करणविशेषणे इत्यर्थः।

**तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।**
**भवन्ति सम्पदं दैवीमभि जातस्य भारत !॥ ३॥**

**किञ्च—** तेज इति। तेजः **प्रागल्भ्यं, न त्वग्गता दीप्तिः**। क्षमा **आक्रुष्टस्य ताडितस्य वाऽन्तर्विक्रियानुत्पत्तिः। उत्पन्नायां विक्रियायां प्रशमनम् अक्रोधः इत्यवोचाम। इत्थं क्षमाया अक्रोधस्य च विशेषः**। धृतिः **देहेन्द्रियेष्ववसादं प्राप्तेषु तस्य प्रतिषेधकोऽन्तःकरणवृत्तिविशेषो येनोत्तम्भितानि करणानि देहश्च नावसीदन्ति**। शौचं **द्विविधं, मृज्जलकृतं बाह्यम् , आभ्यन्तरं च मनोबुद्ध्योर्नैर्मल्यं मायारागादिकालुष्याभावः। एवं द्विविधं शौचम्**। अद्रोहः **परजिघांसाभावो ऽहिंसनम्**। नातिमानिता **अत्यर्थं मानोऽतिमानः, स यस्य विद्यते सोऽतिमानी, तद्भावोऽतिमानिता, तदभावो नातिमानिता, आत्मनः पूज्यतातिशयभावनाऽभाव इत्यर्थः। भवन्ति अभयादीन्येतदन्तानि सम्पदमभि जातस्य।**

आनन्दगिरिकृतव्याख्या

**दैवीं सम्पदं प्राप्तस्य विशेषणान्तराण्यपि सन्तीत्याह—** किञ्चेति। **व्यावर्त्यं कीर्तयति—** नेति। **अध्यात्माधिकारादिति शेषः। क्षमाऽक्रोधयोरेकार्थत्वेन पौनरुक्त्यमाशङ्क्य परिहरति—** उत्पन्नायामिति। **तयोरेवं विशेषादपौनरुक्त्यं फलतीत्याह—**इत्थमिति। **वृत्तिविशेषमेव विशदयति—** येनेति। **शौचस्य द्वैविध्यमेव प्रकटयति—** मृज्जलेत्यादिना। **नैर्मल्यमेव स्फोरयति—** मायेति। **उक्तमुपसंहरति —** एवमिति। **अतिमानित्वाभावमेव व्यनक्ति—** आत्मन इति। **कस्यैतानि विशेषणानीत्यपेक्षायामाह—** भवन्तीति। **साधकस्य मनुष्य-**

भाष्यार्कप्रकाशः

प्रियस्येत्युक्तम्। प्रियस्याप्यनृतस्य वर्जनाय यथाभूतार्थस्येत्युक्तम्। यथाभूतप्रियार्थवचनं, यथाभूतहितार्थवचनं वा सत्यमिति फलितार्थः। अप्रियानृतवर्जितं वचनं सत्यमित्युच्यते। अप्रियानृतवर्जितमित्यस्यैव व्याख्यानं यथाभूतार्थवचनमिति विवेकः। अन्यथा अनृतवर्जितमित्यनेनैव यथाभूतार्थसिद्धौ यथाभूतेत्यस्य पुनरुक्तिः स्यात्। यथाभूतेत्यनेनैवानृतवर्जितत्वसिद्धावनृतवर्जितमित्यस्य वा पुनरुक्तेः। अप्रियवर्जितं यथाभूतार्थकथनमिति भाष्यपाठस्तु निरवद्यः। यथाभूतप्रियार्थकथनं सात्त्विकस्वभावः। तेन यः सात्त्विकीं दैवीं सम्पदमिच्छति प्राप्तुं स पुरुषो यथाभूतप्रियार्थमेव ब्रूयात्।

**रामानुजेनाप्युक्तम्** - सत्यं यथादृष्टार्थगोचरभूतहितवाक्यमिति। यद्यपि यथाभूतार्थवचनेनैव सत्यवादी भवति, तथापि 'सत्यं भूतहितं प्रोक्त'मिति नियमात् तथाभूतोक्तिरिति **वेदान्तदेशिकेनाप्युक्तम्**। परन्तु वाक्यमिति कथनमयुक्तं **रामानुजस्य**। वाक्यप्रयोगस्यैव सात्त्विकपुरुषधर्मत्वम् , न तु वाक्यमिति [वाक्यस्येति]। **आक्रुष्टस्य** अधिक्षिप्तस्य **अभिहतस्य** ताडितस्य वा सतः स्वस्य यः प्राप्तः क्रोधः, तस्योपशमनमक्रोधः। संन्यासः कर्मणां तत्फलस्य वा परित्यागः। न तु द्रव्यत्याग इत्याह— **पूर्वमिति**। **पिशुनः** सूचकः। **रन्ध्राणि** दोषाः। **लज्जेति**। आत्मगुणश्रवणादिष्विति भावः। अकार्यकरणे इति **रामानुजः,** तदसत् , अकार्यकरणेच्छाप्रसक्तेरप्यभावात् सात्त्विकपुरुषस्य। **अव्यापारयितृत्वं** वचनादिव्यापाराजनकत्वम्॥ २॥

**तेज इति**। **प्रागल्भ्यं** पराभिभवनसामर्थ्यं, प्रौढत्वमिति यावत्। न तु देहकान्तिरित्याह— **नेति**। **अन्तर्विक्रिया** मनोविकारो दुःखामर्षादिः। उत्पन्नविकारोपशमनमक्रोधः; विकारानुत्पत्तिः क्षमेति विवेकमाह— **उत्पन्नायामिति**। सत्यामिति शेषः। **उपशमनमिति**। विक्रियायाः इति शेषः। 'उत्पन्नायाः विक्रियायाः उपशमनम्' इति भाष्यपाठः समीचीनः। **अवसादं** शैथिल्यम्। **तस्य** अवसादस्य। **उत्तम्भितानि** उच्छ्वसितानि **करणानी**न्द्रियाणि समनस्कानि नावसीदन्ति; देहश्च नावसीदति। **द्विविधमिति**। बाह्यमाभ्यन्तरं वेति भावः। **माया** वञ्चनादिः; **रागः** कामः; आदिपदात् क्रोधादिग्रहणम्। अहिंसेत्यनेन परद्रोहः प्रतिषिद्धः। अद्रोहः इत्यनेन परद्रोहेच्छैव प्रतिषिध्यत इति भेदः। अतिमानितायाः अभावो **नातिमानिता**, पूज्यतातिशयस्य भावनं प्रकटनम् , तदभावः आत्मश्लाघाराहित्यमित्यर्थः। **अभिलक्ष्य** उद्दिश्य। **भावि** भविष्यत् **कल्याणं** देवत्वरूपं यस्य तस्य भाविकल्याणस्य। अभयादयः एते देवधर्माः यस्य सात्त्विकपुरुषस्य सन्ति, स एतद्देहावसाने देवो भविष्यतीत्यर्थः।

**दम्भो दर्पोऽतिमानश्च[1] क्रोधः पारुष्यमेव च।**
**अज्ञानं चाभि जातस्य पार्थ ! सम्पदमासुरीम्॥ ४॥**
**दैवी सम्पद् विमोक्षाय निबन्धायासुरी मता।**
**मा शुचः सम्पदं दैवीमभि जातोऽसि पाण्डव !॥ ५॥**

**किंविशिष्टां सम्पदम्?** दैवीम् , **[2]देवानां या सम्पत् तामभिलक्ष्य जातस्य दैवविभूत्यर्हस्य भाविकल्याणस्येत्यर्थः, हे भारत ! ॥३॥**

**अथेदानीमासुरी सम्पदुच्यते—**दम्भ इति। दम्भो **धर्मध्वजित्वम्।** दर्पो **विद्याधन[3]स्वजनादिनिमित्तः उत्सेकः।** अतिमानः **पूर्वोक्तः, क्रोधश्च।** पारुष्यमेव **च परुषवचनम् - यथा काणं चक्षुष्मान् , विरूपं रूपवान् , हीनाभिजनम् उत्तमाभिजनः इत्यादि।** अज्ञानं **चाविवेकज्ञानं [4]मिथ्याप्रत्ययः कर्तव्याकर्तव्यादिविषयम् । अभि जातस्य, पार्थ ! किमभि जातस्येत्याह—** संपदमासुरीम् **असुराणां सम्पद् आसुरी, तामभि जातस्येत्यर्थः ॥४॥**

**अनयोः सम्पदोः कार्यमुच्यते—** दैवीति। **दैवी सम्पद् या सा विमोक्षाय संसारबन्धनात् ,** निबन्धाय **नियतो**

आनन्दगिरिकृतव्याख्या

**देहस्थस्यैव कथं दैवीं सम्पदमभिलक्ष्य जातत्वमित्याशङ्क्याह—** दैवेति॥ ३॥

**आदेयत्वेन दैवीं सम्पदमुक्त्वा हेयत्वेनासुरीं सम्पदमाह—** अथेति। उत्सेको **मदो महदवधीरणाहेतुः। आत्मन्युत्कृष्टत्वाध्यारोपो** ऽतिमानः। क्रोधस्तु **कोपापरपर्यायः स्वपरापकारप्रवृत्तिहेतुर्नेत्रादिविकारलिङ्गः अन्तःकरणवृत्तिविशेषः।** परुषो **निष्ठुरः प्रत्यक्षरूक्षवाक्, तस्य भावः पारुष्यम्। तदुदाहरति—** यथेति। तामभिजातस्य **दम्भादीनि अज्ञानान्तानि भवन्तीत्यनुषज्यते॥४॥**

भाष्यार्कप्रकाशः

यद्वा कल्याणं स्वर्गापवर्गान्यन्तरात्मकम्। तथा च यस्याभयादयः सन्ति स देवविभूतिप्राप्त्यर्हः सम्यग्दर्शनानुदये देवत्वं प्राप्स्यति। तदुदये च मुक्तिं प्राप्स्यतीत्यर्थः। अथवा कल्याणं मोक्ष एव 'दैवी सम्पद्विमोक्षाये'ति वक्ष्यमाणत्वात्। देवविभूत्यर्होऽप्यय-मभयादिगुणवान् सात्त्विकः पुरुषः सम्यग्ज्ञानान्मोक्ष्यत इत्यर्थः। **एतेन** यथा दिवि देवा राक्षसाश्चेति द्वेधा पुरुषाः सन्ति; शान्ताः क्रूराश्च तथा भुव्यपि मनुष्येषु देवाः राक्षसाश्चेति द्विविधाः सन्ति। तत्राभयाद्युक्तगुणवन्तः पुरुषा मनुष्या देवाः। दम्भादिवक्ष्यमाणगुण-शालिनस्तु मनुष्याः राक्षसा असुराश्चेति **सिद्धम्।** 'दैवीमभिजातस्ये'त्यस्य भगवदाज्ञां निर्वर्तयितुं जातस्येति **रामानुजो**ऽर्थमाह। नेदं सम्यक्, हिरण्याक्षादिराक्षसानामपि भगवदाज्ञानिर्वर्तनायैव जातत्वात्। यथाश्रुतार्थं विहायैतल्लाक्षणिकार्थकल्पनस्यान्याय्यत्वात्॥ ३॥

**दम्भ इति। धर्मध्वजित्वं** धर्म एव ध्वजो धर्मध्वजः, सोऽस्यास्तीति धर्मध्वजी, तत्त्वम्। यथा पार्थादीनां कप्यादयो ध्वजास्तथा ऽस्य धर्म एव ध्वज इत्यर्थः। यथा राजानो ध्वजैः स्वप्रतिष्ठां प्रख्यापयन्ति, तथा अयं धर्मेण स्वप्रतिष्ठां प्रख्यापयतीति भावः। धार्मिकत्वप्रख्यापनाय धर्मानुष्ठानं दम्भ इति यावत्। **स्वभिजनः** सत्कुलोत्पत्तिः। आदिपदाद् रूपादिग्रहणम्। **उत्सेको** गर्वः। **पूर्वोक्त इति।** आत्मनः पूज्यतातिशयभावनेत्यर्थः। **क्रोधः** इष्टवस्तुविघातादिजन्यो मनोविकारः प्रसिद्धः। येन कर्तव्याकर्तव्यविमूढःसन् मातरं, पितरं, भ्रातरं, सुतं वा हन्ति। परुषवचनं कटुवाक्प्रयोगः। तदेव दर्शयति— **यथेति।** चक्षुष्मान् काण इति, रूपवान् विरूप इति, उत्तमाभिजनो हीनाभिजन इति च यदुच्यते, तद्वचनं परुषमित्यर्थः। गुणवत्यपि पुरुषे दोषमारोप्य दूषणं पारुष्यमिति यावत्। **मिथ्या-प्रत्ययो** भ्रमः; कर्तव्ये विषये अकर्तव्यबुद्धिः; अकर्तव्ये च कर्तव्यबुद्धिरित्यर्थः। आसुरीमित्युपलक्षणं राक्षस्याश्च। असुराणामियम् **आसुरी॥४॥**

---

१. 'ऽभिमानश्च' इति पा.। २. 'देवानां संपदमभिलक्ष्य' इति पा.। ३. 'स्वभिजन' इति रा.पा.। ४. 'कर्तव्याकर्तव्यादिविषयमिथ्याप्रत्ययः' इति पा.।

**द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च।**
**दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु॥ ६॥**

**बन्धो निबन्धः, तदर्थम्** आसुरी सम्पद् मता **अभिप्रेता। तथा राक्षसी च। तत्रैवमुक्ते अर्जुनस्यान्तर्गतं भावं 'किमहमासुरसम्पद्युक्तः, किंवा दैवसम्पद्युक्तः?' इत्येवमालोचनारूपमालक्ष्याह भगवान्—** मा शुचः **शोकं मा कार्षीः।** सम्पदं दैवीम् अभि जातोऽसि **अभिलक्ष्य जातोऽसि, भाविकल्याणस्त्वमसीत्यर्थः;** हे पाण्डव !॥५॥

द्वौ भूतेति। द्वौ **द्विसङ्ख्याकौ** भूतसर्गौ **भूतानां मनुष्याणां सर्गौ सृष्टी भूतसर्गौ, सृज्येते इति सर्गौ। भूतान्येव सृज्यमानानि दैवासुरसम्पद्द्वययुक्तानीति द्वौ भूतसर्गावित्युच्यते[१], 'द्वया ह प्राजापत्या देवाश्चासुराश्च'(बृ.उ.१.३.१) इति श्रुतेः।** लोकेऽस्मिन् **संसार इत्यर्थः, सर्वेषां द्वैविध्योपपत्तेः। कौ तौ भूतसर्गाविति? उच्यते— प्रकृतावेव** दैवः, आसुर एव च। **उक्तयोरेव पुनरनुवादे प्रयोजनमाह—** दैवो **भूतसर्गः 'अभयं सत्त्वसंशुद्धि'रित्यादिना** विस्तरशो **विस्तरप्रकारैः** प्रोक्तः **कथितः, न त्वासुरो विस्तरशः। अतस्तत्परिवर्जनार्थम्** आसुरम् , हे पार्थ ! मे **मम वचनादुच्यमानं विस्तरशः** शृणु **अवधारय॥** ६॥

आनन्दगिरिकृतव्याख्या

कार्यं **फलविभागः। आसुरीत्युपलक्षणम् , राक्षसी चेति द्रष्टव्यमित्याह—** तथेति। **फलविभागे सम्पदोरेवमुक्ते, प्रतीत्यार्जुनस्याभिप्रायं भगवतो वचनमित्याह—** तत्रेति। **तत्राभिजात्यं हेतुं करोति—** हे पाण्डवेति॥५॥

**निर्दयानां रक्षसां सम्पत् तृतीयाऽस्ति, सा कस्मान्नोक्तेत्याशङ्क्य, आसुर्यामन्तर्भावादित्याह—** द्वाविति। **भूतानां द्वैविध्ये मानत्वेन उद्गीथब्राह्मणमुदाहरति—** द्वया हेति। **सम्पद्द्वययुतेभ्योऽतिरिक्तानामपि प्राणिभेदानां सम्भवात् कुतो भूतानां द्वित्वनियतिः? इत्याशङ्क्याह—** सर्वेषामिति॥ ६॥

भाष्यार्कप्रकाशः

**दैवीति**। ननु दैवी मोक्षहेतुः, आसुरी संसारहेतुश्चेत्युक्तम् , न तु - राक्षसी कस्यापि हेतुरिति, अत आह— **राक्षसी चेति**। राक्षसी च संसारहेतुरेवेत्यर्थः॥५॥

**द्वाविति**। अस्मिन् लोके दैव आसुर एव चेति द्वौ भूतसर्गौ स्तः। तत्र मया दैवो भूतसर्गो विस्तरशः प्रोक्तः। हे पार्थ! आसुरं भूतसर्गं मे वचनाद् विस्तरशः शृणु। [२]आसुरराक्षसयोरभेदाद् द्वावित्युक्तिः। भूतानां सृष्टिर्द्विविधा - दैवी आसुरी चेति। अयं च सृष्टिभेदः सृज्यमानभूतभेदप्रयुक्त एवेति बोध्यम्। सर्गशब्दस्य भावव्युत्पत्त्या सृष्ट्यर्थमभिधाय कर्मव्युत्पत्त्या अर्थान्तरमाह— **सृज्येते इति**। भूतान्येव सर्गौ भूतसर्गौ। सृज्यमानदेवासुरसम्पद्द्वययुक्तभूतानीत्यर्थः। सृज्यमानभूतानि द्विविधानि - देवसम्पद्युक्तानि, असुरसम्पद्युक्तानि चेति भावः। तत्र श्रुतिं प्रमाणयति— **द्वया हीति**। देवाश्चासुराश्चेति प्राजापत्या द्वया हि। प्रजापतिर्ब्रह्मा, तेन सृष्टाः प्राणिनः **प्राजापत्याः**। **द्वया** द्विविधाः, हिः प्रसिद्धौ। ननु जगति देवासुरसम्पद्द्वयरहितपृथिव्यादिभूतसर्गस्याप्यचेतनस्य सत्त्वात् कथं 'द्वौ भूतसर्गौ लोकेऽस्मिन्' इत्युक्तम् अत आह— **संसार इति**। संसारविषयभूतौ भूतसर्गौ द्वावेव। अचेतनानां संसाराविषयत्वादिति भावः। **सर्वेषामिति**। संसाराश्रयाणां सचेतनानामित्यर्थः। देवासुरसम्पदन्यतररहितः कोऽपि प्राणी नास्तीति द्वैविध्यमेव भूतानामिति भावः। कौ तौ भूतसर्गाविति शङ्कायामाह भगवान्— **दैव आसुर एव चेति**। तौ च नाप्रकृतावित्याह भगवान् भाष्यकारः— **प्रकृतावेवेति**। दैवासुरसम्पत्प्रदर्शनप्रकरणत्वादस्याध्यायस्येति भावः। **तत्परिवर्जनार्थमिति**। आसुरसम्पत्परित्यागार्थमिति। आसुरसर्गस्य विस्तरेण कथनार्थं दैवासुरयोरिह पुनरनुवादः कृतः। तच्च कथनम् आसुरसम्पत्परिवर्जनार्थमिति भावः॥ ६॥

१.'युक्तानि द्वौ भूतसर्गावित्युच्येते, द्वया हि' इति रा.पा.। २. विषयभोगप्राधान्येन रागप्राबल्यादासुरीत्वम् , हिंसाप्राधान्येन द्वेषप्राबल्याद् राक्षसीत्वमिति विवेकः।

**प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।**
**न शौचं नापि चाचारो न सत्यं तेषु विद्यते॥ ७॥**
**असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।**
**अपरस्परसम्भूतं किमन्यत् कामहैतुकम्[1]॥ ८॥**

**आ अध्यायपरिसमाप्तेः आसुरी सम्पत् प्राणिविशेषणत्वेन प्रदर्श्यते, प्रत्यक्षीकरणेन च शक्यते तस्याः परिवर्जनं कर्तुमिति—** प्रवृत्तिमिति। प्रवृत्तिं **च प्रवर्तनं, यस्मिन् पुरुषार्थसाधने कर्तव्ये प्रवृत्तिः तां,** निवृत्तिं **च तद्विपरीतां यस्मादनर्थहेतोर्निवर्तितव्यं सा निवृत्तिः, तां च जना आसुराः** न विदुः **न जानन्ति। न केवलं प्रवृत्तिनिवृत्ती एव ते न विदुः, न शौचं नापि चाचारो न सत्यं तेषु विद्यते। अशौचा अनाचारा मायाविनोऽनृतवादिनो ह्यासुराः॥ ७॥**

**किञ्च —** असत्यमिति। असत्यं **यथा वयमनृतप्रायास्तथेदं जगत् सर्वमसत्यम्,** अप्रतिष्ठं **च नास्य धर्माधर्मौ प्रतिष्ठा, अतोऽप्रतिष्ठं चेति** ते **आसुरा जनाः** जगदाहुः। अनीश्वरम् **न च [2]धर्माधर्मसव्यपेक्षकोऽस्य शासितेश्वरो विद्यत**

आनन्दगिरिकृतव्याख्या

**नन्वध्यायशेषेणासुरसम्पद्दर्शनमयुक्तम्, तस्याः त्याज्यत्वेन [3]पङ्कप्रक्षालनन्यायावतारादित्याशङ्क्याह—** प्रत्यक्षीकरणेनेति। **वर्जनीयामासुरीं सम्पदं विवृणोति—** प्रवृत्तिं चेति। तां **विहितां प्रवृत्तिं न जानन्तीत्यर्थः।** तां च **निषिद्धां क्रियां न जानन्तीति सम्बन्धः। 'न शौच'मित्यादेस्तात्पर्यमाह—** अनाचारा इति। **शौचसत्ययोराचारान्तर्भावेऽपि ब्राह्मणपरिव्राजकन्यायेन पृथगुपादानम्॥ ७॥**

**आसुराणां जनानां विशेषणान्तराण्यपि सन्तीत्याह—** किञ्चेति। **विद्यत इत्याहुरिति पूर्वेण सम्बन्धः। शास्त्रैकगम्यमदृष्टं**

भाष्यार्कप्रकाशः

**आ अध्यायपरिसमाप्तेरिति** छेदः। अध्यायपरिसमाप्तिपर्यन्तमसुरसम्पदिह वर्ण्यत इत्यर्थः। **प्राणिविशेषाः** आसुरसम्पच्छालिन इत्यर्थः। तथा प्रदर्शने फलमाह— **प्रत्यक्षेति। तस्याः** आसुरसम्पदः। प्रत्यक्षेण ज्ञाता ह्यसुरसम्पत् त्यक्तुं शक्यते पुरुषेणेत्यर्थः। **प्रवृत्तिमिति।** आसुरा जनाः प्रवृत्तिं च निवृत्तिं च न विदुः। शौचं न विदुः। तेष्वाचारोऽपि न विद्यते। सत्यं च न विद्यते। यज्ञादिविहितकर्मणि प्रवृत्तिं, हिंसादिनिषिद्धकर्मणो निवृत्तिं च न विदुरित्याह— **यस्मिन्निति।** पुरुषार्थस्य स्वर्गादेः साधने कर्तव्ये यज्ञादिकर्मणि विहिते या प्रवृत्तिः प्रवर्तनं तां तत्कर्मविषयतत्प्रवृत्तिमित्यर्थः। **तद्विपरीतामिति।** प्रवृत्तिविपरीतामित्यर्थः। अनर्थहेतोः नरकादिदुःखहेतोरधर्मान्निवर्तितव्यं पुरुषेणेति शेषः; स्वेनेति वा। **सा** तस्मान्निवर्तनमित्यर्थः; विधेयप्राधान्यात् स्त्रीत्वम्; निवृत्तिः इत्युच्यत इति शेषः। **तां** च निवृत्तिमनर्थहेतोर्निषिद्धकर्मणो निवर्तनमित्यर्थः। **आसुराः** असुरसम्पच्छालिनोऽसुरांशजा वेति यावत्। **न विदुरिति।** अज्ञानादेव विहिते कर्मणि न प्रवर्तन्ते, निषिद्धान्नैव निवर्तन्त इत्यर्थः। 'न केवल'मिति वाक्यस्यानन्तरं 'किन्तु' इति शेषः। एवंविधजनानामासुरत्वे को हेतुः? अत आह— **अनाचारा इति। मायाविनः** परवञ्चकाः। जनाश्चासुराः 'स्वर्गो नास्ति, नरकं नास्ती' त्येवं वदन्तः परेषामपि बुद्धिं भेदयन्ति। हिः प्रसिद्धौ। हि यस्मादिति वा। यस्मादसुरा एवंविधास्तस्मादासुरा जनास्तादृशा इत्यर्थः॥ ७॥

**असत्यमिति।** ते जगद् असत्यमप्रतिष्ठमनीश्वरं चाहुः। अपरस्परसम्भूतं किञ्चिन्न। कामहेतुकम्। **असत्यप्रायाः** अनृतप्रचुराः। **असत्यं** सत्यरहितम्। 'आत्मवन्मन्यते जगदि'ति न्यायादिति भावः। जगतोऽसत्यत्वं तद्गतप्राणिद्वारेति बोध्यम्। जगति कोऽपि प्राणी सत्यवान् न भवतीत्यर्थः। **अप्रतिष्ठं** धर्माधर्माख्यप्रतिष्ठारहितम्, धर्माधर्मपरतन्त्रं न भवतीत्यर्थः। जन्मान्तरकृतधर्माधर्मवशात् प्राणिनां सुखदुःखसम्भव इति वचनमयुक्तम्, किन्तु स्वाभाविक एव सुखदुःखानुभवः प्राणिनामिति भावः। **धर्माधर्मसव्यपेक्षं**

१. 'अपरस्परसम्भूतं न किञ्चित् कामहेतुकम्' इति रा.पा.। २. 'धर्माधर्मसव्यपेक्षमस्य' इति रा.पा.। ३. 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायः।

[1]**इत्यतोऽनीश्वरं जगदाहुः। किञ्च** अपरस्परसम्भूतं **कामप्रयुक्तयोः स्त्रीपुरुषयोरन्योन्यसंयोगाज्जगत् सर्वं सम्भूतम्। किमन्यत्** कामहैतुकम् - **कामहेतुकमेव कामहैतुकम्। किमन्यज्जगतः कारणम्? न किञ्चिददृष्टं धर्माधर्मादि कारणान्तरं विद्यते जगतः। काम एव प्राणिनां कारणमिति लोकायतिकदृष्टिरियम् ॥८॥**

आनन्दगिरिकृतव्याख्या

**निमित्तीकृत्य [2]प्रकृत्यधिष्ठात्रात्मकेन ब्रह्मणा रहितं जगदिष्यते चेत्, कथं तदुत्पत्तिरित्याशङ्क्याह—** किञ्चेति। **किमन्यदित्यादेराक्षेपस्य तात्पर्यमाह—** न किञ्चिदिति॥८॥

भाष्यार्कप्रकाशः

धर्माधर्मसापेक्षं यथा, तथा **अस्य** प्राणिवर्गस्य **शासिता** शिक्षकः कश्चिदीश्वरो न विद्यत इत्यन्वयः। ईश्वरेऽभ्युपगते सति धर्माधर्माभ्युपगमः स्यात्। ततश्चाधर्मानुष्ठानान्नरकादिभयमाशङ्क्येतेति कृत्वा तावदीश्वरमेव नाभ्युपगच्छन्त्यासुरा जना इति भावः।

नन्वेवमीश्वराभावे कथं जगदुत्पत्तिरत आह—**अपरस्परसम्भूतमिति**। अत्रायं भाष्यपाठः- **अपरस्परसम्भूतं न किञ्चिद् दृष्टम्। कामप्रयुक्तयोः स्त्रीपुरुषयोरन्योन्यसंयोगाज्जगत् सर्वं सम्भूतम्। न यदि कर्मादि कारणान्तरं विद्यते जगतः, किमस्य कारणम्? कामहेतुकम्। कामहेतुरेव कामहेतुकम्। न किञ्चित्कारणान्तरम्। न किञ्चन कामान्यकारणं स्याद् दृष्टम्। काम एव प्राणिनां कारणमिति लोकायतिकदृष्टिरियम्।** अस्येदं व्याख्यानम्— **परस्परो** मिथुनम्। अन्योन्यवाचिनः परस्परशब्दस्यात्र परस्परसंयुक्तमिथुनपरत्व-मुपचारतः। तस्माद् असम्भूतम् **अपरस्परसम्भूतं** किञ्चिदपि सत्त्वमिति शेषः। **न दृष्टं** नोपलभ्यते। पशुपक्षिमनुष्यादयः सर्वेऽपि प्राणिनः परस्परसङ्गतात् स्त्रीपुरुषमिथुनादेव जाताः, न त्वीश्वरादिति भावः। नेदं बौद्धमतं समीचीनमिति भ्रमितव्यम् , क्षित्यादीनामप्राणिनां स्वेदजादीनां प्राणिनां चापरस्परसम्भूतानां सत्त्वेन तदर्थमीश्वरस्यावश्यमभ्युपगन्तव्यत्वात्। तात्पर्यार्थमाह— **कामप्रयुक्तयोरिति। कामः** सुरतेच्छा। तेन प्रयुक्तयोः प्रेरितयोः सङ्गतयोर्वा स्त्रीपुरुषयोरन्योन्यसंयोगाद् मिथुनीभावान्निमित्तात् सर्वं जगत् सम्भूतम्। कर्मादिकारणान्तराज्जगन्नोद्भूतमिति फलितार्थः। ननु यदि जगतः कर्मादिकारणान्तरं न विद्यते, तर्हि किमस्य जगतः कारणमिति पृच्छति— **न यदीति**। समाधत्ते— **कामहेतुकमिति**। स्वार्थे क इत्याह—**कामहेतु(कमे)[रे]वेति**। काम एव हेतुः कामहेतुः, स एव कामहेतुकम्। क्लीबत्वं सामान्यात्। न चापरस्परसम्भूतमित्यस्मादेव पदादयमर्थः सिद्ध इति वाच्यम् , अपरस्परसम्भूतं न किञ्चिदस्तीत्यनेन स्त्रीपुरुषसंयोगो जगतो निमित्तमित्युक्तम् , तस्य च संयोगस्य को हेतुरित्यत उक्तम् 'कामहेतुक'मिति। एतस्य कामहेतुकमित्यस्याप्यर्थस्य सङ्ग्रहादुक्तं भाष्यकारैः **कामप्रयुक्तयोरिति** बोध्यम्। न च स्त्रीपुरुषसंयोगं प्रत्येव कामः कारणं न जगत इति वाच्यम् , संयोगद्वारा कामस्य जगतोऽपि कारणत्वात्। संयोगस्य कारणत्वम् , कामस्य परमकारणत्वमिति वा। एवं 'न किञ्चित् कामहेतुक'मिति पाठमाश्रित्य भाष्यं विधाय, अथ 'न किञ्चित् कारणान्तर'मिति पाठमाश्रित्य भाष्यं रचयति भाष्यकारः— **न किञ्चिदिति**। न किञ्चिदित्यस्यावृत्तिः। अपरस्परसम्भूतं किञ्चिन्नास्ति। कारणान्तरं किञ्चिन्नास्तीति। अपरस्परसम्भूतमित्यनेन त्वर्थात् सिद्धं कामकारणकत्वं जगतः। अत उक्तम् - **कामान्यकारणमिति**। किञ्चनापि कामान्यकारणं दृष्टं न स्यादित्यन्वयः। कामादन्यत् किमपि कारणं नोपलभ्यत इत्यर्थः। फलितमाह— **काम एवेति। कारणमिति**। उत्पत्तिं प्रति हेतुरित्यर्थः। स्त्रीपुरुषसंयोजनद्वारेति भावः। केषां मतमिदम्? अत आह— **लोकायतिकदृष्टिरिति**। बौद्धमतमित्यर्थः।

अत्र 'अपरस्परसम्भूतं किमन्यत्कामहैतुक'मिति नागरपुस्तकेषु पाठः। भाष्यपाठस्तु - **अपरस्परसम्भूतं कामप्रयुक्तयोः स्त्री-पुरुषयोरन्योन्यसंयोगाज्जगत् सर्वं सम्भूतम्। किमन्यत् कामहैतुकम् , कामहेतुकमेव कामहैतुकं किमन्यज्जगतः कारणं न किञ्चिददृष्टं धर्माधर्मादि कारणान्तरं विद्यते जगतः, काम एव प्राणिनां कारणमिति।** अस्येदं व्याख्यानम्— अपरश्च परश्चेत्यपरस्परमन्योन्यं स्त्रीपुरुषमिथुनमित्यर्थः। तस्मात् सम्भूतमपरस्परसम्भूतमित्यभिप्रेत्याह— **कामप्रयुक्तयोरित्यादि**। काम एव हेतुर्यस्य तत् कामहेतुकं, तदेव कामहैतुकम् , कामातिरिक्तकारणशून्यमित्यर्थः। अपरस्परसम्भूतं जगत् कामहैतुकं भवतीत्यन्वयः। जगदपरस्परसम्भूतम् ,

१. 'इत्यतोऽनीश्वरं जगदाहुः'— इति व्याख्यानुसारेण नास्तीति भाति। २. 'प्रकृति' इति नास्ति क्वचित्।

**एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।**
**प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः॥ ९॥**

एतामिति। **एतां दृष्टिम्** अवष्टभ्य **आश्रित्य** नष्टात्मानो **नष्टस्वभावाः विभ्रष्टपरलोकसाधनाः,** अल्पबुद्धयः

आनन्दगिरिकृतव्याख्या

**यथोक्ता दृष्टिर्ब्रह्मदृष्टिवदिष्टैवेत्याशङ्क्याह—** एतामिति। **प्रागुपदिष्टामेतां लोकायतिकदृष्टिमवलम्ब्येति यावत्। नष्टस्वभावत्वमेव**

भाष्यार्कप्रकाशः

अत एव कामहैतुकं भवतीति वा। अथ किमन्यदित्येतद् व्याख्याति— **किमन्यज्जगत इति**। जगतः कामादन्यत् कारणं किमस्तीति आक्षेपः। फलितमाह— **न किञ्चिदिति**। कामरूपे दृष्टकारणे सम्भवति धर्माधर्मादिलक्षणादृष्टकारणकल्पनानवकाशादिति भावः। धर्माधर्मादी**त्यादि**पदादीश्वरस्यापि ग्रहणम्। सिद्धमर्थमाह— **काम एवेति**।

अस्मिन् पक्षे तु अपरस्परसम्भूतं कामहैतुकमिति वाक्यान्तरे किमन्यदिति वाक्यान्तरकल्पनमयुक्तम् , न ह्यपरस्परसम्भूतं कामहैतुकं किमन्यदिति मूलमस्ति, येनादोषः स्यात्। अत एव **श्रीधरः** - जगदपरस्परसम्भूतं भवति, किमन्यत् कारणमस्य, नास्त्यन्यत् किञ्चित् , किन्तु कामहैतुकमेव जगदिति शेषः। स्त्रीपुरुषयोः काम एव प्रवाहरूपेण हेतुरस्येत्यर्थः - इति व्याचख्यौ। अस्मिंश्च व्याख्याने अनेकवाक्यकल्पनं बहुपदाध्याहारश्च। न च न किञ्चिदिति पाठपक्षेऽपि नास्त्येकवाक्यतेति वाच्यम् , कामहेतुकमपरस्परसम्भूतं किञ्चिन्नेत्येकवाक्यतायाः सत्त्वात्। न च कामहेतुकमित्यस्य पूर्ववाक्यान्वये समाप्तपुनराख्यातदोष इति वाच्यम् , साकाङ्क्षत्वात् तस्य। हेतुगर्भविशेषणं हि तत्। कामहेतुकत्वादपरस्परसम्भूतं किमपि नास्तीति। न च भाष्यकारैरेवमेकवाक्यतया न व्याख्यातमिति वाच्यम् , प्रौढ्या तथा तैर्व्याख्यातत्वात्। अस्मन्मते कामो हेतुर्यस्य तत् कामहेतुकमिति बहुव्रीहिरेव। 'शेषाद्विभाषा' इति कः। तस्माद् 'अपरस्परसम्भूतं न किञ्चित् कामहेतुक'मित्येव साधीयान् पाठः। अत्र परश्च परश्च परस्परः 'कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये' इति परशब्दस्य द्विर्भावः। 'समासवच्च बहुल'मिति बहुलग्रहणादन्यपरयोर्न समासवद्भावः। असमासवद्भावात् सोरलुक्। पर सु पर सु इत्यलौकिकविग्रहः। सो रुः, रोर्विसर्गः, विसर्गस्य कस्कादित्वात् सः। परस्परः, क्लीबे स्त्रियां च परस्परमिति[1] रूपम्। लक्षणया द्वयोरेकस्मिन् देहिनि स्त्रीत्वविवक्षया च प्रकृते मिथुनमिति तस्यार्थः। अपरश्च परश्चेति विग्रहे तु अपरस्परमिति रूपस्यासिद्धिरेव। अपरपरशब्दयोः समासे सोर्लुकि विसर्गाभावेन सत्वाभावात्। न चायं कर्मव्यतिहारे सर्वनामद्विर्भावः, अपरपरशब्दयोः भेदेन द्विर्भावाभावात्। न चापरश्चापरश्चेति विग्रहं ब्रूम इति वाच्यम् , तथाप्यसमासवद्भावाभावात्। अन्यपरयोर्ह्यसमासवद्भावः। किञ्च द्वितीयस्यापरशब्दस्य कथमकारलोपः? नाप्यपरश्च परश्च तयोः समाहारोऽपरस्परमिति ब्रूमः इति वाच्यम् , सुड्विधानाभावेनापरस्परमित्येव भवितव्यत्वात्। न च 'अपरस्पराः' इति निपातनात्[2] सुट्सिद्धिरिति वाच्यम् , क्रियासातत्य एव तन्निपातनात् , बहुत्वे चेति सङ्क्षेपः।

**रामानुजस्तु** - अपरस्परसम्भूतमन्यत् किमुपलभ्यते? अतः सर्वमिदं जगत् कामहेतुकमिति व्याचख्यौ। **तन्मन्दम्**। कुतो मन्दत्वमिति चेद्? **उच्यते** - अपरस्परसम्भूतं किमित्येतावतैवाभीष्टार्थसिद्धौ अन्यदिति व्यर्थमसङ्गतं च। अन्यदित्यनेन कस्मादन्यत्वं, कस्यान्यत्वं वा विवक्षितम्? यदि परस्परसम्भूतादन्यत्वं विवक्षितम् , तर्हि अपरस्परसम्भूतमित्येनेनैव परस्परसंभूतान्यार्थसिद्धेः **अन्यत्**पदस्य पौनरुक्त्यम्। तदन्यत्वं हि नञोऽर्थः। कस्यान्यत्वं तु नैव विवक्षितुं शक्यं, यस्यान्यत्वं विवक्षितं तस्य सत्त्वेऽपरस्परसम्भूतं नास्तीति वचनस्यायुक्तत्वात्। तस्यासत्त्वे अप्रसक्तनिषेधायोगेन तन्निषेधायोगाच्च। तथा कामहेतुकमित्यस्यान्वयाय सर्वमिदं जगदिति पदाध्याहारोऽप्ययुक्त एव, मूलाद् बहिः कल्पनस्याप्रमाणत्वात्। श्लोकपूर्वार्धस्थजगत्पदस्येहाकर्षणमप्ययुक्तम् , व्यवहितत्वादिति॥ ८॥

**एतामिति**। जना इति शेषः, आसुरा जनाः इति प्रकरणात्। एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः उग्रकर्माणो जगतोऽहिताश्च सन्तो जगतः क्षयाय प्रभवन्ति। **एतां** पूर्वोक्तां दृष्टिं लोकायतिकदर्शनमवष्टभ्य। **नष्टो**ऽदर्शनं गतः, शून्य इति यावत्। स्वभावो

१. बहुलग्रहणात् स्त्रियां टाबभावः। २. 'अपरस्पराःक्रियासातत्ये' (पा.सू. ६-१-१४२) इति सूत्रे इति शेषः।

**काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः।**
**मोहाद् गृहीत्वाऽसद्ग्राहान् प्रवर्तन्तेऽशुचिव्रताः॥ १०॥**
**चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः।**
**कामोपभोगपरमा एतावदिति निश्चिताः॥ ११॥**

**विषयविषयाऽल्पैव बुद्धिर्येषां तेऽल्पबुद्धयः,** प्रभवन्ति **उद्भवन्ति** उग्रकर्माणः **क्रूरकर्माणो हिंसात्मकाः, क्षयाय जगतः प्रभवन्तीति सम्बन्धः**[१]**। जगतः** अहिताः **शत्रवः इत्यर्थः॥** ९॥

**ते च —** काममिति। कामम् **इच्छाविशेषम्** आश्रित्य **अवष्टभ्य** दुष्पूरम् **अशक्यपूरणं** दम्भमानमदान्विताः **दम्भश्च मानश्च मदश्च दम्भमानमदाः, तैरन्विता दम्भमानमदान्विताः** मोहाद् **अविवेकतो** गृहीत्वा **उपादाय** असद्ग्राहान् **अशुभनिश्चयान्**[२] **, प्रवर्तन्ते लोके** अशुचिव्रताः **अशुचीनि व्रतानि येषां तेऽशुचिव्रताः॥ १०॥**

**किञ्च —** चिन्तेति। **चिन्ताम्** अपरिमेयां **च न परिमातुं शक्यते यस्याश्चिन्ताया इयत्ता सा अपरिमेया, तामपरिमेयां** प्रलयान्तां **मरणान्ताम् उपाश्रिताः, सदा चिन्तापरा इत्यर्थः।** कामोपभोगपरमाः **काम्यन्त इति कामाः**

आनन्दगिरिकृतव्याख्या

**स्पष्टयति—** विभ्रष्टेति। **विषयबुद्धेरल्पत्वं दृष्टमात्रोद्देशेन प्रवृत्तत्वम्।** जगतः **प्राणिजातस्येति यावत्॥** ९॥

**तानेव दुराचारानासुरान् प्रकारान्तरेण विशिनष्टि —** ते चेति॥ १०॥

**तानेव विधान्तरेण विशिनष्टि—**किञ्चेति। चिन्ताम् **आत्मीययोगक्षेमोपायालोचनात्मिकाम् अपरिमेयविषयत्वात् परिमातु-**

भाष्यार्कप्रकाशः

ज्ञानात्मको येषां ते **नष्टस्वभावाः**, नष्टज्ञानाः इत्यर्थः। चेतनानां हि ज्ञानं स्वभावः। ज्ञानशून्याः पाषाणकल्पाः इति यावत्। अर्थान्तरमाह—**विभ्रष्टेति**। आत्मशब्दस्य यत्नार्थवाचित्वाद् भ्रष्टपारलौकिकप्रयत्ना इत्यर्थः। बुद्धेरल्पत्वं नाम विषयविषयत्वमेवेत्यभिप्रेत्याह— **विषयविषयैवेति**। **विषयाः** शब्दादयो **विषया** गोचरा यस्याः सा विषयविषया, विषयासक्तेत्यर्थः। बुद्धिरन्तःकरणावस्थाविशेषः, न तु ज्ञानम्। **उद्भवन्ति** जायन्ते। जन्मना सहैव जायते एतेषामियमासुरी प्रवृत्तिरिति भावः। **हिंसात्मका इति**। हिंसायामेव **आत्मा** मनो येषां ते **हिंसात्मकाः,** घातुकाः इत्यर्थः। **क्षयायेति**। लोकायतिकदृष्ट्यवलम्बानाम् अत एव नष्टात्मनाम् अल्पबुद्धीनाम् उग्रकर्मणां जगदहितानां जनानां जन्म जगतः क्षयायैव भवति। अत एवैते लोकशत्रवः।

**ननु** कुतः क्षयायेति चेद्? **उच्यते** - असुरप्रवृत्तयो हीमे जनाः प्राणिनो हिंसन्ति। वैदिकमार्गात् स्वयं भ्रष्टाः अन्यानपि बलात्कारोपदेशादिना भ्रंशयित्वा यज्ञाद्यभावेन वर्षाद्यभावपूर्वकं क्षामाद्युपद्रवेण लोकं हिंसन्ति चेति॥ ९॥

**काममिति**। विशेष्यपदमाह— **ते चेति**। आसुरा जनाः इत्यर्थः। ते दुष्पूरं काममाश्रित्य दम्भमानमदान्विताः अशुचिव्रताश्च सन्तो मोहादसद्ग्राहान् गृहीत्वा प्रवर्तन्ते। **दुष्पूरमिति**। 'न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥' इति वचनादिति भावः। गृह्यन्ते जायन्ते[ज्ञायन्ते] एभिर्ज्ञेयाः इति ग्रहाः ज्ञानानि। त एव ग्राहाः, स्वार्थेऽण्। असन्तश्च ते ग्राहाश्चासद्ग्राहास्तान् असद्ग्राहान्। क्व प्रवर्तन्ते? अत आह— **लोक इति**॥ १०॥

**चिन्तामिति**। आसुरा जनाः अपरिमेयां प्रलयान्तां चिन्तां चोपाश्रिताः, कामोपभोगपरमाः एतावदिति निश्चिताः, आशापाशशतैर्बद्धाः, कामक्रोधपरायणाः सन्तः कामभोगार्थमन्यायेनार्थसञ्चयानीहन्ते। **इयत्ता** परिमितिः। **मरणान्तामिति**। आमरणमित्यर्थः। फलितमाह— **सदेति**। **चिन्ता** विषयानुध्यानम्।

१. 'जगतः' इति क्षयाय, अहिताः इत्युभयत्र संबध्यते। २. कामिनीनामाकर्षणं करिष्यामि, महानिधीन् साधयिष्यामि इत्यादिदुराग्रहाः अशुभनिश्चयाः।

**आशापाशशतैर्बद्धाः कामक्रोधपरायणाः।**
**ईहन्ते कामभोगार्थम् अन्यायेनार्थसञ्चयान्॥ १२॥**
**इदमद्य मया लब्धमिदं[1] प्राप्स्ये मनोरथम्।**
**इदमस्तीदमपि मे भविष्यति पुनर्धनम्॥ १३॥**

**विषयाः शब्दादयस्तदुपभोगपरमाः, 'अयमेव परमः पुरुषार्थो यः कामोपभोगः' इत्येवं निश्चितात्मानः** एतावदिति निश्चिताः॥ ११॥

आशापाशेति। आशापाशशतैः **आशा एव पाशास्तच्छतैराशापाशशतैः** बद्धाः **नियन्त्रिताः सन्तः सर्वत आकृष्यमाणाः** कामक्रोधपरायणाः **कामक्रोधौ परमयनं परः आश्रयो येषां ते कामक्रोधपरायणाः,** ईहन्ते **चेष्टन्ते** कामभोगार्थं **कामभोगप्रयोजनाय, न तु धर्मार्थम् , अन्यायेन** अर्थसञ्चयान् **अर्थप्रचयान् ,** अन्यायेन **परस्वापहरणादिनेत्यर्थः॥ १२॥**

**ईदृशश्च तेषामभिप्रायः—**इदमिति। **इदं द्रव्यम्** अद्य **इदानीं मया लब्धम्। इदमन्यत् प्राप्स्ये मनोरथं मन-**

आनन्दगिरिकृतव्याख्या

**मशक्यामाश्रिताः इति सम्बन्धः। एष कामोपभोगः परमयनं सुखस्येत्येतावत् , पारत्रिकं तु नास्ति सुखमिति निश्चयवन्त इत्याह—** एतावदितीति॥ ११॥

**आसुरानेव पुनर्विशिनष्टि—** आशेति। **अशक्योपायार्थविषया अनवगतोपायार्थविषया वा प्रार्थना आशाः, ताः पाशा इव पाशास्तेषां शतैर्बद्धा इव, श्रेयसः प्रच्याव्य, इतस्ततो नीयमाना इत्याह—** आशा एवेति॥ १२॥

**तेषामभिप्रायोऽपि विवेकविरोधीत्याह—** ईदृशश्चेति। द्रव्यं **गोहिरण्यादि।** इदमन्यद् **बुद्धौ प्रार्थ्यमानत्वेन विपरिवर्तमानमित्ये-**

भाष्यार्कप्रकाशः

प्रलयः प्राकृतप्रलय इति **रामानुजः। तदयुक्तम्** - देहत्यागरूपप्रलयातिक्रमणे कारणाभावात्। चिन्तादीनां मरणावधिकत्वस्य लोकव्यवहारसिद्धत्वाच्च।

**कामोपभोगो** विषयानुभवः **परमः** [2]प्रधानो येषां ते कामोपभोगपरमाः। एतावच्छब्दार्थमाह— **अयमेवेति। निश्चिताः** निश्चयवन्तः। फलितमाह— **निश्चितात्मान इति।** निश्चितबुद्धयः इत्यर्थः॥ ११॥

**आशेति। सर्वत इति।** सर्वेषु विषयेष्वित्यर्थः। **आकृष्यमाणा इति।** आशापाशशतैरिति कर्तृ। तत्तद्विषयविषयास्तास्ता आशाः पुरुषं तत्तद्विषयान् प्रत्याकर्षन्तीत्ययमाशापाशबन्धो जीवस्येत्यर्थः। पुरुषस्य चेदमाकर्षणमन्तःकरणतादात्म्याध्यासप्रयुक्तमिति मन्तव्यम्। कामभोगो विषयानुभवः तस्मै **कामभोगार्थम्।** किमीहन्त इति पृच्छति—**किमिति। प्रचयाः** राशयः। **अर्थाः** धनानि। अर्थसञ्चयान् प्रतीहन्त इत्यन्वयः। अर्थसञ्चयसङ्ग्रहार्थं व्याप्रियन्त इत्यर्थः। यद्वा सञ्चयाः प्रचयाः, सञ्चयनानीत्यर्थः। अर्थान् सञ्चेतुं व्याप्रियन्त इत्यर्थः। ईहन्त इच्छन्तीत्यर्थे त्विच्छामात्रमेव; न तु तत्र प्रवृत्तिरिति सिध्येत् , तच्चानिष्टमिति बोध्यम्। कामोपभोगार्थमपि नामी न्यायेन कृष्यादिना धनं सञ्चिन्वन्तीत्याह— **अन्यायेनेति।** कञ्चिदन्यायविशेषं दर्शयति— **परस्वेति। परस्वं** परधनं तदपहरणं चौर्यादिना परस्वापहरणम्। आदिपदात् परक्षेत्रापहरणादिसङ्ग्रहः॥ १२॥

**इदमिति।** आसुरा जनाः - अद्य मयेदं लब्धम् , इमं मनोरथं प्राप्स्ये, इदं धनमस्ति, पुनरिदं धनं मे भविष्यति, असौ शत्रुर्मया

१. 'इमम्' इति रा.पा.। २. तन्मते अर्थकामौ पुरुषार्थौ, तत्र कामः प्रधान इत्यर्थः।

**असौ मया हतः शत्रुर्हनिष्ये[1] चापरानपि।**
**ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी॥ १४॥**
**आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया।**
**यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः॥ १५॥**

**स्तुष्टिकरम्। इदं चास्ति[2]। इदमपि मे भविष्यत्यागामिनि संवत्सरे पुनर्धनं तेनाहं धनी विख्यातो भविष्यामि॥ १३॥**

असौ मयेति। **असौ देवदत्तनामा मया हतो दुर्जयः शत्रुः। हनिष्ये चान्यान् वराकान्** अपरानपि। **किमेते करिष्यन्ति तपस्विनः? सर्वथाऽपि नास्ति मत्तुल्यः। कथम्? ईश्वरोऽहम् अहं भोगी सर्वप्रकारेण च** सिद्धोऽहं **सम्पन्नः पुत्रैः पौत्रैर्नप्तृभिः, न केवलं [3]मानुषोऽहं , बलवान् सुखी चाहमेव। अन्ये तु भूमिभारायावतीर्णाः॥ १४॥**

आढ्य इति। **आढ्यो धनेन, [4]अभिजनवान् [5]सप्तपुरुषं श्रोत्रियत्वादिसम्पन्नः, तेनापि न मम तुल्योऽस्ति**

आनन्दगिरिकृतव्याख्या

तत्॥ १३॥

**यथोक्ते मदभिप्राये प्रतिबन्धकः शत्रुरपि न सम्भवतीत्याह—** असाविति। **त्वत्तो विहीनानां त्वया परिभवेऽपि त्वत्तुल्यानां शत्रूणां परिभवो निश्चितो न भवतीत्याशङ्क्याह—** सर्वथेति। **ऐश्वर्यातिरेकेऽपि कुतस्ते भोगसामर्थ्यमित्याशङ्क्याह—** अहमिति। **सिद्धत्वमेव स्फुटयति—** सम्पन्न इति। बलवान् **ओजस्वी।** सुखी **रोगरहितः॥ १४॥**

**विद्यावृत्तधनाभिजनैर्मत्तुल्यो नास्तीत्याह—** आढ्य इति। **तथापि यागदानाभ्यां तत्फलेन वा कश्चिदधिको भविष्यतीत्या-**

भाष्यार्कप्रकाशः

हतः, अपरानपि शत्रून् हनिष्ये च, अहमीश्वरः, अहं भोगी, अहं सिद्धः, बलवान् सुखी च भवामीति शेषः। अहमाढ्योऽभिजनवांश्चास्मि। मया सदृशोऽन्यः कोऽस्ति? अहं यक्ष्ये, दास्यामि, मोदिष्य इत्यज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताश्च सन्तः, अशुचौ नरके पतन्तीति श्लोकचतुष्टयान्वयः। **प्राप्स्ये** प्राप्स्यामि। भविष्यतीति भविष्यदर्थनिर्देशादाह— **आगामिनि संवत्सर इति**। तदन्तर्गतं भावमाह— **तेनेति**। **विख्यातः** प्रसिद्धो, लोक इति शेषः॥ १३॥

**असाविति**। **तपस्विनो** दीनाः। **एते** शत्रवः। **सिद्धः** सम्पन्नः। कैरित्यत आह— **पुत्रैरिति**। पुत्रैः पौत्रैर्नप्तृभिश्चाहं सिद्धः; **मानुषैः** मनुष्यैः सिद्धः। पुत्रादिभिः केवलं न, किन्तु बलसुखाभ्यामपि सिद्ध एवेत्याह— **बलवान् सुखी चेति**॥ १४॥

**आढ्य इति**। 'इभ्य आढ्यो धनी स्वामी' इति कोशादाह— **धनेनेति**। यद्वा **आढ्यः** श्लाघ्यः। केनास्य श्लाघ्यत्वमत आह— **धनेनेति**। **अभिजनः** सत्कुलप्रसूतिः। सद्वंश इत्येव वा। कथं वंशस्य सत्त्वमत आह— **सप्तेति**। यस्य प्राचीनाः पितृपितामहादयः सप्त पुरुषाः श्रोत्रियाः। 'श्रोत्रियंश्छन्दोऽधीते' इति निपातनाद् वेदाध्यायिनः। उपलक्षणमिदं वेदार्थानुष्ठानस्य चेति वेदार्थानुष्ठातारश्च। स सप्तपुरुषश्रोत्रियः, तस्य भावस्तत्त्वम्। आदिपदाद् याजनाध्यापनादिग्रहणम्। अथवा मातृवंशशुद्ध्यादिग्रहणम्। तेन सम्पन्नः। **एतेन** सप्तपुरुषश्रोत्रियत्वादिकमभिजनशब्दार्थ इति **सिद्धम्**। **यक्ष्ये** यागं करिष्यामि। ननु दैवविभूतिरेव यागानुष्ठानम् , अत आह— **यागेनेति**। न चित्तशुद्ध्याद्यर्थममीभिर्यागो विधीयते येनैतद्यागस्य दैवविभूतित्वं स्यात्। किन्तु पराभिभवार्थमेवेति यागोऽयमासुरविभूतिरेव। एवं यागस्यासुरविभूतित्वं प्रदर्शयितुमेव 'यागेनाप्यन्यानभिभविष्यामी'त्यर्थो लक्षणया दर्शितो यक्ष्य इति पदस्याचार्यैः। **अपिशब्दादभिजनेनाहमन्यानभिभूतवानेवेति** गम्यते। **दास्यामीति**। ननु दानं दैवविभूतौ कथितम् , अत आह— **नटादिभ्य इति**।

१. आत्मनेपदमार्षम्। २. पूर्वमेव संचितमिति शेषः। ३. 'मानुषैर्बलवान्' इति पा.। ४. 'अभिजनेन अभिजनवान्' इति पा.। ५. 'सप्तपुरुषश्रोत्रियत्वादिसम्पन्नः' इति रा.पा.भाति।

**अनेकचित्तविभ्रान्ता मोहजालसमावृताः।**
**प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ॥ १६॥**
**आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः।**
**यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम्॥ १७॥**

**कश्चित्। कोऽन्योऽस्ति** सदृशः **तुल्यो मया? किञ्च** यक्ष्ये **यागेनाप्यन्यानभिभविष्यामि,** दास्यामि **नटादिभ्यः,** मोदिष्ये **हर्षं चातिशयं प्राप्स्यामि** इति **एवम्** अज्ञानविमोहिताः **अज्ञानेन विमोहिताः विविधम् अविवेकभावमापन्नाः॥ १५॥**

अनेकेति। अनेकचित्तविभ्रान्ताः **उक्तप्रकारैरनेकैश्चित्तैः विविधं भ्रान्ता अनेकचित्तविभ्रान्ताः** मोहजाल-समावृता **मोहोऽविवेकोऽज्ञानम्, तदेव जालमिव, आवरणात्मकत्वात्, तेन समावृताः, प्रसक्ताः कामभोगेषु तत्रैव निषण्णाः सन्तः, तेनोपचितकल्मषाः पतन्ति** नरके**ऽशुचौ वैतरण्यादौ॥ १६॥**

आत्मेति। आत्मसम्भाविताः **सर्वगुणविशिष्टतया आत्मनैव सम्भाविता आत्मसम्भाविताः, न साधुभिः,** स्तब्धाः **अप्रणतात्मानो** धनमानमदान्विताः **धननिमित्तो मानो मदश्च ताभ्यां धनमानमदाभ्यामन्विताः यजन्ते** नामयज्ञैः **नाममात्रैर्यज्ञैः ते** दम्भेन **धर्मध्वजितया** अविधिपूर्वकं [1]**विहिताङ्गेतिकर्तव्यतारहितम्॥ १७॥**

आनन्दगिरिकृतव्याख्या

**शङ्क्याह—** किञ्चेति। **न च तेषामेषोऽभिप्रायः साधीयानित्याह—** इत्येवमिति॥ १५॥

**उक्तप्रकारविपर्ययेण कृत्याकृत्यविवेकविकलानां किं स्यादित्यपेक्षायामाह—** अनेकेति। कामाः **विषयाः, तेषां** भोगेषु **तत्प्रयुक्तेषु उपभोगेष्विति यावत्॥ १६॥**

**ननु तेषामपि केषाञ्चिद् वैदिके कर्मणि यागदानादौ प्रवृत्तिप्रतिपत्तेरयुक्तं वैतरण्यादौ पतनमिति चेत्, तत्राह—** आत्मेति॥ १७॥

भाष्यार्कप्रकाशः

पात्रदानमेव दैवविभूतिः, इदमपात्रदानं त्वासुरविभूतिरेवेति भावः। आदिपदाद् विटगायकादिग्रहणम्। इदं च नटादिभ्यो दानं न परलोकापेक्षया अमीभिः क्रियते, किन्तु नटादय एते मां धनिकं दातारं प्रभुं च कीर्तयेयुरिति बुद्ध्यैवेति बोध्यम्। **मोदिष्य इति**। मोदं हर्षातिशयं प्राप्स्यामि। कीर्तिस्तुत्यादिश्रवणादिति भावः। कामभोगादिनेति वा। इति पूर्वोक्तविधयेत्यर्थः। विविधो मोह एषां सञ्जात इति विमोहिताः। **मोहो**ऽविवेकः। **अविवेकभावमिति**। विवेकाभावमित्यर्थः। न विद्यते विवेको येषां तेऽविवेकाः, तेषां भावमविवेकभावम् अविवेकत्वमापन्नाः प्राप्ताः॥ १५॥

**अनेकेति**। चित्तैः ज्ञानैरित्यर्थः। यद्वा मनोभिरित्येवार्थः। विषयभेदादेकस्यापि मनसो नानात्वम्। **भ्रान्ता** भ्रमं प्राप्ताः। **जालं** मत्स्यादिबन्धनयन्त्रविशेषः। तद्धि मत्स्यादीनावृत्य बद्ध्वा सूनकस्य हस्ते निधत्ते। एवमज्ञानमपि जनानावृत्य बद्ध्वा नरके क्षिपति, अत उक्तम् - **मोहजालमिति। तेनेति**। कामभोगप्रसङ्गेनेत्यर्थः। उपचितं वर्धितं सञ्चितं वा कल्मषं नरककारणं पापं यैस्ते उपचितकल्मषाः। **पतन्ति** देहत्यागानन्तरं पतिष्यन्तीत्यर्थः। वैतरणीति नरकविशेषः। आदिपदाद् रौरवादिग्रहणम्॥ १६॥

**आत्मेति**। आत्मसम्भाविताः स्तब्धाः धनमानमदान्वितास्ते दम्भेनाविधिपूर्वकं नामयज्ञैर्यजन्ते। **आत्मसम्भाविता इति**। सर्व-गुणविशिष्टोऽहमिति स्वयमेव स्वात्मानं श्लाघयन्त इत्यर्थः। **आत्मनैव** स्वेनैव। **सम्भाविताः** श्लाघिताः। **अप्रणतात्मानः** अप्रणतः प्रकर्षेणानतः आत्मा मनो देहो वा स्वभावो वा येषां ते तथोक्ताः। स्वप्नेऽपि नामीषां नम्रतेत्यर्थः। **नाममात्रैरिति**। धर्मतो नास्ति तेषा-

१. 'विधिविहित' इति पा.।

**अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः।**
**मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः॥ १८॥**

अहङ्कारमिति। अहङ्कारम् **अहङ्करणमहङ्कारो, विद्यमानैरविद्यमानैश्च गुणैरात्मन्यध्यारोपितैर्विशिष्टमात्मानम् अहमिति मन्यते सोऽहङ्कारोऽविद्याख्यः कष्टतमः सर्वदोषाणां मूलं सर्वानर्थप्रवृत्तीनां च, तम्।** **तथा** बलं **पराभिभवनिमित्तं कामरागान्वितम्।** दर्पं **दर्पो नाम यस्योद्भवे धर्ममतिक्रामति सोऽयमन्तःकरणाश्रयो दोषविशेषः।** कामं **स्त्र्यादिविषयं,** क्रोधम् **अनिष्टविषयम् एतानन्यांश्च महतो दोषान् संश्रिताः। किञ्च ते** माम् **ईश्वरम्** आत्मपरदेहेषु **स्वदेहे परदेहेषु च तद्बुद्धिकर्मसाक्षिभूतं मां** प्रद्विषन्तो **मच्छासनातिवर्तित्वं प्रद्वेषस्तं कुर्वन्तः** अभ्यसूयकाः **सन्मार्गस्थानां गुणेष्वसहमानाः॥ १८॥**

आनन्दगिरिकृतव्याख्या

**आसुरीं सम्पदमभिजातैरधर्मजातमेव सञ्चीयते प्रवृत्तैरपि वैदिके** [1]**वर्त्मनि, नैव पुण्यमित्युक्तम्। ब्रह्मज्ञानात् पुनरासुरा दूरादेव उद्विजन्त इत्याह—** अहङ्कारमिति। **अहङ्कारमेव स्फोरयति—** विद्यमानैरिति। **अध्यारोपितवैशिष्ट्यविषयत्वादहङ्कारस्याविद्यामूलत्वेनाविद्यात्वमाह—** अविद्याख्य इति। **विवेकिभिस्तस्यातियत्नादवहेयत्वं**[2] **सूचयति—** कष्टतम इति। **तदेव स्पष्टयति—** सर्वेति। **तं संश्रिता इति सम्बन्धः। कार्यकरणसामर्थ्यमुक्तविशेषणं** बलम्। **अहङ्कार एव महदवधीरणापर्यन्तत्वेन परिणतो** दर्पः। **तं व्याकरोति—** दर्पो नामेत्यादिना। **अन्यांश्च दोषान् मात्सर्यादीन्। न केवलमुक्तमेव तेषां विशेषणं, किन्तु कष्टतममस्ति विशेषणान्तरमित्याह—** किञ्चेति। **यद्यपीश्वरं प्रति द्वेषस्तेषां सम्भाव्यते, तथापि कथं स्वदेहे परदेहेषु च तं प्रति द्वेषः? न हि तत्र भोक्तारमन्तरेणेश्वरस्यावस्थानमित्याशङ्क्याह—** तद्बुद्धीति। **तेषामीश्वरं प्रति द्वेषमेव प्रकटयति—** मच्छासनेति। **ईश्वरस्य शासनं श्रुतिस्मृतिरूपम् ,** तदतिवर्तित्वं **तदुक्तार्थज्ञानानुष्ठानपराङ्मुखत्वम् ॥ १८॥**

भाष्यार्कप्रकाशः

मासुरजनक्रियमाणयज्ञानां यज्ञत्वं, किन्तु नामत एवेत्यर्थः। नाममात्रस्वरूपैरिति यावत्। विधिः शास्त्रं, तेन विहिता अङ्गानां यज्ञाङ्गानां यूपादीनां या इतिकर्तव्यता, इदमित्थं कर्तव्यमिति विधिस्तया रहितं यथा तथेति क्रियाविशेषणम्। विधिमतिक्रम्येति यावत्। स्वेच्छया अश्रद्धया यथाकथञ्चिद् यजन्त इति भावः॥ १७॥

**अहङ्कारमिति**। त अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः अत एव आत्मपरदेहेषु सन्तं मां द्विषन्तोऽभ्यसूयकाश्च भवन्ति। आत्मनि स्वस्मिन्। **मन्यत इति**। येन मन्यते सोऽहङ्कार इत्यन्वयः। मन्यत इति यत् सोऽहङ्कार इति वा। अहं सर्वोत्कृष्ट इत्यभिमानोऽहङ्कार इत्यर्थः। अविद्याप्रयुक्तत्वादस्याहङ्कारस्याप्यविद्येति व्यवहार इत्याह— **अविद्याख्य इति**। अतिदुःखहेतुत्वादयं कष्टतमः। सर्वेषां कामक्रोधादिदोषाणां सर्वासामप्यनर्थहेतूनां हिंसादिप्रवृत्तीनां च मूलं कारणभूतः। पराभिभवनस्य निमित्तं कारणम्। न हि दुर्बलः परानभिभवेत्।

कामरागविवर्जितबलस्येश्वरविभूतित्वादाह— **कामरागान्वितमिति**। काम इच्छा। स्त्र्यादीत्यादिपदात् स्रक्चन्दनादिविषयग्रहणम्। उक्तानुक्तसमुच्चयार्थकस्य क्रोधं चेति चकारस्यार्थमाह— **अन्यांश्चेति**। महतः प्रबलान्। सर्वात्मभूतस्य तव प्रद्वेषणं कथमत आह— **मच्छासनातिवर्तित्वमिति**। ईश्वराज्ञारूपवेदशास्त्रोक्तविधिमतिक्रम्य प्रागुक्तरीत्या वर्तनमेवेश्वरप्रद्वेषः। ईश्वर एव जीवभावेन सर्वत्र सममवस्थित इतीममर्थमविदित्वा शत्रुरयं मम देवदत्तो हन्तव्यः, धिक् शत्रुभिः पराजितं मां जीवन्तमित्येवं मत्वा स्वपरदेहहिंसादिकं यः करोति सोऽपीश्वरप्रद्वेषकार्येव। एवंविधप्रवर्तनस्यापीश्वरशासनातिक्रमरूपत्वादिति बोध्यम्॥ १८॥

---

१. 'कर्मणि' इति पा.। २. 'यत्नादेव हेयत्वम्' इति पा.।

**तानहं द्विषतः क्रूरान् संसारेषु नराधमान्।**
**क्षिपाम्यजस्रमशुभान् आसुरीष्वेव योनिषु॥ १९॥**
**आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि।**
**मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्॥ २०॥**

तानहमिति। तान् **अहं (सर्वान्) सन्मार्गप्रतिपक्षभूतान् साधुद्वेषिणो** द्विषतश्च **मां, क्रूरान्** संसारेष्वेव **अनेकनरकसंसरणमार्गेषु नराधमान् अधर्मदोषवत्त्वात्** क्षिपामि **प्रक्षिपामि** अजस्रं **सन्ततम्** अशुभान् **अशुभकर्मकारिणः** आसुरीष्वेव **क्रूरकर्मप्रायासु व्याघ्रसिंहादियोनिषु क्षिपामीत्यनेन सम्बन्धः॥ १९॥**

आसुरीमिति। **आसुरीं योनिम्** आपन्नाः **प्रतिपन्नाः** मूढाः **अविवेकिनः** जन्मनि जन्मनि **(अविवेकिनः) प्रतिजन्म तमोबहुलास्वेव योनिषु जायमानाः अधो गच्छन्तो मूढाः मामीश्वरम्** अप्राप्य **अनासाद्यैव, हे कौन्तेय !** ततः **तस्मादपि यान्ति** अधमां **निकृष्टतमां गतिम्। मामप्राप्यैवेति न मत्प्राप्तौ काचिदप्याशङ्काऽस्ति, अतो मच्छिष्टसाधुमार्गम् अप्राप्येत्यर्थः॥ २०॥**

आनन्दगिरिकृतव्याख्या

**तेषामुक्तविशेषणवतामासुराणां किं स्यादिति, तदाह—** तानिति। **भगवतो नैर्घृण्यप्रसङ्गं प्रत्यादिशति—** अधर्मेति॥ १९॥

**ननु तेषामपि क्रमेण बहूनां जन्मनामन्ते श्रेयो भविष्यति, नेत्याह—** आसुरीमिति। **तेषामीश्वरप्राप्तिशङ्काऽभावे कथं तन्निषेधः स्यादित्याशङ्क्याह—** मामित्यादिना। **यस्मादासुरी सम्पद् अनर्थपरम्परया सर्वपुरुषार्थपरिपन्थिनी, तस्माद् यावत् पुरुषः स्वतन्त्रो, न काञ्चित् पारवश्यकरीं योनिमापन्नः, तावदेव तेनासौ परिहरणीयेति समुदायार्थः॥ २०॥**

भाष्यार्कप्रकाशः

**तानिति**। अहं द्विषतः क्रूरानशुभान् तान् नराधमानजस्रं संसारेष्वासुरीषु योनिष्वेव क्षिपामि। द्विषत इत्यस्य साधूनिति, मामिति वा कर्मेत्याह— **साधुद्वेषिण इति, मां च द्विषत इति**। संसारशब्दस्तद्धेतुवाची। उपचारात् संसारकारणभूतास्वित्यर्थः। ननु दैवयोनयोऽपि संसारहेतव एवेत्यत आह— **नरकेति**। अनेकनरकदुःखात्मकसंसारकारणभूतास्वित्यर्थः। मार्गशब्दः कारणवाची। **यद्वा** द्वारवाची। अनेकनरकदुःखानुभवद्वारभूतास्वित्यर्थः। योनिष्वित्यस्य विशेषणमिदम्। नरेष्वधमाः नीचा नराधमाः। कुत एषामधमत्वम्? अत आह—**अधर्मदोषवत्त्वादिति**। अशुभत्वमेषां स्वरूपतोऽभावादाह—**अशुभकर्मकारिण इति**। अविद्यमानशुभानित्यर्थकथने तु शुभाभाव एवेति सिध्यति, न तु [अ]शुभसत्त्वमिति बोध्यम्। कास्ताः आसुरयोनयः? अत आह— **व्याघ्रेति**। किमासामासुरत्वम्? अत आह— **क्रूरप्रायास्विति**। क्रूरस्वभावास्वित्यर्थः। असुराः खलु क्रूराः। **क्षिपामीति** उत्पादयामीत्यर्थः॥ १९॥

**आसुरीमिति**। किं तत्र क्षेपणेन फलम्? अत आह— **आसुरीमिति**। हे कौन्तेय! मूढा जन्मनि जन्मन्यासुरीं योनिमापन्नाः सन्तो मामप्राप्यैव ततोऽधमां गतिं यान्ति। मनुष्या असुरसम्पदा व्याघ्रादियोनावुद्भूय ततः क्रमेण स्थावरत्वलक्षणामधोगतिं प्रपद्यन्त इत्यर्थः। तमोबहुलासु तमःप्रायासु सर्पादियोनिषु जायमानाःसन्त एवाधो गच्छन्तः पूर्वपूर्वस्मादुत्तरोत्तरं निकृष्टं जन्म प्रपद्यमानाःसन्त इत्यर्थः। **तस्मादपीति**। सर्पादिजन्मनोऽपीत्यर्थः। **निकृष्टतमाम्** अतिनिकृष्टां स्थावरत्वलक्षणामित्यर्थः। **गतिं** जन्मेत्यर्थः। ननु निकृष्टं जन्म गच्छतः कथमीश्वरप्राप्तिशङ्का? येन मामप्राप्येत्युच्येत, अत आह— **मच्छिष्टेति**।मच्छिष्टं मया शासितं साधूनां मार्गं साधुमार्गमपि अप्राप्य , मच्छिष्टानां साधूनां मार्गमिति वा। **एतेन** मामप्राप्येत्यस्य मच्छिष्टसाधुमार्गमप्यप्राप्येत्यर्थो लाक्षणिक इति सिद्धम्॥ २०॥

**त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।**
**कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्॥ २१॥**
**एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः।**
**आचरत्यात्मनः श्रेयस्ततो याति परां गतिम्॥ २२॥**

**सर्वस्याः आसुर्याः सम्पदः संक्षेपोऽयमुच्यते। यस्मिंस्त्रिविधे सर्वः आसुरीसम्पद्भेदोऽनन्तोऽप्यन्तर्भवति, यत्परिहारेण परिहृतश्च भवति, यद् मूलं सर्वस्यानर्थस्य, तदेतदुच्यते—** त्रिविधमिति। त्रिविधं **त्रिप्रकारं नरकस्य प्राप्तौ इदं द्वारं** नाशनमात्मनो **यद् द्वारं प्रविशन्नेव नश्यत्यात्मा, कस्मैचित् पुरुषार्थाय योग्यो न भवतीत्येतत्। अत उच्यते 'द्वारं नाशनमात्मनः' इति। किं तत्? कामः क्रोधस्तथा लोभः। तस्मादेतत् त्रयं त्यजेत् । यत एतद् द्वारं नाशनमात्मनः, तस्मात् कामादित्रयमेतत् त्यजेत्॥ २१॥**

**त्यागस्तुतिरियम् —** एतैरिति। **एतैर्विमुक्तः, कौन्तेय !** तमोद्वारैः **तमसो नरकस्य दुःखमोहात्मकस्य द्वाराणि कामादयः तैः, एतैस्त्रिभिर्विमुक्तो नरः** आचरति **अनुतिष्ठति। किम्? आत्मनः श्रेयो यत्प्रतिबद्धः पूर्वं** [1]**नाचरति, तदपगमादाचरति, ततः तदाचरणाद् याति** परां गतिं **मोक्षमपीति॥ २२॥**

आनन्दगिरिकृतव्याख्या

**कथमासुरी सम्पदनन्तभेदवती पुरुषायुषेणापि परिहर्तुं शक्येतेत्याशङ्क्याह—** सर्वस्या इति। **संक्षेपोक्तिफलमाह—** यस्मिन्निति। **कामादौ त्रिविधे सर्वस्यासुरसम्पद्भेदस्यान्तर्भावेऽपि कथमसौ परिह्रियते? तत्राह—**यत्परिहारेणेति। **कामादिपरिहारेणासुरसम्पद्भेदपरिहारेऽपि कथं सर्वानर्थपरिवर्जनमित्याशङ्क्याह—** यन्मूलमिति। **कथमात्मनो नित्यस्य नाशाशङ्केति? तत्राह—** कस्मैचिदिति। **त्रिविधमपि सामान्यतो दर्शितमाकाङ्क्षाद्वारा विशेषतो दर्शयति—** किं तदिति। **तस्मादिति व्याचष्टे—** यत इति॥ २१॥

[एतैरिति।] **कामादित्यागे सति अनर्थाचरण-श्रेयःप्रतिबन्धनिवृत्ती स्यातामिति भावः। न केवलं श्रेयः समाचरन् आसुरीं च सम्पदं वर्जयन् मोक्षमेव सम्यग्धीद्वारा लभते, किन्तु लौकिकमपि सुखमिति** अपेरर्थः॥ २२॥

भाष्यार्कप्रकाशः

**त्रिविधमिति।** अनन्तोऽपि सर्वः आसुरीसम्पद्भेदः त्रिविधे यस्मिन्नन्तर्भवति। **आसुर्यः** असुरप्रकृतयस्तासां **सम्पत्** समृद्धिः। **तद्भेदः** तद्विशेषः। आसुरसम्पदिति भाष्ये तु आसुरी च सा सम्पदासुरसम्पद्, आसुरस्वभावः इत्यर्थः। **यत्परिहारेणेति।** यस्य त्रिविधस्यासुरस्वभावस्य परिहारेण। **परिहृत इति।** सर्वोऽप्यासुरसम्पद्भेद इति शेषः। सर्वस्यानर्थस्य नरकादिसंसारस्य यत् त्रिविध आसुरसम्पद्भेदो मूलं कारणं भवति। कामः क्रोधस्तथा लोभ इति त्रिविधमिदमात्मनो नाशनं नरकस्य द्वारं भवति। तस्मान्मुमुक्षुरेतत् त्रयं त्यजेत्। **आत्मा नश्यतीति।** देहेन्द्रियादितादात्म्याध्यासवान् पुरुषो नश्यतीत्यर्थः। आत्मनः पुरुषार्थप्राप्त्यनर्हत्वमेव नाश इत्याह— [2]**आत्मा नेति।** तस्माच्छब्दार्थमाह— **यत इति।** आत्मनाशननरकद्वारत्वादित्यर्थः॥ २१॥

**एतैरिति।** नरः तमोद्वारैरेतैस्त्रिभिर्विमुक्तःसन्नात्मनः श्रेयः आचरति, ततः परां गतिं याति। **यत्प्रतिबद्धः** यैः कामादिभिः प्रतिबद्धः। **तत्** श्रेयः। **तदपगमात्** कामादिप्रतिबन्धापगमात्। **आचरति** श्रेय इति शेषः। तत इत्यस्यार्थमाह—**तदाचरणादिति।** श्रेयोऽनुष्ठानादित्यर्थः। **परा**मुत्तमां गतिं देवत्वादिकं याति, मोक्षं च यातीत्याह— **मोक्षमपीति।** श्रेयोऽनुष्ठानस्य ज्ञानप्राप्तिद्वारा मोक्षस्यापि हेतुत्वादिति भावः॥ २२॥

---

१. 'नाचचार' इति पा.। २. भाष्ये 'आत्मा नश्यति, आत्मा न कस्मैचित् पुरुषार्थाय योग्यो भवतीत्येतत्' इति रा.पा. भाति।

**यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।**
**न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥ २३॥**
**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।**
**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥ २४॥**

**इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसम्पद्विभागयोगो नाम षोडशोऽध्यायः॥ १६॥**

**सर्वस्यैतस्यासुरसम्पत्परिवर्जनस्य श्रेयआचरणस्य च शास्त्रं कारणम् , शास्त्रप्रमाणादुभयं शक्यं कर्तुम् , नान्यथा। अतः—** यः शास्त्रेति। **यः** शास्त्रविधिं **शास्त्रं वेदः, तस्य** विधिं **कर्तव्याकर्तव्यज्ञानकारणं विधिप्रतिषेधाख्यम्** उत्सृज्य **त्यक्त्वा वर्तते** कामकारतः **कामप्रयुक्तः सन् , न स** सिद्धिं **पुरुषार्थयोग्यतामवाप्नोति। नाप्यस्मिन् लोके सुखम् , नापि** परां **प्रकृष्टां गतिम्— स्वर्गं मोक्षं वा॥ २३॥**

तस्मादिति। **तस्माच्छास्त्रं** प्रमाणं **ज्ञानसाधनं** ते **तव** कार्याकार्यव्यवस्थितौ **कर्तव्याकर्तव्यव्यवस्थायाम्। अतो** ज्ञात्वा **बुद्ध्वा** शास्त्रविधानोक्तम् **विधिः विधानम् , [1]शास्त्रमेव विधानं शास्त्रविधानं 'कुर्यात् , न कुर्याद्' इत्येवंलक्षणम् , तेनोक्तं स्वकर्म यत् तत्** कर्तुमिहार्हसि। इहेति **कर्माधिकारभूमिप्रदर्शनार्थमिति॥ २४॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये दैवासुरसम्पद्विभागयोगो नाम षोडशोऽध्यायः॥ १६॥**

आनन्दगिरिकृतव्याख्या

**आसुर्याः सम्पदो वर्जने, श्रेयसश्च करणे किं कारणम्? तदाह—** सर्वस्येति। **तस्य कारणत्वं साधयति—** शास्त्रेति। **उक्तमुपजीव्यानन्तरश्लोकं प्रवर्तयति—** अत इति। **शिष्यतेऽनुशिष्यते बोध्यतेऽनेनापूर्वोऽर्थः इति शास्त्रम् , तच्च विधिनिषेधात्मकमित्युपेत्य व्याचष्टे—** कर्तव्येति। **कामस्य करणं कामकारः, तस्माद्धेतोरित्युपेत्य, कामाधीना शास्त्रविमुखस्य प्रवृत्तिरित्याह—** कामेति। **कामाधीनप्रवृत्तेः सदा पुमर्थायोग्यस्य सर्वपुरुषार्थासिद्धिरित्याह—** नापीति॥ २३॥

**शास्त्रादृते कर्मणो निष्फलत्वे फलितमाह—** तस्मादिति। **कर्तव्याकर्तव्यौ धर्माधर्मौ, तत्र शास्त्रस्य प्रमाणत्वेऽपि मम किं कर्तव्य-**

भाष्यार्कप्रकाशः

**य इति। उभयमिति।** आसुरसम्पत्परिवर्जनं श्रेयआचरणं चेत्यर्थः। यः शास्त्रविधिमुत्सृज्य कामकारतो वर्तते, स सिद्धिं नावाप्नोति, सुखं नावाप्नोति, परां गतिं नावाप्नोति। **कामकारतः** कामकारेण, स्वेच्छाचारेणेत्यर्थः। फलितमाह— **कामप्रयुक्त इति। पुरुषार्थयोग्यतां** पुरुषार्थप्राप्त्यर्हताम्॥ २३॥

**तस्मादिति।** तस्मात् ते कार्याकार्यव्यवस्थितौ शास्त्रं प्रमाणं भवति। इह शास्त्रविधानोक्तं कर्म ज्ञात्वा कर्तुमर्हसि। **कार्याकार्यव्यवस्थितिः** इदं कार्यमिदमकार्यमिति निर्णयः। **तस्यां** विषये। **शास्त्रविधानोक्तमिति।** शास्त्रेण कृतं विधानं शासनं शास्त्रविधानं तेनोक्तम् , विधिप्रतिषेधात्मकशास्त्रेण विहितमित्यर्थः। किं तत् कर्म? अत आह— **स्वकर्मेति।** स्वस्ववर्णाश्रमविहितं कर्मेत्यर्थः। तच्चार्जुनस्य क्षत्रियस्य युद्धमेव। 'क्षत्रियस्य विजित(व्य)'मित्यादिशास्त्रादिति भावः। **इह** अस्यां कर्मभूमावित्यर्थः। कुरुक्षेत्रादिभूमिविशेष एव कर्माधिकारः, न तु सिंहलद्वीपादाविति भावः। इहेति शब्दः कर्माधिकारभूमिप्रदर्शनार्थ इत्यन्वयः। इहशब्दप्रयोगस्य

---

१. 'शास्त्रेण विधानं' इति पा.।

आनन्दगिरिकृतव्याख्या

**मित्याशङ्क्याह—** अत इति। **स्वकर्म क्षत्रियस्य युद्धादि।** इतिशब्दोऽध्यायसमाप्त्यर्थः।

**तदनेनाध्यायेन प्राग्भवीयकर्मवासनानुसारेणाभिव्यज्यमानसात्त्विकादिप्रकृतित्रयविभागेन दैवी आसुरी इति सम्पद्द्वयम् [१]आदान-हानाभ्यामुपदिश्य कामक्रोधलोभानपहाय पुरुषार्थिना शास्त्रप्रवणेन तदुक्तकारिणा भवितव्यमिति निर्धारितम्॥ २४॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते श्रीमद्भगवद्गीताशांकरभाष्यव्याख्याने षोडशोऽध्यायः॥ १६॥**

भाष्यार्कप्रकाशः

कर्माधिकारभूमिप्रदर्शनार्थमेव[प्रदर्शनमेव] फलमित्यर्थः। **इति**शब्दः प्रकृताध्यायभाष्यसमाप्तिवाचकः॥ २४॥

**इति श्रीबेल्लङ्कोण्डोपनामकरामकविकृतौ श्रीभगवद्गीताभाष्यार्कप्रकाशे दैवासुरसम्पद्विभागयोगो नाम षोडशोऽध्यायः।**

**श्रीहयग्रीवार्पणमस्तु**

१. चतुर्थ्यन्तमिदम्। आदानाय, हानाय चेत्यर्थः। क्रमेण संपद्द्वयस्यान्वयः।

ॐ श्रीपरमात्मने नमः

# ॥ अथ सप्तदशोऽध्यायः ॥

**अर्जुन उवाच—**

**ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयाऽन्विताः।**
**तेषां निष्ठा तु का कृष्ण ! सत्त्वमाहो रजस्तमः ॥ १ ॥**

**'तस्माच्छास्त्रं प्रमाणं ते' (भ.गी.१६.२४) इति भगवद्वाक्याल्लब्धप्रश्नबीजोऽर्जुन उवाच—** ये शास्त्रेति। **ये केचिदविशेषिताः**[१] शास्त्रविधिं **शास्त्रविधानं श्रुतिस्मृतिशास्त्रचोदनाम्** उत्सृज्य **परित्यज्य** यजन्ते **देवादीन् पूजयन्ति** श्रद्धयाऽन्विताः श्रद्धया **आस्तिक्यबुद्ध्या** अन्विताः **संयुक्ताः सन्तः; श्रुतिलक्षणं स्मृतिलक्षणं वा कञ्चिच्छास्त्रविधिम् अपश्यन्तो वृद्धव्यवहारदर्शनादेव ये श्रद्दधानतया देवादीन् पूजयन्ति, त इह 'ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धया ऽन्विताः'** [२]**इत्येवं गृह्यन्ते। ये पुनः कञ्चिच्छास्त्रविधिमुपलभमाना एव तमुत्सृज्य अयथाविधि देवादीन् पूजयन्ति, त इह 'ये शास्त्रविधिमुत्सृज्य यजन्ते' इति न परिगृह्यन्ते। कस्मात्? श्रद्धयाऽन्वितत्वविशेषणात्। देवादिपूजाविधिपरं**

### आनन्दगिरिकृतव्याख्या

**आस्तिकानां नास्तिकानां च शास्त्रैकचक्षुषां गतिरुक्ता। सम्प्रत्यास्तिकानामेव शास्त्रानभिज्ञानां गतिजिज्ञासया पृच्छतीत्याह—** तस्मादिति। यजन्ते **इति यागग्रहणं दानादेरुपलक्षणम्। यदि वेदोक्तं विधिमपश्यन्तस्तमुत्सृजन्ति, कथं तर्हि श्रद्दधाना यागादि कुर्वन्ति? न हि मानं विना श्रद्धया यागादि कर्तुं शक्यमित्याशङ्क्याह—** श्रुतीति। **ननु शास्त्रीयं विधिं पश्यन्तोऽपि केचित् तमुपेक्ष्य स्वोत्प्रेक्षया यागादि कुर्वन्तो दृश्यन्ते, तेषामिह 'ये शास्त्रविधिमुत्सृज्य' इति ग्रहो भविष्यति, नेत्याह—** ये पुनरिति। **तेषामत्रापरिग्रहे प्रश्नपूर्वकं हेतुमाह—**कस्मादिति। **शास्त्रज्ञानां तदुपेक्षावतां ग्रहेऽपि विशेषणमविरुद्धमित्याशङ्क्य व्याघातान्मैवमित्याह—**देवादीति। **अश्रद्दधानतया तदुत्सृज्येति सम्बन्धः। शास्त्रोक्तं विधिमधिगच्छतामपि तमवधीर्य स्वेच्छया देवपूजादौ प्रवृत्तानामासुरेष्वेवान्तर्भावो**

### श्रीबेल्लंकोण्डरामरायकविविरचितः
### भाष्यार्कप्रकाशः

**लब्धप्रश्नबीज इति**। 'तव शास्त्रं प्रमाण'मित्युक्तत्वेन केषाञ्चिच्छास्त्रं प्रमाणं न भवत्येवेति सिद्धत्वात् तदीयगतिं प्रष्टुम् अर्जुनस्यावकाश आसीदिति भावः। ये शास्त्रविधिमुत्सृज्य श्रद्धयाऽन्विताः सन्तो यजन्ते, हे कृष्ण ! तेषां तु निष्ठा का? किं सत्त्वं निष्ठा? आहो रजः? यद्वा तमः? **अवशेषिताः** पूर्वमनुक्ता इत्यर्थः। 'यज देवपूजे'ति धातुपाठादाह— **देवादीनिति। वृद्धेति**। यथा वृद्धाः प्राचीना येषु येषु कर्मसु प्रवृत्ताः, तान् दृष्ट्वा श्रुत्वा वा स्वयमपि तथा तेषु तेषु प्रवृत्ताः श्रद्धायुक्ताः सन्त इत्यर्थः। ननु शास्त्रविधिमुत्सृज्य देवादीन् यजमाना इमे किं शास्त्रविदोऽप्यासुरसम्पत्प्रयुक्ततया शास्त्रविधिं त्यक्तवन्तः? किं वा अशास्त्रविदोऽज्ञाः विध्यपरिज्ञानाच्छास्त्रविधिं त्यक्तवन्तः? इति शङ्कायां द्वितीयविकल्पं परिगृह्य समाधत्ते— **श्रुतीति। इति गृह्यन्त इति**। इति वाक्येन प्रतिपाद्यन्त इत्यर्थः। प्रथमं विकल्पं निराचष्टे— **ये पुनरिति**। तत्र हेतुं पृच्छति— **कस्मादिति**। उत्तरयति— **श्रद्धयेति**। तदेव संग्रहभूतं हेतुवाक्यं विवृणोति— **देवादीति**। शास्त्रविधिं विद्वांसोऽपि ये परित्यजन्ति, तेषां तत्परित्यागे कारणं शास्त्रविधौ श्रद्धाऽभाव एव। शास्त्रविधिमविदुषां तत्परित्यागे तु शास्त्रविधिज्ञानाभाव एव कारणम् , न तु श्रद्धाऽभावः। न च शास्त्रविधिमविदुषां कुतस्तस्मिन् श्रद्धाऽवकाश इति वाच्यम्; वृद्धव्यवहारदर्शनानुमिते यत्किञ्चिद्विधौ तेषां श्रद्धायाः सत्त्वादिति। [३]अश्रद्दधानतया तदुत्सृज्येत्यन्वयः। तदित्यस्य शास्त्रमि-

१. 'केचिदवशेषिताः' इति रा.पाठ इति भाति। २. 'इति गृह्यन्ते' इति रा.पा.। ३. अत्र भाष्यमुत्तरपुटे द्र.।

**श्रीभगवानुवाच—**

**त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।**
**सात्त्विकी राजसी चैव तामसी चेति तां शृणु॥२॥**

**किञ्चिच्छास्त्रं पश्यन्त एव तदुत्सृज्याश्रद्दधानतया [१]तद्विहितायां देवादिपूजायां श्रद्धयाऽन्विताः प्रवर्तन्त इति न शक्यं कल्पयितुं यस्मात् तस्मात् पूर्वोक्ता एव 'ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयाऽन्विताः' इत्यत्र गृह्यन्ते। तेषाम् एवम्भूतानां निष्ठा तु का कृष्ण !** सत्त्वमाहो रजस्तमः **किं सत्त्वं** निष्ठा **अवस्थानम् , आहोस्विद् रजः, अथवा तम इति? एतदुक्तं भवति— या तेषां देवादिविषया पूजा सा किं सात्त्विकी, आहोस्विद् राजसी, उत तामसीति॥१॥**

**सामान्यविषयोऽयं प्रश्नो नाप्रविभज्य प्रतिवचनमर्हतीति श्रीभगवानुवाच—** त्रिविधेति। त्रिविधा **त्रिप्रकारा भवति श्रद्धा, यस्यां निष्ठायां त्वं पृच्छसि, देहिनां शरीरिणां सा स्वभावजा। जन्मान्तरकृतो धर्मादिसंस्कारो**

आनन्दगिरिकृतव्याख्या

**यस्मादनन्तराध्याये सिद्धः, तस्मादास्तिकाधिकारे तेषां प्रसङ्गो नास्तीत्युपसंहरति—** यस्मादिति। पूर्वोक्ताः **शास्त्रानभिज्ञाः, वृद्धव्यवहारानुसारिण इति यावत्। तैः श्रद्धया क्रियमाणं कर्म कुत्र पर्यवस्यतीति पृच्छति—** तेषामिति। **का निष्ठेत्येतद् विवृणोति—** सत्त्वमिति। **कार्याणां कारणैर्व्यपदेशमाश्रित्य तात्पर्यमाह—** एतदिति॥१॥

**विशेषनिष्ठमुत्तरं सामान्येन वक्तुं न शक्यमित्याशयेन परिहरति—** सामान्येति। **किमिति श्रद्धात्रैविध्यं प्रश्नानुपयुक्तमुच्यते? तत्राह—** यस्यामिति। **श्रद्धापूर्विकायां क्रियायामिति यावत्। श्रद्धात्रैविध्ये हेतुमाह—** सा स्वभावजेति। **स्वभावशब्दार्थं प्रकृतोपयोगितया**

भाष्यार्कप्रकाशः

त्यर्थः। **तद्विहीनायां** शास्त्रविधिरहितायां देवादिपूजायां श्रद्धयाऽन्विताः प्रवर्तन्त इति कल्पयितुं यस्मान्न शक्यमित्यन्वयः। **तस्माद्** एवं कल्पयितुं नशक्यत्वादित्यर्थः। **पूर्वोक्ता एवेति**। अशास्त्रविद एवेत्यर्थः। शास्त्रविधिमविद्वांसोऽप्यज्ञाः श्रद्धया देवादिपूजायां प्रवर्तमाना दृश्यन्ते। तेषां सा प्रवृत्तिः किं सत्त्वकृता? उत रजःकृता? अथवा तमःकृता? इति प्रश्ननिष्कर्षः। **सत्त्वं निष्ठेति**। नितिष्ठति प्रति-तिष्ठत्यस्यामिति **निष्ठा** प्रतिष्ठा, आश्रय इति यावत्। [२]अवतिष्ठत्यस्मिन्नित्य**वस्थानम्**। यद्वा भावार्थवाची निष्ठाशब्दः। निष्ठा अवस्थानं स्थितिरिति यावत्। औपचारिकोऽयं प्रयोगः निष्ठेति निष्ठाश्रये वस्तुनि। किं ते सत्त्वे तिष्ठन्ति? उत रजसि? यद्वा तमसि? इति फलितार्थः। एवं श्लोकार्थस्य दुर्बोधत्वादाह— **एतदुक्तं भवतीति**। **तेषामिति**। अविदुषामित्यर्थः। अविद्वत्तयोत्सृष्टशास्त्रविधीनामिति वा। ॥१॥

**त्रिविधेति**। सामान्यविषयोऽपि प्रश्नः प्रविभज्य विशिष्य प्रतिवचनमर्हतीति न्यायाच्छ्रद्धयाऽन्विता इति सामान्येनोक्ते ऽप्यर्जुनेन भगवान् तां प्रविभज्य उत्तरयति— **त्रिविधेत्यादिना। यस्यामिति**। श्रद्धायामित्यर्थः। यद्यपि सत्त्वादिनिष्ठैवार्जुनेन पृष्टा, तथापि तत्प्रश्नस्य श्रद्धानिष्ठायामेव पर्यवसानमिति बोध्यम्। स्वभावशब्दार्थमाह— **जन्मान्तरेति**। अतीतानेकजन्मकृतानां बहूनां धर्माधर्माणां संस्काराः अविद्यायामन्तःकरणे वा वर्तमानाः सन्तः कर्मशब्देनोच्यते। तत्र यत् कर्म मरणकालेऽभिव्यज्यते, तदेवोत्तरजन्मारम्भकत्वात् प्रारब्धमित्युच्यते, तदेवेह **स्वभाव**शब्देनोच्यत इति। देहिनां श्रद्धा सात्त्विकी राजसी तामसी चेति त्रिविधा भवति, सा स्वभावजा भवति। तां शृणु इत्यन्वयः। देहिनां स्वभावजा सा श्रद्धा सात्त्विकी राजसी तामसी चेति त्रिविधा भवति, तां शृणु इति वा। प्रारब्धवशात् केषाञ्चिद् देहिनां सात्त्विकी श्रद्धा भवति, केषाञ्चिद् राजसी, केषाञ्चित् पुनस्तामसी। इयं श्रद्धा सात्त्विकी, पुनरियं

---

१. 'तद्विहीनायां' इति रा.पाठः भाति। २. 'अवतिष्ठते' इति युक्तम्।

**सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत !।**
**श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः॥ ३॥**
**यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः।**

**मरणकालेऽभिव्यक्तः स्वभाव उच्यते। ततो जाता** स्वभावजा। सात्त्विकी **सत्त्वनिर्वृत्ता देवपूजादिविषया,** राजसी **रजोनिर्वृत्ता यक्षरक्षःपूजादिविषया,** तामसी **तमोनिर्वृत्ता प्रेतपिशाचादिपूजाविषया। एवं त्रिविधां तामुच्यमानां श्रद्धां** शृणु **अवधारय॥ २॥**

**सैवं त्रिविधा भवति—** सत्त्वेति। सत्त्वानुरूपा **विशिष्टसंस्कारोपेतान्तःकरणानुरूपा** सर्वस्य **प्राणिजातस्य श्रद्धा भवति, भारत !। यद्येवं, ततः किं स्यादिति? उच्यते—** श्रद्धामयः **श्रद्धाप्रायोऽयं** पुरुषः **संसारी जीवः। कथम् ? यो** यच्छ्रद्धो **या श्रद्धा यस्य जीवस्य स यच्छ्रद्धः, स एव तच्छ्रद्धानुरूप एव सः जीवः॥ ३॥**

**ततश्च कार्येण लिङ्गेन देवादिपूजया सत्त्वादिनिष्ठाऽनुमेयेत्याह—** यजन्त इति। यजन्ते **पूजयन्ति** सात्त्विकाः

आनन्दगिरिकृतव्याख्या

**कथयति—** जन्मान्तरेति। **कथं त्रिविधेत्यपेक्षायामाह—** सात्त्विकीत्यादिना। **कथमुक्ता श्रद्धा स्वभावजेति? तत्राह—** तामिति॥ २॥

**प्राचीनकर्मोद्बोधिता त्रिविधा वासना स्वभावशब्दिता त्रिविधायाः श्रद्धाया निमित्तमित्युक्तम्। इदानीमुपादानं तस्या दर्शयति—** सैवमिति। **विशिष्टचित्तोपादाना श्रद्धा तत्त्रैविध्ये त्रिविधेति पूर्वार्धस्यार्थः। कथं निष्ठायाः** [1]**सात्त्विकादिप्रश्नद्वारा श्रद्धायास्त्रैविध्यनिरूपण-मुपयुक्तमिति मन्वानः शङ्कते—** यद्येवमिति। **श्रद्धेयं विषयमभिध्यायंस्तया तत्रैव प्रवर्तत इति मन्वानः परिहरति—** उच्यत इति। **श्रद्धामयत्वं प्रश्नपूर्वकं कथयति—** कथमिति। **श्रद्धा खल्वधिकृते पुरुषे प्राचुर्येण प्रकृतेति तस्य श्रद्धामयत्वसिद्धिरित्यर्थः॥ ३॥**

**तथापि कथं सत्त्वादिनिष्ठा यथोक्तस्य पुरुषस्य ज्ञातुं शक्येत्याशङ्क्याह—** ततश्चेति। **अधिकृतस्य पुरुषस्य श्रद्धाप्रधानत्वादिति**

भाष्यार्कप्रकाशः

राजसी, पुनरियं तामसीति ज्ञानोपायं सूचयति **देवपूजादिविषये**त्यादिविशेषणदानेन। प्रारब्धवशात् केचित् सात्त्विकश्रद्धया देवादीन् यजन्ते, केचिद् राजसश्रद्धया यक्षरक्षःप्रमुखान् , केचित् तामसश्रद्धया प्रेतपिशाचादीनिति परमार्थः। **सैवमिति**। **सा** श्रद्धा। **एवम्** उक्तरीत्या।

अत्र - शास्त्रीयश्रद्धात्रैविध्यं तावदाहेति **रामानुजः**। तदयुक्तम् , देहिनामित्यविशेषेण निर्देशात् , अशास्त्रीयश्रद्धाया अपि सात्त्विकादित्रैविध्यसम्भवाच्च॥ २॥

**सत्त्वेति**। हे भारत ! सर्वस्य सत्त्वानुरूपा श्रद्धा भवति। अयं पुरुषः श्रद्धामयो भवति। यो यच्छ्रद्धः सः स एव भवति। **सत्त्वम्** अन्तःकरणम्। कीदृशमिदम्? अत आह— **विशिष्टेति**। तत्तत्पुरुषनियतधर्माधर्मादिसंस्कारोपेतमित्यर्थः। तस्यानुरूपा सत्त्वानुरूपा। श्रद्धाप्रायः प्रचुरश्रद्धः। प्राचुर्ये मयड्विधानात्। श्रद्धा प्रकृतमुच्यते यस्मिन् स श्रद्धामय इति [2]समासः। अन्नमयो यज्ञ इतिवत्। असंसार्यसङ्गात्मनः कथं श्रद्धासङ्गः? अत आह— **संसारीति। स एवेति**। तच्छ्रद्ध एवेत्यर्थः। यो जीवो यच्छ्रद्धः स तच्छ्रद्ध एव। किमनेनाभिप्रेतम्? अत आह— **तच्छ्रद्धानुरूप एवेति**। तच्छ्रद्धानुगुणप्रवृत्तिरित्यर्थः। सर्वे पुरुषाः स्वस्वसात्त्विक्यादिश्रद्धानुसारेण देवपूजादिषु प्रवर्तन्त इत्यर्थः।

श्रद्धामयः इत्यत्र विकारार्थे मयटमभिप्रेत्य श्रद्धापरिणाम इत्याह **रामानुजः**। तन्मन्दम् , पुरुषस्य श्रद्धाविकारत्वासम्भवात् ॥ ३॥

---

१. 'सत्त्वादिप्रकारप्रश्नद्वारा' इति पा.। २. समास इति। विग्रहः इति भावः।

**प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥ ४॥**
**अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः।**
**दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥ ५॥**
**कर्शयन्तः शरीरस्थं भूतग्राममचेतसः।**
**मां चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान् ॥ ६ ॥**

**सत्त्वनिष्ठाः देवान् , यक्षरक्षांसि राजसाः, प्रेतान् भूतगणांश्च सप्तमातृकादींश्च अन्ये यजन्ते तामसा जनाः ॥ ४॥**

**एवं कार्यतो निर्णीताः सत्त्वादिनिष्ठाः** [१]**शास्त्रविध्युत्सर्गे । तत्र कश्चिदेव सहस्रेषु देवपूजादितत्परः सत्त्वनिष्ठो भवति; बाहुल्येन तु रजोनिष्ठाः तमोनिष्ठाश्चैव प्राणिनो भवन्ति। कथम्? —** अशास्त्रेति। अशास्त्रविहितं **न शास्त्रविहितम् अशास्त्रविहितं** घोरं **पीडाकरं प्राणिनामात्मनश्च तपः** तप्यन्ते **निर्वर्तयन्ति ये (तपो) जनाः, ते च** दम्भाहङ्कारसंयुक्ताः **दम्भश्चाहङ्कारश्च दम्भाहङ्कारौ, ताभ्यां संयुक्ता दम्भाहङ्कारसंयुक्ताः,** कामरागबलान्विताः **कामश्च रागश्च कामरागौ तत्कृतं बलं कामरागबलं तेनान्विताः, (कामरागबलैर्वा अन्विताः) ॥ ५॥**

कर्शयन्त इति। कर्शयन्तः **कृशीकुर्वन्तः शरीरस्थं** भूतग्रामं **करणसमुदायम्** अचेतसः **अविवेकिनो** मां **चैव**

आनन्दगिरिकृतव्याख्या

**यावत्।** देवाः **वस्वादयः,** यक्षाः **कुबेरादयः,** रक्षांसि **नैर्ऋतादयः, स्वधर्मात्प्रच्युता विप्रादयो देहपातादूर्ध्वं वायुदेहमापन्नाः** प्रेताः। **एभ्यश्च यथायथमाराध्यदेवादयः सात्त्विकराजसतामसान्** [२]**कामान् प्रयच्छन्तीति सामर्थ्यादवगन्तव्यम् ॥ ४॥**

**ननु सत्त्वादिनिष्ठाः शास्त्रेण ज्ञातुं शक्यन्ते, कृतं कार्यलिङ्गकानुमानेनेति, तत्राह—** एवमिति। **सत्त्वादिनिष्ठानां जन्तूनामवान्तरविशेषं** [३]**प्रचुरत्वाप्रचुरत्वरूपं दर्शयति—** तत्रेत्यादिना। **राजसानां तामसानां च प्राचुर्यं प्रश्नद्वारा विवृणोति—** कथमित्यादिना। कामश्च **काम्यमानविषयः,** रागश्च **तद्विषयभोगाभिलाषः,** तत्कृतं **तत्प्रयुक्तम् , तन्निमित्तमिति यावत् ॥ ५॥**

**रजोनिष्ठान् प्राधान्येन प्रदर्श्य तमोनिष्ठान् प्राधान्येन दर्शयति—** कर्शयन्त इति। **कथं शरीरादिसाक्षिणमीश्वरं प्रति कृशीकरणं**

भाष्यार्कप्रकाशः

**यजन्त इति। ततश्चेति।** श्रद्धानुरूपत्वात् पुरुषप्रवृत्तेरित्यर्थः। **कार्येणेति।** सत्त्वादिनिष्ठाकार्यभूतया देवादिपूजयैव लिङ्गेन कारणभूता सत्त्वादिनिष्ठा अनुमातुं **शक्याऽनुमेया।** अस्य सत्त्वनिष्ठाऽस्ति, देवपूजकत्वाद् , यः सत्त्वनिष्ठः स देवान् पूजयति, यो नैवं स नैवम् , यथा रजोनिष्ठस्तमोनिष्ठश्च देवान् न पूजयति, एवमादिप्रयोगा ऊह्याः। **सत्त्वनिष्ठा इति।** सात्त्विकश्रद्धायुक्ता इत्यर्थः। स्वधर्मात् प्रच्युता विप्रादयो देहपातादूर्ध्वं वायवीयं देहमापन्नाः प्रेता इत्युच्यन्ते ॥ ४॥

**अशास्त्रेति।** ये जना अचेतसो दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताश्च सन्तः शरीरस्थं भूतग्राममन्तःशरीरस्थं मां चैव कर्शयन्तः सन्तश्चाशास्त्रविहितं घोरं तपस्तप्यन्ते, तानसुरनिश्चयान् विद्धि। **शास्त्रविध्युत्सर्ग इति।** शास्त्रविधिसामान्ये। **तत्रेति।** एवं निर्णीते सति। **देवपूजादितत्परो** देवब्राह्मणगुरुपित्रादिपूजासक्तः। सत्त्वे निष्ठा यस्य स **सत्त्वनिष्ठः ॥ ५॥**

**कर्शयन्त इति।** कृशीकुर्वन्तः पीडयन्तः, स्वस्वव्यापारनिर्वर्तनाक्षमं कुर्वन्त इत्यर्थः। न हीन्द्रियाणां शरीरस्येव स्वरूपतः कार्श्यं सम्भवति। [४]शरीरस्थत्वविशेषणादाह— **भूतग्रामं करणसमुदायमिति। करणानि** समनस्कानीन्द्रियाणि। **अचेतस इति।** चेतनानां

---

१. 'ये शास्त्रविधिमुत्सृज्य' इति प्रक्रमात् इति भावः। २. 'प्रकामान्' इति पा.। ३. प्रचुरत्वं बाहुल्यम्। ४. भूतसमुदायस्य शरीरस्थत्वविशेषणात् इन्द्रियरूपेण परिणतः स विवक्षित इति करणसमुदायः फलितार्थ इति भावः।

**आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः।**
**यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥७॥**
**आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।**
**रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः॥८॥**

**तत्कर्मबुद्धिसाक्षिभूतम्** अन्तःशरीरस्थं [1]**नारायणं कर्शयन्तः। मदनुशासनाकरणमेव मत्कर्शनम्। तान् विद्धि** आसुरनिश्चयान् **आसुरो निश्चयो येषां त आसुरनिश्चयाः, तान् परिहरणार्थं विद्धीत्युपदेशः॥६॥**

[2]**आहाराणां च रस्यस्निग्धादिवर्गत्रयरूपेण भिन्नानां यथाक्रमं सात्त्विकराजसतामसपुरुषप्रियत्वदर्शनमिह क्रियते रस्यस्निग्धादिष्वाहारविशेषेषु आत्मनः प्रीत्यतिरेकेण लिङ्गेन सात्त्विकत्वं राजसत्वं तामसत्वं च बुद्ध्वा रजस्तमोलिङ्गानामाहाराणां परिवर्जनार्थम् , सत्त्वलिङ्गानां चोपादानार्थम्। तथा यज्ञादीनामपि सत्त्वादिगुणभेदेन त्रिविधत्वप्रतिपादनमिह राजसतामसान् बुद्ध्वा कथं नु नाम परित्यजेत् , सात्त्विकानेवानुतिष्ठेद् इत्येवमर्थमाह—** आहारस्त्विति। **आहारस्त्वपि** सर्वस्य **भोक्तुः प्राणिनस्त्रिविधो भवति** प्रियः **इष्टः। तथा यज्ञस्तथा तपस्तथा दानम्। तेषामाहारादीनां भेदमिमं वक्ष्यमाणं शृणु॥७॥**

आयुरिति। **आयुश्च सत्त्वं च बलं चारोग्यं च सुखं च प्रीतिश्च आयुःसत्त्वबलारोग्यसुखप्रीतयः, तासां विवर्धना** आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः, **ते च** रस्या **रसोपेताः** स्निग्धाः **स्नेहवन्तः** स्थिराः **चिरकाल-**

आनन्दगिरिकृतव्याख्या

**प्राणिनां प्रकल्प्यते? तत्राह—** मदनुशासनेति। **तेषां विपर्यासनिश्चयवतां परिज्ञानं कुत्रोपयुज्यते? तत्राह—** परिहरणार्थमिति॥६॥

**उत्तरश्लोकपूर्वार्धतात्पर्यमाह—** आहाराणामिति। **रस्यादिवर्गस्य सात्त्विकपुरुषप्रियत्वं, कट्वादिवर्गस्य राजसप्रियत्वं, यातयामादिवर्गस्य तामसप्रियत्वमिति दर्शनं कुत्रोपयुज्यते? तत्राह—** रस्येति। **श्लोकोत्तरार्धतात्पर्यमाह—** तथेति। **आहारत्रैविध्यवदिति यावत्। कथमेतेषां प्रत्येकं त्रैविध्यम्? तत्राह—** तेषामिति॥७॥

**सात्त्विकप्रीतिविषयमाहारविशेषमुदाहरति—** आयुरिति। आयुः [3]**जीवनम् ,** सत्त्वं **चित्तस्थैर्यम् वीर्यं वा,** बलं **कार्यकरण-**

भाष्यार्कप्रकाशः

चेतोराहित्यासम्भवादाह— **अविवेकिन इति। साक्षिभूतमिति।** साक्षितया प्रत्यग्रूपेण स्थितमित्यर्थः। **नारायणमिति।** परमात्मानम्। **असुरनिश्चयानिति।** दम्भाहङ्कारपरपीडनादीनामसुरधर्मत्वादिति भावः। 'आसुरनिश्चयान्' [4]इति **रामानुजीय**पाठस्तु अणो वैयर्थ्यादुपेक्ष्यः ॥६॥

**आहार इति। कथं नु नामेति।** अतिप्रयासेनेत्यर्थः। सर्वस्यापि त्रिविध आहारस्तु प्रियो भवति। त्रिविधो यज्ञः प्रियो भवति। तथा त्रिविधं दानं प्रियं भवति। इमं तेषां भेदं शृणु॥७॥

**आयुरिति। आयुः** शरीरे प्राणवायुसञ्चारः। **सत्त्वं** गुणविशेषः। **बलं** शरीरेन्द्रियपाटवम्। **आरोग्य**मरोगता। विशेषेण वर्धयन्तीति **विवर्धनाः। रसोपेता इति।** न तु नीरसा इत्यर्थः।

'मधुररसोपेताः' इति **रामानुजः।** तदयुक्तम् , केवलमधुररसाहारस्यापि रोगादिहेतुत्वात्।

---

१. 'नारायणम्' इति क्वचिन्न। २. 'आहारादीनाम्' इति पा.। ३. 'ज्योग्जीवनम्' इति पा.। ४. मूले 'असुरनिश्चयान्' इति रा. पाठः भाति। अद्यत्वे तु 'आसुरनिश्चयान्' इत्येव पाठः सर्वत्र उपलभ्यते।

**कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।**
**आहारा राजसस्येष्टा दुःखशोकामयप्रदाः॥९॥**
**यातयामं गतरसं पूति पर्युषितं च यत्।**
**उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥१०॥**

**स्थायिनो देहे ,** हृद्या **हृदयप्रिया आहाराः** सात्त्विकप्रियाः **सात्त्विकस्येष्टाः**॥८॥

कट्विति। [1]**कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः इत्यत्र अतिशब्दः कट्वादिषु सर्वत्र योज्यः– अतिकटुः, अतितीक्ष्ण इत्येवम्। कटुश्चाम्लश्च लवणश्चात्युष्णश्च तीक्ष्णश्च रूक्षश्च विदाही च** कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः। **एवंविधा आहारा राजसस्येष्टा दुःखशोकामयप्रदाः दुःखं च शोकं चामयं च प्रयच्छन्तीति** दुःखशोकामयप्रदाः॥९॥

यातयाममिति। यातयामं **मन्दपक्वम् , निर्वीर्यस्य गतरसशब्देनोक्तत्वात् ।** गतरसं **रसवियुक्तं** पूति **दुर्गन्धि**

आनन्दगिरिकृतव्याख्या

**सामर्थ्यम् ,** आरोग्यं **नीरोगता,** सुखम् **अन्तराह्लादः,** प्रीतिः **परेषामपि सम्पन्नानां दर्शनात् परमो हर्षः, तासां विवर्धनाः, विवर्धयन्तीति व्युत्पत्तेः।** रसोपेता **रसयितव्याः सरसाः।** देहे चिरकालस्थायित्वं **चिरतरं शरीरोपकारहेतुत्वम्॥८॥**

**राजसप्रीतिविषयमाहारविशेषं दर्शयति—** कट्विति। कटुस्तिक्तः, **कटुकस्य तीक्ष्णशब्देनोक्तत्वात्।** रूक्षो **विस्नेहः,** विदाही **सन्तापकः। अतिशब्दस्य सर्वत्र योजनामेवाभिनयति—** अतिकटुरिति। दुःखं **तात्कालिकी पीडा, इष्टवियोगजं दुःखं** शोकः, आमयो **रोगः॥९॥**

**तामसप्रियमाहारमुदाहरति—** यातयाममिति। **ननु निर्वीर्यं यातयाममुच्यते, न पुनः सामिपक्वमिति, नेत्याह—**निर्वीर्यस्येति

भाष्यार्कप्रकाशः

**स्नेहो** द्रवः। चिरकालं स्थातुं शीलं येषां ते **चिरकालस्थायिनः**। क्वेत्यत आह— **देह इति**। रक्तमांसादिरूपेणेति भावः। 'स्थिरपरिणामाः' इति **रामानुजार्थ**स्तु लाक्षणिकत्वादुपेक्ष्यः॥८॥

**कट्विति**। कट्वादिरसानां सर्वात्मना अभावस्यारुच्यादिहेतुत्वात् सात्त्विकस्यापि कट्वादिरससेवा आवश्यक्येवेत्यत आह— **अतिशब्द इति**। कटुस्तिक्तः कटुरसस्य तीक्ष्णशब्देनोक्तत्वात्। **अतिकटु**र्निम्बादिः। अत्याम्लातिलवणौ प्रसिद्धौ। **अत्युष्णः** पाकोत्तरक्षणकालिकान्नादिः। **अतितीक्ष्णः** श्लेष्मप्रकोपकः मरिचादिः। **अतिरूक्षः** शोषकरो वातप्रकोपकः कोद्रवादिः। **अतिविदाही** तापकरः पित्तप्रकोपकः सर्षपादिः। **आमयं** रोगम्। 'पाघ्राध्मा' इति दाणो यच्छादेशादाह— **प्रयच्छन्तीति**॥९॥

**यातयाममिति**। यातो यामः पाकस्य नियमो यस्य तद् **यातयामं,** यावत्कालं यस्य पाकः कर्तव्यस्तावत्कालं तस्य पाकेऽकृते सति तदन्नं यातयाममित्युच्यते। इदमेवाह— **मन्दपक्वमिति**। मन्दमल्पं यथा तथा पक्वं मन्दपक्वम्। 'पचो वः' इति निष्ठायां वः। न चानुपसृष्टस्य यमधातोर्नियमार्थो नास्तीति वाच्यम् ; द्योतकत्वनियमादुपसर्गाणां, धातूनामेवानेकार्थत्वात्। ननु यातो यामः श्रेष्ठांशो यस्य तद् यातयामं निर्वीर्यमित्यक्लिष्टार्थस्य कुतः परित्यागः? अत आह— **निर्वीर्यस्येति**। आहारस्य **रसो** हि वीर्यम्।

**ननु** यातयामं यातप्रहरं चिरकालावस्थितमिति **रामानुजार्थः**समीचीन इति चेत् , **मैवम्** ; पर्युषितमित्यनेन चिरकालावस्थितस्योक्तत्वात्। रात्र्यन्तरितं हि पर्युषितं यातयामं चिरकालावस्थितं भवति। न च कालातिपत्त्या रसान्तरापन्नं पर्युषितं, कालातिक्रम-

---

१. 'कटुरम्लो लवणोऽत्युष्णः। अतिशब्दः' इति पा.। 'कट्वाम्ल' इति रा.पा.।

**अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।**
**यष्टव्यमेवेति मनः समाधाय स सात्त्विकः॥ ११॥**
**अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्।**

पर्युषितं च **पक्वं सद् रात्र्यन्तरितं च यद् ,** उच्छिष्टमपि **च भुक्तशिष्टमपि** अमेध्यम् **अयज्ञार्हं भोजनमीदृशं तामसप्रियम्** ॥ १० ॥

**अथेदानीं यज्ञस्त्रिविध उच्यते—** अफलेति। अफलाकाङ्क्षिभिः **अफलार्थिभिर्यज्ञो** विधिदृष्टः **शास्त्रचोदनादृष्टो यो यज्ञ** इज्यते **निर्वर्त्यते,** यष्टव्यमेवेति **यज्ञस्वरूपनिर्वर्तनमेव कार्यमिति मनः समाधाय, नानेन पुरुषार्थो मम कर्तव्य इत्येवं निश्चित्य, स सात्त्विको यज्ञ उच्यते॥ ११॥**

अभिसन्धायेति। अभिसन्धाय **तु उद्दिश्य फलं, दम्भार्थमपि चैव यदिज्यते, भरतश्रेष्ठ ! तं यज्ञं** विद्धि राजसं

आनन्दगिरिकृतव्याख्या

॥ १० ॥

**हानादानार्थमाहारत्रैविध्यमेवं विभज्य क्रमप्राप्तं यज्ञत्रैविध्यं कथयति—** अथेति। **तत्र सात्त्विकं यज्ञं ज्ञापयति—** अफलेति। **फलाभिसन्धिं विना यज्ञस्वरूपमेव भाव्यमिति बुद्ध्या शास्त्रतोऽनुष्ठीयमानो यज्ञः सात्त्विक इत्यर्थः॥ ११॥**

**राजसं यज्ञं हानार्थं दर्शयति—** अभिसन्धायेति। **स्वर्गाद्युद्दिश्य धार्मिकत्वख्यापनार्थं च यद् यजनं क्रियते, तं यज्ञं रजसा निर्वृत्तं**

भाष्यार्कप्रकाशः

मात्रदुष्टं यातयाममिति भेदोऽस्तीति वाच्यम् ; रसान्तरापत्त्यादिकं विना कालातिक्रममात्रेण यस्य कस्याप्याहारस्य दुष्टत्वाभावात्। न हि रात्र्यन्तरितं गङ्गाजलं कूपजलवद् दुष्टं भवति। नापि रात्र्यन्तरितं माषवटकादिभक्ष्यमन्नादिवद् दुष्टं भवतीति।

**दुर्गन्धि** दुष्टो गन्धो दुर्गन्धः, सोऽस्यास्तीति दुर्गन्धि। **पर्युषितमिति**। यत् पक्वं सद् रात्र्यन्तरितं तत् पर्युषितम्। यातयामाद् भेदप्रदर्शनार्थम् — **पक्वं सदिति**। पक्वस्यापि दुष्टत्वप्रदर्शनार्थम् — **रात्र्यन्तरितमिति**। **भुक्तशिष्टमिति**। भुक्तावशेष इत्यर्थः।

**रामानुजस्तु**— गुर्वादिभ्योऽन्येषां भुक्तशिष्टमित्याह। तदयुक्तम् , शिष्याय श्रोत्रियाय स्वभुक्तावशेषप्रदानेन गुरोर्दोषप्रसङ्गात्। तथोपनीताय पुत्रायोच्छिष्टप्रदानेन पितुर्दोषप्रसङ्गाच्च। तथा शिष्टाचारादर्शनाच्च। यदि वैष्णवादीनामयं गुर्वाद्युच्छिष्टान्नभोजनं शिष्टाचारः, तर्हि चक्राङ्कनादिशिष्टाचारसम्पन्नानां तेषां तदपि शिष्टाचार एव भवतु। स्मार्तानां तु न तथा। न ह्यत्र गुर्वादिभिन्नोच्छिष्ट-मिति मूलं दृश्यते, किन्तूच्छिष्टमित्येव। तस्य चैवं सङ्कोचनमन्याय्यमिति स्फुटम्।

**अमेध्यम्** अशुद्धमपवित्रमिति यावत्। पवित्रं हि पुरोडाशादिकं यज्ञायार्हतीत्यत आह— **अयज्ञार्हमिति**। अयज्ञशिष्टमिति तु **रामानुजः**, तदयुक्तम् , सात्त्विकराजसयोरप्ययज्ञशिष्टान्नस्य भक्षणदर्शनात्। न हि ये अयज्ञशिष्टान्नं भुञ्जते ते तामसा एवेति नियन्तुं शक्यते; सात्त्विकश्रेष्ठैरपि पक्वचूतफलादीनामयज्ञशिष्टानामद्यमानत्वात्।

**भोजनम्** आहारोऽन्नादिकम्। भुज्यते आह्रियत इति भोजनमाहार इति च व्युत्पत्तेः[१]। **तामसप्रियं** तामसस्येष्टम्॥ १०॥

**अफलेति**। अफलाकाङ्क्षिभिः यष्टव्यमेवेति मनः समाधाय विधिदृष्टो यो यज्ञ इज्यते स सात्त्विकः। यजेतेत्यादिविधिदर्शनात् केवलं मया यष्टव्यं, न तु फलमाकाङ्क्षितव्यमिति मनोनिश्चयपूर्वकं यथाविधि क्रियमाणो यज्ञः सात्त्विक इत्युच्यत इत्यर्थः॥ ११॥

**अभिसन्धायेति**। हे भरतश्रेष्ठ! फलमभिसन्धाय दम्भार्थमपि चैव इज्यत इति यत् तं यज्ञं राजसं विद्धि। यदिज्यते तमिति वा। यदिति सामान्ये नपुंसकम् , यः इत्यर्थः। यथाविधि फलाभिसन्धिमता क्रियमाणः, यथाविधि दाम्भिकेन क्रियमाणश्च यज्ञो राजस

१. कर्मव्युत्पत्तेरित्यर्थः।

**इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्॥ १२॥**
**विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।**
**श्रद्धाविरहितं यज्ञं तामसं परिचक्षते॥ १३॥**
**देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।**
**ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥ १४॥**

[१]**रजोगुणनिर्वर्त्यं राजसं जानीहि॥ १२॥**

विधिहीनमिति। विधिहीनं [२]**यथाचोदितविपरीतम्,** असृष्टान्नं **ब्राह्मणेभ्यो** न सृष्टं **न दत्तम् अन्नं यस्मिन् यज्ञे सोऽसृष्टान्नः, तमसृष्टान्नम्,** मन्त्रहीनं **मन्त्रतः स्वरतो वर्णतो वा वियुक्तं मन्त्रहीनम्,** अदक्षिणम् **उक्तदक्षिणारहितं, श्रद्धाविरहितं यज्ञं** तामसं परिचक्षते **तमोनिर्वृत्तं कथयन्ति॥ १३॥**

**अथेदानीं तपस्त्रिविधमुच्यते—** देवेति। **देवाश्च द्विजाश्च गुरवश्च प्राज्ञाश्च देवद्विजगुरुप्राज्ञाः, तेषां पूजनं** देवद्विजगुरुप्राज्ञपूजनम्, **शौचम्,** आर्जवम् **ऋजुत्वं, ब्रह्मचर्यम्, अहिंसा च शरीरनिर्वर्त्यं** शारीरं **शरीरप्रधानैः सर्वैः**

आनन्दगिरिकृतव्याख्या

**त्याज्यमवगच्छेत्यर्थः॥ १२॥**

**तामसं यज्ञं हानार्थमेवोदाहरति—** विधीति॥ १३॥

**सात्त्विकादिभावं निरूपयितुं सर्वस्य तपसः स्वरूपं त्रिविधं निरूपयति—** अथेति। **तत्र शारीरं तपो निर्दिशति—** देवेति। देवाः **ब्रह्मविष्णुशिवादयः,** द्विजाः **पूज्यपूज्यत्वाद् द्विजोत्तमाः,** गुरवः **पित्रादयः,** प्राज्ञाः **पण्डिता विदितवेदितव्यास्तेषां** पूजनं **प्रणामशुश्रूषादि,** शौचं **मृज्जलाभ्यां शरीरशोधनम्,** आर्जवम**ृजुत्वं विहितप्रतिषिद्धयोरेकरूपप्रवृत्तिनिवृत्तिमत्त्वं,** ब्रह्मचर्यं **मैथुनासमाचरणम्,** अहिंसा **प्राणिनामपीडनम्। शरीरमात्रनिर्वर्त्यत्वमस्य तपसो न सम्भवतीति मत्वा विशिनष्टि—** शरीरेति। **कथं कर्त्रादिसाध्यत्वे तपसः**

भाष्यार्कप्रकाशः

इत्युच्यत इत्यर्थः॥ १२॥

**विधिहीनमिति।** चोदितमनतिक्रम्य वर्तमानं यथाचोदितं, तस्माद्विपरीतं **यथाचोदितविपरीतं** विधिविरुद्धमित्यर्थः। **मन्त्रहीनमिति।** मन्त्रान् यद्यपि पठन्ति, तथापि स्वरवर्णविपर्ययेण पठन्ति, अत उक्तम्— **मन्त्रहीनमिति।** स्वरवर्णविपर्ययरहितमन्त्ररहितमित्यर्थः। इदमेवाह— **स्वरतो वर्णतश्च वियुक्तमिति।** मन्त्रशब्दोऽत्र तद्गतस्वरवर्णपरः। यद्वा स्वरवर्णातिरिक्तमन्त्रपदार्थाभावात् स्वरयुक्तवर्णसमुदायो मन्त्रः। तेन हीनोऽयं यज्ञः स्वरतो वर्णतश्च वियुक्त इति। **श्रद्धाविरहितमिति।** तामसश्रद्धावत्त्वेऽप्येषां तामसश्रद्धाया देवपूजायामनुपयुक्तत्वात् सात्त्विकश्रद्धायाश्चाभावादिति भावः। यद्वा भूतप्रेतादिपूजायामेवैषां तामसी श्रद्धा, न तु यज्ञे इति भावः॥ १३॥

**देवेति।** तपस्तावत् त्रिविधम्— शारीरवाचिकमानसिकभेदात्। पुनस्त्रिविधम्— सात्त्विकराजसतामसभेदात्। तत्र प्राथमिकभेदत्रयं दर्शयति श्लोकत्रयेण। **देवाः** आदित्यचन्द्रादयः। **द्विजाः** अतिथ्यादयः। **गुरवः** पितृविद्यामन्त्रोपदेष्टारः। 'जनिता चोपनेता च यश्च विद्यां प्रयच्छति। श्वशुरश्चाग्रजो भ्राता पञ्चैते गुरवः स्मृताः॥' इत्युक्ता वा। **प्राज्ञाः** पण्डिताः। **ब्रह्मचर्यं** स्त्रीसम्भाषणाद्यभावः। **निर्वर्त्यं** साध्यम्। ननु शरीरेण जडेन कथं निर्वर्त्यते? अत आह— **शरीरप्रधानैरिति।** शरीरं प्रधानं येषां तैः शरीरप्रधानैः।

१. 'रजोगुणनिर्वर्त्यं' इति पाठः क्वचिन्न। २. 'यथाचोदितविधिविपरीतं' इति पा.।

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥ १५॥**

**एव कार्यकरणैः कर्त्रादिभिः साध्यं शारीरं तप उच्यते। 'पञ्चैते तस्य हेतवः'(भ.गी.१८.१५) इति हि वक्ष्यति॥ १४॥**

अनुद्वेगेति। अनुद्वेगकरं **प्राणिनामदुःखकरं वाक्यं सत्यं प्रियहितं च यत्। प्रियहिते दृष्टादृष्टार्थे। अनुद्वेगकरत्वादिभिर्धर्मैर्वाक्यं विशेष्यते।** [१]**विशेषणधर्मसमुच्चयार्थः चशब्दः। परप्रत्ययार्थं प्रयुक्तस्य वाक्यस्य सत्यप्रियहितानुद्वेगकरत्वानाम् अन्यतमेन द्वाभ्यां त्रिभिर्वा हीनता स्याद् यदि , न तद् वाङ्मयं तपः। तथा सत्यवाक्यस्येतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा विहीनतायां न वाङ्मयतपस्त्वम्। तथा प्रियवाक्यस्यापीतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा विहीनस्य न वाङ्मयतपस्त्वम्। तथा हितवाक्यस्यापीतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा** [२]**विहीनस्य न वाङ्मयतपस्त्वम्।**

आनन्दगिरिकृतव्याख्या

**शारीरत्वम्? शारीरत्वे वा कथं कर्त्रादिसाध्यत्वमित्याशङ्क्याह—** पञ्चेति॥ १४॥

**सम्प्रति वाङ्मयं तपो व्यपदिशति—** अनुद्वेगकरमिति। सत्यं **यथादृष्टार्थवचनं,** प्रियं **श्रुतिसुखं,** हितं **परिणामपथ्यम्। प्रियहितयोर्विधान्तरेण विभागमाह—** प्रियेति। **कथमत्र विशेषणविशेष्यत्वम्? तदाह—** अनुद्वेगेति। **विशेषणानां धर्माणामनुद्वेगकरत्वादीनां विशेष्येण वाक्येन समुदितानां परस्परमपि समुच्चयद्योती चकार इत्याह—** विशेषणेति। **किमिति वाक्यमेतैर्विशेष्यते? किमिति वा तेषां मिथः समुच्चयः? तत्राह—** परेति। **यद्यपि वाक्यमात्रस्याविशेषितस्य वाङ्मयतपस्त्वानुपपत्तिः, तथापि सत्यवाक्यस्य विशेषणान्तराभावेऽपि वाङ्मयतपस्त्वमित्याशङ्क्याह—** तथेति। **तथापि प्रियवाक्यमात्रस्य तथात्वं स्यादित्याशङ्क्याह—**तथा प्रियेति। **तथापि परिणामपथ्यं वाक्यमात्रं तथा भविष्यति, नेत्याह—** तथा हितेति। **कीदृक् तर्हि तपो वाङ्मयमिति प्रश्नपूर्वकं विशदयति—** किं

भाष्यार्कप्रकाशः

**कर्त्रादिभिरिति। कर्ता**ऽहङ्कारः। आदिपदात् करणानां ग्रहणम्। कर्ता शरीरतादात्म्याध्यासमापन्नः सन् शरीरतादात्म्याध्यासवद्भिरेवेन्द्रियैर्देवादिपूजां कुर्वन् सन् , 'ब्राह्मणोऽहमादित्यं हस्ताभ्यां नमस्करोमि, रुद्रं हस्तेन वारिणा अभिषिञ्चामी'त्येवं मन्यत इत्यस्य तपसः शारीरत्वमुक्तमिति भावः। ननु क्वोक्तं शरीरस्य कर्मसाधनत्वम्? अत आह— **पञ्चेति**। 'अधिष्ठानं तथा कर्ते'ति श्लोकेनेति भावः। यद्वा कर्त्रादिभिरित्यादिपदाद् 'अधिष्ठान'मिति श्लोकोक्तकरणादिग्रहणम्। तथा च पञ्चभिः कर्तृकरणशरीरचेष्टादैवैः क्रियमाणमपि देवद्विजादिपूजनादिकं शरीरेणैव कृतमिति शारीरमित्युच्यते। कुतः? प्रकृततपसि शरीरस्यैव प्रधानत्वात्। इन्द्रियाद्यधिष्ठितदेहव्यापारो हि पूजादिः॥ १४॥

**अनुद्वेगेति**। अनुद्वेगकरं सत्यं प्रियहितं च यद्वाक्यं तत् , स्वाध्यायाभ्यसनं चैव वाङ्मयं तप इत्युच्यते। प्रियं च तद्धितं च प्रियहितम्। दृष्टार्थं प्रियम् , अदृष्टार्थं हितम्। यद्धीहैव सुखं जनयति तत् प्रियमिष्टम् , यत्तु नरकादिदुःखं निवारयति तद्धितम् अमुत्रोपकारकम्। प्रियहितं चेति चकारस्यार्थमाह— **अविशेषेणेति**। अनुद्वेगकरत्वसत्यत्वप्रियत्वहितत्वाख्यधर्मचतुष्टयस्याविशेषेण समुच्चयार्थश्चकारः। नामीषामन्यतमस्य न्यूनाधिकभावः। किन्तु चतुरोऽप्यमी धर्माः साम्येन वर्तितव्या वाक्य इति[चत्वारोऽप्यमी धर्माः साम्येन वर्तेरन् वाक्य इति ] बोधनार्थश्चकार इत्यर्थः। तेन च यत्र वाक्ये चत्वारस्ते धर्माः सन्ति, तदेव वाचिकं तपः। यत्र तु तेषां मध्ये त्रयो द्वौ वा एको वा धर्मोऽस्ति, तद्वाक्यं नैव तप इति सिध्यति। इदमेवाह— **परेति। परप्रत्ययार्थं** परविश्वासार्थं परेषां ज्ञानार्थमिति वा। अनुद्वेगकरस्य वाक्यस्य विहीनस्य सतो वाङ्मयतपस्त्वं नेत्यन्वयः। **इतरेषामिति।** अनुद्वेगकरप्रियहितानामिति, अन्यत्र अनुद्वेगकरसत्यहितानामिति, अपरत्र अनुद्वेगकरसत्यप्रियाणामिति चार्थः।

---

१. अविशेषेण धर्मसमुच्चयार्थश्चकारः इति रा.पा.। २. 'वियुक्तस्य' इति पा.।

## मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
## भावसंशुद्धिरित्येतत् तपो मानसमुच्यते॥ १६॥

**किं पुनस्तत् तपः? यत् सत्यं वाक्यमनुद्वेगकरं प्रियहितं च तत् परमं तपो वाङ्मयम्। यथा 'शान्तो भव वत्स, स्वाध्यायं योगं चानुतिष्ठ, तथा ते श्रेयो भविष्यति' इति। स्वाध्यायाभ्यसनं चैव यथाविधि वाङ्मयं तप उच्यते॥ १५॥**

मन इति। मनःप्रसादो **मनसः प्रशान्तिः, स्वच्छतापादनं मनसः प्रसादः।** सौम्यत्वं **यत् सौमनस्यमाहुर्मुखादिप्रसादकार्योन्नेया अन्तःकरणस्य वृत्तिः,** मौनम् **वाक्संयमोऽपि मनःसंयमपूर्वको भवतीति कार्येण कारणमुच्यते**

आनन्दगिरिकृतव्याख्या

पुनरिति। **विशिष्टे वाङ्मये तपसि दृष्टान्तमाह—** यथेति। **प्राङ्मुखत्वं पवित्रपाणित्वमित्यादिविधानमनतिक्रम्य स्वाध्यायस्य आवर्तनमपि वाङ्मये तपसि अन्तर्भवतीत्याह—** स्वाध्यायेति। **वाक् प्राचुर्येण प्रस्तुता अस्मिन्निति वाङ्मयं, वाक्प्रधानमित्यर्थः॥ १५॥**

**मानसं तपः संक्षिपति—** मन इति। **प्रशान्तिफलमेव व्यनक्ति—** स्वच्छतेति। **मनसः स्वाच्छ्यमनाकुलता। नैश्चिन्त्यमित्यर्थः।** सौमनस्यं **सर्वेभ्यो हितैषित्वम् अहिताचिन्तनं च। तत् कथं गम्यते? तत्राह—** मुखादीति। **तस्य स्वरूपमाह—** अन्तःकरणस्येति। **ननु मौनं वाङ्नियमनं वाङ्मये तपस्यन्तर्भवति, तत् कथं मानसे तपसि व्यपदिश्यते? तत्र वाचः संयमस्य कार्यत्वान्मनःसंयमस्य कारणत्वात् कार्येण कारणग्रहणान्मानसे तपसि मौनमुक्तमित्याह—** वागिति। **यद्वा मौनं मुनिभावो मननम्, आत्मनो मनसो विनिग्रहो निरोधः।**

भाष्यार्कप्रकाशः

वाङ्मयमित्यस्याकाङ्क्षामाह— **किंपुनस्तत्तप इति। वाङ्मयं** वाग्विकारः, वाक्साध्यमिति यावत्। अस्मिन् तपसि वागेव प्रधाना, अन्तःकरणादयस्त्वप्रधानाः। अत उक्तम्— **वाङ्मयमिति।** न ह्यत्र देवपूजादाविव शरीरव्यापारः कश्चिदस्ति, किन्तु वाग्व्यापार एव। जिह्वादयस्तु वाचोऽधिष्ठानभूता एवेति बोध्यम्। अनुद्वेगकरत्वादिधर्मचतुष्टययुक्तं वाक्यमेव किञ्चिदुदाहरति— **यथा शान्त इति।** हे वत्स! शान्तो भव, कामादिविकारशून्यचित्तो भव। सति चित्तविक्षेपे स्वाध्याययोगाभ्यसना[योगा]दिति भावः। स्वाध्यायं, **योगं** कर्मयोगं चानुतिष्ठ। यथैतदुभयं करोषि तथा तव श्रेयो भविष्यति इति स्वाध्यायाभ्यसनस्यापि श्रेयोहेतुत्वप्रतिपादनात् स्वाध्यायाभ्यसनमपि वाङ्मयं तप इत्युच्यते। कीदृशम्? अत आह—**यथाविधीति।** विधिमनतिक्रम्येत्यर्थः। स्नानसन्ध्यागुरुध्यानादयः स्वाध्यायस्य विधयः। स्वाध्यायो वेदः। स च यस्य शाखिनो यो विहितः स एव। तेन स्वशाखां परित्यज्यान्यशाखां योऽभ्यस्यति स शाखारण्डः सर्वकर्मबहिष्कृत एवेति न परशाखाध्ययनं वाङ्मयं तप इत्युच्यते। इदमेव सूचयितुं स्वाध्याय इत्युक्तम्। अधीयत इत्यध्यायो वेदः। **स्वः** स्वीयश्चासावध्यायः, स्वस्याध्याय इति वा स्वाध्याय इति व्युत्पत्तेः। एवं स्वाध्यायस्य वाङ्मयतपस्त्वादेव 'स्वाध्यायोऽध्येतव्यः' इति विधिर्दृश्यते। न हि निष्फलः कोऽपि विधिः सर्वज्ञेनेश्वरेण विधीयते। तथा सत्यनर्थकत्वेनेश्वरस्याप्रमाणत्वप्रसङ्गात्॥ १५॥

**मन इति। स्वच्छता** कामादिकालुष्याभावः। **सौम्यत्वं** सौमनस्यम्, तस्य च लिङ्गं मुखादिप्रसादः। भ्रूविक्षेपनेत्रारुणत्वादिभिः लिङ्गैः क्रुद्धं पितरं ज्ञात्वा पुत्रः स्वापराधक्षमापणं स्तुतिनमस्कारादिभिः कुर्वन् मुखप्रसादादिना तं पुनःसौम्यत्वमापन्नं निश्चित्य कृतार्थोऽहमिति मन्यते। सेयं मुखप्रसादादिकार्योन्नेया अन्तःकरणवृत्तिः सौम्यत्वमित्युच्यते। स्वानुभवैकवेद्यो मनःप्रसादः, परप्रत्यक्षं तु सौम्यत्वमिति विवेकः।

मनसः परेषामभ्युदयप्रावण्यं सौम्यत्वमिति **रामानुजः**[1]। सौम्यत्वमापन्नो हि राजा अर्थिभ्यः किमपि धनादिकं ददाति। मनसः क्रोधाद्यभावः प्रसादः, अनुग्रहरूपान्तःकरणवृत्तिः सौम्यत्वमिति विवेक इति भावः।

[2]**अन्तःकरणवृत्तिरिति।** अन्तःकरणस्य सात्त्विकः परिणामविशेष इत्यर्थः। अन्तःकरणं यदा सत्त्वमयं वर्तते, तदा

---

१. अत्र रामानुजमतस्याखण्डनम् अविरोधात् इति ज्ञेयम्। २. 'अन्तःकरणवृत्ति'रिति भाष्ये पाठान्तरं भाति।

**श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः।**
**अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥ १७॥**
**सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।**
**क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥ १८॥**

**मनःसंयमो मौनमिति।** आत्मविनिग्रहो **मनोनिरोधः सर्वतः सामान्यरूपः आत्मविनिग्रहः, वाग्विषयस्यैव मनसः संयमो मौनमिति विशेषः।** भावसंशुद्धिः **परैर्व्यवहारकालेऽमायावित्वं भावसंशुद्धिरित्येतत् तपो मानसमुच्यते॥ १६॥**

**यथोक्तं कायिकं वाचिकं मानसं च तपस्तप्तं नरैः [1]सत्त्वादिगुणभेदेन कथं त्रिविधं भवतीत्युच्यते—** श्रद्धयेति। श्रद्धया **आस्तिक्यबुद्ध्या** परया **प्रकृष्टया** तप्तम् **अनुष्ठितं तपस्तत् प्रकृतं** त्रिविधं **त्रिप्रकारम् [2]त्र्यधिष्ठानं** नरैः **अनुष्ठातृभिः** अफलाकाङ्क्षिभिः **फलाकाङ्क्षारहितैः** युक्तैः **समाहितैः, यदीदृशं तपः तत्** सात्त्विकं **सत्त्वनिर्वृत्तं** परिचक्षते **कथयन्ति शिष्टाः॥ १७॥**

सत्कारेति। सत्कारमानपूजार्थम् **सत्कारः साधुकारः, साधुरयं तपस्वी ब्राह्मण इत्येवमर्थं, मानो माननं**

आनन्दगिरिकृतव्याख्या

**नन्वेवं मौनस्य मनोनिग्रहस्य च मनःसंयमत्वेनैकत्वात् पौनरुक्त्यम् , नेत्याह—** सर्वत इति। **भावस्य हृदयस्य संशुद्धी रागादिमलविकलतेति व्याचष्टे—** परैरिति। मानसं **मनसा प्रधानेन निर्वर्त्यमित्यर्थः॥ १६॥**

**त्रिविधस्य तपसो यथासम्भवं सात्त्विकादिभावेन त्रैविध्यमाकाङ्क्षाद्वारा निक्षिपति—** यथोक्तमिति। त्र्यधिष्ठानं **देहवाङ्मनोनिर्वर्त्यमित्यर्थः।** समाहितैः **सिद्ध्यसिद्ध्योर्निर्विकारैरिति यावत्॥ १७॥**

**राजसं तपो निर्दिशति—** सत्कारेति। **साधुकारमेव स्फोरयति—** साधुरिति। **दम्भेन चैव नास्तिक्येन, केवलधर्मध्वजित्वेने-**

भाष्यार्कप्रकाशः

मुखप्रसादादिर्भवति। मौनं वाक्यनियमः। वाक्योपरम इति यावत्। वाचामप्रयोग इति भावः। स हि वाङ्मयस्तप एवेत्यत आह— **मनःसंयमेति।** मनसो विवक्षाव्यापारोपरमे सत्येव वाचो निर्व्यापारत्वम् , मनोव्यापारपूर्वकत्वादिन्द्रियव्यापारस्य। कार्येण मौनेन कारणं मनःसंयम उच्यते। उपचारादिति भावः। उक्तप्रकारमेव दर्शयति— **मनःसंयमो मौनमिति।** मौनशब्दस्यात्र मौनहेतुभूतो मनःसंयमोऽर्थः। तस्य च मानसिकतपस्त्वमुचितमिति भावः। **मनोनिरोध इति।** ननु मनःसंयमशब्देनोक्त एवायमर्थ इत्यत आह— **सर्वत इति।** सर्वविषयेभ्यः सामान्येन मनसो निरोध आत्मविनिग्रहः। वाग्विषयादेव मनसो निरोधो मनःसंयम इति मौनात्मविनिग्रहयोर्भेद इत्यर्थः। सामान्यविशेषभावेन द्वेधा निर्देशान्न पौनरुक्त्यमिति भावः। **अमायावित्वं** निष्कापट्यम्॥ १६॥

**श्रद्धयेति।** नरैः परया श्रद्धया तप्तं तत् तपस्त्रिविधं भवति। अफलाकाङ्क्षिभिर्युक्तैस्तप्तं तपः सात्त्विकं परिचक्षते। **यथोक्तं** पूर्वोक्तम्। **कथमिति।** पुनः कथं त्रिविधं भवतीति शङ्कायामुच्यते— **अधिष्ठानमिति।** वाङ्मनोदेहनिर्वर्त्यमित्यर्थः। तपोऽनुष्ठातारोऽत्र नराः, न तु केवलमनुष्या इत्याह— **अनुष्ठातृभिरिति। समाहितैः** समाहितचित्तैः। फलाभिसन्धिरहितं योगयुक्तं तपः सात्त्विकमित्यर्थः॥ १७॥

**सत्कारेति।** यत् तपः सत्कारमानपूजार्थं दम्भेन चैव क्रियते नरैरिति शेषः। चलमध्रुवं तत् तप इह राजसमिति शिष्टैः प्रोक्तम्। मया तपसि कृते सति मां जनास्तपस्विनं मत्वा मम सत्कारमानपूजाः कुर्युरिति बुद्ध्या धार्मिकोऽहमिति प्रख्यापनार्थं च यत्तपः

१. 'सात्त्विकत्वादिभेदेन' इति पा.। २. 'अधिष्ठानम्' इति पा.। एवं टीकायामपि।

**मूढग्राहेणात्मनो यत् पीडया क्रियते तपः।**
**परस्योत्सादनार्थं वा तत् तामसमुदाहृतम्॥ १९॥**
**दातव्यमिति यद् दानं दीयतेऽनुपकारिणे।**
**देशे काले च पात्रे च तद् दानं सात्त्विकं स्मृतम्॥ २०॥**
**यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।**

**प्रत्युत्थानाभिवादनादिस्तदर्थं, पूजा** [१]**पादप्रक्षालनार्चनाशयितृत्वादिस्तदर्थं च तपः सत्कारमानपूजार्थं, दम्भेनैव च यत् क्रियते तपस्तद् इह** प्रोक्तं **कथितं राजसं चलं कादाचित्कफलत्वेनाध्रुवम्॥ १८॥**

मूढेति। मूढग्राहेण **अविवेकनिश्चयेन आत्मनः पीडया क्रियते यत् तपः, परस्य** उत्सादनार्थं **विनाशार्थं वा तत् तामसं तप उदाहृतम्॥ १९॥**

**इदानीं दानभेद**[२] **उच्यते—** दातव्यमिति। **दातव्यमित्येवं मनः कृत्वा यद् दानं दीयते** अनुपकारिणे **प्रत्युपकारासमर्थाय, समर्थायापि निरपेक्षं दीयते,** देशे **पुण्ये कुरुक्षेत्रादौ,** काले **सङ्क्रान्त्यादौ,** पात्रे **च षडङ्गविद्वेदपारग इत्यादौ, तद् दानं सात्त्विकं स्मृतम्॥ २०॥**

यत्त्विति। **यत्तु दानं** प्रत्युपकारार्थं **काले त्वयं मां प्रत्युपकरिष्यतीत्येवमर्थं, फलं वाऽस्य दानस्य मे भविष्यत्य-**

आनन्दगिरिकृतव्याख्या

**त्यर्थः। तदिह प्रोक्तम् अस्मिन्नेव लोके फलप्रदमित्यर्थः।** कादाचित्कफलत्वं **क्षणिकफलत्वम्।** अध्रुवम् **अनियतम् अनैकान्तिकफलमिति यावत्॥ १८॥**

**तामसं तपः सङ्गृह्णाति—** मूढेति। **मूढोऽत्यन्ताविवेकी, तस्य ग्राहो नामाग्रहोऽभिनिवेशस्तेनेत्याह—** अविवेकेति। आत्मनः **स्वस्य देहादेरित्यर्थः॥ १९॥**

**क्रमप्राप्तं दानस्य गुणनिमित्तं भेदमाह—** इदानीमिति। **दातव्यमित्येवं मनः कृत्वा दानमेव मया भाव्यं, न फलमित्यभिसन्धायेत्यर्थः॥ २०॥**

भाष्यार्कप्रकाशः

क्रियते तद् राजसमित्यर्थः। **साधुकारः** साधुवादः। तमेव दर्शयति— **साधुरिति। तदर्थमिति।** तस्मा इदं तदर्थं, तत्फलायेत्यर्थः। **अभिवादनं** नमस्कारः। आदिपदात् स्तुत्यादिग्रहणम्। पादप्रक्षालनार्चनादीत्यादिपदात् पीठोपवेशनादिग्रहणम्। **इह** शास्त्रे॥ १८॥

**मूढग्राहेणेति**। मूढग्राहेणात्मनः पीडया परस्योत्सादनार्थं वा यत् तपः क्रियते नरैस्तत् तामसमुदाहृतं शिष्टैः। मूढैरविवेकनिश्चयेन कृतं स्वशरीरेन्द्रियादिपीडकं परनाशफलकं च तपः तामसमित्यर्थः। **अविवेकनिश्चयो** मनुष्योऽहं ब्राह्मणोऽहमित्यादिरूपः। **आत्मन** आत्मत्वेन गृहीतस्य शरीरेन्द्रियादेः। वाशब्दो विकल्पार्थः। आत्मपीडाकरत्वेन परनाशकरत्वेन च तामसतपसो द्वैविध्यात् ॥ १९॥

**दातव्यमिति**। दातव्यमिति मत्वा देशे काले पात्रे चानुपकारिणे यद्दानं दीयते, तद्दानं सात्त्विकं स्मृतम्। **अनुपकारिण इति**। इतः प्राक् स्वस्योपकारमकृतवते पश्चादप्यात्मन उपकर्तुमक्षमाय, समर्थत्वेऽपि त्वमिदं द्रव्यं गृहीत्वा काले मम प्रत्युपकारं कुर्वित्येवं वाचा स्वेनानुक्ताय। मनसाऽप्ययमुद्देशो न कार्य इत्याह— **निरपेक्षमिति। पात्र इति**। पात्रभूतायानुपकारिण इत्यर्थः॥ २०॥

१. 'पादप्रक्षालनार्चनातिशयितृ' इति पा.। २. 'दानत्रैविध्यम्' इति पा.।

**दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्॥२१॥**
**अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।**
**असत्कृतमवज्ञातं तत् तामसमुदाहृतम्॥२२॥**
**ओं तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।**
**ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥२३॥**

**दृष्टमिति तदुद्दिश्य, पुनर्दीयते च** परिक्लिष्टं **खेदसंयुक्तं तद् दानं राजसं स्मृतम्॥२१॥**

अदेशेति। अदेशकाले - अदेशे **अपुण्ये देशे म्लेच्छाशुच्यादिसङ्कीर्णे,** अकाले [1]**पुण्यहेतुत्वेनाप्रख्याते सङ्क्रान्त्यादिविशेषरहिते,** अपात्रेभ्यश्च **मूर्खतस्करादिभ्यो, देशादिसम्पत्तौ वा** असत्कृतं **प्रियवचनपादप्रक्षालन-पूजादिरहितम्** अवज्ञातं **पात्रपरिभवयुक्तं च यद् दानं तत् तामसमुदाहृतम्॥२२॥**

**यज्ञदानतपःप्रभृतीनां साद्गुण्यकरणायायमुपदेश उच्यते—** ओं तत्सदिति। **ओं तत् सदित्येष** निर्देशो **निर्दिश्यतेऽनेनेति निर्देशः, त्रिविधो नामनिर्देशो ब्रह्मणः** स्मृतश्चिन्तितो **वेदान्तेषु ब्रह्मविद्भिः। ब्राह्मणास्तेन निर्देशेन त्रिविधेन वेदाश्च यज्ञाश्च** विहिता **निर्मिताः** पुरा **पूर्वम् इति निर्देशस्तुत्यर्थमुच्यते॥२३॥**

आनन्दगिरिकृतव्याख्या

**राजसतामसदानविभजनं स्पष्टार्थम्॥२१- २२॥**

**विहितानां कर्मणां प्रमादयुक्ते वैगुण्ये कथं परिहारः स्यादित्याशङ्क्याह—** यज्ञेति। **'ओमिति ब्रह्म' इत्यादिश्रुतेः ओमिति तावद् ब्रह्मणो नामनिर्देशः, 'तत्त्वमसि' इति श्रुतेः तदित्यपि ब्रह्मणो नाम निर्देशः, 'सदेव सोम्येदम्' इति श्रुतेः सदित्यपि तस्य नामेति मत्वाऽऽह—** ओमिति। **कथं निर्देशेन तेषां विधानमित्याशङ्क्याह—** निर्दिश्यत इति। **यज्ञादीनां वैगुण्यप्रतीतिकाले यथोक्तनाम्ना-मन्यतमोच्चारणादवैगुण्यं सिध्यतीति भावः। कर्मसाद्गुण्यकारणं त्रिविधं नाम स्तौति—** ब्राह्मणा इति। पूर्वं **सर्गादौ। निर्माणं च**

भाष्यार्कप्रकाशः

**यत्त्विति।** यत्तु प्रत्युपकारार्थं दीयते, यत्पुनः फलमुद्दिश्य वा दीयते, यच्च परिक्लिष्टं यथा तथा दीयते, तद्दानं राजसमुदाहृतम्। **अदृष्टं** स्वर्गादिरूपम्॥२१॥

**अदेशेति।** यद्दानमदेशकालेऽपात्रेभ्यश्च दीयते, यच्चासत्कृतमवज्ञातं तद्दानं तामसमुदाहृतम्। अदेशो दानानुचितदेशः। स च कीदृशोऽत आह— **म्लेच्छेति।** अनाख्यातशब्दं स्वयमेव व्याख्याति— **अप्रख्यात इति।** अप्रसिद्ध इत्यर्थः। देशकालपात्ररूपसम्पद्यपि सत्यां यदसत्कृतं दीयते, तद्दानं च तामसमित्याह— **देशादीति। असत्कृतमिति।** न विद्यते सत्कृतं सत्कारः पादप्रक्षालनपूजादिरूपो यस्मिन् कर्मणि तद् यथा तथा। यदवज्ञातं दीयते तच्च दानं तामसम्। पात्रपरिभवयुक्तं यथा तथेति क्रियाविशेषणम्। दीयत इति दानं द्रव्यं, न तु वितरणक्रियामात्रं, दीयत इत्यनेनानन्वयात्। वितीर्यमाणद्रव्यत्रैविध्यकथनाद् वितरणत्रैविध्यसिद्धिः। यद्वा दानं दीयत इति यद्द्रव्यं वितीर्यत इति यत्तद्दानं तद्वितरणमिति व्याख्येयम्। अथवा यद्दानं वितरणं दीयते क्रियते धातूनामनेकार्थत्वात्तद्दानं वितरणमिति॥२२॥

**ओमिति। साद्गुण्यं** सद्गुणत्वं, गुणवत्तातिशय इति यावत्। ब्रह्मणः 'ॐ तत् सदि'ति त्रिविधो निर्देशः स्मृतः। पुरा तेन ब्राह्मणा वेदाश्च यज्ञाश्च विहिताः। निर्देशो नाम। यद्वा निर्दिशनम्। कस्य निर्देशः? अत आह— **नामनिर्देश इति।** त्रिविधो नामनिर्देशः ब्रह्मणः

१. 'पुण्यहेतुत्वेनानाख्यातेऽप्रख्याते' इति रा.पा.।

**तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।**
**प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥ २४॥**
**तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः।**

तस्मादिति। **तस्मादोमिति** उदाहृत्य **उच्चार्य** यज्ञदानतपःक्रियाः **यज्ञादिस्वरूपाः क्रियाः प्रवर्तन्ते** विधानोक्ताः **शास्त्रचोदिताः** सततं **सर्वदा** ब्रह्मवादिनां **ब्रह्मवदनशीलानाम्॥ २४॥**

तदिति। **तदित्यनभिसन्धाय - तद् इति ब्रह्माभिधानमुच्चार्यानभिसन्धाय च यज्ञादिकर्मणः फलं** यज्ञतपः-

आनन्दगिरिकृतव्याख्या

**प्रजापतिकर्तृकम्॥ २३॥**

**यस्माद् ब्राह्मणादीनां कारणम् , यस्माच्च ब्रह्मणो निर्देशस्तस्मादित्युपसंहरति—** तस्मादिति। **'ब्रह्मवादिना'मित्यत्र** ब्रह्म **वेदः॥ २४॥**

**ॐशब्दस्य विनियोगमुक्त्वा तच्छब्दस्य विनियोगमाह—** तदित्यादिना॥ २५॥

भाष्यार्कप्रकाशः

स्मृत इति। ब्रह्मणस्त्रिविधं नाम निर्दिष्टमित्यर्थः। क्वेत्यत आह— **वेदान्तेष्विति**। कैरित्यत आह— **ब्रह्मविद्भिरिति**। **ब्रह्मणः** परमात्मनः, ओमिति, तदिति, सदिति च नामत्रयनिर्देशः शास्त्रप्रसिद्ध इत्यर्थः। 'ओमित्येकाक्षरं ब्रह्म' 'तत्त्वमसि' 'सच्चिदानन्दं ब्रह्म' इत्यादिशास्त्रादिति भावः।

यद्यपि चिदानन्दात्मादिनिर्देशान्तराण्यपि ब्रह्मणः सन्ति। तथापि प्रकृतोपयोगात् प्रधानत्वाच्च नामत्रयनिर्देश एवेह गृहीत इति बोध्यम्। प्रकृतोपयोगित्वं चानुपदमेव दर्शयिष्यति। नामत्रयनिर्देशस्य नामरूपादिविहीनस्यापि ब्रह्मणः कल्पितमिदं नामनिर्देश-त्रयमिति बोध्यम्। **ब्राह्मणा इति**। **ननु** ब्रह्मणैव सृष्टा ब्राह्मणादयः, न तु निर्देशेनेति चेत्? **सत्यम्**। ब्रह्मणा हि मायाविनेश्वरेण ॐ तत्सदिति निर्देशपूर्वकं ब्राह्मणादीनां सृष्टत्वात् तथोक्तिरिति।

यत्तु **रामानुजः**— ब्रह्मणो वेदस्येति वैदिककर्मण इत्यर्थ इति, तेन निर्देशेन युक्ता ब्राह्मणादयो मया पुरा विहिता इति च। **तदयुक्तम् ,** परब्रह्मवाचिनो ब्रह्मशब्दस्य वेदपरत्वासम्भवात् तस्य च वैदिककर्मपरत्वस्य लाक्षणिकत्वेनायुक्तत्वाच्च। ॐ तत्सदिति त्रिविध-शब्दाभिलप्यत्वाभावाच्च वेदवैदिककर्मणोः। न च - ॐ तत् सदिति त्रिविधः शब्दो वैदिककर्मान्वयी भवतीति - वाच्यम् ; अन्वयीति मूलाद्बहिः पदकल्पनस्याप्रमाणत्वात्। किञ्च ब्राह्मणानां वेदानां यज्ञानां च वैदिककर्मणां त्रयाणामपि तन्निर्देशयुक्तत्वस्य ब्राह्मणास्तेनेति वाक्येन प्रोक्तत्वे सति वैदिकं कर्म तन्निर्देशयुक्तमिति पूर्ववाक्येन कथनं व्यर्थं पौनरुक्त्यावहं च। तेन विहिता इति साक्षाच्छ्रूयमाणं तच्छब्दनिष्ठं कर्तृत्वं परित्यज्य तच्छब्दार्थस्याप्राधान्यं कल्पयित्वा मयैवेति कर्त्रन्तराध्याहारोऽप्ययुक्त एव। श्रुतहानाश्रुतकल्पनयोर्दुष्टत्वात्॥ २३॥

**तस्मादिति**। तस्माद् ब्रह्मवादिनां विधानोक्ता यज्ञदानतपःक्रियाः सततमोमित्युदाहृत्य प्रवर्तन्ते। **तस्मादिति**। ब्रह्मनिर्देशत्वा-दोङ्कारादित्रयस्येत्यर्थः। यज्ञश्च दानं च तपश्च यज्ञदानतपांसि, तान्येव क्रियाः यज्ञदानतपःक्रियाः। ब्रह्म वेदः, तद् वदितुं शीलं येषां ते ब्रह्मवादिनः, वैदिका इत्यर्थः। नात्र परब्रह्मवाची ब्रह्मशब्दः, परब्रह्मविदां कर्मप्रवृत्त्ययोगात्। प्रपञ्चितं चैतदधस्तात्। अत्र 'ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायती'ति छान्दोग्यमनुसन्धेयम्।

यत्तु **रामानुजः**— वेदाश्चोमित्युदाहृत्यारभ्यन्ते। ओमिति शब्दान्वितवेदधारणात् तदन्वितयज्ञादिकर्मकरणाच्च ब्राह्मणाना-मप्योमिति शब्दान्वय इति। तदेतद् मूलाद्बहिःकल्पितमुपेक्ष्यम्॥ २४॥

**तदिति**। ओमित्यस्य विनियोगं दर्शयित्वा तदित्यस्य दर्शयति। मोक्षकाङ्क्षिभिस्तदित्युच्चार्य फलमनभिसन्धाय यज्ञतपःक्रिया

**दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः॥ २५॥**
**सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते।**
**प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते॥ २६ ॥**
**यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते।**

क्रियाः **यज्ञक्रियास्तपःक्रियाश्च यज्ञतपःक्रियाः,** दानक्रियाश्च **विविधाः क्षेत्रहिरण्यप्रदानादिलक्षणाः** क्रियन्ते **निर्वर्त्यन्ते** मोक्षकाङ्क्षिभिः **मोक्षार्थिभिः, मुमुक्षुभिः॥ २५॥**

**ओंतच्छब्दयोर्विनियोग उक्तः। अथेदानीं सच्छब्दस्य विनियोगः** [1]**कथ्यते—** सद्भाव इति। **असतः सद्भावे, यथा अविद्यमानस्य पुत्रस्य जन्मनि, तथा** साधुभावे **च असद्वृत्तस्यासाधोः सद्वृत्तता साधुभावः, तस्मिन् साधुभावे च सदित्येतदभिधानं ब्रह्मणः** प्रयुज्यते **अभिधीयते। प्रशस्ते कर्मणि विवाहादौ च तथा सच्छब्दः पार्थ** युज्यते **प्रयुज्यत इत्येतत् ॥ २६ ॥**

यज्ञे **यज्ञकर्मणि या स्थितिः, तपसि च या स्थितिः, दाने च या स्थितिः, सा च सदित्युच्यते विद्वद्भिः, कर्म**

आनन्दगिरिकृतव्याख्या

**वृत्तमनूद्यानन्तरश्लोकतात्पर्यमाह—** ॐ तच्छब्दयोरिति॥ २६ ॥

भाष्यार्कप्रकाशः

विविधा दानक्रियाश्च क्रियन्ते। क्रियन्त इति क्रियाः कर्माणि, न तु करणं क्रिया, क्रियत इत्यनेनानन्वयात्। **मुमुक्षुभिरिति**। चित्तशुद्धि-ज्ञानप्राप्तिद्वारा मोक्षाभिलाषिभिरित्यर्थः। न हि मुमुक्षूणां विदुषां संन्यासिनां क्रियाधिकारोऽस्ति॥ २५॥

श्लोकद्वयफलितार्थमाह—**ॐ तदिति ।**

**सद्भाव इति**। **सद्भावः** सत्त्वम्। कस्येत्यत आह— **असत इति**। असतः कथं सत्तेत्यत आह— **यथेति**। जन्मनः प्रागसतः पुत्रस्य जन्मनि सदिति प्रयुज्यते। असतोऽपि जन्मना लब्धसत्ताकत्वात् पुत्रस्य सत्त्वं युक्तम्। अत एव जन्मानन्तरं सन् पुत्र इति सच्छब्दप्रयोगः। **साधुभावः** साधोर्भावः, सद्वृत्तत्वं तस्मिन्। कस्य साधुभावः? अत आह— **असद्वृत्तस्येति**। असद् दुष्टं वृत्तं चरितं, व्यापार इति यावत् ; यस्य तस्य **असद्वृत्तस्य**। तदर्थमाह— **असाधोरिति**। असद्वृत्तत्वं ह्यसाधुत्वम्। सत् श्रेष्ठं वृत्तं यस्य स सद्वृत्तः **सद्भावः** सद्वृत्तत्वं साधुत्वम्। यः पूर्वमसद्वृत्तः सन्निदानीं दैववशात् सद्वृत्तो जातस्तस्य तत्साधुत्वं सदित्युच्यत इत्यर्थः। असतः सद्भावे वक्तव्ये, असाधोः साधुभावे वक्तव्ये च सदित्येतत् पदं प्रयुज्यत इति श्लोकान्वयः।

एतच्छब्दार्थमाह— **ब्रह्मणोऽभिधानमिति**। **अभिधानं** नाम अभिधीयते उच्यते घटादिपदार्थोऽनेनेति घटादिशब्दस्याभि-धानत्वम्। नाम्ना ह्यभिधेयं वस्तु निर्दिश्यते। घटमानयेत्युक्तो वृद्धेन तरुणो घटमानयतीति प्रत्यक्षम्। तद्धि नाम्नो वस्तुनिर्देशं विना न सम्भवतीति। न च सन् पुत्र इति सद्भावे प्रयोगवत् साधुभावे प्रयोगो नास्तीति वाच्यम् ; साधुः सन्निति प्रयोगसत्त्वात्।[2] असाधुना राज्ञा स्वस्मै धनादिके दत्ते सति ब्राह्मणः प्रत्येति हि 'असाधुरयं दैवात् साधुः सन् राजा मह्यमिदं धनादिकमदिशदि'ति। **प्रशस्ते कर्मणीति**। विवाहादिशुभकर्म हि सत्कर्मेत्युच्यते। आदिपदाद् वापीकूपतटाकादिपूर्तकर्मणाम् अग्निष्टोमादीष्टकर्मणां च ग्रहणम्। तानि हि सत्कर्माणीत्युच्यन्ते। एवं च यज्ञदानतपःक्रियाणां प्रशस्तानां सच्छब्दविषयत्वं सिद्धम्। 'सन् यज्ञः' 'सत् तपः' 'सद् दान'मिति प्रयोगात्॥ २६ ॥

**यज्ञ इति**। यज्ञे तपसि दाने च, पुरुषस्येति शेषः। स्थितिः सदित्युच्यते च। तदर्थीयं कर्म चैव सदित्यभिधीयत एव। **स्थितिः**

१. 'उच्यते' इति पा.। २. सज्जन इति प्रयोगोऽपि बोध्यः।

## कर्म चैव तदर्थीयं सदित्येवाभिधीयते॥ २७॥

**चैव** तदर्थीयं **यज्ञदानतपोर्थीयम्। अथवा यस्याभिधानत्रयं प्रकृतं तदर्थीयम्, [1]ईश्वरार्थीयमित्येतत्, सदित्येवाभिधीयते। तदेतद् यज्ञदानतपआदि कर्म असात्त्विकम् विगुणमपि श्रद्धापूर्वकं ब्रह्मणोऽभिधानत्रयप्रयोगेण सगुणं**

आनन्दगिरिकृतव्याख्या

**प्रकारान्तरेण सच्छब्दस्य विनियोगमाह—** यज्ञ इति। **नामत्रयोच्चारणेन साद्गुण्यं सिध्यतीति प्रकरणार्थमुपसंहरति—** तदेतदिति ॥२७॥

भाष्यार्कप्रकाशः

निष्ठा, प्रवृत्तिरिति यावत्। यज्ञादिषु प्रवृत्तं पुरुषं दृष्ट्वा सत्स्थितिरयमिति प्रतियन्ति शिष्टाः। अतो यज्ञादिस्थितेः सच्छब्दाभिधेयत्वमिति भावः। यज्ञादिविषयैव स्थितिः सत्स्थितिरित्युच्यते, नान्यविषयेति कृत्वा यज्ञादिस्थितेः सत्स्थितित्वमुचितमित्यभिसन्धिः। नात्र सच्छब्दस्य सद्भावः साधुभावः प्राशस्त्यं वाऽर्थः, किन्तु यज्ञादिकर्मस्थितिरेवेति न पूर्वोक्तार्थसाङ्कर्यम्। न च यज्ञादिकर्मस्थितेरेव सच्छब्दार्थत्वे सत्स्थितिपदयोः पौनरुक्त्यमिति वाच्यम् ; 'मृत्युञ्जयः शिवः' इतिवत् 'सती स्थितिः' इत्यस्योपपत्तेर्विशेष्यमपि विशेष्यान्तरे सति विशेषणभावे पर्यवस्यति हि। एवं यज्ञादिविषयस्थितिवाच्यपि सच्छब्दः स्थितिशब्दप्रयोगे सति यज्ञादिविषयत्वमात्रे पर्यवस्यतीति। **तदर्थीयमिति**। तानि यज्ञदानतपांस्येवार्थाः प्रयोजनानि तदर्थाः, तेषामिदं **तदर्थीयं** तदर्थमित्यर्थः। यज्ञदानतपोनिर्वर्तकं धनार्जनादिकर्मेति भावः। एवं तच्छब्दस्य पूर्वोक्तयज्ञादिपरामर्शित्वमभ्युपेत्य व्याख्याय, अथ प्रकृतपरामर्शित्वमभ्युपेत्य व्याख्यानान्तरमाह— **अथवेति**। प्रकृताभिधानत्रयवानीश्वर इह तच्छब्दार्थः। तस्यार्थः प्रयोजनं स्वाज्ञानिर्वर्तनम्, तस्येदं तदर्थीयम्। ईश्वराज्ञानिर्वर्तनमात्रफलकमित्यर्थः। फलाभिसन्ध्यादिरहितमिति यावत्। कर्तव्यमित्येव हि कुशलेन कर्म कार्यमिति प्राग् दर्शितम्। एतस्य चेश्वरार्थस्य कर्मणः सत्त्वं बन्धाहेतुत्वाच्चित्तशुद्धिद्वारा ज्ञानप्राप्तिहेतुत्वादिप्रयुक्तम्। अन्यद्धि बन्धहेतुत्वादिना दुष्टं कर्मासदेव यत्फलाभिसन्ध्यादिमत्। तस्मादीश्वरार्थं कर्म सदित्युच्यते। नेदं प्रशस्तकर्मत्वरूपं सत्कर्मत्वं पौनरुक्त्यात्, किन्तु ईश्वरार्थकर्मत्वरूपमेव। तस्मादीश्वरार्थे कर्मणि सत्कर्मेति प्रयोगः। श्रद्धापूर्वकं यथा तथेति प्रयोगक्रियाविशेषणम्। **अभिधानत्रयम्** ॐ तत् सदिति नामत्रयम्, तस्य **प्रयोगेण** उच्चारणेन।

**ननु** ओमित्युदाहृत्य, तदित्युदाहृत्य चेतिवत् सदित्युदाहृत्येति नोक्तम्। प्रत्युत सच्छब्दस्य ब्रह्मणोऽन्ये सद्भावादय एवार्थाः प्रोक्ता इति कथमभिधानत्रयप्रयोगसम्भवः? ॐ तदिति ब्रह्माभिधानद्वयप्रयोग एव हि दर्शित इति चेत्, **सत्यम्**, ब्रह्मवाचिन एव सच्छब्दस्य सद्भावादिष्वौपचारिकः प्रयोगो दर्शितः प्रशंसार्थः। ततश्च सदित्युदाहृत्यैव यज्ञदानतपःक्रियाः क्रियन्ते मुमुक्षुभिरिति बोध्यम्। यद्वा ॐ तदित्युदाहृत्य फलमनभिसन्धाय ब्रह्मवादिनो मुमुक्षवः ईश्वरार्थीयमिदं कर्म सदिति मत्वा कुर्वन्ति। अन्ये त्वेवमविद्वांसोऽपि ॐ तत्सदिति ब्रह्माभिधानत्रयमुदाहृत्य कर्म कुर्युश्चेद् विगुणमपि तत् कर्म सगुणं भवतीति कर्मसाद्गुण्यापादनं ब्रह्माभिधानत्रयोच्चारणमिति भावः।

**ननु** सच्छब्दस्य यज्ञादिक्रियावाचित्वं कण्ठोक्तम्। तदनुसारेण तच्छब्दस्यापि तदेव युक्तं, तथैव व्याख्यातं च **रामानुजेन**। फलमनभिसन्धाय यज्ञादिक्रियाः मुमुक्षुभिः क्रियन्ते, ताश्च क्रियास्तदित्युच्यन्त इति। न च कथं ब्रह्मवाचितच्छब्दवाच्यत्वं क्रियाणामिति वाच्यम्, ब्रह्मप्राप्त्युपायतया ब्रह्मवाचिना तदिति शब्देन निर्देश्याः क्रिया इति। तस्मात् तदित्युदाहृत्येति व्याख्यानमयुक्तमिति चेत्, **मैवम्**; तस्मादोमित्युदाहृत्येति पूर्वश्लोकानुसारेणेहापि तथैव तदित्युदाहृत्येति व्याख्यातव्यत्वात्। क्रियाणां तच्छब्दनिर्देश्यत्वमिवोङ्कारनिर्देश्यत्वस्यापि सम्पादयितुं शक्यत्वेनोमित्युदाहृत्य यज्ञादिक्रियाः वैदिकानां प्रवर्तन्ते, ताश्चोमित्युच्यन्त इति कुतो **रामानुजेन** न व्याख्यातम्? यद्यधुना व्याख्यायत इति ब्रूषे, तर्हि तथैव तदित्युदाहृत्य मुमुक्षुभिः क्रियाः क्रियन्त इति व्याख्याहि। तुल्यार्थत्वाच्छ्लोकद्वयस्य। एवं व्याख्याने च ताश्च क्रिया ओमित्युच्यन्ते तदित्युच्यन्त इति वाक्यद्वयमपि मूलाद्बहिः स्वकपोलकल्पित-

१. तदर्थीयं तदर्थम् इति व्याख्याने मत्वर्थीय इत्यत्रेव स्वार्थे बाहुलकाच्छप्रत्ययः।

**अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।**
**असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह॥२८॥**

**इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः॥१७॥**

**सात्त्विकं सम्पादितं भवति** ॥२७॥

**तत्र च सर्वत्र श्रद्धाप्रधानतया सर्वं सम्पाद्यते यस्मात् तस्मात्—**अश्रद्धयेति। **अश्रद्धया** हुतं **हवनं कृतं, दत्तं च ब्राह्मणेभ्योऽश्रद्धया, तपः** तप्तम् **अनुष्ठितमश्रद्धया, तथा अश्रद्धयैव कृतं यत् स्तुतिनमस्कारादि , तत् सर्वम् असदित्युच्यते मत्प्राप्तिसाधनमार्गबाह्यत्वात् , हे पार्थ ! । न च तद्** [१]**बह्वायासमपि प्रेत्य फलाय, नो अपीहार्थम् ,**

आनन्दगिरिकृतव्याख्या

**अश्रद्धान्वितस्यापि कर्मणो नामत्रयोच्चारणादवैगुण्ये श्रद्धाप्राधान्यं न स्यादित्याशङ्क्याह—** तत्र चेति। **सप्तमीभ्यां प्रकृतं यज्ञादि गृह्यते। सर्वं यज्ञादि सगुणमिति शेषः। तस्यासत्त्वं साधयति—** मत्प्राप्तीति। **ऐहिकमामुष्मिकं वा फलमश्रद्धितेनापि कर्मणा सम्पत्स्यते कुतोऽस्यासत्त्वमित्याशङ्क्याह—** न चेति। **तस्योभयविधफलाहेतुत्वे हेतुमाह—** साधुभिरिति। **निन्दन्ति हि साधवः श्रद्धारहितं कर्म। अतो नैतदुभयफलौपयिकमित्यर्थः।**

भाष्यार्कप्रकाशः

मेव **रामानुजस्ये**त्यप्रमाणं रामानुजव्याख्यानम्। यदि तु ओमित्युदाहृत्येति श्लोके ओमित्यनेन क्रिया उच्यन्त इति न व्याख्यायते, तर्हीहापि न व्याख्याहि। न चोदाहृत्येति पदाभावादिहैवं व्याख्यायते, तत्र तु तत्सत्त्वान्नैवं व्याख्यायत इति वाच्यम् ; पूर्वश्लोकोक्त-स्थोदा**हृत्ये**ति पदस्येहाप्यन्वयसम्भवादध्याहारादिना। 'ताश्च क्रियास्तदुच्यन्त' इति पदानामध्याहारस्त्वयुक्त एव। पूर्वश्लोकेऽपि तथा अनुक्तत्वात्। तस्मात् 'तस्मादोमित्युदाहृत्ये'ति पूर्वश्लोकवदिहापि तदित्युदाहृत्येत्येव व्याख्येयं, न तु ताश्च तदित्युच्यन्ते उपचारादिति व्याख्येयमयुक्तत्वात्। सच्छब्दानुसारस्तु न न्याय्यः। सच्छब्दस्य सद्भावसाधुभावाद्यर्थविशेषा यथा दर्शितास्तथा तच्छब्दस्यार्थ-विशेषाणामदर्शितत्वात्। तस्मादोङ्कारानुसार एव युक्तः, तच्छब्दवदोङ्कारस्याप्यर्थविशेषाणामदर्शितत्वात्। प्रत्युत ओमित्युदाहृत्य तदित्युच्चार्येतिवत् सदित्युदाहृत्येत्येव कल्पनमुचितं, प्रकरणादिति सङ्क्षेपः।

**सात्त्विकमिति**। ॐ तत्सदिति निर्देशेन कर्मण ईश्वरार्थीयत्वस्य जातत्वादिति भावः। अत एव सन्ध्यावन्दनादिकमपि कर्म कृत्वा वृद्धाः 'ॐ तत्सद्ब्रह्मार्पणमस्तु' इति ब्रुवन्ति, ॐ तत्सदिति निर्देशेन, ब्रह्मार्पणेन च तत्कर्मणः साद्गुण्यलाभार्थमिति बोध्यम् ॥२७॥

**तत्र च** एवं सति **सर्वत्र** यज्ञादिकर्मसु **सर्वं** साद्गुण्यं सात्त्विकत्वं च। श्रद्धया ॐ तत् सदिति निर्देशे कृते सति हि कर्मणः साद्गुण्यादिसम्प्राप्तिः।

**अश्रद्धयेति**। **तस्मादिति**। श्रद्धापूर्वकत्वात् कर्मसाद्गुण्यस्येत्यर्थः। यदश्रद्धया हुतं, यदश्रद्धया दत्तं, यत्तपोऽश्रद्धया तप्तं, यच्चाश्रद्धया कृतं, तत् सर्वमसदित्युच्यते। हे पार्थ! तत् प्रेत्य फलाय नो भवति, इह फलाय च नो भवति। कुतोऽस्यासत्त्वम् अत आह— **मत्प्राप्तीति**। मत्प्राप्तिसाधनभूतान्मार्गात् सन्मार्गात् कर्मयोगादिलक्षणाद् बाह्यं बहिर्भवं सुदूरमित्यर्थः; तत्त्वात् , मत्प्राप्त्य-हेतुत्वादित्यर्थः। प्रेत्यफलायामुष्मिकस्वर्गादिफलाय **नो** न भवति। आमुष्मिकफलदं न भवतीत्यर्थः। **इहार्थमिति**। ऐहिकफलायेत्यर्थः। कुतो नैहिकफलार्थत्वम्? अत आह— **साधुभिरिति**। साधुनिन्दाया अकीर्तेरैहिकफलत्वाभावादिति भावः। यद्वा कुतस्तत् प्रेत्यफलाय

१. 'बहुलायासमपि' इति पा.।

**साधुभिर्निन्दितत्वादिति॥ २८॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः॥ १७॥**

आनन्दगिरिकृतव्याख्या

**तदनेन शास्त्रानभिज्ञानामपि श्रद्धावतां श्रद्धया सात्त्विकत्वादित्रैविध्यभाजां राजसतामसाहारादित्यागेन सात्त्विकाहारादिसेवया सत्त्वैकशरणानां प्राप्तमपि यज्ञादिवैगुण्यं ब्रह्मनामनिर्देशेन परिहरतां परिशुद्धबुद्धीनां श्रवणादिसामग्रीसञ्जाततत्त्वसाक्षात्कारवतां मोक्षोपपत्तिरिति स्थितम्॥ २८॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते श्रीमद्भगवद्गीताशांकरभाष्यव्याख्याने सप्तदशोऽध्यायः॥ १७॥**

भाष्यार्कप्रकाशः

इहफलाय च न भवतीत्यत आह— **साधुभिरिति**। यदि तदसत् कर्म फलदं स्यात् तर्हि तन्नैव निन्द्येत सद्भिः। अनर्थकं हि साधवो निन्दन्ति। तस्मात् साधुभिर्निन्दितमिदं कर्म नरकदुःखाकीर्त्यादिप्रदमेव, न तु फलप्रदमिति भावः। तस्मात् सर्वोऽपि कुशलः सर्वं विहितं कर्म ब्रह्माभिधानत्रयप्रयोगपूर्वकं श्रद्धया युक्तःसन् फलमनभिसन्धाय कर्तव्यमिति बुद्ध्या कुर्यात्। तेन च कर्मयोगेन तत्कर्माकर्मैवाबन्धकं सत् चित्तशुद्धिज्ञानप्राप्तिद्वारा मोक्षहेतुर्भवति। यत एवं तस्मात् , हे पार्थ! त्वमपि युद्धं स्वकर्म श्रद्धया यथोक्तविधं कुरु। ततश्च संसारबन्धान्मोक्ष्यसे इतीमं भावं सूचयितुमेव पार्थेति सम्बुद्धिः॥ २८॥

**इति श्रीबेल्लङ्कोण्डोपनामकरामकविकृतौ श्रीभगवद्गीताभाष्यार्कप्रकाशे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः॥ १७॥**

**श्रीहयग्रीवार्पणमस्तु**

ॐ श्रीपरमात्मने नमः

# ॥ अथ अष्टादशोऽध्यायः ॥

**अर्जुन उवाच—**

**संन्यासस्य महाबाहो ! तत्त्वमिच्छामि वेदितुम्। त्यागस्य च हृषीकेश ! पृथक् केशिनिषूदन !॥ १ ॥**

**सर्वस्यैव गीताशास्त्रस्यार्थोऽस्मिन्नध्याये उपसंहृत्य सर्वश्च वेदार्थो वक्तव्य इत्येवमर्थोऽयमध्यायः आरभ्यते। [1]सर्वेषु ह्यतीतेष्वध्यायेषु उक्तोऽर्थः अस्मिन्नध्यायेऽवगम्यते। अर्जुनस्तु संन्यासत्यागशब्दार्थयोरेव विशेषं बुभुत्सुः**

**आनन्दगिरिकृतव्याख्या**

**पूर्वैरध्यायैर्विस्तरेण यतस्ततो विक्षिप्ततयोक्तमर्थं सुखप्रतिपत्त्यर्थं संक्षेपेणोपसंहृत्याभिधातुमध्यायान्तरमवतारयति—**सर्वस्यैवेति। **उपसंहृत्य वक्तव्यः इति सम्बन्धः। किंच उपनिषत्सु [2]यतस्ततो विस्तृतस्यार्थस्य बुद्धिसौकर्यार्थम् अस्मिन्नध्याये संक्षिप्ताभिधानं कर्तव्यम्, उपनिषदां गीतानां चैकार्थत्वादित्याह—**सर्वश्चेति। **कथं सर्वोऽपि शास्त्रार्थोऽस्मिन्नध्याये संक्षिप्योपसंह्रियते? तत्राह—**सर्वेषु हीति। **ननु वेदार्थश्चेद् अशेषतोऽत्र उपसंजिहीर्षितः, तर्हि किमिति 'त्यागेनैके' 'संन्यासयोगाद्' इति च वेदार्थैकदेशविषयं प्रश्नप्रतिवचनम्? तत्राह—** अर्जुनस्त्विति। **पृथगनयोस्तत्त्वं वेदितुमिच्छामीति विशेषणाद् अपृथगर्थस्तयोरस्तीति गम्यते। बुभुत्सितस्य प्रष्टव्यत्वाद् एकदेशे [3]तद्भावाद् उक्तप्रश्नोपपत्तिरिति भावः॥ १॥**

**श्रीबेल्लंकोण्डरामरायकविविरचितः**

**भाष्यार्कप्रकाशः**

'प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्', 'मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा', 'त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः', 'निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः', 'योगसंन्यस्तकर्माणम्', 'ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति', 'संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः', 'ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः', 'युक्तः कर्मफलं त्यक्त्वा शान्तिम् आप्नोति नैष्ठिकीम्', 'सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी', 'अनाश्रितः कर्मफलं कार्यं कर्म करोति यः। स संन्यासी च योगी च न निरग्निर्न चाक्रियः॥', 'यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव। न ह्यसंन्यस्तसङ्कल्पो योगी भवति कश्चन॥', 'सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते', 'सङ्कल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः', 'संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि', 'ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः', 'सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्', 'सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः', 'शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः', 'सर्वारम्भपरित्यागी गुणातीतः स उच्यते' इति पूर्वाध्यायेषु तत्रतत्र संन्यासस्त्यागश्च निर्दिष्टः। तत्र संन्यासत्यागयोरेकात्मत्वमेवावगम्यते। सम्पूर्वस्तु न्यासशब्दस्त्यागार्थो, न निक्षेपार्थः इति संन्यस्येत्यस्य परित्यज्य इत्यर्थाच्च। पारिव्राज्यस्य परित्यागस्य संन्यासत्वाच्च, परित्यज्य सर्वं व्रजतीति परिव्राडिति व्युत्पत्तेः। एवं संन्यासत्यागयोरेकात्मत्वे सिद्धे सति त्यागसंन्यासयोर्मोक्षं प्रति मार्गद्वयत्वं शिष्टैरुच्यमानम्, 'न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः', 'वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद् यतयः शुद्धसत्त्वाः' इत्यादिशास्त्रप्रमाणकं च, 'जनकादयः त्यागान्मुक्तिं गताः; याज्ञवल्क्यादयस्तु संन्यासाद्' इति व्यवहारसिद्धं च कथं सङ्गच्छते? 'कुरु कर्मैव तस्मात्त्वं सङ्गं त्यक्त्वा धनञ्जय' इति च कथं भगवान् मह्यं युगपदेव कर्मानुष्ठानं त्यागं चोपदिष्टवान्? कर्मानुष्ठानकर्मसंन्यासौ हि विरुद्धौ। संन्यास एव हि त्यागः। अथ यदि संन्यासत्यागौ भिन्नाविति वेद्मि, तर्हि तद्भेदो नैवावगम्यते, अर्थभेदाभावात्। न हि शब्दभेदमात्रं प्रयोजकम्, तथा सति पटवस्त्रयोरपि भेदप्रसङ्गात्। तस्मादर्थभेदाभावात् कथं त्यागसंन्यासयोर्मार्गद्वयत्वम्? मम वा कथं कर्मत्यागयोरेवाधिकारो, न तु संन्यासे? इत्याशङ्क्य संन्यास-

१. 'सर्वो हि' इति पा.। २. 'इतस्ततः' इति पा.। ३. तद्भावात् = बुभुत्सायाः भावात्।

## श्रीभगवानुवाच—

**उवाच**—संन्यासस्येति। संन्यासस्य **संन्यासशब्दार्थस्येत्येतत्। हे महाबाहो** ! तत्त्वं **तस्य भावः तत्त्वम् , याथात्म्यमित्येतत्। इच्छामि** वेदितुं **ज्ञातुम्** ; त्यागस्य **च, त्यागशब्दार्थस्येत्येतत्। हृषीकेश** ! पृथग् **इतरेतरविभागतः।** केशिनिषूदन ! **केशिनामा हयच्छद्मा कश्चिदसुरः। तं निषूदितवान् भगवान् वासुदेवः। तेन तन्नाम्ना संबोध्यतेऽर्जुनेन ॥१॥**

भाष्यार्कप्रकाशः

त्यागयोर्याथार्थ्यबुभुत्सया पृच्छत्यर्जुनः— **संन्यासस्येति**। परिज्ञाते तु त्यागसंन्यासमार्गद्वयभेदयाथार्थ्ये यथास्वाधिकारमन्यतरमार्गे प्रवृत्तःसन् संसाराद् अहं मोक्ष्ये इत्यर्जुनस्य हृदयम्।

यद्यपि 'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन' इति त्यागमार्ग एवोपदिष्टोऽर्जुनाय भगवता, तथापि तदुपदिष्टं तं मार्गं त्यागमार्ग इति विशिष्य न जानात्यर्जुनः, विशिष्यानुक्तत्वाद् भगवता पूर्वम्। न हि फलमनभिसन्धाय कर्मकरणं **त्यागः**, कर्मणां सर्वात्मना परित्यागः **संन्यासः** इति च पूर्वाध्यायेषु क्वाप्युक्तम्। किन्तु फलमनभिसन्धाय कर्मकरणं **योग** इत्युक्तम्। तं तु योगमनुष्ठानात्मकं त्यागत्वेन कथं प्रतीयादुपदेशं विनाऽर्जुनोऽन्यो वा? त्यागो हि परिवर्जनात्मकः। युज्यते क्रियत इति योगः कर्मानुष्ठानम् , त्यजते [त्यज्यते] इति तु त्यागः कर्मपरित्यागः। ततः कथं योगत्यागयोरेकात्मत्वप्रतिपत्तिः स्यात्? न हि - फलत्याग एव त्यागः, न तु कर्मत्यागः - इति गुरूपदेशं विना कोऽपि स्वबुद्ध्या निश्चिनुयात्। तस्माद् यः पूर्वमुक्तः सांख्यमार्गो योगमार्गश्च तत्र योगमार्ग एव त्यागमार्गः, सांख्यमार्ग एव संन्यासमार्गः, न तु त्यागसंन्यासयोः परस्परविरुद्धयोरेकत्वम्। कर्मानुष्ठानकर्मसंन्यासयोर्हि विरोधः स्फुटः। कर्मानुष्ठानफलत्यागयोस्तु न विरोधः। फलत्यागपूर्वकं कर्मणोऽनुष्ठातुं शक्यत्वात्। न तु कर्मत्यागपूर्वकं कर्मानुष्ठातुं शक्यते, येन योगसंन्यासयोरविरोधः स्यात्। तस्मात् सांख्ययोगावेव संन्यासत्यागौ इत्यविदित्वा संन्यासत्यागयोरेकार्थकत्वेनाविशेषं मत्वा तद्विशेषबुभुत्सया पृच्छत्यर्जुनः **'संन्यासस्य'** इत्युपपन्नतरम्। अत एव 'अतीताध्यायोक्त एवार्थोऽस्मिन्नध्यायेऽवगम्यते' **इत्याचार्यै**रुक्तम् , पूर्वाध्यायेषूक्तयोरेव सांख्ययोगयोरिह संन्यासत्यागरूपत्वेन वक्ष्यमाणत्वात्। 'अर्जुनस्तु' इति **तु**शब्दाच्छ्रीकृष्णोऽर्जुनेनापृष्टानप्यंशान् इह वक्ष्यतीति ज्ञायते। न हि त्यागसंन्यासविशेष एवेह प्रतिपाद्यते, किन्तु ब्राह्मणादिवर्णधर्मादिकमन्यदपि। न च – वर्णधर्माः पूर्वमनुक्ता[पूर्वमुक्ता] इति – वाच्यम् ; शमदमादयो धर्माः पूर्वमुक्ता एव। किन्त्विमे ब्राह्मणधर्माः, इमे क्षत्रियधर्माः इत्येवं विशिष्य नोक्ताः। तदिह विशिष्योच्यन्त इति। अन्यथा ह्युक्तस्य तथैव पुनः कथने पुनरुक्तिः स्यात्।

**संन्यासेति**। संन्यासशब्दार्थस्य त्यागशब्दार्थस्य च यो **विशेषो** वैलक्षण्यम् , भेद इति यावत्। तस्य **बोद्धुं** ज्ञातुमिच्छुर्बुभुत्सुः सन्नर्जुन उवाचेति सम्बन्धः। हे महाबाहो ! हे हृषीकेश ! हे केशिनिषूदन ! संन्यासस्य त्यागस्य च तत्त्वं पृथग् वेदितुमिच्छामि। त्वं साक्षाद्भगवानेव, भगवतो महापुरुषस्य यच्चिह्नं महाबाहुत्वं, यो धर्मो दानवान्तकत्वं, तदुभयस्य त्वयि दर्शनादिति सम्बुद्धिद्वयाभिप्रायः। त्वं साक्षादन्तर्यामी प्रत्यगभिन्नः परमात्मैवेति हृषीकेशसम्बुद्ध्यभिप्रायः। हृषीकाणामिन्द्रियाणामीशः प्रेरको हृषीकेशः सर्वभूतेश्वर इति व्युत्पत्तेः। ततश्च सर्वं तत्त्वं यथावत् स्वयं वेत्तुमन्यस्मै बोधयितुमन्येन ग्राहयितुं च त्वमेव क्षमसे, अतस्त्वामेव पृच्छामीत्यर्जुनाशयः। वेदितुमिच्छामीत्येवोक्तम् , न तु कथयेति। ततश्च सर्वेश्वरं भगवन्तं त्वां कथयेति नियन्तुं कोऽहम्? परन्तु ममेच्छा वर्तत एवमितीच्छामात्रं प्रदर्शयति। सा चेच्छा सुहृदा त्वया परमकारुणिकेनावश्यं पूरयितव्यैवेत्यर्जुनाशयोऽवगम्यते। **तस्येति**। [१]प्रकृतस्य संन्यासस्य त्यागस्य च **भावो** याथार्थ्यं **तत्त्वम्**। फलितार्थमाह—**याथात्म्यमिति। इतरेतरविभागत इति**। इतरस्येतरस्माद् **विभागतो** विवेकतः, विविक्तं यथा तथेत्यर्थः। **हयच्छद्मा** अश्वमिषः, अश्वरूपीत्यर्थः। **निषूदितवान्** नाशितवान्। **तन्नाम्ना** केशिनिषूदनाभिधानेन ॥१॥

---

१. तच्छब्दः प्रकृतस्य संन्यासस्य त्यागस्य च परामर्शक इति भावः। **वस्तुतस्तु** संन्यासस्य त्यागस्य च तत्त्वमिच्छामीत्युक्तत्वात् संन्यासत्यागपदार्थयोरन्वयार्थं तत्त्वमित्यखण्डस्यैव याथात्म्यमिति अर्थो युक्तः। 'तत्त्वं तस्य भावः तत्त्वम्' इति भाष्यं तु पदान्वाख्यानमात्रपरमिति परे।

**काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः।**
**सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥२॥**

**तत्र तत्र निर्दिष्टौ संन्यासत्यागशब्दौ न [१]निर्लुण्ठितार्थौ पूर्वेष्वध्यायेषु। अतोऽर्जुनाय पृष्टवते तन्निर्णयाय भगवानुवाच—** काम्यानामिति। काम्यानाम् **अश्वमेधादीनां कर्मणां** न्यासं **परित्यागं** संन्यासं **संन्यासशब्दार्थम् अनुष्ठेयत्वेन प्राप्तस्याननुष्ठानं** कवयः **पण्डिताः केचिद्** विदुः **विजानन्ति। नित्यनैमित्तिकानामनुष्ठीयमानानां सर्वकर्मणाम् आत्मसम्बन्धितया प्राप्तस्य फलस्य परित्यागः** सर्वकर्मफलत्यागः, **तं** प्राहुः **कथयन्ति** त्यागं **त्यागशब्दार्थं** विचक्षणाः **पण्डिताः। यदि काम्यकर्मपरित्यागः, फलपरित्यागो वाऽर्थो वक्तव्यः, [२]सर्वथा परित्यागमात्रं संन्यासत्यागशब्दयोः एकोऽर्थः स्यात्, न घटपटशब्दाविव जात्यन्तरभूतार्थौ[३]।**

आनन्दगिरिकृतव्याख्या

**ननु पूर्वेष्वध्यायेषु तत्र तत्र संन्यासत्यागयोरुक्तत्वात् किमिति पुनस्तौ पृच्छ्येते, ज्ञाते तदयोगात्? तत्राह—** तत्र तत्रेति। न निर्लुण्ठितार्थौ **न निष्कृष्टार्थौ, न विविक्तार्थावित्यर्थः। बुभुत्सया प्रश्नस्य प्रवृत्तत्वात् प्रष्टुरभिप्रायं प्रश्नेन प्रतिपद्य भगवानुत्तरमुक्तवानित्याह —** अत इति। **पक्षद्वयोपन्यासेन संन्यासत्यागशब्दयोरर्थभेदं कथयति—**काम्यानामिति। **तत् किमिदानीं संन्यासत्यागशब्दयोरात्यन्तिकं भिन्नार्थत्वम्? तथा च प्रसिद्धिविरोधः स्यादित्याशङ्क्य, अवान्तरभेदेऽपि नात्यन्तिकभेदोऽस्तीत्याह—** यदीति।

भाष्यार्कप्रकाशः

**काम्यानामिति**। कवयः काम्यानां कर्मणां न्यासं संन्यासं विदुः। विचक्षणाः सर्वकर्मफलत्यागं त्यागं प्राहुः। **काम्यानां** स्वर्गादिकामहेतूनाम्। काम्यन्त इति कामाः स्वर्गादिफलानि, तत्र साधूनि काम्यानि, नित्यनैमित्तिकान्यपि काम्यान्येव, तेषामपि फलवत्त्वात्। परन्तु येषामकरणे प्रत्यवायस्तानि नित्यानि नैमित्तिकानि च, येषामकरणे प्रत्यवायो नास्ति तानि काम्यानीति व्यवहारकृतो विवेकः। तत्र यानि अहरहः क्रियन्ते तानि नित्यानि, यानि निमित्ते सति कदाचित् क्रियन्ते तानि नैमित्तिकानि[४]। यथा सन्ध्यावन्दनदेवर्षिपितृतर्पणादीनि नित्यानि, पित्राब्दिकादीनि नैमित्तिकानीति विवेकः। एतेषां नित्यनैमित्तिककाम्यभेदभिन्नानां त्रिविधानामपि कर्मणां फलवत्त्वेन हेतुना काम्यानां परित्यागः संन्यासशब्दार्थः। फलितमाह—**अनुष्ठेयत्वेन प्राप्तस्याननुष्ठानमिति**। संन्यास इति शेषः। न ह्यनुष्ठेयत्वेन काम्यकर्मैव प्राप्तं कर्मिणः, किन्तु नित्यं नैमित्तिकमपि च। तस्मादनुष्ठेयत्वेन प्राप्तस्य त्रिविधस्यापि कर्मणोऽननुष्ठानं संन्यास इत्युच्यते। अननुष्ठानमेव हि कर्मणः परित्यागः, न तु धनादेरिव कर्मणः स्वरूपतः परित्यागः कर्तुं शक्यते। **नित्यनैमित्तिकानामिति**। उपलक्षणमिदं काम्यानामपि। काम्यान्यपि ह्यश्वमेधादीनि कर्माणि चित्तशुद्ध्याद्यर्थं फलमनभिसन्धाय क्रियन्ते जनकादिभिः। यद्वा फलत्यागिनां काम्यकर्मकरणप्रसक्त्यभावात् तैः क्रियमाणानां कर्मणां च फलाभिसन्ध्यभावेनाकाम्यत्वादुक्तम्— **नित्यनैमित्तिकानामिति**। संन्यासिभिः सर्वमपि कर्म परित्याज्यमेव। त्यागिभिस्तु काम्यकर्माण्येव स्वरूपतः परित्याज्यानि [५](अननुष्ठेयानीत्यर्थः।) नित्यनैमित्तिकानि तु कर्तव्यान्येव, तदकरणे प्रत्यवायात्। परन्तु नित्यनैमित्तिकानां फलपरित्याग एव कर्तव्य इति भावः। **यदीति**। यस्मादित्यर्थः। संन्यासत्यागशब्दयोः काम्यकर्मपरित्यागः सर्वकर्मफलत्यागो वाऽर्थो वक्तव्यस्तस्मादिति शेषः। **परित्यागमात्रं** तद्रूप इत्यर्थः। **एकोऽर्थः स्यात्** घटपटशब्दाविव जात्यन्तरभूतार्थौ (न) संन्यासत्यागशब्दौ न भवतः इत्यर्थः। यथा घटपटशब्दौ भिन्नजातिपदार्थाभिधायिनौ, तथा संन्यासत्यागशब्दौ न भवतः, परित्यागमात्रवाचित्वादुभयोरपि। तस्मादेकार्थवाचिनोरपि संन्यासत्यागशब्दयोः कर्मतत्फलविषयत्वेन भेद इति भावः। अनुष्ठेयत्वेन प्राप्तस्य सर्वस्य कर्मणोऽननुष्ठानं संन्यासः, अनुष्ठीय-

---

१. 'निर्लुठितार्थौ' इति पा.। २. 'सर्वथाऽपि (परि)त्यागमात्रम्' इति पा.। ३. भिन्नार्थौ इत्यर्थः। ४. नियतनिमित्तकानि कर्माणि नित्यानि, अनियतनिमित्तकानि कर्माणि नैमित्तिकानि इति प्रसिद्धिः। ५. कुण्डलितं टिप्पणं स्यादित्यूह्यते।

**ननु नित्यनैमित्तिकानां कर्मणां फलमेव नास्तीत्याहुः; कथमुच्यते तेषां फलत्याग इति, यथा वन्ध्यायाः पुत्रत्यागः?। नैष दोषः; नित्यानामपि कर्मणां भगवता फलवत्त्वस्येष्टत्वात्। वक्ष्यति हि भगवान्—'अनिष्टमिष्टं मिश्रं च' (भ.गी.१८.१२) इति, 'न तु संन्यासिनाम्'(भ.गी.१८.१२) इति च। संन्यासिनामेव हि केवलं कर्मफलासम्बन्धं दर्शयन् असंन्यासिनां नित्यकर्मफलप्राप्तिं [1]'भवत्यत्यागिनां प्रेत्य' (भ.गी.१८.१२) इति दर्शयति॥२॥**

आनन्दगिरिकृतव्याख्या

**पुत्राभावाद् वन्ध्यायास्तत्त्यागायोगवद् नित्यनैमित्तिककर्मणामफलानां फलत्यागानुपपत्तेरुक्तस्त्यागशब्दार्थो न सिध्यतीति शङ्कते—** नन्विति। **नित्यनैमित्तिककर्मफलस्य वन्ध्यापुत्रसादृश्याभावात् तत्त्यागसम्भवादुक्तस्त्यागशब्दार्थः सम्भवतीति समाधत्ते—** नैष दोष इति। **भगवता तेषां फलवत्त्वमिष्टमित्यत्र वाक्यशेषमनुकूलयति—** वक्ष्यतीति। **तर्हि संन्यासिनामसंन्यासिनां च नित्याद्यनुष्ठायिनामविशेषेण तत्फलं स्यादिति चेत् , नैवेत्याह—** न त्विति। **वक्ष्यतीत्यनुकर्षणं चकारार्थः। प्रसक्तस्य वचसोऽर्थं प्रकृतोपयोगित्वेन संगृह्य स्मारयति—** संन्यासिनामिति॥२॥

भाष्यार्कप्रकाशः

मानस्य कर्मणः फलाननुसन्धानं त्याग इति **निष्कर्षः**।

**फलवत्त्वस्येति**। दुरितक्षयादिरूपफलयुक्तत्वस्येत्यर्थः। 'अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्। भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्॥' इति वक्ष्यति। **कर्मणस्त्रिविधस्येत्यर्थः**। अत्यागिनां नित्यनैमित्तिकादिकर्मफलप्रतिपादनेन नित्यनैमित्तिकानां फलमस्तीति गम्यत इति भावः। **अत्यागिनाम्** इत्यस्यासंन्यासिनामित्यर्थः, न तु संन्यासिनामित्युत्तरवाक्यानुसारात्। ततश्च संन्यासिनामेव केवलं कर्मफलासम्बन्धः, असंन्यासिनां तु कर्मानुष्ठानसत्त्वेन तत्फलसंबन्धोऽस्त्येव। अत एवासंन्यासिभिः तत्फलपरित्यागः कर्तव्यः, संन्यासिनां तु कर्मानुष्ठानाभावान्न फलपरित्यागावकाश इति बोध्यम्। अत एव 'संन्यासिनामेव केवल'मित्युक्तम्।

यत्तु **रामानुजः**—संन्यासत्यागौ पर्यायशब्दावेव, न तु तयोरर्थतोऽस्ति भेदः। परन्तु केचित् कवयः काम्यमेव कर्माननुष्ठेयम् , फलद्वारा मुमुक्षोर्बन्धकत्वात् ; नित्यनैमित्तिके त्वनुष्ठेये एव, फलाभावात् तयोस्तदकरणे प्रत्यवायाच्चेत्याहुः। अन्ये विचक्षणास्तु काम्यमपि कर्म न परित्याज्यं, किन्तु नित्यनैमित्तिकवत् कर्तव्यमेव; न च बन्धप्रसङ्गः, फलपरित्यागादिति कृत्वा त्रिविधमपि कर्तव्यं कर्म; तत्फलं तु परित्यक्तव्यमिति प्राहुः। न च नित्यनैमित्तिकयोः फलाभावश्चोदनीयः, 'प्राजापत्यं गृहस्थाना'मित्यादिना तयोरपि फलावगमादिति व्याचख्यौ। **तदसत् ;** अर्जुनप्रश्नकृष्णप्रतिवचनयोरननुरूपत्वात्। संन्यासत्यागयोस्तत्त्वं पृथग्वेदितुमिच्छामीति ह्यर्जुनेन पृष्टम् , न तु त्यागस्य विकल्पानहं वेदितुमिच्छामीति। प्रकृतश्लोकश्च कर्मन्यासं संन्यासं विदुरिति, कर्मफलत्यागं त्यागं विदुरिति च वक्ति। न तु कर्मसंन्यासं केचिद् युक्तमिति विदुः, कर्मफलत्यागं तु केचिद् युक्तमिति विदुरिति वक्ति। तस्मात् कृष्णार्जुनप्रश्नप्रतिवचनश्लोकयोरनयोर्यथाश्रुतमर्थं विहायापार्थकल्पनमप्रमाणमेव। न ह्यत्र 'केचिद् विदु'रिति, 'अन्ये प्राहु'रिति च विकल्पबोधकं पदद्वयमप्यस्ति। न च 'त्याज्यं दोषवदित्येके' इत्युत्तरश्लोकानुसारादिहापि तत्पदद्वयमध्याह्रियत इति वाच्यम् ; तत्र कर्म त्याज्यमिति, न त्याज्यमिति च विकल्पार्थ एव वर्णितः इति तदनुसारायोगादस्य। न ह्यत्र काम्यं कर्म त्याज्यमिति, न त्याज्यमिति विकल्पार्थो वर्णितः, येनोत्तरश्लोकानुसारः स्यादस्य। किञ्च संन्यासत्यागावेकार्थाविति किमर्जुनो वेद, उत न वेद? आद्ये, संन्यासस्य त्यागस्य च पृथक् तत्त्वं वेदितुमिच्छामीति प्रश्नो न युज्यते। द्वितीये, कृष्णस्येदं प्रतिवचनं न युज्यते। त्वं हि संन्यासत्यागौ पृथगर्थाविति भ्राम्यसि, न तु तथा पृथगर्थौ। किन्त्वपृथगर्थावेवेति वक्तव्यत्वात् कृष्णेनोत्तरस्य। न च 'निश्चयं शृणु मे तत्र त्यागे भरतसत्तम' इति त्यागशब्देनैव निर्णयवचनादयमर्थोऽवगम्यत इति वाच्यम् ; साक्षात्कण्ठोक्तमर्थं विहायानुमानिकार्थकल्पनस्यायुक्तत्वात्। त्याज्यं दोषवदिति वक्ष्यमाणश्लोकोक्तविकल्पविषये त्यागे मम निश्चयं शृण्विति तदर्थाच्च। तस्मात् **श्रीशङ्कराचार्योक्त** एव

१. अत्यागिशब्देन असंन्यासिवाचिना नित्याद्यनुष्ठाननिष्ठा अपि कर्मिणः सामान्येन गृहीताः इति भावः।

**त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः।**
**यज्ञदानतपःकर्म न त्याज्यमिति चापरे॥ ३॥**

त्याज्यमिति। त्याज्यं **त्यक्तव्यं** दोषवद् **दोषोऽस्यास्तीति दोषवत्। किं तत्? कर्म, बन्धहेतुत्वात् सर्वमेव। अथवा दोषो यथा** [१]**रागादिः त्यज्यते, तथा त्याज्यमिति एके कर्म प्राहुः** मनीषिणः **पण्डिताः** [२]**सांख्यादिदृष्टिमाश्रिताः अधिकृतानां कर्मिणामपीति।**

आनन्दगिरिकृतव्याख्या

**काम्यानि वर्जयित्वा नित्यनैमित्तिकानि फलाभिलाषादृते कर्तव्यानीत्युक्तं पक्षं प्रतिपक्षनिरासेन द्रढयितुं विप्रतिपत्तिमाह—** त्याज्यमिति। **कर्मणः सर्वस्य दोषवत्त्वे हेतुमाह—** बन्धेति। **दोषवदित्येतद् दृष्टान्तत्वेन व्याचष्टे—**अथवेति। **कर्मण्यनधिकृतानामकर्मिणामेव कर्म त्याज्यम्, कर्मिणां तत्त्यागे प्रत्यवायादित्याशङ्क्याह—**अधिकृतानामिति। **न हि तेषामपि कर्म त्यजतां प्रत्यवायः, हिंसादि-**

भाष्यार्कप्रकाशः

श्लोकस्य यथाश्रुतार्थः, अर्जुनप्रश्नानुरूपश्च। तत्प्रश्नमनुसृत्यैव संन्यासत्यागयोरिह तत्त्वस्य पृथङ्निर्दिष्टत्वात्। सर्वकर्मपरित्यागः संन्यासः, सर्वफलत्यागस्तु त्याग इति पृथगुभयोस्तत्त्वस्य निर्दिष्टत्वात्। न च काम्यानामित्येवोक्तम्, न तु सर्वेषामिति वाच्यम्; कामे साधूनि काम्यानीति व्युत्पत्त्या नित्यनैमित्तिककाम्यात्मकत्रिविधकर्मपरत्वात् काम्यशब्दस्य। तच्चोक्तं प्रागेव। न चैवं **बादरायणेन** 'सर्वेषां कर्मणां न्यासम्' इति कुतो नोक्तमिति वाच्यम्; सर्वाण्यपि कर्माणि काम्यत्वेन परित्याज्यान्येवेति सूचयितुं काम्यानामित्युक्तत्वात्। अन्यथा 'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' इत्यादिश्रुतिसिद्धस्य सर्वकर्मपरित्यागरूपस्य संन्यासस्य कुतो नेह प्रतिपादनं स्यादिति बोध्यम्॥ २॥

**त्याज्यमिति**। यदर्जुनेन पृष्टं तत् प्रत्युक्तं पूर्वश्लोकेन। अथ प्रसङ्गात् किमविदुषां संन्यासः श्रेयस्करः, उत त्यागः? इति शङ्कायां तावद् विकल्पं दर्शयति—**त्याज्यमिति**। न च – अविदुषामपि कोऽयं नियमः? विदुषामपि किं संन्यासः श्रेयस्करः, उत त्यागः? इति शङ्का भवत्येवेति – वाच्यम्; विदुषां कर्माधिकाराभावस्य पूर्वमेव बहुशः प्रतिपादितत्वात्। यद्यपि 'तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते' इति पूर्वमेवायमर्थ उक्तः, तथापि तस्यैवेह पुनर्विमर्शनं क्रियते स्पष्टावगमार्थमिति बोध्यम्। उक्तं हि भाष्यकृद्भिः— 'सर्वो ह्यतीतेषु अध्यायेषूक्तोऽर्थोऽस्मिन्नवगम्यते' इति। **यद्वा** ये संन्यासाश्रमं स्वीकृतवन्तः तैः सर्वकर्मणां परित्यक्तत्वान्न तेषां पुनः कर्माधिकारः। अतो न तद्विषयः कर्मविकल्प इह प्रकृतः, किन्तु ये असंन्यस्यापि यज्ञादिषु न प्रवर्तन्ते, तद्विषयः कर्मविकल्प इह प्रकृत इति बोध्यम्। एके मनीषिणो दोषवत् कर्म त्याज्यमिति प्राहुः। अपरे मनीषिणो यज्ञदानतपःकर्म न त्याज्यमिति प्राहुः। कर्मणि दोषं दर्शयति—**बन्धहेतुत्वादिति**। **सर्वमेवेति**। नित्यं नैमित्तिकं काम्यं चेति त्रिविधमपि कर्मेत्यर्थः। कर्म त्याज्यं दोषवत्त्वात्, यद् दोषवत् तत् त्यज्यते, यथा कीटादिदुष्टं फलादि। 'तदस्यास्त्यस्मिन्' इति मतुपि दोषवच्छब्दार्थं दर्शयित्वा, 'तेन तुल्यं क्रिया चेद् वति'रिति वतौ तं दर्शयति—**अथवेति**। धनरागः। आदिपदात् क्रोधादिग्रहणम्। यद्वा स्त्रीरागादिग्रहणम्। अथवा धनं रागश्चेति दोषद्वयम्। धनं ह्यार्जनादिक्लेशहेतुत्वाद् दुष्टम्। रागः स्त्र्यादिविषयः कामः, तस्य संसारानर्थहेतुत्वाद् दोषवत्त्वं स्फुटमेव। **त्यज्यत इति**। विदुषेति शेषः। **त्याज्यमिति**। मुमुक्षुभिरिति शेषः। क एवं वदन्तीत्यत आह—**साङ्ख्या इति**। कुतो वदन्तीत्यत आह—**आत्मदृष्टिमाश्रिता इति**। आत्मज्ञत्वादित्यर्थः। अकर्तारमभोक्तारमविक्रियमात्मानं विदन्तो हि ते साङ्ख्याः आत्मनि क्रियाकारकफलाभावदर्शनान्नैव कार्यं कर्मेति ब्रुवन्तीत्यर्थः। केषां त्याज्यम्? अत आह—**अधिकृतानां कर्मिणामपीति**। अज्ञा हि कर्मण्यधिकृताः, तैरपि कर्म न कर्तव्यम्, बन्धकत्वात् कर्मणः। किन्तु तूष्णीं स्थातव्यम्, कर्माकरणस्य बन्धाहेतुत्वादिति भावः।

---

१. 'धनरागादिः' इति रा.पा.भाति। २. 'सांख्या आत्मदृष्टिमाश्रिताः' इति रा.पा.।

**तत्रैव यज्ञदानतपःकर्म न त्याज्यमिति चापरे।**

**[१]कर्मिण एवाधिकृतानपेक्ष्यैते विकल्पाः, न तु ज्ञाननिष्ठान् व्युत्थायिनः संन्यासिनोऽपेक्ष्य। 'ज्ञानयोगेन सांख्यानां निष्ठा मया पुरा प्रोक्ता'(द्र.भ.गी.३.३) इति [२]कर्माधिकारादपोद्धृताः ये, न तान् प्रति चिन्ता। ननु 'कर्मयोगेन योगिनाम्' इत्यधिकृताः पूर्वं विभक्तनिष्ठाः अपीह [३]सर्वशास्त्रार्थोपसंहारप्रकरणे यथा विचार्यन्ते, तथा सांख्या अपि ज्ञाननिष्ठाः विचार्यन्तामिति। न; तेषां मोहदुःखनिमित्तत्यागानुपपत्तेः। न [४]कायक्लेशनिमित्तं दुःखं सांख्याः आत्मनि**

### अनुभूतिस्वरूपाचार्यविरचितगीताभाष्यटिप्पणम्

अष्टादशे [५]'किञ्चिन्निरूप्यते।....कर्मफलत्यागात्म[क] इत्येकः पक्षः। नित्यानामपि त्याग इत्यपरः पक्षः। काम्यादीनां यज्ञानामपि न त्याग इत्यन्यः। एते पक्षाः कीदृशानधिकारिण उद्दिश्येत्याशङ्क्याह—**कर्मिण एवाधिकृतानपेक्ष्यैते विकल्पा इति**। कर्माधिकाराद् ये **अपोद्धृताः** बहिष्कृताः तान् प्रति इयं चिन्ता न भवति, निर्णीतत्वादित्युक्तम्। तत्र प्रतिबन्धिन्यायेन शङ्कते—**ननु कर्मयोगेनेति**। येषां मोहदुःखनिमित्तस्त्यागः सम्भवति, तेऽत्र विचार्यन्ते। न तथा साङ्ख्याः। ततस्ते न

### आनन्दगिरिकृतव्याख्या

**युक्तस्य कर्मणोऽनुष्ठाने परं प्रत्यवायादिति भावः। सांख्यादिपक्षसमाप्तौ** इति**शब्दः। मीमांसकपक्षमाह—** तत्रैवेति। **कर्माधिकृतेष्वेवेति यावत्।** कर्म **नित्यं नैमित्तिकं च।**

**'काम्यानां कर्मणा'मित्यारभ्य श्लोकाभ्यां कर्मिणोऽकर्मिणोऽधिकृताननधिकृतांश्चापेक्ष्य दर्शितविकल्पानां प्रवृत्तिरित्याशङ्क्याह—** कर्मिण इति। **एवकारव्यवच्छेद्यमाह—** न त्विति। **तदेव स्फुटयति—** ज्ञानेति। **कर्माधिकृतानां ज्ञाननिष्ठातो विभक्तनिष्ठावत्त्वेन पूर्वोक्तानामपि शास्त्रार्थोपसंहारे पुनर्विचार्यत्ववज्ज्ञाननिष्ठानामपि विचार्यत्वमत्राविरुद्धमिति शङ्कते—**नन्विति। **सांख्यानां परमार्थज्ञाननिष्ठानां नात्र विचार्यतेत्युत्तरमाह—** न, तेषामिति। **ननु तेषामपि स्वात्मनि क्लेशदुःखादि पश्यतां तदनुरोधेन राजसकर्मत्यागसिद्धेः विचार्यत्वम् ,**

### भाष्यार्कप्रकाशः

**तत्रैवेति**। अधिकृतकर्मिविषय एवेत्यर्थः। यज्ञदानतपोरूपं कर्म **यज्ञदानतपःकर्म**। यज्ञो दानं तपश्चेत्येतत् त्रयमित्यर्थः। **न त्याज्यं** त्यक्तुं योग्यं न भवति। सकामानां बन्धहेतुत्वेऽपि, निष्कामानां चित्तशुद्ध्यादिद्वारा मोक्षहेतुत्वादिति भावः।

**एते विकल्पा इति**। एतौ विकल्पावित्यर्थः। एवमादयो विकल्पाः इति वा। कर्मिण एवेत्येवकारार्थमाह—**न तु ज्ञाननिष्ठानिति**। **व्युत्थायिनः** सर्वं परित्यज्य प्रयातानित्यर्थः। 'व्युत्थायाथ भिक्षाचर्यं चरन्ती'ति श्रुतेः। संसारिणो हि गृहिणः संसारकूपे मग्नाः। एते तु संसारकूपादुद्गताः इति व्युत्थायिनः इत्युक्तम्। व्युथातुं शीलं येषां ते व्युत्थायिनः। के ते? अत आह—**संन्यासिन इति**। संन्यासिनां विदुषां ज्ञाननिष्ठा क्वोक्तेत्यत आह—**ज्ञानयोगेनेति**। तस्माद् ये कर्माधिकाररूपादातपादुद्धृतास्तान् प्रति – किं कर्म कार्यमुत त्याज्यम्? – इति चिन्ता न भवति। आतपवत् तापहेतुत्वात् कर्माधिकारे आतपत्वरूपणम्। तत उद्धृताश्च विद्वांसः संन्यासिन एव। अज्ञानाम् असंन्यासिनां कर्मण्येवाधिकारादिति।

**ननु** कर्मिणः प्रत्यपीयं चिन्ताऽनुचितैव। पूर्वमेव 'कर्मयोगेन योगिना'मिति कर्मयोगस्य कर्मिविषयस्य विचारितत्वादिति चेत् , **सत्यम्** ; तथापि सर्वशास्त्रार्थोपसंहारप्रकरणत्वादस्याध्यायस्य पूर्वोक्त एवार्थः इहापि स्पष्टीक्रियत इति। नन्वेवं ज्ञानिनः प्रत्यपि चिन्तोचितैवेति शङ्कते—**नन्विति**। यदि ज्ञानिनः प्रत्यपि चिन्तोचिता स्यादिह तर्हि यज्ञदानतपःकर्म साङ्ख्यानामपि कार्यमेव भवेदिति संन्यासस्य समूलोच्छेदः पूर्वपक्ष्यभिमतः सिध्येदिति बोध्यम्।

परिहरति—**नेति**। हेतुमाह—**तेषामिति**। ज्ञाननिष्ठानां संन्यासिनां सांख्यानां तेषां मोहदुःखनिमित्तकर्मत्यागस्यानुपपत्तेः।

---

१. 'कर्मिण एवाधिकृतास्तानपेक्ष्यैते' इति पा.। २. 'कर्माधिकारातपोद्धृताः' इति रा.पा.भाति। ३. 'सर्वशास्त्रोपसंहारप्रकरणे' इति पा.। ४. 'कायक्लेशनिमित्तानि दुःखानि' इति पा.। ५. 'किञ्चिदुच्यते' इति पा.।

**पश्यन्ति, इच्छादीनां क्षेत्रधर्मत्वेनैव दर्शितत्वात्। अतस्ते न कायक्लेशदुःखभयात् कर्म परित्यजन्ति। नापि ते कर्माण्यात्मनि पश्यन्ति, येन नियतं कर्म मोहात् परित्यजेयुः। 'गुणानां कर्म, नैव किञ्चित् करोमि' इति हि ते संन्यस्यन्ति। 'सर्वकर्माणि मनसा संन्यस्य'(भ.गी.५.१३) इत्यादिभिर्हि तत्त्वविदः संन्यासप्रकारः उक्तः। तस्माद् येऽन्ये अधिकृताः कर्मणि अनात्मविदः, येषां च [1]मोहात् त्यागः सम्भवति कायक्लेशभयाच्च, त एव तामसास्त्यागिनो राजसाश्चेति निन्द्यन्ते कर्मिणामनात्मज्ञानां कर्मफलत्यागस्तुत्यर्थम्। 'सर्वारम्भपरित्यागी'(भ.गी.१२.१६) 'मौनी**

अनुभूतिस्वरूपाचार्यटिप्पणम्

विचार्यन्त इत्याह— **न, तेषामिति**। वस्तुसंग्रहवाक्यं विवृणोति— **न कायक्लेशनिमित्तदुःखमित्यादिना**। यदि दुःखभयाद् मोहाद्वा न सम्यग्दर्शिनां कर्मत्यागः, कथं तर्हि ते कर्माणि संन्यस्यन्नि[न्ती]त्याशङ्क्याह— **गुणानां कर्मेति**। इतश्च सम्यग्ज्ञानिनां मुख्यसंन्यासिनां नेयं चिन्तेत्याह—**सर्वारम्भपरित्यागीत्यादिना**।

आनन्दगिरिकृतव्याख्या

**नेत्याह—** न कायेति। **तत्र क्षेत्राध्यायोक्तं हेतूकरोति—** इच्छादीनामिति। **स्वात्मनि सांख्यादीनां क्लेशाद्यप्रतीतौ फलितमाह—**अत इति। **ननु तेषां क्लेशाद्यदर्शनेऽपि स्वात्मनि कर्माणि पश्यतां तत्त्यागो युक्तस्तेषां कायक्लेशादिकरत्वात् , नेत्याह—**नापीति। **अज्ञानां मोहमाहात्म्यान्नियतमपि कर्म त्यक्तुं शक्यं, न तत्त्वविदाम्, स्वात्मनि कर्मादर्शनेन तत्त्यागे हेत्वभावादिति मत्वाऽऽह—** मोहादिति। **कथं तर्हि तेषामात्मनि कर्माण्यपश्यतां प्राप्त्यभावे तत्त्यागः संन्यासः? तत्राह—**गुणानामिति। **अविवेकप्राप्तानां कर्मणां त्यागस्तत्त्वविदामित्युक्तं स्मारयन् अप्राप्तप्रतिषेधं प्रत्यादिशति—**सर्वेति। **तत्त्वविदामत्राविचार्यत्वे फलितमाह—**तस्मादिति। **येऽनात्मविदः त एवेत्युत्तरत्र सम्बन्धः। कर्मण्यधिकृतानामनात्मविदां कर्मत्यागसम्भावनां दर्शयति—**येषां चेति। **तन्निन्दा कुत्रोपयुक्तेत्याशङ्क्याह—** कर्मिणामिति। **किञ्च परमार्थसंन्यासिनां प्रशस्यत्वोपलम्भान्न निन्दाविषयत्वमित्याह—**सर्वेति। **किञ्चात्रापि 'सिद्धिं प्राप्तो यथा' इत्यादिना**

भाष्यार्कप्रकाशः

अनुपपत्तिमेव विवृणोति—**न कायेति**। साङ्ख्याः कायक्लेशनिमित्तं दुःखमात्मनि न पश्यन्ति। अतो दुःखनिमित्तत्यागो नोपपद्यते तेषाम्। कुतो न पश्यन्तीत्यत आह—**इच्छादीनामिति**। आदिपदात् सुखदुःखादिग्रहणम्। **येनेति**। कर्मणामात्मनि दर्शनेनेत्यर्थः। **नियतमिति**। नित्यमित्यर्थः। **मोहाद्** अज्ञानात्। ननु यदि साङ्ख्यानां मोहदुःखनिमित्तो न कर्मत्यागः, तर्हि किन्निमित्तः? अत आह— **गुणानामिति**। देहेन्द्रियाद्याकारपरिणतसत्त्वादिगुणानामेव कर्म, अहं तु किञ्चिदपि नैव करोमीति हि ते साङ्ख्याः संन्यस्यन्ति कर्माणि। 'नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्' इत्युक्तत्वादिति भावः। **तस्मादिति**। साङ्ख्यानां संन्यासिनां कर्माधिकाराभावादित्यर्थः। **अन्ये** साङ्ख्येभ्य इतरे। के ते? अत आह—**अधिकृताः कर्मणीति**। के ते अधिकृताः? अत आह—**अनात्मविद इति**। कायक्लेशभयाच त्यागः सम्भवतीत्यन्वयः। **त एवेति**। कर्मण्यधिकृता अज्ञा एवेत्यर्थः। **त्यागिन इति**। कर्म त्यक्तवन्त इत्यर्थात्। **तामसा राजसाश्चेति** तमोरजःप्रायस्वभावाः, न तु सात्त्विकाः। ते हि मोहाद् दुःखभयाद्वा कर्म न परित्यजन्ति, किन्तु कर्म कृत्वा तत्फलमेव परित्यजन्ति। वक्ष्यते चायमर्थ उत्तरत्र। **निन्द्यन्त इति**। कुतो निन्दनम्? अत आह—**कर्मिणामिति**। अनात्मज्ञानां कर्मिणां कर्मत्यागात् फलत्याग एवोचित इति फलत्यागस्तुत्यर्थं कर्मत्यागो निन्द्यत इत्यर्थः।

नन्वात्मज्ञानां साङ्ख्यानां कर्मत्यागादनात्मज्ञानां कर्मिणां फलत्याग उत्कृष्ट इति कुतो नोच्यते? अत आह—**सर्वारम्भेति**। गुणातीतस्य सर्वोत्कृष्टत्वं सर्वसम्मतम्। गुणातीतश्च परमार्थसंन्यासी विद्वान् साङ्ख्यः। सर्वारम्भपरित्यागो हि सर्वकर्मसंन्यासो गुणातीतस्य प्रधानं लक्षणम्। एवं सति आत्मज्ञसाङ्ख्य[कर्तृकसर्व]कर्मसंन्यासापेक्षया कथं फलत्यागस्योत्कृष्टत्वसिद्धिः? न कथमपीत्यर्थः। प्रत्युतात्मज्ञसाङ्ख्यकर्तृकसर्वकर्मसंन्यास एव सर्वोत्कृष्ट इति भावः।

१. 'मोहनिमित्तः' इति पा.।

**सन्तुष्टो येन केनचित्। अनिकेतः स्थिरमतिः' (भ.गी.१२.१९) इति गुणातीतलक्षणे च परमार्थसंन्यासिनो विशेषितत्वात्। वक्ष्यति च— [१]'निष्ठा ज्ञानस्य या परा' (भ.गी.१८.५०) इति। तस्माज्ज्ञाननिष्ठाः संन्यासिनो नेह विवक्षिताः।**

**कर्मफलत्याग एव सात्त्विकत्वेन गुणेन तामसत्वाद्यपेक्षया संन्यासः उच्यते, न मुख्यः सर्वकर्मसंन्यासः। सर्वकर्मसंन्यासासम्भवे च 'न हि देहभृता' (भ.गी.१८.११) इति हेतुवचनान्मुख्य एवेति चेत्? न; हेतुवचनस्य स्तुत्यर्थत्वात्। यथा 'त्यागाच्छान्तिरनन्तरम्'(भ.गी.१२.१२) इति कर्मफलत्यागस्तुतिरेव, यथोक्तानेकपक्षानुष्ठाना-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

गार्हस्थ्ये सन्त्येव[सत्येव] यः संन्यासः स एवात्रोच्यते, न मुख्य इत्युक्तम्। तत्र मुख्यः संन्यास एव नास्तीत्याशङ्कते— **सर्वकर्मसंन्यासासम्भव इति।** हेतुवचनस्य सर्वकर्मसंन्यासनिषेधे न तात्पर्यमित्याह— **न, हेतुवचनस्येति।** स्तुतिमात्रत्वं कस्मादित्याशङ्क्याह— **यथोक्तेति।** अनेके पक्षा ज्ञानध्यानादयः। तेषामनुष्ठाने शक्तिहीनं प्रति विधानादित्यर्थः॥ ३॥

आनन्दगिरिकृतव्याख्या

**ज्ञाननिष्ठाया वक्ष्यमाणत्वात् तद्वतां नेह विचार्यतेत्याह—**वक्ष्यतीति। **कर्माधिकृतानामेवात्र विवक्षितत्वं, न ज्ञाननिष्ठानामित्युपसंहरति—**तस्मादिति।

**ननु संन्यासशब्देन सर्वकर्मसंन्यासस्य ग्राह्यत्वात् , तथाविधसंन्यासिनामिह विवक्षितत्वं प्रतिभाति, तत्राह—**कर्मेति। **संन्यासशब्देन मुख्यस्यैव संन्यासस्य ग्रहणम् , गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययाद् , अन्यथा तदसम्भवे हेतूक्तिवैयर्थ्यादप्राप्तप्रतिषेधादिति शङ्कते—** सर्वेति। **नेदं हेतुवचनं सर्वकर्मसंन्यासासम्भवसाधकं, कर्मफलत्यागस्तुतिपरत्वादिति परिहरति—**नेत्यादिना। **एतदेव दृष्टान्तेन स्पष्टयति—**यथेति। **दृष्टान्तेऽपि यथाश्रुतार्थत्वं किं न स्यादित्याशङ्क्याह—**यथोक्तेति। **न हि फलत्यागादेव ज्ञानं विना मुक्तिर्युक्ता, मुक्तेर्ज्ञानैकाधीनत्वसाधकश्रुतिस्मृतिविरोधाद् , 'अद्वेष्टे'त्यादिना चानन्तरमेव ज्ञानसाधनविधानानर्थक्यात्। अतस्त्यागस्तुतिरेवात्र ग्राह्या**

भाष्यार्कप्रकाशः

**संन्यास उच्यत इति।** संन्यास इति स्तूयत इत्यर्थः। 'यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते' इति वाक्येनेति भावः। ननु कर्मफलत्याग एव मुख्यः संन्यासः, कर्मत्यागरूपसंन्यासस्तु अमुख्य एवेत्यत आह—**नेति।** सर्वकर्मफलत्यागो मुख्यः सर्वकर्मसंन्यासो न भवति। सर्वकर्मसंन्यास एव मुख्यः, फलत्यागस्त्वमुख्य एव, फलत्यागस्य संन्यासत्वं स्तुतिरेवेत्यर्थः।

**ननु** 'न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः। यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते॥' इति श्लोके यस्माद् देहधारिणा सर्वाणि कर्माणि त्यक्तुं न शक्यते, तस्मात् फलत्याग्येव संन्यासीत्युक्तत्वात् , मुख्यसंन्यासत्वेन त्वदभिमतस्य सर्वकर्मसंन्यासस्य [अ] सम्भवात् फलत्याग एव मुख्यः संन्यास इत्याक्षिपति— **सर्वेति।** परिहरति— **नेति।** हेतुमाह— **हेत्विति।** यो हि देहात्माभिमानी अज्ञः 'कर्ताऽह'मिति निश्चितप्रत्ययस्तस्यैव सर्वकर्मसंन्यासासम्भवः, देहभृतेत्युक्तत्वात्। तस्य च फलत्याग एव संन्यास इति स्तूयते। यदि पुनरात्मविदोऽपि सर्वकर्मसंन्यासासम्भवस्तर्हि 'सर्वारम्भपरित्यागी'त्यादिना पूर्वमुक्तः सर्वकर्मसंन्यासो निरालम्बनः स्यात्। तस्मादनात्मज्ञस्य फलत्याग एवोचित इति स्तुत्यर्थमेव 'न हि देहभृते'ति हेतूपन्यासः, न त्वात्मज्ञस्य कर्मसंन्यासात् फलत्याग उचित इति कथनार्थः। अकर्तर्यविक्रिये आत्मनि विदुषां कर्मादर्शनात् कथमात्मज्ञस्य कर्माधिकारः, येन विहितं कर्म कृत्वा फलं परित्यजेदात्मज्ञः। 'न हि देहभृते'त्यस्य स्तुत्यर्थत्वे दृष्टान्तमाह—**यथेति।** न हि कर्मफलत्यागादनन्तरमेव **शान्तिः** संसारोपरमः स्यात् , ज्ञानपूर्वकत्वाच्छान्तेः। ज्ञानादेव हि संसारनिवृत्तिः। तस्मात् 'त्यागाच्छान्तिरनन्तर'मिति वचनं स्तुतिवचनमेवेति तद्भाष्य एव स्फुटम्। ननु स्तुत्यर्थं कुतः फलत्यागस्य वचनम्? अत आह—**यथोक्तेति।** असमर्थमज्ञमर्जुनमुद्दिश्य 'अथैतदप्यशक्तोऽसी'ति 'सर्वकर्म-

१. 'ज्ञानस्य या परा निष्ठा ' इति पा.।

## निश्चयं श‍ृणु मे तत्र त्यागे भरतसत्तम ! ।

**शक्तिमन्तम् अर्जुनम् अज्ञं प्रति विधानात् ; तथेदमपि 'न हि देहभृता शक्यम्' (भ.गी.१८.११) इति कर्मफलत्यागस्तुत्यर्थं वचनम्। न 'सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन् न कारयन् आस्ते'(द्र.भ.गी.५.१२) इत्यस्य पक्षस्यापवादः केनचिद् दर्शयितुं शक्यः। तस्मात् कर्मण्यधिकृतान् प्रत्येवैष संन्यासत्यागविकल्पः। ये तु परमार्थदर्शिनः सांख्याः तेषां ज्ञाननिष्ठायामेव सर्वकर्मसंन्यासलक्षणायामधिकारः, नान्यत्रेति न ते विकल्पार्हाः। [1]तथोपपादितमस्माभिः—'वेदाविनाशिनम्' (भ.गी.२.२१) इत्यस्मिन् प्रदेशे, तृतीयादौ च॥ ३॥**

**तत्रैतेषु विकल्पभेदेषु** — निश्चयमिति। **निश्चयं** श‍ृणु **अवधारय** मे **मम वचनात्** तत्र त्यागे **त्यागसंन्यास-**

आनन्दगिरिकृतव्याख्या

**इत्यर्थः। दृष्टान्तगतमर्थं दार्ष्टान्तिके योजयति**—तथेति। **प्रागुक्तपक्षापवादविवक्षया हेतूक्तेर्मुख्यार्थत्वमेव किं न स्यादित्याशङ्क्य तदपवादे हेत्वभावान्मैवमित्याह**—न, सर्वेति। **न चेयमेव हेतूक्तिस्तदपवादिका, अन्यथासिद्धेरुक्तत्वादिति भावः। मुख्यसंन्यासापवादासम्भवे संन्यासत्यागविकल्पस्य कथं सावकाशतेत्याशङ्क्याह**—तस्मादिति। **ज्ञाननिष्ठान् प्रत्युक्तविकल्पानुपपत्तौ कुत्र तेषामधिकारः? तत्राह**—ये त्विति। **संन्यासिनां विकल्पानर्हत्वेन ज्ञाननिष्ठायामेवाधिकारस्य भूयस्सु प्रदेशेषु साधितत्वान्न साधनीयत्वापेक्षेत्याह**—तथेति॥ ३॥

**कर्माधिकृतान् प्रत्येवोक्तविकल्पप्रवृत्तावपि कुतो निर्धारणसिद्धिः? तत्राह**—तत्रेति। **तमेव निश्चयं दर्शयितुमादौ त्यागगतमवान्तरविभागमाह**—त्यागो हीति। **ननु त्यागसंन्यासयोरुभयोरपि प्रकृतत्वाविशेषे त्यागस्यैवावान्तरविभागाभिधाने संन्यासस्योपेक्षिततवम्**

भाष्यार्कप्रकाशः

फलत्यागं कुरु' इति विधानम् , तथा विदधतस्तव त्यागादनन्तरमेव शान्तिर्भवतीति प्रतिपादनं स्तुत्यर्थमेव, न तु तत्त्वार्थमिति भावः। ननु 'त्यागाच्छान्तिरनन्तर'मिति वचनमपि न स्तुत्यर्थं, भगवतोक्तत्वात् , ततश्च कर्मफलत्याग एव सर्वाधिक इति शङ्कायामाह—**नेति**। अस्य पक्षस्यापवादः केनचिदपि दर्शयितुं न शक्य इत्यन्वयः। **अस्य पक्षस्येति**। सर्वकर्मसंन्यासस्येत्यर्थः। **अपवादो** बाधः। भगवतैव सर्वकर्मसंन्यासस्य मुख्यस्य प्रतिपादितत्वात् कथं तेनैव फलत्यागरूपसंन्यास एव मुख्य इति पुनः प्रतिपाद्येत? एवं व्याहतवादिनो भगवतो वाक्यं किं वा कथं वा प्रमाणं स्यात्? न चैवं सर्वकर्मसंन्यास एव तत्र तत्र स्तुत इत्युच्यतामिति वाच्यम् ; आत्मनि कर्माद्यभावेनात्मविदामकर्त्रात्मदर्शिनां कर्माधिकारस्य दुःसम्पादत्वादात्मज्ञानादपि फलत्याग एवोचित इति प्राप्तत्वाच्च। **तस्मादिति**। विदुषां सर्वकर्मसंन्यासस्य मुख्यत्वादित्यर्थः। अविदुषां फलत्यागस्य स्तुत्यर्थं संन्यासत्वेनोक्तत्वादिति वा। विदुषां मुख्यस्य सर्वकर्मसंन्यासस्य केनचिदपि प्रत्याख्यातुमशक्यत्वादिति वा। **संन्यासत्यागविकल्प इति**। 'त्याज्यं दोषव'दिति पूर्वार्धोक्तः संन्यासः, 'यज्ञदाने'त्युत्तरार्धोक्तस्तु त्याग इति विवेकः। तयोर्विकल्पः एके इति, अपरे इति च शब्दाभ्यां दर्शित इति बोध्यम्। किमनात्मज्ञैः कर्मण्यधिकृतैः कर्मसंन्यासः कार्यः, उत फलत्याग इति विकल्प इति यावत्। न ते साङ्ख्या विकल्पार्हाः, किमात्मज्ञैः साङ्ख्यैः कर्मसंन्यासः कार्य उत फलत्याग इति विकल्पो न सम्भवतीत्यर्थः। तेषां कर्माधिकाराभावादिति भावः। **तच्चेति**। साङ्ख्यानां कर्माधिकारराहित्यमित्यर्थः। **तृतीयादाविति**। 'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च सन्तुष्टः तस्य कार्यं न विद्यते॥', 'सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी। नवद्वारे पुरे देही नैव कुर्वन् न कारयन्॥', 'सर्वारम्भपरित्यागी गुणातीतः स उच्यते' इत्यादिस्थलेष्वित्यर्थः॥ ३॥

**निश्चयमिति**। यदि केचिदज्ञानां कर्मत्याग उचित इति ब्रुवन्ति, परे फलत्याग उचित इति, तर्हि तत्र कः पक्षस्तवेश्वरस्याभिमत इत्यत आह—**निश्चयमिति। एतेष्विति**। उक्तानुक्तसर्वविकल्पापेक्षया बहुत्वम्। किमज्ञानां नित्यकर्मत्यागः श्रेयान्? उत नैमित्तिकत्यागः? यद्वा काम्यत्यागः? आहोस्वित् सर्वकर्मत्यागः? यद्वा सर्वकर्मफलत्यागः? इत्यादयो विकल्पा ऊह्याः। सर्वेऽप्यमी विकल्पा

१. 'तच्चोपपादितम्' इति पा.।

**त्यागो हि पुरुषव्याघ्र ! त्रिविधः संप्रकीर्तितः ॥ ४ ॥**

**विकल्पे यथादर्शिते,** भरतसत्तम! **भरतानां साधुतम !** । त्यागो हि । **त्यागसंन्यासशब्दवाच्यो हि योऽर्थः स एक एवेत्यभिप्रेत्याह—** त्यागो हीति। **पुरुषव्याघ्र !** त्रिविधः **त्रिप्रकारस्तामसादिप्रकारैः,** सम्प्रकीर्तितः **शास्त्रेषु सम्यक् कथितः। यस्मात् तामसादिभेदेन त्यागसंन्यासशब्दवाच्योऽर्थः अधिकृतस्य कर्मिणोऽनात्मज्ञस्य त्रिविधः सम्भवति, न परमार्थदर्शिनः इत्ययमर्थो दुर्ज्ञानः, तस्मादत्र तत्त्वं नान्यो वक्तुं समर्थः। तस्माद्** निश्चयं **परमार्थशास्त्रार्थविषयमध्यवसायम् ऐश्वरं मे मत्तः शृणु**[१] ॥ ४ ॥

आनन्दगिरिकृतव्याख्या

**आपद्येत, नेत्याह—**त्यागेति। **सात्त्विको राजसस्तामसश्चेति उक्तेऽर्थे त्रैविध्येऽपि स्वयमेव निश्चयसम्भवात् किमत्र भागवतेन निश्चयेनेत्याशङ्क्याह—**यस्मादिति। **भगवतो**[२]**ऽन्यस्योक्तविभागे तत्त्वानिश्चयाद् भागवतनिश्चयस्य श्रोतव्यतेति निगमयति—**तस्मादिति ॥ ४ ॥

भाष्यार्कप्रकाशः

दर्शितकर्मत्यागफलत्यागरूपविकल्पद्वय एवान्तर्भवन्तीति बोध्यम्। यद्वा **तत्रे**ति त्यागविशेषणम्—तस्मिन् त्याग इति। त्यागशब्दस्य च त्यागसंन्यासविकल्पोऽर्थः, तस्यैव प्रकृतत्वात्। परित्यागमात्रांशसाम्यादुभयोरपि त्यागशब्देन निर्देशः। तत्रशब्दार्थमाह—**यथादर्शित इति**। पूर्वश्लोकेनोक्त इत्यर्थः। विकल्पेन कर्मविषयः फलविषयश्च यस्त्यागः पूर्वश्लोकेन दर्शितस्तस्मिंस्त्यागे विषय इति यावत्। **हि** यस्मात् त्यागस्त्रिविधः सम्प्रकीर्तितः, तस्मात् तत्र त्यागे निश्चयं **मे** मम वाक्याच्छृणु जानीहि। **तामसादिप्रकारैरिति**। वक्ष्यमाणतामसराजससात्त्विकप्रकारैरित्यर्थः। परित्यागमात्रार्थकस्त्यागस्त्रिविधः तामसो राजसः सात्त्विकश्चेत्यर्थः। तिस्रो विधाः प्रकारा यस्य स त्रिविधः। क्व प्रकीर्तितः? अत आह—**शास्त्रेष्विति**। यस्मादयमर्थो दुर्विज्ञानस्तस्मादत्र तत्त्वं नान्यो मत्तो वक्तुं समर्थ इत्यन्वयः। **त्यागसंन्यासशब्दवाच्योऽर्थ इति**। परित्यागरूप इत्यर्थः। **नेति**। परमार्थदर्शिनः कर्मसंन्यास एव मुख्येऽधिकारान्न तस्य तामसादिभेदभिन्नत्रिविधत्यागविषयत्वमिति भावः। **अत्रेति**। अज्ञकर्मिविषयत्याग इत्यर्थः। **तत्त्वं** याथार्थ्यम्। **अन्य इति**। मत्तः सर्वेश्वरादपर इत्यर्थः। **न समर्थ इति**। असर्वज्ञत्वादिति भावः। **तस्मादिति**। ममैव त्यागतत्त्वकथनसमर्थत्वादित्यर्थः। **परमार्थशास्त्रं** मोक्षशास्त्रं, तदर्थस्त्यागसंन्यासादिः, तद्विषयं तद्गोचरम् , ऐश्वरमीश्वरस्य ममेदमैश्वरं मदीयं निश्चयं मत्त एव सकाशाच्छृणु। निश्चयशब्दार्थमाह—**अध्यवसायमिति**।

अयं भावः—केचित् कर्मत्यागं श्रेयांसमज्ञस्य वदन्ति, केचित् फलत्यागमिति, तदुभयं श्रुत्वा मुमुक्षोरज्ञस्य शङ्का जायते—किमत्र प्रमाणमिति। न च शास्त्रात् तन्निर्णेतुं स शक्नोति, द्विविधशास्त्रदर्शनात् , तदुभयबलाबलनिर्णयाय तस्याशक्यत्वात्[शक्तत्वात्]। ततश्च स मन्यते शास्त्रकर्तुरीश्वरस्य यः पक्षोऽभिप्रेतः स समीचीन इति। तं चेश्वराभिमतं पक्षं वेत्तुं न कश्चिच्छक्नोति, परहृदयस्याप्रत्यक्षत्वात्। एवं सति – इदमीश्वराभिमतं मतम् इतीश्वर एव साक्षाद् ब्रूयान्न कोऽपि ततोऽन्यः – इति स निश्चिनोति। स चाज्ञो मन्दभाग्यत्वात्[भाग्य इति] तस्य नेश्वरप्रत्यक्षं सम्भवति। ततः स पक्षद्वये कः श्रेयानित्यधुनाऽपि सन्देग्ध्येव। त्वं तु महाभाग्य इति तवाहमीश्वरः प्रत्यक्षतयाऽवस्थितः सन् ब्रवीमि— ममायं निश्चितः पक्ष इति। ततस्त्वं मत्त इमं निश्चयं श्रुत्वा, अज्ञस्य कर्मत्यागफलत्यागयोः श्रेयांसमन्यतरं पक्षं निश्चयेन जानीहीति।

यत्तु **रामानुजः**—त्यागस्त्रिविधः – कर्मविषयः, फलविषयः, कर्तृत्वविषयश्चेति। ममेदं कर्मेति कर्मणि ममतायास्त्यागः कर्मत्यागः; मम फलं न स्यादिति फलत्यागः; ईश्वर एव कर्ता, न त्वहमिति कर्तृत्वत्यागः। स च पूर्वमेवोक्तः – 'मयि सर्वाणि कर्माणि

---

१. 'कर्म त्याज्यमित्येके, न त्याज्यमित्यपरे' इति विप्रतिपत्तिमुपन्यस्य 'निश्चयं शृणु' इति निर्णयोऽत्र भगवता प्रदर्श्यत इति स्पष्टं प्रतीयते। विप्रतिपत्तिश्च विषयैक्यमपेक्षत इति कर्माधिकृतविषयकत्वं तस्याः भाष्यकारैरुक्तम्। अन्यथा कर्मतत्त्यागयोरधिकारिभेदस्य शास्त्रसिद्धत्वात् विप्रतिपत्त्यनुपपत्तेः। एवं च प्रकरणस्य अस्य सर्वविषयकत्वं, पूर्वोत्तरार्धोक्तपक्षयोरविरोधः, तदर्थं संन्यासिनामपि कथंचिद्यज्ञादिसत्तासंपादनमित्यादि माध्वोक्तमनादरणीयम्। २. 'अन्येन' इति पा.।

## यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्।

**कः पुनरसौ निश्चयः इत्याह—** यज्ञेति। **यज्ञो दानं तप इत्येतत् त्रिविधं कर्म** न त्याज्यं **न त्यक्तव्यम् ,** कार्यं

आनन्दगिरिकृतव्याख्या

**तमेव भगवतो निश्चयं विशेषतो निर्धारयितुं प्रश्नपूर्वकमनन्तरश्लोकप्रवृत्तिं दर्शयति—**कः पुनरिति। **यज्ञादीनां कर्तव्यत्वे**

भाष्यार्कप्रकाशः

संन्यस्याध्यात्मचेतसा। निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः॥' इति। **तन्मन्दम्** ; उदाहृतश्लोके त्यागस्त्रिविध इत्यर्थस्यानुक्तत्वात्। न च कण्ठोक्तत्वाभावेऽप्यर्थात् तत्सिद्धिरिति वाच्यम् ; 'यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः। समः सिद्धावसिद्धौ च कृत्वाऽपि न निबध्यते॥' इति श्लोकेन असन्तोषत्यागद्वन्द्वत्यागमात्सर्यत्यागसिद्ध्यसिद्धिप्रयुक्तहर्षविषादत्यागानामप्यर्थादुक्तत्वेन त्रिविधस्त्यागः सम्प्रकीर्तित इति नियन्तुमशक्यत्वात्। एवं 'यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः' 'नित्यतृप्तो निराश्रयः' इत्यनेन च कामत्यागसङ्कल्पत्यागाश्रयत्यागानामप्यर्थसिद्धत्वात्। तथा 'छित्त्वैनं संशयं योगमातिष्ठे'त्यनेन संशयत्यागस्याप्यर्थतः सिद्धत्वात्। तदेवं बहूनां त्यागानां पूर्वं सम्प्रकीर्तितत्वात् कुतस्त्यागस्त्रिविधः सम्प्रकीर्तित इत्युच्यते? तस्माद् 'मयि संन्यस्ये'त्यादयः श्लोकाः कर्मयोगमेव तैस्तैर्विशिंषन्ति विशेषणैः, न तु त्यागभेदान् प्रदर्शयन्ति। मयि कर्माणि संन्यस्य निराशीर्निर्ममश्च भूत्वा युध्यस्वेति कर्मयोगधर्मसमुच्चयदर्शनात्।

किञ्च त्यागस्य कामसङ्कल्पममत्वादिविषयभेदाद् बहुविधत्वं पूर्वमुक्तमित्यवगम्यते, न तु स्वरूपतो भेदः। तथा सत्येकेन त्यागभेदेन युक्ते कर्मणि द्वितीयस्य त्यागभेदस्यानवकाशप्रसङ्गात्। रूपं द्विविधम्—उद्भूतरूपमनुद्भूतरूपं चेत्युक्ते, न हि उद्भूतरूपवति वस्तुन्यनुद्भूतरूपप्रसङ्गः। स्पर्शो द्विविधः—शीतोष्णभेदादित्युक्ते, नापि शीतस्पर्शवति वस्तुन्युष्णस्पर्शप्रसङ्गः। अत्र तु त्यागस्त्रिविध इति स्वरूपतो भेद इव [एव] कण्ठोक्तः, रूपं द्विविधमित्यादिवत्। ते च भेदा वक्ष्यन्ते— तामसो राजसः सात्त्विकश्चेति। न हि तामसत्यागवति पुरुषे राजससात्त्विकत्यागयोः प्रसङ्गः। एवं राजसत्यागवति तामससात्त्विकत्यागयोर्नैव प्रसङ्गः। तथा सात्त्विकत्यागवति न राजसतामसयोः प्रसङ्गः। अत एव त्यागस्य त्रैविध्यकथनम्। यदि त्वेकस्मिन्नेव पुरुषे युगपदेव त्यागत्रयं स्यात् तर्हि त्याग एकविध एव स्याद् , भेदप्रमाणानुपपत्तेः। त्यागभेदानां परस्परसामानाधिकरण्याभावो हि त्यागभेदे प्रमाणम् (प्रयोजकम्)। आशीस्त्यागममतात्यागादीनां तु सामानाधिकरण्यमस्ति। अतो विषयभेदाद् भिन्न इव प्रतीयमानोऽपि स त्याग एकविध एव। अत्रोक्त एव त्यागस्त्रिविधः, स्वरूपभेदसद्भावात्। न हि सात्त्विकादित्यागभेदानां परस्परसाङ्कर्यं परस्परसामानाधिकरण्यं वा विद्यते। कण्ठोक्तश्चायमेवेति तुच्छमेव **रामानुज**व्याख्यानम्।

**किञ्च** ईश्वर एव कर्ता, नाहं कर्तेत्यनुसन्धानं चायुक्तम् , 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते॥' इति गुणेष्वेव कर्तृत्वारोपो न त्वीश्वरे, नाप्यात्मनि, अविक्रियत्वादीश्वरस्यात्माभिन्नत्वाच्चेति। यदीश्वरे कर्तृत्वम् आरोपितं स्यात् , तदात्मन्येव फलति[१], बिम्बे मुखे आरोपितस्तिलकः [२]प्रतिबिम्बमुखवत्। तस्मान्नैवेश्वरे कर्तृत्वमारोपितव्यम्[३], किन्तु गुणेष्वेव। न च 'मयि सर्वाणि कर्माणि संन्यस्ये'ति वचनस्य का गतिरिति वाच्यम् ; 'ईश्वरार्थमहं कर्म करोमि, स्वाम्यर्थं भृत्य इवे'त्यनुसन्धानस्यैवेश्वरे कर्मसमर्पणरूपत्वादिति। न च गुणेष्वेव कर्तृत्वमारोपितव्यमिति स्थिते कथम् 'अहं करोमी'त्यनुसन्धानमिति वाच्यम् ; कर्माधिकृतानात्मविद्विषयत्वादेतद्वचनस्य। तत्त्वविद्धि गुणा एव कर्तारः, न त्वहमिति मन्यते। तस्माद् 'ईश्वर एव कर्ता' इत्यनुसन्धानमतिमूढविषयमेवेति सङ्क्षेपः॥४॥

**यज्ञेति**। मनीषिणां यज्ञदानतपःकर्म न त्याज्यम् , प्रत्युत तत् कार्यमेव। मनीषिणां यज्ञो दानं तपश्चेत्येतानि पावनान्येव। ननु अज्ञविषयमिदं प्रकरणमिति प्रागुक्तं कथं सङ्गच्छेत, मनीषिणामिति पदस्य सत्त्वात् , मनीषिणो हि विद्वांसः? अत आह—**फलानभि-**

१. जीवस्य ईश्वरप्रतिबिम्बरूपत्वादिति भावः। २. प्रतिबिम्बमुखे इवेति सप्तम्यन्ताद् वतिः। ३. 'आरोपयितव्यम्' इति पठितुं युक्तम्।

**यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥५॥**
**एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।**
**कर्तव्यानीति मे पार्थ ! निश्चितं मतमुत्तमम्॥६॥**

**करणीयमेव तत्। कस्मात्? यज्ञो दानं तपश्चैव** पावनानि [1]**विशुद्धिकराणि** मनीषिणां **फलानभिसन्धीनाम् इत्येतत्॥५॥**

एतान्यपीति। एतान्यपि तु कर्माणि **यज्ञदानतपांसि पावनान्युक्तानि** सङ्गम् **आसक्तिं तेषु त्यक्त्वा**, **फलानि च तेषां** त्यक्त्वा **परित्यज्य** कर्तव्यानि **अनुष्ठेयानीति** मे **मम निश्चितं मतमुत्तमम्।**

**'निश्चयं श्रृणु मे तत्र' इति प्रतिज्ञाय, पावनत्वं च** [2]**हेतुमुक्त्वा, 'एतान्यपि कर्माणि कर्तव्यानीत्येतन्निश्चितं मतमुत्तमम्'मिति प्रतिज्ञातार्थोपसंहार एव,** [3]**नापूर्वार्थं वचनम् , एतान्यपीति प्रकृतसंनिकृष्टार्थत्वोपपत्तेः।** [4]**सासङ्गस्य**

आनन्दगिरिकृतव्याख्या

**हेतुमाह—**यज्ञ इति। **न केवलमत्याज्यम् , किन्तु कर्तव्यमेवेत्याह—**कार्यमिति। [5]**प्रतिज्ञातमेवं विभज्य हेतुं विभजते—**कस्मादिति॥५॥

**प्रतिज्ञातमर्थमुपसंहरति—**एतान्यपीति। **उपसंहारश्लोकाक्षराणि व्याकरोति—**एतानीत्यादिना।

**अक्षरार्थमुक्त्वा** [6]**तात्पर्यार्थमाह—** निश्चयमिति। **प्रकृतार्थोपसंहारे गमकमाह—**एतान्यपीति। **अपिशब्दस्य विवक्षितमर्थं**

भाष्यार्कप्रकाशः

**सन्धीनामिति**। कर्मण्यधिकृतेष्वज्ञेषु मध्ये फलानभिसन्धयो विद्वांसः, फलाभिसन्धयस्तु तदपेक्षया मूढाः। यथा वैदिकेषु वेदार्थविदः प्राज्ञाः, केवलवेदपाठरता मूढाः। यथा वा द्विजेषु वेदपाठरताः प्राज्ञाः, सन्ध्यावन्दनमात्रविदो मूढाः। यथा वा विद्यार्थिषु शास्त्राध्यायिनः प्राज्ञाः, काव्याध्यायिनो मूढाः। यथा वा बालेषु पदवाक्यपाठकाः प्राज्ञाः, अकाराद्यक्षराभ्यासिनो मूढाः, तद्वदिति भावः। तस्मादनात्मविदः कर्मण्यधिकृतास्तत्फलाभिसन्धिराहित्येन मनीषिणः इतीहोच्यन्ते स्तुत्यर्थमिति बोध्यम्। **विशुद्धिः** चित्तशुद्धिः। अनेन च पावनानीति वचनेन चित्तशुद्धिपर्यन्तमेव कर्मण्यधिकृतैरपि कर्म कार्यम् , पश्चात्तु संन्यासः स्वीकर्तव्य एवाश्रमविशेषः तत्त्वज्ञानार्थकश्रवणाद्यर्थः 'अथातो ब्रह्मजिज्ञासा' इति सूत्रात्। न हि ज्ञानं विना मुक्तिः। कर्माणि चित्तशुद्धिफलकान्येव ह्यनभिसंहितफलानि। कर्मभिश्चित्ते शुद्धे सति विविदिषा जायते। 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने'ति श्रुतेः। जातायां च विविदिषायां तद्वेदनार्थं गृहादिकं परित्यज्य तत्त्ववित्सकाशं यात्येवेति सिद्धः संन्यासो मुमुक्षोः। विविदिषाजनकानां तु कर्मणां विविदिषाजननान्तरं नोपयोगः, जलदर्शनानन्तरं खनित्रस्येव।

एवं सति – आ प्रायणादहरहः कर्म कार्यं मुमुक्षुभिरिति वर्णयतो **रामानुजस्या**हो पाण्डित्यम् ! आ प्रायणादिति मूलाद् बहिः पदकल्पनात्। 'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' 'व्युत्थायाथ भिक्षाचर्यं चरन्ति' 'ब्राह्मणो निर्वेदमायात्' 'शान्तो दान्त उपरतः' इत्यादिश्रुतिसिद्धस्य, 'सर्वारम्भपरित्यागी'त्यादिप्रकृतगीतासिद्धस्य च सर्वकर्मसंन्यासस्य विद्वद्विषयस्य प्रत्याख्यानाच्च॥५॥

**एतानीति**। हे पार्थ ! एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च त्यक्त्वा कर्तव्यानीति मे निश्चितमुत्तमं मतम्। क्व सङ्गम्? अत आह—**तेष्विति**। यज्ञादिष्वित्यर्थः।

**हेतुमिति**। यज्ञादीनां कर्तव्यत्वे हेतुमित्यर्थः। **अपूर्वार्थवचनमिति**। यज्ञादिभ्योऽन्यान्यपि कर्माणि कर्तव्यानीत्येवंरूपापूर्वार्थवचनं न भवतीत्यर्थः। कुतो नापूर्वार्थवचनम्? अत आह—**एतान्यपीति**। एतच्छब्दो हि प्रकृतसंनिहितार्थवाची। ननु एतान्यपीत्यपिशब्दात् पूर्वोक्तकर्मभ्योऽन्यान्यप्येतानि कर्तव्यानीत्येवार्थः, अत आह—**ससङ्गस्येति**। ससङ्गस्य फलार्थिनो बन्धहेतून्यप्येतानि पूर्वोक्त-

१.'विशुद्धिकारणानि' इति पा.। २.'सहेतुकमुक्त्वा' इति पा.। ३.'नापूर्वार्थवचनम्' रा.पा.। ४.'ससङ्गस्य'रा.पा.। ५.'प्रतिज्ञामेवं' इति पा.। ६.'तात्पर्यमाह' इति।

**फलार्थिनो बन्धहेतवः एतान्यपि कर्माणि मुमुक्षोः कर्तव्यानीत्यपिशब्दस्यार्थः, न त्वन्यानि कर्माण्यपेक्ष्य 'एतान्यपि' इत्युच्यते।**

**अन्ये तु वर्णयन्ति— नित्यानां कर्मणां फलाभावात् 'सङ्गं त्यक्त्वा फलानि चे'ति नोपपद्यते। अतः 'एतान्यपि' इति यानि काम्यानि कर्माणि नित्येभ्योऽन्यानि एतान्यपि कर्तव्यानि, किमुत यज्ञदानतपांसि नित्यानीति। तदसत् ; नित्यानामपि कर्मणाम् इह फलवत्त्वस्योपपादितत्वाद् 'यज्ञो दानं तपश्चैव पावनानि' इत्यादिना वचनेन। नित्यान्यपि कर्माणि बन्धहेतुत्वाशङ्कया जिहासोर्मुमुक्षोः कुतः काम्येषु प्रसङ्गः? 'दूरेण ह्यवरं कर्म' (भ.गी.२.४९) इति च निन्दितत्वात् , 'यज्ञार्थात् कर्मणोऽन्यत्र' (भ.गी.३.९) इति च काम्यकर्मणां बन्धहेतुत्वस्य निश्चितत्वात्। 'त्रैगुण्यविषया वेदाः'(भ.गी.२.४५) 'त्रैविद्या मां सोमपाः'(भ.गी.९.२०), 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति'(भ.गी. ९.२१) इति च। दूरव्यवहितत्वाच्च न काम्येषु 'एतान्यपी'ति व्यपदेशः॥ ६॥**

आनन्दगिरिकृतव्याख्या

**दर्शयति—** सासङ्गस्येति। **व्यावर्त्यं कीर्तयति—** न त्विति।

**एतान्यपीत्यादिवाक्यं न नित्यकर्मविषयमिति मतमुपन्यस्यति—**अन्य इति। **न चेदिदं नित्यकर्मविषयम् , किंविषयं तर्हि? इत्याशङ्क्य वाक्यमवतार्य व्याकरोति—**एतानीत्यादिना। **नित्यानामफलत्वमुपेत्य यच्चोद्यम् , तदयुक्तमिति दूषयति—** तदसदिति। **यत्तु काम्यान्यपि कर्तव्यानीति, तन्निरस्यति—**नित्यान्यपीति। **किञ्च काम्यानां भगवता निन्दितत्वान्न तेषु मुमुक्षोरनुष्ठानमित्याह—**दूरेणेति। **किञ्च मुमुक्षोरपेक्षितमोक्षापेक्षया विरुद्धफलत्वात् काम्यकर्मणां, न तेषु तस्यानुष्ठानमित्याह—**यज्ञार्थादिति। **काम्यानां बन्धहेतुत्वं निश्चितमित्यत्रैव पूर्वोत्तरवाक्यानुकूल्यं दर्शयति—**त्रैगुण्येति। **किञ्च पूर्वश्लोके यज्ञादिनित्यकर्मणां प्रकृतत्वाद् , एतच्छब्देन सन्निहितवाचिना परामर्शात् , काम्यकर्मणां च 'काम्यानां कर्मणाम्' इति व्यवहितानां सन्निहितपरामर्शकैतच्छब्दाविषयत्वान्न काम्यकर्माणि एतान्यपीति व्यपदेशमर्हन्तीत्याह—**दूरेति॥ ६॥

भाष्यार्कप्रकाशः

कर्माणि मुमुक्षोरज्ञस्य कर्मण्यधिकृतस्य कर्तव्यानीत्यपिशब्दार्थः, न तु समुच्चयार्थोऽपिशब्दोऽत्रेत्याह—**न त्विति**। एतानि पूर्वोक्तकर्माणि कर्तव्यानि, अपिशब्दादन्यान्यपि कर्तव्यानीति नार्थ इति भावः।

**एतेन** सङ्गं त्यक्त्वा फलं त्यक्त्वा च कृतान्येव यज्ञदानतपांसि पावनानि, न तु सकामानीति **सिद्धम्**। अत एव 'मनीषिणां फलानभिसन्धीना'मिति भाष्यकारैरुक्तम्। यदुक्तं 'नापूर्वार्थवचन'मिति, तत्र कैः कथमिहापूर्वार्थो वर्णित इति शङ्कायां तन्मतमुपन्यस्य दूषयति—**अन्ये त्विति। अत इति**। नित्यकर्मणां यज्ञादीनां फलत्यागकथनस्यायुक्तत्वादित्यर्थः। **एतान्यपीति**। तान्येतान्यपीत्यर्थः। काम्यान्यपि कर्माणि फलं त्यक्त्वा कर्तव्यानीति 'एतानि कर्माणि कर्तव्यानी'त्यस्यार्थः। अपिशब्दार्थमाह—**किमुतेति**। यज्ञदानतपांसि कर्तव्यानीति किं पुनर्वक्तव्यमित्यर्थः। **उपपादितत्वादिति**। केन वचनेनेत्यत आह—**यज्ञ इति**। पावनत्वफलस्योक्तत्वादिति भावः। 'अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फल'मित्यनेन वक्ष्यते चेति बोध्यम्। **जिहासोः** हातुं त्यक्तुमिच्छोर्जिहासोः। कुतो न प्रसङ्गः? अत आह—**दूरेणेति**। 'दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जये'ति श्लोकेनेति भावः। ननु नित्यकर्मस्वेवास्य बन्धहेतुत्वशङ्का, न तु काम्यकर्मसु इत्यत आह—**यज्ञार्थादिति**। 'यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः' इति श्लोक ईश्वरार्थं कर्मैवाबन्धकम् , काम्यं कर्म तु बन्धकमेवेति निश्चयेनोक्तत्वादिति भावः। एवं काम्यकर्मणां बन्धकत्वादेव 'त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुने'त्युक्तमित्याह—**त्रैगुण्येति**। काम्यकर्मणां यज्ञादीनां स्वर्गादिफलप्रदानद्वारा जन्ममरणादिसंसारहेतुत्वं च स्फुटमुक्तमित्याह—**त्रैविद्या इति**। 'त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते' 'ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ती'ति। ननु काम्यानां कर्मणामिति प्रकृतत्वात् तत्परामर्श एतच्छब्दस्योचित इत्यत आह— **दूरेति**। अत्यन्तं व्यवहितत्वादित्यर्थः। अव्यवहितयज्ञादित्यागे

**नियतस्य तु संन्यासः कर्मणो नोपपद्यते।**
**मोहात् तस्य परित्यागस्तामसः परिकीर्तितः॥७॥**

**तस्मादज्ञस्याधिकृतस्य मुमुक्षोः—** नियतस्येति। नियतस्य **तु नित्यस्य** संन्यासः **परित्यागः कर्मणो नोपपद्यते, अज्ञस्य पावनत्वस्येष्टत्वात्।** मोहाद् **अज्ञानात्** तस्य **नियतस्य परित्यागः – नियतं चावश्यं कर्तव्यम् , त्यज्यते**

आनन्दगिरिकृतव्याख्या

**नित्यकर्मणामवश्यकर्तव्यत्वमुक्तमुपजीव्यापेक्षितं [१]पूरयन्ननन्तरश्लोकमवतारयति—**तस्मादिति। **ननु कश्चिन्नियतमपि कर्म त्यजन् उपलभ्यते, तत्राह—**मोहादिति। अज्ञानं **पावनत्वापरिज्ञानम्। अज्ञस्य नित्यकर्मत्यागो मोहादित्येतदुपपादयति—**नियतं चेति।

भाष्यार्कप्रकाशः

कारणाभावाद् , दूरव्यवहितकाम्यपरामर्शे प्रमाणाभावाच्चेति भावः। तस्मात् काम्येषु एतान्यपीति न व्यपदेशः। एतान्यपीत्यनेन काम्यानि नोच्यन्त इत्यर्थः। तस्माद् **एतान्यपि** यज्ञादिकर्माणि कर्तव्यानीत्येवार्थः। **तु**शब्दस्तु विशेषार्थः। फलाभिसन्धिरहितान्येव यज्ञादीनि कर्तव्यानि, न तु तत्सहितानीत्ययं विशेषः तुशब्देनोच्यते। बन्धकान्यपि कर्तव्यान्येवेति अपिशब्दार्थ इत्याचार्यैरेव दर्शितम्। एतेन 'यज्ञदानतपःकर्म न त्याज्यमिति चापरे' इत्युक्तकर्मफलत्यागपक्ष एव **श्रीकृष्णा**भिमत इति सिद्धम्॥६॥

**नियतस्येति**। अथ 'त्रिविधः सम्प्रकीर्तितः' इत्युक्तत्यागत्रैविध्यं दर्शयन् 'त्याज्यं दोषवदि'ति कर्मसंन्यासपक्षं दूषयति— **नियतस्येति**। नियतस्य कर्मणः संन्यासस्तु नोपपद्यते। कस्य नियतं कर्मेत्यत आह—**अज्ञस्येति**। अज्ञोऽपि यः कर्मण्यनधिकृतः शूद्रादिः, यश्च द्विजोऽपि यमाद्यर्थं संन्यस्तवान् न तस्य नियतमित्याह— **अधिकृतस्येति**। कथमधिकृतोऽज्ञः कर्म नियतं त्यक्तुमिच्छतीत्याह— **मुमुक्षोरिति**। कर्मणो बन्धकत्वधिया बन्धान्मुमुक्षुः नियतं कर्म परित्यजेदज्ञानादिति भावः। यस्मात् फलाभिसन्धिरहितं यज्ञादिकर्म पावनत्वात् कार्यमज्ञस्य तस्मादिति **तस्मा**च्छब्दार्थः। **नित्यस्ये**ति नैमित्तिकस्याप्युपलक्षणम्। यज्ञादीनि नित्यकर्माणि ब्राह्मणस्य देवयज्ञपितृयज्ञभूतयज्ञमनुष्ययज्ञब्रह्मयज्ञाख्यपञ्चयज्ञानाम् अहरहः कर्तव्यत्वात्। 'वसन्ते वसन्ते ज्योतिषा यजेते'ति ज्योतिष्टोमस्तु नैमित्तिकः। इज्याध्ययनदानानि त्रीणि ब्राह्मणस्य स्वधर्मतया विहितानीति दानं च नित्यकर्मैव। **अध्ययनं** ब्रह्मयज्ञो यज्ञेष्वन्तर्भूतम्। इज्या **देवपूजा** वैश्वदेवादिर्यज्ञत्वेन प्रसिद्धैव। **तपः** एकादश्युपवासादिः। तच्च नियतमेव, तदकरणे प्रत्यवायदर्शनात्। 'एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि' इत्यादिधर्मशास्त्रात्।

एवं नित्यस्य यज्ञादिरूपस्य कर्मणः परित्यागो मुमुक्षोर्नोपपद्यते, परित्यागे प्रत्यवायसम्भवात् , करणे च पावनत्वरूपफलसम्भवात्। ननु फलानभिसन्धीनां किं पावनत्वफलेनेत्यत आह— **तस्येति**। मुमुक्षोर्हि मोक्षफले तावदिच्छाऽस्तीति मोक्षफलमिष्टम्। तदर्थं ज्ञानं चेष्टम् , ज्ञानं विना मोक्षासम्भवात्। ज्ञानार्थं च चित्तशुद्धिलक्षणं पावनत्वमिष्टम्। पावनत्वार्थं च पावनं नित्यकर्मेष्टमिति पावनस्य नित्यकर्मणो मुमुक्षोरिष्टत्वादित्यर्थः। न चैवं कथं फलाभिसन्धिराहित्यमिति वाच्यम् ; स्वर्गादितत्तन्नियतफलाभिसन्धिराहित्यस्यैव विवक्षितत्वात्। स्वर्गादिफलं हि बन्धकत्वादनपेक्षितव्यम्। पावनत्वादिकं तु मोचकत्वादपेक्ष्यमेव। न हि फलस्य फलत्वेन रूपेण दोषवत्त्वम् , किन्तु बन्धकत्वेन रूपेणैव। अन्यथा मोक्षोऽपि फलत्वाद् दोष एव स्यात्।

**अज्ञानादिति**। नित्यं कर्म फलाभिसन्धिरहितं चेन्न बन्धकम् , त्यक्तं चेन्नरकावहमित्येवंरूपविवेकाभावादित्यर्थः। एतेन आत्मविदामात्मज्ञानान्नियतकर्मत्याग उचित एवेति ज्ञायते। **विप्रतिषिद्धं** विरुद्धम् , कर्तव्यत्वत्याज्यत्वयोः सामानाधिकरण्यासम्भवात्

१. कर्मिणि एवाधिकृतानपेक्ष्यैते विकल्पाः, मोहात् कर्मपरित्यागप्रसक्तेस्तेष्वेव संभवात् , न तु ज्ञाननिष्ठान् संन्यासिनोऽपेक्ष्य इति सयुक्तिकं पूर्वमुक्तत्वात् तत्त्ववित्साधारण्यमस्य मा भूदिति इदमपेक्षितपूरणम्। माध्वास्तु ज्ञाननिष्ठस्य संन्यासिनोऽपि ज्ञानयज्ञविद्यादानब्रह्मचर्यादितपस्संभवात् तस्यापि यथासंभवयज्ञादिकर्तव्यतापरतया इदं वाक्यं योजयन्ति। तन्मते 'यस्त्वात्मरतिरेव स्यात्....तस्य कार्यं न विद्यते' इति चासंप्रज्ञातसमाधिस्थस्य कार्याभावोक्तिः। तत्तु ज्ञानादीनां यज्ञत्वोक्तेः स्तुत्यर्थत्वात् , अत्र च मुख्ययज्ञग्रहणौचित्यात् , 'तस्य कार्यं न विद्यते' इत्यस्यासंप्रज्ञातसमाधिस्थपरत्वेन संकोचे कारणाभावाच्चायुक्तम्।

**दुःखमित्येव यत् कर्म कायक्लेशभयात् त्यजेत्।**
**स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥ ८॥**
**कार्यमित्येव यत् कर्म नियतं क्रियतेऽर्जुन !।**
**सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः॥९॥**

**चेति विप्रतिषिद्धम्; अतो मोहनिमित्तः परित्यागः तामसः परिकीर्तितः। मोहश्च तम इति॥७॥**

**किञ्च**— दुःखमिति। **दुःखमित्येव यत् कर्म** कायक्लेशभयात् **शरीरदुःखभयात्** त्यजेत् **परित्यजेत्, स कृत्वा** राजसं **रजोनिर्वृत्तं त्यागं** नैव त्यागफलं **ज्ञानपूर्वकस्य सर्वकर्मत्यागस्य फलं मोक्षाख्यं** न लभेत् **नैव लभेत॥८॥**

**कः पुनः सात्त्विकस्त्यागः इत्याह—**कार्यमिति। कार्यं **कर्तव्यमित्येव यत् कर्म** नियतं **नित्यं** क्रियते **निर्वर्त्यते, हे अर्जुन ! सङ्गं त्यक्त्वा फलं चैव।** [१]**नित्यानां कर्मणां फलवत्त्वे भगवद्वचनं प्रमाणमवोचाम। अथवा यद्यपि फलं न श्रूयते नित्यस्य कर्मणः, तथापि नित्यं कर्म कृतम् आत्मसंस्कारं प्रत्यवायपरिहारं वा फलं करोत्यात्मन इति**

आनन्दगिरिकृतव्याख्या

**नित्यकर्मत्यागस्य मोहकृतत्वे कुतस्तामसत्वमित्याशङ्क्याह—**मोहश्चेति॥७॥

**इतश्च नित्यकर्मत्यागो नाज्ञस्य सम्भवतीत्याह—**किञ्चेति। **ननु मोहं विनैव दुःखात्मकं कर्म कायक्लेशभयात् त्यजति। करणानि हि कार्यं जनयन्ति श्राम्यन्ति च। तथा च न तत्त्यागस्तामसो युक्तः? तत्राह—**दुःखमित्येवेति। **यत् कर्म दुःखात्मकमशक्यसाध्यमित्येवालोच्य ततो निवर्तते, देहस्येन्द्रियाणां च क्लेशात्मनो भयात् त्यजति, स तत् त्यक्त्वा रजोनिमित्तं त्यागं कृत्वाऽपि न तत्फलं मोक्षं लभते, किन्तु कृतेनैव राजसेन त्यागेन तदनुरूपं नरकं प्रतिपद्यत इत्याह—**दुःखमित्येवेत्यादिना॥८॥

**कर्मत्यागस्तामसो राजसश्चेति द्विविधो दर्शितः, सम्प्रति सात्त्विकं त्यागं प्रश्नपूर्वकं वर्णयति—**कः पुनरिति। कर्तव्यमित्येवेति **एवकारेण नित्यस्य** [२]**भाव्यान्तरं निषिध्यते। नित्यानां विध्युद्देशे फलाश्रवणात् तेषां फलं त्यक्त्वेत्ययुक्तमित्याशङ्क्याह—**नित्यानामिति। **फलं त्यक्त्वेत्यस्य विधान्तरेण तात्पर्यमाह—**अथवेति। **न हि विधिना कृतं कर्मानर्थकम्, विध्यानर्थक्यात्। तेन श्रौतफलाभावेऽपि नित्यं**

भाष्यार्कप्रकाशः

इति भावः। **अत इति**। कर्तव्यकर्मत्यागस्य विरुद्धत्वादित्यर्थः। विदुषां संन्यासिनां तु नैव कर्तव्यं कर्मेति तत्त्यागो न विरुद्धः, प्रत्युत तत्करणमेव विरुद्धमिति भावः। **मोहनिमित्त इति**। मोहो **निमित्तं** कारणं यस्य स तथोक्तः। न तु विदुषां संन्यासिनामिवात्मज्ञाननिमित्तः इति भावः। **तामस इति**। तमोगुणप्रवृत्तः। तमःकार्यत्वान्मोहस्येति भावः॥७॥

**दुःखमिति**। यः कर्म दुःखमिति मत्वैव कायक्लेशभयात् त्यजेत्, स राजसं त्यागं कृत्वा त्यागफलं नैव लभेत्। अज्ञानपूर्वकः कर्मत्यागः तामसत्यागः। कायक्लेशभयदुःखपूर्वकः कर्मत्यागस्तु राजसत्यागः। अस्मिन्नेव त्यागद्वये 'त्याज्यं दोषवद्' इति पक्षोऽन्तर्भूतः। अतः स पक्षो दुष्ट एव। अज्ञस्य कर्मण्यधिकृतस्य नियतकर्मपरित्यागेन प्रत्यवायसम्भवान्मोक्षासम्भवाच्च। तस्मादज्ञः कर्मण्यधिकृतो नियतं कर्मावश्यं कुर्यात्। अज्ञस्यापि संन्यस्तस्य न कर्माधिकारः, अधिकृतस्येति विशेषणात्। अतोऽज्ञस्य संन्यासिनोऽपि नियतकर्मत्यागो न प्रत्यवायावहः। परन्तु अज्ञस्य तस्य संन्यासापेक्षया कर्मयोग एव समीचीनः, पावनत्वात् कर्मयोगस्य, 'कर्मयोगो विशिष्यते' इत्युक्तत्वाच्च। तस्मादयुक्त एवाज्ञस्य मोहात् कायक्लेशभयाच्च कर्मत्यागः। **सर्वकर्मत्यागस्येति**। परमार्थसंन्यासस्येत्यर्थः। विद्वत्संन्यासस्येति यावत्॥ ८॥

**कार्यमिति**। हे अर्जुन ! नियतं यत् कर्म सङ्गं त्यक्त्वा फलं च त्यक्त्वा कार्यमित्येव क्रियते, स त्यागः सात्त्विको मतः। **आत्म-**

१. 'एतद् नित्यानां' इति पा.। २. **भाव्यान्तरं** साध्यान्तरम्, फलमिति यावत्।

**कल्पयत्येवाज्ञः। तत्र तामपि कल्पनां निवारयति 'फलं त्यक्त्वा' इत्यनेन। अतः साधूक्तम्— सङ्गं त्यक्त्वा फलं चेति। स** त्यागो **नित्यकर्मसु सङ्गफलपरित्यागः** सात्त्विकः **सत्त्वनिर्वृत्तो** मतः **अभिमतः।**

**ननु कर्मपरित्यागस्त्रिविधः संन्यास इति च प्रकृतः। तत्र तामसो राजसश्चोक्तस्त्यागः। कथमिह सङ्गफलत्यागस्तृतीयत्वेनोच्यते? यथा – त्रयो ब्राह्मणा आगताः; तत्र षडङ्गविदौ द्वौ; क्षत्रियस्तृतीयः इति, तद्वत्। नैष दोषः; त्यागसामान्येन स्तुत्यर्थत्वात्। अस्ति हि कर्मसंन्यासस्य फलाभिसन्धित्यागस्य च त्यागत्वसामान्यम्। तत्र राजसतामसत्वेन कर्मत्यागनिन्दया कर्मफलाभिसन्धित्यागः सात्त्विकत्वेन स्तूयते—'स त्यागः सात्त्विको मतः' इति॥९॥**

**यस्त्वधिकृतः सङ्गं त्यक्त्वा फलाभिसन्धिं च नित्यं कर्म करोति, तस्य फलरागादिना अकलुषीक्रियमाणमन्तःकरणं नित्यैश्च कर्मभिः संस्क्रियमाणं विशुध्यति। तद् विशुद्धं प्रसन्नम् आत्मालोचनक्षमं भवति। तस्यैव नित्य-**

आनन्दगिरिकृतव्याख्या

**कर्म विधितोऽनुतिष्ठन्नात्मानमजानन् अनुपहतमनस्त्वोक्त्या[1] तस्मिन् कर्मण्यात्मसंस्कारं फलं कल्पयति, तदकरणे प्रत्यवायस्मृत्या तत्करणं कर्तुरात्मनः तन्निवृत्तिं करोतीति वा। नित्ये कर्मण्युक्तां कल्पनामनु[2]निष्पादिफलकल्पनां च 'फलं त्यक्त्वे'त्यनेन भगवान् निवारयतीत्यर्थः। नित्यकर्मसु फलत्यागोक्तेः सम्भवे फलितमाह—**अत इति।

**कर्मतत्फलत्यागस्य त्यागसंन्यासशब्दाभ्यां प्रकृतस्य 'त्यागो ही'ति त्रैविध्यं प्रतिज्ञाय, प्रतिज्ञानुरोधेन द्वे विधे व्युत्पाद्य, तृतीयां विधां तद्विरोधेन व्युत्पादयतो भगवतोऽकौशलमापतितमिति शङ्कते—** नन्विति। **प्रक्रमप्रतिकूलमुपसंहारवचनमनुचितमित्यत्र दृष्टान्तमाह—** यथेति। **पूर्वोत्तरविरोधेन प्राप्तमकौशलं प्रत्यादिशति—** नैष दोष इति। **कर्मत्यागफलत्यागयोस्त्यागत्वेन सादृश्यात् कर्मत्यागनिन्दया तत्फलत्यागस्तुत्यर्थमिदं वचनमित्युपगमान्न विरोधोऽस्तीत्युक्तमेव व्यक्तीकुर्वन्नादौ त्यागसामान्यं विशदयति—** अस्तीति। **सति सामान्ये निर्देशस्य स्तुत्यर्थत्वं समर्थयते—** तत्रेति॥९॥

**एवं पूर्वापरविरोधं पराकृत्यानन्तरश्लोकतात्पर्यमाह—**यस्त्विति। फलरागादिनेत्या**दिशब्देन कर्मस्वरूपासङ्गो गृह्यते।अन्तःकरणम् अकलुषीक्रियमाणमिति च्छेदः। विशुद्धेऽन्तःकरणे किं स्यादित्याशङ्क्याह—** विशुद्धमिति। **मलविकलत्वं** विशुद्धत्वम्, [3]**संस्कारवत्त्वं**

भाष्यार्कप्रकाशः

**संस्कारं** चित्तशुद्धिम्। **प्रत्यवायो** नरकादिः। **आत्मनः** स्वस्य। **अज्ञ इति**। आत्मतत्त्वानभिज्ञ इत्यर्थः। आत्मविद् हि स्वस्य चित्तस्य चासम्बन्धं पश्यन् कथं चित्तशुद्धिं कामयेत? कथं वा अपहतपाप्मन्यात्मनि प्रत्यवायपरिहारं कामयेत? **नित्यकर्मस्विति**। यत् कर्म क्रियत इति प्रागुक्तम्, तेष्वित्यर्थः। एवं च **सः** इत्यस्य तन्नित्यकर्मविषय इत्यर्थ इति सिद्धम्। तन्नित्यकर्मगतसङ्गफलविषय इति वा। एतेन सर्वकर्मफलत्यागरूपो यः सात्त्विकत्यागः स एव 'यज्ञदानतपःकर्म न त्याज्यमिति चापरे' इति श्लोकपरार्धोक्तः पक्षः, स एव च भगवदभिमत इति सिद्धम्। ततश्च कर्मण्यधिकृतः सर्वोऽप्यज्ञो नित्यं कर्म कृत्वा फलमेव परित्यजेत्, न तु कर्म संन्यसेदिति फलितम्।

ननु त्यागस्त्रिविधः सम्प्रकीर्तित इति त्यागशब्देन संन्यास एव ग्रहीतव्यः, 'नियतस्य तु संन्यासः' इत्युत्तरानुरोधात्, संन्यासस्य प्रकृतत्वाच्च। तथा सति संन्यासः कर्मत्यागरूप एवेति कृत्वा कर्मत्यागविषया एव त्रयः प्रकारा दर्शनीयाः, न तु कर्मत्यागविषयौ द्वौ, फलत्यागविषय एकश्चेति; फलत्यागस्यासंन्यासत्वात्। प्रकृते तु राजसतामसत्यागौ कर्मत्यागावेव दर्शितौ; सात्त्विकत्यागस्तु फलत्यागो दर्शित इति कथं संन्यासस्य कर्मत्यागरूपस्य त्रैविध्यमिति चोदयति—**नन्विति**। परिहरति— **नैष दोष इति**। हेतुमाह— **त्यागेति। त्यागसामान्येनेति**। परित्यागांशमात्रसादृश्येनेत्यर्थः। संन्यासत्यागयोरिति भावः। तदेव सामान्यं दर्शयति—**अस्ति हीति**। स्तुतिं दर्शयति—**तत्रेति**। संन्यासत्यागयोर्मध्य इत्यर्थः। राजसात् तामसाच्च कर्मत्यागात् सात्त्विकः फलत्याग उत्कृष्ट इति स्तुत्यर्थं फलत्यागस्यापि संन्यासभेदान्तःप्रवेशनमिति भावः॥९॥

---

१. 'अपि वा दर्विहोमेनानुपहतमना एव भवति' इति श्रुतौ अनुपहतमनस्त्वं नित्यकर्मणः फलमुक्तम्। तच्च पापेनोपहत्यभावः। सोऽयं दोषापनयनलक्षणः संस्कारः। २. 'निष्पादित' इति पा.। ३. 'संस्क्रियमाणत्वं' इति पा.।

**न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते।**
**त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः॥१०॥**

**कर्मानुष्ठानेन विशुद्धान्तःकरणस्यात्मज्ञानाभिमुखस्य क्रमेण यथा तन्निष्ठा स्यात् तद् वक्तव्यमित्याह—** नेति। **न द्वेष्टि** अकुशलम् **अशोभनं काम्यं कर्म शरीरारम्भद्वारेण संसारकारणम्, 'किमनेन?' इत्येवम्।** कुशले **शोभने नित्ये कर्मणि – 'सत्त्वशुद्धिज्ञानोत्पत्तितन्निष्ठाहेतुत्वेन मोक्षकारणमिदम्' इत्येवं नानुषज्जते। तत्रापि प्रयोजनमपश्यन्** अनुषङ्गं **प्रीतिं न करोतीत्येतत्। कः पुनरसौ?** त्यागी। **पूर्वोक्तेन सङ्गफलपरित्यागेन तद्वान् त्यागी। यः कर्मणि सङ्गं त्यक्त्वा तत्फलं च नित्यकर्मानुष्ठायी स त्यागी। कदा पुनरसावकुशलं कर्म न द्वेष्टि, कुशले च नानुषज्जत इति? उच्यते—** सत्त्वसमाविष्टः **यदा सत्त्वेनात्मानात्मविवेकविज्ञानहेतुना समाविष्टः संव्याप्तः, संयुक्त इत्येतत्। अत एव च** मेधावी **मेधया आत्मज्ञानलक्षणया प्रज्ञया संयुक्तः तद्वान् मेधावी। मेधावित्वादेव** छिन्नसंशयः **छिन्नोऽविद्याकृतः संशयो यस्य 'आत्मस्वरूपावस्थानमेव परं निःश्रेयससाधनम्, नान्यत् किञ्चिद्' इत्येवं निश्चयेन छिन्नसंशयः।**

आनन्दगिरिकृतव्याख्या

प्रसन्नत्व**मिति भेदः**। क्रमेण **श्रवणाद्यावृत्तिद्वारेणेत्यर्थः**। तन्निष्ठे**त्यात्मज्ञाननिष्ठोक्ता। काम्यकर्मणि त्याज्यत्वेन द्वेषमभिनयति—**किमिति। **उभयत्र द्वेषं प्रीतिं च न करोतीति सामान्येनोक्तं कर्तारं प्रश्नपूर्वकं विशेषतो निर्दिशति—** कः पुनरिति। **त्यागीत्युक्तं त्यागिनमभिव्यनक्ति—**पूर्वोक्तेनेति। **कर्मणि सङ्गस्य तत्फलस्य च त्यागेनेति यावत्। उक्तमेव त्यागिनं विवृणोति—**यः कर्मणीति। **तत्फलं त्यक्त्वेति सम्बन्धः। काम्ये निषिद्धे च कर्मणि बन्धहेतुरिति न द्वेष्टि, नित्ये नैमित्तिके च मोक्षहेतुरिति न प्रीयते। तत्र कालविशेषं पृच्छति—**कदेति। **नित्यादिकर्मणा फलाभिसन्धिवर्जितेन क्षपितकल्मषस्य** सत्त्वं **यथार्थग्रहण[१]सामर्थ्यमुद्बुध्यते। [२]तेन समावेशदशायामुक्तप्रीतिद्वेषयोरभावो भवतीत्याह—**उच्यत इति। अत एवेति। **समुद्बुद्धयथार्थग्रहण[३]सामर्थ्यसमाविष्टत्वादित्यर्थः। छिन्नसंशयत्वमेव विशदयति—**आत्मेति। **[४]परं निःश्रेयसम्, तस्य च साधनं सम्यग्ज्ञानमेवेति योजना।**

भाष्यार्कप्रकाशः

**नेति**। राजसतामसत्यागिनौ निन्दितौ। यस्तु सात्त्विकत्यागी तस्य परमार्थसंन्यासज्ञाननिष्ठाप्राप्तिरनेन श्लोकेनोच्यत इत्याह—**तस्येति। तन्निष्ठा** आत्मज्ञाननिष्ठा। त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयश्च सन्नकुशलं कर्म न द्वेष्टि, कुशले कर्मणि नानुषज्जते। किं तदकुशलं कर्मेत्यत आह—**काम्यमिति**। कुतस्तस्याशोभनत्वम्? अत आह—**शरीरेति**। शरीरारम्भकत्वात् संसारकारणमित्यर्थः। कथं द्वेष्टीत्यत आह—**किमनेनेत्येवमिति। अनुषङ्गं न करोतीति**। अनुषङ्गप्रकारं दर्शयति—**सत्त्वशुद्धीति**। संसारकारणमिदमिति काम्ये न द्वेषः, मोक्षकारणमिदमिति नित्ये नापि प्रीतिस्त्यागिन इत्यर्थः। द्विष अप्रीताविति धातोः द्वेषोऽप्रीतिः। कर्तुस्त्यागिन आकाङ्क्षामाह—**कः पुनरसाविति। त्यागेनेति**। उपलक्षित इति शेषः। **तद्वानिति**। त्यागवानित्यर्थः। कोऽसौ त्यागी? अत आह—**य इति। नित्यकर्मानुष्ठायीति**। नित्यकर्मानुष्ठानशील इत्यर्थः। **सत्त्वेन** गुणविशेषेण। कीदृशेनेत्यत आह—**आत्मेति**। आत्मानात्मविवेकज्ञानस्य हेतुना कारणभूतेन। 'सत्त्वात् सञ्जायते ज्ञान'मित्युक्तत्वादिति भावः। नित्यकर्मानुष्ठानेन चित्ते परिशुद्धे सति सत्त्वगुणोद्रेको भवतीत्यर्थः। यद्वा चित्तशुद्धिरेव सत्त्वोत्कर्षः। **अत एवेति**। सत्त्वनिष्ठत्वादित्यर्थः। मेधा अस्यास्तीति मेधावी, 'अस्मायामेधा' इति विनिः। मेधायाः स्वरूपमाह—**आत्मज्ञानेति**। आत्मज्ञानमिह मेधाशब्दार्थः। छिन्नः संशयो यस्य स **छिन्नसंशयः** नित्यकर्म बन्धकं वा, न वेत्येवमादिरूपः संशयः। यद्वा आत्मा कर्ता वा उताकर्तेत्येवमादिरूपः। केन कृतोऽयम्? अत आह—**अविद्याकृत इति**। अज्ञानजन्य इत्यर्थः। केन छिन्नः? अत आह—**निश्चयेनेति**। निश्चयज्ञानेनेत्यर्थः। निश्चयस्याकारमाह—**आत्मेति। आत्मस्वरूपेणावस्थानम्**

---

१.'समर्थम्' इति पा.। २. उक्तसत्त्वेनेत्यर्थः। ३. 'समर्थ' इति. पा। ४. आत्मस्वरूपावस्थानस्यैव मोक्षत्वात् भाष्ये साधनपदासंगतिमाशङ्क्य योजयति—**परमिति**।

**न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः।**
**यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते॥ ११॥**

**योऽधिकृतः पुरुषः [१]पूर्वोक्तेन प्रकारेण कर्मयोगानुष्ठानेन क्रमेण संस्कृतात्मा सन् जन्मादिविक्रियारहितत्वेन निष्क्रियमात्मानमात्मत्वेन सम्बुद्धः, स सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन् न कारयन् आसीनो नैष्कर्म्यलक्षणां ज्ञाननिष्ठामश्नुत इत्येतत् पूर्वोक्तस्य कर्मयोगस्य प्रयोजनमनेन श्लोकेनोक्तम्॥ १०॥**

**यः पुनरधिकृतः सन् देहात्माभिमानित्वेन देहभृद् अज्ञः अबाधितात्मकर्तृत्वविज्ञानतया 'अहं कर्ता' इति निश्चितबुद्धिः तस्याशेषकर्मपरित्यागस्याशक्यत्वात् , कर्मफलत्यागेन चोदितकर्मानुष्ठान एवाधिकारः, न तत्त्यागे इत्येतमर्थं दर्शयितुमाह—** न हीति। **न** हि **यस्माद्** देहभृता, **देहं बिभर्तीति देहभृद् , देहात्माभिमानवान् देहभृद्**

आनन्दगिरिकृतव्याख्या

**'न द्वेष्टी'त्यादिना श्लोकेनोक्तमर्थं संक्षिप्यानुवदति—**योऽधिकृत इति। पूर्वोक्तप्रकारेणेति। **कर्मणि तत्फले च सङ्गत्यागेनेत्यर्थः। कर्मात्मनो योगस्यानुष्ठानेन संस्कृतात्मा सन् क्रमेण श्रवणाद्यनुष्ठानद्वारेण कूटस्थं ब्रह्म प्रत्यक्त्वेन सम्बुद्धः इति सम्बन्धः। परस्य निष्क्रियत्वे हेतुमाह—**जन्मादीति। **उक्तज्ञानवतः सर्वकर्मत्यागद्वारा मुक्तिभाक्त्वं दर्शयति—**स सर्वेति॥ १०॥

**आत्मज्ञानवतः सर्वकर्मत्यागसम्भावनामुक्त्वा तद्धीनस्य तदसम्भवे हेतुवचनत्वेनानन्तरश्लोकमवतारयति—**यः पुनरिति। **न बाधितमात्मनि कर्तृत्वविज्ञानमस्येत्यज्ञस्तथा, तस्य भावस्तत्ता तयेति यावत्। एतमर्थं दर्शयितुमज्ञस्य सर्वकर्मसंन्यासासम्भवे हेतुमाहेति योजना। यस्मादित्यस्य तस्मादित्युत्तरेण सम्बन्धः। विवेकिनोऽपि देहधारितया देहभृत्त्वाविशेषे कर्माधिकारः स्यादित्याशङ्क्याह— न**

भाष्यार्कप्रकाशः

आत्मज्ञाननिष्ठेति यावत्। एवकारार्थमाह— **नान्यत्किञ्चिदिति**। अन्यन्नित्यकर्मानुष्ठानादिकमित्यर्थः।

फलितार्थमाह— **य इति**। यः कर्मण्यधिकृतोऽज्ञः पुरुषः स पूर्वोक्तप्रकारेण कर्मयोगमनुष्ठाय, तेन क्रमात् **संस्कृतात्मा** शुद्धचित्तःसन् जन्मजरामरणादिविक्रियारहितत्वेन हेतुना निष्क्रियमात्मानं प्रत्यञ्चमेवात्मत्वेन **संबुद्धो** जानन् सन् सर्वकर्माणि मनसा संन्यस्य, किञ्चिदपि कर्म स्वयं नैव कुर्वन्नन्यैरपि न कारयन् तूष्णीमासीनःसन् , नैष्कर्म्यलक्षणां परमार्थसंन्यासस्वरूपां ज्ञाननिष्ठाम् **अश्नुते** प्राप्नोति इत्येतत् पूर्वश्लोकोक्तकर्मयोगस्य प्रयोजनम् अनेन श्लोकेनोक्तम्। पूर्वश्लोकोक्तो यः सात्त्विकत्यागः स एव कर्मयोगः। यः पूर्वं 'संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ' इत्यादिनोक्तः, तस्य च कर्मयोगस्य चित्तशुद्धिज्ञानप्राप्तिद्वारा मोक्षः फलमिति तत्रैवोक्तम्। तदेव फलमिह साक्षादनेन श्लोकेनोक्तम्। किमिति? त्यागात् सत्त्वसमावेशः, सत्त्वसमावेशादात्मज्ञानम् , तस्माच्च संशयनिरासः, ततो नित्यकाम्यकर्मप्रीतिद्वेषाभावपूर्वकात्मज्ञाननिष्ठेति। एवं कर्मयोगिनः क्रमेण ज्ञाननिष्ठाप्राप्तौ सत्यां ज्ञाननिष्ठस्य यत् फलं पूर्वमुक्तम्— गुणातीतत्वं विदेहकैवल्यं च, तदुभयमस्य भवतीति। कर्मयोगिनः फलं ज्ञाननिष्ठाप्राप्तिद्वारा मोक्ष एवेति कृत्वा ज्ञाननिष्ठैव कर्मयोगस्य फलम्। तच्चेह प्रतिपादितमिति भावः॥ १०॥

**न हीति**। हि देहभृता अशेषतः कर्माणि त्यक्तुं न शक्यम्। यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते शिष्टैः। अबाधितमात्मकर्तृत्वविज्ञानम् 'अहं कर्ते'त्येवंरूपं ज्ञानं यस्य तत्तया हेतुना। **तस्येति**। कर्मण्यधिकृतस्य कर्त्रात्मदर्शिनोऽज्ञस्येत्यर्थः। **कर्मफलत्यागेनेति**। कर्मफलत्यागपूर्वकमित्यर्थः। **चोदितकर्मानुष्ठान एवेति**। विहितकर्मानुष्ठान इत्यर्थः। **तत्त्याग इति**। कर्मत्याग इत्यर्थः। **देहभृदिति**। न हि दण्डमिवात्मा देहं बिभर्ति येन देहभृदित्युच्येत। नापि पय इव घट आत्मा देहं बिभर्ति। किन्तु 'ममायं देहः' इति, 'मनुष्योऽह'मिति चाहंममाभिमानपूर्वकं देहं बिभर्त्यात्मा। यदा पुनरात्मनः शरीरेऽहंममाभिमानाभावः, तदा सुषुप्तौ शरीरं हि निश्चेष्टतया वर्तते। अत आह—**देहात्माभिमानवान् देहभृदित्युच्यत इति**। कः पुनर्नोच्यते देहभृदिति? अत आह—**न विवेकीति**। नन्विह

१. 'पूर्वोक्तप्रकारेण' इति पाठः व्याख्यानाभिमतो भाति।

**उच्यते, [1]न हि विवेकी। स हि 'वेदाविनाशिनम्' (भ.गी.२.२१)इत्यादिना कर्तृत्वाधिकारान्निवर्तितः। अतस्तेन देहभृता अज्ञेन न शक्यं** त्यक्तुं **संन्यसितुं कर्माणि** अशेषतो **निःशेषेण। तस्माद्** यस्तु **अज्ञोऽधिकृतो नित्यानि कर्माणि कुर्वन्** कर्मफलत्यागी **कर्मफलाभिसन्धिमात्रसंन्यासी स त्यागीत्यभिधीयते कर्म्यपि सन् इति स्तुत्यभिप्रायेण। तस्मात् [2]परमार्थदर्शिनैव अदेहभृता देहात्मभावरहितेनाशेषकर्मसंन्यासः शक्यते कर्तुम्॥ ११॥**

आनन्दगिरिकृतव्याख्या

हीति। कर्तृत्वाधिकारः **तत्पूर्वकं कर्मानुष्ठानं, तस्मादिति यावत्। ज्ञानवतो देहधारणेऽपि तदभिमानित्वाभावः** अतःशब्दार्थः। **अज्ञस्य सर्वकर्मत्यागायोगमुक्तं हेतूकृत्य फलितमाह—** तस्मादिति। **कर्मानुष्ठायिनस्त्यागित्वोक्तिरयुक्तेत्याशङ्क्याह—** कर्म्यपीति। **कर्मिणोऽपि फलत्यागेन त्यागित्ववचनं फलत्यागस्तुत्यर्थमित्यर्थः। कस्य तर्हि सर्वकर्मत्यागः सम्भवतीत्याशङ्क्य विवेकवैराग्यादिमतो देहाभिमान-**

भाष्यार्कप्रकाशः

देहभृच्छब्देन विवेक्यप्युच्यताम्? अत आह—**स हीति। अत इति**। विवेकिनः कर्माधिकाराभावादित्यर्थः। **तेनेति**। अविवेकिनेत्यर्थः। **शक्यमिति**। [3]नेत्यस्यात्रान्वयान्न शक्यमित्यर्थः।

विवेकिना तु त्यक्तुं शक्यमेव। देहयात्रामात्रफलकभिक्षाटनादिकर्मणामपि गुणकृतत्वानुसन्धानेन त्यागोपपत्तेः। न ह्यज्ञ इव प्राज्ञोऽपि 'अहं करोमी'ति मन्यते। अकर्त्रभोक्त्रविक्रियब्रह्माभिन्नात्मदर्शित्वं हि प्राज्ञत्वम्। कथम् अकर्तारमात्मानं पश्यन् विद्वान् कर्ताऽहमिति मन्येत? यस्तु तथा मन्यते, स नैव तत्त्ववित्। किन्तु भ्रान्त एव रज्जुसर्प[दर्शि]वत्। तस्माद् विवेकिना कर्म कर्तुमेव न शक्यते, न तु त्यक्तुम्। कर्मकरणस्य देहादिष्वनात्मस्वात्माध्यास एव हि हेतुः। सुषुप्तावध्यासाभावेन कर्माभावदर्शनात्। स चाध्यासो विवेकिनः कथं जीवनादिप्रवृत्ति[हेतु]रिति शङ्कायामुक्तं व्यासेनैव भागवते— 'देहोऽपि दैववशगः खलु कर्म यावत्स्वारम्भकं प्रतिसमीक्षित एव सासुः' इति। इहाप्युक्तम् – 'स्वभावस्तु प्रवर्तते' इति। तस्माद् देहाद्याकारपरिणतगुणा एव कर्मसु प्रवर्तन्ते तत्तादात्म्याध्यासेन चाविवेकिनः, न तु विवेकिनः। तस्यात्मत्वादात्मनश्चाकर्तृत्वादिति विवेकिनः कर्मकरणमेवासम्भवि, न तु निःशेषतः कर्मत्यागः। 'देहादिभ्यो विलक्षणश्चिन्मात्रोऽहं सदाशिवः' इति ज्ञानेन सर्वकर्मत्यागस्य सुकरत्वाद् देहादिगतकर्मणा सम्बन्धाभावा-च्चात्मनः, मेघगतजलेनेव गगनस्य।

अतः सर्वं कर्म समूलं त्यक्तुं शक्यमेव विवेकिन इत्यविवेक्येवात्र देहभृच्छब्देन ग्राह्यः, तस्यैव देहादितादात्म्याध्यासवतः कर्मत्यागासम्भवात्। न हि पक्ष्मादिषून्मेषनिमेषादिक्रियासु प्रवृत्तेषु सत्सु तत्तादात्म्याध्यासवान् अज्ञः कर्मत्यागं कर्तुं क्षमते। किन्तु अहमेवोन्मिषामि निमिषामि चेति कर्मैव कुर्वन्निव वर्तते। उक्तं हि पञ्चमाध्याये— 'नैव किञ्चित् करोमीति युक्तो मन्येत तत्ववित् । पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन्॥ प्रलपन् विसृजन् गृह्णन्नुन्मिषन् निमिषन्नपि। इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्॥' इति। तथा 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते॥' इति च। तस्माद् अविवेकिन एव कर्मत्यागासम्भवः, न तु विवेकिनः इति स्थितम्।

**कर्मफलाभिसन्धिमात्रसंन्यासीति**। कर्मफलाभिसन्धिमात्रमेव संन्यसितुं त्यक्तुं शीलमस्यास्तीति तथोक्तः। न तु कर्म-संन्यासीति **मात्र**पदार्थः। ननु यः कर्म न त्यक्तवान् , फलमेव त्यक्तवान् कथं स त्यागीत्युच्यते? अत आह—**स्तुत्यभिप्रायेणेति**। फला-भिसन्धिमात्रत्यागिनः संन्यासित्वं स्तुतिसिद्धम्। ज्ञानपूर्वकसर्वकर्मसंन्यासिनः संन्यासित्वं तु पारमार्थिकम् (मुख्यम्)। मोहपूर्वककर्म-संन्यासिनो दुःखादिपूर्वककर्मसंन्यासिनश्च संन्यासित्वं निन्द्यमिति भावः। **कर्म्यपी**त्यपिशब्दात् कर्मापरित्यागरूपसंन्यासविरुद्धांश-सत्त्वेऽपीति गम्यते। अत एव तस्य संन्यासित्वममुख्यम्। **तस्मादिति**। अविवेकिना देहभृता सर्वकर्मत्यागस्य कर्तुमशक्यत्वादित्यर्थः। अदेहभृतैव कर्मसंन्यासः कर्तुं शक्यते। तत्र हेतुमाह—**परमार्थदर्शित्वेनेति**। अकर्त्रात्मज्ञानेनेत्यर्थः। अदेहभृतेति पदं स्वयमेव व्याख्याति—**देहात्मभावरहितेनेति**। देहात्माभिमानवान् हि देहभृदित्युच्यते॥ ११॥

---

१. 'न विवेकी' इति पा.। २. 'परमार्थदर्शित्वेनैव' इति पा.। ३. भाष्ये प्रथमश्रुतस्येति शेषः। 'अज्ञेन शक्यम्' इति रा.पा. भाति। यथास्थिते तु पुनर्नकारोऽन्व-यार्थः।

**अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्।**
**भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्॥ १२॥**

**किं पुनस्तत् प्रयोजनम्, [१]यत् सर्वकर्मपरित्यागात् स्यादिति? उच्यते**—अनिष्टमिति। अनिष्टं **नरकतिर्यगादिलक्षणम्,** इष्टं **देवादिलक्षणम्**, मिश्रम् **इष्टानिष्टसंयुक्तं मनुष्यलक्षणं च; [२]एवं** त्रिविधं **त्रिप्रकारं** कर्मणो **धर्माधर्मलक्षणस्य फलं बाह्यानेककारकव्यापारनिष्पन्नं सद् अविद्याकृतमिन्द्रजालमायोपमं महामोहकरं प्रत्यगात्मोपसर्पीव। फल्गुतया लयमदर्शनं गच्छतीति** फलमिति **फलनिर्वचनम्। तदेतदेवंलक्षणं फलं भवति** अत्यागिनाम् **अज्ञानां**

आनन्दगिरिकृतव्याख्या

**हीनस्येत्युक्तं निगमयति**—तस्मादिति॥ ११॥

उक्ताधिकारिणः [३]**सर्वकर्मसंन्याससम्भवेऽपि फलाभावे कुतस्तस्य कर्तव्यतेति शङ्कते**—किं पुनरिति। **गौणस्य मुख्यस्य वा संन्यासस्य फलं पिपृच्छिषितमिति विकल्पयति**—उच्यत इति। सर्वकर्मत्यागो **नाम तदनुष्ठानेऽपि तत्फलाभिसन्धित्यागः। स चामुख्यसंन्यासः। तस्य फलमाह**—अनिष्टमिति। **मुख्ये तु संन्यासे सर्वकर्मत्यागे सम्यग्धीद्वारा सर्वसंसारोच्छित्तिरेव फलमित्याह**—न त्विति। **पादत्रयं व्याकरोति**—अनिष्टमित्यादिना। **तिर्यगादीत्यादिपदमवशिष्टनिकृष्टयोनिसंग्रहार्थम्, देवादीत्यादिपदमवशिष्टोत्कृष्टयोनिग्रहणायेति विभागः। फलशब्दं व्युत्पादयति**—बाह्येति। **करणद्वारकमनेकविधत्वमुक्त्वा मिथ्यात्वमाह**—अविद्येति। **तत्कृतत्वेन [४]दृष्टिमात्रदेहत्वे**

भाष्यार्कप्रकाशः

**अनिष्टमिति**। अत्यागिनां प्रेत्य अनिष्टमिष्टं मिश्रं चेति त्रिविधं कर्मणः फलं भवति। संन्यासिनां तु क्वचिदपि तन्न भवति। यज्ञादिलक्षणं नित्यनैमित्तिककाम्यभेदभिन्नं धर्माख्यं कर्म यच्छास्त्रेण विहितं तस्य फलमिष्टम्, यत्पुनर्हिंसादिलक्षणं शास्त्रेण प्रतिषिद्धं कर्माधर्माख्यं तस्य फलमनिष्टम्, यत्कर्म धर्माधर्मोभयात्मकं तस्य फलं मिश्रम्। क्रियत इति कर्म। फलशब्दव्युत्पत्तिं दर्शयति—**फलमित्यादिना**। फल्गुतया लीयत इति फलम्। पृषोदरादित्वात् साधुः। **फल्गुता** तुच्छत्वम्, मिथ्यात्वमिति यावत्। कुतः फल्गुत्वम्? अत आह—**अविद्याकृतमिति**। अविद्या हि मिथ्याभूतमज्ञानम्, तत्कार्यत्वात् फलमपि मिथ्याभूतमेवेत्यर्थः। किमिव तुच्छम्? अत आह—**इन्द्रजालमायोपममिति**। इन्द्रजालाख्यमायाकृतगन्धर्वनगरादितुल्यमित्यर्थः। कुतोऽस्मिन् तुच्छे फले विदुषामप्यासक्तिः? अत आह—**महामोहकरमिति**। नन्वसङ्गस्यात्मनः फलेन सह सङ्गाभावात् कथमस्मिन् मोहः? अत आह—**प्रत्यगात्मोपसर्पीवेति**। प्रत्यगात्मानमुपसर्पति सम्बध्नातीति प्रत्यगात्मोपसर्पि। तदिव भासमानमिति शेषः। आत्मसङ्गीव भातीत्यर्थः। कथमस्य फलस्य निष्पत्तिः? अत आह—**बाह्येति**। बाह्यानामनेकानां कारकाणां व्यापारैः क्रियाभिर्निष्पन्नं निर्वृत्तम्। अत एव नेदं प्रत्यगात्मोपसर्पि वस्तुत इति भावः। एवं तुच्छत्वादेवास्य लयः, सर्पाभासादिवदित्याह—**फल्गुतयेति**। हेतौ तृतीया। लयशब्दार्थमाह—**अदर्शनमिति**। नाशमिति यावत्। **गच्छति** प्राप्नोति। लीयत इत्यस्यार्थकथनमिदं 'लयं गच्छती'ति। **फलनिर्वचनं** फलशब्दनिरुक्तिः। न चैवं मोक्षः फलं नैव भवतीति वाच्यम्; इष्टत्वात्। न हि वयं मोक्षं ब्रह्मभावलक्षणं फलं ब्रूमः, किन्तु नित्यसिद्ध एव स इति ब्रूमः। फलवत् प्राप्त इव भातीति फलत्वं मोक्षस्य, न तु वस्तुतः फलत्वम्। अत एव मोक्षस्य नित्यत्वव्यवहारः सङ्गच्छते। न चैवं सगुणमुक्तिक्षेत्रस्य हिरण्यगर्भलोकस्य कथं फलत्वमिति वाच्यम्; तस्यापि मायामयत्वेन तुच्छत्वात् फलत्वमिति। तद्धि नित्यकर्मणः फलम्, 'प्राजापत्यं गृहस्थाना'मिति शास्त्रात्। यद्वा सगुणोपासनस्य फलम्। उपासनं हि क्रियेति कर्मणः फलमिष्टमेव सगुणमुक्तिक्षेत्रम्। **अत्यागिनामिति**। कर्मफलत्यागिनामिति भ्रमव्युदासायाह—**अपरमार्थसंन्यासिनामिति**। स्वर्गादिलक्षणकर्मफलमात्रत्यागिनाम् इह जन्मनि ज्ञाननिष्ठायाः अप्राप्तौ जन्मान्तरस्यावश्यम्भावितया स्यादेवेष्टं मिश्रं वा कर्मफलमिति भावः। न हि फलत्यागमात्रान्मुक्तिः। न

१. 'यत् सर्वकर्मसंन्यासात्' इति पा.। २. 'तत् त्रिविधं' इति पा.। ३. 'सर्वकर्मसंन्यासासम्भवेऽपि' इति पा.। ४. दृष्टिमात्रदेहत्वं प्रतिभासमात्रशरीरत्वम्, प्रातिभासिकत्वमिति यावत्।

## पञ्चैतानि महाबाहो ! कारणानि निबोध मे।

**कर्मिणाम् अपरमार्थसंन्यासिनां** प्रेत्य **शरीरपातादूर्ध्वम्। न तु** संन्यासिनां **परमार्थसंन्यासिनां परमहंसपरिव्राजकानां केवलज्ञाननिष्ठानां क्वचित्। न हि केवलसम्यग्दर्शननिष्ठाऽविद्यादिसंसारबीजं नोन्मूलयति कदाचिदित्यर्थः॥ १२॥**

[1]**अतः परमार्थदर्शिन एवाशेषकर्मसंन्यासित्वं सम्भवति, अविद्याध्यारोपितत्वादात्मनि क्रियाकारकफलानाम्, न त्वज्ञस्य अधिष्ठानादीनि** [2]**क्रियाकर्तृकारकाणि** [3]**आत्मत्वेन पश्यतोऽशेषकर्मसंन्यासः सम्भवति। तदेतद् उत्तरैः श्लोकैः दर्शयति**—पञ्चेति। **पञ्च** एतानि **वक्ष्यमाणानि, हे महाबाहो !** कारणानि **निर्वर्तकानि। निबोध मे मम इति**

आनन्दगिरिकृतव्याख्या

**दृष्टान्तमाह**—इन्द्रेति। **प्रतीतितो रमणीयत्वं सूचयति**—महामोहेति। **अविद्योत्थस्याविद्याश्रितत्वादात्माश्रितत्वं वस्तुतो नास्तीत्याह**—प्रत्यगिति। **उक्तं फलं कर्मिणामिष्यते चेदमुख्यसंन्यासफलोक्तिपरत्वं पादत्रयस्य कथमिष्टमित्याशङ्क्याह**—अपरमार्थेति। **फलाभिसन्धि-विकलानां कर्मिणां देहपातादूर्ध्वं कर्मानुरोधिफलमावश्यकमित्यर्थः। कर्मिणामेव सतामफलाभिसन्धीनाममुख्यसंन्यासित्वात् तदीया-मुख्यसंन्यासस्य फलमुक्त्वा चतुर्थपादं व्याचष्टे**—न त्विति। **अमुख्यसंन्यासमनन्तरप्रकृतं व्यवच्छिनत्ति**—परमार्थेति। **तेषां प्रधानं धर्म-मुपदिशति**—केवलेति। **क्वचिद् देशे काले वा नास्ति यथोक्तं फलं तेषामिति सम्बन्धः। तर्हि परमार्थसंन्यासोऽफलत्वान्नानुष्ठीयेतेत्या-शङ्क्य तस्य मोक्षावसायित्वान्मैवमित्याह**—न हीति॥ १२॥

**नन्वपरमार्थसंन्यासवदविशेषादज्ञानां परमार्थसंन्यासोऽपि किं न स्यात्, त्यागस्य सुकरत्वात्, तत्राह**—अतः परमार्थेति। **तस्य सम्यग्दर्शनादविद्यानिवृत्तौ तदारोपितक्रियाकारकादिनिवृत्तेरिति हेत्वर्थः। विद्यावतः सर्वकर्मसंन्यासित्वसम्भावनामुक्त्वा एवकार-व्यावर्त्यं दर्शयति**—न त्विति। **अविदुषोऽशेषकर्मणां तद्धेतूनां च रागादीनां त्यागायोगे कारकेष्वधिष्ठानादिष्वात्मत्वदर्शनं हेतुमाह**—

भाष्यार्कप्रकाशः

च 'त्यागाच्छान्तिरनन्तर'मित्युक्तमिति वाच्यम्; स्तुतिपरत्वात् तस्य।

कदा भवति कर्मिणां कर्मफलम्? अत आह—**प्रेत्येति**। शरीरं विहायेत्यर्थः। फलितमाह—**शरीरपातादूर्ध्वमिति**। प्रकृतदेहत्यागानन्तरमित्यर्थः। कुतो न संन्यासिनां कर्मफलमित्यत आह—**न हीति**। आदिपदाद् रागादिग्रहणम्। कदाचिदपि न नोन्मूलयन्ति हि, किन्तु सर्वदाऽप्यवश्यमुन्मूलयन्त्येवेत्यर्थः। सम्भाव्यनिषेधनिवर्तने द्वौ नञौ। हिः प्रसिद्धौ। हि यस्मान्न नोन्मूलयन्ति तस्मान्न कर्मफलमिति वा। **उन्मूलयन्ति** समूलं नाशयन्ति।

**अत एवेति**। विद्यया साङ्ख्यैरविद्यादिसंसारबीजस्योन्मूलितत्वादेवेत्यर्थः। परमार्थदर्शिन एवेत्येवकारार्थमाह—**न त्वज्ञस्येति**। कस्मादज्ञस्य कर्मसंन्यासो न सम्भवतीत्यत आह— **अधिष्ठानादीति**। अधिष्ठानमादिर्येषां तान्यधिष्ठानादीनि, तानि च तानि क्रियाकर्तृ-कारकाणि च अधिष्ठानादिक्रियाकर्तृकारकाणि, 'अधिष्ठानं तथा कर्ता' इति श्लोकोक्तानि क्रियाकर्तृकारकाणीत्यर्थः। यद्यपि कर्तृकारका-णाम् अहङ्कारमनइन्द्रियशरीराणाम् आत्मत्वेन दर्शनं सम्भवति, 'अहं करोमि, स्पृशामि, जिघ्रामि, गच्छामि, स्थूलोऽहं, कृशोऽहम्' इत्यादिव्यवहारात्। क्रियाया आत्मत्वेन दर्शनं तु न सम्भवति[4], 'अहं गमन'मित्यादिव्यवहाराभावात्; तथाप्यात्मीयत्वेन क्रियाया दर्शनसम्भवादुक्तम्—**क्रियाकर्तृकारकाणीति**। क्रियामात्मीयत्वेन कर्तृकारकाण्यात्मत्वेन च पश्यतः इत्यर्थः। अशेषकर्मसंन्यासो न सम्भवतीत्यन्वयः। **तदेतदिति**। अज्ञस्य कर्मसंन्यासासम्भवं, प्राज्ञस्य तत्सम्भवं चेत्यर्थः॥ १२॥

**पञ्चेति**। हे महाबाहो ! सर्वकर्मणां सिद्धये कारणानि कृतान्ते साङ्ख्ये प्रोक्तान्येतानि पञ्च कारणानि मे वाक्यान्निबोध। साङ्ख्य-शब्दार्थमाह—**ज्ञातव्या इति**। ज्ञातव्याः पदार्थाः प्रकृतिमहदहङ्कारादयो यस्मिन् सङ्ख्यायन्ते गण्यन्ते तच्छास्त्रं साङ्ख्यमित्युच्यते। कापि-

१. 'अत एव' इति रा.पा.। २. 'क्रियाकर्तृणि कारकाणि' इति पा. 'अधिष्ठानादिक्रियाकर्तृकारकाणि' इति रा.पा.भाति। ३. 'आत्मत्वेनैव' इति पा.। ४. आत्मत्वेन दर्शनं तादात्म्यदर्शनम् इति स्वीकारे क्रियायामपि तत् संभवतीति बोध्यम्।

**सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्॥ १३॥**

**उत्तरत्र चेतःसमाधानार्थम् , वस्तुवैषम्यप्रदर्शनार्थं च। तानि च कारणानि ज्ञातव्यतया स्तौति—** सांख्ये, **ज्ञातव्याः पदार्थाः संख्यायन्ते यस्मिन् शास्त्रे तत्** सांख्यं वेदान्तः। कृतान्ते **इति तस्यैव विशेषणम्। कृतमिति कर्मोच्यते।** [1]**तस्य** अन्तः **परिसमाप्तिर्यत्र स कृतान्तः। कर्मान्त इत्येतत्। 'यावानर्थ उदपाने' (भ.गी.२.४६), 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' (भ.गी.४.३३) इत्यात्मज्ञाने सञ्जाते सर्वकर्मणां निवृत्तिं दर्शयति। अतः तस्मिन् आत्मज्ञानार्थे सांख्ये कृतान्ते वेदान्ते** प्रोक्तानि **कथितानि** सिद्धये **निष्पत्त्यर्थं सर्वकर्मणाम्॥ १३॥**

आनन्दगिरिकृतव्याख्या

क्रियेति। **कथमधिष्ठानादीनां क्रियाकर्तृत्वम्? कथं वाऽविदुषस्तेष्वात्मत्वधीः? इत्याशङ्क्यानन्तरश्लोकचतुष्टयस्य तात्पर्यमाह—**तदेतदिति। **कर्मार्थानामधिष्ठानादीनामप्रामाणिकत्वाशङ्कामादावुद्धरति—**पञ्चेति। उत्तरत्रेति **अधिष्ठानादिषु वक्ष्यमाणेष्वित्यर्थः। वस्तूनां तेषामेव वैषम्यं दिदर्शयिषितं न हि चेतःसमाधानादृते ज्ञातुं शक्यते। सांख्यशब्दं व्युत्पादयति—**ज्ञातव्या इति। **आत्मा त्वम्पदार्थः, तत्पदार्थो ब्रह्म, तयोरैक्यधीः, तदुपयोगिनश्च श्रवणादयः पदार्थास्ते** संख्यायन्ते **व्युत्पाद्यन्ते। कृतान्तशब्दस्य वेदान्तविषयत्वं विभजते—** कृतमित्यादिना। **वेदान्तस्य तत्त्वधीद्वारा कर्मावसानभूमित्वे वाक्योपक्रमानुकूल्यं दर्शयति—**यावानिति। **उदपाने कूपादौ यावानर्थः स्नानादिस्तावानर्थः समुद्रे सम्पद्यते। अतो यथा कूपादिकृतं कार्यं सर्वं समुद्रेऽन्तर्भवति, तथा सर्वेषु वेदेषु कर्मार्थेषु यावत्फलं तावज्ज्ञानवतो ब्राह्मणस्य ज्ञानेऽन्तर्भवति, ज्ञानं प्राप्तस्य कर्तव्यानवशेषादित्यर्थः। तत्रैव वाक्यान्तरमनुक्रामति—**सर्वमिति। **उदाहृतवाक्ययोः तात्पर्यमाह—**आत्मेति। **आत्मज्ञाने सति सर्वकर्मनिवृत्तावपि कथं वेदान्तस्य कृतान्तत्वमित्याशङ्क्याह—**अत इति। **तानि मद्वचनतो निबोधेति पूर्वेण सम्बन्धः॥ १३॥**

भाष्यार्कप्रकाशः

लसाङ्ख्यनिरासायाह—**वेदान्त इति**। वेदान्तशास्त्रमित्यर्थः। उत्तरमीमांसेति यावत्। कथं कृतस्य साङ्ख्ये परिसमाप्तिः? अत आह—**यावानिति**। साङ्ख्यशास्त्रोक्तात्मज्ञाने सर्वकर्मसमाप्तिसद्भावाच्छास्त्रमपि कृतान्तमित्युच्यत इत्यर्थः। कर्मसमाप्तिमज्ज्ञानप्रतिपादकत्वात् साङ्ख्यशास्त्रस्य कृतान्तत्वमौपचारिकमिति भावः। [यद्वा] कृतस्यान्तः समाप्तिर्ज्ञाने भवतीत्ययमर्थो यत्र प्रतिपाद्यते तत् कृतान्तमित्युच्यते। ज्ञाने कर्मणः परिसमाप्तिं प्रतिपादयतीति साङ्ख्यशास्त्रं कृतान्तमित्युच्यत इति भावः। **अत इति**। ज्ञाने कर्मसमाप्तिप्रतिपादकत्वादित्यर्थः। तस्मिन् कृतान्ते साङ्ख्ये वेदान्ते। साङ्ख्यस्य फलितार्थमाह—**आत्मज्ञानार्थ इति**। साङ्ख्यमात्मज्ञानम् , तत्प्रतिपादकत्वाच्छास्त्रमपि साङ्ख्यमित्युच्यत इत्यर्थः। आत्मज्ञानमेव **अर्थः** फलमभिधेयो वा यस्य तदात्मज्ञानार्थम् , तस्मिन्। सिद्धये इति तादर्थ्ये चतुर्थीत्याह—**निष्पत्त्यर्थमिति**। सर्वकर्मणां निष्पत्तौ हेतुभूतानि साङ्ख्यशास्त्रप्रसिद्धानि पञ्च कारणानि सन्ति; तान्यहं वक्ष्यामि त्वं सावधानो भवेत्यर्थः।

यत्तु **रामानुजः—**सङ्ख्या बुद्धिः, तयाऽनुसंहितः साङ्ख्यः, कृतान्तो निर्णयः इति, **तदसत्** ; साङ्ख्यशब्देनैव वैदिकबुद्ध्यनुसंहितवेदान्तशास्त्रसिद्धान्तरूपार्थस्य सिद्धत्वेन कृतान्तशब्दवैयर्थ्यप्रसङ्गात्। 'ज्ञानयोगेन साङ्ख्याना'मिति वेदान्तशास्त्रस्य साङ्ख्यत्वप्रसिद्धेश्च। सेश्वरसाङ्ख्यं हि वेदान्तशास्त्रम्। तन्निष्ठत्वाच्च ज्ञानिनः साङ्ख्याः इत्युच्यन्ते। न च वेदान्तेष्वपि कर्मान्वयस्य स्थापितत्वान्नास्ति कृतान्तत्वं वेदान्तशास्त्रस्येति वाच्यम् ; वेदान्तेषु कर्मान्वयस्याङ्गपरत्वेनैव स्थापितत्वात्। न हि परमार्थसंन्यासिनां सांख्यानां कोऽपि कर्मान्वयः। 'सर्वारम्भपरित्यागी'त्यादेरुक्तत्वादिहैव। 'तत्र केन कं पश्येदि'त्यादिश्रुतेश्च। न चान्तशब्दस्य निर्णये रूढिरिति वाच्यम् ; 'मृतावसिते रम्ये समाप्तावन्त इष्यते' इति समाप्तावप्यन्तशब्दस्य रूढत्वात्। तस्मान्नात्र कृतान्तशब्दस्य निर्णयार्थवर्णनद्वारा वैयर्थ्यापादनं न्याय्यम्॥ १३॥

---

१. 'तस्यान्तः कृतस्य परिसमाप्तिर्यत्र' इति पा.।

**अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।**
**[1]विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्॥ १४॥**

**कानि तानीति? उच्यते—** अधिष्ठानमिति। अधिष्ठानम् **इच्छाद्वेषसुखदुःखज्ञानादीनामभिव्यक्तेराश्रयः अधिष्ठानं शरीरम् , तथा** कर्ता **उपाधिलक्षणो भोक्ता,** करणं **च श्रोत्रादिकं शब्दाद्युपलब्धये** पृथग्विधं **नानाप्रकारं द्वादशसंख्यं,** विविधाश्च पृथक् चेष्टाः **वायवीयाः प्राणापानाद्याः,** दैवं चैव **दैवमेव च** अत्र **एतेषु चतुर्षु** पञ्चमं **पञ्चानां पूरणम् आदित्यादि चक्षुराद्यनुग्राहकम् ॥ १४॥**

आनन्दगिरिकृतव्याख्या

**कर्मार्थान्यधिष्ठानादीनि मानमूलत्वाज्ज्ञेयानीत्युक्तम्। इदानीं प्रश्नपूर्वकं विशेषतस्तानि निर्दिशति—**कानीत्यादिना। **प्रतीकमादाय व्याकरोति—**अधिष्ठानमिति। उपाधिलक्षणो **बुद्ध्यादिरुपाधिः, तल्लक्षणः तत्स्वभावः, बुद्ध्याद्यनुविधायी तद्धर्मानात्मनि पश्यन्नुपहितः, तत्प्रधान इत्यर्थः।** [2]**तत्र कार्यलिङ्गकमनुमानं सूचयति—**शब्दादीति। **ज्ञानेन्द्रियाणि पञ्च, पञ्च कर्मेन्द्रियाणि, मनो बुद्धिश्चेति द्वादशसंख्यत्वम्। चेष्टाया** [3]**विविधत्वं नानाप्रकारत्वम्। तदेव स्पष्टयति—** वायवीया इति। पृथक्त्वम् **असङ्कीर्णत्वम्। न हि प्राणापानादिचेष्टानां मिथः सङ्करोऽस्ति।** [4]**दैवमेवेति विशदयति—**आदित्यादीति॥ १४॥

भाष्यार्कप्रकाशः

**अधिष्ठानमिति**। अधिष्ठानमाश्रयः। कस्याश्रयः? अत आह— **इच्छेति**। प्राणिनामिच्छादयो हि शरीरेऽभिव्यज्यन्ते, भोगायतनत्वाच्छरीरस्य। सुषुप्तिमृतिमूर्छासु शरीररहितस्य जीवस्य सुखदुःखादिसम्भोगादर्शनात्। तस्मादिच्छाद्यभिव्यक्तिरूपसंसाराश्रयत्वादधिष्ठानं शरीरम्। **उपाधिलक्षण इति**। अन्तःकरणस्वरूपः। अहंवृत्तिः इदंवृत्तिरित्यन्तःकरणं द्विधा। तत्र– अहंवृत्तिर्विज्ञानमयो भोक्ता, इदंवृत्तिस्तु मनः करणमिति विवेकः। तस्मादहङ्कारः कर्ता। तेन हि चिदाभाससंयुक्तेन देहादितादात्म्याध्यासात् कर्माणि क्रियन्ते, तत्फलानि भुज्यन्ते चेति कर्ता भोक्ता च सः। तत्तादात्म्याध्यासात्तु प्रत्यगात्मनः कर्तृत्वभोक्तृत्वापत्तिः। **शब्दाद्युपलब्धिः** शब्दस्पर्शरूपाद्यनुभवः। **द्वादशसङ्ख्यमिति**। दशेन्द्रियाणि मनो बुद्धिश्चेति। **विविधा** बहुविधा, **पृथग्** असङ्कीर्णा, **चेष्टा** व्यापारः। कस्य चेष्टेत्यत आह—**वायवीयेति**। वायोः प्राणवायोरियं वायवीया। का सा चेष्टेत्यत आह— **प्राणापानाद्येति**। प्राणः प्राणनम् , अपानो विसर्जनम् , आदिपदादुदानादिवायुचेष्टा गिलनादयो ग्राह्याः। अनेन च चेष्टापदेन तदाश्रयः प्राणवायुर्ग्राह्यः। यद्वा चेष्ट्यतेऽनयेति चेष्टा, वायोर्भूतस्येमाः वायवीयाः वायुविकाराः प्राणापानाद्याः प्राणापानादिवायवो 'विविधा च पृथक् चेष्टा' इत्यनेनोच्यन्त इत्यर्थः। अन्नमयोऽधिष्ठानम् , प्राणमयश्चेष्टा, मनोमयः करणं, विज्ञानमयः कर्तेति बोध्यम्। दैवम् आदित्यादि। आदिपदाद् दिग्वातप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रादिग्रहणम्। चक्षुरादीत्यादिपदाच्च श्रोत्रादिग्रहणम्। आदित्यादिदेवतानुग्रहादेव चक्षुरादयः स्वस्वकार्यं निर्वर्तयन्तीत्यनुग्राहकत्वं चक्षुरादीनां दैवस्य।

'दैवमन्तर्यामीश्वरः' इति **रामानुजः, तदसत्** , अविक्रियप्रत्यगात्मस्वरूपत्वादन्तर्यामिणः। 'निष्कलं निष्क्रियं शान्त'मिति हि श्रूयते। न च प्रेरणरूपा क्रियाऽस्तीश्वरस्येति वाच्यम् ; 'त्वमिदं कुरु' इतीश्वरेणान्तरेण प्रेर्यमाणस्य यस्य कस्याप्यदर्शनात्। अयस्कान्तलोहदृष्टान्तेनाविक्रियादेवेश्वरान्मनआदिप्रेरणसम्भवात्। [5]अविक्रियस्यैव निधेः पुरुषप्रेरणसम्भवाच्च। न हि निधिः पुरुषं 'त्वं मदर्थं भूखननादिकं कुरु' इति प्रेरयन् दृष्टः। तथापि निधिप्रेरित एव भूखननादौ प्रवर्तते पुरुषः। निध्यर्थं तस्य तत्र प्रवृत्तत्वात्। तस्मादविक्रियस्येश्वरस्य नात्र कर्महेतुत्वेन ग्रहणमुचितम्॥ १४॥

---

१. 'विविधा च पृथक् चेष्टा' इति रा.पा.। तदनुसारेण भाष्येऽपि एकवचनान्ततया पाठः। २. **तत्र** श्रोत्रादिके करणे। इन्द्रियाणामप्रत्यक्षत्वात् , शब्दाद्युपलब्ध्या तत्करणत्वेन श्रोत्रादीन्द्रियमनुमीयत इति भावः। ३. विविधत्वान्नानाप्रकारत्वम् इति पा.। ४. 'दैवमेव विशदयति' 'दैवं विशदयति' इति पा.। ५. अविक्रियस्य प्रेरकत्वे दृष्टान्तान्तरमिदम्। शब्दादिविषयाणां तत्तदिन्द्रियप्रेरकत्वमपीदृशमेवेति बोध्यम्।

**शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः।**
**न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः॥ १५॥**

शरीरेति। **शरीरवाङ्मनोभिः यत् कर्म त्रिभिरेतैः** प्रारभते **निर्वर्तयति नरो** न्याय्यं **वा धर्म्यं शास्त्रीयं**, विपरीतं **वा अशास्त्रीयमधर्म्यम्। यच्चापि** [१]**निमिषितचेष्टादि जीवनहेतुः तदपि पूर्वकृतधर्माधर्मयोरेव कार्यमिति न्याय्यविपरीतयोरेव ग्रहणेन गृहीतम्।** पञ्चैते **यथोक्ताः** तस्य **सर्वस्यैव कर्मणो** हेतवः **कारणानि।**

**नन्वेतानि अधिष्ठानादीनि सर्वकर्मणां** [२]**कारणानि ; कथमुच्यते 'शरीरवाङ्मनोभिः यत् कर्म प्रारभते' इति? नैष दोषः; विधिप्रतिषेधलक्षणं सर्वं कर्म शरीरादित्रयप्रधानम्, तदङ्गतया दर्शनश्रवणादि च जीवनलक्षणं त्रिधैव राशी-**

आनन्दगिरिकृतव्याख्या

**पञ्चानामधिष्ठानादीनामुक्तानां सर्वकर्मसिद्ध्यर्थत्वं स्फुटयति**—शरीरेति। **ननु जीवनकृतं निमेषोन्मेषादिकर्मान्तरं साधारणमस्ति। तत् कथं राशिद्वयकरणमिति? तत्राह**—यच्चेति।

**अधिष्ठानादीनां कर्ममात्रहेतुत्वं प्रतिज्ञाय, शारीरादित्रिविधकर्महेतुत्वोक्तिरयुक्तेति शङ्कते**—नन्विति। **पूर्वापरविरोधं परिहरति**—नैष दोष इति। **ननु जीवनकृतानि स्वाभाविकानि कर्माणि दर्शनादीनि विधिनिषेधबाह्यत्वान्न देहादिनिर्वर्त्यानीत्याशङ्क्याह**—तदङ्गतयेति। **तस्य देहादित्रयस्य प्रधानस्याङ्गं चक्षुरादि, तन्निष्पाद्यत्वेन जीवनकृतं दर्शनादि प्रधानकर्मण्यन्तर्भूतमिति त्रैविध्यमविरुद्धमित्यर्थः। देहाद्यारभ्ये त्रिविधे कर्मणि सर्वकर्मान्तर्भावेऽपि, कथं पञ्चानामेवाधिष्ठानादीनां तत्र हेतुत्वम्, फलोपभोगकाले कारणान्तरापेक्षासम्भवा-**

भाष्यार्कप्रकाशः

**शरीरेति**। नरः शरीरवाङ्मनोभिर्न्याय्यं वा विपरीतं वा यत् कर्म प्रारभते, तस्यैते पञ्च हेतवो भवन्ति। **यत्कर्मेति**। शारीरं वाचिकं मानसिकं वेत्यर्थः। ननु न्याय्यविपरीताभ्यां धर्माधर्माभ्यामन्यस्य निमेषादिकर्मणः का गतिः? अत आह—**यच्चापीति**। यच्च निमेषादिकम्, यच्च जीवनहेतुश्चेष्टितादिकं कृष्यादिव्यापारात्मकम्, तदपि न्याय्यविपरीतशब्दाभ्यामेव गृह्यते। धर्माधर्मकार्यत्वात् तस्य इत्यर्थः। जन्मान्तरकृतपापवशेन निमेषादिचेष्टाप्रतिबन्धसम्भवादन्धादीनां, तच्चेष्टा जन्मान्तरकृतधर्मकार्यभूता एवेति निश्चेतुं शक्यते। तथा पापवशात् कष्टजीवित्वस्य, पुण्यवशात् सुखजीवित्वस्य च कृषीवलादिषु, राजादिषु च दर्शनाज्जीवनहेतुकर्मविशेषोऽपि पुण्यपापप्रयुक्त एवेति भावः। **ननु** शरीरवाङ्मनोभिर्यत् कर्म क्रियते शारीरं वाचिकं मानसिकं वा तस्य कर्मणः शरीरवाङ्मनांसि त्रीण्येव हेतवः, न तु पञ्चाधिष्ठानादीनि पूर्वोक्तानि हेतव इति कृत्वा कथमुक्तं 'पञ्चैते तस्य हेतवः' इति चेत्, **मैवम्**; नरस्य कर्तुश्चतुर्थस्योक्तत्वाद् दैवस्य पञ्चमस्य गम्यमानत्वाच्चेति।

**नन्विति**। 'एतान्यधिष्ठानादीनि सर्वकर्मणां निर्वर्तकानी'ति पूर्वमुक्त्वा कथमिह 'शरीरवाङ्मनोभिर्यत्कर्म प्रारभते' इत्युच्यत इति पूर्वपक्षः। परिहरति—**नैष दोष इति**। अधिष्ठानादिपञ्चकहेतुकमपि विधिप्रतिषेधलक्षणं तदङ्गभूतदर्शनश्रवणादिरूपं जीवनलक्षणं च सर्वमपि कर्म शरीरादित्रयप्रधानम्। ततश्च त्रिधैव राशीकृतं सत् शरीरादिभिरारभ्यत इत्युच्यते। यच्छारीरं कर्म गमनादिकं तदधिष्ठानादिपञ्चकनिर्वर्त्यमपि शरीरप्रधानतया शरीरेणारभ्यत इत्युच्यते। तथा वाचिकं भाषणादिकं यत् तदपि अधिष्ठानादि-पञ्चकनिर्वर्त्यमेव। तथापि वाक्प्रधानतया वाचाऽऽरभ्यत इत्युच्यते। तथा मानसिकं मननादिकर्म यत् तदधिष्ठानादिपञ्चकनिर्वर्त्यमपि मनःप्रधानतया मनसाऽऽरभ्यत इत्युच्यते। एवं शारीरवाचिकमानसिकभेदात् त्रिविधमपि कर्माधिष्ठानादिपञ्चकनिर्वृत्तं भवतीति न कोऽपि दोष इत्यर्थः। न केवलं त्रिविधस्य कर्मणः करणकाल एव शरीरादित्रिकप्राधान्यम्, किन्तु फलकालेऽपीत्याह— **फलकाले ऽपीति। तत्प्रधानैरिति**। प्रधानैस्तैस्त्रिभिरित्यर्थः। वागुपलक्षितैरिन्द्रियैः शरीरेण मनसा च शब्दादिसुखादिविषयानुभवादिति भावः। तस्माच्छरीरादित्रयनिर्वर्त्यस्यापि कर्मणः पञ्चापि पूर्वोक्ता हेतवो भवन्त्येवेत्याह—**पञ्चानामिति। न विरुध्यते** विरुद्धं न भवति। अधिष्ठानादिपञ्चकहेतुकमपि

---

१. 'निमिषितचेष्टितादि' 'निमेषादिकं चेष्टितादि' इति पा.। २. 'निर्वर्तकानि' इति पा.।

**तत्रैवं सति कर्तारमात्मानं केवलं तु यः।**
**पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥ १६॥**

**कृतमुच्यते [1]शरीरादिभिरारभते इति। फलकालेऽपि तत्प्रधानैः [2]साधनैः भुज्यत इति पञ्चानामेव हेतुत्वं न विरुध्यते॥ १५॥**

तत्रेति। **तत्रेति प्रकृतेन सम्बध्यते।** एवं सति **एवं यथोक्तैः पञ्चभिर्हेतुभिर्निर्वर्त्ये सति कर्मणि। तत्रैवं सतीति दुर्मतित्वस्य हेतुत्वेन सम्बध्यते। तत्र [3]तेषु आत्मानमनन्यत्वेनाविद्यया परिकल्प्य, तैः क्रियमाणस्य कर्मणः 'अहमेव कर्ता' इति कर्तारमात्मानं** केवलं **शुद्धं तु यः पश्यति अविद्वान्; कस्माद्? वेदान्ताचार्योपदेशन्यायैः** अकृतबुद्धित्वाद् **असंस्कृतबुद्धित्वात्। योऽपि देहादिव्यतिरिक्तात्मवादी [4]आत्मानमेव केवलं कर्तारं पश्यति असावपि अकृतबुद्धिरेव।**

आनन्दगिरिकृतव्याख्या

**दित्याशङ्क्य जन्मकालभाविनो भोगकालभाविनश्च सर्वस्य कारणस्य तेष्वेवान्तर्भावान्मैवमित्याह—** फलेति ॥ १५॥

**क्रियाकर्तृत्वमधिष्ठानादीनामापाद्याविदुषस्तेष्वात्मत्वदृष्टिमनुवदति—**तत्रेति। **तत्पदपरामर्शयोग्यं प्रकृतं सर्वं कर्म। प्रतीकमादाय पूर्वेण सहाक्षरार्थं कथयति—**एवमिति। **अधिष्ठानादीनामुक्तरीत्या कर्तृत्वे सति अन्यगतं कर्तृत्वमात्मनो यतोऽध्यारोप्य पश्यति, अतो दुर्मतिः (इति) आत्मनि कर्तृत्वं पश्यन्नित्याह—** तत्रैवमिति। **कर्तारमित्यादि व्याचष्टे—**तत्रेत्यादिना। तेषु **अधिष्ठानादिषु।** तैः **अधिष्ठानादिभिरारोपितात्मभावैरित्यर्थः। अकर्तारमात्मानं कर्तारं पश्यतीत्यत्र प्रश्नद्वारा हेतुमाह—**कस्मादिति। **ननु शास्त्रसंस्कृतबुद्धिरेव अतिरिक्तात्मवादी कर्तृत्वं तस्यानुमन्यते, नासौ कर्तृत्वमात्मनि पश्यन्नपि भवत्यकृतबुद्धिः, तत्राह—**योऽपीति। **तस्यापि शास्त्रपूर्वकमाचार्योपदेशेन, तदनुसारिन्यायैश्चानाहितबुद्धित्वाद् अकृतबुद्धित्वं सिद्धमित्यर्थः। कौटस्थ्यम् आत्मनः** तत्त्वं **याथात्म्यम्। कर्मणोऽपि तत्त्वम्**

भाष्यार्कप्रकाशः

कर्म शरीरादिप्रधानतया शारीरादिभेदेन त्रिविधं भवतीति न कोऽपि विरोध इति भावः॥ १५॥

**तत्रेति।** एवं सति तत्र केवलमात्मानम् अकृतबुद्धित्वाद् यः कर्तारं पश्यति, दुर्मतिः स न पश्यति। कर्मणि निर्वर्त्ये सतीत्यन्वयः। **दुर्मतित्वस्य हेतुत्वेनेति।** आत्मनि कर्तृत्वदर्शनं दुर्मतित्वम्। दुष्टबुद्धिर्हि अकर्तर्यात्मनि कर्तृत्वदर्शनम्। एवंविधदर्शनस्य दुष्टत्वं प्रति हेतुस्तु अधिष्ठानादिपञ्चकस्य कर्तृत्वमेव। 'अधिष्ठानादिपञ्चकं कर्तृ' इत्यविद्वान् हि 'कर्ताऽहम्' इति पश्यति। तस्मादधिष्ठानादिपञ्चके कर्तरि सति तत् तथा अगृहीत्वा य आत्मानं कर्तारं पश्यति, स दुर्मतिरेवेति दुर्मतित्वस्य हेतुभूतम् 'एवं सती'ति वाक्यम्।

तत्रेति प्रकृतेन सम्बध्यत इत्युक्तम्, तदेवाह—**तेष्विति।** प्रकृतेष्वधिष्ठानादिष्वित्यर्थः। 'आत्मनोऽनन्यतमत्वेन' इति पदद्वयमध्याहर्तव्यं मूले इत्यभिप्रेत्य तथैवाध्याहृत्याह— **आत्मन इति।** कथमात्मानं कर्तारं पश्यतीत्यत आह— **अहमेव कर्तेति।** कस्य कर्तेत्यत आह— **कर्मण इति।** कीदृशस्य कर्मणः? अत आह— **अविद्यया** आत्मत्वेन **परिकल्पितैः** तैरधिष्ठानादिभिः पञ्चभिः **क्रियमाणस्येति। शुद्धम्** अविक्रियमित्यर्थः। ततश्च कर्तृत्वविकारस्तत्प्रयुक्तभोक्तृत्वविकारश्च नात्मनः सम्भवतीति भावः। कस्माद् अयमज्ञः केवलात्मानं कर्तारं पश्यतीति पृच्छति—**कस्मादिति।** उत्तरयति—**अकृतबुद्धित्वादिति। अकृता** असंस्कृता बुद्धिर्यस्य तत्त्वात्। कैरसंस्कृतेत्यत आह—**वेदान्तेति।** वेदान्तशास्त्रमाचार्योपदेशो न्यायश्चेत्येतैस्त्रिभिः, न तु तर्कव्याकरणादिभिरिति भावः।

ननु ये देहाद्यात्मवादिनो बौद्धादयस्ते आत्मानं कर्तारं पश्यन्तु नाम, कथं पुनरास्तिका वैदिकादयः? अत आह—**योऽपीति।** देहादिव्यतिरिक्तात्मवादी योऽप्यास्तिको वैदिकादिः सोऽपि केवलमात्मानं कर्तारं पश्यत्येव। तस्माद् **असावपि** 'देहादिव्यतिरिक्तः कर्ताऽह'मिति ज्ञानवानपीत्यर्थः। **अकृतबुद्धिरेवेति।** देहादिविलक्षणाकर्त्रभोक्त्रात्मज्ञानाभावादिति भावः। किं न पश्यतीत्यत आह—

१. 'शरीरादिभिरधिष्ठानादिभिरारभ्यते' इति पा.। २. 'साधनैः' इति क्वचिन्न। ३. 'एतेष्वात्मानमन्यतमत्वेन' इति पा.। 'तेष्वात्मनः अनन्यतमत्वेनाविद्यया परिकल्पितैः' इति रा.पा.। ४. 'अन्यमात्मानमेव' इति पा.।

**अतोऽकृतबुद्धित्वान्न स पश्यति आत्मनस्तत्त्वम् , कर्मणो वा इत्यर्थः। अतो** दुर्मतिः **कुत्सिता विपरीता दुष्टाऽजस्रं जननमरणप्रतिपत्तिहेतुभूता मतिरस्येति दुर्मतिः।** स **पश्यन्नपि न पश्यति, यथा तैमिरिकोऽनेकं चन्द्रम् , यथा वाऽभ्रेषु धावत्सु चन्द्रं धावन्तम् , यथा वा वाहन उपविष्टोऽन्येषु धावत्सु आत्मानं धावन्तम्॥ १६ ॥**

आनन्दगिरिकृतव्याख्या

**अविद्याकृताधिष्ठानादिकृतत्वेनात्मास्पर्शित्वम्। आत्मकर्मणोस्तत्त्वदर्शनाभावः** अतः**शब्दार्थः। दुष्टत्वं स्पष्टीकर्तुं दुर्मतित्वं विवृणोति—** जननेति। **'अहं कर्ते'त्यात्मदर्शनवतोऽपि नाविदुषस्तद्दर्शनमस्तीत्यत्र दृष्टान्तमाह—**यथेति। **तिमिरोपहतचक्षुरनेकं चन्द्रं पश्यन्नपि तत्त्वतो न तं पश्यति, एवम् अविद्वानात्मानं कर्तारं पश्यन्नपि तत्त्वतो न तं पश्यतीत्यर्थः। अधिष्ठानादिष्वविद्यया सम्बद्धात्मनः स्वात्मनि तद्गतक्रियारोपे दृष्टान्तमाह—**यथा वेति। अन्येषु **वाहकेषु पुरुषेषु धावनकर्तृषु वाहने स्थितः स्वात्मानं प्रधावनकर्तारमविवेकादभिमन्यते। तथाऽधिष्ठानादिषु क्रियाकर्तृषु तद्गतं स्वात्मानं कर्तारं मन्यमानो दुर्मतिरित्यर्थः॥ १६ ॥**

भाष्यार्कप्रकाशः

**आत्मनस्तत्त्वमिति**। अर्थान्तरमाह—**कर्मणो वेति**। कर्मणस्तत्त्वं वेत्यर्थः। **यद्वा** वाशब्दः समुच्चयार्थः। आत्मनः कर्मणश्च तत्त्वं न वेत्तीत्यर्थः। आत्मनस्तत्त्वमविक्रियत्वम् , कर्मणस्तत्त्वं त्वधिष्ठानादिपञ्चकनिर्वर्त्यत्वमिति विवेकः। **अत इति**। अतत्त्ववित्त्वादित्यर्थः। दुष्टा मतिर्यस्य स दुर्मतिः। दुष्टशब्दार्थमाह—**कुत्सितेति**। फलितमाह—**विपरीतेति**। कुतोऽस्या मतेः 'अहं कर्ते'त्येवंरूपाया दुष्टत्वम्? अत आह—**अजस्रमिति**। जननमरणप्रतिपत्तिः **संसारः**। ननु 'पश्यन्नपि न पश्यती'ति कथं विरुद्धमुच्यते? अत आह—**यथेति**। **तैमिरिकः** तिमिरदोषदूषितनेत्र एकमेव चन्द्रमनेकचन्द्रत्वेन यथा पश्यन्नपि न पश्यतीत्युच्यते, तद्वत्। यद्वा अकर्तारमात्मानं कुतः कर्तारं पश्यतीत्यत आह—**तैमिरिक इति**। अविद्याहतबुद्धिरयमकर्तारमप्यात्मानं कर्तारं पश्यति, यथा तैमिरिक एकमपि चन्द्रमनेकं पश्यति, तद्वदित्यर्थः।

**ननु** एकस्यैवात्मन अनेकत्वेन ग्रहणे भवतु स दृष्टान्तः; न त्विहेति चेत् , **मैवम्** ; यथावस्थितार्थस्यान्यथा ग्रहणांशे दृष्टान्तत्वात् तस्य। योग्यमेव दृष्टान्तान्तरमाह—**यथा वेति**। अभ्रेषु धावत्सु सत्स्वधावन्तमपि चन्द्रं धावन्तं यथा पश्यति, तथाऽधिष्ठानादिषु कर्माणि कुर्वत्सु सत्स्वकुर्वाणमप्यात्मानं कर्तारं पश्यतीति।

**ननु** नायमपि दृष्टान्तः समीचीनः, परस्मिन् परकार्यदर्शनं दृष्टान्तार्थः, आत्मन्येव परकार्यदर्शनं दार्ष्टान्तिकार्थ इति भेदादिति चेत् , **मैवम्** , अक्रिये सक्रियत्वदर्शनस्यैवेह साम्यत्वेन विवक्षितत्वात्। योग्यमेव दृष्टान्तान्तरमाह—**यथेति**। वाहने शिबिकादावुपविष्टः पुरुषोऽन्येषु शिबिकावाहिषु धावत्सु सत्सु आत्मानमेव धावन्तं पश्यति। एवमन्येषु कुर्वत्सु सत्सु आत्मानमकर्तारमपि कर्तारं पश्यति। य एवं पश्यति स विपरीतबुद्धिरेव। यथावस्थितार्थादर्शनाद् मिथ्यार्थदर्शनाच्चेति। नास्य दुर्मतेः सर्वकर्मत्यागः सम्भवति।

**ननु** तत्रेति निर्धारणे सप्तमी। ततश्च **तत्र** तेषां मध्ये **आत्मानं केवलम्** आत्मानमेव यः कर्तारं पश्यति स दुर्मतिः। अधिष्ठानादिपञ्चकस्य कर्मनिर्वर्तकत्वेनात्मन एकस्यैव कर्तृत्वानुपपत्तेः। न चाधिष्ठानादिष्वात्माऽनुक्त इति वाच्यम् ; 'कर्ता' इत्यनेनोक्तत्वात्। 'कर्ता शास्त्रार्थवत्त्वाद्' इति ह्यात्मनः कर्तृत्वं स्थापितं सूत्रकारैरिति **द्वैतिनः** पूर्वपक्षयन्ति।

**अत्रोच्यते**—यदि 'कर्ता' इत्यनेन जीवात्मोच्यते, तर्हि जीवात्मानं कर्तारं यः पश्यति स सुमतिरेवेति कथं दुर्मतित्वं तस्य? न चात्मानमेकमेव यः कर्तारं पश्यति स दुर्मतिः; अधिष्ठानादिपञ्चकस्यापि कर्तृत्वेन दर्शनीयत्वादिति वाच्यम् , पूर्वं जीवस्यैव कर्तृत्वमुक्तं, न त्वधिष्ठानादेरिति। यद्यधिष्ठानादयः पञ्चापि कर्तारः स्युस्तर्हि 'अधिष्ठानं तथा कर्ता करणं चे'ति कर्तृशब्देन कथं जीवस्यैव ग्रहणं स्यात्? कथं वा सर्वसामान्येन कर्तृत्वेन तस्य निर्देशः स्यात्? 'अधिष्ठानं तथा जीवः करणं चे'ति हि नोक्तं व्यासेन। अधिष्ठानादयो हि कर्तुर्जीवस्य साहाय्यकारिण एव। यथा वास्यादयः तक्षकस्य। तस्माद् 'आत्मैक एव कर्ते'ति 'कर्ताऽह'मिति यः पश्यति, स सुमतिरेव[१]।

---

१. त्वन्मते इति शेषः। तथा च तस्य दुर्मतित्वोक्त्यसंगतिस्त्वन्मते इति भावः।

भाष्यार्कप्रकाशः

न चाधिष्ठानादिसहित एवात्मा कर्ता, न तु केवल इति कृत्वा केवलमात्मानं कर्तारं यः पश्यति, स दुर्मतिरेवेति वाच्यम् ; तथा सत्यकर्तृत्वस्यैव प्राप्तत्वादात्मनः। न च शरीराधिष्ठातृत्वरूपं कर्तृत्वं स्वतोऽप्यस्तीति नाकर्ताऽऽत्मेति वाच्यम् ; तथा सति केवलम् आत्मानं यः कर्तारं पश्यति स सुमतिरेव। अधिष्ठानादिसाहाय्यकं विनाऽपि कर्तृत्वस्य सत्त्वादात्मनः।

न च – शरीराधिष्ठानकर्तृत्वादात्मा कर्तेति निर्दिष्टः। गमनादिकं कर्म तु नात्मा केवलो निर्वर्तयितुमीष्टे। अत उक्तं शारीरादि-कर्मत्रये यः केवलमात्मानं कर्तारं पश्यति स दुर्मतिरिति – वाच्यम्। किमयं दुर्मतिः क्रियमाणं कर्म शारीरं वाचिकं मानसिकं वेति वेद, उत न? आद्ये, शारीरमिदं कर्म शरीरप्रधानमिति जानन् कथमात्मानं शरीरसहायरहितं केवलं कर्तारं पश्येत्? एवं वाचिकं मानसिकं चेन्द्रियप्रधानं मनःप्रधानमिति जानन् कथमात्मानमिन्द्रियमनःसहायरहितं कर्तारं पश्येत्? न कथमपि। द्वितीये, शरीरवाङ्मनांस्येवा-त्मत्वेन स वेदेति कथं शरीरादिविलक्षणे आत्मनि कर्तृत्वानुसन्धानं तस्य? तस्मादहं कर्तेति यः प्रत्येति स यदि बौद्धादिर्नास्तिकः, तर्हि देहादिसंघातात्माभिमानित्वेन संघातमेव कर्तारं पश्यति, न केवलमात्मानम्। स यद्यास्तिकस्तर्हि देहादिविलक्षणमात्मानं कर्तारं जानन्नपि न केवलमात्मानं कर्तारं जानाति, किन्तु मनइन्द्रियादिसहितमेव। स ह्यहं कर्ता, मनइन्द्रियादीनि करणानि, शरीरेण मनसा वाचा चेदं करोमीति मन्यते। तस्मान्न सिध्येदेव तव मते दुर्मतिः। य आत्मानं केवलं कर्तारं पश्यति। अतो व्यर्थ एव स्यात् सर्वोऽप्ययं श्लोकस्तव मते इत्यहो ! मूलच्छेदी तव **पाण्डित्यप्रकर्षः**!

यत्तु **रामानुजः—**एवं वस्तुतः परमात्मानुमतिपूर्वके जीवात्मनः कर्तृत्वे सति तत्र तत्र कर्मणि केवलमात्मानमेव यः कर्तारं पश्यति स दुर्मतिरिति, **तत्तुच्छम्,** पूर्वोक्तार्थपरामर्शिना एवंशब्देन वस्तुत इत्याद्यर्थप्रतिपादनासम्भवात्। न हि सोऽर्थः पूर्वमुक्तः। न च 'दैवं चैवात्र पञ्चम'मित्यनेनोक्त इति वाच्यम्। 'पञ्चैते तस्य हेतवः' इत्युक्तत्वाद् दैवस्येश्वरस्य कर्तुर्जीवस्य च पञ्चकान्तःपातित्वेन कर्म-हेतुत्वांशेऽविशेषात्। परमात्मानुमत्याऽपि जीवात्मन एकस्यैव कर्तृत्वेन तज्ज्ञानस्यादुष्टत्वाच्च। कथमन्यथा 'अधिष्ठानं तथा कर्ते'ति कर्तृशब्देन जीवग्रहणं स्यात्? न च – केवलमात्मानं कर्तारं पश्यतीत्यस्य परमात्मानुमतिं विनापि जीवं कर्तारं पश्यतीत्यर्थ इति – वाच्यम् ; केवलशब्दादेतादृशार्थालाभात्। न च **केवलं** प्रेरकेश्वररहितम् अर्थादीश्वरप्रेरणरहितमिति वाच्यम् ; ईश्वरप्रेरितोऽहमिदं करोमीति जानन्नपि तत्फलमवश्यमनुभवेदेवेति किं फलं तज्ज्ञानस्य, येन तज्ज्ञानरहितो दुर्मतिः स्यात्? ईश्वरमभ्युपगच्छन्तः सर्वेऽप्यास्तिकाः स्वस्येश्वरप्रेरणं जानीयुरेवेति किं फलं तत्प्रतिपादनस्येह वेदान्तशास्त्रे? मोक्षाय हि वेदान्तशास्त्रं प्रवर्तितमिदमीश्वरेण। न हि स्वस्येश्वरप्रेरणज्ञानात् कस्यापि मोक्षः, नापि वैदिकैरविदितोऽयमर्थः। येनाज्ञातार्थज्ञापनं फलं स्यात्।

न च नास्तिकस्य दुर्मतित्वमिहोच्यत इति वाच्यम् ; नास्तिको हि देहाद्यतिरिक्तं कर्तारमात्मानं न वेत्ति। येनेह स निन्द्येत। किञ्च यः परमात्मानुमत्या कर्म करोतीत्युच्यते, स जीवः किं वस्तुतः कर्ता, उतोदासीनोऽकर्ता? आद्ये, किं परानुमत्या तस्य? द्वितीये, कथमकर्तुर्वस्तुतः कर्तृत्वम्? न ह्यचलः आकाश ईश्वरानुमत्याऽपि चलति। न च – वस्तुतः कर्ता सन्नपि जीवस्तत्तत्कर्मविशेषे ईश्वर-प्रेरितः सन्नेव प्रवर्तते, राजचोदितभृत्यवदिति – वाच्यम् ; तथा सति परमात्मानुमतिपूर्वकं जीवात्मनः कर्तृत्वमिति वचनस्या-युक्तत्वात्। स्वाभाविकमेव हि जीवात्मनः तत्तत्कर्मकर्तृत्वमिति तद्वचनस्यार्थ इति वाच्यम् , धर्माधर्मसंस्कारप्रयुक्तत्वात् तत्तत्कर्म-कर्तृत्वस्य जीवात्मनः। न हि साक्षिभूतस्येश्वरस्यानुमतिरननुमतिर्वा कल्पयितुं शक्या। तथा सति विकारित्वापत्तेः। साक्षित्वस्य निर्विकारत्वरूपत्वात्[१]। हिंसादिकर्मसु प्रवर्तनोन्मुखस्य जीवस्यानुमतिप्रदानेनेश्वरस्य नैर्घृण्यादिदोषप्रसङ्गाच्च। न च – प्राचीनेषु कर्मसु जीवं तत्र तत्र प्रेरयत्सु सत्सु ईश्वरोऽनुमन्यत इतीश्वरानुमत्यैव कर्मणां प्रेरकत्वमिति – वाच्यम् ; ईश्वरानुमत्यभावे कर्मणामप्रेरकत्व-प्रसङ्गेन (तत्तद्दुष्टकर्मप्रेरकत्वप्रसङ्गेन) तत्तद्दुष्टकर्मप्रेरकत्वरूपनैर्घृण्यस्य पुनरपीश्वरे प्रसङ्गात्। न च जडानां कर्मणां प्रेरकत्वासम्भवात् तत्तत्कर्मानुगुण्येनेश्वर एव प्रेरयतीति वाच्यम् ; जडाया अप्ययस्कान्तशिलाया लोहप्रेरणदर्शनात्। ईश्वरस्यापि करणरहितस्य राजभृत्यादिवत् प्रेरणासम्भवाच्च।

तस्मादीश्वरे साक्षिभूते सति तत्तत्कर्माण्येव तं तं तत्र तत्र प्रेरयन्ति। तच्च प्रेरणं साक्षिण्यारोपितमज्ञानात्। तदेवारोपणम्

१. उदासीनत्वे सति बोद्धृत्वं हि साक्षित्वम्। औदासीन्यं च निर्विकारत्वमिति भावः।

**यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते।**
**हत्वाऽपि स इमान् लोकान् न हन्ति न निबध्यते॥१७॥**

**कः पुनः सुमतिः यः सम्यक् पश्यतीति? उच्यते—** यस्येति। यस्य **शास्त्राचार्योपदेशन्यायसंस्कृतात्मनो न भवति** अहङ्कृतः **'अहं कर्ता' इत्येवंलक्षणो** भावो **भावना प्रत्ययः। 'एत एव पञ्चाधिष्ठानादयोऽविद्यया आत्मनि कल्पिताः सर्वकर्मणां कर्तारः, नाहम् , अहं तु तद्व्यापाराणां साक्षिभूतः, 'अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः' (मु.उ.२.१.२) केवलोऽविक्रियः'– इत्येवं पश्यतीत्येतत्।** बुद्धिः **अन्तःकरणं यस्यात्मनः उपाधिभूता** न लिप्यते

आनन्दगिरिकृतव्याख्या

**विपरीतदृष्टेर्दुर्मतित्वं शिष्ट्वा, सम्यग्दृष्टेः सुमतित्वं प्रश्नपूर्वकमाह—**कः पुनरित्यादिना। **'अहं कर्ते'त्यात्मनि कर्तृत्वप्रत्ययाभावे कुत्र कर्तृत्वधीरित्याशङ्क्याह—**एत इति। **कथं तर्हि** [1]**अकर्तृत्वधीरात्मनीत्याशङ्क्याधिष्ठानादीनां तद्व्यापाराणां च साक्षित्वादित्याह—**अहं त्विति। **आत्मनो न स्वतोऽस्ति क्रियाशक्तिमत्त्वमित्यत्र प्रमाणमाह—**अप्राणो हीति। **नापि तस्य स्वतो ज्ञानशक्तिमत्त्वमित्याह—**अमना इति। **उपाधिद्वयासम्बन्धे शुद्धत्वं फलितमाह—**शुभ्र इति। **कारणसम्बन्धादशुद्धिमाशङ्क्योक्तम्—**अक्षरादिति। **कार्यकारणयोरात्मास्पर्शित्वेन पार्थक्ये सद्वितीयत्वमाशङ्क्य , तयोरवस्तुत्वान्नैवमित्याह—**केवल इति। **जन्मादिसर्वविक्रियारहितत्वेन कौटस्थ्यमाह—**अविक्रिय

भाष्यार्कप्रकाशः

अन्तर्यामिब्राह्मणेनाप्यनुवदितम्। कथमन्यथा निर्विकारस्येश्वरस्य साक्षिणः प्रेरकत्वरूपो विकारः स्यात्? एवं सति यः अहं कर्तेति मन्यते, स दुर्मतिः। यः पुनरीश्वरप्रेरितोऽहं कर्तेति मन्यते सोऽतीव दुर्मतिरिति सिद्धम्। ईश्वरेऽपि प्रेरकत्वविकारस्यानेनारोपितत्वात्। अतः कथमुच्यते— य ईश्वरानुमत्याऽऽत्मानं कर्तारं पश्यति, स पश्यतीति?। तस्माच्छङ्करभगवत्पादो**क्तार्थ एवानवद्यः।

ननु आत्मनोऽनन्यतमत्वेनेति मूलाद् बहिःपदकल्पनं तन्मतेऽप्ययुक्तमेवेति वाच्यम् ; शास्त्राद्यविरोधेन तत्कल्पनस्य युक्तत्वात्। यद्वा तत्रैवं सतीति मूलान्वयः। **तत्र** प्रकृते अधिष्ठानादिपञ्चके **एवं सति** पूर्वोक्तविधया सर्वकर्मकारणे सतीति। अथवा **तत्र** प्रकृते शारीरादिभेदभिन्ने सर्वस्मिन् कर्मणि, **एवं सति** यथोक्तैः पञ्चभिर्हेतुभिर्निर्वर्त्ये सतीत्यर्थः। आत्मकर्तृत्वदर्शनस्य दुष्टत्वे हेतुकथनम्— **तेष्वात्मनोऽनन्यतमत्वेनेति**। यद्यधिष्ठानादिष्वन्यतमः स्यादात्मा तर्हि तस्य कर्तृत्वदर्शनं युक्तमेव स्यात् , न तु तथाऽस्ति। अधिष्ठानादिष्वन्यतमत्वेनात्मा हि न निर्दिष्टः। अत एवात्मा केवलः शुद्धः। न च 'कर्ते'त्यनेनात्मा तेषु निर्दिष्ट इति वाच्यम् ; विज्ञानमयकोशस्योपाधिलक्षणस्य तत्र कर्तृत्वेन निर्देशात्। न च 'कर्ता शास्त्रार्थवत्त्वा'दित्यधिकरणविरोधः। अहङ्कारतादात्म्याध्यासेन कर्तेति निर्दिष्टत्वात् तत्र। कथमन्यथा 'साक्षी चेता केवलो निर्गुणश्च', 'निष्कलं निष्क्रियं शान्तम्', 'अविकार्योऽयमुच्यते' इत्यादिश्रुतिस्मृतिविरुद्धमुच्येतात्मनः कर्तृत्वं परानुमतिपूर्वकं कर्मचोदनपूर्वकं वेति सङ्क्षेपः॥१६॥

**यस्येति**। यस्याहङ्कृतो भावो नास्ति, यस्य बुद्धिर्न लिप्यते, स इमान् [लोकान्] हत्वाऽपि न हन्ति न निबध्यते। अहङ्कृतभावाभावे हेतुप्रदर्शनाय यस्येत्येतद् विशिनष्टि—**शास्त्रेति**। अकृतबुद्धिर्दुर्मतिरिति पूर्वमुक्तत्वात् कृतबुद्धिः सुमतिर्यच्छब्दार्थ इति भावः। **प्रत्ययो** ज्ञानम् , **न भवति** 'अहं कर्ते'ति यो न प्रत्येतीत्यर्थः। तर्हि कः प्रत्ययस्तस्य भवतीत्यत आह—**एत एवेति**। यद्वा 'अहं कर्ते'ति प्रत्ययः कुतोऽस्य न भवतीत्यत आह—**एत एवेति**। अथवा 'अहं कर्ते'ति प्रत्ययाभावमेवोपपादयति—**एत एवेति**। अविद्ययाऽऽत्मनि कल्पिता एते पूर्वोक्ता अधिष्ठानादयः पञ्चैव सर्वकर्मणां कर्तारो भवन्ति। हेतुत्वादिति भावः। अहं कर्ता न भवामि, यस्मादहं **तद्व्यापाराणाम्** अधिष्ठानादिकर्मणां साक्षिभूतः। न हि कर्तृव्यापारः साक्षिणः सम्भवतीति भावः। उपाध्यभावाच्च नाहं कर्तेत्याह—**अप्राण इति**। प्राणरहितो मनःशून्यश्च, उपलक्षणमिदमिन्द्रियादिराहित्यस्य। अत एव **शुभ्रः**। **परतः** कारणभूताद् **अक्षरात्** प्रकृतेः **परो** विलक्षणः। अत एव केवलः। अत एवाविक्रियश्च भवामीत्येवं **पश्यतीत्येतत्** जानातीति यावत्। 'यस्य बुद्धि'रित्यात्मबुद्ध्योः कः सम्बन्धः? अत

१. अधिष्ठानादिषु कर्तृष्वात्मनोऽप्यन्तर्भावादिति शङ्कितुराशयः। विशिष्टस्य तत्त्वेऽपि साक्षिणो न तदन्तर्भाव इति समाधातुराशयः। 'कर्तृत्वधीरात्मनि' इति पा.।

**[1]नानुशायिनी भवति, 'इदमहमकार्षम् , तेनाहं नरकं गमिष्यामि' इत्येवं यस्य बुद्धिर्न लिप्यते, स सुमतिः, स पश्यति। हत्वाऽपि स** इमान् लोकान् **सर्वानिमान् प्राणिनः इत्यर्थः।** न हन्ति **हननक्रियां न करोति।** न निबध्यते **नापि तत्कार्येणाधर्मफलेन सम्बध्यते।**

**ननु 'हत्वाऽपि न हन्ति' इति विप्रतिषिद्धमुच्यते, यद्यपि स्तुतिः। नैष दोषः; लौकिकपारमार्थिकदृष्ट्यपेक्षया**

आनन्दगिरिकृतव्याख्या

इति। **'बुद्धिर्यस्ये'त्यादि व्याचष्टे—**बुद्धिरिति। नानुशायिनी **नानुशयवती। न क्लेशशालिनीत्यर्थः। द्वितीयपादस्याक्षरार्थमुक्त्वा वाक्यार्थमाह—**इदमिति। **पापं कर्म इदमा परामृश्यते। लोकानां प्राणसम्बन्धाभावे कुतो हिंसेत्याशङ्क्याह—**प्राणिन इति।

**विरुद्धार्थोक्त्या स्तुतिरपि न युक्तेति शङ्कते—**नन्विति। **विरोधं परिहरति—**नैष दोष इति। **लौकिकदृष्टिमवष्टभ्य 'हत्वाऽपी'ति**

भाष्यार्कप्रकाशः

आह—**उपाधिभूतेति। नानुशयिनी भवति**, न तप्यत इत्यर्थः। तापप्रकारमेव दर्शयति—**इदमिति।** बुद्धिर्देहादिव्यतिरिक्तात्मदर्शित्वान्नैवं तप्यत इत्यर्थः।

**नन्वनात्मनो** माऽस्तु लेपः, कथं बुद्धेरपि लेपाभावः सम्भवति? कर्तृत्वाद् भोक्तृत्वाच्च बुद्धेरिति चेत् , **मैवम्** ; संस्कृता हि बुद्धिरात्मानमविक्रियं पश्यन्ती स्वयमपि तत्तादात्म्याध्यासेनाविक्रियैव वर्तते, न तु देहादितादात्म्याध्यासेन 'अहं करोमि, भुञ्जामी'ति ['भुञ्जे' इति] मन्यमाना सती विक्रियते। तस्माद् युक्त एव बुद्धेर्लेपाभावः। यः 'अहं करोमी'ति मन्यते तस्यैव बुद्धेर्लेपः। यो नाहं करोमीति मन्यते, तस्य बुद्धिर्निर्लेपा स्वच्छैव, परिशुद्धत्वादिति बोध्यम्।

**वस्तुतस्तु** – यो नाहं करोमीति मन्यते, स एव 'नाहं साध्वकरवम् , असाध्वेवाहमकरवम् , ततो नरकं गमिष्यामी'त्येवं न मन्यते। स चैवं मन्यमानः पदार्थो नात्मा, तस्य वृत्तिज्ञानायोगात्। किन्तु बुद्धिरेव। इयं च बुद्धिः कदाचिदात्मतादात्म्याध्यासाद् निर्लेपोऽहमिति मन्यते। कदाचित्पुनः मम बुद्धिर्निर्लेपेति मन्यते। उक्तं हि– 'अहंवृत्तिरिदंवृत्तिरित्यन्तःकरणं द्विधा' इति। तस्मात् कर्तृभावापन्नस्य विज्ञानमयशब्दवाच्यस्यान्तःकरणस्य बुद्धिपर्यायस्य शास्त्रादिवशाद् नाहं करोमीति प्रत्ययोत्पत्तिः। तस्यैव करणभावापन्नस्य मनोमयशब्दवाच्यस्यान्तःकरणस्य तापाभावश्चेत्युपपन्नम्। ततश्च अहं नरकं गमिष्यामीति तापाभावो बुद्धेरिति वचनात् स तापोऽपि बुद्धेरेव, न त्वात्मन इति सूचितम्। तेन चाविक्रियत्वमात्मनः फलितम्। निरहङ्कारबुद्धितादात्म्याध्यासाद् यस्य नाहङ्कृतो भाव इत्युक्तम्। बुद्धावात्मीयत्वाध्यासात्तु यस्य बुद्धिर्न लिप्यत इत्युक्तमिति विवेकः। **स इति।** यस्यान्तःकरणं निरहङ्कारं निर्लेपं च स इत्यर्थः। नाहं करोमीति, नाहं लिप्त इति च मन्यमानेनान्तःकरणेन तादात्म्याध्यासं प्रपन्नो यः स विद्वानिति यावत्। परिशुद्धान्तःकरणतादात्म्याध्यासं प्रपद्य नाहं कर्तेति, मम बुद्धिर्न लिप्तेति च यः प्रत्येति स विद्वानिति भावः।

**यद्वा** यस्योपाधिभूता बुद्धिरहं करोमीति, अहं नरकं गमिष्यामीति च **न मन्यते** न तप्यते च स आत्मेत्यर्थः। अथवा यस्यान्तःकरणावच्छिन्नस्य प्रमातुरहं कर्तेति न प्रत्ययः, नाप्यन्तःकरणस्यानुशयः स प्रमातेत्यर्थः। न स पश्यति दुर्मतिरिति पूर्वमुक्त्वादाह—**स सुमतिः, स पश्यति चेति।** स एव सम्यग्दर्शीत्यर्थः। लोक्यन्ते दृश्यन्त इति **लोकाः** प्राणिनः। **तत्कार्येण** प्राणिहननकार्येणाधर्मफलेन नरकदुःखेन **न सम्बध्यते** सम्बद्धो युक्तो न भवति। नास्य हननक्रियासम्बन्धः, नापि तत्फलसम्बन्ध इत्यर्थः। 'एतान् न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन !' 'पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः' 'स्वजनं हि कथं हत्वा सुखिनः स्याम माधव !' इत्यर्जुनेन प्रथममुक्तत्वात् तत्प्रतिक्षेपायोक्तं भगवता – 'हत्वाऽपि स इमान् लोकान् न हन्ति न निबध्यते' इति।

ननु 'हत्वाऽपि न हन्ती'त्येतत् स्तुतिवचनमपि विरुद्धमेवेत्याक्षिपति—**नन्विति।** परिहरति—**नेति। एषः** हन्तुरपि हननाभावप्रतिपादनं न दोषः। कुतः? लौकिकी च पारमार्थिकी च लौकिकपारमार्थिक्यौ,[2]ते च ते दृष्टी दर्शने, तयोर्लौकिकपारमार्थिकदृष्ट्योरपेक्षया

---

१. 'नानुशयिनी' इति पा.। २. सामान्ये नपुंसकमिति आश्रित्य लौकिकशब्देन नपुंसकलिङ्गेन विग्रहो युक्तः इति भाति। अन्यथा द्वन्द्वे पूर्वपदस्य पुंवद्भावाभावेन उक्तरूपानुपपत्तेः। लौकिकशब्देन लक्षणया लौकिकदृष्टिविवक्षणात् पारमार्थिकदृष्टिशब्देन द्वन्द्वो वा।

**तदुपपत्तेः। देहाद्यात्मबुद्ध्या 'हन्ताऽहम्' इति लौकिकीं दृष्टिमाश्रित्य 'हत्वाऽपि' इत्याह। यथादर्शितां पारमार्थिकीं दृष्टिमाश्रित्य 'न हन्ति न निबध्यते' इति। [1]तदुभयमुपपद्यत एव।**

आनन्दगिरिकृतव्याख्या

**निर्देशं विशदयति—**देहादीति। **तात्त्विकीं दृष्टिमास्थाय 'न हन्ती'त्यादिनिर्देशमुपपादयति—**यथेति। **'नाहं कर्ता, किन्तु कर्तृतद्व्यापारयोः साक्षी क्रियाज्ञानशक्तिमदुपाधिद्वयविनिर्मुक्तः शुद्धः सन् कार्यकारणासम्बन्धोऽद्वितीयोऽविक्रियः' इत्येवं पारमार्थिकदृष्टेर्यथादर्शितत्वं द्रष्टव्यम्। 'हत्वाऽपी'त्येतद् ,'न हन्ती'त्यादि चोभयं दृष्टिद्वयावष्टम्भादुपपन्नमित्युपसंहरति—**तदुभयमिति।

भाष्यार्कप्रकाशः

**तदुपपत्तेः** 'हत्वाऽपि न हन्ती'ति वचनस्योपपन्नत्वात्। तदेव विवृणोति—**देहादीति**। देहाद्यात्मबुद्धिप्रयुक्तां 'हन्ताऽह'मित्याकारिकां लौकिकदृष्टिम् , व्यवहारमिति यावत् , आश्रित्य 'हत्वाऽपी'त्याह भगवानिति शेषः। यथादर्शितां पूर्वं प्रपञ्चितां पारमार्थिकदृष्टिं सम्यग्दर्शनमाश्रित्य 'न हन्ति न निबध्यते' इत्याह। तस्मादेतदुभयमप्युपपद्यत एव।

देहेन्द्रियादिषु शत्रुहननक्रियां निर्वर्तयत्सु सत्सु 'गुणा एव हननक्रियाकर्तारो, न त्वह'मित्यनुसन्धानाद् विदुषो हननक्रिया-तत्फलाभ्यां न कोऽपि सम्बन्धगन्धः। परन्तु प्राकृतजनाः शत्रून् घ्नन्तं देहेन्द्रियादिसंघातं विदुषो दृष्ट्वा 'विद्वानयं शत्रून् हन्ती'ति मन्यन्तेऽविवेकात्। तेषां दृष्टिमाश्रित्य 'हत्वाऽपि स इमान् लोकानि'त्युक्तम्। विदुषो दृष्टिं पारमार्थिकीमाश्रित्य तु 'न हन्ति न निबध्यते' इत्युक्तं श्रीकृष्णेनेति भावः। 'हत्वाऽपी'त्यनेनापिशब्देन किम्पुनर्भुक्त्वा गत्वा यष्ट्वा[इष्ट्वा] दृष्ट्वा वा न भुङ्क्ते न गच्छति न यजते न पश्यती-त्यादिकं वक्तव्यमिति सूच्यते। ततश्च विदुषः सर्वकर्मसंन्यासस्तत्फलासम्बन्धश्च सिद्धः। अत एव 'न हि देहभृता शक्यं त्यक्तुं कर्माण्य-शेषतः' इत्यत्र 'देहभृताऽज्ञेने'ति व्याख्यातमाचार्यैः, प्रकृतश्लोकेन विदुषः सर्वकर्मसंन्याससम्भवो वक्ष्यत इत्यभिप्रायेण।

**ननु** विदुषः कर्माधिकार एव नास्तीति पूर्वं प्रतिपादितं तत्र तत्र। कथमिदानीं 'हत्वाऽपि स इमान् लोका'नित्युच्यत इति चेत्? **नैष दोषः**, विदुषः कर्मसंन्यास एवाधिकारो, न तु कर्मणीति यदुक्तं तत् सत्यमेव। परन्तु 'लोकसंग्रहमेवापि सम्पश्यन् कर्तुमर्हसी'ति पूर्वोक्तविधया क्षत्रियस्यार्जुनस्य विदुषोऽपि जनकादेरिव लोकसंग्रहार्थं कर्मणि प्रवृत्तेरुचितत्वेन हत्वाऽपीत्यादिकमुक्तम्।

**अयं भावः**– यो देहादिविलक्षणब्रह्मात्मदर्शी विद्वान् स यदि ब्राह्मणस्तर्हि सर्वकर्मसंन्यास एवाधिकारस्तस्य। 'ब्राह्मणो निर्वेदमायादि'त्यादिश्रुतेः। लोकसंग्रहार्थमपि तेन कर्मसंन्यासस्यैव कर्तव्यत्वात्। स यदि क्षत्रियादिस्तर्हि लोकसंग्रहार्थं स्वधर्मयुद्धाद्य-नुष्ठान एव तस्याधिकारः। अर्जुनस्य तु क्षत्रियत्वेन विदुषोऽपि युद्ध एवाधिकारः, न तु संन्यास इत्यभिप्रेत्य तमुद्दिश्योक्तम्— **हत्वा-ऽपीति**। त्वं देहेन्द्रियादिषु कर्तृत्वमारोप्य नाहं कर्तेति मन्यमानःसन् 'नरकमहं गमिष्यामी'ति खेदं, 'स्वर्गमहं गमिष्यामी'ति मोदं च चित्तेऽकुर्वाणः सन् स्वधर्मत्वेन प्राप्तमिमं सर्वशत्रुसंहारं कुरु । नानेन तव कोऽपि बन्धः स्याद्, ईश्वरेण मयोक्तश्चायमर्थो नान्यथा भवितुमर्हतीत्यर्जुनं प्रत्युपदेष्टुः कृष्णस्याशयः।

इमान् सर्वान् लोकानित्यस्य च धार्तराष्ट्राद्यान् इमान् दृश्यमानान् सर्वान् शत्रूनित्यर्थः। अत्र च सर्वानित्यनेन न केवलं शत्रु-हननादेव विदुषस्तव बन्धाभावः। किन्तु मित्रादिसर्वप्राणिहननादपि बन्धाभाव एव, 'अहं कर्ते'ति प्रत्ययाभावात्। 'अहं करोमी'ति प्रत्ययो हि बन्धहेतुः। अन्यथा वासुदेवस्य जनार्दनस्य भूभारापहरणार्थमवतीर्णस्य मम च सर्वजगत्संहारात् सर्वशत्रुसंहारात् पुत्र-मित्रादिस्वजनसंहाराच्च करिष्यमाणात् स्याद्धि महाननर्थः। तस्माद् 'नाहं कर्ता, गुणा एव कर्तारः' इतीमं विवेकमाश्रित्य यथाऽहं प्रलयादौ सर्वजगत्संहारादिकं कुर्वन्नपि न तत्फलेन सम्बध्ये, तथा त्वमपीमान् सर्वान् शत्रून् संहर दर्शितविवेकशाली सन्। ततो न त्वं तत्फलेन सम्बध्यसे। यो हि 'कर्ताऽह'मिति मन्यते, स बध्यते तत्फलेन। यो हि 'नाहं कर्ते'ति, 'गुणा एव कर्तारः' इति च मन्यते, स न लिप्यते। 'कुर्वन्नपि न लिप्यते' इति हि पूर्वमेवोक्तम्। तस्माद् विदुषोऽपि तव वासुदेववज्जनकादिवच्च नेदं हननादिकं बन्धकम् , नापि हननाद्यभावो मोचकः। हननादिवत् तदभावोऽपि देहाद्याश्रयः कर्मैवेति 'कर्मण्यकर्मे'ति श्लोके स्थापितत्वात्।

१. 'एतदुभयम्' इति पा.।

**नन्वधिष्ठानादिभिः सम्भूय करोत्येवात्मा, 'कर्तारमात्मानं केवलं तु' इति केवलशब्दप्रयोगात्। नैष दोषः; आत्मनोऽविक्रियस्वभावत्वेऽधिष्ठानादिभिः संहतत्वानुपपत्तेः। विक्रियावतो ह्यन्यैः संहननं सम्भवति, संहत्य वा**

आनन्दगिरिकृतव्याख्या

**केवलमेवात्मानं कर्तारं पश्यन् दुर्मतिरित्यत्रात्मविशेषणसमर्पककेवलशब्दसामर्थ्यादात्मनो विशिष्टस्य कर्तृत्वमिति शङ्कते—** नन्विति। **आत्मनो वैशिष्ट्यायोगान्न विशिष्टस्यापि कर्तृत्वमिति दूषयति—**नैष दोष इति। **अविक्रियस्वाभाव्येऽपि कथमात्मनोऽसंहतत्वमित्याशङ्क्याह—**विक्रियेति। **अधिष्ठानादिभिरात्मनः संहननेऽपि न कर्तृत्वम् , अविक्रियस्य क्रियान्वयव्याघातादित्याह—**संहत्येति।

भाष्यार्कप्रकाशः

कर्मणो बन्धकत्वं हि तवाभिमतम्। तस्मान्न त्वं तूष्णीम्भावेन कर्मणा मुक्तिं यास्यसि 'नास्त्यकृतः कृतेने'ति श्रुतेः, 'न कर्मणा न प्रजये'ति श्रुतेश्च। किं तर्हि? 'त्यागेनैकेऽमृतत्वमानशु'रिति श्रुतेस्त्यागेनैव तव मोक्षलाभः, पूर्वेषां जनकादीनां त्वदीयानां त्यागेनैव मुक्तत्वात्। स च त्यागो 'नाहं कर्ते'त्यात्मकर्तृत्वपरित्यागरूपः, 'गुणा एव कर्तारः' इति गुणेषु कर्तृत्वारोपरूपश्च। अयमेव त्यागः संन्यासिनाऽपि क्रियते। मोक्षहेतुश्च साक्षादयमेव, परमार्थसंन्यासश्चायमेव। कर्मफलत्यागस्तु परम्परया मोक्षसाधनः, तच्च दर्शितं 'न द्वेष्टी'ति श्लोकेन। यश्च मुण्डः काषायाम्बरभाग् दण्डी च, स न परमार्थसंन्यासी, 'संन्यास्यहं भिक्षामटामी'त्यहङ्कारसत्त्वादस्य। यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते, स सुमतिर्हि परमार्थसंन्यासी। न च परमहंसपरिव्राजका एव परमार्थसंन्यासिन इति वाच्यम् ; लक्ष्मीशगौरीशवागीशादीनामपरमार्थसंन्यासित्वापत्तेः। तेषामपि परमार्थसंन्यासस्य स्वीकर्तव्यस्यावशेषत्वेनाकृतकृत्यत्वापत्तेश्च।

तस्माद् ये परमहंसपरिव्राजका निवृत्तिमार्गस्थाः, कर्मण्यनधिकृताः सनकादयस्ते, ये च सृष्ट्यादिकर्मस्वधिकृता यज्ञादिकर्मसु च ब्रह्मादयो जनकादयस्ते च विद्वांसः परमार्थसंन्यासिन एव, अहङ्काराभावस्य परमार्थसंन्यासलक्षणत्वात्। यज्ञादिकर्मपरित्यागस्तु बाह्यसंन्यासलक्षणम्। न च सर्वारम्भपरित्यागित्वं गुणातीतलक्षणमिति पूर्वमुक्तमिति वाच्यम् ; सर्वारम्भेषु देहाद्याश्रयेषु स्वस्य कर्तृत्वाननुसन्धानस्यापि सर्वारम्भपरित्यागरूपत्वात्। कथमन्यथा निमेषोन्मेषाद्यारम्भपरित्यागित्वं स्यात् परमहंसपरिव्राजकस्यापि?

तस्माद् विदुषो ज्ञाननिष्ठस्य परमहंसपरिव्राजकस्य परमार्थसंन्यासिनो न कर्माधिकारः। विदुषो ज्ञाननिष्ठस्य गृहस्थस्यापि परमार्थसंन्यासिनः कर्तृत्वाभिमानपूर्वको न कर्माधिकारः। अत एव हि जनकादिभिः कृतं कर्म न कर्म, वासुदेवकृतसृष्ट्यादिकर्मवदिति पूर्वमुक्तम्। तस्मात् परमार्थसंन्यास्यपि विद्वान् भवान् यतो न परमहंसपरिव्राजकस्तस्मात् हत्वाऽपीमान् लोकान् न हन्ति, न निबध्यते। भोः पार्थ ! तस्मात् त्वं निरहङ्कारो निस्तापश्च सन् युध्यस्व। उक्तं हीदं प्रागेव – 'युध्यस्व विगतज्वरः' इति।

एतेन – विदुषः कर्माधिकारो नास्तीति कृत्वा कथमुच्यते हत्वाऽपीतीयमाशङ्का – समाधापिता। कथम्? विदुषः परमार्थसंन्यासिनोऽप्यपरमहंसपरिव्राजकस्य स्वकर्माधिकारोऽस्तीति। विदुषः कर्तृत्वाभिमानपूर्वक एव कर्माधिकारो नास्ति, निरहङ्कारपूर्वकस्तु कर्माधिकारोऽस्तीति च विदुषा क्रियमाणं कर्माकर्मैवेति, न तस्य कर्माधिकार इति च प्रोक्तत्वादिति सङ्क्षेपः।

ननु 'कर्तारमात्मानं केवलं तु यः' इत्यस्य केवलम् अधिष्ठानादिभिरसंहतमात्मानं यः कर्तारं पश्यतीत्यर्थः। तथा च केवलात्मनोऽकर्तृत्वेऽपि अधिष्ठानादिसंहतात्मनः कर्तृत्वमस्त्येव। ततश्च संहतोऽयमात्मा हन्त्येवेति कथमुक्तम्— 'न हन्ती'ति भगवानि-[भगवते]त्याक्षिपति— **नन्विति**। परिहरति—**नेति**। **एष** संहतस्यात्मनः कर्तुर्हननक्रियाकर्तृत्वाभावप्रतिपादनरूपो दोषो नास्ति। कुतः? **आत्मन इति**। आत्मनोऽधिष्ठानादिभिः सह **संहतत्वानुपपत्तेः** मिलितत्वायोगात्। तत्र हेतुमाह— **अविक्रियस्वभावत्वेनेति**। निर्विकारत्वेनेत्यर्थः। हेतुमेव व्यतिरेकमुखेनोपपादयति—**विक्रियेति**। **हि** यस्मादित्यर्थः। प्रसिद्धौ वा **हि**शब्दः। **विक्रियावतः** सविकारस्य वस्तुनः अन्यैः सह संहननं सम्भवति। संहत्य वा कर्तृत्वं सम्भवति विक्रियावत इत्येव। सावयवस्य सविक्रियत्वं, सविक्रियस्य संहतत्वं, संहतस्य च कर्तृत्वं प्रसिद्धं सम्भवि च। बहूनां संहतानां देहानां स्थूलोपलोत्क्षेपणादिकार्यकर्तृत्वस्य, बहूनां संहतानां सूक्ष्ममृदवयवानां घटीभूतानामुदकाहरणकर्तृत्वस्य च दर्शनात्। बहूनां तन्तूनां पटात्मना संहतानां देहावरणशीतवारणादिकार्य-कर्तृत्वदर्शनाच्च। तेषां च देहानां रेणूनां तन्तूनां च सविक्रियत्वं सावयवत्वं च प्रसिद्धमिति भावः। तर्हि संहननादिकम[मात्मनः]सम्भवीत्यत

**कर्तृत्वं स्यात्। न त्वविक्रियस्यात्मनः केनचित् संहननमस्तीति न सम्भूय कर्तृत्वमुपपद्यते। अतः केवलत्वमात्मनः स्वाभाविकमिति केवलशब्दोऽनुवादमात्रम्। अविक्रियत्वं चात्मनः श्रुतिस्मृतिन्यायप्रसिद्धम्। 'अविकार्योऽयमुच्यते (भ.गी.२.१५) 'गुणैरेव कर्माणि क्रियन्ते'(द्र.भ.गी.३.२७), 'शरीरस्थोऽपि...न करोति'(भ.गी.१३.३१) इत्याद्यसकृदुपपादितं गीतास्वेव तावत्। श्रुतिषु च 'ध्यायतीव लेलायतीव' (बृ.उ.४.३.७) इत्येवमाद्यासु[१]। न्यायतश्च— निरवयवम् अपरतन्त्रम् अविक्रियम् आत्मतत्त्वमिति राजमार्गः। विक्रियावत्त्वाभ्युपगमेऽप्यात्मनः स्वकीयैव विक्रिया स्वस्य भवितुमर्हति। नाधिष्ठानादीनां कर्माणि आत्मकर्तृकाणि स्युः। न हि परस्य कर्म परेणाकृतमागन्तुमर्हति। यत्त्वविद्यया**

आनन्दगिरिकृतव्याख्या

**संहतत्वानुपपत्तिं व्यक्तीकरोति—**न त्विति। **असंहतत्वे फलितमाह—**इति नेति। **कथं तर्हि केवलत्वमात्मनि केवलशब्दादुक्तम्? तदाह—**अत इति। [२]**कर्तृत्वमात्मनोऽभ्युपपन्नं नास्याविक्रियत्वमुपैतीत्याशङ्क्याह—**अविक्रियत्वं चेति। **तत्र स्मृतिवाक्यान्युदाहरति—**अविकार्योऽयमिति। **'नायं हन्ति न हन्यते' इत्यादिवाक्यमादिशब्दार्थः। उक्तवाक्यानामात्माविक्रियत्वे तात्पर्यं सूचयति—**असकृदिति। **'निष्कलं निष्क्रियं शान्त'मित्यादि वाक्यं श्रुतावादिशब्दार्थः[३]। यानि वाक्यानि तैरात्मनोऽविक्रियत्वं दर्शितमिति योजना। न्यायतश्च तद् दर्शितमिति पूर्वेण सम्बन्धः। न्यायमेव दर्शयति—**निरवयवमिति। **न तावदात्मा स्वतो विक्रियते, निरवयवत्वाद् , आकाशवत् ; नापि परतः, असङ्गस्याकार्यस्य पराधीनत्वायोगादित्यर्थः। किञ्चात्मनः स्वनिष्ठा वा विक्रिया, अधिष्ठानादिनिष्ठा वा? नाद्यः, स्वनिष्ठविक्रियानुपपत्तेरात्मनो दर्शितत्वादित्याशयेनाह—**विक्रियावत्त्वेति। **सा चायुक्तेत्युक्तमिति शेषः। द्वितीयं दूषयति—**नेत्यादिना। **अधिष्ठानादिकृतमपि कर्म तद्योगादात्मन्यागच्छतीत्याशङ्क्य , तदागमनं वास्तवमाविद्यं वेति विकल्प्याऽऽद्यं दूषयति—**न हीति। **द्वितीयं निरस्यति—**

भाष्यार्कप्रकाशः

आह— **न त्वात्मन इति**। तत्र हेतुमाह— **अविक्रियस्येति**। संहननं हि विक्रिया, कथमविक्रियात्मनि तत्सम्भवः? न कथमपीति भावः। तन्तवो हि संहताः सन्तः पटात्मना विक्रियमाणा दृष्टाः। यद्येवमात्माऽपि संहतः स्यात् तर्हि तस्यापि केनचिद् रूपेण परिणामः स्यादिति भावः। **इति** हेतोः संहननासम्भवादित्यर्थः। **सम्भूय** संहत्य। **अत इति**। सम्भूय कर्तृत्वानुपपत्तेरित्यर्थः। **केवलत्वं** शुद्धत्वं **स्वाभाविक**मेवेति, न त्वागन्तुकमित्यर्थः। अधिष्ठानादिभिः सह सम्भूत्यभावप्रयुक्तं नेति भावः। यद्यधिष्ठानादिभिः सहात्मनः सम्भूय कर्तृत्वं स्यात् तर्हि तन्निरासाय **केवल**मिति प्रयुज्येत, न तु तदस्तीत्यभिसन्धिः।

नन्वेवं केवलशब्दो व्यर्थः? अत आह—**अनुवादमात्रमिति**। स्वतःसिद्धस्वरूपानुवादपर इत्यर्थः।'केवलो निर्गुणश्चे'तिवदिति भावः। नन्वविक्रियत्वमात्मनोऽप्रमाणं येनात्मनः सम्भूयापि कर्तृत्वं न स्याद् , अत आह—**अविक्रियत्वं चेति**। स्मृतिप्रसिद्धिं दर्शयति—**अविकार्य इति**। श्रुतिप्रसिद्धिं दर्शयति—**ध्यायतीवेति**। इवशब्दाद् ध्यानचलनादिविकारा नात्मनः सन्तीति सूच्यते। न्यायप्रसिद्धिं दर्शयति— **निरवयवमिति**। **आत्मतत्त्वम्** आत्मस्वरूपं चैतन्यमात्मेति यावत्। **राजमार्गो** घण्टापथः। तद्वन्निरवद्यो महाजनैः क्षुण्णश्चायमर्थ इत्यर्थः। आत्मतत्त्वमविक्रियं निरवयवत्वात् , यत् सावयवं तत् सविक्रियम् , यथा घटः; आत्मतत्त्वमपरतन्त्रम् अविक्रियत्वाद् , यत् सविक्रियं तत् परतन्त्रं यथा घटः; आत्मतत्त्वमपरतन्त्रं निरवयवत्वाद् , यत् सावयवं तत् परतन्त्रं यथा घट इति च प्रयोगा ऊह्याः। तुष्यतु दुर्जन इति न्यायेनाह—**विक्रियेति**। आत्मनो विक्रियावत्त्वं यद्यभ्युपगम्यते, तर्हि तस्य तत् किमात्मनिष्ठैः कर्मभिर्भवति, उताधिष्ठानादिनिष्ठैः? नाद्यः, आत्मनि कर्माभावात्। अधिष्ठानादिपञ्चकं हि कर्मकारणमित्युक्तम् , 'तत्रैवं सती'त्यनेनाकर्तृत्वं ह्यात्मनः प्रतिपादितम्। तस्मादकर्तर्यात्मनि न कर्मसम्भवः। द्वितीयं दूषयति— **स्वकीयैवेति**। कर्मभिरिति शेषः। न त्वधिष्ठानादिकर्मभिरित्याह— **नाधिष्ठानादीनामिति**। यद्यधिष्ठानादिकर्माण्यात्मकर्माणि स्युस्तर्ह्यधिष्ठानादिकर्मभिरात्मा विक्रियावान् कर्ता स्यात् , न तु तथा भवतीत्यर्थः। ननु परकर्म परस्य भवतु, को दोषः? तत्राह— **न हीति**। परेण कृतं कर्म परस्यागन्तुं नार्हति हि, अन्यथा चैत्रेण

१. इतः परं 'यानि वाक्यानि दर्शितम्' इति पाठः क्वचिदुपलभ्यते। स एवानन्दगिरिदृष्टः पाठः स्यादिति भाति। २. 'अकर्तृत्वम्' इति पा.। ३. भाष्ये 'इत्येवमाद्यासु' इत्यत्राद्यशब्दार्थविवरणमिदम्। श्रुतावित्यस्य च भाष्ये श्रुत्युपन्यासे इत्यर्थः।

**गमितं, न तत् तस्य। यथा रजतत्वं न शुक्तिकायाः, यथा वा [1]तलमलवत्त्वं बालैर्गमितमविद्यया नाकाशस्य। तथा अधिष्ठानादिविक्रियाऽपि तेषामेव, नात्मनः। तस्माद् युक्तमुक्तम्— अहङ्कृतत्वबुद्धिलेपाभावाद् विद्वान् न हन्ति, न निबध्यत इति।**

**'नायं हन्ति न हन्यते'(भ.गी.२.१९) इति प्रतिज्ञाय, 'न जायते' इत्यादिहेतुवचनेन अविक्रियत्वमात्मनः उक्त्वा, 'वेदाविनाशिनम्'(भ.गी.२.२१) इति विदुषः कर्माधिकारनिवृत्तिं शास्त्रादौ संक्षेपत उक्त्वा, मध्ये प्रसारितां च तत्र तत्र प्रसङ्गं कृत्वोपसंहरति शास्त्रार्थपिण्डीकरणाय – 'विद्वान् न हन्ति न निबध्यते'(भ.गी.१८.१७) इति। एवं च सति देहभृत्त्वाभिमानानुपपत्तौ अविद्याकृताशेषकर्मसंन्यासोपपत्तेः संन्यासिनाम् अनिष्टादि त्रिविधं कर्मणः फलं न**

आनन्दगिरिकृतव्याख्या

यत्त्विति। **आत्मन्यविद्याप्रापितं कर्म, नात्मीयमित्येतद् दृष्टान्ताभ्यामुपपादयति—**यथेत्यादिना। **आत्मनोऽविक्रियत्वेन कर्तृत्वाभावे फलितमाह—** तस्मादिति। **ननु प्रागेवात्मनोऽविक्रियत्वं प्रतिपादितम् , तदिह कस्मादुच्यते? तत्राह—**नायमिति। **शास्त्रादौ प्रतिज्ञातं हेतुपूर्वकं संक्षिप्योक्त्वा, मध्ये तत्र तत्र प्रसङ्गं कृत्वा प्रसारितां कर्माधिकारनिवृत्तिम् इहोपसंहरतीति सम्बन्धः। प्रतिज्ञातस्य हेतुनोपपादितस्यान्ते निगमनं किमर्थमित्याशङ्क्याह—**शास्त्रार्थेति। **कर्माधिकारो विदुषो नेति स्थिते, तस्य देहाभिमानाभावे सत्यविद्योत्थ-सर्वकर्मत्यागसिद्धेः 'अनिष्टमिष्टं मिश्रं चेति त्रिविधं कर्मफलं संन्यासिनां न' इति प्रागुक्तं युक्तमेवेति परमप्रकृतमुपसंहरति—** एवं चेति। ये

भाष्यार्कप्रकाशः

कृतस्य कर्मणः फलस्य मैत्रेणानुभवितव्यत्वप्रसङ्गात्। तस्मात् परकीयं धनं यथा चौर्यादिना परं प्रत्यागच्छति, तथा न परकीयं कर्मा-गच्छति। 'सुकृतं दुष्कृतं चैव गच्छन्तमनुगच्छती'ति वचनात्। तत्त्वविदः कर्म तु परं प्रत्यागच्छत्येव, 'सुहृदः साधुकृत्यां द्विषन्तः पापकृत्या'[३]मिति श्रुतेः। न तदिहोदाहरणमर्हति। 'तद्विद्वान् पुण्यपापे विधूय' इति श्रुत्या विदुषा विधूतस्यैव कर्मणः परं प्रत्यागन्तु-कत्वम् , न तु परेण कृतस्येति। विद्वदविधूतस्यैव परेण कृतस्य कर्मणः परं प्रत्यनागन्तुकत्वमिति विवक्षितत्वात्। ननु परकृतमपि कर्म परस्य भवत्येवाज्ञानात्। अज्ञो हि देहादिकर्तृके कर्मणि स्वस्य कर्तृत्वं पश्यति 'गन्ताऽहं श्रोताऽह'मिति। अत आह— **यत्त्विति**। अविद्यया **गमितं** प्रापितं तु यत् कर्म परकीयं, तत् तस्य स्वकीयं न भवति। अविद्यया आत्मन्यारोपितं देहाद्याश्रयं कर्म नात्माश्रयं भवितुमर्हतीत्यर्थः। तत्र दृष्टान्तमाह—**यथेति**। शुक्तिकायामविद्ययाऽध्यस्तं रजतत्वं यथा न शुक्तिकाया धर्मो भवति, तथा आत्मन्य-विद्ययाऽध्यस्तं कर्तृत्वं नात्मन इत्यर्थः। ननु सरूपत्वाच्छुक्तिकायां रजतत्वाध्यासोऽस्तु नाम, कथं नीरूपे आत्मनीत्यत आह—**यथा वेति**। बालैरविद्यया गमितं तलमलिनत्वं यथा नाकाशस्य भवति, तद्वदिति। दार्ष्टान्तिकमाह—**तथेति**। अधिष्ठानादिगता विक्रिया अधिष्ठानादीनामेव धर्मः, न त्वात्मधर्म इत्यर्थः। **तस्मादिति**। स्वगतविकाराभावात् , परगतविकारैः स्वस्य विक्रियावत्त्वा-भावाच्चेत्यर्थः। **अहङ्कृतत्वम्** अहङ्कर्तेत्यहङ्कारो, बुद्धिलेपश्च। तयोरभावे सति विद्वानविक्रियात्मदर्शी न हन्ति, न निबध्यत इति युक्त-मुक्तम्। आत्मनि कर्तृत्वादिविक्रियाऽयोगादिति भावः। **पिण्डीकरणं** क्रोडीकारः। 'नायं हन्ति न हन्यते' इति यदादौ प्रतिज्ञातं तदिहो-पसंहृतम् – 'न हन्ति न निबध्यते' इति। उपक्रमोपसंहारयोरैकरूप्यस्यावश्यकत्वादिति भावः। 'य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥' इत्यत्र 'अय'मित्यनेनात्मन उक्तत्वाद् , इह 'सः' इत्यनेन विदुष उक्तत्वाच्च विद्वान् प्रमातैव, वस्तुतः प्रत्यगात्मेति सिद्धम्। ततश्च विदुषोऽविक्रियस्यात्मनः कर्माधिकाराभावश्च सिद्धः। **एवं च सतीति**। विदुषोऽविक्रियात्मत्वेन कर्माधिकाराभावे सतीत्यर्थः। संन्यासिनां ज्ञाननिष्ठानां विदुषां देहभृत्त्वाभिमानानुपपत्तौ सत्याम् अविद्याकृता-नामशेषकर्मणां संन्यासस्योपपत्तेस्तेषां त्रिविधं कर्मफलं न भवतीत्युपपन्नम्। अत एव – 'अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्।

१. 'तलमलिनत्वम्' इति पा.। २. 'परेण कृतम्' इति रा.पा. भाति। ३. 'तस्य पुत्रा दायमुपयन्ति' इति पूर्वश्रुतस्य क्रियापदस्यात्रानुषङ्गः। सुहृद्द्विषद्भ्यां विद्वत्सम्बन्धिसुकृतदुष्कृतयोः आदानवचनं ज्ञानस्तुत्यर्थम् , न मुख्यम्। (द्र.ब्र.सू. ३-३-२६)

## ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना।
## करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः॥ १८॥

**भवतीत्युपपन्नम्। तद्विपर्ययाच्च इतरेषां भवतीत्येतच्चापरिहार्यमित्येष गीताशास्त्रस्यार्थः उपसंहृतः। स एष सर्ववेदार्थ-सारो निपुणमतिभिः पण्डितैः विचार्य प्रतिपत्तव्यः इति तत्र तत्र प्रकरणविभागेन दर्शितोऽस्माभिः शास्त्रन्यायानुसारेण ॥ १७॥**

**अथेदानीं कर्मणां प्रवर्तकमुच्यते—** ज्ञानमिति। ज्ञानं **ज्ञायतेऽनेनेति सर्वविषयम् अविशेषेणोच्यते। तथा** ज्ञेयं **ज्ञातव्यम् , तदपि सामान्येनैव सर्वमुच्यते। तथा** परिज्ञाता **उपाधिलक्षणोऽविद्याकल्पितो भोक्ता – इत्येतत् त्रयम्**

आनन्दगिरिकृतव्याख्या

**पुनरविद्वांसो देहाभिमानिनस्तेषां त्रिविधं कर्मफलं [1]भवत्येवेति हेतुवचनसिद्धमर्थं निगमयति—**तद्विपर्ययाच्चेति। **अधिष्ठानादिकृतं कर्म नात्मकृतम् , अविदुषामेव कर्माधिकारो देहाभिमानित्वेन तत्त्यागायोगात् , देहाभिमानाभावात्तु विदुषां कर्माधिकारनिवृत्तिरित्युपसंहृतमर्थं संक्षिप्याह—**इत्येष इति। **उक्तश्च गीतार्थो वेदार्थत्वादुपादेय इत्याह—**स एष इति। **कथमयमर्थो वेदार्थोऽपि प्रतिपत्तुं शक्यते? तत्राह—** निपुणेति। **भाष्यकृता मानयुक्तिभ्यां विभज्यानुक्तत्वाद् नास्यार्थस्योपादेयत्वमित्याशङ्क्याह—**तत्रेति॥ १७॥

**शास्त्रार्थोपसंहारानन्तर्यम्** अथेत्युक्तम्। इदानीमिति **प्रवर्तकोपदेशापेक्षावस्थोक्ता।** कर्मणां **येषु विदुषां नाधिकारोऽविदुषां चाधिकारस्तेषामित्यर्थः। ज्ञानशब्दस्य करणव्युत्पत्त्या ज्ञानमात्रार्थत्वमाह—**ज्ञानमिति। **ज्ञेयशब्दस्यापि तद्वदेव ज्ञातव्यमात्रार्थत्वमाह—** तथेति। उपाधिलक्षणत्वं **तत्प्रधानत्वमुपहितत्वम्। तस्यावस्तुत्वार्थम् अविद्याकल्पितविशेषणम्। एतदेव त्रयं सर्वकर्मप्रवर्तकमित्याह—** इत्येतदिति। **सर्वकर्मणां प्रवर्तकमित्यध्याहर्तव्यम्[2]। 'चोदनेति क्रियायाः प्रवर्तकं वचनम्' इति [3]भाष्यानुसारेण चोदनाशब्दार्थमाह—**

भाष्यार्कप्रकाशः

भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्॥' इत्युक्तमिति भावः। **इतरेषाम्** अविदुषां **तद्विपर्ययः** कर्मसंन्यासाभावः कर्मफल-भोगश्चेत्यर्थः। **भवतीत्येतदिति।** उक्तं मतमित्यर्थः। उक्तार्थ इति यावत्। **अपरिहार्यं** न केनापि परिहर्तुं शक्यम्। **स एष इति।** विदुषः सर्वकर्मसंन्यासोऽविदुषस्तदसम्भवश्चेत्यर्थः। **प्रतिपत्तव्यो** ज्ञातव्यः। **इतिशब्दः** समाप्तौ। ननु न वयं विचारणे क्षमाः, त्वमेव ब्रूहीत्यत आह— **तत्रतत्रेति।** 'वेदाविनाशिनम्' इत्यादिस्थलेष्वित्यर्थः। **विभागेनेति।** अङ्गप्राङ्गविभागपूर्वकमित्यर्थः। न स्वबुद्ध्य-नुसारेण दर्शित इत्याह—**शास्त्रेति।**

'ईश्वर एव करोति, नाहं करोमी'ति यो मन्यते स सुमतिरिति **रामानुजः, तदयुक्तम्** ; 'निष्कलं निष्क्रियं शान्त'मिति श्रुत्युक्ते निर्विकारे ब्रह्मणि कर्तृत्वदर्शनस्य रज्जौ सर्पत्वदर्शनस्येव मिथ्याज्ञानत्वात् , तस्य च संसारानिवर्तकत्वात् , तत्त्वज्ञानादेव मोक्षसम्भ-वात् , अविक्रियब्रह्मात्मदर्शनस्यैव तत्त्वज्ञानत्वाच्चेति॥ १७॥

**ज्ञानमिति।** कर्मचोदना ज्ञानं ज्ञेयं परिज्ञातेति त्रिविधा भवति। कर्मसंग्रहः करणं कर्म कर्तेति त्रिविधो भवति। ज्ञानमिह न चिन्मात्रमित्याह—**सर्वविषयमिति।** वृत्तिज्ञानमित्यर्थः। तत्तद्विषयाकारपरिणतबुद्धिवृत्त्या हि ते ते विषया घटादयः सर्वेऽवभास्यन्ते। **अविशेषेणेति।** न तु पुनः अमानित्वमदम्भित्वमित्यादिवद् विशेषेणेत्यर्थः। **सामान्येनेति।** अविशेषेणेत्यर्थः। **सर्वमिति।** सर्वविषयजात-मित्यर्थः। **उपाधिलक्षणो**ऽन्तःकरणविशिष्टः, अविद्याकल्पितश्चिदाभासः। चोद्यतेऽनयेति चोदना, कर्मणां चोदना कर्मचोदना, कर्म-प्रवर्तिका। ज्ञानादित्रयं कर्मणां प्रवर्तकमित्यर्थः। कथं त्रयस्य प्रवर्तकत्वम्? अत आह—**ज्ञानादीनामिति। सन्निपातः** सम्बन्धः, मेलन-मिति यावत्। **हानं** त्यागः, **उपादानं** स्वीकारः, **उपेक्षा** तदुभयाभावेन तूष्णीम्भावः। दुष्कृतादिहानार्थं सुकृताद्युपादानार्थमीश्वरार्पणबुद्ध्या

---

१. 'संभवत्येव' इति पा.। २. एतदिति नपुंसकलिङ्गानुरोधेनाध्याहारकथनम्। ३. द्र. शाबरभाष्यम् १.१.२।

[1]**एषामविशेषेण सर्वकर्मणां प्रवर्तिका** त्रिविधा **त्रिप्रकारा** कर्मचोदना। **ज्ञानादीनां हि त्रयाणां सन्निपाते** [2]**हानोपादानादि-प्रयोजनः सर्वकर्मारम्भः स्यात्। ततः पञ्चभिरधिष्ठानादिभिरारब्धं वाङ्मनःकायाश्रयभेदेन त्रिधा राशीभूतं त्रिषु करणा-दिषु सङ्गृह्यते इत्येतदुच्यते—** करणं **क्रियतेऽनेनेति बाह्यं श्रोत्रादि , अन्तःस्थं बुद्ध्यादि ;** कर्म **ईप्सिततमं कर्तुः क्रियया** [3]**व्याप्यमानं**, कर्ता **करणानां** [4]**व्यापारयितोपाधिलक्षण इति** त्रिविध**स्त्रिप्रकारः** कर्मसंग्रहः **संगृह्यतेऽस्मिन्निति संग्रहः। कर्मणः संग्रहः कर्मसंग्रहः। कर्म एषु हि त्रिषु समवैति। तेनायं त्रिविधः कर्मसंग्रहः॥ १८॥**

आनन्दगिरिकृतव्याख्या

प्रवर्तिकेति। **सर्वकर्मणामिति पूर्वेण सम्बन्धः। त्रैविध्यं ज्ञानादिना प्रागुक्तम्। कर्मणां चोदनेति विग्रहः। तेषां सर्वकर्मप्रवर्तकत्वमनुभवेन साधयति—**ज्ञानादीनामिति। हानोपादानादीत्या**दिपदेनोपेक्षा विवक्षिता। 'करण'मित्यादेस्तात्पर्यमाह—**तत इति। **ज्ञानादीनां प्रवर्तक-त्वादित्यर्थः। उक्तेऽर्थे श्लोकभागमवतारयति—** इत्येतदिति। **बाह्यमन्तःस्थं च द्विविधं करणं करणव्युत्पत्त्या कथयति—** करणमिति। **उक्तलक्षणं कर्मैव स्फुटयति—**कर्तुरिति। **स्वतन्त्रो हि कर्ता।** [5]**स्वातन्त्र्यं च कारकाप्रयोज्यस्य तत्प्रयोक्तृत्वमित्याह—**कर्तेति। **कथमुक्ते त्रिविधे कर्म संगृह्यते? तत्राह—**कर्मेति। **कर्मणो हि प्रसिद्धं कारकाश्रयत्वमिति भावः॥ १८॥**

भाष्यार्कप्रकाशः

च केवलं त्रेधा कर्मारभ्यते पुरुषैरिति कर्मारम्भस्य हानादित्रयं प्रयोजनम्। **यद्वा** प्रवृत्तिवन्निवृत्तिरपि कर्मैवेति प्रवृत्तेर्हानोपादाने प्रयोजने, निवृत्तेस्तूपेक्षेति। अयं च कर्मारम्भकः पुरुषो जीवः ज्ञेयं यज्ञादिस्वर्गादिकं शास्त्रादिजन्यज्ञानेन ज्ञात्वा कर्मारभत इति ज्ञानादि-त्रयसन्निपातः कर्मारम्भहेतुरित्यर्थः। **तत इति**। तथेत्यर्थः। **राशीभूतमिति**। कर्मेति शेषः। करणादिषु करणकर्मकर्तृषु। **उच्यत इति**। श्लोकस्योत्तरार्धेनेति शेषः। **बाह्यं** बहिर्विषयग्रहणसमर्थमित्यर्थः। कर्णशष्कुलीरसनात्वगादिबहिःप्रदेशस्थितमिति वा। **अन्तःस्थं** हृत्पुण्डरीकस्थितं सुखाद्यन्तर्विषयग्रहणसमर्थत्वादिति भावः। बुद्ध्यादीत्यादिपदान्मनसो ग्रहणम्। 'कर्तुरीप्सिततमं कर्म'ति **पाणिनिना** सूत्रितं कर्मेह कर्मशब्देन ग्राह्यमित्याह—**कर्मेति**। ईप्सिततमशब्दार्थमाह—**क्रियया प्राप्यमाणमिति**। स्वर्गादिरूपं फलमिति भावः। तद्धि द्वितीयान्तपदवाच्यम् ; ज्योतिष्टोमेन स्वर्गं गच्छतीति प्रसिद्धेः। **कर्ता** भोक्ता जीवः। व्यापाराश्रयत्वं कर्तृत्वम् , तच्चात्मनि निर-वयवे निष्क्रिये न सम्भवतीत्यत आह— **करणानां व्यापारयुत इति**। करणानां चक्षुरादीनां ये व्यापाराः क्रियाः दर्शनादयस्तैर्युतः। जीवस्य स्वतो निर्व्यापारत्वेऽपि स्वाध्यस्तकरणव्यापारैः सव्यापारत्वमिति भावः। एतेनाविद्यालक्षणमेव कर्तृत्वं जीवस्य, न तु स्वाभा-विकमिति स्थितम्।

इदमेव स्फुटयितुमाह—**उपाधिलक्षण इति**। उपाधिनाऽन्तःकरणेनाविद्यया वा लक्ष्यते युज्यत इत्युपाधिलक्षणः। उपाधि-तादात्म्याध्यासमापन्न इत्यर्थः। कथं करणादिषु कर्मणः संग्रहः? अत आह—**कर्मेति**। **समवैति** सङ्गच्छते। कर्ता हि किञ्चित् फलमुद्दिश्य करणैः कर्मणि प्रवर्तत इति कर्तृकरणप्राप्यत्रयाधीनसत्ताकं यज्ञादिकर्मेति भावः। **तेनेति**। कर्मणस्त्रिषु समवायेनेत्यर्थः।

अत्र ज्ञानं शास्त्रमिति **शङ्कराचार्यैरुक्त**मिति **वेदान्तदेशिको** बभ्राम। न ह्याचार्यैर्ज्ञानं शास्त्रमित्युक्तम्। अविवेकिनां ज्ञानमीदृशं दृश्यत इति वक्ष्यमाणानुरोधाद् बुद्धिवृत्तिरेव ज्ञानम्। शास्त्रमपि बुद्धिवृत्तिविषयीकृतमेव सत् करणं भवति, न तु केवलम् , अन्यथा अविद्वानपि पुस्तकेन ज्ञेयं जानीयात्। एवं चक्षुरादयोऽपि स्वद्वारा निर्गतबुद्धिवृत्त्यैव घटादिकमवभासयन्ति, न तु स्वत इति चक्षुरादेरपि केवलस्य न करणत्वम्। तस्माद् ज्ञायतेऽनेनेति व्युत्पत्त्या ज्ञानशब्दो बुद्धिवृत्तिमेवाभिधत्ते स्वरसत इति बोध्यम्। न च शास्त्रेण कर्मणश्चोदितत्वात् 'चोदनालक्षणोऽर्थो धर्मः' इति सूत्रात् कर्मचोदनारूपं शास्त्रमेवेह ज्ञानशब्देन ग्राह्यमिति वाच्यम् ; शास्त्रविषय-बुद्धिवृत्त्यैव कर्म चोद्यते, न तु केवलशास्त्रेण, ज्ञायमानशास्त्रस्यैव चोदकत्वाभ्युपगमात्। अन्यथा पेटिकास्थमपि शास्त्रं पुरुषं चोदयेत्।

**नन्वे**वमिह ज्ञानशब्देन ज्ञायमानशास्त्रमेव गृह्यताम्। तद्धि निषिद्धकर्मणां हाने, विहितानामुपादाने, निवृत्तौ च पुरुषस्यो-

---

१. 'एषाम्' इति क्वचिन्नास्ति। २. 'हानोपादानोपेक्षाप्रयोजनः' इति रा.पा.। ३. 'प्राप्यमाणम्' इति रा.पा.। ४. 'व्यापारयुत उपाधिलक्षणः' इति रा.पा.। ५. करणानां व्यापारयिता' इत्यनेनेदं स्वातन्त्र्यं विवक्षितमिति भावः। कारकेति। कर्तृभिन्नकारकेत्यर्थः। तेन कर्त्रन्तरप्रयुक्तस्यापि स्वातन्त्र्योपपत्तिः।

भाष्यार्कप्रकाशः

पकारकं भवति। शास्त्रेण हि विद्वान् वेद्यं विदित्वा विहितं करोति, निषिद्धं त्यजति, तूष्णीमास्ते च। तत्र विधिनिषेधबोधकं प्रवृत्तिलक्षणं शास्त्रम्, उपेक्षाबोधकं तु निवृत्तिलक्षणं शास्त्रम्। प्रवृत्तिवन्निवृत्तिरपि कर्मैवेत्युक्तत्वादिह 'हानोपादानोपेक्षाप्रयोजनः कर्मारम्भः' इत्युक्तं च भाष्यकृता। हानोपादानप्रयोजनः प्रवृत्तिकर्मारम्भः, उपेक्षाप्रयोजनो निवृत्तिकर्मारम्भ इति विवेकः। तथा च धर्माधर्मौ ब्रह्म च शास्त्रेण ज्ञायत इति प्रवृत्तिलक्षणं निवृत्तिलक्षणं च शास्त्रं पूर्वोत्तरमीमांसारूपेण द्विविधमिह ज्ञानशब्देनोच्यत इति चेत्, **मैवम्**; शास्त्रीयकर्मारम्भे भवतु शास्त्रस्य करणत्वम्, कथं पुनर्लौकिककर्मारम्भे? न हि प्रकृतकर्मारम्भस्य[१] शास्त्रीयकर्मारम्भपरत्वेन सङ्कोचनं न्याय्यम्, 'सर्वविषयं ज्ञान'मिति भाष्यगतसर्वशब्दस्वारस्यभङ्गापत्तेः, तामसादिज्ञानस्याशास्त्रीयत्वाच्च। तस्मादिह ज्ञानशब्देन शास्त्रीयकर्मारम्भहेतुभूतं शास्त्रं न ग्राह्यम्, किन्तु सर्वकर्मारम्भहेतुभूता बुद्धिवृत्तिरेव ग्राह्या।

**ननु** ज्ञानं बुद्धिवृत्तिरेवेति कोऽयं नियमः? करणमात्रं ज्ञानशब्देन गृह्यताम्। तथा चान्तःकरणमेकम्, बहिःकरणानि पञ्च च श्रोत्रादीनि सुखादिशब्दादिविषयग्रहणसाधनत्वाज्ज्ञानशब्दवाच्यान्येव। एतदभिप्रायेणैव 'सर्वविषयं ज्ञान'मित्युक्तमाचार्यैरिति चेत्, **मैवम्**; सर्वत्रापि विषयग्रहणे बुद्धिवृत्तेरेव करणत्वम्, श्रोत्रादीनां तु द्वारत्वमेवेति पूर्वमेवोक्तत्वात्। बुद्धिर्हि चक्षुर्द्वारा निर्गत्य घटादि-विषयदेशं गत्वा घटाद्याकारेण परिणमते। स एष परिणामो वृत्तिरित्युच्यते। तया च वृत्त्या घटाद्यावरकमज्ञानं नाश्यते, ततः प्रत्यक्षं जायत इति सिद्धान्तात्। तस्मात् सुखाद्याकारेण शब्दाद्याकारेण वा परिणता बुद्धिवृत्तिरेव करणमिति गृह्यतां लाघवाज्ज्ञानशब्देनेहेति बोध्यम्। अत एव 'सर्वविषयं ज्ञान'मित्युक्तम्, न तु 'सर्वविधं ज्ञान'मित्याचार्यैः। न ह्येकस्य चक्षुरादिकरणान्यतमस्य ज्ञानस्य सर्व-विषयत्वं सम्भवति, चक्षुषा शब्दादेरग्रहणात्। बुद्धिवृत्त्या तु सर्वं ग्रहीतुं शक्यमिति सर्वविषयं ज्ञानं बुद्धिवृत्तिरेवेत्याचार्याभिमतमिति स्थितम्।

न च 'करणं कर्म कर्ते'ति वचनाज्ज्ञानं करणमेवेति वाच्यम्; तथा सति श्लोकस्य पूर्वार्धेनोक्तस्यार्थस्यैवोत्तरार्धेन पुनर्वचने पुनरुक्तिदोषप्रसङ्गात्। न च – ज्ञेयकर्मणोः, परिज्ञातृकर्त्रोश्चैकत्वाद् ज्ञानकरणयोरप्येकत्वेन भाव्यमिति – वाच्यम्; ज्ञेयकर्मणोरप्येक-त्वाभावात्। धर्मब्रह्माद्यात्मकं ज्ञातव्यं सर्वं हि ज्ञेयशब्दार्थः। तच्चोक्तमाचार्यैः— 'तदपि सामान्येन सर्वमुच्यते' इति। कर्म तु क्रियया प्राप्यमाणं फलमेव, न तु क्रियामात्रमिति। ज्ञातृकर्त्रोरेकत्वेऽपि भोक्तृत्वकर्तृत्वांशाभ्यां भेद इह विवक्षित इति न परिज्ञातृकर्त्रोरपि पुन-रुक्तिः। भोक्ता हि जीवः स्वभोगार्थं कर्म चोदयति, न तु कर्तेति जीवगतं भोक्तृत्वमेव कर्मचोदकम्, न तु कर्तृत्वम्। अत एवोक्तम् आचार्यैः— 'परिज्ञाता भोक्ते'ति।

**रामानुजस्तु**— ज्ञेयं कर्मेति, कर्म यागादिकम् इति चोक्तवान्। तन्मते ज्ञेयकर्मणोः पुनरुक्तिर्दुर्वारैव। वक्तव्यस्य फलस्या-वचनमपि दोष एव।

**ननु** ज्ञानमिहावगतिरेव, भावप्रत्ययान्तत्वेनैव ज्ञानशब्दस्य प्रसिद्धप्रयोगत्वाल्लोके घटज्ञानं पटज्ञानमिति, न तु ज्ञानकरणम्, लाक्षणिकत्वापातादिति चेत्, **मैवम्;** असङ्गचिदात्मरूपाया अवगतेर्ज्ञात्रादिसन्निपातायोगात्, निर्धर्मकत्वेन कर्मचोदनाऽयोगाच्च। घटज्ञानपटज्ञानादयस्तु सविशेषा ज्ञानाभासा एव। घटाद्याकारबुद्धिवृत्तिजन्यानि हि तानि घटज्ञानादीनि। अत एव तेषां वृत्तिज्ञानत्वेन व्यवहारः। न चेदमेव वृत्तिजन्यं ज्ञानमिह गृह्यतां, किमिति वृत्तिरिति वाच्यम्; 'येनैकं भावमव्ययमीक्षते' इति तृतीयान्तयच्छब्देन ज्ञानस्य [२]परामर्शिष्यमाणत्वात्, 'ईक्षते' इति अवगतेः पृथग् वक्ष्यमाणत्वाच्च। न चानुभवैकवेद्यमितिवदनुभवस्याप्यवगतिं प्रति करणत्वमस्तीति वाच्यम्, एकस्यैवानुभवस्य वेदनत्ववेदनकरणत्वयोरयोगात्, अनुभवानेकत्वे मानाभावात्। घटानुभवः पटानुभव इति प्रतीयमानानुभवभेदस्य घटादिविषयगतत्वेनानुभवगतत्वाभावात्, अनुभवैकवेद्यमित्यस्य च शास्त्रादिभिरवेद्यमित्यर्थे तात्पर्यात्।

**ननु** साक्षिभास्यत्वं सर्वस्य श्रुत्यादिसिद्धम्। साक्षिणश्च ज्ञानस्वरूपत्वं [३]तथैव। तथा च साक्षिणा सर्वं भास्यत इत्यस्य ज्ञानेन सर्वं ज्ञायत इत्येवार्थ इति काऽनुपपत्तिर्ज्ञानस्य तृतीयान्तयच्छब्देन परामर्शने इति चेद्, **उच्यते**—साक्षिणा भास्यत इत्यत्र कर्तरि

---

१. कर्मारम्भपदस्येत्यर्थः। २. 'परामृक्ष्यमाणत्वात्' इति पाठो युक्तः। वृत्त्यभिव्यक्तचैतन्यं ज्ञानम्, विषयाभिव्यक्तं चैतन्यमवगतिः फलमिति चोच्यत इति विवेकः। ३. **तथैव** श्रुत्यादिसिद्धमेव।

**ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः।**
**प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि॥१९॥**

**अथेदानीं क्रियाकारकफलानां सर्वेषां गुणात्मकत्वात् सत्त्वरजस्तमोगुणभेदतस्त्रिविधो भेदो वक्तव्यः इत्यारभ्यते—** ज्ञानमिति। **ज्ञानम् , कर्म च—** कर्म **क्रिया, न कारकं पारिभाषिकमीप्सिततमं कर्म**, कर्ता **च निर्वर्तकः क्रियाणां त्रिधैव। अवधारणं गुणव्यतिरिक्तजात्यन्तराभावप्रदर्शनार्थम्।** गुणभेदतः **सत्त्वादिभेदेनेत्यर्थः।** प्रोच्यते

आनन्दगिरिकृतव्याख्या

**अनन्तरश्लोकदशकतात्पर्यमाह—**अथेति। **ज्ञानादिप्रस्तावानन्तर्यम्** अथ**शब्दार्थः।** इदानीं **प्रस्तुतज्ञानाद्यवान्तरभेदापेक्षायामित्यर्थः। तेषां गुणभेदात् त्रैविध्ये हेतुमाह—**गुणात्मकत्वादिति। वक्तव्यो **वक्ष्यमाणश्लोकनवकेनेति शेषः। एवं स्थिते प्रथमनवान्तरभेदप्रतिज्ञा क्रियत इत्याह—**इत्यारभ्यत इति। **'कर्तुरीप्सिततमं कर्म' इति यत् परिभाष्यते, तद् नात्र कर्मशब्दवाच्यमित्याह—**नेति। **गुणातिरेकेण विधान्तरं ज्ञानादिषु नेति निर्धारयितुमवधारणमित्याह—**गुणेति। **ज्ञानादीनां प्रत्येकं गुणभेदप्रयुक्ते त्रैविध्ये प्रमाणमाह—**

भाष्यार्कप्रकाशः

तृतीया। येनेक्षते इति प्रकृते तु करणे तृतीया[१]। स्वप्रकाशस्यान्यावभासकस्य चानुभवस्य भानकर्तृत्वं स्यादेव, न तु भानकरणत्वम् , अपरतन्त्रत्वादनुभवस्य। करणं हि कर्तृपरतन्त्रम्। न च भानस्वरूपस्य साक्षिणः कथं भानकर्तृत्वमिति वाच्यम् ; वृत्तिज्ञानात्मकजन्यज्ञान(ज्ञानाभास)कर्तृत्वस्य साक्षिण्युपपत्तेः। साक्षी हि नित्यज्ञानरूपः। न चैवं जन्यज्ञानस्यापि कर्तृत्वं स्यादिति वाच्यम् ; तस्य जडत्वात्। न च जन्यज्ञानस्य करणत्वे का विप्रतिपत्तिरिति वाच्यम् ; घटज्ञानस्य पटज्ञानं प्रति करणत्वादर्शनात्। न च 'सोऽयं देवदत्तः' इति प्रत्यभिज्ञारूपं ज्ञानं देवदत्तानुभवकरणकमिति वाच्यम् ; प्रत्यभिज्ञाया ज्ञानत्वाभावात्[२]। सत्यपि तस्मिन्[३] देवदत्तानुभवकरणकत्वं नास्ति, किन्त्वनुभवहेतुकत्वमेव। चक्षुरेव तत्रापि करणम्। न हि पूर्वानुभूतं देवदत्तं चक्षुषाऽनिरीक्ष्य 'सोऽयं देवदत्तः' इति प्रत्यभिजानीयात् कोऽपि। तस्माद् नात्र ज्ञानशब्देन जन्यज्ञानं ग्रहीतुमुचितम्।

यत्तु **रामानुजः**—कर्तव्यकर्मविषयं ज्ञानं ज्ञानमिति, **तत्तुच्छम्;** इह ज्ञानशब्देन कर्तव्यकर्मविषयज्ञानस्यैव ग्रहणे 'येनैकं भावमीक्षते' इत्यत्राप्यस्यैव ग्राह्यत्वेनात्मविषयज्ञानस्य वक्ष्यमाणस्य कथं ज्ञानत्रैविध्यान्तःप्रवेशः स्यात्? न हि 'येनैक'मिति श्लोके कर्मविषयज्ञानमुच्यते, किन्त्वात्मविषयमेव। तस्मात् सर्वविषयं ज्ञानमेवेह ज्ञानशब्देन ग्राह्यम्। तच्च ज्ञानं बुद्धिवृत्तिरूपमेव, न तु नित्यज्ञानरूपम् , नापि [४]जन्यज्ञानरूपमिति सङ्क्षेपः॥१८॥

**ज्ञानमिति।** गुणसङ्ख्याने ज्ञानं कर्म च कर्ता च त्रिधैव भवतीति प्रोच्यते। तान्यपि त्वं यथावच्छृणु। **अथेति।** कर्मचोदनाकर्मसंग्रहयोस्त्रैविध्यप्रदर्शनान्तरमित्यर्थः। **क्रिया** कर्म, **कारकं** ज्ञानं, **फलं** तद्बोक्ता कर्ता, तेषां क्रियाकारकफलानाम्। यद्वा फलशब्देन सुखग्रहणम् , सर्वेषामित्यनेन तु कर्तृबुद्धिधृतीनां ग्रहणम्। **ज्ञानमिति।** 'ज्ञानं ज्ञेय'मिति श्लोकोक्तं बुद्धिवृत्तिरूपं कारकं ज्ञानकरणमिह ज्ञानशब्देनोच्यते। 'करणं कर्मे'त्यत्रोक्तं कर्म नेह कर्मशब्देन ग्राह्यम् , किन्तु 'कर्मसंग्रहः' इति समागतकर्मैवेत्याह—**कर्म क्रियेति। कारकमिति।** द्वितीयाकारकमित्यर्थः। **पारिभाषिकमिति।** 'कर्तुरीप्सिततमं कर्मे'ति व्याकरणपरिभाषासिद्धमित्यर्थः। यश्चोपाधिलक्षणो भोक्ता कर्ता च 'परिज्ञाता' इति 'कर्ता' इति च निर्दिष्टः, तस्यैव चिदाभासस्येह कर्तृशब्देन ग्रहणमित्याह—**कर्ता च निर्वर्तक इति।** कारकव्यापारो हि कर्तृपरतन्त्रः। जीवश्च चक्षुरादिभिर्दर्शनादिक्रिया निर्वर्तयतीति निर्वर्तकः क्रियाणाम्। **त्रिधैवेति।** सात्त्विकत्वराजसत्वतामसत्वरूपेणेत्यर्थः। **गुणव्यतिरिक्तेति।** सात्त्विकत्वादिव्यतिरिक्तेत्यर्थः। गुणानां सङ्ख्यानं यत्र तद् गुणसङ्ख्यानम्। ननु कापिलशास्त्रस्य

१. अन्यथा ईक्षते इति कर्तरि लकारेण कर्तुरभिहितत्वात् प्रथमाया एव प्राप्तेरिति भावः। २. प्रत्यभिज्ञाया ज्ञानत्वाभावत्वोक्तिः चिन्त्या। वस्तुतस्तु अनुमित्यादौ ज्ञानकरणकत्वस्य प्रसिद्धत्वात् ज्ञानस्यापि करणत्वं स्वीकार्यमेव। ३. **तस्मिन्** ज्ञानत्वे। ४. तार्किकाद्यभिमतं समवायेनात्मनि जायमानज्ञानरूपमित्यर्थः। तदनङ्गीकारादिति भावः।

**कथ्यते** गुणसंख्याने **कापिले शास्त्रे। तदपि गुणसंख्यानशास्त्रं गुणभोक्तृविषये प्रमाणमेव,** [1]**परमार्थब्रह्मैकत्वविषये यद्यपि विरुध्यते।** [2]**ते हि कापिलाः गुणगौणव्यापारनिरूपणेऽभियुक्ताः इति तच्छास्त्रमपि वक्ष्यमाणार्थस्तुत्यर्थत्वेनोपादीयत इति न विरोधः।** यथावद् **यथान्यायं यथाशास्त्रं शृणु** तान्यपि **ज्ञानादीनि तद्भेदजातानि गुणभेदकृतानि शृणु। वक्ष्यमाणेऽर्थे मनःसमाधिं कुर्वित्यर्थः॥ १९॥**

आनन्दगिरिकृतव्याख्या

प्रोच्यत इति। **ननु कापिलं पातञ्जलमित्यादि शास्त्रं विरुद्धार्थत्वादप्रमाणं कथमिह प्रमाणीक्रियते? तत्राह—**तदपीति। **विषयविशेषे विरोधेऽपि प्रकृतेऽर्थे प्रामाण्यमविरुद्धमित्यर्थः। यद्यपि कापिलादयो गुणवृत्तिविचारे , गौणव्यापारस्य भोगादेर्निरूपणे च निपुणास्तथापि कथं तदीयं शास्त्रमत्र प्रमाणीकृतमित्याशङ्क्याह—**ते हीति। **ज्ञानादिषु प्रत्येकमवान्तरभेदो** वक्ष्यमाणोऽर्थः**, तस्य तन्त्रान्तरेऽपि प्रसिद्धिकथनं स्तुतिः, तादर्थ्येन कापिलादिमतोपादानमिहोपयोगीत्यर्थः। तृतीयपादस्याविरुद्धार्थत्वं निगमयति—**नेति। **'यथावदि'त्यादि व्याचष्टे —** यथान्यायमिति॥ १९॥

भाष्यार्कप्रकाशः

कथं प्रमाणत्वम्? अत आह—**तदपीति**। एकदेशे विरुद्धमप्यन्यदेशेऽविरुद्धमेव कापिलमपि शास्त्रं तर्कादिशास्त्रवत्। ततश्चाविरुद्धांशो ग्राह्य एवेति भावः। कापिलोत्तरमीमांसयोर्गुणभोक्तृविषयेऽविरोधः। सत्त्वादिगुणविशिष्टबुद्धिभोगस्य आत्मन्यारोपादात्मनो भोक्तृत्वम् इति सम्प्रतिपन्नत्वात्। क्व पुनर्विरोधः? अत आह—**परमार्थेति**। कापिलैर्ब्रह्मणोऽनभ्युपगतत्वान्न ब्रह्मात्मैकत्वदर्शनं तत्रास्तीति भावः। गुणभोक्तृविषय इत्यत्र गुणविषये भोक्तृजीवविषये चेति वाऽर्थः। ननु कुतः कापिलस्येहोपादानम्? अत आह—**ते हीति**। **अभियुक्ताः** विद्वांसः, कुशला इति यावत्। गुणानां गौणानां गुणमयबुद्ध्यादीनां च व्यापाराणां **निरूपणं** प्रतिपादनं तस्मिन् विषये। **स्तुत्यर्थमिति**। तन्त्रान्तरेऽपि प्रसिद्धमिदम् , न केवलमस्मिन्नेव तन्त्रे इति स्तुतिः। ज्ञानादीनीत्यादिपदात् कर्मादिग्रहणम्। **भेदजातानि** भेदसमूहान्। ननु स्वोक्तं सर्वं शृण्वन्तमर्जुनं प्रति पुनः शृण्विति वचनं व्यर्थम् , अत आह—**वक्ष्यमाण इति**। चित्तसमाधानार्थमिति शृण्वित्युक्तम् इत्यर्थः।

**ननु** ज्ञानज्ञेयज्ञातृकरणकर्मकर्तॄणां षण्णां पूर्वमुक्तत्वेन तेषां सर्वेषामपि त्रैविध्यकथनं किमितीह न प्रतिज्ञातमिति चेत् , **उच्यते—**ज्ञेयकरणयोर्धर्माधर्मब्रह्मादिरूपत्वेन श्रोत्रादिरूपत्वेन च बहुविधयोर्गुणतस्त्रैविध्यस्य नियन्तुमशक्यत्वान्न तद्ग्रहणमिह कृतम्। ज्ञातृकर्तारौ त्वेक एव। कारकं कर्म तु सुखत्रैविध्ये कथ्यते[3]। **यद्वा** स्वर्गादिरूपम् , तच्च फलं बहुविधमेवेति नेह त्रिविधत्वेन नियन्तुं शक्यते। तस्माज्ज्ञानकर्मकर्तॄणां त्रयाणामेवेह कथनं प्रतिज्ञातम्।

**रामानुज**स्तु ज्ञेयमेव कर्मशब्देन परामृश्यत इत्याह। **तत्तुच्छम् ;** कर्मैव ज्ञेयमिति नियन्तुमशक्यत्वेन ज्ञेयं कर्मेति व्याख्यानस्यायुक्तत्वात् , कर्म कर्मचोदनेत्येकस्यैव कर्मणश्चोद्यत्वचोदनात्वयोरयोगाच्च। **यदप्यनेनोक्तम्** – कर्मैव संग्रहः कर्मसंग्रहः, करणं द्रव्यादिकं, कर्म यागादिकं, कर्ता अनुष्ठातेति त्रिविधं बोद्धव्यरूपं कर्म सङ्गृह्यत इति, **तच्चायुक्तम् ;** क्रियाया एव कर्मत्वेन कर्तृकरणयोः कर्मभेदायोगात्। करणनिर्वर्त्यं कर्त्राश्रयं हि कर्म। [किं] छेदनं छेत्तृलवित्रच्छेदनात्मना त्रिविधमिति वक्तुं शक्यते केनाप्यनुन्मत्तेन? न च करणं कर्म कर्ता चेत्येतत् त्रयमिह ज्ञेयमिति वाच्यम् ; तादृशार्थालाभात्। ज्ञेयं कर्मेति त्वयैव पूर्वमुक्तत्वात्। न च करणकर्तृसहितं कर्म ज्ञेयमिति वाच्यम् ; परिज्ञातेत्यनेन कर्तुरुक्तत्वात्। न च करणसहितं कर्म ज्ञेयमिति वाच्यम् ; द्रव्यादिकरणस्येहाप्रतिपाद्यमानत्वेन करणसाहित्यप्रतिपादनं कर्मणो व्यर्थमेवेति। तथा **गुणसङ्ख्यान**शब्दस्य गुणकार्यगणनमर्थः इत्युक्तमनेन, तच्चायुक्तम् , गुणशब्दस्य गुणकार्यपरत्वे लाक्षणिकत्वापत्तेः। त्रिधैव प्रोच्यत इत्यनेनैवेष्टसिद्धौ गुणकार्यगणने प्रोच्यत इत्यस्यानर्थकत्वाच्च। **कापिलशास्त्र**ग्रहणे तूक्तार्थस्य प्रामाण्यसिद्धिः, प्रसिद्धिश्च फलमिति बोध्यम्॥ १९॥

१. 'परमार्थब्रह्मात्मैकत्वविषये' इति पा.। २. 'तथापि ते हि' इति पा.। ३. 'ज्ञातृकर्तारौ त्वेकमेव कारकम् । कर्म तु सुखत्रैविध्ये कथ्यते।' इति पाठः स्यात्।

## सर्वभूतेषु येनैकं भावमव्ययमीक्षते।
## अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥ २०॥

**ज्ञानस्य तु तावत् त्रिविधत्वमुच्यते—** सर्वभूतेष्विति। सर्वभूतेषु **अव्यक्तादिस्थावरान्तेषु भूतेषु** येन **ज्ञानेन** एकं भावं **वस्तु , भावशब्दो वस्तुवाची। एकमात्मवस्त्वित्यर्थः।** अव्ययं **न व्येति स्वात्मना** [1]**धर्मैर्वा, कूटस्थनित्यमित्यर्थः।** ईक्षते **येन ज्ञानेन पश्यति, तं च भावम्** अविभक्तं **प्रतिदेहं** विभक्तेषु **देहभेदेषु न विभक्तम् , तदात्मवस्तु व्योमवन्निरन्तरमित्यर्थः।** [2]**तज्ज्ञानम् अद्वैतात्मदर्शनं सात्त्विकं सम्यग्दर्शनं विद्धीति।** [3]**यानि द्वैतदर्शनानि तानि**

आनन्दगिरिकृतव्याख्या

**ज्ञानादीनां प्रत्येकं त्रैविध्यं ज्ञातव्यं प्रतिज्ञाय ज्ञानत्रैविध्यार्थं श्लोकत्रयमवतारयति—** ज्ञानस्येति। **तत्र सात्त्विकं ज्ञानमुपन्यस्यति—** सर्वेति। **भूतानि कार्यकारणात्मकान्युपाधिजातानि। अद्वितीयमखण्डैकरसं प्रत्यगात्मभूतमबाधितं तत्त्वं ज्ञेयत्वेन विवक्षितमित्याह—**एकमिति। **विवक्षितम् अव्ययत्वं संक्षिपति—**कूटस्थेति। **प्रतिदेहमविभक्तमित्युक्तं व्यनक्ति—** विभक्तेष्विति। **'तज्ज्ञान'मित्यादि व्याकरोति—** अद्वैतेति। **द्वैतदर्शनान्यपि कानिचिद् भवन्ति सत्त्वनिर्वृत्तानि सम्यञ्चीत्याशङ्क्याह—** यानीति। **तेषामसम्यक्त्वे**

भाष्यार्कप्रकाशः

**सर्वेति**। विभक्तेषु सर्वभूतेष्वविभक्तमव्ययमेकं भावं येनेक्षते, विद्वानिति शेषः, तद् ज्ञानं सात्त्विकं विद्धि। **अव्यक्तादीति**। अव्यक्तमत्र हिरण्यगर्भशरीरम् , न तु माया, तस्या एकत्वेन विभक्तत्वासम्भवात्। ब्रह्मादिस्तम्बपर्यन्तेष्विति सर्वशब्दार्थः। भूतशब्दार्थमाह—**देहभेदेष्विति**। देहेष्वित्यर्थः। विभक्तत्वविशेषणार्थमपि सङ्गृह्योक्तम्—**देहभेदेष्विति**। कथं विभक्तेषु? अत आह—**प्रतिदेहमिति**। परस्परं विलक्षणेष्वित्यर्थः। देहानां परस्परवैलक्षण्यस्य सर्वानुभवसिद्धत्वादिति भावः। तदेवं गुणतः कार्यतः आकारतः कालतो देशतश्च परस्परं भिन्नेषु ब्रह्मादिस्तम्बपर्यन्तेषु चराचरात्मकेषु देहेष्विति 'विभक्तेषु सर्वभूतेषु' इत्यस्यार्थः सिद्धः। अत्राव्यक्तशब्दस्य मायापरत्वाग्रहे तु अव्यक्तमादिः कारणं येषां तेषु **अव्यक्तादिषु** मायाकार्येष्वित्यर्थः। ब्रह्मादिष्विति तु शेषः। **यद्वा** अव्यक्तमादिर्येषामित्यतद्गुणसंविज्ञानबहुव्रीहिः। ततश्च नाव्यक्तस्य भूतानुप्रवेशः। किन्तु तज्जन्यानां ब्रह्मादिदेहानामेवेति।

**ननु** 'ब्रह्मादिस्थावरान्तेषु' इति ऋजु वक्तव्ये कथम् 'अव्यक्तादिस्थावरान्तेषु' इति वक्रमुक्तमाचार्यैरिति चेत्? **नैष दोषः**; भूतानां मायामयत्वस्फोरणायैवमुक्तत्वात्। भवन्तीति भूतानीति व्युत्पत्त्या भूतशब्दः कार्यपरः। भवति अस्ति सर्वत्र देशेषु कालेषु वस्तुषु चेति **भावः** सन् परमात्मेत्यर्थः। **वस्तु** सत्यमित्यर्थः। ब्रह्मेति यावत्। **यद्वा** भावो वस्तु , पदार्थ इति यावत्। एकत्वादिविशेषणवशात्तु अस्य पदार्थस्य, आत्मलाभ इति बोध्यम्। इदमेवाह—**आत्मवस्त्वित्यर्थ इति**। आत्मेति पदार्थ इति भावः। **व्येति** विकारं प्राप्नोति। विकारो द्विविधः—स्वरूपगतः स्वभाव[स्वधर्म]गतश्चेति। तदुभयमात्मनो नास्तीत्याह—**स्वात्मना स्वधर्मेण वा न व्येतीति। कूटस्थमिति**। अविक्रियमित्यर्थः। सदैकरूपमिति यावत्। ज्ञानेन भावं पश्यतीत्युक्तं चोदयति—[4]**कथमिति**। कथम्भूतं भावं पश्यतीत्यर्थः। प्रत्याह—**अविभक्तमिति**। तदर्थमाह—**निरन्तरमिति**। निर्भेदमित्यर्थः। दृष्टान्तमाह—**व्योमवदिति**। अविभक्तं यथा तथाऽवस्थितमिति क्रियाविशेषणत्वेनापि व्याख्यातुं शक्यमिदं पदम्। परन्तु अवस्थितशब्दाध्याहारो गौरवावहः। तज्ज्ञानमित्यस्यार्थमाह—**साक्षात् सम्यग्दर्शनमिति**। सम्यग् दृश्यते येन तत् सम्यग्दर्शनम् , बुद्धिवृत्तिरिति यावत्। सर्वभूतेष्वित्यादिना लब्धमर्थं क्रोडीकृत्य, किंविषयं ज्ञानमिति शङ्कां निराकुर्वन्नाह—**अद्वैतात्मविषयमिति**। 'सर्वभूतात्मभूतमेकमेवाद्वितीयं ब्रह्माह'मित्याकारकं ज्ञानं सात्त्विकज्ञानमिति परमार्थः। ननु कुतोऽस्य ज्ञानस्य सम्यग्ज्ञानत्वम्? अत आह—**यानीति**। साक्षात् संसारोच्छित्तिहेतुत्वाद् इदमद्वैतज्ञानं सम्यग्ज्ञानम्। अन्यानि तु द्वैतज्ञानानि वक्ष्यमाणानि न साक्षात्संसारोच्छित्तिहेतूनीति न सम्यग्ज्ञानानीत्यर्थः। साक्षादित्यनेन च

१. 'स्वधर्मेण' इति पा.। २. 'तज्ज्ञानं साक्षात् सम्यग्दर्शनम् अद्वैतात्मविषयं सात्त्विकं विद्धीति' इति पा.। ३. एतद्वाक्यं क्वचिद् उत्तरश्लोकादौ दृश्यते। ४. 'येन ज्ञानेन पश्यति, कथम् ? अविभक्तं' इति रा.पा. स्यादिति भाति।

**पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान्।**
**वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥२१॥**

**असम्यग्भूतानि राजसानि तामसानि चेति न साक्षात् संसारोच्छित्तये भवन्ति॥२०॥**

पृथक्त्वेनेति। पृथक्त्वेन **तु भेदेन, प्रतिशरीरमन्यत्वेन यज्ज्ञानं** नानाभावान् **भिन्नान् आत्मनः** पृथग्विधान्

आनन्दगिरिकृतव्याख्या

**हेतुमाह—**राजसानीति ॥२०॥

**प्रतिदेहमन्यत्वेन भिन्ना[न् आ]त्मनो येन ज्ञानेन जानाति तज्ज्ञानं राजसमिति व्याचष्टे—**भेदेनेति। **पृथक्त्वं पृथग्विधत्वं च**

भाष्यार्कप्रकाशः

केषाञ्चिद् राजसज्ञानानां परम्परया मोक्षहेतुत्वमस्तीति गम्यते, भिन्नेश्वरभजनस्य चित्तशुद्ध्यादिहेतुत्वात् कर्मयोगवदिति भावः। तानि साक्षात् संसारोच्छित्तये न भवन्तीत्यन्वयः। **न भवन्ति** न शक्नुवन्तीत्यर्थः।

यत्तु **रामानुजः**—ब्राह्मणक्षत्रियगृहस्थब्रह्मचार्यादिरूपेण विभक्तेषु सर्वेषु भूतेषु कर्माधिकारिषु येन ज्ञानेनैकमात्माख्यं भावं तत्राप्यविभक्तं ब्राह्मणत्वाद्यनेकाकारेष्वपि भूतेषु सितदीर्घादिविभागवत्सु ज्ञानाकार आत्मनि विभागरहितमव्ययं ब्राह्मणादिशरीरेषु व्ययस्वभावेष्वप्यविकृतं फलादिसङ्गानर्हं च कर्माधिकारवेलायामीक्षते, तज्ज्ञानं सात्त्विकं विद्धीति, **तत्तुच्छम्** ; सर्वशब्दस्य कर्माधिकारिपरतया सङ्कोचस्यान्याय्यत्वात् ; सर्वविधविभागराहित्यप्रतिपादकाविभक्तशब्दस्य सितदीर्घादिविभागराहित्यपरतया सङ्कोचनस्याप्ययुक्तत्वात्। न ह्यविभक्तस्य विभक्तत्वमुचितम्। अद्वितीयत्वप्रतिपादकस्यैकशब्दस्य च ज्ञानैकाकारमित्यर्थवर्णनमयुक्तम् , लाक्षणिकत्वादिदोषात्। न च जात्येकत्वमुक्तमिति वाच्यम् ; आत्मनि जात्यभावात्। कर्माधिकारवेलायामिति मूलाद्बहिःकल्पनं चाप्रमाणम्। असङ्गतं च। न हि ब्राह्मणत्वादिजात्यभिमानाद् यज्ञादिकर्मणि प्रसक्तः पुरुष एकं भावमीक्षितुं क्षमते, विरोधात्। नापि ज्ञानैकाकाराव्ययासङ्गात्मदर्शी 'ब्राह्मणोऽहं कर्ते'ति कर्मणि प्रवर्तते। तस्माद् 'विभक्तेषु भूतेषु' इति बहुवचनप्रयोगाद् , 'अविभक्तम् एकम्' इति एकवचनप्रयोगाच्च देहभेद एव नात्मभेद इति स्थितम्। अयमेवार्थः– 'न त्वेवाहं जातु नासम्' इति श्लोकेनाप्यभिप्रेतो भगवतेति तद्भाष्ये भाषितमाचार्यैः—'देहभेदानुवृत्त्या बहुवचनम् , नात्मभेदाभिप्रायेण' इति। यदि भगवतस्तत्र सोऽभिप्रायो न स्यात् , तर्हीहाप्यात्मभेदमेव ब्रूयात्। मध्ये च तत्र तत्रात्माभेद एवोक्त इत्युपक्रमोपसंहारैक्याभ्यासादिभिः 'एक एवात्मा' इति गीताशास्त्रस्य निश्चितोऽर्थ इति स्थितम्॥२०॥

**पृथक्त्वेनेति**। यज्ज्ञानं सर्वेषु भूतेषु पृथक्त्वेन पृथग्विधान् नानाभावान् वेत्ति, तज्ज्ञानं राजसं विद्धि। प्रतिशरीरं भिन्ना आत्मानो भिन्नलक्षणा इति यद् द्वैतज्ञानं तद् राजसमित्यर्थः। नन्वौपाधिको भेदस्तवाप्यद्वैतिन इष्ट इत्यत आह—**प्रतिशरीरमिति**। शरीरे शरीरे प्रतिशरीरम्। ततश्चैकैकस्मिन् शरीरे एकैको जीवः परस्परं भिन्नो वर्तत इत्यर्थः। अद्वैतिनस्तु प्रतिशरीरमेक एव जीवो वर्तत इति वदन्तीति भावः। तच्चोक्तं पूर्वश्लोकेन। एतेनाद्वैतिन एव सात्त्विकज्ञानवन्त इति सम्यग्दर्शित्वमद्वैतिनां सिद्धम्।

भावशब्दस्यात्मपरतया पूर्वं व्याख्यातत्वादाह—**भिन्नानात्मन इति**। भिन्नं लक्षणं सुखदुःखादिकं येषां ते भिन्नलक्षणाः, तान्। यदि सर्वशरीरेष्वेक एव जीवः स्यात् तर्हि सर्वेषामेकदैव सुखं वा दुःखं वा स्यात् , चैत्रानुभूतार्थस्य मैत्रेण स्मरणं स्यात् , जीवे उत्क्रान्ते सति सर्वशरीराणामचेतनता स्यात् , देवदत्तः स्वचक्षुषेव मैत्रचक्षुषाऽपि घटं पश्येदित्यादीन् दोषांस्तार्किकादयो मन्यन्त इति भावः। एकात्मवादी अद्वैती तु सुखदुःखादीनामनात्मधर्मत्वान्न कोऽपि दोष इति वेत्ति। तथाहि— सुखं दुःखं च मनोधर्मः, 'कामः सङ्कल्पः' इत्यादिश्रुतेः। स्मरणं चित्तधर्मः। उत्क्रान्तिर्बुद्धिधर्मः, यद्वा प्राणधर्मः। दर्शनस्पर्शनादिकमिन्द्रियधर्मः। इमानि च मनआदीनि प्रतिशरीरं भिन्नान्येवेति नानुभवसाङ्कर्यप्रसङ्गः। न चानुभवितुरेकत्वे कथमनुभवासाङ्कर्यमिति वाच्यम् ; अनुभवितुरपि प्रमातुरन्तःकरणावच्छिन्नस्य नानात्वात्। औपाधिकं हि प्रमातृत्वं चैतन्यस्य। वयं हि निरुपाधिकमेव चैतन्यमेकं ब्रूमः, न तु सोपाधिकम्। यद्वा

**यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम्[१]।**
**अतत्त्वार्थवदल्पं च तत् तामसमुदाहृतम्॥२२॥**

**पृथक्प्रकारान् , भिन्नलक्षणानित्यर्थः;** वेत्ति **विजानाति यज्ज्ञानं सर्वेषु भूतेषु ; [२]ज्ञानस्य कर्तृत्वासम्भवाद् येन ज्ञानेन वेत्तीत्यर्थः; तज्ज्ञानं विद्धि** राजसं **रजोगुणनिर्वृत्तम्॥२१॥**

यत्त्विति। यत्तु **ज्ञानं** कृत्स्नवत् **समस्तवत् सर्वविषयमिव** एकस्मिन् **कार्ये देहे बहिर्वा प्रतिमादौ** सक्तम् **'एतावानेवात्मा, ईश्वरो वा, नातः परमस्ति' इति, यथा नग्नक्षपणकादीनां [३]शरीरानुवर्ती देहपरिमाणो जीवः, ईश्वरो वा**

आनन्दगिरिकृतव्याख्या

**पुनरुक्तमित्याशङ्क्य हेतुहेतुमत्त्वेन[४] विभागं विवक्षित्वाऽऽह—**भिन्नेति। **ज्ञानस्य ज्ञानकर्तृत्वमयुक्तमित्याशङ्क्याह—**येनेति॥२१॥

**सक्तत्वमेव व्यनक्ति—**एतावानिति। **एकस्मिन् कार्ये ज्ञानस्य सक्तत्वमेव दृष्टान्तेन साधयति—**यथेत्यादिना। **यन्निर्युक्तिकत्वं**

भाष्यार्कप्रकाशः

विशेष्यचैतन्यमेवैकं ब्रूमः, न तु विशिष्टचैतन्यम्। चैतन्यमेव हि प्रमातुरात्मा। तस्मात् प्रमातृभेदेऽपि नात्मभेदः, प्रमात्रन्तःकरण-भेदेऽपि प्रमातृचैतन्याभेदात्। तस्मादेक एवात्मा चैतन्यरूपः।

ननु 'येन ज्ञानेनेक्षते' इति पूर्वश्लोकवद् इहापि 'येन वेत्ती'त्येव वक्तव्ये कथमुक्तम् 'यद्वेत्ती'ति? तत्राह—**ज्ञानस्येति**। वृत्तिज्ञानस्येत्यर्थः। **निर्वृत्तं** सिद्धम्।

यत्तु **रामानुजः**—सितदीर्घादिपृथक्त्वेनात्मनो वेत्तीति, **तत्तुच्छम्** ; न हि कोऽप्यास्तिकः कर्मठो देहभिन्नकर्तृभोक्त्रात्मवादी सन् आत्मानं सितं दीर्घं कृष्णं ह्रस्वं वा मन्यते। यस्तु देहात्मवादी बौद्धः स भोक्त्रभावात् कर्म नैव करोति, मन्यते चात्मानं सितं दीर्घं कृष्णं ह्रस्वं स्थूलं कृशं चेत्येवम्। तस्माद् भिन्नात्मज्ञानमेव राजसम्। तच्च निन्द्यं त्याज्यं चेति स्थितम्॥२१॥

**यत्त्विति**। एकस्मिन् कार्ये सक्तमहैतुकमतत्त्वार्थवदल्पं च कृत्स्नवद् यत् तु ज्ञानं, तत् तामसमुदाहृतं शिष्टैरिति शेषः। देहा-त्मज्ञानम् , अर्चेश्वरज्ञानं च तामसमिति फलितार्थः। कृत्स्नमस्यास्ति, अस्मिन्नस्तीति वा कृत्स्नवत्। विषयिणि ज्ञाने विषयत्वेन सर्व-मस्तीत्यर्थः। इदमेवाह—**सर्वविषयमिति**। भूतभौतिकादिसर्वजगद्विषयमित्यर्थः। न त्वेकात्मविषयमिति भावः। यथाऽद्वैतिन 'एकमेवा-द्वितीयं ब्रह्मे'ति मन्यन्ते, तथेमे 'दृश्यं सर्वं जगत् सत्यमेवे'ति मन्यन्त इति परमार्थः। तथा एकस्मिन् कार्ये सक्तमिति। एककार्य-विषयमित्यर्थः। किं तत् कार्यम्? अत आह—**देह इति**। पक्षान्तरमाह—**प्रतिमादाविति**। एकशब्दश्च केवलवाचीत्याह—**एतावानेवेति**। 'देह एवात्मा' इति, 'प्रतिमैवेश्वरः' इत्येतद् एककार्यविषयं ज्ञानमित्यर्थः। एवकारार्थमाह— **नातः परमस्तीति**। अतोऽस्माद् देहात् प्रतिमादेर्वा परम् आत्माख्यमीश्वराख्यं वा वस्तु नास्तीत्यर्थः। के पुनरेवं मन्यन्ते? अत आह—**यथेति**। **नग्नकाः** दिगम्बराः, **श्र[क्ष]पणकाः** कापालिकाः, बौद्धविशेषा एते। **देहपरिमाण इति**। यावत्परिमाणो देहस्तावत्परिमाण इत्यर्थः। अत एव **शरीरानुवर्ती** हस्ति-मशकादिशरीरानुसारी। एतेन सावयवत्वमात्मनः सिद्धम्। जीवस्य केषांचिदवयवानां नाशाद् मशकादिदेहपरिमाणत्वम् , केषांचिल्ला-भाद् मनुष्यादिदेहपरिमाणत्वं चेति। यद्यपीमे न देहात्मवादिनः, तथापि सावयवात्मवादित्वाद् देहात्मवादितुल्या एवेति निदर्शनतये-होपात्ता इति बोध्यम्। अनेन च 'देहपरिमाणो जीवः' इति ज्ञानस्यैव तामसत्वे, किं पुनः 'देह एव जीवः' इति ज्ञानस्येत्यर्थापत्तिः सिध्यति। यद्वा एतावानेवेत्यस्य देहमात्रपरिमाण एवेति, प्रतिमादिमात्र एवेति चार्थः। तथा च देहातिरिक्तात्मवादिनोऽप्येते देह-परिमाणात्मवादित्वात् तामसज्ञानवन्त इति निन्द्यन्ते। 'देहपरिमाणो जीवः' इति ज्ञानं, 'प्रतिमादिरूप ईश्वरः' इति ज्ञानं च तामसमिति

१. 'अहेतुकम्' इति मूले भाष्ये टीकायां च पा.। २. 'ज्ञानं वेत्ति' इति तु 'एधांसि पचन्ती'तिवत् करणे कर्तृत्वोपचारात् प्रयोगः। ३. 'शरीरान्तर्वर्ती' इति पा.।
४. पृथक्त्वेनेति हेतौ तृतीया। पृथक्त्वम् आत्मनः प्रतिशरीरं भेदः। अत एव हेतोः पृथग्विधान् भिन्नलक्षणानिति योजनेति भावः।

**पाषाणदार्वादिमात्रम् इत्येवम् एकस्मिन् कार्ये सक्तम्,** [१]अहैतुकं **हेतुवर्जितं निर्युक्तिकम्,** अतत्त्वार्थवद् [२]**यथाभूतोऽर्थः तत्त्वार्थः, सोऽस्य ज्ञेयभूतोऽस्तीति तत्त्वार्थवत्, न तत्त्वार्थवद् अतत्त्वार्थवद्, अहैतुकत्वादेव,** अल्पं **च अल्पविषयत्वाद् अल्पफलत्वाद्वा, तत् तामसमुदाहृतम्। तामसानां हि प्राणिनामविवेकिनामीदृशं ज्ञानं दृश्यते॥ २२॥**

आनन्दगिरिकृतव्याख्या

**तदेव ज्ञानस्याभासत्वे कारणमित्याह—**अहैतुकत्वादिति। **स्वरूपतो विषयतश्चाभासत्वम्, फलतो वेत्याह—**अल्पेति। **तामसं ज्ञानमुक्तलक्षणमित्यत्रानुभवं प्रमाणयति—**तामसानां हीति॥ २२॥

भाष्यार्कप्रकाशः

श्लोकसारार्थः।

ननु सर्वात्मकस्येश्वरस्य कुतः प्रतिमादिरूपत्वाभावः? अत आह—**पाषाणदार्वादिमात्र इति**। 'ये श्रीरङ्गजगन्नाथादिक्षेत्रेषु कल्पिताः पाषाणदार्वादिमया अर्चाविग्रहाः त एवेश्वरः, न तु घटपटादयः, नापि चैतन्यम्' इति मन्यन्त एत इति भावः। ननु यथोक्तं ज्ञानं सहेतुकत्वान्न त्याज्यम्, अत आह—**अहैतुकमिति**। नापि यथार्थमित्याह—**अतत्त्वार्थवदिति**। अतत्त्वार्थविषयमित्यर्थः। कुत इदं ज्ञानं तामसम्? अत आह—**तामसानामिति। ईदृशमिति**। 'सर्वं जगत्सत्यम्' 'देह एव जीवः' 'देहपरिमाणो जीवः' इति वा, 'पाषाणदार्वादिमात्र ईश्वरः' इत्येवंरूपमित्यर्थः।

**ननु** 'ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना' इति कर्मचोदनत्वं ज्ञानस्य पूर्वमुक्तम्, कथमिह ततोऽन्यदेव ज्ञानमुक्तमिति चेत्, **नैष दोषः**; प्रवृत्तिलक्षणं निवृत्तिलक्षणं चेति द्विविधं हि कर्म। तत्रोपेक्षाप्रयोजकं निवृत्तिलक्षणं कर्म चोदयति सात्त्विकं ज्ञानम्, ब्रह्मात्मविदां सनकादीनां निवृत्तिमार्गनिष्ठत्वात्, साङ्ख्यानां कर्मयोगेऽनधिकाराच्च। राजसतामसज्ञाने तु प्रवृत्तिलक्षणं कर्म चोदयत एव। भिन्नात्मदर्शिनां राजसानां कर्तृभोक्त्रात्मदर्शित्वात् कर्मणि प्रवृत्तिः। तामसानां च देहात्मवादिनामर्चेश्वरवादिनां कर्मणि प्रवृत्तिरुपपन्नैवेति। तस्मादुक्तं त्रिविधं ज्ञानं कर्मचोदनमेव। न च निवृत्तिर्न कर्मेति वाच्यम्; प्रवृत्तिवन्निवृत्तिरपि कर्मैवेत्युक्तत्वात्।

यद्वा ज्ञानं कर्मचोदनेति सामान्यत उक्तम्। तत्र राजसतामसज्ञानयोरेव कर्मचोदनत्वं, न तु सात्त्विकज्ञानस्येति बोध्यम्। वस्तुतस्तु 'ज्ञानं कर्म[ज्ञेयम्]' इति श्लोकोक्तं कर्मचोदनं ज्ञानमन्यत् – यत् क्रियाकारकफलादिसर्वद्वैतविषयम्। 'ज्ञानं कर्म च कर्ता चे'ति श्लोकोक्तं ज्ञानं तु ततोऽन्यत् – यज्जीवेश्वरविषयम्। अत एव 'ज्ञानं कर्म चे'ति श्लोकावतारभाष्यादौ, 'अथेदानीम्' इत्यथशब्दः प्रयुक्तः वक्ष्यमाणग्रन्थस्य प्रकरणान्तरत्वद्योतनायेति।

एतेन 'ज्ञानं ज्ञेयं परिज्ञाते'त्युक्ता एव पदार्था 'ज्ञानं कर्म च कर्ता चे'त्यनेनानूद्यन्त इति **वेदान्तदेशिको**क्तिः परास्ता। जीवेश्वरविषयज्ञानस्यैवेहोक्तत्वेनाकर्मविषयत्वादस्य। न च कर्मार्थमपि जीवेश्वरज्ञानमावश्यकमिति जीवेश्वरविषयं ज्ञानमपि कर्मचोदनमिति वाच्यम्; उपमृदितक्रियाकारकफलादिसर्वद्वैतत्वाद् अद्वितीयजीवेश्वरज्ञानस्य। न च प्रतीयमाने सर्वद्वैते कथमद्वैतसिद्धिरिति वाच्यम्; प्रतीयमानेऽपि नैल्ये गगनस्य नीरूपत्वसिद्धेरिष्टत्वात्। तस्मादविद्यादशायामेव सर्वद्वैतोपलम्भः, न तु विद्यादशायाम्। न च विद्याविद्यादशाद्वयसत्त्वे प्रमाणाभाव इति वाच्यम्; 'दूरमेते विपरीते विषूची अविद्या या च विद्ये'ति श्रुतेरेव प्रमाणत्वात्। न च विद्यादशायां द्वैताभावोऽप्रमाण इति वाच्यम्; 'यत्र सर्वमात्मैवाभूत्तत्र केन कं पश्ये'दिति श्रुतेः, सुषुप्तिमृतिमूर्छासमाध्यनुभवस्य च प्रमाणत्वादिति स्थितमद्वैतम्।

एवं ज्ञानत्रैविध्यप्रदर्शनं तु सात्त्विकज्ञानस्य सम्पादनार्थम्, इतरयोः परिवर्जनार्थं च। एवं कर्मादित्रैविध्यप्रदर्शनमपीति बोध्यम्। तस्मान्मुमुक्षुणा यथोक्तं सात्त्विकमद्वैतज्ञानमेव सम्पाद्यमिति सङ्क्षेपः।

प्रेतभूताद्याराधनविषयं ज्ञानं तामसमिति **रामानुजः**, प्रकृतश्लोकादेतादृशार्थालाभाद्, आत्मविषयज्ञानगतसात्त्विकत्वादिभेदकथनप्रसङ्गे एतदर्थस्याकथनीयत्वाच्चोपेक्ष्यं रामानुजव्याख्यानम्॥ २२॥

---

१. हेतुरेव हैतुकः, विनयादित्वकल्पनया स्वार्थे ठक्। अविद्यमानो हैतुको यस्मिन्निति विग्रहः। २. 'अयथाभूतार्थवद् यथाभूतोऽर्थः' इति पा.।

**नियतं सङ्गरहितमरागद्वेषतःकृतम्।**
**अफलप्रेप्सुना कर्म यत् तत् सात्त्विकमुच्यते॥२३॥**
**यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः।**

**अथेदानीं कर्मणस्त्रैविध्यमुच्यते**—नियतमिति। नियतं **नित्यं** सङ्गरहितम् **आसक्तिवर्जितम्** अरागद्वेषतःकृतम् **रागप्रयुक्तेन द्वेषप्रयुक्तेन च कृतं रागद्वेषतःकृतम्, तद्विपरीतम् अरागद्वेषतःकृतम्,** अफलप्रेप्सुना **फलं प्रेप्सतीति फलप्रेप्सुः फलतृष्णः, तद्विपरीतेनाफलप्रेप्सुना कर्त्रा कृतं कर्म यत् तत् सात्त्विकमुच्यते॥२३॥**

यत्त्विति। यत्तु कामेप्सुना [1]**फलप्रेप्सुनेत्यर्थः; कर्म। साहङ्कारेण वा**[2]। साहङ्कारेणेति **न तत्त्वज्ञानापेक्षया, किं तर्हि? लौकिकश्रोत्रियनिरहङ्कारापेक्षया। यो हि परमार्थनिरहङ्कारः आत्मविद् न तस्य कामेप्सुत्वबहुलायासकर्तृत्व-**

आनन्दगिरिकृतव्याख्या

**त्रिविधं कर्म वक्तुमनन्तरश्लोकत्रयमित्याह**—अथेति। **तत्र सात्त्विकं कर्म निरूपयति**—नियतमिति॥२३॥

**राजसं कर्म निर्दिशति**—यत्त्विति। **फलप्रेप्सुना कर्त्रा यत् कर्म क्रियते, तद् राजसमित्युत्तरत्र सम्बन्धः। तत्त्वज्ञानवता निरहङ्कारेण, साहङ्कारेण त्वज्ञेन क्रियते कर्मेति विवक्षां वारयति**—साहङ्कारेणेति। **'तत्त्वज्ञानवता निरहङ्कारेण कृतं कर्मापेक्ष्य साहङ्कारेणाज्ञेन कृतमेतत् कर्मे'ति न विवक्ष्यते चेत्, तर्हि किमत्र विवक्षितमिति पृच्छति**—किं तर्हीति। **यो हि दुरितरहितः श्रोत्रियो लोकादनपेतस्तस्य यदहङ्कारवर्जितं कर्म, तदपेक्षयेदं साहङ्कारेण कृतं कर्मेत्युक्तमित्याह**—लौकिकेति। **ननु तत्त्वज्ञानवतो निरहङ्कारस्य कर्मकर्तृत्वमपेक्ष्य साहङ्कारेणेत्यादि किं नेष्यते? तत्राह**—यो हीति। **विशेषणान्तरवशादेव तत्त्वविदो निवारितत्वान्न तदपेक्षमिदं विशेषणमित्यर्थः।**

भाष्यार्कप्रकाशः

**नियतमिति। अथेति।** ज्ञानप्रकरणं समाप्तमिति सूचयितुम् अथशब्दः। अफलप्रेप्सुना अरागद्वेषतःकृतं नियतं सङ्गरहितं यत् कर्म, तत् सात्त्विकमुच्यते। **नित्यमिति।** 'अहरहः सन्ध्यामुपासीते'त्यादिश्रुतिसिद्धसन्ध्यावन्दनाग्निहोत्रादिकम्, यस्य चाकरणे प्रत्यवायः। नैमित्तिकस्याप्यत्रैवान्तर्भावः। अकरणे प्रत्यवायजनकत्वस्य नैमित्तिकेष्वपि श्राद्धादिषु सत्त्वात्। **आसक्तिः** प्रीतिविशेषः। **रागः** प्रीतिसामान्यम्। **द्वेषो**ऽप्रीतिः। रागाद् द्वेषतो वा हेतोः कृतं रागद्वेषतःकृतम्। पञ्चम्या अलुगार्षः[3]। रागद्वेषकृतमित्यर्थः। तन्न भवतीत्यरागद्वेषतःकृतम्। यद्वा रागद्वेषयोरभावोऽरागद्वेषः, तस्मादरागद्वेषतः इति पृथक् पदम्। रागद्वेषाभावाद्धेतोरित्यर्थः। अथवा न विद्यते रागद्वेषौ यस्य सोऽयमरागद्वेषः, तेनारागद्वेषतः इति सार्वविभक्तिकस्तसिः तृतीयायाम्। विशेषणमिदम् अफलप्रेप्सुनेत्यस्य। रागप्रयुक्तेनेत्यादिभाष्यं तु फलितार्थकथनपरम्॥२३॥

**यदिति।** कामेप्सुना साहङ्कारेण वा पुनर्बहुलायासं यत्तु कर्म क्रियते तद् राजसमुदाहृतम्। कामेप्सुना कृतं साहङ्कारेण कृतं च पुनर्बहुलायासं कर्म राजसमित्युच्यत इत्यर्थः। ननु 'अहं करोमी'ति कर्तृत्वाभिमानपुरःसरं कर्मिणा कर्मणः क्रियमाणत्वात् कथं निरहङ्कारत्वं कर्मिणः स्याद् येनोच्येत – 'साहङ्कारेण यत् क्रियते' इति। अत आह—**नेति।** तत्त्वज्ञानापेक्षया 'साहङ्कारेण वे'ति नोक्तम्, निरहङ्कारतत्त्वविदपेक्षया साहङ्कारेणेति नोक्तमित्यर्थः। 'अहं करोमी'त्याकारकोऽहङ्कारो नेह ग्राह्यः, किन्तु 'वैश्वदेव्यहम् सोमयाज्यहम् आढ्योऽहम् अभिजनवानहम्' इत्यादिरात्मोत्कर्षप्रधानोऽहङ्कारो ग्राह्यः इति भावः। **लौकिको**ऽतत्त्ववित्, **श्रोत्रिय**श्छान्दसः, **निरहङ्कारः** अहमेवोत्कृष्ट इत्यहङ्काररहितः इत्यर्थः। तदपेक्षयाऽयं कर्मी साहङ्कारः, यः आत्मानं कर्मिषूत्कृष्टं मन्यते। ननु साहङ्कारप्रतियोगितया निरहङ्कारश्रोत्रियग्रहणमिति किम्? निरहङ्कारस्तत्त्वविदेव गृह्यताम्, अत आह—**यो हीति। परमार्थनिरहङ्कार इति।** अनात्मस्वात्माभिमानरूपवास्तवाहङ्कारशून्य इत्यर्थः। कामेप्सुत्वबहुलायासकर्तृत्वयोः प्राप्तिस्तस्य नास्ति। ततश्चाप्राप्तस्य

१. 'कर्मफलप्रेप्सुना' इति पा.। २. 'साहङ्कारेण वा' इतीदम् अग्रे 'क्रियते' इत्यनेनान्वितम्। ३. वस्तुतस्तु तसिलः सुप्त्वाभावात् समासे लुक् न प्राप्नोतीति ध्येयम्।

**क्रियते बहुलायासं तद् राजसमुदाहृतम्॥ २४॥**
**अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्।**
**मोहादारभ्यते कर्म यत् तत् तामसमुच्यते॥ २५॥**

**प्राप्तिरस्ति। सात्त्विकस्यापि कर्मणोऽनात्मवित् साहङ्कारः कर्ता, किमुत राजसतामसयोः। लोकेऽनात्मविदपि श्रोत्रियो निरहङ्कार उच्यते— 'निरहङ्कारोऽयं ब्राह्मणः' इति। तस्मात् तदपेक्षयैव 'साहङ्कारेण वा' इत्युक्तम्।** पुनःशब्दः **पाद-पूरणार्थः।** क्रियते बहुलायासं **कर्त्रा महताऽऽयासेन निर्वर्त्यते, तत् कर्म राजसमुदाहृतम्॥ २४॥**

अनुबन्धमिति। अनुबन्धं **पश्चाद्भावि यद् वस्तु सोऽनुबन्धः उच्यते। तं चानुबन्धं,** क्षयं **यस्मिन् कर्मणि क्रिय-माणे शक्तिक्षयोऽर्थक्षयो वा स्यात् तं क्षयं,** हिंसां [1]**प्राणिपीडाम्** [2]**अनपेक्ष्य च** पौरुषं **पुरुषकारं 'शक्नोमीदं कर्म समाप-यितु'मित्येवमात्मसामर्थ्यम् इत्येतानि अनुबन्धादीनि अनपेक्ष्य पौरुषान्तानि,** मोहाद् **अविवेकत आरभ्यते कर्म यत्, तत्** तामसं **तमोनिर्वृत्तमुच्यते॥ २५॥**

आनन्दगिरिकृतव्याख्या

**साहङ्कारस्यैव राजसे कर्मणि कर्तृत्वमित्येतत् कैमुतिकन्यायेन साधयति—**सात्त्विकस्येति। **नन्वात्मविदोऽन्यस्य निरहङ्कारत्वायोगात् कथं तदपेक्षया साहङ्कारेणेत्युक्तम्? तत्राह—**लोक इति॥ २४॥

**सम्प्रति तामसं कर्मोदाहरति—**अनुबन्धमित्यादिना॥ २५॥

भाष्यार्कप्रकाशः

निषेधायोगाद् नेह निरहङ्कारस्तत्त्वविद् ग्राह्य इत्यर्थः।

अयमाशयः—कामेप्सुना साहङ्कारेण वा कृतं बहुलायासं कर्म राजसमित्युक्तौ, अकामेप्सुना निरहङ्कारेण वा कृतमबहुलायासं कर्म न राजसमित्यापतितम्। ततश्च निरहङ्कारशब्देन तत्त्वविद्ग्रहणे तत्त्वविदः कामेप्सुत्वं बहुलायासकर्मकर्तृत्वं च न युक्तमिति सिध्यति, तच्चायुक्तम्; तत्त्वविदः कामेप्सुत्वबहुलायासकर्मकर्तृत्वयोः प्राप्त्यसम्भवेन निषेधायोगादिति।

ननु कुतस्तत्त्वविदस्तत्प्राप्तिर्नास्तीत्यत आह—**सात्त्विकस्यापीति**। अनात्मविदिति छेदः। न तु निरहङ्कार आत्मवित् कर्तेत्यर्थः। नन्वेवं कर्ममात्रकर्तृत्वस्याहङ्कारपूर्वकत्वे कर्तुरनात्मविदश्च साहङ्कारत्वे कथं लौकिकश्रोत्रियनिरहङ्कारपुरुषसिद्धिः? यदपेक्ष-येह साहङ्कारेण वेत्युक्तम्? अत आह—**लौकिकैरिति। निरहङ्कार इति**। गर्वशून्य इति भावः।

ननु **वा** इत्यनेनैव पुनःशब्दार्थलाभे कुतः पुनःशब्दप्रयोगः? अत आह—**पुनरिति**। कामेप्सुकर्तृकं साहङ्कारकर्तृकं च बहुलायासं कर्म राजसमिति निष्कर्षः। कर्मणो राजसत्वे कामेप्सुकर्तृकत्वं साहङ्कारकर्तृत्वं बहुलायासत्वं चेति हेतुत्रयम्। तत्र कामेप्सु-कर्तृकत्वबहुलायासत्वयोः साहङ्कारकर्तृकत्वबहुलायासत्वयोर्वा समुच्चयः। वाशब्दस्य चार्थाभ्युपगमे तु त्रयाणामपि समुच्चयः। पुनः-शब्दस्यापि विकल्पार्थाभ्युपगमे त्रयाणामपि प्रत्येकं हेतुत्वमिति बोध्यम्। एवं कर्मणः सात्त्विकत्वे चाकामप्रेप्सुकर्तृकत्वं रागद्वेषा-(दि) प्रयुक्तत्वं सङ्गरहितत्वं नित्यत्वं चेति हेतुचतुष्टयं समुच्चित्य वा, प्रत्येकं वेति बोध्यम्॥ २४॥

**अनुबन्धमिति**। अनुबन्धं क्षयं हिंसा पौरुषं चानवेक्ष्य कर्त्रा यत् कर्म मोहादारभ्यते तत् तामसमुच्यते। **यद् वस्तु** दुःखमित्यर्थः। दुःखहेतुरनर्थ इति वा। **अनवेक्ष्य** निरवेक्ष्य, अनालोच्येत्यर्थः। कर्मणस्तामसत्वेऽनुबन्धानवेक्षिकर्तृकत्वं क्षयानवेक्षि-कर्तृकत्वं हिंसानवेक्षिकर्तृकत्वं पौरुषानवेक्षिकर्तृकत्वं मोहप्रयुक्तत्वं चेति हेतुपञ्चकं समुच्चित्य वा प्रत्येकं वेति बोध्यम्। अनुबन्धादि-चतुष्टयानवेक्षित्वम् इत्येको हेतुरिति वा। ततश्च हेतुद्वयं समुच्चित्य प्रत्येकं वा भवतीति।

---

१. 'प्राणिबाधां' इति पा.। २. 'अनवेक्ष्य' इति गीतायां, भाष्ये च पा.।

**मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।**
**सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते॥२६॥**

[१]मुक्तेति। मुक्तसङ्गो **मुक्तः परित्यक्तः सङ्गो येन स मुक्तसङ्गः,** अनहंवादी **नाहंवदनशीलो** धृत्युत्साहसमन्वितः, धृतिः **धारणम्,** उत्साहः **उद्यमः ताभ्यां** समन्वितः **संयुक्तो धृत्युत्साहसमन्वितः,** सिद्ध्यसिद्ध्योः **क्रियमाणस्य कर्मणः फलसिद्धावसिद्धौ च सिद्ध्यसिद्ध्योः** निर्विकारः **केवलं शास्त्रप्रमाणेन प्रयुक्तः, [२]न फलरागादिना [३]युक्तो यः, स निर्विकारः उच्यते। एवम्भूतः कर्ता यः स सात्त्विक उच्यते॥२६॥**

आनन्दगिरिकृतव्याख्या

**इदानीं कर्तृत्रैविध्यं ब्रुवन्नादौ सात्त्विकं कर्तारं दर्शयति—**मुक्तेति। सङ्गो **नाम फलाभिसन्धिर्वा, कर्तृत्वाभिमानो वा।** नाहंवदनशीलः **कर्ताऽहमिति वदनशीलो न भवतीत्यर्थः।** धारणं **धैर्यम्। क्रियमाणस्य कर्मणो यदि फलानभिसन्धिस्तर्हि नानुष्ठानविश्रम्भः सम्भवेदित्याशङ्क्याह—** केवलमिति। **फलरागादिनेत्यादिशब्देन कर्मरागो गृह्यते। अयुक्त इति च्छेदः॥२६॥**

भाष्यार्कप्रकाशः

**ननु** समुच्चयासमुच्चयपक्षद्वयमविशेषेण दर्शितम्, तत्र कतरः पुनः पक्ष आश्रयणीय इति चेत्, **उच्यते**—पक्षद्वयमप्याश्रयणीयमेवेति। कथम्? नियतं कर्म सात्त्विकमित्युक्तौ सङ्गिना कृतस्यापि नियतकर्मणः सात्त्विकत्वं स्यात्। तद्वारणाय नियतं सङ्गरहितं कर्म सात्त्विकमित्युक्तौ असङ्गेनापि रागद्वेषवता कृतं नियतकर्म सात्त्विकं स्यात्। तद्वारणाय नियतं सङ्गरहितमरागद्वेषतः कृतं कर्म सात्त्विकं स्यादित्युक्तौ रागद्वेषसङ्गशून्येन फलकामिना कृतं नियतकर्म सात्त्विकं स्यात्। तद्वारणाय नियतं सङ्गरहितमरागद्वेषतः फलकामरहितेन कृतं कर्म सात्त्विकमिति वक्तव्यम्। तथा कामेप्सुना साहङ्कारेण च कृतं बहुलायासं कर्म राजसमित्युक्तौ कामेप्सुना निरहङ्कारेण कृतं बहुलायासं कर्म राजसं न स्यात्। कामेप्सुना साहङ्कारेण च कृतमबहुलायासं कर्म राजसं न स्याच्च। तथाऽनुबन्धादिचतुष्टयानवेक्षं मोहादारब्धं च कर्म तामसमित्युक्तौ अनुबन्धादिद्वयावेक्षं तत्त्रयावेक्षं तदेकावेक्षं वा मोहादारब्धं कर्म तामसं न स्यात्। तच्चतुष्टयावेक्षमपि मोहादनारब्धं कर्म तामसं न स्यात्। अतः पक्षद्वयाश्रयणमिति। न चैवं सात्त्विककर्मलक्षणे समुच्चयः, अन्यत्रासमुच्चयश्चाश्रयणीय इति वाच्यम्; कामेप्सुना कृते बहुलायासे कर्मणि राजसत्वप्रयोजकस्यैकस्य हेतोर्निश्चित्य वक्तुमशक्यत्वेन समुच्चयस्य वक्तव्यत्वात्। एवमनुबन्धादिचतुष्टयावेक्षे मोहादारब्धे कर्मणि तामसत्वप्रयोजकस्यैकस्य हेतोर्निश्चित्य वक्तुमशक्यत्वेन समुच्चयस्य वक्तव्यत्वाच्च।

**ननु** तर्हि राजसलक्षणे तामसकर्मलक्षणे च पक्षद्वयमाश्रयणीयम्, कुतः पुनःसात्त्विके कर्मणीति चेद्, **उच्यते**—नियतत्वादिकं प्रत्येकमपि कर्मणः सात्त्विकत्वे प्रयोजकमेवेति। न च नियतं कर्म सात्त्विकमित्युक्तौ कामेप्सुना कृतं नियतकर्म सात्त्विकं स्यादिति वाच्यम्; कर्मणः कामेप्सुकृतत्वस्य राजसत्वसम्पादकत्वात्, राजसत्वस्य सात्त्विकत्वदूषकत्वादिति। **वस्तुतस्तु** नियतमिति श्लोके समुच्चयपक्षः, अन्यत्र पक्षद्वयं चेत्येतदेव साधीयः।

अयं श्लोकत्रयनिष्कर्षः—मुमुक्षुः पुरुषः कर्माधिकारी रागद्वेषौ सङ्गं फलकामनां चाकृत्वा निरहङ्कारःसन् निरायासं स्वशक्त्यनुगुणम् अदुःखोदर्कम् अहिंसात्मकमनाशकं नित्यं कर्म निर्मोहःसन् कुर्यात्। एतद्विपरीतं तु परित्यजेदिति॥२५॥

**मुक्तेति। अनहंवदनशीलः** 'अहमाढ्यः, उत्कृष्टमिदं कर्माहं करोमी'त्येवमहङ्कारगर्भवाक्यप्रयोगस्वभावरहित इत्यर्थः। **धारणं** शरीरेन्द्रियाद्यनवसादनम्। **उद्यमो** व्यापारः। **निर्विकारो** हर्षखेदरूपविकाररहितः। कथं निर्विकारत्वसिद्धिः? अत आह—**केवलमिति।** यो हि फलरागादिना कर्मणि प्रवर्तते, तस्य कर्मफलसिद्धौ हर्षः, तदसिद्धौ खेदश्च भवति। यः पुनःशास्त्रप्रमाणेन कर्तव्यमित्येव कर्मणि प्रवर्तते, न तु फलमभिसन्धत्ते कथं तस्य फलसिद्ध्यसिद्धिप्रयुक्तहर्षखेदप्राप्तिः? न कथमपीति भावः॥२६॥

---

१. अत्र 'इदानीं कर्तृभेदःउच्यते— मुक्तसङ्ग इति।' इति अधिकः पाठः। २. 'शास्त्रप्रमाणप्रयुक्तः, फलरागादिनाऽयुक्तो यः' इति आनन्दगिरीयानुसारी पाठः। ३. 'युक्तः' इति क्वचिन्न।

**रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।**
**हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः॥२७॥**
**अयुक्तः प्राकृतः स्तब्धः शठो [१]नैकृतिकोऽलसः।**
**विषादी दीर्घसूत्री च कर्ता तामस उच्यते॥२८॥**

रागीति। रागी **रागोऽस्यास्तीति रागी**, कर्मफलप्रेप्सुः **कर्मफलार्थी**, लुब्धः **परद्रव्येषु सञ्जाततृष्णः, [२]तीर्थादौ स्वद्रव्यापरित्यागी वा,** हिंसात्मकः **परपीडाकरस्वभावः** अशुचिः [३]**बाह्याभ्यन्तरशौचवर्जितः** हर्षशोकान्वितः **इष्टप्राप्तौ हर्षः, अनिष्टप्राप्ताविष्टवियोगे च शोकः, ताभ्यां हर्षशोकाभ्याम्** अन्वितः **संयुक्तः। [४]तस्यैव च कर्मणः [५]सम्पत्तिविपत्त्योः हर्षशोकौ स्याताम्। ताभ्यां संयुक्तो यः कर्ता स राजसः परिकीर्तितः॥२७॥**

अयुक्त इति। [६]अयुक्तो **न युक्तोऽसमाहितः।** प्राकृतोऽत्यन्तासंस्कृतबुद्धिर्बालसमः, स्तब्धो **दण्डवन्न नमति कस्मैचित्** , शठो **मायावी शक्तिगूहनकारी,** नैकृतिकः [७]**परवृत्तिच्छेदनपरः,** अलसोऽ**प्रवृत्तिशीलः कर्तव्येष्वपि,** विषादी **विषादवान् सर्वदाऽवसन्नस्वभावः,** दीर्घसूत्री **च कर्तव्यानां दीर्घप्रसारणः, सर्वदा मन्दस्वभावः, यदद्य श्वो वा कर्तव्यं तन्मासेनापि न करोति,** यश्चैवम्भूतः **कर्ता स तामस उच्यते॥२८॥**

आनन्दगिरिकृतव्याख्या

**राजसं कर्तारं कथयति—**रागीति। **कर्मविषयो रागः[८], कर्मफलप्रेप्सुरिति फलरागस्य पृथक्कथनात्॥२७॥**

[९]**स्वाभिप्रायाप्रकटीकरणपूर्वकं परपीडनं [१०]परवृत्तिविच्छेदनम्। तेन स्वार्थपर इत्यर्थः। दीर्घं सूत्रयितुं शीलमस्येति व्युत्पत्तिं गृहीत्वा विवक्षितमर्थमाह—**कर्तव्यानामिति। **'एवं क्रियमाणे सत्यनिष्टमिदं कथञ्चिदापद्येत, यदा पुनरेवं क्रियते, तदा त्वनिष्टमेव सम्भावनोपनीत'मिति चिन्तापरम्परया मन्थरप्रवृत्तिरित्यर्थः। तदेव स्पष्टयति—**यदद्येति॥२८॥

भाष्यार्कप्रकाशः

**रागीति। हिंसात्मक इति।** शाकपार्थिवादित्वादुत्तरपदलोपी समास इत्याह—**परपीडाकरस्वभाव इति।** हिंसाकरः आत्मा यस्य स इति समासः। हिंसा पीडनमेवात्मा स्वभावो यस्य स हिंसात्मक इत्यपि वक्तुं शक्यम्। तथा हिंसायामात्मा मनो यस्य स हिंसात्मक इत्यपि वक्तुं शक्यते। ननु हर्षशोकयोर्वस्त्वन्तरविषयत्ववर्णनं नातीव युक्तम् , अत आह—**तस्यैव वेति। तस्यैव** आरब्धस्य कर्मणः **सम्पत्तिविपत्त्योः** सिद्ध्यसिद्ध्योः॥२७॥

**अयुक्त इति। बालसम इति।** विद्याविहीन इत्यर्थः। **स्तब्धः** स्तम्ब[म्भ]वत्स्थितः। यथा दण्डोऽनम्रः सन्नेवावतिष्ठते तद्वदयमपीत्यर्थः। **कस्मैचिदिति।** पूज्यायेत्यर्थः। [११]**माया** वञ्चना तस्यां शक्तिः सामर्थ्यम्। तस्या गूहनकारी प्रच्छादकः। स्वयं मायावी सन्नपि अमायावीव नटितुं शीलवानित्यर्थः। 'गूढविप्रियकृच्छठः' इति शास्त्रान्तरादिति भावः। **विभेदनं** मर्मोद्घाटनं हिंसनमेव वा। **निकृतिर्निकारो**ऽपकारस्तया दीव्यतीति नैकृतिकः। विषादोऽस्यास्तीति **विषादी**। अत इनिः। अवसन्नः खिन्नः। **दीर्घप्रसारणो** दीर्घालोचन इत्येतत्। तदेव विवृणोति—**सर्वदेति**। मन्दो निरुद्यमः स्वभावो यस्य स **मन्दस्वभावः**। अत एवाद्य वा श्वो वा कर्तव्यं यत् कर्म तद् मासेनापि न करोति। **एतेन** 'सहसा विदधीत न क्रियामविवेकः परमापदां पद'मिति **भारवि**वचनादनालोच्य कर्मकरणमयुक्तमिति कृत्वा कथं दीर्घसूत्रिणमिह तामसत्वेन कथितमिति[कथयतीति] शङ्का **परास्ता**। आलोच्यैव सम्यग् यदा कर्तव्यं तत् तदैव कुर्यात् , न तु दीर्घमालोचयन् कर्तव्यकर्मकालमतिपातयेदिति सिद्धत्वात्॥२८॥

---

१. 'नैष्कृतिकः' इति मूले भाष्ये च पा.। २. 'तीर्थादौ च स्वद्रव्या' इति पा.। ३. 'बाह्यान्तःशौच' इति पा.। ४. 'तस्यैव वा' इति रा.पा.। ५. 'सम्पत्तिविपत्तिभ्याम्' इति पा.। ६. 'अयुक्तोऽसमाहितः' इति पा.। ७. 'परविभेदनपरः' इति पा.। ८. ग्राह्यः इति शेषः। ९. 'स्वाभिप्राया....स्वार्थपर इत्यर्थः' इत्ययं ग्रन्थः नैकृतिकपदार्थविवरणपरभाष्यविवरणपरः सर्वत्र पूर्वश्लोकान्ते मुद्रितो दृश्यते। १०. 'परविच्छेदनम्' इति पा.। ११. 'मायाशक्तिगूहनकारी' इति रा.पा. भाति।

**बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु।**
**प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय !॥ २९॥**
**प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।**

बुद्धेर्भेदमिति। **बुद्धेर्भेदं धृतेश्चैव भेदं** गुणतः **सत्त्वादिगुणतस्त्रिविधं शृण्विति सूत्रोपन्यासः।** प्रोच्यमानं **कथ्यमानम्** अशेषेण **निरवशेषतो यथावत्** पृथक्त्वेन **विवेकतः,** धनञ्जय!। **दिग्विजये मानुषं दैवं च प्रभूतं धनमजयत् , तेनासौ धनञ्जयोऽर्जुनः॥ २९॥**

प्रवृत्तिं चेति। प्रवृत्तिं च – **प्रवृत्तिः प्रवर्तनं बन्धहेतुः कर्ममार्गः शास्त्रविहितविषयः।** निवृत्तिं च – **निवृत्तिः मोक्षहेतुः संन्यासमार्गः। बन्धमोक्षसमानवाक्यत्वात् प्रवृत्तिनिवृत्ती कर्मसंन्यासमार्गौ इत्यवगम्यते।** कार्याकार्ये **विहितप्रतिषिद्धे [१]कर्तव्याकर्तव्ये ; करणाकरणे इत्येतत् ; कस्य? देशकालाद्यपेक्षया दृष्टादृष्टार्थानां कर्मणाम् ;** भयाभये **बिभेत्यस्मादिति भयं [२]चोरव्याघ्रादि , [३]तद्विपरीतमभयम् , भयं चाभयं च भयाभये, दृष्टादृष्टविषययोर्भयाभययोः कारणे**

आनन्दगिरिकृतव्याख्या

**ज्ञानादीनां प्रत्येकं त्रैविध्यमुक्त्वा वृत्तिमत्या बुद्धेः, तद्वृत्तेश्च धृत्याख्यायास्त्रैविध्यं सूचयति—**बुद्धेरिति। **सूत्रविवरणं प्रतिजानीते—**प्रोच्यमानमिति। **अर्जुनस्य धनञ्जयत्वं व्युत्पादयति—**दिगिति॥ २९॥

**तत्रादौ सात्त्विकीं बुद्धिं निर्दिशति—**प्रवृत्तिं चेति। **प्रवृत्तिराचरणमात्रम् , अनाचरणमात्रं च निवृत्तिरिति किं नेष्यते? तत्राह—**बन्धेति। **यस्मिन् वाक्ये बन्धमोक्षावुच्येते तस्मिन्नेव प्रवृत्तिनिवृत्त्योरुक्तत्वात् , कर्ममार्गस्य बन्धहेतुत्वाद् , मोक्षहेतुत्वाच्च संन्यासमार्गस्य तावेवात्र ग्राह्यावित्यर्थः। करणाकरणयोर्निर्विषयत्वायोगाद् विषयापेक्षामवतार्य योग्यं विषयं निर्दिशति—**कस्येति। **अनिष्टसाधनं भयम् ,**

भाष्यार्कप्रकाशः

**बुद्धेरिति**। हे धनञ्जय ! अशेषेण पृथक्त्वेन प्रोच्यमानं बुद्धेर्धृतेश्चैव गुणतस्त्रिविधं भेदं शृणु। **सूत्रोपन्यास इति**। बुद्धिर्धृतिश्च गुणतस्त्रिविधेतीदं सूत्रभूतं वाक्यमित्यर्थः। प्रवृत्तिं च निवृत्तिं चेत्यादिवक्ष्यमाणग्रन्थस्तु तद्वृत्तिस्थानीय इति भावः। धनञ्जयेति सम्बुद्धिः यथा बाह्यान् शत्रून् जित्वा त्वया धनं सम्पादितम् , तथा कामादीनन्तःशत्रूनपि जित्वा मोक्षः सम्पादनीय इत्यभिप्रायगर्भा॥ २९॥

**प्रवृत्तिमिति**। हे पार्थ ! या बुद्धिः प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये बन्धं मोक्षं च वेत्ति सा सात्त्विकी भवति। **बन्धहेतुरिति**। देवत्वादिजन्मादिहेतुत्वादिति भावः। ननु प्रवृत्तिः प्रवर्तनं, निवृत्तिर्निवर्तनमिति कुतो न व्याख्यायते? अत आह—**बन्धेति**। 'बन्धं मोक्षं च या वेत्ती'ति वाक्येन समानवाक्यत्वात् 'प्रवृत्तिं च निवृत्तिं च वेत्ती'ति वाक्यस्य बन्धमोक्षहेतुकर्मसंन्यासमार्गपरत्वमिति भावः। करणं क्रिया। अकरणं तूष्णीम्भावः। कस्येमे करणाकरणे इति पृच्छति—**कस्येति**। समाधत्ते—**कर्मणामिति**। यस्मिन् देशे यस्मिन् काले येषां कर्मणां शास्त्रतः करणमकरणं च युक्तं तत् सर्वं यथावद् वेत्तीत्यर्थः। भयाभयशब्दावत्र न धर्मपरौ, किन्तु तद्धेतुपरावित्याह—**बिभेत्यस्मादिति भयमिति**। यस्माद् बिभेति तद्भयम् , यस्मान्न बिभेति तदभयम्। किं तद् भयम्? अत आह—**चोरेति**। आदिपदान्नरकादिग्रहणम्। **अभयं** पत्नीपुत्रसुकृतादि। **दृष्टादृष्टयोरेवेति**। दृष्टयोरदृष्टयोश्चेत्यर्थः। चोरव्याघ्रादिजन्यं भयं दृष्टम् , नरकादिजन्यं त्वदृष्टम् , तथा पत्न्यादिजन्यमभयं (भयराहित्यं) दृष्टम् , सुकृतादिजन्यं त्वभयमदृष्टमिति विवेकः। तयोः कारणे। ते अपि कारणे दृष्टादृष्टे एव। दृष्टभयहेतोश्चोरव्याघ्रादेर्दृष्टकारणत्वाद् अदृष्टभयहेतोर्नरकादेरदृष्टभयकारणत्वाच्च। एवं दृष्टाभयहेतोः पुत्रमित्रादेर्दृष्टकारणत्वाद् अदृष्टाभयहेतोः सुकृतादेरदृष्टाभयकारणत्वाच्च। तदेवं भयाभये या वेत्तीत्यस्य दृष्टादृष्टभयाभयकारणे या वेत्तीत्यर्थः फलितः। यथाश्रुतार्थे तु इदं भयम् , इदमभयमिति भयाभयरूपधर्मज्ञानस्य सर्वसाधारणत्वेन न तस्य सात्त्विकबुद्धिधर्मत्वं स्यादिति बोध्यम्।

१. 'प्रतिषिद्धे लौकिके वैदिके वा शास्त्रबुद्धेः कर्तव्याकर्तव्ये' इति पा.। २. 'चोरव्याघ्रादि' इति क्वचिन्न। ३. 'न भयमभयम्' इति पा.।

**बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ ! सात्त्विकी॥३०॥**
**यया धर्ममधर्मं च कार्यं चाकार्यमेव च।**

**इत्यर्थः। बन्धं सहेतुकं , मोक्षं च सहेतुकं या** वेत्ति **विजानाति बुद्धिः, सा पार्थ ! सात्त्विकी। तत्र ज्ञानं बुद्धेर्वृत्तिः, बुद्धिस्तु वृत्तिमती। धृतिरपि वृत्तिविशेष एव बुद्धेः॥३०॥**

ययेति। **यया** धर्मं **शास्त्रचोदितम् , अधर्मं च तत्प्रतिषिद्धम् , कार्यं चाकार्यमेव च पूर्वोक्ते एव कार्याकार्ये**

आनन्दगिरिकृतव्याख्या

**इष्टसाधनमभयमिति विभजते—**भयेति। **बन्धादिमात्रज्ञानस्य बुद्ध्यन्तरेऽपि सम्भवाद् विशेषणम्**[१]। **ननु बुद्धिशब्दितस्य ज्ञानस्य प्रागेव त्रैविध्यप्रतिपादनात् किमिति बुद्धेरिदानीं त्रैविध्यं प्रतिज्ञाय व्युत्पाद्यते? तत्राह—**ज्ञानमिति। **तर्हि ज्ञानेन गतत्वान्न पुनर्धृतिः व्युत्पादनीयेत्याशङ्क्याह—**धृतिरपीति। **विशेषशब्देन ज्ञानाद् व्यावृत्तिरिष्टा॥३०॥**

**कार्याकार्ययोर्धर्माधर्माभ्यां पौनरुक्त्यं परिहरति—**पूर्वोक्ते इति। **पूर्वश्लोके कार्याकार्यशब्दाभ्यां दृष्टादृष्टार्थानां कर्मणां करणाकरणे**

भाष्यार्कप्रकाशः

**ननु** चोरव्याघ्रादीन् भयहेतवः इति, पुत्रमित्रादीन् अभयहेतवः इति च सर्वे विदन्त्येवेति चेत् , **मैवम्** ; सत्यपि सर्वेषां दृष्टभयाभयहेतुवेदनेऽदृष्टभयाभयहेतुवेदनाभावादिति। ननु संसारो बन्धस्तदभावो मोक्षः इति सर्वसामान्यमेव ज्ञानम् , अत आह—**सहेतुकमिति**। अविद्यारागादयो बन्धहेतवः, भक्तिज्ञानादयो मोक्षहेतव इति विवेकः। बन्धहेतुर्भयहेतुश्च करणात्मकः प्रवृत्तिमार्गः। मोक्षहेतुरभयहेतुश्चाकरणात्मको निवृत्तिमार्ग इति या वेत्ति सा बुद्धिः सात्त्विकीति परमार्थः। यद्वा अयं प्रवृत्तिमार्गः, अयं पुनर्निवृत्तिमार्गः, अस्मिन् देशे कालेऽस्य कर्मणः करणं श्रेयः, अस्याकरणं श्रेयः, इदं भयकारणम् , इदमभयकारणम् , अयं बन्धहेतुरयं मोक्षहेतुः, अयं बन्धोऽयमेव मोक्ष इति प्रवृत्त्यादीन् यथावद् वेत्ति, सा बुद्धिः सात्त्विकीति।

ननु बुद्धिर्वेत्तीत्यस्य बुद्धिर्ज्ञानाश्रय इति ह्यर्थः। कर्तुः क्रियाश्रयत्वाद् वेदनकर्तृत्वाच्च बुद्धेः। कथं ज्ञानात्मिकायाः बुद्धेर्ज्ञानाश्रयत्वम्? अत आह—**तत्रेति**। बुद्धिज्ञानयोर्मध्य इत्यर्थः। वेत्तीति धात्वर्थभूतं यज्ज्ञानं सा बुद्धेर्वृत्तिः। बुद्धिर्हि वेद्यात्मना परिणमते, स च परिणामो वृत्तिरित्युच्यते। सा च वृत्तिः क्रियैवेति विदिधात्वर्थज्ञानत्वं बुद्धिवृत्तेरेव, क्रियावाचित्वाद् धातूनाम्। ननु यदि बुद्धिवृत्तिरेव ज्ञानं, न तु बुद्धिस्तर्हि बुद्धिः केत्यत आह—**बुद्धिस्त्वति**। वृत्तिमती बुद्धिः, न तु वृत्तिः। तथा च बुद्धेर्वृत्तिमत्या वृत्त्याश्रयत्वस्योचितत्वाद् बुद्धेर्ज्ञानाश्रयत्वं युक्तमेवेति बुद्धिर्वेत्तीति सम्यगुक्तमिति भावः। प्रवृत्त्यादिविषयाकारपरिणामवती बुद्धिः सात्त्विकीति परमार्थः श्लोकस्य।

न च बुद्धेरन्तःकरणस्य कर्तृत्वमयुक्तमिति वाच्यम् ; परिणामक्रियां प्रति कर्तृत्वस्य युक्तत्वात्। करणमपि चक्षुः परिणामक्रियायां भवति हि कर्तृ। [२]चक्षुर्घटरूपेण परिणमत इति प्रयोगात्। एतेन बुद्धेः क्षेत्रस्य वेत्तृत्वं कथं, तस्य क्षेत्रज्ञधर्मत्वादिति शङ्का प्रत्युक्ता। विषयाकारपरिणाममात्रमेव वेत्तृत्वं बुद्धेरिहोक्तम् , न तु ज्ञातृत्वमिति। यथा चक्षुर्घटाकारपरिणतमपि घटं न वेद, तथा बुद्धिः प्रवृत्त्यादिविषयाकारपरिणताऽपि प्रवृत्त्यादीन् न वेदैव, किन्त्वात्मैव परिणतां तां वेद, परिणतं चक्षुरिवेत्यात्मैव प्रवृत्त्यादीन् वेत्ति। बुद्धिस्तु करणमेव। बुद्धिवृत्त्यैवात्मना प्रवृत्त्यादीनां विदितत्वात्। न च बुद्धिवृत्तेरेव करणत्वं न बुद्धेरिति वाच्यम् ; वृत्तिवृत्तिमतोरैक्यात्। न हि शस्त्रधारया भिनत्तीत्युक्तौ शस्त्रधाराया एव करणत्वं, न तु शस्त्रस्येति वक्तुं शक्यते। तस्माद् यया प्रवृत्त्यादीन् यथावद् वेत्ति पुरुषः सा बुद्धिः सात्त्विकीति श्लोकसारार्थः। या वेत्तीति बुद्धेर्वेत्तृत्वकथनं त्वौपचारिकम् , करणे कर्तृत्वस्योपचरितत्वात्। **ननु** भगवता यया वेत्तीति साक्षादेव कुतो नोक्तमिति चेद् , **उच्यते**—बुद्ध्युपाधिकृतमेव वेत्तृत्वधर्म आत्मनि निर्धर्मके इति ज्ञापनार्थमिति। ननु ज्ञानं बुद्धिवृत्तिरस्तु, धृतिः पुनः केत्यत आह—**धृतिरपीति**॥३०॥

---

१. सहेतुकमिति विशेषणम्। २. चक्षुषः विषयाकारपरिणामः अन्वेषणीयः। चक्षुः विषयपर्यन्तं दीर्घप्रभाकारेण परिणमते इति प्रयोगो वा बोध्यः।

**अयथावत् प्रजानाति बुद्धिः सा पार्थ ! राजसी॥ ३१॥**
**अधर्मं धर्ममिति या मन्यते तमसावृता।**
**सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ ! तामसी॥ ३२॥**
**धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः।**

अयथावत् **न यथावत्, सर्वतो निर्णयेन न प्रजानाति, [१]या बुद्धिः सा पार्थ ! राजसी॥ ३१॥**

अधर्ममिति। अधर्मं **प्रतिषिद्धं** धर्मं **विहितमिति या** मन्यते **जानाति तमसावृता सती** सर्वार्थान् **सर्वानेव ज्ञेयपदार्थान्** विपरीतांश्च **विपरीतानेव विजानाति, बुद्धिः सा पार्थ ! तामसी॥ ३२॥**

धृत्येति। **धृत्या यया अव्यभिचारिण्येति व्यवहितेन सम्बन्धः, धारयते, किम्?** मनःप्राणेन्द्रियक्रियाः, **मनश्च प्राणश्चेन्द्रियाणि च मनःप्राणेन्द्रियाणि, तेषां क्रियाः चेष्टाः, ताः उच्छास्त्रमार्गप्रवृत्तेः** धारयते **धारयति। धृत्या हि धार्यमाणाः उच्छास्त्रमार्गविषया न भवन्ति।** योगेन **समाधिना,** अव्यभिचारिण्या **नित्यसमाध्यनुगतयेत्यर्थः। एतदुक्तं**

आनन्दगिरिकृतव्याख्या

**निर्दिष्टे। तयोरेवात्रापि ग्रहान्न धर्माधर्माभ्याम् [२]अपूर्वपर्यायाभ्यां गतार्थतेत्यर्थः।** [३]या बुद्धिः **यया बुद्ध्या बोद्धा निर्णयेन न जानातीत्यर्थः॥ ३१॥**

**धर्मशब्दो नपुंसकलिङ्गोऽपीत्यभिप्रेत्य [४]धर्ममित्युक्तम्।** तमसावृता **अविवेकेन वेष्टितेत्यर्थः। कार्याकार्यादीन् उक्तानुक्तांश्च संग्रहीतुं** सर्वार्थानित्युक्तम्**, तद् व्याचष्टे—**सर्वानेवेति। **विपरीतांश्चेति चकारमवधारणे गृहीत्वा** विपरीतानेवेत्युक्तम्**॥ ३२॥**

**इदानीं धृतित्रैविध्यं व्युत्पिपादयिषुरादौ सात्त्विकीं धृतिं व्युत्पादयति—**धृत्येति। **निर्दिष्टानां चेष्टानां कथं धृत्या धारणम्? तत्राह—**ता इति। **तदेवानुभवेन साधयति—**धृत्या हीति। **ध्रियतेऽनयेति धृतिर्यत्नविशेषः। तया धृत्या धार्यमाणा यथोपदिष्टाश्चेष्टाः शास्त्रमतिक्रम्य नार्थान्तरावगाहिन्यो भवन्तीत्यर्थः। धृतिमेव समाध्यविनाभूतत्वेन विशिनष्टि—**योगेनेति। **ननु धृतेर्नियमेन समाध्यनुगतत्वं कथमुक्तक्रियाधारणोपयोगीत्याशङ्क्याह—**एतदिति। **उक्तक्रिया धारयमाणो** योगेन **ब्रह्मणि समाधानेनैकाग्र्येण,** अव्यभिचारिण्या

भाष्यार्कप्रकाशः

**ययेति**। प्रजानातीति, पुरुष इति कर्तुः शेषः। अत्र बुद्धेर्वेदनक्रियायां करणत्वमेवोक्तम्—**ययेति**। धर्माधर्मादिनिर्णयरहिता बुद्धी राजसीत्यर्थः॥ ३१॥

**अधर्ममिति**। या तमसा आवृता, अत एवाधर्मं धर्ममिति मन्यते, सर्वार्थान् विपरीतांश्च मन्यते, हे पार्थ ! सा बुद्धिस्तामसी। विपरीतबुद्धिस्तामसीत्यर्थः॥ ३२॥

**धृत्येति**। पुरुष इति शेषः। योगेनाऽव्यभिचारिण्या यया धृत्या मनःप्राणेन्द्रियक्रियाः धारयते, हे पार्थ ! सा सात्त्विकी भवति। **धारयति** नियमयतीत्यर्थः। कुत इत्यत आह—**उच्छास्त्रमार्गप्रवृत्तेरिति**। उत्सृष्टं शास्त्रं येन स उच्छास्त्रः, स चासौ मार्ग उच्छास्त्रमार्गः, शास्त्रविरोधिमार्ग इत्यर्थः। तत्र प्रवृत्तेः सकाशात्। **अव्यभिचारिण्या** व्यभिचारशून्यया। केनास्या आशङ्कितो व्यभिचारः? अत आह—**योगेनेति**। योगव्यभिचारशून्ययेत्यर्थः। फलितमाह—**नित्येति**। सदाऽपि समाधानवत्येत्यर्थः। **अव्यभिचारिण्या** ध्रुवया, तत्र हेतुस्तु योगेनेति व्याख्यानान्तरम्। योगेन हेतुना अव्यभिचारिण्येत्यर्थः। अस्मिन्नेव व्याख्यानान्तरेऽभिप्रायमाह—**एतदुक्तमित्यादिना**। अव्यभिचारिण्या धृत्या मनःप्राणेन्द्रियक्रिया यथा धार्यमाणा भवेयुस्तथा योगेन धारयतीत्यन्वयः॥ ३३॥

१. 'या' इति क्वचिन्न। २. 'पूर्वपर्यायाभ्यां' इति पा.। ३. 'या सा बुद्धिर्यया' इति पा.। ४. इतिशब्देन निपातेनाभिहितत्वात् कर्मणः धर्ममिति प्रथमा। पुंलिङ्गत्वे हि 'अधर्मं धर्म इति या मन्यते' इति पठनीयं स्यादिति भावः। 'स्याद् धर्ममस्त्रियाम्' इति अमरकोशोऽप्यत्रानुसंधेयः।

**योगेनाव्यभिचारिण्या धृतिः सा पार्थ ! सात्त्विकी ॥ ३३ ॥**
**यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन !।**
**प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ ! राजसी ॥ ३४ ॥**
**यया स्वप्नं भयं शोकं विषादं मदमेव च।**
**न विमुञ्चति दुर्मेधा धृतिः [1]सा पार्थ ! तामसी ॥ ३५ ॥**

**भवति— अव्यभिचारिण्या धृत्या मनःप्राणेन्द्रियक्रियाः [2]धारयमाणो योगेन धारयतीति। या एवंलक्षणा धृतिः सा, पार्थ ! सात्त्विकी ॥ ३३ ॥**

ययेति। **यया तु** धर्मकामार्थान् **धर्मश्च कामश्चार्थश्च धर्मकामार्थाः, तान् धर्मकामार्थान् धृत्या यया** धारयते **मनसि नित्यकर्तव्यरूपान् अवधारयते, हे अर्जुन** ! प्रसङ्गेन **यस्य यस्य धर्मादेर्धारणप्रसङ्गस्तेन तेन प्रसङ्गेन फलाकाङ्क्षी च भवति, यः पुरुषः तस्य धृतिर्या, सा पार्थ ! राजसी ॥ ३४ ॥**

ययेति। **यया** स्वप्नं **निद्रां,** भयं **त्रासं,** शोकं, विषादम् **अवसादं विषण्णतां,** मदं **विषयसेवामात्मनो बहु मन्यमानो मत्त इव मदमेव च मनसि नित्यमेव कर्तव्यरूपतया कुर्वन्** न विमुञ्चति **धारयत्येव** दुर्मेधाः **कुत्सितमेधाः पुरुषो यः, तस्य धृतिर्या, सा तामसी मता ॥ ३५ ॥**

आनन्दगिरिकृतव्याख्या

**ऽविनाभूतया धृत्या धारयति, अन्यथा तदविनाभावाभावे नियमेन तद्धारणासिद्धेरित्यर्थः ॥ ३३ ॥**

**राजसीं धृतिं दर्शयति—**यया त्विति। **तेषां धारणप्रकारमभिनयति—**मनसीति। **फलाकाङ्क्षीति कस्य विशेषणम्? तत्राह—**यः पुरुष इति ॥ ३४ ॥

**तामसीं धृतिं व्याचष्टे—**ययेति। शोकं **प्रियवियोगनिमित्तं सन्तापम्।** विषण्णताम् **इन्द्रियाणां ग्लानिम्।** विषयसेवा **कुमार्गप्रवृत्तेरुपलक्षणम्। उक्तं स्वप्नादिमदान्तं सर्वमेव कर्तव्यतयाऽऽत्मनो बहु मन्यमानो मनसि नित्यमेव कुर्वन् दुर्मेधाः न विमुञ्चति, किन्तु धारयत्येवेति योजना ॥ ३५ ॥**

भाष्यार्कप्रकाशः

**ययेति**। हे अर्जुन ! पुरुषो यया धृत्या तु धर्मकामार्थान् धारयते, प्रसङ्गेन फलाकाङ्क्षी च भवति, हे पार्थ ! सा धृतिः राजसी भवति। **अर्थो** धनम्। **प्रसङ्गेन** धर्मादिधारणप्रसङ्गेनेत्यर्थः। फलाकाङ्क्षी सन् धर्मकामार्थसिद्ध्यर्थं मनःप्राणेन्द्रियक्रिया यया धारयति पुरुषः सा धृती राजसीत्यर्थः। न च धर्मकामार्थान् मनसि कर्तव्यरूपानवधारयतीत्येवाचार्यैर्भाषितमिति वाच्यम् ; मनस्यवधारणस्यैव मानसिकचेष्टाधारणत्वात् , तत्पूर्वकत्वाच्च प्राणेन्द्रियचेष्टाधारणस्य, तस्माद् भाष्यार्थसिद्ध एव मदुक्तार्थः ॥ ३४ ॥

**ययेति**। दुर्मेधाः यया स्वप्नं भयं शोकं विषादं मदमेव च न विमुञ्चति, हे पार्थ ! सा धृतिस्तामसी भवति। **विषयेति**। आत्मनो विषयसेवामेव बहु मन्यमानःसन् येन मत्त इव भवति, स मद इत्यर्थः। स्वप्नभयादय एव मया नित्यं कर्तव्या इति मनस्यनुसन्धाय तदर्थं मनःप्राणेन्द्रियक्रिया यया धारयति पुरुषः, सा धृतिस्तामसीत्यर्थः। एवंविधाया धृतेर्बुद्धिवृत्तेर्दुष्टत्वाद् दुर्बुद्धेः पुरुषस्यैवेदृशी धृतिरित्याह —**दुर्मेधा इति**। दुष्टा मेधा बुद्धिर्यस्य स दुर्मेधाः। 'नित्यमसिच् प्रजामेधयो'रित्यसिच्। फलमनभिसन्धाय, स्वप्नभयादिकं विहाय, मोक्षार्थं मनआदिक्रियाः पुरुषेण धृत्या धारयितव्या मुमुक्षुणेति श्लोकत्रयार्थः ॥ ३५ ॥

---

१. 'धृतिः सा तामसी मता' इति पा.। २. 'धार्यमाणाः' 'धारयमाणाः' इति पा.।

**सुखं त्विदानीं त्रिविधं श्रृणु मे भरतर्षभ !।**
**अभ्यासाद् रमते यत्र दुःखान्तं च निगच्छति॥ ३६॥**
**यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।**
**तत् सुखं सात्त्विकं प्रोक्तम् आत्मबुद्धिप्रसादजम्॥ ३७॥**

**गुणभेदेन क्रियाणां कारकाणां च त्रिधा भेदः उक्तः। अथेदानीं [१]फलस्य सुखस्य त्रिधा भेदः उच्यते—** सुखमिति। **सुखं त्विदानीं त्रिविधं श्रृणु , समाधानं कुर्वित्येतत्।** मे **मम, भरतर्षभ !।** अभ्यासात् **परिचयादावृत्तेः** रमते **रतिं प्रतिपद्यते** यत्र **यस्मिन् सुखानुभवे,** दुःखान्तं च **दुःखावसानं दुःखोपशमं च** निगच्छति **निश्चयेन प्राप्नोति॥ ३६॥**

यदिति। **यत्तत् सुखम्** अग्रे **पूर्वं प्रथमसन्निपाते ज्ञानवैराग्यध्यानसमाध्यारम्भे अत्यन्तायासपूर्वकत्वाद्** विषमिव **दुःखात्मकं भवति**, परिणामे **ज्ञानवैराग्यादिपरिपाकजं सुखम्** अमृतोपमं, **तत् सुखं सात्त्विकं प्रोक्तं विद्वद्भिः, आत्मनो बुद्धिरात्मबुद्धिः, आत्मबुद्धेः** प्रसादो **नैर्मल्यं [२]सलिलवत् स्वच्छता, ततो जातम्** आत्मबुद्धिप्रसादजम् , **आत्मविषया वा आत्मावलम्बना वा बुद्धिरात्मबुद्धिः, [३]तत्प्रसादप्रकर्षाद् वा जातमित्येतत्। तस्मात् सात्त्विकं तत्**

आनन्दगिरिकृतव्याख्या

**वृत्तमनूद्यानन्तरश्लोकतात्पर्यमाह—**गुणेत्यादिना। **क्रियाकारकाणां गुणतस्त्रैविध्योक्त्यनन्तरं फलस्य सुखस्य त्रैविध्योक्त्यवसरे सतीत्याह—**इदानीमिति। **हेयोपादेयभेदार्थं त्रैविध्यम्।** समाधानम् ऐकाग्र्यम्। मम **वचनादिति शेषः। [४]यत्रेत्युभयत्र सम्बध्यते। तत् त्रिविधं सुखमिति पूर्वेण सम्बन्धः॥ ३६॥**

**तत्र सात्त्विकं सुखमादेयत्वेन दर्शयति—**यत्तदिति। **प्रथमसन्निपातं विभजते—**ज्ञानेति। **कुतस्तस्य दुःखात्मकत्वम्? तत्राह—**अत्यन्तेति। **दुःखात्मकत्वे दृष्टान्तमाह—**विषमिवेति। **ज्ञानादिपरिपाकावस्था** परिणामः। **तस्मिन् सति ततो जातमिति योजना। तत्रैव हेत्वन्तरमाह—**आत्मन इति। **आत्मबुद्धिशब्दस्यार्थान्तरमाह—**आत्मविषयेति। **अन्तःकरणनैर्मल्याद्वा सम्यग्ज्ञानप्रकर्षाद्वा जातत्वा-**

भाष्यार्कप्रकाशः

**सुखमिति। सुखस्य च फलस्येति।** फलभूतस्य सुखस्येत्यर्थः। हे भरतर्षभ ! इदानीं त्रिविधं सुखं मे वाक्यादिति शेषः। **श्रृणु** अवधारय। ननु श्रृण्वित्युक्तिर्व्यर्थेत्यत आह—**समाधानं कुर्विति**। चित्तसमाधानार्थं वक्ष्यमाणार्थे श्रृणुशब्दप्रयोग इति भावः। तत्र सात्त्विकं सुखं लक्षयति सार्धश्लोकेन—**अभ्यासादिति**। पुरुष इति, चित्तमिति वा शेषः। यत्राभ्यासाद् रमते, दुःखान्तं च निगच्छति, तत् , यच्चाग्रे विषमिव भाति परिणामेऽमृतोपमं भवति, तच्चात्मबुद्धिप्रसादजं सुखं सात्त्विकं प्रोक्तम्। **आवृत्तेरिति**। पुनःपुनरित्यर्थः। एतेन सुखस्यास्याक्षणिकत्वं गम्यते। न हि विषयसुखे क्षणिके असकृद् रतिरुपपद्यते। तस्माच्चिरकालावस्थायी स्वात्मसुखानुभव एवेह विवक्षित इति ज्ञेयम्। तत एव दुःखान्तप्राप्तिसम्भवात्। विषयसुखमनुभवन् हि पुरुषः दुःखाद् दुःखमेव गच्छति, न तु दुःखान्तम्। प्रारब्धविषयसुखनाशात् सुखान्तरालाभाच्च दुःखमेव हि स प्रपद्यते॥ ३६॥

**यदिति**। यत्तदित्यत्र तच्छब्दः प्रसिद्धार्थकः। **अग्र इति**। उत्पत्तेः प्रागित्यर्थः। तदेवाह—**ज्ञानेति**। ज्ञानं श्रवणादिकम् , **वैराग्यं** विषयासक्त्यभावः, **ध्यानमुपासनं, समाधिश्चित्तैकाग्र्यम्**। तेषामारम्भदशायाम्। **दुःखात्मकं** दुःखस्वभावं दुःखस्वरूपं वा, कष्टसाध्यत्वादिति भावः। इदमेवाह—**अत्यन्तेति**। **परिणामः** फलदशा। तदैव सुखस्य जातत्वादाह—**ज्ञानवैराग्यादिपरिपाकजमिति**। कस्मादिदं जायते? अत आह—**आत्मबुद्धीति**। ज्ञानादिभिरात्मोपाधिभूतबुद्धेः प्रसादे जाते सति तत इदं जायत इत्यर्थः।

१.'फलस्य च सुखस्य', 'सुखस्य च फलस्य' इति पा.। २. 'सलिलस्येव' इति पा.। ३. ज्ञानस्य प्रसादः प्रकर्षः, विपरीतवासनाप्रतिबन्धक्षमत्वम्। तस्मादित्यर्थः। 'तत्प्रसादात् प्रकर्षाद्' इति पाठः संभाव्यते। ४. 'यत्र यस्मिन् सुखानुभवे रमते, यत्र यस्मिन् सुखानुभवे दुःखान्तं च निगच्छति ' इत्येवम् उभयत्र संबन्धः।

**विषयेन्द्रियसंयोगाद् यत्तदग्रेऽमृतोपमम्।**
**परिणामे विषमिव तत् सुखं राजसं स्मृतम्॥ ३८॥**

॥ ३७॥

विषयेति। **विषयेन्द्रियसंयोगाद् यत्तत् सुखं जायते** अग्रे **प्रथमक्षणे** अमृतोपमम् **अमृतसमं** परिणामे विषमिव **बलवीर्यरूपप्रज्ञामेधाधनोत्साहहानिहेतुत्वाद् , अधर्मतज्जनितनरकादिहेतुत्वाच्च** परिणामे **तदुपभोग**[१]**विपरिणामान्ते विषमिव, तत् सुखं राजसं स्मृतम्॥ ३८॥**

आनन्दगिरिकृतव्याख्या

**दिति तच्छब्दार्थः॥ ३७॥**

**राजसं सुखं हेयत्वाय कथयति—**विषयेति। बलं **संघातसामर्थ्यम् ,** वीर्यं **पराक्रमकृतं यशः,** रूपं **शरीरसौन्दर्यम् ,** प्रज्ञा **श्रुतार्थग्रहणसामर्थ्यम् ,** मेधा **गृहीतार्थस्याविस्मरणेन धारणाशक्तिः,** धनं **गोहिरण्यादि ,** उत्साहस्तु **कार्यं प्रत्युपक्रमादिः, एतेषां नाशकत्वाद् वैषयिकं सुखं विषसममित्यर्थः। तत्रैव हेत्वन्तरमाह—**अधर्मेति॥ ३८॥

भाष्यार्कप्रकाशः

आत्मबुद्धेरित्यस्यार्थान्तरमाह—**आत्मेति**। [२]आत्मैव विषयो गोचर आत्मविषयः, तदाकारा अखण्डज्ञानाकारेत्यर्थः। अर्थान्तरमाह—**आत्मविषयालम्बनेति**। आत्मैव विषय आत्मविषयः, स आलम्बनं यस्याः सा तथोक्ता। आत्मनिष्ठेत्यर्थः। आत्मोपाधिभूता, आत्माकारा, आत्मालम्बना वा बुद्धिरात्मबुद्धिरित्यर्थत्रयं फलितम्। **तस्मादिति**। आत्मबुद्धिप्रसादजातत्वादित्यर्थः। बुद्धिप्रसादस्य सत्त्वगुणमयत्वादिति भावः। **एतेन** ज्ञानादिसाधननिर्मलीकृतात्मबुद्धिगोचरात्मसुखं सात्त्विकमिति सिद्धम्॥ ३७॥

**विषयेति**। यद् विषयेन्द्रियसंयोगाज्जायत इति शेषः, तत् सुखमग्रेऽमृतोपमं परिणामे विषमिव भवति, तत् सुखं राजसं स्मृतम्। अग्रेऽमृतोपमं परिणामे विषायितं च विषयेन्द्रियसंयोगजं सुखं राजसमित्यर्थः। विषयानुभवसुखं राजसमिति यावत्। विषयाणामिन्द्रियैः सह संयोगः, विषयैः सहेन्द्रियाणां संयोगः, विषयाणामिन्द्रियाणां च परस्परं संयोग इति वा विषयेन्द्रियसंयोगः। श्रोत्रादिभिरिन्द्रियैः शब्दादिषु विषयेष्विष्टेषु गृह्यमाणेषु सत्सु यत् सुखं बुद्धौ जायते तदित्यर्थः। **प्रथमक्षण इति**। उत्पत्तिक्षण इत्यर्थः। **अमृतोपमम्** अमृततुल्यम्। **बलेति**। विषयसुखविशेषस्य स्त्रीसम्भोगजसुखस्य बलादिनाशहेतुत्वं प्रसिद्धमेवेति भावः। **बलं** देहशक्तिः, **वीर्य**मिन्द्रियशक्तिः, **रूपं** सौन्दर्यं, **प्रज्ञा** सदसद्विवेचनचातुर्यं ग्रहणशक्तिर्वा, **मेधा** धारणशक्तिः, **धनं** प्रसिद्धम् , **उत्साह** उद्यमः, एतेषां हानिं प्रति हेतुत्वात्। दृश्यन्ते हि स्त्रीलम्पटा बलवीर्यादिरहिताः। एवं बलवीर्यादिनाशकत्वेन विषतौल्यमुक्त्वा प्रकारान्तरेण विषतौल्यमाह— **अधर्मेति**। दुःखहेतुत्वरूपमपि विषतौल्यमस्तीत्यर्थः। परस्त्रीसम्भोगादिजन्यसुखस्य, दिवाग्रहणामावास्यादिसामयिकस्वस्त्रीसम्भोगजन्यसुखस्य चाधर्मत्वेन नरकादिहेतुत्वमस्तीति भावः। नरकं यमलोकयातना। आदिपदात् स्थावरादिजन्मप्राप्तिः। **तदुपभोगेति**। विषयोपभोगेत्यर्थः। **परिणामः** परिपाकः, तद्रूपोऽन्तो नाशः, तस्मिन् परिणामान्ते। न च— एवं स्त्रीसुखमेव राजसम् , न तु विषयसुखसामान्यमिति— वाच्यम् ; सर्वस्मिन्नपि विषयसुखे अग्रेऽमृतोपमत्वस्य परिणामे विषोपमत्वस्य विषयेन्द्रियसंयोगजन्यत्वस्य च सत्त्वात्। कथमिति चेद्? उच्यते—चक्षुषा रम्यं वस्तु पश्यन् पुरुष आदौ सुखमनुभवन् क्षणान्तर एव तद्वस्त्वलाभात् तद्वस्तुपारोक्ष्याच्च खिद्यते। एवं श्रोत्रेण गानं शृण्वन्नपि, तथा जिह्वया चूतफलादिरसमनुभवन् पुरुषोऽनुभवकाले सुखमनुभवन्नपि पश्चात् प्रकृतरसनाशाद् रसान्तरालाभाल्लाभे वा तदुपभोगशक्त्यभावात् , बलादत्यशनेऽजीर्णादिरोगसम्भवाच्च खिद्यते। एवं स्पर्शादिष्वप्यूह्यम्। तस्मात् सर्वमपि वैषयिकं सुखं राजसम्॥ ३८॥

---

१. 'परिणामान्ते' इति पा.। २. 'आत्मविषयाकारा वा आत्मविषयालम्बना वा' इति रा.पा. भाति।

**यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।**
**निद्रालस्यप्रमादोत्थं तत् तामसमुदाहृतम्॥ ३९॥**
**न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः।**
**सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभिर्गुणैः॥ ४०॥**

यदग्रे चेति। **यदग्रे च** अनुबन्धे **चावसानोत्तरकाले च सुखं** मोहनं **मोहकरमात्मनो** निद्रालस्यप्रमादोत्थं **निद्रा चालस्यं च प्रमादश्चेत्येतेभ्यः समुत्तिष्ठतीति निद्रालस्यप्रमादोत्थं, तत् तामसमुदाहृतम्॥ ३९॥**

**अथेदानीं प्रकरणोपसंहारार्थः श्लोक आरभ्यते**— नेति। न तदस्ति **तन्नास्ति पृथिव्यां वा मनुष्यादिषु** सत्त्वं **प्राणिजातम्, अन्यद्वा अप्राणिजातम्**[१]**, दिवि देवेषु वा पुनः सत्त्वं** प्रकृतिजैः **प्रकृतितो जातैः** एभिस्त्रिभिर्गुणैः **सत्त्वादिभिः** मुक्तं **परित्यक्तं यत्** स्याद् **भवेत्, न तदस्तीति पूर्वेण सम्बन्धः॥ ४०॥**

आनन्दगिरिकृतव्याख्या

**तामसं सुखं त्यागार्थमेवोदाहरति**—यदग्रे चेति। **अनुबन्धशब्दार्थमाह**—अवसानेति। [२]मोहनं **मोहकरम्। तदुत्पत्तिहेतुमाह**— निद्रेति॥ ३९॥

**क्रियाकारकफलात्मनः संसारस्य प्रत्येकं सात्त्विकादिभेदेन त्रैविध्यमुक्त्वा, संसारान्तर्भूतमेव किञ्चिद् गुणत्रयास्पृष्टमपि क्वचिद् भविष्यतीत्याशङ्क्याह**—अथेति। **संसारस्य सर्वस्यैव गुणत्रयसंस्पृष्टत्वं प्रकरणम्।** अन्यद्वा अप्राणीत्य**त्राप्राणिशब्देन** [३]**प्रसिद्ध्या स्थावरादि गृह्यते॥ ४०॥**

भाष्यार्कप्रकाशः

**यदिति**। निद्रालस्यप्रमादोत्थं यत् सुखमग्रे चानुबन्धे चात्मनो मोहनं तत् सुखं तामसमुदाहृतं शिष्टैरिति शेषः। **मोहो** वैचित्त्यम्। यत् सुखमनुभवन्नपि पुरुषोऽहमिदं सुखमनुभवामीति न प्रत्येति, पश्चाच्च नानुसन्धत्ते, तत् सुखं तामसम्। तच्च निद्रादिभिर्भवत्यात्मनः प्रमातुः, न तु चिन्मात्रस्य, तस्य मोहासम्भवात्। प्रमाता हि निद्रादिजं सुखमनुभवन्नचेतन इव भवति। न च निद्रासुखं ब्रह्मानन्द एवेति कथं तस्य तामसत्वमिति वाच्यम्; अज्ञानावृतत्वात् तस्य। न हि समाधाविव निद्रायामनुभूयमानस्या-प्यात्मानन्दस्य प्रकाशोऽस्ति। तस्मात् समाधौ प्रकाशमान आत्मानन्दः सात्त्विकं सुखम्, निद्रादावप्रकाशमान आनन्दस्तामसं सुखमिति बोध्यम्। **आलस्यं** मान्द्यम्, तूष्णीम्भाव इति यावत्। तूष्णीम्भावसमये ह्यन्तर्मुखमनोवृत्तावात्मानन्दः प्रतिफलति। तमानन्दमनुभवन्नपि सोऽलसोऽज्ञानादहमानन्दमनुभवामीति न प्रत्येति, किन्तु मूढ इव वर्तते। **प्रमादो**ऽनवधानता। चित्तेऽनवहिते सति कदाचिदात्मानन्दः प्रतिफलन्नपि न प्रकाशते। न च— अनुभवदशायां निद्रादिजन्यसुखस्य मोहनत्वमस्तु नाम, कथं पुनः परिपाकदशायामिति— वाच्यम्; निद्रोत्थितस्य पुरुषस्यापि किञ्चित्कालं मोहस्य दर्शनात्॥ ३९॥

**नेति**। पृथिव्यां वा दिवि देवेषु वा पुनर्यत् सत्त्वं प्रकृतिजैरेभिस्त्रिभिर्गुणैर्मुक्तं स्यात् तन्नास्ति। यत् सत्त्वं प्रकृतिजैः एभिस्त्रिभिर्गुणैर्मुक्तं स्यात् तत् पृथिव्यां वा दिवि देवेषु वा पुनर्नास्तीति वा। पृथिव्यां वर्तमानेषु मनुष्यादिषु प्राणिषु, दिवि वर्तमानेषु देवेषु च सत्त्वादिगुणत्रयमुक्तः कोऽपि प्राणी नास्तीत्यर्थः। चराचरात्मकं देवमनुष्यपश्वाद्यात्मकं तृणवीरुद्गुल्माद्यात्मकं च सर्वमपि प्राणिजातं ब्रह्मादिस्तम्बपर्यन्तं सत्त्वादिगुणत्रययुक्तमेवेति भावः। **वापुनः**शब्दार्थमाह—**अन्यद्वाऽप्राणिजातमिति**। अचेतनेष्वपि मणिलोहपाषाणादिषु सात्त्विकत्वादिभेददर्शनादिति भावः। **प्रकृति**र्मूलकारणं माया त्रिगुणात्मिका वैष्णवी शक्तिः॥ ४०॥

---

१. 'जात'मिति क्वचिन्न। २. अनेन भाष्ये 'मोहकरम्' इति विवरणम् एतत्पाठे नास्तीति ऊह्यते। ३. यद्यपि स्थावरस्यापि भग्नक्षतसंरोहणादिना प्राणवत्त्वमिष्यते, तथापि लोके प्राणिपदप्रयोगस्य तत्रानुपलम्भात् लोकप्रसिद्धिमनुसृत्य अप्राणिपदेन तदभिहितमिति भावः।

**ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप ।**
**कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१ ॥**

**सर्वः संसारः क्रियाकारकफललक्षणः सत्त्वरजस्तमोगुणात्मकोऽविद्यापरिकल्पितः समूलोऽनर्थ उक्तः, वृक्षरूप[क]कल्पनया च 'ऊर्ध्वमूलम्' (भ.गी.१५.१) इत्यादिना। तं च असङ्गशस्त्रेण दृढेन छित्त्वा, ततः पदं तत् परिमार्गितव्यम् (भ.गी.१५.३,४) इति चोक्तम्। तत्र च सर्वस्य त्रिगुणात्मकत्वात् संसारकारणनिवृत्त्यनुपपत्तौ प्राप्तायाम्, यथा तन्निवृत्तिः स्यात् तथा वक्तव्यम्, सर्वश्च गीताशास्त्रार्थ उपसंहर्तव्यः, एतावानेव च सर्ववेदस्मृत्यर्थः पुरुषार्थमिच्छद्भिरनुष्ठेयः इत्येवमर्थं च 'ब्राह्मणक्षत्रियविशा'मित्यादिरारभ्यते—** ब्राह्मणेति। **ब्राह्मणाश्च क्षत्रियाश्च विशश्च ब्राह्मणक्षत्रियविशः, तेषां** ब्राह्मणक्षत्रियविशां **शूद्राणां च। शूद्राणामसमासकरणम् एकजातित्वे सति**

आनन्दगिरिकृतव्याख्या

**प्रकरणार्थमुपसंहृतमनुवदति—**सर्व इति। **तस्यानेकात्मकत्वेन हेयत्वं सूचयति—**क्रियेति। **निर्गुणादात्मनो वैलक्षण्याच्च तस्य हेयतेत्याह—**सत्त्वेति। **अनर्थत्वाच्च तस्य त्याज्यत्वम्, अनर्थत्वं चाविद्याकल्पितत्वेनावस्तुनो वस्तुवद् भानादित्याह—**अविद्येति। **न केवलमष्टादशे संसारो दर्शितः, किन्तु पञ्चदशेऽपीत्याह—**वृक्षेति। **चकारादुक्तः संसार इत्यनुकृष्यते। संसारध्वस्तिसाधनं सम्यग्ज्ञानं च तत्रैवोक्तमित्याह—**असङ्गेति। **वृत्तमनूद्यानन्तरसन्दर्भतात्पर्यमाह—**तत्र चेति। **उक्तो निविवर्तयिषितः संसारः सतिसप्तम्या परामृश्यते। सर्वो हि संसारो गुणत्रयात्मकः। न च गुणानां प्रकृत्यात्मकानां संसारकारणीभूतानां निवृत्तिर्युक्ता, प्रकृतेर्नित्यत्वादित्याशङ्कायां स्वधर्मानुष्ठानात् तत्त्वज्ञानोत्पत्त्या गुणानामज्ञानात्मकानां निवृत्तिर्यथा भवति तथा स्वधर्मजातं वक्तव्यमित्युत्तरग्रन्थप्रवृत्तिरित्यर्थः। तत्तद्वर्णप्रयुक्तधर्मजातानुपदेशे चोपसंहारप्रकरणप्रकोपः स्यादित्याह—**सर्वश्चेति। **उपसंहृते गीताशास्त्रार्थे यद्यपि सर्वो वेदार्थः, स्मृत्यर्थश्च सर्वः उपसंहृतः, तथापि मुमुक्षुभिरनुष्ठेयमस्ति वक्तव्यमवशिष्टमित्याशङ्क्याह—**एतावानिति। **अनुष्ठेयपरिमाणनिर्धारणवदुक्तशङ्कानिवर्तनं शास्त्रार्थोपसंहारश्चेत्येतदुभयं चकारार्थः। सम्प्रति वर्णचतुष्टयस्यानुष्ठेयं धर्मजातमसङ्कीर्णमिति सूत्रमुपन्यस्यति—**ब्राह्मणेति। **उपनयनसंस्कारवत्त्वे सति वेदाधिकारित्वं समानमिति त्रयाणां समासकरणम्। इतरेषामसमासे हेतुमाह—**शूद्राणामिति। [1]एकजातित्वम्

भाष्यार्कप्रकाशः

**ब्राह्मणेति**। अनर्थः सर्वः संसार उक्तः। वृक्षरूपकल्पनया च 'ऊर्ध्वमूल'मित्यादिना संसार उक्तः। पञ्चदशाध्याय इति शेषः। **तत्र चेति**। एवं सतीत्यर्थः। **सर्वस्येति**। सर्वस्य जगतस्त्रिगुणात्मकत्वात् संसारस्यापि त्रिगुणात्मकत्वात् संसारकारणस्य गुणत्रयस्य तदात्मकाज्ञानस्य वा निवृत्तिः कथं स्यात्? न कथमपीत्यर्थः। न च ज्ञानादिना स्यादिति वाच्यम्; तस्यापि त्रिगुणात्मकत्वात्। न हि त्रिगुणात्मकं ज्ञानादिकं त्रिगुणात्मकं संसारं निवर्तयेदिति भावः। **तन्निवृत्तिः** तदनुपपत्तिनिवृत्तिः। **तद्वक्तव्यं** तथा वक्तव्यमित्यर्थः। यथा येन कारणेन तन्निवृत्तिः संसारनिवृत्तिः स्यात् तत्कारणं वक्तव्यमिति वा। तद्वक्तव्यमित्येवमर्थम्, सर्वश्च गीताशास्त्रार्थ उपसंहर्तव्य इत्येवमर्थम्, पुरुषार्थमिच्छद्भिरनुष्ठेय एतावानेव सर्ववेदस्मृत्यर्थ इत्येवमर्थं च 'ब्राह्मणक्षत्रियविशा'मित्यादिर्ग्रन्थ आरभ्यते भगवतेति शेषः। हे परन्तप ! ब्राह्मणक्षत्रियविशां शूद्राणां च कर्माणि स्वभावप्रभवैर्गुणैः प्रविभक्तानि। **विशो** वैश्याः। ननु ब्राह्मणक्षत्रियविट्छूद्राणामिति समासः कुतो न कृतः, चत्वारो हि मनुष्यजातीयाः? अत आह—**शूद्राणामिति**। ब्राह्मणक्षत्रियविशो हि द्विजत्वाद् वेदाधिकारिणः, शूद्रास्तु न तथेत्यतः शूद्राणां समासात् पृथक्करणमित्यर्थः। **एकजातित्वे सती**ति वेदाधिकाराभावे हेतुः। 'जन्मना जायते शूद्रः कर्मणा जायते द्विजः' इति स्मरणाच्छूद्रस्यैकजातित्वम्। एकं जन्मैव जातिर्येषां त एकजातयः। द्वे जन्मकर्मणी जाती येषां ते द्विजातयः। तथा चैकजातेः शूद्रस्योपनयनादिसंस्कारकृतकर्मरूपजन्माभावान्न वेदाधिकारः। उपनयनादिना संस्कृतो हि

१. जातिः जन्म। उपनयनं पूर्वेषां त्रयाणां द्वितीयजन्म। तदस्य न विहितमिति एकैव जातिर्यस्य स एकजातिः। तद्भाव एकजातित्वम्। फलितमाह— उपनयनवर्जितत्वमिति।

[1]**वेदानधिकारात्। हे परन्तप ! कर्माणि** प्रविभक्तानि **इतरेतरविभागेन व्यवस्थापितानि। केन?** स्वभावप्रभवैर्गुणैः। स्वभावः **ईश्वरस्य प्रकृतिस्त्रिगुणात्मिका माया, सा प्रभवो येषां गुणानां ते स्वभावप्रभवाः, तैः शमादीनि कर्माणि प्रविभक्तानि ब्राह्मणादीनाम्। अथवा ब्राह्मणस्वभावस्य सत्त्वगुणः** प्रभवः **कारणम् , तथा क्षत्रियस्वभावस्य सत्त्वोपसर्जनं रजः प्रभवः, वैश्यस्वभावस्य तमउपसर्जनं रजः प्रभवः, शूद्रस्वभावस्य रजउपसर्जनं तमः प्रभवः, प्रशान्त्यैश्वर्येहामूढतास्वभावदर्शनाच्चतुर्णाम्। अथवा जन्मान्तरकृतसंस्कारः प्राणिनां वर्तमानजन्मनि स्वकार्याभिमुखत्वेनाभिव्यक्तः स्वभावः। स प्रभवो येषां गुणानां ते स्वभावप्रभवा गुणाः। गुणप्रादुर्भावस्य निष्कारणत्वानुपपत्तेः स्वभावः कारणमिति कारणविशेषोपादानम्। एवं** स्वभावप्रभवैः **प्रकृतिप्रभवैः सत्त्वरजस्तमोभिर्गुणैः स्वकार्यानुरूपेण**

### आनन्दगिरिकृतव्याख्या

**उपनयनवर्जितत्वम्। कर्मणामसङ्कीर्णत्वेन व्यवस्थापकं प्रश्नपूर्वकं प्रकटयति**—केनेत्यादिना। **स्वभावप्रभवैर्गुणैरित्यस्यार्थान्तरमाह**—अथवेति। **उक्तव्यवस्थायां कार्यदर्शनं प्रमाणयति**—प्रशान्तीति। **स्वभावशब्दस्यार्थान्तरमाह**—अथवेति। **किमिति गुणाभिव्यक्तेरुक्तवासनाधीनत्वम्? तत्राह**—गुणेति। **ननु नास्ति गुणप्रादुर्भावस्य निष्कारणत्वम् , प्रकृतिजैर्गुणैरिति प्रकृतेर्गुणकारणत्वाभिधानाद् , अत आह**—स्वभाव इति। **वासना कारणमिति गुणव्यक्तेर्निमित्तकारणत्वं विवक्षितम् , प्रकृतिस्तूपादानमिति भावः। उक्तमुपसंहरति**—एवमिति।

### भाष्यार्कप्रकाशः

वेदेऽधिकरोति। अत एव स्त्रीणामपि न वेदाधिकारः, उपनयनादिसंस्काराभावात्। अत एव स्मर्यते – 'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा' इति। **द्विजबन्धवः** तन्तुमात्रधरा रथकारादयः। **इतरेतरविभागेनेति**। परस्परासाङ्कर्येणेत्यर्थः। शमादीनीत्यादिपदाच्छौर्यकृषिसेवाग्रहणम्। यद्वा 'शमो दमः' इत्यादिश्लोकत्रयोक्तानां दमादीनां ग्रहणम्। 'ब्राह्मणादीना'मित्यादिपदात् क्षत्रियविट्छूद्रग्रहणम्। सत्त्वादिगुणवशाद् ब्राह्मणादीनां शमादिकर्माणि पृथगवस्थितानीत्यर्थः। ननु गुणानां प्रकृतिप्रभवत्वकथनं व्यर्थं, प्रसिद्धत्वाद्, अत आह—**अथवेति**। स्वभावानां प्रभवाः कारणानि स्वभावप्रभवाः। ब्राह्मणादीनां चतुर्णां ये परस्परविलक्षणाश्चत्वारः स्वभावाः। तद्धेतुभूता इत्यर्थः। ननु त्रयाणां गुणानां कथं स्वभावचतुष्टयहेतुत्वम्? अत आह—**ब्राह्मणेत्यादि**। सत्त्वगुणाद् ब्राह्मणस्वभावो जायते, सत्त्वोपसर्जनाद् रजोगुणात् क्षत्रियस्वभावः, तमोगुणोपसर्जनाद् रजोगुणाद् वैश्यस्वभावः, रजोगुणोपसर्जनात् तमोगुणाच्छूद्रस्वभाव इत्यर्थः। सत्त्वमुपसर्जनमप्रधानं यस्य तत् सत्त्वोपसर्जनम्। स्वो भावः स्वभावः। स्वासाधारणो धर्मः। स्वभावानेव दर्शयति—**प्रशान्तीति**। प्रशान्तिस्वभावो ब्राह्मणस्य। ऐश्वर्यस्वभावः क्षत्रियस्य। ईहास्वभावो वैश्यस्य। मूढस्वभावः शूद्रस्य इति विवेकः। **ईहा** धनार्जनप्रवृत्तिः। ननु ब्राह्मणादीनां गुणैः कर्माणि व्यवस्थापितानीत्यनेनैव तत्तत्स्वभावहेतुत्वस्य गुणानां सिद्धत्वाद् व्यर्थमेव स्वभावप्रभवत्वविशेषणमित्यतः पक्षान्तरमाह—**अथवेति**। प्रारब्धं कर्मेह स्वभावशब्दार्थः। ब्राह्मणादीनां स्वस्वप्रारब्धकर्मवशात् सत्त्वादयो गुणाः प्रादुर्भवन्ति, तैश्च गुणैस्तत्तच्छमादिकर्माणि प्रविभक्तानीत्यर्थः। प्राणिनां जन्मान्तरकृतसंस्कारो वर्तमानजन्मनि स्वकार्याभिमुखत्वेनाभिव्यक्तःसन् स्वभाव इत्युच्यते। सञ्चितकर्मव्यावृत्त्यर्थं सन्नन्तम्। क्रियमाणस्य कर्मणः समाप्त्यनन्तरमेव नाशात् संस्कार इत्युक्तम्। जन्मान्तरीययज्ञादिकर्मजन्यधर्मादिसंस्कार इत्यर्थः। ननु गुणानां स्वभावप्रभवत्वं कुतो ज्ञायते? अत आह—**गुणेति**। **प्रादुर्भाव** उत्पत्तिः। न हि कारणं विना गुणप्रादुर्भावो भवतीत्यर्थः। ब्राह्मणानां सत्त्वगुणप्रादुर्भावे, क्षत्रियादीनां रजआदिप्रादुर्भावे च नियामकः स्वभावविशेष एव। कथमन्यथा शूद्राणामपि सत्त्वगुणो नोदीयादिति भावः। ननु गुणैः कर्माणि प्रविभक्तानीत्येवालम् , किमिति स्वभावप्रभवत्वनिर्देशेनेत्यत आह—**स्वभावः कारणमिति**। ब्राह्मणादीनां गुणैः शमादिकर्मप्रविभागे को हेतुरिति कारणशङ्कायाः समाधानार्थं स्वभावप्रभवैरित्युक्तमिति भावः। यद्वा तादृशा गुणाः कुतः प्रादुर्भूता इत्यत उक्तम्—**स्वभावप्रभवैरिति।**

१. 'वेदेऽनधिकारात्' इति पा.।

**शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।**
**ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्॥४२॥**

**शमादीनि कर्माणि प्रविभक्तानि।**

**ननु शास्त्रप्रविभक्तानि शास्त्रेण विहितानि ब्राह्मणादीनां शमादीनि कर्माणि। कथमुच्यते सत्त्वादिगुणप्रविभक्तानीति? नैष दोषः; शास्त्रेणापि ब्राह्मणादीनां सत्त्वादिगुणविशेषापेक्षयैव शमादीनि कर्माणि प्रविभक्तानि, न गुणानपेक्षयैवेति शास्त्रप्रविभक्तान्यपि कर्माणि गुणप्रविभक्तानीत्युच्यते[१]॥४१॥**

**कानि पुनस्तानि कर्माणीत्युच्यते[१]**— शम इति। शमो दमश्च **यथाव्याख्यातार्थौ।** तपो **यथोक्तं शारीरादि।** शौचं **व्याख्यातम्।** क्षान्तिः **क्षमा**, आर्जवम् **ऋजुता एव च**, **ज्ञानं, विज्ञानम्**, आस्तिक्यम् **आस्तिकभावः**, **श्रद्दधानता आगमार्थेषु** , [२]ब्रह्मकर्म **ब्राह्मणजातेः कर्म स्वभावजम्। यदुक्तम् – स्वभावप्रभवैर्गुणैः प्रविभक्तानि (भ.गी.१८.४१) इति, तदेवोक्तं स्वभावजमिति॥४२॥**

आनन्दगिरिकृतव्याख्या

**स्वभावप्रभवैः सत्त्वादिगुणैर्ब्राह्मणादीनां कर्माणि प्रविभक्तानीत्युक्तमाक्षिपति**—नन्विति। **शास्त्रस्य धर्मविभागहेतोः सत्त्वादिविशेषापेक्षयैव विभागज्ञापकत्वादुभयत्र विभागहेतुत्वोक्तिरविरुद्धेति परिहरति**—नैष दोष इति॥४१॥

**प्रविभक्तानि कर्माण्येव प्रश्नद्वारा विविच्य दर्शयति**—कानीत्यादिना। **अन्तःकरणोपशमः[रमः] शमः, दमो बाह्यकरणोपरतिरित्युक्तं[३] स्मारयति**—यथेति। **त्रिविधं तपः सप्तदशे दर्शितमित्याह**—तप इति। **शौचमपि बाह्यान्तरभेदेन [४]प्रागेवोक्तमित्याह**— शौचमिति। क्षमा **नामाक्रुष्टस्य ताडितस्य वा मनसि विकारराहित्यम्**, ज्ञानं **शास्त्रीयपदार्थज्ञानम्**, विज्ञानं **शास्त्रार्थस्य [५]स्वानुभवायत्तत्वापादनम्। त्रिधा व्याख्यातं स्वभावशब्दार्थमुपेत्याह**—यदुक्तमिति॥४२॥

भाष्यार्कप्रकाशः

**स्वकारणानुरूप्येणेति**। स्वकारणभूतस्वव्यापारानुसारेणेत्यर्थः।

ननु ब्राह्मणानां शमादीनि कर्माणीत्येवं शास्त्रमेव तत्तद्वर्णानां तानि तानि कर्माणि व्यवस्थापयतीति कृत्वा शास्त्रेणैव प्रविभक्तानीति वक्तव्ये कथमुक्तं गुणैः प्रविभक्तानीति पृच्छति—**नन्विति**। परिहरति—**नेति**। सत्त्वादिगुणप्रविभक्तान्येव कर्माणि शास्त्रं व्यवस्थापयतीति न दोष इत्यर्थः। सत्त्वगुणवशाद् ब्राह्मणस्य शमादीनि कर्माणि भवन्तीत्येवं शास्त्रं बोधयति सत्त्वादिगुणानपेक्ष्यैव, न तु ताननपेक्ष्येति भावः।

गुणैः सह कर्माणि शास्त्रैः प्रविभक्तानीति **रामानुजः**, **तन्मन्दम्** ; शास्त्रैरिति मूलाद्बहिः कल्पनस्यायुक्तत्वात्। कर्मप्रविभाजकमुख्यकर्तृभूतगुणानाम्[६] अप्रधाने तृतीयाकल्पनस्य चायुक्तत्वात्॥४१॥

**शम इति**। शम इत्यादिकमास्तिक्यान्तं ब्राह्मं स्वभावजं कर्म भवति। ब्राह्मणस्य शमादीनि स्वाभाविकानि कर्माणीत्यर्थः। सत्त्वगुणप्रयुक्तत्वाच्छमादीनामिति भावः। **शमो**ऽन्तरिन्द्रियनिग्रहः, **दमो** बहिरिन्द्रियनिग्रहः, **तपः** ब्रह्मचर्यस्वाध्यायाभ्यसनमनःप्रसादादिकम् , **शौचं** मृज्जलाभ्यां प्रक्षालनं बाह्यशौचम् , रागादिदोषापनयनमान्तरशौचम् , **ज्ञान**मात्मादिपदार्थज्ञानम् , **विज्ञानं** तस्यानुभवापादनम्। अस्ति दिष्टमिति मतिर्यस्य स आस्तिकः, तस्य भाव **आस्तिक्यम्। श्रद्दधानता** श्रद्धालुता। **आगमार्थे** शास्त्रोक्तार्थे, शास्त्रं हि प्रमाणमास्तिकानाम्। 'ब्रह्मा विप्रः प्रजापति'रिति कोशाद् **ब्रह्मा** ब्राह्मणः तस्येदं ब्राह्मम्॥४२॥

---

१. 'इत्युच्यन्ते' इति पा.। २. 'ब्राह्मं कर्म' इति पा.। ३. (द्र.भ.गी.१०.४)। ४. (द्र.भ.गी.१६.३)। ५. 'स्वानुभवपर्यन्तत्वापादनम्' इति पा.। ६. गुणैः कर्माणि प्रविभक्तानि इत्यत्र गुणैरिति कर्तरि तृतीया। गुणैः सह शास्त्रैः इत्यर्थवर्णने तु 'सहयुक्तेऽप्रधाने' इति सहयोगे तृतीयेति भावः।

**शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।**
**दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥ ४३॥**
**कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्।**
**परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्॥ ४४॥**

शौर्यमिति। शौर्यं **शूरस्य भावः**, तेजः **प्रागल्भ्यम्**, धृतिः **धारणम्, सर्वावस्थास्वनवसादो भवति यया धृत्या उत्तम्भितस्य**। दाक्ष्यं **दक्षस्य भावः, सहसा प्रत्युत्पन्नेषु कार्येष्वव्यामोहेन प्रवृत्तिः**। **युद्धे चापि** अपलायनम् **अपराङ्मुखीभावः शत्रुभ्यः**। दानं **देयद्रव्येषु मुक्तहस्तता**। ईश्वरभावश्च **ईश्वरस्य भावः प्रभुशक्तिप्रकटीकरणम् ईशितव्यान् प्रति,** क्षात्रं कर्म **क्षत्रियजातेर्विहितं कर्म** [१]**क्षत्रकर्म स्वभावजम्॥ ४३॥**

कृषीति। कृषिगौरक्ष्यवाणिज्यं **कृषिश्च गौरक्ष्यं च वाणिज्यं च कृषिगौरक्ष्यवाणिज्यम्**। कृषिः **भूमेर्विलेखनम्**। गौरक्ष्यं **गाः रक्षतीति गोरक्षः, तद्भावो गौरक्ष्यं, पाशुपाल्यम् इत्यर्थः**। वाणिज्यं **वणिक्कर्म क्रयविक्रयादिलक्षणम्**। वैश्यकर्म **वैश्यजातेः कर्म वैश्यकर्म स्वभावजम्**। परिचर्यात्मकं **शुश्रूषास्वभावं कर्म शूद्रस्यापि स्वभावजम्॥ ४४॥**

**एतेषां जातिविहितानां कर्मणां सम्यगनुष्ठितानां स्वर्गप्राप्तिः फलं स्वभावतः, 'वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलधर्मायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते' (गौ.ध.सू.**

आनन्दगिरिकृतव्याख्या

शूरस्य भावो **विक्रमो बलवत्तरानपि प्रहर्तुं प्रवृत्तिः**। प्रागल्भ्यं **परैरधर्षणीयत्वम्। महत्यामपि विपदि देहेन्द्रियोत्तम्भनी चित्तवृत्तिर्धृतिरिति व्याचष्टे**—सर्वावस्थास्विति। **दक्षस्य भावमेव विभजते**—सहसेति। **स्वभावस्तु पूर्ववत्॥ ४३॥**

[२]**(वैश्यशूद्रयोः कर्मविवक्षयाऽनुवदति**—कृषीति। **स्पष्टार्थः)॥ ४४॥**

**शमादिपरिचर्यान्तकर्मणाम् विभज्योक्तानामभ्युदयं फलमादावुपन्यस्यति**—एतेषामिति। स्वभावतो **विहितत्वादेव मोक्षापेक्षामन्तरेणानुष्ठानादित्यर्थः। तत्र प्रमाणमाह**—वर्णा इति। शेष**शब्देन भुक्तकर्मणोऽतिरिक्तं** [३]**कर्मानुशयशब्दितमुच्यते। प्रत्येकं देशादिभिर्विशिष्टशब्दः सम्बध्यते। आदिशब्देन 'तद्यथाऽऽम्रे फलार्थे निमिते छायागन्धाद्यनूत्पद्यते एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते न धर्महानि-**

भाष्यार्कप्रकाशः

**शौर्यमिति**। शौर्यं पराभिभवनसामर्थ्यम्, तेजः परैरप्रधर्ष्यत्वम्। का सा धृतिः? अत आह—**सर्वेति**। **उत्तम्भितस्य** उच्चैः स्तम्भितस्य। **अपराङ्मुखीभावः** पृष्ठाप्रदर्शनमित्यर्थः। **दानं** द्रव्यत्यागः। **प्रभुशक्तिर्नियमनशक्तिः**। नन्वीश्वरधर्मोऽयम्, न जीवधर्मः, अत आह—**ईशितव्यान् प्रतीति**। स्वपरिपाल्यप्रजाः प्रतीत्यर्थः। **यद्वा** स्वपूज्ये देवब्राह्मण ईशनं कथं क्षत्रियस्येत्यत आह—**ईशितव्यान् प्रतीति**॥ ४३॥

**कृषीति**। कृषिगौरक्ष्यवाणिज्यमिति समाहारद्वन्द्वः। **विलेखनं** हलादिना भेदनम्। **परिचर्येति**। पूर्वोक्तब्राह्मणादिवर्णत्रयशुश्रूषैव शूद्रस्य स्वाभाविकं कर्म॥ ४४॥

**स्वे स्व इति**। उक्तवक्ष्यमाणयोः सङ्गतिप्रदर्शनायाह—**एतेषामिति**। अनुष्ठातुः कर्तुः पुरुषस्य। **वर्णा** ब्राह्मणादयः, **आश्रमा** ब्रह्मचर्यादयः। **प्रेत्य** प्रकृतशरीरं विहाय। **कर्मफलं** स्वर्गम्। **शेषेण** सुकृतशेषेण। **विशिष्टा** उत्कृष्टाः, **देशः** काश्यादिः, **जातिर्ब्राह्मणादिः**, **वित्तं** धनं, **मेधा** बुद्धिः, विशिष्टा देशादयो यस्य। तस्माद् विशिष्टदेशजातिकुलधर्मायुःश्रुतवृत्तवित्तसुखमेधसः पुरुषात् सकाशाद् **जन्म**

१. 'क्षात्रं कर्म' इति पा.। २. अयं पाठः क्वचिन्न। ३. द्र.ब्र.सू.३.१.८।

**स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।**
**स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु॥४५॥**
**यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।**

**११.२९) इत्यादिस्मृतिभ्यः, पुराणे च वर्णिनामाश्रमिणां च लोकफलभेदविशेषस्मरणात्। कारणान्तरात्तु इदं वक्ष्यमाणं फलम्—** स्वे स्व इति। स्वे स्वे **यथोक्तलक्षणभेदे कर्मणि** अभिरतः **तत्परः** संसिद्धिं **स्वकर्मानुष्ठानादशुद्धिक्षये सति कायेन्द्रियाणां ज्ञाननिष्ठायोग्यतालक्षणां संसिद्धिं** लभते **प्राप्नोति** नरः **अधिकृतः पुरुषः। [१]किं स्वकर्मानुष्ठानत एव साक्षात् संसिद्धिः? न ; कथं तर्हि? स्वकर्मनिरतः सिद्धिं** यथा **येन प्रकारेण विन्दति, तच्छृणु॥४५॥**

यत इति। यतो **यस्मात्** प्रवृत्तिः **उत्पत्तिः चेष्टा वा यस्मादन्तर्यामिण ईश्वराद्** भूतानां **प्राणिनां स्याद्,** येन

आनन्दगिरिकृतव्याख्या

**भवति' इति स्मृतिर्गृह्यते। इतश्चोक्तानां कर्मणां स्वर्गफलत्वं युक्तमित्याह—**पुराणे चेति। **उक्तं हि 'यस्तु सम्यक् करोत्येवं गृहस्थः परमं विधिम्। तद्वर्णबन्धमुक्तोऽसौ लोकानाप्नोत्यनुत्तमान्' इति, 'यस्त्वेतां नियतश्चर्यां वानप्रस्थश्चरेन्मुनिः। स दहत्यग्निवद् दोषाञ्जयेल्लोकांश्च शाश्वतान्' इति, 'मोक्षाश्रमो यश्चरते यथोक्तं शुचिः सुसङ्कल्पितबुद्धियुक्तः। अनिन्धनज्योतिरिव प्रशान्तं स ब्रह्मलोकं श्रयते द्विजातिः' इति च। 'सर्वे एते पुण्यलोका भवन्ति' इति श्रुतिश्चकारार्थः। यदि पुनर्मोक्षापेक्षयोक्तानि कर्माण्यनुष्ठीयेरन् , तदा मोक्षफलत्वं तेषां सेत्स्यतीत्याह—**कारणान्तरादिति। **तदेव कारणान्तरं यन्मोक्षापेक्षया तेषामनुष्ठानम्। मोक्षोपायेषु शमादिषु सात्त्विकेषु ब्राह्मणधर्मेषु क्षत्रियादीनामनधिकाराद् ब्राह्मणानामेव मोक्षः, न क्षत्रियादीनामित्याशङ्क्याह—**स्वे स्व इति। **यथास्वे कर्मण्यभिरतस्य बुद्धिशुद्धिद्वारा ज्ञाननिष्ठायोग्यतया प्राप्तज्ञानस्य मोक्षोपपत्तेर्ब्राह्मणातिरिक्तस्यापि ज्ञानवतो मुक्तिरिति मत्वा पूर्वार्धं व्याचष्टे—**स्वे स्व इत्यादिना। **संसिद्धिशब्दस्य मोक्षार्थत्वं गृहीत्वा स्वधर्मनिष्ठत्वमात्रेण तल्लाभे तादर्थ्येन संन्यासादिविधानानर्थक्यमिति मन्वानः शङ्कते—**किमिति। **न तावन्मात्रेण साक्षान्मोक्षो ज्ञाननिष्ठायोग्यता वेति परिहरति—**नेति। **तर्हि कथं स्वधर्मनिष्ठस्य संसिद्धिः? इति पृच्छति—**कथं तर्हीति। **उत्तरार्धेनोत्तरमाह—**स्वकर्मेति। तच्छृणु **तं प्रकारमेकाग्रचेताः भूत्वा श्रुत्वाऽवधारयेत्यर्थः॥४५॥**

**तमेव प्रकारं स्फुटयति—**यत इति। यतः**शब्दार्थं यस्मादित्युक्तं व्यक्तीकरोति—**यस्मादिति। **प्राणिनामुत्पत्तिर्यस्मादीश्वरात् ,**

भाष्यार्कप्रकाशः

**प्रतिपद्यन्ते** जायन्ते। **लोकफलभेदविशेषस्मरणात्** लोकभेदः स्वर्गादिः, फलभेदो देवत्वादिः, तद्विशेषाणां स्मरणात्। एवं यथोक्तकर्मानुष्ठानात् स्वाभाविकं फलमनुष्ठातुः प्रदर्श्य प्रकृतमाह—**कारणान्तरात्त्विति**। तेषामेव कर्मणामीश्वराराधनबुद्ध्या करणं कारणान्तरमिति बोध्यम्। संसिद्धिशब्दो न मोक्षपरः। 'नास्त्यकृतः कृतेन' इत्यादिश्रुतिभिः कर्मणः साक्षान्मोक्षहेतुत्वस्य दूषितत्वात्। अतोऽर्थान्तरमाह—**ज्ञाननिष्ठायोग्यतालक्षणामिति**। ज्ञाननिष्ठायोग्यत्वमेव संसिद्धिरित्यर्थः। ननु किं सर्वोऽपि पुरुषः शमाद्यनुष्ठानात् संसिद्धिं लभते? नेत्याह—**अधिकृतपुरुष इति**। यो यो यत्र यत्राधिकृतः स स तत्कर्म कृत्वा संसिद्धिं लभत इत्यर्थः। यद्वा किं संन्यासिनामपि कर्मानुष्ठानात् संसिद्धिः? नेत्याह—**अधिकृतपुरुष इति**। संन्यासिनां हि ज्ञाननिष्ठायामेवाधिकारान्न तेषां कर्मप्रसङ्ग इति भावः॥४५॥

**यत इति**। श्लोकमवतारयति। **किमिति**। ननु ज्ञाननिष्ठायोग्यत्वलक्षणसंसिद्धिरपि स्वकर्मानुष्ठानमात्रादेव भवति किमिति पृच्छति— **किं स्वकर्मेति**। लभत इति, पुरुष इति च शेषः। परिहरति—**नेति**। न लभत इत्यर्थः। तर्हि कथं लभत इति पृच्छति—**कथं तर्हीति**। स्वस्वविहितकर्मानुष्ठानमात्रादेव न संसिद्धिलाभः पुरुषस्य, किन्त्वीश्वराराधनबुद्ध्या स्वस्वविहितकर्मानुष्ठानात् संसिद्धिलाभ

१. 'किं स्वकर्मानुष्ठानादेव साक्षात् संसिद्धिम्?' इति पा.। अयमेव पाठो भाष्यार्कप्रकाशे आदृतो भाति। भाष्यं चेदमुत्तरश्लोकावतारणे योजितम्।

**स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥४६॥**
**श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।**
**स्वभावनियतं कर्म कुर्वन् नाप्नोति किल्बिषम्॥४७॥**

**ईश्वरेण** सर्वमिदं **जगत्** ततं **व्याप्तम्**, स्वकर्मणा **पूर्वोक्तेन प्रतिवर्णं** तम् **ईश्वरम्** अभ्यर्च्य **पूजयित्वा, आराध्य केवलं ज्ञाननिष्ठायोग्यतालक्षणां** सिद्धिं **विन्दति** मानवो **मनुष्यः॥४६॥**

**यत एवम्, अतः—** श्रेयानिति। श्रेयान् **प्रशस्यतरः स्वो धर्मो** स्वधर्मो **विगुणोऽपीति अपिशब्दो द्रष्टव्यः। परधर्मात् स्वनुष्ठितात्।** स्वभावनियतं **स्वभावेन नियतम्। यदुक्तं स्वभावजमिति, तदेवोक्तं स्वभावनियतमिति। यथा**

आनन्दगिरिकृतव्याख्या

**तेषां चेष्टा च यस्मादन्तर्यामिणः, येन च सर्वं व्याप्तं मृदेव घटादि, कार्यस्य कारणातिरिक्तस्वरूपाभावात्, तं स्वकर्मणाऽभ्यर्च्य मानवः संसिद्धिं विन्दतीति सम्बन्धः। न हि ब्राह्मणादीनां यथोक्तधर्मनिष्ठया साक्षान्मोक्षो लभ्यते, तस्य ज्ञानैकलभ्यत्वात्, किन्तु तन्निष्ठानां शुद्ध-बुद्धीनां कर्मसु फलमपश्यतामीश्वरप्रसादासादितविवेकवैराग्यवतां संन्यासिनां ज्ञाननिष्ठायोग्यतावतां ज्ञानप्राप्त्या मुक्तिरित्यभिप्रेत्याह—** केवलमिति॥४६॥

**स्वधर्मानुष्ठानस्य बुद्धिशुद्ध्यादिद्वारा मोक्षावसायित्वात् तदनुष्ठानमावश्यकमित्याह—**यत इति। **ननु युद्धादिलक्षणं स्वधर्मं कुर्वन्नपि हिंसाधीनं पापं प्राप्नोति, तत् कथं स्वधर्मः श्रेयानिति? तत्राह—**स्वभावेति। **स्वकीयं वर्णाश्रमं निमित्तीकृत्य विहितं स्वभावज-मित्यधस्तादुक्तमित्याह—**यदुक्तमिति। [१]**विग्रहात्मकमपि विहितं कर्म कुर्वन् पापं नाप्नोतीत्यत्र दृष्टान्तमाह—**यथेति॥४७॥

भाष्यार्कप्रकाशः

इत्याह—**यत इति**। 'यतो वा इमानि भूतानि जायन्ते' इति श्रुत्याऽऽह—**प्रवृत्तिरुत्पत्तिरिति**। भवन्तीति भूतानि कार्याणि पृथिव्यादीनि, भौतिकानि च चेतनाचेतनानि सर्वाण्यपीत्यर्थः। प्रवृत्तिशब्दस्योत्पत्त्यर्थवर्णनं नातीव युक्तमित्यर्थान्तरमाह—**चेष्टेति**। अस्मिन् पक्षे भूतशब्दो ब्रह्मादिस्तम्बपर्यन्तप्राणिपरः इत्याह—**प्राणिनामिति। अन्तः** भूतानां हृदि स्थित्वा प्रत्यग्रूपेण यमयतीत्यन्तर्यामी। 'सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च' इत्युक्तत्वात्। 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रा-रूढानि मायया॥' इति वक्ष्यमाणत्वाच्च। 'यो विज्ञाने तिष्ठन्नि'त्याद्यन्तर्यामिब्राह्मणाच्च। ईश्वरप्रेरणवशादेव भूतानि तथा तथा प्रवर्तन्त इत्यर्थः। **व्याप्तमिति**। अन्तः पुरुषरूपेण बहिः परमात्मरूपेण चेश्वरेण व्याप्तं समस्तं जगदित्यर्थः। 'अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः' इति श्रुतेः। यद्वा चैतन्यरूपेण येन व्याप्तमित्यर्थः। सर्वव्यापित्वाच्चैतन्यस्य सद्रूपस्य। एतद्व्याप्तिशब्दादेव हि सर्वस्य अस्तिभातिव्यवहारः। **प्रतिवर्णं** वर्णो वर्णः ब्राह्मणादिचातुर्वर्ण्यमित्यर्थः। यद्वा वर्णेवर्णे प्रतिवर्णमिति पूर्वोक्तेनेत्यनेन सम्बन्धोऽस्य। प्रतिवर्णं विहितेनेत्यर्थः। शमदमादिलक्षणेन स्वस्ववर्णविहितकर्मणेति यावत्। **ईश्वरमभ्यर्च्येति**। ईश्वराज्ञां ब्राह्मणादिभिरिमानीमानि कर्माणि कर्तव्यानीत्येवंरूपां श्रुतिस्मृत्यात्मिकामनतिक्रम्य तदुक्तविधया फलाभिसन्धिं विहाय कर्तव्यानीत्येवं केवलं मत्वा स्वस्व-कर्मानुष्ठानमेवेश्वरार्चनमिति बोध्यम्। लोकेऽपि राजाज्ञापरिपालनमेव राजार्चनमिति दृष्टत्वात्। अथवा स्वानुष्ठितकर्मफलस्य— ॐ तत्सद्ब्रह्मार्पणमस्तु – इति परमेश्वराय समर्पणमेव स्वकर्मणा परमेश्वराराधनमिति बोध्यम्। **मानवो** मनुष्यः कर्माधिकारित्वात् तस्येति भावः॥४६॥

**श्रेयानिति**। विगुणोऽपि स्वधर्मः स्वनुष्ठितात् परधर्माच्छ्रेयान्। स्वभावनियतं कर्म कुर्वन् पुरुषः किल्बिषं नाप्नोति। सगुणस्यापि परधर्मस्यानुष्ठानापेक्षया विगुणस्यापि स्वधर्मस्यानुष्ठानं श्रेयः। यतः स्वधर्मानुष्ठानात् पुरुषस्य न किल्बिषप्राप्तिः,

---

१. युद्धात्मकमित्यर्थः।

## सहजं कर्म कौन्तेय ! सदोषमपि न त्यजेत्।
## सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः॥४८॥

**विषजातस्य कृमेः विषं न दोषकरम्, तथा स्वभावनियतं कर्म कुर्वन् नाप्नोति** किल्बिषं **पापम्॥४७॥**

**स्वभावनियतं कर्म कुर्वाणो विषज इव कृमिः किल्बिषं नाप्नोतीत्युक्तम्; परधर्मश्च भयावह इति; अनात्मज्ञश्च न हि कश्चित् क्षणमप्यकर्मकृत् तिष्ठतीति; अतः—** सहजमिति। सहजं **सह जन्मनैवोत्पन्नं सहजम्। किं तत्? कर्म, कौन्तेय ! सदोषमपि [१]त्रिगुणात्मकत्वात्, [२]न त्यजेत्।** सर्वारम्भाः **आरभ्यन्त इत्यारम्भाः, सर्वकर्माणीत्येतत्,**

आनन्दगिरिकृतव्याख्या

**इतश्च विहितं कर्म दोषवदपि कर्तव्यं, प्रकारान्तरासम्भवादित्युक्तानुवादपूर्वकं कथयति—**स्वभावेत्यादिना। **न हि कृमिर्विषजो विषनिमित्तं मरणं प्रतिपद्यते। तथा अयमधिकृतः पुरुषो दोषवदपि विहितं कर्म कुर्वन् पापं नाप्नोतीत्युक्तमित्यर्थः। तर्हि दोषरहितमेव भिक्षाटनादि सर्वैरनुष्ठीयताम्, अतो न पापप्राप्त्याशङ्केत्याशङ्क्याह—**परेति। **उक्तमित्यनुवर्तते। तर्हि पापप्राप्तिशङ्कां परिहर्तुमकर्मनिष्ठत्वमेव सर्वेषां स्यादित्याशङ्क्य, ज्ञानाभावान्नैवमित्याह—**अनात्मज्ञ इति। [३]**पूर्ववदत्रापि सम्बन्धः। प्रकारान्तरासम्भवकृतं फलमाह—**अत इति। **सह जायत इति सहजम्, स्वभावनियतं नित्यं कर्म। तद् विहितत्वान्निर्दोषमपि हिंसात्मकतया सदोषमित्यत्र हेतुमाह—**त्रिगुणेति। **सत्त्वादिगुणत्रयारब्धतया[४] हिंसादिदोषवदपि कर्म विहितमत्याज्यमित्यर्थः। कर्मणां दोषवत्त्वं प्रपञ्चयति—**सर्वेति। **आरम्भशब्दस्य**

भाष्यार्कप्रकाशः

परधर्मानुष्ठानात्तु किल्बिषप्राप्तिर्भवतीत्यर्थः। न च – परधर्मानुष्ठानात् किल्बिषप्राप्तिरित्यर्थः कथं सिध्यतीति – वाच्यम्; स्वभावनियतं कर्म कुर्वन् किल्बिषं नाप्नोतीत्यनेन तत्सिद्धेः। 'परधर्मो भयावहः' इति पूर्वमुक्तत्वाच्च। **नियतं** व्यवस्थापितम्। ननु स्वभावजस्यापि कर्मणः कथं किल्बिषाहेतुत्वं दुष्टस्येत्यत आह—**यथेति**। **विषजातस्य** विषादुद्भूतस्य। **दोषो** मृतिमूर्छातापादिः। यथा मनुष्यादेर्विषं दोषकरम्, तथा विषजातक्रिमेर्न दोषकरमित्यर्थः।

अनेन श्लोकेन 'न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे' 'पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः' इति प्राणिहिंसालक्षणे स्वधर्मेऽपि युद्धे या आसीदर्जुनस्य पापमिति, अश्रेयः इति च बुद्धिः, 'श्रेयो भोक्तुं भैक्ष्यमपीह लोके' इति ब्राह्मणधर्मे भिक्षाटने याऽप्यासीच्छ्रेयः इति बुद्धिः, तदुभयं निवारितम्। हिंसात्मकमपि क्षत्रियस्य तव स्वभावनियतं युद्धाख्यं कर्म न किल्बिषावहम्, प्रत्युत श्रेयस्करमेव। यथा विषमपि विषजातक्रिमेर्न दोषावहम्, प्रत्युतान्नत्वाच्छरीरादिवृद्धिकरम्, तद्वत्। अहिंसात्मकमपि ब्राह्मणस्वभावनियतं भिक्षाटनादिकं कर्म तव परधर्मत्वात् किल्बिषावहमश्रेयस्करं च; यथा अमृतमपि विषक्रिमेर्दोषकरम्, तद्वदिति भावः॥४७॥

**सहजमिति**। ननु दुष्टः स्वधर्मो दुष्टत्वादेव न कार्यः, शिष्टोऽपि परधर्मः परधर्मत्वादेव न कार्यः, तस्मादननुष्ठानमेव वरमित्यत आह—**सहजमिति**। दुष्टस्यापि स्वधर्मस्य किल्बिषानावहत्वात्, परधर्मस्य च भयावहत्वाद्, अनात्मज्ञस्य चाननुष्ठानासम्भवात् स्वधर्मः कार्य एवाज्ञेनाधिकृतेनेति वक्ति भगवानित्याह—**स्वभावेति। अनात्मज्ञश्चेति**। 'न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृद्' इति श्लोकव्याख्यानसमये प्रतिपादितमिदं विस्तरेण मयेति[५] भावः। **अत इति**। स्वधर्मानुष्ठानस्यादुष्टत्वात्, परधर्मानुष्ठानस्य दुष्टत्वादज्ञस्य कर्माकरणायोगाच्चेत्यर्थः। हे कौन्तेय ! सदोषमपि सहजं कर्म पुरुषो न त्यजेत्, हि सर्वारम्भाः दोषेण, अग्निर्धूमेनेव, आवृताः। सह जायत इति सहजम्। किं तत् सहजमिति पृच्छति—**किमिति**। उत्तरयति—**कर्मेति**। कथं सदोषत्वं कर्मणः? अत आह—**त्रिगुणात्मकत्वादिति**। गुणत्रयस्य संसारहेतुत्वेन सदोषत्वाद् गुणत्रयात्मकं कर्मापि सदोषमेवेत्यर्थः। को न त्यजेत्? अत आह—**कुर्वन्निति**।

---

१. 'त्रिगुणत्वान्न' इति पा.। २. 'कुर्वन् न त्यजेत्' इति रा.पा. भाति। ३. उक्तमित्यस्यात्रापि संबन्ध इत्यर्थः। ४. सत्त्वादिगुणारब्धतया दोषोऽवश्यंभावी। स च दोषः श्रौते कर्मणि हिंसादिः इति योज्यम्। ५. (द्र.३-५) विस्तरस्य स्वकृतत्वादाह— मयेति।

**प्रकरणात्। ये केचिदारम्भाः स्वधर्माः परधर्माश्च, ते सर्वे** हि **यस्मात्— त्रिगुणात्मकत्वमत्र हेतुः— त्रिगुणात्मकत्वाद् दोषेण धूमेन सहजेनाग्निरिवावृताः। सहजस्य कर्मणः स्वधर्माख्यस्य परित्यागेन परधर्मानुष्ठानेऽपि दोषान्नैव मुच्यते; भयावहश्च परधर्मः; न च शक्यतेऽशेषतः त्यक्तुमज्ञेन कर्म यतः, तस्मान्न त्यजेदित्यर्थः।**

[कर्मणोऽत्यागवचनस्य तात्पर्यविचारः]

**किमशेषतः त्यक्तुमशक्यं कर्मेति न त्यजेत्? किं वा सहजस्य कर्मणस्त्यागे दोषो भवतीति?। किञ्चातः? यदि तावदशेषतः त्यक्तुमशक्यमिति न त्याज्यं सहजं कर्म, एवं तर्हि अशेषतस्त्यागे गुण एव स्यादिति सिद्धं भवति।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

अशेषतः कर्मत्यागासम्भववचनस्याज्ञविषयत्वं स्पष्टीकर्तुं विचारमारभते—**किमशेषतस्त्यक्तुमित्यादिना।** तस्मिन् पक्षे को लाभः, को वा दोषः इत्याह पूर्ववादी— **किञ्चात इति।** 'ब्रह्मचर्यादेव प्रव्रजेदि'त्यादिविधिश्रुतेः कर्मत्यागे न दोषो भवतीत्युक्तमुपेक्ष्य[१], आद्यपक्षे लाभमाह—**यदि तावदित्यादिना।** अशक्यकरणस्य त्यागस्य करणे गुण एव स्यादित्येतत्

आनन्दगिरिकृतव्याख्या

**कर्मव्युत्पत्त्या स्वपरसर्वकर्मार्थत्वे कर्मणां प्रकृतत्वं हेतुमाह—**प्रकरणादिति। **दोषेणेत्यादि व्याचष्टे—**ये केचिदिति। **ते सर्वे दोषेणावृताः इति सम्बन्धः। सर्वकर्मणां दोषावृतत्वे** हिशब्दोपात्तं **यस्मादित्युक्तं हेतुमेवाभिनयति—**त्रिगुणात्मकत्वमिति। **स्वभावनियतस्य कर्मणो दोषवत्त्वात् तत्त्यागद्वारा परधर्ममातिष्ठमानस्यापि नैव दोषाद् विमोकः सम्भवति। न च परधर्मोऽनुष्ठातुं शक्यते, भयावहत्वात्। न च तर्हि कर्मणोऽशेषतोऽननुष्ठानमेव, अज्ञस्याशेषकर्मत्यागायोगात्। अतः सहजं कर्म सदोषमपि न त्याज्यमिति वाक्यार्थमाह—**सहजस्येति।

**सहजं कर्म सदोषमपि न त्यजेदित्यत्र विचारमवतारयति—**किमिति। **'न हि कश्चिदि'ति न्यायादिति शेषः।** दोषो **विहितनित्यत्यागे प्रत्यवायः। सन्दिग्धस्य सप्रयोजनस्य विचार्यत्वादुक्ते सन्देहे प्रयोजनं पृच्छति—**किञ्चात इति। **तत्राद्यमनूद्य फलं दर्शयति—**यदीति। **अशक्यार्थानुष्ठानस्य गुणत्वेन प्रसिद्धत्वात्। प्रसिद्धं हि महोदधिमगस्त्यस्य चुलुकीकृत्य पिबतो गुणवत्त्वम्। तदाह—**एवं

भाष्यार्कप्रकाशः

कर्मण्यधिकृतोऽज्ञ इत्यर्थः। आरम्भशब्दस्योपक्रमार्थत्वात् कथं कर्मार्थत्वम्? अत आह—**प्रकरणादिति। अत्रेति।** दोषावृतत्व इत्यर्थः। **दोषेणेति।** बन्धकत्वरूपेणेत्यर्थः। सदोषत्वात् स्वधर्मं परित्यज्य निर्दोषः परधर्मः कार्य इति यदि त्वं मन्यसे, तदपि न सिध्यति, स्वधर्मवत् परधर्मस्यापि सदोषत्वात्। यस्माद् धर्ममात्रं त्रिगुणात्मकं तस्मात् सदोषमेव। एवं च सति सदोषबुद्ध्या स्वकर्म त्यक्तवतः पुरुषस्य परधर्मे प्रवृत्तस्य पुनस्तदेव सदोषकर्मानुष्ठानं प्राप्तम्, न तु निर्दोषकर्मानुष्ठानम्, निर्दोषस्य कर्मण एवाभावात्। तस्मात् सदोषपरधर्मानुष्ठानापेक्षया सदोषस्वधर्मानुष्ठानमेव श्रेयः। यथा कुरूपपरदारसङ्गापेक्षया कुरूपस्वदारसङ्ग एव श्रेयान् वंशानुच्छित्तिहेतुत्वात्, तद्वदिति। सदोषादपि स्वधर्मानुष्ठानाद् भवति हि स्वर्गफलम्, न तु सदोषात् परधर्मानुष्ठानात्, प्रत्युत नरकपातोऽपि। यथा परदारसङ्गाद् वंशप्रतिष्ठाऽलाभः, प्रत्युत ताडनाकीर्तिनरकाद्यनर्थप्राप्तिः, तद्वत्। तस्मात् सदोषमपि सहजं कर्म न परित्यजेदित्यभिप्रयन्नाह—**सहजस्येति।** नन्वेवं स्वधर्मः परधर्मश्चेत्युभयं न कार्यम्, अत आह—**न [च] शक्यत इति।** अज्ञेनाशेषतः कर्म त्यक्तुं न शक्यत इत्यन्वयः। **तस्मादिति।** परधर्मस्यापि सदोषत्वात् कर्मत्यागस्य च दुष्करत्वादित्यर्थः। **न त्यजेदिति।** सहजं कर्मेति शेषः।

सहजं कर्म न त्यजेदित्युक्तम्, तत्र हेतुं पृच्छति—**किमिति।** 'न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः' इति हेतोः सहजं कर्म न त्यजेदित्युक्तं किम्? यद्वा 'नियतस्य तु संन्यासः कर्मणो नोपपद्यते' इति हेतोरित्यर्थः। सन्दिग्धस्य [स]प्रयोजनस्य विचार्यत्वाद् उक्ते सन्देहे प्रयोजनं पृच्छति—**किञ्चात इति।** तत्राद्यपक्षमनूद्य फलं दर्शयति—**यदीति।** अशक्यकरणस्य गुणत्वात्

१. तथा च प्रत्यवायाभावः शास्त्रबलात् सिद्धः इति द्वितीयपक्षानुत्थितेस्तदुपेक्षेति भावः।

**सत्यमेवम् ; अशेषतस्त्याग एव नोपपद्यत इति चेत्? किं नित्यप्रचलितात्मकः पुरुषः, यथा सांख्यानां गुणाः? किंवा क्रियैव कारकम् , यथा बौद्धानां पञ्च स्कन्धाः क्षणप्रध्वंसिनः? उभयथाऽपि कर्मणोऽशेषतस्त्यागो न सम्भवति।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

सत्यम्। किन्त्वसौ त्याग एव न घटत इत्याह पूर्ववादी— **सत्यमेवेति**। सिद्धान्ती पृच्छति—**किं नित्यप्रचलितात्मक इति**। 'चलद् गुणवृत्तम्' इति सांख्यवचनाद् यथा सत्त्वादयो गुणा नित्यप्रचलितरूपाः, तथा किमात्मा सदा प्रचलितरूपः एव, किं वा(ऽनु) [१]'भूतिर्येषां क्रिया सैव कारकं सैव चोद्यते' इति **बौद्ध**वचनात् क्रियैव कारकम्? तत्रोदाहरणमाह—**यथेति**। स्कन्धा इति रूपविज्ञानवेदनासंज्ञासंस्काराख्याः पञ्च। तत्र रूपस्कन्धो नाम पृथिव्यादिपरमाणवः, विज्ञानस्कन्धो नाम त्वमहम् इत्यालयविज्ञानसन्ततिः, वेदनास्कन्धो नाम सुखदुःखादि, घटोऽयं पटोऽयमित्यादिविकल्पप्रत्ययः संज्ञास्कन्ध इत्यर्थः। येनाशेषकर्मत्यागो न सम्भवतीत्युच्यते, तेनानयोः पक्षयोरन्यतरः स्वीकरणीयः, यतः उभयथाऽपि कर्मणोऽशेषतस्त्यागो न सम्भवति, प्रथमपक्षे सदाप्रचलितस्वभावात् , द्वितीये क्रियात्यागे आत्मत्यागप्रसङ्गात् । अतोऽन्यतरः पक्षः स्वीकरणीयः। स चाशक्यः। कूटस्थत्वश्रुतिविरोधात् , प्रत्यभिज्ञाविरोधाच्चेति भावः।

आनन्दगिरिकृतव्याख्या

तर्हीति। **अशेषकर्मत्यागस्य गुणवत्त्वेऽपि प्रागुक्तन्यायेन तदयोगात् तस्याशक्यानुष्ठानतेति शङ्कते—**सत्यमिति। **चोद्यमेव विवृण्वन्नाद्यं विभजते—**किमिति। **सत्त्वादिगुणवदात्मनो नित्यप्रचलितत्वेनाशेषतस्तेन न कर्म त्यक्तुं शक्यम्। नापि रूपविज्ञानवेदनासंज्ञासंस्कार-संज्ञानां क्षणध्वंसिनां स्कन्धानामिव क्रियाकारकभेदाभावात् कारकस्यैवात्मनः क्रियात्वमित्युक्ते कर्माशेषतस्त्यक्तुं शक्यम् , उभयत्रापि स्वभावभङ्गादित्याह—** उभयथेति।

भाष्यार्कप्रकाशः

समुद्रचुलुकीकरणकालकूटभक्षणगोवर्धनोद्धारणादिवदिति भावः। भवत्वशेषकर्मत्यागस्य गुणत्वमित्यत आह—**सत्यमिति**। यद्यशेष-तस्त्याग उपपद्यते, तर्हि स गुणः स्यात् , स एव नोपपद्यते। तस्मात् सहजस्य कर्मणः परित्यागे दोषो भवतीति हेतोरेव सहजं कर्म न त्यजेदित्युक्तम् , न तु कर्माशेषतस्त्यक्तुमशक्यमिति हेतोः, अशेषकर्मत्यागस्यैवासम्भवात्। यस्मादेवं तस्मात् सहजकर्मपरित्यागः परमहंसपरिव्राजकस्य नरकहेतुरेवेति पूर्वपक्षिहृदयम्।

अशेषकर्मत्यागः सम्भवत्येव, अज्ञस्य तु परं स कर्तुमशक्यः इत्यभिप्रयन् पूर्वपक्षं निराकरोति—**किमित्यादिना**। अशेषतः कर्मणस्त्याग एव नोपपद्यत इत्युक्तं यत् त्वया, तत्र को हेतुरिति पृच्छति—**किमिति**। पुरुषस्य नित्यप्रचलितात्मकत्वादशेषतः कर्म-त्यागो न सम्भवतीत्येतदुक्तं किं त्वया? क्रियाया एव कारकत्वादिति वा? इत्यर्थः। **पुरुषो** जीवो **नित्यप्रचलितात्मकः** किम्? नित्य-चलनस्वभावः किम्? तत्र दृष्टान्तमाह—**यथेति**। साङ्ख्यानां मते गुणाः यथा नित्यप्रचलितात्मकाः, तद्वदित्यर्थः। प्रकाशात्मकस्य सवितुर्यथा प्रकाशत्यागानुपपत्तिस्तथा नित्यप्रचलितात्मकस्य पुरुषस्य कर्मत्यागानुपपत्तिः, चलनस्यैव कर्मत्वादिति भावः। **क्रियैव कारकं किं वेति। कारकं** कर्तृ , आत्मवस्त्वित्यर्थः। क्रियास्वरूप एव कर्ता आत्मा किमित्यर्थः। तत्र दृष्टान्तमाह—**यथेति**। बौद्धानां मते क्रियाकारकभेदाभावात् कारका एव क्षणप्रध्वंसिनः स्कन्धाः यथा क्रियास्वरूपाः, तद्वदित्यर्थः। रूपवेदनाविज्ञानसंज्ञासंस्काराः पञ्च स्कन्धाः। तत्र विषयप्रपञ्चो रूपस्कन्धः, तज्ज्ञानप्रपञ्चो वेदनास्कन्धः, आलयविज्ञानसन्तानो विज्ञानस्कन्धः, नामप्रपञ्चः संज्ञास्कन्धः, वासनाप्रपञ्चः संस्कारस्कन्धः। एवं पञ्चधा परिवर्तमानो विज्ञानसन्तान एवात्मेति बौद्धदर्शनम्। विज्ञानानां च क्षणिकत्वात् स्कन्धानां क्षणप्रध्वंसित्वम् , विज्ञानसन्तानात्मकत्वात् स्कन्धानाम्। इमानि च विज्ञानानि बुद्धिवृत्तिरूपाण्येवेति क्रिया एवेति स्कन्धाः क्षण-प्रध्वंसिनः, क्रियास्वरूपाश्चेति भावः।**उभयथाऽपीति**। पक्षद्वयेऽपीत्यर्थः।

---

१. येषां क्षणिकभावानां या भूतिः उत्पत्तिः सैव क्रिया, कारकं चेत्यर्थः। क्षणिकभावानामुत्पत्त्यतिरिक्तव्यापारासंभवात्।

**अथ तृतीयोऽपि पक्षः— यदा करोति, तदा सक्रियं वस्तु ; यदा न करोति, तदा निष्क्रियं वस्तु तदेव। तत्रैवं सति शक्यं कर्माशेषतस्त्यक्तुम्। अयं त्वस्मिंस्तृतीये पक्षे विशेषः—न नित्यप्रचलितं वस्तु , नापि क्रियैव कारकम् ; किं तर्हि? व्यवस्थिते द्रव्येऽविद्यमाना क्रियोत्पद्यते, विद्यमाना च विनश्यति। शुद्धं तद् द्रव्यं शक्तिमदवतिष्ठत इत्येवमाहुः काणादाः; तदेव च कारकमिति अस्मिन् पक्षे को दोष इति? अयमेव तु दोषः – यतस्त्वभागवतं मतमिदम्। कथं**

अनुभूतिस्वरूपाचार्यटिप्पणम्

पक्षान्तरमाशङ्कते—**अथ तृतीयोऽपीति**। कदाचिन्निष्क्रियवस्त्वभ्युपगमे सिद्धोऽशेषतस्त्याग इत्याह—**तत्रैवं सतीति**। ननु त्वदभिप्रेतस्याशेषकर्मत्यागस्यास्मिन् पक्षे सिद्धिश्चेत् तर्हि तत्पक्षादस्य पक्षस्य को भेद इत्याशङ्क्याह—**अस्मिन् पक्ष इति**। क्रियाशब्देन प्रधान उच्यते(?)। शक्तिशब्देन प्रतिबन्धरहितस्वभावविशेष उच्यते। न **मीमांसक**पक्षवत् स्वभावातिरेकिणी शक्तिरस्ति। यदेव क्रियानाशे शुद्धम् , तदेव क्रियोपरक्तं कारकमित्यर्थः। अस्त्वयं विशेषः, तथापि दोषाभावादयं पक्षो न त्याज्य इत्याह—**अस्मिन् पक्षे को दोष इति**। त्यागकारणं दोषं स्फुटयति—**अयमेव त्वित्यादिना**। भागवतं मतं मा भूत् ,

आनन्दगिरिकृतव्याख्या

**पक्षद्वयानुरोधेनाशेषकर्मत्यागायोगे वैशेषिकश्चोदयति—**अथेति। **कदाचिदात्मा सक्रियः, निष्क्रियश्च कदाचिदिति स्थिते फलितमाह—**तत्रेति। **उक्तमेव पक्षं पूर्वोक्तपक्षद्वयाद् विशेषदर्शनेन विशदयति—**अयं त्विति। **आगमापायित्वे क्रियायास्तद्वतो द्रव्यस्य कथं स्थायितेत्याशङ्क्याह—**शुद्धमिति। **क्रियाशक्तिमत्त्वेऽपि क्रियावत्त्वाभावे कथं कारकत्वम्? क्रियां कुर्वत् कारणं कारकमित्यभ्युपगमादित्याशङ्क्याह—**तदेवेति। **क्रियाशक्तिमदेव कारकम् , न क्रियाधिकरणम् , [1]परस्पराश्रयादित्यर्थः। वैशेषिकपक्षे दोषाभावादस्ति सर्वैः स्वीकार्यतेत्युपसंहरति—**इत्यस्मिन्निति। **भगवन्मतानुसारित्वाभावादस्य पक्षस्य त्याज्यतेति दूषयति—**अयमेवेति। **भगवन्मतानुनुसा-**

भाष्यार्कप्रकाशः

ननु दर्शितं पक्षद्वयमप्यस्माकमभिमतमेवेति शङ्कायां तन्निरासार्थं तृतीयः पक्षोऽस्तीत्याह—**अथेति**। तृतीयोऽपि पक्षः, अस्तीति शेषः। तमेव दर्शयति—**यदेति**। सक्रियं निष्क्रियं चात्मवस्तु कालभेदादिति तृतीयः पक्षः। तत्रेत्यस्यार्थमाह—**एवं सतीति**। तृतीयपक्ष इत्यर्थः। अशेषतः कर्म त्यक्तुं शक्यमेव। तृतीयं पक्षमुपपादयितुं भूमिकामारचयति—**अयं त्विति**। आत्मादि वस्तु न नित्यप्रचलितम् , नापि क्रियास्वरूपम् , सर्वदाऽपि क्रियाऽदर्शनात् ; क्रियाश्रयस्य कर्तुः क्रियारूपत्वायोगाच्च। तस्मादशेषतः कर्मत्यागासम्भववाद्यभिमतं पक्षद्वयं दुष्टमेव। **व्यवस्थिते** द्रव्ये आत्मादिवस्तुनीत्यर्थः। उत्पन्ना च सा क्रिया न चिरं तिष्ठतीत्याह—**विद्यमाना चेति**। उत्पन्ना चेत्यर्थः। अत एव सक्रियत्वं निष्क्रियत्वं चात्मन इति भावः। ननु क्रियाया आगमापायित्वे क्रियावतो द्रव्यस्य कथं स्थायितेत्याशङ्क्याह—**शुद्धमिति**। ननु द्रव्यस्य क्रियाशक्तिमत्त्वेऽपि क्रियावत्त्वाभावे कथं कारकत्वम्? क्रियावद्धि कारकम् , अत आह—**तदेवेति**। क्रियाशक्तिमदेव कारकम् , न तु क्रियाश्रयभूतम् , अन्योन्याश्रयादित्यर्थः। अशेषतः कर्मणस्त्याग एव नोपपद्यत इति यदुक्तं पूर्वपक्षिणा, तत् परिहृतमेतावता काणादेन। कथम्? उच्यते— यद्यात्मा नित्यप्रचलितात्मकः स्याद् , यदि वा क्रियास्वरूपः स्यात् , तर्हि कर्मणामशेषतस्त्यागो नोपपद्यताम् , न तु तथाविधः आत्मा। किन्तु सक्रियो निष्क्रियश्च कर्तैवात्मा। अतः कर्तुरप्यात्मनो निष्क्रियत्वेनावस्थानं सम्भवत्येव। यथा तक्षकस्य तक्षणक्रियां परित्यज्य तूष्णीमासनं सम्भवति, तद्वत्। तस्मादशेषतः कर्मत्याग उपपद्यत एवेति।

नन्वेवं समीचीनमेवेदं काणाददर्शनमिति मत्वा कश्चित् पृच्छति—**अस्मिन् पक्षे को दोष इति**। उत्तरयति—**अयमेवेति**। अभागवतत्वमेव दोष इत्यर्थः। **अभागवतं** भगवतोऽनभिमतमित्यर्थः। ननु काणाददर्शनमिदं भगवतोऽनभिमतमिति कथं ज्ञायते त्वयेति पृच्छति कश्चित्—**कथमिति**। उत्तरयति—**यत इति**। 'असतो भावो न विद्यते, सतश्चाभावो न विद्यते' इति भगवतोक्तम्।

---
१. क्रियासिद्धौ क्रियावतः कारकत्वसिद्धिः, तत्सिद्धौ क्रियासिद्धिरिति।

**ज्ञायते? यत आह भगवान्—'नासतो विद्यते भावः' (भ.गी.२.१६) इत्यादि। काणादानां ह्यसतो भावः, सतश्चाभाव इतीदं मतम् अभागवतम्। [1]अभागवतत्वेऽपि न्यायवच्चेत् को दोष इति चेत्? उच्यते— दोषवत्तु इदम् , सर्वप्रमाणविरोधात्। कथम्? यदि तावद् द्व्यणुकादि द्रव्यं प्रागुत्पत्तेरत्यन्तमेवासत् , उत्पन्नं च स्थितं कञ्चित् कालम् , पुनरत्यन्तमेवासत्त्वमापद्यते, तथा च सति असदेव सज्जायते, सदेवासत्त्वमापद्यते, अभावो भावो भवति, भावश्चाभाव इति। तत्राभावो जायमानः प्रागुत्पत्तेः शशविषाणकल्पः समवाय्यसमवायिनिमित्ताख्यं कारणमपेक्ष्य जायत इति। न**

अनुभूतिस्वरूपाचार्यटिप्पणम्

तथापि तर्कोपबृंहितत्वात् स्वीकरणीयमित्याह—**अभागवतत्वेऽपीति**। तर्कोपबृंहितत्वमपि अस्य नास्तीत्याह—**उच्यत इत्यादिना**। सर्वप्रमाणविरोधं दर्शयितुं दूष्यपरमतमनुवदति—**यदि तावदिति**। अनूदितस्य फलमाह—**तथा च सतीति**। असज्जन्मनि कर[कारण]त्रयं च तदभिप्रेतमनुवदति—**तत्राभाव इति**। यत्समवेतं कार्यं तत् समवायि, तत्प्रत्यासन्नम-

आनन्दगिरिकृतव्याख्या

**रित्वमस्याप्रामाणिकमिति शङ्कते**—कथमिति। **भगवद्वचनमुदाहरन् परपक्षस्य तदनुगुणत्वाभावमाह**—यत इति। **परेषामपि मतमेतदनुगुणमेव किं न स्यादित्याशङ्क्याह**—काणादानां हीति। **भगवन्मतानुगुणत्वाभावेऽपि न्यायानुगुणत्वेन दोषरहितं काणादानां मतम् उपादेयमेव, [2]तर्हि काणादमतविरोधादुपेक्ष्यते भगवन्मतमिति शङ्कते**—अभागवतत्वेऽपीति। **न्यायवत्त्वमसिद्धमिति दूषयति**—उच्यत इति। **सर्वप्रमाणानुसारिणो मतस्य न तद्विरोधितेत्याक्षिपति**—कथमिति। **वैशेषिकमतस्य सर्वप्रमाणविरोधं प्रकटयन्नादौ तन्मतमनुवदति**—यदीति। **असतो जन्म, सतश्च नाश इति स्थिते फलितमाह**—तथा चेति। **उक्तमेव वाक्यं व्याकरोति**—अभाव इति। **सदेवासत्त्वमापद्यत इत्युक्तं व्याचष्टे**—भावश्चेति। इति **मतमिति शेषः। तत्रैवाभ्युपगमान्तरमाह**—तत्रेति। **प्रकृतं मतं सप्तम्यर्थः**। इति

भाष्यार्कप्रकाशः

**काणादैः** एतद्विपरीतमुक्तम्— 'असतो भावो विद्यते, सतश्चाभावो विद्यते' इति। तस्मादिदं काणादमतमभागवतम्। काणादानां ह्यसतो भावः, सतश्चाभावः इति मतमिति शेषः। निश्चय इति वा। न च – असत्कार्यवादः काणादोक्तो भवतु नाम दुष्टः, सक्रियं निष्क्रियं चात्मवस्तु कारकमिति प्रकृतकाणादमतैकदेशस्य कथं दुष्टत्वमिति – वाच्यम् ; शुद्धेऽप्यात्मवस्तुनि अविद्यमाना क्रियोत्पद्यत इति असत्कार्यवादस्य प्रकृतेऽपि प्रसारितत्वात्। शुद्धं निष्क्रियं ह्यात्मवस्त्वविद्यमानक्रियोत्पत्त्या सक्रियं भवतीत्यमीभिरुच्यते। तस्माद् असत्कार्यवादसत्त्वात् 'सक्रियं निष्क्रियं चात्मवस्तु' इत्येतत् काणादमतमभागवतत्वाद् दुष्टमेव।

ननु न्याय्यस्य काणाददर्शनस्य भगवदनभिमतत्वमात्रेण कथं दुष्टत्वं शक्यते वक्तुमिति पृच्छति—**अभागवतत्वेऽपीति। इदमिति**। असतो भावः, सतश्चाभाव इत्येतत् काणादमतमित्यर्थः। **दोषवदिति**। दुष्टमेवेत्यर्थः। तत्र हेतुमाह—**सर्वेति**। कथं सर्वप्रमाणविरोध इति पृच्छति—**कथमिति**। विरोधमेव दर्शयति—**यदीत्यादिना**। काणादाः प्रागभावं प्रध्वंसाभावं चाहुः कार्यस्य। घटस्योदयात् प्रागसत्त्वात् प्रागभावः, नाशादनन्तरमसत्त्वात् प्रध्वंसाभावः, मध्यकाले च सत्त्वाद् घटस्य सत्त्वं चाहुः। एवं सति प्रागसतो घटस्य भावः, मध्ये सतो घटस्य पश्चादभावश्चेत्यसतो भावः, सतश्चाभाव इत्युक्तं भवति। तत्र दोषान् दर्शयति—**यदीत्यादिना**। परमाणुद्रव्यस्य नित्यत्वादाह—**द्व्यणुकादीति**। कार्यमुत्पत्तेः प्रागनभिव्यक्तं सत् सूक्ष्मरूपेण कारणे वर्तमानं च सद् असदित्युच्यत इति मतव्यावृत्तये आह—**अत्यन्तमेवासदिति**। उत्पन्नं च द्रव्यं कञ्चित् कालं स्थितं सदित्यन्वयः। आपद्यते यदीत्यन्वयः। **तथा च सतीति**। कार्यस्योत्पत्तेः प्रागत्यन्तासत्त्वे नाशानन्तरं चात्यन्तासत्त्वे सतीत्यर्थः। **असदेवेति**। कार्यकारणयोर्मृद्घटयोः, तन्तुपटयोश्चानन्यत्वदर्शनात् कारणमेव कार्यं भवतीति कृत्वा असदेव सज्जायते। तथा घटस्य नाशानन्तरं मृद्रूपत्वदर्शनात् कार्यं कारणमेव भवतीति कृत्वा सच्चासज्जायते। असत् कारणं सत् कार्यमिति ह्येषामभ्युपगमः। असदेवेति वाक्यद्वयस्य स्वयमेवार्थमाह—**अभाव इति**। द्व्यणुकादि-

१. 'अभागवतमपि' इति पा.। २. 'न हि काणादमतं विरोधादुपेक्षणीयमिति शङ्कते' इति पा.।

**चैवमभाव उत्पद्यते, कारणं वाऽपेक्षत इति शक्यं वक्तुम् , असतां शशविषाणादीनामदर्शनात्। भावात्मकाश्चेद् घटादयः उत्पद्यमानाः, किञ्चिद् अभिव्यक्तिमात्रकारणमपेक्ष्य उत्पद्यन्त इति शक्यं प्रतिपत्तुम्। किञ्च, असतश्च सद्भावे सतश्चासद्भावे न क्वचित् [1]प्रमाणप्रमेयव्यवहारे विश्वासः कस्यचित् स्यात् , 'सत् सदेव, असदसदेव' इति**

अनुभूतिस्वरूपाचार्यटिप्पणम्

समवायि, ताभ्यामन्यत् कार्योपयोगि निमित्तम् - एतत् कारणत्रयमपेक्ष्यासत् कार्यं जायत इत्यर्थः। एवं परमतमनूद्य दोषमाह— **न चैवमभाव इत्यादिना।** विमतं न जन्मार्हकारणापेक्षम् , असत्त्वान्नरविषाणवदित्यर्थः। नन्वसतो जन्म न सम्भवतीति वदता सतो जन्माभ्युपगन्तव्यम्। तदपि न सम्भवतीत्याशङ्क्याह—**भावात्मकाश्चेदिति।** सज्जन्मपक्षे दोषान्तरमाह—**किञ्चेत्यादिना**। सतोऽपि चेन्नाशः आत्मनोऽपि स्यात्। असतश्चेज्जन्म, वन्ध्यापुत्रस्यापि स्यादिति

आनन्दगिरिकृतव्याख्या

**अभ्युपगम्यत इति शेषः। परकीयमभ्युपगमं दूषयति—**न चेति। एवमिति। **परपरिभाषानुसारेणेत्यर्थः।** अदर्शनाद् **उत्पत्तेरपेक्षायाश्चेति शेषः। कथं तर्हि त्वन्मतेऽपि घटादीनां कारणापेक्षाणामुत्पत्तिः, न हि भावानां कारणापेक्षोत्पत्तिर्वा युक्तेति, तत्राह—** भावेति। **घटादीनाम् अस्मत्पक्षे प्रागपि कारणात्मना सतामेवाव्यक्तनामरूपाणाम् अभिव्यक्तिसामग्रीमपेक्ष्य पृथगभिव्यक्तिसम्भवान्न किञ्चिदवद्यमित्यर्थः। असत्कार्यवादे दोषान्तरमाह—**किञ्चेति। **परमते मानमेयव्यवहारे क्वचिदपि विश्वासो न कस्यचिदित्यत्र हेतुमाह—**सत्सदेवेति। **न हि सत् तथैवेति निश्चितम् , तस्यैव पुनरसत्त्वप्राप्तेरिष्टत्वात्। न चासत् तथैवेति निश्चयः, तस्यैव सत्त्वप्राप्तेरुपगमात्। अतो यन्मानेन सद् असद्वा निर्णीतं, तत् तथेति विश्वासाभावान्मानवैफल्यमित्यर्थः।**

भाष्यार्कप्रकाशः

प्रागभावो द्व्यणुकादिरूपो भावो भवति, द्व्यणुकादिरूपो भावश्च द्व्यणुकादिप्रध्वंसाभावरूपाभावो भवतीत्यर्थः। द्व्यणुकादिप्रागभावाद् द्व्यणुकादिभाव उत्पद्यते। द्व्यणुकादिभावश्च प्रध्वंसाभावं प्रपद्यत इत्यमीभिरुच्यमानत्वादिति भावः। **तत्रेति**। अभावो भावो भवतीत्यस्मिन्नंश इत्यर्थः। समवायिकारणं पटं प्रति तन्तुः, असमवायिकारणं तन्तु[संयोग]रूपं, निमित्तकारणं तुरीवेमादि। तदेतत् त्रिविधं कारणमपेक्ष्याभावो भावो भवतीति चैतैरुच्यते। नन्वभावो भावो भवतु, जायमानश्चाभावः समवाय्यादिकारणत्रयमपेक्ष्य जायताम् , को दोषस्तत्राह—**न चेति**। अभाव उत्पद्यते भावरूपेण जायत इति, अभावः स्वोदयं प्रति कारणमपेक्षत इति च वक्तुं न शक्यमित्यर्थः। कुतो न शक्यम्? अत आह—**असतामिति। अदर्शनादिति**। उत्पत्तिकारणापेक्षत्वयोरदर्शनादित्यर्थः। उत्पत्तेः प्रागसतो घटस्य शशविषाणादितुल्यत्वादिति भावः।

ननूत्पत्तेः प्राग् घटस्य सत्त्वेऽपि कारणापेक्षानुपपत्तिस्तदवस्थैव, व्यर्थत्वादित्यत आह—**भावात्मकाश्चेदिति**। उत्पत्तेः प्रागनभिव्यक्ततया स्थितत्वेन कार्यस्याभिव्यक्तिं प्रति कारणापेक्षा युक्तैवेत्यर्थः। तस्माद् भावात्मका एव घटादयः, कारणमपेक्ष्योत्पद्यमानत्वात्। भावस्य ह्युत्पद्यमानत्वं कारणापेक्षत्वं चेत्युभयं सङ्गच्छत इति भावः। तस्मात् कार्यस्याभावात्मकत्वमयुक्तम् , कार्यस्य कारणात्मकत्वादभावस्य च कारणत्वायोगात्। न हि शशविषाणादिकं कस्यचित् कारणं दृष्टम्।

**नन्वे**वमभावो भावो मा भून्नाम, भावः पुनरभावो भवत्येव, घटस्य नाशानन्तरं प्रध्वंसाभावदर्शनादिति चेत् , **मैवमपि**; नष्टस्यापि घटस्य कपालत्वचूर्णत्वादिलक्षणभावत्वमेव नाभावत्वमिति, उत्पत्तेः प्रागिव नाशादनन्तरमपि सूक्ष्मरूपेण स्वकारणमृद्येव घटस्य सत्त्वाभ्युपगमात्। तस्माद् भावात्मकस्य घटस्य नाभावात्मत्वप्राप्तिर्विरोधादिति भावश्चाभावो नैव भवति। दोषान्तरमाह—**किं चेति**। विश्वासो न स्यादित्यन्वयः। विश्वासाभावे हेतुमाह—**सत्सदेवेति**। यदि सदसत् स्याद् , असच्च सत् स्यात् , तर्हि सत् सदेव असदसदेवेति निश्चयासम्भव एव। ततश्च सर्वोऽपि वैदिको लौकिकश्च प्रमाणप्रमेयव्यवहारोऽविश्वसनीय एव स्यात्। यन्मानेन सद् असद्वा निर्णीतं तत् तथेति विश्वासाभावान्मानवैफल्यमित्यर्थः।

१. 'प्रमाणप्रमेयव्यवहारेषु' इति पा.।

**निश्चयानुपपत्तेः।**

**किञ्च, 'उत्पद्यते' इति द्व्यणुकादेर्द्रव्यस्य स्वकारणसत्तासम्बन्धमाहुः। प्रागुत्पत्तेश्च असत् पश्चात् स्वकारण-व्यापारमपेक्ष्य स्वकारणैः परमाणुभिः, सत्तया च समवायलक्षणेन सम्बन्धेन सम्बध्यते। सम्बद्धं सत् कारणसमवेतं सद् भवति।**

**तत्र वक्तव्यम् – कथमसतः [१]सत् कारणं भवेत् , सम्बन्धो वा केनचित् स्यात्? न हि वन्ध्यापुत्रस्य [२]सता सम्बन्धो वा कारणं वा केनचित् प्रमाणतः कल्पयितुं [३]शक्यते।**

**ननु नैवं वैशेषिकैरभावस्य सम्बन्धः कल्प्यते। द्व्यणुकादीनां हि द्रव्याणां स्वकारणेन समवायलक्षणः सम्बन्धः सतामेवोच्यत इति? न ; सम्बन्धात्प्राक् सत्त्वानभ्युपगमात्। न हि वैशेषिकैः कुलालदण्डचक्रादिव्यापारात्प्राग्**

अनुभूतिस्वरूपाचार्यटिप्पणम्

अनाश्वासप्रसङ्ग इत्यर्थः।

किंच प्रागसतः सत्तासम्बन्धः, कारणसम्बन्धो वा जन्मेति जन्मलक्षणम्। तत्पर्यालोचनयाऽप्यसज्जन्म न सम्भवतीत्याह—**किञ्चोत्पद्यत इति**। सम्बन्धस्य सम्बन्धिद्वयपरतन्त्रत्वात् सम्बन्ध्यभावे न संभव इत्यर्थः।

सम्बन्ध्यभावात् सम्बन्धो न सम्भवतीत्युक्तम्। तदेवाक्षेपसमाधानाभ्यां स्पष्टयति—**ननु नैवमित्यादिना।**

आनन्दगिरिकृतव्याख्या

**इतश्चासत्कार्यवादो न युक्तिमानित्याह—**किञ्चेति। **तदेव हेत्वन्तरं स्फोरयितुं परमतमनुवदति—**उत्पद्यत इतीति। **परकीयं वचनमेव व्याचष्टे—**प्रागिति। सम्बद्धं सदित्य**नेन कारणसम्बन्धे सति कार्यस्य सत्तासम्बन्धो भवतीत्युक्तम्, तदेव स्फुटयति—**कारणेति।

**परमतमेवमनुभाष्य दूषयति—**तत्रेति। **कार्यस्यासतोऽपि कारणं सम्भवति, तस्य च कार्येण सम्बन्धः सिध्यतीत्याशङ्क्याह—**न हीति। **असत्त्वादेवासतः सम्बन्धाभावे कारणस्य सतोऽपि न तेन सम्बन्धोऽनुमातुं शक्यते, सदसतोः सम्बन्धासम्भवादित्यर्थः।**

**कार्यस्यात्यन्तासत्त्वानभ्युपगमात् कारणसम्बन्धः स्यादिति शङ्कते—**नन्विति। **सतामेव द्व्यणुकादीनां कारणसम्बन्धं शङ्कितं दूषयति—** न, सम्बन्धादिति। **अनभ्युपगममेव विशदयति—**न हीति। **सदेव कारणं कार्याकारमापद्य कार्यव्यवहारं निर्वहतीत्यभ्युपगमाद्**

भाष्यार्कप्रकाशः

दोषान्तरं दर्शयितुं तन्मतमनुवदति—**किं चेति। उत्पद्यत इति**। द्व्यणुकादिद्रव्यं कर्तृ। संग्रहवाक्यमेव विवृणोति—**प्रागिति**। उत्पत्तेः प्रागसद् द्व्यणुकादिरूपं द्रव्यं परमाणुभिः सत्तया च समवायसम्बन्धेन सम्बध्यत इत्यन्वयः। तत्र हेतुमाह—**कारकव्यापारम् अपेक्ष्येति**। स्वकारकव्यापारवशादित्यर्थः। एवं सम्बद्धं सत् तद् द्व्यणुकादिद्रव्यं सम्भवती[सद् भवती]त्याह—**सम्बद्धमिति**। कारण-सम्बन्धे सति कार्यस्य सत्तासम्बन्धो भवतीत्यर्थः। तदेव स्फुटयति—**कारणेति**। द्व्यणुकादिद्रव्यमित्येव कर्तृ, कारणसमवेतम् , अत एव सद् भवतीत्यन्वयः। उत्पत्तेः प्रागत्यन्तमसतोऽपि द्व्यणुकादिद्रव्यस्य परमाणुभिः सह समवायाद् द्रव्यलाभः, परमाणुनिष्ठसत्तया सह समवायात् सत्त्वलाभश्च भवतीति भावः।

एवं तन्मतमनूद्य निराकरोति—**तत्र चेत्यादिना**। वक्तव्यं प्रष्टव्यमित्यर्थः। **स्वमिति**। स्वस्वप्रतिनियतं मृदादिकमित्यर्थः। उत्पत्तेः प्रागसतो घटस्य मृदादिकं कथं कारणं स्यात्? कथं वा तस्य केनचित् सम्बन्धः स्यादित्यर्थः। कुतो न स्याद्? अत आह—**न हीति। स्वमिति**। पित्रादिरूपमित्यर्थः।

ननु सतोरेव कार्यकारणयोः पटतन्त्वोर्घटमृत्तिकयोश्च समवायं ब्रूमो वयम् , न त्वभावभावयोरिति शङ्कते— **नन्विति**। सतां

१. 'स्वं' इति पा.। २. 'स्वं कारणं सम्बन्धो वा' इति पा.। ३. 'शक्यम्' इति पा.।

**घटादीनामस्तित्वमिष्यते। न च मृद एव घटाद्याकारप्राप्तिमिच्छन्ति। ततश्चासत एव सम्बन्धः पारिशेष्यादिष्टो भवति। नन्वसतोऽपि समवायलक्षणः सम्बन्धो न विरुद्धः। न; [१]वन्ध्यापुत्रादीनामदर्शनात्। घटादेरेव प्रागभावस्य स्वकारण-सम्बन्धो भवति, न वन्ध्यापुत्रादेः, अभावस्य तुल्यत्वेऽपीति विशेषोऽभावस्य वक्तव्यः। एकस्याभावो द्वयोरभावः सर्वस्याभावः प्रागभावः प्रध्वंसाभाव इतरेतराभावोऽत्यन्ताभाव इति लक्षणतो न केनचिद् विशेषो दर्शयितुं शक्यः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ननु वन्ध्यापुत्रात् सकाशात् [अ]सतः कार्यस्य वैलक्षण्याद् घटते समवाय इत्याशङ्क्याह—**घटादेरेव प्रागभावस्येति।** प्रतियोगिभेदमन्तरेण सत्त्वमात्रे न कोऽपि भेद उपलभ्यते। [२]प्राक्त्वादि विशेषणं च परस्पराश्रयग्रस्तम्— असतो जन्मसिद्धौ तदवच्छिन्नप्राक्त्वादिविशेषणसिद्धिः। तत्सिद्धौ च वन्ध्यापुत्रवैलक्षण्येन तज्जन्मसिद्धिरिति भावः। किञ्च प्रागुत्पत्तेः घटासत्त्वं

आनन्दगिरिकृतव्याख्या

**नास्ति सम्बन्धानुपपत्तिरित्याशङ्क्य , अपराद्धान्तान्मैवमित्याह—**न चेति। **कार्यस्य कारणसम्बन्धात्पूर्वं सत्त्वाभावे परिशेषसिद्धमर्थं दर्शयति—**ततश्चेति। **तत्र चानुपपत्तिरुक्तेति शेषः। सम्बन्धिनोः [३]सदसतोः असंयोगेऽपि, समवायः सदसतोः सम्भवेदिति तस्य नित्यत्वाद् अन्यतरसम्बन्धा[न्य्य]भावेऽपि स्थितेरावश्यकत्वादिति शङ्कते—**नन्विति। **सदसतोर्मिथः सम्बन्धस्यादृष्टत्वान्नेति निराचष्टे—**न, वन्ध्येति। **घटादिप्रागभावस्यात्यन्ताभावत्वाभावाद् वन्ध्यापुत्रादिविलक्षणतया स्वकारणसम्बन्धः सिध्यतीत्याशङ्क्याह—**घटादेरिति। **उभयत्राभावस्वभावाविशेषेऽपि कस्यचित् कारणसम्बन्धो, नेतरस्येति विशेषे हेत्वभावान्न प्रागभावस्य कारणसम्बन्धः सम्भवतीत्यर्थः। घटादिप्रागभावस्य सप्रतियोगिकत्वम् , वन्ध्यापुत्रादेर्नैवमिति विशेषमाशङ्क्य दूषयति—**एकस्येति। **प्रागभावस्येव प्रध्वंसाभावादेरपि**

भाष्यार्कप्रकाशः

द्रव्याणामिति सम्बन्धः। परिहरति—**नेति**। हेतुमाह—**सम्बन्धादिति**। परमाणुसत्तासम्बन्धात्प्राग् द्व्यणुकादिद्रव्यस्य सत्तानभ्युपगमादित्यर्थः। तदेव स्फुटयति—**न हीति**। उत्पत्तेः प्राग् घटादिकार्यस्यासत्त्ववादिनो हि वैशेषिकाः कुलालादिव्यापारात्प्राग् घटादिकार्यम् असदित्यभ्युपगच्छन्ति। कुलालादिकारकव्यापारमपेक्ष्य हि परमाणुसत्तासम्बन्धो घटस्य। तस्माद् द्व्यणुकादीनाम् सतामेव स्वकारणेन समवायसम्बन्ध इति वक्तुं न शक्यते।

अयं भावः—किमुत्पन्नस्य सत एव द्रव्यस्य स्वकारणेन सत्तया च सह समवायसम्बन्ध इति ब्रूषे, उतानुपन्नस्यासतः? नाद्यः; कारणसत्तासमवेतं सदेव कार्यं जायत इति कार्यजन्मानन्तरं कार्यकारणसमवायकल्पनस्यायुक्तत्वात्। यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणमिति हि त्वया लक्षितम्। न हि मृदसमवेतः सन्नुत्पद्यमानो घटो दृष्टः, येनोत्पत्त्यनन्तरं घटस्य मृत्समवायः स्यात्। द्वितीये त्वभावस्य केनचित् सम्बन्धः कल्पित एवेति।

ननूत्पत्तेः प्राग् घटो मृद्रूपेण वर्तत एवेति सत एव घटस्य मृदा सह समवायसम्बन्ध इत्यत आह—**न चेति**। वैशेषिका इति शेषः। नेच्छन्तीत्यन्वयः। तथाऽभ्युपगमे असत्कार्यवादभङ्गप्रसङ्गादिति भावः। सत्कार्यवादो हि सः। **ततश्चेति**। सम्बन्धात्प्राक् कार्यस्य सत्ताया अनभ्युपगमादित्यर्थः। **पारिशेष्यादिति**। पर्यवसानादित्यर्थः। सत्कार्यवादानभ्युपगमादिति वा।

ननूत्पत्तेः प्रागसतोऽपि घटस्य स्वकारणेन सह समवायसम्बन्धो न विरुध्यत इत्याक्षिपति—**नन्विति**। परिहरति—**नेति**। हेतुमाह—**वन्ध्येति**। आदिपदाच्छशविषाणादिग्रहणम्। नन्वभावस्य तुल्यत्वेऽपि घटादिप्रागभावलक्षणाभावस्यैव परमाण्वादिकारण-सम्बन्धः, न तु वन्ध्यापुत्रशशविषाणादिलक्षणाभावस्येत्याह वैशेषिकः—**घटादेरेवेति**। तत्र विशेषहेतुं पृच्छत्यद्वैती—**विशेष इति**। तर्ह्यभावस्य विशेषो वक्तव्यः। ननु घटादिप्रागभावस्य सप्रतियोगिकत्वम् , वन्ध्यापुत्रादेर्नैवमित्यस्ति विशेष इत्याशङ्क्य दूषयति—**एकस्येति**। एकद्विसर्वादिप्रतियोगिवशादेवाभावस्य भेदः, न तु स्वरूपत इति कृत्वा वन्ध्यापुत्राद्यभावोऽपि सप्रतियोगिक एवेति न विशेष

१. वन्ध्यापुत्रादीनामसतां केनचित् संबन्धादर्शनादित्यर्थः। २. कार्यस्य उत्पत्तेः प्राक् यः अभावः स हि तत्प्रागभावः। उत्पत्तिसिद्धौ च तद्विशेषितप्रागभाव-सिद्धिः। तत्प्रागभावसिद्धौ चासद्वैलक्षण्याद् उत्पत्तिसिद्धिः इति परस्पराश्रयम्। ३. 'सदसतोरेवासंयोगेऽपि' इति पा.।

**असति च विशेषे घटस्य प्रागभाव एव कुलालादिभिः घटभावमापद्यते, सम्बध्यते च भावेन कपालाख्येन स्वकारणेन, [१]सर्वव्यवहारयोग्यश्च भवति, न तु घटस्यैव प्रध्वंसाभावः अभावत्वे सत्यपीति; प्रध्वंसाद्यभावानां न क्वचिद् व्यवहार-योग्यत्वम् , प्रागभावस्यैव द्व्यणुकादिद्रव्याख्यस्य उत्पत्त्यादिव्यवहारार्हत्वम् इत्येतदसमञ्जसम् अभावत्वाविशेषाद् अत्यन्तप्रध्वंसाभावयोरिव। ननु नैवास्माभिः प्रागभावस्य भावापत्तिरुच्यते। भावस्यैव (हि) तर्हि भावापत्तिः, यथा घटस्य घटापत्तिः, पटस्य वा पटापत्तिः। एतदप्यभावस्य भावापत्तिवदेव प्रमाणविरुद्धम्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

न सत्त्वापत्त्यादिव्यवहारार्हं , घटासत्त्वाद् , विनष्टघटासत्त्ववदित्याह—**असति च विशेष इत्यादिना।** सिद्धसाधनत्वमाशङ्क्य परिहरति— **ननु नैवमस्माभिरित्यादिना।**

आनन्दगिरिकृतव्याख्या

**सप्रतियोगिकत्वाविशेषे स्वकारणेन सम्बन्धाविशेषः स्यादित्यर्थः। प्रागभावप्रध्वंसाभावयोर्विशेषाभावे फलितमाह—**असति चेति। कपाल**शब्दो घटकारणीभूतमृदवयवविषयः।** सर्वो व्यवहारो **घटाश्रितो जन्मनाशादिव्यवहारः। प्रध्वंसाभावस्तु घटस्यैवाभावत्वे सत्यपि न घटत्वमापद्यते, नापि कारणेन सम्बध्यते, न चोत्पत्त्यादिव्यवहारयोग्यो भवतीत्येतदयुक्तम् , प्रागभावेनास्य विशेषाभावादित्याह—**न त्विति। **असमञ्जसमित्यनेन** इति**शब्दः सम्बध्यते। असमञ्जसान्तरमाह—**प्रध्वंसादीति। **अन्योन्याभावात्यन्ताभावावादिपदार्थौ।** क्वचि-दिति **देशकालयोर्ग्रहणम्।** व्यवहारो **जन्मादिरेव। प्रागभावो नोत्पत्त्यादिव्यवहारयोग्यः, अभावत्वात् , प्रध्वंसादिवदित्यर्थः। प्राग-भावस्य घटभावानभ्युपगमादनुमानं सिद्धसाधनमिति शङ्कते—**नन्विति। **अभावस्य भावापत्त्यनभ्युपगमे भावस्यैव भावापत्तिरित्यनिष्टं स्यादिति दूषयति—**भावस्यैवेति। **तस्य तदापत्तेरयोग्यत्वे दृष्टान्तमाह—**यथेति। [२]**भावस्य भावापत्तिरनिष्टेति दार्ष्टान्तिकं स्पष्टयति—**एतदपीति।

भाष्यार्कप्रकाशः

इति भावः। ननु माभूल्लक्षणतो भेदः, किं ततः? अत आह—**असति चेति।** घटस्य प्रागभाव एव कुलालादिभिर्घटभावमापद्यते, भावेन कपालाख्येन स्वकारणेन सम्बध्यते, तेन सम्बद्धश्च सर्वव्यवहारयोग्यो भवति। एवकारार्थमाह—[३]**नन्विति[न त्विति]।** घटस्यैव प्रध्वंसा-भावः कुलालादिभिर्घटभावं नापद्यते, भावेन न सम्बध्यते, व्यवहारयोग्यश्च न भवति। **अभावत्वे सत्यपीति।** प्रध्वंसाभावस्य उत्पत्त्या-दिव्यवहारानर्हत्वम् , प्रागभावस्यैव तदर्हत्वम् **इत्येतद्** वचनम् **असमञ्जसम्** अयुक्तम्। कस्मादसमञ्जसम्? अत आह—**अभावत्वा-विशेषादिति।** दृष्टान्तमाह—**अत्यन्तेति।** अत्यन्ताभावप्रध्वंसाभावयोः अभावत्वाविशेषाद् यथा न क्वचिद् व्यवहारयोग्यत्वम् , तथा प्रागभावस्यापीति। तस्माद् अत्यन्ताभावप्रध्वंसाभाववत् प्रागभावस्यापि परमाण्वादिकारणसम्बन्धकल्पनम् उत्पत्त्यादिव्यवहारार्हत्व-कल्पनं चायुक्तमेव। प्रागभावो नोत्पत्त्यादिव्यवहारार्हः, अभावत्वात् , प्रध्वंसाभाववदत्यन्ताभाववच्चेति प्रयोगादिति भावः। तस्माच्छुद्धे शक्तिमति द्रव्ये आत्मन्यविद्यमाना क्रियोत्पद्यत इति, यदा करोति, [तदा सक्रियं वस्तु ; यदा न करोति,] तदा निष्क्रियं च वस्त्विति तृतीयः पक्षोऽपि काणादाभिमतो दुष्ट एव।

एवमसत्कार्यवादे दूषिते सति लब्धावकाशःसन् सत्कार्यवादी प्रत्यागत्य, भवतु वैशेषिकैस्तैरभिमतोऽसत्कार्यवादो दुष्टः, अस्माभिस्तु सत्कार्यवादोऽभ्युपगतः, स च नैव दुष्ट इति चोदयति—**नन्विति।** अस्माभिः सत्कार्यवादिभिः प्रागभावस्य भावापत्ति-र्नैवोच्यते, किं तर्हि भावस्यैव भावापत्तिरुच्यते। तत्रोदाहरणमाह—**यथा घटस्येति।** स्वकारणे मृदि वर्तमानस्य घटस्यैव घटभावापत्ति-रित्यर्थः। कार्यमुत्पत्तेः प्रागप्यस्तीति हि सत्कार्यवाद इति भावः। दूषयति—**एतदपीति।** भावस्य भावापत्तिरिति मतमपीत्यर्थः। **प्रमाणविरुद्धमिति।** यदि घट उत्पत्तेः प्रागप्यस्ति, तर्हि कुलालादिकारकव्यापारवैयर्थ्यम् , पिण्डावस्थायामपि घटदर्शनप्रसङ्गः। किञ्च

१. 'संबद्धश्च सर्वव्यवहार' इति पा.। २. 'अभावस्य भावापत्तिः' इति पा.। ३. अत्र मुद्रिते रा.पुस्तके भाष्येऽपि 'ननु घटस्यैव' इत्यादिः पाठो दृश्यते। स प्रामादिको वा स्यात् , न नु इति पृथक्कृत्य योजनीयो वा स्यात्। अस्माभिस्तु व्याख्याने लेखकप्रमादं संभाव्य कोष्ठके स्पष्टतायै 'न त्विति' इति पाठः स्थापितः।

**सांख्यस्यापि यः परिणामपक्षः, सोऽपि अपूर्वधर्मोत्पत्तिविनाशाङ्गीकरणाद् वैशेषिकपक्षाद् न विशिष्यते। अभिव्यक्तितिरोभावाङ्गीकरणेऽप्यभिव्यक्तितिरोभावयोः विद्यमानत्वाविद्यमानत्वनिरूपणे पूर्ववदेव प्रमाणविरोधः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

वैशेषिकपक्षोक्तं दोषं साङ्ख्यपक्षेऽप्यतिदिशति—**सांख्यस्यापीति।** पृथुबुध्नोदराकारस्यासत एवोत्पत्तिः, पिण्डाकारस्य च सत एव नाश इत्यङ्गीकरणात् पूर्ववत् प्रमाणविरोध इत्यर्थः। ननु अपूर्वधर्मस्यासतः उत्पत्तिर्नाङ्गीक्रियते, किन्तु सत एवाभिव्यक्तिः। पूर्वरूप(पूर्व)स्यापि सत एव [न] नाशः। किन्तु तिरोधानभावमात्रमित्याशङ्क्याह—[**अभिव्यक्तीति।**]अभि-

आनन्दगिरिकृतव्याख्या

**आरम्भवादोक्तं दोषं परिणामवादेऽपि सञ्चारयति—**सांख्यस्येति। धर्मः **परिणामः। असतोऽपूर्वपरिणामस्योत्पत्तेः, सतश्च पूर्वपरिणामस्य नाशाद् 'असदसदेव सच्च सदेव' इति व्यवस्थाऽत्रापि दुर्घटेत्यर्थः। ननु कार्यं कारणात्मना प्रागपि सदेवाव्यक्तं कारकव्यापाराद् व्यज्यते, तेन व्यक्त्यव्यक्त्योर्जन्मनाशव्यवहारान्मतान्तराद् विशेषसिद्धिः, तत्राह—**अभिव्यक्तीति। **कारकव्यापारात्प्रागनभिव्यक्तिवद् अभिव्यक्तेः सत्त्वम्, असत्त्वं वा? सत्त्वे कारकव्यापारवैयर्थ्यात् तद्विषयप्रमाणविरोधः, द्वितीये पक्षान्तरवदत्यन्तासतः तन्निर्वर्त्यत्वायोगे स एव दोषः। कारकव्यापारादूर्ध्वं व्यक्तिवदव्यक्तेरपि सत्त्वे स एव दोषः, असत्त्वेऽपि सतोऽसत्त्वानङ्गीकारान्मानमेयव्यवहारे न क्वापि**

भाष्यार्कप्रकाशः

घटभावापत्तेः प्रागेव घटस्य सतो द्रव्यस्य पुनर्घटभावापत्तिरित्ययुक्तम्। घटभावापत्तेः प्रागपि घटो वर्तत इति चायुक्तम्, घटभावापत्तेः प्राग् द्रव्यस्य घटस्यैवाभावादिति।

न च – घट उत्पत्तेः प्राक् मृद्रूपेण वर्तत इति सत्कार्यवादसिद्धिरिति – वाच्यम्; उत्पत्तेः प्राग् घटस्यैवानिष्पत्त्या कुतः पुनस्तस्य मृद्रूपेणावस्थानम्? यं मृद्रूपेण वर्तत इति त्वं ब्रूषे, न हि स घट उत्पत्तेः प्राक् सिद्धः। तस्माद् घटोत्पत्तेः प्राक् मृदेवास्ति, न तु मृद्रूपेण घटः इति प्रमाणविरुद्ध एव सत्कार्यवादः।

**नन्वेवं** सत्कार्यवाददूषणात् किं ते फलमिति चेद्? **उच्यते**— उत्पत्तेः प्रागप्यात्मवस्तुनि क्रियाऽस्तीति सत्क्रियस्यात्मनः कर्मणामशेषतस्त्यागासम्भव इत्येवंरूपसत्कार्यवादिहृदयस्य निर्भेदनमेव फलम्।

एवं सत्कार्यवादे आरम्भवादं दूषयित्वा परिणामवादं दूषयति—**साङ्ख्यस्येति**। मृदेव कारकव्यापारवशाद् घटात्मना परिणमत इति साङ्ख्याः। नास्मिन् मते आरम्भवादवत् कारकव्यापारनैरर्थक्यम्, नाप्यसत्कार्यवादवदसतः सद्भावापत्तिरूपो विरोध इति भावः। दूषयति—**सोऽपीति**। परिणामपक्षोऽपि वैशेषिकपक्षान्न विशिष्यते। कुतः? **अपूर्वधर्मोत्पत्तितन्नाशाङ्गीकरणात्।** अपूर्वधर्मो मृदो घटाद्याकारेण परिणामः पूर्वमविद्यमानः। तस्योदयनाशयोरङ्गीकाराद् असतः सत्ता सतश्चासत्तेति दोषद्वयं प्राप्तमिति भावः। ननु कार्यं कारणात्मना प्रागपि सदेवाव्यक्तं कारकव्यापारेणाभिव्यज्यत इत्यत्राह—**अभिव्यक्तीति।**

अयं भावः—उत्पत्तेः प्रागपि घटः सूक्ष्मरूपेणानभिव्यक्तनामरूपतया मृद्यस्त्येव। अनभिव्यक्तत्वादेव तदा तस्यादर्शनम्। तदभिव्यक्त्यर्थं च कारकव्यापारः इति यदि ब्रूषे, तर्हि कारकव्यापारवशात् सूक्ष्मेऽनभिव्यक्ते घटे जायमानोऽभिव्यक्तिरूपः स धर्मः किमुत्पत्तेः प्रागस्ति, उत नास्ति? आद्ये, उत्पत्तेः प्रागेव सतः पुनरुत्पत्त्ययोगः। द्वितीये तु, असत्कार्यवादप्रसङ्गः। न च सोऽप्यभिव्यक्तिरूपधर्म उत्पत्तेः प्राक् सूक्ष्मरूपेणानभिव्यक्तःसन्नस्तीति वाच्यम्; अनवस्थादिदोषप्रसङ्गात्। एवं तिरोभावेऽप्यूह्यमिति।

**ननु** वैशेषिकपक्षादेव न विशिष्यत इति कुत उक्तम्, सत्कार्यवादपक्षादपि न विशिष्यत इति वक्तव्यत्वादिति चेत्, **मैवम्,** सत्कार्यवादस्यापि वैशेषिकैकदेश्यभिमतत्वात्। अत एवोक्तम्— ननु नैवास्माभिरिति। **ननु** न वयमपूर्वाभिव्यक्तिधर्मोत्पत्तिं ब्रूमः येनोक्तदोषः स्यात्। किं तर्ह्यनभिव्यक्तितिरोभावं ब्रूम इति चेत्, **मैवम्,** अभिव्यक्ते घटे जायमानः सोऽप्यनभिव्यक्तितिरोभावः किमुत्पत्तेः प्रागस्ति, उत नास्ति? आद्ये, उत्पत्तिवैयर्थ्यम्। द्वितीये तु, असत्कार्यवादप्रसङ्गः। न च – अनभिव्यक्तितिरोभावस्योत्पत्तेः प्रागसत्त्वेऽपि नासतः सद्भावापत्तिरूपदोषप्रसङ्गः, कार्यकारणावस्थाद्वयेऽप्यसत्त्वादिति – वाच्यम्; अवस्थाद्वयेऽप्यसतोऽनभिव्यक्ति-

**एतेन कारणस्यैव संस्थानमुत्पत्त्यादीत्येतदपि प्रत्युक्तम्। पारिशेष्यात् सदेकमेव वस्तु अविद्ययोत्पत्तिविनाशादिधर्मैः नटवदनेकधा विकल्प्यत इतीदं भागवतं मतमुक्तं 'नासतो विद्यते भावः' (भ.गी.२.१६) इत्यस्मिञ्श्लोके—**

अनुभूतिस्वरूपाचार्यटिप्पणम्

व्यक्तितिरोभावयोरपि सत्त्वे [सत्त्वेऽसत्त्वे वा न जन्म,] नरविषाणवदित्यर्थः।(?).....एकदेशिमते व्यप[ऽप्यति]दिशति—**एतेनेति**। संस्थानस्यापि सत्त्वेऽसत्त्वे वा न जन्मेत्यर्थः॥४८॥

आनन्दगिरिकृतव्याख्या

**विश्वासः, सत् सदेव असदसदेवेत्यनिर्धारणादित्यर्थः। सांख्यपक्षप्रतिक्षेपन्यायेन पक्षान्तरमपि प्रतिक्षिप्तमित्याह—**एतेनेति। **कारणस्यैव कार्यरूपापत्तिरुत्पत्तिः, तस्यैव तद्रूपत्यागेन स्वरूपापत्तिर्नाशः इत्येतदपि न, पूर्वरूपे स्थिते नष्टे च परस्य पररूपापत्तेरनुपपत्तेः। न च प्राप्तं रूपं स्थितेन नष्टेन वा त्यक्तुं शक्यमित्यर्थः। [1]आरम्भवादे परिणामवादेषु चोत्पत्त्यादिव्यवहारानुपपत्तौ परिशेषायातं दर्शयति—**पारिशेष्यादिति। **एकस्यानेकविधविकल्पानुपपत्तिमाशङ्क्याह—**अविद्ययेति। **अस्यापि मतस्य भगवन्मतानुरोधित्वाभावाद् अविशिष्टा त्याज्यतेत्याशङ्क्याह—** इतीदमिति। **उक्तमेव भगवन्मतं विशदयति—**सत्प्रत्ययस्येति। **सदेकमेव वस्तु स्यादिति शेषः। इतरेषां**

भाष्यार्कप्रकाशः

तिरोभावस्य शशविषाणकल्पस्य सत्ताङ्गीकारे सर्वप्रमाणविरोधात्, तदनङ्गीकारेऽनभिव्यक्तितिरोभावस्यैवासिद्धेः।

**ननु** उदासीनपुरुषवादिनः साङ्ख्यस्य मतं निष्क्रियात्मवादिनः स्वस्योपयुक्तमेवेति कुतस्तत्खण्डनमिति चेद्? **उच्यते**—साङ्ख्याभिमतपरिणामपक्षाभ्युपगमे त्वात्मन्यनभिव्यक्ततया सूक्ष्मरूपेण वर्तमाना क्रिया कालादिवशादभिव्यज्यत इति सक्रियत्वमापद्येतात्मनः; ततश्च सर्वकर्मत्यागानुपपत्तिरिति। ननूत्पत्तिविनाशादयः सतो द्रव्यस्यावस्थाविशेषाः। तन्तुप्रभृतीनि हि सन्त्येव द्रव्याणि रचनाविशेषयुक्तानि पटादीन्युच्यन्ते। तत्र पूर्वावस्थस्य द्रव्यस्योत्तरावस्थाप्राप्तिर्विनाश[स्त]स्यैव तदवस्थस्योत्पत्तिरिति द्वैतिनो विशिष्टाद्वैतिनश्च ब्रुवन्ति; तन्मतस्य का गतिः? अत आह—**एतेनेति**। **संस्थानम्** अवस्थाविशेषः, आकारविशेष इति यावत्। **उत्पत्त्यादीत्यादिपदान्नाशग्रहणम्। प्रत्युक्तमिति**। किं पिण्डावस्थस्य मृद्द्रव्यस्य जायमाना घटावस्था प्रागुत्पत्तेरस्ति, उत नास्ति? आद्ये, सत्कार्यवादप्रोक्तकारकव्यापारवैयर्थ्यादिदोषप्रसङ्गः। द्वितीये तु , असत्कार्यवादप्रसङ्गः। तथा घटावस्थस्य मृद्द्रव्यस्य जायमानः कपालावस्थाप्राप्तिपूर्वको घटावस्थानाशः किमुत्पत्तेः प्रागस्ति, उत नास्ति? आद्ये, सत्कार्यवाददोषप्रसङ्गः। द्वितीये तु , असत्कार्यवादप्रसङ्ग इति भावः। अयमपि पक्षः साङ्ख्यपक्षवद् वैशेषिकपक्षान्न विशिष्यते, घटादिसंस्थानविशेषोत्पत्तितन्नाशयोर्विद्यमानत्वाविद्यमानत्वनिरूपणे पूर्ववदेव प्रमाणविरोधात्। ततश्च सत्कार्यवादोऽसत्कार्यवादश्चेति पक्षद्वयमेव व्यवस्थितम् , सर्वेषां पक्षाणां तत्रैवान्तर्भावात्। अस्मिंश्च पक्षद्वये दूषिते सति परिशेषन्यायात् कार्यं मिथ्येति पक्षस्तृतीयो निर्दुष्टः सिद्ध इत्याह—**पारिशेष्यादिति। नटवदिति**। यथा नट एक एव धर्मार्जुनकृष्णरामादिवेषैरनेकधा विकल्प्यते, तद्वदित्यर्थः।

अयं भावः— सच्चिदानन्दे ब्रह्मणि प्रतीयमानमिदं जगद् उत्पत्तेः प्राक् सदिति असदिति वा वक्तुमशक्यमेव। सदसदनिर्वाच्यत्वादेव जगन्मिथ्या। न चोत्पत्त्यनन्तरं जगदिदं सदिति निर्वाच्यमेवेति वाच्यम् ; तदाऽपि मृद्व्यतिरेकेण घटस्येव कारणब्रह्मव्यतिरेकेण जगतोऽभावान्मिथ्यात्वमेव। यथा रज्जुव्यतिरेकेणासतः सर्पाभासस्य मिथ्यात्वं सम्प्रतिपन्नम् , तद्वत्। एवं जगन्नाशोऽपि सदसदनिर्वाच्यः। ततश्च जगन्मिथ्या, तदुदयनाशौ च मिथ्या, तदुभयपूर्वकवृद्ध्यादिविकाराः अपि मिथ्या। जगतो वृद्धिः किमुत्पत्तेः प्रागस्ति, उत नास्ति? आद्ये, सत्कार्यवादप्रसङ्गः। द्वितीये त्वसत्कार्यवादप्रसङ्ग इति वृद्ध्यादीनामपि मिथ्यात्वात्। इमे च जगदुदयविनाशादयो मिथ्याकार्यभूता धर्मा आत्मन्यविद्यया कल्पिताः सद्रूपे ब्रह्मणि, नटे रामादिवेषा इव, रज्जौ सर्पदण्डाद्याकारा इव च। तस्मादात्मनि प्रतीयमानं सर्वमपि कार्य(धर्म)जातं मिथ्यैव। आत्मैक एव सत्यः, सद्रूपत्वात् , 'सदेव सत्य'मिति श्रुतेश्चेति भावः। न च – ब्रह्मापि किमुत्पत्तेः प्रागस्ति, उत नास्ति? उभयथा च दोषो दर्शित एवेति मिथ्यैवेति – वाच्यम् ; अकार्यत्वाद् ब्रह्मण उत्पत्त्याद्य-

१. आरम्भवादः वैशेषिकस्य, परिणामवादः सांख्यादेः।

**'सत्प्रत्ययस्याव्यभिचाराद् , व्यभिचाराच्चेतरेषाम्' इति।**

**कथं तर्हि आत्मनोऽविक्रियत्वेऽशेषतः कर्मणस्त्यागो नोपपद्यत इति? यदि वस्तुभूता गुणाः, यदि वा ऽविद्याकल्पिताः, तद्धर्मः कर्म, [1]तद् आत्मनि अविद्याध्यारोपितमेवेति अविद्वान् न हि कश्चित् क्षणमपि अशेषतस्त्यक्तुं शक्नोतीत्युक्तम्। विद्वांस्तु पुनर्विद्ययाऽविद्यायां निवृत्तायां शक्नोत्येवाशेषतः कर्म परित्यक्तुम् , अविद्याध्यारोपितस्य शेषानुपपत्तेः। न हि तैमिरिकदृष्ट्याऽध्यारोपितस्य द्विचन्द्रादेः तिमिरापगमे शेषोऽवतिष्ठते। एवं च सति इदं वचनमुप-**

आनन्दगिरिकृतव्याख्या

**विकारप्रत्ययानां रजतादिधीवदर्थव्यभिचाराद् अविद्यया तदेव सद्वस्तु अनेकधा विकल्प्यत इत्याह—**व्यभिचाराच्चेति। इति **मतं श्लोके दर्शितमिति सम्बन्धः।**

**आत्मनश्चेदविक्रियत्वं भगवतेष्टम् , तर्हि सर्वकर्मपरित्यागोपपत्तेः सहजस्यापि कर्मणस्त्यागसिद्धिरिति शङ्कते—**कथमिति। **किं कार्यकरणात्मनां गुणानामकल्पितानां कल्पितानां वा कर्म धर्मत्वेनेष्टम्? द्विधाऽपि निःशेषकर्मत्यागोऽविदुषो विदुषो वा? नाद्य इत्याह—** यदीत्यादिना। अविद्यारोपितमेव **गुणशब्दितकार्यकरणारोपद्वारा कर्मेति शेषः। द्वितीयं प्रत्याह—**विद्वांस्त्विति। **आरोपशेषवशाद् विदुषो ऽपि नाशेषकर्मत्यागसिद्धिरित्याशङ्क्याह—**अविद्येति। **तामेवानुपपत्तिं दृष्टान्तेन स्पष्टयति—**न हीति। **विदुषोऽशेषकर्मत्यागे पाञ्चमिकमपि**

भाष्यार्कप्रकाशः

भावात्। नित्यो हि निर्विकार आत्मा। न च सविकार इति वाच्यम् ; सविकारत्वे सति त आत्मविकाराः केनचिद् ग्रहीतव्याः स्युः। न चेष्टापत्तिः, स्वेन स्वविकाराणामग्राह्यत्वाद् नात्मग्राह्यत्वमात्मविकाराणाम्। नाप्यनात्मग्राह्यत्वम् , अनात्मनां जडत्वात्। न ह्यसाक्षिका आत्मविकारा अभ्युपगन्तव्याः। तस्मान्निर्विकारः सद्रूप एवात्मेति स एव सत्यः, अन्यत् सर्वं जगन्मिथ्यैव। श्रुतयोऽपि— 'तत्सत्यं स आत्मा तत्त्वमसि, यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्य'मित्याद्याः अमुमेवार्थं ब्रुवन्ति। स्मृतयश्च— 'ब्रह्म सत्यं जगन्मिथ्या' इत्यादयः। कारणमेव सत्यं, कार्यं मिथ्यैवेति 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य'मित्युपपत्तिमपि सदृष्टान्तं बोधयति श्रुतिः। ब्रह्मणः कारणत्वं, जगतः कार्यत्वं च 'यतो वा इमानि भूतानि जायन्ते', 'आत्मन आकाशः सम्भूतः' इत्यादिश्रुतयो दर्शयन्ति। 'अहं सर्वस्य प्रभवः' इत्यादिस्मृतयश्च। तस्मात् कारणं ब्रह्मैकमेव सत् सत्यं, कार्यं जगन्मिथ्यैवेतीदं भागवतं **श्रीकृष्णाभिमतम् अद्वैतं** मतम्। नन्वयमर्थः क्वोक्तः कृष्णेनेत्यत आह—**नासत इति**। किमुक्तम्? अत आह—**सत्प्रत्ययस्येति**। घटःसन् पटःसन् इत्येवं सर्वत्रानुगततया सत्प्रत्ययो न व्यभिचरति। घटादिप्रत्ययस्तु पटाद्यननुगतत्वाद् व्यभिचरति। यद्विषयः प्रत्ययो व्यभिचरति, तन्मिथ्या, यद्विषयः प्रत्ययो न व्यभिचरति, तत् सत्यम्। यथा सर्पाभासविषयप्रत्ययो व्यभिचरतीति सर्पाभासो मिथ्या, रज्जुविषयप्रत्ययो न व्यभिचरतीति रज्जुः सत्या, तथा सद्बुद्धेरव्यभिचारात् सद्ब्रह्म सत्यम् , जगद्बुद्धेर्व्यभिचाराद् जगन्मिथ्येति भावः।

ननु भवत्वेवं जगदुदयादिधर्माणां मिथ्यात्वादविक्रियत्वमात्मनः सत्यत्वं च, किं तेन प्रकृते फलम्? अत आह—**कथमिति**। तर्हीत्यस्यार्थमाह—**आत्मनोऽविक्रियत्वे सतीति**। अशेषतः कर्मणस्त्यागः कथं नोपपद्यत इत्यन्वयः। अपि तूपपद्यत एवेत्यर्थः। मिथ्याभूतानां क्रियाकारकफलानां कालत्रयेऽप्यात्मन्यभावादिति भावः। ननु यद्येवमशेषतः कर्मत्याग उपपद्यते, तर्हि 'न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः' इति कुत उक्तमिति शङ्कायाम् अविदुष एव सर्वकर्मत्यागासम्भवो, न तु विदुष इत्याह—**यदीति**। यदि गुणाः सत्त्वादयो[2]**ऽवस्तुभूता** मिथ्याभूताः, यदि वा अविद्याकल्पिताः, तद्धर्मः कर्म च यदि मिथ्या, यदि चाविद्याकल्पितम् , **तदा** तर्हि आत्मन्यविद्याध्यारोपितमेव तत् सर्वं गुणतत्कार्यजातमिति यो न वेत्ति सोऽविद्वान् कर्माशेषतस्त्यक्तुं न शक्नोति, तमुद्दिश्यैव – 'न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृद्' इति, 'न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः' इति चोक्तं भगवता।

**य इति**। विद्वान् स तु पुनरविद्यानिवृत्तेरशेषतः कर्म त्यक्तुं शक्नोत्येव। कुतः शक्नोति विद्वान्? अत आह—**अविद्येति**। अविद्यया अध्यारोपणम् आत्मन्यध्यासो यस्य तस्य क्रियाकारकफलसमुदायस्येत्यर्थः। अविद्याकर्तृकक्रियाकारकफलाध्यारोपस्येति

१. 'तदा' इति पा.। २. भाष्ये— 'यद्यवस्तुभूता गुणाः' इति रा.पा. इति भाति। अत्र मिथ्याभूतत्वाविद्याकल्पितत्वयोः भेदः कल्पनीयः।

## असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः।

**पन्नम् – 'सर्वकर्माणि मनसा' (भ.गी.५.१३) इत्यादि। 'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः' (भ.गी. १८.४५) 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः'(भ.गी.१८.४६) इति च ॥४८॥**

**या च कर्मजा सिद्धिरुक्ता ज्ञाननिष्ठायोग्यतालक्षणा, तस्याः फलभूता नैष्कर्म्यसिद्धिः ज्ञाननिष्ठालक्षणा[1] वक्तव्येति श्लोक आरभ्यते—** असक्तबुद्धिरिति। असक्ता **सङ्गरहिता** बुद्धिः **अन्तःकरणं यस्य सः** असक्तबुद्धिः सर्वत्र

आनन्दगिरिकृतव्याख्या

**वचोऽनुकूलमित्याह—**एवं चेति। **अविदुषः सर्वकर्मत्यागायोगे च प्रकृताध्यायस्थमेव वाक्यमनुगुणमित्याह—** स्वे स्व इति। **वाक्यान्तरमपि तत्रैवार्थे युक्तार्थमित्याह—**स्वकर्मणेति॥४८॥

**विदुषः सर्वकर्मत्यागेऽपि नाविदुषस्तथेत्युक्तम्। इदानीमुक्तमनूद्यानन्तरश्लोकतात्पर्यमाह—**या च कर्मजेति। **चोऽवधारणार्थो भिन्नक्रमो वक्तव्येत्यत्र सम्बध्यते[2]। साधनान्युपदिशन् नैष्कर्म्यसिद्धिं व्यपदिशति—**असक्तेति। **पुत्रादिविषये चेतसः सङ्गाभावेऽपि तस्या-**

भाष्यार्कप्रकाशः

वा। अविद्यायां निवृत्तायां तत्कार्यस्यावशेषोऽनुपपन्न इत्यर्थः। अनुपपत्तिमेव दृष्टान्तप्रदर्शनेन स्फुटयति—**न हीति**। अवशेषो नावतिष्ठत इत्यन्वयः। यद्यवशेषोऽवतिष्ठेत, तर्हि तिमिरेऽपनीतेऽपि द्विचन्द्रदर्शनं स्यात्, न तु तथाऽस्ति। तथा सति तिमिरापगमस्यैवासिद्धेः। नन्वेवं विदुषः सर्वकर्मत्यागः सम्भवतीति कुतो नोक्तं भगवतेत्यत आह—**एवं चेति**। 'सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी। नवद्वारे पुरे देहे नैव कुर्वन्न कारयन्॥' इति सर्वकर्मत्यागः प्रोक्त एव भगवतेति भावः। न च तद्वचनं विद्वद्विषयमिति, 'न हि देहभृते'ति वचनमविद्वद्विषयमिति च कुतो ज्ञायत इति वाच्यम्; वचनद्वयस्यैकाधिकारिपरत्वे व्याघाताद् भिन्नाधिकारिपरत्वं तावदवश्यमभ्युपेतव्यम्। तथा च सति अविद्यानिवृत्त्या विदुषः कर्मत्यागसम्भवः, तदनिवृत्त्या त्वविदुषस्तदसम्भव इति ज्ञायते। विद्यावान् हि विद्वान्; विद्या ह्यविद्याया निवर्तिका; अविद्यया ह्यात्मनि क्रियाकारकादिभेदप्रतीतिः। 'सच्चिदानन्दं ब्रह्माहमस्मी'त्येषा हि विद्या। 'कर्ता भोक्ता संसारी भिन्न ईश्वरादह'मित्येषा ह्यविद्या। एतदविद्यावान् पुरुषः सहजं कर्म न त्यजेत्, विद्यावांस्तु त्यजेदेवेति सिद्धः परमहंसपरिव्राजकस्य सर्वकर्मणामशेषतस्त्यागः। आत्मस्वरूपस्य निष्क्रियत्वात् परमहंसपरिव्राजकस्य तत्त्वविदश्चात्मत्वात् तत्त्वविदः सर्वकर्मपरित्यागोपपत्तिरिति।

**ननु** स्वस्मिन्नात्मन्यसतामेव कर्मणां कुतस्त्यागस्तत्त्वविदोऽपि सम्भवेत्? प्रसक्तिपूर्वको हि निषेध इति चेत्, **मैवम्;** अविद्यया स्वात्मनि प्रसक्तानां कर्मणां विद्यया त्यागसम्भवादिति।

यत्तु **रामानुजः**—ज्ञानयोग्योऽपि सहजं कर्मयोगं सदुःखमपि न त्यजेत्। ज्ञानारम्भाः कर्मारम्भाश्च दुःखेनावृता इति, **तत्तुच्छम्;** सर्वारम्भपरित्यागित्वं यदुक्तं गुणातीतलक्षणं तन्नैव सिद्ध्येद् यदि विद्वानपि कर्म न त्यजेत्। 'तरति शोकमात्मविद्' इति श्रुतेर्ज्ञानारम्भस्य सदुःखत्ववचनं चायुक्तम्। न च ज्ञानस्यादुःखत्वेऽपि तदारम्भस्य संन्यासादिलक्षणस्य सदुःखत्वमिति वाच्यम्; तस्यापि त्यागरूपत्वेनादुःखत्वात्। न हि गृहं निर्मातुर्यः श्रमः काष्ठादिसम्पादनरूपः, स तत्परित्यक्तुर्भवेत्। न च विदुषोऽपि रागत्यागो दुष्कर इति वाच्यम्; 'रसोऽप्यस्य परं दृष्ट्वा निवर्तते' इत्युक्तत्वेनात्मनि दृष्टे सति विदुषः स्त्र्यादिरागस्य सुत्यजत्वात्। तस्माद् द्रव्यार्जनपरिकरसम्पादनादिना कर्मारम्भ एव सदुःखः, न तु ज्ञानारम्भः। किञ्च गुणकर्मविभागप्रकरणेऽस्मिन् कोऽवकाशो ज्ञानयोगस्येति॥४८॥

**असक्तेति**। ननु दर्शितविधयेश्वरार्पणबुद्ध्या स्वस्वनियतकर्म कुर्वाणस्य ज्ञाननिष्ठाप्राप्तियोग्यत्वलक्षणचित्तशुद्धिरूपसंसिद्धिर्भवतीत्युक्तम्। तथा सिद्धस्य पुनः किं भवतीत्यत आह—**असक्तेति**। कर्मसिद्धिः कर्मयोगफलम्, चित्तशुद्धिरिति यावत्। सर्वत्रासक्त-

१. 'ज्ञाननिष्ठालक्षणा च' इति पा.। २. वक्तव्यैवेति संबन्धः इति यावत्।

## नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति॥४९॥

**पुत्रदारादिष्वासक्तिनिमित्तेषु** , जितात्मा **जितो वशीकृत** आत्माऽन्तःकरणं **यस्य स जितात्मा,** विगतस्पृहो **विगता** स्पृहा **तृष्णा देहजीवितभोगेषु यस्मात् स विगतस्पृहः, य एवम्भूत आत्मज्ञः स** नैष्कर्म्यसिद्धिं **निर्गतानि कर्माणि यस्माद् निष्क्रियब्रह्मात्मसम्बोधात् स निष्कर्मा, तस्य भावो नैष्कर्म्यम्** , **नैष्कर्म्यं च तत् सिद्धिश्च सा नैष्कर्म्यसिद्धिः,** [1]**नैष्कर्म्यस्य वा निष्क्रियात्मस्वरूपावस्थानलक्षणस्य** सिद्धिः **निष्पत्तिः, तां नैष्कर्म्यसिद्धिं** परमां **प्रकृष्टां कर्मजसिद्धि-विलक्षणां सद्योमुक्त्यवस्थानरूपां** संन्यासेन **सम्यग्दर्शनेन, तत्पूर्वकेण वा सर्वकर्मसंन्यासेन** अधिगच्छति **प्राप्नोति। तथा चोक्तम्— 'सर्वकर्माणि मनसा संन्यस्य, नैव कुर्वन् न कारयन् आस्ते'(द्र.भ.गी.५.१३) इति॥४९॥**

आनन्दगिरिकृतव्याख्या

**स्वाधीनत्वमाशङ्क्याह—**जितात्मेति। **असक्तिमुक्त्वा स्पृहाभावं वदता पुनरुक्तिरिष्टेत्याशङ्क्याह—**देहेति। **उक्तमनूद्य तत्फलं लम्भयति—**य एवमिति। **कर्मणां निर्गतौ हेतुमाह—**निष्क्रियेति। **सम्यग्ज्ञानार्थत्वेन नैष्कर्म्यसिद्धिशब्दं व्याख्यायार्थान्तरमाह—**नैष्कर्म्यस्येति। **प्रकर्ष-मेव प्रकटयति—**कर्मजेति। **संन्यासस्य श्रुतिस्मृत्योः सम्यग्दर्शनत्वाप्रसिद्धेरयुक्तं तादात्म्यमित्याशङ्क्य पक्षान्तरमाह—**तत्पूर्वकेणेति। **संन्यासान्नैष्कर्म्यप्राप्तिरित्यत्र वाक्योपक्रमानुकूल्यमाह—**तथा चेति॥४९॥

भाष्यार्कप्रकाशः

बुद्धिर्जितात्मा विगतस्पृहश्च पुरुषः संन्यासेन परमां नैष्कर्म्यसिद्धिमधिगच्छति। कर्मभिश्चित्ते शुद्धे सति पुरुषस्य पुत्रदारादिषु सर्वत्र बुद्धेरसङ्गो भवति; ततश्च मनसो वशीकरणं भवति; ततश्च देहजीवितादिषु निस्पृहत्वं सिध्यति। ततश्च सम्यग्दर्शनेन सर्वकर्मसंन्यासं कृत्वा नैष्कर्म्यसिद्धिं प्राप्नोतीत्यर्थः। नैष्कर्म्यसिद्धिपदं व्याकरोति—**निर्गतानीत्यादिना**। निष्क्रियं ब्रह्मैवात्मेति बोधो यस्य स निष्क्रिय-ब्रह्मात्मबोधस्तस्मान्निष्क्रियब्रह्मात्मबोधादिति यस्मादित्यस्य विशेषणम्। निष्क्रियब्रह्मात्मबोधाद्धेतोरिति वा। **स इति**। निष्क्रिय-ब्रह्मात्मबोधवान् पुरुष इत्यर्थः। न हि तूष्णीं वर्तमानः पुरुषो निष्कर्मेत्युच्यते, तूष्णीं वर्तनस्यापि क्रियात्वात्। किन्तु निष्क्रियं ब्रह्मै-वाहमिति य आत्मानं वेत्ति स तत्त्वविदेव निष्कर्मा, निष्क्रियस्यात्मन एव तत्त्ववित्त्वात् तत्त्वविद एव निष्क्रियात्मस्वरूपत्वाच्च। तस्य निष्कर्मणो निष्क्रियस्य तत्त्वविदो भावो नैष्कर्म्यम् , निष्क्रियात्मस्वरूपेणावस्थानमित्यर्थः। सिद्धिर्गतिः। फलमिति यावत्। नैष्कर्म्य-रूपा सिद्धिर्नैष्कर्म्यसिद्धिः, नैष्कर्म्यं च तत्सिद्धिश्चेति कर्मधारयः। नैष्कर्म्यमिति सिद्धिर्नैष्कर्म्यसिद्धिरिति सम्भावनापूर्वपदकर्मधारयमाहु-रिममेव समासम्। न हि शास्त्रे 'विशेषणं विशेष्येण बहुल'मिति सूत्रकृतसमासातिरिक्तः कश्चन सम्भावनापूर्वपदोऽवधारणपूर्वपदो वा कर्मधारयोऽस्ति। तस्माद्विशेषणसमास एवायम्। अत एवोक्तम्—नैष्कर्म्यं च तत्सिद्धिश्चेत्याचार्यैः। नैष्कर्म्यरूपा तत्सिद्धिरिति तु फलितार्थकथनम्। समासान्तरमाह—**नैष्कर्म्यस्य सिद्धिरिति। निष्पत्तिरिति**। प्राप्तिरिति यावत्। उभयथाऽपि निष्क्रियात्मस्वरूपा-वस्थानस्यैव फलत्वम्। नैष्कर्म्यसिद्धेः कुतः परमत्वम्? अत आह—**कर्मजेति**। कर्मजसिद्धिश्चित्तशुद्धिस्तद्विलक्षणत्वादियं सिद्धि-रुत्कृष्टेत्यर्थः। ननु मोक्षलक्षणसिद्धेरितोऽप्युत्कृष्टायाःसत्त्वात् कथमस्याः परमत्वम् , अत आह—**सद्योमुक्तीति**। सद्य एव मुक्तिर्यस्मात् तत् सद्योमुक्ति, तच्च तदवस्थानं सद्योमुक्त्यवस्थानं तद्रूपाम्। निष्क्रियात्मस्वरूपावस्थानात् सद्य एव मुक्तिर्भवतीत्यर्थः। सद्योमुक्तिरूपं यदवस्थानं तद्रूपामिति वा। निष्क्रियात्मस्वरूपावस्थानमेव सद्योमुक्तिरित्यर्थः। **सद्योमुक्ति**र्जीवन्मुक्तिरित्यर्थः। सद्योमुक्तिरूपामिति पाठः समीचीनः। धातूनामनेकार्थत्वादाह—**संन्यासेन सम्यग्दर्शनेनेति**। परसिद्धार्थपरित्यागोऽनुचित इत्याह—**सर्वकर्मसंन्यासेनेति, तत्पूर्वकेणेति**। सम्यग्दर्शनपूर्वकेणेत्यर्थः। न ह्यविदुषः सर्वकर्मसंन्यासः सम्भवतीति भावः। ननु विदुषः सर्वकर्मसंन्यासेन नैष्कर्म्य-सिद्धिरिति कुत्रोक्तम्? अत आह—**तथा चोक्तमिति**। इहैवेति शेषः। आस्त इत्युक्तमित्यन्वयः। अनेन श्लोकेन — गृहस्थः पुरुषः कर्मयोगादीश्वराराधनात्मकाच्चित्तशुद्धिं प्राप्य, ततो दारापत्यगृहादिकं सर्वं परित्यज्य प्रव्रज्य, तत्त्वविदः समीपे वेदान्तशास्त्रश्रवणादिकं

---

१. 'नैष्कर्म्यस्य वा सिद्धिः' इति पा.।

**सिद्धिं प्राप्तो यथा ब्रह्म तथाऽऽप्नोति निबोध मे।**
**समासेनैव कौन्तेय ! निष्ठा ज्ञानस्य या परा॥५०॥**

**पूर्वोक्तेन स्वकर्मानुष्ठानेनेश्वराभ्यर्चनरूपेण जनितां प्रागुक्तलक्षणां सिद्धिं प्राप्तस्य उत्पन्नात्मविवेकज्ञानस्य केवलात्मज्ञाननिष्ठारूपा नैष्कर्म्यलक्षणा सिद्धिर्येन क्रमेण भवति, तद् वक्तव्यमित्याह—** सिद्धिमिति। सिद्धिं प्राप्तः **स्वकर्मणेश्वरं समभ्यर्च्य तत्प्रसादजां कायेन्द्रियाणां ज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं प्राप्तः। सिद्धिं प्राप्त इति तदनुवाद उत्तरार्थः। किं तदुत्तरं यदर्थोऽनुवाद इति? उच्यते।** यथा **येन प्रकारेण ज्ञाननिष्ठारूपेण** ब्रह्म **परमात्मानम् आप्नोति** तथा **तं प्रकारं ज्ञाननिष्ठाप्राप्तिक्रमं** मे **मम वचनाद्** निबोध **त्वं निश्चयेनावधारयेत्येतत्। किं विस्तरेण? नेत्याह—** समासेनैव **संक्षेपेणैव, हे कौन्तेय ! यथा ब्रह्म प्राप्नोति तथा निबोधेति अनेन या प्रतिज्ञाता ब्रह्मप्राप्तिः, ताम् इदन्तया दर्शयितुमाह— निष्ठा ज्ञानस्य या परेति।**

निष्ठा **पर्यवसानम् , परिसमाप्तिरित्येतत्। कस्य? ब्रह्मज्ञानस्य या परा परिसमाप्तिः। कीदृशी सा? यादृशम्**

आनन्दगिरिकृतव्याख्या

**ज्ञानप्राप्तियोग्यतावतो जातसम्यग्धियः तत्फलप्राप्तौ मुक्तावुक्तायां वक्तव्यशेषो नास्तीत्याशङ्क्याह—**पूर्वोक्तेनेति। [1]**क्रमाख्यं वस्तु** तदित्युच्यते। **सिद्धिं प्राप्त इत्युक्तमेव कस्मादनूद्यते? तत्राह—**तदनुवाद इति। **उत्तरमेव प्रश्नपूर्वकं स्फोरयति—**किं तदित्यादिना। **ज्ञान-निष्ठाप्राप्तिक्रमस्य विस्तरेणोक्तौ दुर्बोधत्वमाशङ्क्य परिहरति—**किमिति। **चतुर्थपादस्य पूर्वेणासङ्गतिमाशङ्क्याह—**यथेति।

**निष्ठायाः सापेक्षत्वात् प्रतिसम्बन्धि प्रतिनिर्देष्टव्यमित्याह—**कस्येति। **या ब्रह्मज्ञानस्य परा निष्ठा सा प्रकृतस्य ज्ञानस्य निष्ठेत्याह —**ब्रह्मेति। **तस्य परा निष्ठा न प्रसिद्धेति कृत्वा साधनानुष्ठानाधीनतया साध्येति मत्वा पृच्छति—** कीदृशीति। **प्रसिद्धमात्मज्ञानमनुरुध्य**

भाष्यार्कप्रकाशः

कृत्वा निष्क्रियं ब्रह्माहमस्मीति सम्यग्दर्शनं सम्पाद्य, ततः परमहंसपरिव्राजको भूत्वा सर्वं कर्माशेषतः संन्यस्य, निष्क्रियात्म-स्वरूपावस्थानलक्षणां सद्योमुक्तिं प्राप्य यावद्देहपातमात्मारामो वर्तेतेति—दर्शितम्। अस्य च जीवन्मुक्तस्य देहान्ते विदेहकैवल्य-लक्षणब्रह्मप्राप्तिरुत्तरश्लोके वक्ष्यते— ब्रह्म प्राप्नोतीति। एवं स्थिते कर्मयोगादेव ब्रह्मप्राप्तिरिति वदतो **रामानुजस्य** अहो ! साहसम् ॥४९॥

**सिद्धिमिति।** श्लोकमवतारयति—**पूर्वोक्तेनेति। प्रागुक्तलक्षणामिति।** चित्तशुद्धिलक्षणामित्यर्थः। ज्ञाननिष्ठाप्राप्तियोग्यतालक्षणा-मिति यावत्। **तद्वक्तव्यमिति।** स क्रमो वक्तव्य इत्यर्थः। कर्मजसिद्धिं प्राप्तस्य नैष्कर्म्यसिद्धिप्राप्तिर्येन क्रमेण भवति, तं क्रमं वक्ष्यामि शृण्विति प्रतिजानाति 'सिद्धि'मिति श्लोकेन भगवानिति भावः। **तदनुवादः** सिद्धिप्राप्त्यनुवादः उत्तरार्थ इत्युक्ते पृच्छति—**किं तदुत्तरमिति।** प्रत्याह—**यथेत्यादि।** ब्रह्मप्राप्तिहेतुभूतज्ञाननिष्ठाप्राप्तिक्रमप्रदर्शनम् उत्तरम् , तदर्थः उत्तरार्थ इत्यर्थः। ज्ञाननिष्ठाप्राप्तिक्रम उत्तरमिति वा। तथापि पूर्वोक्त एव पर्यवसन्नोऽर्थः। **इदंतयेति।** इयं ब्रह्मप्राप्तिरिति बोधयितुमित्यर्थः। या ज्ञानस्य परा निष्ठा सेयमेव ब्रह्मप्राप्तिरित्यर्थः। ब्रह्मज्ञानस्य मोक्षैकफलत्वान्मोक्षस्य च ब्रह्मप्राप्तिरूपत्वाज्ज्ञानस्य पर्यवसानं ब्रह्मप्राप्तिरेव। साधनस्य साध्यं फलमेव हि पर्यवसानमिति भावः। हे कौन्तेय ! सिद्धिं प्राप्तो यथा ब्रह्म प्राप्नोति तथा समासेनैव मे वचनान्निबोध। या ज्ञानस्य परा निष्ठा भवतीति श्लोकस्यान्वयः। कर्मजसिद्धिं प्राप्तस्य पुरुषस्य ब्रह्मज्ञानस्य परा निष्ठा ब्रह्मप्राप्तिः यया ज्ञाननिष्ठया भवति, सा नैष्कर्म्यलक्षणा ज्ञाननिष्ठा येन क्रमेण प्राप्यते, तं ज्ञाननिष्ठाप्राप्तिक्रममहं वक्ष्यामि, हे कौन्तेय ! त्वं सावधानो भवेति श्लोकस्य सारार्थः।

ननु या ब्रह्मज्ञानस्य परा निष्ठा सैव ब्रह्मप्राप्तिरित्युक्तम् , सा निष्ठा कीदृशीति पृच्छति—**सा कीदृशीति।** उत्तरयति—**यादृशम्**

१. भाष्ये— 'येन क्रमेण भवति, स वक्तव्यः' इति पठितव्ये 'तद् वक्तव्य'मिति कथमित्याशङ्कानिरासार्थमुक्तम्— क्रमाख्यं वस्तु इति।

**आत्मज्ञानम्। कीदृक् तत्? यादृश आत्मा। कीदृशोऽसौ? यादृशो भगवतोक्तः, उपनिषद्वाक्यैश्च, न्यायतश्च।**

**ननु विषयाकारं ज्ञानम्। न [1]विषयः, नाप्याकारवान् आत्मेष्यते क्वचित्। ननु 'आदित्यवर्णम्'(श्वे.उ.३.८)**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ब्रह्मज्ञानस्य परिनिष्ठा[2] नामावगतिपर्यन्तता। सा चावगतिर्ज्ञानानुरूपा। ज्ञानं चात्मानुरूपम्। आत्मा च 'न जायते म्रियते वे'त्यादिशास्त्रे निरवयवत्वादिन्यायतश्चाविक्रियः सिद्ध इत्युक्तम्। तदिदानीमात्मज्ञानस्य प्रयत्नादिविषयत्वोपपादनाय साकारत्वं निराकरोति सिद्धान्ती— **ननु विषयाकारमिति।** अविषयत्वान्निराकारत्वाच्चात्मनो न तज्ज्ञानं साकारम्। अतः कथं प्रयत्नस्य विषय इत्यर्थः। नन्विति अहो इत्यस्मिन्नर्थे, न तु पूर्वपक्षोपक्रमार्थः। एकदेशिमतमनूद्य दूषयति—**नन्वादित्ये-त्यादिना।** 'अस्थूलमनण्वि'त्यादिना आत्मनो द्रव्याद्याकारप्रतिषेधे सति तमस्त्वं प्राप्तम् , अतस्तद्व्यावृत्त्यर्थं ज्योतिष्ट्वाभि-

आनन्दगिरिकृतव्याख्या

**ब्रह्मज्ञाननिष्ठा सुज्ञानेत्याह—**यादृशमिति। **तत्रापि प्रसिद्धिरसिद्धेति शङ्कते—**कीदृगिति। **'अर्थेनैव विशेषो ही'ति न्यायेनोत्तरमाह—**यादृश इति। **तस्मिन्नपि विप्रतिपत्तेरप्रसिद्धिमभिसन्धाय पृच्छति—**कीदृश इति। **भगवद्वाक्यान्युपनिषद्वाक्यानि चाश्रित्य परिहरति—**यादृश इति। **'न जायते म्रियते वा' इत्यादीनि वाक्यानि। कूटस्थत्वमसङ्गत्वमित्यादि न्यायः।**

**ज्ञानस्य विषयाकारत्वाद् , आत्मनश्चाविषयत्वादनाकारत्वाच्च तदाकारज्ञानायोगाद् आत्मप्रसिद्धावपि नात्मज्ञानप्रसिद्धिरिति शङ्कते—** नन्विति। **आकारवत्त्वमात्मनः श्रुतिसिद्धमिति सिद्धान्ती शङ्कते—** नन्वादित्येति। **उक्तवाक्यानामन्यार्थत्वदर्शनेन पूर्ववादी**

भाष्यार्कप्रकाशः

**इति।** यादृशमात्मज्ञानं तादृशी ब्रह्मज्ञानस्य परा निष्ठा, ब्रह्मज्ञानस्यैव ब्रह्मप्राप्तिरूपत्वादिति भावः। कीदृक् तदिति पृच्छति—**कीदृशम् इति।** उत्तरयति—**यादृश आत्मेति।** आत्मा यादृशः, आत्मज्ञानं तादृशमेव, ज्ञानस्य विषयाकारत्वादिति भावः। ननु कीदृश आत्मेति पृच्छति। उत्तरयति—**यादृश इति।** भगवता गीताभिरुपनिषद्वाक्यैश्चात्मा यादृश इत्युक्तः, न्यायतश्चात्मा यादृश इति निर्णेतुं शक्यः, तादृश एवात्मेत्यर्थः। कूटस्थासङ्गस्वप्रकाशानन्दस्वरूप इति भावः।

ननु 'न जायते म्रियते' इत्यादिवाक्यैर्न्यायतश्चात्मनः प्रसिद्धावपि नात्मज्ञानस्य सिद्धिः, आत्मनोऽविषयत्वादनाकारत्वाच्चेति शङ्कते— **नन्विति।** ज्ञानं **विषयाकारं** विषयस्य घटादेराकार इवाकारो यस्य तत् तथोक्तं, भवतीति शेषः। विषयाकारपरिणतबुद्धिवृत्ति-प्रतिफलितचैतन्यस्य ज्ञानत्वेन व्यवहारादिति भावः। भवतु , किं ततः? इत्यत्राह—**नेति।** क्वचिदपि वेदान्तशास्त्रे आत्मा विषय इति नेष्यते, आकारवानित्यपि नेष्यते। आत्मनो विषयत्वाभावे हेतुप्रदर्शनार्थम् 'आकारवान् ने'त्युक्तमाचार्यैः। आकारविशिष्टं वस्तु ज्ञानस्य विषयो भवति। तद्विषयाकारं च ज्ञानं च भवतीति निराकारस्यात्मनः कथं ज्ञानविषयत्वम्? न कथमपीति नात्मज्ञानसिद्धिरिति भावः।

न च 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति श्रुतेर्ज्ञानाकारस्यात्मनः कथं निराकारत्वमिति वाच्यम् ; तत्र ज्ञानपदस्य लाक्षणिकत्वेन चैतन्यपरत्वादात्मस्वरूपभूतं चैतन्यं निराकारमेव। वृत्तिज्ञानमेव हि साकारम्। न च निराकारमपि चैतन्यं भवतु ज्ञानस्य विषयः, आकाशादिवदिति वाच्यम् ; आकाशादेरवकाशादिमत्त्वेन साकारत्वात्। न च चैतन्यमपि गुणवत्त्वेन साकारमिति वाच्यम् ; निर्गुण-त्वात्। 'साक्षी चेता केवलो निर्गुणश्चे'ति हि श्रूयते। न च सुतरां ज्ञानाविषयत्वे कथमात्मनः सिद्धिरिति वाच्यम्। स्वप्रकाशत्वेनैव तत्सिद्धेः। सर्वस्यापि अनात्मवर्गस्य सिद्धेरात्माधीनत्वाच्च। 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति श्रुतेः। न च – वृत्तिज्ञानमेव स्वप्रकाशं परप्रकाशकं चेति – वाच्यम् ; वृत्तेर्जडत्वात् , तत्प्रतिफलितचैतन्यस्य च बिम्बचैतन्यपरतन्त्रत्वात् ; बिम्ब-प्रतिबिम्बाभेदपक्षे तु वृत्तिज्ञानगतज्ञानांशस्य चैतन्यरूपत्वेन स्वप्रकाशत्वं तस्येष्टमेव।

**ननु** यदि घट इति ज्ञानमपि चैतन्येन भास्यते, तर्हि ज्ञानस्य ज्ञेयत्वमापतितं, तच्चानिष्टम् , अनवस्थादिदोषादिति चेत् , **मैवम्।**

---

१.'ज्ञानविषयः' इति पा.। २. 'परा निष्ठा' इति पा.संभाव्यते।

**'भारूपः' (छा.३.१४.२) 'स्वयञ्ज्योतिः' (बृ.उ.४.३.९) इत्याकारवत्त्वमात्मनः श्रूयते? न; तमोरूपत्वप्रतिषेधार्थत्वात् तेषां वाक्यानाम्। द्रव्यगुणाद्याकारप्रतिषेधे आत्मनः तमोरूपत्वे प्राप्ते तत्प्रतिषेधार्थानि 'आदित्यवर्णम्' इत्यादीनि वाक्यानि। 'अरूपम्' (क.उ.३.१५) इति च विशेषतो रूपप्रतिषेधात्। अविषयत्वाच्च— 'न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्' (श्वे.उ.४.२०) 'अशब्दमस्पर्शम्' (क.उ.३.१५) इत्यादेः। तस्माद् 'आत्माकारं ज्ञानम्' इत्यनुपपन्नम्।**

**कथं तर्ह्यात्मनो ज्ञानम्? सर्वं हि यद्विषयं यद् ज्ञानम् , तत् तदाकारं भवति। निराकारश्चात्मेत्युक्तम्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

धानम् , न त्वादित्यसमानरूपत्वप्रतिपादनार्थमित्युक्तम्। तत्रैव हेत्वन्तरमाह—**अरूपमिति चेति। सन्दृशे** सन्दर्शनगोचरे न रूपमस्य तिष्ठतीत्यर्थः। आत्माकारत्वासम्भवे कथं तज्ज्ञानं(त्वं) तवापीत्याह—**कथं तर्हि आत्मन इति।** अग्निव्याप्तोऽयः-

आनन्दगिरिकृतव्याख्या

**परिहरति—** नेत्यादिना। **संग्रहवाक्यं प्रपञ्चयति—** द्रव्येति। **इतश्चाकारवत्त्वमात्मनो नास्तीत्याह—** अरूपमिति। **यदात्मनो विषयत्वाभावात् तद्विषयं ज्ञानं न सम्भवतीत्युक्तम् , तदुपपादयति—**अविषयत्वाच्चेति। **आत्मनोऽविषयत्वे श्रुतिमुदाहरति—** नेत्यादिना। सन्दृशे **सम्यग्दर्शनविषयत्वाय** अस्य **आत्मनो रूपं न तिष्ठतीत्यर्थः। तदेव करणागोचरत्वेनोपपादयति—**नेति। **शब्दादिशून्यत्वाच्चात्मा विषयो न भवतीत्याह—**अशब्दमिति। **आत्मनो विषयत्वाकारवत्त्वयोरभावे फलितमाह—**तस्मादिति।

**ज्ञानस्यात्माकारत्वाभावे सत्यात्मज्ञानमिति व्यपदेशासिद्धिरित्येकदेशी शङ्कते—**कथं तर्हीति। **काऽत्रानुपपत्तिरित्याशङ्क्याह—** सर्वं हीति। **आत्मनोऽपि तर्हि विषयत्वेन ज्ञानस्य तदाकारत्वं स्यादित्याशङ्क्याह—**निराकारश्चेति। **आत्मनो विषयत्वराहित्यं चकारार्थः।**

भाष्यार्कप्रकाशः

चैतन्यावभासकवस्त्वन्तरानभ्युपगमेनानवस्थादोषाभावात् , चैतन्येतरस्य सर्वस्यापि ज्ञेयत्वाभ्युपगमाच्च, घट इति वृत्तिज्ञानस्यापि वृत्त्यंशे जडत्वेन ज्ञेयत्वसद्भावाच्च। तस्माच्चैतन्यैकस्वरूपत्वादात्मा निराकार एव। एवमात्मनो निराकारत्वमसहमानो द्वैती चोदयति—**नन्विति**। 'आदित्यवर्णं तमसः परस्ता'दिति श्रुतिः। आदित्यस्येव वर्णो यस्य तमादित्यवर्णम्। **भारूपः** तेजोरूपः। **स्वयञ्ज्योतिः** स्वत एव भासमानः। **आकारवत्त्वं** तेजोमयाकार इत्यर्थः।

पूर्वपक्षं परिहरति—**नेति**। नास्त्याकारवत्त्वमात्मन इत्यर्थः। तर्हि का गतिः श्रुतिवाक्यानाम्? अत आह—**तम इति**। संग्रहवाक्यं विवृणोति—**द्रव्येति**। **तमो**ऽन्धकारः, अज्ञानं वा। कथमिदं ज्ञायते? अत आह—**अरूपमिति**। अरूपमिति विशेषतो रूपं प्रतिषिध्यात्मनः सैव श्रुतिः कथं तेजोरूपत्वं ब्रूयात् तस्यैव? रूपवद्द्रव्यं हि तेज इति भावः। हेत्वन्तरमाह—**अविषयत्वाच्चेति**। यद्यात्मा सरूपः स्यात् तर्हि घटादिवच्चक्षुरादेर्विषय एव स्यात् , न तु तथाऽस्तीति भावः। उक्तार्थे श्रुतिं प्रमाणयति—**नेति**। अस्यात्मनो रूपं **दृशे** दृग्विषये न सन्तिष्ठति। **सन्दृशे** सम्यग्दर्शनविषये इति वा। **रूपं** सच्चिदानन्दलक्षणं स्वरूपमित्यर्थः। न तु शुक्लकृष्णादि , तस्य दृग्विषयत्वाभावायोगात्। एनमात्मानं कश्चन कोऽपि चक्षुषा न पश्यति नीरूपत्वादिति भावः। कश्चनेत्यनेन मनुष्याणां तददर्शनेऽपि देवानां तद्दर्शनं स्यादित्यपास्तम्। न चैवं रूपाभावेन चक्षुरविषयत्वेऽपि शब्दादिसद्भावाच्छ्रोत्रादिविषयत्वं स्यादात्मन इत्यत आह—**अशब्दमिति**। 'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च'ति श्रुतेः। पूर्वपक्षमुपसंहरति—**तस्मादिति**। ज्ञानस्याविषयत्वान्निराकारत्वाच्चात्मन इति तच्छब्दार्थः। **आत्माकारं ज्ञानमिति**। आत्मन आकार इवाकारो यस्य तदात्माकारं ज्ञानम् **इत्यनुपपन्नम्** अयुक्तम् , आत्मन आकाराभावेन ज्ञानस्यात्माकारत्वासम्भवादिति भावः।

ननु ज्ञानस्यात्माकारत्वं मास्तु , किं ततः? इत्यत आह—**कथमिति**। **तर्ही**त्यस्य ज्ञानस्यात्माकारत्वाभाव इत्यर्थः। आत्मनो ज्ञानं कथम्? ननु ज्ञानस्यात्माकारत्वाभावे आत्मज्ञानसिद्धेः काऽनुपपत्तिः? अत आह—**सर्वमिति**। हिः प्रसिद्धौ। हि यस्मादिति वा।

**ज्ञानात्मनोश्चोभयोर्निराकारत्वे कथं तद्भावनानिष्ठेति?**

**न; अत्यन्तनिर्मलत्वातिस्वच्छत्वातिसूक्ष्मत्वोपपत्तेरात्मनः, बुद्धेश्च आत्मसमनैर्मल्याद्युपपत्तेरात्मचैतन्याकाराभासत्वोपपत्तिः। बुद्ध्याभासं मनः, तदाभासानीन्द्रियाणि, इन्द्रियाभासश्च देहः। अतो लौकिकैर्देहमात्र एवात्मदृष्टिः क्रियते। देहचैतन्यवादिनश्च लोकायतिकाः 'चैतन्यविशिष्टः कायः पुरुषः' इत्याहुः। तथाऽन्य इन्द्रियचैतन्यवादिनः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

पिण्डः स यथोपचारेणाग्न्याकारः उच्यते, तथा आत्मचैतन्यव्याप्ताया बुद्धेर्वृत्तिरुपचारेणात्माकारोच्यते। ततो ज्ञानस्यात्माकारत्वासम्भवान्न यत्नसाध्यत्वस्य सम्भव इत्याह—**न, अत्यन्तनिर्मलत्वेत्यादिना।** बुद्ध्यादिकं व्याप्य आत्मचैतन्यस्फुरणमस्तीत्यत्र लिङ्गमाह—**ततो [अतो] लौकिकैरित्यादिना।**

आनन्दगिरिकृतव्याख्या

**आत्मवत् तज्ज्ञानस्यापि तर्हि निराकारत्वं भविष्यतीत्यत्राह—**ज्ञानेति। **तच्छब्देनात्मज्ञानं गृह्यते। तस्य** भावना **पौनःपुन्येनानुसन्धानं, तस्या** निष्ठा **समाप्तिः आत्मसाक्षात्कारदार्ढ्यम्। न चैतत् सर्वमात्मनो ज्ञानस्य वा निराकारत्वे सिध्यतीत्यर्थः।**

**ज्ञानात्मनोः साम्योपन्यासेन सिद्धान्ती समाधत्ते—** नेत्यादिना। **यथोक्तसाम्यानुसारादात्मचैतन्याभासव्याप्ता ज्ञानपरिणामवती बुद्धिः, साभासबुद्धिव्याप्तं मनः, साभासमनोव्याप्तानीन्द्रियाणि, साभासेन्द्रियव्याप्तः स्थूलो देहः। तत्र लौकिकभ्रान्तिं प्रमाणयति—**अत इति। **आत्मदृष्टेर्देहमात्रे दृष्टत्वात् तत्र चैतन्याभासव्याप्तिरिन्द्रियद्वारा कल्प्यते, इन्द्रियेषु च तद्दृष्टिदर्शनाच्चैतन्याभासवत्त्वं मनोद्वारा सिध्यति, मनसि चात्मदृष्टेश्चैतन्याभासवत्त्वं बुद्धिद्वारा लभ्यते, बुद्धौ चात्मदृष्टेरज्ञानद्वारा चैतन्याभाससिद्धिरित्यर्थः। देहे लौकिकमात्मत्वदर्शनं न्यायाभावादुपेक्षितमित्याशङ्क्याह—** देहेति। **तथापि कथमिन्द्रियाणां न्यायहीनमात्मत्वमिष्टमित्याशङ्क्याह—** तथेति। **तथापि**

भाष्यार्कप्रकाशः

यज्ज्ञानं यद्विषयं तत् सर्वं तदाकारं भवतीत्यन्वयः। घटविषयज्ञानस्य घटाकारत्वम् , पटविषयज्ञानस्य पटाकारत्वमित्येवं सर्वं ज्ञानं विषयाकारं भवतीत्यर्थः। तर्हि भवत्वेवमात्मविषयज्ञानमात्माकारम् , अत आह—**निराकारश्चेति**। चकारादविषयत्वमप्यात्मन उक्तमित्यर्थः। ननु विषयस्य साकारत्वे ज्ञानस्य साकारत्वमिव, विषयस्य निराकारत्वे ज्ञानस्यापि निराकारत्वमिति कृत्वा निराकारमेव स्यादात्मज्ञानमित्यत आह—**ज्ञानात्मनोरिति**। यद्यात्मा निराकारः, आत्मज्ञानं च निराकारम् , तर्हि तद्भावनानिष्ठा न सिध्येदित्यर्थः। **तस्य** आत्मज्ञानस्य **भावना** पौनःपुन्येनानुसन्धानं तस्या **निष्ठा** समाप्तिरात्मसाक्षात्कारदार्ढ्यं **तद्भावनानिष्ठा**। **इति**शब्दः पूर्वपक्षसमाप्तिवाची।

पूर्वपक्षं परिहरति सिद्धान्ती— **नेति**। आत्मज्ञानस्यासिद्धिरिति न वक्तव्यमित्यर्थः। कुतो न वक्तव्यम्? तत्राह—**अत्यन्तेति**। अत्यन्तनिर्मलोऽतिस्वच्छोऽतिसूक्ष्मश्चात्मा भवति; तथा बुद्धिरप्यत्यन्तनिर्मलाऽतिस्वच्छा सूक्ष्मा च भवति। आत्मनश्च चैतन्यमाकारः, न तु वृत्तिज्ञानम् ; बुद्धिश्चात्मचैतन्याकारेणाभासते, बुद्ध्यात्मनोः अन्योन्यतादात्म्याध्यासाद् बुद्धावात्मचैतन्याकाराध्यासः। ततश्चात्मचैतन्याध्यासवशाद् बुद्धिश्चेतनेवाभाति, तथा बुद्धिधर्माध्यासान्मनश्च बुद्धिवदाभासत इति बुद्ध्याभासं भवति। तन्मनोधर्माध्यासादिन्द्रियाण्यपि मनोवच्चेतनानीवाभासन्त इति मनआभासानीन्द्रियाणि। तदिन्द्रियधर्माध्यासाद् देहोऽपीन्द्रियवच्चेतन इवाभासत इतीन्द्रियाभासो देहः। **अत इति**। बुद्ध्यादिषु देहान्तेषु क्रमेण तारतम्येन चात्मचैतन्याकाराभाससत्त्वादित्यर्थः। देह एवात्मेति प्रतिपद्यन्ते लौकिकाः स्थूलोऽहमित्यादिप्रतीतेः। न केवलं लौकिकाः; किन्त्वागमविदोऽपि केचिदित्याह—**लोकायतिका इति**। बौद्धा इत्यर्थः। के ते? अत आह— **देहचैतन्यवादिन इति**। यच्चैतन्यमात्माकार इति वेदान्तिनो ब्रुवन्ति, तच्चैतन्यं देहस्यैवेति देहचैतन्यवादिन एते। तदेव स्फुटयन्नाह—**चैतन्येति**। चैतन्यविशिष्टो देह एवात्मेत्याहुः। मृतशरीरस्य पुरुषव्यवहाराभावादुक्तं चैतन्यविशिष्ट इति। लौकिकापेक्षया लोकायतिकानामयमेव विशेषः। केवलदेह एवात्मेति लौकिकाः, चैतन्यविशिष्टदेह एवात्मेति लोकायतिका इति।

**अन्ये मनश्चैतन्यवादिनः। अन्ये बुद्धिचैतन्यवादिनः। ततोऽप्यान्तरम् अव्यक्तम् अव्याकृताख्यमविद्यावस्थमात्मत्वेन प्रतिपन्नाः केचित्। सर्वत्र हि बुद्ध्यादिदेहान्ते आत्मचैतन्याभासताऽऽत्मभ्रान्तिकारणम् इत्यत[1] आत्मविषयं ज्ञानं न**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**अव्यक्ताख्यमिति।** जडरूपमहङ्कार इत्यर्थः। आत्मावगतेः सिद्धत्वादात्मज्ञानं चेत् प्रयत्नभाव्यं न भवति, कस्तर्हि

आनन्दगिरिकृतव्याख्या

**मनसो यदात्मत्वं तन्न्यायशून्यमित्याशङ्क्याह—**अन्य इति। **बुद्धेरात्मत्वमपि न्यायोपेतमिति सूचयति—**अन्ये बुद्धीति। **देहादौ बुद्ध्यन्ते परमात्मत्वबुद्धिर्नान्यत्रेति नियमं वारयति—**ततोऽपीति। **तत्र हि साभासेऽन्तर्यामिणि कारणोपासकानामात्मत्वधीरस्तीत्यर्थः। बुद्ध्यादौ देहान्ते लौकिकपरीक्षकाणामात्मत्वभ्रान्तौ साधारणं कारणमाह—**सर्वत्रेति। **आत्मज्ञानस्य [2]लौकिकपरीक्षकप्रसिद्धत्वादेव [3]विधिविषयत्वमपि परेष्टं परास्तमित्याह—**इत्यत इति। **ज्ञानस्य विधेयत्वाभावे किं कर्तव्यं द्रष्टव्यादिवाक्यैरित्याशङ्क्याह—**किं तर्हीति। **आत्म-**

भाष्यार्कप्रकाशः

अन्ये पुनरिन्द्रियाण्येवात्मेत्याहुरित्याह—**तथा चेति**। यदि देह एवात्मा स्यात् , तर्हि काणबधिरादिदेहस्यापि दर्शनश्रवणादिव्यवहारो भवेत्। तस्मान्न देह आत्मा; किन्त्विन्द्रियाण्येवात्मेत्यमीषां भावः। अन्ये तु मन एवात्मेत्याहुरित्याह—**अन्य इति**। यदीन्द्रियसङ्घ एवात्मा स्यात् तर्हि मनस्यन्याक्रान्ते सत्यपीन्द्रियाणां दर्शनादिव्यवहारः स्यात्। स्वप्नदशायामिन्द्रियाभावाद् रथगजदर्शनादिव्यवहारानुपपत्तिश्चेति नेन्द्रियाण्यात्मा, किन्तु मन एवात्मेत्येतेषामाशयः। अन्ये तु बुद्धिरेवात्मेत्याहुरित्याह—**अन्ये बुद्धीति**। बुद्धेरेव चैतन्यमिति वदितुं शीलं येषां ते बुद्धिचैतन्यवादिनः। यदि मन एवात्मा स्यात् तर्ह्यध्यवसायदशायामपि सङ्कल्पविकल्पौ स्यातां मनोधर्मत्वात् तयोर्मनस एवात्मत्वाच्च, ततोऽध्यवसायानुपपत्तिश्च। तस्मान्न मन आत्मा, किन्तु बुद्धिरेवात्मा, बुद्धेरेवात्मनः सङ्कल्पविकल्पकारणं करणं तु मनः; यथा रूपाद्युपलब्धिकारणं करणं चक्षुरादिकम् , तद्वदिति भावः। अन्ये त्वव्यक्तमेवात्मेति वदन्तीत्याह—**ततोऽपीति**। केचिदव्यक्तमात्मत्वेन प्रतिपन्ना इत्यन्वयः। अविद्यावस्थमज्ञानस्वरूपं कारणशरीरभूतकार्याज्ञानावस्थमिति वा। यदि बुद्धिरेवात्मा स्यात् तर्हि सुषुप्त्यनुभवो न स्यादात्मनो बुद्ध्यात्मनस्तदानीमभावादिति भावः।

यद्यपि पूर्वं बुद्धेरेवादावात्मचैतन्याकाराभासत्वमुक्तम् , नाव्यक्तस्य, तथाप्यव्यक्तस्यैवादावात्मचैतन्याध्यासाकारः, तदनन्तरं बुद्धेरिति बोध्यम्। **यद्वा** आत्मन उपाधिरविद्येति मतमाश्रित्य, केचिदव्यक्तमात्मचैतन्याभासाकारत्वादात्मेत्याहुरित्युक्तम्। आत्मन उपाधिर्बुद्धिरेवेति मतमाश्रित्य तु बुद्धावेवादावात्मचैतन्याकाराभास इत्युक्तमिति न विरोधः; अन्तःकरणावच्छिन्नं चैतन्यमात्मेति, अविद्यावच्छिन्नं चैतन्यमात्मेति च मतद्वयसत्त्वादिति भावः। अन्तःकरणस्यैवावस्थाविशेषौ बुद्धिर्मनश्चेति बोध्यम्।

ननु कस्मादेवं विविधं प्रतिपन्ना एकमेवात्मानं वादिनः? इत्यत आह—**सर्वत्रेति**। बुद्ध्यादिदेहान्तेषु सर्वेष्वप्यनात्मसु तत्तद्वादिनां दर्शिताया आत्मभ्रान्तेः कारणमात्मचैतन्याभासतैव। **आभासः** प्रतिफलनमध्यासो वा। बुद्ध्यादिषु य आत्मचैतन्याकारस्याभासः पूर्वं दर्शितः, स एव तेष्वात्मेति भ्रमं जनयत्यविवेकिनामित्यर्थः। आत्मचैतन्यस्याभासो येषामस्ति, येष्वस्तीति वा आत्मचैतन्याभासाः, तेषां भावस्तत्ता। आत्मचैतन्याभास इति यावत्। **ननु** भवत्वेवमज्ञानामनात्मस्वात्मभ्रमः, किं तत्कथनेन प्रकृतपूर्वपक्षस्येति चेत् , **उच्यते**—भ्रमेण तत्त्वेन वा कश्चिदात्मेति पदार्थः सिद्ध एव ज्ञात इति सिद्धमात्मज्ञानमिति। अन्यथा अज्ञातस्यात्मनः प्रसिद्ध्ययोगादिति। एवमात्मज्ञानस्य प्रसिद्धत्वादेव न विधेयत्वमित्याह—**अत इति। विधातव्यमिति**। विधातुमर्हं विधातव्यं, विधिविषय इत्यर्थः। न चैवं श्रुत्या 'आत्मा वा अरे द्रष्टव्यो मन्तव्यो निदिध्यासितव्यः' इति विधीयत आत्मज्ञानं तव्यप्रत्ययान्तशब्दैरिति वाच्यम् ; [4]विधिच्छायावचनत्वात् तेषाम्। ननु यद्येवमात्मज्ञानं न विधीयते, तर्हि किं विधीयते श्रोतव्यादि-वाक्यैः? अत आह—**किं तर्हीति**।

१. 'इत्यतश्च' इति पा.। २. शास्त्रन्यायादिजन्यबुद्धिमन्तः परीक्षकाः। तादृशबुद्धिमप्राप्ताः लौकिकाः। ३. अज्ञातविषयत्वाद् विधेरिति भावः। ४. विधिसदृशवचनत्वादित्यर्थः। द्रष्टव्यः इति तव्यप्रत्ययः अर्हार्थे इति भावः। श्रवणमनननिदिध्यासनानां वाचस्पत्युक्तरीत्या ज्ञानरूपत्वे तत्रापि अर्हार्थे तव्यप्रत्ययः। तेषां ज्ञानविजातीयचेतोवृत्तिरूपत्वे तु तत्र विधित्वमेवेति बोध्यम्।

**विधातव्यम्। किं तर्हि? नामरूपाद्यनात्माध्यारोपणनिवृत्तिरेव कार्या, नात्मचैतन्यविज्ञानं कार्यम् , अविद्याध्यारोपित-सर्वपदार्थाकारैरेव [1]विशिष्टतया गृह्यमाणत्वात्। अत एव हि विज्ञानवादिनो बौद्धाः विज्ञानव्यतिरेकेण वस्त्वेव नास्तीति प्रतिपन्नाः, प्रमाणान्तरनिरपेक्षतां च स्वसंविदितत्वाभ्युपगमेन। तस्मादविद्याध्यारोपण[2]निराकरणमात्रं ब्रह्मणि**

अनुभूतिस्वरूपाचार्यटिप्पणम्

पुरुषप्रयत्नस्य गोचर इत्याशङ्क्याह— **किं तर्हीत्यादिना।** 'अहं [अ]परोक्षो, घटोऽपरोक्ष' इति देहघटादीनां चैतन्यानुविद्धत्वेन स्फुरणाच्चिति कल्पितत्वम् । चित्प्रकाशश्चात्मा स्वतः सिद्ध इत्यत्र विज्ञानवादिनः सम्मतिं कथयति—**अत एवेत्यादिना।** किमिति तर्हि सर्वेषां प्राणिनां ब्रह्मज्ञानं न भवति? विपरीतं च 'ब्रह्म नास्ति, न प्रकाशते ब्रह्मे'ति कथं ब्रुवत इत्याशङ्क्याह—

आनन्दगिरिकृतव्याख्या

**ज्ञानस्याविधेयत्वे प्रागुक्तम्** अतः**शब्दितं हेतुं विवृणोति—**अविद्येति। **देहेन्द्रियमनोबुद्ध्यव्यक्तैरुपलभ्यमानैः सहोपलभ्यते चैतन्यम् , नान्यथा तेषामुपलम्भो जडत्वादित्यत्र विज्ञानवादिभ्रान्तिं प्रमाणयति—**अत एवेति। **सर्वं ज्ञेयं ज्ञानव्याप्तमेव ज्ञायते, तेन ज्ञानातिरिक्तं नास्त्येव वस्तु , सम्मतं हि स्वप्नदृष्टं वस्तु ज्ञानातिरिक्तं नास्ति इति ते भ्राम्यन्तीत्यर्थः। ज्ञानस्यापि ज्ञेयत्वाज्ज्ञातृ वस्त्वन्तरमेष्टव्यमित्याशङ्क्याह—**प्रमाणान्तरेति। **ज्ञानस्य स्वेनैव ज्ञेयत्वोपगमनेनातिरिक्तप्रमाणनिरपेक्षतां च प्रतिपन्नाः इति सम्बन्धः। ब्रह्मात्मनि ज्ञानस्य**

भाष्यार्कप्रकाशः

आत्मन्यविद्यया कृतं यन्नामरूपाद्यनात्माध्यारोपणम् , तन्निवृत्तिरेव कार्या। एवकारार्थमाह—**नात्मचैतन्यविज्ञानं कार्यमिति।** कुतो निवृत्तिरेव कार्येत्यत आह—**अविद्येति।** अविद्यया आत्मन्यध्यारोपिता ये बुद्ध्यादिसर्वपदार्थाकारास्तैर्विशिष्टतयैव आत्मचैतन्यस्य **गृह्यमाणत्वात्** ज्ञायमानत्वात्।

अयं भावः—लोकायतिकादयः सर्वेऽप्यात्मचैतन्यं देहाद्याकारविशिष्टत्वेन रूपेण प्रतिपद्यन्त इत्यस्त्येव सर्वेषामात्मचैतन्यप्रतिपत्तिः। सुतरामात्मज्ञानाभावे चैतन्यविशिष्टः काय आत्मेत्येवं वक्तुमशक्यत्वात्। अतः सिद्धमेवात्मज्ञानमिति नात्मज्ञानं साध्यम्। इदं चामीषामात्मज्ञानं भ्रान्तिरूपमेव, न प्रमारूपम् , निर्विशेषे आत्मनि सविशेष आत्मेति ज्ञानस्य भ्रमत्वात्। अयं तु भ्रमो नाशयितव्यः, अनर्थहेतुत्वादिति। निर्विशेषोऽप्यात्मा अविद्ययाऽध्यारोपिततत्तदाकारविशिष्टतयैव गृह्यतेऽतत्त्वविद्भिरित्यत्र विज्ञानवादिबौद्धभ्रान्तिं प्रमाणयति—**अत एवेति।** चैतन्यं केवलं केवलत्वादेव नोपलभ्यते। देहेन्द्रियादयस्तु जडत्वादेव नोपलभ्यन्ते, किं तर्हि? देहेन्द्रियमनोबुद्ध्यव्यक्तैरुपलभ्यमानैः सहैवोपलभ्यते चैतन्यम् , नान्यथेति यस्मात् सिद्धं तस्मादेवेत्यर्थः। **प्रतिपन्ना इति।** सर्वं ज्ञेयं ज्ञानव्याप्तमेव गृह्यते, तेन ज्ञानातिरिक्तं नास्त्येव वस्तु, सम्मतं हि ज्ञानातिरिक्तं स्वप्नदृष्टं वस्तु नास्तीत्येवं विज्ञानवादिनो भ्रान्तिं प्रतिपन्ना इत्यर्थः। ननु ज्ञानस्यापि ज्ञेयत्वाज्ज्ञातृ वस्त्वन्तरमेष्टव्यमित्याशङ्क्याह—**प्रमाणेति।** बौद्धाः ज्ञानस्य प्रमाणान्तरनिरपेक्षतां च प्रतिपन्ना इत्यन्वयः। कथं प्रतिपन्ना इत्यत्राह—**स्वेति।** ज्ञानस्य **स्वसंविदितत्वाभ्युपगमेन** स्वेनैव ज्ञेयत्वाङ्गीकारेण। ज्ञानं स्वैकवेद्यम्। अत एव स्वप्रकाशं स्वतः प्रमाणं चेति न प्रमाणान्तरापेक्षाऽस्ति ज्ञानस्येत्यर्थः।

**ननु** ज्ञानस्य स्वतःप्रमाणत्वादिकं वेदान्तिभिरप्यभ्युपगतम्। 'तस्मान्न विज्ञानमृतेऽस्ति किञ्चित् क्वचित् कदाचिद् द्विज ! वस्तुजातम्' इति पराशरमुनिना विज्ञानातिरिक्तवस्त्वभावोऽपीष्ट इति कृत्वा किमिति विज्ञानवादिनो बौद्धा भ्रान्ता इत्युच्यत इति चेत् , **उच्यते**—शृणु तद्विवेकम्। विज्ञानं नित्यमखण्डमेकरूपं स्वप्रभं ब्रह्म 'सत्यं ज्ञानमनन्त'मिति श्रुतेः। तस्माच्च चैतन्याद् ब्रह्मणो नास्त्यन्यः पदार्थः कोऽपि 'सर्वं खल्विदं ब्रह्मे'ति श्रुतेः सर्वस्य ब्रह्मणि कल्पितत्वात् कल्पितस्य चाधिष्ठानानतिरेकादिति पराशरमतम्। नात्र मते बाह्यार्थस्यापलापः, किन्तु प्रतिभासमाने सत्येव बाह्यार्थे घटादौ विज्ञानं चैतन्यं घटाद्याकारपरिणतबुद्धिवृत्तिप्रतिफलितं सद् घटाद्याकारं ज्ञानमित्युच्यते भ्रान्त्या, न तु वस्तुत इति पराशराद्यद्वैतिमतम्। विज्ञानवादिनां बौद्धानां तु क्षणिकमेव विज्ञानं तावद्वासनावैचित्र्याद् घटाकारमन्तर्जायते, तदेव बहिर्विषयवदवभासते, न तु कोऽपि बाह्यार्थोऽस्ति स्वप्नवज्जागरेऽपीति मतम्।

१.'अविशिष्टतया दृश्यमानत्वात्' इति पा.। २. 'ध्यारोपित' इति पा.।

**कर्तव्यम् , न तु ब्रह्मज्ञाने यत्नः, अत्यन्तप्रसिद्धत्वात्। अविद्याकल्पितनामरूपविशेषाकारापहृतबुद्धित्वाद्[1] अत्यन्तप्रसिद्धं सुविज्ञेयम् आसन्नतरम् आत्मभूतमपि, अप्रसिद्धं दुर्विज्ञेयम् अतिदूरम् अन्यदिव च प्रतिभाति अविवेकिनाम्। बाह्याकारनिवृत्तबुद्धीनां तु [2]लब्धगुर्वात्मप्रसादानां नातः परं सुखं सुप्रसिद्धं सुविज्ञेयं स्वासन्नतरमस्ति। तथा चोक्तम्**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**अविद्याकल्पितेति।** अविद्याकल्पितेन नामरूपविशेषाकारेण 'मनुष्योऽह'मित्याद्यत्वविरुद्ध(?)बुद्धित्वाद् नात्मभूतमपि ब्रह्म प्रकाशते। देहादिभ्यो व्यावृत्तबुद्धीनां तु प्रकाशत एवेत्यर्थः।

आनन्दगिरिकृतव्याख्या

**सिद्धत्वेनाविधेयत्वे फलितमाह—**तस्मादिति। यत्नोऽत्र **भावना। ब्रह्मणस्तज्ज्ञानस्य चात्यन्तप्रसिद्धत्वे कथं ब्रह्मण्यन्यथा प्रथा लौकिकानामित्यत्राह—**अविद्येति। **यथाप्रतिभासं दुर्विज्ञेयत्वादिरूपमेव ब्रह्म किं न स्यात्? तत्राह—**बाह्येति। गुरुप्रसादः **शुश्रूषया तोषितबुद्धेराचार्यस्य करुणातिरेकादेव 'तत्त्वं बुध्यता'मिति निरवग्रहोऽनुग्रहः,** आत्मप्रसादस्तु **अधिगतपदशक्तिवाक्यतात्पर्यस्य श्रौतयुक्त्यनुसन्धानादात्मनो मनसो विषयव्यावृत्तस्य प्रत्यगेकाग्रतया तत्प्रावण्यमिति विवेकः। आत्मज्ञानस्यात्मद्वारा प्रसिद्धत्वे वाक्योपक्रमं प्रमाणयति—**

भाष्यार्कप्रकाशः

**ननु** कथमिदं बौद्धमतमवद्यमिति चेत् , **उच्यते—**क्षणिकस्य विज्ञानस्य स्वसंवेद्यत्वानुपपत्तिः। उत्पत्तेः पूर्वक्षणे नाशादुत्तरक्षणे च ज्ञानं नास्ति, मध्यक्षण एव वर्तत इति हि क्षणिकं विज्ञानमित्युच्यते। तौ च ज्ञानस्योत्पत्तिनाशौ किं ज्ञानेन वेद्येते, उत न? आद्ये, व्याघातः, स्वोत्पत्तिनाशयोः स्वग्राह्यत्वायोगात्। न हि तत्काले स्वमस्ति। नान्त्यः, अवेद्ययोस्तयोरसाक्षिकत्वेनाभ्युपगमायोगात्। न च ज्ञानान्तरेण वेद्यत इति वाच्यम् ; स्ववेद्यत्वापायात्। ज्ञानान्तरस्यापि क्षणिकत्वेन प्रकृतज्ञानोदयनाशदर्शनासम्भवाच्च। तस्माद् यदि ज्ञानं क्षणिकमेवेत्यभिनिवेशस्तर्ह्यनन्यावभास्यमेव।

न च– अद्वैतमतेऽपि कथं नित्यत्वं ज्ञानस्य? 'घटज्ञानं मम नष्टम्' 'पटज्ञानं जात'मिति व्यवहारसत्त्वादिति– वाच्यम् ; घटादिविषयनाशादिप्रयुक्तत्वात् तद्व्यवहारस्य। एकस्मिन्नेवाखण्डे ज्ञाने एकस्मिन् क्षणे घटो विषयो भवति, क्षणान्तरे तु पट इति कृत्वा यदा घटो विषयस्तदा घटज्ञानं जातमिति,[यदा पटो विषयस्तदा पटज्ञानं जातमिति] च व्यवहार इति भावः।

**यद्वा** वृत्तेः क्षणिकत्वाद् वृत्तिज्ञानस्य क्षणिकत्वव्यवहारः, वृत्तिप्रतिफलितचैतन्यस्यैव वृत्तिज्ञानत्वात्। सा च वृत्तिः साक्षिभास्यैवेति वृत्तिज्ञानमपि साक्षिभास्यमेवेति न स्वसंवेद्यम्। विज्ञानं त्वद्वैत्यभिमतं साक्षिभूतं चैतन्यमेवेति तस्य नित्यत्वम् अनन्यावभास्यत्वं च युक्तमेव। घटं विना तदाकारपरिणामाभावाद् बुद्धेर्वासनायाश्चायोगाद् बाह्यार्थापलापोऽप्ययुक्त इत्यवद्यं बौद्धमतम्।

**तस्मादिति।** आत्मज्ञानस्य सिद्धत्वेनाविधेयत्वादित्यर्थः। मात्रशब्दार्थमाह—**न त्विति। यत्न इति।** कर्तव्य इति शेषः। कस्मादात्मज्ञाने यत्नो न कर्तव्यः? अत आह—**अत्यन्तप्रसिद्धत्वादिति।** ब्रह्मणः इति शेषः। आत्मत्वादिति भावः। न हि देहातिरिक्तकर्तृभोक्त्रात्मवादी आत्मज्ञाने यतते, नापि देहात्मवादी आत्मानं ज्ञातुं यतते, तथा ब्रह्मात्मवाद्यपीति बोध्यम्। ननु यद्यत्यन्तं प्रसिद्धं ब्रह्म तर्हि सर्वैः कुतो न ज्ञायते? किमर्थं च महतो वेदान्तशास्त्रस्याध्ययनादिकम्? अत आह—**अविद्येति।** अत्यन्तप्रसिद्धं सुविज्ञेयमासन्नतरमात्मभूतमपि ब्रह्म, अविद्याकल्पितनामरूपविशेषापहृतबुद्धीनामप्रसिद्धं दुर्विज्ञेयमतिदूरस्थमन्यदिव च प्रतिभातीत्यन्वयः। अविद्यया ब्रह्मणि कल्पिता ये नामरूपविशेषाकारास्तैरपहृतबुद्धयः, अविद्यावन्तो मूढा अनात्मनो बुद्ध्यादीनात्मत्वेन प्रतिपन्नाः सन्तः 'स्थूलोऽहं मनुष्योऽहं काणोऽहं सुख्यहं दुःख्यहमज्ञोऽह'मित्येवं मन्यमानाः स्वात्मभूतमपि सच्चिदानन्दं ब्रह्म न विदुः। अत एवाविदुषां तेषां प्रसिद्धमपि ब्रह्माप्रसिद्धमिव भाति; सुविज्ञेयमपि दुर्विज्ञेयमिव भाति; आसन्नतरमपि दूरस्थमिव भाति; आत्मभूतमप्यनात्मभूतमन्यदिव भातीत्यर्थः। तर्हि केषां पुनरिदं ब्रह्म सुप्रसिद्धम्? अत आह—**बाह्येति।** लब्धा गुर्वात्मप्रसादादयो यैस्तेषां लब्धगुर्वात्मप्रसादादीनाम्। **गुरुप्रसादः** तत्त्वमस्यादिमहावाक्योपदेशादिरूपः, **आत्मप्रसाद** ईश्वरानुग्रहश्चित्तपरिशुद्धिर्वा। आदिपदाद् विवेकादि-

१. 'बुद्धीनाम्' इति पा.। २. 'लब्धगुर्वात्मप्रसादादीनां' इति रा.पा. भाति।

**— 'प्रत्यक्षावगमं धर्म्यम्' (भ.गी.९.२) इत्यादि।**

आनन्दगिरिकृतव्याख्या

तथा चेति।

भाष्यार्कप्रकाशः

ग्रहणम्। अत एव **बाह्याकारनिवृत्तबुद्धीनां** बाह्याकारेभ्य आत्मनि कल्पितेभ्यो बुद्ध्याद्याकारेभ्यो निवृत्ता बुद्धिर्येषां तेषां विदुषां तु। **अतो**ऽस्माद् ब्रह्मणः **परम्** अन्यत् **सुखम**ानन्दरूपं सुप्रसिद्धं सुविज्ञेयं स्वासन्नतरं च वस्तु नास्ति। तेषां सच्चिदानन्दं ब्रह्मैवाहमस्मीति ज्ञानसत्त्वादिति भावः। अयमेवार्थो भगवताऽप्युक्त इत्याह—**तथा चेति**। तस्मात् स्वस्यैवात्मत्वाद् आत्मन एव ब्रह्मत्वात् तस्य च स्वप्रकाशत्वात् प्रमाणान्तरानपेक्षत्वाच्च कथमात्मनो ज्ञानमिति न चोदनीयम्। कुतो न चोदनीयमिति चेद्? **उच्यते**—**न** वयम् आत्मा ज्ञातव्यः इति ब्रूमः, येन तथा चोद्येत। कुतो न ब्रूथेति चेद्? येनात्मा ज्ञातव्यस्तस्यैव ज्ञातुरात्मत्वात्। तर्हि किं ब्रूथेति चेद्? देहादिष्वनात्मस्वात्मत्वेन परिगृहीतेष्वात्मबुद्धिनिवृत्तिः कार्येति ब्रूमः। केन कार्येतिचेद्? येनानात्मान आत्मत्वेन परिगृहीतास्तेन। केन परिगृहीता इति चेद्? अविदुषा। कोऽयमविद्वानिति चेद्? यस्याविद्याऽस्ति सः। कस्याविद्याऽस्तीति चेद्? योऽनात्मानमात्मेति प्रतिपद्यते तस्य। क एवं प्रतिपद्यत इति चेद्? उक्तमेवाविद्यावानिति।

**नन्व**विद्यावतोऽनात्मन्यात्मबुद्धिः, अनात्मन्यात्मबुद्धिमतोऽविद्यावत्त्वमित्यन्योन्याश्रयः प्राप्त इति **चेत्** , न प्राप्तः, अविद्याकार्यत्वादनात्मन्यात्मबुद्धेः। अनात्मन्यात्मबुद्धिरूपेण कार्यलिङ्गेनाविद्यावत्त्वरूपकारणस्य गम्यमानत्वात्[१]।

**ननु** योऽनात्मानमात्मानं प्रतिपद्यते सोऽविद्यावानिति अहं जानाम्येव। परन्त्वेवं प्रतिपद्यमानोऽविद्यावान् स क इति पृच्छामीति **चेत्** , किं तव तत्प्रश्नेन? न च तज्ज्ञानमेव फलमिति वाच्यम् ; प्रश्नात्प्रागेव त्वया तस्य ज्ञातत्वात्। यदि त्वं तथा प्रतिपद्यमानमविद्यावन्तं न जानासि, तर्हि कथं मां पृच्छसि—स क इति। तस्माद् अहमज्ञोऽहं मनुष्योऽहं संसारीति व्यवहारबलादविद्यावान् पुरुषः सिद्धः। तेनात्मन्यनात्माध्यारोपणनिवृत्तिः कार्या। न चासङ्गस्य पुरुषस्य कथमविद्यासङ्ग इति वाच्यम् ; नातिशङ्कनीयत्वादविद्यावैचित्र्यविषये। असङ्गमपि ह्यविद्या ससङ्गं करोति पुरुषम् , यथा रज्जुमपि सर्पम् , गगनमपि नीलमिति।

तस्माज्ज्ञानस्वरूपो ज्ञानाविषयश्चात्मेति स्थितम्। न च ज्ञानस्य साकारत्वात् कथं ज्ञानस्वरूपत्वं निराकारस्यात्मन इति वाच्यम् ; विज्ञानवादिबौद्धाभिमतक्षणिकविज्ञानस्यैव वृत्तिज्ञानरूपस्य साकारत्वम् , न तु चैतन्यस्येति।

**ननु** यदुक्तमविषयत्वमात्मनः पूर्वपक्षिणा सिद्धान्तिना चाभ्युपेतम् , **तदयुक्तम्** , बुद्धिविषयत्वादात्मनः 'दृश्यते त्वग्र्यया बुद्ध्ये'ति श्रुतेश्च। तस्मादात्मनो ज्ञानं सम्भवत्येवेति कोऽयं विपरीतो भाष्यपथ इति चेत् , **मैवम्** , 'यत्तदद्रेश्यमग्राह्यं, यतो वाचो निवर्तन्त अप्राप्य मनसा सहे'त्यादिश्रुतिभिरविषयत्वस्यैवात्मन उक्तत्वात्। बुद्धिविषयत्वकथनं तु बुद्धावेकाग्रतया स्थितायामात्मतत्त्वं स्वयमेव स्फुरतीति हेतोरुक्तम्। कथमन्यथा ज्ञातुरात्मनो ज्ञेयत्वं स्यात्? 'यन्मनसा न मनुते येनाहुर्मनो मतम्', 'विज्ञातारमरे केन विजानीया'दिति श्रुतेश्च। 'यदोपरामो मनसो नामरूपरूपस्य दृष्टस्मृतिसम्प्रमोषात्। य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिषद्मने नमः॥' इति भागवताच्च। तस्मान्निर्विशेषस्वप्रकाशचिन्मात्रस्यात्मनोऽविषयत्वं युक्तमेव।

**नन्व**विषये प्रमाणान्तरानपेक्षे ब्रह्मणि कथं शास्त्रं प्रमाणम्? व्यासेनैवोक्तं हि शास्त्रयोनित्वं ब्रह्मणः। एवं शास्त्रप्रमाणत्वाच्छास्त्रविषयस्य ब्रह्मणोऽविषयत्वकथनमयुक्तमेवेति चेत् , **मैवम्** ; शास्त्रमपि न ब्रह्मेदन्तया बोधयितुं शक्नोत्यविषयत्वात् , किं तर्हि? अविद्याध्यारोपणनिरासमात्रमेव करोतीति तावतैव शास्त्रप्रमाणत्वोक्तेर्ब्रह्मण इति। अत एवोक्तं श्रुतिगीतासु – 'श्रुतयस्त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः' इति।

**ननु** वेदान्तानां ब्रह्मणि द्विधा प्रवृत्तिः- साक्षाद्विधिमुखेन, निषेधमुखेन चेति। तत्र सच्चिदानन्दादीनां विधिमुखेन, अस्थूलमित्यादीनां निषेधमुखेनेति सम्प्रदायात् सच्चिदानन्दादिवाक्यानां कथं ब्रह्मण्यप्रवृत्तिर्येनाविषयत्वं स्याद् ब्रह्मण इति **चेन्मैवम्**।

१. तथा च वह्निजन्येन धूमेन वह्न्यनुमितौ यथा नान्योन्याश्रयः, एवमत्रापीति भावः।

**केचित्तु पण्डितम्मन्याः निराकारत्वाद् [1]आत्मवस्तु नोपैति बुद्धिः, अतो दुःसाध्या सम्यग्ज्ञाननिष्ठेत्याहुः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

साकारे हि प्रतिमादौ बुद्धेः स्थैर्यं सम्भवति। ब्रह्मणः पुनः निराकारत्वात् दुःसम्पादं ब्रह्मज्ञानमिति यदाहुः **कर्म-मीमांसकाः**, तदनूद्य दूषयति—**केचित्त्वित्यादिना।**

आनन्दगिरिकृतव्याख्या

**आत्मनो निराकारत्वात् तस्मिन् बुद्धेरप्रवृत्तेः सम्यग्ज्ञाननिष्ठा न सुसम्पाद्येति मतमुत्थापयति—**केचित्त्विति। **बहिर्मुखानामन्त-**

भाष्यार्कप्रकाशः

सच्चिदानन्दादिवाक्यानामपि लक्षणयैव ब्रह्मणि प्रवृत्तिर्नाभिधयेति सिद्धान्तात्। ये त्वभिधयैव ब्रह्मणि स्थूलत्वादिनिषेधं कृतवन्तस्तेषां निषेधमुखेन प्रवृत्तिः, ये तु लक्षणया असत्त्वजडत्वदुःखादिनिषेधं कृतवन्तस्तेषां विधिमुखेन प्रवृत्तिरित्यभ्युपगमात्। अत एव तात्पर्य-वृत्त्या ब्रह्मणि पर्यवसानं श्रुतीनामित्युक्तं श्रुतिगीतासु। एवं शब्दगोचरत्वादिविशेषाभावादेव निर्विशेषं ब्रह्मेत्युक्तम्। अन्यथा हि सविशेषमेव स्यात्।

**ननु** निर्विशेषं (निराकारं) ज्ञानं क्वापि नास्ति, ज्ञानमात्रस्य सविशेषत्वादिति चेत् , **मैवम्** ; निर्विकल्पज्ञानस्य तार्किकादिभि-रप्यभ्युपगतत्वात्। तस्मान्निर्विशेषमेव चैतन्यरूपं ज्ञानम्। यत्पुनर्विषयाकारं ज्ञानं तद् वृत्तिज्ञानमेव। वस्तुतस्तु विषयाकारपरिणता बुद्धिवृत्तिर्नैव ज्ञानम् , किन्तु तत्प्रतिफलितं चैतन्यमेव। वृत्तेर्ज्ञानत्वं तु चैतन्याभासप्रयुक्तमौपचारिकमेव, बुद्ध्यादीनां चेतनत्ववत्। तस्माज्ज्ञानमात्रं निराकारमेव, यच्चैतन्यमात्मेत्युच्यते। बुद्धिवृत्तिरेव विषयाकारा। इयमेव क्षणिकविज्ञानमिति बौद्धैः, ज्ञानमिति तार्कि-कादिभिश्चोच्यते। एवं चोपासकस्य 'अहं ब्रह्मास्मी'ति यदावर्त्यमानं ज्ञानं तदपि बुद्धिवृत्तिरेवेति बोध्यम्।

**ननु** घटाकारा वृत्तिरिव ब्रह्माकारा वृत्तिः कथं जायेत? नीरूपत्वाद् ब्रह्मणो ब्रह्माकारपरिणामासम्भवाद् बुद्धेरिति चेत् , **मैवम्** , नीरूपस्य गगनस्य सुखस्य च बुद्धिवृत्तिविषयत्वदर्शनात्। तस्माद् गगनाकारेव ब्रह्माकाराऽपि बुद्धिवृत्तिः सम्भवत्येव।

**ननु** तर्हि बुद्धिवृत्तिविषयत्वमात्मनः सम्पन्नमेवेति कथमविषयत्वमिति चेत् , **उच्यते**—अयं घटः, इदं गगनमितिवद् 'इदं ब्रह्मे'ति ज्ञातुमशक्यत्वाद् बुद्धिवृत्त्यविषयमेव ब्रह्म, 'अहं ब्रह्मास्मी'त्युपासकस्य बुद्धिवृत्तिस्तु ब्रह्माकारपरिणामं विनापि भवत्येव, शब्दाकारपरिणामादेवेष्टसिद्धेः, राममन्त्राकारपरिणतबुद्धिवृत्तिवत्। यथा राममन्त्रमुच्चारयत्यसकृत् तथैव हि 'अहं ब्रह्मास्मी'त्युच्चार-यत्यसकृदुपासकः। ननूपासकस्य 'अहं ब्रह्मास्मी'ति वृत्तिर्भवतु शब्दमयी, यद्वा मनोमयी, समाहितस्य ज्ञानिनः कथम् 'अहं ब्रह्मा-स्मी'ति ब्रह्मसाक्षात्कारः ब्रह्माकारवृत्त्यभावे? इति चेत्, **उच्यते**—स्वात्मनि वृत्त्ययोगात्। आत्मसाक्षात्कारे वृत्त्यनपेक्षणात्। न हि देवदत्तो घटमिवात्मानं बुद्धिवृत्त्या जानाति, किन्तु स्वत एव। एवं च समाधौ बुद्धेर्ब्रह्माकारवृत्तिर्नाम निर्विकल्पतयैकाग्रत्वेन बुद्धे-रवस्थानमेव; तथा सत्यात्मसाक्षात्कारसम्भवात्। न चैवं सुषुप्तावप्यात्मसाक्षात्कारप्रसङ्ग इति वाच्यम् ; तदानीं बुद्धेरेवासत्त्वात्। जाग्रत्स्वप्नयोस्तु बुद्धेर्विक्षिप्ता[प्तत्वा]न्नैकाग्रतयाऽवस्थानम्। एवं बुद्ध्यैकाग्र्यस्यात्मसाक्षात्कारोपयोगित्वादेव 'दृश्यते त्वग्र्यया बुद्ध्या' इत्युक्तम् , न तु बुद्धिवेद्यत्वादिति। अत एव स्वसंवेद्योऽयमात्मा। न हि बुद्धिवेद्यत्वे सति स्वसंवेद्यत्वं सिध्यति, बुद्धेरन्यत्वात्। न च स्वसंवेद्यत्वमपि कथं वेदितरीति वाच्यम् ; अनन्यवेद्यत्वे स्वसंवेद्यत्वस्य तात्पर्यात्। न चानुभवरूपस्यात्मनः कथं वेदितृत्वमिति वाच्यम् ; सर्वप्रकाशकत्वस्यैव वेदितृत्वात्। अनुभवरूपेण ह्यात्मना सर्वं प्रकाश्यते, 'तस्य भासा सर्वमिदं विभाती'ति श्रुतेः। तस्य भासेति 'राहोः शिर' इतिवद्भेदेन निर्देशः। आत्मचैतन्येनेत्यर्थः। तस्माज्ज्ञानस्वरूप एवात्मा ज्ञानाविषयश्च। आत्मत्वादेव स्व-प्रकाशश्चेति नात्मा ज्ञातव्यः केनचित् प्रमाणेन, सर्वप्रमाणानां तेनैव ज्ञायमानत्वादिति सङ्क्षेपः।

ज्ञानात्मनोरुभयोश्च निराकारत्वे कथं तद्भावनानिष्ठेति यदुक्तं पूर्वपक्षिणा तन्निराकृतमपि स्थूणानिखननन्यायेन तन्निराकरणं पुनः स्थापयितुं भङ्ग्यन्तरेण तमेव पूर्वपक्षं पुनरुत्थापयति—**केचित्त्विति**। सगुणब्रह्मोपासनतत्पराः इह **केचि**च्छब्देनोच्यन्ते। पण्डितम्

१. 'आत्मवस्तुनोऽपैति' इति रा.पा.।

**सत्यमेवम् , गुरुसम्प्रदायरहितानाम् अश्रुतवेदान्तानाम् अत्यन्तबहिर्विषयासक्तबुद्धीनां सम्यक्प्रमाणेषु अकृतश्रमाणाम्। तद्विपरीतानां तु लौकिकग्राह्यग्राहकद्वैतवस्तुनि सद्बुद्धिर्नितरां दुःसम्पाद्या। आत्मचैतन्यव्यतिरेकेण वस्त्वन्त-**

आनन्दगिरिकृतव्याख्या

**मुखानां वा ब्रह्मणि सम्यग्ज्ञाननिष्ठा दुःसाध्या? इति विकल्प्याद्यमनूद्याङ्गीकरोति—**सत्यमिति। **पूर्वपूर्वविशेषणमुत्तरोत्तरविशेषणे हेतुत्वेन योजनीयम्। द्वितीयं दूषयति—**तद्विपरीतानामिति। **अद्वैतनिष्ठानां द्वैतविषये सम्यग्बुद्धेरतिशयेन दुःसम्पाद्यत्वे हेतुमाह—**आत्मेति।

भाष्यार्कप्रकाशः

आत्मानं मन्यन्त इति **पण्डितम्मन्याः**, न तु वस्तुतः पण्डिता इत्यर्थः। **निराकारत्वादिति**। आत्मन इति शेषः। आत्मवस्तुनः सकाशाद् बुद्धिः **अपैति** अपगच्छति; नात्मनि निष्ठां लभत इत्यर्थः। **अत इति**। एवं बुद्धेरात्मनः सकाशादपगमाद्धेतोरित्यर्थः। **सम्यग्ज्ञाननिष्ठा** केवलात्मज्ञाननिष्ठा **दुःसाध्या** दुःसम्पाद्येति केचिदाहुरित्यन्वयः।

अयममीषामाशयः— यद्यप्यनात्माकारनिवृत्त्यात्मज्ञानं सुलभं, तथाप्यात्मज्ञाननिष्ठा दुःसाध्या। कुतः? ज्ञाननिष्ठा नाम ज्ञाने नितरां स्थितिः, सा च बुद्धेरेव धर्मः। ज्ञेये आत्मन्येव बुद्धेरवस्थानं चिरकालमिति यत् सैवात्मज्ञाननिष्ठेत्युच्यते। यथा **विष्णुध्याननिष्ठा**, ध्येये शङ्खचक्रगदाधरे विष्णौ चिरकालं बुद्धेरवस्थितिर्विष्णुध्याननिष्ठेत्युच्यते, तद्वत्। तथा सति बुद्धेः साकारमेव वस्तु चिरकालमवलम्बनं भवितुमर्हति, न तु निराकारं वस्तु। निराकारे आत्मवस्तुनि क्षणकालमेव बुद्ध्यवस्थापनस्य दुष्करत्वेन किम्पुनर्बहुकालमिति दुःसाध्यैवात्मज्ञाननिष्ठेति।

एवमात्मनो निराकारत्वादेव तज्ज्ञाननिष्ठाया दुर्लभत्वे, किम्पुनर्ज्ञानस्यापि निराकारत्वे तस्या दुर्लभत्वं वक्तव्यमिति कैमुत्यन्यायोऽनेन द्योत्यते। शङ्खचक्रगदाधरोऽयं विष्णुरिति साकारज्ञानवन्निराकारज्ञानस्य चिरमवस्थातुमयोगात्। वस्तुतो निराकारज्ञानस्यैवाप्रत्यक्षत्वेनाप्रमाणत्वात्। न च – 'अयमात्मे'ति निराकारं ज्ञानमस्तीति – वाच्यम् ; तस्यापि साकारत्वात्। विषयवत्त्वं हि ज्ञानस्य साकारत्वम्। तस्मान्निराकारस्य ज्ञानस्यैवासिद्धेः कथं पुनस्तन्निष्ठासिद्धिः? किञ्च अयं घट इतिवद् अयमात्मेति ज्ञानं भवितुमेव नार्हति घटवदप्रत्यक्षत्वादात्मनः। न ह्यप्रत्यक्षं देशान्तरस्थं वस्तु रजतादिकमिदं रजतमिति ग्रहीतुं शक्यते। तस्मादात्मज्ञाननिष्ठा दुःसाध्येति।

सिद्धान्ती—किं विदुषामात्मज्ञाननिष्ठा दुःसाध्येति ब्रूषे, उताविदुषामिति विकल्प्य द्वितीयमङ्गीकरोति—**सत्यमिति**। सम्यक्प्रमाणेषु वेदान्तशास्त्रादिष्वित्यर्थः। आद्यं दूषयति—**तद्विपरीतानामिति**। तेभ्यः पूर्वोक्तेभ्यो विपरीताः **तद्विपरीताः**, गुरुसम्प्रदायवतां श्रुतवेदान्तानां [1]बहिर्विषयासक्तबुद्धीनां सम्यक्प्रमाणेषु कृतश्रमाणां चेत्यर्थः। लौकिकानि ग्राह्यग्राहकरूपाणि द्वैतवस्तूनि घटपटादीनि चक्षुरादीनि च, तेषु बुद्धिर्नितरां दुःसम्पाद्या, न त्वद्वैते आत्मनीति भावः। तत्र हेतुमाह—**आत्मेति**। विदुषां विज्ञानव्यतिरेकेण वस्त्वन्तरस्यानुपलब्धेः। 'ऐतदात्म्यमिदं सर्वम्' , 'सर्वमात्मैवाभूद्विजानतः', 'वासुदेवः सर्व'मिति, 'मत्तः परतरं नान्यत्किञ्चिदस्ती'ति, 'यत्र सर्वमात्मैवाभूत्तत्र केन कं पश्ये'दित्यादिश्रुतिस्मृतिभ्यो विदुषां ब्रह्मव्यतिरेकेण किञ्चिदपि द्वैतं न भातीति द्वैतनिष्ठैव विदुषां दुःसम्पाद्या, अनुपलभ्यमानत्वाद् द्वैतस्य। न ह्यनुपलब्धे वन्ध्यापुत्रादौ कस्यापि बुद्धिः स्यात्। अद्वैते आत्मनि तु बुद्धिनिष्ठा सुलभैव, नित्यापरोक्षत्वादात्मनः। आत्मा हि स्वयम्। न हि स्वस्य स्वयं कदाचिदप्यप्रत्यक्षो भवेत्।

**ननु** यच्चक्षुरादिप्रमाणैरुपलभ्यते तदिदं द्वैतं नास्त्यनुपलब्धेरिति, यत्पुनरिन्द्रियाद्यविषयं तदात्मवस्त्वस्त्युपलब्धेरिति च विरुद्धमिदमुभयमिति चेद्? विरुद्धमेवाज्ञानां, न तु विदुषाम्। गगनं नीलमिति मन्यमानां बालानां नीरूपं गगनमिति वचो विरुद्धमेव, न तु गगनतत्त्वविदाम् , तद्वत्।

**ननु** 'नाभाव उपलब्धे'रिति सूत्रकारेणैव द्वैताभाववादो निरस्त इति कथं विदुषां न विरुद्धं तव वचनमिति चेत् , **मैवम् ;** अविद्यादशायां द्वैताभावस्य सूत्रकारेण निन्दितत्वात्। न हि श्रुतिविरुद्धमर्थं सूत्रकारो ब्रूयात्। 'नेह नानास्ति किञ्चन', 'यत्र हि द्वैतमिव

१. बहिर्विषयेऽसक्ता बुद्धिर्येषामित्यर्थः।

**रस्यानुपलब्धेः। यथा चैतदेवमेव, नान्यथेत्यवोचाम। उक्तं च भगवता— 'यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः'(भ.गी.२.६९) इति। तस्माद् बाह्याकारभेदबुद्धिनिवृत्तिरेवात्मस्वरूपालम्बने कारणम्। न ह्यात्मा नाम कस्यचित्**

अनुभूतिस्वरूपाचार्यटिप्पणम्

यदुक्तमात्मज्ञानस्य प्रयत्नानर्हत्वं तन्निगमयति अधिकविवक्षया— **तस्मादित्यादिना।** यद्विधीयमानं कर्मकारकं तदु-

आनन्दगिरिकृतव्याख्या

**तद्व्यतिरेकेण वस्त्वन्तरस्यासत्त्वं कथमित्याशङ्क्याह—**यथा चेति। **अद्वैतमेव वस्तु , द्वैतं त्वाविद्यकम् , न** अन्यथा **तात्त्विकमित्येतद् एवमेव यथा स्यात् तथोक्तवन्तो वयं तत्र तत्राध्यायेष्विति योजना। अन्तर्निष्ठानामद्वैतदर्शिनां द्वैते नास्ति सद्बुद्धिरित्यत्र भगवतोऽपि सम्मतिमाह—**उक्तश्चेति। **परमतं निराकृत्य प्रकृतमुपसंहरन् , आत्मनो निराकारत्वे ज्ञानस्य तदालम्बनत्वे किं कारणमित्याशङ्क्याह—** तस्मादिति। **नन्वात्मा कथञ्चित् सम्यग्ज्ञानक्रियासाध्यश्चेत् तस्य हेयोपादेयान्यतरकोटिनिवेशात् प्राप्तं स्वर्गादिवत् क्रियासाध्यत्वेना-सिद्धत्वम् , नेत्याह—** न हीति। **आत्मत्वादेव [१]प्रसिद्धत्वेन प्राप्तत्वाद् , अनात्मवत् तस्य हेयोपादेयत्वयोरयोगान्न क्रियासाध्यतेत्यर्थः।**

भाष्यार्कप्रकाशः

भवति तदितर इतरं पश्यति, यत्र तु सर्वमात्मैवाभूत् तत्र केन कं पश्येत्', 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती'त्यादिना विद्यादशायां सर्वद्वैताभावस्य, अविद्यादशायां द्वैतसत्त्वस्य, अद्वितीयात्मनि द्वैतज्ञाननिन्दायाश्च श्रुतिभिरुक्तत्वात्। 'एकमेवाद्वितीयं ब्रह्मे'त्यद्वैतत्वम् अत एव हि ब्रह्मणः सिद्ध्येत्। कथमन्यथा विद्यादशायामपि द्वैतसत्त्वे ब्रह्माद्वितीयं स्यात्?

तस्मादविद्यायामन्तरावर्तमानैर्बौद्धैरुक्तस्य द्वैताभावस्याविद्याविषयत्वेन तदानीं तदभावप्रतिपादनमयुक्तमिति निन्दितं तन्मतं सूत्रकारेणेति कृत्वा विद्वद्दृष्ट्या द्वैताभावः सिद्ध एव, अनुपलब्धेर्द्वैतस्य विद्यादशायाम्। न हि सुषुप्तिमृतिमूर्छासु द्वैतोपलम्भो येन विद्या-दशायां द्वैतोपलम्भः स्याद् विदुषाम्। तस्मादविद्यादशायां द्वैतस्योपलब्धेर्हेतोरभावो न युक्तः; विद्यायामनुपलब्धेर्हेतोरभावो युक्त एव। ततश्च विद्यावतामात्मज्ञाननिष्ठा, अविद्यावतां द्वैतज्ञाननिष्ठेव सुलभैव। यथा चैतदेवमेव भवति, अन्यथा न भवति तथा पूर्वमेवावोचाम। नन्विदं तव कपोलकल्पितमेवेत्यत आह—**उक्तं भगवतेति**। यस्यामविद्यादशायां भूतानि जाग्रति व्यवहरन्ति, सा पश्यतो मुनेर्विदुषो **निशा** निशेवाप्रकाशा। द्वैतानुपलब्धेर्विदुष इति भावः। **तस्मादिति**। विदुषां ज्ञाननिष्ठायाः सुलभत्वादित्यर्थः। बुद्धेरात्मस्वरूपावलम्बनं प्रति बाह्याकारभेदज्ञाननिवृत्तिरेव कारणम् , न त्वात्मनः साकारत्वमित्यर्थः।

अयं भावः—निराकारत्वादात्मन्यालम्बने बुद्धिर्न चिरं तिष्ठतीति यदुक्तम् , तदयुक्तम्। साकारेऽपि विष्णुमूर्त्यालम्बने विषय-लम्पटानां बुद्धिनिष्ठादर्शनात्। तस्मादालम्बनविशेषे बुद्धिनिष्ठां प्रत्यालम्बनगतसाकारत्वं न प्रयोजकम् , किन्तु तदालम्बनातिरिक्त-विषयानवगाहित्वमेव बुद्धेः। तथा चानात्माकारानवगाहित्वे सति बुद्धेरात्मस्वरूपावलम्बने निष्ठा सम्भवत्येव। यथा सगुणोपासकस्य शब्दादिविषयानवगाहित्वे सति बुद्धेर्विष्णुमूर्त्यालम्बने निष्ठा सम्भवति, तद्वत्। ततश्चात्मज्ञाननिष्ठाकामेन पुरुषेण विदुषा बाह्याकार-भेदबुद्धिनिवृत्तिरेव कार्या। तस्यां च कृतायां स्वत एव बुद्धिरात्मनि निष्ठिता भवति। सगुणोपासकस्य तु शब्दादिबाह्यविषयबुद्धिनिवृत्ति-मात्रेण न विष्णुस्वरूपज्ञाननिष्ठा सम्भवति; किन्तु शब्दादिभ्यो बुद्धिं प्रत्यावर्त्य, मनसि विष्णुमूर्त्याकारं कल्पयित्वा, तत्र बुद्धिः बलात्प्रवेशनीयेति श्लोको[क्लेशो]ऽधिकतर एव। तस्य च कल्पिताकारस्य चिरमवस्थापनमपि क्लेशावहमेव। तस्मात् साकारविष्ण्वादि-मूर्तिध्याननिष्ठापेक्षया आत्मज्ञाननिष्ठैव सुलभा। बाह्याकारभेदज्ञानं त्यक्त्वा तूष्णीमवस्थितायां सत्यां बुद्धावात्मस्वरूपस्फुरणात्। न चैवं सकृत्स्फुरितेऽप्यात्मनि बुद्धिश्चिरं न तिष्ठति, गुणाभावादिति वाच्यम् ; परमानन्दरूपत्वादात्मनः, 'सच्चिदानन्दं ब्रह्मे'ति श्रुतेः, 'आनन्दो ब्रह्मेति व्यजाना'दिति श्रुतेश्च; सुषुप्तौ सर्वप्राणिनामात्मानन्दानुभवाच्च; अभीष्टविषयसिद्धिवशाद् अन्तर्मुखमनोवृत्तौ प्रतिफलि-तस्यात्मानन्दस्यैव विषयानन्दत्वाच्च। यदि बुद्धिः सकृदात्मानन्दमनुभवेत् तर्हि तं न परित्यजेदेव। किं निद्रासुखमनुभवन्तः पुरुषाः निद्रां स्वेच्छया परित्यजन्तो दृश्यन्ते? अत एव – 'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च सन्तुष्टस्तस्य कार्यं न

१. सर्वो ह्यात्मास्तित्वं प्रत्येति—अहमस्मीति (ब्र.सू. १-१-१) भाष्यमनुसंधेयम्।

**कदाचिदप्रसिद्धः प्राप्यो हेय उपादेयो वा। अप्रसिद्धे हि तस्मिन्नात्मनि [1]स्वार्थाः सर्वाः प्रवृत्तयो व्यर्थाः प्रसज्येरन्। न**

अनुभूतिस्वरूपाचार्यटिप्पणम्

पादानाद्यर्हं[र्हं] दृष्टम्। ब्रह्म तु स्वरूपत्वादेव नोपादानाद्यर्हम् , ततो न तज्ज्ञानस्य विध्यर्हत्वमित्यभिप्रेत्याह— **हेय उपादेयो वेति।** प्रसिद्धत्वादात्मनः तज्ज्ञाने विधिर्न सम्भवतीत्युक्तम् । तां प्रसिद्धिमिदानीं साधयति—**अप्रसिद्धे हीत्यादिना।** संहतानां देहेन्द्रियादीनां शयनादिवत् स्वव्यतिरिक्तशेषाः प्रवृत्तयो वक्तव्याः। न चेद् व्यतिरिक्त आत्मा प्रसिद्धस्तर्हि ताः प्रवृत्तयः स्व-(वि)शेषभूता एव प्रसज्येरन्नित्यर्थः। यत्रापि भृत्यादिदेहस्य स्वाम्यादिशेषत्वं प्रसिद्धम् , तत्रापि देहादेरचेतनत्वाद् न शेषित्व-

आनन्दगिरिकृतव्याख्या

**आत्मनश्चेदृते क्रियामसिद्धत्वम् , तदा सर्वप्रवृत्तीनामभ्युदयनिःश्रेयसार्थानामात्मार्थत्वायोगादर्थिनोऽभावे स्वार्थत्वमप्रामाणिकं स्यादित्याह —**अप्रसिद्धे हीति। **न[2] प्रवृत्तीनां स्वार्थत्वं देहादीनामन्यतमस्यार्थित्वेन तादर्थ्यादित्याशङ्क्य घटादिवदचेतनस्यार्थित्वायोगान्नैवमित्याह—**

भाष्यार्कप्रकाशः

विद्यते॥' इत्युक्तम्। तस्मादकृतबुद्धेरेवात्मस्वरूपावलम्बनं दुर्लभम् , क्लेशावहं च, न तु कृतबुद्धेः।

**नन्व**विषयो ह्यात्मा कथं बुद्धेर्विषयः स्यादिति चेत् , **मैवम्** ; असंस्कृतबुद्धेरेवाविषय इत्युक्तत्वात्। संस्कृतबुद्धिरपि नात्मानं विषयीकरोति, बुद्धेरेवात्मना गृह्यमाणत्वात् ; किं तर्हि? एकाग्रा सत्यात्मानन्दं स्वप्रतिफलितमनुभवतीत्येतावतैव बुद्धिविषय आत्मा इत्युच्यते। न च कथं बुद्धेर्जडाया आनन्दानुभवितृत्वमिति वाच्यम् ; आत्मचैतन्यप्रतिफलनेन चेतनत्वाद् बुद्धेः। एतेनात्मनः स्वानन्दानुभवे किं बुद्ध्यैकाग्र्येणेति शङ्काऽपि परास्ता। प्रमातुः स्वस्वरूपानन्दानुभवं प्रति बुद्ध्यैकाग्र्यस्य साधनत्वमिति। मोक्षे तु स्वरूपचैतन्येनैवात्मन आनन्दानुभवः, सुषुप्तौ त्वविद्यावृत्तिभिरिति विवेकः।

नन्वप्रसिद्धमिदं ब्रह्म कथं विदुषाऽप्युपलभ्येत? येन तस्यात्मज्ञाननिष्ठा स्याद् अत आह—**न हीति**। कस्यचिदपि कदाचिदप्यात्मा नाप्रसिद्धः। आत्मत्वादेवेति भावः। अत एव प्राप्यो वा न भवति, नित्याप्तत्वादात्मन इति भावः। अत एव हेयो न भवति। हातुं त्यक्तुं शक्यो **हेयः**। हातुरेवात्मत्वादिति भावः। उपादेयोऽपि न भवति, उपादातुरेवात्मत्वादिति भावः। न चैवं प्रसिद्धमात्मानं कथं सर्वे सच्चिदानन्दं न विदुरिति वाच्यम् ; सर्वेषां सच्चिदानन्दरूपत्वेन न प्रसिद्धः; किन्त्वात्मत्वेन रूपेणैव यो यमात्मत्वेन प्रतिपद्यते तस्य स प्रसिद्धः। यथा देवदत्तो मनुष्यमात्मत्वेन प्रतिपद्यत इति मनुष्यदेहरूप आत्मा देवदत्तस्य प्रसिद्धः। विष्णुमित्रो मन आत्मत्वेन प्रतिपद्यत इति तस्य मन आत्मा प्रसिद्धः—सुख्यहं दुःख्यहमिति। विदुषां तु क्षेत्रज्ञ एवात्मत्वेन प्रसिद्ध इति ते सच्चिदानन्दं ब्रह्मैवात्मानं विदुः। अत एवाविद्वद्भिरात्मत्वेन गृहीतानामनात्मनामन्यत्वेन गृहीतस्य च ब्रह्मणो यथावद्ग्रहणार्थं वेदान्तशास्त्रं प्रवर्तितं कृपालुना भगवता, न त्वप्रसिद्धमात्मानं बोधयितुम्। येनात्मा बोद्धुमिष्टस्तस्यैवात्मत्वात्।

ननु 'मामहं न जानामी'त्यनुभवादप्रसिद्ध एवात्मेत्यत आह—**अप्रसिद्धे हीति**। तस्मिन्नात्मन्यप्रसिद्धे सति हि स्वार्थाः सर्वाः प्रवृत्तयो व्यर्थाः प्रसज्येरन्। यद्यप्रसिद्धः स्यादात्मा तर्हि लौकिकैर्वैदिकैश्चात्मार्थं क्रियमाणाः सर्वे व्यवहारा लुप्येरन्नेव। ममेदं सुखमिष्टं स्यान्ममेदमनिष्टं दुःखं माभूत् , अनेन भोजनेन मैथुनेन च मम सन्तोषः स्यात् , अनेन यज्ञेन मम स्वर्गः स्यादित्येवमभिसन्धाय हि पुरुषस्तेषु तेषु कर्मसु प्रवर्तते। स्वस्यैवाप्रसिद्धत्वे कथं तत्प्रवृत्तिः? ननु देहाद्यर्था भोजनादिप्रवृत्तयः। भोजने कृते देहादेर्वृद्धिः, तस्मिन्नकृते नाशश्च भवतीति। अत आह—**न चेति**। प्रवृत्तीनां देहाद्यचेतनार्थत्वं कल्पयितुं न शक्यम् , देहादीनामचेतनत्वात्। अनेन भोजनेन मम वृद्धिः स्यादिति न देहादीनां ज्ञानसम्भवः, अचेतनत्वात्। एवं ज्ञानाभावादेव देहादीनां भोजनादिषु न प्रवृत्तिः। न च – मम देहाभिवृद्धिः स्यादिति भोजने प्रवर्तते देहीति देहार्थमेव प्रवृत्तिरिति – वाच्यम् ; किं देहादन्यस्यात्मनो देहाभिवृद्ध्या? तस्माद् देहाभिवृद्धिरप्यात्मसुखायैवाकाङ्क्षितेत्यात्मार्थमेव देहाभिवृद्धिकरभोजनादौ प्रवृत्तिरपि, न तु देहार्थम्।

१. स्वशब्देन प्रवृत्तयो ग्राह्याः। वक्ष्यमाणरीत्या अन्यार्थत्वासंभवात् स्वार्थत्वम्। स्वार्थत्वे च वैयर्थ्यम् , स्वस्योपभोगाभावात्। 'अस्वार्थाः सर्वाः प्रवृत्तयः प्रसज्येरन्' इति पा.। २. 'ननु' इति पा.।

**च देहाद्यचेतनार्थत्वं शक्यं कल्पयितुम्। न च सुखार्थं सुखम् , दुःखार्थं वा दुःखम्। आत्मावगत्यवसानार्थत्वाच्च सर्वव्यवहारस्य। तस्माद् यथा स्वदेहस्य परिच्छेदाय न प्रमाणान्तरापेक्षा, ततोऽप्यात्मनोऽन्तरतमत्वात् तदवगतिं प्रति न प्रमाणान्तरापेक्षेति आत्मज्ञाननिष्ठा विवेकिनां सुप्रसिद्धेति सिद्धम्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

मित्याह— **न च देहादीति।** किञ्च ममे[ष्टं] स्यात् अनिष्टं मा भूदिति परमप्रेमास्पदत्वेनाप्यात्मा प्रसिद्ध इत्याह—**न च सुखार्थमिति।** आत्मनः स्वरूपभूता या अवगतिः तद्याप्तविषयत्वाच्च दर्शनादिव्यवहारस्यात्मनः प्रसिद्धिरवगम्यते। अन्यथा 'मयेदं श्रुत'मित्यादिव्यवहाराभावः स्यादिति भावः।

आनन्दगिरिकृतव्याख्या

न चेति। **ननु प्रवृत्तीनां फलावसायितया सुखदुःखयोरन्यतरार्थत्वान्न स्वार्थत्वम् , तत्राह—** न चेति। **प्रवृत्तीनां सुखदुःखार्थत्वेऽपि तयोः स्वार्थत्वासिद्धेरर्थित्वेनात्मा सिध्यतीत्यर्थः। किञ्च [१]'सर्वापेक्षान्यायादात्मावगत्यवसानः सर्वो व्यवहारः। न चात्मन्यप्रसिद्धे यज्ञादिव्यवहारस्य तज्ज्ञानार्थत्वम्। तेनात्मप्रसिद्धिरेष्टव्येत्याह—**आत्मेति। **नन्वात्मा प्रसिद्धोऽपि प्रमाणद्वारा प्रसिध्यति, यत् सिध्यति तत् प्रमाणादेवेति न्यायात् , तत्राह—**तस्मादिति। **मानमेयादिसर्वव्यवहारस्यात्मावगत्यन्तत्वोपगमात् , प्रागेव प्रमाणप्रवृत्तेरात्मप्रसिद्धेरेष्टव्यत्वादित्यर्थः। आत्मावगतेरेवं स्वाभाविकत्वे विवेकवतामारोपनिवृत्त्या ज्ञाननिष्ठा सुप्रसिद्धेत्युपसंहरति—**इत्यात्मेति।

भाष्यार्कप्रकाशः

ननु प्रवृत्तयो नात्मार्थाः, नापि देहाद्यर्थाः, किन्तु सुखार्था एवेत्यत आह—**न च सुखार्थमिति।** प्रवृत्तयः सुखार्था भवन्तु नाम, तच्च सुखं किमर्थमाकाङ्क्ष्यते पुरुषेण? किमात्मार्थं? यद्वा सुखार्थम्? आद्ये, सुखस्यात्मार्थत्वात् सुखहेतुप्रवृत्तयोऽप्यात्मार्था एवेति सिद्धमात्मार्थत्वम् आत्मसुखार्थत्वात् प्रवृत्तीनाम्। द्वितीये, सुखार्थं सुखं पुरुषेणाकाङ्क्ष्यत इत्यनुपपन्नं, व्याघातात् ; सुखस्याचेतनत्वात्। फलभूतस्य साधनभूतस्य च सुखस्यैकत्वे आत्माश्रयात् ; भिन्नत्वेऽनवस्थानात्। तस्मान्न सुखार्थं सुखमिष्यते। एवं दुःखार्थं च दुःखं नेष्यत इति दुःखहेतुप्रवृत्तयोऽपि न दुःखार्थाः, किन्तु शत्रुशरीराद्यवच्छिन्नात्मार्था एव। तत्र हेतुमाह—**आत्मेति।** सर्वव्यवहारस्यात्मावगत्यवसानार्थत्वात्। आत्मावगतिरेव **अवसानार्थः** चरमार्थः, पर्यवसानमिति यावत्। यस्य तत्त्वाद् , आत्मावगतिपर्यवसायित्वादित्यर्थः। आत्मावगतिरवसानं यस्य स आत्मावगत्यवसानः, अर्थः प्रयोजनं यस्य तत्त्वादिति वा। सर्वव्यवहारार्थस्यात्मप्राप्तिपर्यवसायित्वादित्यर्थः। सर्वस्यापि व्यवहारस्य यो योऽर्थः सुखदुःखसुकृतदुष्कृतादिः स सर्वोऽप्यात्मानमेवासाद्य नश्यति, न त्वन्यत्र गच्छतीत्यर्थः। तस्मादात्मन्यप्रसिद्धे सति कर्तुर्भोक्तुश्चाभावाद् व्यर्था एव स्युः सर्वाः प्रवृत्तयः, लुप्ताश्च। यो हि क्रियासु प्रवर्तते, यश्च क्रियाफलमनुभवति तस्यैवाप्रसिद्धत्वे कथं क्रियाणां सिद्धिः? क्रिया हि कर्तृपरतन्त्रा, न स्वतः सिद्ध्येत्। तस्माद् यः कर्म चिकीर्षति, यश्च तत्फलमनुबुभूषति, स आत्मा सुप्रसिद्ध एव। **तस्मादिति।** प्रसिद्धत्वादेवात्मन इत्यर्थः। **परिच्छेदनाय** ज्ञानायेति यावत्। प्रमाणेन चक्षुरादिना प्रमेयं घटादिकं परिच्छिद्यमानं दृश्यते लोके। एवं स्वदेहस्य केनापि प्रमाणेन परिच्छेदो न दृष्टः, प्रमाणव्यवहारात्प्रागेव सर्वस्य स्वदेहज्ञानसम्भवात्। न हि मनुष्यः चक्षुषा मनुष्यमात्मानं जानाति, तथा सति तमसि चक्षुर्व्यापाराभावान्मनुष्योऽहमिति ज्ञानासम्भवप्रसङ्गात्। न च देहस्य स्थौल्यकार्श्यादिपरिच्छेदनाय चक्षुरादिकमावश्यकमिति [वाच्यम्]। स हि न देहपरिच्छेदः, किन्तु गुणपरिच्छेद एवेति। एवं देहपरिच्छेदस्य प्रमाणान्तरानपेक्षत्वं प्रति हेतुरन्तरतमत्वमेव। अन्तरतमत्वं च नित्यसन्निहितत्वम्। न ह्यसन्निहित इवामलके करतलामलकेऽपि प्रमाणापेक्षाऽस्ति पुरुषस्य। तदेव करतलामलकं यदि क्वचित्क्षिप्तं स्यात् तर्हि तत्परिच्छेदनं पुनरावश्यकमेव। एवं च सति सन्निहितत्वासन्निहितत्वे एव वस्तुनः परिच्छेदने प्रमाणापेक्षत्वतदपेक्षत्वयोः प्रयोजके इति सिद्धम्। **ततोऽपीति।** देहादपीत्यर्थः। तदवगतिमात्मज्ञानं प्रति प्रमाणान्तरापेक्षा नास्ति, प्रमाणव्यापारात्प्रागेवात्मज्ञानसम्भवाद्, यः प्रमाणव्यापारेणात्मानं बोद्धुमिच्छति, तस्यैवात्मत्वात् , प्रमातर्यपि प्रमाणव्यापार इत्यस्य विरुद्धत्वाच्चेति हेतोः विवेकिनामात्मज्ञाननिष्ठा

१. 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' (ब्र.सू. ३।४।२६) सूत्रोक्तो न्यायः।

**येषामपि निराकारं ज्ञानमप्रत्यक्षम् , तेषामपि ज्ञानवशेनैव ज्ञेयावगतिरिति ज्ञानमत्यन्तं प्रसिद्धं सुखादिवदेव इत्यभ्युपगन्तव्यम्। जिज्ञासानुपपत्तेश्च। अप्रसिद्धं चेज्ज्ञानं ज्ञेयवज्जिज्ञास्येत। यथा ज्ञेयं घटादिलक्षणं ज्ञानेन ज्ञाता**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ननु 'प्रज्ञानं ब्रह्मे'त्यादिशास्त्रात् (र्थतया?) त्वया ज्ञानस्वभाव आत्मा स्वीक्रियते। तच्च ज्ञानं नित्यानुमेयमिति **भाट्टाः**। अतः कथम् [अ]परोक्षत्वमात्मन इत्याशङ्क्याह—**येषामपीति**। यथा प्रदीपप्रकाश्यं तस्मिन्नप्रकाशमाने न प्रकाशते, तथा ज्ञानप्रकाश्यमप्रकाशमाने ज्ञाने न प्रकाशते। अतो ज्ञानमपरोक्षप्रकाशं वक्तव्यम्। अन्यथा घटज्ञानोदयानन्तरमेव 'ज्ञातोऽयं मया घटः' इति विशिष्टपरामर्शो न स्यादित्यर्थः। अस्तु तर्हि ज्ञानान्तरेणापरोक्षतेत्याशङ्क्याह—**जिज्ञासेति**। ज्ञानं

आनन्दगिरिकृतव्याख्या

**ननु 'अनाकारामेवानुमिमीमहे बुद्धि'मिति वदतामनाकारमप्रत्यक्षमिच्छतां प्रागर्थावगतेरप्रसिद्धमेव ज्ञानम् , नेत्याह—** येषामिति। **सुखादिवन्नित्यानुभवगम्यं ज्ञानम् , नानुमेयम् , विषयावगत्या [1]तदनुमितावितरेतराश्रयादिति भावः। इतश्च ज्ञानं प्रसिद्धम् , अन्यथा तत्र जिज्ञासाप्रसङ्गात्। न च ज्ञाने जिज्ञासा प्रसिद्धा, प्रसिद्धे च तदयोगादित्याह—**जिज्ञासेति। **तदेव प्रपञ्चयति—**अप्रसिद्धं

भाष्यार्कप्रकाशः

सुप्रसिद्धा। न चात्मज्ञानसम्भवेऽपि तन्निष्ठा न सम्भवतीति वाच्यम् ; स्वस्मिन् कदाचिदपि संशयविपर्ययज्ञानानामसम्भवेन निष्ठाया अपि सुलभत्वात्। न ह्यज्ञोऽपि मनुष्यत्वेनाभिमतमात्मानं कदाचित् किमहं मनुष्यः उत पशुरिति, पशुरेवाहमिति, नाहं मनुष्य इति च प्रत्येति, येन संशयादिभिः अहं मनुष्य इत्यात्मज्ञानस्य निष्ठा दुर्लभा स्यात्। तथा प्राज्ञोऽपि सच्चिदानन्दब्रह्मत्वेनाभिमतमात्मानं कदाचिदपि किमहं ब्रह्म, उत संसारीति, संसार्येवाहमिति, नाहं ब्रह्मेति च प्रत्येति, येन संशयादिभिः अहं ब्रह्मेत्यात्मज्ञाननिष्ठा दुर्लभा स्यात्। न हि यथावज्ज्ञाते घटे वस्तुनि संशयाद्युपपत्तिः, येन घटोऽयमिति ज्ञानं निष्ठितं न भवेत्। न हि कोऽपि यथावज्ज्ञातं घटं पुनर्विस्मरति, येन तदविस्मरणाय घटो घट इत्येवं ज्ञानमभ्यस्येत। तस्मादात्मज्ञानं तन्निष्ठा च सुलभैव।

ये तु पुनरात्मानं ब्रह्मेत्यविदित्वा, अन्नादिष्विवात्मनि ब्रह्मबुद्धिमध्यस्य, अहं ब्रह्मेत्युपासते, तेषां भवत्वात्मध्याननिष्ठा दुर्लभा। बुद्धेरेवंविधध्याने चिरावस्थापनस्य दुःशकत्वात्। 'चञ्चलं हि मनः कृष्ण' इत्युक्तं प्रागेवार्जुनेन। तस्माद् विवेकिनां लब्धगुर्वादिप्रसादानामात्मज्ञाननिष्ठा सुलभैवेति सिद्धम्।

ननु निराकारोऽप्यात्मा भवतु प्रसिद्धः, नित्यापरोक्षत्वात्। निराकारं ज्ञानं त्वप्रसिद्धमेवाप्रत्यक्षत्वाद् , अत आह—**येषामिति**। येषां वादिनां निराकारं ज्ञानमप्रत्यक्षमित्यभिमतं तेषामपि ज्ञानमत्यन्तप्रसिद्धमेवेत्यभ्युपगन्तव्यम्। कुतः? ज्ञानवशेनैव ज्ञेयावगतिरिति हेतोः। घटादयो हि ज्ञेया ज्ञानवशेनैवावगम्यन्ते ज्ञात्रा। न हि घटमानयेति पित्रादिष्टः पुत्रः 'अयं घटः' इति ज्ञानाभावे घटमानयेत्। न च 'अयं घट' इति ज्ञानस्य साकारत्वात् प्रसिद्धत्वमिति वाच्यम् ; तत्रापि विषयांशो घट एव साकारः, न तु विषय्यंशो ज्ञानमिति। तथाहि— 'अयं घट' इति ज्ञानस्य साकारत्वं किं त्वं घटशब्दवत्त्वाद् ब्रूषे, उत घटवत् कम्बुग्रीवाद्याकारवत्त्वात्? नाद्यः, अयं घट इति वाक्य एव शब्दोऽस्ति, न तु तज्ज्ञान इति। अन्यथा अयं रामशब्द इति ज्ञानेऽपि रामशब्दः स्यात्। न चेष्टापत्तिः, [2]रामशब्दे रामशब्द इति व्याघातात्। शब्दवतो वाक्यत्वेन ज्ञानस्यापि वाक्यत्वप्रसङ्गात्। ज्ञाने वर्तमानस्य शब्दस्य ग्रहणाय ज्ञानान्तरापेक्षायामनवस्थाप्रसङ्गात्। स्वेनैव स्वधर्मभूतशब्दग्रहणस्यासम्भवात्। यद्ययं घट इति ज्ञाने घटशब्दः स्यात् , तर्हीदं ज्ञानं घटशब्दयुक्तमिति ज्ञानं स्यात् , तच्च न दृश्यतेऽनुभवविरोधात्। न हि कोऽपीदं ज्ञानं घटशब्दवदिति प्रत्येति। तस्मान्न ज्ञाने घटशब्दोऽस्ति, नापि कम्बुग्रीवाद्याकारोऽस्ति, ज्ञाने तददर्शनात्। यद्यस्ति तद्ग्रहणार्थं ज्ञानान्तरापेक्षायामनवस्थाप्रसङ्गात् , स्वेनैव स्वाकारग्रहणायोगादिदं कम्बु-

---

१. विषयगताऽवगतिः ज्ञाततापरपर्यायं प्राकट्यम्। ततो ज्ञानानुमितिः भाट्टानामिष्टा। २. 'राम' इति ज्ञाने रामशब्दो वर्तत इति रामाकारत्वं चेत् , 'रामशब्द' इति ज्ञाने रामशब्दाकारत्वं रामशब्दशब्दवत्त्वाद् वक्तव्यम्। तत्र च रामशब्द इति शब्दे रामशब्दो वर्तत इति आत्माश्रय इत्यर्थः।

भाष्यार्कप्रकाशः

ग्रीवाद्याकारवज्ज्ञानमिति प्रतीत्यभावादिति। न च सविषयत्वाद् अयं घट इति ज्ञानं साकारमिति वाच्यम्; किं सविषये ज्ञाने घटो विषयः, उत निर्विषये? आद्ये, घटस्य ज्ञानविषयत्वापत्तेः प्राक्कथं ज्ञानस्य सविषयत्वम्? द्वितीये, सिद्धमेव निराकारं ज्ञानम्। न चोत्पन्ने ज्ञाने घटो न विषयो भवति, किन्तूत्पद्यमानमेव ज्ञानं सविषयमुत्पद्यत इति वाच्यम्; ज्ञानस्य जन्मनाशयोरभावात्। भावे वा तद्ग्रहणार्थं ज्ञानान्तरापेक्षायां तस्यापि ज्ञानान्तरस्य जन्मनाशवत्त्वेन तद्ग्रहणार्थं ज्ञानान्तरापेक्षायामनवस्थाप्रसङ्गात्, स्वेनैव स्वनाशोदयग्रहणासम्भवाच्च। न च ज्ञात्रा ज्ञानस्य जन्मनाशौ गृह्येते इति वाच्यम्; ज्ञानस्यैव ज्ञातृत्वात्। न च ज्ञानं न ज्ञाता, किन्तु ज्ञानाश्रयो ज्ञातेति वाच्यम्; ज्ञानोदयात्प्राग्ज्ञाननाशान्तरं च तस्य ज्ञातृत्वासिद्धेः। न चेष्टापत्तिः, त्वत्समीहितज्ञानोदयतन्नाशयोरेवासिद्धेः। कथम्? असाक्षिकयोर्ज्ञानप्रागभावप्रध्वंसाभावयोरनभ्युपगन्तव्यत्वात्। न चात्मसाक्षिकावेवेति वाच्यम्; ज्ञानप्रागभाववत्यात्मनि ज्ञानसत्त्वायोगात्, तत्सत्त्वे वा ज्ञानप्रागभावायोगात्। एवं ज्ञानप्रध्वंसानन्तरं ज्ञानसत्त्वायोगात्, तत्सत्त्वे ज्ञानप्रध्वंसायोगाच्च। तस्माज्ज्ञानप्रागभाववतो ज्ञानप्रध्वंसाभाववतश्चात्मनो ज्ञातृत्वमसम्भव्येव।

**ननु** सविषयाण्युत्पद्यमानानि ज्ञानान्यनन्तानि तत्प्रागभावाश्चानन्तास्तत्प्रध्वंसाभावाश्चानेक इति चेत्, **मैवम्**; युगपदनन्तज्ञानसत्त्वे प्रमाणाभावात्। अयं घट इति ज्ञानसत्त्वे अयं पट इति ज्ञानान्तरानुदयात्। क्षणभेदाज्ज्ञानभेदाभ्युपगमे तु पूर्वोक्तदोषप्रसक्तिः। पटज्ञाननाशानन्तरं घटज्ञानोदयात्प्राक् च ज्ञानाभावादात्मनः पटज्ञाननाशो घटज्ञानोदयश्चासाक्षिकत्वान्नैव सिध्यत इति। न चायं घटप्रागभाव इति, अयं घटप्रध्वंसाभाव इति च ज्ञानमस्ति तदाप्यात्मन इति वाच्यम्; तथाऽनुभवाभावात्। न च घटो नास्तीत्यनुभवोऽस्तीति वाच्यम्; तज्ज्ञानेन घटज्ञानोदयतन्नाशयोर्ग्रहणायोगात्। घटाभाव एव हि तेन गृह्यते, अयं घटप्रागभावः इत्यनुभवसत्त्वेऽपि न तेन घटज्ञानोदयो गृह्यते। नाप्ययं घटप्रध्वंसाभावः इति ज्ञानेन घटज्ञाननाशः, किन्तु घटाभाव एव गृह्यते। तस्मादयं घटज्ञानोदयः, अयं घटज्ञाननाश इति ज्ञानाभावादसाक्षिकावेव घटज्ञानस्यापि जन्मनाशौ। यदि घटज्ञानोदय इति ज्ञानमस्तीत्याग्रहः, तर्हि तस्यापि घटज्ञानोदयज्ञानस्य सादित्वेन घटज्ञानोदयज्ञानोदयार्थमन्यस्यापि ज्ञानस्याभ्युपगन्तव्यत्वादनवस्थादोषप्रसक्तिः।

नन्वनुमानाद् घटज्ञानस्य जन्मनाशौ सिद्ध्यतः, अस्मिन् पक्षे घटज्ञानसत्त्वात्; क्षणान्तरे तदभावाच्चेति चेत्, **मैवम्;** क्षणान्तरे घटज्ञानाभावरूपहेतोरेवासाक्षिकत्वेनानुमानानवतारात्। तस्माद् 'नोदेति नास्तमेत्येषा संविदेका स्वयम्प्रभा।' न चैवं सदाऽपि घटज्ञानमेव भवेदिति वाच्यम्; ज्ञाने सदाऽपि घटस्य विषयत्वाभावात्। तदभावे को हेतुरिति चेदुच्यते। न हि केवल आत्मस्वरूपभूते ज्ञाने घटादयो विषया भवितुमर्हन्ति, सुषुप्त्यादावपि तत्प्रसङ्गात्। किं तर्हि? बुद्धिवृत्त्यभिव्यक्ते चैतन्य एव। सा च बुद्धिवृत्तिः क्षणिकेति न घटज्ञानस्य सदा सत्त्वप्रसङ्गः। न चैवं विषयाकारपरिणामरूपाया बुद्धिवृत्तेः साकारत्वात् तदभिव्यक्तचैतन्यमपि साकारमेवेति सिद्धं ज्ञानस्य साकारत्वमिति वाच्यम्; दर्पणाभिव्यक्तमुखस्य दर्पणाकारेण साकारत्वादर्शनात्। अन्यथाऽन्तःकरणप्रतिफलित आत्माऽप्यन्तःकरणाकारेण साकारः स्यात्। जले प्रतिफलितं गगनमपि जलाकारेण साकारं स्यात्। तस्मात् प्रतिबिम्बस्य बिम्बाकारत्वमेव, नोपाध्याकारत्वमिति न बुद्धिवृत्त्यभिव्यक्तचैतन्यस्य बुद्धिवृत्त्याकारत्वम्, किन्तु बिम्बभूतचैतन्याकारत्वमेव। तच्च चैतन्यं निराकारमिति प्रतिबिम्बचैतन्यमपि निराकारमेव। बिम्बप्रतिबिम्बयोरौपाधिक एव भेदो न तात्त्विक इति न चैतन्यद्वित्वप्रसङ्गः।

**ननु** यदा बुद्धिवृत्तिरस्ति तदा तत्प्रतिफलितचैतन्यमस्ति; यदा बुद्धिवृत्तिर्नास्ति तदा प्रतिबिम्बचैतन्यमपि नास्तीति वृत्तिप्रतिफलितचैतन्यं न नित्यमिति चेत्, **मैवम्**; यदि वृत्तिप्रतिफलितचैतन्यं बिम्बचैतन्यादतिरिक्तं स्यात् तर्हि भवेदेवानित्यम्, न तु तथाऽतिरिक्तम्। किन्तु तदनतिरिक्तमेवेति नित्यमेव, प्रतिफलनांशस्यानित्यत्वेऽपि चैतन्यांशस्य नित्यत्वात्। तस्मान्निराकारमेकं स्वप्रभं नित्यं च ज्ञानमिति स्थितम्। तदेवात्मस्वरूपमिति च। न च न ज्ञानमात्मेति वाच्यम्; आत्मनो ज्ञानादन्यत्वे घटादिवद्भास्यत्वप्रसङ्गात्। घटादयो हि ज्ञानेन भास्यन्ते। न च सूर्यस्थानीय आत्मा, प्रकाशस्थानीयं ज्ञानमिति वाच्यम्; प्रकाशातिरिक्तसूर्यपदार्थाभावात्। न च प्रकाशः चूर्णस्थानीयः, पिण्डस्थानीयस्तु सूर्य इति वाच्यम्; चूर्णस्यैव पिण्डीभूतत्वेन चूर्णात्मकत्वात् पिण्डस्य। न च घनीभूततेजः परमाणुपुञ्जः सूर्यः, विरलीभूतास्तु तेजःपरमाणवः प्रकाश इति वाच्यम्; सूर्यस्य सावयवत्वेनैतत्कल्पनाया उपपत्तावपि

**व्याप्तुमिच्छति, तथा ज्ञानमपि [1]ज्ञानान्तरेण ज्ञाता व्याप्तुमिच्छेत्। न चैतदस्ति। अतोऽत्यन्तप्रसिद्धं ज्ञानम्। ज्ञाताऽपि अत एव प्रसिद्ध इति। तस्माज्ज्ञाने यत्नो न कर्तव्यः, किन्तु अनात्मन्यात्मबुद्धिनिवृत्तावेव। तस्माज्ज्ञाननिष्ठा सुसम्पाद्या॥५०॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ज्ञातुम् इच्छामीत्यनुभवाभावाद् योग्यानुपलम्भादभावे ज्ञानान्तरस्य सिद्धे स्वतोऽपरोक्षं ज्ञानमित्यर्थः। ननु ज्ञानस्यानित्यत्वाद् ज्ञातृस्वरूपत्वायोगात् प्रसिद्धे ज्ञाने नात्मा प्रसिद्ध इत्याशङ्क्याह—**ज्ञाताऽप्यत एवेति**। स्वप्रकाशस्य ज्ञानस्य स्वतः परतो वा प्रागभावाद्यसिद्धेः तत्स्वभाव आत्मा स्वतोऽपरोक्ष इत्यर्थः॥५०॥

आनन्दगिरिकृतव्याख्या

चेदिति। **दृष्टान्तमेव व्याचष्टे—**यथेति। **दार्ष्टान्तिकं विवृणोति—**तथेति। **इष्टापत्तिं निराचष्टे—**न चेति। **ज्ञानस्य ज्ञानान्तरेण ज्ञेयत्वम्** एतच्छब्दार्थः। **अनवस्थापत्तेरित्यर्थः। ज्ञाने जिज्ञासानुपपत्तौ फलितमाह—**अत इति। **प्रसिद्धेऽपि ज्ञाने ज्ञातर्यात्मनि किमायातम्? तदाह—**ज्ञाताऽपीति। **ज्ञानस्य विना ज्ञातारमपर्यवसानादित्यर्थः। ज्ञानस्य प्रसिद्धत्वे तत्र [2]भावनापर्यायो विधिर्नास्तीत्याह—**तस्मादिति। **कुत्र तर्हि प्रयत्नाख्या भावनेत्याशङ्क्याह—**किन्त्विति। **अविषये निराकारे चात्मनि ज्ञाननिष्ठायाः दुःसम्पाद्यात्वाभावे फलितं निगमयति—**तस्मादिति॥५०॥

भाष्यार्कप्रकाशः

निरवयवस्य नात्मन एतत्कल्पनोपपद्यते। घनीभूतज्ञानावयवपुञ्ज आत्मेति , विरलीभूतज्ञानावयवा ज्ञानमिति च वक्तुमशक्यत्वात्। तस्माज्ज्ञानमेवात्मा।

**ननु** यदि ज्ञानमेवात्मा तर्ह्यात्मनः सुप्रसिद्धत्ववचनेनैव ज्ञानस्यापि सुप्रसिद्धत्वं सिद्धमिति कुतः पुनर्वचनं ज्ञानमत्यन्तप्रसिद्धमिति चेद्? **उच्यते**—ब्रह्मण आत्मत्वेन रूपेण सुप्रसिद्धिः पूर्वमुक्ता, ज्ञानत्वेन रूपेणाधुनेति। तस्माज्ज्ञानस्याप्रसिद्धत्वे ज्ञानवशेन ज्ञेयावगतिर्नैव स्यादिति सर्वव्यवहारलोपप्रसङ्गः, ज्ञानपूर्वकत्वात् सर्वव्यवहारस्य। तस्माज्ज्ञानमत्यन्तप्रसिद्धम्। किमिवेत्यत आह—**सुखादिवदिति**। न हि स्वानुभवसिद्धं सुखं केनापि प्रमाणान्तरेण बोद्धुमिच्छति पुरुषः। एवं प्रसिद्धत्वादेव सुखादिवज्ज्ञानस्यापि जिज्ञासानुपपत्तिरित्याह—**जिज्ञासानुपपत्तेश्चेति**। तदेव विवृणोति—**अप्रसिद्धमिति**। **जिज्ञास्येत** ज्ञातुमिष्येत। यथा ज्ञेयं घटादिविषयं ज्ञातुमिच्छति पुरुषः, तथा ज्ञानं ज्ञातुं नेच्छति। कुतः? प्रसिद्धत्वादेव। [3]अप्रसिद्धं हि जिज्ञासाविषयम्। ज्ञेयवदित्येतद् विवृणोति—**यथेति**। ज्ञेयमित्यस्यैवार्थो ज्ञातव्यमिति। घटादिलक्षणं वस्तु यथा **ज्ञानेनाप्तुमिच्छति** ज्ञातुमिच्छतीत्यर्थः। तथा ज्ञातव्यं ज्ञानमपि ज्ञानान्तरेणाप्तुमिच्छेत् , ज्ञातव्यत्वाविशेषाज्ज्ञानघटयोः।

ननु ज्ञानमपि ज्ञेयमिव ज्ञातुमिच्छेत् को दोषः? तत्राह—**न चैतदस्तीति**। **एतत्** ज्ञानस्य जिज्ञास्यमानत्वं नैवास्ति। ज्ञानेन घटमिव ज्ञानमप्याप्तुमिच्छति यदि तर्हि करणभूतं तज्ज्ञानं कर्मभूताज्ज्ञानात् किं भिन्नमुताभिन्नम्? आद्ये, तदपि करणभूतं ज्ञानमाप्तुं ज्ञानान्तरं करणं स्यादित्येवमनवस्था। द्वितीये, स्वस्यैव करणत्वं कर्मत्वं चेति विरुद्धम् । तस्मान्न ज्ञानस्य जिज्ञास्यमानत्वमस्ति। **अत इति**। ज्ञानस्य जिज्ञास्यत्वाभावादित्यर्थः। ज्ञानमत्यन्तप्रसिद्धं स्वप्रकाशत्वादिति भावः। **अत एवेति**। ज्ञानस्यातिप्रसिद्धत्वादेव ज्ञाता आत्माऽपि प्रसिद्धः, ज्ञानस्यैवात्मत्वादिति भावः। **तस्मादिति**। एवमतिप्रसिद्धत्वाज्ज्ञानस्वरूपस्यात्मन इत्यर्थः।

नन्वात्मज्ञाने यदि प्रयत्नो न कर्तव्यस्तर्हि वेदान्तशास्त्रं वृथा, आत्मज्ञानार्थत्वात् तस्येत्यत आह— **किन्त्विति**। **अनात्मनि** अव्यक्तादिदेहान्तेष्वित्यर्थः। या **आत्मबुद्धिः** आत्मेति भ्रम अविदुषामिति भावः। तन्निवृत्तावेव यत्नः कर्तव्यः, मुमुक्षुणेति शेषः। **तस्मादिति**। अनात्मन्यात्मबुद्धिनिवृत्तौ सत्यां स्वत एवात्मस्वरूपस्य स्फुरणसम्भवादित्यर्थः। ज्ञाननिष्ठेत्यात्मज्ञाननिष्ठेत्यर्थः।

**ननु** आत्मज्ञाननिष्ठायाः सुसम्पाद्यत्वेऽपि न तया किमपि फलम् ; किन्तु ब्रह्मज्ञाननिष्ठैव सम्पादनीया, मोक्षहेतुत्वात्। सा च न

१. 'ज्ञानान्तरेण ज्ञातव्यमाप्तुमिच्छेत्' 'ज्ञानान्तरेण व्याप्तुमिच्छेत्' इति पा.। २. शाब्दी भावनेत्यर्थः। ३. अनिश्चितमित्यर्थः। न तु यथाश्रुतम्।

**बुद्ध्या विशुद्धया युक्तो धृत्याऽऽत्मानं नियम्य च।**
**शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च॥५१॥**

**सेयं ज्ञानस्य परा निष्ठोच्यते कथं कार्येति?—** बुद्ध्येति। बुद्ध्या [१]अध्यवसायात्मिकया विशुद्धया **मायारहितया** युक्तः **सम्पन्नः,** धृत्या **धैर्येण** आत्मानं **कार्यकरणसंघातं** नियम्य **च नियमनं कृत्वा वशीकृत्य,** शब्दादीन् **शब्द आदिः**

आनन्दगिरिकृतव्याख्या

**ब्रह्मज्ञानस्य परां निष्ठां प्रतिष्ठापितामनूद्य श्लोकान्तरमवतारयितुं पृच्छति—**सेयमिति। **येयं ब्रह्मज्ञानस्य** परा निष्ठा **समारोपिता-तद्धर्मनिवृत्तिद्वारा ब्रह्मणि परिसमाप्तिर्ज्ञानसन्तानरूपा उच्यते, सा** कार्या **सुसम्पाद्येति यदुक्तं तत्** कथं **केनोपायेनेति प्रश्नार्थः। पृष्टमुपाय-भेदमुदाहरति—**बुद्ध्येति। अध्यवसायो **ब्रह्मात्मत्वनिश्चयः,** मायारहितत्वं **संशयविपर्ययशून्यत्वम्। शब्दादिसमस्तविषयत्यागे देहस्थितिः**

भाष्यार्कप्रकाशः

सम्भवति, निराकारत्वाद् ब्रह्मणोऽप्रसिद्धत्वाच्चेति चेत् , **मैवम्** ; ब्रह्मण्यत्यन्ताप्रसिद्धे सति तज्ज्ञाननिष्ठाया एवानाकाङ्क्ष्यत्वात्। ननु नात्यन्तमप्रसिद्धं ब्रह्म, किन्त्वनुमानादिना किञ्चित्प्रसिद्धमेव, तत एव तज्जिज्ञासोपपत्तिरिति चेत् , तर्हि शास्त्रेण तदेव ब्रह्म आत्मेति विदित्वा सुप्रसिद्धे ब्रह्मणि निष्ठां लभस्व। न च – शास्त्रेण ब्रह्मात्माभेदे प्रोक्तेऽप्यनुभवविरोधात् कथं सोऽर्थोऽवसीयते? सुखदुःखजन्म-मरणादिलक्षणसंसारवानहं क्व? सच्चिदानन्दब्रह्माभेदो मम क्व? इति – वाच्यम् ; कथं ज्ञायते संसार्यात्मेति। न च मयैवानुभूयते मम संसार इति वाच्यम् ; यस्त्वयाऽनुभूयते संसारः स नानुभवितुस्तव धर्मः, किन्तु मनआद्यनात्मधर्म एव, स्वधर्मस्य स्वग्राह्यत्वासम्भ-वात् ; जन्ममरणयोर्देहधर्मत्वस्य सुखदुःखयोर्मनोधर्मत्वस्य च दर्शनात्। न च – सुख्यहं दुःख्यहमित्यादिप्रतीतेः का गतिरिति – वाच्यम् ; अज्ञानकृताध्यास एव गतिरिति। यथा नास्तिकोऽनात्मदेहधर्मानात्मन्यध्यस्य जातो मृतः स्थूलो मनुष्यः काणोऽहमिति मन्यते, तथा आस्तिकश्चानात्ममनआदिधर्मानात्मन्यध्यस्य कर्ताऽहं, भोक्ताऽहं, सुख्यहं, दुःख्यहमिति मन्यते। तस्मादविवेककृत एवायं व्यवहारः। यद्यात्मधर्मः संसारः स्यात् , तर्हि सुषुप्तिमृतिमूर्छास्वपि स दृश्येत। न चानुभूयमानस्य ज्वरादितापस्य कथमपलाप इति वाच्यम् ; किं ज्वरादितापो देहादेरुतात्मनः? आद्ये, सिद्धमसंसारित्वमात्मनः। द्वितीये, कथं सुषुप्तौ ज्वरादितापादर्शनम्? कथं वा अनात्मचिकित्सया देहादितापनिवृत्तिः? यद्ययमात्मतापस्तर्ह्यात्मैव चिकित्सितव्यः, न तु देहादिः, रोगभेषजयोर्वैयधिकरण्यायोगात्। अन्यथा पितरि रुग्णे सति पुत्रो भेषजं सेवेत। तस्मादात्मनाऽनुभूयमानत्वादेव ज्वरतापादयो न आत्मधर्माः, किन्त्वनात्मधर्मा एवेत्यनुभवरूपोऽयमात्मा असंसार्येव सच्चिदानन्दं ब्रह्म। एवं ब्रह्मण आत्मत्वादेव ब्रह्मज्ञाननिष्ठा विदुषां सुसंपाद्या। ये त्वविद्वांसः पण्डितम्मन्याश्च नाहं ब्रह्मेति मन्यन्ते तेषां ब्रह्मज्ञाननिष्ठा दुःसम्पाद्यैवेति सगुणब्रह्मोपासने, यद्वा कर्मयोगे ते यावज्जीवं प्रवर्तन्ताम्। 'अनेकजन्मसंसिद्धस्ततो याति परां गति'मिति गीतावचनादनेकजन्मभिस्ते ज्ञाननिष्ठायोग्यतालक्षणं संसिद्धिं प्राप्य, संन्यस्य ज्ञाननिष्ठां सम्पाद्य, सच्चिदानन्दं ब्रह्माहमिति सम्यग्ज्ञानान्मुच्यन्ते। येषां पुनर्जन्मान्तरानुष्ठितसुकृतप्रयुक्तेश्वरानुग्रहाद् अद्वैतसिद्धिः, त इहैव जन्मनि मुच्यन्ते, अयमेव द्वैतिनामद्वैतिनां च विशेषो यत्परम्परया द्वैतिनां मुक्तिः, साक्षात्पुनरद्वैतिनामिति ॥५०॥

**बुद्ध्येति** श्लोकमवतारयति—**सेयमिति**। सेयं ज्ञानस्य परा निष्ठा कथं कार्येत्यत्रेदमुच्यत इत्यन्वयः। **कथं कार्येति**। केनोपायेन सम्पाद्येत्यर्थः। मुमुक्षुभिरिति शेषः। विशुद्धया बुद्ध्या युक्तःसन् धृत्या आत्मानं नियम्य च, शब्दादीन् विषयान् त्यक्त्वा, रागद्वेषौ चोदस्य, विविक्तसेवी लघ्वाशी यतवाक्कायमानसः नित्यं ध्यानयोगपरश्च भूत्वा नित्यं वैराग्यं समुपाश्रितःसन् , अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहं च विमुच्य निर्ममः शान्तश्च सन् ब्रह्मभूयाय कल्पत इति श्लोकत्रयान्वयः। **विशुद्धया** निष्कपटया **बुद्ध्या** सात्त्विक्या 'प्रवृत्तिं च निवृत्तिं चे'ति श्लोकोक्तलक्षणया निश्चयात्मिकया युक्तःसन् **धृत्या** सात्त्विक्या पूर्वोक्तलक्षणयाऽऽत्मानमात्मत्वेनाभिमतं **कार्य-**

१. 'अध्यवसायलक्षणया' इति पा.।

## विविक्तसेवी लघ्वाशी यतवाक्कायमानसः।
## ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः॥५२॥

**येषां ते शब्दादयः, तान् विषयान् त्यक्त्वा, सामर्थ्याच्छरीरस्थितिमात्र[1]हेतून् केवलान् मुक्त्वा ततोऽधिकान् सुखार्थान् त्यक्त्वेत्यर्थः। शरीरस्थित्यर्थत्वेन प्राप्तेषु च रागद्वेषौ** व्युदस्य **च परित्यज्य च॥५१॥**

**ततः—** विविक्तेति। विविक्तसेवी **अरण्यनदीपुलिनगिरिगुहादीन् विविक्तान् देशान् सेवितुं शीलमस्येति विविक्तसेवी।** लघ्वाशी **लघ्वशनशीलः। विविक्तसेवालघ्वशनयोर्निद्रादिदोषनिवर्तकत्वेन चित्तप्रसादहेतुत्वाद् ग्रहणम्।** यतवाक्कायमानसो **वाक् च कायश्च मानसं च यतानि संयतानि यस्य ज्ञाननिष्ठस्य स ज्ञाननिष्ठो यतिः यतवाक्कायमानसः स्यात्। एवम् उपरतसर्वकरणः सन् ,** ध्यानयोगपरो **ध्यानम् आत्मस्वरूपचिन्तनम् , योगः आत्म-**

आनन्दगिरिकृतव्याख्या

अपि दुःस्था **स्यादित्याशङ्क्याह—**सामर्थ्यादिति। **विषयमात्रत्यागे देहस्थित्यनुपपत्तेर्ज्ञाननिष्ठाऽसिद्धिप्रसङ्गादित्यर्थः। देहस्थित्यर्थत्वेनानुज्ञातेष्वर्थेषु प्राप्तं रागादि ज्ञाननिष्ठाप्रतिबन्धकं व्युदस्यति—**शरीरेति। परित्यज्य **विविक्तसेवी स्यादिति सम्बन्धः॥५१॥**

**बुद्धेर्वैशारद्यम् , यत्नेन कार्यकरणनियमनम् , देहस्थितिहेत्वतिरिक्तविषयत्यागः , देहस्थित्यर्थेष्वपि तेषु रागद्वेषवर्जनमित्युपायभेदे सिद्धे सन्त्युपायान्तराण्यपि यत्नसाध्यानीत्याह—**तत इति। **चित्तैकाग्र्यप्रसादार्थं विविक्तसेवित्वं व्याकरोति—**अरण्येति। **निद्रादिदोषनिवृत्त्यर्थं लघ्वाशित्वं विशदयति—** लघ्विति। लघु **परिमितं हितं मेध्यं चाशितुं शीलमस्येति तथोच्यते। विशेषणयोस्तात्पर्यं विवृणोति—**विविक्तेति। **निद्रादीत्यादिशब्दादालस्यप्रमादादयो बुद्धिविक्षेपका विवक्षिताः। वक्ष्यमाणध्यानयोगयोरुपायत्वेन विशेषणान्तरं विभजते—**वाक् चेति। **वागादिसंयमस्यावश्यकत्वद्योतनार्थं** स्यादित्युक्तम्। **संयतवागादिकरणग्रामस्यानायासेन कर्तव्यमुपदिशति—**एवमिति। **मन्त्रजपादीत्यादिपदेन प्रदक्षिणप्रणामादयो ध्यानयोगप्रतिबन्धका गृहीताः। उक्तयोरेव ध्यानयोगयोरुपायत्वेनोक्तं विरागभावं**

भाष्यार्कप्रकाशः

**करणसंघातं** देहेन्द्रियसंघातं **नियम्य** उत्पथान्निवर्त्य मनःप्राणेन्द्रियक्रियाणामुच्छास्त्रमार्गविषयान्निवर्तनस्य सात्त्विकधृतिकार्यत्वादिति भावः। यद्वा **नियम्य** स्वाधीनीकृत्य यथा स्वयमिन्द्रियादिपरतन्त्रो न स्यात् तथा कृत्वेत्यर्थः। अत एव शब्दस्पर्शादीन् विषयान् त्यक्त्वा, न हि चपलेन्द्रियस्य चपलचित्तस्य च विषयत्यागः सम्भवति। तस्मान्मनइन्द्रियनिग्रहपूर्वकं शब्दादिविषयत्यागः कर्तव्य इति भावः।

ननु यदि सर्वात्मना विषयत्यागस्तर्हि शरीरमेव पतेदन्नपानाद्यभावात् , ततश्च ज्ञानोदयो न स्यादारम्भदशायामेव मरणात् , अत आह—**सामर्थ्यादिति**। ज्ञाननिष्ठाविधानसामर्थ्यादित्यर्थः। **शरीरस्थितिमात्रानिति(?)**। तन्मात्रफलकानित्यर्थः। **केवलानिति**। [2]न कामक्रोधादिहेतूनित्यर्थः। शरीरस्थितिमात्रफलकविषयातिरिक्तशब्दादिविषयांस्त्यक्त्वेत्यर्थः। ननु यदि शरीरस्थित्यर्थं विषयसेवा स्यात् , तर्हि अन्नपानादिविषयेषु रागः, अन्यत्र द्वेषश्च स्याद् , अत आह—**रागद्वेषौ व्युदस्य चेति**। अनुप्राप्तेष्विति, विषयेष्विति च शेषः ॥५१॥

**विविक्तेति**। **विविक्ता** विजनाः पूताश्च। **लघ्वाशी** स्वल्पाहार इत्येतत्। ननु किमर्थं विविक्तसेवालघ्वशनयोर्ग्रहणम्? अत आह—**निद्रादीति**। पत्तनादिजनसहितदेशसेवया ग्राम्यकथाप्रसङ्गः स्यात् ; सुरूपसुगन्ध्यादिद्रव्यदर्शनाच्चित्तेन्द्रियविक्षेपश्च स्यात्। बह्वशनात्तु निद्रामदादयः स्युरिति भावः। **यतेति**। वाङ्नियमः कायनियमो मानसनियमश्चेति नियमत्रयमस्यावश्यकं वाचिककायिकमानसिकव्यापारनिवृत्त्यर्थम्। ततश्च मौनी जितासनो जितमानसश्च भूत्वेति सिद्धम्। अत एवाह—**एवमुपरतसर्वकरणः सन्निति**। उपरतानि निर्व्यापाराणि सर्वाण्यन्तर्बहिःस्थानि करणानि मनइन्द्रियाणि यस्य स तथोक्तः। ध्यानयोगौ परौ यस्य स **ध्यानयोगपरः**।

---

१. 'हेतुभूतान्' इति पा.। २. मात्रपदेनापुनरुक्तये केवलानिति विशेषणस्य व्यावर्त्यान्तरमाह—नेति।

**अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्।**
**विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते॥५३॥**

**विषय [1]एवैकाग्रीकरणम् , तौ ध्यानयोगौ परत्वेन कर्तव्यौ यस्य स ध्यानयोगपरः,** नित्यम् , **नित्यग्रहणं मन्त्र-जपाद्यन्यकर्तव्याभावप्रदर्शनार्थम्।** वैराग्यं **विरागभावो दृष्टादृष्टेषु विषयेषु वैतृष्ण्यं** समुपाश्रितः **सम्यगुपाश्रितो नित्य-मेवेत्यर्थः॥५२॥**

**किञ्च—**अहङ्कारमिति। अहङ्कारम् **अहङ्करणमहङ्कारः देहेन्द्रियादिषु तम्** , बलं **सामर्थ्यं [2]कामरागादियुक्तम् , नेतरच्छरीरादिसामर्थ्यम् , स्वाभाविकत्वेन तत्त्यागस्याशक्यत्वात्।** दर्पम् **- दर्पो नाम हर्षानन्तरभावी धर्मातिक्रमहेतुः 'हृष्टो दृप्यति, दृप्तो धर्ममतिक्रामति' (आ.ध.सू.१.१३.४) इति स्मरणात् ; तं च,** कामम् **इच्छां,** क्रोधं **द्वेषं,** परिग्रहम् , **इन्द्रियमनोगतदोषपरित्यागेऽपि शरीरधारणप्रसङ्गेन धर्मानुष्ठाननिमित्तेन वा बाह्यः परिग्रहः प्राप्तः, तं च** विमुच्य **परित्यज्य परमहंसपरिव्राजको भूत्वा देहजीवनमात्रेऽपि निर्गतममभावो** निर्ममः, **अत एव** शान्त **उपरतः यः संहृत-**

आनन्दगिरिकृतव्याख्या

**विभजते—**दृष्टेति। **सम्यक्त्वमेव व्यनक्ति—**नित्यमिति॥५२॥

**ज्ञाननिष्ठस्य यतेर्विशेषणान्तरं समुच्चिनोति—**किञ्चेति। **नित्यं ध्यानयोगपरत्वे समुच्चितं कारणान्तरं विवृणोति—**अहङ्करणम् इति। **सामर्थ्यमात्रे बलशब्दादुपलभ्यमाने, किमिति विशेषवचनमित्याशङ्क्याह—**स्वाभाविकत्वेनेति। **उक्तेऽर्थे मानमाह—**हृष्ट इति। **वैराग्यशब्देन लब्धस्यापि कामत्यागस्य पुनर्वचनं प्रकृष्टत्वख्यापनार्थम्। अहङ्कारादित्यागे परिग्रहप्राप्त्यभावात् तत्त्यागोक्तिरयुक्तेत्या-शङ्क्याह—**इन्द्रियेति। **परिग्रहाभावे ममत्वविषयाभावान्निर्ममत्वं कथमित्याशङ्क्याह—**देहेति। **अहङ्कारममकारयोरभावेन प्राप्तामन्तः-करणोपरतिमनुवदति—**अत एवेति। **उक्तमनूद्य जीवन्नेवासौ ब्रह्मीभवतीति फलितमाह—**यः संहृतेति। **ज्ञाननिष्ठपदादूर्ध्वं 'स'शब्दो**

भाष्यार्कप्रकाशः

परशब्दश्चात्र लक्षणया कर्तव्यपर इत्याह—**परत्वेनेति**। उत्कृष्टं हि कर्तव्यमिति मन्यते लोकः। योगशब्दार्थमाह—**आत्मेति**। आत्मनि विषये चित्तस्य यदेकाग्रीकरणं तद् योग इत्युच्यते। नित्यं सदाऽपि ध्यानयोगपरः। सर्वदाऽपि ध्यानयोगावेवास्य कर्तव्यौ, न तु मन्त्र-जपादिकमिति भावः। तदेवाह—**नित्यग्रहणमिति**। नित्यमिति पदं काकाक्षिन्यायेन वैराग्येऽप्यन्वेतीत्याह—**नित्यमेवेति**। न तु कदा-चिदपि दृष्टेष्वदृष्टेषु चेष्टेषु विषयेषु रागः कर्तव्य इत्यर्थः॥५२॥

**अहङ्कारमिति**। **अहङ्करणमिति**। अहमिदं करोमीत्यादिरूपम्। **दर्पो** गर्वः। **इच्छाम्** इष्टविषयेष्विति भावः। **द्वेषम्** अनिष्ट-विषयेष्विति भावः। यद्यपि 'रागद्वेषावुदस्य चे'त्यनेन कामं क्रोधं विमुच्येति सिद्धम्, तथापि शरीरस्थितिहेतुभूतविषयगतरागद्वेषत्यागः पूर्वमुक्तः। इह त्विष्टानिष्टविषयगतरागद्वेषत्याग इति न पुनरुक्तिः। परिगृह्यत इति परिग्रहः। स द्विविधः—आन्तरो बाह्यश्चेति। आन्तरो रागादिः, बाह्यो वस्त्रादिः। तत्राहङ्कारं बलं दर्पं कामं क्रोधं त्यक्त्वेत्यनेनान्तरपरिग्रहत्याग उक्तः। बाह्यपरिग्रहत्यागस्तु परिग्रहं विमुच्येत्यनेनोच्यत इत्याह—**इन्द्रियेति। धर्मेति**। संन्यासिनोऽपि स्वाश्रमविहितकर्मणां कर्तव्यत्वादिति भावः।

एतेन विविक्तसेवादयः संन्यासिधर्मा एव, न गृहस्थधर्मा इति सिद्धम्। गृहे स्थितस्य तस्य वनादिस्थित्यसम्भवात्। संन्यासिन एव परमहंसाश्रमाधिकाराच्च। दण्डकमण्डलुकौपीनरहितः परमहंसपरिव्राजकः। **निर्मम इति**। ननु ममताविषयस्य गृहधनपश्वादेः प्रागेव परित्यक्तत्वात् परिग्रहं विमुच्येत्यनेन दण्डकौपीनादेरपि ममताविषयस्य परित्यक्तत्वकथनाद् व्यर्थमिदं निर्मम इति विधानम् , अत आह—**देहेति**। मम देहश्चिरं जीवेदित्यप्यमन्वान इत्यर्थः। अपिशब्दात् परमप्रेमास्पदेऽपि स्वदेहजीवने यस्य न कर्तव्या ममता,

१. एवकारः क्वचिन्न। २.'कामरागसंयुक्तम्' इति पा.।

**ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।**
**समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्॥५४॥**

**हर्षायासो यतिर्ज्ञाननिष्ठो** ब्रह्मभूयाय **ब्रह्मभवनाय** कल्पते **समर्थो भवति॥५३॥**

**अनेन क्रमेण—** ब्रह्मभूत इति। ब्रह्मभूतो **ब्रह्मप्राप्तः** प्रसन्नात्मा [1]**लब्धाध्यात्मप्रसादो न शोचति, किञ्चिदर्थवैकल्यम् आत्मनो वैगुण्यं** [2]**चोद्दिश्य** न शोचति **न सन्तप्यते, न काङ्क्षति।** [3]**ब्रह्मभूतस्यायं स्वभावोऽनूद्यते— न शोचति न काङ्क्षतीति। न ह्यप्राप्तविषयाकाङ्क्षा ब्रह्मविद उपपद्यते। 'न हृष्यती'ति वा पाठः।** समः सर्वेषु भूतेषु **आत्मौपम्येन सर्वेषु भूतेषु सुखं दुःखं वा सममेव पश्यतीत्यर्थः। नात्मसमदर्शनमिह , तस्य वक्ष्यमाणत्वाद्— 'भक्त्या**

आनन्दगिरिकृतव्याख्या

**द्रष्टव्यः। ब्रह्मणो** भवनम् **अनुसन्धानपरिपाकपर्यन्तं साक्षात्करणम् , तदर्थमिति यावत्॥५३॥**

**अपेक्षितं पूरयन्नुत्तरश्लोकमवतारयति—**अनेनेति। **बुद्ध्या विशुद्धयेत्यादिरत्र क्रमः।** ब्रह्मप्राप्तो **जीवन्नेव निवृत्ताशेषानर्थो निरतिशयानन्दं ब्रह्मात्मत्वेनानुभवन्नित्यर्थः।** अध्यात्मं **प्रत्यगात्मा, तस्मिन्** प्रसादः **सर्वानर्थनिवृत्त्या परमानन्दाविर्भावः, स लब्धो येन जीवन्मुक्तेन स तथा। 'न शोचती'त्यादौ तात्पर्यमाह—**ब्रह्मभूतस्येति। **प्राप्तव्यपरिहार्याभावनिश्चयादित्यर्थः। स्वभावानुवादमुपपादयति —** न हीति। **तस्याप्राप्तविषयाभावात् ; नापि परिहार्यापरिहारप्रयुक्तः शोकः, परिहार्यस्यैवाभावादित्यर्थः। पाठान्तरे तु रमणीयं प्राप्य न प्रमोदते, तदभावादित्यर्थः। विवक्षितं समदर्शनं विशदयति—**आत्मेति। **ननु सर्वेषु भूतेष्वात्मनः समस्य निर्विशेषस्य दर्शनमत्राभिप्रेतं किं नेष्यते? तत्राह—**नात्मेति। **उक्तविशेषणवतो जीवन्मुक्तस्य ज्ञाननिष्ठा प्रागुक्तक्रमेण प्राप्ता सुप्रतिष्ठिता भवतीत्याह—**एवम्भूत इति।

भाष्यार्कप्रकाशः

तस्य किं पुनर्वक्तव्यमतिरिक्तविषयेष्विति गम्यते। **अत एवेति।** विशुद्धबुद्धियोगादिसाधनसम्पन्नत्वादेवेत्यर्थः। निर्ममत्वादेवेति वा। **उपरत इति।** उपरतिमुपशमं चित्तस्य प्राप्तः। तदेवाह—**संहृतहर्षायास इति।** संहृतौ हर्षायासौ येन स तथोक्तः। हर्षायासरहित इत्यर्थः। **आयासः** श्रमः। श्रमवद् हर्षोऽपि चित्तस्य विक्षेपकर एवेति हर्षस्यापि संहार उक्तः। य एवंविधः स यति**र्ब्रह्मभूयाय** ब्रह्मभवनाय, ब्रह्मप्राप्तये इति यावत्। कल्पते। कोऽसौ यतिः? अत आह—**ज्ञाननिष्ठ इति।** 'क्लृपू [कृपू ] सामर्थ्ये' इति धातुपाठादाह—**समर्थो भवतीति।** मोक्षार्हो भवतीत्यर्थः। ब्रह्मज्ञानार्हो भवतीति वा॥५३॥

**ब्रह्मभूत इति। ब्रह्मप्राप्त इति।** गुरुशास्त्रादिना पारोक्ष्येण ब्रह्मविदित्यर्थः। ब्रह्मापरोक्ष्यस्य 'भक्त्या मामभिजानाती'ति, ब्रह्मप्राप्तेः 'ज्ञात्वा विशते तदनन्तर'मिति च वक्ष्यमाणत्वादिति भावः। **प्रसन्नात्मा** प्रसन्न आत्मा मनो बुद्धिर्वा यस्य स प्रसन्नात्मा। लब्धः अध्यात्ममात्मनि प्रसादरूपः स्वभावो येन स **लब्धाध्यात्मप्रसादस्वभावः। न शोचतीति।** किमुद्दिश्यास्य शोकप्रसङ्गः? अत आह—**किञ्चिदिति। अर्थवैकल्यं** पुरुषार्थभ्रंशः। **वैगुण्यं** विगुणत्वम्। न **सन्तप्यते** सन्तापं न प्राप्नोति। न **काङ्क्षति** अप्राप्तं विषयविशेषं न वाञ्छति। **ब्रह्मविदो** ब्रह्म पारोक्ष्येण विदितवत इत्यर्थः। 'भक्त्या मामभिजानाती'त्यपारोक्ष्यस्य वक्ष्यमाणत्वादिति भावः। परिपूर्णं ब्रह्मैवाहमिति ज्ञाने सत्यप्राप्तविषयाभावात् कथं तदाकाङ्क्षेति भावः। **अत इति।** ब्रह्मविदोऽप्राप्तविषयाकाङ्क्षानुपपत्तेरित्यर्थः। ब्रह्मभूतस्य न शोचति न काङ्क्षतीत्ययं स्वभावोऽनूद्यते, न तु ब्रह्मभूतो न शोचेन्न काङ्क्षेदिति विधीयत इत्यर्थः। न च ब्रह्मापरोक्ष्यरहितस्य कथं ब्रह्मभूतत्वमिति वाच्यम् ; यो हि पारोक्ष्येणापि ब्रह्माहमिति वेत्ति स ब्रह्मभूत एव, स्वस्मिन् ब्रह्मेति ज्ञानस्य सत्त्वादिति। **सम इति।** समदर्शीत्यर्थः। **आत्मौपम्येनेति।** यथा स्वस्य सुखमिष्टम् , दुःखमनिष्टम् , तथैव सर्वस्यापीति वेत्तीत्यर्थः। मम सुखमस्तु , अन्यस्य दुःखमस्त्विति नेच्छति, किन्तु सर्वस्यापि सुखमस्त्वितीच्छतीति यावत्। 'आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन। सुखं वा यदि वा

---

१. 'लब्धाध्यात्मप्रसादस्वभावः'इति पा.। २.'वोद्दिश्य'इति पा.। ३. 'न ह्यप्राप्तविषयाकाङ्क्षा ब्रह्मविद उपपद्यते। अतो ब्रह्मभूतस्य' इति पा.।

**भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।**
**ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥५५॥**

**मामभिजानाति' (भ.गी.१८.५५) इति। एवम्भूतो ज्ञाननिष्ठो** मद्भक्तिं **मयि परमेश्वरे भक्तिं भजनं** पराम् **उत्तमां ज्ञानलक्षणां चतुर्थीं लभते। 'चतुर्विधा भजन्ते माम्' (भ.गी.७.१६) इति ह्युक्तम् ॥५४॥**

**ततो ज्ञानलक्षणया—** भक्त्येति। भक्त्या **मामभिजानाति** यावान् **अहमुपाधिकृत**[१]**विस्तरभेदः,** यश्च **अहम् अस्मि विध्वस्तसर्वोपाधिभेदः उत्तमपुरुष आकाशकल्पः, तं माम् अद्वैतं चैतन्यमात्रैकरसम् अजम् अजरम् अमरम् अभयम् अनिधनं** तत्त्वतोऽ**भिजानाति।** ततो **मामेवं तत्त्वतो ज्ञात्वा विशते** तदनन्तरं **मामेव ज्ञानानन्तरम्। नात्र**

आनन्दगिरिकृतव्याख्या

**श्रवणमनननिदिध्यासनवतः शमादियुक्तस्याभ्यस्तैः श्रवणादिभिर्ब्रह्मात्मन्यपरोक्षं मोक्षफलं ज्ञानं सिध्यतीत्यर्थः। आर्तादिभक्तित्रयापेक्षया ज्ञानलक्षणा भक्तिश्चतुर्थीत्युक्ता। तत्र सप्तमस्थवाक्यमनुकूलयति—**चतुर्विधा इति॥५४॥

**ननु समाधिसाध्येन परमभक्त्यात्मकेन ज्ञानेन किमपूर्वमवाप्यते? तत्राह—** तत इति। **भक्त्या समाधिजन्यया** मां **ब्रह्म** आभिमुख्येन **प्रत्यक्तया** जानाति **व्याप्नोतीत्यर्थः। तदेव ज्ञानं भक्तिपराधीनं विवृणोति—**यावानिति। आकाशकल्पत्वम् **अनवच्छिन्नत्वम् असङ्गत्वं च। चैतन्यस्य विषयसापेक्षत्वं प्रतिक्षिपति—**अद्वैतमिति। [२]**ये तु द्रव्यबोधात्मत्वमात्मनो मन्यन्ते, तान् प्रत्युक्तम्—**चैतन्यमात्रेति। **आत्मनि तन्मात्रेऽपि धर्मान्तरमुपेत्य धर्मधर्मित्वं प्रत्याह—**एकरसमिति। **सर्वविक्रियाराहित्योक्त्या कौटस्थ्यमात्मनो व्यवस्थापयति—**अजमिति। **उक्तविक्रियाऽभावे तद्धेत्वज्ञानासम्बन्धं हेतुमाह—**अभयमिति। **तत्त्वज्ञानमनूद्य तत्फलं विदेहकैवल्यं लम्भयति—** तत इति। **तत्त्वज्ञानस्य तस्मादनन्तरप्रवेशक्रियायाश्च भिन्नत्वं प्राप्तं प्रत्याह—** नात्रेति। **भिन्नत्वाभावे का गतिर्भेदोक्तेरित्याशङ्क्य**

भाष्यार्कप्रकाशः

दुःखं स योगी परमो मतः' इति षष्ठाध्याये प्रोक्तत्वादिति भावः। नन्वात्मानं समं पश्यतीति सम इति कुतो नोच्यते? अत आह—**नात्मेति**। नात्मदर्शनमिह समशब्देनोच्यते, तस्यात्मदर्शनस्य वक्ष्यमाणत्वात्। केन वाक्येनेत्यत आह—**भक्त्या मामभिजानातीति। मयीति**। मद्विषयामित्यर्थः। **ज्ञानलक्षणामिति**। 'अहं ब्रह्मास्मी'त्यखण्डचैतन्याकारबुद्धिवृत्तिलक्षणामित्यर्थः। ननु ज्ञानस्य कथं भजनत्वम्? कथं वा ज्ञानलक्षणभक्तेश्चतुर्थत्वम्? अत आह—**चतुर्विधा इति**। 'आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ' इति ज्ञानिनश्चतुर्थस्य भगवद्भक्तत्वकथनाज्ज्ञानं भगवद्भजनं, भगवत्प्राप्तौ तुरीयोपायश्चेति भावः॥५४॥

**भक्त्येति। तत इति**। मद्भक्तिप्राप्त्यनन्तरमित्यर्थः। अहं यावानस्मि, यश्चास्मि तं मां भक्त्या विद्वांस्तत्त्वतोऽभिजानाति। ततस्तत्त्वतो मां ज्ञात्वा तदनन्तरं मां विशते। **यावानिति**। यत्परिमाणः। ननु कथमात्मनो निर्विशेषस्य यावत्त्वम्? अत आह—**उपाधीति**। उपाधिभिः कृतो विस्तारः आधिक्यं येषां तैर्भेदैः। बहुभिरुपाधिविशेषैरित्यर्थः। **आकाशकल्प इति**। आकाशवत् सर्वगतत्वनिराकारत्वादिगुणयुक्त इत्यर्थः। **अद्वैतमिति**। द्वयोर्भावो द्विता, द्वितैव द्वैतम् , भेद इति यावत्। तद्रहितमद्वैतम्। चैतन्यमेव चैतन्यमात्रं तदेवैको मुख्यः केवल इति वा रसो यस्य तं चैतन्यस्वरूपमित्यर्थः। रसशब्दादानन्दरूपमिति च। न जीर्यतीत्यजरः। जरारहित इति वा। निधनं नाशः। **तत इति**। तथेत्यर्थे। तत्त्वतो यथावत्। ज्ञात्वा आपरोक्ष्येण विदित्वेत्यर्थः। तदनन्तरमित्यस्यार्थमाह—**ज्ञानानन्तरमिति। विशते** प्रविशति। प्राप्नोतीति यावत्। कं विशते? अत आह—**मामेवेति**। परमात्मानं प्राप्नोति, मुक्तो भवतीति यावत्। अखण्डचैतन्याकारबुद्धिवृत्त्या प्रत्यगभिन्नब्रह्मात्मसाक्षात्काराद् ब्रह्मसायुज्यं लभत इति भावः।

ननु 'मां ज्ञात्वा, मां प्रविशती'ति धातुद्वयेन ज्ञानप्रवेशात्मकक्रियाद्वयमभिधीयते। तत्र च ज्ञानक्रिया पूर्वभाविनी, पश्चाद्भाविनी

---

१. 'विस्तारभेदः' इति रा.पा. भाति। २. भाट्टाः।

**[1]ज्ञानप्रवेशक्रिये भिन्ने विवक्षिते— ज्ञात्वा विशते तदनन्तरमिति। किं तर्हि? फलान्तराभावाद् ज्ञानमात्रमेव, 'क्षेत्रज्ञं चापि मां विद्धि' (भ.गी.१३.२) इत्युक्तत्वात्।**

**ननु विरुद्धमिदमुक्तम्— ज्ञानस्य या परा निष्ठा तया मामभिजानातीति। कथं विरुद्धमिति चेद्? उच्यते— यदैव यस्मिन् विषये ज्ञानमुत्पद्यते ज्ञातुः, तदैव तं विषयमभिजानाति ज्ञातेति न ज्ञाननिष्ठां ज्ञानावृत्तिलक्षणामपेक्षत इति; [2]ततश्च ज्ञानेन नाभिजानाति, ज्ञानावृत्त्या तु ज्ञाननिष्ठयाऽभिजानातीति।**

आनन्दगिरिकृतव्याख्या

**औपचारिकत्वमाह—**किं तर्हीति। **प्रवेश इति शेषः। ब्रह्मप्राप्तिरेव फलान्तरमित्याशङ्क्य , ब्रह्मात्मनोर्भेदाभावान्न ज्ञानातिरिक्ता तत्प्राप्तिरित्याह—**क्षेत्रज्ञं चेति।

**ज्ञाननिष्ठया परया भक्त्या मामभिजानातीत्युक्तमाक्षिपति—**नन्विति। **विरुद्धत्वं स्फोरयितुं पृच्छति—**कथमिति। **विरोधस्फुटीकरणं प्रतिजानीते—**उच्यत इति। **तत्र ज्ञानस्योत्पत्तिरेव विषयाभिव्यक्तिरित्याह—**यदेति। **एवकारनिरस्यं दर्शयति—**न ज्ञानेति। **इत्यावयोः सिद्धमिति शेषः। ज्ञानस्योत्पत्तेरेव विषयाभिव्यक्तित्वेऽपि कथं प्रकृते विरोधधीरित्याशङ्क्याह—**ततश्चेति। **विरुद्धमिति शेषः।**

भाष्यार्कप्रकाशः

तु प्रवेशक्रिया। यो यं जानाति, यं च प्रविशति स तस्माद्भिन्न एव [3]भवितव्यः, ज्ञानक्रियायां प्रवेशक्रियायां वा कर्तृकर्मणोर्भेदेन भाव्यत्वात्। यथा गृहं जानाति, गृहं प्रविशति च पुरुष इति। तस्माज्ज्ञातुः प्रवेष्टुश्चात्मनः सकाशाज्ज्ञेयं प्रवेश्यं च ब्रह्म भिन्नमेवेति कृत्वा कथमद्वैतसिद्धिरिति शङ्कायामाह—**नात्रेति।** 'ज्ञात्वा विशते तदनन्तर'मित्यत्र वाक्ये ज्ञानप्रवेशक्रिये भिन्ने न विवक्षिते मूलकारेण। किं तर्हि? ज्ञानमात्रमेव विवक्षितम्। कुतः? फलान्तराभावात्। ब्रह्मज्ञानातिरिक्तब्रह्मप्रवेशरूपफलाभावादित्यर्थः। कुतः फलान्तराभावः? अत आह—**क्षेत्रज्ञं चापीति।** 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत' इति श्लोकेन जीवब्रह्माभेदस्योक्तत्वान्न जीवाद्भिन्नं जीवेन प्राप्यं च ब्रह्मास्ति, येन तत्प्राप्तिरूपं फलं जीवस्य भवेत्। तस्मात् प्राप्तृप्राप्यपदार्थद्वयाभावाज्ज्ञानमात्रमेव विवक्षितमिति। न चैवं ज्ञानस्य वा कथं सिद्धिः? ज्ञातृज्ञेयपदार्थद्वयाभावादिति वाच्यम् ; एकस्यैव चैतन्यस्य बुद्धितादात्म्याध्यासाज्ज्ञातृत्वम् , तमेवापेक्ष्य ज्ञेयत्वम् , स्वतस्तु ज्ञानत्वमित्यविरोधात्।

**नन्वेवं** ज्ञानमात्रस्यैव विवक्षितत्वे 'भक्त्या मामभिजानाती'त्येतावदेव वक्तव्यम् , न तु 'ज्ञात्वा तदनन्तरं विशते' इति चेत् , **मैवम्** ; 'भक्त्या मां जानाती'त्येतावदुक्तौ किं त्वज्ज्ञानात् फलमित्याशङ्क्येत, तदाशङ्कापूरणार्थमुक्तम्—**ज्ञात्वा मामेव विशतीति।** मज्ज्ञानस्याहमेव फलम् , न तु मत्तः फलान्तरमस्तीति तदर्थात्। न चैवमपि ज्ञानातिरिक्तं फलं सिद्धमिति वाच्यम् ; सति ब्रह्मात्मसाक्षात्कारे ज्ञातव्यस्य प्राप्तव्यस्य वा वस्तुनोऽभावेन ज्ञानातिरिक्तफलासिद्धेः; ज्ञानस्वरूपत्वाच्च ब्रह्मणस्तस्यैवात्मत्वाच्च। तस्माद् ब्रह्मज्ञानादनतिरिक्त एव ब्रह्मप्रवेशः।

ननु कर्मयोगाच्चित्तशुद्धिं प्राप्तः पुरुषो विशुद्धबुद्धियोगादिक्रमेण ज्ञाननिष्ठां प्राप्य, तया परया ज्ञाननिष्ठया ब्रह्म प्राप्नोतीत्युक्तं 'सिद्धिं प्राप्त' इत्यारभ्य 'विशते तदनन्तर'मित्यन्तेन ग्रन्थेन। सा च ब्रह्मप्राप्तिर्ब्रह्मज्ञानादनतिरिक्तेत्युक्तम्। तथा च ज्ञाननिष्ठया ब्रह्म जानातीति सिद्धम्। इयमेव ज्ञाननिष्ठा 'भक्त्या मामभिजानाती'ति भक्तिशब्देनोक्ता। 'ज्ञानलक्षणा चतुर्थी भक्ति'रित्युक्तत्वात् , ज्ञाननिष्ठायाश्च ज्ञानलक्षणत्वात्। एवं सति भक्त्या ज्ञाननिष्ठया मां ब्रह्माभिजानातीति सिद्धत्वेनार्थाज्ज्ञानमात्रेण ब्रह्मज्ञानं न सिद्ध्यतीति सिद्धम्। ज्ञानेनैव ब्रह्मज्ञानसिद्धौ ज्ञाननिष्ठाविधानस्य व्यर्थत्वाज्ज्ञाननिष्ठा कथं कार्येति शङ्कायामेव 'बुद्ध्या विशुद्ध्या युक्तः' इत्यादिग्रन्थस्यावतारितत्वात्। तस्माज्ज्ञानेन ब्रह्म न जानाति; ज्ञाननिष्ठया तु ब्रह्म जानातीत्येतद् विरुद्धमिति पृच्छति—**नन्विति।** ज्ञाननिष्ठायाः स्वरूपमाह—**ज्ञानावृत्तिलक्षणामिति। ज्ञानस्य** 'अहं ब्रह्मास्मी'त्याकारकस्य **आवृत्तिरसकृदभ्यासो लक्षणं** स्वरूपं यस्यास्तां

१. 'ज्ञानानन्तर' इति पा.। २. 'अतश्च' इति पा.। ३. भवितव्यः इति कर्तरि प्रत्ययश्चिन्त्यः। भव्य इति तु युक्तम्।

**नैष दोषः; ज्ञानस्य स्वात्मोत्पत्तिपरिपाकहेतुयुक्तस्य प्रतिपक्षविहीनस्य यद् आत्मानुभवनिश्चयावसानत्वम् , तस्य निष्ठाशब्दाभिलापात्। शास्त्राचार्योपदेशेन ज्ञानोत्पत्तिपरिपाकहेतुं सहकारिकारणं बुद्धिविशुद्ध्यादि अमानित्वादि चापेक्ष्य जनितस्य क्षेत्रज्ञपरमात्मैकत्वज्ञानस्य कर्त्रादिकारकभेदबुद्धिनिबन्धनसर्वकर्मसंन्याससहितस्य स्वात्मानुभवनिश्चयरूपेण यदवस्थानं, सा परा ज्ञाननिष्ठेत्युच्यते। सेयं ज्ञाननिष्ठा आर्तादिभक्तित्रयापेक्षया परा चतुर्थी भक्तिरित्युक्ता। तया परया भक्त्या भगवन्तं तत्त्वतोऽभिजानाति, यदनन्तरमेव ईश्वरक्षेत्रज्ञभेदबुद्धिरशेषतो निवर्तते। अतो ज्ञाननिष्ठालक्षणया भक्त्या मामभिजानातीति वचनं न विरुध्यते।**

आनन्दगिरिकृतव्याख्या

**शङ्कितं विरोधं निरस्यति**—नैष दोष इति। **उक्तमेव हेतुं प्रपञ्चयति**—शास्त्रेति। **यो हि शास्त्रानुसार्याचार्योपदेशस्तेन ज्ञानोत्पत्तिः 'आचार्यवान्पुरुषो वेद' इति श्रुतेः।** **तस्याश्च** परिपाकः **संशयादिप्रतिबन्धध्वंसः, तत्र हेतुभूतमुपदेशस्यैव सहकारिकारणं यद् बुद्धिशुद्ध्यादि, तदपेक्ष्य तस्मादेवोपदेशाज्जनितं यदैक्यज्ञानं तस्य, कारकभेदबुद्धिनिबन्धनानि यानि सर्वाणि कर्माणि तेषां संन्यासेन सहितस्य, फलरूपेण स्वात्मन्येव सर्वकल्पनारहिते यदवस्थानं, सा ज्ञानस्य परा निष्ठेति व्यवह्रियते प्रामाणिकैरित्यर्थः। यदि यथोक्ता परा ज्ञाननिष्ठा, कथं तर्हि सा चतुर्थी भक्तिरित्युक्तेति? तत्राह**—सेयमिति। **यथोक्तया भक्त्या भगवत्तत्त्वज्ञानं सिध्यतीत्याह**—तयेति। **तत्त्वज्ञानस्य फलमाह**—यदनन्तरमिति। **ज्ञाननिष्ठारूपाया भगवद्भक्तेस्तत्त्वज्ञानानतिरेकात् तत्फलस्य चाज्ञाननिवृत्तेस्तन्मात्रत्वाद् भेदोक्तेश्चौपचारिकत्वात् प्रकृतं वाक्यमविरुद्धमित्युपसंहरति**—अत इति।

**औपदेशिकैक्यज्ञानस्य सर्वकर्मसंन्याससहितस्य स्वरूपावस्थानात्मकस्य परमपुरुषार्थौपयिकत्वमित्यस्मिन्नर्थे मानमाह—**

भाष्यार्कप्रकाशः

तथोक्ताम्। ज्ञानेनैव ज्ञेयस्य साक्षात्कारो भवति। अन्यथा ज्ञानाभ्यासेन वाऽपि कथं ज्ञेयसाक्षात्कारः? 'अयं घटः' इति ज्ञानेन घटस्यानवभास्यत्वे कथं पुनस्तदेव ज्ञानमावर्तितं भूत्वा तं घटमवभासयेत्?

परिहरति—**नैष दोष इति**। ज्ञाननिष्ठया मामभिजानातीति वचनं न दुष्टमित्यर्थः। तत्र हेतुमाह—**ज्ञानस्येति**। ज्ञानावृत्तिर्न ज्ञाननिष्ठा, किन्तु ज्ञानस्यात्मानुभवनिश्चयावसानत्वं ज्ञाननिष्ठा। कीदृशस्य ज्ञानस्यात्मानुभवनिश्चयावसानत्वं भवति? तत्राह—**स्वात्मेति**। स्वात्मनो ज्ञानस्वरूपस्य 'अहं ब्रह्मास्मी'त्याकारकस्योत्पत्तिपरिपाकयोर्जन्मनि दार्ढ्ये च ये हेतवो विशुद्धबुद्धियोगादयः, तैर्युक्तस्य। **प्रतिपक्षाः** ज्ञानोत्पत्तिपरिपाकप्रतिबन्धभूता मानदम्भादयस्तैर्विहीनस्य च ज्ञानस्य **यदात्मानुभवनिश्चय** आत्मानुभवरूपो निश्चयः। आत्मानुभवापादनमिति यावत्। स एवावसानं परिसमाप्तिर्यस्य तत्त्वमात्मानुभवनिश्चयावसानत्वम् , तस्य। निष्ठाशब्दाभिलापान्निष्ठाशब्दाभिधेयत्वात्। इदमेव विवृणोति—**शास्त्रेति**। शास्त्राचार्योपदेशेन हेतुना। **गुणं चापेक्ष्येति**। ज्ञानोत्पत्तिपरिपाकहेतुभूतबुद्धिविशुद्धत्वादिगुणवशेन तत्सहकारिकारणभूतामानित्वादिगुणवशेन चेत्यर्थः। जनितस्य कर्तृत्वादिकारकभेदबुद्धिनिबन्धनानि यानि सर्वकर्माणि तत्संन्याससहितस्य क्षेत्रज्ञपरमात्मैकत्वज्ञानस्य 'अहं ब्रह्मास्मी'ति ज्ञानस्य परोक्षकल्पस्येति भावः। **आत्मानुभवनिश्चयरूपेण** अपरोक्षत्वरूपेणेति भावः। **अवस्थानमिति**। यत् सैव परा ज्ञाननिष्ठेत्युच्यते। **यदनन्तरमेवेति**। तत्त्वतो भगवज्ज्ञानानन्तरमित्यर्थः। **अशेषत इति**। एतेन परोक्षज्ञानवेलायां न तद्भेदबुद्धेरशेषतो निवृत्तिरिति गम्यते। **तत इति**। स्वात्मानुभवनिश्चयरूपेणावस्थितेनैव ज्ञानेन ब्रह्मात्मसाक्षात्कारो, न तु केवलज्ञानेनेति हेतोरित्यर्थः। ज्ञानावृत्तेर्ज्ञाननिष्ठात्वाभावादिति वा। **ज्ञाननिष्ठालक्षणयेति**। न च 'ज्ञानलक्षणया भक्त्ये'ति पूर्वोक्तव्याघात इति वाच्यम् ; स्वात्मानुभवनिश्चयरूपावस्थितज्ञानलक्षणयेति तदर्थात्। एवं 'ज्ञानलक्षणां चतुर्थीम्' इत्यत्रापि बोध्यम्। यद्वा 'ज्ञाननिष्ठालक्षणां चतुर्थी'मिति, 'ततो ज्ञाननिष्ठालक्षणया भक्त्ये'ति च भाष्यं पाठ्यम्।

**ननु** ज्ञानमिति, ज्ञाननिष्ठेति, ज्ञाननिष्ठया मज्ज्ञानमिति च ज्ञानत्रयमिह दृश्यते। तत्र परोक्षज्ञानमिति, अपरोक्षज्ञानमिति च द्वयं प्रसिद्धम् ; तृतीयं कथमप्रसिद्धमवगन्तुं शक्यत इति चेत् , **उच्यते**—बुद्धिवृत्तिरूपं तत्फलभूतानुभवरूपं चेत्यपरोक्षज्ञानं द्विविधम्।

**[1]अत्र च सर्वं निवृत्तिविधायि शास्त्रं वेदान्तेतिहासपुराणस्मृतिलक्षणं न्यायप्रसिद्धमर्थवद् भवति, 'विदित्वा... व्युत्थायाथ भिक्षाचर्यं चरन्ति' (द्र.बृ.उ.३।५।१) 'तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः'(म.ना.उ.६३.१९) 'न्यास एवात्यरेचयत्' (म.ना.उ.६२.१२) इति, 'संन्यासः कर्मणां न्यासः', 'वेदानिमं च लोकममुं च परित्यज्य'(आ. ध.सू.२.२३.१३), 'त्यज धर्ममधर्मं च'(सं.उ.२.१२, म.भा.१२.३२९.४०)इत्यादि। इह च दर्शितानि वाक्यानि। न च**

आनन्दगिरिकृतव्याख्या

अत्र चेति। **तदेव शास्त्रमुदाहरति—** विदित्वेत्यादिना। दर्शितानि वाक्यानि **'सर्वकर्माणि मनसे'त्यादीनि। नन्वेषां वाक्यानामविवक्षितार्थत्वाद् नास्ति स्वार्थे प्रामाण्यमित्याशङ्क्य , अध्ययनविध्युपात्तत्वाद् वेदवाक्यानां [2]तदनुरोधित्वाच्चेतरेषां नैवमित्याह—**न चेति। **तथापि**

भाष्यार्कप्रकाशः

तत्र बुद्धिवृत्तिर्ज्ञाननिष्ठा; तत्फलभूतोऽनुभवस्तु ब्रह्मज्ञानमिति। यद्वा परोक्षज्ञानमेव द्विविधम्। तत्र श्रवणादुत्पन्नम् 'अहं ब्रह्मास्मी'ति ज्ञानमेकम् ; मननादुत्पन्नं 'ब्रह्मैवाहमस्मी'ति निश्चयज्ञानमपरम्। इदमेव ज्ञाननिष्ठेत्युच्यते। निदिध्यासादपरोक्षात्मसाक्षात्कारस्तु ब्रह्मज्ञानमिति ज्ञानत्रयम्। अथवा परोक्षमपरोक्षमनुभवश्चेति ज्ञानत्रयम्। तत्र परोक्षज्ञानमपरोक्षज्ञानं चेति द्वयं ज्ञानकरणभूतम् , करणभूतज्ञानस्य फलभूतस्त्वनुभवः। तत्र परोक्षज्ञानं गुरुशास्त्रादिक[जन्य]म् , अपरोक्षज्ञानं ब्रह्माकारबुद्धिवृत्तिः ज्ञाननिष्ठात्मकम् , अनुभवस्तु ब्रह्मात्मसाक्षात्कार इति। यद्वा 'नाहं ब्रह्मे'ति विपर्ययनिवर्तकं ज्ञानमेकं यद्गुरुशास्त्रोपदेशजन्यम्। 'अहं ब्रह्म उत संसारी'ति संशयनिवर्तकं ज्ञानमन्यत् , यत् समाधिलभ्यं ज्ञाननिष्ठात्मकम्। 'अहं ब्रह्मैवे'ति निश्चयात्मको ब्रह्मात्मसाक्षात्कारस्त्वपरं ज्ञानमिति ज्ञानत्रयमिति।

**तत्र चेति**। एवं सति ज्ञाननिष्ठया ब्रह्मज्ञानसम्भवे सतीत्यर्थः। **निवृत्तिविधायि** निवृत्तिमार्गविधायकम् , संन्यासविधायकमिति यावत्। वेदान्तेतिहासपुराणस्मृतिलक्षणं शास्त्रं **न्यायप्रसिद्धं** न्याय्यम् अर्थवच्च भवति। निवृत्तिमार्गनिरतसंन्यास्यनुष्ठेयत्वाज्ज्ञाननिष्ठाया इति भावः। तदेव शास्त्रं दर्शयति—**विदित्वेति**। ब्रह्म पारोक्ष्येण विदित्वेत्यर्थः। नित्यानित्यवस्तुविवेकादिज्ञानवान् भूत्वेति वा। अथ वेदनानन्तरम् अभ्युत्थाय संसारादुत्थाय संन्यस्येति यावत्। भिक्षाचर्यं चरन्ति, भिक्षाटनं कुर्वन्ति। यद्वा विदित्वा अभ्युत्थाय, अथाभ्युत्थानानन्तरं भिक्षाचर्यं चरन्ति। येषां तपसां मध्ये न्यासं संन्यासमतिरिक्तमुत्कृष्टमाहुः, न्यास एवात्यरेचयत् , अतिरिक्तम् अभवत्। नारायणीये – सत्यं तपो दमः शमो दानं धर्मः प्रजननमग्नयोऽग्निहोत्रं यज्ञो मानसं न्यासः इति द्वादश मुक्तिहेतूनुपन्यस्य 'तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचये'दित्युक्तम्। तथा तत्रैवानुवाकान्तरे सत्यादीन् न्यासान्तान् मोक्षोपायत्वेनोपन्यस्य 'तस्मान्न्यासमेषां तपसामतिरिक्तमाहु'रित्युक्तम्। किं चात्रैव 'न्यास इत्याहुर्मनीषिणो ब्रह्माण'मिति, पूर्वानुवाके 'न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मे'ति च दृश्यते। न्यास इत्युक्तो यो मोक्षहेतुस्तं ब्रह्माणं हिरण्यगर्भरूपं मनीषिणः स्मृतिकर्तार आहुः, 'संन्यासाद् ब्रह्मणः स्थान'मिति स्मरणात्। हिरण्यगर्भप्राप्तेरन्तरङ्गसाधनत्वात् संन्यासस्य तद्रूपत्वम्। परो ब्रह्मा हिरण्यगर्भो न्यासो मोक्षहेतुरित्याह—स च ब्रह्मा परः परमात्मरूपो हीति श्रुत्यर्थः। एवं सर्वजीवाधिकहिरण्यगर्भमतत्वान्न्यास एव सर्वाधिकः। यदि संन्यास एव न स्यात् , तर्हीमाः श्रुतयो विरुध्येरन्निति भावः। कर्मणां न्यासः संन्यास इत्युच्यते। वेदानिमं मनुष्यलोकममुं स्वर्गलोकं च परित्यज्य, धर्मं त्यज, अधर्मं त्यज**इत्यादी**त्यादिपदात् 'अथ पुनरव्रती वा स्नातको वा अस्नातको वोत्सन्नाग्निरनग्निको वा यदहरेव विरजेत् तदहरेव प्रव्रजेत् , ब्रह्मचर्यं समाप्य गृही भवेत् , गृहाद्वनी भूत्वा प्रव्रजेत्', 'अनन्यचित्तता ब्रह्मनिष्ठा सा कर्मठे कथम्। कर्मत्यागी ततो ब्रह्मनिष्ठामर्हति नेतरः॥' त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमम्। त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदम्॥ सशिखं वपनं कृत्वा बहिःसूत्रं त्यजेद् बुधः। यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत्॥ कुटुम्बं पुत्रदारांश्च वेदाङ्गानि च सर्वशः। यज्ञं यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः॥ 'एतद्द्विजन्मसाफल्यं ब्राह्मणस्य विशेषतः। प्राप्यैतत् कृतकृत्यो हि द्विजो भवति नान्यथा॥'इत्यादि ग्राह्यम्। **इह चेति**।

१. 'तत्र च' इति पा.। २. वेदमूलकत्वात् इतरेषां स्मृतिवाक्यानां प्रामाण्यमित्यर्थः।

**तेषां वाक्यानामानर्थक्यं युक्तम्। न चार्थवादत्वम्, स्वप्रकरणस्थत्वात्, प्रत्यगात्माविक्रियस्वरूपनिष्ठत्वाच्च मोक्षस्य। न हि पूर्वसमुद्रं जिगमिषोः प्रातिलोम्येन प्रत्यक्समुद्रं जिगमिषुणा समानमार्गत्वं सम्भवति। प्रत्यगात्मविषय-**

आनन्दगिरिकृतव्याख्या

**'सोऽरोदीदि'त्यादिवन्न स्वार्थे** [१]**मानतेत्याशङ्क्याह—**न चार्थवादत्वमिति। **इतश्च मुमुक्षोरपेक्षितमोक्षौपयिकज्ञाननिष्ठस्य संन्यासे ऽधिकारो, न कर्मनिष्ठायामित्याह—** प्रत्यगिति। **ज्ञाननिष्ठस्य कर्मनिष्ठा विरुद्धेत्यत्र दृष्टान्तमाह—** न हीति। **ज्ञाननिष्ठास्वरूपानुवादपूर्वकं कर्मनिष्ठया**

भाष्यार्कप्रकाशः

'सर्वकर्माणि मनसा संन्यस्ये'ति, 'सर्वारम्भपरित्यागी'तीत्यादीनि। ननु संन्यासाश्रमविध्यभावेऽपि तद्वाक्यानां नानर्थक्यमर्थवादत्वाद्, अत आह— **न चेति**। विधिप्रकरणस्थवाक्यानामर्थवादत्वमयुक्तमित्यर्थः। यदीमान्यर्थवादवाक्यानि स्युस्तर्हि विधिवाक्यान्यन्यत्रोपलभ्येरन्। विधिवाक्यस्तुतिपरत्वादर्थवादानां विधिवाक्यानि विनाऽर्थवादवाक्यानारम्भात् ; न तु तथाऽन्यत्र वाक्यान्युपलभ्यन्ते। तस्मादिमानि नार्थवादवाक्यानि, किन्तु विधिवाक्यान्येव। नन्वस्तु नाम संन्यासविधिर्न तु तस्य मोक्षहेतुत्वम्, अत आह—**प्रत्यगिति**। प्रत्यगात्मनो यदविक्रियं स्वरूपं, तस्मिन्निष्ठा यस्य तत्त्वान्मोक्षस्य निरतिशयानन्दलक्षणस्य। निरतिशयानन्दं हि प्रत्यगात्मनः स्वरूपम्। यद्वा प्रत्यगात्मा अविक्रियस्वरूपमेव निष्ठा यस्य तत्त्वान्मोक्षस्य, यन्निष्कृष्टं स्वरूपं तत् प्रत्यगात्मस्वरूपमेवेत्यर्थः। अथवा निष्ठत्वादिति[निष्ठात्वादिति] पाठः। प्रत्यगात्मा अविक्रियस्वरूपे या निष्ठा, सैव मोक्षः। यद्वा प्रत्यगात्मनोऽविक्रियस्वरूपेण या निष्ठा सैव मोक्षः। अनात्मतादात्म्याध्यासतद्धेत्वविद्यानिवृत्तेर्यदविक्रियात्मरूपेण स्थितिः पुरुषस्य सैव मोक्ष इत्यर्थः। अयं च मोक्षः आत्मज्ञाननिष्ठासाध्यः; सा च निष्ठा सर्वकर्मसंन्याससाध्येति मोक्षस्य संन्यास एव हेतुरुक्तम इति भावः।

ननु मुमुक्षुणा मोक्षार्थं संन्यस्य ज्ञाननिष्ठैव किमिति कार्या? कर्मनिष्ठाऽपि क्रियताम्, अत आह—**न हीति**। स्वर्गाद्यभ्युदयार्थं प्रवृत्तिमार्गः कर्मिणाम्, मोक्षार्थं निवृत्तिमार्गः संन्यासिनां च विभज्य पृथङ्निर्मित ईश्वरेणैव। तथा चोक्तं भाष्यारम्भे – 'ईश्वरः प्रवृत्तिधर्मं प्रजापतीन् ग्राहयामास, निवृत्तिधर्मं सनकसनन्दनादी'निति। तत्र कर्मानुष्ठानात्मकः प्रवृत्तिमार्गः, कर्मसंन्यासात्मको निवृत्तिमार्गः। यः पुनरज्ञः स्वर्गं जिगमिषति स कर्ममार्गेणैव स्वर्गं गच्छेत् ; न तु संन्यासमार्गेण, संन्यासमार्गस्य स्वर्गाप्रापकत्वात्। यस्तु विद्वान् मोक्षं जिगमिषति स संन्यासमार्गेणैव मोक्षं गच्छेत्, न तु कर्ममार्गेण, तस्यामोक्षप्रापकत्वात्। एवमज्ञप्राज्ञयोर्विरुद्धफलकौ विपरीतौ द्वौ मार्गौ स्तः– 'दूरमेते विपरीते विषूची अविद्या या च विद्या चे'ति श्रुतेः। तत्र प्रवृत्तिमार्गः कर्ममार्गोऽविद्यामार्ग इत्यर्थान्तरम्। निवृत्तिमार्गो ज्ञानमार्गो विद्यामार्गो मोक्षमार्ग इत्यप्यर्थान्तरम्। न च विद्यामार्ग एव मोक्षहेतुरिति कुत उच्यत इति वाच्यम्; 'नान्यः पन्था विद्यतेऽयनाय' इति, 'विद्ययाऽमृतमश्नुते' इत्यादिश्रुतिभ्यः। तस्मान्मोक्षार्थिना संन्यस्य ज्ञाननिष्ठैव कार्या। अभ्युदयार्थिना त्वसंन्यस्य कर्मनिष्ठैव कार्या। यथा पूर्वसमुद्रं जिगमिषुः सूर्योदयोपाधिकपूर्वदिशं प्रत्येव प्रयायात्। पश्चिमसमुद्रं जिगमिषुस्तु सूर्यास्तमयोपाधिकपश्चिमदिशं प्रत्येव प्रयायात्। न तूभयोरपि पूर्वदिशं प्रति पश्चिमदिशं प्रति वा एक एव मार्गोऽस्ति। एवं स्वर्गमोक्षार्थिनोरुभयोरपि नैकोऽस्ति मार्गः, किन्तु भिन्न एव। फलभेदादनुष्ठानभेदाच्चेति। अक्षरार्थस्तु पूर्वसमुद्रं जिगमिषोर्गन्तुमिच्छोः पुरुषस्य प्रातिलोम्येन स्वप्रातिकूल्येन पश्चिमसमुद्रं जिगमिषुणा सह समानमार्गत्वमेकमार्गत्वं **न हि** नास्ति हि; तथा प्रत्यक्समुद्रं जिगमिषोः प्रातिलोम्येन पूर्वसमुद्रं जिगमिषुणा सह समानमार्गत्वं न हि सम्भवतीति। तस्मान्मुमुक्षुणा विदुषा निवृत्तिमार्ग एव स्वीकर्तव्यः।

ननु पूर्वपश्चिमसमुद्रद्वयप्रापकमार्गद्वयवदिह परस्परप्रतिकूलं किं तन्मार्गद्वयम्? अत आह—**प्रत्यगिति**। ज्ञाननिष्ठा ज्ञानमार्गः। तस्याः स्वरूपमाह—**प्रत्यगात्मेति**। प्रत्यगात्मविषयं यज्ज्ञानम् 'अहं ब्रह्मास्मी'त्याकारकं तस्य सन्तानकरणे आवृत्तौ योऽभिनिवेशः स ज्ञाननिष्ठा। 'अहं ब्रह्मास्मी'त्येवमसकृदभ्यसनं ज्ञाननिष्ठेत्यर्थः। न च ज्ञानस्यात्मानुभवनिश्चयावसानत्वं ज्ञाननिष्ठेत्युक्तं प्रागिति तद्विरोध इति वाच्यम्; ज्ञानस्यात्मानुभवनिश्चयापादनार्थमेव ज्ञानावृत्तेः कर्तव्यत्वात् तादृशज्ञाननिष्ठाहेतुत्वेन ज्ञानावृत्ति-

१. 'सोऽरोदीद् यदरोदीत् तद् रुद्रस्य रुद्रत्वम्' इत्याद्यर्थवादानां न स्वार्थपरत्वम्, किन्तु 'बर्हिषि रजतं न देयम्' इत्यादिनिषेधापेक्षितनिन्दासमर्पकत्वमिति मीमांसायां निर्णीतम्। द्र. जै.सू. १.२.१०।

**प्रत्ययसन्तानकरणाभिनिवेशश्च ज्ञाननिष्ठा। सा च प्रत्यक्समुद्रगमनवत् कर्मणा सहभावित्वेन विरुध्यते। पर्वतसर्षपयोरिवान्तरवान् विरोधः प्रमाणविदां निश्चितः। तस्मात् सर्वकर्मसंन्यासेनैव ज्ञाननिष्ठा कार्येति सिद्धम् ॥५५॥**

आनन्दगिरिकृतव्याख्या

**तस्याः सहभावित्वं विरुद्धमिति दार्ष्टान्तिकमाह—** प्रत्यगात्मेति। **कथं ज्ञानकर्मणोर्विरोधधीरित्याशङ्क्य कर्मणां ज्ञाननिवर्त्यत्वस्य श्रुतिस्मृतिसिद्धत्वादित्याह—**पर्वतेति। अन्तरवान् **उभयोरेकधर्मिनिष्ठत्वेन साङ्कर्याभावसम्पादकभेदवानित्यर्थः। ज्ञानकर्मणोरसमुच्चये फलितमुपसंहरति—**तस्मादिति ॥५५॥

भाष्यार्कप्रकाशः

रपि ज्ञाननिष्ठेत्युच्यते उपचारादिति। सा च ज्ञानावृत्तिलक्षणा ज्ञाननिष्ठा कर्मणा सहभावित्वेन विरुध्यते। विरोधात् कर्मणा सह न भवतीत्यर्थः। तत्र दृष्टान्तमाह—**प्रत्यगिति**। पूर्वसमुद्रं जिगमिषोः प्रत्यक्समुद्रगमनं यथा विरुध्यते, तद्वदित्यर्थः। कर्ममार्गज्ञानमार्गयोर्न सहभावित्वं, विरोधात्। यथा पूर्वपश्चिमसमुद्रप्रापकयोर्मार्गयोर्नैकदेशवृत्तित्वरूपं सहभावित्वं, तद्वदिति भावः।

ननु नास्ति ज्ञानकर्मणोर्विरोधः? अत आह—**पर्वतेति**। पर्वतसर्षपयोरिव ज्ञानकर्मणोः **अन्तरवान्** बहुतारतम्यवान्, महानिति यावत्। विरोधः **प्रमाणविदां** विदुषां निश्चितः। पर्वतसर्षपयोरिव ज्ञानकर्मणोर्महदस्ति तारतम्यमिति विदुषां निश्चितोऽयमर्थः। तथाहि—कर्मानुष्ठानात्मकः क्रियाकारकादिभेदबुद्धिप्रयुक्तः, स्वर्गप्रापकः, बन्धहेतुः, देहेन्द्रियव्यापारसाध्यः, अनात्मतादात्म्याध्यासमूलकः, वर्णाश्रमाद्यभिमानग्रस्तः, यज्ञाग्निहोत्राद्यनेकविधः एवमादिलक्षणः कर्ममार्गः। कर्मत्यागात्मकः, उपमृदितक्रियाकारकादिभेदबुद्धिः, ब्रह्मप्रापकः, मोक्षहेतुः, देहेन्द्रियव्यापारोपरमसाध्यः, अनात्मतादात्म्याध्यासनिवृत्तिमूलकः, वर्णाश्रमाद्यभिमानरहितः, 'अहं ब्रह्मास्मी'त्येवमेकविधः एवमादिलक्षणो ज्ञानमार्गः। तस्मात् स्वरूपतः फलतश्च परस्परमत्यन्तविरुद्धं ज्ञानकर्ममार्गद्वयम्। अत एवाविद्वांसः सकामाः कर्ममार्गेऽधिकुर्वन्ति। विद्वांसस्तु निष्कामा ज्ञानमार्गे इत्यधिकारिभेदश्च सङ्गच्छते। एवमधिकारिभेदादपि कर्मज्ञानयोर्विरोधः प्रसिद्धः। **तस्मादिति**। ज्ञाननिष्ठाया एव मुमुक्षुभिः कार्यत्वादित्यर्थः। संन्यासस्यैव ज्ञाननिष्ठाहेतुत्वादिति वा। **सर्वकर्मसंन्यासेनैवेति**। तत्पूर्वकमित्यर्थः। आदौ सर्वकर्मसंन्यासं कृत्वा पश्चाज्ज्ञाननिष्ठा कार्येत्यर्थः। न च – ज्ञाननिष्ठाप्राप्तेः प्रागविदुषः कथं सर्वकर्मसंन्याससम्भवः, विदुष एव सर्वकर्मसंन्याससम्भवादिति – वाच्यम्; पारोक्ष्येण ब्रह्मविदः सर्वकर्मसंन्याससम्भवात्। पारोक्ष्येण ब्रह्मविद्धि सर्वं कर्म संन्यस्य ज्ञाननिष्ठामभ्यस्य तया परिपक्वया परं ब्रह्म जानाति।

यत्तु **रामानुजः**—विशुद्धबुद्धियोगादिभिर्ब्रह्मप्राप्तिरात्मसाक्षात्कारो भवति; ततो भगवति पुण्डरीकनयने स्वस्वामिन्यत्यर्थप्रियानुभवरूपा भक्तिर्जायते; भक्त्या तत्त्वतो भगवन्तं जानाति; ततो भक्तित एव भगवन्तं विशते इति, **तत् तुच्छात्तुच्छतरम्।** देहाद्यतिरिक्तात्मस्वरूपसाक्षात्कारानन्तरं पुण्डरीकनयनत्वाद्याकारवति देहे परमात्मभ्रान्त्युदयायोगात्। न ह्यात्मानमेव देहाद्यतिरिक्तं जानन् पुरुषः परमात्मानं देहात्मकं मन्येत; येन पुण्डरीकनयने तस्य भक्तिः स्यात्। नापि तादृश्या भक्त्या देहेश्वरभ्रान्तिपूर्विकया परमात्मतत्त्वसाक्षात्कारः। सच्चिदानन्दं हि परमात्मनस्तत्त्वम् – 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः। स च देहाद्यनात्मबुद्धिनिवृत्त्यैव भवितुमर्हति। न तु पुण्डरीकनयनोऽयं भगवानित्याकारकानात्मदेहेश्वरबुद्ध्या। यस्य – देहो नात्मा, नापीन्द्रियाणि, नापि मनः, नापि बुद्धिः, नाप्यव्यक्तम्; किन्तु प्रत्यग्ज्योतिरेवात्मेति स्वात्मसाक्षात्कारादात्मज्ञाननिश्चयः, तस्य कथं सर्वान्तरं स्वप्रभं सच्चिदानन्दं विहाय पुण्डरीकनयनोऽयं देहः परमात्मेति निश्चयो भवितुमर्हति? इन्द्रियाद्यपेक्षया बाह्यो हि देहोऽत्यन्तम्। सर्वान्तरश्चात्मेति प्रसिद्धिः। 'य आत्मनि तिष्ठ'न्नित्यादिरन्तर्यामिब्राह्मणश्रुतिस्तत्र प्रमाणं हि। कथमेवं सर्वान्तरः सर्वान्तर्यामी ज्ञानानन्दरूप ईश्वरः सर्वबाह्यः पुरुषमनोऽधीनसत्ताकः[1] जडरूपश्च स्यात्। तस्मादनात्मविद एव सगुणब्रह्मणि भक्तिः, न त्वात्मविदः। आत्मविद्धि निर्गुणे ब्रह्मणि सच्चिदानन्दलक्षणे प्रत्यगभिन्ने परमात्मनि रमते – 'यस्त्वात्मरतिरेवः स्या'दिति स्मरणात्, 'आत्मरतिरात्मक्रीडः' इति श्रुतेश्च। न च

१. अत्र 'पुरुषबुद्धिकल्पितत्वाद्धृदये भगवद्विग्रहस्येति भावः।' इति मुद्रितपुस्तकस्था टिप्पणी।

**सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।**
**मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्॥ ५६॥**

**स्वकर्मणा भगवतोऽभ्यर्चनभक्तियोगस्य सिद्धिप्राप्तिः फलं ज्ञाननिष्ठायोग्यता, [१]यन्निमित्ता ज्ञाननिष्ठा मोक्षफलावसाना, [२]स भगवद्भक्तियोगोऽधुना स्तूयते शास्त्रार्थोपसंहारप्रकरणे शास्त्रार्थनिश्चयदार्ढ्याय—** सर्वेति। सर्व-

आनन्दगिरिकृतव्याख्या

**तर्हि [३]ज्ञाननिष्ठयैव मोक्षसम्भवान्न कर्मानुष्ठानसिद्धिरित्याशङ्क्याह—**स्वकर्मणेति। **तामेव सिद्धिप्राप्तिं विशिनष्टि—**ज्ञानेति। **ज्ञाननिष्ठायोग्यतायै स्वकर्मानुष्ठानं भगवदर्चनरूपं कर्तव्यमित्यर्थः। ज्ञाननिष्ठायोग्यताऽपि किमर्थेत्याशङ्क्य ज्ञाननिष्ठासिद्ध्यर्थेत्याह—**यन्निमित्तेति। **ज्ञाननिष्ठाऽपि कुत्रोपयुक्तेत्यत्राह—**मोक्षेति। **स्वकर्मणा भगवदर्चनात्मनो भक्तियोगस्य परम्परया मोक्षफलस्य कार्यत्वेन विधेयत्वे विध्यपेक्षितां स्तुतिमवतारयति—**स भगवदिति। **ज्ञाननिष्ठा कर्मनिष्ठेत्युभयं प्रतिज्ञाय तत्र तत्र विभागेन प्रतिपादितम्। किमितीदानीं कर्मनिष्ठा पुनः स्तुत्या कर्तव्यतयोच्यते? तत्राह—**शास्त्रार्थेति। **तत्र तत्रोक्तस्यैव कर्मानुष्ठानस्य प्रकरणवशादिहोपसंहारः। स च शास्त्रार्थनिश्चयस्य दृढतां द्योतयतीत्यर्थः। यद्यपि कस्यचित् कर्मानुष्ठायिनो बुद्धिशुद्धिद्वारा कैवल्यं सिध्यति, तथापि पापबाहुल्यात् कर्मानुष्ठायिनो**

भाष्यार्कप्रकाशः

न प्रत्यगभिन्नं ब्रह्मेति वाच्यम् ; प्रत्यग्भिन्नत्वे सति ब्रह्मणः, ब्रह्मभिन्नत्वे सति प्रतीचो वा जाड्यादिप्रसङ्गात्। तस्मात् पुण्डरीकनयनत्वादिविशिष्टमानसिकबाह्यभगवद्विग्रहनिष्ठार्थप्रीतिरूपभगवद्भक्तिवशात् सच्चिदानन्दब्रह्मसाक्षात्कार इत्यनुपपन्नम्। यद्यपि तादृशभक्त्या चित्तशुद्ध्यादिपूर्वकं ज्ञानलाभाद् ब्रह्मसाक्षात्कारः। तथापि न साक्षाद् ब्रह्मानुभवहेतुत्वं भक्तेति [भक्तेरिति] बोध्यम्। एवं भक्त्या ब्रह्म साक्षात्कृत्य भक्त्यैव ब्रह्म प्रविशतीत्यप्ययुक्तम्। सति ब्रह्मसाक्षात्कारे 'एकमेवाद्वितीयं ब्रह्मे'ति सर्वद्वैतनिवृत्त्या प्राप्तृप्राप्यद्वयाभावात्। न हि निराकारे परिपूर्णे निरवयवे निर्विशेषे ब्रह्मणि प्रवेशो घटते तदन्यस्य तदनन्यस्य वा जीवस्य। समुद्रे नदीजलवत्, निरवकाशत्वाद् ब्रह्मणः। सावकाशत्वे सति परिपूर्णत्वायोगात्। तव मते जीवब्रह्मणोः सायुज्यायोगाच्च न सुतरां प्रवेशोपपत्तिः। न च लक्ष्ये शरवद् ब्रह्मणि जीवः प्रविशतीति वाच्यम् ; निरवयवत्वादुभयोर्निराकारत्वाच्च। न ह्येवमितः प्राक्तना मुक्ता ब्रह्मणि प्रविष्टाः पृथगुपलभ्यन्ते ब्रह्मसाक्षात्कारसमये विदुषा मधुपिष्टगतस्वर्णरेणुवत्। न च 'यथा नद्यः स्यन्दमानाः समुद्रेऽस्तङ्गच्छन्ती'ति श्रुतिरेव प्रमाणमिति वाच्यम् ; नामरूपोपाधिप्रहाणपूर्वकं जीवो ब्रह्मात्मनावतिष्ठत इति तदर्थात्। न च ब्रह्मांशत्वाज्जीवानां पुनर्ब्रह्मप्रवेश उपपद्यत इति वाच्यम् ; निरंशस्य ब्रह्मणः सांशत्वस्यैवायुक्तत्वात्। न च 'ममैवांशः' इति गीतावचनाद्युक्तमिति वाच्यम् ; औपाधिकत्वादंशव्यवहारस्य। न च घटाकाशो घटे नष्टे सति महाकाश इवान्तःकरणावच्छिन्नचैतन्यमन्तःकरणे नष्टे सति निरवच्छिन्नचैतन्ये प्रविशतीति वाच्यम् ; घटनाशानन्तरं यदि घटाकाशः स्यात् , तर्हि स महाकाशं प्रविशेत्। न तु सोऽस्तीति कथं तस्य ब्रह्मप्रवेशः? न चोपाधिनाशानन्तरं घटाकाशो जीवश्चास्तीति वाच्यम् ; तथा सति ब्रह्मप्रवेशस्यैवायोगात्। उपाधिं विनापि घटाकाशमहाकाशयोर्जीवेश्वरचैतन्ययोश्च भेदसत्त्वात्। उपाधिनाशानन्तरं निरुपाधिकयोस्तयोर्घटाकाश इति, जीव इति च व्यवहर्तुमशक्यत्वात्। उपाधिनाशानन्तरं महाकाशात्पूर्णचैतन्याच्च भेदेन ग्रहीतुमशक्यत्वाच्च। तथा सति प्रवेशानन्तरमपि भेदग्रहणप्रसङ्गात्। न चेष्टापत्तिः, घटनाशानन्तरं महाकाशे प्रविष्टस्य घटाकाशस्यादर्शनाच्च। तस्मादुपाधिसद्भावदशायामेव घटाकाशमहाकाशभेदव्यवहारः, न तूपाधिनाश इति घटाकाशमहाकाशयोरिव जीवेश्वरचैतन्ययोः सिद्धमद्वैतमिति न जीवचैतन्यस्येश्वरचैतन्ये प्रवेशप्रसङ्ग इति॥ ५५॥

**सर्वकर्माणीति**। सदा सर्वकर्माणि कुर्वाणोऽपि मद्व्यपाश्रयः पुरुषो मत्प्रसादाच्छाश्वतमव्ययं पदमवाप्नोति। यस्येति शेषः। स्वकर्मणा भगवतोऽभ्यर्चनभक्तियोगस्य ज्ञाननिष्ठायोग्यतारूपसिद्धिप्राप्तिः फलम् , 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इत्युक्त-

१. यन्निमित्तेति यच्छब्देन ज्ञाननिष्ठायोग्यता परामृश्यते। २. सः ज्ञाननिष्ठायोग्यताकारणीभूतः। ३. 'ज्ञाननिष्ठस्यैव' इति पा.।

**चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः।**
**बुद्धियोगमुपाश्रित्य[1] मच्चित्तः सततं भव॥५७॥**

कर्माणि **प्रतिषिद्धान्यपि सदा** कुर्वाणोऽ**नुतिष्ठन्** मद्व्यपाश्रयः **अहं वासुदेव ईश्वरो व्यपाश्रयो यस्य स मद्व्यपाश्रयो** [2]**मय्यर्पितसर्वात्मभाव इत्यर्थः। सोऽपि** मत्प्रसादाद् **मम ईश्वरस्य प्रसादाद् अवाप्नोति** शाश्वतं **नित्यं वैष्णवं पदमव्ययम्॥५६॥**

**यस्मादेवं तस्मात्**—चेतसेति। चेतसा **विवेकबुद्ध्या** सर्वकर्माणि **दृष्टादृष्टार्थानि** मयि **ईश्वरे संन्यस्य 'यत् करोषि यदश्नासि'(भ.गी.९.२७) इत्युक्तन्यायेन** मत्परः **अहं वासुदेवः परो यस्य तव स त्वं मत्परः सन् मय्यर्पितसर्वात्मभावः,**

आनन्दगिरिकृतव्याख्या

**ऽपि कस्यचिद् बुद्धिशुद्ध्यभावे कैवल्यासिद्धिरित्याशङ्क्याह—**सर्वकर्माणीति। **सर्वशब्दानुरोधादीश्वराराधनस्तुतिपरत्वेन**[3] **श्लोकं व्याचष्टे—** प्रतिषिद्धान्यपीति। **नित्यनैमित्तिकवदित्यपेरर्थः। निषिद्धाचरणस्य प्रामादिकत्वं व्यावर्तयति—**सदेति। **अनुतिष्ठन् वैष्णवं पदमाप्नोतीति सम्बन्धः। पापकर्मकारिणो यथोक्तपदप्राप्तौ पापस्यापि मोक्षफलत्वमुपगतं स्यादित्यत्राह—**मद्व्यपाश्रय इति। **तस्यैव तात्पर्यमाह—** मयीति। **तर्हि ज्ञानस्य मोक्षहेतुत्वमुपेक्षितं स्यादित्यत्राह—** सोऽपीति। प्रसादः **अनुग्रहः, सम्यग्ज्ञानोदयः।** पदं **पदनीयम् , उपनिषत्तात्पर्यगम्यम्।** अव्ययम् **अपक्षयरहितम् ॥५६॥**

**परमेश्वरप्रसादस्यैवं माहात्म्यं यतः सिद्धम् , तस्मात् तत्प्रसादार्थं भवता प्रयतितव्यमित्याह—** यस्मादिति। **भगवत्प्रसादादा-**

भाष्यार्कप्रकाशः

त्वात्। यस्येश्वराराधनबुद्ध्याऽनुष्ठितस्वकर्मानुष्ठानात्मकभक्तियोगस्य ज्ञाननिष्ठायोग्यतारूपसिद्धिप्राप्तिः फलमित्यर्थः। **यदिति**। मोक्षफलमेवावसानं यस्याः सा ब्रह्मप्राप्तिपर्यवसाना ज्ञाननिष्ठा यन्निमित्ता य एव भक्तियोगो निमित्तं हेतुर्यस्याः सा तथोक्ता। **स चेति**। ज्ञाननिष्ठायोग्यताप्राप्तिहेतुः, तद्द्वारा ज्ञाननिष्ठाहेतुश्चेत्यर्थः। सर्वकर्माण्यपीत्यपिशब्दादाह—**प्रतिषिद्धान्यपीति**। किं पुनर्विहितानीत्य-पेरर्थः। **कुर्वाण इति**। अज्ञ इति भावः। मयि अर्पितः सर्वात्मेति भावो यस्य सः। सर्वात्मेश्वर इति बुद्धियुक्त इत्यर्थः। **यद्वा** सर्वेषामात्मनां देहेन्द्रियमनोबुद्धीनां ये ये भावा व्यापारास्ते सर्वे मयीश्वरे येनार्पिताः स **मय्यर्पितसर्वात्मभावः**। ईश्वरार्थमेव मया देहेन्द्रियादिभिस्तानि तानि सर्वाणि कर्माणि क्रियन्ते, न मदर्थमिति निश्चयवानित्यर्थः। **अथवा** सर्वोऽप्यात्मभावो मनसो भावना मय्यर्पितो येन स तथोक्तः। सर्वात्मना मामेवाश्रित इत्यर्थः। सर्वकर्माणि कुर्वाणस्यापि परमपदाप्ताविदमेव निमित्तं यदीश्वरव्यपाश्रयत्वम्। **पदमवाप्नोतीति**। ज्ञानप्राप्तिद्वारेति भावः। न तु साक्षात्। अत एव 'भक्तियोगः स्तूयते' इत्युक्तम्। भक्तियोगात् परमपदप्राप्तिरितिवचनं स्तुतिर्हि, साक्षात् तस्मात् तत्प्राप्त्यभावात्। ज्ञानयोगात् परमपदप्राप्तिरिति वचनं तु यथार्थकथनम् , साक्षात् तत्प्राप्तिसम्भवात्। अथवा स्तूयत इत्यस्य कथ्यत इत्येवार्थः। मत्प्रसादाद् भक्तियोगानुष्ठाता परमं पदं प्राप्नोतीत्युक्तत्वात्। भक्तियोगस्येश्वरानुग्रहद्वारा परमपदप्राप्ति[हेतुत्व]सम्भवादिति। ईश्वरानुग्रहश्च ज्ञानप्रदानलक्षणः। यः कर्मभिः परिशुद्धचित्तः सन् ज्ञानं लभते स ईश्वरेणानुगृहीत इत्यनुमातुं शक्यत्वात्। 'ईश्वरानुग्रहादेव पुंसामद्वैतवासने'ति ह्युक्तम्। यद्वा मत्प्रसादाच्छाश्वतं पदं प्रत्यगभिन्नं ब्रह्मावाप्नोति जानाति, मदनुग्रहात् तस्य सम्यग्ज्ञानोदयो भवतीत्यर्थः ॥५६॥

**चेतसेति**। त्वं चेतसा सर्वकर्माणि मयि संन्यस्य मत्परःसन् बुद्धियोगमुपाश्रित्य सततं मच्चित्तो भव। **यस्मादेवमिति**। यस्मादीश्वराराधनात्मककर्मयोगानुष्ठानादीश्वरानुग्रहात् परमपदप्राप्तिस्तस्मादित्यर्थः। **दृष्टेति**। ऐहिकान्यामुष्मिकाणि चेत्यर्थः। कथं संन्यासः? अत आह—**यत्करोषीति**। 'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्' इति

१. 'अपाश्रित्य' इति मूले भाष्ये च पा.। २. 'मय्यर्पितसर्वभावः' इति पा.। ३. प्रतिषिद्धकर्मणो मोक्षप्रतिबन्धकत्वस्य शास्त्रसिद्धत्वात् स्तुतिपरत्वाभावे सर्वकर्माणीत्यसंगतेरिति भावः।

**मच्चित्तः सर्वदुर्गाणि मत्प्रसादात् तरिष्यसि।**
**अथ चेत् त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि॥५८॥**
**[१]यद्यहङ्कारमाश्रित्य न योत्स्य इति मन्यसे।**
**मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति॥५९॥**
**स्वभावजेन कौन्तेय ! निबद्धः स्वेन कर्मणा।**

बुद्धियोगं **मयि समाहितबुद्धित्वं बुद्धियोगस्तं बुद्धियोगम् उपाश्रित्य,** [२]आश्रयोऽ**नन्यशरणत्वम् ,** मच्चित्तो **मय्येव चित्तं यस्य तव स त्वं मच्चित्तः** सततं **सर्वदा** भव॥५७॥

मच्चित्त इति। **मच्चित्तः** सर्वदुर्गाणि **सर्वाणि** दुर्गाणि **दुस्तराणि संसारहेतुजातानि मत्प्रसादात्** तरिष्यसि **अतिक्रमिष्यसि। अथ** चेद् **यदि त्वं मदुक्तम् अहङ्कारात्** **पण्डितोऽहमिति,** न श्रोष्यसि **न ग्रहीष्यसि, ततस्त्वं** विनङ्क्ष्यसि **विनाशं गमिष्यसि॥५८॥**

**इदं च त्वया न मन्तव्यम्— स्वतन्त्रोऽहं किमर्थं परोक्तं करिष्यामीति।** यदीति। [३]यदि **चेत् त्वमहङ्कारमाश्रित्य** न योत्स्य इति **न युद्धं करिष्यामीति** मन्यसे **चिन्तयसि निश्चयं करोषि, मिथ्यैष** व्यवसायो **निश्चयः** ते **तव, यस्मात्** प्रकृतिः **क्षत्रियस्वभावः त्वां नियोक्ष्यति॥५९॥**

आनन्दगिरिकृतव्याख्या

**सादितसम्यग्ज्ञानादेव मुक्तिः, न कर्ममात्रादिति ज्ञानं** विवेकबुद्धिः। **आश्रयशब्दार्थमाह—**अनन्येति॥५७॥

**किमतो भवति? तदाह—**मच्चित्त इति। **भीत्याऽपि प्रवर्तेतेति मन्वानो विपर्यये दोषमाह—**अथ चेदिति॥५८॥

**स्वातन्त्र्ये सति भीतेरवकाशो नास्तीत्याशङ्क्याह—**इदं चेति॥५९॥

भाष्यार्कप्रकाशः

पूर्वोक्तरीत्येत्यर्थः। कर्मणामीश्वरार्पणमेवेह संन्यास इत्युच्यते, उपचारात्। न तु मुख्यः संन्यासः। 'सर्वकर्माणि कुर्वाणः' इति प्रकरणत्वादस्य। **परः** उत्कृष्टः, प्राप्यः इति वा। **बुद्धियोगमुपाश्रित्य** बुद्धियोगोपाश्रयः सन्नित्यर्थः। उपाश्रयं कृत्वोपाश्रित्य। उपाश्रयशब्दार्थमाह—**अनन्यशरणत्वमिति**। न विद्यतेऽन्यच्छरणं यस्य तत्त्वम्। बुद्धियोगैकशरणो भूत्वेति यावत्॥५७॥

**मच्चित्त इति**। मच्चित्तः सततं भवेत्युक्तम् , किं तथा भवनेनेत्यत आह—**मच्चित्त इति**। त्वं मच्चित्तःसन् मत्प्रसादात् सर्वदुर्गाणि तरिष्यसि। अथ त्वमहङ्कारान्मदुक्तमिति शेषः। न श्रोष्यसि चेत् , तर्हि विनङ्क्ष्यसि। कीदृशोऽहङ्कारः? अत आह—**पण्डितोऽहमिति**। पण्डितस्य मम किं परोक्तश्रवणेनेत्यहङ्कारादिति भावः। **न ग्रहीष्यसीति**। मदुक्तमनतिक्रम्य नाचरिष्यसि चेदित्यर्थः। न तु केवलश्रवणरूपग्रहणार्थोऽयं श्रोष्यसीति शब्दः। श्रोत्रेन्द्रियवत्त्वेन शब्दश्रवणस्य जातत्वान्न श्रोष्यसीति वचनस्य व्यर्थत्वापत्तेः। **विनाशं** **नरकादिरूपम्**। तस्मान्मदुक्तविधया मदाराधनात्मकं स्वधर्मं युद्धं कुरु इति भावः। 'नियतं कुरु कर्म त्व'मित्येवं पूर्वमुक्तत्वात् ॥५८॥

**यदीति**। यदीति श्लोकमवतारयति—**इदं चेति**। 'स्वतन्त्रोऽहं किमर्थं परोक्तं करिष्यामि' इतीदं च त्वया न मन्तव्यमित्याह—**यदीति**। त्वमहङ्कारमाश्रित्य 'न योत्स्ये' इति मन्यसे यद्येष ते व्यवसायो मिथ्या भविष्यतीति शेषः। प्रकृतिस्त्वां, कर्मणीति शेषः। **नियोक्ष्यतीति। एष इति**। 'नाहं युद्धं करिष्ये' इत्येवंरूप इत्यर्थः। **मिथ्या** व्यर्थः। कुतो मिथ्या भविष्यतीत्यत आह—**प्रकृतिरिति**।

१.'यदहंकार' इति मूले, भाष्ये च पा.। २. 'उपाश्रयः' इति पा.। ३.'यच्चैतत् त्वम्' इति पा.।

**कर्तुं नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत्॥ ६०॥**
**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति।**
**भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥ ६१॥**

**यस्माच्च—** स्वभावजेनेति। स्वभावजेन **शौर्यादिना यथोक्तेन, कौन्तेय !** निबद्धो **निश्चयेन बद्धः** स्वेन **आत्मीयेन कर्मणा, कर्तुं नेच्छसि** यत् **कर्म** मोहाद् **अविवेकतः करिष्यसि** अवशोऽपि **परवश एव** तत् **कर्म**॥ ६०॥

**यस्मात्—** ईश्वर इति। ईश्वरः **ईशनशीलो नारायणः** सर्वभूतानां **सर्वप्राणिनां** हृद्देशे **हृदयदेशे,** अर्जुन ! [१]**शुक्लान्तरात्मस्वभावो विशुद्धान्तःकरणः (इति), 'अहश्च कृष्णमहरर्जुनं च' (ऋ.सं.४.५.१०.१) इति दर्शनात्।** तिष्ठति **स्थितिं लभते। तेषु स कथं तिष्ठतीत्याह—** भ्रामयन् **भ्रमणं कारयन् सर्वभूतानि** यन्त्रारूढानि **यन्त्राण्यारूढानि**

आनन्दगिरिकृतव्याख्या

**इतश्च त्वया युद्धान्न वैमुख्यं कर्तुमुचितमित्याह—**यस्माच्चेति। **स्वभावजेन स्वेन कर्मणा निबद्धस्त्वमिति सम्बन्धः॥ ६०॥**

**इतोऽपि त्वया युद्धं कर्तव्यमेवेत्याह—**यस्मादिति। **अर्जुनशब्दस्योक्तार्थत्वे श्रुतिमुदाहरति—**अहश्चेति। **'अहश्च कृष्णमहरर्जुनं च विवर्तेते रजसी वेद्याभिः' इत्यत्र किञ्चिदहस्तावत् कृष्णमस्वच्छं कलुषितमिव लक्ष्यते, किञ्चित्पुनरहः अर्जुनमतिस्वच्छं शुद्धस्वभावमुपलभ्यते। एवमर्जुनशब्दस्य शुक्लशब्दपर्यायतया प्रयोगदर्शनादुक्तार्थत्वमुचितमित्यर्थः।** [२]**यन्त्रारूढानीवेति कथमुच्यते? तत्राह—** इव-

भाष्यार्कप्रकाशः

यस्मात्प्रकृतिस्त्वां नियोक्ष्यति, तस्मादेष मिथ्येति भाष्यान्वयः। **नियोक्ष्यति** नियुक्तं करिष्यति। कर्मणि युद्धे प्रवर्तयिष्यतीत्यर्थः॥५९॥

**स्वभावजेनेति**। कथं प्रकृतिर्नियोक्ष्यतीत्यत आह—**स्वभावजेनेति**। हे कौन्तेय, स्वभावजेन स्वेन कर्मणा निबद्धस्त्वं मोहाद् यत् कर्म कर्तुं नेच्छसि, तदवशःसन्नपि त्वं करिष्यसि। **स्वभावः** क्षत्त्रस्वभावः। तज्जेन स्वेन स्वकीयेन कर्मणा शौर्यादिना। 'शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायन'मिति श्लोकोक्तेनेत्याह—**यथोक्तेनेति। मोहादिति**। न तु सम्यग्ज्ञानादिति भावः। तत्त्वविदः प्रकृतिपरवशत्वासम्भवात्। **अवशो**ऽस्वाधीनः। फलितमाह—**परवश इति**। प्रकृतिपरतन्त्र इत्यर्थः। नाहं कर्म करिष्ये इति दृढं सङ्कल्प्य स्थितोऽपि त्वं क्षत्त्रस्वभावप्रयुक्तसहजशौर्यादिगुणयुक्तत्वाच्छत्रुभिर्बाध्यमानान् स्वीयानवलोक्य, शत्रुभिः क्रियमाणामात्मनिन्दां च श्रुत्वा, प्रभूतक्रोधविक्षिप्तं मनो नियन्तुमशक्तःसन् करिष्यस्येव युद्धम्। न हि प्रकृतिस्त्वया नियन्तुं शक्यते। न ह्यग्नेरौष्ण्यस्वभाव इव क्षत्त्रस्य शौर्यादिस्वभावोऽन्यथा भवति। यस्मादेवं तस्मान्मिथ्यैव तव 'न योत्स्येऽह'मित्येष निश्चयः। तस्मान्मदुपदेशात्प्राग् यत् त्वया निश्चितं न योत्स्ये इति, तदधुना परित्याज्यमेव। न त्वद्यापि तथैव न योत्स्य इति मन्तव्यमिति भावः॥ ६०॥

**ईश्वर इति**। न केवलं प्रकृतिरेव त्वां नियोक्ष्यति, किन्त्वीश्वरोऽपीत्याह—**ईश्वर इति**। यद्वा 'अवशः' इत्यनेन न केवलं प्रकृतिपरवशत्वं तवोच्यते, किन्त्वीश्वरपरवशत्वमपीत्याह—**ईश्वर इति**। अथवा कुतो मां स्वतन्त्रमीश्वरं प्रकृतिर्नियोक्ष्यतीत्यत आह—**ईश्वर इति**। हे अर्जुन, यन्त्रारूढानि माययेव सर्वभूतानि भ्रामयन् सन्नीश्वरः सर्वभूतानां हृद्देशे तिष्ठति। अर्जुनशब्दार्थमाह—**शुक्लेति**। शुक्लः परिशुद्धोऽन्तरात्मस्वभावो यस्य स शुक्लान्तरात्मस्वभावः। अस्यैवार्थमाह—**विशुद्धान्तःकरण इति**। नन्वर्जुनशब्दः श्वेतवाचीत्यत आह—**अहश्चेति**। कृष्णमपरिशुद्धं मेघाच्छादनादिनेति भावः। अर्जुनं परिशुद्धं मेघाभावादिनेति भावः। मेघच्छन्नेऽह्नि दुर्दिनशब्दव्यवहारात्। न ह्यह्नि शुक्लकृष्णरूपयोगः। तस्मादर्जुनशब्दः परिशुद्धवाची। इदं च सम्बोधनं वेदान्तशास्त्रोपदेशार्हत्वसूचनाय, परिशुद्धान्तःकरणस्य तव मदुक्तार्थग्रहणमुचितमिति सूचनाय वा; परिशुद्धान्तःकरणस्य तवोच्छास्त्रप्रवृत्तिरयुक्तेति सूचनाय वा;

---

१. 'शुक्लान्तरात्मस्वभाव! विशुद्धान्तःकरण !' इति पा.। २. इवशब्दस्य श्लोकेऽदर्शनात् किमर्थं तदध्याहार इत्याक्षेपः।

**अधिष्ठितानि इवेति इवशब्दोऽत्र द्रष्टव्यः— यथा [1]दारुकृतपुरुषादीनि यन्त्रारूढानि।** मायया **छद्मना भ्रामयंस्तिष्ठतीति सम्बन्धः॥६१॥**

आनन्दगिरिकृतव्याख्या

शब्द इति। **तदेव प्रपञ्चयति—**यथेति। **दारुमयानि यन्त्राणि यथा लौकिको मायावी मायया भ्रामयन् वर्तते, तथेश्वरोऽपि सर्वाणि भूतानि भ्रामयन्नेव हृदये तिष्ठतीत्यर्थः॥६१॥**

भाष्यार्कप्रकाशः

परिशुद्धान्तःकरणस्त्वं समाहितेन मनसा हृद्देशस्थमीश्वरं साक्षात्कर्तुं क्षमसे इति सूचनाय वा।

कानि तानि यन्त्रारूढानीत्यत आह—**दारुकृतपुरुषादीनि यन्त्राणीति**। दारुकृतानि पुरुषादीन्येव यन्त्राणि यन्त्रारूढानीत्युच्यन्त इत्यर्थः। अवयवावयविभावेन यन्त्रे पुरुषादिपुत्रिकाणां सत्त्वाद् यन्त्रावयवानां पुत्रिकाणां यन्त्रत्वं यन्त्रारूढत्वं चेति भावः। यद्वा कानि तानि यन्त्राणीत्यत आह—**दारुकृतेति**। तदारूढानि तु मनुष्यसत्त्वानि। पुरुषाश्वगवादिरूपासु यन्त्रस्थासु पुत्रिकासु बालानारोप्य केनचित् कपटेन भ्रामयति हि पुरुषः। अथवा आरूढानि स्वेनाधिष्ठितानि च तानि यन्त्राणि यन्त्रारूढानि; आहिताग्न्यादित्वान्निष्ठान्तस्य परनिपातः। कानि तानीत्यत आह—**दारुकृतेति**। पुरुषाकारामश्वाकारां वृषभाकारां वा काञ्चित् पुत्रिकां दारुमयीं निर्माय यन्त्रभूतां तां स्वयमधिष्ठाय केनचिन्मिषेण तद् यन्त्रं भ्रामयति कुशलः। 'दारुकृतपुरुषादीनि यन्त्रारूढानी'ति भाष्यपाठस्तु नागरपुस्तकेषु दृश्यते। तद्वदीश्वरो ब्रह्मादिस्तम्बपर्यन्तं सचेतनं कार्यकरणसंघातात्मकं चराचरभूतजातं निर्माय तस्य हृद्देशे स्थितःसन् तद् यथास्वभावं तत्रतत्र प्रवर्तयतीत्यर्थः।

**नन्व**परिच्छिन्नस्य महतो महीयसः परिपूर्णस्य परमेश्वरस्य कथं भूतहृद्देशे स्थितिः? परिमितो हि हृत्पुण्डरीकप्रदेश इति चेत्? **नैष दोषः**; 'हृत्पुण्डरीके विमले प्रविष्टः शास्ता जनाना'मिति, 'अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठती'ति च श्रुतेः। मायया रामकृष्णादिसप्तवितस्तिपरिमितकायवदङ्गुष्ठपरिमितकायोऽपि भवेदीश्वरस्य; तेन च रूपेण हृत्पुण्डरीकस्थितिरुपपद्यत इति।

**ननु** यदि तु पुण्डरीके अङ्गुष्ठमात्रपरिमित ईश्वरः साकारोऽस्ति, तर्हि स दृश्येतैवेति चेत्? **नैष दोषः**; चक्षुषो बहिःकरणस्यान्तःस्थवस्तुस्वरूपग्रहणासामर्थ्यात्। किं घटादिरिवान्तःस्थमांसादिकं चक्षुषा गृह्यते? नन्वेवं मृतभूतशरीरे ईश्वरः सोऽस्ति वा न वा? आद्ये, प्रकृतशरीरदाहेन सप्राणस्यापीश्वरस्य दाहः; तेन चेश्वरस्य महत् कष्टम्। द्वितीये, कस्माद्धेतोर्नास्ति? न च बहिर्निर्गमनादिति वाच्यम् ; बहिर्निर्गतस्य तस्य कुतोऽचाक्षुषत्वम्? किं मृतशरीराद् बहिर्निर्गतोऽङ्गुष्ठमात्रपुरुषः केनापि दृश्यते पार्श्वस्थेन? न च प्राकृतचक्षुरगोचर इति वाच्यम् ; सन्निपातदोषेण दन्तपङ्क्तिद्वयसङ्घट्टने सति वक्रमार्गाभावात् केन मार्गेण स पुरुषो निर्गतः स्यात्? न हि नेत्रादिमार्गा अङ्गुष्ठपरिमिताः। न च गुदद्वारेण निर्गत इति कल्पयितुं शक्यम् , अश्लीलत्वात्। किञ्च दर्पणमयनीरन्ध्रकरण्डे निक्षिप्ताद् म्रियमाणाद् मनुष्यान्निर्गतस्य परमेश्वरस्य तस्य कथं दर्पणाद् बहिर्गमनम् , रन्ध्राभावात्।

अपि च अतिसूक्ष्मेषु कीटादिशरीरेषु हृद्देशस्यात्यल्पत्वात् कथं तत्र तादृशेश्वरस्थितिः? तस्मादिह हृद्देशे स्थितः पुरुषो नाङ्गुष्ठमात्र इति वक्तुं शक्यते। न च श्रुतेः का गतिरिति वाच्यम् ; मनुष्यहृद्देशस्याङ्गुष्ठपरिमितत्वात् तत्स्थस्येश्वरस्यापि तत्परिमितत्वं कल्प्यत एवोपासनार्थम् , न तु तात्त्विकमिति।

नन्वेवञ्चेत् मायावच्छिन्नचैतन्यलक्षणः सत्त्वादिगुणभेदेन विष्णुब्रह्मरुद्ररूपश्चेश्वरो भूतहृद्देशे तिष्ठतीति ब्रूमः। इदं च न युक्तम्। किं हृद्देशे विष्ण्वादिमूर्तित्रयमस्ति, उत तत्रैका मूर्तिः? उभयथाऽपि शङ्खचक्रकमण्डलुत्रिशूलादिधराणां गरुडहंसवृषभध्वजानां लक्ष्मीसरस्वतीपार्वतीसहितानां महतां तेषां त्रयाणां देवोत्तमानां स्वल्पे हृत्पुण्डरीके स्थितिर्न घटते। नापि त्रयाणां तेषाम् अनेककोटिभूतजातहृदयस्थितिरुपपद्यते। अनेककोटिविष्ण्वादिमूर्तयः सन्तीति कल्पनं चायुक्तम् , अप्रमाणत्वात्। नापि विशस्यमानपश्वादिहृत्पुण्डरीके काऽपि मूर्तिरुपलभ्यते। तस्मात् सत्त्वगुणावच्छिन्नं चैतन्यं विष्णुरिति, रजोगुणावच्छिन्नं ब्रह्मेति, तमोगुणावच्छिन्नं रुद्र

१. 'दारुकृतपुरुषादीनि यन्त्राणि' इति रा.पा.। सूत्रसंचारादियन्त्रमारूढानि दारुनिर्मितपुरुषादीनीति मधुसूदनी।

भाष्यार्कप्रकाशः

इति च नामभिरुच्यते। न तु चैतन्यस्य कोऽप्याकारः। अत एव विष्ण्वादिशरीरा अस्मदादिशरीरवद् देवादिशरीरवच्च दृश्यत्वाज्जडत्वात्परिच्छिन्नत्वाच्च नैवेश्वरभूताः; किं तर्हि? मायावच्छिन्नं चैतन्यमेवापरिच्छिन्नत्वादीश्वर इति।

नन्वेवमपि मायावच्छिन्नचैतन्यलक्षणेश्वरस्य परिपूर्णस्यापरिच्छिन्नस्य कथं हृद्देशे स्थितिरिति चेत् , मायापरिणामत्वात् सर्वस्य घटाकारपरिणतमृदि गन्ध इव हृदाकारपरिणतमायायामीश्वरोऽस्तीति। एतदपि न युक्तम् , हृद्देशे तिष्ठतीति विशेषवादस्यायुक्तत्वात्। सर्वभूतानां करचरणनखलोमादिष्वपि मायापरिणामेषु दर्शितविधया सत्त्वादीश्वरस्य। किञ्चानया विधयाऽन्तःकरणस्यापि मायापरिणामत्वेन तत्रापीश्वरचैतन्यस्यैव सत्त्वाद् , अन्तःकरणावच्छिन्नचैतन्यं जीव इति वेदान्तसिद्धान्तविरोधाच्च। तस्मादीश्वरः सर्वभूतानां हृद्देशे तिष्ठतीत्येतदनुपपन्नमेवेति **पूर्वपक्षः**।

**अत्रोच्यते—** 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्युक्तसत्यज्ञानानन्दलक्षणः परिपूर्णः सर्वव्यापी परमात्मा नारायणः परमेश्वरः सर्वभूतानां हृद्देशे प्रत्यग्रूपेण तिष्ठतीति। अन्तःकरणावच्छिन्नं चैतन्यं प्रत्यगित्युच्यते। यद्यपि परिपूर्णं चैतन्यं निरुपाधिकं सर्वत्रास्ति, तथापि तदेव चैतन्यमन्तःकरणावच्छिन्नं सद् भूतानां हृदि तिष्ठतीति न कोऽपि दोषः। न च सर्वान्तरस्य प्रत्यक्चैतन्यस्यापि सर्वशरीरावयवव्यापित्वेन कथं हृद्देशे स्थितिरिति वाच्यम् ; अन्तःकरणस्य हृत्पुण्डरीके स्थितत्वात् तदवच्छिन्नचैतन्यस्य तत्रैवोपलभ्यमानत्वाद् हृद्देशे स्थितिरुक्तेति। **यद्वा** मायोपाधिको महेश्वर एव हृद्देशे प्रत्यग्रूपेण तिष्ठति। न च मायोपाधिकस्य कथमन्तःकरणोपाधिकत्वमिति वाच्यम् ; वस्त्रावृतायाः क्षुरिकायाः पेटिकावृतत्ववत् तदुपपत्तेः। अविद्यावच्छिन्नमेव चैतन्यं पुनरन्तःकरणावच्छिन्नमपि भवतीति वेदान्तशास्त्रे दृश्यते हि। अन्तःकरणावच्छिन्नस्यापि प्रतीचो जीवस्येन्द्रियावच्छिन्नत्वं देहावच्छिन्नत्वं च दृश्यते हि , 'पश्याम्यहम्' 'मनुष्योऽह'मित्यादिव्यवहारात्। न चेश्वरस्यैव कथं जीवत्वमिति वाच्यम् ; निर्विशेषस्य ब्रह्मणो यथेश्वरत्वं तथैवेश्वरस्यापि जीवत्वमिति शास्त्रैकप्रमाणा वयमभ्युपगच्छामः। तथाहि शास्त्रम् – 'तत्सृष्ट्वा तदेवानुप्राविशत्' , 'अनेन जीवेनात्मनानुप्रविश्य' इत्यादिश्रुतिः; 'ममैवांशो जीवलोके जीवभूतः सनातनः', 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत', 'ईश्वरो जीवकलया प्रविष्टो भगवानि'त्येवमादिस्मृतयः; 'भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः' इति पुराणम्। न च शास्त्रादपि कथमीश्वरस्यानीश्वरजीवत्वमिति वाच्यम् ; रज्जोरपि सर्पत्वमिव स्थाणोरपि चोरत्वमिव गगनस्यापि नैल्यमिव सशिरसोऽपि स्वप्ने भिन्नशिरस्कत्वमिव स्थिरस्यापि जलसूर्यकस्य चलनमिवाविद्यावशादीश्वरस्यापि जीवस्यानीश्वरत्वसम्भवात्। न ह्यनुभवसिद्धं जीवगतमनीश्वरत्वं शास्त्रसिद्धमीश्वरत्वं वा प्रत्याख्यातुं शक्यते केनाप्यास्तिकेन। न चैवं जीवे ईश्वरत्वानीश्वरत्वयोरनन्यतरस्य निश्चेतुमशक्यत्वेनोभयासिद्धिरिति वाच्यम् ; शास्त्राद् विद्वदनुभवात् सुषुप्त्यादिदृष्टान्ताच्च जीवे ईश्वरत्वस्य, लोकादविद्वदनुभवाज्जागराच्च तस्मिन्ननीश्वरत्वस्य च निश्चेतुं शक्यत्वात्। एकस्यापि नटस्य दशाभेदात् स्त्रीपुरुषाकारद्वयपरिग्रहवद् एकस्यापि जीवस्य विद्याऽविद्यादशाभेदेनेश्वरत्वानीश्वरत्वसम्भवाच्च। तस्मादुपपन्नं जीवेश्वराद्वैतं तत्त्वमस्यादिमहावाक्योपदिष्टम्।

तथाहि—तदित्यस्येश्वरोऽर्थः; त्वमित्यस्य जीवोऽर्थः; असीत्यस्य तयोरैक्यमर्थः। मायावच्छिन्नचैतन्यलक्षणेश्वरस्यैव पुनरन्तःकरणावच्छिन्नत्वाज्जीवेश्वराभेदः। तथा अविद्यादशायां यः संसारी जीवः स एव विद्यावस्थायामसंसारीश्वर इति जीवेश्वराभेदः। महाकाशस्य घटाकाश इव जीव ईश्वरस्यांश इति कृत्वा अंशांशिनोर्जीवेश्वरयोर्घटाकाशमहाकाशयोरिवाभेदः। बिम्बभूतं मुखं प्रतिबिम्बरूपेण यथा दर्पणे तिष्ठति, तथा बिम्बभूत ईश्वरः प्रतिबिम्बजीवरूपेणान्तःकरणे तिष्ठति; तच्चान्तःकरणं हृद्देशे तिष्ठतीतीश्वरस्यैव जीवरूपेण भूतहृद्देशे स्थितत्वाद् बिम्बप्रतिबिम्बयोर्मुखप्रतिमुखयोरिव जीवेश्वरयोरभेदः। बाह्यचैतन्यमीश्वरः, आन्तरचैतन्यं जीवः। तथा च बाह्याकाशदहराकाशयोरिव जीवेश्वरयोरभेदः। सोपाधिकचैतन्यं जीवः, निरुपाधिकचैतन्यमीश्वरः। तथा च घटाकाशमहाकाशयोरिव जीवेश्वरयोरभेदः। यथा भोग्यो बाह्यो वायुर्भोक्तृप्राणरूपेणान्तस्तिष्ठति, तथा ज्ञेयं बाह्यं ब्रह्म ज्ञातृजीवरूपेण हृद्देशे तिष्ठतीति वायुप्राणयोरिव जीवेश्वरयोरभेदः। न च वायोः प्राणभोग्यत्वं कथमिति वाच्यम् ; सर्पाणामृषीणां च वाताहारत्वात् प्राणस्यैवाहारभोक्तृत्वाच्चेति। लक्षणापक्षे त्वन्तःकरणावच्छिन्नत्वमायावच्छिन्नत्वबिम्बत्वप्रतिबिम्बत्वज्ञातृत्वज्ञेयत्वसर्वज्ञत्वकिञ्चिज्ज्ञत्वेश्वरत्वानीश्वरत्वसंसारित्वासंसारित्वसोपाधिकत्वनिरुपाधिकत्वादिविशेषणांशत्यागेन शुद्धचैतन्यमेकमेवाद्वितीयं ब्रह्म तत्त्वमसीति वाक्येन लक्ष्यत इति

भाष्यार्कप्रकाशः

बोध्यम्।

**ननु** यद्येवमीश्वरो जीवरूपेण भूतानां हृदि तिष्ठेत् तर्हि नियाम्यनियामकभावासिद्धिर्जीवेश्वरद्वयाभावादिति चेत् , **मैवम्** ; नेश्वरेण जीवो नियम्यते , ईश्वरस्यैव जीवत्वात्। किन्तु जीवरूपेणेश्वरेण कार्यकरणसंघातो नियम्यते। जीवेऽस्मिन् देहे सत्येव संघातस्य प्रवृत्तिः, अस्माद् देहादुत्क्रान्ते त्वप्रवृत्तिरिति दर्शनात्। लौकिकास्तार्किकादयश्च जीवस्वरूपमविदित्वा, कार्यकरणसंघातं चराचरात्मकं ब्रह्मादिस्तम्बपर्यन्तं दृश्यमेव सचेतनं सर्वं जीवत्वेन प्रतिपद्य, जीवा ईश्वरेण नियम्यन्त इत्याहुः। एतत्कार्यकरणसंघातेऽहमभिमानादेव वयं केनापि नियमिता इवावशाः प्रवर्तामह इति मन्यन्ते – 'केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमी'ति स्मरणात्। जन्ममरणसुखदुःखादिलक्षणं संसारं चानुभवन्ति।

**वस्तुतस्तु** न जीवस्याविक्रियस्य काऽपि प्रवृत्तिः सम्भाव्यते, 'अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते' इति ह्युक्तम्। एवं कार्यकरणसंघातस्य नानात्वादेव तदभिमानाज्जीवा अप्यनेके इति भ्रान्त्या ब्रुवन्ति तार्किकादयः। वस्तुतस्तु जीव एक एव, 'एको देवः' इति मन्त्रवर्णात् ; ईश्वरैकत्वस्य तार्किकादिसम्प्रतिपन्नत्वादीश्वरस्यैव जीवत्वाच्च। तस्मात् कार्यकरणसंघातात्मकाः प्राणिनो जीवा ईश्वरेण प्रत्यगात्मना नियम्यन्त एव। सर्वान्तरात्मा प्रत्यक्पुरुषस्तु नेश्वरेण नियम्यते, तस्यैवेश्वरत्वादिति स्थितम्।

नन्वेवं प्रकृते ईश्वरः सर्वभूतानि भ्रामयतीत्यस्य किमीश्वरो जीवान् नियमयतीत्यर्थः? उत प्रत्यगात्मा कार्यकरणसंघातजातं नियमयतीत्यर्थः इति चेत् , उभयथाऽप्येक एवाभिप्रायः पर्यवस्यति। अविद्वद्दृष्ट्येश्वरो जीवान् नियमयतीत्युक्तेऽपि विद्वद्दृष्ट्या प्रत्यगात्मा कार्यकरणसंघातजातं नियमयतीत्येव सिद्धत्वात्। विद्वद्दृष्ट्या प्रत्यगात्मा कार्यकरणसंघातजातं नियमयतीत्युक्तेऽपि, अविद्वद्दृष्ट्या जीवानीश्वरो नियमयतीत्येव सिद्धत्वात्। विदुषा हीश्वर आत्मत्वेनाभिमतः, अविदुषा च कार्यकरणसंघातः आत्मत्वेनाभिमतः। न चैक एवात्मा कुत एकेश्वरत्वेन नानासंघातत्वेन च गृहीत इति वाच्यम् ; एकस्यैव चन्द्रस्य तैमिरिकेण नानाचन्द्रत्वेन निर्मलचक्षुषा एकचन्द्रत्वेन च गृह्यमाणत्वात्। एकस्यैव सूर्यस्यास्मदादिभिः प्रकाशरूपत्वेन, उलूकैस्तिमिररूपत्वेन च गृह्यमाणत्वात्। तस्माद् विद्यया एकस्यैवात्मन ईश्वरत्वेन, अविद्यया नानाजीवत्वेन च ग्रहणमुपपद्यते।

**ननु** यः आत्मानं विद्यया ईश्वरत्वेन गृह्णाति, यश्चाविद्यया नानाजीवत्वेन गृह्णाति, सोऽसौ कः इति चेद्? **उच्यते**—प्रमातेति। स हि वस्तुत आत्माऽपि सन्नन्तःकरणतादात्म्याध्यासात् प्रमाता भवति। अयं चान्तःकरणभेदान्नानैवेति ग्रहीतृभेदाद् ग्रहणभेदोपपत्तिः। इम एव प्रमातारः कार्यकरणसंघाताहमभिमाना जीवा इति व्यवह्रियन्ते अविद्यावशात्। विद्यया त्वीश्वरात्मका एव, चैतन्यात्मकत्वादिति स्थितं जीवेश्वराद्वैतम्। अविद्यादशामधिकृत्य प्रोक्तोऽयं श्लोको भगवता, न तु विद्यादशायाम् , तत्र सर्वभूतानामेवाभावात्। तथाच यान्यविद्यादशायामुपलभ्यमानानि सर्वाणि चराण्यचराणि च ब्रह्मादिस्तम्बपर्यन्तानि भूतानि, तेषां हृद्देशे प्रत्यग्रूपेणावस्थित आत्मेश्वरो भ्रामयतीति पर्यवसन्नः श्लोकार्थः।

यत्तु **रामानुजः—**ईश्वरोऽन्तर्यामिरूपेण हृद्देशे तिष्ठन् जीवान् भ्रामयतीति, **तदयुक्तम्** ; यद्यन्तर्यामिरूपं प्रसिद्धं स्यात् , तर्हीश्वरोऽन्तर्यामिरूपेण तिष्ठतीति वक्तुमुचितम्। न तु तत् प्रसिद्धम्। न हि कस्याप्यन्तर्यामी प्रत्यक्षः। किन्त्वनुमेय एव जीवपारतन्त्र्यलिङ्गात्। तस्मात् तस्यान्तर्यामिण ईश्वरस्य रूपं वक्तव्यम्। न च रुक्मवर्णोऽङ्गुष्ठमात्रः पुरुषोऽन्तर्यामीति वाच्यम् ; दूषितत्वादेतद्वादस्य; 'अशब्दमस्पर्शमरूपमव्यय'मितीश्वरस्य रूपवत्त्वनिषेधाच्च। जीवस्यैव नीरूपत्वे किं पुनरीश्वरस्य नीरूपत्वं वक्तव्यम्? न च जीवः कृष्णवर्णः, ईश्वरः शुक्लवर्ण इति वाच्यम् ; सपापनिष्पापपरत्वात् कृष्णशुक्लशब्दयोः। न हि देहे देहाद् गच्छन् वा नीलो जीवः कैरपि दृश्यते। तथा श्वेतोऽपीश्वरः। तस्मात् सत्यज्ञानानन्दरूप एवान्तर्यामीश्वर इत्यभ्युपेयम्। अभ्युपेते च तथा तदेव सत्यं ज्ञानं जीवस्यापि स्वरूपमिति प्रत्यगात्मन एवान्तर्यामीश्वरत्वं सम्भवतीति कृत्वा तदतिरिक्तान्तर्यामिकल्पनमप्रमाणम् , अनुभवविरुद्धमनुपपन्नं च। न चान्तर्यामिब्राह्मणं प्रमाणम् , [1]तस्यापि प्रत्यगात्मपरत्वात्। नापि जीवपारतन्त्र्यानुभवः प्रमाणम् , संघातगतत्वात् पारतन्त्र्यस्य। तस्मात् प्रत्यगात्मैवान्तर्यामी।

१. 'एष त आत्माऽन्तर्याम्यमृतः' इति प्रतिपर्यायं श्रवणात् । न च 'त आत्मे'ति निर्देशाद् भेदसिद्धिः, 'ममात्मा भूतभावनः' इतिवदुपपत्तेः।

**तमेव शरणं गच्छ सर्वभावेन भारत !।**
**तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्॥ ६२॥**

तमेवेति। तमेव **ईश्वरं** शरणम् **आश्रयं संसारार्तिहरणार्थं** गच्छ **आश्रय** सर्वभावेन **सर्वात्मना, हे भारत ! ततः**

आनन्दगिरिकृतव्याख्या

**ईश्वरः सर्वाणि भूतानि प्रेरयति चेत्** [1]**'प्राप्तं कैवल्यार्थस्यापि पुरुषकारस्यानर्थक्यमित्याशङ्क्याह—**तमेवेति। सर्वात्मना **मनोवृत्त्या**

भाष्यार्कप्रकाशः

अस्य श्लोकस्य **श्रीविद्यारण्यस्वामिभिः**– यन्त्रारूढानि सर्वभूतानि मायया भ्रामयन् सन्नीश्वरः सर्वभूतानां हृद्देशे तिष्ठतीत्यन्वयमाश्रित्य देहादिपञ्जरं यन्त्रं तदारूढानि अभिमानित्वरूपमारोहं प्राप्तानि कार्यकरणसंघातेऽहमिति ममेति चाभिमानयुक्तानि इत्यर्थः। सर्वभूतानि सर्वजीवान् मायया त्रिगुणात्मिकया भ्रामयन्नित्यर्थः उपवर्णितः **पञ्चदश्याम्** – 'देहादिपञ्जरं यन्त्रं तदारोहोऽभिमानिता' इत्यादिना। **रामानुजेनापि** देहेन्द्रियावस्थं प्रकृत्याख्यं यन्त्रमारूढानीत्ययमेवार्थ उक्तः। अस्मिन्नर्थेऽपि कार्यकरणसंघाताभिमानिनां सर्वेषां जीवानां प्रमातृणां यत् स्थानं हृत्पुण्डरीकदेशः, तस्मिन् प्रत्यगात्मरूपेणेश्वरस्तिष्ठन् सन् कार्यकरणसंघातं प्रवर्तयति। तथा प्रवर्तिते संघातेऽहमित्यभिमानसत्त्वाज्जीवास्ते स्वयमीश्वरेण प्रवर्तिता इव मन्यन्त इति तात्पर्यं बोध्यम्।

अस्मिन्नन्वये तु केन साधनेनेश्वरः सर्वभूतानि भ्रामयतीत्याकाङ्क्षा पूरिता, माययेत्युक्तत्वात्। कथं भ्रामयतीत्याशङ्का तु न पूरिता। **श्रीशङ्करो**क्तान्वये तु कथमित्याशङ्का पूरिता, यन्त्रारूढानि माययेवेत्युक्तत्वात्। न च भाष्यकृदन्वयेऽपि करणाकाङ्क्षापूर्त्यभावो न्यूनतावह एवेति वाच्यम् ; मायाया ईश्वरशक्तित्वात्। ईश्वरो भूतानि भ्रामयतीत्यनेनैवाग्निः काष्ठानि दहतीतिवच्छक्त्या भ्रामयतीति सिद्धत्वाद् , अशक्तस्य भ्रामणासम्भवाच्च। न च यन्त्रारूढानीत्यस्य सर्वभूतपदाविशेषणीकरणे देहादिपञ्जराभिमानित्वं सर्वभूतानां न सिध्यतीति वाच्यम् ; अचेतनानां कार्यकरणसंघातानां प्रवर्तकत्वानुपपत्तेः सर्वभूतशब्देन सचेतनान्येव कार्यकरणसंघातानि ग्रहीतव्यानि। तथा च सति सचेतनानि सर्वभूतानि नाम प्रमातृभिरहमित्यभिमन्यमानाः कार्यकरणसंघाता एव। ततश्च कार्यकरणसंघाताभिमानिनः प्रमातार एव सर्वभूतशब्दार्थ इति सिद्धमेव। तस्माद् यन्त्रारूढानीति विशेषणं व्यर्थमेव सर्वभूतानीत्यस्य। **किञ्च** अजो नित्यः शाश्वतश्च प्रमाता। भवन्तीति भूतानीति व्युत्पत्त्या भूतशब्दः कार्यवाची न प्रमातारमजमभिधातुं क्षमते। एवं च सति देहादिपञ्जरयन्त्रारूढानि तानि भूतानि कानीत्युक्ते किमुत्तरं **श्रीविद्यारण्यस्वामिनाम्**? न किमपि। ततश्च सर्वभूतानीत्यस्य कार्यकरणसंघाताः सचेतना इत्येवार्थो न्याय्यः। अत एव प्राणिनः इत्युक्तमाचार्यैः। एवं कार्यकरणसंघातानामेव भ्रामणकथनेन जीवस्य वस्तुतस्तदभाव इति च प्रतीयत इति महान् गुणः। तस्माच्छाङ्करमेव भाष्यं शङ्करम्।

**वस्तुतस्तु** कुशलो यन्त्रारूढानि माययेव ईश्वरः सर्वभूतानि मायया भ्रामयन् सन् सर्वभूतानां हृद्देशे तिष्ठतीति माययेति पदमावर्त्य अन्वेतव्यम्। तथा सति करणाकाङ्क्षापूर्तिरपि भवति। न च इवशब्दाध्याहारः कुशलशब्दाध्याहारश्च दुष्ट इति वाच्यम् ; सति गुणेऽध्याहारस्यादोषात्। अन्यथा एकवाक्यत्वे यन्त्रारूढानीति पदवैयर्थ्यप्रसङ्गादिति सङ्क्षेपः॥ ६१॥

**तमेवेति**। यदि प्रकृतिर्मां नियोक्ष्यति, यदि चेश्वरो भ्रामयति, तर्हि प्रकृतीश्वरद्वयपरतन्त्रस्य मम का गतिः? अत आह— **तमेवेति**। हे भारत ! त्वं सर्वभावेन तमेव शरणं गच्छ, तत्प्रसादात् परां शान्तिं शाश्वतं स्थानं च प्राप्स्यसि। शरणशब्दार्थमाह— **आश्रयमिति**। शरणं गच्छेति पदद्वयार्थमाह—**आश्रयेति**। किमर्थमाश्रयणम्? अत आह—**संसारार्तिहरणार्थमिति। सर्वात्मनेति**। वाचा मनसा बुद्ध्या चेत्यर्थः। यदीश्वराद्भिन्नोऽहमिति मन्यसे, तर्हि संसारस्तव प्राप्नोति देहेन्द्रियादिसंघाततादात्म्याध्यासप्रयुक्तः सुखदुःख-

---

१. 'प्राप्तकैवल्यस्यापि' इति पा.। दारुयन्त्राणीवाधिष्ठायेश्वरो जीवान् प्रेरयति चेत् , 'ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा' इति न्यायेनात्यन्तपरतन्त्रस्य तस्य तत्प्रेरणया कैवल्यप्राप्तिरपीति तदर्थपुरुषप्रयत्नवैयर्थ्यमिति शङ्का। समाधानं तु— विधिनिषेधशास्त्रावैयर्थ्याय जीवस्य कर्तृत्वेऽवश्यस्वीकर्तव्ये, 'कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः' (ब्र.सू. २-३-४२) इति सूत्रोक्तन्यायेन कुर्वन्तमेव हीश्वरः कारयतीति न भोगमोक्षार्थपुरुषप्रयत्नवैयर्थ्यमिति।

तत्प्रसादाद् **ईश्वरानुग्रहात्** परां **प्रकृष्टां** शान्तिम् **उपरतिं,** स्थानं **च मम विष्णोः परमं पदं प्राप्स्यसि** शाश्वतं **नित्यम्॥६२॥**

आनन्दगिरिकृतव्याख्या

**वाचा कर्मणा चेत्यर्थः।** ईश्वरस्यानुग्रहात् **तत्त्वज्ञानोत्पत्तिपर्यन्तादिति शेषः।** [1]**मुक्तास्तिष्ठन्त्यस्मिन्निति** स्थानम् ॥६२॥

भाष्यार्कप्रकाशः

जन्ममरणादिलक्षणः। तस्मात् 'क्षत्रियोऽयं[हं] युवे'त्याद्यभिमानं त्यक्त्वा 'ईश्वर एवाह'मिति सर्वभावेन प्रत्यगभिन्नं परमात्मानमाश्रयस्व। किमस्मादीश्वराश्रयणात् फलम्? अत आह—**तत्प्रसादादिति**। एवं सर्वभावेनाश्रितस्य तस्येश्वरस्यानुग्रहाच्चित्तशुद्धिज्ञानप्राप्त्यादिलक्षणात् , शान्तिं संसारोपरमं, शाश्वतं स्थानं परं पदं प्रत्यगभिन्नपरमात्मस्वरूपं सच्चिदानन्दलक्षणं प्राप्स्यसि साक्षात्करिष्यसीत्यर्थः। ब्रह्मैव भविष्यसीति यावत्। तस्माद् 'अहं ब्रह्मे'तीश्वराश्रयणात् सर्वसंसारनिवृत्तिपूर्वकं ब्रह्मात्मसाक्षात्कारः फलमित्यर्थः। यद्वा 'अहं ब्रह्मे'तीश्वराश्रयणाज्जीवन्मुक्तिलक्षणः संसारोपरमः, विदेहमुक्तिलक्षणा ब्रह्मप्राप्तिश्च फलमित्यर्थः।

**ननु** प्रकृतिस्त्वां नियोक्ष्यति, ईश्वरस्त्वां प्रेरयति, मदुक्तं न श्रोष्यसि चेद् विनङ्क्ष्यसि, तस्माद् युद्धं कुरु इति पूर्वमुक्त्वा कथमधुना परमेश्वरसमाश्रयणं विधीयते ज्ञाननिष्ठालक्षणं कर्मनिष्ठाविरोधीति चेत्? **नैष दोषः**; मदुक्तविधयेश्वराराधनबुद्ध्या युद्धं कृत्वा पश्चात् संसारनाशार्थमीश्वरं शरणं गच्छेत्युक्तत्वात्। कर्मनिष्ठा हि ज्ञाननिष्ठायाः साधनभूता। न चैवं साध्यसाधकयोर्ज्ञानकर्मणोः कथं विरोध इति वाच्यम् ; काष्ठद्वयनिर्मथनसाध्यस्याग्नेः काष्ठद्वयदाहदर्शनात्। कर्मभिरुत्पन्नमपि ज्ञानं कर्मनिर्मूलकमेवेति कर्मविरोध्येव।

**यद्वा** प्रकृतीश्वरपारतन्त्र्याद् युद्धे प्रवृत्तोऽपि त्वं तमेवेश्वरं सर्वभावेन शरणं गच्छ; ईश्वरेण 'क्षत्रियस्य विजित(व्य)'मिति शासितत्वात् , मया युद्धं क्रियते तदाराधनार्थम् , न तु पृथिवीस्वर्गजयाद्यैहिकामुष्मिकफलार्थमिति वाचा मनसा बुद्ध्या चावधारयेत्यर्थः। एवं सर्वभावेनेश्वरमाश्रित्य तदाराधनात्मके स्वकर्मणि युद्धे त्वया कृते सति तु तस्येश्वरस्य त्वयि महान् प्रसादो भविष्यति। ततश्च चित्तशुद्धिं सम्यग्दर्शनं च प्राप्य संसारोपरतिं मोक्षं च प्राप्स्यसीति कर्ममार्गप्रतिपादनपर एवायं श्लोकः।

एतेन नाधुनैव तव ज्ञाननिष्ठाप्राप्तियोग्यताऽस्ति; तस्मान्न त्वं ज्ञाननिष्ठां प्रविश; किन्तु युद्धमधुना यथोक्तरीत्या विधाय तेन ज्ञाननिष्ठाप्राप्तियोग्यो भूत्वा ज्ञाननिष्ठां प्रविशेत्यर्जुनाय श्रीकृष्णोपदेश इति सूचितम्। अत एव 'नियतं कुरु कर्म त्वम्', 'तस्माद्युध्यस्व भारत' इत्यादिवाक्यानि पूर्वाध्यायेषूक्तानि। अथवा भवत्वर्जुनस्य ज्ञाननिष्ठाप्राप्तियोग्यता विनाऽपि युद्धानुष्ठानं, तस्येश्वरांशत्वात् , तथापि लोकसंग्रहार्थमप्यर्जुनेन कर्मैवादौ कर्तव्यं ज्ञानहेतुत्वात् कर्मण इत्यभिप्रेत्येत्थमुक्तं भगवता – 'लोकसंग्रहमेवापि सम्पश्यन् कर्तुमर्हसी'ति पूर्वमुक्तत्वात्। तस्मान्नार्जुने ज्ञाननिष्ठानर्हत्वशङ्का कार्येति।

यत्तु **रामानुजः—**विष्णोः परं स्थानं वैकुण्ठाख्यं प्राप्स्यसि 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः', 'ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः', 'यत्र ऋषयः प्रथमजा ये पुराणाः' इत्यादिश्रुतिभ्य इति, **तदयुक्तम् ,** सगुणब्रह्मविद्याफलत्वाद् वैकुण्ठलोकप्राप्तेः। वैकुण्ठलोको हि द्विविधः– एकः सुमेरुशिखरस्थः शुभ्रपत्न्यां विकुण्ठायां जातेन वैकुण्ठेन भगवता रमायाः प्रियकाम्यया निर्मितः। अन्यस्तु ब्रह्माण्डात् परतः सत्यलोके स्थितः। तत्र सालग्रामार्चनादिभिर्मेरुशिखरस्थवैकुण्ठलोकप्राप्तिः। सगुणब्रह्मोपासनेन तु सत्यलोकस्थवैकुण्ठप्राप्तिः। अयं च सत्यलोकस्त्रेधा विभिन्नः—सत्यलोक इति, वैकुण्ठलोक इति, कैलासलोक इति च। तत्र हिरण्यगर्भः सत्यलोकस्य स्वामी; विष्णुर्वैकुण्ठलोकस्य; शम्भुः कैलासलोकस्य। त्रयोऽप्यमी देहधारित्वाज्जीवा एव। परन्तु सर्वज्ञा रजःसत्त्वतमोगुणवशात् सृष्टिस्थितिलयहेतवः ईश्वरत्वेन पूज्याः, प्रथमजास्त्रिमूर्तिव्यपदेश्या देवताः। अमीषां स्थानान्येव सगुणमुक्तिक्षेत्राणीत्युच्यन्त इति **केचित्**। 'हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसी'दिति श्रुतेर्हिरण्यगर्भ एव प्रथमजः। स एव सत्यलोकस्वामी; तस्यैव स्थानं सगुणमुक्तिक्षेत्रम् , सगुणमुक्तिक्षेत्राणामनेकेषां सत्त्वे प्रमाणाभावादिति **परे**। सर्वथाऽपि सगुणमुक्तिक्षेत्रसत्त्वमविद्याभूमावेव; न तु विद्याभूमौ। अविद्याविषयत्वात् सर्वद्वैतस्य। 'नेह नानाऽस्ती'त्यादिना विद्यायां हि सर्वद्वैताभावः

१. मुक्ताः यस्मिन् स्वरूपे तिष्ठन्ति तत् आत्मस्वरूपमिह स्थानशब्दार्थः।

**इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया।**
**विमृश्यैतदशेषेण यथेच्छसि तथा कुरु॥ ६३॥**
**सर्वगुह्यतमं भूयः शृणु मे परमं वचः।**
**इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम्॥ ६४॥**

इतीति। इति **एतत्** ते **तुभ्यं ज्ञानम्** आख्यातं **कथितं** गुह्याद् **गोप्याद्** गुह्यतरम् **अतिशयेन गुह्यं रहस्यमित्यर्थः**; मया **सर्वज्ञेनेश्वरेण।** विमृश्य **विमर्शनम् आलोचनं कृत्वा** एतद् **यथोक्तं शास्त्रम्** अशेषेण **समस्तं यथोक्तं चार्थजातं, यथेच्छसि तथा कुरु॥ ६३॥**

**भूयोऽपि मयोच्यमानं शृणु—** सर्वेति। सर्वगुह्यतमं **सर्वेभ्यः गुह्येभ्योऽत्यन्तगुह्यतमम् अत्यन्तरहस्यम्**

आनन्दगिरिकृतव्याख्या

**शास्त्रमुपसंहर्तुमिच्छन्नाह—**इति ते ज्ञानमिति। ज्ञानं **करणव्युत्पत्त्या गीताशास्त्रम्।** यथेच्छसि तथा कुरु **ज्ञानं कर्म वा यदिष्टं तदनुतिष्ठेत्यर्थः॥ ६३॥**

**गीताशास्त्रस्य पौर्वापर्येण विमर्शनद्वारा तात्पर्यार्थं प्रतिपत्तुमसमर्थं प्रत्याह—**भूयोऽपीति। **किमर्थमिच्छन् पुनःपुनरभिदधासी-**

भाष्यार्कप्रकाशः

श्रूयते। न ह्यविद्याविषयं सगुणमुक्तिक्षेत्रं तत्त्वविदा गम्यते, तत्त्वविद्दृष्ट्या तत्क्षेत्रस्यैवाभावात्। अत एव न सगुणमुक्तिक्षेत्रस्य शाश्वतत्वम्, ब्रह्मातिरिक्तस्य सर्वस्याप्यशाश्वतत्वात्। 'अजो नित्यः शाश्वतः' इति परमात्मन एकस्यैव हि शाश्वतत्वमुच्यते। तस्माच्च शाश्वतं स्थानं परमात्मैव, न वैकुण्ठादिकम्। नन्वाधारवाचिनः स्थानशब्दस्य कथं स्वरूपपरत्वमिति वाच्यम्; सर्वजगत्कल्पनाधिष्ठानत्वेन सर्वाधारस्य ब्रह्मस्वरूपस्य स्थानशब्दवाच्यत्वसम्भवात्। तिष्ठत्यस्मिन् सर्वं जगदिति स्थानमिति निरुक्तेः। तस्माच्छाश्वतं स्थानं ब्रह्मैव, न वैकुण्ठादिकम्। इदमेव ब्रह्म 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः' इत्यनेनोच्यते, विद्वद्भिर्नित्यमनुभूयमानत्वाद् ब्रह्मस्वरूपस्य। न हि वैकुण्ठं चक्षुरगोचरं विद्वांसो भूलोकादिस्था द्रष्टुमर्हन्ति। 'यत्र पूर्वे साध्याः सन्ति देवाः' इत्यादिश्रुतयस्तु सगुणमुक्तिक्षेत्रप्रतिपादिका एव। सूरयोऽनन्तगरुडादिनित्यसूरयो वैकुण्ठं पश्यन्तीति वर्णनेऽपि नैतावता निर्गुणमुक्तिक्षेत्राभावः।[1] नापि सगुणमुक्तिक्षेत्रस्य शाश्वतत्वमिति सङ्क्षेपः॥ ६२॥

**इतीति।** इति गुह्याद् गुह्यतरं ज्ञानं ते मयाऽऽख्यातम्। एतदशेषेण विमृश्य यथेच्छसि तथा कुरु। **इतिशब्दः** पूर्वोक्तसर्वशास्त्रार्थपरामर्शीत्याह—**एतदिति।** अत एव परिसमाप्तिद्योतकमपि इतीदमव्ययं भवति। अतिशयेन गुह्यं गुह्यतरं, गुह्याद् गुह्यतरं गुह्यतममित्यर्थः। 'आयुर्वित्तं गृहच्छिद्रं मन्त्रौषधसमागमाः। दानं मानावमानौ च नव गोप्या मनीषिभिः॥' इति वचनादायुरादयो गोप्याः। तत्सर्वापेक्षयाऽपीदमध्यात्मज्ञानमतीव गोप्यमिति भावः। ननु त्वयोक्तमपीदमप्रमाणमेवेत्यत आह—**सर्वज्ञेनेश्वरेणेति।** सर्वज्ञेश्वरोक्तत्वादिदं शास्त्रं परं प्रमाणमित्यर्थः। **विमृश्य** आलोच्येत्यर्थः। 'यथेच्छसि तथा कुरु' इत्यभ्यनुज्ञामात्रेण न युद्धादुपरतिरर्जुनेन कार्या। किन्तु यथाशास्त्रं कुरु इत्येव श्रीकृष्णाशयाद् युद्धमेव कार्यम्। अत एव विमृश्य कुरु इत्युक्तम्[2]। विमृष्टे च शास्त्रे युद्धकरणेच्छैव जायेतार्जुनस्य, न तूपरमेच्छा, स्वधर्मः कार्य इति बहुश उद्घुष्टत्वात्। तस्माद् यथाशास्त्रं यथेच्छं कुरु॥ ६३॥

**सर्वेति।** भूयः सर्वगुह्यतमं परमं मे वचः शृणु। त्वं मे दृढमिष्टोऽसीति, कृत्वेति शेषः। ततस्ते हितं वदामि। विस्तरेणोक्तार्थस्य बुद्धिसौकर्याय संग्रहेण वचनं न्याय्यमिति, संग्रहेणोक्तस्यापि भङ्ग्यन्तरेण बुद्धिसौकर्याय पुनर्वचनं न्याय्यमिति वा हेतोरसकृदुक्तस्यापि

१. निर्गुणमुक्त्यभावः इति विवक्षितम्। २. अन्यथा विमृश्येत्युक्तिवैयर्थ्यादिति भावः।

**[1]मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।**
**मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे॥ ६५॥**

**उक्तमप्यसकृद्** भूयः **पुनः श्रृणु** मे **मम** परमं **प्रकृष्टं** वचो **वाक्यम्। न भयात् , नाप्यर्थकारणाद् वा वक्ष्यामि। किं तर्हि?** इष्टः **प्रियोऽसि** मे **मम** दृढम् **अव्यभिचारेण** इति **कृत्वा** ततः **तेन कारणेन** वक्ष्यामि **कथयिष्यामि** ते **तव** हितं **परमं ज्ञानप्राप्तिसाधनम्। तद्धि सर्वहितानां हिततमम्॥ ६४॥**

**किं तदित्याह—**मन्मना इति। मन्मना भव, **मच्चित्तो भव,** मद्भक्तो भव **मद्भजनो भव,** मद्याजी **मद्यजनशीलो भव,** मां नमस्कुरु **नमस्कारमपि ममैव कुरु। तत्रैवं वर्तमानो वासुदेवे एव समर्पितसाध्यसाधनप्रयोजनो मामेव** एष्यसि **आगमिष्यसि। सत्यं** ते **तव** प्रतिजाने **सत्यां प्रतिज्ञां करोम्येतस्मिन् वस्तुनीत्यर्थः। यतः प्रियोऽसि मे। एवं भगवतः**

आनन्दगिरिकृतव्याख्या

**त्याशङ्क्याह—**न भयादिति। **हितमिति साधारणनिर्देशे कथं परममित्यादिविशेषणमित्याशङ्क्याह—**तद्धीति॥ ६४॥

**तदेव प्रश्नद्वारा विवृणोति—**किं तदित्यादिना। **उत्तरार्धं व्याचष्टे—**तत्रेति। **एवमुक्तया रीत्या वर्तमानस्त्वं तस्मिन्नेव वासुदेवे भगवत्यर्पितसर्वभावो मामेवागमिष्यसीति सम्बन्धः। सत्यप्रतिज्ञाकरणे हेतुमाह—**यत इति। **इदानीं वाक्यार्थं श्रेयोऽर्थिनां प्रवृत्त्युप-**

भाष्यार्कप्रकाशः

अर्थस्य पुनर्वचनम्। ननु किमर्थं त्वं वदसि पुनः पुनः? किं राज्ञे भृत्य इव भयात्? किमुपाध्यायः शिष्यायेव धनार्थमिति शङ्कायामाह **—न भयादित्यादि।** तर्हि किमर्थं वक्ष्यसीति पृच्छति—**किं तर्हीति।** उत्तरयति—**इष्ट इति। अव्यभिचारेणेति।** त्वयि मम प्रीतिः कदाचिदपि न व्यभिचरतीत्यर्थः। ध्रौव्येणेति यावत्। **कृत्वेति।** मत्वेत्यर्थः। गम्यमानार्थत्वात् कृत्वेत्यस्याप्रयोगः। **तेन कारणेनेति।** तव मत्प्रियत्वेन हेतुनेत्यर्थः। कुतस्तद्वचनस्य हितत्वम्? अत आह—**विज्ञानप्राप्तिसाधनमिति।** विज्ञानम् 'अहं ब्रह्मास्मी'ति सम्यग्ज्ञानम्। तद्धि मोक्षकारणम्। अत एव तद्धिततममित्याह—**तद्धीति।** तद् विज्ञानप्राप्तिसाधनं वचनमित्यर्थः। विज्ञानमिति वा। **सर्वहितानामिति।** धर्मादिपुरुषार्थहेतूनां सर्वेषां हितानां मध्य इत्यर्थः। **हिततमम्** अतिशयेन हितम्। मोक्षस्य परमपुरुषार्थत्वात् तत्साधनस्य हिततमत्वमिति भावः॥ ६४॥

**मन्मना इति। किं तदिति।** तद् वचनमित्यर्थः। त्वं मन्मना भव; मद्भक्तो भव; मद्याजी भव; मां नमस्कुरु; मामेवैष्यसि। ते सत्यं प्रतिजाने। यतो मे प्रियोऽसि। मच्छब्दानामत्र प्रत्यगभिन्नः परमात्माऽर्थः। मयि मनो यस्य स मन्मना भव। मामेव चिन्तयेत्यर्थः। मद्भक्तो भव। मामेव भजस्व। मद्याजी भव। मामेव यजस्व। मां नमस्कुरु। नमस्कारः प्रह्वीभावः। आत्मन्यान्तरे हस्तादिकरणकबाह्यनमस्कारायोगेऽपि मानसिकनमस्कारो युज्यत एवेति बोध्यम्। ममैवेत्येवकारान्न तु बाह्यप्रतिमादीनामिति गम्यते। तत्रेत्यस्यार्थमाह—**एवं वर्तमान इति।** कथं वर्तमान इत्यत आह—**वासुदेव इति।** वासुदेवे मय्येव समर्पितानि साध्या भजनयजनादिक्रियाः, साधनानि वाङ्मनआदीनि करणानि, प्रयोजनानि फलानि स्वर्गादीनि। एतानि साध्यसाधनप्रयोजनानि येन स वासुदेव एव समर्पितसाध्यसाधनप्रयोजनः। त्वं मामेवागमिष्यसि प्राप्स्यसि, मत्सायुज्यं प्राप्स्यसीत्यर्थः। सम्यग्ज्ञानोदयद्वारेति भावः। **सत्यमिति।** मदुक्तमिदं सर्वं सत्यमिति ते प्रतिजाने। सत्यं यथा तथा प्रतिजान इति वा। फलितमाह—**सत्यां प्रतिज्ञां करोमीति।** क्व प्रतिज्ञां करोषीत्यत आह—**एतस्मिन् वस्तुनीति।** यथोक्तार्थ इत्यर्थः। मन्मनस्कत्वादिभिः साधनैस्त्वं मामेवैष्यसीत्ययमर्थः सत्य इति प्रतिज्ञां करोम्यहमिति नात्र त्वया अविश्वासः कार्य इति भावः। कुत एवं प्रतिजानासीत्यत आह—**यतो मे प्रियोऽसीति।** तव मत्प्रियत्वेन त्वद्धिताकाङ्क्षिणा मया तव श्रेयोऽर्थं सत्यप्रतिज्ञा क्रियत इत्यर्थः। योऽर्थो यथा मया प्रतिज्ञायते, सोऽर्थस्तथैव भवितुमर्हति, न

---

१. मन्मनस्त्वे हेतुः भक्तिरनुरक्तिरूपा। तत्र च यजनं, नमस्कारश्च हेतुः। यजनं श्रवणकीर्तनाद्युपलक्षणमिति मधुसूदनी। भजनं श्रवणकीर्तनादि इति केचित्।

**सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।**
**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥ ६६॥**

**सत्यप्रतिज्ञत्वं बुद्ध्वा भगवद्भक्तेः अवश्यम्भावि मोक्षफलमवधार्य भगवच्छरणैकपरायणो भवेदिति वाक्यार्थः॥ ६५॥**

**कर्मयोगनिष्ठायाः परमरहस्यम् ईश्वरशरणतामुपसंहृत्य, अथेदानीं कर्मयोगनिष्ठाफलं सम्यग्दर्शनं [1]सर्ववेदान्तविहितं वक्तव्यमित्याह—** सर्वेति। **सर्वधर्मान् सर्वे च ते धर्माश्च सर्वधर्माः, तान्। धर्मशब्देनात्राधर्मोऽपि गृह्यते, नैष्कर्म्यस्य विवक्षितत्वात्। 'नाविरतो दुश्चरितात्'(क.उ.२.२४) इति, 'त्यज धर्ममधर्मं च'(म.भा.१२.३२९.४०)**

आनन्दगिरिकृतव्याख्या

**योगित्वेन संगृह्णाति—**एवमिति॥ ६५॥

**वृत्तमनूद्यानन्तरश्लोकतात्पर्यमाह—**कर्मयोगेति। **धर्मविशेषणादधर्मानुज्ञां वारयति—** धर्मेति। **ज्ञाननिष्ठेन मुमुक्षुणा धर्माधर्म-**

भाष्यार्कप्रकाशः

त्वन्यथा। यस्मादहं सत्यप्रतिज्ञः, 'सत्यकामः सत्यसङ्कल्पः' इति श्रुतेरिति भावः। इदमेवाह—**एवमिति। भगवद्भक्तेरिति**। भगवदाराधनबुद्ध्या स्वकर्मानुष्ठानस्येत्यर्थः। **अवश्यम्भावीति**। ज्ञानप्राप्त्यादिक्रमेणेति भावः। **भगवच्छरणैकपरायण इति**। भगवानेव शरणमाश्रयो भगवच्छरणं, तदेवैकं मुख्यं परमयनं प्राप्यं यस्य स तथोक्तः। भगवानेव शरणमेकपरायणं च यस्येति वा। भगवदाश्रयो भगवत्परायणश्च भवेत्यर्थः। साध्यसाधनप्रयोजनानीश्वरे समर्प्य, ईश्वराराधनबुद्ध्या कर्तव्यं कर्म केवलमिति मत्वा युद्धाख्यं स्वधर्ममनुतिष्ठ। ततः क्रमेण तव परमपदप्राप्तिर्भविष्यतीति परमार्थः।

अस्मिन् शास्त्रे कर्मयोगो ज्ञानयोगश्चेति मार्गद्वयं परिनिष्ठितं 'ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिना'मित्युपक्रम्य तत्रतत्राभ्यस्तमुपसंहर्तव्यं चेह तदेव। भक्तिध्यानयोगादयस्तु मार्गद्वयान्तर्भूता एव। तत्र कर्मयोगोपसंहारोऽयं श्लोकः। वक्ष्यमाणस्तु ज्ञानयोगोपसंहारपर इति बोध्यम्॥ ६५॥

**सर्वेति। ईश्वरशरणतामिति**। ईश्वराराधनबुद्ध्या सर्वं क्रियाकारकफलजातमीश्वरे समर्प्य कर्मानुष्ठानरूपामिति भावः। **सम्यग्दर्शनमिति**। ज्ञानयोगनिष्ठेत्यर्थः। **सर्वेति**। सर्वेषां वेदान्तानामुपनिषदां साराणि सारभूतानि वाक्यानि तैर्विहितम् , सर्ववेदान्तसारत्वेन गीताशास्त्रेण विहितमिति वा। सर्ववेदान्तसारभूतमित्यर्थः। **वक्तव्यमिति**। उपसंहारप्रकरण इति भावः। इति मत्वेति शेषः। आह भगवान् – 'सर्वधर्मा'निति श्लोकम्। अयं हि सर्वस्य गीताशास्त्रस्य चरमः श्लोकः। 'अशोच्यानन्वशोचस्त्व'मिति तु प्रथमः श्लोकः। त्वं सर्वधर्मान् परित्यज्य एकं मां शरणं व्रज, अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि, त्वं मा शुचः।

**ननु** ज्ञानकर्मयोगयोर्युगपदेकेनानुष्ठातुमशक्यत्वात् कथमर्जुनं प्रति योगद्वयविधानमिति चेत्? **नैष दोषः**; अर्जुनं निमित्तीकृत्य लोकत्रयोपकारार्थं हि गीताशास्त्रं प्रवर्तितं कृष्णेन। तथा च वचनं साम्प्रदायिकानाम् – 'सारथ्यमर्जुनस्याजौ कुर्वन् गीतामृतं ददौ। लोकत्रयोपकाराय तस्मै कृष्णात्मने नमः॥' इति। तथा च कर्मनिष्ठायोग्यानुद्दिश्य कर्मनिष्ठोक्ता पूर्वश्लोकेन। ज्ञाननिष्ठायोग्यानुद्दिश्य तु ज्ञाननिष्ठोच्यतेऽनेनेति। **यद्वा** एकेन युगपद्योगद्वयमनुष्ठातुमशक्यमपि कर्मयोगानन्तरं ज्ञानयोगोऽनुष्ठातुं शक्यत एवेत्यर्जुनायापि मार्गद्वयोपदेशो युक्त एव। प्रथमतः कर्मयोगं कुरु, ततश्चित्ते शुद्धे सति ज्ञानयोगं कुरु इति। अत एव प्रथमतः कर्मयोग एवोपसंहृतः, न तु ज्ञानयोग इति।

**सर्वधर्मानिति**। कार्यनियोगापूर्वापरपर्यायो यज्ञादिजन्यः सुकृतात्मकः संस्कारो धर्मः। तद्धेतुत्वाद् यज्ञादिकर्माण्यपि धर्मा एव। अविहितकर्मजन्यं दुष्कृतमधर्मः। तद्धेतूनि दुष्टकर्माण्यप्यधर्मा एव। 'सर्वधर्मान् परित्यज्ये'त्यनेन सर्वाधर्मकरणे प्राप्ते तस्य च नरकहेतुत्वेन दुष्टत्वादिह मोक्षशास्त्रे तादृशविपरीतार्थकथनस्यायुक्तत्वादाह—**अधर्मोऽपीति**। धर्मशब्दोऽत्राधर्ममप्युपलक्षयतीत्यर्थः।

१. 'सर्ववेदान्तसारविहितं' इति पा.।

**इत्यादिश्रुतिस्मृतिभ्यः।** सर्वधर्मान् परित्यज्य **संन्यस्य सर्वकर्माणीत्येतत्। माम्** एकं **सर्वात्मानं समं** [१]**सर्वभूतस्थम् ईश्वरम् अच्युतं गर्भजन्मजरामरणवर्जितम् 'अहमेवे'त्येवम् एकं**[२] **शरणं व्रज, न मत्तोऽन्यदस्तीत्यवधारयेत्यर्थः। अहं** त्वा **त्वामेवं निश्चितबुद्धिं** सर्वपापेभ्यः **सर्वधर्माधर्मबन्धनरूपेभ्यो मोक्षयिष्यामि स्वात्मभावप्रकाशीकरणेन। उक्तं च—**

आनन्दगिरिकृतव्याख्या

**योस्त्याज्यत्वे श्रुतिस्मृतीरुदाहरति—** नाविरत इति। **मामेकमित्यादेस्तात्पर्यमाह—** न मत्तोऽन्यदिति। **अर्जुनस्य क्षत्रियत्वादुक्त-संन्यासद्वारा ज्ञाननिष्ठायां मुख्यानधिकारेऽपि तं पुरस्कृत्याधिकारिभ्यस्तस्योपदिदिक्षितत्वादविरोधमभिप्रेत्याह—**अहं त्वेति। **उक्तेऽर्थे**

भाष्यार्कप्रकाशः

येनास्तिकेन मुमुक्षुणा विदुषा सर्वे धर्माः परित्याज्याः, किं पुनस्तेनाधर्मः परित्याज्य इति वक्तव्यमित्यर्थापत्तिसिद्धः सर्वाधर्मपरित्याग इति वा भावः। धर्मशब्दोऽत्र लक्षणया कर्ममात्रं बोधयति, ततश्च विहितप्रतिषिद्धधर्माधर्मलाभ इति वा। धर्मशब्दोऽत्र अभिधया विहितकर्मबोधकः सन् लक्षणया स्वप्रतियोगिनमधर्ममपि बोधयतीति वा। धर्मानिति बहुवचनेनैव सर्वधर्मार्थसिद्धौ सर्वशब्दानर्थक्य-प्रसङ्गात् सर्वशब्दबलेनाधर्मसिद्धिरिति वा।

**वस्तुतस्तु** आस्तिकस्य वैदिकस्य कर्मिणोऽधर्मपरित्यागो धर्मस्वीकारश्च पूर्वतन्त्रेणैव विहितः। अनेन तूत्तरतन्त्रेण तस्यैव मुमुक्षोः शमदमादिसाधनसम्पन्नस्य ब्रह्मविचाराधिकारिणः पूर्वतन्त्रप्राप्तसर्वधर्मपरित्याग एव विधेयः। अधर्मपरित्यागस्य पूर्वतन्त्रेणैव कृतत्वात्। अत एव भगवता बादरायणेन 'सर्वधर्मान् परित्यज्ये'त्युक्तम् ; अन्यथा 'धर्माधर्मान् परित्यज्ये'त्येवोच्येत। सर्वधर्मान् परित्यज्येत्यनेन मन्दमतीनामधर्मकरणं प्राप्तमिति बुद्धिः स्यादिति तद्वारणाय धर्मशब्देनात्राधर्मोऽपि गृह्यत इति भाष्यकारैरुक्तमिति बोध्यम्।

सर्वधर्माः नित्यनैमित्तिककाम्यरूपाः। अधर्मस्तु हिंसादिरूपः। ननु सर्वधर्मपरित्यागस्यैव व्यासेन कण्ठत उक्तत्वात् कथं त्वयाऽधर्मोऽपि परित्याज्य इत्युच्यते? अत आह—**नैष्कर्म्यस्येति**। नैष्कर्म्यं सर्वकर्मसंन्यासः। न हि धर्मान् परित्यज्याधर्मे क्रियमाणे सति पुरुषो निष्कर्मा स्यात्। ननु नैष्कर्म्यं विवक्षितं सर्वधर्मान् परित्यज्येति वाक्येन व्यासेनेति कथं व्यासहृदयं त्वया ज्ञायते? अत आह—**नाविरत इति**। 'नाविरतो दुश्चरितान्नाशान्तो नासमाहितः' इत्यत्र दुश्चरितादधर्मान्नाविरतो विरत उपरतो न भवतीत्यविरतः स न भवतीति नाविरतोऽत्यन्तं विरत इत्यर्थः; इत्यधर्मत्यागस्य विहितत्वात्। तथा 'त्यज धर्ममधर्मं च उभे सत्यानृते त्यज' इत्यत्राप्य-धर्मं त्यजेत्यधर्मत्यागस्य विहितत्वात् , श्रुतिस्मृतिविरुद्धमर्थं कथं व्यासो ब्रूयात्? न कथमपीति भावः।

अथ सर्वधर्मान् परित्यज्येत्यस्य फलितार्थमाह—**संन्यस्य सर्वकर्माणीति**। सर्वकर्मसंन्यासं कृत्वेत्यर्थः। अन्यथा वक्ष्यमाण ईश्वरशरणागतिरूपज्ञाननिष्ठाऽसम्भवादिति भावः। न हि कर्म कुर्वाणस्य क्रियाकारकादिद्वैतदर्शिनोऽज्ञस्य ज्ञाननिष्ठा 'ब्रह्माहमद्वितीयम् अस्मी'त्येवंरूपा भवितुमर्हति। अत उक्तम्—**सर्वधर्मान्परित्यज्येति**। अत एव भाष्यकृद्भिः—'तस्मात् सर्वकर्मसंन्यासेनैव ज्ञाननिष्ठा कार्येति सिद्धम्' इत्युक्तं 'भक्त्या मामभिजानाती'ति श्लोकभाष्यान्ते। तस्माज्ज्ञाननिष्ठाया अन्तरङ्गसाधनं सर्वकर्मसंन्यासः। अत एव 'लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ। ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिना'मित्युक्तं भगवता आदावेव। साङ्ख्या विद्वांसः सर्वकर्मसंन्यासिन इति प्रपञ्चितं बहुधा प्राक् – 'कथं स पुरुषः पार्थ कं घातयति हन्ति कम्?' 'सर्वकर्माणि मनसा संन्यस्य, नैव कुर्वन् न कारयन्' , 'सर्वारम्भपरित्यागी'त्यादिभिर्ज्ञानिनां कर्माभावस्योक्तत्वात्। **एतदिति**। यावदित्यर्थः।

मामित्यस्यार्थमाह—**ईश्वरमिति**। ननु मामित्यस्यैकमिति विशेषणं विरुद्धम् , ईश्वरस्य ब्रह्मविष्ण्वादिभेदेनानेकत्वाद् , अत आह—**सर्वात्मानमिति**। सर्वस्यापि ब्रह्मादिस्तम्बपर्यन्तस्य ब्रह्मविष्णुरुद्रगणपतिकुमारलक्ष्मीसरस्वतीप्रमुखस्य च कार्यकरणसंघाता-त्मकस्य सचेतनस्य, अचेतनानां च मृत्पाषाणलोहादीनां पृथिव्यादिभूतानां शब्दादीनां च, किं बहुना? समूर्तस्यामूर्तस्य च सर्वस्य जगतो दृश्यस्यात्मानमात्मभूतम् , अत एव समं निर्विशेषम्। कुतोऽस्य सर्वात्मत्वम्? अत आह—**सर्वभूतस्थमिति**। सर्वेषु भूतेषु

१. 'सर्वभूतस्थितम्' इति पा.। २. 'अहमेवेत्येवं शरणं' इति पा.।

**'नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता'(भ.गी.१०.११)** इति। अतो मा शुचः **शोकं मा कार्षीरित्यर्थः**॥ ६६॥

आनन्दगिरिकृतव्याख्या

**दाशमिकं वाक्यमनुकूलयति—** उक्तञ्चेति। **ईश्वरस्य त्वदीयबन्धननिरसनद्वारा त्वत्पालयितृत्वान्न ते शोकावकाशोऽस्तीत्याह—** अत इति॥ ६६॥

भाष्यार्कप्रकाशः

ब्रह्मादिस्तम्बपर्यन्तेषु विष्णुरुद्रादिषु चोक्तेषु प्राणिषु , अचेतनेषु च पृथिव्यादिभूतेषु भौतिकेषु चाचेतनेषु , किं बहुना? सर्वेष्वपि चेतनाचेतनात्मकेषु कार्येषु तिष्ठतीति सर्वभूतस्थः, तम्। सर्वव्यापित्वादिति भावः। भवन्तीति भूतानीति व्युत्पत्त्या कार्यवाचित्वाद् भूतशब्दस्य। कार्ये कारणसत्त्वं कार्यस्य कारणात्मकत्वं च घटादिषु दृष्टमिति परमकारणस्य परमात्मनः सर्वभूतस्थत्वं सर्वभूतात्मत्वं चोपपद्यते, सर्वभूतानामीश्वरकार्यत्वेनेश्वरात्मकत्वात्। 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतिरीश्वरस्य कारणत्वं, 'न चास्य कश्चिज्जनिते'त्यादिश्रुतिरीश्वरस्याकार्यत्वं च ब्रूत इति परमकारणं हीश्वरः। तस्माद् घटादिस्वकार्याणां यथा मृत्तिकैवात्मा घटादिषु चास्ति, तथा स्वकार्याणां सर्वभूतानामीश्वर एवात्मा, स च सर्वभूतेष्वस्तीत्यत उक्तम्—**सर्वात्मानं सर्वभूतस्थमिति**।

**ननु** मृद्घटयोर्जाड्यादिसलक्षणत्वाद् घटानामात्मा भवितुमर्हति मृत्तिका। मृद्रूपो हि घटो दृश्यते; आत्मा हि नाम स्वरूपम् , घटस्य च मृदेव स्वरूपं, मृदतिरिक्तघटपदार्थाभावात्। नैवमीश्वरजगतोः सालक्षण्यं येन जगत ईश्वर आत्मा स्यात्। ईश्वरो हि सत्यज्ञानानन्दरूपः; जगद् अनृतजडदुःखरूपम्। तस्माज्जगदात्मत्वमीश्वरस्य, ईश्वरात्मकत्वं वा जगतो नोपपद्यते। एवम् ईश्वरात्मकत्वाभावादेव जगतो जगदीश्वरयोः कार्यकारणभावोऽपि नोपपद्यते। ततश्च सर्वभूतस्थत्वमपीश्वरस्य नोपपद्यत इति चेत् , **मैवम्** ; 'यतो वे'त्यादिश्रुतिप्रामाण्याद् रज्जुसर्पादिदृष्टान्ताच्च, स्वप्नरथगजाद्यनुभवाच्च विवर्तवादाश्रयणेन ईश्वरविवर्तभूतस्य जगत ईश्वरात्मकत्वसम्भवात् कारणेश्वरधर्माणां सच्चिदानन्दानां जगत्यनुगमदर्शनाज्जगदस्ति भाति प्रियं चेति व्यवहारात्। तस्माज्जगतः स्वरूपं सच्चिदानन्द ईश्वर एव, यथा सर्पस्य स्वरूपं रज्जुः। रज्जौ सर्पस्येव जगत ईश्वरे मायया कल्पितत्वात्। अत एव रज्जुयाथात्म्यविदां सर्पो यथा न प्रतिभाति, ब्रह्मविदां जगत् तथा न प्रतिभाति, सच्चिदानन्दब्रह्मातिरिक्तजगत्पदार्थाभावाद् , रज्ज्वतिरिक्तसर्पपदार्थाभाववत्। न चैवं विदुषां व्यवहारलोपप्रसङ्ग इति वाच्यम् ; यावद्देहपातमविद्याया लेशतःसत्त्वाद् द्वैतप्रतीतिसत्त्वेऽपि विदुषां तत् सर्वं ब्रह्मैवाभाति– 'वासुदेवः सर्वमिति स महात्मा सुदुर्लभः' इत्युक्तम्। तस्मान्न व्यवहारलोपप्रसङ्गः। नापि ब्रह्मातिरिक्तजगत्पदार्थानुभवश्च विदुषामिति। स एष सर्वोऽर्थः पूर्वमेव विस्तरेणोक्त इतीहोपरम्यते।

**ईश्वरमिति**। देहेन्द्रियादीशनशीलं चैतन्यरूपं परमात्मानमित्यर्थः। **शरणं व्रजेति**। कथं शरणागतिः? अत आह—**अहमेवेत्येवमिति**। 'अहमेवेश्वरः' इत्येवमित्यर्थः। ननु मामेव शरणं व्रजेत्यनेनैवेष्टसिद्धौ किं फलम् **एक**ग्रहणेनेत्यत आह—**नेति**। ईश्वर एक एवास्ति, स एवाहमस्मि, मत्त ईश्वरादन्यत् किमपि नास्तीत्यवधारय निश्चयेन जानीहि। **यद्वा** मामेकं शरणं व्रजेत्यस्य फलितमाह— **नेति**। ईश्वरोऽहमेक एवास्मि, न तु मत्तोऽन्यत् किमप्यस्तीत्यवधारयेत्यर्थः। 'तत्सत्यं स आत्मा तत्त्वमसि, अतोऽन्यदार्त'मित्यादिश्रुतिभ्यः, 'मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय' 'क्षेत्रज्ञं चापि मां विद्धि' 'अहमात्मा गुडाकेश सर्वभूताशयस्थितः' इत्यादिस्मृतिभ्यः, 'न वासुदेवात्परमस्ति किञ्चित्' 'तस्मान्न विज्ञानमृतेऽस्ति किञ्चिदि'त्यादिपुराणाच्च कारणातिरिक्तं कार्यं नास्ति, मृदतिरिक्तघटादर्शनात् , रज्ज्वतिरिक्तसर्पादर्शनात्। एवं परमकारणादीश्वरादतिरिक्तं कार्यं जगन्नास्ति। ईश्वरे उपलभ्यमानौ नामाकारौ तु मिथ्याभूतावेव। मृद्युपलभ्यमानघटनामकम्बुग्रीवाकारयोर्मिथ्यात्वदर्शनात्। अत एव 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य'मिति श्रुतिरपि सङ्गच्छते, [१]इत्यनुमानाच्च। सुषुप्त्यादौ द्वैताभावस्य सर्वानुभवसिद्धत्वादनुभवित्रभावे अनुभवासिद्धेश्च स्वात्मैक एवास्ति, न तु द्वैतमित्यनुभवाच्च नेश्वरादन्यदस्तीति भावः।

यदुक्तम्– 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज' इति तस्य फलमुच्यते—**अहं त्वामित्युत्तरार्धेन**। अहं प्रत्यगभिन्नः

१. ईश्वरे उपलभ्यमानौ नामाकारौ मिथ्याभूतौ, नामरूपत्वात् , मृद्युपलभ्यमानघटनामरूपवत् इत्यनुमानम्। दृष्टान्तसिद्धिस्तु वाचारम्भणश्रुत्येति बोध्यम्।

भाष्यार्कप्रकाशः

परमात्मा त्वाम् एवं पूर्वोक्तविधया 'ब्रह्मैवाहमस्मीति, न मत्तोऽन्यदस्ती'ति च निश्चिताऽवधारिता बुद्धिर्यस्य तं निश्चितबुद्धिं त्वां प्रमातारमित्यर्थः। तस्यैव देहादितादात्म्याध्यासप्रयुक्तसंसारान्मुमुक्षुत्वात् , केवलात्मनो मोक्षेच्छाद्ययोगाच्चेति भावः। **सर्वपापेभ्य इति**। बन्धकत्वात् पापवत् पुण्यमपि पापमेव। अतः पापशब्दोऽत्र पुण्यपापोभयपर इत्यभिप्रेत्याह—**सर्वधर्मेति**। सर्वेभ्यो धर्माधर्मात्मकेभ्यो बन्धनरूपेभ्यो बन्धनमेव रूपं येषां तेभ्यः सर्वपापेभ्यः। **यद्वा** बध्नन्तीति बन्धनानि, धर्माधर्मा एव बन्धनानि धर्माधर्मबन्धनानि, सर्वाणि च तानि धर्माधर्मबन्धनानि च सर्वधर्माधर्मबन्धनानि, तद्रूपेभ्यो बन्धकेभ्यो धर्माधर्मरूपेभ्यो सर्वेभ्यः पापेभ्य इत्यर्थः। **मोक्षयिष्यामि** त्याजयिष्यामि, सर्वपापविनिर्मुक्तं करिष्यामीत्यर्थः।

यदि धर्माः क्रियेरन् तर्हि पुण्यबन्धः स्यात्; यद्यधर्माः क्रियेरन् तर्हि पापबन्धः स्यात् ; यदि विहितानि न क्रियेरन् तथापि पापबन्धः स्यात् ; तस्मात् सर्वान् धर्मानधर्मांश्च परित्यज्य ईश्वरशरणागतौ कृतायां सत्यां पुण्यपापबन्धविनिर्मुक्तिर्भविष्यति मुमुक्षोः। ईश्वरशरणागतिरूपज्ञाननिष्ठाधिकृतस्य विहिताकरणजन्यदोषाभावाद् यथाविधि सर्वं कर्म संन्यस्य हि ज्ञाननिष्ठायामधिकरोति पुरुषः। तस्मात् सर्वधर्मपरित्यागेश्वरशरणागतिभ्यां सर्वपुण्यपापरूपबन्धविमुक्तिः सुलभा मुमुक्षोरिति भावः।

इदं च सर्वपापविनिर्मुक्तिरूपं मया दास्यमानं फलं तव न स्वर्गादिवद् देहपातानन्तरानुभवविषयम्; किं तर्हि? इहैवानुभूयते। सर्वपापविनिर्मुक्तपरिशुद्धसच्चिदानन्दस्वात्मसाक्षात्कारस्येहैव जायमानत्वाद् 'अहं ब्रह्मास्मी'त्यात्मस्वरूपानुसंधानवतः पुरुषस्य। तस्मात् स आत्मसाक्षात्कारस्तव यथा स्यात् तथाऽहं तव स्वात्मभावप्रकाशं कृत्वा, तेन द्वारा त्वां सर्वपापेभ्यो मोक्षयिष्यामीत्याह— **स्वात्मभावप्रकाशकरणेनेति**। स्वस्य तवात्मभावो बुद्धिरूपः पदार्थस्तस्य प्रकाशः सत्त्वोत्कर्षकृतं स्वच्छत्वं, तस्य करणेन हेतुना। सत्त्वगुणात्प्रकाशमानया हि बुद्ध्या दृश्यते स्वात्मा – 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभि'रिति श्रुतेः। स्वोक्तार्थे भगवदुक्तिं प्रमाणयति—**उक्तं चेति। नाशयामीति**। 'अहमज्ञानजं तमः' इति पूर्वमुक्तं तमो नाशयामीत्यर्थः। **ज्ञानदीपेनेति**। 'अहं ब्रह्मे'त्याकारक-बुद्धिवृत्तिरूपदीपेनेत्यर्थः। सर्वं कर्म संन्यस्य यो ज्ञाननिष्ठामभ्यस्यति, तस्य बुद्धिः सत्त्वगुणोत्कर्षादतीव प्रसन्ना एकाग्रा भूत्वा 'अहं ब्रह्मास्मी'त्यखण्डचैतन्याकारेण परिणमते, तत आत्मसाक्षात्कारो जायते। साक्षात्कृते चात्मनि सर्वद्वैतोपमर्दात् क्व पुण्यपापसद्भावः? क्व वा तत्कृतो बन्धः? तस्मान्मुक्त एव त्वं भविष्यसि, नित्यशुद्धबुद्धमुक्तत्वादात्मस्वरूपस्येति भावः।

एतेन सर्वधर्मपरित्यागपूर्वकेश्वरशरणागत्याः स्वात्मभावप्रकाशकरणरूप ईश्वरानुग्रहः फलम् ; मोक्षस्तु नित्यसिद्धत्वान्नैव फलम् ; न हीतः प्रागात्माऽसङ्गः पुण्यपापबद्धो येनेदानीं मुच्येतेति सिद्धम्। स्वात्मभावप्रकाशकरणमित्यस्य **स्वात्मनः** स्वस्य प्रतीचो यो **भावः** सच्चिदानन्दस्वभावः, तत्त्वमिति यावत्। तस्य प्रकाशकरणं बोधनं तेनेत्यप्यर्थ आयाति। भावस्तु स एव। ईश्वरानुग्रहाद् बुद्धेरात्मैकाग्र्यं भवतीति पूर्वोक्तार्थस्यापीहैव तात्पर्यात्। ततश्च सर्वधर्मान् परित्यज्य 'अहं ब्रह्मास्मी'त्यनिशं चिन्तयतः पुरुषस्येश्वरानुग्रहाद् आत्मसाक्षात्कारो जायत इति सिद्धम्। अयं चेश्वरानुग्रहो नाम अनवरतप्रत्यगात्माश्रयवशाद् बुद्धेः प्राप्तं यदात्मैकाग्र्यं तत्प्रत्यगात्मानुग्रहकृतमेवेत्यभिप्रायादुक्तः प्रत्यगात्मानुग्रह एव, न त्वन्यः, अद्वैतज्ञाने तदयोगात्; प्रत्यगात्मातिरिक्तेश्वरपदार्थासत्त्वाच्च। **अत इति**। यस्मादहं सम्यग्दर्शनप्रदानद्वारा त्वामेवं ज्ञाननिष्ठं सर्वकर्मसंन्यासिनं मोक्षयिष्यामि तस्मादित्यर्थः। **मा शुच इति**। मा खिद्यस्व। **शोकमिति**। कथमहमिमं संसारं तरिष्यामीत्येवंरूपमिति भावः। **मा कार्षीरिति**। तवात्मनोऽसंसारीश्वरत्वात् सर्वकर्मसंन्यासपूर्वकात्मज्ञाननिष्ठाया स्वात्मसाक्षात्कारसम्भवाच्चेति भावः। न च कथमात्मज्ञाननिष्ठाकृतात्मसाक्षात्कारमात्रेण संसारोपरम इति वाच्यम् ; प्रमातुरस्यात्मतत्त्वसाक्षात्काराभावरूपाज्ञानादनात्मन्यात्मतादात्म्याध्यासमूलकः संसारो य आसीत् कथं तस्यात्मतत्त्वसाक्षात्काररूपाज्ज्ञानादनिवृत्तिः? किं रज्जुस्वरूपाज्ञानकृतसर्पाभासो रज्जुस्वरूपसाक्षात्कारादनिवृत्तो दृश्यते? किं निर्धन देवदत्त-स्वरूपाज्ञानकृतो नैद्राकालिको महाराजात्मभ्रमः प्रबोधेऽपि देवदत्तस्य भवितुमर्हति? किं देहातिरिक्तकर्तृभोक्त्रात्माज्ञानकृतो देहात्मभ्रमः सत्यपि देहातिरिक्तकर्तृभोक्त्रात्मज्ञाने वैदिकस्यास्तिकस्य भवितुमर्हति नास्तिकवद् बालवच्च? तस्मादसंसारीश्वरात्मस्वरूपसाक्षात्कारादेव संसारनिवृत्तिः, नान्यस्मादुपायाद् भवति। अत एव– 'तरति शोकमात्मवि'दिति श्रुतिरात्मज्ञानादेव शोकनिवृत्तिं ब्रूते। अत एव 'नान्यः पन्था विद्यतेऽयनाये'त्यात्मज्ञानस्यैव मोक्षहेतुत्वमुक्तम्। मोक्षो हि संसारबन्धनिवृत्तिः। तस्मादीश्वरात्मज्ञानादेव मोक्ष इति स्थितमद्वैतम्॥

**अस्मिन् (हि) गीताशास्त्रे [1]परमनिःश्रेयससाधनं निश्चितं किं ज्ञानम् , (किं) कर्म वा, आहोस्विदुभयमिति? कुतः सन्देहः? 'यज्ज्ञात्वाऽमृतमश्नुते'(भ.गी.१३.१२), 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्'(भ.गी.१८.१५) इत्यादीनि वाक्यानि केवलाज्ज्ञानान्निःश्रेयसप्राप्तिं दर्शयन्ति। 'कर्मण्येवाधिकारस्ते'(भ.गी.२.४७), 'कुरु कर्मैव'(भ.गी.४.१५) इत्येवमादीनि कर्मणामवश्यकर्तव्यतां दर्शयन्ति। एवं ज्ञानकर्मणोः कर्तव्यतोपदेशात् समुच्चितयोरपि निःश्रेयसहेतुत्वं स्यादिति भवेत् संशयः [2]कस्यचित्। किं पुनरत्र मीमांसाफलम्? नन्वेतदेव एषामन्यतमस्य परमनिःश्रेयससाधनत्वावधारणम्। अतो [3]विस्तीर्णतरं मीमांस्यमेतत्।**

आनन्दगिरिकृतव्याख्या

**पूर्वापरालोचनातो गीताशास्त्रं व्याख्यायोपसंहृत्य तत्तात्पर्यार्थं निर्धारितमपि विचारद्वारा निर्धारयितुं विचारमवतारयति—** अस्मिन्निति। **किंशब्दार्थमेव त्रेधा विभजते—**ज्ञानमिति। **निमित्ताभावे संशयस्याभासत्वान्न निरस्यतेति मत्वा पृच्छति—**कुत इति। **तत्तदर्थावद्योतकानेकवाक्यदर्शनं तन्निमित्तमित्याह—**यज्ज्ञात्वेति। **कर्मणामवश्यकर्तव्यत्वोपलम्भात् तेभ्योऽपि निःश्रेयसप्राप्तिर्भातीत्याह—**कर्मण्येवेति। **तथापि समुच्चयप्रापकं नास्तीत्याशङ्क्याह—**एवमिति। **सत्यां सामग्र्यां कार्यमवश्यम्भावीत्युपसंहरति—**इति भवेदिति। **सन्दिग्धं सफलं च विचार्यमिति स्थितेरसति फले सन्दिग्धमपि न विचार्यमिति बुद्ध्या पृच्छति—**किं पुनरिति। **प्रत्येकं ज्ञानकर्मणोः, समुच्चितयोर्वा मुक्तिं प्रति परमसाधनतेत्यवधारणमेव विचारफलमिति परिहरति—**नन्विति। **सन्देहप्रयोजनयोर्विचारप्रयोजकयोर्भावाद् विचारद्वारा परममुक्तिसाधनं निर्धारणीयमिति निगमयति—**अत इति।

भाष्यार्कप्रकाशः

ननु ज्ञानादेव मोक्ष इति योंऽशः तवाद्वैतिनोऽभिमतः, सोऽयं न सिध्यति। प्रकृतगीताशास्त्रे भगवताऽस्यांशस्य निष्कृष्यानुक्तत्वादिति शङ्कायां तमेवांशं स्थापयितुं विचारमारभते— **किमस्मिन्नि**त्यादिना **सम्यग्दर्शनादत्यन्तोपरम इति सिद्धमि**त्यन्तेन ग्रन्थेन। अस्मिन् गीताशास्त्रे निश्चितं परं निःश्रेयससाधनं किमित्यन्वयः। अस्मिन् गीताशास्त्रे मोक्षसाधनत्वेन निश्चितं वस्तु किमित्यर्थः। प्रश्नमेवामुं विकल्पयति—**किं ज्ञानमित्यादिना**। अस्मिन् शास्त्रे किं ज्ञानं परं निःश्रेयससाधनमिति निश्चितं, यद्वा कर्म, आहोस्विदुभयं कर्मज्ञानद्वयमिति त्रेधा विकल्पः। एवं विकल्पनस्य संशयपूर्वकत्वात् संशयहेतुं पृच्छति—**कुतः संशय इति**। क्वचिज्ज्ञानान्मोक्ष इति प्रतिपादनात् क्वचित्पुनः कर्मणा मोक्ष इति प्रतिपादनाच्च संशय इत्याह—**यज्ज्ञात्वेति**। इत्यादीनीत्यादिपदात् – 'यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्। स सर्वविद्भजति मां सर्वभावेन भारत', 'नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति। गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति', 'क्षेत्रक्षेत्रज्ञोरेवायमन्तरं ज्ञानचक्षुषा। भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम्', 'य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह। सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते', 'ज्ञानवान्मां प्रपद्यते', 'ज्ञात्वा मां शान्तिमृच्छति', 'ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छती'त्यादीनि वाक्यानि ग्राह्याणि। 'तस्मात्त्वमित्यादीनी'**त्यादि**पदात्तु 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः', 'मत्कर्मकृन्मत्परमः', 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः', 'असक्तो ह्याचरन् कर्म परमाप्नोति पूरुष' इत्यादीनि ग्राह्याणि।

नन्वेवं श्रेयःसाधनं किं ज्ञानमुत कर्मेति भवेत् संशयः। कथं पुनः किमुभयमिति संशयो भवेत्? अत आह—**एवमिति**। ज्ञानकर्मणोरप्युभयोः कर्तव्यत्वोपदेशादुभयमपि श्रेयःसाधनमिति संशयः स्यादित्यर्थः। ननु भवतु संशयः, किमत्र तद्विचारेण फलमिति पृच्छति—**किं पुनरिति**। उत्तरयति—**नन्वेतदेवेति**। नन्विति प्रष्टुः सम्बोधनम्। वाक्यालङ्कारे वा। एतदेव फलम् ; किं तद्? अत आह — **एषामिति**। एषां त्रयाणामन्यतमस्य परमनिःश्रेयससाधनत्वावधारणमेव फलम्। विचारात् त्रयाणां मध्ये एकस्य मोक्षसाधनत्वं निश्चितं भवतीत्यर्थः। **अत इति**। अन्यतमस्य निःश्रेयससाधनत्व[त्वाव]धारणार्थमित्यर्थः। **एतत्** पूर्वोक्तांश इत्यर्थः। विकल्पत्रयात्मक इति भावः। **मीमांस्यं** विचार्यम्। कथं मीमांस्यम्? अत आह—**निस्तीर्णतममिति**। अतिशयेन **निस्तीर्णं** निश्चितं यथा भवति तथा। सति

१. 'परं निश्रेयस' इति पा.। २. 'कस्यचित्' इति क्वचिन्न। ३. 'निस्तीर्णतरं' रा.पा.।

**आत्मज्ञानस्य तु केवलस्य निःश्रेयसहेतुत्वम् , भेदप्रत्ययनिवर्तकत्वेन [१]कैवल्यफलावसानत्वात्। क्रियाकारकफलभेदबुद्धिः अविद्ययाऽऽत्मनि [२]नित्यप्रवृत्ता— 'मम कर्म, अहं कर्ता, अमुष्मै फलायेदं कर्म करिष्यामि' इति इयमविद्याऽनादिकालप्रवृत्ता। अस्याः अविद्यायाः निवर्तकम् 'अयमहमस्मि केवलोऽकर्ताऽक्रियोऽफलः, न मत्तो**

अनुभूतिस्वरूपाचार्यटिप्पणम्

सन्दिग्धत्वात् सप्रयोजनत्वाच्च विचारारम्भमुपपाद्य सिद्धान्तमुपक्रमते—**आत्मज्ञानस्य त्वित्यादिना।** वस्तुसंग्रहवाक्यं व्याख्यातुं भेदप्रत्ययस्य अविद्यात्मकत्वं तावदाह—**क्रियाकारकेत्यादिना।** अविद्यान्वयव्यतिरेकाभ्यां भेदबुद्धेरविद्यात्मकत्वमुपपाद्य, इदानीं ज्ञानमात्रनिवर्त्यत्वमाह—**अस्या अविद्याया इति।** ननु ब्रह्मज्ञानमुत्पद्यमानं ब्रह्माविद्यां निवर्तयतीति

आनन्दगिरिकृतव्याख्या

**एवं विचारमवतार्य सिद्धान्तं संगृह्णाति—**आत्मेति। **संग्रहवाक्यं विवृण्वन्नादावात्मज्ञानापोह्यामविद्यां दर्शयति—**क्रियेति। **आश्रयोक्त्या तदनादित्वमाह—**आत्मनीति। **तामेवाविद्यामनाद्यविद्योत्थामनर्थात्मिकां प्रपञ्चयति—**ममेति। **अनाद्यविद्याकार्यत्वात् प्रवाहरूपेणानादित्वमस्या विवक्षित्वा विशिनष्टि—**अनादीति। **तत्र कारणाविद्यानिवर्तकत्वमात्मज्ञानस्योपन्यस्यति—**अस्या इति। **ननु**

भाष्यार्कप्रकाशः

तु संशये मुमुक्षोर्निश्चयाभावात् क्वाप्यप्रवृत्तिः स्यादिति संशयनिरासाय विचारः आवश्यक इति भावः।

**ननु** किं निर्धारणेन? त्रयाणामपि मोक्षसाधनत्वाद् यथाबुद्धि यथाशक्ति च पुरुषोऽन्यतममनुष्ठाय मोक्षं प्राप्स्यतीति चेत् , **मैवम्** ; ज्ञानस्यैकस्यैव मोक्षसाधनत्वात् कर्मणो मोक्षासाधनत्वात् समुच्चयस्यासिद्धत्वाद् ज्ञानमेकमेव मोक्षसाधनमिति निर्धारणम् आवश्यकमेव। अनिर्धारिते ह्यस्मिन्नंशे कर्मापि मोक्षसाधनमिति मत्वा मुमुक्षुः कर्मणि प्रवर्त्य[प्रवृत्य] मोक्षपुरुषार्थाद्धीयेत। अथवा समुच्चयो मोक्षसाधनमिति मत्वा समुच्चयस्य दुष्करत्वादेकैकस्यामोक्षसाधनत्वाच्च क्वापि पुरुषो न प्रवर्तेत मोक्षार्थी। ततश्च पुरुषार्थाद् भ्रष्टः स्यात्। तस्मादन्यतमस्य मोक्षसाधनत्वनिर्धारणाय, यद्वा ज्ञानस्यैकस्यैव मोक्षसाधनत्वनिर्धारणाय विचारोऽयमावश्यक एव। न हि मथनं विना अमृतवद् विचारं विना निश्चयार्थो लभ्यते। तस्मान्निस्तीर्णतमं मीमांस्यमेतत्।

एवं विकल्पत्रयं प्रदर्श्य सिद्धान्तमाह—**आत्मज्ञानस्य त्विति**। केवलस्यात्मज्ञानस्य तु निःश्रेयसहेतुत्वम् , अस्तीति शेषः। तत्र हेतुमाह—**भेदेति**। भेदप्रत्ययानां निवर्तकत्वेन हेतुना **कैवल्यफलावसायित्वात्** मोक्षपर्यवसायित्वात्। कर्मसमुच्चितत्ववारणायोक्तम् —**केवलस्येति**। तुशब्दस्य फलं स्वयमेव वक्ष्यति। आत्मज्ञानस्य भेदप्रत्ययनिवर्तकत्वमेवोपपादयति—**क्रियेति**। आत्मन्यविद्यया क्रियाकारकफलभेदबुद्धिर्नित्यप्रततेत्यन्वयः। नित्यमनादिकालादारभ्य प्रकर्षेण तता विस्तृता। कथं प्रततेत्यत आह—**मम कर्मेति**।

ननु यद्यविद्ययैवात्मनि क्रियाकारकफलभेदबुद्धिर्वितता, तर्ह्यविद्यायाः प्राक् सा भेदबुद्धिर्भवितुं नार्हति। ततश्चाविद्यायाः प्राक् कैवल्यमस्त्येवात्मनः, ततः पुनरविद्योदयानन्तरं भेदबुद्धिपूर्वकं संसारः प्राप्त आत्मनः, यद्येवं तर्हि विद्यया मुक्तस्याप्यात्मनः पुनः संसारो भविष्यत्येव। पूर्वमविद्यमानाया अविद्याया यथा आत्मन्युदयस्तथा नष्टाया अप्यविद्यायाः पुनरुदयसम्भवात् , उदयात्प्रागिव नाशादनन्तरमपि वस्तुनोऽविद्यमानत्वस्य तुल्यत्वाद् अविद्यमानवस्तुन उत्पत्त्यङ्गीकारे नष्टवस्तुनोऽपि पुनरुत्पत्तेरवर्जनीयत्वात्। एवं च सति स्वर्गं गतस्येव, मुक्तिं गतस्यापि पुनरावृत्तिप्रसङ्गः। तस्मान्नाविद्यया आत्मनि क्रियाकारकफलभेदबुद्धिर्वितता, किन्तु स्वत एवास्तीति शङ्कायामाह—**इयमिति**। अनादिरियमविद्या, अनादिकालमारभ्य प्रवृत्तत्वात्। न ह्यस्मिन् काले इयमविद्या प्रवृत्तेति ज्ञातुं शक्यते। तस्मात् कार्यभूताऽपीयमविद्या अनादिरेव। तस्मादविद्योदयात्प्रागिति वक्तुं न शक्यम्। न चैवं नष्टाया अविद्यायाः पुनरागतिरिति वाच्यम् ; नष्टस्य घटस्य दीपस्य वा पुनरुदयादर्शनात्। न च स्वत एव क्रियादिकमात्मन्यस्तीति वाच्यम् , 'निष्कलं निष्क्रियं शान्त'मित्यादिश्रुतिविरोधात्। तस्मात् क्रियाकारकफलरूपो भेदस्तद्बुद्धिश्चात्मन्यविद्ययैव प्रतता, न तु स्वाभाविकी। किमस्या अविद्याया निवर्तकम्? अत आह—**अस्या अविद्याया इति**। निवर्तकं ज्ञानमिति व्यवहितेन सम्बन्धः। किंविषयं ज्ञानम्? अत आह—

१. 'कैवल्यफलावसायित्वात्' इति पा.। २. 'नित्यप्रतता' इति रा.पा.।

**ऽन्योऽस्ति कश्चिद्' इत्येवंरूपमात्मविषयं ज्ञानमुत्पद्यमानम् , कर्मप्रवृत्तिहेतुभूताया भेदबुद्धेर्निवर्तकत्वात्। तुशब्दः पक्षद्वयव्यावृत्त्यर्थः। न केवलेभ्यः कर्मभ्यः, न च ज्ञानकर्मभ्यां समुच्चिताभ्यां निःश्रेयसप्राप्तिरिति पक्षद्वयं निवर्तयति। अकार्यत्वाच्च निःश्रेयसस्य [1]कर्मसाधनत्वानुपपत्तिः। न हि नित्यं वस्तु कर्मणा ज्ञानेन वा क्रियते।**

**केवलज्ञानमप्यनर्थकं तर्हि? न, अविद्यानिवर्तकत्वे सति दृष्टकैवल्यफलावसानत्वात्। अविद्यातमोनिवर्तकस्य**

अनुभूतिस्वरूपाचार्यटिप्पणम्

कथमुच्यते कारकादिभेदबुद्धिं निवर्तयतीत्याशङ्क्याह—**कर्मप्रवृत्तीति**। मूलभूतब्रह्माविद्यानिवर्तने तत्कार्यभेदबुद्धेर्निवर्तकत्वादित्यर्थः। संग्रहवाक्यगत'तु'शब्दस्यार्थमाह— **तुशब्द इत्यादिना**। बन्धः केवलज्ञानापनोद्यः, अविद्यात्मकत्वात् , शुक्तिरूप्यवदित्यर्थः। हेत्वन्तरमाह—**अकार्यत्वाच्चेति**।

अनादित्वान्नित्यत्वाच्च मोक्षस्य कर्मसाध्यत्वं नोपपद्यते चेत् , तर्हि ज्ञानस्याप्यानर्थक्यमित्युक्ते तस्यार्थकत्व

आनन्दगिरिकृतव्याख्या

**नेदमुत्पन्नं ज्ञानं निवर्तयत्यविरोधेनोत्पन्नत्वात् , न चानुत्पन्नम् , अलब्धात्मकस्यार्थक्रियाकारित्वाभावात् , तत्राह—**उत्पद्यमानमिति। **कथं तस्य कारणाविद्यानिवर्तकत्वमित्याशङ्क्य कार्याविद्यानिवर्तकत्वदृष्टेरित्याह—**कर्मेति। **आत्मज्ञानस्येत्यादिसंग्रहवाक्ये तुशब्दद्योत्यविशेषाभावात् तदानर्थक्यमाशङ्क्याह—**तुशब्द इति। **पक्षद्वयव्यावर्तकत्वमेवास्य स्फुटयति—**नेत्यादिना। **इतश्च कर्मासाध्यता मुक्तेरित्याह—**अकार्यत्वाच्चेति। **'एष नित्यो महिमा' इति श्रुतेर्नित्यत्वेन मोक्षस्याकार्यत्वान्न तत्र हेत्वपेक्षेत्युपपादयति—**न हीति।

**ज्ञानेनापि मोक्षो न क्रियते चेत् , तर्हि केवलमपि ज्ञानं मुक्त्यनुपयुक्तमिति कुतस्तस्य तत्र हेतुत्वधीरित्याशङ्कते—**केवलेति। **ज्ञानानर्थक्यं दूषयति—**नेति। **तदेव प्रपञ्चयति—**अविद्येति। **यदुक्तमविद्यानिवर्तकज्ञानस्य कैवल्यफलावसायित्वं दृष्टमिति, तत्र दृष्टान्त-**

भाष्यार्कप्रकाशः

**आत्मविषयमिति**। किमाकारकं ज्ञानम्? अत आह—**अयमहमित्यादि**। **केवल** एकः। **अकर्ता** कर्तृत्वरहितः, **अक्रियो** न विद्यन्ते क्रिया यस्मिन् स तथोक्तः। नायं क्रियाः करोति, नाप्यस्मिन् क्रियाः सन्तीत्यर्थः। **अफलो**ऽभोक्तेत्यर्थः। एवंविधोऽयमात्माऽहमस्मीति, मत्तोऽन्यः कश्चिन्नास्तीति चैवंरूपं ज्ञानम्। इदं ज्ञानमविद्यां कदा निवर्तयतीत्यत आह—**उत्पद्यमानमिति**। कुतो निवर्तयतीत्यत आह—**कर्मेति**। कर्मप्रवृत्तौ हेतुभूताया भेदबुद्धेः क्रियाकारकफलभेदप्रत्ययस्य निवर्तकत्वाद्धेतोः। अविद्यानाशपूर्वको हि भेदबुद्धिनाशः, अविद्यापूर्वकत्वाद् भेदबुद्धेः। भेदबुद्धिरूपकार्यलिङ्गानुमेया ह्यविद्या। भेदबुद्धिरूपकार्याभावे केन लिङ्गेनानुमातुं शक्यते? न केनापीति कृत्वा भेदबुद्धिनिवर्तकमिदमात्मज्ञानमविद्यानिवर्तकमेवेति भावः। तस्मादात्मज्ञानमेव समूलभेदप्रत्ययनिवर्तकत्वान्मोक्षसाधनम्। 'तुशब्दः पक्षव्यावृत्त्यर्थ' इति वाक्यं स्वयमेव विवृणोति—**नेति**। केवलेभ्यः कर्मभ्यः, समुच्चिताभ्यां ज्ञानकर्मभ्यां वा निःश्रेयसप्राप्तिर्नेति पक्षद्वयं निवर्तयति **तुशब्दः**। एवकारार्थकत्वादिति भावः। तस्मात् कर्म, समुच्चयो वा न मोक्षसाधनमिति सिद्धम्। भेदप्रत्ययपूर्वकत्वेन कर्मणः समुच्चयस्य वा कैवल्यफलावसायित्वाभावादिति भावः। कर्मणो मोक्षसाधनत्वाभावे हेत्वन्तरमाह—**अकार्यत्वाच्चेति**। यदि स्वर्गादिवन्मोक्षोऽपि कार्यः स्यात् , तर्हि तस्य कर्म साधनं स्यात्; न तु तथा मोक्षः कार्यः। तस्मान्न तस्य कर्म साधनं भवति। साध्यस्य हि वस्तुनो यत्किञ्चित् साधनं स्यात् ; न त्वसाध्यस्य। तस्मादसाध्यस्य (अकार्यस्य) मोक्षस्य कर्मसाधनत्वमनुपपन्नम्। कर्म साधनं यस्य तत् कर्मसाधनम् , तद्भावः कर्मसाधनत्वं तस्यानुपपत्तेरिति समासः। तदेवोपपादयति—**न हीति**। नित्यं वस्तु कर्मणा ज्ञानेन वा न हि क्रियते; यत्क्रियते तद्ध्यनित्यं, यथा घटः। मोक्षस्तु नित्य इति सर्ववादिभिरभ्युपगत एव। तस्मान्नित्यस्य मोक्षस्य न कार्यत्वम् , येन कर्म तस्य साधनं स्यादिति भावः।

ननु यदि कर्मणा ज्ञानेन वा मोक्षो न क्रियते, तर्हि कर्मेव ज्ञानमपि न मोक्षसाधनमिति व्यर्थमेव ज्ञानमपीति पृच्छति—

१. कर्म साधनं यस्येति व्युत्पत्त्या कर्मसाध्यत्वानुपपत्तिरित्यर्थः।

**ज्ञानस्य दृष्टं कैवल्यफलावसानत्वम्। रज्ज्वादिविषये सर्पाद्यज्ञानतमोनिवर्तकप्रदीपप्रकाशफलवत्। विनिवृत्तसर्पादिविकल्परज्जुकैवल्यावसानं हि प्रकाशफलम्। तथा ज्ञानम्। दृष्टार्थानां च छिदिक्रियाग्निमन्थनादीनां व्यापृत-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

[र्थवत्त्वम्] आह— **न, अविद्यानिवर्तकत्व इत्यादिना।** स्वरूपेण साध्यत्वाभावेऽपि मुक्तिप्रतिबन्धकाविद्यानिवर्तनेन दृष्टफलत्वाद् ज्ञानस्य नानर्थक्यमित्यर्थः। ननु ब्रह्मज्ञानं नैयोगिकफलं, वैदिकज्ञानत्वात् , धर्मज्ञानवत्। अतो न दृष्टफलत्वमित्याशङ्क्याह—**अविद्यातमोनिवर्तकस्येति**। विद्वदनुभवबाधितमनुमानमित्यर्थः। किञ्च कैवल्यं [न] नैयोगिकम् , प्रकाशफलत्वात् , प्रदीपफलवदित्याह—**रज्ज्वादिविषय इति।** यथा सर्पादेरज्ञानजन्यस्य निमित्तं यत् तमः, तन्निमित्तकस्य

आनन्दगिरिकृतव्याख्या

**माह—**रज्ज्वादीति। **उक्ते विषये तमोनिवर्तकप्रकाशस्य कस्मिन् फले पर्यवसानम्? तत्राह—**विनिवृत्तेति। **प्रदीपप्रकाशस्य सर्पभ्रमनिवृत्तिद्वारा रज्जुमात्रे पर्यवसानवदात्मज्ञानस्यापि तदविद्यानिवृत्त्याऽऽत्मकैवल्यावसानमिति दार्ष्टान्तिकमाह—**तथेति। **ज्ञात्रादीनां**

भाष्यार्कप्रकाशः

**केवलेति**। तर्हि केवलज्ञानमप्यनर्थकमित्यन्वयः। उत्तरयति—**नेति**। हेतुमाह—**अविद्येति**। ज्ञानस्य अविद्यानिवर्तकत्वेन दृष्टकैवल्यफलावसानत्वादिति। ज्ञानेन मोक्षः साध्यत इति न वयं ब्रूमः, किं तर्हि? ज्ञानेनाविद्या निवर्तते, यन्मूलः संसारः। निवृत्तायां चाविद्यायां केवलात्मस्वरूपेणावतिष्ठते विद्वान्। तस्मादविद्यानिवर्तकस्य ज्ञानस्य केवलात्मस्वरूपेणावस्थानलक्षणं कैवल्यफलमवसानमिति दृष्टम्। एवमविद्यानिवर्तकत्वेन कैवल्यफलावसायित्वान्मोक्षसाधनं ज्ञानमित्यस्माभिरुच्यत इति।

अविद्यानिवृत्तिरेव ज्ञानेन क्रियते, कैवल्यरूपमोक्षफलं तु नित्यसिद्धमेव। नित्यसिद्धमपीदमविद्यानिवृत्त्यभावेऽसिद्धमिव प्रतिभातीति कृत्वा तदविद्यानिवर्तकं ज्ञानं मोक्षसाधनमित्युक्तम्। यथा स्वगृहे नित्यं स्थितमपि हिरण्यनिधिमज्ञानादस्थितमिव सन्तमञ्जनादिना पुरुषः साधयति, तद्वज्ज्ञानेन विद्वान् नित्यसिद्धमपि मोक्षमविद्यावशादसिद्धमिव सन्तं साधयति। नैतावता ज्ञानसाध्यत्वं मोक्षस्य नित्यसिद्धस्य। मोक्षो हि ब्रह्म, नित्यापरोक्षं च ब्रह्म, 'यत् साक्षादपरोक्षाद् ब्रह्मे'ति श्रुतेः। कथं तस्य कार्यत्वं स्यात्? तस्मान्मोक्षस्वरूपावारकाविद्यानिवर्तकत्वाज्ज्ञानं मोक्षसाधनमित्युक्तम् , न तु मोक्षजनकत्वादिति कृत्वा न ज्ञानस्य मोक्षसाधनत्वम् , नापि मोक्षस्य ज्ञानकार्यत्वमिति भावः। हेतुवाक्यं विवृणोति—**अविद्येति**। **दृष्टं** ज्ञातम् , विद्वदनुभवसिद्धमित्यर्थः। **कैवल्यं** केवलात्मस्वरूपेणावस्थानम् , तदेव फलं कैवल्यफलम् , तदेवावसानं परिसमाप्तिः, तस्मिन्नेवावसानमिति वा यस्य तत्त्वं कैवल्यफलावसानत्वम्। अविद्यालक्षणं तमोऽज्ञानम् अविद्यातमः, तमोऽन्धकारः, तदिव स्वरूपप्रकाशविरोधित्वादविद्या अविद्यातम इत्युच्यत इति वा, तन्निवर्तकस्य। विदुषां हि विद्यया अविद्यातमोनिवृत्तौ सत्यां केवलात्मरूपेणावस्थानमनुभवसिद्धमिति कृत्वा, न हि दृष्टेऽनुपपत्तिरिति न्यायेनानुभवसिद्धेऽस्मिन्नर्थे नानुपपत्तिः कार्येति भावः। ज्ञानस्यैवंविधत्वे दृष्टान्तमाह—**रज्ज्वादीति**। **रज्ज्वादिविषये** रज्जुशुक्तिकादौ विषये **सर्पादिः** सर्परजतादिरूपो योऽध्यासस्तद्धेतुर्यदज्ञानं रज्ज्वादिविषयावच्छिन्नचैतन्यनिष्ठं तत्स्वरूपावारकं चाज्ञानमित्यर्थः। तदुपलक्षितं यत् तमोऽन्धकारः, तत् सर्पाद्यज्ञानतमः; यद्वा अज्ञानपदं तत्कार्याध्यासपरम् ; तथा च **सर्पाद्यज्ञानं** सर्पाद्यध्यासः, तद्धेतुभूतं तमोऽन्धकारः सर्पाद्यज्ञानतमः। अध्यासस्याज्ञानकार्यत्वेऽपि तमःकार्यत्वमप्यस्ति, प्रकाशे रज्ज्वादौ सर्पाद्यध्यासादर्शनात्। तस्य सर्पाद्यज्ञानतमसो निवर्तको यः प्रदीपस्य प्रकाशः, तस्येव तद्वत्। यथा प्रदीपप्रकाशः रज्ज्वादिविषयावारकं सर्पाद्यध्यासकारणं तमो निवर्त्य रज्ज्वादिं स्वस्वरूपेणावस्थापयन् तावतैव पर्यवसितो दृष्टः, तथा ज्ञानमप्यात्मस्वरूपावारकं देहेन्द्रियाद्यध्यासकारणं चाज्ञानं निवर्त्यात्मानं स्वस्वरूपेणावभासयन् तावतैव पर्यवसितो दृष्टः[1] तत्त्वविद्भिरित्यर्थः। रज्ज्वादिविषये सर्पाद्यज्ञानतमोनिवर्तक-प्रदीपप्रकाशवदविद्यातमोनिवर्तकस्य ज्ञानस्य कैवल्यफलावसानत्वं दृष्टमित्यन्वयः। कथं प्रदीपप्रकाशस्य कैवल्यफलावसानत्वम्? अत आह— **विनिवृत्तेति**। विशेषेण निवृत्ताः सर्वे विकल्पाः दण्डसर्पादयो यस्याः सा रज्जुर्विनिवृत्तसर्वविकल्परज्जुः, तस्याः कैवल्यावसानं

१. ज्ञानप्रकाशः इति शेषः। 'स्वस्वरूपेणावभासयत् तावतैव पर्यवसितं दृष्टम्' इति वा पाठः स्यात्।

**कर्त्रादिकारकाणां द्वैधीभावाग्निदर्शनादिफलादन्यफले [१]कर्मान्तरे व्यापारानुपपत्तिर्यथा, तथा ज्ञाननिष्ठाक्रियायां दृष्टार्थायां व्यापृतस्य ज्ञात्रादिकारकस्यात्मकैवल्यफलादन्यफले [२]कर्मान्तरे प्रवृत्तिरनुपपन्नेति न ज्ञाननिष्ठा कर्मसहितोपपद्यते।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

[तन्निवर्तकस्य] दीपप्रकाशस्य [केवलरज्जुस्वरूपावस्थानं दृष्टं] फलम् , तथा ज्ञानफलमपि केवलात्मस्वरूपावस्थानं दृष्टमेवेत्यर्थः। दृष्टफलत्वादेव च ज्ञानस्य कर्मसमुच्चयोऽपि निरस्तो भवतीत्यभिप्रेत्य दृष्टान्तान्तरमाह— **तथा दृष्टार्थानां चेति।** ज्ञानं स्वफले नेतिकर्तव्यापेक्षम् , दृष्टफलत्वात् , छिदिक्रियावदित्यर्थः।

आनन्दगिरिकृतव्याख्या

**ज्ञाननिष्ठाहेतूनां कर्मान्तरे प्रवृत्तिसम्भवात् कर्मसहितैव सा कैवल्यावसायिनीति चेत् , तत्राह—**दृष्टार्थानामिति।

भाष्यार्कप्रकाशः

केवलरज्जुरूपेणावस्थानम् , तदेव प्रकाशस्य फलमिति। न च कर्माप्येवमेवाविद्यानिवर्तकत्वान्मोक्षसाधनमिति वाच्यम् ; भेदप्रत्ययविशिष्टस्य कर्मणोऽविद्यामूलकत्वेन तन्निवर्तकत्वाभावात्। अत एव समुच्चयोऽपि न मोक्षसाधनम्। एतेन अविद्यानिवृत्तिलक्षणो मोक्षोऽपि कार्यो न कर्मणा क्रियते, किन्तु ज्ञानेनैवेति सिद्धम्।

एवं कर्मणो मोक्षसाधनत्वपक्षं निरस्य तेनैव समुच्चयस्यापि मोक्षसाधनत्वे निरस्तेऽपि समुच्चयस्यैव तावदनुपपत्तिं दर्शयति—**तथेत्यादिना**। तथेति कर्मणो मोक्षसाधनत्वपक्षनिरासपरिसमाप्तिद्योतकमव्ययम्। दृष्टोऽर्थो द्वैधीभावादिलक्षणं फलं येषां तेषां दृष्टार्थानां **छिदिक्रियाग्निमथनादीनां** छिदिक्रिया छेदनरूपा क्रिया, अग्नेर्मथनं, तदादीनां कर्मणां, करण इति शेषः। **दृष्टार्थेषु छिदिक्रियाग्निमथनादिष्विति** सप्तम्यन्तपाठो वा। **व्यापृतानां** प्रवृत्तानां **कर्त्रादिकारकाणां** कर्तृकरणादिकारकाणां कर्मान्तरे व्यापारानुपपत्तिः। कीदृशे कर्मान्तरे? **द्वैधीभावः** द्विधा भवनमग्निदर्शनमेवमादिलक्षणं यत् फलं तस्मादन्यत् फलं यस्य तस्मिन् **द्वैधीभावाग्निदर्शनादिफलादन्यफले** यथा, तथा दृष्टोऽर्थः कैवल्यफलं यस्यास्तस्यां **दृष्टार्थायां**, निर्गताः क्रिया देहेन्द्रियादिव्यापारा यस्यास्तस्यां निष्क्रियायां ज्ञाननिष्ठात्मिकायां क्रियायां व्यापृतस्य कर्त्रादिरूपस्य कारकस्यात्मकैवल्यफलादन्यफले **कर्मान्तरे**ऽन्यकर्मणि **प्रवृत्ति**र्व्यापारो**ऽनुपपन्ना** अयुक्ता। इति हेतोः कर्मसहिता ज्ञाननिष्ठा, कर्मज्ञानसमुच्चय इति यावत्। **नोपपद्यते** न युज्यते, न सम्भवतीति यावत्। 'अहं ब्रह्मास्मी'त्याकारकबुद्धिवृत्तिरूपज्ञाननिष्ठाया मानसिकक्रियात्वात् तस्यां प्रवृत्तस्य विदुषः 'कर्ता भोक्ताऽह'मिति ज्ञानपूर्वकाग्निहोत्रादिकर्मसु प्रवृत्तिर्न घटते। अकर्त्रभोक्तृब्रह्मात्मज्ञानस्य, 'कर्ता भोक्ताऽह'मिति ज्ञानस्य च परस्परं विरोधात्। मनइन्द्रियादिषु बहिर्विषयव्यापृतेषु सत्सु 'अहं ब्रह्मास्मी'त्याकारकबुद्धिवृत्त्यसम्भवाच्च। मनइन्द्रियाद्युपरतिसाध्या हि दर्शितबुद्धिवृत्तिः। समाधि-निष्ठस्यैव तद्बुद्धिवृत्तिदर्शनात्। तस्मात् कर्मज्ञाननिष्ठयोः समुच्चयो न सम्भवति। ननु युगपत्समुच्चयासम्भवेऽपि क्रमेण सम्भवत्येव स इत्यत आह—**दृष्टार्थायामिति**। किं कर्मनिष्ठस्य कालान्तरे ज्ञाननिष्ठोपपद्यत इति ब्रूषे? किंवा ज्ञाननिष्ठस्य कालान्तरे कर्मनिष्ठेति? आद्य इष्ट एव, कर्मनिष्ठाया ज्ञाननिष्ठाहेतुत्वात्। नैतावता कर्मज्ञानसमुच्चयः। ज्ञाननिष्ठाप्राप्त्यनन्तरं कर्मनिष्ठायास्त्यक्तत्वेन कर्मनिष्ठां परित्यज्यैव ज्ञाननिष्ठायां प्रवृत्तत्वेन च समुच्चयासिद्धेः। न तु द्वितीयः, ज्ञाननिष्ठाया दृष्टकैवल्यफलावसानत्वेन ज्ञाननिष्ठायाः फलं कैवल्यम् , साक्षात्कृतवतो विदुषः ज्ञाननिष्ठां विहाय कर्मनिष्ठायां प्रवर्तितुं कारणाभावात्। न हि निरर्थकं कर्म कुर्याद् विद्वान्। न चैवं कर्मनिष्ठायामधिकृतस्यापि तां परित्यज्य ज्ञाननिष्ठास्वीकारो नोपपद्यत इति वाच्यम् ; कर्मनिष्ठाया अदृष्टफलत्वात्। यद्वा दृष्टकैवल्यफलावसानत्वाभावात्। कैवल्यार्थी हि मुमुक्षुः पुरुषः प्रथममज्ञानादिना कर्मनिष्ठायां प्रवृत्तोऽपि तया स्वस्य कृतार्थत्वालाभाज्ज्ञाननिष्ठां स्वीकरोत्येव, स्वीकृतायां च तस्यां कैवल्यफलानुभवेन कृतार्थो भवति। एवं कृतार्थःसन् स विद्वान् पुनः कर्मनिष्ठां किमिति स्वीकुर्यात्? न हि कृतार्थस्य दृष्टकैवल्यफलस्य कृतकृत्यस्य तत्त्वविदः कर्तव्यशेषोऽस्ति यदर्थं पुनः कर्मणि प्रवृत्तिः स्यात्। उक्तं हि 'एतद् बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारत' इति।

१. 'कर्मान्तरे वा' इति पा.। २. 'कर्मान्तरे वा' इति पा.।

**भुज्यग्निहोत्रादिक्रियावत् स्यादिति चेत्? न, कैवल्यफले ज्ञाने क्रियाफलार्थित्वानुपपत्तेः। कैवल्यफले हि ज्ञाने प्राप्ते [१]सर्वतःसम्प्लुतोदकफले कूपतडागादिक्रियाफलार्थित्वाभाववत् फलान्तरे तत्साधनभूतायां वा क्रियायामर्थित्वा-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

[२]ज्ञात्रादि न कर्मान्तरे व्यापि, दृष्टफलकारकत्वात् , छिदिक्रियाव्यापृतकर्त्रादिवत्। अतः कर्मसहितज्ञाननिष्ठा न सम्भवतीत्युक्तम् । तत्र व्यभिचारमाशङ्कते—**भुजीति।** भुजिक्रियायां दृष्टफलायां व्यापृतस्य देवदत्तस्याग्निहोत्रादिक्रिया-प्रवृत्तिवत् ज्ञाननिष्ठायां प्रवृत्तस्यापि ज्ञात्रादेः कर्मणि प्रवृत्तिर्भविष्यतीत्यर्थः। तत्रापि क्षुन्निवृत्तिकामस्य भोजने प्रवृत्तिः, स्वर्गार्थिनस्तु अग्निहोत्रादाविति विशिष्टाधिकारभेदान्न व्यभिचारः। सम्यग्दर्शन[र्शिन]श्च कर्मफले नार्थवत्त्व[नार्थित्व]म् [३]अवस्तुत्वदर्शनादित्याह— **न, कैवल्यफल इति।**

आनन्दगिरिकृतव्याख्या

**कर्मसाहित्यं ज्ञाननिष्ठाया दृष्टान्तेन साधयन्नाशङ्कते—**भुजीति। **भुजिक्रियाया लौकिक्याः, वैदिक्याश्चाग्निहोत्रादिक्रियायाः सहानुष्ठानवदग्निहोत्रादिक्रियाया ज्ञाननिष्ठायाश्च साहित्यमित्यर्थः। भुजिफले तृप्त्याख्ये प्राप्तेऽपि स्वर्गादौ तद्धेतौ चाग्निहोत्रादावर्थित्वदृष्टे-र्युक्तं तत्र साहित्यम्। न तथा मुक्तिफलज्ञाननिष्ठालाभे स्वर्गादौ तद्धेतौ वा कर्मण्यर्थित्वम्। तेन ज्ञाननिष्ठाकर्मणोर्न साहित्यमिति परिहरति —**नेत्यादिना। **संग्रहवाक्यं विवृणोति—**कैवल्येति। **ज्ञाने फलवति लब्धे, फलान्तरे तद्धेतौ च नार्थितेत्यत्र दृष्टान्तमाह—**सर्वत इति। **सर्वत्र** सम्प्लुतं **व्याप्तमुदकमिति समुद्रोक्तिः। तत्फलं स्नानादि। तस्मिन् प्राप्ते न तडागादिनिर्माणक्रियायां, तदधीने च स्नानादौ कस्यचि-**

भाष्यार्कप्रकाशः

तस्माद् द्वैधीभावाग्निदर्शनादिफलाकाङ्क्षी पुरुषो यथा दृष्टफलेषु छेदनमथनादिकर्मसु प्रवर्तते, प्रवृत्तश्च ततस्तत्फलं पश्यति, न तु प्रकृतफलातिरिक्तफलप्रदेषु कर्मसु प्रवर्तते। तद्वत् कैवल्यफलार्थी पुरुषः दृष्टकैवल्यफलावसानायां ज्ञाननिष्ठायां प्रवर्तते। प्रवृत्तश्च ततस्तत्फलं पश्यति, न तु कर्मनिष्ठायां पुनः प्रवर्तते। यदि कर्मनिष्ठेव ज्ञाननिष्ठाऽपि दृष्टकैवल्यफलावसाना न स्यात् , तर्हि ज्ञाननिष्ठां परित्यज्य भ्रान्त्यादिना पुनः कर्मनिष्ठायां प्रवर्तेत, न तु तथाऽस्ति। तस्मात् कैवल्यार्थी पुरुषः अज्ञानादनधिकाराद्वा प्रथमं कर्मनिष्ठायां प्रवृत्तःसन् तत्र स्वाभिलषितं फलमपश्यन् विवेकादिसाधनसम्पत्तिशाली भूत्वा ज्ञाननिष्ठायां प्रविश्य तत्र कैवल्यफलं स्वेष्टं पश्यन् सन् कथं पुनः कर्मनिष्ठायां प्रविशेत्? न कथमपीति कृत्वा ज्ञाननिष्ठस्य विदुषो ज्ञाननिष्ठासमकाले, कालान्तरे वा कर्मनिष्ठा न सम्भवति, नाप्युपपद्यते।

नन्वेकस्मिन् पुरुषे एकस्मै फलाय क्रियाद्वयस्यानुपपन्नत्वेऽपि द्वाभ्यां फलाभ्यां क्रियाद्वयमुपपन्नमेव। यथा क्षुच्छान्तिस्वर्ग-फलाभ्यामेकस्मिन् पुरुषे भोजनाग्निहोत्रक्रियाद्वयमस्ति। तद्वदेकस्मिन्नेव कैवल्यस्वर्गफलाभ्यां ज्ञानकर्मनिष्ठाद्वयमुपपद्यत एवेत्याह— **भुजीति**। परिहरति—**नेति**। हेतुमाह—**कैवल्येति**। कैवल्यं फलं यस्य तस्मिन् कैवल्यफले ज्ञाने प्राप्ते सति क्रियाफलयोः **क्रियायां** यज्ञादिरूपायां **फले** स्वर्गादिलक्षणे चार्थित्वस्यानुपपत्तेः। क्रियाफलार्थित्वमिति पदं प्रातिलोम्येन फलक्रियार्थित्वमिति कृत्वा व्याकरोति —**फलान्तरे तत्साधनायां वा क्रियायामिति**। क्रियार्थित्वस्य फलार्थित्वपूर्वकत्वात् फलान्तर इति प्रथममुक्तम्। मम स्वर्गः स्यादिति फलान्तरार्थित्वम् , मम स्वर्गार्थं ज्योतिष्टोमः स्यादिति क्रियार्थित्वम्। अर्थयते फलादिं प्रार्थयत इत्यर्थी कामी तस्य भावोऽर्थित्वम् ; यथा[तथा] च क्रियाफलार्थित्वं नाम क्रियाफलकामः। तत्र दृष्टान्तमाह—**सर्वत इति**। सर्वतःसम्प्लुतोदकफले प्राप्ते सति, प्राप्तुमिष्टे सतीति वा तटाकादिक्रियाफलार्थित्वाभाववत्। तटाकादिजलस्नानादिक्रियाजन्यफलार्थित्वाभाववदित्यर्थः। तस्मात् कैवल्यफलार्थिनः पुरुषस्य विदुषः स्वर्गादिफलार्थित्वासम्भवाज्ज्ञाननिष्ठायां दृष्टकैवल्यफलावसानायां प्रवृत्तस्य विदुषः कैवल्यार्थिनः स्वर्गाद्यदृष्टफलक-कर्मानुष्ठानप्रसङ्गः स्वप्नेऽपि न भवेदिति न ज्ञाननिष्ठायाः कर्मसाहित्यमुपपद्यते। ननु कैवल्यार्थिनः कुतः कर्मफलार्थित्वानुपपत्तिरित्यतो

१. 'सर्वतःसम्प्लुतोदके फले' इति पा.। २. ज्ञाता ज्ञाननिष्ठायाः कर्ता। ३. अवस्तुत्वं मिथ्यात्वम्।

**नुपपत्तिः। न हि राज्यप्राप्तिफले कर्मणि व्यापृतस्य क्षेत्रमात्रप्राप्तिफले [1]व्यापारोपपत्तिः, तद्विषयं [2]वाऽर्थित्वम्। तस्मान्न कर्मणोऽस्ति निःश्रेयससाधनत्वम्। न च ज्ञानकर्मणोः समुच्चितयोः। नापि ज्ञानस्य कैवल्यफलस्य कर्मसाहाय्यापेक्षा,**

अनुभूतिस्वरूपाचार्यटिप्पणम्

निरस्तान् पक्षान् सङ्क्षेपतो निगमय(ती)ति—**तस्मादित्यादिना**। किञ्च सम्यग्ज्ञानस्याविद्यानिवर्तकत्वेन अविद्यामूलेन

आनन्दगिरिकृतव्याख्या

**दर्थित्वम् , तथा प्रकृतेऽपीत्यर्थः। निरतिशयफले ज्ञाने लब्धे सातिशयफले कर्मणि नार्थित्वमित्येतद् दृष्टान्तेन स्फुटयति—**न हीति। **कर्मणः सातिशयफलत्वमुक्तमुपजीव्य फलितमाह—**तस्मान्नेति। **ज्ञानकर्मणोः साहित्यासम्भवमपि पूर्वोक्तं निगमयति—**न चेति। **न हि प्रकाशतमसोरिव मिथो विरुद्धयोस्तयोः साक्षादेकस्मिन् फले साहित्यमित्यर्थः। ननु ज्ञानमेव मोक्षं साधयदात्मसहायत्वेन कर्मापेक्षते, [3]करणस्योपकरणापेक्षत्वात् , तत्राह—**नापीति। **[4]ज्ञानमुत्पत्तौ यज्ञाद्यपेक्षमपि नोत्पन्नं फले तदपेक्षम् , स्वोत्पत्तिनान्तरीयकत्वेन**

भाष्यार्कप्रकाशः

दृष्टान्तान्तरमाह—**न हीति**। राज्यप्राप्तिः फलं यस्य तस्मिन् कर्मणि युद्धादौ प्रवृत्तस्य क्षत्रियस्य, क्षेत्रमात्रस्य प्राप्तिः फलं यस्य तस्मिन् क्षेत्रमात्रप्राप्तिफले कर्मणि याञ्चादौ व्यापारो न ह्युपपद्यते, तद्विषयं क्षेत्रमात्रविषयमर्थित्वं वा न ह्युपपद्यते यथा, तथा कैवल्यफले ज्ञाने प्रवृत्तस्य विदुषः स्वर्गादिफलककर्मणि प्रवृत्तिः, स्वर्गादिफलविषयमर्थित्वं च नोपपद्यते। राज्यप्राप्तिफले क्षेत्रप्राप्तिफलवत् कैवल्यफले कर्मफलस्यान्तर्भूतत्वादिति भावः। उक्तं हि – 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' इतीहैव भगवता। 'यत्किञ्च प्रजाः साम [साधु] कुर्वन्ति सर्वं तदभिसमेती'ति श्रुतेश्च।

**ननु** क्षेत्रपुरग्रामादीनां सर्वेषां राज्याङ्गत्वादङ्गिनि राज्ये प्राप्ते सति तदङ्गानां क्षेत्रादीनां प्राप्तिः स्यादेवेति राज्यकामिनः क्षत्रियस्य क्षेत्रादिप्राप्त्याशा मा भून्नाम। कथं पुनः कैवल्यार्थिनः स्वर्गादिप्राप्त्याशाभावः? न हि कैवल्यस्य स्वर्गादयोऽङ्गानि, निरस्तनिखिलद्वैतं हि कैवल्यमिति चेत्? **नैष दोषः**; प्राप्तराज्यस्य क्षेत्रमात्रकामाभाव इव प्राप्तकैवल्यस्य स्वर्गादिकामाभावः इत्येतावत एवेह दृष्टान्त-दार्ष्टान्तिकसाधर्म्यस्य विवक्षितत्वात्। प्राप्तकैवल्यस्य स्वर्गादिप्राप्तिकामाभावे हेतुस्तु स्वर्गादिद्वैतस्याभाव एवेति। यद्वा प्राप्तराज्येन यथा क्षेत्रमात्रमपि प्राप्तमिति न तत्र तस्याशा, तथा प्राप्तकैवल्येन स्वर्गादिकमपि प्राप्तमेवेति न तत्र तस्याशा। कैवल्यस्यात्मस्वरूपत्वाद् आत्मनश्च परिपूर्णत्वेन सर्वव्यापित्वात् स्वर्गादयोऽप्यात्मना नित्याप्ता एवेति कृत्वा येनात्मा प्राप्तः कथं तस्य स्वर्गाद्यप्राप्तिः? अथवा कैवल्यस्यात्मत्वाद् आत्मनश्चेश्वरत्वाद् ईश्वरस्य चावाप्तसमस्तकामत्वाद् येनात्मा प्राप्तस्तेन सर्वे कामाः प्राप्ता एवेति। अथवा कैवल्य-स्यात्मत्वादात्मनश्च ब्रह्मत्वाद् ब्रह्मणश्च स्वर्गादिसर्वजगदाधारत्वाद् येनात्मा प्राप्तस्तेन स्वर्गादिकं सर्वमपि प्राप्तमेवेति। यद्वा कैवल्यस्य ब्रह्मत्वाद् ब्रह्मणश्चैकदेशे सर्वस्य जगतः सत्त्वाद् येन कैवल्यं प्राप्तं तेन स्वर्गादिकं प्राप्तमेवेति।

**वस्तुतस्तु** कैवल्यस्य ब्रह्मत्वाद् ब्रह्मणश्च सर्वात्मत्वाद् येन ब्रह्म प्राप्तं तेन स्वर्गादिकमपि प्राप्तमेव। अत एवैकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय ब्रह्मणि विज्ञाते सति सर्वं विज्ञातं भवतीत्युक्तं श्रुत्या, ब्रह्मकार्यत्वात् सर्वस्य। सर्वस्य स्वरूपं हि ब्रह्म। तस्माद् ब्रह्मप्राप्तौ सर्वप्राप्तिः सिद्धैवेति न दृष्टान्तदार्ष्टान्तिकयोः साधर्म्याभावप्रसङ्गदोषः। **तस्मादिति**। ज्ञानकर्मणोः समुच्चयानुपपत्तेर्मोक्षस्य कर्मसाधनत्वानुपपत्तेश्चेत्यर्थः। कर्म निःश्रेयससाधनं न भवति। ज्ञानकर्मणोः समुच्चयो निःश्रेयससाधनं न भवति च। ननु कर्मसहित-मेव ज्ञानं कैवल्यफलकं, न केवलज्ञानम् , यथाऽनुष्ठानसापेक्षमेव वेदार्थज्ञानं स्वर्गादिफलकमित्यत आह—**नापीति**। ज्ञानं कैवल्यं प्रदातुं कर्मरूपं सहायं नापेक्षत इत्यर्थः। सह अयति गच्छतीति सहायः सखा, तस्य भावः कर्म वा साहाय्यं, कर्मणः साहाय्यं कर्म-साहाय्यं तस्यापेक्षा ज्ञानस्य न हीत्यन्वयः। इदमित्थमनेन कर्तव्यमित्येवंरूपस्य वेदार्थज्ञानस्य कर्मानुष्ठानं विना निष्फलत्वाद् युक्ता

१. 'व्यापार उपपद्यते' इति पा.। २. 'चार्थित्वम्' इति पा.। ३. स्वर्गादिसाधनस्य दर्शपूर्णमासादेः प्रयाजाद्यङ्गापेक्षादर्शनात् मोक्षरूपफलं प्रति करणस्य ज्ञानस्याङ्गत्वेन (उपकरणत्वेन इतिकर्तव्यतया) कर्म संबध्यतामिति शङ्कितुराशयः। ४. ननु 'सर्वापेक्षा च यज्ञादिश्रुतेः' इति सूत्रात् ज्ञानस्य यज्ञाद्यपेक्षावगमात् कथं कर्मसाहाय्यनिषेध इत्याशङ्क्य तात्पर्यमाह—ज्ञानमिति। शुद्धचित्तस्य तत्त्वज्ञानोत्पत्तेः चित्तशुद्ध्यर्थं निष्कामकर्मानुष्ठानापेक्षणात् परम्परया ज्ञानं कर्मापेक्षम्। उत्पन्नस्य तु ज्ञानस्य कर्मसहभावो नेति भावः।

**अविद्यानिवर्तकत्वेन विरोधात्। न हि तमस्तमसो निवर्तकम् । अतः केवलमेव ज्ञानं निःश्रेयससाधनमिति।**

[मीमांसकपूर्वपक्षः]

**न, नित्याकरणे प्रत्यवायप्राप्तेः, कैवल्यस्य च नित्यत्वात्। यत् तावत् केवलाज्ज्ञानात् कैवल्यप्राप्तिरित्येतत् ,**

अनुभूतिस्वरूपाचार्यटिप्पणम्

कर्मणा विरोधान्न कर्मणस्तत्सहकारित्वसम्भव इत्याह— **अविद्यानिवर्तकत्वेनेति**। ननु कर्मणोऽपि शास्त्रीयत्वेन [अ]विद्यानिवर्तकत्वात् स्यादविद्यानिवर्तकज्ञानं प्रति सहकारित्वमित्याशङ्क्याह—**न हि तम इति**। प्रकाशत्वप्रयुक्ततमोनाशवद् ज्ञानत्वप्रयुक्त एव [अ]ज्ञाननाशः, न शास्त्रीयत्वप्रयुक्त इति भावः। ब्रह्मज्ञानं स्वफले नेतिकर्तव्यापेक्षम् , अविद्यादिनिवर्तकत्वात् , रज्जुज्ञानवदित्याह—**अतः केवलमेवेति।**

नित्यकर्मानुष्ठानविधिवधं[विरोधं] शङ्कते—**न, नित्याकरण इति**। वस्तुसंग्रहवाक्यं विवृणोति—**यत्तावदित्यादिना।**

आनन्दगिरिकृतव्याख्या

**मुक्तेस्तन्मात्रायत्तत्वादित्यर्थः। यदुक्तमितिकर्तव्यत्वेन ज्ञानं कर्मापेक्षमिति, तत्राह—**अविद्येति। **ज्ञानस्याज्ञाननिवर्तकत्वात् तत्र कर्मणो विरुद्धतया सहकारित्वायोगान्न फले तदपेक्षेत्यर्थः। कर्मणोऽपि ज्ञानवदज्ञाननिवर्तकत्वे कुतो विरुद्धतेत्याशङ्क्याह—**न हीति। **केवलस्य समुच्चितस्य वा कर्मणो मोक्षे साक्षादनन्वये फलितमाह—**अत इति।

**केवलं ज्ञानं मुक्तिसाधनमित्युक्तम् , तन्निषेधयन्नाशङ्कते—**नेत्यादिना। **निषेध्यमनूद्य नञर्थमाह—**यत्तावदिति। **नित्याकरणे**

भाष्यार्कप्रकाशः

कर्मसाहाय्यापेक्षा। 'अहं ब्रह्मास्मी'त्येवंरूपस्यात्मज्ञानस्य कर्तव्यबोधकत्वाभावाद् अयं घट इति ज्ञानवद् वस्तुस्वरूपसमर्पकत्वात् तावतैव सफलत्वान्न कर्मसाहाय्यापेक्षेति भावः। मास्तु ज्ञानस्य कर्मसाहाय्यं, प्रत्युत कर्मविरोधित्वमप्यस्तीत्याह—**अविद्येति**। ज्ञानस्याविद्यानिवर्तकत्वेन हेतुना अविद्यामूलककर्मविरोधात्। अविद्यानिवर्तकं हि ज्ञानमविद्यामूलकं कर्म नाशयतीति विरोध एव ज्ञानकर्मणोः। क्व पुनः साहाय्याशङ्का? न चाविद्याया एव विरोधि ज्ञानम् , न तु कर्मण इति वाच्यम् ; कर्मणो भेदप्रत्ययमूलकत्वाद् भेदप्रत्ययस्य च कर्त्रादिलक्षणस्याविद्यामूलकत्वाद् अद्वैतज्ञानेन भेदप्रत्ययस्य तत्कारणाज्ञानस्य च निवृत्तत्वे क्व पुनः कर्मसम्भव इति समूलं कर्म नाशयत्येवाद्वैतज्ञानमिति ज्ञानं कर्मविरोध्येव। ननु यथा ज्ञानमविद्यानिवर्तकत्वेन कैवल्यफलावसायि, एवं कर्मापीति कर्मापि मोक्षसाधनमेवेत्यत आह—**न हीति**। हिः प्रसिद्धौ। यथा तमस्तमोऽन्तरं न निवर्तयत्येवं कर्म नाज्ञाननिवर्तकम्। सूर्याभावकृतमन्धकारं दीपाभावकृतोऽन्धकारो यथा न निवर्तयति तथा कर्माज्ञानं न निवर्तयति, तमसोरिव कर्माज्ञानयोर्विरोधाभावात्; प्रत्युताज्ञानमूलत्वाच्च कर्मणः। न ह्यन्धकारमूलः पिशाचादिभ्रमोऽन्धकारं निवर्तयति। एवमज्ञानमूलं कर्माप्यज्ञानं न निवर्तयति। न च **रामानुजो**क्तरीत्या ज्ञानपूर्वकं कर्माज्ञानं निवर्तयतीति वाच्यम् ; कर्मणो ज्ञानपूर्वकत्वासम्भवात्। निष्क्रियात्मस्वरूपज्ञानस्य कर्मप्रवृत्तिभञ्जकत्वान्न ह्यात्मज्ञानपूर्वकं कर्म भवेत्। न च कर्त्रात्मज्ञानपूर्वकं कर्मेति वाच्यम् ; कर्ताऽहमित्यात्मज्ञानस्य भ्रमत्वेन प्रमात्वाभावात्। तादृशभ्रमज्ञानस्याज्ञानमूलकत्वेनाज्ञानानिवर्तकत्वात् तेन कैवल्याभावाच्चेति। उपसंहरति सिद्धान्ती स्वमतम्—**अत इति**। कर्मणो मोक्षसाधनत्वाभावात् समुच्चयस्यानुपपन्नत्वाच्चेत्यर्थः। पक्षद्वयस्य दूषितत्वादिति भावः। **केवलमिति**। कर्मानपेक्ष-मित्यर्थः। ज्ञानमेव निःश्रेयससाधनम्। एवकारान्न कर्मादिकमिति भावः।

अत्राह **मीमांसकः** पूर्वपक्षं—**नन्विति[नेति]**। यत्तावत् केवलज्ञानात् कैवल्यप्राप्तिरिति, तदेतदसत् , कुतः? कैवल्यस्य नित्यत्वात्। यदि नित्यं कैवल्यं ज्ञानेनाप्येत, तर्हि प्राप्यं तत् कैवल्यमनित्यमेव स्यात्। निर्विकारं हि वस्तु नित्यम् , प्राप्यत्वं च विकार एवेति कथं प्राप्यत्वात् सविकारं कैवल्यं नित्यं स्यात्? न कथमपीति कृत्वा ज्ञानेन कैवल्यं प्राप्यत इत्युक्तमयुक्तम्। मास्तु सर्वकर्मसंन्यासपूर्वकज्ञानात् कैवल्यम् , प्रत्युत नरकपातोऽपि स्यादित्याह—**नित्याकरणादिति**। तदेव स्वयं विवृणोति—**नित्यानामिति**। यतः कर्मसंन्यासात् प्रत्यवायः स्यात् , यतश्च नित्यत्वात् कैवल्यं ज्ञानेन नाप्येत, तस्मात् केवलज्ञानात् कैवल्यप्राप्तिरित्यद्वैतिनोक्तमयुक्तम्

**तदसत्। यतो नित्यानां कर्मणां श्रुत्युक्तानामकरणे प्रत्यवायो नरकादिप्राप्तिलक्षणः स्यात्। नन्वेवं तर्हि कर्मभ्यो मोक्षो नास्तीत्यनिर्मोक्ष एव। नैष दोषः; नित्यत्वान्मोक्षस्य। नित्यानां कर्मणामनुष्ठानात् प्रत्यवायस्याप्राप्तिः। प्रतिषिद्धस्य चाकरणादनिष्टशरीरानुपपत्तिः। काम्यानां च वर्जनादिष्टशरीरानुपपत्तिः। वर्तमानशरीरारम्भकस्य च कर्मणः फलोपभोगक्षये पतितेऽस्मिञ्शरीरे , देहान्तरोत्पत्तौ च कारणाभावाद् आत्मनो रागादीनां चाकरणात् स्वरूपावस्थानमेव**

अनुभूतिस्वरूपाचार्यटिप्पणम्

कैवल्यस्य नित्यत्वादिति वाक्यभागं शङ्कापूर्वकं व्याचष्टे—**नन्वेवमित्यादिना**। केवलज्ञानान्मोक्षो नास्तीति त्वयोच्यते चेत् , तर्हि कर्मभ्यो मोक्षो नास्तीति मयाऽप्युक्तमेव। अतोऽनिर्मोक्ष एव प्रसज्यते। अतो मोक्षसिद्ध्यन्यथानुपपत्त्या कर्मविधेरज्ञविषयत्वान्नानुमानबाधकत्वमिति भावः। मोक्षस्य प्रकारान्तरेणापि सिद्धत्वान्न ज्ञानस्य तत्साधनत्वं वक्तव्यमित्याह— **नैष दोष इति**। प्रकारान्तरं दर्शयति— **नित्यानामित्यादिना**। पतितेऽस्मिन् शरीरे कैवल्यमित्यन्वयः। ननु सञ्चितकर्मवशाद्

आनन्दगिरिकृतव्याख्या

**प्रत्यवायप्राप्तेरिति हेतुं प्रपञ्चयति**—यत इति। **ज्ञानवतोऽपि नित्यानुष्ठानस्यावश्यकत्वान्न केवलज्ञानस्य कैवल्यहेतुतेत्यर्थः। कैवल्यस्य च नित्यत्वादित्यस्य व्यावर्त्यं दर्शयति**—नन्विति। **यदि नित्यनैमित्तिककर्माणि श्रौतान्यकरणे प्रत्यवायकारीण्यवश्यानुष्ठेयानि, एवं तर्हि तेभ्यः समुच्चितेभ्योऽसमुच्चितेभ्यश्च मोक्षो नेत्युक्तत्वात् केवलज्ञानस्य चातद्धेतुत्वादनिबन्धना मुक्तिर्न सिध्येदित्यर्थः। कैवल्यस्य चेत्यादि व्याकुर्वन्ननिर्मोक्षप्रसङ्गं प्रत्यादिशति**—नैष दोष इति। **मुक्तेर्नित्यत्वेनायत्नसिद्धेर्न तदभावशङ्केत्युक्तं प्रपञ्चयति**—नित्यानामिति। **काम्यकर्मवशादिष्टशरीरापत्तिं शङ्कित्वोक्तम्**—काम्यानां चेति। **आरब्धकर्मवशात् तर्हि देहान्तरम् , नेत्याह**—वर्तमानेति। **तर्हि देहान्तरं शेषकर्मणा स्यादित्याशङ्क्य , कर्माशयस्यैकभविकत्वान्नेत्याह**—पतितेऽस्मिन्निति। **रागादिना कर्मान्तरम् , ततो देहान्तरं च भविष्यति**

भाष्यार्कप्रकाशः

इत्यर्थः। अत्र कैवल्यस्य नित्याप्तत्वाच्चेत्यपि हेत्वन्तरं गम्यते। नित्यत्वादित्यनेनार्थात् सिध्यतीति वा। ततश्च नित्याप्तस्य कैवल्यस्य ज्ञानप्राप्यत्वकथनं चायुक्तमिति भावः।

ननु यद्येवं नित्याकरणात् प्रत्यवायः, नित्यकरणाच्च प्राजापत्यलोकप्राप्त्यादिलक्षणो बन्धः, तर्हि उभयथाऽप्यानर्थक्यात् कर्मभ्यो मोक्षो नास्ति; ज्ञानान्मोक्षप्राप्तिस्तु दूषितेति हेतोः पुरुषस्यानिर्मोक्षो मोक्षाभाव एव प्राप्त इति चेत्? **एष** मोक्षाभावरूपो **दोषो न** नास्ति। कुतः? **नित्यत्वादिति**। यदि कर्मभ्यो मोक्षः स्यात् तर्हि कर्मकृतो मोक्षोऽनित्य एव स्यात् घटवत् , यत्कृतकं तदनित्यमिति व्याप्तिदर्शनात्। नित्यो हि मोक्षः। अतः स कथं कर्मभ्यो ज्ञानाद्वा भवितुमर्हति? न हि नित्यस्य मोक्षस्याभावो वक्तुं शक्यते, नित्यस्य सत्यत्वेन सत्यस्य सत्त्वेन च सतो मोक्षस्याभावायोगात्। उक्तं हि – 'नासतो विद्यते भावो नाभावो विद्यते सतः' इति।

ननु भवत्वेवं नित्यो मोक्षः, कथं पुनस्तत्सिद्धिर्मुमुक्षोः? अत आह—**नित्यानामिति**। सर्वकर्मसंन्यासान्नित्यानामकरणे या प्रत्यवायप्राप्तिः दर्शिता केवलज्ञानिनि, सा कर्मिणो न भवति। कुतः? नित्यानां कर्माणामनुष्ठानात्। एतेन मुमुक्षुणा पुरुषेण नित्यं कर्म कार्यमिति सिद्धम्। अत एव श्रीकृष्णेनापि – 'नियतं कुरु कर्म त्वम्' इत्युक्तमिति भावः। प्रतिषिद्धं कर्म मुमुक्षुणा न कार्यमित्याह—**प्रतिषिद्धस्येति**। अनिष्टशरीराणि यातनापश्वादिशरीराणि। काम्यान्यपि कर्माणि न कर्तव्यानीत्याह—**काम्यानां चेति**। अनिष्टपश्वादिशरीरवद् इष्टदेवादिशरीराणामपि सुखदुःखादिजननद्वारा बन्धकत्वादिति भावः। एवं कृते सति किं भवतीत्यत आह—**वर्तमानेति**। प्रारब्धकर्मणो भोगेन क्षयादिति भावः। अस्मिन् वर्तमाने देहे पतिते मृते सतीत्यर्थः। **कारणाभावादिति**। सुकृतस्य दुष्कृतस्य वा अभावादित्यर्थः। 'पुण्यः पुण्येने'ति शास्त्रादिति भावः। ननु कथं कारणाभावः? धर्माधर्मानुष्ठानहेतुभूतरागादिसत्त्वेन धर्माधर्माकरणानुपपत्तेः, अत आह—**आत्मन इति**। आत्मनो मनसो ये रागादयस्तेषामकरणे सति। आत्मन इत्यस्य कैवल्यमित्यनेनान्वय इति वा, तत्पक्षे आत्मनः स्वस्य मुमुक्षोरित्यर्थः। स्वरूपावस्थानं तल्लक्षणमित्यर्थः। कैवल्यम् **अयत्नसिद्धम्** , प्रयत्नं विनैव सिध्यति। अतो न

**कैवल्यमित्ययत्नसिद्धं कैवल्यमिति। अतिक्रान्तानेकजन्मान्तरकृतस्य स्वर्गनरकादिप्राप्तिफलस्यानारब्धकार्यस्योपभोगानुपपत्तेः क्षयाभाव इति चेत्? न, नित्यकर्मानुष्ठानायासदुःखोपभोगस्य तत्फलोपभोगत्वोपपत्तेः। प्रायश्चित्तवद्वा पूर्वोपात्तदुरितक्षयार्थत्वान्नित्यकर्मणाम् । आरब्धानां चोपभोगेनैव कर्मणां क्षीणत्वाद् , अपूर्वाणां च कर्मणामनारम्भे**

अनुभूतिस्वरूपाचार्यटिप्पणम्

देहान्तरोत्पत्तिरपि भविष्यतीत्याशङ्क्याह—**देहान्तरोत्पत्तौ चेति।** मरणे अभिव्यक्तानां सर्वेषामेव कर्मणां देहान्तरारम्भकत्वायोगात् ना?शरीरारम्भकत्वात् पुण्यारब्धे च मुमुक्षुदेहे धर्माद्यप्रसङ्गात् नित्यानुष्ठानाच्चानारब्धफलदुरितक्षयसम्भवात् नास्त्यनुपभुक्तफलं कर्मेत्याह—**न, नित्यकर्मेत्यादिना।**

आनन्दगिरिकृतव्याख्या

**इत्याशङ्क्याह—** रागादीनां चेति। **आत्मनः स्वरूपावस्थानमिति सम्बन्धः। अतीतासंख्यजन्मभेदेष्वर्जितस्य कर्मणो नानाफलस्यानारब्धस्य भोगेन विनाऽक्षयात् ततो देहान्तरारम्भादैकभविकत्वस्याप्रामाणिकत्वान्न मुक्तेरयत्नसिद्धतेति चोदयति—**अतिक्रान्तेति। **नोक्तकर्मनिमित्तं देहान्तरं शङ्कितव्यमित्याह—**नेति। **नित्यनैमित्तिककर्माणि श्रौतान्यवश्यमनुष्ठेयानि; तदनुष्ठाने च महानायासः; ततो दुःखोपभोगः; तस्योक्तानारब्धकर्मफलभोगत्वोपगमान्न ततो देहान्तरमित्याह—**नित्येति। **नित्यादिना दुरितनिवृत्तावपि, अविरोधान्न सुकृतनिवृत्तिः, ततो देहान्तरमित्याशङ्क्य सुकृतस्य नित्यादेरन्यत्वेऽनारब्धत्वे च [१]न्यायविरुद्धस्य तस्यासिद्धत्वात् ततो देहान्तरायोगात् , नित्यादेरनन्यत्वे च न तस्य फलान्तरमिति मत्वा, यथा प्रायश्चित्तमुपात्तदुरितनिबर्हणार्थं न फलान्तरापेक्षम् , तथेदं सर्वमपि नित्यादिकर्मोपात्तपापनिराकरणार्थं तस्मिन्नेव पर्यवस्यन्न देहान्तरारम्भकमिति पक्षान्तरमाह—**प्रायश्चित्तवदिति। **तथापि प्रारब्धवशादेव देहान्तरं शङ्क्यते, नानाजन्मारम्भकाणामपि तेषां [२]यावदधिकारन्यायेन सम्भवादित्याशङ्क्याह—**आरब्धानां चेति। **पूर्वार्जितकर्मणामेवं क्षीणत्वेऽपि कानिचिदपूर्वकर्माणि देहान्तरमारभेरन्नित्याशङ्क्याह—**अपूर्वाणां चेति।

भाष्यार्कप्रकाशः

मोक्षस्य यत्नसाध्यत्वप्रयुक्तानित्यत्वप्रसङ्गः। तस्मान्मुमुक्षुणा रागादिप्रहाणपूर्वकं नित्यकर्मैव कर्तव्यम् , तथा सति दर्शितविधया मोक्षसिद्धेरिति। ननु नैवं मोक्षः सिध्यति। कुतः? **अतिक्रान्तेति।** अतिक्रान्तेष्वनेकेषु जन्मान्तरेषु कृतस्य, स्वर्गनरकादिप्राप्तिः फलं यस्य तस्य, सुकृतदुष्कृतात्मकस्येत्यर्थः। अनारब्धं कार्यं देहादिरूपं येन तस्य सञ्चितस्येत्यर्थः। कर्मण **उपभोगानुपपत्तेः** उपभोगाभावाद्धेतोः क्षयाभाव इति मोक्षासिद्धौ हेतुः। प्रकृतशरीरत्यागानन्तरं पुनः शरीरान्तरपरिग्रहाभावे सति हि स्वरूपावस्थानलक्षणं कैवल्यमात्मनः सम्भवति, स तु शरीरान्तरपरिग्रहाभावो नित्यकर्मानुष्ठानमात्रेण न सिध्यति। कृत-विप्रणाशस्यायुक्तत्वेन यथा प्रारब्धकर्मण उपभोगेन क्षयस्तथा सञ्चितकर्मणामप्युपभोगं विना क्षयानुपपत्तेः, सञ्चितकर्मफलोपभोगार्थमनन्तानि शरीरान्तराणि परिग्राह्याण्येव कर्मिणा। नित्यकर्मानुष्ठानं हि प्रत्यवायाप्राप्तिं करोति, न तु सञ्चितकर्मक्षयम्। न चायं दोषः समानो ज्ञानान्मोक्षवादिनोऽपीति वाच्यम् ; ज्ञानस्य सर्वसञ्चितकर्मतूलराशिदहने वह्निप्रायत्वात्। उक्तं हि भगवता– 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन' इति। तस्माच्छरीरान्तरपरिग्रहस्यावर्जनीयत्वान्न नित्यानुष्ठानान्मोक्ष इति चेन्न। हेतुमाह—**नित्येति।** तच्छब्दस्य सञ्चितकर्माण्यर्थः। उपभोगेन क्षपयितव्यानां सञ्चितकर्मणां यः फलोपभोगः स नित्यकर्मानुष्ठानजन्यायासदुःखोऽपि भोग एव। ततश्च नित्यकर्मानुष्ठानायासदुःखमनुभूय सञ्चितकर्माणि क्षपयितव्यानीत्यर्थः। नित्यकर्मानुष्ठानप्रयुक्तायासदुःखानुभवात् सञ्चितकर्मणां क्षय इति भावः। नित्यकर्मानुष्ठानप्रयुक्तायासदुःखोपभोगस्य तत्फलोपभोगत्वमुपपद्यत इत्यन्वयार्थः। उपभोगं विनापि सञ्चितकर्मणां क्षयः संभवति, नित्यकर्मानुष्ठानादित्याह—**प्रायश्चित्तवद्वेति।** यथेह जन्मनि प्रमादादिना कृतानां पापकर्मणां तप्तकृच्छ्रादिप्रायश्चित्तैस्तत्फलोपभोगं विनापि क्षयः, एवं जन्मान्तरकृतानामपि कर्मणां विविधानां नित्यकर्मणा क्षयः सम्भवति। नित्यकर्म हि **पूर्वोपचितदुरितक्षयार्थं** पूर्वोपचितानां जन्मान्तरार्जितानां

---

१. प्राग् मरणात् प्रबलेनारब्धफलेन कर्मणा प्रतिबन्धात् न संचितानां फलौन्मुख्यम्। मरणकाले प्रारब्धकर्मनाशाच्च प्रतिबन्धकविगमे स्थितानां सर्वेषामेव तेषां शरीरारम्भकत्वमिति न्यायः।(द्र.ब्र.सू. ३-१-८) २. तत्र हि सकृत्प्रवृत्तस्य प्रारब्धकर्मणो नानाजन्मारम्भकत्वमपि क्वचित् स्वीकृतमिति भावः।(द्र.ब्र.सू. ३-३-३२)

**अयत्नसिद्धं कैवल्यमिति।**

[सिद्धान्तः]

**न, 'तमेव विदित्वाऽति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय'(श्वे.उ.३.८) इति विद्याया अन्यः पन्था मोक्षाय न विद्यत इति श्रुतेः, चर्मवदाकाशवेष्टनासम्भववद् अविदुषो मोक्षासम्भवश्रुतेः, 'ज्ञानात् कैवल्यमाप्नोति' इति च पुराणस्मृतेः, अनारब्धफलानां पुण्यानां कर्मणां क्षयानुपपत्तेश्च। यथा पूर्वोपात्तानां दुरितानामनारब्धफलानां सम्भवः,**

अनुभूतिस्वरूपाचार्यटिप्पणम्

प्रकारान्तरेण मोक्षकल्पनं श्रुतिविरुद्धमित्याह—**तमेव विदित्वेति।** इतश्च नायत्नसिद्धं कैवल्यमित्याह—**अनारब्धफलानामिति।** देवताधिकरणन्यायेन मन्त्रार्थवादादीनां स्वार्थे प्रामाण्यात् तत्प्रतिपाद्यस्वर्गफलानां पुण्यानां नात्र क्षयः सम्भवतीत्यर्थः। मुमुक्षोर्न सन्त्येव तादृशानि पुण्यानीति न वाच्यम्। निश्चयकारणाभावादित्याह—**यथेत्यादिना।** किञ्च

आनन्दगिरिकृतव्याख्या

**विना ज्ञानं कर्मणैव मुक्तिरिति पक्षं श्रुत्यवष्टम्भेन निराचष्टे—**नेत्यादिना। **विद्यतेऽयनायेति श्रुतेरिति सम्बन्धः। एवकारार्थं विवृण्वन् नेत्यादिभागं व्याकरोति—**अन्य इति। **'यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति॥' इति श्रुतिमर्थतोऽनुवदति—**चर्मवदिति। **श्रौतार्थे स्मृतिं संवादयति—**ज्ञानादिति। **किञ्च त्वदीयन्यायस्यानुग्राह्यमानहीनत्वेनाभासतया पुण्यकर्मणामनारब्धफलानां क्षयाभावे देहान्तरारम्भसम्भवान्न ज्ञानं विना मुक्तिरित्याह—**अनारब्धेति। **तथाविधानां कर्मणां नास्ति सम्भावनेत्याशङ्क्याह—**यथेति। **अनारब्धफलपुण्यकर्मभावेऽपि कथं मोक्षानुपपत्तिरिति? तत्राह—**तेषां चेति। **इतश्च कर्मक्षयानुपपत्त्या**

भाष्यार्कप्रकाशः

दुरितानां क्षयो नाशोऽर्थः फलं यस्य तत् तथोक्तम्। अत एव 'उपात्तदुरितक्षयार्थ'मिति सन्ध्यावन्दनादिनित्यकर्मसु कर्मिणः सङ्कल्पयन्तीति। प्रायश्चित्तेन तुल्यं प्रायश्चित्तवदिति 'तेन तुल्यं क्रिया चेद्वति'रिति वतिः। यथा प्रायश्चित्तमुपचितदुरितक्षयार्थं तथा नित्यकर्मापीत्यर्थः। प्रायश्चित्तनित्यकर्मणोस्त्वयं विशेषः—इहजन्मोपचितदुरितक्षयार्थं प्रायश्चित्तम् , जन्मान्तरोपचितदुरितक्षयार्थं नित्यकर्मेति।

**वस्तुतस्तु** नित्यकर्मणोऽप्यैहिकदुरितोपक्षयार्थत्वमप्यस्तीति बोध्यम् – 'यदह्नात्कुरुते पापं तदह्नात्प्रतिमुच्यते' इत्यादिश्रुतेः। स्वमतं निगमयति—**आरब्धानां चेति**। जन्मान्तरकृतानामित्यर्थः। **कर्मणां** प्रारब्धसञ्चितोभयात्मकानामित्यर्थः। **उपभोगेनैव** तत्तत्फलानुभवेनैव क्षीणत्वात् , सञ्चितानां नित्यकर्मभिः क्षीणत्वाच्चेति बोध्यम्। **अपूर्वाणाम्** आगामिनामित्यर्थः। **कर्मणां** काम्यानां प्रतिषिद्धानां चेत्यर्थः। **अनारम्भे** अकरणे सति कैवल्यं भवति मुमुक्षोरिति शेषः। तस्मात् कैवल्यार्थिना नित्यकर्मैकमेव कार्यमिति।

एवं परमतमुपन्यस्य दूषयितुमारभते सिद्धान्ती—**नेत्यादिना**। नैवं नित्यकर्मानुष्ठानं मोक्षसाधनम् , कुतः? श्रुत्यादिविरोधादित्याह—**तमेवमिति**। **तं** परमात्मानम् एवं प्रत्यगभिन्नत्वेन उक्तरीत्येति वा, **विदित्वा** ज्ञात्वा, विद्वानिति शेषः। **मृत्युं** संसारम् **अत्येति** अतिगच्छति; **अयनाय** मोक्षाय, **अन्यो** ज्ञानादतिरिक्तः पन्थाः **न** नास्ति। 'नान्यः पन्था विद्यतेऽयनाय' इत्यस्याः अर्थं स्वयमेवाह भाष्यकृत् 'अन्यः पन्था मोक्षाय न विद्यते' इति। 'यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा देवमविज्ञाय दुःखस्यान्तो भविष्यती'ति श्रुतिरप्यमुमेवार्थमाहेत्याह—**चर्मवदिति**। चर्मण इवाकाशस्य वेष्टनं यथा न सम्भवति, तद्वदविदुषोऽनात्मज्ञस्य मोक्षो न सम्भवतीत्येतदर्थप्रतिपादकश्रुतेश्चेत्यर्थः। पुराणरूपां स्मृतिमाह—**ज्ञानादिति**। युक्तिमाह—**अनारब्धेति। अनारब्धफलानामिति**। सञ्चितानामित्यर्थः। **पुण्यानामिति**। दुरितानां प्रायश्चित्तैरिव नित्यकर्मभिः क्षीणत्वेऽपि नित्यकर्मानुष्ठानायासदुःखानुभवस्य दुरितफलत्वेन तदुपभोगेन वा दुरितानां क्षीणत्वेऽपि पुण्यानामुपभोगं विना क्षयो नोपपद्यत इति भावः। नन्वनारब्धफलानां पुण्यानां सत्त्वमेवासिद्धम् , अत आह—**यथेति**। अनारब्धफलानि दुरितानि सन्तीति यथा त्वमभ्युपैषि, तथा तादृशानि पुण्यान्यपि सन्तीत्यभ्युपगच्छ। दुष्कृतान्ये-

**तथा पुण्यानामप्यनारब्धफलानां स्यात् सम्भवः। तेषां च देहान्तरमकृत्वा क्षयानुपपत्तौ मोक्षानुपपत्तिः। धर्माधर्महेतूनां च रागद्वेषमोहानाम् अन्यत्रात्मज्ञानादुच्छेदानुपपत्तेः धर्माधर्मोच्छेदानुपपत्तिः। नित्यानां च कर्मणां पुण्यलोकफलश्रुतेः, 'वर्णा आश्रमाश्च स्वकर्मनिष्ठाः' (गौ.ध.सू.११.२९) इत्यादिस्मृतेश्च कर्मक्षयानुपपत्तिः।**

**ये त्वाहुः— नित्यानि कर्माणि दुःखरूपत्वात् पूर्वकृतदुरितकर्मणां फलमेव, न तु तेषां स्वरूपव्यतिरेकेणान्यत् फलमस्ति, अश्रुतत्वात्, जीवनादिनिमित्ते च विधानाद् इति। न, अप्रवृत्तानां कर्मणां फलदानासम्भवात्, दुःखफल-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

मुमुक्षुणा काम्यं प्रतिषिद्धं च न क्रियत इत्यपि नियन्तुं न शक्यते, अनात्मज्ञस्य रागाद्युच्छेदासम्भवादित्याह—**धर्माधर्महेतूनां चेति**। 'सर्व एते पुण्यलोका भवन्ती'त्यादिश्रुतेः नित्यकर्मणां पुण्यलोकप्राप्तिः फलम्। अतो न पतितेऽस्मिन् शरीरे कैवल्यमवश्यम्भावीत्यर्थः। 'वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण जन्म प्रतिपद्यन्ते' इति **गौतमसूत्रा**दपि कर्मशेषसद्भावावगमान्नैकस्मिन् देहे सर्वकर्मक्षयः संभवतीत्यर्थः।

पराभिप्रायमनुवदति—**ये त्वाहुरिति। अश्रुतत्वादिति**। विधिवाक्ये फलश्रवणाभावात्, 'यावज्जीवमग्निहोत्रं जुहोती'त्यादिना च जीवनादिनिमित्तेनैव विधानात्, 'सर्व एते पुण्यलोका भवन्ती'त्यादेरर्थवादमात्रत्वान्नास्त्यदृष्टफलं नित्यानाम्।

आनन्दगिरिकृतव्याख्या

**मोक्षानुपपत्तिरित्याह—** धर्मेति। **'कर्मणा पितृलोकः' इति श्रुतिमाश्रित्य कर्माक्षये हेत्वन्तरमाह—**नित्यानामिति। **स्मृत्याऽपि यथोक्तमर्थं समर्थयति—**वर्णा इति। **प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टजात्यादिभाजो जन्म प्रतिपद्यन्त इत्येतदा**दिपद**ार्थः।**

**यत्तु नित्यानुष्ठानायासदुःखभोगस्य तत्फलभोगत्वमिति, तदिदानीमनुवदति—** ये त्विति। **नित्यान्यनुष्ठीयमानानि आयासपर्यन्तानीति शेषः। तथापि नित्यानां काम्यानामिव स्वरूपातिरिक्तं फलमाशङ्क्य विध्युद्देशे तदश्रवणान्नैवमित्याह—**न त्विति। **विध्युद्देशे फलाश्रुतौ तत्कामनाया निमित्तस्याभावान्न नित्यानि विधीयेरन्नित्याशङ्क्याह—** जीवनादीति। **न नित्यानां विध्यसिद्धिरिति शेषः।**

भाष्यार्कप्रकाशः

वानेन जन्मान्तरेषु सञ्चितानि, न तु सुकृतानीति निश्चेतुमशक्यत्वादिति। एवं देहान्तरापत्तौ च कारणाभावादित्येतद् दूषयित्वा रागादीनां चाकरणे इत्येतद् दूषयति—**धर्मेति**। धर्माधर्मयोर्हेतूनां रागद्वेषमोहानाम् **आत्मज्ञानादन्यत्र** आत्मज्ञानं विनेत्यर्थः। **उच्छेदस्य** नाशस्यानुपपत्तेः। आत्मज्ञानवानेव रागद्वेषादीनकृत्वा तिष्ठति, न त्वनात्मवित्। ज्ञानं विनाऽन्येन केनापि कारणेन रागद्वेषमोहनाशासम्भवादिति। एवं रागद्वेषादीनामनाशे तत्कार्ययोर्धर्माधर्मयोरुच्छेदानुपपत्तिः। सतोश्च धर्माधर्मयोस्तत्फलोपभोगाय शरीरान्तरपरिग्रह आवश्यक इति मोक्षानुपपत्तिरिति भावः। अथ यदुक्तं नित्यकर्मकरणात् प्रत्यवायाप्राप्त्या मोक्ष इति, तद् दूषयति—**नित्यानामिति**। नित्यकर्मानुष्ठानस्य अकरणे प्रत्यवायरूपदोषाप्राप्तिरेव न फलं, किन्तु पुण्यफलमप्यस्तीति श्रूयते स्मर्यते च। ततश्च श्रुतिस्मृतिप्रमाणसिद्धस्य नित्यकर्मानुष्ठानजन्यपुण्यफलस्य देहान्तरेऽवश्यमनुभोक्तव्यत्वात् तदनुभवं विना नित्यकर्मणः कृतस्य क्षयानुपपत्तेर्नित्यकर्मकर्तुर्देहान्तरप्राप्तिरवर्जनीयेति मोक्षानुपपत्तिरिति भावः।

ननु नित्यकर्मानुष्ठानान्न पुण्यफलम्, किन्तु नित्यकर्मानुष्ठानमेव जन्मान्तरकृतदुरितफलम्, आयासदुःखरूपत्वादित्याह—**ये त्विति**। फलमेवेत्येवकारार्थमाह—**न त्विति। तेषामिति**। नित्यकर्मणामित्यर्थः। अन्यत् फलं न त्वस्तीत्यन्वयः। तत्र हेतुमाह—**अश्रुतत्वादिति**। 'ज्योतिष्टोमेन स्वर्गकामो यजेते'तिवद् एतत्काम इदं नित्यं कर्म कुर्यादित्यश्रवणादिति भावः। ब्राह्मणस्य यजनादयः षट् नित्यकर्माणीत्युक्तम्, तत्र 'याजनाध्यापनप्रतिग्रहाः जीवनार्थं विहिताः' इति वृद्धवचनादाह[१]— **जीवनादिनिमित्ते चेति**।

१. वस्तुतस्तु याजनादीनां जीवनार्थत्वस्य रागप्राप्तत्वात्, तत्र विध्ययोगात् 'यावज्जीवमग्निहोत्रं जुहोति' इत्यादिना जीवने निमित्ते विधानादिति व्याख्यानं युक्तम्। नैमित्तिकस्याप्यकरणे प्रत्यवायात् तद्भयादेव निमित्तवतः प्रवृत्त्युपपत्तेः नान्यत् फलं कल्पनीयमिति भावः।

**विशेषानुपपत्तिश्च स्यात्। यदुक्तं पूर्वजन्मकृतदुरितानां कर्मणां फलं नित्यकर्मानुष्ठानायासदुःखं भुज्यत इति, तदसत्। न हि मरणकाले फलदानायानङ्कुरीभूतस्य कर्मणः फलम् अन्यकर्मारब्धे जन्मन्युपभुज्यत इत्युपपत्तिः। अन्यथा स्वर्गफलोपभोगायाग्निहोत्रादिकर्मारब्धे जन्मनि नरक([1]कर्म)फलोपभोगानुपपत्तिर्न स्यात्। तस्य दुरितदुःखविशेष-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ततो निष्फलविधानान्यथानुपपत्त्या पूर्वकृतदुरितफलत्वमेव कल्प्यत इति भावः। अत्र दूषणमाह— **न, अप्रवृत्तानामिति।** फलदानायानङ्कुरीभूतानां पूर्वदुरितानां कर्मान्तरारब्धे शरीरे फलदानासम्भवात् नित्यानुष्ठानायासदुःखं न [तत्फलं] सम्भवतीत्यर्थः। यदि वाऽन्यारब्धेऽपि फलदानं स्यात् , तथापि नित्यानुष्ठानदुःखस्यानुपपत्तिः स्यात् , दुःखान्तरस्यापि सम्भवादित्यर्थः। वस्तुसंग्रहवाक्यद्वयमध्ये पूर्ववाक्यं व्याचष्टे—**यदुक्तमित्यादिना।** विमतं कर्मफलं नान्यारब्धे उपभुज्यते, कर्मफलत्वात् , यदेवं तदेवम् , यथा स्वर्गार्थमारब्धे न नरकफलमिति भावः। विपक्षे बाधकमाह— **अन्यथेति।** द्वितीयं वाक्यं

आनन्दगिरिकृतव्याख्या

**अनुभाषितं दूषयति—**नेत्यादिना। **तदेव विवृण्वन् निषेध्यमनूद्य नञर्थमाह—**यदुक्तमिति। **अप्रवृत्तानामित्यादिहेतुं प्रपञ्चयति—**न हीति। **कर्मान्तरारब्धेऽपि देहे दुरितफलं नित्यानुष्ठानायासदुःखं भुज्यताम् , काऽनुपपत्तिरित्याशङ्क्याह—**अन्यथेति। **यदुक्तं दुःखफलविशेषानुपपत्तिश्च स्यादिति, तदुपपादयति—**तस्येति। **सम्भावितानि तावदनन्तानि सञ्चितानि दुरितानि; तानि च नानादुःखफलानि; यदि तानि नित्यानुष्ठानायासरूपं [यद्]दुःखं तन्मात्रफलानि कल्प्येरन् , तदा तेष्वेवं कल्प्यमानेषु सत्सु नित्यस्यानुष्ठितस्य [2]आयासमासादयतो यो दुरितकृतो दुःखविशेषो न तत् फलम् , दुरितफलानां दुःखानां बहुत्वात्। अतो नित्यं कर्म यथाविशेषितं दुरितकृतदुःखविशेषफलकम्**

भाष्यार्कप्रकाशः

तस्माज्जीवनार्थं विहितानां नित्यकर्मणां जीवनातिरिक्तफलकल्पनमयुक्तमिति भावः। आदिपदात् तत्तद्वर्णविशेषनिर्धारणं गृह्यते। तथा च यजनाध्ययनदानानि त्रीणि नित्यकर्माणि ब्राह्मणस्य ब्राह्मणवर्णविशेषनिर्धारणार्थं विहितानीति कृत्वा न तेषामपि फलान्तरं कल्पयितुं शक्यमिति। परिहरति—**नेति।** किं त्वं नित्यकर्माणि प्रारब्धकर्मफलभूतानीति ब्रूषे, उत सञ्चितकर्मफलानीति? आद्ये, त्वदिष्टासिद्धिः। द्वितीये दोषमाह—**अप्रवृत्तानामिति। अप्रवृत्तानां** फलप्रदानार्थमप्रवृत्तानां सञ्चितानामित्यर्थः। अयमेव हि सञ्चितप्रारब्धयोर्भेदः—जन्मान्तरकृतं फलदानाय प्रवृत्तं यत् तत् प्रारब्धम् , यदप्रवृत्तं तत् सञ्चितमिति। तस्मात् सञ्चितानां कर्मणां प्रकृतजन्मनि फलदानं नैव सम्भवति। सति च तदसम्भवे सञ्चितकर्मफलमेवायं नित्यकर्मानुष्ठानायासदुःखविशेष इति कथमुच्यते? तस्मात् सञ्चितकर्मणां दुःखफलविशेषस्यानुपपत्तिः स्यात्। इदमेवाप्रवृत्तानामिति संग्रहवाक्यं विवृणोति—**यदुक्तमित्यादिना।** दुरितानां फलं दुःखं भुज्यत इति यदुक्तं तदसदित्यन्वयः। **अनङ्कुरीभूतस्येति।** अनारब्धस्येत्यर्थः। **अन्यकर्मेति।** प्रारब्धकर्मेत्यर्थः। उपभुज्यत इत्यत्रोपपत्तिर्न हीत्यन्वयः। येन कर्मणा यज्जन्मारब्धं तज्जन्मनि तत्कर्मणः फलमेवानुभवितव्यम् , न त्वन्यकर्मफलमिति नियमादिति भावः। उक्तनियमास्वीकारे को दोषः? तत्राह—**अन्यथेति। जन्मनीति।** देवदेह इत्यर्थः। [3]**उपपत्तिः** आपत्तिरित्यर्थः।

अयं भावः—केनचिद् अग्निहोत्रादिधर्मः कृतः, हिंसास्तेयादिवदधर्मश्च कृतः। तत्र धर्मेण स्वर्गप्राप्तिः, अधर्मेण नरकप्राप्तिश्च क्रमेण भवितुमर्हति, न तु युगपदेव, विरोधात्। एवं सति फलदानायाङ्कुरीभूताद् धर्मात् तस्य स्वर्गफलोपभोगार्हदेवजन्मनि सति तत्रैवाधर्मफलं नरकमपि तेन भुज्येत। अन्यकर्मारब्धेऽपि जन्मन्यन्यकर्मफलानुभवः इत्यभ्युपगमात्। न हि स्वर्गिणो नरकानुभवः सम्भवति, स्वर्गनरकयोः सुखदुःखयोर्विरोधात्। तस्मादुक्तनियमोऽवश्यं स्वीकर्तव्यः इति। किञ्च नित्यकर्मानुष्ठानायाससिद्धं दुःखं किं पूर्वकृतदुरितसामान्यफलमुत दुरितविशेषफलम्? नाद्यः, सर्वेषां ब्रह्महत्यास्वर्णस्तेयपरदारगमनादिपातकानाम् अविशेषेण नित्यकर्मानुष्ठानायासदुःखमेव फलमिति कल्पनस्यायुक्तत्वादप्रमाणत्वाच्च। न द्वितीयः, अस्य दुरितविशेषस्येदं नित्यकर्मानुष्ठानदुःखं फलमिति

१. क्वचिन्न। २. आयासं जनयतः इत्यर्थः। ३. भोगानुपपत्तिरित्यत्र प्रतियोग्युपपत्तिपदार्थोऽयम्। तथा च स्वर्गेऽपि नरकफलभोगः आपद्येतेति भाष्यार्थः।

**फलत्वानुपपत्तेश्च। अनेकेषु हि दुरितेषु सम्भवत्सु भिन्नदुःखसाधनफलेषु नित्यकर्मानुष्ठानायासदुःखमात्रफलेषु कल्प्यमानेषु [1]द्वन्द्वरोगादिबाधानिमित्तं न हि शक्यते कल्पयितुम् ; नित्यकर्मानुष्ठानायासदुःखमेव [2]पूर्वकृतदुरितफलम् , न शिरसा पाषाणवहनादिदुःखमिति।**

**अप्रकृतं चेदमुच्यते— नित्यकर्मानुष्ठानायासदुःखं पूर्वकृतदुरितकर्मफलमिति। कथम्? [3]अप्रसूतफलस्य हि**

अनुभूतिस्वरूपाचार्यटिप्पणम्

विवृणोति— **तस्येति**। नित्यानुष्ठानस्य दुरितदुःखविशेषफलत्वानुपपत्तिमेवाह— **अनेकेषु हीत्यादिना**। द्वन्द्वरोगादि दृश्यमानं (कल्पनायासो?) बाधकमित्युक्तं स्यात्। तत्र हेतुमाह— **न हीति**।

पूर्वं नित्यानुष्ठानायासदुःखमनारब्धफलस्य कर्मणः कार्यमित्युपगम्य तावन्मात्रफलत्वं निश्चेतुं न शक्यत इत्युक्तम्। इदानीं नित्यानुष्ठानायासदुःखमपि आरब्धफलस्यैव कार्यमित्याह—**अप्रकृतं चेदमित्यादिना**। किञ्च नित्यानुष्ठानायासदुःखं

आनन्दगिरिकृतव्याख्या

**इत्ययुक्तमित्यर्थः। किञ्च नित्यानुष्ठानायासदुःखमात्रफलानि चेद् दुरितानि कल्प्यन्ते, तदा द्वन्द्वशब्दितरागादिबाधस्य रोगादिबाधायाश्च दुरितनिमित्तत्वानुपपत्तेः सुकृतकृतत्वस्य चासम्भवादनुपपत्तिरेवोदीरितबाधायाः स्यादित्याह—** द्वन्द्वेति। **इतश्च नित्यानुष्ठानायासदुःखमेव दुरितफलमित्ययुक्तमित्याह—**नित्येति। दुःखमिति **न शक्यते कल्पयितुमिति पूर्वेण सम्बन्धः। यदि तदेव तत्फलम् , न तर्हि शिरसा पाषाणवहनादिदुःखं दुरितकृतम् , न च तत्कारणं सुकृतम् , दुःखस्यातत्कार्यत्वात् , अतस्तदाकस्मिकं स्यादित्यर्थः।**

**नित्यानुष्ठानायासदुःखमुपात्तदुरितफलमित्येतदप्रकृतत्वाच्चायुक्तं वक्तुमित्याह—**अप्रकृतं चेति। **तदेव प्रपञ्चयितुं पृच्छति—**

भाष्यार्कप्रकाशः

निश्चेतुं शास्त्राद्यभावादित्याह—**तस्येति**। नित्यकर्मानुष्ठानायासदुःखस्येत्यर्थः। **दुरितदुःखविशेषफलत्वानुपपत्तेः** दुरितविशेषदुःखफलत्वानुपपत्तेरित्यर्थः। दुरितानां यद् दुःखविशेषरूपं फलं तत्त्वानुपपत्तेरिति वा। संग्रहवाक्यमेव विवृणोति—**अनेकेष्विति**। अनेकेषु भिन्नदुःखसाधनफलेषु सम्भवत्सु भिन्नदुरितेषु नित्यकर्मानुष्ठानायासदुःखमात्रफलेषु कल्प्यमानेषु सत्सु – भिन्नानि दुःखं साधनं फलं करणवैकल्यादिकं चेत्येतानि येषां तेषु **भिन्नदुःखसाधनफलेषु सम्भवत्सु** सम्भावितेष्वित्यर्थः। नित्यकर्मानुष्ठानायासमात्रं फलं येषां तेषु तथोक्तेषु। भिन्नदुःखसाधनफलानां बहूनां सम्भावितानामनेकजन्मसञ्चितानां दुरितानां नित्यकर्मानुष्ठानायासदुःखमेव फलमिति कल्पिते सतीत्यर्थः। अनिमित्तं द्वन्द्वरोगादिबाधनं कल्पयितुं न हि शक्यते। द्वन्द्वरोगादिबाधनमनिमित्तं कल्पयितुं न हि शक्यते इति वा। अस्मिन् पक्षे **कल्पयितुं** वक्तुमित्यर्थः। उभयथाऽपि अनुभवसिद्धत्वाद् दुरपलापं द्वन्द्वरोगादिबाधनं निर्निमित्तं स्यादित्यर्थः। द्वन्द्वरोगादिबाधानां कारणत्वेनाभ्युपगतानि शास्त्रविद्भिर्यानि दुरितानि तेषामपि नित्यकर्मानुष्ठानायासदुःखमेव यदि फलं स्यात् , तर्हि द्वन्द्वरोगादिबाधा फलं नैव भवतीति निर्निमित्ता एव द्वन्द्वरोगादिबाधाः स्युः। तस्मादेवं कल्पयितुं न शक्यत इति भावः। तामेवाशक्यां कल्पनामभिनीय दर्शयति—**नित्येति**। पूर्वोपात्तदुरितानां नित्यकर्मानुष्ठानायासदुःखमेव फलम् , शिरसा पाषाणादिवहनादिसिद्धदुःखं तु न फलमित्यनिमित्तं द्वन्द्वरोगादिबाधनं कल्पयितुं न शक्यत इति पूर्वेणान्वयः। वहनादीत्यादिपदात् द्वन्द्वरोगादिग्रहणम्। द्वन्द्वरोगादीत्यादिपदात् पाषाणवहनादिग्रहणम्। तस्मात् परस्परं भिन्नानां दुरितानां फलमपि परस्परं भिन्नमेव दुःखविशेषो भवितुमर्हतीति न सर्वेषां दुरितानां नित्यकर्मानुष्ठानायासदुःखमेव फलम् , तथा सति द्वन्द्वरोगशिरःपाषाणवहनादिदुःखस्य निर्निमित्तत्वापत्तेः। निर्निमित्तस्यापि दुःखस्याभ्युपगमे कारणं विनापि कार्यं स्यादिति महदनिष्टम्। सुकृतिनोऽपि निष्कारणदुःखानुभवप्रसङ्गाच्चेति भावः।

१. 'द्वन्द्वरोगादिबाधनं निर्निमित्तं' 'द्वन्द्वरोगादिबाधनमनिमित्तं' इति पा.। २. 'पूर्वोपात्तदुरितफलं' इति पा.। ३. अत्र रामकविदृष्टो भाष्यपाठः— 'अप्रसूतफलस्य हि पूर्वकृतदुरितस्य क्षयो नोपपद्यत इति प्रकृतम्। तत्राप्रसूतफलस्य कर्मणः फलं नित्यकर्मानुष्ठानायासदुःखमाह भवान् , न प्रसूतफलस्येति' इति स्यादिति भाति।

**पूर्वकृतदुरितस्य क्षयो नोपपद्यत इति प्रकृतम्। तत्र प्रसूतफलस्य कर्मणः फलं नित्यकर्मानुष्ठानायासदुःखमाह भवान्, नाप्रसूतफलस्येति। अथ सर्वमेव पूर्वकृतं दुरितं प्रसूतफलमेवेति मन्यते भवान्, ततो नित्यकर्मानुष्ठानायासदुःखमेव फलमिति विशेषणमयुक्तम्। नित्यकर्मविध्यानर्थक्यप्रसङ्गश्च, उपभोगेनैव प्रसूतफलस्य दुरितकर्मणः क्षयोपपत्तेः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

यदि पूर्वकृतदुरितस्य फलम्, तर्हि पूर्वकृतदुरितवशादेव तत्र प्रवृत्तिसिद्धेः विधेर्वैयर्थ्यं स्यादित्याह— **नित्यकर्मविध्यानर्थक्येति।**

आनन्दगिरिकृतव्याख्या

कथमिति। **तत्रादौ प्रकृतमाह—**अप्रसूतेति। **तथापि कथमस्माकमप्रकृतवादित्वम्? तत्राह—**तत्रेति। **प्रसूतफलत्वमप्रसूतफलत्वमिति प्राचीनदुरितगतविशेषानुपगमादविशेषेण सर्वस्यैव तस्य प्रसूतफलत्वान्नित्यानुष्ठानायासदुःखफलत्वसम्भवान्नाप्रकृतवादितेति शङ्कते—**अथेति। **पूर्वोपात्तदुरितस्याविशेषेणारब्धफलत्वे विशेषणानर्थक्यमिति परिहरति—**तत इति। **दुरितमात्रस्यारब्धफलत्वेनानारब्धफलस्य तस्योक्तफलविशेषवत्त्वानुपपत्तेरित्यर्थः। पूर्वोपात्तदुरितमारब्धफलं चेद् भोगेनैव तत्क्षयसम्भवात् तन्निवृत्त्यर्थं नित्यं कर्म न विधातव्यमिति दोषान्तरमाह—**नित्येति।

भाष्यार्कप्रकाशः

दोषान्तरमाह—**अप्रकृतं चेति**। प्रकृतविरुद्धमित्यर्थः। किमुच्यते? अत आह—**नित्येति**। कथमिदं वचनमप्रकृतमिति पृच्छति—**कथमिति**। उत्तरयति—**अप्रसूतेति। हि** यस्मादप्रसूतफलस्य पूर्वकृतदुरितस्य क्षय उपपद्यत इत्युक्तम्, तस्मादिदमप्रकृतम् इत्यर्थः। किं तत् प्रकृतं यस्येदं विरुद्धमप्रकृतम्? अत आह—**नोपपद्यत इतीति**। अप्रसूतस्य कर्मणः क्षयो नोपपद्यत इति प्रकृतम्। यद्वा कथमप्रकृतमुच्यते? अत आह—**कथमिति**। अप्रसूतस्य पूर्वकृतदुरितस्य क्षयः कथमुपपद्यते? कथमपि नोपपद्यत इति प्रकृतम्। एतद्विरुद्धत्वात् त्वदुक्तमप्रकृतमिति भावः। तदेव स्फुटयति—**तत्रेति**। एवं सतीत्यर्थः। अप्रसूतफलस्य पूर्वकृतदुरितस्य क्षयो नोपपद्यत इति प्रकृते सतीत्यर्थः। भवान् **अप्रसूतफलस्य** – सञ्चितस्येत्यर्थः – कर्मणो नित्यकर्मानुष्ठानायासदुःखं फलमित्याह, **प्रसूतफलस्य** प्रारब्धस्य कर्मणो नित्यकर्मानुष्ठानायासदुःखं फलं न भवतीति च **भवानाह** त्वं वदसि। तस्मादिदमप्रकृतमुच्यते।

अयं भावः—नित्यकर्मानुष्ठानायासदुःखमेव पूर्वकृतदुरितफलमिति वदन् भवान् प्रष्टव्य इति। किं पूर्वकृतानां सञ्चितानां दुरितानां नित्यकर्मानुष्ठानदुःखं फलमिति तवाभिप्रेतम्? यद्वा प्रारब्धानाम्? द्वितीये, प्रारब्धस्य नित्यकर्मानुष्ठानदुःखोपभोगेन क्षये सत्यपि सञ्चितानां क्षयाभावान्मोक्षानुपपत्तिः। आद्ये, फलदानायानङ्कुरीभूतानां सञ्चितानां कथं नित्यकर्मानुष्ठानदुःखरूपफलप्रदानसम्भवः? तस्मादनुभवसिद्धमिदं नित्यकर्मानुष्ठानायासदुःखं न प्रारब्धफलं, किन्तु सञ्चितदुरितफलमेवेति तव वचनमिदम् **अप्रकृतम्** अप्रमाणमग्राह्यमेवेति। विरोधं स्फुटयितुमेव—**अप्रसूतफलस्येति, प्रसूतफलस्येति** चोक्तमाचार्यैः। अप्रसूतमनुत्पादितं फलं दुःखं येन तस्याप्रसूतफलस्य। प्रसूतमुत्पादितं फलं दुःखं येन तस्य प्रसूतफलस्य। अप्रसूतफलस्य दुःखफलप्रसूतिः, प्रसूतफलस्य[1] दुःखफलाप्रसूतिश्चेत्युभयं विरुद्धमिति भावः।

ननु न वयं पूर्वकृतदुरितानां सञ्चितत्वमभ्युपगच्छामः, किन्तु प्रारब्धत्वमेव। तस्मान्नित्यकर्मानुष्ठानायासदुःखोपभोगेन पूर्वकृतदुरितक्षयोपपत्तिरिति नाप्रकृतत्वदोष इत्यत आह—**अथेति। सर्वमेवेति**। सर्वमपीत्यर्थः। भवान् सर्वमेव पूर्वकृतं दुरितं प्रसूतफलमेवेति मन्यते यदि, ततस्तर्हि नित्यकर्मानुष्ठानायासदुःखमेव - पूर्वकृतदुरितानामिति शेषः - फलमिति **विशेषणं** विशिष्य वचनमयुक्तम्, द्वन्द्वरोगादिदुःखस्यापि पूर्वकृतदुरितफलस्यानुभूयमानस्यापलपितुमशक्यत्वादिति भावः। दोषान्तरमाह—**नित्यकर्मेति**। 'वसन्ते वसन्ते ज्योतिषा यजेत', 'अहरहः सन्ध्यामुपासीत' इत्यादयो विधयो व्यर्था एव। विधिं विनापि पूर्वकृतदुरितफलस्य नित्यकर्मानुष्ठानायासदुःखस्यावश्यमनुभोक्तव्यतया तत्प्रारब्धबलादेव नित्यकर्मसु प्रवृत्त्युपपत्तेरिति भावः। इदमेवाह—**उपभोगेनैवेति**।

१. दुरितस्येति शेषः। अप्रसूतफलस्य दुःखफलप्रसूतिः, प्रसूतफलस्य दुरितस्य दुःखफलाप्रसूतिश्चेत्युभयं प्रमाणविरुद्धमित्यर्थः।

**किञ्च [1]श्रुतस्य नित्यस्य दुःखं कर्मणश्चेत् फलम् , नित्यकर्मानुष्ठानायासादेव तद् दृश्यते, व्यायामादिवत् , तदन्यस्येति कल्पनानुपपत्तिः। जीवनादिनिमित्ते च विधानान्नित्यानां कर्मणां प्रायश्चित्तवत् पूर्वकृतदुरितफलत्वानुपपत्तिः । यस्मिन् पापकर्मणि निमित्ते यद् विहितं प्रायश्चित्तम् , न तु तस्य पापस्य तत् फलम्। अथ तस्यैव पापस्य**

अनुभूतिस्वरूपाचार्यटिप्पणम्

इतश्च न पूर्वकृतदुरितफलत्वं कल्पयितुं (न) शक्यत इत्याशयः। किञ्च नित्यानुष्ठानं न पूर्वकृतदुरितफलं विहितत्वात् , प्रायश्चित्तवदित्याह—**जीवनादीति।** ननु प्रायश्चित्तमपि दुरितफलमेवेति साध्यविकलो दृष्टान्त इत्याशङ्क्याह—**यस्मिन्निति।** प्रमाणाभावात् फलान्तरसिद्धेश्च पापस्येत्यर्थः। विपक्षे चानिष्टमाह—**अथ तस्यैवेत्यादिना।**

आनन्दगिरिकृतव्याख्या

**इतश्च नित्यानुष्ठानायासदुःखं नोपात्तदुरितफलमित्याह—**किञ्चेति। **तदेव स्फोरयति—**श्रुतस्येति। **यथा व्यायामगमनादिकृतं दुःखं नान्यस्य दुरितस्येष्यते, तत्फलत्वसम्भवात् , तथा नित्यस्यापि श्रुत्युक्तस्यानुष्ठितस्यायासपर्यन्तस्य फलान्तरानुपगमादनुष्ठानायासदुःखमेव चेत् फलम् , तर्हि तस्मादेव तद्दर्शनात् तस्य न दुरितफलत्वं कल्प्यम् , नित्यफलत्वसम्भवादित्यर्थः। दुःखफलत्वे नित्यानामननुष्ठानमेव श्रेयः स्यादित्याशङ्क्याह—**जीवनादीति। **नित्यानां दुरितफलत्वानुपपत्तौ हेत्वन्तरमाह—**प्रायश्चित्तवदिति। **दृष्टान्तं प्रपञ्चयति—**यस्मिन्निति। **तथा जीवनादिनिमित्ते विहितानां नित्यानां दुरितफलत्वासिद्धिरिति शेषः। सत्यं प्रायश्चित्तं न निमित्तस्य पापस्य फलम् , किन्तु तदनुष्ठानायासदुःखं तस्य पापस्य फलमिति शङ्कते—**अथेति। **प्रायश्चित्तानुष्ठानायासदुःखस्य निमित्तभूतपापफलत्वे जीवनादि-**

भाष्यार्कप्रकाशः

विधिं विनापि प्राप्तेनोपभोगेनैवेत्यर्थः। ज्वरादिदुःखोपभोगवदिति भावः। अप्राप्तार्थप्रापणे हि विधीनामानर्थक्याभावः।

किञ्च नित्यकर्मानुष्ठानात् प्रत्यवायाप्राप्तिः फलमिति ब्रुवतस्तव नित्यकर्मानुष्ठानाद् दुःखं फलमिति वचनं व्याहतम्। व्याहतमप्ययुक्तं चेत्याह—**किञ्चेति**। श्रुतं फलं प्राजापत्यलोकादिकं यस्य तस्य **श्रुतफलस्य**, नित्यकर्मणां पुण्यफलश्रवणादिति बोध्यम्। नित्यस्य कर्मणो दुःखं फलं चेत् तर्हीति शेषः। नित्यकर्मानुष्ठानायासात् तद् दुःखफलं दृश्यत एव। तत्र दृष्टान्तमाह—**व्यायामादिवदिति**। यथा व्यायामादेर्दुःखं फलं दृश्यते, तद्वदित्यर्थः। एवं स्थिते **तद्** दृश्यमानं दुःखं फलम् **अन्यस्य** पूर्वकृतदुरितस्येति कल्पनाया अनुपपत्तेः।

अयं भावः—अश्रुतफलस्य व्यायामादेरिव श्रुतफलस्य नित्यकर्मणो दृष्टदुःखफलत्वकल्पनं तावदयुक्तम्। तत्रापि व्यायामादेः इव नित्यकर्मणोऽपि यदि दृष्टं दुःखं फलं तर्हि तत् कथं पूर्वकृतदुरितफलं स्यात्? न हि व्यायामगमनादिकृतं दुःखमन्यस्य दुरितस्य इष्यते। एवं नित्यकर्मकृतमपि दुःखं न पूर्वदुरितफलम् , किं तर्हि? नित्यकर्मफलमेव, यथा व्यायामादिजन्यदुःखं व्यायामादिफलम्। तस्माच्छ्रुतफलस्य नित्यस्य दृष्टफलव्यायामादिवन्न दुःखं फलम्। नापि नित्यकर्मानुष्ठानायासजन्यं दुःखं पूर्वोपार्जितदुरितफलं व्यायामादिजन्यदुःखवदिति भावः। इतश्च नित्यकर्मानुष्ठानं न पूर्वकृतदुरितफलमित्याह—**जीवनेति**। जीवनादिनिमित्ते नित्यानां कर्मणां विधानाच्च नित्यकर्मणां पूर्वकृतदुरितफलत्वं नोपपद्यते। प्रायश्चित्तवदिति दृष्टान्तं स्वयमेव विवृणोति—**यस्मिन्निति**। यस्मिन् पापकर्मनिमित्तेऽभोज्यभोजनादिपापकर्मरूपे निमित्ते यत्प्रायश्चित्तं चान्द्रायणादिकं शास्त्रेण विहितं तस्य पापस्य कर्मणस्तदेव प्रायश्चित्तं फलं न भवति। तद्वज्जीवनादिनिमित्ते विहितस्य नित्यस्य पूर्वकृतदुरितफलत्वं नोपपद्यत इति।

ननु पापनिमित्ते विहितस्य प्रायश्चित्तस्य पापफलत्वाभावेऽपि प्रायश्चित्तानुष्ठानायासदुःखस्य पापफलत्वमस्त्येव, पापस्य दुःखमेव फलमिति नियमात्। एवं जीवनादिनिमित्ते विहितस्य नित्यस्य पूर्वकृतदुरितफलत्वाभावेऽपि नित्यकर्मानुष्ठानायासदुःखस्य तत्फलत्वमस्त्येवेति शङ्कते—**अथेति**। तस्य प्रायश्चित्तं प्रति निमित्तभूतस्य पापस्यैव फलं प्रायश्चित्तदुःखमिति यदि त्वं ब्रूषे, तर्हीति शेषः। जीवनादिनिमित्तमपि नित्यकर्मानुष्ठानायासदुःखं जीवनादिनिमित्तस्यैव फलं प्रसज्येत। पापनिमित्तविहितप्रायश्चित्तानुष्ठानायास-

१. 'श्रुतफलस्य' इति रा.पा. भाति।

**निमित्तस्य प्रायश्चित्तदुःखं फलम् , [१]जीवनादिनिमित्तमपि नित्यकर्मानुष्ठानायासदुःखं जीवनादिनिमित्तस्यैव (तत् ) फलं प्रसज्येत, नित्यप्रायश्चित्तयोर्नैमित्तिकत्वाविशेषात्।**

आनन्दगिरिकृतव्याख्या

**निमित्तनित्याद्यनुष्ठानायासदुःखमपि जीवनादेरेव फलं स्यात् , नोपात्तदुरितस्येति परिहरति—** जीवनादीति। **प्रायश्चित्तदुःखस्य [२]तन्निमित्तपापफलत्ववज्जीवनादिनिमित्तकर्मकृतमपि दुःखं जीवनादिफलमित्यत्र हेतुमाह—**नित्येति।

भाष्यार्कप्रकाशः

जन्यं दुःखं यथा पापफलम् , तथा जीवनादिनिमित्तविहितनित्यकर्मानुष्ठानायासजन्यदुःखं जीवनादिनिमित्तस्यैव फलं स्यात् ; न तु पूर्वकृतदुरितस्येत्यर्थः। ननु नित्यस्य नैमित्तिकेन प्रायश्चित्तेन कथं साम्यम्? अत आह—**नित्येति**। यथा पापनिमित्ते प्रायश्चित्तं विहितं, तथा जीवनादिनिमित्ते नित्यं विहितमिति नित्यप्रायश्चित्ते उभे अपि नैमित्तिके एव। निमित्ते विहितं हि नैमित्तिकम्।

**ननु** निमित्तशब्दैक्येऽपि निमित्तार्थयोर्हेतुफलयोर्भेद एव। प्रकृते च प्रायश्चित्तस्य पापं **निमित्तं** हेतुः। नित्यकर्मणो जीवनादिकं निमित्तं फलम् , पापनिवर्तकत्वात्प्रायश्चित्तस्य, जीवनादिनिर्वर्तकत्वाच्च नित्यस्य। तस्मान्न नित्यप्रायश्चित्तयोः साधर्म्यमिति चेत् , **मैवम्** ; यथा पापनिमित्ते प्रायश्चित्तं विहितं तथा जीवनादिनिमित्ते नित्यं विहितमित्येतावदंशस्यैव विवक्षितत्वादिह। न हि सर्वात्मना सादृश्यं वयं तयोर्ब्रूम इति। **वस्तुतस्तु** पापनिवृत्त्यर्थं विहितं प्रायश्चित्तम् , जीवनादिनिर्वृत्त्यर्थं विहितं नित्यमिति नित्यप्रायश्चित्तयोः अविशेषानभ्युपगमेऽपि प्रायश्चित्तवत्पूर्वोपचितदुरितक्षयार्थं नित्यकर्मेति यदुक्तं **मीमांसकेन,** तन्नोपपद्यत एव, प्रायश्चित्तस्य दुरितक्षयार्थत्वेऽपि नित्यस्य जीवनाद्यर्थत्वेन दुरितक्षयार्थत्वाभावात्। नित्यकर्मणां जीवनादिनिमित्ते च विधानादिति स्वेनैवोक्तत्वात्।

**ननु** नित्यकर्मसु कानिचिद् दुरितक्षयार्थानि, कानि[चित्] पुनर्जीवनाद्यर्थानि। यथा ब्राह्मणस्य यजनाध्ययनदानानि दुरितक्षयार्थानि, याजनाध्यापनप्रतिग्रहणानि जीवनाद्यर्थानीति चेत् , **मैवम्** ; यजनादीनां चान्द्रायणादिवद् दुरितक्षयार्थत्वे सति प्रायश्चित्तत्वप्रसङ्गेन नित्यत्वस्यैवाभावात्। यजनादीनां ब्राह्मणवर्णधर्मत्वेन तेषां दुरितक्षयार्थत्वकल्पनायोगाच्च। न च – अकरणे प्रत्यवायप्रापकत्वं नित्यत्वम् , तत् प्रायश्चित्तस्य नास्तीति नित्यप्रायश्चित्तयोर्विशेषः; वर्णधर्माश्च दुरितक्षयार्था एवेति – वाच्यम् ; प्रायश्चित्तस्याप्यकरणे नरकपातलक्षणप्रत्यवायसत्त्वात्। अन्यथा प्रायश्चित्तस्याकर्तव्यत्वापातात्। वर्णधर्माणां दुरितक्षयार्थत्वे तैरेव दुरितक्षये कृते सति प्रायश्चित्तविधिवैयर्थ्यप्रसङ्गाच्च।

**ननु** इहजन्मकृतदुरितक्षयार्थानि प्रायश्चित्तानि, तदकरणे च दुरितफलस्यैव जन्मान्तरेऽनुभवः; न तु प्रायश्चित्ताकरणादपूर्वं किञ्चिद् दुरितमुत्पद्यते। नित्यानि तु जन्मान्तरकृतदुरितक्षयार्थानि, तदकरणे चापूर्वं किञ्चिद् दुरितमुत्पद्यत इति नित्यप्रायश्चित्तयोर्भेद इति चेत् , **अस्तु**। किं प्रायश्चित्तनिवर्त्यमिव नित्यकर्मनिवर्त्यं दुरितं फलदानायानारब्धमुतारब्धम्? आद्ये, नित्यकर्मभिः सञ्चितदुरितक्षयानुपपत्तौ मोक्षानुपपत्तिः। द्वितीये, प्रायश्चित्तवदिति दृष्टान्तानुपपत्तिः। न हि हिंसादिलक्षणमिहजन्मनि कृतं दुरितं फलदानायारब्धं भवितुमर्हति यत् प्रायश्चित्तेन निवर्त्यते। फलदानायेदं मया कृतं दुरितमारब्धं मा भूदिति हि तस्य प्रायश्चित्तं करोति पापी। किञ्च फलदानायारब्धस्य दुरितस्य फलोपभोगेनैव क्षयः। 'प्रारब्धं भोगतो नश्ये'दिति शास्त्रादिति कृत्वा तत्क्षयार्थं नित्यकर्मानुष्ठानं व्यर्थमेव; तद्विधिश्च व्यर्थ एव।

न च जन्मान्तरकृतस्य दुरितस्य नित्यकर्मानुष्ठानायासजन्यदुःखोपभोगेनैव क्षय इति वाच्यम् ; अन्यव्यायामादिदुःखोपभोगेन तस्य न क्षय इति वक्तुमयुक्तत्वाद् अन्यदुःखोपभोगस्य जन्मान्तरकृतदुरितहेतुकत्वाभावस्य सिद्धत्वेन तद्दुःखस्य निर्निमित्तकत्वापत्तेश्च। अथैतद्दोषपरिहाराय सर्वमपि दुःखं पूर्वकृतदुरितफलमेवेत्यभ्युपगम्यते, तर्हि नित्यकर्मैवानुष्ठाय तदायासदुःखेनैव पूर्वकृतदुरितं क्षपणीयमिति कथमुच्यते? किं तर्हि? काम्यकर्माप्यनुष्ठाय तद्दुःखेन तद्दुरितं क्षपणीयमेव। अपि च प्रारब्धवशाद् यथा नित्यकर्मानुष्ठानायास-

---

१. 'यावज्जीवमग्निहोत्रं जुहोति' इत्यादिवाक्यैः जीवने निमित्ते विहितं कर्म अकरणे प्रत्यवायकरत्वात् नित्यं कर्म। 'जीवनादिनिमित्तेऽपि' इति पा.। २. तन्निमित्तेति। प्रायश्चित्तनिमित्तेत्यर्थः।

**किञ्चान्यत् नित्यस्य काम्यस्य चाग्निहोत्रादेरनुष्ठानायासदुःखस्य तुल्यत्वाद् नित्यानुष्ठानायासदुःखमेव पूर्वकृतदुरितस्य फलम् , न तु काम्यानुष्ठानायासदुःखमिति विशेषो नास्तीति तदपि पूर्वकृतदुरितफलं प्रसज्येत। तथा च सति नित्यानां फलाश्रवणात् तद्विधानान्यथानुपपत्तेश्च नित्यानुष्ठानायासदुःखं पूर्वकृतदुरितफलम् इत्यर्थापत्तिकल्पनाऽनुपपन्ना। एवं विधानान्यथानुपपत्तेरनुष्ठानायासदुःखव्यतिरिक्तफलत्वानुमानाच्च नित्यानाम्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

इतश्च नित्यानुष्ठानायासदुःखमात्रं दुरितफलं वक्तुं न शक्यत इत्याह—**किञ्चान्यदिति।** काम्यानुष्ठानायासकृतदुःखमपि पूर्वकृतदुरितफलमित्येवं स्थिते या पूर्वमर्थापत्तिकल्पना कृता, साऽप्यनुपपन्ना। पूर्वकृतदुरितस्य फलान्तरलाभादित्यर्थः। निष्फलस्य नित्यस्य विधानानुपपत्तेर्दुरितफलत्वेन विधानं वक्तव्यमित्यत्रार्थापत्त्यनुद(ति)ये सति फलान्तरमेवाध्यापत्त्या[वार्थापत्त्या] वक्तव्यमित्याह—**एवं विधानेति।** काम्यवन्नित्यस्यापि विधानान्यथानुपपत्त्याऽनुष्ठानायासव्यतिरिक्तफलत्वमेव वक्तव्यमित्यर्थः। नित्यानि नायासमात्रफलानि, विहितत्वात् , काम्यवदिति अनुमानमपि शक्यत इत्याह—**अनुष्ठानायासेति।**

आनन्दगिरिकृतव्याख्या

**इतश्च नित्यानुष्ठानायासदुःखमेवोपात्तदुरितफलमित्यशक्यं वक्तुमित्याह—**किञ्चेति। **काम्यानुष्ठानायासदुःखमपि दुरितफलमित्युपगमात् प्रसङ्गस्येष्टत्वमाशङ्क्याह—**तथा चेति। **विहितानि तावन्नित्यानि। न च तेषु फलं श्रुतम्। न च विना फलं विधिः। तेन दुरितनिबर्हणार्थानि नित्यानीत्यर्थापत्त्या कल्प्यते। न च सा युक्ता, काम्यानुष्ठानादपि दुरितनिवृत्तिसम्भवादित्यर्थः। किञ्च नित्यानि अनुष्ठानायासदुःखातिरिक्तफलानि, विहितत्वात् , काम्यवदित्यनुमानान्न तेषां दुरितनिवृत्त्यर्थतेत्याह—**एवमिति। **काम्यादिकर्म दृष्टान्तयितुम्** एवमित्युक्तम्।

भाष्यार्कप्रकाशः

दुःखप्राप्तिः, तथा तद्वशादेव काम्यकर्मानुष्ठानायासदुःखप्राप्तिरिति कृत्वा कथं काम्यकर्मदुःखस्य परित्यागः शक्यते कर्तुम्? तदिदमभिप्रेत्याह—**किं चान्यदिति।** अन्यदपि दूषणमस्तीत्यर्थः। नित्यस्य काम्यस्य वा सर्वस्यापि कर्मणोऽनुष्ठानायासजन्यं दुःखं पूर्वोपात्तदुरितफलमेव, न तु नित्यानुष्ठानजन्यं दुःखं पूर्वकृतदुरितफलं, काम्यानुष्ठानजन्यं दुःखं तु पूर्वकृतदुरितफलं न भवतीति विशेषोऽस्ति। इति हेतोस्तदपि काम्यानुष्ठानदुःखमपि पूर्वकृतदुरितफलं **प्रसज्येत** स्यादित्यर्थः। भवतु काम्यानुष्ठानदुःखस्यापि पूर्वकृतदुरितफलत्वप्रसङ्गः, को दोषस्तत्रेत्यत आह—**तथा च सतीति।** काम्यानुष्ठानदुःखस्यापि दुरितफलत्वे सतीत्यर्थः। **अर्थापत्तिकल्पनेति।** पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र दिवाभोजनाभावेऽपि प्राप्तस्य पीनत्वस्यान्यथानुपपत्त्या रात्रिभोजनमर्थापत्तिप्रमाणेन यथा कल्प्यते, तद्वन्निष्फलनित्यकर्माविधानान्यथानुपपत्त्या अर्थापत्तिप्रमाणेन कल्पितं यन्नित्यकर्मानुष्ठानदुःखस्य पूर्वकृतदुरितफलत्वं कथं तदुपपद्यते? सफलकाम्यकर्मानुष्ठानजन्यदुःखस्यापि पूर्वकृतदुरितफलत्वेन निष्फलनित्यकर्मानुष्ठानजन्यदुःखमेव पूर्वकृतदुरितफलमिति वक्तुमशक्यत्वादिति भावः। भवत्वेवमर्थापत्तिकल्पनाया अनुपपत्तिः, किं ततः? अत आह—**एवमिति।** अर्थापत्तिकल्पनाया अनुपपन्नत्वे सतीत्येवंशब्दार्थः। नित्यकर्मणोऽनुष्ठानायासदुःखव्यतिरिक्तं फलमस्ति, नित्यकर्मविधेरन्यथोपपत्त्यभावात् काम्यकर्मवदित्यनुमानाच्च नित्यानां फलवत्त्वसिद्धिः। चकाराच्छास्त्रादपीत्यर्थः।

**विरोधाच्चेति।** नित्यकर्मणः फलाभाववचनस्य विरुद्धत्वाच्चेत्यर्थः।

**यद्वा** अर्थापत्तिकल्पनाया अनुपपत्तावेकं कारणमुक्तं काम्यानुष्ठानदुःखस्यापि पूर्वकृतदुरितफलत्वप्रसक्तिरूपम्। कारणान्तरमाह—[**एवमिति।**] अनुमानाच्चोक्तार्थापत्तिकल्पना अनुपपन्नेत्यर्थः। अनुमानं च दर्शितम्। यदि नित्यकर्मानुष्ठानस्य प्रारब्धदुरितकृतनित्यानुष्ठानायासदुःखमेव फलम् , तर्हि प्रारब्धवशादेव तद्दुःखानुभवसिद्धौ व्यर्थमेव नित्यकर्मविधानमिति नित्यकर्म-

**विरोधाच्च। विरुद्धं चेदमुच्यते— नित्यकर्मण्यनुष्ठीयमानेऽन्यस्य कर्मणः फलं भुज्यत इत्यभ्युपगम्यमाने स एवोपभोगो नित्यस्य कर्मणः फलमिति, नित्यस्य कर्मणः फलाभाव इति च विरुद्धमुच्यते। किञ्च काम्याग्निहोत्रादौ अनुष्ठीयमाने नित्यमप्यग्निहोत्रादि तन्त्रेणैवानुष्ठितं भवतीति तदायासदुःखेनैव काम्याग्निहोत्रादिफलमुपक्षीणं स्यात् , तत्तन्त्रत्वात्।**

**अथ काम्याग्निहोत्रादिफलमन्यदेव स्वर्गादि , तदनुष्ठानायासदुःखमपि भिन्नं प्रसज्येत। न च तदस्ति, दृष्ट-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

किञ्च नित्यस्य फलं नास्तीति प्रतिज्ञायाः विरोधप्रसङ्गादपि नायासमात्रफलं त्वया नित्यस्य वक्तव्यमित्याह—**विरुद्धं चेत्यादिना**। इतश्च नायासमात्रफलं नित्यमित्याह—**किञ्च काम्येति**। [१]सकृदनुष्ठितम् अनेकोपकारकं तन्त्रम्। यथा सकृदनुष्ठितं प्रयाजाद्याग्नेयादित्रयस्योपकारकम्। तथैकमेवाग्निहोत्रादि यथा[यदा] नित्यबुद्ध्या काम्यबुद्ध्या च तन्त्रेणानुष्ठीयेत, तदा नित्यस्य चिदायासमात्रेणोपक्षयः[चेदायासमात्रेणोपक्षयः,] तदा काम्यस्यापि स्याद् अनुष्ठानैक्यादित्यर्थः।

काम्यत्वसिद्ध्यन्यथानुपपत्त्यैवाधिकं फलं वक्तव्यमित्याह—**अथ काम्येति**। दूषणमाह—**तदनुष्ठानायासेति**।

आनन्दगिरिकृतव्याख्या

**स्वोक्तिव्याघाताच्च नित्यानुष्ठानाद् दुरितफलभोगोक्तिरयुक्तेत्याह—**विरोधाच्चेति। **तदेव प्रपञ्चयति—**विरुद्धं चेति। **इदंशब्दार्थमेव विशदयति—**नित्येति। अन्यस्य कर्मणो **दुरितस्येति यावत्।** स एवेति। [२]**यदनन्तरं यद् भवति तत् तस्य कार्यमिति नियमादित्यर्थः। इतश्च नित्यानुष्ठाने दुरितफलभोगो न सिध्यतीत्याह—**किञ्चेति। **काम्यानुष्ठानस्य नित्यानुष्ठानस्य च यौगपद्यान्नित्यानुष्ठानायासदुःखेन दुरितफलभोगवत् काम्यफलस्यापि भुक्तत्वसम्भवादिति हेतुमाह—** तत्तन्त्रत्वादिति।

**नित्यकाम्यानुष्ठानयोर्यौगपद्येऽपि नित्यानुष्ठानायासदुःखादन्यदेव काम्यानुष्ठानफलम् , श्रुतत्वादिति शङ्कते—** अथेति।

भाष्यार्कप्रकाशः

विधानान्यथानुपपत्तिरेव नित्यानां दुःखातिरिक्तफलसद्भावं साधयतीत्यर्थः।

कारणान्तरमाह—**विरोधाच्चेति**। विरोधाच्चार्थापत्तिकल्पना अनुपपन्नेत्यर्थः। विरोधमेव प्रकटयति—**विरुद्धं चेदमुच्यत इति**। किं तद्? अत आह—**नित्येति**। नित्यकर्मणि क्रियमाणे सत्यन्यस्य पूर्वकृतदुरितस्य कर्मणः फलं भुज्यत इत्यभ्युपगम एको विरोधः। तथा अभ्युपगम्यापि स एव पूर्वकृतदुरितफलभूतस्य नित्यकर्मानुष्ठानायासजन्यदुःखस्योपभोगो नित्यकर्मणः फलमिति वचनमन्यो विरोधः। एवं नित्यस्य दुःखं फलमित्यभ्युपगम्यापि नित्यकर्मणः फलवत्त्वाभाव इति वचनं तृतीयो विरोधः। तस्माद् विरुद्धं तदिदं यत् त्वयोच्यते नित्यानां फलाश्रवणान्नित्यानुष्ठानायासदुःखं पूर्वकृतदुरितफलमिति।

दूषणान्तरमाह—**किं चेति**। अग्निहोत्रादिकर्मणां नित्यत्वकाम्यत्वप्रयुक्तो न कोऽपि स्वरूपभेदः। क्रियाकारकमन्त्रोपकरण-कलापस्य तुल्यत्वान्नित्ये काम्ये चाग्निहोत्रादिकर्मणि। किं तर्हि? तदनुष्ठातुः सकामत्वनिष्कामत्वाभ्यामेव नित्यकाम्ययोर्भेदः। 'वसन्ते वसन्ते ज्योतिषा यजेते'ति विहितो नित्य एव ज्योतिष्टोमः 'ज्योतिष्टोमेन स्वर्गकामो यजेते'ति स्वर्गकामिना अनुष्ठीयमानः सन् काम्यो भवति। एवं सति नित्याज्ज्योतिष्टोमात् काम्यस्य ज्योतिष्टोमस्य कामांश एक एवाधिकः, तदतिरिक्तः सर्वोऽप्यविशिष्ट एवेति कृत्वा काम्ये तस्मिन्ननुष्ठीयमाने सति नित्योऽप्यनुष्ठित एव। ततश्च काम्यकर्मणोऽपि नित्यकर्मण इव नित्यानुष्ठानायसदुःखं फलमेवेति कृत्वा नित्या-नुष्ठानायासदुःखेनैव काम्यकर्मणोऽपि फलस्योपक्षयः स्यात् , आयासदुःखतन्त्रत्वात् काम्यफलस्य। अयं भावः—नित्यानुष्ठानायास-दुःखोपभोगद्वारा यथा नित्यस्य कृतस्य कर्मणः क्षयः, तथा काम्यस्यापीति कृत्वा नातिरिक्तं स्वर्गादिलक्षणं फलं भवितुमर्हति

१. अनेकोद्देशेन सकृदनुष्ठानं तन्त्रम्। यथा आग्नेयोपांशुयाजाग्नीषोमीययागान् त्रीनुद्दिश्य सकृत् प्रयाजाद्यङ्गानुष्ठानम्। इह तु अनुष्ठानैक्यमात्रं तन्त्रमिति विवक्षि-तम्। २. नित्यकर्मानुष्ठानायासः पूर्वकृतदुरितस्य फलमित्युक्तम् , न तु नित्यकर्मानुष्ठानस्येति कथं स एवोपभोगो नित्यस्य कर्मणः फलमिति भाष्यसंगतिरित्या-शङ्कायामाह — यदनन्तरमिति।

**विरोधात्। न हि काम्यानुष्ठानायासदुःखात् केवलनित्यानुष्ठानायासदुःखं [१]भिद्यते।**

**किञ्चान्यत् , अविहितमप्रतिषिद्धं च कर्म तत्कालफलम् , न तु शास्त्रचोदितं प्रतिषिद्धं वा तत्कालफलम्[२]।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

पूर्वं क्रियास्वरूपप्रयुक्तस्यायासदुःखस्य फलत्वमभ्युपगम्य तावन्मात्रफलत्वं न सम्भवतीत्युक्तम्। इदानीं तु अदृष्टमेव नित्यस्य फलं वक्तव्यमित्याह—**किञ्चान्यदिति।** नित्यं कर्म न क्रियास्वरूपप्रयुक्तफलम् , चोदितत्वात् , काम्यवदित्यर्थः। किञ्च नित्यकाम्ययोः न स्वरूपे कश्चिद्विशेषोऽस्ति, उत्पत्त्यादिविधीनामविशेषात्। किन्तु अधिकारभेदादेव भेदः।

आनन्दगिरिकृतव्याख्या

**काम्यानुष्ठानफलं नित्यानुष्ठानायासदुःखाद्भिन्नं चेत् , तर्हि काम्यानुष्ठानायासदुःखं नित्यानुष्ठानायासदुःखं च मिथो भिन्नं स्यादित्याह—** तदनुष्ठानेति। **प्रसङ्गस्येष्टत्वमाशङ्क्य निराचष्टे—**न चेति। **दृष्टविरोधमेव स्पष्टयति—**न हीति।

**आत्मज्ञानवदग्निहोत्रादीनां मोक्षे साक्षादन्वयो नेत्यत्रान्यदपि कारणमस्तीत्याह—**किञ्चान्यदिति। **तदेव कारणं विवृणोति—** अविहितमिति। **यत् कर्म मर्दनभोजनादि (तत्) न शास्त्रेण विहितं निषिद्धं वा, तद् अनन्तरफलम् , तथाऽनुभवादित्यर्थः। शास्त्रीयं कर्म तु नानन्तरफलम् , आनन्तर्यस्याचोदितत्वात्[३]। अतो ज्ञाने दृष्टफले नादृष्टफलं कर्म सहकारि भवति। नापि स्वयमेव दृष्टफले मोक्षे कर्म प्रवृत्तिक्षममिति विवक्षित्वाऽऽह—**न त्विति। **शास्त्रीयस्याग्निहोत्रादेरपि फलानन्तर्ये स्वर्गादीनामनन्तरमनुपलब्धिर्विरुध्येत। ततस्तेष्वदृष्टे**

भाष्यार्कप्रकाशः

काम्यस्यापीति।

ननु नित्यस्यैवानुष्ठानायासदुःखं फलम् , न तु काम्यस्य, तस्य स्वर्गादिफलश्रवणादित्याह—**अथेति**। अथ काम्याग्निहोत्रादिफलं स्वर्गादिरूपमन्यदेवेति यदि ब्रूषे, तर्हीति शेषः। **तदनुष्ठानेति**। काम्यानुष्ठानेत्यर्थः। **भिन्नमिति**। नित्यानुष्ठानायासदुःखादिति भावः। अभिन्नत्वे तु तेनैव काम्यस्य क्षयः स्यादिति भावः। भवतु भिन्नम् , किं ततः? आह—**न चेति**। **तत्** नित्यानिष्ठानायासदुःखात् काम्यानुष्ठानायासदुःखस्य भिन्नत्वमित्यर्थः। **न चास्ति** नैवास्ति। कुतः? **दृष्टविरोधात्** प्रत्यक्षविरोधात्। दृष्टविरोधमेवोपपादयति—**न हीति**। हिः प्रसिद्धौ। भिन्नं दुःखं न दृश्यत इत्यन्वयः।

अयं भावः—यदि नित्यकाम्याग्निहोत्रयोर्न स्वरूपभेदः, नाप्यनुष्ठानायासदुःखरूपफलभेदः, तर्ह्यनुष्ठानायासदुःखेन नित्यस्येव काम्यस्य कुतो न क्षयः? न च स्वर्गादिफलत्वादक्षय इति वाच्यम् ; यदि दुःखोपभोगात् काम्यस्य क्षयो न स्यात् , तर्हि स्वर्गादिफलवत्त्वं स्यात्। क्षयाभाव एव नोपपद्यते। सर्वस्यापि कृतस्य कर्मणः फलोपभोगेन क्षय इत्यभ्युपगमादनुष्ठानायासदुःखस्य च कर्मफलत्वात्। एवमनुष्ठानदुःखोपभोगेनैव क्षीणस्य काम्यस्य कथं स्वर्गादिफलप्रदत्वम्? न ह्यङ्कुरमुत्पाद्य क्षीणं बीजमङ्कुरान्तरमुत्पादयति। तस्मात् स्वर्गादिरूपं काम्याग्निहोत्रफलमन्यदेवेति वक्तुं न शक्यते। अथैतत्साधनाय नित्याग्निहोत्रानुष्ठानायासदुःखमेव फलम् , न तु काम्याग्निहोत्रानुष्ठानायासदुःखमिति कल्प्यते, तर्हि किं नित्यदुःखात् काम्यदुःखं भिन्नमुताभिन्नम्? आद्ये, प्रत्यक्षविरोधः। द्वितीये, काम्यदुःखफलमेवेति। तस्मात् काम्यस्याप्यग्निहोत्रादेर्नित्यस्येवानुष्ठानायासदुःखमेव फलम् , न तु स्वर्गादिकमिति कृत्वा कथं काम्यस्य फलवत्त्वं नित्यस्य तदभावश्चोच्यते त्वया?

दूषणान्तरमाह—**किं चान्यदिति**। यत् कर्म शास्त्रेणाविहितम् , यच्च शास्त्रेणाप्रतिषिद्धम् , तदेव व्यायामादि लौकिकं कर्म, **तत्कालफलं** कर्मसमकालदृष्टफलकमित्यर्थः। यत्पुनः शास्त्रेण चोदितं प्रतिषिद्धं वा कर्म, तन्न तत्कालफलं भवेत्। अत एव हि 'प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते। एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥' इति वेदस्य शास्त्रस्य लक्षणं स्मर्यते। न हि

---

१. 'भिन्नं दृश्यते' इति पा.। २. 'फलं भवेत्। तदा' इति पा.। ३. कर्मफले कर्मानुष्ठानाव्यवहितोत्तरकालोत्पत्तेः विधिनाऽबोधितत्वादित्यर्थः। तथा च कस्यचित् फलस्य दृष्टसामग्रीवैकल्येन, प्रतिबन्धकसत्त्वेन वा अनन्तरानुत्पत्तावपि शास्त्रप्रामाण्यमक्षतमिति।

आनन्दगिरिकृतव्याख्या

**अपि तथाविधफलापेक्षया प्रवृत्तिरग्निहोत्रादिषु न स्यादित्याह—तदेति। किञ्च नित्यानामग्निहोत्रादीनां नादृष्टं फलम् , तेषामेव काम्यानां**

भाष्यार्कप्रकाशः

दृष्टस्य फलस्योपायः प्रत्यक्षानुमित्यविषयः स्यात् ; किं त्वदृष्टस्य फलस्यैव। तस्माददृष्टफलसाधनबोधनेनैव शास्त्रमर्थवत्। न हि 'ऋतौ भार्यामुपेयात् , न कलञ्जं भक्षयेत् , न सुरां पिबेदि'त्यादिविधिनिषेधवाक्यानां किमपि दृष्टं फलमस्ति। न च ऋतौ भार्योपगमनात् सुखं दृश्यत एवेति वाच्यम् ; अनृतौ भार्यागमनादपि दर्शनाद् ऋतौ तद्गमनविधानस्य वैयर्थ्यादिति। ननु शास्त्रचोदितं शास्त्रप्रतिषिद्धं च कर्मापि तत्कालफलमेवेत्यत आह—[१]**अन्यथेति**। शास्त्रचोदितप्रतिषिद्धयोरपि तत्कालफलत्वे सतीत्यर्थः। स्वर्गादिष्वदृष्टफलेषु शासनोद्यमो न स्यात् , शास्त्रस्येति शेषः, ईश्वरस्येति वा। 'अदृष्टफलशासने'ति पाठे स्वर्गादिषु कामितेषु विषयेऽदृष्टं स्वर्गादिलक्षणं फलं येषां तेषामदृष्टफलानां ज्योतिष्टोमादिकर्मणां शासनोद्यम इत्यर्थः। 'स्वर्गाद्यदृष्टफलशासनोद्यम' इति पाठः समीचीनः। तस्मान्नित्यस्य काम्यस्य वा कर्मणः शास्त्रविहितस्य न तत्कालफलत्वमिति कृत्वा दृष्टमनुष्ठानायासदुःखं न तत्फलं भवितुमर्हति। दुःखार्थं कर्मणाम् अविहितत्वाच्छास्त्रेण। यदि दुःखायैव विहितानि कर्माणि स्युस्तर्हि न कोऽपि तत्र प्रवर्तत इति वैयर्थ्यमेवमपि स्याच्छास्त्रस्य।

**ननु** न व्यर्थं शास्त्रम् , पूर्वकृतदुरितक्षयः कर्मानुष्ठानदुःखोपभोगेनैव कर्तव्य इति विधानादिति चेत् , **मैवम्** ; किं दुरितक्षयः सामान्यदुःखोपभोगेन भवति? उत विशेषदुःखोपभोगेन? आद्ये, कर्मविधिवैयर्थ्यम् , शिरःपाषाणवहनादिदुःखेनापि दुरितक्षयसत्त्वात्। द्वितीये, कर्मानुष्ठानायासदुःखातिरिक्तद्वन्द्वरोगादिदुःखं न स्यात् पुरुषस्य। सति तस्मिन् दुरितक्षयस्यावर्जनीयत्वात्। न च पूर्वकृतदुरितक्षयः कर्मानुष्ठानायासदुःखोपभोगेनापि कर्तव्य इति शास्त्रमर्थवदिति वाच्यम् ; द्वन्द्वरोगादिदुःखोपभोगेनैव क्षीयमाणस्य दुरितकर्मणः क्षयार्थं नित्यादिकर्मविधानानर्थक्यात्। न च कर्मानुष्ठानायासदुःखक्षपणीयं पूर्वकृतं दुरितमन्यत्। द्वन्द्वरोगादिदुःखोपभोगक्षपणीयं दुरितमपरम्। यथा जठररोगदुःखोपभोगक्षपणीयं दुरितमन्यत् , शिरःपाषाणवहनादिदुःखक्षपणीयमपरम् , तद्वत्। अत एव 'न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हती'ति स्मृतिरपि सङ्गच्छते। अग्निहोत्रादिकर्मानुष्ठानायासजन्यदुःखोपभोगनिवर्त्यपातकाभावाच्छूद्रस्योपनयनादिसंस्काराभावः। कर्मार्थो हि स संस्कारः। द्विजेषु तु तादृशपातकसत्त्वात् संस्कारविधानमिति वाच्यम् ; द्वन्द्वरोगादितुल्यमग्निहोत्रादिकं विहितं कर्म। सपापेभ्यो द्विजेभ्यो निष्पापः शूद्र एवाधिक इति कल्पयितुस्तव साहसस्य वाचामगोचरत्वात्। सत्त्वस्वभावस्य ब्राह्मणस्य सपापत्वम् , तमःस्वभावस्य शूद्रस्य निष्पापत्वं च विचित्रायते। एवं सति संस्कारानर्हाणां चण्डालपक्षिपशुस्थावरादीनां तमःस्वभावानामपि निष्पापत्वं स्यात्। न चेष्टापत्तिः, 'वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्। शरीरजैः कर्मदोषैर्याति स्थावरतां नरः' इति स्मृतिविरोधात्। शूद्रादीनां पापस्वभावात् , ब्रह्मणादीनां पुण्यस्वभावादेव कर्माधिकारो ब्राह्मणादीनाम् ; वेदाधिकारश्च। उक्तं हि भगवतैव– 'तन्मन्त्रं ब्राह्मणाधीनं ब्राह्मणो मम दैवत'मिति, 'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा' इति। किञ्च निष्पापत्वाच्छूद्रः संस्कारानर्हः, सपापत्वाद् द्विजः संस्कारार्ह इति महदसङ्गतम्। संस्कारानर्हत्वस्यैव पापकार्यत्वात्। न हि यजनादिकर्मार्हत्वं ब्राह्मणस्य पापफलमिति वक्तुं शक्यते। तथा सति गमनादिकर्मार्हत्वमपि चराणां भूतानां पापफलमेव, स्थावराण्येव महापुण्यानीति वक्तव्यत्वात्। तस्मात् तमःस्वभावत्वेन सपापत्वादेव शूद्राणामुपनयनाद्यनर्हत्वम् , न तु निष्पापत्वात्। न हि शतवारम् उपदिष्टोऽपि शूद्रो वेदाक्षरमुच्चारयितुं क्षमते। न हि तत्पुण्यस्य फलम् , अन्यथा ग्राम्याक्षरोच्चारणाशक्तिर्मूकस्यापि पुण्यफलं स्यात्। 'न शूद्र' इति वचनस्य तु देवर्षिपितृऋणात्मकं पातकं किञ्चिदपि शूद्रे नास्ति। द्विजो हि जन्मनैव त्रिभिः ऋणवान् जायते। स शूद्रः संस्कारं च नार्हति, तमःस्वभावत्वेनातिपापित्वादित्यर्थः। एवं सत्त्वस्वभावस्य ब्राह्मणस्य विहितं यजनादिलक्षणं नित्यकर्म कथं द्वन्द्वरोगादिवत् पापफलं भवितुमर्हति? यदि नित्यकर्म यजनादिकं पापफलं स्यात् तर्हि तमःस्वभावस्यैव पापीयसः शूद्रस्य चण्डालस्य वा तद् विहितं भवेत्। नापि श्रुतमहाफलस्य नित्यकर्मणः पूर्वकृतपापफलत्वं वक्तुमुचितम्। न हि पूर्वकृतदुरितफलस्य द्वन्द्वरोगादेर्महाफलत्वं श्रूयत इति।

---

१. 'तत्कालफलम् , अन्यथा स्वर्गाद्यदृष्टफलशासनोद्यमो न स्यात्' इति रा.पा. भाति।

**भवेद् यदि, तदा स्वर्गादिष्वपि [१]अदृष्टफलशासने चोद्यमो न स्यात्। अग्निहोत्रादीनामेव कर्मस्वरूपाविशेषेऽनुष्ठानायासदुःखमात्रेणोपक्षयः नित्यानाम् , काम्यानां च स्वर्गादिमहाफलत्वम् अङ्गेतिकर्तव्यताद्याधिक्ये त्वसति फलकामित्वमात्रेणेति [२]न शक्यं कल्पयितुम्। [३]तस्मान्न नित्यानां कर्मणामदृष्टफलाभावः कदाचिदप्युपपद्यते।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

तावन्मात्रेण च नित्यानामायाससमात्रं फलम् , काम्यानां तु स्वर्गादि फलमिति न शक्यते वक्तुमित्याह—**अग्निहोत्रादीनामेवेति**। यस्मान्नित्यानां काम्यवन्नित्याधीनमेव फलं 'कर्मणा पितृलोकः' इत्यादिश्रुतिसिद्धं वक्तव्यम् , **तस्मादि**त्युपसंहारः।

आनन्दगिरिकृतव्याख्या

**तादृक्फलम् , न च हेतुं विनाऽयं विभागो भावीत्याह—**अग्निहोत्रादीनामिति। फलकामित्वमात्रेणेति। **न स्यादिति पूर्वेण सम्बन्धः। यानि नित्यान्यग्निहोत्रादीनि यानि च काम्यानि, तेषामुभयेषामेव कर्मस्वरूपविशेषाभावेऽपि नित्यानां तेषामनुष्ठानायासदुःखमात्रेण क्षयो न फलान्तरमस्ति, तेषामेव काम्यानामङ्गाद्याधिक्याभावेऽपि फलकामित्वमधिकारिण्यस्तीत्येतावन्मात्रेण स्वर्गादिमहाफलत्वमित्ययं विभागो न प्रमाणवानित्यर्थः। उक्तविभागायोगे फलितमाह—**तस्मान्नेति।

भाष्यार्कप्रकाशः

**ननु** काम्यानामेव महाफलत्वश्रवणम् , न तु नित्यानामिति काम्यकर्मणां न द्वन्द्वरोगादितौल्यम् ; किन्तु नित्यानामेव। नित्यानि हि अनुष्ठानायासदुःखोपभोगमात्रेण क्षीयन्ते। एवं दृष्टदुःखफलकत्वाददृष्टफलाभावाच्च नित्यानि द्वन्द्वरोगादितुल्यान्येवेति कृत्वा पूर्वकृतदुरितफलमेव नित्यानुष्ठानमिति शङ्कायामाह—**अग्निहोत्रादीनामिति**। अग्निहोत्रादीनामेव नित्यानां कर्मस्वरूपाविशेषे सत्यप्यनुष्ठानायासदुःखमात्रेणोपक्षयः, तेषामेव काम्यानामङ्गेतिकर्तव्यताद्याधिक्ये असत्यपि फलकामित्वमात्रेण स्वर्गादिमहाफलत्वम् इति वक्तुं न शक्यत इति शेषः। **यद्वा,** स्वर्गाद्यदृष्टफलशासनोद्यमाभावरूपदोषपरिहाराय शास्त्रचोदितं काम्यमेव तत्कालफलं न भवति, किन्त्वदृष्टफलकं भवति। नित्यं तु दृष्टफलकमेवेति ब्रूम इति शङ्कायामाह—**अग्निहोत्रादीनामिति**। एतस्य कर्मणोऽङ्गान्येवं कर्तव्यानीति यो विधिः साऽङ्गेतिकर्तव्यता।आदिपदात् कारकभेदादिग्रहणम्। तदादीनाम् , **आधिक्ये** विशेषे। यदि विवाहोपनयनयोरिव कर्मस्वरूपभेदः, अङ्गेतिकर्तव्यताभेदः, कारकादिभेदश्च स्यान्नित्यकाम्याग्निहोत्रयोस्तर्ह्यनुष्ठानायासदुःखेन नित्यस्य क्षयः, काम्यस्य तु नेति वक्तुं शक्येत, न तु तथाऽस्ति। तस्मात् तथावचनमयुक्तमेव। न हि फलकामित्वमात्रेण कर्मस्वरूपाद्यभेदेऽपि काम्यस्य दुःखमात्रेण न क्षय इति वक्तुं शक्यते। फलकामित्वस्य पुरुषनिष्ठस्य कर्मणः स्वाभाविकशक्त्यतिरिक्तशक्तिजननायोगात्। दुःखमात्रजनकस्य कर्मणोऽग्निहोत्रादेः कथं पुरुषगतकामित्वमात्रेण स्वर्गरूपमहाफलजनकत्वसम्भवः? एवं दुःखमात्रफलकेनाग्निहोत्रादिकर्मणा स्वर्गमारोढुमिच्छाऽपि पुरुषस्य तुरगमारुह्य गगने विहर्तुमिच्छेव व्यर्थैव। ततश्च 'ज्योतिष्टोमेन स्वर्गकामो यजेते'ति विधिरपि व्यर्थैव [व्यर्थ एव], तुरगेण गगनविहारकामः सञ्चरेदितिवत्। न हि पुरुषस्य गगनविहारकामित्वमात्रेण तुरगस्य भूसञ्चाराक्षमस्य गगनसञ्चारशक्तिः सम्भवति, येन पुरुषस्य स्वर्गकामित्वमात्रेण कर्मणोऽग्निहोत्रादेर्दुःखमात्रफलकस्य स्वर्गदानशक्तिः सम्भवेत्। तस्माच्छास्त्रचोदितस्य नित्यस्याग्निहोत्रादेर्दुःखमेव दृष्टं फलम् , तस्यैव काम्यस्य स्वर्गः फलमिति वचनमयुक्तमेव। **तस्माच्चेति**। काम्यानामग्निहोत्रादीनां नित्याग्निहोत्राभिन्नस्वरूपाणां स्वर्गादिमहाफलत्वाभ्युपगमादित्यर्थः। नित्यानां कर्मणामदृष्टफलाभावः कदाचिदपि नोपपद्यत इत्यन्वयः।

एवं नित्यकर्मणामदृष्टफलाभावानुपपत्तावदृष्टफले सति तेन बन्धः स्यादेवेति न नित्यकर्मानुष्ठानान्मोक्षः। ननु नित्यकर्मणामदृष्टफलमस्ति कृतदुरितक्षयरूपम्। अत एव हि प्राज्ञैः सङ्कल्प्यते— उपात्तदुरितक्षयार्थमिति। तच्च दुरितमिह जन्मनि जन्मान्तरेषु वा कृतं भवति। उभयविधस्यापि दुरितस्य नित्यैः क्षयसम्भवात् , प्रारब्धदुरितं तु न नित्यैरपि क्षीयते, तस्य भोगत एव नाशात्। स च

१. 'अदृष्टफलाशासनेनोद्यम' इति पा.। २. 'न शक्यं कल्पयितुम्' इति क्वचिन्न। व्याख्यानुसारेणापि तस्यासत्त्वं ज्ञायते। ३. 'तस्माच्च न' इति पा.।

**अतश्चाविद्यापूर्वकस्य कर्मणो विद्यैव शुभस्याशुभस्य वा क्षयकारणमशेषतः, न नित्यकर्मानुष्ठानम्। अविद्याकामबीजं हि सर्वमेव कर्म। तथा चोपपादितम्। अविद्वद्विषयं कर्म, विद्वद्विषया च सर्वकर्मसंन्यासपूर्विका ज्ञाननिष्ठा। 'उभौ तौ न विजानीतः'(भ.गी.२.१९), 'वेदाविनाशिनं नित्यम्' (भ.गी.२.२१), 'ज्ञानयोगेन सांख्यानां कर्मयोगेन**

आनन्दगिरिकृतव्याख्या

**काम्यवन्नित्यानामपि पितृलोकाद्यदृष्टफलवत्त्वे दुरितनिवृत्त्यर्थत्वायोगात् तादर्थ्येनात्मविद्यैवाभ्युपगन्तव्येत्याह—**अतश्चेति। **शुभाशुभात्मकं कर्म सर्वमविद्यापूर्वकं चेद् , अशेषतस्तर्हि तस्य क्षयकारणं विद्येत्युपपद्यते, न तु सर्वं कर्माविद्यापूर्वकमिति सिद्धमित्याशङ्क्याह—** अविद्येति। **तत्र हिशब्दद्योतितां युक्तिं दर्शयति—**तथेति। **इतश्चाविद्वद्विषयं कर्मेत्याह—**अविद्वदिति। **अधिकारिभेदेन निष्ठाद्वयमित्यत्र वाक्योपक्रममनुकूलयन् , 'आत्मनि कर्तृत्वं कर्मत्वं चारोपयन् न जानात्यात्मान'मिति वदता कर्माज्ञानमूलमिति दर्शितमित्याह—**उभाविति। **'आत्मानं याथातथ्येन जानन् कर्तृत्वादिरहितो भवती'ति ब्रुवता कर्मसंन्यासे ज्ञानवतोऽधिकारित्वं सूचितमित्याह—**वेदेति। **निष्ठाद्वयमधिकारिभेदेन बोद्धव्यमित्यत्रैव वाक्यान्तरमाह—**ज्ञानेति। **'न बुद्धिभेदं जनयेदि'त्यत्र चाविद्यामूलत्वं कर्मणः सूचयता**

भाष्यार्कप्रकाशः

भोगो द्वन्द्वादिरोगदुःखोपभोगादिरूपः। एवं स्थिते यातनाशरीरपशुपक्ष्यादिजन्मप्रददुरितनिबर्हणरूपमहाफलस्य नित्यस्य कर्मणः संसारनाशहेतुत्वमेव, न तु बन्धहेतुत्वमिति कृत्वा नित्यकर्मानुष्ठानान्मोक्ष एवेति शङ्कायां नित्यकर्मानुष्ठानादशुभस्य शुभस्य वा कर्मणः क्षयो न सम्भवतीत्याह—**अतश्चेति**। अस्माच्च कारणादित्यर्थः। किं तत् कारणम्? अत आह—**अविद्येति**। अविद्यापूर्वकस्य शुभस्याशुभस्य वा कर्मणोऽशेषतः क्षयकारणं विद्यैव, न नित्यकर्मानुष्ठानमिति हेतोरित्यर्थः। कुतो नित्यकर्मानुष्ठानान्न क्षयः? अत आह—**अविद्याकामेति**। हि यस्मात् सर्वमेवेहजन्मनि जन्मान्तरे वा कृतं नित्यकाम्यप्रतिषिद्धप्रायश्चित्तादिरूपं समस्तमपि कर्म **अविद्याकामबीजम्** अविद्या च कामश्चाविद्याकामौ बीजं हेतुर्यस्य तद् अविद्याकाममूलकमित्यर्थः। यथा शुभमशुभं वा कर्माविद्यापूर्वकं तथा नित्यकर्माप्यविद्यापूर्वकमेवेति कृत्वा अविद्यापूर्वकस्य कर्मणः शुभाशुभलक्षणस्य कथमविद्यापूर्वकमेव नित्यकर्म नाशकं स्यात्? न हि तमोमूलकस्य सर्पादिभयस्य तमोमूलकमेव पिशाचादिभयं निवर्तकं भवति। **वस्तुतस्तु** नित्यकर्मभिर्दुरितक्षयसम्भवेऽपि सुकृतक्षयो न सम्भवतीति कृत्वा दुरितस्यापि समूलं क्षयो न सम्भवति। दुरितमूलस्याज्ञानस्य नित्येन क्षयासम्भवात् सति च मूले सति च सुकृतकर्मपुञ्जे कथं पुरुषस्य मोक्षः स्यान्नित्यानुष्ठानमात्रेण? न कथमपीति नित्यस्य दुरितक्षयार्थत्वाभ्युपगमेऽपि न मुक्तिस्तस्मादिति बोध्यम्। अत एव 'अशेषतः' इत्युक्तं भाष्यकृद्भिः। **अशेषतो** निःशेषतो मूलरूपाज्ञानस्यावशेषो न भवति यथा तथेत्यर्थः।

**नन्व**विद्यामूलस्य कर्मणोऽविद्यामूलं कर्म न नाशकमिति नियमो न सिध्यति, अविद्यामूलस्याभोज्यभोजनादिलक्षणपापकर्मणोऽविद्यामूलेन चान्द्रायणादिलक्षणेन प्रायश्चित्तेन कर्मणा क्षयसम्भवात्। अन्यथा प्रायश्चित्तकाण्डस्य धर्मशास्त्रान्तर्गतस्य वैयर्थ्यापातादिति चेत् , **मैवम्** ; अविद्यामूलस्य कर्मणोऽविद्यामूलं कर्म न नाशकमित्येतावानेव नियमो नास्माभिरभ्युपेयते, किं तर्हि? अविद्या -मूलस्य कर्मणोऽविद्यामूलं कर्म निःशेषतो न नाशकमिति; ततो न दोषः, अज्ञानस्य मूलस्य वा शेषोऽस्तीत्युक्तत्वात्। न च मूलमप्यज्ञानं कुतो न नाशयति कर्मेति वाच्यम् ; अज्ञानजन्यत्वात् कर्मणः। न हि मृन्मयो घटो मृदं नाशयति, येनाज्ञानमयं कर्माज्ञानं नाशयेत्।

नन्वज्ञानात् कृतमभोज्यभोजनादिकं दुरितम् , तत्प्रायश्चित्तं चान्द्रायणादिकं तु ज्ञानादेव क्रियते। तथा नित्यकर्मापीति कृत्वा निवर्तकं कर्म ज्ञानमूलकमेवेत्यज्ञानमूलस्य कर्मणो निःशेषतः क्षय उपपद्यते ज्ञानमूलेन नित्येन कर्मणेति शङ्कायाम् , **मैवं वादीः**; अविद्याकामबीजमेव सर्वं कर्म यथैवं तथोपपादितं भगवतेहैवेत्याह—**तथेति**। किमुपपादितम्? अत आह—**अविद्वदिति**। अविद्वान् अविद्यावान् स विषय आश्रयो यस्य तदविद्वद्विषयं कर्म। संन्यासपूर्विका सर्वकर्मसंन्यासमूला ज्ञाननिष्ठा तु विद्वद्विषयेत्युपपादितमित्यर्थः। कैर्वाक्यैरुपपादितोऽयमर्थः? अत आह—**उभावित्यादि**। 'य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते' इति, 'वेदाविनाशिनं नित्यं य एनमजमव्ययम्। कथं स पुरुषः पार्थ कं घातयति हन्ति कम्॥' इमौ श्लोकौ

**योगिनाम्' (भ.गी.३.३) 'अज्ञानां कर्मसङ्गिनाम्' (भ.गी.३.२६) 'तत्त्ववित्तु महाबाहो.... गुणा गुणेषु वर्तन्ते इति मत्वा न सज्जते'(भ.गी.३.२८) 'सर्वकर्माणि मनसा संन्यस्यास्ते'(भ.गी.५.१३) 'नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्'(भ.गी.५.८), अर्थादज्ञः करोमीति[१]। आरुरुक्षोः कर्म कारणम् , [२]आरूढस्य योगस्थस्य शम एव कारणम्। (द्र.भ.गी.६.३) उदारास्त्रयोऽप्यज्ञाः, ज्ञानी त्वात्मैव मे मतम् (द्र.भ.गी.७.१८), अज्ञाः कर्मिणो गतागतं कामकामा लभन्ते(भ.गी.९.२१), अनन्याश्चिन्तयन्तो मां नित्ययुक्ताः यथोक्तम् आत्मानम् आकाशकल्पम् अकल्मषम् उपासते। 'ददामि बुद्धियोगं तं येन मामुपयान्ति ते' (भ.गी.१०.१०), अर्थान्न कर्मिणोऽज्ञा उपयान्ति। [३]भगवत्कर्मकारिणो ये**

अनुभूतिस्वरूपाचार्यटिप्पणम्

नन्वविद्वद्विषयं कर्मेति न शक्यते वक्तुम् , यतः भगवदाराधकानां कर्मिणामेव भगवता युक्त[तमत्वमुक्त]म् – 'ते मे युक्ततमाः' इति, तत्राह—**भगवत्कर्मकारिण इति।** ज्ञानध्यानाद्यपेक्षयोत्तरोत्तरहीनं फलत्यागावसानं [साधनं] येषां ते

आनन्दगिरिकृतव्याख्या

**कर्मनिष्ठाऽविद्वद्विषयाऽनुमोदितेत्याह—**अज्ञानामिति। **यदुक्तं विद्वद्विषया संन्यासपूर्विका ज्ञाननिष्ठेति, तत्र 'तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः' इत्यादिवाक्यमुदाहरति—**तत्त्वविित्त्विति। **तत्रैव वाक्यान्तरं पठति—**सर्वेति। **विदुषो ज्ञाननिष्ठेत्यत्रैव पाञ्चमिकं वाक्यान्तरमाह—**नैवेति। **तत्रैवार्थसिद्धमर्थं कथयति—**अज्ञ इति। **मन्यत इति सम्बन्धः। अज्ञस्य चित्तशुद्ध्यर्थं कर्म, शुद्धचित्तस्य कर्मसंन्यासो ज्ञानप्राप्तौ हेतुरित्यत्र वाक्यान्तरमाह—**आरुरुक्षोरिति। **यथोक्ते विभागे साप्तमिकं वाक्यमनुगुणमित्याह—**उदारा इति। **'एवं त्रयीधर्म'मित्यादि नावमिकं वाक्यम् अविद्वद्विषयं कर्मेत्यत्र प्रमाणयति—**अज्ञा इति। **विदुषः संन्यासपूर्विका ज्ञाननिष्ठेत्यत्रैव नावमिकं वाक्यान्तरमाह—**अनन्या इति। मामित्येतद् **व्याचष्टे—**यथोक्तमिति। **'तेषां सततयुक्ताना'मित्यादि दाशमिकं वाक्यं तत्रैव प्रमाणयति—**ददामीति। **विद्यावतामेव भगवत्प्राप्तिनिर्देशादितरेषां तदप्राप्तिः सूचितेत्यर्थसिद्धमर्थमाह—**अर्थादिति। **ननु भगवत्कर्मकारिणां युक्ततमत्वात् कर्मिणोऽपि भगवन्तं यान्तीत्याशङ्क्याह—**भगवदिति। **ये 'मत्कर्मकृदि'त्यादिन्यायेन भगवत्कर्मकारिणः, ते यद्यपि युक्ततमाः,**

भाष्यार्कप्रकाशः

ज्ञानिनः सर्वकर्माभावं दर्शयतः। 'ज्ञानयोगेने'ति श्लोको ज्ञानिनां ज्ञानम् , अज्ञानां कर्म च विभज्य दर्शयति। 'अज्ञाना'मिति, 'तत्त्ववित्तु' इति वचनद्वयमज्ञानां कर्मसङ्गो, न तु ज्ञानिनामिति दर्शयति। 'सर्वकर्माणी'ति, 'नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववि'दिति वचनद्वयं सर्वकर्मसंन्यासं दर्शयति विदुषः। **अज्ञः करोमीति**। 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते॥' इति श्लोकेनाज्ञस्यैव कर्तृत्वमुक्तमिति भावः। 'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते॥' इति श्लोकेन योगमारुरुक्षोरज्ञस्य कर्म साधनम् , योगारूढस्य प्राज्ञस्य तु सर्वकर्मसंन्यास एवेत्युक्तमित्यर्थः।

**उदारा इति**। 'आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ। उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मत'मिति श्लोकेनार्तादयस्त्रयोऽज्ञा उदाराः, ज्ञान्येक एव ममात्मेति भगवता ज्ञानिन एव स्तुतत्वादात्मत्वेनात्मनश्चाकर्तृत्वादकर्तृत्वं ज्ञानिनः सिद्धम् ; अज्ञानां च त्रयाणामनात्मत्वेन कर्तृत्वं च सिद्धम्। **अज्ञा इति**। 'त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते। ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान् दिवि देवभोगान्॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति। एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते॥' इतीहानुसन्धेयम्। **अनन्या इति**। 'अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते। इति मत्वा भजन्ते मां बुधा भावसमन्विताः॥ तेषां नित्याभियुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥' इतीहानुसन्धेयम्। **अर्थादिति**। बुधा मामुपयान्तीत्युक्तत्वादिति भावः।

---

१. अज्ञः करोमीति मन्यते इति शेषः पूरणीय इत्यर्थः। २. 'योगारूढस्य' इति पा.। ३. भगवत्कर्मकारिणोऽपि चित्तशुद्धिज्ञानप्राप्तिद्वारेणैव भगवन्तं यान्तीति नाज्ञा भगवन्तं यान्तीत्याशयः।

**युक्ततमा अपि कर्मिणोऽज्ञाः, ते उत्तरोत्तरहीनफलत्यागावसानसाधनाः। अनिर्देश्याक्षरोपासकास्तु 'अद्वेष्टा सर्वभूतानाम्'(भ.गी.१२.१३) इत्याऽध्यायपरिसमाप्त्युक्तसाधनाः, क्षेत्राध्यायाद्यध्यायत्रयोक्तज्ञानसाधनाश्च। अधिष्ठानादिपञ्चहेतुकसर्वकर्मसंन्यासिनाम् आत्मैकत्वाकर्तृत्वज्ञानवतां परस्यां ज्ञाननिष्ठायां वर्तमानानां भगवत्तत्त्वविदाम् अनिष्टादिकर्मफलत्रयं परमहंसपरिव्राजकानामेव लब्धभगवत्स्वरूपात्मैकत्वशरणानां न भवति, भवत्येवान्येषामज्ञानां**

अनुभूतिस्वरूपाचार्यटिप्पणम्

तथोक्ताः, ततस्तेषामज्ञत्वमित्यर्थः। एवं तावदविद्वद्विषयां कर्मनिष्ठां, विद्वद्विषयं च संन्यासमुपपाद्य निष्ठाद्वयस्य फलमपि विलक्षणमेवेत्याह—**अनिर्देश्येति।** अनिर्देश्याक्षरोपासकानामनिष्टादि कर्मत्रयफलं न भवतीति सम्बन्धः।

आनन्दगिरिकृतव्याख्या

**तथापि कर्मिणोऽज्ञाः सन्तो न भगवन्तं सहसा गन्तुमर्हन्तीत्यर्थः। तेषामज्ञत्वे गमकं दर्शयति—**उत्तरोत्तरेति। **चित्तसमाधानमारभ्य फलत्यागपर्यन्तं पाठक्रमेणोत्तरोत्तरं हीनसाधनोपादानादभ्यासासमर्थस्य भगवत्कर्मकारित्वाभिधानाद् भगवत्कर्मकारिणामज्ञत्वं विज्ञातमित्यर्थः। 'ये त्वक्षरमनिर्देश्य'मित्यादिवाक्यावष्टम्भेन विद्वद्विषयत्वं संन्यासपूर्वकज्ञाननिष्ठाया निर्धारयति—**अनिर्देश्येति। उक्तसाधनाः **तेन ते संन्यासपूर्वकज्ञाननिष्ठायामधिक्रियेरन्निति शेषः। किञ्च त्रयोदशे यान्यमानित्वादीनि, चतुर्दशे च 'प्रकाशं च प्रवृत्तिं चे'त्यादीनि यानि, पञ्चदशे च यान्यसङ्गत्वादीन्युक्तानि, तैः सर्वैः साधनैः सहिता भवन्त्यनिर्देश्याक्षरोपासकाः, ततोऽपि ते ज्ञाननिष्ठायामेवाधिक्रियेरन्नित्याह—**क्षेत्रेति। **निष्ठाद्वयमधिकारिभेदेन प्रतिष्ठाप्य ज्ञाननिष्ठानाम् अनिष्टमिष्टं मिश्रमिति त्रिविधं कर्मफलं न भवति, किन्तु मुक्तिरेव, कर्मनिष्ठानां तु त्रिविधं कर्मफलम्, न मुक्तिरिति शास्त्रार्थविभागमभिप्रेतमुपसंहरति—**अधिष्ठानादीति।

भाष्यार्कप्रकाशः

अज्ञा इत्यादिना ग्रन्थेन अज्ञानां कर्मिणामेव यज्ञानुष्ठानम्, स्वर्गादिफलप्राप्तिः, पुनरावृत्तिश्च। ज्ञानिनां संन्यासिनां त्वात्मभजनम्, आत्मप्राप्तिः, अपुनरावृत्तिश्चेति सिद्धमिति बोध्यम्। फलितार्थमाह—**भगवदिति।** ये भगवत्कर्मकारिणो भगवद्विहितं नित्यं कर्म भगवदाराधनबुद्ध्या (ये) कुर्वन्ति, ते भगवत्कर्मकारिणः इत्युच्यन्ते; **युक्ततमाः** समाहितचित्तास्तेऽप्यज्ञाः कर्मिणः **उत्तरोत्तरहीनफलत्यागावसानसाधनाः** भवन्ति। उत्तरस्मादुत्तरस्माद् भगवच्चित्तसमाधानाभ्यासादिरूपाद् हीनोऽपकृष्टः फलत्यागोऽवसानं परिसमाप्तिर्यस्य तदुत्तरोत्तरहीनफलत्यागावसानं साधनं येषां ते तथोक्ता भवन्ति। 'अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्। अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय॥ अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव।...अथैतदप्यशक्तोऽसि...सर्वकर्मफलत्यागं कुरु' इति चित्तसमाधानाद्यशक्तस्याज्ञस्य फलत्यागविधानाद् अज्ञा एते कर्मिण इति भावः। **अनिर्देश्याक्षरोपासकाः** अनिर्देश्यमक्षरमात्मतत्त्वम्, तस्योपासकास्तु 'अद्वेष्टा सर्वभूताना'मित्यारभ्याध्यायपरिसमाप्तिपर्यन्तम् आऽध्यायपरिसमाप्त्युक्तानि साधनानि सर्वभूतद्वेषाभावमैत्रकरुणानिर्ममत्वनिरहङ्कारत्वसमदुःखसुखत्वसन्तुष्टत्वप्रमुखानि येषां ते तथोक्ताः। क्षेत्राध्यायाद्यध्यायत्रयोक्तानि – 'अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्। आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः॥' इत्यादीनि, 'न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति। उदासीनवदासीनो गुणैर्यो न विचाल्यते॥' इत्यादीनि, 'निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः' इत्यादीनि च येषां ते तथोक्ताश्च भवन्ति। एवं ज्ञानिनां कर्माभावादेव 'अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्। भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचि'दिति श्लोकेनानिष्टादिफलत्रयाभावः। अज्ञानां कर्मसत्त्वादेव तत्फलत्रयसद्भावश्चोक्त इत्याह—**अधिष्ठानादीति।** 'अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्। विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्॥' इत्युक्तमधिष्ठानादिपञ्चकं हेतुर्येषां तेषामधिष्ठानादिपञ्चकहेतूनां सर्वेषां नित्यानां काम्यानां प्रतिषिद्धानां च कर्मणां संन्यासिनां त्यागशीलानाम्। एवं त्यागित्वे हेतुमाह— **आत्मेति।** आत्मा एकः अकर्ता चेत्येवंरूपज्ञानवताम् अत एव **परस्याम्** उत्कृष्टायाम्, कर्मनिष्ठातः इति भावः। ज्ञाननिष्ठायां वर्तमानानाम् अत एव भगवत्तत्त्वविदां प्रत्यगभिन्नपरमात्मयाथात्म्यविदाम् अत एव लब्धं भगवत्स्वरूपात्मैकत्वरूपं शरणं यैः तेषाम्, भगवानेक एवात्मेति

**कर्मिणामसंन्यासिनाम् इत्येष गीताशास्त्रोक्तस्य कर्तव्याकर्तव्यार्थस्य विभागः।**

**अविद्यापूर्वकत्वं सर्वस्य कर्मणोऽसिद्धमिति चेन्न; ब्रह्महत्यादिवत्। यद्यपि शास्त्रावगतं नित्यं कर्म, तथाप्यविद्यावत एव भवति। यथा प्रतिषेधशास्त्रावगतमपि ब्रह्महत्यादिलक्षणं कर्मानर्थकारणम् अविद्याकामादिदोषवतो**

अनुभूतिस्वरूपाचार्यटिप्पणम्

पूर्वं भगवद्वचनपर्यालोचनया अज्ञविषयं कर्मोपपाद्य, इदानीं युक्त्याऽप्यज्ञविषयत्वमुपपादयितुमुपक्रमते—**अविद्यापूर्वकत्वमित्यादिना।** यौक्तिकज्ञानस्यापरोक्षभ्रमानिवर्तकत्वादविद्वद्विषयत्वं कर्मणोऽनुभवसिद्धं नापलपनीयमित्याह—**न,**

आनन्दगिरिकृतव्याख्या

**यदुक्तमविद्याकामबीजं सर्वं कर्मेति, तन्न, शास्त्रावगतस्य कर्मणोऽविद्यापूर्वकत्वानुपपत्तेरित्याक्षिपति—**अविद्येति। **दृष्टान्तेन समाधत्ते—**नेति। **तत्राभिमतां प्रतिज्ञां विभजते—**यद्यपीति। **उक्तं दृष्टान्तं व्याचष्टे—**यथेति। **अविद्यादिमतो ब्रह्महत्यादि कर्मेत्यत्र हेतु-**

भाष्यार्कप्रकाशः

ज्ञानैकशरणानामित्यर्थः। 'भगवत्स्वरूपात्मैकशरणाना'मिति वा पाठः। भगवत्स्वरूप आत्मैवैकं मुख्यं शरणं येषां तेषां परमहंसपरिव्राजकानामनिष्टादिकर्मफलत्रयं न भवति; अनिष्टादि त्रिविधं कर्मफलं न भवति। अन्येषामज्ञानाम् अत एवासंन्यासिनां कर्मिणां त्वनिष्टादिकर्मफलत्रयं भवत्येव। तस्मात् कर्मिणां कर्मणा बन्ध एव, ज्ञानिनां ज्ञानेन मोक्ष एवेति भावः। **इति**शब्दः परिसमाप्तौ। **एष** उक्त इत्यर्थः। ज्ञानादेव मोक्षः, न तु कर्मण इत्येवंरूप इति भावः। **गीतेति**। गीताशास्त्रेण मुमुक्षुणा ज्ञाननिष्ठैव कर्तव्येति विभज्य दर्शितोऽयमर्थ इत्यर्थः। गीताशास्त्रोक्तस्य कर्तव्यस्य मुमुक्षुणाऽनुष्ठेयस्यार्थस्य ज्ञाननिष्ठारूपस्य विभागः इत्यक्षरार्थः। **यद्वा** गीताशास्त्रोक्तयोः कर्तव्ययोरज्ञेन प्राज्ञेन च मुमुक्षुणा कार्ययोरर्थयोः कर्मज्ञाननिष्ठयोर्विभागः। तस्मादज्ञेन चित्तशुद्ध्यर्थं कर्मयोगः कर्तव्यः; विदुषां तु मोक्षार्थं ज्ञाननिष्ठैव कर्तव्या। ज्ञानादेव सर्वबन्धविनिवृत्तिः, न तु कर्मणः। अज्ञानकृतानां सर्वेषां बन्धानामज्ञानमयेन कर्मणा निवृत्त्यसम्भवात् , तमःकृतानां सर्पाभासादीनां तमोमयेन पिशाचेनानिवृत्तिवत्। ज्ञानं त्वज्ञानविरोधीति युक्तम्। तस्याज्ञानमूलकसर्वबन्धनिवर्तकत्वं प्रकाशस्येव तमोमूलकसर्पादिनिवर्तकत्वम्। न च नित्यकर्म ज्ञानपूर्वकमेवेति नाज्ञानमयमिति वाच्यम् ; मया कृतस्यास्य पापस्येदं कर्म निवर्तकमित्येवंरूपं ज्ञानं नास्माभिर्ज्ञानमित्युच्यते; किन्तु तदज्ञानमेव। 'अकर्ताऽभोक्ता चिन्मात्रोऽहं सदाशिवः' इत्यात्मज्ञानमेव ज्ञानमित्यस्माभिरुच्यते। तद्धि न कर्मणो मूलम् , किन्तु नाशकमेव। कर्ता भोक्ताऽहमिति विरुद्धं ज्ञानमज्ञानात्मकं हि कर्मणो मूलम्। तस्मादज्ञानमयमेव नित्यकर्म, प्रायश्चित्तकर्म, काम्यकर्म, प्रतिषिद्धकर्म, व्यायामादिलौकिककर्म च, न तु ज्ञानमूलकम्। ज्ञानाज्ञानयोर्विरोधित्वेन ज्ञानकर्मणोरपि विरोधात्। अज्ञानमूलकं हि कर्म अज्ञाननिवर्तकेन ज्ञानेन निवर्त्यते। तमोमूलको रज्जुसर्पाभासो यथा तमोनिवर्तकेन प्रकाशेन निवर्त्यते। एवं कर्मभिरनिवर्त्ये अज्ञाने तत्कार्येषु सुकृतकर्मसु च सत्सु , कर्माज्ञाननिवर्तके सर्वकर्मसंन्यासपूर्वके ज्ञाने चासति कथं पुरुषस्य मोक्षलाभः? न कथमपि। अज्ञानं तत्कृतकर्माणि च पुरुषस्य पशोरिव रज्जवः कण्ठपाशायितानि हि। तच्छेदनार्थं ज्ञानलवित्रमेवाश्रयणीयं कुशलेन, न तु नित्यकर्मरूपपाशान्तरमिति।

ननु यदि गीताशास्त्रेणैवाज्ञेन कर्म कर्तव्यमित्युच्यते, तर्ह्यविद्यापूर्वकं[कत्वं] सर्वस्य कर्मणोऽसिद्धम् , शास्त्रं हि विद्या, शास्त्रादवगतत्वात् कर्म विद्यापूर्वकमिति शङ्कते—**अविद्येति**। परिहरति—**नेति**। यदि शास्त्रावगतत्वमात्रेण नित्यनैमित्तिकादिकर्मणां विद्यापूर्वकत्वं स्यात् , तर्हि ब्रह्महत्यादीनामपि विद्यापूर्वकत्वं स्यादित्याह—**ब्रह्महत्यादिवदिति**। संग्रहवाक्यं विवृणोति—**यद्यपीति**। **शास्त्रावगतं** विधिशास्त्रावगतमित्यर्थः। **नित्यमिति** नैमित्तिकादेर्विहितस्योपलक्षणम्। **अविद्यावत एवे**त्येवकारान्न विद्यावतः इत्यर्थः।

अयं भावः—अर्थस्य शास्त्रावगतत्वमात्रेण न [१]विद्यापूर्वकत्वसिद्धिः, किन्तु विद्यावद्विषयत्वेनैव। अन्यथा विधिशास्त्रावगतनित्यकर्मणामिव प्रतिषेधशास्त्रावगतब्रह्महत्यादीनामपि विद्यापूर्वकत्वं स्यात्। न चेष्टापत्तिः, विद्यापूर्वकाणां नित्यानामिव ब्रह्महत्यादी-

१. विद्याशब्देन ब्रह्मविद्या विवक्षितेति भावः।

**भवति, अन्यथा प्रवृत्त्यनुपपत्तेः, तथा नित्यनैमित्तिककाम्यान्यपीति। [१](देह)व्यतिरिक्तात्मन्यज्ञाते प्रवृत्तिर्नित्यादिकर्मस्वनुपपन्नेति चेन्न; चलनात्मकस्य कर्मणोऽनात्मकर्तृकस्य 'अहं करोमी'ति प्रवृत्तिदर्शनात्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**चलनात्मकस्येति।**

आनन्दगिरिकृतव्याख्या

**माह—**अन्यथेति। **दार्ष्टान्तिकं गृह्णाति—**तथेति। **तान्यप्यविद्यादिमतो भवन्तीत्यविद्यादिपूर्वकत्वं तेषामेषितव्यमित्यर्थः। पारलौकिककर्मसु देहाद्यतिरिक्तात्मज्ञानं विना प्रवृत्त्ययोगान्न तेषामविद्यापूर्वकतेति शङ्कते—**व्यतिरिक्तेति। **सत्यपि व्यतिरिक्तात्मज्ञाने पारमार्थिकात्मज्ञानाभावान्मिथ्याज्ञानादेव नित्यादिकर्मसु प्रवृत्तेरविद्यापूर्वकत्वं तेषामप्रतिहतमिति परिहरति—**नेत्यादिना। **कर्मणश्चलनात्मकत्वान्नात्मकर्तृकत्वम् , तस्य निष्क्रियत्वात्। देहादिसंघातस्य तु सक्रियत्वात् तत्कर्तृकं कर्म युक्तम्। तथापि संघातेऽहमभिमानद्वारा 'अहं करोमी'ति आत्मनो मिथ्याधीपूर्विका कर्मणि प्रवृत्तिर्दृष्टा। तेनाविद्यापूर्वकत्वं तस्य युक्तमित्यर्थः।**

भाष्यार्कप्रकाशः

नामप्यनुष्ठानान्मोक्षप्रसङ्गात्। विद्यापूर्वककर्मानुष्ठानान्मोक्ष इति हि तव मतम्। विद्यावद्विषयत्वं तु न शास्त्रार्थस्य कर्मणोऽस्ति, किन्तु ज्ञानस्यैव कर्मसंन्यासपूर्वकस्य। तस्मादविद्यावद्विषयकर्मानुष्ठानान्न मोक्षः। नन्वविद्यावत एव विहितं प्रतिषिद्धं वा कर्म भवतीत्यस्य नियमस्यानभ्युपगमे को दोषः? तत्राह—**अन्यथेति**। अविद्याकामादिदोषाभावे कर्मसु प्रवृत्त्यनुपपत्तेः पुरुषस्य। यथा प्रतिषेधशास्त्रावगतमप्यनर्थकारणं ब्रह्महत्यादिलक्षणं कर्म अविद्याकामादिदोषवत एव भवति, तथा नित्यनैमित्तिककाम्यान्यपि विधिशास्त्रावगतानि पुरुषार्थकारणान्यप्यविद्यावत एव भवन्ति, अन्यथा प्रवृत्त्यनुपपत्तेरिति शेषपूरणपूर्वको भाष्यवाक्यसमन्वयः। तस्मादविद्यावद्विषयत्वेन सर्वं कर्माविद्यापूर्वकमेव। अविद्यापूर्वकस्य कर्मणः शुभाशुभलक्षणस्य विद्यैव क्षयकारणमिति सिद्धान्तिनोक्ते सति कर्मणोऽविद्यापूर्वकत्वमसहमानःसन् पूर्ववादी शास्त्रावगतत्वात् सर्वं कर्म विद्यापूर्वकमेवेत्युवाच , तच्च परिहृतं सिद्धान्तिना। अथ पुनः प्रकारान्तरेण विद्यापूर्वकत्वं साधयति कर्मणः पूर्ववादी— **देहेति**। देहव्यतिरिक्ते आत्मन्यज्ञाते सति देहान्तरानुभाव्यप्राजापत्यस्वर्गादिफललोभेन नित्यादिकर्मसु प्रवृत्तिरनुपपन्नेति देहातिरिक्तात्मज्ञानपूर्वकत्वात् कर्म विद्यापूर्वकमेवेति। परिहरति—**चेन्नेति**। अनात्मकर्तृकस्य चलनात्मकस्य कर्मणः 'अहं करोमी'ति प्रवृत्तिदर्शनादित्यन्वयः। आत्मनोऽन्योऽनात्मा देहादिः, तत्कर्तृके चलनात्मके कर्मणि 'अहं करोमी'ति पुरुषस्य प्रवृत्तिदर्शनादित्यर्थः। नित्यनैमित्तिकादिकं वैदिकं, व्यायामादिकं लौकिकं च सर्वमपि कर्म चलनात्मकमेव। तच्चानात्मकर्तृकम्। अनात्मसु देहेन्द्रियादिषु व्याप्रियमाणेषु सत्सु कर्मनिष्पत्तेः। न च देहचलनाद् गमनादिक्रियानिष्पत्तावपीन्द्रियान्तःकरणयोरचलतोरेव दर्शनसङ्कल्पादिक्रियानिष्पत्तिरिति वाच्यम् ; 'चञ्चलं हि मनः कृष्ण' इत्यादिशास्त्राद् , अनुभवाच्चैकत्र विषयेऽनवस्थानलक्षणं चाञ्चल्यं मनइन्द्रियाणामप्यस्ति। मनस इन्द्रियस्य वा वृत्तिकृतचलनाभावे विषयग्रहणानुपपत्तिश्च; चक्षुःश्रोत्रयोर्विषयदेशं गत्वा विषयग्राहकत्वं वेदान्तशास्त्रप्रसिद्धं च। वायुवेगादप्यधिको मनोवेग इति मनसो वेगवत्त्वाच्चलनं प्रसिद्धमेव। देहे रामेश्वरक्षेत्रे स्थिते सत्यपि मनो हि काशीं गच्छति। एतेषां देहेन्द्रियमनसां चलनाभावादेव निर्व्यापारता सुषुप्त्यादौ। एवं सति सर्वमपि कर्म देहेन्द्रियमनआश्रयमेवेति कृत्वा अनात्मकर्तृकमेव। 'अचलोऽयं सनातनः' इति गीतावाक्यादेवा-चलस्यात्मनः चलनात्मककर्माश्रयत्वायोगादात्मकर्तृकं न भवति। अचलत्वं चात्मनः परिपूर्णचैतन्यत्वादेव। न च – बुद्धिपरिच्छिन्न एवात्मा, तस्य चोत्क्रान्तिगत्यादिश्रवणात् कर्माश्रयत्वमस्तीति – वाच्यम् ; 'ध्यायतीव लेलायतीवे'त्यादिश्रुत्या बुद्धौ चलन्त्यामात्मा चलतीवेति बुद्ध्युपाधिधर्माध्यासप्रयुक्तमेवात्मन उत्क्रान्तिगत्यादिकं न स्वाभाविकमिति स्वभावतोऽचलोऽपरिच्छिन्न एवात्मा, नित्यत्वात्। 'अजो नित्यः शाश्वतोऽय'मिति ह्युक्तम्। न हि परिच्छिन्नस्य घटादेः क्वापि नित्यत्वं दृष्टम्। तस्मादचल एवात्मा। एवं स्थिते अचलस्यात्मनः कथम् अहं करोमीति प्रवृत्तिरुपपद्येत देहाद्यनात्माश्रये कर्मणि? न कथमप्युपपन्ना। तथाप्यहं करोमीति प्रवर्तत एव सर्वो लोकः कर्मणि। तत्र

---

१. देह इति क्वचिन्न।

**देहादिसंघातेऽहम्प्रत्ययो गौणः, न मिथ्येति चेत् , न , तत्कार्येष्वपि गौणत्वोपपत्तेः। आत्मीये देहादिसंघाते ऽहम्प्रत्ययो गौणः, यथा आत्मीये पुत्रे 'आत्मा वै पुत्रनामासि' (एकाग्नि. २.१२) इति, लोके च (अपि) मम प्राण एवायं गौरिति, तद्वत् , [१]नैवायं मिथ्याप्रत्ययः। मिथ्याप्रत्ययस्तु स्थाणुपुरुषयोरगृह्यमाणविशेषयोः। न गौणप्रत्ययस्य**

अनुभूतिस्वरूपाचार्यटिप्पणम्

मिथ्याप्रत्यय एवायं न भवतीत्याह—**देहादीति**। चोद्यं विवृणोति—**आत्मीय इत्यादिना**। ननु मिथ्याप्रत्ययादस्य को विशेषः येनास्य गौणत्वमित्याशङ्क्याह—**मिथ्याप्रत्ययस्त्विति**। द्रष्टृदृश्य(च)भावेन विशेषस्मरणात् 'अहं मनुष्य' इत्यादिः न

आनन्दगिरिकृतव्याख्या

**यदुक्तं देहादिसंघातेऽहमभिमानस्य मिथ्याज्ञानत्वं तदाक्षिपति—**देहादीति। **अहंधियो गौणत्वे तत्पूर्वककर्मस्वपि गौणत्वापत्तेरात्मनोऽनर्थाभावात् तन्निवृत्त्यर्थं हेत्वन्वेषणं न स्यादिति दूषयति—**नेति। **एतदेव प्रपञ्चयन्नादौ चोद्यं प्रपञ्चयति—**आत्मीय इति। **तत्र श्रुत्यवष्टम्भेन दृष्टान्तमाह—**यथेति। **दर्शितश्रुतेरात्मीये पुत्रेऽहम्प्रत्ययो गौणो यथा, संघातेऽप्यात्मीयेऽहम्प्रत्ययस्तथा युक्त इत्यर्थः। भेदधीपूर्वकत्वं गौणधियो लोके प्रसिद्धमित्याह—**लोके चेति। **लोकवेदानुरोधेनात्मीये संघातेऽहन्धीरपि गौणी स्यादिति दार्ष्टान्तिकमाह—**तद्वदिति। **मिथ्याधियोऽपि भेदधीपूर्वकत्वसंभवादात्मीये संघाते अहंधियो मिथ्यात्वमेव किं न स्यादित्याशङ्क्याह—**नैवायमिति। **भेदधीपूर्वकत्वाभावे कथं मिथ्याधीरुदेतीत्याशङ्क्याह—**मिथ्येति। **अधिष्ठानारोप्ययोर्विवेकाग्रहात् तदुत्पत्तिरित्यर्थः। देहादावहन्धियो गौणतेति**

भाष्यार्कप्रकाशः

च हेतुरात्मानात्मनोरितरेतरधर्माध्यास एवाज्ञानकृत इति सर्वैरभ्युपगन्तव्यम्। अभ्युपगते च तस्मिन् नित्यादिकर्मसु प्रवृत्तौ न देहव्यतिरिक्तात्मज्ञानं कारणम् , किं तर्हि? देहेन्द्रियान्तःकरणतादात्म्याध्यासप्रयुक्तं 'कर्ता भोक्ताऽह'मिति मिथ्याज्ञानं कारणम्। यदि देहव्यतिरिक्तोऽहमात्मेति ज्ञानं स्यादमीषां, तर्हि देहे तदवयवहस्तादौ च स्नानहोमादिकर्मसु प्रवृत्ते सति 'देहः स्नाति' 'हस्तो जुहोती'ति प्रतिपत्तव्ये, 'अहं स्नामि, जुहोमी'ति कथं प्रतिपद्येरन्नेते? तस्मान्नामीषां देहव्यतिरिक्तात्मज्ञानमपि दृढमस्ति, किं पुनरिन्द्रियान्तःकरणातिरिक्तात्मज्ञानम्? तस्मान्मिथ्याज्ञानिन एवैते। मिथ्याज्ञानादेव नित्यादिकर्मसु प्रवृत्तिरमीषाम् , न पुनर्देहादिव्यतिरिक्ताकर्त्रभोक्त्रात्मज्ञानात्। न हि देहादिव्यतिरिक्तः आत्मा कर्ता भोक्ता वा स्यात्।

ननु देहादिष्वनात्मसु कुर्वत्सु सत्सु 'अहं करोमी'ति यः प्रत्ययोऽज्ञस्य स देहाद्यनात्मतादात्म्याध्यासप्रयुक्त एव। स च देहादावनात्मनि 'अह'मित्यात्मतादात्म्याध्यासो न मिथ्याज्ञानम् , किन्तु गौणज्ञानमेवेत्याह—**देहादीति**। परिहरति—**नेति**। हेतुमाह—**तत्कार्येति**। संग्रहेणोक्तं प्रश्नोत्तरवाक्यद्वयं स्वयमेव विवृणोति—**आत्मीय इति**। आत्मीय इति हेतुगर्भं विशेषणम्। आत्मीयत्वादित्यर्थः। न हि स्वपुत्र इव स्वशरीर इव च, परपुत्रे परशरीरेऽहमिति प्रत्ययोऽस्ति लोकस्येति भावः। तत्र दृष्टान्तमाह—**यथेति**। आत्मीये पुत्रेऽहम्प्रत्ययो यथा गौणः, तथाऽऽत्मीये देहादिसंघातेऽहम्प्रत्ययो गौण इति। दृष्टान्तासिद्धिं परिहरति श्रुतिप्रामाण्यप्रदर्शनद्वारा— '**आत्मा वै पुत्रनामासी'ति**। त्वमिति शेषः। पुत्र इति नाम यस्य स पुत्रनामाऽऽत्मा वै अहमेवासि। पितैव पुत्र इत्यर्थः। एतेन पितुः पुत्रेऽहम्प्रत्ययो दर्शितः। आत्मीये वस्तुन्यहम्प्रत्ययो लोकतश्च सिध्यतीत्याह—**लोके चेति**। आत्मीये गवि 'मम प्राण एवाय'मिति स्वप्राणप्रत्ययरूपः स्वप्रत्ययः। न हि प्राणमात्मानं च पृथक्त्वेन प्रतिपद्य मम प्राण इति व्यवहरति लोकः; किन्त्वेकीकृत्यैव। तथा च 'मम प्राण' इत्यस्य ममात्मेतिवद् अहमित्येवार्थः। यद्वा कथमात्मीयत्वमात्रेणाप्राणभूते देहादिसंघाते पुत्रे वा ऽऽत्मेति प्रत्ययो लोकस्येत्यत आह—**लोके चेति**। आत्मीयत्वमात्रेणाप्राणभूते गवि यथा लोकस्य मम प्राण इति प्रत्ययस्तद्वदित्यर्थः।

ननु अतस्मिन् तद्बुद्धिर्मिथ्याप्रत्ययः। अनात्मनि देहादिसंघाते पुत्रे वा या आत्मबुद्धिः, अप्राणे गवि च या प्राणबुद्धिर्गौणप्रत्ययत्वेन तवाभिमता, साऽपि मिथ्याप्रत्यय एवेत्यत आह—**नैवमिति**। मिथ्याप्रत्यय एवंविधो न भवति। तर्हि कीदृशो मिथ्याप्रत्ययः? अत आह—**मिथ्याप्रत्ययस्त्विति**। तुशब्दो गौणप्रत्ययवैलक्षण्यद्योतनार्थः। **अगृह्यमाणः** अनुपलभ्यमानो **विशेषो** भेदो ययोस्तयोः

१. 'नैवम्' इति रा. पा. भाति।

**मुख्यकार्यार्थता, अधिकरणस्तुत्यर्थत्वाल्लुप्तोपमाशब्देन। यथा 'सिंहो देवदत्तः', 'अग्निर्माणवकः' इति सिंह इवाग्निरिव क्रौर्यपैङ्गल्यादिसामान्यवत्त्वाद् देवदत्तमाणवकाधिकरणस्तुत्यर्थमेव, न तु सिंहकार्यमग्निकार्यं वा गौणशब्द-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

मिथ्याप्रत्यय इति भावः। वस्तुसंग्रहवाक्यं सिद्धान्तवाक्यं विवृणोति—**न गौणप्रत्ययस्येत्यादिना**। यत्र (न) गौणप्रत्ययः, तत्र न मुख्यं कार्यं दृष्टम् , यथा न सिंहकार्यं देवदत्ते किञ्चिद् दृश्यते इत्युक्तम्। तर्हि मिथ्याप्रत्ययकार्यमपि मिथ्याप्रत्ययवति न

आनन्दगिरिकृतव्याख्या

**चोद्ये विवृते तत्कार्येष्वपीत्यादिपरिहारं विवृणोति—**नेत्यादिना। **हेतुभागं विभजते—**यथेति। **'सिंहो देवदत्तः' इति वाक्यं देवदत्तः सिंह इवेत्युपमया देवदत्तं क्रौर्याद्यधिकरणं स्तोतुं प्रवृत्तम्। 'अग्निर्माणवकः' इत्यपि वाक्यं माणवकोऽग्निरिवेत्युपमया माणवकस्य पैङ्गल्याधिकरणस्य स्तुत्यर्थमेव। न तथा 'मनुष्योऽह'मिति वाक्यस्याधिकरणस्तुत्यर्थता भातीत्यर्थः। देवदत्तमाणवकयोरधिकरणत्वं कथमित्याशङ्क्याह—**क्रौर्येति। **किञ्च गौणशब्दं तत्प्रत्ययं च निमित्तं कृत्वा सिंहकार्यं न किञ्चिद् देवदत्ते साध्यते। नापि माणवके किञ्चिदग्निकार्यम्। मिथ्याधीकार्यं त्वनर्थमात्माऽनुभवति। अतो न देहादावहन्धीर्गौणीत्याह—** न त्विति। **इतोऽपि देहादौ**

भाष्यार्कप्रकाशः

**अगृह्यमाणविशेषयोः** स्थाणुपुरुषयोर्मिथ्याप्रत्ययो भवति। गौणप्रत्ययस्तु गृह्यमाणविशेषयोर्देहिदेहयोः पितृपुत्रयोः गोप्राणयोश्च भवति। स्थाणुं, रज्जुं, शुक्तिकां वा मन्दान्धकारे सामान्याकारेण गृहीत्वा तद्गतविशेषाकारमगृहीत्वा पुरुष इति, सर्प इति, रजतमिति च प्रत्येति लोक इति स प्रत्ययो मिथ्यैव। संघातात्मानौ पुत्रात्मानौ गोप्राणौ च पृथग् विशेषतो गृहीत्वैव संघातं पुत्रं चाहमिति, गां प्राण इति च प्रत्येति लोक इति स प्रत्ययो गौण एवेति गौणमिथ्याप्रत्यययोर्भेदः। अविवेककृता अतस्मिंस्तद्बुद्धिर्मिथ्याप्रत्ययः, विवेककृता त्वतस्मिंस्तद्बुद्धिर्गौणप्रत्यय इति भावः। अत एव मिथ्याप्रत्ययो भ्रमज्ञानम् , गौणप्रत्ययस्तु प्रमैवेति व्यवहारः[१]।

अथ सिद्धान्तांशं विवृणोति—**गौणेति**। यदि देहादिष्वहम्प्रत्ययो गौणः स्यात् तर्हि देहादिकार्याण्यपि गौणान्येव स्युः, गौणात्मकृतकार्याणां मुख्यकार्यत्वायोगात्। न हि गौणात्मना पुत्रेण कृतं भोजनादिकर्म मुख्यात्मना स्वेनैव कृतमिति मन्यते पिता। तस्माद् गौणात्मना देहादिसंघातेन कृतं कार्यं सर्वमपि मुख्यात्मानं प्रति गौणमेव, न मुख्यम् , मुख्यात्मना तस्याकृतत्वात्। प्रकृते तु देहादिसंघातकृतं कर्म स्वेनैव कृतं मुख्यं कर्मेत्येव प्रत्येत्यात्मा। मया गतं भुक्तं स्नातं हुतमित्यादिव्यवहारात्। तस्मात् संघातकार्येषु मुख्यकार्यत्वदर्शनाद् गौणकार्यत्वादर्शनाच्च न संघातेऽहमिति प्रत्ययो गौणः, किन्तु मिथ्यैव। ननु गौणप्रत्ययोऽपि मुख्यकार्यार्थः किं न स्याद्? अत आह—**गौणप्रत्ययस्येति**। लुप्तोपमाशब्देन प्रतीयमानस्य गौणप्रत्ययस्य न मुख्यकार्यार्थता; अधिकरणस्तुत्यर्थत्वादित्यन्वयः। गौणप्रत्ययो मुख्यकार्यार्थो न भवति; किन्त्वधिकरणस्तुत्यर्थ एव। तत्र दृष्टान्तमाह—**यथेति**। 'सिंहो देवदत्तः' इति, 'अग्निर्माणवकः' इति च गौणप्रत्ययः। सिंह इवेत्यर्थे सिंहशब्दस्य, अग्निरिवेत्यर्थे अग्निशब्दस्य च प्रयोगात् सिंहाग्निशब्दौ लुप्तोपमाशब्दौ। उपमानोपमेययोः सिंहदेवदत्तयोरग्निमाणवकयोश्च साधारणधर्ममाह—**क्रौर्यपैङ्गल्येति**। किमर्थमेवं गौण्या वृत्त्या प्रयुज्यते? अत आह—**देवदत्तेति**। देवदत्तमाणवकरूपाधिकरणस्तुत्यर्थमित्यर्थः। माणवको बालः, 'ब्राह्मणमाणवे'ति निपातनाद् णत्वम् , अल्पार्थे कन्। मनोरल्पमपत्यम् पुमान् माणवकः। सिंहवत् क्रूरे देवदत्ते अग्निवत् पिङ्गलवर्णे माणवके च सिंह इति, अग्निरिति च यो गौणः प्रयोगः स न मुख्यकार्यार्थः, किन्तु देवदत्तमाणवकयोः स्तुत्यर्थ एव। एवकारार्थमाह—**न त्विति**। गौणशब्दप्रत्ययनिमित्तं सिंहकार्यमग्निकार्यं वा किञ्चिन्न तु साध्यत इत्यन्वयः। **गौणशब्दः** सिंह इति, अग्निरिति च प्रयोग इति यावत्। **प्रत्ययो** ज्ञानम् , तयोर्निमित्तं सिंहकार्यमग्निकार्यं वा मुख्यकार्यं गजकुम्भविदलनदाहादिरूपं किञ्चिन्न साध्यते, देवदत्तमाणवकयोरिति शेषः। 'सिंहो देवदत्तः' इति, 'अग्निर्माणवकः' इति च प्रयुञ्जानः प्रतिपद्यमानश्च पुरुषः देवदत्ते माणवके वा मुख्यसिंहकार्यं मुख्याग्निकार्यं च न विधित्सति,

१. विवक्षितगुणस्य विशेष्येऽबाधितत्वादिति भावः।

**प्रत्ययनिमित्तं किञ्चित् साध्यते, मिथ्याप्रत्ययकार्यं त्वनर्थमनुभवतीति। गौणप्रत्ययविषयं च जानाति 'नैष सिंहः देवदत्तः', तथा 'नायमग्निर्माणवकः' इति। तथा गौणेन देहादिसंघातेनात्मना कृतं कर्म न मुख्येनाहम्प्रत्यय-विषयेणात्मना कृतं स्यात्। न हि गौणसिंहाग्निभ्यां कृतं कर्म मुख्यसिंहाग्निभ्यां कृतं स्यात्। न च क्रौर्येण पैङ्गल्येन वा**

अनुभूतिस्वरूपाचार्यटिप्पणम्

दृष्टमित्याशङ्क्याह—**मिथ्याप्रत्ययकार्यं त्विति**। सर्पभ्रमादिकृतभयकम्पादेर्दर्शनादित्यर्थः। न केवलं गौणे मुख्यकार्याभावः, प्रत्ययोऽपि तत्र परस्परानात्मतावगाहीत्यादि[त्याह—] **गौणप्रत्ययविषयमिति**। दार्ष्टान्तिके योजयति—**तथा गौणेनेति**। तथा चात्मनि [१]**भट्टानां** बन्धो न स्यादिति दूषणम्। ननु यद्यपि गौणेन कृतं मुख्यस्य न सम्भवति, तथापि मुख्यकृतं गौणे

आनन्दगिरिकृतव्याख्या

**नाहन्धीर्गौणीत्याह—** गौणेति। **यो देवदत्तो माणवको वा गौण्या धियो विषयः, तं परो 'नैष सिंहः' 'नायमग्नि'रिति जानाति। नैवमविद्वानात्मनः संघातस्य च सत्यपि भेदे संघातस्यानात्मत्वं प्रत्येति। अतो न संघातेऽहंशब्दप्रत्ययौ गौणावित्यर्थः। संघाते तयोर्गौणत्वे दोषान्तरं समुच्चिनोति—**तथेति। **तथा सत्यात्मनि कर्तृत्वादिप्रतिभासासिद्धिरिति शेषः। गौणेन कृतं न मुख्येन कृतमित्युदा-हरणेन स्फुटयति—**न हीति। **यद्यपि देवदत्तमाणवकाभ्यां कृतं कार्यं मुख्याभ्यां सिंहाग्निभ्यां न क्रियते, तथापि देवदत्तगतक्रौर्येण मुख्यसिंहस्य, माणवकनिष्ठपैङ्गल्येन मुख्याग्नेरिव च संघातगतेनापि जडत्वेनात्मनो मुख्यस्य किञ्चित् कार्यं कृतं भविष्यतीत्याशङ्क्याह—**

भाष्यार्कप्रकाशः

असम्भवात्। किन्तु सिंहवत् क्रूरो देवदत्त इति, अग्निरिव पिङ्गलो माणवक इति च स्तुतिमेव चिकीर्षतीति भावः। ननु गौणप्रत्यय-विषयदेवदत्तमाणवककार्येष्वेव मुख्यकार्यत्वाभावे मिथ्याप्रत्ययविषयसंघातकार्येष्वपि कथं मुख्यात्मकार्यत्वम्? अत आह—**मिथ्येति**। अनात्मनि देहादिसंघाते य आत्मेति मिथ्याप्रत्ययस्तस्य कार्यं संसाररूपोऽनर्थ एव; तमनुभवत्येव स मिथ्याप्रत्ययी।

अयं भावः—देहादिसंघातकार्येष्वपि न मुख्यकार्यत्वं, किन्तु देहादिसंघातमनात्मानं यथा आत्मत्वेन प्रत्येति तथा तत्कार्य-मप्यात्मकार्यत्वेन प्रत्येतीति देहादिसंघातकार्ये मिथ्यात्मकार्यत्वमेवास्ति, न मुख्यात्मकार्यत्वम्। तत्र च मुख्यात्मकार्यत्वप्रत्ययो मिथ्यैव। अस्माच्च मिथ्याप्रत्ययादज्ञस्य संसारबन्ध एवेति। तस्माद् देहादिसंघातकार्याणि न गौणानि, नापि मुख्यानि, गौणात्माकार्य-त्वान्मुख्यात्माकार्यत्वाच्च। न हि संघातो गौणात्मा, नापि मुख्यात्मा, किन्तु मिथ्याभूतान्येव[त्मैव], मिथ्याकार्यत्वात्। संघातो हि मिथ्यात्मेति भावः। किञ्च **गौणप्रत्ययविषयं** गौणज्ञानविषयमित्यर्थः। देवदत्तं, माणवकं चेति यावत्। एष देवदत्तः सिंहो न भवति, अयं माणवकोऽग्निर्न भवतीति जानाति, 'सिंहो देवदत्तः' इति, 'अग्निर्माणवकः' इति च वाक्यप्रयोक्ता। एवं मिथ्याप्रत्ययविषयं तु स्थाणु-पुरुषादिकं न जानाति भ्रान्तः पुरुषः। न हि 'नायं पुरुषः, नेदं रजतं, नायं सर्पः' इति ज्ञानवान् स्थाणुं शुक्तिं रज्जुं वा दृष्ट्वा 'पुरुषोऽयं रजतमिदं सर्पोऽय'मिति भ्रमं प्रपद्येत। ततश्च यदि संघातो गौणप्रत्ययविषयस्तर्हि 'नायं संघात आत्मा' इति जानीयादेव लोकः, न तु तथा जानाति; किन्तु 'मनुष्योऽह'मित्येवं जानाति, न तु 'नाहं मनुष्य' इति। यः पुनर्विद्वान् संघातमनात्मानं जानाति, स संघात-मात्मत्वेन न गृह्णात्येवेति कथं गौणप्रत्ययविषयत्वं संघातस्य? तस्मान्मिथ्यैव संघातेऽहमिति प्रत्ययोऽज्ञानाम्। ननु गौणात्मकृत-कार्याणां गौणत्वे किं प्रयोजकमिति शङ्कायां मुख्यात्माकृतत्वमेवेत्यभिप्रेत्य मुख्यात्माकृतत्वमेव दर्शयति—**तथेति**। त्वदुक्तविधया गौणत्वाभ्युपगमे सतीत्यर्थः। गौणात्मकर्तृकस्य कर्मणः कुतो न मुख्यात्मकर्तृकत्वम्? अत आह—**न हीति। गौणसिंहाग्निभ्यामिति**। देवदत्तमाणवकाभ्यामित्यर्थः। ननु सिंहवत् क्रूरत्वाद् अग्निरिव पिङ्गलत्वाच्च मुख्यसिंहाग्निकार्यं गौणसिंहाग्नी कुरुत एव, गौण-सिंहाग्नि-कार्यं तु मुख्यसिंहाग्नी मा कुरुतां नाम, इत्यत आह—**न चेति**। सिंहवत्क्रूरः, अग्निवत्पिङ्गलः इत्यर्थबोधकगौणसिंहाग्निशब्दप्रयोगाद् देवदत्ते माणवके च क्रौर्यं पिङ्गलत्वं सिद्धम्। तेन च क्रौर्येण पैङ्गल्येन वा मुख्यसिंहाग्न्योः कार्यं किञ्चिन्नैव क्रियते। न हि गजकुम्भ-

१. कुमारिलभट्टानुयायिनामित्यर्थः। तैः देहाद् भेदज्ञानवतः 'अहं मनुष्य' इत्यादिव्यवहारस्य गौणत्वोक्तेः।

**मुख्यसिंहाग्न्योः कार्यं किञ्चित् क्रियते, स्तुत्यर्थेनोपक्षीणत्वात्। स्तूयमानौ च जानीतो नाहं सिंहो नाहमग्निरिति, न सिंहस्य कर्म ममाग्नेश्चेति। तथा न संघातस्य कर्म मम मुख्यस्यात्मनः इति प्रत्ययो युक्ततरः स्यात्, न पुनरहं कर्ता मम कर्मेति।**

**यच्चाहुः— आत्मीयैः स्मृतीच्छाप्रयत्नैः कर्महेतुभिरात्मा कर्म करोतीति। न, तेषां मिथ्याप्रत्ययपूर्वकत्वात्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

भवति। कथमन्यथा क्रौर्यादिकं देवदत्तादौ दृश्यत इत्याशङ्क्याह—**न च क्रौर्येणेति**। न केवलं गौणवाक्यप्रयोक्तुः विवेको भाति, श्रोतुरपि भातीत्याह—**स्तूयमानौ चेति**।

देहादेर्यत् कर्म तदात्मन एव भवति, [१]आत्मेच्छादिनिबन्धकत्वादित्याह—**यच्चाहुरिति**। भवेदेवं गौणपक्षेऽप्यात्मनः कर्तृत्वं यदीच्छादिमत्त्वं मिथ्याज्ञानं विना स्यादित्याह—**न, तेषामिति**। मिथ्याप्रत्ययनिमित्ते ये इष्टानिष्टे अनुभूते क्रियाफले

आनन्दगिरिकृतव्याख्या

न चेति। **देहादावहन्धियो गौणत्वायोगे हेत्वन्तरमाह**—स्तूयमानाविति। **देवदत्तमाणवकयोः सिंहाग्निभ्यां भेदधीपूर्वकं तद्व्यापारवत्त्वाभावधीवदात्मनोऽपि मुख्यस्य संघाताद् भेदधीद्वारा तदीयव्यापाररहित्यमात्मनि दृष्टं स्यादित्यर्थः। व्यावर्त्यं दर्शयति**—न पुनरिति।

**संघातेऽहन्धियो मिथ्याधीत्वेऽपि न तत्कृतमात्मनि कर्तृत्वम्, किं त्वात्मीयैर्ज्ञानेच्छाप्रयत्नैरस्य कर्तृत्वं वास्तवमिति मतमनुवदति**—यच्चेति। **ज्ञानादिकृतमपि कर्तृत्वं मिथ्याधीकृतमेव, ज्ञानादीनां मिथ्याधीकार्यत्वादिति दूषयति**—न, तेषामिति। **तदेव**

भाष्यार्कप्रकाशः

विदलनदाहादिलक्षणं मुख्यसिंहाग्निकार्यं क्रौर्येण पैङ्गल्येन वा देवदत्तमाणवकाभ्यां निर्वर्तयितुं शक्यते। तर्हि किं फलं क्रौर्यपैङ्गल्यविधानस्य? अत आह—**स्तुत्यर्थत्वेनेति**। स्तुत्यर्थं विहितस्य तस्य स्तुतिमात्रफलत्वात् तावतैव तस्योपक्षय इति न तद्विधानस्य फलान्तरं कल्पयितुं शक्यमिति भावः। स्तूयमानौ च देवदत्तमाणवकौ 'अहं सिंहो न भवामि, अहमग्निर्न भवामी'ति जानीतः, मम सिंहस्य कर्म न हि, ममाग्नेः कर्म न हीति च जानीतः। तथा देवदत्तमाणवकवत् संघातस्य गौणात्मनः कर्म मुख्यस्यात्मनो न भवतीति प्रत्ययो युक्ततरः स्यात्। 'अहं कर्ता, मम कर्मे'ति **प्रत्ययः पुनः** ज्ञानं तु आत्मन इति भावः, न युक्ततरः।

अयं भावः—'सिंहो देवदत्तः' 'अग्निर्माणवकः' इतिवद् देहादिसंघात आत्मेति यदि गौणः प्रत्ययः स्यात्, तर्हि गौणात्मनः संघातस्य यत् कर्म तन्मुख्यस्यात्मनो न भवत्येवेति कृत्वा कथं गौणात्मसंघातकर्तृककर्मणि मुख्यात्मनः कर्ताऽहं मम कर्मेति प्रत्ययः स्यात्? न हि गौणसिंहाग्निकर्तृककर्मसु मुख्यसिंहाग्न्योरहं कर्ता मम कर्मेति प्रत्ययो भवति। तस्मात् संघातकार्येषु गौणत्वाभावात्, मुख्यात्मनः तेषु स्वकर्तृकत्वस्वकर्मत्वप्रतीतिसत्त्वेन मुख्यत्वसत्त्वाच्च न संघातेऽहमिति प्रत्ययो गौणः, किन्तु मिथ्यैवेति। कूटस्थो मुख्यात्मा, संघातो मिथ्यात्मा, पुत्रादिर्गौणात्मेति विवेकोऽत्र बोध्यम् [बोध्यः]।

ननु संघातस्य जडस्य कर्तृत्वानुपपत्तेः आत्मैव स्वीयस्मृतीच्छाप्रयत्नैः कर्म करोतीति **तार्किका**दिमतमनुवदति—**यच्चाहुरिति**। करोतीति यच्चाहुरित्यन्वयः। तदपि **न,** न युक्तमित्यर्थः। तत्र हेतुमाह—**तेषामिति**। स्मृतीच्छाप्रयत्नानामित्यर्थः। मिथ्याप्रत्ययपूर्वकत्वमेव विवृणोति—**मिथ्येति**। अनात्मनि संघातेऽहमिति यो मिथ्याप्रत्ययः स एव निमित्तं यस्य सः। इष्टानिष्टरूपादनुभूतात् क्रियाफलाज्जनितो यः संस्कारः स **पूर्वः** कारणं येषां ते मिथ्याप्रत्ययनिमित्तेष्टानिष्टानुभूतक्रियाफलजनितसंस्कारपूर्वकाः, मिथ्याप्रत्ययनिमित्तत्वं क्रियाफलविशेषणं वा; मिथ्याप्रत्ययनिमित्तेष्टानिष्टरूपक्रियाफलानुभवजनितसंस्कारपूर्वका इत्यर्थः। अनात्मनि देहादिसंघातेऽहमिति मिथ्याप्रत्यये सति तत्क्रियासु ममेति मिथ्याप्रत्ययो भवति; ततस्तत्फलेष्विष्टानिष्टेषु 'मयेदमनुभूयत' इति 'ममेदं

१. आत्मवृत्तीच्छादिजन्यत्वात् देहादिनिष्ठकर्मणः इत्यर्थः।

**मिथ्याप्रत्ययनिमित्तेष्टानिष्टानुभूतक्रियाफलजनितसंस्कारपूर्वका हि स्मृतीच्छाप्रयत्नादयः। यथा अस्मिञ्जन्मनि देहादिसंघाताभिमानरागद्वेषादिकृतौ धर्माधर्मौ तत्फलानुभवश्च, तथाऽतीतेऽतीततरेऽपि जन्मनीत्यनादिरविद्याकृतः संसारोऽतीतोऽनागतश्चानुमेयः। ततश्च सर्वकर्मसंन्याससहितज्ञाननिष्ठया आत्यन्तिकः संसारोपरम इति सिद्धम्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ताभ्यां जनितो यः संस्कारः तत्पूर्वकत्वं स्मृत्यादेः इदानीं यद्यप्यनुभवसिद्धं तथापि कालान्तरे कथं सिद्ध्यतीत्याशङ्क्याह— **यथाऽस्मिन् जन्मनीति।**

आनन्दगिरिकृतव्याख्या

**प्रपञ्चयति—**मिथ्येति। **मिथ्याज्ञानं निमित्तं कृत्वा किञ्चिदिष्टं किञ्चिदनिष्टमित्यारोप्य तद्द्वाराऽनुभूते तस्मिन् प्रेप्साजिहासाभ्यां क्रियां निर्वर्त्य तयेष्टमनिष्टं च फलं भुक्त्वा तेन संस्कारेण तत्पूर्वकाः स्मृत्यादयः स्वात्मनि क्रियां कुर्वन्तीति युक्तं कर्तृत्वस्य मिथ्यात्वमित्यर्थः। अतीतानागतजन्मनोरिव वर्तमानेऽपि जन्मनि कर्तृत्वादिसंसारस्य वस्तुत्वमाशङ्क्याह—**यथेति। **विमतौ कालावविद्याकृतसंसारवन्तौ कालत्वाद् वर्तमानकालवदित्यर्थः। संसारस्याविद्याकृतत्वे फलितमाह—**ततश्चेति।

भाष्यार्कप्रकाशः

फल'मिति च मिथ्याप्रत्ययो भवति। तस्माच्च मिथ्याप्रत्ययपूर्वकात् फलानुभवात् संस्कारो जायते, अनुभवजन्यत्वात् संस्कारस्य। स च संस्कारो मिथ्याप्रत्ययपूर्वक एव। तस्मात् संस्कारात् पूर्वानुभूतार्थस्मृतिर्जायते, स्मृतिहेतुत्वात् संस्कारस्य। ततः स्मृतेऽर्थे इच्छा जायते, ततस्तत्सिद्ध्यर्थं प्रयतत इति स्मृतीच्छाप्रयत्ना मिथ्याप्रत्ययपूर्वका एव, क्रियायास्तत्फलस्य च मिथ्याप्रत्ययपूर्वकत्वादिति।

**ननु** कस्यचित् कदाचिद् [1]अप्यननुभूतार्थे स्मृत्युपलम्भात् कथं संस्कारपूर्वकत्वं स्मृत्यादीनामिति चेत् , **मैवम्** ; जन्मान्तरानुभूतार्थस्यैवेह जन्मनि स्मरणसम्भवात्। ननु जन्मान्तरीयानुभवस्य मिथ्याप्रत्ययपूर्वकत्वं कथं ज्ञायते? अत आह—**यथेति**। अस्मिन् जन्मनि पुरुषस्य देहादिसंघाते यः अहमित्यभिमानो ममेत्यभिमानश्च तत्प्रयुक्ता ये रागद्वेषादयः, तत्कृतौ धर्माधर्मौ, तत्फलानुभवो धर्माधर्मफलसुखदुःखानुभवश्च, तत्कृतो **देहादिसंघाताभिमानप्रयुक्तरागद्वेषादिकृतः**, देहादिसंघाताभिमानकृत इत्येव वा। तथाऽतीते जन्मन्यतीततरे जन्मनि चेत्यनादिरविद्याकृतोऽतीतोऽनागतश्च संसारोऽनुमेयः। यथाऽस्मिन् देहादिसंघातेऽहमिति मिथ्याज्ञानाद् रागद्वेषादिपूर्वकं धर्माधर्मौ कृत्वा तत्फलमनुभवति पुरुषः, एवं जन्मान्तरेऽपीति कृत्वा प्रकृतभवीयानुभववद् जन्मान्तरीयानुभवोऽपि मिथ्याप्रत्ययपूर्वक एव; तथा प्रकृतभवीयक्रियावज्जन्मान्तरीयक्रिया अपि मिथ्याप्रत्ययपूर्विका एव। तथा प्रकृतभवीयरागद्वेषादिवज्जन्मान्तरीयरागद्वेषादयोऽपि मिथ्याप्रत्ययपूर्वका एव। एवं प्रकृतभवीयमिथ्याप्रत्ययोऽपि जन्मान्तरीयमिथ्याप्रत्ययपूर्वक एव, पूर्वपूर्वाध्यासस्योत्तरोत्तराध्यासं प्रति हेतुत्वात्। तथा च मिथ्याप्रत्ययः, तत्पूर्वको रागद्वेषादिः, तत्कृतो धर्माधर्मादिः, तत्फलसुखदुःखानुभवः, तज्जन्यः संस्कार इत्येष संसार इहजन्मनीव जन्मान्तरेष्वप्यस्ति पूर्वेषु, प्राग्भवीयसंसारप्रयुक्तत्वादेतद्भवीयसंसारस्य। एवमुत्तरजन्मस्वपि भविष्यति, पूर्वजन्मसंसारस्येहजन्मसंसारहेतुत्ववदिहजन्मसंसारस्योत्तरजन्मसंसारहेतुत्वात्। एवमनादिरयं चक्रवत् परिभ्रमति संसारः। अनेन चानादित्ववचनेन कथमादावहमभिमानः संघाते पुरुषस्य, पूर्वकृतसंस्काराभावादिति शङ्का प्रत्युक्ता। अनादिरपि कार्यभूतत्वादनित्य एवायमिति सुपरिहर इत्याह—**अविद्याकृत इति**। अज्ञानकृतोऽज्ञानवन्मिथ्याभूत इत्यर्थः। एतेन देहादिसंघातेऽहमिति मिथ्याप्रत्ययस्याज्ञानमेव हेतुरिति सिद्धम्। एवमज्ञानहेतुकत्वादेव संघातेऽहमिति प्रत्ययो मिथ्याप्रत्ययः, न तु गौणः। आत्मानात्माविवेकपूर्वकत्वात्। गौणो हि सिंहदेवदत्तविवेकपूर्वकः।**अनुमेय इति**। इहजन्मानुभवसिद्धेन संसारेण जन्मान्तरीयसंसारोऽनुमेय इत्यर्थः। यथा— जन्मान्तरे मम संसारानुभवोऽस्ति, इहजन्मनि मया संसारस्य स्मर्यमाणत्वात्। अनुभवजन्यसंस्कारपूर्विका हि स्मृतिः। पूर्वदिनानुभूतघटस्यास्मिन् दिने स्मरणवत्। एवमुत्तरजन्मनि मम संसारो भविष्यति, इहजन्मनि मया संसारस्यानुभूतत्वात्। पूर्वजन्मानुभूतसंसारो यथेहजन्मन्यासीत् तद्वदिति च प्रयोगवशादिति भावः। भवत्वेवमविद्याकृतः संसारः, किं

१. अननुभूतार्थेऽपि इत्यन्वयः।

**अविद्यात्मकत्वाच्च देहाभिमानस्य तन्निवृत्तौ देहानुपपत्तेः संसारानुपपत्तिः। देहादिसंघात आत्माभिमानो ऽविद्यात्मकः। न हि लोके गवादिभ्योऽन्योऽहं मत्तश्चान्ये गवादय इति जानंस्तान् अहमिति (प्रत्ययं) मन्यते कश्चित्। अजानंस्तु स्थाणौ पुरुषविज्ञानवदविवेकतो देहादिसंघाते कुर्यादहमिति प्रत्ययं, न विवेकतो जानन्। यस्तु 'आत्मा वै पुत्रनामासि'(एकाग्नि.२.१२) इति पुत्रेऽहम्प्रत्ययः, स तु जन्यजनकसम्बन्धनिमित्तो गौणः। गौणेन चात्मना**

अनुभूतिस्वरूपाचार्यटिप्पणम्

देहाद्यभिमानस्याविद्यात्मकत्वं विद्याविरोधित्वेन विवृणोति—**देहादिसंघातेऽभिमान इत्यादिना**। ननु यथा गौणेनात्मना पुत्रेण कृतं वैश्वदेवादि स्वकृतमेव भवति, तथा गौणेन देहादिना कृतमात्मकर्तृ[क](त्व)मेव भविष्यतीत्याशङ्क्याह—

आनन्दगिरिकृतव्याख्या

**तस्याविद्यत्वेन विद्यापोह्यत्वे हेत्वन्तरमाह—**अविद्येति। **कुतोऽस्याविद्याकृतत्वं धर्माधर्मकृतत्वसम्भवादित्याशङ्क्याह—** देहादीति। **आत्मनो धर्मादिकर्तृत्वस्याविद्यत्वान्नाविद्यां विना कर्मिणां देहाभिमानः सम्भवति, अतश्चात्मनः संघातेऽहमभिमानस्याविद्याविद्यमानतेत्यर्थः। आत्मनो देहाद्यभिमानस्याविद्यकत्वमन्वयव्यतिरेकाभ्यां साधयन् व्यतिरेकं दर्शयति—**न हीति। **अन्वयं दर्शयन् व्यतिरेकमनुवदति—**अजानन्निति। **पुत्रे पितुः अहन्धीवद् आत्मीये देहादौ अहन्धीर्गौणीत्युक्तमनुवदति—**यस्त्विति। **तत्र दृष्टान्तश्रुतेर्गौणात्मविषयत्वमुक्तमङ्गीकरोति—**स त्विति। **तर्हि देहादावपि तथैव स्वकीये स्यादहन्धीर्गौणीत्याशङ्क्याह—** गौणेनेति। **न हि**

भाष्यार्कप्रकाशः

ततः? अत आह— **ततश्चेति**। संसारस्याविद्यापूर्वकत्वादित्यर्थः। सर्वकर्मसंन्यासपूर्वकज्ञाननिष्ठयैवात्यन्तिकः संसारोपरमः। **आत्यन्तिको** निःशेष इत्यर्थः। संसारमूलस्याज्ञानस्यापि नाशादिति भावः। अविद्यापूर्वकस्य मिथ्याप्रत्ययधर्माधर्मरागद्वेषेष्टानिष्टसंस्कारादिरूपस्य संसारस्य विद्ययैव समूलोच्छेदः, विद्याविद्ययोर्विरोधात्; न तु कर्मणा, तस्याप्यविद्यापूर्वकत्वेन कर्माविद्ययोरविरोधात्, कर्मसंसारयोः हेतुहेतुमद्भावात् कर्मणोऽपि धर्माधर्मलक्षणस्य संसारान्तःपातित्वेन संसारत्वाच्च। तस्माज्ज्ञानादेव मोक्ष इति सिद्धम्।

कुतः सिद्धम्? अत आह—**अविद्येति**। **देहाभिमानस्य** देहादिसंघातेऽहम्प्रत्ययस्य मिथ्याभूतस्य **अविद्यात्मकत्वाद्** अज्ञानकृतत्वात् कार्यकारणयोरभेदेनाज्ञानस्वरूपत्वाच्च, **तन्निवृत्तौ** अविद्याया निवृत्तौ देहाभिमानानुपपत्तेः संसारानुपपत्तिः; देहाभिमानपूर्वकत्वात् संसारस्येति भावः। देहादिसंघातमविद्ययाऽऽत्मत्वेन प्रतिपद्य हि धर्माधर्मसुखदुःखजन्ममरणादिलक्षणं संसारमनुभवत्यज्ञः। अविद्यात्मकत्वाद् देहाभिमानस्येति वाक्यं व्याचष्टे—**देहादीति**। अविद्यानिवृत्तावभिमाननिवृत्तिः, अविद्यायां निवृत्तायां सत्यां 'संघातादन्योऽहमात्मा, मत्तोऽन्यः संघात' इति जानाति, अविद्याकृतत्वात् संघातात्मनोस्तादात्म्याध्यासस्य। एवमात्मानात्मानौ स्वसंघातौ विविच्य जानन् पुरुषः तस्मिन् संघाते स्वस्मादत्यन्तभिन्ने कथमहमिति प्रत्ययं कुर्यात्? न कथमपि। तत्र दृष्टान्तमाह—**न हीति**। ननु यद्येवं जानन् पुरुषः संघाते न कुर्यादहमिति मिथ्याप्रत्ययम्, तर्हि कः पुनः करोति? अत आह—**कश्चिदजानन्निति**। यथा स्थाणुमजानन् पुरुषः स्थाणौ पुरुष इति विज्ञानं (प्रत्ययं) करोति, तथा आत्मानात्माविवेकतः संघातेऽहमिति प्रत्ययं कुर्यादजानन् कश्चित् पुरुषः। अजानंस्त्विति **तुशब्दार्थमाह—न विवेकतो जानन्निति**। आत्मानात्मानौ विवेकतो जानन् अयमात्मा, अयमनात्मेति विविच्य जानन् पुरुषः संघातेऽनात्मनि अहमिति प्रत्ययं न करोति; यथा स्थाणुं विद्वान् पुरुषः स्थाणौ पुरुषोऽयमिति प्रत्ययं न करोति, तद्वदिति भावः।

**ननु** स्थाणुपुरुषदृष्टान्तो नेहानुकूलः, विद्यमाने स्थाणावविद्यमानपुरुषभ्रमः सः, विद्यमाने संघाते विद्यमानात्मभ्रमोऽयमिति भेदात्। न हि परस्पराध्यस्तमात्मानात्मपदार्थद्वयमिव स्थाणुपुरुषद्वयं तत्रास्तीति चेत्, **मैवम्**; स्थाणौ पुरुष इतिवद् अनात्मन्यात्मेति भ्रम इत्येतावत एवांशस्येह साधर्म्यत्वेन विवक्षिततत्वात्। यथा पुरुषव्यतिरिक्तोऽपि स्थाणुः पुरुषतादात्म्याध्यासात् 'पुरुषः सः' इति व्यवह्रियते, तथा आत्मव्यतिरिक्तोऽप्यनात्मा संघातः आत्मतादात्म्याध्यासादात्मेति व्यवह्रियत इति।

**भोजनादिवत् परमार्थकार्यं न शक्यते कर्तुम् , गौणसिंहाग्निभ्यां मुख्यसिंहाग्निकार्यवत्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**गौणेन चात्मनेति**। यथा पुत्रेण कृते भोजने न तत्पित्रा कृतं भवतीति लौकिकव्याप्तिबलादवगम्यते। वैश्वदेवादौ तु तत्कृतमेवास्य सम्भवतीति शास्त्रबलादेवाभ्युपगम इति भावः।

आनन्दगिरिकृतव्याख्या

**स्वकीयेन पुत्रादिना गौणात्मना पितृभोजनादिकार्यं क्रियते। तथा देहादेरपि गौणात्मत्वे तेन कर्तृत्वादिकार्यमात्मनो न वास्तवं सिध्यतीत्यर्थः। गौणात्मना मुख्यात्मनो नास्ति वास्तवं कार्यमित्यत्र दृष्टान्तमाह—**गौणेति। **न हि गौणसिंहेन देवदत्तेन मुख्यसिंहकार्यं क्रियते। नापि गौणाग्निना माणवकेन मुख्याग्निकार्यं दाहपाकादि। तथा देहादिना गौणात्मना मुख्यात्मनो न वास्तवं कार्यं कर्तृत्वादि कर्तुं**

भाष्यार्कप्रकाशः

**ननु** यः स्थाणुं पुरुषं चोभौ वेत्ति तस्य स्थाणौ पुरुषभ्रमः, न त्वन्यतरापरिज्ञातुः, नाप्युभयापरिज्ञानात् , बालस्य तददर्शनात्। एवमात्मानात्मानौ जानतः किं संघातात्मभ्रमो भवति, उतान्यतरमजानतः, यद्वोभयमजानतः? नाद्यः, आत्मानात्मविदः सम्यग्दर्शिन एव संघातात्मभ्रमप्रसङ्गात्। द्वितीये, किमात्मानमजानतः? उतानात्मानमजानतः? नाद्यः, पुरुषापरिज्ञातुः स्थाणौ पुरुषभ्रमासम्भववदात्मापरिज्ञातुः संघाते आत्मभ्रमासम्भवात्। न द्वितीयः, अनात्मविद एवाभावात्। न तृतीयः, सुषुप्तिमृत्यादिषु भ्रमासम्भवादिति चेत् , **मैवम्** ; आत्मानमनात्मानं वा यः सम्यग् वेत्ति, न तस्य संघाते आत्मभ्रमो भवति। न हि स्थाणुं पुरुषं वा सम्यग् विदितवतः स्थाणावपि पुरुषभ्रमो भवति। न च प्रकृतपुरुषभ्रमविषयस्थाणुस्वरूपयाथार्थ्यज्ञानाभावेऽपि स्थाणुसामान्यस्वरूपज्ञानमस्तीति वाच्यम् ; भ्रमम्प्रति संस्कार(ज्ञान)स्यैव हेतुत्वेन स्वानुभूतस्थाणुपुरुषसंस्कारवशाद् यथा स्थाणौ पुरुषभ्रम एवं दिनान्तरे जन्मान्तरे वा स्वानुभूतसंघातात्मभ्रमसंस्कारवशादिदानीं संघातात्मभ्रमोदय इति। तस्माद् य आत्मानं सम्यङ् न वेत्ति तस्यैवानात्मनि संघाते आत्मेति भ्रमः, आत्मनि सम्यग्विदिते सति संघाते आत्मभ्रमायोगात्। नाप्यात्मानं सुतरामविदुषः संघाते आत्मभ्रमः सम्भवति; किन्तु कर्ता भोक्ता जातो मृत इति विपरीतलक्षणमात्मानं यो वेत्ति तस्य संघाते आत्मभ्रमः। न च भ्रमात्प्राक् कथं विपरीतात्मज्ञानम् इति वाच्यम् ; बीजाङ्कुरन्यायेन भ्रमात्प्राग् विपरीतात्मज्ञानं तस्मात्प्राग् भ्रमश्चास्तीति। **यद्वा**ऽज्ञानादात्मनि विपरीतज्ञानं भ्रमश्चेत्युभयमेकदैव भवति।

**वस्तुतस्तु** स्वशब्दवाच्योऽहमित्यनुभवसिद्ध आत्मेति कश्चन पदार्थोऽस्तीति सामान्याकारेणात्मानं सर्वे विदन्त्येव। अज्ञास्तु तमेवात्मानं संघातत्वेन प्रतिपद्यन्त इति संघाते आत्मभ्रमोऽज्ञानां युक्ततरः। अनुभवसिद्धत्वाद् दुरपलापेऽस्मिन् संघातात्मभ्रमेऽविद्यापूर्वकत्वादनिर्वाच्ये नातीव प्रश्नोत्तरसरणिः कार्या, मायामयस्य वस्तुनः सति विमर्शे स्वरूपासिद्धेः। न हि कृते विमर्शे रज्जुसर्पस्य क्वाप्यात्मसत्तालाभः। तस्मान्मायामयोऽयं संघातः, तस्मिन्नात्मभ्रमश्चेति मिथ्यैवैतदुभयम्। अत एव संघातेऽहमिति मिथ्याप्रत्यय इत्युक्तम्। ननु 'आत्मा वै पुत्रनामासी'ति श्रुतिप्रामाण्यात् पुत्रे अहमिति प्रत्ययो यथा गौणः, तथा स्वीये संघातेऽप्यहमिति प्रत्ययो गौण एव, न मिथ्येत्यत आह—**यस्त्विति**। पुत्रस्य गौणात्मत्वेऽपि संघातस्य न गौणात्मत्वम्।

कुतः पुत्रस्य गौणात्मत्वम्? अत आह—**स त्विति**। जन्यजनकयोः पुत्रपित्रोर्यः सम्बन्धः जन्यजनकभावरूपः, स निमित्तं यस्य स तथोक्तः, पुत्रेऽहमिति प्रत्ययो गौणः, जन्यजनकभावरूपसम्बन्धात्मकगुणनिमित्तत्वादिति भावः। नैवात्मसंघातयोरस्ति जन्यजनकसम्बन्धः, देहेन्द्रियाद्यवच्छिन्नचैतन्यलक्षणस्यात्मनः देहेन्द्रियादिजनकत्वासम्भवात्। 'आत्मन आकाशः सम्भूतः' इति श्रुतिस्तु देहेन्द्रियाद्य[न]वच्छिन्नात्मपरेति न विरोधः। तस्मात् संघातेऽहम्प्रत्ययो न गौणः, किन्तु मिथ्यैव। किञ्च गौणेनात्मना संघातेन परमार्थात्मकार्यं कर्तुं न शक्यते। यथा पुत्रेण गौणात्मना पितुर्मुख्यात्मनः कार्यं भोजनादिकं कर्तुं न शक्यते, तद्वदित्याह—**गौणेन चेति**। न हि पितृदेहस्य पितृभुक्तान्नपानैरिव पुत्रभुक्तान्नपानैर्वृद्ध्यादिरस्ति, येन गौणात्मसंघातकृतकर्मभिर्मुख्यात्मनः स्वर्गादिप्राप्तिः स्यात्। श्रूयते चात्मनः संघातकर्मभिः स्वर्गादिप्राप्तिः। तस्मात् संघातो न गौणात्मा, किन्तु मिथ्यात्मैव। मुख्यात्मकार्यं

**अदृष्टविषयचोदनाप्रामाण्यादात्मकर्तव्यं गौणैर्देहेन्द्रियात्मभिः क्रियत एव इति चेन्न, अविद्याकृतात्मत्वात् तेषाम्। न गौणा आत्मानो देहेन्द्रियादयः। [1]कथं तर्हि? मिथ्याप्रत्ययेनैव [2]असङ्गस्यात्मनः सङ्गत्यात्मत्वमापाद्यते, तद्भावे भावात् तदभावे चाभावात्। अविवेकिनां ह्यज्ञानकाले बालानां दृश्यते दीर्घोऽहं गौरोऽहमिति देहादिसंघाते अहम्प्रत्ययः। न तु विवेकिनाम् अन्योऽहं देहादिसंघातादिति जानतां तत्काले देहादिसंघातेऽहम्प्रत्ययो भवति।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

तर्हि इदं नाम शास्त्रबलादेवाभ्युपगम्यतामित्याह—**अदृष्टविषयेति**। किं शास्त्रस्य प्रामाण्यं प्रकारान्तरेण न सम्भवतीत्यभिप्रायः, किं वा शास्त्रमुखादित्थमेव प्रतीयते? प्रथमं प्रत्याह—**नाविद्यात्मकत्वात् [नाविद्याकृतात्मत्वात्] इति। तेषां** देहादीनाम्। ततो ब्राह्मण्यादिविशिष्टदेहादिना कृतमात्मकृतमेवेति भावः। वस्तुसंग्रहं विवृणोति—**न गौणा इत्यादिना।**

आनन्दगिरिकृतव्याख्या

**शक्यमित्यर्थः।**

**स्वर्गकामादिवाक्यप्रामाण्यादात्मनो देहाद्यतिरेकज्ञानात् तस्य च केवलस्याकर्तृत्वात् तत्कर्तव्यं कर्म गौणैरेव देहाद्यात्मभिः सम्पाद्यते। न हि सत्येव श्रौतातिरेकज्ञाने देहादावात्मत्वमात्मनो मुख्यं युक्तमिति चोदयति—**अदृष्टेति। **न देहादीनामात्मत्वं गौणं तदीयात्मत्वस्याविद्यत्वेन मुख्यत्वात् , अतो न गौणात्मभिरात्मकर्तव्यं कर्म क्रियते, किन्तु मिथ्यात्मभिरिति परिहरति—**नाविद्येति। **तदेव विवृण्वन्नर्थं स्फुटयति—**न गौणा इति। **कथं तर्हि देहादिविषयात्मत्वप्रथेत्याशङ्क्याविद्याकृतेत्यादिहेतुं विभजते—**कथं तर्हीति। **देहादीनामनात्मनामेव सतामात्मत्वं मिथ्याप्रत्ययकृतमित्यत्रान्वयव्यतिरेकावुदाहरति—**तद्भाव इति। **उक्तेऽन्वये शास्त्रीयसंस्कारशून्यानामनुभवं प्रमाणयति—**अविवेकिनामिति। **व्यतिरेकेऽपि दर्शिते शास्त्राभिज्ञानामनुभवमनुकूलयति—**न त्विति। **अन्वयव्यतिरेकाभ्याम्**

भाष्यार्कप्रकाशः

गौणात्मना कुतो न क्रियत इत्यतो दृष्टान्तमाह—**गौणेति**। गौणसिंहाग्निभ्यां देवदत्तमाणवकाभ्यां मुख्यसिंहाग्निकार्ये यथा न क्रियेते, तद्वत्। न च मिथ्यात्मनाऽपि मुख्यात्मकार्यं कथं क्रियत इति वाच्यम् ; संघाते आत्मेति प्रत्ययवत् , तत्कार्येष्वपि मुख्यात्मकार्यत्वप्रत्ययसत्त्वात्।

नन्वदृष्टेषु विषयेषु स्वर्गादिषु या चोदना 'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्यादिविधिः, साऽनात्मनो न भवति, तस्य जडत्वात्। अतो मुख्यात्मन एव भवति। तच्छास्त्रप्रामाण्याच्च कर्तव्यमेव मुख्यात्मना यज्ञादिकं कर्म, अन्यथा विधिवैयर्थ्यप्रसङ्गेन विधीनामप्रामाण्यापत्तेः। तच्च मुख्यात्मना कर्तव्यं कर्म गौणात्मभिः क्रियते मुख्यात्मनः करणाद्यभावादिति शङ्कते—**अदृष्टेति**। परिहरति—**नेति**। हेतुमाह—**अविद्येति**। देहेन्द्रियादयो न गौणात्मानः, तेषां देहादीनामविद्याकृतात्मत्वात्। अविद्ययैव देहेन्द्रियादयोऽनात्मानोऽप्यात्मानः कृताः, न तु गौणवृत्त्या, यथा अविद्यया रज्जुः सर्पः क्रियते, तद्वत्। तस्मान्मिथ्यात्मान एव त इत्याह—**किं तर्हीति**। अनात्मनां सतामनात्मत्वेन वर्तमानानां तेषां देहादीनां मिथ्याप्रत्ययेनैवाविद्यापूर्वकेणात्मत्वमापाद्यते, न तु गौणप्रत्ययेन। तस्मात् ते मिथ्यात्मान एव। मिथ्याप्रत्ययेनैव देहादीनामात्मत्वमापाद्यत इत्यत्र हेतुमाह—**तद्भाव इति**। मिथ्याप्रत्ययसत्त्वे देहादीनामात्मत्वसत्त्वम् , मिथ्याप्रत्ययाभावे देहादीनामात्मत्वाभाव इत्यन्वयव्यतिरेकाभ्यां मिथ्याप्रत्ययपूर्वकत्वं देहाद्यात्मत्वस्य सिद्धम्। यथा मृत्सत्त्वे घटसत्त्वं, मृदभावे घटाभावः इत्यन्वयव्यतिरेकाभ्यां घटस्य मृत्पूर्वकत्वसिद्धिः, तद्वदिति भावः। अन्वयव्यतिरेकावेव विवृणोति—**अविवेकिनामिति**। अविवेकिनां बालानां मूढानामज्ञानकाले देहादिसंघाते विषये 'दीर्घोऽहम्' 'गौरोऽह'मिति प्रत्ययो दृश्यते। देहादिसंघातादन्योऽहमिति जानतां विवेकिनां तु तत्काले ज्ञानकाले देहादिसंघातेऽहम्प्रत्ययो न भवति। अविवेकिनामपि कालान्तरे विवेकसत्त्वे तादृशप्रत्ययाभावादुक्तमज्ञानकाल इति। विवेकिनामपि कस्मिंश्चिद् दुःखाद्यनुभवकाले विवेकलोपे सति संघातात्मप्रत्यय-

१. 'किं तर्हि' इति पा.। २. 'अनात्मानः सन्तः आत्मत्वमापाद्यन्ते' इति पा.।

**तस्माद् मिथ्याप्रत्ययाभावेऽभावात् तत्कृत एव, न गौणः। पृथग्गृह्यमाणविशेषसामान्ययोर्हि सिंहदेवदत्तयोः अग्नि-माणवकयोर्वा गौणः प्रत्ययः, शब्दप्रयोगो वा स्यात्, नागृह्यमाणसामान्यविशेषयोः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

अन्वयव्यतिरेकाभ्यामविद्याकृतत्वमुपपाद्य गौणत्वाभावे पूर्वोक्तं हेतुं स्मारयति—**पृथग्गृह्यमाणेत्यादिना।** यत्रापरोक्षेऽर्थे गौणप्रत्ययः, तत्र देवेकापरोक्ष्यमदृष्टम्[विवेकापरोक्ष्यं[1] दृष्टम्]। इह तु यौक्तिकविवेकेऽपि (हेतु)विवेकापरोक्ष्यं व्यापकं व्यावर्त-मानं स्वव्याप्यं गौणत्वमपि व्यावर्तयतीति भावः।

आनन्दगिरिकृतव्याख्या

**अनुभवानुसारिणां सिद्धमर्थमुपसंहरति—**तस्मादिति। तत्कृत एव **देहादावहम्प्रत्यय इति शेषः। किञ्च व्यवहारभूमौ भेदग्रहस्य गौणत्वव्यापकत्वात् तस्य प्रकृतेऽभावान्न देहादावहंशब्दप्रत्ययौ गौणावित्याह—**पृथगिति।

भाष्यार्कप्रकाशः

सत्त्वादुक्तम्— **तत्काल इति। तस्मादिति।** विवेकिनां विवेककाले संघातात्माभिमानादर्शनात्, अविवेकिनामविवेककाले संघातात्मा-भिमानदर्शनाच्चेत्यर्थः। विवेकिनामपि विवेककाले संघाताभिमानादर्शनाद् अविवेककाले तद्दर्शनाद् अविवेकिनामपि विवेकोदयानन्तरं संघाताभिमानादर्शनाच्चेत्यर्थ इति वा। मिथ्याप्रत्ययाभावे देहाद्यात्मत्वाभावादित्याह—**मिथ्येति।** नन्वविवेकिनामित्यादिग्रन्थेनाज्ञान-सत्त्वे मिथ्याप्रत्ययसत्त्वम्, तदभावे तदभाव इत्येवान्वयव्यतिरेकावुक्तौ। न तु मिथ्याप्रत्यये सति देहाद्यात्मत्वम् तदभावे तदभाव इति चेत्, नैष दोषः, अज्ञाने सति मिथ्याप्रत्ययः मिथ्याप्रत्यये सति देहाद्यात्मत्वमिति कृत्वा अज्ञाने सति मिथ्याप्रत्ययः, तदभावे तदभाव इत्यन्वयव्यतिरेकप्रदर्शनेन मिथ्याप्रत्यये सति देहाद्यात्मत्वम्, तदभावे तदभाव इत्यन्वयव्यतिरेकयोरप्युक्तप्रायत्वादिति। यद्वा मिथ्या-प्रत्ययेन संघातस्यात्मत्वमन्वयव्यतिरेकाभ्यां सिद्धं भवतु नाम, स तु मिथ्याप्रत्ययो ना-विद्यापूर्वकः। विदुषामपि संघातेऽहम्प्रत्यय-दर्शनात्, अत आह—**अविवेकिनामिति। तस्मादिति।** मिथ्याप्रत्ययस्याविद्यापूर्वकत्वादित्यर्थः। **तत्कृत एवेति।** संघातेऽहमिति प्रत्ययोऽज्ञानकृतमिथ्याप्रत्यय एवेत्यर्थः। एवकारार्थमाह—**न गौण इति।** कस्मान्न गौणः? अत आह—**पृथगिति।** पृथग्गृह्यमाणे विशेषसामान्ये ययोस्तयोः **पृथग्गृह्यमाणविशेषसामान्ययोः।** हिः प्रसिद्धौ। गौणप्रत्ययः 'सिंहो देवदत्तः' इति ज्ञानं तत्पूर्वकः शब्द-प्रयोगः 'सिंहो देवदत्तः' इति वाचोच्चारणम्। अगृह्यमाणविशेषसामान्ययोरात्मसंघातयोस्तु न गौणः प्रत्ययो भवति संघात आत्मेति। तस्मात् संघातेऽहमिति प्रत्ययो न गौणः।

अयं भावः—सिंहं देवदत्तं च सामान्याकारेण विशेषाकारेण च पृथग् जानन्नेव पुरुषः 'सिंहो देवदत्तः' इति प्रत्येति, सिंहदेवदत्तगतक्रौर्यादिसमानधर्माणामग्रहणे देवदत्ते सिंहतौल्यबुद्ध्यनुदयात्। केसरशिखाचतुष्पात्त्वद्विपात्त्वादिविशेषधर्माणामग्रहणे देवदत्ते सिंहाभेदबुद्ध्युदयप्रसङ्गाच्च। एवमात्मानं संघातं च यदि सामान्याकारेण विशेषाकारेण च पृथग् जानन् पुरुषो यदि संघात आत्मेति प्रतीयात् तर्हि संघातेऽहम्प्रत्ययो गौणः स्यात्, न तु तथा विद्वान् प्रत्येति, विद्याया आनर्थक्यप्रसङ्गात्। संघातात्मभ्रम-निवारणफला संघातभिन्नसच्चिदानन्दात्मस्वरूपावगतिपर्यवसाना च हि विद्या। कथं संघातभिन्नं सच्चिदानन्दलक्षणमात्मानं सामान्यतो विशेषतश्च जानन् पुरुषः संघातेऽहमिति प्रत्ययं कुर्यात्? यस्तु मनुष्योऽहमित्यभिमन्यते; स ह्यनात्मेति, आत्मेति च पदार्थद्वयमस्तीति सामान्याकारेणैव न वेत्त्यात्मानात्मानौ। किम्पुनः सच्चिदानन्दलक्षण आत्मा, अनृतजडदुःखात्मकोऽनात्मेति विशेषाकारेण। अत एव हि तस्यानात्मन्यात्मेति प्रत्ययो भ्रमः स्थाणौ पुरुष इति प्रत्ययवत्। यथा सिंहदेवदत्तौ पृथक्पश्यन् पुरुषः 'सिंहो देवदत्त' इति प्रत्येति, (न तथा स्थाणुः पुरुष इति प्रत्येति,) न तथा स्थाणुपुरुषौ पृथक् पश्यन् स्थाणुः पुरुष इति प्रत्येति; किन्तु स्थाणुमेकमेव पश्यन् पुरुष इति प्रत्येति। एवमात्मानात्मानौ पृथक् पश्यन् संघात आत्मेति (मनुष्योऽहमिति) न प्रत्येत्यज्ञः, किन्त्वनात्मानमेकमेव पश्यन्नात्मेति प्रत्येति। तस्मात् संघातेऽहमिति प्रत्ययो न गौणः, किन्तु मिथ्यैव।

---

१. विवेकापरोक्ष्यं भेदप्रत्यक्षम्।

**यत्तूक्तम्— श्रुतिप्रामाण्यादिति, तन्न, तत्प्रामाण्यस्यादृष्टविषयत्वात्। प्रत्यक्षादिप्रमाणानुपलब्धे हि विषये-ऽग्निहोत्रादिसाध्यसाधनसम्बन्धे श्रुतेः प्रामाण्यम्, न प्रत्यक्षादिविषये, अदृष्टदर्शनार्थविषयत्वात् प्रामाण्यस्य। तस्मान्न**

अनुभूतिस्वरूपाचार्यटिप्पणम्

द्वितीयं विकल्पं दूषयति—**यत्तूक्तमित्यादिना**। अग्निहोत्रादेः स्वर्गादिसाधनत्वे श्रुतिः प्रमाणम्। न गौणेनात्मना कृतं मुख्यस्य स्यादिति श्रुतिमुखात् प्रतीयते। तात्पर्यकल्पनं त्वनुभवविरुद्धमिति भावः।

आनन्दगिरिकृतव्याख्या

**अदृष्टविषयचोदनाप्रामाण्यात् कर्तुरात्मनो व्यतिरेकावधारणात् तस्य देहादावहमभिमानस्य गौणतेत्युक्तमनुवदति—**यत्त्विति। **श्रुतिप्रामाण्यस्याज्ञातार्थविषयत्वान्मानान्तरसिद्धे व्यतिरिक्तात्मनि चोदनाप्रामाण्याभावान्न तदवष्टम्भेन देहादावात्माभिमानस्य गौणतेत्युत्तरमाह—**न तदिति। **श्रुतिप्रामाण्यस्यादृष्टविषयत्वं स्पष्टयति—**प्रत्यक्षादीति। **अज्ञातार्थज्ञापकं प्रमाणमिति स्थितेर्न ज्ञाते श्रुतिप्रामाण्यमित्याह—**अदृष्टेति। **अज्ञातसाध्यसाधनसम्बन्धबोधिनः शास्त्रस्यातिरिक्तात्मन्यौदासीन्ये फलितमाह—**तस्मादिति। **अन्वय-**

भाष्यार्कप्रकाशः

ननु यदि देहेन्द्रियादयो मिथ्यात्मानः स्युस्तर्हि तत्कृतमपि कर्म मिथ्यैव स्यादिति कथं मिथ्याभूतं यज्ञादिकर्म श्रुतिर्ब्रूयाद् मुख्यात्मकर्तव्यत्वेन? तस्माच्छ्रुतेरदृष्टविषयमुख्यात्मचोदनाप्रामाण्यान्मुख्यात्मकर्तव्यं गौणैर्देहेन्द्रियादिभिः क्रियत इत्यवश्यमभ्युपगन्तव्यम्, वेदस्य सर्वप्रमाणाधिकत्वात्। न हि वेदप्रामाण्यमुपपत्तिभिर्विघटयितुमर्हम्, अत आह—**यत्तूक्तमित्यादि। तत्प्रामाण्यस्येति**। श्रुतिप्रामाण्यस्येत्यर्थः। 'प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते। एनं विदन्ति वेदेने'ति वचनात् प्रत्यक्षानुमितिप्रमाणाविषयादृष्टार्थबोधकत्व एव वेदस्य प्रामाण्यम्, न तु दृष्टार्थविषय इति भावः। इदमेवाह—**प्रत्यक्षादीति**। आदिपदादनुमानादिग्रहणम्। कस्य विषयः? अत आह—**अग्निहोत्रादीति**। अग्निहोत्रादि कर्म, तत्साध्यं स्वर्गादिफलम्, तयोः कर्मफलयोर्वर्तमानः साध्यसाधनभावरूपसम्बन्धश्चेत्ययं विषय इत्यर्थः। अग्निहोत्रादिसाध्यं स्वर्गादि; साधनमग्निहोत्रादि; सम्बन्धश्च त्रयाणां समाहारद्वन्द्वः। तस्मिन् विषये श्रुतेः प्रामाण्यात्। प्रत्यक्षादिविषये श्रुतेर्न प्रामाण्यम्। तत्र हेतुमाह—**अदृष्टेति**। प्रामाण्यस्यादृष्टस्याज्ञातस्यार्थस्य दर्शनं ज्ञापनं तदेवार्थो वस्तु विषयो यस्य तत्त्वात्; 'अदृष्टार्थदर्शनविषयत्वा'दिति वा पाठः। सर्वेषामपि प्रमाणानामज्ञातार्थज्ञापकत्वादेव प्रामाण्यम्। तथा हि— प्रमाकरणं प्रमाणम्; अनधिगताबाधितार्थविषयकं ज्ञानं प्रमा; भ्रमव्यावृत्त्यर्थमुक्तम् **अबाधितेति**। ततश्चाज्ञाताबाधितार्थज्ञापकं प्रमाणम्; प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाणं चक्षुरादि। तत्र चक्षुर्व्यापारात्प्रागदृष्टं घटं स्वव्यापारेण घटोऽयमिति पुरुषं प्रति बोधयित्वा चक्षुः प्रमाणं भवति। एवं स्वव्यापारात्प्रागश्रुतं शब्दं बोधयित्वा श्रोत्रं प्रमाणम्, तथा रसनादिकमपि। अनुमितिकरणम् अनुमानम्, तच्च मनः। परत्वे[पर्वते]ऽदृश्यमानमग्निं वह्निव्याप्यो धूम इति धूमलिङ्गेन पुरुषं प्रति बोधयित्वा प्रमाणं भवति। व्याप्तिज्ञानं करणमिति केचित्। सादृश्यज्ञानमुपमितिकरणमुपमानम्। तच्चाज्ञातमेव गोगवयसादृश्यं ज्ञापयित्वा प्रमाणं भवति। तथा पीनो देवदत्तो दिवा न भुङ्क्ते इत्यर्थापत्तिरप्यज्ञातमेव पीनदेवदत्तकर्तृकं रात्रिभोजनं ज्ञापयित्वा प्रमाणं भवति। एवमनुपलब्धिरपि अज्ञातमेव घटाभावं ज्ञापयित्वा प्रमाणं भवति। तद्वच्छब्दोऽप्यज्ञातार्थज्ञापनादेव प्रमाणम्। आप्तवाक्यं शब्दः। घटमविदन् हि बालो घटं दृष्ट्वा कोऽयमिति मातरं पृष्ट्वा घटोऽयमिति मातृवचनाद् घटं जानाति। वेदश्च परमाप्तस्य भगवतो वाक्यमिति परं प्रमाणम्। स ह्यज्ञातं स्वर्गाग्निहोत्रादिकं ज्ञापयति। **तस्मादिति**। दृष्टार्थे वेदस्याप्रमाणत्वादित्यर्थः। दृष्टं मिथ्या च तदज्ञानं च मिथ्याज्ञानं निमित्तं यस्य तस्य दृष्टमिथ्याज्ञाननिमित्तस्य, देहादिसंघातेऽहम्प्रत्ययस्य दृष्टस्यैवेत्यर्थः, गौणत्वं कल्पयितुं न शक्यम्। ननु देहादिसंघातेऽहम्प्रत्ययः तत्कारणमज्ञानं च यद्यपि मिथ्यात्वेन ज्ञातम्, तथापि गौणत्वेनाहम्प्रत्ययो न ज्ञात इत्यज्ञातज्ञापनमस्ति वेदप्रामाण्यकारणं प्रकृतेऽपीत्यत आह—**न हीति**। 'अग्निरुष्णः प्रकाशः' इत्यनुभवसिद्धे विषये यदि बहवोऽपि वेदाः 'अग्निः शीतो ऽप्रकाशो वे'ति भाषमाणाः सन्तः प्रमाणं स्युस्तर्हि मिथ्यात्वेन विद्वदनुभवसिद्धे संघाताहम्प्रत्यये विषये देहेन्द्रियादयो गौणा इति वदन् वेदः प्रमाणं स्यात्।

**दृष्टमिथ्याज्ञाननिमित्तस्याहम्प्रत्ययस्य देहादिसंघाते गौणत्वं कल्पयितुं शक्यम्। न हि श्रुतिशतमपि शीतोऽग्निरप्रकाशो वेति ब्रुवत् प्रामाण्यमुपैति। यदि ब्रूयाच्छीतोऽग्निरप्रकाशो वेति, तथाप्यर्थान्तरं श्रुतेर्विवक्षितं कल्प्यम् , प्रामाण्यान्यथानुपपत्तेः, न तु प्रमाणान्तरविरुद्धं स्ववचनविरुद्धं वा।**

**कर्मणो मिथ्याप्रत्ययवत्कर्तृकत्वात् कर्तुरभावे श्रुतेरप्रामाण्यमिति चेत्? न, ब्रह्मविद्यायामर्थवत्त्वोपपत्तेः।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

मिथ्याप्रत्ययवांश्चेत् कर्ता, तर्हि परमार्थतः कर्तुरभावादप्रामाण्यं स्यादित्याह— **कर्मणो मिथ्याप्रत्ययवत्कर्तृकत्वादिति।** कर्तृत्वादिभ्रमसिद्धक्रियाकारकाद्यनुवादेन परमपुरुषार्थसाधनभूतायां ब्रह्मविद्यायां सर्वस्य वेद्यस्य[वेदस्य] तात्पर्य-

आनन्दगिरिकृतव्याख्या

**व्यतिरेकाभ्यां दृष्टो मिथ्याज्ञाननिमित्तो देहादिसंघातेऽहम्प्रत्ययः, तस्येति यावत्। अन्यविषयत्वाच्चोदनाया नातिरिक्तात्मविषयतेत्युक्तम्। इदानीं तद्विषयत्वाङ्गीकारेऽपि न तन्निर्वोढुं शक्यम् , प्रत्यक्षविरोधादित्याह—** न हीति। [१]**अपौरुषेय्याः श्रुतेरसम्भावितदोषाया मानान्तरविरोधेऽपि प्रामाण्यमप्रत्याख्येयमित्यभिप्रेत्याह—**यदीति। **स्वार्थं बोधयन्त्याः श्रुतेरविरोधापेक्षत्वाद् विरुद्धार्थवादित्वे तत्परिहाराय विवक्षितमर्थान्तरमविरुद्धं तस्याः स्वीकर्तव्यम् , विरोधे तत्प्रामाण्यानुपपत्तेरित्याह—**तथापीति। [२]**(अ)विरोधमवधीर्य श्रुत्यर्थकल्पना न युक्तेति व्यावर्त्यमाह—**न त्विति।

**अविद्यावत्कर्तृकं कर्मेति त्वयोपगमाद् उत्पन्नायां विद्यायामविद्याऽभावे तदधीनकर्तुरभावाद् अन्तरेण कर्तारमनुष्ठानासिद्धौ कर्मकाण्डाप्रामाण्यमित्यध्ययनविधिविरोधः स्यादिति शङ्कते—**कर्मण इति। **कर्मकाण्डश्रुतेर्विद्योदयात्पूर्वं व्यावहारिकप्रामाण्यस्य तात्त्विक-**

भाष्यार्कप्रकाशः

तस्मादनुभवाविरुद्ध एव वेदः प्रमाणम्। ननु वेदाः प्रमाणमिति प्रसिद्धेऽर्थे कथमप्रामाण्यप्रसङ्ग इत्यत आह—**यदीति**। श्रुतेः प्रामाण्यान्यथानुपपत्त्या विवक्षितमर्थान्तरं कल्प्यम् , यथा 'शीतोऽग्निरप्रकाशः' इति वेदवाक्ये सति तस्य— अग्निः शीतः शान्तो, नष्ट इति यावत् , अत एवाप्रकाश इति। किमिति यथाश्रुतार्थो न कल्प्यः? अत आह—**न त्विति**। स्ववचनविरुद्धं प्रमाणान्तरविरुद्धं न कल्प्यम् , विरोधादिति भावः। एतेन यजेतेत्याद्यदृष्टविषयचोदनाप्रामाण्याद् यदि संघातो गौणात्मेति कल्प्यते, तर्हि सर्ववेदान्तविरोध इति स्ववचनविरोधः। वेदान्तेषु हि मायया सर्वं जगदात्मनि कल्पितमिति, अविद्यया देहेन्द्रियादिकमात्मत्वेन प्रत्येतीति च घण्टाघोषः, विद्वदनुभवविरोधश्च, विदुषां संघातेऽहम्प्रत्ययाभावात्। यदि स गौणः स्यात् तर्हि विदुषां किमिति न स्यात्? किमु विद्वान् पिता – 'आत्मा वै पुत्रनामासी'ति पुत्रं गौणात्मानं न प्रत्येति? प्रत्युत विद्वानेव प्रत्येति, न त्वविद्वान् मूर्खः, श्रुत्यर्थानभिज्ञत्वात् तस्य। उपपत्तिविरोधश्च, अगृहीतसामान्यविशेषयोः संघातात्मनोर्गौणत्वायोगादित्युक्तत्वात् ; प्रत्यक्षप्रमाणविरोधश्च, गौणमुख्यसिंहयोरिव गौणमुख्यात्मनोः पृथगनुपलम्भात्। तस्मान्मिथ्यात्मैव संघातः। यजेतेत्यादिश्रुतयस्तु अविद्वद्विषयत्वेन प्रमाणमेव। यो हि संघातं कर्तारम् आत्मत्वेन प्रत्येति, स हि यज्ञादिकं कुरुते, तत्फलमनुभवति च। तथा च विधिश्रुतीनामविद्वद्विषयत्वं प्रकल्प्य प्रामाण्यं सम्पादनीयम् इति भावः।

ननु संघातेऽहमिति मिथ्याप्रत्ययवान् यः स एवाविद्यावान् कर्मणः कर्तेति मिथ्याप्रत्ययवत्पुरुषकर्तृकत्वे सति कर्मणो मिथ्यात्मभूतसंघातकर्तृकत्वमेव प्राप्तं कर्मणो न मुख्यात्मकर्तृकत्वमिति कृत्वा मुख्यस्य कर्तुरात्मनोऽभावाच्छ्रुतिरप्रमाणेति शङ्कते—**कर्मण इति**। संघातात्मानमुद्दिश्य यजेतेत्यादिविधिरनुपपन्ना। न हि स्थाणुपुरुषं कोऽप्यनुन्मत्तः 'त्वमेवं कुरु' इति चोदयति , मुख्यात्मा त्वकर्तैव। तस्माच्छ्रुतिरप्रमाणैवेति भावः। यद्वा कर्मणोऽविद्वत्कर्तृकत्वे सति विदुषः कर्मण्यप्रवृत्त्या कर्तुरभावात् श्रुतेरप्रामाण्यमिति शङ्कते—**कर्मण इति**। परिहरति—**नेति**। हेतुमाह—**ब्रह्मेति**। कर्मकाण्डो ज्ञानकाण्डश्चेति काण्डद्वयात्मको वेदः। तत्र कर्मकाण्डस्याप्रमाणत्वेऽपि ज्ञानकाण्डः प्रमाणमेवेति न श्रुतेरप्रामाण्यप्रसङ्गः। ज्ञाननिष्ठाकर्तुर्विदुषः सत्त्वेन ज्ञातुर्मुख्यात्मनः सत्त्वेन च ज्ञानकाण्डस्य

१. 'अपौरुषेयायाः' इति पा.। २. 'अविरोधमवधार्य' इति पा.।

**कर्मविधिश्रुतिवद् ब्रह्मविद्याविधिश्रुतेरप्यप्रामाण्यप्रसङ्ग इति चेत्? न, बाधकप्रत्ययानुपपत्तेः। यथा ब्रह्मविद्याविधिश्रुत्यात्मन्यवगते देहादिसंघातेऽहम्प्रत्ययो बाध्यते, तथा आत्मन्येवात्मावगतिः न कदाचित् केनचित् कथञ्चिदपि बाधितुं शक्या,** [1]**फलाव्यतिरेकादवगतेः, यथा अग्निरुष्णः प्रकाशश्चेति। न चैवं कर्मविधिश्रुतेरप्रामाण्यम्, पूर्वपूर्व-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

वृत्त्या प्रामाण्योपपत्तेः नाप्रामाण्यप्रसङ्ग इत्युक्तम्। तत्रातिप्रसङ्गं शङ्कते—**कर्मसिद्धिरि[विधिश्रुती]ति**। श्रुतित्वमप्रयोजकम्, बाधाधीनत्वादप्रामाण्यस्य, नेह स विद्यत इत्याह—**न, बाधकेति**। ज्ञानस्य फलम् आत्मस्वरूपावस्थानम्, तदभिन्नत्वावगतेर्न बाध इत्यर्थः। अबाध्यनिश्चयस्य लौकिकमुदाहरणमाह—**यथाऽग्निरिति**। श्रुतेर्गत्यन्तरमाह—**न च कर्मविधिश्रुतेरिति**। ननु स्वाभाविकप्रवृत्तिनिरोधेन कर्मापूर्वप्रवृत्तिमुपदिश्यात्माभिमुखप्रवृत्त्युत्पादनार्थत्वं चेत्, तर्हि स्वार्थस्य व्याजमात्रत्वा-

आनन्दगिरिकृतव्याख्या

**प्रामाण्याभावेऽपि सम्भवाद् ब्रह्मकाण्डश्रुतेश्च तात्त्विकप्रामाण्यस्य ब्रह्मविद्याजनकत्वेनोपपन्नत्वाद् नाध्ययनविधिविरोध इति परिहरति—**न, ब्रह्मेति। **कर्मकाण्डश्रुतेस्तात्त्विकप्रामाण्याभावे ब्रह्मकाण्डश्रुतेरपि तदसिद्धिरविशेषादिति शङ्कते—**कर्मेति। **उत्पन्नाया ब्रह्मविद्याया बाधकाभावेन प्रमाणत्वात् तद्धेतुश्रुतेस्तात्त्विकं प्रामाण्यमिति दूषयति—**न, बाधकेति। **ब्रह्मविद्याया बाधकानुपपत्तिं दृष्टान्तेन साधयति—**यथेति। **देहादिसंघातवदित्यपेरर्थः। लौकिकावगतेरिवात्मावगतेरपि फलाव्यतिरेकमुदाहरणेन स्फोरयति—**यथेति। **फलमज्ञाननिवृत्तिः। कर्मविधिश्रुतिवदित्युक्तं दृष्टान्तं विघटयति—**न चेति। **अनादिकालप्रवृत्तस्वाभाविकप्रवृत्तिव्यक्तीनां प्रतिबन्धेन यागाद्यलौकिक-**

भाष्यार्कप्रकाशः

सार्थकत्वादिति भावः। **ब्रह्मविद्यायां** ज्ञानकाण्डे, उपनिषत्स्विति यावत्। अर्थवत्त्वस्योपपत्तेरित्यक्षरार्थः। ननु यजेतेत्यादिकर्मकाण्डोऽविद्वद्विषयत्वेन यथा विदुषामप्रमाणम्, तथा ज्ञानकाण्डोऽपि विद्वद्विषयत्वेनाविदुषामप्रमाणमेवेति कर्मज्ञानकाण्डयोरप्रामाण्यं तुल्यमेव। अविदुषामप्रवृत्त्या ज्ञानकाण्डस्य, विदुषामप्रवृत्त्या कर्मकाण्डस्य चानर्थकत्वादिति शङ्कते—**कर्मविधीति**। कर्मविधिश्रुतिः यजेतेत्यादिः। तस्या इव तद्वत्। ब्रह्मविद्याविधिश्रुतिः 'श्रोतव्यो मन्तव्य' इत्यादिः। तस्या अप्यप्रामाण्यप्रसङ्ग इति चेन्न, कुतः? **बाधकेति**। बाधकज्ञानासम्भवादित्यर्थः। तदेव विवृणोति—**यथेति**। **ब्रह्मविद्याविधिश्रुत्या** तज्जन्यज्ञानेनेत्यर्थः। आत्मन्यवगते साक्षात्कृते सति देहादिसंघातेऽहमिति प्रत्ययो यथा बाध्यते, तथा आत्मावगतिः, केनापीति शेषः, कदाचिदपि कथञ्चिदपि बाधितुं न शक्या। कुतः? अवगतेरात्मज्ञानस्य फलाव्यतिरेकाद् आत्मप्राप्तिरूपफलाभेदात्, आत्मसाक्षात्कारातिरिक्तात्मप्राप्तिरूपमोक्षफलाभावादित्यर्थः। तस्माद् ब्रह्मविद्याया वैयर्थ्यमापादयितुं न शक्यते, येन तस्या अप्रामाण्यं स्यादिति भावः। कुतो न शक्यते? अत आह—**यथेति**। अग्निरुष्णः प्रकाशश्चेति प्रत्ययस्य यथा न केनापि बाधः, तद्वद् अहं ब्रह्मेति प्रत्ययस्यापीत्यर्थः। यथावदवस्थितवस्तुज्ञानत्वात् तस्येति भावः।

अत्रेदं बोध्यम्—अविदुषां ज्ञानकाण्डेऽप्रवृत्तिः किं ब्रह्मविद्याया बाधितत्वादुत तेषां तत्रानधिकारात्? नाद्यः; ब्रह्मविद्यायाः कयाऽपि तद्भिन्नविद्यया बाधाभावात्। न ह्यग्निविषयकः अग्निरुष्णः प्रकाशश्चेति प्रत्ययः केनापि प्रत्ययान्तरेण बाध्यते? किंवा घटविषयोऽयं घट इति प्रत्ययः केनापि बाध्यते? एवं ब्रह्मविषयोऽहं ब्रह्मेति सच्चिदानन्दं ब्रह्मेति च ज्ञानं न केनापि बाध्यते? किञ्चाहं ब्रह्मेति प्रत्ययः नाहं ब्रह्मेति प्रत्ययेनैव बाध्येत। यस्य त्वज्ञस्य नाहं ब्रह्मेति प्रत्ययोऽस्ति, तस्य ब्रह्माहमस्मीति प्रत्ययस्यैवाभावात् कथं तद्बाधप्रसङ्गः? न ह्यहं ब्रह्मेति विदुषो नाहं ब्रह्मेति प्रत्ययः पुनरुदीयाद् येन ब्रह्मात्मप्रत्ययस्य बाध आशङ्क्येत। न ह्यग्निरुष्ण इति विदुषः शीतोऽग्निरिति प्रत्यय उदेति, नापि घटोऽयमिति विदुषो नायं घटः इति। अत एव ह्यबाधितार्थविषयं ज्ञानं प्रमेत्युक्तमभियुक्तैः। अर्थस्याबाधितत्ववचनेन च ज्ञानस्यापि तत्त्वं सिद्धमित्यबाधितमेव ज्ञानं प्रमा।

यत्तु बाधितार्थविषयं ज्ञानं भ्रमरूपं, तद् बाधितमेव। यथा रज्जुविषये रज्जुरियमिति ज्ञानमबाधितार्थविषयत्वादबाधितं

१. 'फलाव्यतिरेकावगतेः' इति पा.।

भाष्यार्कप्रकाशः

प्रमाज्ञानम् ; रज्जुविषये सर्पोऽयमिति ज्ञानं तु बाधितार्थविषयत्वाद् बाधितं भ्रमज्ञानम्। रज्जुरयं न सर्पः इत्याप्तवाक्यजन्यरज्जुज्ञानेन हि सर्पभ्रमो बाध्यते; बाधो हि निवृत्तिः। रज्जुज्ञानात् सर्पभ्रमनिवृत्तिरनुभवसिद्धैव। तस्माद् भ्रमज्ञानस्य बाधकं प्रमाज्ञानमस्ति। प्रमाज्ञानस्य तु न किञ्चिदपि बाधकम् , तथा भ्रमज्ञानविषयस्य सर्पाभासस्य बाधितत्वम् , न तु प्रमाज्ञानविषयस्य रज्जोः। एवं संघातात्मज्ञानं भ्रमः। संघातस्यानात्मत्वात् तद्विषयात्मज्ञानस्य ब्रह्माहमस्मीति वेदवाक्यजन्यब्रह्मात्मज्ञानेन बाधितत्वाद् भ्रमविषयसंघातस्यापि बाधितत्वेन बाधितार्थविषयत्वाच्च संघातात्मज्ञानस्य। ब्रह्मात्मज्ञानं तु न भ्रमः, किन्तु प्रमा। रज्जुज्ञानवद् ब्रह्मज्ञानस्य केनाप्यबाधितत्वाद् रज्जुवद् ब्रह्मणोऽप्यबाधितार्थत्वात्। पारमार्थिकं सद्रूपं हि ब्रह्म। न हि बाधितस्य क्वापि सत्त्वमस्ति; नित्यं हि सत्। रज्जुस्तु व्यावहारिकसत्या; प्रातिभासिका रज्जुसर्पमरीच्युदकस्वप्नरथादयः। तज्ज्ञानानि च व्यावहारिकसर्पमरीचिजागरप्रपञ्चैः तज्ज्ञानैश्च बाध्यन्ते यथा, तथा व्यावहारिकोऽपि संघातस्तदात्मज्ञानं च पारमार्थिकेन ब्रह्मणा तदात्मज्ञानेन च बाध्यते। तस्मात् – 'सत्यं ज्ञानमनन्तं ब्रह्म', 'अजो नित्यः शाश्वतः' इत्यादि शास्त्रादबाधितं नित्यं सद्रूपं ब्रह्मेति तद्विषयं ज्ञानं चाबाधितं प्रमैव। संघातस्तु 'नेति नेती'त्यादिश्रुतिभिः, 'नेह नाने'त्यादिश्रुतिभिश्च बाधित इति तद्विषयं ज्ञानमपि बाधितमेवेति भ्रम एव। न च 'नेह नाने'त्यादिना संघातस्यैव बाधितत्वात् संघातविषये संघातज्ञानं च भ्रम एवेति विरुद्धमिदमिति वाच्यम् ; इष्टापत्तेः। अत एव हि 'सर्वं खल्विदं ब्रह्म', 'वासुदेवःसर्व'मिति, 'सर्वं विष्णुमयं जग'दिति च श्रुतिस्मृतिपुराणानि सङ्गच्छन्ते। रज्जौ सर्पवद् ब्रह्मणि सर्वमध्यस्तमिति, सर्पज्ञानवत् सर्वज्ञानं बाधितार्थविषयत्वाद् भ्रम एव, ब्रह्मज्ञानमेकमेव प्रमा, ब्रह्मण एकस्यैवाबाधितार्थत्वात्। अबाधितार्थविषयं हि ब्रह्मज्ञानम्।

रज्जुज्ञानादीनां प्रमात्वं तु यावद्व्यवहारमप्यबाधितत्वरूपम्। अत एव संघाते संघातज्ञानस्य यावद्व्यवहारमबाधितत्वाद् रज्जुज्ञानवत् प्रमात्वम्। निरपेक्षमबाधितत्वं तु नास्तीति भ्रमत्वं च परमार्थदृष्ट्या। संघाते आत्मज्ञानं तु रज्जौ सर्पज्ञानवद् यावद्व्यवहारमप्यबाधितं न भवति, आप्तवाक्यज्ञानेन रज्जुसर्पज्ञानवद् महावाक्यज्ञानेन संघातात्मज्ञानस्य व्यवहारकालेऽपि बाधितत्वात्। व्यवहारदशायामपि संघातादन्यमात्मानं हि मन्यन्ते विद्वांसः। अन्यथा ज्ञानोपदेशतद्ग्रहणाद्यसम्भवात्। तस्मात् संघातात्मज्ञानं बाधितमेवेति भ्रम एव; ब्रह्मात्मज्ञानं त्वबाधितमेवेति प्रमैव। न हि 'सच्चिदानन्दं ब्रह्मे'ति वेदवाक्यजन्यस्य स्वानुभवारूढस्य ब्रह्मात्मज्ञानस्य केनापि बाधः सम्भवति, सर्वाण्यपि ज्ञानान्तराणि देहात्मेन्द्रियात्मेत्यादीनि बाधित्वा जातत्वात् तस्य। सम्यग्विचारेण जातं हि तत्। एतद्ब्रह्मात्मज्ञानायैव हि ब्रह्मविचारात्मकं ब्रह्ममीमांसाशास्त्रं कृतं व्यासाचार्यैः। संघातात्मज्ञानं तु स्वभावतोऽविचाराज्जातमौत्पत्तिकमेव, आबाल्यादपि तस्य सत्त्वात्। अत एवाविवेकमूलकं संघातात्मज्ञानं विवेकपूर्वकेण ब्रह्मात्मज्ञानेन बाध्यते। यथा अविवेकपूर्वकं रज्जुसर्पज्ञानं विवेकपूर्वकेण रज्जुज्ञानेन बाध्यते; न तु विवेकपूर्वकस्य रज्जुज्ञानस्याविवेकपूर्वकसर्पज्ञानेन बाधो दृश्यते। येन ब्रह्मज्ञानस्य गुरुशास्त्रोपदेशादिविचारजन्यस्य स्वाभाविकसंघातात्मज्ञानेन बाधः स्यात्। किञ्च प्रकाशतुल्या ब्रह्मविद्या, स्पष्टपदार्थावगतिहेतुत्वात्। तमस्तुल्या तु स्वाभाविक्यविद्या, यन्मूलं संघातात्मज्ञानमज्ञानां पदार्थस्वरूपतिरोधायकत्वात्। तथा च तेजसा तम इव ब्रह्मविद्यया अविद्या निवर्त्यते। तस्मात् संघातात्मज्ञानस्यैव बाधकमस्ति, न तु ब्रह्मात्मज्ञानस्येति कृत्वा अविदुषां ज्ञानकाण्डेऽप्रवृत्तिर्ब्रह्मविद्याया बाधितत्वादिति वक्तुं न शक्यते। अतो द्वितीयः पक्षः परिशिष्टः; अनधिकारादिति। युक्तं चैतत्। न ह्यविद्यारागादिदोषदूषितहृदयानां संघातात्मनिश्चयानां कर्ता भोक्ताऽहमिति मन्यमानानां धर्माधर्मादिसंस्कारवशाद् विहितेषु प्रतिषिद्धेषु च कर्मसु प्रवर्तमानानां संसरतामज्ञानां ब्रह्मविद्यायामधिकारोऽस्ति। अत एव हि – 'शान्तो दान्त उपरतस्तितिक्षु'रिति श्रुत्या, 'अथातो ब्रह्मजिज्ञासा' इति सूत्रेण च शमदमादिसाधनसम्पन्नानां प्राज्ञानामापातज्ञातब्रह्मात्मभावानामेव ब्रह्मविद्यायामधिकारो दर्शितः। इह च 'ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिना'मिति साङ्ख्यानां ज्ञानिनामेव ब्रह्मविद्यायामधिकारः, न तु कर्मिणामज्ञानामिति दर्शितम्। तथा चानधिकारिणामज्ञानां ज्ञानकाण्डेऽप्रवृत्त्या न ज्ञानविधिवैयर्थ्यम्।

तथा विदुषां कर्मकाण्डेऽप्रवृत्तिः किं कर्मविद्याया बाधितत्वात्? यद्वा तेषां तत्रानधिकारात्? नान्त्यः, ब्रह्मविदां द्विजानां स्त्रीशूद्रादिवत् कर्मण्यनधिकार इति वचनस्यायुक्तत्वात्। ब्रह्मज्ञानात्प्रागेव येषां द्विजानां कर्माधिकारस्तेषां ब्रह्मज्ञाने सति कर्माधिकार-

भाष्यार्कप्रकाशः

नाशो यदि स्यात् तर्हि ब्रह्मज्ञानं दोष एव स्यात् सुरापानब्रह्महत्यादिवत्। न चेष्टापत्तिः; तथा सति ब्रह्मविद्याप्रतिपादकवेदभागस्याप्रामाण्यापत्तेः। एवं ब्रह्महत्योपदेष्टुरिव ब्रह्मज्ञानोपदेष्टुरीश्वरस्यानाप्तत्वापत्तेः, ब्रह्महत्यादिकृत इव ब्रह्मज्ञाननिष्ठस्यापि राजादिभिर्दण्ड्यत्वापत्तेः। तस्मात् कर्मविद्याया ब्रह्मविद्यया बाधितत्वादेव विदुषां कर्मण्यप्रवृत्तिः। 'नेह नानास्ति किञ्चन', 'आत्मैवेदं सर्वं', 'निष्कलं निष्क्रियं शान्तं', 'तत्सत्यं स आत्मा तत्त्वमसि', 'अशब्दमस्पर्शमरूपमव्ययं', 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा, यो वै भूमा तदमृतम् ', 'अतोऽन्यदार्त'मित्यादिश्रुतिभिरकर्त्रभोक्तृसच्चिदानन्दलक्षणाद्वितीयब्रह्मात्मज्ञाने सति कर्ताऽहं भोक्ताऽहं मम कर्मेति मिथ्याज्ञानं कथमबाधितं सद् वर्तेत? येन कर्मणि प्रवृत्तिः स्याद् विदुषः। न हि तेजसि जाते तिमिरमवतिष्ठेत। तस्मान्न ब्रह्मविद्यायाः कयाऽपि बाध इति बाधकप्रत्ययानुपपत्तिः।

**ननु** शास्त्रजन्यम् 'अहं ब्रह्मे'ति ज्ञानं 'नाहं ब्रह्मे'त्यनुभवेन बाध्यत इति चेत् , **मैवम्** ; स किं विद्वदनुभवः? उताविद्वदनुभवः? नाद्यः, 'अहं ब्रह्मे'ति विदुषां 'नाहं ब्रह्मे'त्यनुभवायोगात्। न द्वितीयः, अविद्वन्निष्ठेन 'नाहं ब्रह्मे'त्यनुभवेन विद्वन्निष्ठस्य 'अहं ब्रह्मे'ति ज्ञानस्य बाधायोगात्। समानाधिकरणसमानविषययोर्हि ज्ञानाज्ञानयोर्बाध्यबाधकभावः। अन्यथा देवदत्तकर्तृकाच्छब्दशास्त्राध्ययनाद् देवदत्तनिष्ठतर्कशास्त्राज्ञानस्य यज्ञदत्तनिष्ठशब्दशास्त्राज्ञानस्य च निवृत्त्यापत्तेः। 'नाहं ब्रह्मे'त्यनुभवो ह्यज्ञानम्। न चानुभवस्य [१]ज्ञानाभावत्वं कथमिति वाच्यम् ; ज्ञानाभावादन्यस्यैव भावरूपाज्ञानस्य सिद्धान्तिततत्वात्। अथवा 'नाहं ब्रह्म' इत्यनुभवोऽपि ज्ञानमेव भवतु। तथापि 'अहं ब्रह्मे'ति ज्ञानस्य 'नाहं ब्रह्मे'ति ज्ञानस्य च विरोधः, ब्रह्मतदभावयोर्विरोधेन तज्ज्ञानयोरपि विरोधात्। 'नाहं ब्रह्मे'ति हि ब्रह्माभावज्ञानम्। तस्माद् 'अहं ब्रह्मे'ति ज्ञानस्य न केनापि बाधः।

**ननु** बहुवारं पठितवेदान्तशास्त्राणां वेदान्ताचार्यपदमधिरुह्य ब्रह्मज्ञानोपदेष्टॄणां च बहूनां 'नाहं ब्रह्मे'त्यनुभवोऽस्ति संसारदुःखोपलम्भात् तेष्विति चेत् , **मैवं वादीः**; यथावदनवगतब्रह्मात्मज्ञानानामेव संसार्यहमिति संसारदुःखानुभवः, न तु सम्यग्दर्शिनाम्। दुर्लभो हि ब्रह्मात्मसाक्षात्कारः, पुंसां प्रतिबन्धबाहुल्यसत्त्वात्। न हि बहुवारं श्रुतमपि चूतफलमाधुर्यमचर्वितचूतफलानां बुद्ध्यारूढं भवति। एवं बहुवारं श्रुतब्रह्मणामपि तत्साक्षात्काररहितानां तद् बुद्ध्यारूढं न भवति। तस्माद् ब्रह्मात्मसाक्षात्कारशून्या एव ते; ये त्वयोपन्यस्ताः। शिष्योपदेशस्तु परोक्षज्ञानमात्रेणापि सम्भवत्येव। अज्ञाननिवृत्तिस्त्वपरोक्षज्ञानादेव। यथा घटाज्ञाननिवृत्तिर्घटाकारपरिणतबुद्धिवृत्त्यपरोक्षज्ञानाद् भवति, तथा ब्रह्माज्ञाननिवृत्तिरपि ब्रह्माकारपरिणतबुद्धिवृत्त्यपरोक्षज्ञानादेव भवति। एवंविधब्रह्मापरोक्षज्ञानजनकत्वादेव ब्रह्मविद्यायाः प्रामाण्यम् , यथा घटापरोक्षज्ञानजनकत्वाच्चक्षुषः।

**ननु** अज्ञातार्थज्ञापकत्वाच्छास्त्रं प्रमाणमित्युक्तम् , ब्रह्मविद्यायास्तथात्वाभावादप्रामाण्यमेव। किं वेदान्तशास्त्रमज्ञातं ब्रह्म बोधयत्युत ज्ञातम्? नाद्यः; 'यत् साक्षादपरोक्षाद् ब्रह्मे'ति श्रुतेर्नित्यापरोक्षस्य ब्रह्मणोऽज्ञातत्वासम्भवात् , येन ब्रह्म ज्ञातुमिष्टं तस्यैवात्मनो ब्रह्मत्वाच्च। द्वितीये, वेदान्तशास्त्रस्य ब्रह्मविद्यात्मकस्याप्रामाण्यमेवेति चेत् , **मैवम्** ; यो ब्रह्म जिज्ञासति[२] स नाहं ब्रह्मेति वेद, यद्यहं ब्रह्मेति वेद तर्हि तस्य तज्जिज्ञासैव नोदीयात्। न हि घटं विदुषः पुरुषस्य घटजिज्ञासा दृश्यते, तस्मादज्ञातमेव ब्रह्म। न च सुतरामज्ञातत्वे कथं तज्जिज्ञासोदय इति वाच्यम् ; आपाततो ज्ञातत्वाद् ब्रह्मणः। सर्वो ह्यास्तिकः कश्चिदीश्वरो देवोऽस्तीति प्रत्येति, जगत्कार्यलिङ्गकानुमानेन चापाततो वेत्ति; आपाततो ज्ञातमपि तदज्ञातप्रायमेवेति न कश्चिद् दोषः। 'यत् साक्षा'दिति श्रुतिस्तु विद्वद्विषया, विदुषो हि साक्षादपरोक्षं ब्रह्म, न त्वविदुषः। यो ब्रह्मैव पारोक्ष्येणापि सम्यङ् न वेद, कथं तस्य ब्रह्मसाक्षात्कारप्रसङ्गः? **यत्तु** येन ब्रह्म ज्ञातुमिष्टं तस्यैवात्मनो ब्रह्मत्वान्नाज्ञातत्वं ब्रह्मणः इति, **तदप्ययुक्तम्** ; यो ब्रह्म जिज्ञासति स एवात्मा ब्रह्मेति किं जिज्ञासुर्वेद उत तदन्यस्तत्त्ववित्? नाद्यः; विदितत्वे जिज्ञासानुदयप्रसङ्गात्। नान्त्यः; विद्वत्कर्तृकब्रह्मात्मज्ञानेनाविदुषो ब्रह्मज्ञानासम्भवात्। न चात्मनोऽपि कथमज्ञातत्वमिति वाच्यम् ; अविद्यावैभवप्रयुक्तेन संघाते आत्मेति प्रत्ययेन सच्चिदानन्दलक्षणस्यात्मनोऽप्यज्ञातत्वोपपत्तेः; निद्रायां ह्यात्मनोऽप्यज्ञातत्वं सर्वानुभवसिद्धम्। तस्मान्मामहं न जानामीत्यनुभवान्मनुष्योऽहमित्याद्यनुभवान्नाहं ब्रह्मेत्यनु-

---

१. ज्ञानाभावः अज्ञानम् इति शङ्कितुराशयः। २. यो ब्रह्म जिज्ञासते सः अहं ब्रह्मेति न वेदेत्यन्वयः। जिज्ञासते इति युक्तम्।

**प्रवृत्तिनिरोधेनोत्तरोत्तरापूर्वप्रवृत्तिजननस्य प्रत्यगात्माभिमुख्येन प्रवृत्त्युत्पादनार्थत्वात्। मिथ्यात्वेऽप्युपायस्योपेय-**

अनुभूतिस्वरूपाचार्यटिप्पणम्

दप्रामाण्यमित्याशङ्क्याह—**मिथ्यात्वेऽपीति।** यथा 'प्रजापतिरात्मनो वपामुदखिदत्' इत्याद्यर्थवादानां स्वार्थस्य व्याजरूपत्वेऽपि यत्र शेषिणि विधौ तात्पर्यं तस्य सत्यत्वात् **सत्यत्वं** प्रामाण्यमित्यर्थः। 'शिखा ते वर्धते वत्से'त्यादिवचनं

आनन्दगिरिकृतव्याख्या

**प्रवृत्तिव्यक्तीर्जनयति कर्मकाण्डश्रुतिः। तज्जननं च चित्तशुद्धिद्वारा प्रत्यगात्माभिमुख्यप्रवृत्तिमुत्पादयति। तथाच कर्मविधिश्रुतीनां पारम्पर्येण प्रत्यगात्मज्ञानार्थत्वात् तात्त्विकप्रामाण्यसिद्धिरित्यर्थः। नन्वेवमपि श्रुतेर्मिथ्यात्वाद् धूमाभासवदप्रामाण्यमिति चेन्नेत्याह—**

भाष्यार्कप्रकाशः

भवात् संसार्यहमित्यनुभवाच्च सिद्धस्यात्मनोऽप्यज्ञातत्वस्य केवलयुक्त्या प्रतिषेद्धुमयुक्तत्वाच्च सच्चिदानन्दलक्षणब्रह्माभिन्न आत्मा सर्वस्याज्ञस्याविदित एवात्मा सन्नपि मायावैभवादिति सिद्धमज्ञातब्रह्मात्मार्थज्ञापनाद् ब्रह्मविद्यायाः प्रामाण्यम्। न च तर्कादिशास्त्रेण ब्रह्म ज्ञातमेवेति वेदान्तशास्त्रं व्यर्थमिति वाच्यम् ; तर्कादिशास्त्रेणात्मभिन्नस्य ब्रह्मणो ज्ञातत्वेऽप्यात्माभिन्नस्य ब्रह्मणोऽज्ञातत्वात्। **एतेन** भिन्नात्मवादिनां द्वैतिनां विशिष्टाद्वैतिनां च मते वेदान्तशास्त्रस्य प्रामाण्यमेव दुरुपपादमिति **सिद्धम्।**

नन्वनधिगताबाधितब्रह्मात्मविषयज्ञानजनकत्वाद् वेदान्तशास्त्रमेकमेव परं प्रमाणम् ; अनधिगतस्यापि कर्मरूपार्थस्य ब्रह्मज्ञानबाधितत्वेन तद्बोधकः कर्मकाण्डात्मको वेदोऽप्रमाणमेव। किम्पुनः तर्कादिशास्त्राणां चक्षुरादिप्रमाणानां चाप्रामाण्यं वक्तव्यम्। तथा च सर्वात्मना वेदोऽप्रमाणमिति वदतो बौद्धान्नास्तिकादर्धांशेन वेदोऽप्रमाणमिति वदन् भवान् मनाग् वरमित्यत आह—**न चैवम् इति।** अनधिगतयावद्व्यवहाराबाधितकर्मार्थविषयज्ञानजनकत्वेन तादृशघटाद्यर्थविषयज्ञानजनकचक्षुरादिवत् कर्मकाण्डस्यापि प्रामाण्यात्। न हि वयं नास्तिका इव यावद्व्यवहारं कर्मार्थस्य बाधितत्वं ब्रूमः, येन वयमर्धबौद्धाः प्रच्छन्नबौद्धा वा भवेम। किञ्च कर्मकाण्डस्य ज्ञानोपकारकत्वेनापि प्रामाण्यमस्ति। उक्तं हि कर्मनिष्ठाया ज्ञाननिष्ठोपकारकत्वमिहैव 'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते' इत्यादिना। कर्मनिष्ठापूर्विका हि ज्ञाननिष्ठा। कर्मनिष्ठया चित्ते शुद्धे सत्येव ज्ञाननिष्ठाप्राप्तियोग्यत्वलाभात्। तच्चोक्तमत्रैवाध्याये। इदमेव कर्मणो ज्ञानोपकारकत्वं दर्शयति—**पूर्वपूर्वेति।** पूर्वपूर्ववैश्वदेवाग्निहोत्राग्निष्टोमादिप्रवृत्तिनिरोधेन उत्तरोत्तरापूर्वचयनपौण्डरीकादिप्रवृत्तिजननस्य, कर्मविधिकृतस्येति शेषः, प्रत्यगात्माभिमुख्येन, ब्रह्मविद्यायामिति शेषः, प्रवृत्त्युत्पादनार्थत्वात्।

अयं भावः—उपनीतस्य विवाहः, विवाहितस्य वैश्वदेवः, कृतवैश्वदेवस्याग्निहोत्राधानं, कृताधानस्याग्निष्टोमः, कृताग्निष्टोमस्य चयनमित्येवं पूर्वपूर्वकर्म कृतवत उत्तरोत्तरं कर्म विदधाति कर्मकाण्डः, न तूपनीतस्य पुनरुपनयनमित्येवं कृतमेव कर्म पुनः कर्तव्यतयोपदिशति। ततश्च किं ज्ञायते? कर्मकाण्डस्य न स्वार्थे तात्पर्यम् , किन्तु ज्ञानार्थ एवेति। एवं हि पूर्वपूर्वं कर्म विहायोत्तरोत्तरं कर्म कुर्वन् पुरुषः क्रमेण प्रत्यगात्माभिमुखो भूत्वा ब्रह्मविद्यायां प्रवर्तत इति। न चैवं कर्मठस्य ब्रह्मविद्यायां प्रवृत्तिर्न स्यादिति वाच्यम् ; 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने'ति श्रुतेः। 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इति स्मृतेश्च। 'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पण'मित्युक्तन्यायेनेश्वरार्पणबुद्ध्या कर्म कुर्वाणस्य स्त्र्यन्नपानादिबाह्यविषयेषु रागरहितस्य क्रमेण चित्तशुद्धौ सत्यां क ईश्वरः, कश्चात्मेति जिज्ञासा स्यात्। ततश्च ब्रह्मविद्यायां प्रवर्तत एव कर्मठोऽपि। तस्माद् आत्मज्ञानार्थकब्रह्मविचारहेतुभूतशमदमादिसाधनसम्पत्तिसम्पादकत्वात् कर्मणां कर्मकाण्डस्य ज्ञानकाण्डोपकारकत्वमिति युक्तं कर्मकाण्डस्यापि प्रामाण्यम्।

ननु कर्मणो बाधितत्वात् तद्विषयज्ञानस्यापि बाधितत्वेन कर्मकाण्डो मिथ्याभूत एवेति कथं तस्य प्रामाण्यम्? अत आह—**मिथ्यात्वेऽपीति।** उपायस्य कर्मणः तत्प्रतिपादकवेदभागस्य वा मिथ्यात्वेऽपि उपेयस्य चित्तशुद्ध्यादिद्वारा प्राप्यस्य ब्रह्मणः सत्यत्वाद् उपायस्यापि सत्यत्वमेव स्यात्। एतेन कर्मकाण्डवज्ज्ञानकाण्डस्याप्युपायभूतस्य व्यावहारिकत्वेनापारमार्थिकत्वात् कथं ब्रह्मविद्याविधिश्रुतेः प्रामाण्यं मिथ्याभूताया इति शङ्काऽपि प्रत्युक्ता। ननु ब्रह्मप्राप्तिं प्रति साक्षादुपायस्य ज्ञानकाण्डस्य भवत्वेवमुपेयसत्यतया

**सत्यतया सत्यत्वमेव स्याद् , यथा अर्थवादानां विधिशेषाणाम्। लोकेऽपि बालोन्मत्तादीनां पयआदौ पाययितव्ये चूडावर्धनादिवचनम्। प्रकारान्तरस्थानां च साक्षादेव [1]वा प्रामाण्यसिद्धिः, प्रागात्मज्ञानाद् [2]देहाभिमाननिमित्त-प्रत्यक्षादिप्रामाण्यवत्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

नेत्रविकारादिकरणं च व्याजरूपमपि प्रमाणमित्यर्थः। **एकदेशिमतेन** कर्मश्रुतेः गतिमुक्त्वा, इदानीं स्वाभिप्रायमाह— **साक्षादेवेति।** क्रियाकारकादिद्वैतस्य मिथ्यात्वेऽवगतेऽप्यर्थक्रियासामर्थ्यानपहारात् व्यावहारिकप्रामाण्यमिति भावः।

आनन्दगिरिकृतव्याख्या

मिथ्यात्वेऽपीति। **स्वरूपेणासत्यत्वेऽपि सत्योपेयद्वारा प्रामाण्यमित्यत्र दृष्टान्तमाह**—यथेति। **मन्त्रार्थवादेतिहासपुराणानां श्रुतेऽर्थे प्रामाण्याभावेऽपि [3]शेषिविध्यनुरोधेन प्रामाण्यवत् प्रकृतेऽपि श्रुतेः स्वरूपेणासत्यायाः विषयसत्यतया** [4]सत्यत्वं **प्रामाण्यम् अविरुद्धमित्यर्थः। वाक्यस्य शेषिविध्यनुरोधेन प्रामाण्यं नालौकिकमित्याह**—लोकेऽपीति। **कर्मकाण्डश्रुतीनामुक्तरीत्या परम्परया प्रामाण्येऽपि साक्षात्प्रामाण्यमुपेक्षितमित्याशङ्क्याह**—प्रकारान्तरेति। **आत्मज्ञानोदयात्प्रागवस्था** प्रकारान्तरम्। **तत्र स्थितानां कर्म-श्रुतीनाम् अज्ञातसम्बन्धबोधकत्वेन साक्षादेव प्रामाण्यमिष्टमित्यर्थः। ज्ञानात्पूर्वं कर्मश्रुतीनां व्यावहारिकप्रामाण्ये दृष्टान्तमाह**—प्रागिति।

भाष्यार्कप्रकाशः

सत्यत्वम् ; कथं पुनः कर्मकाण्डस्येत्यत आह—**यथेति**। अपूर्वयज्ञादिकर्मप्रतिपादकत्वाद् विधिवाक्यानि प्रमाणानि। तत्स्तुत्यर्थत्वादर्थ-वादा विधिशेषा अपि विधिशेषत्वेन प्रमाणानि यथा, तथा अपूर्वब्रह्मात्मप्रतिपादकत्वाद् ब्रह्मविद्याविधिश्रुतिः प्रमाणम् , तदर्थत्वेन तच्छेषत्वात् कर्मविधिरपीत्युपेयसत्यतया ज्ञानकाण्डस्य सत्यत्वे ज्ञानकाण्डोपकारकतया कर्मकाण्डस्य सत्यत्वम्। यथा यज्ञाद्यपूर्व-प्रतिपादकतया विधिवाक्यानां सार्थकत्वे विधिशेषभूततया अर्थवादानां सार्थक्यम् , तद्वदिति भावः।

ननूपेयस्य ब्रह्मणः प्राप्त्युपायतया ब्रह्मविद्यैव विधीयताम् , किमिति कर्मविधिः? अत आह—**लोकेऽपीति**। 'यवागूं पिब, शिखा ते वर्धिष्यते' इति प्ररोचनावचनं यथा यवागूपानकृतशिखावृद्ध्यंशेऽप्रमाणमपि तापोपशमार्थे विहितत्वेन सार्थकत्वाद् यवागू-पानस्य तद्वचनं प्रमाणमेव, तथा 'अक्षय्य्ं ह वै चातुर्मास्ययाजिनः सुकृतं भवती'ति कर्मविधिवचनमक्षयसुकृतप्रदश्चातुर्मास्ययाग इत्यंशेऽप्रमाणमपि ब्रह्मज्ञानहेतुभूतचित्तशुद्ध्यर्थं विहितत्वेन चातुर्मास्ययागस्य तत्र तत्प्रमाणमेव। तस्मात् प्ररोचनावाक्यवत् कर्म-विधिवाक्यस्य स्वार्थे तात्पर्याभावात् , कर्मविधानं विना चित्तशुद्ध्यलाभाच्चित्तशुद्धिलाभं विना ब्रह्मविद्यारूपोपायस्वीकारानधिकाराद् ब्रह्मविद्याप्राप्त्यर्थं कर्मविधिरिति। **यद्वा** कर्मविधिवाक्यानां स्वार्थे तात्पर्यं नास्ति, किन्तु ज्ञान एवेत्यत्र शास्त्राभिमतोऽर्थवाददृष्टान्त उक्तः। अथ लोकन्यायोऽप्यस्तीत्याह—**लोकेऽपीति**। एवं ज्ञानशेषत्वात् कर्मणः प्रामाण्यमिति मतमुक्त्वा यावद्व्यवहारमबाधितत्वात् कर्मार्थस्य तद्विषयं ज्ञानमपि प्रमैवेति मतमाश्रित्याह—**साक्षादेव वेति**। वाशब्दः पक्षान्तरद्योतनार्थः। **प्रकारान्तरस्थानाम्** आत्मज्ञानो-दयात्प्रागवस्थायां स्थितानां कर्मविधिश्रुतीनां साक्षादेव वा प्रामाण्यं सिद्धम्। अज्ञातस्वर्गाग्निहोत्रादिसम्बन्धबोधकत्वादिति भावः। तत्र दृष्टान्तमाह—**प्रागिति**। आत्मज्ञानात्प्राग् यावद्व्यवहारमित्यर्थः। आत्मज्ञानसूर्योदये सति हि सर्वव्यवहारकारणाज्ञानतमसः क्षय इति भावः। देहाभिमाननिमित्तं प्रत्यक्षादीनां प्रमाणानां प्रामाण्यं यथा यावद्व्यवहारमस्ति, तथेत्यर्थः। देहादिष्वहमभिमानाभावे हि पश्यामि [5]मनोम्यहमित्येवं न व्यवहरति। तद्व्यवहाराभावे च कथं चक्षुरादिप्रामाण्यमुपपादयितुं शक्यते? व्यवहारबलकल्प्यं हि चक्षुरादीनां प्रामाण्यम्। तस्माद् यावद्व्यवहारमस्माकं कर्मविधिश्रुतिः प्रमाणमेव व्यावहारिकत्वात् कर्मणस्तद्विधीनां च। परमार्थतस्तु सर्वव्यवहारो ऽप्यप्रमाणमेव। आत्मन एकस्यैव सत्त्वादिति। एवं ब्रह्मविद्यायाः प्रामाण्यादकर्तैवात्मा। न च कर्मविद्याप्रामाण्यात् कर्ताऽपीति वाच्यम् ; कर्मविद्याया ब्रह्मविद्यया बाधितत्वेन तदंशेऽप्रमाणत्वात्।

---

१. 'वा' इति क्वचिन्न। २. 'देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः। लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात्॥' इति समन्वयाधिकरणान्ते भाष्यकारैरुद्धृतः श्लोकोऽनुसंधेयः। ३. विधिशेषार्थप्रतिपादकत्वेनेत्यर्थः। ४. 'सत्यत्वं गतायाः' 'सत्यत्वे' इति पा.। ५. आत्मनेपदप्रयोगो युक्तः।

**यत्तु मन्यसे - स्वयमव्याप्रियमाणोऽप्यात्मा सन्निधिमात्रेण करोति, तदेव च मुख्यं कर्तृत्वमात्मनः। यथा राजा युद्ध्यमानेषु योधेषु युध्यत इति प्रसिद्धं स्वयमयुध्यमानोऽपि सन्निधानादेव जितः पराजितश्चेति; तथा सेनापतिः वाचैव करोति; क्रियाफलसम्बन्धश्च राज्ञः सेनापतेश्च दृष्टः। यथा च ऋत्विक्कर्म यजमानस्य, तथा देहादीनां कर्मात्मकृतं स्यात् तत्फलस्यात्मगामित्वात्। [1]यथा च भ्रामकस्य लोहभ्रामयितृत्वादव्यापृतस्यैव मुख्यमेव कर्तृत्वम् ,**

अनुभूतिस्वरूपाचार्यटिप्पणम्

**यत्त्वित्यादिना** दृष्टान्तावष्टम्भेन मिथ्याज्ञानं विनाऽप्यात्मनो मुख्यकर्तृत्वमाशङ्क्य परिहृतम्।

आनन्दगिरिकृतव्याख्या

**प्रातीतिककर्तृत्वस्याविद्यकत्वेऽपि श्रुतिप्रामाण्यमप्रत्यूहमित्युक्तम्। संप्रति कर्तृत्वस्य प्रकारान्तरेण पारमार्थिकत्वमुत्थापयति—** यत्त्विति। **स्वव्यापाराभावे सन्निधिमात्रेण कुतो मुख्यं कर्तृत्वमित्याशङ्क्य दृष्टान्तमाह—**यथेति। **स्वयमयुध्यमानत्वे कथं तत्फलवत्त्वम् इत्याशङ्क्य प्रसिद्धिवशादित्याह—**जित इति। **कायिकव्यापाराभावेऽपि कर्तृत्वस्य मुख्यत्वे दृष्टान्तमाह—**सेनापतिरिति। **तस्यापि फलवत्त्वं राजवदविशिष्टमित्याह—**क्रियेति। **अन्यकर्मणाऽन्यस्य सन्निहितस्य मुख्ये कर्तृत्वे वैदिकमुदाहरणमाह—**यथा चेति। **कथमृत्विजां कर्म यजमानस्येत्याशङ्क्याह—**तत्फलस्येति। **स्वव्यापारादृते सन्निधेरेवान्यव्यापारहेतोर्मुख्यकर्तृत्वे दृष्टान्तान्तरमाह—**यथा चेति। **क्रियां**

भाष्यार्कप्रकाशः

ननु कर्मब्रह्मविद्ययोरन्यतराप्रामाण्यस्य वेदवादिनामभ्युपगन्तुमयुक्तत्वाद् विद्याद्वयमपि प्रमाणमेव। न च – कथमात्मनः कर्तृत्वमविक्रियस्य? येन कर्मविद्याऽपि प्रमाणं स्यादिति – वाच्यम् ; कर्तृभूतसंघातस्य सन्निधिमात्रेणात्मनः कर्तृत्वस्य वस्तुतोऽकर्तृत्वस्य च सत्त्वादिति पूर्वपक्षिणः शङ्कामुपपादयति— **यत्त्वित्यादिना। मन्यत इति**। भवानिति शेषः। पूर्ववादीति वा। यत्तु मन्यते, तदसदित्यन्वयः। मननप्रकारमेव दर्शयति— **स्वयम**ित्याद्यारभ्य **आत्मन** इत्यन्तेन ग्रन्थेन। **तदेवेति**। सन्निधिमात्रेण कर्मकरणमेवेत्यर्थः। नन्वव्याप्रियमाणस्याकर्तुरप्यात्मनः सन्निधिमात्रेण यदि कर्तृत्वं स्यात् , तर्हि घटस्यापि तत् स्यादित्यतो दृष्टान्तमाह— **यथेति**। योधेषु भटेषु युध्यमानेषु सत्सु राजा युध्यत इति यथा प्रसिद्धम् , योधेषु जितेषु पराजितेषु वा सत्सु स्वयमयुध्यमानोऽपि राजा सन्निधिमात्रेण जितः पराजितश्चेति यथा प्रसिद्धम् , एवं राजवत् सेनापतिश्चापि स्वयमयुध्यमानः सन्निधिमात्रेण युद्धं करोति जितः पराजितश्चेति प्रसिद्धम्। न केवलं प्रसिद्धमात्रम् , किन्तु युद्धक्रियाफलभूतराज्यधनादिसम्बन्धोऽपि राज्ञः सेनापतेश्च दृष्टः। दृष्टान्तान्तरमाह—**यथा चेति**। ऋत्विक्कर्म यजमानस्य यथा दृष्टम् , ऋत्विग्गणे होमादिकर्मसु व्याप्रियमाणे सति यजमानः स्वयमव्याप्रियमाणोऽपि यजमानो यज्ञं करोतीति प्रसिद्धम् , तद्यज्ञकर्मफलसम्बन्धश्च यजमानस्य श्रुतश्च। **तथा** राजवत् सेनापतिवद् यजमानवच्चेत्यर्थः; देहाद्याश्रयं कर्मात्मकृतं स्यात्। हेतुमाह—**फलस्येति**। यथा युद्धफलस्य राज्यप्राप्त्यादिलक्षणस्य राजगामित्वाद् भटकृतमपि युद्धं राजकृतं भवति। यथा यज्ञफलस्य स्वर्गस्य यजमानगामित्वादृत्विक्कृतमपि यज्ञकर्म यजमानकृतं भवति, तथा कर्मफलस्यात्मगामित्वाद् देहादिसंघातकृतमपि कर्मात्मकृतं भवतीत्यर्थः। घटकलशादेस्तु सन्निहितस्यापि न कर्तृत्वप्रसङ्गः, कर्मफलस्य घटादिगामित्वाभावादिति भावः। ननु राजयजमानयोरपि युद्धयज्ञकर्मणोर्दर्शनप्रेरणादिरूपो यः कश्चिद् व्यापारोऽस्त्येवेति कृत्वा कथं तद्दृष्टान्तेन सुतरां निर्व्यापारस्यात्मनः कर्तृत्वं साधयितुं शक्यत इत्यतो दृष्टान्तान्तरमाह—**यथा वेति। भ्रामकस्य** अयस्कान्तशिलायाः। अव्यापृतस्यैव भ्रामकस्य लोहभ्रामयितृत्वान्मुख्यमेव कर्तृत्वं यथा, तथा चाव्यापृतस्यैवात्मनो मुख्यमेव कर्तृत्वमित्यर्थः।

परिहरति पूर्वपक्षम्—**तदसदिति**। हेतुमाह—**अकुर्वत इति**। कृञः कर्तरि ण्वुलि कारकमिति रूपम्; तथा च करोतीति कारकमिति व्युत्पत्तिः। कर्तृ इत्यर्थः। तस्य भावः कारकत्वम्। तद्धि कर्तर्येवास्ति, न त्वकर्तरि; यथा गव्येव गोत्वं, न तु मनुष्ये; यथा वा घट

१. 'यथा वा' इति पा.।

**तथा चात्मन इति। तदसत्; अकुर्वतः कारकत्वप्रसङ्गात्। कारकमनेकप्रकारमिति चेत्, न; राजप्रभृतीनां मुख्यस्यापि कर्तृत्वस्य दर्शनात्। राजा तावत् स्वव्यापारेणापि युध्यते, योधानां च [1]योधयितृत्वे धनदाने च मुख्यमेव कर्तृत्वम्। तथा जयपराजयफलोपभोगे। तथा यजमानस्यापि [2]प्रधानत्यागे दक्षिणादाने च मुख्यमेव कर्तृत्वम्। तस्मादव्यापृतस्य कर्तृत्व उपचारो यः स गौण इत्यवगम्यते[3]।**

आनन्दगिरिकृतव्याख्या

**कुर्वत् कारणं कारकमित्यङ्गीकारविरोधान्नैतदिति दूषयति—**तदसदिति। **कारकविशेषविषयत्वेनाङ्गीकारोपपत्तिरिति शङ्कते—**कारकमिति। **स्वव्यापारमन्तरेण न किञ्चिदपि कारकमिति परिहरति—**न, राजेति। **दर्शनमेव विशदयति—**राजेति। **यथा राज्ञो युद्धे योधयितृत्वेन धनदानेन च मुख्यं कर्तृत्वम्, तथा फलभोगेऽपि मुख्यमेव तस्य कर्तृत्वमित्याह—** तथेति। **यदुक्तमृत्विक्कर्म यजमानस्येति, तत्राह—** यजमानस्यापीति। **स्वव्यापारादेव मुख्यं कर्तृत्वमिति स्थिते फलितमाह—** तस्मादिति।

भाष्यार्कप्रकाशः

एव घटत्वं, न तु पटे। एवं सति कथमकर्तर्यात्मनि कारकत्वप्रसङ्गः? यद्येवमकर्तर्यप्यात्मनि कारकत्वं स्यात्, तर्ह्यकर्तरि घटादावपि तत् स्यात्; अघटादौ घटत्वादिकमपि स्यात्, विरुद्धधर्मसामानाधिकरण्यस्याभ्युपगतत्वात्। तस्माद् **अकुर्वतो**ऽकर्तुरात्मनः **कारकत्वं** कर्तृत्वमित्यस्य दोषस्य तव मते प्रसक्तत्वादसत् तव मतम्।

नन्वकुर्वतोऽपि कारकत्वमस्त्येव, कारकस्यानेकविधत्वात्। यत् स्वयमेव करोति तन्मुख्यं कारकम्, यथा भटऋत्विगादिः; यथा वा भोजनमैथुनादिकर्मणि देवदत्तादिः; यत् स्वयमकुर्वदप्यन्यैः कारयति तद्गौणं कारकम्, यथा राजयजमानादिः। एवं कारकस्यैकविधत्वाभावादकुर्वतोऽपि गौणकारकत्वप्रसङ्गो न दोषायेति भाव इत्याह पूर्ववादी—**कारकमिति**। परिहरति—**नेति**। हेतुमाह — **राजेति**। राजसेनापतियजमानानां त्वयोदाहृतानां न हि गौणं कारकत्वमस्ति, येनाकुर्वतोऽपि कारकत्वप्रसङ्गो निर्दुष्टः स्यात्; किन्तु मुख्यमेव कारकत्वमस्ति। ततश्च कुर्वतामेव राजादीनां कारकत्वमिति सिद्धम्; न त्वकुर्वतामिति कृत्वा अकुर्वतः कारकत्वप्रसङ्गो दुष्ट एव। ननु कथं राजादीनां युद्धादिकमकुर्वतामस्ति मुख्यं कारकत्वम्? अत आह—**राजेति**। आदौ राज्ञो मुख्यं कारकत्वं दर्शयामीत्याह— **राजा तावदिति**। राजशब्दोऽत्र सेनापतेरप्युपलक्षणम्। **स्वव्यापारेणापि युध्यत इति**। श्रीरामधर्मराजादीनां राज्ञां स्वयमेव युद्धे व्यापृतत्वश्रवणादिति भावः। अधुनातनानामपि राज्ञाम्। योधानामिति कर्मणि षष्ठी शेषे षष्ठी च। योधानां योधयितृत्वे कर्मणि, योधानां धनदाने कर्मणि च मुख्यमेव कर्तृत्वमस्ति। एवं धृष्टद्युम्नादिसेनापतीनां स्वव्यापारेण योद्धृत्वमस्ति। आधुनिकसेनापतीनां च योधयितृत्वमस्तीति बोध्यम्। न केवलं योद्धृत्वयोधयितृत्वयोरेव राज्ञो मुख्यं कर्तृत्वम्, किन्तु तत्फलानुभवेऽपीत्याह—**तथेति**। जयफलं परराज्यधनादिप्राप्तिसुखम्, पराजयफलं स्वराज्यधनादिनाशदुःखम्, तयोरुपभोगे ऽनुभवकर्मणि मुख्यमेव कर्तृत्वमस्ति राज्ञः। **प्रधानत्यागे** प्रधानहोमे; प्रधाने त्यागे धनदाने ब्राह्मणानामिति वा। दक्षिणादाने ऋत्विजामिति भावः। **एतेन** यदन्यैः कारयति तद् गौणं कारकमिति लक्षणमपि **दूषितम्**, कारयितृत्वांशेऽपि मुख्यकर्तृत्वसत्त्वेन कारयितुरपि मुख्यकारकत्वात्। **तस्मादिति**। कर्तुरिव कारयितुरपि मुख्यकर्तृत्वादित्यर्थः। कर्तृत्वेन कारयितृत्वेन तत्फलभोक्तृत्वेन च राजप्रभृतीनां व्याप्रियमाणत्वान्मुख्यकर्तृत्वाच्चेत्यर्थ इति वा। **य इति**। अव्यापृतस्य गौणं कर्तृत्वमुपचारादुच्यत इत्यर्थः। कर्तृत्वरूपं कारयितृत्वरूपं वा कारकत्वमव्यापृतस्य न सम्भवतीति कृत्वा अकुर्वतः कारकत्वप्रसङ्गो दुष्ट एवेति भावः।

नन्वकुर्वतोऽकारयतश्चाव्यापृतस्य भ्रामकस्य सन्निधिमात्रेणैव लोहभ्रमणे कर्मणि मुख्यकर्तृत्वदर्शनादव्यापृतस्यापि सन्निधि-

---

१. 'योधयितृत्वेन धनदानेन च' इति पा.। २. प्रधाने त्यागे इति कर्मधारयः। देवतोद्देशेन द्रव्यत्यागो हि प्रधानम्; तस्मिन्, ऋत्विग्भ्यो दक्षिणादाने च यजमान एव कर्ता। स्वत्वत्यागात्मकं हि दानम्। यजमानस्यैव द्रव्यादौ स्वत्वसत्त्वेन ऋत्विग्भिः तत्त्यागासंभवात् तत्र यजमानस्यैव कर्तृत्वम्। अथ च यजमानस्य प्रयोजककर्तृत्वम् आर्त्विज्येऽपि कर्मणि अस्तीत्यपि बोध्यम्। 'प्रधानत्यागेन दक्षिणादानेन च' इति पा.। ३. सिद्धान्ते तु आरोपितं कर्तृत्वमात्मनो मुख्यमेवेति वक्ष्यते। तथा च तत्संभवे न गौणस्य स्वीकार्यतेति भावः।

**यदि मुख्यं कर्तृत्वं स्वव्यापारलक्षणं नोपलभ्यते राजयजमानप्रभृतीनाम् , तदा सन्निधिमात्रेणापि कर्तृत्वं मुख्यं परिकल्प्येत, यथा भ्रामकस्य लोहभ्रमणेन। न तथा राजयजमानादीनां स्वव्यापारो नोपलभ्यते। तस्मात् संनिधिमात्रेण कर्तृत्वं गौणमेव। तथा च सति तत्फलसम्बन्धोऽपि गौण एव स्यात्। न गौणेन मुख्यं कार्यं निर्वर्त्यते।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

उक्तं प्रमेयजातं सङ्क्षेपतो निगमयति सुखप्रतिपत्तये – **तस्मात् सन्निधिमात्रेणेत्यादिना।**

**अनुभूतिस्वरूपाख्यो यतिश्चकार टिप्पणम्।**
**व्याख्याऽसामर्थ्यसन्तापिपुंसां चित्तानुरञ्जनम्॥**

**॥ इति श्रीगीताभाष्यटिप्पणे अष्टादशोऽध्यायः॥**

आनन्दगिरिकृतव्याख्या

**तदेव प्रपञ्चयति—**यदीति। **तर्हि सन्निधानादेव मुख्यं कर्तृत्वं राजादीनामुपगतमिति, नेत्याह—** न तथेति। **राजादीनां स्वव्यापारवत्त्वे पूर्वोक्तं सिद्धमित्याह—**तस्मादिति। **राजप्रभृतीनां सन्निधेरेव[१] कर्तृत्वस्य गौणत्वे जयादिफलवत्त्वस्यापि सिद्धं गौणत्वम् इत्याह—**तथा चेति। **तत्र पूर्वोक्तं हेतुत्वेन स्मारयति—**नेति। **अन्यव्यापारेणान्यस्य मुख्यकर्तृत्वाभावे फलितमुपसंहरति—**तस्मादिति।

भाष्यार्कप्रकाशः

मात्रेण मुख्यमेव कर्तृत्वं सम्भवतीति कृत्वा राजादीनामपि तथा सन्निधिमात्रेणैव मुख्यकर्तृत्वसम्भवे योधयितृत्वादिप्रयुक्तमुख्यकर्तृत्ववर्णनं क्लिष्टमित्यत आह—**यदीति**। राजयजमानप्रभृतीनां यदि [२]स्वव्यापारलक्षणमयद्योधयितृत्वधनदातृत्वादिलक्षणं वा मुख्यं कर्तृत्वं नोपलभ्येत, तदा सन्निधिमात्रेणापि मुख्यं कर्तृत्वं परिकल्प्येत। प्रसिद्धे सत्यप्रसिद्धकल्पनस्यान्याय्यत्वादिति भावः। यथा भ्रामकस्य लोहभ्रमणे सन्निधिमात्रेणैव मुख्यं कर्तृत्वम् , तद्वत् ; तथा राजयजमानादीनां स्वव्यापारो नोपलभ्यत इति न, किन्तूपलभ्यत एव। स्वव्यापारानुपलम्भाद् भ्रामकस्य सन्निधिमात्रेण मुख्यकर्तृत्वकल्पनमुचितम्। स्वव्यापारोलम्भात्तु न राजादीनां तत्कल्पनमुचितमिति भावः। **तस्मादिति**। स्वव्यापारलक्षणमुख्यकर्तृत्वसत्त्वादित्यर्थः। सन्निधिमात्रप्रयुक्तं कर्तृत्वं राजादीनां गौणमेव।

**नन्वेव**मस्तु राजादीनां सन्निधिमात्रेण कर्तृत्वं गौणं, स्वव्यापारलक्षणमुख्यकर्तृत्वसम्भवात्[३]। आत्मनस्तु भ्रामकस्येव स्वव्यापाराभावादव्यापृतस्यैव तस्य सन्निधिमात्रेण मुख्यं कर्तृत्वं स्यादित्यकुर्वतः कारकत्वप्रसङ्गो न दुष्ट इति चेत् , **उच्यते**—अव्यापृतस्यापि स्वाध्यस्तदेहादिव्यापारैर्व्यापृतवदवभासमानस्यात्मनः सन्निधिमात्रेण मुख्यं कर्तृत्वं न सम्भवति; किन्तु गौणमेव। भ्रामकं तु स्वयमव्यापृतं सद् व्यापृतमिव नावभासत इति युक्तं तस्य सन्निधिमात्रेण मुख्यं कर्तृत्वम्। तस्मादकुर्वत आत्मनो मुख्यं कारकत्वम् अयुक्तमेव।

ननु तर्हि अकुर्वत्यप्यात्मनि सन्निधिमात्रेण कर्तृत्वारोप इति भवतु गौणं कारकत्वमात्मन इत्यत आह—**तथा च सतीति। तत्फलेति**। कर्मफलेत्यर्थः। कर्मफलसम्बन्धोऽप्यात्मनि कल्पित एव स्यात् ,न तु मुख्य इत्यर्थः। भवतु फलसम्बन्धोऽपि गौणः, किं ततः? अत आह—**नेति**। गौणेन कर्त्रा मुख्यं कार्यं न निर्वर्त्यते, मुख्येन कर्त्रैव तस्य निर्वर्त्यत्वात्। ततश्च मुख्यकर्तरि कर्मनिर्वर्तके देहेन्द्रियादिसंघाते सति कर्मानिर्वर्तक आत्मनि किमिति कर्तृत्वारोपः? यदि कर्मतत्फलसम्बन्धशून्येऽप्यात्मनि कर्तृत्वमारोप्येत सन्निधिमात्रेण, तर्हि घटादावप्यारोप्येतेति भावः। **तस्मात्** कार्यानिर्वर्तत्वात् कर्मफलाभोक्तृत्वाच्चात्मन इत्यर्थः। देहादीनां व्यापारेणाव्यापार एवात्मा कर्ता भोक्ता च स्यादित्येतदसदेवेति निश्चीयते। ननु तर्हि कथं कर्ताऽहं भोक्ताऽहं संसार्यहं सुख्यहं दुःख्यहमित्यादि-

१. सन्निधिमात्रादेवेत्यर्थः। २. 'स्वव्यापारलक्षणं योधयितृत्वधनदातृत्वादिलक्षणं वा' इति पाठः स्यात्। ३. अन्यत्र स्वव्यापारेण मुख्यकर्तृत्वं राजादेः प्रसिद्धमिति सन्निधिमात्रेण कर्तृत्वं गौणं स्यात्। आत्मनस्तु स्वव्यापारेण कर्तृत्वं न क्वापि प्रसिद्धमिति सन्निधिमात्रेण कर्तृत्वं कथं गौणं स्यात् , किन्तु मुख्यमेव स्यादिति शङ्का। व्यापारारोपेण मुख्यकर्तृत्वसंभवात् न सन्निधिमात्रेण कर्तृत्वं मुख्यमिति समाधानभावः।

**तस्मादसदेवैतद् गीयते— देहादीनां व्यापारेणाव्यापृतः आत्मा कर्ता भोक्ता च स्यादिति। भ्रान्तिनिमित्तं तु सर्वमुपपद्यते। यथा स्वप्ने मायायां च, एवम्। न च देहाद्यात्मप्रत्ययभ्रान्तिसन्तानविच्छेदेषु सुषुप्तिसमाध्यादिषु कर्तृत्वभोक्तृत्वाद्यनर्थः उपलभ्यते। तस्माद् भ्रान्तिप्रत्ययनिमित्त एवायं संसारभ्रमः, न तु परमार्थः इति सम्यग्दर्शनादत्यन्तमेवोपरम इति सिद्धम्॥ ६६॥**

आनन्दगिरिकृतव्याख्या

**कथं तर्हि त्वयाऽऽत्मनि कर्तृत्वादि स्वीकृतम्? न हि बुद्धेस्तदिष्टम् , 'कर्ता शास्त्रार्थवत्त्वा'दिति न्यायात् , तत्राह—** भ्रान्तीति। **कर्तृत्वाद्यात्मनि भ्रान्तमित्येतदुदाहरणेन स्फोरयति—**यथेति। **मिथ्याज्ञानकृतमात्मनि कर्तृत्वादीत्यत्र व्यतिरेकं दर्शयति—**न चेति। **उक्तव्यतिरेकफलं कथयति—**तस्मादिति। **संसारभ्रमस्याविद्याकृतत्वे सिद्धे परमप्रकृतमुपसंहरति—**इति सम्यगिति॥ ६६॥

भाष्यार्कप्रकाशः

व्यवहारस्योपपत्तिः? अत आह—**भ्रान्तीति**। भ्रान्त्या हेतुना सर्वमुपपद्यते, मायायां सर्वसम्भवादिति न्यायादिति भावः। रज्जौ सर्प इव, मरुमरीचिकासूदकमिव, गगने नैल्यमिव भ्रान्त्या संसारः प्रतीयत आत्मनीति सर्वस्याप्यसम्भावितार्थस्य भ्रान्तिरेव शरणम् ; सा च भ्रान्तिरज्ञानमूला। ननु भ्रान्त्याऽपि कथमकर्तुरभोक्तुः कर्तृत्वभोक्तृत्वोपपत्तिः? अत आह—**यथेति**। स्वप्ने देहे पर्यङ्के शयानेऽपि स्वयं यथा रथ्यायां सञ्चरन्निव दृश्यते, हृत्पुण्डरीकान्तर्गते केवलेऽप्यात्मनि यथा रथगजपत्तनादय अलभ्यन्ते निद्रादोषात् , तद्वदात्मन्यपि संसारः। दृष्टान्तान्तरमाह—**मायायामिति**। इन्द्रजालादिलक्षणायामित्यर्थः। इन्द्रजालादौ हि गगनेऽपि गन्धर्वनगरादयो दृश्यन्ते, गोगर्भं प्रविश्य निर्गच्छन्निव पुरुषो दृश्यते, छिन्नेन शिरसा पुनः कृतसन्धान इव जीवन् पुरुषो दृश्यते, तद्वदात्मन्यपि संसार इति भावः। एवं भ्रान्तिसत्त्वे संसारसत्त्वमित्यन्वयं, भ्रान्त्यभावे संसाराभाव इति व्यतिरेकेण द्रढयति—**न चेति**। देहादावनात्मन्यात्मेति प्रत्ययो **भ्रान्तिः** भ्रमज्ञानं, तस्य **सन्तानो**ऽविच्छेदेन धारारूपतया पूर्वपूर्वज्ञाननाशे उत्तरोत्तरज्ञानोदय इत्येवंरूपेण वर्तनं, भ्रान्तीनां सन्तानः समूह इति वा। तस्य **विच्छेदो** नाशो येषु तेषु **सुषुप्तसमाधानादिषु** सुषुप्तः सुषुप्तिः, समाधानं समाधिः। आदिपदान्मृतिमूर्छादिग्रहणम्। तेषु कर्तृत्वभोक्तृत्वाद्यनर्थौ न चोपलभ्यते, नैवानुभूयते। आत्मनेति शेषः। **तस्मादिति**। भ्रान्तिसत्त्वे संसारसत्त्वात् , तदभावे संसाराभावाच्चेत्यर्थः। अयं संसारभ्रमो भ्रान्तिप्रत्ययः, देहादावात्मेति मिथ्याप्रत्ययस्तन्निमित्त एव। देहादावात्मप्रत्यये सत्येव तद्धर्माणां कर्तृत्वभोक्तृत्वसुखदुःखादीनामात्मधर्मत्वभ्रम इति भावः। एवकारार्थमाह—**न त्विति**। **परमार्थतो** वस्तुत आत्मनि न कोऽपि संसार इत्यर्थ इति। अत एव सम्यग्दर्शनात् 'नाहं देहो नेन्द्रियाण्यन्तरङ्गो नाहङ्कारः प्राणवर्गो न बुद्धिः। दारापत्यक्षेत्रवित्तादिदूरः साक्षी नित्यः प्रत्यगात्मा शिवोऽह'मिति यथार्थज्ञानात् संसारस्यात्यन्तोपरमः समूलोच्छेदः; भ्रान्तिज्ञानसम्यग्ज्ञानयोः सर्पज्ञानरज्जुज्ञानयोरिव विरोधात् सम्यग्ज्ञानेन भ्रान्तिज्ञानं निवर्त्यते। ज्ञानाज्ञानयोर्विरोधाद् भ्रान्तिहेत्वज्ञानमपि ज्ञानेन निवर्त्यत इति ज्ञानादेव मोक्षः। कर्म तु 'कर्ता भोक्ताऽह'मिति भ्रान्तिज्ञानपूर्वकमेवेति न कर्मणा भ्रान्तिज्ञानस्य निवृत्तिः। अत एव नाज्ञानस्यापि निवृत्तिरिति न कर्मणा मोक्षः। अत एव – 'नास्त्यकृतः कृतेने'ति श्रुतिरुपपद्यते। कृतेन कर्मणा अकृतो मोक्षो नास्तीति तदर्थः। समुच्चयस्त्वसिद्ध एव, कर्मज्ञानयोर्विरोधात्। तस्मान्न समुच्चयान्मोक्षः। अत एवोक्तं भगवता – 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रजे'ति सर्वकर्मसंन्यासपूर्विका ज्ञाननिष्ठा त्वया कार्येत्यभिप्रेत्य ज्ञाननिष्ठायाः फलं च स्वयमेवाह भगवान् – 'अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामी'ति। पुण्यपापात्मकसर्वबन्धविनिर्मोक्षो हि मोक्षः। श्रुतिरप्यमुमेवार्थमाह – 'तरति शोकमात्मवि'दिति, 'ब्रह्मविद् ब्रह्मैव भवती'ति च। संसारे तीर्णे सति हि आत्मा सच्चिदानन्दब्रह्मस्वरूपेणावतिष्ठते। अत एव ब्रह्मस्वरूपावस्थानाय यत्नो न कर्तव्यः, किन्तु संसारोपरमायैव यत्नः कार्य इत्युक्तम्। स च ज्ञानसाध्यः, अज्ञानमूलत्वात् संसारस्य। तस्माज्ज्ञानमेव मोक्षसाधनमिति गीताशास्त्रस्य निश्चितोऽर्थः। अयमेव सर्वोपनिषदर्थश्च उपनिषत्सारत्वाद् गीताशास्त्रस्येति।

**ननु** ज्ञानान्मोक्ष इति यदुक्तं तद् युक्तमेव, परन्तु नाद्वैतज्ञानान्मोक्ष इति गीताशास्त्रकर्तुराशयः। किं तर्हि? द्वैतज्ञानादेव।

भाष्यार्कप्रकाशः

तथाहि उपक्रमे तावत् – 'न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः' इति जीवेश्वरद्वैतमेवोक्तम्। उपसंहारे – 'मां त्वं शरणं व्रज, अहं त्वां मोक्षयिष्यामी'ति कृष्णार्जुनयोर्जीवेश्वरयोर्द्वैतमेवोक्तम्। मध्ये च तत्र तत्र – 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्', 'मामेति सोऽर्जुन', 'तस्याहं न प्रणश्यामि स च मे न प्रणश्यति', 'श्रद्धावान् भजते यो मां स मे युक्ततमो मतः', 'कश्चिन्मां वेत्ति तत्त्वतः', 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते', 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः', 'मां नित्ययुक्ता उपासते', 'भजन्ते मां बुधा भावसमन्विताः', 'तेषामहं समुद्धर्ता', 'यो मामेवमसम्मूढो जानाति पुरुषोत्तम'मित्यादिवाक्येषु जीवेश्वरभेद एवासकृत् प्रपञ्चितः। एवं जीवेश्वरद्वैते यथार्थे सति 'अहं ब्रह्मे'त्यद्वैतज्ञानमयथार्थमेव, भटस्य 'राजाऽह'मिति वचनवत्। अत एव 'राजाऽह'मिति वदन् दुरहङ्कारो भटो राज्ञेव, 'ब्रह्माह'मिति वदन् अद्वैत्यपीश्वरेण दण्ड्य एवेत्यद्वैतज्ञानान्नरकपात एवेति चेत् , **मैवं वादीः**; जीवेश्वरभेदज्ञानस्य लोकतस्तर्कादिशास्त्रतोऽनुमानाच्च सिद्धस्य महता गीताशास्त्रेण प्रतिपादनस्य व्यर्थत्वात् , तादृशज्ञानान्मोक्षासिद्धेश्च। यदि मोक्षसिद्धिः, तस्माद् द्वैतज्ञानात् , तर्ह्यास्तिकः सर्वोऽपि लोको विनैव गीताशास्त्राध्ययनं कृतार्थ एव स्याद् , द्वैतज्ञानस्य प्रागेव सिद्धत्वात्। न च – जीवेश्वरभेदज्ञानस्य लोकादिना सिद्धत्वेऽपीश्वराद्भिन्नस्य जीवस्य देहेन्द्रियादिविलक्षणशुद्धचिन्मात्रत्वज्ञानस्यासिद्धत्वात् तदर्थं शास्त्राध्ययनमावश्यकम् , तादृशज्ञानादेव मोक्षश्चेति – वाच्यम् ; जीवस्य शुद्धचिन्मात्रत्वाभ्युपगम ईश्वरभिन्नत्वस्य दुर्निरूपत्वात्। शुद्धचिन्मात्रत्वं हीश्वरस्यापि। न च चिन्मात्रोऽपि विभुरीश्वरः, अणुर्जीव इति वाच्यम् ; निरवयवचैतन्यरूपजीवस्याणुत्वासम्भवात्। सावयवं हि वस्तु सपरिमाणं भवति। न च – सर्वज्ञ ईश्वरः, किञ्चिज्ज्ञो जीव इति – वाच्यम् ; मुक्तौ जीवचैतन्यस्य सर्वज्ञत्वस्य त्वयाऽप्यभ्युपगतत्वात्। यन्मुक्तिदशावस्थितमात्मस्वरूपं तदेव बद्धदशायामपि, अन्यथा सविकारत्वापत्त्या 'अविकार्योऽय'मित्यादिशास्त्रविरोधाद् अनित्यत्वप्रसङ्गाच्च। न च सकलकल्याणगुणपरिपूर्णमीश्वरचैतन्यमिति वाच्यम् ; 'केवलो निर्गुणश्चे'ति श्रुतिविरोधात्। न च नियामकेश्वरस्य नियाम्यजीवाभेदोऽयुक्त इति वाच्यम् , नियाम्यनियामकभावस्य भूतेश्वरनिष्ठत्वेनात्मेश्वरनिष्ठत्वाभावात्। न च भूतान्येवात्मान इति वाच्यम् ; 'यतो वे'त्यादिश्रुत्या सादीनां सान्तानां च भूतानामात्मत्वायोगात्। आत्मा हि जन्मादिविकारशून्यत्वान्नित्यः – 'अजो नित्यः शाश्वतः' इति शास्त्रात्। न च चराचरात्मकभूतसंसृष्टतया जन्मादिसिद्धिरात्मन इति वाच्यम् ; तथात्व ईश्वरस्यापि तत्प्रसङ्गात्। भूतोपाधिकजन्मादिविकारस्य भूतनिष्ठत्वेन वस्तुत आत्मनिष्ठत्वासम्भवाच्च।

न च संसारिजीवस्यासंसारीश्वराभेदोऽयुक्त इति वाच्यम् ; जीवस्य संसारित्वाभावात्। न च 'संसार्यह'मित्यनुभवसिद्धजीवसंसारस्य कथमपलाप इति वाच्यम् ; जीवेनानुभूयमानस्य सुखदुःखजन्ममरणादिलक्षणसंसारस्यानात्मधर्मत्वात्। देहस्य जन्ममरणवृद्धिक्षयादिमत्त्वं प्रत्यक्षमेव; मनसः सुखदुःखवत्त्वं च 'कामः सङ्कल्पः' इत्यादिश्रुतिसिद्धमनुभवसिद्धं च, सुषुप्तौ मनसोऽभावे सुखदुःखानुभवाभावात्। न च देहादिगतोऽपि संसारो जीवेनानुभूयमानत्वाज्जीवधर्म एवेति वाच्यम् ; तथा सति सर्वस्यापि जगतो यः संसारः स सर्वज्ञेनेश्वरेणानुभूयत इतीश्वरस्यापि संसारित्वप्रसङ्गात्। न चानुभवो न ज्ञानमात्रम् , किन्तूपभोग इति वाच्यम् ; जीवेनापि संसारस्यानुपभुज्यमानत्वात्। न च ममायं संसारः इत्यस्त्येवोपभोगो जीवस्येति वाच्यम् ; तस्यानात्मतादात्म्याध्यासप्रयुक्तत्वेन तस्य चाध्यासस्याज्ञानमूलकत्वेन ममायं संसारः इत्यस्य भ्रान्तिज्ञानत्वाद् वस्तुतो जीवस्यासंसारित्वमेवेति। न हि भ्रान्तिसिद्धो धर्मो वस्तुतस्तद्धर्मो भवति। यथा गगने बालानां भ्रान्तिसिद्धं नैल्यं वस्तुतो न गगनधर्मः; यथा वा मरुमरीचिकासु भ्रान्तिसिद्धमुदकं वस्तुतो न मरुमरीचिकाधर्मः; यथा वा शयानस्य भ्रान्तिसिद्धः शिरश्छेदादिधर्मो वस्तुतो न पुरुषधर्मः, तद्वत्। न च – संसारो न भ्रान्तिसिद्धः, किन्तु सत्य एवेति – वाच्यम् ; सत्यत्वे तस्य निवृत्त्ययोगेन मोक्षशास्त्रवैयर्थ्यप्रसङ्गात्। न च – सत्यमपि पापं प्रायश्चित्तेन निवर्तत इति वाच्यम् ; ब्रह्मातिरिक्तस्य सर्वस्याप्यसत्यत्वात्। 'तत्सत्यमतोऽन्यदार्त'मिति श्रुतेः सत्यत्वनित्यत्वयोर्वैयधिकरण्यायोगेन सत्यस्य नित्यत्वान्नित्यस्य निवृत्तिमत्त्वे नित्यत्वस्यैवासिद्धिप्रसङ्गाच्च। न च – असत्यत्वे संसारस्य कथमुपलम्भः? न ह्यसत्यं शशशृङ्गादिकं केनाप्युपलभ्यत इति – वाच्यम् ; असत्यस्यापि स्वप्नरथगजादेरैन्द्रजालिकगन्धर्वनगरादेश्चोपलम्भसत्त्वात्। एवमसत्यत्वे सत्युपलभ्यमानत्वादेव संसारस्य मिथ्यात्वमवोचाम। न च – ईश्वरसृष्टत्वादिन्द्रजालसृष्टत्वाच्च स्वप्नरथगन्धर्वनगरादिकं सत्यमेवेति –

भाष्यार्कप्रकाशः

वाच्यम् ; त्वदभ्युपगतानित्यत्वेनैव सत्यत्वस्य निराकृतत्वात्। न हि सत्यं वस्त्वनित्यं भवति। उक्तं हि पराशरेणापि – 'ज्ञानं यथा सत्यमसत्यमन्य'दिति। न चैवं ज्ञानमीश्वर एव, 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति श्रुतेः। तस्मादीश्वर एव सत्य इति वाच्यम् ; जीवस्यापि ज्ञानैकाकारत्वस्य त्वयाऽप्यभ्युपगतत्वात्। तस्माद् भ्रान्तिसिद्ध एव जीवस्य संसारोपभोग इति सिद्धमसंसारीश्वराद्वैतम्।

न चैकस्येश्वरस्यानेकजीवाभेदोऽयुक्त इति वाच्यम् ; जीवानेकत्वे मानाभावात्। न च 'न त्वेवाहं जातु नास'मित्यादीनि मदुदाहृतानि वाक्यानि मानमिति वाच्यम् ; प्रमातृभेदपरत्वात् तद्वाक्यानामात्मभेदकल्पनस्यायुक्तत्वात्। न चात्मैकत्वे मानाभाव इति वाच्यम् ; प्रकृतगीताशास्त्रस्यैव मानत्वात्। तथाहि – 'अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्। विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति॥ अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः। अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत॥ य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥ न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता न भूयः। अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥ वेदाविनाशिनं नित्यं य एनमजमव्ययम्' , 'नैनं छिन्दन्ति शस्त्राणि', 'अच्छेद्यो ऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च। नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः॥ अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते', 'आश्चर्यवत्पश्यति कश्चिदेनम्', 'देही नित्यमवध्योऽयं देहे सर्वस्य भारत', 'परस्तस्मात्तु भावोऽन्यो व्यक्तोऽव्यक्तात्सनातनः। यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति॥ अव्यक्तोऽक्षर इत्युक्तः', 'अहमात्मा गुडाकेश सर्वभूताशयस्थितः', 'ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते। सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्', 'एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः। क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत', 'अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते। सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखम्। सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति॥ सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्। असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च॥ बहिरन्तश्च भूतानां चरं चाचरमेव च। सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत्॥ अविभक्तं च भूतेषु विभक्तमिव च स्थितम्। भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च। ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते। ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम्॥' 'प्रकृतिं पुरुषं चैव', 'पुरुषः प्रकृतिस्थो हि', 'पुरुषः सुखदुःखानाम्' , 'उपद्रष्टाऽनुमन्ता च भर्ता भोक्ता महेश्वरः। परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः॥' 'य एवं वेत्ति पुरुषम्', 'समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्। विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति॥ समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम्। न हिनस्त्यात्मनाऽऽत्मानं ततो याति परां गतिम्॥', 'यः पश्यति तदात्मानमकर्तारं स पश्यति। अनादित्वान्निर्गुणत्वात्परमात्माऽयमव्ययः॥ शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते॥ यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते। सर्वत्रावस्थितो देहे तथाऽऽत्मा नोपलिप्यते॥ यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः। क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत॥', 'ममैवांशो जीवलोके जीवभूतः सनातनः', 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः' इत्यादीनि।

न च जात्येकवचननिर्देश इति वाच्यम् ; शुद्धचिन्मात्रे आत्मनि जातिव्यक्त्योरभावात्। यद्यात्मनो व्यक्तिभेदः स्यात् , तर्हि व्यक्त एव स्यात् , न त्वव्यक्तः। उक्तं हि – 'अव्यक्तोऽयमचिन्त्योऽय'मिति[१]। न चोपाधिकृतो व्यक्तिभेद इति वाच्यम् ; औपाधिकस्य तस्य वास्तवात्मभेदव्यवस्थापनाशक्तत्वात्। न ह्यौपाधिकघटाकाशादिभेदो महाकाशस्य भेदं जनयितुमीष्टे। न चात्मैकत्वे सुखदुःखाद्यनुभवसाङ्कर्यप्रसङ्ग इति वाच्यम् ; मनआद्युपाधिभेदेन तदसाङ्कर्यात्। न चैकोऽप्यात्मा परमात्मनः ईश्वराद् भिन्न एवेति वाच्यम् ; 'परमात्मेति चाप्युक्तः' इति जीवस्यापि परमात्मत्वात् । न च श्रीकृष्णेन जीवेश्वराभेदः कण्ठतो नोक्त इति वाच्यम्। 'क्षेत्रज्ञं चापि मां विद्धि' इत्युक्तत्वात्। न च – **मां** मदात्मकमित्यर्थान्तरपरं तद्वाक्यमिति – वाच्यम् ; तस्य प्रागेव दूषितत्वात्। विमृष्टे सति मदात्मकमित्यस्यापीश्वराभिन्नमित्येवार्थलाभात्। तस्मान्निर्विशेषशुद्धचिन्मात्रे ब्रह्मणि प्रत्यगभिन्ने जीवेश्वरभेदव्यवहारादयोऽज्ञानमूला एव। न च – परिपूर्णचैतन्यस्येश्वरस्य प्रत्यग्रूपत्वमयुक्तमिति – वाच्यम् ; 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति', 'सर्वस्य चाहं हृदि सन्निविष्टः' इति, 'अहमात्मा गुडाकेश सर्वभूताशयस्थितः' इति च प्रत्यग्रूपेणेश्वरस्थितेरुक्तत्वात्। अन्तर्बहिः सर्वत्र परिपूर्ण-

---

१. तस्मान्न व्यक्तिभेद आत्मन इति शेषः।

भाष्यार्कप्रकाशः

चैतन्यस्येश्वरात्मकस्य, अन्तःस्थचैतन्यरूपप्रत्यगात्मभावस्य युक्तत्वाच्च। अन्यथा ईश्वरस्यान्तर्व्याप्त्यभावेऽपरिपूर्णत्वप्रसङ्गाच्च। तस्मात् सिद्धं जीवेश्वराद्वैतम् , चैतन्यैकस्वरूपत्वाज्जीवेश्वरयोः; चैतन्यस्य च निर्विशेषत्वात्। एतस्मादेवाद्वैतज्ञानान्मोक्षमाह गीताशास्त्रं – 'सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः। सर्वथा वर्तमानोऽपि स योगी मयि वर्तते॥' 'ज्ञात्वा मां शान्तिमृच्छति' 'यो मामेवम-सम्मूढो जानाति पुरुषोत्तमम्। स सर्वविद्भजति मां सर्वभावेन भारत॥' 'एवं मां तत्त्वतो ज्ञात्वा विशते तदनन्तर'मित्यादिवाक्यैः। द्वैतज्ञानात् संसारभयं श्रुतिरेवाह – 'य उदरमन्तरं कुरुते अथ तस्य भयं भवती'ति।

**यदप्युक्तं** राजाऽहमिति ज्ञानवान् भट इव, ब्रह्माहमिति ज्ञानवान् दण्ड्यः इति, **तदयुक्तम्** ; ज्ञानिन ईश्वरात्मत्वेनेश्वरस्य परं प्रियत्वात्। आत्मा हि प्रियः। उक्तं हि कृष्णेनैव – 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' इति, 'ज्ञानी त्वात्मैव मे मत'मिति च। भटस्तु न राज्ञः संघाताभिमानिन आत्मेति दण्ड्य एव तादृशो राज्ञा।

**ननु** ज्ञानिन एवेश्वरत्वे कथं ज्ञानिनोऽहं प्रियः इत्युक्तमिति चेत् , **नैष दोषः**; ममात्मा प्रिय इतिवददोषात्। न च त्वं मां शरणं व्रजेति भेदेन कथमुक्तमिति वाच्यम् ; प्रमाता स्वात्मभूतं ब्रह्म शरणं व्रजेदिति तदर्थात्। न च - प्रमातैव जीवो न त्वात्मा, आत्मा त्वीश्वर एवेति - वाच्यम् ; प्रमातुरेव स्वरूपत्वादात्मनः। आत्मनि हि प्रमाता कल्पितः, रज्जौ सर्पवत्। सर्पस्य कल्पितस्य यथा रज्जुरेव स्वरूपम् , तथा प्रमातुरात्मैव स्वरूपम्। न चैवं प्रमातुर्मिथ्यात्वे शास्त्राधिकारिण एवाभावान्मोक्षफलभोक्तुरप्यभावाच्च व्यर्थं गीता-शास्त्रमिति वाच्यम् ; अन्तःकरणावच्छिन्नचैतन्यस्य प्रमातृत्वेन प्रमातृगतप्रमातृत्वप्रयोजकविशेषणीभूतान्तःकरणावच्छिन्नत्वांशस्य मिथ्यात्वेऽपि विशेष्यचैतन्यांशस्य सत्यत्वात्। न च सिद्धोऽपि मोक्षो व्यर्थ एव, अनुभवसाधनाभावादिति वाच्यम् ; करणानधीन-ज्ञानत्वादात्मनः। 'अपाणिपादो जवनो ग्रहीता' इति श्रूयते। तस्मात् स्वरूपचैतन्येनैव मोक्षानन्दानुभव इति। तस्मात् सिद्धमद्वितीय-ब्रह्मात्मज्ञानान्मोक्ष इति।

यत्तु **रामानुजः—**कर्मयोगज्ञानयोगभक्तियोगरूपान् सर्वान् धर्मान् कुर्वाण एव फलकर्मकर्तृत्वादित्यागेन परित्यज्य मामेकमेव कर्तारमाराध्यं प्राप्यमुपायं चानुसन्धत्स्वेति, **तत्तुच्छम्** ; सर्वधर्मान् परित्यज्येति यथाश्रुतार्थपरित्यागस्यान्यार्थकल्पनस्य च लक्षणया अयुक्तत्वात्। न हि सर्वधर्मानपरित्यज्येति सर्वधर्मफलाभिसन्ध्यादिकं परित्यज्येति वा मूले दृश्यते, किन्तु सर्वधर्मान् परित्यज्येत्येव दृश्यते। न च – यथाश्रुतार्थस्वीकारे, 'नियतस्य तु संन्यासः कर्मणो नोपपद्यते। मोहात्तस्य परित्यागस्तामसः परिकीर्तितः॥' इति तामसत्यागस्य सर्वधर्मपरित्यागस्य निन्दितत्वात् तद्विरोधः स्यात्। ततश्च सर्वधर्मानित्यस्य लक्षणया सर्वधर्मफलानीत्येवार्थः पूर्वा-विरोधात् स्वीकार्यः। पूर्वं हि 'एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च। कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥ कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन। सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः॥' इत्युक्तम्। तस्मात् स एव सात्त्विकत्याग इहापि स्वीकर्तव्य – इति वाच्यम् ; तस्य सात्त्विकत्यागस्य कर्माधिकार्यज्ञपरत्वात् , इहोक्तसर्वधर्मपरित्यागस्य सर्वकर्मसंन्यासिज्ञानि-परत्वाच्च। सर्वधर्मानिति श्लोकेन हि ज्ञाननिष्ठोपसंह्रियते, पूर्वश्लोकेन कर्मनिष्ठाया उपसंहृतत्वात्। न च सर्वकर्मसंन्यास एव [न] श्रीकृष्णस्याभिमत इति वाच्यम् ; 'सर्वकर्माणि संन्यस्य' 'सर्वारम्भपरित्यागी' इत्यादिवाक्यैरुक्तत्वात् तेनैव सर्वकर्मसंन्यासस्य, 'ब्राह्मणो निर्वेदमायात्', 'यदहरेव विरजेत्तदहरेव प्रव्रजेदि'त्यादिश्रुतिसिद्धं सर्वकर्मसंन्यासं भगवान् न हि निरुन्ध्यात्। न च विदुष एव तामसत्यागो निन्दित इति वाच्यम् ; मोहादित्युक्तत्वात्। न हि विदुषो निरस्तमोहस्य मोहः सम्भवति। न च – भक्तियोगस्यापि परित्यागे कथं ज्ञानिनोऽपि ब्रह्मप्राप्तिः? 'मद्भक्ता यान्ति मामपि', 'भजन्ते मां दृढव्रताः' 'जरामरणमोक्षाय' 'मय्यर्पितमनोबुद्धिर्मामे-वैष्यस्यसंशयः' 'अनन्यचेताः सततं यो मां स्मरति नित्यशः। तस्याहं सुलभं पार्थ', 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया', 'मद्भक्तो भव, मामेवैष्यसि', 'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप॥' 'मद्भक्तो यः स मामेति पाण्डव'। एवं भक्तस्य भगवत्प्रियत्वमप्याह— 'यो मे भक्तः स मे प्रियः' 'भक्तिमान् मे प्रियो नरः' 'भक्तास्तेऽतीव मे प्रियाः' इति भक्तियोगादेव मोक्षः परब्रह्मप्राप्तिलक्षणो भवति। ज्ञानयोगात्तु केवलादात्मप्राप्तिरेवेति – वाच्यम् ; ज्ञाननिष्ठालक्षणः कर्मनिष्ठा-

भाष्यार्कप्रकाशः

लक्षणाश्च भक्तियोगो द्विविधः। भक्तिर्भजनमीश्वरस्य; तद्धि कर्मनिष्ठया ज्ञाननिष्ठया वा कर्तुं शक्यते। अत एवोक्तम्– 'लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ। ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिना'मिति। न हि भक्तियोगात्मकं निष्ठान्तरमुक्तम्। तत्र च ज्ञाननिष्ठालक्षणो भक्तियोगो मोक्षस्य साक्षात्साधनं, कर्मनिष्ठालक्षणस्तु परम्परयेति। तस्माज्ज्ञानयोगातिरिक्तः त्वदुक्तो भक्तियोगः कर्मयोगादनन्य एव। तं परित्यज्य ज्ञाननिष्ठाप्राप्त्यैव ब्रह्मप्राप्तिः। त्वदुदाहृतवचनेषु तु केषुचिद् भक्तियोगः कर्मयोगात्मकः, केषुचिज्ज्ञानयोगात्मक इति कृत्वा कर्मयोगलक्षणभक्तियोगात् परम्परया ब्रह्मप्राप्तिः, ज्ञानयोगलक्षणभक्तियोगात्तु साक्षादिति बोध्यम्। तथा सति– 'ज्ञात्वा मां शान्तिमृच्छती'त्यादिवचनाविरोधः, अन्यथा ज्ञानाद् ब्रह्मप्राप्तिप्रतिपादकवचनविरोधः स्यात्।

**यत्तूक्तं** ज्ञानादात्मप्राप्तिरेव, न परमात्मप्राप्तिरिति; तद् आत्मपरमात्मभेदवादविध्वंसनेनैव विध्वस्तम्। यच्चोक्तम्– 'मामेकं शरणं व्रजे'त्यस्य कर्तारमाराध्यमुपायमुपेयं च मामनुसन्धत्स्वेति, **तदयुक्तम्**; तद्वाक्यात् तादृशार्थाप्रतीतेः। अकर्तारमीश्वरमात्मानं कर्तेत्यनुसन्धानस्य विपरीतज्ञानत्वेन मोक्षाहेतुत्वाच्च। न च वासुदेवः सर्वमिति तदुपपद्यत एवेति वाच्यम्; कर्तृभोक्त्रादिसर्वप्रपञ्चबाधे ब्रह्मैकमेव शिष्यत इति तदर्थात्; ब्रह्मणि कल्पितस्य सर्वस्य ब्रह्मैव स्वरूपमिति वा। न च सर्वशरीरकत्वात् सर्वं ब्रह्मेत्युच्यत इति वाच्यम्; शरीरभूतसर्वस्याब्रह्मात्मकत्वप्रसङ्गात्, कर्तारं जीवं मां परमात्मानमनुसन्धत्स्वेत्यनेन जीवब्रह्माभेदवादप्रवेशप्रसङ्गाच्च तव।

यदप्यनेनोक्तम्— सर्वधर्मान् कृच्छ्रचान्द्रायणादीन् प्रायश्चित्तरूपान् सर्वान् धर्मान् परित्यज्य मामेकं शरणं व्रज। न च ते पापेभ्यो भीतिः, अस्मच्छरणागतिमात्रेणैव सर्वपापक्षयात् तवेत्याह— अहं त्वामित्यादीति; **तदपि तुच्छम्;** नित्यनैमित्तिककाम्यरूप-धर्मापरित्यागस्यार्थतः सिद्धत्वात्, सर्वशब्दस्य प्रायश्चित्तमात्रपरत्वे सङ्कोचस्यान्याय्यत्वात्, भगवच्छरणागतिमात्रेण सर्वपापक्षये सति मोक्षप्राप्तौ च सत्यां नित्याद्यनुष्ठानस्यापि वैयर्थ्यापत्तेः; नित्याद्यनुष्ठानस्य बहिर्मुखत्वेन भगवच्छरणागतिविरोधित्वाच्च। तस्मात् प्रायश्चित्तानुष्ठानवन्नित्याद्यनुष्ठानस्यापि भगवदेकपरायणत्वविरुद्धत्वात् तदपि त्याज्यमेव। अत एवोक्तं भगवता पाराशर्येण—'सर्व-धर्मान् परित्यज्ये'ति, अन्यथा 'प्रायश्चित्तानि सन्त्यज्ये'त्येव ब्रूयात्। न च नित्यकर्मानुतिष्ठतोऽपि भगवदेकपरायणत्वं स्यादिति वाच्यम्; तथा सति प्रायश्चित्तमनुतिष्ठतोऽपि तत् स्यादिति प्रायश्चित्तपरित्यागस्याप्यकर्तव्यापत्तेः।

'सन्ध्यावन्दन भद्रमस्तु भवते भो स्नान तुभ्यं नमो भो देवाः पितरश्च तर्पणविधौ नाहं क्षमः क्षम्यताम्। यत्र क्वापि निषद्य यादवकुलोत्तंसस्य कंसद्विषः स्मारं स्मारमघं हरामि तदलं मन्ये किमन्येन मे ॥' इति [1]शुकवचनान्नित्यकर्मानुष्ठानं भगवदेकपराय-णत्वविरोध्येव। हृत्पुण्डरीकस्थे भगवति परमात्मनि मनसः प्रवेशनं, तत्रैव चिरमवस्थापनं च हि भगवदेकपरायणत्वम्, तत् कथमन्तर्मुखस्य भवितुमर्हति? कथमेवमन्तर्मुखस्य बहूपकरणसाध्ये कर्मणि बाह्ये प्रवृत्तिर्भवितुमर्हति? तस्मात् सर्वकर्मसंन्यास-पूर्विकैव भगवदेकशरणागतिरूपा ज्ञाननिष्ठा। न च भगवत्प्रीत्यर्थं भगवत्कर्मकरणमेव भगवच्छरणागतिरिति वाच्यम्; तादृशकर्म-योगस्य पूर्वश्लोक एवोपसंहृतत्वात्; भगवद्ध्यानयोगस्य भगवच्छरणागतित्वाभाव इत्यस्य विरुद्धत्वाच्च। न च भगवद्ध्यानं नाम मनसि कल्पितभगवद्विग्रहार्चनमेवेति तदपि कर्मयोग एवेति वाच्यम्; नित्यसिद्धप्रत्यगभिन्नभगवत्स्वरूपानुसन्धानलक्षणभगवद्ध्यानस्याकर्म-योगत्वात्। 'अकल्पितभगवत्स्वरूपध्यानं न कर्तव्यम्, किन्तु कल्पितभगवद्विग्रहध्यानमेव कर्तव्य'मिति राजाज्ञाऽभावात् कल्पिता-पेक्षया अकल्पितं युक्तमिति प्रसिद्धत्वात्। न चाकल्पितेश्वरस्वरूपध्यानं दुष्करमिति वाच्यम्; येषां दुष्करं तदर्थं कर्मयोगो विहित एव; येषां तु सुकरं तदर्थमेव ज्ञानयोगो विहितः। न च हृदि कल्पितेश्वरविग्रहार्चनमेव ज्ञानयोग इति वाच्यम्; यथावस्थितवस्तुस्वरूप-चिन्तनस्यैव ज्ञानयोगत्वात्। लोकेऽपि यथावस्थितघटादिवस्तुज्ञानमेव ज्ञानमिति व्यवह्रियते, न तु कल्पितसर्पाभासादिज्ञानम्; नापि तदुपासनम्। तस्मान्नित्यादिकर्मानुष्ठानं हृदि प्रतिमादिषु वा कल्पितभगवद्विग्रहार्चनादिकं सर्वमपि कर्मयोग एव। स चाज्ञविषयः, 'यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम्, अर्चायां भजते मौढ्या'दिति भागवतात्। इहापि कर्मयोगस्याज्ञ-विषयत्वेनोक्तत्वात्। 'अहं ब्रह्मास्मी'ति प्रत्यगभिन्नब्रह्मस्वरूपचिन्तनं तु ज्ञानयोगः। स च प्राज्ञविषयः; स च सर्वकर्मसंन्यासपूर्वकः; स एव 'सर्वधर्मान् परित्यज्य

---

१. कृष्णकर्णामृते लीलाशुकवचनादित्यर्थः।

भाष्यार्कप्रकाशः

मामेकं शरणं व्रजे'ति श्लोके उपसंहृतः। युक्तं चैतत्—ज्ञानकर्मनिष्ठाद्वयस्य पूर्वमुपक्रान्तत्वेन तस्येहोपसंहृतत्वात्। तस्माज्ज्ञाननिष्ठापर एवायं श्लोकः। अयमेव श्लोको मया भङ्ग्यन्तरेणोक्तोऽ**द्वैतामृत**ग्रन्थे मामके— 'धर्मान् विहाय विविधान् शरणं भजेऽहं मामेव येन विनिवर्तत एव माया' इति। तस्मात् प्रत्यगभिन्नब्रह्मात्मज्ञानादेव मायातत्कार्यनिवृत्त्यात्मको मोक्षः सम्भवति।

यदप्युक्तं **वेदान्तदेशिकेन—**'मामेक'मित्यत्र निर्विशेषचिन्मात्रैक्यादिविवक्षां शृण्वन्तो बाला अपि परिहसेयुरिति, **तत् सत्यमेव** ; बाला अज्ञा अपिशब्दाद् विपरीतज्ञाश्च परिहसन्त्येवाद्वैतम् , न तु सम्यग्दर्शिनः। मां कर्तारमाराध्यमुपायमुपेयं चानुसन्धत्स्वेति योजनां शृण्वन्तस्तु विवेकिन एव परिहसेयुः, न तु बालादयः, तद्दृष्ट्या तद्योजनाया युक्तत्वात्। यथा गर्दभगानं पिशाचानां श्रवणानन्दकरम् , यथा वा गोमायुगानं महिषाणाम्। तथाहि—यदि मामित्यस्य वक्तरि वासुदेवे पार्थसारथौ शक्तिस्तर्हि तच्चरणारविन्दयोः सुदृढं परिग्रहणमेव तच्छरणागतिः स्यात्। तत् पार्थस्य सुलभमपि, दुर्लभमेव ततः प्राक्तनानां प्रह्लादादीनाम् , पश्चात्तनानां परीक्षिदादीनां च। न चेष्टापत्तिः; लोकत्रयोपकाराय गीताशास्त्रस्य भगवता प्रवर्तितत्वात्। अथ यदि सर्वज्ञे परमात्मनि विष्णौ लक्षणा, तर्हि सिद्धमेव निर्विशेषचिन्मात्रैक्यम् , निर्विशेषचिन्मात्रत्वाद् विष्णोरिति।

**यच्चानेनोक्तम्**—गीताशास्त्रस्य सारार्थोऽयम् - भगवानेव परं तत्त्वम् , यथाधिकारं तदाश्रयणमेव परमधर्मः - इति, **तदपि** स्वतात्पर्यानुसारेण न सिध्यति। श्रीकृष्ण एक एव परं तत्त्वं, न तु ब्रह्मरुद्रादयः। ते हि जीवा इति हि तवाशयः। न हि सोऽर्थो गीताशास्त्रात् सिद्ध्यति, किन्तु श्रीकृष्णश्रीनिवासरुद्रब्रह्मेन्द्रबृहस्पतिवायुसूर्येन्दुलक्ष्मीसरस्वतीपार्वतीगणपतिकुमारविनायकदेवगरुडगन्धर्वपिशाचोरगकिन्नरकिम्पुरुषसिद्धसाध्यपितृमातृभूतप्रेतग्रहतारानक्षत्रमनुष्यपक्षिपशुमत्स्यकमठकीटसरीसृपतरुगुल्मलतादिचराचरसर्वभूतहृदयस्थं मृत्पाषाणादिसर्व[वा]चेतनस्यापि च परिपूर्णं निर्विशेषं सत्यमनन्तं चैतन्यमेकमेवाद्वितीयं ब्रह्म परं तत्त्वम् , तदेकानुसन्धानात्मकज्ञाननिष्ठैव परमधर्मः, तदुपायभूता तु कर्मनिष्ठा इति गीताशास्त्रस्य सार इति। अत एवोक्तमभियुक्तैः— 'अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनी'मिति। सर्वकर्मसंन्यासस्तु **देशिकेना**प्यभ्युपगतः। यस्य वशिनो योगेन सर्वकर्मकालो व्याप्तः, तस्य कर्मपरित्यागो युक्तो, नान्यस्य। एतदेव तृतीयचतुर्थपञ्चमेषु भगवता प्रतिपादितमित्यनुसन्धातव्यम्। तृतीये तावत् 'यस्त्वात्मरतिरेव स्या'दित्यत्र, चतुर्थे 'योगसंन्यस्तकर्माण'मित्यत्र, पञ्चमे च 'सर्वकर्माणि मनसा संन्यस्यास्ते' इत्यत्र। तेनात्मरतीनां वशिनां योगारूढानामेव कर्मसंन्यासो युक्त इति। [1]अस्य तु - ज्ञानिनः संन्यासो न युक्तः, किन्तु समाधिनिष्ठस्यैव युक्त इति बुद्धिः; सा तु दुष्टा। यस्य तु प्राज्ञस्य ब्रह्मैवाहमस्मीति निश्चयः कुतस्तस्य समाधिः? समाधिसाध्यो हि ब्रह्मसाक्षात्कारः स्वत एव भवति विदुषः, आत्मत्वाद् ब्रह्मणः। तस्मात् समाधिनिरपेक्ष एव ज्ञानयोगः। यस्य तु प्रतिबन्धवशाद् ब्रह्मसाक्षात्काराभावो बहुवारं श्रुतवेदान्तस्यापि तस्य समाधिर्विहितः। न तावता समाधिनिष्ठस्यैव संन्यासो युक्तः, न तु ज्ञानिन इति वाच्यम् ; कृतात्मसाक्षात्कारस्य ज्ञानिनः संन्यासो न युक्तः। आत्मसाक्षात्कारं प्रति यतमानस्य योगिनः समाहितस्य संन्यासो युक्त इति कल्पनस्यायुक्तत्वात्। आत्मसाक्षात्कारेण हि पुरुषः कृतकृत्यो भवति – 'एतद् बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारत' इत्युक्तत्वात्। न हि कृतकृत्यस्य कृत्यावशेषः स्याद् येन विदुषः कर्मसंन्यासो न युक्त इति कल्प्येत। न च समाहितस्यैवात्मरतिर्न तु ज्ञानिन इति वाच्यम् ; अज्ञस्याप्यस्त्येवात्मरतिरात्मत्वेनाभिमते देहे, किं पुनः प्राज्ञस्य सच्चिदानन्दे आत्मनि रतिः। तस्माद् विदुषः कृतात्मसाक्षात्कारस्य कर्मसंन्यासो युक्त एव, तथा आत्मसाक्षात्काराय यतमानस्य ज्ञाननिष्ठायां प्रविष्टस्यापि युक्त एव, ब्रह्माहमस्मीत्यन्वहमनुसन्धातव्यत्वात् तेनात्मरूपस्य। अतः समाधिनिष्ठस्यापि कर्मसंन्यासो युक्त एव।

**यच्चानेनोक्तम्** आत्मरतेर्वशिनोऽपि लोकसंग्रहार्थं कर्मयोग एव कार्य इति, **तदयुक्तम्** ; विदुषः कर्तव्यत्वानवशेषात् ; किन्तु विद्वांसो यदृच्छया वासुदेववत् कर्मयोगादौ विहरन्ति। उक्तं हि – 'कृष्णो भोगी शुकस्त्यागी नृपौ जनकराघवौ। वसिष्ठः कर्मनिरतः पञ्चैते ज्ञानिनः स्मृताः॥' इति। तत्र च कारणं प्रारब्धकर्मैव। अत एव भगवानपि स्वस्य धर्मसंस्थापनार्थमवतीर्णत्वात् तत्सङ्कल्पानुगुणं

१. अस्य वेदान्तदेशिकस्य।

भाष्यार्कप्रकाशः

कर्मणि प्रवृत्तः। उक्तं हि – 'वर्त एव च कर्मणी'ति तेनैव। अयमेव ऋषभावतारे अवधूतःसन् चचार परमहंसपरिव्राजकचर्यां ग्राहयितुं लोकेन। तस्माद् विदुषः कर्मयोग एव युक्त इति न नियमः; जनकराघवादीनां तु नृपत्वेन तत्प्रारब्धानुगुणं प्रजापरिपालनादौ प्रवृत्तिः। अत एव अर्जुनस्यापि स्वप्रारब्धानुगुणं युद्धे प्रवृत्तिरुचितेति मत्वा – 'कुरु कर्मैव तस्मात्त्व'मित्युक्तम्। नैतावता विदुषः कर्मयोग एव युक्त इति भ्रमितव्यम्। शुकादीनां विदुषां तत्र प्रवृत्त्यदर्शनात्। अनेन च शुकदृष्टान्तेन सर्वदा समाधिशालिन एव कर्मसंन्यासो युक्त इत्येतत् प्रत्युक्तम् , शुकस्य संन्यासिनः सर्वदा समाधिनिष्ठत्वे भागवतसम्प्रदायोच्छेदप्रसङ्गात्। तस्माद् विदुषो विविदिषोश्च कर्म-संन्यासो युक्तः। अत एव विद्वत्संन्यासो विविदिषासंन्यासश्चेति द्विविधः संन्यासो विहितः शास्त्रेण। तस्मान्मुमुक्षुणा सर्वकर्मसंन्यास-पूर्विका ब्रह्मात्मज्ञाननिष्ठैव कार्यैति गीताशास्त्रसारार्थः। तत्रानधिकारिणा तु कर्मनिष्ठेति।

**नन्वेवं** जनकादीनामत्यागिनां मोक्षानुपपत्तिरिति चेत् , **मैवम्** ; मुमुक्षोः कर्मसंन्यासाभावे मोक्षानुपपत्तिर्न तु मुक्तस्य। जनकादयो हि जीवन्मुक्ताः, कृतात्मसाक्षात्कारत्वात्। अत एव तेषां न मुमुक्षाऽस्ति, यया मोक्षार्थं तैः संन्यासः स्वीक्रियेत। अत एव हि शमादिसम्पत्तिर्नित्यानित्यवस्तुविवेक इहामुत्रफलभोगविरागो मुमुक्षुत्वं चेति विशेषणचतुष्टयं विहितं ब्रह्मविद्याधिकारिणः।

**ननु** यद्येवं मुमुक्षोरेव संन्यासाधिकारः, न तु विदुषो मुक्तस्य, तर्हि सिद्धमेव विदुषः सर्वकर्मसंन्यासानर्हत्वमिति चेत् , **मैवम्** ; विदुषः सर्वकर्मसंन्यासः कार्यो न भवतीत्यस्माभिरुच्यते, कृतकृत्यत्वात् तस्य। न तेन तस्य कर्मसंन्यासानुपपत्तिः, कर्मानुष्ठानहेत्व-ज्ञानाभावादेव संन्यासस्य सिद्धत्वात् तस्य। तस्माद् विदुषः कर्मयोगस्यैवानुपपत्तिः।

**ननु** यद्येवं कृतकृत्यत्वे विदुषः कथं तस्य संन्यासपूर्विका ज्ञाननिष्ठा कार्येत्युच्यते 'ज्ञानयोगेन साङ्ख्याना'मिति वाक्येनेति चेत्? **नैष दोषः**; आत्मज्ञानस्य परोक्षत्वापरोक्षत्वाभ्यां विदुषो द्वैविध्यम्। तत्र परोक्षज्ञानिनो ज्ञाननिष्ठा विधीयते, नापरोक्षज्ञानिनः, तस्य कृतकृत्यत्वादिति।

**ननु** कथं ज्ञायते स्वस्य परोक्षात्मज्ञत्वमपरोक्षात्मज्ञत्वं वेति चेत्? **उच्यते**—यस्य मनसि संसारदुःखं नास्ति, मोक्षकामो नास्ति, विषयस्पृहा नास्ति, 'अहं ब्रह्मास्मी'ति निश्चयोऽस्ति, कृतकृत्योऽहमिति सन्तोषोऽस्ति, देहपातानन्तरं मम का वा गतिर्भविष्य-तीति चिन्ता नास्ति, ईश्वरान्मृत्योर्वा भयं नास्ति स विद्वानपरोक्षात्मवित्। एतद्भिन्नस्तु शास्त्रादात्मानं ब्रह्मेति यः केवलं वेद, न स्वानु-भवात् स परोक्षात्मविदिति। ततश्च विद्वान् स्वबुद्ध्या स्वस्य परोक्षज्ञत्वमपरोक्षज्ञत्वं च विदित्वा परोक्षज्ञश्चेत् तदापि शमदमादिसम्पत्ति-मालोच्य साऽप्यस्ति चेद् यथाविधि शिखायज्ञोपवीतादिकं परित्यज्य प्रव्रज्य ज्ञानयोगं कुर्यात्। शमदमादिसम्पत्तिर्नास्ति चेत् कर्मयोग एवावतिष्ठेत। एवमन्यजन्मसु कर्मयोगानुष्ठाने इहजन्मनि वा सुकृतातिशयाच्चित्तशुद्धौ जातायां ज्ञानयोगाधिकारी भवति। उक्तं हि – 'बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।' 'अनेकजन्मसंसिद्धस्ततो याति परां गति'मिति, 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इति च। यद्यपरोक्षज्ञस्तर्हि यथाप्रारब्धं यथेच्छं तस्य विहारः। उक्तं हि–'निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः' इति।

यस्तु पुनः पारोक्ष्येणाप्यात्मानं न वेत्ति, तस्याज्ञस्य कर्मयोग एवाधिकारः। स च कर्मयोगः स्ववर्णाश्रमानुसारेण विहितमिति बुद्ध्या फलत्यागपूर्वकमीश्वराराधनमिदमिति नित्यनैमित्तिककर्मानुष्ठानम् ; न तु स्नानसन्ध्यादिकं विहाय देवालयादौ सतैलाम्लान्नदध्यो-दनादिभोजनादिकम्। ज्ञानयोगो नाम वेदान्तश्रवणमननादिपूर्वकं ब्रह्माहमस्मीत्यात्मानुसन्धानम् , न तु द्रविडवेदपारायणादिकम् , नापि शङ्खचक्राङ्कनादिकमिति बोध्यम्। तस्मादज्ञेनाधिकृतेन कर्मयोगः कार्यः, विदुषा परोक्षज्ञेन ज्ञानयोगः कार्य इति सर्वस्य गीताशास्त्रस्य निश्चितमंशद्वयम्। तच्च 'मन्मना' इति, 'सर्वधर्मानि'ति च श्लोकद्वयेन भगवतैव दर्शितम्।

मुमुक्षुणा कर्मयोगः कार्योऽज्ञेन द्विजन्मना। परोक्षज्ञेन विदुषा ज्ञानयोग इति स्थितिः॥

स च ज्ञानयोगः संन्यासपूर्वकः। स च संन्यासो द्विविधः– वैदिको लौकिकश्चेति। मन्त्रपूर्वकसंन्यासाश्रमस्वीकारो वैदिकः; गृहधनदारापत्यादिकमुत्सृज्य क्वापि प्रयाणं लौकिकः। वैदिके द्विजस्यैवाधिकारः; लौकिके तु स्त्रीशूद्रादीनां सर्वेषामपि। अत एवोक्तं श्रीशङ्करस्वामिभिरुपनिषद्भाष्ये– 'ज्ञानमार्गे सर्वेषामधिकारः' इति। कर्मयोगे तु द्विजस्यैवाधिकारः, तस्यैवोपनयनादिसंस्कारवत्त्वेन

भाष्यार्कप्रकाशः

वेदाधिकारात्। तस्मात् –

'यथाविधि परित्यज्य ज्ञानयोगं द्विजोऽभ्यसेत्। गृहादिकं परित्यज्य तदन्यस्तु तमभ्यसेत्॥
कामक्रोधादिरहितचित्तः संन्यासमाश्रयेत्। दम्भाद्यर्थं तु संन्यस्य पतेदेव नरोऽशुचौ॥
ईश्वराराधनार्थं स्वं कर्म कुर्यान्मलाशयः। दम्भाद्यर्थं तु तत्कृत्वा पतेदेव नरोऽशुचौ॥

**मलं** कामक्रोधादिरूपम्। **अशुचिः** संसारः। **स्वं** स्ववर्णाश्रमविहितम्।

स्वकर्मोत्सृज्य पुरुषः परकर्म न चाचरेत्। अन्यथा यदि वर्तेत पतेदेव नरोऽशुचौ॥
यस्तु ज्ञानावलेपेन विहितं न समाचरेत्। प्रतिषिद्धं चाचरेत् स पतेदेव नरोऽशुचौ॥
शास्त्रदीपेन कर्तव्यमर्थं दृष्ट्वा समाचरेत्। स्वेच्छया यदि वर्तेत पतेदेव नरोऽशुचौ॥
शास्त्राणामुत्तमं शास्त्रं गीताशास्त्रमिति स्मृतम्। कृष्णधीमथिताम्नायपाराब्धिजमिवामृतम्॥

**कृष्णो** व्यासो वासुदेवो वा; **आम्नायपाराः** उपनिषदः।

अशोच्यानन्वशोचस्त्वमित्युपक्रम्य शोचनम्। अन्ते मा शुच इत्युक्तः शोकाभावोऽत्र शौरिणा॥
अशेषशोकप्रशमोपायभूतमिदं ततः। शोकान्मुमुक्षुणा नित्यमध्येयमधिकारिणा॥
मलनिर्मोचनं पुंसां जलस्नानं दिने दिने। सकृद्गीताम्भसि स्नानं संसारमलमोचनम्॥
भगवद्गीता किञ्चिदधीता गङ्गाजललवकणिका पीता।
सकृदपि येन मुरारिसमर्चा क्रियते तस्य यमोऽपि न चर्चाम्[१]॥
गङ्गास्नानादिवादृष्टं गीतापारायणात् फलम्। गीतार्थब्रह्मविज्ञानं ब्रह्मानन्दप्रदं पुनः॥

**॥ इति समाप्तं गीताशास्त्रं तद्भाष्यार्कप्रकाशश्च ॥**
**॥ समर्पितश्चायं श्रीहयग्रीवपरब्रह्मणे ॥**

प्रकाशमेनं परिलक्ष्य कौस्तुभप्रकाशमप्यात्मनि संशयाकुलम्।
निरीक्ष्य लक्ष्म्या तुरगेन्द्रकन्धरं कृतं स्मितं हन्तु तमो, ददातु शम्॥

संशयः- किं कौस्तुभस्यैवायमपूर्वः प्रकाशः? मद्धृदयगतं गीताशास्त्रतात्पर्यं कथमेवं बहिर्गतम्? कौस्तुभप्रकाशैतत्प्रकाशयोः कतरोऽधिकः? स्वानुजेन कौस्तुभेन सहार्धासनाधिपत्यं स्वीकृतवन्तं प्रकाशमिमं दृष्ट्वा लक्ष्मीः किं मन्येत? प्रकाशद्वयव्याप्ते मद्धृदये लक्ष्मीं स्थापयितुमवकाशोऽस्ति वा, न वा? एतत्प्रकाशसाक्षात्काराल्लक्ष्म्या अपि ज्ञाननिष्ठास्वीकारेण मयि वैराग्यं भवेत् किमु? इत्यादि-रूह्यः। स्मितस्य चन्द्रिकातुल्यत्वात् तमोनाशनं सुखदानं च युक्तमिति भावः।

'अशोच्यानि'त्यारभ्य 'मा शुचः' इत्येतदन्तं गीताशास्त्रमेकत्रिंशदधिकषट्छतश्लोकात्मकम्। 'धर्मक्षेत्रे' इत्यारभ्य 'ध्रुवा नीतिर्मतिर्मम'त्येतदन्तस्तु ग्रन्थः सप्तशतश्लोकात्मकः। अत एवोक्तं भाष्यकृद्भिर्भाष्यारम्भे—'सप्तभिः श्लोकशतैरुपनिबबन्धे'ति। 'प्रकृतिं पुरुषं चैवे'ति श्लोकस्तु प्रक्षिप्त एवेति न गणनीयः॥ ६६॥

---

१. यमोऽपि न चर्चां कुरुते इति योजनीयम्। २. स्वरचितस्य भाष्यव्याख्यानस्य भगवत्तात्पर्यानुसारित्वं, स्वखण्डितस्य रामानुजादिभाष्यादेः तदननुसारित्वं च सूचयन् गीताशास्त्रव्याख्यानान्ते मङ्गलमाचरति— प्रकाशमेनमिति।

## इदं ते नातपस्काय नाभक्ताय कदाचन।
## न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति॥६७॥

**सर्वं गीताशास्त्रार्थमुपसंहृत्यास्मिन्नध्याये विशेषतश्चान्ते इह शास्त्रार्थदार्ढ्याय संक्षेपत उपसंहारं कृत्वा अथेदानीं शास्त्रसम्प्रदायविधिमाह—** इदमिति। इदं **शास्त्रं** ते **तव हिताय मयोक्तं संसारविच्छित्तये** अतपस्काय **तपोरहिताय न वाच्यमिति व्यवहितेन सम्बध्यते। तपस्विनेऽपि** अभक्ताय **गुरौ देवे च भक्तिरहिताय** कदाचन **कस्यांचिदप्यवस्थायां न वाच्यम्।** [1]**भक्तस्तपस्वी अपि सन् अशुश्रूषुर्यो भवति तस्मा अपि न वाच्यम्।** [2]**न च यो मां वासुदेवं प्राकृतं मनुष्यं मत्वा** अभ्यसूयति **आत्मप्रशंसादिदोषाध्यारोपणेन ममेश्वरत्वमजानन् न सहते असावप्ययोग्यः, तस्मा अपि न वाच्यम्।** [3]**भगवति भक्ताय तपस्विने शुश्रूषवेऽनसूयवे च वाच्यं शास्त्रमिति सामर्थ्याद् गम्यते। तत्र 'मेधाविने**

आनन्दगिरिकृतव्याख्या

**शास्त्रतात्पर्यार्थं विचारद्वारा निर्धार्यानन्तरश्लोकमवतारयति—**सर्वमिति। **प्रकृते खल्वष्टादशाध्याये गीताशास्त्रार्थं सर्वं प्रतिपत्तिसौकर्यार्थमुपसंहृत्य, अन्ते च 'सर्वधर्मान् परित्यज्ये'त्यादौ विशेषतस्तस्य संक्षेपेणोपसंहारं कृत्वा, सम्प्रदायविधिवचनस्यावसरे सति, इदानीमिति योजना। किमिति विस्तरेणोपसंहृतः शास्त्रार्थः संक्षिप्योपसंह्रियते? तत्राह—**शास्त्रार्थेति। **संक्षेपविस्तराभ्यामुक्तोऽर्थः सर्वेषां दृढतया बुद्धिमधिरोहतीत्यर्थः।** हितायेत्येतदेव **व्याचष्टे—**संसारेति। **कदाचनेति सर्वैः सम्बध्यते। प्रतिषेधसामर्थ्यसिद्धमर्थं कथयति—**

भाष्यार्कप्रकाशः

अथ शास्त्रसम्प्रदायविधिं शिक्षयति भगवान् **इद**मित्यादिना इत्याह भाष्यकारः—**सर्वमिति**। सर्वं गीताशास्त्रार्थमस्मिन्नध्याये उपसंहृत्य विशेषतश्चेहान्ते शास्त्रार्थदार्ढ्याय सङ्क्षेपत उपसंहारकं कृत्वा, **यद्वा** विशेषतो विस्तरत उपसंहृत्येत्यन्वयः। **अथ** शास्त्रार्थोपसंहारानन्तरमित्यर्थः। **इदमिति**। 'सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः' इति यत्पूर्वं वक्ष्यमाणत्वोपाधिना इदंशब्देन सङ्गृहीतम् अशोच्यानित्यारभ्य मा शुचः इत्येतदन्तं, तदेवेह इदंशब्देनोक्तत्वोपाधिना संगृह्यते। तथा च **इदं** पूर्वोक्तमशोच्यानित्यादिकं मा शुच इत्यन्तं गीताशास्त्रमित्यर्थः। **ते** तव मयोक्तमिति शेषः। किमर्थमुक्तम्? अत आह—**हितायेति**। किं तद् हितम्? अत आह—**संसारविच्छित्तय इति**। संसारविच्छित्तिरूपहितायेत्यर्थः। अतपस्काय न वाच्यं, त्वयेति शेषः। यद्वा त इति त्वयेत्यर्थे षष्ठी 'षष्ठी शेषे' इति सूत्रेण विहिता। तथा चेदं ते न वाच्यमित्यन्वयः। तव हिताय मयोक्तमिति तु भाष्यकृद्भिरिदंशब्दार्थविवरणरूपतयोक्तमिति बोध्यम्। अतपस्काय न वाच्यमित्यनेन तपस्विने वाच्यमिति प्राप्त आह—**तपस्विनेऽप्यभक्ताय न वाच्यमिति**। कस्मिन्नभक्तायेत्यत आह—**गुरौ देवे चेति**। देव ईश्वरः परमात्मा। **कस्यांचिदपीति**। दारिद्र्यादिकष्टदशाप्राप्तावपीत्यर्थः। दरिद्रो हि शास्त्रविद् धनलोभेना-भक्तायापि ब्रूयादिति भावः। रुग्णश्च शास्त्रवित् स्वरोगापहारायाभक्तायापि भिषजे ब्रूयादिति च। एवं तपस्विने भक्ताय ब्रूयादिति प्राप्त आह—**न चाशुश्रूषव इति**। श्रोतुमिच्छुः **शुश्रूषुः**, 'नापृष्टः कस्यचिद् ब्रूयादि'ति न्यायादिति भावः। यः शुश्रूषुः स जिज्ञासया श्रोतव्यार्थं पृच्छत्येवेति बोध्यम्। यद्वा **शुश्रूषुः** गुरुपरिचरणशीलः 'गुरुशुश्रूषया विद्ये'ति स्मरणात्। एवं तपस्विने भक्ताय शुश्रूषवेऽपि भगवत्यसूयायुक्ताय न वाच्यमित्याह—**न च मामिति**। मां शास्त्रकर्तारमित्यर्थः। शास्त्रकर्तरि ईश्वर इति बुद्धौ सत्यामेव तच्छास्त्रोपदेशः फलतीति भावः। कुतोऽभ्यसूयति? तत्राह—**मनुष्यं प्राकृतं मत्वेति**। **प्राकृतं** साधारणं मनुष्यं मत्वा **आत्मप्रशंसादिदोषाध्यारोपणेन** आत्मप्रशंसादिरूपदोषारोपणेन – 'मत्तः परतरं नान्यदि'त्यादेरुक्तत्वाच्छ्रीकृष्णेनेति भावः। तदीयमीश्वरतत्त्वं निरवद्यमजानन् **न सहते** ईर्ष्यायुक्तो भवति। **अयोग्यः** शास्त्रोपदेशानर्हः। **सामर्थ्याद् गम्यते** अर्थात् सिध्यतीत्यर्थः। इदं ते अतपस्काय न वाच्यम् , इदं ते अभक्ताय न वाच्यम् , इदं ते अशुश्रूषवे न वाच्यम् ; यो मामभ्यसूयति तस्मा इदं न वाच्यम् ; कदाचनेति सर्ववाक्येष्वन्वेतव्यम्। तत्रैवं

---

१. 'न चाशुश्रूषवे भक्तस्तपस्वी' इति रा.पा.भाति। २. 'न च मां यो' इति रा.पा.। ३. 'भगवति अनसूयायुक्ताय भक्ताय तपस्विने शुश्रूषवे च' इति पा.।

## य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति।
## भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः॥६८॥

**तपस्विने वा'( निरुक्तं द्र. २.१.३) इत्यनयोर्विकल्पदर्शनात् शुश्रूषाभक्तियुक्ताय तपस्विने, तद्युक्ताय मेधाविने वा वाच्यम्। शुश्रूषाभक्तिवियुक्ताय न तपस्विने नापि मेधाविने वाच्यम्। भगवत्यसूयायुक्ताय समस्तगुणवतेऽपि न वाच्यम्। गुरुशुश्रूषाभक्तिमते च वाच्यमित्येष शास्त्रसम्प्रदायविधिः॥६७॥**

**सम्प्रदायस्य कर्तुः फलमिदानीमाह—** य इति। य इमं **यथोक्तं** परमं **परमनिःश्रेयसार्थं केशवार्जुनयोः संवाद-रूपं ग्रन्थं** गुह्यं **गोप्यं** मद्भक्तेषु **मयि भक्तिमत्सु** अभिधास्यति **वक्ष्यति। ग्रन्थतोऽर्थतश्च स्थापयिष्यतीत्यर्थः। यथा**

आनन्दगिरिकृतव्याख्या

भगवतीति। **अर्थसिद्धेऽर्थे स्मृत्यन्तरमनुसृत्य मेधावित्वमन्तर्भावयति—**तत्रेति। विकल्पदर्शनात् **तेषूक्तेषु विशेषणेषु मेधावित्वमपि प्रवि-शतीत्यर्थः। विकल्पपक्षे कथमधिकारिप्रतिपत्तिरिति? तत्राह—**शुश्रूषेति। **ताभ्यां युक्ताय भगवत्यसूयारहिताय तपस्विने वाच्यमिति सम्बन्धः।** तद्युक्ताय **शुश्रूषाभक्त्यनसूयासहितायेत्यर्थः। तपस्वित्वं मेधावित्वं वा निरपेक्षमधिकारिविशेषणमिति शङ्कां शातयति—**शुश्रूषेति। **भगवद्विषयासूयाराहित्ये तात्पर्यं सूचयति—**भगवतीति। **कस्मै तर्हि वाच्यमेतदित्याशङ्क्य पूर्वोक्तसर्वगुणसम्पन्नायेत्याह—**गुरुशुश्रूषेति। **अनुक्तेतरविशेषणोपलक्षणार्थमुभयग्रहणम्। मेधाविनस्तपस्वित्वं नातीवापेक्षते[क्ष्यते]। सर्वमन्यद् बाधकाभावादपेक्षितमे-वेति भावः॥६७॥**

**शास्त्रसम्प्रदायप्रवृत्त्यर्थमुत्तरश्लोकप्रवृत्तिं दर्शयति—**सम्प्रदायस्येति। यः **इत्यध्यापको निर्दिश्यते।** परमत्वं **ग्रन्थस्य निरतिशय-पुरुषार्थसाधनत्वमित्याह—**परममिति। गोप्यत्वमस्य **रहस्यार्थविषयत्वात्। यथोक्तसंवादस्य ग्रन्थतोऽर्थश्च भक्तेषु स्थापने दृष्टान्तमाह—**

भाष्यार्कप्रकाशः

सति ग्रन्थान्तरे 'मेधाविने तपस्विने वा वाच्य'मिति मेधावितपस्विनोर्विकल्पस्य दर्शनात् इहानुक्तोऽपि मेधावी ग्राह्यः। गृहीते च तस्मिन् मेधावितपस्वित्वयोः समप्राधान्येन [१]सामानाधिकरण्यं नावश्यकम्। **मेधा** ग्रहणधारणशक्तिः; **तपः** चित्तैकाग्र्यम्। मन्दबुद्धेरपि चित्तैकाग्र्ये सति शास्त्रार्थपरिज्ञानं भवति। मेधाविनस्तु मेधावशादेव शास्त्रार्थपरिज्ञानं भवति। चित्तैकाग्र्यं त्वस्य गौणमेव। यद्वा यम-नियमादिलक्षणं तपः, तद्वान् तपस्वी; बुद्धिमांस्तु मेधावी यमनियमादिरहित एव। तत्र मेधावी उत्तमाधिकारी, तपस्वी तु मध्यम इति बोध्यम्। शुश्रूषाभक्ती तु द्वयोरपि प्रधाने एवेत्याह—**शुश्रूषेति। तद्युक्तायेति**। शुश्रूषाभक्तियुक्तायेत्यर्थः। शुश्रूषाभक्तिवियुक्ताय तपस्विने न वाच्यम् ; तादृशाय मेधाविनेऽपि न वाच्यमिदं शास्त्रमिति शेषः। शुश्रूषाभक्तिमान् मेधावी तपस्वी वा यदि श्रीकृष्णे सासूयस्तर्हि तस्मै न वाच्यमित्याह—**भगवतीति। समस्तेति**। शुश्रूषाभक्ती मेधातपसोरन्यतरश्चेति गुणत्रयवतेऽपीत्यर्थः। यद्वा यस्य कस्यापि धन्यस्य मेधातपसी द्वे अपि भवत इति गुणचतुष्टयवतेऽपीत्यर्थः। एवं भगवत्यसूयायाः सर्वगुणावारकप्रबलदोषत्वादेव पृथगुक्तिः। यः पुनर्न तपस्वी, नापि मेधावी; तस्यापि यदि गुरुपरिचर्या गुरौ देवे कृष्णे च भक्तिस्तर्हि तस्मा इदं वाच्यमेवेत्याह—**गुर्विति**। अत एव **श्रीशङ्कराचार्यस्वामिना** स्वशुश्रूषाभक्तियुक्तस्य मन्दमतेरतपस्विनोऽप्या**नन्दगिरेः**[२] शिष्यस्य शास्त्रोपदेशः कृतः। **शास्त्रसम्प्रदायः** पूर्व-पूर्वस्य गुरोरुत्तरोत्तरं शिष्यं प्रति शास्त्रस्योपदेशः शास्त्रसम्प्रदाय इत्युच्यते। सम्यक् प्रदीयते शिष्यायेदं गुरुणेति **सम्प्रदायः** उपदेशस्तस्य **विधिः** विधानम्॥६७॥

**य इति**। यो मयि परां भक्तिं कृत्वा परमं गुह्यमिमं मद्भक्तेष्वभिधास्यति स मामेवैष्यत्यसंशयः। **सम्प्रदायस्य कर्तुः** उपदेष्टु-रित्यर्थः। **यथोक्तं** पूर्वोक्तं ग्रन्थम्। **परमम्** उत्कृष्टम्। उत्कृष्टत्वं चास्य ग्रन्थस्योत्कृष्टपुरुषार्थसाधनत्वादित्याह—**परमनिःश्रेयसार्थमिति**।

---

१. सामानाधिकरण्यं समुच्चयः। २. कथेयं माधवीयशंकरविजये द्वादशे सर्गे द्रष्टव्या।

**न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः।**
**भविता न च मे तस्मादन्यः प्रियतरो भुवि॥६९॥**

**त्वयि मया। भक्तेः पुनर्ग्रहणाद् भक्तिमात्रेण केवलेन शास्त्रसम्प्रदाने पात्रं भवतीति गम्यते। कथमभिधास्यति इत्युच्यते—** भक्तिं मयि परां कृत्वा **'भगवतः परमगुरोः अच्युतस्य शुश्रूषा मया क्रियते' इत्येवं कृत्वेत्यर्थः। तस्येदं फलम् —** मामेवैष्यति **मुच्यत एव।** असंशयः **अत्र संशयो न कर्तव्यः॥६८॥**

**किञ्च—** नेति। **न च** तस्मात् **शास्त्रसम्प्रदायकृतो** मनुष्येषु **मनुष्याणां मध्ये कश्चिद्** मे **मम** प्रियकृत्तमः **अतिशयेन प्रियकरः, अन्यः प्रियकृत्तमो नास्त्येवेत्यर्थो वर्तमानेषु। न च भविता भविष्यत्यपि काले तस्माद् द्वितीयोऽन्यः** प्रियतरः **प्रियकृत्तरः** भुवि [१]**लोकेऽस्मिन्॥६९॥**

आनन्दगिरिकृतव्याख्या

यथेति। **मयि वासुदेवे भगवति अनन्यभक्ते** त्वयि **यथा मया ग्रन्थोऽर्थतः स्थापितः, तथा मद्भक्तेष्वन्येष्वपि यो ग्रन्थमिमं स्थापयिष्यति तस्येदं फलमित्युत्तरत्र सम्बन्धः। 'नाभक्ताये'ति भक्तेरधिकारिविशेषणत्वोक्तेः 'मद्भक्तेष्वि'ति पुनर्भक्तिग्रहणमनर्थकमित्याशङ्क्याह—** भक्तेरिति। [२]**शुश्रूषादिसहकारिराहित्यं** केवल**शब्दार्थः। यद्यपि मात्रशब्देन सूचितमेतत्, तथापीतरेण**[३] **स्फुटीकृतमित्यविरोधः। प्रश्नपूर्वकमभिधानप्रकारमभिनयति—**कथमित्यादिना। **भगवति भक्तिकरणप्रकारं प्रकटयति—**भगवत इति। **यच्छब्दापेक्षितं पूरयति—**तस्येति। **'मामेष्यत्येवे'त्यन्वयं गृहीत्वा व्याचष्टे—**मुच्यत एवेति॥६८॥

**ननु सर्वेषां मुक्तिसाधनानां ध्यानस्य श्रेष्ठत्वात् तन्निष्ठस्य मुमुक्षोर्नास्ति विद्यासम्प्रदाने प्रवृत्तिरिति, तत्राह—**किञ्चेति। **इतश्च [अतश्च] विद्यासम्प्रदानं मुमुक्षुणा यथोक्तविशेषणवते कर्तव्यमित्यर्थः।** वर्तमानेषु **मध्ये ततोऽन्यो नास्त्येव प्रियकृत्तमः। नाप्यतीतेषु तादृक् कश्चिदासीदिति शेषः।** तस्माद् **विद्यासम्प्रदायकर्तुः सकाशादित्यर्थः। ध्याननिष्ठस्य श्रेष्ठत्वेऽपि स्वसम्प्रदायप्रवक्तुः श्रेष्ठतमत्वाद् उचिता विद्यासम्प्रदाने प्रवृत्तिरिति भावः॥६९॥**

भाष्यार्कप्रकाशः

परमनिःश्रेयसं मोक्षोऽर्थः फलं यस्य तं तथोक्तम्। **संवादः** प्रश्नोत्तरसरणिः। **गोप्यतमं** रहस्यम्। मयि भक्ताः मद्भक्तास्तेषु **मद्भक्तेषु ग्रन्थतोऽर्थतश्चेति** ग्रन्थं तदर्थं च वक्ष्यतीत्यर्थः। कथमभिधास्यतीत्यत्राह—**यथेति**। त्वयि मया यथाऽभिहितं, यद्वा स्थापितं, तथेत्यर्थः। ननु 'नाभक्ताय कदाचने'त्यनेनाभक्तेषूपदेशस्य निषिद्धत्वान्मद्भक्तेष्विति वचनमिह व्यर्थम्, अत आह—**भक्तेरिति**। **भवतीति**। पुरुष इति शेषः। शुश्रूषा परिचर्या, तदुपदिष्टार्थस्य शिष्यप्रशिष्यद्वारा भुवि विपुलीकरणमेव तच्छुश्रूषेति भावः। न संशयोऽसंशयः,[४]संशयस्याभावः। मदुक्तार्थे कोऽपि संशयो नास्तीत्यर्थः। एतेन गीताशास्त्रसम्प्रदायकर्तुर्मुक्तिः फलमिति सिद्धम्॥६८॥

**नेति**। मे मनुष्येषु तस्मादन्यः प्रियकृत्तमः कश्चिदपि नास्ति। भुवि मे तस्मादन्यः प्रियतरो न च भविता। यो गीतासम्प्रदायकृद् विद्वान् स एव मम वर्तमानकाले भविष्यत्काले वा अतिशयेन प्रियः, न तु तदन्यः कोऽपि मम प्रियतमः। ज्ञानिनः प्रियत्वं पूर्वमुक्तं—**स च मम प्रिय इति**। यस्तु ज्ञानी सन् गीतासम्प्रदायं करोति पात्रे, स तु प्रियतम इतीहोच्यते। अन्यथा गीताशास्त्रप्रसङ्गो भुवि लुप्येत, यदि ज्ञानी किं मम शिष्योपदेशेनेति तूष्णीं तिष्ठेत्। तस्माज्ज्ञानिनः शिष्योपदेश आवश्यकः; स्वयं तीर्णः परान् तारयेदिति न्यायादिति भावः। **वर्तमानेष्विति**। मनुष्येष्वित्यस्य विशेषणम्। **भविष्यत्यपि काल इति**। भविष्यत्सु मनुष्येष्वपीत्यर्थः। **लोकेऽस्मिन् इति**। भूलोक इत्यर्थः। एवं ज्ञानिनो ज्ञानोपदेष्टुश्च भगवत्प्रियतमत्वादेव – 'नारायणप्रियमनङ्गमदापहारं वाराणसीपुरपतिं भज विश्वनाथम्' इत्युक्तमभियुक्तैः शिवस्य विष्णुप्रियत्वम्॥६९॥

---

१. 'लोकेऽस्मिन् न भविता' इति पा.। २. शुश्रूषेति।गुरुशुश्रूषेत्यर्थः।। ३. केवलेन भक्तिमात्रेणेत्यत्र मात्रशब्देन सूचितं यत् तदेव **इतरेण** केवलशब्देन स्फुटीकृतमित्यर्थः।। ४. असंशयः इति अर्थाभावे नञ्तत्पुरुषः।

**अध्येष्यते च य इमं धर्म्यं संवादमावयोः।**
**ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः॥७०॥**
**श्रद्धावाननसूयश्च शृणुयादपि यो नरः।**
**सोऽपि मुक्तः शुभान् लोकान् प्राप्नुयात् पुण्यकर्मणाम्॥७१॥**

**योऽपि**— अध्येष्यत इति। अध्येष्यते **च पठिष्यति यः इमं** धर्म्यं **धर्मादनपेतं संवादरूपं ग्रन्थमावयोः, तेनेदं कृतं स्यात्।** ज्ञानयज्ञेन **विधिजपोपांशुमानसानां यज्ञानां ज्ञानयज्ञो मानसत्वाद् विशिष्टतमः इत्यतस्तेन ज्ञानयज्ञेन गीताशास्त्रस्याध्ययनं स्तूयते। फलविधिरेव वा, देवतादिविषयज्ञानयज्ञफलतुल्यम् अस्य फलं भवतीति। तेनाध्ययनेन अहम्** [1]इष्टः **पूजितः** स्यां **भवेयमिति मे मम** मतिः **निश्चयः**॥७०॥

**अथ श्रोतुरिदं फलम्**— श्रद्धावानिति। श्रद्धावान् **श्रद्दधानः** अनसूयश्च **असूयावर्जितः सन् इमं ग्रन्थं**

आनन्दगिरिकृतव्याख्या

**सम्प्रदायप्रवक्तुः सर्वाधिकं फलं 'स वक्ता विष्णुरित्युक्तो न स विश्वाधिदैवतम्' इति न्यायेनोक्त्वा, सम्प्रति अध्येतुर्विवक्षितं फलम् आह**—योऽपीति। **यथोक्तस्य शास्त्रस्य योऽप्यध्येता तेनेदं कृतं स्यादिति सम्बन्धः। तदेवाह**—अध्येष्यत इति। **तेनेदं कृतमित्यत्र इदं-शब्दार्थं विशदयति**—ज्ञानेति। **तेनाहमिष्टः स्यामिति सम्बन्धः। चतुर्विधानां यज्ञानां मध्ये ज्ञानयज्ञस्य 'श्रेयान् द्रव्यमयाद् यज्ञाज्ज्ञान-यज्ञः' इति विशिष्टत्वाभिधानात्, तेनाहमिष्टः स्यामित्यध्ययनस्य स्तुतिरभिमतेत्याह**—विधीति। **पक्षान्तरमाह**—फलेति। **फलविधिमेव प्रकटयति**—देवतादीति। **यद्धि ज्ञानयज्ञस्य फलं कैवल्यम्, तेन तुल्यमस्याध्येतुः सम्पद्यते, तच्च देवताद्यात्मत्वमित्यर्थः। कथमध्यय-नादेव सर्वात्मत्वं फलं लभ्यते? 'तस्मात् तत् सर्वमभवत्' इति श्रुतेः, तत्राह**—तेनेति। **तेनाध्येत्रा ज्ञानयज्ञतुल्येनाध्ययनेन भगवानिष्टः। तथा च तज्ज्ञानादुक्तं फलमविरुद्धमित्यर्थः॥७०॥**

**प्रवक्तुरध्येतुश्च फलमुक्त्वा श्रोतुरिदानीं फलं कथयति**—अथेति॥७१॥

भाष्यार्कप्रकाशः

**अध्येष्यत इति**। यो धर्म्यमावयोरिमं संवादमध्येष्यते च तेन ज्ञानयज्ञेनाहमिष्टः स्यामिति मे मतिः। यज्ञानां द्रव्ययज्ञादीनां जपयज्ञःश्रेष्ठः – 'यज्ञानां जपयज्ञोऽस्मी'त्युक्तत्वात्। स च त्रिविधः—विधिजपः, उपांशुजपः, मानसजपश्चेति। तत्र विधिजपो वाचा विस्पष्टं बहिर्मन्त्रोच्चारणम्; उपांशुजपो निःशब्दं जिह्वोष्ठचलनपूर्वकं मन्त्रोच्चारणम्; मानसजपस्तु मनसि केवलं मन्त्रोच्चारणं जिह्वोष्ठ-चलनादिरहितम्। एषु त्रिष्वपि जपेषु मानस उत्कृष्टः चित्तैकाग्र्यपूर्वकत्वान्मानसजपस्य। स एव मानसजप इह ज्ञानयज्ञशब्देनोच्यत इत्याह—**विधीति। मानसत्वादिति**। मनसोऽन्तःकरणत्वेनोत्कृष्टत्वात् तदीयोऽयं जपोऽप्युत्कृष्ट एवेति भावः। स्तूयत इति। ज्ञान-यज्ञतुल्यं गीताशास्त्राध्ययनमित्युच्यत इत्यर्थः। पक्षान्तरमाह—**फलविधिरिति**। तदेव विवृणोति—**देवतेति**। देवतादिविषयज्ञानयज्ञस्य यत्फलं तत्तुल्यं फलमस्य गीताध्येतुर्भवतीत्यर्थः। यथा ज्ञानयज्ञेनाग्न्यादिमन्त्रजपरूपेणाग्न्यादिदेवता इष्टा भवन्ति, तथा गीताध्ययनेन भगवानहमिष्टो भवेयमित्यर्थः। यद्वा मानसिकनारायणाष्टाक्षरीमन्त्रजपवद् गीताध्ययनमपि मत्प्रीतकारणमिति भावः। **तेनेति**। ज्ञान-यज्ञतुल्येनेत्यर्थः। **अध्ययनेनेति**। गीताध्ययनेनेत्यर्थः। **ममेति**। सर्वज्ञस्येत्यर्थः। ततश्चेश्वराभिमतत्वान्नात्र संशयादिः कार्यः। भगव-द्विषयकज्ञानयज्ञतुल्यमेव गीताध्ययनमिति सिद्धान्त एव॥७०॥

**श्रद्धावानिति**। यो नरःश्रद्धावाननसूयसश्च सन्नावयोरिमं संवादं शृणुयादपि सोऽपि मुक्तःसन् पुण्यकर्मणां शुभाँल्लोकान् प्राप्नुयात्। शृणुयादपीत्यपिशब्दार्थमाह—**अपीति**। श्रोताऽप्येवं, किमुत प्रज्ञावांस्तदर्थाभिज्ञ इत्यपेरर्थः। मुक्तस्य कथं पुण्यलोकप्राप्तिः?

१. इष्टः इति 'यज देवपूजासंगतिकरणदानेषु' इति धातोः क्तप्रत्यये रूपम्।

**कच्चिदेतच्छ्रुतं पार्थ ! त्वयैकाग्रेण चेतसा।**
**कच्चिदज्ञानसम्मोहः प्रनष्टस्ते धनञ्जय !॥ ७२॥**

**शृणुयादपि यो नरः, अपिशब्दात् किमुतार्थज्ञानवान्, सोऽपि पापाद् मुक्तः** शुभान् **प्रशस्तान् लोकान् प्राप्नुयात्** पुण्य-कर्मणाम् **अग्निहोत्रादिकर्मवताम्॥ ७१॥**

**शिष्यस्य शास्त्रार्थग्रहणाग्रहणविवेकबुभुत्सया पृच्छति। तदग्रहणे ज्ञाते पुनर्ग्राहयिष्याम्युपायान्तरेणापीति प्रष्टुरभिप्रायः। यत्नान्तरं चास्थाय [१]शिष्यः कृतार्थः कर्तव्यः इत्याचार्यधर्मः प्रदर्शितो भवति।**

कच्चिदिति। कच्चित् **किम्** एतद् **मयोक्तं** श्रुतं **श्रवणेनावधारितं, हे पार्थ** ! **किं त्वयैकाग्रेण** [२]चेतसा **चित्तेन? किं वा प्रमादितम्? कच्चिद्** अज्ञानसम्मोहः **अज्ञाननिमित्तः सम्मोहो [३]विचित्तभावोऽविवेकः स्वाभाविकः किं प्रनष्टः? यदर्थोऽयं शास्त्रश्रवणायासस्तव, मम चोपदेष्टृत्वायासः प्रवृत्तः,** ते [४]**तव, हे धनञ्जय !॥ ७२॥**

आनन्दगिरिकृतव्याख्या

**आचार्येण शिष्याय यावदज्ञानसंशयविपर्यासः, तावदनेकधोपदेष्टव्यमिति दर्शयितुं भगवानर्जुनं पृष्टवानित्याह—**शिष्यस्येति। **प्रष्टुरभिप्रायं प्रकटयति—**तदग्रहण इति। **शिष्यश्चेद् उक्तं ग्रहीतुं नेष्टे, तर्हि तं प्रत्यौदासीन्यमाचार्यस्योचितम्, तस्य मन्दबुद्धित्वादित्या-शङ्क्याह—** यत्नान्तरमिति। कच्चिदिति [५]**कोमलप्रश्ने। तमेव व्याचष्टे—**किमेतदिति। **द्वितीयं किम्पदं पूर्वस्य व्याख्यानतया सम्बध्यते। कच्चिदिति द्वितीयं प्रश्नं विभजते—**किं प्रनष्ट इति। **मोहप्रणाशस्य प्रसङ्गं दर्शयति—**यदर्थ इति॥ ७२॥

भाष्यार्कप्रकाशः

अत आह—**पापादिति**। नायं पुण्यपापविनिर्मुक्तः परमात्मज्ञानिवत्किन्तु पापादेव मुक्त इत्यर्थः। पुण्यकर्मणां स्वर्गिणाम्॥ ७१॥

**कच्चिदिति**। शास्त्रार्थस्य **ग्रहणाग्रहणे** ज्ञानाज्ञाने तयोर्विवेकः, तस्य बोद्धुमिच्छा **बुभुत्सा** तया। शास्त्रार्थो मदुक्तः शिष्येणार्जुनेन ज्ञातो वा, उताज्ञात इतीममंशं विविच्य ज्ञातुं पृच्छति कृष्ण इत्यर्थः। किं तत्फलम्? अत आह—**तदिति**। **तदग्रहणे** शास्त्रार्थस्याग्रहणे, शिष्यस्येति शेषः। **ज्ञाते सति** मदुक्तमर्थं शिष्योऽयं नावैदिति ज्ञाने सतीत्यर्थः। उपायान्तरेण शास्त्रार्थं ग्राहयिष्याम्यर्जुनेनेति प्रष्टुः कृष्णस्याशयः। अनेन चाचार्यधर्मः शिक्षितो भवतीत्याह—**यत्नान्तरमिति**। यद्येकेनोपायेनोक्तेन शिष्यः कृतार्थो न भवति, तर्ह्युपाया-न्तरेणापि शिष्यः कृतार्थीकर्तव्यः आचार्येणेत्यर्थः। हे पार्थ ! त्वयैकाग्रेण चेतसा एतत् श्रुतं कच्चित्? हे धनञ्जय ! तेऽज्ञानसम्मोहः प्रणष्टः कच्चित्? श्रोत्रेन्द्रियसत्त्वादर्जुनस्य श्रुतमिति प्रश्नोऽनर्थकः, अत आह—**श्रवणेनावधारितमिति**। मदुक्तं सर्वं श्रुत्वा स्वकर्तव्यार्थं निश्चितवान् किमित्यर्थः। **एकाग्रेण चेतसा** सावधानमनसेत्यर्थः। तदेवाह—**अप्रमादत इति**। प्रमादोऽनवधानता, तदभावोऽप्रमादः, ततोऽप्रमादतः। अज्ञानात् सम्मोहोऽज्ञानसम्मोहः, पञ्चमीति योगविभागात् समासः; यद्वा शाकपार्थिवादित्वादुत्तरपदलोपसमासः। इदमेवाह—**अज्ञाननिमित्तः सम्मोहोऽज्ञानसम्मोह इति**। अज्ञानं निमित्तं कारणं यस्य सोऽज्ञाननिमित्तः। **अविविक्तभावो** विविक्तं विवेकः, स यस्य नास्ति सोऽविविक्तः, तस्य भावोऽविविक्तभावः अविवेकित्वम्। अविवेकस्वभाव इति यावत्। अयं चाविवेकः कार्याकार्यविषयः, आत्मानात्मविषयो वा; उभयविधस्याप्यविवेकस्यात्मनिष्ठस्यार्जुनेनादौ दर्शितत्वात्। 'पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः' इति। **यदर्थ इति**। यदज्ञानसम्मोहनिवृत्त्यर्थ इत्यर्थः। **ते तुभ्यमिति**। तदर्थं[त्वदर्थं]मित्यर्थः। त्वां शोचयितुं प्रवृत्त इति यावत्। ते तवेति वा भाष्यपाठः। त्वद्बुद्धिगत इत्यर्थः। **धनञ्जयेति**। धनञ्जयस्य तव मदुपदेशेन मोहजयः सुकर एवेति भावः॥ ७२॥

---

१. 'शिष्यस्य कृतार्थता कर्तव्या' इति पा.। २. '**चेतसा** चित्तेनाप्रमादतः' रा.पा.। 'किं वा प्रमादतः' इति पा.। ३. 'अविविक्तभावः' इति पा.। यथाश्रुतपाठस्तु मुह वैचित्त्ये इति धातुपाठानुसारी। ४. 'तुभ्यम्' इति पा.। तस्य उपदेशेऽन्वयः। यथाश्रुतपाठे तव संमोह इत्यन्वयः। ५. 'प्रशस्तप्रश्ने' इति पा.।

**अर्जुन उवाच—**

**नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत !।**
**स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव॥७३॥**

नष्ट इति। **नष्टो मोहोऽज्ञानजः समस्तसंसारानर्थहेतुः सागर इव** [1]**दुस्तरः।** स्मृतिश्चात्मतत्त्वविषया **लब्धा, यस्या लाभात् सर्वहृदयग्रन्थीनां विप्रमोक्षः।** त्वत्प्रसादात् **तव प्रसादात्** मया **त्वत्प्रसादमाश्रितेन, अच्युत ! । अनेन मोहनाशप्रश्नप्रतिवचनेन सर्वशास्त्रार्थज्ञानफलमेतावदेवेति निश्चितं दर्शितं भवति, यतो ज्ञानान्मोहनाश आत्मस्मृतिलाभश्चेति। तथा च श्रुतौ 'अनात्मवित्...शोचामि'(द्र.छा.उ.७.१.३) इत्युपन्यस्यात्मज्ञानेन सर्वग्रन्थिविप्रमोक्ष उक्तः। 'भिद्यते हृदयग्रन्थिः'(मु.उ.२.२.८) 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः'(ई.उ.७) इति च मन्त्रवर्णः। अथेदानीं त्वच्छासने स्थितोऽस्मि** गतसन्देहो **मुक्तसंशयः। करिष्ये वचनं तव। अहं त्वत्प्रसादात् कृतार्थः, न मे कर्तव्यम्**

आनन्दगिरिकृतव्याख्या

**प्रेमोपदिष्टात्मज्ञानस्य अज्ञानसन्देहविपर्यासरहितस्य पृष्टस्य** [2]**भगवदनुग्रहात् प्राप्तिकथनेन भगवन्तं परितोषयिष्यन्नर्जुनो विज्ञापितवानित्याह—**अर्जुन इति। **अज्ञानोत्थस्याविवेकस्य नष्टत्वमेव स्पष्टयति—**समस्त इति। **स्वयञ्ज्योतिषि प्रतीचि ब्रह्मण्यविद्याभ्रमं विद्याऽपनयति, नाविदितं प्रकाशयतीति मत्वाऽऽह—**स्मृतिश्चेति। **स्मृतिलाभे किं स्यादिति चेत्, तदाह—**यस्या इति। **मोहनाशे स्मृतिप्रतिलम्भे चासाधारणं कारणमाह—**त्वत्प्रसादादिति। **प्रकृतेन प्रश्नप्रतिवचनेन लब्धमर्थं कथयति—**अनेनेति। **यदुक्तं स्मृतिप्रतिलम्भादशेषतो हृदयग्रन्थीनां विप्रमोक्षः स्यादिति, तत्र प्रमाणमाह—**तथा चेति। **ज्ञानादज्ञानतत्कार्यनिवृत्तौ श्रुत्यन्तरमपि संवादयति—**भिद्यत इति। **भगवदनुग्रहादज्ञानकृतमोहदाहानन्तरमात्मज्ञाने प्रतिलब्धे त्वदाज्ञाप्रतीक्षोऽहमित्युत्तरार्धं व्याकरोति—**अथेति। **तव वचनं करिष्ये-**

भाष्यार्कप्रकाशः

**नष्ट इति**। हे अच्युत ! त्वत्प्रसादाद् मम मोहो नष्टः; मया स्मृतिर्लब्धा; त्वच्छासने स्थितोऽस्मि; गतसन्देहश्चास्मि; तव वचनं करिष्ये; गतसन्देहःसन् त्वच्छासने स्थितोऽस्मि वा। **मोहो**ऽविवेकः। कस्मादुदितोऽयम्? अत आह—**अज्ञानज इति**। किमस्य कृत्यम्? अत आह—**संसारेति**। न चायं मोहनाशः सुकर इत्याह—**सागर इवेति**। **दुरुत्तरः** दुःखेनाप्युत्तर्तुमशक्य इत्यर्थः। किंविषया स्मृतिः? अत आह—**आत्मेति**। आत्मतत्त्वस्मरणं जातमित्यर्थः। **अनेन** – कृष्णोपदेशात्प्रागप्यर्जुनस्यात्मतत्त्वज्ञानं परोक्षप्रायम् अस्त्येव। तत्तु मोहेनाच्छादितं मेघेन सूर्य इव। भगवदुपदेशान्मोहनाशे सति पुनस्तत्स्मरणं जातमिति – **सूच्यते**। **यद्वा** स्मृतिरिह ज्ञानमेवेति बोध्यम्। **अथवा** यत्त्वयोपन्यस्तमात्मतत्त्वं तदिदानीं स्मर्यत इत्यर्थः। एतेन स्मृतिजनकसंस्कारवत्तया सुदृढमर्जुनस्यात्मज्ञानमिति सूच्यते। स्मृतिफलमाह—**यस्या इति**। हृदयग्रन्थीनां कामानां विशेषेण प्रकर्षेण मोक्षो विप्रमोक्षो, नाश इति यावत्। **मोहनाशप्रश्नप्रतिवचनेनेति**। 'मोहो नष्टः कि'मिति प्रश्नः, 'मोहो नष्टः' इति तत्प्रतिवचनं च, तेनेत्यर्थः। **एतावदेवेति**। मोहनाशमात्रमेवेत्यर्थः। **यतो** यस्माज्**ज्ञानात्** शास्त्रार्थभूतब्रह्मात्मज्ञानादित्यर्थः। आत्मस्मृतिरात्मस्वरूपस्मरणं यत्प्रागज्ञानाद् विस्मृतमिव स्थितं तस्यात्मस्वरूपस्य सच्चिदानन्दलक्षणस्य स्मरणमित्यर्थः। तत्साक्षात्कार इति यावत्। तल्लाभश्चेत्येतावदेव शास्त्रार्थज्ञानफलमित्यर्थः। यस्माज्ज्ञानान्मोहनाश आत्मस्मृतिलाभश्च भवति, तस्माच्छास्त्रार्थज्ञानस्यैतावदेव फलमित्यर्थः। अनयोरपि मोहनाशमात्रमेव फलं सति तस्मिन्नात्मस्मृतेः स्वत एव जायमानत्वादिति बोध्यम्। 'अनात्मविच्छोचामि तं मा भगवः शोकस्य पारं तारयतु' इत्यादिरिहानुसन्धेयः। तत्र विद्यादशायामेकत्वमात्मैक्यमनुपश्यतो विदुषः को मोहः? कः शोकः? शोकमोहौ द्वावपि न स्त इत्यर्थः। **वचनमिति**। त्वदुक्तमर्थं करिष्य इत्यर्थः। युद्धं करिष्यामीति यावत्। 'कुरु कर्मैव तस्मात् त्व'मित्युक्तत्वादिति भावः।

१. 'दुरुत्तरः' इति पा.। २. 'भगवदनुग्रहप्राप्ति' इति पा.।

**सञ्जय उवाच—**

**इत्यहं वासुदेवस्य पार्थस्य च महात्मनः।**
**संवादमिममश्रौषम् अद्भुतं रोमहर्षणम्॥ ७४॥**
**व्यासप्रसादाच्छ्रुतवानेतद्[1] गुह्यमहं परम्।**

अस्तीत्यभिप्रायः॥ ७३॥

**परिसमाप्तः शास्त्रार्थः। अथेदानीं कथासम्बन्धप्रदर्शनार्थं सञ्जय उवाच—** इतीति। इति **एवम् अहं वासुदेवस्य पार्थस्य च महात्मनः संवादमिमं यथोक्तम्** अश्रौषं **श्रुतवानस्मि** अद्भुतम् **अत्यन्तविस्मयकरं** रोमहर्षणं **रोमाञ्चकरम्** ॥ ७४॥

**तं चेमम्—** व्यासप्रसादादिति। व्यासप्रसादात् **ततो दिव्यचक्षुर्लाभात् श्रुतवान्** [एतद्] [1]**एतं संवादं गुह्यतमं**

आनन्दगिरिकृतव्याख्या

ऽहमित्यत्र तात्पर्यमाह—अहमिति॥ ७३॥

**शास्त्रार्थे समाप्ते सत्यस्यामवस्थायां सञ्जयवचनं कुत्रोपयुक्तमिति? तदाह—**परिसमाप्त इति। **वासुदेवस्य सर्वज्ञस्य सर्वेश्वरस्य कृतार्थस्य** पार्थस्य **पृथासुतस्यार्जुनस्य** महात्मनः **अक्षुद्रबुद्धेः सर्वाधिकारिगुणसम्पन्नस्य सम्यञ्चं वादं** संवादं **गुरुशिष्यभावेन प्रश्नप्रति-वचनाभिधानम्** इमम् **अनुक्रान्तम्** अद्भुतं **विस्मयकरं रोमाणि हृष्यन्ति पुलकीभवन्त्यनेनेति** रोमहर्षणम् [2]**आह्लादकरं यथोक्तं श्रुतवा-नस्मीत्याह—**इत्येवमिति॥ ७४॥

**प्रकृष्टं संवादं कथमश्रौषीरिति चेत्, तत्राह—**तं चेति। **एतत्पदं संवादपरत्वात् पुंलिङ्गत्वेन नेतव्यमित्याह—**एतमिति। **परम-पुरुषार्थौपयिकत्वात् परत्वम्।** परं गुह्यम् **अतिशयेन गुह्यं रहस्यमिति वा।** [3]**योगो ज्ञानं कर्म च, तदर्थत्वादयं संवादो योग उक्तः। अथवा**

भाष्यार्कप्रकाशः

ननु साक्षात् परमेश्वरस्य श्रीकृष्णस्योपदेशादर्जुनः किं कृतार्थः, उताकृतार्थः? आद्ये, 'युद्धं करिष्ये' इत्यर्जुनवचनमयुक्तं, युद्धस्य कर्तव्यत्वेनावशेषे सति कृतकृत्यत्वाभावात्। द्वितीये, यदि साक्षाच्छ्रीकृष्णेनोपदिष्टगीताशास्त्रार्थोऽप्यर्जुनोऽकृतार्थस्तर्हि अर्वा-चीनैर्गुरुभिरुपदिष्टगीतार्थानां शिष्याणां कथं कृतकृत्यत्वं स्यात्? न कथमपीत्याशङ्कायामाह—**अहमिति**।

**ननु** 'करिष्ये वचनं तवे'ति कण्ठत उक्तत्वात् कथं मम कर्तव्यं नास्तीत्यभिप्रायस्य सिद्धिरिति चेत्, **उच्यते**— त्वत्प्रसादा-दात्मस्मृतिलाभेन मम सर्वकामप्रहाणात् कृतार्थ एवाहम्, मम चाविक्रियस्यात्मनः किमपि न कर्मास्ति, लोकसंग्रहार्थं भूभारहरणार्थ-तया आवयोरवतीर्णत्वेन तत्प्रारब्धानुगुणं तत्प्रारब्धक्षपणार्थं च क्षत्रियस्वभावसिद्धं युद्धाख्यं कर्म, भवानिव लोकसृष्ट्यादिकं कर्म, करिष्ये केवलं लीलयेति पार्थस्याशयात्। आचार्यकर्तृकशास्त्रार्थोपदेशस्य कृतार्थोऽहमिति शिष्यवचनश्रवणमेवावसान-मित्यभिप्रेत्याह—**परिसमाप्तः शास्त्रार्थ इति** ॥ ७३॥

**इतीति**। अहं रोमहर्षणमद्भुतमि(ती)मं महात्मनो वासुदेवस्य पार्थस्य च संवादमश्रौषम्॥ ७४॥

**व्यासेति**। अहं साक्षात् स्वयं कथयतो योगेश्वरात् कृष्णाद् व्यासप्रसादाद् गुह्यतमं परं योगमिमं श्रुतवान्। कोऽसौ व्यासप्रसादः? अत आह—**दिव्यचक्षुर्लाभादिति**। दिव्यचक्षुर्दानरूपव्यासप्रसादादित्यर्थः। अतिव्यवहितमपि दुर्दर्शमर्थमव्यवहितमिव येन पश्यति तद् दिव्यचक्षुः, योगिनां स्वाभाविकमिदं चक्षुः। अत एवातीन्द्रियार्थदर्शिनो योगिनः। इदंशब्दार्थमाह—**संवादमिति**। ग्रन्थमित्यर्थः। ग्रन्थस्य कथं योगत्वम्? अत आह—**योगार्थत्वादिति**। योगः कर्मयोगज्ञानयोगोभयात्मकः; स एवार्थोऽभिधेयो यस्य

१. 'इमं' इति मूले भाष्ये च पा.। २. 'आह्लादकं' इति पा.। ३. संवादे योगशब्दप्रयोगमुपपादयति— योग इति।

**योगं योगेश्वरात् कृष्णात् साक्षात् कथयतः स्वयम्॥ ७५॥**
**राजन्! संस्मृत्य संस्मृत्य संवादमिममद्भुतम्।**
**केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६॥**
**तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः।**
**विस्मयो मे महान् राजन्! हृष्यामि च पुनः पुनः॥ ७७॥**
**यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।**

**परं** योगं **योगार्थत्वाद् ग्रन्थोऽपि योगः। संवादमिमं योगमेव वा। योगेश्वरात् कृष्णात् साक्षात् कथयतः स्वयम्, न परम्परया॥ ७५॥**

राजन्निति। **हे राजन् धृतराष्ट्र! संस्मृत्य संस्मृत्य प्रतिक्षणं संवादमिममद्भुतं केशवार्जुनयोः** पुण्यं [1]**श्रवणादपि पापहरं श्रुत्वा हृष्यामि च** मुहुर्मुहुः **प्रतिक्षणम्॥ ७६॥**

तदिति। **तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः विश्वरूपम्, विस्मयो मे महान्, राजन्! हृष्यामि च पुनः पुनः॥ ७७॥**

**किं बहुना? —** यत्रेति। यत्र **यस्मिन् पक्षे** योगेश्वरः **सर्वयोगानामीश्वरः, तत्प्रभवत्वात् सर्वयोगबीजस्य,**

आनन्दगिरिकृतव्याख्या

**चित्तवृत्तिनिरोधस्य योगस्याङ्गत्वादयं संवादो योग इत्याह—**संवादमिति। **योगानामीश्वरो योगेश्वरः, तदनुग्रहहेतुत्वाद् योगतत्फलयोः।** ततः साक्षाद् **अव्यवधानेन श्रुतवान्, न परम्परयेत्याह—**योगेश्वरादिति। स्वयं **स्वेन पारमेश्वरेणातिरस्कृतज्ञानैश्वर्यरूपेण** कथयतो **व्याचक्षाणादित्यर्थः॥ ७५॥**

**यथोक्तं संवादं भगवतः श्रुत्वा किमुपेक्षसे? नेत्याह—**राजन्निति। **पुण्यत्वं साधयति—**श्रवणादपीति॥ ७६॥

**यत्तु विश्वरूपाख्यं रूपं सगुणमर्जुनाय भगवान् दर्शितवान् ध्यानार्थम्, तदिदानीं स्तौति—**तच्चेति॥ ७७॥

भाष्यार्कप्रकाशः

तत्त्वात्। अत एवास्य योगशास्त्रत्वमिति भावः। योगप्रतिपादकं शास्त्रं हि योगशास्त्रम्। न चात्मसंयमयोगादयो बहव इहोक्ता इति कृत्वा किमिति कर्मज्ञानयोगद्वयमेव त्वयोक्तमित्युच्यत इति वाच्यम्; सर्वेषां योगानां तदुभयेऽन्तर्भावात्। व्याख्यानान्तरमाह— **संवादमिति**। संवादरूपमिमं योगमित्यर्थः। **योगेश्वरादिति**। कर्मयोगज्ञानयोगफलप्रदात् तन्निर्वाहकाच्चेत्यर्थः। न हीश्वरानुग्रहाभावे कर्मयोगे ज्ञानयोगे वा प्रवृत्तः पुरुषस्तत्पारं पश्येदिति भावः। साक्षात् स्वयं कथयत इत्यस्यार्थमाह—**न परम्परयेति**। एतेन नात्र ग्रन्थ-लोपतद्विस्तराद्याशङ्का कार्येति सिद्धम्॥ ७५॥

**राजन्निति**। हे राजन्! इमं पुण्यमद्भुतं केशवार्जुनयोः संवादं संस्मृत्य संस्मृत्य मुहुर्मुहुर्हृष्यामि च। संस्मृत्य संस्मृत्येति नित्यार्थे द्विर्भावः। कदा संस्मृत्येत्यत आह—**प्रतिक्षणमिति**। क्षणे क्षण इत्यर्थः। **श्रवणेनापीति**। किं पुनस्तदर्थानुष्ठानेनेति भावः। गीताशास्त्रस्याबन्धकत्वात् पुण्यप्रदमिति नोक्तम्, किन्तु पापहरमित्युक्तमिति बोध्यम्। **हृष्यामि** हर्षं प्राप्नोमि॥ ७६॥

**तच्चेति**। हे राजन्! तच्चात्यद्भुतं हरेः रूपं संस्मृत्य संस्मृत्य मे महान् विस्मयो भवति; पुनःपुनः हृष्यामि च॥ ७७॥

**यत्रेति**। एवं सञ्जयोक्तं श्रुत्वाऽपि दुर्योधनविजयाकाङ्क्षिणं सर्वात्मनाऽन्धं धृतराष्ट्रं दृष्ट्वा प्राह सञ्जयः— **यत्रेति**। यत्र योगेश्वरः

१. 'इमं श्रवणेनापि' इति पा.।

## तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥७८॥

**इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो नामाष्टादशोऽध्यायः॥१८॥**

**कृष्णः,** यत्र **पार्थो यस्मिन् पक्षे** धनुर्धरो **गाण्डीवधन्वा,** तत्र **श्रीः तस्मिन् पाण्डवानां पक्षे श्रीः, विजयः, तत्रैव** भूतिः **श्रियो विशेषो विस्तारो भूतिः** ध्रुवा **अव्यभिचारिणी** नीतिः **नयः इत्येवं मतिर्ममेति**[१] ॥७८॥

**इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये मोक्षसंन्यासयोगो नामाष्टादशोऽध्यायः॥१८॥**

आनन्दगिरिकृतव्याख्या

**द्वयोरपि कृष्णार्जुनयोर्नरनारायणयोः संवादस्य प्रामाण्यार्थं परममुत्कर्षं दर्शयति—**किं बहुनेति। **कथं सर्वेषां योगानामीश्वरो भगवानिति, तत्राह—**तत्प्रभवत्वादिति। **सर्वयोगो ज्ञानं कर्म च, तस्य बीजं शास्त्रीयं ज्ञानवैराग्यादि , तद्धि भगवदधीनं तदनुग्रहविहीनस्य तदयोगात्। अतो योगतत्फलयोर्भगवदनुग्रहायत्तत्वाद् भगवतो योगेश्वरत्वमित्यर्थः।** श्रीः **लक्ष्मीः,** विजयः **परमः उत्कर्षः। राज्ञो धृतराष्ट्रस्य स्वपुत्रेषु विजयाशां शिथिलीकृत्य पाण्डवेषु जयप्राप्तिमैकान्तिकीमुपसंहरति—**इत्येवमिति। **उपायोपेयभावेन निष्ठाद्वयस्य प्रतिष्ठापितत्वात् कर्मनिष्ठा परम्परया ज्ञाननिष्ठाहेतुः, ज्ञाननिष्ठा तु साक्षादेव मोक्षहेतुरिति शास्त्रार्थमुपसंहर्तुम्** इतीत्युक्तम्॥७८॥

*****

भाष्यार्कप्रकाशः

कृष्णोऽस्ति, यत्र धनुर्धरः स पार्थोऽस्ति, तत्र श्रीर्विजयो भूतिर्नीतिश्च ध्रुवेति मम मतिः। सर्वेषां योगानां यद्बीजं कारणं गीताशास्त्रं तस्य तत्प्रभवत्वात् स कृष्णः प्रभवः कारणं यस्य तत्त्वात् ; कृष्णेनोक्तत्वादित्यर्थः। **यद्वा** सर्वस्यापि योगलक्षणस्य बीजस्य तत्प्रभवत्वात्। **अथवा** सर्वेषामपि योगिनां यद्योगबीजमस्ति, तस्य तत्प्रभवत्वात् ; **यद्वा** सर्वयोगबीजस्य सत्त्वगुणस्य तत्प्रभवत्वात् सर्वमपि योगात्मकं बीजम् ; तस्मादीश्वरानुग्रहादित्यर्थः; प्रभवति वर्धते अङ्कुरीभवतीति वा तत्प्रभवं, तस्य भावस्तत्प्रभवत्वं, तस्मात् ; **यद्वा** योगो बीजं यस्य तद् योगबीजम् , सर्वं च तद् योगबीजं च सर्वयोगबीजं तस्य सर्वस्यापि योगफलस्येत्यर्थः। तत्प्रभवत्वाद् ईश्वरजन्यत्वाद् , ईश्वराधीनत्वादिति यावत्। नास्य धनुः सर्वसाधारणमिति द्योतयितुमाह—**गाण्डीवधन्वेति**। गाण्डीवं धनुर्यस्य स गाण्डीवधन्वा। श्रीः सम्पद् ध्रुवा। विजयो जयो ध्रुव इति लिङ्गविपरिणामेन योज्यम्। भूतिशब्दार्थमाह—**श्रियो विशेष इति**। सम्पद्विस्तार इत्यर्थः। ध्रुवा अव्यभिचारिणी; सत्येत्यर्थः। शाश्वतेति वा। राज्ञः समीपे भृत्यस्य विनयेन भवितव्यत्वात् 'ध्रुवा नीतिरिति ध्रुव'मिति नोक्तम् ; किन्तु 'मतिर्ममे'त्युक्तम्। कृष्णार्जुनवति पक्षे श्रीविजयादिकं वस्तुतो भविष्यतु[ति] वा, मा वा। मम तु भविष्यत्येवेति प्रतिभातीति विनय-प्रदर्शनम्। वस्तुतो भविष्यत्येवेति निश्चय एव सञ्जयस्य, दृष्टकृष्णमाहात्म्यत्वाद् विश्वरूपप्रसङ्गे - इतीदमभिप्रेत्याह भगवान् भाष्य-कारः— **मम त्विति**। तुशब्दादन्येषां भवदादीनामन्यथा प्रतिभातु नामेति सूच्यते। **ममेति** इति भाष्यपाठे तु इतिशब्दो भाष्यसमाप्ति-वाचीति बोध्यम्॥७८॥

**इति श्री बेल्लंकोण्डोपनामकरामकविवरकृते श्रीमच्छाङ्करभगवद्गीताभाष्यार्कप्रकाशेऽष्टादशोऽध्यायः।**

**समाप्तोऽयं ग्रन्थः।**

॥सौम्यज्येष्ठामायामर्पितश्च श्रीहयवदनाय॥

**मोक्षसंन्यासयोगो** मोक्षप्रदकर्मसंन्यासयोगप्रतिपादक इत्यर्थः। **सर्वधर्मानिति** चरमश्लोके तस्यैव प्रतिपादितत्वादिति भावः।

*****

---

१. भाष्ये— 'मम तु' इति रा.पा. भाति।

आनन्दगिरिकृतव्याख्या

**काण्डत्रयात्मकं शास्त्रं [१]पदवाक्यार्थगोचरम्। आदिमध्यान्तषट्केषु व्याख्याया गोचरीकृतम्॥ १॥**
**[२]सङ्क्षेपविस्तराभ्यां यो लक्षणैरुपपादितः। सोऽर्थोऽन्तिमेन संक्षिप्य लक्षणेन विवक्षितः॥ २॥**
**[३]गीता शास्त्रमहार्णवोत्थममृतं वैकुण्ठकण्ठोद्भवं श्रीकण्ठापरनामवन्मुनिकृतं निष्ठाद्वयद्योतितम्।**
**निष्ठा यत्र मतिप्रसादजननी साक्षात्कृतं कुर्वती मोक्षे पर्यवसास्यति प्रतिदिनं सेवध्वमेतद् बुधाः!॥ ३॥**
**प्राचामाचार्यपादानां पदवीमनुगच्छता। गीताभाष्ये कृता टीका टीकतां पुरुषोत्तमम्॥ ४॥**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचिते**
**श्रीमद्भगवद्गीताशाङ्करभाष्यव्याख्यानेऽष्टादशोऽध्यायः॥ १८॥**

भाष्यार्कप्रकाशः

श्रीकृष्णलीला उपवर्ण्य कृष्णलीलातरङ्गिण्यभिधे प्रबन्धे।
श्रीकृष्णगीतार्थमवर्णयद् य एवं स रामोऽहमहो ! कृतार्थः॥ १॥
श्रीकृष्णपादाब्जमरन्दपानात् कृष्णस्वरूपामृतपानतश्च।
तृप्तस्य रामस्य कवेः प्रकाशः प्रकाशतामारवि[४] माधवाप्तः॥ २॥
श्रीकृष्णभक्त्या क्रियते बताज्ञोऽप्यात्मज्ञ इत्यत्र [५]कविं प्रमाणम्।
विज्ञाय कृष्णे सगुणेऽगुणे वा भक्तिं मुमुक्षुर्वितनोतु नित्यम्॥ ३॥

*****

---

१. पदार्थौ महावाक्यघटकत्वम्पदार्थतत्पदार्थौ, वाक्यार्थः तदभेदः, तत्प्रतिपादकं क्रमेण काण्डत्रयमिति भावः। २. अष्टादशाध्यायतात्पर्यमाह—संक्षेपेति। लक्षणम् अध्यायः। ३. अतिगम्भीरमहार्णवसदृशसर्वशास्त्रार्थसाररूपत्वात् गीतायाः अमृतत्वरूपणम्। वैकुण्ठः श्रीकृष्णः, तन्मुखनिःसृतम्। श्रीकण्ठापरनामवन्मुनिः व्यासः, तेन निबद्धम्। 'तं धर्मं भगवता यथोपदिष्टं वेदव्यासः सर्वज्ञो भगवान् गीताख्यैः सप्तभिः श्लोकशतैरुपनिबबन्ध' इति भाष्यात् , 'व्यासेन ग्रथितां पुराणमुनिना' इति पुराणवचनाच्च। व्यासस्य श्रीकण्ठनामवत्त्वे प्रमाणमन्वेष्यम्। केचित् श्रीकण्ठापरनामशिवावतारभगवत्पादीयभाष्यपरतया इदं विशेषणं योजयन्ति। तत्र गीतामृतस्य भाष्येणाभेदोपचारः कल्प्यः। यत्र गीतायाम् , निष्ठा तत्परतयाऽर्थानुसंधानम् , साक्षात्कृतं साक्षात्कारम् । शेषं स्पष्टम्। ४. रविः सूर्यः, तत्स्थितिपर्यन्तम्। माधवेन परमात्मना आप्तः। ५. कविः= रामरायकविः।

*ॐ श्रीदक्षिणामूर्तये नमः*

**अनुभूतिस्वरूपाचार्य - श्रीमदानन्दगिरि - श्रीबेल्लंकोण्डरामरायकविविरचित-व्याख्योपबृंहित-श्रीमच्छाङ्करभाष्योपेता**

# श्रीमद्भगवद्गीता

*****

## *अनुभूतिस्वरूपाचार्यविरचितगीताभाष्यटिप्पणम्*

**सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे। नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे॥**

गीताशास्त्रं व्याचिख्यासुर्भगवान् भाष्यकारः विघ्नोपशमनादिप्रयोजनसिद्ध्यर्थं 'स्मृते सकलकल्याणभाजनं यत्र जायते' इत्यादिस्मृतिविहितनारायणानुस्मरणं मङ्गलं चिकीर्षुः पुराणान्तर्गतमेव श्लोकं पठति स्म, पुराणानामपि गीतार्थ-

## *आनन्दगिरिकृतव्याख्या*

**दृष्टिं मयि विशिष्टार्थां[1] कृपापीयूषवर्षिणीम्। हेरम्ब! देहि प्रत्यूह[2]क्ष्वेडव्यूहनिवारिणीम्॥१॥**

**यद्वक्त्रपङ्केरुहसंप्रसूतं निष्ठामृतं[3] विश्वविभागनिष्ठम्। [4]साध्येतराभ्यां परिनिष्ठितान्तं तं वासुदेवं सततं नतोऽस्मि॥२॥**

**प्रत्यञ्चमच्युतं नत्वा गुरूनपि गरीयसः। क्रियते शिष्यशिक्षायै गीताभाष्यविवेचनम्॥३॥**

**कर्मनिष्ठा ज्ञाननिष्ठेत्युपायोपेयभूतं निष्ठाद्वयमधिकृत्य प्रवृत्तं गीताशास्त्रं व्याचिख्यासुर्भगवान् भाष्यकारो विघ्नोपप्लवोपशमनादि-**

## *श्रीबेल्लंकोण्डरामरायकविविरचितः भाष्यार्कप्रकाशः*

**श्रीमद्धयग्रीवपदारविन्द [5]मारन्दसानन्दमनोमिलिन्दः। रामः कविर्व्याप्रियते यथार्थगीतार्थभाष्यार्थविमर्शनार्थे॥**

अस्ति खलु भुवि समस्तास्तिकजनैरपौरुषेयतया स्वतःप्रमाणतया चाभ्युपगतः परमेश्वराज्ञारूपः स्मृत्यादिमूलप्रमाणं वेदः इति महच्छास्त्रम्। अनेन हि शास्यते - 'अहरहः सन्ध्यामुपासीत' 'यावज्जीवमग्निहोत्रं जुहुयात्' 'न परदारान् गच्छेत्' 'न सुरां पिबेत्' इत्यादिविधिनिषेधसन्ततिः। अयं च पूर्वोत्तरभागद्वयात्मकः। तत्र कर्म(काण्ड)प्रतिपादकः पूर्वो भागः, यस्यैव मीमांसा जैमिनिना कृता 'अथातो धर्मजिज्ञासा' इत्यादिना, पूर्वमीमांसाशास्त्रमिति व्यवह्रियते। साध्यधर्मप्रतिपादकश्चायमभ्युदयहेतुः, चित्तशुद्धिजनकतया ज्ञानोत्पत्तिहेतुश्च। एतदुक्तकर्ममार्ग एव 'कर्मयोगेन योगिनाम्' इति गीताशास्त्रे कर्मयोग इति प्रतिपादितः।

अथ ज्ञान(काण्ड)प्रतिपादक उत्तरो भागः, यस्यैव मीमांसा व्यासेन कृता 'अथातो ब्रह्मजिज्ञासा' इत्यादिना, उत्तरमीमांसा-शास्त्रमिति व्यवह्रियते। सिद्धब्रह्मप्रतिपादकश्चायं मोक्षहेतुः साक्षादिति। एतदुक्तज्ञानमार्ग एव 'ज्ञानयोगेन सांख्यानाम्' इति गीताशास्त्रे ज्ञानयोग इति प्रतिपादितः। अस्यैवोत्तरभागस्य 'उपनिषदः' इति जन्मजरामरणादिदुःखनिशातनाद्, ब्रह्मप्रापकत्वाच्च व्यवहारः। तत्तद्वेदशाखान्तत्वाच्च 'वेदान्ताः' इति व्यवहारः।

आसां चोपनिषदां प्रधानतात्पर्यं ब्रह्मात्मैक्यप्रतिपादन एवेति कृत्वा अद्वितीयं ब्रह्मैवासां विषयः। स च मुखत एवाभिहितः— 'एकमेवाद्वितीयं ब्रह्म' इति। लक्षणया च प्रत्यपादि – 'तत्त्वमसि' 'अयमात्मा ब्रह्म' 'अहं ब्रह्मास्मि' 'प्रज्ञानं ब्रह्म' इति। भागत्याग-लक्षणया हि महावाक्यानामेतेषाम् अखण्डं ब्रह्मैवार्थः। एतदुपनिषदर्थप्रतिपादनपरत्वादेव भगवद्गीतानाम् उपनिषत्त्वव्यवहारः— 'भगवद्गीतासूपनिषत्सु' इति।

---

**ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने। व्योमवद् व्याप्तदेहाय दक्षिणामूर्तये नमः॥**

१.विशिष्टः अर्थः प्रयोजनं मोक्षो ग्रन्थसमाप्त्यादि च यस्यास्ताम्। २. प्रत्यूहो विघ्न एव क्ष्वेडो विषम्। व्यूहः समूहः। ३.गीतामृतमिति पा.। यथास्थितपाठे कर्म-निष्ठा ज्ञाननिष्ठा चामृतमिव, परम्परया साक्षाच्चामृतत्वसाधनत्वात्। विश्वविभागनिष्ठम् = वर्णाश्रमादिप्रविभागेन जगत्स्थितिहेतुः। ४. साध्येन सिद्धेन च फलेन परिनिष्ठितः अन्तो यस्य। साध्यं फलं चित्तशुद्ध्यादि स्वर्गादि च, सिद्धं फलं मोक्षः, तत्र निष्ठाद्वयं पर्यवसितम्। ५. मरन्दः= मकरन्दः, स एव मारन्दः। तल्लाभेन सानन्दः मनोरूपो मिलिन्दः=भ्रमरः यस्य सः। मरन्द इत्येव वा पाठः स्यात्, 'श्रीकृष्णपादाब्जमरन्दपानात्' इति ग्रन्थान्तश्लोके दर्शनात्।

### श्रीमच्छांकरभाष्योपक्रमणिका

## नारायणः परोऽव्यक्तादण्डमव्यक्तसम्भवम्। अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी॥

अनुभूतिस्वरूपाचार्यटिप्पणम्

परत्वप्रकटनाय, पुराणव्याख्यातृसम्प्रदायप्रकटनाय च— **नारायणः परोऽव्यक्ता[द्] इत्यादि**। **नराणां** प्रतिबिम्बकल्पानां जीवानाम् **अयन**मधिष्ठानं बिम्बकल्पं ब्रह्म नरायणः। नरायण एव **नारायणः**। तद्धितोऽनन्यार्थः, [१]राक्षसवायसादिवत्। ननु

भाष्यार्कप्रकाशः

तत्र प्रथमषट्के 'न जायते म्रियते वा' इत्यादिभिः **त्वम्**पदार्थजीवस्वरूपं शोधितम्। मध्यमषट्के 'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा' इत्यादिभिः **तत्**पदार्थेश्वरस्वरूपं शोधितम्। चरमषट्के तु 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत' इत्यादिभि**रसि**पदार्थो विवृतः। फलं च 'ब्रह्मविद् ब्रह्मैव भवति' इति ब्रह्मसायुज्यलक्षणं वेदान्तैर्मुखत एवाभिहितम्। गीताभिश्च – 'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' 'मामैवैष्यसि' इत्यादिना। 'शान्तो दान्त उपरतस्तितिक्षुः समाहितः श्रद्धावित्तो भूत्वाऽऽत्मन्येवात्मानं पश्येदि'ति श्रुत्या शमादिसम्पन्नोऽधिकारी दर्शितः। गीतास्वपि— 'तानि सर्वाणि संयम्य' 'तांस्तितिक्षस्व भारत' इत्यादिना। किञ्च - अत्राधिकारिणा इहामुत्रफलभोगविरागिणा भवितव्यमित्येतदुपोद्घातग्रन्थसन्दर्भेण दर्शितम् – 'न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च' इत्यादिना। एवमधिकारिणा 'तद्विज्ञानाय स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' इति श्रुत्या गुरूपसत्तिः कार्येति बोधितम्। अत्रापि उपोद्घातग्रन्थे 'शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्' इति। एवं शास्त्रस्य विषयप्रयोजनाधिकारिणो निरूपिताः। सम्बन्धस्तु विषयग्रन्थयोः प्रतिपाद्यप्रतिपादकभावरूपः, फलाधिकारिणोः प्राप्यप्राप्तृभावरूपः, फलग्रन्थयोः प्राप्य-प्रापकभावरूपः—उपेयोपायभावरूप इत्यर्थः; विषयाधिकारिणोर्ज्ञेयज्ञातृभावरूपः, ग्रन्थाधिकारिणोः अध्येयाध्येतृभावरूपः, विषयप्रयोजनयोः जन्यजनकभावरूपः इति।

एवमुपनिषद्भिः सह गीतानां समानविषयादिमत्त्वादुपनिषदां भाष्यं रचितवता श्रीशङ्करावतारेण **श्रीशङ्कराचार्येण** गीतानामपि भाष्यं विरचितम्। न च व्यर्थमिदमिति मन्तव्यम्; उपनिषदां गम्भीरहृदयत्वेन दुर्बोधत्वात् तदर्थं निश्चित्य संक्षिप्य भगवता बादरायणेन विष्ण्ववतारेण गीतानामुक्तत्वात् तथैव तद्भाष्यं रचनीयमेवेति। 'शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः' इति, 'शङ्करः शङ्करः साक्षाद् व्यासो नारायणो हरिः' इति च वचनाद् विष्ण्ववतारव्यासहृदयपरिज्ञानं शिवावतारशङ्करैकविषयमेवेति कृत्वा गीताभिप्रायः शङ्करभाष्यादेव ज्ञेयः; न तु रामानुजभाष्यादिभिः; तेषां श्रीशङ्करभाष्यनिन्दैकप्रधानोद्देशत्वात्। मूलाननुगतार्थत्वाद् वेदान्तविरुद्धत्वेना-प्रमाणत्वाच्च तद्भाष्याणाम्।

तत्र च **शङ्करभाष्य**प्रतिपक्षभूतभाष्यमध्ये **रामानुजभाष्य**मेव प्रधानमिति प्रधानमल्लनिबर्हणन्यायेन रामानुजभाष्ये **वेदान्त-देशिक**कृत**तात्पर्यचन्द्रिका**सहिते श्रुतियुक्त्यादिभिर्विमृष्टे सति शङ्करभाष्यं निरवद्यमप्रतिभटं स्थितं स्यादित्येतदर्थमहमधुना मन्दमतिरपि श्रीहयग्रीवदेवकृपया श्रीशाङ्करभगवद्गीताभाष्यव्याख्याने प्रयुक्तः। किं नाम दुष्करमचिन्त्यविचित्रशक्तेर्भगवतः कृपायाः? तृणमपि श्रीरामेण निहितशक्तिकं ब्रह्मास्त्रमभवत् किल काकासुरे। 'पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना। आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम्' इति पञ्चलक्षणं व्याख्यानम्। इदं च मया मूलग्रन्थस्यापि श्रीशङ्कराचार्यैरकृतव्याख्यानस्य क्रियते। तैर्व्याख्यातश्लोकानां च पदान्वयः प्रदर्श्यते।

अत्र च **अशोच्यान्** इत्यारभ्य किञ्चिदूनसप्तदशाध्यायात्मकं **सर्वधर्मान्** इत्यन्तमेव गीताशास्त्रम्। तदेव व्याकृतमाचार्यैः। अवशिष्टं तूपोद्घातरूपकथामात्रं स्पष्टार्थं चेति न व्याकृतम्।

**ननु** शङ्करमते ग्रन्थारम्भ एव नोपपद्यते, गुरुशिष्यादिद्वैताभावादित्याह **वेदान्तदेशिकः**। तत्र [२]कोपपत्तिरिति चेद्? **उच्यते**—

१. रक्ष एव राक्षसः, वय एव वायस इतिवत् स्वार्थे तद्धितः अण् प्रत्ययः इत्यर्थः। २. उपपत्तिः= समाधानम्।

अनुभूतिस्वरूपाचार्यटिप्पणम्

नारायणस्यापि चेतनत्वादस्मदादिवदविद्यादिक्लेशयुक्तत्वादशुद्धत्वम् , ततः न तदनुस्मरणाद् विघ्नोपशमादिसम्भव इत्याशङ्क्याह—**परोऽव्यक्तादिति। अव्यक्तम्** अनिर्वाच्यमवास्तवधर्मेण मायादिशब्दाभिधेयं जडम्। तस्मात् **परः** तद्गुणदोषाभ्याम-

आनन्दगिरिकृतव्याख्या

**प्रयोजनप्रसिद्धये प्रामाणिकव्यवहारप्रमाणकमिष्टदेवतातत्त्वानुस्मरणं मङ्गलाचरणं सम्पादयन् [1]अनवशेषेणेतिहासपुराणयोर्व्याचिख्यासितगीताशास्त्रेणैकवाक्यतामभिप्रेत्य पौराणिकश्लोकमेकमेवान्तर्यामिविषयमुदाहरति—** नारायण इति। **'आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः॥' इति स्मृतिसिद्धः स्थूलदृशां नारायणशब्दार्थः। सूक्ष्मदर्शिनः पुनराचक्षते — नरशब्देन चराचरात्मकं शरीरजातमुच्यते। तत्र नित्यसन्निहिताश्चिदाभासा जीवाः नारा इति निरुच्यन्ते। तेषाम् अयनमाश्रयो नियामको ऽन्तर्यामी नारायण इति, यमधिकृत्यान्तर्यामिब्राह्मणं [2] श्रीनारायणाख्यं मन्त्राम्नायं चाधीयते। तदनेन शास्त्रप्रतिपाद्यं विशिष्टं [3]तत्त्वमादिष्टं भवति।**

भाष्यार्कप्रकाशः

परमार्थदशायां द्वैताभावेऽपि व्यवहारदशायां तत्सत्त्वान्न ग्रन्थारम्भानुपपत्तिरिति। अस्ति हि द्वैतिनामपि समाध्यादौ द्वैताभावः, अन्यत्र द्वैतसत्त्वम्। किं बहुना? सर्वेषामपि प्राणिनां सुषुप्तौ द्वैताभावः, स्वप्नजागरयोस्तु द्वैतसत्त्वं चेति सर्वजनविदितमेव । 'यत्र सर्वमात्मैवाभूत् तत्र केन किं पश्येदि'ति श्रुतेः सुषुप्तिमुक्तिविषयत्वं 'स्वाप्ययसम्पत्त्यो'रिति सूत्रेण **व्यासेनैव** स्थापितम्। न च - द्वैतसत्त्वे व्यवहारः, व्यवहारसत्त्वे द्वैतमित्यन्योन्याश्रय इति - वाच्यम् , अनादित्वादुभयोर्बीजाङ्कुरवत्। नाप्यज्ञजनाश्रयो व्यवहार इति वाच्यम् , लीलया जगज्जन्मादिषु व्यवहरतः ईश्वरस्याप्यज्ञत्वापत्तेः। तस्माद् द्वैताश्रय एव व्यवहारः, व्यवहाराश्रयमेव द्वैतम् ; यथा शब्दाश्रयोऽर्थः, अर्थाश्रयः शब्दश्च। उभयमपीदमद्वैते ब्रह्मणि मायया कल्पितमिति न ब्रह्मणो द्वैतप्रसङ्गः।

**वस्तुतस्तु** प्रतिपक्षशिरस्येवायं दोषो वज्रप्रहारः प्रपतति। तथाहि– ईश्वरः प्रलयदशायां सूक्ष्मचिदचिद्विशिष्टः, प्रपञ्चदशायां तु स्थूलचिदचिद्विशिष्ट इति विशिष्टाद्वैतिनो वदन्ति। ततश्च सर्वदाऽपि चिदचिद्विशिष्ट एवेश्वर इति चिदचितोरीश्वरसायुज्यस्य नित्यसिद्धत्वान्निष्फलत्वेन तावदनारम्भणीयं विशिष्टाद्वैतमते वेदान्तशास्त्रम्। चितो जीवस्याचिद्विशिष्टेश्वरसायुज्यं चार्धांशेन [4]स्थावरत्वं जनयतीति पुनरनर्थप्रदञ्च। ईश्वरस्य चिदचितोरपृथक्सिद्धविशेषणत्वेन, स्वापृथक्सिद्धान् स्वानन्यांश्चेतनानुद्दिश्येश्वरस्योपदेशोऽपि न घटत इति कृष्णस्यार्जुनं प्रत्युपदेशानुपपत्तिश्च। अर्जुनश्चित् , शास्त्रमचित् , विशिष्टस्त्वीश्वरः इति स्थिते अर्जुनशास्त्रविशिष्ट ईश्वरोऽर्जुनायोपदिशति शास्त्रमिति प्राप्तमिदमपार्थं खलु वाक्यम् , अर्जुनादिभिन्नस्यैव तदुपदेशक्रियान्वयौचित्यात्। न च लक्षणया विशेषणांशत्यागः, अपृथक्सिद्धयोर्विशेषणयोस्त्यागायोगात् , त्यागे सति विशेषणस्वरूपासिद्धेः। अर्जुनदेहरूपाचिद्विशिष्टस्य कृष्णदेहरूपाचिद्विशिष्टस्य चेश्वरस्यैकत्वेन गुरुशिष्यभेदायोगाच्च। कृष्णदेह इवार्जुनदेहेऽपीश्वरसत्त्वानङ्गीकारे ईश्वरस्य सर्वव्याप्तिभङ्गप्रसङ्गात्। न चार्जुनदेहविशिष्टचिते कृष्णदेहविशिष्ट ईश्वर उपदिशतीति वाच्यम् , अर्जुनदेह इव कृष्णदेहेऽपि चितः सत्त्वाद् , अन्यथा तद्देहावच्छिन्नेश्वरस्य चिद्वैशिष्ट्याभावेन चिदचिद्विशिष्टेश्वरत्वाभावात् , अर्जुनदेहतचिद्विशिष्टस्य कृष्णदेहतचिद्विशिष्टस्य चैकत्वात्। स्फुटीभविष्यत्ययमंश उत्तरत्रेति इहोपरम्यते॥

**[5]नत्वा लक्ष्मीहयग्रीवौ वासुदेवपृथासुतौ। व्यासार्यशङ्कराचार्यौ भाष्यार्थं विवृणोम्यहम्॥**

---

१. अनवशेषेण= कार्त्स्न्येन। सर्वेषामितिहासपुराणानां गीताशास्त्रेणैकवाक्यत्वं तात्पर्यैक्यात् । २. अन्तर्यामिब्राह्मणं बृहदारण्यकोपनिषत्स्थम् (द्र.बृ.उ.३-७)। श्रीनारायणाख्यो मन्त्राम्नायः पुरुषसूक्तम्। 'पुरुषेण नारायणेन यजमान उपतिष्ठते'(आप.श्रौ.सू .१६-२३-३) इत्यादौ 'सहस्रशीर्षा पुरुषः' इत्यनुवाको नारायणशब्देन व्यवहृतः। ३. ब्रह्मात्मैक्यरूपम्। एतच्चानुपदमेव स्फुटीकरिष्यते। ४. जडत्वं लक्षणया विवक्षितम्। ५. रामरायकविना प्रथमम् 'अशोच्यान्'(भ.गी.२.११) इति श्लोकान्तं गीताग्रन्थं स्वयं सोपोद्घातं विवृत्य ततो 'नत्वा' इति मङ्गलपद्यपूर्वकं 'नारायणःपरोऽव्यक्तादि'त्यादि भाष्यं व्याख्यातम्। तदनुसारेण इत आरभ्य 'अतः तत इत्यर्थः' (पृ.१४) इत्यन्तग्रन्थभागस्य द्वितीयाध्यायस्थत्वेऽपि इतरव्याख्याद्वयानुरोधेनात्र निवेशः कृतः।

अनुभूतिस्वरूपाचार्यटिप्पणम्

(पसृष्टः)[संस्पृष्टः]।'अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः' इति श्रुतेरित्यर्थः। ननु माययाऽप्यसंस्पर्शो नारायणस्य जगत्कर्तृत्वं न स्यात्, तथा च वचनान्तरं विरुध्येत –'अतश्च संक्षेपमिमं शृणुध्वं नारायणः सर्वमिदं पुराणः। स सर्गकाले च करोति सर्गं संहारकाले च तदत्ति भूयः॥' इति। तत्राह—**अण्डमव्यक्तसंभवमिति**। यदिदं ब्रह्माण्डं [तत्] तावदव्यक्तसंभवम्, जाड्यानुविद्धत्वात्, 'मायां तु प्रकृतिं विद्याद्' इत्यादिश्रुतेश्च। ये चेमे भूरादयो लोका अण्डान्तर्वर्तिनो, या च जम्बूद्वीपादिसप्तद्वीपवती पृथिवी, तत् सर्वमव्यक्तप्रभवमेव। अण्डादिग्रहणस्योपलक्षणार्थत्वात् सर्वमेव द्वैतजातं मायाकार्यम्। मायाद्वारेणैव च नारायणस्य जगत्कर्तृत्वमित्यर्थः। यथा नीरस्याकाशतन्त्रत्वेऽपि न नीरगुणदोषाभ्यामाकाशः स्वतः संस्पृश्यते, तस्मिन्नेव नीरे प्रतिबिम्बितः तच्चलनादिना चलनादिमानि[व] भवति; तथा मायायाः नारायणतन्त्रत्वेऽपि [1]न

आनन्दगिरिकृतव्याख्या

**ननु परस्यात्मनो मायासम्बन्धादन्तर्यामित्वं शास्त्रप्रतिपाद्यत्वं च वक्तव्यम्। अन्यथा कूटस्थासङ्गाविषयाद्वितीयस्य तदयोगात्। तथा च शुद्धताऽसिद्धौ कथं यथोक्ता परदेवता शास्त्रादावनुस्मर्यते? शुद्धस्य हि तत्त्वस्यानुस्मरणमभीष्टफलवदभीष्टम्, तत्राह—** परोऽव्यक्तादिति। अव्यक्तम् **अव्याकृतं मायेत्यनर्थान्तरम्। तस्मात्** परो **व्यतिरिक्तः, तेनासंस्पृष्टोऽयं परः, 'अक्षरात्परतः परः' इति श्रुतेर्गृहीतः। तत्त्वतो मायासम्बन्धाभावेऽपि कल्पनया तदीयसङ्गतिमङ्गीकृत्यान्तर्यामित्वादिकमुन्नेयम्। यस्मादीश्वरस्य व्यतिरेको विवक्षितः, तस्मिन् अव्यक्ते [2]साक्षिसिद्धेऽपि [3]कार्यलिङ्गकमनुमानमुपन्यस्यति—** अण्डमिति। **अपञ्चीकृतपञ्चमहाभूतात्मकं हैरण्यगर्भं तत्त्वम्** अण्ड**मित्यभिलप्यते। तदव्यक्तात् पूर्वोक्तादुत्पद्यते। प्रसिद्धा हि श्रुतिस्मृतिवादेषु हिरण्यगर्भस्य मूलकारणादुत्पत्तिः। तथा च कार्यलिङ्गादव्यक्तादभिव्यक्तिरित्यर्थः[4]। हिरण्यगर्भे श्रुतिस्मृतिसमधिगतेऽपि कार्यलिङ्गकमनुमानमस्तीति मन्वानो विराडुत्पत्तिमुपदर्शयति –** अण्डस्येति। **उक्तस्याण्डस्य हिरण्यगर्भाभिधानीयस्यान्तरिमे भूरादयो लोका विराडात्मका वर्तन्ते। कार्यं हि कारणस्यान्तर्भवति। तेन हिरण्यगर्भान्तर्भूता भूरादयो लोका विराडात्मानस्तेन सृष्टा इति तल्लिङ्गाद्धिरण्यगर्भसिद्धिरित्यर्थः। लोकानेव पञ्चीकृतपञ्चमहाभूतात्मक-**

भाष्यार्कप्रकाशः

**अशोच्यानि**ति प्रथमो गीताशास्त्रश्लोकः। श्रीशांकरभाष्यावतारिकाग्रन्थारम्भगतश्चायं मङ्गलश्लोकः—[**नारायणः परोऽव्यक्तादिति**]। अस्यायमर्थः– अस्मिन् वेदान्तशास्त्रे दृग् दृश्यमिति द्वावेव पदार्थौ। तौ चाचार्यैः एव प्रतिपादितौ—'दृग् ब्रह्म दृश्यं माया' इति **दृग्दृश्यविवेके**। इमौ च परस्परविलक्षणौ। लोकेऽपि घटतद्दृशोर्भेददर्शनात्। इदमेवाह—**नारायणः परोऽव्यक्तादिति**।अव्याकृत-प्रकृति-शक्ति-मायादिनामकेश्वरोपाधिः **अव्यक्त**पदार्थः। तस्मात् **परो** विलक्षणः नारायणः। **न रीयते** न क्षीयते इति नरः परमात्मा। तस्येदं नारं जगत्। तद् **एति** जानातीति नारायणः दृग्रूपः प्रत्यगभिन्नः परमात्मा। प्रतीचः साक्षित्वस्य द्वैतिभिरप्यभ्युपगतत्वात्, 'नान्योऽतोऽस्ति द्रष्टा' इति द्रष्ट्रन्तरस्य श्रुत्यैव निषिद्धत्वाच्च न प्रत्यक्परयोर्भेदः।

**ननु** यदि दृग्दृश्ये द्वावेव पदार्थौ, दृश्यं चाव्यक्तं, तर्हि व्यक्तस्यास्य जगतः कुत्रान्तर्भावः? अत आह— **अण्डमव्यक्तसम्भवमिति**। अव्यक्तात् सम्भवो यस्य तदव्यक्तसम्भवम्। ब्रह्माण्डस्याव्यक्तसम्भवत्वाद् मृत्सम्भवस्य घटस्य मृदात्मत्वमिवाव्यक्तात्मत्वमेवेत्यव्यक्ते एव ब्रह्माण्डस्यान्तर्भावः।

**नन्वेवं** साङ्ख्यवत् तवाप्यचेतनकारणवादः प्राप्त इति चेत्, **मैवम्**। ईश्वराद्दृष्टादिसहकृताव्यक्तस्य, अव्यक्तावच्छिन्नस्येश्वरस्य वा जगत्कारणत्ववादात्। **अत्रेदं बोध्यम्** – दृश्यमिदमव्यक्तं न दृग्वत् स्वतन्त्रम्, किन्तु दृशि अध्यस्तमेव। अनध्यस्तत्वे तु दृश्यस्यास्य नित्यत्वप्रसङ्गात्। तस्मिंश्च दृश्ये दृशोऽप्यस्त्यध्यासः कोऽप्यनिर्वचनीयः। एवं दृग्दृश्ययोरितरेतराध्यासवशाद् दृश्यस्य चेतनत्वं, दृशः प्रपञ्चकारणत्वं च प्राप्तम्। यथा लोकेऽपि जीवदेहयोस्तादात्म्याध्यासाद् देहस्य चेतनत्वं, जीवस्य मनुष्यत्वादिकं च प्राप्तं, तद्वत्।

१. 'न नारायणस्तद्गुणदोषाभ्याम्' इति पाठः संभाव्यते। संस्पृश्यते इत्यस्यानन्तरम् 'अस्मन्नेव शरीरे प्रतिबिम्बितः तच्चलनादिना संस्पृश्यते' इत्यधिकः कुण्डलितः पाठः। २. अव्यक्तस्याज्ञानात्मकस्य साक्षिवेद्यत्वादिति भावः। ३. हैरण्यगर्भतत्त्वकारणत्वेन तत्सिद्धिरिति भावः। ४. अण्डस्येति शेषः।

अनुभूतिस्वरूपाचार्यटिप्पणम्

नीरगुणदोषाभ्यां संस्पृश्यते, किन्तु तत्प्रतिबिम्बितः तत्परिणामैरेव सर्वज्ञत्वसर्वेश्वरत्वसर्वजगत्कर्तृत्वादिधर्मवान् भवति। तदेवं नारायण एव एकं परमार्थतत्त्वम् , द्वैतं तु सर्वं मायामात्रमित्येव सर्वोपनिषदामर्थः, पुराणानां च सर्वेषाम् , गीतायाश्च।

आनन्दगिरिकृतव्याख्या

**विराडात्मत्वेन व्युत्पादयति—**सप्तद्वीपेति। **'सा पृथिव्यभवत्' इति श्रुतौ विराजो जन्म सङ्कीर्तितमित्यङ्गीकाराद् अशेषद्वीपोपेता पृथिवीत्यनेन सर्वलोकात्मको विराडेवोच्यते। चशब्देन विराजो हि हिरण्यगर्भे पूर्वोक्ताण्डात्मन्यन्तर्भावात् ततः सम्भवोऽनुकृष्यते। परमात्मा हि स्वाज्ञानद्वारा जगदशेषमुत्पाद्य [१]स्वात्मन्येवान्तर्भाव्याखण्डैकरससच्चिदानन्दात्मना स्वे महिम्नि तिष्ठतीत्यर्थः।**

अत्र च नारायण**शब्देनाभिधेयमुक्तम्। नरा एव नारा जीवास्त्वम्पदवाच्याः, तेषामयनमधिष्ठानं तत्पदवाच्यं परं ब्रह्म। तथा च कल्पितस्याधिष्ठानातिरिक्तस्वरूपाभावाद् , वाच्यस्य कल्पितत्वेऽपि लक्ष्यस्य ब्रह्ममात्रत्वाद् ब्रह्मात्मैक्यं विषयोऽत्र सूच्यते। तेनार्थाद् विषयविषयिभावः सम्बन्धोऽपि ध्वनितः।** परोऽव्यक्तादित्य**नेन मायासंस्पर्शाभावोक्त्या सर्वानर्थनिवृत्त्या परमानन्दाविर्भावलक्षणो मोक्षो विवक्षितः। तेन च तत्कामस्याधिकारो द्योतितः। [२]परिशिष्टेन तु वस्तुनो वास्तवमद्वितीयत्वमावेदितम्। तेन च वस्तुद्वारा परमविषयत्वं तज्ज्ञाननिष्ठायाः, तदुपायभूतकर्मनिष्ठायाश्चावान्तरविषयत्वम् इत्यर्थादुक्तमित्यवधेयम्॥ १॥**

**ननु नैवं साध्यसाधनभूतं निष्ठाद्वयमत्र भगवता प्रतिपाद्यते; भूमिप्रार्थितेन ब्रह्मणाऽभ्यर्थितस्य भगवतो भूमिभारापहारार्थं वसुदेवेन देवक्यामाविर्भूतस्य[३] तादर्थ्येन मध्यमं पृथासुतं प्रथितमहिमानं प्रेरयितुं धर्मयोरिहानूद्यमानत्वात्। अतो नास्य शास्त्रस्य निष्ठाद्वयं [४]परापरविषयभावमनुभवितुमलमिति। [५]तन्न। भगवतो धर्मसंस्थापनस्वाभाव्यध्रौव्याद् धर्मद्वयस्थापनार्थमेव प्रादुर्भावाभ्युपगमाद् , भूभार-परिहारस्य चार्थिकत्वाद् , अर्जुनं निमित्तीकृत्याधिकारिणं स्वधर्मप्रवर्तनद्वारा ज्ञाननिष्ठायामवतारयितुं गीताशास्त्रस्य प्रणीतत्वादुचितमस्य**

भाष्यार्कप्रकाशः

अत एव – 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुतिर्ब्रह्मणो जगद्धेतुत्वमवदत् , मायावच्छिन्नस्य ब्रह्मणो जगद्धेतुत्वात्। एवमपि न ब्रह्मणो जगत्प्रकृतित्वम् , तस्य निर्विशेषचिन्मात्रस्योपादानत्वाभावात्। किन्तु तदुपाधेर्मायाया एव, मायामयत्वादनृतजडदुःखा-त्मकस्य जगतः। अत एव केचिज्जगदाकारपरिणतमायाधिष्ठानत्वाद् ब्रह्म जगत्कारणमित्याहुः। तस्मादीश्वरकारणपक्षे ब्रह्मकारणपक्षे वा मायांशस्यैव जगत्प्रकृतित्वमिति युक्तमुक्तम्— **अण्डमव्यक्तसम्भवमिति**। **एतेन** अत्राव्यक्तशब्दस्येश्वराधिष्ठिता प्रकृतिरर्थ इति **सिद्धम्** इत्यनवद्यम्।

नन्वस्तु ब्रह्माण्डस्याव्यक्तसम्भवा[वत्वा]दव्यक्तात्मत्वम् , कथं पुनर्लोकानाम् ? अत आह— **अण्डस्यान्तरिति**। इमे लोकाः सप्तद्वीपा मेदिनी चाण्डस्यान्तः वसन्तीति शेषः। अण्डान्तःपातित्वाल्लोकानां भुवश्चाण्डात्मत्वमेवेति कृत्वा अण्डवदेषामपि सिद्ध-मव्यक्तात्मत्वमिति भावः। **एतेन** आकाशादिकममूर्तं, पृथिव्यादि मूर्तं, तत्कारणमव्यक्तं चेति त्रिविधं दृश्यमिति **सिद्धम्।**

**अत्रेदं बोध्यम्** – एक एव नारायणः परमात्मा सच्चिदानन्दरूपः सर्वदृश्यविलक्षणः शुद्धोऽद्वितीयश्च। स चाव्यक्तोपहित ईश्वर इत्युच्यते, ब्रह्माण्डोपाधिकस्तु हिरण्यगर्भ इति, लोकोपाधिकस्तु विराडिति। तत्र – अव्यक्तस्यानादित्वादीश्वरस्य नास्त्यौपाधिकमपि जन्मेत्यज एवेश्वरः। इतरयोरुपाध्यधीनजन्मवत्त्वान्नाजत्वम् , नापीश्वरत्वम् , किन्तु जातौ जीवावेव तौ। तयोश्च हिरण्यगर्भः प्रथमजः, विराट्पुरुषस्तु अनन्तरज इति विवेकः। अयमेव जीवेश्वरविभागः श्रुत्याऽप्युक्तः– 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः' इति। कार्यकारणभूतजीवेश्वरोपाधिद्वयविनिर्मुक्तं चिद्रूपं ब्रह्मेति श्लोकस्य परमार्थः। एतेन ब्रह्मातिरिक्तं सर्वमपि मायामयत्वान्मृषैव, मायायाः [६]सदसदनिर्वाच्यत्वेन [७]प्रबोधबाध्यत्वेन च मृषात्वाद्, एकमेवाद्वितीयं ब्रह्म अमायामयत्वात् सत्यमित्यद्वैतं **सिद्धम्।** एतदेव हि गीताशास्त्रे प्रधानप्रतिपाद्यम्।

१. 'आत्मन्येव' इति पा.। २. परिशिष्टेन ='अण्डमव्यक्तसंभवम्' इत्यादिना। 'परिशिष्टेन तु शब्देन वस्तुनो' इति पा.। ३. षष्ठ्यन्तस्य अनुवादक्रियायामन्वयः। कर्तुःशेषत्वविवक्षया षष्ठी। ४. प्रधानावान्तरेत्यर्थः। ५. 'तत्र' इति पा.। ६. अनेन सदसद्विलक्षणत्वं मिथ्यात्वमुक्तम्। ७.अनेन ज्ञाननिवर्त्यत्वरूपं मिथ्यात्वमुक्तम्।

**स भगवान्[१] सृष्ट्वेदं जगत्, तस्य च स्थितिं चिकीर्षुः मरीच्यादीन् अग्रे सृष्ट्वा प्रजापतीन् प्रवृत्तिलक्षणं धर्मं ग्राहयामास वेदोक्तम्। ततोऽन्यांश्च सनकसनन्दनादीनुत्पाद्य निवृत्तिलक्षणं धर्मं ज्ञानवैराग्यलक्षणं ग्राहयामास।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ननु तथापि न गीता व्याख्यानार्हा, अप्रमाणत्वात्। पौरुषेयं हि वचनमाप्तप्रणीतमेव प्रमाणम्। सम्यग्ज्ञानेनार्थमुपलभ्य यथोपलब्धमेव यः प्रतिपादयति सः **आप्तः** उच्यते। कृष्णस्य च न धर्मादिविषयं सम्यग्ज्ञानं भवति, गोपालत्वात्, गोपालान्तरवत्। अत एव न प्रयोजनादित्व[मत्त्व]मपि सम्भवति गीताया इत्याशङ्क्य, गीतायाः प्रामाण्यसमर्थनाय कृष्णस्याप्तत्वं तावत् समर्थयति— **स भगवानिति।** यद्यपि कृष्णो गोपालवेषधारी, तथापि स भगवानिति प्रसिद्ध इतिहासपुराणादिषु। ततो निरुप(म)चरितभगवच्छब्दवाच्यत्वप्रसिद्धिबलेनैव तस्य याथार्थ्यदर्शित्वमाप्तत्वं च सिद्धमित्यर्थः। 'उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति'। किञ्च नासौ जातितो गोपः, किन्तु य एव आदिकर्ता नारायणः हंसरूपेण धर्मप्रवर्तकः आसीत्, स एव धर्मपरिपिपालयिषया यदोर्वंशेऽवतीर्णः। कुतः तस्मिन् सकलक[ध]र्मगोप्तरि अनाप्तत्वशङ्केत्याह—**सृष्ट्वेदमि**त्यादिना। **प्रवृत्तिलक्षणं** यज्ञाध्ययनादिरूपं धर्मम्। न स्वबुद्धिपरिकल्पितं **काणादा**दिवत् ग्राहितवान्, किन्तु अनादिवेदोपनिबद्धमित्याह— **वेदोक्तमिति**। ननु यदि प्रवृत्तिलक्षण एव धर्मः परमेश्वरेण

आनन्दगिरिकृतव्याख्या

**निष्ठाद्वयविषयत्वमिति परिहरति—** स भगवानित्या**दिना** धर्मद्वयमर्जुनायोपदिदेशेत्य**न्तेन भाष्येण।**

**तत्र नेदं गीताशास्त्रं व्याख्यातुमुचितमाप्तप्रणीतत्वानिर्धारणात्, तथाविधशास्त्रान्तरवदित्याशङ्क्य मङ्गलाचरणस्योद्देश्यं दर्शयन् आदौ शास्त्रप्रणेतुराप्तत्वनिर्धारणार्थं सर्वज्ञत्वादिप्रतिज्ञापूर्वकं सर्वजगज्जनयितृत्वमाह—**स भगवानिति। **प्रकृतो नारायणाख्यो देवः सर्वज्ञः सर्वेश्वरः समस्तमपि प्रपञ्चमुत्पाद्य व्यवस्थितः। न च तस्यानाप्तत्वम्, ईश्वरानुगृहीतानामाप्तत्वप्रसिद्ध्या तस्य [२]परमाप्तत्वसिद्धेरित्यर्थः। ननु भगवता सृष्टमपि चातुर्वर्ण्यादिविशिष्टं हिरण्यगर्भादिलक्षणं जगन्न व्यवस्थितिमास्थातुं शक्यते, व्यवस्थापकाभावात्। न च परस्यैवेश्वरस्य व्यवस्थापकत्वम्, वैषम्यादिप्रसङ्गात्, तत्राह—** तस्य चेति। **सृष्टस्य जगतो मर्यादाविरहितत्वे शङ्किते तदीयां व्यवस्थां कर्तुमिच्छन् व्यवस्थापकमालोच्य [३]क्षत्रस्यापि क्षत्रत्वेन प्रसिद्धं धर्मं तथाविधमधिगम्य सृष्टवानित्यर्थः। सृष्टस्य धर्मस्य साध्यस्वभावतया साधयितारमन्तरेणासम्भवात्, [४]तस्यैव तदनुष्ठातृत्वानभ्युपगमात्, प्राणिप्रभेदानामधर्मप्रायाणां तदयोगात् कुतस्तदीया सृष्टिरित्याशङ्क्याह—** मरीच्यादीनिति। **तेषां भगवता सृष्टानां प्रजासृष्टिहेतूनां यागदानादिप्रवृत्तिसाध्यं धर्ममनुष्ठातुमधिकृतानां स्वकीयत्वेन [५]तदुपादानमुपपन्नमित्यर्थः। चैत्यवन्दनादिभ्यो [६]विशेषार्थं धर्मं विशिनष्टि—** वेदोक्तमिति। **ननु नैतावता जगदशेषमपि व्यवस्थापयितुं**

भाष्यार्कप्रकाशः

एवं तत्त्वं प्रतिपाद्य प्रकृतं वक्तुं तस्यैव मायावैभवमाह— **स चेति । भगवानिति** । 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां वर्गो भगो मतः' इति, 'उत्पत्तिं च विनाशं च भूतानामागतिं गतिम्। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति'[इति] वोक्तलक्षणः भगोऽस्यास्तीति भगवान्। 'तदस्यास्ती'ति मतुप्। **वासुदेवः** वसन्ति जगन्त्यस्मिन्निति, वसति जगतीति वा वासुः। दीव्यति भूतपालनादिना क्रीडति, स्वयं भासत इति वा देवः। वासुश्चासौ देवो वासुदेवः। नारायणस्यापि स्वोपाधिभूतमायया भगवत्त्वं वासुदेवत्वं चेति भावः। **सृष्ट्वेति**। संकल्पेनेति शेषः। अनेन प्रधानपरमाण्वादिजगत्कारणवादा निरस्ताः, प्रधानादीनामचेतनत्वेन संकल्पासम्भवात्, 'तदैक्षते'ति श्रुतौ सृष्टेः संकल्पपूर्वकत्वश्रवणात्, कुलालस्यापि संकल्पपूर्वकं घटादिनिर्माणमिति दर्शनाच्च। **स्थितिं** रक्षाम्। मरीच्यादीन् प्रजापतीन् **अग्रे** प्रथमं सृष्ट्वेति। हिरण्यगर्भद्वारेति भावः। **वेदोक्त**मिति धर्मविशेषणम्। ननु

१. 'स च भगवान् वासुदेवः' रा.पा.। २. अनुग्राहकस्य तस्याप्तत्वं कैमुतिकन्यायसिद्धमिति भावः। ३. 'तदेतत् क्षत्रस्य क्षत्रं यद्धर्मः'(बृ.उ.१.४.१४) इति क्षत्रस्यापि नियन्तृत्वेन श्रुतिप्रसिद्धमिति भावः। ४. तस्यैव= स्रष्टुः भगवत एव। ५. धर्मोपादानम्। तथा चानुष्ठातृलाभः। ६. व्यावृत्त्यर्थम्।

**[१]द्विविधो हि वेदोक्तो धर्मः– प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च [२]जगतः स्थितिकारणम्। प्राणिनां साक्षादभ्युदयनिःश्रेयस-हेतुर्यः स धर्मः ब्राह्मणाद्यैर्वर्णिभिः आश्रमिभिश्च श्रेयोऽर्थिभिरनुष्ठीयमानः। दीर्घेण कालेनानुष्ठातॄणां कामोद्भवाद्**

अनुभूतिस्वरूपाचार्यटिप्पणम्

गृहीतः, तर्हि निवृत्तिनिष्ठाः संन्यासिनो नेश्वरमार्गानुसारिण इत्याशङ्क्याह— **ततोऽन्यांश्चेति**। **ततो** मरीच्यादिभ्यः। ननु जगत्स्थितिं चिकीर्षुः धर्मं ग्राहयामासेत्यसङ्गतम् , यतः कार्यस्थितिः सो[स्वो]पादानाधीनेत्याशङ्क्याह— **द्विविधो हीति**। केचिन्मुक्तरूपेणावतिष्ठन्ते, केचित् प्रतिबिम्बरूपेणेत्येवंरूपेण स्थितेः [३]कारणं द्विविधो धर्मः 'पुण्यो वै पुण्येन कर्मणा' इत्यादिशास्त्रात् मूलकारणस्य वैषम्यनैर्घृण्यदोषपरिहारायावश्यमभ्युपगन्तव्यमित्यर्थः। ननु धर्मस्य क्षणिकत्वात् कालान्त-रीयफलहेतुत्वासम्भवात् न स्थितिहेतुत्वमित्याशङ्क्याह— **प्राणिनामिति**। कृषिसेवादिवत् स्थाय्यवान्तरकार्योत्पादनद्वारेण सम्भवति कालान्तरीयफलहेतुः धर्म इत्यर्थः। ननु तथापि न धर्मः सकलजगत्स्थितिहेतुः, सर्वैरननुष्ठानादित्याशङ्क्याह— **स धर्म** इति। अनधिकारिणामननुष्ठानं न दोषाय भवति। अधिकारिभिस्त्वनुष्ठीयमानो भवत्येव स्वफलभोगाक्षिप्तसकल-स्थितिहेतुरित्यर्थः। अस्तु जगत्स्थितिहेतुर्धर्मः; तथाप्यादिकर्तुः नावतारे हेतुरस्ति, पूर्वोपदिष्टस्यैव धर्मस्य परमेश्वराज्ञा-वशेनाप्रतिहत[वशेन प्रतिभान]संभवादित्याशङ्क्याह—**दीर्घेण कालेनेति**। ननु यदा कामिनां परमेश्वराज्ञा[वशत्वा]संभवाद्

आनन्दगिरिकृतव्याख्या

**शक्यते, प्रवृत्तिमार्गस्य पूर्वोक्तधर्मं प्रति नियतत्वेऽपि निवृत्तिमार्गस्य तेन व्यवस्थापनायोग्यत्वात् , तत्राह—** ततोऽन्यांश्चेति। **निवृत्ति-रूपस्य धर्मस्य शमदमाद्यात्मनो गमकमाह—** ज्ञानेति। **विवेकवैराग्यातिशये शमाद्यतिशयो गम्यते। ततो विवेकादि तस्य गमकमित्यर्थः। धर्मे बहुविदां विवाददर्शनात् , जगतः [४]स्थेम्ने कारणीभूतधर्मान्तरमपि स्रष्टव्यमस्तीत्याशङ्क्याह—** द्विविधो हीति। **अति-प्रसङ्गाप्रसङ्गव्यावृत्तये प्रकृतं धर्मं लक्षयति—** प्राणिनामिति। **प्रवृत्तिलक्षणो धर्मोऽभ्युदयार्थिनां साक्षादभ्युदयहेतुः, निश्रेयसार्थिनां परम्परया निःश्रेयसहेतुः। निवृत्तिलक्षणस्तु धर्मः साक्षादेव निःश्रेयसहेतुरिति विभागः। ज्ञानस्यैव निःश्रेयसहेतुत्वेऽपि शमादीनां ज्ञानद्वारा मोक्षहेतुत्वम्। ज्ञानातिरिक्तव्यवधानाभावाच्च** साक्षादित्युक्तम्[५]**। यद्येवं धर्मो लक्ष्यते, तर्हि वर्णित्वमाश्रमित्वं चोपेक्ष्य सर्वैरेव पुरुषार्थार्थिभिर्द्वावपि धर्मौ यथायोग्यमनुष्ठेयावित्यनुष्ठातृनियमासिद्धिरित्याशङ्क्याह—** ब्राह्मणाद्यैरिति। **अर्थित्वाविशेषेऽपि श्रुतिस्मृति-पर्यालोचनयाऽनुष्ठानान्नियमसिद्धिरित्यर्थः। नित्यनैमित्तिकेषु यावज्जीवमनुष्ठानम् ; काम्येषु [६]करणांशे रागाधीना प्रवृत्तिः, इतिकर्तव्यतांशे वैधीति विभागेऽपि कदाचिदेवानुष्ठानमिति विभागमभिप्रेत्याह—** दीर्घेणेति। **अथ यथोक्तधर्मवशादेव जगतो विवक्षितस्थितिसिद्धेर्भगवतो नारायणस्यादिकर्तुः अनेकानर्थकलुषितशरीरपरिग्रहासम्भवाद् अन्यस्यैव कस्यचिदनाप्तस्य वैषम्यनैर्घृण्यवतो नि[वि]ग्रहपरिग्रहद्वारेण गीताशास्त्रप्रणयनमिति कुतोऽस्याप्तप्रणीतत्वम्? तत्राह—** अनुष्ठातॄणामिति। **अथवा यथोक्तशङ्कायां** दीर्घेणेत्या**रभ्योत्तरम्। महता कालेन**

भाष्यार्कप्रकाशः

जगत्स्थितिचिकीर्षोरीश्वरस्य किमिति प्रवृत्तिनिवृत्तिधर्मग्राहणं मरीच्यादिभिः, सनकादिभिश्चेत्यत आह— **स इति**। **हि** यस्मात् प्रवृत्ति-लक्षणो निवृत्तिलक्षणश्च स द्विविधो वेदोक्तो धर्मः जगतः स्थितिकारणमित्यन्वयः। धर्मस्य लक्षणमाह— **प्राणिनामिति**। अभ्युदय-निःश्रेयसहेतुः ब्राह्मणाद्यैर्वर्णिभिराश्रमिभिश्चानुष्ठीयमानो यः स धर्मः। आद्यशब्दात् क्षत्रियवैश्यशूद्रग्रहणम्। वर्ण एषामस्तीति वर्णिनः, आश्रमः एषामस्तीत्याश्रमिणः ब्रह्मचारिगृहस्थवानप्रस्थसंन्यासिनः। ब्रह्मचार्याद्यनुष्ठीयमानत्वे सति अभ्युदयनिःश्रेयसान्यतरहेतुत्वं धर्मस्य लक्षणम्। एकस्य धर्मस्योभयहेतुत्वाभावादन्यतरेति। ईश्वरेऽतिव्याप्तिवारणाय सत्यन्तम्। अधर्मेऽतिव्याप्तिवारणाय विशेष्य-दलम्। प्रवृत्तिलक्षणो धर्मः कर्मनिष्ठाशब्देन वक्ष्यमाणः अभ्युदयस्य स्वर्गादिरूपस्य चित्तशुद्धिरूपस्य वा हेतुः, निवृत्तिलक्षणो धर्मः

---

१. 'स द्विविधः' इति रा.पा.। २. 'तत्रैको जगतः' इति पा.। ३. निमित्तकारणं धर्मः। कारणम् अभ्युपगन्तव्यमित्यन्वयः। ४. **स्थेम्ने** स्थैर्याय स्थितये इति यावत्। ५. ज्ञानातिरिक्तमद्वारीकृत्य हेतुत्वमेव साक्षात्पदेन विवक्षितमिति भावः। ६. फलसाधनीभूतप्रधानांशे इत्यर्थः। इतिकर्तव्यता अङ्गम्।

**हीयमानविवेक[१]विज्ञानहेतुकेनाधर्मेणाभिभूयमाने धर्मे, प्रवर्धमाने चाधर्मे जगतः स्थितिं परिपिपालयिषुः स आदिकर्ता नारायणाख्यो विष्णुः भौमस्य ब्रह्मणो ब्राह्मणत्वस्य रक्षणार्थं देवक्यां वसुदेवादंशेन [२]कृष्णः किल सम्बभूव। ब्राह्मणत्वस्य हि रक्षणेन रक्षितः स्याद् वैदिको धर्मः, तदधीनत्वाद् [३]वर्णाश्रमभेदानाम्।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

हीयमानं विवेकज्ञानं भवति, तत्कार्येण चाधर्मेण धर्मस्याभिभवः संभवति, तदा तर्हि धर्मसंरक्षणायेश्वरः प्रादुर्भूत इति वक्तव्यम्। [किम्] इदमुक्तम् - भूमौ भवं यद् ब्रह्मशब्दाभिधेयं ब्राह्मणत्वम् , तस्य रक्षणायेति? तत्राह— **ब्राह्मणत्वस्य हीति**।

ननु कृष्णो नेश्वरः, शरीरवत्त्वात् , प्राण्यन्तरवत्। ततः कृष्णस्य परमेश्वरत्वमुपादायाप्तत्वसमर्थनमयुक्तमित्या-

आनन्दगिरिकृतव्याख्या

**कृतत्रेतात्यये द्वापरावसाने साधकानां कामक्रोधादिपूर्वकादविवेकादधर्मबाहुल्याद् धर्माभिभवादधर्माभिवृद्धेश्च जगतो मर्यादाभेदे तदीयां मर्यादामात्मनिर्मितां पालयितुमिच्छन् प्रकृतो भगवानेतदर्थेन चातुर्वर्ण्यादिसंरक्षणार्थं लीलामयं [४]मायाशक्तिप्रयुक्तं स्वेच्छाविग्रहं जग्राहेत्यर्थः। 'भौमस्य ब्रह्मणो गुप्त्यै वसुदेवादजीजनत्' इति स्मृतिमनुसृत्य पदद्वयमनूद्य व्याचष्टे—** भौमस्येति। अंशेनेति। **स्वेच्छानिर्मितेन मायामयेन स्वरूपेणेत्यर्थः।** किल इत्य**स्मिन्नर्थे पौराणिकी प्रसिद्धिरनूद्यते। न हि भगवतो व्यतिरिक्तस्येदं जन्मेति युज्यते, बहुविधागमविरोधादिति भावः। ननु वैदिकधर्मसंरक्षणार्थं भगवतो जन्म, 'यदा यदा हि धर्मस्य' इत्यादिदर्शनात् ; किमिदं ब्राह्मणत्वस्य रक्षणार्थमिति? तत्राह—** ब्राह्मणत्वस्य हीति। **तथापि वर्णाश्रमभेदव्यवस्थापनं विना कथं यथोक्तधर्मरक्षणमित्याशङ्क्याह—** तदधीनत्वादिति। **ब्राह्मणं हि पुरोधाय क्षत्रादि प्रतिष्ठां प्रतिपद्यते, याजनाध्यापनयोस्तद्धर्मत्वात् , तद्द्वारा च वर्णाश्रमभेदव्यवस्थापनात्। अतो ब्राह्मण्ये रक्षिते सर्वमपि सुरक्षितं भवतीत्यर्थः।**

भाष्यार्कप्रकाशः

ज्ञाननिष्ठाशब्देन वक्ष्यमाणः निःश्रेयसस्य मोक्षस्य हेतुरिति बोध्यम्। **हीयमानेति**। हीयमानं क्षीयमाणं विज्ञानमेव हेतुर्यस्य तेन हीयमानविज्ञानहेतुकेन। 'शेषाद्विभाषा' इति कः। अधर्मस्य विज्ञानक्षय एव हेतुरित्यर्थः। **यद्वा** हेतुरेव हेतुकः इति स्वार्थे कः। हीयमानेन विज्ञानेन हेतुना, विज्ञानक्षयाद्धेतोरित्यर्थः। **परिपिपालयिषुः** परिपालयितुमिच्छुः। **आदिकर्तेति**। जगत उपादानं निमित्तं चेत्यर्थः। **यद्वा** प्रधानकर्ता। हिरण्यगर्भस्याप्रधानकर्तुरन्यस्य सत्त्वादियुक्तिः। **अनेन** चाभिन्ननिमित्तोपादानकारणवादेन प्रधानकारण-वादिनः सांख्याः, ईश्वरनिमित्तकारणवादिनस्तार्किकादयश्च **पराकृताः**। न च कथमेकस्यैव कारणवस्तुनः निमित्तत्वमुपादानत्वं चेत्युभयमिति वाच्यम् , मायया तत्सम्भवात् , 'यतो वा' इति 'तत्सृष्ट्वा' इति च श्रुतेः। श्रौतस्यार्थस्य प्रबलस्य दुर्बलयुक्त्यवष्टम्भेन प्रतारणायोगाच्च, ऊर्णनाभेस्तन्तुसन्ततिं प्रत्यभिन्ननिमित्तोपादानत्वदर्शनाच्च। **विष्णुर्व्यापकः** परमात्मा सत्त्वगुणप्रधानमायावच्छिन्न-चैतन्यलक्षणः। **भौमस्येति**। भूलोकस्थस्य **ब्रह्मणो** वेदस्य[५]। **अंशेनेति**। माययेत्यर्थः। कथमन्यथा निरंशस्य परमात्मनः स्यादंशः? **किलेत्य**लीके वार्तायां वा। उभयथाऽपि मृषैवायं कृष्णावतार इति फलितम्। अत्र 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम्॥' इति गीतावचनमनुसंधेयम्।

**ननु** नष्ट एव धर्मो रक्षणीयः; तथा च धर्मस्य रक्षणार्थमित्येव वक्तव्यम् ; किमिति ब्राह्मणत्वस्येत्युक्तम्? अत आह— **ब्राह्मणत्वस्येति**। याजनाध्यापनादिरूपब्राह्मणधर्मस्य **रक्षणं** ब्राह्मणत्यागब्राह्मणेतरस्वीकारादिरूपविप्लवात् त्राणम्। तत्र हेतुमाह— **तदधीनत्वादिति**। ब्राह्मणाधीनत्वात् । येन येन वर्णिना येन येनाश्रमिणा यद्यत् कर्म यथा यथाऽनुष्ठेयं तेन तेन तत्तत् तथा तथा विद्वान् ब्राह्मणोऽनुष्ठापयतीत्यर्थः।

---

१. 'विवेक' इति नास्ति रा.पाठे। २. 'कृष्णः' इति नास्ति क्वचित् । ३. 'वर्णाश्रमधर्मभेदानाम्' इति पा.। ४. 'मायाशक्तिप्रयुक्तस्वेच्छाविग्रहं' इति पा.।
५. भाष्ये—'भौमस्य ब्रह्मणो ब्राह्मणत्वस्य चाभिरक्षणार्थम्' इति रा.पा.। तदनुसारेण ब्रह्मपदं वेदपरतया व्याख्यातम्।

**स च भगवान् ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा सम्पन्नस्त्रिगुणात्मिकां वैष्णवीं स्वां मायां मूलप्रकृतिं वशीकृत्य[१] अजोऽव्ययो भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोऽपि सन् स्वमायया देहवानिव, जात इव च**

अनुभूतिस्वरूपाचार्यटिप्पणम्

शङ्क्याह— **स च भगवान्** इति। ज्ञानशक्तिः, ऐश्वर्यशक्तिश्च, **बल**मवष्टम्भो, **वीर्यं** पराक्रमः, **तेजः** प्रागल्भ्यम्। एतैः सदा सम्पन्नः स भगवान् कृष्णः। तस्मादैश्वर्यगुणोपलम्भेन बाधितमनुमानमित्यर्थः। ननु यो जीवदेहः स धर्माधर्माधीनो दृष्टः। परमेश्वरस्य वेदवेद्यस्य देवदेवस्य न धर्मादिसम्बन्धोऽस्ति, 'स पर्यगात् शुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम्' इत्यादिश्रुतेः। तत् कथं देहादिसम्बन्ध इत्याशङ्क्याह—**त्रिगुणात्मिकामि**ति। लौकिकमायाविनो व्याघ्रादिशरीरवत् स्वमाययैव शरीरं निर्माय धर्मसंरक्षणादिकं करोतीत्यर्थः। ननु लौकिकस्यापि मायाविनो द्रव्यादिलिप्सया व्याघ्रादिशरीरनिर्माणम् , तथा

आनन्दगिरिकृतव्याख्या

**नन्वेवमपि भगवतो नारायणस्य शरीरादिमत्त्वे सत्यस्मदादिभिरविशेषादनीश्वरत्वप्रसक्तिरित्याशङ्क्य ज्ञानादिकृतं विशेषमाह—** स चेति। ज्ञानं **ज्ञप्तिरर्थपरिच्छित्तिः,** ऐश्वर्य**मीश्वरत्वं स्वातन्त्र्यम् ,** शक्ति**स्तदर्थनिर्वर्तनसामर्थ्यम् ,** बलं **सहायसम्पत्तिः,** वीर्यं **पराक्रमवत्त्वम् ,** तेजस्तु **प्रागल्भ्यम् अप्रधृष्यत्वम्। एते च षड् गुणाः सर्वविषयाः सर्वदा भगवति वर्तन्ते। तथा च तस्य शरीरादिमत्त्वेऽपि नास्मदादिसाम्यमित्यर्थः। अथैवमपि कथमीश्वरस्यानादिनिधनस्य नित्यशुद्धबुद्धमुक्तस्वभावस्य स्वभावविपरीतं जन्मादि सम्भवति? न हि भूतानामीशिता [२]स्वतन्त्रः स्वात्मनोऽनर्थं स्वयमेव सम्पादयितुमर्हति। न चास्य देहादिग्रहे किमपि फलमुपलभ्यते, तत्राह—** त्रिगुणात्मिकामिति। **सिसृक्षितदेहादिगतवैरूप्यसिद्ध्यर्थमिदं विशेषणम्। तस्याः व्यापकत्वं वक्तुं** वैष्णवी**मित्युक्तम्। ईश्वरपारवश्यं तस्या दर्शयति—** स्वामिति। **तस्याश्च प्रतिभासमात्रशरीरत्वमेव, न तु वस्तुत्वमित्याह—** मायामिति। **तस्या नानाविधकार्याकारेण परिणामित्वं सूचयति—** मूलप्रकृतिमिति। **ईश्वरस्य प्रकृत्यधीनत्वं वारयति—** वशीकृत्येति। नित्यत्वं [३]**कार्याकारविरहितत्वं,** शुद्धत्व**मकारणत्वं,** बुद्धत्व**मजडत्वं,** मुक्तत्वम् **अविद्याकामकर्मपारतन्त्र्यराहित्यम्। न च नित्यत्वादयः संसारावस्थायामसन्तो मोक्षावस्थायां सम्भवन्तीति युक्तमित्याह—** स्वभाव इति। **देहग्रहे प्राधान्यं मायाया दर्शयितुं पुनः** स्वमाययेत्यु**क्तम्। 'स वा अयं पुरुषो जायमानः शरीरमभि सम्पद्यमानः' इति श्रुतिमाश्रित्याह—** देहवानिति। **इवकाराभ्यां देहादेरवस्तुत्वेन कल्पितत्वं द्योत्यते। धर्मद्वयोपदेशद्वारा प्राणिवर्गस्या-**

भाष्यार्कप्रकाशः

नन्वजस्य नारायणस्य धर्मसंस्थापनरूपलोकानुग्रहार्थमपि कथं जन्मादिसम्भवः? अत आह— **स चेति**। भगवानित्यस्यार्थं स्वयमेवाह— **ज्ञानेति**। वसिष्ठादयो जीवाश्च केचिज्ज्ञानादिमन्तो दृश्यन्त इत्यत आह— **स चेति**। जीवानां ज्ञानादिकमीश्वरप्रसादादिलभ्यम् , ईश्वरस्य तु स्वतःसिद्धम् 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे'ति श्रुतेरिति भावः। कुत ईश्वरस्य भगः स्वाभाविकः? अत आह— **प्रकृतिं वशीकृत्येति**। जीवास्तु प्रकृतिपरतन्त्राः। अत एवेश्वरस्य मायित्वं ब्रूते श्रुतिः– 'मायिनं तु महेश्वरम्' इति। कस्येयं प्रकृतिः? अत आह— **वैष्णवीं स्वामिति**। स्वस्य विष्णोः सबन्धिनीं स्वोपाधिभूतामित्यर्थः। तस्याः स्वरूपमाह— **त्रिगुणेति**। सत्त्वरजस्तमोगुणात्मिका; सत्त्वादिगुणाश्रयातिरिक्तप्रकृतिपदार्थाभावादिति भावः। एतेन सत्त्वरजस्तमोगुणोपहितानां विष्णुब्रह्मरुद्राणां भेदः परास्तः, मायोपाधिकत्वेन त्रयाणामेकत्वात्। एवं प्रकृतिवशित्वादेव नेश्वरस्य कर्माधीनजन्मसद्भाव इत्याह— **अज इति**। जन्माभावादेव न लय इत्याह— **अव्यय इति**। 'जायते मरणायैव म्रियते जन्मने पुनः' इति, 'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च' इति स्मरणाज्जन्ममरणयोः सामानाधिकरण्यमिति भावः। **ईश्वरः** ईशनशीलः। एवं मायिकं रूपमुक्त्वा तात्त्विकमाह—**नित्येति**। **नित्यः** सत्यः, 'नित्योऽनित्यानाम्' इति श्रुतेः, 'तत्सत्यं स आत्मे'ति श्रुतेश्च। कुतो नित्यत्वम्? अत आह— **शुद्ध इति**। उपाधिसंसृष्टस्य मलिनस्य जीवस्य हि उपाधिवशाद् भवत्यनित्यत्वम्। तस्य निष्कृष्टं स्वरूपमाह— **बुद्ध इति**। ज्ञानस्वरूप

१. द्र.भ.गी. ४-६। २. 'स्वतन्त्रश्चात्मनोऽनर्थं' इति पा.। ३. 'कार्याकारविरहित्वं' इति पा.।

**लोकानुग्रहं कुर्वन् लक्ष्यते। स्वप्रयोजनाभावेऽपि भूतानुजिघृक्षया वैदिकं[1] धर्मद्वयमर्जुनाय शोकमोहमहोदधौ निमग्नाय उपदिदेश, गुणाधिकैर्हि गृहीतोऽनुष्ठीयमानश्च धर्मः प्रचयं गमिष्यतीति। तं धर्मं भगवता यथोपदिष्टं वेदव्यासः सर्वज्ञो**

अनुभूतिस्वरूपाचार्यटिप्पणम्

ईश्वरस्य स्वप्रयोजनं किञ्चिदस्ति न वा? न चेत् , न प्रवृत्तिर्धर्मोपदेशे, अस्ति चेत् अनीश्वरत्वप्रसङ्गः इत्याशङ्क्याह— **स्वप्रयोजनाभावेऽपीति**। लौकिकस्य तत्त्वविदः शिष्यानुशासनप्रवृत्तिवत् प्रवृत्तिरित्यर्थः। अर्जुनायेति पुरुषविशेष(ण) ग्रहणकारणमाह— **गुणाधिकैर्हीति**। तदेवं कृष्णस्य धर्मोपदेशकस्य परमेश्वरावतारत्वेन परमाप्तत्वमुक्त्वा तदुपदिष्टे धर्मे श्लोकानां कर्तुः व्यासस्यापि परमाप्तत्वप्रसिद्धेः नाप्रमाणं गीताशास्त्रमित्याह— **तं धर्ममिति**।

आनन्दगिरिकृतव्याख्या

**भ्युदयनिःश्रेयस[2]तत्परत्वापादनं** लोकानुग्रहः। **यद्यपि कूटस्थः स्वतन्त्रो नित्यत्वादिलक्षणश्चायमीश्वरः स्वतो दृश्यते, तथापि यथोक्तमायाशक्त्या देहादि गृहीत्वा प्राणिनामनुग्रहमादधानो न स्वभावविपर्ययं [3]प्रयातीत्यर्थः। ननु 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति न्यायाद् ईश्वरस्याप्तकामतया कृतकृत्यस्य प्रयोजनाभावाद् , अनुग्राह्याणां चाद्वैतवादे व्यतिरिक्तानामसत्त्वान्न धर्मद्वय-मुपदेष्टुमुचितमिति, तत्राह—** स्वप्रयोजनेति। **कल्पितभेदभाञ्जि भूतान्युपादाय तदनुग्रहेच्छया चैत्यवन्दनादिविलक्षणं धर्मद्वयमर्जुनं निमित्तीकृत्याप्तकामोऽपि भगवानुपदिष्टवानित्यर्थः। अर्जुनस्योपदेशापेक्षाऽस्तीति दर्शयितुं विशिनष्टि—** शोकेति। **ननु भूतानुग्रहे कर्तव्ये किमित्यर्जुनाय धर्मद्वयं भगवतोपदिश्यते? तत्राह—** गुणाधिकैरिति। **प्रचयं गमिष्यतीति मत्वा धर्मद्वयमर्जुनायोपदिदेशेति सम्बन्धः। अथ[4] सुगतोपदिष्टधर्मवदयमपि भगवदुपदिष्टो धर्मो न प्रामाणिकोपादेयतामुपगच्छेदित्याशङ्क्य , वेदोक्तत्वान्नास्य तत्तुल्यत्वमित्युक्त-मित्यभिप्रेत्य शिष्टपरिगृहीतत्वाच्च मैवमित्याह—** तं धर्ममिति। **अधर्मे धर्मबुद्धिर्वेदव्यासस्य जातेत्याशङ्क्याह—** सर्वज्ञ इति।

भाष्यार्कप्रकाशः

इत्यर्थः, 'सच्चिदानन्दं ब्रह्मे'ति श्रुतेः। ज्ञातुर्हि ज्ञानं स्वरूपम्। ज्ञातृत्वं चास्य 'स [यः] सर्वज्ञः सर्वविदि'ति श्रुतम्। सर्वज्ञत्वं सर्वावभासकत्वम् , नेदं मायाधर्मः , मायाया जडत्वेनेश्वरभास्यत्वात्। अत एवायं मुक्तः, न तु जीववत् कदाऽपि बद्धः, अज्ञानानभिभूतत्वादिति भावः। **इवेति**। न तु वस्तुत इत्यर्थः। इवशब्दः कुर्वन्नित्यत्रापि सम्बध्यते। न हि वस्तुतः परमात्मनः लोकानुजिघृक्षाऽपि सम्भवति, निष्कामत्वादीश्वरस्य। **यद्वा** – परमार्थतः परमात्मनः कामासम्भवेऽपि व्यवहारत ईश्वरस्य लोकानुग्रहः सम्भवत्येव; जन्मदेहौ तु व्यवहारतोऽपि न सम्भवत इत्यभिप्रेत्य कुर्वन्निवेति नोक्तमाचार्यैः। व्यवहारदशायामपि कारणोपाधिर्हीश्वरः। **लक्ष्यत इति**। अज्ञैरिति शेषः। न हि प्राज्ञा ईश्वरं जातं पश्यन्ति। स्वप्रयोजनाभावेऽपि भूतानुजिघृक्षया भगवानर्जुनाय धर्मद्वयमुपदिदेशेति सम्बन्धः। पूर्णकामस्य कुतः शिष्योपदेशे प्रवृत्तिः? अत आह— **भूतेति**। [5]भूताः प्राणिनः, तेषामनुग्रहीतुमिच्छा भूतानुजिघृक्षा, तया। शोकमोहावेव महोदधिः, शोकयुक्तो मोहः शोकमोहः, स एव महोदधिरिति वा शोकमोहमहोदधिस्तस्मिन्निति। एतेनोपदेशस्य शोकमोहनिरासः फलमिति व्यज्यते। किमित्यर्जुनायोपदेशः? अत आह— **गुणाधिकैरिति**। **गृहीतो** ज्ञातः, **प्रचयम्** अभिवृद्धिम्। गुणाधिकत्वादर्जुनस्य यद्ययं मत्तः सकाशाद् धर्मं गृहीत्वाऽनुतिष्ठेत् , तर्हि 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इति न्यायादितरजनोऽप्यनुतिष्ठेत् । तं च दृष्ट्वा तदितरजनः इत्येवमभिवृद्धिमीयान्मदुक्तः पन्था धर्मस्येति मत्वा भगवानर्जुनाय धर्ममुपदिदेशेति भावः। अनेन च विद्वानाचार्यः सच्छिष्यायैव धर्मं बोधयेदिति सूच्यते। आचार्यस्य स्वयं कृतार्थत्वेन लोकानुग्रह-प्रयोजनवैमुख्ये सति सम्प्रदायोच्छेदप्रसङ्गात्। **यथोपदिष्टमिति**। उपदिष्टमुपदेशः, भावे क्तः। तदनतिक्रम्य यथोपदिष्टम्। **यद्वा** – तथेति, यथा भगवतोपदिष्टं तथेत्यन्वयः। **उपनिबबन्ध** ग्रथितवान्।

१. 'वैदिकं हि' इति पा.। २. 'प्रवणत्वापादनम्' इति पा.। ३. 'पर्येतीत्यर्थः' इति पा.। ४. 'अथ तथापि' इति पा. क्वचित्। 'तथागतोपदिष्ट' इति पा.। ५. भूतानीति पाठः संभाव्यते।

**भगवान् गीताख्यैः सप्तभिः श्लोकशतैरुपनिबबन्ध[१]।**

**तदिदं गीताशास्त्रं समस्तवेदार्थसारसंग्रहभूतं दुर्विज्ञेयार्थं तदर्थाविष्करणायानेकैर्विवृतपदपदार्थवाक्यार्थन्याय-मपि अत्यन्तविरुद्धानेकार्थत्वेन लौकिकैर्गृह्यमाणमुपलभ्याहं विवेकतोऽर्थनिर्धारणार्थं संक्षेपतो विवरणं करिष्यामि।**

अनुभूतिस्वरूपाचार्यटिप्पणम्

वेदमूलत्वादपि वेदवत् प्रमाणं गीताशास्त्रम् , ततो व्याख्यानार्हमित्याह— **तदिदमि**ति। तथापि स्फुटार्थत्वादव्या-ख्येयमित्याशङ्क्याह— **दुर्विज्ञेयार्थमिति**। तथाप्यनेकैः **वृत्तिकारै**स्तदर्थप्रकटनाय यत्नस्य कृतत्वात् तव प्रयासो व्यर्थ इत्याशङ्क्याह— **तदर्थाविष्करणायेति**। विवृतानि पदानि पदार्थाश्च वाक्यार्थश्च तदनुग्राहको न्यायश्च यस्य शास्त्रस्य [तत्] तथोक्तम्। कर्मैव पुरुषार्थसाधनं गीतार्थ इति केचित् , कर्मसमुच्चितं ज्ञानमित्येके, केवलविज्ञानमित्यन्ये, एवमत्यन्त-विरुद्धानेकार्थत्वेनेत्यर्थः।

आनन्दगिरिकृतव्याख्या

**'कृष्णद्वैपायनं विद्धि व्यासं नारायणं प्रभुम्' इति स्मृतेः, सज्जनोपकारकभगवदवतारत्वाच्च व्यासस्य नान्यथाबुद्धिरित्याह—** भगवानिति।

**गीताशास्त्रस्यानाप्तप्रणीतत्वमपाकृत्य व्याख्येयत्वमुपपादितमुपसंहरति—** तदिदमिति। **पौरुषेयस्य वचसो मूलप्रमाणाभावेना-प्रामाण्यमिति मत्वा विशिनष्टि—** समस्तेति। **शास्त्राक्षरैरेव तदर्थप्रतिपत्तिसम्भवे किमिति व्याख्यानमित्याशङ्क्याह—** दुर्विज्ञेयार्थमिति। **'पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना। आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम्॥' इत्यादिक्रमेणास्य शास्त्रस्य पूर्वाचार्यैर्व्याख्या-तत्वात् किमर्थमिदमारभ्यते, गतार्थत्वात् , तत्राह—**तदर्थेति। **गीताशास्त्रार्थस्य प्रकटीकरणार्थं पदविभागस्तदर्थोक्तिः समासद्वारा वाक्या-र्थनिर्देशस्तत्रापेक्षितो न्यायश्चाक्षेपसमाधानलक्षणो** वृत्तिकारैर्दर्शितः**, तथापि तथाविधमेव शास्त्रं शास्त्रपरिचयशून्यैः [२]समुच्चयवादिभिः विरुद्धार्थत्वेनानेकार्थत्वेन च गृहीतमालक्ष्य तद्बुद्धिमनुरोद्धुमिदमारब्धव्यमित्यर्थः। येषां प्राचीने व्याख्याने बुद्धिरप्रविष्टा तेषां सम्प्रतितन एतस्मिन्नसौ प्रवेक्ष्यतीति कुतो नियमस्तत्राह—** विवेकत इति। **पूर्वव्याख्याने तत्तदर्थनिर्धारणार्थो न्यायः[३] सङ्कीर्णवद् भातीति न तत्र केषाञ्चिन्मनीषा समुन्मिषति, प्रकृते त्वसंकीर्णतया तत्तत्पदार्थनिर्णयोपयोगी न्यायो विव्रियते। तेनात्र मन्दमध्यमयोरपि बुद्धिरव-तरतीत्यर्थः। किञ्चानपेक्षिताधिकग्रन्थसद्भावान्न प्राचीने व्याख्याने श्रोतॄणां प्रवृत्तिः, अत्र त्वपेक्षिताल्पग्रन्थे विवरणे प्रायशः सर्वेषां प्रवृत्तिः स्यादिति मत्वाऽऽह—** संक्षेपत इति।

**नन्वनाप्तप्रणीतत्वाभावेऽपि नेदं शास्त्रं व्याख्येयम् , विषयाद्यनुबन्धस्यानभिहितत्वेन [४]अभावादित्याशङ्क्य सर्वव्यापाराणां**

भाष्यार्कप्रकाशः

**अनेकै**र्वृत्तिकारादिभिर्विद्वद्भिः। **उपलभ्य** दृष्ट्वा। **संक्षेपत इति**। ग्रन्थविस्तरभयादिति भावः। [५]लोकानुग्रहार्थमेवाचार्यस्य प्रवृत्तत्त्वात् तत्क्रियाफलस्य सुकृतादेरात्मगामित्वं [६]माऽस्त्वित्यभिप्रेत्याह— **करिष्यामीति**। यदि करिष्ये इत्युच्येत तर्हि तज्जन्य-सुकृतादिना बन्धः स्यात् कवेरिति बोध्यम्।

१. तत्र च प्रायशः श्रीकृष्णमुखनिःसृतानेव श्लोकानलिखत्। कांश्चित् तत्संगतये स्वयं व्यरचयत् । यथोक्तं गीतामाहात्म्ये - 'गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः। या स्वयं पद्मनाभस्य मुखपद्माद् विनिःसृता।' इति श्रीधरीये। अत्र च व्यासस्य ज्ञानकार्यत्वेन ज्ञानोपदेशे प्राधान्यम् , कृष्णस्य तु बलकार्यत्वेन ज्ञानोपदेशस्य प्रासङ्गिकत्वमित्यभिप्रेत्य मध्वाचार्याः व्यासावतारपुरस्कारेण गीताशास्त्रमवतारयामासुः। वस्तुतस्तु ज्ञानावतारत्वेऽपि भगवता व्यासेन श्रीकृष्णो-पदिष्टत्वेनैव गीताशास्त्रस्य निबद्धत्वेन कृष्णावतारोपवर्णनेनैव गीतावतारणौचित्यमिति। २. 'समुच्चयासमुच्चयवादिभिः' इति पा.। ३. 'निर्धारणार्थोपन्यासः' इति पा.। ४. विषयाद्यनुबन्धस्याभावादिति संबन्धः। 'विषयाद्यनुबन्धस्यानभिहितत्वेन शास्त्रत्वाभावाद्' इति पा.। ५. करिष्यामीति परस्मैपदप्रयोगस्याभिप्रायमाह— लोकेति। ६. 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' (पा.सू. १.३.७२) इति सूत्रेण कर्तृगामिनि फले आत्मनेपदविधानात् , भाष्यकाराणां च लोकानुग्रहार्थमेव गीतार्थविवरणे प्रवृत्तत्वात् , फलस्यात्मगामित्वेनेष्टत्वाभावात् परस्मैपदप्रयोगस्यौचित्यमिति।

**तस्यास्य गीताशास्त्रस्य संक्षेपतः प्रयोजनम् – परं निःश्रेयसं सहेतुकस्य संसारस्यात्यन्तोपरमलक्षणम्। तच्च सर्वकर्मसंन्यासपूर्वकादात्मज्ञाननिष्ठारूपाद् धर्माद् भवति। तथेममेव गीतार्थं धर्ममुद्दिश्य भगवतैवोक्तम् – 'स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने' (म.भा.अश्व.१६.१२) इत्यनुगीतासु। [1]तत्रैव चोक्तम् – 'नैव धर्मी न चाधर्मी न चैव**

अनुभूतिस्वरूपाचार्यटिप्पणम्

तदेवमप्रामाण्यप्रयुक्तामव्याख्येयत्वाशङ्कां परिहृत्य, यदुक्तं प्रयोजनादिराहित्यं तत् परिहरति—**तस्यास्येति। तस्येति** साधितप्रामाण्यस्य, **अस्येति** व्याख्येयत्वेन हृदि सन्निधापितस्येत्यर्थः। प्रयोजनमुक्त्वा विषयमाह— **तच्चे**त्यादिना। ननु सर्वकर्मसंन्यासपूर्विका ज्ञाननिष्ठा न गीतायां प्रतिपाद्या, यतो 'यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्' इति भगवता स्वमत [मुक्त]मित्याशङ्क्याह— **तथेममेवेति**। स हि **धर्मः** सर्वधर्मसंन्यासपूर्वकज्ञाननिष्ठालक्षणः, **सुपर्याप्तः** समक्षो[मर्थो] ब्रह्मणः पदप्राप्तावित्यनुगीतासु भगवतैवोक्तम्। ततः कर्मसंन्यासो नास्तीति भगवतोऽ[न]नुमतम्। तस्मादियमपि गीता संन्यास-

आनन्दगिरिकृतव्याख्या

**प्रयोजनार्थत्वादादौ प्रयोजनमाह—** तस्येति। **प्रसाधितप्रामाण्यस्य व्याख्येयत्वेन मनसि सन्निहितस्य गीताशास्त्रस्य।** [2]संक्षेपतः **संग्रहः सम्पिण्डितत्वमेकवाक्यत्वम् , तेन । इदं परमं फलं यन्निश्चितं श्रेयो** निःश्रेयसं **कैवल्यम्। अवान्तरफलं तु तत्र तत्रावान्तरवाक्यभेदेन मनोनिग्रहादि विवक्ष्यते। निःश्रेयसं च द्विविधम् – निरतिशयसुखाविर्भावो निःशेषानर्थोच्छित्तिश्च। तत्राद्यमुदाहरति—** परमिति। **द्वितीयं दर्शयति—** सहेतुकस्येति। **संसारोपरमस्यात्यन्तिकत्वं प्रतियोगिनः संसारस्य पुनरुत्पत्त्ययोग्यत्वम्। तच्च स्वापमूर्छादिव्यवच्छेदार्थं विशेषणम्।** [3]**तदेव साधयितुं** सहेतुकस्येत्युक्तम्। **उक्तं फलं** [4]**समुच्चितादेकाकिनो वा कर्मणः स्यादिति तस्यैव शास्त्रप्रतिपाद्यतेत्याशङ्क्य अभिधेयमभिधित्समानः समाधत्ते—** तच्चेति। **आत्मज्ञाननिष्ठाशेषत्वेन कर्मनिष्ठाऽत्रोच्यते, प्राधान्येन त्वात्मज्ञाननिष्ठैवात्र प्रतिपाद्यत इत्यर्थः।** [5]**ननु शेषिणी निष्ठा कुतो भवति संन्यासात् , न कर्मनिष्ठायाः, शेषत्वात्? तत्राह—**सर्वेति। **संन्यासद्वारेणासकृदनुष्ठितश्रवणादेः शेषिणी निष्ठा सिध्यति। शेषत्वं च कर्मणस्तत्र** [6]**परम्पराश्रयत्वमित्यर्थः। ननु 'यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्' इति वाक्यशेषात्** [7]**समुच्चितमात्मज्ञानमत्र प्रतिपाद्यते, नेत्याह—** तथेति। **सर्वकर्मसंन्यासपूर्वकमात्मज्ञाननिष्ठारूपं धर्मं** [8]**निःश्रेयसप्रयोजनं प्रागुक्तं परामृशति—** इममेवेति। **वक्तृभेदादभिप्रायभेदाशङ्कां वारयति—** भगवतैवेति। **उक्तमनुगीतास्विति सम्बन्धः।** ब्रह्मणः पदं **पूर्वोक्तं निःश्रेयसम् , तस्य** वेदनं लाभः, **तत्र विशिष्टो ज्ञाननिष्ठारूपो धर्मः समर्थो भवतीत्यर्थः। यज्ञदानादिवाक्यस्य तु तद्व्याख्यानावसरे तात्पर्यं**

भाष्यार्कप्रकाशः

**संक्षेपत इति**। प्राधान्येनेत्यर्थः। कर्मज्ञानादीनि त्ववान्तरफलानीति भावः।

**स हीति**। स आत्मज्ञाननिष्ठारूपो निवृत्तिलक्षणो धर्मो ब्रह्मणः परमात्मनः पदवेदने स्वरूपसाक्षात्कारे सुपर्याप्तः सुष्ठु समर्थः। हिशब्दः सर्वशास्त्रविद्वत्प्रसिद्धिं द्योतयति। ननु 'चोदनालक्षणोऽर्थो धर्मः' इति जैमिनिसूत्रात् प्रवृत्तेरस्तु धर्मत्वं, कथं पुनर्निवृत्तेरिति शङ्कायामौपचारिकमेव निवृत्तेर्धर्मत्वमिति हृदि कृत्वा तत्र प्रमाणमाह— **नैवेति**। यः किञ्चिदप्यचिन्तयन् तूष्णीमेकासने एकस्मिन् सर्वाधारे प्रत्यगभिन्ने ब्रह्मणि लीनःस्यात् सः धर्मी नैव, अधर्मी च नैव, शुभी नैव, अशुभी नैव च । हिः प्रसिद्धौ। ननु निवृत्तेर्मास्तु

---

१. 'किञ्चान्यदपि तत्रैवोक्तम्' इति पा.। २. 'संक्षेपः' इति पा.। ३. परं निःश्रेयसं संसारस्यात्यन्तोपरमलक्षणम् इत्येतावतैवोपपत्तौ सहेतुकस्येति विशेषणं संसारोपरमस्यात्यन्तिकत्वे प्रमाणबोधकतया सार्थकयति—तदेवेति। स्वापादौ तदनात्यन्तिकत्वं तु हेतोरनुपरमादिति भावः। ४. आत्मज्ञानेन समुच्चितादित्यर्थः। ५. कर्मनिष्ठायाः आत्मज्ञाननिष्ठाशेषत्वे, शेषिणी आत्मज्ञाननिष्ठा कर्मनिष्ठातो भवतीति वक्तव्यम् , अन्यथा तस्याः शेषत्वानुपपत्तेः, अतः संन्यासपूर्वकादिति भाष्यासंगतिरित्याशङ्क्य निराकरोति—नन्विति। 'कुतो भवति? न संन्यासात् , कर्मनिष्ठायाः शेषत्वात्' इति पा.। ६. परम्परयोपकारकत्वमित्यर्थः। 'परम्परायत्त'मिति पा.। ७. 'असमुच्चितमात्मज्ञानमत्र न प्रतिपाद्यते' इति पा.। ८. 'निःश्रेयससाधनम्' इति पा.।

**हि शुभाशुभी।' (द्र.म.भा.अश्व.१९.७) 'यः स्यादेकासने लीनस्तूष्णीं किञ्चिदचिन्तयन्' (म.भा.अश्व.१९.१) इति, 'ज्ञानं संन्यासलक्षणम्' (म.भा.अश्व.४३.२६) इति च। इहापि चान्ते उक्तमर्जुनाय – 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज' (भ.गी.१८.६६) इति। अभ्युदयार्थोऽपि यः प्रवृत्तिलक्षणो धर्मो वर्णान् आश्रमांश्चोद्दिश्य विहितः, स च देवादिस्थानप्राप्तिहेतुरपि सन् ईश्वरार्पणबुद्ध्या अनुष्ठीयमानः सत्त्वशुद्धये भवति फलाभिसन्धिवर्जितः; शुद्धसत्त्वस्य च ज्ञाननिष्ठायोग्यताप्राप्तिद्वारेण ज्ञानोत्पत्तिहेतुत्वेन च निःश्रेयसहेतुत्वमपि प्रतिपद्यते। तथा चेममर्थमभिसन्धाय वक्ष्यति**

अनुभूतिस्वरूपाचार्यटिप्पणम्

पूर्वकज्ञानपर्यवसायिनी, गीतार्थात् [गीतात्वात् ], अनुगीतावदित्यर्थः। अत्यागवचनस्याभिप्रायं वक्ष्यति। संन्यासो **लक्षणं** कारणमस्येति तथोक्तं ज्ञानं विद्धीत्यर्थः। न केवलमनुगीतास्वेवोक्तम् , अत्रापि **अन्ते**ऽवसाने दर्शितमित्याह— **इहापि चेति**। ननु 'कुरु कर्मैव तस्मात् त्वम्' इत्यादिप्रदेशेषु प्रवृत्तिलक्षणोऽपि धर्मो गीतायां प्रतिपाद्यते। तत् कथं ससंन्यासपूर्वं कर्मात्म [संन्यासपूर्वकमात्म]ज्ञानं गीताप्रतिपाद्यमुच्यते इत्याशङ्क्य, तस्यापि परम्परया ज्ञाने तात्पर्यं दर्शयति— **अभ्युदयार्थोऽपीत्यादिना**।

आनन्दगिरिकृतव्याख्या

**वक्ष्यते। कर्मत्यागस्य भगवतोऽभिप्रेतत्वे वाक्यान्तरमनुगीतागतमेवोदाहरति—** तत्रैवेति। **धर्माधर्मापूर्वासंसर्गित्वे हेतुमाह—** [१]न चैवेति। **क्रियाद्वयसम्बन्धाभावात् तन्निर्वर्त्त्यापूर्वाभ्यामसम्बन्धे प्राप्तमर्थमाह—** यः स्यादिति। **वागादिबाह्यकरणव्यापारविरहितत्वं** तूष्णीमित्यु**च्यते।** किञ्चिदचिन्तयन्नित्यन्तः**करणव्यापाराभावोऽभिप्रेतः। द्विविधकरणव्यापारविरहितः सन् प्रागुक्तो योऽधिकारी, केवलमेकस्मिन्नद्वितीये ब्रह्मण्यासनमवस्थानम् , तत्र** लीनस्तस्मिन्नेव **समाप्तिभागी स्यात् , तस्यासम्प्रज्ञातसमाधिनिष्ठस्य सर्वकर्मत्यागहेतुकं ज्ञानं मुक्तिहेतुर्भवतीत्यर्थः। न केवलमनुगीतास्वेव यथोक्तं ज्ञानमुक्तम् , किन्तु प्रकृतेऽपि शास्त्रे समाप्त्यवसरे दर्शितमित्याह—** इहापीति। **नन्वत्र निवृत्तिलक्षणधर्मात्मकं ससंन्यासमात्मज्ञानमेव न प्रतिपाद्यते, 'कुरु कर्मैव तस्मात्त्वम्' इत्यादौ प्रवृत्तिलक्षणस्यापि धर्मस्य वक्ष्यमाणत्वाद् ,** [२]**धर्मयोश्च प्रकृतत्वाविशेषात् , तत्राह—** अभ्युदयार्थोऽपीति। **ननु वर्णिभिराश्रमिभिश्चानुष्ठेयत्वेनान्यत्र विहितस्यापि तस्य न युक्तं मोक्षसाधनत्वाधिकारे विधानम् , देवादिस्थानप्राप्तिहेतुत्वेन** [३]**मोक्षप्रतिपक्षत्वात्। सत्यम् , तथापि फलाभिलाषमन्तरेणेश्वरार्पणधिया कृतस्य बुद्धिशुद्धिहेतुत्वात् तस्येह वचनमित्याह—** स च[४] देवादीति। **फलाभिसन्धिद्वारा कृतः सन्निति शेषः। प्रवृत्तिलक्षणधर्मस्योक्तरीत्या चित्तशुद्धिहेतुत्वेऽपि** [५]**मोक्षहेतुत्वेन कुतो मोक्षाधिकारे निर्देशः स्यादित्याशङ्क्याह—** शुद्धेति। प्रतिपद्यते **प्रागुक्तो धर्म इति शेषः। यदुक्तं फलाभिसन्धिवर्जितमीश्वरार्पणबुद्ध्याऽनुष्ठितं कर्म बुद्धिशुद्धये भवतीति, तत्र वाक्यशेषमनुकूलयति—** तथा चेति।

भाष्यार्कप्रकाशः

धर्मत्वं, कथं पुनर्ज्ञानत्वम्? अत आह— **ज्ञानमिति**। संन्यासः सर्वकर्मसंन्यासः लक्षणं स्वरूपं यस्य तत् संन्यासलक्षणम् - सर्वकर्मसंन्यासरूपा निवृत्तिरेवात्मज्ञाननिष्ठा, न त्वन्यदित्यर्थः। किं ग्रन्थान्तरप्रमाणोदाहरणेनेत्याह—**इहापीति। सर्वेति**। प्रवृत्तिलक्षणसर्वधर्मान् विहायेत्यर्थः, निवृत्तिधर्मस्य त्यागायोगात् , मामेकं प्रत्यगभिन्नं ब्रह्म शरणं व्रजेति निवृत्तिधर्मस्यैव कर्तव्यत्वेनोपदेशाच्च। आत्मज्ञाननिष्ठैव खलु निवृत्तिधर्मः। एवं निःश्रेयसार्थं निवृत्तिधर्ममुपवर्ण्य अथ प्रवृत्तिधर्ममाह— **अभ्युदयार्थ इति**। अभ्युदयः अर्थः प्रयोजनं यस्य सः प्रवृत्तिलक्षणश्चोदनालक्षणः ज्योतिष्टोमादिः। नित्यनैमित्तिककाम्यप्रायश्चित्तभेदेन चतुर्विधोऽयं धर्मः। **सत्त्वशुद्धिः** चित्तशुद्धिः । **फलाभिसन्धिः** धर्मफलेषु स्पृहा। **शुद्धसत्त्वस्येति**। शुद्धचित्तस्य पुरुषस्य। **प्रतिपद्यते** प्राप्नोति, धर्म

१. 'नैवेति' इति पा.। तन्न युक्तम् , 'न चैव हि शुभाशुभी' इत्यस्यैव हिशब्दघटितत्वेन हेतुपरतयाऽवतारणौचित्यात् । २. 'द्वयोश्च' इति पा.। ३. 'मोक्षं प्रति प्रतिपक्षत्वात्' इति पा.। ४. 'च' इति भाष्ये टीकाप्रतीके च क्वचिन्न। ५. मोक्षहेतुत्वेन निर्देशः कुत इत्यन्वयः।

**– 'ब्रह्मण्याधाय कर्माणि' 'योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये' (भ.गी.५.१०, ११) इति।**

**[१]इमं द्विप्रकारं धर्मं निःश्रेयसप्रयोजनम् , परमार्थतत्त्वं च वासुदेवाख्यं परं ब्रह्म अभिधेयभूतं विशेषतोऽभिव्यञ्जयद् विशिष्टप्रयोजनसम्बन्धाभिधेयवद् गीताशास्त्रम्। यतः [२]तदर्थविज्ञानेन समस्तपुरुषार्थसिद्धिः, अतः तद्विवरणे यत्नः क्रियते मया॥**

**॥ समाप्तेयं श्रीमच्छाङ्करभाष्योपक्रमणिका॥**

अनुभूतिस्वरूपाचार्यटिप्पणम्

उक्तं संक्षेपतो निगमयति— **इमं द्विप्रकारमि**त्यादिना॥

**॥ इत्युपोद्घातभाष्यटिप्पणम्॥**

आनन्दगिरिकृतव्याख्या

**शास्त्रस्य प्रयोजनं ससाधनमुक्तमनूद्य विषयं दर्शयति—** इममिति। **दर्शितेन फलेन शास्त्रस्य निष्ठाद्वयद्वारा साध्यसाधनभावः सम्बन्धः, विषयेण विषयविषयित्वमिति विवक्षित्वाऽऽह—** विशेषत इति। **एवमनुबन्धत्रयविशिष्टं शास्त्रं व्याख्यानार्हमित्युपसंहरति—** विशिष्टेति। **सिद्धे व्याख्यानयोग्यत्वे व्याख्येयत्वं फलितमाह—** यत इति॥

**॥ इत्युपोद्घातभाष्यव्याख्या॥**

भाष्यार्कप्रकाशः

इत्येव कर्तृपदम् । **आत्मशुद्धये** सत्त्वशुद्धये।

विषयसम्बन्धाधिकारिप्रयोजनाख्यमनुबन्धचतुष्टयं तावच्छास्त्रस्यावश्यकम् । तत्र अधिकारिणां मुमुक्षूणामत्र सुज्ञेयत्वादन्यत् त्रयमाह— **इहेत्यादिना**। **अभिधेयभूतं** विषयभूतम्। **निःश्रेयसप्रयोजनं** साक्षात्क्रमेण च मोक्षफलकं **द्विप्रकारं** द्विविधं धर्मं – निवृत्तिधर्मं प्रवृत्तिधर्मं च, **परमार्थतत्त्वं** परमार्थतःसत्यं वासुदेवाख्यं परं ब्रह्म च **विशेषतोऽभिव्यञ्जयत्** प्रकटयत् सद् गीताशास्त्रं **विशिष्ट-प्रयोजनसम्बन्धाभिधेयवत्** । **विशिष्टानि** विलक्षणानि उत्कृष्टानि वा प्रयोजनसम्बन्धाभिधेयानि अस्य सन्तीति (अस्मिन् सन्तीति वा) तथोक्तं भवति। निःश्रेयसं प्रयोजनम् , द्विविधो धर्मः वासुदेवश्चेत्येतत् त्रयमभिधेयम् , व्यङ्ग्यव्यञ्जकभावः सम्बन्ध इति विवेकः। **तदर्थे** गीताशास्त्रार्थे धर्मद्वये, वासुदेवे चेत्यर्थः। **अतः** [३]तत इत्यर्थः॥

**॥ इत्युपोद्घातभाष्यार्कप्रकाशः॥**

१. 'इह द्विप्रकारम्' इति रा.पा.। २. 'तदर्थे विज्ञाते' इति रा.पा.। ३. भाष्ये 'यतः' इति आदौ यच्छब्दप्रयोगात् **अतः**शब्दस्य 'ततः' इति तच्छब्देन विवरणम्।

# श्रीमद्भगवद्गीताश्लोकार्धानुक्रमणिका


| श्लोकः | श्लोकाङ्कः |
|---|---|
| **अ** | |
| अकर्मणश्च बोद्धव्यं | ४.१७ |
| अकीर्तिं चापि भूतानि | २.३४ |
| अक्षरं ब्रह्म परमं | ८.३ |
| अक्षराणामकारोऽस्मि | १०.३३ |
| अग्निर्ज्योतिरहः शुक्लः | ८.२४ |
| अघायुरिन्द्रियारामो | ३.१६ |
| अच्छेद्योऽयमदाह्योऽयम् | २.२४ |
| अजानता महिमानं तवेदं | ११.४१ |
| अजो नित्यः शाश्वतोऽयं | २.२० |
| अजोऽपि सन्नव्ययात्मा | ४.६ |
| अज्ञश्चाश्रद्दधानश्च | ४.४० |
| अज्ञानं चाभिजातस्य | १६.४ |
| अज्ञानेनावृतं ज्ञानं तेन | ५.१५ |
| अतत्त्वार्थवदल्पं च तत् | १८.२२ |
| अतोऽस्मि लोके वेदे च | १५.१८ |
| अत्येति तत् सर्वमिदं | ८.२८ |
| अत्र शूरा महेष्वासाः | १.४ |
| अथ केन प्रयुक्तोऽयं | ३.३६ |
| अथ चित्तं समाधातुं | १२.९ |
| अथ चेत् त्वमहङ्कारान्न | १८.५८ |
| अथ चेत् त्वमिमं धर्म्यं | २.३३ |
| अथ चैनं नित्यजातं | २.२६ |
| अथ व्यवस्थितान् दृष्ट्वा | १.२० |
| अथवा बहुनैतेन | १०.४२ |
| अथवा योगिनामेव | ६.४२ |
| अथैतदप्यशक्तोऽसि | १२.११ |
| अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा | ११.४५ |
| अदेशकाले यद्दानं | १७.२२ |
| अद्वेष्टा सर्वभूतानां | १२.१३ |
| अधर्मं धर्ममिति या | १८.३२ |
| अधर्माभिभवात् कृष्ण | १.४१ |
| अधश्च मूलान्यनुसन्ततानि | १५.२ |
| अधश्चोर्ध्वं प्रसृतास्तस्य शाखा | १५.२ |
| अधिभूतं क्षरो भावः | ८.४ |
| अधिभूतं च किं प्रोक्तम् | ८.१ |
| अधियज्ञः कथं कोऽत्र | ८.२ |
| अधियज्ञोऽहमेवात्र देहे | ८.४ |
| अधिष्ठानं तथा कर्ता | १८.१४ |
| अधिष्ठाय मनश्चायं | १५.९ |
| अध्यात्मज्ञाननित्यत्वं | १३.११ |
| अध्यात्मविद्या विद्यानां | १०.३२ |
| अध्येष्यते च य इमं | १८.७० |
| अनन्त! देवेश! जगन्निवास! | ११.३७ |
| अनन्तविजयं राजा | १.१६ |
| अनन्तवीर्यामितविक्रमस्त्वं | ११.४० |
| अनन्तश्चास्मि नागानां | १०.२९ |
| अनन्यचेताः सततं | ८.१४ |
| अनन्याश्चिन्तयन्तो मां | ९.२२ |
| अनन्येनैव योगेन मां | १२.६ |
| अनपेक्षः शुचिर्दक्षः | १२.१६ |
| अनात्मनस्तु शत्रुत्वे | ६.६ |
| अनादित्वान्निर्गुणत्वात् | १३.३१ |
| अनादिमत् परं ब्रह्म न सत् | १३.१२ |
| अनादिमध्यान्तमनन्तवीर्यम् | ११.१९ |
| अनार्यजुष्टमस्वर्ग्यमकीर्तिकर | २.२ |
| अनाशिनोऽप्रमेयस्य | २.१८ |
| अनाश्रितः कर्मफलं | ६.१ |
| अनिकेतः स्थिरमतिः | १२.१९ |
| अनिच्छन्नपि वार्ष्णेय ! | ३.३६ |
| अनित्यमसुखं लोकमिमं | ९.३३ |
| अनिष्टमिष्टं मिश्रं च | १८.१२ |
| अनुद्वेगकरं वाक्यं | १७.१५ |
| अनुबन्धं क्षयं हिंसा | १८.२५ |
| अनेकचित्तविभ्रान्ता | १६.१६ |
| अनेकजन्मसंसिद्धस्ततो | ६.४५ |
| अनेकदिव्याभरणं | ११.१० |
| अनेकबाहूदरवक्त्रनेत्रं | ११.१६ |
| अनेकवक्त्रनयनम् | ११.१० |
| अनेन प्रसविष्यध्वमेष | ३.१० |
| अन्तकाले च मामेव | ८.५ |
| अन्तवत्तु फलं तेषां | ७.२३ |
| अन्तवन्त इमे देहाः | २.१८ |
| अन्नाद् भवन्ति भूतानि | ३.१४ |
| अन्ये च बहवः शूरा | १.९ |
| अन्ये त्वेवमजानन्तः | १३.२५ |
| अन्ये साङ्ख्येन योगेन | १३.२४ |
| अपरं भवतो जन्म | ४.४ |
| अपरस्परसम्भूतं | १६.८ |
| अपरे नियताहाराः | ४.३० |
| अपरेयमितस्त्वन्यां | ७.५ |
| अपर्याप्तं तदस्माकं | १.१० |
| अपश्यद् देवदेवस्य | ११.१३ |
| अपाने जुह्वति प्राणं | ४.२९ |
| अपि चेत् सुदुराचारो | ९.३० |
| अपि चेदसि पापेभ्यः | ४.३६ |
| अपि त्रैलोक्यराज्यस्य | १.३५ |

| श्लोकः | श्लोकाङ्कः | श्लोकः | श्लोकाङ्कः | श्लोकः | श्लोकाङ्कः |
|---|---|---|---|---|---|
| अप्रकाशोऽप्रवृत्तिश्च | १४.१३ | अविभक्तं च भूतेषु | १३.१६ | अहं कृत्स्नस्य जगतः | ७.६ |
| अप्रतिष्ठो महाबाहो ! | ६.३८ | अविभक्तं विभक्तेषु | १८.२० | अहं क्रतुरहं यज्ञः | ९.१६ |
| अप्राप्य मां निवर्तन्ते | ९.३ | अव्यक्तं व्यक्तिमापन्नं | ७.२४ | अहं त्वा सर्वपापेभ्यो | १८.६६ |
| अप्राप्य योगसंसिद्धिं | ६.३७ | अव्यक्तनिधनान्येव | १२.२८ | अहं वैश्वानरो भूत्वा | १५.१४ |
| अफलप्रेप्सुना कर्म | १८.२३ | अव्यक्ता हि गतिर्दुःखं | १२.५ | अहं सर्वस्य प्रभवो | १०.८ |
| अफलाकाङ्क्षिभिर्यज्ञो | १७.११ | अव्यक्तादीनि भूतानि | २.२८ | अहं हि सर्वयज्ञानां | ९.२४ |
| अफलाकाङ्क्षिभिर्युक्तैः | १७.१७ | अव्यक्ताद् व्यक्तयः सर्वाः | ८.१८ | अहङ्कारं बलं दर्पं | १६.१८ |
| अभयं सत्त्वसंशुद्धिः | १६.१ | अव्यक्तोऽक्षर इत्युक्तः | ८.२१ | अहङ्कारं बलं दर्पं | १८.५३ |
| अभितो ब्रह्मनिर्वाणं | ५.२६ | अव्यक्तोऽयमचिन्त्योऽयम् | २.२५ | अहङ्कार इतीयं मे | ७.४ |
| अभिसन्धाय तु फलं | १७.१२ | अशास्त्रविहितं घोरं | १७.५ | अहङ्कारविमूढात्मा | ३.२७ |
| अभ्यासयोगयुक्तात्मा | ९.२८ | अशोच्यानन्वशोचस्त्वं | २.११ | अहमात्मा गुडाकेश | १०.२० |
| अभ्यासयोगयुक्तेन | ८.८ | अश्रद्दधानाः पुरुषा | ९.३ | अहमादिर्हि देवानां | १०.२ |
| अभ्यासयोगेन ततो | १२.९ | अश्रद्धया हुतं दत्तं | १७.२८ | अहमादिश्च मध्यं च | १०.२० |
| अभ्यासाद् रमते यत्र | १८.३६ | अश्वत्थः सर्ववृक्षाणां | १०.२६ | अहमेवाक्षयः कालो | १०.३३ |
| अभ्यासेऽप्यसमर्थोऽसि | १२.१० | अश्वत्थमेनं सुविरूढमूल | १५.३ | अहिंसा सत्यमक्रोधः | १६.२ |
| अभ्यासेन तु कौन्तेय ! | ६.३५ | अश्वत्थामा विकर्णश्च | १.८ | अहिंसा समता तुष्टिः | १०.५ |
| अभ्युत्थानमधर्मस्य | ४.७ | असंयतात्मना योगो | ६.३६ | अहो बत महत् पापं | १.४५ |
| अमानित्वमदम्भित्वम् | १३.७ | असंशयं महाबाहो ! | ६.३५ | **आ** | |
| अमी च त्वां धृतराष्ट्रस्य पुत्राः | ११.२६ | असंशयं समग्रं मां | ७.१ | आख्याहि मे को भवानुग्ररूपो | ११.३१ |
| अमी हि त्वां सुरसङ्घा विशन्ति | ११.२१ | असक्तं सर्वभृच्चैव | १३.१४ | आगमापायिनोऽनित्याः | २.१४ |
| अमृतं चैव मृत्युश्च | ९.१९ | असक्तबुद्धिः सर्वत्र | १८.४९ | आचरत्यात्मनः श्रेयः | १६.२२ |
| अयतिः श्रद्धयोपेतो | ६.३७ | असक्तिरनभिष्वङ्गः | १३.९ | आचार्यमुपसङ्गम्य राजा | १.२ |
| अयथावत् प्रजानाति | १८.३१ | असक्तो ह्याचरन् कर्म | ३.१९ | आचार्याः पितरः पुत्राः | १.३४ |
| अयनेषु च सर्वेषु | १.११ | असत्कृतमवज्ञातं | १७.२२ | आचार्यान् मातुलान् भ्रातॄन् | १.२६ |
| अयुक्तः कामकारेण | ५.१२ | असत्यमप्रतिष्ठं ते | १६.८ | आचार्योपासनं शौचं | १३.७ |
| अयुक्तः प्राकृतः स्तब्धः | १८.२८ | असदित्युच्यते पार्थ | १७.२८ | आढ्योऽभिजनवानस्मि | १६.१५ |
| अवजानन्ति मां मूढाः | ९.११ | असम्मूढः स मर्त्येषु | १०.३ | आत्मन्येव च सन्तुष्टः | ३.१७ |
| अवाच्यवादांश्च बहून् | २.३६ | असितो देवलो व्यासः | १०.१३ | आत्मन्येवात्मना तुष्टः | २.५५ |
| अवाप्य भूमावसपत्नमृद्धं | २.८ | असौ मया हतः शत्रुः | १६.१४ | आत्मवन्तं न कर्माणि | ४.४१ |
| अविनाशि तु तद्विद्धि | २.१७ | अस्माकं तु विशिष्टा ये | १.७ | आत्मवश्यैर्विधेयात्मा | २.६४ |

| श्लोकः | श्लोकाङ्कः | श्लोकः | श्लोकाङ्कः | श्लोकः | श्लोकाङ्कः |
|---|---|---|---|---|---|
| आत्मसंयमयोगाग्नौ | ४.२७ | इति मत्वा भजन्ते मां | १०.८ | **ई** | |
| आत्मसंस्थं मनः कृत्वा | ६.२५ | इति मां योऽभिजानाति | ४.१४ | ईक्षते योगयुक्तात्मा | ६.२९ |
| आत्मसम्भाविताः स्तब्धाः | १६.१७ | इत्यर्जुनं वासुदेवस्तथोक्त्वा | ११.५० | ईश्वरः सर्वभूतानां | १८.६१ |
| आत्मैव ह्यात्मनो बन्धुः | ६.५ | इत्यहं वासुदेवस्य | १८.७४ | ईश्वरोऽहमहं भोगी | १६.१४ |
| आत्मौपम्येन सर्वत्र | ६.३२ | इदं ज्ञानमुपाश्रित्य | १४.२ | ईहन्ते कामभोगार्थम् | १६.१२ |
| आदित्यानामहं विष्णुः | १०.२१ | इदं तु ते गुह्यतमं | ९.१ | **उ** | |
| आद्यन्तवन्तः कौन्तेय | ५.२२ | इदं ते नातपस्काय | १८.६७ | उच्चैःश्रवसमश्वानां | १०.२७ |
| आपूर्यमाणमचलप्रतिष्ठं | २.७० | इदं शरीरं कौन्तेय ! | १३.१ | उच्छिष्टमपि चामेध्यं | १७.१० |
| आ ब्रह्मभुवनाल्लोकाः | ८.१६ | इदमद्य मया लब्धमिदं | १६.१३ | उत्क्रामन्तं स्थितं वाऽपि | १५.१० |
| आयुःसत्त्वबलारोग्य | १७.८ | इदमस्तीदमपि मे | १६.१३ | उत्तमः पुरुषस्त्वन्यः | १५.१७ |
| आयुधानामहं वज्रं | १०.२८ | इदानीमस्मि संवृत्तः | ११.५१ | उत्सन्नकुलधर्माणां | १.४४ |
| आरुरुक्षोर्मुनेर्योगं | ६.३ | इन्द्रियस्येन्द्रियस्यार्थे | ३.३४ | उत्साद्यन्ते जातिधर्माः | १.४३ |
| आर्तो जिज्ञासुरर्थार्थी | ७.१६ | इन्द्रियाणां मनश्चास्मि | १०.२२ | उत्सीदेयुरिमे लोकाः | ३.२४ |
| आवृतं ज्ञानमेतेन | ३.३९ | इन्द्रियाणां हि चरतां | २.६७ | उदाराः सर्व एवैते | ७.१८ |
| आशापाशशतैर्बद्धाः | १६.१२ | इन्द्रियाणि दशैकं च | १३.५ | उदासीनवदासीनः | १४.२३ |
| आश्चर्यवच्चैनमन्यः शृणोति | २.२९ | इन्द्रियाणि पराण्याहुः | ३.४२ | उदासीनवदासीनम् | ९.९ |
| आश्चर्यवत् पश्यति कश्चिदेनम् | २.२९ | इन्द्रियाणि प्रमाथीनि | २.६० | उद्धरेदात्मनाऽऽत्मानं | ६.५ |
| आश्वासयामास च भीतमेनं | ११.५० | इन्द्रियाणि मनो बुद्धिः | ३.४० | उपदेक्ष्यन्ति ते ज्ञानं | ४.३४ |
| आसुरीं योनिमापन्नाः | १६.२० | इन्द्रियाणीन्द्रियार्थेभ्यः | २.५८ | उपद्रष्टाऽनुमन्ता च | १३.२२ |
| आस्थितः स हि युक्तात्मा | ७.१८ | इन्द्रियाणीन्द्रियार्थेभ्यः | २.६८ | उपविश्यासने युञ्ज्याद् | ६.१२ |
| आहारस्त्वपि सर्वस्य | १७.७ | इन्द्रियाणीन्द्रियार्थेषु | ५.९ | उपैति शान्तरजसं | ६.२७ |
| आहारा राजसस्येष्टाः | १७.९ | इन्द्रियार्थान् विमूढात्मा | ३.६ | उभयोरपि दृष्टोऽन्तः | २.१६ |
| आहुस्त्वामृषयः सर्वे | १०.१३ | इन्द्रियार्थेषु वैराग्यम् | १३.८ | उभौ तौ न विजानीतो | २.१९ |
| **इ** | | इमं विवस्वते योगं | ४.१ | उवाच पार्थ ! पश्यैतान् | १.२५ |
| इच्छा द्वेषः सुखं दुःखं | १३.६ | इषुभिः प्रतियोत्स्यामि | २.४ | **ऊ** | |
| इच्छाद्वेषसमुत्थेन | ७.२७ | इष्टान् भोगान् हि वो देवाः | ३.१२ | ऊर्ध्वं गच्छन्ति सत्त्वस्थाः | १४.१८ |
| इज्यते भरतश्रेष्ठ तं | १७.१२ | इष्टोऽसि मे दृढमिति | १८.६४ | ऊर्ध्वमूलमधःशाखम् | १५.१ |
| इति क्षेत्रं तथा ज्ञानं | १३.१८ | इहैकस्थं जगत् कृत्स्नं | ११.७ | **ऋ** | |
| इति गुह्यतमं शास्त्रम् | १५.२० | इहैव तैर्जितः सर्गः | ५.१९ | ऋतेऽपि त्वां न भविष्यन्ति सर्वे | ११.३२ |
| इति ते ज्ञानमाख्यातं | १८.६३ | | | ऋषिभिर्बहुधा गीतं | १३.४ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| **ए** | |
| एकं सांख्यं च योगं च | ५.५ |
| एकत्वेन पृथक्त्वेन | ९.१५ |
| एकमप्यास्थितः सम्यग् | ५.४ |
| एकया यात्यनावृत्तिम् | ८.२६ |
| एकाकी यतचित्तात्मा | ६.१० |
| एकोऽथवाप्यच्युत! तत् समक्षं | ११.४२ |
| एतच्छ्रुत्वा वचनं केशवस्य | ११.३५ |
| एतज्ज्ञानमिति प्रोक्तम् | १३.११ |
| एतत् क्षेत्रं समासेन | १३.६ |
| एतद् बुद्ध्वा बुद्धिमान् स्यात् | १५.२० |
| एतद् यो वेत्ति तं प्राहुः | १३.१ |
| एतद्धि दुर्लभतरं लोके | ६.४२ |
| एतद्योनीनि भूतानि | ७.६ |
| एतन्मे संशयं कृष्ण ! | ६.३९ |
| एतस्याहं न पश्यामि | ६.३३ |
| एतां दृष्टिमवष्टभ्य | १६.९ |
| एतां विभूतिं योगं च | १०.७ |
| एतान् न हन्तुमिच्छामि | १.३५ |
| एतान्यपि तु कर्माणि | १८.६ |
| एतैर्विमुक्तः कौन्तेय | १६.२२ |
| एतैर्विमोहयत्येष | ३.४० |
| एवं ज्ञात्वा कृतं कर्म | ४.१५ |
| एवं त्रयीधर्ममनुप्रपन्ना | ९.२१ |
| एवं परम्पराप्राप्तम् | ४.२ |
| एवं प्रवर्तितं चक्रं | ३.१६ |
| एवं बहुविधा यज्ञाः | ४.३२ |
| एवं बुद्धेः परं बुद्ध्वा | ३.४३ |
| एवंरूपः शक्य अहं नृलोके | ११.४८ |
| एवं सततयुक्ता ये | १२.१ |
| एवमुक्तो हृषीकेशः | १.२४ |
| एवमुक्त्वा ततो राजन्! | ११.९ |
| एवमुक्त्वा हृषीकेशं | २.९ |
| एवमुक्त्वाऽर्जुनः सङ्ख्ये | १.४७ |
| एवमेतद् यथाऽऽत्थ | ११.३ |
| एष तूद्देशतः प्रोक्तो | १०.४० |
| एषा तेऽभिहिता सांख्ये | २.३९ |
| एषा ब्राह्मी स्थितिः पार्थ ! | २.७२ |
| **ऐ** | |
| ऐरावतं गजेन्द्राणां | १०.२७ |
| **ओ** | |
| ओं तत् सदिति निर्देशः | १७.२३ |
| ओमित्येकाक्षरं ब्रह्म | ८.१३ |
| **क** | |
| कच्चिदज्ञानसम्मोहः | १८.७२ |
| कच्चिदेतच्छ्रुतं पार्थ ! | १८.७२ |
| कच्चिन्नोभयविभ्रष्टः | ६.३८ |
| कट्वम्ललवणात्युष्ण | १७.९ |
| कथं भीष्ममहं संख्ये | २.४ |
| कथं न ज्ञेयमस्माभिः | १.३९ |
| कथं विद्यामहं योगिन् | १०.१७ |
| कथं स पुरुषः पार्थ ! | २.२१ |
| कथमेतद् विजानीयां | ४.४ |
| कथयन्तश्च मां नित्यं | १०.९ |
| करणं कर्म कर्तेति | १८.१८ |
| कर्तव्यानीति मे पार्थ ! | १८.६ |
| कर्तुं नेच्छसि यन्मोहात् | १८.६० |
| कर्म चैव तदर्थीयं | १७.२७ |
| कर्म ब्रह्मोद्भवं विद्धि | ३.१५ |
| कर्मजं बुद्धियुक्ता हि | २.५१ |
| कर्मजान् विद्धि तान् सर्वान् | ४.३२ |
| कर्मणः सुकृतस्याहुः | १४.१६ |
| कर्मणैव हि संसिद्धिम् | ३.२० |
| कर्मणो ह्यपि बोद्धव्यं | ४.१७ |
| कर्मण्यकर्म यः पश्येत् | ४.१८ |
| कर्मण्यभिप्रवृत्तोऽपि | ४.२० |
| कर्मण्येवाधिकारस्ते | २.४७ |
| कर्माणि प्रविभक्तानि | १८.४१ |
| कर्मिभ्यश्चाधिको योगी | ६.४६ |
| कर्मेन्द्रियाणि संयम्य | ३.६ |
| कर्मेन्द्रियैः कर्मयोगम् | ३.७ |
| कर्शयन्तः शरीरस्थं | १७.६ |
| कल्पक्षये पुनस्तानि | ९.७ |
| कविं पुराणमनुशासितारम् | ८.९ |
| कस्माच्च ते न नमेरन् महात्मन् | ११.३७ |
| काङ्क्षन्तः कर्मणां सिद्धिं | ४.१२ |
| कामः क्रोधस्तथा लोभः | १६.२१ |
| काम एष क्रोध एषः | ३.३७ |
| कामक्रोधवियुक्तानां | ५.२६ |
| कामक्रोधोद्भवं वेगं | ५.२३ |
| काममाश्रित्य दुष्पूरं | १६.१० |
| कामरूपेण कौन्तेय ! | ३.३९ |
| कामात्मानः स्वर्गपराः | २.४३ |
| कामैस्तैस्तैर्हृतज्ञानाः | ७.२० |
| कामोपभोगपरमाः | १६.११ |
| काम्यानां कर्मणां न्यासं | १८.२ |
| कायेन मनसा बुद्ध्या | ५.११ |
| कारणं गुणसङ्गोऽस्य | १३.२१ |
| कार्पण्यदोषोपहतस्वभावः | २.७ |
| कार्यकरणकर्तृत्वे | १३.२० |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| कार्यते ह्यवशः कर्म | ३.५ |
| कार्यमित्येव यत् कर्म | १८.९ |
| कालोऽस्मि लोकक्षयकृत् | ११.३२ |
| काश्यश्च परमेष्वासः | १.१७ |
| किं कर्म किमकर्मेति | ४.१६ |
| किं तद् ब्रह्म किमध्यात्मं | ८.१ |
| किं नो राज्येन गोविन्द ! | १.३२ |
| किं पुनर्ब्राह्मणाः पुण्याः | ९.३३ |
| किमाचारः कथं चैतांस्त्रीन् | १४.२१ |
| किरीटिनं गदिनं चक्रिणं च | ११.१७ |
| कीर्तिः श्रीर्वाक् च नारीणां | १०.३४ |
| कुतस्त्वा कश्मलमिदं | २.२ |
| कुरु कर्मैव तस्मात् त्वं | ४.१५ |
| कुर्याद् विद्वांस्तथाऽसक्तः | ३.२५ |
| कुलक्षयकृतं दोषं | १.३९ |
| कुलक्षयकृतं दोषं | १.३८ |
| कुलक्षये प्रणश्यन्ति | १.४० |
| कृपया परयाऽऽविष्टः | १.२८ |
| कृषिगौरक्ष्यवाणिज्यं | १८.४४ |
| केचिद् विलग्ना दशनान्तरेषु | ११.२७ |
| केशवार्जुनयोः पुण्यं | १८.७६ |
| केषु केषु च भावेषु | १०.१७ |
| कैर्मया सह योद्धव्यमस्मिन् | १.२२ |
| कैर्लिङ्गैस्त्रीन्गुणानेतान् | १४.२१ |
| कौन्तेय ! प्रतिजानीहि | ९.३१ |
| क्रियते तदिह प्रोक्तं | १७.१८ |
| क्रियते बहुलायासं | १८.२४ |
| क्रियाविशेषबहुलां | २.४३ |
| क्रोधाद् भवति संमोहः | २.६३ |
| क्लेशोऽधिकतरस्तेषाम् | १२.५ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| क्लैब्यं मा स्म गमः पार्थ ! | २.३ |
| क्षरः सर्वाणि भूतानि | १५.१६ |
| क्षिपाम्यजस्रमशुभान् | १६.१९ |
| क्षिप्रं भवति धर्मात्मा | ९.३१ |
| क्षिप्रं हि मानुषे लोके | ४.१२ |
| क्षुद्रं हृदयदौर्बल्यं | २.३ |
| क्षेत्रं क्षेत्री तथा कृत्स्नं | १३.३३ |
| क्षेत्रक्षेत्रज्ञयोरेवम् | १३.३४ |
| क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत् | १३.२ |
| क्षेत्रक्षेत्रज्ञसंयोगात् | १३.२६ |
| क्षेत्रज्ञं चापि मां विद्धि | १३.२ |
| **ग** | |
| गच्छन्त्यपुनरावृत्तिं | ५.१७ |
| गतसङ्गस्य मुक्तस्य | ४.२३ |
| गतासूनगतासूंश्च | २.११ |
| गतिर्भर्ता प्रभुः साक्षी | ९.१८ |
| गन्धर्वयक्षासुरसिद्धसङ्घाः | ११.२२ |
| गन्धर्वाणां चित्ररथः | १०.२६ |
| गाडीवं स्रंसते हस्तात् | १.३० |
| गामाविश्य च भूतानि | १५.१३ |
| गुणा गुणेषु वर्तन्त इति | ३.२८ |
| गुणानेतानतीत्य त्रीन् | १४.२० |
| गुणा वर्तन्त इत्येव | १४.२३ |
| गुणेभ्यश्च परं वेत्ति | १४.१९ |
| गुरूनहत्वा हि महानुभावान् | २.५ |
| गृहीत्वैतानि संयाति | १५.८ |
| **च** | |
| चञ्चलं हि मनः कृष्ण ! | ६.३४ |
| चतुर्विधा भजन्ते मां | ७.१६ |
| चातुर्वर्ण्यं मया सृष्टं | ४.१३ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| चिन्तामपरिमेयां च | १६.११ |
| चेतसा सर्वकर्माणि | १८.५७ |
| **छ** | |
| छन्दांसि यस्य पर्णानि | १५.१ |
| छित्त्वैनं संशयं योगम् | ४.४२ |
| छिन्नद्वैधा यतात्मानः | ५.२५ |
| **ज** | |
| जघन्यगुणवृत्तस्था अधो | १४.१८ |
| जन्म कर्म च मे दिव्यम् | ४.९ |
| जन्मबन्धविनिर्मुक्ताः | २.५१ |
| जन्ममृत्युजरादुःखैर्विमुक्तो | १४.२० |
| जन्ममृत्युजराव्याधिदुःख | १३.८ |
| जयोऽस्मि व्यवसायोऽस्मि | १०.३६ |
| जरामरणमोक्षाय | ७.२९ |
| जहि शत्रुं महाबाहो ! | ३.४३ |
| जातस्य हि ध्रुवो मृत्युः | २.२७ |
| जिज्ञासुरपि योगस्य | ६.४४ |
| जितात्मनः प्रशान्तस्य | ६.७ |
| जीवनं सर्वभूतेषु | ७.९ |
| जीवभूतां महाबाहो ! | ७.५ |
| जोषयेत् सर्वकर्माणि विद्वान् | ३.२६ |
| ज्ञातुं द्रष्टुं च तत्त्वेन | ११.५४ |
| ज्ञात्वा शास्त्रविधानोक्तं | १६.२४ |
| ज्ञानं कर्म च कर्ता च | १८.१९ |
| ज्ञानं ज्ञेयं ज्ञानगम्यं | १३.१७ |
| ज्ञानं ज्ञेयं परिज्ञाता | १८.१८ |
| ज्ञानं तेऽहं सविज्ञानम् | ७.२ |
| ज्ञानं यदा तदा विद्याद्विवृद्धं | १४.११ |
| ज्ञानं लब्ध्वा परां शान्तिम् | ४.३९ |
| ज्ञानं विज्ञानमास्तिक्यं | १८.४२ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| ज्ञानं विज्ञानसहितं यज्ज्ञात्वा | ९.१ |
| ज्ञानमावृत्य तु तमः | १४.९ |
| ज्ञानयज्ञेन चाप्यन्ये | ९.१५ |
| ज्ञानयज्ञेन तेनाहमिष्टः | १८.७० |
| ज्ञानयोगेन साङ्ख्यानां | ३.३ |
| ज्ञानविज्ञानतृप्तात्मा | ६.८ |
| ज्ञानाग्निः सर्वकर्माणि | ४.३७ |
| ज्ञानाग्निदग्धकर्माणं | ४.१९ |
| ज्ञानेन तु तदज्ञानं | ५.१६ |
| ज्ञेयं यत् तत् प्रवक्ष्यामि | १३.१२ |
| ज्ञेयः स नित्यसंन्यासी | ५.३ |
| ज्यायसी चेत् कर्मणस्ते | ३.१ |
| ज्योतिषामपि तज्ज्योतिः | १३.१७ |
| **झ** | |
| झषाणां मकरश्चास्मि | १०.३१ |
| **त** | |
| तं तथा कृपयाऽऽविष्टम् | २.१ |
| तं तं नियममास्थाय | ७.२० |
| तं तमेवैति कौन्तेय ! | ८.६ |
| तं विद्याद् दुःखसंयोग | ६.२३ |
| त इमेऽवस्थिता युद्धे | १.३३ |
| तच्च संस्मृत्य संस्मृत्य | १८.७७ |
| ततः पदं तत् परिमार्गितव्यं | १५.४ |
| ततः शङ्खाश्च भेर्यश्च | १.१३ |
| ततः श्वेतैर्हयैर्युक्ते | १.१४ |
| ततः स विस्मयाविष्टो | ११.१४ |
| ततः स्वधर्मं कीर्तिं च | २.३३ |
| तत एव च विस्तारं | १३.३० |
| ततस्ततो नियम्यैतदात्मन्येव | ६.२६ |
| ततो मां तत्त्वतो ज्ञात्वा | १८.५५ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| ततो युद्धाय युज्यस्व नैवं | २.३८ |
| तत् किं कर्मणि घोरे मां | ३.१ |
| तत् क्षेत्रं यच्च यादृक् च | १३.३ |
| तत्तदेवावगच्छ त्वं मम | १०.४१ |
| तत् ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा | ४.१६ |
| तत्त्ववित् तु महाबाहो ! | ३.२८ |
| तत्प्रसादात् परां शान्तिं | १८.६२ |
| तत् सुखं सात्त्विकं प्रोक्तम् | १८.३७ |
| तत् स्वयं योगसंसिद्धः | ४.३८ |
| तत्र चान्द्रमसं ज्योतिः | ८.२५ |
| तत्र तं बुद्धिसंयोगं | ६.४३ |
| तत्र प्रयाता गच्छन्ति | ८.२४ |
| तत्र श्रीर्विजयो भूतिर्ध्रुवा | १८.७८ |
| तत्र सत्त्वं निर्मलत्वात् | १४.६ |
| तत्रापश्यत् स्थितान् पार्थः | १.२६ |
| तत्रैकस्थं जगत् कृत्स्नं | ११.१३ |
| तत्रैकाग्रं मनः कृत्वा | ६.१२ |
| तत्रैवं सति कर्तारम् | १८.१६ |
| तथा तवामी नरलोकवीराः | ११.२८ |
| तथा देहान्तरप्राप्तिर्धीरस्तत्र | २.१३ |
| तथापि त्वं महाबाहो ! | २.२६ |
| तथा प्रलीनस्तमसि | १४.१५ |
| तथा शरीराणि विहाय | २.२२ |
| तथा सर्वाणि भूतानि | ९.६ |
| तथैव नाशाय विशन्ति लोकाः | ११.२९ |
| तदर्थं कर्म कौन्तेय ! | ३.९ |
| तदस्य हरति प्रज्ञां | २.६७ |
| तदहं भक्त्युपहृतमश्नामि | ९.२६ |
| तदा गन्तासि निर्वेदं | २.५२ |
| तदित्यनभिसन्धाय | १७.२५ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| तदेकं वद निश्चित्य | ३.२ |
| तदेव मे दर्शय देव रूपं | ११.४५ |
| तदोत्तमविदां लोकान् | १४.१४ |
| तद्बुद्धयस्तदात्मानः | ५.१७ |
| तद्वत् कामा यं प्रविशन्ति सर्वे | २.७० |
| तद् विद्धि प्रणिपातेन | ४.३४ |
| तन्निबध्नाति कौन्तेय | १४.७ |
| तपस्विभ्योऽधिको योगी | ६.४६ |
| तपाम्यहमहं वर्षं | ९.१९ |
| तमस्त्वज्ञानजं विद्धि | १४.८ |
| तमस्येतानि जायन्ते | १४.१३ |
| तमुवाच हृषीकेशः | २.१० |
| तमेव चाद्यं पुरुषं प्रपद्ये | १५.४ |
| तमेव शरणं गच्छ | १८.६२ |
| तयोर्न वशमागच्छेत् | ३.३४ |
| तयोस्तु कर्मसंन्यासात् | ५.२ |
| तस्माच्छास्त्रं प्रमाणं ते | १६.२४ |
| तस्मात् त्वमिन्द्रियाण्यादौ | ३.४१ |
| तस्मात् त्वमुत्तिष्ठ यशो लभस्व | ११.३३ |
| तस्मात् प्रणम्य प्रणिधाय कायं | ११.४४ |
| तस्मात् सर्वगतं ब्रह्म | ३.१५ |
| तस्मात् सर्वाणि भूतानि | २.३० |
| तस्मात् सर्वेषु कालेषु | ८.७ |
| तस्मात् सर्वेषु कालेषु | ८.२७ |
| तस्मादज्ञानसम्भूतं | ४.४२ |
| तस्मादपरिहार्येऽर्थे | २.२७ |
| तस्मादसक्तः सततं | ३.१९ |
| तस्मादुत्तिष्ठ कौन्तेय ! | २.३७ |
| तस्मादेवं विदित्वैनं | २.२५ |
| तस्मादोमित्युदाहृत्य | १७.२४ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| तस्माद् यस्य महाबाहो | २.६८ |
| तस्माद् योगाय युज्यस्व | २.५० |
| तस्मान्नार्हा वयं हन्तुं | १.३७ |
| तस्य कर्तारमपि मां | ४.१३ |
| तस्य तस्याचलां श्रद्धां | ७.२१ |
| तस्य संजनयन् हर्षं | १.१२ |
| तस्याहं न प्रणश्यामि | ६.३० |
| तस्याहं निग्रहं मन्ये | ६.३४ |
| तस्याहं सुलभः पार्थ ! | ८.१४ |
| तानकृत्स्नविदो मन्दान् | ३.२९ |
| तानहं द्विषतः क्रूरान् | १६.१९ |
| तानि सर्वाणि संयम्य | २.६१ |
| तान्यहं वेद सर्वाणि | ४.५ |
| तान् समीक्ष्य स कौन्तेयः | १.२७ |
| तावान् सर्वेषु वेदेषु | २.४६ |
| तासां ब्रह्म महद्योनिरहं | १४.४ |
| तुल्यनिन्दास्तुतिर्मौनी | १२.१९ |
| तुल्यप्रियाप्रियो धीरः | १४.२४ |
| ते तं भुक्त्वा स्वर्गलोकं विशालं | ९.२१ |
| ते द्वन्द्वमोहनिर्मुक्ताः | ७.२८ |
| ते पुण्यमासाद्य सुरेन्द्रलोकम् | ९.२० |
| ते प्राप्नुवन्ति मामेव | १२.४ |
| तेऽपि चातितरन्त्येव | १३.२५ |
| तेऽपि मामेव कौन्तेय! | ९.२३ |
| तेजः क्षमा धृतिः शौचम् | १६.३ |
| तेजोभिरापूर्य जगत् समग्रं | ११.३० |
| तेजोमयं विश्वमनन्तमाद्यं | ११.४७ |
| तेनैव रूपेण चतुर्भुजेन | ११.४६ |
| ते ब्रह्म तद् विदुः कृत्स्नम् | ७.२९ |
| तेषां ज्ञानी नित्ययुक्तः | ७.१७ |
| तेषां नित्याभियुक्तानां | ९.२२ |
| तेषां निष्ठा तु का कृष्ण ! | १७.१ |
| तेषां सततयुक्तानां | १०.१० |
| तेषामहं समुद्धर्ता | १२.७ |
| तेषामादित्यवज्ज्ञानं | ५.१६ |
| तेषामेवानुकम्पार्थम् | १०.११ |
| तैर्दत्तानप्रदायैभ्यो | ३.१२ |
| त्यक्त्वा कर्मफलासङ्गं | ४.२० |
| त्यक्त्वा देहं पुनर्जन्म नैति | ४.९ |
| त्यागस्य च हृषीकेश ! | १८.१ |
| त्यागी सत्त्वसमाविष्टो | १८.१० |
| त्यागो हि पुरुषव्याघ्र ! | १८.४ |
| त्याज्यं दोषवदित्येके | १८.३ |
| त्रिभिर्गुणमयैर्भावैः | ७.१३ |
| त्रिविधं नरकस्येदं | १६.२१ |
| त्रिविधा भवति श्रद्धा | १७.२ |
| त्रैगुण्यविषया वेदाः | २.४५ |
| त्रैविद्या मां सोमपाः पूतपापाः | ९.२० |
| त्वत्तः कमलपत्राक्ष ! | ११.२ |
| त्वदन्यः संशयस्यास्य | ६.३९ |
| त्वमक्षरं परमं वेदितव्यं | ११.१८ |
| त्वमव्ययः शाश्वतधर्मगोप्ता | ११.१८ |
| त्वमादिदेवः पुरुषः पुराणः | ११.३८ |
| **द** | |
| दंष्ट्राकरालानि च ते मुखानि | ११.२५ |
| दण्डो दमयतामस्मि | १०.३८ |
| ददामि बुद्धियोगं तं | १०.१० |
| दम्भाहङ्कारसंयुक्ताः | १७.५ |
| दम्भो दर्पोऽभिमानश्च | १६.४ |
| दया भूतेष्वलोलुप्त्वं | १६.२ |
| दर्शयामास पार्थाय | ११.९ |
| दातव्यमिति यद्दानं | १७.२० |
| दानं दमश्च यज्ञश्च | १६.१ |
| दानक्रियाश्च विविधाः | १७.२५ |
| दानमीश्वरभावश्च | १८.४३ |
| दिवि सूर्यसहस्रस्य | ११.१२ |
| दिव्यं ददामि ते चक्षुः | ११.८ |
| दिव्यमाल्याम्बरधरं | ११.११ |
| दिशो न जाने न लभे च शर्म | ११.२५ |
| दीयते च परिक्लिष्टं तद्दानं | १७.२१ |
| दुःखमित्येव यत् कर्म | १८.८ |
| दुःखेष्वनुद्विग्नमनाः | २.५६ |
| दूरेण ह्यवरं कर्म | २.४९ |
| दृष्ट्वा तु पाण्डवानीकं | १.२ |
| दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदं | ११.२० |
| दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा | ११.२४ |
| दृष्ट्वेदं मानुषं रूपं | ११.५१ |
| दृष्ट्वेमं स्वजनं कृष्ण ! | १.२८ |
| देवद्विजगुरुप्राज्ञ | १७.१४ |
| देवा अप्यस्य रूपस्य | ११.५२ |
| देवान् देवयजो यान्ति | ७.२३ |
| देवान् भावयतानेन | ३.११ |
| देशे काले च पात्रे च तद् | १७.२० |
| देहिनोऽस्मिन् यथा देहे | २.१३ |
| देही नित्यमवध्योऽयं | २.३० |
| दैवमेवापरे यज्ञं | ४.२५ |
| दैवी सम्पद् विमोक्षाय | १६.५ |
| दैवी ह्येषा गुणमयी | ७.१४ |
| दैवो विस्तरशः प्रोक्त आसुरं | १६.६ |
| दोषैरेतैः कुलघ्नानां | १.४३ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| द्यावापृथिव्योरिदमन्तरं हि | ११.२० |
| द्यूतं छलयतामस्मि | १०.३६ |
| द्रव्ययज्ञास्तपोयज्ञाः | ४.२८ |
| द्रष्टुमिच्छामि ते | ११.३ |
| द्रुपदो द्रौपदेयाश्च | १.१८ |
| द्रोणं च भीष्मं च जयद्रथं च | ११.३४ |
| द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैः | १५.५ |
| द्वाविमौ पुरुषौ लोके | १५.१६ |
| द्वौ भूतसर्गौ लोकेऽस्मिन् | १६.६ |
| **ध** | |
| धर्मक्षेत्रे कुरुक्षेत्रे | १.१ |
| धर्मसंस्थापनार्थाय | ४.८ |
| धर्माविरुद्धो भूतेषु कामोऽस्मि | ७.११ |
| धर्मे नष्टे कुलं कृत्स्नम् | १.४० |
| धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् | २.३१ |
| धार्तराष्ट्रस्य दुर्बुद्धेः युद्धे | १.२३ |
| धार्तराष्ट्रा रणे हन्युः तन्मे | १.४६ |
| धूमेनाव्रियते वह्निः | ३.३८ |
| धूमो रात्रिस्तथा कृष्णः | ८.२५ |
| धृत्या यया धारयते | १८.३३ |
| धृष्टकेतुश्चेकितानः | १.५ |
| धृष्टद्युम्नो विराटश्च | १.१७ |
| ध्यानयोगपरो नित्यं | १८.५२ |
| ध्यानात् कर्मफलत्यागः | १२.१२ |
| ध्यानेनात्मनि पश्यन्ति | १३.२४ |
| ध्यायतो विषयान् पुंसः | २.६२ |
| **न** | |
| न कर्तृत्वं न कर्माणि | ५.१४ |
| न कर्मणामनारम्भात् | ३.४ |
| न कर्मफलसंयोगं | ५.१४ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| न काङ्क्षे विजयं कृष्ण ! | १.३२ |
| न च तस्मान्मनुष्येषु | १८.६९ |
| न च मत्स्थानि भूतानि | ९.५ |
| न च मां तानि कर्माणि | ९.९ |
| न च शक्नोम्यवस्थातुं | १.३० |
| न च श्रेयोऽनुपश्यामि | १.३१ |
| न च संन्यसनादेव सिद्धिं | ३.४ |
| न चाति स्वप्नशीलस्य | ६.१६ |
| न चाभावयतः शान्तिरशान्तस्य | २.६६ |
| न चाशुश्रूषवे वाच्यं | १८.६७ |
| न चास्य सर्वभूतेषु | ३.१८ |
| न चैतद् विद्मः कतरन्नो गरीयः | २.६ |
| न चैनं क्लेदयन्त्यापो | २.२३ |
| न चैव न भविष्यामः | २.१२ |
| न जायते म्रियते वा कदाचित् | २.२० |
| न तदस्ति पृथिव्यां वा | १८.४० |
| न तदस्ति विना यत् स्यान्मया | १०.३९ |
| न तद् भासयते सूर्यः | १५.६ |
| न तु मां शक्यसे द्रष्टुम् | ११.८ |
| न तु मामभिजानन्ति | ९.२४ |
| न त्वत्समोऽस्त्यभ्यधिकः | ११.४३ |
| न त्वेवाहं जातु नासं | २.१२ |
| न द्वेष्टि सम्प्रवृत्तानि | १४.२२ |
| न द्वेष्ट्यकुशलं कर्म | १८.१० |
| न प्रहृष्येत् प्रियं प्राप्य | ५.२० |
| न बुद्धिभेदं जनयेत् | ३.२६ |
| न मां कर्माणि लिम्पन्ति | ४.१४ |
| न मां दुष्कृतिनो मूढाः | ७.१५ |
| न मे पार्थास्ति कर्तव्यं | ३.२२ |
| न मे विदुः सुरगणाः | १०.२ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| न योत्स्य इति गोविन्दमुक्त्वा | २.९ |
| न रूपमस्येह तथोपलभ्यते | १५.३ |
| न विमुञ्चति दुर्मेधा धृतिः | १८.३५ |
| न वेदयज्ञाध्ययनैर्न दानैर्न | ११.४८ |
| न शौचं नापि चाचारो | १६.७ |
| न स सिद्धिमवाप्नोति | १६.२३ |
| न हि कल्याणकृत् कश्चिद् | ६.४० |
| न हि कश्चित् क्षणमपि | ३.५ |
| न हि ज्ञानेन सदृशं | ४.३८ |
| न हि ते भगवन् व्यक्तिं | १०.१४ |
| न हि देहभृता शक्यं | १८.११ |
| न हि प्रपश्यामि ममापनुद्याद् | २.८ |
| न हिनस्त्यात्मनाऽऽत्मानं | १३.२८ |
| न ह्यसंन्यस्तसङ्कल्पो | ६.२ |
| नकुलः सहदेवश्च | १.१६ |
| नभःस्पृशं दीप्तमनेक | ११.२४ |
| नभश्च पृथिवीं चैव तुमुलो | १.१९ |
| नमः पुरस्तादथ | ११-४० |
| नमस्कृत्वा भूय एवाह कृष्णं | ११.३५ |
| नमस्यन्तश्च मां भक्त्या | ९.१४ |
| नमो नमस्तेऽस्तु सहस्रकृत्वः | ११.३९ |
| नरके नियतं वासो | १.४४ |
| नवद्वारे पुरे देही | ५.१३ |
| नष्टो मोहः स्मृतिर्लब्ध्वा | १८.७३ |
| नात्यश्नतस्तु योगोऽस्ति | ६.१६ |
| नात्युच्छ्रितं नातिनीचं | ६.११ |
| नादत्ते कस्यचित् पापं | ५.१५ |
| नानवाप्तमवाप्तव्यं | ३.२२ |
| नानाविधानि दिव्यानि | ११.५ |
| नानाशस्त्रप्रहरणाः | १.९ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| नान्तं न मध्यं न पुनस्तवादिं | ११.१६ |
| नान्तोऽस्ति मम दिव्यानां | १०.४० |
| नान्यं गुणेभ्यः कर्तारं | १४.१९ |
| नाप्नुवन्ति महात्मानः | ८.१५ |
| नाभिनन्दति न द्वेष्टि | २.५७ |
| नायं लोकोऽस्ति न परो | ४.४० |
| नायं लोकोऽस्त्ययज्ञस्य | ४.३१ |
| नायका मम सैन्यस्य | १.७ |
| नाशयाम्यात्मभावस्थो | १०.११ |
| नासतो विद्यते भावः | २.१६ |
| नास्ति बुद्धिरयुक्तस्य | २.६६ |
| नाहं प्रकाशः सर्वस्य | ७.२५ |
| नाहं वेदैर्न तपसा | ११.५३ |
| निःस्पृहः सर्वकामेभ्यो | ६.१८ |
| नित्यं च समचित्तत्वम् | १३.९ |
| नित्यः सर्वगतः स्थाणुरचलो | २.२४ |
| निद्रालस्यप्रमादोत्थं | १८.३९ |
| निन्दन्तस्तव सामर्थ्यं | २.३६ |
| निबध्नन्ति महाबाहो | १४.५ |
| निमित्तानि च पश्यामि | १.३१ |
| नियतं कुरु कर्म त्वं | ३.८ |
| नियतं सङ्गरहितम् | १८.२३ |
| नियतस्य तु संन्यासः | १८.७ |
| निराशीर्निर्ममो भूत्वा | ३.३० |
| निराशीर्यतचित्तात्मा | ४.२१ |
| निर्दोषं हि समं ब्रह्म | ५.१९ |
| निर्द्वन्द्वो नित्यसत्त्वस्थो | २.४५ |
| निर्द्वन्द्वो हि महाबाहो! | ५.३ |
| निर्ममो निरहंकारः | २.७१ |
| निर्ममो निरहङ्कारः | १२.१३ |
| निर्मानमोहा जितसङ्गदोषाः | १५.५ |
| निर्वैरः सर्वभूतेषु यः | ११.५५ |
| निवसिष्यसि मय्येव | १२.८ |
| निश्चयं शृणु मे तत्र | १८.४ |
| निहत्य धार्तराष्ट्रान् नः | १.३६ |
| नेहाभिक्रमनाशोऽस्ति | २.४० |
| नैते सृती पार्थ जानन् | ८.२७ |
| नैनं छिन्दन्ति शस्त्राणि | २.२३ |
| नैव किञ्चित् करोमीति | ५.८ |
| नैव तस्य कृतेनार्थः | ३.१८ |
| नैष्कर्म्यसिद्धिं परमां | १८.४९ |
| न्याय्यं वा विपरीतं वा | १८.१५ |
| **प** | |
| पञ्चैतानि महाबाहो ! | १८.१३ |
| पतन्ति पितरो ह्येषां | १.४२ |
| पत्रं पुष्पं फलं तोयं | ९.२६ |
| परं ब्रह्म परं धाम | १०.१२ |
| परं भावमजानन्तो | ९.११ |
| परं भावमजानन्तो | ७.२४ |
| परं भूयः प्रवक्ष्यामि | १४.१ |
| परमं पुरुषं दिव्यं याति | ८.८ |
| परमात्मेति चाप्युक्तो | १३.२२ |
| परस्तस्मात्तु भावोऽन्यो | ८.२० |
| परस्परं भावयन्तः श्रेयः | ३.११ |
| परस्योत्सादनार्थं वा | १७.१९ |
| परिचर्यात्मकं कर्म | १८.४४ |
| परिणामे विषमिव | १८.३८ |
| परित्राणाय साधूनां | ४.८ |
| पर्याप्तं त्विदमेतेषां बलं | १.१० |
| पवनः पवतामस्मि | १०.३१ |
| पश्य मे पार्थ! रूपाणि | ११.५ |
| पश्यञ्शृण्वन् स्पृशञ्जिघ्रन्नश्नन् | ५.८ |
| पश्यत्यकृतबुद्धित्वान्न | १८.१६ |
| पश्यादित्यान् वसून् | ११.६ |
| पश्यामि त्वां दीप्तहुताशवक्त्रं | ११.१९ |
| पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद् | ११.१७ |
| पश्यामि देवांस्तव देव! देहे | ११.१५ |
| पश्यैतां पाण्डुपुत्राणाम् | १.३ |
| पाञ्चजन्यं हृषीकेशो | १.१५ |
| पापमेवाश्रयेदस्मान् | १.३६ |
| पाप्मानं प्रजहिह्येनं | ३.४१ |
| पार्थ ! नैवेह नामुत्र | ६.४० |
| पिताऽसि लोकस्य चराचरस्य | ११.४३ |
| पिताऽहमस्य जगतो | ९.१७ |
| पितॄणामर्यमा चास्मि | १०.२९ |
| पितेव पुत्रस्य सखेव सख्युः | ११.४४ |
| पुण्यो गन्धः पृथिव्यां च | ७.९ |
| पुरुजित् कुन्तिभोजश्च | १.५ |
| पुरुषः प्रकृतिस्थो हि | १३.२१ |
| पुरुषं शाश्वतं दिव्यमादिदेवमजं | १०.१२ |
| पुरुषः स परः पार्थ ! | ८.२२ |
| पुरुषः सुखदुःखानां भोक्तृत्वे | १३.२० |
| पुरोधसां च मुख्यं मां | १०.२४ |
| पुष्णामि चौषधीः सर्वाः | १५.१३ |
| पूर्वाभ्यासेन तेनैव | ६.४४ |
| पृथक्त्वेन तु यज्ज्ञानं | १८.२१ |
| पौण्ड्रं दध्मौ महाशङ्खं | १.१५ |
| प्रकाशं च प्रवृत्तिं च | १४.२२ |
| प्रकृतिं पुरुषं चैव | १३.१९ |
| (प्रकृतिं पुरुषं चैव क्षेत्रं) | (१३.१) |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| प्रकृतिं यान्ति भूतानि | ३.३३ |
| प्रकृतिं स्वामधिष्ठाय | ४.६ |
| प्रकृतिं स्वामवष्टभ्य | ९.८ |
| प्रकृतेः क्रियमाणानि | ३.२७ |
| प्रकृतेर्गुणसम्मूढाः | ३.२९ |
| प्रकृत्यैव च कर्माणि | १३.२९ |
| प्रजनश्चास्मि कन्दर्पः | १०.२८ |
| प्रजहाति यदा कामान् | २.५५ |
| प्रणम्य शिरसा देवं | ११.१४ |
| प्रणवः सर्ववेदेषु | ७.८ |
| प्रत्यक्षावगमं धर्म्यं | ९.२ |
| प्रभवः प्रलयः स्थानं | ९.१८ |
| प्रभवन्त्युग्रकर्माणः | १६.९ |
| प्रमादमोहौ तमसो | १४.१७ |
| प्रमादालस्यनिद्राभिस्तन्निबध्नाति | १४.८ |
| प्रयत्नाद् यतमानस्तु | ६.४५ |
| प्रयाणकाले च कथं ज्ञेयोऽसि | ८.२ |
| प्रयाणकाले मनसाऽचलेन | ८.१० |
| प्रयाणकालेऽपि च मां ते | ७.३० |
| प्रयाता यान्ति तं कालं | ८.२३ |
| प्रलपन् विसृजन् गृह्णन् | ५.९ |
| प्रवर्तन्ते विधानोक्ताः | १७.२४ |
| प्रवृत्तिं च निवृत्तिं च | १६.७ |
| प्रवृत्तिं च निवृत्तिं च | १८.३० |
| प्रवृत्ते शस्त्रसम्पाते | १.२० |
| प्रशस्ते कर्मणि तथा | १७.२६ |
| प्रशान्तमनसं ह्येनं | ६.२७ |
| प्रशान्तात्मा विगतभीः | ६.१४ |
| प्रसक्ताः कामभोगेषु | १६.१६ |
| प्रसङ्गेन फलाकाङ्क्षी धृतिः | १८.३४ |
| प्रसन्नचेतसो ह्याशु बुद्धिः | २.६५ |
| प्रसादे सर्वदुःखानां | २.६५ |
| प्रह्लादश्चास्मि दैत्यानां | १०.३० |
| प्राणापानगती रुद्ध्वा | ४.२९ |
| प्राणापानसमायुक्तः | १५.१४ |
| प्राणापानौ समौ कृत्वा | ५.२७ |
| प्राधान्यतः कुरुश्रेष्ठ ! | १०.१९ |
| प्राप्य पुण्यकृतां लोकान् | ६.४१ |
| प्रियो हि ज्ञानिनोऽत्यर्थमहं | ७.१७ |
| प्रेतान् भूतगणांश्चान्ये | १७.४ |
| प्रोच्यते गुणसंख्याने | १८.१९ |
| प्रोच्यमानमशेषेण | १८.२९ |
| **ब** | |
| बन्धं मोक्षं च या वेत्ति | १८.३० |
| बन्धुरात्माऽऽत्मनस्तस्य | ६.६ |
| बलं बलवतां चाहं | ७.११ |
| बहवो ज्ञानतपसा पूता | ४.१० |
| बहिरन्तश्च भूतानाम् | १३.१५ |
| बहुशाखा ह्यनन्ताश्च बुद्धयो | २.४१ |
| बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा | ११.२३ |
| बहूनां जन्मनामन्ते | ७.१९ |
| बहूनि मे व्यतीतानि | ४.५ |
| बहून्यदृष्टपूर्वाणि | ११.६ |
| बाह्यस्पर्शेष्वसक्तात्मा | ५.२१ |
| बीजं मां सर्वभूतानां | ७.१० |
| बुद्धियुक्तो जहातीह | २.५० |
| बुद्धियोगमुपाश्रित्य | १८.५७ |
| बुद्धिर्ज्ञानमसम्मोहः | १०.४ |
| बुद्धिर्बुद्धिमतामस्मि | ७.१० |
| बुद्धेर्भेदं धृतेश्चैव | १८.२९ |
| बुद्धौ शरणमन्विच्छ कृपणाः | २.४९ |
| बुद्ध्या युक्तो यया पार्थ ! | २.३९ |
| बुद्ध्या विशुद्धया युक्तः | १८.५१ |
| बृहत्साम तथा साम्नां | १०.३५ |
| ब्रह्मचर्यमहिंसा च | १७.१४ |
| ब्रह्मणो हि प्रतिष्ठाहम् | १४.२७ |
| ब्रह्मण्याधाय कर्माणि | ५.१० |
| ब्रह्मभूतः प्रसन्नात्मा | १८.५४ |
| ब्रह्मसूत्रपदैश्चैव | १३.४ |
| ब्रह्माग्नावपरे यज्ञं | ४.२५ |
| ब्रह्माणमीशं कमलासनस्थम् | ११.१५ |
| ब्रह्मार्पणं ब्रह्म हविः | ४.२४ |
| ब्रह्मैव तेन गन्तव्यं | ४.२४ |
| ब्राह्मणक्षत्रियविशां | १८.४१ |
| ब्राह्मणास्तेन वेदाश्च यज्ञाश्च | १७.२३ |
| **भ** | |
| भक्तिं मयि परां कृत्वा | १८.६८ |
| भक्तोऽसि मे सखा चेति | ४.३ |
| भक्त्या त्वनन्यया शक्यः | ११.५४ |
| भक्त्या मामभिजानाति | १८.५५ |
| भजन्त्यनन्यमनसो ज्ञात्वा | ९.१३ |
| भयाद् रणादुपरतं | २.३५ |
| भवत्यत्यागिनां प्रेत्य | १८.१२ |
| भवन्ति भावा भूतानां | १०.५ |
| भवन्ति सम्पदं दैवीमभि | १६.३ |
| भवान् भीष्मश्च कर्णश्च | १.८ |
| भवाप्ययौ हि भूतानां | ११.२ |
| भवामि न चिरात् पार्थ ! | १२.७ |
| भविता न च मे तस्मादन्यः | १८.६९ |
| भविष्याणि च भूतानि | ७.२६ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| भावसंशुद्धिरित्येतत् तपो | १७.१६ |
| भीष्मद्रोणप्रमुखतः | १.२५ |
| भीष्ममेवाभिरक्षन्तु भवन्तः | १.११ |
| भीष्मो द्रोणः सूतपुत्रस्तथाऽसौ | ११.२६ |
| भुञ्जते ते त्वघं पापा ये | ३.१३ |
| भूतग्रामः स एवायं | ८.१९ |
| भूतग्राममिमं कृत्स्नमवशं | ९.८ |
| भूतप्रकृतिमोक्षं च ये | १३.३४ |
| भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु | १३.१६ |
| भूतभावन ! भूतेश ! देवदेव ! | १०.१५ |
| भूतभावोद्भवकरो विसर्गः | ८.३ |
| भूतभृन्न च भूतस्थो ममात्मा | ९.५ |
| भूतानि यान्ति भूतेज्या | ९.२५ |
| भूमिरापोऽनलो वायुः | ७.४ |
| भूयः कथय तृप्तिर्हि | १०.१८ |
| भूय एव महाबाहो ! | १०.१ |
| भोक्तारं यज्ञतपसां | ५.२९ |
| भोगैश्वर्यप्रसक्तानां | २.४४ |
| भ्रामयन् सर्वभूतानि | १८.६१ |
| भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् | ८.१० |
| **म** | |
| मच्चित्तः सर्वदुर्गाणि | १८.५८ |
| मच्चित्ता मद्गतप्राणाः | १०.९ |
| मत्कर्मकृन्मत्परमः | ११.५५ |
| मत्तः परतरं नान्यत् | ७.७ |
| मत्त एवेति तान् विद्धि | ७.१२ |
| मत्प्रसादादवाप्नोति शाश्वतं | १८.५६ |
| मत्स्थानि सर्वभूतानि | ९.४ |
| मदनुग्रहाय परमं | ११.१ |
| मदर्थमपि कर्माणि कुर्वन् | १२.१० |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| मद्भक्त एतद् विज्ञाय | १३.१८ |
| मद्भावा मानसा जाता | १०.६ |
| मनः संयम्य मच्चित्तो | ६.१४ |
| मनःप्रसादः सौम्यत्वं | १७.१६ |
| मनःषष्ठानीन्द्रियाणि | १५.७ |
| मनसस्तु परा बुद्धिर्यो बुद्धेः | ३.४२ |
| मनसैवेन्द्रियग्रामं विनियम्य | ६.२४ |
| मनुष्याणां सहस्रेषु | ७.३ |
| मन्त्रोऽहमहमेवाज्यमहमग्निरहं | ९.१६ |
| मन्मना भव मद्भक्तः | १८.६५ |
| मन्मना भव मद्भक्तः | ९.३४ |
| मन्यसे यदि तच्छक्यं | ११.४ |
| मम देहे गुडाकेश! | ११.७ |
| मम योनिर्महद् ब्रह्म | १४.३ |
| मम वर्त्मानुवर्तन्ते मनुष्याः | ४.११ |
| मम वर्त्मानुवर्तन्ते मनुष्याः | ३.२३ |
| ममैवांशो जीवलोके | १५.७ |
| मया ततमिदं सर्वं | ९.४ |
| मया प्रसन्नेन तवार्जुनेदं | ११.४७ |
| मया हतांस्त्वं जहि मा व्यथिष्ठाः | ११.३४ |
| मयाऽध्यक्षेण प्रकृतिः | ९.१० |
| मयि सर्वमिदं प्रोतं | ७.७ |
| मयि चानन्ययोगेन | १३.१० |
| मयि सर्वाणि कर्माणि | ३.३० |
| मयैवैते निहताः पूर्वमेव | ११.३३ |
| मय्यर्पितमनोबुद्धिर्माम् | ८.७ |
| मय्यर्पितमनोबुद्धिर्यो | १२.१४ |
| मय्यावेश्य मनो ये मां | १२.२ |
| मय्यासक्तमनाः पार्थ ! | ७.१ |
| मय्येव मन आधत्स्व | १२.८ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| मरीचिर्मरुतामस्मि | १०.२१ |
| महर्षयः सप्त पूर्वे | १०.६ |
| महर्षीणां भृगुरहं | १०.२५ |
| महात्मानस्तु मां पार्थ ! | ९.१३ |
| महाभूतान्यहङ्कारः | १३.५ |
| महाशनो महापाप्मा | ३.३७ |
| मां च योऽव्यभिचारेण | १४.२६ |
| मां चैवान्तःशरीरस्थं तान् | १७.६ |
| मां हि पार्थ ! व्यपाश्रित्य | ९.३२ |
| मा कर्मफलहेतुर्भूर्मा ते | २.४७ |
| मा ते व्यथा मा च विमूढभावः | ११.४९ |
| मा शुचः सम्पदं दैवीमभिजातो | १६.५ |
| मातुलाः श्वशुराः पौत्राः श्यालाः | १.३४ |
| मात्रास्पर्शास्तु कौन्तेय ! | २.१४ |
| माधवः पाण्डवश्चैव | १.१४ |
| मानापमानयोस्तुल्यः | १४.२५ |
| मामकाः पाण्डवाश्चैव | १.१ |
| मामप्राप्यैव कौन्तेय ततो | १६.२० |
| मामात्मपरदेहेषु | १६.१८ |
| मामुपेत्य तु कौन्तेय ! | ८.१६ |
| मामुपेत्य पुनर्जन्म | ८.१५ |
| मामेव ये प्रपद्यन्ते मायामेतां | ७.१४ |
| मामेवैष्यसि युक्त्वैवमात्मानं | ९.३४ |
| मामेवैष्यसि सत्यं ते प्रतिजाने | १८.६५ |
| माययाऽपहृतज्ञाना आसुरं | ७.१५ |
| मासानां मार्गशीर्षोऽहमृतूनां | १०.३५ |
| मिथ्यैष व्यवसायस्ते | १८.५९ |
| मुक्तसङ्गोऽनहंवादी | १८.२६ |
| मुनीनामप्यहं व्यासः | १०.३७ |
| मूढग्राहेणात्मनो यत् | १७.१९ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| मूढोऽयं नाभिजानाति लोको | ७.२५ |
| मूर्ध्न्याधायाऽऽत्मनः प्राणम् | ८.१२ |
| मृगाणां च मृगेन्द्रोऽहं | १०.३० |
| मृत्युः सर्वहरश्चाहम् | १०.३४ |
| मोघाशा मोघकर्माणः | ९.१२ |
| मोहात् तस्य परित्यागस्तामसः | १८.७ |
| मोहादारभ्यते कर्म यत् तत् | १८.२५ |
| मोहाद् गृहीत्वाऽसद्ग्राहान् | १६.१० |
| मोहितं नाभिजानाति मामेभ्यः | ७.१३ |
| मौनं चैवास्मि गुह्यानां ज्ञानं | १०.३८ |
| **य** | |
| यः पश्यति तथाऽऽत्मानम् | १३.२९ |
| यः प्रयाति त्यजन् देहं स | ८.१३ |
| यः प्रयाति स मद्भावं याति | ८.५ |
| यं प्राप्य न निवर्तन्ते तद् | ८.२१ |
| यं यं वापि स्मरन् भावं | ८.६ |
| यं लब्ध्वा चापरं लाभं | ६.२२ |
| यः शास्त्रविधिमुत्सृज्य | १६.२३ |
| यं संन्यासमिति प्राहुः | ६.२ |
| यः स सर्वेषु भूतेषु | ८.२० |
| यः सर्वत्रानभिस्नेहः | २.५७ |
| यं हि न व्यथयन्त्येते | २.१५ |
| य इमं परमं गुह्यं | १८.६८ |
| य एनं वेत्ति हन्तारं | २.१९ |
| य एवं वेत्ति पुरुषं | १३.२३ |
| यक्ष्ये दास्यामि मोदिष्य | १६.१५ |
| यच्चन्द्रमसि यच्चाग्नौ तत् | १५.१२ |
| यच्चापि सर्वभूतानां | १०.३९ |
| यच्चावहासार्थमसत्कृतोऽसि | ११.४२ |
| यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे | २.७ |
| यच्छ्रेय एतयोरेकं तन्मे | ५.१ |
| यजन्ते नामयज्ञैस्ते | १६.१७ |
| यजन्ते सात्त्विका देवान् | १७.४ |
| यज्ज्ञात्वा न पुनर्मोहम् | ४.३५ |
| यज्ज्ञात्वा नेह भूयोऽन्यत् | ७.२ |
| यज्ज्ञात्वा मुनयः सर्वे | १४.१ |
| यज्ञदानतपःकर्म | १८.५ |
| यज्ञदानतपःकर्म न | १८.३ |
| यज्ञशिष्टामृतभुजः | ४.३१ |
| यज्ञशिष्टाशिनः सन्तः | ३.१३ |
| यज्ञस्तपस्तथा दानं | १७.७ |
| यज्ञाद् भवति पर्जन्यो | ३.१४ |
| यज्ञानां जपयज्ञोऽस्मि | १०.२५ |
| यज्ञायाचरतः कर्म | ४.२३ |
| यज्ञार्थात् कर्मणोऽन्यत्र | ३.९ |
| यज्ञे तपसि दाने च | १७.२७ |
| यज्ञो दानं तपश्चैव पावनानि | १८.५ |
| यतः प्रवृत्तिर्भूतानां | १८.४६ |
| यततामपि सिद्धानां | ७.३ |
| यतते च ततो भूयः | ६.४३ |
| यततो ह्यपि कौन्तेय | २.६० |
| यतन्तो योगिनश्चैनं | १५.११ |
| यतन्तोऽप्यकृतात्मानो | १५.११ |
| यतेन्द्रियमनोबुद्धिः | ५.२८ |
| यतो यतो निश्चरति | ६.२६ |
| यत् त्वयोक्तं वचस्तेन | ११.१ |
| यत् सांख्यैः प्राप्यते स्थानं | ५.५ |
| यत्करोषि यदश्नासि | ९.२७ |
| यत्तदग्रे विषमिव | १८.३७ |
| यत्तपस्यसि कौन्तेय ! | ९.२७ |
| यत्तु कामेप्सुना कर्म | १८.२४ |
| यत्तु कृत्स्नवदेकस्मिन् | १८.२२ |
| यत्तु प्रत्युपकारार्थं | १७.२१ |
| यत्तेऽहं प्रीयमाणाय | १०.१ |
| यत्र काले त्वनावृत्तिम् | ८.२३ |
| यत्र चैवात्मनाऽऽत्मानं | ६.२० |
| यत्र योगेश्वरः कृष्णः | १८.७८ |
| यत्रोपरमते चित्तं | ६.२० |
| यथा दीपो निवातस्थः | ६.१९ |
| यथा नदीनां बहवोऽम्बुवेगाः | ११.२८ |
| यथा प्रकाशयत्येकः | १३.३३ |
| यथा प्रदीप्तं ज्वलनं पतङ्गाः | ११.२९ |
| यथा सर्वगतं सौक्ष्म्यात् | १३.३२ |
| यथाऽऽकाशस्थितो नित्यं | ९.६ |
| यथैधांसि समिद्धोऽग्निः | ४.३७ |
| यथोल्बेनावृतो गर्भः | ३.३८ |
| यदक्षरं वेदविदो वदन्ति | ८.११ |
| यदग्रे चानुबन्धे च | १८.३९ |
| (यदहंकारमाश्रित्य) | (१८.५९) |
| यदा ते मोहकलिलम् | २.५२ |
| यदा भूतपृथग्भावम् | १३.३० |
| यदा यदा हि धर्मस्य | ४.७ |
| यदा विनियतं चित्तम् | ६.१८ |
| यदा संहरते चायं | २.५८ |
| यदा सत्त्वे प्रवृद्धे तु | १४.१४ |
| यदा हि नेन्द्रियार्थेषु | ६.४ |
| यदादित्यगतं तेजो | १५.१२ |
| यदि भाः सदृशी सा स्याद् | ११.१२ |
| यदि मामप्रतीकारम् | १.४६ |
| यदि ह्यहं न वर्तेयं | ३.२३ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| यदिच्छन्तो ब्रह्मचर्यं चरन्ति | ८.११ |
| यदृच्छया चोपपन्नं | २.३२ |
| यदृच्छालाभसन्तुष्टो | ४.२२ |
| यद् गत्वा न निवर्तन्ते | १५.६ |
| यद् राज्यसुखलोभेन | १.४५ |
| यद्यदाचरति श्रेष्ठः | ३.२१ |
| यद्यद् विभूतिमत् सत्त्वं | १०.४१ |
| यद्यप्येते न पश्यन्ति | १.३८ |
| यद्यहङ्कारमाश्रित्य | १८.५९ |
| यया तु धर्मकामार्थान् | १८.३४ |
| यया धर्ममधर्मं च | १८.३१ |
| यया स्वप्नं भयं शोकं | १८.३५ |
| यष्टव्यमेवेति मनः | १७.११ |
| यस्तु कर्मफलत्यागी | १८.११ |
| यस्त्वात्मरतिरेव स्यात् | ३.१७ |
| यस्त्विन्द्रियाणि मनसा | ३.७ |
| यस्मात् क्षरमतीतोऽहम् | १५.१८ |
| यस्मान्नोद्विजते लोकः | १२.१५ |
| यस्मिन् स्थितो न दुःखेन | ६.२२ |
| यस्य नाहङ्कृतो भावः | १८.१७ |
| यस्य सर्वे समारम्भाः | ४.१९ |
| यस्यां जाग्रति भूतानि | २.६९ |
| यस्यान्तःस्थानि भूतानि | ८.२२ |
| या निशा सर्वभूतानां | २.६९ |
| यातयामं गतरसं | १७.१० |
| यानेव हत्वा न जिजीविषामस्ते | २.६ |
| यान्ति देवव्रता देवान् | ९.२५ |
| याभिर्विभूतिभिर्लोकानिमांस्त्वं | १०.१६ |
| यामिमां पुष्पितां वाचं | २.४२ |
| यावत् संजायते किञ्चित् | १३.२६ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| यावदेतान् निरीक्षेऽहं | १.२२ |
| यावानर्थ उदपाने | २.४६ |
| युक्तः कर्मफलं त्यक्त्वा | ५.१२ |
| युक्त इत्युच्यते योगी | ६.८ |
| युक्तस्वप्नावबोधस्य | ६.१७ |
| युक्ताहारविहारस्य | ६.१७ |
| युञ्जन्नेवं सदाऽऽत्मानं | ६.१५ |
| युञ्जन्नेवं सदाऽऽत्मानं | ६.२८ |
| युधामन्युश्च विक्रान्तः | १.६ |
| युयुधानो विराटश्च | १.४ |
| ये चाप्यक्षरमव्यक्तं | १२.१ |
| ये चैव सात्त्विका भावाः | ७.१२ |
| ये तु धर्म्यामृतमिदं | १२.२० |
| ये तु सर्वाणि कर्माणि | १२.६ |
| ये त्वक्षरमनिर्देश्यम् | १२.३ |
| ये त्वेतदभ्यसूयन्तः | ३.३२ |
| ये भजन्ति तु मां भक्त्या | ९.२९ |
| ये मे मतमिदं नित्यं | ३.३१ |
| ये यथा मां प्रपद्यन्ते | ४.११ |
| ये शास्त्रविधिमुत्सृज्य | १७.१ |
| ये हि संस्पर्शजा भोगाः | ५.२२ |
| येऽप्यन्यदेवताभक्ता | ९.२३ |
| येन भूतान्यशेषेण | ४.३५ |
| येषां च त्वं बहुमतो | २.३५ |
| येषां त्वन्तगतं पापं | ७.२८ |
| येषामर्थे काङ्क्षितं नः | १.३३ |
| यो न हृष्यति न द्वेष्टि | १२.१७ |
| यो मां पश्यति सर्वत्र | ६.३० |
| यो मामजमनादिं च | १०.३ |
| यो मामेवमसम्मूढो | १५.१९ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| यो यो यां यां तनुं भक्तः | ७.२१ |
| यो लोकत्रयमाविश्य | १५.१७ |
| योऽन्तःसुखोऽन्तरारामः | ५.२४ |
| योऽयं योगस्त्वया प्रोक्तः | ६.३३ |
| योगं योगेश्वरात् कृष्णात् | १८.७५ |
| योगयुक्तो मुनिर्ब्रह्म | ५.६ |
| योगयुक्तो विशुद्धात्मा | ५.७ |
| योगसंन्यस्तकर्माणं | ४.४१ |
| योगस्थः कुरु कर्माणि | २.४८ |
| योगारूढस्य तस्यैव शमः | ६.३ |
| योगिनः कर्म कुर्वन्ति सङ्गं | ५.११ |
| योगिनामपि सर्वेषां | ६.४७ |
| योगिनो यतचित्तस्य युञ्जतो | ६.१९ |
| योगी युञ्जीत सतत | ६.१० |
| योगेनाव्यभिचारिण्या धृतिः | १८.३३ |
| योगेश्वर ! ततो मे त्वं | ११.४ |
| योत्स्यमानानवेक्षेऽहं | १.२३ |
| **र** | |
| रक्षांसि भीतानि दिशो द्रवन्ति | ११.३६ |
| रजः सत्त्वं तमश्चैव तमः | १४.१० |
| रजसस्तु फलं दुःखमज्ञानं | १४.१६ |
| रजसि प्रलयं गत्वा | १४.१५ |
| रजस्तमश्चाभिभूय | १४.१० |
| रजस्येतानि जायन्ते | १४.१२ |
| रजो रागात्मकं विद्धि | १४.७ |
| रसवर्जं रसोऽप्यस्य | २.५९ |
| रसोऽहमप्सु कौन्तेय ! | ७.८ |
| रस्याः स्निग्धाः स्थिरा हृद्याः | १७.८ |
| राक्षसीमासुरीं चैव प्रकृतिं | ९.१२ |
| रागद्वेषवियुक्तैस्तु | २.६४ |

| श्लोकः | श्लोकाङ्कः | श्लोकः | श्लोकाङ्कः | श्लोकः | श्लोकाङ्कः |
|---|---|---|---|---|---|
| रागी कर्मफलप्रेप्सुः | १८.२७ | विधिहीनमसृष्टान्नं | १७.१३ | वेदैश्च सर्वैरहमेव वेद्यो | १५.१५ |
| राजन्! संस्मृत्य संस्मृत्य | १८.७६ | विनश्यत्स्वविनश्यन्तं | १३.२७ | वेद्यं पवित्रमोङ्कार ऋक् | ९.१७ |
| राजविद्या राजगुह्यं | ९.२ | विनाशमव्ययस्यास्य | २.१७ | वेपथुश्च शरीरे मे | १.२९ |
| रात्रिं युगसहस्रान्तां | ८.१७ | विमुच्य निर्ममः शान्तो | १८.५३ | व्यपेतभीः प्रीतमनाः पुनस्त्वं | ११.४९ |
| रात्र्यागमे प्रलीयन्ते | ८.१८ | विमूढा नानुपश्यन्ति | १५.१० | व्यवसायात्मिका बुद्धिः | २.४१ |
| रात्र्यागमेऽवशः पार्थ ! | ८.१९ | विमृश्यैतदशेषेण | १८.६३ | व्यवसायात्मिका बुद्धिः | २.४४ |
| रुद्राणां शङ्करश्चास्मि | १०.२३ | विवस्वान् मनवे प्राह | ४.१ | व्यामिश्रेणेव वाक्येन | ३.२ |
| रुद्रादित्या वसवो ये च साध्याः | ११.२२ | विविक्तदेशसेवित्वम् | १३.१० | व्यासप्रसादाच्छ्रुतवान् | १८.७५ |
| रूपं महत् ते बहुवक्त्रनेत्रं | ११.२३ | विविक्तसेवी लघ्वाशी | १८.५२ | व्यूढां द्रुपदपुत्रेण तव | १.३ |
| **ल** | | विविधाश्च पृथक् चेष्टाः | १८.१४ | **श** | |
| लभते च ततः कामान् | ७.२२ | विषया विनिवर्तन्ते | २.५९ | शक्नोतीहैव यः सोढुं | ५.२३ |
| लभन्ते ब्रह्मनिर्वाणम् | ५.२५ | विषयेन्द्रियसंयोगाद् | १८.३८ | शक्य एवंविधो द्रष्टुं | ११.५३ |
| लिप्यते न स पापेन | ५.१० | विषादी दीर्घसूत्री च | १८.२८ | शनैः शनैरुपरमेद् | ६.२५ |
| लेलिह्यसे ग्रसमानः समन्तात् | ११.३० | विषीदन्तमिदं वाक्यमुवाच | २.१ | शब्दादीन् विषयांस्त्यक्त्वा | १८.५१ |
| लोकसंग्रहमेवापि सम्पश्यन् | ३.२० | विष्टभ्याहमिदं कृत्स्नमेकांशेन | १०.४२ | शब्दादीन् विषयानन्ये | ४.२६ |
| लोकेऽस्मिन् द्विविधा निष्ठा | ३.३ | विसृज्य सशरं चापं | १.४७ | शमो दमस्तपः शौचं | १८.४२ |
| लोभः प्रवृत्तिरारम्भः | १४.१२ | विस्तरेणात्मनो योगं | १०.१८ | शरीरं यदवाप्नोति | १५.८ |
| **व** | | विस्मयो मे महान् राजन्! | १८.७७ | शरीरयात्राऽपि च ते न | ३.८ |
| वक्तुमर्हस्यशेषेण | १०.१६ | विहाय कामान् यः सर्वान् | २.७१ | शरीरवाङ्मनोभिर्यत् | १८.१५ |
| वक्त्राणि ते त्वरमाणा विशन्ति | ११.२७ | वीतरागभयक्रोधः | २.५६ | शरीरस्थोऽपि कौन्तेय ! | १३.३१ |
| वशे हि यस्येन्द्रियाणि | २.६१ | वीतरागभयक्रोधाः | ४.१० | शान्तिं निर्वाणपरमां | ६.१५ |
| वश्यात्मना तु यतता | ६.३६ | वृष्णीनां वासुदेवोऽस्मि | १०.३७ | शारीरं केवलं कर्म कुर्वन् | ४.२१ |
| वसूनां पावकश्चास्मि मेरुः | १०.२३ | वेत्ताऽसि वेद्यं च परं च धाम | ११.३८ | शाश्वतस्य च धर्मस्य | १४.२७ |
| वायुर्यमोऽग्निर्वरुणः शशाङ्कः | ११.३९ | वेत्ति यत्र न चैवायं | ६.२१ | शीतोष्णसुखदुःखेषु तथा | ६.७ |
| वासांसि जीर्णानि यथा विहाय | २.२२ | वेत्ति सर्वेषु भूतेषु तज्ज्ञानं | १८.२१ | शीतोष्णसुखदुःखेषु समः | १२.१८ |
| वासुदेवः सर्वमिति स महात्मा | ७.१९ | वेदवादरताः पार्थ ! | २.४२ | शुक्लकृष्णे गती ह्येते | ८.२६ |
| विकारांश्च गुणांश्चैव विद्धि | १३.१९ | वेदानां सामवेदोऽस्मि | १०.२२ | शुचीनां श्रीमतां गेहे | ६.४१ |
| विगतेच्छाभयक्रोधो | ५.२८ | वेदाविनाशिनं नित्यं | २.२१ | शुचौ देशे प्रतिष्ठाप्य | ६.११ |
| विज्ञातुमिच्छामि भवन्तमाद्यं | ११.३१ | वेदाहं समतीतानि | ७.२६ | शुनि चैव श्वपाके च | ५.१८ |
| विद्याविनयसम्पन्ने | ५.१८ | वेदेषु यज्ञेषु तपस्सु चैव | ८.२८ | शुभाशुभपरित्यागी | १२.१७ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| शुभाशुभफलैरेवं | ९.२८ |
| शौर्यं तेजो धृतिर्दाक्ष्यं | १८.४३ |
| श्रद्दधाना मत्परमा भक्तास्ते | १२.२० |
| श्रद्धया परया तप्तं | १७.१७ |
| श्रद्धया परयोपेतास्ते | १२.२ |
| श्रद्धामयोऽयं पुरुषो | १७.३ |
| श्रद्धावन्तोऽनसूयन्तो | ३.३१ |
| श्रद्धावाननसूयश्च | १८.७१ |
| श्रद्धावान् भजते यो मां | ६.४७ |
| श्रद्धावान् लभते ज्ञानं | ४.३९ |
| श्रद्धाविरहितं यज्ञं | १७.१३ |
| श्रुतिविप्रतिपन्ना ते | २.५३ |
| श्रेयान् द्रव्यमयाद् यज्ञाद् | ४.३३ |
| श्रेयान् स्वधर्मो विगुणः | १८.४७ |
| श्रेयान् स्वधर्मो विगुणः | ३.३५ |
| श्रेयो हि ज्ञानमभ्यासात् | १२.१२ |
| श्रोत्रं चक्षुः स्पर्शनं च | १५.९ |
| श्रोत्रादीनीन्द्रियाण्यन्ये | ४.२६ |
| श्वशुरान् सुहृदश्चैव | १.२७ |
| **स** | |
| संकरो नरकायैव | १.४२ |
| संकल्पप्रभवान् कामां | ६.२४ |
| संतुष्टः सततं योगी | १२.१४ |
| संनियम्येन्द्रियग्रामं | १२.४ |
| संन्यासं कर्मणां कृष्ण ! | ५.१ |
| संन्यासः कर्मयोगश्च | ५.२ |
| संन्यासस्तु महाबाहो ! | ५.६ |
| संन्यासस्य महाबाहो ! | १८.१ |
| संप्रेक्ष्य नासिकाग्रं स्वं | ६.१३ |
| संवादमिममश्रौषम् | १८.७४ |
| स एवायं मया तेऽद्य | ४.३ |
| स कालेनेह महता योगो | ४.२ |
| स कृत्वा राजसं त्यागं | १८.८ |
| स गुणान् समतीत्यैतान् | १४.२६ |
| स घोषो धार्तराष्ट्राणां | १.१९ |
| स च यो यत्प्रभावश्च | १३.३ |
| स तया श्रद्धया युक्तः | ७.२२ |
| स निश्चयेन योक्तव्यो | ६.२३ |
| स बुद्धिमान् मनुष्येषु स युक्तः | ४.१८ |
| स ब्रह्मयोगयुक्तात्मा | ५.२१ |
| स यत् प्रमाणं कुरुते | ३.२१ |
| स योगी ब्रह्मनिर्वाणं | ५.२४ |
| स संन्यासी च योगी च | ६.१ |
| स सर्वविद् भजति मां | १५.१९ |
| सक्ताः कर्मण्यविद्वांसो | ३.२५ |
| सखेति मत्वा प्रसभं यदुक्तं | ११.४१ |
| सङ्करस्य च कर्ता स्याम् | ३.२४ |
| सङ्गं त्यक्त्वा फलं चैव | १८.९ |
| सङ्गात् संजायते कामः | २.६२ |
| सततं कीर्तयन्तो मां | ९.१४ |
| सत्कारमानपूजार्थं | १७.१८ |
| सत्त्वं प्रकृतिजैर्मुक्तं | १८.४० |
| सत्त्वं रजस्तम इति | १४.५ |
| सत्त्वं सुखे सञ्जयति | १४.९ |
| सत्त्वात्सञ्जायते ज्ञानं | १४.१७ |
| सत्त्वानुरूपा सर्वस्य | १७.३ |
| सदृशं चेष्टते स्वस्याः | ३.३३ |
| सद्भावे साधुभावे च | १७.२६ |
| समं सर्वेषु भूतेषु | १३.२७ |
| समं कायशिरोग्रीवं | ६.१३ |
| समं पश्यन् हि सर्वत्र | १३.२८ |
| समः शत्रौ च मित्रे च | १२.१८ |
| समः सर्वेषु भूतेषु मद्भक्तिं | १८.५४ |
| समः सिद्धावसिद्धौ च कृत्वाऽपि | ४.२२ |
| समदुःखसुखं धीरं | २.१५ |
| समदुःखसुखः स्वस्थः | १४.२४ |
| समाधावचला बुद्धिस्तदा | २.५३ |
| समासेनैव कौन्तेय ! | १८.५० |
| समोऽहं सर्वभूतेषु | ९.२९ |
| सम्भवः सर्वभूतानां | १४.३ |
| सम्भावितस्य चाकीर्तिः | २.३४ |
| सर्गाणामादिरन्तश्च | १०.३२ |
| सर्गेऽपि नोपजायन्ते | १४.२ |
| सर्वं कर्माखिलं पार्थ ! | ४.३३ |
| सर्वं ज्ञानप्लवेनैव वृजिनं | ४.३६ |
| सर्वकर्मफलत्यागं | १२.११ |
| सर्वकर्मफलत्यागं प्राहुः | १८.२ |
| सर्वकर्माणि मनसा | ५.१३ |
| सर्वकर्माण्यपि सदा | १८.५६ |
| सर्वगुह्यतमं भूयः | १८.६४ |
| सर्वज्ञानविमूढांस्तान् विद्धि | ३.३२ |
| सर्वतःपाणिपादं तत् | १३.१३ |
| सर्वतःश्रुतिमल्लोके | १३.१३ |
| सर्वत्रगमचिन्त्यं च | १२.३ |
| सर्वत्रावस्थितो देहे | १३.३२ |
| सर्वथा वर्तमानोऽपि न स | १३.२३ |
| सर्वथा वर्तमानोऽपि | ६.३१ |
| सर्वद्वाराणि संयम्य | ८.१२ |
| सर्वद्वारेषु देहेऽस्मिन् | १४.११ |
| सर्वधर्मान् परित्यज्य | १८.६६ |

| श्लोकः | श्लोकाङ्कः |
|---|---|
| सर्वभूतस्थमात्मानं | ६.२९ |
| सर्वभूतस्थितं यो मां | ६.३१ |
| सर्वभूतात्मभूतात्मा | ५.७ |
| सर्वभूतानि कौन्तेय ! | ९.७ |
| सर्वभूतानि संमोहं | ७.२७ |
| सर्वभूतेषु येनैकं | १८.२० |
| सर्वमेतदृतं मन्ये | १०.१४ |
| सर्वयोनिषु कौन्तेय | १४.४ |
| सर्वसङ्कल्पसंन्यासी | ६.४ |
| सर्वस्य चाहं हृदि सन्निविष्टः | १५.१५ |
| सर्वस्य धातारमचिन्त्यरूपम् | ८.९ |
| सर्वाणीन्द्रियकर्माणि | ४.२७ |
| सर्वारम्भपरित्यागी | १४.२५ |
| सर्वारम्भपरित्यागी यो | १२.१६ |
| सर्वारम्भा हि दोषेण | १८.४८ |
| सर्वार्थान् विपरीतांश्च | १८.३२ |
| सर्वाश्चर्यमयं देवमनन्तं | ११.११ |
| सर्वेऽप्येते यज्ञविदो | ४.३० |
| सर्वेन्द्रियगुणाभासं | १३.१४ |
| सहजं कर्म कौन्तेय ! | १८.४८ |
| सहयज्ञाः प्रजाः सृष्ट्वा | ३.१० |
| सहसैवाभ्यहन्यन्त स | १.१३ |
| सहस्रयुगपर्यन्तम् | ८.१७ |
| सांख्ययोगौ पृथग् बालाः | ५.४ |
| सांख्ये कृतान्ते प्रोक्तानि | १८.१३ |
| सात्त्विकी राजसी चैव | १७.२ |
| साधिभूताधिदैवं मां | ७.३० |
| साधुरेव स मन्तव्यः | ९.३० |
| साधुष्वपि च पापेषु | ६.९ |
| सिंहनादं विनद्योच्चैः | १.१२ |
| सिद्धिं प्राप्तो यथा ब्रह्म | १८.५० |
| सिद्ध्यसिद्ध्योः समो भूत्वा | २.४८ |
| सिद्ध्यसिद्ध्योर्निर्विकारः | १८.२६ |
| सीदन्ति मम गात्राणि | १.२९ |
| सुखं त्विदानीं त्रिविधं | १८.३६ |
| सुखं दुःखं भवोऽभावो | १०.४ |
| सुखं वा यदि वा दुःखं | ६.३२ |
| सुखदुःखे समे कृत्वा | २.३८ |
| सुखमात्यन्तिकं यत्तद् | ६.२१ |
| सुखसङ्गेन बध्नाति | १४.६ |
| सुखिनः क्षत्रियाः पार्थ ! | २.३२ |
| सुखेन ब्रह्मसंस्पर्शमत्यन्तं | ६.२८ |
| सुदुर्दर्शमिदं रूपं | ११.५२ |
| सुहृदं सर्वभूतानां ज्ञात्वा | ५.२९ |
| सुहृन्मित्रार्युदासीन | ६.९ |
| सूक्ष्मत्वात् तदविज्ञेयं | १३.१५ |
| सेनयोरुभयोर्मध्ये रथं | १.२१ |
| सेनयोरुभयोर्मध्ये | २.१० |
| सेनयोरुभयोर्मध्ये स्थापयित्वा | १.२४ |
| सेनानीनामहं स्कन्दः | १०.२४ |
| सोऽपि मुक्तः शुभान् लोकान् | १८.७१ |
| सोऽविकम्पेन योगेन | १०.७ |
| सौभद्रश्च महाबाहुः | १.१८ |
| सौभद्रो द्रौपदेयाश्च | १.६ |
| स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि | ९.३२ |
| स्त्रीषु दुष्टासु वार्ष्णेय ! | १.४१ |
| स्थाने हृषीकेश ! तव प्रकीर्त्या | ११.३६ |
| स्थितधीः किं प्रभाषेत किमासीत | २.५४ |
| स्थितप्रज्ञस्य का भाषा | २.५४ |
| स्थितोऽस्मि गतसन्देहः | १८.७३ |
| स्थित्वाऽस्यामन्तकालेऽपि | २.७२ |
| स्थिरबुद्धिरसम्मूढो ब्रह्मविद् | ५.२० |
| स्पर्शान् कृत्वा बहिर्बाह्यान् | ५.२७ |
| स्मृतिभ्रंशाद् बुद्धिनाशो | २.६३ |
| स्वकर्मणा तमभ्यर्च्य | १८.४६ |
| स्वकर्मनिरतः सिद्धिं | १८.४५ |
| स्वजनं हि कथं हत्वा | १.३७ |
| स्वधर्ममपि चावेक्ष्य | २.३१ |
| स्वधर्मे निधनं श्रेयः | ३.३५ |
| स्वभावजेन कौन्तेय ! | १८.६० |
| स्वभावनियतं कर्म कुर्वन् | १८.४७ |
| स्वयमेवात्मात्मनाऽऽत्मानं | १०.१५ |
| स्वल्पमप्यस्य धर्मस्य | २.४० |
| स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः | ११.२१ |
| स्वाध्यायज्ञानयज्ञाश्च यतयः | ४.२८ |
| स्वाध्यायाभ्यसनं चैव | १७.१५ |
| स्वे स्वे कर्मण्यभिरतः | १८.४५ |
| **ह** | |
| हतो वा प्राप्स्यसि स्वर्गं | २.३७ |
| हत्वाऽपि स इमान् लोकान् | १८.१७ |
| हत्वाऽर्थकामांस्तु गुरूनिहैव | २.५ |
| हन्त ते कथयिष्यामि | १०.१९ |
| हर्षशोकान्वितः कर्ता | १८.२७ |
| हर्षामर्षभयोद्वेगैः मुक्तो | १२.१५ |
| हृषीकेशं तदा वाक्यम् | १.२१ |
| हेतुनाऽनेन कौन्तेय | ९.१० |


*******

# अथ श्रीमद्भगवद्गीताश्लोकान्तर्गतपदानामनुक्रमणिका


| पदानि | अ० श्लो० |
|---|---|
| **अ.** | |
| अकर्तारम् | ४-१३; १३-२९ |
| अकर्म | ४-१६,१८ |
| अकर्मकृत् | ३-५ |
| अकर्मणः | ३-८(२); ४-१७ |
| अकर्मणि | २-४७; ४-१८ |
| अकल्मषम् | ६-२७ |
| अकारः | १०-३३ |
| अकार्यम् | १८-३१ |
| अकीर्तिकरम् | २-२ |
| अकीर्तिम् | २-३४ |
| अकीर्तिः | २-३४ |
| अकुर्वत | १-१ |
| अकुशलम् | १८-१० |
| अकृतबुद्धित्वात् | १८-१६ |
| अकृतात्मानः | १५-११ |
| अकृतेन | ३-१८ |
| अकृत्स्नविदः | ३-२९ |
| अक्रियः | ६-१ |
| अक्रोधः | १६-२ |
| अक्लेद्यः | २-२४ |
| अक्षयम् | ५-२१ |
| अक्षयः | १०-३३ |
| अक्षरसमुद्भवम् | ३-१५ |
| अक्षरम् | ८-३, ११; १०-२५; ११-१८, ३७; १२-१,३ |
| अक्षरः | ८-२१; १५-१६(२) |
| अक्षराणाम् | १०-१३ |
| अक्षरात् | १५-१८ |
| अखिलम् | ४-३३; ७-२९; १५-१२ |
| अगतासून् | २-११ |
| अग्निः | ४-३७; ८-२४; ९-१६; ११-३९; १८-४८ |
| अग्नौ | १५-१२ |
| अग्रे | १८-३७, ३८, ३९ |
| अघम् | ३-१३ |
| अघायुः | ३-१६ |
| अङ्गानि | २-५८ |
| अचरम् | १३-१५ |
| अचलप्रतिष्ठम् | २-७० |
| अचलम् | ६-१३; १२-३ |
| अचलः | २-२४ |
| अचला | २-५३ |
| अचलाम् | ७-२१ |
| अचलेन | ८-१० |
| अचापलम् | १६-२ |
| अचिन्त्यरूपम् | ८-९ |
| अचिन्त्यम् | १२-३ |
| अचिन्त्यः | २-२५ |
| अचिरेण | ४-३९ |
| अचेतसः | ३-३२; १५-११; १७-६ |
| अच्छेद्यः | २-२४ |
| अच्युत | १-२१; ११-४२; १८-७३ |
| अजस्रम् | १६-१९ |
| अजम् | २-२१; ७-२५; १०-३, १२ |
| अजः | २-२०; ४-६ |
| अजानता | ११-४१ |
| अजानन्तः | ७-२४; ९-११; १३-२५ |
| अज्ञः | ४-४० |
| अज्ञानजम् | १०-११; १४-८ |
| अज्ञानविमोहिताः | १६-१५ |
| अज्ञानसम्भूतम् | ४-४२ |
| अज्ञानसम्मोहः | १८-७२ |
| अज्ञानम् | ५-१६; १३-११; १४-१६, १७; १६-४ |
| अज्ञानाम् | ३-२६ |
| अज्ञानेन | ५-१५ |
| अणीयांसम् | ८-९ |
| अणोः | ८-९ |
| अतत्त्वार्थवत् | १८-२२ |
| अतन्द्रितः | ३-२३ |
| अतपस्काय | १८-६७ |
| अतः | २-१२; ९-२४; १२-८ १३-११; १५-१८ |
| अतितरन्ति | १३-२५ |
| अतिनीचम् | ६-११ |
| अतिमानः | १६-४ |
| अतिमानिता | १६-३ |
| अतिरिच्यते | २-३४ |
| अतिवर्तते | ६-४४; १४-२१ |
| अतिस्वप्नशीलस्य | ६-१६ |
| अतीतः | १४-२१; १५-१८ |
| अतीत्य | १४-२० |
| अतीन्द्रियम् | ६-२१ |
| अतीव | १२-२० |
| अत्यद्भुतम् | १८-७७ |
| अत्यन्तम् | ६-२८ |
| अत्यर्थम् | ७-१७ |
| अत्यश्नतः | ६-१६ |
| अत्यागिनाम् | १८-१२ |
| अत्युच्छ्रितम् | ६-११ |
| अत्येति | ८-२८ |
| अत्र | १-४, २३; ४-१६; ८-२, ४, ५; १०-७; १८-१४ |
| अथ | १-२०, २६; २-२६,३३; ३-३६; ११-५, ४०; १२-९, ११; १८-५८ |
| अथवा | ६-४२; १०-४२; ११-४२ |
| अथो | ४-३५ |
| अदक्षिणम् | १७-१३ |
| अदम्भित्वम् | १३-७ |
| अदाह्यः | २-२४ |
| अदृष्टपूर्वम् | ११-४५ |
| अदृष्टपूर्वाणि | ११-६ |
| अदेशकाले | १७-२२ |
| अद्भुतम् | ११-२०; १८-७४, ७६ |
| अद्य | ४-३; ११-७; १६-१३ |
| अद्रोहः | १६-३ |
| अद्वेष्टा | १२-१३ |
| अधमाम् | १६-२० |
| अधर्मस्य | ४-७ |
| अधर्मम् | १८-३१, ३२ |
| अधर्मः | १-४० |
| अधर्माभिभवात् | १-४१ |
| अधः | १४-१८; १५-२(२) |
| अधःशाखम् | १५-१ |
| अधिकतरः | १२-५ |
| अधिकम् | ६-२२ |
| अधिकः | ६-४६(३) |
| अधिकारः | २-४७ |
| अधिगच्छति | २-६४, ७१; ४-३९; ५-६, २४; ६-१५; १४-१९; १८-४९ |
| अधिदैवम् | ८-१ |
| अधिदैवतम् | ८-४ |
| अधिभूतम् | ८-१, ४ |
| अधियज्ञः | ८-२, ४ |
| अधिष्ठानम् | ३-४०; १८-१४ |

| पदानि | अ०-श्लो० |
|---|---|
| अधिष्ठाय | ४-६; १५-९ |
| अध्यक्षेण | ९-१० |
| अध्यात्मचेतसा | ३-३० |
| अध्यात्मज्ञाननित्यत्वम् | १३-११ |
| अध्यात्मनित्याः | १५-५ |
| अध्यात्मविद्या | १०-३२ |
| अध्यात्मसंज्ञितम् | ११-१ |
| अध्यात्मम् | ७-२९; ८-१,३ |
| अध्येष्यते | १८-७० |
| अध्रुवम् | १७-१८ |
| अनघ | ३-३; १४-६; १५-२० |
| अनन्त | ११-३७ |
| अनन्तः | १०-२९ |
| अनन्तम् | ११-११, ४७ |
| अनन्तबाहुम् | ११-१९ |
| अनन्तरम् | १२-१२ |
| अनन्तरूप | ११-३८ |
| अनन्तरूपम् | ११-१६ |
| अनन्तविजयम् | १-१६ |
| अनन्तवीर्य | ११-४० |
| अनन्तवीर्यम् | ११-१९ |
| अनन्ताः | २-४१ |
| अनन्यचेताः | ८-१४ |
| अनन्यभाक् | ९-३० |
| अनन्यमनसः | ९-१३ |
| अनन्यया | ८-२२; ११-५४ |
| अनन्ययोगेन | १३-१० |
| अनन्याः | ९-२२ |
| अनन्येन | १२-६ |
| अनपेक्षः | १२-१६ |
| अनपेक्ष्य | १८-२५ |
| अनभिष्वङ्गः | १३-९ |
| अनभिसन्धाय | १७-२५ |
| अनभिस्नेहः | २-५७ |
| अनयोः | २-१६ |
| अनलः | ७-४ |
| अनलेन | ३-३९ |
| अनवलोकयन् | ६-१३ |
| अनवाप्तम् | ३-२२ |
| अनश्नतः | ६-१६ |
| अनसूयः | १८-७१ |
| अनसूयन्तः | ३-३१ |
| अनसूयवे | ९-१ |
| अनहङ्कारः | १३-८ |
| अनहंवादी | १८-२६ |
| अनात्मनः | ६-६ |
| अनादित्वात् | १३-३१ |
| अनादिमत् | १३-१२ |
| अनादिमध्यान्तम् | ११-१९ |
| अनादिम् | १०-३ |
| अनादी | १३-१९ |
| अनामयम् | २-५१; १४-६ |
| अनारम्भात् | ३-४ |
| अनार्यजुष्टम् | २-२ |
| अनावृत्तिम् | ८-२३, २६ |
| अनाशिनः | २-१८ |
| अनाश्रितः | ६-१ |
| अनिकेतः | १२-१९ |
| अनिच्छन् | ३-३६ |
| अनित्यम् | ९-३३ |
| अनित्याः | २-१४ |
| अनिर्देश्यम् | १२-३ |
| अनिर्विण्णचेतसा | ६-२३ |
| अनिष्टम् | १८-१२ |
| अनीश्वरम् | १६-८ |
| अनुकम्पार्थम् | १०-११ |
| अनुचिन्तयन् | ८-८ |
| अनुतिष्ठन्ति | ३-३१, ३२ |
| अनुत्तमम् | ७-२४ |
| अनुत्तमाम् | ७-१८ |
| अनुद्विग्नमनाः | २-५६ |
| अनुद्वेगकरम् | १७-१५ |
| अनुपकारिणे | १७-२० |
| अनुपश्यति | १३-३०; १४-१९ |
| अनुपश्यन्ति | १५-१० |
| अनुपश्यामि | १-३१ |
| अनुप्रपन्नाः | ९-२१ |
| अनुबन्धम् | १८-२५ |
| अनुबन्धे | १८-३९ |
| अनुमन्ता | १३-२२ |
| अनुरज्यते | ११-३६ |
| अनुवर्तते | ३-२१ |
| अनुवर्तन्ते | ३-२३; ४-११ |
| अनुवर्तयति | ३-१६ |
| अनुविधीयते | २-६७ |
| अनुशासितारम् | ८-९ |
| अनुशुश्रुम | १-४४ |
| अनुशोचन्ति | २-११ |
| अनुषज्जते | ६-४; १८-१० |
| अनुसन्ततानि | १५-२ |
| अनुस्मर | ८-७ |
| अनुस्मरन् | ८-१३ |
| अनुस्मरेत् | ८-९ |
| अनेकचित्तविभ्रान्ताः | १६-१६ |
| अनेकजन्मसंसिद्धः | ६-४५ |
| अनेकदिव्याभरणम् | ११-१० |
| अनेकधा | ११-१३ |
| अनेकबाहूदरवक्त्रनेत्रम् | ११-१६ |
| अनेकवक्त्रनयनम् | ११-१० |
| अनेकवर्णम् | ११-२४ |
| अनेकाद्भुतदर्शनम् | ११-१० |
| अनेन | ३-१०, ११; ९-१०; ११-८ |
| अन्तकाले | २-७२; ८-५ |
| अन्तगतम् | ७-२८ |
| अन्तरम् | ११-२०; १३-३४ |
| अन्तरात्मना | ६-४७ |
| अन्तरारामः | ५-२४ |
| अन्तरे | ५-२७ |
| अन्तर्ज्योतिः | ५-२४ |
| अन्तवत् | ७-२३ |
| अन्तवन्तः | २-१८ |
| अन्तम् | ११-१६ |
| अन्तः | २-१६; १०-१९, २०, ३२, ४०; १३-१५; १५-३ |
| अन्तःशरीरस्थम् | १७-६ |
| अन्तःसुखः | ५-२४ |
| अन्तःस्थानि | ८-२२ |
| अन्तिके | १३-१५ |
| अन्ते | ७-१९; ८-६ |
| अन्नसम्भवः | ३-१४ |
| अन्नम् | १५-१४ |
| अन्नात् | ३-१४ |
| अन्यत् | २-३१,४२; ७-२,७; ११-७; १६-८ |
| अन्यत्र | ३-९ |
| अन्यथा | १३-११ |
| अन्यदेवताभक्ताः | ९-२३ |
| अन्यदेवताः | ७-२० |
| अन्यया | ८-२६ |
| अन्यम् | १४-१९ |
| अन्यः | २-२९(२); ४-३१; ८-२०; ११-४३; १५-१७; १६-१५; १८-६९ |

| पदानि | अ०-श्लो० |
|---|---|
| अन्यानि | २-२२ |
| अन्यान् | ११-३४ |
| अन्यायेन | १६-१२ |
| अन्याम् | ७-५ |
| अन्ये | १-९; ४-२६(२); ९-१५; १३-२४, २५; १७-४ |
| अन्येभ्यः | १३-२५ |
| अन्वशोचः | २-११ |
| अन्विच्छ | २-४९ |
| अन्विताः | ९-२३; १७-१ |
| अपनुद्यात् | २-८ |
| अपरस्परसम्भूतम् | १६-८ |
| अपरम् | ४-४; ६-२२ |
| अपरा | ७-५ |
| अपराजितः | १-१७ |
| अपराणि | २-२२ |
| अपरान् | १६-१४ |
| अपरिग्रहः | ६-१० |
| अपरिमेयाम् | १६-११ |
| अपरिहार्ये | २-२७ |
| अपरे | ४-२५(२), २७, २८, २९, ३०; १३-२४; १८-३ |
| अपर्याप्तम् | १-१० |
| अपलायनम् | १८-४३ |
| अपश्यत् | १-२६; ११-१३ |
| अपहृतचेतसाम् | २-४४ |
| अपहृतज्ञानाः | ७-१५ |
| अपात्रेभ्यः | १७-२२ |
| अपानम् | ४-२९ |
| अपाने | ४-२९ |
| अपावृतम् | २-३२ |
| अपि | १-२७,३५(२),३८; २-५, ८, १६, २६, २९, ३१, ३४, ४०, ५९, ६०, ७२; ३-५, ८, २०, ३१, ३३, ३६; ४-६(२), १३, १५, १६, १७, २०, २२, ३०, ३६; ५-४, ५, ७, ९, ११; ६-९, २२, २५, ३१, ४४(२), ४६, ४७; ७-३, २३, ३०; ८-६; ९-१५, २३(२), २५, २९, ३०, ३२(२); १०-३७, ३९; ११-२, २६, २९, ३२, ३४, ३७, ३९, ४१, ४२, ४३, ५२; १२-१, १० (२), ११; १३-२, १७, १९, २२, २३, २५, ३१; १४-२; १५-८, १०, ११, १८; १६-७, १३, १४; १७-७, १०, १२; १८-६, १७, १९, ४३, ४४, ४८, ५६, ६०, ७१(२) |
| अपुनरावृत्तिम् | ५-१७ |
| अपैशुनम् | १६-२ |
| अपोहनम् | १५-१५ |
| अप्रकाशः | १४-१३ |
| अप्रतिमप्रभाव | ११-४३ |
| अप्रतिष्ठम् | १६-८ |
| अप्रतिष्ठः | ६-३८ |
| अप्रतीकारम् | १-४६ |
| अप्रदाय | ३-१२ |
| अप्रमेयम् | ११-१७, ४२ |
| अप्रमेयस्य | २-१८ |
| अप्रवृत्तिः | १४-१३ |
| अप्राप्य | ६-३७; ९-३; १६-२० |
| अप्रियम् | ५-२० |
| अप्सु | ७-८ |
| अफलप्रेप्सुना | १८-२३ |
| अफलाकाङ्क्षिभिः | १७-११, १७ |
| अबुद्धयः | ७-२४ |
| अब्रवीत् | १-२,२८; ४-१ |
| अभक्ताय | १८-६७ |
| अभयम् | १०-४; १६-१ |
| अभवत् | १-१३ |
| अभविता | २-२० |
| अभावयतः | २-६६ |
| अभावः | २-१६; १०-४ |
| अभाषत | ११-१४ |
| अभिक्रमनाशः | २-४० |
| अभिजनवान् | १६-१५ |
| अभिजातस्य | १६-३, ४ |
| अभिजातः | १६-५ |
| अभिजानन्ति | ९-२४ |
| अभिजानाति | ४-१४; ७-१३, २५; १८-५५ |
| अभिजायते | २-६२; ६-४१; १३-२३ |
| अभितः | ५-२६ |
| अभिधास्यति | १८-६८ |
| अभिधीयते | १३-१; १७-२७; १८-११ |
| अभिनन्दति | २-५७ |
| अभिप्रवृत्तः | ४-२० |
| अभिभवति | १-४० |
| अभिभूय | १४-१० |
| अभिमुखाः | ११-२८ |
| अभिरक्षन्तु | १-११ |
| अभिरतः | १८-४५ |
| अभिविज्वलन्ति | ११-२८ |
| अभिसन्धाय | १७-१२ |
| अभिहिता | २-३९ |
| अभ्यधिकः | ११-४३ |
| अभ्यर्च्य | १८-४६ |
| अभ्यसूयकाः | १६-१८ |
| अभ्यसूयति | १८-६७ |
| अभ्यसूयन्तः | ३-३२ |
| अभ्यहन्यन्त | १-१३ |
| अभ्यासयोगयुक्तेन | ८-८ |
| अभ्यासयोगेन | १२-९ |
| अभ्यासात् | १२-१२; १८-३६ |
| अभ्यासे | १२-१० |
| अभ्यासेन | ६-३५ |
| अभ्युत्थानम् | ४-७ |
| अमलान् | १४-१४ |
| अमानित्वम् | १३-७ |
| अमितविक्रमः | ११-४० |
| अमी | ११-२१, २६, २८ |
| अमुत्र | ६-४० |
| अमूढाः | १५-५ |
| अमृतत्वाय | २-१५ |
| अमृतस्य | १४-२७ |
| अमृतम् | ९-१९; १०-१८; १३-१२; १४-२० |
| अमृतोद्भवम् | १०-२७ |
| अमृतोपमम् | १८-३७, ३८ |
| अमेध्यम् | १७-१० |
| अम्बुवेगाः | ११-२८ |
| अम्भसा | ५-१० |
| अम्भसि | २-६७ |
| अयज्ञस्य | ४-३१ |
| अयतिः | ६-३७ |
| अयथावत् | १८-३१ |
| अयनेषु | १-११ |
| अयशः | १०-५ |
| अयम् | २-१९, २०(२), २४(३), २५(३), ३०, ५८; ३-९, ३६; ४-३, ३१, ४०; ६-२१, ३३; ७-२५; ८-१९; ११-१; १३-३१; १५-९; १७-३ |
| अयुक्तस्य | २-६६(२) |
| अयुक्तः | ५-१२; १८-२८ |
| अयोगतः | ५-६ |
| अरतिः | १३-१० |

| पदानि | अ०-श्लो० |
|---|---|
| अरागद्वेषतः | १८-२३ |
| अरिसूदन | २-४ |
| अर्चितुम् | ७-२१ |
| अर्जुन | २-२, ४५; ३-७; ४-५, ९, ३७; ६-१६, ३२, ४६; ७-१६, २६; ८-१६, २७; ९-१९; १०-३२, ३९, ४२; ११-४७, ५४; १८-९, ३४, ६१ |
| अर्जुनम् | ११-५० |
| अर्जुनः | १-४७; २-४, ५४; ३-१, ३६; ४-४; ५-१; ६-३३, ३७; ८-१; १०-१२; ११-१, १५, ३६, ५१; १२-१; १४-२१; १७-१; १८-१, ७३ |
| अर्थकामान् | २-५ |
| अर्थव्यपाश्रयः | ३-१८ |
| अर्थसञ्चयान् | १६-१२ |
| अर्थः | २-४६; ३-१८ |
| अर्थार्थी | ७-१६ |
| अर्थे | १-३३; २-२७; ३-३४ |
| अर्पणम् | ४-२४ |
| अर्पितमनोबुद्धिः | ८-७; १२-१४ |
| अर्यमा | १०-२९ |
| अर्हति | २-१७ |
| अर्हसि | २-२५, २६, २७, ३०, ३१; ३-२०; ६-३९; १०-१६; ११-४४; १६-२४ |
| अर्हाः | १-३७ |
| अलसः | १८-२८ |
| अलोलुप्त्वम् | १६-२ |
| अल्पबुद्धयः | १६-९ |
| अल्पमेधसाम् | ७-२३ |
| अल्पम् | १८-२२ |
| अवगच्छ | १०-४१ |
| अवजानन्ति | ९-११ |
| अवज्ञातम् | १७-२२ |
| अवतिष्ठति | १४-२३ |
| अवतिष्ठते | ६-१८ |
| अवध्यः | २-३० |
| अवनिपालसङ्घैः | ११-२६ |
| अवरम् | २-४९ |
| अवशम् | ९-८ |
| अवशः | ३-५; ६-४४; ८-१९; १८-६० |
| अवशिष्यते | ७-२ |
| अवष्टभ्य | ९-८; १६-९ |
| अवसादयेत् | ६-५ |
| अवस्थातुम् | १-३० |
| अवस्थितम् | १५-११ |
| अवस्थितः | ९-४; १३-३२ |
| अवस्थितान् | १-२२, २७ |
| अवस्थिताः | १-११, ३३; २-६; ११-३२ |
| अवहासार्थम् | ११-४२ |
| अवाच्यवादान् | २-३६ |
| अवाप्तव्यम् | ३-२२ |
| अवाप्तुम् | ६-३६ |
| अवाप्नोति | १५-८; १६-२३; १८-५६ |
| अवाप्य | २-८ |
| अवाप्यते | १२-५ |
| अवाप्स्यथ | ३-११ |
| अवाप्स्यसि | २-३३, ३८, ५३; १२-१० |
| अविकम्पेन | १०-७ |
| अविकार्यः | २-२५ |
| अविज्ञेयम् | १३-१५ |
| अविद्वांसः | ३-२५ |
| अविधिपूर्वकम् | ९-२३; १६-१७ |
| अविनश्यन्तम् | १३-२७ |
| अविनाशि | २-१७ |
| अविनाशिनम् | २-२१ |
| अविपश्चितः | २-४२ |
| अविभक्तम् | १३-१६; १८-२० |
| अवेक्षे | १-२३ |
| अवेक्ष्य | २-३१ |
| अव्यक्तनिधनानि | २-२८ |
| अव्यक्तमूर्तिना | ९-४ |
| अव्यक्तसंज्ञके | ८-१८ |
| अव्यक्तम् | ७-२४; ११-१, ३; १३-५ |
| अव्यक्तः | २-२५; ८-२०, २१ |
| अव्यक्ता | १२-५ |
| अव्यक्तात् | ८-१८, २० |
| अव्यक्तादीनि | २-२८ |
| अव्यक्तासक्तचेतसाम् | १२-५ |
| अव्यभिचारिणी | १३-१० |
| अव्यभिचारिण्या | १८-३३ |
| अव्यभिचारेण | १४-२६ |
| अव्ययस्य | २-१७; १४-२७ |
| अव्ययम् | २-२१; ४-१,१३; ७-१३, २४, २५; ९-२, १३, १८; ११-२, ४; १४-५; १५-१, ५; १८-२०, ५६ |
| अव्ययः | ११-१८; १३-३१; १५-१७ |
| अव्ययात्मा | ४-६ |
| अव्ययाम् | २-३४ |
| अव्यवसायिनाम् | २-४१ |
| अशक्तः | १२-११ |
| अशमः | १४-१२ |
| अशस्त्रम् | १-४६ |
| अशान्तस्य | २-६६ |
| अशाश्वतम् | ८-१५ |
| अशास्त्रविहितम् | १७-५ |
| अशुचिव्रताः | १६-१० |
| अशुचिः | १८-२७ |
| अशुचौ | १६-१६ |
| अशुभात् | ४-१६; ९-१ |
| अशुभान् | १६-१९ |
| अशुश्रूषवे | १८-६७ |
| अशेषतः | ६-२४, ३९; ७-२; १८-११ |
| अशेषेण | ४-३५; १०-१६; १८-२९, ६३ |
| अशोच्यान् | २-११ |
| अशोष्यः | २-२४ |
| अश्नन् | ५-८ |
| अश्नन्ति | ९-२० |
| अश्नामि | ९-२६ |
| अश्नासि | ९-२७ |
| अश्नुते | ३-४; ५-२१; ६-२८; १३-१२; १४-२० |
| अश्रद्दधानः | ४-४० |
| अश्रद्दधानाः | ९-३ |
| अश्रद्धया | १७-२ |
| अश्रुपूर्णाकुलेक्षणम् | २-१ |
| अश्रौषम् | १८-७४ |
| अश्वत्थम् | १५-१,३ |
| अश्वत्थः | १०-२६ |
| अश्वत्थामा | १-८ |
| अश्वानाम् | १०-२७ |
| अश्विनौ | ११-६, २२ |
| अष्टधा | ७-४ |
| असक्तबुद्धिः | १८-४९ |
| असक्तम् | ९-९; १३-१४ |
| असक्तः | ३-७, १९(२), २५ |
| असक्तात्मा | ५-२१ |
| असक्तिः | १३-९ |
| असङ्गशस्त्रेण | १५-३ |
| असतः | २-१६ |
| असत् | ९-१९; ११-३७; १३-१२; १७-२८ |
| असत्कृतम् | १७-२२ |

| पदानि | अ०-श्लो० |
|---|---|
| असत्कृतः | ११-४२ |
| असत्यम् | १६-८ |
| असद्ग्राहान् | १६-१० |
| असपत्नम् | २-८ |
| असमर्थः | १२-१० |
| असंन्यस्तसङ्कल्पः | ६-२ |
| असम्मूढः | ५-२०; १०-३; १५-१९ |
| असम्मोहः | १०-४ |
| असंयतात्मना | ६-३६ |
| असंशयम् | ६-३५; ७-१ |
| असंशयः | ८-७; १८-६८ |
| असि | ४-३, ३६; ८-२; १०-१७; ११-३८, ४०, ४२, ४३ ,५२, ५३; १२-१०, ११; १६-५; १८-६४, ६५ |
| असितः | १०-१३ |
| असिद्धौ | ४-२२ |
| असुखम् | ९-३३ |
| असृष्टान्नम् | १७-१३ |
| असौ | ११-२६; १६-१४ |
| अस्ति | २-४०, ४२, ६६; ३-२२ ४-३१, ४०; ६-१६; ७-७; ८-५; ९-२९; १०-१८, १९, ३९, ४०; ११-४३; १६-१३, १५; १८-४० |
| अस्तु | २-४७; ३-१०; ११-३१, ३९, ४० |
| अस्थिरम् | ६-२६ |
| अस्मदीयैः | ११-२६ |
| अस्माकम् | १-७, १० |
| अस्मात् | १-३९ |
| अस्मान् | १-३६ |
| अस्माभिः | १-३९ |
| अस्मि | ७-८, ९(२), १०, ११; १०-२१, २२(४), २३(२), २४, २५(२), २८(३), २९(२), ३०, ३१(३), ३३, ३६(३), ३७, ३८(३); ११-३२, ४५, ५१; १५-१८ १६-१५; १८-५५, ७३ |
| अस्मिन् | १-२२; २-१३; ३-३; ८-२; १३-२२; १४-११; १६-६ |
| अस्य | २-१७, ४०, ५९, ६५, ६७; ३-१८, ३४, ४०; ६-३९; ९-३,१७; ११-१८, ३८, ४३, ५२; १३-२१; १५-३ |
| अस्याम् | २-७२ |
| अस्वर्ग्यम् | २-२ |
| अहत्वा | २-५ |
| अहरागमे | ८-१८, १९ |
| अहम् | १-२२, २३; २-४, ७, १२; ३-२, २३, २४, २७; ४-१, ५, ७, ११; ६-३०, ३३, ३४; ७-२, ६, ८, १०, ११, १२, १७, २१, २५, २६; ८-४, १४; ९-४, ७, १६(८), १७, १९(३), २२, २४, २६, २९(२); १०-१, २, ८, ११, १७, २०(२), २१(२), २३, २४, २५, २८, २९(२), ३०(२), ३१, ३२(२), ३३(२), ३४, ३५(२), ३६(२), ३७, ३८, ३९, ४२; ११-२३, ४२, ४४, ४६, ४८, ५३, ५४; १२-७; १४-३, ४, २७; १५-१३, १४, १५(३), १८; १६-१४(३), १९; १८-६६, ७०, ७४, ७५ |
| अहङ्कारविमूढात्मा | ३-२७ |
| अहङ्कारम् | १६-१८; १८-५३, ५९ |
| अहङ्कारः | ७-४; १३-५ |
| अहङ्कारात् | १८-५८ |
| अहङ्कृतः | १८-१७ |
| अहः | ८-१७, २४ |
| अहिताः | २-३६; १६-९ |
| अहिंसा | १०-५; १३-७; १६-२; १७-१४ |
| अहैतुकम् | १८-२२ |
| अहो | १-४५ |
| अहोरात्रविदः | ८-१७ |
| अंशः | १५-७ |
| अंशुमान् | १०-२१ |
| **आ** | |
| आकाशस्थितः | ९-६ |
| आकाशम् | १३-३२ |
| आख्यातम् | १८-६३ |
| आख्याहि | ११-३१ |
| आगच्छेत् | ३-३४ |
| आगताः | ४-१०; १४-२ |
| आगमापायिनः | २-१४ |
| आचरतः | ४-२३ |
| आचरति | ३-२१; १६-२२ |
| आचरन् | ३-१९ |
| आचारः | १६-७ |
| आचार्य | १-३ |
| आचार्यम् | १-२ |
| आचार्यान् | १-२६ |
| आचार्याः | १-३४ |
| आचार्योपासनम् | १३-७ |
| आज्यम् | ९-१६ |
| आढ्यः | १६-१५ |
| आततायिनः | १-३६ |
| आतिष्ठ | ४-४२ |
| आत्थ | ११-३ |
| आत्मकारणात् | ३-१३ |
| आत्मतृप्तः | ३-१७ |
| आत्मनः | ४-४२; ५-१६; ६-५(२), ६, ११, १९; ८-१२; १०-१८; १६-२१, २२; १७-१९; १८-३९ |
| आत्मना | २-५५; ३-४६; ६-५, ६, २०; १०-१५; १३-२४, २८ |
| आत्मनि | २-५५; ३-१७; ४-३५, ३८; ५-२१; ६-१८, २०, २६, २९; १३-२४; १५-११ |
| आत्मपरदेहेषु | १६-१८ |
| आत्मबुद्धिप्रसादजम् | १८-३७ |
| आत्मभावस्थः | १०-११ |
| आत्ममायया | ४-६ |
| आत्मयोगात् | ११-४७ |
| आत्मरतिः | ३-१७ |
| आत्मवन्तम् | ४-४१ |
| आत्मवश्यैः | २-६४ |
| आत्मवान् | २-४५ |
| आत्मविनिग्रहः | १३-७; १७-१६ |
| आत्मविभूतयः | १०-१६, १९ |
| आत्मविशुद्धये | ६-१२ |
| आत्मशुद्धये | ५-११ |
| आत्मसम्भाविताः | १६-१७ |
| आत्मसंयमयोगाग्नौ | ४-२७ |
| आत्मसंस्थम् | ६-२५ |
| आत्मा | ६-५(२), ६(३); ७-१८; ९-५ १०-२०; १३-३२ |
| आत्मानम् | ३-४३; ४-७; ६-५(२), १०, १५, २०,२८, २९; ९-३४; १०-१५; ११-३, ४; १३-२४, २८, २९; १८-१६, ५१ |
| आत्मौपम्येन | ६-३२ |
| आत्यन्तिकम् | ६-२१ |
| आदत्ते | ५-१५ |
| आदर्शः | ३-३८ |
| आदिकर्त्रे | ११-३७ |
| आदित्यगतम् | १५-१२ |
| आदित्यवत् | ५-१६ |
| आदित्यवर्णम् | ८-९ |

| पदानि | अ०-श्लो० |
|---|---|
| आदित्यानाम् | १०-२१ |
| आदित्यान् | ११-६ |
| आदिदेवः | ११-३८ |
| आदिदेवम् | १०-१२ |
| आदिम् | ११-१६ |
| आदिः | १०-२, २०, ३२; १५-३ |
| आदौ | ३-४१; ४-४ |
| आद्यन्तवन्तः | ५-२२ |
| आद्यम् | ८-२८; ११-३१, ४७; १५-४ |
| आधत्स्व | १२-८ |
| आधाय | ५-१०; ८-१२ |
| आधिपत्यम् | २-८ |
| आपन्नम् | ७-२४ |
| आपन्नाः | १६-२० |
| आपः | २-२३,७०; ७-४ |
| आपूर्य | ११-३० |
| आपूर्यमाणम् | २-७० |
| आप्तुम् | ५-६; १२-९ |
| आप्नुयाम् | ३-२ |
| आप्नुवन्ति | ८-१५ |
| आप्नोति | २-७०; ३-१९; ४-२१; ५-१२; १८-४७,५० |
| आ ब्रह्मभुवनात् | ८-१६ |
| आयुधानाम् | १०-२८ |
| आयुःसत्त्वबलारोग्य-सुखप्रीतिविवर्धनाः | १७-८ |
| आरभते | ३-७ |
| आरभ्यते | १८-२५ |
| आरम्भः | १४-१२ |
| आरुरुक्षोः | ६-३ |
| आर्जवम् | १३-७; १६-१; १७-१४; १८-४२ |
| आर्तः | ७-१६ |

| पदानि | अ०-श्लो० |
|---|---|
| आवयोः | १८-७० |
| आवर्तते | ८-२६ |
| आवर्तिनः | ८-१६ |
| आविश्य | १५-१३, १७ |
| आविष्टम् | २-१ |
| आविष्टः | १-२८ |
| आवृतम् | ३-३८, ३९; ५-१५ |
| आवृतः | ३-३८ |
| आवृता | १८-३२ |
| आवृताः | १८-४८ |
| आवृत्तिम् | ८-२३ |
| आवृत्य | ३-४०; १३-१३; १४-९ |
| आवेशितचेतसाम् | १२-७ |
| आवेश्य | ८-१०; १२-२ |
| आव्रियते | ३-३८ |
| आशयात् | १५-८ |
| आशापाशशतैः | १६-१२ |
| आशु | २-६५ |
| आश्चर्यवत् | २-२९(३) |
| आश्चर्याणि | ११-६ |
| आश्रयेत् | १-३६ |
| आश्रितम् | ९-११ |
| आश्रितः | १२-११; १५-१४ |
| आश्रिताः | ७-१५; ९-१३ |
| आश्रित्य | ७-२९; १६-१०; १८-५९ |
| आश्वासयामास | ११-५० |
| आसक्तमनाः | ७-१ |
| आसने | ६-१२ |
| आसनम् | ६-११ |
| आसम् | २-१२ |
| आसाद्य | ९-२० |
| आसीत | २-५४, ६१; ६-१४ |
| आसीनम् | ९-९ |

| पदानि | अ०-श्लो० |
|---|---|
| आसीनः | १४-२३ |
| आसुरनिश्चयान् | १७-६ |
| आसुरम् | ७-१५; १६-६ |
| आसुरः | १६-६ |
| आसुराः | १६-७ |
| आसुरी | १६-५ |
| आसुरीषु | १६-१९ |
| आसुरीम् | ९-१२; १६-४,२० |
| आस्तिक्यम् | १८-४२ |
| आस्ते | ३-६; ५-१३ |
| आस्थाय | ७-२० |
| आस्थितः | ५-४; ६-३१; ७-२८; ८-१२ |
| आस्थिताः | ३-२० |
| आह | १-२१; ११-३५ |
| आहवे | १-३१ |
| आहारः | १७-७ |
| आहाराः | १७-८, ९ |
| आहुः | ३-४२; ४-१९; ८-२१; १०-१३; १४-१६; १६-८ |
| आहो | १७-१ |
| **इ** | |
| इक्ष्वाकवे | ४-१ |
| इङ्गते | ६-१९; १४-२३ |
| इच्छ | १२-९ |
| इच्छति | ७-२१ |
| इच्छन्तः | ८-११ |
| इच्छसि | ११-७; १८-६०, ६३ |
| इच्छा | १३-६ |
| इच्छाद्वेषसमुत्थेन | ७-२७ |
| इच्छामि | १-३५; ११-३, ३१, ४६; १८-१ |
| इज्यते | १७-११, १२ |
| इज्यया | ११-५३ |
| इतरः | ३-२१ |

| पदानि | अ०-श्लो० |
|---|---|
| इतः | ७-६; १४-१ |
| इति | १-२५, ४४; २-९, ४२; ३-२७, २८; ४-३, ४, १४, १६; ५-८, ९; ६-२, ८, १८, ३६; ७-४, ६, १२, १९; ८-१३, २१; ९-६; १०-८; ११-४, २१, ४१(२), ५०; १३-१(२), ११, १८, २२; १४-५, ११, २३; १५-१७, २०; १६-११, १५; १७-२, ११, १६, २०, २३, २४, २५, २६, २७(२), २८; १८-३(२), ६, ८, ९, ११, १८, ३२, ५९, ६३, ६४, ७०, ७४ |
| इदम् | १-१०, २१, २८; २-१, २, १०, १७; ३-३१, ३८; ७-२, ५, ७, १३; ८-२२, २८; ९-१, २, ४; १०-४२; ११-१९, २०(२), ४१, ४७, ४९(२), ५१, ५२; १२-२०; १३-१; १४-२; १५-२०; १६-१३(३) २१; १८-४६, ६७ |
| इदानीम् | ११-५१; १८-३६ |
| इन्द्रियकर्माणि | ४-२७ |
| इन्द्रियगोचराः | १३-५ |
| इन्द्रियग्रामम् | ६-२४; १२-४ |
| इन्द्रियस्य | ३-३४(२) |
| इन्द्रियाग्निषु | ४-२६ |
| इन्द्रियाणाम् | २-८, ६७; १०-२२ |
| इन्द्रियाणि | २-५८, ६०, ६१, ६८; ३-७, ४०, ४१, ४२; ४-२६; ५-९; १३-५; १५-७ |
| इन्द्रियारामः | ३-१६ |
| इन्द्रियार्थान् | ३-६ |
| इन्द्रियार्थेभ्यः | २-५८, ६८ |
| इन्द्रियार्थेषु | ५-९; ६-४; १३-८ |
| इन्द्रियेभ्यः | ३-४२ |
| इन्द्रियैः | २-६४; ५-११ |
| इमम् | १-२८; २-३३; ४-१, २; ९-८, |

| पदानि | अ०-श्लो० |
|---|---|
| | ३३; १३-३३; १६-१३; १७-७; १८-६८, ७०, ७४, ७६ |
| इमानि | १८-१३ |
| इमाः | ३-२४; १०-६ |
| इमान् | १०-१६; १८-१७ |
| इमाम् | २-३९,४२ |
| इमे | १-३३; २-१२,१८; ३-२४ |
| इमौ | १५-१६ |
| इयम् | ७-४, ५ |
| इव | १-३०; २-१०, ५८, ६७; ३-२(२), ३६; ५-१०; ६-३४, ३८; ७-७; ११-४४(२); १३-१६; १५-८; १८-३७, ३८, ४८ |
| इषुभिः | २-४ |
| इष्टकामधुक् | ३-१० |
| इष्टम् | १८-१२ |
| इष्टः | १८-६४, ७० |
| इष्टानिष्टोपपत्तिषु | १३-९ |
| इष्टाः | १७-९ |
| इष्टान् | ३-१२ |
| इष्ट्वा | ९-२० |
| इह | २-५(२), ४०, ४१, ५०; ३-१६, १८, ३७; ४-२, १२, ३८; ५-१९, २३; ६-४०; ७-२; ११-७, ३२; १५-३; १६-२४; १७-१८, २८ |
| **ई** | |
| ईक्षते | ६-२९; १८-२० |
| ईड्यम् | ११-४४ |
| ईदृक् | ११-४९ |
| ईदृशम् | २-३२; ६-४२ |
| ईशम् | ११-१५, ४४ |
| ईश्वरभावः | १८-४३ |
| ईश्वरम् | १३-२८ |
| ईश्वरः | ४-६; १५-८,१७; १६-१४; १८-६१ |
| ईहते | ७-२२ |
| ईहन्ते | १६-१२ |
| **उ** | |
| उक्तम् | ११-१, ४१; १२-२०; १३-१८; १५-२० |
| उक्तः | १-२४; ८-२१; १३-२२ |
| उक्ताः | २-१८ |
| उक्त्वा | १-४७; २-९(२); ११-९, २१, ५० |
| उग्रकर्माणः | १६-९ |
| उग्ररूपः | ११-३१ |
| उग्रम् | ११-२० |
| उग्राः | ११-३० |
| उग्रैः | ११-४८ |
| उच्चैः | १-१२ |
| उच्चैःश्रवसम् | १०-२७ |
| उच्छिष्टम् | १७-१० |
| उच्छोषणम् | २-८ |
| उच्यते | २-२५, ४८, ५५, ५६; ३-६, ४०; ६-३(२), ४, ८, १८; ८-१, १३; १३-१२, १७, २०(२); १४-२५; १५-१६; १७-१४, १५, १६, २७, २८; १८-२३, २५, २६, २८ |
| उत | १-४०; १४-९,११ |
| उत्क्रामति | १५-८ |
| उत्क्रामन्तम् | १५-१० |
| उत्तमविदाम् | १४-१४ |
| उत्तमम् | ४-३; ६-२७; ९-२; १४-१; १८-६ |
| उत्तमः | १५-१७, १८ |
| उत्तमाङ्गैः | ११-२७ |
| उत्तमौजाः | १-६ |
| उत्तरायणम् | ८-२४ |
| उत्तिष्ठ | २-३,३७; ४-४२; ११-३३ |
| उत्थिता | ११-१२ |
| उत्सन्नकुलधर्माणाम् | १-४४ |
| उत्सादनार्थम् | १७-१९ |
| उत्साद्यन्ते | १-४३ |
| उत्सीदेयुः | ३-२४ |
| उत्सृजामि | ९-१९ |
| उत्सृज्य | १६-२३; १७-१ |
| उदपाने | २-४६ |
| उदाराः | ७-१८ |
| उदासीनवत् | ९-९; १४-२३ |
| उदासीनः | १२-१६ |
| उदाहृतम् | १३-६; १७-१९, २२; १८-२२, २४, ३९ |
| उदाहृतः | १५-१७ |
| उदाहृत्य | १७-२४ |
| उद्दिश्य | १७-२१ |
| उद्देशतः | १०-४० |
| उद्धरेत् | ६-५ |
| उद्भवः | १०-३४ |
| उद्यताः | १-४५ |
| उद्यम्य | १-२० |
| उद्विजते | १२-१५(२) |
| उद्विजेत् | ५-२० |
| उन्मिषन् | ५-९ |
| उपजायते | २-६२, ६५; १४-११ |
| उपजायन्ते | १४-२ |
| उपजुह्वति | ४-२५ |
| उपदेक्ष्यन्ति | ४-३४ |
| उपद्रष्टा | १३-२२ |
| उपधारय | ७-६; ९-६ |
| उपपद्यते | २-३; ६-३९; १३-१८; १८-७ |
| उपपन्नम् | २-३२ |
| उपमा | ६-१९ |
| उपयान्ति | १०-१० |
| उपरतम् | २-३५ |
| उपरमते | ६-२० |
| उपरमेत् | ६-२५ |
| उपलभ्यते | १५-३ |
| उपलिप्यते | १३-३२(२) |
| उपविश्य | ६-१२ |
| उपसङ्गम्य | १-२ |
| उपसेवते | १५-९ |
| उपहन्याम् | ३-२४ |
| उपायतः | ६-३६ |
| उपाविशत् | १-४७ |
| उपाश्रिताः | ४-१०; १६-११ |
| उपाश्रित्य | १४-२; १८-५७ |
| उपासते | ९-१४,१५; १२-२,६; १३-२५ |
| उपेतः | ६-३७ |
| उपेताः | १२-२ |
| उपेत्य | ८-१५,१६ |
| उपैति | ६-२७; ८-१०,१८ |
| उपैष्यसि | ९-२८ |
| उभयविभ्रष्टः | ६-३८ |
| उभयोः | १-२१, २४, २७; २-१०, १६; ५-४ |
| उभे | २-५० |
| उभौ | २-१९; ५-२; १३-१९ |
| उरगान् | ११-१५ |
| उल्बेन | ३-३८ |
| उवाच | १-१, २, २४, २५, ४७; २-१, २, ४, ९, १०, ११, ५४, ५५; ३-१, ३, १०, ३६, ३७; ४-१, ४, ५; ५-१, २; ६-१, ३३, ३५, ३७, ४०; |

पदानि — अ०-श्लो०

७-१; ८-१, ३; ९-१; १०-१, १२, १९; ११-१, ५, ९, १५, ३२, ३५, ३६, ४७, ५०, ५१, ५२; १२-१, २; १३-१; १४-१, २१, २२; १५-१; १६-१; १७-१, २; १८-१, २, ७३, ७४
उशना १०-३७
उषित्वा ६-४१

ऊ

ऊर्जितम् १०-४१
ऊर्ध्वमूलम् १५-१
ऊर्ध्वम् १२-८; १४-१८; १५-२
ऊष्मपाः ११-२२

ऋ

ऋक् ९-१७
ऋच्छति २-७२; ५-२९
ऋतम् १०-१४
ऋतूनाम् १०-३५
ऋते ११-३२
ऋद्धम् २-८
ऋषयः ५-२५; १०-१३
ऋषिभिः १३-४
ऋषीन् ११-१५

ए

एकत्वम् ६-३१
एकत्वेन ९-१५
एकभक्तिः ७-१७
एकया ८-२६
एकस्थम् ११-७,१३; १३-३०
एकस्मिन् १८-२२
एकम् ३-२; ५-१, ४, ५; १०-२५; १३-५; १८-२०, ६६
एकः ११-४२; १३-३३
एका २-४१
एकाकी ६-१०
एकाक्षरम् ८-१३
एकाग्रम् ६-१२
एकाग्रेण १८-७२
एकान्तम् ६-१६
एकांशेन १०-४२
एके १८-३
एकेन ११-२०
एतत् २-३,६; ३-३२; ४-३,४; ६-२६, ३९, ४२; १०-१४; ११-३,३५; १२-११; १३-१, ६, ११, १८; १५-२०; १६-२१; १७-१६, २६; १८-६३, ७२, ७५
एतद्योनीनि ७-६
एतयोः ५-१
एतस्य ६-३३
एतानि १४-१२, १३; १५-८; १८-६
एतान् १-२२, २५, ३५, ३६; १४-२०, २१, २६
एतावत् १६-११
एताम् १-३; ७-१४; १०-७; १६-९
एति ४-९(२); ८-६; ११-५५
एते १-२३, ३८; २-१५; ४-३० ७-१८; ८-२६, २७; ११-३३; १८-१५
एतेन ३-३९; १०-४२
एतेषाम् १-१०
एतैः १-४३; ३-४०; १६-२२
एधांसि ४-३७
एनम् २-१९(२), २१, २३(३), २५, २६, २९(३); ३-३७, ४१; ४-४२; ६-२७; ११-५०; १५-३, ११(२)
एनाम् २-७२
एभिः ७-१३; १८-४०
एभ्यः ३-१२; ७-१३
एव १-१, ६, ८, ११(२), १३, १४, १९, २७, ३०, ३४, ३६, ४२; २-५, ६, १२(२), २४, २८, २९(२), ४७, ५५; ३-४, १२, १७(२),१८,२०(२), २१, २२; ४-३, ११, १५, २०, २४, २५(२), ३६; ५-८, १३, १५, १८, १९, २२, २३, २४, २७, २८; ६-३, ५(२), ६(२), १६, १८, २०, २१, २४, २६, ४०, ४२, ४४; ७-४, १२(२), १४, १८(३), २१, २२; ८-४, ५, ६, ७, १०, १८, १९, २३, २८; ९-१२, १६, १७, १९, २३, २४, ३०, ३४; १०-१, ४, ५, ११, १३, १५, २०, ३२, ३३, ३८, ४१(२); ११-८, २२, २५, २६, २८, २९, ३३(२), ३५, ४०, ४५, ४६ (२),४९; १२-४, ६, ८(२), १३; १३-४, ५, ८, १४, १५, १९(२), २५, २९, ३०; १४-१०, १३, १७(२), २२, २३; १५-४, ७, ९, १५(२), १६; १६-४, ६, १९, २०; १७-२, ३, ६, ११, १२, १५, १८, २७(२); १८-५(२), ८(२),९(२), १४, १९, २९, ३१, ३५, ४२, ५०, ६२, ६५, ६८
एवम् १-२४, ४७; २-९, २५, २६, ३८; ३-१६, ४३; ४-२, ९, १५, ३२(२), ३५; ६-१५, २८; ९-२१, २८, ३४; ११-३, ९; १२-१; १३-२३, २५, ३४; १५-१९; १८-१६
एवंरूपः ११-४८
एवंविधः ११-५३, ५४
एषः ३-१०, ३७(२), ४०; १०-४०; १८-५९
एषा २-३९, ७२; ७-१४
एषाम् १-४२
एष्यति १८-६८
एष्यसि ८-७; ९-३४; १८-६८

ऐ

ऐकान्तिकस्य १४-२७
ऐश्वरम् ९-५; ११-३, ८, ९
ऐरावतम् १०-२७

ओ

ओजसा १५-१३
ओषधीः १५-१३
ओम् ८-१३; १७-२३, २४
ओंकारः ९-१७

औ

औषधम् ९-१६

क

कच्चित् ६-३८; १८-७२(२)
कट्वम्ललवणात्युष्णतीक्ष्णरूक्ष-
-विदाहिनः १७-९
कतरत् २-६
कथय १०-१८
कथयतः १८-७५
कथयन्तः १०-९
कथयिष्यन्ति २-३४
कथयिष्यामि १०-१९
कथम् १-३७,३९; २-४, २१; ४-४; ८-२(२); १०-१७; १४-२१
कदाचन २-४७; १८-६७
कदाचित् २-२०
कपिध्वजः १-२०
कपिलः १०-२६
कमलपत्राक्ष ११-२

| पदानि | अ०-श्लो० |
|---|---|
| कमलासनस्थम् | ११-१५ |
| करणम् | १८-१४, १८ |
| करिष्यति | ३-३३ |
| करिष्यसि | २-३३; १८-६० |
| करिष्ये | १८-७३ |
| करुणः | १२-१३ |
| करोति | ४-२०; ५-१०; ६-१; १३-३१ |
| करोमि | ५-८ |
| करोषि | ९-२७ |
| कर्णम् | ११-३४ |
| कर्णः | १-८ |
| कर्तव्यम् | ३-२२ |
| कर्तव्यानि | १८-६ |
| कर्ता | ३-२४, २७; १८-१४, १८, १९, २६, २७, २८ |
| कर्तारम् | ४-१३; १४-१९; १८-१६ |
| कर्तुम् | १-४५; २-२७; ३-२०; ९-२; १२-११; १६-२४; १८-६० |
| कर्तृत्वम् | ५-१४ |
| कर्म | २-४९; ३-५, ८ (२), ९, १५, १९(२), २४; ४-९, १५(२), १६(२), १८, २१, २३,३३; ५-११; ६-१,३; ७-२९; ८-१; १६-२४; १७-२७; १८-३, ५, ८, ९, १०, १५, १८, १९, २३, २४, २५, ४४, ४७, ४८ |
| कर्मचोदना | १८-१८ |
| कर्मजम् | २-५१ |
| कर्मजा | ४-१२ |
| कर्मजान् | ४-३२ |
| कर्मणः | ३-१,९; ४-१७(२); १४-१६; १८-७, १२ |
| कर्मणा | ३-२०; १८-६० |
| कर्मणाम् | ३-४; ४-१२; ५-१; १४-१२; १८-२ |
| कर्मणि | २-४७; ३-१, २२, २३, २५; ४-१८, २०; १४-९; १७-२६; १८-४५ |
| कर्मफलत्यागः | १२-१२ |
| कर्मफलत्यागी | १८-११ |
| कर्मफलप्रेप्सुः | १८-२७ |
| कर्मफलसंयोगम् | ५-१४ |
| कर्मफलहेतुः | २-४७ |
| कर्मफलम् | ५-१२; ६-१ |
| कर्मफलासङ्गम् | ४-२० |
| कर्मफले | ४-१४ |
| कर्मबन्धनः | ३-९ |
| कर्मबन्धम् | २-३९ |
| कर्मबन्धनैः | ९-२८ |
| कर्मभिः | ३-३१; ४-१४ |
| कर्मयोगम् | ३-७ |
| कर्मयोगः | ५-२(२) |
| कर्मयोगेन | ३-३; १३-२४ |
| कर्मसङ्गिनाम् | ३-२६ |
| कर्मसङ्गिषु | १४-१५ |
| कर्मसङ्गेन | १४-७ |
| कर्मसमुद्भवः | ३-१४ |
| कर्मसङ्ग्रहः | १८-१८ |
| कर्मसंज्ञितः | ८-३ |
| कर्मसंन्यासात् | ५-२ |
| कर्मसु | २-५०; ६-४,१७; ९-९ |
| कर्माणि | २-४८; ३-२७, ३०; ४-१४, ४१; ५-१०, १४; ९-९; १२-६, १०; १३-२९; १८-६, ११, ४१ |
| कर्मानुबन्धीनि | १५-२ |
| कर्मिभ्यः | ६-४६ |
| कर्मेन्द्रियाणि | ३-६ |
| कर्मेन्द्रियैः | ३-७ |
| कर्शयन्तः | १७-६ |
| कर्षति | १५-७ |
| कलयताम् | १०-३० |
| कलेवरम् | ८-५, ६ |
| कल्पक्षये | ९-७ |
| कल्पते | २-१५; १४-२६; १८-५३ |
| कल्पादौ | ९-७ |
| कल्याणकृत् | ६-४० |
| कवयः | ४-१६; १८-२ |
| कविम् | ८-९ |
| कविः | १०-३७ |
| कवीनाम् | १०-३७ |
| कश्चन | ३-१८; ६-२; ७-२६; ८-२७ |
| कश्चित् | २-१७, २९(२); ३-५, १८; ६-४०; ७-३(२); १८-६९ |
| कश्मलम् | २-२ |
| कस्मात् | ११-३७ |
| कस्यचित् | ५-१५ |
| कम् | २-२१(२) |
| कन्दर्पः | १०-२८ |
| कः | ८-२; ११-३१; १६-१५ |
| का | १-३६; २-२५,५४; १७-१ |
| काङ्क्षति | ५-३; १२-१७; १४-२२; १८-५४ |
| काङ्क्षन्तः | ४-१२ |
| काङ्क्षितम् | १-३३ |
| काङ्क्षे | १-३२ |
| कामकामाः | ९-२१ |
| कामकामी | २-७० |
| कामकारतः | १६-२३ |
| कामकारेण | ५-१२ |
| कामक्रोधपरायणाः | १६-१२ |
| कामक्रोधवियुक्तानाम् | ५-२६ |
| कामक्रोधोद्भवम् | ५-२३ |
| कामधुक् | १०-२८ |
| कामभोगार्थम् | १६-१२ |
| कामभोगेषु | १६-१६ |
| कामरागबलान्विताः | १७-५ |
| कामरागविवर्जितम् | ७-११ |
| कामरूपम् | ३-४३ |
| कामरूपेण | ३-३९ |
| कामसङ्कल्पवर्जिताः | ४-१९ |
| कामहैतुकम् | १६-८ |
| कामम् | १६-१०, १८; १८-५३ |
| कामः | २-६२; ३-३७; ७-११; १६-२१ |
| कामात्मानः | २-४३ |
| कामात् | २-६२ |
| कामान् | २-५५, ७१; ६-२४; ७-२२ |
| कामाः | २-७० |
| कामेप्सुना | १८-२४ |
| कामैः | ७-२० |
| कामोपभोगपरमाः | १६-११ |
| काम्यानाम् | १८-२ |
| कायक्लेशभयात् | १८-८ |
| कायशिरोग्रीवम् | ६-१३ |
| कायम् | ११-४४ |
| कायेन | ५-११ |
| कारणम् | ६-३(२); १३-२१ |
| कारणानि | १८-१३ |
| कारयन् | ५-१३ |
| कार्पण्यदोषोपहतस्वभावः | २-७ |
| कार्यक(का)रणकर्तृत्वे | १३-२० |
| कार्यते | ३-५ |
| कार्यम् | ३-१७,१९; ६-१; १८-५, ९, ३१ |
| कार्याकार्यव्यवस्थितौ | १६-२४ |
| कार्याकार्ये | १८-३० |
| कार्ये | १८-२२ |

| पदानि | अ०-श्लो० |
|---|---|
| कालम् | ८-२३ |
| कालः | १०-३०,३३; ११-३२ |
| कालानलसन्निभानि | ११-२५ |
| काले | ८-२३; १७-२० |
| कालेन | ४-२,३८ |
| कालेषु | ८-७, २७ |
| काशिराजः | १-५ |
| काश्यः | १-१७ |
| काम् | ६-३७ |
| किम् | १-१,३२(२),३५; २-३६,५४(३); ३-१,३३; ४-१६(२); ८-१(५); ९-३३; १०-४२; १६-८ |
| किमाचारः | १४-२१ |
| किञ्चन | ३-२२ |
| किञ्चित् | ४-२०; ५-८; ६-२५; ७-७; १३-२६ |
| किरीटी | ११-३५ |
| किरीटिनम् | ११-१७, ४६ |
| किल्बिषम् | ४-२१; १८-४७ |
| कीर्तयन्तः | ९-१४ |
| कीर्तिम् | ९-३३ |
| कीर्तिः | १०-३४ |
| कुतः | २-२,६६; ४-३१; ११-४३ |
| कुन्तिभोजः | १-५ |
| कुन्तीपुत्रः | १-१६ |
| कुरु | २-४८; ३-८; ४-१५; १२-११; १८-६३ |
| कुरुक्षेत्रे | १-१ |
| कुरुते | ३-२१; ४-३७(२) |
| कुरुनन्दन | २-४१; ६-४३; १४-१३ |
| कुरुप्रवीर | ११-४८ |
| कुरुवृद्धः | १-१२ |
| कुरुश्रेष्ठ | १०-१९ |
| कुरुष्व | ९-२७ |
| कुरुसत्तम | ४-३१ |
| कुरून् | १-२५ |
| कुर्यात् | ३-२५ |
| कुर्याम् | ३-२४ |
| कुर्वन् | ४-२१; ५-७,१३; १२-१०; १८-४७ |
| कुर्वन्ति | ३-२५; ५-११ |
| कुर्वाणः | १८-५६ |
| कुलक्षयकृतम् | १-३८, ३९ |
| कुलक्षये | १-४० |
| कुलघ्नानाम् | १-४२, ४३ |
| कुलधर्माः | १-४०, ४३ |
| कुलस्य | १-४२ |
| कुलस्त्रियः | १-४१ |
| कुलम् | १-४० |
| कुले | ६-४२ |
| कुशले | १८-१० |
| कुसुमाकरः | १०-३५ |
| कूटस्थम् | १२-३ |
| कूटस्थः | ६-८; १५-१६ |
| कूर्मः | २-५८ |
| कृतकृत्यः | १५-२० |
| कृतनिश्चयः | २-३७ |
| कृतम् | ४-१५(२); १७-२८; १८-२३ |
| कृताञ्जलिः | ११-१४, ३५ |
| कृतान्ते | १८-१३ |
| कृतेन | ३-१८ |
| कृत्वा | २-३८; ४-२२; ५-२७(२); ६-१२, २५; ११-३५; १८-८, ६८ |
| कृत्स्नकर्मकृत् | ४-१८ |
| कृत्स्नवत् | १८-२२ |
| कृत्स्नवित् | ३-२९ |
| कृत्स्नस्य | ७-६ |
| कृत्स्नम् | १-४०; ७-२९; ९-८; १०-४२; ११-७, १३; १३-३३(२) |
| कृपणाः | २-४९ |
| कृपया | १-२८; २-१ |
| कृपः | १-८ |
| कृषिगौरक्ष्यवाणिज्यम् | १८-४४ |
| कृष्ण | १-२८, ३२, ४१; ५-१; ६-३६, ३७, ३९; ११-४१; १७-१ |
| कृष्णम् | ११-३५ |
| कृष्णः | ८-२५; १८-७८ |
| कृष्णात् | १८-७५ |
| के | १२-१ |
| केचित् | ११-२१, २७; १३-२४ |
| केन | ३-३६ |
| केनचित् | १२-१९ |
| केवलम् | ४-२१; १८-१६ |
| केवलैः | ५-११ |
| केशव | १-३१; २-५४; ३-१; १०-१४ |
| केशवस्य | ११-३५ |
| केशवार्जुनयोः | १८-७६ |
| केशिनिषूदन | १८-१ |
| केषु | १०-१७(२) |
| कैः | १-२२; १४-२१ |
| कौन्तेय | २-१४, ३७, ६०; ३-९, ३९; ५-२२; ६-३५; ७-८; ८-६, १६; ९-७, १० २३, २७, ३१; १३-१, ३१; १४-४, ७; १६-२०, २२; १८-४८, ५०, ६० |
| कौन्तेयः | १-२७ |
| कौमारम् | २-१३ |
| कौशलम् | २-५० |
| क्रतुः | ९-१६ |
| क्रियते | १७-१८, १९; १८-९, २४ |
| क्रियन्ते | १७-२५ |
| क्रियमाणानि | ३-२७; १३-२९ |
| क्रियाभिः | ११-४८ |
| क्रियाविशेषबहुलाम् | २-४३ |
| क्रूरान् | १६-१९ |
| क्रोधम् | १६-१८; १८-५३ |
| क्रोधः | २-६२; ३-३७; १६-४, २१ |
| क्रोधात् | २-६३ |
| क्लेदयन्ति | २-२३ |
| क्लेशः | १२-५ |
| क्लैब्यम् | २-३ |
| क्वचित् | १८-१२ |
| क्षणम् | ३-५ |
| क्षत्रकर्म | १८-४३ |
| क्षत्रियस्य | २-३१ |
| क्षत्रियाः | २-३२ |
| क्षमा | १०-४,३४; १६-३ |
| क्षमी | १२-१३ |
| क्षयम् | १८-२५ |
| क्षयाय | १६-९ |
| क्षरम् | १५-१८ |
| क्षरः | ८-४; १५-१६(२) |
| क्षान्तिः | १३-७; १८-४२ |
| क्षामये | ११-४२ |
| क्षिपामि | १६-१९ |
| क्षिप्रम् | ४-१२; ९-३१ |
| क्षीणकल्मषाः | ५-२५ |
| क्षीणे | ९-२१ |
| क्षुद्रम् | २-३ |
| क्षेत्रक्षेत्रज्ञयोः | १३-२, ३४ |
| क्षेत्रक्षेत्रज्ञसंयोगात् | १३-२६ |
| क्षेत्रज्ञम् | १३-२ |
| क्षेत्रज्ञः | १३-१ |

| पदानि | अ०-श्लो० |
|---|---|
| क्षेत्रम् | १३-१, ३, ६, १८, ३३ |
| क्षेत्री | १३-३३ |
| क्षेमतरम् | १-४६ |
| **ख** | |
| खम् | ७-४ |
| खे | ७-८ |
| **ग** | |
| गच्छ | १८-६२ |
| गच्छति | ६-३७, ४० |
| गच्छन् | ५-८ |
| गच्छन्ति | २-५१; ५-१७; ८-२४ १४-१८(२); १५-५ |
| गजेन्द्राणाम् | १०-२७ |
| गतरसम् | १७-१० |
| गतव्यथः | १२-१६ |
| गतसङ्गस्य | ४-२३ |
| गतसन्देहः | १८-७३ |
| गतः | ११-५१ |
| गतागतम् | ९-२१ |
| गतासून् | २-११ |
| गताः | ८-१५; १४-१; १५-४ |
| गतिम् | ६-३७,४७; ७-१८; ८-१३, २९; ९-३२; १३-२८; १६-२०,२२,२३ |
| गतिः | ४-१७; ९-१८; १२-५ |
| गती | ८-२६ |
| गत्वा | १४-१५; १५-६ |
| गदिनम् | ११-१७, ४६ |
| गन्तव्यम् | ४-२४ |
| गन्तासि | २-५२ |
| गन्धर्वयक्षासुरसिद्धसङ्घाः | ११-२२ |
| गन्धर्वाणाम् | १०-२६ |
| गन्धः | ७-९ |
| गन्धान् | १५-८ |
| गमः | २-३ |
| गम्यते | ५-५ |
| गरीयसे | ११-३७ |
| गरीयः | २-६ |
| गरीयान् | ११-४३ |
| गर्भम् | १४-३ |
| गर्भः | ३-३८ |
| गवि | ५-१८ |
| गहना | ४-१७ |
| गाण्डीवम् | १-३० |
| गात्राणि | १-२९ |
| गायत्री | १०-३५ |
| गाम् | १५-१३ |
| गिराम् | १०-२५ |
| गीतम् | १३-४ |
| गुडाकेश | १०-२०; ११-७ |
| गुडाकेशः | २-९ |
| गुडाकेशेन | १-२४ |
| गुणकर्मविभागयोः | ३-२८ |
| गुणकर्मविभागशः | ४-१३ |
| गुणकर्मसु | ३-२९ |
| गुणतः | १८-२९ |
| गुणप्रवृद्धाः | १५-२ |
| गुणभेदतः | १८-१९ |
| गुणभोक्तृ | १३-१४ |
| गुणमयी | ७-१४ |
| गुणमयैः | ७-१३ |
| गुणसङ्गः | १३-२१ |
| गुणसम्मूढाः | ३-२९ |
| गुणसङ्ख्याने | १८-१९ |
| गुणातीतः | १४-२५ |
| गुणान् | १३-१९, २१; १४-२०, २१(२), २६ |
| गुणान्वितम् | १५-१० |
| गुणाः | ३-२८; १४-५, २३ |
| गुणेषु | ३-२८ |
| गुणेभ्यः | १४-१९(२) |
| गुणैः | ३-५, २७; १३-२३; १४-२३; १८-४०, ४१ |
| गुरुणा | ६-२२ |
| गुरुः | ११-४३ |
| गुरून् | २-५(२) |
| गुह्यतमम् | ९-१, १५-२० |
| गुह्यतरम् | १८-६३ |
| गुह्यम् | ११-१; १८-६८, ७५ |
| गुह्यात् | १८-६३ |
| गुह्यानाम् | १०-३८ |
| गृणन्ति | ११-२१ |
| गृह्णन् | ५-९ |
| गृह्णाति | २-२२ |
| गृहीत्वा | १५-८; १६-१० |
| गृह्यते | ६-३५ |
| गेहे | ६-४१ |
| गोविन्द | १-३२ |
| गोविन्दम् | २-९ |
| ग्रसमानः | ११-३० |
| ग्रसिष्णु | १३-१६ |
| ग्लानिः | ४-७ |
| **घ** | |
| घातयति | २-२१ |
| घोरम् | ११-४९; १७-५ |
| घोरे | ३-१ |
| घोषः | १-१९ |
| घ्नतः | १-३५ |
| घ्राणम् | १५-९ |
| **च** | |
| च | १-१, ४(२), ५(३), ६(३), ८(५), ९, ११, १३(२), १४, १६, १७(४), १८(२), १९(२), २५, २७, २९(३), ३०(२), ३१(३), ३२(२), ३३(२), ३४, ३८, ४२, ४३; २-४, ६, ८, ११(२), १२, १९, २३, २४, २६, २७, २९(३), ३१, ३२, ३३, ३४(२), ३५, ३६, ४१, ५२, ५८, ६६(२); ३-४, ८, १७(२), १८, २२, २४, ३८, ३९; ४-३, ५, ८, ९, १७(२), १८, २२, २७, २८, ४०(२); ५-१, २, ५(२), १५, १८(२), २०, २७; ६-१(३), ९, १३, १६(३), २०, २१, २२, २९, ३०(२), ३५, ४३, ४६; ७-४, ९(३), ११, १२(२), १६, १७, २२, २६(२), २९, ३०(२); ८-१, २, ४, ५, ७, १०, १२, २३, २८(२); ९-४, ५(२), ९, १२, १४(२), १५, १७, १९(४), २४(२), २९; १०-२, ३, ४(२), ७, ९(३), १३, १७, १८, २०(३), २२, २३(२), २४, २६, २७, २८, २९(२), ३०(३), ३१, ३२(२), ३३, ३४(३), ३८, ३९; ११-२, ५, ७, १५(२), १७, २०, २२(४), २४, २५(२), २६, ३४ (३), ३६(२), ३७, ३८(२), ३९(२), ४२, ४३, ४५, ४८, ४९, ५०, ५३, ५४(२); १२-१, ३, १३, १५(२), १८(२); १३-२, ३(५), ४, ५(३), ८, ९, १०, १४(२), १५(४), १६(४), १८, १९(३), २२(२), २३, २४, २५, २९, ३०, ३४; १४-२, ६, १०(२), १३(२), १७(२), १९, २१, २२(३), २६, २७(३); १५-२(२), ३(२), ४, ८, ९(३), ११, १२, १३(२), १५(४), १६(२), १८(२), २०; १६-१(२), ४(३), |

| पदानि | अ०-श्लो० |
|---|---|
| | ६, ७(३), ११, १४, १८; १७-२(२), ४, ६, १०(२), १२, १४, १५(२), १८, २०(२), २१, २२, २३(२), २५, २६, २७(३), २८(२); १८-१, ३, ५, ६, ९, १२, १४(३), १९(२), २२, २५, २८, २९, ३०(३), ३१(३), ३२, ३५, ३६, ३९(२), ४१, ४२, ४३(२), ५१(२), ५५, ६७(२), ६९(२), ७०, ७१, ७४, ७६, ७७(२) |
| चक्रहस्तम् | ११-४६ |
| चक्रम् | ३-१६ |
| चक्रिणम् | ११-१७ |
| चक्षुः | ५-२७; ११-८; १५-९ |
| चञ्चलत्वात् | ६-३३ |
| चञ्चलम् | ६-२६, ३४ |
| चतुर्भुजेन | ११-४६ |
| चतुर्विधम् | १५-१४ |
| चतुर्विधाः | ७-१६ |
| चत्वारः | १०-६ |
| चन्द्रमसि | १५-१२ |
| चमूम् | १-३ |
| चरताम् | २-६७ |
| चरति | २-७१; ३-३६ |
| चरन् | २-६४ |
| चरन्ति | ८-११ |
| चरम् | १३-१५ |
| चराचरस्य | ११-४३ |
| चराचरम् | १०-३९ |
| चलति | ६-२१ |
| चलम् | ६-३५; १७-१८ |
| चलितमानसः | ६-३७ |
| चातुर्वर्ण्यम् | ४-१३ |
| चान्द्रमसम् | ८-२५ |
| चापम् | १-४७ |
| चिकीर्षुः | ३-२५ |
| चित्तम् | ६-१८, २०; १२-९ |
| चित्ररथः | १०-२६ |
| चिन्तयन्तः | ९-२२ |
| चिन्तयेत् | ६-२५ |
| चिन्ताम् | १६-११ |
| चिन्त्यः | १०-१७ |
| चिरात् | १२-७ |
| चिरेण | ५-६ |
| चूर्णितैः | ११-२७ |
| चेकितानः | १-५ |
| चेत् | २-३३; ३-१,२४; ४-३६; ९-३०; १८-५८ |
| चेतना | १०-२२; १३-६ |
| चेतसा | ८-८; १८-५७, ७२ |
| चेष्टते | ३-३३ |
| चेष्टाः | १८-१४ |
| चैलाजिनकुशोत्तरम् | ६-११ |
| च्यवन्ति | ९-२४ |
| **छ** | |
| छन्दसाम् | १०-३५ |
| छन्दांसि | १५-१ |
| छन्दोभिः | १३-४ |
| छलयताम् | १०-३६ |
| छित्त्वा | ४-४२; १५-३ |
| छिन्दन्ति | २-२३ |
| छिन्नद्वैधाः | ५-२५ |
| छिन्नसंशयः | १८-१० |
| छिन्नाभ्रम् | ६-३८ |
| छेत्ता | ६-३९ |
| छेत्तुम् | ६-३९ |
| **ज** | |
| जगतः | ७-६; ८-२६; ९-१७; १६-९ |
| जगत् | ७-५, १३; ९-४, १०; १०-४२; ११-७, १३, ३०, ३६; १५-१२; १६-८ |
| जगत्पते | १०-१५ |
| जगन्निवास | ११-२५, ३७, ४५ |
| जघन्यगुणवृत्तिस्थाः | १४-१८ |
| जनकादयः | ३-२० |
| जनयेत् | ३-२६ |
| जनसंसदि | १३-१० |
| जनः | ३-२१ |
| जनाधिपाः | २-१२ |
| जनानाम् | ७-२८ |
| जनार्दन | १-३६,३९, ४४; ३-१; १०-१८; ११-५१ |
| जनाः | ७-१६; ८-१७,२४; ९-२२; १६-७; १७-४,५ |
| जन्तवः | ५-१५ |
| जन्म | २-२७; ४-४(२), ९(२); ६-४२; ८-१५,१६ |
| जन्मकर्मफलप्रदाम् | २-४३ |
| जन्मनाम् | ७-१९ |
| जन्मनि | १६-२०(२) |
| जन्मबन्धविनिर्मुक्ताः | २-५१ |
| जन्ममृत्युजरादुःखैः | १४-२० |
| जन्ममृत्युजराव्याधिदुःख-दोषानुदर्शनम् | १३-८ |
| जन्मानि | ४-५ |
| जपयज्ञः | १०-२५ |
| जयद्रथम् | ११-३४ |
| जयः | १०-३६ |
| जयाजयौ | २-३८ |
| जयेम | २-६ |
| जयेयुः | २-६ |
| जरा | २-१३ |
| जरामरणमोक्षाय | ७-२९ |
| जहाति | २-५० |
| जहि | ३-४३; ११-३४ |
| जागर्ति | २-६९ |
| जाग्रतः | ६-१६ |
| जाग्रति | २-६९ |
| जातस्य | २-२७ |
| जाताः | १०-६ |
| जातिधर्माः | १-४३ |
| जातु | २-१२; ३-५,२३ |
| जानन् | ८-२७ |
| जानाति | १५-१९ |
| जाने | ११-२५ |
| जायते | १-२९, ४१; २-२०; १४-१५(२) |
| जायन्ते | १४-१२,१३ |
| जाह्नवी | १०-३१ |
| जिगीषताम् | १०-३८ |
| जिघ्रन् | ५-८ |
| जिजीविषामः | २-६ |
| जिज्ञासुः | ६-४४; ७-१६ |
| जितसङ्गदोषाः | १५-५ |
| जितः | ५-१९; ६-६ |
| जितात्मनः | ६-७ |
| जितात्मा | १८-४९ |
| जित्वा | २-३७; ११-३३ |
| जितेन्द्रियः | ५-७ |
| जीर्णानि | २-२२(२) |
| जीवति | ३-१६ |
| जीवनम् | ७-१ |
| जीवभूतः | १५-७ |
| जीवभूताम् | ७-५ |
| जीवलोके | १५-७ |
| जीवितेन | १-३२ |

पदानि अ०-श्लो०

जुहोषि ९-२७
जुह्वति ४-२६(२), २७, २९, ३०
जेतासि ११-३४
जोषयेत् ३-२६
ज्ञातव्यम् ७-२
ज्ञातुम् ११-५४
ज्ञातेन १०-४२
ज्ञात्वा ४-१५, १६, ३२, ३५; ५-२९; ७-२; ९-१,१३; १३-१२; १४-१; १६-२४; १८-५५
ज्ञानगम्यम् १३-१७
ज्ञानचक्षुषः १५-१०
ज्ञानचक्षुषा १३-३४
ज्ञानतपसा ४-१०
ज्ञानदीपिते ४-२७
ज्ञानदीपेन १०-११
ज्ञाननिर्धूतकल्मषाः ५-२७
ज्ञानप्लवेन ४-३६
ज्ञानयज्ञः ४-३३
ज्ञानयज्ञेन ९-१५; १८-७०
ज्ञानयोगव्यवस्थितिः १६-१
ज्ञानयोगेन ३-३
ज्ञानवताम् १०-३८
ज्ञानवान् ३-३३; ७-१९
ज्ञानविज्ञानतृप्तात्मा ६-८
ज्ञानविज्ञाननाशनम् ३-४१
ज्ञानसङ्गेन १४-६
ज्ञानसञ्छिन्नसंशयम् ४-४१
ज्ञानस्य १८-५०
ज्ञानम् ३-३९, ४०; ४-३४, ३९(२); ५-१५, १६; ७-२; ९-१; १०-४, ३८ १२-१२; १३-२(२), ११, १७; १५-१५; १८-१८, १९, २०, २१(२), ४२, ६३
ज्ञानाग्निदग्धकर्माणम् ४-१९
ज्ञानाग्निः ४-३७
ज्ञानात् १२-१२
ज्ञानानाम् १४-१
ज्ञानावस्थितचेतसः ४-२३
ज्ञानासिना ४-४२
ज्ञानिनः ३-३९; ४-३४; ७-१७
ज्ञानिभ्यः ६-४६
ज्ञानी ७-१६, १७, १८
ज्ञाने ४-३३
ज्ञानेन ४-३८; ५-१६
ज्ञास्यसि ७-१
ज्ञेयम् १-३९; १३-१२, १६, १७, १८; १८-१८
ज्ञेयः ५-३; ८-२
ज्यायसी ३-१
ज्यायः ३-८
ज्योतिषाम् १०-२१; १३-१७
ज्योतिः ८-२४, २५; १३-१७
ज्वलद्भिः ११-३०
ज्वलनम् ११-२९

## झ

झषाणाम् १०-३१

## त

ततम् २-१७; ८-२२; ९-४; ११-३८; १८-४६
ततः १-१३,१४; २-३३, ३६, ३८; ६-२२,२६(२), ४३, ४५; ७-२२; ११-४, ९, १४, ४०; १२-९, ११; १३-२८, ३०; १४-३; १५-४; १६-२०,२२; १८-५५,६४
तत् १-१०, ४६; २-७,१७,५७(२),६७; ३-१, २, २१(३); ४-१६,३४, ३८; ५-१, ५,१६; ६-२१; ७-१, २३, २९; ८-१, ११, २१, २८; ९-२६, २७; १०-३९(२), ४१(२); ११-४, ४२(२), ४५,४९; १३-२, ३(२), १२(२), १३, १५(२),१६, १७, २६; १४-७, ८; १५-४, ५, ६(२), १२; १७-१७, १८, १९, २०, २१, २२, २३, २५, २८; १८-५, २०, २१, २२, २३, २४, २५,३७(२),३८(२),३९, ४०, ४५,६०,७७
तत्परम् ५-१६; ११-३७
तत्परः ४-३९
तत्परायणाः ५-१७
तत्प्रसादात् १८-६२
तत्र १-२६; २-१३, १८; ६-१२, ४३; ८-१८, २४, २५; ११-१३; १४-६; १८-४, १६, ७८
तत्त्वज्ञानार्थदर्शनम् १३-११
तत्त्वतः ४-९; ६-२१; ७-३; १०-७; १८-५५(२)
तत्त्वदर्शिनः ४-३४
तत्त्वदर्शिभिः २-१६
तत्त्ववित् ३-२८; ५-८
तत्त्वम् १८-१
तत्त्वेन ९-२४; ११-५४
तथा १-८, २६, ३४(२); २-१, १३, २२, २६, २९; ३-२५, ३८; ४-११, २८, २९, ३७; ५-२४; ६-७; ७-६; ८-२५; ९-६, ३२, ३३; १०-६, १३, ३५; ११-६, १५, २३, २६, २८, २९, ३४, ४६, ५०; १२-१८; १३-१८, २९, ३२, ३३; १४-१०, १५; १५-३; १६-२१; १७-७,२६; १८-१४, ५०, ६३
तदनन्तरम् १८-५५
तदर्थम् ३-९
तदर्थीयम् १७-२७
तदा १-२, २१; २-५२, ५३, ५५; ४-७; ६-४,१८; ११-१३; १३-३०; १४-११, १४
तदात्मानः ५-१७
तद्बुद्धयः ५-१७
तद्भावभावितः ८-६
तद्वत् २-७०
तद्विदः १३-१
तनुम् ७-२१; ९-११
तन्निष्ठाः ५-१७
तपन्तम् ११-१९
तपसा ११-५३
तपसि १७-२७
तपस्यसि ९-२७
तपस्विभ्यः ६-४६
तपस्विषु ७-९
तपः ७-९; १०-५; १६-१; १७-५, ७, १४, १५, १६, १७, १८, १९, २८; १८-५(२), ४२
तपःसु ८-२८
तपामि ९-१९
तपोभिः ११-४८
तपोयज्ञाः ४-२८
तप्तम् १७-१७, २८
तप्यन्ते १७-५
तमसः ८-९; १३-१७; १४-१६,१७;
तमसा १८-३२
तमसि १४-१३, १५
तमः १०-११; १४-५, ८, ९, १०(३); १७-१
तमोद्वारैः १६-२२
तया २-४४; ७-२२
तयोः ३-३४; ५-२

| पदानि | अ०-श्लो० |
|---|---|
| तरन्ति | ७-१४ |
| तरिष्यसि | १८-५८ |
| तव | १-३; २-३६(२); ४-५; १०-४२; ११-१५, १६, २०, २८, २९, ३०, ३१, ३६, ४१, ४७, ५१; १८-७३ |
| तस्मात् | १-३७; २-१८, २५, २७, ३० ३७, ५०, ६८; ३-१५, १९, ४१; ४-१५, ४२; ५-१९; ६-४६; ८-७, २०, २७; ११-३३, ४४; १६-२१, २४; १७-२४; १८-६९(२) |
| तस्मिन् | १४-३ |
| तस्य | १-१२; २-५७, ५८, ६१, ६८; ३-१७, १८; ४-१३; ६-३,६,३०,३४, ४०; ७-२१(२); ८-१४; ११-१२; १५-२; १८-७, १५ |
| तस्याम् | २-६९ |
| तस्याः | ७-२२ |
| तम् | २-१,१०; ४-१९; ६-२, २३, ४३; ७-२०(२); ८-६(२), १०, २१, २३; ९-२१; १०-१०; १३-१; १५-१, ४; १७-१२; १८-४६, ६२ |
| तात | ६-४० |
| तानि | २-६१; ४-५; ९-७, ९; १८-१९ |
| तान् | १-७(२), २७; २-१४; ३-२९,३२; ४-११,३२; ७-१२, २२; १६-१९; १७-६ |
| तामसप्रियम् | १७-१० |
| तामसम् | १७-१३, १९, २२; १८-२२, २५, ३९ |
| तामसः | १८-७, २८ |
| तामसाः | ७-१२; १४-१८; १७-४ |
| तामसी | १७-२; १८-३२, ३५ |
| तावान् | २-४६ |
| तासाम् | १४-४ |
| ताम् | ७-२१; ८-१७; १७-२ |
| तितिक्षस्व | २-१४ |
| तिष्ठति | ३-५; १३-१३; १८-६१ |
| तिष्ठन्तम् | १३-१७ |
| तिष्ठन्ति | १४-१८ |
| तिष्ठसि | १०-१६ |
| तु | १-२, ७, १०; २-५, १२, १४, १६, १७, ३९, ६४; ३-७, १३, १७, २८, ३२, ४२(२); ५-२, ६, १४, १६; ६-६, १६, ३५, ३६, ४५; ७-५, १२, १८, २३, २६, २८; ८-१६, २०, २२, २३; ९-१, १३, २४, २९; १०-४०; ११-८,५४; १२-३, ६, २०; १३-२५; १४-८, ९, १४, १६; १५-१७; १७-१, ७, १२, २१; १८-६, ७, ११, १२, १६, २१, २२, २४, ३४, ३६ |
| तुमुलः | १-१३, १९ |
| तुल्यनिन्दात्मसंस्तुतिः | १४-२४ |
| तुल्यनिन्दास्तुतिः | १२-१९ |
| तुल्यप्रियाप्रियः | १४-२४ |
| तुल्यः | १४-२५(२) |
| तुष्टः | २-५५ |
| तुष्टिः | १०-५ |
| तुष्यति | ६-२० |
| तुष्यन्ति | १०-९ |
| तूष्णीम् | २-९ |
| तृप्तिः | १०-१८ |
| तृष्णासङ्गसमुद्भवम् | १४-७ |
| ते | १-७, ३३; २-६, ७, ३४, ३९, ४७(२) ५२, ५३; ३-१, ८, ११, १३, ३१; ४-३, १६, ३४; ५-१९, २२; ७-२, १२, १४, २८, २९, ३०; ८-११, १७; ९-१, २०, २१, २३, २४, २९, ३२; १०-१,१०,१४, १९; ११-३, ८, २३, २५, २७, ३१, ३७, ३९(२), ४०(२), ४९; १२-२, ४, २०; १३-२५, ३४; १६-८, १७, २४; १८-५९, ६३, ६४, ६५, ६७, ७२ |
| तेजस्विनाम् | ७-१०; १०-३६ |
| तेजः | ७-९, १०; १०-३६; १५-१२(२); १६-३; १८-४३ |
| तेजोभिः | ११-३० |
| तेजोमयम् | ११-४७ |
| तेजोराशिम् | ११-१७ |
| तेजोंऽशसम्भवम् | १०-४१ |
| तेन | ३-३८; ४-२४; ५-१५; ६-४४; ११-१, ४६; १७-२३; १८-७० |
| तेषाम् | ५-१६; ७-१७, २३; ९-२२; १०-१०, ११; १२-१, ५, ७; १७-१,७ |
| तेषु | २-६२; ५-२२; ७-१२; ९-४, ९, २९; १६-७ |
| तैः | ३-१२; ५-१९; ७-२०(२) |
| तोयम् | ९-२६ |
| तौ | २-१९; ३-३४ |
| त्यक्तजीविताः | १-९ |
| त्यक्तसर्वपरिग्रहः | ४-२१ |
| त्यक्तुम् | १८-११ |
| त्यक्त्वा | १-३३; २-३, ४८, ५१; ४-९, २०; ५-१०, ११, १२; ६-२४; १८-६, ९, ५१ |
| त्यजति | ८-६ |
| त्यजन् | ८-१३ |
| त्यजेत् | १६-२१; १८-८, ४८ |
| त्यागफलम् | १८-८ |
| त्यागस्य | १८-१ |
| त्यागम् | १८-२, ८ |
| त्यागः | १६-२; १८-४, ९ |
| त्यागात् | १२-१२ |
| त्यागी | १८-१०, ११ |
| त्यागे | १८-४ |
| त्याज्यम् | १८-३(२), ५ |
| त्रयम् | १६-२१ |
| त्रयीधर्मम् | ९-२१ |
| त्रायते | २-४० |
| त्रिधा | १८-१९ |
| त्रिभिः | ७-१३; १६-२२; १८-४० |
| त्रिविधम् | १६-२१; १७-१७; १८-१२, २९, ३६ |
| त्रिविधः | १७-७, २३; १८-४, १८ |
| त्रिविधा | १७-२; १८-१८ |
| त्रिषु | ३-२२ |
| त्रीन् | १४-२०, २१(२) |
| त्रैगुण्यविषयाः | २-४५ |
| (त्रैधर्म्यम् | ९-२१) |
| त्रैलोक्यराज्यस्य | १-३५ |
| त्रैविद्याः | ९-२० |
| त्वक् | १-३० |
| त्वत्तः | ११-२ |
| त्वत्प्रसादात् | १८-७३ |
| त्वत्समः | ११-४३ |
| त्वदन्यः | ६-३९ |
| त्वदन्येन | ११-४७, ४८ |
| त्वया | ६-३३; ११-१, २०, ३८; १८-७२ |
| त्वयि | २-३ |
| त्वरमाणाः | ११-२७ |
| त्वम् | २-११, १२, २६, २७, ३०, ३३, ३५; ३-८, ४१; ४-४, ५, १५; १०-१५, १६, ४१; ११-३, ४, १८(४), ३३, ३४, ३७, ३८(२), ३९, ४०, ४३, ४९; १८-५८ |
| त्वा | २-२; ११-२१, २२, ३२; १८-६६ |
| त्वाम् | २-७(२), ३५; १०-१३, १७; |

| पदानि | अ०-श्लो० |
|---|---|
| | ११-१६, १७, १९, २१, २४, २६, ४२, ४४, ४६; १२-१; १८-५९ |
| **द** | |
| दक्षः | १२-१६ |
| दक्षिणायनम् | ८-२५ |
| दण्डः | १०-३८ |
| दत्तम् | १७-२८ |
| दत्तान् | ३-१२ |
| ददामि | १०-१०; ११-८ |
| ददासि | ९-२७ |
| दधामि | १४-३ |
| दध्मुः | १-१८ |
| दध्मौ | १-१२, १५ |
| दमयताम् | १०-३८ |
| दमः | १०-४; १६-१; १८-४२ |
| दम्भमानमदान्विताः | १६-१० |
| दम्भः | १६-४ |
| दम्भार्थम् | १७-१२ |
| दम्भाहङ्कारसंयुक्ताः | १७-५ |
| दम्भेन | १६-१७; १७-१८ |
| दया | १६-२ |
| दर्पः | १६-४ |
| दर्पम् | १६-१८; १८-५३ |
| दर्शनकाङ्क्षिणः | ११-५२ |
| दर्शय | ११-४, ४५ |
| दर्शयामास | ११-९, ५० |
| दर्शितम् | ११-४७ |
| दश | १३-५ |
| दशनान्तरेषु | ११-२७ |
| दहति | २-२३ |
| दंष्ट्राकरालानि | ११-२५, २७ |
| दाक्ष्यम् | १८-४३ |
| दातव्यम् | १७-२० |
| दानक्रियाः | १७-२५ |
| दानवाः | १०-१४ |
| दानम् | १०-५; १६-१; १७-७, २०(२), २१, २२; १८-५, ४३ |
| दाने | १७-२७ |
| दानेन | ११-५३ |
| दानेषु | ८-२८ |
| दानैः | ११-४८ |
| दास्यन्ते | ३-१२ |
| दास्यामि | १६-१५ |
| दिवि | ९-२०; ११-१२; १८-४० |
| दिव्यगन्धानुलेपनम् | ११-११ |
| दिव्यमाल्याम्बरधरम् | ११-११ |
| दिव्यम् | ४-९; ८-८, १०; १०-१२; ११-८ |
| दिव्यानाम् | १०-४० |
| दिव्यानि | ११-५ |
| दिव्यानेकोद्यतायुधम् | ११-१० |
| दिव्यान् | ९-२०; ११-१५ |
| दिव्याः | १०-१६, १९ |
| दिव्यौ | १-१४ |
| दिशः | ६-१३; ११-२०, २५, ३६ |
| दीपः | ६-१९ |
| दीप्तविशालनेत्रम् | ११-२४ |
| दीप्तहुताशवक्त्रम् | ११-१९ |
| दीप्तम् | ११-२४ |
| दीप्तानलार्कद्युतिम् | ११-१७ |
| दीयते | १७-२०, २१, २२ |
| दीर्घसूत्री | १८-२८ |
| दुरत्यया | ७-१४ |
| दुरासदम् | ३-४३ |
| दुर्गतिम् | ६-४० |
| दुर्निग्रहम् | ६-३५ |
| दुर्निरीक्ष्यम् | ११-१७ |
| दुर्बुद्धेः | १-२३ |
| दुर्मतिः | १८-१६ |
| दुर्मेधाः | १८-३५ |
| दुर्योधनः | १-२ |
| दुर्लभतरम् | ६-४२ |
| दुष्कृताम् | ४-८ |
| दुष्कृतिनः | ७-१५ |
| दुष्टासु | १-४१ |
| दुष्पूरम् | १६-१० |
| दुष्पूरेण | ३-३९ |
| दुष्प्रापः | ६-३६ |
| दुःखतरम् | २-३६ |
| दुःखयोनयः | ५-२२ |
| दुःखशोकामयप्रदाः | १७-९ |
| दुःखसंयोगवियोगम् | ६-२३ |
| दुःखहा | ६-१७ |
| दुःखम् | ५-६; ६-३२; १०-४; १२-५; १३-६; १४-१६; १८-८ |
| दुःखान्तम् | १८-३६ |
| दुःखालयम् | ८-१५ |
| दुःखेन | ६-२२ |
| दुःखेषु | २-५६ |
| दूरस्थम् | १३-१५ |
| दूरेण | २-४९ |
| दृढनिश्चयः | १२-१४ |
| दृढव्रताः | ७-२८; ९-१४ |
| दृढम् | ६-३४; १८-६४ |
| दृढेन | १५-३ |
| दृष्टपूर्वम् | ११-४७ |
| दृष्टवान् | ११-५२, ५३ |
| दृष्टः | २-१६ |
| दृष्टिम् | १६-९ |
| दृष्ट्वा | १-२, २०, २८; २-५९; ११-२०, २३, २४, २५, ४५, ४९, ५१ |
| देव | ११-१५, ४४, ४५ |
| देवताः | ४-१२ |
| देवदत्तम् | १-१५ |
| देवदेव | १०-१५ |
| देवदेवस्य | ११-१३ |
| देवद्विजगुरुप्राज्ञपूजनम् | १७-१४ |
| देवभोगान् | ९-२० |
| देवयजः | ७-२३ |
| देवर्षिः | १०-१३ |
| देवर्षीणाम् | १०-२६ |
| देवलः | १०-१३ |
| देववर | ११-३१ |
| देवव्रताः | ९-२५ |
| देवम् | ११-११, १४ |
| देवानाम् | १०-२, २२ |
| देवान् | ३-११; ७-२३; ९-२५; ११-१५; १७-४ |
| देवाः | ३-११, १२; १०-१४; ११-५२ |
| देवेश | ११-२५, ३७, ४५ |
| देवेषु | १८-४० |
| देशे | ६-११; १७-२० |
| देहभृता | १८-११ |
| देहभृताम् | ८-४ |
| देहभृत् | १४-१४ |
| देहवद्भिः | १२-५ |
| देहसमुद्भवान् | १४-२० |
| देहम् | ४-९; ८-१३; १५-१४ |
| देहान्तरप्राप्तिः | २-१३ |
| देहाः | २-१८ |
| देहिनम् | ३-४०; १४-५, ७ |
| देहिनाम् | १७-२ |
| देहिनः | २-१३, ५९ |

| पदानि | अ०-श्लो० |
|---|---|
| देही | २-२२, ३०; ५-१३; १४-२० |
| देहे | २-१३, ३०; ८-२, ४; ११-७, १५; १३-२२, ३२; १४-५ |
| दैत्यानाम् | १०-३० |
| दैवम् | ४-२५; १८-१४ |
| दैवः | १६-६(२) |
| दैवी | ७-१४; १६-५ |
| दैवीम् | ९-१३; १६-३, ५ |
| दोषवत् | १८-३ |
| दोषम् | १-३८, ३९ |
| दोषेण | १८-४८ |
| दोषैः | १-४३ |
| द्यावापृथिव्योः | ११-२० |
| द्यूतम् | १०-३६ |
| द्रक्ष्यसि | ४-३५ |
| द्रवन्ति | ११-२८, ३६ |
| द्रव्यमयात् | ४-३३ |
| द्रव्ययज्ञाः | ४-२८ |
| द्रष्टा | १४-१९ |
| द्रष्टुम् | ११-३, ४, ७, ८, ४६, ४८, ५३, ५४ |
| द्रुपदपुत्रेण | १-३ |
| द्रुपदः | १-४, १८ |
| द्रोणम् | २-४; ११-३४ |
| द्रोणः | ११-२६ |
| द्रौपदेयाः | १-६, १८ |
| द्वन्द्वमोहनिर्मुक्ताः | ७-२८ |
| द्वन्द्वमोहेन | ७-२७ |
| द्वन्द्वः | १०-३३ |
| द्वन्द्वातीतः | ४-२२ |
| द्वन्द्वैः | १५-५ |
| द्वारम् | १६-२१ |
| द्विजोत्तम | १-७ |
| द्विविधा | ३-३ |
| द्विषतः | १६-१९ |
| द्वेषः | १३-६ |
| द्वेष्टि | २-५७; ५-३; १२-१७; १४-२२; १८-१० |
| द्वेष्यः | ९-२९ |
| द्वौ | १५-१६; १६-६ |

ध

| पदानि | अ०-श्लो० |
|---|---|
| धनमानमदान्विताः | १६-१७ |
| धनम् | १६-१३ |
| धनञ्जय | २-४८, ४९; ४-४१; ७-७; ९-९; १२-९; १८-२९, ७२ |
| धनञ्जयः | १-१५; १०-३७; ११-१४ |
| धनानि | १-३३ |
| धनुर्धरः | १८-७८ |
| धनुः | १-२० |
| धर्मकामार्थान् | १८-३४ |
| धर्मक्षेत्रे | १-१ |
| धर्मसम्मूढचेताः | २-७ |
| धर्मसंस्थापनार्थाय | ४-८ |
| धर्मस्य | २-४०; ४-७; ९-३; १४-२७ |
| धर्मम् | १८-३१, ३२ |
| धर्मात्मा | ९-३१ |
| धर्माविरुद्धः | ७-११ |
| धर्मे | १-४० |
| धर्म्यम् | २-३३; ९-२; १८-७० |
| धर्म्यात् | २-३१ |
| धर्म्यामृतम् | १२-२० |
| धाता | ९-१७; १०-३३ |
| धातारम् | ८-९ |
| धाम | ८-२१; १०-१२; ११-३८; १५-६ |
| धारयते | १८-३३, ३४ |
| धारयन् | ५-९; ६-१३ |
| धारयामि | १५-१३ |
| धार्तराष्ट्रस्य | १-२३ |
| धार्तराष्ट्राणाम् | १-१९ |
| धार्तराष्ट्रान् | १-२०, ३६, ३७ |
| धार्तराष्ट्राः | १-४६; २-६ |
| धार्यते | ७-५ |
| धीमता | १-३ |
| धीमताम् | ६-४२ |
| धीरम् | २-१५ |
| धीरः | २-१३; १४-२४ |
| धूमः | ८-२५ |
| धूमेन | ३-३८; १८-४८ |
| धृतराष्ट्रस्य | ११-२६ |
| धृतराष्ट्रः | १-१ |
| धृतिगृहीतया | ६-२५ |
| धृतिम् | ११-२४ |
| धृतिः | १०-३४; १३-६; १६-३ १८-३३, ३४, ३५, ४३ |
| धृतेः | १८-२९ |
| धृत्या | १८-३३, ३४, ५१ |
| धृत्युत्साहसमन्विताः | १८-२६ |
| धृष्टकेतुः | १-५ |
| धृष्टद्युम्नः | १-१७ |
| धेनूनाम् | १०-२८ |
| ध्यानयोगपरः | १८-५२ |
| ध्यानम् | १२-१२ |
| ध्यानात् | १२-१२ |
| ध्यानेन | १३-२४ |
| ध्यायतः | २-६२ |
| ध्यायन्तः | १२-६ |
| ध्रुवम् | २-२७; १२-३ |
| ध्रुवः | २-२७ |
| ध्रुवा | १८-७८ |

न

| पदानि | अ०-श्लो० |
|---|---|
| न | १-३०, ३१, ३२(२), ३५, ३७, ३८, ३९; २-३, ६(२), ८, ९, ११, १२(६), १३, १५, १६(२), १७, १९(३), २०(४), २३(४), २५, २६, २७, २९, ३०, ३१(२), ३३, ३८, ४०(२), ४२, ४४, ५७(२), ६६(३), ७०, ७२; ३-४(२), ५, ८, १६, १७, १८(३), २२(२), २३, २४, २६, २८, २९, ३२, ३४; ४-५, ९, १४(३), २०, २१, २२, ३१, ३५, ३८, ४०(३), ४१; ५-३(२), ४, ६, ७, ८, १०, १३(२), १४(३), १५(२), २०(२), २२; ६-१(२), २, ४(२), ५, ११(२), १६(४), १९, २१, २२(२), २५, ३०(२), ३३, ३८, ३९, ४०(३); ७-२, ७, १२, १३, १५, २५(२), २६; ८-५, १५, १६, २०, २१, २७; ९-४, ५(२), ९, २४, २९(२), ३१; १०-२(२), ७, १४(२), १८, १९, ३९, ४०; ११-८, १६(३), २४, २५(२), ३१, ३२, ३७, ४३, ४७, ४८(४), ५३(४); १२-७, ८, ९, १५(२), १७(४); १३-१२(२), २३, २८, ३१(२), ३२(२); १४-२(२), १९, २२(२),२३(२); १५-३(४), ४,६(४),१०, ११; १६-३, ७(४), २३(३); १७-२८; १८-३, ५, ७, ८, १०(२), ११, १२, १६, १७(४), ३५, ४०, ४७, ४८, ५४(२), ५८, ५९, ६०, ६७(४), ६९(२) |
| नकुलः | १-१६ |
| नक्षत्राणाम् | १०-२१ |
| नदीनाम् | ११-२८ |
| नभः | १-१९ |
| नभःस्पृशम् | ११-२४ |
| नमस्कुरु | ९-३४; १८-६५ |

| पदानि | अ०-श्लो० |
|---|---|
| नमस्यन्तः | ९-१४ |
| नमस्यन्ति | ११-३६ |
| नमः | ११-३१, ३५, ३९(४), ४०(२) |
| नमेरन् | ११-३७ |
| नयेत् | ६-२६ |
| नरकस्य | १६-२१ |
| नरकाय | १-४२ |
| नरके | १-४४; १६-१६ |
| नरपुङ्गवः | १-५ |
| नरलोकवीराः | ११-२८ |
| नरः | २-२२; ५-२३; १२-१९; १६-२२; १८-१५, ४५, ७१ |
| नराणाम् | १०-२७ |
| नराधमान् | १६-१९ |
| नराधमाः | ७-१५ |
| नराधिपम् | १०-२७ |
| नरैः | १७-१७ |
| नवद्वारे | ५-१३ |
| नवानि | २-२२(२) |
| नश्यति | ६-३८ |
| नश्यत्सु | ८-२० |
| नष्टः | ४-२; १८-७३ |
| नष्टात्मानः | १६-९ |
| नष्टान् | ३-३२ |
| नष्टे | १-४० |
| नः | १-३२, ३३, ३६; २-६(२) |
| नागानाम् | १०-२९ |
| नानाभावान् | १८-२१ |
| नानावर्णाकृतीनि | ११-५ |
| नानाविधानि | ११-५ |
| नानाशस्त्रप्रहरणाः | १-९ |
| नान्यगामिना | ८-८ |
| नामयज्ञैः | १६-१७ |
| नायकाः | १-७ |
| नारदः | १०-१३, २६ |
| नारीणाम् | १०-३४ |
| नावम् | २-६७ |
| नाशनम् | १६-२१ |
| नाशयामि | १०-११ |
| नाशाय | ११-२९(२) |
| नाशितम् | ५-१६ |
| नासाभ्यान्तरचारिणौ | ५-२७ |
| नासिकाग्रम् | ६-१३ |
| निगच्छति | ९-३१; १८-३६ |
| निगृहीतानि | २-६८ |
| निगृह्णामि | ९-१९ |
| निग्रहम् | ६-३४ |
| निग्रहः | ३-३३ |
| नित्यजातम् | २-२६ |
| नित्यतृप्तः | ४-२० |
| नित्ययुक्तस्य | ८-१४ |
| नित्ययुक्तः | ७-१७ |
| नित्ययुक्ताः | ९-१४; १२-२ |
| नित्यवैरिणा | ३-३९ |
| नित्यशः | ८-१४ |
| नित्यसत्त्वस्थः | २-४५ |
| नित्यसन्न्यासी | ५-३ |
| नित्यस्य | २-१८ |
| नित्यम् | २-२१, २६, ३०; ३-१५, ३१; ९-६; १०-९; ११-५२; १३-९; १८-५२ |
| नित्यः | २-२०, २४ |
| नित्याभियुक्तानाम् | ९-२२ |
| निद्रालस्यप्रमादोत्थम् | १८-३९ |
| निधनम् | ३-३५ |
| निधानम् | ९-१८; ११-१८, ३८ |
| निन्दन्तः | २-३६ |
| निबद्धः | १८-६० |
| निबध्नन्ति | ४-४१; ९-९; १४-५ |
| निबध्नाति | १४-७, ८ |
| निबन्धाय | १६-५ |
| निबध्यते | ४-२२; ५-१२; १८-१७ |
| निबोध | १-७; १८-१३, ५० |
| निमित्तमात्रम् | ११-३३ |
| निमित्तानि | १-३१ |
| निमिषन् | ५-९ |
| नियतमानसः | ६-१५ |
| नियतस्य | १८-७ |
| नियतम् | १-४४; ३-८; १८-९, २३ |
| नियतात्मभिः | ८-२ |
| नियताहाराः | ४-३० |
| नियताः | ७-२० |
| नियमम् | ७-२० |
| नियम्य | ३-७, ४१; ६-२६; १८-५१ |
| नियोक्ष्यति | १८-५९ |
| नियोजयसि | ३-१ |
| नियोजितः | ३-३६ |
| निरग्निः | ६-१ |
| निरहङ्कारः | २-७२; १२-१३ |
| निराशीः | ३-३०; ४-२१; ६-१० |
| निराश्रयः | ४-२० |
| निराहारस्य | २-५९ |
| निरीक्षे | १-२२ |
| निरुद्धम् | ६-२० |
| निरुध्य | ८-१२ |
| निर्गुणत्वात् | १३-३१ |
| निर्गुणम् | १३-१४ |
| निर्देशः | १७-२३ |
| निर्दोषम् | ५-१९ |
| निर्द्वन्द्वः | २-४५; ५-३ |
| निर्ममः | २-७२; ३-३०; १२-१३; १८-५३ |
| निर्मलत्वात् | १४-६ |
| निर्मलम् | १४-१६ |
| निर्मानमोहाः | १५-५ |
| निर्योगक्षेमः | २-४५ |
| निर्वाणपरमाम् | ६-१५ |
| निर्विकारः | १८-२६ |
| निर्वेदम् | २-५२ |
| निर्वैरः | ११-५५ |
| निवर्तते | २-५९; ८-२५ |
| निवर्तन्ति | १५-४ |
| निवर्तन्ते | ८-२१; ९-३; १५-६ |
| निवर्तितुम् | १-३९ |
| निवसिष्यसि | १२-८ |
| निवातस्थः | ६-१९ |
| निवासः | ९-१८ |
| निवृत्तानि | १४-२२ |
| निवृत्तिम् | १६-७; १८-३० |
| निवेशय | १२-८ |
| निशा | २-६९(२) |
| निश्चयम् | १८-४ |
| निश्चयेन | ६-२३ |
| निश्चरति | ६-२६ |
| निश्चला | २-५३ |
| निश्चितम् | २-७; १८-६ |
| निश्चिताः | १६-११ |
| निश्चित्य | ३-२ |
| निष्ठा | ३-३; १७-१; १८-५० |
| निस्त्रैगुण्यः | २-४५ |
| निहताः | ११-३३ |
| निहत्य | १-३६ |
| निःश्रेयसकरौ | ५-२ |

| पदानि | अ०-श्लो० |
|---|---|
| निःस्पृहः | २-७१; ६-१८ |
| नीतिः | १०-३८; १८-७८ |
| नु | १-३५; २-३६ |
| नृलोके | ११-४८ |
| नृषु | ७-८ |
| नैकृतिकः | १८-२८ |
| नैष्कर्म्यसिद्धिम् | १८-४९ |
| नैष्कर्म्यम् | ३-४ |
| (नैष्कृतिकः | १८-२८) |
| नैष्ठिकीम् | ५-१२ |
| नो | १७-२८ |
| न्याय्यम् | १८-१५ |
| न्यासम् | १८-२ |
| **प** | |
| पक्षिणाम् | १०-३० |
| पचन्ति | ३-१३ |
| पचामि | १५-१४ |
| पञ्च | १३-५; १८-१३, १५ |
| पञ्चमम् | १८-१४ |
| पणवानकगोमुखाः | १-१३ |
| पण्डितम् | ४-१९ |
| पण्डिताः | २-११; ५-४, १८ |
| पतङ्गाः | ११-२९ |
| पतन्ति | १-४२; १६-१६ |
| पत्रम् | ९-२६ |
| पथि | ६-३८ |
| पदम् | २-५१; ८-११; १५-४, ५; १८-५६ |
| पद्मपत्रम् | ५-१० |
| परतरम् | ७-७ |
| परतः | ३-४२ |
| परधर्मः | ३-३५ |
| परधर्मात् | ३-३५; १८-४७ |
| परमम् | ८-३, ८, २१; १०-१, १२; ११-१, ९, १८; १५-६; १८-६४, ६८ |
| परमः | ६-३२ |
| परमात्मा | ६-७; १३-२२, ३१; १५-१७ |
| परमाम् | ८-१३, १५, २१; १८-४९ |
| परमेश्वर | ११-३ |
| परमेश्वरम् | १३-२७ |
| परमेष्वासः | १-२७ |
| परया | १-२८; १२-२; १७-१७ |
| परस्तात् | ८-९ |
| परस्परम् | ३-११; १०-९ |
| परस्य | १७-१९ |
| परम् | २-१२, ५९; ३-११, १९, ४२, ४३; ४-४; ७-१३, २४; ८-१०, २८; ९-११; १०-१२(२); ११-१८, ३८(२), ४७; १३-१२, १७, ३४; १४-१, १९; १८-७५ |
| परन्तप | २-३; ४-२, ५, ३३; ७-२७; ९-३३; १०-४०; ११-५४; १८-४१ |
| परन्तपः | २-९ |
| परम्पराप्राप्तम् | ४-२ |
| परः | ४-४०; ८-२०, २२; १३-२२ |
| परा | ३-४२; १८-५० |
| पराणि | ३-४२ |
| पराम् | ४-३९; ६-४५; ७-५; ९-३२; १३-२८; १४-१; १६-२२, २३; १८-५४, ६२, ६८ |
| परिकीर्तितः | १८-७, २७ |
| परिक्लिष्टम् | १७-२१ |
| परिग्रहम् | १८-५३ |
| परिचक्षते | १७-१३, १७ |
| परिचर्यात्मकम् | १८-४४ |
| परिचिन्तयन् | १०-१७ |
| परिज्ञाता | १८-१८ |
| परिणामे | १८-३७, ३८ |
| परित्यज्य | १८-६६ |
| परित्यागः | १८-७ |
| परित्राणाय | ४-८ |
| परिदह्यते | १-३० |
| परिदेवना | २-२८ |
| परिपन्थिनौ | ३-३४ |
| परिप्रश्नेन | ४-३४ |
| परिमार्गितव्यम् | १५-४ |
| परिशुष्यति | १-२९ |
| परिसमाप्यते | ४-३३ |
| पर्जन्यः | ३-१४ |
| पर्जन्यात् | ३-१४ |
| पर्णानि | १५-१ |
| पर्यवतिष्ठते | २-६५ |
| पर्याप्तम् | १-१० |
| पर्युपासते | ४-२५; ९-२२; १२-१, ३, २० |
| पर्युषितम् | १७-१० |
| पवताम् | १०-३१ |
| पवनः | १०-३१ |
| पवित्रम् | ४-३८; ९-२, १७; १०-१२ |
| पश्य | १-३, २५; ९-५; ११-५, ६(२), ७, ८ |
| पश्यतः | २-६९ |
| पश्यति | २-२९; ५-५(२); ६-३०(२), ३२; १३-२७(२), २९(२); १८-१६(२) |
| पश्यन् | ५-८; ६-२०; १३-२८ |
| पश्यन्ति | १-३८; १३-२४; १५-१०, ११(२) |
| पश्यामि | १-३१; ६-३३; ११-१५, १६(२), १७, १९ |
| पश्येत् | ४-१८ |
| पाञ्चजन्यम् | १-१५ |
| पाण्डव | ४-३५; ६-२; ११-५५; १४-२२ १६-५ |
| पाण्डवः | १-१४, २०; ११-१३ |
| पाण्डवानाम् | १०-३७ |
| पाण्डवानीकम् | १-२ |
| पाण्डवाः | १-१ |
| पाण्डुपुत्राणाम् | १-३ |
| पातकम् | १-३८ |
| पात्रे | १७-२० |
| पापकृत्तमः | ४-३६ |
| पापयोनयः | ९-३२ |
| पापम् | १-३६, ४५; २-३३, ३८; ३-३६; ५-१५; ७-२८ |
| पापात् | १-३९ |
| पापाः | ३-१३ |
| पापेन | ५-१० |
| पापेभ्यः | ४-३६ |
| पापेषु | ६-९ |
| पाप्मनाम् | ३-४१ |
| पारुष्यम् | १६-४ |
| पार्थ | १-२५; २-३, २१, ३२, ३९, ४२, ५५, ७२; ३-१६, २२, २३; ४-११, ३३; ६-४०; ७-१, १०; ८-८, १४, १९, २२, २७; ९-१३, ३२; १०-२४; ११-५; १२-७; १६-४, ६; १७-२६, २८; १८-६, ३०, ३१, ३२, ३३, ३४, ३५, ७२ |
| पार्थः | १-२६; १८-७८ |
| पार्थस्य | १८-७४ |
| पार्थाय | ११-९ |
| पावकः | २-२३; १०-२३; १५-६ |
| पावनानि | १८-५ |
| पितरः | १-३४, ४२ |

| पदानि | अ०-श्लो० |
|---|---|
| पिता | ९-१७; ११-४३, ४४; १४-४ |
| पितामहः | १-१२; ९-१७ |
| पितामहान् | १-२६ |
| पितामहाः | १-३४ |
| पितृव्रताः | ९-२५ |
| पितृणाम् | १०-२९ |
| पितॄन् | १-२६; ९-२५ |
| पीडया | १७-१९ |
| पुण्यकर्मणाम् | ७-२८; १८-७१ |
| पुण्यकृताम् | ६-४१ |
| पुण्यफलम् | ८-२८ |
| पुण्यम् | ९-२०; १८-७६ |
| पुण्यः | ७-९ |
| पुण्याः | ९-३३ |
| पुण्ये | ९-२१ |
| पुत्रदारगृहादिषु | १३-९ |
| पुत्रस्य | ११-४४ |
| पुत्रान् | १-२६ |
| पुत्राः | १-३४; ११-२६ |
| पुनः | ४-९, ३५, ५-१; ८-१५, १६(२), २६; ९-७, ८(२), ३३; ११-१६, ३९, ४९, ५०; १६-१३; १७-२१; १८-२४, ४०, ७७(२) |
| पुमान् | २-७१ |
| पुरस्तात् | ११-४० |
| पुरा | ३-३,१०; १७-२३ |
| पुराणम् | ८-९ |
| पुराणः | २-२०; ११-३८ |
| पुराणी | १५-४ |
| पुरातनः | ४-३ |
| पुरुजित् | १-५ |
| पुरुषर्षभ | २-१५ |
| पुरुषव्याघ्र | १८-४ |
| पुरुषस्य | २-६० |
| पुरुषम् | २-१५; ८-८,१०; १०-१२; १३-१९, २३; १५-४ |
| पुरुषः | २-२१; ३-४; ८-४, २२; ११-१८, ३८; १३-२०, २१, २२; १५-१७; १७-३ |
| पुरुषाः | ९-३ |
| पुरुषोत्तम | ८-१; १०-२५; ११-३ |
| पुरुषोत्तमम् | १५-१९ |
| पुरुषोत्तमः | १५-१८ |
| पुरुषौ | १५-१६ |
| पुरे | ५-१३ |
| पुरोधसाम् | १०-२४ |
| पुष्कलाभिः | ११-२१ |
| पुष्णामि | १५-१३ |
| पुष्पम् | ९-२६ |
| पुष्पिताम् | २-४२ |
| पुंसः | २-६२ |
| पूजार्हौ | २-४ |
| पूज्यः | ११-४३ |
| पूतपापाः | ९-२० |
| पूताः | ४-१० |
| पूति | १७-१० |
| पूरुषः | ३-१९, ३६ |
| पूर्वतरम् | ४-१५ |
| पूर्वम् | ११-३३ |
| पूर्वाभ्यासेन | ६-४४ |
| पूर्वे | १०-६ |
| पूर्वैः | ४-१५(२) |
| पृच्छामि | २-७ |
| पृथक् | १-१८(२); ५-४; १३-४; १८-१, १४ |
| पृथक्त्वेन | ९-१५; १८-२१, २९ |
| पृथग्विधम् | १८-१४ |
| पृथग्विधान् | १८-२१ |
| पृथग्विधाः | १०-५ |
| पृथिवीपते | १-१८ |
| पृथिवीम् | १-१९ |
| पृथिव्याम् | ७-९; १८-४० |
| पृष्ठतः | ११-४० |
| पौण्ड्रम् | १-१५ |
| पौत्रान् | १-२६ |
| पौत्राः | १-३४ |
| पौरुषम् | ७-८; १८-२५ |
| पौर्वदेहिकम् | ६-४३ |
| प्रकाशकम् | १४-६ |
| प्रकाशयति | ५-१६; १३-३३(२) |
| प्रकाशम् | १४-२२ |
| प्रकाशः | ७-२५; १४-११ |
| प्रकीर्त्या | ११-३६ |
| प्रकृतिजान् | १३-२१ |
| प्रकृतिजैः | ३-५; १८-४० |
| प्रकृतिसम्भवान् | १३-१९ |
| प्रकृतिसम्भवाः | १४-५ |
| प्रकृतिस्थः | १३-२१ |
| प्रकृतिस्थानि | १५-७ |
| प्रकृतिम् | ३-३३; ४-६; ७-५; ९-७, ८, १२, १३; ११-५१; १३-१९, २३ |
| प्रकृतिः | ७-४; ९-१०; १३-२०; १८-५९ |
| प्रकृतेः | ३-२७, २९, ३३; ९-८ |
| प्रकृत्या | ७-२०; १३-२९ |
| प्रजनः | १०-२८ |
| प्रजहाति | २-५५ |
| प्रजहि | ३-४१ |
| प्रजानाति | १८-३१ |
| प्रजानामि | ११-३१ |
| प्रजापतिः | ३-१०; ११-३९ |
| प्रजाः | ३-१०, २४; १०-६ |
| प्रज्ञा | २-५७, ५८, ६१, ६८ |
| प्रज्ञावादान् | २-११ |
| प्रज्ञाम् | २-६७ |
| प्रणम्य | ११-१४, ३५, ४४ |
| प्रणयेन | ११-४१ |
| प्रणवः | ७-८ |
| प्रणश्यति | २-६३; ६-३०; ९-३१ |
| प्रणश्यन्ति | १-४० |
| प्रणश्यामि | ६-३० |
| प्रणिधाय | ११-४४ |
| प्रणिपातेन | ४-३४ |
| प्रतपन्ति | ११-३० |
| प्रतापवान् | १-१२ |
| प्रति | २-४३ |
| प्रतिजानीहि | ९-३१ |
| प्रतिजाने | १८-६५ |
| प्रतिपद्यते | १४-१४ |
| प्रतियोत्स्यामि | २-४ |
| प्रतिष्ठा | १४-२७ |
| प्रतिष्ठाप्य | ६-११ |
| प्रतिष्ठितम् | ३-१५ |
| प्रतिष्ठिता | २-५७, ५८, ६१, ६८ |
| प्रत्यक्षावगमम् | ९-२ |
| प्रत्यनीकेषु | ११-३२ |
| प्रत्यवायः | २-४० |
| प्रत्युपकारार्थम् | १७-२१ |
| प्रथितः | १५-१८ |
| प्रदध्मतुः | १-१४ |
| प्रदिष्टम् | ८-२८ |
| प्रदीप्तम् | ११-२९ |
| प्रदुष्यन्ति | १-४१ |
| प्रद्विषन्तः | १६-१८ |

| पदानि | अ०-श्लो० |
|---|---|
| प्रनष्टः | १८-७२ |
| प्रपद्यते | ७-१९ |
| प्रपद्यन्ते | ४-११; ७-१४, १५, २० |
| प्रपद्ये | १५-४ |
| प्रपन्नम् | २-७ |
| प्रपश्य | ११-४९ |
| प्रपश्यद्भिः | १-३९ |
| प्रपश्यामि | २-८ |
| प्रपितामहः | ११-३९ |
| प्रभवति | ८-१९ |
| प्रभवन्ति | ८-१८; १६-९ |
| प्रभवम् | १०-२ |
| प्रभवः | ७-६; ९-१८; १०-८ |
| प्रभविष्णु | १३-१६ |
| प्रभा | ७-८ |
| प्रभाषेत | २-५४ |
| प्रभुः | ५-१४; ९-१८, २४ |
| प्रभो | ११-४; १४-२१ |
| प्रमाणम् | ३-२१; १६-२४ |
| प्रमाथि | ६-३४ |
| प्रमाथीनि | २-६० |
| प्रमादमोहौ | १४-१७ |
| प्रमादः | १४-१३ |
| प्रमादात् | ११-४१ |
| प्रमादालस्यनिद्राभिः | १४-८ |
| प्रमादे | १४-९ |
| प्रमुखे | २-६ |
| प्रमुच्यते | ५-३; १०-३ |
| प्रयच्छति | ९-२६ |
| प्रयतात्मनः | ९-२६ |
| प्रयत्नात् | ६-४५ |
| प्रयाणकाले | ७-३०; ८-२, १० |
| प्रयाताः | ८-२३, २४ |
| प्रयाति | ८-५, १३ |
| प्रयुक्तः | ३-३६ |
| प्रयुज्यते | १७-२६ |
| प्रलपन् | ५-९ |
| प्रलयम् | १४-१४, १५ |
| प्रलयः | ७-६; ९-१८ |
| प्रलयान्ताम् | १६-११ |
| प्रलये | १४-२ |
| प्रलीनः | १४-१५ |
| प्रलीयते | ८-१९ |
| प्रलीयन्ते | ८-१८ |
| प्रवक्ष्यामि | ४-१६; ९-१; १३-१२; १४-१ |
| प्रवक्ष्ये | ८-११ |
| प्रवदताम् | १०-३२ |
| प्रवदन्ति | २-४२; ५-४ |
| प्रवर्तते | ५-१४; १०-८ |
| प्रवर्तन्ते | १६-१०; १७-२४ |
| प्रवर्तितम् | ३-१६ |
| प्रविभक्तम् | ११-१३ |
| प्रविभक्तानि | १८-४१ |
| प्रविलीयते | ४-२३ |
| प्रविशन्ति | २-७०(२) |
| प्रवृत्तः | ११-३२ |
| प्रवृत्तिम् | ११-३१; १४-२२; १६-७; १८-३० |
| प्रवृत्तिः | १४-१२; १५-४; १८-४६ |
| प्रवृत्ते | १-२० |
| प्रवृद्धः | ११-३२ |
| प्रवृद्धे | १४-१४ |
| प्रवेष्टुम् | ११-५४ |
| प्रव्यथितम् | ११-२०, ४५ |
| प्रव्यथितान्तरात्मा | ११-२४ |
| प्रव्यथिताः | ११-२३ |
| प्रशस्ते | १७-२६ |
| प्रशान्तमनसम् | ६-२७ |
| प्रशान्तस्य | ६-७ |
| प्रशान्तात्मा | ६-१४ |
| प्रसक्ताः | १६-१६ |
| प्रसङ्गेन | १८-३४ |
| प्रसन्नचेतसः | २-६५ |
| प्रसन्नात्मा | १८-५४ |
| प्रसन्नेन | ११-४७ |
| प्रसभम् | २-६०; ११-४१ |
| प्रसविष्यध्वम् | ३-१० |
| प्रसादये | ११-४४ |
| प्रसादम् | २-६४ |
| प्रसादे | २-६५ |
| प्रसिध्येत् | ३-८ |
| प्रसीद | ११-२५, ३१, ४५ |
| प्रसूता | १५-४ |
| प्रसृताः | १५-२ |
| प्रहसन् | २-१० |
| प्रहास्यसि | २-३९ |
| प्रहृष्यति | ११-३६ |
| प्रहृष्येत् | ५-२० |
| प्रह्लादः | १०-३० |
| प्राकृतः | १८-२८ |
| प्राक् | ५-२३ |
| प्राञ्जलयः | ११-२१ |
| प्राणकर्माणि | ४-२७ |
| प्राणम् | ४-२९; ८-१०, १२ |
| प्राणान् | १-३३ |
| प्राणापानगती | ४-२९ |
| प्राणापानसमायुक्तः | १५-१४ |
| प्राणापानौ | ५-२७ |
| प्राणायामपरायणाः | ४-२९ |
| प्राणिनाम् | १५-१४ |
| प्राणे | ४-२९ |
| प्राणेषु | ४-३० |
| प्राधान्यतः | १०-१९ |
| प्राप्तः | १८-५० |
| प्राप्नुयात् | १८-७१ |
| प्राप्नुवन्ति | १२-४ |
| प्राप्य | २-५७, ७२; ५-२०(२); ६-४१; ८-२१, २५; ९-३३ |
| प्राप्यते | ५-५ |
| प्राप्स्यसि | २-३७; १८-६२ |
| प्राप्स्ये | १७-१३ |
| प्रारभते | १८-१५ |
| प्रार्थयन्ते | ९-२० |
| प्राह | ४-१ |
| प्राहुः | ६-२; १३-१; १५-१; १८-२, ३ |
| प्रियचिकीर्षवः | १-२३ |
| प्रियकृत्तमः | १८-६९ |
| प्रियतरः | १८-६९ |
| प्रियहितम् | १७-१५ |
| प्रियम् | ५-२० |
| प्रियः | ७-१७(२); ९-२९; ११-४४; १२-१४, १५, १६, १७, १९; १७-७; १८-६५ |
| प्रियाः | १२-२० |
| प्रियायाः | ११-४४ |
| प्रीतमनाः | ११-४९ |
| प्रीतिपूर्वकम् | १०-१० |
| प्रीतिः | १-३६ |
| प्रीयमाणाय | १०-१ |
| प्रेतान् | १७-४ |
| प्रेत्य | १७-२८; १८-१२ |
| प्रोक्तवान् | ४-१, ४ |

| पदानि | अ०-श्लो० |
|---|---|
| प्रोक्तम् | ८-१; १३-११; १७-१८; १८-३७ |
| प्रोक्तः | ४-३; ६-३३; १०-४०; १६-६ |
| प्रोक्ता | ३-३ |
| प्रोक्तानि | १८-१३ |
| प्रोच्यते | १८-१९ |
| प्रोच्यमानम् | १८-२९ |
| प्रोतम् | ७-७ |
| **फ** | |
| फलहेतवः | २-४९ |
| फलम् | २-५१; ५-४; ७-२३; ९-२६; १४-१६(२); १७-१२, २१,२५; १८-९, १२ |
| फलाकाङ्क्षी | १८-३४ |
| फलानि | १८-६ |
| फले | ५-१२ |
| फलेषु | २-४७ |
| **ब** | |
| बत | १-४५ |
| बद्धाः | १६-१२ |
| बध्नाति | १४-६ |
| बध्यते | ४-१४ |
| बन्धम् | १८-३० |
| बन्धात् | ५-३ |
| बन्धुः | ६-५, ६ |
| बन्धून् | १-२७ |
| बभूव | २-९ |
| बलवताम् | ७-११ |
| बलवत् | ६-३४ |
| बलवान् | १६-१४ |
| बलम् | १-१०(२); ७-११; १६-१८; १८-५३ |
| बलात् | ३-३६ |
| बहवः | १-९; ४-१०; ११-२८ |
| बहिः | ५-२७; १३-१५ |
| बहुदंष्ट्राकरालम् | ११-२३ |
| बहुधा | ९-१५; १३-४ |
| बहुना | १०-४२ |
| बहुबाहूरुपादम् | ११-२३ |
| बहुमतः | २-३५ |
| बहुलायासम् | १८-२४ |
| बहुवक्त्रनेत्रम् | ११-२३ |
| बहुविधाः | ४-३२ |
| बहुशाखाः | २-४१ |
| बहूदरम् | ११-२३ |
| बहूनाम् | ७-१९ |
| बहूनि | ४-५; ११-६ |
| बहून् | २-३६ |
| बालाः | ५-४ |
| बाह्यस्पर्शेषु | ५-२१ |
| बाह्यान् | ५-२७ |
| बिभर्ति | १५-१७ |
| बीजप्रदः | १४-४ |
| बीजम् | ७-१०; ९-१८; १०-३९ |
| बुद्धयः | २-४१ |
| बुद्धिग्राह्यम् | ६-२१ |
| बुद्धिनाशः | २-६३ |
| बुद्धिनाशात् | २-६३ |
| बुद्धिभेदम् | ३-२६ |
| बुद्धिमताम् | ७-१० |
| बुद्धिमान् | ४-१८; १५-२० |
| बुद्धियुक्तः | २-५० |
| बुद्धियुक्ताः | २-५१ |
| बुद्धियोगम् | १०-१०; १८-५७ |
| बुद्धियोगात् | २-४९ |
| बुद्धिसंयोगम् | ६-४३ |
| बुद्धिम् | ३-२; १२-८ |
| बुद्धिः | २-३९, ४१, ४४, ५२, ५३, ६५, ६६; ३-१, ४०, ४२; ७-४, १०; १०-४; १३-५; १८-१७, ३०, ३१, ३२ |
| बुद्धेः | ३-४२, ४३; १८-२९ |
| बुद्धौ | २-४९ |
| बुद्ध्या | २-३९; ५-११; ६-२५; १८-५१ |
| बुद्ध्वा | ३-४३; १५-२० |
| बुधः | ५-२२ |
| बुधाः | ४-१९; १०-८ |
| बृहत्साम | १०-३५ |
| बृहस्पतिम् | १०-२४ |
| बोद्धव्यम् | ४-१७(३) |
| बोधयन्तः | १०-९ |
| ब्रवीमि | १-७ |
| ब्रवीषि | १०-१३ |
| ब्रह्म | ३-१५(२); ४-२४(३), ३१; ५-६, १९; ७-२९; ८-१, ३, १३, २४; १०-१२; १३-१२, ३०; १४-४; १८-५० |
| ब्रह्मकर्म | १८-४२ |
| ब्रह्मकर्मसमाधिना | ४-२४ |
| ब्रह्मचर्यम् | ८-११; १७-१४ |
| ब्रह्मचारिव्रते | ६-१४ |
| ब्रह्मणः | ४-३२; ६-३८; ८-१७; ११-३७; १४-२७; १७-२३ |
| ब्रह्मणा | ४-२४ |
| ब्रह्मणि | ५-१०, १९, २० |
| ब्रह्मनिर्वाणम् | २-७२; ५-२४, २५, २६ |
| ब्रह्मभूतम् | ६-२७ |
| ब्रह्मभूतः | ५-२४; १८-५४ |
| ब्रह्मभूयाय | १४-२६; १८-५३ |
| ब्रह्मयोगयुक्तात्मा | ५-२१ |
| ब्रह्मवादिनाम् | १७-२४ |
| ब्रह्मवित् | ५-२० |
| ब्रह्मविदः | ८-२४ |
| ब्रह्मसंस्पर्शम् | ६-२८ |
| ब्रह्मसूत्रपदैः | १३-४ |
| ब्रह्माग्नौ | ४-२४, २५ |
| ब्रह्माणम् | ११-१५ |
| ब्रह्मोद्भवम् | ३-१५ |
| ब्राह्मणक्षत्रियविशाम् | १८-४१ |
| ब्राह्मणस्य | २-४६ |
| ब्राह्मणाः | ९-३३; १७-२३ |
| ब्राह्मणे | ५-१८ |
| ब्राह्मी | २-७२ |
| ब्रूहि | २-७; ५-१ |
| **भ** | |
| भक्तः | ४-३; ७-२१; ९-३१ |
| भक्ताः | ९-३३; १२-१, २० |
| भक्तिमान् | १२-१७, १९ |
| भक्तियोगेन | १४-२६ |
| भक्तिम् | १८-६८ |
| भक्तिः | १३-१० |
| भक्त्या | ८-१०, २२; ९-१४, २६, २९; ११-५४; १८-५५ |
| भक्त्युपहृतम् | ९-२६ |
| भगवन् | १०-१४, १७ |
| भजताम् | १०-१० |
| भजति | ६-३१; १५-१९ |
| भजते | ६-४७; ९-३० |
| भजन्ति | ९-१३, २९ |
| भजन्ते | ७-१६, २८; १०-८ |
| भजस्व | ९-३३ |
| भजामि | ४-११ |
| भयम् | १०-४; १८-३५ |
| भयात् | २-३५, ४० |
| भयानकानि | ११-२७ |

| पदानि | अ०-श्लो० |
|---|---|
| भयाभये | १८-३० |
| भयावहः | ३-३५ |
| भयेन | ११-४५ |
| भरतर्षभ | ३-४१; ७-११, १६; ८-२३; १३-२६; १४-१२; १८-३६ |
| भरतश्रेष्ठ | १७-१२ |
| भरतसत्तम | १८-४ |
| भर्ता | ९-१८; १३-२२ |
| भव | २-४५; ६-४६; ८-२७; ९-३४; ११-३३, ४६; १२-१०; १८-५७, ६५ |
| भवः | १०-४ |
| भवतः | ४-४; १४-१७ |
| भवति | १-४४; २-६३; ३-१४; ४-७, १२; ६-२, १७, ४२; ७-२३; ९-३१; १४-३, १०, २१; १७-२, ३, ७; १८-१२ |
| भवन्तम् | ११-३१ |
| भवन्तः | १-११ |
| भवन्ति | ३-१४; १०-५; १६-३ |
| भवान् | १-८; १०-१२; ११-३ |
| भवाप्ययौ | ११-२ |
| भवामि | १२-७ |
| भविता | १८-६९ |
| भविष्यताम् | १०-३४ |
| भविष्यति | १६-१३ |
| भविष्यन्ति | ११-३२ |
| भविष्याणि | ७-२६ |
| भविष्यामः | २-१२ |
| भवेत् | १-४६; ११-१२ |
| भस्मसात् | ४-३७(२) |
| भारत | १-२४; २-१०, १४, १८, २८, ३०; ३-२५; ४-७, ४२; ७-२७; ११-६; १३-२, ३३; १४-३, ८, ९, १०; १५-१९, २०; १६-३; १७-३; १८-६२ |

| पदानि | अ०-श्लो० |
|---|---|
| भावना | २-६६ |
| भावयत | ३-११ |
| भावयन्तः | ३-११ |
| भावयन्तु | ३-११ |
| भावसमन्विताः | १०-८ |
| भावसंशुद्धिः | १७-१६ |
| भावम् | ७-१५, २४; ८-६; ९-११; १८-२० |
| भावः | २-१६; ८-४, २०; १८-१७ |
| भावाः | ७-१२; १०-५ |
| भावेषु | १०-१७ |
| भावैः | ७-१३ |
| भाषसे | २-११ |
| भाषा | २-५४ |
| भासयते | १५-६, १२ |
| भासः | ११-१२, ३० |
| भास्वता | १०-११ |
| भाः | ११-१२ |
| भिन्ना | ७-४ |
| भीतभीतः | ११-३५ |
| भीतम् | ११-५० |
| भीताः | ११-२१ |
| भीतानि | ११-३६ |
| भीमकर्मा | १-१५ |
| भीमाभिरक्षितम् | १-१० |
| भीमार्जुनसमाः | १-४ |
| भीष्मद्रोणप्रमुखतः | १-२५ |
| भीष्मम् | १-११; २-४; ११-३४ |
| भीष्मः | १-८; ११-२६ |
| भीष्माभिरक्षितम् | १-१० |
| भुक्त्वा | ९-२१ |
| भुङ्क्ते | ३-१२; १३-२१ |
| भुङ्क्ष्व | ११-३३ |

| पदानि | अ०-श्लो० |
|---|---|
| भुञ्जते | ३-१३ |
| भुञ्जानम् | १५-१० |
| भुञ्जीय | २-५ |
| भुवि | १८-६९ |
| भूतगणान् | १७-४ |
| भूतग्रामम् | ९-८; १७-६ |
| भूतग्रामः | ८-१९ |
| भूतपृथग्भावम् | १३-३० |
| भूतप्रकृतिमोक्षम् | १३-३४ |
| भूतभर्तृ | १३-१६ |
| भूतभावन | १०-१५ |
| भूतभावनः | ९-५ |
| भूतभावोद्भवकरः | ८-३ |
| भूतभृत् | ९-५ |
| भूतमहेश्वरम् | ९-११ |
| भूतविशेषसङ्घान् | ११-१५ |
| भूतसर्गौ | १६-६ |
| भूतस्थः | ९-५ |
| भूतम् | १०-३९ |
| भूतादिम् | ९-१३ |
| भूतानि | २-२८, ३०, ३४, ६९; ३-१४, ३३; ४-३५; ७-६, २६; ८-२२; ९-५, ६, २५; १५-१३, १६ |
| भूतानाम् | ४-६; १०-५, २०, २२; ११-२; १३-१५; १८-४६ |
| भूतिः | १८-७८ |
| भूतेज्याः | ९-२५ |
| भूतेश | १०-१५ |
| भूतेषु | ७-११; ८-२०; १३-१६, २७; १६-२; १८-२१, ५४ |
| भूत्वा | २-२०, ३५, ४८; ३-३०; ८-१९(२); ११-५०; १५-१३,१४ |
| भूमिः | ७-४ |

| पदानि | अ०-श्लो० |
|---|---|
| भूमौ | २-८ |
| भूयः | २-२०; ६-४३; ७-२; १०-१, १८; ११-३५, ३९, ५०; १३-२३; १४-१; १५-४; १८-६४ |
| भूः | २-४७ |
| भृगुः | १०-२५ |
| भेदम् | १७-७; १८-२९ |
| भेर्यः | १-१३ |
| (भैक्षम् | २-५) |
| भैक्ष्यम् | २-५ |
| भोक्ता | ९-२४; १३-२२ |
| भोक्तारम् | ५-२९ |
| भोक्तुम् | २-५ |
| भोक्तृत्वे | १३-२० |
| भोक्ष्यसे | २-३७ |
| भोगान् | २-५; ३-१२ |
| भोगाः | १-३३; ५-२२ |
| भोगी | १६-१४ |
| भोगैश्वर्यगतिम् | २-४३ |
| भोगैश्वर्यप्रसक्तानाम् | २-४४ |
| भोगैः | १-३२ |
| भोजनम् | १७-१० |
| भ्रमति | १-३० |
| भ्रातॄन् | १-२६ |
| भ्रामयन् | १८-६१ |
| भ्रुवोः | ५-२७; ८-१० |
| **म** | |
| मकरः | १०-३१ |
| मच्चित्तः | ६-१४; १८-५७, ५८ |
| मच्चित्ताः | १०-९ |
| मणिगणाः | ७-७ |
| मतम् | ३-३१, ३२; ७-१८; १३-२; १८-६ |

| पदानि | अ०-श्लो० |
|---|---|
| मतः | ६-३२, ४६, ४७; ११-१८; १८-९ |
| मता | ३-१; १६-५; १८-३५ |
| मताः | १२-२ |
| मतिः | ६-३६; १८-७०, ७८ |
| मते | ८-२६ |
| मत्कर्मकृत् | ११-५५ |
| मत्कर्मपरमः | १२-१० |
| मत्तः | ७-७, १२; १०-५, ८; १५-१५ |
| मत्परमः | ११-५५ |
| मत्परमाः | १२-२० |
| मत्परः | २-६१; ६-१४; १८-५७ |
| मत्परायणः | ९-३४ |
| मत्पराः | १२-६ |
| मत्प्रसादात् | १८-५६, ५८ |
| मत्वा | ३-२८; १०-८; ११-४१ |
| मत्संस्थाम् | ६-१५ |
| मत्स्थानि | ९-४, ५, ६ |
| मदनुग्रहाय | ११-१ |
| मदर्थम् | १२-१० |
| मदर्थे | १-९ |
| मदर्पणम् | ९-२७ |
| मदम् | १८-३५ |
| मदाश्रयः | ७-१ |
| मद्गतप्राणाः | १०-९ |
| मद्गतेन | ६-४७ |
| मद्भक्तः | ९-३४; ११-५५; १२-१४, १६; १३-१८; १८-६५ |
| मद्भक्ताः | ७-२३ |
| मद्भक्तिम् | १८-५४ |
| मद्भक्तेषु | १८-६८ |
| मद्भावम् | ४-१०; ८-५; १४-१९ |
| मद्भावाय | १३-१८ |
| मद्भावाः | १०-६ |
| मद्याजिनः | ९-२५ |
| मद्याजी | ९-३४; १८-६५ |
| मद्योगम् | १२-११ |
| मद्व्यपाश्रयः | १८-५६ |
| मधुसूदन | १-३५; २-४; ६-३३; ८-२ |
| मधुसूदनः | २-१ |
| मध्यम् | १०-२०, ३२; ११-१६ |
| मध्ये | १-२१, २४; २-१०; ८-१०; १४-१८ |
| मनवः | १०-६ |
| मनवे | ४-१ |
| मनसा | ३-६, ७; ५-११, १३; ६-२४; ८-१० |
| मनसः | ३-४२ |
| मनः | १-३०; २-६०,६७; ३-४०, ४२; ५-१९; ६-१२, १४, २५, २६, ३४, ३५; ७-४; ८-१२; १०-२२; ११-४५; १२-२, ८; १५-९; १७-११ |
| मनःप्रसादः | १७-१६ |
| मनःप्राणेन्द्रियक्रियाः | १८-३३ |
| मनःषष्ठानि | १५-७ |
| मनीषिणः | २-५१; १८-३ |
| मनीषिणाम् | १८-५ |
| मनुष्यलोके | १५-२ |
| मनुष्याणाम् | १-४४; ७-३ |
| मनुष्याः | ३-२३; ४-११ |
| मनुष्येषु | ४-१८; १८-६९ |
| मनुः | ४-१ |
| मनोगतान् | २-५५ |
| मनोरथम् | १६-१३ |
| मन्तव्यः | ९-३० |
| मन्त्रहीनम् | १७-१३ |
| मन्त्रः | ९-१६ |
| मन्दान् | ३-२९ |
| मन्मनाः | ९-३४; १८-६५ |
| मन्मयाः | ४-१० |
| मन्यते | २-१९; ३-२७; ६-२२; १८-३२ |
| मन्यन्ते | ७-२४ |
| मन्यसे | २-२६; ११-४; १८-५९ |
| मन्ये | ६-३४; १०-१४ |
| मन्येत | ५-८ |
| मम | १-७, २९; २-८; ३-२३; ४-११; ७-१४, १७, २४; ८-२१; ९-५, ११; १०-७, ४०, ४१; ११-१, ७, ४९, ५२; १३-२; १४-२, ३; १५-६, ७; १८-७८ |
| मया | १-२२; ३-३; ४-३, १३; ७-२२; ९-४, १०; १०-१७, ३९, ४०; ११-२, ४, ३३, ३४, ४१, ४७; १५-२०; १६-१३, १४, १५; १८-६३,७३ |
| मयि | ३-३०; ४-३५; ६-३०, ३१; ७-१, ७, १२; ८-७; ९-२९; १२-२, ६, ७, ८(२), ९, १४; १३-१०; १८-५७, ६८ |
| मरणात् | २-३४ |
| मरीचिः | १०-२१ |
| मरुतः | ११-६, २२ |
| मरुताम् | १०-२१ |
| मर्त्यलोकम् | ९-२१ |
| मर्त्येषु | १०-३ |
| मलेन | ३-३८ |
| महतः | २-४० |
| महता | ४-२ |
| महति | १-४४ |
| महतीम् | १-३ |
| महत् | १-४५; ११-२३ |
| महद्ब्रह्म | १४-३ |
| महद्योनिः | १४-४ |
| महर्षयः | १०-२, ६ |
| महर्षिसिद्धसङ्घाः | ११-२१ |
| महर्षीणाम् | १०-२, २५ |
| महात्मनः | ११-१२; १८-७४ |
| महात्मन् | ११-२०, ३७ |
| महात्मा | ७-१९; ११-५० |
| महात्मानः | ८-१५; ९-१३ |
| महानुभावान् | २-५ |
| महान् | ९-६; १८-७७ |
| महापाप्मा | ३-३७ |
| महाबाहुः | १-१८ |
| महाबाहो | २-२६, ६८; ३-२८, ४३; ५-३, ६; ६-३५, ३८; ७-५; १०-१; ११-२३; १४-५; १८-१, १३ |
| महाभूतानि | १३-५ |
| महायोगेश्वरः | ११-९ |
| महारथः | १-४, १७ |
| महारथाः | १-६; २-३५ |
| महाशङ्खम् | १-१५ |
| महाशनः | ३-३७ |
| महिमानम् | ११-४१ |
| महीकृते | १-३५ |
| महीक्षिताम् | १-२५ |
| महीपते | १-२१ |
| महीम् | २-३७ |
| महेश्वरः | १३-२२ |
| महेष्वासाः | १-४ |
| मंस्यन्ते | २-३५ |
| मा | २-३, ४७(३); ११-३४, ४९(२); १६-५; १८-६६ |
| माता | ९-१७ |
| मातुलान् | १-२६ |
| मातुलाः | १-३४ |

| पदानि | अ०-श्लो० |
|---|---|
| मात्रास्पर्शाः | २-१४ |
| माधव | १-३७ |
| माधवः | १-१४ |
| मानवः | ३-१७; १८-४६ |
| मानवाः | ३-३१ |
| मानसम् | १७-१६ |
| मानसाः | १०-६ |
| मानापमानयोः | ३-७; १२-१८; १४-२५ |
| मानुषम् | ११-५१ |
| मानुषीम् | ९-११ |
| मानुषे | ४-१२ |
| मामकम् | १५-१२ |
| मामकाः | १-१ |
| मामिकाम् | ९-७ |
| मायया | ७-१५; १८-६१ |
| माया | ७-१४ |
| मायाम् | ७-१४ |
| मारुतः | २-२३ |
| मार्गशीर्षः | १०-३५ |
| मार्दवम् | १६-२ |
| मासानाम् | १०-३५ |
| माहात्म्यम् | ११-२ |
| माम् | १-४६; २-७; ३-१; ४-९, १०, |
| | ११, १३, १४(२); ५-२९; ६-३०, ३१, |
| | ४७; ७-१, ३, १०, १३, १४, १५, |
| | १६, १८, १९, २३, २४, २५, २६, २८, |
| | २९, ३०(२); ८-५, ७(२), १३, १४, |
| | १५, १६; ९-३, ९, ११, १३, १४(२), |
| | १५, २०, २२, २३, २४, २५, २८, २९, |
| | ३०, ३२, ३३, ३४(२); १०-३, ८, ९, |
| | १०, १४, २४, २७; ११-८, ५३, ५५; |
| | १२-२, ४, ६, ९; १३-२ १४-२६; १५-१९ |
| | (२); १६-१८, २०; १७-६; १८-५५(२), |

| पदानि | अ०-श्लो० |
|---|---|
| | ६५(२), ६६, ६७, ६८ |
| मित्रद्रोहे | १-३८ |
| मित्रारिपक्षयोः | १४-२५ |
| मित्रे | १२-१८ |
| मिथ्या | १८-५९ |
| मिथ्याचारः | ३-६ |
| मिश्रम् | १८-१२ |
| मुक्तसङ्गः | ३-९; १८-२६ |
| मुक्तस्य | ४-२३ |
| मुक्तम् | १८-४० |
| मुक्तः | ५-२८; १२-१५; १८-७१ |
| मुक्त्वा | ८-५ |
| मुखम् | १-२९ |
| मुखानि | ११-२५ |
| मुखे | ४-३२ |
| मुख्यम् | १०-२४ |
| मुच्यन्ते | ३-१३, ३१ |
| मुनयः | १४-१ |
| मुनिः | २-५६; ५-६, २८; १०-२६ |
| मुनीनाम् | १०-३७ |
| मुनेः | २-६९; ६-३ |
| मुमुक्षुभिः | ४-१५ |
| मुहुः | १८-७६(२) |
| मुह्यति | २-१३; ८-२७ |
| मुह्यन्ति | ५-१५ |
| मूढग्राहेण | १७-१९ |
| मूढयोनिषु | १४-१५ |
| मूढः | ७-२५ |
| मूढाः | ७-१५; ९-११; १६-२० |
| मूर्तयः | १४-४ |
| मूर्ध्नि | ८-१२ |
| मूलानि | १५-२ |
| मृगाणाम् | १०-३० |

| पदानि | अ०-श्लो० |
|---|---|
| मृगेन्द्रः | १०-३० |
| मृतस्य | २-२७ |
| मृतम् | २-२६ |
| मृत्युसंसारवर्त्मनि | ९-३ |
| मृत्युसंसारसागरात् | १२-७ |
| मृत्युम् | १३-२५ |
| मृत्युः | २-२७; ९-१९; १०-३४ |
| मे | १-२१, २९, ३०, ४६; २-७; ३-२, |
| | २२, ३१, ३२; ४-३, ५, ९, १४; ५-१; |
| | ६-३०, ३६, ३९, ४७; ७-४, ५, १८; |
| | ९-५, २६, २९, ३१; १०-१, २, १३, |
| | १८, १९; ११-४, ५, ८, १८, ३१, |
| | ४५(२), ४७, ४९; १२-२, १४, १५, |
| | १६, १७, १९, २०; १३-३; १६-६, १३; |
| | १८-४, ६, १३, ३६, ५०, ६४(२), |
| | ६५, ६९, ७०, ७७ |
| मेधा | १०-३४ |
| मेधावी | १८-१० |
| मेरुः | १०-२३ |
| मैत्रः | १२-१३ |
| मोक्षकाङ्क्षिभिः | १७-२५ |
| मोक्षपरायणः | ५-२८ |
| मोक्षयिष्यामि | १८-६६ |
| मोक्षम् | १८-३० |
| मोक्ष्यसे | ४-१६; ९-१, २८ |
| मोघकर्माणः | ९-१२ |
| मोघज्ञानाः | ९-१२ |
| मोघम् | ३-१६ |
| मोघाशाः | ९-१२ |
| मोदिष्ये | १६-१५ |
| मोहकलिलम् | २-५२ |
| मोहजालसमन्विताः | १६-१६ |
| मोहनम् | १४-८; १८-३९ |

| पदानि | अ०-श्लो० |
|---|---|
| मोहयसि | ३-२ |
| मोहम् | ४-३५; १४-२२ |
| मोहः | ११-१; १४-१३; १८-७३ |
| मोहात् | १६-१०; १८-७, २५, ६० |
| मोहितम् | ७-१३ |
| मोहिताः | ४-१६ |
| मोहिनीम् | ९-१२ |
| मौनम् | १०-३८; १७-१६ |
| मौनी | १२-१९ |
| म्रियते | २-२० |
| **य** | |
| यक्षरक्षसाम् | १०-२३ |
| यक्षरक्षांसि | १७-४ |
| यक्ष्ये | १६-१५ |
| यच्छ्रद्धः | १७-३ |
| यजन्तः | ९-१५ |
| यजन्ति | ९-२३ |
| यजन्ते | ४-१२; ९-२३; १६-१७; |
| | १७-१, ४(२) |
| यजुः | ९-१७ |
| यज्ञः | ३-१४; ९-१६; १६-१; १७-७, |
| | ११; १८-५(२) |
| यज्ञक्षपितकल्मषाः | ४-३० |
| यज्ञतपसाम् | ५-२९ |
| यज्ञतपःक्रियाः | १७-२५ |
| यज्ञदानतपःकर्म | १८-३, ५ |
| यज्ञदानतपःक्रियाः | १७-२४ |
| यज्ञभाविताः | ३-१२ |
| यज्ञम् | ५-२५(२); १७-१२, १३ |
| यज्ञविदः | ४-३० |
| यज्ञशिष्टामृतभुजः | ४-३१ |
| यज्ञशिष्टाशिनः | ३-१३ |
| यज्ञात् | ३-१४; ४-३३ |

पदानि — अ०-श्लो०


यज्ञानाम् १०-२५
यज्ञाय ४-२३
यज्ञार्थात् ३-९
यज्ञाः ४-३२; १७-२३
यज्ञे ३-१५; १७-२७
यज्ञेन ४-२५
यज्ञेषु ८-२८
यज्ञैः ९-२०
यतचित्तस्य ६-१९
यतचित्तात्मा ४-२१; ६-१०
यतचित्तेन्द्रियक्रियः ६-१२
यतचेतसाम् ५-२६
यततः २-६०
यतता ६-३६
यतताम् ७-३
यतति ७-३
यतते ६-४३
यतवाक्कायमानसः १८-५२
यतन्तः ९-१४; १५-११(२)
यतन्ति ७-२९
यतमानः ६-४५
यतयः ४-२८; ८-११
यतः ६-२६(२); १३-३; १५-४; १८-४६
यतात्मवान् १२-११
यतात्मा १२-१४
यतात्मानः ५-२५
यतीनाम् ५-२६
यतेन्द्रियमनोबुद्धिः ५-२८
यत् १-४५; २-६, ७, ८, ६७; ३-२१(३); ४-१६, ३५; ५-१, ५, २१; ६-२१, ४२; ७-२; ८-११(३), १७, २८; ९-१, २७(५); १०-१, १४, ३९(२), ४१(२); ११-१, ७, ३७, ४१, ४२, ४७, ५२; १३-२, ३(२), ११, १२(२); १४-१; १५-६, ८(२), १२(३); १७-१०, १२, १५, १८, १९, २०, २२, २८; १८-८, ९, १५, २१, २२, २३, २४, २५, ३७, ३८, ३९, ४०, ५९, ६०
यत्प्रभावः १३-३
यत्र ६-२०(२), २१; ८-२३; १८-३६, ७८(२)
यथा २-१३, २२; ३-२५, ३८(२); ४-११, ३७; ६-१९; ७-१; ९-६; ११-३, २८, २९, ५३; १२-२०; १३-३२, ३३; १८-४५, ५०, ६३
यथाभागम् १-११
यथावत् १८-१९
यदा २-५२, ५३, ५५, ५८; ४-७(२); ६-४, १८; १३-३०; १४-११, १४, १९
यदि १-३८, ४६; २-६; ३-२३; ६-३२; ११-४, १२
यदृच्छया २-३२
यदृच्छालाभसन्तुष्टः ४-२२
यद्वत् २-७०
यद्विकारि १३-३
यन्त्रारूढानि १८-६१
यमः १०-२९; ११-३९
यया २-३९; ७-५; १८-३१, ३३, ३४, ३५
यशः १०-५; ११-३३
यष्टव्यम् १७-११
यस्मात् १२-१५; १५-१८
यस्मिन् ६-२२; १५-४
यस्य २-६१, ६८; ४-१९; ८-२२; १५-१; १८-१७(२)
यस्याम् २-६९
यम् २-१५, ७०; ६-२, २२; ८-६(२), २१
यः २-१९(२), २१, ५७, ७१; ३-६, ७, १२, १६, १७, ४२; ४-९, १४, १८(२); ५-३, ५, १०, २३, २४(२), २८; ६-१, ३०, ३१, ३२, ३३, ४७; ७-२१(२); ८-५, ९, १३, १४, २०; ९-२६; १०-३, ७; ११-५५; १२-१४, १५(२), १६, १७(२); १३-१, ३, २३, २७, २९; १४-२३(२), २६; १५-१, १७, १९; १६-२३; १७-३, ११; १८-११, १६, ५५, ६७, ६८, ७०, ७१
या २-६९; १८-३०, ३२, ५०
यातयामम् १७-१०
याति ६-४५; ८-५, ८, १३, २६; १३-२८; १४-१४; १६-२२
यादव ११-४१
यादसाम् १०-२९
यादृक् १३-३
यान् २-६
यान्ति ३-३३; ४-३१; ७-२३(२), २७; ८-२३; ९-७, २५(४), ३२; १३-३४; १६-२०
याभिः १०-१६
यावत् १-२२; १३-२६
यावान् २-४६; १८-५५
यास्यसि २-३५; ४-३५
याम् २-४२; ७-२१(२)
याः १४-४
युक्तचेतसः ७-३०
युक्तचेष्टस्य ६-१७
युक्ततमः ६-४७
युक्ततमाः १२-२
युक्तस्वप्नावबोधस्य ६-१७
युक्तः २-३९, ६१; ३-२६; ४-१८; ५-८, १२, २३; ६-८, १४, १८; ७-२२; ८-१०; १८-५१
युक्तात्मा ७-१८
युक्ताहारविहारस्य ६-१७
युक्ते १-१४
युक्तैः १७-१७
युक्त्वा ९-३४
युगपत् ११-१२
युगसहस्राणाम् ८-१७
युगे ४-८(२)
युज्यते १०-७; १७-२६
युज्यस्व २-३८, ५०
युञ्जतः ६-१९
युञ्जन् ६-१५, २८; ७-१
युञ्जीत ६-१०
युञ्ज्यात् ६-१२
युद्धविशारदाः १-९
युद्धम् २-३२
युद्धात् २-३१
युद्धाय २-३७, ३८
युद्धे १-२३, ३३; १८-४३
युधामन्युः १-६
युधि १-४
युधिष्ठिरः १-१६
युध्य ८-७
युध्यस्व २-१८; ३-३०; ११-३४
युयुधानः १-४
युयुत्सवः १-१
युयुत्सुम् १-२८
ये १-७, २३; ३-१३, ३१, ३२; ४-११;

पदानि अ०-श्लो०

५-२२; ७-१२(२), १४, २९, ३०; ९-२२, २३, २९, ३२; ११-२२, ३२; १२-१(२), २, ३, ६, २०; १३-३४; १७-१, ५
येन २-१७; ३-२; ४-३५; ६-६; ८-२२; १०-१०; १२-१९; १८-२०, ४६
येषाम् १-३३; २-३५; ५-१६, १९; ७-२८; १०-६
योक्तव्यः ६-२३
योगक्षेमम् ९-२२
योगधारणाम् ८-१२
योगबलेन ८-१०
योगभ्रष्टः ६-४१
योगमायासमावृतः ७-२५
योगयज्ञाः ४-२८
योगयुक्तः ५-६, ७; ८-२७
योगयुक्तात्मा ६-२९
योगवित्तमाः ११-१
योगसंज्ञितम् ६-२३
योगसंन्यस्तकर्माणम् ४-४१
योगसंसिद्धः ४-३८
योगसंसिद्धिम् ६-३७
योगसेवया ६-२०
योगस्थः २-४८
योगस्य ६-४४
योगम् २-५३; ४-१, ४२; ५-१, ५; ६-२, ३, १२, १९; ७-१; ९-५; १०-७, १८; ११-८; १८-७५
योगः २-४८, ५०; ४-२, ३; ६-१६, १७, २३, ३३, ३६
योगात् ६-३७
योगाय २-५०
योगारूढस्य ६-३
योगारूढः ६-४
योगिनम् ६-२७
योगिनः ४-२५; ५-११; ६-१९; ८-१४, २३; १५-११
योगिनाम् ३-३; ६-४२, ४७
योगिन् १०-१७
योगी ५-२४; ६-१, २, ८, १०, १५, २८, ३१, ३२, ४५, ४६(३); ८-२५, २७,२८; १२-१४
योगे २-३९
योगेन १०-७; १२-६; १३-२४; १८-३३
योगेश्वर ११-४
योगेश्वरः १८-७८
योगैः ५-५
योत्स्यमानान् १-२३
योत्स्ये २-९; १८-५९
योद्धव्यम् १-२२
योद्धुकामान् १-२२
योधमुख्यैः ११-२६
योधवीरान् ११-३४
योधाः ११-३२
योनिषु १६-१९
योनिम् १६-२०
योनिः १४-३
यौवनम् २-१३

र

रक्षांसि ११-३६
रजसः १४-१६, १७
रजसि १४-१२, १५
रजः १४-५, ७, ९, १०(३); १७-१
रजोगुणसमुद्भवः ३-३७
रणसमुद्यमे १-२२
रणात् २-३५
रणे १-४६; ११-३४
रताः ५-२५; १२-४
रथम् १-२१
रथोत्तमम् १-२४
रथोपस्थे १-४७
रमते ५-२२; १८-३६
रमन्ति १०-९
रविः १०-२१; १३-३३
रसनम् १५-९
रसवर्जम् २-५९
रसः २-५९; ७-८
रसात्मकः १५-१३
रस्याः १७-८
रहसि ६-१०
रहस्यम् ४-३
राक्षसीम् ९-१२
रागद्वेषवियुक्तैः २-६४
रागद्वेषौ ३-३४; १८-५१
रागात्मकम् १४-७
रागी १८-२७
राजगुह्यम् ९-२
राजन् ११-९; १८-७६, ७७
राजर्षयः ४-२; ९-३३
राजविद्या ९-२
राजसस्य १७-९
राजसम् १७-१२, १८, २१; १८-८, २१, २४, ३८
राजसः १८-२७
राजसाः ७-१२; १४-१८; १७-४
राजसी १७-२; १८-३१, ३४
राजा १-२, १६
राज्यसुखलोभेन १-४५
राज्यम् १-३२, ३३; २-८; ११-३३
राज्येन १-३२
रात्रिम् ८-१७
रात्रिः ८-२५
रात्र्यागमे ८-१८, १९
राधनम् ७-२२
रामः १०-३१
रिपुः ६-५
रुद्राणाम् १०-२३
रुद्रादित्याः ११-२२
रुद्रान् ११-६
रुद्ध्वा ४-२९
रुधिरप्रदिग्धान् २-५
रूपस्य ११-५२
रूपम् ११-३, ९, २०, २३, ४५, ४७, ४९(२), ५०, ५१, ५२; १५-३; १८-७७
रूपाणि ११-५
रूपेण ११-४६
रोमहर्षणम् १८-७४
रोमहर्षः १-२९

ल

लघ्वाशी १८-५२
लब्धम् १६-१३
लब्ध्वा ४-३९; ६-२२
लब्धा १८-७३
लभते ४-३९; ६-४३; ७-२२; १८-४५, ५४
लभन्ते २-३२; ५-२५; ९-२१
लभस्व ११-३३
लभे ११-२५
लभेत् १८-८
लभ्यः ८-२२
लाघवम् २-३५
लाभम् ६-२२
लाभालाभौ २-३८

| पदानि | अ०-श्लो० |
|---|---|
| लिङ्गैः | १४-२१ |
| लिप्यते | ५-७, १०; १३-३१; १८-१७ |
| लिम्पन्ति | ४-२४ |
| लुप्तपिण्डोदकक्रियाः | १-४२ |
| लुब्धः | १८-२७ |
| लेलिह्यसे | ११-३० |
| लोकक्षयकृत् | ११-३२ |
| लोकत्रयम् | ११-२०; १५-१७ |
| लोकत्रये | ११-४३ |
| लोकमहेश्वरम् | १०-३ |
| लोकसङ्ग्रहम् | ३-२०, २५ |
| लोकस्य | ५-१४; ११-४३ |
| लोकम् | ९-३३; १३-३३ |
| लोकः | ३-९, २१; ४-३१, ४०; ७-२५; १०-६; १२-१५ |
| लोकात् | १२-१५ |
| लोकान् | ६-४१; १०-१६; ११-३०, ३२; १४-१४; १८-१७, ७१ |
| लोकाः | ३-२४; ८-१६; ११-२३, २९ |
| लोके | २-५; ३-३; ४-१२; ६-४२; १३-१३; १५-१६, १८; १६-६ |
| लोकेषु | ३-२२ |
| लोभः | १४-१२, १७; १६-२१ |
| लोभोपहतचेतसः | १-३८ |
| **व** | |
| वक्तुम् | १०-१६ |
| वक्त्राणि | ११-२७, २८, २९ |
| वक्ष्यामि | ७-२; ८-२३; १०-१; १८-६४ |
| वचनम् | १-२; ११-३५; १८-७३ |
| वचः | २-१०; १०-१; ११-१; १८-६४ |
| वज्रम् | १०-२८ |
| वद | ३-२ |
| वदति | २-२९ |
| वदनैः | ११-३० |
| वदन्ति | ८-११ |
| वदसि | १०-१४ |
| वदिष्यन्ति | २-३६ |
| वयम् | १-३७, ४५; २-१२ |
| वर | ८-४ |
| वरुणः | १०-२९; ११-३९ |
| वर्णसङ्करकारकैः | १-४३ |
| वर्णसङ्करः | १-४१ |
| वर्तते | ५-२६; ६-३१; १६-२३ |
| वर्तन्ते | ३-२८; ५-९; १४-२३ |
| वर्तमानः | ६-३१; १३-२३ |
| वर्तमानानि | ७-२६ |
| वर्ते | ३-२२ |
| वर्तेत | ६-६ |
| वर्तेयम् | ३-२३ |
| वर्त्म | ३-२३; ४-११ |
| वर्षम् | ९-१९ |
| वशम् | ३-३४; ६-२६ |
| वशात् | ९-८ |
| वशी | ५-१३ |
| वशे | २-६१ |
| वश्यात्मना | ६-३६ |
| वसवः | ११-२२ |
| वसूनाम् | १०-२३ |
| वसून् | ११-६ |
| वहामि | ९-२२ |
| वह्निः | ३-३८ |
| वः | ३-१०, ११, १२ |
| वा | १-३२; २-६(२), २०(२), २६, ३७(२); ६-३२(२); ८-६; १०-४१; ११-४१; १५-१०(२); १७-१९, २१; १८-१५(२), २४, ४०(२) |
| वाक् | १०-३४ |
| वाक्यम् | १-२१; २-१; १७-१५ |
| वाक्येन | ३-२ |
| वाङ्मयम् | १७-१५ |
| वाचम् | २-४२ |
| वाच्यम् | १८-६७ |
| वादः | १०-३२ |
| वादिनः | २-४२ |
| वायुः | २-६७; ७-४; ९-६; ११-३९; १५-८ |
| वायोः | ६-३४ |
| वार्ष्णेय | १-४१; ३-३६ |
| वासवः | १०-२२ |
| वासः | १-४४ |
| वासांसि | २-२२ |
| वासुकिः | १०-२८ |
| वासुदेवस्य | १८-७४ |
| वासुदेवः | ७-१९, ३७; ११-५० |
| विकम्पितुम् | २-३१ |
| विकर्णः | १-८ |
| विकर्मणः | ४-१७ |
| विकारान् | १३-१९ |
| विक्रान्तः | १-६ |
| विगतकल्मषः | ६-२८ |
| विगतज्वरः | ३-३० |
| विगतभीः | ६-१४ |
| विगतस्पृहः | २-५६; १८-४९ |
| विगतः | ११-१ |
| विगतेच्छाभयक्रोधः | ५-२८ |
| विगुणः | ३-३५; १८-४७ |
| विचक्षणाः | १८-२ |
| विचालयेत् | ३-२९ |
| विचाल्यते | ६-२२; १४-२३ |
| विचेतसः | ९-१२ |
| विजयम् | १-३२ |
| विजयः | १८-७८ |
| विजानतः | २-४६ |
| विजानीतः | २-१९ |
| विजानीयाम् | ४-४ |
| विजितात्मा | ५-७ |
| विजितेन्द्रियः | ६-८ |
| विज्ञातुम् | ११-३१ |
| विज्ञानसहितम् | ९-१ |
| विज्ञानम् | १८-४२ |
| विज्ञाय | १३-१८ |
| वितता | ४-३२ |
| वित्तेशः | १०-२३ |
| विदधामि | ७-२१ |
| विदितात्मनाम् | ५-२६ |
| विदित्वा | २-२५; ८-२८ |
| विदुः | ४-२; ७-२९, ३०(२); ८-१७; १०-२, १४; १३-३४; १६-७; १८-२ |
| विद्धि | २-१७; ३-१५, ३२, ३७; ४-१३, ३२, ३४; ६-२; ७-५, १०, १२; १०-२४, २७; १३-२, १९(२), २६; १४-७, ८; १५-१२; १७-६, १२; १८-२०, २१ |
| विद्मः | २-६ |
| विद्यते | २-१६(२), ३१, ४०; ३-१७; ४-३८; ६-४०; ८-१६; १६-७ |
| विद्यात् | ६-२३; १४-११ |
| विद्यानाम् | १०-३२ |
| विद्याम् | १०-१७ |
| विद्याविनयसम्पन्ने | ५-१८ |
| विद्वान् | ३-२५, २६ |
| विधानोक्ताः | १७-२४ |
| विधिदृष्टः | १७-११ |

| पदानि | अ०-श्लो० |
|---|---|
| विधिहीनम् | १७-१३ |
| विधीयते | २-४४ |
| विधेयात्मा | २-६४ |
| विनङ्क्ष्यसि | १८-५८ |
| विनद्य | १-१२ |
| विनश्यति | ४-४०; ८-२० |
| विनश्यत्सु | १३-२७ |
| विना | १०-३९ |
| विनाशम् | २-२७ |
| विनाशः | ६-४० |
| विनाशाय | ४-८ |
| विनियतम् | ६-१८ |
| विनियम्य | ६-२४ |
| विनिवर्तन्ते | २-५१ |
| विनिवृत्तकामाः | १५-५ |
| विनिश्चितैः | १३-४ |
| विन्दति | ४-३८; ५-२१; १८-४५, ४६ |
| विन्दते | ५-४ |
| विन्दामि | ११-२४ |
| विपरिवर्तते | ९-१० |
| विपरीतम् | १८-१५ |
| विपरीतानि | १-३१ |
| विपरीतान् | १८-३२ |
| विपश्चितः | २-६० |
| विभक्तम् | १३-१६ |
| विभक्तेषु | १८-२० |
| विभावसौ | ७-९ |
| विभुम् | १०-१२ |
| विभुः | ५-१५ |
| विभूतिभिः | १०-१६ |
| विभूतिमत् | १०-४१ |
| विभूतिम् | १०-७, १८ |
| विभूतीनाम् | १०-४० |
| विभूतेः | १०-४० |
| विमत्सरः | ४-२२ |
| विमुक्तः | ९-२८; १४-२०; १६-२२ |
| विमुक्ताः | १५-५ |
| विमुच्य | १८-५३ |
| विमुञ्चति | १८-३५ |
| विमुह्यति | २-७२ |
| विमूढः | ६-३८ |
| विमूढभावः | ११-४९ |
| विमूढाः | १५-१० |
| विमूढात्मा | ३-६ |
| विमृश्य | १८-६३ |
| विमोक्षाय | १६-५ |
| विमोक्ष्यसे | ४-३२ |
| विमोहयति | ३-४० |
| विराटः | १-४, १७ |
| विलग्नाः | ११-२७ |
| विवस्वतः | ४-४ |
| विवस्वते | ४-१ |
| विवस्वान् | ४-१ |
| विविक्तदेशसेवित्वम् | १३-१० |
| विविक्तसेवी | १८-५२ |
| विविधाः | १७-२५; १८-१४ |
| विविधैः | १३-४ |
| विवृद्धम् | १४-११ |
| विवृद्धे | १४-१२, १३ |
| विशते | १८-५५ |
| विशन्ति | ८-११; ९-२१; ११-२१, २७, २८, २९(२) |
| विशालम् | ९-२१ |
| विशिष्टाः | १-७ |
| विशिष्यते | ३-७; ५-२; ६-९; ७-१७; १२-१२ |
| विशुद्धया | १८-५१ |
| विशुद्धात्मा | ५-७ |
| विश्वतोमुखम् | ९-१५; ११-११ |
| विश्वतोमुखः | १०-३३ |
| विश्वमूर्ते | ११-४६ |
| विश्वरूप | ११-१६ |
| विश्वस्य | ११-१८, ३८ |
| विश्वम् | ११-१९, ३८, ४७ |
| विश्वे | ११-२२ |
| विश्वेश्वर | ११-१६ |
| विषमे | २-२ |
| विषयप्रवालाः | १५-२ |
| विषयान् | २-६२, ६४; ४-२६; १५-९; १८-५१ |
| विषयाः | २-५९ |
| विषयेन्द्रियसंयोगात् | १८-३८ |
| विषम् | १८-३७, ३८ |
| विषादम् | १८-३५ |
| विषादी | १८-२८ |
| विषीदन् | १-२८ |
| विषीदन्तम् | २-१, १० |
| विष्टभ्य | १०-४२ |
| विष्ठितम् | १३-१७ |
| विष्णुः | १०-२१ |
| विष्णो | ११-२४, ३० |
| विसर्गः | ८-३ |
| विसृजन् | ५-९ |
| विसृजामि | ९-७, ८ |
| विसृज्य | १-४७ |
| विस्तरशः | ११-२; १६-६ |
| विस्तरस्य | १०-१९ |
| विस्तरः | १०-४० |
| विस्तरेण | १०-१८ |
| विस्तारम् | १३-३० |
| विस्मयः | १८-७७ |
| विस्मयाविष्टः | ११-१४ |
| विस्मिताः | ११-२२ |
| विहाय | २-२२(२), ७१ |
| विहारशय्यासनभोजनेषु | ११-४२ |
| विहितान् | ७-२२ |
| विहिताः | १७-२३ |
| वीक्षन्ते | ११-२२ |
| वीतरागभयक्रोधः | २-५६ |
| वीतरागभयक्रोधाः | ४-१० |
| वीतरागाः | ८-११ |
| वीर्यवान् | १-५, ६ |
| वृकोदरः | १-१५ |
| वृजिनम् | ४-३६ |
| वृष्णीनाम् | १०-३७ |
| वेगम् | ५-२३ |
| वेत्ता | ११-३८ |
| वेत्ति | २-१९; ४-९; ६-२१; ७-३; १०-३, ७; १३-१, २३; १४-१९; १८-२१, ३० |
| वेत्थ | ४-५; १०-१५ |
| वेद | २-२१, २९; ४-५; ७-२६(२); १५-१ |
| वेदयज्ञाध्ययनैः | ११-४८ |
| वेदवादरताः | २-४२ |
| वेदवित् | १५-१, १५ |
| वेदविदः | ८-११ |
| वेदानाम् | १०-२२ |
| वेदान्तकृत् | १५-१५ |
| वेदाः | २-४५; १७-२३ |
| वेदितव्यम् | ११-१८ |
| वेदितुम् | १८-१ |

| पदानि | अ०-श्लो० |
|---|---|
| वेदेषु | २-४६; ८-२८ |
| वेदे | १५-१८ |
| वेदैः | ११-५३; १५-१ |
| वेद्यम् | ९-१७; ११-३८ |
| वेद्यः | १५-१५ |
| वेपथुः | १-२९ |
| वेपमानः | ११-३५ |
| वैनतेयः | १०-३० |
| वैराग्यम् | १३-८; १८-५२ |
| वैराग्येण | ६-३५ |
| वैरिणम् | ३-३७ |
| वैश्यकर्म | १८-४४ |
| वैश्याः | ९-३२ |
| वैश्वानरः | १५-१४ |
| व्यक्तमध्यानि | २-२८ |
| व्यक्तयः | ८-१८ |
| व्यक्तिम् | ७-२४; १०-१४ |
| व्यतितरिष्यति | २-५२ |
| व्यतीतानि | ४-५ |
| व्यथन्ति | १४-२ |
| व्यथयन्ति | २-१५ |
| व्यथा | ११-४९ |
| व्यथिताः | ११-३४ |
| व्यदारयत् | १-१९ |
| व्यनुनादयन् | १-१९ |
| व्यपाश्रित्य | ९-३२ |
| व्यपेतभीः | ११-४९ |
| व्यवसायः | १०-३६; १८-५९ |
| व्यवसायात्मिका | २-४१, ४४ |
| व्यवसितः | ९-३० |
| व्यवसिताः | १-४५ |
| व्यवस्थितान् | १-२० |
| व्यवस्थितौ | ३-३४ |
| व्यात्ताननम् | ११-२४ |
| व्याप्तम् | ११-२० |
| व्यामिश्रेण | ३-२ |
| व्याप्य | १०-१६ |
| व्यासप्रसादात् | १८-७५ |
| व्यासः | १०-१३, ३७ |
| व्याहरन् | ८-१३ |
| व्युदस्य | १८-५१ |
| व्यूढम् | १-२ |
| व्यूढाम् | १-३ |
| व्रज | १८-६६ |
| व्रजेत | २-५४ |
| **श** | |
| शक्नोति | ५-२३ |
| शक्नोमि | १-३० |
| शक्नोषि | १२-९ |
| शक्यसे | ११-८ |
| शक्यम् | ११-४; १८-११ |
| शक्यः | ६-३६; ११-४८, ५३, ५४ |
| शङ्खम् | १-१२ |
| शङ्खाः | १-१३ |
| शङ्खान् | १-१८ |
| शङ्खौ | १-१४ |
| शठः | १८-२८ |
| शतशः | ११-५ |
| शत्रुत्वे | ६-६ |
| शत्रुवत् | ६-६ |
| शत्रुम् | ३-४३ |
| शत्रुः | १६-१४ |
| शत्रून् | ११-३३ |
| शत्रौ | १२-१८ |
| शनैः | ६-२५(२) |
| शब्दब्रह्म | ६-४४ |
| शब्दः | १-१३; ७-८ |
| शब्दादीन् | ४-२६; १८-५१ |
| शमम् | ११-२४ |
| शमः | ६-३; १०-४; १८-४२ |
| शरणम् | २-४९; ९-१८; १८-६२, ६६ |
| शरीरयात्रा | ३-८ |
| शरीरवाङ्मनोभिः | १८-१५ |
| शरीरविमोक्षणात् | ५-२३ |
| शरीरस्थम् | १७-६ |
| शरीरस्थः | १३-३१ |
| शरीरम् | १३-१; १५-८ |
| शरीराणि | २-२२ |
| शरीरिणः | २-१८ |
| शरीरे | १-२९; २-२०; ११-१३ |
| शर्म | ११-२५ |
| शशाङ्कः | ११-३९; १५-६ |
| शशिसूर्यनेत्रम् | ११-१९ |
| शशिसूर्ययोः | ७-८ |
| शशी | १०-२१ |
| शश्वत् | ९-३१ |
| शस्त्रपाणयः | १-४६ |
| शस्त्रभृताम् | १०-३१ |
| शस्त्रसम्पाते | १-२० |
| शस्त्राणि | २-२३ |
| शङ्करः | १०-२३ |
| शंससि | ५-१ |
| शाखाः | १५-२ |
| शाधि | २-७ |
| शान्तरजसम् | ६-२७ |
| शान्तः | १८-५३ |
| शान्तिम् | २-७०, ७१; ४-३९; ५-१२, २९; ६-१५; ९-३१; १८-६२ |
| शान्तिः | २-६६; १२-१२; १६-२ |
| शारीरम् | ४-२१; १७-१४ |
| शाश्वतधर्मगोप्ता | ११-१८ |
| शाश्वतस्य | १४-१७ |
| शाश्वतम् | १०-१२; १८-५६, ६२ |
| शाश्वतः | २-२० |
| शाश्वताः | १-४३ |
| शाश्वतीः | ६-४१ |
| शाश्वते | ८-२६ |
| शास्त्रविधानोक्तम् | १६-२४ |
| शास्त्रविधिम् | १६-२३; १७-१ |
| शास्त्रम् | १५-२०; १६-२४ |
| शिखण्डी | १-१७ |
| शिखरिणाम् | १०-२३ |
| शिरसा | ११-१४ |
| शिष्यः | २-७ |
| शिष्येण | १-३ |
| शीतोष्णसुखदुःखदाः | २-१४ |
| शीतोष्णसुखदुःखेषु | ६-७; १२-१८ |
| शुक्लकृष्णे | ८-२६ |
| शुक्लः | ८-२४ |
| शुचः | १६-५; १८-६६ |
| शुचिः | १२-१६ |
| शुचीनाम् | ६-४१ |
| शुचौ | ६-११ |
| शुनि | ५-१८ |
| शुभान् | १८-७१ |
| शुभाशुभपरित्यागी | १२-१७ |
| शुभाशुभफलैः | ९-२८ |
| शुभाशुभम् | २-५७ |
| शूद्रस्य | १८-४४ |
| शूद्राणाम् | १८-४१ |
| शूद्राः | ९-३२ |
| शूराः | १-४, ९ |

| पदानि | अ०-श्लो० |
|---|---|
| शृणु | २-३९; ७-१; १०-१; १३-३; १६-६; १७-२, ७; १८-४, १९, २९, ३६, ४५, ६४ |
| शृणुयात् | १८-७१ |
| शृणोति | २-२९ |
| शृण्वतः | १०-१८ |
| शृण्वन् | ५-८ |
| शैब्यः | १-५ |
| शोकसंविग्नमानसः | १-४७ |
| शोकम् | २-८; १८-३५ |
| शोचति | १२-१७; १८-५४ |
| शोचितुम् | २-२६, २७, ३० |
| शोषयति | २-२३ |
| शौचम् | १३-७; १६-३, ७; १७-१४; १८-४२ |
| शौर्यम् | १८-४३ |
| श्यालाः | १-३४ |
| श्रद्दधानाः | १२-२० |
| श्रद्धया | ६-३७; ७-२१, २२; ९-२३; १२-२; १७-१, १७ |
| श्रद्धा | १७-२, ३ |
| श्रद्धामयः | १७-३ |
| श्रद्धावन्तः | ३-३१ |
| श्रद्धावान् | ४-३९; ६-४७; १८-७१ |
| श्रद्धाविरहितम् | १७-१३ |
| श्रद्धाम् | ७-२१ |
| श्रिताः | ९-१२ |
| श्रीभगवान् | २-२, ११, ५५; ३-३, ३७; ४-१, ५; ५-२; ६-१, ३५, ४०; ७-१; ८-३; ९-१; १०-१, १९; ११-५, ३२, ४७, ५२; १२-२; १३-१; १४-१, २२; १५-१; १६-१; १७-२; १८-२ |
| श्रीमताम् | ६-४१ |

| पदानि | अ०-श्लो० |
|---|---|
| श्रीमत् | १०-४१ |
| श्रीः | १०-३४; १८-७८ |
| श्रुतवान् | १८-७५ |
| श्रुतस्य | २-५२ |
| श्रुतम् | १८-७२ |
| श्रुतिपरायणाः | १३-२५ |
| श्रुतिविप्रतिपन्ना | २-५३ |
| श्रुतौ | ११-२ |
| श्रुत्वा | २-२९; ११-३५; १३-२५ |
| श्रेयः | १-३१; २-५, ७, ३१; ३-२, ११, ३५; ५-१; १२-१२; १६-२२ |
| श्रेयान् | ३-३५; ४-३३; १८-४७ |
| श्रेष्ठः | ३-२१ |
| श्रोतव्यस्य | २-५२ |
| श्रोत्रम् | १५-९ |
| श्रोत्रादीनि | ४-२६ |
| श्रोष्यसि | १८-५८ |
| श्वपाके | ५-१८ |
| श्वशुरान् | १-२७ |
| श्वशुराः | १-३४ |
| श्वसन् | ५-९ |
| श्वेतैः | १-१४ |
| **ष** | |
| षण्मासाः | ८-२४, २५ |
| **स** | |
| सक्तम् | १८-२२ |
| सक्तः | ५-१२ |
| सक्ताः | ३-२५ |
| सखा | ४-३; ११-४१, ४४ |
| सखीन् | १-२६ |
| सखे | ११-४१ |
| सख्युः | ११-४४ |
| सगद्गदम् | ११-३५ |

| पदानि | अ०-श्लो० |
|---|---|
| सङ्गरहितम् | १८-२३ |
| सङ्गवर्जितः | ११-५५ |
| सङ्गविवर्जितः | १२-१८ |
| सङ्गम् | २-४८; ५-१०, ११; १८-६, ९ |
| सङ्गः | २-४७, ६२ |
| सङ्गात् | २-६२ |
| सङ्ग्रामम् | २-३३ |
| सचराचरम् | ९-१०; ११-७ |
| सचेताः | ११-५१ |
| सच्छब्दः | १७-२६ |
| सज्जते | ३-२८ |
| सज्जन्ते | ३-२९ |
| सततयुक्तानाम् | १०-१० |
| सततयुक्ताः | १२-१ |
| सततम् | ३-१९; ६-१०; ८-१४; ९-१४; १२-१४; १७-२४; १८-५७ |
| सतः | २-१६ |
| सति | १८-१६ |
| सत् | ९-१९; ११-३७; १३-१२; १७-२३, २६, २७(२) |
| सत्कारमानपूजार्थम् | १७-१८ |
| सत्यम् | १०-४; १६-२, ७; १७-१५; १८-६५ |
| सत्त्ववताम् | १०-३६ |
| सत्त्वसमाविष्टः | १८-१० |
| सत्त्वसंशुद्धिः | १६-१ |
| सत्त्वस्थाः | १४-१८ |
| सत्त्वम् | १०-३६, ४१; १३-२६; १४-५, ६, ९, १०(३), ११; १७-१; १८-४० |
| सत्त्वात् | १४-१७ |
| सत्त्वानुरूपा | १७-३ |
| सत्त्वे | १४-१४ |
| सदसद्योनिजन्मसु | १३-२१ |

| पदानि | अ०-श्लो० |
|---|---|
| सदा | ५-२८; ६-१५, २८; ८-६; १०-१७; १८-५६ |
| सदृशम् | ३-३३; ४-३८ |
| सदृशाः | १६-१५ |
| सदृशी | ११-१२ |
| सदोषम् | १८-४८ |
| सद्भावे | १७-२६ |
| सनातनम् | ४-३१; ७-१० |
| सनातनः | २-२४; ८-२०; ११-१८; १५-७ |
| सनातनाः | १-४० |
| सन् | ४-६(२) |
| सन्तः | ३-१३ |
| सपत्नान् | ११-३४ |
| सप्त | १०-६ |
| समक्षम् | ११-४२ |
| समग्रम् | ४-२३; ७-१; ११-३० |
| समग्रान् | ११-३० |
| समचित्तत्वम् | १३-९ |
| समता | १०-५ |
| समतीतानि | ७-२६ |
| समतीत्य | १४-२६ |
| समत्वम् | २-४८ |
| (समदर्शनः | ६-२९) |
| समदर्शिनः | ५-१८ |
| समदुःखसुखम् | २-१५ |
| समदुःखसुखः | १२-१३; १४-२४ |
| समधिगच्छति | ३-४ |
| समबुद्धयः | १२-४ |
| समबुद्धिः | ६-९ |
| समलोष्टाश्मकाञ्चनः | ६-८; १४-२४ |
| समवस्थितम् | १३-२८ |
| समवेताः | १-१ |

| पदानि | अ०-श्लो० |
|---|---|
| समवेतान् | १-२५ |
| समम् | ५-१९; ६-१३, ३२; १३-२७, २८ |
| समन्ततः | ६-२४ |
| समन्तात् | ११-१७, ३० |
| समः | २-४८; ४-२२; ९-२९; १२-१८(२); १८-५४ |
| समागताः | १-२३ |
| समाचर | ३-९, १९ |
| समाचरन् | ३-२६ |
| समाधातुम् | १२-९ |
| समाधाय | १७-११ |
| समाधिस्थस्य | २-५४ |
| समाधौ | २-४४, ५३ |
| समाप्नोषि | ११-४० |
| समारम्भाः | ४-१९ |
| समासतः | १३-१८ |
| समासेन | १३-३, ६; १८-५० |
| समाहर्तुम् | ११-३२ |
| समाहितः | ६-७ |
| समाः | ६-४१ |
| समितिञ्जयः | १-८ |
| समिद्धः | ४-३७ |
| समीक्ष्य | १-२७ |
| समुद्रम् | २-७०; ११-२८ |
| समुद्धर्ता | १२-७ |
| समुपस्थितम् | १-२८; २-२ |
| समुपाश्रितः | १८-५२ |
| समृद्धवेगाः | ११-२९(२) |
| समृद्धम् | ११-३३ |
| समे | २-३८ |
| समौ | ५-२७ |
| सम्यक् | ५-४; ८-१०; ९-३० |
| सरसाम् | १०-२४ |
| सर्गः | ५-१९ |
| सर्गाणाम् | १०-३२ |
| सर्गे | ७-२७; १४-२ |
| सर्पाणाम् | १०-२८ |
| सर्व | ११-४० |
| सर्वकर्मणाम् | १८-१३ |
| सर्वकर्मफलत्यागम् | १२-११; १८-२ |
| सर्वकर्माणि | ३-२६; ४-३७; ५-१३; १८-५६, ५७ |
| सर्वकामेभ्यः | ६-१८ |
| सर्वकिल्बिषैः | ३-१३ |
| सर्वक्षेत्रेषु | १३-२ |
| सर्वगतम् | ३-१५; १३-३२ |
| सर्वगतः | २-२४ |
| सर्वगुह्यतमम् | १८-६४ |
| सर्वज्ञानविमूढान् | ३-३२ |
| सर्वतः | २-४६; ११-१६, ४० |
| सर्वतःपाणिपादम् | १३-१३ |
| सर्वतःश्रुतिमत् | १३-१३ |
| सर्वतोऽक्षिशिरोमुखम् | १३-१३ |
| सर्वतोदीप्तिमन्तम् | ११-१७ |
| सर्वत्र | २-५७; ६-३०, ३२; १२-४; १३-२८, ३२; १८-४९ |
| सर्वत्रगम् | १२-३ |
| सर्वत्रगः | ९-६ |
| सर्वत्रसमदर्शनः | ६-२९ |
| सर्वथा | ६-३१; १३-२३ |
| सर्वदुर्गाणि | १८-५८ |
| सर्वदुःखानाम् | २-६५ |
| सर्वदेहिनाम् | १४-८ |
| सर्वद्वाराणि | ८-१२ |
| सर्वद्वारेषु | १४-११ |
| सर्वधर्मान् | १८-६६ |
| सर्वपापेभ्यः | १८-६६ |
| सर्वपापैः | १०-३ |
| सर्वभावेन | १५-१९; १८-६२ |
| सर्वभूतस्थम् | ६-२९ |
| सर्वभूतस्थितम् | ६-३१ |
| सर्वभूतहिते | ५-२५; १२-४ |
| सर्वभूतात्मभूतात्मा | ५-७ |
| सर्वभूतानाम् | २-६९; ५-२९; ७-१०; १०-३९; १२-१३; १४-३; १८-६१ |
| सर्वभूतानि | ६-२९; ७-२७; ९-४, ७; १८-६१ |
| सर्वभूताशयस्थितः | १०-२० |
| सर्वभूतेषु | ३-१८; ७-९; ९-२९; ११-५५; १८-२० |
| सर्वभृत् | १३-१४ |
| सर्वयज्ञानाम् | ९-२४ |
| सर्वयोनिषु | १४-४ |
| सर्वलोकमहेश्वरम् | ५-२९ |
| सर्ववित् | १५-१९ |
| सर्ववृक्षाणाम् | १०-२६ |
| सर्ववेदेषु | ७-८ |
| सर्वशः | १-१८; २-५८, ६८; ३-२३, २७; ४-११; १०-२; १३-२९ |
| सर्वसङ्कल्पसंन्यासी | ६-४ |
| सर्वस्य | २-३०; ७-२५; ८-९; १०-८; १३-१७; १५-१५; १७-३, ७ |
| सर्वहरः | १०-३४ |
| सर्वम् | २-१७; ४-३३, ३६; ६-३०; ७-७, १३, १९; ८-२२, २८; ९-४; १०-८, १४; ११-४०; १३-१३; १८-४६ |
| सर्वः | ३-५; ११-४० |
| सर्वाणि | २-३०, ६१; ३-३०; ४-५, २७; ७-६; ९-६; १२-६; १५-१६ |
| सर्वान् | १-२७; २-५५, ७१; ४-३२; ६-२४; ११-१५(२) |
| सर्वारम्भपरित्यागी | १२-१६; १४-२५ |
| सर्वारम्भाः | १८-४८ |
| सर्वार्थान् | १८-३२ |
| सर्वाश्चर्यमयम् | ११-११ |
| सर्वाः | ८-१८; ११-२०; १५-१३ |
| सर्वे | १-६, ९, ११; २-१२, ७०; ४-१९, ३०; ७-१८; १०-१३; ११-२२, २६, ३२, ३६; १४-१ |
| सर्वेन्द्रियगुणाभासम् | १३-१४ |
| सर्वेन्द्रियविवर्जितम् | १३-१४ |
| सर्वेभ्यः | ४-३६ |
| सर्वेषाम् | १-२५; ६-४७ |
| सर्वेषु | १-११; २-४६; ८-७, २०, २७; १३-२७; १८-२१, ५४ |
| सर्वैः | १५-१५ |
| सविकारम् | १३-६ |
| सविज्ञानम् | ७-२ |
| सव्यसाचिन् | ११-३३ |
| सशरम् | १-४७ |
| सह | १-२२; ११-२६(२); १३-२३ |
| सहजम् | १८-४८ |
| सहदेवः | १-१६ |
| सहयज्ञाः | ३-१० |
| सहसा | १-१३ |
| सहस्रकृत्वः | ११-३९ |
| सहस्रबाहो | ११-४६ |
| सहस्रयुगपर्यन्तम् | ८-१७ |
| सहस्रशः | ११-५ |
| सहस्रेषु | ७-३ |
| सङ्करस्य | ३-२४ |
| सङ्करः | १-४२ |

| पदानि | अ०-श्लो० |
|---|---|
| सङ्कल्पप्रभवान् | ६-२४ |
| सङ्गे | १-४७; २-४ |
| सङ्ग्रहेण | ८-११ |
| सङ्घातः | १३-६ |
| सञ्जय | १-१ |
| सञ्जयः | १-२, २४, ४७; २-१, ९; ११-९, ३५, ५०; १८-७४ |
| सञ्जनयन् | १-१२ |
| सञ्जयति | १४-९(२) |
| सञ्जायते | २-६२; १३-२६; १४-१७ |
| सञ्ज्ञार्थम् | १-७ |
| सन्तरिष्यसि | ४-३६ |
| सन्तुष्टः | ३-१७; १२-१४, १९ |
| सन्दृश्यन्ते | ११-२७ |
| सन्नियम्य | १२-४ |
| सन्निविष्टः | १५-१५ |
| सन्न्यसनात् | ३-४ |
| सन्न्यस्य | ३-३०; ५-१३; १२-६; १८-५७ |
| सन्न्यासयोगयुक्तात्मा | ९-२८ |
| सन्न्यासस्य | १८-१ |
| सन्न्यासम् | ५-१; ६-२; १८-२ |
| सन्न्यासः | ५-२, ६; १८-७ |
| सन्न्यासिनाम् | १८-१२ |
| सन्न्यासी | ६-१ |
| सन्न्यासेन | १८-४९ |
| सम्पत् | १६-५ |
| सम्पदम् | १६-३, ४, ५ |
| सम्पद्यते | १३-३० |
| सम्पश्यन् | ३-२० |
| सम्प्रकीर्तितः | १८-४ |
| सम्प्रतिष्ठा | १५-३ |
| सम्प्रवृत्तानि | १४-२२ |
| सम्प्रेक्ष्य | ६-१३ |
| सम्प्लुतोदके | २-४६ |
| सम्बन्धिनः | १-३४ |
| सम्भवन्ति | १४-४ |
| सम्भवः | १४-३ |
| सम्भवामि | ४-६, ८ |
| सम्भावितस्य | २-३४ |
| सम्मोहम् | ७-२७ |
| सम्मोहः | २-६३ |
| सम्मोहात् | २-६३ |
| संयतेन्द्रियः | ४-३९ |
| संयमताम् | १०-२९ |
| संयमाग्निषु | ४-२६ |
| संयमी | २-६९ |
| संयम्य | २-६१; ३-६; ६-१४; ८-१२ |
| संयाति | २-२२; १५-८ |
| संवादम् | १८-७०, ७४, ७६ |
| संवृत्तः | ११-५१ |
| संशयस्य | ६-३९ |
| संशयम् | ४-४२; ६-३९ |
| संशयः | ८-५; १०-७; १२-८ |
| संशयात्मनः | ४-४० |
| संशयात्मा | ४-४० |
| संशितव्रताः | ४-२८ |
| संशुद्धकिल्बिषः | ६-४५ |
| संश्रिताः | १६-१८ |
| संसारेषु | १६-१९ |
| संसिद्धिम् | ३-२०; ८-१५; १८-४५ |
| संसिद्धौ | ६-४३ |
| संस्तभ्य | ३-४३ |
| संस्पर्शजाः | ५-२२ |
| संस्मृत्य | १८-७६(२), ७७(२) |
| संहरते | २-५८ |
| सः | १-१३, १९, २७; २-१५, २१, ७०, ७१; ३-६, ७, १२, १६, २१, ४२; ४-२, ३, ९, १४, १८(२), २०; ५-३, ५, १०, २१, २३(२), २४, २८; ६-१, २३, ३०, ३१, ३२, ४४, ४७; ७-१७, १८, १९, २२; ८-५, १०, १३, १९, २०, २२; ९-३०(२); १०-३, ७; ११-१४, ५५; १२-१४, १५, १६, १७; १३-३, २३, २७, २९; १४-१९, २५, २६; १५-१, १९; १६-२३; १७-३(२), ११; १८-८, ९, ११, १६, १७, ७१ |
| सा | २-६९; ६-१९; ११-१२; १७-२; १८-३०, ३१, ३३, ३४, ३५ |
| साक्षात् | १८-७५ |
| साक्षी | ९-१८ |
| सागरः | १०-२४ |
| सात्यकिः | १-१७ |
| सात्त्विकप्रियाः | १७-८ |
| सात्त्विकम् | १४-१६; १७-१७, २०; १८-२०, २३, ३७ |
| सात्त्विकः | १७-११; १८-९, २६ |
| सात्त्विकाः | ७-१२; १७-४ |
| सात्त्विकी | १७-२; १८-३०, ३३ |
| साधर्म्यम् | १४-२ |
| साधिभूताधिदैवम् | ७-३० |
| साधियज्ञम् | ७-३० |
| साधुभावे | १७-२६ |
| साधुषु | ६-९ |
| साधुः | ९-३० |
| साधूनाम् | ४-८ |
| साध्याः | ११-२२ |
| साम | ९-१७ |
| सामर्थ्यम् | २-३६ |
| सामवेदः | १०-२२ |
| सामासिकस्य | १०-३३ |
| साम्नाम् | १०-३५ |
| साम्ये | ५-१९ |
| साम्येन | ६-३३ |
| साहङ्कारेण | १८-२४ |
| साङ्ख्ययोगौ | ५-४ |
| साङ्ख्यम् | ५-५ |
| साङ्ख्यानाम् | ३-३ |
| साङ्ख्ये | २-३९; १८-१३ |
| साङ्ख्येन | १३-२४ |
| साङ्ख्यैः | ५-५ |
| सिद्धये | ७-३; १८-१३ |
| सिद्धसङ्घाः | ११-३६ |
| सिद्धः | १६-१४ |
| सिद्धानाम् | ७-३; १०-२६ |
| सिद्धिम् | ३-४; ४-१२; १२-१०; १४-१; १६-२३; १८-४५, ४६, ५० |
| सिद्धिः | ४-१२ |
| सिद्धौ | ४-२२ |
| सिद्ध्यसिद्ध्योः | २-४८; १८-२६ |
| सिंहनादम् | १-१२ |
| सीदन्ति | १-२९ |
| सुकृतदुष्कृते | २-५० |
| सुकृतस्य | १४-१६ |
| सुकृतम् | ५-१५ |
| सुकृतिनः | ७-१६ |
| सुखदुःखे | २-३८ |
| सुखदुःखसंज्ञैः | १५-५ |
| सुखदुःखानाम् | १३-२० |
| सुखसङ्गेन | १४-६ |
| सुखस्य | १४-२७ |
| सुखम् | २-६६; ४-४०; ५-३, १३, २१(२); ६-२१, २७, २८, ३२; १०-४; |

| पदानि | अ०-श्लो० |
|---|---|
| | १३-६; १६-२३; १८-३६, ३७, ३८, ३९ |
| सुखानि | १-३२, ३३ |
| सुखिनः | १-३७; २-३२ |
| सुखी | ५-२३; १६-१४ |
| सुखे | १४-९ |
| सुखेन | ६-२८ |
| सुखेषु | २-५६ |
| सुघोषमणिपुष्पकौ | १-१६ |
| सुदुराचारः | ९-३० |
| सुदुर्दर्शम् | ११-५२ |
| सुदुर्लभः | ७-१९ |
| सुदुष्करम् | ६-३४ |
| सुनिश्चितम् | ५-१ |
| सुरगणाः | १०-२ |
| सुरसङ्घाः | ११-२१ |
| सुराणाम् | २-८ |
| सुरेन्द्रलोकम् | ९-२० |
| सुलभः | ८-१४ |
| सुविरूढमूलम् | १५-३ |
| सुसुखम् | ९-२ |
| सुहृत् | ९-१८ |
| सुहृदम् | ५-२९ |
| सुहृदः | १-२७ |
| सुहृन्मित्रार्युदासीनमध्यस्थ- -द्वेष्यबन्धुषु | ६-९ |
| सूक्ष्मत्वात् | १३-१५ |
| सूतपुत्रः | ११-२६ |
| सूत्रे | ७-७ |
| सूयते | ९-१० |
| सूर्यसहस्रस्य | ११-१२ |
| सूर्यः | १५-६ |
| सृजति | ५-१४ |
| सृजामि | ४-७ |
| सृती | ८-२७ |
| सृष्टम् | ४-१३ |
| सृष्ट्वा | ३-१० |
| सेनयोः | १-२१, २४, २७; २-१० |
| सेनानीनाम् | १०-२४ |
| सेवते | १४-२६ |
| सेवया | ४-३४ |
| सैन्यस्य | १-७ |
| सोढुम् | ५-२३; ११-४४ |
| सोमपाः | ९-२० |
| सोमः | १५-१३ |
| सौक्ष्म्यात् | १३-३२ |
| सौभद्रः | १-६, १८ |
| सौमदत्तिः | १-८ |
| सौम्यत्वम् | १७-१६ |
| सौम्यवपुः | ११-५० |
| सौम्यम् | ११-५१ |
| स्कन्दः | १०-२४ |
| स्तब्धः | १८-२८ |
| स्तब्धाः | १६-१७ |
| स्तुतिभिः | ११-२१ |
| स्तुवन्ति | ११-२१ |
| स्तेनः | ३-१२ |
| स्त्रियः | ९-३२ |
| स्त्रीषु | १-४१ |
| स्थाणुः | २-२४ |
| स्थानम् | ५-५; ८-२८; ९-१८; १८-६२ |
| स्थाने | ११-३६ |
| स्थापय | १-२१ |
| स्थापयित्वा | १-२४ |
| स्थावरजङ्गमम् | १३-२६ |
| स्थावराणाम् | १०-२५ |
| स्थास्यति | २-५३ |
| स्थितप्रज्ञस्य | २-५४ |
| स्थितप्रज्ञः | २-५५ |
| स्थित्वा | २-७२ |
| स्थितधीः | २-५४, ५६ |
| स्थितम् | ५-१९; १३-१६; १५-१० |
| स्थितः | ५-२०; ६-१०, १४, २१, २२; १०-४२; १८-७३ |
| स्थितान् | १-२६ |
| स्थिताः | ५-१९ |
| स्थितिम् | ६-३३ |
| स्थितिः | २-७२; १७-२७ |
| स्थितौ | १-१४ |
| स्थिरबुद्धिः | ५-२० |
| स्थिरमतिः | १२-१९ |
| स्थिरम् | ६-११; १२-९ |
| स्थिरः | ६-१३ |
| स्थिराम् | ६-३३ |
| स्थिराः | १७-८ |
| स्थैर्यम् | १३-७ |
| स्निग्धाः | १७-८ |
| स्पर्शनम् | १५-९ |
| स्पर्शान् | ५-२७ |
| स्पृशन् | ५-८ |
| स्पृहा | ४-१४; १४-१२ |
| स्म | २-३ |
| स्मरति | ८-१४ |
| स्मरन् | ३-६ ८-५, ६ |
| स्मृतम् | १७-२०, २१; १८-३८ |
| स्मृतः | १७-२३ |
| स्मृता | ६-१९ |
| स्मृतिभ्रंशात् | २-६३ |
| स्मृतिविभ्रमः | २-६३ |
| स्मृतिः | १०-३४; १५-१५; १८-७३ |
| स्यन्दने | १-१४ |
| स्यात् | १-३६; २-७; ३-१७; १०-३९; ११-१२; १५-२०; १८-४० |
| स्याम | १-३७ |
| स्याम् | ३-२४; १८-७० |
| स्युः | ९-३२ |
| स्रंसते | १-३० |
| स्रोतसाम् | १०-३१ |
| स्वकर्मणा | १८-४६ |
| स्वकर्मनिरतः | १८-४५ |
| स्वकम् | ११-५० |
| स्वचक्षुषा | ११-८ |
| स्वजनम् | १-२८, ३१, ३७, ४५ |
| स्वतेजसा | ११-१९ |
| स्वधर्मम् | २-३१, ३३ |
| स्वधर्मः | ३-३५; १८-४७ |
| स्वधर्मे | ३-३५ |
| स्वधा | ९-१६ |
| स्वनुष्ठितात् | ३-३५; १८-४७ |
| स्वपन् | ५-८ |
| स्वप्नम् | १८-३५ |
| स्वबान्धवान् | १-३७ |
| स्वभावजम् | १८-४२, ४३, ४४(२) |
| स्वभावजा | १७-२ |
| स्वभावजेन | १८-६० |
| स्वभावनियतम् | १८-४७ |
| स्वभावप्रभवैः | १८-४१ |
| स्वभावः | ५-१४; ८-३ |
| स्वयम् | ४-३८; १०-१३, १५; १८-७५ |
| स्वया | ७-२० |
| स्वर्गतिम् | ९-२० |
| स्वर्गद्वारम् | २-३२ |
| स्वर्गपराः | २-४३ |

| पदानि | अ०-श्लो० |
|---|---|
| स्वर्गलोकम् | ९-२१ |
| स्वर्गम् | २-३७ |
| स्वल्पम् | २-४० |
| स्वस्ति | ११-२१ |
| स्वस्थः | १४-२४ |
| स्वस्याः | ३-३३ |
| स्वम् | ६-१३ |
| स्वाध्यायज्ञानयज्ञाः | ४-२८ |
| स्वाध्यायः | १६-१ |
| स्वाध्यायाभ्यसनम् | १७-१५ |
| स्वाम् | ४-६; ९-८ |
| स्वे | १८-४५(२) |
| स्वेन | १८-६० |

**ह**

| पदानि | अ०-श्लो० |
|---|---|
| ह | २-९ |
| हतम् | २-१९ |
| हतः | २-३७; १६-१४ |
| हतान् | ११-३४ |
| हत्वा | १-३१, ३६, ३७; २-५, ६; १८-१७ |
| हनिष्ये | १६-१४ |
| हन्त | १०-१९ |
| हन्तारम् | २-१९ |
| हन्ति | २-१९, २१; १८-१७ |
| हन्तुम् | १-३५, ३७, ४५ |
| हन्यते | २-१९, २० |
| हन्यमाने | २-२० |
| हन्युः | १-४६ |
| हयैः | १-१४ |
| हरति | २-६७ |
| हरन्ति | २-६० |
| हरिः | ११-९ |
| हरेः | १८-७७ |
| हर्षशोकान्वितः | १८-२७ |
| हर्षम् | १-१२ |
| हर्षामर्षभयोद्वेगैः | १२-१५ |
| हविः | ४-२४ |
| हस्तात् | १-३० |
| हस्तिनि | ५-२८ |
| हानिः | २-६५ |
| हि | १-११, ३७, ४२; २-५, ८, १५, २७, ३१, ४१, ४९, ५१, ६०, ६१, ६५, ६७; ३-५(२), ८, १२, १९, २०, २३, ३४; ४-३, ७, १२, १७, ३८; ५-३, १९, २२; ६-२, ४, ५, २७, ३४, ३९, ४०, ४२, ४४; ७-१४, १७, १८, २२; ८-२६; ९-२४, ३०, ३२; १०-२, १४, १६, १८, १९; ११-२, २०, २१, २४, ३१; १२-५, १२; १३-२१, २८; १४-२७; १८-४, ११, ४८ |
| हितकाम्यया | १०-१ |
| हितम् | १८-६४ |
| हित्वा | २-३३ |
| हिनस्ति | १३-२८ |
| हिमालयः | १०-२५ |
| हिंसात्मकः | १८-२७ |
| हिंसाम् | १८-२५ |
| हुतम् | ४-२४; ९-१६; १७-२८ |
| हृतज्ञानाः | ७-२० |
| हृत्स्थम् | ४-४२ |
| हृदयदौर्बल्यम् | २-३ |
| हृदयानि | १-१९ |
| हृदि | ८-१२; १३-१७; १५-१५ |
| हृद्देशे | १८-६१ |
| हृद्याः | १७-८ |
| हृषितः | ११-४५ |
| हृषीकेश | ११-३६; १८-१ |
| हृषीकेशम् | १-२१; २-९ |
| हृषीकेशः | १-१५, २४; २-१० |
| हृष्टरोमा | ११-१४ |
| हृष्यति | १२-१७ |
| हृष्यामि | १८-७६, ७७ |
| हे | ११-४१(३) |
| हेतवः | १८-१५ |
| हेतुना | ९-१० |
| हेतुमद्भिः | १३-४ |
| हेतुः | १३-२०(२) |
| हेतोः | १-३५ |
| ह्रियते | ७-४४ |
| ह्रीः | १६-२ |


समाप्तिमगमदियं

श्रीमद्भगवद्गीताश्लोकान्तर्गतपदानां

वर्णानुक्रमणिका

*****

# सव्याख्यगीताशांकरभाष्योद्धृतवाक्यसूचिका

## अ


पृष्ठसंख्या.

अंशो नानाव्यपदेशात् (ब्र.सू. २.३.४३) ७८४, ७८६

अकारो वै सर्वा वाक् (ऐ.आ. २.३.६) ५१३

अकुर्वन् विहितं कर्म निन्दितं च समाचरन् (म.स्मृ. ११.४४) १५०

अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति (आप.श्रौ.८.१.१) ४५७, ९९७

अक्षरात्परतः परः (मु.उ. २.१.२) ४

अक्षैर्मा दीव्यः (ऋ.सं. १०.३४.१३) ५१७

अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारहरौ चैव षडेते आततायिनः॥ (व.स्मृ. ३.१९) २३

अग्निमीळे पुरोहितं (ऋ.सं. १.१.१) ५१६

अग्निर्वै देवानामवमो विष्णुः परमः (ऐ.ब्रा. १.१.१) ५१६

अग्नीषोमीयं पशुमालभेत (द्र.तै.सं.६.१.११) १०२

अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥ (म.स्मृ. ३.७६) १७०, ४१३

अग्रं वै छन्दसां गायत्री (ऐ.आ. १.४.१) ५१६

अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे (बृ.उ. ६.४.९,एकाग्नि.२.१२) ३५१

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति (क.उ. ४.१२) ३८४, ९४४

अजामेकां लोहितशुक्लकृष्णां (म.ना.उ. १२.५, श्वे.उ. ४.५) ६४०

अजो ह्येको जुषमाणोऽनुशेते (म.ना.उ. १२.५, श्वे.उ. ४.५) ४९२

अणोरणीयान् महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः (म.ना.उ. १२.१) ६५, ७७०

अत इनिठनौ (पा.सू.५.२.११५) ६७, ३८२

अत ऊर्ध्वममन्त्रवदाचरेद् (आरुणिकोपनिषत्. २) १५०

अतः संन्यस्य सर्वाणि कर्माण्यात्मावबोधतः (बृ.वा. संबन्धवा. २१९) ८७

अतश्च संक्षेपमिमं श‍ृणुध्वं नारायणः सर्वमिदं पुराणः। (द्र.म.भा.शां.३०१.११५) ४

अतश्चायनेऽपि दक्षिणे (ब्र.सू.४.२.२०) ४४६

अतोऽन्यदार्तम् (बृ.उ. ३.४.२) २१२, ६०९, ६२५, ६९५, ७२६, ७३३, ९५३, ९९५

अत्र वेदा अवेदा भवन्ति (द्र.बृ.उ. ४.३.२२) १३५

अत्रायं पुरुषः स्वयञ्ज्योतिर्भवति (बृ.उ. ४.३.९) ६८

अत्रैव समवलीयन्ते (द्र.बृ.उ. ३.२.११) ७०३

अथ तस्य भयं भवति (तै.उ. २.७) ५९२, ५९७,६२३, ६४०

अथ त्रयो वाव लोका मनुष्यलोकः पितृलोको देवलोकः (बृ.उ. १.५.१६) ३७

अथ पुनरव्रती वा स्नातको वाऽस्नातको वोत्सन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेत् (जा.उ.४) ९३७

अथ मर्त्योऽमृतो भवति (बृ.उ. ४.४.७, क. उ. २.३.१४,१५) ५७४

अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति (छां.उ. ५.१०.३) ४५१
अथ यदिदमस्मिन्ब्रह्मपुरे (छां.उ. ८.१.१) ४२५
अथ येऽन्यथाऽतो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति (छां.उ. ७.२५.२) ४५४
अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः (बृ.उ. १.४.१०) २०५, ४९५, ५७१, ५७६, ५९८, ६२४, ६३८, ६५०
अथातः सम्प्रत्तिर्यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोकः (बृ.उ. १.१५.१७) ६१४
अथातो धर्मजिज्ञासा (जै.सू.१.१.१) १, ३७, १११, ११२
अथातो ब्रह्मजिज्ञासा (ब्र.सू.१.१.१) १, ८२, ११२, ४२२, ६५०, ७६४, ८५२, ९९४
अदर्शनादापतितः पुनश्चादर्शनं गतः। नासौ तव न तस्य त्वं वृथा का परिदेवना॥ (म.भा.स्त्री.२.१३) ९४
अदुष्टमन्यतो ग्राह्यम् (न्यायः) ३६७
अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनीम् (भ.गी.माहात्म्यम् १) १००६
अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते (सर्ववे.सि.सा.सं.२९१) ६७१
अनन्यचित्तता ब्रह्मनिष्ठा सा कर्मठे कथम्। कर्मत्यागी ततो ब्रह्मनिष्ठामर्हति नेतरः। (.) ९३७
अनश्नन्नन्यो अभिचाकशीति (मु.उ. ३.१.१) ५९४
अनाकारामेवानुमिमीमहे (शाबरभाष्यम् द्र. १.१.५) ९२७
अनात्मविच्छोचामि तं मा भगवः शोकस्य पारं तारयतु (द्र.छां.उ. ७.१.३) १०१४
अनारम्भो मनुष्याणां प्रथमं बुद्धिलक्षणम्। आरब्धस्य समाप्तिस्तु द्वितीयं बुद्धिलक्षणम्॥ (द्र.पञ्चतन्त्रम् ३.१२७) २२८
अनावृत्तिः शब्दात् (ब्र.सू.४.४.२२) ४३३, ४३४, ४३५
अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते। तत्तु नाशि न सन्देहो नाशिद्रव्योपपादितम्॥ (वि.पु.२.१४.२४) ३८६
अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि (छां.उ. ६.३.२) ६३९, ७९४, ९४५
अन्तःप्रविष्टः शास्ता जनानां सर्वात्मा (तै.आ.३.११.२) ६३९, ६४२
अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः (म.ना.उ. १३.५) ६३, ३६८, ४४३, ४६४, ६४५, ६७७, ७६५, ८०३, ८९९
अन्तर्हितो हि देवलोको मनुष्यलोकान्नास्माल्लोकात् स्वेतव्यमिवेत्याहुः को हि तद्वेद यद्यमुष्मिन् लोकेऽस्ति वा न वा (तै.सं.६.१.१) ६६५
अन्धं तमः प्रपद्यन्ते (प्रविशन्ति) ये के चात्महनो जनाः। (द्र. ई.उ. ९) ६२३, ७२१
अन्धोऽप्यनन्धो भवति (द्र.छां.उ. ८.१०.१,३) ५०१
अन्धो मणिमविन्दत् , तमनङ्गुलिरावयत् , अग्रीवः प्रत्यमुञ्चत् , तमजिह्वा असश्चत। (तै.आ.१.११) ६७४, ६७५
अन्नाद्भूतानि जायन्ते। जातान्यन्नेन जीवन्ति। अन्नं प्रयन्त्यभिसंविशन्ति॥ (द्र.तै.उ. २.२) १७०, ३७४
अन्यत्र धर्मादन्यत्राधर्मात् (क.उ. २.१४) ४२७
अन्यदेव तद्विदितादथो अविदितादधि (के.उ. १.४) ६६५
अपदोषतैव विगुणस्य गुणः (शिशुपालवधम् ९.१२) ६२४
अपहतपाप्मा (छां.उ. ८.१.५, ८.७.१,३) ६३९
अपाणिपादो जवनो ग्रहीता (श्वे.उ. ३.९) ९०, ६७२, ६७४, ६८०, १००४

अपाम सोमममृता अभूम (तै.सं.३.२.५.४) ४३३

अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः (मु.उ. २.१.२) ४, ३५७, ३८९, ४१६, ८६८

अप्राप्य मनसा सह (तै.उ.ब्रह्म.९) ६३८, ६८३, ६९६

अभयं सर्वभूतेभ्यो दत्त्वा नैष्कर्म्यमाचरेत् (म.भा.अश्व.४६.१८) १६२

अभये भयदर्शिनः(मा.का.३.३९) ३२९

अमुष्मादादित्यात्प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः(छां.उ. ८.६.२) ४४६

अमृतं वै घृतम् (द्र.ऐ.ब्रा.७.४) १६८

अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते (बृ.उ. ५.९.१) ७९३

अयमात्मा ब्रह्म (बृ.उ. २.५.१९, मा.उ.२) १, ४७, ७७, २१०, ६२०, ६२१, ६३८, ७०२

अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया' (म.भा.१४.४६.१९, बौ.ध.सू.२.१८.१२) २३१

अरूपम् (क.उ. ३.१५) ९१६

अरूपवदेव हि (ब्र.सू. ३.२.१४ ) ४२४

अर्थेनैव विशेषो हि (न्यायकुसुमाञ्जलिः ४.४) ९१५

अर्द गतियाचनयोः (धातुपाठः) ५०४

अर्धं सव्यञ्जनान्नस्य (.) ३३०

अवाङ्मानसगम्यं तं श्रुतिर्बोधयितुं गिरा। जीवमीशं जगद्वापि समाश्रित्य प्रबोधयेत् ॥ (पञ्चदशी ८.७२) ६७१

अविज्ञातं विजानतां विज्ञातमविजानताम् (के.उ. २.३) ६३८

अविद्यायामन्तरे वर्तमानाः (क.उ. २.५) ५९७

अविनाशी वा अरेऽयमात्मा (बृ.उ. ४.५ .१४) २१६, ७८३

अव्यक्तमूलप्रभवस्तस्यैवानुग्रहोत्थितः। बुद्धिस्कन्धमयश्चैव इन्द्रियान्तरकोटरः॥

महाभूतविशाखश्च विषयैः पत्रवांस्तथा। धर्माधर्मसुपुष्पश्च सुखदुःखफलोदयः॥

आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः। एतद्ब्रह्मवनं चैव ब्रह्माचरति नित्यशः॥

एतच्छित्त्वा च भित्त्वा च ज्ञानेन परमासिना। ततश्चात्मरतिं प्राप्य तस्मान्नावर्तते पुनः॥ (म.भा. आश्व. ४७.१२–१५) ७७०, ७७२, ७७३

अव्यक्तात्पुरुषः परः (क.उ. १.३.११) ४६०

अशब्दमस्पर्शमरूपमव्ययम् (क.उ. १.३.१५) ११७, २०१, ३८४, ६३८, ६६९, ७४४, ७८६, ७९२, ९१६, ९४६, ९९५

अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः। (छा.उ. ८.१२.१) २९४, ४१९

अशुक्लकृष्णं कर्म योगिनस्त्रिविधमितरेषाम् (द्र.यो.सू.४.७) ३५४

असङ्गो न हि सज्यते (बृ.उ. ३.९.२६, ४.२.२, ४.४.२२) ४६०, ४६२

असङ्गो ह्ययं पुरुषः(बृ.उ. ४.३.१५) ४९, ४१५, ४३२, ४६०, ६३८, ६७५, ६९५, ७०१, ७१२, ७१९

असुर्या नाम ते लोकाः (ई.उ. ३) ४७५

अस्ति ब्रह्मेति चेद्वेद । सन्तमेनं ततो विदुः। (तै.उ. ब्रह्म.६.१ ) ६६४

अस्थूलमनणु (बृ.उ. ३.८.८) ३७५, ४२६, ६६२, ६९६, ९१५

अस्मान्मायी सृजते विश्वमेतत् (श्वे.उ. ४.९) ६३९

अस्मायामेधास्रजो विनिः (पा.सू.५.२.१२१) ८५७

अस्राक्षीद्भगवान् विश्वं गुणमय्यात्ममायया। तया संस्थापयत्येतद्भूयः प्रत्यभिधास्यति॥ (भाग.३.७.४) ३९६

अहमेवासमेकोऽग्रे नान्यद् यत्सदसत्परम् (भाग.२.९.३२) ६३८

अहरहः सन्ध्यामुपासीत (.) १, ५६९, ८८३, ९६९

अहश्च कृष्णमहरर्जुनं च (ऋ.सं.४.५.१०.१) ९४३

अहं ब्रह्मास्मि (बृ.उ. १.४.१०) १, ७८, १२१, १३५, ३५९, ३८५, ३८९, ६४२, ६८२, ७०३, ७१०, ७११, ७१३, ७३२

अहंवृत्तिरिदंवृत्तिरित्यन्तःकरणं द्विधा (पञ्चदशी ६.७०) ८६९

अहिंसा परमो धर्मः (म.भा.आदि.११.१२, वन.९१.६९, आनु.११०.१,२५, १०१.३७) २८

## आ

आकाशात्पतितं तोयं यथा गच्छति सागरम्। सर्वदेवनमस्कारः केशवं प्रति गच्छति॥ (वि.स.नाम.फलश्रुतिः१५) २८५

आक्रुश्य पुत्रमघवान् यदजामिलोऽपि नारायणेति म्रियमाण उपैति मुक्तिम् (भाग.६.३.२४) ४१८

आचार्यवान्पुरुषो वेद (छां.उ. ६.१४.२) ९३६

आततायिनमायान्तं हन्यादेवाविचारयन् (म.स्मृ.८.३५०) २४

आतिवाहिकास्तल्लिङ्गात् (ब्र.सू.४.३.४) ४४७, ४४८, ४४९

आत्मतः प्राणः....आविर्भावतिरोभावावात्मतोऽन्नम् (छा.उ. ७.२६.१) ७२४

आत्मत्वात् सर्वभूतानां सिद्धत्वादिह सर्वतः (भाग. ७.६.१९) ३९५

आत्मन आकाशः सम्भूतः (तै.उ. २.१) ५६, ६५, ९३, २३४, ४१६, ४६०, ४७५, ६७८, ७१७, ७२६, ९११, ९८८

आत्मनस्तु कामाय सर्वं प्रियं भवति (बृ.उ. २.४.६, ४.५.६) ३८३

आत्मनः परिणामो वा विज्ञानं वा अन्यवस्तुनः(द्र. श्लो.वा. अभाववादः ११) ६०३

आत्मनो भोगायतनं शरीरम् (तर्कसंग्रहदीपिका २.२) ५८९

आत्मरतिरात्मक्रीडः (छां.उ. ७.२५.२) २९५, ९३९

आत्मलाभान्न परं विद्यते (आ.ध.सू. १.२२.२) ३३४

आत्मा यत्ने धृतौ बुद्धौ स्वभावे परमात्मनि (कोशः) १९९

आत्मा वा अरे द्रष्टव्यो मन्तव्यो निदिध्यासितव्यः (बृ.उ. २.४.५) ४३, ६४, ७९, १११, ११८, ४५६, ६६१, ९१८

आत्मा वै पुत्रनामासि (एकाग्नि.२.१२) ३५१, ९८२, ९८७, ९८८, ९९२

आत्मानमेव लोकमिच्छन्तः प्रव्रजन्ति (द्र.बृ.उ. ४.४.२२) १४९

आत्मानं सारथिं चाश्वान् रक्षन् युध्येत यो नरः। स महारथसंज्ञः स्यात् (.) १६

आत्मार्थे पृथिवीं त्यजेद् (म.भा.आदि. १०१.३२, सभा.५९.१०, उद्योग.३७.१६, १२६.४८) ७२

आत्मेत्येवोपासीत (बृ.उ. १.४.७) ६४९, ६५०

आत्मैवेदं सर्वम् (छा.उ. ७.२५.२) ४५४, ६७८, ७०४, ७२४, ९९५

आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा (मा.का.२.६) ५४

आदित्यवर्णं तमसः परस्तात् (तै.आ.३.१३) २०१, ९१६

आधारोऽधिकरणम् (पा.सू. १.४.४५) २१०

आनन्दमयोऽभ्यासात् (ब्र.सू.१.१.१२) ३५५

आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते (तै.उ. भृगु.६.१) १५१

आनन्दो ब्रह्मेति व्यजानात् (तै.उ. भृगु.६.१) ७६६, ९२४

आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति तद्धर्माः, अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्ते(पञ्चपादिका.अध्यास.) ६०, ३९६, ६२५

आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन (तै.उ. २.९) २९५, ५९७

आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवम्। प्रीतिः प्रसादो माधुर्यमक्रोधश्च यमा दश॥ (द्र.अत्रि.सं. ४८) २६७

आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः॥ (म.भा.शां. ३३६.३५, म.स्मृ.१.१०) ३

आयुर्वित्तं गृहच्छिद्रं मन्त्रौषधसमागमाः। दानं मानावमानौ च नव गोप्या मनीषिभिः॥ (सुभाषितम्) ९४९

आलम्बनतया भाति योऽस्मत्प्रत्ययशब्दयोः। अन्तःकरणसम्भिन्नबोधः स त्वम्पदाभिधः॥

मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः। पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः॥

प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णते। विरुध्येते यतस्तस्माल्लक्षणा सम्प्रवर्तते॥ (वाक्यवृत्तिः ४४-४६) ४७१

आस उपवेशने (धातुपाठः) ८६

आ सुप्तेरा मृतेः कालं नयेद्वेदान्तचिन्तया (.) ११८

## इ

इदं सर्वं यदयमात्मा (बृ.उ. २.४.६) ३३७

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः। (क.उ. १.३.१०) १९३, ४४३

इभ्य आढ्यो धनी स्वामी (अमर. विशेष्यनिघ्नवर्गः ९) ८१६

इवे प्रतिकृतौ (पा.सू.५.३.९६) ७८२

इषीकातूलवत् सर्वकर्माणि प्रदूयन्ते (द्र. छा.उ. ५.२४.३) ७०५

इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः (के.उ. २.५), ४३५, ५९७

## ई

ईक्षतेर्नाशब्दम् (ब्र.सू. १.१.५) १८२, ३८८, ४६८, ६८९, ७३३

ईश्वरानुग्रहादेव पुंसामद्वैतवासना (अवधूतगीता १.१) ५६३, ९४१

ईश्वरो जीवकलया प्रविष्टो भगवान् (याज्ञ.उ. २.४, भाग.३.२९.३४) ४९३, ९४५

ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु (पा.सू.३.३.१२६) १९४

## उ


उक्तात्युक्ता तथा मध्या (वृत्तरत्नाकरः १.१९) ५१६

उत्पत्तिं च विनाशं च भूतानाम् आगतिं गतिम् (द्र.वि.पु. ६.५.७८) ६

उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्। वेत्ति विद्यामविद्यां च स वाच्यो भगवान् इति॥ (वि.पु. ६.५.७८) ६

उत्सङ्गान्नारदो जज्ञे (भाग. ३.१२.२३) १०९

उदकस्योदः संज्ञायाम् (पा.सू.६.३.५७) १०८

उदु त्यं जातवेदसं (ऋ.सं. १.५०.१) ५१५

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः (सुभाषितम्.) ५१७

उपनीय तु यः शिष्यम् (म.स्मृ. २.१४०) ६५४

उपासतामात्मविदः पुराणाः परं पुमांसं निहितं गुहायाम्। वयं यशोदाशिशुबाललीलाकथासुधासिन्धुषु लीलयामः॥ (कृ.कर्णा. २.५४) ५०५

उभयव्यामोहात्तत्सिद्धेः (ब्र.सू. ४.३.५) ४४९


## ऊ


ऊर्ध्वमूलोऽवाक्शाखः (क.उ. ६.१) ७७१


## ऋ


ऋतौ भार्यामुपेयात् (द्र.गौ.ध.सू. ५-१) ३२५, ७६३ ९७५


## ए


एकमेवाद्वितीयं ब्रह्म (छा.उ. ६.२.१) १, ४७, ६५, ६६, १३७, २००, २११, २७७, २७९, ३३७, ३५७, ४३४, ४५४, ४६१, ४७१, ६३८, ६४३, ६५३, ६६७, ६६९, ६९५, ७२६, ७३३, ८८१, ९२४, ९४०

एकाग्रमेकताने स्यादेकाग्रं चाप्यनाकुले (कोशः) ३२७

एकादश्यां न भुञ्जीत (स्मृतिः) ८५४

एकादाकिनिच्चासहाये (पा.सू.५.३.५२) ३०९

एको देवः सर्वभूतेषु गूढः सर्वव्यापी (श्वे.उ. ६.११, ब्रह्मोपनिषत्. ४, गोपालतापिनी.उ. ४.१८) ४६८, ५५४, ५५८, ६२५, ६४०, ६७७, ७३१

एको बहूनां यो विदधाति कामान् (क.उ. ५.१३) ४८, ३९४

एतदप्रमयम् ध्रुवम् (बृ.उ. ४.४.२०) ६८, ४२४

एतद्विजन्मसाफल्यं ब्राह्मणस्य विशेषतः। प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा (म.स्मृ.१२.९३) ९३७

एतद्ध स्म वै तत्पूर्वे विद्वांस आहुः (ऐ.आ.३.२.६) २४५

एतद्धि जन्मसामग्र्यं ब्राह्मणस्य विशेषतः। प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा (म.स्मृ.१२.९३) ८०४

एतद्वै सत्यकाम यत्परं चापरं च (प्र.उ. ५.२) ५५९

एतमेव प्रव्राजिनो लोकमिच्छन्तः (बृ.उ. ४.४.२२) ३७

एतस्मात् किमिवेन्द्रजालमपरं यद् गर्भवासस्थितं रेतश्चेतति हस्तमस्तकपदप्रोद्भूतनानाङ्कुरम् (पञ्चदशी.६.१४७) २०१

एतस्मिन् मे मनो विद्वन् खिद्यते ज्ञानसङ्कटे। तन्मे पराणुद विभो कश्मलं मानसं महत्॥ (भाग. ३७.७) ३९६

एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः। (बृ.उ. ३.८.९) ४११, ४३१, ८००

एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति (बृ.उ. ४.३.३२) १०८,११०

एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते। (छां.उ. ४.१५.५) ४३४

एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति (बृ.उ. ३.५.१) १७४

एवं गजेन्द्रमुपवर्णितनिर्विशेषं ब्रह्मादयः (भाग.८.३.३०) २०५

एष त आत्मान्तर्याम्यमृतः (बृ.उ. ३.७.३–२३) ६९७

एष नित्यो महिमा (बृ.उ. ४.४.२३) ९५७

एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः (सुबाल.उ. ७) ६३९


## ऐ


ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद् गार्हस्थ्यस्य(गौ.ध.सू. १.३.३५) १४८

ऐतदात्म्यमिदं सर्वं स आत्मा तत्त्वमसि (छा.उ. ६.८.७) ४७, ५७९, ६३८, ६८७, ९२३

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां वर्गो भगो मतः॥ (द्र.वि.पु. ६.५.७४) ६


## ओ


ओमिति ब्रह्म (तै.उ. शीक्षा. ८.१, ना.प.उ. ८.१) ८३५

ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायति (छां.उ. १.१.९) ८३६


## क


क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम्। (द्र. हरिवंशःपरिशिष्टम् १. ३१-११९७) १५६

कथमसतः सज्जायेत (छा.उ. ६.२.२) १५१

कन्यायाः कनीन च (पा.सू. ४.१.११६) ५३८

करतलभिक्षस्तरुतलवासः (मोहमुद्गरः १६) १७६

कर्ता शास्त्रार्थवत्त्वात् (ब्र.सू. २.३.३२) ३१६, ६१५, ६१६, ६९२, ८६६, ८६८

कर्तुरीप्सिततमं कर्म (पा.सू. १.४.४९) ८७५, ८७७

कर्मणा पितृलोकः (बृ.उ. १.५.१६) ९६६

कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते। तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः (म.भा.१२.२४१.७) १४९, १६६

कर्मणा यमभिप्रैति स सम्प्रदानम् (पा.सू. १-४-३२ ) २३६

कर्मण्यण् (पा.सू. ३.२.१) ११०

कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये (पा.सू. ८.१.१२ वार्तिकम्) ८१३

कलञ्जं न भक्षयेत् (द्र.म.स्मृ.५-५) ६१५

कश्चिद् ध्येयः कारणं तु ध्येयः (द्र.अथर्वशिखा उ. १,२) ५०५

काम जानामि ते मूलं सङ्कल्पात्त्वं हि जायसे। न त्वां सङ्कल्पयिष्यामि तेन मे न भविष्यसि॥ (म.भा १२.१७७.२५) ३१९

कामस्यान्तं तु क्षुत्तृड्भ्यां क्रोधस्यान्तं फलोदयात्। नरो याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः॥ (भाग.७.१५.२०) १९०, ७५१

कामः कर्ता नाहं कर्ता (म.ना.उ. ६१) ८०

कामः सङ्कल्पो (बृ.उ. १.५.३) १९३, ५६३, ८८०, १००२

कामात्मता न प्रशस्ता (म.स्मृ. २.२) १९१

कायेन वाचा मनसेन्द्रियैर्वा (द्र. भाग.११.२.३६, वि.स.नाम.उत्तर ३३) २७९

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् (ब्र.सू. ४.३.१०) ४३४

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः (शुकरहस्योपनिषत् ३.१२) ५

काश्यां तु मरणान्मुक्तिः (द्र.जाबालोपनिषत् १, अरुणाचलस्तोत्रम्) ४०९

किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः (बृ.उ. ४.४.२२) ३७

कुटुम्बं पुत्रदारांश्च वेदाङ्गानि च सर्वशः। यज्ञं यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः॥ (ना.प.उ. ३.३२) ९३७

कुतस्तु खलु (छां.उ. ६.२.२) ४८०

कुर्यान्मेरावणुधियम् (बृ.वा.१-३-३१३) ७४२

कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् (भर्तृ.शत.१.४९) १११

कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते॥ (म.भा.उद्योग. ७०.५) ३४६

कृष्णद्वैपायनं विद्धि व्यासं नारायणं प्रभुम् (वि.पु. ३.४.५) ११

कृष्णो भोगी शुकस्त्यागी नृपौ जनकराघवौ। वसिष्ठः कर्मनिरतः पञ्चैते ज्ञानिनः स्मृताः॥ (.) १००६

क्लृपू [कृपू]सामर्थ्ये (धातुपाठः) ७६४

केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि। (पाण्डवगीता.२० ) ९४६

को अद्धा वेद क इह प्रवोचत् कुत आ जाता कुत इयं विसृष्टिः (ऋ.सं.८.७.१७.८, तै.ब्रा.२.८.९) ४७२

को हि तद्वेद यद्यमुष्मिन् लोकेऽस्ति वा न वेति (तै.सं.६.१.१) ६६५

कौमार आचरेत् प्राज्ञो धर्मान् भागवतानिह। दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम्। (भाग. ७.६.१) ४८९

क्रियापथश्चैव पुरस्तात् पश्चात् संन्यासश्च (.) ८१

क्रियाभ्यावृत्तिगणने कृत्वसुच् (पा.सू.५-४-१७) ५४२

क्रीडायामुद्यमोऽर्भस्य कामश्चिक्रीडिषान्यतः। स्वतस्तृप्तस्य च कथं निवृत्तस्य सदा स्वतः॥ (भाग. ३.७.३) ३९६

क्षत्रियस्य विजित(व्य)म् (गौ.ध.सू. २.१.४१) ९७, ८२१, ९४८

क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः। (श्वे.उ. १.१०) ६३९, ६४०

क्षीयन्ते चास्य कर्माणि (मु.उ. २.२.८) ७०५

क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता (या.स्मृ. ३.३४) २१९

## ग


गायत्री चतुर्विंशत्यक्षरा (म.ना.उ. ३५) ५१५

गुणदोषौ बुधो गृह्णन् (कुवलयानन्दः ६) ६३६

गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु (कोशः.) १५७, १८३, ७४१

गुरुशास्त्रे विनाऽत्यन्तं गम्भीरं ब्रह्म वेत्ति कः। (पञ्चदशी ११.७८) ४६२

गुरुशुश्रूषया विद्या (म.भा.आनुशा. ५५.१२) १००९

गुहां प्रविष्टौ परमे परार्ध्ये (क.उ. १.३.१) ७९५

गूढविप्रियकृच्छठः (कोशः.) ८८६

गृधू अभिकाङ्क्षायाम् (धातुपाठः) ४८३

गौरनाद्यन्तवती सा (मन्त्रिकोपनिषत्. ५) ६३९, ६४१


## च


चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रं, यन्मनसा न मनुते येनाहुर्मनो मतम् (के.उ. १.२,५) ४०१

चतुर्थी (पा.सू. २.१.३६) १७६

चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते। (त्रिपाद्वि. म.ना.उ. ३) ४३७

चराचरव्यपाश्रयस्तु स्यात् (ब्र.सू. २.३.१६) ४६

चेतनाचेतनभिदा कूटस्थात्मकृता न हि। किन्तु बुद्धिकृताभासकृतैवेत्यवगम्यताम्॥ (पञ्चदशी ६.४५) ३६८, ६४२

चैतन्यविशिष्टः कायः पुरुषः (लोकायतिकाः) ९१७

चोदनालक्षणोऽर्थो धर्मः (जै.सू. १.१.२) १२, ४०, ८७५

चोदनेति क्रियायाः प्रवर्तकं वचनम् (शाबरभाष्यम् १.१.२) ८७४


## ज


जनिकर्तुः प्रकृतिः (पा.सू. १.४.३०) ३६५, ३७७, ४७८

जनिता चोपनेता च यश्च विद्यां (द्र.चाणक्यनीति.५.२२.) ८३०

जन्म दुःखं, जरा दुःखं, जाया दुःखं पुनःपुनः (इतिहासोपनिषत्.१२) ६५६

जन्मना जायते शूद्रः कर्मणा जायते द्विजः। वेदपाठेन विप्रः स्याद् ब्रह्मज्ञानेन ब्राह्मणः(द्र.स्कन्दपु.नागरखण्ड अ० २३९ श्लो० ३१) १०९, ८९४

जन्माद्यस्य यतः (ब्र.सू. १.१.२) ३६७, ६८९, ७७३

जहात्येनां भुक्तभोगामजोऽन्यः (श्वे.उ. ४.५) ३८७

जायते मरणायैव म्रियते जन्मने पुनः (द्र.यो.वा. १.१२.७.) ९

जिघांसन्तं जिघांसीयात् (व.स्मृ. ३.२०) २३

जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा। अविद्यातच्चित्तोर्योगः षडस्माकमनादयः॥ (.) ६३६, ६८८

जीव प्राणधारणे (धातुपाठः) ३५७, ३६८, ३८९

जीवापेतं वाव किल शरीरं म्रियते (छा.उ. ६.११.३) ३६८, ४६४
जीवेश्वरावाभासेन करोति (नृ.उत्तर. उ. ९) ५११
ज्योतिष्टोमेन स्वर्गकामो यजेत (आप.श्रौ.सू. १०-२-१) १०४, ९६६, ९७३, ९७६, ९८९

## ज्ञ

ज्ञाज्ञौ द्वावजावीशनीशौ (श्वे.उ. १.९, ना.प.उ. ९.८) ६३९, ६४०, ७०२, ७९५
ज्ञानदग्धैस्तथा क्लेशैर्नात्मा सम्पद्यते पुनः (म.भा ३.२००.१०) ७०६
ज्ञानमार्गे सर्वेषामधिकारः (उपनिषद्भाष्ये) १००७
ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः। यथाऽऽदर्शतलप्रख्ये पश्यत्यात्मानमात्मनि (म.भा.शान्ति.२०४.८) १६१
ज्ञानात् कैवल्यमाप्नोति (पुराणस्मृतेः) ९६५
ज्ञानादेव तु कैवल्यम् (पञ्चदशी ९.९७, सर्ववे. सि.सा.सं. १६८) ४४३
ज्ञानं महेश्वरादिच्छेत् (द्र. मत्स्यपु.६८-४१) ३९३
ज्ञानं यथा सत्यमसत्यमन्यत् (वि.पु. २.१२.४५) ३८६, ३८७, १००३
ज्ञानं संन्यासलक्षणम् (म.भा.अश्व.४३.२६) १३

## ण

णश अदर्शने (धातुपाठः) ६३, ६७

## त

तं त्वौपनिषदं पुरुषं पृच्छामि(बृ.उ. ३.९.२६) ६७
तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम्। एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः॥ (पञ्चदशी ७.१०६, १३.९३) ३८१, ४९८
ततो भगवता तस्य रक्षार्थं चक्रमुत्तमम्। आजगाम समाज्ञप्तं ज्वालामालि सुदर्शनम्॥
तेन मायासहस्रं तच्छम्बरस्याशुगामिना। बालस्य रक्षता देहमेकैकश्येन सूदितम्॥ (वि.पु. १.१९.१९) ३८६
ततो ह्यस्य बन्धविपर्ययौ (ब्र.सू. ३.२.५) ७६९
तत्तेज ऐक्षत (छा.उ. ६.२.३) ३३६
तत्तेजोऽसृजत (छां.उ. ६.२.३) ६३९
तत्त्वमसि (छा.उ. ६.८.७) १, ३८९, ४९२, ५९३, ६२१, ६२२, ६३६, ६४४, ६४७, ६८७, ६९५, ७००, ७२९, ७३३, ८३५, ८३६
तत्त्वविदः प्राणा नोत्क्रामन्ति, अत्रैव समवलीयन्ते। (द्र बृ.उ. ४.४.६, ३.२.११) ४०८, ४५०, ७०४
तत्त्वं नारायणः परः (म.ना.उ. १३.४) ३६३
तत्पुरुषः समानाधिकरणः कर्मधारयः (पा.सू. १.२.४२) ६६१
तत्र को मोहः कः शोक एकत्वमनुपश्यतः (ई.उ. ७) १०१४
तत्र तस्येव (पा.सू.५.१.११६) १०३
तत्र भवः (पा.सू. ४.३.५३) १४१

तत्सत्यं स आत्मा तत्त्वमसि (छा.उ. ६.८.७) ९, ४७१, ६९५, ७८३, ९११, ९५३, ९९५

तत्सवितुर्वरेण्यं, भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात् (म.ना.उ. ३५.२) ५१५

तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य, सच्च त्यच्चाभवत् (तै.उ. २.६.१) ८, ६५, ३३६, ३६८, ४९३, ६३९, ९४५

तथा तपश्च विद्या च संयुक्तं भेषजं महद् (अत्रि.स्मृ.२.१५, द्र.लघुहारीत. ७.१०) ३८

तदक्षरे परमे व्योमन् (म.ना.उ. १.२) ४५३

तदभाववति तत्प्रकारकानुभवोऽयथार्थानुभवः(तर्कसंग्रहः) ३८७

तदस्य सञ्जातम् (पा.सू. ५.२.३६) १०५

तदस्यास्त्यस्मिन्निति मतुप् (पा.सू. ५.२.९१) ६, ५०१, ८४५

तदिदं सर्वं यदयमात्मा (द्र बृ.उ. २.४.६, ४.५.७) ४५४

तदुदितः स हि यो यदनन्तरः(नै.च. ४.३) १५८

तदुपर्यपि बादरायणः सम्भवात् (ब्र.सू. १.३.२६) १७५

तदैक्षत, बहु स्यां प्रजायेय (छा.उ. ६.२.३) ६, ६५, ३३६, ३६३, ४६५, ५०९, ६३९, ६८०

तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारः (ब्र.सू. ४.२.१७) ४४६

तद्धेदं तर्ह्यव्याकृतम् (बृ.उ. १.४.७) ५५९

तद्यथाऽऽम्रे फलार्थे निमिते छायागन्धाद्यनूत्पद्यत एव धर्मं चर्यमाणमर्था अनूत्पद्यन्ते न धर्महानिर्भवति (आप.ध.सू. १.७.३.४) ८९७

तद्वा एतदक्षरं गार्गि ब्राह्मणा अभिवदन्ति (बृ.उ. ३.८.८) ४२६

तद्विज्ञानाय[र्थं] स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् (मु.उ. १.२.१२) २

तद्विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति (द्र. मु.उ. ३.१.३) ११६, ११७, ४०७, ४९३, ८७३

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः (तै.सं. १.३.६) ११७, ३४४, ४४२, ९४८, ९४९

तन्मन्त्रं ब्राह्मणाधीनं ब्राह्मणो मम दैवतम् (.) ९७५

तमः परे देव एकी भवति (सुबाल. उ. २) ३७१

तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन (बृ.उ. ४.४.२२) ४०, १०४, १६१, २४५, ८५२, ९९६

तमेव भान्तमनुभाति सर्वं तस्या भासा सर्वमिदं विभान्ति (क. उ. २.२.१५, मु.उ. २.२.१०, श्वे.उ. ६.१४) ८७, २८७, ४०१, ६६७, ७९६, ८०१, ९१५, ९२२

तमेव विदित्वाऽति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय (श्वे.उ. ३.८) २३९, २५४, ३०३, ३६४, ४०२, ५९७, ९६५

तमेवैकं जानथ आत्मानम् (मु.उ. २.२.५) ५४१

तयोरन्यः पिप्पलं स्वाद्वत्ति (मु.उ. १.१, श्वे.उ. ४.६) ५९४, ६३९

तरति शोकमात्मवित् (छा.उ. ७.१.३) १०१, १११, २१८, २२०, २५४, ५७१, ५७५, ७०४, ७३२, ९१२, ९५४, १००१

तवकममकावेकवचने (पा.सू. ४.३.३.) १५

तस्मात् तत् सर्वमभवत् (बृ.उ. १.४.१०) १०१२

तस्मात् न्यासमेषां तपसामतिरिक्तमाहुः (म.ना.उ. ७९) १४८, ९३७

तस्मान्न विज्ञानमृतेऽस्ति किञ्चित्कचित्कदाचिद्विज वस्तुजातम् (वि.पु.२.१२.४३) ३८६, ९१९, ९५३

तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये (छा.उ. ६.१४.१) २५२, ४५०, ५५७, ७०५

तस्य महतो भूतस्य निश्वसितमेतत् यदृग्वेदः (द्र.बृ.उ. २.४.१०) १७१

तस्यापत्यम् (पा.सू. ४.१.९२) १५

तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् (श्वे.उ ४.१०) ७८४

तस्याश्रमविकल्प इत्येके (गौ.ध.सू.१.३.१) १४८

तस्येदम् (पा.सू. ४.३.१२०) १७, १०९, १३५

तानि वा एतान्यवराणि तपाँसि न्यास एवात्यरेचयेत् (द्र.म.ना.उ. ७८) २७६, ९३७

तितिक्षुः समाहितो भूत्वा (बृ.उ. ४.४.२३) ५०

तुम् काममनसोरपि (पा.सू. ६.१.१४४ वार्तिकम्) २०

तेऽर्चिषमभिसम्भवन्ति (छां.उ. ५.१०.१) २४५, ४४६, ४४९

ते तेषु लोकेषु पराः परावतो वसन्ति। (द्र.बृ.उ. ६.२.१५) ४३३

तेन तुल्यं क्रिया चेद्वतिः (पा.सू. ५.१.११३) ९५, ७६०, ८४५, ९६५

तेन निर्वृत्तम् ( पा.सू. ४.२.६८) ३७७

तेनेदं पूर्णं पुरुषेण सर्वम् (म.ना.उ. १२.१३, श्वे.उ. ३.९) ४४४

तेने ब्रह्म हृदा य आदिकवये (भाग. १.१.१) ७९७

ते ह नाकं महिमानः सचन्ते, यत्र पूर्वे साध्याः सन्ति देवाः (पु.सू. ७) ९४८

त्यज धर्ममधर्मं च उभे सत्यानृते त्यज। उभे सत्यानृते त्यक्त्वा येन (सं.उ. २.१२ , म.भा.१२.३२९.४०, ३३१.४४) १४९, ९३७, ९५२

त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमम्। त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदम्॥ (स्मृतिः द्र. बृ.वा. २१५) ९३७

त्रयी न श्रुतिगोचरा (भाग. १.४.२५) ८०४

त्रिपादस्यामृतं (पु.सू. २, छां.उ. ३.१२.६) ५२१

त्रिविधोऽयमहङ्कारो महत्तत्त्वाद्धि (वि.पु. १.२.३६) ३६६

त्वं हि लोकगतिर्देव न त्वां केचित् प्रजानते। ऋते मायां विशालाक्षीं तव पूर्वपरिग्रहाम्॥ (वा.रा.उत्तरकाण्डम् १००. ८) ३८६, ३८७

त्वत्प्रभुजीवप्रियमिच्छसि चेन्नरहरिपूजां कुरु सततं (लक्ष्मीनृसिंह. १) ४०३

त्वदन्यः शरणं नास्ति त्वमेव शरणं मम। तस्मात् कारुण्यभावेन रक्ष रक्ष जनार्दन॥ (पूजापद्धतिः.) ३८०

त्वामिद्धि हवामहे (ऋ.सं. ६.४६.१) ५१४


## द


दानमिज्या तपो ध्यानं स्वाध्यायोपस्थनिग्रहौ। व्रतोपवासौ मौनं च स्नानं च नियमा दश॥ (द्र.अत्रि.सं. ४९) २६७

दिगम्बरा निर्दण्डकपालाः (.) १७६

दिह उपचये (धातुपाठः) ५८९

दूरमेते विपरीते विषूची अविद्या या च विद्या (क. उ. १.२.४) ५९५, ६८७, ८८२, ९३८

दूरात्सुदूरे तदिहान्तिके च (मु.उ. ३.१.७) ६७८
दृग् ब्रह्म दृश्यं माया (वेदान्तडिण्डिमः १७) ४
दृशोऽनालोचने (पा.सू. ३.२.६०) ९५
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः (क.उ. १.३.१२) २४०, ३३३, ३६४, ४०१, ६८३, ७२०, ९२२, ९५४
देशतः कालतो योऽसाववस्थातःस्वतोऽन्यतः। अविलुप्तावबोधात्मा स युज्येताजया कथम्॥ (भाग. ३.७.५) ३९६, ६३८
देहः किमन्नदातुः स्वं निषेक्तुर्मातुरेव वा (भाग.१०.१०.११) ७०२
देहादिपञ्जरं यन्त्रं तदारोहोऽभिमानिता (पञ्चदशी ६.१७३.) ९४७
देहादिभ्यो विलक्षणश्चिन्मात्रोऽहं सदाशिवः (कै.उ. १८) ८५९
देहोऽपि दैववशगः खलु कर्म यावत्स्वारम्भकं प्रति समीक्षत एव सासुः (उद्धवगीता १३.३७, भाग. ३.१८.३८) ७०४, ८५९
द्वन्द्वान्ते श्रूयमाणं (व्याकरणम् द्र.तत्त्वबोधिनी २.३.४६) १८२
द्वया ह प्राजापत्या देवाश्चासुराश्च (बृ.उ. १.३.१) ८१०
द्वाविमावथ पन्थानौ (म.भा.शां. २४०.६) ८१, ५९६
द्वा सुपर्णा सयुजा सखाया समानं वृक्षं (मु.उ. ३.१.१, श्वे.उ. ४.६) ५००, ५९४, ६२२, ६३६
द्वितीयाद्वै भयं भवति (बृ.उ. १.४.२) १२८, २७७, ३९८, ५७६, ५८३, ६३८, ८०६
द्वौ भागौ पूरयेदन्नैः तोयेनैकं प्रपूरयेत्। मारुतस्य प्रचारार्थं चतुर्थमवशेषयेत्। (द्र.संन्यास.उ. ५९ ) ३३०

## ध

धर्मपथ्यर्थन्यायादनपेते (पा.सू. ४.४.९२) ९६
धर्मान् विहाय विविधान् शरणं भजेऽहं मामेव येन विनिवर्तत एव माया (अद्वैतामृतम्. ४) १००६
धर्मेण पापमपनुदति (म.ना.उ. ७९.७) २१९
धाता धातृणां भुवनस्य गोप्ता (द्र.ऋ.सं. १०.१२८.७) ५१३
धाता यथापूर्वमकल्पयत् (म.ना.उ. २.६८) ३९०
ध्यायतीव पृथिवी .... ध्यायन्तीव पर्वताः (छां.उ. ७.६.१) ७१०
ध्यायतीव लेलायतीव (बृ.उ. ४.३.७) २८३, ३२०, ३६८, ५६०, ८७२, ९८१
ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः (नरसिंहपु. ६२.१७) ५०६

## न

न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः (कै.उ. ३, म.ना.उ. १४, अवधूतोपनिषत्. ५) १४९, ८४१, ८७१
न कर्मधारयान्मत्वर्थीयः (व्याकरणम् द्र.तत्त्वबोधिनी.२.२.१) ६६१
न कलञ्जं भक्षयेत् (द्र.म.स्मृ.५-५ ) ६१६, ९७५
न कश्चिन्नोपनयते पुमानन्यत्र भार्गवात्। शेषसम्प्रतिपत्तिस्तु बुद्धिमत्स्ववतिष्ठते। (द्र. म.भा. उद्योग. ३९.३०) ५१८
न कुड्यां नोदके सङ्गो न चैले न त्रिपुष्करे। नागारे नासने नान्ने यस्य वै मोक्षवित्तु सः॥ (म.भा.अनु. १४१.८२) ५८४

न गायत्र्याः परो मन्त्रः (द्र.औशनसस्मृतिः ३-५४) ५१५

न च तेन विना निद्रां लभते पुरुषोत्तमः (वा.रा.बालकाण्डम् १७.१७) ८०३

न चलति निजवर्णधर्मतो यः स्थिरमनसं तमवेहि विष्णुभक्तम्( द्र वि.पु. ३-७-२०) २०२

न चास्य कश्चिज्जनिता (श्वे.उ. ६.९) ९५२

न जातु कामः कामानामुपभोगेन (म.स्मृ. २.९४, भाग. ९.१९.१४) १९०, ८१४

न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चिद् (क.उ. २.१८) ७१, २१६

न जीवो नामान्योस्त्यनुभवमयान्तःकरणतो न मायातश्चेशो न हि चिदपरूपा प्रतिफलेत्॥ (हयग्रीवस्तुतिः ८६) ७६६

न तत्समश्चाभ्यधिकश्च दृश्यते (श्वे.उ. ६.८) ३८९, ७०२

न तस्य कार्यं करणं च विद्यते (श्वे.उ. ६.८) ४०४, ७३०

न तस्य प्राणा उत्क्रामन्ति (बृ.उ. ४.४.६) ४५०

न नामरूपे गुणदोष एव वा (भाग. ८.३.८) ६६७

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः। न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥ (मा.का.२.३२, अमृतबिन्दूपनिषत्. १०) २८८, ३९१, ४६२, ५९५, ६१०

न परदारान् गच्छेत् (.) १, ६१३

न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे (तै.सं.५.२.७.१) ७२१

न प्रकृतिर्न विकृतिः पुरुषः (सां.का. ३) ३६५, ३६७, ७३४

न यस्य सख्यं पुरुषोऽवैति सख्युः सखा (भाग.६.४.२४) ४०५

न वासुदेवात्परमस्ति किञ्चित् (.) ९५३

न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति (म.स्मृ. १०.१२६) ९७५

न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् (श्वे.उ. ४.२०) ९१६

न सुरां पिबेत् (द्र.का.सं. १२.१२) १, ९७५

न ह वै स शरीरस्य प्रियप्रिययोरपहतिरस्ति (छां.उ. ८.१२.१) ७८०

न हिंस्यात् सर्वा भूतानि (द्र.छा.उ. ८.१५.१) ३४, ४५६

नाग्निस्तृप्यति काष्ठानाम् (म.भा. अनु. ३८.२५. ) १२४

नात्माऽश्रुतेः (ब्र.सू.२.३.१७ ) ४६

नान्यः पन्था विद्यतेऽयनाय (श्वे.उ. ६.१५, ३.८) १०१, १४१, ९३८, ९५४

नान्यत्किञ्चन मिषत् (ऐ.उ. १.१) ३३७

नान्यत्र कर्मसंत्यागान्मोक्षं विन्दति मानवः(.) १४७

नान्योऽतोऽस्ति द्रष्टा (बृ.उ. ३.७.२३) ४, २४०, ३४४, ४०३, ४९४, ६२९, ६३८, ६४२, ६६१

नापुत्रायाशिष्याय (श्वे.उ. ६.२२) ३०

नापृष्टः कस्यचिद् ब्रूयात् (म.स्मृ. २.११०) १००९

नाभाव उपलब्धेः (ब्र.सू. २.२.२८) ९२३

नाभिनन्देत मरणं नाभिनन्देत जीवितम्। कालमेव प्रतीक्षेत निर्देशं भृतको यथा॥ (म.भा.शां. २४४.१५, ना.प.उ. ३.६१) ४८३
नाभुक्तं क्षीयते कर्म (बृहन्नारदीयपुराणम्.१,३१.६९-२,२९.१८) ७०४
नायं सुधांशुः किन्तर्हि सुधांशुः प्रेयसीमुखम् (चन्द्रालोकः ५.२५) ३११
नारायणप्रियमनङ्गमदापहारं वाराणसीपुरपतिं भज विश्वनाथम् (विश्वनाथाष्टकम् १ – ८) १०११
नाविरतो दुश्चरितात् (क.उ. २.२४) ९५२
नासदासीन्नो सदासीत् (नासदीयसूत्रम् १) ६०३
नास्त्यकृतः कृतेन (मु.उ. १.२.१२) १०१, १४१, १५०, ७५४, ८७१, ८९८, १००१
नाहं देहो नेन्द्रियाण्यन्तरङ्गो नाहङ्कारः प्राणवर्गो न बुद्धिः। दारापत्यक्षेत्रवित्तादिदूरः साक्षी नित्यः प्रत्यगात्मा शिवोऽहम्॥ (अद्वैतपञ्चरत्नम् १) १००१
निःस्वो ह्येकशतं शती दशशतं लक्षं सहस्राधिपः(सुभाषितरत्नभाण्डागारः) १९०
नित्यमभोज्यं (गौ.ध.सू.२.८.८) २९०
नित्यमसिच् प्रजामेधयोः (पा.सू. ५.४.१२२) ३९५, ८९०
नित्यो नित्यानां चेतनश्चेतनानाम् (क.उ. ५.१३) ९, ४८, ६३९
निद्रालस्ये गुडाके स्यात् (कोशः.) ५०५
निरञ्जनः परमं साम्युपैति (मु.उ. ३.१.३) ४१९
निरादयः क्रान्ताद्यर्थे पञ्चम्या (पा.सू.वार्तिकम्) १०७
निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च (ब्र.सू. ४.२.१९) ४४६
निषेधशेषो जयतादशेषः(भाग. ८.३.२४) १८३
निष्कलं निष्क्रियं शान्तम् (श्वे.उ. ६.१९) १०१, ११७, २०१, २११, ३१६, ३६८, ६३८, ६६६, ६७२, ६७४, ७३०, ८६३, ८६८, ८७२, ८७४, ९५६, ९९५
निस्तत्त्वा कार्यगम्यास्य शक्तिर्मायाग्निशक्तिवत् (पञ्चदशी २.४७) ३८८, ६४३
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः (शुकाष्टकम्. १) १७६, ७०३, १००७
नेति नेति (बृ.उ. ४.४.२२) २४१, ६६२
नेह नानास्ति किञ्चन (क. उ. २.१.११) ४६१, ६३८, ६८७, ६९५, ७१३, ९२३, ९९५
नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च। (म.भा.१२.१७५.३७) २६७, ३१७
नैव धर्मी न चाधर्मी न चैव हि शुभाशुभी। (म.भा.अश्व.१९.७) १२
न्यास इति ब्रह्म, ब्रह्म हि परः परो हि ब्रह्म (द्र.म.ना.उ. ७८) २७५, २७६, ९३७
न्यास इत्याहुर्मनीषिणो ब्रह्माणम् (म.ना.उ. ७९) ९३७
न्यास एवात्यरेचयत् (म.ना.उ. ७८) १४८, ९३७
न्यास एवोत्तमो मोक्षहेतुरिति ब्रह्मा हिरण्यगर्भो मन्यते (सायणभाष्यम् तै.आ. १०.७८) २७६

## प


पङ्गुः पर्वतश्रृङ्गमेति, बधिरो गाथां श्रृणोत्यादराद् (.) ६७४

पचो वः (पा.सू. ८.२.५२) ८२८

पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम् (म.ना.उ. १३.३) ६३९

पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना। आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम्॥ (पराशर.उप. १८-१८) २, १०

परमं साम्यमुपैति (मु.उ. ३.१.३) ७५७

पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च (श्वे.उ. ६.८) ९

परेण परधर्मा च भवत्येव समेत्य वै (म.भा. शां. ३०४.२५) ७५७

परोरजसि सावदोम् (बृ.उ. ५.१४.७) ५१५

पश्वादिभिश्चाविशेषात् (ब्र.सू.भाष्यम् १.१.१) २२७

पाघ्राध्मा (पा.सू. ७.३.७८) ८२८

पाण्डित्यं निर्विद्य (बृ.उ. ३.५.१) ४४, ४५

पादोऽस्य विश्वा भूतानि, त्रिपादस्यामृतं दिवि (त्रिपाद्विभूति म.ना.उ. ४, पु.सूक्तम् २) ९३, ४३६, ७८४

पुण्यो वै पुण्येन कर्मणा (बृ.उ. ४.४.५) ७, ५९५

पुरा प्रोक्ता मयाऽनघ। ज्ञानयोगेन सांख्यानाम् (भ. गी.३.३) ३६

पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेद (म.भा.शां. १०.६.१.११) ७९३

पुरुषान्न परं किञ्चित्सा काष्ठा (क उ. १.३.११) ४४१, ४४२, ४४३

पूरयेदशनेनार्धं तृतीयमुदकेन तु। वायोः सञ्चरणार्थं तु चतुर्थमवशेषयेत्॥ (द्र.संन्यास.उ. ५९) ३३०

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते (बृ.उ. ५. १.१) ४३१, ६४५

पूर्वजन्मकृतं पापं व्याधिरूपेण बाधते। (द्र. शातातपस्मृतिः १-५) ३८२

पूर्वपुण्यविभवव्ययलब्धाःसम्पदो विपद एव विमृष्टाः। (नै.च. ५.१७) ३५३

पृथगात्मानं प्रेरितारं च (श्वे.उ. १.६) ६३९

पृथिव्यप्सु प्रविलीयते (सुबाल. उ. २) ९३

प्रकाशादिवत्तु नैवं परः (द्र.ब्र.सू. २.३.४५) ७८४

प्रकृतिर्या मया ख्याता व्यक्ताव्यक्तस्वरूपिणी। पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि॥ (वि.पु. ६.४.३९) ३७१

प्रज्ञानं ब्रह्म (ऐ.उ. ५.३) १, ६३८

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते। एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता॥ (द्र.सायणीयवेदभाष्यभूमिका.) ९७४, ९९१

प्रधानक्षेत्रज्ञपतिर्गुणेशः (श्वे.उ. ६.१६) ६३९

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते (श्लो.वा.संबन्धाक्षेपपरिहारः ५५) १०

प्रशस्यस्य श्रः(पा.सू. ५.३.५९) १८८, ५७२

प्राजापत्यं गृहस्थानाम् (वि.पु. १-६-३७) ८४४
प्राज्ञेनात्मना सम्परिष्वज्य (बृ.उ. ४.३.२२) ३७१, ७९५
प्राणे वा वाचं यो ह्येव प्रभवः स एवाप्ययः (ऐ.आ.३.२.६) २४६
प्रादिभ्यो धातुजस्य वाच्यो वा (पा.सू.२.२.२४ वार्तिकम्) १९४
प्रारब्धं भोगतो नश्येत् (.) ९७१
प्रेक्षोपलब्धिश्चित् संवित् प्रतिपज्ज्ञप्तिचेतनाः (अमर.धीवर्गः.१) ५०७

## फ

फलमत उपपत्तेः (ब्र.सू. ३.२.३९) २०४, ४२४, ७६९

## ब

बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति (भाग. ९.१९.१७) २५६
बृहच्च वा इदमग्रे रथन्तरं (ऐ.ब्रा. १९.५) ५१४
ब्रह्मचर्यादेव प्रव्रजेत् (जा.उ. ४) १४८, १४९, ९०१
ब्रह्मचर्यं समाप्य गृही भवेत्, गृहाद्वनी भूत्वा प्रव्रजेत् (जा.उ. ४) ९३७
ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्॥ (.) ४३४
ब्रह्मन् कथं भगवतश्चिन्मात्रस्याविकारिणः। लीलया वापि युज्येरन् निर्गुणस्य गुणाः क्रियाः॥ (भाग. ३.७.२) ३९६, ६३८
ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः। कथं चरन्ति श्रुतयः साक्षात् सदसतः परे॥ (भाग. १०.८७.१) ६३८, ६६८
ब्रह्म यदोङ्कारः (प्र.उ. ५.१,२) ४२७
ब्रह्मविदाप्नोति परम् (तै.उ. २.१.१) ३८५, ६५०
ब्रह्मविद् ब्रह्मैव भवति (द्र.मु.उ. ३.२.९) २, १०१, १११, १४०,२१८, २४५, २५४, ३३९, ३८५, ४०८, ४५०, ४९४, ५५७, ५९७, ७०४, ७५७, १००१
ब्रह्म वेदस्तपस्तत्त्वं(कोशः.) १७१
ब्रह्म सत्यं जगन्मिथ्या (वेदान्तडिण्डिमः २०) १३५, ४५९, ५९५, ६०९, ६३८, ६९५, ९११
ब्रह्मा विश्वसृजो धर्मः (म.स्मृ.१२-५०) ७७५
ब्रह्मैवेदममृतं पुरस्तात् (मु.उ. २.२.११) ६३८
ब्रह्मैवेदं सर्वम् (बृ.उ. २.५.१) ६७८
ब्राह्मणमाणव (पा.सू.४.२.४२) ९८३
ब्राह्मणः प्रव्रजेत् (म.स्मृ. ६.३८) ११३
ब्राह्मणो निर्वेदमायाद् (मु.उ. १.२.१२) १०९, ११२, ४२१, ८५२, ८७०, १००४
ब्राह्मणोऽस्य मुखमासीत् (तै.आ.३.१२) १०९, २०६
ब्राह्मोऽजातौ (पा.सू. ६.४.१७१) १०९

## भ


भक्तिः पुंसि रतिः पुमान् स भगवान् यः (रामकविः.) ५८६

भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः। अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः॥ (भाग. ३.७.६) ३९६, ४९३, ६०२, ६३८, ९४५

भयमिति किमेतद् ब्राह्मणस्य (अनर्घराघवम् अङ्कः २.) ५८३

भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचित्। (भाग. २.९.३६) ४२१

भारूपः(छा.उ.३.१४.२) ९१६

भिक्षादिभ्योऽण् (पा.सू.४.२.३८) २९

भिक्षिता शतमखी सुकृतं यत्तत्परिश्रमविदः स्वविभूतौ (नै.च. ५.२१) ३५३

भिद्यते हृदयग्रन्थिः (मु.उ. २.२.८) १०१४

भीषाऽस्माद् वातः पवते, भीषोदेति सूर्यः। (तै.उ. २.८.१) ४९, १९९, ३४२, ४११, ५९२, ७२९

भूताभयप्रदानस्य कलां नार्हन्ति षोडशीम् (.) १६२

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायिने। ससर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः (पा.सू.५.२.९४ वार्तिकम्) १८९

भोक्ता भोग्यं प्रेरितारं च मत्वा (श्वे.उ. १.१२) ६३९, ६४०

भौमस्य ब्रह्मणो गुप्त्यै वसुदेवादजीजनत् (म.भा.शां. ३.४७.२९) ८


## म


मत्तः सर्वमहं सर्वं मयि सर्वं सनातने। (वि.पु. १.१९.८५.) ४०४

मनसैवानुद्रष्टव्यम् (बृ.उ. ४.४.१९) ६७, ८३, ९०, ४२५, ५५८, ५९३, ६६४, ७०९

मनीषिणोऽन्तर्हृदि सन्निवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः। वह्निं यथा दारुषु पाञ्चदश्यं मनीषया निष्कर्षन्तीह गूढम्॥ (भाग. ६.४.२७) ७०१

मयि सत्य[मय्यखण्ड]सुखाम्भोधौ बहुधा विश्ववीचयः (वि.चू. ४९७) ५७९

मयि सर्वाणि भूतानि तेषु चाहमवस्थितः। मत्तः परतरं नैव विद्यतेऽहमतः परम्॥ (स्कन्दपु.) ४३६

महतो महीयान् ( क.उ. १.२.२०) ५४४

महानव्यक्ते लीयते, अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते, तमः परे देव एकीभवति (सुबाल. उ. २) ३७१

महान्तं विभुमात्मानं मत्वा धीरो न शोचति (क.उ. २.४.४, १.२.२२) ६५

माधूकरमसंक्लृप्तं प्राक्प्रणीतमयाचितम्। तत्तत्कालोपपन्नं च भैक्ष्यं पञ्चविधं स्मृतम्॥ (संन्यास.उ. २.५) २३२

मानान्तरविरोधे तु मुख्यार्थस्य परिग्रहे। मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते॥
तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा। सोऽयमित्यादिवाक्यस्थपदयोरिव नापरा॥ (वाक्यवृत्तिः ४७-४८) ४७१

माया चाविद्या च स्वयमेव भवति (नृ.उत्तर.उ. ९) ३७५, ६१०, ६८६

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं (श्वे.उ. ४.१०) ४, ९, ३७०, ३८६, ५५८, ५५९, ६३९, ७०१, ७२३

मायायां सर्वसम्भवात् (पञ्चदशी ६.१५९) ६३९, ६८९

मारायुधभूता बाला शफराक्षी। कान्तं हरिमागाल्लक्ष्मीस्तनुमध्या (.) ५१५

मालाफणीव च निलीयति यत्प्रबोधात् (वेदान्तपरिभाषा शिखामणिः १) ४६३
मा हिंस्यात् सर्वा भूतानि(द्र.छा.उ. ८.१५.१) ८८, १०२
मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे। अग्रतः शिवरूपाय वृक्षराजाय ते नमः॥ (.) ५०८
मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः॥ (सां.का.३) ३६५, ३६६, ४६८, ६५०, ६९१, ७४४
मृङ् प्राणत्यागे (धातुपाठः) ३६८, ४०८
मृतावavसिते रम्ये समाप्तावन्त इष्यते (कोशः) ८६२
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति (बृ.उ. ४.४.१९, क.उ. २.१.१०,११) ६३८, ९२४
मेधाविने तपस्विने वा वाच्यम् (निरुक्तं द्र.२.१.३) १०१०
मेनेऽसन्तमिवात्मानं सुप्तशक्तिरसुप्तदृग् (भाग.३.५.२४) १५१
मोक्षमिच्छेज्जनार्दनात् (मत्स्यपु.६८-४१) ३९३
मोक्षाश्रमं यश्चरते यथोक्तं शुचिः सुसङ्कल्पितबुद्धियुक्तः। (म.भा.शान्ति. १९२.६) ८९८

## य

य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरम् (बृ.उ. [मा.] ३.७.३०) ५०५, ६३६, ६३९, ६४२, ९३९
य आत्मानमन्तरो यमयति (बृ.उ.[मा.]३.७.३०) २८८
य आत्माऽपहतपाप्मा (छा.उ. ८.७.१) ४७
य आत्मा सर्वान्तरः (बृ.उ. ३.४.१,२, बृ.उ. ३.५.१) ४५९
य आदित्ये तिष्ठन् यस्यादित्यःशरीरम् (बृ.उ. ३.७.९) ३९३
य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिषद्मने नमः॥ (भाग. ६.४.२६) ९२१
य उदरमन्तरं कुरुते अथ तस्य भयं भवति (तै.उ. २.७) ३०३, ३४२, ५७६, ५९२, ६२२, ६३८, १००४
यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत (प्र.उ. ५.५) ४२७
यः पृथिव्यां तिष्ठन् (बृ.उ. ३.७.३.) ४६४
यः सर्वेषु भूतेषु तिष्ठन् (बृ.उ. ३.७.१५.) ५०५
यः साक्षादपरोक्षाद् (बृ.उ. ३.४.१) ३५९, ४७१
यः स्यादेकासने लीनस्तूष्णीं किञ्चिदचिन्तयन् (म.भा.अश्व.१९.१) १३
यज्ञो वै विष्णुः (तै.सं. १.७.४) १६६, १६७, ४१४
यतो वा इमानि भूतानि जायन्ते (तै.उ. ३.१.१) ५, ८, ६५, ९४, १५१, ३४१, ३७०, ३७५, ३७७, ३९०, ४१६, ४६६, ४६८, ४९२, ६०९, ६७७, ६८०, ७१७, ७७०, ८९९, ९११, ९५३
यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह (तै.उ. २.९.१) ८२, ८३, ३३७, ४५८, ५६१, ६३८, ६६२, ६६७, ६८३, ७९७, ९२१
यत्किञ्च प्रजाः साम [साधु] कुर्वन्ति सर्वं तदभिसमेति (छां.उ. ४.१.४,६) ९६१
यत्तदद्रेश्यमग्राह्यम् (मु.उ. १.१.६) ५६०, ६३८, ६९६, ७९८, ९२१

यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै। परिणामादिसम्भूतां तद्वस्तु नृप तच्च किम्॥ (वि.पु. २.१३.१००) ३८६

यत् प्रयन्त्यभिसंविशन्ति (तै.उ. ३.१.१) ९४, ३४१, ६८०, ७१७

यत्र ऋषय प्रथमजा ये पुराणाः (तै.सं. ४.७.१३.१) ९४८

यत्र क्वापि निषद्य यादवकुलोत्तंसस्य कंसद्विषः स्मारं स्मारमघं हरामि तदलं मन्ये किमन्येन मे॥ (कृ.कर्णा. २.१०६) १००५

यत्र त्वस्य सर्वमात्मैवाभूत्तत्र केन कं पश्येत् (बृ.उ. ४.५.१५) ३, ६३८, ६४२, ७०३, ८६२, ८८२, ९२३, ९२४

यत्र नान्यत्पश्यति नायच्छृणोति नान्यद्विजानाति स भूमा (छा.उ. ७.२४.१) ३३७, ६३८, ९९५

यत्र पूर्वे साध्याः सन्ति देवाः (पु.सू. ७) ९४८

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वात्मैवाभूत्तत्केन कं पश्येत् (बृ.उ. ४.५.१५) ६३८, ९२३

यत्साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः (बृ.उ. ३.४.१) ६९, २४१, ३६४, ६२८, ९५८, ९९५

यथा कृतायविजितायाधरेयाः संयन्त्येवमेवैनं सर्वं तदभिसमेति यत्किञ्च प्रजाः साधु कुर्वन्ति यस्तद् वेद (छा.उ. ४.१.४) ११०, २४७

यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्व एवात्मानो व्युच्चरन्ति (बृ.उ. २.१.२०) ७८४

यथा जले चन्द्रमसः कम्पादिस्तत्कृतो गुणः। दृश्यते सन्नपि द्रष्टुरात्मनोऽनात्मनो गुणः॥ (भाग. ३.७.११) ३९६, ६३८

यथा नद्यः स्यन्दमानाः समुद्रेऽस्तङ्गच्छन्ति (मु.उ. ३.२.८) ९४०

यथाऽन्नं मधुसंयुक्तं मधु चान्नेन संयुतम्। एवं तपश्च विद्या च संयुक्तं भेषजं महद् (अत्रि.स्मृ.२.१५, द्र.लघुहारीत. ७.१०) ३३

यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात्। तद्वत् सत्यमविज्ञाय जगत् पश्यति मूढधीः॥
रज्जुखण्डे परिज्ञाते सर्परूपं न तिष्ठति। अधिष्ठाने तथा ज्ञाते प्रपञ्चे शून्यतां गते॥
देहस्यापि प्रपञ्चत्वात् प्रारब्धावस्थितिः कुतः। अज्ञानिजनबोधार्थं प्रारब्धमिति चोद्यते॥ (ना.बि.उ. २६-२८) ४६४

यथार्थेन विना पुंसो मृषैवात्मविपर्ययः। प्रतीयत उपद्रष्टुः स्वशिरश्छेदनादिना॥ (भाग. ३.७.१०) ३९६

यथोक्तान्यपि कर्माणि परिहाप्य द्विजोत्तमः (म.स्मृ.१२.९२) ३११

यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति। एवं मुनेर्विजानत आत्मा भवति गौतम॥ (क उ. २.१.१५) ७५७

यदहरेव विरजेत्तदहरेव (जा.उ. ४) ८१, १११, १२३, ३०९, ३११, ३२६, ४२१, ४२२, ८४५, ८५२, १००४

यदह्नात्कुरुते पापं तदह्नात्प्रतिमुच्यते (तै.आ. १०.३४) ९६५

यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति (श्वे.उ. ६.२०) ५९७, ९६५

यदा सर्वे प्रभिद्यन्ते हृदयग्रन्थयस्त्विति (पञ्चदशी ६.२६०) ७६०

यदा सर्वे प्रमुच्यन्ते कामाः येऽस्य हृदि स्थिताः (क.उ ६.१४) ५७३

यदुह वा आत्मसम्मितमन्नं तदवति तन्न हिनस्ति, तदवति (श.ब्रा.९.२.१.२) ३३०

यदोपरामो मनसो नामरूपरूपस्य दृष्टस्मृतिसम्प्रमोषात्। (भाग. ६.४.२६) ३२३, ९२१

यद्यद्धि कुरुते कर्म(जन्तुः) तत्तत्कामस्यचेष्टितम् (म.स्मृ.२.४) ३१९

यद्वाचाऽनभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥ (के.उ. १.५) ६३८

यन्मनसा न मनुते येनाहुर्मनो मतम् (के.उ. १.६) ९०, ६३८, ९२१

यश्चासावादित्ये (तै.उ. २.८.८, तै.उ. ३.१०.४) ४२३

यस्तु सम्यक्करोत्येवं गृहस्थः परमं विधिम्। तद्वर्णबन्धमुक्तोऽसौ लोकानाप्नोत्यनुत्तमान्। (वि.पु. ३.९.१७) ८९८

यस्त्वेतां नियतश्चर्यां वानप्रस्थश्चरेन्मुनिः। स दहत्यग्निवद्दोषाञ्जयेल्लोकांश्च शाश्वतान्॥ (वि.पु.३.९.२३,म.भा.शां. १९२.२) ८९८

यस्य च भावेन (पा.सू.२.३.३७) २५०

याऽन्ते मतिः सा गतिः (अवधूतगीता २.२६) ४०८

याभिरादित्यस्तपति रश्मिभिः (म.ना.उ. ७९) ४७९

यावज्जीवमग्निहोत्रं जुहुयात् (द्र.वाराहश्रौतसूत्रम् १.८६) १, १४५, ३०४, ९६६

यावद्विकारं तु विभागो लोकवत् (ब्र.सू. २.३.७ ) ४६

येनकेनचिदाच्छन्नो येनकेनचिदाशितः (म.भा.शा. २४५.१२) ५८४

येन जातानि जीवन्ति (तै.उ. ३.१.१) ३४१

येन द्यौरुग्रा पृथिवी च दृढा (ऋ.सं.१०.१२१.५, तै.सं.४.१.८) ७९२

येन सूर्यस्तपति तेजसेद्धः (तै.ब्रा.३.१२.९) ६८१

येनाक्षरं पुरुषं वेद सत्यम् (मु.उ. १.२.१३) ४४२

ये ब्राह्मणा गामवधूतलिङ्गाश्चरन्ति तेभ्यः शिवमस्तु राज्ञाम् (भाग. ५.१३.२३) १७६

ये वर्णाश्रमधर्मस्थास्ते भक्ताः केशवं प्रति (नरसिंहपु. ५७.८) ५५३

योऽकामः (बृ.उ. ४.४.६) १३९

योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चोरेणात्मापहारिणा (म.भा.आदि. ७२.२६) ४९५, ६२१

योऽयं विज्ञानमयः प्राणेषु (बृ.उ. ४.३.७) ७१२

योऽक्षरमन्तरे सञ्चरन् यस्याक्षरं शरीरं यमक्षरं न वेद (सुबाल.उ.७) ६३९

यो अस्याध्यक्षः परमे व्योमन् (ऋ.सं.८.७.१७.७, तै.ब्रा.२.८.९) ४७०

योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु (अमर.नानार्थ.२२) २७

योगश्चित्तवृत्तिनिरोधः (यो.सू. १.२) ३३५

योगिनः प्रति च स्मर्यते स्मार्ते चैते (ब्र.सू. ४.२.११) ४४७

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च (श्वे.उ. ६.१८) २७६

यो भूतेषु तिष्ठन् (द्र.बृ.उ. ३.७.१५.) ५१६

यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम्। हित्वाऽर्चां भजते मौढ्याद् भस्मन्येव जुहोति सः॥ (भाग. ३.२९.२२) ३८४, ५६९, १००५

यो वा इह यजमानोऽमुं लोकं नक्षते तन्नक्षत्राणां नक्षत्रत्वम्। (द्र.तै.ब्रा.१.५.२.५) ५०६

यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणः (बृ.उ. ३.८.१०) ३०, ११५

यो विज्ञाने तिष्ठन् (बृ.उ. ३.७.२२.) ८९९

यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम् (छा.उ. ७.२४.१.) ६३८, ६८७, ६९५, ७३३, ७५७, ७८३, ९११, ९९५

यो वै स बहिर्धा पुरुषादाकाशः (छा.उ. ३.१२.७) ४७०

## र


रश्म्यनुसारी (ब्र.सू.४.२.१७) ४४६

राजृ दीप्तौ (धातुपाठः) ४५५

रामो न गच्छति न तिष्ठति नानुशोचत्याकाङ्क्षते (अध्यात्मरामायणम्. बाल. १.४३) २०७, २१६, २७८

रूपं रूपं प्रतिरूपो बभूव (बृ.उ. २.५.१९) ४६


## ल


लः कर्मणि च भावे चाकर्मकेभ्यः (पा.सू. ३.४.६९) ७२

लट् स्मे (पा.सू.३.२.११८ ) ३००


## व


वंशो द्वेधा विद्यया जन्मना (द्र.सिद्धान्तकौमुदी. पा.सू. २.१.१९) ३५१

वन्ध्याकुमारवचने भीतिश्चेदस्ति किञ्चन। शशश्रृङ्गेण नागेन्द्रो मृतश्चेज्जगदस्ति तत्। (ते.बिं.उ. ६.७३,७४) ४६२

वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण (गौ.ध.सू. ११.२९) ८९७, ९६६

वसन्ते वसन्ते ज्योतिषा यजेत (द्र.आप.श्रौ.सू.१०.१.२.१९) ८०, ५१७, ५७०, ८५४, ९६९, ९७३

वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं (छां.उ. ६.१.४) ९३, ४५९, ६०९, ९११, ९५३

वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्। शरीरजैः कर्मदोषैर्याति स्थावरतां नरम्। (म.स्मृ.१२.९) ९७५

वाचि हि प्राणं जुहुमः (ऐ.आ.३.२.६) २४५

विज्ञातारमरे केन विजानीयात् (बृ.उ. २.४.१४) ४०१, ६८२, ९२१

विज्ञानमानन्दं ब्रह्म (बृ.उ. ३.९.२८) २४१

विज्ञानं यज्ञं तनुते (तै.उ. ३.५.१) ४१०

विदित्वा व्युत्थायाथ भिक्षाचर्यं चरन्ति (द्र.बृ.उ. ३.५.१, ४.४.२) ८४६, ८५२, ९३७

विद्ययाऽमृतमश्नुते (ई.उ. ११) ९३८

विद्वान् यजेत(.) ८०

विपदः सन्तु नः शश्वत् यासु सङ्कीर्त्यते हरिः। (भाग. १.८.२५) ३८२

विशेषणं विशेष्येण बहुलम् (पा.सू. २.१.५७) १४२, ५६६, ९१३

विष्ण्वर्पिताखिलाचारः स हि वैष्णव उच्यते (स्कन्दपु.) २०२

वीरहा वा एष देवानां (तै.सं.१.५.२.५) ३०४

वृद्धाच्छः (पा.सू. ४.२.११४) ३९६

वृषापेहि परक्षेत्रात् (कुवलयानन्दः.१५४) २२२

वेदानिमं च लोकममुं च परित्यज्य (आप.ध.सू.२.२३.१३) ९३७

वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद् यतयः शुद्धसत्त्वाः (कै.उ. ४, म.ना.उ. १२, मुं.उ. ३.२.६) १५९, ८४१

वेदाक्षराणि यावन्ति पठितानि द्विजोत्तमैः। तावन्ति हरिनामानि कीर्तितानि न संशयः॥ (द्र.गरुडपु. ३.२.५५) ७९८

वेधा द्वेधा भ्रमं चक्रे कान्तासु (द्र.कुवलयानन्दः २०) ३२४

## श

शकन्ध्वादिषु पररूपं वक्तव्यम् (पा.सू.वार्तिकम्) ११०

शङ्करः शङ्करः साक्षाद् व्यासो नारायणो हरिः (.) २, ५१८

शतं चैका च हृदयस्य नाड्यः, तासामूर्धानमभिनिःसृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति॥ (छां.उ. ८.६.६, क.उ. २.३.१६) ४४६

शस्तं चाथ त्रिषु द्रव्ये पापपुण्यसुखानि च (अमर. ४.२६) २५१

शान्तो दान्त उपरतस्तितिक्षुः समाहितः श्रद्धावित्तो भूत्वाऽऽत्मन्येवात्मानं पश्येद् (द्र.बृ.उ. ४.४.२३) २, ८२, १०९, ८५२, ९९४

शास्त्रयोनित्वात् (ब्र.सू.१.१.३ ) ६७, ५९३

शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः (स्कन्दोपनिषत्. ८) २

श्रृङ्गारमुख्यमधुरादिसुवर्णरेतोनिर्यासरागगरलद्रवपारदेषु। आस्वादनध्वनिसुधाम्बुरसाख्यधातुष्विष्टो रसोऽथ धरणी रसना (कोशः) १२६

शेषाद्विभाषा (पा.सू. ५.४.१५४) ८

श्येनेनाभिचरन् यजेत (षड्विंशब्राह्मणम्.३.८) ६१७

श्रवणायापि बहुभिर्यो न लभ्यः श्रृण्वन्तोऽपि बहवो यं न विद्युः (क.उ. १.२७) ९६

श्रेयश्च प्रेयश्च मनुष्यमेतः (क.उ. २.२) ५९६

## स

स आत्मा तत्त्वमसि (छा.उ. ६.८.७) २७६, ४७२

स इत्थं चोदितः क्षत्त्रा तद्विजिज्ञासुना मुनिः। प्रत्याह भगवच्चित्तः स्मयन्निव गतस्मयः॥ (भाग. ३.७.८) ३९६

स इदं सर्वं भवति (बृ.उ. १.४.१०) ५९७

स एको मानुष आनन्दः (तै.उ. २.८.१) ७९१

स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति, स वायुलोकं, स वरुणलोकं, स इन्द्रलोकं, स प्रजापतिलोकं, स ब्रह्मलोकम्। (कौ.ब्रा. १.३) ४४६

स एतान् ब्रह्म गमयति (छां.उ. ४.१५.५) ४३३

संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया। प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिताः (ना.प.उ. ३.१५) १४९

सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः (म.स्मृ. २.३) ३१९

सच्च त्यच्चाभवदिति (तै.उ. २.६) ३३६

सच्चिदानन्दं ब्रह्म (मण्डलब्राह्मणोपनिषत्. २.१) १०, २०१, ६२५, ६३८, ६३९, ६४७, ६६७, ६८२, ७१७, ९१२, ९२४

स तपोऽतप्यत (बृ.उ. १.२.६, तै.उ. ३.१.१, २.१, प्र.उ. १.४) ६३९

सति सम्पत्स्य[द्य] न विदुः, सति सम्पत्स्या[द्या]महे। (छां.उ. ६.९.२) ३७१, ७९५

सत्यं ज्ञानमनन्तं ब्रह्म (तै.उ. २.१) २४१, २८७, ७८५, ९१५, ९२०, ९३९, ९४५, ९९४, १००३

सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् (म.स्मृ. ४.१.३८) ८०७

सत्यं भूतहितं प्रोक्तम् (योगयाज्ञवल्क्यः १-५३, द्र.म.भा.वन. १७७-१४ पाठान्तरम् ) ८०८

स त्वासक्तमतिः कृष्णे दश्यमानो महोरगैः। न विवेदात्मनो गात्रं तत्स्मृत्याह्लादसंस्थितः॥ (वि.पु. १.१७.३९) ३८४

सत्सङ्गत्वे निःसङ्गत्वं निःसङ्गत्वे निर्मोहत्वम्। निर्मोहत्वे निश्चलतत्त्वं निश्चलतत्त्वे जीवन्मुक्तिः (मोहमुद्गरः ९) ६५८

स दाधार पृथिवीम् (ऋ.सं.८.७.३.१) ७९३

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्(गोपथब्राह्मणम् १.१.२६) ६३

सदेव सत्यम् (द्र.छा.उ. ६-१-४ ) ९१०

सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयं ब्रह्म (छा.उ. ६.२.१) ६५, ४५२, ६३८, ८३५, ९२४

सदेवेदमग्र आसीत्(छा.उ. ६.२.१) १५१

सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा (वि.पु.२.१२.४५) ३८६

सन्ध्या येन न विज्ञाता, सन्ध्या येनानुपासिता।(बृहद्योगियाज्ञवल्क्यस्मृतिः ६.२) १५२

सन्ध्यावन्दन भद्रमस्तु भवते भो स्नान तुभ्यं नमो भो देवाः पितरश्च तर्पणविधौ नाहं क्षमः क्षम्यताम्। (कृ.कर्णा.२.१०६) १००५

सन्मूलाः सोम्येमाः (छा.उ. ६.८.४) १५१

स पर्यगात् शुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् (ई.उ. ८) ९, ४४३

सप्तम्यधिकरणे च (पा.सू. २.३.३६) २१०

सप्तम्या बहुलमम्भावः (द्र.पा.सू. २.४.८४) २३५, ४९५

समवप्रविभ्यः स्थः (पा.सू. १.३.२२) ७६०

समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः (मु.उ. ३.१.२, श्वे.उ. ४.७) ६३९

समासमाभ्यां विषमसमे पूजातः (गौ.ध.सू.२.८.२०) २९०, २९१, २९३

समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि (शिशुपालवधम् २.५९) १०६

सम्पद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले (भाग. १.९.४४) ४४५

स यथाकामो भवति तत्क्रतुर्भवति, यत्क्रतुर्भवति तत्कर्म कुरुत (बृ.उ. ४.४.५) ३१९, ६९३

स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ते (छां.उ. ८.२.१) ६५३

स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छति। (छां.उ. ८.६.५) ४४६, ४४८

स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत ... एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः (प्र.उ. ५.१,२) ४२७

स राशिरासीन्महसां महोज्ज्वल (नै.च. १.१) ५२९

सर्पान् कुशाग्राणि तथोदपानं ज्ञात्वा मनुष्याः परिवर्जयन्ति। अज्ञानतस्तत्र पतन्ति केचिज्ज्ञाने फलं पश्य यथा विशिष्टम् (म.भा.१२.२०१.१७) ५९८

सर्वं खल्विदं ब्रह्म (छा.उ. ३.१४.१) १८३, २११, २३५, ३३७, ४६२, ४७८, ५७९, ७९७, ९१९, ९९४

सर्वं विष्णुमयं जगत् (गरुडपु.२.३०.४२) ९९४

सर्व एते पुण्यलोका भवन्ति (छां.उ. २.२३.१) ८९८, ९६६

सर्वकर्माणि संन्यस्य (म.भा.शान्ति. १५९.३०) १००४

सर्वगत्वादनन्तस्य स एवाहमवस्थितः। मत्तः सर्वमहं सर्वं मयि सर्वं सनातने॥ (वि.पु. १.१९.८५.) २०२

सर्वपापप्रसक्तोऽपि ध्यायन् निमिषमच्युतम्। (द्र.अत्रि. ४.१०) १०२

सर्वमात्मैवाभूद्विजानतः (ई.उ. ७) ९२३

सर्वव्यापी सर्वभूतान्तरात्मा (श्वे.उ. ६.११) ४७

सर्वादीनि सर्वनामानि(पा.सू. १.१.२७) ६०

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् (ब्र.सू. ३.४.२६) ६१४

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि (म.ना.उ. १.८) २०१

सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति। यदिच्छन्तो....ब्रवीम्योमित्येतत् (क.उ. २.१५) ६७, ४२६, ४२७, ७९७

सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः। संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम्॥ (वा.रा. अयोध्या. ९८.१६, म. भा. शा. २७.३१.) ७८१

स वक्ता विष्णुरित्युक्तो न स विश्वाधिदैवतम् (.) १०१२

स वा अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः (बृ.उ. ४.३.८) ९

स वा एष पुरुषोऽन्नरसमयः (तै.उ. २.१.१) ८०१

सशिखं वपनं कृत्वा बहिःसूत्रं त्यजेद्बुधः। यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत्॥ (ब्रह्म.उ. ३, ना.पा. ३७७) ९३७

स [यः] सर्वज्ञः सर्वविद् (मु.उ. १.१.९) १०, १८३

स सामभिरुन्नीयते ब्रह्मलोकम्। (प्र.उ. ५.५) ४२७

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् (किरातार्जुनीयम् २.३० ) ८८६

सहस्रशीर्षा पुरुषः (पु.सू. १) ४४४

स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने (म.भा.अश्व.१६.१२) १२

सा पृथिव्यभवत् (बृ.उ. १.२.२) ५

साभासबुद्धेः कर्तृत्वमवच्छिन्नेऽविकारिणि। साक्षिण्यारोप्यते भ्रान्त्या जीवत्वं च तथाऽबुधैः॥ (अध्यात्मरामायणम्. बाल. ४७) ६९९

सायञ्चिरम् (पा.सू. ४.३.२३) ८९

सारथ्यमर्जुनस्याजौ कुर्वन् गीतामृतं ददौ। लोकत्रयोपकाराय तस्मै कृष्णात्मने नमः॥ (द्र.म.भा.१२.४७.३५) ९५१

साक्षी चेता केवलो निर्गुणश्च (श्वे.उ. ६.११, ब्रह्म. उ. ४, गोपालतापिनी.उ. ४.१८ ) ९०, १०१, २४०, ३४४, ४९४, ६०१, ६३३, ६३६, ६३८, ६६६, ७३०, ७८१, ८६८, ८७२, ९१५, १००२

सिद्धं तु निवर्तकत्वाद् (द्रविडाचार्यवाक्यम् आगमविदां सूत्रमिति माण्डूक्योपनिषद्भाष्ये वैतथ्यप्र.३२ उद्धृतम्) ६९

सुकृतं दुष्कृतं चैव गच्छन्तमनुगच्छति (सुभाषितम्.) ८७३

सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यां (शाट्यायनि.) ८७३

सेयं भगवतो माया यन्नयेन विरुध्यते। ईश्वरस्य विमुक्तस्य कार्पण्यमुत बन्धनम्॥ (भाग. ३.७.९) २४१, ३९६, ६३८, ७४२

सोऽकामयत जाया मे स्याद् (बृ.उ. १.४.१७) ३७, ३८

सोऽकामयत (तै.उ. २.६.१) ६३९, ६४३, ६५३

सोऽन्वेष्टव्यःस विजिज्ञासितव्यः (छां.उ. ८.७.१,३) ७७८

सोऽरोदीत् (तै.सं.१.५.१) ९३८

स्त्रीभ्यो ढक् (पा.सू. ४.१.१२०) १७

स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा (भाग. १.४.२५) ८९५, ९७५

स्थाणुरयं भारवाहः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्। (निरुक्तम्.१.१८) ४२६, ७७२

स्मृते सकलकल्याणभाजनं यत्र जायते (ब्रह्मपु.१९१.१७) १

स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चितामेति ततः परं हि माम्। अव्याकृतं भागवतोऽथ वैष्णवः पदं यथाऽहं विबुधाः कलात्यये॥ (भाग.४-२४-२९) ४१७

स्वभावो दुरतिक्रमः (वा.रा.युद्धकाण्डम्. २७.११) ५८०

स्वयञ्ज्योतिः (बृ.उ. ४.३.९) ९१६

स्वयं तीर्णः परांस्तारयेत् (वि.चू. ३७) ७५९

स्वर्गकामो यजेत (ताण्ड्यमहाब्राह्मणम्.१६.१५.५) २६१, ६१५, ६१६

स्वाध्यायोऽध्येतव्यः (तै.आ. २.१५) ८३२

स्वाप्ययसम्पत्त्योः(ब्र.सू. ४.४.१६) ३, ६५३

स्वे महिम्नि व्यवस्थितः (भाग. ३.२७.२४) ४७०

स्वे महिम्नि प्रतिष्ठितः (छां.उ. ७.२४.१) ७६५

## ह

हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् (क.उ. २.१९) ७१, ७२

हलदन्तात्सप्तम्याःसंज्ञायाम् (पा.सू. ६.३.९) ६७०

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् (तै.सं.४.१.८) ३९०, ७३८, ९४८

हिरण्यवर्णम् (सूर्य.उ.१, द्र.छा.उ. १-६-६) २०१

हुयामाश्रुभसिभ्यस्त्रन् (उ.सू. ६१७) ५०

हृत्पुण्डरीके विमले प्रविष्टः शास्ता जनानाम् (श्रुतिः.) ९४४

हृष्टो दृप्यति, दृप्तो धर्ममतिक्रामति (आ.ध.सू.१.१३.४) ९३२

ह्रस्वस्य पिति कृति (पा.सू. ६.१.७०) ३७०

*****

# साङ्केतिकाक्षरविवरणम्

| | |
|---|---|
| अत्रि. | अत्रिस्मृतिः |
| अत्रि.सं. | अत्रिसंहिता |
| अमर. | अमरकोशः |
| आप.ध.सू. | आपस्तम्बधर्मसूत्रम् |
| आप.श्रौ. | आपस्तम्बश्रौतसूत्रम् |
| ई.उ. | ईशावास्योपनिषत् |
| उप.साहस्री | उपदेशसाहस्री |
| उ.सू. | उणादिसूत्रम् |
| ऋ.सं. | ऋग्वेदसंहिता |
| एकाग्नि. | एकाग्निकाण्डम् |
| ऐ.आ. | ऐतरेयारण्यकम् |
| ऐ.उ. | ऐतरेयोपनिषत् |
| ऐ.ब्रा. | ऐतरेयब्राह्मणम् |
| क.उ. | कठोपनिषत् |
| का.सं. | काठकसंहिता |
| कृ.कर्णा. | कृष्णकर्णामृतम् |
| के.उ. | केनोपनिषत् |
| कै.उ. | कैवल्योपनिषत् |
| कौ.ब्रा. | कौषीतकिब्राह्मणोपनिषत् |
| गरुडपु. | गरुडपुराणम् |
| गोपालतापिनी.उ. | गोपालतापिन्युपनिषत् |
| गौ.ध.सू. | गौतमधर्मसूत्रम् |
| छां.उ. | छान्दोग्योपनिषत् |
| जा.उ. | जाबालोपनिषत् |
| जै.सू. | जैमिनिसूत्रम् |
| ते.बिं.उ. | तेजोबिन्दूपनिषत् |
| तै.आ. | तैत्तिरीयारण्यकम् |
| तै.उ. | तैत्तिरीयोपनिषत् |
| तै.ब्रा. | तैत्तिरीयब्राह्मणम् |
| तै.सं. | तैत्तिरीयसंहिता |
| त्रिपाद्वि.म.ना.उ. | त्रिपाद्विभूतिमहानारायणोपनिषत् |
| द्र. | द्रष्टव्यम् |
| नरसिंहपु. | नरसिंहपुराणम् |
| ना.प.उ. | नारदपरिव्राजकोपनिषत् |
| ना.बि.उ. | नादबिन्दूपनिषत् |
| नृ.उत्तर.उ. | नृसिंहोत्तरतापिनीउपनिषत् |
| नै.च. | नैषधचरितम् |
| पा. | पाठान्तरम् |
| पा.सू. | पाणिनिसूत्रम् |
| पु.सू. | पुरुषसूक्तम् |
| पू.मी. | पूर्वमीमांसा |
| प्र.उ. | प्रश्नोपनिषत् |
| बृ.उ. | बृहदारण्यकोपनिषत् |
| बृ.उ. [मा.] | बृहदारण्यकोपनिषत् [माध्यन्दिनशाखा] |
| बृ.वा. | बृहदारण्यकोपनिषद्भाष्यवार्तिकम् |
| बृ.वा. संबन्धवा. | बृहदारण्यकोपनिषद्भाष्यवार्तिके संबन्धवार्तिकम् |
| बौ.ध.सू. | बौधायनधर्मसूत्रम् |
| ब्र.पु. | ब्रह्मपुराणम् |
| ब्र.सू. | ब्रह्मसूत्रम् |
| भ.गी. | श्रीमद्भगवद्गीता |
| भर्तृ.शत. | भर्तृहरिशतकत्रयम् |
| भाग. | श्रीमद्भागवतम् |
| मत्स्यपु. | मत्स्यपुराणम् |
| म.ना.उ. | महानारायणोपनिषत् |
| म.भा. | महाभारतम् |
| म.स्मृ. | मनुस्मृतिः |
| मा.उ. | माण्डूक्योपनिषत् |
| मा.का. | माण्डूक्यकारिका |
| मु.उ. | मुण्डकोपनिषत् |
| याज्ञ.उ. | याज्ञवल्क्योपनिषत् |
| यो.वा. | योगवासिष्ठम् |
| यो.सू. | योगसूत्रम् |
| रा.पा. | रामकविपाठः |
| लक्ष्मीनृसिंह. | लक्ष्मीनृसिंहकरावलम्ब स्तोत्रम् |
| व.स्मृ. | वसिष्ठस्मृतिः |
| वा.रा. | वाल्मीकीयरामायणम् |
| वि.चू. | विवेकचूडामणिः |
| वि.पु. | विष्णुपुराणम् |
| वि.स.नाम. | विष्णुसहस्रनामस्तोत्रम् |
| श.ब्रा. | शतपथब्राह्मणम् |
| श्वे.उ. | श्वेताश्वतरोपनिषत् |
| श्लो.वा. | श्लोकवार्तिकम् |
| सर्ववे.सि.सा.सं. | सर्ववेदान्तसिद्धान्तसारसंग्रहः |
| संन्यास.उ. | संन्यासोपनिषत् |
| सां.का. | सांख्यकारिका |
| सुबाल.उ. | सुबालोपनिषत् |
| स्कन्दपु. | स्कन्दपुराणम् |